॥ श्रीः ॥

वाचस्पत्यम्

VĀCASPATYAM

Sri Taranatha Tarkavachaspati

राष्ट्रिय संस्कृत संस्थान
नई दिल्ली

वाचस्पत्यम्

५

वाचस्पत्यम्

(बृहत् संस्कृताभिधानम्)

कालिकातास्थ गवर्नमेन्टसंस्कृतमहाविद्यालय-दर्शन-व्याकरणाध्यापक-

श्रीतारानाथतर्कवाचस्पतिभट्टाचार्येण

सङ्कलितम्
तेनैव संस्कृतम्

चतुर्थो भागः

राष्ट्रिय संस्कृत संस्थान
५६-५७, इन्स्टीट्यूशनल एरिया, जनकपुरी
नई दिल्ली-११० ०५८

प्रकाशक :
प्रो. वी. कुटुम्ब शास्त्री
निदेशक
राष्ट्रिय संस्कृत संस्थान
५६-५७, इन्स्टीट्यूशनल एरिया, जनकपुरी
नई दिल्ली-११० ०५८

पुनर्मुद्रित संस्करण, २००२

मूल्य : रु० ८०९.०० (छः भागों का सेट)

मुद्रक
चौखम्बा संस्कृत सीरीज आफिस
के. ३७/९९, गोपाल मन्दिर लेन
गोलघर (मैदागिन) के पास
पोस्ट बॉक्स नं० १००८, वाराणसी-२२१ ००१ (भारत)
फोन : ३३३४५८ (आफिस), ३३४०३२ एवं ३३५०२० (आवास)
e-mail : cssoffice@satyam.net.in

VĀCASPATYAM

(A Comprehensive Sanskrit Dictionary)

Compiled by

Sri Taranatha Tarkavachaspati

Professor of Grammar and Philosophy
Govt. Sanskrit College, Calcutta.

Vol. IV

RASHTRIYA SANSKRIT SANSTHAN
56-57, Institutional Area, Janakpuri
New Delhi - 110 058

Publisher
Prof. V. Kutumba Shastri
Director
RASHTRIYA SANSKRIT SANSTHAN
56-57, Institutional Area, Janakpuri
New Delhi - 110 058

Reprinted, 2002

Price : Rs. 809.00 (Set of six vols.)

Printer :
CHOWKHAMBA SANSKRIT SERIES OFFICE
K. 37/99, Gopal Mandir Lane
Near Golghar (Maidagin)
Post Box No. 1008, Varanasi-221 001 (India)
Phone : Off. 333458, Resi. : 334032 & 335020
e-mail : cssoffice@satyam.net.in

गगनाङ्गना स्त्री गगनगताङ्गना। अप्सरःसु।

गगनाध्वग पु० गगनाध्वना आकाशमार्गेण गच्छति गम–ड, सूर्य्ये हेम०।

गगनाम्बु न० ६त०। दिव्योदके तड़ागादावपतिते पात्रादौ धृते मेघनिःसृतजले। "गगनाम्बु त्रिदोषघ्नं गृहीतं यत् सुभाजने। बल्यं रसायनं मेध्यं पात्रापेक्षि ततःपरम्। रक्षोघ्नं शीतलं ह्लादि जड़दाहविषापहम्" सुश्रुतः।

गगनेचर पु० गगने चरति चर–ट अलुक् स०। १देवे २ऋक्षादिग्रहे ३राशिचक्रे च। ४विहगादौ त्रि० स्त्रियां टाप्। "तस्मिंस्तु कथिते माता कारणे गगनेचरः" भा० आ० २७ अ०।

गगनोल्मुक पु० गगने उल्मुक इव। १मङ्गलग्रहे हारा०। तस्य गगनगत्वात् लोहिताङ्गत्वाच्च तथात्वम्। [जगग्घ।

गग्घ हासे भ्वा० पर० सक० सेट्। गग्घति अगग्घीत्

गग्नु स्त्री वाचि निघण्टौ "ग्ग्नु" इत्यत्र पाठान्तरम्।

गङ्गा स्त्री गम–गन्। १विष्णुपादभवे नदीभेदे २हिमवत्कन्याभेदे च। "इमं मे गङ्गे! यमुने! सरस्वति! शुतुद्रि! स्तोमं सचता परुष्ण्या। असिक्न्या मरुद्वृधे! वितस्तयार्जीकीये! शृणुह्यासुषोमया" ऋ० १०,७५,५। इमामृचमधिकृत्य दशप्रधाननदीनां निरुक्तिर्यास्केन ९,२६ दर्शितम् यथा "अथैकैकपदनिरुक्तम् गङ्गा १गमनात्। यमुना २प्रयुवती गच्छतीति वा विप्रयुतं गच्छतीति वा। सरस्वती ३सर इत्युदकनाम सर्त्तेः तद्वती। शुतुद्री ४शुद्राविणी क्षिप्रद्राविणी आशुतुन्नेव द्रवतीति वा। इरावतीं परुष्णी५त्याहुः पर्ववती भास्वती कुटिलगामिनी। असिक्नी ६अशुक्लाऽसिता सितमिति वर्णनाम तत्प्रतिषेधोऽसितम्। मरुद्वृधा ७सर्वा नद्यः, मरुत एना वर्द्धयन्ति। वितस्ता ८विदग्धा विवृद्धा महाकूला। आर्जीकीया ९विपाडित्याहुः ऋजुकप्रभवा वा ऋजुगामिनी। विपाट् विपाटनाद्वा विपाशनाद्वा विप्रापणात् वा पाशा अस्यां व्यपाश्यन्त वसिष्ठस्य मुमूर्षतस्तस्माद्विपाडुच्यते पूर्वमासीदुरुञ्जिरा। सुषोमा १०सिन्धुर्यदेनामभिप्रसुवन्ति सिन्धुः स्यन्दनात्"। "अष्टात्रिंशतं (हयान्) भरतो दौष्मन्तिर्यमुनामनु। गङ्गायां वृत्रघ्नेऽबध्नात् पञ्चपञ्चाशतं हयान्" शत० ब्रा० १३,५,४,११। "न वै गाङ्गेमन्त्रीरस्य गङ्गाया उदकं पपुः" कात्या० श्रौ० १३,३,२०। "तेन चेदविवादस्ते मा गङ्गां मा कुरून् गमः" मनुः। "गङ्गाया हिमवत्कन्यारूपत्वेऽपि नदीरूपतया पृथिव्यवतरणकथा रामा० आदि० यथा "भगीरथस्तु राजर्षिर्धार्म्मिको रघुनन्दन!। अनपत्यो महाराजः प्रजाकामः स च प्रजाः। मन्त्रिष्वाधाय तद्राज्यं गङ्गावतरणे रतः। तपो दीर्घं समातिष्ठद्गोकर्णे रघुनन्दन!। ऊर्द्ध्ववाहुः पञ्चतपा मासाहारो जितेन्द्रियः!। तस्य वर्षसहस्राणि घोरे तपसि तिष्ठतः। अतीतानि महाबाहो! तस्य राज्ञो महात्मनः। सुप्रीतो भगवान् ब्रह्मा प्रजानां प्रभुरीश्वरः। ततः सुरगणैः सार्द्धमुपागम्य पितामहः। भगीरथं महात्मानं तप्यमानमथाब्रवीत्। भगीरथ! महाराज! प्रीतस्तेऽहं जनाधिप!। तपसा च सुतप्तेन, वरं वरय सुव्रत!। तमुवाच महातेजाः सर्व्वलोकपितामहम्। भगीरथो महाबाहुः कृताञ्जलिपुटः स्थितः। यदि मे भगवान् प्रीतो यद्यस्ति तपसः फलम्। सगरस्यात्मजाः सर्वे मत्तः सलिलमाप्नुयुः। गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महात्मनाम्। स्वर्गं गच्छेयुरत्यन्तं सर्व्वे च प्रपितामहाः। देव! याचे ह सन्तत्यै नावसीदेत् कुलञ्च नः। इक्ष्वाकूणां कुले देव! एष मेऽस्तु वरः परः। उक्तवाक्यं तु राजानं सर्वलोकपितामहः। प्रत्युवाच शुभां वाणीं मधुरां मधुराक्षराम्। मनोरथो महानेष भगीरथ! महारथ!। एवम्भवतु भद्रन्ते इक्ष्वाकुकुलवर्द्धन!। इयं हैमवती ज्येष्ठा गङ्गा हिमवतः सुता। तां वै धारयितुं राजन्! हरस्तत्र नियुज्यताम्। गङ्गायाः पतनं राजन्! पृथिवी न सहिष्यते। तां वै धारयितुं राजन्नान्यं पश्यामि शूलिनः। तमेवमुक्त्वा राजानं गङ्गां चाभाष्य लोककृत्। जगाम त्रिदिवं देवैः सर्व्वैः सह मरुद्गणैः!" ४२ स०।

"देवदेवे गते तस्मिन् सोऽङ्गुष्ठाग्रनिपीड़िताम्। कृत्वा वसुमतीं राम! वत्सरं समुपासत। अथ संवत्सरे पूर्णे सर्व्वलोकनमस्कृतः। उमापतिः पशुपती राजानमिदमब्रवीत्। प्रीतस्तेऽहं नरश्रेष्ठ! करिष्यामि तव प्रियम्। शिरसा धारयिष्यामि शैलराजसुतामहम्। ततो हैमवती ज्येष्ठा सर्वलोकनमस्कृता। तदा सातिमहद्रूपं कृत्वा वेगञ्च दुःसहम्। आकाशादपतद्राम! शिवे शिवशिरस्युत। अचिन्तयच्च सा देवी गङ्गा परमदुर्द्धरा। विशाम्यहं हि पातालं स्रोतसा गृह्य शङ्करम्। तस्यावलेपनं ज्ञात्वा क्रुद्धस्तु भगवान् हरः। तिरोभावयितुं बुद्धिं चक्रे त्रिनयनस्तदा। सा तस्मिन् पतिता पुण्या पुण्ये रुद्रस्य मूर्द्धनि। हिमवत्प्रतिमे राम! जटाम-

मण्डलगह्वरे । सा कथञ्चिन्महीं गन्तुं नाशक्नोद्यत्नमास्थिता । नैव सा निर्गमं लेभे जटामण्डलमध्यतः । तत्रैवाबभ्रमद्देवी संवत्सरगणान् बहून् । तामपश्यन् पुनस्तत्र तपः परममास्थितः । स तेन तोषितश्चासीदत्यन्तं रघुनन्दन ! । विससर्ज ततो गङ्गां हरो विन्दुसरः प्रति । तस्यां विसृज्यमानायां सप्त स्रोतांसि जज्ञिरे ह्लादिनी पावनी चैव नलिनी च तथैव च । तिस्रः प्राचीं दिशं जग्मुर्गङ्गाः शिवजलाः शुभाः । सुचक्षुश्चैव सीता च सिन्धुश्चैव महानदी । तिस्रश्चैता दिशं जग्मुः प्रतीचीन्तु शुभोदकाः । सप्तमी चान्वगात्तासां भगीरथरथं तदा । भगीरथोऽपि राजर्षिर्दिव्यस्यन्दनमास्थितः । प्रायादग्रे महातेजा गङ्गा तं चाप्यनुव्रजत् ।” ४३ स० ।

“स गत्वा सागरं राजा गङ्गयानुगतस्तदा । प्रविवेश तलं भूमेर्यत्र ते भस्मसात्कृताः । भस्मन्यथाप्लुते राम ! गङ्गायाः सलिलेन वै । सर्व्वलोकप्रभुर्ब्रह्मा राजानमिदमब्रवीत् । तारिता नरशार्दूल ! दिवं याताश्च देववत् । षष्टिः पुत्त्राः सहस्राणि सगरस्य महात्मनः । सागरस्य जलं लोके यावत् स्थास्यति पार्थिव ! । सगरस्यात्मजाः सर्व्वे दिवि स्थास्यन्ति देववत् । इयञ्च दुहिता ज्येष्ठा तव गङ्गा भविष्यति । त्वत्कृतेन च नाम्नाथ लोके स्थास्यति विश्रुता । गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च । त्रीन् पथो भावयन्तीति तस्मात्त्रिपथगा स्मृता ।” ४४ स० ।

पुराणसर्वस्वे तु तस्या अवतरणप्रकारोऽन्यथा उक्तः कल्पभेदादविरोधः । यथा

महाभारते “महापुण्यां गगनतः पतन्तीं वै महेश्वरः ! दधार शिरसा गङ्गां तामेव दिवि सेवते” । ब्रह्माण्डे “महादेवस्य या शम्भोरुत्तमाङ्गोत्तमाच्छुभात् । विनिर्गता महानन्दा दक्षिणेक्षणतः शुभा” स्कान्दे- “त्रिविक्रमपदोद्भिन्नब्रह्माण्डशुषिरोद्भवा । परा विष्णुपदीगङ्गा समुद्रापूर्त्तिकारिणी ।” वैष्णवे “ततः प्रभवति ब्रह्मन् ! सर्वपापहरा सरित् । गङ्गा देवाङ्गनाङ्गानामनुलेपनपिञ्जरा । विष्णुपादविनिष्क्रान्ता प्लावयित्वेन्दुमण्डलम् । समन्ताद्ब्रह्मणः पुर्य्यां गङ्गा पतति वै दिवः । सा तत्र पतिता दिक्षु चतुर्द्धा प्रत्यपद्यत । सीता चालकनन्दा च वङ्क्षुर्भद्रा च वै क्रमात् ।” पाद्मे “क्षितौ तारयते मर्त्त्यान्नागांस्तारयतेऽप्यधः । दिवि तारयते देवांस्तेन त्रिपथगा स्मृता ।” भविष्ये “महेश्वरस्य या शम्भोर्मूर्त्तिरेषा सनातनी । त्रैलोक्यपावनार्थाय दयया धरणीकृता ।” तत्स्वभावप्रकरणं ब्रह्माण्डे “पापिष्ठानां पापहन्त्री स्वर्गमोक्षाप्तिहेतुका । स्वभाव एष गङ्गायाः शैत्यं शीतरुचो यथा” भविष्ये “पापखण्डनशीला हि सद्योगङ्गा स्वभावतः । उपपातकराशीनां सा हि हन्त्री यतः स्मृता” स्कान्दमात्स्ययोः “क्रोधलोभैकदृष्टीनां विपरीतक्रियावताम् । कामिनाञ्च तथान्यत्र तपोयज्ञादि निष्फलम् । गङ्गायान्तु कृतं सर्वं सफलं स्यान्न संशयः । परब्रह्मस्वरूपाया गङ्गायास्तु स्वभावतः” । सर्वदेवादिमयप्रकरणम् भविष्ये “शिववाक्यं “त्रैलोक्ये यानि तीर्थानि पुण्यान्यायतनानि च । पर्वतादीनि रम्याणि पुण्यक्षेत्राणि यानि च । धर्माश्च सर्वदेवाश्च सर्वयज्ञतपांसि च । अहं ब्रह्मा च विष्णुश्च सर्वशक्तिसमन्वितः । अष्टाविंशतिकोट्यस्तु देवता व्याप्य वै सदा । गङ्गायां सर्व एवैते सूक्ष्मरूपेण संस्थिताः । तिस्रः कोट्यर्द्धकोटी च तीर्थानां वायुरब्रवीत् । सर्वदा कलिकाले च गङ्गायां नात्र संशयः” भविष्ये “सर्वदेवमयी गङ्गा सर्ववेदस्वरूपिणी” भगवद्गीतायां “स्रोतसामस्मि जाह्नवीति” अथ तस्या विशिष्टताप्रकरणम् “देवानान्तु महादेवो यथा श्रेष्ठतमः स्मृतः । सर्वेषामेव तीर्थानां तथा गङ्गा विशिष्यते” महाभारते “सर्वतीर्थमयी गङ्गा सर्वधर्ममयो मनुः । सर्वशास्त्रमयी गीता सर्वदेवमयो हरिः” स्कान्दे “भूतेश्वरादिह परोऽस्ति न पूजनीयो नैवाश्वमेधसदृशः क्रतुरस्ति लोके । गङ्गासमं त्रिभुवने न हि तीर्थमस्ति नान्यद्व्रतं च शिवरात्रिसमं तथास्ति” महाभारते “न गङ्गासदृशं तीर्थं न देवः केशवात् परः । ब्राह्मणेभ्यः परं नास्तीत्येवमाह पितामहः” ब्रह्माण्डे “कलौ तु सर्वतीर्थानि स्वमहात्म्यप्रभावतः । गङ्गामभिमुखं यान्ति सा तु देवी न कुत्रचित्” नारदीये “कोटिष्वष्टासु दशसु तीर्थानां यत् फलं भवेत् । तत्समस्तमिहैकत्र गङ्गायां लभते नरः” भविष्ये “अभिभूति प्रयाणेन भक्तिग्राह्या महेश्वरी । भावानुरूपफलदा गङ्गा सर्वजगद्धिता” ब्रह्माण्डे “प्रभासे गोसहस्रेण राहुग्रस्ते दिवाकरे । यत्फलं पाण्डवश्रेष्ठ ! गङ्गायां तद्दिने दिने । महापुण्या महावेगा सद्यः शुद्धिकरी परा । महापुण्यप्रदा सद्यः स्वर्गमोक्षप्रदैव सा” दानधर्मे “स्वायम्भुवं यथा स्थानं सर्वेषामुत्तमं स्मृतम् । तीर्थानां

सरितां श्रेष्ठा तथा गङ्गा इहोच्यते” मात्स्ये “तीर्थानां परमं तीर्थं नदीनामुत्तमा नदी। मोक्षदा सर्वभूतानां मह्यं प्राह दिशामधिः” भविष्ये “ध्यानं कृते मोक्षहेतुस्त्रेतायां तच्च वै तपः। द्वापरे यज्ञमेवाहुः कलौ गङ्गैव केवलम्। चिन्तामणिगणाश्चापि गङ्गायास्तोयबिन्दवः। विशिष्टा यत् प्रयच्छन्ति भक्तेभ्यश्चिन्तितं फलम्” शैवे “नास्ति गङ्गासमं तीर्थं नास्ति वेदसमा श्रुतिः। नास्ति मृत्युसमः शास्ता नास्ति भूतिसमं तपः” कौर्ममात्स्ययोः “कृते च सर्वतीर्थानि त्रेतायां पुष्करं परम्। द्वापरे तु कुरुक्षेत्रं कलौ गङ्गैव केवलम्” दानधर्मे “ते देशास्ते जनपदास्ते शैलास्तेऽपि चाश्रमाः। येषां भागीरथी गङ्गा मध्ये याति सरिद्वरा” स्मरणप्रकरणम् हरिवंशे “दिव्या त्रिधारा दृष्टा यैः पुण्या त्रिपथगा नदी। स्मरणादेव सर्वेषामहंसां या विभेदिनी” ब्रह्माण्डे “मनसा संस्मरेद्यस्तु गङ्गां दूरस्थितो नरः। चान्द्रायणसहस्रन्तु लभते नात्र संशयः” भविष्ये “स्मरणादेव गङ्गायाः पापसंघातपिञ्जरम्। भेदं सहस्रधा याति गिरिर्वज्रहतो यथा” ब्रह्माण्डे “यत्र तत्र स्थितोऽपि मरणे समुपस्थिते। भक्त्या गङ्गां स्मरन् याति नरः शिवपुरं परम्” भविष्ये “गच्छन् तिष्ठन् स्वपन् ध्यायन् जाग्रद्भुञ्जन् श्वसन् वदन्। यः स्मरेत् सततं गङ्गां स च मुच्येत संकटात्” कीर्त्तनप्रकरणम् वैष्णवे “गङ्गा गङ्गेति यैर्नाम योजनानां शतैरपि। स्थितैरुच्चारितं हन्ति पापं जन्मत्रयार्जितम्”। “गङ्गा गङ्गेति यो ब्रूयात् योजनानां शतैरपि। मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति” यात्राप्रकरणम् ब्रह्माण्डे “येषां बुद्धिं शुभां देवाः प्रयच्छन्ति महात्मनाम्। तेऽपि गच्छन्ति नियता गङ्गामभिगतां सुरैः” तत्रैव “स्नानञ्च भक्त्या गङ्गायां कर्त्तुकामस्य गच्छतः। पदेपदेऽश्वमेधस्य फलं प्राप्नोति मानवः”। भविष्ये “वृथा कुलं वृथा विद्या वृथा यज्ञा वृथा तपः। वृथा दानानि तस्येह कलौ गङ्गां न याति यः”। वाराहब्रह्माण्डयोः “अर्घ्यादिकं गृहीत्वा तु सेन्द्रा देवाः समासते। आगच्छन्ति कदा मर्त्या गङ्गामभिगता नराः। भविष्ये “अनुषङ्गेण सङ्गेन वाणिज्येनापि सेवया। कामासक्तोऽपि च नरो गङ्गां प्राप्य दिवं व्रजेत्। दानधर्मे “गङ्गाकृता ये त्रिदिवं गतास्ते” अथ क्षेत्रप्रकरणम् “सार्द्धहस्तशतं यावत् गर्भतस्तीरमुच्यते। न मन्त्रो न विधिः कालो न मृदो न च गोमयम्”। अत्र ऋषयः पठन्ति “अत्र न प्रतिगृह्णीयात् प्राणैः कण्ठगतैरपि”। स्कान्दे “तीराद्गव्यूतिमात्रन्तु परितः क्षेत्रमुच्यते। अत्र दानं जपो होमो गङ्गायां नात्र संशयः”। दानधर्मे “भाद्रकृष्णचतुर्द्दश्यां यावदाक्रमते जलम्। तावद्गर्भं विजानीयात् तदूर्द्ध्वं तीरमुच्यते” ब्रह्माण्डे “प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम्। अत्र नारायणः स्वामी नान्यः स्वामी कदाचन”। स्पर्शादिप्रकरणम् वैष्णवे “श्रुताभिलषिता दृष्टा स्पृष्टा गीताऽवगाहिता। या पावयति भूतानि कीर्त्तिता सा दिनेदिने”

गतिप्रकरणम् भविष्ये “परदारपरद्रव्यवाञ्छा द्रोहः परस्य च। गतिमन्विष्यमाणस्य गङ्गैव परमा गतिः। प्लवनप्रकरणम्” महाभारते “गङ्गोर्म्मिभिरथो दिग्धः पुरुषः पवनो यथा। स्पृशते सोऽस्य पाप्मानं सद्य एवापकर्षति” दर्शनप्रकरणम् दानधर्मे। “जात्यन्धैरिह तुल्यास्ते मृतैः पङ्गुभिरेव वा। समर्था ये न पश्यन्ति गङ्गां पुण्यजलां शुभाम्” ब्रह्माण्डे “धामैश्वर्य्यमायुश्च प्रतिष्ठा सर्वमान्यता। शुभानामाश्रयत्वञ्च गङ्गादर्शनजं फलम्” अथ नमस्कारप्रकरणम् भविष्ये “सर्वतीर्थमयीं गङ्गां परमात्मस्वरूपिणीम्। त्रैलोक्यपावनार्थाय गाङ्गतां प्रणमेत् सदा”। स्पर्शनप्रकरणम् ब्रह्माण्डे “अभक्त्या हि महापापी गङ्गां स्पृष्ट्वा शुचिर्भवेत्। अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः” नारदीये “तथेह गङ्गां संस्पृश्य ब्रह्मरूपां सुपुण्यदाम्। शुद्धा भवन्तीह सर्वे सद्य एव न संशयः” वाराहे “ब्रह्महा गुरुहा गोघ्नः स्पृष्टो वा सर्वपातकैः। तस्यास्तोयं नरः स्पृष्ट्वा सर्वपापैः प्रमुच्यते”। अथावगाहनप्रकरणम् वनपर्व्वणि “यदकार्य्यशतं कृत्वा कृतं गङ्गावगाहनम्। सर्वं दहति गङ्गाम्भस्तूलराशिमिवानलः” स्नानप्रकरणम् वैष्णवे “स्नातस्य सलिले यस्याः सद्यः पापं प्रणश्यति। अपूर्वपुण्यप्राप्तिश्च सदा मैत्रेय! जायते” भविष्ये “शक्तस्य पण्डितस्यापि गुणिनः सत्यशालिनः। गङ्गास्नानविहीनस्य तस्य जन्म निरर्थकम्” तत्रैव “पितरो योगिनश्चैव गाथां गायन्ति सादराः। अपि नः स्वकुले कश्चित् गङ्गास्नायी भविष्यति। देवेभ्यश्च पितृभ्यश्च दास्यते सलिलाञ्जलिम्। गङ्गास्नानरतं मर्त्यं दृष्ट्वैव यमकिङ्कराः। दिशो दश पलायन्ते सिंहं दृष्ट्वा यथा मृगाः। यमो भीतस्तु तं दृष्ट्वा प्रणिपत्य प्रपूज्य च। न शक्नोति

तथा स्यादं तस्याग्ने पुण्यकर्म्मणः । मेरुमन्दरमात्रोऽपि राशिः पापस्य कर्म्मणः । गङ्गास्नानेन दग्धः स्यात्तूलराशिरिवानलैः” ब्रह्माण्डे “स्पृष्ट्वा स्वर्गमवाप्नोति पीत्वा ज्ञानमवाप्नुयात् । गङ्गास्नाने तु भक्त्या वै प्राप्नोति परमं पदम्” ब्रह्मवैवर्त्ते “गङ्गायां मौसलं स्नानं महापातकनाशनम् । अज्ञानात् स्वर्गसंप्राप्तिर्ज्ञानान्मुक्तिर्न संशयः” । पुण्यकालविशेषस्नानप्रकरणम् भविष्ये “द्वादश्यां श्रवणर्क्षेण अष्टम्यां पुष्ययोगतः । आर्द्रायाञ्च चतुर्दश्यां गङ्गास्नानं विशेषतः । वैशाखे पूर्णिमा या स्यान्माघे वै कार्त्तिके तथा । तथा माघी ह्यमावास्या गङ्गास्नाने सुदुर्लभा । कृष्णाष्टम्यां सहस्रन्तु शतं स्यात् सर्वपर्वसु । अमावास्यादिने चैव सहस्रन्तु दिनक्षये । चन्द्रसूर्य्यग्रहे लक्षं व्यतीपाते त्वनन्तकम्” ब्राह्मे “चन्द्रसूर्य्यग्रहे चैव योऽवगाहति जाह्नवीम् । स स्नातः सर्वतीर्थेषु किमर्थमटते महीम्” स्मृतिः “इन्दोर्लक्षगुणं प्रोक्तं रवेर्दशगुणं तथा । गङ्गातोये तु संप्राप्ते इन्दोः कोटी रवेर्दश” (नन्दामहाज्यैष्ठीवारुणीदशहरार्द्धोदयस्नानफलं तत्तच्छब्दे द्रष्टव्यम्) । मृत्तिकाधारणप्रकरणम् दानधर्मब्रह्माण्डाग्नेयेषु ।

“जाह्नवीतीरसंभूतां मृदं मूर्द्ध्ना बिभर्त्ति यः । बिभर्त्ति रूपं सोऽर्कस्य तमोनाशाय केवलम्” तर्पणप्रकरणम् ब्रह्माण्डाग्नेयदानधर्मेषु “य इच्छेत् सफलं जन्म जीवनं श्रुतमेव च । स पितॄंस्तर्पयेद्गङ्गामभिगम्य सुरांस्तथा” अथ दानप्रकरणम् भविष्ये “वासो हिरण्यरत्नानि पत्रपुष्पफलानि च । अन्नदानादिकञ्चापि आत्मनो यदभीप्सितम् । तत्तु भक्त्या तु गङ्गायां यः प्रयच्छति मानवः । तत्तत्सुखमनन्तञ्च सम्प्राप्य चेह जन्मनि । प्रेत्य चाप्नोति निर्वाणं परमं यन्निरञ्जनम् । यज्ञो दानं तपो ज्ञानं श्राद्धञ्च सुरपूजनम् । गङ्गायान्तु कृतं सर्वं कोटिकोटिगुणं भवेत्” व्रतप्रकरणम् ब्रह्माण्डे “शालितण्डुलप्रस्थेन द्विप्रस्थपयसा तथा । पायसं पाचयित्वा तु मधुखण्डं घृतं तथा । प्रत्येकं पलमात्रन्तु तत्र निक्षिप्य भक्तितः । तत् पायसमपूपञ्च लड्डुकान् यावकानपि । तथा गुञ्जार्द्धमात्रन्तु सुवर्णं रूप्यमेव च । चन्दनागुरुकर्पूरकुङ्कुमानि च गुग्गुलुम् । विल्वपत्राणि दूर्वाश्च रोचनां सितसर्षपम् । नीलोत्पलस्य पत्राणि पत्राभावे फलानि च । यथा शक्त्या महाभक्त्या गङ्गायां यो विनिक्षिपेत् । मासि मासि पौर्णमास्यां दर्शे वा प्रहरद्वये । अनुयानेन मन्त्रेण यावत् संवत्सरं तथा । (ओं गङ्गायै नारायण्यै ते नमो नमः) । इति मन्त्रेण सततं शतमष्टोत्तरं जपेत् । गङ्गाजलान्तर्भूत्वा तु तन्मनाश्च्यक्तसंशयः । हविष्याशी मिताहारी यमी तेषु दिनेषु च । संवत्सरान्ते तस्यैषा गङ्गा दिव्यवपुर्धरा । दिव्यमाल्याम्बरधरा दिव्यगन्धानुलेपना । चारुरूपधरा देवी दिव्यरत्नविभूषिता । मत्स्यरूपा पुरतस्तिष्ठत्येव वरप्रदा । एवं प्रत्यक्षतः साक्षात् गङ्गां दिव्यवपुर्धराम् । दृष्ट्वा स्वचक्षुषा मर्त्यो वरदानसमुद्यताम् । यान् यान् कामयते कामांस्तांस्तान् सर्वानवाप्नुयात् । निष्कामस्तु परं मोक्षं लभते नात्र संशयः” श्राद्धप्रकरणम् भविष्ये “गयाश्राद्धं कृतं तेन उत्सृष्टश्च वृषस्तथा । येन गङ्गाम्भसा सिक्ते तीरे श्राद्धमकारि च । पितॄनुद्दिश्य यो भक्त्या पायसं मधुसंयुतम् । गुडसर्पिःसमायुक्तं गङ्गाम्भसि विनिक्षिपेत् । तृप्ताः भवन्ति पितरस्तस्य वर्षशतत्रयम्” देवीपुराणे “अकालेऽप्यथ वा काले तीरे श्राद्धं तथा नरैः । प्राप्तैरेव सदा कार्य्यं कर्त्तव्यं पितृतर्पणम्” अथ पिण्डप्रकरणम् देवीपुराणे “सकृद्गङ्गाभिगमनं कृत्वा पिण्डं ददाति यः । तारिताः पितरस्तेन भवाम्भोधेस्तिलोदकैः ।” तत्रैव “गङ्गायाञ्च गयायाञ्च पिण्डदानं समं स्मृतम् । विशेषतः कलियुगे गङ्गापिण्डं प्रशस्यते । गङ्गायां पिण्डदानेन पितरस्तु तिलोदकैः । नरकस्था दिवं यान्ति स्वर्गस्था मोक्षमाप्नुयुः । माहेन्द्रे विरजे चैव गयायां जाह्नवीतटे । अत्र पिण्डप्रदो याति ब्रह्मलोकमनामयम्” जलप्रकरणम् ब्राह्मे “योऽसौ निरञ्जनो देवश्चित्स्वरूपी जनार्द्दनः । स एव द्रवरूपेण गङ्गाम्भो नात्र संशयः” । लैङ्गे “ब्रह्महा गुरुहा गोघ्नः स्तेयी च गुरुतल्पगः । गङ्गाम्भसा च पूयन्ते नात्र कार्य्या विचारणा” । ब्राह्मे “तिष्ठद्युगसहस्रन्तु पादेनैकेन यः पुमान् । मासमेकन्तु गङ्गाम्भः सेवते स विशिष्यते । मेरोः समुद्रस्य च रत्नराशेः संख्योपलानामुदकस्य वाचा । शक्यं यत्तु नेह गङ्गाजलानां गुणाख्यानं परिमाणं तथैव” तोयदानप्रकरणम् भविष्ये “अन्नदानैश्च गोदानैश्च स्वर्णदानादिभिस्तथा । रथाश्वगजदानैश्च यत्फलं परिकीर्त्तितम् । ततः शतगुणं गङ्गातोयदानादवाप्नुयात्” महाभारते “चान्द्रायणसहस्रेण यश्चरेत् कायशोधनम् । यः पिबेद्वै यथेष्टञ्च गङ्गाम्भः स विशिष्यते । गङ्गा-

तीरे वसेन्नित्यं गङ्गातोयं पिवेत् सदा । दीक्षितः सर्व्वयज्ञेषु सोमपानं दिने दिने । गङ्गातोयाभिसंसिक्तां भिक्षामश्नाति यो नरः । सर्पवत् कञ्चुकं मुक्त्वा पापानीह नरोत्तमः । स्वार्गापवर्गिकीं सिद्धिं प्राप्नोत्येव न संशयः” स्कान्दे “गण्डूषमात्रपानेन अश्वमेधफलं लभेत् । स्वच्छन्दं यः पिवेद्यस्तस्य मुक्तिः करे स्थिता” पाद्मे “त्रिभिः सारस्वतं तोयं सप्तभिस्त्वेव यामुनम् । नार्म्मदं दशभिर्मासैर्गाङ्गं वर्षेण जीर्य्यति” अथ वासरूपसेवाप्रकरणम् । ब्राह्मे “तपसा ब्रह्मचर्य्येण यज्ञैस्त्यागेन वा गतिम् । न तां संलभते जन्तुर्गङ्गां संसेव्य यां लभेत्” नारदीये “किमष्टाङ्गेन योगेन किं तपोभिः किमध्वरैः । वास एव हि गङ्गायां ब्रह्मज्ञानस्य कारणम्”’महाभारते “पूर्व्वे वयस्यधर्म्मांश्च कृत्वा पापानि ये नराः । पश्चाद्गङ्गां समाश्रित्य तेऽपि यान्ति परां गतिम्” ब्रह्माण्डे “महापातकिनो ये च सेवन्ते यदि जाह्नवीम् । पातकेभ्योऽपि मुच्यन्ते का कथाऽन्यस्य पाप्मनः” भविष्ये “त्रिरात्रं सप्तरात्रं वा स्थितिमात्रेण भक्तितः । गङ्गातीरे नरो यस्तु नरकं स न पश्यति” । विघ्नप्रकरणम् भविष्ये “षष्टिर्विघ्नसहस्राणि गङ्गां रक्षन्ति यत्नतः । निराशयन्त्यभक्तांश्च पापकर्म्मरतांस्तथा । कामक्रोधमदोत्साहलोभादिनिशितैः शरैः । प्रहरन्ति भक्तेषां स्थितिं वै नाशयन्ति च” प्रतिग्रहप्रकरणम् मात्स्ये “यस्तत्र प्रतिगृह्णाति तीर्थेष्वायतनेषु च । हिरण्यं रजतं ताम्रं यच्चान्यद्वस्तु किञ्चन । निःफलं तस्य तत् तीर्थं यावत्तद्वस्तु चाश्नुते । वरं विक्रयणं मातुर्वरं विक्रयणं पितुः । अपि गङ्गाजलस्यन्तु न गृह्णीयात् कदाचन” स्मृतिः । “गङ्गाविक्रयणाद्राजन् विष्णोर्विक्रयणं भवेत् । जनार्द्दने तु विक्रीते विक्रीतं स्याज्जगत्त्रयम्” अभक्तिप्रकरणम् भविष्ये “गङ्गां प्राप्याथ ये मर्त्त्याः श्रद्धां भक्तिं न कुर्व्वते । तीर्थान्तरे रतिं कुर्य्युस्ते वै निरयगामिनः”। कृतकृत्यप्रकरणम् ब्रह्माण्डे “गङ्गां संश्रित्य यस्तिष्ठेत्तस्याकार्य्यं न विद्यते । कृतकृत्यः स वै मुक्तो जीवन्मुक्तो भवेन्नरः”। मृत्युफलप्रकरणम् ब्राह्मे “ज्ञानतोऽज्ञानतो वापि कामतोऽकामतोऽपि वा । गङ्गायान्तु मृतो मर्त्त्यो मोक्षं स्वर्गञ्च विन्दति” भविष्ये “कृमिकीटपतङ्गाद्या ये मृता जाह्नवीजले । कूलान्निपतिता वृक्षास्तेऽपि यान्ति परां गतिम्” तथा “अपि योजनपर्य्यन्ते गङ्गां स्मृत्वा तनुं त्यजेत् । वैवस्वतोऽपि तस्यार्घ्यं दत्त्वा स्वर्गं प्रयच्छति” स्कान्दे “अर्द्धोदके तु जाह्नव्या म्रियतेऽनशनेन यः । स याति न पुनर्जन्म ब्रह्मसायुज्यमेव च” अस्थिप्रक्षेपप्रकरणम् वनपर्व्वणि कौर्म्मे च “यावन्त्यस्थीनि गङ्गायां तिष्ठन्ति पुरुषस्य च । तावद्वर्षसहस्राणि ब्रह्मलोके महीयते । यावदस्थि मनुष्यस्य गङ्गायाः स्पृशते जलम् । तावद्वर्षसहस्राणि स्वर्गलोके महीयते” ब्रह्माण्डे “गङ्गातोये तु यस्यास्थि नीत्वा संक्षिप्यते नरैः । तत्कालमादितः कृत्वा स्वर्गे तस्य भवेत् स्थितिः । गङ्गातोयेषु यस्यास्थि प्लाव्यते पुण्यकर्म्मणः । न तस्य पुनरावृत्तिर्ब्रह्मलोकात् कदाचन” केशादिप्रकरणम् ब्रह्माण्डे “केशलोमनखादीनि येषां पुंसान्तु वायुना । निक्षिप्यन्ते च गङ्गायां तेषां स्याद्दियति स्थितिः” अथ प्रकीर्णकम् ब्रह्माण्डे “दृष्ट्वा शतकृतं पापं स्पृष्ट्वा जन्मशतानि च । स्नात्वा जन्मसहस्राणि हन्ति गङ्गा कलौ युगे”। गङ्गाद्वारवाराणसीप्रयागादिप्रकरणम् मात्स्ये “सर्व्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा । गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे” वनपर्व्वणि “स्वर्गद्वारेण तत्तुल्यं गङ्गाद्वारं न संशयः । तत्राभिषेकं यः कुर्य्यात् सोऽश्वमेधमवाप्नुयात्” ब्रह्माण्डे “वाराणस्यां विशेषेण गङ्गा नित्यं विमुक्तिदा । अनन्तकोटिकल्पोत्थं पापं पुंसां प्रणाशयेत् । वाराणस्यां विशेषेण सद्यः पापविनाशिनी । गङ्गायान्तु जले मोक्षो वाराणस्यां जले स्थले । जले स्थले चान्तरीक्षे गङ्गासागरसङ्गमे” । मोक्षप्रकरणम् स्कान्दे “ब्रह्मादिदेवलोकानां मुक्तेश्च प्राप्तये नृणाम् । गङ्गा च परमा हेतुः कलिकाले विशेषतः” ।

गङ्गामाहात्म्यं काशीख० विष्णुं प्रति शिवेनोक्तम् यथा

“ममैव सा परा मूर्त्तिस्तोयरूपा शिवात्मिका । ब्रह्माण्डानामनेकेषामाधारः प्रकृतिः परा । सिद्धविद्यास्वरूपा च त्रिशक्तिः करुणात्मिका । आनन्दामृतरूपा च शुद्धधर्म्मस्वरूपिणी । तामेनां जगतां धात्रीं धारयामि स्वलीलया । विश्वस्य रक्षणार्थाय पर ब्रह्मस्वरूपिणीम् । त्रैलोक्ये यानि तीर्थानि पुण्यक्षेत्राणि यानि च । सर्व्वत्र सर्व्वे ये धर्म्माः सर्व्वे यज्ञाः सदक्षिणाः । तपांसि विष्णो ! सर्व्वाणि श्रुतिः साङ्गा चतुर्म्मिता । अहञ्च त्वञ्च ब्रह्मा च देवतानां गणाश्च ये । पुरुषार्थाश्च सर्व्वे वै शक्तयो विविधाश्च याः । गङ्गायां सर्व्व एवैते सूक्ष्मरूपेण संस्थिताः । स स्नातः सर्व्व-

तीर्थेषु सर्व्वक्रतुषु दीक्षितः । चीर्णसर्व्वव्रतः सोऽपि यस्तु गङ्गां निषेवते । तपांसि तेन तप्तानि सर्व्वदानप्रदः स च । स प्राप्तयोगनियमो यस्तु गङ्गां निषेवते । सर्व्ववर्णाश्रमिभ्यश्च वेदविद्भ्यश्च वै तथा । शास्त्रार्थपारगेभ्यश्च गङ्गास्नायी विशिष्यते । मनोवाक्कायजैर्दोषैर्दुष्टो बहुविधैरपि । वीक्ष्य गङ्गां भवेत् पूतः पुरुषो नात्र संशयः । कृते सर्व्वाणि तीर्थानि त्रेतायां पुष्करं परम् । द्वापरे तु कुरुक्षेत्रं कलौ गङ्गैव केवलम् । ध्यानं कृते मोक्षहेतुस्त्रेतायां तच्च वै तपः । द्वापरे तद्द्वयं यज्ञः कलौ गङ्गैव केवलम् । पूर्व्वजन्मान्तराभ्यासवासनावशतो हरे ! । गङ्गातीरे निवासः स्यान्मदनुग्रहतः परम् । यो देहपातनाद्यावद्गङ्गातीरं न मुञ्चति । स हि वेदान्तविद्योगी ब्रह्मचर्य्यव्रती सदा । कलौ कलुषचित्तानां पापद्रव्यरतात्मनाम् । विधिहीनक्रियाणाञ्च गतिर्गङ्गां विना नहि । अलक्ष्मीः कालकर्णी च दुःस्वप्नो दुर्व्विचिन्तितम् । गङ्गागङ्गेति जपनात्तानि नोपविशन्ति हि । गङ्गा हि सर्व्वभूतानामिहामुत्र फलप्रदा । भावानुरूपतो विष्णो ! सदा सर्व्वजगद्धिता । यज्ञदानतपोयोगजपाः सनियमा यमाः । गङ्गासेवासहस्रांशं न लभन्ते कलौ हरे ! । किमष्टाङ्गेन योगेन किं तपोभिः किमध्वरैः । वास एव हि गङ्गायां ब्रह्मज्ञानस्य कारणम् । अपि दूरस्थितस्यापि गङ्गामाहात्म्यवेदिनः । अयोग्यस्यापि गोविन्द ! । भक्त्या गङ्गा प्रसीदति । श्रद्धा धर्म्मः परः सूक्ष्मः श्रद्धा ज्ञानं परन्तपः । श्रद्धा स्वर्गश्च मोक्षश्च श्रद्धया सा प्रसीदति । अज्ञानरागलोभाद्यैः पुंसां संमूढचेतसाम् । श्रद्धा न जायते धर्म्मे गङ्गायाञ्च विशेषतः । बहिःस्थितं जलं यद्वन्नारिकेलान्तरस्थितम् । तथा ब्रह्माण्डबाह्यस्थं परं ब्रह्माम्बु जाह्नवम् । गङ्गालाभात् परो लाभः क्वचिदन्यो न विद्यते । तस्माद्गङ्गामुपासीत गङ्गैव परमः पुमान् । शक्तस्य पण्डितस्यापि गुणिनो दानशालिनः । गङ्गास्नानविहीनस्य हरे ! जन्म निरर्थकम् । वृथा कुलं वृथा विद्या वृथा यज्ञो वृथा तपः । वृथा दानानि तस्येह गङ्गाभक्तो न यो भवेत् । गुणवत्पात्रपूजायां न स्याद्वै तादृशं फलम् । यथा गङ्गाजले स्नातः पूजने विधिना फलम् । मम तेजोऽग्निगर्भेयं मम वीर्य्यातिसम्भृता । दाहिका सर्व्वदोषाणां सर्व्वपापविनाशिनी । स्मरणादेव गङ्गायाः पापसङ्घातपञ्जरम् । शतधा भेदमायाति गिरिर्व्वज्रहतो यथा । गङ्गां गच्छति यस्त्वेको यस्तं भक्त्यानुमोदयेत् । तयोस्तुल्यं फलं प्राहुर्भक्तिरेवात्र कारणम् । गच्छंस्तिष्ठन् स्वपन् भुञ्जन् ध्यायन् जाग्रत् श्वसन् वदन् । यः स्मरेत् सततं गङ्गां स हि मुच्येत बन्धनात् । पितॄनुद्दिश्य यो भक्त्या पायसं मधुसंयुतम् । गुडसर्पिस्तिलैः सार्द्धं गङ्गाम्भसि विनिःक्षिपेत् । तृप्ता भवन्ति पितरस्तस्य वर्षशतं हरे ! । यच्छन्ति विविधान् कामान् भूरिभूतान् पितामहाः । लिङ्गेशे पूजिते सर्व्वमर्च्चितं स्याज्जगद्द्वया । गङ्गास्नानेन लभते सर्व्वतीर्थफलं तथा । गङ्गायान्तु नरः स्नात्वा यो लिङ्गं नित्यमर्च्चति । एकेन जन्मना मुक्तिं परां प्राप्नोति स ध्रुवम् । अग्निहोत्राणि यज्ञाश्च तथा दानतपांसि च । गङ्गायां लिङ्गपूजायाः कोट्यंशेनापि नो समाः । गङ्गां गन्तुं विनिश्चित्य कृत्वा श्राद्धादिकं गृहे । स्थितस्य सम्यक् सङ्कल्पात् तस्यानन्दन्ति पूर्व्वजाः । पापानि च रुदन्त्याशु हा क यास्याम इत्यलम् । लोभमोहादिभिः सार्द्धं मन्त्रयन्ति पुनः पुनः । यथा गङ्गां न यात्येष तथा विघ्नं प्रकुर्म्महे । गङ्गां गतो यदा चैष न उच्छित्तिं विधास्यति । गृहाद्गङ्गावगाहार्थं गच्छतस्तु पदे पदे । निराशानि व्रजन्त्येव पापान्यस्य शरीरतः । पूर्व्वजन्मकृतैः पुण्यैस्त्यक्त्वा लोभादिकं हरे ! । व्युदस्य सर्व्वविघ्नौघान् गङ्गां प्राप्नोति पुण्यवान् । अनुषङ्गेण शुल्केन वाणिज्येनापि सेवया । कामासक्तोऽपि वा मर्त्त्यो गङ्गास्नायी दिवं व्रजेत् । अनिच्छयापि संस्पृष्टो दहनोऽपि यथा दहेत् । अनिच्छयापि संस्नाता गङ्गा पापं तथा दहेत् । तावद्भ्रमति संसारे यावद्गङ्गां न सेवते । संसेव्य गङ्गां नो जन्तुर्भवक्लेशं प्रपश्यति । यो गङ्गाम्भसि संस्नातो भक्त्या संत्यक्तसंशयः । मनुष्यचर्म्मणा नद्धः स देवो नात्र संशयः । गङ्गास्नानार्थमुद्युक्तो मध्येमार्गं मृतो यदि । गङ्गास्नानफलं सोऽपि तदाप्नोति न संशयः । माहात्म्यं ये च गङ्गायाः शृण्वन्ति च पठन्ति च । तेऽप्यशेषैर्म्महापापैर्मुच्यन्ते नात्र संशयः । दुर्बुद्धयो दुराचारा हैतुका बहुसंशयाः । पश्यन्ति मोहिता विष्णो ! गङ्गामन्यां नदीमिव । जन्मान्तरकृतैर्दानैस्तपोभिर्नियमैर्व्रतैः । इह जन्मनि गङ्गायां नृणां भक्तिः प्रजायते । गङ्गाभक्तिमतामर्थे महेन्द्रादिपुरेषु च । हर्म्याणि रत्नभोगाणि निर्म्मितानि स्वयम्भुवा । सिद्धयः सिद्धलिङ्गानि स्वर्णलिङ्गान्यनेकशः । प्रासादा रत्न-

र्श्चिताश्चिन्तामणिगणा अपि । गङ्गाजले न तिष्ठन्ति कलिपापानि भीतितः । अतएव हि संसेव्या कलौ गङ्गेष्टसिद्धिदा । सूर्य्योदये तमांसीव वज्रिवज्रभयान्नगाः । तार्क्ष्येक्षणाद्यथा सर्पाः मेघा वाताहता यथा । तत्त्वज्ञानाद्यथा मोहाः सिंहं दृष्ट्वा यथा मृगाः । तथा सर्वाणि पापानि यान्ति गङ्गेक्षणात् क्षयम् । दिव्यौषधैर्यथा रोगा लोभेन च यथा गुणाः । यथा ग्रीष्मोष्मसन्तप्तिरगाधह्रदमज्जनात् । तूलशैलाः स्फुलिङ्गेन यथा नश्यन्ति तत्क्षणात् । तथा दोषाः प्रणश्यन्ति गङ्गाम्भःस्पर्शनाद्ध्रुवम् । क्रोधेन च तपोयद्वत् कामेन च यथा मतिः । अनयेन यथा लक्ष्मीर्विद्या मानेन वै यथा । दम्भकौटिल्यमायाभिर्यथा धर्मो विनश्यति । तथा नश्यन्ति पापानि गङ्गायादर्शनेन तु । मानुष्यं दुर्लभं प्राप्य विद्युत्सम्पातचञ्चलम् । गङ्गां यः सेवते सोऽत्र बुद्धेः पारं परं गतः । विधूतपापाये मर्त्याः परज्योतिःस्वरूपिणीम् । सहस्रसूर्य्यप्रतिमां गङ्गां पश्यन्ति ते भुवि । साधारणाम्भसा पूर्णां साधारणनदीमिव । पश्यन्ति नास्तिका गङ्गां पापोपहतलोचनाः । संसारमोचकस्याहं जनानामनुकम्पया । गङ्गातरङ्गरूपेण सोपानं निर्ममे दिवः । सर्व्व एव शुभः कालः सर्व्वो देशस्तथा शुभः । सर्व्वे जना दानपात्रं श्रीमति जाह्नवीतटे । यथाश्वमेधो यज्ञानां नगानां हिमवान् यथा । व्रतानान्तु यथा सत्यं दानानामभयं यथा । प्राणायामश्च तपसां मन्त्राणां प्रणवो यथा । धर्म्माणामप्यहिंसा च कन्यानां श्रीर्यथा वरा । यथात्मविद्या विद्यानां स्त्रीणां गौरी यथोत्तमा । सर्व्वदेवगणानाञ्च यथाहं परमेश्वरः । सर्व्वेषामेव भक्तानां शिवभक्तो यथा वरः । तथा सर्व्वेषु तीर्थेषु गङ्गातीर्थं विशिष्यते । हरे ! यस्त्वावयोर्भेदं न करोति महामतिः । शिवभक्तः स विज्ञेयो महापाशुपतश्च सः । पापपांशुमहावात्या पापद्रुमकुठारिका । पापेन्धनदवाग्निश्च गङ्गेयं पुण्यवाहिनी । नानारूपाश्च पितरो गाथां गायन्ति सर्व्वदा । अपि कश्चित् कुलेऽस्माकं गङ्गास्नायी भविष्यति । देवर्षीन् परिसन्तर्प्य दीनानाथांश्च दुःखितान् । श्रद्धया विधिना स्नात्वा दास्यते सलिलाञ्जलिम् । अपि नः स कुले भूयाच्छिवे विष्णौ च साम्यदृक् । तदालयकरो भक्त्या तत्र सम्मार्ज्जनादिकृत् । अकामो वा सकामो वा तिर्य्यग्योनिगतोऽपि वा । गङ्गायां यो मृतो मर्त्त्यो नरकं न स पश्यति । तीर्थमन्यत् प्रशंसन्ति गङ्गातीरे स्थिताश्च ये । गङ्गां न बहु मन्यन्ते ते स्युर्निरयगामिनः । माञ्च त्वाञ्चैव गङ्गाञ्च यो द्वेष्टि पुरुषाधमः । स्वकीयैः पितृभिः सार्द्धं स घोरं नरकं व्रजेत् । षष्टिर्गणसहस्राणि गङ्गां रक्षन्ति सर्व्वदा । अभक्तानाञ्च पापानां वासे विघ्नं प्रकुर्व्वते । कामक्रोधमहामोहलोभादिनिशितैः शरैः । घ्नन्ति तेषां मनस्तत्र स्थितिञ्चापनयन्ति च । गङ्गां समाश्रयेत् यस्तु स मुनिः स च पण्डितः । कृतकृत्यः स विज्ञेयः पुरुषार्थचतुष्टये । गङ्गायाञ्च सकृत्स्नातो हयमेधफलं लभेत् । तर्पयंश्च पितॄंस्तत्र तारयेन्नरकार्णवात् । नैरन्तर्य्येण गङ्गायां मासं यः स्नाति पुण्यभाक् । स शक्रलोके वसति यावच्छक्रः सपूर्व्वजः । अब्दं स्नाति च गङ्गायां नैरन्तर्य्येण पुण्यवान् । विष्णुलोकं समागत्य ससुखं संवसेन्नरः ! । गङ्गायां स्नाति यो मर्त्त्यो यावज्जीवं दिने दिने । जीवन्मुक्तः स विज्ञेयो देहान्ते मुक्त एव सः । तिथिनक्षत्रपर्व्वादि नापेक्ष्यं जाह्नवीजले । स्नानमात्रेण गङ्गायां सञ्चिताघं विनश्यति । पण्डितोऽपि स मूर्खः स्याच्छक्तियुक्तोऽप्यशक्तिकः । यस्तु भागीरथीतीरं सुखसेव्यं न संश्रयेत् । किमायुषाप्यरोगेण किं कामिन्याथ किं श्रिया । किं वा बुद्ध्या विमलया यदि गङ्गां न सेवते । यः कारयेदायतनं गङ्गाप्रतिकृतेर्नरः । भुक्त्वा स भोगान् प्रेत्यापि याति गङ्गासलोकताम् । शृण्वन्ति महिमानं ये गङ्गाया नित्यमादरात् । गङ्गास्नानफलं तेषां वाचकप्रीणनाद्धनैः । पितॄनुद्दिश्य यो लिङ्गं स्नापयेद्गाङ्गवारिणा । तृप्ताः स्युस्तस्य पितरो महानिरयगा अपि । अष्टकृत्वो मन्त्रजप्तैर्वस्त्रपूतैः सुगन्धिभिः । प्रोचुर्गाङ्गैर्जलैः स्नानं घृतस्नानादिकं बुधाः । आपः क्षीरकुशाग्राणि घृतं दधि गवां मधु । रक्तानि करवीराणि रक्तचन्दनमित्यपि । अष्टद्रव्यविमिश्रेण गङ्गातोयेन यः सकृत् । माधव ! प्रस्थमात्रेण ताम्रपात्रस्थितेन च । भानवेऽर्घं प्रदद्याच्च स्वकीयपितृभिः सह । सोऽतितेजोविमानेन सूर्य्यलोके महीयते । अगाङ्गोऽर्घोऽयमुद्दिष्टस्त्वतीव रवितोषणः । गाङ्गैर्वार्भिः कोटिगुणो ज्ञेयो विष्णोऽन्यवारितः । गङ्गातीरेषु शक्त्या यः कुर्य्याद्देवालयं सुधीः । अन्यतीर्थप्रतिष्ठातो लभेत् कोटिगुणं फलम् । कूपवापीतडागादिप्रपादानादिभिस्तथा । अन्यत्र यद्भवेत् पुण्यं तद्गङ्गा-

दर्शनाद्भवेत् । अश्वत्थवटवृक्षादिवृक्षारोपेण यत् फलम् । पुष्पशय्यादिभिश्चापि गङ्गास्पर्शस्ततोऽधिकः । कन्यादानेन यत् पुण्यं यत् पुण्यं गोप्रदानतः । तत् पुण्यं स्याच्छतगुणं गङ्गागण्डूषपानतः । चान्द्रायणसहस्रेण यत् फलं स्याज्जनार्द्दन ! । ततोऽधिकं फलं गङ्गाऽमृतपानादवाप्नुयात् । भक्त्या गङ्गावगाहस्य किमन्यत् फलमुच्यते । अक्षयः स्वर्गवासोऽपि निर्वाणमथ वा हरे ! । गङ्गायाः पादुकायुग्मं नित्यमर्च्चति यो नरः । आयुः पुण्यं धनं पुत्रान् स्वर्गमोक्षौ च विन्दति । नास्ति गङ्गासमं तीर्थं कलिकल्मषनाशनम् । नास्ति मुक्तिप्रदं चात्रमविमुक्तसमं हरे ! । गङ्गास्नानरतं मर्त्यं दृष्ट्वैव यमकिङ्कराः । दिशो दश पलायन्ते सिंहं दृष्ट्वा यथा मृगाः । गङ्गाव्रजनशीलस्य गङ्गातटनिवासिनः । अर्च्चां कृत्वा यथान्यायमश्वमेधफलं लभेत् । गोभूहिरण्यदानेन भक्त्या गङ्गातटे शुभे । नरो न जायते भूयः संसारे दुःखसङ्कटे । दीर्घायुष्यञ्च वासोभिर्ज्ञानं पुस्तकदानतः । अन्नदानेन सम्पत्तिः कीर्त्तिः कन्याप्रदानतः । अन्यत्र यत् कृतं कर्म व्रतं दानं जपस्तपः । गङ्गातटे तु तत् सर्वं हरे ! कोटिगुणं भवेत् । धेनुं पयस्विनीं दद्यात् गङ्गातीरे विधानतः । गोरोमसंख्यया विष्णोर्युगान् सर्वं समृद्धिदान् । गोलोके मम लोके वा कामधेनुव्रजावृतः । भुञ्जानः सर्वकामांस्तु दिव्यान् नानाविधान् बहून् । देवानामप्यलभ्यांश्च भुक्त्वा तु सह बान्धवैः । पितृभिश्च सुहृद्भिश्च सर्व्वरत्नविभूषितः । जायते सुकुले पश्चाद्धनधान्यसमाकुले । रत्नकाञ्चनसम्पूर्णे शीलविद्यासमन्विते । भुक्त्वा च विपुलान् भोगान् पुत्रपौत्रसमन्वितः । पुनर्गङ्गां समासाद्य काश्यामुत्तरवाहिनीम् । विश्वेश्वरं समाराध्य प्रागजनुर्वासनावशात् । कालाद्देहान्तमासाद्य ब्रह्म सम्पद्यते ततः । निर्वर्त्तनद्वयमपि भूमेर्भागीरथीतटे । नरो ददाति यो भक्त्या तस्य पुण्यफलं शृणु । तद्भूमित्रसरेणूनां संख्यया युगमानया । महेन्द्रचन्द्रलोकेषु भुक्त्वा भोगान् मनःप्रियान् । सप्तद्वीपपतिर्भूत्वा महाधर्मपरायणः । नरकस्थानपि पितॄन् ! प्रापय्य त्रिदिवं व्रजेत् । स्वर्गस्थांश्च पितॄन् सर्वान् मोचयित्वा महाद्युतिः । अन्ते ज्ञानासिना छित्त्वा ह्यविद्यां पाञ्चभौतिकीम् । परं वैराग्यमापन्नो युञ्जानो योगमुत्तमम् । प्राप्याथ वाऽविमुक्तञ्च परं ब्रह्माधिगच्छति । सुवर्णमात्रमपि यः सुवर्णं वा प्रयच्छति । सुवर्णञ्च सुविप्राय हरे ! भागीरथीतटे । स हेमरत्नखचिते विमाने सर्वगे शुभे । सर्वैश्वर्यसमायुक्तः सर्वलोकेषु पूजितः । ब्रह्माण्डान्तरसंस्थेषु भुक्त्वा भोगान् मनोरमान् । सर्वैः संपूजितो विष्णो ! यावदाहूतसंप्लवम् । एकराट् च ततोभूत्वा जम्बुद्वीपे प्रतापवान् । ततोऽविमुक्तमासाद्य परं निर्वाणमृच्छति । जन्मर्क्षे तु कृते स्नाने गङ्गायां भक्तिपूर्वकम् । जन्मप्रभृतिपापौघात् संचितात् मुच्यते क्षणात् । वैशाखे कार्त्तिके माघे गङ्गास्नानं सुदुर्लभम् । दर्शे शतगुणं पुण्यं संक्रान्तौ च सहस्रकम् । चन्द्रसूर्य्यग्रहे लक्षं व्यतीपाते त्वनन्तकम् । अयुतं विषुवे चैव नियुतन्त्वयनद्वये । सोमग्रहः सोमदिने, रविवारे रवेर्ग्रहः । तच्चूडामणिपूर्वाख्यं तत्र स्नानमसंख्यकम् । स्नानं दानं जपोहोमो यच्च चूडामणौ कृतम् । तदक्षयमिदं सर्वं विष्णो ! भागीरथीतटे । श्रद्धया भक्तियुक्तस्तु गङ्गां स्नात्वा विधानतः । ब्रह्महापि विशुद्ध्येत किं पुनस्त्वन्यपातकी । कृमिकीटपतङ्गाद्या ये मृता जाह्नवीजले । कूलात् पतन्ति ये वृक्षास्तेऽपि यान्ति परां गतिम्" । अन्यान्यपि तत्रत्य फलानि प्रा० त० उक्तानि तत्र दृश्यानि । ब्रह्माण्डे "गङ्गां पुण्यजलां प्राप्य त्रयोदश विवर्जयेत् । शौचमाचमनं सेकं निर्माल्यं मलघर्षणम् । गात्रसंवाहनं क्रीड़ां प्रतिग्रहमथोऽरतिम् । अन्यतीर्थरतिञ्चैव अन्यतीर्थप्रशंसनम् । विण्मूत्रादिमलोत्सर्गं सन्तारञ्च विशेषतः" । तस्याश्च वैशाखशुक्लतृतीयायां ब्रह्मलोकात् हिमवति पतनं ततो भूमौ पतनञ्च दशहरायां यथा "वैशाखशुक्लपक्षे तु तृतीयायां जनार्दनः । यवानुत्पादयामास युगं चारब्धवान् कृतम् । ब्रह्मलोकात्त्रिपथगां पृथिव्यामवतारयत्" ब्रह्मपुराणम् । "ज्यैष्ठे मासि क्षितिसुतदिने शुक्लपक्षे दशम्यां हस्ते शैलान्निरगमदियं जाह्नवी मर्त्यलोकम्" ति० त० धृतवाक्यम् । एतयोरविरोधाय तथा व्यवस्था । २तज्जलाधिष्ठातृदेवीभेदे । गङ्गाया इदम् नदीपरत्वे अदन्तत्वात् अण् । गाङ्ग तत्सम्बन्धिनि । "गाङ्गमम्बुसितमम्बुयामुनम्" काव्यप्र० । "गाङ्गं जलं निर्मलम्" गङ्गास्तोत्रम् । "गाङ्गं वर्षेण जीर्यति" पद्मपु० । नदीपरत्वाभावे गङ्गाया अपत्यं ढक् । गाङ्गेय गङ्गादेव्यपत्ये भीष्मे कार्त्तिकेये च । "गङ्गाप्रवाहोक्षितदेवदारु" कुमा० "गङ्गास्रोतोऽन्तरेषु सः" रघुः । ४नदीमात्रे च । सप्तगङ्गम् सि० कौ० ।

गङ्गाक्षेत्र न० ६त०। "तीराद्गव्यूतिमात्रन्तु परितः क्षेत्रमुच्यते" इत्युक्ते गङ्गातीरादुभयपार्श्वस्थक्रोशद्वयमितस्थाने। [(गाँगाचिल) इारा० ।

गङ्गाचिल्ली स्त्री गङ्गास्था नदीस्था चिल्ली। चिल्लभेदे

गङ्गाज पु० गङ्गातो जायते जन–ड। १भीष्मे २कार्त्तिकेये च तत्र भीष्मस्य गङ्गातो जन्मकथा।

"स राजा शान्तनुर्धीमान् देवराजसमद्युतिः। बभूव मृगयाशीलः सततं वनगोचरः। स मृगान् महिषांश्चैव विनिघ्नन्राजसत्तमः। गङ्गामनुचचारैकः सिद्धचारणसेविताम्। स कदाचिन्महाराज! ददर्श परमां स्त्रियम्। जाज्वल्यमानां वपुषा साक्षाच्छ्रियमिवापराम्। सर्वानवद्यां सुदतीं दिव्याभरणभूषिताम्। सूक्ष्माम्बरधरामेकां पद्मोदरसमप्रभाम्। तां दृष्ट्वा हृष्टरोमाऽभूद्विस्मितो रूपसम्पदा। पिबन्निव च नेत्राभ्यां नातृप्यत नराधिपः। सा च दृष्ट्वैव राजानं विचरन्तं महाद्युतिम्। स्नेहादागतसौहार्द्दा नातृप्यत विलासिनी। तामुवाच ततो राजा सान्त्वयन् श्लक्ष्णया गिरा। देवी वा दानवी वा त्वं गन्धर्वी यदि वाप्सराः। यक्षी वा पन्नगी वापि मानुषी वा सुमध्यमे!। याचे त्वां सुरगर्भाभे! भार्य्या मे भव शोभने।" भा० आ० ९७अ०।

"एतत् श्रुत्वा वचो राज्ञः सस्मितं मृदु वल्गु च। वसूनां समयं स्मृत्वाऽथाभ्यागच्छदनिन्दिता। उवाच चैवं राज्ञः सा ह्लादयन्ती मनो गिरा। भविष्यामि महीपाल! महिषी ते वशानुगा। यत्तु कुर्य्यामहं राजन्! शुभं वा यदि वाऽशुभम्। न तद्वारयितव्यास्मि न वक्तव्या तथाऽप्रियम्। एवं हि वर्त्तमानेऽहं त्वयि वत्स्यामि पार्थिव!। वारिता विप्रियञ्चोक्ता त्यजेयं त्वामसंशयम्। तथेति राज्ञा सा तूक्ता तदा भरतसत्तम!। प्रहर्षमतुलं लेभे प्राप्य तं पार्थिवोत्तमम्। आसाद्य शान्तनुस्ताञ्च बुभुजे कामतो वशी। न प्रष्टव्येति मन्वानो न स तां किञ्चिदुक्तवान्। स तस्याः शीलवृत्तेन रूपौदार्य्यगुणेन च। उपचारेण च रहस्तुतोष जगतीपतिः। दिव्यरूपा हि सा देवी गङ्गा त्रिपथगामिनी। मानुषं विग्रहं कृत्वा श्रीमन्तं वरवर्णिनी। भाग्योपनतकामस्य भार्य्येवोपस्थिताऽभवत्। शान्तनोराजसिंहस्य देवराजसमद्युतेः। सम्भोगस्नेहचातुर्य्यैर्हावलास्यमनोहरैः। राजानं रमयामास तथा रेमे तथैव सः। स राजा रतिसक्तत्वादुत्तमस्त्रीगुणैर्हृतः। संवत्सरानृतून् मासान् बुबुधे न बहून् गतान्। रममाणस्तया सार्द्धं यथाकामं नरेश्वरः। अष्टावजनयत् पुत्रांस्तस्याममरसन्निभान्। जातं जातं च सा पुत्रं क्षिपत्यम्भसि भारत!। प्रीणामि च त्वामित्युक्त्वा गङ्गास्रोतस्यमज्जयत्। तच्च तन्न प्रियं राज्ञः शान्तनोरभवत्तदा। न च तां किञ्चनोवाच त्यागाद्भीतो महीपतिः। अथैनामष्टमे पुत्रे जाते प्रहसतीमिव। उवाच राजा दुःखार्त्तः परीप्सन् सुतमात्मनः। मा वधीः कासि कस्यासि किञ्च हंसि सुतानिति। पुत्रघ्नि! सुमहत् पापं संप्राप्तं ते विगर्हिते!। स्त्र्युवाच। पुत्रकाम! न ते हन्मि पुत्रं पुत्रवतां वर!। जीर्णोऽस्तु मम वासोऽयं यथा स समयः कृतः। अहं गङ्गा जह्नुसुता महर्षिगणसेविता। देवकार्य्यार्थसिद्ध्यर्थमुषिताहं त्वया सह। इमेऽष्टौ वसवो देवा महाभागा महौजसः। वशिष्ठशापदोषेण मानुषत्वमुपागताः। तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते। मद्विधा मानुषी धात्री लोके नास्तीह काचन। तेषाञ्च जननीहेतोर्मानुषत्वमुपागता। जनयित्वा वसूनष्टौ जिता लोकास्त्वयाऽक्षयाः। देवानां समयस्त्वेष वसूनां संश्रुतो मया। जातं जातं मोक्षयिष्ये जन्मतो मानुषादिति। तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्मनः। स्वस्ति तेऽस्तु गमिष्यामि पुत्रं पाहि महाव्रतम्। एष पर्य्यायवासो मे वसूनां सन्निधौ कृतः। मत्प्रसूतं विजानीहि गङ्गादत्तमिमं सुतम्" ९८अ०।

"स कदाचिन्मृगं विद्धा गङ्गामनुसरन्नदीम्। भागीरथीमल्पजलां शान्तनुर्दृष्टवान्नृपः। तां दृष्ट्वा चिन्तयामास शान्तनुः पुरुषर्षभः। स्यन्दते किं त्वियं नाद्य सरिच्छ्रेष्ठा यथा पुरा। ततो निमित्तमन्विच्छन्ददर्श स महामनाः। कुमारं रूपसम्पन्नं बृहन्तञ्चारुदर्शनम्। दिव्यमस्त्रं विकुर्वाणं यथा देवं पुरन्दरम्। कृत्स्नां गङ्गां समावृत्य शरैस्तीक्ष्णैरवस्थितम्। तां शरैरावृतां दृष्ट्वा नदीं गङ्गां तदन्तिके। अभवद्विस्मितो राजा दृष्ट्वा कर्मातिमानुषम्। जातमात्रं पुरा दृष्ट्वा तं पुत्रं शान्तनुस्तदा। नोपलेभे स्मृतिं धीमानभिज्ञातुं तमात्मजम्। स तु तं पितरं दृष्ट्वा मोहयामास मायया। संमोह्य तु ततः क्षिप्रं तत्रैवान्तर-

धीयत। तदद्भुतं ततो दृष्ट्वा तत्र राजा स शान्तनुः। शङ्कमानः सुतं गङ्गामब्रवीद्दर्शयेति ह। दर्शयामास तं गङ्गा बिभ्रती रूपमुत्तमम्। गृहीत्वा दक्षिणे पाणौ तं कुमारमलङ्कृतम्। अलङ्कृतामाभरणैर्विरजोऽम्बरधारिणीम्। दृष्टपूर्वामपि स तां नाभ्यजानात् स शान्तनुः। गङ्गोवाच। यं पुत्रमष्टमं राजंस्त्वं पुरा मय्यविन्दथाः। स चायं पुरुषव्याघ्र! सर्वास्त्रविदुत्तमः। गृहाणेमं महाराज! मया संवर्द्धितं सुतम्। आदाय पुरुषव्याघ्र! नयस्वैनं गृहं विभो!" भा०आ० १००अ० "गङ्गाज। लङ्केशवनारिकेतुः" भा०वि० ३८अ०। गङ्गाजेत्यत्र मुद्रितपुस्तके नदीजेति पाठः। कार्त्तिकेयस्य गङ्गातो जन्मकथा अग्निगर्भशब्दे ५५पृ० उक्ता। गङ्गाजातगङ्गातनयादयोऽप्युभयत्र।

गङ्गाटेय पु० गङ्गाया नद्यास्तटे याति या—क पृषो० तलोपः अलुक् स०। (चिङ्गिड़ी) मत्स्यभेदे त्रिका०।

गङ्गादत्त पु० गङ्गया दत्तः। भीष्मे गङ्गाजशब्दे दृश्यम्।

गङ्गादित्य पु० काशीस्थे विश्वेशाद्दक्षिणस्थिते आदित्यभेदे "गङ्गादित्योऽस्ति तत्रान्यो विश्वेशाद्दक्षिणेन वै। तस्य दर्शनमात्रेण नरः शुद्धिमियादिह। यदा गङ्गा समायाता भगीरथपुरस्कृता। तदा गङ्गां परिष्टोतुं रविस्तत्रैव संस्थितः। तस्याप्यहर्निशं गङ्गां संमुखीकृत्य भास्करः। परिष्टौति प्रसन्नात्मा गङ्गाभक्तवरप्रदः। गङ्गादित्यं समाराध्य वाराणस्यां नरोत्तमः। न जातु दुर्गतिं क्वापि लभते च न रोगभाक्" काशीख०५१अ०।

गङ्गाद्वार न० गङ्गाया भूम्यवतरणद्वारम्। मायापुर्यां हरिद्वारे "ततो मायापुरीं प्राप्तः दुष्प्रापां पापकारिभिः। यत्र सा वैष्णवी माया जन्तून् पाशैर्न पाशयेत्। केचिदूचुर्हरिद्वारं मोक्षद्वारं जगुः परे। गङ्गाद्वारञ्च केऽप्याहुः केचिन्मायापुरीं पुनः। यतोविनिर्गता गङ्गा ख्याता भागीरथी भुवि। यन्नामोच्चारणात् पुंसां पापं याति सहस्रधा। वैकुण्ठस्यैकसोपानं हरिद्वारं जगुर्जनाः। तत्राप्लुता नरा यान्ति तद्विष्णोः परमं पदम्" काशीख०७अ०।

गङ्गाधर पु० गङ्गां धरति मूर्द्ध्नि धृ—अच् ६त०। १महादेवे अमरः। गङ्गाशब्दे तद्धारणकथा दृश्या गङ्गाभृदादयोऽप्यत्र। २समुद्रे त्रिका०। लोलम्बराजोक्ते जीर्णातिसारनाशके चूर्णभेदे यथा "धातक्यामलकीपयोधरशुकीकट्वङ्गयष्टीमधुश्रीजम्ब्वाम्रफलास्थिनागरबिषाह्रीवेरलोध्रेन्द्रजैः। तुल्यांशं विहितं सतण्डुलजलं गङ्गाधराख्यं महच्चूर्णं तूर्णमपाकरोति सकलं जीर्णातिसारं परम्"।

गङ्गाधररस पु० वैद्यकप्रसिद्धे औषधभेदे।

गङ्गापत्री स्त्री गङ्गेव शुभ्रं पत्रमस्याः ङीप्। सुगन्धिकायां वृक्षभेदे राजनि०।

गङ्गापुत्र पु० ६त०। गङ्गातनये १भीष्मे २कार्त्तिकेये च "लेटात् तीवरकन्यायां गङ्गापुत्र इति स्मृतः" ब्रह्मवै०पु० उक्ते सङ्कीर्णजातिभेदे (मुरदाफराश)।

गङ्गायात्रा स्त्री० गङ्गामुद्दिश्य यात्रा। गङ्गामरणार्थं यात्रायाम्।

गङ्गालहरी स्त्री ६त०। १गङ्गायास्तरङ्गसन्ततौ २जगन्नाथपण्डितरचिते गङ्गास्तोत्रभेदे च।

गङ्गावतार पु० गङ्गाया अवतारः ब्रह्मलोकात् भूमौ पतनमत्र। गङ्गाद्वाररूपे तीर्थभेदे ६त०। तस्या भूमौ २अवतरणे च। "भगीरथ इव दृष्टगङ्गावतारः" काद०।

गङ्गावाक्यावली गङ्गामाहात्म्यादिप्रतिपादकानां वाक्यानामावली। स्मृतिनिबन्धभेदे।

गङ्गासागर पु० गङ्गया सङ्गतः सागरः शा० त०। गङ्गासागरयोः सङ्गमरूपे तीर्थभेदे।

गङ्गासुत पु० ६त०। १भीष्मे, २कार्त्तिकेये च हेम०।

गङ्गाह्रद पु० गङ्गाया ह्रद इव। भारतप्रसिद्धे स्वस्तिपुरस्थे १कूपरूपे तीर्थभेदे। "ततः स्वस्तिपुरं गच्छेत्" इत्युपक्रमे "गङ्गाह्रदश्च तत्रैव कूपश्च भरतर्षभ!। तिस्रः कोट्यस्तु तीर्थानां तत्र कूपे महीपते!। तत्र स्नात्वा नरो राजन्! स्वर्गलोकं प्रपद्यते" भा०व० ८३अ०। २कोटितीर्थस्थे तीर्थभेदे च "कोटितीर्थे सुतपसा लभेदिह सुवर्णकम्। गङ्गाह्रदश्च तत्रैव तीर्थं भरतसत्तम!। तत्र स्नायीत धर्म्मज्ञ! ब्रह्मचारी समाहितः। राजसूयाश्वमेधाभ्यां फलं विन्दति मानवः"। तत्राध्याये "६त०। ३गङ्गायाह्रदे च।

गङ्गुक पु० कङ्गुक+पृषो०। कङ्गौ धान्यभेदे (काङ्नी) सुश्रु०। "रक्तशालियष्टिकगङ्गुकमुकुन्दकपाण्डुकपीतकप्रमोदककालकाशनकपुष्पककर्दमकशकुनाहृतसुगन्धककलमनीवारकोद्रवोद्दालकश्यामाकगोधूमवेणुयवादयः"।

गङ्गोद्भेद पु० गङ्गायाः उद्भेदः प्रथमप्रकाशो यत्र। तीर्थभेदे। "गङ्गोद्भेदं समासाद्य तर्पयेत् पितृदेवताः। वाजपेयमवाप्नोति ब्रह्मभूतो भवेत् सदा" भा०वन०८१अ०

गङ्गोज्झ न० गङ्गया उज्झ्यते उज्झ—कर्मणि घञ्। गङ्गास्रोतःशून्ये जलादौ।

गङ्गोल पु॰ गोमेदकनामके मणिभेदे हारावली।

गच्छ पु॰ गम–सम्प॰क्विप् मलोपे तुक् च गतं गतिं छ्यति छो–क। १वृक्षे त्रिका॰। लीलावत्युक्ते श्रेढीव्यवहारे प्रवृत्तगत्यादिक्रियाविरतिकारके २पदसंज्ञे स्थाने पु॰। तज्ज्ञानार्थं तत्राह "श्रेढीफलादुत्तरलोचनघ्नाच्चयार्द्धवर्गान्तरवर्गयुक्तात्। मूलं मुखोनं चयखण्डयुक्तं चयोद्धृतं गच्छमुदाहरन्ति। उदाहरणम्। द्रम्मत्रयं यः प्रथमेऽह्नि दत्त्वा दातुं प्रवृत्तो द्विचयेन तेन। शतत्रयं षष्ट्यधिकं द्विजेभ्यो दत्तं कियद्भिर्दिवसैर्वदाशु। न्यासः आदिः।३। चयः।२। गच्छः।०। सर्वधनं ३६०। लब्धो गच्छः १८। अथ द्विगुणोत्तरादिफलानयने करणसूत्रं सार्द्धवृत्तम्। विषमे गच्छे व्येके गुणकः स्थाप्यः समेऽर्द्धिते वर्गः। गच्छक्षयान्त्यमन्त्याद्व्यस्तं गुणवर्गजं फलं यत्तत्। व्येकं व्येकगुणोद्धृतमादिगुणं स्याद्गुणोत्तरे गणितम्। उदाहरणम्। पूर्वं वराटकयुगं येन द्विगुणोत्तरं प्रतिज्ञातम्। प्रत्यहमर्थिजनाय स मासे निष्कान् ददाति कति। न्यासः आदिः।२। चयो द्विगुणः २। गच्छः।३०। लब्धा वराटकाः। २१४७८३६४६। निष्कवराटकाभिर्भक्ता जाता निष्काः।१०४८५७। द्रम्माः।९। पणाः।९। काकिण्यौ।२। वराटकाः।६। उदाहरणम्। आदिर्द्विकं सखे! वृद्धिः प्रत्यहं त्रिगुणोत्तरा। गच्छः सप्तदिनं यत्र गणितं तत्र किं वद। न्यासः। आदिः।२। चयोगुणः ३। गच्छः।७। लब्धं गणितम्।२१८६"

शब्दकल्पद्रुमे निर्विसर्गगच्छेत्यस्य विभक्त्यन्तस्य शब्दत्वकल्पनेनार्थकथनमतीव हास्यास्पदम् गच्छेत्यस्य विभक्त्यन्ततया पदत्वेन शब्दत्वाभावात् अन्यथा नानाविभक्तियोगेन नानाशब्दार्थकथनापत्तेः।

गज मदे स्वने च भ्वा॰ पर॰ अक॰ सेट्। गजति अगाजीत् अजगीत्। जगाज। गजः।

गज स्वने भ्वा॰ इदित् पर॰ अक॰ सेट्। गञ्जति अगञ्जीत्। जगञ्ज। गञ्ज्यते। गञ्जा। [जत् त।

गज स्वने चुरा॰ उभ॰ अक॰ सेट्। गजयति ते अजग

गज पुंस्त्री॰ गज–मदे अच्। १हस्तिनि "नगजा न गजा दयिता दयिताः" भट्टिः। इभशब्दे विवृतिः। स्त्रियां जातित्वात् ङीष्। २अष्टसंख्यायाम् गजानामैरावतादीनामष्टत्वात् तथात्वम्। "कृत्वा विघ्नं गजैर्हृत्वा" ज्यो॰त॰ "गजभुक्तशेषम्" तन्त्रसा॰। "अरत्नीनां शतान्यष्टावेकषष्ट्यान्वितानि च। गजप्रमाणमाख्यातं मुनिभिर्मानवेदिभिः" शब्दार्थचि॰ उक्ते ३मानभेदे। "साधारणनराङ्गुल्या त्रिंशदङ्गुलको गजः" इत्युक्ते ४मानभेदे। ५मानमात्रे ६वास्तुमानभेदे च मेदि॰। स च ज्यो॰त॰उक्तः यथा "प्रस्तारदैर्घ्यमानं तु स्वहस्तेन तथा नरैः। कृत्वा विघ्नं गजैर्हृत्वा वास्तुमाननिरूपणम्। ध्वजो धूमश्च सिंहश्च श्वा वृषः खर एव च। गजः काकपदं चैव ज्ञातान्यष्टौ च वास्तुनः" ज्यो॰त॰। "पुष्टिर्गजे काकपदे विनाशः" तत्फलम् ७औषधपाकार्थे गर्त्तभेदे वैद्यकम् गजपुटशब्दे दृश्यम्। गजानां समूहः तल्। गजता तत्समूहे स्त्री। ततः ऊर्द्ध्वमाने दघ्नच्, गजदघ्न, द्वयसच्, गजद्वयस, गजतुल्योर्द्ध्वपरिमाणे त्रि॰। स्त्रियां ङीप्। "द्वितीयश्च तृतीयश्च ऊर्द्ध्वमाने मतो मम" व्या॰का॰उक्तेः ऊर्द्ध्वमान एव तयोः प्रयोगः। परिमाणमात्रे तु मात्रच्। गजमात्र इत्येव त्रि॰। [हस्तिकन्दे वृक्षे राजनि

गजकन्द पु॰ गजो गजदन्त इव कन्दोऽस्य। (हातिकाँदा)

गजकर्ण पु॰ गजस्य कर्ण इव कर्णोऽस्य। १यक्षभेदे "कुस्तुम्बरः पिशाचश्च गजकर्णो विशालकः" भा॰स॰१०अ॰। यक्षकथने। २ओषधिभेदे स्त्री ङीप्। "गजकर्णी तु तिक्तोष्णा तथा वातकफान् जयेत्। शीतज्वरहरा स्वादुः पाके तस्यास्तु कन्दकः। पाण्डुरोगकृमिप्लीहागुल्मानाहोदरापहः। ग्रहण्यर्शोविकारघ्नो वनसूरणकन्दवत्" भावप्र॰।

गजकूर्माशिन् पु॰ गजश्च कूर्मश्च तौ अश्नाति अश–भोजने णिनि। १गरुड़े शब्दरत्ना॰ गजकच्छपभोजोत्यादयोऽप्यत्र। तौ च विभावसुप्रतीकसुतौ अन्योन्यशापाद् गजकूर्मतां प्राप्तौ गरुड़ेन भक्षितौ यथाह भा॰ आ॰ २९ अ॰

"आसीद्विभावसुर्नाम महर्षिः कोपनो भृशम्। भ्राता तस्यानुजश्चासीत् सुप्रतीको महातपाः। स नेच्छति धनं भ्रात्रा सहैकस्थं महामुनिः। विभागं कीर्त्तयत्येव सुप्रतीको हि नित्यशः। अथाब्रवीच्च तं भ्राता सुप्रतीकं विभावसुः। विभागं बहवो मोहात् कर्त्तुमिच्छन्ति नित्यशः। ततो विभक्तास्त्वन्योऽन्यं विरुध्यन्तेऽर्थमोहिताः। ततः स्वार्थपरान् मूढान् पृथग्भूतान् स्वकैर्धनैः। विदित्वा भेदयन्त्येतानमित्रा मित्ररूपिणः। विदित्वा चापरे भिन्नानन्तरेषु पतन्त्यथ। भिन्नानामतुलो नाशः चिरमेव प्रवर्त्तते। तस्माद्विभागं

भ्रातॄणां न प्रशंसन्ति साधवः। गुरुशास्त्रेऽनिबद्धानामन्योऽन्येनाभिशङ्किनाम्। नियन्तुं नहि शक्यस्त्वं भेदतो धनमिच्छसि। यस्मात्तस्मात् सुप्रतीक! हस्तित्वं समवाप्स्यसि। शप्तस्त्वेवं सुप्रतीको विभावसुमथाब्रवीत्। त्वमप्यन्तर्जलचरः कच्छपः सम्भविष्यसि। एवमन्योऽन्यशापात्तौ सुप्रतीकविभावसू। गजकच्छपतां प्राप्तावर्थार्थं मूढचेतसौ। रोषदोषानुषङ्गेण तिर्य्यग्योनिगतावुभौ। परस्परद्वेषरतौ प्रमाणबलदर्पितौ। सरस्यस्मिन्महाकायौ पूर्ववैरानुसारिणौ। तयोरन्यतरः श्रीमान् समुपैति महागजः। यस्य बृंहितशब्देन कूर्म्मोऽप्यन्तर्ज्जलेशयः। उत्थितोऽसौ महाकायः कृत्स्नं विक्षोभयन् सरः। यं दृष्ट्वा वेष्टितकरः पतत्येष गजो जलम्। दन्तहस्ताग्रलाङ्गूलपादवेगेन वीर्य्यवान्। विक्षोभयंस्ततो नागः सरो बहुझषाकुलम्। कूर्म्मोऽप्यभ्युद्यतशिरा युद्धायाभ्येति वीर्य्यवान्। षडुच्छ्रितो योजनानि गजस्तद्द्विगुणायतः। कूर्म्मस्त्रियोजनोत्सेधो दशयोजनमण्डलः। तावुभौ युद्धसम्मत्तौ परस्परवधैषिणौ। उपयुज्याशु कर्म्मेदं साधयेहितमात्मनः। महाभ्रघनसङ्काशौ तौ भुक्त्वाऽमृतमानय"।

इत्येवं पित्रानुशिष्टो गरुड़स्तावभक्षयत् यथाह तत्रैव ३०अ०। "भक्षयामास गरुड़स्तावुभौ गजकच्छपौ"।

गजकृष्णा स्त्री गज इव कृष्णा। गजपिप्पल्याम् भावप्र० गजपिप्पलीशब्दे दृश्यम्।

गजचिर्भ(र्भि)टा स्त्री गजप्रिया चिर्भ(र्भि)टा शा०त०। इन्द्रवारुण्याम् (राखालशशा) रत्नमा०।

गजचिर्भिट पु० गजचिर्भिटाया इव आकारोऽस्त्यस्य अच्। गोडुम्बायाम् त्रिका०। [राजनि०।

गजचिर्भिटी स्त्री गजप्रिया चिर्भिटी। १माहेन्द्रवारुण्याम्

गजच्छाया स्त्री "यदेन्दुः पितृ(१०)दैवत्ये सूर्य्यश्चैव करे(१३)स्थितः याम्या १४तिथिर्भवेत् सा हि गजच्छायेति कीर्त्तिता" १इत्युक्ते, "कृष्णपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः। यदा तदा गजच्छाया" २इत्युक्ते च योगभेदे "द्विगुणा ह्यात्मनश्छाया दर्शे स्यादापराह्णिकी। गजच्छायेति सा प्रोक्ता इत्युक्ते ३दर्शापराह्णे च। "सैंहि यो यदा भानुं ग्रसते पर्वसन्धिषु। गजच्छाया तु सा प्रोक्ता श्राद्धं तत्र प्रकल्पयेत्" वराहोक्ते ४सूर्य्यग्रहणकाले च कुञ्जरच्छायशब्दे २०६८पृ०वि०। [ब्दायां गजोपरिस्थढक्कायाम् हारा०।

गजढक्का स्त्री गजोपरिस्था ढक्का। हस्तिमदसूचनार्थकृतश-

गजता स्त्री गजानां समूहः तल्। हस्तिसमूहे अमरः।

गजदन्त पु० गजस्य दन्ताविव दन्तावस्य। १गणेशे। २हस्तिदन्ततुल्यदन्तवति त्रि०। ६त०। ३करिदन्ते पु०। गणेशस्य तथात्वं च गजाननत्वेन तत्तुल्यदन्तत्वात्। गजदन्ताकृतित्वात् भित्तौ द्रव्यादिस्थापनार्थं गजदन्तद्वयाकारे ४नागदन्ते (दाण्डा) ५दन्तोपरिजातदन्ते तस्याकारेण गजदन्ततुल्यत्वात्तथात्वम्। [याम् राजनि०।

गजदन्तफला स्त्री गजदन्त इव फलमस्याः। १डङ्गरीलता-

गजदान न० ६त०। १हस्तिमदे। तस्य प्रस्रवणस्थानञ्च "करात् कटाभ्यां मेढ्राच्च नेत्राभ्याञ्च मदस्रुतिः" पालकाव्ये उक्तम्। ६त०। २हस्तिनो विसर्गे च। "गां पुच्छे करिणं करे" इत्युक्तेः तस्य करावच्छेदेन ग्राहकेण स्पर्शनेन तस्य दानं विहितम्।

गजनासा स्त्री ६त०। गजस्य शुण्डे। सा इव ऊरुर्यस्याः गजनासोरु(रू) करिशुण्डतुल्यनाकारायां स्त्रियाम्। उपमानपूर्वकत्वात् वा ऊङ्। "धर्मस्तु गजनासोरु! सद्भिराचरितः पुरा" रामा० २,३०,३०।

गजपति पु० ६त०। १श्रेष्ठगजे २अत्युच्चगजे च "गजपतिद्वयसीरपि हैमनः" माघः। [स्यालीढायां भावप्र०।

गजपादप पु० गजप्रियः पादपः शा०त०। (खुलकुडि) ख्याते

गजपिप्पली स्त्री गजोपपदा पिप्पली शाक०त०। स्वनामख्यातायां पिप्पल्याम्। "चविकायाः फलं प्राज्ञैः कथिता गजपिप्पली। गजकृष्णा कटुर्वातश्लेष्मनुत् वह्निवर्द्धिनी। उष्णा निहन्त्यतीसारश्वासकण्ठामयक्रिमीन्" भावप्र० हरतीति शेषः। "कूर्ची निर्दहनी गाठा त्र्यूषणं गजपिप्पली" सुश्रुतः।

गजपुट पु० "हस्तप्रमाणो गर्त्तो यः पुटः स तु गजाह्वयः" इत्युक्ते औषधपाकार्थे हस्तमित खाते गर्त्तभेदे वैद्यकम्।

गजपुर न० गजस्य हस्तिनामनृपस्य पुरम्। "युधिष्ठिरराजधान्याम् (दिल्ली) "स निर्ययौ गजपुराद्याजकैः परिवारितः" भा०आनु० १६७ अ०।

गजपुष्पी स्त्री गजस्कन्द इव गन्धयुतं पुष्पमस्याः। नागपुष्पायां लतायां शब्दार्थचि०। "गजपुष्पीमिमां फुल्लामुत्पाट्य शुभलक्षणाम्" रामा० कि० १।१२।३९।

गजप्रिया स्त्री ६त०। शल्लकीद्रुमे हेमच०।

गजबन्धनी स्त्री गजा बध्यन्तेऽत्र ल्युट् ङीप्। हस्तिबन्धनशालायां (हातिशाला) अमरः। [शालायां जटा०।

गजबान्धनी स्त्री गजस्य बन्धोऽस्त्यत्र इनि ङीप्। गज-

गजभक्षक पु॰ गजो भक्षकोऽस्य। अश्वत्थवृक्षे राजनि॰।

गजभक्ष्या स्त्री गजेन भक्ष्या। शल्लकीवृक्षे अमरः। गजेन भक्ष्यते कर्म्मणि घञ्। गजभक्षा तत्रार्थे स्त्री शब्दरत्ना॰।

गजमण्डली स्त्री गजानां सन्निवेशनभेदेन मण्डली परिवेशः वेष्टनाकारपरिधिः। गजानां सन्निवेशनविशेषेण परिधिरूपे वेष्टने। स्वार्थे क ह्रस्वः। तत्रार्थे। "चन्द्राकृतीनि गजमण्डलिकाभिरुच्चैः" माघः। ६त॰। २गजसमूहे च।

गजमाचल पुंस्त्री मच–कल्कने घञ् माचः गजस्य माचं शाठ्यं लुनाति लू–बा॰ ड। १सिंहे हारा॰ स्त्रियां जातित्वात् ङीष्।

गजमुक्ता स्त्री गजे तत्कुम्भे जाता मुक्ता। हस्तिकुम्भजाते मुक्ताभेदे "मुक्ताफलैः केशरिणां किराता" कुमा॰व्या॰ मल्लिनाथधृतवाक्यम् "करीन्द्रजीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि। मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरि" मुक्तैव स्वार्थे क ठञ्। गजमौक्तिकमप्यत्र। "गजमौक्तिकावलियुतेन वक्षसा" किरा॰ मल्लिनाथधृता॰ करिणां मुक्तायोनित्वे प्रमाणमाहागस्त्यः "जीमूतकरिमत्स्याहिवंशशङ्खवराहजाः। शुक्त्युद्भवाश्च विज्ञेया अष्टौ मौक्तिकयोनयः"।

गजमुख पु॰ गजस्य मुखं मुखमस्य। १गणेशे यथा च तस्य तन्मुखमुखता तथा इभाननशब्दे ९८१ पृ॰उक्ता। "प्रमथाधिपो गजमुखः" वृह॰सं॰५८अ॰। गजवदनादयोऽप्यत्र।

गजमोटन पुंस्त्री॰ गजं मोटयति चु॰ मुट–चोदे ल्यु। १सिंहे शब्दमा॰। स्त्रियां जातित्वात् ङीष्।

गजवल्लभा स्त्री ६त॰। १वक्रबीजायां गिरिकदल्यां, २शल्लक्याञ्च राजनि॰।

गजवीथी स्त्री उत्तरमार्गस्थे "रोहिण्यार्द्रामृगशिरो गजवीथ्यभिधीयते" इत्युक्ते १नक्षत्रत्रये। खगोलशब्दे २४५१ पृ॰ विवृतिः। ६त॰। २गजानामावलौ च।

गजशिक्षा स्त्री गजानां शिक्षा। गजचालनाभ्यासे "तथैव गजशिक्षायां नीतिशास्त्रेषु पारगः" भा॰आ॰१०९ अ॰।

गजशिरस् पु॰ गजस्य शिर इव शिरोऽस्य। १दैत्यभेदे "गजोदरोगजशिरागजस्कन्धोगजेक्षणः" हरिवं॰२४० अ॰। गजस्य तन्नामासुरस्य वा शिरः शिरोऽस्य। २गणेशे च। इभाननशब्दे ९८१ पृ॰ गजाननशब्दे च दृश्यम्।

गजसाह्वय पु॰ गजेन हस्तिनामकनृपेण सहितं आह्वयो यस्य। हस्तिनापुरे (दिल्ली)। "निर्ययुर्गजसाह्वयात्" भा॰ व॰ १अ॰। गजाह्वयमप्यत्र न॰।

गजस्कन्ध पु॰ गजस्य स्कन्ध इव स्कन्धोऽस्य। दैत्यभेदे गजशिरःशब्दे उदा॰ दृश्यम्। गजवत् संश्लिष्टस्कन्धे उत्तमपुरुषलक्षणयुते च।

गजाख्य पु॰ गजं गजकर्णमाख्याति पत्रेण आ+ख्या–क। १चक्रमर्दवृक्षे राजनि॰। तस्य पत्रस्य गजकर्णतुल्याकारत्वात् तथात्वम्। २गजतुल्यनामनि हस्तिनापुरे न॰

गजाग्रणी पु॰ ६त॰। ऐरावते हस्तिनि शब्दर॰।

गजाजीव पु॰ गजैस्तत्पालनादिभिराजीव्यते जीव–घञ्। १हस्तिपालके हेमच॰।

गजाण्ड न॰ गजस्याण्डमिव मूलं यस्य। १पिण्डमूले राजनि॰

गजादिनामन्(मा) स्त्री गज इति शब्द आदौ यस्य तादृशं नामास्य वा डाप्। गजपिप्पल्याम् "कालामृताशिग्रुपुनर्नवार्कगजादिनामाकरहाटकुष्ठैः" सुश्रुतः।

गजानन पु॰ गजस्याननमाननं यस्य। १गणेशे अमरः। इभाननशब्दे ९८१पृ॰ दृश्यम्। स्कन्दपु॰गणेशख॰ ११अ॰ तु अन्यथा तस्य गजाननता वर्णिता तत्र गणेशस्य मस्तकशून्यतयोत्पत्तौ पुरा शिवच्छिन्नेन कैलासे स्थापितेन गजासुरमस्तकेन मुखयोजनं तेन कृतमित्युक्तं यथा "गुरुरुवाच। अवतारो यदि धृतः साधुत्राणाय भो विभो!। प्रकाशयाशु वदनं सर्वेषां शोकनाशनम्। नयस्व सर्वदेवानामानन्दं हृदयं प्रभो!। शिव उवाच। प्रत्युवाच गुरुं पुत्रः पार्वत्या हीनमस्तकः। शिशुरुवाच। मद्देशाख्येन राज्ञा ते प्रणतौ चरणौ यदा। तदाशीर्या त्वया दत्ता तस्मै राज्ञे गुरो! मुदा। गजयोनौ जनिर्मुक्तिः शिवहस्तादुदीरिता। तत्सर्वमभवत् तस्य विद्यते चारुमस्तकः। पूज्यमानं शिवेनास्ते शुण्डादण्डः सुशोभनः। अवतारकरोऽसौ मे गुरोऽस्ति भविता सुखम्। शिव उवाच। आश्चर्यपूर्णहृदयो गुरुरूचे पुनः शिशुम्। गुरुरुवाच। भगवन्! विश्वरूपोऽसि त्रिकालज्ञोऽखिलेश्वरः। मया यदुदितं तस्मै त्वया ज्ञातं यतः प्रभो!। अहमीशस्वरूपन्ते परिच्छेत्तुं न च क्षमः। स्तुत्वैवं ब्रह्मणः पुत्रो नारदस्तत्र चाब्रवीत्। नारद उवाच।

"एवमेवावतीर्णोऽसि हीनमूर्द्धा कथं प्रभो!। अथवा बालरूपस्य छिन्नं केन तच्छिरः। एतन्मे संशयं छिन्धि कृपया परमेश्वर!। शिव उवाच। निपीय नारदीं वाणीमुवाच शिशुरुच्चकैः। शिशुरुवाच। सिन्दूरः कोऽपि

दैत्यो मे वायुरूपधरोऽच्छिनत् । अष्टमे मासि सम्पूर्णे प्रविश्योमोदरं शिरः । तमिदानीं हनिष्येऽहं गजास्यं साम्प्रतं द्विज ! । शिवउवाच । श्रुत्वैवं नारदः प्राह शिशुरूपिणमीश्वरम् । नारदउवाच । अकिञ्चिज्ज्ञा वयं देव ! योजनेऽस्य मुखस्य ते । त्वमेव च स्वभावेन मुखमेतन्नियोजय । शिवउवाच । वदतीत्थं मुनि यावत्तावत् स ददृशेऽखिलैः। सर्वावयवसम्पूर्णो गजाननउमासुतः । कीरीटकुण्डलधरो युगबाहुः सुलोचनः । वामदक्षिणभागे च सिद्धिवृद्धिविराजितः । दृष्ट्वा विनायकं स्कन्द ! तथाभूतं निजेच्छया । हर्षेणोत्फुल्लनयना देवाः सर्वे तदाऽब्रुवन् । गजानन इति ख्यातो भवितायं जगत्त्रये" "एवं भाद्रचतुर्थ्यां स अवतीर्णो गजाननः" इति च तत्राध्याये । ६त०। हस्तिमुखे न०।

गजारि पु०६त०। १सिंहे । २वृक्षभेदे हड्डचन्द्रः। ३शिवे च गजासुरद्वेषिशब्दे दृश्यम् । [(माङ्गत) अमरः

गजारोह पु० गजमारोहति आ+रुह—अण् । १हस्तिपाले

गजा(द्)शन पु० गजैरश्य(द्य)ते कर्मणि ल्युट् । १अश्वत्थद्रुमे । २शल्लक्यां स्त्री ङीप् । ३गजभक्षायाम् (भाग शब्दच० ४पद्ममूले न० रत्ना० ।

गजासुर पु० गजाकारोऽसुरः । असुरभेदे ।

तस्योत्पत्तिकथा च स्कन्दपु० गणेशख० १०अ० यथा ·

साम्प्रतं कथयिष्यामि गजासुरकथानकम् । पुरा युगे स राजासीत्कीर्तिसो लोकपालकः । लक्ष्मीवान् रूपसम्पन्नो वेदशास्त्रार्थकोविदः । देवद्विजार्चनरत आत्मविद्याविशारदः" । "महेश इति नाम्ना च विख्यातो भुवनत्रये" इत्युपक्रम्य "उत्पत्तिमाप्स्यते राजन् त्वया योनौ गजस्य हेति" गुरुवाक्यमुपन्यस्य "कदाचिद्गच्छता तेन वीक्षितो नारदः पथि । अवमन्य ययौ तं तु सप्तोऽसौ मुनिना रुषा । इभास्यो भवितासि त्वमौद्धत्यादन्यजन्मनि । गजासुर इति ख्यातिं यास्यसि त्वं नराधिप ! । कैलासे प्राप्स्यसे स्थानमन्ते तस्यैव जन्मनि । अवमन्य यतो यातो मामिदानीं नराधम ! । इत्युक्त्वान्तर्हितो भूत्वा स स्वयं नारदो मुनिः । गुरुनारदवाक्याभ्यां महेशो विस्मयं गतः । गते बहुतिथे काले राजा पञ्चत्वमाप सः । पश्य लीकानने स्कन्द ! करिण्यां जनिमाप सः। इभास्यो बलवान् वीरः सर्वत्रासौ नराकृतिः" ।

गजासुरद्वेषिन् पु० गजासुरं द्वेष्टि द्विष—णिनि ६त० । महादेवे कृत्तिवासःशब्दे विवृतिः ।

स्कन्दपु०गणेशख० १०अ० तु तं हत्वा तस्य स्वभक्तिमालक्ष्य तच्चर्मधारणं तच्छिरसः कैलासे स्थापनञ्च वर्णितं यथा "जघान तं त्रिशूलेन स्कन्द! कोपात् गजासुरम्" इत्युपक्रम्य "तव हस्तादभून्मृत्युरन्ते ते दर्शनं यतः । उक्तञ्च गुरुणा पूर्वं भविष्यं नारदेन च । कैलासन्तु गते तस्मिन् गृहाणास्य चर्म चाननम् । चर्मणः परिधानञ्च मुखस्यापि प्रपूजनम् । भक्तवात्सल्यभावेन क्रियतेऽद्यापि पञ्चमुख !" । अस्यैव शिरसा विमस्तकस्य विनायकस्य गजाननतेति गजाननशब्दे दर्शितम् ।

गजास्य पु० गजस्यास्यमास्यमस्य । १गणेशे हेम० । ६त० । २हस्तिवदने न० । गजस्यास्यमिवास्यं यस्य । ३गजासुरे पु० गजासुरशब्दे दृश्यम् ।

गजाह्व न०गजसहिता आह्वा यस्य शाक० त० । १हस्तिनापुरे मेदि० । गजाह्वयमयत्र । "युधिष्ठिरस्यानुमते वनवासात् गजाह्वयम्" भा० व० ६अ० । २तत्पुरयुक्ते देशभेदे तद्वासिषु तन्नृपेषु च पु० बहुव०, स च देशः वृहत्सं० १४अ० कूर्म्मविभागे मध्यस्थतयोक्तः । "गजाह्वयाश्चेति मध्यमिदम्" । [मेदि०। २हस्तिनापुर्याञ्च ।

गजाह्वा स्त्री गजोपपदा आह्वा अस्याः । १गजपिप्पल्याम्

गजेन्द्र पु० गज इन्द्र इव व्याघ्रा०उपमितस०, ६त०वा । १श्रेष्ठगजे । २गजयूथपतौ च । "नेत्रश्रियं विकसतो विदधुर्गजेन्द्राः" माघः । अगस्त्यशापेन गजेन्द्रतां प्राप्ते ३इन्द्रद्युम्ननृपे च तस्य तथाशापादिकथा भाग०८स्क०४अ०उक्ता यथा

"स वै पूर्व्वमभूद्राजा पाण्ड्योद्रविडसत्तमः । इन्द्रद्युम्न इति ख्यातो विष्णुव्रतपरायणः । स एकदाऽऽराधनकाल आत्मवान् गृहीतमौनव्रत ईश्वरं हरिम् । जटाधरस्तापस आप्लुतोऽच्युतं समर्चयामास कुलाचलाश्रमः । यदृच्छया तत्र महायशा मुनिः समागमच्छिष्यगणैः परिश्रितः । तं वीक्ष्य तूष्णीमकृतार्हणादिकं रहस्युपासीनमृषिश्चुकोप ह ! तस्मा इमं शापमदादसाधुरयं दुरात्माऽकृतबुद्धिरद्य । विप्रावमन्ता विशतां तमिस्रं यथा गजस्तब्धमतिः स एव । श्रीशुक उवाच । एवं शप्त्वा गतोऽगस्त्यो भगवान्नृप ! सानुगः । इन्द्रद्युम्नोऽपि राजर्षिर्दिष्टं तदुपधारयन् । आपन्नः कौञ्जरीं योनिमात्मस्मृतिविनाशिनीम् । हर्यर्च्चनानुभावेन यद्गजत्वेऽप्यनुस्मृतिः" ।

ततः तच्छापेन गजेन्द्रतां प्राप्तस्य कदाचित् त्रिकूटपर्वते वरुणोद्यानस्थसरसि निमग्नस्य ग्राहेण ग्रहणे

पूर्वजन्मार्ज्जितहरिसेवावासनावशात् हरिस्तवनमेव तदुपायतया संचिन्त्य तस्य स्तवने कृते हरिणा तस्य ततो विमोक्षणं कृतं तेनैव च दिव्यगतिलाभस्य तस्य जात इत्येषा कथा तत्रैव १० अ० स्थिता दिङ्मात्रं ततः उदाह्रियते ।

“घृणी करेणुः करभांश्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोऽजमायया । तं तत्र कश्चिन्नृप! दैवचोदितो ग्राहो बलीयांश्चरणे रुषाऽग्रहीत्। यदृच्छयैवं व्यसनं गतो गजो यथाबलं सोऽतिबलो विचक्रमे । यथातुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा । विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहास्तारयितुं न चाशकन् । नियुध्यतोरेवमिभेन्द्रनक्रयोर्विकर्षतोरन्तरतो बहिर्मिथः । समाः सहस्रं व्यगमन्महीपते! सप्राणयोश्चित्रममंसतामराः । ततो गजेन्द्रस्य मनोबलौजसां कालेन दीर्घेण महानभूद्व्ययः । विकृष्यमाणस्य जलेऽवसीदतो विपर्ययोऽभूत् सकलं जलौकसः । इत्थं गजेन्द्रः स यदाप सङ्कटं प्राणस्य देही विवशो यदृच्छया । अपारयन्नात्मविमोक्षणे चिरं दध्याविमां बुद्धिमथाभ्यपद्यत । न मेमिमा ज्ञातय आतुरं गजाः कुतः करिण्यः प्रभवन्ति मोचितुम् । ग्राहेण पाशेन विधातुरावृतोऽप्यहं च तं यामि परं परायणम् । यः कश्चनेशो बलिनोऽन्तकोरगात् प्रचण्डवेगादभिधावतो भृशम् । भीतं प्रपन्नं परिपाति, यद्भयान्मृत्युः प्रधावत्यरणं तमीमहि”। भा० ८।२ अ० ।

ततः तत्कृतस्तुतिस्तु परत्र ३अ० शेषे, हरिणा ततो गजेन्द्रस्य मोक्षणमुक्तं यथा

एवं गजेन्द्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिङ्गभिदाभिमानाः । नैते यदोपससृपुर्निखिलात्मकत्वात्तत्राखिलामरमयो हरिराविरासीत् । तं तद्वदार्त्तमुपलभ्य जगन्निवासः स्तोत्रं निशम्य दिविजैः सह संस्तुवद्भिः। छन्दोमयेन गरुडेन समुह्यमानश्चक्रायुधोऽभ्यगमदाशु यतो गजेन्द्रः । सोऽन्तःसरस्युरुबलेन गृहीत आर्त्तो दृष्ट्वा गरुत्मति हरिं ख उपात्तचक्रम् । उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छ्रान्नारायणाखिलगुरो! भगवन्नमस्ते । तं वीक्ष्य पीडितमजः सहसाऽवतीर्य स ग्राहमाशु सरसः कृपयोज्जहार । ग्राहाद्विपाटितमुखादरिणा गजेन्द्रं सम्पश्यतां हरिरमूमुचदुच्छ्रियाणाम्” ।

गजेन्द्रमोक्षणरूपस्य हरिचरितस्य श्रवणे फलमाह “एतन्महाराज! तवेरिता मया कृष्णानुभावो गजराजमोक्षणम् । स्वर्ग्यं यशस्यं कलिकल्मषापहं दुःस्वप्ननाशं कुरुवर्य! शृण्वताम् । यथानुकीर्त्तयन्त्येतच्छ्रेयस्कामा द्विजातयः । शुचयः प्रातरुत्थाय दुःस्वप्नाद्युपशान्तये” । तद्गजेन्द्रकृतस्तवमाहात्म्यमपि तत्रैवोक्तं यथा “ये मां स्तुवन्त्यनेनाङ्ग प्रतिबुध्य निशात्यये । तेषां प्राणात्यये चाहं ददामि विमलां मतिम्” तं प्रति हरेर्वरदानम् ।

गजेष्टा स्त्री गजानामिष्टा । विदार्य्याम् भूमिकुष्माण्डे राजनि० ।

गजोदर पु० गजस्योदरमिवोदरमस्य । दैत्यभेदे हरिवं० । गजाशिरःशब्दे दृश्यम् । [राजनि० ।

गजोषणा स्त्री गजोपपदा ऊषणा । गजपिप्पल्याम् ।

गञ्ज पु० गजि—घञ् । १अवज्ञायाम् हेमच० । आधारे घञ् । २गोष्ठागारे हारा० । ३भाण्डागारे ४खनौ मेदि० । ५पामरगृहे, ६हट्टस्थाने, ७मद्यभाण्डे, शब्दरत्ना० ८मदिरागृहे स्त्री टाप् अमरः ।

गञ्जन त्रि० गजि—खने णिच्—ल्यु । तिरस्कारके “नेत्रे खञ्जनगञ्जने सरसिजप्रसङ्गि पाणिद्वयम्” सा० द० । “युष्मत्कृते खञ्जनगञ्जनाक्षि! शिरोमदीयं यदि याति यातु” उद्भटः । “अलिकुलगञ्जनमञ्जनकम्” गीतगो० ।

गञ्जिका स्त्री गञ्जेव स्वार्थे क । मदिरागृहे शब्दर० ।

गड़ सेके भ्वा० पर० सक० सेट् । गडति अगाडीत्-अगडीत् । जगाड घटा० । गडयति-ते ।

गड़ वदनैकदेशे (गण्डव्यापारे) इदित् भ्वा० पर० अक० सेट् । गण्डति अगण्डीत् । जगण्डः गण्डः । गण्डूषः ।

गड़ पु० गड—सेके अच् । (गडुइ) गरघ्नीनामके मत्स्यभेदे । “गरघ्नी मधुरा तिक्ता तुवरा वातपित्तहृत् । कफघ्नी रुचिकृद्बल्यो दीपनी बलवीर्यकृत्” भावप्र० । तस्य पाकविशेषे गुणा उक्ता वैद्यके “पुच्छशीर्षेण रहिताः कासमर्द्दविमर्द्दिताः । हिङ्गुतैले च संतप्ता गडमत्स्यस्य खण्डकाः । गडो वातहरो बल्यो हृद्यः पथ्योऽग्निवर्द्धनः । सुरुच्यः शुक्रदोऽप्ययं किञ्चित् कफकरः सरः” २अन्तराये मेदि० । ३परिखायां ४व्यवधाने शब्दर० । ५देशभेदे शाम्बरे राजनि० । गड—संज्ञायां कन् । गडक (गडुइ) मत्स्यभेदे अमरः ।

गड़देशज न० गडदेशे शाम्बरदेशे जायते जन-ड । शाम्बरदेशजातलवणे राजनि० ।

गड़यन्त पु० घटा० गड–णिच्–झच् ह्रस्वः । १मेघे सि०कौ०

गड़लवण न० गडदेशजं लवणम् । शाम्बरदेशजे लवणभेदे राजनि०। "गड़ोत्थं लघुवातघ्नमत्युष्णं भेदि पित्तलम् । तीक्ष्णं व्यवायि सूक्ष्मञ्चाभिष्यन्दि कटुपाकि च" भावप्र०

गड़ि पु० गड–इन् । १वत्सतरे राजनि०। २भारवहनादिस्वकार्य्ये अलसे गवादौ (गड़िया) "गुणानामेव दौरात्म्याद्धुरि धुर्य्यो नियुज्यते । असंजातकिणस्कन्धः सुखं स्वपिति गौर्गडिः" काव्यप्र० ।

गडु पु० गड–उन् । १गलगण्डे घाटामस्तकयोर्मध्ये मांसवृद्धिकारके रोगभेदे भरतः । २कुब्जे मेदि० । ३शस्त्यास्त्रे शब्दर० । ४किञ्चुलके (केंचो) त्रिका० । गलगण्डवन्निरर्थके ५पदार्थे च "काव्यान्तर्गडुभूतत्वात् नालङ्कारः प्रहेलिका" सा० द० । "किमन्तर्गडुना" सर्वद० स० । अस्य कण्ठशब्देन समासे आहिता० वा पूर्वनि०। गडुकण्ठः, कण्ठगडुः ।

गडुक पु० गडुर्गलगण्ड इव कायति मध्ये कै–क । (गाड़ु) ख्याते भृङ्गारे पात्रभेदे तन्मध्यस्य गलगण्डाकृतित्वात् तथात्वम् । "घण्टागडुककुम्भादिस्नानोपस्करभाजनैः" काशी० ३अ०। २तदाकृतौ ऋषिभेदे पु० तस्य गोत्रापत्यम् इञ् । गाडुकि तदपत्ये पुंस्त्री अन्यशब्देन तस्य द्वन्द्वे अद्वन्द्वे च बहुषु इञोलुक् । गडुकास्तदृषेर्गोत्रापत्येषु ।

गडुर(ल) त्रि० गडुः कुब्जरोगोऽस्त्यस्य सिध्मा० लच् वा० र वा । १कुब्जे शब्दर० । स्त्रियां गौरा० ङीष् । गलगण्डवदाकृतिमत्त्वात् तस्य तथात्वम् । ततः ब्राह्मणा० भावे ष्यञ् । गाडुल्य तद्भावे न० कडा० कर्म्मधा० अस्य पूर्वनि० । खञ्जगडुलः गडुलखञ्जः ।

गडेर पुंस्त्री० गड–एरक् । १मेषे (गाडोल) । त्रिका० । जातित्वात् स्त्रियां ङीष् ।

गड़ोत्थ न० गड़ात् देशभेदात् उत्तिष्ठति उद्+स्था– क । शाम्बरदेशजे लवणभेदे राजनि० । [२पांसौ हेम० ।

गडोल पु० गड–ओलच् । १गुड़के (गुली) ग्रासभेदे उज्ज्व० ।

गड्डर(ल) पु० गड–बा० डर डल वा उस्य नेत्त्वम् । १मेषे ।

गड्डरि(लि)का स्त्री गड्डरं(लं) मेषमनुधावति ठन् । मेषानुगन्त्र्यां १मेषपङ्क्तौ । तत्सादृश्यादविच्छिन्नगतौ अज्ञातप्रवाहागममूले २धारावाहिनि च शब्दचि० ।

गड्डुक पु० गडुक+पृषो० । १भृङ्गारे जलपात्रभेदे शब्दर० पृषो० दीर्घमध्योऽपि तत्रार्थे ।

गण संख्याने अद० चु० उभ० सक० सेट् । गणयति ते अजीगणत् त अजगणत् त । गणयाम्–बभूव आस–चकार चक्रे । गणयितव्यः । गण्यः । गणयिता गणयन् । गणितम् गणनम् गणना । गणयित्वा । विगणय्य । गणः, "गणयति विहितहुताशविकल्पम्"गीतगो० "तां भक्तिरेवागणयत् पुरस्तात्"रघुः । "पदानि गणयन् गच्छ स्वानि नैषध ! कानिचित्"भा०व०२६१८। नलं प्रति कर्कोटकनागोक्तिः "यदि त्रिलोकी गणनापरा स्यात् तस्याः समाप्तिर्यदि नायुषः स्यात् । पारेपरार्द्धं गणितं यदि स्यात् गणेयनिःशेषगुणोऽपि स स्यात्"नैष०। "लीलाकमलपत्राणि गणयामास पार्वती"कुमा०। "अजीगणद्दाशरथं न वाक्यम्"भट्टिः। "याणीं काणभुजीमजीगणदवासासीच्च वैयासिकीम्"माघटी०,मल्लिनाथः "इह स्थितश्च भगवानादित्येष्वेव गण्यते" भा०आ० २६०२ श्लो०

अव+अवज्ञायाम् । "नार्थनूनैर्नावगणैरेकात्मभिरसाधनैः" भा० व० ८२अ० ।

वि+विशेषेण संख्याने"अदूरवर्त्तिनीं सिद्धिं राजन् ! विगणयात्मनः" रघुः ।

गण पु० गण–कर्मणि अच कर्त्तरि अच् वा । १समूहे । "गणानां त्वां गणपतिम्"यजु०२३,१९। "गणपतिं गणानां समूहानां पालकम्" वेददी० । २प्रमथे "सकलहंसगणं शुचि मानसम् शिवमगात्मजया च कृतेर्ष्यया सकलहं सगणं शुचिमानसम्" "गणानमेरुप्रसवावतंसाः"कुमा०। सेनाविशेषाणां ३सङ्ख्याविशेषे अमरः । स च अनीकिनीशब्दे १६९पृ०दर्शितेन"त्रयोगुल्मा गणो नाम"इत्यादिवाक्येन उक्तः तेन(रथाः२७गजाः२७ । अश्वाः ८१पदातिकाः १३५सर्वसमष्टिः२७०, इति संख्याविशेषः) । ४चोरनामगन्धद्रव्ये मेदि० । गणः प्रमथादिः वश्यत्वेन सत्त्वादिगुणगणः वश्यत्वेन वा गणाः गणदैत्यः नाश्यत्वेन वाऽस्त्यस्य अच् । ५गणेशे "गणदीक्षाप्रवर्त्तकः" महानि०। प्रमथाधिपत्वात् तस्य गणेशत्वम् । विवाहे वरकन्ययोर्मेलनज्ञानोपयोगिनि ६देवराक्षसमानुषसूचके ताराभेदवर्गे उपयमशब्दे १२५०पृ०विवृतः। "गणमैत्री भकूटं च नाड़ी चैते गुणाधिकाः" मुहूर्त्तचि० । "नो गणानां च दोषः" ज्यो०त० । ७ध्रुवादिसंज्ञके नक्षत्रविशेषसमूहे "उग्रः पूर्वमघान्तका ध्रुवगणः इत्यादि" ज्यो०त०। सम्भूय एकद्रव्यतापादनेन वाणिज्यकारिणिवणिक्समूहे च"श्रेणिनैगमपाषण्डिगणानामप्ययं विधिः" "गणद्रव्यं हरेद्यस्तु संविदं यश्च लङ्घयेत्" याज्ञ० ।

"भ्वाद्यदादी जुहोत्यादिर्दिवादिः स्वादिरेव च । तुदादिश्च रुधादिश्च तनक्र्यादिचुरादयः" उक्तेषु शबादिविकरणविशेषनिमित्तेषु दशसु धातुसमुदायेषु तद्युक्तत्वात् १०गणपाठग्रन्थेऽपि । पाणिनिरचिते ११स्वरादिस्वरूपप्रतिपादकग्रन्थे १२दैत्यभेदे स च दैत्यः अभिजिदपरनाम्नो गुणवतः गुणवत्यां जातः यथाह स्कान्दपु० गणेशख० ३अ० "अथ सोऽप्यभिजित् पत्न्या समुद्रस्नानमाययौ । पर्वणि श्रद्धया युक्तश्चक्रे स्नानं तया सह । तृषिता सा गुणवती पपौ चाञ्जलिना जलम् । यद्वीर्य्यं ब्रह्मणात्यक्तं दैवात्तदुदरे गतम्" । "भार्य्या गुणवती तस्य नवमासादनन्तरम् । पुत्रं प्रासूताऽह्नि शुभे दिव्यरूपं गुणाद्भुतम् । ज्योतिर्विद्भिरनुज्ञातो गण इत्यभिधां पिता । कृत्वाभ्युदयिकं चक्रे व्यतीते दशमेऽहनि"

स च महादेवमाराध्य लब्धवरस्त्रैलोक्यं निर्जित्य कपिलमुनेश्चिन्तामणिं हृतवान् तेन जातमन्युना तेन गणेशस्य सेवने कृते गणेशेन तद्गृहे अवतीर्य्य तं गणदैत्यं नाशितवान् इत्येषा कथा तत्रैव विस्तीर्णा दिङ्मात्रमुच्यते यथा "कथं नाशितवाञ्छम्भो ! गणदैत्यं विनायकः । तत्सर्वं कृपया देव ! कथयस्व समासतः । शिव उवाच । यथा नाशितवान् दैत्यं गणं दुष्टमतिं विभुः । तथाहं कथयिष्यामि तच्छृणुष्व षडानन" ६अ० इत्युपक्रम्य

"प्राप्तसंज्ञां परशुना हन्ति स्म नं रुषा विभुः । दृष्टवान् परशुं वीरमुख्यः सूर्यमिवाऽपरम् । सुतीक्ष्णं ज्वालया व्याप्तं कालचक्रनिभं शुभम् । दहन्तं दशदिग्भागान् प्रलयानलसन्निभम् । यदा तत्सादरं द्रष्टुमुपचक्राम दैत्यराट् । तदैवापातयच्छित्त्वा परशुस्तस्य मस्तकम् । सपर्वतवना पृथ्वी चाल्लसत् सागरैः सह । अभिजित्प्रमुखाः सर्वे रुरुदुः पतिते गणे" ७अ० ।

शस् गणशस् [illegible] कृत्वस् गणकृत्वस् वीप्सार्थे कारकार्थे [illegible] गणशब्दार्थे अव्य० । १३स्वपक्षे "सगणाय सपरिवाराय सायुधाय सशक्तिकाय इन्द्राय नमः" इति विधानपारिजा० । १४वाक्ये निघण्टुः ।

गणक त्रि० गण—ण्वुल् । १संख्याकारके २सांवत्सरिके पुं० । तस्य लक्षणगुणदोषादिकमुक्तं वृ०सं० २अ० यथा

"ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम् तत्कार्त्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता । स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ होरान्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ।

"अथातः सांवत्सरसूत्रं व्याख्यास्यामः । तत्र सांवत्सरोऽभिजातः प्रियदर्शनो विनीतवेषः सत्यवागनसूयकः समसंहतोपचितगात्रसन्धिरविकलश्चारुकरचरणनखनयनचिबुकदशनश्रवणललाटभ्रूत्तमाङ्गो वपुष्मान् गम्भीरोदात्तघोषः । प्रायः शरीराकारानुवर्त्तिनो हि गुणाश्च दोषाश्च भवन्ति । तत्र गुणाः । शुचिर्दक्षः प्रगल्भो वाग्मी प्रतिभानवान् देशकालवित् सात्त्विको न पर्षद्भीरुः सहाध्यायिभिरनभिभवनीयः कुशलोऽव्यसनी शान्तिपौष्टिकाभिचारस्नानविद्याभिज्ञो विबुधार्चनव्रतोपवासनिरतः स्वतन्त्राश्चर्य्योत्पादितज्ञानप्रभावः पृष्टाभिधाय्यन्यत्र दैवात्ययाद्ग्रहगणितसंहिताहोराग्रन्थार्थवेत्ता । तत्र ग्रहगणिते पौलिशरोमकवासिष्ठसौरपैतामहेषु पञ्चस्वेतेषु सिद्धान्तेषु युगवर्षायनर्त्तुमासपक्षाहोरात्रयाममुहूर्त्तनाडीविनाडीप्राणत्रुटित्र्यवयवाद्यस्य कालस्य क्षेत्रस्य च वेत्ता । चतुर्णां च मानानां सौरसावननाक्षत्रचान्द्राणामधिमासकावमसम्भवस्य च कारणाभिज्ञः । षष्ट्यब्दयुगवर्षमासदिनहोराधिपतीनां प्रतिपत्तिविच्छेदवित् । सौरादीनाञ्च मानानां सदृशासदृशयोग्यायोग्यत्वप्रतिपादनपटुः । सिद्धान्तभेदेऽप्ययननिवृत्तौ प्रत्यक्षं सममण्डलरेखासम्प्रयोगाभ्युदितांशकानाञ्च छायाजलयन्त्रदृग्गणितसाम्येन प्रतिपादनकुशलः । सूर्य्यादीनाञ्च ग्रहाणां शीघ्रमन्दयाम्योत्तरनीचोच्चगतिकारणाभिज्ञः सूर्य्यचन्द्रमसोश्च ग्रहणे ग्रहणादिमोक्षकालदिक्प्रमाणस्थितिविमर्दवर्णदेशानामनागतग्रहसमागमयुद्धानामादेष्टा । प्रत्येकग्रहभ्रमणयोजनकक्षाप्रमाणप्रतिविषययोजनपरिच्छेदकुशलो भूभगणभ्रमणसंस्थानाद्यक्षावलम्बकाहर्व्यासचरदलकालराश्युदयच्छायानाडीकरणप्रभृतिषु क्षेत्रकालकरणेष्वभिज्ञो नानाचोद्यप्रश्नभेदोपलब्धिजनितवाक्सारो निकषसन्तापाभिनिवेशैर्विशुद्धस्य कनकस्येवाधिकतरममलीकृतस्य शास्त्रस्य वक्ता तन्त्रज्ञो भवति । उक्तञ्च न प्रतिबद्धं गमयति वक्ति न च प्रश्नमेकमपि पृष्टः । निगदति न च शिष्येभ्यः स कथं शास्त्रार्थविज्ज्ञेयः । ग्रन्थोऽन्यथान्यथार्थः करणं यश्चान्यथा करोत्यबुधः । स पितामहमुपगम्य स्तौति नरो वैशिकेनार्य्याम् । तन्त्रे सुपरिज्ञाते लग्ने छायाम्बुयन्त्रसंविदिते । होरार्थे च सुरूढे नादेष्टुर्भारती वन्ध्या । उक्तञ्चार्य्यविष्णुगुप्तेन । अप्यर्णवस्य पुरुषः प्रतरन् कदाचिदासादयेदनिलवेगवशेन पारम् । न त्वस्य कालपुरुषाख्यमहा-

र्णवस्य गच्छेत् कदाचिदप्यृषिर्मनसापि पारम्। होराशास्त्रेऽपि राशिहोराद्रेक्काणनवांशकद्वादशभागत्रिंशद्भागबलाबलपरिग्रहो ग्रहाणां दिक्स्थानकालचेष्टाभिरनेकप्रकारबलनिर्धारणं प्रकृतिधातुद्रव्यजातिचेष्टादिपरिग्रहो निषेकजन्मकालविस्मापनप्रत्ययादेशसद्योमरणायुर्दायदशान्तर्दशाष्टवर्गराजयोगचन्द्रयोगद्विग्रहादियोगानां नाभसादीनाञ्च योगानां फलान्याश्रयभावावलोकननिर्याणगत्यनूकानि तात्कालिकप्रश्नशुभाशुभनिमित्तानि विवाहादीनाञ्च कर्मणां करणम्। यात्रायाञ्च तिथिदिवसकरणनक्षत्रमुहूर्त्तविलग्नयोगदेहस्पन्दनस्वप्नविजयस्नानग्रहयज्ञगणयागाग्निलिङ्गहस्त्यश्वेङ्गितसेनाप्रवादचेष्टादिग्रहषाड्गुण्योपायमङ्गलामङ्गलशकुनसैन्यनिवेशभूमयोऽग्निवर्णा मन्त्रिचरदूताटविकानां यथाकालं प्रयोगाः परदुर्गलम्भोपायाश्चेत्युक्तं चाचार्यैः। जगति प्रसारितमिवालिखितमिव मतौ निषिक्तमिव हृदये। शास्त्रं यस्य सभगणं नादेशा निष्फलास्तस्य। संहितापारगश्च दैवचिन्तको भवति। यत्रैते संहितापदार्थाः। दिनकरादीनां ग्रहाणां चारास्तेषु च तेषां प्रकृतिविकृतिप्रमाणवर्णकिरणद्युतिसंस्थानास्तमनोदयमार्गमार्गान्तरवक्रानुवक्रर्क्षग्रहसमागमचारादिभिः फलानि नक्षत्रकूर्मविभागेन देशेष्वगस्त्यचारः सप्तर्षिचारो ग्रहभक्तयो नक्षत्रव्यूहग्रहशृङ्गाटकग्रहयुद्धग्रहसमागमग्रहवर्षफलगर्भलक्षणरोहिणीस्वात्याषाढीयोगाः सद्योवर्षकुसुमलतापरिधिपरिवेषपरिघपवनोल्कादिग्दाहक्षितिचलनसन्ध्यारागगन्धर्वनगररजोनिर्घातार्घकाण्डसस्यजन्मेन्द्रध्वजेन्द्रचापवास्तुविद्याङ्गविद्यावायसविद्यान्तरचक्रमृगचक्राश्वचक्रवातचक्रप्रासादलक्षणप्रतिमालक्षणप्रतिष्ठापनवृक्षायुर्वेददगार्गलनीराजनखञ्जनोत्पातशान्तिमयूरचित्रकघृतकम्बलखड्गपट्टकृकवाकुकूर्मगोऽजाश्वेभपुरुषस्त्रीलक्षणान्यन्तःपुरचिन्तापिटकलक्षणोपानच्छेदवस्त्रच्छेदचामरदण्डशय्यासनलक्षणरत्नपरीक्षादीपलक्षणदन्तकाष्ठाद्याश्रितानि शुभाशुभानि निमित्तानि सामान्यानि च जगतः प्रतिपुरुषं पार्थिवे च प्रतिक्षणमनन्यकर्माभियुक्तेन दैवज्ञेन चिन्तयितव्यानि। न चैकाकिना शक्यन्तेऽहर्निशमवधारयितुं निमित्तानि। तस्मात् सुभृतेनैव दैवज्ञेनान्ये तद्विदश्चत्वारो भर्त्तव्याः। तत्रैकेनैन्द्री चाग्नेयी च दिगवलोकयितव्या। याम्या नैरृती चान्येनैवं वारुणी वायव्या, चोत्तरा चैशानी चेति। यस्मादुल्कापातादीनि निमित्तानि शीघ्रमुपगच्छन्तीति। तेषां चाकारवर्णस्नेहप्रमाणादिग्रहर्क्षाभिघातादिभिः फलानि भवन्ति। उक्तञ्च गर्गेण महर्षिणा “कृत्स्नाङ्गोपाङ्गकुशलं होरागणितनैष्ठिकम्। यो न पूजयते राजा स नाशमुपगच्छति। वनं समाश्रिता येऽपि निर्ममा निःपरिग्रहाः। अपि ते परिपृच्छन्ति ज्योतिषां गतिकोविदम्। अप्रदीपा यथा रात्रिरनादित्यं यथा नभः। तथाऽसांवत्सरो राजा भ्रमत्यन्ध इवाध्वनि। मुहूर्त्तं तिथिनक्षत्रमृतवश्चायने तथा। सर्वाण्येवाकुलानि स्युर्न स्यात् सांवत्सरो यदि। तस्माद्राज्ञाभिगन्तव्यो विद्वान् सांवत्सरोऽग्रणीः। जयं यशः श्रियं भोगान् श्रेयश्च समभीप्सता। नासांवत्सरिके देशे वस्तव्यं भूतिमिच्छता। चक्षुर्भूतो हि यत्रैष पापं तत्र न विद्यते। न सांवत्सरपाठी च नरकेषूपपद्यते। ब्रह्मलोकप्रतिष्ठाञ्च लभते दैवचिन्तकः। ग्रन्थतश्चार्थतश्चैतत्कृत्स्नं जानाति यो द्विजः! अग्रभुक् स भवेच्छ्राद्धे पूजितः पङ्क्तिपावनः। म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्। ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्दैवविद्द्विजः! कुहकावेशपिहितैः कर्णोपश्रुतिहेतुभिः। कृतादेशो न सर्वत्र प्रष्टव्यो न स दैववित्। अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते। स पङ्क्तिदूषकः पापो ज्ञेयो नक्षत्रसूचकः। नक्षत्रसूचकोद्दिष्टमुपवासं करोति यः। स व्रजत्यन्धतामिस्रं सार्द्धमृक्षविडम्बिना। नगरद्वारलोष्टस्य यद्वत् स्यादुपयाचितम्। आदेशस्तद्वदज्ञानां यः सत्यः स विभाव्यते। सम्पत्त्या योजितादेशस्तद्विच्छिन्नकथाप्रियः!। मत्तः शास्त्रैकदेशेन त्याज्यस्तादृङ्महीक्षिता। यस्तु सम्यग्विजानाति होरागणितसंहिताः। अभ्यर्च्यः स नरेन्द्रेण स्वीकर्त्तव्यो जयैषिणा। न तत् सहस्रं करिणां वाजिनां वा ‘चतुर्गुणम्। करोति देशकालज्ञो यदेको दैवचिन्तकः। दुःस्वप्नदुर्विचिन्तितदुःप्रेक्षितदुःकृतानि कर्माणि। क्षिप्रं प्रयान्ति नाशं शशिनः श्रुत्वा भसंवादम्। न तथेच्छति भूपतेः पिता जननी वा स्वजनोऽथवा सुहृत्। स्वयशोऽभिविवृद्धये यथा हितमाप्तः सबलस्य दैववित्”।

सि॰शि॰ ज्योतिःशास्त्रस्य वेदनेत्ररूपाङ्गत्वप्रतिपादनेन तदध्ययने द्विजातिमात्रस्यैवाधिकारं प्रतिपाद्य तद्धेतुगणकस्य प्रशंसा दर्शिता यथा

“त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः क्रमाच्चारश्च

द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः । भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः ॥ जानन् जातकसंहिताः सगणितस्कन्धैकदेशा अपि ज्योतिःशास्त्रविचारसारचतुरः प्रश्नेष्वकिञ्चित्करः । यः सिद्धान्तमनन्तयुक्तिविततं नो वेत्ति भित्तौ यथा राजा चित्रमयोऽथवा सुघटितः काष्ठस्य कण्ठीरवः ॥ गर्जत्कुञ्जरवर्जिता नृपचमूरथ्यूर्जिताऽश्वादिकैरुद्यानं च्युतचूतवृक्षमथवा पाथोविहीनं सरः । योषित् प्रोषितनूतनप्रियतमा यद्वच्च भात्युच्चकैर्ज्योतिःशास्त्रमिदं तथैव विबुधाः सिद्धान्तहीनं जगुः" ॥ "इदानीं ज्योतिःशास्त्रस्य वेदाङ्गत्वं निरूप्य वेदाङ्गत्वादवश्यमध्येतव्यं तद्द्विजैरेव नान्यैः शूद्रादिभिरित्येतत्प्रतिपादनार्थं श्लोकचतुष्टयमाह" प्रमि० "वेदास्तावद्यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण । शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ॥ शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं च कल्पः करौ । या तु शिक्षास्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः । वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते । संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाङ्गेन हीनो न किञ्चित्करः । तस्माद्द्विजैरध्ययनीयमेतत् पुण्यं रहस्यं परमं च तत्त्वम् । यो ज्योतिषं वेत्ति नरः स सम्यग् धर्मार्थकामान् लभते यशश्च" सि०शि० । एवं गणकस्य प्रशंसायां स्थितायाम् सिद्धान्तानभिज्ञस्य नक्षत्रसूचिनो निन्दाश्रवणाच्च "वरं चाण्डालसंस्पर्शं कुर्यात्तु साधकोत्तमः ! तथाप्यस्पृश्यगणकं सर्वदा तु परित्यजेत्" महिषमर्द्दिनीतन्त्रवाक्यम् नक्षत्रसूचिविषयम् "चर्मकारस्य द्वौ पुत्रौ गणको वाद्यपूरकः," इत्युक्त सङ्कीर्णवर्णरूपगणकपरत्वे सङ्कोचाभावाच्च तस्यावमशूद्रतया वेदाङ्गज्योतिषेऽनधिकारात् अनधिकृतशास्त्राध्यायिनो निन्द्यौचित्यात् । "द्विजातेऽस्तु यथोक्तस्कन्धत्रयवेत्तृरूपगणकस्य प्रशंस्यत्वात् । न तथा । यथाहपी०धा० "सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम् । वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमकल्मषम् । विनैतदखिलं श्रौतं स्मार्तकर्म न सिध्यति । तस्माज्जगद्धितायेदं ब्रह्मणा निर्मितं पुरा । अतएव द्विजैरेतदध्येतव्यं प्रयत्नतः" इति । तत्रैव ज्योतिःशास्त्राध्येतुर्माहात्म्यमाह माण्डव्यः "एवंविधस्य श्रुतिनेत्रशास्त्रस्वरूपवेत्तुः खलु दर्शनं वै । निहन्त्यशेषं कलुषं जनानां षड्वदजं धर्मसुखास्पदं स्यात्" अत्र ज्ञानविशेषेण ज्योतिर्विदः पूज्यतातारतम्यं जीर्णैरभ्यधायि "दशदिनकृतपापं हन्ति सिद्धान्तवेत्ता त्रिदिनजनितदोषं तन्त्रवित्तः स एव । करणभगणवेत्ता हन्त्यहोरात्रदोषं जनयति घनमंहश्चात्र नक्षत्रसूची" । नक्षत्रसूची दैवज्ञो घनं बहु अंहः पापं जनयति । तल्लक्षणं वराहसंहितायां "अविदित्वैव यः शास्त्रं दैवज्ञत्वं प्रपद्यते । स पङ्क्तिदूषकः पापो ज्ञेयो नक्षत्रसूचकः" अन्यच्च "तिथ्युत्पत्तिन्न जानन्ति ग्रहाणां नैव साधनम् । परवाक्येन वर्त्तन्ते ते वै नक्षत्रसूचकाः" व्युत्पत्तिस्तु गृहे गृहे गत्वाऽपृष्ट एव नक्षत्राण्यश्विन्यादीनि शुभाशुभफलसूचकानि सूचयतीति नक्षत्रसूची । वराहः "नक्षत्रसूचकोद्दिष्टमुपवासं करोति यः । स व्रजत्यन्धतामिस्रं सार्द्धमृक्षविडम्बिना नक्षत्रसूचकं पापं भिषजं शुल्कजीविनम् । तादृक् पौराणिकादींश्च वाङ्मात्रेणापि नार्चयेत्" अतएव वसिष्ठः "त्रिस्कन्धपारङ्गम एव पूज्यः श्राद्धे सदा भूसुरवृन्दमध्ये । नक्षत्रसूची खलु पापरूपो हेयः सदा सर्वसुधर्मकृत्ये" । वराहोऽपि "ग्रन्थतश्चार्थतश्चैव कृत्स्नं जानाति यो द्विजः । अग्रभुक् स भवेच्छ्राद्धे पूजितः पङ्क्तिपावनः । नासांवत्सरिके देशे वस्तव्यं भूतिमिच्छता । चक्षुर्भूतोऽपि यत्रैव पापं तत्र न विद्यते । मुहूर्त्तं तिथिनक्षत्रमृतवश्चायनानि च । सर्वाण्येवाकुलानि स्युर्न स्यात् सांवत्सरो यदि" । अत एव यद्धर्मशास्त्रे सुमन्तुः "तस्करकितवेत्यादिना महता गद्येन यत् "सांवत्सरिकोऽपाङ्क्तेयः" इत्याह यच्च महाभारतेऽपि "कितवो भ्रूणहा यक्ष्मीत्यादिपद्यषट्कमध्ये कुशीलवो देवलको नक्षत्रैर्यश्च जीवति । एतानिह विजानीयाद्ब्राह्मणान् पङ्क्तिदूषकानित्युक्तं तन्नक्षत्रसूचकज्योतिर्विद्विषयं यदाह कश्यपः "दारर्त्तिगृभ्रूणहन्तॄंश्च व्यङ्गान्नक्षत्रसूचकान् । वर्ज्जयेत् ब्राह्मणानेतान् सर्वकर्मसु यत्नतः" इति "नक्षत्रसूचकश्चैव पर्वकारश्च गर्हितः" इति ब्रह्मपुराणेऽप्युक्तम् मनुः "तिथिं पक्षस्य न ब्रूयान्न नक्षत्राणि निर्दिशेत्" इत्याह स्म अपृष्ट इति शेषः । यमोऽपि "नक्षत्रतिथिपुण्याहान्मुहूर्त्तान् मङ्गलानि च । न निर्दिशन्ति ये विप्रास्तैर्भुक्तं ह्यक्षयं भवेदिति" वसिष्ठवाक्यन्तु "प्रागभिहितम् महाप्रयोजनं त्वेतच्छास्त्रस्य सम्यग्ज्ञानाद्ब्रह्म सायुज्यमिति" तदुक्तं गर्गेण "ज्योतिश्चक्रं तु लोकस्य सर्वस्योक्तं शुभाऽशुभम् । ज्योतिर्ज्ञानं च यो

वेद स याति परमां गतिम्"। गतिं ब्रह्मसायुज्यमिति सूर्य्यसिद्धान्तेऽपि "दिव्यचक्षुर्ग्रहर्क्षाणां दर्शितं ज्ञानमुत्तमम्। विज्ञायार्कादिलोकेषु स्थानं प्राप्नोति शाश्वतम्" वराहसंहितायामपि "न साम्वत्सरपाठी च नरके परिपच्यते। ब्रह्मलोके प्रतिष्ठाञ्च लभते दैवचिन्तक" इति गणकस्य पत्नी ङीष् गणकी तत्पत्न्यां जटा०। "तस्मिन् मग्नं गणक! कथय क्षिप्रमस्याः प्रमाणम्" "गणक! पवनवेगादेकदेशे स भग्नः" लीला०। "गणकचक्रचूड़ामणिः" सि० शि०। "चर्म्मकारस्य द्वौ पुत्रौ गणको वाद्यपूरकः" इत्युक्ते ३सङ्कीर्णजातिभेदे प्रजापतिपुत्रे तारापुञ्जात्मके अष्टसंख्यके ४केतुभेदे "तारापुञ्जनिकाशा गणका नाम प्रजापतेरष्टौ" वृह० सं० ११ अ०।

गणकर्णिका स्त्री गणस्य गणेशस्य कर्ण इव पत्रमस्याः कप् अत इत्त्वम्। इन्द्रवारुण्याम् राजनि०।

गणकार पु० गणं धात्वादिगणपाठं करोति कृ–अण्। धात्वादिगणार्थप्रतिपादके १ग्रन्थकर्त्तरि २भीमसेने शब्दच०।

गणकारि पु० गणं धात्वादिगणं करोति कृ बा० इञ्। धात्वर्थप्रतिपादकग्रन्थकर्त्तरि। ६त० गणकस्यारौ च। तस्यापत्यं कुर्वा० ण्य। गाणकार्य्य तदपत्ये पुंस्त्री।

गणकूट पुंन० गणरूपं कूटम्। वरकन्ययोर्नक्षत्रभेदेन जातयोः विवाहे मेलनोपयोगिनि सुरराक्षसमानुषरूपे कूटे। उपयमशब्दे १२५० पृ० विवृतिः।

गणचक्रक न० गणानां धार्मिकगणानां चक्रमत्र कप्। धार्म्मिकानां सम्भूय भोजने त्रिका०।

गणता गणस्य भावः तल्। गणसमूहे।

गणतिथ त्रि० गण+असंख्यावाचकत्वेऽपि पूरणे डट् तिथुगागमश्च। गणानां पूरणे।

गणदीक्षिन् पु० गणान् दीक्षयति दीक्ष–णिनि। १बहुयाजके। "वेणाभिशस्तवार्द्धुषि गणिका गणदीक्षिणाम्" अभक्ष्यान्नकथने याज्ञ०। "गणदीक्षिणो बहुयाजकाः" मिता० २गणेशदीक्षकावति त्रि० स्त्रियां ङीप्।

गणदेवता स्त्री गणभूता सङ्घभूता देवता। सङ्घभूते देवभेदे "आदित्यविश्वे वसवस्तुषिता भास्वरानिलाः। महाराजिकसाध्याश्च रुद्राश्च गणदेवताः। आदित्या द्वादश प्रोक्ता विश्वे देवा दश स्मृताः। वसवश्चाष्टसंख्याताः षट्त्रिंशत् तुषिता मताः। आभास्वराश्चतुःषष्टिर्वाताः पञ्चाशदूनकाः। महाराजिकनामानो द्वे शते चापि विंशतिः। साध्या द्वादशविख्याता रुद्राश्चैकादश स्मृताः। एते च संहृता देवास्तत्रादित्याः स्वनामतः" जटाधरकोषः।

गणद्रव्य ६त०। गणस्वामिके द्रव्ये। गणं गणीभूतं द्रव्यं द्रव्याणां गणे च।

गणद्वीप पुंन० गणानां सप्तानां राज्यत्वात् द्वीपः। सप्तानां राज्यरूपे द्वीपभेदे "यत्नवन्तो गणद्वीपं सप्तराज्योपशोभितम्" रामा० कि० ४०३०अ०। यवद्वीपमिति पाठान्तरम्।

गणन न० गण–भावे ल्युट्। सङ्ख्याकरणे सङ्ख्याने (गोणा) "येनैव लिखितं कुर्य्यात् तेनैव गणनं भवेत्" विश्वसारत०। युच्। गणनाप्यत्र स्त्री। "यदि त्रिलोकी गणनापरा स्यात्" नैष० "व्याजपर्वगणनामिवोद्वहन्" रघुः

गणनाथ पु० गणानां प्रमथादीनां नाथः। १गणेशे २शिवे च गणनायकादयोऽप्यत्र। ३बहूनां स्वामिनि त्रि०। गणनायिका स्त्री २दुर्गायाम् त्रिका०।

गणनीय त्रि० गणयितुमर्हति गण–अनीयर्। गणनार्हे अमरः। यत्, गण्य, तव्य गणितव्य तदर्थे त्रि०।

गणपति पु० ६त०। गणेशे तस्याविर्भावकथा इभाननशब्दे ९८१पृ० गजाननशब्दे २४९५पृ० च उक्ता तस्य गणाधिपतित्वं याज्ञवल्क्येनोक्तं तच्च वाक्यं गणपतिकल्पशब्दे दृश्यम् २शिवे ३समूहपतौ च "गणानां त्वा गणपतिम्" यजु० १६।१८।

गणपतिकल्प पु० गणपत्युद्देशेन कल्पः विधानभेदः। गणेशोद्देशेन विघ्नविघाताय तत्स्नपनादिरूप, विधानभेदे। स च कल्पः याज्ञ० उक्तो यथा।

"विनायकः कर्म्मविघ्नसिद्ध्यर्थं विनियोजितः। गणानामाधिपत्ये च रुद्रेण ब्रह्मणा तथा। तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत। स्वप्नेऽवगाहतेऽत्यर्थं जलं मुण्डांश्च पश्यति। काषायवाससश्चैव क्रव्यादांश्चाधिरोहति। अन्त्यजैर्गर्द्दभैरुष्ट्रैः सहैकत्रावतिष्ठते। व्रजन्नपि तथात्मानं मन्यतेऽनुगतं परैः। विमना विफलारम्भः संसीदत्यनिमित्ततः। तेनोपसृष्टो लभते न राज्य राजनन्दनः। कुमारी न च भर्त्तारमपत्यं न च गर्भिणी। आचार्य्यत्वं श्रोत्रियश्च न शिष्योऽध्ययनं तथा। वणिग्लाभं न चाप्नोति कृषिञ्चैव कृषी बलः। स्नपनं तस्य कर्त्तव्यं पुण्येऽह्नि विधिपूर्वकम्। गौरसर्षपकल्केन साज्येनोत्सादितस्य च। सर्व्वौषधैः सर्वगन्धैः प्रलिप्तशिरसस्तथा। भद्रासनोपविष्टस्य स्वस्तिवाच्या द्विजाः शुभाः। अश्वस्थानाद्गजस्थानाद्वल्मी-

कात् सङ्गमात् ह्रदात् । मृत्तिकां रोचनां गन्धान् गुग्गुलुञ्चाप्सु निःक्षिपेत् । या आहृता एकवर्णैश्चतुर्भिः कलशैर्ह्रदात् । चर्म्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं तथा । सहस्राक्षं शतधारमृषिभिः पावनं कृतम् । तेन त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते । भगन्ते वरुणो राजा भगं सूर्य्यो बृहस्पतिः । भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः । यत्ते केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्द्धनि । ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नन्तु सर्वदा । स्नातस्य सार्षपं तैलं स्रुवेणौडुम्बरेण च । जुहुयान्मूर्द्धनि कुशान् सव्येन परिगृह्य च । मितश्च संमितश्चैव तथा शालकटङ्कटौ । कुष्माण्डो राजपुत्रश्चेत्यन्ते स्वाहासमन्वितैः । नामभिर्बलिमन्त्रैश्च नमस्कारसमन्वितैः । दद्याच्चतुष्पथे सूर्पे कुशानास्तीर्य्य सर्वतः । कृताकृतांस्तण्डुलांश्च पललौदनमेव च । मत्स्यान् पक्कांस्तथैवामान् मांसमेतावदेव तु । पुष्पं चित्रं सुगन्धञ्च सुराञ्च त्रिविधामपि । मूलकं पूरिकापूपांस्तथैवैरण्डिकाः स्रजः । दध्यन्नं पायसञ्चैव गुड़पिष्टं समोदकम् । एतान् सर्वानुपाहृत्य भूमौ कृत्वा ततः शिरः । विनायकस्य जननीमुपतिष्ठेत्ततोऽम्बिकाम् । दूर्वासर्षपपुष्पाणां दत्त्वार्घ्यं पूर्णमञ्जलिम् । रूपं देहि यशो देहि भाग्यं भगवति ! देहि मे । पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे । ततः शुक्लाम्बरधरः शुक्लगन्धानुलेपनः । ब्राह्मणान् भोजयेद्दद्याद्वस्त्रयुग्मं गुरोरपि । एवं विनायकं पूज्य ग्रहांश्चैव विधानतः । कर्म्मणां फलमाप्नोति श्रियञ्चाप्नोत्यनुत्तमाम् । आदित्यस्य सदा पूजां तिलकं स्वामिनस्तथा । महागणपतेश्चैव कुर्व्वन् सिद्धिमवाप्नुयात्" ।

गणपर्व्वत पु० गणभूयिष्ठः पर्वतः । कैलासाचले त्रिका० ।

गणपाठ पु० गणानां स्वरादिगणानां पाठोऽत्र । पाणिन्यादिरचिते स्वरादिगणानां स्वरूपकथने ग्रन्थभेदे ।

गणपाद पु० गणस्येव पादोऽस्य । प्रमथतुल्यपादयुक्ते युक्तारोह्यादित्वादाद्युदात्तताऽस्य । [शब्दच० ।

गणपीठक न० गणस्य पीठ इव कायति कै—क । १वक्षसि

गणपुङ्गव पु० गणः पुङ्गव इव उपमि०स० ।१गणश्रेष्ठे २देशभेदे च ।३तत्रवासिषु ४तद्देशनृपेषु च बहुव० "कौलिङ्गान् गणपुङ्गवानथ शिबीनायोध्यकान् पार्थिवान्" बृह० स० ४अ० ।

गणपूज्य पु० गणो गणेशः प्रमथो वा पूज्योऽत्र । १देशभेदे २तद्देशस्थजनेषु ३तन्नृपेषु च बहुव० ।"गणपूज्यस्खलितव्रतशवरपुलिन्दार्थपरिहीनाः" बृह० सं० १६अ० ।

गणपूर्व्व पु० गणानां ग्रामादिस्थलोकानां पूर्व्वः प्रधानम् । ग्रामण्याम् "अपरिज्ञातपूर्व्वाश्च गणपूर्व्वाश्च भारत !" भा० आ० २३अ० आह्वानर्हकथने ।"गणपूर्व्वो ग्रामण्यः" नीलक० । गणमुख्यादयोऽप्यत्र । "रविजेन सिते विजिते गणमुख्याः शस्त्रजीविनः चलम्" बृह०स० १७अ०

गणभर्त्तृ पु० गणानां प्रमथादीनां भर्त्ता । १महादेवे । "शृङ्गाग्र्यमूष्य भजते गणभर्त्तुरुच्चा" किरा० । गणस्वामिप्रभृतयोऽप्यत्र । २गणेशे ३समूहस्वामिनि त्रि० ।

गणयज्ञ पु० गणस्य भ्रातॄणां सखीनां वा समूहस्य कर्त्तव्यः यज्ञः । मरुत्स्तोमाख्ये भ्रातृसखिवर्गकर्त्तव्ये यज्ञभेदे । "वैश्यस्तोमदक्षिणालिङ्गो मरुत्स्तोमे गणयज्ञो भ्रातॄणां सखीनां वा" कात्या० श्रौ० २२।११।१२ । "सत्रगणयज्ञे सहत्वशब्दात्" कात्या०२५।१२।२८ । "एतच्च सत्रे भवति गणयज्ञे च "तेन सह यजेरन्निति" सहत्वशब्दात्" कर्कः। "तयोरनेकयजमानसद्भावान्नान्यत्र" सं०व्या० ।

गणयाग पु० गजोद्देशेन शान्त्यर्थं यागः । गणेशोद्देशेन कर्त्तव्ये गणपतिकल्पोक्ते तत्स्नपनादौ "विजयस्नानग्रहयज्ञगणयागाग्निलिङ्गेत्यादि" बृह०सं०२अ० ।

गणरत्न न०गणाः स्वरादयः रत्नानीव यत्र । पाणिन्युक्तस्वरादिगणानाम् श्लोकैर्निर्बन्धनपूर्वकं तदर्थकथनरूपे ग्रन्थभेदे । तस्य व्याख्या गणरत्नमहोदधिः ।

गणराज्य न० बृ० स० १४ उक्ते दक्षिणस्यामुक्ते देशभेदे "गणराज्यकृष्णवेल्लूरेत्यादि तद्वाक्यं कूर्म्मविभागशब्दे २४६८ पृ० उक्तम् ।

गणरात्र न० गणानां रात्रीणां समाहारः गणशब्दस्य संख्यावत्त्वात् द्विगुस० अच्समा० । रात्रिवृन्दे ।

गणरूप पु० गणा बहूनि रूपाण्यस्य । १अर्कवृक्षे अमरः । संज्ञायां कन् । गणरूपक राजार्के राजनि० ।

गणरूपिन् पु० गणा बहूनि रूपाणि सन्त्यस्य इनि । श्वेतार्के रत्नमा० ।

गणवत् त्रि० गणोऽस्त्यस्य मतुप् मस्य वः । १गणयुते "गणवती याज्यानुवाक्ये भवतः" तैत्ति० २।३।३।५ । स्त्रियां ङीप् । सा च २दिवोदासमातरि त्रिका० ।

गणशस् अव्य० गण+वीप्सार्थवृत्तौ कारकार्थे शस् । गणान् गणान् कृत्वा इत्याद्यर्थे । "स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या

विश्वेदेवा मरुतः”शत०ब्रा०१३।४।२।२४। “अजगणनन् गणशः प्रियमन्ततः”माघः।

गणश्रि पु० गणं गणरूपं श्रयति श्रि–क्विप् नि० तुगभावः। गणरूपेणावस्थिते मरुदादौ संहतदेवे। “रोदसी आ वदता गणश्रियः” ऋ० १।६४।९। हे गणश्रियः! (मरुतः) गणं श्रयमाणाः सप्त गणरूपेणावस्थिता इत्यर्थः” भा०। “पित्र भन्दमाने गणश्रिभिः” ऋ० ५।६१।८। “गणश्रिभिः गणभावमाश्रयद्भिः” भा० “गणश्रिये स्वाहा गणपतये स्वाहा”यजु०२२।३।

गणहासक पु०गणान् हासयति हस-णिच्–ण्वुल्। १चोरनामगन्धे अमरः। २समूहहासके त्रि०। अण् उपमि० स०। गणहास तत्रार्थे राजनि०।

गणाग्रणी पु० ६त०। १गणेशे त्रिका०।२बहुनामग्रगण्ये त्रि०

गणाचल पु० गणभूयिष्ठोऽचलः। कैलासपर्वते जटा०।

गणाधिप पु० ६त०। १गणेशे अमरः २शिवे हला०। गणाधिपत्यादयोप्यत्र।“गगनं गणाधिपतिमूर्त्तिरिति”माघः। जैनशास्त्रप्रसिद्धेषु “गणा नवास्यर्षिसंघा एकादश गणाधिपाः”। हेमचन्द्रोक्तेषु एकादशजैनश्रेष्ठभेदेषु।

गणान्न न०गणायोत्सृष्टं, गणानां वाऽन्नम्। मठादौ १बहुजनोद्देशेनोत्सृष्टान्ने, २बहुस्वामिकेऽन्ने च ‘गणान्नं गणिकान्नञ्चेति” मनुना निषिद्धान्नमध्ये गणितम्। “गणान्नं गणिकान्नञ्च लोकेभ्यः परिकृन्तति” मनुना। तद्भक्षणे पापविशेष उक्तः।

गणाभ्यन्तर त्रि०गणायोत्सृष्टमठादौ अभ्यन्तरः तदुपजीवनासक्तः। “गणायोत्सृष्टमठधनाद्युपजीविनि” कुल्लू०। “ब्रह्मद्विट् परिवित्तिश्च गणाभ्यन्तर एव च” मनुः।

गणि स्त्री गण–इन्। गणने।

गणिका स्त्री गणः समूहोऽस्त्यस्याः भर्त्तृत्वेन ठन्।१वेश्यायाम्, तद्वच्चित्ताकर्षकत्वात् २यूथिकायाम्(युँइ)अमरः। ३गणिकारिकावृक्षे शब्दर०। गण–ण्वुल्। ४हस्तिन्यां जटा०। “अनुरागवन्तमपि लोचनयोर्दधतं वपुः सुखमतापकरम्। निरकासयद्रविमपेतवसुं वियदालयादपरदिग्गणिका”माघः। वेश्यायाः साधारणस्त्रीत्वं लक्षणादिकं च सा० द० उक्तं यथा।

“धीरा कलाप्रगल्भा स्याद्वेश्या सामान्यनायिका। निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि। वित्तमात्रं समालोक्य सा रागं दर्शयेद्बहिः। काममङ्गीकृतमपि परिक्षीणधनं नरम्। मात्रा निष्कासयेदेषा पुनः सन्धानकाङ्क्षया। तस्कराः पण्डका मूर्खाः सुखप्राप्तधनास्तथा। लिङ्गिनश्छन्नकामाद्या आसां प्रायेण वल्लभाः। एषापि मदनायत्ता क्वापि सत्यानुरागिणी। रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभम्”। प्रसङ्गात् तस्याः पञ्चमजातित्वं तद्गमनादौ दण्ड दण्डाभावादिकं मिताक्षरोक्तम् प्रदर्श्यते।

“साधारणस्त्रीगमने दण्डमाह “अवरुद्धासु दासीषु भुजिष्यासु तथैव च। गम्यास्वपि पुमान्दाप्यः पञ्चाशत्पणिकन्दमम्”या०। गच्छन्नित्यनुवर्त्तते। उक्तलक्षणावर्णस्त्रियोदास्यस्ता एव स्वामिना शुश्रूषाहानिव्युदासार्थं गृहे एव स्थातव्यमित्येवं पुरुषान्तरोपभोगतो निरुद्धाः, अवरुद्धाः पुरुषनियतपरिग्रहा भुजिष्याः। यदा दास्योऽवरुद्धा भुजिष्या वा भवेयुस्तदा तासु तथा चशब्दाद्वेश्यास्वैरिणीनामपि साधारणस्त्रीणां भुजिष्याणां ग्रहणन्तासु च सर्वपुरुषसाधारणतया गम्यास्वपि गच्छन् पञ्चाशत् पणान्दण्डन्दापनीयः परपरिगृहीतत्वेन तासाम्परदारतुल्यत्वात्। एतच्च स्पष्टमुक्तन्नारदेन “स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी तथा। गम्याः स्युरानुलोम्येन स्त्रियो न प्रतिलोमतः। आस्वेव तु भुजिष्यासु दोषः स्यात् परदारवत्। गम्यास्वपि हि नोपेयाद्यत्ताः परपरिग्रहाः” इति। निष्कासिनी स्वाम्यनवरुद्धा दासी। ननु स्वैरिण्यादीनां साधारणतया गम्यत्वाभिधानमयुक्तम् न हि जातितः शास्त्रतो वा काश्चन लोके साधारणाः स्त्रिय उपलभ्यन्ते। तथाहि स्वैरिण्योदास्यश्च तावद्वर्णस्त्रियएव “स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत्। वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः” इति स्मरणात्। न च वर्णस्त्रीणाम्पत्यौ जीवति मृते वा पुरुषान्तरोपभोगो घटते “दुःशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः। परिचार्य्यः स्त्रिया साध्व्या सततन्देववत् पतिः। कामन्तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः। न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य त्विति” निषेध(मनु)स्मरणात्। नापि कन्यावस्थायां साधारणत्वं पित्रादिपरिरक्षितायाः कन्याया एव दानोपदेशाद्दातृभावेऽपि तथाविधाया एव स्वयंवरोपदेशात्। न च दासीभावात् स्वधर्माधिकारच्युतिः। पारतन्त्र्यं हि दास्यन्न स्वधर्मपरित्यागः। नापि वेश्या साधारणी वर्णानुलोमजव्यतिरेकेण गम्य

जात्यन्तरासम्भवात्। तदन्तःपातित्वे च पूर्वप्रदेशागम्यत्वं प्रतिलोमजत्वे तु तासान्नितरामगम्यत्वम्। अतः पुरुषान्तरोपभोगे तासान्निन्दितकर्माभ्यासेन पातित्यात् पतितसंसर्गस्य च निषिद्धत्वान्न सकलपुरुषोपभोगयोग्यत्वम्। सत्यमेवम्। किन्त्वत्र स्वैरिण्याद्युपभोगे पित्रादिरक्षकराजदण्डभयादिदृष्टदोषाभावाद्गम्यत्ववाचोयुक्तिः। दण्डाभावस्त्ववरुद्धासु दासीष्विति नियतपुरुषपरिग्रहोपाधितो दण्डविधानात्तदुपाधिरहितास्वर्थाद्गम्यते। स्वैरिण्याद्यानां पुनर्दण्डाभावो विधानाभावात् "कन्याम्भजन्तीमुत्कृष्टं न किञ्चिदपि दापयेदिति" लिङ्गदर्शनाच्चावगम्यते। प्रायश्चित्तन्तु स्वधर्मस्खलननिमित्तकत्वाद्गन्तृणां चाऽविशेषाद्भवत्येव। यत् पुनर्वेश्यानाञ्जात्यन्तरासम्भवेन वर्णान्तःपातित्वमनुमानादुक्तम् वेश्यावर्णानुलोमाद्यन्तःपातिन्यो मनुष्यजात्याश्रयत्वात् ब्राह्मणादिवदिति। तन्न कुण्डगोलकादिभिरनैकान्तिकत्वात्। अतो वेश्याख्या काचिज्जातिरनादिर्वेश्यायामुत्कृष्टजातेः समानजातेर्वा पुरुषादुत्पन्ना पुरुषसंयोगवृत्तिर्वेश्येति ब्राह्मण्यादिवल्लोकप्रसिद्धिबलादभ्युपगमनीयम्। न च निर्मूलेयम्प्रसिद्धिः। स्मर्य्यते हि स्कन्दपुराणे "पञ्चचूडा नाम काञ्चनाप्सरसस्तत्सन्ततिर्वेश्याख्या पञ्चमी जातिरिति। अतस्तासान्नियतपुरुषपरिणयनविधिविधुरतया समानोत्कृष्टजातिपुरुषाभिगमने न दृष्टदोषो नापि दण्डस्तासु चानवरुद्धासु गच्छतां पुरुषाणां यद्यपि न दण्डस्तथाप्यदृष्टदोषोऽस्त्येव "स्वदारनिरतः सदेति" नियमात्। "पशुवेश्याभिगमने प्राजापत्यं विधीयते" इति प्रायश्चित्तस्मरणाच्चेति निरवद्यम्। अवरुद्धासु दासीष्वित्यनेन दासीस्वैरिण्यादिभुजिष्याभिगमने दण्डं विदधतस्तास्वभुजिष्यासु दण्डो नास्तीत्यर्थादुक्तम्। तस्यापवादमाह "प्रसह्य दास्यभिगमे दण्डो दशपणः स्मृतः। बहूनां यद्यकामासौ चतुर्विंशतिकः पृथक्" या०। पुरुषसम्भोगजीविकासु दासीषु स्वैरिण्यादिषु शुल्कदानविरहेण प्रसह्य वलात्कारेणाभिगच्छतो दशपणो दण्डः। यदि बहवः अकामामनिच्छन्तीमपि वलात्कारेणाभिगच्छन्ति तर्हि प्रत्येकञ्चतुर्विंशतिपणपरिमितन्दण्डं दण्डनीयाः। यदा पुनस्तदिच्छया भाटिन्दत्त्वा पश्चादनिच्छन्तीमपि वलात् व्रजन्ति तदा तेषामदोषः यदि व्याध्याद्यभिभवस्तस्या न स्यात् "व्याधिता सश्रमा व्यग्रा राजकर्मपरायणा। आमन्त्रिता चेन्नागच्छेददण्ड्या वड़वा स्मृतेति" नारदवचनात्। किञ्च। "गृहीतवेतना वेश्या नेच्छन्ती द्विगुणं वहेत्। अगृहीते समन्दाप्यः पुमानप्येवमेव च" या०। यदा तु शुल्कं गृहीत्वा सुस्थापि तं नेच्छति तदा शुल्कं द्विगुणं दद्यात् तथा शुल्कं दत्त्वा स्वयमनिच्छतः स्वस्थस्य पुंसः शुल्कहानिरेव "शुल्कं गृहीत्वा पण्यस्त्री नेच्छन्ती द्विगुणं वहेत्। अनिच्छन् दत्तशुल्कोऽपि शुल्कहानिमवाप्नुयादिति तेनैवोक्तत्वात्। तथान्योऽपि विशेषस्तेनैव दर्शितः "अप्रयच्छंस्तथा शुल्कमनुभूय पुमान् स्त्रियम्। अक्रमेण च सङ्गच्छन् तथा दन्तनखादिभिः। अयोनौ चाभिगच्छेद्यो वहुभिर्वाभिवासयेत्। शुल्कमष्टगुणं दाप्यो विनयन्तावदेव तु। "वेश्या प्रधाना यास्तत्र कामुकास्तद्गृहोषिताः। तत्समुत्थेषु कार्य्येषु निर्णयं संशये विदुरिति"। "गणान्नं गणिकान्नञ्च" अभक्ष्यान्नकथने मनुना तदन्नं निषिद्धम्।

गणिकारिका स्त्री गणनं गणिः गण-इन् तं करोति अण् गौरा० ङीष् गणिकारी स्वार्थे के ह्रस्वः, कृ-ण्वुल् वा कापि अत इत्त्वम्। १(गणियारी) द्रुमे अमरः। "अग्निमन्थो जयः स स्याच्छ्रीपर्णी गणिकारिका। जया जयन्ती तर्कारी नादेयी वैजयन्तिका। अग्निमन्थः श्वयथुनुद्वीर्य्योष्णः कफवातहृत्। पाण्डुनुत् कटुकस्तिक्तस्तुवरो मधुरोऽग्निदः" भावप्र०।

गणिकारी स्त्री गणिं गणनं करोति कृ-अण् उप० स० गौरा० ङीष्। क्षुद्रगणिकारिकायाम् राजनि०।

गणित न० गण-भावे क्त। १गणने "पारेपरार्द्धं गणितं यदि स्यात्" नैष०। ग्रहाणां २गतिस्थित्यादिगणने यथा गणिताध्यायः। करणे क्त। ३व्यक्ताव्यक्तरूपे अङ्कशास्त्रे "द्विविधगणितमुक्तं व्यक्तमव्यक्तयुक्तं तदवगमननिष्ठः शब्दशास्त्रे पटिष्ठः। यदि भवति तदेदं ज्यौतिषं भूरिभेदं प्रपठितुमधिकारी सोऽन्यथा नामधारी" सि०शि०। कर्म्मणि क्त। ४कृतगणने संख्याते त्रि० अमरः "विद्यां प्रमादगणितामपि चिन्तयामि" चौरप०। गणनया आगते ५क्षेत्रफलादौ (कालि) "क्षेत्रस्य पञ्चकृतितुल्यचतुर्भुजस्य कर्णौ ततश्च गणितं गणक! प्रचक्ष्व"। "सूर्य्योन्मितस्य गणितं वद तत्र किं स्यात्" लीला०।

गणिताध्याय पु० गणितम् ग्रहगतिस्थित्यादिगणनमधीयतेऽत्र। अधि+इ-आधारे घञ्। सि०शि०ग्रन्थान्तर्गते अध्या-

यभेदे तत्र च प्रतिपाद्यविषयाश्च प्रथमं ग्रहाणां मध्यमगत्यादिकम् । ततः कालमानम् ततो भगणाः। मध्यग्रहस्पष्टताकरणम् ग्रहकक्षामानम् । प्रत्यब्दशुद्धिः । अधिमासादिनिर्णयः। स्पष्टग्रहानयनम् । त्रिप्रश्नाधिकारः । पर्व्वसम्भवः । चन्द्रग्रहणम् सूर्य्यग्रहणम् ग्रहच्छाया । ग्रहोदयास्तमनादि । ग्रहशृङ्गोन्नतिः । ग्रहयुतिः । भग्रहयुतिः पाताधिकारश्चेति । [गणनाकर्त्तरि ।

गणितिन् त्रि॰ गणितमनेन गणित+इष्टा॰ कर्त्तरि इनि ।

गणिपिटका स्त्री हेमचन्द्रोक्ते आचाराङ्गादिषु द्वादशसु जिनानामङ्गेषु । यथा "आचाराङ्गं सूत्रकृतं२ स्थानाङ्गं३ समवाययुक्४ । पञ्चमं भगवत्यङ्गं५ ज्ञाता धर्म्मकथा६ ऽपि च । उपासकाऽन्तकृत७ अनुत्तरोपपातिका८ दशाहः९ । प्रश्नव्याकरण१०ञ्चैव विपाकश्रुत११मेव च । इत्येकादश सोपाङ्गान्यङ्गानि द्वादश पुनः । दृष्टिवादो द्वादशाङ्गी स्याद्गणिपिटकाह्वया"

गणेय त्रि॰गण–एय । गणनीये संख्येये अमरः ।"गणेयनिःशेषगुणोऽपि स स्यात्" नैष॰ ।

गणेरु पु॰ गण–बा॰ एरु । १कर्णिकारवृक्षे, २वेश्यायां ३हस्तिन्याञ्च स्त्री मेदि॰ । [त्रिका॰ ।

गणेरुका स्त्री गणेरुषु वेश्यासु कायति कै–क । १कुट्टन्याम्

गणेश पु॰गणानामीशः। १स्वनामख्याते देवे २शिवे च । गणेशोत्पत्तिः इभाननशब्दे ९८१पृ॰उक्ता तस्य वक्रतुण्डकपिलचिन्तामणिविनायकादिरूपेण प्रादुर्भावकथा स्कान्दपु॰ गणेशख॰ उक्ता । तत एवावसेया विस्तरभयान्नोक्ता । गणेशस्य परब्रह्मरूपत्वं नामभेदात् तद्भेदाश्च गणपतितत्त्वग्रन्थे विस्तरेणोक्ता दिङ्मात्रमुदाह्रियते ।"एष सर्वेश्वरः एष सर्वज्ञः एष भूतपतिरेष भूतलय एष सेतुर्विधरणः प्रधानक्षेत्रज्ञपतिर्गणेशः इति" श्रुतिप्रसिद्धसर्वेश्वरादिपदवद्गणेशपदस्य नित्यसिद्धेश्वरपरत्वम् दृश्यते इत्युपक्रम्य "तस्मात् प्रधानक्षेत्रज्ञपतिर्गणेशः" इति श्रुतेः "गुणत्रयस्येश्वरोऽसि न नाम्ना त्वं गणेश्वरः" इति विनायकसंहितावचनाच्च गणशब्दाभिहितस्य सत्वादिगुणसंघातस्य पतिर्गणेश इति सिद्धमित्युक्तम्"। अन्ते च नमः सहमानायेत्याद्यनुवाकैस्तस्य सर्व्वेषां नाम्नां सङ्कलनेन एकोननवत्यधिकशतद्वयम् इत्युक्तम् । गणपतिभेदाश्च आगममन्त्रैर्व्वैदमन्त्रैर्वाराधनीया इत्यप्युक्तम् । तन्त्रे तु अन्यथा संख्योक्ता यथा शारदतिलकराघवटीकायाम् "विघ्नेशो विघ्नराजश्च विनायकशिवोत्तमौ । विघ्नकृत् विघ्नहर्त्ता च गणैकददन्तकाः । गजवक्त्रनिरञ्जनौ कपर्द्दी दीर्घजिह्वकः । शङ्कुकर्णश्च वृषभध्वजश्च गणनायकः । गजेन्द्रः शूर्पकर्णश्च त्रिलोचनसंज्ञकः । लम्बोदरमहानन्दौ चतुर्म्मूर्त्तिसदाशिवौ । आमोददुर्मुखौ चैव सुमुखश्च प्रमोदकः । एकपादो द्विजिह्वश्च सुरवीरः षण्मुखः । वरदो वामदेवश्च वक्रतुण्डो द्विरण्डकः । सेनानीर्ग्रामणीर्मत्तो विमत्तो मत्तवाहनः । जटी मुण्डी तथा खड्गी वरेण्यो वृषकेतनः। भक्ष्यप्रियो गणेशश्च मेघनादकसंज्ञकः। व्यापी गणेश्वरः प्रोक्ताः पञ्चाशद्गणपा इमे । तरुणारुणसङ्काशा गजवक्त्रास्त्रिलोचनाः। पाशाङ्कुशवराभीतिहस्ताः शक्तिसमन्विताः" । तेषाञ्च पञ्चाशच्छक्तयस्तत्रोक्ता यथा "ह्रीः श्रीश्च पुष्टिः शान्तिश्च स्वस्तिश्चैव सरस्वती । स्वाहा मेधा कान्तिकामिन्यौ मोहिन्यपि वै नटी । पार्वती ज्वालिनी नन्दा सुयशाः कामरूपिणी। उमा तेजोवती सत्या विघ्नेशानी सुरूपिणी । कामदा मदजिह्वा च भूतिः स्याद्भौतिकासिता । रमा च महिषी प्रोक्ता मञ्जुला च विकर्णपा । भ्रुकुटिः स्यात्तथा लज्जा दीर्घघोणा धनुर्द्धरा । यामिनी रात्रिसंज्ञा च कामान्धा च शशिप्रभा । लोलाक्षी चञ्चला दीप्तिः सुभगा दुर्भगा शिवा । भर्गा च भगिनी चैव भोगिनी शुभदा मता । कालरात्रिः कालिका च पञ्चाशच्छक्तयः स्मृताः । सर्वाङ्गरणोद्दीप्ताः प्रियाङ्कस्थाः सुशोभनाः । रक्तोत्पलकरा ध्येया रक्तमाल्याम्बरारुणाः" ।

गणेशकुण्ड न॰ नर्म्मदास्थकुण्डभेदे । तत्कुण्डाविर्भवकथा स्कन्दपु॰ गणेशख॰११ख॰ यथा "पार्वती सिन्दूरेणाथ दृष्टा सा पर्य्यलीवने । प्रसुप्तां गिरिजां वीक्ष्य प्रसुप्तं मां (शिवम्) च षण्मुख !। प्रविवेशोदरं दैत्य उमाया वायुरूपधृक् । छित्त्वा नखैः करे धृत्वा गर्भस्थमस्तकं बहिः । निर्गत्य तच्छिरस्त्यक्तं विन्ध्याचलसमीपतः । यत्रास्ते शर्म्मदात्री सा नर्मदा दुरितापहा । मुक्तिदा सर्वजन्तूनाम् तपसां सिद्धिदायिनी । गणेशकुण्डं तत्राभूदपतद्यत्र तच्छिरः । तदादि नर्मदान्तःस्था कुण्डान्तःस्थास्तथोपलाः । आसन् ये रक्तवर्णाभा गणेशास्तेऽभवन् भुवि"। [शब्दार्थचि॰।

गणेशकुसुम न॰ गणेश इव रक्तत्वात् कुसुमम् । रक्तकुसुमे

गणेशखण्ड न॰ स्कन्दपुराणान्तर्गते गणेशाविर्भावादिभेदके खण्डभेदे ।

गणेशजननी स्त्री त० । १दुर्गायां “गणेशजननी दुर्गा राधा लक्ष्मीः सरस्वती” तन्त्र० गणेशमात्रादयोऽप्यत्र ।

गणेशभूषण न०गणेशं भूषयति भूषि–ल्यु । सिन्दूरे राजनि० तस्य ध्याने “सिन्दूरशोभाकरम्” इत्युक्तेः सिन्दूरस्य तथात्वम् सिन्दूरेण शोभाकरमिति तदर्थः ।

गणेशान पु० गणानामीशानः । गणेशे ‘‘गणेशान’ करिगणेशानाननमनामयम्” काशीख० । ‘‘ततः सस्मार हेरम्बं व्यासः सत्यवतीसुतः । स्मृतमात्रो गणेशानो भक्तचिन्तितपूरकः” भा० आ० १२ अ० । २शिवे च ।

गणेश्वर पु० गणानामीश्वरः। १गणेशे २शिवे च । गणात्मक ईश्वरः।३रुद्रादिषु त्रयस्त्रिंशत्संघदेवेषु च । ते च रुद्रादयः ११ आदित्याः १२ वसवः ८ अश्विनौ२। एते त्रयस्त्रिंशत् । रुद्रादीन् एतान् अभिधाय“एते देवास्त्रयस्त्रिंशत् सर्वभूते गणेश्वराः” भा० आनु० १५०अ० ।

गणोत्साह पुंस्त्री गणे गणभावे सम्भूयकरणे उत्साहोऽस्य । गण्डके त्रिका० स्त्रियां जातित्वात् ङीष् ।

गण्ड पु०गडि+वदनैकदेशे अच् । १कपोले(गाल)२हस्तिकपोले च अमरः।३गण्डके पुंस्त्री०४वीथ्यङ्गे५पिटके६चिह्ने७वीरे ८हयभूषणे ९बुद्बुदे च मेदि०।१०स्फोटके ११पन्थौ रमानाथः। विष्कुम्भादिषु १२दशमे योगे ।१३अश्विन्यादिनक्षत्राणां दण्डभेदे । गण्डमाह ज्यो०त० “अश्विनी मघमूलानां तिस्रो गण्डाद्यनाड़िकाः । अन्त्याः पौष्णोरगेन्द्राणां पञ्चैव जवना जगुः । मूलेन्द्रयोर्दिवा गण्डो निशायां पितृसर्पयोः । सन्ध्याद्वये तथा ज्ञेयो रेवतीतुरगर्क्षयोः । तत्र जातस्य दोषा यथा । सन्ध्यारात्रिदिवाभागे गण्डयोगोद्भवः शिशुः । आत्मानं मातरं तातं विनिहन्ति यथाक्रमम्” “मूलयाः प्रथमे पादे पितुर्वपुर्विनश्यति । द्वितीये नियतां पीड़ां मातुः कुर्यात् पितुस्तथा । तृतीये धननाशश्च चतुर्थे सर्वसम्पदः । व्यत्ययेन फलं ज्ञेयमश्लेषास्वपि पूर्ववत् ।” “दिवा जाता तु या कन्या निशि जातस्तु यः पुमान् । नोभयोर्गण्डदोषः स्यात् नाचलो हन्ति पार्वतीम् ।” विस्तरस्तु मुहूर्त्तचिन्तामणौ पीयूषधारायाञ्चोक्तो यथा । “अभुक्तमूलं घटिकाचतुष्टयं ज्येष्ठान्त्यमूलादिभवं हि नारदः । वसिष्ठ एकद्विघटीमितं जगौ बृहस्पतिस्त्वेकघटीप्रमाणकम् । अथोचुरन्ये प्रथमाष्टघट्योमूलस्य शाक्रान्तिमपञ्चनाड्यः । जातं शिशुं तत्र परित्यजेद्वा मुखं पिताऽस्याष्टसमा न पश्येत्” । “आद्ये पिता नाशमुपैति मूलपादे, द्वितीये जननी तृतीये । धनं चतुर्थोऽस्य शुभोऽथ शान्त्या सर्वत्र सत् स्यादहिभे विलोमम् । स्वर्गे शुचिप्रोष्ठपदेषमाघे भूमौ नभःकार्त्तिकचैत्रपौषे । मूलं ह्यधस्तात्तु तपस्यमार्गवैशाखशुक्रेष्वशुभं च तत्र । गण्डान्तेन्द्रभमूलपातपरिघव्याघातगण्डावमे संक्रान्तिव्यतिपातवैधृतिसिनीवालीकुहूदर्शके । वज्रे कृष्णचतुर्दशीषु यमघण्टे दग्धयोगे मृतौ विष्टौ सोदरभे जनिर्न पितृभे शस्ता शुभा शान्तितः”मु०चि०। एतद्व्याख्या पी०धा० “अत्राभुक्तमूलस्यानेके भेदाः तत्रैकस्तावदयं भेदः ज्येष्ठानक्षत्रान्तभवं ज्येष्ठान्त्यं मूलादौ भवं मूलादिभवं ज्येष्ठान्त्यजातं घटीचतुष्टयं मूलादिजातं घटीचतुष्टयं मिलित्वाष्टौ घटिकाः प्रहर इति यावत्तावान् कालोऽभुक्तमूलाख्यः (गण्डाख्यः) इति नारद आह (उपलक्षणत्वादश्लेषान्तिमघटीचतुष्टयं मघादिमघटीचतुष्टयं चाभुक्तमूलाख्यः कालः यदाह नारदः“यो ज्येष्ठामूलयोरन्तरालप्रहरजः शिशुः। अभुक्तमूलजः सार्पमघानक्षत्रयोरपीति”। तथापरोभेदः एकेति ज्येष्ठान्ते एकघटीमितं मूलादौ घटीद्वयमितमेवं मिलित्वा त्रिघटिकमभुक्तमूलं स्यादिति वसिष्ठमुनिर्जगौ यदाह वसिष्ठः “ज्येष्ठान्त्यपादघटिकामितमेव केचित् मूलं ह्यभुक्तमपरे पुनरामनन्ति । मूलाद्यपादघटिकाद्वितयेन सार्द्धमष्टौ समाःपरिहरेदिह जन्मभाजमिति”समा वर्षाणि। अथान्योभेदः एकेति ज्येष्ठान्त्यार्द्धघटिका मूलाद्यार्द्धघटिका मिलित्वा एकघटी प्रमाणमस्य तदेकघटीप्रमाणकं“शेषाद्विभाषा”इति पा०कप् तादृशमभुक्तमूलं स्यादिति बृहस्पतिर्जगौ तदाह गुरुः“ज्येष्ठान्त्यघटिकार्द्धञ्च मूलादौ घटिकार्द्धकम्। तयोरन्तर्गता नाड़ी ह्यभुक्तमूलमुच्यते”इति अथेतरो भेदः अथेति अथशब्दः पादपूरणे मूलनक्षत्रस्य प्रथमा आदिमा अष्ट घटिकाः शाक्रस्य ज्येष्ठायाः अन्तिमाः पञ्च नाड्यः पञ्च घटिकाः । एवमुभयोर्ज्येष्ठामूलयोरन्तरालवर्त्तिन्यस्त्रयोदशघटिका अभुक्तमूलमिति लोका ऊचुः । “ज्येष्ठान्त्यघटिकाः पञ्च मूलाद्या वसुनाड़िकाः। अभुक्तमूलमित्युक्तं तत्र जातं शिशुं त्यजेदिति”स्मरणात् । एवमभुक्तमूलस्यानेकभेदसम्भवे कः साधीयान् पक्ष इति चेत् उच्यते नारदोक्तः पक्ष एव साधीयान् किमत्र प्रमाणमिति चेत् शृणु बहुमुनिसंवाद एवात्र प्रमाणं तदाह कश्यपः ज्येष्ठान्त्यमूलयोरन्तरालयामोद्भवः शिशुः । अभुक्तमूलजः सोऽप्यश्लेषापितृभयोरपीति” । वसिष्ठोऽपि “भुजङ्गपौर-

न्दरपौष्णभानां तदग्रभानाञ्च यदन्तरालम्। अभुक्तमूलं प्रहरप्रमाणं त्यजेत् सुतं तत्र भवां सुताञ्चेति"। अतएव पूर्वसुक्ते वशिष्ठवाक्ये केचिदित्यन्यमताभिप्रायेण यमस्तद्वाक्ये केचिदिति अपरे इति चेत्युक्तिरस्ति यद्येवं घटीन्यूनाधिकभावाभिधायिनां प्रागुक्तवाक्यानां का गतिरिति चेत्। उच्यते दोषस्याधिक्याल्पत्वसूचनमेव गतिः। अथाभुक्तमूलसंज्ञाकथनस्य प्रयोजनमाह जातमिति। तत्राभुक्तमूलाख्ये काले जातं शिशुं बालकम् उपलक्षणत्वात्तत्र जातां कन्यां वा पिता परित्यजेन्निष्कासयेत् "त्यजेत् सुतं तत्रभवां सुताञ्चेति" वशिष्ठोक्तेः। यद्यशक्यं निष्कासनं स्यात्तदा किं कार्य्यमित्यत आह वेति वा अथ वा पूर्वपक्षकर्त्तव्यताशक्तौ पिताऽस्य शिशोः कन्याया वा मुखमष्ट समाः अष्टौ वर्षाणि "संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री शरत्समा" इत्यमरः तावत् कालं न पश्येत् यदाह नारदः "अभुक्तमूलजं पुत्रं पुत्रीमपि परित्यजेत्। अथवाब्दाष्टकं तातस्तन्मुखं न विलोकयेदिति'। च्यवनोऽपि '"अभुक्तमूलसम्भूतं परित्यजेच्च बालकम्। समाष्टकं पिताऽथ वा न तन्मुखं विलोकयेत्" इति गण्डान्तदोषस्तु विवाहप्रकरणे वक्ष्यत इति कृत्वाऽत्र नोक्तः (तच्चोपयमशब्दे १२५८पृ० दर्शितम्)। अथ प्रसङ्गात् मूलाश्लेषा जातस्य बालस्य चरणवशेन शुभाशुभफलमुपजात्याह आद्ये इति मूलनक्षत्रस्याद्ये पादे प्रथमे चरणे चतुर्थांशे इति यावत् तत्र जातस्य शिशोः कन्याया वा पिता नाशं मरणमुपैति प्राप्नोति तथा मूलद्वितीयपादे जननी माता नाशमुपैति। तथा तृतीयमूलपादे धनं द्रव्यं नाशमुपैति चतुर्थो मूलपादोऽस्य शिशोः शुभः शुभफलदः। उक्तञ्च ब्रह्मपुराणे "मूलाद्येऽंशे पितुर्नाशो द्वितीये मातुरेव च। तृतीये धनधान्यादिनाशस्तुर्य्ये धनागमः" इति। तुर्य्ये चतुर्थे रत्नमालायाम् "तदाद्यपादके पिता विपद्यते जनन्यथ। तृतीयके धनक्षयश्चतुर्थकः शुभावहः" इति। अत्र पितुर्बहुस्त्रीकत्वेऽपि स्वमातुरेव नाशो वाच्यो न सापत्नमातुः यदाह कश्यपः "मूलाद्यपादजो हन्ति पितरन्तु द्वितीयजः। मातरं स्वां तृतीयोऽर्थान् सुहृदश्च तुरीयजः" इति। यतो मातृशब्दः सापत्नमातुरपि वाचकः। यदाह गौतमः "पितृपत्न्यः सर्वा मातरस्तद्भ्रातरो मातुलास्तदपत्यानि मातुलेयानीति। अतः स्पष्टार्थमेव कश्यपवाक्ये स्वामिति पदोपादानम्। अत्र विशेषो वशिष्ठसंहितायां "मूलाद्यपादो दिवसे यदि स्यात्तज्जः पितुर्नाशनकारणं स्यात्। द्वितीयपादो यदि रात्रिभागे तदुद्भवो मातृविनाशकः स्यात्। मूलाद्यपादो यदि रात्रिभागे तदात्मनो नास्ति पुनर्विनाशः। द्वितीयपादो दिनगो यदि स्याच्च मातुरल्पोऽपि तदास्ति दोषः" इति। नारदसंहितायाञ्च "दिवाजातस्तु पितरं रात्रौ तु जननीं तथा। आत्मानं सन्ध्ययोर्हन्ति नान्यगण्डं विवर्जयेदिति"। एतदेव मातापितृगण्डमिति जीर्णा व्यवहरन्ति। अथ दोषसत्त्वे किं कार्य्यमत आह अथेति। अथानन्तरं शान्त्या मूलाश्लेषाशान्त्यास्वनुष्ठितया सर्वत्र चरणचतुष्टयेऽपि शुभमनिष्टफलनाशकं कल्याणं स्यात् उक्तञ्च वशिष्ठेन 'नैर्ऋत्यभौजङ्गमगण्डदोषनिवारणायाभ्युदयाय नूनम्। पितामहोक्तां रुचिरां च शान्तिं प्रवच्मि लोकस्य हिताय सम्यक्। शास्त्रोक्तरीत्या खलु सूतकान्ते मासे तृतीयेऽप्यथ वत्सरान्ते" इति। नैर्ऋत्यं मूलं तद्दोषः। भौजङ्गमश्लेषा तद्दोषः गण्डो वक्ष्यमाणस्तद्दोषश्च द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यत इति न्यायात् अतस्तद्दोषाणां निवारणं तदर्थम् अतएव कश्यपेन "तद्दोषशमनार्थं हि शान्तिं कुर्य्यात् प्रयत्नतः" इति सामान्यत उक्तम्। अत्र वशिष्ठवाक्ये कालत्रयकथनं सामर्थ्यासामर्थ्यकृतं ध्येयं तथा हि यदि मातुः शीतोदकस्नाने सामर्थ्यं स्यात् तदा सूतकान्त एव शान्तिस्तत्राप्यशक्तौ तृतीये मासि शान्तिः दीर्घरोगादिना तदाप्यशक्तिश्चेत्तर्हि वर्षसमाप्तिदिवसे शान्तिः। मातृगण्डे तु विशेषस्तेनैवोक्तः '"मातृगण्डे सुते जाते सूतकान्ते विचक्षणः। कुर्य्याच्छान्तिं तदब्दे वा तद्दोषस्यापनुत्तये इति" शिष्टास्तु सर्वत्र यस्मिन्नक्षत्रे जन्म तन्नक्षत्र एव शान्तिरिति व्यवहरन्ति। ननु मूलपादचतुष्टयेऽपि शान्तिः कर्त्तव्येत्युक्तं तत्र चतुर्थचरणस्य शुभफलत्वात् शान्तिरयुक्तेति प्रतिभाति "अनिमित्तकृता शान्तिर्निमित्तायोपजायते" स्मरणात्। उच्यते यद्यपि चतुर्थचरणे धनागमरूपं शुभफलमभिहितं तथापि कश्यपेन "सुहृदश्चतुरीयजः" इति सुहृन्नाशरूपस्य फलस्यानिष्टस्योक्तस्तदपाकरणार्थमवश्यं कर्त्तव्या शान्तिः। न हि कस्यचिद्वैरिनाशवन्मातुलाद्यनेकसुहृन्नाश इष्टः मूलवृक्षपादे पुरुषकन्ययोरशुभफलकथनाच्च। मूलवृक्षस्तु समनन्तरमेव मया वक्ष्यते यदि मूलाश्लेषादिदोषसम्भवे शान्तिर्न क्रियते तदानिष्टं भवति एवेत्याह नारदः "वत्स-

रात् पितरं हन्ति मातरं तु त्रिवर्षतः। द्युम्नं वर्षद्वयेनैव श्वशुरं नववर्षतः। जातं बालं वत्सरेण वर्षैः पञ्चभिरग्रजम्। मातुलं चाष्टभिर्वर्षैरनुक्तान् हन्ति सप्तभिः। तस्माच्छान्तिं प्रकुर्वीत प्रयत्नाद्विधिपूर्वकमिति” द्युम्नं धनं तस्मादवश्यं चरणचतुष्टयेऽपि शान्तिर्विधेयेति। अहिभे विलोममिति। अहिभे अश्लेषायामुक्तं फलं विलोमं विपरीतं ज्ञेयं तद्यथा मूलस्य प्रथमे पादे पितृनाश इति फलमुक्तं तत्फलमश्लेषाचतुर्थपादोत्पन्नस्य स्यात् मूलस्य द्वितीयपादे मातृनाश इत्युक्तं फलं तदश्लेषातृतीयचरणोत्पन्नस्य स्यात् अर्थनाशस्तृतीयचरणे इत्युक्तं तदश्लेषाद्वितीयपादजातस्य स्यात् मूलस्य चतुर्थपादः शुभ इत्युक्तं तदश्लेषाप्रथमचरणोत्पन्नस्य स्यादित्यर्थः। तदाह कश्यपः “फलं तदेव सार्पर्क्षे प्रतीपं त्वन्त्यपादतः” इति। वसिष्ठोऽपि “मूलाद्यपादजनितः पितरं निहन्ति द्वैतीयजः स्वजननीं त्रिपदेऽर्थहन्द्रम्। तौरीयजः शुभकरः फलमेतदेव वैलोमतो भुजगधिष्ण्यभवस्य सर्वमिति”। द्वितीय एव द्वैतीयः प्रज्ञादेराकृतिगणत्वात् स्वार्थेऽण् एवं तौरीयवैलोमशब्दौ साध्यौ। अयमर्थः स्पष्टमुक्तो भास्करव्यवहारे “सार्पांशे प्रथमे राज्यं द्वितीये तु धनक्षयः। तृतीये जननीनाशश्चतुर्थे मरणं पितुरिति”। अंशस्वरणः अत्र लग्नादिदौष्ट्ये सति दुष्टं फलमविकलं भवतीत्याह बादरायणः “मूलसार्पादिजं दौष्ट्यं स्यात् सम्पूर्णन्तु लग्नपे। सक्रूरेऽब्जे च विबले शुभदृष्टिविवर्ज्जिते” इति। अतः यथा अश्लेषादौष्ट्येऽपि शान्तिकं विधेयं तथाश्लेषान्त्यमघादिस्थान्तरालप्रहरात्मका भुक्तमूलाख्यकालेयोऽभिविहितस्तत्रोत्पन्नस्यापि शान्तिकं विधेयम्। अत्र सम्मतिवाक्यं प्रागभिहितं तत्र मूलशान्तिरश्लेषाशान्तिश्च गण्डान्तेन्द्रभेति पद्यव्याख्यानानन्तरं लिखिष्यते”। “अथात्र प्रसङ्गान्मूलवृक्षविचारोऽभिधीयते जयार्णवे मूलस्तम्भस्त्वचा शाखा पत्रं पुष्पं फलं शिखा। मुनयोऽष्टौ दिशो रुद्राः सूर्य्याः पञ्चाङ्घ्रयोऽग्नयः। मूले तु मूलनाशः स्यात् स्तम्भे वंशविनाशनम्। त्वचि१० मातुर्भवेत् क्लेशः शाखायां११ मातुलस्य च। पत्रे१२ राज्यं विजानीयात् पुष्पे५ मन्त्रिपदं स्मृतम्। फले ४च विपुला लक्ष्मीः शिखायां३ मल्पजीवितमिति” अस्य मूलाख्यस्य पुरुषस्याङ्गेषु घटीविन्यासस्तत्रैव। “मूलस्य घटिकान्यासो मूर्ध्नि पञ्च५ नृपो भवेत्। मुखे सप्त७ मृतिः पित्रोः स्कन्धे वेदा४ महाबलः। बाह्वोरष्टौ बली पाण्योस्तिस्रो३ हस्तान्वितो भवेत्। हृदि खेटाः९ भूपमन्त्री नाभौ द्वौ२ ब्रह्मविद्भवेत्। गुह्ये दश१० ऽतिकामी स्याज्जानुनोः षण्६ महामतिः। पादयोः षण्६ मतिस्तस्येत्युक्तवान् कमलासनः” इति। अथ मूलोद्भूतायाः कन्यायाः फलार्थं मूलाङ्गविभागस्तत्रैव। “चतस्रो४ नाड़िकाः शीर्षे कुर्वन्ति पशुनाशनम्। मुखे षट्६ धनहानिश्च कण्ठे पञ्च धनागमः। कौटिल्यं हृदये पञ्च बाह्वोर्वित्तागमं च तत्। वेदाः४ पाण्योर्द्दयाधर्म्मौ वेदा ४ गुह्येऽतिकामिनी। ज्येष्ठमातुलनाशश्च जङ्घयोर्युग४ नाड़िकाः। ज्येष्ठभ्रातृविनाशश्च चतस्रो जानुयुग्मके। पादयोर्दश१० नाड्यश्च तत्र वैधव्यमादिशेत्। इति मूलप्रसूतायाः फलमीरितमीदृशमिति” अस्यार्थः शीर्षे चतस्रो ४ घटिकाः मुखे षट्६ कण्ठे पञ्च५ हृदये पञ्च५ बाह्वोर्बाहुद्वये पञ्चपञ्चेति५ वीप्सा। पाण्योर्मणिबन्धादधो भागयोस्तिस्र इत्यत्रापि वीप्सा। गुह्ये चतस्रः ४ जङ्घयोर्जङ्घाद्वये द्वे द्वे २।२ एवञ्चतस्रः जानुद्वये द्वे द्वे एवं चतस्रः पादयोः पादद्वये पञ्चपञ्चेत्येवं दश१० एवं मिलित्वा षष्टि६०र्घटिका भवन्ति। अथाश्लेषाजातयोः पुत्रकन्ययोरङ्गविभागेन फलं तत्रैवोक्तम् मूर्ध्नि पञ्चसु५ पुत्राप्तिर्मुखे सप्त७ पितृक्षयः। नेत्रे द्वे२ जननीनाशो ग्रीवायां स्त्रीषु लम्पटः। स्कन्धे वेदा ४ गुरौ भक्तिर्हस्तेऽष्टौ ८च बली भवेत्। हृद्येकादशभि११श्चात्मघाती संजायते नरः। द्वाभ्यां नाभौ भ्रमः, षड्भिर्गुदे नन्दै९स्तपोधनः। पादे पञ्च५ धनं हन्ति सार्पादेतत्फलं क्रमादिति”। अथाश्लेषावृक्षोऽपि तत्रैवोक्तः फलं पुष्पं दलं शाखा त्वग्लता कन्द एव च। सार्पवल्ल्या दशा१० र्थां५ ङ्कं९ स्वर७ विश्वा१३ र्का१२ सागराः ४। नाडिकास्तद्भवे बाले फलं ज्ञेयं यथाक्रमम्। श्रीः श्रीराजभयं हानिर्मातृपित्रात्मसंक्षयः” इति। अयञ्च विभागो नक्षत्रस्य षष्टि६०घटिकात्मकत्वे ज्ञेयः न्यूनाधिकत्वे तु त्रैराशिकमुह्यम्”।

वसिष्ठेनान्येष्वपि कियत्सु नक्षत्रेषु जातस्यारिष्टमुक्तं “चित्राद्यर्द्धे पुष्यमध्ये द्विपादे पूर्वाषाढ़ाधिष्ण्यपादे तृतीये। जातः पुत्रश्चोत्तराद्ये विधत्ते मातापित्रोर्भ्रातरं चात्मनाशम्। द्विमासश्चोत्तरादोषः पुष्ये चैव त्रिमासकः। पूर्वाषाढ़ाष्टमे मासि चित्रा षाण्मासिकं फलमिति” अत्रोत्तराशब्देनोत्तराषाढ़ा गृह्यते पूर्वाषाढ़ासाहचर्यात्। अत एष्वपि नक्षत्रेषु यथाशक्तिमूलव-

च्छान्तिकं दोषपरिहारार्थं विधेयम् परन्त्वत्र देवताभेद एव केवलं ध्येयः। स च तत्तत्स्वामिकत्वः तत्तन्मन्त्राश्च वेदादेवावगन्तव्यास्तच्छान्तिकञ्च तिथिगण्डान्तशान्तावस्माभिर्वक्ष्यत इत्यलमतिप्रसङ्गेन” पी॰धा॰। अथ मूलनिवासं सफलमिन्द्रवज्राच्छन्दसाह स्वर्गे इति शुचिराषाढः प्रौष्ठपदो भाद्रपदः इष आश्विनः माघः प्रसिद्धः एषु मासेषु मूलं मूलनक्षत्रं स्वर्गेऽस्ति स्वर्गे निवासस्तस्य। नभाः श्रावणः अन्ये प्रसिद्धाः श्रावणकार्त्तिकचैत्रपौषेषु भूमौ मूलं तिष्ठति। तपस्यः फाल्गुनः शुक्रो ज्येष्ठः अन्यौ प्रसिद्धौ फाल्गुनमार्गशीर्षवैशाखज्यैष्ठेष्वधस्तात्पाताले मूलं तिष्ठति एष मूलनिवास उक्तः एतत्फलञ्च मूलनक्षत्रं यदा यस्मिन्मासे यत्र वसति तत्रैव स्वर्गभूमिपातालेषु यथोक्तशुभाशुभफलं ददाति अयमत्र तात्पर्य्यार्थः द्रव्याद्यभावेन शान्तिकं कर्त्तुमशक्नुवतः पुंसः स्वर्गपातालनिवासित्वेन मूलस्यारिष्टदोषस्तथा न प्रभवेत् यदा तु भूमावेव निवासस्तदा दोषनिवारणं नैव स्यादित्यशक्तेनापि शान्तिकं विधेयं नैतावता प्रागुक्ते विषये शान्त्यभाव एव किन्तु यथाशक्ति तत्रापि शान्तिकं विधेयं शक्तेन तु सर्वत्रैव विधेयम् तदुक्तं ज्योतिषार्णवे “मार्गफाल्गुनवैशाखज्यैष्ठे मूलं रसातले। माघाश्विननभस्येषु शुचौ मूलं सुरालये। पौषश्रावणचैत्रेषु कार्त्तिके भूमिसंस्थितम्। भूमिष्ठं दोषबहुलं स्वल्पमन्यत्र संश्रितम्” क्वचित् सौरमासपरत्वेन मूलनिवासोऽभिहितः “वृषालिसिंहेषु घटे च मूलं दिविस्थितं युग्मतुलाङ्गनान्त्ये। पातालगं मेषधनुःकुलीरनक्रेषु भूमाविति संस्मरन्ति। स्वर्गे मूले भवेद्राज्यं पाताले च धनागमः। मर्त्यलोके यदा मूलं तदा शून्यं समादिशेदिति” ज्योतिषरत्नेऽभिहितत्वात्” पी॰धा॰। अथ मूलप्रसङ्गाद्दुष्टेषु गण्डान्तादिनिमित्तेषु सत्सु जातस्यारिष्टं सपरिहारं शार्दूलविक्रीडितेनाह गण्डान्तेति एतेषु पदार्थेषु सत्सु जनिः शिशोरुत्पत्तिर्न शस्ता दुष्टफलदा गण्डान्तः सन्धिविशेषः स त्रिविधो नक्षत्रतिथिलग्नभेदेन तल्लक्षणं ज्येष्ठा पौष्णभेत्यादिना वक्ष्यति इन्द्रभं ज्येष्ठानक्षत्रं मूलः मूलाख्यो दुष्टयोगः पातो महापातो गणितसाध्यो, व्यतीपाताख्यो वैधृताख्यश्च परिघव्याघातगण्डा अपि दुष्टयोगाः अवमस्तिथिक्षयः संक्रान्तिः सूर्य्यस्य राश्यन्तरसंक्रमपुण्यकालः व्यतीपातवैधृतौ सप्तदशसप्तविंशतितमौ दुष्टयोगौ सिनीवाली दृष्टेन्दुरमावास्या। कुहूर्नष्टेन्दुरमावस्या “सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः” इत्यभिधानात् दर्शश्चन्द्रदर्शनरहितामावास्या एतच्चाग्रे सम्यक् प्रतिपादयिष्यते वज्रे दुष्टयोगे कृष्णे कृष्णपक्षे चतुर्दशी बहुवचनमादृत्याभिप्रायं यमघण्टे मघाविशाखेत्युक्ते दुष्टयोगे दग्धयोगे सूर्य्येशपञ्चाग्निरसाष्टनन्दा इत्युक्ते दुष्टयोगे केचित्तु चापान्त्यगे गोघटगे पतङ्गे” इति वक्ष्यमाणो दुष्टयोग इति व्याचख्युः सूतौ हीशास्तोयादित्यादिनोक्ते मृत्युयोगे विष्टौ भद्रायां सोदरस्य भ्रातुर्भगिन्या वा भे नक्षत्रे पितृभे माता च पिता च पितरौ तयोर्भे मातृभे पितृभे च एषु निमित्तेषु सुतस्य सुताया जन्म चेत् स्यात्तदनिष्टकृत् स्यादित्यर्थः। इष्टनिमित्तस्योपलक्षणत्वात् सूर्य्यचन्द्रग्रहणजन्मत्रीतरजन्माद्यनिष्टं सजातीयापत्यत्रयप्रसवानन्तरं विजातीयापत्यप्रसवस्त्रीतरः तथा पुत्रत्रयप्रसवानन्तरं कन्याया जननं कन्यात्रयप्रसवानन्तरं पुत्रस्य जननम् अतएव त्रिभ्यः सजातीयेभ्यः इतरो विजातीयस्त्रीतरः स्त्री च त्रीतरेति व्युत्पत्तिस्त्रीतरस्त्रीतरा च त्रीतरौ पुमान् स्त्रियेत्येकशेषः अथ परिहारोऽप्युच्यते सा जनिः शान्तितो वसिष्ठाद्यर्षिप्रोक्तायाः शान्त्याः शुभा परिणामे सुखदायिनी शारीरक्लेशानुभवपूर्वकनीरोगदीर्घायुष्ट्वं शिशोः स्यादित्यर्थः। अत्र मूलवाक्यानि लिख्यन्ते। तत्र प्राक्पद्यप्रतिज्ञातसकलशान्तिसामान्यकर्मौपयिकी च मूलशान्तिस्तावदुच्यते। शौनक उवाच। अथातः सम्प्रवक्ष्यामि मूलजातहिताय च। मातापित्रोर्धनस्यापि कुले शान्तिहिताय च। त्यागो वा मूलजातस्य स्याद्दशाब्दात् प्रदर्शनम्। अभुक्तमूलजातानां परित्यागो विधीयते। अदर्शने यापि पिता स तु तिष्ठेत् समाष्टकम्। एवं च दुहितर्ज्ञेयं मूलजातफलं बुधैः। मुख्यकालं प्रवक्ष्यामि शान्तिहोमस्य यत्नतः। जातस्य जननाह्ने तु जन्मर्क्षे वा शुभे दिने। समाष्टके वा मतिमान् कुर्य्याद्वै शान्तिमादरात्। यदेव शान्तिकं कुर्य्यात् कर्म तत्तु प्रचक्ष्महे” अधिकं तत्र दृश्यम्।

“गण्डेषु स्फुटरचनाजपत्रवल्ली” “गण्डोज्ज्वलामुज्ज्वलनाभिचक्रया” इति च माघः।

गण्डक पुंस्त्री गण्ड+स्वार्थे क। (गाण्डार) १पशुभेदे स्त्रियां जातित्वात् ङीष्। २गण्डशब्दार्थे तस्य हयभूषणपरत्वेऽपि क्वचित् भूषणमात्रपरतेत्यभिप्रायेण “व्याघ्रनखपङ्क्तिमण्डिता गण्डकाभरणा (बालग्रीवा) च” काद॰। ३ग्रन्थौ

"गोरोचनालिखितभूर्ज्जपत्रगर्भान् मन्त्रगण्डकान्" कादं० स्फोटकरोगे "अनेकवेत्राघातनिर्मितवक्रगात्रगण्डकम्" कादं०। गण्डकी नदी सन्निकृष्टतयाऽस्त्यस्य अच्। गण्डकप्राचीस्थदेशभेदे तत्रवासिषु तन्नृपेषु बहुव० "ततः स गण्डकान् शूरो विदेहान् भरतर्षभः। विजित्याल्पेन कालेन" भा०स०२८अ० भीमप्राचीजयोक्तौ।

गण्डकी स्त्री गण्ड+जातौ ङीष्। १गण्डकी गण्डकजातिस्त्रियाम्। २नदीभेदे ३तदधिष्ठातृदेवीभेदे च सा च विष्णुसेवया शालग्रामशिलाखनित्वं लेभे तत्कथा। वराहपु०

"गण्डक्यापि पुरा तप्तं वर्षाणामयुतं विधे!। शीर्णपर्णाशनं कृत्वा वायुभक्षाप्यनन्तरम्। दिव्यं वर्षशतं तेपे विष्णुं चिन्तयती तदा। ततः साक्षाज्जगन्नाथो हरिर्भक्तजनप्रियः। उवाच मधुरं वाक्यं प्रीतः प्रणतवत्सलः। गण्डकि! त्वां प्रसन्नोऽस्मि तपसा विस्मितोऽनघे!। अनवच्छिन्नया भक्त्या वरं वरय सुव्रते!। किं देयं तद्वदस्वाशु प्रीतोऽस्मि वरवर्णिनि!। गण्डक्यपि पुरो दृष्ट्वा शङ्खचक्रगदाधरम्। दण्डवत् प्रणता भूत्वा ततः स्तोतुं प्रचक्रमे।" "ततो हिमांशो! सा देवी गण्डकी लोकतारिणी। प्राञ्जलिः प्रणता भूत्वा मधुरं वाक्यमब्रवीत्। यदि देव! प्रसन्नोऽसि देयो मे वाञ्छितो वरः। मम गर्भगतो भूत्वा विष्णो! मत्पुत्रतां व्रज। ततः प्रसन्नो भगवान् चिन्तयामास गोपते!। किं याचितं निम्नगया नित्यं मत्सङ्गलुब्धया। दास्यामि याचितं येन लोकानां भवमोक्षणम्। इत्येवं कृपया देवो निश्चित्य मनसा स्वयम्। गण्डकीमवदत् प्रीतः शृणु देवि! वचो मम। शालग्रामशिलारूपी तव गर्भगतः सदा। तिष्ठामि तव पुत्रत्वे भक्तानुग्रहकारणात्। मत्सान्निध्यात् नदीनां त्वमतिश्रेष्ठा भविष्यसि। दर्शनात् स्पर्शनात् स्नानात् पानाच्चैवावगाहनात्। हरिष्यसि महापापं वाङ्मनःकायसम्भवम्। यः स्नास्यति विधानेन देवर्षिपितृतर्पकः। तर्पयेत् स्वपितॄंश्चापि तारयित्वा दिवं नयेत्। स्वयम् मम प्रियो भूत्वा ब्रह्मलोकं गमिष्यति। यदि त्वय्युत्सृजेत् प्राणान् मम कर्मपरायणः। सोऽपि याति परं स्थानं यत्र गत्वा न शोचति। एवं दत्त्वा वरान् देव्यै तत्रैवान्तरधीयत। ततः प्रभृति तिष्ठामः क्षेत्रेऽस्मिन् शशलाञ्छन!"। "गण्डक्याश्चैकदेशे च शालग्रामस्थलं स्मृतम्। पाषाणं तद्भवं यत्तत् शालग्राममिति स्मृतम्" स्मृतिः। सा च शोणनदसन्निकृष्टस्थाने गङ्गायां सङ्गता हरिहरक्षेत्रतया च तत्सङ्गमस्थानं प्रसिद्धम्। "गण्डकीञ्च महाशोणं सदानीरां(करतोयाम्)तथैव च। एकपर्वतके सद्यः क्रमेणैवाव्रजन्त ते" भा०स०१८अ० "गण्डकीन्तु समासाद्य सर्वतीर्थजलोद्भवाम्। वाजपेयमवाप्नोति सूर्य्यलोकञ्च गच्छति" भा०व० ८४। "गण्डक्या उत्तरे तीरे गिरिराजस्य दक्षिणे। सिंहस्थं मकरस्थञ्च गुरुं यत्नेन वर्ज्जयेत्" मलमा० त०।

गण्डकारी स्त्री गण्डं ग्रन्थिं भग्नसंयोजनरूपं करोति कृ—अण् गौ० ङीष्। (हातजोड़ा) १वराहक्रान्तायामोषधौ रत्नमा०। २खदिरवृक्षे शब्दच०।

गण्डकाली स्त्री गण्डेषु ग्रन्थिषु काली। १खदिरीवृक्षे २समङ्गायाम् अमरः। [शब्दे तस्य तत्पुत्रत्वकथा दृश्या

गण्डकीपुत्र पु० ६त०। १शालग्रामे शिलाभेदे। गण्डकी-

गण्डकीशिला स्त्री गण्डक्यामुत्पन्ना शिला। शालग्रामशिलायाम्। [मदे हारा०।

गण्डकुसुम न० गण्डस्य हस्तिकपोलस्य कुसुममिव। १हस्ति-

गण्डकूप पु० गण्डे गण्डवदुच्चपर्वतभृगौ कूपः। पर्वतोच्चदेशस्थे कूपे हारा०। [फलप्रधाने वृक्षे शब्दचि०।

गण्डगात्र न० गण्ड इव उच्चावचं गात्रमस्य। (आता)

गण्डदूर्व्वा स्त्री गण्डयुक्ता ग्रन्थिमती दूर्वा। (गाँटदूर्वा) दूर्वाभेदे राजनि०। "गण्डदूर्वा हिमा लौहद्राविणी ग्राहिणी लघुः। तिक्ता कषाया मधुरा वातकृत् कटुपाकिनी। दाहतृष्णाबलासास्रकुष्ठपित्तज्वरापहा" भावप्र०। [लोपः। गण्डतुल्यचरणे।

गण्डपाद त्रि० गण्डस्य पाद इव पादोऽस्य हस्त्या० नान्त्य-

गण्डफलक न० गण्डः फलकमिव प्रशस्तत्वात् उपमितस०। १विस्तीर्णगण्डे। बहु०स०।२तद्युक्ते त्रि०।"घृतसुगन्धगण्डफलकैर्विबभुर्विकसद्भिरास्यकमलैः प्रमदाः" माघः। गण्डं भित्तिरिव। गण्डभित्त्यादयोऽपि तत्रार्थे "निधौतदानामलगण्डभित्तिः" "अनुगतमलिवृन्दैर्गण्डभित्तीर्विहाय" रघुः।

गण्डमाला स्त्री ६त०। १रोगभेदे। तल्लक्षणभेदाद्युक्तं भावप्र० यथा

"कर्कन्धुकोलामलकप्रमाणैः कक्षांसमन्यागलवङ्क्षणेषु। मेदःकफाभ्यां चिरमन्दपाकैः स्याद्गण्डमाला बहुभिस्तु गण्डैः।" "गण्डमालाया एकावस्थाविशेषमपचीमाह "ते ग्रन्थयः केचिदवाप्तपाकाः

स्रवन्ति नश्यन्ति भवन्ति चान्ये । कालानुबन्धं चिरमादधाति सैवापचीति प्रवदन्ति केचित् । ते ग्रन्थयः गण्डमालाया एव गण्डाः केचिदल्पप्रपाकाः सन्तः स्रवन्ति, केचित् नश्यन्ति पुनः प्ररोहन्ति । अन्ये भवन्ति च । कालानुबन्धाच्चिरमादधाति या गण्डमाला चिरं तिष्ठति सैवापची इति केचिद्वदन्ति । अपच्याः साध्यत्वादिकमाह । साध्या स्मृता पीनसपार्श्वशूलकासज्वरच्छर्दियुता त्वसाध्या । ग्रन्थेर्लक्षणमाह । वातादयो मांसमसृक् च दुष्टं संदूष्य मेदश्च तथा शिराश्च । वृत्तोन्नतं विग्रथितं तु शोथं कुर्वन्त्यतो ग्रन्थिरिति प्रदिष्टः । विग्रथितं ग्रन्थिरूपम्” ।
गण्डमालाऽस्त्यस्य इनि । गण्डमालिन् तद्रोगवति त्रि० । तस्य श्राद्धे वर्ज्यतामाह मनुः “भ्रामरी गण्डमाली च श्वित्र्यथो पिशुनस्तथा” ।

गण्डमालिका स्त्री गण्डानां ग्रन्थीनां माला यत्र कप् कापि अत इत्त्वम् । १लज्जालुलतायाम् रत्नमा० ।

गण्डयन्त पु० गडि झच् । १मेघे उज्ज्वलदत्तः ।

गण्डली पु० गण्ड इव भूमेरुच्छूनप्रदेशः क्षुद्रशैलस्तत्र लीयते ली–क्विप् । १महादेवे “गण्डली मेरुधामा च देवाधिपतिरेव च” भा० आनु० १७अ० । “शिवसहस्रनामोक्तौ “सुलोपः आर्षः” नीलकण्ठः ।

गण्डलेखा स्त्री लिख्यतेऽत्र लेखा स्थली गण्डः स्थलीव । १प्रशस्तगण्डस्थल्याम् ।

गण्डशिला स्त्री गण्डः भूमेरुच्छूनप्रदेश इव शिला । भूमेरुच्छूनप्रदेशवत् १स्थूलपाषाणे । “दृष्टोऽङ्गुष्ठशिरोमात्रः क्षणाद्गण्डशिलासमः” भाग०३।१३।२१ ।

गण्डशैल पु० गण्ड इव भूमेरुच्छूनप्रदेशः शैलः स्थूलोपलः, शैलस्य गण्ड इव वा राजद० पूर्वनि० । भूकम्पादिना पर्वतात् पतिते स्थूलपाषाणे अमरः । “लीलां दधौ राजतगण्डशैलः” “अस्मिन् भजन्ति कनकोपलगण्डशैलाः” । “योषाणामुरुभिरुरोजगण्डशैलैः” इति च माघः ।

गण्डसाह्वया स्त्री गण्डेन सहित आह्वयो यस्याः । १गण्डक्यां नद्याम् “गङ्गा च शतकुम्भा च शरयूर्गण्डकाह्वया” भा०व०२१२अ० । [शब्दच० स्त्रियां ङीप् ।

गण्डाङ्ग पुंस्त्री गण्ड इव उच्छूनमङ्गं यस्य । १गण्डके

गण्डान्त न० “नक्षत्रतिथिलग्नानां गण्डान्तं त्रिविधं स्मृतम् । नवपञ्चचतुर्थीनां द्व्येकार्द्धघटिकामितम्” ज्योतिषोक्ते तिथिनक्षत्रादीनां सन्धिसमयभेदे उपयमशब्दे १२५८ पृ० विवृतिः । [वृक्षे भावप्र० ।

गण्डारि पु० गण्डरोगस्याऽरिः नाशकत्वात् । १कोविदार-

गण्डाली स्त्री गण्डेन ग्रन्थिनाऽल्यते भूष्यते अल–घञ् गौरा०ङीष् । १श्वेतदूर्वायां अमरः । गण्डमलति–अल–अण् गौरा० ङीष् । २सर्पाक्षीवृक्षे भावप्र० । [हेम० ।

गण्डि पु० गडि–इन् । वृक्षस्य मूलाच्छाखावधिभागे (गुँडि)

गण्डिक त्रि०गण्डः बुद्बुद इवाकारेणास्त्यस्य ठन् । बुद्बुदोपमे १क्षुद्रपाषाणादौ “गन्धमादनपार्श्वे तु परे त्वपरगण्डिकाः” भा०भी०६अ० । “अपरे अस्य गन्धमादनस्यैवावयवभूता बुद्बुदोपमाः क्षुद्रशैलाः” नील० । अल्पार्थे ङीप् स्वार्थे क ह्रस्वः । २गण्डिका क्षुद्रगण्डपाषाणे स्त्री “तथा माल्यवतः शृङ्गे पूर्वपूर्वानुगण्डिका” भा०भी०७अ० । अत्र “नगं डिकाकारयोगं करेऽणुमिति” भा० आश्व० ८श्लोकं कश्चिदुदाजहार तच्चिन्त्यं तस्य श्लोकस्य नगमितिच्छेदः तदर्थस्तु नीलकण्ठेनोक्तः यथा नगं पर्वतं, डीयते विहायसा गच्छति डीः पक्षी ततः अल्पार्थे कन् डिका मशकादि तस्याकारेण योगोऽस्य तथाभूतं करे कुर्वे तथा च पर्वतमपि मशकीकर्तुं शक्नोमीति” ।

गण्डीर पु० गडि–बा० ईरन् । १समष्ठिलायां (शशा) ख्याते वृक्षे जटा० (गुमिया) ख्याते २शाकभेदे भरतः । ३सेहुण्डवृक्षे (सिजु) स्त्री राजनि० गौरा० ङीष् ।

गण्डु (गण्डू) पुंस्त्री गण्ड्यते गडि–आधारे उन् स्त्रीत्वे अप्राणिजातिवाचकत्वात् ऊङ् । १उपधाने (बालिश) जटा० तत्र कपोलरूपवदनैकदेशव्यापारसत्त्वात्तथात्वम् । २ग्रन्थौ पु० शब्दार्थचि० गण्डूपदः । गण्डुः ग्रन्थिरस्त्यस्य सिध्मा०वा लच् । ३गण्डुल ग्रन्थियुते त्रि० । पक्षे मतुप् । गण्डुमत् तत्रार्थे त्रि० स्त्रियां ङीप् ।

गण्डूपद पुंस्त्री०गण्डुः ग्रन्थयः तद्युतानि पदानि यस्य । (केँचो) १किञ्चुलुके अमरः । स्त्रियां ङीष् । अल्पार्थे ङीप् । गण्डूपदी २क्षुद्रकिञ्चुलके अमरः । [हेमच० ।

गण्डूपदभव न० गण्डूपद इव भवति भू–अच् । १सीसके

गण्डूष पु० गडि–ऊषन् । १मुखपूरणे २मुखान्तर्धृतजलादौ च “गण्डूषमुज्झितवता पयसः सरोषम्” माघः । “सुखोष्णः स्नेहगण्डूषो नस्यं स्नैहिकमेव च” सुश्रु० । “अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते” आ० त० । “तस्य जह्नुः सुतो, गङ्गां गण्डूषीकृत्य योऽपिबत्” भाग० ८।१५।२। “गजाय गण्डूषजलं करेणुः” कुमा० । १हस्ति

शुण्डाग्रे ४प्रसृतिपरिमाणे च मेदि० "गण्डूषजलमात्रेण शफरी फर्फरायते" उद्भटः। ५उन्नतनाभौ च स्त्री टाप् अमरोक्तं स्त्रीत्वमेतदर्थपरमिति शब्दार्थचि०।

गण्डूषकवलधारणादौ विधिश्च भावप्र० दर्शितो यथा "स्नेहक्षीरकषायादिद्रवैः संपूर्णमाननम्। आपूर्य्य स्थीयते तावद्विधिर्गण्डूषधारणे। कफपूर्णास्यता यावच्छेदो दोषस्य वा भवेत्। नेत्रघ्राणस्रुतिर्य्यावत्तावद्गण्डूषधारणम्। गण्डूषान् सुस्थितः कुर्यात् स्विन्नभालगलादिकः। मनुष्यस्त्रींस्तथा पञ्च सप्त वा दोषनाशनान्। गलादिक इत्यादि शब्देन गण्डकपोलौ गृह्येते सुश्रुतोक्तत्वात्। चतुर्विधः स्याद्गण्डूषः स्नेहनः शमनस्तथा। शोधनो रोपणश्चैव कवलश्चापि तादृशः। स्निग्धोष्णैः स्नैहिको वाते, स्वादुशीतैः प्रसादनः। पित्ते कट्वम्ललवणैरुष्णैः संशोधनः कफे। कषायतिक्तमधुरैः कटूष्णो रोपणो व्रणे। दद्याद्द्रवेषु चूर्णञ्च गण्डूषे कोलमात्रकम्। कर्षप्रमाणः कल्कश्च कवले दीयते बुधैः। धार्य्यन्ते पञ्चमाद्वर्षाद्गण्डूषाः कवलादयः। व्याधेरपचयस्तुष्टिर्वैशद्यं वक्त्रलाघवम्। इन्द्रियाणां प्रसादश्च गण्डूषे विहिते भवेत्। हरेदास्यस्य वैरस्यं शोषपाकं व्रणं तृषाम्। दन्तचालं च गण्डूषो वैशद्यं तु करोति हि। अथ कवलः वातपित्तकफघ्नस्य द्रव्यस्य कवलं मुखे। अर्द्धं निःक्षिप्य संचर्व्य निष्ठीवेत्कवले विधिः। कवलः कुरुते काङ्क्षाम्भक्ष्येषु हरते कफम्। तृष्णां शोफञ्च वैरस्यं दन्तचालञ्च नाशयेत्।"

गण्डापधान न० गण्ड उपधीयतेऽत्र उप+धा—आधारे ल्युट् ६त०। (गालबालिश) गण्डस्थापनार्हे १उपधाने। "मृदुगण्डोपधानानि शयनानि सुखानि च" सुश्रु०।

गण्डोल पु०गडि—ओलच्।१गुडके २ग्रासे च हेमच०। गुडकस्य वर्त्तुलाकारः(गोला)पदार्थभेदः। गुडकशब्दे दृश्यम्।

गण्डोलपाद पु० गण्डोल इव पादोऽस्य उपमानपूर्वत्वेऽपि हस्त्या० नान्त्यलोपः। १गण्डोलतुल्यवर्त्तुलपादे त्रि० स्त्रियां स्वाङ्गत्वात् वा ङीप्।

गण्य त्रि०गणं लब्धा गण+यत्,गण—कर्मणि यत् वा। गणं सङ्ख्यानं १लब्धरि,२गणनीये च। अग्रगण्यः। गणेभवः दिगा०यत्। गण्य ३गणभवे त्रि०। अस्य केनचित् समासे उत्तरपदस्थत्वे वर्ग्यादि०अकर्म्मधारये उत्तरपदस्थस्याद्युदात्तता धार्म्मिकगण्य इति।

गत त्रि० गम—कर्त्तरि क्त। १अतीते "नुनोद तस्य स्थलपद्मिनीगतम्" किरा०। "गता बहुतरा कान्ते! स्वल्पा तिष्ठति यामिनी" "गताः समाः पादयुताः" नी०ता० "आयुषोऽङ्गं गतं तस्य" सू०सि० धातूनामनेकार्थत्वात् २इत्थंभावं प्राप्ते च। "तथागतायां परिहासपूर्व्वम्" रघुः "तथागतायां तथाभूतायाम्" मल्लिना०। तथारूपप्राप्तायामिति तु न्याय्यम्।३समाप्ते ४पतिते। कर्म्मणि क्त।५ज्ञाते ६प्राप्ते ७कृतगतिके च। भावे क्त।८गमने न० "गतं तिरश्चीनमनूरुसारथेः" माघः। "गतेषु लीलाञ्चितविक्रमेषु" कुमा०। "गतं गतं वह्निसमागतं गतम्" भट्टिः।

गतत्रप त्रि० गता त्रपा लज्जा यस्य।१निर्लज्जे। [अमरः।

गतनासिक त्रि० गता नासिकाऽस्य। (खाँदा)नासिकाशून्ये

गतप्रत्यागत त्रि० पूर्वं विरागात् स्वस्थानात् गतः पश्चादागतः स्वसेवायां विरक्ततया पूर्वं गते पश्चादागते १भृत्यादौ "शत्रुसेविनि मित्रे च गूढे युक्ततरो भवेत्। गतप्रत्यागते चैव स हि कष्टतरो रिपुः" मनुः। "सा चेदक्षतयोनिः स्याद्गतप्रत्यागताऽपि वा" मनुः। भावे क्त। २गमनप्रत्यागमनयोश्च न० द्विव०। गदाशब्दे दृश्यम्।

गतबुद्धि त्रि० गता बुद्धिरस्य। १ज्ञानशून्ये।

गतरस त्रि०गतो रसोऽस्य। १नष्टरसे "यातयामं गतरसम्। अभक्ष्यकथने" स्मृतिः।

गतभर्त्तृका स्त्री गतो नष्टः प्रोषितो वा भर्त्ता यस्याः कप्। १विधवायां २प्रोषितभर्त्तृकायाञ्च। "किमु मुक्तमुक्तगतभर्त्तृकाः" माघः।

गतव्यथ त्रि० गता नष्टा व्यथा यस्य। १व्यथाशून्ये।

गतसङ्ग त्रि०गतः सङ्गोऽस्य।१फलकामनाशून्ये २फलासक्ते।

गतसन्नक पु० गतं सन्नमवसादहेतुर्मदोऽस्य कप्। निर्मदे १हस्तिनि शब्दच०। [स्पृहोऽप्यागमनप्रयोजनम्" माघः।

गतस्पृह त्रि० गता स्पृहा अस्य। १निवृत्ततर्षे। "गत-

गतस्मय त्रि० गतः स्मयो गर्व्वो, विस्मयो वा यस्य। १अहङ्कारशून्ये २विस्मयशून्ये च। [षित्त्वात् ङीष्।

गताक्ष त्रि०गतमक्षि यस्य षच् समा०। १अन्धे हेमच०स्त्रियां

गतागत न०गतं गमनमागतमागमनं द्वयोः,समाहारः।१गमागमनयोः। "एवं त्रयीधर्म्ममनुप्रपन्ना गतागतं कामकामा लभन्ते" गीता। जीवस्य गतागतं च संसारे मरणोत्तरं पुनर्जन्मग्रहणरूपम् निष्क्रियस्य तस्य अन्यथा तदसम्भवात्। "गतागतकुतूहलं नयनयोरपाङ्गावधि" रसमञ्जरी। "मध्येन मघानां गतागतं लोहितः करोति ततः" वृह०सं० ६अ०। गतागतेन निर्वृत्तम् अच्-

द्युता०ठक्। गातागतिक यातायातनिष्पादिते त्रि०। पूर्वं गतं पश्चादागतम्। २पक्षिगतिभेदे जटाधरः। गम—कर्त्तरि क्त। कर्म्म०। पूर्वं गते पश्चादागते त्रि०। खगगतिशब्दे विवृतिः। आ+गम—क्तिन् गतोत्तरमागतिः। गतागतिरप्यत्र स्त्री। "जाबालिरपि जानीते लोकस्यास्य गतागतिम्" रामा० अयो० ११०।

गताध्वन् त्रि० गतः अध्वा येन। १गतमार्गे २ज्ञाततत्त्वे च "गताध्वा छिन्नसंशयः" भा०शा०३२२अ०। स्त्रियां "डाबुभाभ्यामन्यतरस्याम्" पा० वा डाप्। सा च १चतुर्दशीयुक्तामावास्यायां खर्विताशब्दे २४६८ पृ० कर्म्मप्रदीपवाक्यं दृश्यम्। "अमावास्यां कुर्वीत चन्द्रे दृश्यमानेऽप्येकदा गताध्वा भवतीति" गोपथब्रा० १।५।१०।

गतानुगत त्रि० गतस्य गमनस्यानुगतम् अनुगमनम्। १गमनानुरूपगमने। तेन निर्वृत्तं अक्षद्यूतादि०ठक्। गातानुगतिक गमनानुगमननिष्पन्ने त्रि०। गतानुगतमस्त्यस्य ठन्। गतानुगतिक तद्युक्ते त्रि० "गतानुगतिको लोको न लोकः पारमार्थिकः" पञ्चत०।

गतान्त त्रि० गत उपस्थितः अन्तः अन्तकालोऽस्य। १उपस्थितान्तकाले, मुमूर्षौ "मम वृद्धस्य कैकेयि! गतान्तस्य तपस्विनः" रामा० अ० १२।२०। गतः प्राप्तः अन्तो येन। २प्राप्तचरमसीमनि च।

गतायुस् त्रि० गतं गतप्रायमायुर्जीवनकालोऽस्य। १प्राप्तचरमकाले, गतायुर्लक्षणं सुश्रुतेनोक्तं यथा "शरीरशीलयोर्यस्य प्रकृतेर्व्विकृतिर्भवेत्। तस्यारिष्टं समासेन व्यासतस्तु निबोध मे। शृणोति विविधान् शब्दान् यो दिव्यानामभावतः। समुद्रपुरमेघानामसम्पत्तौ च निःस्वनान्। तान् स्वनान्नावगृह्णाति मन्यते चान्यशब्दवत्। ग्राम्यारण्यस्वनांश्चापि विपरीतान् शृणोत्यपि। द्विषच्छब्देषु रमते सुहृच्छब्देषु कुप्यति। न शृणोति च योऽकस्मात्तं ब्रुवन्ति गतायुषम्। यस्तूष्णमिव गृह्णाति शीतमुष्णञ्च शीतवत्। सञ्जातशीतपिड़को यश्च दाहेन पीड्यते। उष्णगात्रोऽतिमात्रञ्च यः शीतेन प्रवेपते। प्रहारान्नाभिजानाति योऽङ्गच्छेदमथापि वा। पांशुनेवावकीर्णानि यश्च गात्राणि मन्यते। वर्णान्यभावराज्यो वा यस्य गात्रे भवन्ति हि। स्नातानुलिप्तं यञ्चापि भजन्ते नीलमक्षिकाः। सुगन्धिर्वाति योऽकस्मात्तं ब्रुवन्ति गतायुषम्। विपरीतेन गृह्णाति रसान् यश्चोपयोजितान्। उपयुक्ताः क्रमाद्यस्य रसा दोषाभिवृद्धये। यस्य दोषाग्निसाम्यञ्च कुर्य्युर्मिथ्योपयोजिताः। यो वा रसान्न संवेत्ति गतासुं तं प्रचक्षते। सुगन्धिं वेत्ति दुर्गन्धं दुर्गन्धस्य सुगन्धिताम्। गृह्णीते योऽन्यथा गन्धं शान्ते दीपे च नीरुजः। यो वा गन्धान्न जानाति गतासुं तं विनिर्दिशेत्। द्वन्द्वान्युष्णहिमादीनि कालावस्था दिशस्तथा। विपरीतेन गृह्णाति भावानन्यांश्च यो नरः। दिवाज्योतींषि यश्चापि ज्वलितानीव पश्यति। रात्रौ सूर्य्यं ज्वलन्तं वा दिवा वा चन्द्रवर्चसम्। अमेघोपप्लवे यश्च शक्रचापतडिद्गुणान्। तडित्वतोऽसितान् यो वा निर्मले गगने घनान्। विमानयानप्रासादैर्यश्च सङ्कुलमम्बरम्। यश्चानिलं मूर्त्तिमन्तमन्तरीक्षञ्च पश्यति। धूमनीहारवासोभिरावृतामिव मेदिनीम्। प्रदीप्तमिव लोकञ्च यो वा प्लुतमिवाम्भसा। भूमिमष्टापदाकारां लेखाभिर्यश्च पश्यति। न पश्यति सनक्षत्रां यश्च देवीमरुन्धतीम्। ध्रुवमाकाशगङ्गां वा तं वदन्ति गतायुषम्। ज्योत्स्नादर्पणतोयेषु छायां यश्च न पश्यति। पश्यत्येकाङ्गहीनां वा विकृतां वाऽन्यसत्त्वजाम्। श्वकाककङ्कगृध्राणां प्रेतानां यक्षरक्षसाम्। पिशाचोरगनागानां भूतानां विकृतामपि। यो वा मयूरकण्ठाभं विधूमं वह्निमीक्षते। आतुरस्य भवेन्मृत्युः स्वस्थो व्याधिमवाप्नुयात्।" अधिकं कालचिह्नशब्दे १९९६ पृ० उक्तम्।

गतार्त्तवा स्त्री गतमार्त्तवं यस्याः। गतपञ्चाशद्वर्षवयस्कायां स्त्रियाम्। "द्वादशाद्वत्सरादूर्द्ध्वमापञ्चाशत्समं स्त्रियः। मासि मासि भगद्वारा प्रकृत्यैवार्त्तवं स्रवेत्" भावप्र० तद्गतिकाल उक्तः। रोगादिना तन्मध्ये गतरजस्कायामपि जातवन्ध्यायां २स्त्रियाञ्च राजनि०।

गतार्थ त्रि० गतो ज्ञातोऽर्थो यस्य। ज्ञातार्थके पदार्थे "तदपि लक्षणकथनेनैव गतार्थम्" सा० द०।

गतासु त्रि० गताः असवोऽस्य। १मृते २शवे "गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः" गीता। ३गतप्रायप्राणके च सुश्रुतः गतायुःशब्दे दृश्यम्।

गति स्त्री गम—भावे क्तिन्। १गमने। "त्वमस्येवास्ति मे गतिः" रघुः। "प्रणयातिभूमिमगमयत् गतिभिः" माघः। "उपागमे दुश्चरिता इवापदां गतिं न निश्चेतुमलं शिलीमुखाः" किरा०। २परिणामे च "दुरधिगमा हि गतिः प्रयोजनानाम्" किरा०। "गतिः परिणामः" मल्लि०। ३ज्ञाने। करणे क्तिन्। ४प्रमाणे च।

"अनेन

पूर्वं न मयेति का गतिः"किरा०"का गतिः किं प्रमाणम्"मल्लि०। आधारे क्तिन्। ५सरणौ पथि"भिन्नगतिर्हि लोकः"रघुः।६स्थाने च।"कां गतिं कृष्ण! गच्छति" गीता"गतिं प्रतापस्य जलतृणमाथिनः" किरा० "गतिं स्थानम्" मल्लि०। गम्यते कर्म्मणि क्तिन्। ७स्वरूपे "न वयं निरूपयितुमस्य गतिम्" किरा० "गतिं स्वरूपम्" मल्लि०। ८विषये च "मनोरथानामगतिर्न्न विद्यते"कुमा०"अगतिरविषयः" मल्लि०। भावे क्तिन्। ९यात्रायाम्। करणे क्तिन् १०अभ्युपाये "कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा" पुरा०। ११नाडीव्रणे मेदि०। पक्षिप्रभृतिगतिभेदाश्च खगगतिशब्दे २४१५ पृ० उक्ताः। वृह० सं० ७अ० नक्षत्रभेदेन बुधस्य गतिभेदास्तत्फलभेदाश्चोक्ता यथा

"प्राकृतविमिश्रसङ्क्षिप्ततीक्ष्णयोगान्तघोरपापाख्याः। सप्त पराशरतन्त्रे नक्षत्रैः कीर्त्तिता गतयः। प्राकृतसञ्ज्ञा१ वायव्य१५याम्य२पैतामहानि४ बहुलाश्च३। मिश्रा गतिः२ प्रदिष्टा शशि५शिव६पितृ१०भुजग९दैवानि। सङ्क्षिप्तायां३ पुष्यः पुनर्वसुः फल्गुनीद्वयं चेति। तीक्ष्णायां४भाद्रपदाद्वयं सशाक्राश्वयुक्१८।१। पौष्णम्२७। योगान्तिकेति५ मूलं द्वे चषाढे गतिः सुतस्येन्दोः। घोरा६ श्रवणस्त्वाष्ट्रं१४ वासवं२२ वारुणं२४ चैव,पापाख्या७। सवित्रं१२ मैत्रं१७ शक्राग्निदैवतं१६ चेति। उदयप्रवासदिवसैः स एव गतिलक्षणं प्राह। चत्वारिंशत्त्रिंशद्द्विसमेता विंशति२२र्द्दिनवकं च१८। नव मासार्धं दश चैकसंयुताः११ प्राकृताद्यानाम्। प्राकृतगत्यामारोग्यवृष्टिसस्यप्रवृद्धयः क्षेमम्। सङ्क्षिप्तमिश्रयोर्मिश्रमेतदन्यासु विपरीतम्। ऋज्व्यतिवक्रा वक्रा विकला च मतेन देवलस्यैताः। पञ्चचतुर्द्व्येकाहा ऋज्व्यादीनां षडभ्यस्ताः। ऋज्वी हिता प्रजानामतिवक्रार्थं गतिर्विनाशयति। शस्त्रभयदा च वक्रा विकला भयरोगसञ्जननी।"

पाणिन्युक्तेषु प्रादिषु१२शब्दविशेषेषु पु० ते च "प्रादयः" "उपसर्गाः क्रियायोगे" "गतिश्च" "ऊर्यादिच्विडाचश्च" "अनुकरणं चानितिपरम्" "आदरानादरयोः सदसती" भूषणेऽलम् "अन्तरपरिग्रहे" "कणेमनसी" "श्रद्धाप्रतीघाते" "पुरोऽव्ययम्" "अस्तं च" "अच्छ गत्यर्थवदेषु" "अदोऽनुपदेशे" "तिरोऽन्तर्धौ" "विभाषा कृञि" "उपाजेऽन्वाजे" "साक्षात्प्रभृतीनि च" "अनत्याधान उरसिमनसी" "मध्ये पदे निवचने च" "नित्यं हस्ते पाणावुपयमने" "प्राध्वं बन्धने" "जीविकोपनिषदावौपम्ये।" पा० उक्ताः धातुविशेषयोग एव तत्संज्ञां भजन्ते धातुविशेषाश्च सि०कौ० त०स०प्र० दृश्याः। तेषाञ्च गतिसंज्ञकानां "गतिर्गतौ" पा० अनुदात्तता। "सगतिरपि तिङ्" पा०। काष्ठं प्रपचतीत्यादौ अनुदात्तता। "गतिरनन्तरः" पा० "कर्म्मार्थे क्तान्ते परेऽव्यवहितो गतिः प्रकृत्या" पुरोहितम्। "गतिकारकोपपदानां कृद्भिः समासवचनं प्राक्सुबुत्पत्तेः" वार्त्ति०। "गतिबुद्ध्यादि"पा०णिचि प्रयोज्यकर्त्तुः कर्म्मत्वम् ग्रामं गमयति देवदत्तम् चैत्रः। गत्यर्थकर्म्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि" पा०। ग्रामं ग्रामाय वा गच्छति अध्वनि तु मार्गं गच्छति। अचेष्टायां मनसा गच्छति "गत्यर्थाकर्म्मकेत्यादि" पा० कर्त्तरि च क्त। ग्रामं गतश्चैत्रः चकारात् भावे कर्म्मणि च गतं चैत्रस्य, गतो ग्रामश्चैत्रेण। "क्तोऽधिकरणे च" "ध्रौव्यगतिप्रत्यवसानेत्यादि" पा० आधारे क्त। "इदं यातं रमापतेः" सि० कौ०। सर्वे गत्यर्था ज्ञानार्थाः प्राप्त्यर्थाश्चेत्युक्तेः "मतिबुद्धिपूजार्थेभ्यश्च" पा० वर्त्तमानेऽपि क्त। शास्त्रमधिगतम् विप्रेण वर्त्तते, तेन ज्ञायमानमित्यर्थः। गत्यर्थकधातवश्च गणपाठे पठिता एव ज्ञेयाः। वैदिकप्रयोगे तु केचित्ततोऽन्येऽपि धातवः समष्ट्या निघण्टौ पठिता यथा

"वर्त्तते। अयते। लोटते। लोठते। स्यन्दते। कसति। सर्पति। स्यमति। स्रवति। स्रंसते। अवति। श्रोतति। ध्वंसति। वेनति। मार्ष्टि। भुरण्यति। शवति। कालयति। पेलयति। कण्टति। पिस्यति। विस्यति। मिस्यति। प्रवते। प्लवते। च्यवते। कवते। गवते। नवते। क्षोदति। नक्षति। सक्षति। स्यक्षति। सचति। ऋच्छति। तुरीयति। चतति। अतति। गाति। इयक्षति। सश्चति। त्सरति। रंहति। यतते। भ्रमति। भ्रजति। रजति। लजति। सियति। धमति। मिनाति। ऋण्वति। ऋणोति। स्वरति। सिसर्ति। वेविष्टि। योविष्टि। रिणाति। रीयते। रेजति। दध्यति। दभ्नोति। युध्यति। धन्वति। अरुषति। आर्यति। डीयते। तकति। दीयति। ईषति। फणति। हर्मति। अर्दति। मर्दति। सर्स्रते। नसते। हर्यति। इयर्ति। ईर्ते। ईङ्खते। जयति। आलति। गन्ति। ऋः गनीगन्ति। साहुन्ति।

जिन्वति । जसति । गमति । भ्रति । भ्राति । म्रयति । वञ्चते । अयर्यति । जेहते । धःऋति । क्षुम्पति । पस्ताति । वाति । याति । दूर्वति । द्राति । हूर्डति । एजति । जमति । जवति । वञ्चति । ध्वनिति । पवते । हन्ति । सेधति । अगन् । अजगन् । जिगाति । पतति । इन्वति । हूर्णति । हृवति । वेति । हयन्तात् । एति । जगायात् । अयुधुरिति । द्वाविंशशतं गतिकर्माणः ।” एतेषां भ्वाद्यादिगणीयत्वं विकरणादेवावसेयम् ।

गतितालिन् पु० स्कन्दसैन्यभेदे “शृणु नामानि चाप्येषां येऽन्ये स्कन्दस्य सैन्यकाः” इत्युपक्रमे “वैताली गतिताली च तथा कथकवाचिकौ” भा० शल्य० ४६अ० ।

गतिला स्त्री गम–इलच् मिथिला० नि तान्तादेशः । १वेत्रलतायाम् उज्ज्वल० । २नद्यां ३परम्परायाञ्च उणादिको० ।

गतिसत्तम पु० गतिर्बोधः, प्राप्यं स्थानं वा चासौ सत्तमश्च । १परमेश्वरे । “आदित्यो ज्योतिरात्मा च सहिष्णुर्गतिसत्तमः” विष्णुस० ।

गत्वन् त्रि० गम–क्वनिप् मलोपे तुक् । गत्वरि । स्त्रियां ङीप् रश्चान्तादेशः । गत्वरी ।

गत्वर त्रि० गम–क्वरप् मलोपे तुक् । गमनशीले स्त्रियां ङीप् । “अभिमानधनस्य गत्वरैः” किरा० ।

गत्वा अव्य० गम–क्त्वा । गतिं कृत्वेत्यर्थे “सद्यः पुरीपरिसरे च शिरीषमृद्वी गत्वा जवात् त्रिचतुराणि पदानि सीता” उत्तरच० । वेदे तु “क्त्वो यक् च” पा० यक् । गत्वाय तदर्थे अव्य० “दिवं सुपर्णो गत्वाय सोमं वज्रिण आभरत्” ऋ० ८,१००,८ । “गत्वाय गत्वा” भा० । स्नात्व्यादि० नि० आतःस्थाने ईत् । गत्वी तदर्थे अव्य० । “सा गोदुघी यद्यवसेव गत्वी” ऋ० ४।४१।५।

गद मेघध्वनौ अद० चुरा० उभ० अक० सेट् । गदयति ते अजगदत् त । गदयां बभूव आस चकार चक्रे ।

गद व्यक्तभाषणे भ्वा० पर० सक० सेट् । गदति अगादीत्-अगदीत् जगाद । गदितं गदः । गद्यं निगाद्यम् । प्रणिगदति+प्रण्यगदत् । “जगादाग्रे गदाग्रजम्” माघः । “यच्च सार्वं सदा चैवं श्लोकमेकं जगाद ह” भा० व० ६७अ० । “अथ जगदुरनीचैराशिषस्तस्य विप्राः” भट्टिः । “शुद्धान्तरक्ष्या जगदे कुमारी” रघुः । “अन्तर्वाष्पभरोपरोधि गदितम्” शकु० । “विस्तरात् गदतो मम” देवीमा० । नि+नितरां कथने । “निगदामि यथा युक्तं पुराणाश्रयसंयुतम्” भा० आ० ५अ० । “पौरा निवर्त्तध्वमिति न्यगादीत्” भट्टिः । “मखांशभाजां प्रथमो मनीषिभिस्त्वमेव देवेन्द्र ! यदा निगद्यसे” रघुः । “न नैषधकार्य्यमिदं निगाद्यम्” नैष० । भावे वा अप् । निगादः निगदः । चतुर्थ्यन्ततयोच्चारणे च । “प्रतिनिगद्य होमः” कात्या०श्रौ० ६,१०२६ । “देवतां प्रति निगद्य देवतापदं चतुर्थ्यन्तमुच्चार्य्य स्वाहाकारेण होमः” कर्कः ।

प्रति+प्रत्युत्तरकथने । “आभिगीर्याभिरव्ययः मन्त्रं प्रतिजगाद ह” भा० आनु० १२४अ० ।

वि+विरुद्धोक्तौ । “न हि निम्बात् स्रवेत् क्षौद्रं लोके विगदितं वचः” रामा० अयो० ३५अ० ।

गद पु० गद–अच् । १रोगे अमरः । “व्रणोत्थानाञ्च विज्ञानं तद्गदप्रतिषेधनम् । प्रतिश्यायनिषेधश्च शिरोगदविशेषणम् । चिकित्सा तद्गदानाञ्च” सुश्रुतः । “येषां गदानां ये योगाः प्रवक्ष्यन्तेऽगदङ्कराः !” सुश्रु० । “असाध्यं कुरुते कोपं प्राप्ते काले गदो यथा” माघः । गद–अभ्रध्वनौ भावे अच् । २मेघध्वनौ । शब्दक० भावघञर्थकतोक्तिश्चिन्त्या हलन्तत्वात् ततो भावे घञ एवानुशासनात् नावेवोपगदेऽपोविधानात् । ३रोहिणीगर्भजाते वसुदेवपुत्रभेदे पु० । “बलं गदं सारणञ्च दुर्मदं विपुलं ध्रुवम् । वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत्” भाग० ९,१४अ० । “हृदीकः ससुतोऽक्रूरो जयन्तगदसारणाः । आसते कुशलं कच्चित्” भा० ३।१२१४,२८ । “चलितानकदुन्दुभिः पुरः सबलस्त्वं सह सारणेन तम् । समितौ रभसादुपागतः सगदः सम्प्रतिपत्तुमर्हसि” माघः “जगादाग्रे गदाग्रजम्” माघः । कु(ड) ४कुष्ठे विषभेदे न० राजनि० । गदाख्यगदाह्वयादयोऽप्यत्र ।५असुरभेदे पु० । गदाशब्दे दृश्यम् ।

गदगद न० गद्गद+पृषो० । गद्गदभाषणे “वक्त्रजेषु कण्ठोष्ठतालुनामन्यतमे गदगदवाक्यता” सुश्रु० । गद्गदेत्येव पाठः सम्यक् ।

गदयित्नु पु० गदि–इत्नुच् णेरयादेशः । १कामे, २कामुके ३वावदूके च त्रि० मेदि० ४शब्दे उज्ज्वलदत्तः ।

गदा स्त्री गद–अच् टाप् । १स्वनामख्याते लौहादिकीलिते, २लौहमये याऽस्त्रभेदे, तद्युद्धक्रियाभेदो मक्ति पु० धनुर्वेदे दर्शितो यथा “आहतं विहृतं चैव गोमूत्रकमनायसम् । तयोर्गावकमितं वामदक्षिणमेव

च। व्याहृतञ्च पराहृतम् पादोद्धूतमवप्लुतम्। हंसमार्गं विमार्गञ्च गदाकर्म्म प्रकीर्त्तितम्"। तत्रैवानतिदूरे च "सव्यासव्यवदङ्गञ्च वराहोद्धूतकं तथा। हस्तावहस्तपालीनमेकहस्तावहस्तके। द्विहस्तबाहुपाशे च कटिकाचितकोद्गते। भव्ये ललाटघाते च भुजाविधमनं तथा। कारोद्धूतं विमानञ्च पादाहतविपादकम्। गात्रसंप्रेषणं क्रान्तं तथागात्रविपर्य्ययम्। ऊर्द्ध्वप्रहारं घातञ्च गोमूत्रं सव्यदक्षिणे। पादसन्ताड़नं मण्डं कवचं विधसाकुलम्। तिर्य्यग्वन्धमपाघातं भीमवेगप्रदर्शनम्। सिंहाक्रान्तं गजाक्रान्तं गर्द्दभाक्रान्तमेव च। गदाकर्म्माणि जानीयात्"। भा॰ शल्य॰ गदापर्व्वणि ५७अ॰ तु अन्यथैव प्रकारो दर्शितः यथा "अचरद्भीमसेनस्तु मार्गान् बहुविधांस्तथा। मण्डलानि विचित्राणि गतप्रत्यागतानि च। अस्त्रयन्त्राणि चित्राणि स्थानानि विविधानि च। परिमोक्षं प्रहाराणां वर्जनं परिधावनम्। अभिद्रवणमाक्षेपमवस्थानं सविग्रहम्। परिवर्त्तनसंवर्त्तमवप्लुतमुपप्लुतम्। उपन्यस्तमपन्यस्तं गदायुद्धविशारदौ। एवन्तौ विचरन्तौ तु न्यघ्नतां वै परस्परम्"। "मण्डलानि शत्रोः परिवेष्टनानि परितो भ्रमणानि। गतं शत्रोः सम्मुखगमनं प्रत्यागतम् आभिमुख्येन तत एवापसरणम्। अस्त्रयन्त्राणि कठिनमर्मदेशमाक्षिप्य येन शत्रोरुत्क्षेपणमपक्षेपणं च क्रियते तदस्त्रयन्त्रम् अस्यते क्षिप्यतेऽनेनेत्यस्त्रं तच्च तद्यन्त्रं नियन्त्रणम् चास्त्रयन्त्रमिति समासः। स्थानानि तेषामेवोपयोगीनि मर्मदेशादीनि परिधावनं वेगेन सव्यापसव्यकरणम्। अभिद्रवणं वेगेनाभ्यागमनम् आक्षेपं परयत्नस्य तत्पातनहेतुतासम्पादनम्। अवस्थानमचाञ्चल्यं सविग्रहं शत्रावुत्थिते पुनस्तेन सहयुद्धकरणं परिवर्त्तनं शत्रुं प्रहर्त्तुं परितः प्रसरणं, संवर्त्तं शत्रुप्रसरणस्यावरोधनम् अवप्लुतं प्रहारवञ्चनार्थं नम्रीभावेन निःसरणम् उपप्लुतं तदेवार्वाग्गमनयुक्तम्। उपन्यस्तं उपेत्यायुधप्रक्षेपः अपन्यस्तं परावृत्य पृष्ठतः कृतेन हस्तेन शत्रोस्ताड़नम्" नी॰क॰।

गदालक्षणन्तु हेमा॰ परि॰ख॰ लक्षणसमुच्चये "गदा पञ्चाशदङ्गुलायामा श्रेष्ठा, चत्वारिंशदङ्गुलायामा मध्या, त्रिंशदङ्गुलायामा कनिष्ठेत्यादि" अधिकं तत्रैव दृश्यम्। असुरभेदस्य गदस्यास्थिजातत्वात् विष्णुगदायास्तथात्वम्। यथा वायुपु॰ गयामा॰५अ॰। "गदो नामासुरो आसीत् वज्राद्वज्रतरो दृढः। प्रार्थितो ब्रह्मणे प्रादात् स्वशरीरास्थि दुस्त्यजम्। ब्रह्मोक्तो विश्वकर्म्मापि गदां चक्रेऽद्भुतां तदा। तदस्थ्ना वज्रनिष्पेषैः कुन्दैः स्वर्गेऽप्यधारयत्" तस्याश्च विष्णवे दानकथा गदाधरशब्दे वक्ष्यते अन्य गदानां तदाकृतित्वात्तथात्वम्। "मनस्तत्त्वात्मकं चक्रं बुद्धितत्त्वात्मिकां गदाम्" विष्णुस॰भा॰धृतवाक्यात् ३बुद्धितत्त्वे च। गदाधरः गदाभृत्। ४पाटलावृक्षे शब्दच॰।

गदागद पु॰ द्वि॰ व॰ गदमागच्छति आ+गम–ड गदागं रुग्नं दायतः शोधयतः दैप्–शोधने क। अश्विनीकुमारयोः त्रिका॰।

गदाग्रज पु॰ गदस्याग्रजः। १बलरामे गदशब्दे बलरामस्य तथात्वं दृश्यम् २श्रीकृष्णे त्रिका॰ तस्य सापत्नभ्रातृत्वेऽपि एकपितृकत्वेन तस्य गदतोऽग्रजत्वात् तथात्वम् "तथ्यासुतथ्यानुजवज्जदागाग्रे गदाग्रजम्" माघः।

गदाग्रणी पु॰ ६त॰। १क्षयरोगे राजनि॰ तस्य सर्व्वरोगश्रेष्ठत्वात्तथात्वम्।

गदाधर पु॰ गदां धारयति धृ–अन्तर्भूतण्यर्थे अच्। १विष्णौ तस्य तद्धारणकथा वायुपु॰ गयामा॰ ५अ॰ गदाशब्ददर्शितवाक्ये गदानिर्म्माणमुक्त्वा "अथ कालेन महता मनौ स्वायम्भुवेऽन्तरे। हेतिरक्षो ब्रह्मपुत्रस्तपस्तेपे सुदारुणम्। दिव्यवर्षसहस्राणां शतं वायुमभक्षयत्। उन्मुखश्चोर्द्ध्वबाहुश्च पादाङ्गुष्ठभरेण हि। एकेनातिष्ठदव्ययः शीर्णपर्णानिलाशनः! ब्रह्मादींस्तपसा तुष्टान् वरं वव्रे वरप्रदान्। देवैर्दैत्यैश्च शस्त्रास्त्रैर्विविधैर्मनुजादिभिः। कृष्णेशानस्य चक्राद्यैरवध्यः स्यां महाबलः। तथेत्युक्तान्तर्हितास्ते हेतिर्देवानथाजयत्। इन्द्रत्वमकरोद्धेति भीता ब्रह्महरादयः। हरिन्ते शरणं जग्मुरूचुर्हेतिं जहीति तान्। ऊचे हरिरवध्योऽयं हेतिर्देवासुरैः सुराः!। महास्त्रं मे प्रयच्छध्वम् हेतिं हन्मि हि येन तम्। इत्युक्तास्ते ततो देवा गदान्तां हरये ददुः। दधार तां गदामादौ दैवैरुक्तो गदाधरः। गदया हेतिमाहत्य देवेभ्यस्त्रिदिवं ददौ" वायुपु॰ गया॰ ५अ॰। "मनस्तत्त्वात्मकं चक्रं बुद्धितत्त्वात्मिकां गदाम्! धारयन् लोकरक्षार्थमुक्तश्चक्रगदाधरः" विष्णुसह॰ भाष्यधृतवाक्यात् लोकमर्य्यादारक्षार्थं बुद्धितत्त्वस्य प्रेरकत्वेन धारयितृत्वाद्वा तस्य तथात्वम्। "गदाधरं व्यपगतकालकल्मषम्" वायुपु॰ विष्णुस्तवः। "शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः" विष्णुस॰। "बुद्धितत्त्वा-

त्मिकां गदाम् वहन् गदाधरः" भा० । विष्णोर्मूर्त्तिभेदे गदाया हस्तविशेषेण धारणं ध्यानशब्दे विष्णुचतुर्विंशतिमूर्त्तिध्यानकथने वक्ष्यते ।

गदाभृत् पु० गदां बिभर्त्ति भृ–क्विप् तुक् । विष्णौ हेमच० "पार्श्वस्यास्य गदाभृतः" भाग० १० रासपञ्चाध्याय ।

गदामुद्रा स्त्री "अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथिताङ्गुली । अङ्गुष्ठौ मध्यमे भूयः सुलग्ने सुप्रसारिते । गदामुद्रेयमुदिता विष्णुसन्तोषवर्द्धिनी" तन्त्रसारोक्ते विष्णुपूजाङ्गे मुद्राभेदे ।

गदाम्बर पु० गदोऽभ्रध्वनियुक्तमम्बरमस्मात् । १मेघे त्रिका० ।

गदाराति पु० ६त० । १औषधे राजनि० ।

गदालोल न० गयातीर्थस्थे हेतिदैत्यनाशोत्तरं गदाक्षालनाख्याते तीर्थभेदे "क्षालनार्थं गदा यत्र विष्णुना लोलिताऽभवत् । बभूव तद्गदालोलं तीर्थं परमपावनम्" वायुपु० गया० ५अ० ।

गदावसान न० गदाया जरासन्धत्यक्त गदागतेरवसानमत्र । मथुरासमीपस्थे जरासन्धत्यक्तगदापतनस्थाने । "निहते वासुदेवेन तदा कंसे महीपतौ । जातो वै वैरनिर्बन्धः कृष्णेन सह तस्य (जरासन्धस्य कंसश्वशुरस्य) वै । भ्रामयित्वा शतगुणमेकोनं तेन भारत ! । गदा क्षिप्ता बलवता मागधेन गिरिव्रजात् । तिष्ठतो मथुरायां वै कृष्णस्याद्भुतकर्म्मणः । एकोनयोजनशते सा पपात गदा शुभा । दृष्टा पौरैस्तदा सम्यग्गदा चैव निवेदिता । गदावसानं तत् ख्यातं मथुरायाः समीपतः । तस्यास्तौ हंसडिम्भकावशस्त्रनिधानावुभौ" भा० सभा० १८अ० ।

गदासन न० "गदासनमथो वक्ष्ये गदाकृति वसेत् भुवि । ऊर्द्ध्वबाहुर्भवेत् येन तस्य साधनहेतुना" तन्त्रसारोक्ते आसनभेदे ।

गदित त्रि० गद–क्त । कथिते स्त्रियां टाप् "ननभरसहिता गदितोज्ज्वला" वृ०र० । अत्र गदितोज्ज्वलेति छन्दो नाम इत्यन्ये । उज्ज्वलेत्येव नामेति बहवः ।

गदिन् पु० गदाऽस्त्यस्य इनि । १विष्णौ "किरीटिनं गदिनं चक्रिणञ्च" गीता । २गदाधारिमात्रे त्रि० । "पिनाकिनं वज्रिणं दीप्तशूलम् परश्वधिनं गदिनं आयतासिम्" भा० द्रो० २०१ अ० । गद+इनि । ३रोगयुक्ते त्रि० स्त्रियां ङीप् ।

गद्गद वाक्स्खलने कण्ड्वा० पर०अक०सेट् । गद्गद्यति अगद्गद्यीत् अगद्गदीत् गद्गदया(दाम्) बभूव आस चकार ।

गद्गद पु० गद्गद–कण्ड्वा० भावे घञ् कर्त्तरि अच् वा अल्लोपः १अव्यक्तास्फुटशब्दे । २तद्वति त्रि० अमरः । तन्निदानमाह "आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः । नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान्" माधवकरः । सा०द० तु सात्त्विकभावोक्तौ स्वरभङ्गरूपता तस्योक्ता यथा "स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः" इत्याद्यष्टसात्त्विकभावानुक्त्वा "मदसंमोदपीडाद्यैर्वैस्वर्यं गद्गदं विदुः" इत्युक्तम् "तत् किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते नन्वेतन्मम, का तवास्मि दयिता, नास्मीत्यतो रुद्यते" अमरुश० । "विललाप सबाष्पगद्गदम्" रघुः । "हर्षस्त्विष्टावाप्तेर्मनःप्रसादोऽश्रुगद्गदादिकरः" सा०द० । "सगद्गदस्वरं किञ्चित् प्रियं प्रायेण भाषते" सा०द० मुग्धानुरागोक्तौ । तत्र कुशलः आकर्षा० कन् । गद्गदक गद्गदकुशले त्रि० । सुश्रुते गद्गदत्वकारणमुक्तम् "तमतिस्थूलं क्षुद्रश्वासपिपासाक्षुत्स्वप्नस्वेदगात्रदौर्गन्ध्यक्रथनगात्रसादगद्गदत्वानि क्षिप्रमेवाविशन्ति" ।

गद्गदध्वनि पु० गद्गदः कफादिनाऽव्यक्तः ध्वनिः । हर्षशोकादिना सकफेन वायुना यथास्थानानुच्चारणात् संजाते अव्यक्तध्वनौ । बङ्ग०स० । २तद्वति त्रि० ।

गद्य त्रि० गद–यत् । १कथनीये "सह्यः कथं वियोगस्य गद्यमेतत्त्वया मम" भट्टिः । सा० द० उक्ते २पादरहिते काव्यभेदे न० । "श्रव्यं श्रोतव्यमात्रं तत् पद्यगद्यमयं द्विधा" इति श्रव्यकाव्यं विभज्य "वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च । भवेदुत्कलिकाप्रायं चूर्णकञ्च चतुर्विधम् । आद्यं समासरहितं वृत्तभागयुतं परम् । अन्यद्दीर्घसमासाढ्यं तुर्य्यं चाल्पसमासकम् । मुक्तकं यथा "गुरुर्वचसि पृथुरुरसीत्यादि । वृत्तगन्धि यथा समरकण्डूलनिविडभुजदण्डकुण्डलीकृतकोदण्डशिञ्जिनीटङ्कारोज्जागरितवैरिनगरः । अत्र कुण्डलीकृतकोदण्डेत्यनुष्टुब्वृत्तस्य पादः । उत्कलिकाप्रायं यथा अणिसविसुमरणिसिददरसरविसरविदलितसमरपरिगदपवरपरबलेत्यादि (प्राकृतम्) । चूर्णकं यथा गुणरत्नसागर ! जगदेकनागर ! कामिनीमदन ! जनरञ्जनेत्यादि" । छन्दोमञ्जर्य्यामन्यथाभेदसंहितं तल्लक्षणादिकमुक्तं यथा "गद्यं पद्यमिति प्राहुर्वाङ्मयं द्विविधं बुधाः । प्रागुक्तलक्षणं पद्यं गद्यं सम्प्रति गद्यते । अपादं पदसन्तानं गद्यं तत्तु त्रिधा मतम् । वृत्तकोत्कलिका

प्रायवृत्तगन्धिप्रभेदतः। अकठोराक्षरं स्वल्पसमासं वृत्तकं१ मतम्। तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत्। भवेदुत्कलिकाप्रायं२ समासाढ्यं दृढाक्षरम्। वृत्तैकदेशसम्बन्धात् वृत्तगन्धि३ पुनः स्मृतम्।"

"कथायां सरसं वस्तु गद्यैरेव विनिर्म्मितम्। क्वचिदत्र भवेदार्य्या क्वचिद्वक्त्रापवक्त्रके। आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्त्तनम्" यथा कादम्बर्य्यादि"।

"गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते"। यथा देशराजचरितम्। "गद्यपद्यमयी राजस्तुतिर्विरुदमुच्यते। यथा विरुदमणिमाला" सा०द०।

"यजुषामृचां च साम्नाञ्च गद्यानाञ्चैव सर्व्वशः। आशीर्दुच्चार्य्यमाणानां निस्वनो हृदयङ्गमः" भा० व०२६अ०। भाग० ५स्क०, विष्णुपु० च तत्प्रपञ्चो दृश्यः।

गद्याण पु० भावप्र० कालिङ्गमानोक्तौ "यवद्वयेन गुञ्जा स्यात्त्रिगुञ्जो वल्ल उच्यते। माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत् क्वचित्। चतुर्भिर्माषकैः शाणः स निष्कष्टङ्क एव च। गद्याणो माषकैः षड्भिः कर्षः स्याद्दशमाषिकः" इत्युक्ते अष्टचत्वारिंशद्गुञ्जामिते मानभेदे। स्वार्थे क। तत्रार्थे। "तुल्या यवाभ्यां कथिताऽत्र गुञ्जा वल्लस्त्रिगुञ्जो धरणञ्च गतेऽष्टौ। गद्याणकस्तद्द्वयमिन्द्र१४तुल्यैर्वल्लैस्तथैको घटकः प्रदिष्टः" लीला० उक्ते परिमाणभेदे। तेन अष्टगुञ्जात्मकमाषषड्गुणतया तस्याष्टाचत्वारिंशद्गुञ्जामानत्वम्। क्वचिदस्य दन्त्यनमध्यतापि लमध्यता च। शब्दकल्पद्रुमे क्लीवोक्तिश्चिन्त्या भावप्र० गद्याणशब्दस्य पुंस्त्वोक्तेः स्वार्थिकप्रत्ययस्योत्सर्गतः प्रकृतिलिङ्गत्वौचित्यात्।

गध्य त्रि० ग्रह–यत् पृषो० नि०। १ग्राह्ये। "ऋजा वाजं न गध्यम्" ऋ०४।१६।११। "गध्यं ग्राह्यम्" "गध्य ग्रहणातेः निगमः" भा० "मक्षो वाजस्य गध्यस्य सातौ" ऋ०६।२६।२। "गध्यस्य ग्राह्यस्य" भा०।

गध मिश्रीभावे निघण्टुः दिवा० पर० सेट्। गध्यति अगधीत् अगाधीत्। जगाध गधिता "वाजस्य गध्यस्य सातौ" ऋ० ६।१०।६ गध्यस्य गध्यतिर्मिश्रीभावकर्म्मा मिश्रणीयस्य प्राप्यस्य वाजस्य सातौ सम्भजने"भा०।

गन्तव्य त्रि०गम–तव्य।१गम्ये "गन्तव्यमस्ति कियदित्यसकृत् ब्रुवाणा रामाश्रुणः कृतवती प्रथमावतारम्" उत्तर०। "राजा स्तेनेन गन्तव्यो मुक्तकेशेन धावता"मनुः।

गन्तु त्रि० गम–तुन्। १पथिके आगन्तुरभ्यागतः उज्ज्वलदत्तः २गन्तरि च। क्वचिद्भावेऽपि तुन्। "मध्यारीरिषतायुर्गन्तोः" ऋ० १,८९।९, "आयुर्गन्तोः कृत्स्नस्यायोर्गमनात् पूर्व्वम्" भा०। अत्र गन्तोः भावलक्षणे "स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्" पा० ३।४।१६। विहिततोसुनन्ततया माधवोक्तिश्चिन्त्या तत्र सूत्रे गमेरपाठात्। सितनिगमीत्यादिसूत्रेण तुन्प्रत्ययान्तस्यैव तद्रूपस्यौचित्यात्। "युयोत नो अनपत्यानि गन्तोः" ऋ० ३।५४।१८ इत्यस्याः व्याख्यायां च तेन तुनन्ततयैव साधितत्वात् तथैवेहौचितत्वात्। वस्तुतः तोसुन्नन्तस्याव्ययतया तत्स्वरार्थमेव तथासाधनं तेन वा० तोसुन् इत्येव न्यायः।

गन्तृ त्रि० गम–शीलार्थे तृन्। १गमनशीले २प्राप्तिशीले "तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च" गीता शीलार्थतृन्नन्तत्वात् न कर्म्मणि षष्ठी। कर्त्तरि तृच्। ३गमनकर्त्तरि त्रि०। अत्र कर्म्मणि षष्ठीति भेदः। उभयत्र स्त्रियां ङीप्। "गन्त्री वसुमती नाशम्" या०।

गन्त्री स्त्री गन्यतेऽनया ष्ट्रन् ङीप्। १वृषवहनीये शकटे अमरः। २गमनकारिकायां ३गमनशीलायां स्त्रियाञ्च।

गन्त्रीरथ पु० गन्त्री रथ इव अभीष्टस्थानप्रापकत्वात्। शकटे अमरः। [न्दिक-पित्रादिक्रमेण तत्रवासिनि।

गन्दिका स्त्री पुरीभेदे साऽभिजनोऽस्य सिन्ध्वा० अण्। गा-

गन्ध अर्द्दने (हिंसायाम्)गत्यां भूषणे च चुरा०आ०सक०सेट्। गन्धयते अजिगन्धत। गन्धनम् "गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नकथनोपयोगेषु कृञः" पा० "गन्धनं हिंसनम्, गन्धनाङ्गे उपयमे तु" इति च सि०कौ०। "गन्धनाङ्गे सूचनार्थे इत्यर्थः। तेन सूचनार्थेऽपि।

गन्ध पु० गन्ध–पचाद्यच्। घ्राणेन्द्रियग्राह्ये पृथिवीवृत्तौ विशेषगुणभेदे अमरः। २प्रतिवेशिनि त्रि०३लेशे ४सम्बन्धे ५गन्धके च मेदि०६गर्वे हेमच०।७शोभाञ्जने शब्दरत्ना०। "दृष्टो मलयजो गन्धः"इति स्मृत्युक्ते दृष्टचन्दने च। गन्धस्तु पृथिवीमात्रस्य गुणः। "रूपगन्धस्पर्शवती पृथिवी" कणा० सू०। न च पाषाणादौ गन्धरसयोरनुपलम्भात् तत्राव्यापकत्वमिति वाच्यम्। तत्रापाततो गन्धरसयोरनुपलम्भेऽपि तदीयभस्मनि तदुपलम्भस्य सत्त्वात् य एवावयवाः पाषाणारम्भकास्त एव तद्भस्मारम्भका अपि "यत् द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति" व्याप्तेरतो नाव्याप्तिः। गन्धवत्त्वमुत्पत्तिकाले घटादावव्याप्तमतो गन्धसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं पृथिवीत्वलक्षणम्। मुक्तावल्याञ्च

"तत्र क्षितिर्गन्धहेतुरिति"का०व्याख्यायाम् तथैवोक्तं यथा "गन्धहेतुरिति गन्धसमवायिकारणमित्यर्थः। यद्यपि गन्धवत्त्वमात्रं लक्षणमुचितं तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तम्। तथाहि पृथिवीत्वं हि गन्धसमवायिकारणतावच्छेदकतया सिध्यति अन्यथा गन्धत्वावच्छिन्नस्याकस्मिकत्वापत्तेः। न च पाषाणादौ गन्धाभावाद्गन्धवत्त्वमव्याप्तमिति वाच्यं तत्रापि गन्धसत्त्वात् अनुपलब्धिस्तु अनुत्कटत्वेनाप्युपपद्यते कथमन्यथा तद्भस्मनि गन्ध उपलभ्यते? भस्मनो हि पाषाणध्वंसजन्यत्वात् पाषाणोपादानोपादेयत्वं सिध्यति, "यद् द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेः दृष्टञ्चैतत् खण्डपटे महापटध्वंसजन्ये। इत्थञ्च पाषाणपरमाणोः पृथिवीत्वात् तज्जन्यस्य पाषाणस्यापि पृथिवीत्वं तथा च तस्यापि गन्धवत्त्वे बाधकाभावः"। गुणग्रन्थे च तस्य घ्राणग्राह्यत्वं द्वैविध्यञ्चोक्तं यथा "घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः। सौरभश्चासौरभश्च स द्विधा परिकीर्त्तितः" गन्धस्य पृथिव्यां स्वाभाविकत्वमौपाधिकत्वं वेति सन्दिह्य स्वाभाविकस्यैव तल्लक्षणत्वं कणा०सू०वृत्त्योः समर्थितं यथा "पुष्पवस्त्रयोः सति सन्निकर्षे गुणान्तराप्रादुर्भावो वस्त्रे गन्धाभावलिङ्गम् व्यवस्थितः पृथिव्यां गन्धः।" सू० "इदानीं भूतानां लक्षणानि गन्धादीनि परीचिक्षिषुर्गन्धादीनां स्वाभाविकत्वमौपाधिकत्वञ्च व्यवस्थापयन्नाह। रूपरसगन्धस्पर्शा यत्र कारणगुणप्रक्रमेणोत्पद्यन्ते तत्र स्वाभाविकाः सन्तो लक्षणतामुपयन्ति नान्यथा नहि समीरणे उपलभ्यमानं सौरभं शिलातले उपलभ्यमानं शैत्यं जले उपलभ्यमानमौष्ण्यं वा लक्षणं भवति तदेतदाह पुष्पवस्त्रयोरिति नहि कनककेतकीकुसुमसन्निकृष्टे वाससि कनककेतकीसौरभमुपलभ्यमानं वाससः। नहि वाससः कारणगुणप्रक्रमेण तदुत्पन्नम्, किन्तर्हि कनककेतकीसन्निधानादौपाधिकं नहि वस्त्रे गन्धाभावे केतकीगन्धाभावो लिङ्गम्। किं लिङ्गमत उक्तं गुणान्तराप्रादुर्भाव इति गुणान्तरात् कारणगुणात् अप्रादुर्भावोऽनुत्पत्तिः यदि हि वस्त्रे यो गन्ध उपलभ्यते स तस्य स्वाभाविकः स्यात्तदा तदवयवेषु तन्तुषु केतकीसन्निकर्षात् पूर्व्वं तत्र वस्त्रे चोपलभ्येत न चैवमित्यर्थः। तथा च विवादाध्यासितो गन्धो न वस्त्रसमवेतः तदवयवगुणाजन्यविशेषगुणत्वात् शीतोष्णस्पर्शवत्। स्वाभाविकं गन्धं पृथिव्या लक्षणमाह पृथिव्यां व्यवस्थितोऽयोगान्ययोगाभ्यां परिच्छिन्नः समानासमानजातीयव्यावर्त्तकतया गन्धो लक्षणमित्यर्थः भवति हि पृथिवी गन्धवत्येव, पृथिव्येव गन्धवतीति, तदेवं समानजातीयेभ्यो जलाद्यष्टभ्योऽसमानजातीयेभ्यो गुणादिभ्यश्च व्यावर्त्तकः स्वाभाविकः पृथिव्यां गन्ध इति व्यवस्थितम्" वृत्तिः। तत्र पृथिव्या उक्तार्थकगन्धवत्त्वलक्षणं यदुक्तं तस्य कथङ्कारं लक्षणता स्यादित्याशङ्कापूर्व्वकं कणादसू० उप० वृत्तौ समर्थितं यथा

"ननु लक्षणमिदं व्यतिरेकिलिङ्गमितरभेदसाधकं व्यवहारसाधकं वा तत्र पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात् यन्नेतरभिन्नं तन्न गन्धवत् यथा जलादि इतरभेदाभावव्यापकाभावप्रतियोगिगन्धवती चेयं तस्मादितरभिन्ना। तत्रेतरभेदस्य साध्यस्य प्रसिद्धौ ततो हेतोर्व्यतिरेके सपक्षविपक्षव्यावृत्ततयाऽसाधारण्यम्। अव्यतिरेके चान्वयित्वम्। अप्रसिद्धौ चाप्रसिद्धविशेषणः पक्षः। तथाच तत्र न सन्देहो न वा सिषाधयिषा न वा तद्विशिष्टस्यानुमितिः। किञ्च हेतुसाध्यव्यतिरेकयोर्व्याप्तिस्तथाच न व्याप्तस्य पक्षधर्मत्वं पक्षधर्मस्य न व्याप्तत्वमिति वैषम्यम्, अत एवोपनयवैयर्थ्यमपि व्याख्यायते नत्वगृहीतव्याप्तिकमिति तदुक्तम्, "साध्याप्रसिद्धिर्वैषम्यं व्यर्थतोपनयस्य च। अन्वयेनैव सिद्धिश्च व्यतिरेकिणि दूषणम्" इति। एवं व्यवहारसाध्यकेऽपि, तत्र यद्यपि व्यवहारः पृथिवीपदवाच्यत्वं तच्च पृथिवीत्वजातावप्यस्ति तत्र च पृथिवीत्वहेतुर्नास्तीत्यसाधारण्यं तथापि पृथिवीत्वप्रवृत्तिनिमित्तकपृथिवीपदवाच्यत्वं साध्यमिति नासाधारण्यं यद्वा पृथिवीत्वं काचित्कपदप्रवृत्तिनिमित्तं जातित्वात् घटत्ववदिति सामान्यतः सिद्धौ पृथिवीपदं पृथिवीत्वप्रवृत्तिनिमित्तकम् इतराप्रवृत्तिनिमित्तकत्वे सति सप्रवृत्तिनिमित्तकत्वात् यन्नैवं तन्नैवमिति साध्यम्। तथा चात्रापि साध्याप्रसिद्धिरेवेति चेत् नैवम्, इतरेषां जलादीनाम् भेदस्य घट एव प्रसिद्धेः। वाय्वादेरतीन्द्रियस्यापि भेदस्य अन्योन्याभावस्य घटादौ प्रत्यक्षत एव सिद्धत्वात् अन्योन्याभावप्रत्यक्षे अधिकरणयोग्यतामात्रस्य तन्त्रत्वात् स्तम्भः पिशाचो न भवतीत्यादौ तथादर्शनात्, नचैवं घट एव तर्हि दृष्टान्तोऽस्तु किं व्यतिरेकिणा "ऋजुमार्गेण सिद्ध्यन्तं को हि वक्रेण साधयेत्" इति वाच्यम् अव्यतिरेकिलिङ्गं चेदनाभासं, तदाऽयमपि मार्गो वक्ररुचिं प्रत्यप्रतिहत एव साध्याप्रसिद्धेर्निरासे तन्मूल-

कदोषाणां निरस्तत्वात्। व्यतिरेकसहचारेण अन्वयव्याप्तेरेव ग्रहात् व्यतिरेकव्याप्त्याऽन्वयव्याप्तेरनुमानाद्वा न वैषम्यम्। नचोपनयवैयर्थ्यम्, गृहीतव्याप्तेरेव हेतोः पक्षे उपसंहारात् तदुक्तम्, "नियम्यत्वनियन्तृत्वे भावयोर्यादृशी मते। त एव विपरीते तु विज्ञेये तदभावयोः"। इति व्यवहारस्तु गन्धवती पृथिवीत्युपदेशादेव यथा कम्बुग्रीवादिमान् घटपदवाच्य इति। तथा कुत्रचिदेव घृतादौ मृदादौ च गन्धवत्त्वेनोपलक्षणेन पृथिवीत्वे पृथिवीपदप्रवृत्तिनिमित्तत्वं येनोपदेशाद्गृहीतम्, गन्धवत् सर्वं पृथिवीत्वेन प्रवृत्तिनिमित्तेन पृथिवीपदवाच्यं गन्धवत्त्वात् यन्नैवं तन्नैवमिति व्यतिरेकी तत्राप्यवतरत्येव। ननु भेदसाधकव्यतिरेकिणि भेदो वैधर्म्यं स्वरूपभेदो वा अन्योन्याभावो वा न तावदाद्यौ प्रत्यक्षत एव तदवगमात् न तृतीयः अभावभेदस्यापि साध्यत्वेन तदन्योन्याभावस्य तत्राभावात् तेन सह स्वरूपभेदे साध्ये साध्याननुगमादितिचेन्न अभावप्रतियोगिकान्योन्याभावस्यापि साध्यत्वात् स यद्यतिरिक्तस्तदाऽस्त्येव न चेत् स्वरूपमादाय तत्पर्यवसानात् वस्तुतोभिन्नएव तद्वैधर्म्यस्य तदन्योन्याभावव्याप्यत्वात्, नचानवस्था यावत्येवानुभवस्तावत्येऽविश्रामात् अन्यत्र त्वननुभवेनैव विश्रामात् यत्तु त्रयोदशान्योन्याभावास्त्रयोदशसु प्रसिद्धाः मिलिताः पृथिव्यां साध्यन्ते इति तत्तुच्छं प्रत्येकं प्रसिद्धेरतन्त्रत्वात् मिलितप्रसिद्धेरभावात् किन्तु निर्गन्धत्वावच्छिन्नप्रतियोगिताकान्योन्याभावः साध्येत प्रतियोगितावच्छेदकभेदेनाभावभेदस्यावश्यकत्वात् स च घटादावेव प्रत्यक्षसिद्ध इत्युक्तत्वात्"। (जलाद्यष्टद्रव्याणि गुणादिभावपञ्चकञ्चेति त्रयोदश) तस्य चाश्रयनाशादेव नाशादनित्यत्वं यथाह कणादसू०।

"पृथिव्यादिरूपरसगन्धस्पर्शा द्रव्यानित्यत्वादनित्याश्च" सू० "पृथिव्यादीनां वाय्वन्तानामवयविनां रूपादयश्चत्वारोगुणा अनित्याः। यद्यप्यन्येऽपि गुणा अवयविषु वर्त्तमाना अनित्या एव,तथापि तेषामन्यतोऽपि विनाशः, रूपादयश्चत्वारोगुणा आश्रयनाशादेव नश्यन्ति न तु विरोधिगुणान्तरात्, द्रव्यानित्यत्वादिति द्रव्यस्याश्रयभूतस्यानित्यत्वादाश्रितानामनित्यत्वमित्यर्थः।" उप० वृ० "रूपादीनामनित्यत्वे यद्याश्रयानित्यत्वं तन्त्रं तदा नित्याश्रयवृत्तीनां नित्यत्वमित्याक्षेपबललभ्यमित्याह"। "एतेन नित्येषु नित्यत्वमुक्तम्।" सू० "रूपादीनामेव चतुर्णां नित्येष्वाश्रयेषु वर्त्तमानानां नित्यत्वमुक्तम् एतेनेति एतेनेति आश्रयानित्यत्वेनानित्यत्वाभिधानेनेत्यर्थः" उप० वृ०। एतेन मुक्तावल्यां सर्वगन्धोऽनित्य इत्युक्तिश्चिन्त्या। तस्य पाकजत्वमपि कणादसू० वृत्तौ उक्तं यथा "कारणगुणपूर्वकाः पृथिव्यां पाकजाः" सू० "पाकजा रूपरसगन्धस्पर्शा इत्यर्थः कारणगुणपूर्वका इति रूपाश्रयस्य घटादेर्यत् समवायिकारणं कपालादि तद्गुणपूर्वकाः तथा च कपालरूपकारणैकार्थसमवायप्रत्यासत्त्या घटरूपाद्यसमवायिकारणम्, एवं रसादावपि"।

रूपादीनां पाकप्रकारः पाकजशब्दे वक्ष्यते। गुणगुणिनोरभेद इति वेदान्तिनो मन्यन्ते कणादसूत्रवृत्तौ तन्निरासितं यथा।

"ननु नीलपीतादयोगुणा द्रव्याभिन्ना एव धर्मधर्मिणोरभेदादितिचेन्न रूपं घटः स्पर्शोघट इत्यादिव्यवहारप्रसङ्गात्, ननु नेदमनिष्टं यतो भवत्येव शुक्लः पटो नीलः पट इत्यादिप्रतीतिरितिचेन्न मतुब्लोपादभेदोपचाराद्वा प्रतीत्युपपत्तेः। भेदे प्रमाणे सति कल्पनेयं यथाकथञ्चिदुपपद्यते इति चेन्न चन्दनस्य रूपं चन्दनस्य गन्ध इत्यादिव्यपदेशबलाद्भेदसिद्धेः पटस्य रूपाभेदे पटवद्रूपमपि त्वगिन्द्रियेण गृह्येत पटमानयेत्युक्ते यत्किञ्चिद्रूपमानयेत् रूपमानयेत्युक्ते यत्किञ्चिद्द्रव्यमानयेत्। अस्तु तर्हि भेदाभेदः अत्यन्तभेदेऽत्यन्ताभेदे च सामानाधिकरण्यानुपपत्तेरितिचेन्न अवच्छेदभेदं विना विरुद्धयोर्भेदाभेदयोरेकत्रासमावेशात्, अन्योन्याभावत्वमव्याप्यवृत्तित्ववन्नित्याभाववृत्तिधर्मत्वादत्यन्ताभावत्ववदितिचेन्न एकत्र संयोगतदत्यन्ताभावयोः प्रतीतिबलादत्यन्ताभावस्याव्याप्यवृत्तित्वाभ्युपगमात् अन्योन्याभावे तु तथाप्रतीतेरभावात्।"

वेदान्तिमते तु तत्सत्त्वनियतसत्ताकत्वरूपतादात्म्यस्यैवाभेदत्वस्वीकारात् न तद्दोषावतारः। अतएवोक्तं "सत्यैक्ये मिथोभेदस्तादात्म्यमिति"। ऐक्ये तत्सत्त्वनियतसत्ताकत्वे सति मिथः परस्परं भेदः इति तैरभ्युपगमान्न किञ्चिद्दूषणमवहतीति।

"रूपरसगन्धस्पर्शाः रूपत्वादिगुणत्वसाक्षाद्व्याप्यजातिमन्तः।" इत्युपक्रम्य उप०वृत्तौ तल्लक्षणमुक्तं यथा "घ्राणमात्रग्राह्यो गुणो गन्धः घ्राणमात्रग्राह्यगुणत्वव्याप्यजातिमत्त्वं गन्धत्वं स च सुरभिरसुरभिश्चेति द्विविधः, यद्वा पृथिवीवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वं गन्धत्वम्।

सचायं गन्धः द्विविधः सुरभिरसुरभिश्च । भा० आश्व० ५०अ० अस्य दशविधतोक्ता यथा ।

“शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चमः । एते पञ्चगुणा भूमेर्विज्ञेया द्विजसत्तमाः! । पार्थिवश्च सदा गन्धो गन्धश्च बहुधा स्मृतः । तस्य गन्धस्य वक्ष्यामि विस्तरेण बहून् गुणान् (भेदान्) । इष्टश्चानिष्टगन्धश्च मधुरोऽम्लः कटुस्तथा । निर्हारी संहतः स्निग्धो रूक्षो विशद एव च । एवं दशविधो ज्ञेयः पार्थिवो गन्ध इत्युत” । तत्रेष्टः १कस्तूरिकादौ, अनिष्टः २विष्ठादौ, मधुरः ३मधुपुष्पादौ, कटुः ४मरिचादौ, निर्हारी ५हिङ्ग्वादौ । संहतश्चित्रगन्धः ६अनेककल्कद्रव्यादौ, स्निग्धः ७सद्यस्तप्तघृतादौ । रूक्षः ८सार्षपतैलादौ । विशदः ९शाल्यादौ, अम्लः १०तिन्तिडत्रादौ । तस्योत्कटानुत्कटत्वादिकः अवान्तरधर्म्मः उद्भूतशब्दे ११८१ पृ० विवृतः ।

तत्र सुरभिगन्धः पञ्चविधः पूजाङ्गम् यथाह कालि०पु० । “गन्धञ्च सम्यक् शृणुतं पुत्रौ! वेतालभैरवौ! । चूर्णीकृतो १वा घृष्टो २वा दाहकर्षितं ३एव वा । रसः सम्मर्दजो ४वापि प्राण्यङ्गोद्भव ५एव वा । गन्धः पञ्चविधः प्रोक्तो देवानां प्रीतिदायकः । गन्धचूर्णं गन्धपत्रचूर्णं सुमनसां तथा । प्रशस्तगन्धवृक्षाणां पत्रचूर्णानि यानि च ! तानि गन्धाह्वयानि स्युः स गन्धः प्रथमः १स्मृतः । घृष्टो मलयजो गन्धः सरलश्च नमेरुणा । अगरुप्रभृतिश्चापि यश्च पङ्कः प्रदीयते । घृष्टा, स दृष्टो गन्धोऽयं द्वितीयः परिकीर्त्तितः २ । देवदार्वगुरुब्रह्मसालसारान्तचन्दनाः । प्रियादीनाञ्च यो दग्ध्वा गृह्यते दाहजो रसः । स दाहाकर्षितो गन्धस्तृतीयः परिकीर्त्तितः ३ । स गन्धः करवीबिल्वगन्धिनीतिलकं तथा । प्रभृतीनां रसो योऽसौ निष्पीड्य परिगृह्यते । स सम्मर्दोद्गतो गन्धः सम्मर्द्दज इतीर्य्यते ४ । मृगनाभिसमुद्भूतस्तत्कोषोद्भव एव वा । गन्धः प्राण्यङ्गजः प्रोक्तो मोददः स्वर्गवासिनाम् ५ । कर्पूरगन्धसाराद्याः क्षोदे घृष्टे च संस्थिताः । चन्द्रभागादयश्चापि रसे पङ्के च सङ्गताः । गन्धसारस्तु सर्वत्र संसर्गादौ प्रयुज्यते ! मृगनाभिर्भवेद्घृष्टचूर्णोऽप्यन्यस्य योगतः । एवं सर्वस्तु सर्वत्र गन्धो भवति पञ्चधा । घृष्टादिभावादन्योन्यं गन्धः प्रीतिकरः परः । गन्धस्य विस्तरो भेदः प्रोक्तः कालीयकादयः । सर्वः पञ्चविधेष्वेव प्रविष्टो भवति क्षणात् । गन्धो मलयजो यस्तु देवे पैत्रे च सम्मतः । तत्पङ्को वा रसो वापि चूर्णो वा विष्णुतुष्टिदः । सर्वेषु गन्धजातेषु प्रशस्तो मलयोद्भवः । तस्मात् सर्वप्रयत्नेन दद्यान्मलयजं सदा । कृष्णागुरुः सकर्पूरः सहितो मलयोद्भवैः । वैष्णवप्रीतिदो गन्धः कामाख्यायाश्च भैरवौ ! । कुङ्कुमागुरुकस्तूरीचन्द्रभागैः समीकृतैः । त्रिपुराप्रीतिदो गन्धस्तथा चण्ड्याश्च शम्भुना । दैवतोद्देशपूर्वेण गन्धान् सम्पूज्य साधकः । देवायेच्छाय वितरेत् सर्वसाध्येषु पूजकः । गन्धेन लभते कामं गन्धो धर्म्मप्रदः सदा । अर्थानां साधको गन्धो गन्धे मोक्षः प्रतिष्ठितः । अयं वै कथितो गन्धः पुत्रौ वेतालभैरवौ” कालि० पु० ६८अ० ।

३कृष्णागुरुणि न० शब्दार्थचि० “नवपरिमलगन्धः केन शक्योवरीतुम्” सा०द०। “गन्धवद्रुधिरचन्दनोक्षिता” रघुः । “वर्ज्जयेन्मधुमांसं च गन्धं माल्यं रसान् स्त्रियः” मनुः । ४गन्धवति त्रि०। उद्+पूति+सु+सुरभि+शब्दात् परस्य गन्धस्य बहु० इच् समा०। उत्कटो गन्धोऽस्य उद्गन्धिः एवं पूतिगन्धिः सुगन्धिः सुरभिगन्धिः । “गन्धस्येत्त्वे तदेकान्तग्रहणम्” वार्त्ति० “एकान्त एकदेश इवाविभागेन लक्ष्यमाण इत्यर्थः यथा सुगन्धि पुष्पम् सलिलं वा सुगन्धिर्वायुरिति” च सि०कौ०। अत्र औपाधिकगन्धवत्त्वात् तथात्वम् शोभना गन्धा गन्धयुक्ताः पदार्थाः सन्त्यस्य सुगन्ध आपण इत्यादौ न” सि०कौ० । “कण्डूयतः कटभुवं करिणो मदेन स्कन्धं सुगन्धिमनुलीनवता नभस्य” “सुगन्धितामप्रतियत्नपूर्वाम्” माघः । “आघायि वान् गन्धवहः सुगन्धस्तेनारविन्दव्यतिषङ्गवांश्च” भट्टिः। “अरविन्दव्यतिषङ्गवत्त्वात् गन्धस्येत्त्वं न भवति विभागेन लक्ष्यत्वादिति जयम० । एवं उपमानपूर्वकस्य तस्येत् समा० पद्मगन्धिः । “प्रस्थं हिमाद्रेर्मृगनाभिगन्धि” कुमा० लेशवाचकत्वेऽपि इत् समा०। “सूपगन्धि घृतगन्धि भोजनम्” सि० कौ० । देवादौ गन्धदानेऽङ्गुलिविशेषनियमः तन्त्रसारे उक्तो यथा “मध्यमानामिकाङ्गुष्ठैरङ्गुल्यग्रेण पार्वति ! । दद्याच्च विमलं गन्धं मूलमन्त्रेण साधकः” । तत्र देयगन्धस्तु चन्दनकर्पूरकालागुर्वात्मकः यथाह तन्त्रसा० निबन्धे “गन्धश्चन्दनकर्पूरकालागुरुभिरीरितः” तद्योजनप्रकारो गन्धयुक्तिशब्दे दृश्यः ।

गन्धक पुं० गन्धोऽस्त्यस्य अर्श० अच् स्वार्थे क । १शिग्रुवृक्षे (सजना) शब्दर० । २स्वनामख्याते उपधातुभेदे तस्योत्पत्तिगुणभेदशोधनादिकं भावप्र० उक्तं यथा

"श्वेतद्वीपे पुरा देव्याः क्रीडन्त्या रजसाप्लुतम्। दुकूलं तेन वस्त्रेण स्नातायाः क्षीरनीरधौ। प्रसृतं यद्रजस्तस्माद्गन्धकः समजायत"। तस्य भेदाः "चतुर्धा गन्धकः प्रोक्तो रक्तः पीतः सितोऽसितः। रक्तो हेमक्रियासूक्तः पीतश्च रसायने। व्रणादिलेपने श्वेतः कृष्णः श्रेष्ठः स दुर्लभः। श्रेष्ठो हेमक्रियादिषु सर्वत्रप्रशस्यतर इत्यर्थः। अस्य गुणाः। गन्धकः कटुकस्तिक्तो वीर्य्योष्णस्तुवरः सरः। पित्तलः कटुकः पाके कण्डूविसर्पजन्तुजित्। हन्ति कुष्ठक्षयप्लीहकफवातान् रसायनः। अशोधितो गन्धक एष कुष्ठं करोति तापं विषमं शरीरे। सौख्यस्य रूपस्य बलं तथौजः शुक्रं निहन्त्येव करोति चार्त्तिम्। शोधितो यस्तु गन्धः स्यात् जरामृत्युज्वरापहः। अग्निसन्दीपनः श्रेष्ठो वीर्य्यवृद्धिकरोऽस्थिकृत्। शोधनविधिस्तु। लौहपात्रे त्रिभिःक्षिप्य घृतमग्नौ प्रतापयेत्। तप्ते घृते तत् समानं क्षिपेद्गन्धकजं रजः। विद्रुतं गन्धकं दृष्ट्वा तनुवस्त्रे विनिःक्षिपेत्। तथा वस्त्राद्विनिःसार्य्य दुग्धमध्येऽखिलं क्षिपेत्। एवं स गन्धकः शुध्येत् सर्वकर्मोचितो भवेत्।" गन्धेन कायति कै—क। इति व्युत्पत्तिरित्यन्ये।

गन्धकचूर्ण पु० गन्धकप्रधानश्चूर्णः। (बारुद) इति ख्याते पदार्थे शब्दार्थचि०।

गन्धकन्द पु० गन्धप्रधानः कन्दोऽस्य। कसेरुवृक्षे वैद्य०।

गन्धकारिका स्त्री गन्धं गन्धप्रधानं वेशादिकं करोति कृ—ण्वुल् कापि अत इत्त्वम्। परवेश्मस्थायां स्ववशायां वेशादिकारिकायाम् १सैरन्ध्र्यां हला०।

गन्धकाली स्त्री प्रशस्तः गन्धस्तस्मै अलति पर्य्याप्नोति अल—अच् गौरा० ङीष्। सत्यवत्यां व्यासमातरि। "भीष्मः खलु पितुः प्रियचिकीर्षया सत्यवतीं मातरमुदवाहयत् यामाहुर्गन्धकालीमिति तस्यां पूर्वं कानीनो गर्भः पराशरात् द्वैपायनोऽभवत्। तस्यामेव शान्तनोरन्यौ द्वौ पुत्रौ बभूवतुः विचित्रवीर्य्यचित्राङ्गदश्च" भा० आ० ६१५ अ०। "अद्य त्वं जननीं भीष्म! गन्धकालीं यशस्विनीम्" भा० हरि० २० अ०। गन्धवतीशब्दे दृश्यम्। स्वार्थे क। गन्धकालिकाऽप्यत्र हेमच०। [२शम्बरचन्दने राजनि०।

गन्धकाष्ठ न० गन्धयुक्तं काष्ठमस्य। १अगुरुचन्दने त्रिका०।

गन्धकुटी स्त्री गन्धस्य कुटीवाधारः। १मुरानामगन्धद्रव्ये। अमरः।

गन्धकुसुमा स्त्री गन्धयुक्तं कुसुमं यस्याः। (गणियारी) गणिकारीवृक्षे राजनि०।

गन्धकेलिका स्त्री गन्धं केलति गच्छति केल—ण्वुल् कापि अत इत्त्वम्। १कस्तूर्य्यां मृगमदे राजनि०। गन्धप्रधानत्वात्तस्यास्तथात्वम्।

गन्धकोकिला स्त्री गन्धप्रधाना कोकिलेव कृष्णत्वात्। "तीक्ष्णोष्णा कफहृत् तिक्ता सुगन्धा गन्धकोकिला" भावप्र० उक्तगुणके लतौषधिभेदे।

गन्धखेड़(ल)(क) न० गन्धस्य खेला यत्र वा कप् डलयोरेकत्वात्। (वेणा)गन्धवति १भूतृणे रत्नमा०। कवन्तः तत्रार्थे न० शब्दरत्नावली।

गन्धचेलिका स्त्री गन्धं चेलति गच्छति चेल—ण्वुल् कापि अत इत्त्वम्। १कस्तूर्य्यां मृगमदे त्रिका०।

गन्धजटिला स्त्री गन्धेन जटिला। १वचायां(वच)रत्नमा०।

गन्धजल न० गन्धाढ्यद्रव्यवासितं जलं शा० त०। गन्धाढ्यकुसुमादिपुष्पवासितजले "सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः" भाग० १।१।२।१२।

गन्धजात न० गन्धो व्यञ्जनादौ जातो यस्मात् निष्ठान्तान्तत्वात् परनि०। (तेजपात) १तेजपत्रे शब्दरत्ना०। ६त०। २गन्धद्रव्यसंघे च०।

गन्धज्ञा स्त्री गन्धं जानाति रसज्ञेत्यत्रेव करणस्य कर्त्तृत्वोपचारात् ज्ञा—कर्त्तरि क। १नासिकायाम् हेमच०।

गन्धतण्डुल पु० गन्धप्रधानं तण्डुलमस्य। (बासमति) १शालिभेदे राजनि०।

गन्धतन्मात्र न० सांख्यमतप्रसिद्धे शान्तघोरादिविशेषशून्यगन्धमात्रगुणके स्थूलपृथिव्यारम्भके सूक्ष्मपार्थिवांशे यथाह "स्थूलात् पञ्चतन्मात्रस्य" सा० प्र० सूत्रभाष्ये "तन्मात्राणि च यज्जातीयेषु शान्तादिविशेषत्रयं न तिष्ठति तज्जातीयानां शब्दस्पर्शरूपरसगन्धानामाधारभूतानि सूक्ष्मद्रव्याणि स्थूलानां हेतवोऽविशेषाः "तस्मिंस्तस्मिंस्तु तन्मात्रास्तेन तन्मात्रता स्मृता। न शान्ता नापि घोरास्ते न मूढाश्चाविशेषिणः" इति विष्णुपुराणादिभ्यः। अस्यायमर्थः तेषु तेषु भूतेषु तन्मात्रास्तिष्ठन्तीति कृत्वा धर्मधर्म्यभेदाद्द्रव्याणामपि तन्मात्रता स्मृता। ते च पदार्थाः शान्तघोरमूढाख्यैः स्थूलशब्दादिगतविशेषैः शून्या एकरूपत्वात्। तथा च शान्तादिविशेषशून्यशब्दादिमत्त्वमेव भूतानां शब्दादितन्मात्रत्वमित्याशयः। अतोऽविशेषिणोऽविशेषसंज्ञिता इति शान्तं सुखात्मकं

घोरं दुःखात्मकं मूढं मोहात्मकम्। तन्मात्राणि च देशादिमात्रभोग्यानि केवलं सुखाधिक्यादिति" [शब्दर०।

गन्धतूर्य्य न० गन्धे हिंसास्थाने रणे तूर्य्यम्। १रणवाद्यभेदे

गन्धतृण न० गन्धप्रधानं तृणं शा०त०। सुगन्धयुक्ते भूतृणे सुरसे सुखरागे तृणभेदे (बेणा) राजनि०। "दीप्रतिक्तं गन्धतृणं स्निग्धं चैव रसायनम्। सुगन्धि मधुरं शीतं कफपित्तश्रमापहम्" इति तत्र तद्गुणा उक्ताः।

गन्धतैल न० गन्धयुक्तस्य चन्दनस्याग्निसंयोगेन जनितं तैलम् शा० त०। यन्त्रपाकेण जनिते तैलभेदे। (चन्दनीआतर) १प्रभृतौ। "प्रदीपैः काञ्चनैस्तत्र गन्धतैलावसेचितैः" भा०भी० ६८अ०। सुश्रुतोक्ते २पक्वतैलभेदे च तत्पाकप्रकारस्तत्रोक्तो यथा

"रात्रौ रात्रौ तिलान् कृष्णान् वासयेदस्थिरे जले। दिवा दिवा शोषयित्वा गवां क्षीरेण भावयेत्। त्रिरात्रं सप्तरात्रं वा भावयेन्मधुकाम्बुना। ततः क्षीरे पुनः पीतान्सुशुष्कांश्चूर्णयेद्भिषक्। काकल्यादिं सयष्ट्याह्वं मञ्जिष्ठां सारिवां तथा। कुष्ठं सर्ज्जरसं मांसीं सुरदारु सचन्दनम्। शतपुष्पाञ्च सञ्चूर्ण्य तिलचूर्णेन योजयेत्। पीडनार्थञ्च कर्त्तव्यं सर्वगन्धशृतं पयः। चतुर्गुणेन पयसा तत्तैलं विपचेद्भिषक्। एलामंशुमतीं पत्रं जीरकं तगरं तथा। लोध्रं प्रपौण्डरीकञ्च तथा कालानुसारिणम्। शौरेयकं क्षीरशुक्लामनन्तां समधूलिकाम्। पिष्ट्वा शृङ्गाटकञ्चैव पूर्व्वोक्तान्यौषधानि च। एभिस्तद्विपचेत्तैलं शास्त्रविन्मृदुनाग्निना। एतत्तैलं सदा पथ्यं भग्नानां सर्वकर्म्मसु। आक्षेपके पक्षघाते तालुशोषे तथाऽर्द्दिते। मन्यास्तम्भे शिरोरोगे कर्णमूले हनुग्रहे। बाधिर्य्ये तिमिरे चैव ये च स्त्रीषु क्षयं गताः। पथ्यं पाने तथाभ्यङ्गे नस्ये वस्तिषु भोजने। ग्रीवास्कन्धोरसां वृद्धिरसुनैवोपजायते। मुखञ्च पद्मप्रतिमं ससुगन्धिसमीरणम्। गन्धतैलमिदं नाम्ना सर्ववातविकारनुत्। राजार्हमेतत्कर्त्तव्यं राज्ञामेव विचक्षणैः।"

गन्धत्वच् न० गन्धप्रधाना त्वक् यस्य। १एलवालुके राजनि०

गन्धदला स्त्री गन्धयुक्तं दलं यस्याः।१अजमोदायाम् राजनि०

गन्धदारु न० गन्धप्रधानं दारु। चन्दने मलयजे हेमच०। तस्य दारुण्येव गन्धसत्त्वात्तथात्वम्। [न्धाढ्यद्रव्यमात्रे च

गन्धद्रव्य न० गन्धप्रधानं द्रव्यम्।१नागकेशरे त्रिका०। २ग-

गन्धद्विप पु० गन्धप्रधानो मदगन्धाढ्यः द्विपः। मदगन्धाढ्ये हस्तिनि। "गन्धद्विपे वन्य इव द्विरेफाः" "रणो गन्धद्विपस्येव गन्धभिन्नान्यदन्तिनः" रघुः। "गन्धद्विपस्येव मतङ्गजौघः" किरा०। गन्धगजादयोऽप्यत्र।

गन्धधारिन् त्रि० गन्धं गन्धयुक्तं द्रव्यं धारयति धारि–णिनि। १गन्धद्रव्यधारिणि स्त्रियां ङीप्। २महादेवे पु०। "अजश्च बहुरूपश्च गन्धधारी कपर्द्यपि" भा० अनु०१७अ०। शिवनामोक्तौ।

गन्धधूमज पु० गन्धस्य गन्धाढ्यस्य धूमात् जायते जन–ड। स्वादुनामगन्धद्रव्ये राजनि०।

गन्धधूलि स्त्री गन्धाय धूलिश्चूर्णोऽस्याः। कस्तूर्य्यां हेमच०।

गन्धन न० गन्ध–अर्द्दने भावकरणादौ ल्युट्। १उत्साहे २प्रकाशने ३हिंसायाम् ४सूचने च मेदि०। ५तृणभेदे (गन्धतृणे) शब्दार्थचि०। "गन्धनावक्षेपणेत्यादि" पा०। "वा गतिगन्धनयोरिति धातुः"। वातपदव्युत्पत्तौ सुश्रुतः "गन्धनाङ्गे" सि० कौ०।

गन्धनकुल पु० गन्धेन लेशेन नकुलतुल्याकृतित्वात्, दुर्गन्धप्रधानो वा नकुलः।(छुँचो) छुछुन्दर्य्यां जन्तुभेदे हारा०।

गन्धनाकुली स्त्री गन्धान्विता नाकुली रास्ना। रास्नाभेदे अमरः। "नाकुली सुरसा रास्ना सुगन्धा गन्धनाकुली। नकुलेष्टा भुजाङ्गाक्षी सर्पाङ्गी विषनाशिनी। नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत्। भोगिलूतावृश्चिकाखुविषज्वरक्रिमिव्रणान्" भावप्र०।

गन्धनामन् पु० गन्धेति पदयुक्तं नामास्य। १रक्ततुलस्याम् रत्नमा०२रोगभेदे स्त्री ङीप्। तल्लक्षणमुक्तं भावप्र० यथा "बाहुकक्षांसपार्श्वेषु कृष्णस्फोटां सवेदनाम्। पित्तप्रकोपसम्भूतां कक्षामिति विनिर्दिशेत्। एतान्तु तादृशीं दृष्ट्वा पिडकां स्फोटसन्निभाम्। त्वग्जातां पित्तकोपेन गन्धनाम्नीं प्रचक्षते। तादृशीं बाह्वादिषु कृष्णां सवेदनाञ्च"

गन्धनाली स्त्री गन्धस्य गन्धज्ञानस्य नालीव। नासिकायाम् त्रिका०। स्वार्थे क ह्रस्वः। गन्धनालिका तत्रार्थे।

गन्धनिलया स्त्री गन्धस्य निलयो वासो यत्र। नवमल्लिकायाम् शब्दच। [शठीभेदे राजनि०।

गन्धनिशा स्त्री गन्धेन निशा हरिद्रेव। गन्धपत्रायां

गन्धप पु० गन्धं पिबति गन्धेनैव तृप्यति पा–क। १देवभेदे आभासुरा गन्धपा दृष्टिपाश्च वाचा विरुद्धाश्च मनोविरुद्धाः" भा० अनु०१८अ० नानादेवानां शिवरूपतोक्तौ।

गन्धपत्र पु०गन्धयुक्तं पत्रमस्य। १श्वेततुलस्यां रत्नमा०। २मरुवके ३बर्वरे ४नागरङ्गे ५विल्वे च राजनि०। ५शटीभेदे स्त्री टाप् "गन्धपत्रा कटुः स्वादुस्तीक्ष्णोष्णा कफ-

वातहृत्। कासच्छर्दिज्वरान् हन्ति पित्तकोपकरी तथा" राजनि०। गौरा०ङीष्। ६अश्वगन्धायाम् ७अम्बष्ठायाम् ८अजमोदायाञ्च राजनि०। ततः स्वार्थे क। गन्धपत्रिका अश्वगन्धादिषु राजनि०।

गन्धपलाशिका स्त्री गन्धयुतं पलाशमस्याः कप् अत इत्वम्। हरिद्रायां हारा०। [भावप्र०।

गन्धपलाशी स्त्री गन्धयुक्तं पलाशं यस्या ङीप्। शट्याम्

गन्धपाषाण पु० गन्धयुक्तः पाषाण इव कठिनत्वात्। गन्धके उपधातुभेदे जटाधरः। [धूपे हेमच०।

गन्धपिशाचिका स्त्री गन्धेन पिशाच इव ऊर्द्धगतित्वात्।

गन्धपीता स्त्री गन्धयुक्तं पीतं पत्रं यस्याः। १शटीभेदे गन्धपत्रायाम् राजगि०।

गन्धपुष्प पु० गन्धयुक्तं पुष्पमस्य। १वेतसवृक्षे शब्दच०। २अङ्कोटवृक्षे जटाध० ३वञ्जुवारवृक्षे राजनि०। ४नील्यां ५केतकीवृक्षे ६गणिकारीवृक्षे च स्त्री टाप् राजनि०। ७पुष्पवति गन्धयुक्तवृक्षमात्रे त्रि०। गन्धसहितं पुष्पम् शा०त०। ८गन्धसहितपुष्पे न० "गन्धपुष्पैरलङ्कृतम्" रामा०२१अ०। द्वन्द्वः। ९गन्धपुष्पयोः द्विव०। "अभावे गन्धपुष्पाभ्यां केवलेन जलेन वा" आ०त०। [वृक्षे रत्नमा०।

गन्धफणिज्झक पु० गन्धप्रधानः फणिज्झकः। रक्ततुलसी

गन्धफल पु० गन्धयुक्तं फलं यस्य। १कपित्थे २विल्वे ३तेजफलवृक्षे राजनि०। ४प्रियङ्गुवृक्षे स्त्री टाप् शब्दरत्ना०। ५मेथिकायां ६विदार्य्यां ७शल्लक्याञ्च स्त्री टाप् राजनि०। ८चम्पककलिकायां ९प्रियङ्गुवृक्षे च स्त्री अमरः गौरा० ङीष्। ९आमोदयुक्तफलवति वृक्षमात्रे त्रि०।

गन्धवणिज् पु०गन्धस्य आमोदिद्रव्यस्य वणिक्। (गन्धवेणे) सङ्कीर्णजातिभेदे "अम्बष्ठात् राजपुत्र्याञ्च जातो गन्धवणिक् स्मृतः" ब्रह्मवै०। नवशाखशब्दे विवृतिः। वणिक्शब्दस्य वर्ग्यादित्वात् शब्दकल्पद्रुमे तन्मूलतया शब्दस्तोमे च अयथास्थाने लिखनं प्रामादिकम्।

गन्धबन्धु पु० गन्धं बध्नाति बन्ध–उण्। आम्रवृक्षे शब्दर०

गन्धबहुला स्त्री गन्धोबहुलोऽत्र। १गोरक्षीवृक्षे राजनि०।

गन्धभद्रा स्त्री गन्धेन लेशमात्रसेवनेन भद्रं यस्याः ५ब०। (गन्धभादाल) लताभेदे शब्दच०। [शब्दर०।

गन्धभाण्ड पु० गन्धस्य भाण्ड इव। (गन्धभादाल) लताभेदे

गन्धमांसी स्त्री गन्धप्रधाना मांसी। जटामांसीभेदे राजनि०

गन्धमातृ स्त्री गन्धस्य मातेव उत्पादकत्वात्। क्षितौ हेमच० "तत्र क्षितिर्गन्धहेतुः" इत्युक्तेस्तस्यास्तदुत्पादकत्वम्।

गन्धमाद पु० १रामसैन्यस्थवानरभेदे। "सुग्रीवलक्ष्मणमरुत्सुतगन्धमादनीलर्क्षपाङ्गदनलादिभिरन्वितोऽगात्" भाग० ९।१०।१९। "गान्धिन्यास्तु श्वफल्कतः", अक्रूरप्रमुखा आसन्" इत्युपक्रमे "शत्रुघ्नो गन्धमादश्चेति" भाग० ९।१४।९०। उक्ते २अक्रूरभ्रातरि च।

गन्धमादन पुंन०गन्धेन मादयति मादि–ल्यु। १पर्वतभेदे स च पर्वतः रोमकपत्तनात् उदक्, नीलनिषधपर्य्यन्तदीर्घः तस्य जलधेश्च मध्ये केतुमालं वर्षम्। एवं निषधनीलमाल्यवद्गन्धमादनैरावृतमिलावृतं नवमं वर्षम् मूलवाक्यमिलावृतशब्दे ९८५ पृ० दृश्यम्। "गन्धमादनशृङ्गेषु पुरुथः सह राक्षसैः"। "गन्धमादनपार्श्वे तु परेत्वपरगण्डिकाः" भा० भी० ६अ०। "ततः किंपुरुषावासं सिद्धचारणसेवितम्। ददृशुर्हृष्टरोमाणः पर्वतं गन्धमादनम्" भा० व० १५८ अ०। "तथैवापरेण पूर्वेण च माल्यवद्गन्धमादनौ नीलनिषधायतौ" भाग०५।१६।१०२। एवं सर्वत्र पुंस्त्वम् क्वचित् क्लीवत्वमपि। "यस्य चोपवनं बाह्यं गन्धवत् गन्धमादनम्" कुमा०। "अत्र गन्धवत्गन्धमादनम्" इति आगन्तुकः पाठः। प्राचीनपाठस्तु "सुगन्धिर्गन्धमादनः" इति पुंलिङ्गान्तः। अतएव क्षीरस्वामिना "गन्धमादनमन्ये चेत्यत्र गन्धेन मादयतीति गन्धमादनः" इति व्याख्याय प्रयोगे च पुंलिङ्गता दृश्यत इत्याशयेनोक्तं "सुगन्धिर्गन्धमादन इति" कालिदासः इति" मल्लिना०। स च मेरोर्दक्षिणस्थविष्कम्भरूपः यथाह विष्णुपु० "इलावृतमनुक्रम्य "चत्वार उपपर्वताः"। "विष्कम्भा रचिता मेरोर्योजनायुतसुच्छ्रिताः। पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः। विपुलः पश्चिमे भागे सुपार्श्वश्चोत्तरे स्मृतः"। तत्र च केतुवृक्षो जम्बुः। यथाह तत्रैव "कदम्बस्तेषु जम्बूश्च पिप्पलो वट एव च" तत्र वनं नन्दनं, चैत्ररथं, गन्धमादनाख्यं, वा कल्पभेदात् व्यवस्थितं तत्र विष्णुपु०० "वनं चैत्ररथं पूर्वे दक्षिणे गन्धमादनम्। वैभ्राजं पश्चिमे तद्वदुत्तरे नन्दनं स्मृतम्" इत्युक्तेः गन्धमादनाख्यवनवत्त्वं तस्य। "तान् विष्कम्भान् गिरीनुपक्रम्य" भाग० ५।१६। देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति"। चैत्ररथवनवत्तोक्ता। सि०शि०"वनं तथा चैत्ररथं विचित्रं तेष्वप्सरोनन्दननन्दनञ्च। धृत्याह्वयं यद्धृतिकृत् सुराणां भ्राजिष्णु वैभ्राजमिति प्रसिद्धम्" इत्युक्तेर्नन्दनवनवत्त्वम्।

"अरुणोदं महाभद्रं सितोदं समानसम्। सरांस्येतानि चत्वारि देवभोग्यानि सर्वदा" विष्णु पु० उक्तेस्तत्र महाभद्रं सरः। "सरांस्यथैतेष्वरुणञ्च मानसम् महाह्रदं श्वेतजलं यथाक्रममिति" सि०शि० उक्तेस्तत्र मानसं सरः। सरसां कल्पभेदान्नामभेदः। २तद्वासिनि रामसैन्यस्थवानरभेदे च "गन्धमादनवासी च प्रथितो गन्धमादनः। कोटीशतसहस्राणि हरीणां समकर्षत" भा० व० २८अ०। तत्पर्वतस्थे ३वनभेदे न० उदाहृतविष्णु पु० वाक्ये दृश्यम्।

गन्धमादनी स्त्री गन्धेन माद्यतेऽनया मादि+करणे ल्युट् ङीप्। १मदिरायां त्रिका० २वन्दारौ ३चौड़ानामद्रव्ये च राजनि०.[१लाक्षायां २सुरानामगन्धद्रव्ये च राजनि०।

गन्धमादिनी स्त्री गन्धेन मादयति मादि-णिनि ङीप्।

गन्धमार्ज्जार पु० गन्धप्रधानः मार्ज्जारः। खट्टाशजन्तौ जटाधरः। [णायां लतायाम् भावप्र०।

गन्धमालती स्त्री गन्धेन मालतीव। गन्धकोकिलातुल्यगु-

गन्धमालिनी स्त्री गन्धमालाऽस्त्यस्या इति ङीप् मल-संश्लेषे णिनि वा हत०। १सुरानामगन्धद्रव्ये जटाधरः।

गन्धमुखा स्त्री गन्धो मुखेऽस्याः। १छुछुन्दर्य्याम् (छुँचा)। शब्दार्थचि०। २आमोदिमुखवति त्रि०। स्त्रियां स्वाङ्गत्वात् ङीप्। [अण्। (गन्धमादाल) लताभेदे वैद्यकम्।

गन्धमुण्ड पु० गन्धं मुण्डयति मुण्ड+तत्करोति णिच्-

गन्धमूल पु० गन्धप्रधानं मूलं यस्य। १कुलञ्जनवृक्षे २शल्लक्यां ३शट्याञ्च स्त्री टाप् राजनि०।४शट्यां स्त्री अमरः जातित्वात् ङीष्। वा कप् कापि अत इत्त्वम्। गन्धमूलिका १माकन्द्यां २शट्याञ्च राजनि०। [राजनि०।

गन्धमूषिक पुंस्त्री० गन्धप्रधानः मूषिकः। छुछुन्दर्य्याम्

गन्धमूषी स्त्री स्वल्पः मूषः मूषी गन्धप्रधाना मूषी। छुछुन्दर्य्यां हेमच०। [२खट्टासे च शब्दमा०।

गन्धमृग पु० गन्धप्रधानो मृगः। १गन्धयोनौ कस्तूरीमृगे।

गन्धमैथुन पु० गन्धेन गन्धघ्राणेन मैथुनं मैथुनारम्भो यस्य। वृषे जटाधरः। [राजनि०।

गन्धमोदन पु० गन्धेन मोदयति मुद-णिच्-ल्यु। गन्धके

गन्धमोहिनी स्त्री गन्धेन मोहयति मुह-णिच्-णिनि ङीप्। चम्पककलिकायां राजनि०।

गन्धयुक्ति स्त्री गन्धानां गन्धद्रव्याणां युक्तिर्योजनविशेषः। वृ०सं० उक्ते गन्धद्रव्ययोजनप्रकारभेदे। गन्धयुक्तिश्च सप्रयोजनभेदसहिता तत्र ७७अ०दर्शिता यथा

"स्रग्गन्धधूपाम्बरभूषणाद्यं न शोभते शुक्लशिरोरुहस्य। यस्मादतो मूर्धजरागसेवां कुर्यात्तथैवाञ्जनभूषणानाम्। लौहे पात्रे तण्डुलान् कोद्रवाणां शुक्ले पकाँल्लोहचूर्णेन साकम्। पिष्टान् सूक्ष्मं मूर्ध्नि शुक्लाम्लकेशे दत्त्वा तिष्ठेद्वेष्टयित्वार्कपत्रैः। याते द्वितीये प्रहरे विहाय दद्याच्छिरस्यामलकप्रलेपम्। सञ्छाद्य पत्रैः प्रहरद्वयेन प्रक्षालितं कार्ष्ण्यमुपैति शीर्षम्। पश्चाच्छिरःस्नानसुगन्धितैलैर्लौहाम्लगन्धं शिरसोऽपनीय। हृद्यैश्च गन्धैर्विविधैश्च धूपैरन्तःपुरे राजसुखं निषेवेत्। त्वक्कुष्ठरेणुनलिकास्पृक्कारसतगरवालकैस्तुल्यैः। केसरपत्रविमिश्रैर्नरपतियोग्यं शिरःस्नानम्। मञ्जिष्ठया व्याघ्रनखेन शुक्त्या त्वचा सकुष्ठेन रसेन चूर्णः। तैलेन युक्तोऽर्कमयूखतप्तः करोति तच्चम्पकगन्धि तैलम्। तुल्यैः पत्रतुरुष्कवालतगरैर्गन्धः स्मरोद्दीपनः सव्यामो बकुलोऽयमेव कटुकाहिङ्गुप्रधूपान्वितः। कुष्ठेनोत्पलगन्धिकः समलयोमूर्वो भवेच्चम्पको जातीत्वक्सहितोऽतिमुक्तकइति ज्ञेयः स कुस्तुम्बुरुः। शतपुष्पाकुन्दुरुकौ पादेनार्धेन नखतुरुष्कौ च। मलयप्रियङ्गुभागौ गन्धोधूप्यो गुडनखेन। गुग्गुलुवालकलाक्षामुस्तानखशर्कराः क्रमाद्धूपः। अन्यो मांसीवालकतुरुष्कनखचन्दनैः पिण्डः। हरीतकीशङ्खघनद्रवाम्बुभिर्गुडोत्पलैः शैलकमुस्तकान्वितैः। नवान्तपादादिविवर्धितैः क्रमाद् भवन्ति धूपा बहवो मनोहराः। भागैश्चतुर्भिः सितशैलमुस्ताः श्रीसर्जभागौ नखगुग्गुलू च। कर्पूरबोधो मधुपिण्डितोऽयं कोपच्छदो नाम नरेन्द्रधूपः। त्वगुशीरपत्रभागैः सूक्ष्मैलार्धेन संयुतैश्चूर्णः। पटवासः प्रवरोऽयं मृगकर्पूरप्रबोधेन। घनवालकशैलेयककर्पूरोशीरनागपुष्पाणि। व्याघ्रनखस्पृक्कागुरुदमनकनखतगरधान्यानि। कर्पूरचोरमलयैः स्वेच्छापरिवर्तितैश्चतुर्भिरतः। एकद्वित्रिचतुर्भिर्भागैर्गन्धार्णवो भवति। अत्युल्बणगन्धत्वाद् एकांशो नित्यमेव धान्यानाम्। कर्पूरस्य तदूनो नैतौ द्वित्र्यादिभिर्देयौ। श्रीसर्जगुडनखैस्ते धूपयितव्याः क्रमाच्च पिण्डस्थैः। बोधः कस्तूरिकया देयः कर्पूरसंयुतया। अत्र सहस्रचतुष्टयमन्यानि च सप्तसहस्राणि। लक्षं शतानि सप्तविंशतियुक्तानि गन्धानाम्। एकैकमेकभागं द्वित्रिचतुर्भागिकैर्युतं द्रव्यैः। षड्गन्धकरं तद्वद् द्वित्रिचतुर्भागिकं कुरुते। द्रव्यचतुष्टययोगाद् गन्धचतुर्विंशतिर्यथैकस्य। एवं शेषाणामपि षण्णवतिः सर्वपिण्डोऽत्र। षोडशकै

द्रव्यगणे चतुर्विकल्पेन भिद्यमानानाम् । अष्टादश जायन्ते शतानि सहितानि विंशत्या । प्रस्तवतिभेदभिन्नस्तुर्विकल्पो गणो यतस्तस्मात् । प्रस्तरतिगुणः कार्यः सा सङ्ख्या भवति गन्धानाम् । पूर्वेण पूर्वेण गतेन युक्तं स्थानं विनान्त्यं प्रवदन्ति सङ्ख्याम् । इच्छाविकल्पैः क्रमशोऽभिनीय नीते निवृत्तिः पुनरन्यनीतिः । द्वित्रीन्द्रियाष्टभागैरगुरुः पत्रं तुरुष्कशैलेयौ । विषयाष्टपक्षदहनाः प्रियङ्गुमुस्तारसाः केशः । स्पृक्कात्वक्तगराणां मांस्याश्च कृतैकसप्तषड्भागाः । सप्तर्तुवेदचन्द्रैर्मलयनखश्रीककुन्दुरुकाः । षोडशके कच्छपुटे यथा तथा मिश्रिते चतुर्द्रव्यैः । येऽत्राष्टादशभागास्तेऽस्मिन् गन्धादयो योगाः । नखतगरतुरुष्कयुता जातीकर्पूरमृगकृतोद्बोधाः । गुडनखधूप्या गन्धाः कर्तव्याः सर्वतोभद्राः । जातीफलमृगकर्पूरबोधितैः सहकारमधुसिक्तैः । बहवोऽत्र पारिजाताश्चतुर्भिरिच्छापरिगृहीतैः । सर्जरसश्रीवासकसमन्विता येऽत्र धूपयोगास्तैः । श्रीसर्जरसवियुक्तैः स्नानानि सबालकत्वग्भिः । लोध्रोशीरलतागुरुमुस्ताप्रियङ्गुवनपथ्याः । नवकोष्ठात्कच्छपुटाद् द्रव्यत्रितयं समुद्धृत्य । चन्दनतुरुष्कभागौ शुक्तार्धं पादिका तु शतपुष्पा । कटुहिङ्गुलगुडधूप्याः केसरगन्धाश्चतुरशीतिः। सप्ताहं गोमूत्रे हरीतकीचूर्णसंयुते क्षिप्त्वा । गन्धोदके च भूयो विनिःक्षिपेद्दन्तकाष्ठानि । एलात्वक्पत्राञ्जनमधुमरिचैर्नागपुष्पकुष्ठैश्च । गन्धाम्भः कर्तव्यं कञ्चित्कालं स्थितान्यस्मिन् । जातीफलपत्रैलाकर्पूरैः कृतयमैकशिखिभागैः । अवचूर्णितानि भानोर्मरीचिभिः शोषणीयानि । वर्णप्रसादं वदनस्य कान्तिं वैशद्यमास्यस्य सुगन्धितां च । संसेवितुः श्रोत्रसुखां च वाचं कुर्वन्ति काष्ठान्यसमुद्भवानाम् । कामं प्रदीपयति रूपमभिव्यनक्ति सौभाग्यमावहति वक्त्रसुगन्धितां च । ऊर्जं करोति कफजांश्च निहन्ति रोगांस्ताम्बूलमेवमपरांश्च गुणान् करोति । युक्तेन चूर्णेन करोति रागं रागक्षयं पूगफलातिरिक्तम् । चूर्णाधिकं वक्त्रविगन्धकारि पत्राधिकं साधु करोति गन्धम् । पत्राधिकं निशि हितं सफलं दिवा च प्रोक्तान्यथाकरणमस्य विडम्बनैव । कक्कोलपूगलवलीफलपारिजातैरामोदितं मदमुदा मुदितं करोति" "लेख्यमणिरागगन्धयुक्तिविदः" वृ०स० ।

गन्धरस पु० गन्धयुक्तो रसोऽस्य । १बोले । (फुलसत्त्व) ख्याते उपधातुभेदे । गन्धस्य रसश्च द्व० । २आमोदरसयोः द्वि० । "अन्नापूतं गन्धरसोपपन्नम् (अन्नम्)" भा०उ० २६अ० "शीतस्यामृतकल्पस्य दिव्यगन्धरसस्य च" भा०भी०१२३अ० ।

गन्धरसाङ्गक पु० गन्धरसौ अङ्गे यस्य कप् । श्रीवेष्टनाख्यगन्धद्रव्ये राजनि० ।

गन्धराज पु०गन्धानां गन्धयुक्तानां राजा टच् समा०। १स्वनामख्याते पुष्पप्रधाने वृक्षे २मुद्गरवृक्षे ३कणगुग्गुलौ च राजनि० । गन्धेन राजते राज–अच् । ४जवादिनामगन्धद्रव्ये पु० ५गन्धद्रव्यश्रेष्ठे त्रि०६चन्दने न०राजनि० । ७नखीनामगन्धद्रव्ये स्त्री ङीप् शब्दचन्द्रिका ।

गन्धर्व पु० गन्धमामोदमर्वति अर्व–अच् शक०, गाः स्तुतिरूपा गीतिरूपा वा वाचः रश्मीन् वा धारयति धृ–व गोर्गमादेशो वा ।१घोटके २मृगभेदे कस्तूरीमृगे ३अन्तराभवसत्त्वे च अमरः । अन्तराभवसत्त्वस्तु जन्ममरणयोर्मध्यभवः यातनाशरीरवान्, शुभप्राणी वा ।"गन्धर्वाः पतयोमम"भा०वि०१०अ० । सैरिन्ध्रीरूपद्रौपदीवाक्यम् । अन्तराभवसत्त्वः सत्वान्तरमध्ये आवेशकारी सत्वभेद इत्येव युक्तम् । स च सुश्रुते दर्शितो यथा "अथातोऽमानुषप्रतिषेधीयं व्याख्यास्यामः" इत्युपक्रमे "देवास्तथा शत्रुगणाश्च तेषां,गन्धर्वयक्षाः पितरो भुजङ्गाः। रक्षांसि या चापि पिशाचजातिरेषोऽष्टधा देवगणो ग्रहाख्यः"इत्यष्टधा विभज्य ।"हृष्टात्मा पुलिनवनान्तरोपसेवी स्वाचारः प्रियपरिगीतगन्धमाल्यः । नृत्यन् वा प्रहसति चारु चाल्पशब्दं गन्धर्वग्रहपरिपीड़ितो मनुष्यः" इति तद्ग्रहाविष्टलक्षणमुक्तम्। "ते पतञ्जलस्य काप्यस्य गृहानैम तस्यासीद्दुहिता गन्धर्वगृहीता" शत०ब्रा० १४।६।३।१ । "गन्धर्वेणामानुषेण गृहीता आविष्टा" भा०।४एरण्डे भावप्र०"गन्धर्वतैलसिद्धां हरितकीं गोऽम्बुना पिबेत्"अस्य व्याख्यायां "गन्धर्वतैलमेरण्डतैलम्" तदुक्तेः तस्य च गन्धर्वरूपमृगभेदपादतुल्यपत्रकत्वात्तथात्वम् । ५गायनमात्रे त्रि०मेदि०।६देवगायने देवयोनिभेदे पु० अमरः । तत्रार्थे "रथं संयोजयामासुर्गन्धर्वैर्हेममालिभिः"भा०व०१६१अ०। "गावः रश्मयः इष्टुदकानि वा धारयति गवि उपपदे धृ–व गोर्गमादेशः इति ता० ब्रा० भाष्ये माधवोक्तेः ७रश्मिधारके सोमादित्यादौ । "गन्धर्वोऽस्य रशनामगृभ्णात्"ऋ० १,१६३,२, "गन्धर्वः सोमः" भा०। "ऊर्ध्वो गन्धर्वो अधिनाके अस्थात्" ऋ० ९,८५,१२ । "गन्धर्वो रश्मीनां धारकः" भा० । "गन्धर्व इत्था पदमस्य रक्षति" ९,८३,४। "गन्धर्वः [illegible]

स्तुतीनां वा धारक आदित्यः” भा० “शतक्रतुरत्सरत् गन्धर्वमस्तृतम्” ऋ० ८,१,११। “गन्धर्वः गवां रश्मीनां धर्त्तारं सूर्य्यम्” भा० “दिव्यो गन्धर्वः केतपूः” यजु०११, ७,“गां वाचं स्तुतिरूपाम् धारयतीति गन्धर्वः सविता” वेददी०। गायने। “विश्वावसुरभि तन्नोगृणातु दिव्यो गन्धर्वः” ऋ० १०,१३९,५ दिव्य इति विशेषणात् गायन मात्रपरत्वम्। अत एव शब्दार्थचि० “अस्मिन् कल्पे मनुष्यः सन् पुण्यपाकविशेषतः। गन्धर्वत्वं समापन्नो मर्त्यगन्धर्व उच्यते। पूर्वकल्पकृतात् पुण्यात् कल्पादावस्य चेद्भवेत्। गन्धर्वत्वं, तादृशोऽत्र दिव्यगन्धर्व उच्यते” इति गायनरूपगन्धर्वाभिप्रायेण द्वैविध्यमुक्तम् देवयोनि गन्धर्वाश्च वह्निपुराणे एकादशविधा उक्ता यथा “अभ्राजोऽङ्गारिवम्भारी सूर्य्यवर्चास्तथा कृधुः। हस्तः सुहस्तः स्वाम्येव मूर्द्धवांश्च महामनाः। विश्वावसुः कृशानुश्च गन्धर्वैकादशो गणः”।

जटाधरेण तन्नामान्यन्यथोक्तानि यथा “हाहा हूहूश्चित्ररथो हंसो विश्वावसुस्तथा। गोमायुस्तुम्बुरुर्नन्दिरेवमाद्याश्च ते स्मृताः”। देवगन्धर्वाश्च द्विविधाः केचित् मौनेयाः केचित् प्राधेयाश्च तत्र मौनेयाः कश्यपपत्न्यां दक्षसुतायां मुनिनामिकायां जाताः षोडश प्राधेयाश्च प्राधायां तत्पत्न्यां जाता दश इत्येवं भा०आ०६५अ० उक्ता यथा “भीमसेनोग्रसेनौ च सुपर्णो वरुणस्तथा। गोपतिर्धृतराष्ट्रश्च सूर्य्यवर्चाश्च सप्तमः। सत्यवागर्कपर्णश्च प्रयुतश्चाभिविश्रुतः। भीमश्चित्ररथश्चैव विख्यातः सर्वविद्वशी। तथा शालिशिरा राजन् पर्जन्यश्च चतुर्दशः। कलिः पञ्चादशस्तेषां नारदश्चैव षोडशः। इत्येते देवगन्धर्वा मौनेयाः परिकीर्त्तिताः। अथ प्रभूतान्यन्यानि कीर्त्तयिष्यामि भारत!। अनवद्यां मनुं वंशामसुरां मार्गणप्रियाम्। अनूपां सुभगां भासीमिति प्राधा व्यजायत। सिद्धः पूर्णश्च वर्ही च पूर्णायुश्च महायशाः। ब्रह्मचारी रतिगुणः सुपर्णश्चैव सप्तमः। विश्वावसुश्च भानुश्च सुचन्द्रो दशमस्तथा। इत्येते देवगन्धर्वाः प्राधेयाः परिकीर्त्तिताः” स्वारोचिषमन्वन्तरे तु गन्धर्वा अरिष्टायाः पुत्राः यथा हरिवं०३अ०। “अरिष्टा तु महासत्वान् गन्धर्वानमितौजसः” इत्युक्ता “एष मन्वन्तरे तात! सर्गः स्वारोचिषे स्मृतः”। जातिपरत्वे स्त्रियां ङीष्। “नैव देवी न गन्धर्वी न यक्षी न च किन्नरी” रामा०आर०८३अ०। पत्न्यामपि ङीष् “गन्धर्वी गुह्यका यक्षा विबुधानुचराश्च ये। तथैवाप्सरसः सर्वा राक्षसेषूत्तमा गतिः”। “दैत्यदानवयक्षाणां गन्धर्वोरगरक्षसाम्” मनुः। ८द्वीपभेदे पु० “भारतस्यास्य वर्षस्य नव भेदान्निशामय। इन्द्रद्वीपकशेरुमांस्ताम्रवर्णो गभस्तिमान्। नागद्वीपस्तथा सौम्यः गन्धर्वस्त्वथ वारुणः। अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः”। गन्धर्वो देवताऽस्य अण्। गान्धर्व अस्त्रभेदे “संमोहनं नाम सखे! ममास्त्रं प्रयोगसंहारविभक्तमन्त्रम्। गान्धर्वमादत्स्व यतः प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते” रघुः। विवाहभेदे च “गान्धर्वः समयान्मिथः” मनुः।

गन्धर्वनगर न० अनिष्टसूचके आकाशोत्थिते वृ० सं० उक्ते १खपुरे खपुरशब्दे विवृतिः तस्य कालभेदे विपाकः वृ०स०९७अ० उक्तो यथा। “गन्धर्वपुरं मासात् रसवैकृत्यं हिरण्यविकृतिश्च”।६त०। २गन्धर्वाणां नगरे च। “सरोमानसमासाद्य हाटकानभितः प्रभुः। गन्धर्वरक्षितं देशमजयत् पाण्डवस्ततः। तत्र तित्तिरिकल्माषान् मण्डूकाख्यान्। हयोत्तमान् लेभे स करमत्यन्तं गन्धर्वनगरात्तदा” भा० स० १७ अ०। अर्जुनोत्तरदिग्विजयोक्तौ। गन्धर्वपुरादयोऽप्यत्र।

गन्धर्ववधू स्त्री गन्धर्वस्य वधूरिव प्रियत्वात्। १शठ्यां २चीडानामगन्धद्रव्ये च राजनि०।

गन्धर्वलोक पु० ६त०। गुह्यकलोकोपरिस्थे विद्याधरलोकस्याधोनिविष्टे स्थाने। तत्स्थानकर्म तत्प्राप्तिपुण्यानि च गुह्यकलोकोक्तानन्तरं काशीख०दर्शितानि यथा।

“गान्धर्वस्त्वेष लोकोऽमी गन्धर्वाश्च शुभप्रदाः। देवानां गायनाह्येते चारणाः स्तुतिपाठकाः। गीतज्ञा अभिगीतेन तोषयन्ति नराधिपान्। स्तुवन्ति च धनाढ्यांश्च धनलोभेन मोहिताः। राज्ञां प्रसादलब्धानि सुवासांसि धनान्यपि। द्रव्याण्यपि सुगन्धीनि कर्पूरादीन्यनेकशः। ब्राह्मणेभ्यः प्रयच्छन्ति गीतिं गायन्त्यहर्निशम्। स्तुतावेव मनस्तेषां नान्यशास्त्रे कृतश्रमाः। तेन पुण्येन गन्धर्वलोकस्तेषां विशिष्यते। ब्राह्मणास्तोषिता यद्वै गीतिविद्यार्जितैर्धनैः। गीतविद्याप्रभावेन देवर्षिर्नारदो महान्। मान्यो वैष्णवलोके वै श्रीशम्भोश्चातिवल्लभः। तुम्बुरुर्नारदश्चोभौ देवानामपि दुर्लभौ। नादरूपी शिवः साक्षान्नादविद्याविदां हितः। यदि गीतं कचिद्गीतं श्रीमद्धरिहरात्मकम्। मोक्षन्तु तत्फलं प्राहुः सान्निध्यमथ वा तयोः।

गीतज्ञो यदि गीतेन नाप्नोति परमं पदम्। रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते। अस्मिँल्लोके सदा कालं स्तुतिरेषा प्रगीयते। तद्गीतमालया पूज्यौ देवौ हरिहरौ सदा। इति शृण्वन् क्षणात् प्राप पुरमन्यन्मनोहरम्। शिवशर्माथ पप्रच्छ किंसंज्ञं नगरन्त्विदम्। गणावूचतुः। असौ विद्याधरो लोको नानाविद्याविशारदाः।”

गन्धर्वविद्या स्त्री ६त०। सङ्गीतविद्यायाम्। [वेदशब्दे दृश्यः।

गन्धर्ववेद पु०६त०। सामवेदस्योपवेदे सङ्गीतमूलग्रन्थे उप-

गन्धर्वहस्त पु० गन्धर्वस्य मृगभेदस्य हस्तः पाद इव पत्रमस्य। एरण्डवृक्षे हारा०। कप्। तत्रार्थे अमरः। सुश्रुतेन तत्पत्राक्षवणोत्पत्तिरभिहिता यथा “गन्धर्वहस्तकमुष्ककनक्तमालाटरूषकपूतीकारग्वधचित्रपदीनां पत्राण्यार्द्राणि लवणेन सहोदूखलेऽनुवद्य स्नेहघटे प्रक्षिप्यावलिप्य गोशकृद्भिर्दाहयेदेतत्पत्रलवणमुपदिशन्ति वातरोगेषु”।

गन्धलता स्त्री गन्धान्विता लता। प्रियङ्गौ शब्दार्थचि०।

गन्धलोलुप त्रि०७त०। गन्धलोभातिशयवत्यां मधुमक्षिकायां शब्दर०।

गन्धवत् त्रि० गन्धो विद्यतेऽस्य मतुप् मस्य वः। १गन्धयुक्ते “गन्धवद्रुधिरचन्दनोक्षिता” रघुः। स्त्रियां ङीप्। सा च २पृथिव्याम् मत्स्यगन्धायां सत्यवत्याम् ३व्यासमातरि तस्यास्तन्नामत्वप्राप्तिः भा० भी०६२अ० उक्ता यथा

“एवमुक्ता वरं वव्रे गात्रसौगन्ध्यमुत्तमम्। स चास्यै भगवान् प्रादात् मनसः काङ्क्षितं भुवि। ततो लब्धवरा प्रीता स्त्रीभावगुणभूषिता। जगाम सह संसर्गमृषिणाऽद्भुतकर्मणा। तेन गन्धवतीत्येवं नामास्याः प्रथितं भुवि। तस्यास्तु योजनाद्गन्धमाजिघ्रन्त नरा भुवि। तस्या योजनगन्धेति ततो नामापरं स्मृतम्। इति सत्यवती हृष्टा लब्ध्वा वरमनुत्तमम्। पराशरेण संयुक्ता सद्यो गर्भं सुषाव सा। जज्ञे च यमुनाद्वीपे पाराशर्यः स वीर्यवान्।”

४सुरायां मेदि० ५नवमल्लिकायां रत्नमा०६सुरानामगन्धद्रव्ये जटा०।७वायुपुर्याञ्च यथाह स्कगेन्द्रसंहिता यथा “वायोर्गन्धवतीं तुङ्गश्वेतपीतध्वजां शृणु। बलवद्भूतसंजुष्टां सर्वरत्नविनिर्मिताम्”। काशीख०१२अ०। “इमां गन्धवतीं रम्यां पुरीं वायोर्विलोकय। वारुण्या उत्तरे भागे महाभाग्यनिधे! द्विज!” इति गन्धवतीपुर्याः स्वरूपं ते निरूपितम्। तस्याः प्राच्यां कुबेरस्य भ्राजत्येशालका पुरी”। तदुत्तराध्याये। मेदिनिकोषे “अथ गन्धवती पृथ्वी पुरीभिद्व्यासमातरीति” पुरीभेदार्थकतामात्रोक्तेः शब्दकल्पद्रुमे तन्मूलकशब्दस्तोमे च वरुणपुरीपरत्वकथनं प्रामादिकमेव। वरुणपुर्यास्तु निम्लोचनीति नाम यथोक्तं भाग० ५।२०।१०। यथा “तस्मिन्नैन्द्रीं पूर्वस्मान्मेरोर्देवधानीं नाम दक्षिणतो याम्यां संयमनीं नाम पश्चाद्वारुणीं निम्लोचनीं नाम उत्तरतः सौम्यां विभावरीं नाम”

गन्धवल्कल न० गन्धो वल्कलेऽस्य। (दारचिनि) त्वचे। राजनि०। [गन्धवल्लीत्यप्यत्र राजनि०।

गन्धवल्लरी स्त्री गन्धान्विता वल्लरी। सहदेवीलतायाम्

गन्धवह पु० गन्धं वहति वह–अच् ६त०। १वायौ अमरः “आघ्रायि वान् गन्धवहः सुगन्धः” भट्टिः “दिग्दक्षिणा गन्धवहं सुखेन” कुमा०। २गन्धयुक्ते नायकभेदे पु०। “नवालता गन्धवहेन चुम्बिता” नैष०। अत्र नायिकापक्षे गन्धवहशब्दस्य नायकभेदपरत्वम्। ३गन्धधारिमात्रे त्रि०। “आकाशात्तु विकुर्वाणात् सर्वगन्धवहः शुचिः। बलवान् जायते वायुः स वै स्पर्शगुणो मतः” मनुः। “वायुर्गन्धवहः” भाग० २।१०।२०।४नासिकायां स्त्री अमरः।

गन्धवहल गन्धं वहति वह–बा०अलच् गन्धो वहलोऽस्य वा।१सितार्जकवृक्षे २श्वेततुलस्याञ्च राजनि०। [जवे।

गन्धवारि न० गन्धद्रव्यवासितं वारि। सुगन्धिद्रव्यवासिते

गन्धवाह पु० गन्धं वहति वह–अण् उप०स०। १वायौ। अमरः। “प्रसरदसमबाणप्राणवद्गन्धवाहः” गीतगो०। २कस्तूरीमृगे हेमच०। ३नासिकायां स्त्री ङीप् हेमच०

गन्धविह्वल पु० गन्धेन विह्वलयति वि+ह्वल–णिच्–अच्। गोधूमे शब्दच०। [राजनि०।

गन्धवीजा स्त्री स्त्री गन्धो वीजे यस्याः। मेथिकायाम्।

गन्धवृक्षक पु० गन्धप्रधानो वृक्षः संज्ञायां कन्। १सालवृक्षे राजनि०। [अच्। १कक्कोले। शब्दच०।

गन्धव्याकुल पुंन० गन्धेन व्याकुलयति वि+आ+कुल–णिच्-

गन्धशटी स्त्री गन्धप्रधाना शटी शा० त०। शट्याम् शब्दच०

गन्धशाक न० गन्धप्रधानं शाकम् शा०त०। गौरसुवर्णशाके राजनि०।

गन्धशालि पु० गन्धप्रधानः शालिः। आमोदमति धान्यभेदे (वासमती) प्रसिद्धे सुगन्धके शालौ। “गन्धशालिः सुमधुरो हृद्यः पित्तश्लेष्मप्रणुत्। स्नायुविदाहशमन कान्त्यगर्भस्थिरत्वकृत्। ईषद्वातप्रशमनः स्वल्पकफवल-

प्रदः” राजनिघण्टौ तद्गुणाः समासेन दर्शिताः ।

गन्धशुण्डिनी स्त्री गन्धयुक्तः शुण्डो मुखमस्त्यस्याः इनि ङीप् । छुछुन्दर्य्यां राजनि० ।

गन्धशेखर पु० गन्धः शेखरेऽस्य । कस्तूर्य्यां मृगमदे हारा० । [गन्धशब्दे उदा० ।

गन्धसार पु० गन्धयुक्तः सारो यस्य । चन्दनवृक्षे अमरः ।

गन्धसारण पु० गन्धं सारयति सृ–णिच्–ल्यु । १वृहन्मखीनामगन्धद्रव्ये रत्नमा० । २मुद्गरवृक्षे राजनि० ।

गन्धसोम न० गन्धार्थं सोमो विधुर्यस्य । १कुमुदे हारा० चन्द्रोदये हि तस्य गन्धः ।

गन्धहारिका स्त्री गन्धं हरति हृ–ण्वुल् टाप् कापि अत इत्त्वम् । परगृहस्थायां गन्धाढ्यवेशकारिकायां स्त्रियाम् शब्दमाला ।

गन्धा स्त्री गन्ध–णिच् अच्, गन्ध+अस्त्यस्य अच् वा । आमोदहेतौ चम्पककलिकायाम् शब्दरत्ना० । २शट्याम् राजनि० ३शालपर्ण्यां भरतः । ४आमोदयुक्तायां स्त्रियाञ्च ।[हारा० ।

गन्धाखु स्त्री गन्धयुक्त आखुः । छुछुन्दर्य्याम् (छुचा) ।

गन्धाजीव पु० गन्धेन गन्धद्रव्येणाजीवति आ+जीव–अच् । (गन्धवेणे) गन्धवणिजि जटाधरः ।

गन्धाढ्य न० गन्धेनाढ्यः । १जवादिनामगन्धद्रव्ये २चन्दने च राजनि० ३नारङ्गवृक्षे पु० राजनि० । ४गन्धपत्रायां (गन्धभादाल) ५स्वर्णयूथ्यां ६तरुण्याम् ७आरामशीतलायाञ्च स्त्री राजनि० ८गन्धोल्याञ्च स्त्री शब्दच० । ९गन्धयुक्ते त्रि० । “वनस्पतिरसो दिव्यो गन्धाढ्यः सुमनोहरः” धूपदानमन्त्रः ।

गन्धाधिक न० गन्धोऽधिकोऽत्र । तृणकुङ्कुमे राजनि० [राजनि०

गन्धाम्ला स्त्री गन्धयुक्तः अम्लो रसो यस्याः । वनबीजपूरके

गन्धार पु० ब० व० गन्धमृच्छन्ति ऋ–अण् उप० स० १देशभेदे “काश्मीराः सिन्धुसौवीरा गन्धारादर्शकास्तथा” भा० भी० ९ अ० नानाजनपदोक्तौ । “पण्डितो मेधावी गन्धारानेवोपसम्पद्यते” छा० उप० । “गन्धारराजपुत्रोऽभूच्छकुनिः सौबलस्तथा” भा० आ० ६३० । २तन्नृपेषु ब० व० । ततो भवार्थादौ कच्छादि० अण् । गान्धार तद्देशभवे त्रि० स्त्रियां ङीप् । गान्धारी सा च शकुनिदुर्य्योधनमातरि । गन्धाराः अभिजनोऽस्य सिन्ध्वा० गन्धार–अण् । गान्धारपित्रादिक्रमेण गन्धारदेशवासिनि त्रि० ।

गन्धारि पु० गन्धम् ऋच्छति ऋ–इन् ६ त० । गन्धारदेशे । “सर्वाहमत्यबोध्य गान्धारीणामिवाविका” ऋ० १।१२६ । गन्धं देशरूपं गर्भमृच्छति अण् गौरा० ङीष् । १गन्धारी गर्भवत्याञ्च उक्तमन्त्रभाष्ये माधव आह स्म “रोमशत्वे दृष्टान्तः गन्धारीणामविकेव । गन्धारा देशाः । तेषां सम्बन्धिन्य विजातिरिव तद्देशस्था अवयो मेषा यथा रोमशाः तथाहमस्मि । यद्वा गन्धारीणां गर्भधारिणीनां स्त्रीणामविकात्यर्थं तर्पयन्ती योनिरिव । तासामापन्नसत्त्वे रोमादिविकर्त्तनस्य शास्त्रे निषिद्धत्वाद्योनी रोमशा भवति अतः सोपमीयते” [लतायां शब्दच० ।

गन्धाला स्त्री गन्धायालति पर्य्याप्नोति अल–अच् । (जियति)

गन्धाली स्त्री गन्धमलति पर्य्याप्नोति अल–अण् गौरा० ङीष् । (गन्धभादाल) लताभेदे अमरः । ६ त० । गन्धश्रेण्यौ च ।

गन्धालीगर्भ स्त्री गन्धाली गन्धश्रेणी गर्भे यस्याः । सूक्ष्मैलायाम् राजनि० ।

गन्धाश्मन् पु० गन्धयुक्तोऽश्मा शा० त० । गन्धके अमरः ।

गन्धाष्टक न० गन्धानां गन्धद्रव्याणामष्टकम् । चन्दनाद्यष्टसु आमोदाढ्यद्रव्येषु ।

देवताभेदेन देयाष्टप्रकारगन्धद्रव्यभेदा यथा “चन्दनागुरुकर्पूरचोरकुङ्कुमरोचनाः । जटामांसी कपियुता शक्तेर्गन्धाष्टकं विदुः । चन्दनागुरुह्रीवेरकुष्ठकुङ्कुमसेव्यकाः । जटामांसीसुरमिति विष्णोर्गन्धाष्टकं विदुः । चन्दनागुरुकर्पूरतमालदलकुङ्कुमम् । कुसीदं कुष्ठसंयुक्तं शैवं गन्धाष्टकं शुभम् । स्वरूपं चन्दनं चोररोचनागुरुरेव च । मद मृगद्वयोद्भूतं कस्तूरीचन्द्रसंयुतम् । गन्धाष्टकं विनिर्द्दिष्टं गणेशस्य महेशितुः” शारदा० ति० । “चन्दनागुरुकर्पूररोचनाकुङ्कुमं मदम् । रक्तचन्दनह्रीवेरं गाणपत्यमुदाहृतम् । जलकाश्मीरकुष्ठैस्तु रक्तचन्दनचन्दनैः । उशीरागुरुकर्पूरैः सौरं गन्धाष्टकं विदुः” मेरुतन्त्रम् ।

गन्धाह्वा स्त्री गन्धेनाह्वयति आ+ह्वे–क । रक्ततुलस्याम् । “मालती कटुतुम्बी गन्धाह्वा मूलकं तथा” सुश्रुतः ।

गन्धि न० गन्ध–इन् । तृणकुङ्कुमे राजनि० ।

गन्धिक पु० गन्धोऽस्त्यस्य ठन् । १गन्धके गन्धो गन्धद्रव्यं पण्यत्वेनास्त्यस्य ठन् । २गन्धवणिजि ।

गन्धिन् त्रि० प्रशस्तः गन्धोऽस्त्यस्य इनि । प्रशस्तामोदयुक्ते “अनोकहाकम्पितपुष्पगन्धी” “हविः शमीलाजगन्धि” “शालनिर्यासगन्धिभिः” धूमैराहुतिगन्धिभिः” रघुः । “यन्नैव गन्धि नो रस्यं नो रूपि न च शब्दवत् । अन्यत्ते मनसो बुद्ध्या तत् प्रधानं प्रचक्षते” भा० आश्व० ५२ अ० ।

स्त्रियां ङीप्। "गावः सुरभिगन्धिन्यस्तथा गुग्गुलुगन्धयः" भा० आनु० ७८अ०। सा च २मुरानामगन्धद्रव्ये अमरः। [गन्धिफलादयोऽप्यत्र।

गन्धिपर्ण पु० गन्धि गन्धयुक्तं पर्णमस्य। सप्तच्छदे राजनि०।

गन्धेन्द्रिय न० गन्धग्राहकमिन्द्रियम् शा० त०। घ्राणेन्द्रिये तच्च पृथिव्यंशोत्पन्नम् "पार्थिवो गन्धो गन्धेन्द्रियं सर्वमूर्त्तिसमूहो गुरुता चेति" सुश्रुतः। तस्य यथा पार्थिवत्वं तथा मुक्तावल्यां समर्थितं यथा

"घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात् कुङ्कुमगन्धव्यञ्जकघृतवत् न च दृष्टान्ते स्वकीयरूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यं परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात् न च नवशरावगन्धव्यञ्जकजलेनानैकान्तिकमिति वाच्यं तस्य सक्तुरसाभिव्यञ्जकत्वात् यद्वा परकीयेति न देयं वायूपनीतसुरभिभागस्य दृष्टान्तत्वसम्भवात् नच घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्रव्यञ्जकत्वात् तत्र व्यभिचार इति वाच्यं द्रव्यत्वे सति इति विशेषणात्।" अधिकमिन्द्रियशब्दे उक्तम्। [जन्तुभेदे त्रिका०।

गन्धो(न्धौ)तु पु० गन्धप्रधान ओतुः वा वृद्धिः। खट्टासे

गन्धोत्कटा स्त्री गन्धेन उत्कटा उग्रा। दमनकवृक्षे राजनि०

गन्धोत्तमा स्त्री गन्धेन उत्तमा उत्कृष्टा। मदिरायाम् अमरः

गन्धोद न० गन्धवासितमुदकं शा०त०वा उदादेशः। गन्धद्रव्यवासितजले "आसिञ्चन्मार्गं गन्धोदैः" भाग०९।११।१८। उदादेशाभावे गन्धोदकमप्यत्र गन्धयुक्तिशब्दे उदा०।

गन्धोपजीविन् पु० गन्धं गन्धद्रव्यमुपजीवति उप+जीव–णिनि। गन्धवणिजि। "दन्तकाराः सूपकारा ये च गन्धोपजीविनः" रामा० अयो०८३।१ श्लो०।

गन्धोलि(ली) स्त्री गन्ध–ओलि–वा ङीप्। शट्याम्। ङोवनः। २भद्रमुस्तायाम् मेदि०।

गन्धोली स्त्री गन्ध–अर्द्दने वा० ओलच् गौरा० ङीष्। वरटायां (बोलता) अमरः।

गभ न० भग+पृषो० वर्णविपर्य्ययः। भगे। "आहन्ति गभे पसो निगल्गलीति धाका" यजु०२३।२२ "गभे भगे वर्णविपर्य्ययः" वेददी० "गभे मुष्टिमतंसयत्" २३।४।२४ "आहन्ति गभे पसो निगल्गलीति धाका" शत० ब्रा० १३।२।९।६।

गभस्ति पु० गम्यते ज्ञायते गम–डि गः विषयस्तं बभस्ति भासयति भस–क्तिच्। १किरणे, २सूर्य्ये च। ३स्वाहायां वह्निपत्न्यां स्त्री मेदि० वा ङीप्। "यथा राजन्! प्रजाः सर्वाः सूर्य्यः पाति गभस्तिभिः" भा० व० १२२अ०। "निजवदनमलिनमयगभस्तिभिः सुधयति" भाग० ५।८।२७। "गभस्तिधाराभिरिव द्रुतानि तेजांसि भानोः" भट्टिः। ४अङ्गुलीषु ब०व० ५बाह्वौ द्विव० निघण्टुः। "पृथू करस्ना बहुला गभस्ती" ऋ० ६।१९।२। "भगस्ती बाहू" भा०। "आ रश्मयोः गभस्त्योः सूरयोः" २९।२। "गभस्त्योः बाह्वोः" भा० ६पाणौ च "पाणी वै गभस्ती पाणिभ्यां ह्येनं मावयति" गभस्तिपूतनिरुक्तौ शत०ब्रा० ४।१।१।९। "कण्वोऽंशुभ्यां गभस्तिपूतः" यजु० ७।१। "गभस्तिभ्यां पाणिभ्यां पूतः" वेददी०।

गभस्तिनेमि पु०गभस्तय एव चक्रं तस्य नेमिरिव। गभस्तिरूपचक्रमध्यस्थस्य सूर्य्यात्मनो नेमितुल्ये परमेश्वरे। "गभस्तिनेमिः सत्त्वस्थः" विष्णु स०। "गभस्तिनेमिः श्रीपद्मः" भा० शा० १२अ० विष्णुस्तुतिः।

गभस्तिपाणि पु०गभस्तिः पाणिरिवास्य रसाकर्षणाय। सूर्य्ये हेमच०। गभस्तिकरादयोऽप्यत्र। गभस्तिहस्तशब्दे दृश्यम्।

गभस्तिमत् पु०गभस्तयो भूम्ना सन्त्यस्य मतुप्। सूर्य्ये शब्दरत्ना०। तस्य सहस्रकिरणत्वात्तथात्वम्। "घनव्यपायेन गभस्तिमानिव" रघुः गभस्तयो नित्यं सन्त्यत्र नित्ययोगे मतुप्। २पातालभेदे न० शब्दर०। "आह्लादकारिणः शुभ्राः मणयो यत्र सुप्रभाः। दिवार्करश्मयो यत्र प्रभां तन्वन्ति नातपम्। शशिनश्च न शीताय निशि द्योताय केवलम्" विष्णुपुराणोक्तेः तस्य सर्वदा मण्यादिदीप्तिमत्त्वात् तथात्वम् ३द्वीपभेदे पु० गन्धर्वशब्दे दृश्यम्।

गभस्तिहस्त पु० गभस्तयो हस्ता इव जलाकर्षणाय यस्य। सूर्य्ये त्रिका०। "सूर्य्यः किरणजालेन वायुयुक्तेन सर्वतः। जगतो जलमादत्ते कृत्स्नस्य द्विजसत्तम!" विष्णुपु० उक्तेस्तस्य किरणद्वारा जलाकर्षकत्वात् तत्किरणानां तस्य हस्ततुल्यत्वम्। [मेतद्दिव्यमहःसदम्" काशीख०।

गभस्तीश पु० काशीस्थे लिङ्गभेदे "गभस्तीशो महालिङ्ग-

गभि त्रि० गच्छति नीरमत्र गम–आधारे इन् भश्चान्तादेशः। गभीरे। "गभौ सज्जते सस्ज–क्विप् गभिषक् गभीरस्थायिनि। "तेषां हि धाम गभिषक् समुद्रियम्" अथ० ७।७।१।

गभीका स्त्री गभीरे कायति कै–क पृषो०रलोपः।(गाम्भार) वृक्षभेदे तस्याः फलम् अण् हरितक्या० तस्य लुप् तद्धित लुपि प्रकृतिलिङ्गता। गभीका तत्फले स्त्री।

गभीर त्रि० गच्छति जलमत्र गम–ईरन् भान्तादेशश्च। १निम्नस्थाने, २अतलस्पर्शे, ३मन्द्रे ध्वनौ च अमरः। ४गहने, ५दुष्प्रवेशे, ६दुर्बोधे च उणादिकोषः। "जीर्णा तरिः सरिदतीव गभीरनीरा" उद्भटः "स त्वां गभीरं पुरुहूतः! सिन्धुः" ऋ० ३।३२।१६। "न तं गूहन्ति स्रवतो गभीराः" ऋ० १०।१०८।४॥ ७वाचि स्त्री निघण्टुः। ८द्यावापृथिव्योः रोदस्योः स्त्री द्विव० निघण्टुः।

गभीरात्मन् पु० गभीरः दुर्लक्ष्य आत्मा स्वरूपमस्य। परमेश्वरे। "चतुरस्रो गभीरात्मा" विष्णुस०। आत्मस्वरूपं चित्तं वा गभीरं परिच्छेत्तुमशक्यमस्य गभीरात्मा" भा०। [हुहुड्ढक्कायाम् शब्दरत्ना०।

गभीरिका स्त्री गभीरा मन्द्रध्वनियुक्ता संज्ञायां कन्।

गभोलिक पु० अव्युत्पन्नप्रातिपदिकम्। मसूरे हारा०।

गम गतौ भ्वा० पर० अनिट्। गच्छति ऌदित् अगमत् जगाम जग्मतुः। गन्ता गम्यात् गमिष्यति। गन्ता गमी गम्यः गन्तव्यः गमनीयः गच्छन् गतं गतः गतिः गन्तुम् गत्वा आगत्य। हृदयङ्गमः। जग्मिवान्। कर्मणि गम्यते अगमि गम्यमानः। णिच्। गमयति ते अजीगमत् ते। सन् जिगमिषति संजिगांसते। यङ् जङ्गम्यते। यङ्लुक् जङ्गमीति-जङ्गन्ति। जङ्गमम्। "वीदीयानपि गच्छति" माघः "गच्छति पुरः शरीरम्" शकु० "तेन गच्छन् न रिष्यति" मनुः। "न गणस्याग्रतो गच्छेत्" हितो०। "जगाम गहनं वनम्" देवीमा०। "तत्र निश्चित्य कन्दर्पमगमत् पाकशासनः" कुमा०। "गतं तिरश्चीनमनूरुसारथेः" माघः। "कोशार्द्धं प्रकृतिपुरःसरेण गत्वा" रघुः। "अगम्यां च स्त्रियं गत्वा" स्मृतिः।

अच्छ+आभिमुख्ये गच्छगत्य अभिमुखं गत्वा।

अति+अतिक्रम्य उत्क्रम्य वा गमने। "ततो दशाहेऽतिगते कृतशौचो नृपात्मजः" रामा० अयो० ७७।१। "चिन्तामतिजगाम ह" भा० शल्य०४७ अ०। अतिक्रमार्थे नास्य गतित्वम् अतिगत्वा।

वि+अति+विशेषेणातिक्रम्य गतौ "कथमर्ज्जुन! कालोयम् स्वर्गे व्यतिगमस्तव" भा० व० १६७ अ०।

अधि+प्राप्तौ। "अधिगत्य जगत्यधीश्वरात्" नैष०। यथा "खनन् खनित्रेण नरो वार्य्यधिगच्छति" मनुः। "विशेषं नाधिगच्छामि निर्द्धनस्यावरस्य च" भा० शा० २२६ श्लो०। "वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च" याज्ञ०।

सम्+अधि+सम्यक् प्राप्तौ। "यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम्" मनुः।

अनु+प्राप्तौ पश्चाद्गमने अनुकरणे च। "तत् पापं शतधा भूत्वा तद्धर्त्तॄननुगच्छति" स्मृतिः "श्रुतेरिवार्थं स्मृतिरन्वगच्छत्" रघुः। "अनुगतनयमार्गामर्गलां दुर्नयस्य" माघः।

अन्तर्+व्यवधाने गतौ मध्यगतौ च। "भानौ यस्मादन्तर्गतः" शत०ब्रा० १।६।१।१। "अन्तर्गतां मदनवह्निशिखावली या" उद्भटः।

अप+अपाये विश्लेषजनकक्रियायाम्। "सा कन्यापजगामाथ समीपात्तस्य धीमतः" भा० द्रो० ५४अ०।

अपि+स्वकारणादौ प्रवेशे "अस्तुं वागपिगच्छतु" अथ०२।१२।८।

अभि+आभिमुख्येन गतौ। "अनुरागाद्वने रामं दिष्ट्या त्वमभिगच्छसि" रामा० अयो० २ अ०। सम्यग्गतौ च "अभिगन्तास्मि भगिनीं मातरं च तवेति च" याज्ञ०।

अव+बोधे, "यदावगच्छेदायत्यामनिष्टं ध्रुवमात्मनः" मनुः। प्राप्तौ च "कुतो युद्धं जातु नरोऽवगच्छेत्" भा० उ० ७४०श्लो०।

आ+पश्चाद्देशविभागपूर्वकगतौ। "आगत्य बिल्वशाखायां चण्डिके! कुरु सन्निधिम्" दुर्गावाहनमन्त्रः। "धनुषोऽस्याः समागत्य" भा० आ०१८७अ०। "आगता वत जरेव हिमानी सेव्यतां सुरतरङ्गिणी" उद्भटः। बोधे "आगमो निष्फलस्तत्र भुक्तिस्तोकापि यत्र नो"। आ+गम–णिच्। क्षमायां प्रतीक्षायाञ्च आत्म० "यावदागमयतेऽथ नरेन्द्रान्" नैष०। आगमयते कालम्। "कर्म्मादिषु सर्वेषु अध्वर्युः संप्रेषमागमयेत" लाट्या०श्रौ०४।९।८।

अधि+आ+प्राप्तौ "नाध्यागमच्च मृगयंस्तां गां मुनिरुदारधीः" भा० आ०९९अ०।

अनु+आ+अनुकृतौ सम्यग्गतौ पश्चाद्गतौ प्रत्यागतौ च "अन्वागतो यज्ञपतिर्वो अभ्रमत" यजु०१८।५९। "अन्वागतो कर्म्मसमाप्तौ भवतः प्रत्यागमिष्यति" वेददी०। सम्बन्धे च। "किञ्चित् पश्यत्यनन्वागतः" शत० ब्रा० १४।६।१।१७। "अनन्वागतः अननुबद्धः" भा०।

अभि+आ+आभिमुख्येनागतौ "सर्वत्राभ्यागतो गुरुः" मनुः सम्यगागतौ "क्रमादभ्यागतं द्रव्यम्" याज्ञ०। प्राप्तौ च

उप+आ+समीपागतौ "वनादारादुपागतः" रामा०। "तपोनिधिं वेत्सि न मामुपगातम्" शकु०। उपस्थितौ अक०। "कथमापदुपागता" भा० स०२६०९अ०।

प्रति+आ+परावृत्यागमने (यतो गतिस्तत्र पुनरागतौ) "द-

णात् प्रत्यागतं शूरं भार्य्याश्च गतयौवनाम्” चाण० । “प्रत्यागतस्यैव पुनस्तथैव” प्रा०त० ।

उद्+ऊर्द्ध्वगतौ उत्थाने अक० । “इत्युद्गताः पौरवधूमुखेभ्यः शृण्वन् कथाः” रघुः । उद्गमः । उत्क्रम्य गतौ च “ऊर्द्ध्वं प्राणा ह्युद्गच्छन्ति यूनः स्थविर आयति” मनुः ।

अभि+आ+आभिमुख्येनागमने । “अभ्युद्गतास्त्वा वयमद्य सर्वे” भा०आ० ८८अ० ।

प्रति+उद्+प्रतिमुखीकृत्य उत्थाने अक० । “तमागतमभिप्रेक्ष्य प्रत्युद्गम्य परन्तपाः” भा०आ० १६८अ० । (आगवाड़ा) गतिभेदे सक० । “प्रत्युज्जगामातिथिमातिथेयः” । “प्रत्युद्गतमिवानुष्णैः” “प्रत्युद्गता पार्थिवधर्म्मपत्न्या” रघुः “प्रत्युज्जगामागमनप्रतीतः” कुमा० ।

उप+समीपगमने । “गृहास्तमुपगच्छन्ति सारमेया इवामिषम्” “सदनमुपगतोऽहं पूर्व्वमम्भोजयोनेः” प्रबोधच० । “सुप्तां मत्तां प्रमत्तां वा रहोयत्रोपगच्छति” मनुः । प्रतिज्ञायाम् उपगमः ।

अभि+उप+प्रतिज्ञायाम् स्वीकारे च । “वयमभ्युपगच्छाम कृष्णेय त्वां प्रधर्षितम्” हरिवं०३अ० । अभ्युपगमः । आभिमुख्येन समीपगतौ च “गच्छन्नभ्युपगच्छन्ति यशसेऽर्थाय भाविनि !” भा०१२४अ० ।

नि+नियमेन प्राप्तौ । “हिते मित्रे निगतान् हन्ति वीरान्” ऋ०१०।११२।५ । “निगतान् हननाय नियमेन प्राप्तान्” भा० । णिच् । निश्चयेन बोधने च निगमो वेदः । निगमकल्पतरोर्गलितं फलम्” भाग० १।१।२ । उक्तस्यार्थस्योपसंहारे च निगमनशब्दे विवृतिः ।

निर्+निष्क्रमणे । “अधिविन्ना तु या नारी निर्गच्छेद्रुषिता गृहात्” मनुः । विशेषेण प्राप्तौ च । “पुरुषाः प्रेष्यतामेके निर्गच्छन्ति धनार्थिनः” भा० व० २५८अ० ।

परा+परावृत्य गमने परिगतौ च । “यद्वै मनः परागतं यद्बद्धमिह वेह वा” अथ०७।१२।४ । “विद्यया तदारोहन्ति यत्र कामाः परागताः” शत०ब्रा० १०।५।४।१६ । व्याप्तौ च । “स्फुटपरागपरागतपङ्कजम्” माघः ।

परि+परितो गतौ “यथा हि मेरुर्भगवता(सूर्य्येण)नित्यशः परिगम्यते” भा०व० २०४अ० । वेष्टने च “अथ स वल्कदुकूलकुथादिभिः परिगतोज्ज्वलदुद्धतबालधिः” भट्टिः ।

प्रति+वैपरीत्येन गतौ (यत आगतिस्तत्रैव गमने) “भवतु प्रतिगमिष्यामस्तावत्” शकु० “अधीतां योगहीनस्य विद्यां प्रतिगतामिव” रामा०सुन्द०१८अ० ।

वि+विशेषेण गतौ विच्छेदे विगमे च । “अवनितलविगतै भूतसंघैः” भा० द्रो० ३७अ० । “ततो निशा साव्यगमन्महात्मनाम्” भा० आश्व० ६४अ० । “श्रद्धा च नो माविगमत्” मनुः । “रुचिभर्त्तुरस्य विरहाधिगमादिति सन्ध्ययापि सपदि व्यगमि” माघः ।

सम्+सङ्गे अक० आ० । “यत्र देवाः समगच्छन्त विश्वे” ऋ० १०।८२।६ । “सङ्गच्छस्व मया सार्द्धमेकेनैकनराशन !” भा० अयो०१५३अ० । “जले स्थले चान्तरीक्षे गङ्गासागरसङ्गमे” प्रा०त० । “परमं भगवन्नेवं संगमिष्ये त्वया सह” भा० व० २०६ अ० । “दिष्ट्या मे सङ्गतं यथा” भा० सम्यग्गतौ पर०सक० । “सङ्गच्छ पोंश्चि ! स्वैरं माम्” भट्टिः । गमेः कर्म्मविशेषे उपपदे कर्त्तरि ख । तुरङ्गमः हृदयङ्गमः भुजङ्गमः इत्यादि । उरआदिषु उपपदेषु ड । उरगः भुजगः तुरगः हृद्गः अन्तग इत्यादि ।

गम पु० गम—यथायथं भावादौ अप् । १जिगीषोर्यात्रायाम्, २पथि, अमरः ३द्यूतभेदे, ४गमने, च । ५अपर्य्यालोचिते अध्वनि मेदि० । ६सदृक्पाठे हेम० । गम्यते कर्म्मणि अप् न वृद्धिः । ७गम्यमाने मार्गादौ । “अश्वस्यैकाहगमः” पा० तत्र गमने “वृषसिंहवृश्चिकघटैर्विद्धि स्थानं गमागमौ नस्तः” षट्पञ्चाशिका ।

गमक त्रि० गमयति गम—णिच्—ण्वुल् । १गमयितरि २बोधके च “सापेक्षत्वेऽपि गमकत्वात् समासः” महाभा० “सत् प्रौढत्वमुदारता च वचसां यच्चार्थतोगौरवम् तच्चेदस्ति ततस्तदेव गमकं पाण्डित्यवैदग्ध्ययोः” मालतीमा० । ३स्वरभेदे । “गमकः स्वश्रुतिस्थानस्थानां श्रुत्यन्तराश्रयात् । स्वरो यो मूर्च्छनामेति गमकः स इहोच्यते । कम्पितः स्फुरितो लीनो भिन्नः स्थविर एव च । आहतान्दोलितौ चेति गमकाः सप्त कीर्त्तिताः । माघपौषनिशायान्तु शेषप्रहरमात्रके । साधकैः सलिले स्थित्वा गमकान् सप्त साधयेत् । दाक्षिणात्या हरिप्रीत्यै गायन्ति गमकानिमान्” सङ्गी०दा० ।

गमथ पु० गम—अथच् । पथिके उज्ज्वद० ।

गमन न० गम—भावे ल्युट् । स्वाश्रयसंयोगविभागासमवायिकारणे १क्रियाभेदे “प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्च च” “भ्रमणं रेचनं स्पन्दनोर्द्ध्वज्वलनमेव च । तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते” भाषा० । उत्क्षेपणशब्दे १०८६पृ०विवृतिः । २जिगीषोः प्रयाणे च अमरः ।

गमिन् त्रि० “भविष्यति गम्यादयः” पा० गम—भव्ये इनि ।

भावि गमनके स्त्रियां ङीप्। "गम्यादीनामुपसंख्यानम्" वार्त्तिकोक्तेः ग्रामगमीत्यादौ द्वितीयात०समा०। कृदन्तत्वेऽपि तद्योगे कर्म्मणि न षष्ठी ग्रामं गमी।

गमिष्ठ त्रि० अतिशयेन गन्ता—गन्तृ—अतिशायने इष्ठन्। गन्तृतमे। "किमङ्ग वा प्रत्यर्त्तिं गमिष्ठः" ऋ० १।११८।२।

गम्व(न्व) गतौ भ्वा० पर० सक० सेट्। गम्वति अगम्वीत् जगम्व। नोपधत्वे क्विपि गनौ गनः। मोपधत्वे गमौ गम इति भेदः।

गम्भन् त्रि० गम—वा० अन् भुगागमश्च। गम्भीरे "अपां गम्भन्त्सीद मा त्वा" यजु० १३।३०। "गम्भन् गम्भानि गभीरे" वेददी०। वेदे सप्तमीलोपः।

गम्भर न० गम—क्विप् गमं निम्नगतिं बिभर्त्ति भृ—अच् ६त०। उदके निघण्टुः। "दृहन्तेव गम्भरेषु प्रतिष्ठाम्" ऋ०१०।१०६।८। "गम्भरेषु गहनेषु जलेषु" भा०।

गम्भारिका स्त्री गम—क्विप् गमं निम्नगतिं बिभर्त्ति—भृ—ण्वुल् कापि अत इत्त्वम्। (गाम्भार) वृक्षभेदे राजनि०।

गम्भारी स्त्री गमं गतिभेदं बिभर्त्ति अण्, कं जलं बिभर्त्ति पृषो० कस्य ग इत्यन्ये उप०स० गौरा० ङीष्। (गाम्भार) वृक्षभेदे अमरः। गम्भार्य्याः फलं पुष्पं वा अण् तस्य लुपि प्रकृतिवल्लिङ्गता। गम्भारीतत्फले पुष्पे च स्त्री। "गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका। काश्मीरी काश्मरी हीरा काश्मर्य्यः पीतरोहिणी। कृष्णवृन्ता मधुरसा महाकुमुदिकापि च। काश्मरी तुवरा तिक्ता वीर्य्योष्णा मधुरा गुरुः। दीपनी पाचनी मेध्या भेदनी भ्रमशोषजित्। दोषतृष्णामशूलार्शोविषदाहज्वरापहा। तत्फलं बृंहणं वृष्यं गुरु केश्यं रसायनम्। वातपित्ततृषारक्तक्षयमूत्रविबन्धहृत्। स्वादु पाके हिमं स्निग्धं तुवराम्लं विबन्धकृत्। हन्याद्दाहतृषावातरक्तपित्तक्षतक्षयान्" भावप्र०

गम्भिष्ठ त्रि० गम्भन्+अतिशायने इष्ठन् टिलोपः। गम्भीरतमे। "अपां गम्भन्त्सीदेति एतद्वा अपां गम्भिष्ठं यत्रैष एतत्तपति" शत०ब्रा० ७।५।१।८।

गम्भीर त्रि० गच्छति जलमत्र गम—ईरन् नि० भुगागमः। १निम्नस्थाने अगाधे, अमरः। "धृतगम्भीरखनीखनीनिभ" नैष०। २मन्द्रे शब्दे "स्निग्धगम्भीरनिर्घोषमेकस्यन्दनमास्थितौ" रघुः। ३गभीरार्थे च उणादि०। ४जम्बीरे, ५पद्मे, ६ऋग्मन्त्रभेदे च पु०। "स्वरे सत्त्वे च नाभौ च त्रिषु गम्भीरता शुभा।

गम्भीरवेदिन् पु० गम्भीरं गहनं यथातथा वेत्ति विद—णिनि। "चिरकालेन यो वेत्ति शिक्षां परिचितामपि। गम्भीरवेदी विज्ञेयः स गजो गजवेदिभिः" राजपुत्रीयोक्तचिह्ने १गजे। "अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः" रघुः। "गम्भीरवेदिनः पुरः कवलं करीन्द्रे" माघः। तृच्। गम्भीरवेत्तृ "त्वग्भेदात् शोणितस्रावात् मांसस्य क्रथनादपि। आत्मानं यो न जानाति स स्यात् गम्भीरवेदिता" मृगपक्षीयोक्तचिह्ने गजे।

गम्भीरिका स्त्री गम्भीर—स्वार्थे क संज्ञायां कन् वा कापि अत इत्त्वम्। १गम्भीरायां नद्यां २नदीभेदे च। "लौहित्यः सिन्धुनदः सरयूर्गम्भीरिका रथाह्वा च। गङ्गाकौशिक्याद्याः सरितो विदेहकाम्बोजाः" वृह०सं० १६ अ०। ३नाडीभेदे "नाड्यो गम्भीरिका यास्तु सद्यश्छिन्नास्तथैव च" सुश्रुतः। ४दृष्टिरोगभेदे "हताधिमन्थो निमिषो दृष्टिर्गम्भीरिका च या" सुश्रुतः। तल्लक्षणं तत्रैव उक्तं यथा "दृष्टिर्विरूपा श्वसनोपसृष्टा सङ्कुच्यतेऽभ्यन्तरतश्च याति। रुजावगाढा च तमक्षिरोगं गम्भीरिकेति प्रवदन्ति तज्ज्ञाः"।

गम्य त्रि० गम—पवर्गान्तत्वात् कर्मादौ यत्। १गमनीये २प्राप्ये च। अर्हार्थे यत्। गमनयोग्ये। "गम्यान्यपि तीर्थानि कीर्त्तितान्यगम्यानि च" भा० व० ८५। "अभिकामां स्त्रियं यस्तु गम्यां रहसि याचितः" भा० आ० ८२ अ०। "गम्यं त्वभावे दातॄणां कन्या कुर्य्यात् स्वयं वरम्" याज्ञ०। "समानश्च खेदविगमो गम्यायामगम्यायाञ्च तत्र नियमः क्रियते इयं गम्या इयमगम्येति" महाभाष्यम् "खेदयतीति खेदो रोगः इन्द्रियनियमासामर्थ्यं वा" इति कैयटः तथा च अगम्यानिषेधस्य इतराभ्यनुज्ञाफलकतया स्वदारगमने दोषाभावः" विवरणम्।

गम्यमान त्रि० गम—कर्म्मणि शानच्। १वर्त्तमानगतिकर्मणि। २बुध्यमाने च "गम्यमानाऽपि क्रिया विभक्तौ प्रयोजिका" व्या०न्यायः। "गम्यमानेऽर्थे" सि० कौ० भूरिप्रयोगः।

गम्यादि न० "भविष्यति गम्यादयः" पा० उक्ते भविष्यदर्थे इनिप्रत्ययान्तशब्दसमूहे ते च "गमी आगमी भावी प्रस्थायी प्रतिरोधी प्रतियोधी प्रतिबोधी प्रतियायी प्रतिषेधी इत्येते" पा०ग०। "गम्यादीनामुपसंख्यानम्" वार्त्ति० तद्योगे द्वितीयातत्पुरुषः। ग्रामगमी।

गय पु० रामायणप्रसिद्धे १वानरभेदे। "कोटीशतवृतो वापि गयो गवय एव च। वानरेन्द्र महावीर्य्यौ पृथक्

पृथगध्यासताम्" भा० व० २८२अ०। २हविर्धानराजपुत्रभेदे, तत्कथा "हविर्धानाद्धविर्धानी विदुरासूत षट् सुतान्। बर्हिषदं गयं शुक्लं कृष्णं सत्यजितं व्रतम्" भाग० ५।१५अ०। प्रियव्रतवंश्योद्भवे ३राजभेदे तत्कथा यथा "नक्ताद्द्युतिपुत्रो गयो राजर्षिप्रवर उदारश्रवा अजायत। साक्षाद्भगवतो विष्णोर्जगद्रिरक्षिषया गृहीतसत्त्वस्य कला आत्मवत्त्वादिलक्षणेन महापुरुषतां प्राप्तः। स वै स्वधर्मेण प्रजापालनपोषणप्रीणनोपलालनानुशासनलक्षणेनेज्यादिना च भगवति महापुरुषे परावरे ब्रह्मणि सर्वात्मनार्पितपरमार्थलक्षणेन ब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेन चाभीक्ष्णशः परिभावितविशुद्धमतिरुपरतानात्म्ये आत्मनि स्वयमुपलभ्यमानब्रह्मात्मानुभवोऽपि निरभिमान एवावनिमजूगुपत्। तस्येमां गाथां पाण्डवेय! पुराविद उपगायन्ति। गयं नृपं कः प्रतियाति कर्मभिर्यज्वाभिमानी बहुविद्धर्मगोप्ता। समागतश्रीः सदसस्पतिः सतां सत्सेवकोऽन्यो भगवत्कलामृते। यमभ्यषिञ्चन् परया मुदा सतीः(सत्यः) सत्याशिषो दक्षकन्याः सरिद्भिः। यस्य प्रजानां दुदुहे धराऽऽशिषो निराशिषो गुणवत्सस्नुतोधाः। छन्दांस्यकामस्य च यस्य कामान् दुदूहुराजह्रुरथो बलिं नृपाः। प्रत्यञ्चिता युधि धर्मेण विप्रा यदाशिषां षष्ठमंशं परेत्य। यस्याध्वरे भगवानध्वरात्मा मघोनि माद्यत्युरुसोमपीथे। श्रद्धाविशुद्धाचलभक्तियोगसमर्पितेज्याफलमाजहार। यत्प्रीणनाद्बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणमाविरिञ्चात्। प्रीयेत सद्यः स ह विश्वजीवः प्रीतः स्वयं प्रीतिमगाद्गयस्य। गयाद्गयन्त्यां चित्ररथः सुमतिरवरोधन इति त्रयः पुत्रा बभूवुः" भाग०५।१५। अमूर्त्तरयसः पुत्रे प्रधानषोड़शराजान्तर्गते ४राजर्षिभेदे तत्कथा।

"गयञ्चामूर्त्तरयसं मृतं सृञ्जय! शुश्रुम। यो वै वर्षशतं राजा हुतशिष्टाशनोऽभवत्। तस्मै ह्यग्निर्वरं प्रादात्ततो वव्रे वरं गयः। तपसा ब्रह्मचर्येण व्रतेन नियमेन च। गुरूणाञ्च प्रसादेन वेदानिच्छामि वेदितुम्। स्वधर्मेणाविहिंस्यान्यान् धनमिच्छामि चाक्षयम्। विप्रेषु ददतश्चैव श्रद्धा भवतु नित्यशः। अनन्यासु सवर्णासु पुत्रजन्म च मे भवेत्। अन्नं मे ददतः श्रद्धा धर्मे मे रमतां मनः। अविघ्नं चास्तु मे नित्यं धर्मकार्येषु, पावक!। तथा भविष्यतीत्युक्त्वा तत्रैवान्तरधीयत। गयो ह्यवाप्य तत् सर्वं धर्मेणारीनजीजयत्। स दर्शपौर्णमासाभ्यां कालेष्वाग्रयणेषु च। चातुर्मास्यैश्च विविधैर्यज्ञैश्चावाप्तदक्षिणैः। अयजच्छ्रद्धया राजा परिसंवत्सरान् शतम्। गवां शतसहस्राणि शतमश्वशतानि च। शतं निष्कसहस्राणि गवाञ्चाप्ययुतानि षट्। उत्थायोत्थाय संप्रादात् परिसंवत्सरान् शतम्। नक्षत्रेषु च सर्वेषु ददन्नक्षत्रदक्षिणाः। ईजे च विविधैर्यज्ञैर्यथा सोमोऽङ्गिरास्तथा। सौवर्णीं पृथिवीं कृत्वा य इमां मणिशर्कराम्। विप्रेभ्यः प्राददद्राजा अश्वमेधे महामखे। जाम्बूनदमया यूपाः सर्वे रत्नपरिच्छदाः। गयस्यासन् समृद्धास्तु सर्वभूतमनोहराः। सर्वकामसमृद्धांश्च प्रादात्तांश्च गयस्तथा। ब्राह्मणेभ्यः प्रहृष्टेभ्यः सर्वभूतेभ्य एव च। ससमुद्रवनद्वीपनदीनदवनेषु च। नगरेषु च राष्ट्रेषु दिवि व्योम्नि च येऽवसन्। भूतग्रामाश्च विविधाः संतृप्ता यज्ञसम्पदा। गयस्य सदृशो यज्ञो नास्त्यन्य इति तेऽब्रुवन्। षड्विंशयोजनायामा त्रिंशद्योजनमायता। पश्चात् पुरश्चतुर्विंशद्वेदी ह्यासीद्धिरण्मयी। गयस्य यजमानस्य मुक्तावज्रमणिस्तृता। प्रादात् स ब्राह्मणेभ्योऽथ वासांस्याभरणानि च। यथोक्ता दक्षिणाश्चान्या विप्रेभ्यो भूरिदक्षिणाः। यत्र भोजनशिष्टस्य पर्वताः पञ्चविंशतिः। कुल्याः सुकृतवाहिन्यो रसानामभवंस्तदा। वस्त्राभरणगन्धानां राशयश्च पृथग्विधाः। यस्य प्रभावाच्च गयस्त्रिषु लोकेषु विश्रुतः। वटश्चाक्षयकरणः पुण्यं ब्रह्मसरश्च तत्। स चेन्ममार सृञ्जय! चतुर्भद्रतरस्त्वया। पुत्रात् पुण्यतरश्चैव मा पुत्रमनुतप्यथाः" भा० द्रो० ६६अ०। ५धने ६अपत्ये ७गृहे च निघण्टुः। "इन्द्रो वसुभिः परिपातु नो गयम्" ऋ० १०।६६।२। "गयं गृहनामैतत्। प्राप्तव्यं गीयते शब्द्यतेऽस्मिन् वा गयं गृहम्" भा०। "अरक्षद्दाशुषे गयम्" ऋ० १।७४।२। "गयं धनम्" भा०। "परि पाहि नो गयम्" ऋ० ६।७१।२। "गयं गृहं धनं वा" भा०। ८अन्तरीक्षे च। "गयमस्माकं शर्म वनवत्स्वावसुः" ऋ०५।४४।७। "गयं गृहमन्तरिक्षं वा" भा०। ९गृहगते प्राणिनि च। "या नो गयमाविवेश" ऋ० ६।७४।२। "गयं गृहगतं प्राणिजातम्" भा०। १०स्वस्थाने। "हित्वी गयमारे अवद्य आगात्" ऋ०१०।९९।५। "गयं स्वस्थानम्" भा०। ११प्राणेषु वृह०उ०। "सा हैषा गयांस्तत्रे प्राणा वै गयास्तत्

आयांस्तत्र तद्वद्गयांस्तत्र तस्माद्गायत्री नाम” शत० ब्रा० १४।८।१५।७। गयाऽस्त्यत्र अच्। १२गयाप्रदेशे बहुव०। “गयस्य यजमानस्य गयेष्वेव महाक्रतुम्। आहूता सरितां श्रेष्ठे गययज्ञे सरस्वती” भा० शल्य० ३८ अ० “गयेन यजमानेन गयेष्वेव पितॄन् प्रति” रामा० अयो० १०७।१। तेन तद्यागस्थानत्वेन च गयेति प्रसिद्धिः १३असुरभेदे। तत्कथा वायुपु० गयामाहात्म्ये २अ० यथा।

“गयासुरोऽसुराणाञ्च महाबलपराक्रमः। योजनानां सपादञ्च शतं तस्योच्छ्रयः स्मृतः। स्थूलः षष्टिर्योजनानां श्रेष्ठोऽसौ वैष्णवः स्मृतः। कोलाहले गिरिवरे तपस्तेपे सुदारुणम्। बहुवर्षसहस्राणि निरुच्छ्वासं स्थितोऽभवत्। तत्तपस्तापिता देवाः संक्षोभं परमं ययुः। ब्रह्मलोकं गता देवाः प्रोचुस्ते प्रपितामहम्।”

ततस्तत्कृतस्तवादिकमुपवर्ण्य तद्वरकथा तत्रैव यथा

“यदि तुष्टास्तु मे देवा ब्रह्मविष्णुमहेश्वराः। सर्वदेवद्विजातिभ्यो यज्ञतीर्थशिलोच्चयात्। देवेभ्योऽतिपवित्रोऽहमृषिभ्योऽपि शिवाव्ययात्। मन्त्रेभ्यो देवदेवीभ्यो योगिभ्यश्चापि सर्वशः। न्यासिभ्यश्चापि कर्मिभ्यो धर्मिभ्यश्च तथा पुनः। ज्ञातिभ्योऽतिपवित्रोऽहं पवित्रः स्यां सदा सुराः!। पवित्रितास्तु तं देवाः सत्यमुक्त्वा दिवं ययुः। दृष्ट्वा दैत्यं, तथा स्पृष्ट्वा सर्वे हरिपुरं ययुः। शून्ये लोकत्रये याते शून्या यमपुरी ह्यभूत्। यम इन्द्रादिभिः सार्द्धं ब्रह्मलोकं ततोऽगमत्। ब्रह्माणमूचिरे देवा गयासुरविलोपिताः। त्वया दत्ताधिकारांस्त्वं तान् गृहाण पितामह!। ब्रह्माब्रवीत्ततो देवान् व्रजामो विष्णुमव्ययम्। ब्रह्मादयोऽब्रुवन् विष्णुं त्वया दत्तवरोऽसुरः। तद्दर्शनाद्ययुः स्वर्गं शून्यं लोकत्रयं ह्यभूत्। देवैरुक्तो वासुदेवो ब्रह्माणं स वचोऽब्रवीत्। गयासुरं प्रार्थयस्व यज्ञार्थं देहि देहकम्। विष्णूक्तः ससुरो ब्रह्मा गत्वाऽपश्यद्गयासुरम्। गयासुरोऽब्रवीत् दृष्ट्वा ब्रह्माणं त्रिदशैःसह। संपूज्योत्थाय विधिवत् प्रणतः श्रद्धयान्वितः। गयासुर उवाच। अद्य मे सफलं जन्म अद्य मे सफलं तपः। यदागतोऽतिथिर्ब्रह्मा सर्वं प्राप्तं मयाद्य वै। योगिन्! योगाङ्गवित् सर्वलोकस्वामिन्! पितर्गुरो!। यदर्थमागतो ब्रह्मन् तत्कार्य्यं करवाण्यहम्। ब्रह्मोवाच। पृथिव्यां यानि तीर्थानि दृष्टानि भ्रमता मया। यज्ञार्थं न तु ते तानि पवित्राणि शरीरतः। त्वया देहे पवित्रत्वं प्राप्तं विष्णुप्रसादतः। अतः पवित्रं देहं त्वं यज्ञार्थं देहि मेऽसुर!। गयासुर उवाच। धन्योऽहं देवदेवेश! यद्देहं प्रार्थ्यते त्वया। पितृवंशे कृतार्थोऽहं मातृवंशे तथैव च। त्वयैवोत्पादितो देहः पवित्रस्तु त्वया कृतः। सर्वेषामुपकाराय यागोऽवश्यं भविष्यति। इत्युक्त्वा सोऽपतद्भूमौ श्वेतकल्पे गयासुरः। नैरृतं दिशमाश्रित्य तदा कोलाहले गिरौ। शिरः कृत्वोत्तरे दैत्यः पादौ कृत्वा तु दक्षिणे। ब्रह्मा संभृतसम्भारो मानसानृत्विजोऽसृजत्” इत्युपक्रम्य कतिचित्तत्कल्पितर्षीनुक्त्वा “एतानन्यांश्च विप्रेन्द्रान् वेधा लोकपितामहः। परिकल्प्याकरोद्यागं गयासुरशरीरके। अग्निशर्मापि पञ्चाग्नीन् मुखादेतानवासृजत्। दक्षिणाग्निं गार्हपत्याहवनीयौ तपोऽव्ययः। सभ्यावसथ्यौ देवर्षिर्येषु यज्ञाः प्रतिष्ठिताः। यज्ञस्य च प्रतिष्ठार्थं विप्रेभ्यो दक्षिणां ददौ। हुत्वा पूर्णाहुतिं ब्रह्मा स्नात्वा चावभृथे सुरैः। यज्ञयूपं सुरैः सार्द्धं समानीय व्यरोपयत्। ब्रह्मणः सरसां श्रेष्ठे सरस्येवोच्छ्रितं शुभम्। यज्ञवाटे सुरैःसार्द्धं गयासुरमपश्यत। चलितं चकितो ब्रह्मा धर्म्मराजमभाषत। या सा गृहे तव शिला समानीयाविचारयन्। दैत्यस्य शीर्षं शिरसि तां धारय ममाज्ञया। निश्चलार्थं, यमः श्रुत्वाऽधारयन्मस्तके शिलाम्। शिलायां धारितायान्तु सशिलश्चासुरोऽचलत्। देवानूचेऽथ रुद्रादीन् शिलायां निश्चलाः किल। तिष्ठध्वं देवाः सकलास्तथेत्युक्त्वा च ते स्थिताः। देवाः पादैर्लक्षयित्वा तथापि चलितोऽसुरः। ब्रह्माथ व्याकुलो विष्णुं गतः क्षीराब्धिशायिनम्। तुष्टाव प्रणतो भूत्वा नत्वा चाहत्य तं प्रभुम्। ब्रह्माण्डस्य पते! नाथ! नमामि जगतां पतिम्। गतिं कीर्त्तिमतां नृणां भुक्तिमुक्तिप्रदायकम्। विष्वक्सेनोऽब्रवीत् विष्णुं देव! त्वां स्तौति पद्मजः। हरिराहानयस्व त्वं विष्णूक्तः स तमानयत्। अजमूचे हरिः कस्मादागतोऽसि वदस्व तत्। ब्रह्मोवाच। देवदेव! कृते यागे प्रचचाल गयासुरः। शिलायां देवरूपिण्यां न्यस्तायां तस्य मस्तके। रुद्रादिषु च देवेषु संस्थितेष्वसुरोऽचलत्। इदानीं निश्चलार्थं हि प्रसादं कुरु माधव!। ब्रह्मणो वचनं श्रुत्वा ह्याकृष्य स्वशरीरतः। मूर्त्तिं ददौ निश्चलार्थं ब्रह्मणे भगवान् हरिः। आनीय मूर्त्तिं ब्रह्मापि शिलायां समधारयत्। तथापि चलितं वीक्ष्य पुनर्द्देवमथागमत्। आगत्य विष्णुः क्षीराब्धेः शिलायां संस्थितोऽभवत्। जनार्द्दनाभिधानेन पुण्डरीकेति नामतः।

शिलायां निश्चलार्थं हि स्वयमादिगदाधरः । निश्चलार्थं पञ्चधासीत् शिलायां प्रपितामहः । पितामहोऽथ फल्ग्वीशः केदारः कनकेश्वरः । ब्रह्मा स्थितः स्वयं तत्र गजरूपी विनायकः । गयादित्यश्चोत्तरार्कौ दक्षिणार्कस्त्रिधा रविः । लक्ष्मीः सीताभिधानेन, गौरी वै मङ्गलाह्वया । गायत्री चैव सावित्री त्रिसन्ध्येयं सरस्वती । इन्द्रो बृहस्पतिः पूषा वसवोऽष्टौ महाबलाः । विश्वे देवाश्चाश्विनेयौ मरुतो विश्वनायकाः । यक्षोरगगन्धर्व्वास्तस्थुर्द्देवाः स्वशक्तिभिः । आदितो गदया चासौ यस्माद्दैत्यः स्थिरीकृतः । स्थित इत्येव हरिणा तस्मादादिगदाधरः । ऊचे गयासुरो देवान् किमर्थं वञ्चितोह्यहम् । यज्ञार्थं ब्रह्मणे दत्तं शरीरममलं मया । विष्णोर्व्वचनमात्रेण किं न स्यां निश्चलोह्यहम् । यत्सुरैः पीड़ितोऽत्यर्थं गदया हरिणा तथा । पीड़ितो यद्यहं देवाः प्रसन्नाः सन्तु सर्व्वदा । गदाधरादयस्तुष्टाः प्रोचुर्द्दैत्यं गयासुरम् । वरं ब्रूहि प्रसन्नाः स्मो देवानूचे गयासुरः । यावत् पृथ्वी पर्व्वताश्च यावच्चन्द्रार्कतारकाः । तावच्छिलायां तिष्ठन्तु ब्रह्मविष्णुमहेश्वराः । अन्याश्च सकला देवा मन्नाम्ना क्षेत्रमस्तु वै । पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः । तन्मध्ये सर्व्वतीर्थानि प्रयच्छन्तु हितं नृणाम् । स्नानादितर्पणं कृत्वा पिण्डदानात् फलादिकम् । महात्मनि सहस्रञ्च कुलानाञ्चोद्धरेन्नरः । व्यक्ताव्यक्तस्वरूपेण यूयं तिष्ठन्तु सर्व्वदा । गदाधराद्यस्य लोकात् भूयात् सर्व्वाघनाशनात् । श्राद्धं सपिण्डकं येषां ब्रह्मलोकं प्रयान्तु ते । ब्रह्महत्यादिकं पापं विनश्यतु च सेविनाम् । नैमिषं पुष्करं गङ्गा प्रयागं चाविमुक्तकम् । एतान्यन्यानि तीर्थानि दिवि भुव्यन्तरीक्षतः । समायान्तु सदा नृणां प्रयच्छन्तु हितं सुराः! । ते देवास्तानि तीर्थानि प्रयच्छन्तु हितं नृणाम् । पितॄणां ब्रह्मलोकञ्च भुक्तिमुक्तिफलं तथा । एको विष्णुस्त्रिधामूर्त्तिर्यात्रव् संकीर्त्त्यते बुधैः । तावद्गयासुरक्षेत्रं ख्यातिमेतु सदा भुवि । ब्रह्महत्यादिकं पापं विनाशयतु सेविनाम् । किं बहूक्त्या सुरेशाना ! युष्मास्वेकापि देवता । चेन्न तिष्ठेदहं चापि, समयः प्रतिपाल्यताम् । गयासुरवचः श्रुत्वा प्रोचुर्व्विष्ण्वादयः सुराः । त्वया यत् प्रार्थितं सर्व्वं तद्भविष्यत्यसंशयम् । पितॄणां वै कुलशतमात्मानं पिण्डदानतः । श्राद्धादिना नयिष्यन्ति ब्रह्मलोकमनामयम् । अस्मत्पादानर्च्चयित्वा यास्यन्ति परमां गतिम् । सनत्कुमार उवाच । देवैर्द्दत्तवरो दैत्यो हर्षितो निश्चलोऽभवत् ।” ४अङ्गिरसे मुनिभेदे गर्गशब्दे दृश्यम् अस्य दृषा०आद्युदात्तता ।

गयस्फान पु० स्फायी—वृद्धौ अन्तर्भूतण्यर्थात् ल्युट् नि० यलोपः गयस्य धनस्य स्फानः । धनवर्द्धके । “गयस्फानो अमीवहा वसुवित् पुष्टिवर्द्धनः” ऋ० १। ९१।१२ । “गयस्फानः धनस्य वर्द्धयिता” भा० । “एधि गयस्फानो गोभिरश्वेभिरिन्द्र !” ऋ० ७।५४।२ ।

गया स्त्री गयो गयासुरः गयनृपो वा कारणत्वेनास्त्यस्य अच् । तीर्थभेदे गयशब्दे तत्कथा उक्ता ।

वायुपु० गयामा० १अ० तन्माहात्म्यं यथा

“वक्ष्ये तीर्थवरं पुण्यं श्राद्धादौ सर्व्वतारकम् । गयातीर्थं सर्व्वदेशे तीर्थेभ्योऽप्यधिकं शृणु । गयासुरस्तपस्तेपे ब्रह्मणा क्रतवेऽर्थितः । प्राप्तस्य तस्य शिरसि शिलां धर्म्मोह्यधारयत् । तत्र ब्रह्माकरोद्यागं स्थितश्चादिगदाधरः । फल्गुतीर्थादिरूपेण निश्चलार्थमहर्निशम् । गयासुरस्य विप्रेन्द्र ! ब्रह्माद्यैर्द्दैवतैः सह । कृतयज्ञो ददौ ब्रह्मा ब्राह्मणेभ्यो गृहादिकम् । श्वेतकल्पे तु वाराहे गयोयागमकारयत् । गयनाम्ना गयाख्यातं क्षेत्रं ब्रह्माभिकाङ्क्षितम् । काङ्क्षन्ति पितरः पुत्रान्नरकाद्भयभीरवः । गयां यास्यति यः पुत्रः स नस्त्राता भविष्यति । गयाप्राप्तं सुतं दृष्ट्वा पितॄणामुत्सवो भवेत् । पद्भ्यामपि जलं स्पृष्ट्वा सोऽस्मभ्यं किं न दास्यति ? । गयां गत्वान्नदाता यः पितरस्तेन पुत्रिणः । पक्षत्रय निवासी च पुनात्यासप्तमं कुलम् । न चेत् पञ्चदशाहं वा सप्तरात्रं त्रिरात्रकम् ।’ महाकल्पकृतं पापं गयां प्राप्य विनश्यति । पिण्डं दत्त्वा च पित्रादेरात्मनोऽपि तिलैर्विना । ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः । पापं तत्सङ्गजं सर्व्वं गयाश्राद्धाद्विनश्यति । आत्मजोऽप्यन्यजोवापि गयाभूमौ यदा तदा । यन्नाम्ना पातयेत् पिण्डं तन्नयेत् ब्रह्म शाश्वतम् । नामगोत्रे समुच्चार्य्य पिण्डपातनमीष्यते । येन केनापि कस्मैचित् स याति परमां गतिम् । ब्रह्मज्ञानं गयाश्राद्धं गोगृहे मरणं तथा । वासः पुंसां कुरुक्षेत्रे मुक्तिरेषा चतुर्व्विधा । ब्रह्मज्ञानेन किं साध्यं गोगृहे मरणेन किम् । वासेन किं कुरुक्षेत्रे यदि पुत्रोगयां व्रजेत् । गयायां पर्व्वकालेषु पिण्डं दद्याद्विचक्षणः । अधिमासे जन्मदिने चास्तेऽपि गुरुशुक्रयोः । न त्यक्तव्यं गयाश्राद्धं

सिंहस्थेऽपि वृहस्पतौ । तथा दैवप्रमादेन प्रयच्छन्त्र व्रणेषु च । पुत्रः कर्म्माधिकारी च श्राद्धकृत् स्वर्लोकभाक् । प्रीत्या श्राद्धन्तु कर्त्तव्यं सर्व्वेषां वर्णलिङ्गिनाम् । एवं कुर्व्वन् नरः सम्यक् महतीं श्रियमाप्नुयात् । सकृद् गयाभिगमनं सकृत्पिण्डस्य पातनम् । दुर्लभं किं पुनर्नित्यमस्मिन्नेव व्यवस्थितः । प्रमादान्म्रियते क्षेत्रे ब्रह्माद्यैर्मुक्तिदायके । ब्रह्मज्ञानाद्यथा मुक्तिर्लभ्यते नात्र संशयः । कीकटादिमृतानाञ्च पितृणां तारणाय च । तस्मात् सर्व्वयत्नेन वस्तव्यं सुविचक्षणैः । ब्रह्मप्रकल्पितान् विप्रान् हव्यकव्यादिनार्च्चयेत् । तैस्तुष्टैस्तोषिताः सर्व्वाः पितृभिः सह देवताः । मुण्डनञ्चोपवासश्च सर्व्वतीर्थेष्वयं विधिः । वर्ज्जयित्वा कुरुक्षेत्रं विशालां विरजां गयाम् । दण्डं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिण्डदः । दण्डं न्यस्य विष्णुपदे पितृभिः सह मुच्यते । न दण्डी किल्विषं धत्ते पुण्यं वा परमार्थतः । अतः सर्व्वक्रियां त्यक्त्वा विष्णुं ध्यायति भावुकः । संन्यसेत् सर्व्वकर्म्माणि वेदमेकं न संत्यजेत् । मुण्डपृष्ठाच्च पूर्व्वस्मिन् पश्चिमे दक्षिणोत्तरे । सार्द्धं क्रोशद्वयं मानं गयेति ब्रह्मणेरितम् । पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः । तन्मध्ये सर्व्वतीर्थानि त्रैलोक्ये यानि सन्ति वै । श्राद्धकृद् यो गयाक्षेत्रे पितृणामनृणो हि सः । शिरसि श्राद्धकृद् यस्तु कुलानां शतमुद्धरेत् । गृहाच्चलितमात्रेण गयायां गमनं प्रति । स्वर्गारोहणसोपानं पितृणाञ्च पदे पदे । पदेपदेऽश्वमेधस्य यत्फलं गच्छतो गयाम् । तत्फलञ्च भवेन्नृणां समग्रं नात्र संशयः । पायसेनाथ चरुणा सक्तुना पिष्टकेन वा । तण्डुलैः फलमूलाद्यैर्गयायां पिण्डपातनम् । तिलाज्यदधिमध्वादिपिण्डद्रव्येषु योजयेत् । मुष्टिमात्रप्रमाणेन आर्द्रामलकमात्रतः । शमीपत्रप्रमाणेन पिण्डं दद्याद्गयाशिरे । उद्धरेत् सप्त गोत्राणि कुलमेकोत्तरं शतम् । तिलकल्केन खण्डेन गुडेन सघृतेन वा । केवलेनैव दध्ना वा दुग्धेन मधुनाथ वा । पिण्याकं सघृतं खण्डं पितृभ्योऽक्षयमित्युत । इष्यतेऽवाप्तितो भोज्यं हविष्यं मनुरब्रवीत् । एकतः सर्व्ववस्तूनि रसवन्ति मधूनि हि । स्मृत्वा गदाधराङ्घ्रिञ्च फल्गुतीर्थाम्बु चैकतः । पिण्डासनं पिण्डदानं पुनः प्रत्यवनेजनम् । दक्षिणा चान्नसंकल्पस्तीर्थश्राद्धेष्वयं विधिः । नावाहनं न दिग्बन्धो न दोषो दृष्टिसम्भवः । सकारुण्येन कर्त्तव्यं तीर्थश्राद्धं विचक्षणैः । अन्यत्रावाहिताः काले पितरो यान्त्यमुं प्रति । तीर्थे सदा वसन्त्येते तस्मादावाहनं न हि । तीर्थश्राद्धं प्रयच्छद्भिः पुरुषैः फलकाङ्क्षिभिः । कामं क्रोधं तथा लोभं त्यक्त्वा कार्य्या क्रिया ऽनिशम् । ब्रह्मचार्य्येकभोजी च भूशायी सत्यवाक् शुचिः । सर्व्वभूतहिते रक्तः स तीर्थफलमश्नुते । तीर्थान्यनुसरन् धीरः पाषण्डं दूरतस्त्यजेत् । पाषण्डं तच्च विज्ञेयं यद्भवेत् कामकारतः । तीर्थेषु ये नरा धीराः कर्म्म कुर्व्वन्ति सङ्गताः । यथा ब्रह्मविदो वेद्यं वस्तुध्यानमयचेतसः । प्रविशन्ति परेशाख्यं ब्रह्म ब्रह्मपरायणाः । याऽसौ वैतरणी नाम नदी त्रैलोक्यविश्रुता । सावतीर्णा गयाक्षेत्रे पितृणां तारणाय वै । स्नातो गोदो वैतरण्यां त्रिःसप्त कुलमुद्धरेत् । तथाक्षयवटं गत्वा विप्रान् सन्तोषयिष्यति । ब्रह्मप्रकल्पितान् विप्रान् हव्यकव्यादिनार्च्चयेत् । तैस्तुष्टैस्तोषिताः सर्व्वाः पितृभिः सह देवताः । गयायां नहि तत्स्थानं यत्र तीर्थं न विद्यते । सान्निध्यं सर्व्वतीर्थानां गयातीर्थं ततो वरम् । मीनमेषे स्थिते सूर्य्ये कन्यायां कार्म्मुके घटे । दुर्लभं त्रिषु लोकेषु गयायां पिण्डपातनम् । मकरे वर्त्तमानेऽर्के ग्रहणे चन्द्रसूर्य्ययोः । दुर्लभं त्रिषु लोकेषु गयाश्राद्धं सुदुर्लभम् । गयायां पिण्डदानेन यत् फलं लभते नरः । न तच्छक्यं मया वक्तुं कल्पकोटिशतैरपि" ।

तद्यात्राविधिश्च तत्रैव ६ अ०। "सनत्कुमार उवाच । गयायात्रां प्रवक्ष्यामि शृणु नारद ! मुक्तिदाम् । निष्कृतिः पिण्डकर्त्तॄणां ब्रह्मणा गीयते पुरा । उद्यतश्चेद्गयां गन्तुं श्राद्धं कृत्वा विधानतः । विधाय कर्पटिवेशं कृत्वा ग्रामं प्रदक्षिणम् । ततो ग्रामान्तरं गत्वा श्राद्धशेषस्य भोजनम् । ततः प्रतिदिनं गच्छेत् प्रतिग्रहविवर्ज्जितः । प्रतिग्रहाद्युपावृत्तः सन्तुष्टो नियतः शुचिः । अहङ्कारविमुक्तो यः स तीर्थफलमश्नुते । यस्य हस्तौ च पादौ च मनश्चापि सुसंयतः । विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते । ततो गयाप्रवेशे च पूर्व्वतोऽस्ति महानदी । तत्र तोयं समुत्पाद्य स्नातव्यं निर्म्मले जले । देवादींस्तर्पयित्वाथ श्राद्धं कृत्वा यथाविधि । स्ववेदशाखोदितमर्घ्यावाहनवर्जितम् । अपरेद्युः शुचिर्भूत्वा गच्छेद्वै प्रेतपर्व्वतम् । ब्रह्मकुण्डे ततः स्नात्वा देवादींस्तर्पयेत् सुधीः । कुर्य्यात् श्राद्धं

सपिण्डानां प्रयतः प्रेतपर्व्वते। प्राचीनावीतिनाभ्यर्च्य दक्षिणाभिमुखः स्मरन्। "कव्यवालोनलः सोमो यमश्चैवार्य्यमा तथा। अग्निष्वात्ता बर्हिषदः सोमपाः पितृदेवताः। आगच्छन्तु महाभागा युष्माभी रक्षितास्त्विह"। "मदीयाः पितृवंशे च कुलेजाताः कुलाह्वयाः। तेषां पिण्डप्रदानार्थमागतोऽस्मि गयामिमाम्। ते सर्वे तृप्तिमायान्तु श्राद्धेनानेन शाश्वतीम्"। आचम्योक्ता च पञ्चाङ्गं प्राणायामं प्रयत्नतः। पुनराहचिरहितः ब्रह्मलोकाप्तिहेतवे। एवञ्च विधिवत् श्राद्धं कृत्वा पूर्वं यथाक्रमम्। पितृनावाह्य चाभ्यर्च्य मन्त्रैः पिण्डप्रदो भवेत्। तीर्थे प्रेतशिलादौ च चरुणा सहतेन वा। प्रक्षाल्य पूर्वं तत्स्थानं पञ्चगव्यैः पृथक् पृथक्। मन्त्रैः सौरैश्च संपूज्य पञ्चगव्यैश्च देवताम्। यावत्तिला मनुष्यैश्च गृहीताः पितृकर्म्मसु। गच्छन्ति तावदसुराः सिंहत्रस्ता यथा मृगाः। अष्टकासु च वृद्धौ च गयायां च क्षयेऽहनि। मातुः श्राद्धं पृथक् कुर्य्यादन्यत्र पतिना सह। वृद्धिश्राद्धे तु मात्रादि गयायां पितृपूर्वकम्। गृहीत्वाञ्जलिना तेभ्यः पितृतीर्थेन तत्त्वतः। सक्तुना मुष्टिमात्रेण दद्यादक्षय्यपिण्डकम्। आब्रह्मस्तम्बपर्य्यन्तं देवर्षिपितृमानवाः। तृप्यन्तु पितरः सर्वे मातृमातामहादयः। अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्। आ ब्रह्मभुवनात् लोकादिदमस्तु तिलोदकम्। पिता पितामहश्चैव तथैव प्रपितामहः। माता पितामही चैव तथैव प्रपितामही। मातामहस्तत्पिता च प्रमातामहकादयः। तेषां पिण्डो मया दत्तो ह्यक्षय्यमुपतिष्ठताम्। मुष्टिमात्रप्रमाणञ्च आर्द्रामलकमात्रकम्। शमीपत्रप्रमाणं वा पिण्डं दद्याद्गयाशिरे। उद्धरेत् सप्तगोत्राणां कुलानि शतमुद्धरेत्। पितुर्मातुश्च भार्य्याया भगिन्या दुहितुस्तथा। पितृष्वसुर्मातृष्वसुः सप्त गोत्राः प्रकीर्त्तिताः। त्रिंशतिर्विंशतिरिन्द्राः१४ षोडश द्वादशैव हि। रुद्राश्च११ वसवश्चैव कुलान्येकोत्तरं शतम्। नावाहनं न दिग्बन्धो न दोषो दृष्टिसम्भवः। सकारुण्येन कर्त्तव्यं तीर्थश्राद्धं विचक्षणैः। पिण्डासनं पिण्डदानं पुनः प्रत्यवनेजनम्। दक्षिणा चान्नसंकल्पस्तीर्थश्राद्धेष्वयं विधिः"।

अधिकं मदीयगयाश्राद्धादिपद्धतौ दृश्यम्। गयाश्राद्धस्य फलादेराधारादिकं गयाश्राद्धादिपद्धतौ अस्माभिर्न्यरूपि तथा "गयाश्राद्धफलं किंनिष्ठमिति विविच्यते। "यन्नाम्ना पातयेत् पिण्डम्" इत्यादिवचनजातात् पुत्त्रादिकृतश्राद्धात् तदुद्देश्यपित्रादिगतं नरकनिवृत्तिब्रह्मलोकावाप्त्यादिफलमवगम्यते तच्च नोपपद्यते। तथा हि सर्व्वो हि लोकः स्वेष्टसाधने कर्म्मणि प्रवर्त्तते तत्प्रवृत्त्या च तत्तदिष्टसाधनं वस्तु साधयति इत्येवं नियमे स्थिते वैदिककर्म्मण्यपि तथैव स्वाभीष्टफलवत्येव प्रवृत्तिरुचिता नान्यगामिफले। एवं शास्त्रदेशितं फलमनुष्ठातर्य्येव कर्म्मभिर्ज्जन्यते "शास्त्रीयं फलं प्रयोक्तरि तल्लक्षणत्वादिति" जैमिनीयन्यायात्। अन्यकर्त्तृकक्रिययाऽन्यदीयफलस्य जननेऽतिप्रसङ्गः स्यात्। ततश्च पुत्त्रादिकृतश्राद्धात् कथं पित्रादेरुद्धारादिसम्भवः तस्य श्राद्धाद्यकर्त्तृत्वात् इत्येवं प्राप्ते उच्यते "यस्मिन् जाते एतामिष्टिं निर्वपति पूत एव सः" इत्यादिवेदवचनात् जैमिनीयन्यायस्य जातेष्ट्यादिभिन्नविषयत्वं कल्प्यते। तथा च पित्रादिकृतजातेष्ट्यादिद्वारा अन्नप्राशनादिसंस्कारद्वारा च यथा तत्राऽकर्त्तर्य्यपि पुत्त्रे फलमुत्पद्यते एवं गयादिश्राद्धकर्त्तुरुद्देश्यस्याकर्त्तुरपि उद्धारादिफलसम्बन्धः नानापुराणवचनबलादपि सम्भवति "फलसंयोगस्त्वचोदिते न स्यादशेषभूतत्वादिति" जैमिनीयन्यायान्तरेण विधिविशेषेणैव फलविशेषसम्बन्ध इत्युक्तत्वात्। तथा च प्रागुक्तातिप्रसङ्गस्य शास्त्रातिरिक्तविषयत्वमिति कल्प्यते "नास्ति वचनस्यातिभारः" इति न्यायात् "वाचनिकोऽर्थे न्यायानवतारात्" इति न्यायाच्च। तत्र वचनाच्चोभयगतफलसाधनताऽवगता जातेष्ट्यादिवत्। तच्च फलं पुण्यविशेषस्तज्जन्यनरकाद्युद्धारो वेत्यन्यदेतत्। मीमांसादावेवैतद्विवेचितमित्युपरम्यते। काश्यादिमृतपितृकगयाश्राद्धस्य तु कर्त्तव्यत्वेऽकरणनिबन्धनप्रत्यवायपरिहारमात्रं, सति कामे विशिष्टसन्तानस्य फलम् "गयायां पिण्डदानेन पितृणामनृणो भवेत्" इत्यादिवचने पितृणापाकरणस्यावश्यकतया तदकरणे प्रत्यवायबोधनात् "गयाभिगमनं कर्त्तुं यः शक्तो नाभिगच्छति। शोचन्ति पितरस्तस्य वृथा तस्य परिश्रमः" इति कूर्मपुराणीयेन समर्थस्य गयाश्राद्धाऽकरणे वृथाजन्मतोक्तेः "जीवतोर्वाक्यकरणात् प्रत्यब्दं भूरिभोजनात्। गयायां पिण्डदानाच्च त्रिभिः पुत्त्रस्य पुत्त्रता" इत्यादिवचने गयाश्राद्धादिकरणेनैव पुत्त्रकार्य्यकारितया पुत्त्रत्वसिद्ध्युक्तेश्च। तेन गयाश्राद्धं नित्यमत एव यथाशक्ति चानुष्ठेयं "नित्ये यथा शक्त्यादिति" न्यायात्। तथापि सकृत्करणमेव

नित्यं तावतैव शास्त्रार्थसिद्धेः "सकृत्कृते कृतः शास्त्रार्थ इति" न्यायात् आवृत्तिबोधकशब्दाद्यभावाच्च जन्मतिथ्यादिकं यवन्न पुनःपुनः करणावश्यकता । पुनःकरणे तु फलाधिक्यम् "यो भूय आरभते तस्य फले विशेषः" इति न्यायात् "सकृद्गयाभिगमनं सकृत्पिण्डप्रपातनम्" इत्यादिवाक्यमप्याद्यस्यैवावश्यकत्वार्थं न तु द्वितीयादेर्निरासार्थमपि, परिसंख्यापत्तेः । तत्रापि प्रथमयात्रायां येषां प्रेतत्वनिवारणार्थं प्रेतशिलायां पिण्डदानभाण्डस्फोटने कृते तत्र द्वितीययात्रायां तेषां ते न कार्य्या इत्येव विशेषः । प्रथमयात्रानन्तरमृतानान्तु द्वितीययात्रायां ते अपि कार्य्याः । अन्यत् सर्व्वं सर्व्वास्वपि यात्रासु समानम् । तस्मादमुक्ते पित्रादौ नरकोद्धारादि यथायथं फलं मुक्ते तु तस्मिन् पुत्त्रादेः प्रत्यवायाभावः सत्वाञ्च कामनायां विशिष्टसन्तानादि पुत्त्रादिगतं फलं भवतीति सिद्धम् । अत्रेदं विविच्यते प्रागुक्तपुराणादिवचनेषु गयाश्राद्धस्य पित्राद्युद्धारः प्रत्यवायपरिहारः पुत्त्रावाप्तिश्च फलत्वेन श्रूयते तत्र गयाश्राद्धप्रवृत्तौ किं प्रयोजकं किमेकैकमुभयं वा त्रितयं वेति सन्देहे त्रितयस्यैव प्रयोजकता तत्र कामनाभेदादेकस्य मुख्यफलताऽपरयोर्द्वारता प्रासङ्गिकता वा तथा च यदा पित्राद्युद्धारार्थिना गयाश्राद्धं क्रियते तदा तदेव मुख्यं फलं तत्प्रवृत्तौ प्रयोजकं, प्रत्यवायपरिहारः पुत्त्रोत्पत्तिश्च तत्र प्रासङ्गिकौ अन्यार्थदीपस्यानुद्देश्यप्रकाशनवत् । यदा तु पुत्रार्थिना तदनुष्ठीयते तदा पुत्त्रोत्पत्तिरेव मुख्यं फलं पित्राद्युद्धारस्तु तत्र द्वारमित्येव सिद्धान्तः । एवं पित्राद्युद्धारस्य फलत्वे स्थितेऽधुना तत्रेदं विचार्य्यते । उद्धारो नाम स्वापेक्षयोत्कृष्टस्थानादिनयनं तच्च प्रकृते नारकीयदेहविगमानन्तरं देवादिदेहप्रापणरूपं तच्च न सम्भवति नारकीयादिदेहादेः स्वस्वकर्म्मारब्धतया कारणसत्त्वे विगमासम्भवात् तत्कर्म्मणां च भोगेनैव नाश्यत्वात् "नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपीति" आगमात् । ततश्च तद्देहनाशः स्वारम्भककर्म्मनाश एव नान्यथा । तथा च गयाश्राद्धादिना कथमुद्धारसम्भवः । प्रारब्धकर्म्मणाञ्च भोगादेव क्षये सति गयाश्राद्धेनोद्धारो जननीय इति कल्पनापि न युक्ता भोगादेव कर्म्मक्षये कल्प्ये गयाश्राद्धवैफल्यापत्तेः । इत्येवं स्थिते उच्यते कर्म्मविपाकोक्तदानादिना प्रारब्धकर्म्मक्षयद्वारा यथा रोगनाशकल्पना तथा प्रकृतेऽपि गयाश्राद्धादिना प्रारब्धक्षयनाशद्वारैव उद्धारकल्पना "नाभुक्तं क्षीयते" इत्यादिवाक्यस्य तु बलवद्वाक्यस्यैव प्रतिबन्धकस्य सत्त्वे नाप्रवृत्तेः "न हि वचनस्यातिभारः इति" न्यायात् तथा च गयाश्राद्धस्यैव प्रारब्धक्षयजनकपुण्यविशेषजनकता कर्म्मविपाकोक्तदानादिवदेव कल्प्यते इति न कश्चिद्विरोधः । किञ्च भोगादेव प्रारब्धकर्म्मक्षयादनन्तरमुद्धारकल्पनेऽपि न गयाश्राद्धवैफल्यं पापविशेषैरेकैकयोनिष्वनेकावृत्तिश्रवणात् फलोन्मुखानामितरेषामनारब्धफलानां कर्म्मणाञ्च गयाश्राद्धनाश्यता भविष्यतीति । असति च नारकीयाद्यारम्भके पापे उद्धारस्य ब्रह्मलोकावाप्तिरूपतैव । स्वकर्म्मानुसारेण तल्लोकप्राप्तेरपि पूर्व्वं वृत्तत्वे तु पुत्त्रनिष्ठः प्रत्यवायपरिहार एव फलं मुक्तपित्रादौ तथाकल्पनस्य पूर्व्वमुक्तत्वात् तथैवात्र कल्पनौचित्यात् ।

अथ गयाश्राद्धाधिकारिणः । तत्र पुत्त्रपौत्त्रप्रपौत्त्रा एव प्रधानाधिकारिणः । तद्भिन्नाः सर्वेऽपि गौणाधिकारिणः । तथा "पुत्त्रेषु विद्यमानेषु नान्यो वै कारयेत् स्वधाम्" इत्यादिवचनेन पुत्रसत्त्वेऽन्यकर्त्तृकश्राद्धस्य निषेधेऽपि गयायां तस्य प्रतिप्रसवः, "आत्मजो वाऽन्यजो वापि गयाकूपे यदा तदा । यन्नाम्ना पातयेत् पिण्डं तं नयेद्ब्रह्म शाश्वतम्" इति वायवीयवचनात् "सवर्णा ज्ञातयो मित्रबान्धवाः सुहृदस्तथा । तेऽपि भूयो गयां गत्वा पिण्डं दद्युर्विधानतः" इति स्मृतिरत्नावलीधृतवाक्याच्च । तथा चात्र सम्बन्धिमात्राणामधिकारः । यो यदीयधनं यया कथञ्चिद्गृह्णाति सोऽसवर्णोऽपि तदीयगयाश्राद्धेऽधिकारी, "प्रेत किञ्चिद्विशुद्ध्यर्थम्" इत्यादि वायवीयवचनेऽसवर्णवणिग्दत्तपिण्डेन प्रेतोद्धारस्य कीर्त्तनात् पुत्रो वा बन्धुपुत्त्रो वा मित्रं वा स्वजनोऽपि वा । ऋणिको वाथवा दद्याद् द्वयोः स्वर्गस्तदा तयोरिति" वह्निपुराणीयाच्च । तथान्यत्र कर्त्तृविशेषविषयनिषेधोऽपि गयायां न प्रवर्त्तते "न पुत्त्रेभ्यः पिता दद्यान्नानुजेभ्यस्तदाग्रजः । न पत्न्यै तु पतिर्द्द्यात् बुद्धिमान् सुसमाहितः" इति च सामान्यतो निषिध्य "तेऽपि यान्ति दिवं सर्वे पिण्डे दत्ते इति स्मृतिः । अतस्तेभ्योऽत्र यत्नेन पिण्डं दद्यात् समाहितः" इति स्मृतिरत्नावल्यां गयायां प्रतिप्रसवात् बौधायनेनापि "पित्रा श्राद्धं न कर्त्तव्यं पुत्त्राणान्तु कदाचन । भ्रात्राग्रजेन वा कार्य्यं भ्रातृणां न कनीयसाम् । अतिस्नेहेन कार्य्यं वा सपिण्डीकरणं विना । गयायामविशेषेण ज्यायानपि समा-

चरेदिति सामान्यतो निषिध्य गयायां प्रतिप्रसवाच्च । पूर्व्ववचने अत्रेति गयायामित्यर्थः ।

अथ गयाश्राद्धानधिकारिणः । जीवत्पितृको जीवन्मातृकश्च गयाश्राद्धे सर्व्वथानधिकारी । जीवत्पितृको मृतमातृकस्तु यदि प्रसङ्गेन गयां प्राप्नोति तदा अन्वष्टकाश्राद्धमिव मातृपार्व्वणमेव कुर्य्यात् "आन्वष्टक्यं गयाप्राप्तौ सत्यां यच्च क्षयाहनि । मातुः श्राद्धं सुतः कुर्य्यात् पितर्य्यपि च जीवति" इति मैत्रायणीयपरिशिष्टवाक्यात् । अत्र प्राप्तावित्युक्त्या प्रासङ्गिकगमनं सूचितम् "गयां प्रसङ्गतो गत्वा मातृश्राद्धं समाचरेदिति त्रिस्थलीसेतुधृतवचने प्रसङ्गत इति पदस्य स्पष्टोपादानस्वरसात् । तेन जीवत्पितृकस्य गयामुद्दिश्य गमने न मातृश्राद्धकरणम् । मातृश्राद्धस्यान्वष्टकाश्राद्धसाहचर्य्यात् पार्व्वणमेव कार्य्यमिति त्रिस्थलीसेतुप्रभृतयः । अन्ये तु जीवन्मातृको मृतमातृको वा जीवत्पितृकोऽपि पार्व्वणविधिना पितामहादीनां गयाश्राद्धं कुर्य्यात् "जीवे पितरि वै पुत्त्रः श्राद्धकार्य्यं विवर्ज्जयेत् । येषां वापि पिता दद्यात्तेषामेके प्रचक्षते" इति हारीतवचनोत्तरार्द्धेन जीवत्पितृकपार्व्वणस्य विधानेन गयायामपि तत्प्रवृत्तेरित्याहुः । आचार एवात्रान्यतरपक्षग्रहणे शरणम् ।

संन्यासिनस्तु सर्व्वकर्म्मपरित्यागितया गयाश्राद्धेऽनधिकारिणः । तथापि तत्र विष्णुपदादिश्राद्धस्थानेषु दण्डमात्रस्पर्शनं प्रणवोपासनादिवत् तैराचरणीयं न तु श्राद्धतर्पणादि "दण्डं प्रदर्शयेद्भिक्षुर्गयां गत्वा न पिण्डदः । दण्डं स्पृष्ट्वा विष्णुपदे पितृभिः सह मुच्यते" इति वायवीयात् स्पृष्ट्वा स्पर्शयित्वेत्यर्थः । पुत्त्रवत्याः स्त्रिया नाधिकार इति गौडैकदेशिनामाचारः स तु मूलाभावान्नादरणीयः ।

अथ गयाश्राद्धकालः । न तत्र कालशुद्ध्यपेक्षा "गयायां सर्व्वकालेषु पिण्डं दद्यात् विचक्षणः । अधिमासे जन्मदिने अस्ते च गुरुशुक्रयोः । न त्यक्तव्यं गयाश्राद्धं सिंहस्थे च बृहस्पताविति" वायवीयात् । अत्र सर्व्वकालेष्वित्युपक्रमात् अस्ते इत्याद्युक्तिस्तु सर्व्वसमयाशुद्धिप्रयोजकनिमित्तमात्रोपलक्षणार्था न तु रात्र्यादिपर्य्युदस्तकालग्रहणार्थेति बोध्यं सर्व्वत्र तीर्थादौ रात्र्यादिकालस्य पर्य्युदस्ततया रघुनन्दनादिभिः स्वीकारात् । संक्रान्त्यादौ तु फलातिशयः "गयाश्राद्धं प्रकुर्व्वीत संक्रान्त्यादौ विशेषतः । काले वाऽपरपक्षे वा चतुर्थ्यादितिथिष्वपीति" वह्निपुराणीयात् "मकरे वर्त्तमानेऽर्के ग्रहणे चन्द्रसूर्य्ययोः । दुर्लभं त्रिषु लोकेषु गयायां पिण्डपातनमिति" वायुपुराणवाक्याच्च । तथान्येऽपि निषिद्धकाला गयायां प्रतिप्रसूताः । यथा "विवाहव्रतचूडासु वर्षमर्द्धं तदर्द्धकम् । पिण्डदानं मृदा स्नानं न कुर्य्यात्तिलतर्पणमिति" कार्ष्णाजिनिवचनेन, "वृद्धिमात्रे तथान्यत्र पिण्डदाननिराक्रिया । कृता गर्गादिभिर्मुख्यैर्म्मासमेकन्तु कर्म्मिणामिति" स्मृतिसंग्रहवाक्येन च विवाहादेरूर्द्ध्वं वर्षादिकालपर्य्यन्तं पिण्डदानस्य निषेधेऽपि "महालये गयाश्राद्धे मातापित्रोर्मृताहनि । कृतोद्वाहोऽपि कुर्व्वीत पिण्डनिर्व्वपणं सुतः" इति, "पित्रोः क्षयाहे यज्ञे च पितृयज्ञे महालये । गयायां पिण्डदानस्य न कदाचिन्निराक्रियेति" च त्रिस्थलीसेतुधृतस्मृतिसंग्रहवाक्याच्च तत्प्रतिप्रसवः । तथा तत्र तिलतर्पणनिषेधाभावोऽपि "उपरागे व्यतीपाते गयायामथ पर्व्वणि । आदित्यादिनिषेधेऽपि कर्त्तव्यं तिलतर्पणमिति" स्मृतिदर्पणधृतसंग्रहवाक्यात् ।

अथ गयाश्राद्धे निषिद्धकालः । "तीर्थश्राद्धं गयाश्राद्धं श्राद्धमन्यच्च पैतृकम् । अब्दमध्ये न कुर्व्वीत महागुरुनिपातने" इति गारुडात् प्रमीतमहागुरुकस्य वर्षमात्रं गयाश्राद्धं निषिद्धम् । तत्रायं विशेषः वृद्ध्यादिनिमित्तकसपिण्डीकरणे तु कर्त्तुं शक्यत एव "अस्थिक्षेपं गयाश्राद्धं श्राद्धञ्चापरपक्षिकम् । अब्दमध्ये न कुर्व्वीत सपिण्डीकरणं विना" इति गारुडवाक्यान्तरात् । अत्राप्यपरोविशेषः यदि पितृभक्तिमान् तदाब्दमध्येऽपि गयाश्राद्धं कर्त्तुं शक्नोति "अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपक्षिकम् । प्रथमाब्देऽपि कुर्व्वीत यदि स्याद्भक्तिमान् सुतः" इति त्रिस्थलीसेतुधृतवचनात् । अत्र भक्तिः प्रीतिरिति बहवः । अन्ये तु अब्दमध्ये प्रेतस्य देवतात्वयोग्यतासिद्धये देवतासंस्कारकमेकं पार्व्वणं कर्त्तव्यं तदेव भक्तिपदाभिधेयं तच्च कृत्वा गयाश्राद्धं कुर्य्यादित्याहुः । भक्त्या वर्षमध्ये गयाश्राद्धकरणे तु वृद्धाविव मासिकादीन्यपकृष्य कार्य्याणीति बोध्यम् । अत्रेयं सम्प्रदायानुसारिणी व्यवस्था अकृतसपिण्डनस्य प्रथमाब्दे गयाश्राद्धं नैव कार्य्यं कृतसपिण्डनस्यापि सति सम्भवे प्रथममाब्दे नैव कार्य्यमित्येव मुख्यः पक्षः प्रसङ्गतो गयाप्राप्तौ पुनरागमनाद्यसम्भावनायान्तु भक्त्या, मतान्तरोक्तं श्राद्धं कृत्वा वा । प्रथमाब्देऽपि तत् कार्य्यं नित्य-

त्वादिति। महापातकिनामपि वर्षमात्रं गयाश्राद्धं न कार्य्यम् "क्रियते पतितानां च गते संवत्सरे क्वचित्। देशधर्मप्रमाणत्वाद्गयाकूपे स्वबन्धुभिरिति" आम्नात् कूपग्रहणं गयास्थतीर्थमात्रोपलक्षणम्। पतितानामिति यावद्दुर्मरणहतानामुपलक्षणार्थं ते च विस्तरभयान्नात्र लिखिताः। युक्तञ्चैतत् मिताक्षरायां यावद्दुर्निमित्तहतानां संवत्सरादूर्द्ध्वमेव नारायणबलिविधानपूर्व्वकं श्राद्धकरणस्योक्ततया गयाश्राद्धस्यापि तत्स्थानीयत्वेन तत्काले एव करणौचित्यम्। अतएव तत्र षट्त्रिंशन्मतीयवाक्यम् "गोब्राह्मणहतानाञ्च पतितानां तथैव च। ऊर्द्ध्वं संवत्सरात् कार्य्यं सर्वमेवौर्द्ध्वदैहिकमिति"। अत्र सर्व्वमिति सर्वशब्दस्वरसात् नारायणबलेरिव गयाश्राद्धादेरपि वर्षोत्तरमेव कर्त्तव्यता नार्वागिति प्रतीयते। अतएव तद्वचनव्याख्यायां मिताक्षराकृता नारायणबलिं कृत्वौर्द्ध्वदैहिकं कार्य्यमित्युक्तम्। एवञ्चात्मघातिनाम् "नास्ति किञ्चिद्गयां विना" इत्युक्तिरपि वर्षोत्तरमेव तत्कर्त्तव्यतार्थैवेति बोध्यम्। अथ कर्त्तृविशेषे गयाश्राद्धविशेषः। तत्र "पितृणां दत्तमक्षयमिति", "पिण्डं दद्याच्च पित्रादेरिति" च वायवीयात् पित्रादित्रयाणामुद्देश्यता। "पितरो यत्र पूज्यन्ते तत्र मातामहादयः" इत्युक्तेः, गयामुपक्रम्य "मातामहानामप्येवं श्रुतिरेषा सनातनीति" पाद्मसृष्टिखण्डवचनाच्च, मातामहादीनामप्युद्देश्यतेत्येवं षड्दैवतं पार्व्वणमिति गौडीयाः। "अन्वष्टकायां वृद्धौ च गयायाञ्च मृताहनि। अत्र मातुः पृथक्श्राद्धमन्यत्र पतिना सह" इति वाय्वग्निपुराणोक्तेः "नान्दीमुखेऽन्वष्टकायां गयायाञ्च मृताहनि। पितामह्यादिभिः सार्द्धं मातुः श्राद्धं समाचरेत्" इति शातातपोक्तेश्च मात्रादीनामप्युद्देश्यता तेन नवदैवत्यम्। तत्राप्ययं विशेषः। नान्दीमुखे असामवेदिनामेव नवदैवतपार्वणस्य विधानेन तत्साहचर्य्यात् तद्वेदिनामेव नवदैवत्यमिति। "पित्रादि नवदैवं वा तथा द्वादशदैवतम्" वह्निपुराणीयात् मातामह्यादित्रिकसहितं नवदैवतमिति द्वादशदैवतं वा। तत्र वाशब्दश्रवणात् विकल्प एव गम्यते स च देशभेदादिना व्यवस्थितः। पितृव्यादीनान्तु एकोद्दिष्टमेव तदशक्तौ पिण्डदानमात्रं कार्य्यम्। तत्पत्नीनामपि पृथगेवैकोद्दिष्टादि कार्य्यम् "न योषिद्भ्यः पृथग्दद्यात्" इत्यादिना पृथग्दाननिषेधेऽपि "स्वगोत्रे परगोत्रे वा दम्पत्योः पिण्डपातनम्। अपृथक् निष्फलं श्राद्धं पिण्डञ्चोदकतर्पणम्" इति वायवीये गयामुपक्रम्य सहदाननिषेधेन तत्प्रतिप्रसवात्।"

गयाकूप गयास्थकूपभेदे पुं०। गयाक्षेत्र न० गयारूपे क्षेत्रभेदे। गयातीर्थ तद्रूपे तीर्थे न०। गयादित्य पु० तत्रत्यादित्यभेदे। गयाशिरस् न० गयास्थे गयशिरसि। "सर्वे यान्ता अदन्नाद्य" इत्युक्तेः गयाशिरमप्यत्र न०। "पिण्डं दद्यात् गयाशिरे" वायुपु०। गयाशीर्षगयाशेखरादयोऽप्यत्र। ६गन्तव्ये। "खरोऽसि गयोऽसि" ता० ब्रा०। "गयः फलाकाङ्क्षिभिर्गन्तव्यः" भा०।

गर त्रि० गीर्य्यते गॄ—कर्म्मादौ पचादि० अच्। तत्र गणे गरट् इति पाठात् टित्त्वात् स्त्रियां ङीप्। १गीर्य्यमाणे २उपविषे ३रोगे ४विषे च पु० हेमच०। "गरो गिरः पल्लवनार्थलाघवे मितञ्च सारञ्च वचो हि वाग्मिता" नैष०। "स्त्रियोऽन्नपानं नखरोममूत्रविड़ार्त्तवैर्युक्तमसाधुवृत्ताः। यस्मै प्रयच्छन्त्यरयो गरांश्च" सुश्रुतः। "विषनिमित्तस्तु गरोपयोगाद्दुष्टतोयसेवनात्" सुश्रुतः विषभक्षणजातश्वयथुकरणोक्तौ "अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः" स्मृतिः। ५विषभेदे न० हेमच० "तस्मादिदं गरं भुञ्जे" भाग० ८।७।२२श्लो०। ६वत्सनाभाख्ये विषे राजनि०। ववादिषु पञ्चमे तिथ्यर्द्धरूपे ७करणे न० मेदि०। करणशब्दे विवृतिः। "गरोदूष्ये" पा० गणसूत्रोक्ते ८दूष्ये च तस्य उञ्छादि० अन्तोदात्तता। भावे अप्। ९निगरणे पु०। ततः तार० इतच्। गरित सञ्जातगरणे। गीर्य्यते कर्म्मणि अप्। १०भक्ष्ये चूर्णभेदे "शृणु मन्दविषेषु" इत्युपक्रमे "योगैर्नानाविधैर्येषां चूर्णानि गरमादिशेत्" सुश्रुतः।

करणशब्दे अनुक्तत्वात् प्रसङ्गात् करणाधीशाः कृत्यभेदे तेषां ग्रहणादिकं च बृ०सं०९९अ०उक्तं प्रदर्श्यते यथा।

"ववबालवकौलवतैतिलाख्यगरवणिग्विष्टिसञ्ज्ञानाम्। पतयः स्युरिन्द्रकमलजमित्रयमभूश्रियः सयमाः। कृष्णचतुर्द्दश्यर्द्धाद्ध्रुवाणि शकुनिश्चतुष्पदं नागम्। किन्तुघ्नमिति च तेषां कलिवृषफणिमारुताः पतयः। कुर्य्याद्ववे शुभचरस्थिरपौष्टिकानि, धर्मक्रिया द्विजहितानि च बालवाख्ये। सम्प्रीतिमित्रकरणानि च कौलवे स्युः सौभाग्यसंश्रयगृहाणि च तैतिलाख्ये। कृषिबीजगृहाश्रयजानि गरे वणिजि ध्रुवकार्य्यवणिग्युतयः। नहि विष्टिकृतं विदधाति शुभं परघातविषादिषु सिद्धिकरम्। कार्य्यं पौष्टिकमौषधादि

शकुनौ गूढानि मन्त्रास्तथा। गोकार्यादि चतुष्पदे द्विजपितॄनुद्दिश्य राज्यानि च। नागे स्थावरदारुणानि हरणं दौर्भाग्यकर्म्माण्यतः। किन्तुमे शुभमिष्टकृत्यकरणं मङ्गल्यसिद्धिक्रियाः।"

गरघ्न पु० गरं हन्ति हन–टक्। १कृष्णार्जके २वर्वरे च राजनि०। (गरुड़) ३मत्स्यभेदे स्त्री ङीप्। भावप्र० तद्गुणा उक्ता यथा "गरघ्नी मधुरा तिक्ता तुवरा वातपित्तनुत्। कफघ्नी रुचिकृद्ग्राही दीपनी बलवीर्य्यकृत्"।

गरण न० गृ–सेचने गॄ–निगरणे वा भावे ल्युट्। १सेचने २भक्षणे च। "गरुत्मान् गरणवान्" निरुक्तौ ६।१८। ३विषे शब्दचि०।

गरद न० गरेण सेचनेन दीयते खण्ड्यते दो–खण्डने कर्म्मणि घञर्थे क। १विषे हेम० दा–क ६त०। २विषदातरि त्रि० "अग्निदो गरदश्चैव" स्मृतिः।

गरभ पु० गॄ–बा० अभच्। गर्भे हेमच०।

गरल न० गिरति जीवनम् गॄ–अलच् गरं सेचनं लाति प्रतीकाराय ला–क वा। १विषे अमरः। "स्मरगरलखण्डनं मम शिरसि मण्डनम्"। "गरलमिव कलयति मलयसमीरम्" गीतगो० "संछादितं गरलमिवाशनेन" भा० व० ६७ अ०। २तृणपुले(घासेर आटि) ३सर्पविषे ४मानभेदे च हेमच०।

गरलारि पु० ६त०। मरकतमणौ राजनि०। [शब्दरत्ना०।

गरव्रत पुंस्त्री गरः विषवद्सर्पभोजनं व्रतमस्य। मयूरे

गरस् न० गॄ–बा० असुन्। १भक्षणे। "सगरा असि सुभ्रः" ता०ब्रा०। "गरसा भक्षणेन सह वर्त्तमानः" भा०।

गरहन् पु० गरं हन्ति हन्–विच्। १कृष्णार्जके २वर्वरे च त्रिका०।

गरा स्त्री गृ–गॄ–वा अच् अजादेराकृतिगणत्वात् टाप्। १देवतालीवृक्षे राजनि०। भावे–अ। २भक्षणे धरणी।

गरागरी स्त्री गरं मूषिकविषमागिरति गॄ–अच् गौरा० ङीष्। देवतालीवृक्षे अमरः।

गरात्मक न० गरस्य विषस्येवात्मा यस्य। शिग्रुवीजे शब्दच०।

गराधिका स्त्री गरे गरप्रतीकारेऽधिका श्रेष्ठा। लाक्षायाम् रत्नमा०। गरायिकेति पाठान्तरे गर इवाचरति क्यच्–ण्वुल्। तत्रार्थे। [उभ० सेट् गरयति अजगरत् त।

गरि (गुरुं करोतीत्यर्थे णिच् गुरोर्गरादेशः) गुरुकरणे अक०

गरिमन् पु० गुरोर्भावः इमनिच् गरादेशः। अधःपतनसाधने ऊर्द्धस्थितिविरोधिनि गुरुत्वरूपे गुणे। "पादाहतं यत् खटशं गरिम्णः"। "इतराङ्गवन्न यदिदं गरिमग्लपितावलग्नमगमत्तनुताम्" माघः। "प्रोद्यद्राजफलो गृहीतगरिमा विष्वग्वृतो भोगिभिः" सा०द०।

गरिष्ठ त्रि० अतिशयेन गुरुः गुरु+इष्ठन् गरादेशः। १अतिगुरौ। २राजभेदे पु० "हविर्धांश्च गरिष्ठश्च हरिश्चन्द्रश्च पार्थिवः" भा० स० ७अ० शक्रसभ्योक्तौ। ३दैत्यभेदे पु०। "हविष्यश्च गरिष्ठश्च मलयो नरकः पृथुः" हरिवं० २६३ अ० दैत्योक्तौ।

गरी स्त्री गॄ–पचाद्यच् तत्र गणे गरट् इति पाठात् ङीप्। देवतालीवृक्षे अमरः गरागरीत्यत्र पदद्वयमित्यन्यमतात्।

गरीयस् त्रि० अतिशयेन गुरुः गुरु+ईयसुन् गरादेशः। अतिगुरौ "सखा गरीयान् शत्रुश्च" "वाक्यस्यार्थगरीयसः" माघः। स्त्रियां ङीप्। "तथापि शुश्रूषुरहं गरीयसीः" माघः।

गरुड़ पु० गरुद्भ्यां डयते डी–ड पृषो० तलोपः। कश्यपात्मजे विनतागर्भजाते १पक्षिराजे अमरः। "विनतापि सुसिद्धार्था बभूव मुदिता तदा। जनयामास पुत्रौ द्वावरुणं गरुड़ं तथा। विकलाङ्गोऽरुणस्तत्र भास्करस्य पुरःसरः। पतत्त्रिणान्तु गरुड इन्द्रत्वेनाभ्यषिच्यत" भा० आ० ३१अ०। विंशतिविधप्रासादमध्ये २प्रासादभेदे। "गरुड़ाकृतिश्च गरुड़ो नन्दीति षट्चतुष्कविस्तीर्णः। कार्य्यश्च सप्तभौमो विभूषितोऽण्डैश्च विंशत्या" वृ०स० ५६अ० ३सैन्यनिवेशनभेदरूपे व्यूहभेदे। "दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा। वराहमकराभ्यां वा सूच्या वा गरुड़ेन वा" मनुः। "संक्षिप्तमुखपश्चाद्भागः पृथुमध्यो वराहव्यूहः एष एव पृथुतरमध्यो गरुड़व्यूहः ताभ्यां पार्श्वयोर्भये सति व्रजेत्" कुल्लू०।

गरुड़ध्वज पु० गरुड़ो ध्वजोऽस्य। १विष्णौ अमरः। यथा च तस्य तत्केतनत्वं तथा खगासनशब्दे पृ० २४१६ द्रष्टव्यम्। गरुड़केतनादयोऽप्यत्र। "पयांसि भक्त्या गरुड़ध्वजस्य" माघः। "महाक्षो गरुड़ध्वजः" विष्णुसं०।

गरुड़पुराण न० गरुड़ायोक्तं विष्णुना पुराणम्। अष्टादशमहापुराणान्तर्गते सप्तदशे महापुराणभेदे। गरुड़स्येदम् उद्देश्यतया अण् गारुड़मप्यत्र। तत्संख्याप्रतिपाद्यविषयाश्च उत्तरख० १०८अ० नारदीयपुराणोक्ताः यथा

"ब्रह्मोवाच। मरीचे! शृणु वच्म्यद्य पुराणं गारुड़ं शुभम्। गरुड़ायाब्रवीत् पृष्टो भगवान् गरुड़ा-

स्तनः। एकोनविंशसाहस्रं तार्क्ष्यकल्पकथाचितम्"। तत्र पूर्वखण्डे। "पुराणोपक्रमो यत्र सर्गः सङ्क्षेपत स्ततः। सूर्य्यादिपूजनविधिर्दीक्षाविधिरतः परम्। श्र्यादिपूजा ततः पश्चान्नवव्यूहार्च्चनं द्विज!। पूजाविधानञ्च वैष्णवं तथा पञ्जरं ततः। योगाध्यायस्ततो विष्णोर्नामसाहस्रकीर्त्तनम्। ध्यानं विष्णोस्ततः सूर्य्यपूजा मृत्युञ्जयार्च्चनम्। मालामन्त्राः शिवार्च्चाऽथ गणपूजा ततः परम्। गोपालपूजा त्रैलोक्यमोहनं श्रीधरार्च्चनम्। विष्ण्वर्च्चा पञ्चतत्त्वार्च्चा चक्रार्च्चा देवपूजनम्। न्यासादिसन्ध्योपास्तिश्च दुर्गार्च्चाऽथ सुरार्च्चनम्। पूजा माहेश्वरी चातः पवित्रारोहणार्च्चनम्। मूर्त्तिध्यानं वास्तुमानं प्रासादानाञ्च लक्षणम्। प्रतिष्ठा सर्वदेवानां पृथक् पूजा विधानतः। योगोऽष्टाङ्गो दानधर्मः प्रायश्चित्तविधिक्रिया। द्वीपेशनरकाख्यानं सूर्य्यव्यूहश्च ज्यौतिषम्। सामुद्रिकं स्वरज्ञानं नवरत्नपरीक्षणम्। माहात्म्यमथ तीर्थानां गयामाहात्म्यमुत्तमम्। ततो मन्वन्तराख्यानं पृथक् पृथग् विभागशः। पित्राख्यानं वर्णधर्मा द्रव्यशुद्धिः समर्पणम्। श्राद्धं विनायकस्यार्च्चा ग्रहयज्ञस्तथाऽऽश्रमाः। जननाख्या प्रेता शौचं नीतिसारो व्रतोक्तयः। सूर्य्यवंशः सोमवंशोऽवतारकथनं हरेः। रामायणं हरिवंशो भारता ख्यानकन्ततः। आयुर्वेदे निदानं प्राक्चिकित्सा द्रव्यजा गुणाः। रोगघ्नं कवचं विष्णोर्गारुडस्त्रैपुरो मनुः। प्रश्नचूड़ामणिश्चान्ते हयायुर्वेदकीर्त्तनम्। ओषधीनामकथनं ततोव्याकरणोहनम्। छन्दःशास्त्रं सदाचारस्ततः स्नानविधिः स्मृतः। तर्पणं वैश्वदेवञ्च सन्ध्या पार्वणकर्म च। नित्यश्राद्धं सपिण्डाख्यं धर्मसारोऽघ निष्कृतिः। प्रतिसंक्रम उक्तोऽस्माद्युगधर्माः कृतेः फलम्। योगशास्त्रं विष्णुभक्तिर्नमस्कृतिफलं हरेः। माहात्म्यं वैष्णवञ्चाथ नारसिंहस्तवोत्तमम्। ज्ञानामृतं गुह्याष्टकं स्तोत्रं विष्ण्वर्च्चनाह्वयम्। वेदान्तसाङ्ख्यसिद्धान्तं ब्रह्मज्ञानात्मकं तथा। गीतासारः फलोत्कीर्त्तिः पूर्वखण्डोऽयमीरितः"। उत्तरखण्डे प्रेतकल्पे। "अथास्यैवोत्तरे खण्डे प्रेतकल्पः पुरोदितः। यत्र तार्क्ष्येण संपृष्टो भगवानाह वाडव!। धर्मप्रकटनं पूर्वयोनीनां गतिकारणम्। दानादिकं फलञ्चापि प्रोक्तमत्रौर्द्ध्वदैहिकम्। यमलोकस्य मार्गस्य वर्णनञ्च ततः परम्। षोडशश्राद्धफलक वृत्तान्तञ्चात्र वर्णितम्। निष्कृतिर्यममार्गस्य धर्मराजस्य वैभवम्। प्रेतपीड़ाविनिर्द्देशः प्रेतचिह्ननिरूपणम्। प्रेतानां चरिताख्यानं कारणम् प्रेततां प्रति। प्रेतकृत्यविचारश्च सपिण्डीकरणोक्तयः। प्रेतत्वमोक्षणाख्यानं दानानि च विमुक्तये। आवश्यकोत्तमं दानं प्रेतसौख्यकरं हितम्। शारीरकविनिर्द्देशो यमलोकस्य वर्णनम्। प्रेतत्वोद्धारकथनं कर्म कर्त्तृविनिर्णयः। मृत्योः पूर्वक्रियाख्यानं पश्चात् कर्म निरूपणम्। मध्यं षोडशकं श्राद्धं स्वर्गप्राप्तिक्रियोहनम्। सूतकस्याथ सङ्ख्यानं नारायणबलिक्रिया। वृषोत्सर्गस्य माहात्म्यं निषिद्धपरिवर्जनम्। अपमृत्युक्रियोक्तिश्च विपाकः कर्मणां नृणाम्। कृत्याकृत्यविचारश्च विष्णुध्यानं विमुक्तये। स्वर्गतौ विहिताख्यानम् स्वर्गसौख्यनिरूपणम्। भूर्लोकवर्णनञ्चैव सप्तधा लोकवर्णनम्। पञ्चोर्द्धलोककथनं ब्रह्माण्डस्थितिकीर्त्तनम्। ब्रह्माण्डानेकचरितं ब्रह्मजीवनिरूपणम्। आत्यन्तिकलयाख्यानं फलस्तुतिनिरूपणम्। इत्येतद्गारुड़ं नाम पुराणं भुक्तिमुक्तिदम्"। तत्फलश्रुतिः। "कीर्त्तितं पापशमनं पठतां शृण्वतां नृणाम्। लिखित्वैतत्पुराणन्तु विषुवे यः प्रयच्छति। सौवर्ण हंसयुग्माढ्यं विप्राय स दिवं व्रजेत्"।

गरुड़मन्त्र पु० ६त०। "संवर्त्तको नेत्रयुतः पार्श्वस्थारोऽग्निसुन्दरी। (क्षिप ओं स्वाहा)। गारुड़ो मनुराख्यातो विषद्वयविनाशनः। स्मरन् गरुड़मात्मानं मन्त्रमेनं जपेन्नरः। विषमालोचनेनैव हन्यान्नागभयं कुतः" तन्त्रसारे निबन्धोक्ते विषहारके मन्त्रभेदे।

गरुड़मुद्रा स्त्री "हस्तौ तु विमुखौ कृत्वा ग्रथयित्वा कनिष्ठके। मिथस्तर्जनिके श्लिष्टे श्लिष्टावङ्गुष्ठकौ तथा। मध्यमानामिकाग्रे तु द्वौ पक्षाविव चालयेत्। एषा गरुड़मुद्रा स्याद्विष्णोः सन्तोषवर्द्धिनी" तन्त्रसारोक्ते विष्णुपूजाङ्गे मुद्राभेदे।

गरुड़रुत न० "गरुड़रुतं नजौ भजतगा यदा स्युस्तदा" छन्दो० उक्तलक्षणे षोड़शाक्षरपादके छन्दोभेदे ६त०। गरुड़स्य रवे च "असरमयूरमानससुदे गरुड़रुतं सुरारिभुजगेन्द्रसन्त्रासने" छन्दोम०।

गरुड़वेगा स्त्री गरुड़स्य वेग इव वेगो गमने यस्याः। शीघ्रोत्पद्यमानलताभेदे। "वीरुधयो वाराही ज्योतिष्मती च गरुडवेगा" वृ०सं० ५४ अ०।

गरुड़व्यूह पु० गरुड़ इवाकृत्या व्यूहः। सैन्यनिवेशन-

विशेषेण गरुड़ाकृतौ व्यूहभेदे गरुड़शब्दे दृश्यम् ।

गरुड़ाग्रज पु० ६त० । विनतायाः ज्येष्ठपुत्रे सूर्य्यसारथौ १अरुणे । अमरः । तस्य गरुड़ाग्रजत्वकथा गरुड़शब्दे दृश्या । "विभिन्नवर्णा गरुडाग्रजेन" माघः ।

गरुड़ाङ्कित न० गरुड इवाङ्कितं तुल्यवर्णत्वात् । १मरकतमणौ शब्दरत्ना० । गरुडाङ्कादयोऽप्यत्र ।

गरुड़ाश्मन् पु० गरुड इवाश्मा समानवर्णत्वात् । मरकतमणौ जटाधरः ।

गरुड़ासन न० "गरुडासनमावच्ये येन ध्यानस्थिरो भुवि । सर्वदोषादिनिर्मुक्तो भवतीह महाबली । एकपादमूरौ बद्ध्वा एकपादे च दण्डवत् । जङ्घापादसन्धिदेशे जान्वोरग्रं व्यवस्थितम् । एतदासनमाकृत्य पृष्ठे संहारमुद्रया । आधार्य्य योगनाथस्य स दास ईश्वरस्य च" रुद्रयामलोक्ते आसनभेदे ।

गरुड़ोत्तीर्ण पु० गरुडो वर्णेनोत्तीर्णः अतिक्रान्तो येन । मरकतमणौ राजनि० । [उपनिषच्छब्दे दृश्यम् ।

गरुड़ोपनिषद् स्त्री अथर्ववेदान्तर्गते गारुडाख्योपनिषद्भेदे ।

गरुत् पु० गृ—वा उति । खगानां नभोगतिहेतौ पक्षे (पाखा) अमरः । २गरणे गरुत्मच्छब्दे उदा० । ३भक्षणे च ।

गरुत्मन् पु० प्रशस्तौ गरुतौ स्तोऽस्य मतुप् यवादि० मस्य न वः । १गरुडे अमरः । "सुपर्णोऽसि गरुत्मान्" यजु०१२।४ । "अङ्ग सवितुर्गरुत्मान् पूर्व्वो जातः" ऋ०१०।१४९।३ । २हविर्भक्षणवति वह्नौ च । "सुपर्णोऽसि गरुत्मान् पृष्ठे" यजु० १७।७२ । "अग्ने ! त्वं सुपर्णोऽसि सुपर्णपक्ष्याकारो गरुड इवासि । गरुत्मान् गरुत् गरणं गिलनं भक्षणमस्यास्तीति गरुत्मान् अशनायावानित्यर्थः" वेददी० । ३पक्षिमात्रे च ।

गरुद्योधिन् पुंस्त्री गरुता युध्यति युध—णिनि ३त० । भारतीखगे (भारुइ) त्रिका० ।

गरुल पु० गरुड+डस्य वा लः । गरुडे हेमच० ।

गर्ग पु० गृ—ग तस्य नेत्त्वम् । आङ्गिरसे मुनिभेदे । "वृहस्पतेरङ्गिरसः पुत्रो राजन् ! महामुनिः । संक्रामितो भरद्वाजः" इत्युपक्रमे "वितथञ्चाभिषिच्याथ भरद्वाजो वनं ययौ । स चापि वितथः पुत्रान् जनयामास पञ्च वै । सुहोत्रञ्च सुहोतारं गयं गर्गं तथैव च । कपिलञ्च महात्मानम्" हरिवं २२ अध्या० । तस्य च शिवतोषात् चतुःषष्ट्यङ्गज्योतिषज्ञानं यथाह भा० आनु० १८अ० । "गर्ग उवाच चतुःषष्ट्यङ्गमददत् कालज्ञानं ममाद्भुतम् । सरस्वत्यास्तटे तुष्टो (शिवः) मनोयज्ञेन पाण्डव !" कलाज्ञानमित्यपपाठः । तस्य च कालज्ञानप्रकारः भा० ष०२८अ०उक्तः । तच्च वाक्यं गर्गस्रोतस्शब्दे दृश्यम् । तत्कृता ज्योतिषसंहिता गर्गसंहितेति प्रसिद्धम् । "तल्लक्षणानि सुनिर्मलानि निबद्धानि तानि दृष्ट्वेदम् । क्रियते गर्गपराशरकाश्यपवात्स्यरचितानि" "गर्गादीनां मतं वीक्ष्य" इति च वृ०सं० २१ अ० । स च भरद्वाजगोत्रान्तर्गतः आर्षशब्दे ८१७पृ० दृश्यम् । तस्य गोत्रापत्यं गर्गा०यत् । गार्ग्य तद्गोत्रापत्ये पुंस्त्री । यून्यपत्ये फक् । गार्ग्यायण यूनि तद्गोत्रापत्ये पुंस्त्री । बहुषु यञोलुक् अस्त्रियाम् । "गर्गाः शतं भोज्यन्ताम्" महाभा० "गर्गाणामाङ्गिरसबार्हस्पत्यभारद्वाजशैन्यगार्ग्येति पञ्च" आश्व० श्रौ० १०।१२।१२। स्त्रियान्तु ङीप् यलोपश्च गार्गी इत्येव "गार्गी वाचक्नवी" आश्व० गृ० ३।४।४ । गार्ग्यश्च गार्ग्यायणश्च इत्येकशेषे "वृद्धो यूना" पा० वृद्धशेषे गार्ग्यौ । कुणिरोगाक्रान्ते २मुनिभेदे । "कुणिरासीत् महावीर्य्यः कुणिर्गर्गो महायशाः" भा० ग० ५३ अ० । तत्कथा वृद्धकन्याशब्दे दृश्या । गयाक्षेत्रे यज्ञार्थं सृष्टे ब्रह्मणो ३मानसपुत्रभेदे । "ब्रह्मा सम्भृतसंभारो मानसानृत्विजोऽसृजत्" इत्युपक्रमे "गर्गं कौशिकवासिष्ठौ" वायु० गयामा०२अ० । ४वृषे ५किञ्जल्के शब्दार्थचि० । "चतुर्द्रुतविरामान्तस्तालोऽयं गर्गसंज्ञितः" संगीतदामोदरोक्ते ६तालभेदे पु० ।

गर्गत्रिरात्र पु० तिसृभिः रात्रिभिः साध्यः अच् द्विगोर्लुक् लुकि व्यक्तिवचनत्वा गर्गकृतस्त्रिरात्रः । त्रिसुत्यके त्रिदिनसाध्ये यागभेदे । "त्र्यहाः पञ्च गर्गवैदच्छन्दोमान्तर्वसुपराकाः" कात्या० श्रौ० २२२।८ । "त्र्यहाः (त्र्यह साध्याः") पञ्च अहीनाः । "द्विगौ क्रतौ" पा० पूर्वपदमन्तोदात्तम् । युक्तारोह्या० आद्युदात्तञ्च

गर्गर पुंस्त्री गर्गेति शब्दं राति रा—क गृ—अ० गरन् वा । "यः पीतवर्णोऽपि च पिच्छिलाङ्गः पृष्ठेषु रेखाबहुलः सशल्कः । स गर्गरो बर्बरनादरूक्षो जडश्च शीतः कफवातकारी" राजनि० उक्ताकारगुणे मत्स्यभेदे स्त्रियां जातित्वात् ङीष् । २तरुणपर्णौ ३दधिमन्थनभाण्डे च शब्दार्थचि० "गर्गरोद्गारनिस्वनम्" हरिवं० ६१ अ० । "नैषां ब्रह्म च नोतपुत्रा न गर्गरो मथ्यते नो यजन्ते" भा० शा० ७० अ० । "न वृषाः संप्रवर्त्तेरन्नमथ्येरंश्च गर्गराः" भा० शा० ६८ अ० ।

४कलसे अल्पार्थे ङीप्। ५स्वल्पघटे स्त्री "मेघादौ सक्तवो देया वारिपूर्णा तु गर्गरी" ति॰त॰। गर्गरस्येदम् कुर्वा॰ गय। गार्गर्य्य तत्सम्बन्धिनि त्रि॰।

गर्गशिरस् पु॰दैत्यभेदे। "दूरा गर्गशिरा यश्च" हरिवं॰३अ॰।

गर्गसंहिता स्त्री गर्गेण कृता कालज्ञानस्य संहिता। गर्गकृते ज्योतिषग्रन्थभेदे।

गर्गस्रोतस् न॰ भा॰व॰ प्रसिद्धे सरस्वतीस्थे तीर्थभेदे "तस्माद्गार्ग्यवतीर्थाच्च महाबाहुररिन्दमः। गर्गस्रोतो महातीर्थमाजगामैककुण्डली (बलभद्रः)। यत्र गर्गेण वृद्धेन तपसा भावितात्मना। कालज्ञानगतिश्चैव ज्योतिषाञ्च व्यतिक्रमः। उत्पाता दारुणाश्चैव शुभाश्च जनमेजय!। सरस्वत्याः शुभे तीर्थे विदिता वै महात्मना। तस्य नाम्ना च तत्तीर्थं गर्गस्रोत इति स्मृतम्। तत्र गर्गं महाभागमृषयः सुव्रता नृप!। उपासाञ्चक्रिरे नित्यं कालज्ञानं प्रति प्रभो!" भा॰ श॰ ३८अ॰

गर्गाट पुंस्त्री गर्गेति शब्दायादति अट–अच्। मत्स्यभेदे हारा॰।

गर्गादि पु॰ गोत्रे यञ्प्रत्ययनिमित्ते शब्दगणे सच गणः गर्ग वत्स (राजा से) संकृति अज व्याघ्रपात् विदभृत् प्राचीनयोग अगस्ति पुलस्ति चमस रेभ अग्निवेश शङ्ख शट शक एक धूम अवट मनस् धनञ्जय वृक्ष विश्वावसु जरमाण लोहित संशित बभ्रु वल्गु मण्डु गण्डु शङ्कु लिगु गुहलु मन्तु मङ्क्षु अलिगु जिगीषु मनु तन्तु मनायी सूनु कथक कन्थक ऋक्ष वृक्ष तनु तरुक्ष तलुक्ष तण्ड वतण्ड कपि कत कुरुकत अनडुह् कण्व शकल गोकक्ष अगस्त्य कुण्डिनी यज्ञवल्क पर्णवल्क अभयजात विरोहित वृषगण रहूगण शण्डिल चणक चुलुक मुद्गल मुसल जमदग्नि पराशर जातूकर्ण महित मन्त्रित अश्मरथ शर्कराक्ष पूतिमाष स्थूरा अररक एलाक पिङ्गल कृष्ण गोलन्द उलूक तितिक्ष भिषज् भिष्णज भडित भण्डित दल्भ चेकित चिकित्सित देवहू इन्द्रहू एकलू पिप्पलू वृहदग्नि सुलोहिन् सुलाभिन् उक्थ कुटीगु।

गर्ज्ज अर्ज्जहेतुकशब्दे भ्वा॰ पर॰ अक॰ सेट्। गर्ज्जति। अगर्जीत् जगर्ज। गर्जितम्। गर्जनं गर्जः। गर्जन्। गर्ज्जा। "गर्ज गर्ज क्षणं मूढेति" देवीमाहात्म्यम्। "शरदि गर्जति, न वर्षति, वर्षति वर्षासु निःस्वनो मेघः" उद्भटः। "कुम्भकर्णस्ततोऽगर्जीत्" "गर्ज्जन् हरिः साम्भसि शैलकुञ्जे" भट्टिः। "योधानां चैव गर्जताम्" भा॰ भी॰ ६७८ श्लो॰। "नाम संश्रावयामास जगर्ज च ननाद च" रामा॰ सु॰ ८६। शीलार्थे चानश्। गर्जमानः। "तथात्र गर्जमाने तु मेघवृन्दाभिनिस्वनम्" भा॰ आ॰ २०अ॰। "सन्ध्यायां गर्जिते मेघे शास्त्रचिन्तां करोति यः। चत्वारि तस्य नश्यन्ति आयुर्विद्यायशोबलम्" स्मृतिः। "माघादिचतुरो मासान् गर्जमात्रं विवर्जयेत्" स्मृतिः।

अनु+गर्जनप्रतिरूपगर्जने। "अनुगर्जितसन्दिग्धाः करणैर्मुरजस्वनाः" कुमा॰। अनुरूपगर्जने च। "सोऽनुगर्जन् धनुष्पाणिः" भा॰द्रो॰ ४०अ॰।

अभि+अभिलक्ष्य गर्जने सक॰। "दुःशासनस्तामभिगर्जमानः" भा॰स॰६५अ॰। ताच्छील्ये चानश्। "शार्दूलाविव चान्योन्यमामिषार्थेऽभ्यगर्जताम्" भा॰द्रो॰१२२अ॰। सम्यगगर्जने अक॰। "शूराणाञ्चाभिगर्जताम्" भा॰क॰२१अ॰

प्रति+प्रतिरूपगर्जने अक॰। "बलवन्तावपि संक्रुद्धावन्योन्यं प्रतिगर्जताम्" भा॰ वि॰ २२अ॰। आर्षः पदव्यत्ययः। "प्रतीपं पततो मत्तान् कुञ्जरान् प्रतिगर्जतः" भा॰ उ॰ ५०अ॰ "सुहृदयो हृदयः प्रतिगर्जताम्" रघुः। प्रतिलक्ष्यीकृत्य गर्जने सक॰। "ऋषीणां कदनं कृत्वा नाशमपि प्रतिगर्जति" हरिवं ४८अ॰।

गर्ज्ज रवे चुरा॰ उभ॰ अक॰ सेट्। गर्ज्जयति ते अजगर्जत्-त। गर्जयां बभूव आस–चकार चक्रे। गर्जयन् गर्जयमानः।

गर्ज पु॰ गर्ज–भावे घञ्। १हस्तिशब्दे २मेघादिशब्दे च गुरुमत्त्वात् सेट्कत्वाच्च भावे अ स्त्रियाम्। गर्जा। ३मेघारिध्वनौ स्त्री "गण्डूषगर्जजागरभुजकीलज्वालवक्त्रकन्नीड़ाः। उत्कण्ठसठवराटकरभसाः स्त्रीत्वे तु टाबन्ताः" त्रिका॰।

गर्ज्जक पु॰ गर्ज–ण्वुल्। (शाल) मत्स्यभेदे शब्दर॰।

गर्ज्जन न॰ गर्ज–भावे ल्युट्। १शब्दे करणे ल्युट्। २कोपे [मेदि॰।

गर्ज्जर न॰ गर्ज–बा॰ अरच्। १गृञ्जने (गाजर) ख्याते मूलप्रधाने वृक्षे भावप्र॰। "गर्जरं गृञ्जनं प्रोक्तं तथा नारङ्गवर्णकम्। गर्जरं मधुरं तीक्ष्णं तिक्तोष्णं दीपनं लघु। संग्राहि रक्तपित्तार्शोग्रहणीकफवातजित्"।

गर्ज्जाफल पु॰ गर्जया फलति फल–अच् ३त॰। विकङ्कतवृक्षे राजनि॰।

गर्जि पु॰ गर्ज–भावे इन्। १मेघशब्दे हेम॰।

गर्जित न॰ गर्ज–भावे क्त। १मेघादिध्वनौ कर्त्तरि क्तः।

२मत्तगजे अमरः। ३गर्जनकर्त्तरि मेघादौ त्रि० "सन्ध्यायां गर्जिते मेघे शास्त्रचिन्तां करोति यः" स्मृतिः। गर्जो जातोऽस्य तार०—इतच्। ४जातगर्जने त्रि०।

गर्ज्य न० गर्ज—ण्यत् "न कादेः" पा० न कुत्वम्। गर्जनीये।

गर्त्त पु० गॄ—तन्। १भूमिच्छिद्रे १त्रिगर्त्तदेशे २स्त्रीनितम्बस्थ ककुन्दरे च विश्वः। ४रोगभेदे शब्दर०। ५गृहे निघ०। ६रथे ७सभास्थाणौ च निरु०। "अभ्रातेव पुंस एति प्रतीची गर्त्तारुगिव सनये धनानाम्" ऋचो निरुक्तौ गर्त्तः सभास्थाणुर्गृणातेः सत्यसङ्गरो भवति रथोऽपि गर्त्त उच्यते गृणातेः स्तुतिकर्म्मणः स्तुततमं यानम्" इति ३।५। "वरुण! मित्र! गर्त्तमचचाथे" ऋ० ५।६२।८। 'गर्त्तं रथम्' भा० "नमस्वन्ता धृतदक्षाधिगर्त्ते" २५।६।५। "गर्त्ते रथे" भा०। ८खातभेदे "धनुःसहस्राण्यष्टौ च गतिर्यासां न विद्यते। न ता नदीशब्दवहा गर्त्तास्ताः परिकीर्त्तिताः" ति० त०। "स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च" मनुः। ९खातेन कृतबिलमात्रदेशे च "अशुचिस्थानम् उच्छिष्टक्षेपणस्थानं गर्त्तादिकम्" मिता०। "न ससत्त्वेषु गर्त्तेषु न गच्छन्नापि च स्थितः"(मूत्रं कुर्य्यात्) मनुः। "गर्त्तेष्वव-काशीपालमित्यवधापयेत्" आश्व० गृ० २।८।१४। "सर्वासां स्थूणानां गर्त्तेषु" नारा० "वर्षाभ्यस्तत्र गर्त्तेऽवदध्युः" ४।५।५। "स्थाणुं वर्च्छतु गर्त्ते वा पात्यते" छ०भा०श्रुतिः। गर्त्तस्यादूरभवो देशः सुवास्त्वा० अण्। गार्त्त गर्त्तसन्निकृष्टदेशादौ त्रि०। ततः चतुरर्थ्याम् प्रेक्षा० इनि। गर्त्तिन् गर्त्तसन्निकृष्टादौ त्रि० स्त्रियां ङीप्। गर्त्ते भवः धूमा० वुञ्। गार्त्तक गर्त्तभवे त्रि०। उत्करा० चतुरर्थ्यां छ। गर्त्तीय गर्त्तयुक्तदेशादौ त्रि०। कुमुदा० चतुरर्थ्यां ठञ्। गर्त्तिक गर्त्तसन्निकृष्टदेशादौ। गर्त्तं तत्पतनमर्हति "छन्दसि च" पा० यत्। गर्त्त्य गर्त्तपतनमर्हति त्रि०छन्दसीत्युक्तेः वेद एवास्य प्रयोगः।

गर्त्तिका स्त्री गर्त्तोऽस्त्यस्याः ठन्। १तन्तुवपनशालायां (ताँतघर)। हेमच०। २गर्त्तवति त्रि०।

गर्द्द रवे वा चुरा० उभ० पक्षे भ्वा० पर० अक० सेट्। गर्द्दयति-ते गर्दति अजगर्दत्-त अगर्दीत्। गर्द्दयाम् बभूव आस. चकार चक्रे जगर्द्द।

गर्द्दभ पुंस्त्री० गर्द—अभच् (गाधा) १जन्तुभेदे। स्त्रियां जातित्वात् ङीष्। "सहैव दशभिः पुत्रैर्भारं वहति गर्दभी" "अविश्रामं वहेद्भारं शीतोष्णञ्च न विन्दति। ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्दभात्" चाणक०। "दीपनं गार्दभं मूत्रं कृमि-वातकफापहः। शोफकुष्ठोदरोन्मादमारुतकृमिनाशनम्" सुश्रु० तत्र पुंसामेव मूत्रं ग्राह्यं यथाह भावप्र० "खरोष्ट्रेभनराश्वानां पुंसां मूत्रं हितं स्मृतम्"। तस्योत्पत्तिः "अथ यासां पांसवः पर्य्यशिष्यन्त ततो गर्दभः समभवत् तस्माद्यत्र पांसुलं भवति गर्दभस्थानमिव तत्रेत्याहुः" शत०ब्रा० ४।५।१।८। तस्य पांसुषु उत्पन्नत्वात् पांसुलस्थानप्रियता। "चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः। अपात्रास्ते च कर्त्तव्या धनमेषां श्व गर्दभम्" मनुना तस्य श्वपचादिधनत्वमुक्तम्। २गन्धे हेमच०। ३श्वेतकुमुदे ४विडङ्गे च न० रत्नमा०।

गर्द्दभगद पु० जालगर्दभाख्ये रोगभेदे राजनि०। जालगर्दभशब्दे लक्षणादि।

गर्द्दभयाग पु० गर्दभेन यागः। अवकीर्णिनः पापक्षयार्थे नैर्ऋतदेवताककाणगर्दभपश्वालम्भनेन कर्त्तव्ये यागभेदे।। तद्विधिर्मनुनोक्तो यथा

"अवकीर्णी तु काणेन गर्दभेन चतुष्पथे। पाकयज्ञविधानेन यजेत निर्ऋतिन्निशि। हुत्वाग्नौ विधिवद्धोमानन्ततश्च समेत्यृचा। वातेन्द्रगुरुवह्नीनां जुहुयात् सर्पिषाऽऽहुतीः। कामतो रेतसः सेकं व्रतस्थस्य द्विजन्मनः। अतिक्रमं व्रतस्याहुर्द्धर्मज्ञा ब्रह्मवादिनः। मारुतं पुरुहूतञ्च गुरुं पावकमेव च। चतुरो व्रतिनोऽभ्येति ब्राह्मन्तेजोऽवकीर्णिनः"।

गर्दभयज्ञ गर्दभेज्यादयोऽप्यत्र। तत्र विशेषः कात्या०श्रौ० सूत्रे उक्तो यथा।

"वाऽवकीर्णिनो गर्दभेज्या" सू०१।१।१३ "यो ब्रह्मचारी सन् स्त्रियं गच्छति सोऽवकीर्णी तस्यावकीर्णिनः स्खलितब्रह्मचर्यस्य गर्दभेज्या गर्दभेनेज्या यागो गर्दभेज्या प्रायश्चित्तार्था भवति। वाशब्दो विकल्पार्थः तेन गृह्योक्तमपि प्रायश्चित्तान्तरमाज्याहुतिद्वयरूपं विकल्पेन भवति "अथापरमाज्याहुती जुहोति कामावकीर्णोऽस्मीत्यादिना" (पारस्कर) शाखान्तरे उभयस्य विकल्पेन श्रुतत्वात् अत्रैतद्विचार्य्यते किं स्थपतीष्टिरवकीर्णिपशुश्च तदुभयसाधनसंस्कृतेष्वाहवनीयादिषु भवति उत लौकिके इति। तत्र प्रकृतित आहवनीयादिप्राप्तेराहवनीयादीनां चाधाननिष्पाद्यत्वात् स्थपतेरवकीर्णिनश्चाधानविध्यभावेऽपि इष्टिपश्वर्थ आधानं प्रयोजतः अत एतदर्थमेवाधानेनाऽऽ-

हवनीयादीनुत्पाद्य तेष्वेतदुभयं कर्त्तव्यमिति प्राप्ते आह" कर्कः। "लौकिके" १४सू०। 'एतौ स्थपतीष्ट्यवकीर्णिपशू लौकिकेऽग्नौ भवतः न होमाविष्टिपशू आधानं प्रयोजयतः आभ्यां हि तदेव गृह्यते यद्दर्शपूर्णमासाङ्गं भवति। न चाधानं दर्शपूर्णमासाङ्गम् स्वकाले हि पुरुषसंस्कारकत्वेन तद्विहितमिति। अतो लौकिकाग्नावेवैतावनुष्ठेयौ लौकिकमेव गार्हपत्यस्थाने स्थापयित्वा तत आहवनीयादिस्थानेषु विहृत्य स्थपतीष्ट्यवकीर्णिपशू दर्शपूर्णमासपशुवत् कर्त्तव्यौ। अत्र विशेषविधानार्थमाह" कर्कः। "भूमौ पशुपुरोडाशश्रपणम्" १५सू०। "अत्रावकीर्णिनो गर्दभपशुयागे पशुपुरोडाशस्य श्रपणं भूमावेव कर्त्तव्यम् न तु कपालेषु" कर्कः। "अप्स्ववदानहोमः" १६सू०। "अवदानानां हृदयजिह्वाक्रोडादीनां होमोऽप्सु उदकेषु भवति नाग्नौ वचनात्। अवदानग्रहणादन्यदाघाराज्यभागहोमादिकमग्नावेव कार्य्यम्" कर्कः। "शिश्नात् प्राशित्रावदानम्" १७सू०। "गर्दभस्य शिश्नात् प्राशित्रावदानं कार्य्यम् वचनात्" कर्कः।

गर्दभशाक पु० गर्दभोगन्धो शाकेऽस्य। ब्रह्मयष्टिवृक्षे (वामनहाटि) जटा०। २तत्रैवार्थे स्त्री गौरा० ङीष् रत्नमा०।

गर्दभशाखी स्त्री गर्दभो गन्धः शाखायां यस्याः गौरा० ङीष्। १भार्ग्याम् राजनि०।

गर्दभाण्ड पु० गर्दभं गन्धममति अम–गतौ ड। पत्रकाण्डफलादिभिरश्वत्थाकारे १प्लक्षवृक्षे (पाकुड) अमरः। (पिप्पली) ख्याते २वृक्षे शारसुन्दरी।

गर्दभाह्वय न० गर्दभेति आह्वयो यस्य। १कुमुदे हेमच०।

गर्दभिका स्त्री "मण्डलं वृत्तमुत्सन्नं सरक्तं पिडकावृतम्। रुजाकारीं गर्दभिकाम् तां विद्यात् वातपित्तजाम्" माधवकरोक्ते रोगभेदे।

गर्दभी स्त्री गर्द–अभच् गौरा० ङीष्। अग्निप्रकृतिके १कीटभेदे सुश्रु० कीटशब्दे २०४८पृ० विवृतिः। स्वार्थे क। २गर्दभिकारोगे संज्ञायां कन्। ३अपराजितायाम् ४श्वेतकण्टकार्य्यां ५कटभ्याञ्च राजनि०। गर्द्दभ+जातौ स्त्रियां ङीष्। ६गर्दभजातिस्त्रियाञ्च तत्क्षीरादिगुणाः "बल्यं वातश्वासहरं मधुराम्लं च गार्दभम्। पयो रूक्षं दीपनञ्च सुपथ्यं परिकीर्त्तितम्। गार्दभं दधि रूक्षोष्णं लघु दीपनमुच्यते। पाचनं मधुराम्लञ्च रुचिकृत् वातदोषहृत्। गार्दभं नवनीतं च कषायं कफवातहृत्। बल्यञ्च दीपनं पाके लघूष्णं मूत्रदोषकृत्" राजनि०।

गर्द्ध लिप्सायां चुरा० उभ० सक० सेट्। गर्द्धयति ते अजगर्द्धत् त। गर्द्धयाम् बभूव आस चकार चक्रे। गर्द्धः गर्द्धी। गर्द्धनः। [२गर्द्धभाण्डद्रुमे च शब्दच०।

गर्द्ध पु० गृध–घञ् अच् वा। १अतिशयस्पृहायां, हेमच०।

गर्द्धन त्रि० गृध–युच्। लुब्धे अमरः।

गर्व गतौ भ्वा० पर० सक० सेट्। गर्वति अगर्वीत् जगर्व।

गर्व दर्पे अद० चुरा० आत्म० अक० सेट्। गर्वयते अजगर्वत। गर्वः। गर्वितः। "तदप्रसारगर्वितकृष्णसारम्" रघुः।

गर्व पु० गर्व–दर्पे भावे अच्। अहङ्कारे अमरः।

गर्भ(र्ब्भ) पु० गृ–भन् वा द्वित्वे भस्य बः। भ्रूणे देहजन्मकारके शुक्रशोणितानुबन्धजन्ये १मांसपिण्डे, २शिशौ, ३कुक्षौ, ४नाटकसन्धिभेदे, ५पनसकण्टके मेदि० ६अपवरके, हेमच० "भाद्रकृष्णचतुर्द्दश्यां यावदाप्लवते जलम्। तावद् गर्भं विजानीयात्" प्रा०त० उक्ते भाद्रकृष्णचर्दश्यां, गङ्गाजलाप्लावनस्थाने, ७अन्ने, ८अग्नौ, ९पुत्रे च शब्दार्थचि०। गर्भस्य देहहेतुता कायशब्दे १९०८पृ० दर्शिता कश्चिदत्र विशेषोऽभिधीयते। तत्र भावप्र०

"कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः। गर्भः सञ्जायते नार्य्याः स जातो बाल उच्यते। गर्भः शुद्धोऽशुद्धश्च अशुद्धस्तु गर्भोऽशुद्धशुक्रशोणितयोरपि दम्पत्योर्भवति यत आह "दम्पत्योः कुष्ठबाहुल्यात् दुष्टशोणितशुक्रयोः। यदपत्यन्तयोर्जातं ज्ञेयं तदपि कुष्ठितमिति"। कुष्ठं सञ्जातं यस्य तत् कुष्ठितम्, अत्र तारकादित्वादितच् प्रत्ययः। यत्तु, "वातादिदुष्टरेतसः प्रजोत्पादने न समर्थाः" इति सुश्रुतः। तत्र शुद्धप्रजोत्पादने न समर्था इति बोद्धव्यम्। रोगादिनाऽशुद्धास्तु वातादिदुष्टशुक्रा अपि प्रजा जनयन्ति जन्मान्धबधिरपङ्ग्वादिसम्भवात्। ऋतौ स्त्रीपुंसयोर्योगे मकरध्वजवेगतः। मेढ्रयोन्यभिसङ्घर्षाच्छरीरोष्माऽनिलाहतः। पुंसः सर्वशरीरस्थं रेतो द्रावयतेऽथ तत्। वायुर्मेहनमार्गेण पातयत्यङ्गनाभगे। तत् संस्रुत्य व्यात्तमुखं याति गर्भाशयं प्रति। तत्र शुक्रवदायातेनार्त्तवेन युतं भवेत्। गर्भाशयस्य स्वरूपमाह शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा च कीर्त्तिता। तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता। यथा रोहितमत्स्यस्य मुखं भवति रूपतः। तत्संस्थानां तथारूपां गर्भशय्यां विदुर्बुधाः। अयमर्थः गर्भशय्याया मुखं रोहितमत्स्यस्येव भवति यथा च रोहितमत्स्यस्य स्थितिर्जले भवति तथा पित्ताशयपक्वाशयमध्ये गर्भशय्यायाः

स्थितिर्भवति रूपमपि तस्येव भवति यथा रोहितस्य मुखं स्वल्पमाशयस्तु महानित्यर्थः। शुक्रार्त्तवसमाश्लेषो यदैव खलु जायते। जीवस्तदैव विशति युक्त शुक्रार्त्तवान्तरः। सूर्य्यांशोः सूर्य्यमणितोऽनुभयस्माद्युताद्यथा। वह्निः सञ्जायते जीवस्तथा शुक्रार्त्तवाद्युतात्। आत्माऽनादिरनन्तश्चाऽव्यक्तो वक्तुं न शक्यते। चिदानन्दैकरूपोऽयं मनसापि न गम्यते। एवं भूतोऽपि जगतो भाविन्या बलवत्तया। अविद्यया कृत कर्मवशो गर्भं विशत्यसौ। गर्भं चतुर्विंशतितत्त्वमयम्। स एव वेत्ता रसनो द्रष्टा घ्राता स्पृशत्यसौ। श्रोता वक्ता च कर्त्ता च गन्ता रन्तोत्सृजत्यपि। दिने व्यतीते नियतं सङ्कुचत्यम्बुजं यथा। ऋतौ व्यतीते नार्य्यास्तु योनिः संव्रियते तथा। ऋतौ रजोदर्शनात् षोड़शनिशात्मके काले योनिरत्र भगद्वारम्।

“वीजेऽन्तर्वायुना भिन्ने द्वौ जीवौ कुक्षिमागतौ। यमावित्यभिधीयेते धर्मेतरपुरःसरौ। धर्मस्तदितरोऽधर्मस्तौ पुरःसरौ ययोः तेन यमौ धर्माधर्माभ्यां भवत इत्यर्थः। आधिक्ये रेतसः पुत्रः कन्या स्यादार्त्तवेऽधिके। नपुंसकं तयोः साम्ये यथेच्छा पारमेश्वरी। नन्वेवं सति कथं पुत्रोत्पत्तिः सदैवार्त्तवस्यैव बाहुल्यात् यत उक्तम् “आर्त्तवं चतुरञ्जलिप्रमाणं शुक्रं प्रसृतिमात्रमिति” वाग्भटेऽप्युक्तमात्रेयादिभिः “मज्जा मेदोवसा मूत्रपित्तश्लेष्मशकृदसृक्। रसो जलं च देहेऽस्मिन्नेकैकाञ्जलिवर्द्धितम्। पृथक् च प्रसृतं प्रोक्तमोजोमस्तिष्करेतसाम्। द्वावञ्जली तु दुग्धस्य चत्वारो रजसस्तु ते। समधातोरिदं मानं विद्यात् वृद्धिक्षयावतः” इति। मैवं, यतो गर्भाशयस्थमेव शुक्रमार्त्तवं च गर्भोत्पत्तिहेतुः शुक्रं कदाचिदत्यन्तहर्षवशाद्वृष्यादिशुक्रलद्रव्यसेवनात् शुक्रबाहुल्यात् गर्भाशये बहु स्रवति कदाचिद्वैमनस्यादिना शुक्राल्पत्वादल्पमिति एवमार्त्तवमपीति न दोषः। सुश्रुतः पुनराह “वैलक्षण्याच्छरीराणामस्थायित्वात् तथैव च। दोषधातुमलानां तु परिमाणं न विद्यते”। वैलक्षण्यात् दीर्घह्रस्वकृशादिभेदेन सादृश्याभावात् अस्थायित्वात् वयोहर्निशर्त्तु भुक्तेष्वेकमात्रानवस्थानात्। एवं तामभिसङ्गम्य पुनर्मासाद्भजेदसौ” मासादूर्द्धमिति शेषः। अर्वागगमनेन गर्भद्वारविघट्टनात् गर्भच्युतिप्रसङ्गः स्यात्। केचित्, पुनः पुष्पदर्शनेन गर्भालाभनिश्चये मासात् पूर्वं गच्छेत् लब्धगर्भां तु नोपगच्छेदिति वदन्ति। तत्र परिहार्य्यपरिहारार्थं सद्योगृहीतगर्भाया लक्षणमाह शुक्रशोणितयोर्योनेरास्रावोऽस्य श्रमोद्भवः। सक्थिसादः पिपासा च ग्लानिः स्फूर्त्तिर्भगे भवेत्। अथ तस्या एवोत्तरकालीनं लक्षणमाह स्तनयोर्मुखकाष्ण्यं स्याद्रोमराज्युद्गमस्तथा। अक्षिपक्ष्माणि चाप्यस्याः संमील्यन्ते विशेषतः”।

“छर्दयेत् पथ्यभुक् चापि गन्धादुद्विजते शुभात्। प्रसेकः सदनं चैव गर्भिण्या लिङ्गमुच्यते। तत्र पुत्रगर्भवत्या लक्षणमाह पुत्रगर्भयुतायास्तु नार्य्या मासि द्वितीयके। गर्भो गर्भाशये लक्ष्यः पिण्डाकारोऽपरं शृणु। पिण्डो वर्त्तुलाकृतिः मासि द्वितीयक इत्यस्य गर्भः पिण्डाकारो लक्ष्यः इत्यनेनैवान्वयो न त्वग्रिमश्लोकेऽपि। दक्षिणाक्षिमहत्त्वं स्यात् प्राक्क्षीरं दक्षिणे स्तने। दक्षिणोरुः सुपुष्टः स्यात् प्रसन्नमुखवर्णता। पुन्नामधेयद्रव्येषु स्वप्नेष्वपि मनोरथः। आम्रादिफलमाप्नोति स्वप्नेषु कमलादि च। कन्यागर्भवतीगर्भः पेशी मासि द्वितीयके। पुत्रगर्भस्य लिङ्गानि विपरीतानि चेक्षते। पेशी दीर्घाकृतिः। नपुंसकं यदा गर्भे भवेद्गर्भोऽर्बुदाकृतिः। उन्नते भवतः पार्श्वे पुरस्तादुदरं महत्। अर्बुदं वर्त्तुलं फलार्द्धतुल्यम्।

“अपरा अपि गर्भप्रकृतीराह यदा नार्य्यावुपेयातां वृषस्यन्त्यौ कथञ्चन। मुञ्चन्त्यौ शुक्रमन्योन्यमनस्थिस्तत्र जायते। अनस्थिः अत्रेषदर्थे नञ् तेनाल्पको मलास्थिरित्यर्थः। ऋतुस्नाता तु या नारी स्वप्ने मैथुनमाचरेत्। आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि। मासि मासि प्रवर्द्धेत स गर्भो गर्भलक्षणः। कललं जायते तस्य वर्जितं पैतृकैर्गुणैः। गर्भलक्षणः प्रकृतगर्भलक्षणः। पैतृकैर्गुणैः केशश्मश्रुलोमनखदन्तशिरास्नायुधमनीरेतःप्रभृतिभिः। सर्पवृश्चिककुष्माण्डाकृतयो विकृताश्च ये। गर्भास्ते योषितस्ताश्च ज्ञेयाः पापकृतो भृशम्। गर्भो वातप्रकोपेण दोहदे चापमानिते। भवेत् कुब्जः कुणिः पङ्गुर्मूकोमिन्मिन एव च। पुत्राणामाहारचारचेष्टाभेदस्य हेतुमाह आहाराचारचेष्टाभिर्य्यादृशीभिः समन्वितौ। स्त्रीपुंसौ समुपेयातां तयोः पुत्रोऽपि तादृशः। समुपेयातां संयोगं गच्छेताम्। अथ गर्भलक्षणमाह। गर्भाशयगतं शुक्रमार्त्तवं जीवसंक्रमम्। प्रकृतिः सविकारा च तत्सर्वं गर्भसंज्ञितम्।

कालेन वर्द्धितो गर्भो यदाङ्गोपाङ्गसंयुतः। भवेत्तदा स मुनिभिः शरीरीति निगद्यते। अङ्गोपाङ्गसंयुतः व्यक्ताङ्गोपाङ्गः। तस्य त्वङ्गान्युपाङ्गानि ज्ञात्वा सुश्रुतशास्त्रतः। मस्तकादभिधीयन्ते शिष्याः शृणुत यत्नतः। आद्यमङ्गं शिरः प्रोक्तं तदुपाङ्गानि कुन्तलाः। तस्यान्तर्मस्तुलुङ्गं च ललाटं भ्रूयुगन्तथा। नेत्रद्वयं तयोरन्तर्वर्त्तिते द्वे कनीनिके। दृष्टिद्वयं कृष्णगोलौ श्वेतभागौ च वर्त्मनी। पक्ष्माण्यपाङ्गौ शङ्खौ च कर्णौ तच्छष्कुलीद्वयम्। पालिद्वयं कपोलौ च नासिका च प्रकीर्त्तिता। ओष्ठाधरौ च सृक्किण्यौ मुखं तालुहनुद्वयम्। दन्ताश्च दन्तवेष्टश्च रसना चिबुकं गलः। द्वितीयमङ्गं ग्रीवा तु यया मूर्द्धा विधार्य्यते। तृतीयं बाहुयुगलं तदुपाङ्गान्यथ ब्रुवे। तत्रोपरिगतौ स्कन्धौ प्रगण्डौ भवतस्त्वधः। कफोणियुगं तदधः प्रकोष्ठयुगलन्तथा। मणिबन्धौ तले हस्तौ तयोश्चाङ्गुलयो दश। नखाश्च दश ते स्याथा दश च्छेद्याः प्रकीर्त्तिताः। चतुर्थमङ्गं वक्षस्तु तदुपाङ्गान्यथ ब्रुवे। स्तनौ पुंसस्तथा नार्य्या विशेष उभयोरयम्। यौवनागमने नार्य्याः पीवरौ भवतः स्तनौ। गर्भवत्याः प्रसूतायास्तावेव क्षीरपूरितौ। हृदयं पुण्डरीकेण सदृशं स्यादधोमुखम्। जाग्रतस्तद्विकसति स्वपतस्तु निमीलति। आशयस्तत्तु जीवस्य चेतनास्थानमुत्तमम्। अतस्तस्मिंस्तमोव्याप्ते प्राणिनः प्रस्वपन्ति हि। चेतनास्थानमुत्तममिति अयमभिप्रायः। चेतनानामधिष्ठानं मनोदेहश्च सेन्द्रियः। केशलोमनखाग्रं च मलं द्रव्यगुणं विना" इत्युक्तवता चरकेण सकलं शरीरं चेतनास्थानमुक्तम्। तदपेक्षया हृदयं विशेषतश्चेतनास्थानमिति। कक्षयोर्वक्षसः सन्धी जत्रुणी समुदाहृते। कक्षे उभे समाख्याते तयोः स्यातां च वङ्क्षणौ। उदरं पञ्चमञ्चाङ्गं षष्ठं पार्श्वद्वयं मतम्। सपृष्ठवंशं पृष्ठं तु समस्तं सप्तमं स्मृतम्। उपाङ्गानि च कथ्यन्ते तानि जानीहि यत्नतः। शोणिताज्जायते प्लीहा वामतो हृदयादधः। रक्तवाहिशिराणां स मूलं ख्यातो महर्षिभिः। हृदयाद्वामतोऽधश्च फुस्फुसो रक्तफेनजः। अधो दक्षिणतश्चापि हृदयात् यकृतः स्थितिः। तत्तु रञ्जकपित्तस्य स्थानं शोणितजं मतम्। अधस्तु दक्षिणे भागे हृदयात् क्लोम तिष्ठति। जलवाहिशिरामूलं तृष्णाच्छादनकृन्मतम्। क्लोम तिलकम्। एतत्तु वातरक्तजम्। अत्र वृद्धवाग्भट्टः "रक्तादनिलसंयुक्तात्क्षीयकसमुद्भव इति। मेदःशोणितयोः साराद्वृक्कयोर्युगलं भवेत्। तौ तु पुष्टिकरौ प्रोक्तौ जठरस्थस्य मेदसः। उक्ताः सार्द्धास्त्रयो व्यामाः पुंसामन्त्राणि सूरिभिः। अर्द्धव्यामेन हीनानि योषितोऽन्त्राणि निर्द्दिशेत्। उण्डुकश्च कटी चापि त्रिकं वस्तिश्च वङ्क्षणौ। कण्डराणां प्ररोहः स्यात् स्थानं तद्वीर्य्यमूत्रयोः। स एव गर्भस्याधानं कुर्य्याद्गर्भाशये स्त्रियाः। शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा च कीर्त्तिता। यस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता। वृषणौ भवतः सारात्कफासृग्भ्यां च मेदसाम्। वीर्य्यवाहिशिराधारौ तौ मतौ पौरुषावहौ। गुदस्य मानं सर्वस्य सार्द्धं स्याच्चतुरङ्गुलम्। तत्र स्युर्वलयस्तिस्रः शङ्खावर्त्तनिभास्तु ताः। प्रवाहिणी भवेत्पूर्वा सार्द्धाङ्गुलमिता मता। उत्सर्जनी तु तदधः सा सार्द्धाङ्गुलसम्मिता। तस्याधः सम्वरणी स्यादेकाङ्गुलसमा मता। अर्द्धाङ्गुलप्रमाणं तु बुधैर्गुदमुखं मतम्। मलोत्सर्गस्य मार्गोऽयं पायुर्देहे विनिर्मितः। पुंसः प्रोथौ स्मृतौ यौ तु तौ नितम्बौ च योषितः। तयोः ककुन्दरे स्यातां सक्थिनी त्वङ्गमष्टमम्। तदुपाङ्गानि च ब्रूमो जानुनी पिण्डिकाद्वयम्। जङ्घे द्वे घण्टिके पार्ष्णी तले च प्रपदे तथा। पादावङ्गुलयस्तत्र दश तासां नखा दश"। अथेदं शरीरमपरेणापि येन येन समवायिकारणेनोत्पद्यते तानि सर्वाण्याह अथ दोषाः प्रवक्ष्यन्ते धातवस्तदनन्तरम्। आहारादेर्गतिस्तस्य परिणामश्च वक्ष्यते। आर्त्तवं चाथ धातूनां मलास्तदुपधातवः। आशयाश्च कलाश्चापि वर्माण्यथ च सन्धयः। शिराश्च स्नायवश्चापि धमन्यःकण्डरास्तथा। रन्ध्राणि भूरिस्रोतांसि जालैः कूर्चाश्च रज्जवः। सेवन्यश्चाथ सङ्घाताः सीमन्ताश्च तथा त्वचः। लोमानि लोमकूपाश्च देह एतन्मयो मतः"।

१०मेघस्य जलवर्षणयोग्यतासम्पादके निमित्तभेदे स च वृ॰सं॰ २१ अ॰ उक्तो यथा

"दैवविदवहितचित्तो द्युनिशं यो गर्भलक्षणे भवति। तस्य मुनेरिव वाणी न भवति मिथ्याम्बुनिर्द्देशे। किं वाऽतः परमन्यच्छास्त्रं ज्यायोऽस्ति यद्विदित्वैव। प्रध्वंसिन्यपि काले त्रिकालदर्शी कलौ भवति। केचिद्वदन्ति कार्त्तिकशुक्लान्तमतीत्य गर्भदिवसाः स्युः। न तु तन्मतं बहूनां, गर्गादीनां मतं वक्ष्ये। मार्गशिरःशुक्लपक्षप्रतिपत्प्रभृति क्षपाकरेऽषाढाम्। पूर्वां वा समुपगते गर्भाणां

लक्षणं ज्ञेयम्। यन्नक्षत्रमुपगते गर्भश्चन्द्रे भवेत् स चन्द्रवशात्। पञ्चनवते दिनशते १९५ तत्रैव प्रसवमायाति। सितपक्षभवाः कृष्णे, शुक्ले कार्ष्णा द्युसम्भवा रात्रौ। नक्तंप्रभवाश्चाहनि सन्ध्याजाताश्च सन्ध्यायाम्। मृगशीर्षाद्या गर्भा मन्दफलाः पौषशुक्लजाताश्च। पौषस्य कृष्णपक्षेण निर्दिशेच्छ्रावणस्य सितम्। माघसितोत्था गर्भाः श्रावणकृष्णे प्रसूतिमायान्ति। माघस्य कृष्णपक्षेण निर्दिशेद्भाद्रपदशुक्लम्। फाल्गुनशुक्लसमुत्था भाद्रपदस्यासिते विनिर्देश्याः। तस्यैव कृष्णपक्षोद्भवास्तु ये तेऽश्वयुक्शुक्ले। चैत्रसितपक्षजाताः कृष्णेऽश्वयुजस्य वारिदा गर्भाः। चैत्रासितसम्भूताः कार्त्तिकशुक्लेऽभिवर्षन्ति। पूर्वोद्भूताः पश्चादपरोत्थाः प्राग्भवन्ति जीमूताः। शेषास्वपि दिक्ष्वेवं विपर्ययो भवति वायोश्च। ह्लादिमृदूदक्छिवशक्रदिग्भवो मारुतो वियद्विमलम्। स्निग्धसितबहुलपरिवेषपरिवृतौ हिममयूखार्कौ। पृथुबहुलस्निग्धघनं घनसूचीक्षुरकलोहिताभ्रयुतम्। काकाण्डमेचकाभं वियद्विशुद्धेन्दुनक्षत्रम्। सुरचापमन्द्रगर्जितविद्युत्प्रतिसूर्यकाः शुभा सन्ध्या। शशिशिवशक्राशास्थाः शान्तरवाः पक्षिमृगसङ्घाः। विपुलाः प्रदक्षिणचराः स्निग्धमयूखा ग्रहा निरुपसर्गाः। तरवश्च निरुपसृष्टाङ्कुरा नरचतुष्पदा हृष्टाः। गर्भाणां पुष्टिकराः सर्वेषामेव योऽत्र तु विशेषः। स्वर्त्तुस्वभावजनितो गर्भविवृद्ध्यै तमभिधास्ये। पौषे समार्गशीर्षे सन्ध्यारागोऽम्बुदाः सपरिवेषाः। नात्यर्थं मृगशीर्षे शीतं पौषेऽतिहिमपातः। माघे प्रबलो वायुस्तुषारकलुषद्युती रविशशाङ्कौ। अतिशीतं सघनस्य च भानोरस्तोदयौ धन्यौ। फाल्गुनमासे रूक्षश्चण्डः पवनोऽभ्रसम्प्लवाः स्निग्धाः। परिवेषाश्चासकलाः कपिलस्ताम्रो रविश्च शुभः। पवनघनवृष्टियुक्ताश्चैत्रे गर्भाः शुभाः सपरिवेषाः। घनपवनसलिलविद्युत्स्तनितैश्च हिताय वैशाखे। मुक्तारजतनिकाशास्तमालनीलोत्पलाञ्जनाभासः। जलचरसत्त्वाकारा गर्भेषु घनाः प्रभूतजलाः। तीव्रदिवाकरकिरणाभितापिता मन्दमारुता जलदाः। रुषिता इव धाराभिर्विसृजन्त्यम्भः प्रसवकाले। गर्भोपघातलिङ्गान्युल्काशनिपांशुपातदिग्दाहाः। क्षितिकम्पखपुरकीलककेतुग्रहयुद्धनिर्घाताः। रुधिरादिवृष्टिवैकृतपरिघेन्द्रधनूंषि दर्शनं राहोः। इत्युत्पातैरेभिस्त्रिविधैश्चान्यैर्हतो गर्भः। स्वर्त्तुस्वभावजनितैः सामान्यैर्यैश्च लक्षणैर्वृद्धिः। गर्भाणां विपरीतैस्तैरेव विपर्ययो भवति। भाद्रपदाद्वयविश्वाम्बुदैवपैतामहेष्वथर्क्षेषु। सर्वेष्वृतुषु विवृद्धो गर्भो बहुतोयदो भवति। शतभिषगाश्लेषार्द्रास्वातिमघासंयुतः शुभो गर्भः। पुष्णाति बहून्दिवसान् हन्त्युत्पातैर्हतस्त्रिविधैः। मृगमासादिष्वष्टौ षट् षोडश विंशतिश्चतुर्युक्ता। विंशतिरथ दिवसत्रयमेकतमर्क्षेण पञ्चभ्यः। क्रूरग्रहसंयुक्ते करकाशनिमत्स्यवर्षदा गर्भाः। शशिनि रवौ वा शुभसंयुतेक्षिते भूरिवृष्टिकराः। गर्भसमयेऽतिवृष्टिर्गर्भाभावाय दुर्निमित्तकृता। द्रोणाष्टांशेऽभ्यधिके वृष्टे गर्भः स्रुतो भवति। गर्भः पुष्टः प्रसवे ग्रहोपघातादिभिर्यदि न वृष्टः। आत्मीयगर्भसमये करकामिश्रं ददात्यम्भः। काठिन्यं याति यथा चिरकालधृतं पयः पयस्विन्याः। कालातीतं तद्वत् सलिलं काठिन्यमुपयाति। पञ्चनिमित्तैः शतयोजनं तदर्धार्धमेकहान्यातः। वर्षति पञ्च समन्ताद्रूपेणैकेन यो गर्भः। द्रोणः पञ्चनिमित्ते गर्भे त्रीण्याढकानि पवनेन। षड् विद्युता नवाभ्रैः स्तनितेन द्वादश प्रसवे। पवनसलिलविद्युद्गर्जिताभ्रान्वितो यः स भवति बहुतोयः पञ्चरूपाभ्युपेतः। विसृजति यदि तोयं गर्भकालेऽतिभूरि प्रसवसमयमित्वा शीकराम्भः करोति”।

“गर्भोऽभवत् भूधरराजपत्न्याः” कुमा०। “नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी” रघुः। “गर्भो जरायुणावृत उल्वं जहाति जन्मना” यजु०१९।७६। “यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्” गीता। कुक्षिश्च गर्भाशयस्थानम्। तत्र “गर्भे यदि विपत्तिः स्यात् दशाहं सूतकी भवेत्” शु०त० “कुन्त्या गर्भेण धारितः” भा०स० ११७अ०। “देहादुत्क्रमणं चास्मात् पुनर्गर्भे च सम्भवम्” मनुः। आधारे अभन्। ११गर्भारम्भकाले “गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम्” मनुः। “तस्मात् गर्भान्विते कुम्भे पतिसौभाग्यवर्द्धिनी” उ०त०। १२अभ्यन्तरे “तासां मुखैरासवगन्धगर्भैः” “स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि” “आविर्भूतकुशगर्भमुखं मृगाणाम्” “निधानगर्भामिव सागराम्बराम्” रघुः। “भक्ष्ये माञ्च मधुरसितगर्भाः” सा०द०। “नष्टो न दृश्यते यत्र शमीगर्भे हुताशनः” भा० शा० ४८ अ०। जलोत्पादकगर्भे “अष्टमासधृतं गर्भं भास्करस्य गभस्तिभिः। रसं सर्वं समुद्राणां द्यौः प्रसूते रसायनम्” रामा० कि० २७ अ०। तस्याष्टमासधृतत्वञ्च मनूक्तं

यथा "अष्टौ मासान् यथादित्यस्तोयं हरति रश्मिभिः" मनुः। गर्भोत्पन्ने पुत्रे "अस्यास्त्वामष्टमो गर्भो हन्ता, यां वहसेऽबुध!" भाग०१०।१।२४। "देवक्या जठरे गर्भं शेषाख्यं धाम मामकम्" भाग० १०।४।७। नाटकसन्धिभेदश्च सा०द०उक्तो यथा "अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति" सन्धिं लक्षयित्वा "मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः। इति पञ्चास्य भेदाः स्युः" इति तं पञ्चधा विभज्य "फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन। गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान् मुहुः" तल्लक्षणमुक्त्वा तस्य गर्भशब्दार्थत्वे युक्तिप्रदर्शनमुखेन उदाहृतं यथा

"फलस्य गर्भीकरणाद्गर्भः। यथा रत्नावल्यां द्वितीयेऽङ्के "सुसङ्गता सहि अदक्खिणा दाणिं सि तुमं, जा एवं भट्टिणा हत्थेण गहिदावि कोवं ण मुञ्चसी" इत्यादौ समुद्भेदः। पुनर्वासवदत्ताप्रवेशे ह्रासः। तृतीयेऽङ्के "तद्वार्त्तान्वेषणाय गतः कथञ्चिरयति वसन्तकः" इत्यन्वेषणम्। "विदू। ही ही भो भो कोसम्बीरज्जलम्भेणावि ण तारिसो पिअवअस्सस्स परितोसो जादिसो मम सआसादो पिअवअणं सुणिअ भविस्सदि" इत्यादौ उद्भेदः। पुनरपि वासवदत्ताप्रत्यभिज्ञानात् ह्रासः। पुनः सागरिकायाः सङ्केतस्थानगमने अन्वेषणम्। पुनर्लतापाशकरणे उद्भेदः।

"यत्र मुख्यस्य नोपाय उद्भिन्नोगर्भतोऽधिकः" सा० द०। गर्भो जातोऽस्य तारका० इतच्। गर्भित जातगर्भे काव्यदोषभेदे च। दोषशब्दे दृश्यम्। सगर्भ्यः।

गर्भक पु० गर्भे केशमध्ये कायति कै—क। १केशमध्यस्थे माल्ये अमरः। गर्भ+संज्ञायां कन्। २रात्रिद्वये न० हेमच०।

गर्भंकर पु० गर्भं करोति निष्पादयति सेवनेन कृ—ट। १पुत्रजीववृक्षे भावप्र०। २गर्भकारके त्रि०।

गर्भकार पु० गर्भं करोति कृ—ण्वुल्। १गर्भाधानकारके पत्यादौ। गर्भे मध्ये कारः स्तवनकर्म्मणि वैराजस्य यत्र। रथन्तरस्तोमयोर्मध्ये वैराजपाठरूपे २स्तोमभेदे न०। "गर्भकारन्त्वेव स्तुवीरंस्तथैव स्तोत्रियानुरूपान्" आश्व० श्रौ० ८।५। "शंसेदिति शेषः। रथन्तरेणाग्रे ततो वैराजेन ततो रथन्तरेण। अनेन गर्भकारस्वरूपमुच्यते" नारा० वृ०। "इडवैराजाभ्यां वैकम्" ६ सू०। "एवमेव गर्भकारमेवेत्यर्थः" नारा०वृ०।

गर्भकोष पु० गर्भस्य कोष आधार इव। गर्भाशये। "गर्भकोषसमासङ्गोमक्कल्लो योनिसंवृतिः। हन्यात् स्त्रियं मूढगर्भे यथोक्ताश्चाप्युपद्रवाः" सुश्रुतः।

गर्भगृह न० गर्भ इव मध्यस्थं गृहम्। गृहमध्यभागे। "वासागारविमानेषु तथा गर्भगृहेषु च" भा०उ०११७अ०। "कान्ता गर्भगृहे गवाक्षविवरव्यापारिताक्ष्या बहिः सख्या" सा० द०। गर्भभवनादयोऽप्यत्र। "निर्गत्य गर्भभवनात्" मालतीमा०। [वृत्ते रत्नमा०।

गर्भघातिनी स्त्री गर्भं हन्ति हन—णिनि। लाङ्गलिका-

गर्भच्युति स्त्री ६त०। गर्भस्रावे तत्कारणादि सुश्रुते उक्तं यथा

"ग्राम्यधर्म्मयानवाहनाध्वगमनप्रस्खलनप्रपतनप्रपीडनधावनाभिघातविषमशयनासनोपवासवेगाभिघातातिरूक्षकटुतिक्तभोजनशाकातिक्षारसेवनातिसारवमनविरेचनप्रेङ्खोलनाजीर्णगर्भशातनप्रभृतिभिर्विशेषैर्बन्धनान्मुच्यते गर्भः फलमिव वृन्तबन्धनादभिघातविशेषैः। स विमुक्तबन्धनो गर्भाशयमतिक्रम्य यकृत्प्लीहान्त्रविवरैरवस्रंसमानः कोष्ठसङ्क्षोभमापादयति तस्या जठरसङ्क्षोभाद्वायुरपानो मूढः पार्श्ववस्तिशीर्षोदरयोनिशूलानाहमूत्रसङ्गानामन्यतममापाद्य गर्भं व्यापादयति तरुणं शोणितस्रावेण, तमेव कदाचिद्विवृद्धमसम्यगागतमपत्यपथमनुप्राप्तमनिरस्यमानमपानवैगुण्यसंमोहितं गर्भं मूढगर्भमित्याचक्षते। ततः स कीलः प्रतिखुरो बीजकः परिघ इति। तत्र ऊर्द्ध्वबाहुशिरःपादो यो योनिमुखं निरुणद्धि कील इव स कीलः। निःसृतहस्तपादशिराः कायसङ्गी प्रतिखुरः। यस्तु निर्गच्छत्येकशिरोभुजः स बीजकः। परिघ इव योनिमुखमावृत्य तिष्ठेत् स परिघ इति चतुर्विधो भवतीत्येके भाषन्ते तत्तु न सम्यक् कस्मात् स यदा विगुणानिलप्रपीडितोऽपत्यपथमनेकधा प्रतिपद्यते तदा सङ्ख्या हीयते। तत्र कश्चित् द्वाभ्यां सक्थिभ्यां योनिमुखं प्रतिपद्यते कश्चिदाभुग्नैकसक्थिरेकेन, कश्चिदाभुग्नसक्थिशरीरः स्फिग्देशेन तिर्य्यगागतः। कश्चिदुरःपार्श्वपृष्ठानामन्यतमेन योनिद्वारं पिधायावतिष्ठते। अन्तःपार्श्वापवृत्तशिराः कश्चिदेकेन बाहुना। कश्चिदाभुग्नशिरा बाहुद्वयेन। कश्चिदाभुग्नमध्यो हस्तपादशिरोभिः। कश्चिदेकेन सक्थ्ना योनिमुखमाभप्रतिपद्यतेऽपरेण पायुमित्यष्टविधा मूढगर्भगतिरुद्दिष्टाः समासेन। तत्र द्वावन्त्यावसाध्यौ मूढगर्भौ शेषानपि विपरीतेन्द्रियार्थाक्षेपकयोनिभ्रंशसंवरणमक्कल-

श्वासकासश्रमनिपीडितान् परिहरेत्। भवन्ति चात्र। कालस्य परिणामेन मुक्तं वृन्ताद्यथा फलम्। प्रवर्त्तते स्वभावेन नान्यथा पतितुं फलम्। एवं कालप्रकर्षेण मुक्तो नाडीनिबन्धनात्। गर्भाशयस्थो यो गर्भो जननाय प्रपद्यते। क्रिमिवाताभिघातैस्तु तदेवोपद्रुतं फलम्। पतत्यकालेऽपि यथा तथा स्याद्गर्भविच्युतिः। आ चतुर्थात्ततो मासात्प्रस्रवेद्गर्भविच्युतिः। ततः स्थिरशरीरस्य पातः पञ्चमषष्ठयोः। प्रविध्यति शिरो या तु शीताङ्गी निरपत्रपा। नीलोद्गतसिरा हन्ति सा गर्भं स च तां तथा। गर्भास्पन्दनमावीनां (गर्भवतीनाम्) प्रणाशः श्यावपाण्डुता। भवत्युच्छ्वासपूतित्वं शूलं चान्तर्गते शिशौ। मानसागन्तुभिर्मातुरुपतापैः प्रपीडितः। गर्भो व्यापद्यते कुक्षौ व्याधिभिश्च प्रपीडितः। वस्तमारविपन्नायाः कुक्षिः प्रस्पन्दते यदि। तत्क्षणाज्जन्मकाले तं पाटयित्वोद्धरेद्भिषक्।"

गर्भविच्युति गर्भपतनादयोऽप्यत्र। (गाँड़) त्रिका°।

गर्भाण्ड पु° गर्भस्याण्ड इव शब्द°। नाभिगुड़के (नाभिर-

गर्भद पु° गर्भं ददाति सेवनेन दा–क। १पुत्रजीववृक्षे राजनि°। २गर्भसम्पादके औषधभेदे च।

गर्भदात्री स्त्री गर्भं ददाति दा–तृच् ङीप्। तापसद्रुमसमानपत्रायामपत्यदायामोषधिभेदे राजनि°। "अपत्यदा तु मधुरा शीतला पित्तदाहनुत्। नारीपुष्पादिदोषघ्नी श्रमनाशिनी। गर्भसम्भवदात्री च सेवनात् परिकीर्त्तिता" राजनि°।

गर्भदास पु° गर्भात् गर्भमारभ्य दासः। गृहजातदास्यामुत्पन्ने दासभेदे। "शूद्रस्य दानं वा दर्शनाविरोधाभ्याम्" कात्या°श्रौ°२२।१।११। कर्क° व्याख्यायां "शूद्रस्य दानं भवति दृश्यते हि दानं पुरुषमेधे। "सपुरुषं प्राचीदिश होतुः" शत°ब्रा° १३।६।२।११। "न च विरोधो गर्भदासस्य" कर्कः।

गर्भध न° गर्भं दधाति धा–क। रेतसि। "आऽहमजानि गर्भधमा त्वमजासि गर्भधम्" यजु° २३।१९। "गर्भधं गर्भधारकं रेतः" वेददी°।

गर्भधारण न° ६त°। अपत्योत्पादनार्थं शुक्रशोणितानुबन्धरूपगर्भग्रहणे। तद्धारणचिह्नञ्च मिताक्षरायां दर्शितं यथा "गर्भधारणञ्च श्रमादिभिर्लिङ्गैरवगन्तव्यं तथाच श्रुतिः "सद्योगृहीतगर्भायाः श्रमो ग्लानिः पिपासा अवसक्त्रा निषदनं शुक्रशोणितयोरनुबन्धः स्फुरणञ्च योन्याः" गर्भशब्ददर्शिते भावप्र° वाक्ये विवृतिः। तद्धारणाय विधिः आ° त° दर्शितो यथा "पुत्रानुत्पत्तौ पारस्करः"सा यदि गर्भं नादधीत निदिग्धिकायाः सिंह्याः श्वेतपुष्प्यायाः उपोष्य पुष्येण मूलमुद्धृत्य चतुर्थेऽहनि स्नातायां निशायामुदकेन पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चतीति "इयमोषधी त्रायमाणा सहमाना सरस्वती। अस्या अहं पुत्रः पितुरिव नाम जनयत्वभित इति" "सा परिणीता ऋतुकाले कृताभिगमना यदि गर्भं न धारयति तदा उपोष्य पुष्ये नक्षत्रे श्वेतकण्टकारिकाया मूलमुत्पाट्य चतुर्थेऽहनि ऋतुस्नातायाः पत्न्या रात्रावुदकेन दक्षिणनासापुटे पतिरियमोषधी त्रायमाणा, इति मन्त्रेण सिञ्चति नस्यं दधाति दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा प्राक्शिरःसंविष्टायाः इति। आयुर्वेदीयेऽपि। "पिप्पल्यः शृङ्गवेरञ्च मरिचं नागकेशरम्। आज्येन सह भुञ्जीत अपि बन्ध्या प्रसूयते"। "गर्भधारणजं वाऽपि न खेदं समवाप्स्यसि" भा° व° १२६ अ°।

गर्भनुद् पु° गर्भं नुदति नुद–क्विप्। कलिकार्य्यां वृक्षे (विषलाङ्गला) भावप्र°।

गर्भपाकिन् पु° गर्भस्य पाको पुष्टिः साध्यत्वेनास्त्यस्य इनि। षष्टिधान्ये (षेटेरा धान) हेमच°। यथा च तस्य गर्भपोषकत्वम् तथा गर्भपोषणशब्दे वक्ष्यते।

गर्भपात पु° ६त°। गर्भस्रावे स तु पञ्चमादिमासस्यैव कठिनशरीरस्य भवति तत्प्रमाणं गर्भच्युतिशब्दे दृश्यम्।

गर्भपातक पु° गर्भं पातयति सेवनात् पत–णिच्–ण्वुल्। रक्तशोभाञ्जने जटा°।

गर्भपातन पु° गर्भं पातयति पाति–ल्यु। १रीठावृक्षे भावप्र° गौरा° ङीष्। २कलिकारीवृक्षे स्त्री राजनि°।

गर्भपातिनी स्त्री गर्भं पातयति–पत–णिच्–णिनि ङीप्। विशल्यावृक्षे जटाधरः।

गर्भपोषण न°६त°। गर्भस्य पुष्टिसम्पादके विधौ स च सुश्रुते दर्शितः यथा "गर्भिणी प्रथमदिवसात् प्रभृति नित्यं प्रहृष्टा शुच्यलङ्कृता शुक्लवसना शान्तिमङ्गलदेवताब्राह्मणगुरुपरा च भवेन्मलिनविकृतहीनगात्राणि न स्पृशेद्दुर्गन्धदुर्दर्शनानि परिहरेदुद्वेजनीयाश्च कथाः, शुष्कं पर्य्युषितं कुथितं क्लिन्नं चान्नं नोपभुञ्जीत बहिर्निष्क्रमणं शून्यागारचैत्यश्मशानवृक्षाश्रयान् क्रोधभयसङ्करांश्च भाराद्युच्चैर्भाष्यादिकं परिहरेद्यानि च गर्भं व्यापादयन्ति

नचाभीक्ष्णं तैलाभ्यङ्गोत्सादनादीनि निषेवेत नचायासयेच्छरीरं पूर्वोक्तानि च परिहरेत्। शयनासनं मृद्वास्तरणं नात्युच्चमपाश्रयोपेतमसंबाधं विदध्यात्। हृद्यं द्रवं मधुप्रायं स्निग्धं दीपनीयसंस्कृतञ्च भोजनं भोजयेत् सामान्यमेतदा प्रसवात्। विशेषतस्तु गर्भिणी प्रथमद्वितीयतृतीयमासेषु मधुरशीतद्रवप्रायमाहारमुपसेवेत। विशेषतस्तु तृतीये षष्टिकौदनं पयसा भोजयेच्चतुर्थे दध्ना पञ्चमे पयसा षष्ठे सर्पिषा चेत्येके। चतुर्थे पयोनवनीतसंसृष्टमाहारयेज्जाङ्गलमांससहितं हृद्यमन्नं भोजयेत्। पञ्चमे क्षीरसर्पिःसंसृष्टं षष्ठे श्वदंष्ट्रासिद्धस्य सर्पिषोमात्रां पाययेद्यवागूं वा। सप्तमे सर्पिः पृश्निपर्ण्यादिसिद्धम् एवमाप्याय्यते गर्भः। अष्टमे वदरोदकेन वलातिवलाशतपुष्पपललपयोदधिमस्तुतैललवणमदनफलमधुघृतमिश्रेणास्थापयेत् पुराणपुरीषशुद्ध्यर्थमनुलोमनार्थञ्च वायोः। ततः पयोमधुरकषायसिद्धेन तैलेनानुवासयेदनुलोमे हि वायौ सुखं प्रसूयते निरुपद्रवा च भवति। अत ऊर्द्ध्वं स्निग्धाभिर्यवागूभिर्जाङ्गलरसैश्चोपक्रमेदाप्रसवकालादेवमुपक्रान्ता स्निग्धा बलयती सुखमनुपद्रवा प्रसूयते" विधानपारि॰ तत्पोषणविधिर्मन्त्रभेदपूर्वको दर्शितो विस्तरभयान्नोक्तस्तत्रैवावसेयः।

गर्भप्रसव पु॰ ६त॰। गर्भस्य तत्स्थशिशोः प्रथमप्रकाशनरूपे दर्शनयोग्यतापादनरूपकर्मभेदे तत्र कालश्च "नवमे दशमे मासि प्रबलैः सूतिमारुतैः। निःसार्य्यते वाण इव जन्तुश्छिद्रेण सज्वरः" याज्ञ॰उक्तः। तद्विधानं सुश्रुते दर्शितं यथा।

"नवमे मासि सूतिकागारमेनां प्रवेशयेत् प्रशस्ततिथ्यादौ तत्रारिष्टं ब्राह्मणक्षत्रियवैश्यशूद्राणां श्वेतरक्तपीतकृष्णेषु भूमिप्रदेशेषु विल्वन्यग्रोधतिन्दुकभल्लातकनिर्मितं सर्वागारं यथासङ्ख्यं तन्मयपर्य्यङ्कमुपलिप्तभित्ति सुविभक्तपरिच्छदं प्राग्द्वारं दक्षिणद्वारं वाष्टहस्तायतचतुर्हस्तविस्तृतं रक्षामङ्गलसम्पन्नं विधेयम्। जाते हि शिथिले कुक्षौ मुक्ते हृदयबन्धने। सशूले जघने नारी ज्ञेया सा तु प्रजायिनी। तत्रोपस्थितप्रसवायाः कटीपृष्ठं प्रति समन्ताद्वेदना भवत्यभीक्ष्णं पुरीषप्रवृत्तिर्मूत्रं प्रसिच्यते योनिमुखात् श्लेष्मा च। प्रजनयिष्यमाणां कृतमङ्गलामुष्णोदकपरिषिक्तामथैनां कुमारपरिवृतां पुन्नामफलहस्तां स्वभ्यक्तामुष्णोदकपरिषिक्तामथैनां सम्भृतां यवागूमाकण्ठात् पाययेत्। ततः कृतोपधाने मृदुविस्तीर्णे शयने स्थितामाभुग्नसक्थीमुत्तानामशङ्कनीयाश्चतस्रः स्त्रियः परिणतवयसः प्रजननकुशलाः कर्त्तितनखाः परिचरेयुरिति। अथास्या विशिखान्तरमनुलोममनुसुखमभ्यज्याद् ब्रूयाच्चैनामेका सुभगे!" प्रवाहयस्वेति न चाप्राप्तावीं (अप्राप्तप्रसववेदनाम्) प्रवाहयस्व ततो विमुक्ते गर्भनाडीप्रबन्धे सशूलेषु श्रोणिवङ्क्षणवस्तिशिरःसु प्रवाहयेथाः शनैः शनैः। ततो गर्भनिर्गमे प्रगाढं, ततो गर्भे योनिमुखं प्रपन्ने गाढतरमा विशल्यभावात्। अकालप्रवाहणाद्बधिरं मूकं व्यस्तहनुं मूर्द्धाभिघातिनं कासश्वासशोषोपद्रुतं कुब्जं विकटं वा जनयति। तत्र प्रतिलोममनुलोमयेत्। गर्भसङ्गे तु योनिं धूपयेत् कृष्णसर्पनिर्मोकेण पिण्डीतकेन वा। बध्नीयाद्धिरण्यपुष्पीमूलं हस्तपादयोर्धारयेत् सुवर्च्चलां विशल्यां वा। अथ जातस्योल्वं मुखस्य सैन्धवसर्पिषा विशोध्य घृताक्तं मूर्द्ध्नि पिचुं दद्यात्ततो नाभिनाडीमष्टाङ्गुलायामसूत्रेण बद्ध्वा छेदयेत्तत्सूत्रैकदेशञ्च कुमारस्य ग्रीवायां सम्यग्बध्नीयात्। अथ कुमारं शीताभिरद्भिराश्वास्य जातकर्म्मणि कृते मधुसर्पिरनन्ताब्राह्मीरसेन सुवर्णचूर्णमङ्गुल्यानामिकया लेहयेत्ततोवलातैलेनाभ्यज्य क्षीरवृक्षकषायेण सर्वगन्धोदकेन वा रूप्यहेमप्रतप्तेन वा वारिणा स्नापयेदेनं कपित्थपत्रकषायेण वा कोष्णेन यथाकायं यथादोषं यथाविभवञ्च। धमनीनां हृदिस्थानां विवृतत्वादनन्तरम्। चतूरात्रात्त्रिरात्राद्वा स्त्रीणां स्तन्यं प्रवर्त्तते। तस्मात्प्रथमेऽह्नि मधुसर्पिरनन्तामिश्रं मन्त्रपूतं त्रिकालं पाययेद्द्वितीये लक्ष्मणासिद्धं सर्पिस्तृतीये च। ततः प्राङ्निवारितस्तन्यं मधुसर्पिः स्वपाणितलसम्मितं द्विकालं काशयेत्"।

गर्भभर्म्मन् न॰गर्भस्य शिशोः भर्म्म भरणं भृ—भावे मनिन्। कुमारभृत्याकर्मणि तद्विधानादि सुश्रुतोक्तं कुमारभृत्याशब्दे दर्शितम्। "कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथ गर्भभर्म्मणि" रघुः।

गर्भमास पु॰गर्भस्य तदारम्भस्य मासः तत्सहितो मासः। १गर्भारम्भमासे २गर्भसहिते मासे च "यदि नाधीयात् तृतीये गर्भमासे" आश्व॰ गृ॰ १।१३।२। "गर्भसहितो मासः गर्भमास" इति नारा॰। ३गर्भमाससंख्यमासे च गर्भस्रावशब्दे दृश्यम्।

गर्भयोषा स्त्री गर्भार्था योषा। गर्भस्थानीयायां स्त्रियाम् "इयं गङ्गेति नियतं प्रतिष्ठा गुहस्य रुक्मस्य च गर्भ-

"योषा" भारते आनुशासनिकपर्वणि २अध्याये ।

गर्भलक्षण न० गर्भो लक्ष्यतेऽनेन लक्ष–करणे ल्युट् । गर्भसूचकचिह्नभेदे भावप्रकाशोक्तं गर्भशब्दे तल्लक्षणमुक्तम्

गर्भलम्भन न०गर्भोऽमोघवीर्य्यतया लभ्यतेऽनेन लभ–ल्युट् मुम् च । निषिक्तवीर्य्यस्यामोघतासम्पादनार्थे क्रियाभेदे"उपनिषदि गर्भलम्भनं पुंसवनमनवलोभनञ्च" आश्व० गृ०१। १३।१ । "आम्नातमिति शेषः गर्भो लभ्यते येन कर्म्मणा निषिक्तं वीर्य्यममोघं भवति" नारा० ।

गर्भवती स्त्री गर्भो विद्यतेऽस्याः मतुप् मस्य वः । आपन्नगर्भायां स्त्रियाम् शब्दरत्ना० तस्या लक्षणं तत्परिहार्य्यञ्च कायशब्दोक्तसुश्रुतवाक्ये १९२१पृ० दृश्यम् । लब्धगर्भाया गर्भस्थैर्य्यकारिविधिभेदः सुश्रुते उक्तो यथा

"लब्धगर्भायाश्चैतेष्वहःसु लक्ष्मणावटशुङ्गासहदेवाविश्वदेवानामन्यतमं क्षीरेणाभिषुत्य त्रींश्चतुरो वा बिन्दून् दद्याद्दक्षिणे नासापुटे पुत्रकामायै नच तान्निष्ठीवेत् । ध्रुवश्चतुर्णां सान्निध्याद्गर्भः स्याद्विधिपूर्वकः । ऋतुक्षेत्राम्बुबीजानां सामग्र्यादङ्कुरो यथा । एवं जाता रूपवन्तो महासत्त्वाश्चिरायुषः । भवन्त्यृणस्य मोक्तारः सत्पुत्राः पुत्रिणे हिताः" । शिशौ वर्णभेदहेतुरपि तत्रोक्तः तत्र तेजोधातुः सर्ववर्णानां प्रभवः स यदा गर्भोत्पत्तावब्धातुप्रायो भवति तदा गर्भं गौरं करोति पृथिवीधातुप्रायः कृष्णं, पृथिव्याकाशप्रायः कृष्णश्यामं, तोयाकाशधातुप्रायो गौरश्यामम् । यादृग्वर्णमाहारमुपसेवते गर्भिणी तादृग्वर्णप्रसवा भवतीत्येके भाषन्ते । तत्र दृष्टिभागमप्रतिपन्नं तेजो जात्यन्धं करोति । तदेव रक्तानुगतं रक्ताक्षं, पित्तानुगतं पिङ्गाक्षं,श्लेष्मानुगतं शुक्लाक्षं,वातानुगतं विकृताक्षमिति" "दशैव मासान् बिभ्रति गर्भवत्यः" भा० व० १३४अ० ।

गर्भवसति स्त्री गर्भः कुक्षिरेव वसतिः। कुक्षिरूपे स्थाने "स तत्र गर्भवसतौ वसत्यात्मेच्छया हरिः" हरिवं०६०अ०।

गर्भवास पु० वसत्यस्मिन् वासः वासस्थानं गर्भ एव वासः। १कुक्षिरूपस्थाने "असकृत् गर्भवासेषु वासं जन्म च दारुणम्" मनुः । वस–भावे घञ् ७त०। २कुक्षौ वासे च ।

गर्भव्यूह पु० गर्भ इव गूढो व्यूहः । व्यूहभेदे युद्धार्थसैन्यनिवेशनभेदे । "पश्चाद्वै तस्य पद्मस्तु गर्भव्यूहः सुदुर्भिदः । सूचीपद्मस्य गर्भस्थो गूढो व्यूहः कृतः पुनः" भा० द्रो० २७ अ० । स च पद्माकारः ।

गर्भशय्या स्त्री गर्भस्य शय्येव स्थानम् । "शङ्खनाभ्याकृतियोनिस्त्र्यावर्त्ता सा च कीर्त्तिता । तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता" भावप्र०उक्ते गर्भोत्पत्तिस्थाने । "शिशुरधिकवया गर्भशय्यां गतो वा" इति वेणीसंहारः ।

गर्भसंक्रमण न० गर्भे संक्रमणं अन्यदेहपरित्यागेन देहान्तरोपादनार्थं प्रवेशनम् । देहाद्देहान्तरग्रहणाय कुक्षिप्रवेशनरूपे जन्मनि । "गर्भसंक्रमणे चापि कर्मणामभिसर्पणे । तादृशीमेव लभते वेदनां मानवः पुनः" भा० आश्व० १७ अ० ।

गर्भसमय पु० ६त० । गर्भकाले स च ऋतुस्नानोत्तरपुंयोगकालः दृष्टार्त्तवायमेवगर्भकालश्च। स च गर्भशब्दे बृ०सं० वाक्येन दर्शितः "गर्भसमयेऽतिवृष्टिर्गर्भाभावाय दुर्निमित्तकृता" बृ० सं० ।

गर्भस्राव पु० स्रु–घञ् ६त० । प्रसूतिकालात् पूर्वं रोगादिना गर्भस्य पतने । गर्भच्युतिशब्दे विवृतिः। तत्राशौचनिर्णयः "रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति" मनुः । कूर्मपुराणम् "अर्वाक् षण्मासतः स्त्रीणां यदि स्यात् गर्भसंस्रवः । तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते । अत ऊर्द्धन्तु पतने स्त्रीणां स्याद्दशरात्रकम् । सद्यःशौचं सपिण्डानां गर्भस्रावाच्च वा ततः । गर्भच्युतावहोरात्रं सपिण्डेऽत्यन्तनिर्गुणे । यथेष्टाचरणे ज्ञातौ त्रिरात्रमिति निश्चयः" । दशरात्रकमिति स्वस्वजात्युक्ताशौचकालपरम् । तथा आदित्यपुराणम् "षण्मासाभ्यन्तरं यावत् गर्भस्रावो भवेद् यदि । तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते । अत ऊर्द्धं स्वजात्युक्तमशौचं तासु विद्यते" । गर्भस्रावाच्च वा तत इति तच्छब्देन सन्निधानादत ऊर्द्धमित्युक्तषण्मासोत्तरकालः परामृश्यते । षण्मासोपरि सगुणानां सद्यः, निर्गुणानामेकाहः, अत्यन्तनिर्गुणयथेष्टाचरणज्ञातीनां त्रिरात्रम्" शु०त०। अशौचव्यवस्था अशौचशब्दे४८६पृ०उक्ता

गर्भस्राविन् पु० गर्भं स्रावयति स्रु–णिच्–णिनि । हिन्तालवृक्षे । राजनि० ।

गर्भागार न० गर्भ इवागारम् । १गृहमध्यभागे वासगृहे । गर्भ एवागारम् ।२गर्भस्थाने अमरः। ३गर्भाशये राजनि०।

गर्भाधान न० गर्भ आधीयतेऽनेन कर्मणा आ+धा–करणे ल्युट् । गर्भरूपपात्रसंस्कारकर्म्मणि तत्र विहितनक्षत्रादिकालभेदास्तद्विधानानि च सं०त०उक्तानि यथा

"अथ गर्भाधानम् । गोभिलः "यदा ऋतुमती भवति उपरतशोणिता तदा सम्भवकालः" ऋतुः प्रजाजनन-

योग्यकालः तन्निमित्तेन नैमित्तिकं गमनं कार्य्यम् अकुर्वतः प्रत्यवायाच्चियमः "ऋतुमतीन्तु यो भार्य्यां सन्निधौ नोपसर्पति । अवाप्नोति स मन्दात्मा भ्रूणहत्यामृतावृतौ" इति स्मृतेः। ज्योतिषे "ज्येष्ठा मूला मघाश्लेषा रेवती कृत्तिकाश्विनी । उत्तरात्रितयं त्यक्त्वा पर्व्ववर्ज्जं व्रजेदृतौ" विष्णुपु० "चतुर्दश्यष्टमी चैव अमावास्याथ पूर्णिमा । पर्व्वाण्येतानि राजेन्द्र ! रविसंक्रान्तिरेव च । स्त्रीतैलमांससम्भोगी विण्मूत्रनरकं व्रजेत्" । याज्ञ० "षोड़शर्त्तुनिशास्त्रीणां तासु युग्मासु संविशेत् । अत्र षोड़शाहोरात्रात्मककालस्य सावनत्वात् पुंसवननामकरणयोरपि सावनगणनायायुक्तत्वाच्च संस्कारमात्रे सावनगणना । तथा व्यवहारस्य तथा च याज्ञवल्क्यः "गर्भाधानमृतौ पुंसः सवनं स्पन्दनात् पुरा । षष्ठेऽष्टमे वा सीमन्तः प्रसवे जातकर्म्म च । अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः । षष्ठेऽन्नप्राशनं मासि चूड़ा कार्य्या यथाकुलम् । एवमेनः शमं याति वीजगर्भसमुद्भवम्" । "चतुर्थे स्पन्दते ततः" इति वचनात् स्पन्दनात् पूर्व्वमासत्रयं पुंसवनकालः । अत्र चतुर्थमासस्य सौरत्वे चान्द्रत्वे वा निषेकमासस्यापि तथात्वे तदाद्यन्तदिननिषेके सति अधिकन्यूनकालयोगे गर्भस्पन्दनमनियतमापद्येत सावने तु नियतं तेनात्र सावनगणना युक्ता योषिद्व्यवहारप्रसिद्धा च । "अहन्येकादशे नाम" इत्यत्रापि "अशौचव्यपगमे नामधेयमिति" विष्णुसूत्रात् सूतकोत्तरदिनपरमेकादशदिनपदम् सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा । मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तिता" सूर्य्यसिद्धान्तवचनेन सूतकस्य सावनदिनघटितत्वात् तदुत्तरदिनस्यापि तथात्वम् । अतो दिनमासवर्षगणना सावनेनेति । शुभाशुभविवेचनन्तु सौरेण ज्योतिःशास्त्रात् । अतएव पितामहः "विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः" । अत्र द्वितीयादिशब्दात् संस्कारपरिग्रहः । "गर्भाधाने सदा ग्राह्याः वारा भौमरवीज्यकाः" इति । गोभिलः "दक्षिणेन पाणिना उपस्थमभिमृशेत्" विष्णुर्योनिं कल्पयत्वेतयर्चा "गर्भं धेहि सिनीवालीति च" समाप्यर्चौ सम्भवतः" । कुत्सितदेशस्य सव्येन पाणिना शौचदर्शनात् तद्वारणाय दक्षिणेनेति । उपस्थं योनिं स्पृशेत् विष्णुरिति मन्त्रेण प्रथमं, ततो "गर्भं धेहिसिनीवालीत्यादि" मन्त्रेण च । "मन्त्रान्ते कर्म्मादिसन्निपातः" इति न्यायात् पाठानन्तरं स्पर्शः न तु भवदेवभट्टोक्तं स्पृशन् जपतीति । ऋचौ समाप्यैव संयोगं कुरुतः न मध्ये वामदेव्यजपः । देवलः "सकृच्च संस्कृता नारी सर्व्वगर्भेषु संस्कृता" । तेन गर्भाधानपुंसवनसीमन्तोन्नयनानि सकृदेव कर्त्तव्यानि । छन्दोगपरिशिष्टम् "विवाहादिकर्म्मगणोय उक्तो गर्भाधानं शुश्रुम यस्य चान्ते । विवाहादावेकमेवात्र कुर्वीत् श्राद्धं नादौ कर्म्मणः कर्म्मणः स्यात्" । विवाहादिगर्भाधानान्तकर्म्मसु एकमेव श्राद्धं न तु प्रतिकर्म्मादौ, एकेनैव श्राद्धेन कृतेन सर्व्वाणि श्राद्धवन्तीति । अन्तशब्दोऽत्रावयवार्थः दशान्तः पट इति वत् समीपार्थे उपलक्षणं स्यात् । ततश्च विशेषणोपलक्षणसन्देहे विशेषणत्वेन ग्रहणं कार्य्यान्वितत्वात् । यत्तु "निषेककाले सोमे च सीमन्तोन्नयने तथा । ज्ञेयं पुंसवने चैव श्राद्धं कर्म्माङ्गमेव च" इत्यनेन भविष्यपुराणे श्राद्धं कर्म्माङ्गत्वेन विहितं तच्छन्दोगेतरपरम् । अत एव भवदेवभट्टेनापि तथा लिखितम् । अत्र श्राद्धोत्तरगमनेऽपि न दोषः उक्तभविष्यपुराणात् "नित्ये नान्दीमुखश्राद्धे कृते दानाद्यवर्ज्जनम्" इति वचनान्तराच्च" ।

मु० चि० पीयू० धा० विस्तरेण विहितनिषिद्धकालादिकमुक्तं यथा "गण्डान्तं त्रिविधं त्यजेन्निधनजन्मर्क्षे च मूलान्तकं दास्रं पौष्णमथोपरागदिवसं पातं तथा वैधृतिम् । पित्रोः श्राद्धदिनं दिवा च परिघाद्यार्धं स्वपत्नीगमे भान्युत्पातहतानि मृत्युभवनं जन्मर्क्षतः पापभम्" मु० चि० "गण्डान्तमिति । अत्र यदि दुष्टफलतिथ्यादिषु रजोदर्शनमुद्भूतं तत्र चतुर्थदिनानन्तरं शान्तिकं विधेयं यदाह वशिष्ठः "प्रभूतदोषं यदि दृश्यते तत्पुष्पं ततः शान्तिककर्म्म कार्य्यम्" "विवर्ज्जयेदेव तदैकशय्यां यावद्रजो दर्शनमन्यवस्ते । ईशानतो गोमयमण्डलेन परिस्तृतेऽग्नौ जुहुयात्सदूर्व्वाम् । युग्मां घृताक्ताञ्च समित्प्रमाणां गायत्रिकां साष्टसहस्रसंख्याम् । शतप्रमाणामथवाघहन्त्रीं शुभैर्यवैर्व्याहृतिभिस्तिलैश्च । ततः सुरान् भूमिसुरान् पितॄंश्च सन्तर्पयेदन्नसुवर्णवस्त्रैरिति" । शान्तिकप्रकारस्तु शान्तिपद्धत्यादौ द्रष्टव्यः । एवं शान्तिकं विधाय गर्भाधानं विधेयम् । तत्र स्वपत्नीगमे स्वपत्नीगमने एतान् दोषान् त्यजेदिति सर्व्वत्र सम्बन्धः । एतान् कान् ? त्रिविधं गण्डान्तं गण्डान्तलक्षणं रत्नमालायाम् "नक्षत्रतिथिलग्नानां गण्डान्तं त्रिविधं स्मृतम् । नवपञ्चचतुर्थानां द्व्येकार्द्धघटिकामितमिति" निधनं जन्मर्क्षात् सप्तमं वधतारां, जन्मनक्षत्रं

मूलम् अन्तकं भरणीं दास्रमश्विनीम्। पौष्णं रेवतीं मघाम् उपरागदिवसं ग्रहणदिनं, पातं व्यतीपातम् महापातं च, वैधृतिं योगं, पित्रोर्मातापित्रोः श्राद्धदिनं, दिवा सूर्यावच्छिन्नकालं परिघयोगस्य पूर्वार्द्धम्। तथोत्पातैर्दिव्यान्तरिक्षभौमैस्त्रिविधैरुत्पातैर्हतं दूषितं, जन्मर्क्षतः जन्मलग्नाज्जन्मराशेर्वा मृत्युभवनमष्टमं लग्नं पापभं पापग्रहयुक्तं भं नक्षत्रं लग्नं वा इति” पी॰धा॰ “भद्राषष्ठीपर्वरिक्ताश्च सन्ध्यां भौमार्कार्कीनाद्यरात्रीश्च तस्रः। गर्भाधानं त्र्युत्तरेन्द्वर्कमैत्रब्राह्मस्वातीविष्णुवस्वम्बुपे सत्” मु॰ चि॰। “भद्रेति भद्रा प्रसिद्धा षष्ठी तिथिश्च पर्वाणि चतुर्दश्यष्टम्यमावास्या पूर्णिमा संक्रमणानि उक्तञ्च विष्णुपुराणे “चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा। पर्वाण्येतानि राजेन्द्र! रविसंक्रान्तिरेव चेति” रिक्ताश्चतुर्थीनवमीचतुर्दशीः, सन्ध्यां प्रातःसन्ध्यां सायम् सन्ध्याञ्च। भौमं मङ्गलवारम् अर्कमादित्यवारम् आर्किं शनैश्चरवारं, चतस्रः आद्यरात्रीः रजोदर्शनदिनमारभ्य दिनचतुष्टयं त्यजेदित्यर्थः। तदनन्तरमपि पुत्रार्थी रजोदर्शनात् विषमदिवसं त्यजेत्। उक्तञ्चाधानाध्याये वसिष्ठेन निषेधजातं “पौष्णद्वये पित्र्यभयाम्यसार्पविष्णुद्वये नैधनजन्मभेषु। उत्पातपापग्रहदूषितेषु न कार्यमाधानमनिष्टलग्ने। उपप्लवे वैधृतपातयोश्च विष्ट्यां दिवा पारिघपूर्वभागे। सन्ध्यासु पर्वस्वपि मातृपित्रोर्मृतेऽह्नि पत्नीगमनं विवर्ज्यम्। दिनेषु युग्मेषु च वक्ष्यमाणयोगैः सुतार्थी स्वसतीमुपेयात्। दिनेष्वयुग्मेषु च कन्यकार्थी हित्वा च गण्डांस्तिथिलग्नभानामिति” वक्ष्यमाणयोगैः पुंयोगैः स्त्रीयोगैश्च। अत्र ग्रन्थकृता श्रवणधनिष्ठयोर्न निषेधः कृतः। वार्हस्पत्यसंहितायां तयोर्विशेषतो विहितत्वात्। तद्वचनमधुनैव वक्ष्यते। ननु षोडशिग्रहणाग्रहणवत् विहितप्रतिषिद्धत्वाद्विकल्पः कस्मान्न भवति? सत्यम् बहूनामनुरोधो न्याय्य इति विधिरेवोचितः। अतएवोक्तं नारदेन “शुचिर्भूत्वा युग्मतिथावनग्नां कामयेत् स्त्रियम्। पुत्रार्थी पुरुषस्त्यक्त्वा पौष्णमूलाहिपित्र्यभमिति” “त्यक्त्वा पर्वतिथिं मूलमश्लेषां पैत्रभन्त्विति” काश्यपोक्तेः। तिथ्यादयः कश्यपेन कालविधाने उक्ताः। “षष्ठ्यष्टमीं पञ्चदशीं चतुर्थीं चतुर्दशीमप्युभयत्र हित्वा। शेषाः शुभाः स्युस्तिथयो निषेके वाराः शशाङ्कार्यसितेन्दुजानामिति” अत्र वाक्ये चन्द्रबुधगुरुशुक्रवारा निषेककार्ये शुभा उक्ताः। अर्थादन्ये सूर्यभौमशनिवारा निषिद्धाः। उक्तञ्च कालनिर्णये “रिक्ता पर्वाष्टमी षष्ठी दिवा जन्मत्रयं तथा। पापग्रहाणां वाराश्च त्याज्याश्चैवान्ततो गतिरिति”। अतएव वृहस्पतिसंहितायाम् “शेषाण्यृक्षाणि दुष्टानि स्युर्निषेकाख्यकर्मणीत्युक्तं “सोमज्ञगुरुशुक्राणां वारा वर्गोदयाः शुभाः। तेषाञ्च दृष्टस्यैव नेतरेषां कदाचनेति” अत्र केचिन्निषेके पुंवारा उत्तमाः स्त्रीवारौ मध्यमौ नपुंसकवारौ निषिद्धौ उक्तञ्च व्यासेन “पुरुषग्रहवाराः स्युः शुभाः सीमन्तकर्मणि। मध्यौ स्त्रीग्रहवारौ तु वर्जयेत्तु नपुंसकाविति” अत्र सीमन्तग्रहणमुपलक्षणं गर्भाधानस्येत्याहुः। युक्तञ्चैतत् पुंस्त्रीवारेषु स्त्रीगमने पुरुषाः स्त्रियो वोत्पद्यन्ते इति तावदिष्टम्। नपुंसकवारगमने तु नपुंसकस्योत्पत्तिः स्यान्न हि सा कस्यचिदिष्टा भवेदिति नपुंसकबुधवारनिषेध एवोचितः। शनिनिषेधस्तूभयवादिसिद्ध एव दाक्षिणात्यशिष्टसमाचाराच्चातो बुधशन्योरेव निषेधोऽन्येषां ग्रहणमिति प्रतीमः। प्राच्यस्तु नैतत्सहन्ते तन्मते तु सूर्यभौमशनीनामेव निषेधः। नारदः “रजोदर्शनतोऽस्पृश्या नार्यो दिनचतुष्टयम्। ततः शुद्धाः क्रियास्वेताः सर्ववर्णेष्वयं विधिः”। अत्रार्थवादमाह भरद्वाजः “प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी। तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति”। धर्मशास्त्रेऽपि “भर्तुः स्पृश्या चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला। पञ्चमेऽहनि योग्या स्याद्दैवे पित्र्ये च कर्मणि”। तस्मादेतावतो दोषांस्त्यक्त्वा स्त्रीगमनं हितमिति। ऋतुकालावधिमाह याज्ञवल्क्यः “षोडशर्तुर्निशाः स्त्रीणां तस्मिन् युग्मासु संविशेत्। युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु”अतः षोड़शदिनमध्ये गर्भाधानं विधेयम् तत्रैव गर्भसम्भवात्तत्र वाराः समीचीनाः प्रागुक्ता एवाधुना नक्षत्राण्याह गर्भाधानमिति। उत्तरात्रयमृगहस्तानुराधारोहिणीस्वातिश्रवणधनिष्ठाशततारकासु गर्भाधानं सत् शुभदम्। उक्तञ्च वार्हस्पत्यसंहितायाम् “हरिहस्तानुराधाश्च स्वातीवारुणवासवम्। उत्तरात्रितयं सौम्यं रोहिणी च शुभाः स्मृताः। आधाने मूलसार्पान्त्यमशुभं सममन्यभमिति” एवं विहितनक्षत्रे सति चन्द्रबले गर्भाधानार्थं सकृदेव पत्नीगमनं कार्यमित्याह “याज्ञवल्क्यः। “एवं गच्छेत् स्त्रियं

ज्यामां मघां मूलं च वर्जयेत् । सुस्थिरेन्दौ सकृत् पुत्रं लक्षण्यं जनयेत् पुमान्” चकाराद्रेवतीम् । भीमपराक्रमोऽपि “पित्र्यं पौष्णं नैर्ऋतं चापि धिष्ण्यं त्यक्त्वा नारीं सुप्रसन्नः प्रसन्नाम् । पुष्टः श्यामां पुत्रकामोऽभिगच्छन् सल्लक्षण्यं पुत्रमाप्नोति पुष्टमिति” । तच्च गमनं मन्त्रपूर्वकम् । तदुक्तं विष्णुपुराणे “ऋतावुपगमः शस्तः स्वपत्न्यां मन्त्रतो द्विजेत्युक्तेः” इदन्त्वैवर्णिकविषयं प्रतीयते । मन्त्रास्तु “विष्णुर्योनिं कल्पयत्वित्येवमादयः । “एतैर्मन्त्रैर्दक्षिणेन पाणिना पत्न्यमभिमृशेदिति गोभिलोक्तेः” पी० धा० । “केन्द्रत्रिकोणेषु शुभैश्च पापैस्त्र्यायारिगैः पुंग्रहदृष्टलग्ने । ओजांशगेऽब्जेऽपि च युग्मरात्रौ चित्रादितीज्यासु च मध्यमं स्यात्” मु० चि० । अथ गर्भाधाने लग्नबलमिन्दुबलञ्चाह । केन्द्रेति अथ सामान्यतः शुभलग्नानि वसिष्ठोक्तानि वृषमिथुनकर्कसिंहकन्यातुलाधरचापझषाः शुभा भवन्ति । यदि शुभफलशालिनोऽनुकूला निधनविशुद्धियुता निषेककाले” इति । तत्र केन्द्रत्रिकोणेषु लग्नचतुर्थसप्तमदशमपञ्चमनवमस्थानेषु स्थितैः शुभग्रहैस्तथा त्र्यायारिगैस्तृतीयैकादशषष्ठस्थानस्थितैः पापग्रहैरुपलक्षिते पुंग्रहैः सूर्यभौमगुरुभिर्दृष्टे लग्ने तथौजांशगेन्दौ विषमराशिर्मेषमिथुनादिरंशोऽजादिरेव तत्र स्थिते चन्द्रे सति युग्मरात्रौ समरात्रौ गर्भाधानं कार्यम् यदाह जगन्मोहने वसिष्ठः “केन्द्रत्रिकोणेषु शुभाश्रितेषु लग्ने शशाङ्के च शुभैः समेते । पापैस्त्रिलाभारिगतैश्च यायात् पुंजन्मयोगेषु च संप्रयोगम्” नारदः “ओजराश्यंशगे चन्द्रे लग्ने पुंग्रहवीक्षिते । शुचिर्भूत्वा युग्मतिथौ ह्यनग्नां कामयेत् स्त्रियमिति । पुंग्रहादीनाह नारदः “पुंग्रहाः सूर्यजीवाराः स्त्रीग्रहौ शशिभार्गवौ । नपुंसकौ सौम्यसौरी शिरोमात्रं विधुन्तुदः” इति । अत्र पुंनपुंसकादियोगावशिष्टेनोक्ताः “आधानलग्ने विषमांशराशौ जीवेन्दुजाभ्यां युतवीक्षिते वा । नान्यैः सुपुत्रस्त्वथ पापखेटैः पापी च मिश्रैर्बलिभिश्च मिश्रः । ओजत्र्यंशे लग्नगे वीर्ययुक्ते जीवेन्द्वर्कैरोजराश्यंशसंस्थैः । पुंजन्म स्याद्व्यत्यये कन्यका स्यात् मिश्रैः षण्ढोद्रेक्कगैर्द्विभिरत्र । षण्ढो नपुंसकः “ओजांशकस्थौ द्विषमर्क्षसंस्थः पुंजन्मकारी रविसूनुरेकः । विचार्य वीर्यं पुरुषग्रहाणां वाच्योऽत्र पुत्रस्त्वथ पुत्रिका वा । पापैश्च शेषं सुविचिन्त्य वाच्यमिति” । एवमन्येऽपि पुंजन्मादियोगा जातके द्रष्टव्याः । एषु यस्मिन् कस्मिंश्चित् पुंजन्मयोगे पुत्रार्थी युग्मतौ पत्नीं गच्छेत् । कन्याजन्मयोगे तु कन्यार्थी विषमरात्रौ पत्नीं गच्छेत् इति फलितोऽर्थः । अथ गर्भाधाने विहितनक्षत्राप्राप्तौ मध्यमनक्षत्राण्याह । चित्रेति चित्रापुनर्वसुपुष्याश्विनीषु तद्गर्भाधानं मध्यमं मध्यमफलदमित्यर्थः । यदाह वृहस्पतिः “चित्रादित्ये तथा तिष्यतुरगौ चेति मध्यमाः । शेषाण्यृक्षाणि दुष्टानि स्युर्निषेकाख्यकर्मणीति” अत्र केचित् दैवान्मानुषाद्वा प्रतिबन्धाद्भर्त्तुरसन्निधाने अनेकेषु ऋतुषु व्यतीतेषु यदि गर्भाधानाख्यः संस्कारो नाभूत्तदानीं दैवान्मध्ये भर्त्ता समागतश्चेत्तदा दक्षिणायने शुक्रास्तगुर्वस्तम्लूनाधिमासादिमहादोषसद्भावस्तदा गर्भाधानं नैव भवतीत्याहुः अतीतकालत्वात् यथा कालातीतेषु जातकर्मनामकर्मान्नप्राशनचौलादिसंस्काराः पूर्वोक्तदोषसद्भावे नैव भवन्ति । उक्तञ्च वसिष्ठेन “अतीतकालान्यखिलानि यानि कार्याणि सौम्यायनगे दिनेशे । गुरौ भृगौ वाप्यथ दृश्यमाने तदुक्तपक्षाङ्गदिनेऽप्यखण्डे” इति सत्यम् । सत्यपि नृणामतिक्रमे निमित्तानन्तरमेव नैमित्तिकमिति” न्यायेन “षोडशर्तुनिशाः स्त्रीणां तस्मिन् युग्मासु संविशेत्” इति याज्ञवल्क्यवचसा षोडशदिनातिक्रमे ऋत्वन्तरमपेक्ष्य प्रागुक्तदिशा कालशुद्धिं विचार्य कार्यमेव । तदा बहुकालव्यापिनी कालशुद्धिरन्वेष्यैव यतो विज्ञानेश्वरेण “तस्मिन् युग्मासु संविशेदिति” व्याख्यावसरे किमयं विधिर्नियमः परिसंख्या वेति त्रयः पक्षा उपन्यस्तास्तत्र स्त्रीगमने रागत एव प्रवृत्तेर्नियम एवायमिति सिद्धान्तितमतो गच्छेदेवेति नियमस्मरणात् ऋतावुपेयात् सर्वत्र वा प्रतिषेधवर्जमिति” गौतमस्मरणात् ऋतुगमने प्रत्यवायोऽपि स्मर्यते “ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति । घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः” इति शातातपोक्तेः ।

“अथ गर्भाधानं विधाय पुंसामिद्रासमये किं कार्य”मित्याह विष्णुः । “निद्रासमयमासाद्य ताम्बूलं वदनात् त्यजेत् । पर्यङ्कात् प्रमदां मालां पुष्पाणि मस्तकात्” इति” । पी० धा० । निषेकोत्तरं कार्य्यमाह आ० त० । “अत्र सम्यग्गर्भाधानहेतुतया उत्तानकरचरणामेव कुर्व्वीत नातिर्य्यगाश्रितकरचरणां स्त्रियं ऋत्वभिगमनानन्तरं दक्षिणपार्श्वेन स्वापयेत् । पुरुषायिते तु गर्भानुत्पत्तिरिति विशेषः । गर्भाधानञ्च गर्भस्य-

बालस्य तदाधारपात्रस्य च सीमन्तोन्नयनवत् संस्कारः "सीमन्तोन्नयनसंस्कारो गार्भपात्रसंस्कारः" इति श्रुतेः गर्भपात्रयोरयं संस्कार इति गार्भपात्रः गर्भस्य उदरस्थस्य, पात्रस्य तदाधारस्त्रियश्च। सीमन्तोनयनपदमुपलक्षणार्थम्। यदि दैवात् गर्भाधानादिसंस्कारा यथाकाले न कृतास्तदा प्रसवकालोत्तरं जातकर्माद्युत्तरसंस्कारकाले "अङ्के बालकं निधाय संस्कारः कार्य्यः यथाह राजमार्त्तण्डे "यं नार्य्यकृतसीमन्ता सूयते च कथञ्चन। अङ्के निधाय तं बालं पुनः संस्कारमर्हति"। तेन संस्कारेण च तदाधारे उत्पन्नानामपि संस्कारसिद्धिः "सकृच्च कृतसंस्काराः सीमन्ते न कुलस्त्रियः। यं यं गर्भं प्रसूयन्ते स गर्भः संस्कृतो भवेत्" राजमार्त्तण्डात्।

लग्नभेदेन गर्भाधाने शुभाशुभं वृहज्जातके ४अ० निषेकाध्याये विस्तरेणोक्तं जातकपद्धतौ तु किञ्चित् संक्षिप्योक्तं यथा "आधानाङ्गात् सप्तमभे यादृशं कुरुते रतम्। करोति तादृक् पुरुषस्तदुत्पत्तिं बलान्विताम्। रवीन्दुशुक्रभौमाश्चेत् स्वांशे वाथ गुरौ तनौ। नवमे पञ्चमे वा स्यादपत्यं पुंस्त्वशालि तत्। बलिष्ठौ स्वर्क्षांशेऽर्कगुर्वावुपचयर्क्षगौ। पुंसां, स्त्रीणां कुजेन्दू चेत् तदा गर्भस्य सम्भवः। भौमार्कौ सप्तमेऽर्कात् स्तो रुजे पुंसः, स्त्रिया विधोः। भौमार्कमध्ये सूर्येन्दू पुंस्त्रियोर्मृत्यवे क्रमात्। भौमार्कयन्यतरेणार्कचन्द्रौ युक्तौ चितौ क्रमात्। पुंस्त्रियोर्मृत्युदौ प्रोक्तौ प्राक् सूतेः प्राक्तनैर्बुधैः। लग्ने चेन्दौ पापमध्ये शुभदृष्टिविवर्जिते। सगर्भस्त्रीमृतिः स्याद्वा यथा वामनभाषितम्। दिवा सूर्य्यशुक्रौ, शनीन्दू च रात्रौ, ४जले तातमातृप्रदौ व्यस्ततस्तौ। तयोः सोदरस्वसृसंज्ञौ क्रमात्तु तयोरोजयुग्मर्क्षगौ सौख्यहेतू। कललं कठिनं हस्ताद्यस्थित्वग्रोमचेतनाः। अशनोद्वेगसूतिश्च मासेष्वीशाः क्रमादमी। भृग्वारेज्यार्कचन्द्रार्किज्ञाङ्गेशाब्जदिवाकराः। मासेशे पीड़िते गर्भरोगः पुष्टिश्च सद्बले। (प्रथममासि कललं शुक्रशोणितमिश्रणरूपं तत्र शुक्रोऽधिपः। द्वितीये काठिन्यं तदीशः कुजः। तृतीयमासि हस्ताद्युत्पत्तिः गुरुस्तदीशः। चतुर्थेऽस्थ्युत्पत्तिः सूर्य्यस्तदीशः। पञ्चममासे चर्म्मोत्पत्तिश्चन्द्रोऽधिपः। षष्ठे रोमोत्पत्तिः शनिरधीशः। सप्तमे चैतन्यं बुधोऽधिपः। अष्टमे मातृभुक्तान्नादेर्नाड़ीद्वारेणाशनम्, तत्र गर्भाधानलग्नेशः स्वामी। नवमे उद्वेगः चन्द्रोऽधीशः। दशमे प्रसवः, सूर्य्यस्तदीशः आधानकाले उक्तपद्धे पीड़िते तत्तुल्यमासे गर्भपातादि बलयुक्ते तत्तन्मासे पुष्टिः)। विषमर्क्षनवांशेषु गुरुचन्द्राङ्गभानुषु। पुंजन्म समभांशेषु, स्त्रियस्तेषु समाविशेत्। सूर्य्येज्यौ विषमेऽंशे चेत् सबलौ पुंजनिप्रदौ। स्त्रियाः समांशे शुक्रेन्दू, कुजाद्दृष्टग्रङ्गांशके यमम्। भौमचन्द्रदृष्टाश्चेत् पुंस्त्रीयुग्मं नवांशकात्। विषमर्क्षे शनिर्लग्नाल्लग्नं त्यक्त्वा नृजन्मदः। इन्दुर्दृष्टे भसन्धिस्थैरशुभैर्मूकजन्मदः। व्ययेऽर्केन्दू दक्षवामनेत्रनाशकरौ मतौ। शनिभांशे तनौ, मन्दे सप्तमेऽब्दत्रयात् शवः। स्वांशे कर्कतनौ चन्द्रे द्यूने द्वादशवर्षतः। यत्संख्ये द्वादशांशे स्याच्चन्द्रः प्रश्ने ततःपरम्। तत्तुल्यराशिसहिते चन्द्रे सूतिं वदेत् सुधीः" आधानाध्यायः।

गर्भावक्रान्ति स्त्री अव+क्रम-भावे क्तिन् ६त०। शारीरजीवस्य गर्भाशयप्रवेशनरूपे गर्भावतारे तत्र सुश्रुते शारीरस्थाने ३अ० "अथातो गर्भावक्रान्ति शारीरं व्याख्यास्यामः" इत्युपक्रम्य दर्शितं तच्च वाक्यं कायशब्दे १९२१पृ० दर्शितम्।

गर्भाशय पु० आशेतेऽत्र आ+शी-आधारे अच् ६त०। गर्भाधारस्थाने गर्भशय्यायाम् "पुरुषेभ्योऽधिकाश्चान्ये नारीणामाशयास्त्रयः। एको गर्भाशयः प्रोक्तः पित्तपक्वाशयान्तरे" इति भावप्र० तस्य पित्तपक्वाशययोर्मध्यस्थत्वमुक्तम् "स्त्रीणां गर्भाशयोऽष्टमः"। "ततोऽग्निसोमसंयोगात् संसृज्यमानो गर्भो गर्भाशयमनुप्रतिपद्यते" "दैवसंयोगादव्ययोऽचिन्त्यः (आत्मा) भूतात्मना सहान्वक्षं सत्त्वरजस्तमोभिर्दैवासुरैरपरैश्च भावैर्वायुनाऽभिप्रेर्य्यमाणो गर्भाशयमनुप्रविश्यावतिष्ठते" इति च सुश्रुतः। तदाधारावरकत्वात् २जरायौ अमरः।

गर्भाष्टम पु० गर्भात् गर्भकालात् अष्टमः। गर्भावधिके अष्टमे मासवर्षादौ। "गर्भाष्टमो दैवमासः" त्रिका०। "गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्। गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः" मनुः "उत्तरत् गर्भादिति निर्देशेन गर्भाष्टमे इत्यत्रापि अवध्यर्थकपञ्चम्या "सह सुपेति" या०समा०।

गर्भास्पन्दन न० गर्भस्यास्पन्दनम्। "गर्भक्षये गर्भास्पन्दनमुन्नतकुक्षिता च" सुश्रुतोक्ते गर्भक्षयचिह्ने। "गर्भास्पन्दनमावीनां (गर्भिणीनां) प्रणाशः श्यावपाण्डुता" सुश्रु०।

गर्भास्राव पु० गर्भस्यास्रावः। गर्भस्रावे तच्छब्दे दृश्य०।

गर्भिणी स्त्री गर्भोऽस्त्यस्याः इनि ङीप्। गर्भवत्यां सगर्भायां

स्त्रियाम् अमरः। गर्भिणीलिङ्गं गर्भवतीशब्दे उक्तम्। गर्भिणीतत्पतिकृत्याकृत्यादि नि॰सि॰उक्तं यथा "गर्भिणी कुञ्जराश्वादिशैलहर्म्यादिरोहणम्। व्यायामं शीघ्रगमनं शकटारोहणं त्यजेत्। शोकं रक्तविमोक्षं च साध्वसं कुक्कुटासनम्। व्यवायं च दिवास्वप्नं रात्रौ जागरणं त्यजेत्" कश्य॰। मदनरत्ने स्कान्दे "हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलं तथा। कूर्पासकञ्च ताम्बूलं माङ्गल्याभरणं शुभम्। केशसंस्कारकबरीकरकर्णविभूषणम्। भर्त्तुरायुष्यमिच्छन्ती वर्जयेद्गर्भिणी न हि" वृहस्पतिः "चतुर्थे मासि षष्ठे वाप्यष्टमे गर्भिणी यदा। यात्रा तदा विवर्ज्या स्यादाषाढे तु विशेषतः" याज्ञवल्क्यः "दौहृदस्याप्रदानेन गर्भो दोषमवाप्नुयात्। वैरूप्यं मरणं वापि तस्मात् कार्य्यं प्रियं स्त्रियाः" दौहृदं गर्भिणीप्रियम्। तत्रैवाश्वलायनः "वपनं मैथुनं तीर्थं वर्जयेद्गर्भिणीपतिः। श्राद्धञ्च सप्तमान्मासादूर्ध्वं चान्यत्र वेदवित्। श्राद्धं तद्भोजनमिति प्रयोगपारिजातः। कालविधाने मुहूर्त्तदीपिकायाञ्च "क्षौरं शवानुगमनं नखकृन्तनं च युद्धादि वास्तुकरणं त्वतिदूरयानम्। उद्वाहमौपनयनं जलधेश्च गाहमायुःक्षयार्थमिति गर्भिणिकापतीनाम्" रत्नसंग्रहे गालवः "दहनं वपनञ्चैव चौलं वै गिरिरोहणम्। नाव आरोहणं चैव वर्जयेद्गर्भिणीपतिः" अन्यत्रापि "प्रव्यक्तगर्भापतिरब्धियानं मृतस्य वाहं क्षुरकर्मसङ्गम्। तस्यानुयत्नेन गयादितीर्थं यागादिकं वास्तुविधिं न कुर्य्यात्"। प्रव्यक्तगर्भा वनिता भवेन्मासत्रयात् परम्।(मासत्रयादूर्द्ध्वम्)षण्मासात् परतः सूतिर्नवमे रिष्टवासिनी" अथ सूतिकागृहप्रवेशः "रोहिण्यैन्दवपौष्णेषु स्वातीवरुणयोरपि। पुनर्वसौ पुष्यहस्तधनिष्ठास्तूत्तरासु च। मैत्रे त्वाष्ट्रे तथाश्विन्यां सूतिकागारवेशनम्" एतच्च सम्भवे "प्रसूतिसमये काले सद्य एव प्रवेशयेदिति" वसिष्ठोक्तेः तद्गृहञ्च नैरृत्यां कार्य्यम् "वारुण्यां भोजनगृहं नैरृत्यामथ रिष्टकमिति" वसिष्ठोक्तेः विष्णुधर्मे "दयाहं सूतिकागारमायुधैश्च विशेषतः। वह्निना तिन्दुकालातैः पूर्णकुम्भैः प्रदीपकैः। सुयत्नेन तथा वारिवर्णकैर्लिखितेन चेति"।

"गर्भिणी तु द्विमासादिस्तथा प्रव्रजितो मुनिः। ब्राह्मणा लिङ्गिनश्चैव न दाप्यास्तारिकं (करम्) तरेः" मनुना द्विमासोर्द्ध्वं तस्या नौशुल्काग्रहणमुक्तम्। अतिथेरग्र एव तस्याभोजनं मनुनोक्तं यथा "सुवासिनीः कुमारांश्च रोगिणोगर्भिणीस्तथा। अतिथिभ्योऽग्र एवैतान् भोजयेदविचारयन्"। "बालं सुवासिनीवृद्धगर्भिण्यातुरकांस्तथा। संभोज्यातिथिभृत्यांश्च दम्पत्योः शेषभोजनम्" याज्ञ॰। जात्या सह कर्म्म॰ अस्य परनिपातः। गोगर्भिणी।

गर्भिणीदौहृद न॰ ६त॰। गर्भिण्याकाङ्क्षिते द्रव्यभेदे तस्य दानावश्यकता सुश्रुते उक्ता तत्र चतुर्थे याभिप्रायमिन्द्रियार्थेषु करोतीत्यादि वाक्यं २११९ पृ॰ उक्तं "इन्द्रियार्थांस्तु यान् यान् सा भोक्तुमिच्छति गर्भिणी" सुश्रुतः। [त्रिका॰।

गर्भिण्यवेक्षण न॰६त॰। कुमारभृत्यायां गर्भिणीपरिचर्य्यायाम्

गर्भित त्रि॰ गर्भो जातोऽस्य तार॰ इतच्। १जातगर्भे २काव्यदोषभेदे न॰। दोषशब्दे विवृतिः।

ग(र्भे)र्भाङ्क पु॰ गर्भे अङ्कमध्येऽङ्कः वा अलुक्स॰। "अङ्कोदरप्रविष्टो यो रङ्गद्वारा मुखादिमान्। अङ्कोऽपरः स गर्भे(र्भा)ङ्कः सवीजः फलवानपि" सा॰द॰ उक्ते नाटकाङ्गाङ्कमध्यप्रविष्टाङ्के। यथा बालरामायणे सीतास्वयंवरनामा ग(र्भे)र्भाङ्कः।

गर्भेतृप्त त्रि॰ गर्भे शिशौ अन्ने वा तृप्तः अलुक् स॰। १शिशौ २अन्ने च तृप्ते। युक्तारोह्या॰ आद्युदात्तताऽस्य।

गर्भोपघात पु॰ गर्भस्य उपघातः। १जातगर्भस्य नाशे मेघस्य २जलोत्पादनशक्तिनाशे च तल्लिङ्गानि "गर्भोपघातलिङ्गान्युल्काशनिपांशुपातदिग्दाहाः" इत्यादि वृ॰स॰ २१अ॰ उक्तं तच्च गर्भशब्दे दर्शितम्।

गर्भोपघातिनी स्त्री गर्भमुपहन्ति उप+हन+णिनि। गर्भघातिन्यां स्त्रीगव्यादौ अमरः।

गर्भोपनिषद् स्त्री गर्भस्वरूपावेदिका उपनिषद्। उपनिषदन्तर्गते गर्भस्वरूपाद्यावेदके उपनिषद्भेदे उपनिषच्छब्दे विवृतिः। तत्स्वरूपादि ऐतरेयोपनिषद्यपि संक्षेपेणोक्तं तच्च कायशब्दे १९२५ पृ॰ "पुरुषे ह वा आदितो गर्भः" इत्याद्युक्तम्। [धान्यभेदे रत्नमाला।

गर्मुच्छद पु॰गर्म्मुतो नडस्य छद इव छदोऽस्य। (मेड़ुया)

गर्मुटिका स्त्री गर्मुत इव उटं पर्णमस्य शक॰ टेः पररूपैकादेशः टापि अत इत्वम्। (मेड़ुया) इति ख्याते धान्यभेदे रत्नमाला।

गर्म्मुत् स्त्री गृ—बा॰उति मुट् च।(मेड़ुया)१धान्यभेदे अमरः। २नड़े तृणभेदे ३स्वर्णे च मेदि॰।

गर्व मदे भ्वा० पर० सक० सेट्। गर्वति अगर्वीत्। जगर्व। गर्वितः। गर्वः। "खर्वे! गर्वसमूहपूरिततनो!" तारास्तवः।

गर्व पु० गर्व–घञ्। अभिमाने, "ऐश्वर्य्यरूपतारुण्यकुलविद्याबलैरपि। इष्टलाभादिनान्येषामवज्ञा गर्वः ईरितः" इत्युक्ते १अवज्ञाभेदे "गर्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः। "अवज्ञासविलासाङ्गदर्शनाऽविनयादिकृत्" सा० द० उक्ते २व्यभिचारिभावभेदे। अमरे अहङ्कारपर्य्यायतोक्तिः ईषद्भेदमनादृत्यैव।

गर्वाट पु० गर्वेणाटति अट–अच् ३त०। द्वारपाले त्रिका०।

गर्वित त्रि० गर्व–कर्त्तरि क्त गर्वो जातोऽस्य तार० इतच् वा। १मत्ते २जातगर्वे "यूथं तदग्रसरगर्वि(र्वि)तकृष्णसारम्" "प्रेमगर्वितविपक्षमत्सरात्" रघुः।

गर्ह निन्दायां वा चुरा० पक्षे भ्वा० आत्म०सक०सेट्। गर्हयते गर्हते अजगर्हत अगर्हिष्ट। गर्हयाञ्चक्रे जगर्हे। गर्हणा "न गर्हयेयुरस्मान् वै पाण्डवार्थाय कर्हिचित्" भा० आ० ५७३१ श्लो०। "गर्हयन्तोऽस्य साहसम्" भा० व० १८१ अ० पदव्यत्यय आर्षः। उपसर्गपूर्वकस्तु तद्द्योत्यार्थयुक्ते निन्दने। "विगर्हितं धर्मधनैर्निबर्हणम्" नैष०।

गर्ह कुत्सायां भ्वा० आ० सक० सेट्। गर्हते अगर्हिष्ट जगर्हे गर्हणम् गर्हितः गर्हा। "स एव धर्मो राज्ञां तु तद्वितं किन्तु गर्हणम्" भा० आ० ११८अ०। "केचिद्भीष्मं जगर्हिरे" भा० स० ४२अ०। "न कुत्सयाम्यहं किञ्चिन्न गर्हे बलवत्तरम्" र० २०६अ०। "विषमां च दशां प्राप्तो देवान् गर्हति वै भृशम्" २०८ अ०। आर्षः पदव्यत्ययः। "गर्हितान्नस्य जग्धिः" मनुः।

गर्हा स्त्री गर्ह–अ। १निन्दायाम् "येन येनाचरेद्धर्मं तस्मिन् गर्हा न विद्यते" भा० अ० ६०५६ श्लो०। चुरा० गर्ह–भावे युच्। गर्हणाऽप्यत्र स्त्री।

गर्ह्य त्रि० गर्ह–ण्यत्। १निन्द्ये २अधमे अमरः।

गर्ह्यवादिन् त्रि० गर्ह्यं वदति वद–णिनि। कुत्सितवादिनि कद्वदे अमरः स्त्रियां ङीप्।

गल भक्षणे सक०स्रावे (गला) अक०भ्वा०पर०सेट्। गलति अगालीत्। "निर्गलिताम्बुगर्भम्" रघुः। "गलितं त्वराविरहितासनयाः" माघः "प्राक्शोकनिर्गलितनेत्रपयःप्रवाहान्" नैष०। "विपक्षे गलितादरौ" "पर्य्यागलदच्छविन्दुः" "मुषलाद्यगलत्ततः" भट्टिः। "प्रच्छदान्तगलिताश्रुविन्दुभिः"। "विगाह्यमानो गलिताङ्गरागैः" रघुः।

गल स्रावणे (गालान) चुरा० आत्म० सक० सेट्। गालयते अजीगलत गालयाञ्चक्रे। गालः। गालितः। "पङ्कं गोमूत्रगलितम्" चक्रदत्तः।

गल पु० गल–भक्षे वा० करणे अच्। १कण्ठे (गला) अमरः। कर्त्तरि अच्। २सर्ज्जरसे (धुना) ३वाद्यभेदे, ४गड़कमत्स्ये च शब्दरत्ना०। "गले गृहीत्वा क्षिप्तोऽस्मि" भा० आनु० १५४ अ०। अस्य स्वाङ्गत्वेऽपि क्रोड़ा० न ङीष्। छिन्नगला। बह्वा० स्त्रियां ङीष्। गली इत्यपि तत्रैव स्त्री।

गलक पु० गल–बा० वुन्। (गड़इ) १मत्स्ये शब्दार्थचि०।

गलकम्बल पु० गले कम्बल इव। सास्नायां गवां गलस्थिते रोमशे मांसपिण्डे अमरः।

गलगण्ड पु० ७त०। (गरगण्ड)। रोगभेदे। तल्लक्षणादि यथा "निबद्धः श्वयथुर्यस्य मुष्कवल्लम्बते गले। महान् वा यदि वा ह्रस्वो गलगण्डं तमादिशेत्। निबद्धो दृढः अचलो वा। मुष्कवत् अण्डवत्। गले इति हनुमन्यमोरुपलक्षणम्। तथा च भोजः "महान्तं शोथमल्पं वा हनुमन्यागलाश्रयम्। मुष्कवल्लम्बमानं तु गलगण्डं विनिर्दिशेत्" संप्राप्तिमाह वातः कफश्चापि गले प्रदुष्टो मध्ये तु संसृत्य तथैव मेदः। कुर्वन्ति गण्डं क्रमशः स्वलिङ्गैः समन्वितं तं गलगण्डमाहुः। क्रमशः शनैः शनैः स्वलिङ्गैः वातकफमेदोलक्षणैः। तत्र वातिकमाह। तोदान्वितः कृष्णसिरावनद्धः श्यावारुणो वा पवनात्मकस्तु। पारुष्ययुक्तश्चिरवृद्धपाको यदृच्छया पाकमियात् कदाचित्। वैरस्यमास्यस्य च तस्य जन्तोर्भवेत्तथा तालुगलप्रशोषः। चिरवृद्धपाकः चिरेण वृद्धिरपाकश्च यस्य सः। श्लैष्मिकमाह स्थिरः सवर्णो गुरुरुग्रकण्डुः शीतो महांश्चापि कफात्मकस्तु। चिराच्च वृद्धिं भजतेऽचिराद्वा प्रपच्यते मन्दरुजः कदाचित्। माधुर्य्यमास्यस्य च तस्य जन्तोर्भवेत्तथा तालुगले प्रलेपः। कदाचित् प्रपच्यते वा पाकोऽपि चिराद्भवति। प्रलेपः श्लेष्मणा। मेदोजमाह स्निग्धो मृदुः पाण्डुरनिष्टगन्धो मेदोऽन्वितः कण्डुयुतोऽरुजश्च। प्रलम्बतेऽलाबुवदल्पमूलो देहानुरूपक्षयवृद्धियुक्तः। स्निग्धास्यता तस्य भवेच्च जन्तोर्गलेन शब्दं कुरुते च नित्यम्। देहक्षये कार्श्यं क्षयं, देहवृद्धौ वृद्धिं यातीत्यर्थः। असाध्यमाह "कृच्छ्राच्छ्वसन्तं मृदुसर्वगात्रं संवत्सरातीतमरोचकार्त्तम्।

क्षीणञ्च वैद्यो गलगण्डयुक्तं भिन्नस्वरं नैव नरं चिकित्सेत्" भावप्र०। "यवमुद्गपटोलानि कटुकञ्च भोजनम्। छर्दिं सरक्तमोक्षौ च गलगण्डे प्रयोजयेत्" चक्रद०।

गलग्रह पु० "आरम्भानन्तरं यत्र प्रत्यारम्भो न दृश्यते। गर्गादिमुनयः सर्वे तमेवाहुर्गलग्रहम्" १नारदोक्ते आरम्भदिनात् परं स्मृत्युक्तानध्ययदिनपातेन प्रत्यारम्भाभाववति, पदार्थे, "कृष्णपक्षे चतुर्थी च सप्तम्यादिदिनत्रयम्। त्रयोदशीचतुष्कञ्च अष्टावेते गलग्रहाः" राजमार्त्तण्डोक्ते २तिथ्यष्टके च। ३व्यञ्जनभेदे ४मत्स्यकण्टके शब्दार्थचि०।

गलत्कुष्ठ न० कर्म्म०। स्रवद्रुधिरादौ कुष्ठभेदे। 'भ्रातृभार्य्याभिगमनात् गलत्कुष्ठं प्रजायते,' शातातपेन तस्य भ्रातृभार्य्यागमनकर्मविपाकतोक्ता।

गलन न० गल+भावे ल्युट्। १क्षरणे (गला) "गलदा धमनयो भवन्ति गलनमासु धीयते" निरु० ६।२४। २स्वयं पतने च कर्त्तरि ल्यु। ३स्राविणि त्रि० "गलनस्नानफलानि च दन्तस्य समानि भक्तेन" वृह० ८४अ०।

गलन्तिका स्त्री गल–शतृ ङीप् अल्पार्थे कन्। स्वल्पवारिधारायुतायां (झारा) कर्कर्य्याम् "प्रपा कार्य्या च वैशाखे देवे देया गलन्तिका" क.शी०५अ०।

गलमेखला स्त्री गलस्य मेखलेव। कण्ठाभरणभेदे हारा०।

गलवार्त्त त्रि० गले गलव्यापारे यथेष्टभोजनादौ वार्त्तः निरामयः। यथेष्टभोजनयोग्ये निरामये। "दृश्यन्ते चैव तीर्थेषु गलवार्त्तास्तपस्विनः" पञ्चतन्त्रम्।

गलविद्रधि पु० "सर्वं गलं व्याप्य समुत्थितोयः शोफोरुजो यत्र वसन्ति सर्वाः। स सर्वदोषो गलविद्रधिस्तु" सुश्रुतोक्ते कण्ठगते रोगभेदे "असमर्मस्थं सुपक्वञ्च भेदयेद्गलविद्रधिम्" सुश्रु०।

गलव्रत स्त्री गरो गरणं सर्पभक्षणं व्रतमस्य रस्य लः। मयूरे त्रिका० स्त्रियां जातित्वात् ङीष्।

गलशुण्डिका स्त्री अल्पा शुण्डा कन् शुण्डिका गले शुण्डिकेव। (आलजिव)१उपजिह्वायाम् हेमच०। "तालूदरं वस्तिशीर्षं चिवुके गलशुण्डिके" याज्ञ०। तालुगते कण्ठशुण्डीख्याते २रोगभेदे कण्ठशुण्डीशब्दे १६६५ पृ० लक्षणादुक्तम्। "तालुगतास्तु गलशुण्डिकेत्यादि" सुश्रु०। "शल्यं जतुमणिमांससंघातो गलशुण्डिका" सुश्रु० अधिमांसार्बुदार्शोऽधिजिह्वोपजिह्वोपकुशगलशुण्डिका" इत्युपक्रमे गलगण्डमाला प्रभृतयोमांसदोषजा" सुश्रुतेन तस्याः मांसदोषजत्वमुक्तम्।

गलस्तन पु० गले स्तन इव। छागगलस्थे स्तनाकारे मांसपिण्डभेदे। स च दुग्धक्षरणहीनत्वात् निष्फलः यथोक्तं दृष्टान्तविधया वसिष्ठसिद्धान्ते "चलसंक्रमयुङ्मासे संक्रमोयः स संक्रमः। अजागलस्तन इव राशिसंक्रान्तिरुच्यते"। [छाग्याम्। हेमच०।

गल(ले)स्तनी स्त्री गले स्तनौ यस्याः या अलुक्स०।

गलहस्त पु० गले न्यस्तो हस्तः। १अपसारणार्थं गलेऽर्पिते हस्ते (गलाटिपि)। "देवलवचनं गलहस्तः" दायभागः "अनिच्छन् गलहस्तेन ताभिर्निर्वासितस्तदा" कथास०। स जातोऽस्य तार० इतच्। गलहस्तित जातगलहस्ते। "अर्द्धेन्दुलीलैर्गलहस्तितेव" नैष०। तदाकृतित्वात् २अर्द्धचन्द्राख्ये वाणभेदे पु०। ३कण्ठलिदति स्त्री मेदि०।

गला स्त्री गलति गल–अच्। लज्जालुलताभेदे, शब्दार्थचि०

गलाङ्कुर पु० "गलेऽनिलः पित्तकफौ च मूर्च्छितौ प्रदूष्य मांसं च तथैव शोणितम्। गलोपसंरोधकरैस्तथाङ्कुरैर्निहन्त्यसून् व्याधिरयं तु रोहिणी" माधवकरोक्ते रोहिणीरूपकण्ठजातरोगाङ्गे अङ्कुराकारे पदार्थे। "गलेऽनिलः पित्तकफौ च मूर्च्छितौ पृथक् समन्ताच्च तथैव शोणितम्। प्रदूष्य मांसं गलरोधिनोऽङ्कुरान् सृजन्ति यान् साऽसुहरा तु रोहिणी" इति सुश्रुते रोहिणीरोगस्य गलजाताङ्कुरसर्जनकारित्वमुक्तम्।

गलानिल पु० गलेऽनिलः प्राणवायुरस्य। (गल्‌ता चिङ्गिटि) मत्स्यभेदे। त्रिका०। गलाबिल इति पाठः।

गलि पु० गडि–इन् डस्य लः। (गडियागरु) सामर्थ्येऽपि भारावाहके १वृषे हेमच०। गल इन्। २लतायां स्त्री उज्ज्वल०।

गलित त्रि० गल–क्त। १पतिते स्रस्ते, च्युते, हस्तादितो भ्रष्टे अमरः। गलधातौ उदा०२परिणते च। "गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम्" रघुः।

गलितक पु० गलित इव कायति कै–क। पतितवन्नाट्यभेदे नाट्यशब्दे विवृतिः। "गलितकः" विक्रमो०५अ०। [त्रिका०।

गलितकुष्ठ न० कर्म्म०। गलत्कुष्ठे।

गलेगण्ड पु० गलेगण्ड इव यस्य। पक्षिभेदे (हाड़गिला)

गलेचोपक त्रि० गले चुप्यतेऽसौ चुप–णि० कर्म्मणि ण्वुल् अलुक्स०। कण्ठे कर्त्तनीये। "गलेचोपकपादहारकौ" मुग्ध०।

गलोड्य न०गलेन लोड्यः पृषो० ललोपः। धान्यभेदे "शालिषष्टिकनलवञ्जुलतालीशशृङ्गाटकगलोड्यगौरीगिरिकशैवलपद्मकपत्रप्रभृतिभिर्धान्याम्लपिष्टैः प्रदेहो घृतमिश्रः" सुश्रु०। [यवे निगाले अमरः।

गलोद्देश पु० गलस्य उद्देशः समीपम्। गलसमीपस्थेऽव-

गलोद्भव पु० गले अश्वगलदेशे उद्भवति उद्+भू–अच्। अश्वगलजाते रोचमानाख्ये रोमावर्त्तभेदे त्रिका०।

गलौघ पु० गले ओघ इव। "तस्यैव (गलविद्रधेः) तुल्यः खलु सर्वजस्य। शोफो महानन्नजलावरोधी तीव्रज्वरो वातगतेर्निहन्ता। कफेन जातो रुधिरान्वितेन गले गलौघः परिकीर्त्यतेऽसौ" सुश्रुतोक्ते कण्ठगतरोगभेदे।

गल्द स्त्री गल–क्विप् गल+पृषो०वा तेन गला गलेन वा दीयते दा–कर्मणि घञर्थे क। १वाचि निघ०। गलद इति पाठान्तरम्। गलितं गल् धीयते अस्य धा–घञर्थे क पृषो०धस्य दः। धमनीभेदे "आ त्वा विशन्त्विन्दव आ गल्दा धमनीनाम्"। इमामृचमधिकृत्य गल्दा धमनयो भवन्ति गलनमासु धीयते" निरु० ६।२४।

गल्भ धार्ष्ट्ये (प्रागल्भ्ये) भ्वा० आ० सक० सेट्। गल्भते अगल्भिष्ट जगल्भे। "या कथञ्चन सखीवचनेन प्रागभि प्रियतमं प्रजगल्भे" माघः। गल्भ+च्व्यर्थे क्यङ् गल्भायते अगल्भायिष्ट।

गल्या स्त्री गलानां कण्ठानां समूहः पाशा० यत्। १कण्ठसमुदाये। गलो वृहत्काशस्तेषां २समूहे शब्दार्थचि०।

गल्ल पु० गल–ल तस्य नेत्त्वम्। (गाल) गण्डे। हेमच०।

गल्लक पु० गलति क्विप् गल् तं लाति गृह्णाति ला–क ततः स्वार्थे क। १चषके मद्यपानपात्रे हेमच०। २इन्द्रनीलमणौ त्रिका०। पृषो० वमध्यता इत्येके।

गल्लचातुरी स्त्री गल्ले चातुरी यस्य, संज्ञात्वात् न कप् न वा ह्रस्वः। (गालवालिश) ख्याते उपधानभेदे जटा०।

गल्वर्क पु० गलति गल–उन् गलुरर्को दीप्तिरस्य। मसारे १मणिभेदे त्रिका०। तत्र "गल्वर्कस्तु मसारवत्। अश्मसारस्त्विन्द्रनीलः" इत्युक्तौ अश्मसारशब्दोत्तरं तुकारात् गल्वर्कशब्दस्य न इन्द्रनीलार्थता शब्दकल्पद्रुमे तदर्थतोक्तिः प्रामादिकी। २पद्मरागे मणौ च। "मसारगल्वर्कसुवर्णरूप्यैः" भा० द्रो० १६अ०। "मसार इन्द्रनीलः(अश्मसारत्वात्) गल्वर्कः पद्मरागः" (अर्कदीप्तिकत्वात्) नील०। ३चषकपात्रे हेमच०। रक्तवर्णसुरासम्बन्धेन सूर्यकरतुल्यवर्णत्वात्तस्य तथात्वम्।

गल्ह कुत्सने भ्वा० आ० सक० सेट्। गल्हते अगल्हिष्ट जगल्हे।

गवची स्त्री गां भूमिमञ्चति अन्च–क्विप् अवङादेशः ङीप् अचोऽल्लोपः पृषो० न दीर्घः। इन्द्रवारुण्याम् (राखालशशा) रत्नमाला।

गवय पुंस्त्री गुङ् शब्दे भावे अप् गवं शब्दभेदं याति या–क, गां तदवयवं सादृश्येनायते अय–अच् वा। गलकम्बलशून्ये गोसदृशे मृगभेदे अमरः "ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्। सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम्। गवयादिपदानां तु शक्तिधीरुपमाफलम्" भाषा०। "दृष्टः कथञ्चिद् गवयैर्विविग्नैः" कुमा०। स्त्रियां योपधत्वेऽपि योपधप्रतिषेधे गवयहयादीनामप्रतिषेधात् ङीष्। अस्य मांसपाकविधिर्यथा। तैले संपाचिते तप्ते हिङ्गुसैन्धवसंयुतम्। मांसं गवयसम्भूतं सुस्विन्नं भूरिवारिणा"। भावप्र० तद्गुणा उक्ता यथा "गवयो मधुरो हृद्यः स्निग्धोष्णः कफपित्तलः। विदाही गुरुविष्टम्भी विपाके विरसः सदा"। २वैवस्वतपुत्रे वानरभेदे। "पुत्रा वैवस्वतस्यासन् पञ्च कालान्तकोपमाः। गयो गवाक्षो गवयः शरभो गन्धमादनः" रामा०उत्त०।

गवराज पु० गवेन शब्देन राजते राज–अच्। वृषे शब्दच०

गवल पुंस्त्री गुङ् शब्दे भावे अप् गवं शब्दभेदं लाति ला–क। महिषे हेमच०। "गवलाजवधस्तथा" ति०त०। "गवलालिकुलाहिनिभाविसृजन्ति पयः पयोवाहाः" वृ० सं० २२अ०। "बभौ तरङ्गैर्गवलासितद्युतिः" माघः। स्त्रियां ङीष्।

गवल्गण पु० सञ्जयपितरि सूतभेदे। "सञ्जयो मुनिकल्पस्तु जज्ञे सूतो गवल्गणात्" भा० आ० ६३अ०।

गवाक्ष पु०गवामक्षीव अक्षि–अच् समा० नित्यमवङ्, गावः सूर्यकरा जलानि वा अक्ष्णुवन्ति व्याप्नुवन्ति एतमनेन वा अक्ष–व्याप्तौ अकर्त्तरि घञ्। वातायने (जानेला) अमरः। "गवाक्षजालैरभिनिष्पतन्त्यः" भट्टिः "उत्सृष्टलीलाञ्चितमा गवाक्षात्" "विलोलनेत्रभ्रमरैर्गवाक्षाः" कुमा०। "कुवलयितगवाक्षां लोचनैरङ्गनानाम्" रघुः। २वैवस्वतपुत्रे वानरभेदे रामा० गवयशब्दे दृश्यम्। गां भूमिमक्षति व्याप्नोति अण् गौरा० ङीष् सि० कौ०मुग्ध०मते ईप्। ३गोडुम्बायां(गोसुक्)। अमरः।ङीषन्तः ४इन्द्रवारुण्याम् (राखालशशा) ५शाखोटे(शेओड़ा)राजनि०।६अपराजितायाम् रत्नमा०।

गवाची स्त्री गवचीवत् किन्तु पूर्वाणो दीर्घः।(पाँकाल)मत्स्यभेदे "गवाच्यजीर्णकारी च गुर्वी श्लेष्मप्रकोपिणी" राजव०

गवादन न० गोभिरद्यते अद्–कर्मणि ल्युट् अवङ्। १घासे अमरः। इन्द्रवारुण्यां स्त्री ङीप् शब्दच०। २नीलापारिजातायाम् स्त्री राजनि०। आधारे ल्युट् ङीप्। २गवां भक्षणाधारे पात्रे (डावा)स्त्री मेदि०।

गवादि पु० पा० गणसूत्रोक्ते हिताद्यर्थे यत्प्रत्ययप्रकृतिरूपे शब्दगणे स च "गो हविस् अक्षर विष बर्हिस् अष्टका स्खदा युग मेधा स्रुच् (नाभि नभञ्च) (शुनः संप्रसारणं वा च दीर्घत्वं तत्सन्नियोगेन चान्तोदात्तत्वम्)।(ऊधसोऽनङ् च) कूप खद दर खर असुर अध्वन् क्षर वेद बीज दीप्त। "गवादिभ्यो यत्" पा० हितादौ गव्यम्

गवाधिका स्त्री गवा किरणेनाधिकायति अधि–कै क। लाक्षायां त्रिका०। अत्र गवाधिकेति पाठः प्रामादिकः

गवानृत न० गवि गोविषयेऽनृतम् अवङादेशः। गोविषये मिथ्याकथने। "गवानृते पञ्चशतं सहस्रं पुरुषानृते" स्मृतिः।

गवामयन न०दशमाससाध्ये द्वादशमाससाध्ये च सत्रभेदे तद्विवृतिः ता० ब्रा० ४अध्यायादौ।

तत्र ताण्ड०ब्रा० ४अ० भाष्ये तस्य द्वैविध्यमुक्त्वा तत्राहानि यथा कर्त्तव्यानि तथोक्त्वा तच्छब्दप्रवृत्तिनिमित्तज्ञानाय श्रुतिमवतारयन् व्याचख्यौ यथा

"स्तोमानां दशरात्रस्य प्रोक्ता विष्टुतयः क्रमात्। गवामयनिकानां च ता एवेत्यवगम्यते। शतानि त्रीणि षष्टिश्च विषुवांश्च चतुर्थके। प्रोक्तानि गव्यसत्रस्य सुत्याहानि क्रमादिह। तानि संदृश्य वक्ष्यन्ते बुद्धिव्युत्पत्तिसिद्धये।

द्विविधं गवामयनं दशमाससाध्यं द्वादशमाससाध्यञ्च तस्य द्वादशमासनिर्वर्त्यस्य प्रायणीयोऽतिरात्रः प्रथममहस्तत्र चतुर्विंशः उक्थ्य आरम्भणीयः ते उभे अहनी अनुष्ठाय ज्योतिर्गौरायुर्गौरायुर्ज्योतिरित्याभिप्लविकः षडहः स चतुर्वारमावर्त्तनीयः ततस्त्रिवृदादिस्तोमस्तुत्यकसाध्यः पृष्ठ्यः षडहः एवं पञ्चभिः षडहैरेको मासः पूर्य्यते एतस्यैवावर्त्तनेन पञ्च मासाः सम्पाद्याः तत्र षष्ठे मासादौ त्रयोऽभिप्लवाः षडहाः कार्य्याः ततः एकः पृष्ठ्यः षडहः ततोभिजिदेकमहः त्रयः स्वरसामान इत्येवमष्टाविंशत्यहानि आद्याभ्यां प्रायणीयचतुर्विंशाभ्यां षष्ठमासपूरणम्। इत्थं पूर्वपक्षे अशीत्युत्तरशतसंख्यान्यहानि सम्पन्नानि। ततो विषुवमेकमहः सोऽस्य सत्रस्य प्रधानभूतः। सप्तमे मासादौ त्रयः स्वरसामानः प्रतिलोमाः कार्य्याः। ततो विश्वजिदावृत्तः पृष्ठ्यः षडहस्त्रयस्त्रिंशारम्भस्त्रिवृदुत्तमः ततस्त्रयोऽभिप्लवाः षडहाः आवृत्ताः एवमष्टाविंशत्यहानि स्युः अस्य च मासस्य महाव्रतातिरात्रौ च ततोभिधास्यमानौ पूरकौ स सप्तमो मासः। ततः पृष्ठ्यः षडहः पूर्वोक्तैश्चतुर्भिराभिप्लविकैः प्रतिलोमक्रमेणानुष्ठितैरष्टमोमासः अनयावृत्त्या नवमदशमैकादशा अपि सम्पाद्याः द्वादशमासस्यादौ त्रयोभिप्लवाः, षडहः, ततो गोरायुषी द्वे अहनी द्वादशाहस्य दशाहानि चेति त्रिंशाहानि स द्वादशो मासः ततो महाव्रतमुपान्त्यमहः तेन उदयनीयातिरात्रौ इत्यपि सप्तममासस्य पूरकाविति तदेतद्गवामयनसत्रं विधास्यन् तन्नामनिर्वचनप्रदर्शनाय दावाख्यायिकामाह" भा०

"गावो वा एतत् सत्रमासत तासां दशसु माससु शृङ्गाण्यजायन्त ता अब्रुवन्नरात्स्मोत्तिष्ठामोपशा नोऽज्ञतेति ता उदतिष्ठन्" ता०ब्रा०४।१।१। "पुरा खलु गावः एतत्संवत्सरसत्रमासत अन्वतिष्ठन् आसचोदना अपरचोदना च तत्र लिङ्गमिति मीमांसकाः। अत्रासङ्कल्पपूर्वनिषेधानुशाने ये वर्त्तन्ते तदन्यैरनुष्ठितम् अत इदं गवामयनमित्याचक्षते तासां सत्रस्थितानां मध्ये कासाञ्चिद्गवां दशसु मासु मासेषु पद्दन्नासीत्यादिना मासशब्दस्य मासभावः तेष्वनुष्ठितेषु शृङ्गाण्यजायन्त ता जातशृङ्गा अब्रुवन् परस्परमुक्तवत्यः किमिति अरात्स्म समृद्धा अभूम अतोवयमुत्तिष्ठामसत्रं समापयाम अरात्स्मेति तदुक्तं तद्याचष्टे। ओपशाः आ अभितः शिरःप्रदेशमुपेत्य शेरन्ते इत्योपशाः शृङ्गाणि, अज्ञत जातान्यभूवन्निति सम्बन्धः अज्ञतेति जनी प्रादुर्भावे इत्यस्मात् लुङि बहुवचने "मन्त्रे घसेत्यादिना च्लेर्लुङि गमहनजनेत्युपधालोपे रूपम्। एवमुक्त्वा ता गावः सत्रादुदतिष्ठन्। ताभिरेवं दशभिर्मासैः फलस्य प्राप्तेर्दशमासनिर्वर्त्यमपि गवामयनमस्तीत्युक्तं भवति" भा०। द्वादशमासनिर्वर्त्यमप्यस्तीति दर्शयति। "तासान्त्वेवाब्रुवन्नासामहा एवेमौ द्वादशौ मासौ सं संवत्सरमापयामेति तासान्द्वादशसु मासु शृङ्गाणि प्रावर्त्तन्त ताः सर्वमन्नाद्यमाप्नुवंस्ता एतास्तूपरास्तस्मात्ताः सर्वान्द्वादश मासः प्रेरते सर्वं हि ता अन्नाद्यमाप्नुवन्" ता०ब्रा० २। "तुशब्दो वैलक्षण्यद्योतनार्थः तासामेव गवां मध्ये काश्चिदब्रुवन् किमित्युच्यते, यौ द्वादशौ द्वादशसंख्यापूरकावेव शिष्टावेका-

दशद्वादशौ मासौ इमौ आसामहा एवं अनुष्ठायैव अनुष्ठाय प्रारब्धं संवत्सरसाध्यं समापयामेति व्यवहिताश्च ति समित्यस्य व्यवहितेन सम्बन्धः। तासां गवां जातानि शृङ्गाणि द्वादशसु मासु नासेषु पूर्णेषु प्रावर्त्तन्त प्रापयन् दशभिर्मासैः शृङ्गप्राप्तिलक्षणफले सिद्धेऽपि पुनरश्रद्धया यतो मासद्वयमन्वतिष्ठन् अतो जातानामपि शृङ्गाणां पुनःपतनमित्यभिप्रायः तथा चैतरेयकम् "अथ समापयिष्यामः संवत्सरमित्यासत तासामश्रद्धया शृङ्गाणि प्रावर्त्तन्तेति" एतास्तूपरा इति ताः पतितशृङ्गाः गावः सर्वर्त्तुभवमन्नाद्यमदनीयमन्नं प्राप्नुवन् ता गावस्तूपराः शृङ्गहीनाः दृश्यन्ते तस्मात्ताः सर्वान् द्वादश मासो मासान् प्रेरते प्रगच्छन्ति ईर गतौ शीतवातातपेषु सर्वदा पुष्टाङ्गा एव यथायथं गच्छन्ति शृङ्गिणो महिष्यादयस्तु कृशा भवन्ति तस्मादित्युक्तं कस्मादित्याह हि यस्मात्ता गावः सर्वमन्नाद्यमाप्नुवन् तस्मात्सर्वर्त्तुषु पुष्टाङ्गा भवन्ति तथा चैतरेयकम् "ऊर्ज्जं त्वमसमन्वत तस्मादु ताः सर्वभूतान्तरमुत्तिष्ठन्तीति"। उक्तार्थं जानतः फलमाह" भा०। "सर्वमन्नाद्यमाप्नोति य एवं वेद" ता०ब्रा०३। स्पष्टोऽर्थः। तदेवं दशमासनिर्वर्त्त्यं द्वादशमासनिर्वर्त्त्यं चेति द्विविधं गवामयनं प्रतिपादितं तयोर्ज्योतिष्टोमदर्शपूर्णमासादिवद्देतत्काम तत्कुर्यादिति कामफलसम्बन्धफलविशेषाश्रवणाद्विश्वजिन्न्यायेनान्यत्राम्नातस्य स्वर्गस्य कल्पनाया अन्याय्यत्वाद्रात्रिसत्रन्यायेनार्थवादिकस्य समृद्धिफलस्य वाक्यशेषे श्रुतत्वादद्भुताच्छृङ्करीय इति समृद्धिकामा एतत्सत्रमासीरन्निति विधिरुन्नेतव्यः। तैत्तिरीयके समृद्धिफलकत्वं स्पष्टमाम्नातम् "य एवं विद्वान् संवत्सरमुपयन्त्यार्ध्नुवन्त्येवेति" भा०ततः,४।१ ४कण्डिकामारभ्य। ५अ०८ख० ९क०पर्यन्ते तद्विधानमुक्तं तत्र सत्रे दीक्षाकालविधानार्थमेकाष्टकारम्भपक्षं निरस्य चैत्रशुक्लैकादश्यां दीक्षामाह तत्रैव ५।९।१० कण्डिकादिषु

"चित्रापूर्णमासे दीक्षेरन्" ता०ब्रा०५।९।१०।"चित्रायुक्तः पौर्णमासः चित्रापूर्णमासः तस्मिन् दीक्षेरन्" तदेतत् स्तौति" भा०।"चक्षुर्वा एतत् संवत्सरस्य यच्चित्रापूर्णमासो मुखतो वै चक्षुर्मुखत एव तत् संवत्सरस्य दीक्षन्ते तस्य न निर्यास्ति" ता०ब्रा०११। 'चित्रापूर्णमास इति यत् एतत् संवत्सरस्य चक्षुर्वै जायमानस्य हि प्रथमं मुखञ्जायते तत्रापि चक्षुरेव प्रथममाविर्भवति अतस्तत्सादृश्यादस्य चक्षुषः उक्तक्रमेण मुखतो मुखप्रदेशएव चक्षुः, अतो मुखएव तत् संवत्सरमारभ्य गृहीत्वा दीक्षन्ते। यः फाल्गुन उक्तः सोऽप्यत्र विद्यत इत्युक्तं भवति तस्य न निर्यास्ति कश्चिदपि दोषो न विद्यते" इत्थं चित्रापौर्णमास्यां दीक्षितव्यमित्युक्तम् अथ तस्मिन्नेव मासे शुक्लैकादश्यां दीक्षितव्यमित्याह" भा०"चतुरहे पुरस्तात् पौर्णमास्या दीक्षेरन्" ता॰ ब्रा०१२।"चैत्र्याः पौर्णमास्याः पुरस्ताच्चतुरहे चतुर्णामह्नां समाहारश्चतुरहस्तस्मिन्विद्यमाने गवामयनस्य दीक्षा कार्या एवं दीक्षणस्य गुणमाह" भा०"तेषामेकाष्टकायां क्रयः सम्पद्यते तेनैकाष्टकान्न संवट् कुर्वन्ति" ता० ब्रा०१३। "सर्वेषां सत्राणां द्वादश दीक्षा भवन्ति तत्र एकादशीप्रभृति द्वादशसु गतासु रात्रिषु त्रयोदशी रात्रिरष्टमी स्यात् एकाष्टका च बहुलाष्टमीति अस्यामेकाष्टकेत्युपचारः तस्याः क्रयः सम्पद्यते प्रथमे ह्युपसर्जने राजक्रयस्तस्मिन् दिने प्रातःकाले प्रायणीयाद्या यज्ञावयवाः प्रक्रम्यन्ते तेन प्रक्रमेण एकाष्टकां न संवट् कुर्वन्ति क्रियानुपयोगेन व्यर्थं न कुर्वन्ति अतएव एकाष्टकामारम्भतो गुणस्तस्मिन् पक्षेऽन्तर्भवति इत्यर्थः। अन्येऽपि गुणा अस्मिन् पक्ष सन्तीत्याह" भा० 'तेषां पूर्वपक्षे सुत्या सम्पद्यते पूर्वपक्षे मासाः सन्तिष्ठमाना यन्ति पूर्वपक्ष उत्तिष्ठन्ति तानुत्तिष्ठतः पशव ओषधयोऽनूत्तिष्ठन्ति तान्कल्याणी वागभिवदत्यरात्सुरिमे सत्रिण इति ते राध्नुवन्ति" ता०ब्रा० १४। "तेषामेकादश्यां दीक्षमाणानां सुत्या सोमयागः पूर्वपक्षे सम्पद्यते सत्राणां सर्वेषां द्वादशोपसदः तत्राष्टमीप्रभृति द्वादशसु गतासु त्रयोदशी शुक्लपक्षपञ्चमी तस्यां प्रथमोऽतिरात्र इति पूर्वपक्षे सुत्या प्रारभ्यत इत्यर्थः। त्रिंशता त्रिंशताऽहोभिर्मासेषु पूर्वपक्षे एव सर्वे मासाः सन्तिष्ठमाना यन्ति वर्त्तन्ते एवं द्वादशसु मासेषु गतेषु पूर्वपक्ष एव सत्रादुत्तिष्ठन्ति तानुत्तिष्ठतः सत्रादुत्थानं कुर्वतो यजमानाननु पश्चात् पशव ओषधयश्चोत्तिष्ठन्ति ऊर्द्ध्वं रोहन्ति तान् यजमानान् कल्याणी शोभना वाक् यशस्करी वाक् वदति किमिति इमे सत्रिणो यजमानाः अरात्सुः समृद्धा अभवन्निति तदनन्तरन्ते सत्रिणो राध्नुवन्ति समृद्धा भवन्ति"।५अध्यायसमाप्तिपर्यन्ते तस्यैव विधानभेदा उक्ताः। "गवामयनेनेयुः" कात्या०श्रौ०२४।५।२।"गवामयनं वाऽभिगरस्तुतेः" २४।४।४९। इदञ्च एकपदं तेन गावामयनिकमित्यादौ ठकि पूर्वाचोवृद्धिः। "गावामयनिके पृष्ठ्यषडहे प्रत्यहं द्वयम्" जैमिनीयन्यायमाला।

गवामृत न० गोरमृतमिव क्षीरम् अवङादेशः। गोक्षीरे "अतिथिः सर्वभूतानामग्निः सोमो गवामृतम्" भा० व० ३१२ अ०। गोक्षीरस्य सोमवत् हूयमानत्वात् चन्द्रहेतुकत्वाद्वा सोमत्वेति "अमायां च सदा सोम ओषधीः प्रतिपद्यते। तमोषधिगतं गावः पिबन्त्यम्बुगतञ्च यत्। तत् क्षीरममृतं भूत्वा मन्त्रपूतं द्विजातिभिः। हुतमग्निषु यज्ञेषु पुनराप्यायते शशी" कालमा० सोमोत्पत्तिवाक्यात् सोमस्यैव गोक्षीरहेतुत्वम्। एवञ्च गोक्षीरस्य सोमप्रसूतत्वेन पुनर्यज्ञे मन्त्रेण होमात् चन्द्राप्यायनात् तद्धोमस्य सन्तत्या सनातनत्वम्। तेन "किं स्विद्धर्मः सनातन" इति यक्षप्रश्नस्योत्तरमिदं सङ्गच्छते।

गवाम्पति पु० ६त० अलुक् स०। १वृषभे "सिंहेनेन गवाम्पतिम्" भा० व० १६० अ०। २गोपालके "तथा दृष्ट्वा यवीयांसं सहदेवं गवांपतिम्" भा० वि० वि० १८ अ०। ३गोस्वामिनि ४रुद्रे ५किरणपतौ सूर्य्यवह्न्यादौ। "प्रशान्तोऽग्निर्महाभाग! परिश्रान्तो गवांपतिः" भा०वि० २२० अ०। सहस्ररश्मिरादित्यस्तपनस्त्वं गवांपतिः रुद्रः" भा० य० ३अ० सूर्य्यस्तवः। खगोलशब्ददर्शितदिशा सूर्य्यस्य चन्द्रादिग्रहदीप्तिकारित्वात् तथात्वम् रुद्रस्य तथात्वं गोपतिशब्दे वक्ष्यते। पदद्वयमित्येके। [मृगभेदे गवये त्रिका०।

गवालूक पु० गवाय शब्दाय अलति अल–वा ऊकञ्।

गवाविक न० गौश्च अविश्च द्वयोः समाहारः गवाश्वा० नि० नित्यमवङादेशः कस्य। गोमेषयोः समाहारे।

गवाश्व न० समाहारद्व० अवङ्। गोहययोः समुच्चये।

गवाश्वप्रभृति न० पा० गणसूत्रोक्ते समाहारद्वन्द्वनिमित्ते शब्दसमूहे स च गणः "गवाश्वम् गवाविकम् गवैडकम् अजाविकम् अजैडकम् कुब्जवामनम् कुब्जकिरातम् पुत्रपौत्रम् श्वचण्डालम् स्त्रीकुमारम् दासीमानवकम् शाटीपटीरम् शाटीप्रच्छदम् शाटीपट्टिउष्ट्रखरम् उष्ट्रशशम् मूत्रपुरीषम् यकृन्मेदः, मांसशोणितम् दर्भशरम् दर्भपूतीकम् अर्जुनशिरीषम् अर्जुनपुरुषम् तृणोलपम् दासीदासम् कुटीकुटम् भागवतीभागवतम्" "गवाश्वादीनि यथोच्चारितानि साधूनि" सि० कौ०।

गवाह्निक न० अह्नि भवं दिनभक्षणाय पर्य्याप्तम् अहन्+ठक् आह्निकम् ६त०। गोर्दिनभक्षणपर्य्याप्तघासादौ "निरुद्वेगस्तु यो दद्यात् मासमेकं गवाह्निकम्। एकभक्तं तथाश्नीयात् श्रूयतां तस्य यत् फलम्। इमा गावो महाभागाः पवित्रं परमं स्मृताः। त्रीन् लोकान् धारयन्ति स्म सदेवासुरमानुषान्। तासु चैव महापुण्यं शुश्रूषा च महाफला। अहन्यहनि धर्मेण युज्यते वै गवाह्निके" भा० आनु० १२२ अ०। "गवाह्निकं देवपूजा वेदाभ्यासः सरित्प्लवः। नाशयन्त्याशु पापानि महापातकजान्यपि" आ० त० यमः। "गवाह्निकं गोर्दिनभक्ष्यम्" आ० त० रघुनन्दनः।

गविजात पु० गवि, गोसंज्ञायाम् पुलस्त्यकार्य्यायां या जातः अलुक्स०। १ऋषिभेदे स तु नहुषाय च्यवनमूल्यतया गां कल्पितवान् तत्कथा भा० आनु० ५१ अ० "तत्र त्वन्यो वनचरः कश्चिन्मूलफलाशनः। नहुषस्य समीपस्थो गविजातोऽभवन्मुनिः" इत्युपक्रमे "नहुषस्य वचः श्रुत्वा गविजातः प्रतापवान्। उवाच हर्षयन् सर्वानमात्यान् पार्थिवञ्च तम्। अनर्घा वै महाराज! द्विजा वर्णेषु चोत्तमाः। गावश्च, पुरुषव्याघ्र! गौर्मूल्यं परिकल्प्यताम्" पुलस्त्यस्य गोसंज्ञायां भार्य्यायां जाते २वैश्रवणे च

पुलस्त्यो नाम तस्यासीन्मानसो दयितः सुतः। तस्य वैश्रवणो नाम गवि पुत्रोऽभवत् प्रभुः" भा० व० २७ अ०। "गवि गोसंज्ञायां भार्य्यायाम् नील०। गवीत्यस्याभवदित्यनेन सम्बन्धात् तस्येत्यस्य पुत्रेणान्वयाच्च तथात्वम् एतन्मूलकं गविपुत्रशब्दकल्पनं प्रामादिकमेव।

गविनी स्त्री गवां समूहः खला० इनि। गोसमूहे।

गविष् त्रि० "गां स्तुतिवाचमिच्छति इष–क्विप्। स्तोत्रादिवाक्येच्छावति। "निरस्य रसं गविषः" ऋ० १०।७६।७। "अगोरुधाय गविषे" ८।२४।२०।

गविष त्रि० गामिच्छति इष–क। स्तोत्रेच्छावति "अश्मेदुद्रप्सं दविध्वद्गविषो सत्वा" ऋ० ४।१३।२। "सत्वा भरिषो गविषः" ४।४०।२। "गविषो गवां प्रेप्सुः" भा०।

गविष्टि पु० इष–अन्वेषे क्तिन् ६त०। गवामन्वेष्टरि। "आपवस्व गविष्टये" ९।६६।१५। "गविष्टये गवामन्वेष्ट्रे" भा०।

गविष्ठ पु० दैत्यभेदे "गविष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः" भा० आ० ६५ अ०। स च द्वापरे द्रुमसेनतयाऽऽविर्भूतः यथाह भा० आ० ६७ अ० "गविष्ठस्तु महातेजा यः प्रख्यातो महासुरः। द्रुमसेन इति ख्यातो पृथिव्यां समजायत"।

गविष्ठिर पु० गवि वाचि स्थिरः षत्वम् अलुक्स०। गोत्रप्रवर्त्तके १ऋषिभेदे। तस्यापत्यम् अण्। गाविष्ठिर तद्गोत्रापत्ये पुंस्त्री० बहुषु तस्य लुक्। "गविष्ठिराणामात्रेयगाविष्ठिरपौतिमाषेति" आश्व० श्रौ० १२।१४।१। "गविष्ठिरो नमसा

"स्तोममग्नौ" ऋ०५।१।१२। २कण्वे मुनौ च "अग्निरत्रिं भरद्वाजं गविष्ठिरम्" ऋ०१०।१५०।५। "गविष्ठिरं कण्वम्" भा०।

गवीधुका स्त्री गवेधुका+पृषो०। धान्यभेदे। "अनाहुतिर्वै जर्त्तिलाश्च गवीधुकाश्च" तैत्ति० ५।४।३।२।

गवो(वे)श्वर ६त० वा अवङ्। गोस्वामिनि अमरः।

गवेङ्गित न०गवामिङ्गितम् अवङ्। शुभाशुभसूचके गवां चेष्टाभेदे तच्च वृ० स० ९२ अ० उक्तं यथा।

"गावो दीनाः पार्थिवस्याशिवाय पादैर्भूमिं कुट्टयन्त्यश्च रोगान्। मृत्युं कुर्वन्त्यश्रुपूर्णायताक्ष्यः पत्युर्भीतास्तस्करानारुवन्त्यः। अकारणे क्रोशति चेदनर्थं भयाय रात्रौ वृषभः शिवाय। भृशं निरुद्धो यदि मक्षिकाभिस्तदाशु वृष्टिं सरमात्मजैर्वा। आगच्छन्त्यो गोष्ठवृद्ध्यै च वेश्म बम्भारवेण संसेवन्त्यो गोष्ठवृद्ध्यै गवां गाः। आर्द्राङ्ग्यो वा हृष्टरोमाणः प्रहृष्टा धन्या गावः स्युर्महिष्योऽपि चैवम्"। [स०। (गडगडे) धान्यभेदे अमरः।

गवेडु स्त्री गवे दीयते दीङ् रक्षणे कु पृषो० दस्य डः अलुक्

गवेधु पु०गवे धीयते धाञ्–धारणे कु अलुक्स०। (गडगडे) १धान्यभेदे तस्या गवे धारणात्तथात्वं यथोक्तम्

"अथ रुद्राय पशुपतये। रौद्रं गावेधुकं चरुं निर्वपति तदेनं रुद्र एव पशुपतिः पशुभ्यः सुवत्यथ यद् गावेधुको भवति वास्तव्यो वा एष देवो वास्तव्या गवेधुकास्तस्माद्गावेधुको भवति" शत० ब्रा० ५।३।३।७।

"गवेधुका तु विद्वद्भिर्गवेधुः कथिता स्त्रियाम्। गवेधुः कटुका स्वाद्वी कार्श्यकृत् कफनाशिनी" भावप्र०। तेन शब्दक०गवेधुशब्दस्य पुंस्त्वोक्तिः प्रामादिकी। गवेधुश्च सुश्रुते कुधान्यवर्गे उक्ता यथा

"कोरदूषकश्यामाकनीवारशान्तनुतुवरकोद्दालकप्रियङ्गुमधूलिकानान्दीमुखीकुरुविन्दगवेधुकामरुकतोदर्पणीमुकुन्दकवेणुयवप्रभृतयः कुधान्यविशेषाः"

गवेन्द्र पु० गौरिन्द्र इव नित्यमवङ्। श्रेष्ठे गवि।

गवेरुक न० गां गोशोभामीरयति ईर–वा० उकन् अवङ्। गैरिके त्रिका०। गैरिकेण गोर्भूषणात्तथात्वम्।

गवेश पु० ६त० अवङ्। १गोस्वामिनि गोरक्षके तेन निर्वृत्तादि० संकला० पाठान्तरे ततोऽण्। गावेश तन्निर्वृत्तादौ त्रि०। २रुद्रे च गोपतिशब्दे दृश्यम्। पक्षेऽच्। गवीश उक्तार्थेषु।

गवेशकी स्त्री। गवामीशः गोरक्षः तथाभूत इव कायति कै–क गौरा० ङीष्। (गोरक्षचाकुलिया) लताभेदे शब्दच०। गवेशकेति केचिदिमं टाबन्तमाहुः।

गवेष अन्वेषणे, अद० चुरा० आत्म० सेट्। गवेषयते अजगवेषत। गवेषयाञ्चक्रे। गवेषितः गवेषणं गवेषणा। "तीर्थेष्वितस्ततस्तस्याभिचचार गवेषयन्" भा०व०२६२अ०। आर्षः पदव्यत्ययः। तस्य भ्वादित्वं तङ्वत्त्वं च क्वचित् प्रयोगे दृश्यते "गवेषमाणं महिषीकुलं जलम्" रत्ना०।

गवेष त्रि० गवेष+अच्। १अन्वेष्टरि भावे अप्। २अन्वेषणे पु०। तेन निर्वृत्तादि संकला० अण्। गावेष तन्निर्वृत्तादौ त्रि०।

गवेषणा स्त्री गवेष–भावे युच्। १अन्वेषणे अमरः। गोरुदकस्य वा एषणा। गोरुदकस्य वा २अन्वेषणे। इष–ल्यु ६त०। ३गोरन्वेषके त्रि०। गवेष–ल्यु। ४अन्वेष्टरि त्रि० "अग्निरिन्द्रो गवेषणो बभ्रुः पिङ्गो गवेषणः" ऋ० १।१२२।२। "अस्तीनः सत्वा गवेषणः" ऋ० ७।२०।५। "गवेषणः गवामन्वेष्टा उदकान्वेष्टा। यजमानफलस्य मार्गयिता वा" भा०। भाष्ये गवेष मार्गणे पूर्ववत् ल्यु इत्येव पाठः मुद्रितपुस्तके ल्युट् इति पाठः प्रामादिकस्तस्याकर्त्तर्येव विधानात् क्लीबत्वाच्च।

गवेषित त्रि० गवेष–क्त। १अन्वेषिते मार्गिते अमरः।

गवेष्ठिन् न० दैत्यभेदे "शङ्कुकर्णौ विरोधश्च गवेष्ठी दुन्दुभिस्तथा" हरिवं० ३अ०। [षयोः समाहारे।

गवैडक न०गौश्च एडकश्च गवाश्वा० नि० क्लीवता च। गोमे-

गवोद्व पु०प्रशस्तः प्रशस्ता वा गौः "प्रशंसावचनैश्च" पा०जातेः कर्म०परनि०अवङ्। १प्रशस्ते गवि। २प्रशस्तायां गोजातिस्त्रियाञ्च अस्य नियतलिङ्गत्वात् स्त्रियामपि तथात्वम्।

गव्य (आत्मनो गामिच्छति क्यच् "वान्तो यि प्रत्यये" पा० अव्) आत्मसम्बन्धित्वेन गोरिच्छायाम् अक०व्या० पर० सेट्। गव्यति अगव्यीत्-अगवीत् गव्या(या)म् चकार" "गौरसि वीर! गव्यते" ऋ० ६।४५।८।२६।

गव्य त्रि०गोर्विकारः गवि भवं, गोर्हितं, गोरिदं, वा सर्वत्र यत् यादौ अव्। १गोसम्बन्धिनि, 'गव्यसतके" जै० अधिकर० मा०। २सरलमर्घ्यं मधुमच्च गव्यम्" कुमा० "संवत्सरं तु गव्येन पयसा पायसेन वा।" "शेलुं गव्यञ्च पेयूषं प्रयत्नेन विवर्जयेत्" मनुः। २गोर्हितादौ च। गवि इषौ नेत्रे वा साधु यत्। ३ज्यायां ४रागद्रव्ये च न० मेदि०। ज्यायाः शरक्षेपणसाधनत्वात् रागद्रव्यस्य च नेत्ररागजनकत्वात्तथात्वम्। गोर्विकारे ५गोरोचनाद्रव्ये स्त्री राजनि०। तस्य गोर्विकारत्वात्तथात्वम् तत्र ज्यायाम्

"श्रवणोपान्तिकनीयमानगव्यम्" माघः। समूहे पाशा० यत्। ६गोसमूहे, ७गव्यूतौ क्रोशयुगे च स्त्री हेमच०।

गव्ययी स्त्री गोरिदम् वा० अयट् युडागमश्च यादौ अत्र ङीप्। गोरवयवे त्वगादौ। "गव्ययी त्वगभवति" ऋ० ८।७०।७। "गव्ययी गोमयी त्वक्" भा०।

गव्ययु त्रि० गामिच्छति गो+क्यच्—उन् यादौ वेदे दीर्घयलोपाभावौ। गोरिच्छावति "आ दिवस्पृष्टमश्वयुर्गव्ययुः" ऋ०८।३६।६। "गव्ययुर्गामिच्छन्" भा०।

गव्यु त्रि०गामिच्छति क्यच् उन् यादौ अत्र दीर्घयलोपाभावौ। गामिच्छति। "अश्वयुर्गव्यू रथयुर्वसुयुः ऋ० १।५१।१४।

गव्यूत न० गव्यूति+पृषो० अदन्तादेशः। १क्रोशे २क्रोशयुगे च हेमच०।

गव्यूति स्त्री गोर्यूतिः "गोर्यूतौ" पा० अच्। द्विसहस्रधनुर्मिते १क्रोशे हेमच०। २क्रोशद्वये अमरः। "गव्या गव्यूतगव्यूती इति दीर्घपाठदर्शनात् शब्दकल्प० दीर्घान्तगव्यूतिशब्दकल्पनं प्रामादिकम् तत्र गव्यूतगव्यूती इत्यस्य द्विवचनान्ततया दीर्घान्तशब्दत्वाभावात् किञ्च यूतिरित्यस्य क्तिन्नतया निपातनात् "कृदिकारादक्तिनः" पा० अक्तिन्नन्तस्यैव ङीपो विधानेन ततो ङीपोऽप्रसक्तिः।

गह गहने अद० चुरा० उभ० सक० सेट्। गहयति ते अजगहत् त। गहनं दुर्वोधः दुष्प्रवेशो दुर्गमश्च।

गहन न० गाह—ल्युट्—"कृच्छ्रगहनयोरिति" पा० निर्देशात्, पृषो०वा ह्रस्वः गह—गहने ल्युट् वा।१वने अमरः। तस्य दुर्गमत्वात् तथात्वम्।२निविडे त्रि०"जगाम गहनं वनम्" देवीमा० ३गह्वरे ४दुःखे च न०मेदि०। ५दुर्गमे ६दुर्वोधे ७दुष्प्रवेशे त्रि०। ८परमेश्वरे पु०। "करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः"विष्णुस०। "स्वरूपं सामर्थ्यं चेष्टितं वा तस्य ज्ञातुं न शक्यते इति गहनः" भा० "गभीरो गहनो गुप्तः" विष्णुस० "दुष्प्रवेशत्वात् गहनः अवस्थात्रयसाक्षित्वाद्वा गहनः" भा०। "गहना कर्मणो गतिः" गीता। ९उदके निघ० गाहनात्तस्य तथात्वम्। १०अलङ्कारे स्त्री शब्दार्थचि०।

गहादि न० चतुरर्थ्यां छप्रत्ययनिमित्ते पा० ग० उक्ते शब्दगणे स च गणः

"गह अन्तस्थ सम विषम (मध्य मध्यंदिनं चरणे) उत्तम अङ्ग वङ्ग मगध पूर्व्वपक्ष अपरपक्ष अधमशाख उत्तमशाख एकशाख समानशाख समानग्राम एकग्राम एकवृक्ष एकपलाश इष्वग्र इष्वनीक अवस्यन्दन कामप्रस्थ खाडायन काठेरणि लावेरणि सौमित्रि शैशिरि आसुत् दैवशर्मि श्रौति आहिंसि आमित्रि व्याडि वैजि आध्यश्वि आनृशंसि शौङ्गि आग्निशर्मि भौजि वाराटकि वाल्मीकि क्षेमवृद्धि आश्वत्थि औद्गाहमानि ऐकविन्दवि दन्ताग्र हंस तन्त्वग्र उत्तर अनन्तर (मुखपार्श्वतसोर्लोपः) (जनपरयोः कुक् च) (स्वस्य च) (देवस्य) (वेणुकादिभ्यश्छण्। गहादिराकृतिगणः"। "गहादिभ्यश्छः" पा०। गहीयः।

गह्व न० गह—कर्म्मणि भावे वा वा०व।१गाम्भीर्ये २दुष्प्रवेशे च ततः अश्मादि० चतुरर्थ्यां र। गह्वर तद्युक्तादौ त्रि०।

गह्वर न० गुह—वरच् पृषो० नि०। १दम्भे अमरः। २वने, ३निकुञ्जे पु० मेदि०। ४रोदने, हेमच०। ५विषमस्थाने, ६अनेकार्थसङ्कुले च न० शब्दार्थचि०। "अथान्धकारं गिरिगह्वरस्थम्" रघुः। ८गुहायां न०स्त्री स्त्रीत्वपक्षे ङीप्। "गौरीगुरोर्गह्वरमाविवेश" रघुः। "गुहाहितं गह्वरेष्ठं पुराणम्" कठो० अम्बाद्या० षत्वम्। "काट्याय च गह्वरेष्ठाय च" यजु०१६।४।

गा गतौ सक० भ्वा० आ० अनिट्। गाते अगास्त जगे।

गा स्तुतौ सक०जन्मनि अक०जुहो०वैदिकोऽयं धातुः सार्वधातुके अभ्यासस्येत्त्वञ्च। जिगाति अगासीत्। जगौ। "सोमो जिगाति गातुवित्" ऋ० ३।६२।१२। "जरितुः सचा यज्ञो जिगाति चेतनः" ३।१२।२। "स्वेषु क्षयेषु प्रथमो जिगाति" १०।८।२। इङादेशस्य इणादेशस्य च गाते रूपं तत्तद्धातौ उक्तम्।

गाङ्ग पु० गङ्गाया अपत्यम् शिवा० अण्। गङ्गापुत्रे १भीष्मे २कार्त्तिकेये च गङ्गापुत्रशब्दे दृश्यम्। गङ्गाया इदम् अण्।३गङ्गासम्बन्धिनि जलादौ "गाङ्गमम्बु सितमम्बु यामुनम्" काव्यप्र० "गाङ्गं जलं निर्मलम्" गङ्गास्तोत्रम्। "गाङ्गं वर्षेण जीर्य्यतिः"प्रा०त०। ४मेघनिःसृते सुश्रुतोक्ते जलभेदे तल्लक्षणादि अम्बुशब्दे २२पृ० उक्तम्। ५स्वर्णे "यं गर्भं सुषुवे गङ्गा पावकाद्दीप्ततेजसम्। तदुल्वं पर्वते न्यस्तं हिरण्यं समपद्यत" भा० व० उक्तेस्तस्य तज्जातत्वात् तथात्वम्! अग्निरेतःशब्दे विस्तृतिः। ६स्वर्णनामनामके धूस्तुरे अमरः ७कशेरुणि शब्दार्थ०। ८नदीसम्बन्धिनि तटादौ त्रि०।

गाङ्गट पु० गाङ्गं नदीतटमटति अट—अच् शक०। (चिङ्गिड़ि) १मत्स्यभेदे शब्दरत्ना०। स्वार्थे क। तत्रैवार्थे शब्दर०। [तलोपः। (चिङिड़ि) मत्स्यभेदे शब्दर०।

गाङ्गटेय पु॰ गाङ्गे नदीतटे अटति अट–अच् पृषो॰

गाङ्गायनि पु॰ गङ्गाया अपत्यम तिका॰ फिञ्। १भीष्मे २कार्त्तिकेये च। प्रवरप्रवर्त्तके ३ऋषिभेदे च प्रवराध्यायः।

गाङ्गेय पु॰ गङ्गा+अपत्ये ढक्। १भीष्मे, २कार्त्तिकेये च। "यं गर्भं सुसुवे गङ्गा पावकाद्दीप्ततेजसम्। तदुल्वं पर्व्वते न्यस्तं हिरण्यं समपद्यत" इत्युक्तेः ३स्वर्णे, ४तन्नामनामके धुस्तूरे, ५कशेरुणि च शब्दार्थचि॰। ६इल्लिशमत्स्ये पु॰ त्रिका॰। ७भद्रमुस्तके राजनि॰।

गाङ्गेरुका स्त्री गाङ्गं जलमीरयति क्षिपति ईर–उ स्वार्थे क गौरा॰ ङीष्। नागबल्याम् अमरः गोरक्षतण्डुलायाम् शब्दार्थचि॰।

गाङ्गेष्ठी स्त्री गाङ्गे नदीतटे तिष्ठति स्था–क अम्ब॰ षत्वम् अलुक् स॰ गौरा॰ ङीष्। (नटा) कटशर्करालतायाम् हारा॰।

गाङ्ग्य त्रि॰ गाङ्गे गङ्गाकूले भवः यत्। गाङ्गसम्बन्धिनि। "उरुः कक्षो न गाङ्ग्यः" ऋ॰६।४५।३१। "गाङ्ग्यः गाङ्गकूले भवः" भा॰।

गाजर न॰ गज–मदे घञ् "न क्वादेः" पा॰ न कुत्वम् गाजं मदं राति रा–क। १गृञ्जने २गर्ज्जरे (गाजोर)। मूलभेदे गर्ज्जरमित्यत्र भावप्र॰ पाठान्तरम् गर्जरशब्दे गुणाद्युक्तम्।

गाडव पु॰ गडुराकारेणास्त्यस्य प्रज्ञा॰ अण् गडोर्भावो वा अण्। १गवेडुधान्ये त्रिका॰ २गडुभावे न॰।

गाडिक त्रि॰ गडिका+चतुरर्थ्यां सुतङ्ग॰ इञ्। गडिकानिर्वृत्तादौ।

गाडुल्य न॰ गडुलस्य भावः ब्राह्म॰ष्यञ्। गडुलभावे।

गाढ़ न॰गाह–क्त। १अतिशये दृढ़े। २तद्युते, ३अवगाढे, ४सेविते च त्रि॰। "तपस्विगाढ़ां तमसां प्रापेति" रघुः। "गाढ़कान्तदशनक्षतव्यथाम्" माघः। "सद्यःकण्ठच्युतभुजलताग्रन्थिगाढोपगूढ़े" मेघ॰।

गाढ़मुष्टि पु॰ गाढ़ोमुष्टिरत्र। खड्गे मेदि॰।

गाढ़ावटी स्त्री चतुरङ्गक्रीड़ाङ्गे क्रीड़ाभेदे "नौकैका वटिकायस्य विद्यते खेलने यदि। गाढ़ावटीति विख्याता पदं तस्य न दुष्यति" ति॰त॰। [कारिभवादौ।

गाणकार्य्य त्रि॰ गाणकारौ भवः कुर्वादि॰ ण्य। गण-

गाणगारि पु॰गणगारस्यापत्यम् इञ्। मुनिभेदे। "सर्वे समानगोत्राः स्युः गाणगारिः" विश्वादं॰ष्टवाक्यम्। "पुनर्होमश्च गाणगारिः" आश्व॰श्रौ॰ २।१७।१८। सूत्रे

गाणपत त्रि॰ गणपतेरिदम् अश्वपत्या॰ अण् यकोऽपवादः। १गणपतिसम्बन्धिनि। "सारस्वतो गाणपतः सौरश्च वैष्णवः क्रमात्" ति॰ त॰।

गाणपत्य त्रि॰ गणपतेर्भावः पत्यन्तात् यक्। गणपतिभावे "महादेवप्रसादेन गाणपत्यञ्च विन्दति" भा॰ व॰ ८२ अ॰। "उपोष्य रजनीमेकां गाणपत्यमवाप्नुयात्" तत्राध्याये।

गाणिक त्रि॰ गणं वेत्त्यधीते वा उक्था॰ठक्। १गणस्थलादिपाठके २तद्वेत्तरि च। गणे गणपाठे साधुः कथा॰ठक्। ३गणस्थलकुशले त्रि॰। [यञ्। वेश्यासमूहे हेम॰।

गाणिक्य न॰ गणिकानां समूहः गणिकाया यञ्" वार्त्ति॰

गाणिन पुंस्त्री गणिनोऽपत्यादि "इन्यऽणयनपत्ये" पा॰ अपत्यार्थकेनो निषेधेऽपि गाथिविदथीत्यादिना इनोनलोपः। १गणिनोऽपत्ये २तच्छात्रे च स्त्रियां ङीप्।

गाण्डव्य पु॰ गण्डोरपत्यादि गर्गा॰ यञ्। गण्डोरपत्ये। यूनि यञन्तत्वात् फञ्। गाण्डव्यायन यूनि तदपत्ये लोहिता॰ स्त्रियां युवत्यामयुवत्याञ्च ष्फ षित्त्वात् ङीष्। गाण्डव्यायनी तदपत्यस्त्रीमात्रे।

गाण्ड(ण्डी) स्त्री गडि–इनृ "गाण्ड्यजगात् संज्ञायाम्" पा॰ दीर्घनिर्द्देशात् नि॰ वृद्धिः। ग्रन्थौ। कृदिकारान्तत्वात् वा ङीष्। तत्रार्थे। "एष गाण्डीमयश्चापः" भा॰ उ॰ ९७ अ॰।

गाण्डि(ण्डी)व पुंन॰ गाण्डिरस्त्यस्य संज्ञायाम् व। १अर्जुनस्य धनुषि। तच्च धनुर्ब्रह्मणा निर्मीय सोमाय दत्तं सोमेन च वरुणाय, अग्निप्रार्थितेन च वरुणेनार्ज्जुनाय दत्तम् तत्कथा भा॰आ॰२२५ अ॰।

"तमब्रवीद्धूमकेतुः प्रतिगृह्य जलेश्वरम्। चतुर्थं लोकपालानां देवदेवं सनातनम्। सोमेन राज्ञा यद्दत्तं धनुश्चैवेषुधी च ते॥ तत् प्रयच्छोभयं शीघ्रं रथञ्च कपिलक्षणम्। कार्य्यञ्च सुमहत् पार्थो गाण्डीवेन करिष्यति। चक्रेण वासुदेवस्य तन्ममाद्य प्रदीयताम्। ददानीत्येव वरुणः पावकं प्रत्यभाषत। तदद्भुतं महावीर्य्यं यशःकीर्त्तिविवर्धनम्। सर्वशस्त्रैरनाधृष्यं सर्वशस्त्रप्रमाथि च। सर्वायुधमहामात्रं परसैन्यप्रधर्षणम्। एकं शतसहस्रेण संमितं राष्ट्रवर्धनम्। चित्रमुच्चावचैर्वर्णैः शोभितं श्लक्ष्णमव्रणम्। देवदानवगन्धर्वैः पूजितं शाश्वतीः समाः। प्रादाच्चैव धनूरत्नमक्षय्यौ च महेषुधी"। "एतद्दिव्यं धनुः

श्रेष्ठं ब्रह्मणा निर्म्मितं पुरा"। "एतद्वर्षसहस्रन्तु ब्रह्मा पूर्वमधारयत्। ततोऽनन्तरमेवाथ प्रजापतिरधारयत्। त्रीणि पञ्चशतं चैव शक्रोऽशीतिं च पञ्च च। सोमः पञ्चशतं राजा तथैव वरुणः शतम्। पार्थः पञ्च च षष्टिञ्च वर्षाणि श्वेतवाहनः" भा० वि०४२ अ०। २धनुर्मात्रे मेदि०। [र्ज्जुने। "यत्र गाण्डीवधन्वा" मेघ०।

गाण्डीवधन्वन् पु० गाण्डीवं धनुरस्य अनङ् समा०। अ-

गाण्डीविन् पु० गाण्डीवमस्त्यस्य इनि। १अर्ज्जुने मध्यमपाण्डवे त्रिका०। "कृतवान् योऽबुधः कोपाद्वरिगाण्डीविविग्रहम्" भा० आ०१४८अ०। २अर्ज्जुनवृक्षे राजनि०। [२गन्तव्ये च।

गातव्य त्रि०गै–गाने गा गतौ वा कर्मणि तव्य। १गेये

गातागतिक त्रि० गतागतेन निर्वृत्तम् अध्या० ठक्। गमागमनिष्पन्ने। [ठक्। गतानुगतनिष्पन्ने।

गातानुगतिक त्रि० गतानुगतेन निर्वृत्तम् अध्या०

गातु पु०गै–गाने गाङ्–गतौ गा–स्तुतौ वा कर्त्तृभावादौ तुन्। १कोकिले २भ्रमरे ३गन्धर्वे च मेदिनिः। ४रोषणे त्रि० मेदि०। ५गायने त्रि० उणादि०। ६गाने "गातुं कृण्वन्नुषसो जनाय" ऋ०४।५१।२। "गातुं गानम्" भा०। ७गन्तव्ये मार्गादौ "उरुं नो गातुं कृणु सोममीढ्वः" ९।८५।४। "गातुं मनुषे च विन्दः" १०।१०४।८। "गातुं गन्तव्यमार्गम्" भा० ८उपाये "चयाय गातुं वनते" ५,६५।४। "गातुमुपायम्" भा०। गच्छत्यत्र गा–गतौ आधारे तुन्। ९पृथिव्यां निघ०। "नार्क,सूर्य्यमुषसं गातुमग्निम्" ३।३१।१५। "गातुं पृथिवीम्" भा०। "गोभ्यो गातुं निरेतवे" ८।४४।३०। "गातुं भूमिम्" भा०। १०स्तवे। "यद्वतेब्रह्मणे गातुमैरत्" ४।४।६। "गातुं स्तवम्" भा०। गातुमिच्छति क्यच् गातूयति। "ये स्मा पुरा गातूयन्तीव देवाः" १।१६९।५। गातुं वेत्ति विद–क्विप्। गातुविद् मार्गादिवेत्तरि। "सोमो जिगाति गातुविद्देवानाम्" ३।६२।१३।

गातृ त्रि० गै– गाने तृच्। गायके। "गाता चतुर्णां वेदानां उद्गाता प्रथमर्त्विजाम्। स नारदोऽथ विप्रर्षिः" हरिवं५५ अ०। "तस्मात्त्वोद्गातैतस्य हि गाता" छा०उ०

गात्र शैथिल्ये अद० चु० आत्म० अक० सेट्। गात्रयते अजगात्रत। गात्रयाम्–बभूव आस चक्रे।

गात्र न० गै–ष्ट्रन् गातुरिदम् वा अण्। १अङ्गे देहे "सा मङ्गलस्नानविशुद्धगात्री" कुमा० "दुःखदुःखेन गात्रम्" मेघ०। "सृशङ्गिगात्रमन्तिकात्" रघुः। २गात्रसम्बन्धिनि त्रि० "प्रभुर्गात्राणि पर्य्यैषि" ता०ब्रा० ३हस्तिपृष्ठजङ्घादौ मेदि०। "आपस्काराल्लूनगात्रस्य भूमिम्" माघः। "लूनगात्रस्य छिन्नजङ्घस्य" मल्लि०।

गात्रगुप्त पु० कृष्णस्य महिषीषु लक्ष्मणायामुत्पन्ने पुत्रभेदे "लक्ष्मणायाः प्रजाः शृणु। गात्रवान् गात्रगुप्तश्च गात्रविन्दश्च वीर्य्यवान्। जज्ञिरे गात्रवत्याथ भगिन्यानुजया सह" हरिवं० १६२ अ०।

गात्रभङ्गा स्त्री भन्ज–घञ् गात्रस्य भङ्गोऽवसादो यस्याः। १मूकशिम्ब्याम्। शब्दच०। ६त०। २अङ्गभङ्गे (गामोड़ा) पु०।

गात्रमार्जनी स्त्री गात्रं मृज्यते अनया मृज–करणे ल्युट् ङीप्। (गामछा) क्षुद्रपट्याम्।

गात्ररुह न०गात्रे रोहति रुह–क ७त०। १तनुरुहे लोमनि। "गात्ररुहेषु च हर्षः" भाग० २२।३ अ०।

गात्रवत् पु० १लक्ष्मणागर्भजाते कृष्णपुत्रभेदे २तदनुजभगिन्यां स्त्री ङीप्। गात्रगुप्तशब्दे दृश्यम्। २प्रशस्तगात्रे त्रि०। स्त्रियां ङीप्। [दृश्यम्।

गात्रविन्द पु० लक्ष्मणागर्भजाते कृष्णपुत्रभेदे गात्रगुप्तशब्दे

गात्रसङ्कोचिन् पु०गात्रं सङ्कोचयति सम्+कुच–णिच्–णिनि ६त०। जाहकजन्तौ राजनि०। [खगे हेमच०।

गात्रसम्प्लव पु०गात्रेण संप्लवते सम्+प्लु–अच् ३त०। प्लव-

गात्रानुलेपनी स्त्री गात्रमनुलिप्यतेऽनया लिप–करणे ल्युट्। अनुलेपनवर्त्तिकायाम् अमरः।

गात्रावरण न० गात्रमावृणोति आ+वृ–ल्यु। गात्रावरके वर्म्मणि "तूणांश्च पूर्णान् महतः शराणामासज्य गात्रावरणानि चैव" भा०द्रो० २अ०।

गात्रसम्मित त्रि० गात्रं सम्मितं सम्पूर्णं यस्य। सम्पूर्णगात्रे त्रिमासोर्द्ध्वगर्भस्थे प्राणिनि। "पाद उत्पन्नमात्रे तु द्वौ पादौ गात्रसम्मिते। पादोनं व्रतमाचष्टे हत्वा गर्भमचेतनम्" प्रा० त०घृतवाक्यम्।

गाथ त्रि० गा–थन्। १स्तोत्रादौ। "गायद्गाथं सुतसोमो दुरायन्" ऋ० १।१६७।६। "गाथं गातव्यं स्तोत्रम्" भा०। २श्लोके "पादे द्वादश विषमे मात्राश्चाष्टादश द्वितीये हि। पञ्चदश चेत् तुरीये कथिता गाथा तथैवार्य्या" छन्दोम०उक्तलक्षणे २मात्रावृत्तभेदे, ३गानमात्रे च ४प्राकृतभाषायां मेदि०। गाथां करोति अण्। आनुलोम्यादावपि न ट। गाथाकार तत्कारके "अत्राप्युदाहरन्तीमां गाथां नित्यं क्षमावताम्" भा०व०२अ०।

पितृगाथादयः। "इतिहासश्च पुराणञ्च गाथाश्च नाराशंसीश्च" अथ० १५।६।४। ६वाक्यमात्रे निघ०।

गाथक त्रि० गै—थकन्। गायके "कणद्भिरलिगाथकैः" भट्टिः।

गाथगति पु० ६त० ङ्यापोरिति ह्रस्व०। वाक्पतौ रुद्रे। "गाथपतिं ये धमति रुद्रम्" ऋ० १।४३।४।

गाथिन् त्रि० गाथा स्तोत्रादि अस्त्यस्य इनि। गाथायुक्ते गीयमानसामयुक्ते "इन्द्रामरुद्गाथिनः" १।७।१। तस्यापत्यमण् गाथिविदथीत्यादिना अपत्येऽपि न टिलोपः गाथिन तदपत्ये तच्छात्रे च। स्त्रियां ङीप्।

गादि पुंस्त्री गदस्यापत्यं बाह्वा० इञ्। गदरूपयादवस्यापत्ये। [निर्वृत्ते।

गादित्य त्रि० गदितेन निर्वृत्तादि प्रगद्या० ञ्य। गदितेन

गाध प्रतिष्ठायां अक०ग्रन्थने लिप्सायाञ्च सक० भ्वा० आत्म० सेट्। गाधते अगाधिष्ट। जगाधे। ऋदित् चङि अह्रस्वः। अजगाधत्-त। गाधः। "अगाधत ततो व्योम "गाधितासे नभो भूयः" भट्टिः।

गाध पु० गाध—आवादौ घञ्। १स्थाने, २लिप्सायां, च कर्मणि घञ्। ३तलस्पर्शे हेमच०।४तद्वति त्रि०।"सरितः कुर्वती गाधाः" रघुः। "अशीमहि गाधमुत प्रतिष्ठाम्" ऋ०५।४७।७।"अनासादितगाधं च पातालतलमव्ययम्" भा०आ०२१अ०।

गाधि पु० गाध—इन्। चन्द्रवंश्ये कान्यकुब्जाधिपे, विश्वामित्रपितरि नृपभेदे। "कस्य चित्त्वथ कालस्य कुशनाभस्य धीमतः। जज्ञे परमधर्म्मिष्ठो गाधिरित्येव नामतः स पिता मम काकुत्स्थ! गाधिः परमधार्मिकः" रामा० वा०१।३४अ०। रामं प्रति विश्वामित्रोक्तौ। "ऐलपुत्रानहं वक्ष्ये" इत्युपक्रमे "कुशपुत्रा बभूवुर्हि चत्वारो देववर्चसः"। कुशिकः कुशनाभश्च कुशाम्बो मूर्त्तिमांस्तथा" "कुशिकस्तु तपस्तेपे पुत्रमिन्द्रसमं विभुः। लभेयमिति "तं शक्रस्त्रासादभ्येत्य जज्ञिवान्" "पूर्णे वर्षसहस्रे वै तन्तु शक्रो ह्यपश्यत। अत्युग्रतपसं दृष्ट्वा सहस्राक्षः पुरन्दरः। समर्थः पुत्रजनने स्वमेवांशमवासयत्। पुत्रत्वे कल्पयामास स देवेन्द्रः सुरोत्तमः। स गाधिरभवद्राजा मघवान् कौशिकः स्वयम्। पौरकुत्स्यभवद्भार्य्या गाधिस्तस्यामजायत" हरिवं० २७अ०।

गाधिज पु०गाधेर्जायते जन—ड। विश्वामित्रे ब्रह्मर्षौ तत्कथा हरिवं० २७ अ०। "विश्वामित्रन्तु दायादं गाधिः कुशिकनन्दनः। जन पुत्रन्तु तपोविद्याशमात्मकम्। प्राप्य ब्रह्मर्षिसमतां योऽयं सप्तर्षितां गतः। ऋचीकशब्दे १४१४पृ० तदुत्पत्तिकथा। गाधिसुतादयोऽप्यत्र "ततोऽभ्यगात् गाधिसुतः क्षितीन्द्रम्" भट्टिः। "प्रजापतिसुतादासीत् कुशो नाम महीपतिः। कुशस्य पुत्रो बलवान् कुशनाभः सुधार्म्मिकः। कुशनाभसुतो ह्यासीत् गाधिरित्येव विश्रुतः" "गाधेः पुत्रो महातेजा विश्वामित्रो महामुनिः" रामा०वा०२१अ०।२विश्वरथादौ च।

गाधिन् पु०गाधिनामके नृपे।"शीघ्रमाख्यात मां प्राप्तं कौशिकं गाधिनः सुतम्" रामा०वा०१८अ०

गाधिपुर न० ६त०। कान्यकुब्जे महोदयाख्ये पुरे हेमच०। कान्यकुब्जशब्दे १८८६ पृ० कुशनाभशब्दे च दृश्यम्। गाधिनगरादयोऽप्यत्र।

गाधेय पु० गाधेरपत्यम् द्व्यचः इत्यनुवृत्तौ "इतोऽनिञः" पा० ढक्। गाधिपुत्रे विश्वामित्रादौ। "विश्वामित्रस्तु गाधेयो राजा विश्वरथस्तथा। विश्वकृत् विश्वजिच्चैव तथा सत्यवती नृप!" हरिवं० २२ अ०। "गाधेयदिष्टं विरसं रसन्तम्" भट्टिः। तस्य कन्यायां २सत्यवत्यामृचीकपत्न्याम् स्त्री ङीप्। "उवाच भार्य्या गाधेयी भर्त्तारं भार्गवर्षभम्" भा० आनु० ४अ०।

गान न०गै—भावे—ल्युट्। १गीतौ। गानं हि द्विविधं लौकिकं वैदिकञ्च। तत्र लौकिकगानस्य लक्षणादि गीतशब्दे वक्ष्यते वैदिकस्य लक्षणादि जै०९।२।२९ सूत्रभाष्यादौ उक्तं यथा

"अर्थैकत्वात् विकल्पः स्यात्" २९सू०। "सामवेदे सहस्रं गीत्युपायाः। आह, के इमे गीत्युपायाः नाम?"। उच्यते,—गीतिर्नाम क्रिया, सा आभ्यन्तरप्रयत्नजनितस्वरविशेषाणामभिव्यञ्जिका, सा सामशब्दाभिलप्या, सा च नियतपरिमाणायामृचि गीयते, तत्सम्पादनार्थाः ऋक्षु अक्षरविकारो विश्लेषो विकर्षणमभ्यासो विरामः स्तोभ इत्येवमादयः सर्वे समधिगताः समाम्नायन्ते। तेषु संशयः,—किं समुच्चीयन्ते उत विकल्प्यन्ते?—इति। किं तावन्नः प्रतिभाति, सर्वेषां समाम्नानात् सर्वाङ्गोपसंहारित्वाच्च प्रयोगवचनस्य, समुच्चीयेरन्निति एवं प्राप्ते ब्रूमः, "अर्थैकत्वाद्विकल्पः स्यात्" इति। एकार्था हि गीत्युपायाः,—गीतिः कथं निर्वर्त्त्येतेति प्रयुज्यन्ते, तत्रान्यतरेण गीतौ निर्वृत्तायां नेतरे प्रयोगमर्हन्ति। तस्माद्विकल्प इति"। तत्र स्वराः क्रुष्टादयः षष्ठान्ताः सप्त सामविधानब्रा०१।१। उक्ताः

यथा "तद्योऽसौ क्रुष्टतमइव साम्नः स्वरस्तं देवा उपजीवन्ति येऽवरेषां प्रथमस्तं मनुष्यायो,द्वितीयस्तं गन्धर्वाप्सरसो, यस्तृतीयस्तं पशवो,यश्चतुर्थस्तं पितरो ये चाण्डेषु शेरते,यः पञ्चमस्तमसुररक्षांसि,योऽन्त्यस्तमोषधयोवनस्पतयोयच्चान्यज्जगत्, तस्मादाहुः सामैवान्नमिति साम ह्येषामुपजीवनं प्रायच्छत्। उपजीवनीयो भवति यएवं वेद तस्य ह वा एतस्य साम्न ऋगेवास्थीनि स्वरोमांसानि स्तोभा लोमानि। योह वै साम्नः स्वं यः सुवर्णं वेद स्वं च ह वै साम्नः सुवर्णं च भवति स्वरो वाव साम्नः स्वं तदेव सुवर्णम्"।

छान्दोग्ये च "का साम्नो गतिरिति स्वर इति होवाच" "स्वर इति स्वरात्मकत्वात् साम्नः, यो यदात्मकः स तद्गतिस्तदाश्रयश्च भवतीति मृदाश्रय इव घटादि" भा०। सामसंहिताभाष्येऽपि तथैवोक्तं यथा

""साम-शब्द-वाच्यस्य गानस्य स्वरूपमृगक्षरेषु क्रुष्टादिभिः सप्तभिः स्वरैः,अक्षरविकारादिभिश्च निष्पाद्यते। क्रुष्टः प्रथमः द्वितीयस्तृतीयश्चतुर्थः पञ्चमः षष्ठश्च इत्येते सप्त स्वराः ते चावान्तरभेदैर्बहुधा भिन्नाः। स्वरस्य साम-निष्पादकत्वं छान्दोग्योपनिषदः प्रथमे प्रपाठके प्रश्नोत्तराभ्यामामनन्ति"।

तत्राक्षरविकारविषये पूर्वोत्तरपक्षौ जै० ९।२।२२। सूत्रादिभाष्ययोर्दर्शितौ यथा

"सामप्रदेशे विकारस्तदपेक्षः स्याच्छास्त्रकृतत्वात्" सू०२२। "इदमाम्नायते,—'रथन्तरमुत्तरयोर्गायति, यद्योन्यां तदुत्तरयोर्गायति कवतीषु रथन्तरं गायति, विराट्सु वामदेव्यम्" इति। तत्र सन्देहः,—किमुत्तरावर्णवशेन गातव्यं, किं योनिवर्णवशेन ?। कथमुत्तरावर्णवशेन गीतं भवति ? कथं वा योनिवर्णवशेन ? इति। उच्यते, किञ्चिदुदाहरणं गृहीत्वा व्याख्यास्यामः,—यदा तावत् बृहन्नालव्यमाईं भवति इति योनौ यस्मिन् भागे आईभावः क्रियते. ततो योनिवर्णवशेन गीतं भवति, अथ भागान्तरे बृहन्नालव्यं दृष्ट्वा आईभावः क्रियते, तत उत्तरावर्णवशेन गीतं भवति। किं पुनरत्र कर्त्तव्यम् ?—योनिवर्णवशेनेति। कथम् ?। यावति भागे ५एकारस्य योनौ ईभावः कृतस्तं विचारयामः,—किं तत्र कृतमिति ?—एकारो नोच्चारितः, ईकाराकारौ आगमिताविति, एवञ्चेदुत्तरास्वपि तावत्येव भागे यो वर्णः, स न उच्चारयितव्यः, ईकाराकारौ आगमयितव्यौ इति। एवं, यद्योन्यां तदुत्तरयोर्गीतं भवति। तस्माद्योनिवर्णवशेन गातव्यमिति। अपि चैवं गीतिर्न नङ्क्ष्यति,इतरथा क्वचित् प्रणश्येत् यत्र महती गीतिः अल्पेषु अक्षरेषु गीयते, तत्र व्यक्तं प्रणश्यति यद्युत्तराक्षरवशेन क्रियते, तस्माद्योन्यक्षरवशेन कर्त्तमिति। अपिच क्वचित् क्रम उपरुध्यते यत्क्रमे आईभावभाग्वर्णः, आर्षश्च क्वचिदुपरुध्यते, यत्र प्राकृत आगमो नैव क्रियते, तत्र स्वाध्यायकाले गानेन च कर्मकालं गानमविरुद्धं कर्त्तव्यं, तस्मात् योन्यक्षरवशेन कर्त्तव्यमिति "सामप्रदेशे विकारः" आईभावादिः, "तदपेक्षः' योन्यपेक्षः, एतत् शास्त्रेण कृतः,—'यद्योन्यां तदुत्तरयोः' इति, यावति सामभागे योनौ आईभावः कृतः, तावत्येवोत्तरासु कर्त्तव्यः" भा०। "वर्णे तु वादरिर्यथाद्रव्यं द्रव्यव्यतिरेकात्"२३सू०। "उत्तरावर्णवशेन कर्त्तव्यं वादरिर्मन्यते स्म, न योनिभागवशेन। कुतः ?। योऽसौ प्रकृतौ आईभावः कृतः, नासौ आगमः, न च तत्र एकारलोपः, किन्तर्हि ? एकारो नाम आवर्णम् ईवर्णञ्च आवर्णं संवृतम्, ईवर्णं विवृतम्, उभे अपि च दीर्घे, ताभ्यामसाधुभ्यां सन्ध्यक्षरं साधु जन्यते। तत्र प्रकृतौ आकारेकारौ विश्लेषितौ, नापूर्वावागमितौ, गुणस्तु तयोः कश्चिदपूर्वः कृतः। सर्वत्रात्र प्रमाणं प्रत्यक्षं तद्वत्, तावति भागेऽन्यो वर्णो भवति, न सन्ध्यक्षरं, तत् संश्लेषाभावे विश्लेषो न शक्यः कर्त्तुम्, अन्यस्मिन् भागे यत् सन्ध्यक्षरं भवति, तत् तद्वशाद्विश्लेषः क्रियते एवं, यद्योन्यान्तदुत्तरयोः कृतं भवति, योन्यां हि संश्लिष्टयोर्विश्लेषः कृतः, इहापि संश्लिष्टयोर्विश्लेषः, इतरथा व्यतिरिक्तं कल्पितं स्यात् अथ यदुक्तं,—गीतिः प्रनङ्क्ष्यतीति, न प्रनङ्क्ष्यतीति, विनामं कृत्वा अनक्षरं गायिष्यते। संश्लेषभावाच्चाशक्यो विश्लेषः, आर्षक्रमौ नोपरोत्स्येते" भा०।

स्तोभविषये च तथैव तौ पक्षौ तत्रैव९।२।२४।२९सूत्रादौ दर्शितौ यथा

"स्तोभस्यैके द्रव्यान्तरे निवृत्तिमृग्वत्"२४सू०। "कवतीषु रथन्तरं गायति, रथन्तरमुत्तरयोर्गायति यद्योन्यां तदुत्तरयोर्गायति' इति। तत्रोत्तरावर्णवशेन गातव्यमित्येतत् समधिगतम्। अथेदानीम् इह संदिह्यते,—किं स्तोभाः प्रदिश्यन्ते न वा ? इति। किं प्राप्तम् ?—न प्रदिश्यन्ते इति। कुतः। गीतिर्हि

साम, न स्तोभाः, या गीतिः, सा प्रदिश्यते, "यद्योन्यां तदुत्तरयोर्गायति" इति गायतिशब्दसम्बन्धात्। अपि च ऋक्शब्दार्थैरसंबध्यमानः स्तोभोऽनर्थकः स्यात्, तस्मादपि न प्रदिश्येत। अपिच कश्चिद्भवति वचनम्,—"ऐन्द्राग्नमवक्ष्यसाम गायति" इति, तत्रानुपपत्तिर्भवेत् शीतकर्मा हीन्द्रो वाक्यशेषेभ्योऽवगम्यते। तस्य "तपति" इत्यनेन सम्बन्धो न स्यात्। तस्मात् स्तोभस्य ऋगन्तरे निवृत्तिः, यथा ऋगक्षराणामगीतित्वात् निवृत्तिरेवं स्तोभाक्षराणामपीति" भा०। "सर्व्वातिदेशस्तु सामान्याल्लोकवद्विकारः स्यात्"२५सू०। "नैतदस्ति,-स्तोभानां निवृत्तिरिति, सर्वातिदेशो हि भवति, ऋक्-स्तोभ-स्वर-कालाभ्यासविशिष्टायाः गीतेः सामशब्दो वाचकः। कथमवगम्यते ?। तत्र प्रयोगात्, यदि स्तोभा निवर्त्तेरन्, तत्कृतो विशेषो नोपसंहितः स्यात् तत्र शब्दो वाध्येत! तस्मात् स्तोभाः प्रदिश्येरन्। यत्तूक्तम्,-ऋक्शब्दार्थैः असम्बध्यमानाः स्तोभा अनर्थका भवेयुः, अत्र ब्रूमः,—"लोकवत्" न अनर्थका भविष्यन्ति। तद्यथा, लोके गायनैरङ्गव्यञ्जकानि यानि नाम प्रक्षिप्यन्ते, तानि गीतिकालगणनार्थानि, नार्थसम्बन्धाय उच्चार्यन्ते, सुखं ह्यक्षरैः गीतिकालः परिच्छिद्यते, तद्वदिहापि कालपरिच्छेदार्थानि स्तोभाक्षराणि अनुवर्त्तेरन्निति" भा०। "अन्वयतश्चापि दर्शयति"२६सू०।"अन्वयतश्चापि स्तोभान् दर्शयति, "यत्राधिकानि पदानि निवर्त्तन्ते, "स्तोभा गेह्माश्चानुयन्ति" इति, "स्तोभाः" स्तोभा एव "गेह्माः" स्वराः। तस्मादपि स्तोभाः प्रदिश्यन्ते" भा०। "निवृत्तिर्वाऽर्थलोपात्"२७सू०।"वाशब्दात्पक्षो विनिवर्त्त्यते। 'निवृत्तिः' 'अग्निष्टपति' इत्येवञ्जातीयकाः, शीतकर्मा हीन्द्री वाक्यशेषे उपलभ्यते, न तेनैवंजातीयकाः स्तोभाः सम्बध्येरन्निति। अन्वयात्सम्बध्यन्ते लोकवदिति यदुक्तं, तत्परिहर्त्तव्यम्" भा०। "अन्वयो वार्थवादः स्यात्" २८सू०। "अन्वीयुर्वा एवञ्जातीयकाः स्तोभाः, नहि वयमिन्द्ररूपं प्रत्यक्षमुपलभामहे, यच्च वाक्यशेषवचनं, सोऽर्थवादः" भा०।"अधिकश्च विवर्णश्च जैमिनिः स्तोभशब्दत्वात्" २९सू०।"अथ कः स्तोभो नाम, ? तस्य लक्षणं कर्त्तव्यम्, उच्यते,—य ऋगक्षरेभ्योऽधिको न च तैः सवर्णः स स्तोभो नाम, ईदृशे हि लौकिकाः स्तोभशब्दमुपचरन्तीति,—तद्यथा देवदत्तेन सभायां परं प्रलपता बहुस्तोभं कथितमिति, यदर्थवचनेभ्योऽधिकं विवर्णञ्च, तत् आलोच्य एवंप्रकारो भवन्ति। लक्षण प्रयोजनं न वक्तव्यं, लक्षणकर्मणो हि तदेव प्रयोजनं, यल्लक्षितो भविष्यतीति। किमर्थमुभयं सूत्रितं ? नन्वन्यतरत् पर्य्याप्तम् अधिकमिति वा' इति। नेत्याह,—भवति हि किञ्चित् अधिकं न सवर्णं,—यथा अभ्यास,-"तोयाइ, तोयाइ" इति, तथा किञ्चित् विवर्णं,नाधिकं,-यथा विकारः,—"ओग्नाइ" इति। तस्मादुभयं सूत्रयितव्यमिति" भा०।

विवृतञ्चैतत् सामसंहिताभाष्ये यथा

"समुच्चेया विकल्प्या वा विभिन्ना गीति-हेतवः। आद्यः प्रयोगग्रहणादैकत्वाद् विकल्पनम्। छान्दोग्ये तवल्कारादि-शाखा-भेदेषु विलक्षणा गीति-हेतवोऽक्षर-विकारादय आम्नायन्ते, ते सर्वे कर्मानुष्ठाने समुच्चेतव्याः, कुतः ? प्रयोगवचने सर्वेषां परिगृहीतत्वात्—मैवम्, एकैक-शाखोक्तैरेवाक्षर-विकारादिभिरध्ययन-कालएव गीति-स्वरूपनिष्पत्तेस्तन्निष्पत्ति-लक्षणस्य प्रयोजनस्यैकत्वात्, प्रयोग-वचन-परिगृहीता अपि व्रीहि-यव-वद् बृहद्रथन्तरवच्च विकल्प्यन्ते" इति। गीतिहेतुषु स्तोभस्यात्यन्तमप्रसिद्धत्वात्तल्लक्षणं तस्मिन्नेव पादे एकादशाधिकरणे चिन्तितम्—"स्तोभस्य लक्षणं नास्ति किं वास्ति न विवर्णता। आधिक्यमप्यतिव्याप्तं विशिष्टं लक्षणं भवेत्। न तावद् विवर्णत्वं लक्षणम्, वर्ण-विकारस्य विपरीत-वर्णत्वेन स्तोभत्व-प्रसङ्गात्, "अग्न-आयाहि" (छ,१प्र,१द,१) इत्यस्यामृचि अकारस्य स्थाने ओकारं कृत्वा गायन्ति "ओग्नाइ" इति (गे०प्र१सा१)। अधिको वर्णः स्तोभ इत्युक्ते सति, अभ्यासेऽतिव्याप्तिः, "पिवासोममिन्द्रमन्दतुत्वा" इत्येतस्यामृचि दतुत्वेत्यक्षर-त्रयं गानकाले त्रिरभ्यस्तम्। अतोविकाराभ्यासयोरतिव्याप्तेर्नास्तिलक्षणम्-इति चेद्—मैवम्, अधिकत्वे सत्यृग्विलक्षण-वर्णः स्तोभः" इति विशिष्टस्य तल्लक्षणत्वात्। लोकेऽपि सभायां विप्रलम्भकेनोच्यमानं प्रकृतार्थानन्वितं काल-क्षेप-मात्र-हेतुं शब्दराशिं स्तोभ इत्याचक्षते, तस्मादस्ति लक्षणम्" इति। अक्षर-विकार-स्तोभादिवत् वर्ण-लोपोऽपि क्वचिद् गीति-हेतुर्भवति, तल्लोप-विषयश्च विचारो नवमाध्याये प्रथमपादस्याष्टादशाधिकरणेऽभिहितः—१०"इरा गिरा विकल्पः स्यादुतैवाविशेषतः। आद्यमैरं वाध-पूर्वमिरायाविहितत्वतः। ज्योतिष्टोमे श्रूयते "यज्ञायज्ञीयेन स्तुवीत"-इति।

'यज्ञायज्ञा'-इत्यनेन शब्देन युक्तायामृच्युत्पन्नं साम यज्ञायज्ञीयम्, तस्यामृचि गिराशब्दः पठ्यते 'यज्ञा यज्ञा वो अग्नये गिरा गिरा च दक्षसे'-इति। तत्र सामगा योनिगानमधीयानाः सहैव गकारेण गायन्ति 'गायिरा गिरा'-इति, ब्राह्मणे तु गकार-लोप-पूर्वकमाकार-यकारादिकगानं विधीयते 'ऐरं कृत्वोद्गेयम्'-इति, गिरा-शब्दे गकार-लोपात् इराशब्दो भवति, इरायाः सम्बन्धि गानम् ऐरम्, तादृशं कृत्वा प्रयोगकाले तद्गानं कर्त्तव्यमित्यर्थः। तत्र योनिगान-ब्राह्मणयोः समान-बलत्वेन विशेषाभावात् विकल्पेन प्रयोक्तव्यम्-इति प्राप्ते, ब्रूमः—"न गिरा गिरेति ब्रूयाद्, यद् गिरा गिरेति ब्रूयाद् आत्मानमेव तदुद्गाता गिरेत्" इति गकार-सहित गाने बाधकमुक्त्वा गकार-रहित-मिरा-पदं गेयत्वेन विधीयते, तत्पदादेरिकारस्य गानार्थमाकारोयकारइकारश्चेति त्रीन् वर्णान् प्रयुञ्जते, ततः 'आयिरा'-इत्येव गातव्यम्" इति। तत्रैवोपरितनाधिकरणे कश्चिद् विशेषश्चिन्तितः—""इरापदं न गेयं स्याद् गेयं वा गीत्यनुक्तितः। न गेयं गीयमानस्य स्थाने पातात् प्रगीयते। ब्राह्मणेन निहित-इराशब्दो न गातव्यः, कुतः? ऐरमिति शब्देन गीतेरनुक्तत्वात्, पाणिनीयेन 'विमुक्तादिभ्योऽण् [५,२,६१] इति सूत्रेणेराशब्दादण्-प्रत्ययो मत्वर्थीयो विहितः, तथा सतीरापदोपेतं कृत्वेत्येतावानेवार्थो भवति, यदि प्रगीतेरापद-सम्बन्धः तद्धितेन विवक्ष्येत, तदानीमाकारो यकारइकारोरेफआकारश्चैतैः पञ्चभिर्वर्णैर्निष्पन्नमायिरा-रूपं गीयमानैरा-शब्द-प्रातिपदिकं भवति, तादृशात् प्रातिपदिकात् पाणिनीयेन 'वृद्धाच्छः [४,२,११४]'-इति सूत्रेण छप्रत्ययान्तरे सति, आयिरीयं कृत्वेति ब्राह्मणपाठो भवेत्, तस्मान्न गेयम्-इति प्राप्ते, ब्रूमः—गीयमानस्य गिरा-पदस्य स्थाने इरापदं विधीयते-इतिपदमात्रस्य बाधः, गानन्तु न बाध्यते, किञ्च विमुक्तादिसूत्रेणाण्-प्रत्ययेऽपि, पूर्वस्मात् 'मतौ छः सूक्त-साम्नोः [५,२,५९]-इति सूत्रात् सामानुवृत्तेरैरं सामेत्यर्थो भवति, सामत्वं च गीति साध्यम्, यदा तु 'तस्य विकारः [४,३,१३४]'-इत्यर्थे अण्प्रत्ययः, तदानीमिराया विकार इति विग्रहेयथोक्तं गानं लभ्यते, तस्माद् गातव्यम्" इति। तत्रैव ऋगक्षराणां संस्कारकत्वं गानात्मकसाम्नो व्यवस्थाप्योक्तं यथा

यथोक्तमृगक्षराणां संस्कारकं गीत्यात्मकं यत् साम तदेतदेकैकं छन्दोगा एकैकस्यामृचि 'वेदसाम-नामके ग्रन्थेऽधीयन्त, ऊहनामके तु ग्रन्थे एकैकं साम तृचेऽधीयते सोऽयमूहग्रन्थः तस्मिन्नेव पादे प्रथमाधिकरणस्य द्वितीयवर्णके विचारितः—"ऊहग्रन्थोऽपौरुषेयः पौरुषेयोऽथवाग्रिमः। वेदसाम-समानत्वाद् विधि-सार्थत्वतोऽन्तिमः। यस्मिन् ग्रन्थे सामगास्तृचे तृचे सामैकैकं गायन्ति सोऽयमूहग्रन्थोनित्यो नं तु पुरुषेण निर्मितः, कुतः? अनध्यायवर्जनेन कर्तुरस्मरणेनाध्यापकानां वेदत्वप्रसिद्ध्या च वेदसाम-नामक-योनि-ग्रन्थ-सदृशत्वात्, इति चेत्—मैवम्, अपौरुषेयत्वे विधि-वैयर्थ्य-प्रसङ्गात्—'यद्योन्यां तदुत्तरयोर्गायति'-इति विधीयते। अयमर्थः—अपौरुषेयत्वेन सम्प्रतिपन्ने वेदसाम-नामके ग्रन्थे 'कया नश्चित्र आ भुवत्' इत्येतस्यां योन्यामेकस्यामृचि यद्-वामदेव्य-नामकं सामोपदिष्टं तदेवोत्तरयोर्ऋचोः 'कस्त्वा सत्यो मदानाम्' "अभी षु णः सखीनाम्" इत्येतयोः द्वितीयतृतीययोर्गातव्यम्-इत्ययं विधिरूहग्रन्थस्य वेदत्वे व्यर्थः स्यात्, "वेदसाम-वदध्ययनादेव तत् प्रसिद्धेः। उपरितनऋग्द्वये सामोहस्य पौरुषेयत्वेऽपि सामस्वरूपस्य तदाधारभूतानां तिसृणामृचां च वेदत्वादनध्याये वर्जनीयाः, कर्तुरस्मरणं जीर्णकूपारामादिष्विव चिरकाल-व्यवधानादुपपन्नम्, अ-स्मरण-मूलिकैवाध्यापकानां वेदत्वप्रसिद्धिः यथाबह्वृचानामध्यापका महाव्रत-प्रयोग-प्रतिपादकमाश्वलायन-निर्मितं कल्पसूत्रमारण्येऽधीयमानाः पञ्चममारण्यकमिति वेदत्वेन व्यवहरन्ति तद्वत्। न च तस्यापि वेदत्वमस्त्विति वाच्यम्, प्रथमारण्यकेन पुनरुक्तत्वात्, अर्थवाद-राहित्येन ब्राह्मणसादृश्याभावाच्च। तस्मात् पञ्चमारण्यकवदूहः पौरुषेयः, पौरुषेयस्य च न्यायमूलत्वात् यत्र वक्ष्यमाणन्याय-विरोध-स्तदप्रमाणम्"। अत्रेदं दिङ्मात्रमुदाह्रियते। "अग्न आयाहि वीतये गृणानो हव्यदातये। नि होता सत्सि बर्हिषि" सा॰ प्रथमा ऋक्। तस्या अक्षरविकारादिभिरेवं गानम्। यथा ''ओग्नाइ आयाही३ वीइ(यि) तोयाइ तोयाइ गृणानो ह, व्यदा तोयाइ तोयाइ नाइ हो तासा३ साइ वा औ हो वा हीषि"। तत्र अग्न इत्यत्र आद्यस्य वर्णविकारे अ इत्यस्य स्थाने ओरूपो विकारः। एवं ए इत्येकारस्थाने आइ इति विश्लेषणम्। आयाहि

इत्यत्र दीर्घता इति वर्णविकारः। वी इत्यत्र वीइ (यि) विश्लेषणम्। त इत्यस्य तो इति विकारः। गे इत्यत्र एकारस्य आई, इति विश्लेषे ताई इति। तोयाई तोयाई इत्यभ्यासः। गृणानोह, इति हव्यदातय इत्यस्यैकदेशे विरामः। व्यदातये इत्यत्र त इत्यत्र अकारस्य ओ इति विकारे ये इत्यत्र आई इति विश्लेषे च तोयाई इति तस्य चाभ्यासः। नि इत्यत्र नायि इति वर्णविकारः। हो इत्यत्र विरामः। ता इति यथास्थितम् सत्सीत्यस्य स इत्यत्र विरामः दीर्घश्चाक्षरागमः वर्णविकारः। त्सि इत्यस्य स्थाने तृषाय इति तलोपविकारौ। वर्हिषि इत्यस्य व इत्यत्र विरामो दीर्घश्च। औहो वा इति स्तोभः ऋगक्षराधिकत्वात्। र्हिषि इत्यत्र दीर्घरलोपौ अक्षरविकारश्च। एवमन्यत्राप्यूह्यम्। एवंरूपेण अक्षरविकारादि तु नारदशिक्षाद्यनुसारेण ज्ञेयम्। सामभेदाश्च रथन्तरादयः गानविशेषा एव यथाह सामसं॰ भाष्ये

"यदुक्तं "गीतिषु सामाख्येति" जै॰सू॰ तदेव विशदीकर्त्तुं सप्तमाध्यायस्य द्वितीयपादे रथन्तरशब्दो निरूपितः· "अतिदेशंत्र विनिश्चेतुं कवतीषु रथन्तरम्। गायतीत्यृग् गानयुक्ता शब्दार्थोगानमेव वा। इति चिन्ता गानयुक्ता त्वभित्वेत्यृक् प्रसिद्धितः। लाघवादतिदेशस्य योग्यत्वाच्चान्तिमोभवेत्। इदमाम्नायते—"कवतीषु रथन्तरं गायति"-इति, "कया नश्चित्र आभुवदित्याद्यास्तिस्र ऋचः कवत्यः, तासु वामदेव्यं सामाध्ययनतः प्राप्तम् तस्मादिदं रथन्तरं साम तास्वतिदिश्यते, तत्रातिदेशस्य स्वरूपं निश्चेतुं रथन्तर-शब्दार्थश्चिन्त्यते। गानविशेषयुक्ता "अभि त्वा शूर नोनुम" इतीयमृग् रथन्तरमित्युच्यते, कुतः? अध्येतृ-प्रसिद्धितः रथन्तरं गीयतामिति केनचिदुक्ताः अध्येतारः स्वर-स्तोभविशेषयुक्ताम् अभित्वेत्यृचं पठन्ति, न तु स्वरस्तोभमात्रम् तस्माद् गान-विशिष्टायाऋचोरथन्तर-शब्दार्थत्वमिति प्राप्ते, ब्रूमः स्वरादिविशेषानुपूर्वीमात्रस्वरूपमृगक्षर-व्यतिरिक्तं यद् गानं तदेव रथन्तरशब्दार्थः, कुतः? लाघवात्, किञ्च कवतीष्वृक्षु गानमतिदेष्टुं योग्यम्। नत्वृचस्तद्योग्यतास्ति, कयानोऽभित्वेत्यनयोऋचोर्युगपदाधाराधेयभावेन पठितुमशक्यत्वात्, तस्माद् गानविशेषस्य रथन्तरशब्दार्थः इति। पुनरपि नवमाध्यायस्य द्वितीयपादे प्रथमाधिकरणस्य प्रथमवर्णके सामशब्दस्य गानमात्र-वाचित्वं स्मारितम्—"सामोक्ति-वृहद्रथद्युक्ती गीतायामृचि केवले। गाने वा गानएवेति स्मार्यते सप्तमोदितम्। सामान्यवाची सामशब्दो विशेषवाचिनो वृहद्रथन्तरादि-शब्दाश्च गानमात्रे वर्त्तन्ते, न तु गानविशिष्टायामृचि-इत्ययं नियमः सप्तमस्य द्वितीयपादे सिद्धः"। वेदगानग्रन्थे ऊहगानग्रन्थे चास्य विस्तरः। तद्भेदाश्च सामशब्दे वक्ष्यन्ते।

गा—गतौ ल्युट्। २गमने। गा स्तुतौ ल्युट्। ३स्तवने।

गानिन् त्रि॰ गानमस्त्यस्य इनि। १गतियुक्ते। २गीतियुक्ते ३स्तुतियुक्ते च स्त्रियां ङीप्। ४वचायाम् स्त्री शब्दच॰।

गान्तु त्रि॰ गम-तुन् वृद्धिश्च। १गन्तरि २पथिके उज्ज्वल॰ ३गाथके संक्षिप्तसा॰ वस्तुतः तत्रापि पथिक इत्येव पाठः लिपिकरप्रमादात् गायक इति।

गान्त्री स्त्री गन्त्र्येव गन्त्री+स्वार्थे अण् ङीप्। वृषवाह्ये शकटे रायमुकुटः। "भ्रसुजिगमिनमीत्यादिना" सूत्रेण ष्ट्रन् वृद्धिश्च गान्त्रं शकटमित्युज्ज्वलदत्तोक्तेः क्लीवत्वमपि।

[नदीभवे।

गान्दिक त्रि॰ गन्दिकायां भवः सिन्ध्वा॰ अण्। गन्दिका-

गान्दिनी स्त्री काशिराजदुहितरि श्वफल्कभार्य्यायामक्रूरादिमातरि त्रिका॰ तस्या नामनिरुक्तिः हरिवं॰३५अ॰ उक्ता यथा "शफल्कः काशिराजस्य सुतां भार्य्यामविन्दत। गान्दिनी नाम सा गां तु ददौ विप्रेषु नित्यशः। सा मातुरुदरस्था तु बहून् वर्षगणान् किल। निवसन्ती न वै जज्ञे गर्भस्थां तां पिताऽब्रवीत्। जायस्व शीघ्रं भद्रन्ते किमर्थमिह तिष्ठसि। प्रोवाच चैनं गर्भस्था कन्या गाञ्च दिने दिने। यदि दद्यां ततो जाये पितरं प्रत्युवाच ह। तथेत्युक्त्वा च तां चास्याः पिता काममपूरयत्। दाता यज्वा च वीरश्च श्रुतवानतिथिप्रियः। अक्रूरः सुषुवे तस्यां श्वफल्काद्भूरिदक्षिणः। उपमद्गुस्तथा मद्गुर्मृदरश्चारिमेजयः। अविक्षिपस्तथोपेक्षः शत्रुघ्नोऽथारिमर्द्दनः। धर्मभृग् यतिधर्मा च गृध्रभोजान्धकस्तथा। आवाह प्रतिवाहौ च सुन्दरी च वराङ्गना"। गान्धिनीति त्रिका॰ पाठान्तरम्। दर्शितनिरुक्तेर्दकारयुक्तैव युक्ता। गां भूमिं दायति शोधयति दै-णिनि पृषो॰। २गङ्गायां त्रिका॰।

गान्दि(न्धि)नीसुत पु॰ ६त॰। १भीष्मे २कार्त्तिकेये त्रिका॰ ३अक्रूरादौ च। गान्दिनीशब्दे तन्मूलं

ह्ययम्। "रिपोर्गिरा गुरुमपि गान्दिनीसुतम्" माघः। "गान्दि(न्धि)न्यास्तु श्वफल्कतः। अक्रूरप्रमुखा आसन् पुत्रा द्वादश विश्रुताः" भाग० "आसङ्गः सारमेयश्च मृदुरो मृदुरिर्गिरिः। धर्म्मवृद्धः सुकर्मा च क्षेत्रोऽपेक्षोऽरिमर्द्दनः। शत्रुघ्नो गन्धमादश्च प्रतिबाहुश्च द्वादशः। तेषां स्वसा सुचार्व्वाख्या" भाग० ९।२४।९। अत्र अक्रूरप्रमुखा इत्यत्रातद्गुणसंविज्ञानबहुव्रीहिणा अक्रूरं त्यक्त्वा द्वादश तेन सह त्रयोदशेत्यर्थः। तत्सुतायां ४चार्व्यां स्त्री। गान्दिनीशब्दोक्ते हरिवं० वाक्ये तत्पुत्राणां नामान्तरमुक्तं तच्च कल्पभेदादविरुद्धम्।

गान्दी स्त्री अक्रूरमातरि गान्दिन्याम्। "स्यमन्तककृते प्राज्ञो गान्दीपुत्रो महायशाः" हरिवं ४०अ०।

गान्धपिङ्गलेय पुंस्त्री गन्धपिङ्गलाया अपत्यम् शुभ्रा० ढक्। गन्धपिङ्गलायाः अपत्ये स्त्रियां ङीप्।

गान्धर्व त्रि० गन्धर्वस्येदम् अण्। १गन्धर्वसम्बन्धिनि गान्धर्वलोकः। "इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च। गान्धर्वः स तु विज्ञेयः" इत्युक्ते २विवाहभेदे, गान्धर्वविवाहेऽधिकारिभेदादि नि० सि० उक्तं यथा।

"मनुः "षड़ानुपूर्व्या विप्रस्य क्षत्रस्य चतुरो वरान्। विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान्"। चतुरः आसुरगान्धर्वराक्षसपैशाचान्, तान् राक्षसवर्ज्यान् वैश्यशूद्रयोः। स एव "आसुरं वैश्यशूद्रयोः" हेमाद्रौ पैठीनसिः "राक्षसो वैश्यस्य, पैशाचः शूद्रस्य" प्रचेताः "पैशाचोऽसंस्कृतप्रसूतानां प्रतिलोमजानाञ्च" मनुः "राक्षसस्तथासुरो वैश्ये शूद्रे चान्त्यस्तु गर्हितः" क्षत्रियादेः संकटे पैशाचमाह माधवीये वत्सः "सर्वोपायैरसाध्या स्यात् सुकन्या पुरुषस्य या। चौर्य्येणापि विवाहेन सा विवाह्या रहःस्थिता" गान्धर्वादिविवाहेष्वप्युदकपूर्वकं दानमाह तत्रैव यमः "नोदकेन न वा वाचा कन्यायाः पतिरुच्यते। पाणिग्रहणसंस्कारात् पतित्वं सप्तमे पदे" पराशरमाधवीये देवलोऽपि "गान्धर्वादिविवाहेषु पुनर्वैवाहिको विधिः। कर्त्तव्यश्च त्रिभिर्वर्णैः समर्थैवाग्निसाक्षिकः" त्रैवर्णोक्तेः गान्धर्वादौ विप्रवर्जमधिकार उक्तः। तत्रैव परिशिष्टे "गान्धर्वासुरपैशाचा विवाहा राक्षसश्च यः। पूर्वं परिग्रहस्तेषु पश्चाद्धोमो विधीयते" अतो होमादावकृते भार्य्यात्वाभावाद्वरान्तराय देया तथा च तत्रैव वसिष्ठबौधायनौ "बलादपहृता कन्या मन्त्रैर्यदि न संस्कृता। अन्यस्मै विधिवद्देया यथा कन्या तथैव सेति" अत्र मन्त्रसंस्काराभावेऽन्यस्मै दानस्य सर्वविवाहेषु साम्याद्बलादपहारे राक्षसपैशाचयोर्विशेषवचनं व्यर्थम्। तेन तयोर्यदि न संस्कृता संस्कृता वेत्यादृत्तत्र कन्यानुमत्यभावेऽन्यस्मै देयेति व्याख्येयम्" "द्वयोः सकामयोर्मातापितृरहितो योगो गान्धर्वः" विष्णुः। ३भारतवर्षीयोपद्वीपभेदे "भारतस्यास्य वर्षस्य नव भेदान्निशामय। इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान्। नागद्वीपस्तथा सौम्यो गा(ग)न्धर्वस्त्वथ वारुणः। अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः" पुराणस० विष्णुपु०। तस्य द्वीपस्य गन्धर्वप्रधानत्वात् गा(ग)न्धर्वसंज्ञा। ४सामवेदस्योपवेदे उपवेदशब्दे १२२०पृ० विवृतिः। "पदस्य स्वरसंघातस्तालेन सङ्गतस्तथा। प्रयुक्तश्चावधानेन गान्धर्वमभिधीयते" इत्युक्ते ५सङ्गीतभेदे, न० हेमच०। गान्धर्वचित्तता च सुश्रुते वातप्रकृतिनिमित्ततयोक्ता। सप्त प्रकृतयो भवन्तीत्युपक्रमे "वातप्रकृतिलक्षणोक्तौ "तत्र जागरूकः शीतद्वेषी दुर्भगः स्तेनो मत्सर्य्यनार्य्यो गान्धर्वचित्तः स्फुटितचरणः" इत्यादि। गान्धर्वशाला सङ्गीतशालायाम् गान्धर्वविद्या सङ्गीतविद्यायाम्। गान्धर्वविद् सङ्गीतवेत्तरि। गन्धर्वो देवताऽस्य अण्। ६तद्देवताकेऽस्त्रे। "गान्धर्वमादत्स्व सखे! समास्त्रम्" रघुः। स्वार्थे अण्। ६अश्वे अमरः। "नानाविधाविष्कृतसामजस्वरः सहस्रवर्त्मा चपलैर्दुरध्ययः। गान्धर्वभूमिष्ठतया समानतां स सामवेदस्य दधौ वलोदधिः" माघः। सामवेदपक्षे गानम वलपक्षे अश्वः। गान्धर्वं गानं प्रियत्वेनास्त्यस्याः प्रज्ञा० अण् ङीप्। ७दुर्गायाम् स्त्री "ह्रीं श्रीं गार्गीश्च गान्धर्वी योगिनी योगदा सदा" हरिवं १७८ अ० दुर्गास्तुतौ। ८वाचि स्त्री निघण्टुः। "अग्निं गान्धर्वीं पथ्यास्तस्याग्नेर्गव्यूतिघृत" ऋ० १०।८०।६।

गान्धर्विक त्रि० गान्धर्वे कुशलः ठक्। सङ्गीतकुशले। "याम्ये माषकुलत्थाभोज्यं गान्धर्विके यौगः" वृ० सं० ८९अ०। काकशकुने उक्तम्।

गान्धार पु० गन्ध एव स्वार्थे अण् तमृच्छति ऋ—अण् उप०स०। १सिन्दूरे २देशभेदे च (कान्दार) मेदि० स च देशः वृ०स० कूर्मविभागे१५अ० उत्तरस्यामुक्तः "उत्तरतः कैलासः" इत्युपक्रमे "गान्धारयशोवतहेमतालराज-

न्यखचराच्च"गन्धारोऽभिजनोऽस्य सिन्ध्वा॰ अण्। पित्रादिक्रमेण ३गान्धारदेशवासिनि। ४तन्नृपे च बहुषु तस्य लुक्। गन्धाराः तद्वासिषु तन्नृपेषु च ब॰ व॰। "क्रमेण व्यचरत् स्फीतस्ततः पञ्चनदं ययौ" "तस्मादपि च कौरव्य! गन्धारविषयं ययौ"। "ततो गन्धारराजेन युद्धमासीत् किरीटिनः" भा॰ आनु॰ ८३ अ॰। "शकुनेस्तनयो वीरो गन्धाराणां महारथः। निरुध्यमानस्तैश्चापि गन्धारैः पाण्डुनन्दनः"। "वध्यमानेषु तेष्वाजौ गन्धारेषु समन्ततः" ८४ अ॰। गन्धारे भवः तस्य राजा वा कच्छा॰ अण्। ५गन्धारदेशभवे मनुष्यतत्स्थभिन्ने मनुष्यतत्स्थयोस्तु वुञ्। गान्धारक गान्धारदेशस्थे मनुष्ये तदीयहसितादौ च। "शकुनिस्तु महानीको माद्रीपुत्रमवारयत्। गान्धारकैः सप्तशतैश्चापशक्त्यसिपाणिभिः" भा॰ द्रो॰ ९५ अ॰। "वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः। नानागन्धवहः पुण्यो गान्धारस्तेन हेतुना" भरतोक्ते "नाभेः समुद्गतो वायुर्गन्धश्रोत्रे च चालयन्। सशब्दस्तेन निर्याति गान्धारस्तेन कथ्यते" संगी॰ दा॰ उक्ते च तन्त्रीकण्ठोत्थितसप्तस्वरान्तर्गते ५तृतीयस्वरे। "अजाविकं च गान्धारम्" इत्युक्तेः तस्याजाविकस्वरतुल्यता। "चतस्रः पञ्चमे षड्जे मध्यमे श्रुतयो मताः। ऋषभे धैवते तिस्रो द्वे गान्धारनिषादयोः" संगी॰ दा॰। ७गन्धरसे न॰ त्रिका॰। गान्धारेरपत्यम् "साल्वेयगान्धारिभ्याञ्च" पा॰ अण्। ८गान्धारेरपत्ये पुंस्त्री स्त्रियां ङीप्।

गान्धारि पु॰ गन्धेनेव गान्धं सौरभमृच्छति ऋ-इन्। १गान्धारदेशे गान्धारस्य तद्देशनृपस्यापत्यम् इञ्। २तद्देशनृपापत्ये। "गान्धारिभिरसंभ्रान्तैः पार्वतीयैश्च दुर्जयैः" भा॰ कर्ण॰ ४६ अ॰। "अलं द्यूतेन गान्धारे! विदुरो न प्रशंसति" भा॰ स॰ ४९ अ॰। गान्धारिः शकुनिः सुवलनृपपुत्रः। "अनुज्ञातस्तु गान्धारिः कर्णेन सहितस्तदा भा॰ व॰ २३८।

गान्धारी स्त्री गान्धारस्यापत्यम् स्त्री इञ् ततो ङीप्। गान्धारदेशनृपकन्यायाम् १सा च अजमीढ़भार्य्याभेदः यथाह भा॰ आ॰ ९५ अ॰। "अजमीढ़स्य चतुर्विंशं पुत्रशतं वभूव कैकय्यां गान्धार्य्यां विशालायामृक्षायां चेति"। धृतराष्ट्रभार्य्या सुवलात्मजा दुर्य्योधनादिमाता च यथाह भा॰ आ॰ ११० अ॰। "अथ शुश्राव विप्रेभ्यो गान्धारीं सुवलात्मजाम्। आराध्य वरदं देवं भगनेत्रहरं हरम्। गान्धारी किल पुत्राणां शतं लेभे वरं शुभा। इति शुश्राव तत्त्वेन भीष्मः कुरुपितामहः। ततो गन्धारराजस्य प्रेषयामास भारत!। अचक्षुरिति तत्रासीत् सुवलस्य विचारणा। कुलं ख्यातिञ्च वृत्तञ्च बुद्ध्या तु प्रसमीक्ष्य सः। ददौ तां धृतराष्ट्रस्य गान्धारीं धर्मचारिणीम्। गान्धारी त्वथ शुश्राव धृतराष्ट्रमचक्षुषम्। आत्मानं दित्सितं चास्मै पित्रा मात्रा च भारत!। ततः सा पटमादाय कृत्वा वहुगुणं तदा। ववन्ध नेत्रे स्वे राजन्! पतिव्रतपरायणा। नाभ्यसूयां पतिमहमित्येवं कृतनिश्चया। ततो गान्धारराजस्य पुत्रः शकुनिरभ्यगात्"। "इड़ापृष्ठे तु गान्धारी मयूरगलसन्निभा। सव्यपादादिनेत्रान्तव्यापिनी परिकीर्त्तिता" तन्त्रोक्तलक्षणे ३नाड़ीभेदे। ४जिनानां शासनदेवताभेदे हेमच॰। ५यवासे राजनि॰। ६दुरालभायां भावप्र॰। ७पार्व्वतीसहचरीभेदे "गौरी विद्याऽथ गान्धारी केशिनी मित्रसाह्वया" भा॰ व॰ २३०अ॰।

गान्धारीतनय पु॰ ६त॰। १दुर्य्योधनादौ तद्भगिन्यां २दुःशलायां स्त्री। तस्यां तदुत्पत्तिकथा

"क्षुच्छ्रमाभिपरिग्लानं द्वैपायनमुपस्थितम्। तोषयामास गान्धारी व्यासस्तस्मै वरं ददौ। सा वव्रे सदृशं भर्त्तुः पुत्राणां शतमात्मनः। ततः कालेन सा गर्भं धृतराष्ट्रादथाग्रहीत्। संवत्सरद्वयं तन्तु गान्धारी गर्भमाहितम्। अप्रजा धारतामास ततस्तां दुःखमाविशत्। श्रुत्वा कुन्तीसुतं जातं वालार्कसमतेजसम्। उदरस्यात्मनः स्थैर्य्यमुपलभ्यान्वचिन्तयत्। अज्ञातं धृतराष्ट्रस्य यत्नेन महता ततः। सोदरं घातयामास गान्धारी दुःखमूर्च्छिता। ततो जज्ञे मांसपेशी लोहाष्ठीलेव संहता। द्विवर्षसम्भृतां कुक्षौ तामुत्स्रष्टुं प्रचक्रमे। अथ द्वैपायनो ज्ञात्वा त्वरितः समुपागमत्। तां स मांसमयीं पेशीं ददर्श जपतां वरः। ततोऽब्रवीत् सौवलेयीं किमिदं ते चिकीर्षितम्। सा चात्मनो मतं सत्यं शशंस परमर्षये। गान्धार्य्युवाच। ज्येष्ठं कुन्तीसुतं जातं श्रुत्वा रविसमप्रभम्। दुःखेन परमेणेदमुदरं घातितं मया। शतञ्च किल पुत्राणां वितीर्णं मे त्वया पुरा। इयञ्च मे मांसपेशी जाता पुत्रशताय वै। व्यास उवाच। एवमेतत् सौवलेयि! नैतज्जात्वन्यथा भवेत्। वितथं नोक्तपूर्वं मे स्वैरेष्वपि कुतोऽन्यदा। घृतपूर्णं कुम्भशतं क्षिप्रमेव विधीयताम्। सुगुप्तेषु

देशेषु रक्षा चैव विधीयताम् । शीताभिरद्भिरष्ठीलामिमाञ्च परिषेचय । वैशम्पायन उवाच । सा सिच्यमाना त्वष्ठीला बभूव बहुधा तदा । अङ्गुष्ठपर्व्वमात्राणां गर्भाणां पृथगेव तु । एकाधिकशतं पूर्णं यथायोगं विशाम्पते ! । मांसपेश्यास्तदा राजन् ! क्रमशः कालपर्य्ययात् । ततस्तांस्तेषु कुम्भेषु गर्भानवदधे तदा । स्वनुगुप्तेषु देशेषु रक्षां चैवादधात्ततः । शशंस चैव भगवान् कालेनैतावता पुनः । उद्घाटनीयान्येतानि कुम्भानीति स सौवलीम् । इत्युक्त्वा भगवान् व्यासस्तथा प्रतिविधाय च । जगाम तपसे धीमान् हिमवन्तं शिलोच्चयम् । जज्ञे क्रमेण चैतेन तेषां दुर्य्योधनो नृपः ! । जन्मतस्तु प्रमाणेन ज्येष्ठो राजा युधिष्ठिरः” । भा० आ० ११५ अ० ।

तेषां नामानि ज्यैष्ठानुज्यैष्ठानि च तत्रैव ११७ अ० पाठक्रमेणोक्तानि यथा

“दुर्य्योधनो युयुत्सुश्च राजन् ! दुःशासनस्तथा । दुःसहो दुःशलश्चैव जलसन्धः समः सहः । विन्दानुविन्दौ दुर्द्धर्षः सुबाहुर्दुष्प्रधर्षणः । दुर्म्मर्षणो दुर्मुखश्च दुष्कर्णः कर्ण एव च । विविंशतिर्विकर्णश्च शलः सत्त्वः सुलोचनः । चित्रोपचित्रौ चित्राक्षश्चारुचित्रःशरासनः । दुर्मदो दुर्विगाहश्च विवित्सुर्विकटाननः । ऊर्णनाभः सुनाभश्च तथा नन्दोपनन्दकौ । चित्रबाणश्चित्रवर्म्मा सुवर्म्मा दुर्विमोचनः । अयोबाहुर्महाबाहुश्चित्राङ्गश्चित्रकुण्डलः । भीमवेगो भीमबलो बलाकी बलवर्द्धनः । उग्रायुधो भीमकर्म्मा कनकायुर्दृढायुधः । दृढवर्म्मा दृढक्षत्रः सोमकीर्त्तिरनूदरः । दृढसन्धो जरासन्धः सत्यसन्धः सदः सुवाक् । उग्रश्रवा उग्रसेनः सेनानीर्दुष्पराजयः । अपराजितः कुण्डशायी विशालाक्षो दुराधरः । दृढहस्तः सुहस्तश्च वातवेगसुवर्च्चसौ । आदित्यकेतुर्बह्वाशी नागदत्तोऽग्रयाय्यपि । कवची निषङ्गी कुण्डी च कुण्डधारो धनुर्द्धरः । उग्रभीमरथौ वीरौ वीरबाहुरलोलुपः । अभयो रौद्रकर्म्मा च तथा दृढरथश्च यः । अनाधृष्यः कुण्डभेदी विरावी दीर्घलोचनः । प्रमथश्च प्रमाथी च दीर्घरोमश्च वीर्य्यवान् । दीर्घबाहुर्महाबाहुर्व्यूढोरुः कनकध्वजः । कुण्डाशी विरजाश्चैव दुःशला च शताधिका” । [भगिन्यां स्त्री ङीप् ।

गान्धारेय पु० गान्धार्य्या अपत्यम् ढक् ।१दुर्य्योधनादौ २तद्-

गान्धिक पु० गन्धो गन्धद्रव्यं पण्यमस्य ठक् । १सुगन्धिद्रव्यव्यवहारिणि (गन्धवेणे) अम्बष्ठात् राजपुत्र्यां जाते सङ्कीर्णजातिभेदे । “शृङ्गारस्य सहाया विटचेटविदूषकाद्याः स्युः । आद्यशब्दात् मालाकाररजकगान्धिकादयः” सा०द० । स्वार्थे ठक् । गन्धद्रव्यमात्रे च “पण्यानां गान्धिकं पण्यं किमन्यैः काञ्चनादिकैः । एकैकेन च यत् क्रीतं तच्छतेन प्रदीयते” पञ्चत० । गन्धी+स्वार्थे क । ३गान्धिका कीटविशेषे स्त्री (गँधोपोका) शब्दर० । कृमिशब्दे २२०० पृ० दृश्यम् ।

गान्धी स्त्री गन्ध एव स्वार्थे प्रज्ञा० अण् सोऽस्या अस्ति अच् गौरा० ङीष् । कीटभेदे (गँधोपोका) कृमिशब्दे २२०० पृ० दृश्यम् ।

गामिन् त्रि० गम+भविष्यति णिनि । भाविगमनकारके “आगामी” “यद्वागामिक्रियामुख्यकालस्याप्यन्तरालवत्” छन्दोग० एतद्योगे कर्म्मणि न षष्ठी २त० । “द्वितीयगामी न हि शब्द एष नः” रघुः । कर्त्तर्य्युपमाने उपपदे गम—णिनि । तत्तुल्यगन्तरि । “हंसवारणगामिनी” मनुः । “सममेव समाक्रान्तं द्वयं द्विरदगामिना” रघुः ।

गामुक त्रि० गम—उकञ् । गमनशीले ।

गाम्भीर्य्य न० गम्भीरस्य भावः ष्यञ् । १अगाधत्वे तलस्पर्शनायोग्यत्वे २अविकारित्वे च । “निरस्तगाम्भीर्य्यमपास्तपुष्पकम्” माघः । “गाम्भीर्य्यमविकारित्वम् अगाधत्वञ्च” मल्लि० । सा० द० उक्ते ३पौरुषसात्त्विकगुणभेदे यथा “शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी । ललितौदार्य्यमित्यष्टौ सत्वजाः पौरुषा गुणाः” इति पुरुषगुणानष्टधा विभज्य “भीशोकक्रोधहर्षाद्यैर्गाम्भीर्य्यं निर्विकारता” इति लक्षितम् । “विकाराः सहजा यस्य हर्षक्रोधभयादिषु । भावेषु नोपलभ्यन्ते तद् गाम्भीर्य्यमिति स्मृतम्” शाकु० । यथा “आहूतस्याभिषेकाय विसृष्टस्य वनाय च । न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः” । ४अचापल्ये च “गाम्भीर्य्यं मनोहरं वपुः” रघुः “गाम्भीर्य्येण अचापल्येन” मल्लि० ।

गाय पु० गै—भावे घञ् । १गाने । “यथाविधानेन पठन् सामगायमविच्युतम्” याज्ञ० । कर्मण्युपपदे गै—कर्त्तरि अण् । तत्तत्पदार्थगायके त्रि० । “विज्ञाय तावुत्तमगायकिङ्करौ” भाग० ४।१२।१८ । स्त्रियां टाप् सि० कौ० । मुग्धमते षण् ईप् ।

गायक त्रि० गै—ण्वुल् । १गानकर्त्तरि गानोपजीविनि २नटे । “पठन्ति पाणिस्वनिकास्तथा गायन्ति गायकाः” भा०आ०

५२ अ० । "नर्त्तकैश्चापि नृत्यद्भिर्गायकानाञ्च निःस्वनैः" भा० आद० ७० अ० ।

गाय(त्त्री)त्री स्त्री गायन्तं त्रायते त्रै–क, गीयतेऽनेन गै–घञ् यण् नि० ह्रस्वः गयः प्राणस्तं त्रायते त्रै–क वा । षडक्षरपादके छन्दोभेदे "उक्थाऽत्युक्था तथा मध्या प्रतिष्ठाऽन्या सुपूर्विका । गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च" वृ०र० । अस्याः पादे लघुगुरुभेदनिवेशनभेदात् चतुःषष्टिर्भेदाः । तेषां मध्ये भेदत्रयस्य विशेषनामानि तनुमध्या शशिवदना वसुमतीति वृत्तोक्तानि । इतरभेदानां तु विशेषनामाभावेऽपि ऋग्वेदादौ बाहुल्येनोदाहरणात् तेषां गायत्रीछन्दस्कत्वम् । इयांस्तु भेदः लौकिकच्छन्दसि षडक्षरपादेन चतुश्चरणता वेदे अष्टाक्षरपादत्वेन त्रिपादतया समष्ट्या चतुर्विंशाक्षरता । यथा "अग्निमीळे पुरोहितम् यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम्" इत्यादौ अतएव कात्या० सर्वानुक्रमणिकायां ५अ० "अथ छन्दांसि गायत्र्युष्णिगनुष्टुब्बृहतीत्यादिना छन्दोनामान्यभिधाय चतुर्विंशत्यक्षरादीनि चतुरुत्तराणीति गायत्र्यादीनां समष्ट्यक्षरसंख्यामुक्त्वा "प्रथमं छन्दस्त्रिपदा गायत्री" इति सा लक्षिता । तेनाष्टाक्षरपादतया त्रिपादत्वे चतुर्विंशाक्षरता इति । अनादेशे च सर्वासां गायत्रीच्छन्दस्कानामृचामग्निर्देवता "अथात्र छन्दोदेवता गायत्र्या अग्निः" इति तत्रोक्तेः गायत्रीच्छन्दसश्च यथाऽष्टाक्षरपादता तथा ता० ब्रा० भाष्ययोर्दर्शितम् ।

"साध्या वै नाम देवा आसंस्ते सर्वे यज्ञेन सह स्वर्गलोकमायंस्ते देवाश्छन्दांस्यब्रुवन् सोममाहरतेति ते जगतीं प्राहिण्वन् सा त्रीण्यक्षराणि हित्वैकाक्षरा भूत्वाऽऽगच्छत्, त्रिष्टुभं प्राहिण्वन् सैकमक्षरं हित्वा त्र्यक्षरा भूत्वागच्छद् गायत्रीं प्राहिण्वंश्चतुरक्षराणि वै तर्हि छन्दांस्यासन् सा तानि चाक्षराणि हरन्त्यागच्छदष्टाक्षरा भूत्वा" ता० ब्रा० "पूर्वं साध्याख्या देवा आसन् ते सर्वे यज्ञेन सोपकरणेन सोमादिसाधनमादायैव स्वर्गं लोकमायन्नगमन् ते प्रसिद्धा वस्वादयो देवाः आदौ स्वर्गसाधनयज्ञार्थसोमहरणाय छन्दांसि गायत्र्यादीनि "यूयं सोमं द्युलोकात् आहरत" इत्यब्रुवन्तः तान्यपि तथैवाङ्गीचक्रुरिति शेषः तथोक्तास्ते जगतीं प्राहिण्वन् अप्रैरयन् सा तत्रत्यैः सोमपालैः सह युद्धा त्रीण्यक्षराणि हित्वा एकाक्षरा भूत्वा पुनर्देवानागच्छत् चतुरुत्तराणि वै तर्हि छन्दांसि वक्ष्यति तदभिप्रायकमिदं पुनस्ते त्रिष्टुभं प्राहिण्वन् सापि पूर्ववत् सोमपालेभ्य एकमक्षरं हित्वा त्र्यक्षरा भूत्वा पुनरागच्छत् ते पुनर्गायत्रीं प्राहिण्वन् छन्दांसि सर्वाणि चतुरुत्तराण्यासन् अतः सा गायत्री द्युलोके सोमरक्षकैः कृशानुप्रभृतिभिर्जितानि जगतीत्रिष्टुभोश्चतुरक्षराणि हरन्ती अष्टाक्षरा भूत्वा आगच्छत्" भा० ।

२ गायत्रीछन्दस्के उपनयनाङ्गे मन्त्रभेदे च । छन्दःशास्त्रे षडक्षरपादं हि छन्दो गायत्रीशब्देनोच्यते । सर्ववेदेऽपि षडक्षरयुक्तपादका बहवो मन्त्राः सन्ति । सर्वेऽपि ते गायत्रीरूपतया वक्तुं शक्यन्ते । किन्तु यथा, "पङ्काज्जायते" इति व्युत्पत्त्या पङ्कजशब्दः पङ्कजनिकर्तृत्वयुक्तस्य पद्मस्यैव बोधकः पङ्कजातानामन्येषां कुमुदादीनामबोधकः, एवं गायत्रीशब्दोऽपि योगरूढ्या मन्त्रभेदस्यैव बोधकः । वस्तुतोऽन्यव्युत्पत्तिमत्त्वेनास्या मन्त्रभेदबोधकत्वम् । यथाह, व्यासः "गायन्तं त्रायते यस्मात् गायत्रीयं ततः स्मृता" । स्वोपासकत्राणकर्तृब्रह्मप्रतिपादकतयाऽपि उक्तमन्त्रविशेष एव गायत्रीरूपतयोच्यते । यद्यपि गायत्र्याः षडक्षरपादतया चतुर्षु चरणेषु २४ चतुर्विंशत्यक्षरावश्यकत्वं किन्तु, अन्यगायत्रीच्छन्दस्कानां मन्त्राणामिवास्मिन् २४ चतुर्विंशत्यक्षराभावस्तथापि द्यौरित्यत्रेव वरेण्यपदे वर्णविश्लेषेण २४ चतुर्विंशतिसंख्या परिपूर्य्या । वाज्यमाध्यबृहदारण्यकमाधवभाष्ये च "द्यौरित्यत्र दिउऔरिति वर्णविश्लेषे सति वरेण्यमित्यत्र वरेणीअमिति वर्णविश्लेषेण व्यक्तमुक्तम् । अस्याश्च अष्टाक्षरपादतया एकैकचरणस्य भूम्यादिरूपता, गयनामप्राणत्राणतया गायत्रीशब्दनिरुक्तिश्च बृहदारण्यकब्राह्मणे दर्शिता यथा, "भूमिरन्तरिक्षं द्यौरित्यष्टावक्षराणि, अष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत् स यावदेषु लोकेषु तावद्ध जयति योऽस्या एतदेवं पदं वेद । ऋचो यजूंषि सामानीति अष्टावक्षराणि अष्टाक्षरं वा एकं गायत्र्यै पदमेतदु हैवास्या एतत् स यावतीयं त्रयी विद्या तावद्ध जयति योऽस्या एतदेवं पदं वेद । प्राणोऽपानो व्यानः (विज्ञानः) इत्यष्टावक्षराणि अष्टाक्षरं ह वा एकं गायत्र्यै पदमेतदु हैवास्या एतत् स यावदिदं प्राणिति तद्ध जयति योऽस्या एतदेवं पदं वेद । अथास्या

एतदेव तुरीयं दर्शतं पदं परोरजा य एष तपति यद्वै चतुर्थं तत्तुरीयं दर्शतं पदमिति ददृशे इव एष परोरजा इति सर्वम् ह्येष रज उपर्य्युपरि तपति एवं हैव श्रिया यशसा तपति योऽस्या एतदेवं पदं वेद। सैषा गायत्री एतस्मिंस्तुरीये दर्शते पदे परोरजसि प्रतिष्ठितेत्यादि। तद्वै तत् सत्यं बले प्रतिष्ठितं प्राणो वै बलं तत् प्राणे प्रतिष्ठितमित्यादि। सा हैषा गयांस्तत्रे प्राणा वै गयास्तान् प्राणांस्तत्रे यस्माद् गयांस्तत्रे तस्माद् गायत्री नाम। स यामेवामुमन्वाहैषैव सा, स यस्मा अन्वाह तस्य प्राणांस्त्रायते"। "ब्रह्मणो हृदयाद्यनेकोपाधिविशिष्टस्योपासनमुक्तमथेदानीं गायत्र्युपाधिविशिष्टस्योपासनं वक्तव्यमित्यारभ्यते सर्वच्छन्दसां हि गायत्रीच्छन्दः प्रधानभूतं तत्प्रयोक्तृगयत्राणात् गायत्रीति वक्ष्यति। न चान्येषां छन्दसां प्रयोक्तृप्राणत्राणसामर्थ्यं प्राणात्मभूता सा, सर्वच्छन्दसां चात्मा प्राणः, "प्राणश्च क्षतः त्राणात् क्षत्त्रम्" इत्युक्तं प्राणश्च गायत्री तस्मात् तदुपासनमेवं विधित्सते द्विजोत्तमत्वहेतुत्वाच्च "गायत्र्या ब्राह्मणमसृजत, त्रिष्टुभा राजन्यं जगत्या वैश्यमिति" द्विजोत्तमस्य द्वितीयं जन्म गायत्रीनिमित्तं तस्मात् प्रधाना गायत्री ब्राह्मण्याद्यर्था। "यो ब्राह्मणान् अभिवदन्ति स ब्राह्मणः विपापो विरजा विचिकित्सो ब्राह्मणो भवति" इत्युक्तेन परमपुरुषार्थसम्बन्धं ब्राह्मणस्य दर्शयति तच्च ब्राह्मणत्वं गायत्रीजन्ममूलमतो वक्तव्यं गायत्र्याः सतत्त्वं, गायत्र्या हि यः सृष्टो द्विजोत्तमो निरङ्कुश एवोत्तमपुरुषार्थसाधनेऽधिक्रियते ततस्तन्मूलः परमपुरुषार्थसम्बन्धस्तस्मादेतदुपासनविधानायाह भूमिः अन्तरीक्षं द्यौः (दिऔः) इत्येतानि अष्टौ अक्षराणि,अष्टाक्षरम् अष्टावक्षराणि यस्य तदिदम् अष्टाक्षरं ह्वै प्रसिद्धावद्योनचौ। एकं प्रथमं गायत्र्यै, गायत्र्याः पदं पादः प्रथमो भूम्यादिलक्षणः त्रैलोक्यात्माष्टाक्षरत्वसाम्यात् एवम् एतत् त्रैलोक्यात्मकं गायत्र्याः प्रथमं पदं यो वेद तस्यैतत् फलम् स विद्वान यावत् किञ्चिदेषु त्रिषु जेतव्यं तावत् सर्वं ह जयति योऽस्या एतदेवं पदं वेद। तथा ऋचः, यजूंषि, सामानि, इति त्रयीनामाक्षराणि एतान्यप्यष्टावेव तथैवाष्टाक्षरं ह वा एकं गायत्र्याः द्वितीयम् पदं एतदु हैवास्या एतद् यदृग्यजुःसामलक्षणम् अष्टाक्षरत्वसाम्यात् एवं स यावती इयं त्रयी विद्या त्रय्या विद्यया यावत् फलजातमाप्यते तावद्ध जयति योऽस्या एतत् गायत्र्यास्त्रैविद्यलक्षणं पदं वेद। तथा प्राणः, अपानः (विआनः) व्यानः एतान्यपि प्राणाद्यभिधानाक्षराणि अष्टौ तच्च गायत्र्यास्तृतीयं पदं यावदिदं प्राणिजातं तावद्ध जयति योऽस्या एतदेवं गायत्र्यास्तृतीयं पदं वेद। अथानन्तरं गायत्र्यास्त्रिपदायाः शब्दात्मिकायास्तुरीयं पदमुच्यते अभिधेयभूतम्। अस्याः प्रकृतायाः गायत्र्याः एतदेव वक्ष्यमाणं तुरीयं दर्शतं पदम् परोरजा य एष तपति तुरीयमित्यादि वाक्यपदार्थं स्वयमेव व्याचष्टे श्रुतिः। यद् वै चतुर्थं प्रसिद्धं लोके तदिह तुरीयशब्देनाभिधीयते। दर्शतं पदमित्यस्य कोऽर्थः? इत्युच्यते ददृश इव दृश्यत इव हि सूर्य्यमण्डलान्तर्गतः पुरुषः अतो दर्शतं पदमुच्यते। परोरजाः इत्यस्य पदस्य कोऽर्थः? इत्युच्यते सर्व्वम् समस्तम् उ हि एष मण्डलान्तर्गतः पुरुषः, रजः रजोजातं समस्तं लोकमित्यर्थः उपर्य्युपरीति वीप्सा सर्व्वलोकाधिपत्यख्यापनार्था। ननु सर्व्वशब्देनैव सिद्धत्वात् वीप्सानर्थिका, नैष दोषः येषामुपरिष्टात् सविता दृश्यते तद्विषयः एव सर्वशब्दः स्यादित्याशङ्कानिवृत्त्यर्था वीप्सा "ये चामुष्मात् पराञ्चो लोकास्तेषाञ्चेष्टे देवकामानश्चेति" श्रुत्यन्तरात् तस्मात् सर्वावबोधार्था वीप्सा। यथासौ सविता सर्वाधिपत्यलक्षणया श्रिया यशसा च ख्यात्या तपति एवं हैव श्रिया यशसा च तपति योऽस्या एतदेवं तुरीयं दर्शतं पदं वेद। सैषा त्रिपादा उक्ता या त्रैलोक्यत्रैविद्यप्राणाद्यात्मिका गायत्री, एतस्मिन् चतुर्थे तुरीये दर्शते पदे परोरजसि प्रतिष्ठिता, मूर्त्तामूर्त्तरसत्वादादित्यस्य, रसापाये हि वस्तु नीरसमप्रतिष्ठितं भवति यथा काष्ठादि दग्धसारं तद्वत्। तथा मूर्त्तामूर्त्तात्मकं जगत्। त्रिपदा गायत्री च आदित्यप्रतिष्ठिता तद्रूपत्वात्। सह त्रिभिः पदैः तद्धि तुरीयं पदं सत्यं प्रतिष्ठितम् इत्यादि। तद्धि तुरीयपदाश्रयं सत्यं बले प्रतिष्ठितं किं? पुनस्तद्बलमित्याह प्राणो वै बलम् तस्मिन् प्राणे बले, प्रतिष्ठितं सत्यं तथाचोक्तं सूत्रे, "तदोतञ्च प्रोतञ्चेति" तस्मात् बले सत्यं प्रतिष्ठितमित्यादि। सैषा गायत्री प्राणः अतः गायत्र्यां जगत् प्रतिष्ठितम् यस्मिन् सर्वे देवाः एकीभवन्ति सर्वे-

वेदाः, कर्म्माणि फलानि च सैषा गायत्री प्राणरूपा सती जगत आत्मा सा हैषा गयांस्तत्रे त्रातवती, के? पुनर्गयाः, एते प्राणाः वागादयो वै गयाः शब्दकरणात् तान् तत्रे, सैषा गायत्री तत् यस्मात् गयांस्तत्रे तस्माद्गायत्री नाम गयत्राणात् गायत्रीति प्रथिता। स आचार्य्य उपनीय माणवकमष्टवर्षं यामेव अमूं सावित्रीं सवितृदेवताकाम् अन्वाह पच्छः अर्द्धशः समस्ताञ्च एषैव सा साक्षात् प्राणो जगतः आत्मा माणवकाय समर्पिता इहेदानीं नान्या सः आचार्य्यः यस्मै माणवकाय अन्वाह अनुवक्ति तस्य माणवकस्य गयान् प्राणान् त्रायते नरकादिपतनात्” भा०

छान्दोग्योपनिषदि गायत्र्या अन्यया निर्व्वचनपूर्व्वकं षड़क्षरपादत्वेन चतुष्पदत्वं वागादिरूपेण ध्यातव्यत्वम् स्वप्रतिपाद्यब्रह्मात्मद्वारा सर्व्वात्मकत्वञ्च दर्शितम्।

“गायत्री वा इदं सर्व्वं भूतं यदिदं किञ्च। वाग्वै गायत्री वाग्वा इदं सर्व्वं भूतं गायति च त्रायते च। या वै सा गायत्रीयं वाव सा येयं पृथिवी अस्यां हीदं सर्व्वं भूतं प्रतिष्ठितम् एतामेव नातिशीयते। या वै सा पृथिवीयं वाव सा यदिदमस्मिन् पुरुषे शरीरम् अस्मिन् हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते। यद्वै तत् पुरुषे शरीरमिदं वाव तद्यदिदमस्मिन्नन्तःपुरुषे हृदयम् अस्मिन् हीमे प्राणाः प्रतिष्ठिताः एतदेव नातिशीयन्ते। सैषा चतुष्पदा षड़्विधा गायत्री तदेतदृचाभ्यनूक्तम्। तावानस्य महिमा ततोज्यायांश्च पुरुषः। पादोऽस्य सर्व्वाभूतानि त्रिपादस्यामृतं दिवीति।” छ०उप०। “यत एवमतिशयफलैषा ब्रह्मविद्या अतः सा प्रकारान्तरेणापि वक्तव्येति गायत्री वा इत्यारभ्यते। गायत्रीद्वारेण चोच्यते ब्रह्म, सर्व्वविशेषरहितस्य नेति नेतीत्यादिविशेषप्रतिषेधगम्यस्य दुर्बोधत्वात् सत्स्वनेकेषु छन्दःसु गायत्र्या एव ब्रह्मज्ञानद्वारतयोपादानं प्राधान्यात्।” (इत्युपक्रम्य किञ्चिदुक्त्वोक्तम्) “गायत्रीसारत्वाच्च ब्राह्मणस्य मातरमिव हित्वा गुरुतरां गायत्रीं ततोऽन्यत् गुरुतरं न प्रतिपद्यते यथोक्तं ब्रह्मापीति तस्यामत्यन्तगौरवस्य प्रसिद्धत्वात् अतो गायत्रीमुखेनैव ब्रह्मोच्यते। गायत्री वै इत्यवधारणार्थो वैशब्दः। इदं सर्व्वं भूतं प्राणिजातं यत् किञ्च स्थावरं जङ्गमं वा तत्सर्व्वं गायत्र्येव तस्याश्छन्दोमात्रायाः सर्व्वभूतात्मत्वमनुपपन्नमिति गायत्रीकारणं वाचं शब्दरूपामापादयति गायत्रीं, वाग्वै गायत्रीति वाग्वा इदं सर्व्वं भूतम् गायति च शब्दायते (असौ गौरसावश्वः) इति त्रायते च रक्षति “अमुष्मात् मा भैषीः किं? ते भयमुत्थितमित्यादि” सर्व्वतो भयान्निवर्त्त्यमानो वाचा त्रातः स्यात्। यत् वाक्, भूतं गायति च त्रायते च गायत्र्येव तद् गायति च त्रायते च वाचोऽनन्यत्वात् गायत्र्याः,गानात् त्राणाच्च गायत्रीत्वम्। या वै सैवंलक्षणा सर्व्वभूतरूपा गायत्री इयं वाव सा येयं पृथिवी, कथं? पुनरियं पृथिवी गायत्रीत्युच्यते? सर्व्वभूतसम्बन्धात् कथं सर्व्वभूतसम्बन्धः? तस्यां पृथिव्यां हि यस्मात् सर्व्वं स्थावरं जङ्गमञ्च भूतं प्रतिष्ठितम् एतामेव पृथिवीं नातिशीयते, नातिवर्त्तते इत्येतत्। यश्च गानत्राणाभ्यां भूतसम्बन्धो गायत्र्या एषं भूतप्रतिष्ठानात् भूतसम्बन्धाद्वा पृथिवी अतो गायत्री पृथिवी। या वै सा पृथिवी गायत्रीयं वाव सा इदमेव, तत् किम्? यदिदमस्मिन् पुरुषे कार्य्यकारणसङ्घाते जीवति शरीरं, पार्थिवत्वाच्छरीरस्य गायत्रीत्वमुच्यते? अस्मिन् हीमे प्राणाः भूतशब्दवाच्याः प्रतिष्ठिताः। अतः पृथिवीवत् भूतशब्दवाच्य-प्राणप्रतिष्ठानात् शरीरं गायत्री एतदेव यस्माच्छरीरं नातिशीयन्ते प्राणाः। यद्वै तत् पुरुषे शरीरं गायत्री वाव तत् यदिदमस्मिन् अन्तर्मध्ये पुरुषे हृदयं पुण्डरीकाख्यमेतत् गायत्री कथम्? इत्याह अस्मिन् हीमे प्राणाः प्रतिष्ठिताः अतः शरीरवत् गायत्री हृदयम् एतदेव नातिशीयन्ते “प्राणो हि पिता प्राणो माता” “अहिंसन् सर्व्वभूतानीति” श्रुतेः भूतशब्दवाच्याः प्राणाः। सैषा चतुष्पदा षड़क्षरपादच्छन्दोरूपा सती भवति गायत्री षड़्विधा वाग्भूतपृथिवीशरीरहृदयप्राणरूपा सती षड़्विधा भवति। (किञ्चिदतीत्योक्तम्) तदेतस्मिन्नर्थे एतद्गायत्र्याख्यं ब्रह्म गायत्र्यनुगतं गायत्रीमुखेनोक्तम् ऋचापि मन्त्रेण अभ्यनूक्तं प्रकाशितम्। तावान् अस्य गायत्र्याख्यस्य ब्रह्मणः समस्तस्य महिमा विभूतिविस्तारः यावान् चतुष्पाद् षड़्विधस्य ब्रह्मणो विकारः, पादः गायत्रीति व्याख्यातः। अतस्तस्माद्विकारलक्षणात् गायत्र्याख्यात् ततो ज्यायान् महत्तरश्च परमार्थसत्यरूपोऽविकारः पुरुषः सर्व्वपूरणात् पुरिशयनाच्च। तस्यास्य पादः सर्व्वा सर्व्वाणि भूतानि तेजोऽबन्नादीनि सस्थावर-

जङ्गमानि। त्रिपाद् त्रयः पादा अस्य सोऽयं त्रिपाद् अमृतं पुरुषाख्यं समस्तस्य गायत्र्यात्मकस्य दिवि द्योतनवति स्वात्मन्यवस्थितमित्यर्थः" शा॰भा॰। मातृतोजन्मवतामपि सावित्र्या द्वितीयजन्माधानात् द्विजानां द्विजत्वम्। यज्जन्मैव हि सकलपुरुषार्थहेतुरिति मन्वादिशास्त्रे प्रसिद्धम्। यथा, मनुः "आचार्य्यस्त्वस्य यां जातिं विधिवद्वेदपारगः। उत्पादयति सावित्र्या सा सत्या साऽजराऽमरा। तत्र यद् ब्रह्मजन्मास्य मौञ्जीबन्धनचिह्नितम्। तत्रास्य माता सावित्री पिता त्वाचार्य्य उच्यते"। यद्यपि परमेश्वरः सर्वत्राभिन्नरूपतया वर्त्तमानस्तथापि स्वोपासने एव विशिष्टफलप्रदः, नान्यथा इदमपि दृष्टान्ततया योगियाज्ञवल्क्येन कथितम् "गवां सर्पिः शरीरस्थं न करोत्यङ्गपोषणम्। निःसृतं कर्म्मसंयुक्तं पुनस्तासां तदौषधम्। एवं स हि शरीरस्थः सर्पिर्वत् परमेश्वरः। विना चोपासनादेव न करोति हितं नृषु"। गायत्र्याश्च स्ववाच्यब्रह्मणा सहाभेदात् प्राशस्त्यमाह व्यासः "न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह। सोऽहमस्मीत्युपासीत विधिना येन केनचित्"। "गायत्रीस्थभर्गपदप्रतिपाद्य ईश्वरः अहं जीवरूपोऽस्मि भवामीति जीवेश्वरयोरहङ्कारप्रतिविम्बितत्वोपाधिरहितेन चिद्रूपेणैक्यं भावयन् उपासीत" इति रघुनन्दनः। तत्र सत्स्वपि परब्रह्मण उपासनाया बहुषूपायेषु गायत्र्येव तदुपासनायाः प्रधानोपायः इति प्राग्दर्शितेषु शास्त्रेषु प्रसिद्धम्। विशेषतः, गायत्र्यर्थः परं ब्रह्म एतदर्थमपि अनेन मन्त्रेणैव उपासना श्रेयस्करी "प्रणवव्याहृतिभ्यांश्च गायत्र्या त्रितयेन च। उपास्यं परमं ब्रह्म आत्मा यत्र प्रतिष्ठितः। वाच्यः स ईश्वरः प्रोक्तो वाचकः प्रणवः स्मृतः। वाचकेऽपि च विज्ञाते वाच्य एव प्रसीदति" योगीश्वरवाक्येन तथाभिधानात्।

"गायत्र्याः २४ चतुर्विंशत्यक्षराणां यथा भावना कार्य्या, तथा ब्राह्मणसर्वस्वे विष्णुधर्मोत्तरे दर्शित यथा "कर्म्मेन्द्रियाणि पञ्चैव पञ्च बुद्धीन्द्रियाणि च। पञ्च बुद्धीन्द्रियार्थाश्च भूतानां चैव पञ्चकम्। मनोबुद्धिस्तथैवात्मा अव्यक्तञ्च यदुत्तमम्। चतुर्विंशतिरेतानि गायत्र्या अक्षराणि च। प्रणवं पुरुषं विद्धि सर्वगं पञ्चविंशकम्।" अनेन पञ्चविंशतितत्त्वरूपतया सप्रणवगायत्र्यक्षराणां ध्येयतोक्ता। तत्र प्रत्यक्षरं देवताभेदमाह योगियाज्ञवल्क्यः। "अक्षराणान्तु दैवत्यं सम्प्रवक्ष्याम्यतः परम्। आग्नेयं (तत्) प्रथमं ज्ञेयं वायव्यञ्च (स) द्वितीयकम्। तृतीयं (वि) सूर्य्यदैवत्यं चतुर्थं (तुः) वैद्युतं तथा। पञ्चमं (व) यमदैवत्यं वारुण्यं (रे) षष्ठमुच्यते। वार्हस्पत्यं सप्तमन्तु (ण्) पार्ज्जन्यमष्टमं (यम्) विदुः। ऐन्द्रं तु नवमं (भ) ज्ञेयं गान्धर्व्वं दशमं (र्गः) तथा। पौष्णमेकादशं (दे) प्रोक्तं मैत्रावरुणं द्वादशम् (व)। त्वाष्ट्रं त्रयोदशं (स्य) ज्ञेयं वासवन्तु चतुर्द्दशम् (धी)। मारुतं पञ्चदशकं (म) सौम्यं षोड़शकं (हि) स्मृतम्। सप्तदशं (धि) त्वाङ्गिरसं वैश्वदेवमतः परम्। (यः)। आश्विनञ्चैकोनविंशं (यः) प्राजापत्यन्तु विंशकम् (नः)। सर्वदेवमयं प्रोक्तमेकविंश (प्र) मतः परम्। रौद्रं द्वाविंशकं (च) प्रोक्तम् त्रयोविंशन्तु (द) ब्राह्मकम्। वैष्णवन्तु (यात्) चतुर्विंशमेता ह्यक्षरदेवताः। जप्यकाले तु संस्मृत्य तासां सायुज्यतां व्रजेत्"।

"तस्याश्च वेदसारता-नानाशास्त्रे दर्शिता यथा

"अष्टादशसु विद्यासु मीमांसाऽतिगरीयसी। ततोऽपि तर्कशास्त्राणि पुराणं तेभ्य एव च। ततोऽपि धर्म्मशास्त्राणि तेभ्यो गुर्वी श्रुतिर्द्विज। ततोऽप्युपनिषच्छ्रेष्ठा गायत्री च ततोऽधिका। दुर्लभा सर्वमन्त्रेषु गायत्री प्रणवान्विता। न गायत्र्यधिकं किञ्चित्त्रयीषु परिविद्यते। न गायत्रीसमो मन्त्रो न काशीसदृशी पुरी। न विश्वेशसमं लिङ्गं सत्यं सत्यं पुनः पुनः। गायत्री वेदजननी गायत्री ब्राह्मणप्रसूः। गायन्तं त्रायते यस्माद्गायत्रीति प्रगीयते। वाच्यवाचकसम्बन्धो गायत्र्याः सवितुर्द्वयोः। वाच्योऽसौ सविता साक्षाद्गायत्री वाचिका परा। प्रभावेनैव गायत्र्याः क्षत्रियः कौशिको वशी। राजर्षित्वं परित्यज्य ब्रह्मर्षिपदमीयिवान्। सामर्थ्यं प्राप चात्युच्चैरन्यद्भुवनसर्जने। किं किं न दद्याद्गायत्री सम्यगेवमुपासिता। न ब्राह्मणो वेदपाठान्न शास्त्रपठनादपि। देव्यास्त्रिकालमभ्यासात् ब्राह्मणः स्याद् द्विजोऽन्यथा। गायत्र्येव परो विष्णुर्गायत्र्येव परः शिवः। गायत्र्येव परो ब्रह्मा गायत्र्येव त्रयी यतः" काशी॰।

इत्थं बहुविधशास्त्रे गायत्री सर्वेषां वेदानां सारांशतया सर्वाभीष्टहेतुमयी च प्रसिद्धा। यदज्ञाने ब्राह्मण्यहानिर्भवति। सेयं वेदत्रयेऽपि समानरूपा"।

मनुः "अकारञ्चाप्युकारञ्च मकारञ्च प्रजापतिः। वेदत्रयान्निरदुहद्भूर्भुवः स्वरितीति च!। त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत्"। मनुयमदक्षविष्णवः "ओङ्कारपूर्विकास्तिस्रो महाव्याहृतयस्तथा। त्रिपदा चैव गायत्री विज्ञेयं ब्रह्मणो मुखम्।" जपेदित्यनुकृष्य छन्दोगपरिशिष्टम् "सर्वेषां वेदानां गुह्योपनिषत्सारभूतां ततो गायत्रीम्।" योगियाज्ञवल्क्यः "गायत्रीञ्चैव वेदांश्च तुलया समतोलयन्। वेदा एकत्र साङ्गास्तु गायत्री चैकतः स्थिता।" स एव "सारभूतास्तु वेदानां गुह्योपनिषदो मताः। ताभ्यः सारस्तु गायत्री तिस्रो व्याहृतयस्तथा।" स एव "ओङ्कारपूर्विकास्तिस्रो गायत्रीं यश्च विन्दति। चरितब्रह्मचर्य्यश्च स वै श्रोत्रिय उच्यते।" स एव "एतया ज्ञातया सर्वं वाङ्मयं विदितं भवेत्। उपासितं भवेत्तेन विश्वं भुवनसप्तकम्।" स एव "एवं यस्तु विजानाति गायत्रीं ब्राह्मणस्तु सः। अन्यथा शूद्रधर्मा स्याद् वेदानामपि पारगः।" स एव "अज्ञात्वा चैव गायत्रीं ब्राह्मण्यादेव हीयते। अपवादेन संयुक्तो भवेत् श्रुतिनिदर्शनात्।" कौर्मम् "क्रियाहीनस्य मूर्खस्य महारोगिण एव च। यथेष्टाचरणस्याहुर्मरणान्तमशौचकम्।" मूर्खस्य सार्थगायत्रीरहितस्येति शुद्धितत्त्वे रघुनन्दनः। गायत्रीरहितस्येत्यन्ये। तस्याः सन्ध्यारूपतया उपास्यतापि यथाह, योगियाज्ञवल्क्यः "या सन्ध्या सैव गायत्री द्विधा भूता व्यवस्थिता। सन्ध्या उपासिता येन विष्णुस्तेन उपासितः।" व्यासः "गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने। सरस्वती च सायाह्ने सैव सन्ध्या त्रिषु स्मृता। प्रतिग्रहान्नदोषाच्च पातकादुपपातकात्। गायत्री प्रोच्यते तस्मात् गायन्तं त्रायते सदा। सवितृद्योतनात् सैव सावित्री परिकीर्त्तिता। जगतः प्रसवितृत्वात् वाग्रूपत्वात् सरस्वती"। ऋष्यशृङ्गः "सर्वात्मना हि या देवी सर्वभूतेषु संस्थिता। गायत्री मोक्षहेतुर्वै मोक्षस्थानमलक्षणम्" कूर्मपुराणम् "गायत्री वेदजननी गायत्री लोकपावनी। न गायत्र्याः परं जप्यमेतद्विज्ञानमुच्यते।" योगियाज्ञवल्क्यः "गायत्री वेदजननी गायत्री पापनाशिनी। गायत्र्यास्तु परं नास्ति दिवि चेह च पावनम्। हस्तत्राणप्रदा देवी पततां नरकार्णवे। तस्मात्तामभ्यसेन्नित्यं ब्राह्मणोऽनुदये शुचिः। गायत्रीं निरतं हव्यकव्येषु विनियोजयेत्। तस्मिन्न तिष्ठते पापमब्विन्दुरिव पुष्करे।" स एव "गायत्र्याः पदमर्द्धं तु ऋचोऽर्द्धमृच एव वा। ब्रह्महत्यासुरापाणं गुरुदाराभिमर्षणम्। यच्चान्यत् दुष्कृतं सर्वं पुनातीत्याह वै मनुः।" स एव "यज्ञदानरतो विद्वान् साङ्गवेदस्य पाठकः। गायत्रीध्यानपूतस्य कलां नार्हति षोड़शीम्।" बृहद्विष्णुः "एतयर्चा विसंयुक्ता काले च क्रियया स्वया। विप्रक्षत्रियविड्योनिर्गर्हणीया तु साधुषु।" अग्निपुराणम् "गायत्रीं जपते यस्तु द्वौ कालौ ब्राह्मणः सदा। असत्प्रतिग्रहीतापि स याति परमां गतिम्।"

गायत्र्याश्च सर्वछन्दसां प्रधानत्वात् "गायत्री छन्दसामपि" गीतायां भगवद्विभूतित्वमुक्तम्। २खदिरवृक्षे अमरः। खदिरस्य च "सा गायत्री सोममाहरत्" इत्युपक्रमे "खदिरेण सोममाचखाद" तस्मात् खदिर इति" शत० ब्रा० ६।२।९ गायत्र्या सोमहरणेन तत्पाने साधनत्वात् गायत्रीत्वम्। गायत्रं गायत्रीसम्बन्धि सोमहरणमस्त्यस्य पानसाधनत्वेन गायत्र+इनि। गायत्रिन् इत्यपि तत्रार्थे वैद्यकम् "उभे हरिद्रे सुरदारुशुण्ठीं गायत्रिसारं च पिबेत् समानम्" सुश्रुतः। "वह्निगायत्रिणां तथेति" वैद्यकात् इनन्तोऽपि तत्रार्थे पुंभानुदीक्षितः। पुंसाहचर्यात् अमरवाक्यस्य पुंलिङ्गपरतौचित्यात् तथात्वम्। "गायत्री खदिरे स्त्री स्यात्" इति रभसोक्तेः "गायत्री तु पदा देवी छन्दोभित् खदिरेषु च" कोषान्तराच्च स्त्रीत्वम् ङीवन्तता च। ३गायत्र्या ऋचोपास्यायां ४देवतायाम्। सा च एकापि प्रातरादिकालभेदेन गायत्री-सावित्री सरस्वतीति-नामत्रययुता तत्र प्रातरुपास्या गायत्रीति संज्ञाऽनुपदमुक्तम्। ५दुर्गायां च "गायनाद्गमनाद्वापि गायत्री त्रिदशार्च्चिता" देवीपु० देवीनामनिरुक्तौ। गायत्र्या इदम् अण्। ६गायत्र गायत्रच्छन्दसि न० "गायत्रच्छन्दा ह्यग्निः" ता०ब्रा०८।८।६। गायत्रच्छन्दोऽभिमानी अग्निः" भा०। "आददे गायत्रेण छन्दसा" यजु० ११।९। गायत्र्याहृतः अण्। गायत्र्या हृते ७सोमभेदे पु० तद्धरणकथाऽग्रे उक्ता च "गायत्रस्त्रैष्टुभः पाङ्क्तो जागतः शाङ्करस्तथा" सुश्रुते सोमभेदकथने। तत्स्थानञ्च तत्रैवोक्तं "काश्मीरेषु सरो दिव्यं नाम्ना क्षुद्रकमानसम्। गायत्रस्त्रैष्टुभः पाङ्क्तो जागतः शाङ्करस्तथा। न तान् पश्यन्त्यधर्मिष्ठाः कृतघ्नाश्चापि मानवाः। भेषज-

द्वेषिणश्चापि ब्राह्मणद्वेषिणस्तथा"। गायत्र्या इदम् अण्। गायत्र ८गायत्रीसम्बन्धिनि त्रि० ९गायत्रीच्छन्दस्के स्तोत्रादौ न०। गायत्रीं तच्छन्दस्कामृचमधिकृत्य गीतं साम अण्। गायत्र्यामृचि गेये १०सामभेदे। "स्वादिष्ठया मदिष्ठया" इत्येकं सूक्तं तस्मिन् गायत्र्यस्तिस्र ऋचः तत्र गायत्रं संहितं चेति द्वे सामनी" सा० स० भाष्यम्। "ऋचा स्तोमं समर्द्धय गायत्रेण रथन्तरम् बृहद्गायत्रवर्त्तनि! स्वाहा" यजु० ११।८। गायत्रेण साम्ना, गायत्रं सामं वर्त्तनिर्मार्गोऽस्याः वेददी० "इमां गायत्रवर्त्तनिं जुषेथां सुष्टुतिं मम" ऋ० ८।३८।६। "गायत्रवर्त्तनिं गायत्रसाममार्गां सुष्टुतिं शोभनां स्तुतिम्" भा०। "स्वाहा गायत्रवेपसे" ऋ० १।१४२।१२। गायत्रं साम वेपो रूपं यस्याः" भा०। गायत्रसदृशत्वात् ११प्रशस्ये च "हुवे गायत्रवेपसम्" ८।१।१०। "गायत्रवेपसम् प्रशस्तवेगाम्" भा०। गायत्रसाम्न उपसना प्रकारादि छा० उ० दर्शितम् यथा

"मनो हिङ्कारो वाक् प्रस्तारश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो निधनमेतद्गायत्रं प्राणेषु प्रोतम्। स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति सर्वमायुरेति ज्योग्जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्त्या, महामनाः स्यात्तद्व्रतम्" छा० उ०। "मनो हिङ्कारो मनसः सर्वकरणप्रवृत्तीनां प्राथम्यात्। तदानन्तर्याद्वाक्‌प्रस्तारः, चक्षुरुद्गीथः श्रैष्ठ्यात्। श्रोत्रं प्रतिहारः प्रतिहार्य्यत्वात्, प्राणो निधनं यथोक्तानां प्राणे निधानात्स्वापकाल। एतद्गायत्रं साम प्राणेषु प्रोतम् गायत्र्याः प्राणसंस्तुतत्वात्। स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति अविकलकरणो भवतीत्येतत्। सर्वमायुरेति "शतं वर्षाणि सर्वमायुः पुरुषस्येति" श्रुतेः। ज्योगुज्ज्वलं जीवति। महान् भवति प्रजादिभिर्महांश्च कीर्त्त्या। गायत्रोपासकस्यैतद्व्रतं भवति यन्महामनास्त्वक्षुद्रचित्तः स्यादित्यर्थः" शा० भा०।

गायत्रिन् पु० गायत्रं स्तोत्रमस्यास्ति इनि। १उद्गातरि सामगायके "गायन्ति त्वा गायत्रिणः" ऋ० १।१०।१ २खदिरवृक्षे च गायत्रीशब्दे दृश्यम्।

गायन त्रि० गै—शिल्पिनि ल्युट्। गानोपजीविनि त्रिका०। "स्तेनगायनयोरन्नम्" मनुना तदन्नभक्षणं निषिद्धम् "सत्यं किलैतत् सा प्राह दैत्यानामसि गायनः" भा० आ० ७८ अ०। स्त्रियां ङीप्।

गारित्र न० गीर्य्यते गॄ—कर्म्मणि णित्रन्। ओदने उज्ज्वल०।

गारुड़ न० गरुड़ायोक्तं भगवता, तस्येदम् वा अण्। १गरुड़पुराणे २विषहरमन्त्रभेदे जटाधरः। गरुडाकृतित्वात् ३व्यूहभेदे। "गारुड़ं च महाव्यूहं चक्रे शान्तनवस्तदा" भा० भी० ५६ अ०। तस्य च गरुड़ाकृतित्वं तदुत्तरश्लोकानां पर्य्यालोचनयाऽवसेयम्। ४मरकतमणौ राजनि० तस्य च नीलवर्णतया गरुड़वर्णता तच्च गारुत्मतशब्दे वक्ष्यते। "सोऽयं वटः श्याम इति प्रतीतो राशिर्मणीनामिव गारुड़ानाम्" रघुः। ५स्वर्णे हेम० तल्लोमतुल्यवर्णत्वात्तथा। ६पातालगरुड़लतायाम् स्त्री राजनि० ङीप्। गरुड़ो देवताऽस्य अण्। ७अस्त्रभेदे। "अलं विषादेन अर्जुनेन प्रयुक्तं गारुड़मस्त्रम्। पश्य पश्य। पक्षाघातनिपातमारुतभरोत्प्रोत्क्षिप्तपृथ्वीधराश्चञ्चूदष्टविशालभोगभुजगाः स्वर्य्योपकण्ठस्पृशः। सन्तोषं जनयन्त्यमी कुलगुरोस्तीक्ष्णास्तथा सारथेर्मन्ये वैरिन्दपप्रमाथविकसद्विक्रान्तयः पक्षिणः"। धनञ्जयवि० तत्प्रयोगकृत्यमुक्तम्। [वैद्ये शब्दरत्न०।

गारुड़िक पु० गारुड़ेन विषमन्त्रेण जीवति ठक्। विष-

गारुत्मत न० गरुत्मान् देवतास्य अण्, गरुत्मान् तद्वर्णः अस्त्यस्य सादृश्येन प्रज्ञा० अण् वा। १गरुड़देवताके अस्त्रभेदे। "गारुत्मतं तीरगतस्तरस्वी भुजङ्गनाशाय समादनेऽस्त्रम्" रघुः। २मरकतमणौ अमरः। गरुत्मत इव श्यामवर्णत्वात्तथात्वम्। "तस्योल्लसत्काञ्चनकुण्डलाग्रप्रत्युप्तगारुत्मतरत्नभासा" माघः। "शुकवंशपत्रकदलीशिरीषकुसुमप्रभं गुणोपेतम्। सुरपितृकार्य्ये मरकतमतीव शुभदं नृणां विधत्ते" बृ० सं० ८१ अ०। तल्लक्षणवर्णादिकमुक्तम्।

गारुत्मतपत्रिका स्त्री गारुत्मतमिव वर्णेन पत्रमस्याः कप् कापि अत इत्त्वम्। पाठालतायाम् राजनि०।

गार्ग पुंस्त्री गार्ग्याः कुत्सितमपत्यम् "गोत्रस्त्रियाः कुत्सने ण च" पा० ण पक्षे ठक्। गार्ग्याः कुत्सितेऽपत्ये पक्षे ठकि गार्गिकोऽप्यत्र। उभयत्र स्त्रियां टाप्। गार्ग्यस्य अङ्कः संघः लक्षणं वा यञन्तत्वात् अण् यलोपः। गार्ग्य संघे २तदङ्के च पु०। ४तल्लक्षणे न० परम्परासम्बद्धोऽङ्कः साक्षात्तु लक्षणमिति भेदः सि० कौ०। गार्ग्यादागतः "गोत्रादङ्कवत्" पा० अण् यलोपः। गार्ग्यादागते त्रि० वा वुञि गार्गकोऽपि तदर्थे त्रि०।

गार्गिका स्त्री "गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु" पा०

गर्ग+वुञ् वैरमैथुनिकादिवुञः स्त्रीत्वम्। गार्ग्यत्वेन १श्लाघायां २तथात्याकारे ३तद्वेते च।

गार्गी स्त्री गर्गस्य गोत्रापत्यं स्त्री यञ् ङीपि यलोपः। गर्गगोत्रापत्ये १स्त्रीमात्रे तत्र वचक्नोर्दुहिता गार्गी ब्रह्मविदुत्तमा तच्च वृ० उ० गार्गीब्राह्मणे स्पष्टम् तच्च ब्राह्मणम् "अथैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्येति होवाचेत्यादि "ततोह गार्गी वाचक्नव्युपरराममित्यन्तम्" षष्ठब्राह्मणम्। सैव च अष्टमब्राह्मणे इतरप्रश्नद्वयकरणेन याज्ञवल्क्यात्तदुत्तरप्राप्त्या याज्ञवल्क्यस्य जेतृत्वमन्येषां निषिध्य तस्य ब्रह्मज्ञश्रेष्ठत्वं व्यवस्थापितं यथा तत्रैवोक्तं ८म ब्राह्मणे "साहोवाच ब्राह्मणा भवन्तस्तदेव बहु मन्येध्वम् यदस्मान्नमस्कारेण मुच्येध्वम् न वै जातु युष्माकमिमं कश्चिद् ब्रह्मोद्यं जेतेति" "ततोह वाचक्नव्युपरराम"। २दुर्गायां गाम्भर्गीशब्दे उदा०। तस्या अपत्यम् ढक्।। गार्गेय तदपत्ये पुंस्त्री।

गार्गीपुत्र पु० ६त०। गार्ग्याः पुत्रे शुक्लयजुर्वेदवंशान्तर्गते मुनिभेदे "गार्गीपुत्रात् गार्गीपुत्रः" शत०ब्रा०१४।८।४।२०। ततः अपत्ये "पुत्रान्तादन्यतरस्याम्" वा फिञ् वा कुक्च् पक्षे इञ्। गार्गीपुत्रकायणि गार्गीपुत्रायणि गार्गीपुत्रि गार्गीपुत्रस्यापत्ये पुंस्त्री।

गार्गीभू अगार्ग्यो गार्ग्यो भवति अभूततद्भावे च्वि। "क्यच्व्योश्च" पा० च्वौ अपत्यार्थयलोपश्च। अगार्ग्यस्य गार्ग्यभवने भ्वा० प० अक० सेट्। गार्गीभवति गार्गीभूतः।

गार्गीय आत्मनो गार्ग्यमिच्छति क्यचि यलोपे गार्ग्येच्छायाम् पर०अक०सेट्। गार्गीयति अगार्गीयीत्।

गार्गीय त्रि० गार्ग्यस्येदम्, "वृद्धाच्छः" पा० छ यलोपश्च। १गार्ग्यसम्बन्धिनि २तत्प्रोक्ते च। "गार्गीयं शिखिचारं पाराशरमसितदेवलकृतञ्च" वृ०स०।

गार्ग्य पुंस्त्री गर्गस्यापत्यं गर्गा० यञ्। गर्गगोत्रापत्ये स्त्रियां ङीप् यलोपे गार्गी। विशेषोऽत्र गर्गशब्दे दृश्यः

गार्त्तक त्रि० गर्त्तदेशे भवः धूमा० वुञ्। गर्त्तदेशभवे।

गार्त्समद पु० गृत्समदस्यापत्यम् शिवा० अण्। गृत्समदापत्ये स च शुनकानां त्रिप्रवरान्तर्गत ऋषिभेदः। यथाह आश्व० श्रौ० १२।१०।१२ सू० "शुनकानां गृत्समदेति, त्रिप्रवरं वा भार्गवशौनहोत्रगार्त्समदेति"।

गार्द्दभ त्रि० गर्दभस्येदम् अण्। गर्दभमूत्रादौ २५४७पृ० गर्दभशब्दे विवृतिः।

गार्द्दभरथिक त्रि० गर्दभयुक्तं रथमर्हति ठक्। गर्दभयुक्तरथगमनयोग्ये।

गार्द्ध्य न० गृध–गर्द्ध–वा भावे घञ् गर्द्ध एव चतुर्वर्णा० स्वार्थे ष्यञ्। लोभे। "पीत्वा जलानां निधिनातिगार्द्ध्यात्" माघः। "लभ्रं गार्द्ध्यृङ् वलज संभक्तौ"कविक०।

गार्ध्रपक्ष पु० गृध्रस्यायम्–अण् गार्ध्रः पक्षः पक्षो यस्य। गृध्रपक्षयुक्ते वाणे हेमच०। गार्ध्रपत्रादयोऽप्युक्तार्थे। "विपाठाः पृथवः कस्य गार्ध्रपत्राः शिलाशिताः" भा०वि० ४२ अ०। "न हि गाण्डीवनिर्मुक्ता गार्ध्रपत्राः सुतेजनाः" भा०वि०५३अ०। गार्ध्रवाजोऽप्यत्र। गार्ध्रवाजः कृतः गार्ध्रवाज+करोत्यर्थे णिच् कर्म्मणि क्त। गार्ध्रवाजित कृतगृध्रपक्षे वाणे। "इतस्ततश्च निर्मुक्तैः काञ्चनैर्गार्ध्रवाजितैः" भा० वि० ४८अ०। "तानहं निशितैर्बाणैर्व्यधमं गार्ध्रवाजितैः" भा० व० १७२अ० मुद्रित पु० वाजितैरित्यत्र राजितैरित्यपपाठः।

गार्ध्रवासस् पु० गार्ध्रः पक्षः वास इव यस्य। गृध्रपक्षयुक्ते वाणे "नहि गाण्डीवमुक्तानां शराणां गार्ध्रवाससाम्" भा० व० ३०अ०।

गार्भ त्रि० गर्भे गर्भवृद्धौ साधु अण्। गर्भवृद्धये कर्त्तव्ये १गर्भाधानकर्म्मणि। "गार्भैर्होमैर्जातकर्म्मचौड़मौञ्जीनिवन्धनैः,' मनुः। होमैरित्युपलक्षणं गर्भाधानादेरहोमरूपत्वात्" कुल्लू०। गर्भस्येदम् अण्। २गर्भसम्बन्धिनि त्रि०। "संस्कारैर्विविधैस्तद्वत् गार्भमेनो व्यपोहति" स्मृतिः। तत्रार्थे ठक्। गार्भिकमप्यत्र। "वैजिकं गार्भिकं चैनो द्विजानामपमृज्यते" मनुः। तच्च "एनः अशुचिमातृगर्भवासजम्" कुल्लू०।

गार्भिण न० गर्भिणीनां समूहः भिक्षा० अण्। गर्भिणीसमूहे अमरः। भिक्षादिगणे गर्भिणीशब्दपाठात् अण् एव विधानेन अत्रार्थे गार्भिण्यशब्दकल्पनं प्रामादिकमेव।

गार्मुत त्रि० गर्मुत इदम् अण्। गर्मुद्धान्यविशेषसम्बन्धिनि "प्राजापत्यं गार्मुतं चरुं निर्वपेत्" तैत्ति० २।४।४।७।

गार्ष्टेय पुंस्त्री गृष्टेरपत्यम् गृष्ट्या० ढक्। गृष्टेरपत्ये। "गार्ष्टेयो वृषभो गोभिरानट्"ऋ०१०।१११।२। "सकृत्प्रसूता गौः गृष्टिः तस्या अपत्यम्" भा०।

गार्हपत त्रि०गृहपतेरिदम् तस्य भावो वा अश्वपत्या०अण्। १गृहपतिसम्बन्धिनि त्रि०। २गृहपतिभावे न०। "वैश्वराजन्ययोः गार्हपते"कात्या०श्रौ०१।६।१६। "नेत्यनुवर्त्तते

वैश्यराजन्ययोर्गृहपतित्वेऽपि नाधिकारः" कर्कः। "अपेतप्रजननाः स्थविरास्तदाख्यास्तेषां यो गृगंसतमः स्याद्द्रव्यवत्तमो वाऽनूचानतमो वा तस्य गार्हपते दीक्षेरन्" कात्या० श्रौ० २२।४।७। "स गृहपतिः कर्त्तव्यः" कर्कः। चतुर्थव्रात्ये स्तोमे इति शेषः।

गार्हपत्य पु० गृहपतिना नित्यं संयुक्तः संज्ञायां ञ्य। यजमानरूपगृहपतिसंयुक्तेऽग्निभेदे स च कृतविवाहाग्निपरिग्रहस्याग्निहोत्रादिसाधनाधानाङ्गतया प्राक् आधेयः यथाह आश्व० श्रौ० २।२।१।

"उत्सर्गेऽपराह्णे गार्हपत्यं प्रज्वाल्य दक्षिणाग्निमानीय विट्कुलाद्विसवतो वैश्ययोनय इत्येके भ्रियमाणं वा प्रज्वाल्यारणिमन्तं वा मथित्वा गार्हपत्यादाहवनीयं ज्वलन्तमुद्धरेत्" १सू० "अत्रापराह्णशब्देन अह्नश्चतुर्थभागो गृह्यते। विहरणकाले गार्हपत्यं प्रादुष्कृत्य प्रज्वाल्य च दक्षिणाग्निं वैश्यगृहादानयेत्। चतुर्णां वर्णानामन्यतमस्य द्रव्यवतो वा गृहात्, गार्हपत्याद्वा धार्य्यस्येत् प्रज्वालयेत्। काले काले यदि निर्मन्थ्यः तदा मन्थेत् एषां प्रकाराणामुत्पत्तिवैशेष्याद्व्यवस्था। तेषामन्यतमप्रकारेण दक्षिणाग्निं साधयित्वा ततो गार्हपत्यात् ज्वलन्तमग्निमाहवनीयार्थमुद्धरेत्। पात्रान्तरेण पृथक् कुर्यादित्यर्थः" नारा० "गार्हपत्ये संस्काराः" कात्या० श्रौ० १।८।२४ "अधिश्रयणपर्य्यग्निकरणपात्रप्रतपनादयः संस्काराः वचनाभावे गार्हपत्याग्नौ भवन्ति तद्यथा सूर्प्याग्निहोत्रहवण्योः प्रतपनम् स्रुक्स्रुवादीनाम् वरुणप्रघासे करम्भपात्रयवानां दक्षिणाग्नौ श्रपणेऽपि पर्य्यग्निकरणं गार्हपत्यादेव, पितृयज्ञे च धानानाम् पर्णकषायोदकस्य तु दक्षिणाग्नावेव पाकः इष्टकापाकार्थत्वात् तत्पाकस्य दक्षिणाग्निना विधानात्" कर्कः

"श्रपणं वाहवनीये" २५ सू० "हविषां श्रपणमाहवनीये वा स्यात् गार्हपत्ये वा उभयथा श्रुतत्वात् "तदाहुराहवनीये हवींषि श्रपयेयुरिति अतो गार्हपत्य एव श्रपयन्तीति च"। आदिविकल्पोऽयम् नेच्छाविकल्पः नच्छ्रापिण इति तच्छ्रापित्वस्य नियतत्वेनानुवादात्। तदुक्तम्। "रूपं कालेऽनुनिर्वाप्यः श्रपणं देवतास्तथा। आदौ ये विहिताः पश्चात्त इमे सर्व्वदा स्मृताः" इति रूपं कर्मस्वरूपम् दाक्षायणदर्शपूर्णमासादिकम् कालः उदितानुदितादिः अनुनिर्वाप्यो वैमृधादित्यौ, श्रपणं हविःश्रपणम् गार्हपत्ये वाहवनीये वेति। देवता ऐन्द्रं भवति माहेन्द्रं वेति एतेषां विकल्पानां मध्ये यः प्रथमं स्वीकृतः स एव यावज्जीवं कर्त्तव्यः न पश्चान्तरम्। एवमेवैते पञ्चैवादिविकल्पाः अन्ये सर्वेऽपीच्छाविकल्पाः" कर्कः।

तस्य प्रतियज्ञविधानञ्च शत० ब्रा० ३।६।१।२८। यथा "तस्मादेनानृतसवने सवने एव प्रतिसमिन्धते" "एनान् गार्हपत्यादीन्"। त्रेताग्नेश्च च षोड़शसंस्कारान्तर्गतत्वं व्यासवाक्ये यथा "गर्भाधानं पुंसवनं सीमन्तो जातकर्म च। नामक्रिया निष्क्रमोऽन्नप्राशनं वपनक्रिया। कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः। केशान्तस्नानमुद्वाहो विवाहाग्निपरिग्रहः। त्रेताग्निसंग्रहश्चैव संस्काराः षोड़श स्मृताः" "गार्हपत्यागारे वा देवान् वा एष उपावर्त्तते" शत० ब्रा० १।१।१।११। तत्करणप्रकारः कात्या० श्रौ० ४।७।८। सूत्रादौ उक्तो यथा "अग्न्यगारे कुर्वन्ति" "पूर्वं गार्हपत्यगृहं पश्चादाहवनीयगृहम् कुर्वन्ति" कर्कः। "उदग्वंशं वाऽपरम्" ९सू० "अपरं गार्हपत्यागारं उदग्वंशं वा प्राग्वंशम् आहवनीयागारं तु प्राग्वंशमेव" कर्कः। "दक्षिणपूर्वे द्वारे" १०सू० "उत्पत्तिक्रमेण गार्हपत्यागारस्य दक्षिणद्वारमाहवनीयागारस्य प्राच्याम्। अर्थात् गार्हपत्यागारे पूर्वद्वारम् आहवनीयागारे अपरद्वारम्" कर्कः "गार्हपत्यागारे निर्मथ्याभ्यादधाति" तत्रैव १५ सूत्रम्।

गार्हमेध पु० गृहस्येदं अण् कर्म०। गृहसम्बन्धियज्ञे गृहस्थकर्त्तव्ये पञ्चयज्ञरूपे कर्मणि। "तथैव राजन्नुरु गार्हमेधवितानविद्योरुविजृम्भितेषु" भाग० ५।११।१।

गार्हस्थ्य न० गृहस्थस्य भावः कर्म वा। गृहस्थकर्त्तव्ये पञ्चयज्ञादौ कर्मणि। "गार्हस्थ्यञ्चैव याव्याश्च सर्वा गृह्याश्च देवताः" भा० आश्व० ७अ०। "गार्हस्थ्यं धर्ममास्थाय ह्यासितो देवलः पुरा" भा० शल्य० ५१अ०।

गालन न० चु० गल—स्रावणे भावे ल्युट्। निःस्रावणे (गालान) "मा चुक्षुधं त्वां सोमस्य गालनेन" निरु० ६।२४। "तथा पचेत् यथा दारुकाठिन्यातिशैथिल्यमलगालनरहितोऽन्नरूपपक्वचरुर्भवति" भवदेवः।

गालव पु० गल—घञ् तं वाति वा—क। १लोध्रवृक्षे मेदि० २तेन्दुकद्रुमे शब्दच० ३मुनिभेदे, स च विश्वामित्रपुत्रभेदः। यथाह हरिवं० २७अ०। "विश्वामित्रस्य च सुता देवरातादयः स्मृताः" इत्युपक्रमे

“शाङ्कृतिर्गालवश्चेति मुद्गलश्चेति विश्रुताः”। तस्य शिष्यभेदश्च यथाह भा० उ० १०५ अ० । “विश्वामित्रस्तु शिष्यस्य गालवस्य तपस्विनः ! शुश्रूषया च भक्त्या च प्रीतिमानित्युवाच ह” इत्युपक्रमे तस्यातिनिर्बन्धेन रुष्टविश्वामित्रादिष्टगुरुदक्षिणात्वेन एकतः श्यामकर्णाश्वशताष्टकस्य दानकथा भा० उ० १०६अ० ११८ अ०पर्य्यन्ते उक्ता । तत्रेयमाख्यायिका गुरुणा तथाऽनुशिष्टस्य तस्य उपासनादितः प्रसन्नेन गरुडेन सह तथाभूताश्वप्राप्त्यर्थं ययातिनृपसमीपे गतिः । तत्प्रार्थनया तेन च तथाभूताश्वलाभद्वारभूतां माधवीनामककन्यां ददे । तस्यां कन्यायाञ्चैकैकपुत्रजनने तथाभूताश्वशतद्वयं शुल्कत्वेन च कल्पितं, तत्रादौ हर्य्यश्वनृपेण द्वे तथाविधाश्वशते शुल्कत्वेन दत्त्वा एकपुत्रस्तस्यामुत्पादितः । ततो दिवोदासेन तथैव द्वे शते शुल्कं दत्त्वा एकः पुत्र उदपादि । तत उशीनरेण तथैव द्वे शते शुल्कं दत्त्वा एकः पुत्र उदपादि । एवं षट् तथाभूताश्वशतानि द्विशताश्वशुल्कदानेनैकपुत्रोत्पादनयोग्यां ताञ्च कन्यां गुरवे विश्वामित्राय गुरुदक्षिणात्वेन ददौ तेन च तस्यामेकः पुत्रः उदपादीति ।

गालवि पु० गालवस्यापत्यम् इञ् । गालवर्षेः पुत्रे प्राक्शृङ्गवदाख्ये मुनिभेदे । स हि कुणिगर्गस्यातिवृद्धां कन्यामुपयेमे तत्कथा च वृद्धकन्यामुपवर्ण्य “गार्ग्येण च राजेन्द्र ! तपसा चैव कर्षिता । सा नाशकद्यदा गन्तुं पदात् पदमपि स्वयम् । चकार गमने बुद्धिं परलोकाय वै तदा । मोक्तुकामान्तु तां दृष्ट्वा शरीरं नारदोऽब्रवीत् । असंस्कृतायाः कन्यायाः कुतो लोकास्तवानघे ! । एवन्तु श्रुतमस्माभिर्देवलोके महाव्रते ! । तपः परमकं प्राप्तं न तु लोकास्त्वया जिताः । तन्नारदवचः श्रुत्वा साऽब्रवीदृषिसंसदि । तपसोऽर्द्धं प्रयच्छामि पाणिग्राहस्य सत्तम ! । इत्युक्तेऽस्याश्च जग्राह पाणिं गालवसम्भवः । ऋषिः प्राक्शृङ्गवान्नाम समयञ्चेदमब्रवीत् । समयेन तवाद्याहं पाणिं स्प्रक्ष्यामि शोभने ! । यद्येकरात्रं वस्तव्यं त्वया सह मयेति ह । तथेति सा प्रतिश्रुत्य तस्मै पाणिं ददौ तदा । यथादृष्टेन विधिना हुत्वा चाग्निं विधानतः । चक्रे च पाणिग्रहणं तस्योद्वाहश्च गालविः” भा० शल्य० ५२ अ० ।

गालि पु० चु० गल–चारणे इन् । आक्रोशे शापे त्रिका० । “ददतु ददतु गालिं गालिमन्तो भवन्तो वयमिह तदभावाद्गालिदानेऽप्यशक्ताः” उद्भटः ।

गालित त्रि० चु० गल–चारणे (गालन) कर्म्मणि क्त । द्रुतद्रवे “गालितस्य सुवर्णस्य षोड़शांशेन सीसकम्” वैद्य० । “तथा पचेत् यथाऽगालितमखण्डस्वरूर्भवति” कालेसी पद्धतिः।

गालिनी स्त्री “कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम् । तर्ज्जनीमध्यमानामाः संहताः भुग्नवर्ज्जिताः । मुद्रैषा गालिनी प्रोक्ता शङ्खस्योपरि चालिता” तन्त्रसा० उक्ते मुद्राभेदे ।

गालोडि गालोड़ितमाचष्टे णिच् इतलोपः मुग्ध० उन्मत्ताद्याख्याने अक० उभ० सेट् । गालोड़यति ते ।

गालोडित त्रि० “उन्मादशीलो रोगार्त्तो मूर्खो गालोड़ितः स्मृतः” कलापवृत्त्युक्ते १उन्मत्ते २रोगार्त्ते ३मूर्खे च गोलोडित इति वा पाठस्तत्रार्थेषु । [वीजे राजनि० ।

गालोड्य न०गलोड्य+स्वार्थे प्रज्ञा० अण् । १धान्यभेदे २पद्म-

गावल्गणि पु० गवल्गणस्यापत्यम् इञ् । गवल्गणेरपत्ये सञ्जये गवल्गणशब्दे दृश्यम् ।“गावल्गणिरिदं धीमान्” भा० आ० १० अ० । “सञ्जयश्च महामात्यो विद्वान् गावल्गणिर्वशी” २अ० ।

गाविष्ठिर पुंस्त्री गविष्ठिरस्यापत्यम् विदा० अञ् । गविष्ठिरर्षेरपत्ये । ततः हरिता०युवापत्ये फञ् । गाविष्ठिरायण तदीययुवापत्ये पुंस्त्री ।

गावेधुक त्रि० गवेधुकाया विकारः बिल्वा० अण् । गवेधुकामयवे चर्वादौ । गवेधुशब्दे उदा० ।

गाह विलोड़ने भ्वा० आत्म० सक० ऊदित् वेट् । गाहते अगाहिष्ट-अगाढ जगाहे । “मनस्तु मे संशयमेव गाहते” कुमा० । “अगाहताष्टादशतां जिगीषया” नैष० । “जगाहिरेऽम्बुधिं नागाः” । “समगाहिष्ट चाम्बुधिम्” “जगाहे द्यां निशाचरः” “जगाहे च दिशो दश” भट्टिः । “ब्रह्मावर्त्तं जनपदमधश्छायया गाहमानः” मेघ० । “पूर्वापरौ तोयनिधी वगाह्य” कुमा० अवाऽल्लोपः । पक्षे अवगाह्य । “तपस्विगाढ़ां तमसाम्” (प्राय) रघुः। अव+विषयीकरणे च । “पक्षे साध्यावगाहि ज्ञानम्” गदा० ।

गाह पु० गह–गहने भावे कर्म्मणि वा घञ् । १गहने । “गाहादिव वा निरभुजत” ऋ० ६।११०।८ । “गाहात् गहनात्”भा०। गाह–कर्त्तरि अच् ।२गाहकर्त्तरि त्रि०

गिद पु० रथपालके देवभेदे “गिदैष ते रथ एष वामग्निना” ता० ब्रा० १।७।७ । “गिदो नाम रथपालकः कश्चि-

हेवः"भा०। [गिरिधारके।

गिध्र त्रि० गिरिं धारयति धृ—मूलविभ०क नि० रिलोपः।

गिन्दुक पु० गेन्दुक+पृषो०। गेन्दुके (केन्द) वृक्षे हेमच०।

गि(र)रा स्त्री गॄ—क्विप् वा टाप्। वाक्ये। "रवेः कवेः किं समरस्य सारं इति" प्रश्ने "भागीरथीतीरसमाश्रितानाम्" विदग्धमु० उत्तरम्। "गिरा मुखाम्भोजमियं युयोज" "गरोगिरः पल्लवनार्थलाघवे" नैषधम् "भवद्गिरामवसरप्रदानाय वचांसि नः" "गिरमुत्तरपक्षताम्" माघः। "गीर्भिष्ट्वा वयं वर्द्धयामो वचोविदः" ऋ० १।९१।९। अस्य पत्यादौ परे समासे अहरा०रूपत्रयम् गीष्पतिः गीर्पतिः गीःपतिः। २स्तुतौ च "पवमानो गिरावृधम्" ऋ०९।२६।६। "गिरा स्तुत्या वर्द्धमानम्" भा०।

गिरि पु० गॄ—इ किच्च। १पर्वते। "कुचरो गिरिष्ठा इत्यृचो निरुक्तौ १।२०। "गिरिः पर्वतः समुद्गीर्णो भवति" इत्युक्तम्। "सदोर्द्ध्ववाहुर्योवीरो मुक्तकेशो दिगम्बरः। सर्वत्र समभावेन भावयेद्यो नरोत्तमः। इष्टदेवीधिया नारीं स गिरिः परिकीर्त्तित" इत्युक्तलक्षणे २तान्त्रिकसंन्यासिभेदे, ३परिव्राजकोपाधिभेदे च; यथा आनन्दगिरिः। गि(र)लति स्तोकम् गॄ—अच्। ४वालमूषिकायां स्त्री वा ङीप् रमानाथः। ५नेत्ररोगे मेदि०। गिरिकाणः २त० प्रकृतिस्वरः। ६गेन्दुके विश्वः। ७पूज्ये त्रि० मेदि०। ८निगरणे स्त्री अमरः। "अथान्धकारं गिरिगह्वरस्थम्"रघुः। "गिरेस्तडित्त्वानिव तावदुच्चकैः" माघः। ९मेघे निघ०। "गिरयो नाप उग्रा अस्पृध्रन्" ऋ० ६।६७।११। "गिरयो मेघाः" भा०। "गिरिभ्रजो नोर्मयो मदन्तः" ऋ० १०।६८।१। "गिरिभ्यो मेघेभ्यो भ्रष्टा निर्गताः"भा०। "मेघोऽपि गिरिरेतस्मादेव जलादेः संगरणं भवति" निरु० १।२०। १०पारददोषभेदे "मलं विषं वह्निगिरी च चापल्यं नैसर्गिकं दोषमुशन्ति पारदे। उपाधिजौ द्वौ त्रपुनागयोगजौ दोषौ रसेन्द्रे कथितौ मुनीश्वरैः। मलेन मूर्च्छा, मरणं विषेण, दाहोऽग्निना कष्टतरः शरीरे। देहस्य जाड्यं गिरिणा सदा स्यात्, चाञ्चल्यतो वीर्य्यहृतिश्च पुंसाम्। वङ्गेन कुष्ठं भुजगेन षण्डो भवेदतोऽसौ परिशोधनीयः। वह्निर्विषं मलञ्चेति मुख्या दोषास्त्रयो रसे। एते कुर्वन्ति सन्तापं मृतिं मूर्च्छां नृणां क्रमात्। अन्येऽपि कथिता दोषा भिषग्भिः पारदे यदि। तथाप्येते त्रयो दोषाः शोधनीया विशेषतः" भावप्र०। ततःपरस्य नदीनखादीनां गिरिनद्यादि० पूर्वपदस्थनिमित्तत्वात् वा णत्वम्। गिरिण(न)दी गिरिण(न)खः गिरिण(न)द्धः गिरिणि(नि)तम्बः।

गिरिक पु० गिरौ कैलासे कायति कै—क। १शिवे। "गिरिको हिण्डुको वृक्षो जीवः पुद्गल एव च" भा० शा० २६८ अ० दत्तशिवनामसु। नीलकण्ठ नान्याव्युत्पत्तिरुक्ता। गिरिं गिरिवदचेतनं देहादिकं कायति शब्दति अन्तर्भूतण्यर्थे कै—क। अचेतनमपि देहादि चेतनं करोतीत्यर्थः"। गिरि+स्वार्थे क। २वालमूषिकायाम् स्त्री अमरः। गिरौ भवः कन्। ३पर्वतजाते त्रि०। ४उपरिचरवसुनृपमहिष्यां स्त्री तस्या गिरितो जन्मकथा भा० आ० ६३ अ० यथा

"राजोपरिचरेत्येवं नाम तस्याथ विश्रुतम्। पुरोपवाहिनीं तस्य नदीं शुक्तिमतीं गिरिः। अरौत्सीच्चेतनायुक्तः कामात् कोलाहलः किल। गिरिं कोलाहलं तन्तु पदा वसुरताडयत्। निश्चक्राम ततस्तेन प्रहारविवरेण सा। तस्यां नद्यामजनयन् मिथुनं पर्वतः स्वयम्। तस्मात् विमेक्षणात् प्रीता नदी राज्ञे न्यवेदयत्। यः पुमानभवत् तत्र तं स राजर्षिसत्तमः। वसुर्वसुप्रदश्चक्रे सेनापतिमरिन्दमः। चकार पत्नीं कन्यान्तु तथा तां गिरिकां नृपः। वसोः पत्नी च गिरिका कामकालं न्यवेदयत्। ऋतुकालमनुप्राप्ता स्नाता पुंसवने शुचिः। तदहः पितरश्चैनमूचुर्जहि मृगानिति। तं राजसत्तमं प्रीतास्तदा मतिमतां वर!। स पितॄणां नियोगन्तमनतिक्रम्य पार्थिवः। चचार मृगयां कामी गिरिकामेव संस्मरन्। अतीव रूपसम्पन्नां साक्षाच्छ्रियमिवापराम्"। "चैद्योपरिचरं वीरं वसुं नामान्तरिक्षगम्। चैद्योपरिचराज्जज्ञे गिरिका सप्त मानवान्। महारथो मगधराट् विश्रुतो यो बृहद्रथः। प्रत्यग्रहः कुशश्चैव यमाहुर्मणिवाहनम्। मारुतश्च यदुश्चैव मत्स्यकाली च सत्तम!" हरिवं३२ अ०।

गिरिकच्छप गिरौ पर्वतस्थदर्य्यां कच्छपः। पर्वतदरीस्थशायिनि स्थलकच्छपे। स च प्रमथाद्युपद्रवराहित्याय गृहे गृहस्थेन स्थापनीयः यथाह भा०आनु० १२१ अ० "गोरचना समालम्भो वचाहस्तश्च यो भवेत्। घृताक्षतं च यो दध्यात् मस्तके तत्परायणः। ये च मांसं न खादन्ति तान्न शक्नुम हिंसितुम्। यस्य चाग्निर्गृहे नित्यं दिवा

रात्रौ च दीप्यते। तरक्षोश्चर्म दंष्ट्रा च तथैव गिरिकच्छपः। श्वाव्यभ्रूमोविडालस्य छागः कृष्णोऽथ पिङ्गलः। येषामेतानि तिष्ठन्ति गृहेषु गृहमेधिनाम्। तान्यधृष्याण्यगाराणि पिशिताशैः सुदारुणैः" पिशाचोक्तौ।

गिरिकण्टक पु० गिरेः कण्टक इव भेदकत्वात्। वज्रे त्रिका०

गिरिकदम्ब पु० गिरौ भवः कदम्बः। धाराकदम्बे राजनि० स्वार्थे क। तत्रार्थे "देवदारुवचाहिङ्गुकुष्ठं गिरिकदम्बकः" सुश्रुतः।

गिरिकदली स्त्री ७त०। बहुवीजायाम् वनरम्भायाम् राजनि० "गिरिरम्भा तु मधुरा हिमा बल्या च दुर्ज्जरा। तृष्णापित्तदाहशोषशमनी वीर्य्यकृद्गुरुः" राजनि०।

गिरिकर्णिका स्त्री गिरिः कर्ण इव यस्याः कप् कापि अत इत्त्वम्। १पृथिव्यां त्रिका०। गिरेर्बालमूषिकायाः कर्णः अस्त्यस्याः तदाकारपत्रत्वात् ठन्। २अपराजितालतायां ३श्वेतकिणिहीवृक्षे च राजनि०।

गिरिकर्णी स्त्री गिरेर्बालमूषिकायाः कर्ण इव कर्णः पत्रमस्याः ङीप्। १अपराजितालतायाम् अमरः। "त्रिफला गिरिकर्णी च हंसपादी च चित्रकम्" भावप्र०। २यवासे शब्दच०। [गिरिशब्दे गिरिकशब्दे च दृश्यम्।

गिरिका स्त्री गिरिरेव स्वार्थे क। बालमूषिकायाम् अमरः।

गिरिकाण त्रि० गिरिणा नेत्ररोगभेदेन काणः। नेत्ररोगभेदेन एकनेत्रहीने। अस्य ३त० प्रकृतिस्वरता।

गिरिक्षित् पु० गिरि वाचि क्षियति क्षि—वासे क्विप् अलुक्स०। स्तुतिरूपवाक्यस्थे परमेश्वरे "प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे" ऋ०१।१५४।३। "गिरिक्षिते गिरि वाचि, गिरिवदुन्नतप्रदेशे वा तिष्ठते" भा०।

गिरिक्षिप त्रि० गिरिं क्षिपति क्षिप—क। १गिरेरुत्क्षेपणसामर्थ्यवति २अक्रूरभ्रातरि पु० गान्दिनीजशब्दे दृश्यम्

गिरिगुड पु० गिरौ गुड इव। गेन्दुके (केन्द) हेमच०।

गिरिचर त्रि० गिरौ चरति चर—ट। १पर्वतचारिणि। "गिरिचर इव नागं प्राणसारं बिभर्त्ति" शकु०। स्त्रियां ङीप्। २चौरे तदीशे ३रुद्रभेदे पु० "नम उष्णीषिणे गिरिचराय" यजु० १६।२१। गिरिचरश्चौरः अध्वन्यानां वस्त्राद्यपहर्त्तुं पर्वतादिविषमस्थानचरत्वात् तदधिपत्वाद्रुद्रोपि गिरिचरः इत्युपचारः।

गिरिज न० गिरौ जायते जन—ड। १शैलजे शिलाजतुनि २लोभे ३अभ्रके च मेदि०। ४गैरिके राजनि० ५मधुकवृक्षे ६गौरशाके पु० रत्नमा०। ७हिमाद्रिजातायां पार्वत्यां स्त्री "आगतं शिववक्त्रेभ्यो गतञ्च गिरिजानने" यामलम्। "यदा यदा स गिरिजास्तदुनामाचरागतम्" काशी० ६६अ० ८मातुलाङ्ग्यां स्त्री मेदि० ९श्वेतवुङ्कायां रत्नमा०। १०क्षुद्रपाषाणभेदलतायां ११त्रायमाणलतायां १२कारीवृक्षे १३मल्लिकायां १४गिरिकदल्यां च स्त्री राजनि०। १५पर्वतजातमात्रे त्रि०। गिरि वाचि जायते जन—ड अलुक्स०। १६स्तुतिरूपवाक्यनिष्पन्ने च "मरुत्वते गिरिजा एवया मरुत्" ऋ०५।८७।२। गिरिजा वाचिनिष्पन्नाः" भा०। पार्वत्या हिमालयरूपगिरेर्जन्मकथा शिवपुराणे १३अ० हिमालयस्य मेनकानाम्नी पत्नी बभूवेत्युक्त्वा "प्रसूतिरभवत्तस्याः मेनायाः कन्यका शुभा" इत्युपक्रमे "तां पार्वतीत्याभिजनाच्च नामतो जुहाव तद्बन्धुजनः स्वभावतः। मात्रा निषिद्धा तपसे यदा तु सा ययावुमाख्यां भवभक्तिभाविनी"। कालिकापुराणे तु तस्याः कालीतिनाम तत्कथा ४१।४२अ० दृश्या। १७गङ्गायाञ्च स्त्री तस्या अपि तत उत्पत्तिकथा कालिकापु० ४७ अ० दृश्या।

गिरिजातनय पु० ६त०। कार्त्तिकेये तस्य च यथोत्पत्तिस्तथा कार्त्तिकेयप्रसूशब्दे १९५६पृ० उक्तप्राया कालिकापु० ४७अ० विस्तरेण दृश्या। गिरिजानन्दनादयोऽप्यत्र।

गिरिजापति पु० ६त०। १शिवे, गिरिजेशादयोऽप्यत्र।

गिरिजामल न० गिरौ पर्वते मेघे घनरवे वा जायते जन—ड, तेषु अमलम्, तथाभूतञ्च तदमलञ्च, गिरिजायाः पार्वत्या वीजरूपं मलं वा। १अभ्रके तस्य यथा च पार्वतीवीजजातत्वं तथा अभ्रकशब्दे ३१५ पृ० उक्तम् भावप्र० तस्यान्यथोत्पत्तिभेदादिकमुक्तं यथा

"पुरा वधाय वृत्रस्य वज्रिणा वज्रमुद्धृतम्। विस्फुलिङ्गास्ततस्तस्य गगने परिसर्पिताः। ते निपेतुर्घनध्वानाच्छिखरेषु महीभृताम्। तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकम्। तद्वज्रं वज्रजातत्वादभ्रमभ्ररवोद्भवात्। गगनात् स्खलितं यस्माद्गगनञ्च ततो मतम्। विप्रक्षत्रियविट्शूद्रभेदात्तत् स्याच्चतुर्विधम्। क्रमेणैव सितं रक्तं पीतं कृष्णञ्च वर्णतः। प्रशस्यते सितन्तारे रक्तं तत्तु रसायने। पीतं हेमनि, कृष्णन्तु गदेषु द्रुतयेऽपि च। पिनाकं दर्दुरं नागं वज्रञ्चेति चतुर्विधम्। मुञ्चत्यग्नौ विनिक्षिप्तं पिनाकन्दलसञ्चयम्। अज्ञानाद्भक्षणं तस्य महाकुष्ठप्रदायकम्। दर्दुरं त्वग्निनिःक्षिप्तं कुरुते दर्दुरध्वनिम्। गोलकान् बहुशः कृत्वा स स्यान्मृत्यु

प्रदायकः। नागन्तु नागवद्वह्नौ फुत्कारं परिमुञ्चति। तद्भक्षितमवश्यन्तु विदधाति भगन्दरम्। वज्रन्तु वज्रवत्तिष्ठेत्तन्नाग्नौ विकृतिं व्रजेत्। सर्वाभ्रेषु वरं वज्रं व्याधिवार्द्धक्यमृत्युहृत्। अभ्रमुत्तरशैलोत्थं बहुसत्वं गुणाधिकम्। दक्षिणाद्रिभवं स्वल्पसत्वमल्पगुणप्रदम्। अभ्रं कषायं मधुरं सुशीतमायुष्करं धातुविवर्द्धनञ्च। हन्यात् त्रिदोषं व्रणमेहकुष्ठप्लीहोदरग्रन्थिविषक्रमींश्च। रोगान् हन्ति द्रढयति वपुर्वीर्य्यवृद्धिं विधत्ते तारुण्याढ्यं रमयति शतं योषितां नित्यमेव। दीर्घायुष्कान् जनयति सुतान् विक्रमैः सिंहतुल्यान् मृत्योर्भीतिं हरति सततं सेव्यमानं मृताभ्रम्"। अभ्रशब्दे अनुक्तास्तद्गुणादिभेदा इहोक्ताः।

गिरिज्वर पु० गिरिं ज्वरयति ज्वर-णिच्-अच्। वज्रे शब्दर०।

गिरि(लि)त त्रि० गिल-क्त वा रः। भक्षिते रायमुकु०।

गिरित्र पु० गिरौ कैलासे स्थितस्त्रायते त्रै-क। रुद्रे। "शिवां गिरित्र तां कुरु" यजु० १६।३।

गिरिदुर्ग न० गिरिरेव दुर्गम् राज्ञां शत्रुभ्यो निःशङ्क-, तया वासस्थानम्। पर्वतदुर्गमे तादृशे स्थाने (गड़)। "धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा। नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम्। सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत्। एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते"। त्रीण्याद्यान्याश्रितास्तेषां मृगगर्त्ताश्रयाप्चराः"। त्रीण्युत्तराणि क्रमशः प्लवङ्गमनरामराः" मनुः। एषां मध्ये गिरिदुर्गं बहुगुणत्वात् विशिष्टं तस्य गुणाश्च सुदुरारोहत्वं महाप्रदेशादल्पप्राणप्रेरितशिलादिना बहुशत्रुसैन्यविनाशनमित्यादयः" कुल्लू० "वसन्तो गिरिदुर्गेषु वनदुर्गेषु धन्विनः" भा०वि० ५ अ०।

गिरिधातु पु० ६त०। गैरिके उपधातुभेदे राजनि०।

गिरिनगर न० वृ०स० कूर्मविभागे १४अ० दक्षिणस्यामुक्ते अथ दक्षिणेन लङ्केत्युपक्रमे "कालाजिनसौरिकीर्णतालिकटाः गिरिनगरमलयदर्दुरमहेन्द्रमालिन्द्यभरुकच्छाः" इत्युक्ते देशभेदे। अस्य च संज्ञात्वेऽपि पूर्वपदस्थनिमित्तात् क्षुभ्नादित्वात् न णत्वम्।

गिरिनद्यादि पु० वार्त्ति०ग० उक्ते पूर्वपदस्थनिमित्तात् वा णत्वनिमित्ते शब्दगणे स च गणः "गिरिनदी गिरिनख गिरिनद्ध गिरिनितम्ब चक्रनदी चक्रनितम्ब तूर्य्यमाणमाषोण आर्गयन" आकृतिगणः। "गिरिनद्यादीनां वा" वार्त्ति०।

गिरिनन्दिनी स्त्री ६त०। हिमालयसुतायां १पार्वत्यां २गङ्गायाञ्च, गिरेर्नन्दिनीव। ३नदीमात्रे तासां गिरिप्रभवत्वात्तथात्वम् "अन्याश्च सरितो बह्व्यः" इत्युपक्रमे "शुभाश्च गिरिनन्दिन्यः" हरिवं० १२६अ०। "कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी" रसगङ्गाधरः।

गिरिनिम्ब पु० ७त०। महानिम्बवृक्षे राजनि०।

गिरिपीलु पु० ६त०। (फालसा) इति वृक्षभेदे राजनि०।

गिरिपुर न० आनर्त्तदेशान्तर्गते पुरभेदे आनर्त्तशब्दे ७२७ पृ० उदा०। [जतुनि राजनि०।

गिरिपुष्पक न० गिरेः पुष्पमिव कायति कै-क। शिला-

गिरिप्रिया स्त्री गिरिः प्रियोऽस्याः। चमर्य्यां मृगभेदे राजनि०। [उवासापः" शत०ब्रा० ७।४।२।१८।

गिरिबुध्ना स्त्री गिरिर्बुध्न इव यस्याः। अप्सु। गिरिबुध्ना

गिरिभिद् पु० गिरिं भिनत्ति भिद-क्विप्। १पाषाणभेदके वृक्षे भावप्र०। २इन्द्रे च। ३नद्यन्तरे। ४नदीभेदके "नद्यन्तरेऽसंसवो गिरिभिच्चेत्" कात्या० श्रौ० २५।१४।२३। "गिरिं भित्त्वा या नद्यागता तदनन्तरे संसवो न भवति" कर्कः।

गिरिभू त्रि० गिरौ भवति भू-क्विप्। १पर्वतप्रभवे क्षुद्रपाषाणभेदे २पार्वत्यां ३गङ्गायां च स्त्री ६त०। ४पर्वतभूमौ स्त्री।

गिरिमल्लिका स्त्री गिरौ मल्लीव इवार्थे कन्। कुटजवृक्षे अमरः। [उच्चत्वात्तथात्वम्।

गिरिमान पु० गिरेरिव मानमस्य। गजे शब्दरत्ना०। तस्य

गिरिमाल पु० गिरौ मालः सम्बन्धोऽस्य। बाधके स्वनामख्याते यज्ञिययूपकाष्ठसाधने वृक्षभेदे "तैल्वको बाधको वा" कात्या० श्रौ० २१।३।६। "यूपो भवति तैल्वकस्तिणिशः बाधको गिरिमालः" कर्कः।

गिरिमृद् स्त्री ६त०। १गैरिके (गेरिमाटि) त्रिका०। २पर्वतमृत्तिकायाञ्च।

गिरिमृद्भव न० गिरेर्मृदो भवति भू-अच्। गैरिके राजनि०

गिरिमेद पु० गिरिमेद इव सारोऽस्य। विट्खदिरे रत्नमा०

गिरियक पु० गिरिं याति या-क संज्ञायां कन्। गेन्दुके (केन्द) वृक्षे हेमच०। [कन्दुके शब्दरत्ना०।

गिरियाक पु० गिरिं याति-या क्विप् संज्ञायां कन् न ह्रस्वः।

गिरिराज् पु० गिरिषु राजते राज-क्विप् ७त०। १पर्वतश्रेष्ठे "स तयाभिहितो राजन् नाचलत् गिरिराडिव" भा०भी०

७८अ० । "गिरिराट्पादचारीव" भाग० ६।१२।२५ । २हिमाचले च ।

गिरिराज पु० ६त० । हिमालये । यथा च तस्य नगराजत्वं तथा अचलराजशब्दे ८३ पृ०उक्तम् । "सोऽपि कार्पटिकस्तस्य गिरिराजस्य भाषितम्" । "गिरिराजाङ्गजासखः" काशी० । "गिरिराजराजसुतान्वितवामतनुम्" शिवस्तवः ।

गिरिवासिन् त्रि० गिरिं वासयति सुरभीकरोति वासि—णिनि, गिरौ वसति वस—णिनि वा । हस्तिकन्दे वृक्षे राजनि० ।

गिरिव्रज न० गिरीणां पञ्चानां व्रजो यत्र । मगधदेशान्तर्गते जरासन्धपुरे "सोऽभिजनोऽस्य" अण् । गैरिव्रज तद्देशवासिनि त्रि० बहुषु तस्य लुक् । "गिरिव्रजाः मगधपुण्ड्रमिथिलाश्च" वृ०स०१०अ० ।

गिरिव्रजवर्णनं भा०स०२१अ० । यथा

"एष पार्थ ! महान् भाति पशुमान्नित्यमम्बुमान् । निरामयः सुवेश्माढ्यो निवेशो मागधः शुभः । वैहारो १ विपुलः शैलो वराहः २ वृषभ ३ स्तथा । तथा ऋषिगिरि४स्तात ! शुभश्चैत्यक५पञ्चमाः । एते पञ्च महाशृङ्गाः पर्वताः शीतलद्रुमाः । रक्षन्तीवाभिसंहत्य संहतोङ्गा गिरिव्रजम्" इत्युपक्रमे ।

"अङ्गवङ्गादयश्चैव राजानः सुमहाबलाः । गौतमक्षयमभ्येत्य रमन्ते स्म पुरार्ज्जुन ! । वनराजीस्तु पश्येमाः पिप्पलानां मनोरमाः । लोध्राणाञ्च शुभाः पार्थ ! गौतमौकःसमीपजाः । अर्ब्बुदः शक्रवापी च पन्नगौ शत्रुतापनौ । स्वस्तिकस्यालयश्चात्र मणिनागस्य चोत्तमः । अपरिहार्य्या मेघानां मागधा मनुना कृताः । कौशिको मणिमांश्चैव चक्राते चाप्यनुग्रहम् । एवं प्राप्य पुरं रम्यं दुराधर्षं समन्ततः । अर्थसिद्धिं त्वनुपमां जरासन्धोऽभिमन्यते" ।

गिरिश पु० गिरौ शेते शी—बा० लोकेऽपि ड, गिरिरस्त्यस्य लोमा० श वा । १शिवे अमरः । "गिरिशमुपचचार प्रत्यहं सा सुकेशी" कुमा० । "गिरिशरमणी कालि ! सततम्" कालीस्तवः । "शिवेन वचसा त्वा गिरिशाच्छा वदामसि" यजु० १६।४ ।

गिरिशन्त पु० महादेवे । "गिरिशन्ताभिचाकशीहि" यजु० १६।२ । "गिरौ कैलासे स्थितः शं सुखं प्राणिनां तनोति विस्तारयति, गिरि वाचि स्थितः शं तनोतीति वा गिरौ—मेघे स्थितो वृष्टिद्वारेण शं तनोतीति वा वेददी० । सर्व्वत्र तन—बा० ड । गिरि वाचीति पक्षे अलुक्स० ।

गिरिशय पु० गिरौ कैलासे शेते शी—अच् । महादेवे । "नमो गिरिशयाय च गिरिष्ठाय च" यजु० १६।९ ।

गिरिशाल पु० गिरिं शलति आश्रयत्वेन गच्छति शल—गतौ अण् उप० स० । सुश्रुतोक्ते प्रतुदे पक्षिभेदे । कपोतपारावतेत्युपक्रमे गिरिशालक्कानदूषकेत्यादयः प्रतुदाः" सुश्रुतः ।

गिरिशालिनी स्त्री गिरिं वालमूषिकाकर्णं शलते श्लाघते स्वपत्रेण शल—श्लाघायां णिनि ङीप् । गिरिकर्णिकायामपराजितायाम् "पारिभद्रं पाटला च बकुलं गिरिशालिनी" वामनपु० । तत्तुल्यपत्रत्वेन गिरेः श्लाघनात् तस्यास्तथात्वम् ।

गिरिशृङ्ग पु० गिरेः शृङ्गमाकारेणास्त्यस्य अच् । १गणेशे शब्दरत्ना० शुण्डादण्डस्योत्तलने गिरिशृङ्गाकारत्वात् तस्य तथात्वम् । ६त०।२ पर्वतशिखरे न० ।

गिरिषद् पु० गिरौ सीदति सद—क्विप् षत्वम् । महादेवे ।

गिरिष्ठा स्त्री गिरौ तिष्ठति स्था क्विप् अम्ब० षत्वम् । १महादेवे २पर्वतस्थायिमात्रे त्रि० । "मृगो न भीमः कुचरो गिरिष्ठाः" ऋ०१।१४४।२ । "गिरिष्ठा गिरिस्थायी" निरु०

गिरिसर्प पु० नित्यः ७त० । दर्वीकरसर्पभेदे सुश्रुतः । अहिशब्दे ५८१ पृ० विवृतिः ।

गिरिसार पु० ६त० । १लौहे २रङ्गे धातुभेदे च "द्रोणाय प्रेषयामास गिरिसारमयीं वलौ" भा० भी० ५२अ० गिरिषु सारः चन्दनादिसुरभिद्रव्यसत्त्वात् श्रेष्ठः । २मलयपर्वते मेदिनिः ।

गिरिसुत पु० ६त० । १मैनाकपर्वते ।२पार्वत्याम् स्त्री । "अवतु वो गिरिसुता शशिभृतः प्रियतमा" उद्भटः । "शम्भोः शिरसीन्दुकला वृषध्वजोऽक्षि च तृतीयमप्यूर्ध्वम् । शूलं धनुः पिनाकं वामार्धे वा गिरिसुतार्धम्" वृ०स० ५८अ० ।

गिरिस्रवा स्त्री गिरेः स्रवति स्रु—अच् ५त० । पर्वतनद्यां "गिरिस्रवाभि ! सर्वाभिः पृष्ठतोऽनुगता शुभा" भा० आनु०१४अ० ।

गिरिह्वा स्त्री गिरिं वालमूषिकाकर्णं ह्वयति स्पर्द्धते तदाकारेण ह्वे—क । गिरिकर्णिकायाम् अपराजितायाम् तत्कर्णतुल्यपत्रत्वात्तस्यास्तथात्वम् । "श्वेता गिरिह्वा किण्ही सिता च" सुश्रु० । आ+ह्वे—क । गिर्य्याह्वा-

प्यत। 'शिरीषः किणीहिः शेलुः गिर्य्याह्वा रजनीद्वयम्" सुश्रु०।

गिरीन्द्र पु० गिरिरिन्द्र इव श्रेष्ठत्वात् ६त० वा। हिमालये पर्व्वते अचलराजशब्दे ८२पृ० विवृतिः। १महादेवे च कैलासेश्वरत्वत्तस्य तथात्वम्। "माधवश्च गिरीन्द्रोऽसौ सम्भावयति चेतसि" काशी० ६६ अ०।

गिरीश पु० गिरेः कैलासस्य ईशः। महादेवे अमरः। "सुतां गिरीशप्रतिसक्तमानसाम्" कुमा०। गिरीणामीशः। २हिमालये। गिरां वाचामीशः। ३वाचस्पतौ च मेदि०।

गिर्व्वणस् पु० गिरा स्तुत्या वन्यते वन-कर्म्मणि असुन् संज्ञात्वात् णत्वं पृषो० नोपपददीर्घः। १स्तवनीये देवभेदे। "गिर्व्वणादेवो भवति गीर्भिरेनं वनयन्ति" निरु० ६।१४। "सोमास इन्द्र! गिर्व्वणः" ऋ० १।५।७। "गीर्भिः स्तुतिभिः संभजनीयो देवविशेषः" भा०। कर्त्तरि असुन्। २स्तोतरि च। "धीरो गिर्व्वणस्यु र्विदानः" ऋ० १०।१११।१। "गीर्भिर्वनन्ति भजन्ते इति गिर्व्वणसः स्तोतारः वनतेरसुनि रूपम् उपपददीर्घाभावश्छान्दसः। तदन्तात् क्यच्। "क्याच्छन्दसि" पा० उप्रत्ययः स्तोतॄन् कामयमानः" भा०। "परि त्वा गिर्व्वणो! गिर इमा भवन्तु विश्वतः" शत० ब्रा० ३।६।१।२४।

गिर्व्वन् पु० गिरा वन्यते वन-विच् नि० उपपददीर्घाभावः। इन्द्रादौ देवे "इन्द्रो वै गिर्व्वा" शत० ब्रा० ३।६।१।२४।

गिर्व्वाहस् पु० गिरा स्तुतिवाचा उह्यते नि० उपपददीर्घाभावः। "स्तुतिवाक्यवाहनीये इन्द्रादौ देवे।"न जगसुर्गिर्व्वाहो! अश्वाः" ऋ०.६।२४।६।

गिल गिल गिलने सक पर० सेट्। गिलति गिलन् सार्व्वधातुकविषयोऽयम्। गिरतेः रस्य लः इत्येके। किन्तु गिलन इति निर्द्देशात् सौत्रोऽयं धातुरित्येव ज्यायः

गिल त्रि० गिल-क। १भक्षके। "गिलेऽगिलस्य" वार्त्ति० एतत्परे पूर्व्वस्य मुम्! तिमिङ्गिलः। "तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघव!" गिलस्य तु न गिलगिलः "गेलगिले च" वा०। तिमिङ्गिलगिलः इत्यादौ मुम्। २कुम्भीरे पु० शब्दच०। तस्य सर्व्वपदार्थस्य चर्व्वणाभावेन गिलनात् तथात्वम्। कर्म्मणि मूल० क। ३जम्बीरे शब्दच० तस्य दन्तशठत्वेन चर्व्वणान्तरेण गिलनात्तथात्वम्।

गिलगिल पु० गिलं कुम्भीरं गिलति गिल-क। अगिलस्येत्युक्तेः न मुम्। गिलग्राहे नक्रे (हाँगर)।

गिलग्राह पु० गिलं कुम्भीरं गृह्णाति ग्रह-अण् उप०स०। नक्रे राजनि०।

गिलन न० सौ० गिल-ल्युट् गिलन इति निर्द्देशात् न गुणः। चर्व्वणमन्तरेण भक्षणे (गेला) अमरः।

गिलायु "ग्रन्थिर्गले त्वामलकास्थिमात्रः स्थिरोऽल्परुक् स्यात् कफरक्तमूर्त्तिः। संलक्ष्यते सक्तमिवाशनञ्च स शस्त्रसाध्यस्तु गिलायुसंज्ञः" सुश्रुतोक्ते कण्ठरोगभेदे।

गिलि स्त्री गिल-भावे इन्। गिलने अमरटी०।

गिलित त्रि० गिल-क्त। भक्षिते अमरः।

गिलोड्य पु० मधुरफले वृक्षभेदे। "कतकाश्मगिलोपियालेत्याद्युपक्रमे "समासेन मधुरो वर्गः" सुश्रुतः।

गि(गे)ष्णु त्रि० "गै-गादाभ्यामिष्णुच्" उणा० इष्णुच् आद्गुणः। इष्णुगिति केचित् पठन्ति तन्मते आतो लोपः। १गायने २सामादिगायके पु०। उज्ज्वलदत्तीये तु इष्णुजित्येव पाठः मतान्तरे एष्णुक् इति पाठान्तरमुक्त्वा आतो लोपे रूपसामान्यमुक्त्वा चित्स्वराभावात् स्वरे भेद इत्युक्तं तेन शब्दकल्पद्रुमे गिष्ण इत्यदन्तशब्दकल्पनं प्रामादिकम्। तथा च गिष्णुरिति, गेष्णुरिति वा. शब्दरूपद्वयम्।

गीत न० गै-गाने भावे क्त। गाने स्वरविशेषनिष्पाद्ये शब्दभेदे। तच्च द्विविधं लौकिकं वैदिकञ्च तत्र गानशब्दे वैदिकगानलक्षणादिकमुक्तं लौकिकमधुनोच्यते।

"धातुमात्रासमायुक्तं गीतमित्युच्यते बुधैः। तत्र नादात्मकोधातुर्मात्रा ह्यक्षरसञ्चयः"। तद्द्विविधं यथा "गीतञ्च द्विविधं प्रोक्तं यन्त्रगात्रविभागतः। यन्त्रं स्याद्वेणुवीणादि गात्रन्तु मुखजं मतम्। निबन्धमनिबन्धञ्च गीतं द्विविधमुच्यते। अनिबन्धं भवेद्गीतं वर्णादिनियमं विना। तद्वा गमकधात्वाद्यैरनिबन्धं विनाकृतम्। निबन्धञ्च भवेद्गीतं तालमानरसाञ्चितम्। छन्दोगमकधात्वाद्यैर्वर्णादिनियमैः कृतम्। ऋग्भिः पाठ्यमभूद्गीतं सामभ्यः समपद्यत। यजुर्भ्योऽभिनया जाता रसाश्चाथर्व्वणः स्मृताः। अथ संगीतलक्षणम् "तालवाद्यानुगं गीतं नटीभिर्यत्र गीयते नृत्यस्यानुगतं रङ्गे तत्सङ्गीतकमुच्यते। सङ्गीतकेन रम्येण सुखं यस्य न चेतसि। मनुष्यवृषभो लोके विधिनैव स वञ्चितः। संसारदुःखदग्धानामुत्तमानामनुग्रहात्। प्रभुणा शङ्करेणात्र गीतवाद्यं प्रकाशितम्। गीतं वाद्यं तथा नृत्यं तौर्य्यत्रिकमिदं मतम्। तूर्य्यशब्दोऽस्मदङ्गे स्यात् हर-

ऽेऽपि च दृश्यते । गीतज्ञो यदि गीतेन नाप्नोति परमं पदम् । रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते । गीतेन हरिणा रङ्गं प्राप्नुवन्त्यपि पक्षिणः । वनादायान्ति फणिनः शिशवो न रुदन्ति च । हृदि चमत्कृतये किमतः परं फणिवरोऽश्वतरो यत पन्नगः । अपि स्तुतां यदवाप मदालसां मधुरगीतवशीकृतशङ्करः । परमानन्दविवर्द्धनमभिमतफलं वशीकरणम् । सकलजनचित्तहरणं विमुक्तिबीजं परं गीतम्"। "शुद्धशालगसङ्कीर्णभेदाद्गीतं त्रिधा मतम् । एला साद्यभवा सपाठकरं तत् पञ्चतानेश्वरः कैराते स्वरचक्रपालविजयां पत्रं त्रिभङ्गिस्तथा । टेङ्कारवर्णसरःपुटौ द्विपदिका सुक्रावलीमाह्वकालम्बोदण्डकवर्त्तनीति कथिताः शुद्धास्तु ते विंशतिः" सङ्गीतदा० । एलादीनामेतेषां विंशति संख्यकानां प्रबन्धगीतानामङ्गानि षट् भवन्ति यथा "पदं तानो विरुदश्च तालः पाठः स्वरस्तथा । एलादीनां षडङ्गानि कथितानि विरिञ्चिना । पौनरुक्त्यं न देशीये गीते दोषोऽभिजायते । शीघ्रोच्चारेण वर्णानां तथा चैव प्रसारणे । लिङ्गान्यत्वे विसन्धौ च संयुक्ताक्षरमोचने । परिवर्त्तेऽक्षराणाञ्च ह्रस्वदीर्घव्यतिक्रमे" । शालगस्थं यथा "ध्रुवकोमण्ठकश्चैव प्रतिमण्ठोनिसारुकः । यासकः प्रतितालश्च तथान्या चैकतालिका । यतिश्च भुमरि स्वेति शालगं सप्तमीरितम्" । सङ्कीर्णस्थं यथा "चैत्रोमङ्गलकस्तथा न गणिका चर्च्चातिनाटोज्ज्वली दोहा स्याद्गजलस्तथागुरुवलो गीमा च गोविस्तथा । छेम्नोकोप्यथ कारिका त्रिपदिकेत्येतानि कामद्विषा संक्षेपेण चतुर्द्दश प्रकटितान्यत्राधमानि क्रमात्" सङ्गीतदा० । अधिकम् उक्तोप्यशब्दे १२७२ पृ० दृश्यम् । स्वार्थे क तत्रार्थे "काव्यालापाश्च ये केचित् गीतकान्यखिलानि च । शब्दमूर्त्तिधरस्यैते विष्णोरंशा महात्मनः" अग्निपु० । कर्म्मणि क्त । २शब्दिते मेदि० । ३स्तुते ४गानकर्म्मणि कृतगाने त्रि० । "गीता सुगीता कर्त्तव्या" गानशब्दे उदा० ।

गीतगोविन्द पु० गीतो गोविन्दोऽत्र । जयदेवकृते श्रीकृष्णचरितख्यापके द्वादशसर्गात्मके ग्रन्थभेदे । "यच्छृङ्गारविवेकतत्त्वमपि यत्काव्येषु लीलायितम् तत्सर्वं जयदेवपण्डितकवेः कृष्णैकतानात्मनः । सानन्दाः परिशोधयन्तु सुधियः श्रीगीतगोविन्दितः" गीतगो० ।

गीतप्रिय त्रि० गीतं प्रियमस्य । १गानरक्ते २महादेवे पु० ३कुमारानुगतमातृकाभेदे स्त्री । "गीतप्रिया च कल्याणी कद्रुरोमाऽमिताशना" भा० शल्य० ५ अ० मातृगणोक्तौ ।

गीतमोदिन् त्रि० गीतेन मोदते मुद–णिनि । १गीतेनामोदकर्त्तरि स्त्रियां ङीप् । २किन्नरे पु० शब्दर० ।

गीता स्त्री गै–कर्म्मणि क्त । १गुरुशिष्यकल्पनया आत्मविद्योपदेशात्मके कथाविशेषे सा च भगवद्गीतारामगीतादिभेदात् बहुला किन्तु भगवद्गीतायामेव प्रसिद्धिः । "गीता सुगीता कर्त्तव्या किमन्यैः शास्त्रविस्तरैः । या स्वयं पद्मनाभस्य मुखपद्मात् विनिःसृतेति" श्रीधरस्वामिधृतवचनम् । प्रसिद्धगीतायास्तात्पर्य्यादि नीलकण्ठेन सम्पादि यथा "भारते सर्ववेदार्थो, भारतार्थश्च कृत्स्नशः । गीतायामस्ति, तेनेयं सर्वशास्त्रमयी मता । कर्म्मोपास्तिज्ञानभेदैः शास्त्रं काण्डत्रयात्मकम् भक्तिस्तूपासनाकाण्डात्तृतीयाज्ज्ञातिरिच्यते । तदेव ब्रह्म त्वं विद्धि नेदं यत्तदुपासते । इति श्रुत्यैव वेद्यस्य ह्युपास्यादन्यतेरिता । इयमष्टादशाध्यायी क्रमात् षट्कत्रिकेण हि । कर्म्मोपास्तिज्ञानकाण्डत्रितयात्मा निगद्यते" । मधुसूदनसरस्वतीभिस्तु गीतागूढार्थदीपिन्यां तत्प्रयोजनादिकं विस्तरेण दर्शितं यथा

सहेतुकस्य संसारस्यात्यन्तोपरमात्मकम् । परं निःश्रेयसं गीताशास्त्रस्योक्तं प्रयोजनम् । सच्चिदानन्दरूपन्तत् पूर्णं विष्णोः परं पदम् । यत्प्राप्तये समारब्धाः वेदाः काण्डत्रयात्मकाः । कर्म्मोपास्तिस्तथा ज्ञानमिति काण्डत्रयं क्रमात् । तद्रूपाष्टादशाध्यायी गीता काण्डत्रयात्मिका । एकमेकेन षट्केन काण्डमत्रोपलक्षयेत् । कर्म्मनिष्ठाज्ञाननिष्ठे कथिते प्रथमान्त्ययोः । यतः समुच्चये नास्ति तयोरतिविरोधतः । भगवद्भक्तिनिष्ठा तु मध्यमे परिकीर्त्तिता । उभयानुगता सा हि सर्वविघ्नापनोदिनी । कर्म्ममिश्रा च शुद्धा च ज्ञानमिश्रा च सा त्रिधा । तत्र तु प्रथमे काण्डे कर्म्म तत्त्यागवर्त्मना । त्वंपदार्थो विशुद्धात्मा सोपपत्तिर्निरूप्यते । द्वितीये भगवद्भक्तिनिष्ठावर्णनया ततः । भगवान् परमानन्दस्तत्पदार्थोऽवधार्य्यते । तृतीये तु तयोरैक्यं वाक्यार्थो वर्ण्यते स्फुटम् । एवमप्यत्र काण्डानां संबन्धोऽस्ति परस्परम् । प्रत्यध्यायं विशेषन्तु तत्रतत्रैव वक्ष्यते । मुक्तिसाधनपर्वेदं शास्त्रार्थत्वेन कथ्यते । निष्कामकर्म्मानुष्ठानं त्यागात् काम्यनिषिद्धयोः । तत्रापि परमो धर्म्मो जपस्तुत्यादिकं हरेः । क्षीणपापस्य चित्तस्य विवेके योग्यता यदा । नित्यानित्यविवेकस्तु जायते सुदृढस्तदा । इहामूत्रार्थ

वैराग्यं वशीकाराभिधं क्रमात्। ततः शमादिसंपत्त्या संन्यासनिष्ठता भवेत्। एवं सर्वपरित्यागान्मुमुक्षा जायते दृढा। ततो गुरूपसदनमुपदेशग्रहस्ततः। ततः सन्देहहानाय वेदान्तश्रवणादिकम्। सर्वमुत्तरमीमांसाशास्त्रमत्रोपयुज्यते। ततस्तत्परिपाकेण निदिध्यासननिष्ठता। योगशास्त्रं तु संपूर्णमुपक्षीणं भवेदिह। क्षीणदोषे ततश्चित्ते वाक्यात्तत्त्वमतिर्भवेत्। साक्षात्कारो निर्विकल्पः शब्दादेवोपजायते। अविद्याविनिवृत्तिस्तु तत्त्वज्ञानोदये भवेत्। तत आवरणे क्षीणे क्षीयेते भ्रमसंशयौ। अनारब्धानि कर्माणि नश्यन्त्येव समन्ततः। न चागामीनि जायन्ते तत्त्वज्ञानप्रभावतः। प्रारब्धकर्मविक्षेपाद्वासना तु न नश्यति। सा सर्वतो बलवती संयमेनोपशाम्यति। संयमो धारणा ध्यानं समाधिरिति यत् त्रिकम्। यमादिपञ्चकं पूर्वं तदर्थमुपयुज्यते। ईश्वरप्रणिधानात्तु समाधिः सिध्यति द्रुतम्। ततोभवेन्मनोनाशवासनाक्षय एव च। तत्त्वज्ञानं मनोनाशोवासनाक्षय इत्यपि। युगपत्त्रितयाभ्यासाज्जीवन्मुक्तिर्दृढा भवेत्। विद्वत्संन्यासकथनमेतदर्थं श्रुतौ कृतम्। प्रागसिद्धो यएवांशो यत्नः स्यात्तस्य साधने। निरुद्धे चेतसि पुरा सविकल्पसमाधिना। निर्विकल्पसमाधिस्तु भवेदत्र त्रिभूमिकः। व्युत्तिष्ठते स्वतस्त्वाद्ये द्वितीये परबोधितः। अन्त्ये तूत्तिष्ठते नैव सदा भवति तन्मयः। एवम्भूतो ब्राह्मणः स्याद्वरिष्ठो ब्रह्मवादिनाम्। गुणातीतः स्थितप्रज्ञो विष्णुभक्तश्च कथ्यते। अतिवर्णाश्रमी जीवन्मुक्त आत्मरतिस्तदा। एतस्य कृतकृत्यत्वाच्छास्त्रमस्मान्निवर्त्तते। यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः। इत्यादिश्रुतिमानेन कायेन मनसा गिरा। सर्वावस्थासु भगवद्भक्तिरत्रोपयुज्यते। पूर्वभूमौ कृता भक्तिरुत्तरां भूमिमानयेत्। अन्यथा विघ्नबाहुल्यात् फलसिद्धिः सुदुर्लभा। पूर्वाभ्यासेन तेनैव क्रियते ह्यवशोऽपि सः। अनेकजन्मसंसिद्ध इत्यादि च वचो हरेः। यदि प्राग्भवसंस्कारैरचिन्त्यत्वात्तु कश्चन। प्रागेव कृतकृत्यः स्यादकस्मात् फलपातवत्। न तं प्रतिकृतार्थत्वाच्छास्त्रमारब्धमिष्यते। प्राक्सिद्धसाधनाभ्यासाद्दुर्ज्ञेया भगवत्कृपा। एवं प्राग्भूमिसिद्धावप्युत्तरोत्तरभूमये। विधेया भगवद्भक्तिस्तां विना सा न सिद्ध्यति। जीवन्मुक्तदशायां तु न भक्तेः फलकल्पना। अद्वेष्टृत्वादिवत्तेषां स्वभावो भजनं हरेः। आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे। कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः। तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते। इत्यादिवचनात् प्रेमभक्तोऽयं मुख्य उच्यते। एतत् सर्वं भगवता गीताशास्त्रे प्रकाशितम्। अतो व्याख्यातुमेतन्म मन उत्सहते भृशम्। निष्कामकर्मानुष्ठानं मूलं मोक्षस्य कीर्त्तितम्। शोकादिरासुरः पाप्मा तस्य च प्रतिबन्धकः। यतः स्वधर्मविभ्रंशः प्रतिषिद्धस्य सेवनात्। फलाभिसन्धिपूर्वा वा साहङ्कारा क्रिया भवेत्। आविष्टः पुरुषो नित्यमेवमासुरपाप्मभिः। पुमर्थलाभायोग्यः सन् लभते दुःखसन्ततिम्। दुःखं स्वभावतो द्वेष्यं सर्वेषां प्राणिनामिह। अतस्तत्साधनं त्याज्यं शोकमोहादिकं विदा। अनादिभवसन्ताननिरूढं दुःखकारणम्। दुस्त्यजं शोकमोहादि केनोपायेन हीयताम्। एवमाकाङ्क्षयाविष्टं पुरुषार्थोन्मुखं नरम्। बुबोधयिषुराहेदं भगवान् शास्त्रमुत्तमम्"। व्यासप्रणीताध्यात्मरामायणान्तर्गता रामगीता भारताश्वमेधिकोक्ते ब्राह्मणगीतानुगीते देवीभागवतोक्ता देवीगीता वैष्णवभागवतोक्ता गोपीगीता तन्त्रोक्ता शिवगीता इत्यादयो बह्व्यो गीताः सन्ति। ताश्च सर्वा एव अध्यात्मविद्याप्रकाशिकाः। अपराधशब्दे २२३ पृ०उक्तवाक्ये प्रत्यहं गीताध्यायपाठफलमुक्तम्।

गीतायन न० ६त०। गानसाधने वेणुमृदङ्गादौ "गीतायनैः दुन्दुभिशङ्खवेणुभिः" भाग० ४।४।६।

गीतासार पु० गीताया भगवद्गीताया सारः संक्षेपेणार्थकथनमत्र। गरुडपुराणान्तर्गते २३५ अध्यायादित्रये भगवद्गीतार्थोक्तिसंक्षेपरूपग्रन्थे।

गीति स्त्री गै—भावे क्तिन्। १ गाने। "तवास्मि गीतिरागेण हारिणा प्रसभं हृतः"। "अहोरागपरिवाहिणी गीतिः" शकु०। "श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्" कुमा०। "आर्य्याप्रथमदलोक्तं कथमपि लक्षणं भवेदुभयोः। दलयोः कृतयतिशोभां तां गीतिं गीतवान् भुजङ्गेशः" वृ०र० उक्ते २ मात्रावृत्तभेदे।

गीतिका स्त्री गीतिरिव कायति कै—क। १ गीतितुल्यगाथायां "गायत्रीं पठते यस्तु वर्णशङ्करजस्तथा। गाथा च गीतिका चापि तस्य सम्पद्यते नृप!" भा० व० ८५ अ०। "गाथा स्वरनियमहीना, गद्यवन्मुखान्निः सरति। गाथैव सामगीतिवत् स्वरवर्णविकृता गीतिका" नीलक०। "सगणौ जयुग्मभरैः सलगैः कथिता बुधैरिह गीतिका" वृ०र० टी० उक्ते २ विंशत्यक्षरपादके समचतुष्पादवर्णवृत्त-

भेदे च। स्वार्थे क। गीतिका १गीतौ गाने।

गीथा स्त्री गै–थक्। वाचि। "एष उ वा उद्गीथः प्राणो वा उत् प्राणेन हीदं सर्वमुत्तब्धं, वागेव गीथा उच्च गीथा चेति स उद्गीथः" शत०ब्रा० १४।४।१।२५। "वागेव गीथा उद्गीथाभिव्यक्तिरूपा गायतेः शब्दार्थत्वात्" भा०

गीरथ पु० गीः रथ इवास्य। १गीष्पतौ त्रिका०। २जीवात्मनि शब्दार्थचि०।

गीर्ण त्रि० गॄ–निगरणे शब्दे कर्म्मणि क्त। १वर्णिते २स्तुते ३गिलिते च अमरः। [अमरः।

गीर्णि स्त्री गॄ–भावे क्तिन्। १स्तुतौ २वर्णने ३गिलने च

गीर्देवी स्त्री गिरोऽधिष्ठात्री देवी। १सरस्वत्याम् शब्दरत्ना०।

गीर्पति पु० ६त० अहरा० वा रः। १बृहस्पतौ। २पण्डिते च पक्षे षविसर्गौ गीष्पतिः गीःपतिशब्दोऽप्यत्र अमरः।

गीर्वा(र्वा)ण पु० गीरेव बाणः कार्य्यसाधनत्वादस्त्रं यस्य। १देवे सुरे। अन्तःस्थमध्यत्वे गिरं स्तुतिरूपां वनुते वन–याचने अण् "पूर्वपदात् संज्ञायामिति" पा० णत्वम् उप०स०। देवानां स्तुतिप्रियत्वात् तथात्वमिति भेदः।

गीर्वा(र्वा)णकुसुम न० गीर्वा(र्वा)णप्रियं कुसुमम्। देवकुसुमे लवङ्गे राजनि० गीर्वाणपुष्पादयोऽप्यत्र।

गीर्लता स्त्री गीरिव विस्तीर्णा लता। महाज्योतिष्मतीलतायाम् राजनि०।

गीर्वत् त्रि० गीरस्त्यस्य मतुप् "छन्दसीरः" पा० मस्य वः। वाक्ययुक्ते छन्दसीयुक्तेः लोके न वः। गीर्मत् इति।

गु ध्वनौ अव्यक्तशब्दे भ्वा० आत्म० अक० अनिट्। गवते अगोष्ट। जुगुवे। "उपो वेनस्य जोगुवानः" ऋ० १।६१।१४। गुङ् अव्यक्ते शब्दे अस्मात् यङ्लुकि पदव्यत्ययेन शानच्" भा०। "विश्वासुक्षासु जोगुवे" ऋ० ५।६४।२। "जोगुवे शब्दयामीति" भा० पूर्ववत् पदव्यत्ययः।

गु विष्ठोत्सर्गे तुदा० कुटा० पर० अक० अनिट्। गुवति अगुत ओदित् क्त तस्य नः "दुग्वोर्दीर्घश्च" पा० दीर्घः गूनः।

गुग्गु(ल)लु पु० गुज–क्विप् गुक् व्याधिः ततो गुडति रक्षति गुड–क कु वा डलयोरेकत्वम्। स्वनामख्याते वृक्षभेदे, अमरः। भरतस्तु इममदन्तमप्याह स्म। २रक्तशोभाञ्जनवृक्षे शब्दच०।

"श्रीवासकरसगुग्गुलुभल्लातककुन्दुरूकसर्जरसैः" "लाक्षाकुन्दुरुगुग्गुलुगृहधूमकपित्थबिल्वमध्यानि" वृ० स० ५७अ०। तस्य पर्य्यायभेदगुणादि भावप्र० उक्तं यथा

"गुग्गुलुर्देवधूपश्च जटायुः कौशिकः पुरः। कुम्भोलूखलकं क्लीबे महिषाक्षः पलङ्कषः। महिषाक्षः१ महानीलः२ कुमुदः ३पद्म ४इत्यपि। हिरण्यः ५पञ्चमो ज्ञेयो गुग्गुलोः पञ्च जातयः। भृङ्गाञ्जनसवर्णस्तु महिषाक्ष इति स्मृतः। महानीलस्तु विज्ञेयः स्वनामसमलक्षणः। कुमुदः कुमुदाभः स्यात् पद्मो माणिक्यसन्निभः। हिरण्याख्यस्तु हेमाभः पञ्चानां लिङ्गमीरितम्। महिषाक्षो महानीलो गजेन्द्राणां हितावुभौ। हयानां कुमुदः पद्मः स्वस्त्यारोग्यकरौ परौ। विशेषेण मनुष्याणां कनकः परिकीर्त्तितः। कदाचिन्महिषाक्षश्च मतः कैश्चिन्नृणामपि। गुग्गुलुर्विशदस्तिक्तो वीर्य्योष्णः पित्तलः सरः। कषायः कटुकः पाके कटू रूक्षो लघुः परः। भग्नसन्धानकृद् वृष्यः सूक्ष्मः स्वर्य्यो रसायनः। दीपनः पिच्छिलो बल्यः कफवातव्रणापचीः। मेदोमेहाश्मवातांश्च क्लेद कुष्ठाममारुतान्। पिडिकाग्रन्थिशोफार्शोगण्डमालाकृमीन् जयेत्। माधुर्य्याच्छमयेद्वातं कषायत्वाच्च पित्तहा। तिक्तत्वात् कफजित्तेन गुग्गुलुः सर्व्वदोषहा। स नवो बृंहणो वृष्यः पुराणस्त्वतिलेखनः। स्निग्धः काञ्चनसङ्काशः पक्वजम्बूफलोपमः। नूतनो गुग्गुलुः प्रोक्तः सुगन्धिर्यस्तु पिच्छिलः। शुष्को दुर्गन्धकश्चैव त्यक्तप्रकृतिवर्णकः। पुराणः स तु विज्ञेयः गुग्गुलुर्वीर्य्यवर्ज्जितः। अम्लं तीक्ष्णमजीर्णञ्च व्यवायं श्रममातपम्। मद्यं रोषं त्यजेत् सम्यग्गुणार्थी पुरसेवकः" पुरः गुग्गुलुः।

अस्य स्थानविशेषे जन्मादिकथनं यथा "जायन्ते पुरपादपा मरुभुवि ग्रीष्मेऽर्कसन्तापिताः शीतर्त्तौ शिशिरेऽपि गुग्गुलुरसं मुञ्चन्ति ते पञ्चधा। हेमाभं महिषाक्षितुल्यमपरं सत् पद्मरागोपमं भृङ्गाभं कुमुदद्युतिञ्च विधिना ग्राह्या परीक्षा ततः। वह्नौ ज्वलन्ति तपने विलयं प्रयान्ति क्लिद्यन्ति कोष्णसलिले पयसः समानाः। ग्राह्याः शुभाः परिहरेच्चिरकालजातान् कङ्कादवर्णसमपूयविगन्धवर्णानिति" प्रयोगामृतम्। अस्य वह्निपु० उत्पत्तिस्थानमुक्तम् यथा

"गोरोचना या मङ्गल्या संजाता सर्व्वकामिका। गुग्गुलुस्तु ततो जातो गोमूत्राच्छुभदर्शनः"।

गुग्गुलुक त्रि० गुग्गुलुः पण्यमस्य किशरा० ष्ठन्। गुग्गुलुविक्रेतरि स्त्रियां षित्त्वात् ङीष्।

गुग्गुलुगन्धि पुंस्त्री गुग्गुलुर्गन्धो लेशोऽस्य अल्पार्थे ग-

गन्धस्येत् समा०। गवि“गावो गुग्गुलुगन्धयः”प्रा०त०यमः गुग्गुलोर्गोमूत्रभवत्वात् गोस्तथात्वम् गुग्गुलुशब्दे तत्कथा। गुग्गुलोर्गन्ध इव गन्धोऽस्य वा इत् समा०। २गुग्गुलुगन्धयुक्ते त्रि०।

गुङ्गू स्त्री कुहू+पृषो०। कुहूतिथौ। “या गुङ्गूर्या सिनीवाली या राका या सरस्वती” ऋ० २।३२।८।
“अत्र गुङ्गूशब्देन राकासिनीवाल्योः साहचर्यात् कुहूरुच्यते” भा०।

गुच्छ(त्स) पु०गु–संप०क्विप् गुतं छ्यति स्यति वा छो–सो–वा क। कलिकाकुसुमादिसमूहवति १स्तवके, काण्डशून्ये मूलत एव शाखाप्रधानसंघात्मके धान्यमल्लिकादेः २स्तम्बे, द्वात्रिंशद्यष्टिके ३हारभेदे, ४मयूरपुच्छे च मेदि०। ५मल्लिकादौ च “गुच्छगुल्मं तु विविधं तथैव तृणजातयः। बीजकाण्डरुहाण्येव प्रताना वल्ल्य एव च। तमसा बहुरूपेण वेष्टिताः कर्म्महेतुना। अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः” मनुना तेषां कर्म्महेतुतोक्ता। “मूलतएव यत्र लतासमूहो भवति न प्रकाण्डानि ते गुच्छा मल्लिकादयः, गुल्मा एकमूलाः संघातजाताः शरेक्षुप्रभृतयः” कुल्लू०। ६गुच्छकरञ्जे मेदि०। स्तवके पु० स्त्री राजनि० स्त्रियां ङीप्। “बवरयुकच्छदगुच्छसुगन्धयः” माघः। स्वार्थे क। गुच्छक उक्तार्थेषु। संज्ञायां कन्। रीठाकरञ्जे ग्रन्थिपर्णे न० भाव०।

गुच्छ(त्स)कणिश पु०गुच्छः कणिशोऽस्य। धान्यभेदे राजनि०

गुच्छ(त्स)करञ्ज पु० गुच्छाकरः करञ्जः। करञ्जभेदे राजनि०। “कटुर्गुच्छकरञ्जस्तु तिक्तोष्णो विषवातहृत्। कण्डूविचर्चिकाकुष्ठस्पर्शत्वग्दोषनाशनः”राजनि०।

गुच्छ(त्स)दन्तिका स्त्री गुच्छीभूता दन्ताः पुष्परूपाःसन्त्यस्याः ठन्। कदल्याम् राजनि०। तस्या हि मोचकरूपे पुष्पे गुच्छाकृतिदन्तरूपत्वात्तथात्वम्।

गुच्छ(त्स)पत्र पु० गुच्छाकृतीनि पत्राण्यस्य। तालवृक्षे राजनि०। तस्य हि प्रत्येकपत्रस्य गुच्छात्मकत्वात्तथात्वम्।

गुच्छ(त्स)पुष्प पु०गु(त्सा)च्छाकृतीनि पुष्पाण्यस्य। सप्तच्छदवृक्षे २रीठाकरञ्जे ३धातक्यां स्त्री राजनि० ङीप्।

गुच्छ(त्स)फल पु० गु(त्सा)च्छाकृतीनि फलान्यस्य। १रीठाकरञ्जे, २राजादन्यां, ३कतके च। ४अग्निदमन्यां, ५काकमाच्यां, ६द्राक्षायां ७कदल्याञ्च स्त्री राजनि० टाप्।

गुच्छ(त्स)बध्ना स्त्री गुच्छेन बध्यते बन्ध–बा० रक्। गुण्डालावृक्षे राजनि०। [गुण्डालिनीतृणे राजनि०।

गुच्छ(त्स)मूलिका गुच्छाकृति मूलमस्याः कप् अतइत्त्वम्।

गुच्छा(त्सा)र्द्ध पु० गु(त्स)च्छ इव ऋध्नोति ऋध–अच्। चतुर्विंशतियष्टिके हारभेदे। ६त०। गुच्छ(त्स)स्यार्द्धे पु०न०। अमरः। [आ+ला–क वा। भूतृणे राजनि०।

गुच्छा(त्सा)ल पु०गुच्छाय अलति अल–अच् गुच्छमालाति

गुच्छा(त्सा)ह्वकन्द पु० गुच्छमाह्वयति आ+ह्वे–क गुच्छाह्वः कन्दोऽस्य। गुलुञ्चकन्दे राजनि०।

गुज ध्वनौ तुदा० कुटा० पर० अक० सेट्। गुजति अगुजिष्ट जुगोज। प्रनिगुजति। [जुगोज।

गुज कूजने भ्वा० पर० अक० सेट्। जोजति अगोजीत्।

गुज कूजने भ्वा०पर०सक०सेट् इदित्। गुञ्जति अगुञ्जीत् जुगुञ्ज गुञ्जितम् गुञ्जः गुञ्जन्। (गुनगुन) इति ध्वनितमिह कूजनम्। “न जुगुञ्ज यः कलमिति”। “न गुञ्जितं तन्न जहार यन्मनः”। “रेणून् पुपूरिरे गुञ्जा” जुगुञ्जुः करघट्टिताः” भट्टिः। “लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन्” “गुञ्जन् मत्तमधुव्रतः” सा० द०।

गुञ्ज(र्ज)री स्त्री १रागिणीभेदे। तत्स्वरूपं सङ्गीतदा० उक्तं यथा “श्यामा सुकेशी मलयद्रुमाणां मृदूल्लसत्पल्लवतल्पयाता। श्रुतेः स्वराणां दधती विभागं तन्त्रीमुखात् दक्षिणगुर्ज्ज(ञ्ज)रीयम्” कालभेदे तस्या गानं निषिद्धं तत्रैव “नाटी गौडी वराटी च गुञ्ज(र्ज)री देशिरेव च। पूर्वाह्णे गानमेतेषां निषिद्धमिति तद्विदः” २रागभेदे च “गुञ्ज(र्जरीरागैकतालीतालेन गीयते” गीतगो०।

गुञ्ज पु० गुजि–अच्। १पुष्पस्तवके शब्दर०। भावे घञ्। गुञ्जने (गुनगुन) इति २ध्वनौ च। भावे ल्युट्। गुञ्जनमप्यत्र ध्वनौ। [शब्दच०।

गुञ्जकृत् पु० गुञ्जं ध्वनिभेदं करोति कृ–क्विप्। १भ्रमरे

गुञ्जा स्त्री गुजि–अच्। १लताभेदे (कुँच) तत्फलेऽपि हक्यादिरितत्वादणो लुक्। “तुल्या यवाभ्यां कथितात्र गुञ्जेति” लीलावती। २गोधूमद्वयमाने, राजनि० ३चतुर्धान्यमाने, वैद्यकम् “श्वेता रक्तोच्चटा प्रोक्ता कृष्णला चापि सा स्मृता। रक्ता सा काकचिञ्ची स्यात् काकशिम्बी च रक्तिका। काकादनी काकपीलुः सा स्मृता काकवल्लरी” “श्वेतरक्तप्रभेदेन ज्ञेयं गुञ्जाद्वयं बुधैः। गुञ्जाद्वयं तु केश्यं स्यात् वातपित्त-

ज्वरापहम्। मुखशोषभ्रमश्वासतृष्णामदविनाशनम्। नेत्रामयहरं वृष्यं बल्यं कण्डूव्रणं हरेत्। कृमीन्द्रलुप्तकुष्ठानि रक्ता च धवलाऽपि च" भावप्र० तद्गुणा उक्ताः। सितगुञ्जा चाभिचारकर्म्मभेदे विहिता। "जपित्वा सितगुञ्जानां कुड़वं कुलिकोदये" शा० ति० नवदुर्गामन्त्राभिचारे। तत्र स्मार्त्तवैदिकपौराणिककृत्येषु त्रियवमिता गुञ्जा वैद्यके तु चतुर्यवमितेति भेदः। कर्षशब्दे १७७४पृ०दृश्यम्। "सहसि प्लवगैरुपासितं न हि गुञ्जाफलमेति सोष्मताम्" माघः। "अन्तर्विषमयाह्येता बहिश्चैव मनोरमाः गुञ्जाफलसमाकाराः स्वभावादेव योषितः" पञ्चत०। "तेनेयं मधुगन्धलुब्धमनसा गुञ्जालता सेव्यते" भ्रमरा०। कर्त्तरि अच्। ४पटहे। भावे अ। ५कलध्वनौ मेदि० ६चर्च्चायां त्रिका०। आधारे अ। ७मदिरागृहे शब्दरत्ना०। तत्र सुरासवगन्धेन भ्रमरगुञ्जावाहुल्यात् तथात्वम्।

गुञ्जिका स्त्री गुञ्जा+संज्ञायां कन्। त्रियवपरिमाणे शब्दच०।

गुटिका स्त्री वध्वेव स्वार्थे क पृषो०। वटिकायाम् वर्त्तुलाकारे पदार्थे। "समुद्रे गुटिकापातः" ज्यो०। "गुटिकापातादिना व्यञ्जनं वा विभागः" दायभागः। "निर्द्धौतहारगुटिकाविशदं हिमाम्भः" रघुः। कनभावे ङीप् गुटीत्यपि तत्रार्थे।

गुटिकाञ्जन न० "गैरिकं सैन्धवं कृष्णां नागरञ्च यथोत्तरम्। द्विगुणं पिष्टमद्भिस्तु गुटिकाञ्जनमिष्यते" सुश्रुतोक्ते १अञ्जनभेदे। गुटिका वटिका तथाभूतमञ्जनमित्यर्थः। "अञ्जनं क्रियते येन तद्द्रव्यमञ्जनं मतम्। रसो वटी तथा चूर्णमिति त्रिविधमञ्जनम्" भावप्र०। सुश्रुतेऽपि "वटिकारसचूर्णानि त्रिविधान्यञ्जनानि च"।

गुठ वेष्टने चुरा० उभ० इदित् सक० सेट्। गुण्ठयति-ते अजुगुण्ठत्-त। गुण्ठितः गुण्ठनम्। "प्रतिपद्य पदा स्तनुर्धरणीरेणुगुण्ठितः" भा०आ० ७४ अ०। "अग्निहोत्रं त्रयोवेदास्त्रिदण्डं भस्मगुण्ठनम्। बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः" सर्वद०। अव+समन्तात् वेष्टने। "रजनीतिमिरावगुण्ठिते पुरमार्गे" कुमा०।

गुड़ वेष्टने रक्षणे चूर्णने च चुरा० उभ० इदित् सक० सेट्। गुण्डयति-ते अजुगुण्डत्-त। गुण्डः गुण्डिता। गुण्डनं गुण्डा। [अगुडीत्। जुगोड।

गुड़ रक्षणे व्याघाते च तुदा० कुटा० पर०सक०सेट्। गुडति।

गुड़ पु० गु–ड कित्। १इक्षुविकारे इक्षुशब्दे ८०८ पृ० विवृतिः। "ऐक्षवं गुडवर्जितम्" ति०त०। गुडेन निर्वृत्तादि गुड+अश्मा०र। गुडर गुडनिर्वृत्ते त्रि०। गुडाय साधु गुडा० ठञ्। गौडिक गुडसाधने इक्षौ। भक्ष्येण मिश्रणे स० गुडधाना गुडौदन गुडमिश्रितधानादौ। "सिता चतुर्गुणा देया वटीषु द्विगुणो गुडः" वैद्यकम्। २गोले वर्त्तुलाकारपदार्थे "प्रादुरासन् महीपाल! कार्ष्णायसमया गुड़ाः" भा० द्रो० २००अ० ३हस्तिसन्नाहे मेदि०। ४पाशे हेमच०। ५कार्पास्यां स्त्री राजनि०। ६स्नुह्यां स्त्री गुडाप्रायाः केशा यस्य। गुडाकेशः अर्ज्जुनः। उज्ज्वलद०।

गुडक त्रि० गुडेन पक्कः या० कन्। १गुडपक्वे औषधादौ गुड़+स्वार्थे क। २गोलाकारे पदार्थे। "सभुशुण्ड्यश्मगुडकाः" भा०व० १५अ०। अश्मगुडकाः वर्त्तुलीकृताः पाषाणाः" नील०। "नीतौ च तद्युक्तात्" पा० परम्परया अनुकम्पायाम् कन्। अनुकम्प्यपुत्रादौ दीयमाने ३गुडद्रव्ये च। हन्त ते धानकाः गुडकाः एहकि" सि०कौ०।

गुडकारी स्त्री रागिणीभेदे हलायु०।

गुडकुष्माण्डक न० चक्रदत्तोक्ते औषधभेदे यथा।

"कुष्माण्डस्य पलशतं सुखिन्नं निष्कुलीकृतम्। प्रस्थं घृतस्य तैलस्य तस्मिंस्तप्ते प्रदापयेत्। त्वक्पत्रधन्याकव्योषजीरकैलाद्वयानलम्। ग्रन्थिकं चव्यमानङ्गपिप्पलीविश्वभेषजम्। शृङ्गाटकं कशेरुञ्च प्रलम्बं तालमस्तकम्। चूर्णीकृतं पलांशञ्च गुडस्य च तुलां पचेत्। शीतीभूते पलान्यष्टौ मधुनः संप्रदापयेत्। कफपित्तानिलहरं मन्दाग्नीनाञ्च शस्यते। कृशानां बृंहणं श्रेष्ठं वाजीकरणमुत्तमम्। प्रमदासु प्रसक्तान ये च स्युः क्षीणरेतसः। क्षयेण च गृहीतानां परमेतद् भिषग्जितम्। कासं श्वासं ज्वरं हिक्कां हन्ति छर्दिमरोचम्। गुड़कुष्माण्डकं ख्यातमश्विभ्यां समुदाहृतम्। खण्डकुष्माण्डवत् पात्रं स्विन्नकुष्माण्डकद्रवः।"

गुडची स्त्री गुडेन चीयते ची–ड गौ०ङीष्। गुडूच्याम् भरतः।

गुडतृण न० गुडसाधनं तत्प्रधानं वा तृणम् शा०त०। १इक्षौ राजनि० पृषो०। गुडत्रिणमप्यत्र शब्दरत्ना०।

गुडत्वच् स्त्री गुड इव मधुरा त्वग् यस्याः। (दारचिनि) ख्याते पदार्थे शब्दरत्ना०। "त्वक् स्वाद्वी तु गुडत्वक् स्यात् तथा दारुसिता मता। उक्ता दारुसिता स्वाद्वी तिक्ता

चानिलपित्तहृत्। सुरभिः शुक्रदा वस्त्रा मुखशोषतृषापहा" भावप्र०।

गुडत्वचा स्त्री गुड इव मधुरा त्वचा यस्याः। १गुडत्वचि(दारचिनि) ख्याते पदार्थे २राजभोग्ये(जयत्री)न० शब्दच०।

गुडदारु न० गुडप्रधानं दारु शाक०त०। इक्षौ त्रिका०।

गुडधेनु स्त्री दानार्थं गुडनिर्मिते धेनुभेदे। तद्विधिश्च हेमा०दा० यथा "प्रथमा गुडधेनुः स्यात् घृतधेनुस्तथाऽपरा। तिलधेनुस्तृतीया तु चतुर्थी जलसंज्ञिता। क्षीरधेनुश्च विख्याता मधुधेनुस्तथाऽपरा। सप्तमी शर्कराधेनुर्दधिधेनुस्तथाऽष्टमी। रसधेनुर्नवमी स्याद्दशमी स्यात् स्वरूपतः" इत्युपक्रमे "एतासां तु विधानञ्च समाचक्ष्व जगत्पते!। किंरूपं केन मन्त्रेण दातव्या तदिहोच्यताम्। मत्स्य उवाच। गुडधेनुविधानस्य यद्रूपमिह यत्फलम्। तदिदानीं प्रवक्ष्यामि सर्वपापविनाशनम्। कृष्णाजिनं चतुर्हस्तं प्रागग्रीवं विन्यसेद्भुवि। गोमयेनोपलिप्तायां दर्भानास्तीर्य सर्वतः। लघ्वेणकाजिनन्तद्वद्वत्सस्य परिकल्पयेत्, प्राङ्मुखीं स्थापयेद्धेनुमुदक्पादां सवत्सकाम्"। एणकाजिनं कृष्णाजिनं प्राङ्मुखीं प्राक्शिरसमित्यर्थः। "तदुत्तरेण वत्सोऽपि तथैव परिकल्पनीयः। "उत्तमा गुडधेनुः स्यात्सदा भारचतुष्टयम्। वत्सम्भारेण कुर्वीत भाराभ्यां मध्यमा स्मृता। अर्द्धभारेण वत्सः! स्यात् निजवित्तानुसारतः"। निजवित्तानुसारत इति इयमुत्तममध्यमादिकल्पना निजवित्तानुसारतः कर्त्तव्येत्यर्थः। "धेनुवत्सौ घृतास्यौ तौ सितसूक्ष्माम्बरावृतौ। शुक्तिकर्णाविक्षुपादौ शुचिमुक्ताफलेक्षणौ। सितसूत्रशिरालौ तौ सितकम्बलकम्बलौ। ताम्रकद्रूकपृष्ठौ तौ सितचामररोमकौ"। कद्रूकं ककुत्प्रदेशः। "विद्रुमभ्रूयुगोपेतौ नवनीतस्तनान्वितौ। क्षौमपुच्छौ कांस्यदोहाविन्द्रनीलकसारकौ। सुवर्णशृङ्गाभरणौ राजतक्षुरसंयुतौ। नानाफलमयैर्दन्तैर्घ्राणगन्धकरण्डकौ"। अत्र च सारतः परिमाणतश्च फलविशेष इति यथाशक्ति सुवर्णशृङ्गादित्वमवधेयम्। "इत्येवं रचयित्वा तु धूपदीपैरथार्च्चयेत्"। "विधानमेतद्धेनूनां सर्वासामिह पठ्यते"। सर्वासामन्यच्चधेनुव्यतिरिक्तानामित्यवगन्तव्यम्। तथा "एतदेव विधानं स्यात्त एवोपस्कराः स्मृताः। मन्त्रावाहनसंयुक्ताः सदा पर्वणि पर्वणि। यथाश्रद्धं प्रदातव्या भुक्तिमुक्तिफलप्रदाः। [illegible]फलदाः सर्वपापहराः शुभाः। अयने विषुवे पुण्ये व्यतीपातेऽथ वा पुनः। गुडधेन्वादयो देया उपरागादिपर्वसु" मत्स्यपु०। अत्र घृतादिधेनुद्रव्यपरिमाणमपि गुडधेनूक्तमेव। "विधानमेतद्धेनूनां सर्वासामपि पठ्यते इत्यतिदेशात् "कुम्भाः स्युर्द्रवधेनूनामितरासान्तु राशयः" इति तु भारचतुष्टयादिपरिमितस्य द्रवद्रव्यस्य कुम्भाधारतयावस्थापनम्" हेमाद्रिदानखण्डम्।

अन्यत् क्षीरधेनुशब्दे २३७२ पृ० दर्शितरीत्या कार्य्यम्" "धेनुवत्सौ तदा तौ तु सितसूक्ष्माम्बरावृतौ। शुक्तिकर्णाविक्षुपादौ शुद्धमुक्ताफलेक्षणौ। सितसूत्रशिरालौ तु सितकम्बलकम्बलौ। ताम्रककुदपृष्ठौ तु सितचामररोमकौ। विद्रुमभ्रूयुगयुतौ नवनीतस्तनान्वितौ। क्षौमपुच्छौ कांस्यदोहाविन्द्रनीलकतारकौ। इत्येवं रचयित्वा तु धूपदीपैः समर्च्चयेत्" पद्मपु०।

गुडपाक पु० ६त०। गुडस्य पाके वैद्यकोक्ते औषधपाकभेदे तत्पाकप्रकारः चक्रदत्तेनोक्तो यथा "तोयपूर्णे यदा पात्रे क्षिप्तो न प्लवते गुडः। क्षिप्तश्च निश्चलस्तिष्ठेत् पतितस्तु न शीर्य्यते। यदा दर्वीविलेपः स्याद्यावद्वा तन्तुलीभवेत्। एष पाको गुडादीनां सर्वेषां परिकीर्त्तितः"। "सुखमर्द्दः सुखस्पर्शो गुडः पाकमुपागतः। पीडितो भजते तन्तु गन्धवर्णरसान्वितम्"।

गुडपिप्पलीघृत न० चक्रदत्तोक्ते औषधभेदे। "सपिप्पलीगुडं सर्पिः पचेत् क्षीरचतुर्गुणे। विनिहन्त्यम्लपित्तञ्च शूलञ्च परिणामजम्"।

गुड़पुष्प पु० गुड इव मधुरं पुष्पमस्य। मधूकवृक्षे (मौल) (मड्डया) अमरः।

गुड़फल पु० गुड इव मधुरं फलमस्य। पीलुवृक्षे अमरः।

गुड़भल्लातक पु० गुडेन पक्वः भल्लातकः। पाकविशेषेण गुड़पक्वे भल्लातकादिरूपे औषधभेदे चक्र० तत्पाको यथा "भल्लातकसहस्रे द्वे जलद्रोणे विपाचयेत्। पादशेषे रसे तस्मिन् पचेद्गुडतुलां भिषक्। भल्लातकसहस्रार्द्धं छित्त्वा तत्रैव दापयेत्। सिद्धेऽस्मिंस्त्रिफलाव्योषयमानीमुस्तसैन्धवम्। कर्षांशसम्मितं दद्यात् त्वगेलापत्रकेशरम्। खादेदग्निबलापेक्षी प्रातरुत्थाय मानवः!। हन्यात् कुष्ठार्शःकामलामेहग्रहणीगुल्मपाण्डुताः। प्लीहोदरं कासक्रिमिरोगभगन्दरान्। गुडभल्लातको ह्येष श्रेष्ठश्चार्शोविकारिणाम्"। प्रकारान्तरं यथा "दशमूल्यस्तथा भागौ श्वदंष्ट्रा चित्रकं शटी। भल्लातकसहस्रञ्च पलांशं क्वाथयेद् बुधः। पादशेषे जलद्रोणे रसे तस्मिन्

विपाचयेत्। दत्त्वा गुडतुलामेकां लेहीभूतं समुद्धरेत्। माक्षिकं पिप्पलीतैलं मारुवकञ्च दापयेत्। कुडवं कुडवञ्चात्र त्वगेलामरिचन्तथा। अर्शःकासमुदावर्त्तं पाण्डुत्वं शोथमेव च। नाशयेदग्निसादञ्च गुडभल्लातकः स्मृतः”।

गुड़भा स्त्री गुड इव भाति भा—क। यावनालशर्करायाम्। राजनि०। [(कनूकानटे। शब्दच०।

गुड़मूल पु० गुड इव मधुरं मूलमस्य। क्षुद्रमारिषशाके

गुड़ल न० गुडं कारणतया लाति ला—क। १गौड्यां मदिरायां शब्दच०। २गुडोत्पन्ने त्रि०।

गुड़वीज पु० गुड इव मधुरं वीजमस्य। १मसूरे राजनि०।

गुड़शर्करा स्त्री गुडजाता शर्करा। गुडजातशर्करायाम् त्रिका०।

गुड़शिग्रु पु० गुड इव मधुरः शिग्रुः। रक्तशोभाञ्जने शब्दच०

गुड़ा स्त्री गु—ड किच्च। १स्नुहीवृक्षे २वटिकायां गुटिकायां मेदि०। ३उशीर्यां राजनि०।

गुड़ाका स्त्री गुडि वेष्टने वा० व्याकन् उपधालोपश्च। १आलस्ये २निद्रायाञ्च।

गुड़ाकेश पु० गुडा स्नुहीव केशा अस्य उज्ज्व०। गुडाकाया निद्राया आलस्यस्य वा ईशः। २गुडावत्केशयुक्ते अर्जुने। “गुडाकेशः अर्ज्जुनः” उज्ज्वल०। २जितालस्ये “एवमुक्ता हृषीकेशं गुडाकेशः परन्तपः” गीता। “गुडाकेशो जितालस्यः” मधुसूदनः ३शिवे जटा०।

गुड़ाचल पु० दानार्थं कल्पिते गुडनिर्मिते मेरुरूपे पर्वते “प्रथमो धान्यशैलः स्यात् द्वितीयो लवणाचलः। गुडाचलस्तृतीयस्तु” पद्मपु० दश मेरूक्तौ। गुडपर्वतादयोऽप्यत्र। तद्विधिः हेमा० दा० ब्रह्मपु०।

“पुलस्त्य उवाच। ‘अथात संप्रवक्ष्यामि गुडपर्वतमुत्तमम्। यत्प्रदानान्नरः स्वर्गमाप्नोति सुरपूजितम्। उत्तमो दशभिर्भारैर्मध्यमः पञ्चभिर्मतः। त्रिभिर्भारैः कनिष्ठः स्यात्तदर्द्धेनाल्पवित्तवान्”। भारः, परिभाषायां व्याख्यातः। “तद्वदामन्त्रणं पूजाहैमवृक्षसुरार्चनम्। विष्कम्भपर्वतांस्तद्वत् सरांसि वनदेवताः। होमं जागरणं तद्वल्लोकपालाधिवासनम्। धान्यपर्वतवत् कुर्य्यादिमं मन्त्रमुदीरयेत्। यथा देवेषु विश्वात्मा प्रवरोऽयं जनार्दनः। सामवेदस्तु वेदानां महादेवस्तु योगिनाम्। प्रणवः सर्वमन्त्राणां नारीणां पार्वती यथा। तथा रसानां प्रवरः सदैवेक्षुरसो मतः। मम तस्मात् परां लक्ष्मीं ददस्व गुडपर्वत !। यस्मात् सौभाग्यदायिन्या भ्राता त्वं गुडपर्वत !। निवासश्चापि पार्वत्यास्तस्मान्मां पाहि सर्वदा। अनेन विधिना यस्तु दद्यात् गुडमयं गिरिम्। पूज्यमानः स गन्धर्वैर्गौरीलोके महीयते। पुनः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत्। आयुरारोग्यसम्पन्नः शत्रुभिश्चापराजितः” इति पद्मपुराणोक्तो गुड़पर्वत दानविधिः। “श्रीभगवानुवाच। अतः परं प्रवक्ष्यामि गुडपर्वतमुत्तमम्। सर्वपापहरं पुण्यं सौभाग्यजननं परम्। पुष्टिदं शान्तिदञ्चैव सुखदं दिव्यभोगदम्। भारैस्तं दशभिः कुर्य्याद्यथाशक्त्यापि वा भवेत्। पूर्ववत् मण्डपं कृत्वा सर्वोपकरणानि च”। पूर्ववदिति, ब्रह्माण्डपुराणोक्तधान्यपर्वतवदित्यर्थः। लोकपालसमोपेतं तथा काञ्चनशृङ्गिणम्। मुक्ताफलविचित्राङ्गं वस्त्रालङ्कृतविग्रहम्। प्रवालकलतोपेतं इक्षुखण्डोपवेणुकम्। नितम्बं राजतन्तस्य मेखलाकारसंस्कृतम्। कुर्य्यात्ताम्रमयं स्कन्धं नानाधातुविभूषितम्। कृत्वा तमीदृशं शैलं सर्वधान्यसमावृतम्। सर्वौषधिसमोपेतं सशृङ्गं समहाद्रुमम्। कल्पयित्वा विधानेन सवितानं विचक्षणैः। कुण्डमेकं ततः कृत्वा चतुःकोणं स्वलङ्कृतम्। नियोज्यास्तत्र विद्वांसो ब्राह्मणाः शंसितव्रताः। पञ्चमो गुरुरुक्तस्तान् सर्वान् पूजयेत्ततः। पूजितास्ते यथान्यायं होमं कुर्य्युरतन्द्रिताः। लोकपालान् ग्रहांश्चैव ब्रह्मादींश्च विधानतः। स्वलिङ्गोक्तैश्च मन्त्रैश्च होमयेयुर्द्विजोत्तमाः। महाव्याहृतिभिश्चैव अयुतं तत्र होमयेत्। आचार्य्यः सह विप्रैस्तैर्मौनेन सुसमाहितः। ब्रह्मघोषरतस्तस्मिन् कारयित्वा महोत्सवम्। एवं विधिं तदा कृत्वा पूर्वेद्युः श्रद्धयान्वितः। दद्यात्तं माघमासस्य तृतीयायां विशेषतः। चैत्रस्य वा विधानेन तृतीयायां प्रदापयेत्। अन्येष्वपि च कालेषु ग्रहणादिषु कारयेत्। त्वं रसानां वरो नित्यं देवानाञ्च सदा प्रियः। सुखं प्रयच्छ मे नित्यं नमस्ते पर्वतोत्तम !। यावद्भूः सागरा नद्यो यावच्चन्द्रार्कतारकाः। तावन्मे त्वं सुखं यच्छ सौभाग्यमतुलं तथा। एवं संपूजयित्वा तं ब्राह्मणानां निवेदयेत्। आचार्य्यं पूजयेत्पश्चाद्दीनान्धकृपणानपि। विसृज्य ब्राह्मणांस्तांस्तु कृत्वा चैव प्रदक्षिणम्। तस्मिन् दिने च भोक्तव्यं मधुरं क्षारवर्ज्जितम्। अनन्नालेपनञ्चैव कृतकृत्यो भवेन्नरः। तस्मादेवमिदं दानं फलमुत्तममिच्छता। गतिश्च शाश्वती लोके सौभाग्यं रूपमेव च। अनेन विधिना चैव दातव्यो

गुडपर्वतः। विंशद्भारस्तु कर्त्तव्यः शेषं पूर्ववदाचरेत्। दानमेतत् प्रशस्तं स्यात् स्त्रीणां राजन् विशेषतः। सौभाग्यराज्यकामस्य सर्वस्यापि विधीयते। पूर्वोक्तञ्च फलं प्राप्य कृतकृत्यो हि जायते" इति ब्रह्माण्डपुराणोक्तो गुडपर्वतदानविधिः"।

गुडादि पु० पा० गण० उक्ते साध्वर्थे ठञ्निमित्ते शब्दगणे स च गण "गुड कुल्माष सक्तु अपूप मांसौदन इक्षु वेणु संग्राम सङ्घात संक्राम संवाह प्रवास निवास उपवास" "गुडादिभ्यष्ठञ्" पा० गुडाय साधु गौडिक इक्षुः।

गुडापूप पु० गुडेन मिश्रितः अपूपः। गुडमिश्रिते पिष्टके "तदस्मिन्नन्नं प्रायेण संज्ञायाम्" पा० कन् टाप्। गुडापूपिका पौर्णमास्यां सि०कौ०।

गुडाशय पु० गुड इव मधुररसः आशेतेऽस्मिन् आ+शी आधारे अच् ६त०। आखोटवृक्षे (आखरोट)राजनि०।

गुडगुडायन न० "रुणद्धि मारुतं श्लेष्मा कुक्षिपार्श्वव्यवस्थितः। संनिरुद्धः करोत्याशु ध्वानं गुडगुडायनम्" सुश्रुतोक्ते श्लेष्मरुद्धवायुजनिते शब्दभेदे।

गुडु(डू)ची स्त्री गुड-रक्षणे बा० उ(ऊ)चट् ङीप्। स्वनामख्यातायां लतायाम्। तस्या उत्पत्तिगुणादिकं भावप्र० उक्तं यथा
"हते तस्मिन् सुरारातौ रावणे बलगर्विते। देवराजः सहस्राक्षः परितुष्टोऽति राघवे। तत्र ये वानराः केचिद्राक्षसैर्निहिता रणे। तानिन्द्रो जीवयामास संसिच्यामृतवृष्टिभिः। ततो येषु प्रदेशेषु कपिगात्रात् परिच्युताः। पीयूषबिन्दवः पेतुस्तेभ्यो जाता गुडूचिका। गुडूची मधुपर्णी स्यादमृताऽमृतवल्लरी। छिन्ना छिन्नरुहा छिन्नोद्भवा वत्सादनीति च। जीवन्ती तन्त्रिका सोमा सोमवल्ली च कुण्डली। चक्रलक्षणिका धीरा विशल्या च रसायनी। चन्द्रहासा वयस्था च मण्डली देवनिर्मिता। गुडूची कटुका तिक्ता स्वादुपाका रसायनी। संग्राहिणी कषायोष्णा लघ्वी बल्याऽग्निदीपनी। दोषत्रयामतृड्दाहमेहकासांश्च पाण्डुताम्। कामलाकुष्ठवातास्रज्वरक्रिमिवमीन् हरेत्। प्रमेहश्वासकासार्शःकृच्छ्रहृद्रोगवातनुत्।" तत्सत्त्वगुणाः
"अमृतायाः कृतं चूर्णं वाससा परिशोधितम्। पृथक् षोडश भागाः स्युर्गुडमाक्षिकसर्पिषाम्। यथाग्नि भक्षयेदेतन्नरो हितमिताशनः। नास्य कश्चिद्भवेद्व्याधिर्न जरा पलितं न च। न ज्वरा विषमा नैव मेहोनानिलरक्तकम्। न च नेत्रगता रोगाः परमेतद्रसायनम्। मेधाकरं त्रिदोषघ्नं प्रयोगादस्य बुद्धिमान्। जीवेद्वर्षशतं साग्रं यथैवादितिजास्तथेति"। तत् पत्रगुणाः
"गुडूचीपत्रमाग्नेयं सर्वज्वरहरं लघु। कषायं कटुतिक्तञ्च स्वादुपाकं रसायनम्। बल्यमुष्णञ्च सङ्ग्राहि हन्याद्दोषत्रयं तृषाम्। दाहप्रमेहवातास्रकामलाकुष्ठपाण्डुताः"।
"गुडूची कटुका लघ्वी स्वादुपाका रसायनी। संग्राहिणी कषायोष्णा बल्या तिक्ताग्निदीपनी। कामलाकुष्ठवातास्रज्वरपित्तक्रिमीन् जयेत्। घृतेन वातं सहसाविबन्धं पित्तं सिताढ्या मधुना कफञ्च। वातास्रमेरण्डकतैलमिश्रा शुण्ठ्यामवातं शमयेद्गुडूची" वैद्यकम्।

गुडूच्यादि पु० "गुडूची निम्बधन्याकं पद्मकं चन्दनानि च। एष सर्वज्वरान् हन्ति गुडूच्यादिस्तु दीपनः। हृल्लासारोचकच्छर्दिपिपासादाहनाशनः" इति चक्रद०त्तोक्ते गुडूच्यादिद्रव्यगणे। "आरग्वधादिगुडूच्यादिरित्यादिना सुश्रुतेऽसौ तिक्तवर्गे उक्तः तिक्तशब्दे विवृतिः।

गुडूच्यादिकषाय पु० "गुडूच्यतिविषाधान्यशुण्ठीबिल्वाब्दवालकैः। पाठाभूनिम्बकुटजचन्दनोशीरपद्मकैः। कषायः शीतलः पेयो ज्वरातीसारशान्तये। हृल्लासारोचकच्छर्दिपिपासादाहनाशनः" चक्रदत्तोक्ते पाचनभेदे।

गुडूच्यादिघृत न० "गुडूच्याः क्वाथकल्काभ्यां त्रिफलाया वृषस्य च। मृद्वीकाया बलायाश्च सिद्धाः स्नेहा ज्वरार्त्तिहाः" चक्रदत्तोक्ते घृतभेदे।

गुडूच्यादितैल न० "गुडूचीक्वाथदुग्धाभ्यां तैलं लाक्षारसेन च। सिद्धमधुककाश्मर्यरसैर्वा वातरक्तनुत्" "चक्रदत्तोक्ते तैलभेदे।

गुडेर पु० गुडि-एरक् नलोपश्च। १गुडके (गुली) वर्त्तुलाकारे पदार्थे उज्ज्वल०। २ग्रासे हेमच०। स्वार्थे क। तत्रार्थे।

गुडोद्भवा स्त्री उद्भवत्यस्मात् उद्+भू-अपादाने अप् गुड उद्भवोऽस्याः। १शर्करायाम् राजनि०। २गुडजातमात्रे त्रि०

गुण आमन्त्रणे आम्रेडने आवृत्तौ इत्येके अद० चु० उभ० सक० सेट्। गुणयति-ते अजुगुणत्-त। "गुणयान्त्यमङ्कं गुणकेन हन्यात्"। "विषमे गच्छे व्येके गुणकः स्थाप्यः समेऽर्द्धिते वर्गः" "गुण्यः पृथग्वा गुणितः समेतः" लीला०। "वर्गेण वर्गं गुणयेत् भजेच्च" बीजग०

गुण पु॰ गुण–भावे कर्त्तरि वा अच्। १धनुर्मौर्व्याम् धनुराकर्षणदामनि, २रज्जुमात्रे, "गुणवन्तोऽपि सीदन्ति न गणग्राहको यदि। सगुणोऽपि पूर्णकुम्भो यथा कूपे निमज्जति" उद्भटः। ३शौर्य्यादिधर्मे, राज्ञां ४सन्धिविग्रहादिषु षट्सु साधनेषु, "षड्गुणाः शक्तयस्तिस्रः" अमरः। "षाड्गुण्यमुपयुञ्जते" इति माघः। ५ज्ञानविद्यादिषु, "गुणा गुणानुबन्धित्वादिति" रघुः। सांख्यमते पुरुषोपभोगोपकरणभूतत्वात् तद्बन्धनोपयोगित्वाच्च सत्त्वरजस्तमआदिषु ६पदार्थेषु। "प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु" गीता। ७अप्रधाने, "शर्वी कुर्य्यात्तदा गुणे" भर्त्तृहरिः। तद्गुणसंविज्ञानबहुव्रीहिः। न्यायमते ८रूपादिषु चतुर्विंशतिपदार्थेषु "सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते। आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः" भाष्योक्ते द्रव्यमात्राश्रिते द्रव्यभिन्ने उत्पाद्यानुत्पाद्यतासमानाधिकरणे सिद्धरूपे ९वस्तुधर्मे, "अदेङ्गुणः" पा॰ परिभाषिते १०अकारे ११एकारे १२ओकारे च "दुषधातोरिवास्माकं दोषसम्पत्तये गुणः" उद्भटः। अलङ्कारोक्तेषु १३माधुर्य्यादिषु, "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" काव्यप्र॰। "निर्दोषं गुणवत् काव्यमलङ्कारैरलङ्कृतम्" सा॰ द॰। १४आवृत्तौ, "विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः" मनुः। १५उत्कर्षे। १६विशेषणे "समासतद्धितकृतां यत्किञ्चिदुपदर्शकम्। प्रधानगुणभावे च तत्र दृष्टो विपर्य्ययः" साकाङ्क्षावयवं भेदे, परानाकाङ्क्षशब्दकम्। क्रियाप्रधानमेकार्थं सगुणं वाक्यमुच्यते" हरिः। सगुणं सविशेषणं क्रियान्वयिकारकादिविशेषणसहितमित्यर्थः। १७अप्रधानधर्मभेदे तेजोबलशौर्य्यैश्वर्य्यवैराग्यादिशक्त्यादौ स हि पराश्रितत्वादप्रधानभूतः "उपैत्यन्यज्जहात्यन्यद् दृष्टो द्रव्यान्तरेष्वपि। वाचकः सर्वलिङ्गानां द्रव्यादन्यो गुणः स्मृतः" इत्युक्तलक्षणे १८धर्मभेदे च देशकालज्ञतादिषु चतुर्दशसु १९धर्मभेदेषु ते च "देशकालज्ञता१ दार्ढ्यं२ सर्वक्लेशसहिष्णुता३। सर्वविज्ञानता४ दाक्ष्य५ मोजः६ संवृतमन्त्रता७। अविसंवादिता८ शौर्य्यं९ भक्तिज्ञत्वं१० कृतज्ञता११। शरणागतवात्सल्य१२ममर्षित्व१३मचापलम्१४। एते चतुर्दशगुणाः प्रोक्ताः शास्त्रेषु सूरिभिः" इत्युक्ताः। "दया सर्वभूतेषु१, क्षान्तिः२ अनसूया३ शौचम्४ अनायासः५ मङ्गलम्६ अकार्पण्यम्७ अस्पृहा८ इति" २०गौतमोक्तधर्मभेदे। २१सूदे २२इन्द्रिये २३त्यागे २४ज्याम् मेदि॰। दोषान्यधर्मे २५विद्यादौ मुमुक्षासाधने २६विवेकवैराग्यमुमुक्षादौ च। "प्रक्षीणदोषाय गुणान्विताय" वेदान्तसा॰। प्रधाननिर्वाहके २७अङ्गे। "गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्" जैमि॰। तिथिनक्षत्रवारादिसाधनं पुण्यपापयोः प्रधानगुणभावेन स्वातन्त्र्येण न ते क्षमाः" "शब्दात्तु तदुपस्थानमुपादेये गुणो भवेत्" मडुका॰। २८सादृश्यादिवस्तुधर्मे च। "लक्ष्यमाणगुणैर्योगात् वृत्तेरिष्टा तु गौणता" काव्यप्र॰। २९वस्तुधर्ममात्रे "गुणः प्रधानसंस्कारः प्रधानं प्रतिपद्यते" काव्यप्र॰। "सतो गुणान्तराधानं प्रतियत्नः" सि॰कौ॰। "गन्धः स्पर्शो रसो रूपं शब्दश्चेति गुणाः स्मृताः। तस्य गन्धस्य वक्ष्यामि विस्तराभिहितान् गुणान्" भा॰ शा॰ १८४अ॰। गन्धरूपगुणस्य "गुणादिनिर्गुणक्रिय" इत्युक्तेः प्रसिद्धगुणशून्यत्वात् धर्ममात्रपरता "निर्गुणं निष्क्रियं शान्तं निरवद्यं निरञ्जनत्वं" इत्यादिश्रुतौ गुणशब्दस्य धर्ममात्रपरत्वम्। "ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः। कथं चरन्ति श्रुतयः" भाग॰१०।८७अ॰।

३०दूर्वायाम् स्त्री राजनि॰: तस्या बहुतन्तुमत्त्वात्तथात्वम्। वर्णोत्पत्त्यनन्तरभाविषु शिक्षोक्तेषु ३१विवारादिषु बाह्यप्रयत्नेषु पु॰ "वर्णाभिव्यक्त्यनन्तरभाविनस्तु आन्तरतम्यपरीक्षोपयुक्ताः कण्ठविवरविकाशादेर्बहिर्भागावच्छिन्नस्य कार्य्यस्य जनका यत्ना गुणशब्देनोच्यन्ते" शब्देन्दुशेखरः। बाह्यप्रयत्नाश्च एकादशधा विवारसंवारश्वासनादघोषाघोषाल्पप्राणमहाप्राणाः उदात्तादयश्च त्रयः स्वराः। "स्थानेऽन्तरतमः" पा॰। "तुल्यास्यप्रयत्नं सवर्णमिति" पा॰। "सादृश्यञ्च स्थानतो वर्णतः गुणतः प्रमाणतश्च" तत्र गुणतः (बाह्यप्रयत्नात्) यथा। नादवतो घोषवतो महाप्राणस्य संवृतकण्ठस्य हकारस्य सदृशस्तादृश एव घकारः"। सुश्रुतोक्ते ३२अष्टविधवीर्य्ये च। "केचिदाहुरष्टविधं वीर्य्यम् उष्णं शीतं स्निग्धं रूक्षं विशदं पिच्छिलं मृदु तीक्ष्णञ्च" सुश्रुते विभज्य "वीर्य्यसंज्ञा गुणा येऽष्टौ तेऽपि द्रव्याश्रयाः स्मृताः" इति तेषां गुणत्वमुक्तम्। गुण–कर्मणि अच्। ३३गुणिते। "आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा। षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः" चाण॰। वैद्यकोक्तद्रव्यगुणाश्च भावप्र॰ गुणप्रस्थे दृश्यास्तत्रत्ये

च ते प्रायेण उक्ता वक्ष्यन्ते च २४भीमसेने हेम० २५त्रित्वसंख्यायाञ्च सत्त्वे निविशते इत्यस्यायमर्थः। सत्त्वं द्रव्यम्। सत्त्व एव निविशते इति सावधारणम्। तेन सत्ता व्यावर्त्त्यते। सत्ता हि न केवलं द्रव्ये वर्त्तते किन्तु द्रव्यगुणकर्मसु। ननु द्रव्य एव द्रव्यत्वं वर्त्तते इति तत्रातिव्याप्तिरतआह अपैतीति असम्बन्धो भवतीत्यर्थः अर्थात् द्रव्ये यथा पीततायां जातायां फलादेर्नीलतापैति नैवं द्रव्यत्वं द्रव्यादपैति। एवमपि गोत्वं गोषु वर्त्तते अश्वादावसम्बद्धम् तत्रातिव्याप्तिरतआह पृथग्जातिषु दृश्यत इति। गोत्वं हि द्रव्यत्वावान्तरनानाजातिषु न दृश्यते गुणस्तु दृश्यते यथा अभ्रे नीलता दृष्टा तृणादिष्वपि सा दृश्यते। तेन पूर्व्वार्द्धेन सकलजातेर्व्यवच्छेदः। एवं तर्हि कर्म द्रव्ये वर्त्तते ततोऽपैति, पृथग्जातिषु दृश्यते चेति तत्रातिव्याप्तिरतआह आधेयश्चाक्रियाजश्चेति। उत्पाद्यानुत्पाद्यतासमानाधिकरणजातिमान् इत्यर्थः। तत्रोत्पाद्यो यथा घटादेः पाकजो रूपादिः। अक्रियाजः अनुत्पाद्यो यथा आकाशादेर्महत्त्वादिः। क्रिया तु सर्वाप्युत्पाद्यैव न कापि नित्येति तस्या नित्यत्वसामानाधिकरण्याभावात् गुणत्वाभावः। एवमपि द्रव्यस्य गुणत्वापत्तिः अवयविद्रव्यं हि अवयवद्रव्येषु निविशते, असमवायिकारणसंयोगनिवृत्तौ च स्वयं विनाशात्ततोऽपैति भिन्नजातीयेषु च हस्तपादादिषु दृश्यते। तच्च द्विविधं भवति नित्यानित्यभेदेन निरवयवस्यात्मपरमाण्वादेर्नित्यत्वादवयविद्रव्यस्य तु घटादेरनित्यत्वादतआह असत्वप्रकृतिरिति। अद्रव्यस्वभावः द्रव्यभिन्न इति यावत्।

वैशेषिकमतप्रसिद्धगुणभेदलक्षणादिकं कणादसूत्रवृत्त्योरुक्तं यथा

रूपरसगन्धस्पर्शाः सङ्ख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः" १।७सू०।

"गुणत्वेन रूपेण गुणानां सर्वद्रव्याश्रितत्वं द्रव्याभिव्यङ्ग्यत्वं द्रव्याभिव्यञ्जकत्वञ्चेति द्रव्यानन्तरं गुणानामुद्देशं विभागञ्चाह रूपेत्यादि चकारेण गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दान् समुच्चिनोति ते हि प्रसिद्धगुणभावा एवेति कण्ठतो नोक्ताः। गुणत्वञ्चामीषां यथास्थानं लक्षणतः स्वरूपतश्च वक्ष्यति तत्र रूपरसगन्धस्पर्शानां समानकालीनरूपरसगन्धस्पर्शसामानाधिकरण्यं नास्तीति सूचनार्थं समासः। सङ्ख्यापरिमाणयोस्तु समानकालीनसङ्ख्यापरिमाणसामानाधिकरण्यसूचनायासमासो बहुवचननिर्द्देशश्च यद्यप्येकत्वसमाधिकरणं मैकत्वान्तरं न वा महत्त्वदीर्घत्वसमानाधिकरणं महत्त्वदीर्घत्वान्तरं तथापि द्वित्वादीनामन्योऽन्यं सामानाधिकरण्यं महत्त्वदीर्घत्वादीनाञ्च विजातीयपरिमाणयोः सामानाधिकरण्यमस्त्येव। पृथक्त्वञ्च यद्यपि द्विपृथक्त्वादिसमानाधिकरणं, तेन सङ्ख्यावद्बहुत्वेनैव निर्द्देष्टुमर्हति तथाप्यवधिव्यङ्ग्यत्वलक्षणं सङ्ख्यातो वैधर्म्यं सूचयितुमेकवचननिर्द्देशः। संयोगविभागयोर्द्वयोरप्येककर्मजन्यत्वसूचनाय द्विवचनं, परत्वापरत्वयोरन्योन्याश्रयनिरूप्यतया दिक्काललिङ्गत्वविशेषसूचनाय च द्विवचनं, बुद्धीनां विद्यादिभेदेन साङ्ख्याभिमतैकमात्रबुद्धिनिराकरणसूचनाय बहुवचनं, सुखदुःखयोर्द्वयोरपि भोगत्वावच्छेदैककार्य्यजनकत्वम् अविशेषेण चादृष्टोन्नायकत्वं सुखस्यापि दुःखत्वेन भावनञ्च ख्यापयितुं द्विवचनम्। इच्छाद्वेषयोर्द्वयोरपि प्रवृत्तिं प्रति कारणत्वसूचनाय द्विवचनं प्रयत्नानां विहितनिषिद्धगोचराणां दशविधानां पुण्यहेतुत्वं, दशविधानाञ्च पापहेतुत्वमभिसन्धाय बहुवचनमित्युन्नेयम्। यद्वा रूपरसगन्धस्पर्शानां भौतिकेन्द्रियव्यवस्थाहेतुत्वज्ञापनार्थं पाकजप्रक्रियाव्यवस्थापनार्थं वा ते समस्योक्ताः सङ्ख्यायां द्वित्वबहुत्वादौ विप्रतिपत्तिरिति तन्निराकरणसूचनार्थं बहुत्वेनाभिधानं, पृथक्त्वे तु सङ्ख्याबहुत्वेनैवास्यापि बहुत्वमिति सूचनायावधिज्ञानव्यञ्जनीयत्वं सङ्ख्यातो वैधर्म्यमिति सूचनाय च पृथगभिधानम्। परिमाणे तु दीर्घत्वह्रस्वत्वादिविप्रतिपत्तिनिरासाय बहुवचनम्। संयोगविभागयोरन्योन्यविरोधज्ञापनाय द्विवचनं, परत्वापरत्वयोर्दैशिककालिकभेदेन भिन्नजातीयत्वसम्भवेन चतुष्ट्वापत्तौ गुणविभागो न्यूनः स्यात् इति तत्रापि द्विवचनमित्याद्युन्नेयम्" उप० वृत्तिः।

"द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्" १।८सू०

"द्रव्यमाश्रयितुं शीलमस्येति द्रव्याश्रयी एतच्च द्रव्येऽपि गतमत आह अगुणवानिति तथापि कर्मण्यतिव्याप्तिरित्यत आह संयोगविभागेष्वकारणं तथापि संयोगविभागधर्माधर्मेश्वरज्ञानादीनामसङ्ग्रहः स्यादत उक्तमनपेक्ष इति अत्रानपेक्ष इत्यनन्तरं गुण इति पूरणीयं संयोगविभागेष्वनपेक्षः सन् कारणं यो न भवति स गुण इत्यर्थः।

संयोगविभागादीनां संयोगविभागौ प्रति सापेक्षत्वात् नित्यवृत्तिनित्यवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं गुणत्वं संयोगविभागौ मिलितौ प्रति समवायिकारणत्वासमवायिकारणत्वरहिते सामान्यवति यत् कारणत्वं तद्गुणत्वाभिव्यञ्जकं, संयोगविभागयोः प्रत्येकमेव संयोगविभागकारणत्वं न मिलितयोः, धर्माधर्मेश्वरज्ञानादीनां द्वयोर्निमित्तकारणत्वमात्रं न समवायिकारणत्वं नाप्यसमवायिकारणत्वमिति तेषां संग्रहः, यद्वा संयोगविभागसमवायित्वासमवायिकारणत्वशून्यत्वं सामान्यसमानाधिकरणं गुणत्वव्यञ्जकं सामान्यवत्त्वे सति कर्मान्यत्वे च सत्यगुणवत्त्वमेव वा गुणलक्षणम् ॥” उप० वृत्तिः

“नित्यवृत्तिनित्यवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं गुणत्वं समवायिकारणावृत्तिनित्यवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं वा असमवायिकारणवृत्तिनित्यवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं वा कार्य्यासमानाधिकरणकर्मावृत्तिजातिमत्त्वं वा” तत्रैवोक्तम्। कर्म्मत्वजातेः सत्तासाक्षाद्व्याप्यत्वेऽपि नित्यवृत्तित्वाभावात् द्रव्यत्वजातेस्तथात्वेऽपि नित्यवृत्तिनित्यवृत्तित्वाभावान्नातिव्याप्तिः गुणत्वजातेस्तु नित्येष्वात्मादिषु वर्त्तमाने नित्ये महत्त्वादौ सत्त्वात् तामादाय लक्षणसमन्वयः। व्याप्तिश्च भेदगर्भा बोध्या। तेन सत्ताव्याप्यत्वस्य स्वस्मिन्नपि सत्त्वेन तामादाय न द्रव्यकर्मणोरतिव्याप्तिः।

“तेषां मूर्त्तामूर्त्तगुणत्वादिभेदः भाषायामुक्तो यथा।

“रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकम्। द्रवो गुरुत्वं स्नेहश्च वेगो मूर्त्तगुणा अमी। धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च। एतेऽमूर्त्तगुणाः सर्वे विद्वद्भिः परिकीर्त्तिताः। संख्यादिश्च विभागान्त उभयेषां गुणो मतः। संयोगश्च विभागश्च संख्या द्वित्वादिकास्तथा। द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः। अतः शेषा गुणाः सर्व्वे मता एकैकवृत्तयः। बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः। अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः। संख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा। गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्त्तिताः। संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च। एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः। बाह्यैकैकेन्द्रियग्राह्या, गुरुत्वादृष्टभावनाः। अतीन्द्रिया, विभूनान्तु ये स्युर्वैशेषिका गुणाः। अकारणगुणोत्पन्ना एते तु परिकीर्त्तिताः। अपाकजास्तु स्पर्शान्ता द्रवत्वञ्च तथाविधम्। स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम्। स्थितिस्थापक इत्येते स्युः कारणगुणोद्भवाः। संयोगश्च विभागश्च वेगश्चैते तु कर्म्मजाः। स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके। भवेदसमवायित्व, मथ वैशेषिके गुणे। आत्मनः स्यान्निमित्तत्व,मुष्णस्पर्शगुरुत्वयोः। वेगेऽपि च द्रवत्वे च संयोगादिद्वये तथा। द्विधैव कारणत्वं, स्यादथ प्रादेशिको भवेत्। वैशेषिको विभुगुणः संयोगादिद्वयं तथा”।

एते च गुणाः द्रव्यभिन्ना गन्धशब्दे २५२४पृ०दर्शिते उपस्कारवृत्तिवाक्ये स्पष्टमुक्ताः। तद्भिन्ना अपि ते द्रव्याधीना इति वैशेषिकादय आहुः। वैदान्तिकादयस्तु द्रव्याभिन्ना एव गुणा इति मन्यन्ते यथाह शा०भा० “वैशेषिकास्तन्त्रार्थभूतान् षट् पदार्थान् द्रव्यगुणकर्मसामान्यविशेषसमवायाख्यानत्यन्तभिन्नान् भिन्नलक्षणानभ्युपगच्छन्ति यथा मनुष्योऽश्वः शश इति। तथात्वमभ्युपगम्य तद्विरुद्धं द्रव्याधीनत्वं शेषाणामभ्युपगच्छन्ति। तन्नोपपद्यते कथं यथाहि लोके शशकुशपलाशप्रभृतीनामत्यन्तभिन्नानां सतां नैवेतरेतराधीनत्वं भवति एवं द्रव्यादीनामप्यत्यन्तभिन्नानां नैव द्रव्याधीनत्वं गुणादीनां भवितुमर्हति। अथ च भवति द्रव्याधीनत्वं गुणादीनाम्। ततो द्रव्यभावे भावात् द्रव्याभावे चाभावात् द्रव्यमेव संस्थानादिभेदादनेकशब्दप्रत्ययभाग् भवति। यथा देवदत्त एकएव सन्नवस्थान्तरयोगादनेकशब्दप्रत्ययभाग् भवति तद्वत्। तथासति साङ्ख्यसिद्धान्तप्रसङ्गः स्वसिद्धान्तविरोधश्चापद्येयाताम्। नन्वग्नेरन्यस्यापि सतो धूमस्याग्न्यधीनत्वं दृश्यते, सत्यं दृश्यते भेदप्रतीतेस्तु तत्राग्निधूमयोरन्यत्वं निश्चीयते इह तु शुक्लःकम्बलोरोहिणी धेनुर्नीलमुत्पलमिति द्रव्यस्यैव तस्य तस्य तेन विशेषेण प्रतीयमानत्वान्नैव द्रव्यगुणयोरग्निधूमयोरिव भेदप्रतीतिरस्ति।” इतःपरं भाष्यम् अयुतसिद्धशब्दे २४५ पृ० दर्शितम्। तत्र च द्रव्याभिन्नत्वं गुणादीनामुक्तम्।

सां०प्रव० भा० समवायनिराकरणेनैव गुणादीनां द्रव्याभिन्नत्वमुक्तं यथा

“कादाचित्कविभागे सत्येव सम्बन्धः सिध्यति अन्यथा वक्ष्यमाणरीत्या स्वरूपेणैवोपपत्तौ सम्बन्धकल्पनानवकाशात्। स च कादाचित्को विभागो न सम्बन्धिनित्यत्वे सम्भवति। अतः सम्बन्धग्राहकप्रमाणा

नैव बाधाच्च नित्यः सम्बन्धः। नन्वेवं नित्ययोर्गुणगुणिनोर्नित्यः समवायो नोपपद्येत तत्राह" सा० भा० "न समवायोऽस्ति प्रमाणाभावात्" सा० सू०।" ननु वैशिष्ट्यप्रत्यक्षं विशिष्टबुद्ध्यन्यथानुपपत्तिश्च प्रमाणं तत्राह" भा०। "उभयत्राप्यन्यथासिद्धेर्न प्रत्यक्षमनुमानं वा" सू०। "उभयत्रापि वैशिष्ट्यप्रत्यक्षे तदनुमाने च स्वरूपेणैवान्यथासिद्धेर्न तदुभयं समवाये प्रमाणमित्यर्थः। अयं भावः। यथा समवायवैशिष्ट्यबुद्धिः तत्स्वरूपेणैवेष्यतेऽनवस्थाभयादिति तत्र प्रत्यक्षानुमाने अन्यथासिद्धे। एवं गुणगुणिप्रभृतीनां विशिष्टबुद्धिरपि गुणादिस्वरूपेणैवेष्यताम्। अतस्तत्रापि प्रत्यक्षानुमाने अन्यथासिद्धे इति। नन्वेवं संयोगोऽपि न सिद्ध्यति भूतलादौ घटादिप्रत्ययस्यापि स्वरूपेणैवान्यथासिद्धेरिति चेन्न वियोगकालेऽपि भूतलघटयोः स्वरूपतादवस्थ्येन विशिष्टबुद्धिप्रसङ्गात्। समवायस्थले च समवेतस्य कदापि स्वाश्रयवियोगो नास्तीति नायं दोषः। कश्चित्तु तादात्म्यसम्बन्धेनात्र समवायस्यान्यथासिद्धिमाह तन्न शब्दमात्रभेदात्। तादात्म्यं ह्यत्र नानन्यत्वं वक्तव्यम् गुणवियोगेऽपि गुणिसत्त्वात् वैशिष्ट्याप्रत्ययाच्च। किन्तु भेदाभेदबुद्धिनियामकः सम्बन्धविशेष एवागत्या वक्तव्यः। तथाच तस्य समवाय इति वा तादात्म्यमिति वा नाममात्रं भिन्नम् सम्बन्धिद्वयातिरिक्तः सम्बन्धस्तु सिद्ध एवेति। यदि च तादात्म्यं स्वरूपमेवोच्यते तदास्माभिरपि तदेवोक्तमिति शब्दमात्रभेद इति"।

"सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च" इत्युक्तेः शुक्लादिशब्दानां शुक्लादयो गुणा शक्यतावच्छेदका भवन्ति शुक्लादयो हि सिद्धवस्तुधर्मा गवादिकं सजातीयेभ्यो व्यवच्छिन्दन्ति इति तेषां तत्पदप्रवृत्तिनिमित्तत्वम्। साङ्ख्यमते सत्वादयो गुणाद्रव्यात्मकाः सूक्ष्मभूतोपादानत्वात् तेषाञ्च पुरुषभोगसाधनत्वेनाङ्गत्वात् तथात्वं यथाह शा०प्र०भा०।

"सत्वादीनि द्रव्याणि न वैशेषिकादिमतसिद्धा गुणाः संयोगविभागवत्त्वात् लघुत्वचलत्वगुरुत्वादिधर्मकत्वाच्च। तेष्वत्र शास्त्रे श्रुत्यादौ च गुणशब्दः पुरुषोपकरणत्वात् पुरुषपशुबन्धनत्रिगुणात्मकमहदादिरज्जुनिर्मातृत्वाच्च प्रयुज्यते"।

राज्ञां नीत्यङ्गानि सन्ध्यादयश्च षट् यथा "सन्धिविग्रहयानानि स्थानमासनमेव च। द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनामिति"। रसाङ्गगुणाश्च "ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः। उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः इत्युपक्रमे "श्लेषः१ प्रसादः२ समता३माधुर्य्यं४ सुकुमारता५। अर्थव्यक्ति६रुदारत्व७मोजः८कान्ति९ समाधयः१०। इति वैदर्भीमार्गस्य प्राणा दश गुणाः स्मृताः" अन्यमतप्रसिद्धान् दश गुणानुक्त्वा तेषां त्रिष्वेवान्तर्भावात् गुणत्रैविध्यमाह स्म काव्यप्र० "माधुर्य्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश। केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिताः। अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश"। काव्यप्र०।

गुणक त्रि० गुणयति आवर्त्तयति गुण–ण्वुल्। गुणनकारके। "गुण्यान्त्यमङ्कं गुणकेन हन्यात्"। "विषमे गच्छे व्येके गुणकः स्थाप्यः समेऽर्द्धिते वर्गः" लीला०।

गुणकथन न० ६त०। १गुणवर्णने "मम त्वेतां वाणीं गुणकथनपुण्येन भवतः" शिवस्तवः। २कामकृते नायकदशाभेदे। "अभिलाषश्चिन्ता स्मृतिगुणकथनोद्वेगसंप्रलापाश्च। उन्मादोऽथ व्याधिर्जड़ता मृतिरिति दशात्र कामकृता" सा०द०। रसमञ्जर्य्यान्तु गुणकथनमित्यत्र गुणकीर्त्तनमिति पठित्वा "विरहकालीनकान्ताविषयकप्रशंसाकथनं गुणकीर्त्तनमिति लक्षयित्वा "संस्पर्शः स्तनसंस्पर्शो वीक्षणम् रत्नवीक्षणम्। तस्याः कौलिकलालापसमयः समयः सखे!" इत्युदाहृतं तेन गुणकीर्त्तनमप्यत्र।

गुणकर्मन् न० कर्म०। १अप्रधाने कर्म्मणि कर्म्मणोऽप्रधानत्वञ्च द्विकर्म्मकधात्वर्थघटकाप्रधानक्रियान्वितत्वम्। "कर्त्तृकर्म्मणोः कृति" पा० "गुणकर्म्मणि वेष्यते" वार्त्ति०। "नेताश्वस्य स्रुघ्नं स्रुघ्नस्य वा" अत्र गमनानुकूलव्यापारो नयत्यर्थस्तद्विशेषणीभूतगतौ स्रुघ्नस्यान्वितत्वेन गुणकर्म्मत्वम्। "गुणानां सत्वादिद्रव्यरूपाणाम् कर्म्म। सत्वादिद्रव्यरूपजन्ये २कर्मभेदे च तानि च कर्माणि सा० का०उक्तानि यथा।

"सत्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः। गुरु वरणकमेव तमः प्रदीपवच्चार्थतोवृत्तिः।" सत्वमेव लघु प्रकाशकमिष्टं सांख्याचार्य्यैः, तत्र कार्य्योद्गमने हेतुर्धर्मो लाघवं गौरवप्रतिद्वन्द्वि यतोऽग्नेरूर्द्ध्वज्वलनं भवति तदेव लाघवं कस्यचित्तिर्य्यग्गमने हेतुर्यथा वायोः। एवं करणानां वृत्तिपटुत्वहेतु-

लाघवं गुरुत्वे हि मन्दानि स्युरिति सत्वस्य प्रकाशकत्वमुक्तम्। सत्वतमसो स्वयमक्रियतया स्वस्वकार्य्यप्रवृत्तिं प्रत्यवसीदन्तो रजसोपष्टभ्येते अवसादात् प्रच्याव्य स्वकार्य्ये ते उत्साहं प्रयत्नं कार्य्येते तदिदमुक्तमुपष्टम्भकं रजइति। कस्मादित्यत उक्तं चलमिति। तदनेन रजसः प्रवृत्त्यर्थत्वं दर्शितम्। रजस्तु चलतया परितस्त्रैगुण्यं चालयद्गुरुणावृण्वता च तमसा यत्र प्रवृत्तिप्रतिबन्धकेन क्वचिदेव प्रवर्त्तते इति ततस्ततो व्यावर्त्त्य तमोनियामकमुक्तं गुरु वरणकमेव तमइति। एवकारः प्रत्येकं भिन्नक्रमः सम्बध्यते सत्वमेव रजएव तमएव। ननु परस्परविरोधशीलागुणाः सुन्दोपसुन्दवत्परस्परं ध्वंसयन्त इत्येव युक्तं प्रागेव तेषामेकक्रियाकर्तृतायाः, इत्यत आह "प्रदीपवच्चार्थतो वृत्तिः, दृष्टमेतत् यथा वर्त्तितैले अनलविरोधिनी अथच मिलिते सहानलेन रूपप्रकाशलक्षणं कार्य्यं कुरुतः यथा च वातपित्तश्लेष्माणः परस्परविरोधिनः शरीरधारणलक्षणकार्य्यकारिणः एवं सत्वरजस्तमांसि मिथोविरुद्धान्यपि अनुवर्त्स्यन्ति च स्वस्वकार्य्यं करिष्यन्ति च अर्थतः पुरुषार्थत इति यावत्। वक्ष्यति च "पुरुषार्थ एव हेतुर्न केनचित्कार्य्यते करणम्"इति। अत्र च सुखदुःखमोहाः परस्परविरोधिनः स्वस्वानुरूपाणि सुखदुःखमोहात्मकान्येव निमित्तानि कल्पयन्ति। तेषाञ्च परस्परमभिभाव्याभिभावकभावान्नानात्वम्। तद्यथा एकैव स्त्री रूपयौवनकुलशीलसम्पन्ना स्वामिनं सुखाकरोति तत्कस्य हेतोः? स्वामिनं प्रति तस्याः सुखरूपसमुद्भवात्। सैव स्त्री सपत्नीः दुःखाकरोति तत्कस्य हेतोः? ताः प्रति तस्या दुःखरूपसमुद्भवात्। एवं पुरुषान्तरं तामविन्दत् सैव मोहयति तत्कस्य हेतोः? तत् प्रति तस्या मोहरूपसमुद्भवात्। अनया च स्त्रिया सर्वे भावा व्याख्याताः। तत्र यत्सुखहेतुस्तत्सुखात्मकं सत्वं, यत् दुःखहेतुस्तद्दुःखात्मकं रजः, यन्मोहहेतुस्तन्मोहात्मकं तमः, सुखप्रकाशलाघवानां त्वेकस्मिन् युगपदुद्भूतावविरोधः सहदर्शनात्। तस्मात् सुखदुःखमोहैरिव विरोधिभिरेकैकगुणवृत्तिभिः सुखप्रकाशलाघवैर्न निमित्तभेदा उन्नीयन्ते एवं दुःखोपष्टम्भकत्वप्रवर्त्तकत्वैरेवं मोहगुरुत्वावरणैरिति सिद्धं त्रैगुण्यमिति।"

विस्तरेण गुणकर्म्मविभागश्च गीतायां दर्शितो यथा।

"सत्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः। निबध्नन्ति महाबाहो! देहे देहिनमव्ययम्। तत्र सत्वं निर्म्मलत्वात् प्रकाशकमनामयम्। सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ!। रजोरागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्। तन्निबध्नाति कौन्तेय! कर्मसङ्गेन देहिनम्। तमस्त्वज्ञानजं विद्धि मोहनं सर्व्वदेहिनाम्। प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत!। सत्वं सुखे सञ्जयति रजः कर्म्मणि भारत!। ज्ञानमावृत्य तु तु तमः प्रमादे सञ्जयत्युत। रजस्तमश्चाभिभूय सत्वं भवति भारत!। रजः सत्वं तमश्चैव तमः सत्वं रजस्तथा। सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते। ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमित्युत। लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा। रजस्येतानि जायन्ते विवृद्धे भरतर्षभ!। अप्रकाशोऽप्रवृत्तिश्च प्रमादोमोहएव च। तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन!। यदा सत्वे प्रवृद्धे तु प्रलयं याति देहभृत्। तदोत्तमविदां लोकानमलान् प्रतिपद्यते। रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते। तथा प्रलीनस्तमसि,मूढयोनिषु जायते। कर्मणः सुकृतस्याहुः सात्विकं निर्म्मलं फलम्। रजसस्तु फलं दुःखमज्ञानं तमसः फलम्। सत्वात् संजायते ज्ञानं रजसोलोभएव च। प्रमादमोहौ तमसोभवतोऽज्ञानमेव च। ऊर्द्धं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसाः। जघन्यगुणवृत्तिस्थाअधोगच्छन्ति तामसाः।"

गुणकार त्रि० गुणं पाकभेदेनान्नरसरूपं गुणं करोति कृ-अण्। १सूपकारे २भीमसेने पु० त्रिका०। स हि विराटनगरे छद्मवेशेन सूपकारितां जग्राहेति तस्य तथात्वं तत्कथा भा० वि० २अ०

"पौरोगवो ब्रुवाणोऽहं वल्लवो नाम नामतः। उपस्थास्यामि राजानं विराटमिति मे मतिः। सूपानस्य करिष्यामि कुशलोऽस्मि महानसे। कृतपूर्वाणि यैरस्य व्यञ्जनानि सुशिक्षितैः। तानप्यभिभविष्यामि प्रीतिं संजनयन्नहम्। आहरिष्यामि दारूणां निचयान् महतोऽपि च। तत्प्रेक्ष्य विपुलं कर्म्म राजा प्रीतो भविष्यति। अमानुषाणि कुर्वाणं तानि कर्माणि भारत!। राजस्तस्य परिप्रेष्या मंस्यन्ते मां यथा नृपम्। भक्ष्यान्नरसपानानां भविष्यामि तथेश्वरः"। तस्य पाकशास्त्रकर्तृत्वेन रसकारकारित्वात् तथात्वमिति तु ज्यायः।

गुणकेशी स्त्री मातलिकन्यायाम् "मतस्त्रिदशराजस्य मातलिर्नाम सारथिः। तस्य चैका कुले कन्या रूपतो लोकविश्रुता। गुणकेशीति विख्याता नाम्ना सा देवसन्निभा" भा० उ० ९६ अ०। तस्याश्चार्य्यकनागपौत्रेण सुमुखनागेन विवाहकथा च १०२अ०उक्ता तत्र एवावसेया।

गुणगृह्य त्रि० ग्रह—पक्षार्थे क्यप् ६त०। गुणपक्षपातिनि।

गुणगौरी स्त्री गुणेन गौरी शुद्धा गौरीव वा। १गुणैः शुद्धायां २गुणः पार्वतीतुल्यायां च।"अनृतगिरं गुणगौरि! मा कृथा माम्" माघः।

गुणग्राहिन् त्रि० गुणं गृह्णाति ग्रह—णिनि। गुणग्रहीतरि स्त्रियां ङीप्। ण्वुल् गुणग्राहकोऽप्यत्र।"गुणवन्तोऽपि सीदन्ति न गुणग्राहको यदि" उद्भटः।

गुणज्ञ त्रि० गुणं जानाति ज्ञा—क ६त० गुणज्ञातरि "गुणिनि गुणज्ञो रमते" हितो०।

गुणधर्म्म पु०"यो गुणेन प्रवर्त्तेत गुणधर्मः स उच्यते" इत्युक्ते मूर्द्धाभिषिक्तस्य प्रजापालनादिधर्मे।

गुणनिका स्त्री गुण—आम्रेडने भावे युच् स्वार्थे क। १अभ्यासे निश्चयार्थं पाठ्यग्रन्थस्य पुनःपुनरनुशीलने, "हेतुः परिचयस्थैर्य्ये वक्तुर्गुणनिकैव सा" माघः। २शून्ये, ३नृत्ये, मेदि०। ४मालायाञ्च "दरिद्राणां चिन्तामणिगुणनिका" आनन्दलहरी।

गुणनिधि पु० गुणा निधीयन्ते अस्मिन् नि+धा—आधारे कि ६त०। १गुणाधारे कम्पिल्लनगरवासियज्ञदत्तदीक्षितद्विजपुत्रे "आसीत् काम्पिल्लनगरे सोमराजिकुलोद्भवः। दीक्षितो यज्ञदत्ताख्यो यज्ञविद्याविशारदः। तस्य पुत्रो गुणनिधिश्चन्द्रविम्बसमाकृतिः" काशी० १२अ०। स चात्यन्तद्यूताद्यासङ्गेन दुर्वृत्ततया पित्रा त्यक्तः इतस्ततोऽटन् अन्नालाभेन शिवचतुर्दश्यामुपोष्य रात्रौ शैवकृतशिवलिङ्गार्चनादिकं दृष्ट्वा सुप्तेषु तदर्चकेषु शिवनिर्माल्यहरणायोपचक्राम तत्र काले च शिवगृहे पूर्वप्रज्वलितप्रदीपे निर्वाणप्रायतां प्राप्ते अपहर्त्तव्यद्रव्यसम्यग्दर्शनार्थं स्ववस्त्रखण्डेन तस्य दीपस्योद्दीपनं कृत्वा शिवनैवेद्यान्नं हर्त्तुमारेभे अस्मिन्नेव काले शिवोपासकानां निद्रापगमे तैस्ताड्यमानो गुणनिधिर्मृतः तत्र प्रसङ्गेन शिवरात्रिदिनोपवासजेन शिवार्चादर्शनजेन शिवगृहदीपोद्दीपनजेन च पुण्येन कैलासं जगाम भोगावसाने कलिङ्गदेशाधिपत्यं लेभे पूर्वसंस्कारवशात् शिवभक्तेः प्रादुर्भावे शिवाराधनेन कुबेरपदवीं प्राप इति तत्रत्यकथासंक्षेपः। विस्तरस्तु तत्र दृश्यः। [काव्यानुशीलने त्रिका०।

गुणनी स्त्री गुण्यतेऽनया गुण—ल्युट् ङीप्। गुणनि-

गुणनीय पु० गुण—करणे अनीयर्। १अभ्यासे हारा०। कर्म्मणि अनीयर्। २गुणितव्ये त्रि०।

गुणपदी स्त्री गुणौ गुणितौ पादावस्याः कुम्भपद्या० अन्त्यलोपो ङीप् च। गुणितपादायां स्त्रियाम्।

गुणप्रवृद्ध पु० गुणैः सत्वादिभिः प्रवृद्धः। संसाररूपवृक्षशाखादौ "अधश्चोर्द्ध्वं च प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः" गीता।

गुणभृत् त्रि० गुणं बिभर्त्ति, अधिष्ठातृत्वेन वा बिभर्त्ति आश्रयति भृ—क्विप्। १गुणधारिणि २गुणाधिष्ठातरि परमेश्वरे पु०। "गुणभृन्निर्गुणो महान्" विष्णुस०। "सृष्टिस्थितिप्रलयकर्म्मस्वधिष्ठातृत्वात् गुणभृत्" भा०।

गुणभ्रंश पु० ६त०। गुणनाशे हारा०।

गुणमय त्रि० गुणात्मकः गुणप्रचुरो वा गुण+तादात्म्ये प्राचुर्य्ये वा मयट्। १गुणात्मके "तया बद्धमनश्चक्षुःपाशैर्गुणमयैस्तदा" भा० आ० १७१अ०। "एतैर्गुणमयैर्भावैः" गीता। स्त्रियां ङीप् "दैवी ह्येषा गुणमयी मम माया दुरत्यया" गीता। २गुणाढ्ये च।

गुणलयनी स्त्री गुणा गुणनिर्म्मिताः पटा लीयन्तेऽस्याम् ली—आधारे ल्युट् ङीप्। १पटमण्डपे (तांबु) हलायुधः। स्वार्थे क। अत इत्वम्। गुणलयनिका। तत्रार्थे हेम०

गुणवचन पु० गुणमुक्तवान् वच—कर्त्तरि भूते ल्यु। गुणवद्द्रव्यवाचके शुक्लादौ शब्दे।"वोतो गुणवचनस्य" पा०। अत्र विशेषणतया गुणवचनानामेव तथात्वं तेन गुणिवाचकत्वे सति गुणवाचकत्वं गुणवचनत्वम्। ततो मृद्वादिपदानामेव तथात्वम् रूपादिपदानान्तु केवलगुणवाचकत्वं तु न गुणवचनत्वमिति बोध्यम्। गुणमुक्तवान् इति भूत एव ल्युट् तेन यदा कदाचिद्गुणवाचकत्वे सति इदानीं गुणवचनत्वमिति शेख"तृतीया तत्कृतार्थेन गुणवचनेन" पा०। "गुणमात्र धर्ममात्रं तेन शङ्कुलाखण्ड इत्यादावुदाहृतौ खण्डनस्य क्रियारूपत्वेऽपि नासङ्गतिः" "गुणवचनब्राह्मणादिभ्यः ष्यञ्" पा०। अत्र विशेषणमात्रपरम् गुणवचनं ग्राह्यम् तेन जडस्य भावः जाड्यम् इति वैशिष्ट्यमित्यादिसिद्धिः "अजादी गुणवचनादेव" पा० अत्रापि विशेषणतयैव गुणवाचिनां द्रव्यपरत्वे इष्टनीयसुनौ न गुणपरत्वे इत्याकरे स्थितम् "प्रकारे गुणवचनस्य" पा० द्वित्वम्। पटुप्रकारः पटुपटुः इत्यादि।

गुणवचनशब्दे परे विस्पष्टादीनामाद्युदात्तता विस्पष्टकटुकम्" सि०कौ० ण्वुल्। गुणवाचकोऽप्यत्र।

गुणवत् त्रि० गुणोऽस्त्यस्य मतुप् मस्य वः। १गुणाढ्ये "गुणवन्तोऽपि सीदन्ति न गुणग्राहको यदि" उद्भटः। "सर्वत्र गुणवद्दानम्" स्मृतिः स्त्रियां ङीप्। यदुवंश्यसुनाभस्य २दौहित्रे पु० ३तत्कन्यायां स्त्री। "वज्रनाभस्य तनयः सुनाभो नाम विश्रुतः। दुहितृद्वयस्य नृपते! तस्य रूपगुणान्वितम्। एका चन्द्रवती नाम्ना गुणवत्यथ चापरा" हरिवं०१५२अ०। "गुणवत्यपि पुत्रञ्च गुणवन्तमजीजनत्" हरिवं०१५५ अ०। ४अप्सरोभेदे स्त्री। "अलम्बुषा गुणवती स्थूलकेशी कलावती" काशी० ९अ०।

गुणवाद पु० गुणस्य अङ्गस्य वादः। अर्थवादभेदे तथाहि अर्थवादो विध्यसमभिव्याहृतवाक्यरूपः सोऽपि त्रिविधः "गुणवादो विरोधे स्यादनुवादोऽवधारिते। भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः" इति भट्टका०। अयमर्थः विरोधे विशेष्यविशेषणयोः सामानाधिकरण्येनान्वयविरोधे गुणवादः अङ्गकथनरूपत्वात् यथा यजमानः प्रस्तर इति अत्र हि प्रस्तरः कुशमुष्टिः तस्य यजमानेऽभेदान्वयबाधात् यजमानस्य कुशमुष्टिधारणरूपाङ्गवादरूपत्वात् गुणवादः। अवधारिते प्रमाणान्तरसिद्धेऽर्थे यो वादः सोऽनुवादः यथा "अन्तरीक्षे नाग्निश्चेतव्यः" "अग्निर्हिमस्य भेषजम्" इत्यादि च, अन्तरीक्षे अग्निचयनस्यासम्भवेन तदभावस्य, अग्नेर्हिमनाशकत्वस्य च लौकिकप्रमाणसिद्धत्वात् अनुवादः। तद्धानौ तयोर्विरोधावधारणयोरभावे भूतार्थवादः। "इन्द्रो वृत्रमहन्नित्यादि" सोऽपि द्विविधः स्तुत्यर्थवादो निन्दार्थवादश्च। "सन्ध्यामुपासते ये तु सततं संशितव्रताः। विधूतपापास्ते यान्ति ब्रह्मलोकमनामयमित्यादौ" स्तुत्यर्थवादः। "तैलस्त्रीमांससम्भोगी पर्वस्वेतेषु वै पुमान्। विण्मूत्रभोजनं नाम प्रयाति नरकं ध्रुवम्" इत्यादौ निन्दार्थवाद इति।

गुणविधि पु० गुणस्याङ्गस्य द्रव्यादेर्विधिः। प्राप्तस्याऽप्राप्तस्य वा कर्मणोऽङ्गद्रव्यविधाने। यथा "अग्निहोत्रं जुहोति स्वर्गकामः" इति विधिना स्वर्गसाधनत्वेन प्राप्तस्याग्निहोत्रादेरङ्गं "दध्ना जुहोतीति" वाक्येन दधिद्रव्यं विदधत् गुणविधिः। यत्र च कर्म अङ्गं च मानान्तरेणाप्राप्तं तत्रोभयविधानं यथाहि तस्य अङ्गरूपगुणविधानेन गुणविधित्वं तथा कर्मस्वरूपप्रापकत्वेन उत्पत्तिविधित्वं चेत्युभयरूपत्वम् तदेतत् लौगाक्षिग्रन्थे विवृतं यथा अज्ञातार्थज्ञापको वेदभागो विधिः। स च प्रयोजनवदर्थविधानेनार्थवान्। तादृशञ्चार्थं प्रमाणान्तरेणाप्राप्तं विधत्ते। यथा "अग्निहोत्रं जुहुयात् स्वर्गकामः" इति विधिः प्रमाणान्तरेणाप्राप्तस्वर्गप्रयोजनवद्धोमं विधत्ते अग्निहोत्रेण स्वर्गं भावयेदिति वाक्यार्थबोधः। यत्र कर्म प्रमाणान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते। यथा "दध्ना जुहोति" इत्यत्र होमस्य "अग्निहोत्रं जुहुयात्" इत्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानं दध्ना होमं भावयेदिति। यत्र तूभयमप्राप्तं, तत्र विशिष्टं विधत्ते। यथा "सोमेन यजेत" इत्यत्र सोमद्रव्ययागयोरप्राप्तत्वात् सोमविशिष्टयागविधानम्। सोमपदे मत्वर्थलक्षणया सोमवता यागेनेष्टं भावयेदिति वाक्यार्थबोधः। न चोभयविधाने वाक्यभेदः, प्रत्येकमुभयस्याविधानात् किन्तु विशिष्टस्यैकस्यैव विधानात्। न च "ज्योतिष्टोमेन स्वर्गकामो यजेतेति" प्राप्तयागोद्देशेन सोमरूपगुणविधानमेवास्तु सोमेन यागं भावयेदिति, किं मत्वर्थलक्षणयेति वाच्यम्। तस्याधिकारविधित्वेनोत्पत्तिविधित्वासम्भवात्। ननु "उद्भिदा यजेत पशुकाम" इत्यस्येव ज्योतिष्टोमेन इत्यस्याप्युत्पत्त्यधिकारविधित्वमस्त्विति चेन्न दृष्टान्ते उत्पत्तिवाक्यान्तराभावेनान्यथानुपपत्त्या तथात्वाश्रयणात्। किञ्च ज्योतिष्टोमेनेत्यत्रोभयविधित्वे तेनैव यागस्तस्य फलसम्बन्धश्च बोधनीय इति स्फुटो वाक्यभेदस्तद्वरं सोमपदे मत्वर्थलक्षणया विशिष्टविधानम्"। अधिकं विधिशब्दे वक्ष्यते। उभयविधाने अन्यदुदाहरणं तत्त्वबोधिन्यां दर्शितं यथा

"प्रथमस्य चतुर्थे "वाजपेयेन स्वाराज्यकामो यजेतेति" तत्र वाजपेयशब्देन वाजमन्नं पेयं सुरादीति। तत्र तत्तद्यागमनूद्य वाजपेयद्रव्यरूपो गुणो विधीयते, किं वा वाजपेयनामा यागविशेषोऽनेन विधीयत इति संशयः तत्र विशिष्टयागान्तरकल्पने गौरवादन्नसुरात्मकं द्रव्यद्वयं गुणो विधीयते न च गुणविधित्वे वाजपेयकरणक यागेन स्वाराज्यं कुर्यादिति यागे वाजपेयकरणत्वेन वाजपेयसाध्यत्वस्वाराज्यसाधनत्वयोर्निरूढयोरेकज्ञानविषयत्वानभ्युपगमात् वाजपेयगुणवता यागेन स्वाराज्यं भावयेदिति मत्वर्थलक्षणा प्रसज्येतेति वाच्यं सकृदुच्चरितस्य यजेतेत्यस्य तन्त्रेणोभयत्रान्वयाङ्गीकारात् वाजपेयेन द्रव्येण स्वाराज्याय यागं कुर्यादित्यर्थलाभान्न मत्वर्थलक्षणा। तथाच सूत्रं "नामधेये गुणश्रुतेः स्याद्विधानमिति चेदिति" (जैमि० १।४।८।) प्राप्ते ब्रूमः यजे।

फले द्रव्ये च उभयत्र सम्बन्धाङ्गीकारे विरुद्धं त्रिकद्वयमापद्येत। तथा हि उपादेयत्वं गुणत्वं विधेयत्वञ्चेत्येकं त्रिकम् उद्देश्यत्वमनुवाद्यत्वं मुख्यत्वञ्चेत्यपरं त्रिकं तत्रोद्देश्यत्वादयस्त्रयः स्वाराज्यफलनिष्ठा धर्माः। उपादेयत्वादयस्त्रयः साधनीभूतयागनिष्ठा धर्माः फलमुद्दिश्य यागस्योपादानात् फलमनूद्य यागस्य विधानात् फलस्य च साध्यतया मुख्यत्वात् यागस्य साधनत्वेनोपसर्ज्जनत्वात् तदेव च गुणत्वम्। अत्र चोपादेयत्वोद्देश्यत्वयोः, गुणत्वमुख्यत्वयोरनुवाद्यत्वविधेयत्वयोर्विरोध इति त्रिकद्वयं विरुद्धम्। तथाचैकेनैकदा तादृशविरुद्धोभययोर्बोधकत्वं नाङ्गीक्रियत इति भावः। अथ मा भूत्तन्त्रेण सम्बन्धः यजेतेनुषङ्गेण पृथक् फले द्रव्येचान्वयः स्वीक्रियतामिति चेन्न अनुषङ्गकल्पने वाजपेयद्रव्येण यजेत यागं कुर्य्यात् स्वाराज्याय यजेत यागेन स्वाराज्यं भावयेदिति वाक्यभेदापत्तेः तस्माद्वाजपेयशब्दो न द्रव्यवाचकः अपि तु यागनामधेयमिति। इत्थञ्चानुषङ्गकल्पने वाक्यभेदरूपगौरवं दोष इत्यनुषङ्गाधिकरणसिद्धान्तः। यत्र चानुषङ्गकल्पने विशेषप्रमाणमस्ति तत्र प्रामाणिकत्वात् तत्कल्पने गौरवं न दोषायेति ध्येयम्”।

उभयत्र च द्रव्यमात्रगुणविधाननिराकरणम् प्रयोजनम्। क्वचित्तु गुणमात्रविधानं जै० १।४।९ सूत्रभाष्ययोर्दर्शितं यथा

“तद्गुणास्तु विधीयेरन्नविभागाद्विधानार्थे न चेदन्येन शिष्टाः” ९सू०। “यथा “आग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति’ इत्येवमादयः श्रूयन्ते तत्र सन्देहः, किम्‘आग्नेयोऽग्नीषोमीयः’इत्येवमादयो गुणविधयः, कर्मनामधेयानि वा? इति। किं तावत् प्राप्तम्? गुणविधौ सत्यनेको गुणो विधीयेत, अग्निपुरोडाशाष्टाकपालाः इति, तस्मान्न गुणविधयः इत्येवं प्राप्ते ब्रूमः, तच्च कर्म, गुणाश्चास्य विधीयेरन्, अविभक्ता हि ते कर्मणो विधानार्थे तद्धितान्ते शब्दे, तत्र हि अष्टाकपालस्याग्नेयता विधीयते, स एष एवमाग्नेयो भवति, यदाग्नये संकल्प्य दीयते, तेनायम् अनेन प्रकारेण यागो विहितो भवति, स एवं विधीयमानो न शक्यते सम्बन्धिनावविधाय विहित इति वक्तुम्। तस्मात् गुणविधयः, अष्टसु कपालेषु संस्क्रियमाणो व्रीहिमयो वा पुरोडाश एव भवति, सोऽनुवादः सिद्धत्वादष्टाकपाल उच्यते, ‘कपालेषु श्रपयति’ इति वचनात् नान्येन श्रपितं गृह्णन्ति, तेनास्मिन्पक्षे न वाक्यभेदो भवति, ‘न चेदन्येन शिष्टाः’ यत्र पुनरन्येन वचनेन शिष्टा गुणा भवन्ति तत्र नामधेयं, यथा ‘अग्निहोत्रं जुहोति।”

गुणवृक्ष पु० गुणानां नौकाकर्षणरज्जूनां बन्धनाधारः वृक्ष इव। नौकाकर्षकदामाद्याधारे काष्ठे। (मास्तुल)। स्वार्थे क, स इव कायति कै–क वा। तत्रार्थे अमरः।

गुणवृत्ति स्त्री गुणेन वृत्तिः। १लक्ष्यमाणसादृश्यादिगुणावलम्बनेन शब्दस्य अर्थप्रकाशनरूपशक्तौ लक्षणावृत्तौ, “यस्याश्चित्समीपे पौण्ड्राणि स गुणवृत्त्या चतुरक्षः” कात्या०श्रौ० २०।१।२८ सूत्रे कर्कः। गुणे वृत्तिर्यस्य। २गुणसामर्थ्यवति त्रि० “ब्रह्मन् ब्रह्मण्यनिर्द्देश्ये निर्गुणे गुणवृत्तयः। कथं चरन्ति? श्रुतयः साक्षात् सदसतः परे” भाग०१०८७ अ०। गुणानां सत्वादीनां वृत्तिः। सत्वादीनां ३परिणामभेदेषु स्त्री “परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः” पात०सू०। तासाञ्च यथाऽन्योन्यविरोधस्तथा तत्सूत्रभाष्यादिषु दर्शितम्।

“प्रख्याप्रवृत्तिस्थितिरूपा बुद्धिगुणाः परस्परानुग्रहतन्त्रीभूत्वा शान्तं घोरं मूढं वा प्रत्ययं त्रिगुणमेवारभन्ते चलञ्च गुणवृत्तमिति क्षिप्रपरिणामि चित्तमुक्तं रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुध्यन्ते सामान्यानि तु अतिशयैः सह प्रवर्त्तन्ते एवमेते गुणा इतरेतराश्रयेणोपार्ज्जितसुखदुःखमोहप्रत्यया इति सर्वे सर्वरूपा भवन्ति गुणप्रधानभावकृतस्तेषु विशेष इति तस्मात् दुःखमेव सर्वं विवेकिन” व्यासभा०।

“प्रख्याप्रवृत्तिस्थितिरूपबुद्धिरूपेण परिणता गुणाः सत्वरजस्तमांसि परस्परानुग्रहतन्त्राः शान्तंसुखात्मकं, वोरं दुखात्मकं, मूढं विषादात्मकमेव प्रत्ययं सुखोपभोगरूपमपि त्रिगुणं प्रारभन्ते नच सोऽपि तादृशरूपोऽस्य परिणामः स्थिरः इत्याह चलञ्च गुणवृत्तमिति क्षिप्रपरिणामि चित्तमुक्तं नान्वेकप्रत्ययः कथं परस्परविरुद्धशान्तघोरमूढत्वान्येकदा प्रतिपद्यते? इत्यत आह रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुध्यन्ते सरूपास्त्वष्टौ भावा धर्म्मादयो वृत्तयः सुखाद्यास्तदिह धर्म्मेण विपच्यमानेनाधर्म्मस्तादृशो विरुध्यते एवं ज्ञानवैराग्यैश्वर्य्यैः सुखादिभिश्च तादृशान्येव

तद्विपरीतानि विरुध्यन्ते, सामान्यानि त्वसमुदाचरद्रूपाणि अतिशयैः समुदाचरद्भिः सहाविरोधात् प्रवर्त्तन्ते इति। ननु गृह्णीमएतत्तथापि विषयसुखस्य कुतः स्वाभाविकी दुःखतेत्यत आह एवमेव इति उपादानाभेदादुपादानात्मकत्वाच्चोपादेयस्याप्यभेद इत्यर्थः। तत्किमिदानीमात्यन्तिकमेव तादात्म्यं तथा च बुद्धिव्यपदेशभेदौ न कल्पेते इत्यत आह गुणप्रधानेति सामान्यात्मना गुणभावोऽतिशयात्मना च प्राधान्यं तस्मादुपाधितः स्वभावतश्च दुःखमेव सर्व्वं विवेकिन इति" वाच० विवरणम्

गुणसङ्ग पु० गुणेषु गुणकार्य्येषु सुखदुःखादिषु सङ्गः। सुखाद्यासक्तौ "कारणं गुणसङ्गोऽस्य" गीता।

गुणसंख्यान न० गुणाः संख्यायन्तेऽनेन सम्–ख्या करणे ल्युट् ६त०। सांख्यपातञ्जलशास्त्रे।

गुणसम्मूढ त्रि० गुणैः सम्मूढः। गुणकार्य्यदेहादिष्वात्माभिमानवति। "प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु" गीता।

गुणसागर पु० गुणानां सागर इवाधारः। चतुर्मुखे १ब्रह्मणि शब्दच०। २बुद्धभेदे त्रिका० ३गुणाधारे च। शब्दक० अस्य अत्रार्थे त्रिलिङ्गतोक्तिः प्रामादिकी सागरशब्दस्य नियतलिङ्गत्वात् "द्वन्द्वतत्पुरुषयोः" पा० सूत्रेण विशेषं विना उत्तरपदलिङ्गस्य नियमनात्।

गुणा स्त्री गुणोऽस्त्यस्याः अच्। १दूर्वायां २मांसरोहिण्याञ्च राजनि०। तयोर्बहुतन्तुमत्त्वात्तथात्वम्।

गुणाकर पु० ६त०। १बुद्धभेदे शब्दर० २गुणयुक्ते च "तपस्विभिरतस्याथ तस्य पुत्रो गुणाकरः। सत्यवान् नाम देवर्षे!" भा०व० सावित्र्युपाख्याने। गुणसागरशब्दोक्तहेतुना शब्दक० अस्य त्रिलिङ्गतोक्तिः प्रामादिकी।

गुणाढ्य त्रि० गुणैराढ्यः। सद्गुणयुक्ते।

गुणातीत पु० गुणान् सत्वादिगुणधर्म्मान् सुखदुःखादीनतीतः। १परमेश्वरे स्थितप्रज्ञे २आत्मज्ञे च। गुणातीतताकारणसहितं तल्लक्षणमुक्तं गीतायां यथा

"गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान्। जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते। अर्ज्जुन उवाच। कैर्लिङ्गैस्त्रीन् गुणानेतानतीतो भवति प्रभो!। किमाचारः कथं चैतांस्त्रीन् गुणानतिवर्त्तते। श्रीभगवानुवाच। प्रकाशञ्च प्रवृत्तिञ्च मोहमेव च पाण्डव!। न द्वेष्टि संप्रवृत्तानि निवृत्तानि न काङ्क्षति। उदासीनवदासीनो गुणैर्यो न विचाल्यते। गुणा वर्त्तन्त इत्येवं योऽवतिष्ठति नेङ्गते। समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः। तुल्यप्रियाऽप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः। मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः। सर्व्वारम्भपरित्यागी गुणातीतः स उच्यते। माञ्च योऽव्यभिचारेण भक्तियोगेन सेवते। स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते"।

गुणादि "गुणादयोऽवयवाः"। ("अवयववाचिनः परे गुणादयोनान्तोदात्ताः") पा० सूत्रविहितान्तोदात्ततानिषेधनिमित्ते १शब्दगणे। स च गण "गुण अक्षर, अध्याय सूक्तच्छन्दस् मान"। २गुणकर्म्मजातिसमवायविशेषाभावेषु "गुणादिर्निर्गुणक्रियः" भाषा०।

गुणान्वित त्रि० ३त०। १विवेकवैराग्योपरमादिभिर्मोक्षो"पायैरन्विते" "प्रक्षीणदोषाय गुणान्विताय" वेदा०सा० २गुणयुक्ते च।

गुणिका स्त्री गुण इन् स्वार्थे क। शूनाङ्गे उच्छूनदेहे [हारा०।

गुणित त्रि० गुण–आम्रेडने कर्मणि क्त। १आहते ताडिते पूरिते अमरः। "इष्टकृतिरष्टगुणिता व्येका दलिता विभाजितेष्टेन" लीला०।

गुणिन् त्रि० गुण+अस्त्यर्थे इनि। गुणयुक्ते "गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमा यस्य" हितो०।

गुणीभूत त्रि० अगुणः गुणः भूतः गुण+च्वि+भू–क्त। अप्रधानीभूते "गुणीभूता गुणाः सर्वे तिष्ठन्ति हि पराक्रमे" भा०स०१५अ०। च्व्यर्थे कृतादित्वात् समासे उक्तार्थत्वात् ततो न च्विः। तेन गुणभूतोऽप्यत्र। "गुणभूतैरवयवैः समूहः क्रमजन्मनाम्। बुद्ध्या प्रकल्पिताऽभेदः क्रियेति व्यपदिश्यते" हरिः।

गुणीभूतव्यङ्ग्य न० गुणीभूतं व्यङ्ग्यं यत्र। काव्यभेदे तल्लक्षणभेदादि सा०द० उक्तं यथा

"अपरन्तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये। अपरं काव्यं अनुत्तमत्वम् न्यूनतया साम्येन च संभवति। तत्र स्यादितराङ्गं१ काक्वाक्षिप्तं२ञ्च वाच्यसिद्ध्यङ्गम्३ संदिग्धप्राधान्यं४तुल्यप्राधान्य५मस्फुट६मगूढम्७। व्यङ्ग्यमसुन्दरमेवं भेदास्तस्योदिता अष्टौ। इतरस्य रसादेरङ्गं रसादि व्यङ्ग्यं१ यथा। "अयं स रसनोत्कर्षी पीनस्तनविमर्द्दनः। नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः"। अत्र शृङ्गारः करुणस्याङ्गम्। "मानोन्नतां प्रणयिनीमनुनेतुकामस्त्वत्सैन्यसागररवोद्गतकर्णतापः। हा हा कथं नु भवतो रिपुराजधानीप्रासादसन्ततिषु तिष्ठति

कामिलोकः"। अत्रौत्सुक्यत्रासमन्धिसंस्कृतस्य करुणस्य राजविषयरतावङ्गभावः। "जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम्। कृता लङ्काभर्त्तुर्वदनपरिपाटीषु घटना मयाप्तं रामत्वं कुशलवसुता न त्वधिगता"। अत्र रामत्वं प्राप्तमित्यवचनेऽपि शब्दशक्तेरेव रामत्वमवगम्यते वचनेन तु सादृश्यहेतुकतादात्म्यारोपणमाविष्कृत्य तद्गोपनमपाकृतं तेन व्यङ्ग्यं सादृश्यं वाक्यार्थान्वयोपपादकतयाऽङ्गतां नीतम्। काक्वाक्षिप्तं २यथा। "मथ्नामि कौरवशतं समरे न कोपाद्दुःशासनस्य रुधिरं न पिबाम्युरस्तः। संचूर्णयामि गदया न सुयोधनोरू सन्धिं करोतु भवतां नृपतिः पणेन"। अत्र मथ्नाम्येवेत्यादि व्यङ्ग्यं वाच्यस्य निषेधस्य सहभावेनैव स्थितम्। "दीपयन् रोदसीरन्ध्रमेष ज्वलति सर्वतः। प्रतापस्तव राजेन्द्र! वैरिवंशदवानलः"। अत्रान्वयस्य वेणुत्वारोपणरूपो व्यङ्ग्यः प्रतापस्य दवानलत्वारोपसिद्ध्यङ्गम्३। "हरस्तु किञ्चित् परिवृत्तेत्यादौ"। विलोचनव्यापारचुम्बनाभिलाषयोः प्राधान्ये सन्देहः४। "ब्राह्मणातिक्रमत्यागो भवतामेव भूतये। जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते"। अत्र वाच्यस्य परशुरामो रक्षःकुलक्षयं करिष्यतीति व्यङ्ग्यस्य च समं प्राधान्यम्५। "सन्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः। अश्वपदीननृपतौ न सन्धिर्न च विग्रहः"। अत्राश्वपदीनाख्ये नृपतौ दानसामादिमन्तरेण नान्यः प्रशमोपाय इति व्यङ्ग्यं व्युत्पन्नानामपि झटित्यस्फुटम्६। "अनेन लोकगुरुणा सतां धर्मोपदेशिना। अहं व्रतवती स्वैरमुक्तेन किमतः परम्"। अत्र प्रतीयमानोऽपि शाक्यमुनेस्तिर्य्यक्योषिति बलात्कारोपभोगः स्फुटतया वाच्यायमानइत्यगूढम्७। "वाणीरकुडुङ्गुड्डीणसउणिकोलाहलं सुणन्तीए। वर कम्मव्वावडाए सीअन्ति अङ्गाइम्"। अत्र दत्तसंकेतः कश्चिल्लतागहनं प्रविष्टइति व्यङ्ग्यात् शृण्वन्त्याः सीदन्त्यङ्गानि इति वाक्यस्य चमत्कारः सहृदयसंवेद्य इत्यसुन्दरम् ८। किञ्च योदीपकतुल्ययोगितादिषु उपमाद्यलङ्कारो व्यङ्ग्यः स गुणीभूतव्यङ्ग्य एव काव्यस्य दीपकादिमुखेनैव चमत्कारविधायित्वात् तदुक्तं ध्वनिकृता "अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते। तत्परत्वं तु काव्यस्य नासौ मार्गो ध्वनेर्मतः"। यत्र च शब्दान्तरादिना गोपनकृतचारुत्वस्य विपर्य्यासः यथा "दृष्ट्या केशवगोपरागहृतया किञ्चिन्न दृष्टं मया तेनात्र स्खलितास्मि नाथ! पतितां किं नाम नालम्बसे। एकस्त्वं विषमेषु खिन्नमनसां सर्वाबलानां गतिर्गोप्यैवं गदितः सलेशमवताद्गोष्ठे हरिर्वश्चिरम्"। अत्र गोपरागादिशब्दानां गोपे राग इत्यादिव्यङ्ग्यार्थानां सलेशमिति पदेन स्फुटतयाऽवभासः। सलेशमिति पदस्य परित्यागे ध्वनिरेव। किञ्च यत्र वस्त्वलङ्काररसादिरूपव्यङ्ग्यानां रसान्तरे गुणीभावः तत्र प्रधानकृतएव काव्यव्यवहारः तदुक्तं तेनैव "प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम्। धत्ते रसादितात्पर्य्यपर्य्यालोचनया पृथक्" यत्र च "यत्रोन्मदानां प्रमदाजनानामभ्रंलिहः शोणमणीमयूखः। सन्ध्याभ्रमं प्राप्नुवतामकाण्डेऽप्यनङ्गनेपथ्यविधिं व्यधत्त" इत्यादौ रसादीनां नगरीवृत्तान्तादिवस्तुमात्रेऽङ्गत्वं तत्र तेषामतात्पर्य्यविषयत्वेऽपि तैरेव गुणीभूतैः काव्यव्यवहारः"। अस्य भेदसंख्याविस्तरभयात् नोक्तास्तत एवावसेयाः।

गुणेश्वर पु० ६त०। १चित्रकूटपर्वते २सत्त्वादिगुणानां नियामके परमेश्वरे शब्दरत्ना०। गुणेशोऽपि परमेश्वरे।

गुणोत्कर्ष पु० ६त०। गुणातिशये हेमच०। "भूयस्तव गुणोत्कर्षमेते विद्ये करिष्यतः" रामा०बाल० २६अ०।

गुण्ठित त्रि० गुठि—क्त। १आवृते। २गुण्डिते ३कृतधूलिधूसरे च रमानाथः।

गुण्ड पु० गुडि—वेष्टने अच्। १असिपत्रे तृणभेदे राजनि० यस्य कन्दः कशेरु। कशेरुशब्दे विवृतिः। भावे अच्। २चूर्णने पेषणे (गुँड़ाकरा) पु०। कर्मणि अच्। ३चूर्णीकृते त्रि०। [४स्नेहपात्रे च पु० मेदि०।

गुण्डक त्रि० गुडि—ण्वुल्। १मलिने। २धूलौ ३कलोक्तौ

गुण्डकन्द पु० ६त०। कशेरुणि (केशुर)। राजनि०।

गुण्डारोचनिका स्त्री गुण्डा सती रोचना हरिद्रेव इवार्थे कन् (कमंलागुँडि) वृक्षभेदे रत्नमा०।

गुण्डाला स्त्री गुण्डं चूर्णनमालाति आ+ला—णिनि। जलोद्भवायां क्षुपभेदे राजनि०। [लतायाम् राजनि०।

गुण्डासिनी गुण्डा सती आस्ते आस—णिनि। चिपिटा-

गुण्डिक पु० गुण्ड+अस्त्यर्थे ठन्। चूर्णीकृते तण्डुलादौ (गुँड़ि) "गुण्डिकैः सितपीतैश्च मण्डयेन्मृहाङ्गनम्" अनन्तव्रतकथा।

गुण्डिचा स्त्री जगन्नाथक्षेत्रस्थे तस्य रथयात्रानन्तरं सप्ताहं वासार्थे मण्डपभेदे "मण्डपे वासयेत् देवान् गुण्डिचाख्ये मनोहरे" इत्युपक्रमे "विन्दुतीर्थतटे तस्मिन्

सप्ताहानि जनार्द्दनः। तिष्ठेत् पुरा स्वयं रात्रौ वरमेतत् समादिशत्। मत्तीर्थतीरे राजेन्द्र! स्थास्यामि सप्तवासरम्। सर्व्वतीर्थानि तत्रापि स्थास्यन्ति मयि तिष्ठति। तत्र स्नात्वा विधानेन तीर्थे तीर्थोपपावने। सप्ताहं ये प्रपश्यन्ति गुण्डिचामण्डपे स्थितम्। मां च रामं सुभद्रां च मम सायुज्यमाप्नुयुः”। तन्नामनिरुक्तिरपि तत्रोक्ता यथा “सर्व्वपापनियन्तृत्वात् पूज्यत्वात् सर्व्वदैवतैः। गुण्डिचाख्यापि सा प्रोक्ता ब्रह्मतेजोऽवगुण्ठनात्” स्का० पु० उत्क०।

गुण्डित त्रि० गुडि–वेष्टने क्त। रजसाकीर्णे, रूषिते अमरः

गुण्य त्रि० गुण–कर्म्मणि यत्। १गुणनीये पूर्य्ये। “गुण्यस्त्वधोऽधो गुणखण्डतुल्यः”। “गुण्यान्त्यमङ्कं गुणकेन हन्यात्” लीला०। प्रशस्तो गुणोऽस्यास्ति “अन्येभ्योऽपि दृश्यते” वार्त्ति० यत्। २प्रशस्तगुणयुक्ते च। “गुण्याः ब्राह्मणाः” सि० कौ०।

गुत्थ पु० गुत्स+पृषो०। गवेधुकाधान्ये (गड़गडे) रत्नमा०

गुत्थक न० गुच्छेन कायति कै–क पृषो०। ग्रन्थिपर्णे वृक्षे रत्नमा०। [गुच्छशब्दे २५८६पृ० विवृतिः।

गुत्स पु० गुध–स किच्च नि० दत्न। ग्रन्थिपर्णवृक्षे मेदि०।

गुत्सक पु०गुत्स+स्वार्थादौ क। १स्तवके शब्दरत्ना०। गुच्छकशब्दे दृश्यम्। २ग्रन्थपरिच्छेदे त्रिका०। “अथ वाङ्मयभेदाः स्युश्चम्पूः खण्डकथा कथा। आख्यायिका परिकथा कलापकविशेषकौ। सन्धानमनिरुद्धं च प्रकीर्णं गुत्सकादि च। सर्गोवर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः। उच्छ्वासः परिवर्त्तश्च पटलं काण्डमस्त्रियाम्। स्थानं प्रकरणं पर्व्वाह्निकञ्च ग्रन्थसन्धयः” त्रिका०। अत्र गुत्सकादीत्यादिपदात् स्तवकोल्लासादीनां ग्रहणम्। तत्र कुसुमाञ्जलौ स्तवकः, काव्यप्रकाशे उल्लासः। एवमन्यत्रापि यथायथं ग्रन्थनामानुसारेण तदवयववाचकशब्दविशेषेण ग्रन्थसन्धिकरणम् दृश्यते तेषां सर्व्वेषामादिपदग्राह्यता।

गुद खेले भ्वा० आत्म० अक० सेट्। गोदते अगोदिष्ट। जुगुदे। गुदम्।

गुद न० गुद–क। मलत्यागद्वारे अपानवायुनिःसारणद्वारे “तत्र स्थूलान्त्रप्रतिबद्धमर्द्धपञ्चाङ्गुलं गुदमाहुस्तस्मिन् वलयस्तिस्रोऽध्यर्द्धाङ्गुलान्तरभूताः प्रवाहणी १विसर्ज्जनी २संवरणी चेति। “चतुरङ्गुलायताः सर्व्वास्तिर्य्यगेकाङ्गुलोच्छ्रिताः। शङ्खावर्त्तनिभाश्चापि उपर्य्युपरि संस्थिताः। गजतालुनिभाश्चापि वर्णतः सम्प्रकीर्त्तिताः। रोमान्तेभ्यो यवाध्यर्द्धो गुदौष्ठः परिकीर्त्तितः” सुश्रु०। तस्य स्वरूपादिकमुक्तम्।

अस्य प्राणायतनता याज्ञ० उक्ता यथा “नाभिरोजो गुदं शुक्रं शोणितं शङ्खकौ तथा। मूर्द्धांसकण्ठहृदयं प्राणस्यायतनानि च”। अस्य उपसर्ज्जनत्वे क्रोड़ादौ शुकेत्यत्र गुद इति पाठान्तरं तेन स्त्रियां ङीष्। भ्रष्टगुदा इत्येव। २नाड़ीभेदे स्त्री बह्वादि०वा ङीष्टापौ। “आन्त्रेभ्यस्ते गुदाभ्यः” ऋ०१०।१६३।३। “गुदाभ्यः याभिर्नाड़ीभिरन्नरसः समानवायुना धातुषु नीयते ताभ्यो नाड़ीभ्यः” भा०। ३वलयाकारे गुदस्थाने पु०। “उदरं च गुदौ कोष्ठ्यौ विस्तारोऽयमथो शृणु” याज्ञ० “बाह्याद्गुदवलयात् अन्तरे गुदवलये द्वे, तौ च गुदौ कोष्ठ्ये कोष्ठौ नाभेरधोदेशे भवौ” मिता०। वस्तुतः गुदमस्त्यत्र अर्श० अच्। गुदाधारस्थानपरतायामेव त्रिलिङ्गत्वम्। अतएव “गुदाः पात्राणि सूदकामधेनुः” यजु०१८।८६। व्याख्यायाम् वेददी० “गुदाः गुदस्थानानि” इत्युक्तम् “स्थूलगुदया सर्पान् गुदाभिः” यजु०२५।७ मन्त्रव्याख्यायां च तेन गुदपरत्वे क्लीत्वं छान्दसमित्युक्तञ्च सङ्गच्छते “सिन्धवो गुदाः” शत० ब्रा० ६।४। ततः अश्मा० अस्त्यर्थे र। गुदर तद्युक्ते त्रि०।

गुदकील पु० गुदे कील इव। अर्शोरोगे राजनि०। अर्शःशब्दे विवृतिः। “स्थूलकन्दस्तु नात्युष्णः शूरणो गुदकीलहा” सुश्रु० “आनाहमेदोगुदकीलहिक्काश्वासापहो वन्यकुलत्थ एषः” सुश्रु०। स्वार्थे क। तत्रार्थे हला०।

गुदग्रह पु० गुदं तद्व्यापारं गृह्णाति ग्रह–अच् ६त०। उदावर्त्तरोगे हेम०। उदावर्त्तशब्दे ११६२ पृ० दृश्यम्।

गुदपरिणद्ध पु० ऋषिभेदे तस्यापत्यम् इञ्। गौदपरिणद्धि तदपत्ये तस्य वकनखेन द्वन्द्वे इञो लुक् बहुत्वे। वकनखगुदपरिणद्धाः।

गुदपाक पु० ६त०। अतिसारादिजनिते गुदस्थानस्य पूयादिनिःस्रावहेतौ पाके। “असंवृतगुदं क्षीणोदराध्मानादुपद्रुतम्। गुदे पक्वे गतोष्माणञ्चातीसारकिणं त्यजेत्” सुश्रु०। “मांसपाकेन बध्यन्ते गुदपाके च दारुणे” “गुदपाके तु बालानां पित्तघ्नीं कारयेत् क्रियाम्” “गुदपाकस्तु पित्तेन यस्य स्यादहिताशिनः” सुश्रु०।

गुदभ्रंश पु० “प्रवाहणातिसाराभ्यां निर्गच्छति गुदं बहिः। रूक्षदुर्बलदेहस्य गुदभ्रंशं तमादिशेत्” गुदभ्रंशमिमं कृच्छ्रं पानाभ्यङ्गात् प्रसाधयेत्” सुश्रुतोक्ते रोगभेदे।

गुदरोग पु० ६त०। गुदस्थानभवे भगन्दरार्शोभिन्ने रोगे तस्य च शातातपेन "सुरालये जले वाऽपि शकृन्मूत्रं करोति यः। गुदरोगो भवेत्तस्य पापरूपः सुदारुणः" इति कर्म्मविपाकविशेषमुक्त्वा "मासं सुरार्चनेनैव गोदानद्वितयेन च। प्राजापत्येन चैकेन शाम्यन्ति गुदजा रुजा" भगन्दरार्शसोः पृथगुक्तत्वात्तद्भिन्नता ज्ञेया

गुदवर्त्मन् न० गुदरूपं वर्त्म। गुदरूपे मलद्वारे जटा०।

गुदस्तम्भ पु० ६त०। गुदव्यापारस्य मलनिःसारणस्य प्रतिरोधे रोगभेदे। "अन्ययोनौ च गमनाद् गुदस्तम्भः प्रजायते। सहस्रकमलैः स्नानं मासं कुर्य्यात् शिवस्य च" शातातपः।

गुदाङ्कुर पु० गुदेऽङ्कुर इव। अर्शोरोगे हेमच०।

गुदौष्ठ पु० गुदस्य ओष्ठ इव। गुदावयवभेदे गुदशब्दे दर्शिते सुश्रुतवाक्ये तत्स्वरूपादि।

गुद्र मिथ्याकथने चुरा० उभ० सक० सेट् इदित्। गुन्द्रयति अजुगुन्द्रत्-त। गुन्द्रयां—बभूव आस चक्रे। गुन्द्रा।

गुध रोषणे क्र्या० पर० सक० सेट्। गुध्नाति अगोधीत्। जुगोध। सेट्कत्वेऽपि न गुणः गुधित्वा। गुद्धः।

गुध क्रीडे भ्वा० आत्म० अक० सेट्। गोधते अगोधिष्ट। जुगुधे

गुध वेष्टने दिवा० पर० सक० सेट्। गुध्यति अगोधीत्। जुगोध गुधित्वा।

गुधेर त्रि० गुध वेष्टने एरक्। गोप्तरि उज्ज्वलदत्तः।

गुन्दल पु० गुमित्यव्यक्तशब्देन दल्यतेऽसौ दल—णिच्—कर्म्मणि अच्। मर्द्दलशब्दे हेमच०।

गुन्द्र पु० गुद्रि—कर्म्मणि अच्। १शरतृणे (गोपटेर) वृक्षे अमरः। "गुन्द्रः कषायो मधुरः शिशिरः पित्तरक्तजित्। स्तन्यशुक्ररजोमूत्रशोधनो मूत्रकृच्छ्रजित्" भावप्र०। २भद्रमुस्तके ३प्रियङ्गुवृक्षे च स्त्री अमरः। ४गवेधुकायां स्त्री रत्नमाला ५एरकायां स्त्री भावप्र०। [भावप्र०।

गुन्द्रमूला स्त्री गुन्द्रस्य मूलमिव मूलमस्याः। एरकातृणे

गुन्द्रला स्त्री गुन्द्रं मिथ्यावचनं लाति ला—क। जीवञ्जीवखगे चकोरके हेमच०।

गुन्फ ग्रन्थे तु० प० सक० सेट्। गुम्फति अगुम्फीत्। जुगुम्फ। गुम्फन् गुफितः गुम्फित्वा—गुफित्वा। नोपधत्वात् क्विपि गुन् गुनौ इत्यादि।

गुप गोपने सक० आत्म० सेट् कुत्सने स्वार्थे सन् अनिट्। कुत्सनमिह कुत्सापूर्व्वकनिर्द्देशस्तत्र अक० निन्दनस्य तत्र सक०। पापात् जुगुप्सते अजुगुप्सिष्ट। जुगुप्सां बभूव आस चक्रे जुगुप्सितः। गोपने गोपते अगोपिष्ट जुगुपे। "आच्छिधानैर्गुपितो बार्हतैः सोमरक्षितः" ऋ० १०।८५।१। "तया राष्ट्रं गुपितं क्षत्रियस्य" १०।१०९।३। तत्र निन्दार्थत्वे "जुगुप्सेरन्न चाप्येनम् संवसेयुश्च सर्व्वशः" मनुः "यदा बुध्यति बोद्धव्यं लोकवृत्तं जुगुप्सते" भा० व० २११अ०।

गुप रक्षणे भ्वा० सक० पर० वेट् स्वार्थे सार्व्वधातुके नित्यमायः आर्द्धधातुके वा। गोपायति अगोपायीत् अगोपीत् अगोप्सीत्। गोपायाम्—बभूव आस चकार जुगोप। गोपायितः गुप्तः। गुप्तिः गोपायनम् गोपनम्। "जुगोपात्मानमत्रस्तः" रघुः। "आत्मानं सततं गोपायीत" श्रुतिः "जुगोप गोरूपधरामिवोर्वीम्" रघुः। "नैनं गोप्स्यति दुर्बुद्धिमद्य बाणहतं मया" भा० भी० २८६२श्लो० "अगोपिष्टां पुरीलङ्कामगौप्तां रक्षसां बलम्" भट्टिः। "यस्य वाङ्मनसी शुद्धे सम्यग्गुप्ते च सर्व्वदा" मनुः।

गुप व्याकुलत्वे दिवा० अक० पर० सेट् इरित्। गुप्यति अगुपत् अगोपीत् जुगोप। गुपितः।

गुप भासने चुरा० उभ० अक० सेट्। गोपयति ते अजूगुपत् त। गोपयाम् बभूव आस चकार चक्रे। चतुर्णां गुपधातूनामुदाहरणं कविरहस्ये यथा "गोपायति क्षितिमिमां चतुरब्धिसीमां पापाज्जुगुप्सत उदारमतिः सदैव। वित्तं न गोपयति यस्तु वणीयकेभ्यो धीरो न गुप्यति महत्यपि कार्य्यजाते"।

गुपिल पु० गुप इलच् किच्च। १नृपे उज्ज्वल० २रक्षके त्रि०।

गुप्त त्रि० गुप—कर्म्मणि क्त। १त्राते रक्षिते २गूढे संवृते च अमरः। "स गुप्तमूलप्रत्यन्तः" रघुः। ३सङ्गरे पु० शब्दरत्ना०। "गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः" उद्वा० त० उक्ते ४वैश्योपनामभेदे पु०। ५कपिकच्छ्वां स्त्री राजनि०। ६परकीयायां नायिकायां स्त्री। "गुप्ताविदग्धालक्षिताकुलटानुशयानामुदिताप्रभृतीनां परकीयायामेवान्तर्भावः तत्र गुप्ता त्रिविधा वृत्तसुरतगोपना वर्त्तिष्यमाणसुरतगोपना वर्त्तमानसुरतगोपना चेति विभज्य रसमञ्जर्य्यां तिसृणामेकत्र पद्ये उदाहृतिः यथा "श्वश्रूः क्रुध्यतु निर्दहन्तु सुहृदो निन्दन्तु वा यातरस्तस्मिन्नद्य न मन्दिरे सखि! पुनः स्वापो विधेयो मया"। आखोराक्रमणाय कोणकुहरादुत्कालमातन्वती मार्ज्जारी भखरैः खरैः क्षतवती कां कां न मे दुर्दशाम्"। ७रक्षितायां क्रियायाञ्च (राखनी) स्त्री "ब्राह्मणी यद्यगुप्तां तु सेवेतां

ह्यपार्थिवौ’’ मनुः ८परमेश्वरे पु० “गुप्तश्चक्रगदाधरः” विष्णुस० “वाङ्मनसयोरगोचरत्वात् गुप्तः “एष सर्वेषु भूतेषु गूढ़ोत्मा न प्रकाशते’’ इति श्रुतेः’’भा०।

गुप्तक पु० जयद्रथसेनानीभेदे। “अङ्गारकः कुञ्जरो गुप्तकश्च शत्रुञ्जयः सृञ्जयसंपद्दौ” भा० आ० २६४अ०। स्वार्थे क। २गुप्तार्थे त्रि०। [२गूढ़गमने त्रि०।

गुप्तगति पु० गुप्ता गतिर्यस्य। अपसर्पे १गुप्तचरे शब्दार्थचि०।

गुप्तचर त्रि० गुप्तश्चरो यस्य। १गूढ़भावेन चरणेरके। २बलभद्राख्ये यदुवंश्ये पु० त्रिका०। कर्म्म०। ३गूढ़े दूतभेदे पु०

गुप्तस्नेह पु० गुप्तः स्नेहोऽत्र। १अङ्कोटवृक्षे राजनि०। कर्म्म०। २गूढ़े स्नेहे “गुप्तस्नेहकरी(इष्टिः)तृतीयभवने’’ नीलकण्ठताजकम्।

गुप्ति स्त्री गुप–भावे क्तिन्। १गोपने “भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था’’ सा० द०। २संवरणे “बृहन्मणिशिलासालं गुप्तावपि मनोरमम्’’ कुमा०। “असिधारासु कोषगुप्तिः” काद०। “स्थानं समुदयं गुप्तिं लब्धप्रशमनादिकम्’’मनुः। ३रक्षणे “सर्वस्यास्य तु सर्गस्य गुप्त्यर्थं स महाद्युतिः’’ (ईश्वरः)मनुः। ४पाठ्यमन्त्रसंस्कारभेदे तन्त्रसा० ‘गौतमीये “जननं जीवनं पश्चात् ताड़नं बोधनं तथा। तथाभिषेको विमलीकरणाप्यायने पुनः। तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः’’ इति विभज्य “जप्यमानस्य मन्त्रस्य गोपनं त्वप्रकाशनम्’’ इति लक्षितम्। आधारे क्तिन्। ५अवस्करस्थाने ६कारागारस्थाने मेदि०। “चिरमतिरसलौल्यात् बन्धनं लम्भितानां पुनरयमुदयाय प्राप्य धाम स्वमेव। दलितदलकपाटः षट्पदानां सरोजे सरभस इव गुप्तिस्फोटमर्कः करोति” माघः ७भूगर्त्ते। करणे क्तिन्। ८अहिंसादौ योगाङ्गे यमे च हेमच०। ९गर्त्तार्थं क्षितेरुत्खनने १०नौकाच्छिद्रे भरतः।

गुफ ग्रन्थे तुदा० पर० सक० सेट् मुचा०। गुम्फति अगोफीत् जुगोफ।

गुफित त्रि०गुफ–गुन्फ–वा कर्म्मणि क्त। ग्रथिते अमरः।

गुम्फ ग्रन्थने तुदा० पर० सक० सेट्। गुम्फति अगुम्फीत्। जुगुम्फ गुम्फितः। नोपधत्वात् गुम्फित्वा किपि गुन् गुभौ गुभ इति। [च शब्दरत्ना०।

गुम्फ पु०गुम्फ–घञ्।१ग्रन्थने, २बाहोर्भूषणे मेदि०३स्मश्रुणि

गुम्फना स्त्री गुम्फ–युच्। “वाक्ये शब्दार्थयोः सम्यग्रचना गुम्फना स्मृता” इत्युक्तायां १वाक्यस्य चारुरचनायाम्। २ग्रन्थने च (गाथा) भावे ल्युट्। २ग्रन्थने न०।

गुम्फित त्रि० गुम्फ–क्त। सूत्रादिना ग्रथिते, अमरः।

गुर बधे गत्याञ्च दिवा० आत्म० सक० सेट्। गूर्य्यते अगोरिष्ट। जुगोर। ईदित् गूर्णः। गोरणम्।

गुर उद्यमे तुदा० कुटा० आत्म० अक० सेट्। गुरते अगुरिष्ट जुगोर गुरणम् ईदित् गूर्णः। वेदे तु नि०गूर्त्त इत्येव। “इषो हवो गूर्त्ततमाः” ऋ० १।१६७।१। “गूर्त्तौ रुषसः शरदश्च गूर्त्ताः’’ ऋ० ४।१९।८। ‘अवगूर्य्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने” स्मृतिः। “यो ब्राह्मणायावगुरेत् तं शतेन यातयात्” श्रुतिः छान्दसः पदव्यत्ययः। एवं “न कदाचिद् द्विजे तस्माद्विद्वानवगुरेदपि’’ मनुः।

गुरण न० कुटा०गुर–भावे ल्युट्। हननाद्यर्थमुद्यमे अमरः। दैवादिकस्य गोरणमित्येव। तच्च बधे गत्याञ्च। अव+गोरणं हननार्थमुद्यमे इति भेदः।

गुरु पु० गिरत्यज्ञानं गृणात्युपदिशति धर्म्मं गॄ–गिरणे, गॄ–शब्दे कर्त्तरि, गीर्य्यते स्तूयते वा कर्मणि वा कु उच्च। १बृहस्पतौ देवाचार्य्ये अमरः। “गुरुकाव्यानुगां बिभ्रत्’’ माघः। “गुरोर्भृगोरस्तबाल्ये’’नीचस्थे सिंहगे गुरौ’’ ज्यो०त०। २प्रभाकराख्ये मीमांसकभेदे तस्य तन्नामता यथा “अत्र तु नोक्तम् तत्रापिनोक्तम् अतः पौनरुक्त्यम्”इत्यत्र स्वगुरोः संशये जाते प्रभाकरेण तदसन्निधाने तत्पुस्तके तुना, अपिना, इति पदच्छेदः कृतः उत्तरकाले गुरुणा तद्दृष्ट्वा केनेदृशः पदच्छेदः कृतः इति पृष्टे अन्यशिष्यद्वारा प्रभाकरकृतत्वं निश्चित्य तस्य संशयापनोदकत्वात् गुरुरिति संज्ञा कृतेति आख्यायिका “गुरोर्गिरः पञ्चदिनान्यधीत्य”सा०द०। “अर्थापत्तिर्गुरूणाम्’’ शब्द०प्र०। “निषेकादीनि कर्म्माणि यः करोति यथाविधि। सम्भावयति चान्नेन स विप्रो गुरुरुच्यते”मनूक्ते—“स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति” याज्ञ० उक्ते च निषेकादिक्रियाकर्त्तरि ३पितरि प्रायश्चित्तविवे०। “न केवलं तद्गुरुरेकपार्थिवः’’रघुः गुरुतल्पगशब्दे विवृतिः। ‘अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः। तमपीह गुरुं विद्यात् श्रुतोपक्रियया तया”मनूक्ते शास्त्रोपदेशके ४आचार्य्यादौ तद्विषये“ पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः। गुरुराहवनीयस्तु साग्नित्रेता गरीयसी’’ इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम्। गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते’’ मनुः। “तौ गुरुर्गुरुपत्नी च’’ रघुः। “आचार्य्यश्च पिता ज्येष्ठो भ्राता चैव महीपतिः। मातुलः श्वशुरस्त्राता मातामहपितामहौ।

वर्णज्येष्ठः पितृव्यश्च पुंस्येते गुरवो मताः" देवलोक्तेषु ५एकादशसु आचार्य्यादिषु "अनेनैकादशगुरवः सङ्कीर्तिताः" प्रा० वि०। गुरुतल्पगशब्दे विवृतिः।

"उपाध्यायः पिता ज्येष्ठभ्राता चैव महीपतिः। मातुलः श्वशुरस्त्राता मातामहपितामहौ। वर्णज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः। मातामही मातुलानी माता मातुश्च सोदराः। श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवः स्त्रीषु। इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विजाः!। अनुवर्त्तनमेतेषां मनोवाक्कायकर्मभिः। गुरुं दृष्ट्वा समुत्तिष्ठेदभिवाद्य कृताञ्जलिः। नैतैरुपविशेत् सार्द्धं विवदेन्नात्मकारणात्। जीवितार्थमपि द्वेषाद्गुरुभिर्नैव भाषणम्। उदितोऽपि गुणैरन्यैर्गुरुद्वेषी पतत्यधः। गुरूणाञ्चैव सर्वेषां पूज्याः पञ्च विशेषतः। तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता। यो भावयति या सूते येन विद्योपदिश्यते। ज्येष्ठभ्राता च भर्त्ता च पञ्चैते गुरवः स्मृताः। आत्मनः सर्वयत्नेन प्राणत्यागेन वा पुनः। पूजनीया विशेषेण पञ्चैते भूतिमिच्छता" कूर्म० पु०११अ०। उक्ते पुंस्त्रीभेदेन ६उपाध्यायादौ यथायथं पुंस्त्री०।

"तथापि तन्मय्यपि ते गुरुरित्यस्ति गौरवम्"माघः। कृष्णं प्रति तत्पितृव्योद्धवोक्तिः"गुरुद्वयाय गुरुणोरुभयोरथ कार्य्ययोः" माघे ज्येष्ठभ्रातृपितृव्यपरता। ७सम्प्रदायप्रवर्त्तके ८धर्म्मोपदेशके ९कपिकच्छूवृक्षे राजनि०। "सानुस्वारो विसर्गान्तो दीर्घोयुक्तपरश्च यः। वा पादान्ते त्वसौ" वृ०र० उक्ते १०दीर्घवर्णादौ। "अगुरुचतुष्कं भवति गुरू द्वौ घनकुचयुग्मे शशिवदनासौ" श्रुतबोध० "गुरुमतोऽनृच्छेत्यादि""गुरोश्च हलः"पा० ११महति त्रि० शापे गुरुणि गुरूणि" प्रा०त०। १२दुर्ज्जरे १३दुष्पाके त्रि० "तत्फलं (प्रियङ्गुफलम्) मधुरं रूक्षं कषायं शीतलं गुरु" भावप्र०। १४अलघुनि गुरुत्ववति त्रि० मेदि०। "कार्य्ये गुरुण्यात्मसमं नियोक्ष्ये"कुमा०। "नारदस्तु जगतो गुरुरुच्चैर्विस्मयाय गगनं विललङ्घे" नैष० "गुरुणी द्वे रसवती"भाषा० स्त्रियां ङीप्। "अलाबूर्भेदिका गुर्वी" वैद्यकम्। "इयमतिजरठा प्रकाम गुर्वी"माघः। गुरुत्वं च गुरुत्वशब्दे दृश्यम् १५तान्त्रिकमन्त्रोपदेष्टरि पु० तल्लक्षणादि शा०ति० "मातृतः पितृतः शुद्धः शुद्धभावो जितेन्द्रियः। सर्वागमानां तत्त्वज्ञः सर्वशास्त्रार्थतत्त्ववित्। परोपकारनिरतो जपपूजादितत्परः। अमोघवचनः शान्तो वेदवेदार्थपारगः। योगमार्गानुसन्धाता देवताहृदयङ्गमः। इत्यादिगुणसम्पन्नो गुरुरागमसम्मतः" वर्ज्यागुरवोराघवभट्टधृतवचनैरुक्ताः यथा

"नातिबालोन वृद्धश्च न खञ्जो न कृशस्तथा। नाधिकाङ्गोन हीनाङ्गो न खल्लाटोन दन्तुरः"। वीरमित्रोदयधृतकल्पचिन्तामणौ "क्षयरोगी च दुश्चर्मा कुनखी श्यावदन्तकः। काणोऽन्धः कुसुमाक्षश्च खल्वाटः खञ्जरीटकः"

"अङ्गहीनोऽतिरिक्ताङ्गः पिङ्गाक्षः पूतिनासिकः। ह्रस्वाण्डोवामनः कुब्जः श्वित्री चैव नपुंसकः"। पूतिनासिकोदुर्गन्धिनासिकः। "संस्काररहितोमूर्खो वेदशास्त्रविवर्ज्जितः। श्रौतस्मार्त्तक्रियाशून्यः शुष्कभाषः सुकुत्सितः। पुरयाजनजीवी च नरो वैद्यश्च कामुकः। क्रूरो दम्भी मत्सरी च व्यसनी कृपणः खलः। कुसङ्गी नास्तिको भीतो महापातकचिह्नितः। देवाग्निगुरुविद्यादिपूजाविधिपराङ्मुखः। सन्ध्यातर्पणपूजादिमन्त्रज्ञानविवर्ज्जितः। आलस्योपहतो भोगी धर्महीन उपश्रुतः। इत्याद्यैर्बहुभिर्दोषैरागमोक्तैश्च यत्नतः। वर्जनीयोगुरुः प्राज्ञैर्दीक्षासु स्थापनादिषु"। मत्स्यसूक्ते त्रयोदशपटले"अपुत्त्रश्चासपत्नीकः शक्तिहीनोऽथ वामनः। कुब्जः कुष्ठः श्यावदन्तो वृषलीपतिरेव च" तन्त्रसारे रामार्च०च० सदसद्गुरुलक्षणे यथा

"शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेशवान्। शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान्। अध्यात्मध्याननिष्ठश्च मन्त्रतन्त्रविशारदः। निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते। आगमसंहितायाम् "उद्धर्त्तुञ्चैव संहर्त्तुं समर्थो ब्राह्मणोत्तमः। तपस्वी सत्यवादी च गृहस्थो गुरुरुच्यते" इति।

गुरुरपि गृहस्थ एव यथाह ज्ञानार्णवे। "सर्वशास्त्रार्थवेत्ता च गृहस्थो गुरुरुच्यते" गृहस्थेषु पुत्रवतामेवाधिकारः यथा यामले "कलत्रपुत्रवान् विप्रो दयालुः सर्वसम्मतः। दैवे पित्र्येऽरिमित्रे च गृहस्थो देशिको भवेदिति" मुण्डमालायाम् "मध्यमो वैष्णवः प्रोक्तो मध्यमशैवदीक्षितः। परमादीक्षितो यो वै स एव परमो गुरुः"

आगमसारे "गकारः सिद्धिदः प्रोक्तो रेफः पापस्य दाहकः। उकारः शम्भुरित्युक्तस्त्रितयात्मा गुरुः स्मृतः। गकारो ज्ञानसम्पत्त्यै रेफस्तत्त्वप्रकाशकः। उकारात् शिवतादात्म्यं दद्यादिति गुरुः स्मृतः"। निन्द्यगुरुमाह क्रियासारसमुच्चये "श्वित्री चैव गलत्-

कुष्ठी नेत्ररोगी च वामनः। कुनखी श्यावदन्तश्च स्त्रीजितश्चाधिकाङ्गकः। हीनाङ्गः कपटी रोगी बह्वाशी बहुजल्पकः। एतैर्दोषैर्विहीनो यः स गुरुः शिष्यसम्मतः" यामले "अभिशस्तमपुत्रञ्च कदर्यं कितवं तथा। क्रियाहीनं शठञ्चापि वामनं गुरुनिन्दकम्। जलरक्तविकारं च वर्ज्जयेन्मतिमान् सदा। सदा मत्सरसंयुक्तं गुरुं मन्त्रेषु वर्ज्जयेत्"। वैशम्पायनसंहितायाम् "अपुत्रो मृतपुत्रश्च कुब्जश्च रोषणस्तथा"। सम्बन्धभेदाद्वर्ज्यतामाह योगिनीतन्त्रे "पितुर्मन्त्रं न गृह्णीयात् तथा मातामहस्य च। सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च" तथा गणेशविमर्षिण्याम् "यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः। विविक्ताश्रमिणो दीक्षा न सा कल्याणदायिका" अस्यापवादः शक्तियामले "तीर्थाचारव्रतो मन्त्री ज्ञानवान् सुसमाहितः। नित्यनिष्ठो यतिः ख्यातो गुरुः स्याद्भौतिकोऽपि च" रुद्रयामले "न पत्नीं दीक्षयेद्भर्त्ता न पिता दीक्षयेत् सुताम्। न पुत्रञ्च तथा भ्राता भ्रातरं न च दीक्षयेत्। सिद्धमन्त्रो यदि पतिस्तदा पत्नीं स दीक्षयेत्। शक्तित्वेन वरारोहे! न च सा पुत्रिका भवेत्"। इत्यादिनिषेधवचनात् एभ्यो मन्त्रं न गृह्णीयात्। इदन्तु सिद्धमन्त्रेतरविषयं "सिद्धमन्त्रो न दुष्यतीति" वचनात् तथा च सिद्धयामले "यदि भाग्यवशेनैव सिद्धविद्यां लभेत् प्रिये!। तदैव तान्तु दीक्षेत त्यक्त्वा गुरुविचारणाम्" गणेशविमर्षिण्याम् "प्रमादाच्च तथाऽज्ञानात् पितुर्दीक्षां समाचरन्। प्रायश्चित्तं ततः कृत्वा पुनर्दीक्षां समाचरेत्"। पितुरित्युपलक्षणं मातामहादीनामपि। प्रायश्चित्तन्तु अयुतसावित्रीजपः सर्वत्र तथा दर्शनात् तथा च शङ्खः "दशसाहस्रजप्येन सर्वकल्मषनाशिनी"। मत्स्यसूक्ते "निर्वीर्यञ्च पितुर्मन्त्रं शैवे शाक्ते न दुष्यति" इति वचनं कौलिकमन्त्रदीक्षापरम् योगिनीतन्त्रे "शक्तिविद्यामधिकृत्य ततो दीक्षानिषेधात्। यद्वा शाक्ते तारादिविद्यायां न दोषः मत्स्यसूक्ते "निजकुलतिलकाय ज्येष्ठपुत्राय दद्यात्" इति तारामधिकृत्य तथा प्रतिपादनात्। मौक्तेऽपि "मनुर्विमृश्य दातव्यो ज्येष्ठपुत्राय धीमते" उत्तरषट्के च "अयोग्याय न दातव्यमित्याज्ञा परमेश्वरि!। सुशीलाय विनीताय ज्येष्ठपुत्राय धीमते। अनन्तदायिशिष्याय देव्या [illegible] प्रदीयते"। तदुक्तं "कथमपि मनुमेनं प्राप्य पित्राय तस्मै निजकुलतिलकाय ज्येष्ठपुत्राय दद्यादिति" ताराविषयं मत्स्यसूक्ते ताराप्रकरणे तथा दृष्टेः महातीर्थे उपरागे सति सर्वत्र न दोषभाक् तथा च विष्णुमन्त्रमधिकृत्य "साधु पृष्टं त्वया ब्रह्मन् वक्ष्यामि सकलन्तव। ब्रह्मणा कथितं पूर्वं वशिष्ठाय महात्मने। वशिष्ठोऽपि स्वपौत्राय मत्पित्रे दत्तवान् स्वयम्। प्रसन्नहृदयः स्वच्छः पिता मे करुणानिधिः। कुरुक्षेत्रे महातीर्थे सूर्यपर्वणि दत्तवान्" इत्यादि वैशम्पायनसंहितायां शौनकं प्रति व्यासवाक्यम्। योगिनीतन्त्रे "निर्वीर्यञ्च पितुर्मन्त्रं तथा मातामहस्य च। स्वप्नलब्धं स्त्रिया दत्तं संस्कारेणैव शुध्यति"। यत्तु "साध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रिया। सर्वतन्त्रार्थतत्त्वज्ञा सुशीला पूजने रता। गुरुयोग्या भवेत् सा हि विधवा परिवर्ज्जिता। स्त्रियो दीक्षा शुभा प्रोक्ता मातुश्चाष्टगुणा स्मृता"। तत्तु गुरोरुपासितमन्त्रपरम्। तथा च भैरवीतन्त्रे "स्वीयमन्त्रोपदेशे तु न कुर्य्यात् गुरुचिन्तनम्"। मातुरिति उपासितेऽष्टगुणं अनुपासिते शुभफलदमित्यर्थः। सिद्धमन्त्रविषयं चेति केचित्। वस्तुतस्तु योगिनीतन्त्रे स्त्रीपदं विधवापरं एकवाक्यताबलात्। अत्र विधवापदम् अवीरापरम्। "विधवायाः सुतादेशात् कन्यायाः पितुराज्ञया। नाधिकारोयतोनार्य्या भार्य्याया भर्त्तुराज्ञया" इत्युक्तौ न्यायवचनात् नाधिकार इति स्वातन्त्र्येण नाधिकारः। योगिनीतन्त्रे "स्वप्नलब्धे तु कलसे गुरोर्मूर्त्तिं निवेशयेत्। वटपत्रे कुङ्कुमेन लिखित्वा ग्रहणं शुभम्। ततः शुद्धिमवाप्नोति अन्यथा विफलं भवेत्"। इदन्तु सद्गुरोरभावे तत्सम्भवे तस्मादेव गृह्णीयात् "स्वप्ने तु नियमो नहीति" नारदवचनात्। तथा विद्याधराचार्य्यधृतवचनम् "मध्यदेशे कुरुक्षेत्रनाटकोङ्कणसम्भवाः। अन्तर्वेदिप्रतिष्ठानाः आवन्त्याश्च गुरूत्तमाः। मध्यदेश आर्य्यावर्त्तः। "गौड़ाः शाल्वोद्भवाः सौराः मागधाः केरलास्तथा। कोशलाश्च दशार्णाश्च गुरवः सप्त मध्यमाः। कर्णाटनर्म्मदाराढकच्छातीरोद्भवास्तथा। कालिङ्गाश्च कलिङ्गाश्च काम्बोजाश्चाधमा मताः। वैष्णवे वैष्णवो ग्राह्यः शैवे शैवश्च शाक्तिके। शैवः शाक्तोऽपि सर्वत्र दीक्षास्वामी न संशयः" नित्यातन्त्रे "गुरुं न मर्त्यं ध्यायेत यदि बुध्येत तस्य तु। न कदाचिद्भवेत् सिद्धिर्न मन्त्रैर्देवपूजनैः" १६परमेश्वरे पु०। "गुरुर्गुरुतमोधाम" विष्णुस०। सर्वविद्यानामुपदेष्टृत्वात् सर्वेषां जनकत्वाद्वा गुरुः" भा०। "पूर्वेषामपि गुरुः कालेनानवच्छेदात्" पात० सू०। १७गम्भीरार्थे १८बलवति १९पूज्ये च त्रि०। २०द्रोणाचार्य्ये

पु॰ शब्दार्थचि॰ २ पुष्यनक्षत्रे तस्य गुर्वधिष्ठातृकत्वात् "भृगुगुरुकरमूलापौष्णभान्यर्कवारे" ज्यो॰त॰। स्वार्थे क। भारातिशययुक्ताद्यर्थे। "ततो युधिष्ठिरस्तस्य गुरुकः समपद्यत। स तु भाराभिभूतात्मा न तथाशीघ्रगोऽभवत्" भा॰ व॰ १५७ अ॰। "अतिमात्रं लघूनि स्युर्गात्राणि गुरुकाणि च"। "गुरुकावस्थिरावूरू न स्वाविव च मन्यते" सुश्रुतः।

गुरोर्भावः इमनिच् गरादेशः गरिमन् पु॰ अण् गौरव न॰ तल् गुरुता स्त्री त्व गुरुत्व न॰। गुरुभावे पतनासमवायिकारणतावति गुणभेदे। अतिशयेन गुरु इष्ठन्, ईयसुन् गरादेशः। गरिष्ठ गरीयस् अतिगुरौ त्रि॰ ईयसुनि स्त्रियां ङीप्। गुरुं करोति णिच् गरादेशः गरयति।

गुरुकुण्डली स्त्री गुरुर्जीवः प्रधानमत्र तादृशी कुण्डली चक्रभेदः। जन्मनक्षत्रभेदेन जन्मावध्येकैकवर्षाधिपज्ञापके चक्रभेदे तत्र हि चक्रे गुरोर्मध्यस्थित्या इतरेषामष्टानां ग्रहाणामष्टदिक्षु स्थित्या च गुरुप्रधानत्वं तत्स्वरूपफलाद्युक्तं पञ्चस्वरायां यथा

"रविश्चन्द्रकुजः सौम्यो गुरुः शुक्रः शनैश्चरः। राहुः केतुश्च विज्ञेया सर्वथा गुरुकुण्डली। कृत्तिकादीनि ऋक्षाणि त्रिरावृत्ति क्रमान्न्यसेत्। जन्मर्क्षं खेचरे यत्र जन्माद्यब्दास्ततः क्रमात्"। कुण्डलीद्वयस्य फलमाह। शुभं विधौ बुधे च स्यात् मरणं राहुमन्दयोः। गुरुद्वये महासौख्यं दुःखं स्याद्भौमसूर्य्ययोः"। "पताकी कुण्डली केतोः कुण्डली च वृहस्पतेः। सर्वत्र पापसंयोगे संशयो जायते महान्"।

गुरुक्रम पु॰ गुरुरेव क्रमो यत्र। पारम्पर्य्योपदेशे हला॰।

गुरुगीता स्त्री गुरुस्तवनभूता गीता। गीताभेदे।

गुरुघ्न पु॰ गुरुं गुरुतां हन्ति हन–टक्। १ गौरसर्षपे राजनि॰ २ गुरुहन्तरि त्रि॰ स्त्रियां ङीप्। [पृषो॰। तिलमयूरे त्रि॰।

गुरुघटक पु॰ गुरुं गुरुतां दुर्जरतां घटति घटि–क्षये ण्वुल्

गुरुतम त्रि॰ अतिशयेन गुरुः। १ अतिगुरौ "त्रयः पुरुषस्यातिगुरवो भवन्ति माता पिता चार्य्यश्चेति" विष्णूक्ते २ मात्रादौ ३ अतिगुरुत्ववति च। ४ परमेश्वरे पु॰। "गुरुर्गुरुतमो धामसत्यः सत्यपराक्रमः" विष्णुस॰। "विरिञ्चादीनामपि ब्रह्मविद्याप्रवर्त्तकत्वात् गुरुतमः। "यो वै ब्रह्माणं विदधाति पूर्वं यश्चास्मै प्रहिणोति वेदम्" इति श्रुतेः भा॰। "पूर्वेषामपि गुरुः कालेनानवच्छेदात्" पात॰ सू॰। तस्य सर्वेषां गुरूणामुपदेष्टृत्वात् गुरुतमत्वमुक्तम्।

गुरुतल्प पु॰ गुरोः पितुस्तल्पं तल्पं भार्य्या यस्य। १ विमातृगन्तरि। स च महापातकी तत्प्रायश्चित्तमाह स्म मनुः। "गुरुतल्पोऽभिभाष्यैनस्तप्ते स्वप्यादयोमये। सूर्म्मीं ज्वलन्तीं वाश्लिष्येन्मृत्युना स विशुध्यति" "मातृगमनं दुहितृगमनं स्नुषागमनमित्यतिपातकानीति विष्णुहारीताभ्यां स्वमातृगमनस्यातिपातकत्वेनाभिधानात् परिशेषात् गुरुतल्पपदं विमातृपरम् यथा च गुरुशब्दस्यात्र पितृमात्रपरता तथा गुरुतल्पगशब्दे वक्ष्यते। ६ त॰। २ गुरुभार्य्यायाम् "गत्वैतदेव कुर्वीत गुरुतल्पमकामतः" प्रा॰वि॰व्यासः। "ब्रह्महत्या सुरापानं गुरुतल्पगमनं ब्राह्मणस्वर्णहरणं द्विजातीनां महापातकम्" च्यवनः।

गुरुतल्पग पु॰ गुरोः पितुस्तल्पं भार्य्यां गच्छति गम–ड। विमातृगन्तरि स च महापातकी। महापातकमध्ये गुरुतल्पगमनमुक्तं तत्र गुरुतल्पशब्दार्थनिर्णये बहूनि मतानि सन्ति तानि च पूर्वपक्षीकृत्य निरस्य विमातृगमनपरत्वं प्रा॰ विवेके निर्णीतं यथा

"तत्र को गुरुः का चाङ्गना। तत्र कश्चित् पितैव गुरुः तथा च मनुः "निषेकादीनि कर्म्माणि यः करोति यथाविधि। सम्भावयति चान्नेन स विप्रो गुरुरुच्यते। याज्ञवल्क्यः "स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति। उपनीय ददद्वेदमाचार्य्यः स उदाहृतः"। क्रियानिषेकादिकाः। आभ्यां गर्भाधानादिक्रियाकर्त्तरि गुरुशब्दस्य सङ्केतितत्वात् पिता गुरुस्तस्याङ्गना स्त्री माता तत्सपत्नी च सा च सवर्णा चोत्तमवर्णा च न हीनवर्णा तद्गमने गुरुतल्पगमनसमानत्वस्य वक्ष्यमाणत्वात् तद्गमनं न महापातकमिति। तदसङ्गतम् आचार्य्यादेरपि गुरुत्वश्रवणात् एतयोर्वचनयोरन्यनिषेधार्थस्याभावात्। तथा च मनुरेवान्यं गुरुमाह "पिता वै गार्हपत्योऽग्निर्माताग्निर्दक्षिणः स्मृतः। गुरुराहवनीयस्तु साग्नित्रेता गरीयसी। इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम्। गुरुशुश्रूषया त्वेवं ब्रह्मलोकं समश्नुते। अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः। तमपीह गुरुं विद्यात् श्रुतोपक्रियया तया"। तथा गोतमः "आचार्य्यः श्रेष्ठो गुरूणां मतः" इत्येके। पितरि सङ्केतितत्वादाचार्य्ये गौणं गुरुपदमिति चेन्न आचार्य्यादावपि सङ्केतदर्शनात् यथा विष्णुः "त्रयः पुरुषस्यातिगुरवो भवन्ति माता पिता चाचार्य्यश्चेति"। तथा

देवलः "आचार्य्यश्च पिता ज्येष्ठो भ्राता चैव महीपतिः। मातुलः श्वशुरस्त्राता मातामहपितामहौ। वर्णज्येष्ठः पितृव्यश्च पुंस्येते गुरवो मताः"। त्राता प्राणरक्षकः वर्णश्रेष्ठः क्षत्रियादीनां ब्राह्मणः। अनेनैकादश गुरवः सङ्केतिताः। कथमनेकेषामेकगुरुशब्दवाच्यत्वमेकस्य प्रवृत्तिनिमित्तस्याभावादिति "चेन्न गुरुरनुगन्तव्यः" इत्यादि श्रुत्या सदापरितोषणीयत्वादिधर्म्मस्यैकस्योपाधित्वात् यद्यप्याचार्य्यस्यैव परितोषणीयत्वं श्रूयते तथाप्यन्येष्वति दिश्यते ततोऽतिदिष्टधर्मोऽप्येकपदप्रवृत्तावुपाधिर्भवति इष्टिपदप्रवृत्ताविव तद्धर्मसम्बन्धः। शास्त्रीयगुरुशब्दप्रवृत्तिविषयत्वं वोपाधिः। भवतु वा विशेषाग्रहात् अक्षादिशब्दवदनेकार्थत्वे को दोषः। अथाचार्य्यपरत्वे गुरुशब्दस्य कथमाचार्य्यपत्न्यभिगमने गुरुतल्पातिदेशः तथा च गोतमः "आचार्य्यपुत्रशिष्यभार्य्यासु चैवमिति" तथा याज्ञवल्क्यः "मातुःसपत्नीं भगिनीमाचार्य्यतनयान्तथा। आचार्य्याणीं सुताञ्च स्वां गच्छंस्तु गुरुतल्पगः" इति, न एतस्य हीनजातीयपत्न्यभिप्रायेणाप्युपपत्तेः अतिदेशस्योपदेशसापेक्षत्वात् प्रथमावगतोपजीव्यगुरुशब्दसङ्कोचे हेत्वभावात्। न च "पितृभार्य्यां समारुह्य मातृवर्ज्जं नराधमः। भगिनीञ्च निजां गत्वा निष्कृतिर्न विधीयते" इति संवर्त्तवचने पितृशब्ददर्शनात् सामान्यवाचिगुरुशब्दे सङ्कोचोऽस्त्विति वाच्यम् एतस्य प्रायश्चित्तविधिपरत्वेनाचार्य्यादिव्युदासपरत्वाभावात् अन्यथोभयपरत्वे वाक्यभेदापत्तेः। पितृपदस्य गुरोर्विशेषणरूपत्वाभावात् न सामान्यवचनसङ्कोचकत्वम् किञ्च याज्ञवल्क्यस्वरसात् निषेकादिवेददानान्तकर्म्मकर्त्तुरेवाङ्गना गुर्व्वङ्गना तद्गमने महापातकं क्षत्रियादीनां न भवेत्तेषां वेदाध्यापकत्वाभावात् किञ्चैवमवेददातुर्ब्राह्मणस्य पितुर्गुरुत्वाभावात् तदङ्गनागमनं महापातकं न स्यात्। किञ्चैवं मातृगमनस्य महापातकत्वे "मातृगमनं दुहितृगमनं स्नुषागमनमित्यतिपातकानीति" विष्णुहारीतवचनविरोधश्च स्यात् तस्मान्मातृव्यतिरेकैकादशगुर्व्वङ्गनागमनमेव महापातकमिति युज्यते देवलवचनादिति। अत्र भवदेवेनोक्तं नात्र "गुरोरङ्गना गुर्व्वङ्गनेति" षष्ठीसमासः षष्ठीतत्पुरुषसमासस्याश्रयणे निषादस्थपतिवत् षष्ठ्यर्थलक्षणापत्तेः। अतो गुरुश्चासावङ्गना चेति कर्म्मधारयः। गुरुत्वञ्च मातुरेव न मातुः सपत्न्याः शरीरोत्पादकत्वेनोपाधिना मातापित्रोरेव गुरुशब्दाभिधेयत्वात्। अतएवाचार्य्यादिषु गुरुशब्दो गौणस्तद्धर्म्मप्रतिपत्त्यर्थः। ग [illegible] गच्छेदित्यत्रागत्या षष्ठीसमासः पत्नीशब्दस्य स्वपरिणीतावचनत्वात्। गुरुश्चासौ पत्नी चेति यदपेक्षया गुरुत्वं तदपेक्षया पत्नीत्वायोगात् न कर्म्मधारयः। इह त्वङ्गनाशब्दस्य स्त्रीमात्रवचनत्वात् युज्यत एवेति। अतोऽत्र गुरुशब्दस्य मातृपरत्वे गुरुपत्नीं न गच्छेदित्यत्रापि मातृपरत्वमेव सामानाधिकरण्याभावात्। "गुरुतल्पोऽभिभाष्यैनः" इत्यत्र गुरुः तल्पं तल्पं कलत्रं यस्येति मातुरेव ग्रहः। अतएव मातुः सपत्नीमिति याज्ञवल्क्यवचने मातुः सपत्न्यामाचार्य्यपत्न्याञ्च गुरुतल्पातिदेशो घटते एवेति, तदसङ्गतम् "मातृगमनं दुहितृगमनं स्नुषागमनमित्यतिपातकानीति" विष्णुहारीताभ्यां मातृगमनस्यातिपातकत्वाभिधानात्। न चात्र मातृसपत्नीपरत्वं मातृशब्दस्य मुख्यार्थत्यागापत्तेः जननीवचनत्वात्। न च षष्ठीसमासे लक्षणायामपि मुख्यार्थत्यागः किञ्च कर्म्मधारयसमासे अङ्गनापदवैयर्थ्यापत्तिः गुरुगमनमित्येतावतैवार्थसिद्धेः। दुहितुश्च पितृगमनमतिपातकमेव यथा पितुर्दुहितृगमनेऽतिपातकं पितृनिष्ठं, तथा दुहितुरपि पितृगमनेऽतिपातकं दुहितृनिष्ठम् एवं सर्वत्र उभयनिष्ठमेव। किञ्च गुरुपत्नीं न गच्छेदित्यादिषु बहुषु वचनेषु गुरुपत्नी गुरुतल्पगुरुभार्य्यादिपदस्य पत्न्यादिपदानामनर्थकता स्यात् गुरुपदेनैव मातुः प्राप्तेः किञ्च निःसन्दिग्धार्थम् मातृपदमेव प्रयोक्तुमुचितं मुनीनां न तु गुरुपत्न्यादिपदं सन्दिग्धार्थम्। एवं गौरवातिशयोऽपि वक्ष्यते। अतएव "सहस्रेण पितुर्माता गौरवेणातिरिच्यते" इति। जिकनस्तु आचार्य्यपितृमहीपतीनामत्र गुरुशब्देनोपादानम् यथा देवलः "उपाध्यायराजपितृभार्य्यागमनानि गुरुतल्पगमने कष्टतमानि"। पापातिशययुक्तानीत्यर्थः। उपाध्यायोऽत्राचार्य्यः यथा बौधायनः "पितुर्गुरोर्नरेन्द्रस्य भार्य्यां गत्वा प्रमादतः। गुरुतल्पी भवेत्तेन पूर्व्वोक्ता तत्र "निष्कृतिः" पूर्व्वोक्ता निष्कृतिः तप्तलौहशय्याशयनादिः। गुरुरत्राचार्य्यः "नरेन्द्रग्रहणाद्राजाऽत्राभिषिक्तक्षत्रियः। अतएव "राज्ञी प्रव्रजिता धात्री" इत्यादिषु राज्ञीपदं वैश्यान्तपतिपत्नीपरम् "आचार्य्याणीं स्वाञ्च सुतामित्याचार्य्याणीपदं हीनवर्णतत्पत्नीपरमिति तच्चिन्त्यम्। उच्यते यद्यपि देवलवचनेनैकादश गुरवो दर्शिताः तथाप्यत्र पितैव गुरुर्नाचार्य्यादिः तत्पत्नीगमनस्य गुरुतल्पगमनसमत्वानुपपत्तेः अनुपा-

तकत्वश्रुतेश्च । तथा च विष्णुः “पितृपितृव्यमातामहमातुलश्वशुरन्टपपत्न्यभिगमनं गुरुदारगमनसमं पितृस्वसृमातृस्वसृस्वसृश्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमनञ्चेत्यभिधाय “अनुपातकिनस्त्वेते महापातकिनो यथा । अश्वमेधेन शुद्ध्यन्ति तीर्थानुसरणेन वा” । न चात्राचार्य्यादिपत्नीनां हीनवर्णानां ग्रहणं न्टपस्य क्षत्रियेतरस्य पत्न्या इति युज्यते आचार्य्यभार्य्यादेर्विशेषत्वात् गुर्वङ्गनाशब्दस्य सामान्यत्वात् सामान्यविशेषन्यायेन गुर्वङ्गनाशब्द एव सङ्कोचस्य युक्तत्वात् पितृपत्न्यास्तु हीनवर्णाया युक्तमेव मातृगमनस्यातिपातकत्वात् सपत्नीमातृगमनस्य गुर्वङ्गनागमनत्वेन महापातकत्वात् अर्थादनुपातके लघुनि हीनवर्णायाः पितृपत्न्याग्रहणं तथा च याज्ञवल्क्यः “मातुः सपत्नीं भगिनीमाचार्य्यतनयां तथा । आचार्य्याणीं स्वाञ्च सुतां गच्छंस्तु गुरुतल्पगः” । गुरुतल्पगो गुरुतल्पगवदित्यर्थः । भगिन्यादिषु गुरुतल्पगत्वानुपपत्तेः । अत्र सुताऽसवर्णा ग्राह्या सवर्णासुतागमनस्यातिपातकत्वात् संवर्त्तः “पितृव्यदारगमने भ्रातृभार्य्यागमे तथा । गुरुतल्पव्रतं कुर्य्यान्नान्या निष्कृतिरुच्यते” । अत्र गुरुतल्पव्रतातिदेशात् पितृव्यादिभार्य्यागमनं न गुरुतल्पगमनमित्यवगम्यते अतएव विष्णुवचने न्टपाचार्य्यपत्नीगमनस्यानुपातकत्वश्रुतेः “पितुर्गुरोर्नरेन्द्रस्य” इति बौधायनवचनेऽपि गुरुतल्पपदं गौणम् । अत्रापि पितृभार्य्या हीनवर्णा ग्राह्या विष्णुवचनैकवाक्यत्वात् अतः पितैव गुरुर्मनुवचनात् तत्पत्न्येव गुर्वङ्गना सा तु न माता किन्तु सपत्नीमाता सा च सवर्णोत्तमवर्णा च न तु हीनवर्णा विष्णुवचनेऽनुपातकत्वश्रुतेः एतेनैकादशानामेव गुरूणां मुख्यपत्नीगमनं महापातकं विष्णुवचने तु पत्नीपदममुख्यस्त्रीपरमिति कल्पतरूक्तं निरस्तमेव । यद्यपि पञ्चानां पितृत्वं श्रूयते यथा “जनकश्चोपनेता च यश्च विद्यां (कन्यां) प्रयच्छति । अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः” इति तथापि जनकव्यतिरिक्ते तद्गौणं लोके जनक एवाभिधानात् एकस्य प्रवृत्तिनिमित्तस्याभावात् ननु जनकस्यापि संस्कारकर्त्तुरेव मनुना गुरुत्वमुक्तं याज्ञवल्क्येन च “वेददातृत्वेनेति कथं संस्काराकर्त्तुः पितुरवेददातृणां क्षत्रियादीनाञ्च गुरुत्वमिति न देवलवचनेन पितृमात्रेण गुरुत्वावगतेः संस्कारकर्त्तृत्वं वेददातृत्वञ्चातिशयार्थमिति” प्रा०वि०

गुरुतल्पिन् पु० गुरोस्तल्पं गम्यत्वेनास्त्यस्य इनि । विमातृगन्तरि गुरुतल्पगशब्दे उदा० ।

गुरुताल पु० “एकएव गुरुर्यत्र गुरुतालः स कथ्यते” संगी०दा० उक्ते अन्यवर्णरहिते गुरुतालवति तालभेदे ।

गुरुत्व न० गुरोर्भावः त्वण् । वैशेषिकादिमतसिद्धे पतनहेतौ द्रव्यनिष्ठे गुणभेदे “अतीन्द्रियं गुरुत्वं स्यात् पृथिव्यादिद्वये तु तत् । अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् । तदेवासमवायि स्यात्पतनाख्ये तु कर्म्मणि” भाषा० “पतने आद्यपतने” मुक्ताव० । तस्याप्रत्यक्षत्वे कारणं कणा० सू०वृत्त्योर्दर्शितं यथा

ननु गुरुत्वमप्यनेकद्रव्यसमवेतं रूपमहत्त्वसमानाधिकरणञ्चेति कथं न प्रत्यक्षमत आह” उप०वृ० “तस्य भावादव्यभिचारः” सू० ।

“तस्य रूपत्वादेः सामान्यस्य उद्भवस्य च गुरुत्वेऽभावान्न गुरुत्वं प्रत्यक्षम् । ननु मा भूत् तत्र रूपत्वादिकं तथापि तत्प्रत्यक्षं स्यादत आह अव्यभिचार इति एकैकेन्द्रियग्राह्यत्वं प्रति रूपत्वादीनां पञ्चानां जातीनाम् अव्यभिचारो नियम एव यत्रैव रूपत्वादिपञ्चकान्यतमत् तत्रैव बाह्यैकैकेन्द्रियग्राह्यत्वं तद्व्यतिरेकादित्यर्थः, सूत्रे तु गुरुत्वाधिकारस्यास्पष्टत्वात् प्रशस्तदेवैरतीन्द्रियेषु मध्ये परिगणितमपि वल्लभाचार्य्यैः स्पार्शनमुक्तं गुरुत्वे ।” उप० वृ० ।

गुरुत्वञ्च प्रतिबन्धकाभावे एव यथा पतनेऽसमवायिकारणं तथा “संयोगाभावे गुरुत्वात् पतनमित्यादि “संस्काराभावे गुरुत्वात् पतनमित्यन्तं कणादसूत्रवृत्तिवाक्यं ५४३पृ०दर्शितम् । तच्च गुरुत्वं पृथ्वीसलिलयोर्धर्मः इति नैयायिकादयः सांख्यास्तु“गुरु वरणकमेव तमः इत्युक्तेः तमोगुणस्यैव धर्म इत्याहुः तच्च वाक्यं गुणवृत्तिशब्दे २६०८पृ० दर्शितम् “भटष्टिगुरुत्वाद्वपुषो नरेन्द्रः” “मेने पराद्ध्र्यमात्मानं गुरुत्वेन जगद्गुरोः” रघुः । तल् । गुरुताप्यत्र स्त्री “नाकृतिगुरुता गुरुता विक्रमगुरुता गरीयसी ख्याता” उद्भटः । “अवधार्य्य कार्य्य गुरुताम्” माघः । “गुरुता मण्डलेश” स्वमूनील०ता उक्ते मण्डलैश्वर्य्ये च । [शब्दे ४६८पृ० दृश्यम् ।

गुरुदैवत पु० गुरुर्दैवतमस्य । पुष्यनक्षत्रे हेमच० अश्लेषा-

गुरुपत्नी स्त्री ६त० । गुरुः आचार्य्यः पतिर्यस्या वा नुङ् ङीष् । गुरोः सवर्णायामसवर्णायाञ्च स्त्रियाम् । तयोर्विभेदो मनुनोक्तो यथा

"गुरुवत् प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः। असवर्णास्तु संपूज्याः प्रत्युत्थानाभिवादनैः। अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च। गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम्। गुरुपत्नी तु युवतिर्नाभिवाद्येह पादयोः। पूर्णविंशतिवर्षेण गुणदोषौ विजानता" "कामन्तु गुरुपत्नीनां युवतीनां युवा भुवि। विधिवद्वन्दनं कुर्य्यादसावहमिति ब्रुवन्। विप्रोष्य पादग्रहणमन्वहं चाभिवादनम्"। "गुरुदारेषु कुर्वीत सतां धर्ममनुस्मरत्" मनुः। गुरोः पितुः स्त्री। २मातरि ३विमातरि च। [शब्दरत्ना० २वङ्गे धातौ न० हेम०।

गुरुपत्रा स्त्री गुरु पाके दुर्ज्जरं पत्रमस्याः। १तिन्तिडीवृक्षे

गुरुपुत्र पु० ६त०। आचार्य्यादिगुरूणां पुत्रे। तत्र वृत्तिभेदो मनुना दर्शितो यथा

"श्रेयःसु गुरुवद् वृत्तिं नित्यमेव समाचरेत्। गुरुपुत्रेषु चार्य्येषु गुरोश्चैव स्वबन्धुषु" मनुः "गुरुपुत्रश्चात्राऽशिष्योऽधिकवयाश्च बोद्धव्यः शिष्यबालसमवयसामनन्तरं विशेषस्य वक्ष्यमाणत्वात्" कुल्लू०। "बालः समानजन्मा वा शिष्यो वा यज्ञकर्मणि। अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति। उत्सादनञ्च गात्राणां स्नापनोच्छिष्टभोजने। न कुर्य्यात् गुरुपुत्रस्य पादयोश्चावनेजनम्" मनुः

गुरुभ न० ६त०। १पुष्यनक्षत्रे "गुरुभं श्रवणस्तथाश्विनीहस्तम्।" वृह०सं० ५५अ०। २धनुषि ३मीने च राशौ।

गुरुमर्द्दल पु० नित्यकर्म्म०। डिण्डिमवाद्ये शब्दर०।

गुरुरत्न न०गुरोः प्रियं रत्नम्। १पुष्परागे मणौ राजनि०। २गोमेदे च तस्य तत्प्रियत्वं नवरत्नशब्दे दृश्यम् गुरुमण्यादयोऽप्युभयत्र।

गुरुराहु पु० गुरुणा सह राहुर्यत्र। कालाशुद्धिहेतौ राहुजीवयोर्योगे "व्रतदीक्षे न कुर्वीत तमोयुक्ते वृहस्पतौ" व्रतदीक्षे इति नित्येतरकर्म्मोपलक्षणपरम् "एकराशौ स्थितौ स्यातां यदि राहुवृहस्पती। विवाहव्रतयज्ञादि सर्वं तत्र विवर्ज्जयेत्" स्मृतिसारे ज्यो० वचनात्। "ऋक्षभेदेऽप्येकराशौ सम्पर्कौ यदि वाऽनयोः। गुरुराह्वोरपि तदा त्यजेद्विद्वान्न संशयः" भविष्यपु०। अत्र गुरोर्लज्जितत्वं हेतुः। "यत्र यत्र स्थितो जीवस्तमोयोगेन लज्जते। उपहासाय किन्न स्यादसत्सङ्गो मनीषिणाम्"। गुरुचण्डालादयोऽप्यत्र।

गुरुवर्च्चोघ्न पु० गुरुवर्च्चो विष्ठाविबन्धस्तं हन्ति हन-टक्। (पातिलेबु) निम्बाके शब्दच०।

गुरुवर्त्तिन् पु० गुरौ गुरुकुले वर्त्तते वृत-णिनि। १गुरुकुलवासिनि ब्रह्मचारिणि गुरुवासिन्प्रभृतयोऽप्यत्र। "अष्टाशीतिसहस्राणां यतीनामूर्द्ध्वरेतसाम्। स्मृतं स्थानं तु यत्तेषां तदेव गुरुवासिनाम्" शब्दार्थचि० धृतवाक्यम्। गुरौ वर्त्तते णिनि। २गुरुशुश्रूषके च।

गुरुवर्ष न०पु० ६ त०ज्योतिषोक्ते गुरोर्मध्यगत्या राशिभोगकालात्मके वर्षभेदे वृह०सं० ८अ० वृहस्पतिचाराध्याये तद्वर्षमध्ये गुरोरस्तोदयात् तत्संज्ञाभेद उक्तो यथा "नक्षत्रेण सहोदयमुपगच्छति येन देवपतिमन्त्री। तत्संज्ञं वक्तव्यं वर्षं मासक्रमेणैव। वर्षाणि कार्त्तिकादीन्याग्नेयाद्भद्वयानुयोगीनि। क्रमशस्त्रिभं तु पञ्चममुपान्त्यमन्त्यं च तद्वर्षम्"। "सहोदयमस्तं वा येन यातीति" पाठं प्रकल्प्य "नक्षत्रेण गुरुभुज्यमाननक्षत्रेण आग्नेयं कृत्तिका। पञ्चमं फाल्गुनम् अन्त्यमाश्विनं उपान्त्यं भाद्रपदम्। "अन्त्योपान्त्यौ त्रिभौ ज्ञेयौ फाल्गुनश्च त्रिभोमतः। शेषामासाद्विभाज्ञेयाः कृत्तिकादिव्यवस्थया, इति वचनात्। "द्वे द्वे चित्रादितारणां पूर्णपर्वेन्दुसङ्गते। मासाश्चैत्रादयोज्ञेयास्त्रिकैः षष्ठान्त्यसप्तमाः इति सङ्कर्षणवाक्यात् पर्वेन्दुसङ्गते पौर्णमासीसंयुते। तदेकवाक्यतया पूर्ववचने पौर्णमासीलाभः। तथा च यथा मासानां पौर्णमास्यां कृत्तिकादिसम्बन्धात् कार्त्तिकादित्वं तथा वर्षाणां वृहस्पतेरस्तोदयसम्बन्धात् कार्त्तिकादित्वं तेन कृत्तिकारोहिण्योरेकतरस्मिन् वृहस्पतेरस्तोदयैकतरलाभे कार्त्तिकवर्षम् एवं मार्गशीर्षादि। यत्र वर्षद्वयघटकयोर्नक्षत्रयोरेकतरस्मिन्नस्तं गतो गुरुरन्यस्मिन्नुदेति तत्र का गतिरिति चेत् कार्त्तिकोत्तरं मार्गशीर्षं तदुत्तरं पौषमित्यादिक्रमाद् गतिः" मल० त० व्याख्यातम्। "नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वान्तयोगतः। कार्त्तिक्यादिषु संयोगे कृत्तिकादिद्वयं द्वयम्। अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम्। वैशाखादिषु कृष्णे च योगः पञ्चदशे तिथौ। कार्त्तिकादीनि वर्षाणि गुरोरस्तोदयात् तथा" सू० सि० तस्य रङ्ग० व्याख्या अब्दशब्दे २७१ पृ० दर्शितापि स्मरणार्थं दिङ्मात्रमत्रोच्यते "वृहस्पतेः सूर्य्यसान्निध्यदूरत्वाभ्यामस्तादुदयाद्वा वैशाखादिषु द्वादशसु मासेषु कृष्णपक्षे पञ्चदशे तिथौ अमायामित्यर्थः चकारः पौर्णमासीसम्बन्धसमुच्चयार्थकः। योगोऽिननक्षत्रसम्बन्धः। कार्त्तिकादीनि द्वादश वर्षाणि। वैशाखकृष्णपक्षामायां गुरोरस्ते तस्य (पौर्णमास्यां वा)

उदये जाते सति तदादि गुरुवर्षं कृत्तिकादिनक्षत्रसम्बन्धात् कार्त्तिकसंज्ञं भवति। अस्तेत्यत्युपलक्षणम् तेन यद्दिने गुरोरस्तोदयौ तद्दिने यच्चन्द्राधिष्ठितनक्षत्रं तत्संज्ञं बार्हस्पत्यं वर्षं भवतीति तात्पर्य्यम्” संक्षेपः। अत्र चन्द्राक्रान्तनक्षत्रवशेन गुरुवर्षसंज्ञायाः कार्त्तिकादिशब्दस्य योगरूढ़त्वमाश्रित्य रङ्गनाथेनोक्तिः। तथाहि “नक्षत्रेण युक्तः कालः” पा० सूत्रे नक्षत्रपदस्य चन्द्राधिष्ठिततत्समीपस्थनक्षत्रपरत्वमन्यथा राशिचक्रान्तर्गततत्तन्नक्षत्राणां कालभेदेनोदयात्तद्योगस्य प्रतिदिनं सत्त्वेन नक्षत्रयोगमात्रस्याव्यावर्त्तकत्वम्। तस्य च “लुबविशेषे” पा० लुप् लुप्राऽणा प्रत्ययेन च चन्द्राधिष्ठितकृत्तिकादिनक्षत्रयुक्तस्य तत्समीपस्थरोहिण्यादियुक्तस्य च कालस्य बोधनम् न तु गुरुभुज्यमाननक्षत्रयुक्तकालस्य बोधनम्। स च कालः यत्रास्ति अर्श०अचि कार्त्तिकादेर्वर्षस्य बोधः। रघु०मते तु कार्त्तिकशब्दे १६४९पृ०दर्शितजयादित्यव्याख्यानुसारेण “सास्मिन् पौर्णमासीति संज्ञायामिति” पा०सूत्रे अस्मिन्निति पदस्यार्द्धमासमासवर्षपरत्वेऽपि वर्षपरत्वपक्षे अनेकपूर्णिमाणां वर्षघटकत्वेन तद्योगेन संज्ञाविशेषानाधायकत्वेन योगार्थाभावात् केवलरूढ़त्वं पारिभाषिकत्वं वाश्रित्य गुरुभुज्यमाननक्षत्रे गुरोरस्तोदयवशात् तन्नामोक्तिरिति मतभेदः। उभयमतेऽपि उदयशब्दस्य सूर्यसान्निध्यविशेषोत्तरमुदयपरता न तु प्रत्यहं कालभेदेन जायमानोदयगिरिसम्बन्धमात्रपरता तस्य सदातनत्वेनाविशेषात्। तत्राप्ययं विशेषः यद्दिने गुरोरस्तोदयौ तद्दिने यच्चन्द्राधिष्ठितनक्षत्रं तत्संज्ञं बार्हस्पत्यं वर्षमिति रङ्गनाथोक्तिः अमायामस्तोदययोरेव बोध्या। अमायां हि सूर्यचन्द्रयोरेकराशिस्थत्वेन गुरोरपि तत्रस्थितत्वेनास्तत्वात्। पूर्णिमायान्तु नैतत्सम्भवः तदा चन्द्रस्य सूर्यात् सप्तमराशिस्थत्वेन गुरोश्चन्द्राधिष्ठितनक्षत्रस्थत्वेऽस्तत्वासम्भवात्। अत्र पूर्णिमायां गुरोरस्तोदययोश्चन्द्राधिष्ठितनक्षत्रं विनाऽपि सम्भवात् तत्र जीवभुज्यमाननक्षत्रनाम्नैव वर्षसंज्ञा तदभिप्रायेणैव “ज्येष्ठामूलोपगे जीवे” इति वक्ष्यमाणवचनं द्रष्टव्यम् नक्षत्रेण सहोदयमित्यस्य “नक्षत्रेण गुरुभुज्यमाननक्षत्रेणेति” रघु०व्याख्या च बोध्या। रङ्गनाथमते तु नक्षत्रेण चन्द्राक्रान्तनक्षत्रेण सह चन्द्रार्काभ्यां सममित्येव व्याख्या अमायाञ्च तयोरेकराशिस्थत्वात् तथोक्तिः अस्मिन् पक्षे च सह शब्दस्य सार्थक्यं रघु०मते तु सहशब्दनैयर्थ्यं बोध्यम्। वस्तुतः चान्द्रमाससंज्ञाभेदे चन्द्राक्रान्तनक्षत्रस्य प्रयोजकत्ववत् गुरुवर्षसंज्ञाभेदे गुरुभुज्यमाननक्षत्रस्यैव प्रयोजकत्वं युक्तमन्यवर्षसंज्ञाभेदेऽन्याक्रान्तनक्षत्रस्य प्रयोजकत्वानौचित्यात्। अत्रेदं बोध्यम् “ह्रासप्रतिर्भक्त्यस्ते इत्युक्तेः” ७२ह्रासप्रतिमावनदिनैर्वार्द्धक्यास्तत्ववाल्यसम्भवेन वार्द्धक्यबाल्यकालपरित्यागेन अस्तकालस्य त्रिपक्षात्मकत्वेनामायामस्तत्वे पूर्णिमायामुदयः पूर्णिमायामस्तत्वेऽमायामुदयः। अमाया अपि द्वादशभागात्मकत्वेन सूर्याक्रान्तांशात् “एकादशामरेज्यस्य” सू०सि० उक्तैकादशांशातिक्रमे गुरोरुदयसम्भवः। रङ्गनाथेन “संहिताग्रन्थेऽस्तोदयसम्बन्धात् वर्षोक्तिः परन्त्विदानीमुदयाद्वर्षव्यवहारो गणकैर्गण्यते इत्युक्तत्वात् गुरोरुदयवशादेव तद्वर्षगणना कार्य्या। अतएव “अस्तोदयात्तथा” सू०सि० वाक्यस्य अस्तोत्तरं सूर्यसान्निध्यविशेषाधीनास्तकालादुत्तरम् उदय इति व्याख्या अतएवैकवचनप्रयोगः अतएव च वृ०स०“नक्षत्रेण सहोदयमुपगच्छति येनेति” उदयमात्रस्य वर्षनामप्रयोजकतोक्तिः। तत्र “नक्षत्रेण सहोदयमस्तं वा येन यातीति रघुनन्दनधृतपाठश्छन्दोभङ्गदोषादनादेयः। अत्रेदं बोध्यं ग्रहगतेर्न्यूनाधिकसम्भावनया ततोऽर्वाक् पश्चाद्वा उदयः सम्भाव्यते इत्यतोऽस्तेत्युपलक्षणमित्युक्तम्। चन्द्राधिष्ठितनक्षत्रद्योतनायैव सू०सि०“वैशाखादिषु कृष्णे च योगे पञ्चदशे तिथावित्युक्तं “सा वैशाखस्यामावास्या या रोहिण्या संबध्यते”इत्युक्तेः प्रायेण तस्या रोहिणीसम्बन्धः सम्भाव्यते रोहिणीसम्बन्धे च वर्षस्य कार्त्तिकत्वं रोहिण्याश्चन्द्राधिष्ठितकृत्तिकासमीपस्थत्वात् अतएव नक्षत्रद्वयसम्बन्धेन कार्त्तिकत्वादित्वकथनम्। तथा चायमर्थः। ३।४। नक्षत्रयोः कार्त्तिकम्। ५।६। मार्गशीर्षम्। ७।८। पौषम्। ९।१०। माघम्।११।१२। १३। फाल्गुनम्। १४।१५। चैत्रम्। १६।१७। वैशाखम्। १८।१९। ज्यैष्ठम्।२०।२१। आषाढ़म् २२।२३। श्रावणम्। २४।२५।२६। भाद्रम्। २७।१।२। नक्षत्रेषु आश्विनं वर्षम्। एवं द्वादश वर्षाणि भवन्ति। तेन चन्द्राधिष्ठितशब्दस्य तदाक्रान्ततत्समीपर्क्षपरत्वम् “नक्षत्रेण युक्तः कालः”पा०नक्षत्रशब्दस्य तादृशार्थकत्वेन तत्प्रत्ययार्थरूपयोगेन तदर्थत्वौचित्यात्। अतः कार्त्तिकवर्षस्य रोहिणीनक्षत्रसम्बन्धेऽपि सम्भवः। अतएव “ज्यैष्ठे संवत्सरे चैव ज्यैष्ठमासस्य पूर्णिमा”इति “ज्येष्ठा

मूलोपगे जीवे वर्षं स्यात् शक्रदैवतम्” इत्युक्तिर्द्रष्टव्या। एवं कार्त्तिकादिगुरुवर्षनिमित्तेऽवधारिते इदमिदानीं चिन्त्यते यथा चान्द्रमासस्य तत्तन्नक्षत्रयुक्तपौर्णमासीयुक्तत्वेऽपि तद्घटितत्वेन शुक्लप्रतिपदादिदर्शान्तस्य “साऽस्मिन् पौर्णमासीति संज्ञायाम्” पा॰ इत्यण्प्रत्ययान्तार्थतया प्राप्तता तथा “वैशाखादिष्वित्यादिना गुरोरस्तोदयसम्बन्धात् गुरुवर्षत्वेऽपि तस्य कतम आद्यन्तकाल इति सन्देहे अविशेषात् चान्द्रवर्षस्य सौरवर्षस्य वा आद्यन्तकाल एव तस्याद्यन्तकाल इति केचित्। तन्न नक्षत्रसम्बन्धेन चान्द्रमासस्य ग्रहणे “साऽस्मिन् पौर्णमासीति” पा॰विहिताणा तत्तन्नक्षत्रयुक्तपौर्णमासीघटितकालस्य बोधनात् तदादित्वौचित्यात्। गुरुवर्षग्रहणे तु तथाभूतपौर्णमासीमात्रस्याप्रयोजकत्वात् न चान्द्रादिवर्षादित्वकल्पनं किन्तु गुरोर्मध्यगत्या राशिभोगारम्भान्तकाल एव कार्त्तिकादिगुरुवर्षाद्यन्तकालः वक्ष्यमाणवचनजातेभ्यः। रङ्ग॰ना॰मते तदादीत्युक्तेः सावनादिवत् गुरोरस्तोदयादिकालाद्यन्तकाल एव आश्विनादेर्गुरुवर्षतया तदाद्यन्तकालो युक्त इतरस्यासन्निहितत्वात् इति भेदः। तच्च वर्षं तदीयोदयादियुक्ततदीयमध्यमराशिभोगावच्छिन्नकालः, अब्दशब्दे २७१ पृष्ठे दर्शितायाः “बृहस्पतेरस्त उदये वा जाते सति तदादि बृहस्पतिवर्षमिति” सूर्य्यसिद्धान्तटीकायां रङ्गनाथेन तदादीत्युक्तेः तदादिर्वेति भेदः। तन्मते मध्यमराशिपदं च राशिचक्रान्तर्गतत्रिंशांशपरं तेन यत्तमांशे उदयः पुनः राश्यन्तरे तत्तमेऽंशे उदयकालपर्य्यन्तः राशिशब्दार्थः। अन्यमते तु राशिपदं मेषादिराशिपरं तेन तदीयराशिभोगारम्भकालावधि तदवसानपर्य्यन्त एवाश्विनादिवर्षाणामाद्यन्तकालः। इदमेव ज्यायः “बृहस्पतेर्मध्यमराशिभोगात् संवत्सरं सांहितिका वदन्ति” सि॰ शि॰ उक्तेः “कल्यादितो मध्यमजीवभुक्ता ये राशयः षष्टिहृतावशेषाः। संवत्सरास्ते विजयाश्विनाद्या इतीज्यमाने किल संहितोक्तमिति” तत्रत्यपाठान्तरात् “कल्यादभुक्ता गुरुराशयो ये संवत्सराः स्युर्विजयादयस्ते। बभाषिरे सांहितिका हि पूर्वे वर्षाणि तस्याश्विनपूर्वकाणि” श्रीपतिसमुच्चयोक्तेश्च। तेन मध्यमराशिभोगकालस्य गुरोरस्तोदयादाश्विनादिवर्षसंज्ञा। तथा च गुरोरेकैकमध्यमराशिभोगकालावच्छिन्नं गुरुवर्षमिति स्थिते यस्मिन् वर्षे गुरोरुदयास्तकाले अश्विन्यादियोगस्तस्य वर्षस्याश्विनादिसंज्ञा एवं गुरुवर्षस्यैव चान्द्रवर्षसौरवर्षयोरप्रवेशद्विप्रवेशाभ्यां तदीयाधिमासलुप्तवर्षोत्कीर्त्तनञ्च सङ्गच्छते यथाह मुहूर्त्तकल्पद्रुमे “चेत् स्पष्टया वाप्यथ मध्यगत्या राश्यन्तरं यत्र च चान्द्रवर्षे। गुरुर्न यायादधिवत्सरोऽधिमासेन तुल्यः स शुभेषु वर्ज्यः”। यशोधरतन्त्रे “एकस्मिन् रविवर्षे गौरववर्षद्वयावसानं चेत्। तत्रवदस्तृगेनमेवं विलुप्तसंवत्सरं प्राहुः”। ज्योतिर्विदाभरणे “गुरुसंक्रमयुग्मवत्समा गदिता सा ननु लुप्तसंज्ञिता। न बुधैर्गदिता शुभेहिताऽधिसमा गीष्पति संक्रमोज्झिता”। अतः सौरचान्द्रवर्षातिरिक्त एव आश्विनादिगुरुवर्षः गुरोः उदयकालावधिः पुनरुदयकालपर्यन्तः, तदीयैकैकमध्यमराशिभोगकालावच्छिन्नो वा स्वीकार्य्यः इति तदादित्वमेव तस्येत्येवमवसीयते। एवञ्च महाज्यैष्ठ्यादियोगेऽपि तदाद्यन्त एव ज्यैष्ठोपाह्यः।

कार्त्तिकादिगुरुवर्षफलं तद्वर्षेणैव विष्णादिद्वादशवर्षकल्पयुगानि प्रत्येकतदन्तर्गतसंवत्सरादिवर्षपञ्चकस्य विशेषसंज्ञा इत्येवं षष्टिवर्षास्तत्फलञ्च बृ॰ सं॰ उक्तं यथा “शकटानलोपजीवकगोपीड़ाव्याधिशस्त्रकोपश्च। वृद्धिस्तु रक्तपीतककुसुमानां कार्त्तिके१ वर्षे। सौम्ये२ (मार्गे) ऽब्देऽनावृष्टिर्मृगाखुशलभाण्डजैश्च सस्यवधः। व्याधिभयं मित्रैरपि भूपानां जायते वैरम्। शुभकृज्जगतः पौषे३ निवृत्तवैराः परस्परं क्षितिपाः। द्वित्रिगुणो धान्यार्घः पौष्टिककर्मप्रसिद्धिश्च। पितृपूजापरिवृद्धिर्माघे४ महृद्धिः सर्वभूतानाम्। आरोग्यवृष्टिधान्यार्घसम्पदो मित्रलाभश्च। फाल्गुनवर्षे५ विद्यात् क्वचित् क्वचित् क्षेमवृद्धिसस्यानि। दौर्भाग्यं प्रमदानां प्रबलाश्चौरा नृपाश्चोग्राः। चैत्रे६ मन्दा वृष्टिः प्रियमन्नं क्षेममवनिपा मृदवः। वृद्धिस्तु कोशधान्यस्य भवति पीड़ा च रूपवताम्। वैशाखे७ धर्मपरा विगतभयाः प्रमुदिताः प्रजाः सनृपाः। यज्ञक्रियाप्रवृत्तिर्निष्पत्तिः सर्वसस्यानाम्। ज्यैष्ठे८ जातिकुलधनश्रेणीश्रेष्ठा नृपाः सधर्मज्ञाः। पीड्यन्ते धान्यानि च हित्वा कङ्गुं शमीजातिम्। आषाढे९ जायन्ते सस्यानि क्वचिदवृष्टिरन्यत्र। योगक्षेमं मध्यं व्यग्राश्च भवन्ति भूपालाः। श्रावणवर्षे१० क्षेमं सम्यक् सस्यानि पाकमुपयान्ति। क्षुद्रा ये पाषण्डाः पीड्यन्ते ये च तद्भक्ताः। भाद्रपदे११ वल्लीजं निष्पत्तिं याति पूर्वसस्यं च। न भवत्यपरं सस्यं क्वचित् सुभिक्षं क्वचिच्च भयम्। आश्वयुजे१२ऽब्देऽजस्रं पतति जलं प्रमुदिताः प्रजाः क्षेमम्। प्राणचयः

प्राणभृतां सर्वेषामन्नबाहुल्यम्। उदगारोग्यसुभिक्षक्षेमकरो वाक्पतिश्चरन् भानाम्। याम्ये तद्विपरीतो मध्येन तु मध्यफलदायी। विचरन् भद्वयमिष्टस्तत्सार्धं वत्सरेण मध्यफलः। सस्यानां विध्वंसी विचरेदधिकं यदि कदाचित्। अनलभयमनलवर्णे व्याधिः पीते रणागमः श्यामे। हरिते च तस्करेभ्यः पीड़ा रक्ते तु शस्त्रभयम्। धूमाभेऽनावृष्टिस्त्रिदशगुरौ नृपवधो दिवा दृष्टे। विपुलेऽमले सुतारे रात्रौ दृष्टे प्रजाः स्वस्थाः। रोहिण्योऽनलभं३ च वत्सरतनुर्नाभिस्त्वषाढ़ाद्वयं सार्पं९ हृत् पितृदैवतं१० च कुसुमं शुद्धैः शुभं तैः फलम्। देहे क्रूरनिपीड़िते ऽग्न्यनिलजं नाभ्यां भयं क्षुत्क्षतम्, पुष्ये मूलफलक्षयोऽथ हृदये सस्यस्य नाशो ध्रुवम्। गतानि वर्षाणि शकेन्द्रकालाद्धतानि रुद्रैः११र्गुणयेच्चतुर्भिः। नवाष्टपञ्चाष्टयुतानि कृत्वा विभाजयेच्छून्यशरागरामैः३७५०। फलेन युक्तं शकभूपकालं संशोध्य षष्ट्या विषयै ५ विभज्य। युगानि नारायणपूर्वकाणि लब्धानि शेषाः क्रमशः समाः स्युः। एकैकमब्देषु नवाहतेषु दत्त्वा पृथग्द्वादशकं क्रमेण। हृत्वा चतुर्भिर्वसुदेवताद्यान्युडूनि शेषांशकपूर्वमब्दम्। विष्णुः१ सुरेज्यो२ बलभिद्३ हुताश४ स्त्वष्टो५ त्तरप्रोष्ठपदाधिपश्च६। क्रमाद्युगेशाः पितृ७ विश्व८ सोमाः९ शक्रानलाख्या१० ऽश्वि११ भगाः१२ प्रदिष्टाः। संवत्सरोऽग्निः परिवत्सरोऽर्क इदादिकः शीतमयूखमाली। प्रजापतिश्चाप्यनुवत्सरः स्या इद्वत्सरः शैलसुतापतिश्च। वृष्टिः समाद्ये प्रमुखे द्वितीये प्रभूततोया कथिता तृतीये। पश्चाज्जलं मुञ्चति यच्चतुर्थं स्वल्पोदकं पञ्चममब्दमुक्तम्। चत्वारि मुख्यानि युगान्यथैषां विष्ण्विन्द्रजीवानलदैवतानि। चत्वारि मध्यानि च मध्यमानि चत्वारि चान्त्यान्यधमानि विद्यात्। आद्यं धनिष्ठांशमभिप्रपन्नो माघे यदा यात्युदयं सुरेज्यः। षष्ट्यब्दपूर्वः प्रभवः स नाम्ना प्रवर्त्तते भूतहितस्तदाब्दः। क्वचित्त्ववृष्टिः पवनाग्निकोपः सन्तीतयः श्लेष्मकृताश्च रोगाः। संवत्सरेऽस्मिन् प्रभवे प्रवृत्ते न दुःखमाप्नोति जनस्तथापि। तस्माद्द्वितीयो विभवः२ प्रदिष्टः शुक्ल३स्तृतीयः परतः प्रमोदः४। प्रजापतिश्चेति५ यथोत्तराणि शस्तानि वर्षाणि फलानि चैषाम्। निष्पन्नशालीक्षुयवादिसस्यां भयैर्विमुक्तामुपशान्तवैराम्। संहृष्टलोकां कलिदोषमुक्तां क्षत्रं तदा शास्ति च भूतधात्रीम्। आद्योऽङ्गिराः१ श्रीमुख२भावसाह्वौ३ युवाथ४ धातेति५ युगे द्वितीये। वर्षाणि पञ्चैव यथाक्रमेण त्रीण्यत्र शस्तानि समे परे द्वे। त्रिष्वग्निराद्येषु निकामवर्षी देवो निरातङ्कभयाश्च लोकाः। अब्दद्वयेऽन्त्येऽपि समा सुवृष्टिः किन्त्वत्र रोगाः समरागमश्च। शाक्रे युगे पूर्वमथेश्वराख्यं१ वर्षं द्वितीयं बहुधान्य२माहुः। प्रमाथिनं३ विक्रम४मप्यतोऽन्यद्वृषं५ च विद्याद्गुरुचारयोगात्। आद्यं द्वितीयं च शुभे तु वर्षे कृतानुकारं कुरुतः प्रजानाम्। पापः प्रमाथी वृषविक्रमौ तु सुभिक्षदौ रोगभयप्रदौ च। श्रेष्ठं चतुर्थस्य युगस्य पूर्वं यच्चित्रभानुं१ कथयन्ति वर्षम्। मध्यं द्वितीयं तु सुभानु२संज्ञं रोगप्रदं मृत्युकरं न तच्च। तारणं३ तदनु भूरिवारिदं सस्यवृद्धिमुदितं च पार्थिवम्। पञ्चमं व्ययमुशन्ति शोभनं५ मन्मथप्रबलमुत्सवाकुलम्४। त्वाष्ट्रे युगे सर्वजि१दाद्य२ उक्तः संवत्सरोऽन्यः खलु सर्वधारी२। तस्माद्विरोधी३ विकृतः४ खरश्च५ शस्तो द्वितीयोऽत्र भयाय शेषाः। नन्दनो१ऽथ विजयो२ जय३स्तथा मन्मथो४ऽस्य परतश्च दुर्मुखः५। कान्तमत्र युग आदितस्त्रयं मन्मथः समफलोऽधमोऽपरः। हेमलम्ब१ इति सप्तमे युगे स्याद्विलम्बि२ परतो विकारि३ च। शर्वरीति४ तदनु प्लवः५ स्मृतो वत्सरो गुरुवशेन पञ्चमः। ईतिप्रायः प्रचुरपवनो वृष्टिरब्दे तु पूर्वे मन्दं सस्यं न बहुसलिलं वत्सरेऽतो द्वितीये। अत्युद्वेगः प्रचुरसलिलः स्यात्तृतीयश्चतुर्थो दुर्भिक्षाय प्लव इति ततः शोभनो भूरितोयः। वैश्वे युगे शोभकृ१दित्यथाद्यः संवत्सरोऽतः शुभकृद्२द्वितीयः। क्रोधी३ तृतीयः परतः क्रमेण विश्वावसु४श्चेति पराभव५श्च। पूर्वापरौ प्रीतिकरौ प्रजानामेषां तृतीयो बहुदोषदोऽब्दः। अन्त्यौ समौ किन्तु पराभवेऽग्निः शस्त्रामयार्त्तिर्द्विजगोभयं च। आद्यः प्लवङ्गो१ नवमे युगेऽब्दः स्यात्कीलको२ऽन्यः परतश्च सौम्यः३। साधारणो४ रोधकृ५दित्यथाब्दः शुभप्रदौ कीलकसौम्यसंज्ञौ। कष्टः प्लवङ्गो बहुशः प्रजानां साधारणेऽल्पं जलमीतयश्च। यः पञ्चमो रोधकृदित्यथाब्दश्चित्रं जलं तत्र च सस्यसम्पत्। इन्द्राग्निदैवं दशमं युगं यत् तत्राद्यमब्दं परिधावि१संज्ञम्। प्रमाद्य२थानन्द३मतः परं यत् स्याद्राक्षसं४ चानल५संज्ञितं च। परिधाविनि मध्यदेशनाशो नृपहानिर्जलमल्पमग्निकोपः। अलसस्तु जनः प्रमादिसंज्ञे डमरं रक्तकपुष्पबीजनाशः। तत्परः सकललोकनन्दनो राक्षसः क्षयकरोऽनलस्तथा। ग्रीष्मधान्यजननोऽत्र राक्षसो वह्निकोपमरकप्रदोऽनलः।

एकादये पिङ्गल१कालयुक्त२सिद्धार्थ३रौद्राः४ खलु दुर्मतिश्च५। आद्ये तु वृष्टिर्महती सचौरा श्वासो हनूकम्पयुतश्च कासः। यत्कालयुक्तं तदनेकदोषं सिद्धार्थसंज्ञे बहवो गुणाश्च। रौद्रोऽतिरौद्रः क्षयकृत् प्रदिष्टो यो दुर्मतिर्मध्यमवृष्टिकृत् सः। भाग्ये युगे दुन्दुभि१संज्ञमाद्यं सस्यस्य वृद्धिं महतीं करोति। उद्गारि२संज्ञं तदनु क्षयाय नरेश्वराणां, विषमा च वृष्टिः। रक्ताक्ष३मब्दं कथितं तृतीयं यस्मिन् भयं दंष्ट्रिकृतं गदाश्च। क्रोधं४ बहुक्रोधकरं चतुर्थं राष्ट्राणि शून्यीकुरुते विरोधैः। क्षयमिति५ युगस्यान्त्यस्यान्त्यं बहुक्षयकारकं जनयति भयं तद्विप्राणां कृषीवलवृद्धिदम्। उपचयकरं विट्शूद्राणां परस्वहृतां तथा कथितमखिलं षष्ट्यब्दे यत्तदत्र समासतः। अकलुषांशुजटिलः पृथुमूर्त्तिः कुमुदकुन्दकुसुमस्फटिकाभः। ग्रहहतो न यदि सत्पथवर्त्ती हितकरोऽमरगुरुर्मनुजानाम्"। "बार्हस्पत्येन षष्ठ्यब्दम्" सू०सि०।

गुरुवृत्ति स्त्री गुरौ वृत्तिः। आचार्य्यादिगुरौ शिष्येण कर्त्तव्ये आचारभेदे सा च मनुनोक्ता यथा

"नोदितो गुरुणा नित्यमप्रचोदित एव वा। कुर्य्यादध्ययने यत्नमाचार्य्यस्य हितेषु च। शरीरञ्चैव वाचं च बुद्धीन्द्रियमनांसि च। नियम्य प्राञ्जलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखम्। नित्यमुद्धृतपाणिः स्यात् साध्वाचारः सुसंयतः। आस्यतामिति चोक्तः सन्नासीताभिमुखं गुरोः। हीनान्नवस्त्रवेशः स्यात् सर्वदा गुरुसन्निधौ। उत्तिष्ठेत् प्रथमञ्चास्य चरमञ्चैव संविशेत्। प्रतिश्रवणसम्भाषे शयानो न समाचरेत्। नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः। आसीनस्य स्थितः कुर्य्यादभिगच्छंस्तु तिष्ठतः। प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंस्तु धावतः। पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चान्तिकम्। प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः। नीचं शय्यासनञ्चास्य सर्वदा गुरुसन्निधौ। गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत्। नोदाहरेदस्य नाम परोक्षमपि केवलम् (अश्रीपूर्वम्)। न चैवास्यानुकुर्वीत गतिभाषितचेष्टितम्। गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते। कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः। परीवादात् खरो भवति श्वा वै भवति निन्दकः। परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी। दूरस्थो नार्च्चयेदेनं न क्रुद्धो नान्तिके स्त्रियाः। यानासने न चैवैनमवरुह्याभिवादयेत्। प्रतिवातेऽनुवाते च नासीत गुरुणा सह। असंश्रवे चैव गुरोर्न किञ्चिदपि कीर्त्तयेत्। गोऽश्वोष्ट्रयानप्रासादस्रस्तरेषु कटेषु च। नासीत गुरुणा सार्द्धं शिलाफलकनौषु च। गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत्। न चानिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत्। विद्यागुरुष्वेतदेव नित्या वृत्तिः स्वयोनिषु। प्रतिषेधत्सु चाधर्म्मान् हितञ्चोपदिशत्स्वपि।"

तान्त्रिकगुरौ वृत्तिभेदः तन्त्रसारे उक्तो यथा

"गुरौ सन्निहिते यस्तु पूजयेदन्यतो न तम्। स दुर्गतिमवाप्नोति पूजा च विफला भवेत्" क्रियासारे। "एकग्रामे स्थितः शिष्यस्त्रिसन्ध्यं प्रणमेद्गुरुम्। क्रोशमात्रस्थितो भक्त्या गुरुं प्रतिदिनं नमेत्। अर्द्धयोजनतः शिष्यः प्रणमेत् पञ्चपर्वसु। एकयोजनमारभ्य योजनद्वादशावधि। दूरदेशस्थितः शिष्यो भक्त्या तत्सन्निधिं गतः। तत्र योजनसंख्योक्तमानेन प्रणमेद्गुरुम्"। ज्ञानार्णवे "गुरौ मनुष्यबुद्धिन्तु मन्त्रे चाक्षरभावनाम्। प्रतिमासु शिलाबुद्धिं कुर्व्वाणो नरकं व्रजेत्। जन्महेतू हि पितरौ पूजनीयौ प्रयत्नतः। गुरुर्विशेषतः पूज्यो धर्म्माधर्म्मप्रदर्शकः। गुरुः पिता गुरुर्माता गुरुर्देवो गुरुर्गतिः। शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन। गुरोर्हितं प्रकर्त्तव्यं वाङ्मनःकायकर्म्मभिः। अहिताचरणाद्देवि! विष्ठायां जायते कृमिः। मन्त्रत्यागाद्भवेन्मृत्युर्गुरुत्यागाद्दरिद्रता। गुरुमन्त्रपरित्यागाद्रौरवं नरकं व्रजेत्। गुरौ सन्निहिते यस्तु पूजयेदन्यदेवताम्। स याति नरकं घोरं पूजा च विफला भवेत्। एकत्र गुरुणा सार्द्धं गच्छेद्वोपविशेत्तु यः। स याति नरकं घोरं यावदिन्द्राश्चतुर्दश। गुरुवाक्यं हतं कृत्वा आत्मवाक्यं तु योजयेत्। गुरूक्तं लङ्घयेद्यस्तु पतेत् स नरकाय वै"। श्रीक्रमे "उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता। तस्मान्मन्येत सततं पितुरप्यधिकं गुरुम्। गुरुवद्गुरुपुत्रेषु गुरुवत्तत्सुतादिषु। अविद्यो वा सविद्यो वा गुरुरेव च दैवतम्। अमार्गस्थोऽपि मार्गस्थो गुरुरेव सदा गतिः। आयान्तमग्रतो गच्छेद्गच्छन्तं तमनुव्रजेत्। आसने शयने वापि न तिष्ठेदग्रतो गुरोः। अनुज्ञां प्राप्य तिष्ठेच्च नैवं पापमवाप्नुयात्"। क्रियासारे "गुरुर्माता पिता स्वामी बान्धवः सुहृदः शिवः। इत्याधाय मनो नित्यं भजेत् सर्व्वात्मना गुरुम्"

गुरुशिंशपा स्त्री नित्यकर्म्म०। शिंशपाभेदे शब्दार्थचि०।

गुरुसारा स्त्री गुरुः गुरुत्ववान् सारो यस्याः। (शिशु)

१शिंशपायाम् । शब्दार्थचि० । २महासारे वस्तुमात्रे त्रि०

गुरुस्कन्ध पु० गुरुः स्कन्धोऽस्य । १श्रेष्ठपर्वतभेदे । "गुरुस्कन्धो महेन्द्रश्च माल्यवान् पर्वतस्तथा । एते पर्वतराजानः" भा० आश्व० ४३ अ० । २श्लेष्मातकवृक्षे शब्दार्थचि० ।

गुरुहन् पु० गुरुं गुरुपाकं हन्ति हन–क्विप् । १दुर्जरघ्ने गौरसर्षपे हेमच० २गुरुहन्तरि त्रि० ।

गुरूत्तम त्रि० गुरुषु गुरूणां वा उत्तमः । १पूज्यतमे २परमेश्वरे पु० । "तस्मै पूर्वगुरूत्तमाय जगतामीशाय पित्रे नमः" आत्म० वि० । अत्र "न निर्द्धारणे" पा० षष्ठीसमासनिषेधात् सप्तमीतत्पुरुष इति बहवः । कैयटस्तु "यस्मान्निर्द्धार्य्यते यश्च निर्द्धार्य्यते यश्च निर्द्धारणहेतुरेतत्त्रितयसन्निधाने सत्येवायं निषेधः इति "द्विवचने विभज्योपपदे" पा० सूत्रे भाष्यकार आह स्म । पुरुषोत्तम इत्यादौ त्रितयसन्निधानाभावात् न निर्द्धारणविभक्तिः किन्तु सम्बन्धसामान्ये षष्ठीति तया समासः । अतएव "हलादिः शेषः" पा० सूत्रे "हलामादिरिति षष्ठीसमास" इत्युक्तं भाष्ये इत्युवाच "न निर्द्धारणे इति" सूत्रवृत्तौ नृणां द्विजः श्रेष्ठः इत्युदाहरता च कौमुदीकारेण त्रितयसन्निधान एव समासाभावः सूचितः । यत्तु गदाधरेण एतदनालोच्य, षष्ठीसप्तमीसमासयोः स्वरकृतवैलक्षण्यञ्चानालोच्य "न निर्द्धारणे" इत्यस्य षष्ठीसमासप्रकरणञ्चानवेक्ष्य निर्द्धारणषष्ठ्या समासनिषेधे तदर्थकसप्तमीसमासोऽपि निषिद्धः अन्यथा प्रयोगसामग्र्यात् सूत्रवैयर्थ्यमतो गुरूत्तम इत्यत्र पञ्चमीतत्पुरुषोऽङ्गीकृतः, तत्तु साहसमात्रम् तथा हि "पञ्चमी विभक्ते" पा० सूत्रे निर्द्धार्य्यमाणस्य भेद एव पञ्चमीविधानात् तयोः सामान्यधर्माक्रान्तत्वाभावे एव तस्याः प्रवृत्तेः । यथा माथुराः पाटलिपुत्रेभ्य आढ्यतमाः अत्र पाटलिपुत्रस्थलोकानां माथुराणां च केनापि रूपेण सामान्यधर्मत्वाभावेन उभयोर्भेद एव इति तत्र पञ्चमीप्रवृत्तिः । गुरूत्तम इत्यादौ तु ईशस्यान्यगुरुनिष्ठगुरुत्वरूपसामान्यधर्म्माक्रान्तत्वात्तदप्रवृत्तेर्न पञ्चमीसमासः

"अक्षरादपि चोत्तमः" (गीता) इत्यादौ तु अक्षराच्चेतनवर्गात् तदपेक्ष्येति व्याख्या न्यायमते जीवेश्वरयोर्भेदेऽपि चेतनत्वसामान्यधर्म्माक्रान्तत्वेन तयोर्भेदाभावात् न पञ्चमीप्रसक्तिः । वेदान्तिमते अक्षरशब्दस्य मायापरत्वात् ईशमाययोर्भेदसम्भवात् पञ्चमीप्रसक्तिसम्भावनायामपि तया पञ्चम्या न समासप्रसक्तिः पञ्चमीतत्पुरुषस्य वक्ष्यमाणसूत्रेभ्यो विषयविशेषनियतत्वेनात्र तदप्रसक्तेः । अक्षरशब्दस्य मायापरत्वञ्च गीताव्याख्यायां मधुसूदनेन दर्शितं यथा

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते" गीता । "द्वौ इमौ पृथग्राशीभूतौ पुरुषोपाधित्वेन पुरुषशब्दव्यपदेश्यौ लोके संसारे, कौ तावित्याह क्षरश्चाक्षर एव च । क्षरतीति क्षरो विनाशी कार्य्यराशिरेकश्च पुरुषः, न क्षरतीत्यक्षरो विनाशरहितः । क्षरस्य पुरुषस्योत्पत्तिवीजं भगवतो मायाशक्तिर्द्वितीयः पुरुषः । तौ पुरुषौ, व्याचष्टे स्वयमेव भगवान्, क्षरः सर्वाणि भूतानि समस्तं कार्य्यजातमित्यर्थः कूटस्थः कूटो यथार्थवस्त्वाच्छादनेनायथार्थवस्तुप्रकाशनं वञ्चनं मायेत्यनर्थान्तरं तेनावरणविक्षेपशक्तिद्वयरूपेण स्थितः कूटस्थः भगवन्मायाशक्तिरूपः कारणोपाधिः संसारवीजत्वेनानन्त्यादक्षर उच्यते । केचित्तु क्षरशब्देनाचेतनवर्गमुक्त्वा कूटस्थोऽक्षर उच्यत इत्यनेन जीवमाहुः तन्न सम्यक्, क्षेत्रज्ञस्यैवेह पुरुषोत्तमत्वेन प्रतिपाद्यत्वात् तस्मात् क्षराक्षरशब्दाभ्यां कार्य्यकारणोपाधी उभावपि जड़ावेवोच्येते इत्येव युक्तम् । आभ्यां क्षराक्षराभ्यां विलक्षणः क्षराक्षरोपाधिद्वयदोषेणाऽस्पृष्टो नित्यशुद्धबुद्धमुक्तस्वभावः "उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य विभर्त्त्यव्यय ईश्वरः" (गीता) । उत्तम उत्कृष्टतमः पुरुषस्त्वन्यः अन्य एव अत्यन्तविलक्षण आभ्यां जड़राशिभ्याम्, उभयभासकस्तृतीयश्चेतनराशिरित्यर्थः । परमात्मेत्युदाहृतः अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयेभ्यः पञ्चभ्योऽविद्याकल्पितात्मभ्यः परमः प्रकृष्टोऽकल्पितः "ब्रह्म पुच्छं प्रतिष्ठा" इत्युक्त आत्मा च सर्वभूतानां प्रत्यक्चेतन इत्यतः परमात्मेत्युक्तो वेदान्तेषु यः परमात्मा लोकत्रयं भूर्भुवःस्वराख्यं सर्वं जगदिति यावत् आविश्य स्वकीयया मायया शक्त्याधिष्ठाय विभर्त्ति सत्तास्फूर्त्तिप्रदानेन धारयति पोषयति च कीदृशः अव्ययः सर्वविकारशून्यः ईश्वरः सर्वस्य नियन्ता नारायणः स उत्तमः पुरुषः परमात्मेत्युदाहृत इत्यन्वयः" । अतः "यस्मात् क्षरमतीतोऽक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" गीतावाक्ये अक्षरादितिल्यब्लोपे पञ्चमी मध्यपदलोपः अक्षरमतीत्य उत्तम इत्यर्थः । पुरुषोत्तम इत्यत्र पुरुषपदार्थानां पुरुषोपाधिद्वयतद्विलक्षणमुख्यपुरुषाणां मध्ये उत्तम

इत्यर्थः द्वाविमाविति क्षराक्षरपुरुषयोः "उत्तमः पुरुषस्त्वन्य" इति त्रयाणामेव पूर्वं प्रक्रान्तत्वात्तेषां मध्ये एव परमात्मन उत्तमत्वेन निर्द्धार्य्यमाणत्वात् अतो न तत्रापि पञ्चमीसमासः। तथाहि "पञ्चमी भयेन" पा० "अपेतापोढमुक्तपतितापत्रस्तैरल्पशः" "स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन" पा० सूत्रैः पञ्चमीतत्पुरुषस्य विधानात् तन्मध्ये च एतत्पञ्चम्याः पाठाभावात् नात्र पञ्चमीतत्पुरुषः किन्तु सप्तमीसमासः षष्ठीसमासो वेत्येवेति ज्यायः।

गु(गू)र्जर पु० दक्षिणदेशस्थे देशभेदे सोऽभिजनोऽस्य अण्। गौर्ज्जर तद्देशवासिनि बहुषु लुक्। महाराष्ट्राश्च तैलिङ्गाद्रविडा गु(गू)र्ज्जरास्तथा" दशविधब्राह्मणकथने।

गु(गू)र्द कूर्दने भ्वा० आत्म० अक० सेट्। गूर्दते अगूर्दिष्ट। जुगूर्दे। लघुयुक्तस्य क्विपि गूः गुरौ गुरः। दीर्घान्वितस्य गूः गूरौ गूर इति भेदः।

गु(गू)र्द निवासे कूर्दने च चुरा० उभ० अक० सेट्। गु(गू)र्दयति ते अजुगु(गू)र्दत्-त।

गुर्व उद्यमे भ्वा० पर० अक० सेट्। गुर्वति अगुर्वीत्। जुगुर्व ईदित् गूर्णः।

गुर्विणी स्त्री गुरुर्गर्भोऽस्त्यस्याः व्रीह्यादित्वात् इनि नि० गुणाभावः, गर्व—गतौ "गर्वेरत उच्चेति" उणा० इनन् गौरा० ङीष् वा। गर्भिण्याम्। "उत्तरां त्वमवेत्यस्य गुर्विणीं मा शुचः शुभे!" भा० आश्व० ६१अ०। "गुर्विणीं नानुगच्छन्ति न स्पृशन्ति रजस्वलाम्" अनायुष्योक्तौ।

गर्व्वादित्य पु० गुरुणा सह आदित्यो यत्र। ज्योतिषोक्ते कालाशुद्धिहेतौ एकराश्येकनक्षत्रस्थयोर्जीवादित्ययोर्योगभेदे "गुर्वादित्ये दशाहिकम्" ज्यो०त०। "एकराशौ गतौ स्यातामेकर्क्षविषये यदि। गुर्वादित्यौ, तदा त्याज्या यज्ञोद्वाहादिकाक्रियाः" राजमा०। "गुर्वादित्ये दशाहे त्विति" नक्षत्रभेदविषयम्। अत्यन्तावश्यकत्वे भुजबलभीमः "जीवोऽर्केण युतः करोति मरणं, बालांशुको भागुरिः नक्षत्रैकगतो वदन्ति मरणं, पादस्थितो देवलः" तथा च एकराशिस्थत्वेऽकालः अत्यन्तावश्यकत्वे एकनक्षत्रपादस्थितौ दशाहं त्यक्त्वा यज्ञादि कर्त्तुं शक्यते इति व्यवस्था।

गुर्व्वी स्त्री गुरु—ङीष्। १गर्भवत्याम् "न हि वन्ध्या विजानाति गुर्वीप्रसववेदनाम्" हितो०। २गौरवयुक्तस्त्रीलिङ्गार्थकपदार्थे च "गुर्वीरजस्रं दृषदः समन्तात्" माघः।

यत्तु "अनन्यगुर्वास्तव केन केवलम् पुराणमूर्त्तेः" पद्ये अन्यगुर्व्या इति पाठं कल्पयित्वा शब्दक० उदाजहार तत् प्रामादिकं "न विद्यतेऽन्या गुरुर्यस्यास्तस्या अन्यगुर्वा इत्यनीकारान्तः पाठः एव साधुः समासात् प्राङ् ङीषि "नद्यृतश्चेति" पा० कप्प्रत्ययः स्यात् पश्चात्तु अनुपसर्जनाधिकारात् "वोतो गुणवचनादिति" न प्राप्नोतीति। तद्रूपसिद्धिस्तु "ङिति ह्रस्वश्चेति" पा० वा नदीसंज्ञत्वायाम् "आण्नद्याः" पा० इत्याडागमात्" मल्लि०। समासान्तस्य विधेरनित्यत्वकल्पनेन कबभावकल्पनस्यागतिकविषयएव स्वीकारात् अत्र तथाऽकल्पनेऽपि छन्दोदोषाप्रसङ्गात्" इति विभाव्यम्। ३गुरुस्त्रियाञ्च। [टाप् मेदि०।

गुल पु० गुड+डस्य लः। १ऐक्षवे गुडे २स्नुहीवृक्षे स्त्री

गुलञ्चकन्द पु० गुलं गुडरसमञ्चति अन्च—अण् शक०। गुलञ्चः कन्दोऽस्य। (कुली) भाषाप्रसिद्धे कन्दभेदे राजनि०

गुलिका स्त्री गुडः गोलाकारः अस्त्यस्य ठन्। १गुटिकायां गोलाकारायां वटिकायां (वसन्त) २रोगभेदे च मेदि०। "घृतेन गुडयुक्तेन गोलकुष्माण्डखण्डकान्। रञ्जितान् जीरमरिचैरिमांस्तु गुलिकां विदुः" इत्युक्ते ३पक्वकुष्माण्डभेदे च। [याम् (वसन्त) २रोगे च मेदि०।

गुली स्त्री गुडाकारोऽस्त्याः अच् गौरा० ङीष्। १गुटिका-

गुलगुधा अव्य०। सहार्थे। उर्यादि० पा० ग० सू०।

गुलुच्छ गुच्छ+पृषो०। गुच्छे स्तवके त्रिका०। "कोषातकीपुष्पगुलुच्छ(ञ्छ)कान्तिभिः" माघः।

गुलुञ्छ पु० गुड—क्विप् गुलं गोलाकारमुञ्छति बध्नाति उञ्छ—बन्धने अण् उप० समा० डस्य लः। स्तवके हेमच० ण्वुल्। गुलुञ्छक तत्रार्थे शब्दरत्ना०। गुलुञ्च इति हारा० पाठः तत्रार्थे। तत्र ग्लुन्च—अच् पृषो० साधु

गुल्फ पु० गुल—फक् नि० अस्योत्व। पादग्रन्थौ। "षडङ्गुलीनां द्वे पाण्योर्गुल्फेषु च चतुष्टयम्" याज्ञ०। "आगुल्फकीर्णापणमार्गपुष्पम्" कुमा०। "गुल्फैरति तनुभिरतिशहङ्किवौ" वृ०स० ६१अ०। गुल्फस्य मूलं कर्णा० जाहच्। गुल्फजाह गुल्फमूले न०।

गुल्म पु० गुड—रक्षणे वेष्टने वा मक् डलयोरैक्यात् डस्य लः। १प्रधानपुरुषाधिष्ठिते रक्षके पुरुषसंघे, (गजाः ९, रथाः ९, अश्वाः २७, पदातयः ४५) एतत्संख्यान्विते २सैन्यसमुदाये, स्वनामख्याते ३रोगभेदे, अमरः। घट्टदेशे रक्षणार्थं स्थापिते ४सैन्ये, ५अप्रकाण्डे लतादौ मेदि० एकमूलेषु सङ्घातजातेषु शरेक्षुप्रभृतिषु तृणभेदेषु, शब्द०।

गुच्छगुल्ममित्यादि मनुवचनस्य गुच्छशब्दे दर्शितस्य कुल्लूकभट्टव्याख्या २५८६पृ० दृश्या। ७प्लीहरोगे अमरः। "त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते १६०पृ०अनीकिनीशब्दे दर्शितम् भा०उ०वाक्यम्। "प्रच्छन्नस्तरुगहनैः स गुल्मजालैः" किरा०। "गुल्मगुच्छक्षुपलतेत्यादि" याज्ञ०। "स्थावराणां तु भूतानां जातयः षट् प्रकीर्त्तिताः। गुच्छगुल्मलतावल्ल्यस्त्वक्सारास्तृणजातयः भा०आनु०५८अ०। रक्षणार्थं गुल्मनिवेशनप्रकारो मनुनोक्तो यथा "द्वयोस्त्रयाणां पञ्चानां मध्ये गुल्ममधिष्ठितम्। तथा ग्रामशतानां च कुर्य्याद्राष्ट्रस्य संग्रहम्"। "द्वयो र्ग्रामयोर्मध्ये त्रयाणां वा ग्रामाणां पञ्चानां वा ग्रामशतानां गुल्मं रक्षितृपुरुषसमूहं सत्वप्रधानपुरुषाधिष्ठितं राष्ट्रस्य संग्रहं रक्षास्थानं कुर्य्यात् अत्र लाघवगौरवापेक्षयोक्तविकल्पः" कुल्लू०। "गुल्मांश्च स्थापयेदाप्तान् कृतसंज्ञान् समन्ततः। स्थाने युद्धे च कुशलानभीरूनविकारिणः".मनुः गुल्मरोगलक्षणादि सुश्रुतोक्तं यथा "अथातो गुल्मप्रतिषेधं व्याख्यास्यामः। यथोक्तैः कोपनैर्दोषाः कुपिताः कोष्ठमागताः। जनयन्ति नृणां गुल्मं स पञ्चविध उच्यते। हृद्वस्त्योरन्तरे ग्रन्थिः सञ्चारी यदि वाचलः। चयापचयवान् वृत्तः स गुल्म इति कीर्त्तितः। पञ्च गुल्माश्रया नृणां पार्श्वे हृन्नाभिवस्तयः। कुपितानिलमूलत्वाद्गूढमूलोदयादपि। गुल्मवद्वा विशालत्वात् गुल्म इत्यभिधीयते। स यस्मादात्मनि चयं गच्छत्यप्स्विव बुद्बुदः। अन्तःसरति यस्माच्च न पाकमुपयात्यतः। स व्यस्तैर्जायते दोषैः समस्तैरपि वोच्छ्रितैः। पुरुषाणां, तथा स्त्रीणां ज्ञेयो रक्तेन चापरः। सदनं मन्दता वह्नेराटोपोऽन्त्रविकूजनम्। विण्मूत्रानिलसङ्गश्च सौहित्यासहता तथा। द्वेषोऽन्ने वायुरूर्द्ध्वञ्च पूर्वरूपेषु गुल्मिनाम्। हृत्कुक्षिशूलं मुखकण्ठशोषो वायोर्निरोधो विषमाग्निता च। ते ते विकाराः पवनात्मकाश्च भवन्ति गुल्मेऽनिलसम्भवे तु। स्वेदज्वराहारविकारदाहास्तृष्णाङ्गरागः कटुवक्त्रता च। पित्तस्य लिङ्गान्यखिलानि यानि पित्तात्मके तानि भवन्ति गुल्मे। स्तैमित्यमन्नेऽरुचिरङ्गसादश्छर्दिः प्रसेको मधुरास्यता च। कफस्य लिङ्गानि च यानि तानि भवन्ति गुल्मे कफसम्भवे तु। सर्वात्मकः सर्वविकारयुक्तः सोऽसाध्य उक्तः क्षतजञ्च वक्ष्ये। नवप्रसूताऽहितभोजना या या चामगर्भं विसृजेदृतौ वा। वायुर्हि तस्याः परिगृह्य रक्तं करोति गुल्मं सरुजं सदाहम्। पैत्तस्य लिङ्गेन समानलिङ्गं विशेषणं चाप्यपरं निबोध। न स्पन्दते नोदरमेति वृद्धिं भवन्ति लिङ्गानि च गर्भिणीनाम। तं गर्भकालातिगमे चिकित्स्यमसृग्भवं गुल्ममुशन्ति तज्ज्ञाः"।

गुल्मकेतु पु०गुल्मः केतुरस्य। अम्लवेतसे राजनि०।

गुल्ममूल न०गुल्म इव मूलमस्य। आर्द्रके (आदा)शब्दर०।

गुल्मवल्ली स्त्री गुल्मप्रधाना वल्ली। सोमलतायाम् राजनि०।

गुल्मशूल न० शूलरोगभेदे शूलशब्दे विवृतिः।

गुल्मिन् त्रि० गुल्म+अस्त्यर्थे इनि। १गुल्मरोगयुक्ते। गुल्मशब्दे सुश्रुतः। स्त्रियां ङीप् सा च विस्तृतलतायां २द्राक्षाताम्बूलीप्रभृतौ अमरः।

गुल्मी स्त्री गुल्मस्तदाकारफलत्वात् गुल्मरोगहन्तृत्वाद्वा अस्त्यर्थे अच् गौ०ङीष्। १आमलक्यां, २एलायाम्, ३वस्त्रनिर्म्मितगृहे, मेदि०४लवल्याम् शब्दार्थचि०५गृहभ्रनखीवृक्षे, (गुड़काओली) शब्दच०। [स्वादौ हेम०।

गुल्य त्रि० गुडं तद्रसमर्हति यत् डस्य लः। मधुरे

गु(गू)वाक पु० गु—पिनाकादित्वात् आक नि० दीर्घः। (सुपारी)क्रमुके अमरः"घोरण्टः पूगी पूगस्य गु(गू)वाकः क्रमुकोऽस्य तु। फलं पूगीफलं प्रोक्तमुद्वेगञ्च तदीरितम्। पूगं गुरु हिमं रूक्षं कषायं कफपित्तजित्। मोहनं दीपनं रुच्यमास्यवैरस्यनाशनम्। आर्द्रं तद्गुर्वभिष्यन्दि वह्निदृष्टिहरं स्मृतम्। स्विन्नं दोषत्रयच्छेदि दृढमध्यं तदुत्तमम्" भावप्र०। "प्रभाते पूगमधिकं मध्याह्ने खदिरं तथा। निशासु चूर्णमधिकं ताम्बूले भक्षयेत् सदा" भावप्र०।

गुष्पित न० गुन्फ भावे—क्त वेदे नि०। गुम्फने वृक्षादेः शाखानिर्गमरूपे ग्रन्थने "व्रततेरिव गुष्पितमोजो दासस्य सम्भवः" ऋ० ८।४०।६। "गुष्पितं निर्गता शाखा" भा०।

गुह संवरणे भ्वा० उभ० सक० वेट्। गूहति ते अगूहीत् अघुक्षत्। अगूहिष्ट अगूढ़ अघुक्षत अगूहिषत अघुक्षन्त। अगूहिषि अघुक्षि। अगूहिष्वहि अगुह्वहि अघुक्षावहि। जुगूह जुगुहे "गूहिता गोढ़ा। गुह्यात्। गूहिषीष्ट घुक्षीष्ट गूहिष्यति-ते-घोक्ष्यति-ते, गुह्यम् गोह्यम्। गूहनं गुहः गुहा। सन् जुघुक्षति "जुगूह तस्याः पथि लक्ष्मणो यत्"रघुः। "अगूहीच्छायकैर्दिशः" "गूहिष्यामि क्षितिं क्षत्रैः"भट्टिः "गूहेत् कूर्म इवाङ्गानि"

मनुः। "जुगूहे दक्षिणे पार्श्वे" भा०वि० २३५ श्लो०। "गूहन्ति मेघा इव रश्मिवन्तम्" भा० भी० ७८२श्लो०। "आकारो गूहितुं शक्यः" भा० द्रो० ४४७ श्लो०। "अगूढसद्भावमितीङ्गितज्ञया" कुमा०। णिच् गूहयति ते अजूगुहत् न। "न देवामपि ह्नुतः सुमति न जुगुक्षतः" ऋ० ८।३१।७। क्विप् घुट् गुहौ गुहः। "विश्वायुरग्ने गुहा गुहं गाः" ऋ० १।६७।३।

अप+अपनयने "अपागूहन्नमृतां मर्त्येभ्यः" ऋ० १०।१७।२। "अपागूहन् अपनीतवन्तः" भा०। संवरणे च। "मात्मानमग्र गूहथाः" अथ० ४।२०।५।

अव+सम्यक्संवरणे। "यूपशकलमवगूहति" शत० ब्रा० ३।७।१।२२। "उष्णीषं संहृत्य पुरस्तादवगूहति" ५।३।५।२३। [३।२।१।१५।

उद्+उत्क्षिप्य संवरणे। "नीविमुद्गूहते" शत० ब्रा०

उप+आलिङ्गने "गाढं चोपजुगूहैनम्" भट्टिः "छायाच्छलेनोपजुगूह लक्ष्मीः" रघुः। "उपगूढानि सवेपथूनि च" कुमा०। "तरङ्गहस्तैरुपगूहतीव" रघुः आश्लेषणे च। "कश्चित् कराभ्यामुपगूढनालम्" रघुः।

नि+अतिशयसंवरणे। "देवात्मशक्तिं स्वगुणैर्निगूढाम्" श्वेता०उप०। समादिपूर्वस्य तत्तदुपसर्गद्योत्यार्थसंयुतसंवरणे

गुह पु० गूहति देवसेनाम् गुह—क। १ कार्त्तिकेये "सेनापत्येन देवानामभिषिक्तो गुहस्तदा" भा०व० २८ अ०। "अथैनमभ्ययुः सर्वदेवसेनाः सहस्रशः। अस्माकं त्वं पतिरिति ब्रुवाणाः सर्वतो दिशः" भा०व० २२८ अ०। "गुहोऽपि येषां प्रथमाप्तजन्मनाम्" कुमा० तस्य देवसेनारक्षकत्वेन सेनापतित्वात् तथात्वम्। भा०आनु० ८५ अ० गुहनामनिरुक्तिरन्यथोक्ता यथा "स्कन्नत्वात् स्कन्दनामायं गुहावासाद्गुहोऽभवत्"। अत्र पक्षे गुहा आवासत्वेनास्त्यस्य अच्। २अश्वे पुंस्त्री शब्दरत्ना०एतदाशयेन "यत्राश्वा बिलयोनयः" कुमा०उक्तम्। देवखातरूपबिलोत्पन्नत्वात्तथात्वम्। ३परमेश्वरे। "करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः" विष्णुस०। "गूहति संवृणोति स्वरूपं माययेति गुहः" भा० "नाहं प्रकाशः सर्वस्य योगमायासमावृतः" इति गीतोक्तेस्तस्य स्वमायया स्वात्मरूपसंवरणात्तथात्वम्। गुहारूपमायाहृदयाद्याश्रयत्वात् वा तथात्वम्। गुहाशयशब्दे दृश्यम्। रामायणप्रसिद्धे शृङ्गवेरपुराधीशे चण्डालजातीये राममित्रे च पु०। "आससाद महावीरः शृङ्गवेरपुरं प्रति" इत्युपक्रमे "यत्र राजा गुहो नाम रामस्यात्मसमः सखा। निषादजात्यो बलवान् स्थपतिश्चेति विश्रुतः" इत्यादिना "सह सौमित्रिणा रामः समागच्छत् गुहेन स" इत्यन्तेन रामा० अयोध्याकाण्डे तत्सख्यमुक्तम्। ५सिंहपुच्छीलतायाम् (चाकुलिया) ६पर्वतादिगह्वरे स्त्री मेदि०। तस्य सर्वसत्त्वसंवारकत्वात् तथात्वम्। "गुहानिबद्धप्रतिशब्ददीर्घम्" "प्रतिस्वनेनास्य गुहागतेन" रघुः ८शालपर्ण्याम् (शालपाण) राजनि० अकृत्रिमे ९देवखाते,१०हृदये च स्त्री शब्दार्थचि०। हृदयस्य गुहातुल्यत्वात् तथात्वम् यथाह शत० ब्रा० ११।२।६।५। "तस्मादिदं गुहा हृदयम्"। "गुहां प्रविष्टौ सुकृतस्य लोके" श्रुतिः ११मायायां च। "यो वेद निहितं गुहायां परमव्योमन्" श्रुतिः गुहाहितं गह्वरेष्ठं पुराणम्" "आत्मा गुहायां निहितः" श्रुतिः। वृषा०आद्युदात्तः। १२गुहाधिष्ठातृदेवतायाम् स्त्री। "गुहाभ्यः किरातम्" यजु० ३०।१७। पुरुषमेधे। १३बुद्धौ। गुह—भावे भिदा० अङ्। १४संवरणे स्त्री। गुह+अश्मा० अस्त्यर्थे र। गुहर तद्युक्ते त्रि०। [दृश्यम्।

गुहराज पु० वृ०सं० ५५।अ० लक्षिते प्रासादभेदे प्रासादशब्दे

गुहलु पु० गोत्रप्रवर्त्तके ऋषिभेदे ततो गर्गा० अपत्ये यञ्। गोहलव्य तद्गोत्रापत्ये पुंस्त्री।

गुहषष्ठी स्त्री गुहप्रिया षष्ठी तज्जन्मदिनत्वात् शाक० त०। "येयं मार्गशिरे मासि षष्ठी भरतसत्तम!। पुण्या पापहरा धन्या शिवा शान्ता गुहप्रिया" ति० त० भविष्योक्ते मार्गशुक्लषष्ठीतिथौ। इयं वारभेदादियोगेन चम्पेति कीर्त्त्यते यथाह नि० सि० ब्रह्मा० पु० "मार्गे भाद्रपदे शुक्ला षष्ठी वैधृतिसंयुता। रविवारेण संयुक्ता सा चम्पेतीह कीर्त्तिता" "विशाखाभौमयोगेन सा चम्पेतीह कीर्त्त्यते" इति मदनरत्ने पाठः। गुहस्य षष्ठ्यां कृतार्थतोक्ता भा०व०२२४अ० "तस्मिन् कुण्डे प्रतिपदि कामिन्या स्वाहया तदा। तत् स्कन्नं तेजसा तत्र संवृतं जनयत् सुतम्" इत्युपक्रमे "द्वितीयायामिति व्यक्तस्तृतीयायां शिशुर्बभौ। अङ्गप्रत्यङ्गसम्भूतश्चतुर्थ्यामभवद्गुहः" इत्युक्त्वा २२८अ० "तदा तदाश्रया लक्ष्मीः स्वयं देवी शरीरिणाम्। श्रीजुष्टं पञ्चमीं स्कन्दस्तस्मात् श्रीपञ्चमी स्मृता। षष्ठीं कृतार्थोऽभवद्यस्मात् तस्मात् षष्ठी महातिथिः" उक्तम्। इयमेव स्कन्दषष्ठीति नि० सि० उक्तम्। ति० त० तु चैत्रशुक्लषष्ठ्या

एव स्कन्दषष्ठीत्वं व्यवस्थापितं तच्च स्कन्दषष्ठीशब्दे वक्ष्यते। देशभेदाद्व्यवस्था

गुहाचर न॰ गुह्यन्ते ज्ञातत्वेयज्ञानपदार्था अस्याम् गुह-घञर्थे क गुहा बुद्धिस्तत्र चरति विषयतया चर-ट। १ब्रह्मणि।

“मनसैवानुद्रष्टव्यम्” इति श्रुतौ तस्य मनोवृत्तिमात्रवेद्यत्वात्तथात्वम्। “आविः सन्निहितं गुहाचरं नाम महत् पदमत्रैतत् समर्पितम्” माण्डू॰ उ॰।

“आविः प्रकाशं सन्निहितं रागाद्युपाधिभिश्चरति भ्राजतीति श्रुत्यन्तराच्छब्दादीनुपलभमानवदवभासते। दर्शनश्रवणमननविज्ञानाद्युपाधिधर्मैराविर्भूतं सल्लक्ष्यते हृदि सर्वप्राणिनाम्। यदेतदाविर्भूतं ब्रह्म सन्निहितं सम्यक् स्थितं हृदि तद् गुहाचरं नाम गुहायाञ्चरतीति दर्शनश्रवणादिप्रकारैर्गुहाचरमिति प्रख्यातम्” भा॰

गुहावदरी स्त्री गुहा गुह्या वदरीव। (शालपाणी) वृक्षे वैद्यकम्।

गुहाशय पु॰स्त्री-गुहायां गर्त्ते शेते शी-अच्। १मूषिके शब्दार्थचि॰ २सिंहादिषु जन्तुषु भावप्र॰यथा “सिंहव्याघ्रवृका ऋक्षतरक्षुद्वीपिनस्तथा। बभ्रुजम्बुकमार्ज्जार इत्याद्याः स्युर्गुहाशयाः”। तन्मांसगुणा भाव॰प्र॰ उक्ता यथा “गुहाशया वातहरा गुरूष्णा मधुराश्च ते। स्निग्धा वल्या हिता नित्यं नेत्रगुह्यविकारिणाम्”। स्त्रियामुभयत्र जातित्वेऽपि योपधत्वात् टाप्। गुहायां हृदि शेते। ३परमात्मनि। “एवं हि यो वेद गुहाशयं प्रभुम्” भा॰आश्व॰४०अ॰। “सर्वभूतगुहाशयः” श्वेता॰उ॰। “गुहायां बुद्धौ शेते इति सर्वभूतगुहाशयः” भा॰ स्वापकाले हृदयेषु शायिनि ४प्राणे “सप्त इमे लोकायेषु चरन्ति प्राणा गुहाशयानिहिताः सप्त सप्त” मुण्ड॰उ॰

गुहाहित पु॰ गुहायां बुद्धौ हृदये वा आहितः। हृदिस्थे बुद्ध्यारूढे परमात्मनि। “गुहाहितं गह्वरेष्टं पुराणम्” कठ॰उ॰

गुहिन न॰ गुह-बा॰ इनन्। वने शब्दरत्ना॰

गुहिल न॰ गुह-गु पा॰ इलच् किच्च। १धने उज्ज्व॰द॰। गुहा+काशा॰चतुरर्थ्याम् इलः। २गुहासन्निकृष्टदेशादौ त्रि॰

गुहेर त्रि॰ गुह-एरक्। १गोप्तरि २लोहकारे सि॰कौ॰।

गुह्य त्रि॰ गुह-भावादौ-क्यप् काशिका। १गोपने २गोप्ये अमरः “गुह्यातिगुह्यगोप्ता त्वम्” जपसमापनमन्त्रः। ३उपस्थे स्त्रीपुंसचिह्ने न॰। गुहामर्हति दण्डादि॰यत्। ४कमठे पु॰स्त्री स्त्रियां योपधत्वात् टाप्। ५दम्भे पु॰ मेदि॰। “गुह्यो गभीरो गहनः” विष्णुस॰ उक्ते ६विष्णौ पु॰ “गूहितुं योग्यं गुह्यं वेदरहस्यं तद्वेद्यत्वात् लक्षणया गुह्यो विष्णुः गुहायां हृदाकाशे निहित इति वा गुह्यः” भा॰।

गुह्यक पु॰ गूहन्ति रक्षन्ति निधिं गुह-ण्वुल् पृषो॰ यगागमः। “निधिं गूहन्ति ये यक्षास्ते स्युर्गुह्यकसंज्ञकाः” इति व्याड़िः। गुह्यं कुत्सितं कायति कै-शब्दे कः गुह्यं गोपनीयं कं सुखं येषामिति वा अनयोः पक्षयोः “शंसिदुहिगुहिभ्योवेति” काशिकावचनात् गुहेः क्यप्। १देवयोनिभेदे तल्लोकप्राप्तिकर्मभेदाः काशी॰ ख॰ उक्ता यथा “गुह्यकानामयं लोकस्त्वेते वै गुह्यकाः स्मृताः” “न्यायेनोपार्ज्य वित्तानि गूहयन्ति च ये भुवि। स्वमार्गगा धनाढ्याश्च शूद्रप्रायाः कुटुम्बिनः। संविभज्य च भोक्तारः क्रोधासूयाविवर्जिताः। न तिथिं नैव वारञ्च संक्रान्त्यादि न पर्व च। नाधर्मञ्च न धर्मञ्च विदन्त्येते सदासुखाः। एकमेव हि जानन्ति कुलपूज्योहि यो द्विजः। तस्मै गाः संप्रयच्छन्ति मन्यन्ते तद्वचः स्फुटम्। समृद्धिभाजोह्यत्रापि तेन पुण्येन गुह्यकाः। भुञ्जते स्वर्गसौख्यानि देवत्वमकुतोभयाः”। २पक्वान्नभेदे तत्पाकप्रकारो यथा “समितां सर्पिषा भृष्टां सिताद्राक्षादिसम्भृताम्। एलालवङ्गकर्पूरमरीचपरिवासिताम्। क्षिपत्वान्य समितालम्बपुटे वेष्ट्य घृते पचेत्। ततः खण्डे न्यसेत् पक्वं गुह्यकोऽयमुदाहृतः। गुह्यको बृंहणो हृद्यो वृष्यः पित्तानिलापहः मधुरोऽतिगुरुः पाके किञ्चित् सन्धानकृत्सरः” पाकशा॰

गुह्यकाली स्त्री नित्यकर्म॰। विश्वसारतन्त्रोक्ते देवीमूर्त्तिकालीभेदे तन्मन्त्राद्युक्तं तत्र यथा “अथ वक्ष्ये महेशानि! विद्यां सर्वफलप्रदाम्। चतुर्वर्गप्रदां साक्षात् महापातकनाशिनीम्। सर्वसिद्धिप्रदां नित्यां भक्तिमुक्तिप्रदायिनीम्। गुह्यकालीं महाविद्यां त्रैलोक्ये चातिदुर्लभाम्। इन्द्रादि(र)रूढं वर्गाद्यं रतिविन्दुविभूषितम् (क्रीं)। त्रिगुणञ्च ततः कृत्वा ईशानञ्च समुद्धरेत्। षष्ठस्वरसमायुक्तं विन्दुनादकलान्वितम् (हूं)। द्विगुणञ्च ततः कृत्वा ईशवर्णं समुद्धरेत्। वामाक्षिवह्निसंयुक्तं नादविन्दुकलायुतम् (ह्रीं)। तद्गुह्ये कालिके चोक्ताः चाथवा दक्षिणे वदेत्। सप्तबीजं ततः पश्चात् त्रैलोक्यमोहिनी

त्विषम्"। अथ वेति गुह्ये कालिके। दक्षिणे कालिके"वा

गुह्यकेश्वर पु० ६त०। कुवेरे।

गुह्यगुरु पु० कर्म०। शिवे महादेवे त्रिका०

गुह्यदीपक पु० स्वयं गुह्यः सन् दीपयति दीपि–ण्वुल्। गुह्यप्रदीप इव कायति कै–क वा। खद्योते (जोनाकी-पोका) शब्दमा०। [अच्। मूले राजनि०

गुह्यनिष्यन्द पु० गुह्यात् उपस्थात् निष्यन्दते नि+स्यन्द

गुह्यपुष्प पु० गुह्यं पुष्पमस्य। अश्वत्थवृक्षे राजनि०

गुह्यभाषित न० गुह्यं गुप्तं भाषितम्। १मन्त्रे जटाध० २गुप्तवाक्ये च।

गुह्यमय पु० गुह्यप्रचुरः प्राचुर्य्ये मयट्। कार्त्तिकेये "आग्नेयः कृत्तिकापुत्रो रौद्रो गाङ्गेय इत्यपि। श्रूयते भगवान् देवो सर्वगुह्यमयो गुहः" भा०आ०१३७अ०

गुह्यवीज पु० गुह्यं वीजमस्य। भूतृणे राजनि०

गुह्याष्टक न० भारभूत्यादितीर्थाष्टके। तच्च यथा "भारभूत्याषाढिडिण्डिलाकुल्लमरपुष्कराः। प्रभासनैमिषौ चेति गुह्याष्टकमिदं जले" इति स्कन्द० स०।

गू विष्ठात्यागे तुदा० कुटा०पर०अक०सेट्। गुवति अगुवीत् जुगाव। ओदित् गूनः। गूथम्।

गू स्त्री गच्छत्यपानेन देहात् गम–कू टिलोपश्च। १विष्ठायां, २मले च। गूधातोः क्विप्प्रत्ययान्तताकथनं पुंलिङ्गताकथनञ्च प्रामादिकम्।

गूढ त्रि० गुह–क्त। १गुप्ते २संवृते च अमरमेदिन्यौ। "कामिनीकुचकलशवत् गूढं चमत्करोति" सा०द० "गूढाकारेङ्गितस्य च" रघुः।

गूढचारिन् त्रि०गूढः सन् चरति चर–ट। १गुप्तीभूयचारिणि गुप्तचरणञ्च चौर्य्यशङ्काहेतुः यथोक्तं याज्ञवल्क्येन "अन्येऽपि शङ्कया ग्राह्या जातिनामादिनिह्नवैः। द्यूतस्त्रीपानसक्ताश्च शुष्कभिन्नमुखस्वराः। परद्रव्यगृहाणाञ्च प्रच्छका गूढचारिणः। निराया व्ययवन्तश्च विनष्टद्रव्यविक्रयाः। गृहीतः शङ्कया चौर्य्ये नात्मानं चेद्विशोधयेत्। दापयित्वा हृतं द्रव्यं चौरदण्डेन दण्डयेत्"।

गूढज पु० गूढ–गुप्तः सन् जायते जन–ड। पुत्रभेदे "गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतोमतः" याज्ञ०। गूढोत्पन्नशब्दे विवृतिः।

गूढनीड पुंस्त्री गूढं नीडं वासस्थानं यस्य। खञ्जनखगे शब्दमाला तद्वासस्थानं हि केनापि न दृष्टचरम् स्त्रियां जातित्वात् ङीष्। [जनि०।

गूढपत्र पु० गूढं पत्रमस्य। १अङ्कोठे, २करीरे च रा-

गूढपथ पु० गूढः पन्थायस्य अच् समा०। १अन्तःकरणे शब्दार्थचि०कर्म०। २गुप्ते मार्गे च

गूढपाद् पुंस्त्री गूढः पादोऽस्य दृषो०। १सर्पे अमरः

गूढपाद पुंस्त्री गूढः पादोऽस्य। १सर्पे शब्दरत्ना० "महीधरमिव श्वेतं गूढपादैर्विषोल्वणैः" भा० कर्ण० १२१ अ०। स्त्रियां जातित्वात् ङीषि पादः पदादेशः गूढपदी। २गुप्तपादमात्रे त्रि० "उपानद्गूढपादश्च" हितो०।

गूढपुरुष पु०कर्म०। गुप्तचरे, प्रणिधौ अमरः। [राजनि०।

गूढपुष्पक पु० गूढानि संवृतानि पुष्पाण्यस्य। वकुलवृक्षे।

गूढफल पु०गूढं यथा तथा फलति अच्। वदरे शब्दार्थचि०

गूढ़मार्ग पु०नि०कर्म०। भूमेरन्तर्गते सुरङ्गाख्ये पथि हेमच०

गूढमैथुन पुंस्त्री गूढं केनाप्यदृश्यं मैथुनं यस्य। काके। स्त्रियां जातित्वात् ङीष्।

गूढवर्च्चस् पुंस्त्री गूढवर्च्चोऽस्य। भेके त्रिका०।

गूढवल्लिका स्त्री कर्म०। अङ्कोठवृक्षे राजनि०।

गूढव्यङ्ग्या स्त्री गूढं काव्यार्थभावनापरिपक्वबुद्धिमात्रवेद्यम् व्यङ्ग्यं यत्र। लक्षणाभेदे "व्यङ्ग्यस्य गूढागूढत्वात् द्विधा स्यात् फललक्षणा" सा०द०। यथा "उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्। विदधदीदृशमेव सदा सखे! सुखितमास्स्व ततः शरदां शतम्"

गूढसाक्षिन् पु० कर्म०। 'अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम्। यः श्राव्यते तदः गूढं गूढसाक्षी स उच्यते" नारदोक्ते साक्षिभेदे।

गूढाङ्ग पुंस्त्री गूढान्यङ्गान्यस्य। कच्छपे राजनि० स्त्रियां जातित्वात् ङीष् २गुप्तदेहमात्रे त्रि० तत्र स्त्रियां स्वाङ्गत्वात् वा ङीष्। [मिदन्तत्वात् वा ङीष्।

गूढाङ्घ्रि पुंस्त्री गूढः अङ्घ्रिरस्य। सर्पे राजनि० स्त्रिया-

गूढ़ोत्पन्न पु० गूढं यथा तथोत्पन्नः। "उत्पद्यते गृहे यस्य न च ज्ञायेत कस्य सः। स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः" इति मनूक्ते पुत्रभेदे। "यस्य गृहे अवस्थितायां भार्य्यायां यः पुत्र उत्पद्यते सजातीयोऽयं भवतीति ज्ञातोऽपि कस्मात् पुरुषविशेषाज्जातोऽसाविति न ज्ञायते स गृहे अप्रकाशमुत्पन्नस्तस्य पुत्रः स्याद्यदीयायां भार्य्यायां जातः" कुल्लू०। "सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः" याज्ञ०उक्तेः

सजातीयत्वनिश्चये एव तस्य पुत्रता। स च पूर्वषट्कपातित्वात् बन्धुदायहरः यथाह मनुः “औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च। गूढोत्पन्नोऽपविद्धश्च दायादबान्धवाश्च षट्”।

गूढात्मन् पु॰ गूढ आत्मा पृषो॰। परमात्मनि। “भवेद्वर्णागमात् हंसः सिंहो वर्णविपर्य्ययात्। गूढोत्मा वर्णविकृतेर्वर्णलोपे पृषोदरः” व्या॰ का॰। “एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते” श्रुतिः तस्य सर्वान्तर्यामित्वेन स्थितावपि अविदुषामगम्यत्वात् गूढत्वम्।

गूथ पु॰न॰। गू-थक् अर्द्धर्चा॰। विष्ठायाम् अमरः।

गूथलक्त पुंस्त्री गूथे रक्त आसक्त रस्य लः। (गुयेसालिक) प्रसिद्धे खगे शब्दच॰। स्त्रियां जातित्वात् ङीष्।

गून त्रि॰ गू-क्त तस्य नः। कृतविष्ठोत्सर्गे अमरः। [गूरणम्

गूर उद्यमे चुरा॰ आत्म॰ अक॰ सेट्। गूरयते अजुगूरत।

गूर बधे गतौ च दिवा॰ आत्म॰ सक॰ सेट्। गूर्य्यते अगूरिष्ट। जुगूरे ईदित् गूर्णः

गूर्त्त(र्ण) त्रि॰ गूरी उद्यमे क्त ईदित्त्वात् नेट् वेदे नित्वाभावः। उद्युक्ते “प्रहोता गूर्त्तमना उराणाः” ऋ॰ ६।६३।४ “इदमित्था रौद्रं गूर्त्तवचाः” ऋ॰ १०।६१।१।२।२प्रशस्ते च “पुरां गूर्त्तश्रवसं दर्माणम्” ऋ॰ १।६१।५ “गूर्त्तश्रवसम् प्रशस्यान्नम्” भा॰। लोके निष्ठातस्य नत्वे गूर्ण इत्येव।

गूर्त्ति त्रि॰ गृणन्ति स्तुवन्ति गृ-कर्त्तरि क्तिच् “बहुलं छन्दसि” पा॰ उत्त्वम्। १स्तोतरि “गूर्त्तयो नेमानिषः” ऋ॰ १।५६।१ “गूर्त्तयः स्तोतारः” भा॰। भावे क्तिन्। २स्तुतौ स्त्री “शिशुं न यज्ञैः स्वदयन्त गूर्त्तिभिः” ऋ॰ ८।१५।१ “गूर्त्तिभिः स्तुतिभिः” भा॰ लोके तु गीर्णिरित्येव।

गूर्द स्तुतौ सक॰ चु॰ उभ॰ सेट्। गूर्दयति ते अजुगूर्दत् त। “गूर्दयतिः स्तुतिकर्म्मा” निघ॰ “तं गूर्दय स्वर्णरम्” ऋ॰ ७।१८।१ “गूर्दय स्तुहि” भा॰ क्रीडार्थे गुर्द्दवत्।

गूवाक पु॰ गुवाक+पृषो॰। गुवाकशब्दार्थे पूगवृक्षे राजनि॰

गूषणा स्त्री मयूरपिच्छचन्द्रे शब्दच॰।

गृ सेके भ्वा॰ पर॰ सक॰ अनिट्। गरति अगार्षीत्। जगार।

गृज ध्वनौ भ्वा॰ पर॰ अक॰ सेट् गर्जति। अगर्जीत् जगर्ज “गर्ज गर्ज क्षणं मूढ!” देवीमा॰ “गर्जन् हरिः साम्भसि शैलकुञ्जे” भट्टिः। भावे गृज्यते। अगर्जि

गृज ध्वनौ भ्वा॰ पर॰ अक॰ सेट् इदित्। गृञ्जति अगृञ्जीत्। जगृञ्ज गृञ्जनम्। भावे गृञ्ज्यते अगृञ्जि

गृञ्जन पु॰ गृञ्जति रोगभेदनाशाय ध्वनति गृजि-कर्त्तरि ल्यु। १मूलभेदे मेदि॰ २रक्तलशुने राजनि॰। “गृञ्जनः पित्तलः ग्राही तीक्ष्णोष्णो रोगनाशनः। गन्धाकृतिगुणैस्तुल्यः सूक्ष्मनालः पलाण्डुना” इत्युक्तलक्षणे (सलगम्) प्रसिद्धे ३ मूलभेदे पु॰। “कटुष्णं कफवातघ्नं गृञ्जनं गुल्मनाशनम्। रुचिकृत् दीपनं हृद्यं दुर्गन्धि परिकीर्त्तितम् इत्युक्तगुणे (लशुन) ख्याते ४मूलभेदे न॰ “लशुनं गृञ्जनं चैव पलाण्डुं कवकानि च” अभक्ष्ये मनुः। (गाजर) इति ख्याते ५मूलभेदे च ६विषदिग्धपशुमांसे न॰ मेदि॰ स्वार्थे क। तत्रार्थे। “शोभाञ्जनः कोविदारस्तथा गृञ्जनकादयः” भा॰ आनु॰ ९१ अ॰ अश्राद्धीयोक्तौ।

गृञ्जिम पु॰ यदुवंश्ये शूरस्य पुत्रे वसुदेवभ्रातृभेदे। “महिषद्यां जज्ञिरे शूरात् भोज्यायां पुरुषा दश। वसुदेवो महाबाहुः” इत्युपक्रमे “अनाधृष्टिः कनवको वत्सवानथ गृञ्जिमः” हरिव॰ ३५ अ॰।

गृणीषन् पु॰ गृ-णिक् गृणिः स्तोत्रं तस्येच्छा इष-भावे बा॰ कनिन् ६त॰। स्तोत्रेच्छायाम् “देवं देवं वोऽवसे इन्द्रमिन्द्रं गृणीषणि” ऋ॰ ८।१२।१९ “गृणीषणि स्तोत्रेच्छायाम्” भा॰। [ङीष्।

गृण्डीव पुंस्त्री स्थूलशृगाले हेम॰ स्त्रियां जातित्वात्

गृत्स पु॰ गृध्यति अनेन गृध-स। १कामदेवे उज्ज्वलद॰ २स्तोतरि ३स्तुत्ये च त्रि॰ माधवः “गृत्सं कविं विश्वविदममूरम्” ऋ॰ २।१९।१ “गृत्सं गृणन्तम्” भा॰ “गृत्सो राजा वरुणश्च एतम्” ऋ॰ ७।८७।५ गृत्सः स्तुत्यः” भा॰। ४मेधाविनि त्रि॰ निरु॰। अग्निस्तरुणास्विदस्तु” ऋ॰ ७।४।२ “गृत्सो मेधावी” भा॰। ५विषयाभिलाषुके त्रि॰ ६रुद्रभेदे पु॰ “गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमः” यजु॰ १६।२५ [उदा॰दृश्यम्।

गृत्सपति पु॰ ६त॰। रुद्रभेदे गृत्सशब्दे यजुर्वाक्यं

गृत्समति पु॰ बृहस्पतिवंश्ये सुहोत्रपुत्रभेदे नृपे “सुहोत्रस्य सुतद्वयम्” “काशकश्च महासत्वस्तथा गृत्समतिर्नृपः” हरिव॰ ३२ अ॰।

गृत्समद पु॰ शौनकगोत्रप्रवरे शुनहोत्रस्य १पुत्रभेदे “शुनहोत्रस्य दायादास्त्रयः परमधार्मिकाः। काशः शाल्मश्च द्वावेतौ तथा गृत्समदः प्रभुः” हरिव॰ २९ अ॰ “शुनकानां गृत्समदेति त्रिप्रवरं वा भार्गवशौनहोत्रगार्त्समदेति” आश्व॰ श्रौ॰ १२।१०।१२ “काष्टिर्गृत्सम-

दोनाम शक्रस्य दयितः सखा" भा० आनु० १८ अ०। स च ऋग्वेदिनां तर्पणीयर्षिभेदः "अथर्षयः शतर्चिनो माध्यमा गृत्समदो विश्वामित्रो वामदेवोऽत्रिर्भरद्वाजो वशिष्ठः" इति आश्व०गृह्य०सू०३।४।२ "वीतहव्यो महाराज! ब्रह्मवादित्वमेव च। तस्य गृत्समदः पुत्रो रूपेणेन्द्र इवापरः। शक्रस्त्वमिति यो दैत्यैर्निगृहीतः किलाभवत्। ऋग्वेदे वर्त्तते चाग्र्या श्रुतिर्यस्य महात्मनः। यत्र गृत्समदो ब्रह्मन् ब्राह्मणैः स महीयते। स ब्रह्मचारी विप्रर्षिः श्रीमान् गृत्समदोऽभवत्" आनु० ३० अ० उक्ते २वीतहव्यपुत्रे ऋषिभेदे च।

गृध लिप्सायां दिवा० पर० सक० सेट्। गृध्यति इरित् अगृधत्—अगर्द्धीत्। जगर्द्ध। गर्द्धित्वा-गृद्ध्वा गृध्नुः।

गृधु त्रि० गृध—कु। १अभिलाषुके २कामे पु० उणादि०।

गृधू स्त्री गृध—कू १वुद्धौ २कुत्सिते ३अपाने च संक्षिप्तसा०

गृध्नु त्रि० गृध—क्नु। लुब्धे अमरः "अगृध्नुराददे सोऽर्थान्" रघुः "चातकस्तोयगृध्नुः" मेघदू० "मा ते गृध्नुरविशस्तातिहायच्छिद्रागात्राणि" ऋग्० १।१६।२०

गृध्य त्रि० गृध—कर्मणि क्यप्। १अभिषणीये "गृध्यमर्थमपाप्स्यसि" भट्टिः। भावे क्यप्। २लिप्सायां न०। ततोऽस्त्यर्थे इनि। गृध्यिन् लिप्सावति त्रि०। "नेमां हिंस्युर्वने बालां क्रव्यादा मांसगृध्यिनः" भा० आनु० ७२ अ०। स्त्रियां ङीप्।

गृध्र पुंस्त्री गृध—क्रन्। (शकुनि) पक्षिभेदे राजनि०। "आसन्नमृत्योर्नियतं चरन्ति गृध्रादयो मूर्ध्नि गृहोर्द्धभागे" शकुनशास्त्रम्। "कौशिकगृध्रप्रभृतिभिरनिष्टविहगैः परित्यक्ते" बृ०स० ४८ अ०। गृध्रस्येदम् गार्ध्रं गृध्रसम्बन्धिनि त्रि० गार्ध्रपक्षशब्दे २५८५पृ० उदा० "गृध्रच्छाये वरूथिनी" २पक्षिमात्रे च "तौ सीतान्वेषिणौ गृध्रं (जटायुषम्) लूनपक्षमपश्यताम्" रघुः। ३लुब्धे त्रि० "प्रत्यग्रनिशितैः शस्त्रैर्जयगृध्राः प्रहारिणः" भा० द्रो० ७ अ०। गृध्रपक्षिजातिश्च श्येनीजाता यथाह "श्येनो श्येनांश्च गृध्रांश्च तथोलूकानजायत" रामा० गृध्रीशब्दे दृश्यम्। स्त्रियां ङीष्।

गृध्रकूट पु० गृध्रप्रधानं कूटमस्य। मगधदेशस्थपर्वतभेदे। "गोलाङ्गूलैर्महाभागो गृध्रकूटेऽभिरक्षितः" (बृहद्रथः) भा० शा० ४९ अ०। "चरणाद्रिं समारभ्य गृध्रकूटान्तकं शिवे!। तावत् कीकटदेशः स्यात्तदन्तर्मगधो भवेत्" शक्ति० सङ्ग० ३०७ पट०

गृध्रनखी स्त्री गृध्रस्य नखस्तदाकारोऽस्त्यस्याः अच् गौरा० ङीष्। (कुलियाखाडा) १कुलिकवृक्षे रत्नमा०। २कोलिवृक्षे वदर्य्याम् त्रिका० "करमर्द्दत्रिकण्टकसौवीरकशतावरीगृध्रनख्यश्चेति कण्टकसंज्ञः। रक्तपित्तहरौ ह्येतौ वल्ली कण्टसंज्ञकौ। सर्वमेहहरौ चैव शुक्रदोषविनाशनौ" सुश्रुते तस्याः कण्टकसंज्ञत्वमुक्त्वा गुणा उक्ताः।

गृध्रपत्रा स्त्री गृध्र इव सूक्ष्मं पत्रं यस्याः। सूक्ष्मपत्रावृक्षे राजनि०। गृध्रस्य पत्रं पत्रं पक्षोऽस्य। गृध्रपक्षिपक्षसतपक्षे २बाणभेदे। गृध्रवाजादयोऽप्यत्र "शतेन गृध्रवाजानां शराणां नतपर्वणाम्" भा० शल्य० २७ अ०। "येऽन्ये स्कन्दस्य सैनिकाः" इत्युपक्रमे "कद्रारकः कोकनदो गृध्रपत्रश्च जम्बुकः" भा० श० ४६ अ०। उक्ते ३स्कन्दसैन्यभेदे।

गृध्रयातु पु० गृध्ररूपेण याति या—तुन्। गृध्ररूपे राक्षसभेदे। "सुपर्णयातुमुत गृध्रयातुम्" ऋ० ७।१०४।२२।

गृध्रराज पु० ६त० गृध्रो राजेवेति वा उपमितस०। गरुडात्मजे जटायुपक्षिणि। "निर्बिभेद सुतीक्ष्णाग्रैर्गृध्रराजं शिलाशितैः" रामा० आर०। गृध्रपत्यादयोऽप्यत्र।

गृध्रवट पु० गृध्रोपलक्षितो वटोऽत्र स्थाने। तीर्थभेदे "ततो गृध्रवटं गच्छेत् स्थानं देवस्य धीमतः। स्नायीत भस्मना तत्र अभिगम्य वृषध्वजम्। ब्राह्मणेन भवेच्चीर्णं व्रतं द्वादशवार्षिकम्। इतरेषां तु वर्णानां सर्वपापं प्रणश्यति" भा० व० ८४ अ०

गृध्रसी स्त्री गृध्रमपि स्यति सो—क गौरा० ङीष् ६त०। वातरोगभेदे यथाह सुश्रुतः "पार्ष्णीं प्रत्यङ्गुलीनां तु स्तम्भकृत् यानिलार्दिता। सक्थ्नोः क्षेपं निगृह्णीयाद् गृध्रसीति हि सा स्मृता"। माधवकरोऽप्याह। "स्फिक्पूर्वोरुकटीपृष्ठजानुजङ्घापदं क्रमात्। गृध्रसीस्तम्भरुक्तोदैर्गृह्णाति स्पन्दते मुहुः। वाताद्वातः कफात्तन्द्रा गौरवारोचकान्विता"। भावप्रकाशे विस्तरेणोक्तम् यथाह "स्फिक्पूर्व्वोरुकटीपृष्ठजानुजङ्घापदं क्रमात्। गृध्रसीस्तम्भकृत् तोदैर्गृह्णाति स्पन्दते मुहुः। वाताद्वातकफाभ्यां सा विज्ञेया द्विविधा पुनः। वातजायां भवेत्तोदो देहस्यातीव वक्रता। जानुजङ्घोरुसन्धीनां स्फुरणं स्तम्भता भृश [illegible] श्लेष्मोद्भवायान्तु गौरवं वह्निमार्द्दवम्। तन्द्रा मुखप्रसेकश्च भक्तद्वेषस्तथैव च। गृध्रसी वातात् केवलात् स्फिगादिपर्य्यन्तं स्तम्भकृत तोदैर्गृह्णाति। क्रमात् इति क्रमात् तेन यथा यथा

वर्द्धते तथा तथा स्फिगादीन्याक्रामति। नात्र ग्रहणे निर्द्देशक्रमनियमः। तथा मुहुः स्पन्दते स्फिगादिषु शिराकम्पं करोतीत्यर्थः"।

गृध्राणु पुं० गृध इवानिति अन–अच् गौरा० ङीष् संज्ञायां णत्वम्। धूम्रपत्रा वृक्षे वैद्यकम्।

गृध्री स्त्री कश्यपपत्न्याः सुताभेदे। "षट् सुताश्च महासत्वास्ताम्रायाः परिकीर्त्तिताः। काकी श्येनी च भासी च सुग्रीवी शुचिगृध्रिका। श्येनी श्येनांस्तथा भासी भासान् गृध्रांश्च गृध्र्यपि" हरिव०३अ०।

गृभ न० गृह+वेदे हस्य भः। गृहे "न्यु भ्रियन्ते यशसो गृभादा" ऋ० ७।२२।२ गृभात् गृहात्" भा०

गृभि पु० ग्रह–कि सम्प्र० वेदे हस्य भः। ग्रहणे। "वनस्पतीनां गृभिरोषधीनाम्" अथ० १२।१।५७

गृभीत त्रि०ग्रह–क्त वेदे हस्य भः। गृहीते "रात्रिं गृभीतां मुखतो नयन्ति" ऋ०१।१६२।२ "गृभीतां गृहीताम्" भा० २गृहीतयज्ञे च "यदि गृभीततातये" ऋ० ५।७४।४ "गृभीततातये गृहीतयज्ञसन्तानाय" भा० क्वचित् आर्षेऽपि प्रयोगे लोके भः। "जयजय जह्यजामजितदोषगृभीतगुणाम्" भाग०१०।८७। ११ श्लो०।

गृष्टि स्त्री गृह्णाति सकृत् गर्भम् ग्रह–कर्त्तरि क्तिच् पृषो०। १सकृत्प्रसूतायां गवि। "गृष्टिः ससुव स्थविरं तवागाम्" ऋ०४।१८।१० "आपीनभारोद्वहनप्रयत्नात् गृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः" रघुः। "भजमानस्य चपलो गृष्टेः स प्रचचार ह" हरि०३७अ०। जात्या सहास्य कर्म०। विशेषणत्वेऽपि परनिपातः गोगृष्टिः। इदन्तत्वात् वा ङीप्। "पृष्ठौहीनां पीवराणाञ्च तावदग्र्याः गृष्ट्योधेनवः सुव्रताश्च" भा० आनु० ६२ अ०। २सकृत्प्रसूतस्त्रीमात्रे अतएव गृष्टेर्गोमात्रपरत्वे "चतुष्पादो गर्भिण्याः" पा० सूत्रान्तरमारब्धं शब्दार्थचि० गृष्टेरपत्यम् गृष्ट्यादि ढक्। गार्ष्टेय तदपत्ये पुंस्त्री। कर्मणि क्तिन्। ३वराहक्रान्तायाम् अमरः। ४वदरवृक्षे मेदि०। ५काश्मर्यां राजनि०। स्वार्थे क तत्रार्थे। सप्तपर्णारग्वधेत्याद्युपक्रमे "मधुकभूनिम्बगृष्टिका इति समभागाः कल्कः" सुश्रुतः।

गृष्ट्यादि अपत्यार्थे ढक्प्रत्ययनिमित्ते पा०ग०सूत्रोक्ते शब्दगणे स च गणः "गृष्टि हृष्टि बलि हलि विश्रि कुद्रि अजवस्ति मित्रयु"। [गृहयालुः।

गृह ग्रहणे अद०चु० आत्म०सक०सेट्। गृहयते अजगृहत

गृह न० गृह्यते धर्माचरणाय ग्रह–गेहार्थे क। इष्टकामृत्तिकादिरचिते १गेहे। अर्द्धर्चादित्वादयमुभयलिङ्गः तत्र एकगृहे न० पुंलिङ्गस्तु बहुवचनान्त एव "तत्रागारं धनपतिगृहानुत्तरेणास्मदीयम्" मेघदू०। "जालागताभ्योऽधिगृहं गृहिण्यः" "गृहाणि नीब्रैरिव तत्र रेजुः" "लिप्तेषु भासा गृहदेहलीनाम्" गृहैर्विशालैरपि भूरिशालैः" माघः। चु०गृह–ग्रहणे कर्मणि अच्। २कलत्रे "न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते" इति स्मृतिः। ३नाम्नि शब्दर०४मेषादिभवने राशौ च। गेहनिर्माणप्रयोजनमाह वशिष्ठः "वास्तुज्ञानं प्रवक्ष्यामि यदुक्तं ब्रह्मणा पुरा। ग्रामसद्मपुरादीनां निर्माणं वक्ष्यते मया"। भवि०पु० "गृहस्थस्य क्रियाः सर्व्वाः न सिध्यन्ति गृहं विना। यतस्तस्माद् गृहारम्भप्रवेशसमयं ब्रुवे। परगेहे कृताः सर्वाः श्रौतस्मार्त्तादिकाः क्रियाः। निष्फला स्युर्यतस्तासामधीशः फलमश्नुते" तत्र ग्रामादिभेदे पुरुषभेदस्य शुभाशुभं राशिभेदेन द्वारनिवेशनञ्चोक्तम् "युग्मं द्व्यङ्कसुतेशदिङ्मितमभौ ग्रामः शुभोनामभात्स्वं वर्गं द्विगुणं विधाय परवर्गाढ्यं गजैः शेषितम्। काकिण्यस्त्वनयोश्च तद्विवरतो यस्याधिकाः सोऽर्थदोऽथ द्वारं द्विजवैश्यशूद्रनृपराशीनां हितं पूर्वतः" मु० चि०। "व्यवहारप्रसिद्धं यन्नाम (नीलकण्ठः) इत्यादिकं तस्यावकहडचक्रानुसारेण यदनुराधादिकं नक्षत्रं ततो यद्वृश्चिकादिराशिः स्यात्तन्नामभमेवं यस्मिन् ग्रामे नगरे वा वस्तुमिष्यते तस्य (चरणाद्रिः) इत्यादिकं यन्नाम तस्माज्जातो यो राशिर्मीनादिस्तद्ग्रामभम् एवं नामभद्वयं ज्ञात्वा नामभात् पुरुषनामराशेः सकाशात् यद्भं यस्य ग्रामस्य भं राशिः यदा द्वितीयो नवमः पञ्चमः एकादशसङ्ख्योदशमश्च स्यात्तदासौ ग्रामः स्वस्य शुभो फलदाता स्यात् अन्यथा न भवतीत्यर्थः। यथा नीलकण्ठस्य वृश्चिकराशितः पञ्चमोमीनराशिरतश्चरणाद्रिर्नीलकण्ठस्य वासयोग्यः सन् शुभफलदो न वाराणस्यादिः। उक्तञ्च मुहूर्त्तमार्तण्डे "नामर्क्षात् द्विसुताङ्कदिग्भवगतो ग्रामः शुभोनाऽन्यथेति"। अत्र काकिण्यादौ नामराशिरेव ग्राह्यः। उक्तञ्च "काकिण्यां वर्गशुद्धौ च वादे द्यूते स्वरोदये। मन्त्रे पुनर्भूवरणे नामराशेः प्रधानतेति" अथ ग्रामात्मनोरुत्तमर्णत्वमधमर्णत्वं चाह स्वं वर्गमिति। वर्गास्तु "अकचटतपयशाः खगेशमार्जारसिंहशुनाम्। सर्पाखुमृगावीनां निजपञ्चमवैरिणामष्टौ"

इत्युक्तास्तत्र यस्य पुंसः यत्संख्याकोवर्गोगरुडादिः स्यात्तद्वर्गसंख्यां द्विगुणां विधाय कृत्वा परस्य ग्रामस्य वर्गसंख्यया आद्यां च कृत्वा गजैरष्टभिः शेषितमवशिष्टन्ताः काकिण्योज्ञेयाःपुंसः। एवं ग्रामस्यापि स्ववर्गसंख्यां द्विगुणां कृत्वा परस्य पुंसः वर्गसंख्यया युक्तां च कृत्वा गजभक्तावशिष्टाः ग्रामस्य काकिण्यो भवन्ति एवमनयोः पुरुषग्रामयोः काकिण्यःस्युः। तत्र तद्विवरतः पुरुषकाकिणीनां ग्रामकाकिणीनां विवरमन्तरन्तस्मिन् क्रियमाणे यस्य ग्रामस्य दातृत्वात् पुंसः काकिण्याविशेषे पुंसोद्रव्यहानिः। ग्रामस्य प्रतिग्रहीतृत्वादित्यर्थः। यथा। नीलकण्ठस्य वर्गः सर्पः तत्संख्या ५ द्विगुणा १०चरणाद्रेर्वर्गःसिंहस्तत्संख्यया २ युक्ता १२ गजभक्तशेषं ५ नीलकण्ठस्य काकिण्यः। एवं ग्रामवर्गसङ्ख्या ३ द्विगुणा ६ नीलकण्ठवर्ग ५ सङ्ख्यया युक्ता ११ अष्टभक्तावशेषं ३ ग्रामस्य काकिण्यः द्वयोरन्तरे शेषं२ नीलकण्ठस्य दातृत्वात् स्वद्रव्यहानिरित्यर्थः। उक्तञ्च "स्ववर्गं द्विगुणं कृत्वा परवर्गेण योजयेत्। अष्टभिस्तु हरेद्भागं योऽधिकः स ऋणी भवेत्"इति। इतोऽन्यथाहुः कश्यपवशिष्ठनारदाः "अकारादिषु वर्गेषु दिक्षु प्रागादिषु क्रमात्। गृध्रमार्जारसिंहाश्वसर्पाखुगजमेषकाः। दिग्वर्गाणामियं योनिः स्ववर्गात्पञ्चमो रिपुः। रिपुवर्गं परित्यज्य शेषवर्गाः शुभप्रदाः। साध्यवर्गं पुरः स्थाप्य पृष्ठतः साधकं न्यसेत्। विभजेदष्टभिः शेषं साधकस्य धनं स्मृतम्। व्यत्ययेनागतं शेषं साधकस्य ऋणं स्मृतम्। धनाधिकं स्वल्पऋणं सर्वसंपत्प्रदं स्मृतम्" इति। गृध्रोऽत्र गरुडः गरुडसर्पयोर्महावैरसत्त्वात् साध्य इत्यर्थः। साध्यो वासयोग्यो ग्रामादिस्तस्य वर्गं वर्गसंख्यां पुरः संस्थाप्य साधकस्य नीलकण्ठादेः वर्गसंख्यां पृष्ठतोन्यसेत्। एवं विशिष्टोऽङ्कोऽष्टभिर्भक्तः शेषं साधकस्य ऋणं स्यात्। यथा साध्यवर्गसंख्या ३पुरःस्थापिता साधकस्य ५वर्गसंख्या च पृष्ठतः साचैवम् ५३ एतास्त्रिपञ्चाशत् कष्टभक्तावशिष्टं साध्यस्य ५धनं साधकस्य साध्यस्य च संख्या विपरीतस्थापित३५ अष्टभक्तं शेषं साधकस्य ३ऋणं स्यात्। अथ द्वारनिवेशनमाह। अथेति। द्विजादिराशिमतां पुंसां क्रमेण पूर्वतः प्राच्यादिदिक्चतुष्टये द्वारं हितं यथा द्विजराशयः कर्कटवृश्चिकमीनास्तेषां पूर्वदिशि। वैश्यराशयो वृषकन्यामकरास्तेषां दक्षिणदिशि। शूद्रराशयो मिथुनतुला कुम्भास्तेषां पश्चिमदिशि नृपराशयो मेषसिंहधनुर्धरास्तेषामुत्तरदिशि द्वारनिवेश इत्यर्थः" पीयु० धा० अत्रेदं बोध्यम् "शेषाङ्केन फलं बोध्यं शेषाभावे तु हारकात्। अङ्कादेव फलं बोध्यमिति तन्त्रविदां मतम्" ज्यो० त० वचनादङ्काभावे हारकाङ्कात् फलनिर्णयः। राशिविशेषस्य ग्रामादिस्थानविशेषे निवासनिषेधमाह। "गोसिंहनक्रमिथुनं निवसेन्न मध्ये ग्रामस्य पूर्वककुभोऽलिझषाङ्गनाश्च। कर्कौ धनुस्तुलभमेषघटाश्च तद्वद्वर्गाः स्वपञ्चमपरा बलिनः स्युरैन्द्र्याः" मु०चि० "वस्तुमिष्टस्य ग्रामस्य वस्त्रविभागवन्नवधा विभागं कृत्वा मध्ये मध्यमविभागे गोसिंहनक्रमिथुनं समाहारद्वन्द्वः न निवसेत् वृषसिंहमकरमिथुनराशिमन्तः पुरुषा न वसेयुः। अथ पूर्वककुभः पूर्वदिशातोऽष्टदिक्षु अलिर्वृश्चिकः तदादिराशिमन्तः पुरुषाः न वसेयुः। यथा। पूर्वस्यां वृश्चिकः आग्नेय्यां झषो मीनः, दक्षिणस्यां कन्या, नैरृत्यां कर्कः पश्चिमायां धनुः। वायव्यां तुला उत्तरस्यां मेषः ऐशान्यां कुम्भः न वसेदित्यर्थः। अथ वर्गाः। अकचटतपयशवर्गाः अष्टौ ऐन्द्र्याः पूर्वदिशमारभ्य अष्टदिक्षु बलिनः। यथा अवर्गः पूर्वस्याम्। कवर्ग आग्नेय्याम्। चवर्गो दक्षिणस्याम् टवर्गो नैरृत्याम्। तवर्गः पश्चिमायाम् पवर्गो वायव्याम्। यवर्गः उत्तरस्याम्। शवर्ग ऐशान्यां बलीत्यर्थः। कीदृशाः वर्गाः स्वपञ्चमपराः स्वस्मात् पञ्चमः परः शत्रुर्येषां ते। यस्य अवर्गः पूर्वस्यां बली तेन खपञ्चमपश्चिमायां द्वारं निवासो वा न विधेयः एवं कवर्गादीनामाग्नेयादिसप्तदिक्षु बलित्वं तत् पञ्चमस्य रिपुत्वञ्च ज्ञेयम्"। पी० धा०

तत्र गृहयोग्यभूमिपरीक्षा विश्वकर्मणोक्ता यथा "अथातः संप्रवक्ष्यामि लोकानां हितकाम्यया। श्वेता रक्ता तथा पीता कृष्णा वर्णानुपूर्वशः। सुगन्धा ब्राह्मणी भूमीरक्तगन्धा तु क्षत्रिणी। मधुगन्धा भवेद्वैश्या मद्यगन्धा च शूद्रिणी। मधुरा ब्राह्मणी भूमिः कषाया क्षत्रियान्विता। अम्ला वैश्या भवेद्भूमिस्तिक्ता शूद्रा प्रकीर्त्तिता। चतुरस्रा द्विपाकारा सिंहा वृषभरूपिणी। वृत्तं च भद्रपीठं च त्रिशूलं लिङ्गसन्निभम्। प्रासादध्वजकुम्भादिदेवानामपि दुर्लभम्। त्रिकोणां शकटाकारां शूर्पव्यजनसन्निभाम्। मुरजाकारसदृशीं सर्पमण्डूकरूपिणीम्। खराजगरसंकाशां वक्रां चिपिटरूपिणीम्। मुद्गराभां तथा लूककाकसर्पनिभां तथा।

शूकरोष्ट्राजसदृशीं धनुःपरशुरूपभाम्। कृकलासशवाकारां दुर्गन्धां च विवर्जयेत्। मनोरमाऽत्र या भूमिः परीप्सेत्तां प्रयत्नतः। द्वितीया दृढभूमिश्च निम्ना चोत्तरपूर्वके। गम्भीरा ब्राह्मणी भूमिर्नृपाणां तुङ्गमाश्रिता। वैश्यानां समभूमिश्च शूद्राणां विकटा स्मृता। सर्वेषां चैव वर्णानां समभूमिः शुभावहा। शुक्लवर्णा च सर्वेषां शुभा भूमिरुदाहृता। कुशकाशयुता ब्राह्मी दूर्वा नृपतिवल्लभा। फलपुष्पयुता वैश्या शूद्राणां तृणसंयुता। नदीपाताश्रितां तद्वत् महापाषाणसंयुताम्। मुशलाभां महाघोरां वायुना वापि पीड़िताम्। वल्लभल्लकसंयुक्तां मध्ये विकटरूपिणीम्। श्वसृगालनिभां रूक्षां दन्तिकैः परिवारिताम्। चैत्यश्मशानवल्मीकधूर्त्तालिकेषु वर्त्तिनीम्। चतुष्पथमहावृक्षदेवमन्दिरनिवासतः। अदूरस्थां श्वभ्रगर्त्तयुक्तां चैव विवर्जयेत्" भूमिभेदे फलानि तत्रैव "सुवर्णगन्धा सुरसा धनधान्य शुभावहा। व्यत्यये व्यत्ययफला ततः कार्यं परीक्षणम्। चतुरस्रा महाधन्या द्विपाभा धनदायिनी। सिंहाभा सद्गुणान्यूना वृषाभा पशुवृद्धिदा। वृत्ता सद्वृत्तदा भूमिर्भद्रपीठनिभा तथा। त्रिशूलरूपा वीराणां सत्त्वनिर्धनसौख्यदा। लिङ्गाभा लिङ्गिना श्रेष्ठा प्रासादध्वजसन्निभा। पदोन्नतिं प्रकुरुते कुम्भाभा धनवर्द्धिनी। त्रिकोणशकटाकारा शूर्पव्यजनसन्निभा। क्रमेण सुतसौख्यार्थधर्महानिकरी स्मृता। मुरजा वंशहा सर्पमण्डूकाभा भयावहा। नैःस्वा खरानुकारा च मृत्युदाऽजगरान्विता। चिपिटा पौरुषैर्हीना वक्राकारा तथैव च। काकोलूकनिभा दुःखशोकभयप्रदा। सर्पाभा पुत्रपौत्रघ्नी वंशाभा वंशहानिदा। शूकरोष्ट्राजसदृशी धनुःपरशुरूपिणी। कुचेलान्मलिनान् मूर्खान् ब्रह्मघ्नान् जनयेत् सुतान्। कृकलासशवाकारा मृतपुत्रा धनार्त्तिदा। दुर्गन्धां पापिनीं दुष्टप्रजां भूमिं परित्यजेत्। मनोरमा सुतप्रदा दृढा धनप्रदा मता। सुतार्थदा तथाप्युदक्सुरेशादिकप्लवा मही। गम्भीरशब्दा जनयेत् पुत्रान् गम्भीरनिःस्वनान्। तुङ्गा पदान्वितान् कुर्यात् सदा सौभाग्यदायिनी। विकटा शूद्रजातीनां तथा दुर्गवासिनाम्। शुभदा न परेषां च तस्कराणां शुभावहा। सुवर्णवर्णा स्वान् वर्णान् वर्णानामाधिपं सदा। शुक्लवर्णा च सर्वेषां पुत्रपौत्रप्रवर्द्धिनी। कुशकाशान्विता ब्रह्मवर्चसान् कुरुते सुतान्। दूर्वान्विता वीरजनिः फलाढ्या धनपुत्रदा। नदीपाताश्रिता मूर्खान् मृतवत्सांस्तथैव च। दरिद्रानश्ममध्यस्था गर्त्तान्तस्था मृषायुतान्। विवरा पशुपुत्रार्त्तिदायिनी सौख्यहारिणी। वक्रातिवक्रा जनयेत् पुत्रान् विद्याविहीनकान्। शूर्पमार्जारलगुडनिभा भीतिसुतार्तिदा। मुशला मुशलान् पुत्रान् जनयेद्वंशघातकान्। घोराघोरप्रदा वायुपीड़िता वायुभीतिदा। वल्लभल्लकसंयुक्ता पशुहानिप्रदा सदा। विकटा विकटान् पुत्रान् श्वसृगालनिभा तथा। ददाति रूक्षा परुषा दुर्बलान् जनयेत् सुताम्। गृहस्वामिभयं चैव वल्मीके विपदः स्मृताः। धूर्त्तालयसमीपे तु पुत्रस्य मरणं ध्रुवम्। चतुःपथे त्वकीर्त्तिः स्यादुद्वेगो देवसद्मनि। अर्थहानिश्च सचिवे श्वभ्रे विपद उत्कटाः। गर्त्तायां तु पिपासा स्यात् कूर्माभं धननाशदम्। दशखण्डादिपर्यन्तं पीड्यन्ते पुरवासिनः। चैत्यश्मशानदेवानां गृहाणि परिवर्जयेत्। निखनेद्धस्तमात्रेण पुनस्तेनैव पूरयेत्। पांसुनाधिकमध्योनाः श्रेष्ठमध्याधमाः क्रमात्। जलेनापूरयेत् श्वभ्रं शीघ्रं गत्वा शतं पदम्। तथैवागम्य वीक्षेत न हीनं सलिलांशुना। अरत्निमात्रे श्वभ्रे वा ह्यनुलिप्ते च सर्वतः। घृतमामशरावस्थं कृत्वा वर्त्तिचतुष्टयम्। ज्वाल-येद्भूपरीक्षार्थं सम्पूर्णं सर्वदिङ्मुखम्। दीप्ता पूर्वादि गृह्णीयाद्वर्णानामनुपूर्वशः। हलाकृष्टे तथोद्देशे सर्ववीजानि वापयेत्। त्रिपञ्चसप्तरात्रेण संप्ररोहन्ति तान्यपि। उप्तवीजा त्रिरात्रेण साङ्कुरा शोभना मही। मध्यमा पञ्चरात्रेण सप्तरात्रेण निन्दिता। तिलान्वा वापयेत्तत्र यवांश्चापि च सर्षपान्। अथ वा सर्वधान्यानि वापयेच्च समन्ततः। यत्र नैव प्ररोहन्ति तां प्रयत्नेन वर्जयेत्। व्रीहयः शालयो मुद्गाः गोधूमाः सर्षपास्तिलाः। यवाश्चौषधयः सप्त सर्ववीजानि चैव हि। सुवर्णताम्रपुष्पाणि श्वभ्रमध्यं गतानि च। यस्य नाश्नि समायान्ति स भूमिस्तस्य शोभना। पांसवो रेणुतां नीता निरीक्ष्याश्चान्तरिक्षगाः। अधोमध्योर्द्धगा नृणां गतितुल्यफलप्रदाः"।

भूमेः पूर्वादिदिक्प्लवफलं तत्रैवोक्तम् 'चतुरस्रां समां शुद्धां भूमिं कृत्वा प्रयत्नतः। तस्मिन् दिक्साधनं कार्यं वृत्तमध्ये गते दिशि। पूर्वप्लवे भवेल्लक्ष्मीराग्नेय्यां शोकमादिशेत्। याम्यां याति यमद्वारं नैर्ऋते च महाभयम्। पश्चिमे कलहं कुर्याद्वायव्यां मृत्युमादिशेत्। उत्तरे वंशवृद्धिः स्यादीशाने रत्नसञ्चयम्। दिङ्मूढे कुलनाशः स्याद्वक्रे दारिद्र्यमादिशेत्"।

गृहे आयामविस्तारभेदेन ध्वजाद्यायास्तत्फलं वर्णादिग्भेदेन ध्वजादीनां विधिनिषेधौ चाह तत्रैव "विस्तारेण हतं दैर्घ्यं विभजेदष्टभिस्ततः। यच्छेषं स भवेदायोध्वजाद्यास्ते स्युरष्टधा। ध्वजो धूमो हरिः श्वा गौः खरेभौ वायसोऽष्टमः। पूर्वादिदिक्षु चाष्टानां ध्वजादीनामवस्थितिः। स्वस्थानात् पञ्चमे स्थाने वैरत्वं च मङ्ङ्गवेत्। विषमायः शुभः प्रोक्तः समायः शोकदुःखदः। स्वस्थानगा बलिष्ठाः स्युर्नचान्यस्थानगाः शुभाः। ध्वजः सिंहे तौ च गजे ह्येते गवि शुभप्रदाः। वृषो न पूजितोऽन्यत्र ध्वजः सर्वत्र पूजितः। वृषसिंहगजाश्चैव कुण्डे कर्कटकीटयोः। द्विपः पुनः प्रयोक्तव्यो वापीकूपसरःसु च। मृगेन्द्रमासने दद्याच्छयनेषु गजं पुनः। वृषं भोजनपात्रेषु छत्रादिषु पुनर्ध्वजम्। अग्निवेश्मसु सर्वेषु, गृहे वह्न्युपजीविनाम्। धूमं नियोजयेत् केचित् श्वानं म्लेच्छादिजातिषु। खरो वैश्यगृहे शस्तोध्वाङ्क्षः शेष कुटीषु च। वृषसिंहगजाश्चापि प्रासादपुरवेश्मसु। गजाये वा ध्वजाये वा गजानां सदनं शुभम्। अश्वालयं ध्वजाये च खराये वृषभेऽपि वा। उष्ट्राणां मन्दिरं कार्यं गजाये वा वृषध्वजे। पशुसद्म वृषाये च ध्वजाये वा शुभप्रदम्। शय्यासु वृषभः शस्तः पीठे सिंहः शुभप्रदः। अमत्रच्छत्रवस्त्राणां वृषाये वा ध्वजेऽपि वा। पादुकोपानहौ कार्यौ सिंहायेऽप्यथ वा ध्वजे। स्वर्णरौप्यादिधातूनामन्येषां तु ध्वजः स्मृतः। ब्राह्मणे तु ध्वजः श्रेष्ठः प्रतीच्यां कारयेन्मुखम्। सिंहश्च भूभृतां शस्त उदीच्यां च मुखं शुभम्। विशां वृषः प्राग्वदनं शूद्राणां दक्षिणे गजः। सर्वेषामेव चायानां ध्वजः श्रेष्ठतमो मतः। ध्वजायः क्षत्रियविशोः प्रशस्तो गुरुरब्रवीत्। सिंहायः सर्वथा त्याज्यो ब्राह्मणेन वृषस्तथा। सिंहाये शुनि चाये च अल्पायासं प्रजायते। ध्वजाये पूर्णसिद्धिः स्याद्वृषायः पशुवृद्धिदः। गजाये सम्पदां वृद्धिः शेषायाः शोकदुःखदाः"। तथा च ध्वजाद्या आया यत्र स्युस्तद्दिङ्मुखद्वाराणि स्युरिति फलितार्थः "प्रत्यग्ध्वजे द्वारमथोत्तरे पूर्वं हरावुदक् स्यात् द्विरदे च याम्यम्" इति श्रीपत्युक्तेः "सर्वद्वार इह ध्वजो वरुणदिग्द्वारं च हित्वा हरिः प्राग्द्वारो वृषभो गजो यमसुरेशाशामुखे स्याच्छुभः" महेश्वरोक्तेश्च। "पश्चादुदक्पूर्वयमे द्विजादितः" मु॰चि॰ ब्राह्मादिवर्णभेदेन द्वारनिवेशनमुक्तम् द्विजादितः ब्राह्मणादिवर्णभेदेन पश्चादादि दिक्षु गृहद्वारं स्यात्। यथा ब्राह्मणस्य पश्चान्मुखं गृहद्वारं क्षत्रियस्योदग्दिशि वैश्यस्य पूर्वस्यां, शूद्रस्य यमे दक्षिणस्याम् इत्यर्थः। उक्तञ्च श्रीपतिना "ध्वजे प्रतीच्यां मुखमग्रजानामुदङ्मुखं भूमिभृताञ्च सिंहे। विशो वृषे प्राग्वदनं गजे तु शूद्रस्य याम्याननमामनन्तीति"। टोडरानन्दे च्यवनः "ध्वजे परास्यं विप्राणां राज्ञां सिंहेऽप्युदङ्मुखम्। गजे शूद्रस्य याम्यास्यं विशः पूर्वमुखं वृषे इति॥" पी॰धा॰ गृहाणामायवारांशादिकं तत्फलञ्च विश्व॰ उक्तं यथा "पिण्डे नवाङ्काङ्गगजैरग्निनागाष्टसागरैः। नागैश्च गुणिते भक्ते क्रमादेते पदार्थकाः। नागाद्रिनवसूर्यार्क्षतिथ्यृक्षखभानुभिः। आयो वारोऽंशको द्रव्यमृणमृक्षन्तिथिर्युतिः। आयुश्चाथ गृहेशर्क्षगृहभैक्यं मृतिप्रदम्। संपूर्णाः शुभदा ह्येते ह्यसंपूर्णास्त्वनिष्टदाः"। अस्यार्थः। इष्टगृहदीर्घः १७हस्ताः विस्तारः ७हस्ताः। "तथायते तद्भुजकोटिघातः" लीला॰उक्तदिशा क्षेत्रफलम् २०३ इदं पिण्डं नवधा स्थापितम् यथाक्रमम् नवाद्यङ्कैर्गुणिते नागाद्यङ्कैर्हृते आयादयः स्युः। यथा २०३ पिण्डे ९ गुणिते १८२७। ८भक्ते शेषाङ्कात् ३ आयः सिंहाख्यः। ९हतः १८२७। ७भक्तः शेषः७ तेन वारः शनिः। ६गुणः १२१८। ९भक्तः ३शेषः अंशकः (नवांशकः)। ८गुणः १६२४। १२भक्तः ४धनम्। ३गुणः ६०९। ८भक्तः शेषः १ऋणम्। ८गुणः १६२४। २७ भक्तः शेषः ४नक्षत्रं रोहिणी। ८गुणः १६२४। १५भक्तः। शेषः ४चतुर्थी तिथिः। ४गुणः ८१२। २७भक्तः शेषः २प्रीतिर्योगः। ८गुणः १६२४। १२०भक्तः शेषः६४ वर्षा आयुः। आयादीनां प्रयोजनं पी॰धा॰ दर्शितं यथा अथैषामायादीनां प्रयोजनमुच्यते। आयस्य तावत् "विषमायः शुभायैव समायः शोकदुःखदः" इति वसिष्ठोक्तम्। "वाराणां च सूर्यारवारराश्यंशाः सदा वह्निभयप्रदाः। शेषग्रहाणां वारांशाः कर्त्तुरिष्टार्थसिद्धिदाः" इति यथा गणितेनागतो भौमवारः सोऽपि निन्द्यः तद्राशी मेषवृश्चिकौ निन्द्यौ एवमन्येष्वपि राशिषु तन्नवांशा निन्द्याः "गृहस्यागतभं यत्तु तद्द्विराश्यात्मकं यदि। तन्नवांशवशात्तत्र ज्ञातव्यं सर्वदा गृहमिति" तथा च कृत्तिका द्विराश्यात्मिका तत्रैकावशेषे मेषः। मृगेऽपि द्व्यादिके शेषे मिथुनमन्यथा वृषः। पुनर्वसावप्यंशकत्रयं यावन्मिथुनमन्यथा कर्कः। एवमुत्तराफाल्गुन्यादिषु द्विराश्यात्मकेषूहनीयं वि-

वृद्धिः। न तु निःसन्दिग्धेष्वेकराशग्रात्मकेषु अश्विन्यादिषु।

धनर्णयोश्च फलम् "धनाधिकं गृहं दद्यात् निर्द्धनाय ऋणाधिकमिति"। नक्षत्रस्य फलम् "विपत्प्रदा विपत्तारा प्रत्यरिः प्रतिकूलदः। निधनाख्या तारका तु सर्वथा निधनप्रदा। विवर्ज्य तारकास्त्वेतन्निर्माणमशुभप्रदम्। कुर्वन्नज्ञानतो मोहाद्दुःखभाग्व्याधिभाग्भवेत्। अत्र गृहनक्षत्राद्दिनभं यत्संख्यं तन्नवभक्तमवशिष्टतारका विपत्तारादिकाः स्युश्चेत्तदानिष्टास्तद्दिने गृहारम्भं न कुर्यात् अन्यस्मिन् दिने शुभतारासु गृहारम्भं कुर्यादित्यर्थः इति केचित्। अपरे तु गृहकर्त्तुर्नामनक्षत्राद् गृहभं संगणय्य नवभक्तमवशिष्टं विपत्तारादिकं स्यात्तद्गृहमनिष्टमन्यथा शुभमिति यदाह कश्यपः "दत्ते दुःखं तृतीयर्क्षं पञ्चमर्क्षं यशःक्षयम्। आयुःक्षयं सप्तमर्क्षं कर्त्तुर्भाद्यदि सप्तममिति" वास्तुशास्त्रेऽपि "गृहभात् स्वामिभं गणय्य भक्तं च नवभिः पुनः। यच्छेषं सा भवेत्तारा सप्तपञ्चत्रिकाऽधमेति" प्राहुः। यदा तु गृहकर्त्तुर्गृहस्य चैकं नक्षत्रं स्यात्तदा तच्छुभमशुभं वेति निर्णयमाह। वसिष्ठः "गृहस्य तत्पतेस्त्वेकं धिष्ण्यं चेन्निधनप्रदमिति" निधनं मरणम्। राश्यैक्येऽयं दोषः न तु भिन्नराशित्वे तद्वाक्यस्य विवाहप्रकरणोक्तत्वात्। केचिदन्यदपि प्रयोजनमुक्तं तदुक्तं व्यवहारसमुच्चये "त्रिभिस्त्रिभिर्वेश्मानि कृत्तिकाद्यैरुकच्छेदपुत्राप्तिधनानि शोकम्। शत्रोर्भयं राजभयं च मृत्युः सुखं प्रवासश्च नव प्रभेदाः" इति। गृहभवशाद्राशिज्ञानेऽपि प्रयोजनमाह स एव। (विश्वकर्म्मा) राशिकूटादिकमित्यादि (तद्वाक्यमनुपदं दृश्यम्) वास्तुशास्त्रे कृत्तिकादिषु द्विराशिषु भेषु राशिनिर्णयो यथा "अश्विन्यादित्रयं मेषे सिंहे प्रोक्तं मघात्रयम्। मूलादित्रितयं चापे शेषेषु नव राशय" इति। शेषेषु भेषु रोहिण्यादिषु नव राशयो ज्ञेयाः। यथा रोहिणीमृगयोर्वृषः। आर्द्रापुनर्वस्वोर्मिथुनम्। पुष्याश्लेषयोः कर्कः। एवं हस्तादिके श्रवणादिद्विके च कन्यामकराद्याराशयः स्युरित्यर्थः अयं च पक्षो वास्तुशास्त्रे नवांशानुक्तेरुक्तः। अत्र राशिकूटे नाडीवेधो न दोषाय। उक्तं च ज्योतिश्चिन्तामणौ "सेव्यसेवकयोश्चैव गृहतत्स्वामिनोरपि। परस्परं मित्रयोश्चैकनाडी प्रशस्यते" इति। तिथिप्रयोजनं तिथ्यानयनप्रकारान्तरं च वास्तुशास्त्रे "शक्राहतं क्षेत्रफलं त्रिंशद्भक्तावशेषकम्। तिथयः प्रतिपदाद्याः स्युर्दर्शं रिक्तां च वर्जयेदिति"। तुल्यन्यायत्वाच्छुभाशुभप्रकरणोक्तं नेष्टयोगवर्जनं च योगानां प्रयोजनं स्पष्टमेव आयुषः प्रयोजनं तावत्कालं गृहस्थितिरिति" पी०धा० आयादिफलं विश्व०वास्तुशास्त्रे "धिष्ण्ये च वसुभिर्भक्ते व्ययः स्याच्छेषकाङ्कके। धनाधिकं गृहं दद्यात् निर्द्धनाय ऋणाधिकम्। व्ययान्विते क्षेत्रफले ध्रुवाद्यक्षरसंयुते। त्रिभिः शेषे क्रमादिन्द्रयमभूमिपाशयाः। इन्द्रांशे पदवीवृद्धिर्महत्सौख्यं प्रजायते। यमांशे मरणं नूनं रोगशोकमनेकधा। राजांशे धनधान्यानि पुत्रवृद्धिश्च जायते। राशिकूटादिकं सर्वं दम्पत्योरिव चिन्तयेत्। नैःस्वं द्विद्वादशे नूनं त्रिकोणे त्वनपत्यता। षट्काष्टके नैधनं स्यादत्यये मध्यमं स्मृतम्। (व्यत्यये द्वादशद्वितीयादौ) दूनस्थिते पुत्रलाभः स्त्रीलाभश्च तथैव च। जन्मतृतीये च तथा धनधान्यागमो भवेत्। दशमैकादशे चन्द्रे धनायुर्भद्रपत्रदः। चतुर्थाष्टमरिप्फस्थो मृत्युपुत्रविनाशदः। त्रिकोणेऽत्वनपत्यं स्यात् केचिद् बन्धुगृहे शुभम्। वदन्ति चन्द्रे मुनयो नैतन्मम मतं स्मृतम्। अश्विन्यादित्रयम् इत्यादिकम् (अनुपदमुक्तम्)। सूर्यारवारराश्यंशाः सदा वह्निभयप्रदा। शेषग्रहाणां वारांशाः कर्त्तुरिष्टार्थसिद्धिदाः। गृहस्यागतभं यत्तु तच्च राश्यात्मकं यदि। तन्नवांशवशात्तत्र ज्ञातव्यं सर्वदा गृहम्। विपत्प्रदा विपत्तारा प्रत्यरिः प्रतिकूलदः। निधनाख्या तु या तारा सर्वथा निधनप्रदा। विवर्ज्य तारकास्त्वेतन्निर्माणमशुभप्रदम्। प्रत्यरितारा भयदा निरंशश्चेत्तु मृत्युभीः। निधानाख्या तु या तारा स्त्रीसूतार्त्तिप्रदायिनी। कुर्वन्नज्ञानतो मोहाद्दुःखभाग्व्याधिभाग्भवेत्। तिथौ रिक्ते दरिद्रत्वं दर्शे गर्भनिपातनम्। कुयोगे धनधान्यादिनाशः पातश्च मृत्युदः। वैधृतौ सर्वनाशाय नक्षत्रैक्ये तथैव च। आयुर्विहीने गेहे तु दुर्भगत्वं प्रजायते। नाडीवेधो न शुभदस्तारा रोगभयप्रदा। गणवैरे पुत्रहानिर्द्धनहानिस्तथैव च। योनौ कलिर्महादुःखं यमांशे मरणं ध्रुवम्। नक्षत्रैक्ये स्वामिमृत्युर्वर्णे वंशविनाशनम्। पापवारे दरिद्रत्वं शिशूनां मरणं तथा। केचिच्छनिं प्रशंसन्ति चौरभीतिस्तु जायते"।

आयादिकचिन्ताया मर्यादां दिग्भेदेन गृहभेदनिर्माणमाह विश्वकर्मा "एकादशकराद्दूर्द्धं यावद्द्वात्रिंशहस्तकम्। तावदायादिकं चिन्त्यं तदूर्द्धं नैव चिन्तयेत्। आग-

व्ययौ मासशुद्धिर्न जीर्णे चिन्तयेद्गृहे। शिलान्यासं प्रकुर्वीत मध्ये तस्य विधानतः। ऐशान्यां देवतागेहं पूर्वस्यां स्नानमन्दिरम्। आग्नेय्यां पाकसदनं शयनं दक्षिणे न्यसेत्। शस्त्रगेहं च नैरृत्यां पश्चिमे भोजनालयम्। वायव्यां धान्यसदनं भाण्डारागारमुत्तरे। आग्नेयीपूर्वयोर्मध्ये दधिमन्थनमन्दिरम्। अग्निप्रेतेशयोर्मध्ये आज्यगेहं प्रशस्यते। याम्यनैरृतयोर्मध्ये पुरीषत्यागमन्दिरम्। नैरृत्यम्बुपयोर्मध्ये विद्याभ्यासस्य मन्दिरम्। पश्चिमानिलयोर्मध्ये रोदनार्थं गृहं स्मृतम्। वायव्योत्तरयोर्मध्ये रतिगेहं प्रशस्यते। उत्तरेशानयोर्मध्ये औषधार्थं च कारयेत्। ईशानपूर्वयोर्मध्ये शेषं सर्वगृहं स्मृतम्। नैरृत्यां सूतिकागेहं नृपाणां गेहमिष्यते। आसन्नप्रसवे मासि कुर्याच्चैव विशेषतः। तद्वत् प्रसवकाले स्यादिति शास्त्रेषु निश्चितम्। मासे तु नवमे प्राप्ते पूर्वपक्षे शुभे दिने। प्रसूतिसम्भवे काले गृहारम्भणमिष्यते"।

अलिन्दभेदेन गृहनामभेदान् तत्फलमलिन्दशब्दार्थञ्चाह तत्रैव "गुरोरधो लघुः स्थाप्यः पुरस्तादूर्द्ध्वगं न्यसेत्। गुरुभिः पश्चिमे पूर्यं सर्वलघ्ववधिर्विधिः। स्यादलिन्दं लघुस्थाने नालिन्दं गुरुमाश्रितम्। प्रदक्षिणैर्गृहद्वारादलिन्दैर्दशषड्विधैः १६। ध्रुवसंज्ञं १ गृहं त्वाद्यं धनधान्यसुखप्रदम्। धन्यं २ धान्यप्रदं नृणां जयं ३ स्याद्विजयप्रदम्। मन्दं ४ स्त्रीहानिदं नूनं खरं ५ सम्पद्विनाशनम्। पुत्रपौत्रप्रदं कान्तं ६ श्रीपदं स्यान्मनोरमम् ७। सुवक्त्रं ८ भोगदं नूनं दुर्मुखं ९ विमुखप्रदम्। सर्वदुःखप्रदं क्रूरं १० विपक्षं ११ शत्रुभीतिदम्। धनदं १२ धनदं गेहं क्षयं १३ सर्वक्षयावहम्। आक्रन्दं १४ शोकजननं विपुलश्रीयशःप्रदम्। विपुलं १५ नामसदृशं धनदं विजयाभिधम् १६। प्रदक्षिणं सद्मसुखादलिन्दं विद्याल्लघुस्थानसमाश्रितं च। गृहस्य पूर्वादिगतेष्वलिन्देष्वेवं भवेयुर्दश षट्कभेदाः १६। भवेत् पुनः शुभालिन्दयुतं कापालसंज्ञकम्। विस्तारात् द्विगुणं गेहं गृहस्वामिविनाशनम्। निरर्थकं तद्गृहं स्याद्भयं वा राजसम्भवम्। केचिदलिन्दं द्वारं तु प्रवदन्ति मनीषिणः। केचिदलिन्दं शालाञ्च केचिच्चालिन्दकं च तत्। गृहाद्बहिश्च ये कोष्ठा गृहस्यान्तर्गताश्च ये। तेषां कोष्ठीकृतं तिर्यग्गेहं चालिन्दसंज्ञकम्। स्तम्भहीनं गृहाद्बाह्यान्निर्गतं कोष्ठनिर्मितम्। मध्यादूर्द्ध्वं तत्र गेहं वाचालिन्दसंज्ञकम्। यत्रालिन्दं च तत्रैव द्वारमार्गः प्रशस्यते। अलिन्दद्वारहीनं च गृहं कोटीसमं स्मृतम्। यत्रालिन्दं तत्र शाला तत्र द्वारं च शोभनम्। शालालिन्दद्वारहीनं न गृहं कारयेद्बुधः" अयमर्थः। "प्रस्तारे तु लघुं न्यस्य प्रथमस्य गुरोरधः। यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम्। ऊने दद्याद्गुरूनेव यावत् सर्वलघुर्भवेत्" छं०र०उक्तरीत्या चतुर्द्वाररूपचतुर्गुरुप्रकल्पनेन प्रस्तारे लघुं द्वारं प्रकल्प्य षोडश भेदाः स्वरूपतो दर्श्यन्ते यथा

१ | ऽऽऽऽ ऊर्द्ध्वमुखम् ध्रुवं शुभदम्।
२ | ।ऽऽऽ प्राङ्मुखं धान्यं शुभम्।
३ | ऽ।ऽऽ दक्षिणद्वारम् जयं शुभदम्।
४ | ।।ऽऽ प्राग्दक्षिणद्वारम् मन्दमशुभदम्।
५ | ऽऽ।ऽ पश्चिमद्वारं खरमशुभदम्।
६ | ।ऽ।ऽ प्राक्पश्चिममुखम् कान्तं शुभदम्।
७ | ऽ।।ऽ दक्षिणपश्चिमास्यम् मनोरमं शुभदम्।
८ | ।।।ऽ प्राग्दक्षिणपश्चिमास्यं सुमुखं शुभदम्।
९ | ऽऽऽ। उत्तरास्यम्—दुर्मुखमशुभदम्।
१० | ।ऽऽ। पूर्वोत्तरद्वारम्—उग्रमशुभदम्।
११ | ऽ।ऽ। दक्षिणोत्तरास्यम् विपक्षमशुभदम्।
१२ | ।।ऽ। प्राग्दक्षिणादिगास्यम् धनदं शुभदम्।
१३ | ।ऽ।। पश्चिमोत्तरास्यम् क्षयमशुभदम्।
१४ | ।ऽ।। पूर्वपश्चिमोत्तरास्यम् आक्रन्दमशुभदम्।
१५ | ऽ।।। दक्षिणपश्चिमोत्तरद्वारम् विपुलं शुभदम्।
१६ | ।।।। चतुर्दिग्द्वारम् विजयं सर्वत्र शुभदम्।

दिग्भेदेनैकशालादिनिर्माणप्रकारं तत्राह "यद्वास्तुनि च विस्तारः सैवोच्छ्रायः शुभः स्मृतः। एकशालो गृहः कार्यो विस्ताराद्द्विगुणोच्छ्रयः। चतुःशालगृहस्यैवमुच्छ्रायो व्याससंमितः। विस्ताराद्द्विगुणं दैर्घ्यमेकशालेषु शस्यते। विस्तीर्णं यद्भवेद्गेहं तदूर्द्ध्वं त्वेकशालके। द्विशाले द्विगुणं प्रोक्तं त्रिशाले त्रिगुणं तथा। चतुःशाले पञ्चगुणं तदूर्द्ध्वं नैव कारयेत्। शिखा चैव त्रिभागे तु गृहं चोत्तमसंज्ञकम्। एकं नागेन्द्रसंयुक्तौ द्वे च दक्षिणपश्चिमे। त्रिशालं पूर्वतोहीनं कार्यं वा सौख्यवर्जितम्। ऊर्द्ध्वभागत्रयं त्यक्त्वा अधोभागद्वयं तथा। मध्ये नाभिं विजानीयादिति प्राह पराशरः। पूर्वादिषु चतुर्दिक्षु वासमेकादयो ध्रुवाः। विस्तारस्याथ दैर्घ्यस्य तथैवैकैकसंयुताः। वासं वातादिकोणेषु ध्रुव

विस्तारदैर्घ्ययोः। एकाद्याः स्वेच्छया सर्व्वे कार्य्या वेदसमन्विताः। अनेनैव प्रकारेण क्रियमाणे च वास्तुनि। आयव्ययादिसंशुद्धिं न चिन्तयति पूर्व्वतः” अस्यार्थः यदि वास्तुनि एकमेव गृहं क्रियते तदा नागेन्द्रसंशुद्ध्यासौम्यवर्जितं उत्तरशालाहीनं गृहं कार्य्यं यदि द्विशालकं गृहं क्रियते तदा दक्षिणपश्चिमे शाले कार्य्ये त्रिशाले पूर्व्वतोहीनं कार्य्यम् उत्तरशालया वा हीनं कार्य्यम्। शालाविभागस्तु अनेनैव विधानेन कार्य्यः पूर्व्वतः अर्द्धभागत्रयं त्यक्त्वा पश्चिमे भागद्वयं त्यक्त्वा यो मध्यगतो भागः स नाभिः तत्र शाला न विधेया अनेनैव प्रकारेण पूर्व्वादिदिक्षु एकादयो विस्तारस्य दैर्घ्यस्य एकैकभागं संयोज्य वातादिकोणेषु उत्तरशाला हीनत्वाच्च देयं सर्व्वे एकाद्याश्चतुःशालान्ता वेदसमन्विताः कार्य्याः अनेनैव प्रकारेण शालायुते गृहवास्तुनि आयव्ययादिशुद्धिर्न चिन्तनीया। एकशाले आयव्ययादिविचारः कर्त्तव्यः द्विशालादिगृहे आयव्ययादिशुद्धिर्न विचारणीया यतः निर्गमालिन्दनिर्य्यूहादीनि यानि चतुर्दिशं वेश्मनां तानि न ग्राह्याणि इति। वर्णभेदेनैकशालादिविशेषभेदादिकमाह तत्रैव “ब्राह्मणानां चतुःशालं क्षत्त्रियाणां त्रिशालकम्। द्विशालकं च वैश्यानां शूद्राणामेकशालकम्। सर्व्वेषामेव वर्णानामेकशालं प्रशस्यते। एकशालं द्विशालं वा त्रिशालं तुर्य्यशालकम्। यथालिन्दगृहं कुर्य्यात्तादृक्शाला प्रशस्यते। शालाभेदो न कर्त्तव्यो न कुर्य्यात्तुङ्गनिम्नकम्। समां शालां ततः कुर्य्यात्समं प्राकारमेव च। कुलीरो वृश्चिको मीन उत्तरद्वारसंस्थिताः। मेषसिंहधनुर्द्धारी पूर्व्वद्वारेषु संस्थिताः। वृषभो मकरः कन्या याम्यद्वारसमाश्रिताः। मिथुनं तुलकुम्भौ च पश्चिमद्वारमाश्रिताः। ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राश्चैव यथाक्रमम्। यदीशा राशयः प्रोक्तास्तस्मिन् शाला प्रवर्त्तते। अथ पूर्व्वविभागे तु ब्राह्मणा उत्तरे नृपाः। वैश्याश्च दक्षिणे भागे पश्चिमे शूद्रकास्तथा। आग्नेयादिक्रमेणैवापभ्रंशा वर्णसङ्कराः। जातिभ्रष्टाश्च चौराश्च विदिक्स्थाः शोभनाः स्मृताः। ब्राह्मणाः क्षत्त्रियावैश्याः शूद्राः प्रागादिषु स्मृताः”। नृपादीनां गृहमानभेदमाह तत्रैव। “अष्टोत्तरं हस्तशतं विस्तारो नृपमन्दिरम्। कार्य्यं प्रधानमन्यानि तथाष्टाष्टोनितानि तु। विस्तारपादसंयुक्तं तेषां दैर्घ्यं प्रकल्पयेत्। एवं नृपाणां पञ्चैव गृहाणि शुभदानि च। सेनानीनां च पञ्चैव गृहाणि शुभदानि च। षड्भिः षड्भिर्विहीनानि चतुःषष्टिमितानि च। पञ्चैव, तस्य विस्तारे दैर्घ्यं षड्भागसंयुतम्। षष्टिश्चतुर्विहीनानि वेश्मानि सचिवस्य च। पञ्चस्वष्टांशसंयुक्तं दैर्घ्यं तस्यार्द्धमेव च। नृपाणां महिषीणाञ्च प्रशस्तं पञ्च चैव हि। षड्भिः षड्भिश्च वर्ज्यानि अशीत्याश्च तथैव च। त्रिंशद्युतञ्च दैर्घ्यं च युवराजगृहाणि च। पञ्च अर्द्धं च तस्यैव भ्रातॄणां प्रभवन्ति हि। नृपमन्त्रिगृहाणाञ्च अन्तरे यत्प्रमाणकम्। सामन्तराजभृत्यानां प्रवराणां गृहं स्मृतम्। नृपाणां युवराजस्य गृहाणामन्तरेण यत्। तत् गृहं कञ्चुकीवेश्म कलाज्ञानां तथैव च। युवराजमन्त्रिगृहेष्वन्तरं यद्भवेदिह। अध्यक्षस्य तु तद्गेहं तत्कर्मकुशलाश्च ये। अध्यक्षाधिकृतानां च रतिकोशप्रमाणकम्। चत्वारिंशच्चतुर्हीना पञ्च गेहा भवन्ति हि। षड्भागसंयुतं दैर्घ्यं दैवज्ञभिषजां तथा। पुरोहितानां शुभदं सर्व्वेषां कथयाम्यतः। हस्तात् द्वात्रिंशता युक्तं विस्तारस्य द्विजालयम्। विस्तारं सदशांशं तु दैर्घ्यं तस्य प्रकल्पयेत्। त्रयाणां क्षत्त्रियादीनामालयं पूर्व्वचोदितम्। नृपसेनापतिगेहस्यान्तरं यद्भवेदिह। तत्कोशगेहं भवति रतिगेहं तथैव च। सेनापतन्नृपगेहानामन्तरं यत्प्रमाणकम्। चातुर्व्वर्ण्यस्य यद्गेहं तद्राजपूज्यसम्मतम्। अथ पारशवादीनां मातापित्रोर्यदन्तरम्। ब्राह्मणस्य च यन्मानं शूद्रेण सह तद्भवेत्। शतहस्तोच्छ्रितं कार्य्यं चतुःशालं गृहं भवेत्। प्रमितन्त्वेकशालन्तु शुभदं तत्प्रकीर्त्तितम्। सेनापतिनृपादीनां सप्तत्या सहिते कृते। व्यासे चतुर्दशहृते शालामानं विनिर्दिशेत्। पञ्चत्रिंशद्धृतेऽन्यत्रालिन्दमानं भवेच्च तत्। शाला त्रिभागतुल्या च कर्त्तव्या वीथिकाबहिः। भवनात् पूर्व्वं सोष्णीषं पश्चात्सापाश्रयं भवेत्। सावष्टम्भं पार्श्वयोस्तु सर्व्वत्र सुस्थिरं भवेत्। विस्तारषोडशांशस्तु चतुर्हस्तयुतोच्छ्रयः। तदन्तरस्योच्चतरं प्रमाणं प्रवदेद्बुधः। द्वादशभागेनोनं च समस्तानां प्रकल्पयेत्। यजन्ते राजसूयाद्यैः क्रतुभिर्येऽवनीश्वराः। तलैरप्यष्टभिस्तेषां कारयेद्भवनोत्तमम्। तथा च सप्तभिरेव विप्राणां कारयेद्गृहम्। सार्द्धषड्भिः क्षत्त्रियाणां वैश्यानां सार्द्धपञ्चभिः। त्रिभिः सार्द्धैश्च शूद्राणां भवनं शुभदं स्मृतम्। स्वगृहाणां विभागेन प्रमाणमिह लक्षयेत्।

विस्तारायामगुणितं नलैः षोडशभिः स्मृतम्। स्वगृहाणां विभागेन प्रमाणमिह लक्षयेत्। व्यासाच्च षोडशोभागः सर्व्वेषां भित्तयः स्मृताः। पक्वेष्टकाकृतानां च न दारूणां कदाचन। नृपसेनापतिगृहेत्वष्टाशीतिं शतैर्युताम्। अङ्गुलानि द्वारमानं प्रवदन्ति मनीषिणः। विप्रादीनां विंशतिस्तु अङ्गुलानि च सप्त च। द्वारस्य मानं तत्प्रोक्तं द्विगुणोच्छ्राय उच्यते। उच्छ्रायहस्तसंख्यायाः परिमाणाङ्गुलानि च। शाखाद्वयेऽपि बाहुल्यं कार्य्यं सार्द्धांशसंयुतम्। उच्छ्रायात् सप्तगुणिताद्शीतिः पृथुता मता। भागः पुनर्नवगुणाशीत्य शस्तम्भमानकम्। दशांशहीनं तस्याग्रं स्तम्भानां परिमाणकम्। वेदाश्रो रुचकः१ स्तम्भो वज्रो२ऽष्टाश्रियुतो मतः। द्विवज्रः३ षोडशाश्रस्तद्द्विगुणाश्रः प्रलीनकः४। समन्ताद्वृत्तो वृत्ताख्यः५ स्तम्भः प्रोक्तो द्विजोत्तमैः। विभज्य नवधा स्तम्भं कुर्य्यादुद्वहनं घटम्। पद्मं तु सोत्तरोष्ठञ्च कुर्य्याद्भागेन भागतः। स्तम्भसमं बाहुल्यं भारतुलानामुपर्य्युपर्य्यासाम्। भवति तुलोपतुलानामूनं पादेन पादेन। अप्रतिषिद्धालिन्दं समन्ततो वास्तु सर्व्वतोभद्रम्। नृपविबुधसमूहानां कार्य्यं द्वारैश्चतुर्भिरपि"।

अथ द्विशालानि गृहाणि दक्षिणे दुर्मुखं कृत्वा पूर्व्वे च खरसंज्ञकम्। तद्वाताख्यं१ भवेद्गेहं वातरोगप्रदं स्मृतम्। दक्षिणे दुर्मुखं गेहं पश्चिमे धान्यसंज्ञकम्। यमसूर्य्यं२ द्विशालं तन्मृत्युदं नाशदं स्मृतम्। पूर्व्वे तु खरनामानमुत्तरे धान्यसंज्ञकम्। दण्डाख्यं३ तद्विशालं स्याद्दण्डं कुर्य्यात् पुनः पुनः। दुर्मुखं दक्षिणे कुर्य्यादुत्तरे जयसंज्ञकम्। वीच्याख्यं४ तद्द्विशालन्तु बन्धुनाशं धनक्षयम्। खरञ्च पूर्व्वदिग्भागे पश्चिमे धान्यसंज्ञकम्। गृहं चुल्ली५ द्विशालं तद्धनधान्यविनाशनम्। आक्रन्दं दक्षिणे भागे पश्चिमे धनदं तथा। द्विशालं चेत्तुसंज्ञं६ तत्पशुवृद्धिधनप्रदम्। विपक्षं दक्षिणे भागे पश्चिमे क्रूरसंज्ञकम्। शोभनाख्यं७ द्विशालं तद्धनधान्यकरं परम्। विजयं दक्षिणे भागे विजयं चैव पश्चिमे। द्विशालं चैव कुम्भाख्यं८ पुत्रदारादिसंयुतम्। धान्यञ्च पूर्व्वदिग्भागे धान्यं चैव तु पश्चिमे। नन्दाख्यं९तद्द्विशालञ्च धनदं शोभनं स्मृतम्। विजयं सर्व्वदिग्भागे द्विशालाख्यं तदेव१०हि। अङ्काद्यं११ नाम तद्गेहं शुभदं द्वारतो भवेत्। विपुलं सर्व्वदिग्भागे द्विशालं तत्प्रजायते। तानि स्युदसंज्ञानि१२ धनधान्यप्रदानि च। धनदं सर्व्वदिग्भागे सुमुखं वा मनोरमम्। कान्तनाम१३ तु तद्गेहं सर्व्वांशे शोभनं स्मृतम्। द्विशालानां सद्मनां च भेदाश्चैव त्रयोदश। फलपाकार्थमेतेषां मया प्रोक्तं सुविस्तरात्। पूर्व्वयाम्यमथ याम्यपश्चिमं पश्चिमोत्तरमुदीचिपूर्व्वमम्। प्राक्प्रतीचीमथ दक्षिणोत्तरं वास्तु षड्विधमिदं द्विशालकम्"। अथ त्रिशालानि "उत्तरद्वारहीनं यत् त्रिशालं धनधान्यदम्। हिरण्यनाभनामानं१ राज्ञां सौख्यविवर्द्धनम्। प्राग्द्वारशालाहीनन्तु सुक्षेत्रं२ नाम तद्गृहम्। वृद्धिदं पुत्रपौत्राणां धनधान्यसमृद्धिदम्। याम्यशालाविहीनं तत् त्रिशालं चुल्लीसंज्ञकम्३। विनाशनं धनस्यापि पुत्रपौत्रादिनाशनम्। प्रत्यक्शालाविहीनन्तु पक्षघ्नं४ नाम तद्गृहम्। पुत्राणां दोषदं चैव परञ्च पुरवासिनाम्। चत्वारोऽमी मया प्रोक्ता भेदाश्चैव चतुर्विधाः। तस्माद्विचार्य्य कुर्व्वीत गृहकर्म्मणि कोविदैः"। अथ चतुःशालानि "याम्यशालां न्यसेदादौ द्वितीयां पश्चिमे ततः। तृतीया चोत्तरे स्थाप्या चतुर्थी पूर्व्वपश्चिमा। गृहाणां क्रमयोगेन चतुःषष्टिः समासतः। अनेकयोगभेदाच्च शतं विंशोत्तरं स्मृतम्। अलिन्दानां व्यवच्छेदो नास्ति यत्र समन्ततः तद्वास्तु सर्व्वतोभद्रं१ चतुर्द्वारसमन्वितम्। एकग्रामे चतुःशाले दुर्भिक्षे राजविप्लवे। स्वामिना नीयमानायां प्रतिशुक्रो न दुष्यति। नृपाणां विबुधानाञ्च गृहं सौख्यप्रदायकम्। प्रदक्षिणं ततः सर्व्वैःशालाभित्तेरलिन्दकैः। विनापरेण द्वारेण नन्द्यावर्त्तमिदं२ स्मृतम्। श्रेष्ठं सुतारोग्यकरं सर्व्वेषां शुद्धजन्मनाम्। द्वारालिन्दोगतस्त्वेको नेत्रयोर्दक्षिणाङ्गतः। विहाय दक्षिणद्वारं वर्द्धमानमिति३ स्मृतम्। शुभदं सर्व्ववर्णानां वृद्धिदं पुत्रपौत्रदम्। पश्चिमोत्तरतोऽलिन्दं प्रागन्तौ चैतदुच्छ्रितौ। अन्यस्तन्मध्यविधृतः प्राग्द्वारं स्वस्तिक४ शुभम्। प्राक्पश्चिमावलिन्दौ यावन्तगौ तद्भवौ परं सौम्यद्वारं विना यत् स्याद्रुचकाख्यं५ तु तत् स्मृतम्"। ग्रन्थस्य ग्रहान्तरं टीकेत्यभियुक्तोक्तेः अत्रास्पष्टार्थानामर्थः" वृ० सं० वाक्येन मत्स्यपुराणवाक्येन च स्पष्टीक्रियते यथा वृ० सं० "उत्तममष्टाभ्यधिकं हस्तशतं नृपगृहं पृथुत्वेन। अष्टाष्टोनान्येवं पञ्च सपादानि दैर्घ्येण। षड्भिः षड्भिर्हीना सेनापतिसद्मनां चतुःषष्टिः। पञ्चैवं विस्तारात् षड्भागसमन्विता दैर्घ्ये। षष्टिश्चतुर्विहीना वेश्मानि भवन्ति पञ्च सचिवस्य। स्वाष्टांशयुता दैर्घ्ये तदर्द्धतो राज्ञ-

महिषीणाम् । षड्भिः षड्भिश्चैवं युवराजस्यापवर्जिताऽशीतिः । त्र्यंशान्विता च दैर्घ्ये पञ्च तदर्द्धैस्तदनुजानाम् । नृपसचिवान्तरतुल्यं सामन्तप्रवरराजपुरुषाणाम् । नृपयुवराजविशेषः कञ्चुकिवेश्याकलाज्ञानाम् । अध्यक्षाधिकृतानां सर्व्वेषामेव कोशरतितुल्यम् । युवराजमन्त्रिविवरं कर्म्मान्ताध्यक्षदूतानाम् । चत्वारिंशद्धीना चतुश्चतुर्भिस्तु पञ्च यावदिति । षड्भागयुता दैर्घ्ये दैवज्ञपुरोधसोर्भिषजः । वास्तुनि यो विस्तारः स एव चोच्छ्रायनिश्चयः शुभदः । शालैकेषु गृहेष्वपि विस्ताराद्द्विगुणितं दैर्घ्यम् । चातुर्व्वर्ण्यव्यासे द्वात्रिंशत् साचतुश्चतुर्हीना । आ षोडशादिति परं न्यूनतरमतीव हीनानाम् । सदशांशं विप्राणां क्षत्रस्याष्टांशसंयुतं दैर्घ्यम् । षड्भागयुतं वैश्यस्य भवति शूद्रस्य पादयुतम् । नृपसेनापतिगृहयोरन्तरमानेन कोशरतिभवने । सेनापतिचातुर्व्वर्ण्यविवरतो राजपुरुषाणाम् । अथ पारसवादीनां स्वमानसंयोगदलसमं भवनम् । हीनाधिकं स्वमानादशुभकरं वास्तु सर्व्वेषाम् । पश्वाश्रमिणाञ्च मितं धान्यायुधवह्निरतिगृहाणां च । नेच्छन्ति शास्त्रकारा हस्तशतादुच्छ्रितं परतः । सेनापति नृपतीनां सप्ततिसहिते द्विधाकृते व्यासे । शाला चतुर्दशहृते पञ्चत्रिंशद्धृतेऽलिन्दः । हस्तद्वात्रिंशादिषु चतुश्चतुस्त्रिकत्रिकाः शालाः । सप्तदशत्रितयतिथित्रयोदशकृताङ्गुलाभ्यधिकाः । त्रित्रिद्विद्विद्विसमाः क्षयः क्रमादङ्गुलानि चैतेषाम् । त्र्येका विंशतिरष्टौ विंशतिरष्टादश त्रितयम् । शालात्रिभागतुल्या कर्त्तव्या वीथिका बहिर्भवनात् । यद्यग्रतो भवति सा सोष्णीषं१ नाम तद्वास्तु । सायाश्रयमिति२ पश्चात् सावष्टम्भं३ तु पार्श्वसंस्थितया । सुस्थितमिति४ च समन्तात् शास्त्रज्ञैः पूजिताः सर्व्वाः । विस्तारषोडशांशः सचतुर्हस्तो भवेद्गृहोच्छ्रायः । द्वादशभागेनोनो भूमौ भूमौ समस्तानाम् । व्यासात् षोडशभागः सर्व्वेषां सद्मनां भवति भित्तिः । पक्वेष्टकाकृतानां दारुकृतानां तु स विकल्पः । एकादशभागयुतः ससप्ततिर्नृपवेशयोर्व्यासः । उच्छ्रायोऽङ्गुलतुल्यो द्वारस्यार्द्धेन विष्कम्भः । विप्रादीनां व्यासात् पञ्चांशोऽष्टादशाङ्गुलसमेतः । साष्टांशो विष्कम्भो द्वारस्य द्विगुण उच्छ्रायः । उच्छ्रायहस्तसङ्ख्यापरिमाणान्यङ्गुलानि बाहुल्यम् । शाखाद्वयेऽपि कार्यं सार्द्धं तत्स्यादुदुम्बरयोः । उच्छ्रायात् सप्तगुणादशीतिभागः पृथुत्वमेतेषाम् । नवगुणितेऽशीत्यंशः स्तम्भस्य दशांशहीनोऽग्रे । समचतुरस्रो रुचको१ वज्रो२ऽष्टाश्रिर्द्विवज्रको३ द्विगुणः । द्वात्रिंशता तु मध्ये प्रलीनको४ वृत्त इति वृत्तः५ । स्तम्भं विभज्य नवधा वहनं१ भागो घटो२ऽस्य भागोऽन्यः । पद्मं३ तथोत्तरोष्ठं४ कुर्याद्भागेन भागेन । स्तम्भसमं बाहुल्यं भारतुलानामुपर्युपर्यासाम् । भवति तुलोपतुलानामूनं पादेन पादेन । अप्रतिषिद्धालिन्दं समन्ततो वास्तु सर्व्वतोभद्रम्१ । नृपविबुधसमूहानां कार्यं द्वारैश्चतुर्भिरपि । नन्द्यावर्त्तं२मलिन्दैः शालाकुड्यात् प्रदक्षिणान्तगतैः । द्वारं पश्चिममस्मिन् विहाय शेषाणि कार्याणि । द्वारालिन्दोऽन्तगतः प्रदक्षिणोऽन्यः शुभस्ततश्चान्यः । तद्वच्च वर्द्धमाने३ द्वारं तु न दक्षिणं कार्यम् । अपरोऽन्तगतोऽलिन्दः प्रागन्तगतौ तदुत्थितौ चान्यौ । तदवधिविधृतश्चान्यः प्राग्द्वारं स्वस्तिके४ऽशुभदम् । प्राक्पश्चिमावलिन्दावन्तगतौ तदवधिस्थितौ शेषौ । रुचके५ द्वारं न शुभदमुत्तरतोऽन्यानि शस्तानि । श्रेष्ठं नन्द्यावर्तं सर्व्वेषां वर्द्धमानसञ्ज्ञं च । स्वस्तिकरुचके मध्ये शेषं शुभदं नृपादीनाम् । उत्तरशालाहीनं हिरण्यनाभं त्रिशालकं धन्यम् । प्राक्शालया वियुक्तं सुक्षेत्रं वृद्धिदं वास्तु । याम्याहीनं चुल्ली त्रिशालकं वित्तनाशकरमेतत् । पक्षघ्नमपरया वर्जितम् सुतध्वंसवैरकरम् । सिद्धार्थमपरयास्ये यमसूर्यं पश्चिमोत्तरे शाले । दण्डाख्यमुदक्पूर्व्वे वाताख्यं प्राग्युता याम्या । पूर्व्वापरे तु शाले गृहचुल्ली दक्षिणोत्तरे काचम् । सिद्धार्थेऽर्थावाप्तिर्यमसूर्ये गृहपतेर्मृत्युः । दण्डवधो दण्डाख्ये कलहोद्वेगः सदैव वाताख्ये । वित्तविनाशश्चुल्ल्यां ज्ञातिविरोधः स्मृतः काचे" ।

तत एकाशीतिपदं चतुःषष्टिपदञ्च द्विधा वास्तुनरविभागमुक्तोक्तम् "सम्पाता वंशानां मध्यानि समानानि यानि च पदानाम् । मर्म्माणि तानि विद्यान्न परिपीडयेत् प्राज्ञः । तान्यशुचिभाण्डकीलस्तम्भाद्यैः पीडितानि शल्यैश्च । गृहभर्त्तुस्तत्तुल्ये पीडामङ्गे प्रयच्छन्ति । कण्डूयते यदङ्गं गृहपतिना यत्र वाऽमराहुत्याम् । अशुभं भवेन्निमित्तं विकृतिर्वाग्नेः सशल्यं तत् । धनहानिर्दारुमये पशुपीडा रुग्भयानि चास्थिकृते । (लोहमये शस्त्रभयं कपालकेशेषु मृत्युः स्यात् । अङ्गारे स्तेनभयं भस्मनि च विनिर्दिशेत्सदाग्निभयम् । शल्यं हि मर्म-

संस्थं सुवर्णरजतादितेऽप्यशुभम्। मर्मण्यमर्म यो वा रुणज्ञर्थागमं तुषसमूहः) (चोपकम्) अपि नागदन्तको मर्मसंस्थितो दोषकृद्भवति। रोगाद्वायुं पितृतो हुताशनं शोषस्तृत्वमपि वितथात्। मुख्याद्भृशं जयन्ताच्च भृशमदितेश्च सुग्रीवात्। तत्सम्पाता नव ये तान्यति मर्माणि सम्प्रदिष्टानि। यच्च पदस्याष्टांशस्तत्प्रोक्तं मर्मपरिमाणम्। पदहस्तसंख्यया सम्मितानि वंशोऽङ्गुलानि विस्तीर्णः। वंशव्यासोऽप्यर्द्धः शिराप्रमाणं विनिर्दिष्टम्। सुखमिच्छन् ब्रह्माणं यत्नाद्रक्षेद्गृही गृहान्तःस्थम्। उच्छिष्टाद्युपघाताद्गृहपतिरुपतप्यते तस्मिन्। दक्षिणभुजेन हीने वास्तुनरेऽर्थक्षयोऽङ्गनादोषाः। वामेऽर्थधान्यहानिः शिरसि गुणैर्हीयते सर्वैः। स्त्रीदोषाः सुतमरणं प्रेष्यत्वं चापि करेण वैकल्ये। अविकलपुरुषे वसतां मानार्थयुतानि सौख्यानि। गृहनगरग्रामेषु च सर्वत्रैवं प्रतिष्ठिता देवाः। तेषु च यथानुरूपं वर्णा विप्रादयो वास्याः। वासगृहाणि च विद्याद् विप्रादीनामुदग्दिगाद्यानि। विशतां च तथा भवनं भवन्ति तान्येव दक्षिणतः। नवगुणसूत्रविभक्तान्यष्टगुणेनाथवा चतुःषष्टेः। द्वाराणि यानि तेषामनलादीनां फलोपनयः। अनलभयं स्त्रीजन्मप्रभूतधनता नरेन्द्रवाल्लभ्यम्। क्रोधपरताऽनृतत्वं क्रौर्यं च पूर्वेण। अल्पसुतत्वं प्रैष्यं नीचत्वं भक्ष्यपानसुतवृद्धिः। रौद्रं कृतघ्नमधनं सुतवीर्यघ्नं च याम्येन। सुतपीडा रिपुवृद्धिर्न धनसुताप्तिः सुतार्थबलसम्पत्। धनसम्पन्नृपतिभयं धनक्षयो रोग इत्यपरे। वधबन्धौ रिपुवृद्धिर्धनसुतलाभः समस्तगुणसम्पत्। पुत्रधनाप्तिर्वैरं सुतेन दोषाः स्त्रिया नैःस्वम्। मार्गतरुकोणकूपस्तम्भभ्रमविद्धमशुभदं द्वारम्। उच्छ्रायाद्द्विगुणमितां त्यक्त्वा भूमिं न दोषाय। रथ्याविद्धं द्वारं नाशाय कुमारदोषदं तरुणा। पङ्कद्वारे शोको व्ययोऽम्बुनि स्राविणि प्रोक्तः। कूपेनापस्मारो भवति विनाशश्च देवताविद्धे। स्तम्भेन स्त्रीदोषाः कुलनाशो ब्रह्मणोऽभिमुखे। उन्मादः स्वयमुद्घाटितेऽथ पिहिते स्वयं कुलविनाशः। मानाधिके नृपभयं दस्युभयं व्यसनदं नीचम्। द्वारं द्वारस्योपरि यत्तन्न शिवाय सङ्कटं यच्च। व्याव्यात्तं क्षुद्भयदं कुब्जं कुलनाशनं भवति। पीडाकरमतिपीडितमन्तर्विनतं भवेदभावाय। बाह्यविनते प्रवासो दिग्भ्रान्ते दस्युभिः पीडा। मूलद्वारं नान्यैर्द्वारैरतिसन्दधीत रूपर्द्ध्या। वटफलपत्रप्रभवादिभिश्च तन्मङ्गलैश्चिनुयात्। ऐशान्यादिषु कोणेषु संस्थिता बाह्यतो गृहस्यैताः। चरकी विदारिनाम्नाथ पूतना राक्षसी चेति। पुरभवनग्रामाणां ये कोणास्तेषु निवसतां दोषाः। श्वपचादयोऽन्त्यजात्यास्तेष्वेव विवृद्धिमायान्ति। याम्यादिष्वशुभफला जातास्तरवः प्रदक्षिणेनैते। उदगादिषु प्रशस्ताः प्लक्षवटोदुम्बराश्वत्थाः। आसन्नाः कण्टकिनो रिपुभयदाः क्षीरिणोऽर्थनाशाय। फलिनः प्रजाक्षयकरा दारूण्यपि वर्जयेदेषाम्। न छिन्द्याद्यदि तरूंस्तान् तदन्तरे पूजितान्वपेदन्यान्। पुन्नागाशोकारिष्टवकुलपनसान् शमीशालौ। शस्तौषधिद्रुमलतामधुरा सुगन्धा स्निग्धा समा न सुषिरा च मही नराणाम्। अप्यध्वनि श्रमविनोदमुपागतानां धत्ते श्रियं किमुत शाश्वतमन्दिरेषु। सचिवालयेऽर्थनाशो धूर्तगृहे सुतवधः समीपस्थे। उद्वेगो देवकुले चतुष्पथे भवति चाऽकीर्तिः। चैत्ये भयं ग्रहकृतं वल्मीकश्वभ्रसङ्कुले विपदः। गर्त्तायां तु पिपासा कूर्माकारे धनविनाशः। उदगादिप्लवमिष्टं विप्रादीनां प्रदक्षिणेनैव। विप्रः सर्वत्र वसेदनुवर्णमथेष्टमन्येषाम्। गृहमध्ये हस्तमितं खात्वा परिपूरितं पुनः श्वभ्रम्। यद्यूनमनिष्टं तत् समे समं धन्यमधिकं यत्। श्वभ्रमथ वाम्बुपूर्णं पदशतमित्वागतस्य यदि नोनम्। तद्धन्यं यच्च भवेत् पलान्यपामाढकं चतुःषष्टिः। आमे वा मृत्पात्रे श्वभ्रस्थे दीपवर्त्तिरभ्यनिलम्। ज्वलति दिशि यस्य शस्ता सा भूमिस्तस्य वर्णस्य। श्वभ्रोषितं न कुसुमं यस्मिन् प्रम्लायतेऽनुवर्णसमम्। तत्तस्य भवति शुभदं यस्य च यस्मिन्मनो रमते। सितरक्तपीतकृष्णा विप्रादीनां प्रशस्यते भूमिः। गन्धश्च भवति यस्या घृतरुधिरान्नाद्यमद्यसमः। कुशयुक्ता शरबहुला दूर्वाकाशावृता क्रमेण मही। अनुवर्णं वृद्धिकरी मधुरकषायाम्लकटुका च। कृष्टां प्ररूढबीजां गोऽध्युषितां ब्राह्मणैः प्रशस्तां च। गत्वा महीं गृहपतिः काले सांवत्सरोद्दिष्टे। भक्ष्यैर्नानाकारैर्दध्यक्षतसुरभिकुसुमधूपैश्च। दैवतपूजां कृत्वा स्थपतीनभ्यर्च्य विप्रांश्च। विप्रः स्पृष्ट्वा शीर्षं, वक्षश्च क्षत्रियो विशश्चोरू। शूद्रः पादौ स्पृष्ट्वा कुर्याद्रेखां गृहारम्भे। अङ्गुष्ठकेन कुर्यान्मध्याङ्गुल्याथवा प्रदेशिन्या। कनकमणिरजतमुक्तादधिफलकुसुमाक्षतैश्च शुभम्। शस्त्रेण शस्त्रमृत्युर्बन्धो लोहेन भस्मनाग्निभयम्। तस्करभयं

तृणेन च काष्ठोन्निखिता च राजभयम्। वक्रा पादालिखिता शस्त्रभयकृद्यदा विरूपा च। चर्माङ्गारास्थिकृता दन्तेन च कर्त्तुरशिवाय। वैरमपसव्यलिखिता प्रदक्षिणं सम्पदो विनिर्देश्याः। वाचः परुषा निष्ठीवितं क्षुतं चाशुभं कथितम्। अर्धनिचितं कृतं वा प्रविशन् स्थपतिर्गृहे निमित्तानि। अवलोकयेद्गृहपतिः क्व संस्थितः स्पृशति किं चाङ्गम्। रविदीप्तं यदि शकुनिस्तस्मिन् काले विरौति परुषरवः। संस्पृष्टाङ्गसमानं तस्मिन्देशेऽस्थि निर्देश्यम्। शकुनसमयेऽथवान्ये हस्त्यश्वश्वादयोऽनुवाशन्ते। तत्प्रभवमस्थि तस्मिंस्तदङ्गसम्भूतमेवेति। सूत्रे प्रसार्यमाणे गर्दभरावोऽस्थिशल्यमाचष्टे। श्वशृगाललङ्घिते वा सूत्रे शल्यं विनिर्देश्यम्। दिशि शान्तायां शकुनिर्मधुरविरावी यदा तदा वाच्यः। अर्थस्तस्मिन् स्थाने गृहेश्वराधिष्ठितेऽङ्गे वा। सूत्रच्छेदे मृत्युः कीले चावाङ्मुखे महान् रोगः। गृहनाथस्थपतीनां स्मृतिलोपे मृत्युरादेश्यः। स्कन्धाच्च्युते शिरोरुक् कुलोपसर्गोऽपवर्जिते कुम्भे। भग्नेऽपि च कर्मिवधश्च्युते कराद्गृहपतेर्मृत्युः। दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत्प्रथमम्। शेषाः प्रदक्षिणेन स्तम्भाश्चैवं समुत्थाप्याः। छत्रस्रगम्बरयुतः कृतधूपविलेपनः समुत्थाप्यः। स्तम्भस्तथैव कार्यो द्वारोच्छ्रायः प्रयत्नेन। विहगादिभिरवलीनैराकम्पितपतितदुःस्थितैश्च फलम्। शक्रध्वजफलसदृशं तस्मिंश्च शुभं विनिर्दिष्टम्। प्रागुत्तरोन्नते धनसुतक्षयः सुतवधश्च दुर्गन्धे। वक्रे बन्धुविनाशो न सन्ति गर्भाश्च दिग्मूढे। इच्छेद्यदि गृहवृद्धिं ततः समन्ताद्विवर्धयेत्तुल्यम्। एकोद्देशे दोषः प्रागथवाप्युत्तरे कुर्यात्। प्राग् भवति मित्रवैरं मृत्युर्दक्षिणेन यदि वृद्धिः। अर्थविनाशः पश्चादुदग्विवृद्धौ मनस्तापः। ऐशान्यां देवगृहं महानसं चापि कार्यमाग्नेय्याम्। नैर्ऋत्यां भाण्डोपस्करोऽथ धान्यानि मारुत्याम्। प्रागादिस्थे सलिले सुतहानिः शिखिभयं रिपुभयं च। स्त्रीकलहः स्त्रीदौष्ट्यं नैःस्वं वित्तात्मजविवृद्धिः। खगनिलयभग्नसंशुष्कदग्धदेवालयश्मशानस्थान्। क्षीरतरुधवविभीतकनिम्बारणिवर्जितांश्छिन्द्यात्। रात्रौ कृतबलिपूजं प्रदक्षिणं छेदयेद्दिवा वृक्षम्। धन्यमुदक्प्राक्पतनं न ग्राह्योऽन्यथा पतितः। छेदो यद्यविकारी ततः शुभं दारु तद्गृहोपयिकम्। पीते तु तरुखण्डे निर्दिशेत् तरोर्मध्यगां गोधाम्। मञ्जिष्ठाभे भेकं नीले सर्पं तथारुणे सरटः। मुद्गाभेऽश्मा कपिले तु मूषकोऽम्भश्च खड्गाभे। धान्यगोगुरुहुताशसुराणां न स्वपेदुपरि नाप्यनुवंशम्। नोत्तरापरशिरा न च नग्नो नैव चार्द्रचरणः श्रियमिच्छन्। भूरिपुष्पनिकरं सतोरणं तोयपूर्णकलसोपशोभितम्। धूपगन्धबलिपूजितामरं ब्राह्मणध्वनियुतं विशेद्गृहम्" मत्स्यपुराणे वास्तुप्रकरणे चोक्तं यथा "पूर्वं भूमिं परीक्षेत पश्चाद्वास्तुं प्रकल्पयेत्। श्वेता रक्ता तथा पीता कृष्णा चैवानुपूर्वशः। विप्रादेः शस्यते भूमिरतः कार्यं परीक्षणम्। विप्राणां मधुरास्वादा कटुका क्षत्रियस्य तु। तिक्ता कषाया च तथा वैश्यशूद्रेषु शस्यते। अरत्निमात्रे वै गर्त्ते स्वनुलिप्ते च सर्वशः। घृतमामशरावस्थं कृत्वावर्त्तिचतुष्टयम्। ज्वालयेद्भूपरीक्षार्थं तत्पूर्णं सर्वदिङ्मुखम्। दीप्तौ पूर्वादिगृह्णीयाद्वर्णानामनुपूर्वशः। वास्तुः सामूहिको नाम दीप्यते सर्वतस्तु यः। शुभदः सर्ववर्णानां प्रासादेषु गृहेषु च। अरत्निमात्राधोगर्त्ते परीक्ष्यं खातपूरणे। अधिके श्रियमाप्नोति न्यूने हानिं समे समम्। फालकृष्टेऽथवा देशे सर्वबीजानि वापयेत्। त्रिपञ्चसप्तरात्रेण यत्र रोहन्ति तान्यपि। ज्येष्ठा समा कनिष्ठा भूर्वर्जनीयेतरा सदा। पञ्चगव्यौषधिजलैः परीक्षित्वा च सेचयेत्। एकाशीतिपदं कृत्वा रेखाभिः कनकेन च। पश्चात्पिष्टेन चालिप्य सूत्रेणावेष्ट्य सर्वतः। दश पूर्वायता रेखा दश चैवोत्तरायताः। सर्ववास्तुविभागेषु विज्ञेया नवका नव। एकाशीतिपदं कृत्वा वास्तुवित्सर्ववास्तुषु। पदस्थान् पूजयेद्देवांस्त्रिंशत्पञ्चदशैव तु ४५। द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चान्तस्त्रयोदश। नामतस्तान् प्रवक्ष्यामि स्थानानि च निबोधत। ईशानकोणादिषु तान् पूजयेद्धविषा नरः। शिखी चैवाथ पर्जन्यो जयन्तः कुलिशायुधः। सूर्यसत्यौ भृशश्चैव आकाशो वायुरेव च। पूषा च वितथश्चैव बृहत्क्षतयमावुभौ। गन्धर्वो भृङ्गराजश्च मृगः पितृगणस्तथा। दौवारिकोऽथ सुग्रीवः पुष्पदन्तो जलाधिपः। असुरः शोषपापौ च रोगोऽहिर्मुख्य एव च। भल्लाटः सोमसर्पौ च अदितिश्च दितिस्तथा। बहिर्द्वात्रिंशदेते तु तदन्तस्तु ततः शृणु। ईशानादिचतुष्कोणसंस्थितान् पूजयेद्बुधः। आपश्चैवाथ सावित्रो जयो रुद्रस्तथैव च, मध्ये नवपदे ब्रह्मा तस्याष्टौ च समीपगान्

साध्यानेकान्तरान् विद्यात् पूर्वाद्यान्नामतः शृणु। अर्यमा सविता चैव विवस्वान् विबुधाधिपः। मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः स्मृतः। अष्टमश्चापवत्सस्तु परितो ब्रह्मणः स्मृताः। आपश्चैवापवत्सश्च पर्ज्जन्योऽग्निर्दितिस्तथा। पदिकानान्तु वर्गोऽयमेवं कोणेष्वशेषतः। तन्मध्ये तु बहिर्विंशत् द्विपदास्ते तु सर्वशः। अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरस्तथा। ब्रह्मणः परितो दिक्षु त्रिपदास्ते तु सर्वशः। वंशानिदानीं वक्ष्यामि ऋजूनपि पृथक् पृथक्। वायुं यावत्तथा रोगात् पितृभ्यः शिखिनं पुनः। मुख्यात् भृशं तथा शोषाद्वितथं यावदेव तु। सुग्रीवाददितिं यावत् मृगात् पर्जन्यमेव च। एते वंशाः समाख्याताः क्वचिच्च जयमेव तु। एतेषां यस्तु सम्पातः पदं मध्यं समं तथा। मर्म चैतत्समाख्यातं त्रिशूलं कोणगञ्च यत्। स्तम्भन्यासेषु वर्ज्यानि तुलाविधिषु सर्वदा। कीलोच्छिष्टोपघातादि वर्जयेद् यत्नतो जनः। सर्वत्र वास्तुर्निर्दिष्टो पितृवैश्वानरायतः। मूर्द्धन्यग्निः समादिष्टो मुखे चापः समाश्रितः। पृथ्वीधरोऽर्यमा चैव स्तनयोस्तावधिष्ठितौ। वक्षःस्थले चापवत्सः पूजनीयः सदा बुधैः। नेत्रयोर्दितिपर्जन्यौ श्रोत्रेऽदितिजयन्तकौ। सर्पेन्द्रावंससंस्थौ तु पूजनीयौ प्रयत्नतः। सूर्यसत्यादयस्तद्वत् बाह्वोः पञ्च च पञ्च च। रुद्रश्च राजयक्ष्मा च वामहस्ते समास्थितौ। सावित्रः सविता तद्वद्धस्तं दक्षिणमास्थितौ। विवस्वानथ मित्रश्च जठरे संव्यवस्थितौ। पूषा च पापयक्ष्मा च हस्तयोर्मणिबन्धने। तथैवासुरशोषौ च वामपार्श्वं समाश्रितौ। पार्श्वे तु दक्षिणे तद्वत् वितथः सगृहक्षतः। ऊर्वोर्यमाम्बुपौ ज्ञेयौ जान्वोर्गन्धर्वपुष्पकौ। जङ्घयोर्भृशसुग्रीवौ स्फिक्स्थौ दौवारिको मृगः। जयशक्रौ तथा मेढ्रे पादयोः पितरस्तथा। मध्ये नवपदे ब्रह्मा हृदये स तु पूज्यते। चतुःषष्टिपदो वास्तुः प्रासादे ब्रह्मणा स्मृतः। ब्रह्मा चतुष्पदस्तत्र कोणेष्वर्धपदास्तथा। बहिःकोणेषु वास्तौ तु सार्धाश्चोभयसंस्थिताः। विंशतिर्द्विपदाश्चैव चतुःषष्टिपदे स्मृताः। गृहारम्भेषु कण्डूतिः स्वाम्यङ्गे यत्र जायते। शल्यं त्वपनयेत्तत्र प्रासादे भवने तथा। सशल्यं भयदं यस्मादशल्यं शुभदायकम्। हीनाधिकाङ्गतां वास्तोः सर्वथा तु विवर्जयेत्। नगरग्रामदेशेषु सर्वत्रैवं विवर्जयेत्। चतुःशालं त्रिशालञ्च द्विशालं चैकशालकम्। नामतस्तान् प्रवक्ष्यामि स्वरूपेण द्विजोत्तम!। चतुःशालं प्रवक्ष्यामि स्वरूपन्नामतस्तथा। चतुःशालञ्चतुर्द्वारैरलिन्दैः सर्वतोमुखम्। नाम्ना तत् सर्वतोभद्रं१ शुभं देवनृपालयम्। पश्चिमद्वारहीनञ्च नन्द्यावर्तं२ प्रचक्षते। दक्षिणद्वारहीनन्तु वर्द्धमानं३ प्रचक्षते। पूर्वद्वारविहीनं तत् स्वस्तिकं४ नाम विश्रुतम्। रुचकं५ चोत्तरद्वारविहीनं तत् प्रचक्षते। सौम्यशालाविहीनं यत्त्रिशालं धान्यकं६ च तत्। क्षेमवृद्धिकरं नृणां बहुपुत्रफलप्रदम्। शालया पूर्वया हीनं सुक्षेत्रमिति७ विश्रुतम्। धन्यं यशस्यमायुष्यं शोकमोहविनाशनम्। शालया याम्यया हीनं यत्त्रिशालं तु शालया। कुलक्षयकरं८ नृणां सर्वव्याधिविनाशनम्। हीनं पश्चिमया यत्तु पक्षघ्नं९ नाम तत् पुनः। मित्रबन्धून् सुतान् हन्ति तथा सर्वभयावहम्। याम्यापराभ्यां शालाभ्यां धन्यं१० धान्यफलप्रदम्। क्षेमवृद्धिकरं नृणां तथा पुत्रफलप्रदम्। यमसूर्यञ्च११ विज्ञेयं पश्चिमोत्तरशालिकम्। राजाग्निभयदं नृणां कुलक्षयकरं च तत्। उदक्पूर्वे तु शाले हि दण्डाख्यं११ यत्र तद्भवेत्। अकालमृत्युभयदं परचक्रभयावहम्। धनाख्यं१२ पूर्वयाम्याभ्यां शालाभ्यां यद्द्विशालकम्। तच्छस्त्रभयदं नृणां पराभवभयावहम्। चुल्ली१४ पूर्वापराभ्यां तु सा भवेन्मृत्युसूचिनी। वैधव्यदायकं स्त्रीणामनेकभयकारकम्। कार्यमुत्तरयाम्याभ्यां शालाभ्यां भयदं नृणाम्। सिद्धार्थसंज्ञं१५ वर्ज्यानि द्विशालानि सदा बुधैः। अथातः संप्रवक्ष्यामि भवनं पृथिवीपतेः। पञ्चप्रकारं तत्प्रोक्तमुत्तमादिविभेदतः। अष्टोत्तरं हस्तशतं विस्तरश्चोत्तमो मतः। चतुर्ष्वन्येषु विस्तारो हीयते चाष्टभिः करैः। चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते। युवराजस्य वक्ष्यामि तथा भवनपञ्चकम्। षड्भिः षड्भिस्तथाशीतिर्हीयते तत्र विस्तरात्। त्र्यंशेन चाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते। सेनापतेः प्रवक्ष्यामि तथा भवनपञ्चकम्। चतुःषष्टिस्तु विस्तारात् षड्भिः षड्भिस्तु हीयते। पञ्चस्वेतेषु दैर्घ्यञ्च षड्भागेनाधिकं भवेत्। मन्त्रिणामथ वक्ष्यामि तथा भवनपञ्चकम्। चतुश्चतुर्भिर्हीना स्यात् करषष्टिः प्रविस्तरे। अष्टांशेनाधिकं दैर्घ्यं पञ्चस्वपि निगद्यते। सामन्तामात्यलोकानां वक्ष्ये भवनपञ्चकम्। चत्वारिंशत्तथाष्टौ च चतुर्भिर्हीयते क्रमात्। चतुर्थांशाधिकं दैर्घ्यं पञ्चस्वेतेषु शस्यते। शिल्पिकञ्चुकिनाञ्चैव

वैश्यानां गृहपञ्चकम्। अष्टाविंशत् कराणान्तु त्रिहीनं विस्तरे क्रमात्। द्विगुणं दैर्घ्यमेवोक्तं मध्यमेष्वेवमेव तत्। दूतीकर्माधिकृतानां वक्ष्ये भवनपञ्चकम्। चतुर्थांशाधिकं दैर्घ्यं विस्तारो द्वादशैव तु। अर्धार्द्धकरहानिः स्याद्विस्तारात्पञ्चशः क्रमात्। दैवज्ञगुरुवैद्यानां सभास्तारपुरोधसाम्। तेषामपि प्रवक्ष्यामि तथा भवनपञ्चकम्। चत्वारिंशत्तु विस्ताराच्चतुर्भिर्हीयते क्रमात्। पञ्चस्वेतेषु दैर्घ्यञ्च षड्भागेनाधिकं भवेत्। चातुर्वर्ण्यस्य वक्ष्यामि सामान्यं गृहपञ्चकम्। द्वात्रिंशतिः कराणान्तु चतुर्भिर्हीयते क्रमात्। आ षोड़शादिति परं नूनमन्त्यावसायिनाम्। दशांशेनाष्टभागेन त्रिभागेणाथ पादिकम्। अधिकं दैर्घ्यमित्याहुर्ब्राह्मणादेः प्रशस्यते। सेनापतेर्नृपस्यापि गृहयोरन्तरेण तु। नृपवासगृहं कार्य्यं भाण्डागारन्तथैव च। सेनापतेर्गृहस्यापि चातुर्वर्ण्यस्य चान्तरे। वासाय च गृहं कार्य्यं राजपूज्येषु सर्वदा। अन्तरप्रभवानाञ्च स्वपितुर्गृहमिष्यते। तथा हस्तशतादर्द्धं गदितं वनवासिनाम्। सेनापतेर्नृपस्यापि सप्तत्या सहिते कृते। चतुर्दशहृते व्यासे शालाव्यासः प्रकीर्तितः। पञ्चत्रिंशान्विते तस्मिन्नलिन्दः समुदाहृतः। तथा षड्त्रिंशद्धस्ता तु सप्ताङ्गुलसमन्विता। विप्रस्य महती शाला न दैर्घ्यं परतो भवेत्। दशाङ्गुलाधिका तद्वत् क्षत्रियस्य निगद्यते। पञ्चत्रिंशत्करा वैश्ये अङ्गुलानि त्रयोदश। तावत्करैव शूद्रस्य युता पञ्चदशाङ्गुलैः। शालायास्तु त्रिभागेण यस्याग्रे वीथिका भवेत्। सोष्णीषं नाम तद्वास्तु, पश्चात् सायाश्रयं भवेत्। पार्श्वयोर्वीथिका यत्र सावष्टम्भन्तदुच्यते। समन्ताद्वीथिका यत्र सुस्थितं तदिहोच्यते। शुभदं सर्वमेतत्स्याच्चातुर्वर्ण्ये चतुर्विधम्। विस्तारात् षोड़शो भागस्तथा हस्तचतुष्टयम्। प्रथमो भूमिकोच्छ्राय उपरिष्टात् प्रहीयते। द्वादशांशेन सर्वासु भूमिकासु तथोच्छ्रयः। पक्वेष्टकाभवा भित्तिः षोड़शांशेन विस्तरात्। दारवैरपि कल्प्या स्यात्तथा मृण्मयभित्तिका। गर्भमानेन मानन्तु सर्ववास्तुषु शस्यते। गृहव्यासस्य पञ्चाशदष्टादशभिरङ्गुलैः। संयुतो द्वारविष्कम्भो द्विगुणश्चोच्छ्रयो भवेत्। द्वारशाखासु बाहुल्यमुच्छ्रायःकरसम्मितैः। अङ्गुलैः सर्ववास्तूनां पृथुत्वं शस्यते बुधैः। उदुम्बरोत्तरायामस्तदर्धार्धं प्रविस्तरात्” २५३अ०।

“अथातः संप्रवक्ष्यामि स्तम्भमानविनिर्णयम्। कृत्वा स्वभवनोच्छ्रायं सदा सप्तगुणं बुधैः। अशीत्यंशः पृथुत्वं स्यादग्रेणाष्टगुणैः सह। रुचकश्चतुरस्रः स्यादष्टास्रो वज्र उच्यते। द्विवज्रः षोडशास्रस्तु द्वात्रिंशास्रः प्रलीनकः। मध्यप्रदेशे यस्तम्भो वृत्तो वृत्त इति स्मृतः। एते पञ्च महास्तम्भाः प्रशस्ताः सर्ववास्तुषु। पद्मवल्लीलताकुम्भपत्रदर्पणरूपिताः। स्तम्भस्य नवमांशेन पद्मकुम्भान्तराणि तु। स्तम्भतुल्या तुला प्रोक्ता हीना चोपतुला ततः। त्रिभागेणेह सर्वत्र चतुर्भागेण वा पुनः। हीनं हीनं चतुर्थांशात् तथा सर्वासु भूमिषु। वासगेहेषु सर्वेषां प्रवेशो दक्षिणेन तु। द्वाराणि तु प्रवक्ष्यामि प्रशस्तानीह यानि तु। पूर्वेणेन्द्रं जयन्तञ्च द्वारं सर्वत्र शस्यते। याम्यञ्च वितथञ्चैव दक्षिणेन विदुर्बुधाः। पश्चिमे पुष्पदन्तञ्च वारुणञ्च प्रशस्यते। उत्तरेण तु भल्लाटं सौम्यं तु शुभदं भवेत्। तथा वास्तुषु सर्वत्र वेधं द्वारस्य वर्जयेत्। द्वारे तु रथ्यया विद्धे भवेत् सर्वकुलक्षयः। तरुणा द्वेषबाहुल्यं शोकः पङ्केन जायते। अपस्मारो भवेन्नूनं कूपवेधेन सर्वदा। व्यथा प्रस्रवणेन स्यात्कीलेनाग्निभयं भवेत्। विनाशो देवताविद्धे स्तम्भेन स्त्रीकृतो भवेत्। गृहभर्तुर्विनाशः स्यात् गृहेण च व्यधे कृते। अमेध्यावस्करैर्विद्धे गृहिणी बन्धकी भवेत्। तथा शस्त्रभयं विद्यादन्त्यजस्य गृहेण तु। उच्छ्रायाद्द्विगुणां भूमिं त्यक्त्वा वेधो न जायते। स्वयमुत्पाटिते द्वारे उन्मादो गृहवासिनाम्। स्वयं वा पिहिते विद्यात् कुलनाशं विचक्षणः। मानाधिके राजभयं न्यूने तस्करतो भवेत्। द्वारोपरि च यद्द्वारं तदन्तकमुखं स्मृतम्। अध्वनो मध्यदेशे तु अधिको यस्य विस्तरः। वज्रन्तु सङ्कटं मध्ये सद्यो भर्तृविनाशनम्। तथान्यपीड़ितं द्वारं बहुदोषकरं भवेत्। मूलद्वारात्तथान्यत्तु नाधिकं शोभनं भवेत्। कुम्भश्रीपर्णिवल्लीभिर्मूलद्वारन्तु शोभयेत्। पूजयेच्चापि तन्नित्यं बलिना चाक्षतोदकैः। भवनस्य वटः पूर्वे दिग्भागे सर्वकामिकः। उदुम्बरस्तथा याम्ये वारुण्यां पिप्पलः शुभः। प्लक्षश्चोत्तरतो धन्यो विपरीतास्त्वसिद्धये। कण्टकी क्षीरवृक्षश्च असनः फलिनीद्रुमः। भार्य्याहान्यै प्रजाहान्यै भवेतां क्रमशस्तदा। न च्छिद्यात् यदि तानन्यानन्तरे स्थापयेच्छुभान्। पुन्नागाशोकवकुलशमीतिलकचम्पकान्। दाडिमीपिप्पलद्राक्षा स्तथा कुसुममण्डपान्। जम्बीरपूगपनसद्रुमकेतकीभिर्जातीसरोजशतपत्रिकमल्लिकाभिः। यन्नालिकेरकदलीदलपाटलाभिर्युक्तं तदत्र भवनं श्रियमातनोति” २५४अ०। द्वारवेधे वराहवाक्यं पी०धा०व्याख्यातं यथा

"मार्गतरुकोणकूपस्तम्भभ्रमविद्धमशुभदं द्वारम्। उच्छ्रायाद्विगुणितां भूमिं त्यक्त्वा न दोषायेति" ह०स० भ्रमोजलनिर्गमप्रदेशः प्रणालिकेत्यर्थः। विद्धं सम्मुखावस्थितम्। अतोच्छ्रायो द्वारस्य गृह्यते। तथा च वर्गः "द्वारोच्छ्रायाद्विगुणितां भूमिं त्यक्त्वा बहिःस्थिताः। न दोषाय भवन्त्येव" इति। रथ्याविद्धं द्वारं नाशाय कुमारदोषदं तरुणा। पङ्कद्वारे शोको व्ययोऽम्बुनि स्राविणि प्रोक्तः। कूपेनापस्मारो भवति विनाशश्च देवताविद्धे। क्रमेण स्त्रीदोषः कुलनाशो ब्रह्मणोऽभिमुखे भवति" ह०स० पङ्कविद्धं द्वारं पङ्कद्वारं यस्य द्वारस्याग्रतः निरन्तरं पङ्कस्तिष्ठति। देवता सुरप्रतिमा। नाशः स्वामिन एव। ब्रह्मवेध एकाशीतिपदचक्रस्थितब्रह्मवेधो गृह्यते। यदाह विश्वकर्मा "गृहमध्ये कृतं द्वारं द्रव्यधान्यविनाशनमिति" विशेषमाह भरद्वाजः "शिरो मर्माणि वंशश्च नालं मध्यं च सर्वशः। विहाय वास्तुमध्यं च द्वाराणि विनिवेशयेदिति" वास्तुमध्यं ब्रह्मस्थानम्। "तत्र द्वारं चेन्निधनप्रदमिति" वशिष्ठोक्तेश्च अस्यापवादमाह विश्वकर्मा "देवागारे विहारे च प्रपायां मण्डपेषु च। प्रतोल्यां च मखे वास्तुमध्ये द्वारं निवेशयेदिति" वास्तुमध्यं ब्रह्मस्थानं देवालयादिस्थानेषु कृतस्य गृहान्तर्गतद्वारस्य ब्रह्मणो न वेध इति निष्कृष्टोऽर्थः"।

गृहकर्मणि वर्ज्यकाष्ठमाह ज्यो० त० "क्षीरिवृक्षोद्भवं दारु गृहेषु न निवेशयेत्। कृताधिवासं विहगैरनिलानलपीडितम्। गजैर्विभग्नञ्च तथा विद्युन्निर्घातपीडितम्। चैत्यदेवालयोत्पन्नं वज्रभग्नं श्मशानजम्। देवाद्यधिष्ठितं दारु नीपनिम्बविभीतकान्। कण्टकिनोऽसारतरून् वर्जयेत् गृहकर्मणि। वटाश्वत्थौ च निर्गुण्डीं कोविदारांस्तथैव च। प्लक्षं शाल्मलीश्चैव पलाशञ्च विवर्जयेत्"।

गृहजातरक्तपुष्पवृक्षादिफलमुक्तं तत्रैव
"रक्तपुष्पाद्भयं प्राहुः क्षीरिणा च पशोर्भयम्। कण्टक्यरिभयं कुर्यात् गृहभेदश्च शाल्मलिः" वास्तुमध्यदिग्भेदात् कूपफलमुक्तम् मु०चि० "कूपे वास्तोर्मध्यदेशेऽर्थनाशस्त्वैशान्यादौ पुष्टिरैश्वर्यवृद्धिः। सूनोर्नाशः स्त्रीविनाशो मृतिश्च सम्पत्पीडाशत्रुतः स्याच्च सौख्यम्" मू० "वास्तोर्गृहस्य मध्यदेशे मध्यभागे कूपे जलकूपे कृते सति स्वामिनोऽर्थनाशः स्यात्। अथैशान्यादिषु पुष्टिरित्यादिफलम्। यथा ऐशान्यां कूपे पुष्टिः। पूर्वस्यां कूपे ऐश्वर्यवृद्धिः। आग्नेय्यां कूपे पुत्रनाशः। दक्षिणस्यां कूपे स्त्रीविनाशः। नैर्ऋत्यां कूपे गृहकर्त्तुर्मृतिः। पश्चिमायां कूपे सम्पत्, वायव्यां कूपे शत्रुतः सकाशात्पीडा। उत्तरस्यां कूपे सुखम्। गृहस्वामिन एव" पी०धा०। एवं गृहसन्निवेशप्रकारेऽवधारितेऽधुना गृहारम्भकालः प्रदर्श्यते। तत्रादौ सौरमासभेदेन वास्तुनरमुखादिप्रदर्शनेन पूर्वादिमुखगृहारम्भकालमाह विश्व० वा०शा० "वास्तुनागं जगत्प्राणं पूर्व्वस्यां प्रथमाश्रितम्। कुक्षिप्रदेशे निखनेद्वास्तुनागस्य मन्त्रितः। त्रिषु त्रिषु च मासेषु नभस्यादिषु च क्रमात्। यद्दिङ्मुखो वास्तुनरस्तन्मुखं सदनं शुभम्। अन्यदिङ्मुखगेहं तु दुःखशोकभयप्रदम्। वृषार्कादित्रिकमेषां सिंहादि गणयेद्गृहे। देवालये च मीनादि तडागे मकरादिकम्। पूर्वादिषु शिरः कृत्वा नागः शेते त्रिभिस्त्रिभिः। भाद्राद्यैर्वामपार्श्वेन तस्य क्रोडे गृहं शुभम्" व्यक्तमाह ज्यो०त० "वास्तुप्रमाणेन तु गात्रकेण वामेन शेते खलु नित्यकालम्। त्रिभिस्तु मासैः परिवृत्य भूमौ तं वास्तुनागं प्रवदन्ति वृद्धाः। भाद्रादिके वासवदिक्शिराः स्यात् मार्गादिकेषु त्रिषु याम्यमूर्द्धा। प्रत्यक्शिराः स्यात् खलु फाल्गुनादौ ज्यैष्ठादि कौवेरशिराः सनागः। मूर्ध्नि खाते भवेन्मृत्युः पृष्ठे स्यात् पुत्रभार्ययोः। जघनेऽर्थक्षयं विद्यात् सर्वसम्पत्तथोदरे"

गृहारम्भाद्युपयोगिराहुमुखादिकमाह वा०शा०
"ईशानतः कालसर्पः संहारेण प्रसर्पति। विदिक्षु शेषवास्तोश्च मुखं त्यज्य चतुर्थकम्। खनेच्च सौरमानेन व्यत्यये चाशुभं भवेत्। चतुस्त्रिद्विकशालानामेष दोषो न विद्यते। एवं नागेन्द्रसंशुद्ध्या मन्दिरारम्भणं शुभम्। अधोमुखे च नक्षत्रे शुभेऽह्नि शुभवासरे। चन्द्रतारानुकूले च भवनारम्भणं शुभम्। त्रिषु त्रिषु च मासेषु मार्गशीर्षादिषु क्रमात्। पूर्व्वदक्षिणतोयेशपौलस्त्याशां क्रमाद्गुः (राहुः) स्तम्भे धन विनाशः स्यात् द्वारे वह्निभयं भवेत्। गमने कार्यहानिः स्यात् गृहारम्भे कुलक्षयः। रक्षःकुवेराग्निजलेशयाम्यावायव्यकाष्ठासु च सूर्यप्रवासात्। वसेदसावष्टसु दिग्भचक्रे मुखे विवर्ज्यो गमने गृहे च। शिरःखाते विनाशः स्यान्मातापित्रोश्च पृष्ठके। स्त्रीपुत्रनाशः पुच्छे तु गोत्रपुत्रविनाशनम्। कुक्षौ सर्व्वसमृद्धिः

स्याद्धनधान्यसुतागमः । सिंहादिषु त्रिमासेषु चाग्नेय्यां कुक्षिमाश्रितः । वृश्चिकादिषु ईशान्यां कुम्भादिषु च वायुदिक् । वृषादित्रिषु नैर्ऋत्यां मुखपुच्छं न शोभनम् ।

गृहारम्भविहितमासादि विश्व० वा०शा०उक्तं यथा "चैत्रे व्याधिमवाप्नोति यो नवं कारयेद्गृहम् । वैशाखे धनरत्नानि ज्यैष्ठे मृत्युं तथैव च । आषाढे भृत्यरत्नानि पशुवर्जमवाप्नुयात् । श्रावणे मित्रलाभं च हानिं भाद्रपदे तथा । युद्धं चैवाश्विने मासि कार्त्तिके धनधान्यकम् । धनवृद्धिं मार्गशीर्षे पौषे तस्करतोभयम् । माघे चाग्निभयं विद्याल्लक्ष्मीवृद्धिश्च फाल्गुने । गृहसंस्थापनं सूर्ये मेषस्थे शुभदं भवेत् । वृषस्थे धनवृद्धिः स्यान्मिथुने मरणं भवेत् । कर्कटे शुभदं प्रोक्तं सिंहे भृत्यविवर्द्धनम् । कन्या रोगं तुला सौख्यं वृश्चिके धनधान्यकम् । कार्मुके च महाहानिर्मकरे स्याद्धनागमः । कुम्भेऽर्के रत्नलाभः स्यान्मीने मृत्युभयावहम् । चापमीननृयुक्कन्या मासा दोषावहाः स्मृताः । ज्यैष्ठोर्जमावृसिंहाख्याः सौरमाने तु शोभनाः । माघे तपस्ये तपसि माधवे नभसि त्विषे । ऊर्जे च गृहनिर्माणं पुत्रपौत्रधनप्रदम् । निषिद्धेष्वपि कालेषु सानुकूले शुभे दिने । तृणदारुगृहारम्भे मासदोषो न विद्यते । पाषाणेष्टकगेहानि निन्द्यमासे न कारयेत् । निन्द्यमासेऽपि चन्द्रस्य मासेन शुभदं गृहम्"

तत्र सौरचान्द्रमासविशेषस्य ग्राह्यतां मासभेदेन पूर्वादिमुखगृहकरणञ्चाह मु० चि० "कुम्भेऽर्के फाल्गुने प्रागपरमुखगृहं श्रावणे सिंहकर्क्योः पौषे नक्रे च याम्योत्तरमुखसदनं गोऽजगेऽर्के च राधे । मार्गे जूकालिगे सत् ध्रुवमृदुवरुणस्वातिवस्वर्कपुष्यैः सूतोगेहं त्वदित्यां हरिभविधिभयोस्तत्र शस्तः प्रवेशः । केचिन्मेषरवौ मधौ, वृषभगे ज्यैष्ठे, शुचौ कर्कटे, भाद्रे सिंहगते, घटेऽश्वयुजि चोर्जेऽलौ मृगे पौषके । माघे नक्रघटे शुभं निगदितं गेहं तथोर्जे न सत्कन्यायां च तथा धनुष्यपि न सत् कृष्णादिमासाद्भवेत्" मू० । "कुम्भे कुम्भस्थिते सूर्ये फाल्गुने च मासि प्रागपरमुखं गृहं प्राङ्मुखं पश्चिममुखं च गृहं सत् शुभफलदं स्यादित्यर्थः । श्रावणे मासि सिंहकर्कसंस्थार्के प्रागपरमुखं गृहं सत् । पौषे मासे नक्रे मकरसंस्थार्के च प्रागपरमुखं गृहं सत् । अथ गोऽजगे वृषमेषगे सूर्ये राधे वैशाखे मासे च तथा मार्गशीर्षे मासि जूकालिगे तुलावृश्चिकगते सूर्ये सति याम्योत्तरमुखं सदनम् दक्षिणमुखं उत्तरमुखं च सदनं सत् यदाह नारदः "गृहसंस्थापनं सूर्ये मेषस्थे शुभदं भवेत् । वृषस्थे धनवृद्धिः स्यान्मिथुने मरणं ध्रुवम् । कर्कटे शुभदं प्रोक्तं सिंहे भृत्यविवर्धनम् । कन्या रोगं तुला सौख्यं वृश्चिके धनवर्द्धनम् । कार्मुके तु महाहानिर्मकरे स्याद्धनागमः । कुम्भे तु रत्नलाभः स्यान्मीने सद्म भयावहमिति" चान्द्रमासफलान्याह श्रीपतिः "शोकोधान्यं मृतिपशुहृतिर्द्रव्यवृद्धिर्विनाशो युद्धं भृत्यक्षतिरथ धनं श्रीश्च वह्निभयञ्च । लक्ष्मीप्राप्तिर्भवति भवनारम्भकर्तुः क्रमेण चैत्रादूचे मुनिरिति फलं वास्तुशास्त्रोपदिष्टम्" इति अन्यच्च "आषाढचैत्राश्वयुजोर्जमाघज्यैष्ठेषु च प्रौष्ठपदेषु नूनम् । निकेतनानां घटनं नृपाणां योगेश्वराचार्यमते न शस्तम्" इति । मते न इति पदच्छेदः । अत्र सौराणां चान्द्रमासानां महान् शुभाशुभफलदभेदेन विरोधः । अत्र चिकीर्षितगृहद्वारानुकूलरविसंक्रमसमीचीनविहितमासेष्वेव वैशाखादिषु गृहारम्भः कार्य इति विरोधाभावः इति पितृचरणाः । तत्र द्वारनियममाह श्रीपतिः "कर्किनक्रहरिकुम्भगतेऽर्के पूर्वपश्चिममुखानि गृहाणि । तौलिमेषवृषवृश्चिकयाते दक्षिणोत्तरमुखानि च कुर्यात् । अन्यथा यदि करोति दुर्मतिर्व्याधिशोकधननाशमश्नुते । मीनचापमिथुनाङ्गनागते कारयेन्न गृहमेव भास्करे" इति । कर्कार्कसहिते श्रावणे मासि तादृशमेव गृहम् उक्तहेतोः । एवं मकरार्कसहिते पौषे मासे अनेनैव हेतुना दक्षिणोत्तरमुखं गृहं मेषवृषार्कसहिते वैशाखे स्यात् । तुलावृश्चिकार्कसहिते मार्गशीर्षमासे तथैव गृहं स्यादित्यर्थः । अथात्र सौराणां चान्द्राणां च मासानां निषेधस्तृणादिनिर्मेयगृहाद्यारम्भे नैव भवति । यदुक्तं व्यवहारसमुच्चये "निषिद्धेष्वपि कालेषु स्वानुकूले शुभे दिने । तृणदारुगृहारम्भे मासदोषो न विद्यते" इति । जगन्मोहनेऽपि "पाषाणेष्टादिगेहादि निन्द्यमासे न कारयेत् । तृणदारुगृहारम्भे मासदोषो न विद्यते' अत्र केचिदनियतदिग्गृहारम्भे सर्वदा कालदोषो न प्रवर्तत इत्याहुः तन्न वचनाभावात्! किं च "दिङ्मूढे कुलनाशः स्यादित्यनियतदिग्गृहस्य विचारकोटिसन्निवेशाभावात् । अथ गृह

निर्माणनक्षत्राण्याह । ध्रुवेति । ध्रुवाणि मृदूनि च प्रसिद्धानि वरुणः शतभं स्वाती प्रसिद्धा वसुः धनिष्ठा अर्कोहस्ता पुष्यश्च एषु भेषु गृहनिर्माणं सत् शुभफलदम् । यदाह गर्गः "त्र्युत्तरेऽपि च रोहिण्यां पुष्ये मैत्रे१७ करद्वये १३।१४। धनिष्ठाद्वितये पौष्णे २७ गृहारम्भः प्रशस्यते" अत्र वाक्ये मृगानभिधानेऽपि तदुक्तिर्महेश्वरवाक्यालोचनेन "प्रारम्भो भवनस्य वारुण२४मृदु१४।१७।५।२७ स्वात्यर्क१३ पुष्यध्रुवै४।१२।२१।२६। र्वस्वृक्षेण२३ युतैरिति" अथ सूतिकागृहनिर्माणे विशेषमाह सूतीगेहमिति । अदित्यां पुनर्वसौ सूतिकागृहनिर्माणं शस्तम् । तत्रेति तत्र सूतिकागृहे हरिभविधिभयोः श्रवणाभिजितोर्नक्षत्रयोः प्रवेशः शस्तः । उक्तं च श्रीपतिना "पुनर्वसौ च सूतिकागृहस्य निर्मितिः शुभा । विरञ्चिविष्णुभान्तरे प्रवेशनं हितं भवेत्" इति । तदेतद्ब्राह्मणव्यतिरिक्तवर्णविषयम् यदाह लल्लः "पुनर्वसौ नृपादीनां कर्त्तव्यं सूतिकागृहम् । श्रवणाभिजितोर्मध्ये प्रवेशं तत्र कारयेदिति" आवश्यकत्वे तु श्रवणाभिजितोर्मुहूर्त्तस्तदुदयो वा ग्राह्यः इत्यर्थः । ब्राह्मणस्य तु प्रागुक्तनक्षत्रेष्वेव सूतिकागृहनिर्माणप्रवेशौ । तत्र सूतिकागृहं नैरृत्यां कार्यं यदाह वृद्धवशिष्ठः "ऐन्द्र्यां तु विक्रयस्थानमाग्नेय्यां पचनालयः । वारुण्यां भोजनगृहं नैरृत्यां सूतिकागृहम् । याम्यायां शयनस्थानं वायव्यां पशुमन्दिरम् । कौवेर्यां तु धनस्थानमैशान्यां देवतालयः" इति । स्मृतिभास्करे गर्गः "वारेऽनुकूले राशौ तु दिने दोषविवर्जिते । सानुकूलदिशि प्रोक्तं सूतिकाभवनं बुधैरिति" कालनियम उक्तो रत्नकोशे "आसन्नप्रसवे मासि कुर्याच्चैव विशेषतः । तद्वत् प्रसवकाले स्यादिति शास्त्रेषु निश्चयः" इति । वराहेणात्रानेकनक्षत्राणामभिधानं कृतं यथा "हस्तादित्यशशाङ्कतिष्यपवनप्राज्येशमित्रोत्तराचित्राश्विश्रवणेषु वृश्चिकघटौ हित्वा विरिक्ते तिथौ । शुक्राचार्यशनैश्चरज्ञशशिनां वारेऽनुकूले विधौ सद्भिर्वेश्मनि सूतिकागृहविधिः क्षेमङ्करः कीर्त्यते" इति । वेश्मनि चतुर्थस्थाने सद्भिः शुभग्रहैः । सूतिकागृहप्रवेशे कालविशेषमाह ज्योतिर्वसिष्ठः "अथातः संप्रवक्ष्यामि सूतिकागारवेशनम् । मासि तु नवमे प्राप्ते पूर्वपक्षे शुभे दिने । प्रसूतिसम्भवे काले सद्य एव प्रवेशयेदिति" पूर्वपक्षे शुक्लपक्षे । प्रवेशे नक्षत्रादीन्याह गर्गः "रोहिण्यैन्द्रवपौष्णेषु स्वातीवारुणयोरपि । पुष्ये पुनर्वसौ हस्तधनिष्ठात्र्युत्तरासु च । "मैत्रत्वाष्ट्रे तथाश्विन्यां सूतिकागारवेशनम्" । "सर्वे शुभग्रहाः केन्द्रे पापाश्च त्रिषडायगाः । शुभांशे शुभसन्दृष्टे सूतिकागारवेशनमिति" । प्रागभिहितानां सौरचान्द्रमासानां प्रकारान्तरेणैकवाक्यतां शार्दूलविक्रीडितेनाह । केश्चिदिति पूर्वदिग्द्वारवशेनैकवाक्यता उक्ता इदानीमेतादृशमुच्यते मेषसंस्थे रवौ मधौ चैत्रे मासि गेहं प्रारब्धं शुभं स्यात् । तथा वृषस्थे सूर्ये ज्यैष्ठे मासि, कर्कस्थेऽर्के शुचावाषाढे, सिंहगतेऽर्के भाद्रपदे मासि, घटे तुलास्थे रवौ आश्वयुजि आश्विनमासि । अलौ वृश्चिकगेऽर्के ऊर्जे कार्त्तिके मासि । मृगे मकरस्थेऽर्के पौषे मासि, नक्रघटे मकरकुम्भस्थेऽर्के माघे मासि प्रारब्धं गृहं शुभं स्यात् इत्यर्थः इति कैश्चिन्निगदितम् । अस्यायमाशयः । मीनचापेत्यादिना द्विस्वभावराशयो निषिद्धाः शोकौ धान्यमित्यादिना च कियन्तश्चान्द्रा अपि मासा निषिद्धाः । अतोऽन्ये सौराश्चान्द्रा वा विहितास्तेषामयमेव एकवाक्यताप्रकारः । मेषस्थे रवौ चैत्रेऽपि गृहं शुभम् । यस्तु चैत्रोनिषिद्धः स मीनार्कविषयः । वृषभस्थे रवौ ज्यैष्ठेऽपि शुभम् । वैशाखस्तु विहितएवास्ति ज्येष्ठो निषिद्धः स मिथुनार्कविषयः । कर्कटस्थे सूर्ये आषाढेऽपि शुभं आषाढनिषेधस्तु मिथुनार्कविषयः । सिंहगते सूर्ये भाद्रपदेऽपि शुभम् । श्रावणश्चेत्तत्र स्यात्स विहितत्वादेव शुभः । यस्तु भाद्रपदनिषेधः स कन्यार्कविषयः । तुलागते सूर्ये आश्विनेऽपि शुभम् । यस्तस्य निषेधः । स कन्यार्कपरः । वृश्चिकस्थे सूर्ये कार्त्तिकेऽपि शुभं स्यात् निषेधविषयं स्वयमेव वक्ष्यति । मार्गशीर्षो विहित एव । मकरस्थे सूर्ये पौषे शुभं धनुरर्कसाहित्ये सोऽप्यशुभः । मकरकुम्भस्थे सूर्ये माघेऽपि शुभं निषेधस्तु धनुरर्कविषयः । अत एव "पौषफाल्गुनवैशाखमाघश्रावणकार्त्तिकाः । मासाः स्युर्गृहनिर्माणे पुत्रारोग्यशुभप्रदाः" इति नारदवाक्यम् "मासे तपस्ये तपसि माधवे नभसि त्विषे । ऊर्जे च गृहनिर्माणं पुत्रपौत्रधनप्रदम्" इति वसिष्ठवाक्यं च आश्विनकार्त्तिकमाघमासानां शुभत्वप्रतिपादकं तुलावृश्चिकमकरकुम्भार्कविषयं मीनार्कराहित्यप्राशस्त्यपरं च वचनान्तरबोधितो निषेधः प्रागुक्तविषय एव । फाल्गुनस्य शुभत्वं

कुम्भार्कविषयं मीनार्कसाहित्ये तु निषिद्धम्। ननु कार्त्तिकमाघमासौ श्रीपतिना निषिद्धौ तयोः को विषय इत्यत आह अर्थेति ऊर्जः कार्त्तिको मासः कन्यायां कन्यागते रवौ न सन् न शुभः। च पुनः तपा माघमासो धनुषि धनुरर्के न सन् अपिः पादपूरणे। नन्वेतदयुक्तं प्रतिभाति यतश्चान्द्रमासेषु चैत्रादिमाससंज्ञाः सन्ति तत्र कार्त्तिके मासि कन्यासंक्रान्तिः। माघे मासि धनुरर्कस्य कदापि न सम्भवेत्। यतः कार्त्तिकस्य माघमासस्य च शुक्लप्रतिपदादित्रिंशत्तिथयः यावत् तावत् संज्ञेत्यत आह कृष्णादिमासादिति। अस्ति द्विविधो मासः शुक्लादिः कृष्णादिश्चेति। तत्र शुक्लप्रतिपदमारभ्यामावास्यापर्य्यन्तः शुक्लादिः। कृष्णपक्षप्रतिपदमारभ्य पूर्णिमान्तः कृष्णप्रतिपदादिः। यथा। चैत्रशुक्लपक्षे मतद्वयेऽपि स एव चैत्रपूर्णिमास्यनन्तरं कृष्णपक्षः चैत्रमास एव एवं चान्द्रमासो भवति। स एव कृष्णपक्षो यदि वैशाखकृष्णपक्षत्वेन व्यवह्रियते। भाविशुक्लपक्षो वैशाखशुक्लः सर्ववादिसिद्धः। तदा कृष्णादिमासः सम्भवति उभयथा हि शास्त्रे व्यवहारः “अश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्य्यात् दिने दिन इति”पी॰धा॰ तत्र विहितनिषिद्धतिथिनक्षत्रादिनिरूपणम् वा॰शा॰ “अथातः संप्रवक्ष्यामि गृहकालविनिर्णयम्। यथाकालं शुभं ज्ञात्वा तदा भवनमारभेत्। मृदुध्रुवस्वाति पुष्यधनिष्ठाद्वितये रवौ (१७)। मूले पुनर्वसौ सौम्यवारेप्रारम्भणं शुभम्। आदित्यभौमवर्ज्याःस्युर्वाराः सर्वे शुभावहाः। द्वितीया च तृतीया च पञ्चमी षष्ठिका तथा। सप्तमी दशमी चैव द्वादश्येकादशी तथा। त्रयोदशी पञ्चदशी तिथयः स्युः शुभावहाः। दारिद्र्यं प्रतिपत् कुर्यात् चतुर्थी धनहारिणी। अष्टम्युच्चाटनं चैव नवमी शस्त्रघातिनी। दर्शे राजभयं चैव भूते दारविनाशनम्। धनिष्ठापञ्चके नैव कुर्यात् स्तम्भसमुच्छ्रयम्। सूत्रधारशिलान्यासं प्राकारादि समारभेत्। जामित्रं द्विविधं चैव वेधोपग्रहकर्त्तरी। एकार्गलं तथा लत्तायुतक्रकचसंज्ञकाः। पातश्च द्विविधोवर्ज्यो व्यतीपातश्च वैधृतिः। कुलिकं कण्टकं कालं यमघण्टस्तथैव च। कुयोगातिथिवारोत्थास्तिथिभोत्था भवारजा। विवाहादिषु ये वर्ज्यास्ते वर्ज्या वास्तुकर्मणि”

वास्तुचक्रं तत्रैव “वास्तुचक्रं प्रवक्ष्यामि यच्च व्यासेन भाषितम्। यस्मिन्नृक्षे स्थितो भानुस्तदादि त्रीणि मस्तके। चतुष्कमग्रपादे स्यात् पुनश्चत्वारि पश्चिमे। पृष्ठे च त्रीणि ऋक्षाणि कुक्षौ चत्वारि वामतः। चत्वारि दक्षिणे कुक्षौ पुच्छे भत्रयमेव च। मुखे भत्रयमेवं स्युरष्टाविंशतितारकाः। शिरस्ताराग्निदाहाय गृहोद्वासोऽग्रपादयोः। स्थैर्यं स्यात् पश्चिमे पादे पृष्ठे चैव धनागमः। कुक्षौ स्याद्दक्षिणे लाभः पुच्छे च स्वामिनाशनम्। वामकुक्षौ च दारिद्र्यं मुखे पीडा निरन्तरम्”। तत्र वर्ज्यकालमाह विश्व॰वा॰शा॰। कृष्णपक्षे तिथौ रिक्ते गण्डान्ते रविसंक्रमे। रविभौमदिने विष्टौ व्यतीपाते च वैधृतौ। मासदग्धं वारदग्धं तिथिदग्धं च वर्जयेत्। अनुक्तेष्वपि धिष्ण्येषु न कर्त्तव्यं कदाचन। क्रकचं चन्द्रदग्धं च योगानां वज्रसंज्ञकम्। उत्पातैर्दूषितर्क्षं च त्रिस्पृशं दग्धसंज्ञकम्। वज्रव्याघातशूलेषु व्यतीपातातिगण्डयोः। विष्कम्भगण्डपरिघं वर्जयित्वा च कारयेत्”। विहितमुहूर्त्तमाह तत्रैव “स्वातौ मैत्रेऽथ माहेन्द्रे गान्धर्वे भगरोहिणे। तथा वैराजसावित्रे मुहूर्ते गृहमारभेत्। चन्द्रादि सबलं ज्ञात्वा शुभं लग्नं निरीक्ष्य च। स्तम्भोच्छ्रायादि कर्तव्यमन्यत्र परिवर्जयेत्”।

तिथिभेदेन पूर्वादिदिङ्मुखगृहारम्भनिषेधमाह मु॰चि॰। ‘पूर्णेन्दुतः प्राग्वदनं नवम्यादिषूत्तरास्यन्त्वथ पश्चिमास्यम्। दर्शादितः शुक्लदले नवम्यादौ दक्षिणास्यं न शुभं वदन्ति” मू॰“पूर्णेन्दुतः पूर्णिमातः कृष्णाष्टमीपर्यन्तं प्राङ्मुखं गृहं शुभं न वदन्ति। कृष्णनवमीतश्चतुर्दशीपर्यन्तं क्रियमाणं गृहमुत्तरास्यं न शुभम्। अथ दर्शादितः शुक्लाष्टमीपर्यन्तं पश्चिमास्यं गृहं न शुभम्। शुक्लनवमीतश्चतुर्दशीपर्यन्तं दक्षिणास्यं गृहं न शुभं वदन्ति। तासु तिथिषु तत्तद्दिङ्मुखं गृहं न कर्त्तव्यम् इति वाक्यार्थः फलितः। यदुक्तं व्यवहारसमुच्चये ‘‘पूर्णिमातोऽष्टमीं यावत् पूर्वास्यं वर्जयेद्गृहम्। उत्तरास्यं न कुर्वीत नवम्यादिचतुर्दशीम्। अमावास्याष्टमीं यावत्पश्चिमास्यं विवर्जयेत्। नवम्यादौ दक्षिणास्यं यावत् शुक्लचतुर्दशीमिति”। दिग्भेदमुखनक्षत्राण्याह “कृत्तिकाद्याः सप्त पूर्वे मघाद्याः सप्त दक्षिणे। मैत्राद्याः पश्चिमे सप्त धनिष्ठाद्यास्तथोत्तरे। अग्ने चन्द्रे स्वामिभयं कर्मकर्त्ता च पृष्ठके। दक्षिणे च धनं दद्याद्वामे स्त्रीसुखसम्पदः। गृहोपलक्ष्यकार्येषु यत्र ऋक्षेषु चन्द्रमाः। शलाकासप्तके देयं कृत्तिकादिकमेव

च। ऋक्षं चन्द्रस्य वास्तोश्च अग्रे पृष्ठे न शस्यते। लग्नादृक्षाद्विचार्य्योऽत्र चन्द्रः सद्यःफलप्रदः। गृहे चन्द्रे सम्मुखस्थे पृष्ठस्थे न शुभं गृहम्। वामदक्षिणतः चन्द्रः प्रशस्तो वास्तुकर्म्मणि"

तत्र विहितनिषिद्धलग्नादिकमाह तत्रैव "चरलग्नं चरांशञ्च सर्व्वथा परिवर्ज्जयेत्। जन्मभाच्चोपचयभे लग्ने वर्गे तथैव च। प्रारम्भणं प्रकुर्व्वीत नैधनं परिवर्ज्जयेत्। पापैस्त्रिषष्ठायगतैः सौम्यैः केन्द्रत्रिकोणगे। निर्म्माणं कारयेद्धीमानष्टमस्थैः खलैर्मृतिः। मनुष्यलग्ने सौम्यानां दृग्योगे योगतस्तथा। कुम्भं विहायान्यलग्ने सौम्यग्रहयुतेक्षिते। जलाशयादिवास्तूनां प्रारम्भः शुभदः स्मृतः" अत्र शुभयोगास्तत्रैव "गुरुर्लग्ने रविः षष्ठे द्यूने७ सौम्ये सुखे४ सिते। तृतीयस्थेऽर्कपुत्रेऽत्र तद्गृहं तु शतायुषम्। भृगुर्लग्नेऽम्बरे१० सौम्ये लाभस्थाने११ च भास्करे। गुरुः केन्द्रगतो यत्र शतवर्षाणि तिष्ठति। हिबुके४ज्येऽम्बरे१० चन्द्रे लाभे११ च कुजभास्करौ। आरम्भः क्रियते यस्य अशीत्यायुः क्रमात् भवेत्। लग्ने भृगौ पुत्रगेज्ये५ षष्ठे भौमे त्रिगे रवौ। यस्य गृहस्य प्रारम्भः स च तिष्ठेच्छतं समाः। लग्नस्थौ गुरुशुक्रौ चेत् रिपु६राशिगते कुजे। सूर्य्ये लाभगते११ यस्य द्विशताब्दानि तिष्ठति। स्वोच्चस्थो वा भृगुर्लग्ने स्वोच्चे जीवे सुख४स्थिते। स्वोच्चे लाभगते११ मन्दे सहस्राणि समाः स्थितिः। स्वोच्चे स्वभवने सौम्ये लग्नस्थे वापि केन्द्रगे। प्रारम्भः क्रियते यस्य शतद्वयं स तिष्ठति। पुष्योत्तरात्रयाहीन्दुविष्णुधातृजलोडुषु। ८।१२।२१।२६।९।५।२२।४।२०। गुरुणा सहितेष्वेषु कृतं गेहं श्रिया युतम्। द्विदैवत्वाष्ट्रवारीश रुद्रादिति वसूडुषु। १६।१४।२४।६।७।२३। शुक्रेण सहितेष्वेषु कृतं धान्यप्रदं गृहम्। हस्तार्य्यमत्वाष्ट्रदस्रचतुरास्येन्द्रभेषु च १३।१२।१४।२।४।१८। बुधेन सहितेष्वेषु धनपुत्रसुखप्रदम्"। कुयोगास्तत्रैव "शत्रुक्षेत्रगतैः खेटैर्नीचस्थैर्वा पराजितैः। प्रारब्धं यस्य भवनं लक्ष्मीस्तस्य विनश्यति। एकोऽपि परभागस्थो दशमे सप्तमेऽपि वा। वर्णाधिपे बलैर्हीने तद्गृहं परहस्तगम्। पापान्तरगते लग्ने चन्द्रे सौम्ययुतेक्षिते। अष्टमस्थेऽर्कपुत्रे च अशीत्यब्दाद्विहन्यते। मन्दे लग्नगते चैव कुजे सप्तमसंस्थिते। शुभैरवीक्षिते वापि शतवर्षाद्विहन्यते। लग्नगे शशिनि क्षीणे मृत्युस्थाने च भूसुते। प्रारम्भः क्रियते यस्य शीघ्रं तच्च विनश्यति। दशापतौ बलैर्हीने वर्णनाथे तथैव च। पीडितर्क्षगते सूर्य्ये न विदध्यात्कदाचन। पितृमूलेज्यभाग्यार्कपौष्णभेषु च १०।१९।८।११।१३।२७ यत् कृतम्। कुजेन सहितेष्वेषु गृहं सन्दह्यतेऽग्निना। मूलञ्च रेवती चैव कृत्तिकाषाढमेव च। पूर्व्वफाल्गुनी हस्ते च मघा चैव तु सप्तकम्। एषु भौमेन युक्तेषु यारे तस्यैव वेश्म यत्। अग्निना दह्यते कृत्स्नं पुत्रनाशः प्रजायते। अग्नित्तभर्क्षगते सूर्य्ये चन्द्रे वा तत्र संस्थिते। निर्म्मितं मन्दिरं नूनमग्निना परिदह्यते। ज्येष्ठानुराधके चैव भरणीस्वातिपूर्व्वभे। धनिष्ठास्वपि ऋक्षेषु शनिस्तिष्ठेद्दिनस्य च। कृपणो नामतः प्रोक्तो धनधान्यादिके गृहे। पुत्रे जातेऽथवा तस्मिन् दह्यते यक्षराक्षसैः। प्रासादेष्वेवमेव स्याद्वापीकूपेषु चैव हि। तस्माद्विचार्य्य कुर्व्वीत गृहारम्भं शुभे शुभम्। नाशन्दिशन्ति मकरालिकुलीरलग्ने, मेषे घटे धनुषि कर्म्मसु दीर्घसूत्रम्। कन्याझषे मिथुनगे ध्रुवमर्थलाभं ज्योतिर्विदः कलससिंहवृषेषु सिद्धिम्। सायाह्ने तु कृतं वास्तु कर्त्तुर्वित्तविनाशदम्। महानिशास्वपि तथा सन्ध्ययोर्नैव कारयेत्"। भावस्थग्रहफलानि तत्रैव "लग्नेऽर्के विघ्नपातः स्यात्कोशहानिश्च शीतगौ। मृत्युं विश्वम्भरापुत्रे दारिद्र्यं रविनन्दने। जीवे धर्म्मार्थकामाः स्युः पुत्रोत्पत्तिश्च भार्गवे। चन्द्रजे कुशला शक्तिर्यावदायुः प्रवर्त्तते। द्वितयस्थे रवौ हानिश्चन्द्रे शत्रुभयं भवेत्। भूमिजे बन्धनं प्रोक्तं नानाविघ्नानि भानुजे। बुधे द्रविणसम्पत्तिर्गुरौ धर्म्माभिवर्द्धनम्। यथाकामविनोदेन भृगौ कामं व्रजेत् फलम्। तृतीयस्थेषु पापेषु सौम्येष्वेषु विशेषतः। सिद्धिः स्यादचिरादेव यथाभिलषितं प्रति। चतुर्थस्थानगे जीवे पूजा सम्पद्यते नृपात्। चन्द्रजे चार्थलाभः स्याद्भूमिलाभश्च भार्गवे। वियोगः सुहृदां भानौ मन्त्रभेदो महीसुते। बुद्धिनाशो निशानाथे सर्व्वनाशोऽर्कनन्दने। पञ्चमे तु सुराचार्य्ये चित्रो वसुधनागमः। शुक्रे पुत्रसुखावाप्ती रत्नलाभस्तथेन्दुजे। सुतदुःखं सहस्रांशौ शशाङ्के कलहः स्मृतः। भौमे कार्य्यविरोधः स्यात्सौरौ बन्धुविमर्द्दनम्। षष्ठस्थानगते सूर्य्ये रोगनाशं विनिर्द्दिशेत्। चन्द्रे पुष्टिः कुजे प्राप्तिः सौरौ शत्रुबलक्षयः। गुरौ मन्त्रोदयः प्रोक्तो भृगौ विद्यागमो भवेत्। सर्व्वस्थानार्थकौशल्यं नक्षत्रपतिनन्दने। सप्तमस्थानगे जीवे

बुधे दैत्यपुरोहिते । गजवाजिधरित्रीणां क्रमाल्लाभं विनिर्दिशेत् । भास्करे कीर्त्तिभङ्गः स्यात् कुजे विपद्मादिशेत् । हिमगौ क्लेश आयासः सौरौ सर्व्वधनक्षयः । पतङ्गे पङ्क्ताष्टस्थे भौमे सौरौ च रुग्भयम् । चन्द्रे रोगविवृद्धिः स्यात् कुजे शोकागमो भवेत् । बुधे मानधनप्राप्तिर्जीवे च विजयो भवेत् । शुक्रे स्वजनभेदः स्यान्मन्त्रणस्यापि देहिनः । वागीशे नवमस्थाने विद्याभोगाभिनन्दनम् । बुधे विविधभोगाप्तिर्भार्गवे विजयो भवेत् । चन्द्रे धातुक्षयः प्रोक्तो धर्म्महानिश्च भास्करे । कुजे चाथ भयं विद्याद्रविजे धर्म्मदूषणम् । दशमस्थानगे शुक्रे शयनासननिश्चयः । सुराचार्य्ये महत्सौख्यं विजयः स्त्रीधनं बुधे । मार्त्तण्डे च सुहृद्वृद्धिस्तथा शोकविवर्द्धनम् । भौमे रत्नागमः प्रोक्तः शनौ कीर्त्तिविलोपनम् । लाभस्थानेषु सर्व्वेषु लाभस्थानं विनिर्द्दिशेत् । व्ययस्थानेषु सर्व्वेषु विनिर्द्दिश्यो व्ययः सदा । स्वोच्चे पूर्णफलः प्रोक्तः पादोनः स्वर्क्षगो ग्रहः । स्वत्रिकोणेऽर्द्धफलदः पादं मित्रपदाश्रितः । समर्क्षे रिपुराशौ च समकष्टफलो ग्रहः । नीचस्थो विफलो द्वेष्यवर्गेऽसत्फलदः शुभः” ।

गृहारम्भे रव्यादिगोचरादिशुद्धिफलादि वा॰शा॰

“गोचराष्टकवर्गाभ्यां वामवेधं विचिन्तयेत् । दशा चान्तर्दशादिश्च विचार्य्य स्वात्र कर्म्मणि । गुरुशुक्रबले शशिनस्त्वबले सौरिविप्रात् सूर्य्यभूमिजयोस्तथा । बले वर्णानुपूर्व्वशः । गृहारम्भं प्रकुर्व्वीत वर्णनाथबले सति । सर्व्वेषामपि वर्णानां सूर्य्यचन्द्रबलं स्मृतम् । विषमस्थे रवौ स्वामी पीड्यते गृहिणी विधौ । शुक्रेण पीड्यते लक्ष्मीर्जीवेन सुखसम्पदः । बुधेन पुत्रपौत्राश्च भौमेन भ्रातृबान्धवाः । सौरिणा दासवर्गाश्च पीड्यन्ते नात्र संशयः । विशेषेण तु सूर्य्यस्य बलं प्रोक्तं गृहे बुधैः । सर्व्वेषामेव वर्णानां रविशुद्धिर्विधीयते । दशापतौ हीनबले वर्णनाथे तथैव च । पीडितर्क्षगते सूर्य्ये न विदध्यात् कदाचन । प्रथमकोष्ठगे रोगं द्वितीये चार्थनाशनम् । तृतीये धनलाभं च चतुर्थे भयदो रविः । पञ्चमे पुत्रलाभं च शत्रुनाशाय शत्रुगे । स्त्रीकष्टं सप्तमे सूर्य्ये मृत्युश्चाष्टमगेहगे । नवमे धर्म्मनाशाय दशमे कर्म्मसंयुतिः । एकादशे भवेल्लक्ष्मीर्द्वादशे च धनक्षयः । पुत्रे५ द्वितीये द्यूने७ च धर्म्मे मध्यबलो रविः । द्वितीयपुत्राङ्क५।८गतस्त्रिदशाहात् परः शुभः । अस्तगा नीचराशिस्थाः परराशौ पराजिताः । वृद्धस्था बालभावस्था वक्रगाश्चातिचारिणः । रिपुदृष्टिवशं याता उल्कापातेन दूषिताः । न फलन्ति ग्रहा गेहप्रारम्भे तान् प्रपूजयेत्” ।

गृहारम्भे खातारम्भोपयोगिनक्षत्राण्याह माण्डव्यः ।

“अधोमुखैर्भैर्विदधीत खातं शिलास्तथा चोर्द्ध्वमुखैश्च पट्टम् । तिर्य्यङ्मुखैर्द्वारकपाटदानं गृहप्रवेशो मृदुभिर्ध्रुवैश्च”

अधोमुखादिनक्षत्राण्याह पी॰पा॰ गरुडपु॰

“भरणी कृत्तिकाऽश्लेषा मघामूलविशाखिकाः । तिस्रः पूर्व्वास्तथा चैव अधोवक्त्राः प्रकीर्त्तिताः । वापीकूपतडागादिखननं च तृणादिकम् । देवतागारखननं निधानखननं तथा । गणितं ज्योतिषारम्भं खनी बिलप्रवेशनम् । कुर्य्यादधोगतान्येव कार्य्याणि वृषभध्वज ! । रोहिण्यार्द्रा तथा पुष्यो धनिष्ठा चोत्तरात्रयम् । वारुणं श्रवणं चैव नव चोर्द्ध्वमुखाः स्मृताः । एषु राज्याभिषेकं च पट्टबन्धं च कारयेत् । ऊर्द्ध्वमुखान्युच्छ्रितानि सर्व्वाण्येषु च कारयेत् । रेवती चाश्विनी चित्रा स्वाती हस्तः पुनर्व्वसुः । अनुराधा मृगः ज्येष्ठा एताः पार्श्वमुखाः स्मृताः । गजोष्ट्राश्वबलीवर्द्ददमनं महिषस्य च । वीजानां वपनं कुर्य्याद्गमनागमनादिकम् । चक्रयन्त्ररथादीनां नावादीनां प्रवाहनम् । पार्श्वेषु यानि कर्म्माणि कुर्य्यादेतेषु तानि च”

नक्षत्रभेदे द्वारनिर्माणाय सफलं द्वारचक्रमाह मु॰चि॰

“सूर्य्यर्क्षाद्युगभैः शिरस्यथ फलं लक्ष्मीस्ततः कोणभैर्नागैरुद्वसनं ततो गजमितैः शाखासु सौख्यं भवेत् । देहल्याङ्गुणभैर्मृतिर्गृहपतेर्मध्यस्थितैर्वेदभैः सौख्यं चक्रमिदं विलोक्य सुधिया द्वारं विधेयं शुभम्” मू॰

“द्वारस्य चत्वारः पाषाणा आवश्यकाः । द्वौ ऊर्द्ध्वाधोभावेनावस्थितौ समावल्पपरिमाणौ । तत्र उत्तरङ्ग इत्यूर्द्ध्वस्थितस्य संज्ञा । अधोवस्थितस्य तु देहलीति सर्व्वसाधारणं नाम । द्वौ पार्श्वयोः स्थितौ महापरिमाणौ शाखासंज्ञौ (साह) इति भाषया द्वयोरपि संज्ञा एवं दीर्घचतुरस्रद्वारं भवति । पाषाणासम्भवे तु काष्ठादेरपि निवेशः । तत्र द्वारे चिकीर्षिते सूर्य्याधिष्ठितनक्षत्राद्युगभैश्चतुर्भिर्नक्षत्रैः शिरस्यवस्थितैः सद्भिः लक्ष्मीप्राप्तिरूपं फलं स्यात् । ततस्तदग्रिमैर्नागैः कोणभैर्द्वयोरेवस्थित्या चतुःकोणेष्ववस्थितैरष्टसंख्यकैर्नक्षत्रैरुद्वसनं तत् द्वारगृहं सर्व्वदा जनवासरहितं स्यात् । ततस्तदग्रिमैः

र्जनितैरष्टाभिर्भैः शाखासु तत्रावस्थितैर्गृहस्वामिनः सौख्यरूपं फलं स्यात्। ततस्तदग्रिमैर्गुणभैस्त्रिभिर्नक्षत्रैर्देहल्यामवस्थितैर्गृहपतेर्मृतिः स्यात्। ततस्तदग्रिमैर्वेदभैश्चतुर्भिर्नक्षत्रैर्मध्यस्वरूपेऽवकाशे स्थितैः सौख्यं स्यात्। फलितार्थमाह। चक्रमिति। इदं द्वारचक्रं निरीक्ष्य सुधिया शुभं शुभफलदं द्वारं विधेयं कर्त्तव्यम्। तदुक्तं ज्योतिर्निबन्धे "द्वारचक्रं प्रवक्ष्यामि भाषितं विश्वकर्मणा। सूर्यभाद्भचतुष्कं तु द्वारस्योपरि विन्यसेत्। द्वे द्वे कोणे च दातव्ये शाखायुग्मे द्वयं द्वयम्। अधश्च त्रीणि देयानि वेदा मध्ये प्रतिष्ठिताः। राज्यं स्यादूर्द्ध्वनक्षत्रे कोणेषूद्वसनं भवेत्। शाखायां लभते लक्ष्मीमधश्चैव मृतिं लभेत्। मध्यभेषु लभेत्सौख्यं चिन्तनीयं सदा बुधैरिति" अथ द्वारस्थापनम् "द्वारस्थापननक्षत्राण्युच्यन्तेऽश्विनी चोत्तरा। हस्तापुष्यश्रुतिमृगाः स्थिरैरेताः प्रकीर्त्तिताः। स्वातौ पूष्णि च रोहिण्यां द्वारशाखावरोपणमिति" ज्योतिर्निबन्धेऽभिहितत्वात्तेऽपि ग्राह्याः। तिथयोऽपि तत्रैवाभिहिताः "पञ्चमी धनदा चैव मुनिनन्दवसौ शुभम्। प्रतिपत्सु न कर्त्तव्यं कृते दुःखमवाप्नुयात्। द्वितीयायां द्रव्यहानिः पशुपुत्रविनाशनम्। तृतीया रोगदा ज्ञेया चतुर्थी भङ्गकारिणी। कुलक्षयं तथा षष्ठी दशमी धननाशिनी। विरोधकृदमा पूर्णा न स्याच्छाखावरोपणमिति" एवं सति विरुद्धतिथिं विहाय विहिततिथिषु विहितभेषु च तत्रापि चक्रशुद्धेषु भेषु द्वारं विहितं शुभफलदात् स्यादिति निष्कृष्टोऽर्थः" पी०धा०

तत्प्रवेशकालमाह मु०चि० "सौम्यायने ज्यैष्ठतपोऽन्त्यमाधवे यात्रानिवृत्तौ नृपतेर्नवे गृहे। स्याद्वेशनं द्वाःस्थमृदुध्रुवोडुभिर्जन्मर्क्षलग्नोपचयोदये स्थिरे" (१) मू० "जीर्णे गृहेऽग्न्यादिभयान्नवेऽपि मार्गोर्जयोः श्रावणिकेऽपि सन् स्यात्। वेशोऽम्बुपेज्यानिलवासवेषु नावश्यमस्तादिविचारणात्र। (२) मृदुध्रुवक्षिप्रचरेषु मूलभे वास्त्वर्चनं भूतबलिञ्च कारयेत्। त्रिकोणकेन्द्रायधनत्रिगैः शुभैर्लग्ने त्रिषष्ठायगतैश्च पापकैः। (३) शुद्धाम्बुरन्ध्रे विजनुर्भषष्ठ्यौ व्यर्कारिरिक्ताचरदर्शचैत्रे। अग्रेऽम्बुपूर्णं कलसं द्विजांश्च कृत्वा विशेद्वेश्म भकूटशुद्धम्। (४) वामो रविर्मृत्युसुतार्थलाभतोऽर्के पञ्चमे प्राग्वदनादिमन्दिरे। पूर्णातिथौ प्राग्वदने गृहे शुभो नन्दादिके याम्यजलोत्तरानने। (५) वक्त्रे भूरविभात् प्रवेशसमये कुम्भेऽग्निदाहः कृताः४ प्राच्यामुद्वसनं कृताः४ यमगता लाभः कृताः४ पश्चिमे। श्रीर्वेदाः कलिरुत्तरे युगमिता गर्भे विनाशो गुदे रामाः३ स्थैर्यमतः स्थिरत्वमनलाः३ कण्ठे भवेत्सर्वदा" (६) मू०

"तत्रापूर्वप्रवेशसुपूर्वप्रवेशयोः कालशुद्ध्यादिकमिन्द्रवंशाछन्दसाह सौम्यायने इति। एतेषु सौम्यायन इत्यादिकेषु पदार्थेषु सत्सु नृपतेर्यात्रानिवृत्तौ अथवा नवे नूतनोत्थापिते गृहे प्रवेशनं स्यात्। सौम्यायने उत्तरायणे। अत्र शुक्रगुर्वस्तादिको दोषो वाप्यारामतडागेत्यादिनोक्त इति न पुनरुक्तः। एवं गीर्वाणाम्बुप्रतिष्ठेत्यादिना दक्षिणायननिषेधोऽपि। अतःपरिशेषात्सौम्यायनग्रहणे सिद्धे तदुक्तिर्मन्दबुद्धीनां शीघ्रप्रतिपत्त्यर्था। उक्तं च वसिष्ठेन "अथ प्रवेशो नवसद्मनश्च सौम्यायने जीवसिते बलाढ्ये" इति बलाढ्ये उदिते। नारदेनापि "अथ सौम्यायने कार्यं नववेश्मप्रवेशनम्। राज्ञां यात्रानिवृत्तौ वेति" केवलायां भूमौ क्रीतायां प्राप्तायां वा स्वतःसिद्धायां वोत्थापितं गृहं नूतनमित्युच्यते। ज्यैष्ठेति ज्यैष्ठमाघफाल्गुनवैशाखमासेष्वेव सत्यप्युत्तरायणे प्रवेशनं शुभम्। यदाह नारदः माघफाल्गुनवैशाखज्यैष्ठमासेषु शोभनः। प्रवेशो मध्यमो ज्ञेयः सौम्यकार्त्तिकमासयोरिति" सौम्यो मार्गशीर्षः। मध्यमोक्तिरावश्यकविषया। चान्द्रमासफलान्याह वसिष्ठः "माघेऽर्थलाभः प्रथमप्रवेशे पुत्रार्थलाभः खलु फाल्गुने च। चैत्रेऽर्थहानि,र्धनधान्यलाभो वैशाखमासे, पशुपुत्रलाभः। ज्यैष्ठे, च मासेषु परेषु नूनं हानिप्रदः शत्रुभयप्रदश्च"। "शुक्ले च पक्षे सुतरां विवृद्ध्यै कृष्णे च यावद्दशमीं च तावत्" इत्याद्युक्तेरेव ग्रन्थकृता पक्षविशुद्धिर्नोक्ता तिथिवारशुद्धिश्चाग्रे वक्ष्यते। वसिष्ठेन तु गृहप्रवेशे सौरमानमनूद्य दूषितं यथा "मकरादिषड्राशिषु संस्थितेऽर्के नवप्रवेशः शुभदः सदैव। कुम्भं विनान्येष्वपि केचिदूचुर्न सौरमिष्टं खलु सन्निवेशे। इति अस्यार्थः नूतनगृहप्रवेशो मकरादिषड्राशिसंस्थिते सूर्ये शुभफलदो भवति तत्रापि माघादिषु कुम्भरहितेषु चतुर्षु मासेषु शुभतरः ननु "अथ प्रवेशो नवसद्मनश्च सौम्यायने" इति स्वयं प्राक् सौम्यायन इत्युक्तत्वात् किमित्येव तत् पुनरुक्तमित्यत आह। कुम्भं विनेति। सत्यप्युत्तरायणे कुम्भसंक्रान्तौ नूतनगृहप्रवेशो न भवतीत्येतदर्थं पुनरुक्तमित्यर्थः। नन्विदं

पूर्वापरविरुद्धम् । तथाहि "माघेऽर्थलाभः प्रथमः प्रवेशः" इत्यादिना माघफाल्गुनयोश्चान्द्रमासयोः शुभफलाभिधानात्तत्रैव च कुम्भसंक्रान्तिसद्भावात्तयोरन्यतरस्याशुभत्वं प्रतिपाद्यते । उभयमासमिश्रक्तः कुम्भस्तु नाश्यैवेति चेत् । उच्यते । सन्ति हि द्विविधाश्चान्द्रामासा शुक्लादयः कृष्णादयश्चेति । तत्र फाल्गुनपूर्णिमोत्तरमासस्य कृष्णादिमासगणनया चैत्रत्वात्तस्य च विरुद्धफलत्वात्तद्विषयकोऽयं कुम्भसंक्रान्तिनिषेधः । चान्द्रमासस्य शुक्लादिकृष्णाद्यभिधायकानि वाक्यानि गृहारम्भप्रकरणेऽस्माभिरुक्तानि अयमपि निषेधो मासस्य कृष्णादित्वे ज्ञापकः । अथ कर्कादिसंक्रान्तिषु मतान्तरमाहान्येष्वपीति केचिदाचार्या अन्येष्वपि कर्कादिषड्राशिस्थिते सूर्येऽपि नवगृहप्रवेशः कार्य इत्यूचुः । तदेतद्द्वन्द्वशीपूर्विकगृहप्रवेशविषयम् । तदुक्तं स्वयमेव "नवप्रवेशे त्वथ कालशुद्धिर्न द्वन्द्वशीपूर्विकयोः कदाचिदिति" । नूतनतृणागारप्रवेशविषयं वा । तदुक्तं ज्योतिःप्रकाशे "गृहारम्भोदितैर्मासैर्धिष्ण्यैर्वारैर्विगर्हितम् । विशेत्सौम्यायने हर्म्यं तृणागारं तु सर्वदेति" अतएव "कुलीरकन्याकाकुम्भे दिनेशे न विशेद्गृहम् । ग्रामं वा नगरं वापि पत्तनं वा सुराधिपेति" गुरुवाक्यमप्येवमेव व्याख्येयम् । ननु पौषचैत्रादिषु विरुद्धफलेषु चान्द्रमासेषु विहितसंक्रान्तिसत्त्वे नूतनगृहप्रवेशः कार्यो वा नवेत्यत आह न सौरमिति खलु निश्चये न सौरं मानं सत् प्रवेशे नेष्टं न शुभफलदम् । विरुद्धशुभफलयोश्चान्द्रसौरमासयोः साहित्ये विहितचान्द्रमासैरेव गृहप्रवेशः कार्य इत्यलमतिप्रसङ्गेन । द्वाःस्थेति । द्वाःस्थनक्षत्राणि गृहारम्भे उक्तानि । मृदूनि ध्रुवाणि चोडूनि प्रसिद्धानि । द्वाःस्थानि च तानि मृदुध्रुवोडूनि चेति कर्मधारयः । तादृशैर्भैः प्रवेशनं हितं स्यात् । अयमर्थः यस्मिन् गृहे प्रवेशः कर्त्तुमिष्यते तस्य द्वारं यद्दिगभिमुखं तद्दिङ्नक्षत्रैर्विहितैः प्रवेशः कार्यः । यदाह वसिष्ठः "यद्दिग्द्वारं मन्दिरं तद्दिगृक्षैरुक्तैः स्यात् संप्रवेशो न सर्वैरिति" उक्तान्याह स एव "चित्रोत्तराधातृशशाङ्कमित्रवस्वन्त्यवारीश्वरभेषु १४।१२।२१।२६।४ ५।१७।२३।२७।२४ नूनम् । आयुर्धनारोग्यसुपुत्रपौत्रसत्कीर्तिदः स्यात्त्रिविधः प्रवेशः" इति । नारदोऽपि "वस्विज्यान्त्येषु २३।८।२७ वरुणत्वाष्ट्रमित्रस्थिरोडुषु २४।१४।१७।४।१२।२१।२६ । शुभःप्रवेशो देवेज्यशुक्रयोर्दृश्यमानयोरिति" । अत्र पुष्यधनिष्ठाशततारकाग्रहणं जीर्णगृहप्रवेशविषयम् । उक्तञ्च ज्योतिःप्रकाशे "प्रवेशो नूतने हर्म्ये ध्रुवैर्मैत्रैः सुखाप्तये । पुष्यस्वातीयुतैस्तैश्च जीर्णे स्याद्वासवद्वये" इति । एतद्ग्रन्थकृदग्रिमपद्ये वक्ष्यति । अमुमेवाशयं मनसि निधायाह श्रीपतिः "शुभः प्रवेशो मृदुभिर्ध्रुवाख्यैः क्षिप्रैश्चरैः स्यात् पुनरेव यात्रा । उग्रैर्नृपो दारुणभैः कुमारो रामा विशाखासु विनाशमेति" "कृत्तिकासु भवनं कृशानुना दह्यते प्रविशतां न संशयः । तन्मुखं च सदनं हि तत्कुरु द्वारभेषु शुभकृत् प्रवेशनमिति" वसिष्ठोऽपि "अर्कादितेयानिलदस्रविष्णु १३।७।१५।२।२२ऋक्षे प्रविष्टं नवमन्दिरं यत् । अब्दत्रयात्तत्परहस्तयातं शेषेषु (विहितभिन्नेषु) धिष्ण्येषु च मृत्युदं स्यादिति" प्रवेशलग्नान्याह जन्मर्क्षेति । जन्मर्क्षं जन्मराशिः जन्मलग्नं च प्रसिद्धम् । ताभ्यामुपचये तृतीयषष्ठैकादशदशमस्थेऽन्येषु तथा स्थिराख्यराशिषु लग्नगतेषु सत्सु नवगृहप्रवेशनं शुभम् । यदाह वसिष्ठः "कर्तुर्विलग्नादथ जन्मराशेर्लग्नस्थितो राशिरिति प्रदिष्टः । निर्व्याधिदारिद्र्ययशस्कराश्च सुहृत् सुतघ्नो रिपुनाशदश्च । कलत्रहन्ता निधनप्रदश्च रोगप्रदः सिद्धिकरोऽर्थदश्च । क्रमाच्च वैरामयदः क्रमेण सदैव नूनं त्रिविधः प्रवेशः" इति । अतो निष्कृष्टमर्थमाह गृहप्रवेशे राजमार्त्तण्डः "कर्तुर्भोपचयगाश्च विलग्ने राशयः शुभफलाय भवन्तीति" नारदोऽपि "कर्तुर्जन्मभलग्ने वा ताभ्यामुपचयेऽपि वा । प्रवेशलग्ने स्याद्वृद्धिरन्यभे शोकनिःस्वनः" इति । पुनर्वसिष्ठः "सौम्ये स्थिरे भे शुभदृष्टियुक्ते लग्नेऽथ वा द्व्यङ्गगृहे विलग्ने" इति । सौम्ये सौम्यग्रहयुक्ते । द्व्यङ्गगृहे द्विस्वभावराशौ । अत्र विवाहप्रकरणोक्ता एकविंशतिविधा दोषा वर्ज्या इत्यपि ध्येयम् । एकविंशतिदोषानुपक्रम्य वसिष्ठेनोक्तम् "कर्तुर्नाशो गृहारम्भे प्रवेशे पतिनाशनम्" इति (१)। अथ जीर्णगृहादिविषयके प्रवेशे विशेषमिन्द्रवज्राच्छन्दसाह जीर्णे पुरातनेऽन्यनिर्मिते गृहेऽथवा सिद्धएव स्वगृहेऽग्न्यादिभयात् अग्निकृतं भयं दाहः । आदिशब्देन वज्रदृष्टिपातभयं राजकोपोत्था । इत्याद्युपद्रवैः पतिते गृहे पुनरपि सम्यक्कृते उत्थापिते गृहेऽपि प्राक्पद्योक्ताः सर्वेऽपि मासास्तस्मिन्गृहप्रवेशे ज्ञेयाः । किञ्च । मार्गो

र्जयोः मार्गशीर्षकार्त्तिकयोश्च श्रावणिकेऽपि श्रावणे मासि वेशः प्रवेशः सन् शुभफलदः स्यात्। यदाह सनत्कुमारः "गृहारम्भोदितैर्मासैर्धिष्ण्यैर्वारैर्विशेद्गृहमिति" अत्र सामान्यतो गृहारम्भोदिता मासा गृहप्रवेशेऽभिहिताः" ते चेमे। "सौम्यफाल्गुनवैशाखमाघश्रावणकार्त्तिकाः। मासाः स्युर्गृहनिर्माणे पुत्रारोग्यधनप्रदाः" इति नारदोक्ताः मार्गशीर्षफाल्गुनवैशाखमाघश्रावणकार्त्तिका विहिताः। तत्र उत्तरायण एव गृहप्रवेशस्य वाक्यान्तरेण विहितत्वात् श्रावणकार्त्तिकमार्गशीर्षाणामुत्तरायणत्वाभावाद्विरोधेन नूतनजीर्णगृहप्रवेशाभ्यां व्यवस्था कथं? प्रागभिहितनारदवाक्येनोत्तरायणसाहचर्य्येण नूतनगृहप्रवेशसुपूर्वगृहप्रवेशयोर्विधानात् "गृहारम्भोदितैर्मासैः" इत्यनेन तु सामान्यतस्त्रिविधस्यापि गृहप्रवेशस्याभिधानादुत्तरायणीयामासास्त्रिविधगृहप्रवेशे शुभाः दक्षिणायनीया मासाः श्रावणादयस्तु जीर्णगृहप्रवेशविषयाः। अतएव नारदो मार्गशीर्षकार्त्तिकयोर्नूतनगृहप्रवेशे मध्यमत्वमाह अर्थादेव जीर्णगृहप्रवेशे उत्कृष्टत्वमध्यवसीयते। अम्बुपेति अम्बुपः शततारका ईज्यः पुष्यः। अनिलः स्वातीवासवं धनिष्ठा एष्वपि भेषु जीर्णगृहेऽग्न्यादिभयान्नवेऽपि गृहे प्रवेशः शुभः प्राक्पद्योक्तेषु तु भेषु शुभ एवेति कैमुतिकन्यायादवगम्यते। यदुक्तं ज्योतिःप्रकाशे "प्रवेशो नूतने हर्म्ये मृदुध्रुवैर्भैः सुखाप्तये। पुष्ये स्वातियुतैश्चैव जीर्णे स्याद्वासवद्वये" इति। नावश्यमिति अत्रैवंविधे जीर्णे गृहे अग्न्यादिभयान्नवेऽपि गृहेऽवश्यमस्तादिविचारणा शुक्रास्तगुर्वस्तबाल्यवार्द्धक्यसिंहस्थगुरुमकरस्थगुरुलुप्तसंवत्सरादीनां दोषाणां विचारणा विचारो नास्ति। अस्तादयः कालदोषाः सन्तु वा मा वा तथापि गृहप्रवेशः कार्यः। परन्तु सोऽपि यथाकथंचित्पञ्चाङ्गशुद्धिमात्रमङ्गीकृत्य विहितनक्षत्रेष्वेव कार्यः। वास्तुपूजा त्वेवंविधेऽपि गृहप्रवेशे भवतीत्यपि ध्येयम् यदुक्तं ज्योतिःप्रकाशे "नित्ययाने गृहे जीर्णे प्राशने परिधानके। वधूप्रवेशे माङ्गल्ये न मौढ्यं गुरुशुक्रयोरिति" वशिष्ठेनाप्युक्तम् "नवप्रवेशे त्वथ कालशुद्धिर्न द्वन्द्वसौपूर्विकयोः कदाचिदिति" अस्यार्थः। नूतनगृहप्रवेशे कालशुद्धिर्विचार्या। द्वन्द्वं द्वन्द्वाभयाख्यो गृहप्रवेशः सौपूर्विको राज्ञो यात्रासमाप्तौ गृहप्रवेशः। तादृशयोर्गृहप्रवेशयोः कालशुद्धिः कदाचिदपि नापेक्षिता। सति सम्भवे सुखेनास्तु। किन्तु प्रवेशदिनीयपञ्चाङ्गशुद्धिसहिते सुलग्ने गृहप्रवेशः कार्यः। पूर्वस्मिन्नाद्ये नूतने प्रवेशे यथा वास्तुपूजा तथा द्वन्द्वसौपूर्विकयोरपि कार्येत्यर्थः। नारदस्तु यात्रानिवृत्तिप्रवेशे कालशुद्धिरपेक्षितैवेत्याह तद्वाक्यं प्रागभिहितम्। तदेतयोर्वाक्ययोरावश्यकाऽनावश्यकविषयत्वेन व्यवस्था। त्रयाणां गृहप्रवेशानां लक्षणमुक्तं वशिष्ठेन "अपूर्वसंज्ञः प्रथमः प्रवेशो यात्रावसाने तु सुपूर्वसंज्ञः। द्वन्द्वाभयस्त्वग्निभयादिजातः प्रवेश एवं त्रिविधः प्रदिष्टः" इति। एतद्व्याख्यानं यात्रानिवृत्ताविति पद्यव्याख्यातावस्ति तत्तत एवावधार्यम्। अत्रेदं ध्येयम् यत्त्रिविधेऽपि प्रवेशे प्रवेशदिनीयनक्षत्रं क्रूराक्रान्तं क्रूरविद्धं वा नक्षत्रं सर्वथा वर्ज्यमिति। उक्तं च वशिष्ठेन "क्रूरग्रहाधिष्ठितविद्धभं च विवर्जनीयं त्रिविधप्रवेशे" इति। (२) "अथ गृहप्रवेशदिनात् प्राक्कर्त्तव्यां वास्तुपूजां विवक्षुस्तत्र नक्षत्राण्युपजातिकापूर्वार्द्धेनाह मृदुध्रुवेति। मृदूनि ध्रुवाणि क्षिप्राणि चराणि नक्षत्राणि प्रसिद्धानि मूलभं च एषु सप्तदशसु भेषु नक्षत्रेषु वास्तोः वास्तुपुरुषस्यार्चनं भूतबलिं च कारयेत्। गृहपतिर्वास्तुपूजां कुर्यात्। पुरोहितो गृहपतिं वास्तुपूजादिकं कारयेत्। द्वयोरन्यतरस्यामिति णौ कर्त्तुः कर्मत्वम्। यदाह कश्यपः "चित्राशतभिषास्वातीहस्तः पुष्यः पुनर्वसुः। रोहिणी रेवतीमूलं श्रवणोत्तरफाल्गुनी। धनिष्ठा चोत्तराषाढा तथा भाद्रोत्तरान्विता। अश्विनी मृगशीर्षं च अनुराधा तथैव च। वास्तुपूजनमेतेषु नक्षत्रेषु करोति यः। स प्राप्नोति नरो लक्ष्मीमिति प्राह पराशरः" इति। वास्तुपूजाप्रकारमाह। वशिष्ठः "निर्माणे मन्दिराणां च प्रवेशे त्रिविधेऽपि वा। वास्तुपूजा तु कर्त्तव्या यस्यास्तां कथयाम्यतः। गृहमध्ये हस्तमात्रं समन्तात्तण्डुलोपरि। एकाशीतिपदं कार्यं लिखेत्तुल्यं सुशोभनम्। एकद्वित्रिपदाः पञ्चचत्वारिंशत् सुरार्चिताः। द्वात्रिंशद्बाह्यतो वक्ष्यमाणास्त्वन्तस्त्रयोदश। तेषां स्थानानि नामानि वक्ष्यामीश्वरकोणतः। तत्राग्निः शम्भुकोणस्थस्त्वसौ चैकपदेश्वरः। तस्माद्द्वितीयः पर्जन्यस्तथा चैकपदेश्वरः। जयन्तेन्द्रार्कसत्याख्याभृशश्च द्विपदेश्वराः। आकाशवायू परतः क्रमादेकपदेश्वरौ। एवं प्राच्यां नव ज्ञात्वा त्वेवमेवान्यदिक्षु च। आद्यस्यान्त्यावेकपदौ द्विपदाः पञ्च मध्यगाः। पूषाद्यष्टौ यमान्ताः (पितृगणा-

धीशान्ताः) सुरमराश्चास्यभागगाः। आद्यश्चान्त्यावेकपदौ द्विपदाः पञ्च मध्यगाः। अष्टौ पितृगणाधीशात् रोगान्ताः पश्चिमेश्वराः। आद्यन्तौ द्वावेकपदौ द्विपदाः पञ्च मध्यगाः। रोगाददित्यन्तसुराः सप्त सौम्यदिशि क्रमात्। तत्राधस्यश्चतुष्कोणेष्वीशानादिषु च क्रमात्। आपः सावित्रविजयरुद्राश्चैकपदेश्वराः। मध्ये नवपदो ब्रह्मा तस्यैशानादिकोणगाः। आपवत्सोऽथ सविता विबुधाधिपसंज्ञकः। राजयक्ष्मा च चत्वारः सुराश्चैकपदेश्वराः। ब्रह्मणः पूर्वतो दिक्षु त्रिपदाश्चामरा अमी। अर्यमा च विवस्वांश्च मित्रः पृथ्वीधरः क्रमात्। स्वस्वस्थलेषु देवेषु स्थापितेष्वीदृशं भवेत्। कोणेषु पञ्च पञ्चैव (२०)चत्वार्येकपदाः सुराः। प्रागादिदिक्षु द्विपदाः वसु पञ्च ४०यथाक्रमम्। ब्रह्मणः ९ पूर्वतोदिक्षु त्रिपदाःस्युः समीपगाः १२। हिरण्यरेताः पर्जन्यो जयन्तः पाकशासनः। सूर्यःसत्यो भृशाकाशौ वायुः पूषा च वैतथः। बृहत्क्षतः पितृपतिर्गन्धर्वौ भृङ्गराजकः। मृगः पितृगणाधीशस्तथा दौवारिकाह्वयः। सुग्रीवः पुष्पदन्तश्च जलाधीशो निशाचरः। शोषः पापश्च रोगोऽहिर्मुख्यो भल्लाट एव च। सोमसर्पौ दित्यदिती द्वात्रिंशदमराः स्मृताः। आपश्चैवापवत्सश्च जयोरुद्रस्तथैव च। मध्ये नवपदो ब्रह्मा तस्थौ तस्य समीपतः। प्राच्यां ह्यन्तरिता देवाः परितो ब्रह्मणः स्मृताः। अर्यमा सविता चैव विवस्वान् विबुधाधिपः। मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरःक्रमात्। आपवत्सोऽष्टमः पञ्चचत्वारिंशत् सुरोत्तमाः। ज्ञात्वैवं स्थाननामानि ब्रह्मणा सहितान्न्यसेत्। वास्तुज्ञो वास्तुमन्त्रेण गन्धपुष्पाक्षतादिभिः। प्रणवेनार्चयेद्वापि अथवा स्वस्वनामभिः। शुक्लवस्त्रयुगं दद्याद्धूपदीपफलैः सह। अपूपैर्भूरिनैवेद्यैः पाद्यैः सह समर्चयेत्। ताम्बूलञ्च ततो दद्याद्देवेभ्यश्च पृथक् पृथक्। दत्त्वा पुष्पाञ्जलिं कर्त्ता प्रार्थयेद्वास्तुपुरुषम्।" "एवं यः कुरुते सम्यग्वास्तुपूजां प्रयत्नतः। आरोग्यं पुत्रपौत्रादि धनधान्यं लभेन्नरः। वास्तुपूजामकृत्वा यः प्रविशेन्नवमन्दिरे। रोगान्नानाविधान् क्लेशानश्नुते सर्वसङ्कटम्"। (चतुःषष्टिपद वास्तुमण्डलम्) वृ॰सं॰५२ अ॰ यथा "अष्टाष्टकपदमथ वा कृत्वा रेखाश्च कोणगास्तिर्यक्। ब्रह्मा चतुःपदोऽस्मिन्नर्धपदा ब्रह्मकोणस्थाः। अष्टौ च बहिःकोणेष्वर्धपदास्तदुभयस्थिताः सार्धाः। उक्तेभ्यो ये शेषास्ते द्विपदा विंशतिस्ते च" ॥

अधिकं वास्तुयागशब्दे दृश्यम्)। केचित्तु पञ्चाङ्गशुद्धिमात्रयुक्ते पूर्वदिन एव वास्तुपूजामाहुः यदाह नारदः "विधाय पूर्वदिवसे वास्तुपूजां बलिक्रियामिति"। श्रीपतिरपि "अथ प्रवेशो नवमन्दिरस्य यात्रानिवृत्तावथ भूपतीनाम्। सौम्यायने पूर्वदिने विधाय वास्त्वर्चनं भूतबलिं च सम्यगिति" अथ लग्नशुद्धिं तिथिशुद्धिं चोपजातिकोत्तरार्द्धेनेन्द्रवज्रया चाह। त्रिकोणे इति। शुद्धेति। नवमपञ्चमचतुर्थसप्तमदशमैकादशद्वितीयतृतीयस्थानानामन्यतमस्थानस्थैः शुभग्रहैः। पूर्णचन्द्रबुधगुरुशुक्रैरुपलक्षिते। अत्र चन्द्रस्य लग्नराहित्यं ध्येयं तथा तृतीयषष्ठैकादशस्थैः पापग्रहैरुपलक्षिते तथा अम्बु चतुर्थस्थानं रन्ध्रमष्टमस्थानं च। शुद्धे सर्वग्रहरहिते अम्बुरन्ध्रे यस्मिंस्तादृशे लग्ने वेश्म गृहमाविशेत्। यदाह वसिष्ठः "केन्द्रत्रिकोणायधनत्रिसंस्थैः शुभैस्त्रिषष्ठायगतैः खलैश्च। लग्नान्त्यषष्ठाष्टमवर्जितेन चन्द्रेण लक्ष्मीनिलयः प्रवेशः" इति। अन्यच्च "प्रवेशलग्नान्निधनस्थितो यः क्रूरग्रहः क्रूरगृहे यदि स्यात्। प्रवेशकर्त्तारमथ त्रिवर्षाद्धन्त्यष्टवर्षैः शुभराशिगश्चेदिति" नारदः "स्थिरलग्ने स्थिरे राशौ नैधने शुद्धिसंयुते। त्रिकोणकेन्द्रखत्र्यायसौम्यैस्त्र्यारिगैः परैः। लग्नान्त्याष्टमस्थानवर्जितेन हिमांशुनेति" प्रवेशः स्यादिति पूर्वेण सम्बन्धः। गुरुः "सप्तमं शुक्रसद्वाहे यात्रायामष्टमं तथा। दशमं च गृहारम्भे चतुर्थं सन्निवेशने" इति। यत्तु श्रीपतिना "केन्द्रच्छिद्रव्ययैः शुद्धैः क्रूरैः षट्त्र्यायगैर्गुरौ। लग्ने भृगौ वा केन्द्रे वा स्थिरग्राम्योदये विशेदिति" केन्द्रस्य शुद्धत्वमुक्तं तत्पापग्रहराहित्यकृतं ध्येयम्। लग्नस्य गुरुभृग्वोरन्यतरस्थितप्राशस्त्याभिधानार्थो। कीदृशे लग्ने विजनुर्भमृत्यौ भं राशिर्लग्नं च। जनुषि जन्मकाले भे जनुर्भे। ताभ्यां मृत्युरष्टमभवनं विगतो जनुर्भमृत्युर्यस्मिन्। स्वजन्मलग्नात् स्वजन्मराशेर्वा अष्टमोराशिः प्रवेशलग्नगो नाऽपेक्षित इत्यर्थः। पुनः कीदृशे व्यर्कारिक्ताचरदर्शचैत्रे। अर्कारौ प्रसिद्धौ वारौ। रिक्ता ४।९।१४ उपलक्षणत्वाद्दग्धतिथयोऽपि। चरलग्नानि मेषकर्कतुलामकराः। उपलक्षणत्वात्तदंशा अपि। दर्शोऽमावास्या चैत्रो मासः। उपलक्षणत्वादाषाढोऽपि। विगता अर्कादयो यस्मिन् अर्कादयः प्रवेशे निषिद्धा इत्यर्थः। यदाह वसिष्ठः "न नैधने मेऽपि न चाष्टलग्ने

पञ्चेष्टकेऽप्यष्टमशुद्धियुक्ते । कार्यः प्रवेशो न चरांशलग्ने शुभेक्षिते वाप्यथ संयुते वा । रिक्ताममां दग्धतिथिं दिनेशभूसूनुषड्वर्गमिनेन्दुदृष्टम् । क्रूरग्रहाधिष्ठितविद्धभं च विवर्जनीयं त्रिविधप्रवेशे" इति । वारफलमप्याह स एव "इनाते प्रविशतां च मन्दिरं वह्निना नियतमेव वह्निभे । नभभूमिसुतवासरे तथा शीतरश्मिदिवसे हि वृद्धिदम् । चन्द्रजार्यसितवासरेषु च श्रीकरं सुखमहार्थलाभदम् ! सूर्यसूनुदिवसे स्थिरप्रदं किन्तु चौरभयमत्र विद्यते" इति । एषां निष्कृष्टमर्थमाह श्रीपतिः "रिक्ता तिथिर्भूसुतभानुवारौ निन्द्याश्च योगाः परिवर्जनीयाः । मेषः कुलीरो मकरस्तुला च त्याज्याः प्रवेशे हि तथा तदंशाः" इति । निषिद्धलग्नफलान्यभिहितानि राजमार्तण्डे "भूपो यात्वा मेषलग्ने प्रवेशे नाशङ्गच्छेत् कर्कटस्योदये वा । व्याधिं तौलिन्याश्रिते लग्नवर्त्तिन्याकोकेरे चाशु याज्ञान्यनाशम्" । आकोकेरे मकरे । "लग्नेऽन्यत्रांशकेऽप्येषामेतद्दुष्टफलप्रदाः । शुभान्यन्यानि लग्नानि प्रवेशे मुनयो विदुरिति" अन्यानि स्थिराणि द्विस्वभावानि च । उक्तं च वसिष्ठेन "पञ्चाङ्गसंशुद्धदिने निशेशताराबले चाष्टकवर्गयुक्ते । सौम्ये स्थिरे भे शुभदृष्टियुक्ते लग्नेऽथ वा द्व्यङ्गगृहे विलग्ने" इति । विशेषो राजमार्त्तण्डे "निन्दिता अपि शुभांशसमेतास्तौलिमेषमकराः सकुलीराः । कर्तृभोपचयगाश्च विलग्ने राशयः शुभफलाय भवन्तीति" । एतल्लग्नान्तराशुद्धौ बहुकालासहिष्णुत्वे वा द्रष्टव्यम् । शुभांशाः वृषमिथुनकन्याधनुर्मीनानामंशा इत्यर्थः कर्कतुलांशयोः स्वरूपतो निषिद्धत्वात् । विशेषान्तरमाह वसिष्ठः "यः क्षीणचन्द्रोऽन्त्यषडष्टसंस्थः पापेक्षितः पापयुतोऽथ वा स्यात् । कर्तुः स्त्रियं हन्ति स वत्सरेण त्रिवर्षतः सौम्यनिरीक्षितश्चेदिति" अथ राज्ञां यात्रानिवृत्तिप्रवेशेऽयं विशेषो ध्येयः यत्र मासे यात्रा कृता तस्मान्नवमे मासि यात्रादिनान्नवमे दिने वा प्रवेशो निषिद्धः यदाह गुरुः । "निर्गमान्नवमे मासि प्रवेशो नैव शोभनः । नवमे दिवसे चैव प्रवेशं नैव कारयेदिति" । वामं रविमिति । गृहप्रवेशसमये रविं सूर्यं वामं तद्दिगभिमुखात् प्रवेश्यगृहाद्वामभागस्थं कृत्वा वेश्म गृहं विशेत् । तथा पुरोऽग्रे स्वसम्मुखं पूर्णघटं जलपूर्णं कलसमुपलक्षणत्वात् पूगीफलादिपूर्णं घटं वा कृत्वा । चकारस्याऽनुक्तसमुच्चयार्थत्वाद्ब्राह्मणांश्च सजलकलसानपि ब्राह्मणान्वाग्रे कृत्वा वेश्म विशेत् । अत्र शुक्रः पृष्ठगः कार्य इत्यनुक्तोऽपि विशेषो ध्येयः यदाह वसिष्ठः "कृत्वा शुक्रं पृष्ठतो वामतोऽर्कं विप्रान् पूज्यानग्रतः पूर्णकुम्भम् । हर्म्यं रम्यन्तोरणस्रग्वितानैः स्त्रीभिः स्रग्वी गीतमाल्यैर्विशेत्तदिति" गुरुस्तु वामगोऽग्रगो वा शुक्रो निषिद्धः, किन्तु पृष्ठगतो दक्षिणगतो वा शुभ इत्याह "पृष्ठगं दक्षिणं वापि भृगुं कृत्वा विशेत्सदा । पुरोगं वामगं वापि शुक्रं कृत्वा विशेन्नेति" अत्र शुक्रस्य दिक्चतुष्टयस्थत्वज्ञानं चन्द्रवदेव ज्ञेयं विशेषानुक्तेः । तच्च गृहारम्भप्रकरणेऽस्माभिरुक्तम् अयं च सर्ववर्णानां त्रिविधेऽपि प्रवेशे विधिः राज्ञां तु यात्रानिवृत्तौ विशेषमप्याह श्रीपतिः "कृत्वा विप्रान् सजलकलशांश्चाग्रतो वामतोऽर्कं स्नातः स्रग्वी विमलवसनो मङ्गलैर्वेदघोषैः । व्यस्तैर्यात्राकथितशकुनैर्द्वारमार्गे च राजा हर्म्यं पुष्पप्रकररुचिरन्तोरणाढ्यं विशेच्चेति" कीदृशं वेश्म भकूटशुद्धं भकूटं षष्ठाष्टकादि तेन शुद्धम् । उपलक्षणत्वाद्विवाहप्रकरणोक्तं "वर्णो वश्यं तथा तारा" इत्येवमादिकं च । तेनापि शुद्धं ध्येयम् यदाह वसिष्ठः "राशिकूटादिकं सर्वं दम्पत्योरिव चिन्तयेदिति" ।४। अथ वामगतार्कज्ञानं तिथिभेदेन पूर्वाद्यभिमुखगृहप्रवेशं चेन्द्रवंशाच्छन्दसाह वाम इति । अष्टमपञ्चमद्वितीयैकादशस्थानेभ्यः पञ्चसु स्थानेषु स्थिते रवौ सति प्राग्वदनादिमन्दिरे प्रवेष्टव्ये गृहप्रवेशकर्तुर्वामो रविर्ज्ञेयः तद्यथा । यस्मिन् लग्ने प्रवेशः कर्तुमिष्यते तस्मादष्टमं यत् स्थानं तस्मात् पञ्चसु स्थानेषु अर्के स्थिते पूर्वाभिमुखगृहप्रवेशकर्तुर्वामः सूर्यः स्यात् । तथा लग्नाद्यत् पञ्चमस्थानं ततः पञ्चसु स्थानेषु अर्के स्थिते दक्षिणाभिमुखगृहप्रवेशकर्तुर्वामः सूर्यः । एवं लग्नाद्यद्द्वितीयं स्थानं ततः पञ्चसु स्थानेषु सूर्ये पश्चिमाभिमुखगृहप्रवेशकर्तुर्वामः सूर्यः । तथैव लग्नाद्यदेकादशस्थानं ततः पञ्चसु स्थानेषु सूर्ये स्थिते उत्तराभिमुखगृहप्रवेशकर्तुर्वामः सूर्य इत्यर्थः । उक्तञ्च "रन्ध्रात्सुताङ्गनादायात्पञ्चस्वर्के स्थिते क्रमात् । पूर्वाशादिमुखं गेहं विशेद्वामो भवेद्यतः" इति । विश्वकर्माऽपि "लग्नात्प्रागादितो दिक्षु द्वौ द्वौ राशी नियोजयेत् । एकमेकं न्यसेत्कोणे सूर्यं वामं विचिन्तयेत् । प्राच्यां लग्नात् द्वौ राशी स्थाप्यौ कोणे चैकः । तथा

पूर्णातिथाविति। प्राग्वदने पूर्वाभिमुखे गृहे पूर्णातिथौ पञ्चम्यां दशम्यां पूर्णिमायां वा प्रवेशः शुभः। नन्दादिके तिथिगणे याम्यजलोत्तरानने गृहप्रवेशः शुभः। यथा दक्षिणाभिमुखे गृहे नन्दायां प्रतिपदि षष्ठ्यामेकादश्यां वा प्रवेशः शुभः। जलं पश्चिमदिक् तद्दिगभिमुखे भद्रायां द्वितीयायां सप्तम्यां द्वादश्यां वा प्रवेशःशुभः। उत्तराभिमुखे गृहे जयायां तृतीयायामष्टम्यां त्रयोदश्यां वा प्रवेशःशुभ इत्यर्थः। यदाह गुरुः "नन्दायां दक्षिणद्वारं भद्रायां पश्चिमामुखम्। जयायामुत्तरद्वारं पूर्णायां पूर्वतोविशेदिति" मूले नन्दादिके इति पदोपादानाद्रिक्ताग्रहणं यद्यप्यायाति तथापि विदिक्षु द्वारनिषेधाद्दिशां चतुष्टयेन चतुर्णान्द्वाराणां सम्भवात्तस्याः स्वरूपतो निषेधाच्च रिक्ताग्रहणासम्भवोध्येयः। सोऽपि सम्मतिवाक्ये स्पष्ट एव।५। तत्र गृहप्रवेशे वास्तुकलसचक्रं शार्दूलविक्रीडितेनाह। वक्त्रे इति। कलशस्याऽष्टधा विभागाः परिकल्प्याः मुखं कण्ठो गर्भो मूलं चेति चत्वारो विभागाः पूर्वादिदिक्परत्वेन चत्वारो विभागा एवमष्टौ स्युः। तथाविभागपरत्वेन सूर्यभान्नक्षत्रन्यासे फलमुच्यते। वक्त्रे इति। गृहप्रवेशसमये इति सर्वत्रापि सम्बध्यते कुम्भे कलशाकृतौ वास्तुनि रविभात्सूर्याक्रान्तनक्षत्रादिति ल्यब्लोपे पञ्चमी। रव्यृक्षमारभ्य नक्षत्रन्यास इत्यर्थः। तत्र कलसस्य वक्त्रे मुखे भूरेकं सूर्याक्रान्तनक्षत्रमेव स्थाप्यन्तत्फलं गृहस्याऽग्निदाहः। ततः सूर्यभात् कृतास्तदग्रिमाणि चत्वारि भानि प्राच्यां स्थाप्यानि, फलमुद्वसनं जनवासशून्यं गृहं स्यात्। ततः कृता यमगतास्तदग्रिमाणि चत्वारि भानि दक्षिणस्यां यमदिशि स्थाप्यानि, फलं गृहपतेर्लाभो द्रव्यप्राप्तिः। ततः कृताः तदग्रिमाणि चत्वारि भानि पश्चिमे पश्चिमायां स्थाप्यानि, फलं गृहपतेः श्रीप्राप्तिः। ततो वेदाः तदग्रिमाणि चत्वारि भानि उत्तरे उत्तरस्यां स्थाप्यानि। फलं कलिर्लोकैः सह गृहसम्बन्धी निरर्थकः कलहः स्यात्। ततोयुगमितास्तदग्रिमाणि चत्वारि भानि गर्भे कलसमध्ये स्थाप्यानि, फलं विनाशः। कस्येत्याकाङ्क्षायां गर्भोपादानाद्भाविनां गर्भाणां विनाश इत्यर्थः। ततोरामास्तदग्रिमाणि त्रीणि भानि गुदे बुध्ने स्थाप्यानि। फलं स्थैर्यं गृहपतेर्बहुकालं तत्र गृहे निवासः। ततोऽनलास्तदग्रिमाणि त्रीणि भानि कण्ठे स्थाप्यानि, फलं स्थिरत्वं सर्वदा गृहपतेर्भवेत्। एवमभिजिद्रहितानि स्युः। तदुक्तं विश्वकर्मणा "वटाकारं लिखेच्चक्रं रविधिष्ण्यक्रमेण च। मुखैकं दिक्षु चत्वारि त्रीणि गुदकण्ठयोः। एवं चक्रं समालेख्यं प्रवेशार्थं सदा बुधैः" अत्र चत्वारि इति वीप्सा द्रष्टव्या। दिक्षु इत्यनेन गर्भोऽप्युपलक्ष्यते। तथा तत्फलनिर्देशस्तत्रैव "अग्नेर्नाशो मुखे प्रोक्त, उद्वासः पूर्वतो भवेत्। दक्षिणे चार्थलाभाय, पश्चिमे श्रीप्रदो भवेत्। उत्तरे कलहश्चैव, गर्भे गर्भविनाशनम्। स्थिरता च गुदे, कण्ठे कलसस्य प्रकीर्त्तितेति" ज्योतिःप्रकाशेऽपि "भर्वेदपञ्चकं त्रिस्त्रिः। १।४।४।४।४।४।३।३ प्रवेशे कलसेऽर्कभात्। स्मृतिर्गतिर्धनं श्रीः स्याद्वैरं शुक् स्थिरता सुखमिति" वेदपञ्चकं वेदाश्चत्वारस्तेषां पञ्चवारं चत्वारि भानि लेख्यानीत्यर्थः। स्मृतिरित्यादीन्यष्टौ यथासङ्ख्यं फलानि। अत्र कलसचक्रे शुभफलदस्थाने याते सत्येव विहितनक्षत्राणां परिग्रहो युक्तस्तत्रापि यद्दिङ्मुखगृहप्रवेशो विधित्सितः तद्दिङ्मुखविहितनक्षत्रपरिग्रहः। यथा पूर्वदिङ्मुखगृहप्रवेशे विधित्सिते रोहिणी मृगे ग्राह्ये। दक्षिणाभिमुखगृहप्रवेशे। उत्तरफाल्गुनी चित्रे। एवं पश्चिमाभिमुखे अनुराधोत्तराषाढे। एवमुत्तराभिमुखे उत्तरभाद्रपदारेवत्यौ ग्राह्ये इति निष्कृष्टोऽर्थः। अतएवोक्तं वसिष्ठेन "यद्दिग्द्वारं मन्दिरं तद्दिगृक्षैरुक्तर्क्षैः स्यात्प्रवेशो न सर्वैरिति"। तद्दिगृक्षैरिति उक्तर्क्षैरिति चानयोः सामानाधिकरण्येनान्वयः। भिन्नवाक्यत्वे तु विवक्षिते चकारः कर्त्तव्यः। "सम्भवत्येकवाक्यत्वे वाक्यभेदो हि दूषणमिति" न्यायाच्च। अतएव "अर्कादितेयानिलदस्रविष्णुऋक्षे प्रविष्टं नव मन्दिरं यत्। अब्दत्रयात्तत् परहस्तयातं शेषेषु धिष्ण्येषु च मृत्युदं स्यादिति" "निषेधोऽप्युपपन्नो भवति" पी०धा०

गृहकच्छप पु० गृहे कच्छप इव। पेषणशिलायाम् शब्दर०।

गृहकन्या स्त्री गृहे कन्येव। घृतकुमार्याम् राजनि०

गृहकपोत पुंस्त्री गृहे स्थितः कपोतः। कपोतभेदे स्त्रियां, जातित्वात् ङीष्। "शिष्यायितं गृहकपोतशतैर्यथा स्यात्" सा० द० "आवर्त्तिभिर्गृहकपोतशिरोधराभैः" माघः। कपोतशब्दे दृश्यम्।

गृहकर्त्तृ त्रि० गृहं करोति कृ–तृच् ६त०। १गृहकारके (घरामि) २धूसरेऽतिसूक्ष्मे चटकभेदे पुंस्त्री राजनि०। स्त्रियामुभयत्र ङीप्।

गृहकारक पु० गृहं करोति कृ-ण्वुल् ६त०। गृहनिर्माणकारके वर्णसङ्करभेदे। “प्रतिमाघटकाद्वैव कन्यायां नापितस्य च। सूत्रकारस्य सम्भूतिः सोपान गृहकारकः” पराशरः २गृहकर्त्तरि (घरामि) त्रि०। “मृद्दण्डचक्रसंयोगात् कुम्भकारो यथा घटम्। करोति तृणमृत्काष्ठैर्गृहं वा गृहकारकः” याज्ञ०।

गृहकारिन् त्रि० गृहं करोति कृ-णिनि। (घरामि) १गृहकारके स्त्रियां ङीप् (कुमिरक्या) २कीटभेदे। सा च जातिः उपस्करहरणपापजाता। यथाह “बकोभवति हृत्वाग्निं गृहकारी ह्युपस्करम्” मनुः।

गृहकुक्कुट पुंस्त्री गृहे रुद्धः कुक्कुटः। कुक्कुटभेदे “श्वेताय दद्याद्गृहकुक्कुटाय चतुर्थभक्ताय बुभुक्षिताय” सुश्रु०।

गृहकूलक पु० गृहस्य कूले समीपे भवः कन्। चिञ्चिडाख्ये शाके शब्दार्थचि०।

गृहगोधा स्त्री गृहस्य गोधेव। (टिकटिकी) ज्येष्ठ्याम् राजनि०। स्वार्थे क। तत्रार्थे अमरः “श्वेता गृहगोधिकार्द्धनरे” वृ०स०५४अ०। पुरुषार्द्धप्रमाणतोयज्ञापिका श्वेता गृहगोधिकेत्यर्थः। पिङ्गलवर्णायास्तस्या वामे स्थिताया गमने शुभत्वं यथाह वृ०स० ८६अ० “शिवा श्यामा रला छुच्छुः पिङ्गला गृहगोधिका। सूकरी परपुष्टा च पुन्नामानश्च वामतः” “गृहगोधिकेति संज्ञा विशेषा कुड्यमत्स्यस्य। दिङ्मण्डलेऽभ्यन्तरबाह्यभागे फलानि विद्यात् गृहगोधिकायाः” ८८अ०। [(टिकटिकी) हेम०।

गृहगोलिका स्त्री गृहे गोधिका पृषो०। ज्येष्ठ्याम्

गृहचुल्ली स्त्री “पूर्वापरे तु शाले गृहचुल्ली दक्षिणोत्तरे काचम्” वृ०स० ५२ उक्ते द्विशाले गृहभेदे

गृहज पु० गृहे दास्यां जायते जन-ड। दासभेदे “ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ। पैतृको दण्डदासश्च सप्तैते दासयोनयः” मनुः। “दासास्तु गृहजादयः” नारदः १७२५ पृ० दृश्यम्। [काञ्जिके त्रिका०।

गृहणी स्त्री गृहे नीयते नी-कर्मणि क्विप् संज्ञायां णत्वम्।

गृहतटी स्त्री गृहस्य तटीव। वीथिकायाम् (पिँडा दाओया) इति ख्याते पदार्थे हारा०।

गृहदेवता स्त्री गृहे वास्तौ स्थिता देवता। वास्तुपुरुषदेहस्थेषु अग्न्यादिषु ब्रह्मान्तेषु ४५ संख्यकदेवताभेदेषु गृहशब्दे दृश्यम् “गृहाय गृहदेवताभ्यो वास्तुदेवताभ्यः” आश्व०गृ०१।२।४ सू०

गृहदेवी स्त्री गृहे तत्कुड्ये विलिख्य पूज्या देवी। जरानाम राक्षस्याम् तत्कथा भा० स० १७ अ० “जरा नामाऽस्मि भद्रं ते राक्षसी कामरूपिणी। तव वेश्मनि राजेन्द्र! पूजिता न्यवसं सुखम्। गृहे गृहे मनुष्याणां नित्यं तिष्ठामि राक्षसी। गृहदेवीति नाम्ना वै पुरा सृष्टा स्वयम्भुवा। दानवानां विनाशाय स्थापिता दिव्यरूपिणी। यो मां भक्त्या लिखेत् कुड्ये सपुत्रां यौवनान्विताम्। गृहे तस्य भवेद्वृद्धिरन्यथा हानिमाप्नुयात्। त्वद्गृहे तिष्ठमाना तु पूजिताऽहं सदा विभो!। लिखिता चैव कुड्येऽहं पुत्रैर्बहुभिरावृता। गन्धपुष्पैस्तथा धूपैर्भक्ष्यैर्भोज्यैः सुपूजिता। साऽहं प्रत्युपकारार्थं चिन्तयाम्यनिशं तव। तवेमे पुत्रशकले दृष्टवत्यस्मि धार्मिक!। संश्लेषिते मया दैवात् कुमारः समपद्यत। तव भाग्यान्महाराज! हेतुमात्रमहं त्विह। मेरुं वा खादितुं शक्ता किं पुनस्तव बालकम्। गृहसंपूजनात्तुष्ट्या मया प्रत्यर्पितस्तव” [रत्नमा०।

गृहद्रुम पु० गृहमिव द्रुमः। मेषशृङ्गीवृक्षे (गाडरशिङा)

गृहधूप पु० गृहस्य धूप इव। धूपभेदे “मयूरपिच्छं निम्बस्य पत्राणि बृहतीफलम्। मरिचं हिङ्गु मांसी च. बीजं कार्पाससम्भवम्। छागरोमाहिनिर्मोकौ विष्ठा वैडालिकी तथा। गजदन्तश्च तच्चूर्णं किञ्चिद्घृतविमिश्रितम्। गृहेषु धूपनं दत्तं सर्वान् बालग्रहान् जयेत्। पिशाचान् राक्षसान् हत्वा सर्वज्वरहरं भवेत्” शब्दार्थचि०। गेहधूपोऽप्यत्र।

गृहधूम पु० गृहगतो धूमः। (झुल) ख्याते पदार्थे। “सैन्धवं करवीरञ्च गृहधूमं विषं तथा” “ततो हरिद्रा गृहधूमरोध्रपतङ्गचूर्णैः समनःशिलालैः” सुश्रु०।

गृहनमन न० गृहं नमयति नम-णिच्-ल्यु पूर्वपदात् संज्ञायां णत्वप्राप्तौ क्षुभ्ना० न णत्वम्। वायौ।

गृहनाशन पुंस्त्री गृहं नाशयति प्रवेशेन नश-णिच्-ल्यु। वनकपोते (घुघु) राजनि० कपोतशब्दे तस्य गृहनाशकता दृश्या स्त्रियां जातित्वात् ङीष्। [ङीष्।

गृहनीड़ पुंस्त्री गृहे नीड़मस्य। चटके हारा० स्त्रियां

गृहप पु० गृहं पाति पा-क। गृहपतौ

गृहपति पु० ६त०। गृहस्वामिनि, १गृहस्थे, द्वितीयाश्रमिणि २मन्त्रिणि, ३धर्मे च मेदि० ४सत्रयागकर्त्तरि यजमाने “बहुषु गृहपतये” कात्या० श्रौ०८।२।३ “गृहपतिर्यजमानप्रयुक्तत्वात्” १२।१।८। “याजमानं यत् कर्म तत् गृहपतिः करोति कर्मान्तरे तस्यायुक्तत्वात्

इतरेषां चाध्वर्य्यवादिषु योगात्" कर्कः "ऋत्विक्षय सदस्येषु स वै गृहपतिस्तदा। उपविष्टेषूपविष्टः शौनकोऽथाब्रवीदिदम्" भा० आ० ४अ०। "वनौकसां गृहपतिनामनुत्तमम्" भा० शा० २४३ अ०। आर्षत्वात् न दीर्घः। ५यजमानमात्रे "गृहपतिना संयुक्तो ञ्यः" पा० "गृहपतिर्यजमानस्तेन संयुक्तः गार्हपत्योऽग्निः" सि० कौ०। गृहपतेरपत्यादि अश्वप० अण्। गार्हपत गृहपतिसम्बन्धिनि त्रि० स्त्रियां ङीप्। ६अग्निभेदे "अग्निर्गृहपतिर्नाम नित्यं यज्ञेषु पूज्यते" भा० २२१ अ०। गृहस्य पतिः। ७गृहस्वामिमात्रे स्त्रियां सपूर्वत्वात् वा नान्तादेशे गृहपत्नी गृहपतिरिति रूपद्वयमितिभेदः। "गृहान् गच्छ गृहपत्नी" ऋ० १०।८५। गृहपत्नी स्वगृहस्वामिनी" भा०

गृहपाल त्रि० गृहं पालयति पालि—अण्। गृहरक्षके "तमस्थं शूद्रमासीनं गृहपालमथाब्रवीत्" भा० व० ३३७ अ०। २कुक्कुटे शब्दार्थचि०

गृहपोतक गृहं पोत इव यस्य कप्। वास्तुस्थाने शब्दरत्ना०

गृहप्रवेश पु० ७त०। गृहे विधानेन प्रवेशे गृहशब्दे [शब्दार्थचि०।
तद्विधिर्दृश्यः

गृहबभ्रु पुंस्त्री गृहस्थितो बभ्रुः। गृहस्थिते नकुले।

गृहबलि पु० गृहे देयो बलिः। वैश्वदेवकर्मणि "ततो गृहबलिं कुर्यात्" मनुः।

गृहबलिप्रिय ६त०। वकपक्षिणि शब्दार्थचि०।

गृहबलिभुज् पुंस्त्री गृहे दत्तं बलिं भुङ्क्ते भुज—क्विप्। १काके २चटके च हेम०।

गृहभर्त्तृ त्रि० ६त०। गृहस्वामिनि "गृहभर्त्तुस्तत्तुल्येऽब्दे पीडासङ्गं प्रयच्छन्ति" वृ० सं० ५३अ०। स्त्रियां ङीप्।

गृहभूमि स्त्री गृहयोग्या भूमिः। वास्तुभूमौ हलायु०

गृहमणि पु० गृहे मणिरिव। प्रदीपे हारा०।

गृहमाचिका स्त्री मच—ण्वुल् ६त० (चामचिका) अजिन- [जातित्वात् ङीष्।
पत्रयाम् त्रिका०।

गृहमृग पुंस्त्री गृहे मृग इव। कुक्कुरे हेम० स्त्रियां

गृहमेध पु० गृहेण दारैः मेधते संगच्छते मेध—अच् ३त०। कृतदारपरिग्रहे १गृहस्थे। मेध—हिंसायां भावे घञ् ७त०। २पञ्चसूनात्मकहिंसायाम् मेधो हिंसाहेतुको यज्ञः पञ्चसूनात्मको यस्य। ३पञ्चयज्ञकर्त्तरि गृहस्थे। गृहे कर्त्तव्य यज्ञो यस्य। ४मरुद्भेदे "गृहमेधास आगत मरुतो माप भूतन" ऋ० ७।५९।१०

गृहमेधिन् पु० गृहेण दारैर्मेधते संगच्छते मेध—सङ्गमे णिनि। १गृहस्थे "पञ्च कॢप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्। अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्। होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्। पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः" मनुः। "प्रजायै गृहमेधिनाम्" रघुः। गृहे कर्त्तव्यो मेधो यज्ञोऽस्त्यस्य इनि। २मरुद्भेदे "मरुद्भ्यो गृहमेधिभ्यः सायं चरुः पयसि" कात्या० श्रौ० ५।६।६। गृहमेधः पञ्चसूनानिमित्तहिंसा अस्त्यस्य इनि। ३गृहस्थे "गृहमेधी व्रीहियवाभ्यां शरद्वसन्तयोर्यजेत। शूद्रामाकैर्वन्यैर्वर्षासु आपत्कल्पे चान्येन, पुरातनैर्वेति" श्रा० ३०स्मृतिः। "मेधृ मेधाहिंसः। यो मेधृ सङ्गमे चेत्यत्र चकारेण पूर्वगणस्यमेधाहिंसयोरनुवृत्तिः तेन मेधृ हिंसार्थः तथा च गृहनिमित्तेन जातायाः "पञ्चसूना गृहस्थस्य चूल्ली पेषण्युपस्करः। कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्" इति मनूक्तायाः पञ्चसूनारूपहिंसायाः कारी गृहमेधी गृहस्थ" इत्यर्थः रघु०। ४तत्पत्न्यां स्त्री ङीप्। पतिकृतयज्ञसम्बन्धात्तस्यास्तथात्वम्।

गृहमेधीय त्रि० गृहमेधस्येदं छ। १गृहस्थकर्त्तव्ये कर्मभेदे "सान्तपनीयवेद्यां गृहमेधीयं विदधत्" कात्या० श्रौ० ५।६।६ व्या० हरिस्वामी। गृहमेधी मरुद्भेदे देवताऽस्य छ। २गृहमेधिनामकमरुद्देवताके हविरादौ त्रि०। "सहस्रियं दम्य भागमेतं गृहमेधीयं मरुतो जुषध्वम्" ऋ० ७ ५७।१४

गृहमेध्य त्रि० गृहमेधो देवताऽस्य वा यत्। गृहमेधदेवताके हविरादौ। अर्श०अच् तत्कृत्ययुक्तेऽपि त्रि० "गृहमेध्या भवेन्नित्यं भूषणानि च पूजयेत्" शु०त० ऋष्यशृङ्गः। "गृहमेध्या गृहकृत्यपरा" रघु०।

गृहयन्त्र क्ली० गृहे यन्त्रं वस्त्रधारणदारुविशेषः। गृहस्थितवस्त्राद्याधारे (आलना) प्रसिद्धे काष्ठनिर्मिते पदार्थे "गृहयन्त्रपताकाश्रीरपौरादरनिर्मिता" कुमा०

गृहयाय्य त्रि० चु० गृह—"श्रुदक्षिस्पृहिगृहिभ्य आय्यः" उ० सू० आय्य। गृहस्वामिनि इति सिद्धान्तकौमुदी। शब्दकल्पद्रुमे गृहयाय्यशब्दकल्पनमतीव प्रामादिकम् आय्यप्रत्ययस्य पमध्यत्वाभावात्

गृहयालु त्रि० चु०गृह—आलु। ग्रहीतरि।

गृहवाटिका स्त्री गृहसमीपे वाटिकेव आरामः। गृहसमीपस्थोपवने हारा०।

गृहवित्त त्रि॰ गृहं वित्तं यस्य । गृहस्वामिनि दारा॰ स्त्रियां टाप् ।

गृहसंवेशक पु॰ गृहं गृहनिर्माणं संविशति उपजीवति सम्+विश–ण्वुल् । वास्तुविद्योपजीविनि । "गृहसंवेशको दूतो वृक्षारोपक एव च" मनुः ।

गृहस्थ पु॰ गृहे दारेषु तिष्ठति अभिरमते स्था–क । गृहिणि गृहस्थाश्रमिणि द्वितीयाश्रमस्थे "गृहस्थस्तु यदा पश्येत् वलीपलितमात्मनः" मनुः ।

गृहस्थधर्म पु॰ ६त॰। गृहस्थकर्त्तव्ये धर्मभेदे स च धर्मः मन्वादिभिर्दर्शितः। तत्रादौ मनुनोक्तो यथा "गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि । उद्वहेत द्विजो भार्य्यां सवर्णां लक्षणान्विताम् । असपिण्डा च या मातुरसगोत्रा च या पितुः । सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने । महान्त्यपि समृद्धानि गोऽजाविधनधान्यतः । स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्ज्जयेत् । हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम् । क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च । नोद्वहेत् कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम् । नालोमिकां नातिलोमां न वाचाटां न पिङ्गलाम् । नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् । न पक्ष्यहिप्रेष्यनाम्नीं न च भीषणनामिकाम् । अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् । तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत् स्त्रियम् । यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता । नोपयच्छेत तां प्राज्ञः पुत्त्रिकाधर्मशङ्कया । सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्म्मणि । कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः । शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशः स्मृते । ते च स्वा चैव राज्ञश्च ताश्च स्वा चाग्रजन्मनः । न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः । कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्य्योपदिश्यते । हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः । कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम् । शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च । शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः । शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम् । जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते । दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु । नाश्नन्ति पितृदेवास्तच्च स्वर्गं स गच्छति । वृषलीफेनपीतस्य निःश्वासोपहतस्य च । तस्याञ्चैव प्रसूतस्य निष्कृतिर्न विधीयते । चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान् । अष्टाविमान् समासेन स्त्रीविवाहान्निबोधत । ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः । गान्धर्व्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः । यो यस्य धर्म्म्यो वर्णस्य गुणदोषौ तु यस्य यौ । तद्वः सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणान् । षडानुपूर्व्व्या विप्रस्य क्षत्त्रस्य चतुरोऽवरान् । विट्शूद्रयोस्तु तानेव विद्याद्धर्म्म्यानराक्षसान् । चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः । राक्षसं क्षत्त्रियस्यैकमासुरं वैश्यशूद्रयोः । पञ्चानान्तु त्रयो धर्म्म्या द्वावधर्म्म्यौ स्मृताविह । पैशाचश्चासुरश्चैव न कर्त्तव्यौ कदाचन । पृथक् पृथग्वा मिश्रौ वा विवाहौ पूर्व्वनोदितौ । गान्धर्व्वो राक्षसश्चैव धर्म्म्यौ क्षत्त्रस्य तौ स्मृतौ । आच्छाद्य चार्च्चयित्वा च श्रुतशीलवते स्वयम् । आहूय दानं कन्याया ब्राह्मो १धर्मः प्रकीर्त्तितः । यज्ञे तु वितते सम्यगृत्विजे कर्म्म कुर्व्वते । अलङ्कृत्य सुतादानं दैवं २धर्म्मं प्रचक्षते । एकं गोमिथुनं द्वे वा वरादादाय धर्म्मतः । कन्याप्रदानं विधिवदार्षो ३धर्म्मः स उच्यते । सहोभौ चरतां धर्म्ममिति वाचानुभाष्य च । कन्याप्रदानमभ्यर्च्य प्राजापत्यो ४ विधिः स्मृतः । ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः । कन्याप्रदानं स्वाच्छन्द्यादासुरो ५धर्म उच्यते । इच्छयान्योऽन्यसंयोगः कन्यायाश्च वरस्य च । गान्धर्वः ६ स तु विज्ञेयो मैथुन्यः कामसम्भवः । हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात् । प्रसह्य कन्याहरणं राक्षसो७विधिरुच्यते । सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति । स पापिष्ठो विवाहानां पैशाच८श्चाष्टमोऽधमः । अद्भिरेव द्विजाग्र्याणां कन्यादानं विशिष्यते । इतरेषान्तु वर्णानामितरेतरकाम्यया । यो यस्यैषां विवाहानां मनुना कीर्त्तितो गुणः । सर्वं शृणुत तं विप्राः सम्यक् कीर्त्तयतो मम । दश पूर्वान् परान् वंश्यानात्मानञ्चैकविंशकम् । ब्राह्मीपुत्रः सुकृतकृन्मोचयत्येनसः पितॄन् । दैवोढाजः सुतस्त्रींस्त्रीन् षट् षट् कायोढजः सुतः । ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः । ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसम्मताः । रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः । पर्य्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः । इतरेषु तु शिष्टेषु नृशंसानृतवादिनः । जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः । अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा । निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्जयेत् ।

पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते । असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्म्मणि । शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया । वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने । ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदा । पर्व्ववर्जं व्रजेच्चैनां तद्व्रतो रतिकाम्यया । ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोड़श स्मृताः । चतुर्भिरितरैः सार्द्धमहोभिः सद्विगर्हितैः । तासामाद्याश्चतस्रस्तु निन्दितैकादशी च या । त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रयः । युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु । तस्माद्युग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियम् । पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः । समेऽपुमान् पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्य्ययः । निन्द्यास्वष्टासु चान्यासु स्त्रियो रात्रिषु वर्जयन् । ब्रह्मचार्य्येव भवति यत्र तत्राश्रमे वसन् । न कन्यायाः पिता विद्वान् गृह्णीयाच्छुल्कमण्वपि । गृह्णन् शुल्कं हि लोभेन स्यान्नरोऽपत्यविक्रयी । स्त्रीधनानि तु ये मोहादुपजीवन्ति बान्धवाः । नारीयानानि वस्त्रं वा ते पापा यान्त्यधोगतिम् । आर्षे गोमिथुनं शुल्कं केचिदाहुर्म्मृषैव तत् । अल्पोऽप्येवं महान् वापि विक्रयस्तावदेव सः । यासां नाददते शुल्कं ज्ञातयो न स विक्रयः । अर्हणं तत् कुमारीणामानृशंस्यञ्च केवलम् । पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा । पूज्याः भूषयितव्याश्च बहुकल्याणमीप्सुभिः । यत्र नार्य्यस्तु पूज्यन्ते रमन्ते तत्र देवताः । यत्रैतास्तु न पूज्यन्ते सर्व्वास्तत्राफलाः क्रियाः । शोचन्ति जामयो यत्र विनश्यत्याशु तत् कुलम् । न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्व्वदा । जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः । तानि कृत्याहतानीव विनश्यन्ति समन्ततः । तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः । भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च । सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च । यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् । यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत् । अप्रमोदात् पुनः पुंसः प्रजनं न प्रवर्त्तते । स्त्रियान्तु रोचमानायां सर्व्वं तद्रोचते कुलम् । तस्यान्त्वरोचमानायां सर्व्वमेव न रोचते । कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च । कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च । शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः । गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया । अयाज्ययाजनैश्चैव नास्तिक्येन च कर्म्मणा । कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः । मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि । कुलसङ्ख्याञ्च गच्छन्ति कर्षन्ति च महद्यशः । वैवाहिकेऽग्नौ कुर्व्वीत गृह्यं कर्म्म यथाविधि । पञ्चयज्ञविधानञ्च पक्तिञ्चान्वाहिकीं गृही । पञ्च सूना गृहस्थस्य चूल्ली पेषण्युपस्करः । कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् । तासां क्रमेण सर्व्वासां निष्कृत्यर्थं महर्षिभिः । पञ्च कॢप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् । अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् । पञ्चैतान् यो महायज्ञान् न हापयति शक्तितः । स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते । देवतातिथिभृत्यानां पितॄणामात्मनश्च यः । न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति । अहुतञ्च हुतञ्चैव तथा प्रहुतमेव च । ब्राह्म्यहुतं प्राशितञ्च पञ्च यज्ञान् प्रचक्षते । जपोऽहुतो हुतो होमः प्रहुतो भौतिको बलिः । ब्राह्म्यं हुतं द्विजाग्र्यार्च्चा प्राशितं पितृतर्पणम् । स्वाध्याये नित्ययुक्तः स्याद्दैवे चैवेह कर्म्मणि । दैवकर्म्मणि युक्तो हि बिभर्त्तीदं चराचरम् । अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः । यथा वायुं समाश्रित्य वर्त्तन्ते सर्वजन्तवः । तथा गृहस्थमाश्रित्य वर्त्तन्ते सर्व्व आश्रमाः । यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम् । गृहस्थेनैव धार्य्यन्ते तस्माज्ज्येष्ठाश्रमो गृही । स सन्धार्य्यः प्रयत्नेन स्वर्गमक्षयमिच्छता । सुखञ्चेहेच्छता नित्यं योऽधार्य्यो दुर्व्वलेन्द्रियैः । ऋषयः पितरो देवा भूतान्यतिथयस्तथा । आशासते कुटुम्बिभ्यस्तेभ्यः कार्यं विजानता । स्वाध्यायेनार्च्चयेतर्षीन् होमैर्देवान् यथाविधि । पितॄन् श्राद्धैश्च नॄनन्नैर्भूतानि बलिकर्म्मणा । कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा । पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन् । एकमप्याशयेद्विप्रं पित्रर्थे पाञ्चयज्ञिके । न चैव प्राशयेत् कञ्चिद्वैश्वदेवं प्रति द्विजम् । वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वकम् । आभ्यः कुर्याद्देवताभ्यो ब्राह्मणो होममन्वहम् । अग्नेः सोमस्य चैवादौ तयोश्चैव समस्तयोः । विश्वेभ्यश्चैव देवेभ्यो धन्वन्तरय एव च । कुह्वै चैवानुमत्यै च प्रजापतय एव च । सह द्यावापृथिव्योश्च तथा स्विष्टकृतेऽन्ततः । एवं सम्यक् हविर्हुत्वा सर्व्वदिक्षु प्रदक्षिणम् । इन्द्रान्तकाप्पतीन्दुभ्यः सानुगेभ्यो

बलिं हरेत् । मरुद्भ्य इति तु द्वारि क्षिपेदप्स्वद्भ्य इत्यपि । वनस्पतिभ्य इत्येवं मुषलोलूखले हरेत् । उच्छीर्षके श्रियै कुर्य्याद्भद्रकाल्यै च पादतः । ब्रह्मवास्तोष्पतिभ्यास्तु वास्तुमध्ये बलिं हरेत् । विश्वेभ्यश्चैव देवेभ्यो बलिमाकाश उत्क्षिपेत् । दिवाचरेभ्यो भूतेभ्यो नक्तञ्चारिभ्य एव च । पूर्ववास्तुनि कुर्वीत बलिं सर्वात्मभूतये । पितृभ्यो बलिशेषन्तु सर्वदक्षिणतो हरेत् । शुनाञ्च पतितानाञ्च श्वपचां पापरोगिणाम् । वायसानां कृमीणाञ्च शनकैर्निर्वपेद्भुवि । एवं यः सर्वभूतानि ब्राह्मणो नित्यमर्चति । स गच्छति परं स्थानं तेजोमूर्त्ति पथर्जुना । कृत्वैतद्बलिकर्म्मैवमतिथिं पूर्वमाशयेत् । भिक्षाञ्च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे । यत् पुण्यफलमाप्नोति गां दत्त्वा विधिवद्गुरोः । तत् पुण्यफलमाप्नोति भिक्षां दत्त्वा द्विजो गृही । भिक्षामप्युदपात्रं वा सत्कृत्य विधिपूर्वकम् । वेदतत्त्वार्थविदुषे ब्राह्मणायोपपादयेत् । नश्यन्ति हव्यकव्यानि नराणामविजानताम् । भस्मीभूतेषु विप्रेषु मोहाद्दत्तानि दातृभिः । विद्यातपःसमृद्धेषु हुतं विप्रमुखाग्निषु । निस्तारयति दुर्गाच्च महतश्चैव किल्विषात् । संप्राप्ताय त्वतिथये प्रदद्यादासनोदके । अन्नञ्चैव यथाशक्ति सत्कृत्य विधिपूर्वकम् । शिलानप्युञ्छतो नित्यं पञ्चाग्नीनपि जुह्वतः । सर्वं सुकृतमादत्ते ब्राह्मणोऽनर्चितो वसन् । तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता । एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन । एकरात्रन्तु निवसन्नतिथिर्ब्राह्मण स्मृतः । अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते । नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा । उपस्थितं गृहे विद्याद्भार्या यत्राग्नयोऽपि वा । उपासते ये गृहस्थाः परपाकमबुद्धयः । तेन ते प्रेत्य पशुतां व्रजन्त्यन्नादिदायिनाम् । अप्रणोद्योऽतिथिः सायं सूर्य्योढो गृहमेधिना । काले प्राप्तस्त्वकाले वा नास्यानश्नन् गृहे वसेत् । न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत् । धन्यं यशस्यमायुष्यं स्वर्ग्यञ्चातिथिपूजनम् । आसनावसथौ शय्यामनुव्रज्यामुपासनम् । उत्तमेषूत्तमं कुर्य्याद्धीने हीनं समे समम् । वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत् । तस्याप्यन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत् । न भोजनार्थं स्वे विप्रः कुलगोत्रे निवेदयेत् । भोजनार्थं हि ते शंसन् वान्ताशीत्युच्यते बुधैः । न ब्राह्मणस्य त्वतिथिर्गृहे राजन्य उच्यते । वैश्यशूद्रौ सखा चैव ज्ञातयो गुरुरेव च । यदि त्वतिथिधर्म्मेण क्षत्रियो गृहमाव्रजेत् । भुक्तवत्सूक्तविप्रेषु कामन्तमपि भोजयेत् । वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्म्मिणौ । भोजयेत् सह भृत्यैस्तावानृशंस्यं प्रयोजयन् । इतरानपि सख्यादीन् सम्प्रीत्या गृहमागतान् । सत्कृत्यान्नं यथाशक्ति भोजयेत् सह भार्यया । सुवासिनीः कुमारांश्च रोगिणो गर्भिणीस्तथा । अतिथिभ्योऽग्र एवैतान् भोजयेदविचारयन् । अदत्त्वा तु य एतेभ्यः पूर्वं भुङ्क्तेऽविचक्षणः । स भुञ्जानो न जानाति श्वगृध्रैर्जग्धिमात्मनः । भुक्तवत्स्वथ विप्रेषु स्वेषु भृत्येषु चैव हि । भुञ्जीयातां ततः पश्चादवशिष्टन्तु दम्पती । देवानृषीन्मनुष्यांश्च पितॄन् गृह्याश्च देवताः । पूजयित्वा ततः पश्चाद्गृहस्थः शेषभुग्भवेत् । अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात् । यज्ञशिष्टाशनं ह्येतत् सतामन्नं विधीयते । राजर्त्विक्स्नातकगुरून् प्रियश्वशुरमातुलान् । अर्हयेन्मधुपर्केण परिसंवत्सरात् पुनः । राजा च श्रोत्रियश्चैव यज्ञकर्म्मण्युपस्थितौ । मधुपर्केण संपूज्यौ न त्वयज्ञ इति स्थितिः । सायन्त्वन्नस्य सिद्धस्य पत्न्यमन्त्रं बलिं हरेत् । वैश्वदेवं हि नामैतत् सायं प्रातर्विधीयते । पितृयज्ञन्तु निर्वर्त्य विप्रश्चन्द्रक्षयेऽग्निमान् । पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकम् । पितॄणां मासिकं श्राद्धमन्वाहार्य्यं विदुर्बुधाः । तच्चामिषेण कर्त्तव्यं प्रशस्तेन प्रयत्नतः । तत्र ये भोजनीयाः स्युर्ये च वर्ज्या द्विजोत्तमाः । यावन्तश्चैव यैश्चान्नैस्तान् प्रवक्ष्याम्यशेषतः । द्वौ दैवे पितृकार्य्ये त्रीनेकैकमुभयत्र वा । भोजयेत् सुसमृद्धोऽपि न प्रसज्जेत विस्तरे । सत्क्रियां देशकालौ च शौचं ब्राह्मणसम्पदः । पञ्चैतान् विस्तरो हन्ति तस्मान्नेहेत विस्तरम् । प्रथिता प्रेतकृत्यैषा पित्र्यं नाम विधुक्षये । तस्मिन् युक्तस्यैति नित्यं प्रेतकृत्यैव लौकिकी । श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः । अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् । एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत् । पुष्कलं फलमाप्नोति नामन्त्रज्ञान् बहूनपि । दूरादेव परीक्षेत ब्राह्मणं वेदपारगम् । तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः । सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते । एकस्तान् मन्त्रवित् प्रीतः सर्वानर्हति धर्म्मतः । ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च । न हि हस्ता-

वसृग्दिग्धौ रुधिरेणैव शुद्धव्रतः । यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित् । तावतो ग्रसते प्रेत्य दीप्तशूलर्ष्ट्ययोगुड़ान् । ज्ञाननिष्ठा द्विजाः केचित् तपोनिष्ठास्तथापरे । ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः । हव्यानि तु यथान्यायं सर्वेष्वेव चतुर्ष्वपि । अश्रोत्रियः पिता यस्य पुत्त्रः स्याद्वेदपारगः । अश्रोत्रियो वा पुत्त्रः स्यात् पिता स्याद्वेदपारगः । ज्यायांसमनयोर्विद्यात् यस्य स्याच्छ्रोत्रियः पिता । मन्त्रसम्पूजनार्थन्तु सत्कारमितरोऽर्हति । न श्राद्धे भोजयेन्मित्रं धनैः कार्य्योऽस्य संग्रहः । नारिं न मित्रं यं विद्यात् तं श्राद्धे भोजयेद्द्विजम् । यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च । तस्य प्रेत्य फलं नास्ति श्राद्धेषु च हविःषु च । यः सङ्गतानि कुरुते मोहाच्छ्राद्धेन मानवः । स स्वर्गाच्च्यवते लोकाच्छ्राद्धमित्रो द्विजाधमः । सम्भोजनी साऽभिहिता पैशाची दक्षिणा द्विजैः । इहैवास्ते तु सा लोके गौरन्धेवैकवेश्मनि । यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम् । तथाऽनृचे हविर्दत्त्वा न दाता लभते फलम् । दातॄन् प्रतिग्रहीतॄंश्च कुरुते फलभागिनः । विदुषे दक्षिणा दत्ता विधिवत् प्रेत्य चेह च । कामं श्राद्धेऽर्च्चयेन्मित्रं नाभिरूपमपि त्वरिम् । द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम् । यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम् । शाखान्तगमथाध्वर्य्युं छन्दोगन्तु समाप्तिकम् । एषामन्यतमो यस्य भुञ्जीत श्राद्धमर्च्चितः । पितॄणां तस्य तृप्तिः स्याच्छाश्वती साप्तपौरुषी । एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः । अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः । मातामहं मातुलञ्च स्वस्रीयं श्वशुरं गुरुम् । दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत् । न ब्राह्मणं परीक्षेत दैवे कर्म्मणि धर्म्मवित् । पित्र्ये कर्म्मणि तु प्राप्ते परीक्षेत प्रयत्नतः । ये स्तेनपतितक्लीवा ये च नास्तिकवृत्तयः । तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत् । जटिलञ्चानधीयानं दुर्बलं कितवन्तथा । याजयन्ति च ये पूगांस्तांश्च श्राद्धे न भोजयेत् । चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा । विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः । प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः । प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्द्धुषिस्तथा । यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः । ब्रह्मद्विट् परिवित्तिश्च गणाभ्यन्तर एव च । कुशीलवोऽवकीर्णी च वृषलीपतिरेव च । पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे । भृतकाध्यापको यश्च भृतकाध्यापितस्तथा । शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ । अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा । ब्राह्मैर्यौनैश्च सम्बन्धैः संयोगं पतितैर्गतः । अगारदाही गरदः कुण्डाशी सोमविक्रयी । समुद्रयायी वन्दी च तैलिकः कूटकारकः । पित्रा विवदमानश्च कितवो मद्यपस्तथा । पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी । धनुःशराणां कर्त्ता च यश्चाग्रेदिधिषूपतिः । मित्रध्रुक् द्यूतवृत्तिश्च पुत्त्राचार्य्यस्तथैव च । भ्रामरी गण्डमाली च श्वित्र्यथो पिशुनस्तथा । उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेदनिन्दक एव च । हस्तिगोऽश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति । पक्षिणां पोषको यश्च युद्धाचार्य्यस्तथैव च । स्रोतसां भेदको यश्च तेषाञ्चावरणे रतः । गृहसंवेशको दूतो वृक्षारोपक एव च । श्वक्रीड़ी श्येनजीवी च कन्यादूषक एव च । हिंस्रो वृषलवृत्तिश्च गणानाञ्चैव याजकः । आचारहीनः क्लीवश्च नित्यं याचनकस्तथा । कृषिजीवी श्लीपदी च सद्भिर्निन्दित एव च । औरभ्रिको माहिषिकः परपूर्व्वापतिस्तथा । प्रेतनिर्हारकश्चैव वर्जनीयाः प्रयत्नतः । एतान् विगर्हिताचारानपाङ्क्तेयान् द्विजाधमान् । द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् । ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति । तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते । अपाङ्क्तप्रदाने यो दातुर्भवत्यूर्द्धं फलोदयः । दैवे हविषि पित्र्ये वा तं प्रवक्ष्याम्यशेषतः । अव्रतैर्यद्द्विजैर्भुक्तं परिवेत्त्रादिभिस्तथा । अपाङ्क्तेयैर्यदन्यैश्च तद्वै रक्षांसि भुञ्जते । दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्व्वजः । परिवित्तिः परीवेत्ता यया च परिविद्यते । सर्व्वे ते नरकं यान्ति दातृयाजकपञ्चमाः । भ्रातुर्मृतस्य भार्य्यायां योऽनुरज्येत कामतः । धर्म्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः । परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ । पत्यौ जीवति कुण्डः स्यान्मृते भर्त्तरि गोलकः । तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च । दत्तानि हव्यकव्यानि नाशयेते प्रदायिनाम् । अपाङ्क्तान् यावतः पाङ्क्तान् भुञ्जानाननुपश्यति । तावतां न फलं तत्र दाता प्राप्नोति बालिशः । वीक्ष्यान्धो नवतेः, काणः षष्टेः, श्वित्री शतस्य तु । पापरोगी सहस्रस्य दातुर्नाशयते फलम् । यावतः संस्पृशेदङ्गैर्ब्राह्मणान्

शूद्रयाजकः। तावतां न भवेद्दातुः फलं दानस्य पौर्त्तिकम्। वेदविच्चापि विप्रोऽस्य लोभात् कृत्वा प्रतिग्रहम्। विनाशं व्रजति क्षिप्रमामपात्रमिवाम्भसि। सोमविक्रयिणे विष्ठा भिषजे पूयशोणितम्। नष्टं देवलके दत्तम् अप्रतिष्ठन्तु वार्द्धुषौ। यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत्। भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे। इतरेषु त्वपाङ्क्त्येषु यथोद्दिष्टेष्वसाधुषु। मेदोऽसृङ्मांसमज्जास्थि वदन्त्यन्नं मनीषिणः। अपाङ्क्त्योपहता पङ्क्तिः पाव्यते यैर्द्विजोत्तमैः। तान्निबोधत कार्त्स्न्येन द्विजाग्र्यान् पङ्क्तिपावनान्। अग्र्याः सर्व्वेषु वेदेषु सर्वप्रवचनेषु च। श्रोत्रियान्वयजाश्चैव विज्ञेयाः पङ्क्तिपावनाः। त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित्। ब्राह्मदेयात्मसन्तानो ज्येष्ठसामग एव च। वेदार्थवित् प्रवक्ता च ब्रह्मचारी सहस्रदः। शतायुश्चैव विज्ञेया ब्राह्मणाः पङ्क्तिपावनाः। पूर्व्वेद्युरपरेद्युर्व्वा श्राद्धकर्मण्युपस्थिते। निमन्त्रयेत त्र्यवरान् सम्यग्विप्रान् यथोदितान्। निमन्त्रितो द्विजः पित्र्ये नियतात्मा भवेत् सदा। न च छन्दांस्यधीयीत यस्य श्राद्धञ्च तद्भवेत्। निमन्त्रितान् हि पितर उपतिष्ठन्ति तान् द्विजान्। वायुवच्चानुगच्छन्ति तथासीनानुपासते। केतितस्तु यथान्यायं हव्यकव्ये द्विजोत्तमः। कथञ्चिदप्यतिक्रामन् पापः शूकरतां व्रजेत्। आमन्त्रितस्तु यः श्राद्धे वृषल्या सह मोदते। दातुर्यत् दुष्कृतं किञ्चित्तत् सर्वं प्रतिपद्यते। अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः। न्यस्तशस्त्रा महाभागाः पितरः पूर्व्वदेवताः। यस्मादुत्पत्तिरेतेषां सर्व्वेषामप्यशेषतः। ये च यैरुपचर्य्याः स्युर्नियमैस्तान्निबोधत। मनोर्हैरण्यगर्भस्य ये मरीच्यादयः सुताः। तेषामृषीणां सर्व्वेषां पुत्त्राः पितृगणाः स्मृताः। विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः। अग्निष्वात्ताश्च देवानां मारीच्या लोकविश्रुताः। दैत्यदानवयक्षाणां गन्धर्व्वोरगरक्षसाम्। सुपर्णकिन्नराणाञ्च स्मृता बर्हिषदोऽत्रिजाः। सोमपा नाम विप्राणां क्षत्त्रियाणां हविर्भुजः। वैश्यानामाज्यपा नाम शूद्राणान्तु सुकालिनः। सोमपास्तु कवेः पुत्त्रा हविष्मन्तोऽङ्गिरःसुताः। पुलस्त्यस्याज्यपाः पुत्त्रा वशिष्ठस्य सुकालिनः। अग्निदग्धानग्निदग्धान् काव्यान् बर्हिषदस्तथा। अग्निष्वात्तांश्च सौमांश्च विप्राणामेव निर्द्दिशेत्। यएते तु गणा मुख्याः पितॄणां परिकीर्त्तिताः। तेषामपीह विज्ञेयं पुत्त्रपौत्त्रमनन्तकम्। ऋषिभ्यः पितरो जाताः पितृभ्यो देवदानवाः। देवेभ्यस्तु जगत् सर्व्वं चरं स्थाण्वनुपूर्व्वशः। राजतैर्भाजनैरेषामथ वा राजतान्वितैः। वार्य्यपि श्रद्धया दत्तमक्षयायोपकल्पते। देवकार्य्याद्द्विजातीनां पितृकार्य्यं विशिष्यते। दैवं हि पितृकार्य्यस्य पूर्व्वमाप्यायनं स्मृतम्। तेषामारक्षभूतन्तु पूर्व्वं दैवं नियोजयेत्। रक्षांसि हि विलुम्पन्ति श्राद्धमारक्षवर्जितम्। दैवाद्यन्तं तदीहेत पित्राद्यन्तं न तद्भवेत्। पित्राद्यन्तं त्वीहमानः क्षिप्रं नश्यति सान्वयः। शुचिं देशं विविक्तञ्च गोमयेनोपलेपयेत्। दक्षिणाप्रवणञ्चैव प्रयत्नेनोपपादयेत्। अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि। विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा। आसनेषूपक्लृप्तेषु बर्हिष्मत्सु पृथक् पृथक्। उपस्पृष्टोदकान् सम्यग्विप्रांस्तानुपवेशयेत्। उपवेश्य तु तान् विप्रानासनेष्वजुगुप्सितान्। गन्धमाल्यैः सुरभिभिरर्च्चयेद्दैवपूर्व्वकम्। तेषामुदकमानीय सपवित्रांस्तिलानपि। अग्नौ कुर्य्यादनुज्ञातो ब्राह्मणो ब्राह्मणैः सह। अग्नेः सोमयमाभ्याञ्च कृत्वाप्यायनमादितः। हविर्दानेन विधिवत् पश्चात् सन्तर्पयेत् पितॄन्। अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्। यो ह्यग्निः स द्विजो विप्रैर्मन्त्रदर्शिभिरुच्यते। अक्रोधनान् सुप्रसादान् वदन्त्येतान् पुरातनान्। लोकस्याप्यायने युक्तान् श्राद्धदेवान् द्विजोत्तमान्। अपसव्यमग्नौ कृत्वा सर्व्वमावृत् परिक्रमम्। अपसव्येन हस्तेन निर्व्वपेदुदकं भुवि। त्रींस्तु तस्माद्धविःशेषात् पिण्डान् कृत्वा समाहितः। औदकेनैव विधिना निर्व्वपेद्दक्षिणामुखः। न्युप्य पिण्डांस्ततस्तांस्तु प्रयतो विधिपूर्व्वकम्। तेषु दर्भेषु तं हस्तं निमृज्याल्लेपभागिनाम्। आचम्योदक् परावृत्य त्रिरायम्य शनैरसून्। षड् ऋतूंश्च नमस्कुर्य्यात् पितॄनेव च मन्त्रवित्। उदकं निनयेच्छेषं शनैः पिण्डान्तिके पुनः। अवजिघ्रेच्च तान् पिण्डान् यथा न्युप्तान् समाहितः। पिण्डेभ्यस्त्वल्पिकां मात्रां समादायानुपूर्व्वशः। तानेव विप्रानासीनान् विधिवत् पूर्व्वमाशयेत्। ध्रियमाणे तु पितरि पूर्व्वेषामेव निर्व्वपेत्। विप्रवद्वापि तं श्राद्धे स्वकं पितरमाशयेत्। पिता यस्य तु वृत्तः स्याज्जीवेद्वापि पितामहः। पितुः स नाम संकीर्त्त्य कीर्त्तयेत् प्रपितामहम्। पितामहो वा तच्छ्राद्धं भुञ्जीतेत्यब्रवीन्मनुः। कामं वा समनुज्ञातः स्वयमेव समा-

चरेत्। तेषां दत्त्वा तु हस्तेषु सपवित्रं तिलोदकम्। तत्पिण्डाग्रं प्रयच्छेत स्वधैषामस्त्विति ब्रुवन्। पाणिभ्यान्तूपसंगृह्य स्वयमन्नस्य वर्द्धितम्। विप्रान्तिके पितॄन् ध्यायन् शनकैरुपनिक्षिपेत्। उभयोर्हस्तयोर्मुक्तं यदन्नमुपनीयते। तद्विप्रलुम्पन्त्यसुराः सहसा दुष्टचेतसः। गुणांश्च सूपशाकाद्यान् पयो दधि घृतं मधु। विन्यसेत् प्रयतः सम्यक् भूमावेव समाहितः। भक्ष्यं भोज्यञ्च विविधं मूलानि च फलानि च। हृद्यानि चैव मांसानि पानानि सुरभीणि च। उपनीय तु तत् सर्व्वं शनकैः सुसमाहितः। परिवेषयेत प्रयतो गुणान् सर्वान् प्रचोदयन्। नास्रमापातयेज्जातु न कुप्येन्नानृतं वदेत्। न पादेन स्पृशेदन्नं नचैतदवधूनयेत्। अस्रङ्गमयति प्रेतान् कोपोऽरीननृतं शुनः। पादस्पर्शस्तु रक्षांसि दुष्कृतीनवधूननम्। यद्यद्रोचेत विप्रेभ्यस्तत्तद्दद्यादमत्सरः। ब्रह्मोद्याश्च कथाः कुर्य्यात् पितॄणामेतदीप्सितम्। स्वाध्यायं श्रावयेत् पित्र्ये धर्म्मशास्त्राणि चैव हि। आख्यानानीतिहासांश्च पुराणानि खिलानि च। हर्षयेद्ब्राह्मणांस्तुष्टो भोजयेच्च शनैः शनैः। अन्नाद्येनासकृच्चैतान् गुणैश्च परिचोदयेत्। व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत्। कुतपञ्चासने दद्यात् तिलैश्च विकिरेन्महीम्। त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः। त्रीणि चात्र प्रशंसन्ति शौचमक्रोधमत्वराम्। अत्युष्णं सर्व्वमन्नं स्याद्भुञ्जीरंस्ते च वाग्यताः। न च द्विजातयो ब्रूयुर्दात्रा पृष्टा हविर्गुणान्। यावदुष्णं भवत्यन्नं यावदश्नन्ति वाग्यताः। पितरस्तावदश्नन्ति यावन्नोक्ता हविर्गुणाः। यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः। सोपानत्कश्च यद्भुङ्क्ते तद्वै रक्षांसि भुञ्जते। चाण्डालश्च वराहश्च कुक्कुटः श्वा तथैव च। रजस्वला च षण्ढश्च नेक्षेरन्नश्नतो द्विजान्। होमे प्रदाने भोज्ये च यदेभिरभिवीक्ष्यते। दैवे कर्म्मणि पित्र्ये वा तद्गच्छत्ययथातथम्। घ्राणेन शूकरो हन्ति पक्षवातेन कुक्कुटः। श्वा तु दृष्टिनिपातेन स्पर्शेनावरवर्णजः। खञ्जो वा यदि वा काणो दातुः प्रेष्योऽपि वा भवेत्। हीनातिरिक्तगात्रो वा तमप्यपनयेत्ततः। ब्राह्मणं भिक्षुकं वापि भोजनार्थमुपस्थितम्। ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत्। सार्व्ववर्णिकमन्नाद्यं सन्नीयाप्लाव्य वारिणा। समुत्सृजेद्भुक्तवतामग्रतो विकिरन् भुवि। असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्। उच्छिष्टं भागधेयं स्याद्दर्भेषु विकिरश्च यः। उच्छेषणं भूमिगतमजिह्मस्याशठस्य च। दासवर्गस्य तत् पित्र्ये भागधेयं प्रचक्षते। आसपिण्डक्रियाकर्म्म द्विजातेः संस्थितस्य तु। अदैवं भोजयेच्छ्राद्धं पिण्डमेकन्तु निर्व्वपेत्। सहपिण्डक्रियायान्तु कृतायामस्य धर्म्मतः। अनयैवावृता कार्य्यं पिण्डनिर्व्वपणं सुतैः। श्राद्धं भुक्त्वा य उच्छिष्टं वृषलाय प्रयच्छति। स मूढो नरकं याति कालसूत्रमवाक्शिराः। श्राद्धभुग्वृषलीतल्पं तदहर्योऽधिगच्छति। तस्याः पुरीषे तन्मासं पितरस्तस्य शेरते। पृष्ट्वा स्वदितमित्येवं तृप्तानाचामयेत्ततः। आचान्तांश्चानुजानीयादभि भो ! रम्यतामिति। स्वधास्त्वित्येव तं ब्रूयुर्ब्राह्मणास्तदनन्तरम्। स्वधाकारः परा ह्याशीः सर्व्वेषु पितृकर्म्मसु। ततो भुक्तवतां तेषामन्नशेषं निवेदयेत्। यथा ब्रूयुस्तथा कुर्य्यादनुज्ञातस्ततो द्विजैः। पित्र्ये स्वदितमित्येव वाच्यं गोष्ठे तु सुश्रुतम्। सम्पन्नमित्यभ्युदये दैवे रुचितमित्यपि। अपराह्णस्तथा दर्भा वास्तुसम्पादनं तिलाः। सृष्टिर्मृष्टिर्द्विजाश्चाग्र्याः श्राद्धकर्म्मसु सम्पदः। दर्भाः पवित्रं पूर्व्वाह्णो हविष्याणि च सर्व्वशः। पवित्रं यच्च पूर्व्वोक्तं विज्ञेया हव्यसम्पदः। मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतम्। अक्षारलवणञ्चैव प्रकृत्या हविरुच्यते। विसृज्य ब्राह्मणांस्तांस्तु नियतो वाग्यतः शुचिः। दक्षिणां दिशमाकाङ्क्षन् याचेतेमान् वरान् पितॄन्। दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च। श्रद्धा च नो मा व्यगमद्बहु देयञ्च नोऽस्त्विति। एवं निर्व्वपणं कृत्वा पिण्डांस्तांस्तदनन्तरम्। गां विप्रमजमग्निं वा प्राशयेदप्सु वा क्षिपेत्। पिण्डनिर्व्वपणं केचित् पुरस्तादेव कुर्व्वते। वयोभिः खादयन्त्यन्ये प्रक्षिपन्त्यनलेऽप्सु वा। पतिव्रता धर्म्मपत्नी पितृपूजनतत्परा। मध्यमन्तु ततः पिण्डमद्यात् सम्यक् सुतार्थिनी। आयुष्मन्तं सुतं सूते यशोमेधासमन्वितम्। धनवन्तं प्रजावन्तं सात्त्विकं धार्म्मिकं तथा। प्रक्षाल्य हस्तावाचम्य ज्ञातिप्रायं प्रकल्पयेत्। ज्ञातिभ्यः सत्कृतं दत्त्वा बान्धवानपि भोजयेत्। उच्छेषणन्तु तत्तिष्ठेद्यावद्विप्रा विसर्जिताः। ततो गृहबलिं कुर्य्यादिति धर्म्मो व्यवस्थितः। हविर्यच्चिररात्राय यच्चानन्त्याय कल्पते। पितृभ्यो विधिवद्दत्तं तत् प्रवक्ष्याम्यशेषतः। तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा। दत्तेन मासं

प्रीयन्ते विधिवत् पितरो नृणाम् । द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन तु । औरभ्रेणाथ चतुरः शाकुनेनाथ पञ्च वै । षण्मासान् छागमांसेन पार्षतेन च सप्त वै । अष्टावेणस्य मांसेन रौरवेण नवैव तु । दश मासांस्तु तृप्यन्ति वराहमहिषामिषैः । शशकूर्म्मयोस्तु मांसेन मासानेकादशैव तु । संवत्सरन्तु गव्येन पयसा पायसेन च । वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी । कालशाकं महाशल्काः खड्गलोहामिषं मधु । आनन्त्यायैव कल्पन्ते मुन्यन्नानि च सर्व्वशः । यत्किञ्चिन्मधुना मिश्रं प्रदद्यात्तु त्रयोदशीम् । तदप्यक्षयमेव स्याद्वर्षासु च मघासु च । अपि नः स कुले जायाद्यो नो दद्यात्त्रयोदशीम् । पायसं मधुसर्पिर्भ्यां प्राक्छाये कुञ्जरस्य च । यद्यद्ददाति विधिवत् सम्यक् श्रद्धासमन्वितः । तत्तत् पितॄणां भवति परत्रानन्तमक्षयम् । कृष्णपक्षे दशम्यादौ वर्ज्जयित्वा चतुर्द्दशीम् । श्राद्धे प्रशस्तास्तिथयो यथैता न तथेतराः । युक्षु कुर्व्वन् दिनर्क्षेषु सर्व्वान् कामान् समश्नुते । अयुक्षु तु पितॄन् सर्व्वान् प्रजां प्राप्नोति पुष्कलाम् । यथा चैवापरः पक्षः पूर्व्वपक्षाद्विशिष्यते । तथा श्राद्धस्य पूर्व्वाह्णादपराह्णो विशिष्यते । प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा । पित्र्यमा निधनात् कार्य्यं विधिवद्दर्भपाणिना । रात्रौ श्राद्धं न कुर्व्वीत राक्षसी कीर्त्तिता हि सा । सन्ध्ययोरुभयोश्चैव सूर्य्ये चैवाचिरोदिते । अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्व्वपेत् । हेमन्तग्रीष्मवर्षासु पाञ्चयज्ञिकमन्वहम् । न पैतृयज्ञियो होमो लौकिकेऽग्नौ विधीयते । न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः । यदेव तर्पयत्यद्भिः पितॄन् स्नात्वा द्विजोत्तमः । तेनैव कृत्स्नमाप्नोति पितृयज्ञक्रियाफलम् । वसून् वदन्ति वै पितॄन् रुद्रांश्चैव पितामहान् । प्रपितामहांस्त्वादित्यान् श्रुतिरेषा सनातनी । विघसाशी भवेन्नित्यं नित्यं वामृतभोजनः । विघसो भुक्तशेषन्तु यज्ञशेषं तथाऽमृतम् । एतद्वोऽभिहितं सर्व्वं विधानं पाञ्चयज्ञिकम् । द्विजातिमुख्यवृत्तीनां विधानं श्रूयतामिति" २अ० । "चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः । द्वितीयमायुषो भागं कृतदारो गृहे वसेत् । अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः । या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि । यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्म्मभिरगर्हितैः । अक्लेशेन शरीरस्य कुर्व्वीत धनसञ्चयम् । ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा । सत्यानृताख्यया वापि न श्ववृत्त्या कदाचन । ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् । मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् । सत्यानृतन्तु वाणिज्यं तेन चैवापि जीव्यते । सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्ज्जयेत् । कुशूलधान्यको वा स्यात् कुम्भीधान्यक एव वा । त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा । चतुर्णामपि चैतेषां द्विजानां गृहमेधिनाम् । ज्यायान् परः परो ज्ञेयो धर्मतो लोकजित्तमः । षट्कर्म्मको भवत्येषां त्रिभिरन्यः प्रवर्त्तते । द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति । वर्त्तयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः । इष्टीः पार्वायनान्तीयाः केवला निर्व्वपेत् सदा । न लोकवृत्तं वर्त्तेत वृत्तिहेतोः कथञ्चन । अजिह्मामशठां शुद्धां जीवेद्ब्राह्मणजीविकाम् । सन्तोषं परमास्थाय सुखार्थी संयतो भवेत् । सन्तोषमूलं हि सुखं दुःखमूलं विपर्य्ययः । अतोऽन्यतमया वृत्त्या जीवंस्तु स्नातको द्विजः । स्वर्ग्यायुष्ययशस्यानि व्रतानीमानि धारयेत् । वेदोदितं स्वकं कर्म नित्यं कुर्य्यादतन्द्रितः । तद्धि कुर्व्वन् यथाशक्ति प्राप्नोति परमां गतिम् । नेहेतार्थान् प्रसङ्गेन न विरुद्धेन कर्मणा । न विद्यमानेष्वर्थेषु नार्त्त्यामपि यतस्ततः । इन्द्रियार्थेषु सर्व्वेषु न प्रसज्जेत कामतः । अतिप्रसक्तिञ्चैतेषां मनसा सन्निवर्त्तयेत् । सर्व्वान् परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः । यथातथाध्यापयंस्तु सा ह्यस्य कृतकृत्यता । वयसः कर्मणोऽर्थस्य श्रुतस्याभिजनस्य च । वेषवाग्बुद्धिसारूप्यमाचरन् विचरेदिह । बुद्धिवृद्धिकराण्याशु धन्यानि च हितानि च । नित्यं शास्त्राण्यवेक्षेत निगमांश्चैव वैदिकान् । यथा यथा हि पुरुषः शास्त्रं समधिगच्छति । तथा तथा विजानाति विज्ञानञ्चास्य रोचते । ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा । नृयज्ञं पितृयज्ञञ्च यथाशक्ति न हापयेत् । एतानेके महायज्ञान् यज्ञशास्त्रविदो जनाः । अनीहमानाः सततमिन्द्रियेष्वेव जुह्वति । वाच्येके जुह्वति प्राणं प्राणे वाचञ्च सर्व्वदा । वाचि प्राणे च पश्यन्तो यज्ञनिर्वृत्तिमक्षयाम् । ज्ञानेनैवापरे विप्रा यजन्त्येतैर्म्मखैः सदा । ज्ञानमूलां क्रियामेषां पश्यन्तो ज्ञानचक्षुषा । अग्निहोत्रञ्च जुहुयादाद्यन्ते द्युनिशोः सदा । दर्शेन चार्द्धमासान्ते पौर्णमासेन चैव हि । शस्यान्ते नवशस्येष्ट्या तथर्त्त्वन्ते द्विजोऽध्वरैः ।

पशुना त्वयनस्यादौ समान्ते सौमिकैर्मखैः। नानिष्ट्वा नवशस्येष्ट्या पशुना चाग्निमान् द्विजः। नवान्नमद्यान्मांसं वा दीर्घमायुर्जिजीविषुः। नवेनानर्च्चिता ह्यस्य पशुहव्येन चाग्नयः। प्राणानेवात्तुमिच्छन्ति नवान्नामिषगर्द्धिनः। आसनाशनशय्याभिरद्भिर्मूलफलेन वा। नास्य कश्चिद्वसेद्गेहे शक्तितोऽनर्च्चितोऽतिथिः। पाषण्डिनो विकर्मस्थान् वैड़ालव्रतिकान् शठान्। हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत्। वेदविद्याव्रतस्नातान् श्रोत्रियान् गृहमेधिनः। पूजयेद्धव्यकव्येन विपरीतांश्च वर्जयेत्। शक्तितोऽपचमानेभ्यो दातव्यं गृहमेधिना। संविभागश्च भूतेभ्यः कर्त्तव्योऽनुपरोधतः।” इत्येवं स्नातकगृहस्थधर्माः उक्ताः शेषं स्नातकशब्दे वक्ष्यते। काशी०ख० ३८ अ० गृहस्थधर्मा उक्ता यथा

“न क्लेशेन विना द्रव्यमर्थहीने कुतः क्रिया। क्रियाहीने कुतो धर्मो धर्महीने कुतः सुखम्। सुखं हि सर्वदा काङ्क्ष्यं तच्च धर्मसमुद्भवम्। तस्माद्धर्मोऽत्र कर्त्तव्यश्चातुर्वर्ण्येन यत्नतः। न्यायागतेन द्रव्येण कर्त्तव्यं पारलौकिकम्। दानञ्च विधिना देयं काले पात्रे च भावतः। विधिहीनस्तथाऽपात्रे यो ददाति प्रतिग्रहम्। न केवलं हि तद्याति शेषन्तस्य च नश्यति। व्यसनार्थे कुटुम्बार्थे यद्दणार्थे च दीयते। तदक्षयं भवेदत्र परत्र च न संशयः। मातापितृविहीनं यो मौञ्जीपाणिग्रहादिभिः। संस्कारयेद्द्विजैरर्थैस्तस्य श्रेयस्त्वनन्तकम्। अग्निहोत्रैर्न तच्छ्रेयो नाग्निष्टोमादिभिर्मखैः। यच्छ्रेयः प्राप्यते ह्यर्थैर्द्विजे कस्मिन् प्रतिष्ठिते। पितृगेहे तु या कन्या रजः पश्येदसंस्कृता। भ्रूणहा तत्पिता ज्ञेयो वृषली सापि कन्यका। यस्तां परिणयेन्मोहात् स भवेद्वृषलीपतिः। तेन सम्भाषणं त्याज्यमपाङ्क्तेयेन सर्वदा। विज्ञाय दोषमुभयोः कन्यायाश्च वरस्य च। सम्बन्धं वाचयेत् पश्चादन्यथा दोषभाक् पिता। स्त्रियः पवित्राः सततं नैता दुष्यन्ति केनचित्। मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति। पूर्वं स्त्रिभिः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः। भुञ्जते मानुषाः पश्चान्नैता दुष्यन्ति केनचित्। स्त्रीणां शौचं ददौ सोमः पावकः सर्वमेध्यताम्। कल्याणवाणीं गन्धर्वस्तेन मेध्याः सदा स्त्रियः। कन्यां भुङ्क्ते रजःकालेऽग्निः शशी लोमदर्शने। स्तनोद्भेदे च गन्धर्वस्तत्प्रागेव प्रदीयते। दशरोमा त्वपत्यघ्नी कुलघ्नी भूनयौवना। पितृत्राविस्कृतरजास्ततस्ताः परिवर्ज्जयेत्। कन्यादानफलप्रेप्सुस्तस्माद्द्यादनग्निकाम्। अन्यथा न फलं दातुः प्रतिग्राही पतेदधः। कन्यासभुक्तां सोमाद्यैर्ददद्दानफलं लभेत्। दैवभुक्तां दद्दाता न स्वर्गमधिगच्छति। शयनासनयानानि कुतपं स्त्रीमुखं कुशम्। यज्ञपात्राणि सर्वाणि न दुष्यन्ति बुधाः क्वचित्। वत्सः प्रस्नवने मेध्यः, शकुनिः फलपातने। नार्य्यो रतिप्रयोगेषु श्वा मृगग्रहणे शुचिः। अजाश्वयोर्मुखं मेध्यं गावो मेध्याश्च पृष्ठतः। पादतो ब्राह्मणा मेध्याः स्त्रियो मेध्यास्तु सर्वतः। बलात्कारोपभुक्ता वा चौरहस्तगतापि वा। न त्याज्या दूषिता नारी नास्यास्त्यागो विधीयते। अम्लेन ताम्रशुद्धिः स्याच्छुद्धिः कांस्यस्य भस्मना। संशुद्धा रजसा नार्य्यो तटिनी वेगतः शुचिः। मनसापि हि या नेह चिन्तयेत् पुरुषान्तरम्। सोमया सह सौख्यानि भुङ्क्ते चात्रापि कीर्त्तिभाक्। पिता पितामहो भ्राता सकुल्यो जननी तथा। कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः। अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ। स्वयं त्वभावे दातृणां कन्या कुर्यात् स्वयं वरम्। हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम्। परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम्। व्यभिचारादृतौ शुद्धिर्गर्भे त्यागो विधीयते। गर्भभर्त्तृबधादौ च महत्यपि च कल्मषे। शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशः स्मृते। ते च स्वा चैव राज्ञस्तु ताश्च स्वा चाग्रजन्मनः। आरोप्य शूद्रां शयने विप्रो गच्छेदधोगतिम्। उत्पाद्य पुत्रं शूद्रायां ब्राह्मण्यादेव हीयते। दैवपित्र्यातिथेयानि तत्प्रधानानि यस्य तु। देवाद्यास्तानि नाश्नन्ति स च स्वर्गञ्च गच्छति। जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः। कृत्याभिर्निहितानीव नश्येयुस्तान्यसंशयम्। तदभ्यर्च्याः सुवासिन्यो भूषणाच्छादनाशनैः। भूतिकामैर्नरैर्नित्यं सत्कृतेषूत्सवेषु च। यत्र नार्य्यः प्रमुदिता भूषणाच्छादनाशनैः। रमन्ते देवतास्तत्र स्युस्तत्र सफलाः क्रियाः। यत्र तुष्यति भर्त्ता स्त्री स्त्रिया भर्त्ता च तुष्यति। तत्र वेश्मनि कल्याणं सम्पद्येत पदे पदे। जपोऽहुतो हुतो होमः प्रहुतो भौतिको बलिः। प्राशितं पितृसंतृप्तिरुक्तं ब्राह्मं द्विजार्चनम्। पञ्चयज्ञानिमान् कुर्वन् ब्राह्मणो नावसीदति। एतेषामननुष्ठानात् पञ्चसूनामवाप्नुयात्। ब्राह्मणं कुशलं पृच्छे-

हाङ्गजातमनामयम्। वैश्यं सुखं समागम्य शूद्रं सन्तोषमेव च। जातमात्रः शिशुस्तावद्यावदष्टौ समाः स्मृताः। भक्ष्याभक्ष्येषु नो दुष्येद्यावन्नैवोपनीयते। भरणं पोष्यवर्गस्य दृष्टादृष्टफलोदयम्। प्रत्यवायोऽप्यभरणे भर्त्तव्यस्तत् प्रयत्नतः। माता पिता गुरुः पत्नी त्वपत्यानि समाश्रिताः। अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्गा अमी नव। स जीवति पुमान् योऽत्र बहुभिश्चोपजीव्यते। जीवन्मृतोऽथ विज्ञेयः पुरुषः स्वोदरम्भरिः। दीनानाथविशिष्टेभ्यो दातव्यं भूतिमिच्छता। अदत्तदाना जायन्ते परभाग्योपजीविनः। विभागशीलसंयुक्तोदयावांश्च क्षमारतः। देवतातिथिभक्तस्तु गृहस्थो धार्मिकः स्मृतः। शर्वरीमध्ययामौ द्वौ हुतशेषञ्च यद्धविः। तत्र स्वपंस्तदश्नंश्च ब्राह्मणो नावसीदति। नवैतानि गृहस्थेन कार्याण्यभ्यागते सदा। सुधामयानि यत् सौम्यं वाक्यञ्चक्षुर्मनोसुखम्। अभ्युत्थानमिहायाते सस्नेहपूर्वभाषणम्। उपासनमनुव्रज्या गृहस्थोन्नतिहेतवे। तथेषद्व्ययुक्तानि कार्याण्येतानि वै नव। आसनं पादशौचञ्च यथाशक्त्यशनं क्षितिः। शय्या तृणं जलाभ्यङ्गदीपा गार्हस्थ्यसिद्धिदाः। तथा नव विकर्माणि त्याज्यानि गृहमेधिना। पैशुन्यं परदाराश्च द्रोहः क्रोधानृताप्रियम्। द्वेषो दम्भश्च माया च स्वर्गमार्गार्गलानि हि। नवावश्यककर्माणि कार्याणि प्रतिवासरम्। स्नानं सन्ध्या जपो होमः स्वाध्यायो देवतार्चनम्। वैश्वदेवन्तथातिथ्यं नवमं पितृतर्पणम्। नव गोप्यानि यान्यत्र मुने! तानि निशामय। जन्मर्क्षं मैथुनं मन्त्रो गृहच्छिद्रञ्च पञ्चमम्। आयुर्धनापमानं स्त्री न प्रकाश्यानि सर्वथा। नवैतानि प्रकाश्यानि रहः पापमकुत्सितम्। प्रायोग्यमृणशुद्धिश्च स्वान्वयः क्रयविक्रयौ। कन्यादानं गुणोत्कर्षौ नान्यत् केनापि कुत्रचित्। पात्रमित्रविनीतेषु दीनानाथोपकारिषु। मातापितृगुरुष्वेतन्नवकं दत्तमक्षयम्। निष्फलं नवकं दृष्टं चाटचारणतस्करे। कुवैद्ये कितवे धूर्त्ते शठे मल्ले च वन्दिनि। आपत्स्वपि न देयानि नव वस्तूनि सर्वदा। अन्वये सति सर्वस्वं दाराश्च शरणागतः। न्यासाधी कुलवृत्तिश्च निक्षेपं स्त्रीधनं सुतम्। यो ददाति स मूढात्मा प्रायश्चित्तैर्विशुद्ध्यति। एतन्नवानां नवकं ज्ञात्वा श्रियमवाप्नुयात्। अन्यच्च नवकं वच्मि सर्वेषां स्वर्गमार्गदम्। सत्यं शौचमहिंसा च क्षान्तिरार्जवं दया दमः। अस्तेयमिन्द्रियाक्रोधः सर्वेषां धर्मसाधनम्। अभ्यस्य नवतिश्चैनां स्वर्गमार्गप्रदीपिकाम्। सतामभिमतां पुण्यां गृहस्थो नावसीदति। जिह्वा भार्य्या सुतो भ्राता मित्रदाससमाश्रिताः। यस्यैते विनयाढ्याश्च तस्य सर्वत्र गौरवम्। पानं दुर्जनसंसर्गः पत्या च विरहाटनम्। स्वप्नोऽन्यगेहवासश्च नारीणां दूषणानि षट्। समार्घं धान्यमुद्धृत्य महार्घं यः प्रयच्छति। स हि वार्द्धुषिको नाम तस्यान्नं नैव भक्षयेत्। अपि माहिषिकं दृष्ट्वा मध्ये तु वृषलीपतिम्। अन्ते वार्द्धुषिकञ्चैव निराशाः पितरोगताः। महिषीत्युच्यते नारी या च स्याद्व्यभिचारिणी। तां प्रहृष्टां कामयते यः स माहिषिकः स्मृतः। स्वधर्मं या परित्यज्य परधर्मे वृषायते। वृषली सा हि विज्ञेया न शूद्रा वृषली भवेत्। यावदुष्णं भवत्यन्नं यावन्मौनेन भुज्यते। तावदश्नन्ति पितरो यावन्नोक्ता हविर्गुणाः। विद्याविनयसम्पन्ने श्रोत्रिये गृहमागते। क्रीडन्त्योषधयः सर्वा यास्यामः परमां गतिम्। भ्रष्टशौचव्रताचारे विप्रे वेदविवर्जिते। रोदित्यन्नं दीयमानं किं मया दुष्कृतं कृतम्। यस्य कोष्ठगतञ्चान्नं वेदाभ्यासेन जीर्य्यति। स तारयति दातारं दश पूर्वान् दशापरान्। न स्त्रीणां वपनं कार्यं न च गाः समनुव्रजेत्। न च रात्रौ वसेद्गोष्ठे न कुर्य्याद्वैदिकीं श्रुतिम्। सर्वान् केशान् समुद्धृत्य च्छेदयेदङ्गुलिद्वयम्। एवमेव तु नारीणां शिरसो मुण्डनं भवेत्। राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः। अकारयित्वा वपनं प्रायश्चित्तं तु निर्दिशेत्। केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत्। द्विगुणा दक्षिणा देया ब्राह्मणे वेदपारगे। अन्नं यो गृहीत्वा विवाहाग्निं गृहस्थ इव मन्यते। तस्य न भोक्तव्यं वृथापाको हि स स्मृतः। दाराग्निहोत्रदीक्षाञ्च कुरुते योऽग्रजे स्थिते। परीवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः। परिवेत्तिः परीवेत्ता याश्चैव परिविद्यते। सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः। क्लीबे देशान्तरस्थे च मूके प्रव्रजिते जडे। कुब्जे खर्वे च पतिते न दोषः परिवेदने। वेदाक्षराणि यावन्ति नियुञ्ज्यादर्थकारणात्। तावतीर्वै भ्रूणहत्या वेदविक्रयसम्भवेत्। यस्तु प्रव्रजितो भूत्वा सेवते मैथुनं पुनः। षष्टिं वर्षसहस्राणि विष्ठायां जायते कृमिः। शूद्रान्नं शूद्रसम्पर्कः शूद्रेण च सहासनम्। शूद्राद्वि-

द्यागमः कश्चित् ज्वलन्तमपि पातयेत् । शूद्रादाहृत्य निर्वापं ये पचन्त्यबुधा द्विजाः । ते यान्ति नरकं घोरं ब्रह्मतेजोविवर्ज्जिताः । हस्तदत्ताश्च ये स्नेहा व्यञ्जनं लवणानि च । दातारं नोपतिष्ठन्ति भोक्ता भुङ्क्ते तु किल्बिषम् । आयसेनैव पात्रेण यदन्नमुपनीयते । भोक्ता तद्विट्समं भुङ्क्ते दाता च नरकं व्रजेत् । अङ्गुल्या दन्तकाष्ठञ्च प्रत्यक्षलवणञ्च यत् । मृत्तिकाभक्षणं यच्च समं गोमांसभक्षणैः । पानीयं पायसं भैक्ष्यं घृतं लवणमेव च । हस्तदत्तं न गृह्णीयात् तुल्यं गोमांसभक्षणैः । अग्रतो निवसेन्मूर्खो दूरस्थश्च गुणान्वितः । गुणान्विताय दातव्यं नास्ति मूर्खे व्यतिक्रमः । ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्ज्जिते । ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते । सन्निकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत् । भोजने चैव दाने च दहत्यासप्तमं कुलम् । गोरक्षकान् वाणिजकान् तथा कारुकुशीलवान् । प्रेष्यान् वार्द्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत् । देवद्रव्यविभागेन ब्रह्मस्वहरणेन च । कुलान्याशु विनश्यन्ति ब्राह्मणातिक्रमेण च । मा देहीति च यो ब्रूयाद्देवाग्निब्राह्मणेषु च । तिर्य्यग्योनिशतं गत्वा चाण्डालेष्वभिजायते । वाण्या यच्च प्रतिज्ञातं कर्म्मणा नोपपादितम् । ऋणं तद्धर्म्मसंयुक्तमिह लोके परत्र च । विघसाशी भवेन्नित्यं नित्यञ्चामृतभोजनः । यज्ञशेषोऽमृतं भुक्तशेषन्तु विघसं विदुः । सव्यादंशात् परिभ्रष्टे नाभिदेशव्यवस्थिते । यस्ते च एकवासास्तं दैवे पित्र्ये च वर्ज्जयेत् । यदेव तर्पयत्यद्भिः पितॄन् स्नात्वा द्विजोत्तमः । तेनैव सर्व्वमाप्नोति पितृयज्ञक्रियाफलम् । हस्तं प्रक्षाल्य गण्डूषं यः पिवेद्भोजनान्तरे । दैवं पित्र्यं तथात्मानं त्रयं स उपघातयेत् । गणान्नं गणिकान्नञ्च यदन्नं ग्रामयाजके । स्त्रीणां प्रथमगर्भेषु भुक्त्वा चान्द्रायणञ्चरेत् । पक्षे वा यदि वा मासे यस्य गेहेऽश्नाति न द्विजः । भुक्त्वा दुरात्मनस्तस्य चरेच्चान्द्रायणं व्रतम् । सतोनान्दोक्षितानाञ्च यतीनां व्रतचारिणाम् । एतेषां सूतकन्नास्ति आर्त्विज्यं कर्म्म कुर्व्वताम् । अजीर्णेऽभ्युदिते वान्ते श्मश्रुकर्म्मणि मैथुने । दुःस्वप्ने दुर्जनस्पर्शे स्नानमेव विधीयते । चैत्यवृक्षं चितिं यूपं शवनिर्माल्यभोजनम् । वेदविक्रयिणं स्पृष्ट्वा सचेलो जलमाविशेत् । अग्न्यगारे गवां गोष्ठे देवब्राह्मणसन्निधौ । स्वाध्याये भोजने पाने पादुके वै विवर्ज्जयेत् । खलक्षेत्रगतं धान्यं कूपवापीषु यत् जलम् । अग्राह्यादपि तद्ग्राह्यं यच्च गोष्ठगतं पयः । यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः । सोपानत्कश्च यो भुङ्क्ते तद्वै रक्षांसि भुञ्जते । यातुधानाः पिशाचाश्च राक्षसाः क्रूरकर्म्मिणः । हरन्ति रसमन्नस्य मण्डलेन विवर्ज्जितम् । ब्रह्माद्याश्च सुराः सर्व्वे वशिष्ठाद्या महर्षयः । मण्डलं चोपजीवन्ति ततः कुर्व्वीत मण्डलम् । ब्राह्मणे चतुरस्रं स्यात् त्र्यस्रं वै बाहुजन्मनः । वर्त्तुलन्तु विशः प्रोक्तं शूद्रस्याभ्युक्षणं स्मृतम् । नोत्सङ्गे भाजनं कृत्वा नो पाणौ नैव कर्पटे । नासने न च शय्यायां भुञ्जीत न मलार्द्दितः । धर्म्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः । क्रीडार्थमपि यद्ब्रूयुः स धर्म्मः परमः स्मृतः । रात्रौ दधियुतं द्रव्यं धर्म्मकामो न भक्षयेत् । अश्नतो धर्म्महानिः स्यात् व्याधिभिश्चोपपीड्यते । फाणितं गोरसं तोयं लवणं मधु काञ्जिकम् । हस्तेन ब्राह्मणो दत्त्वा कृच्छ्रं चान्द्रायणं चरेत् । गन्धाभरणमाल्यानि यः प्रयच्छति धर्म्मवित् । स दुर्गन्धिः सदाऽतुष्टो यत्र यत्रोपजायते । नीलीरक्तञ्च यद्वस्त्रं दूरतस्तद्विवर्ज्जयेत् । स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यति । पालनाद्विक्रयाच्चैव तद्वृत्तेरुपजीवनात् । अपवित्रो भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुद्ध्यति । स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम् । वृथा तस्य महायज्ञा नीलीवासो बिभर्त्ति यः । नीलीरक्तं यदा वस्त्रं द्विजः स्वाङ्गेषु धारयेत् । तन्तुसंघातसंख्याते नरके स वसेद्ध्रुवम् । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति । अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम् । वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम् । वैश्वदेवेन होमेन देवताभ्यर्च्चनैर्ज्जपैः । अमृतं तेन विप्रान्नं ऋग्यजुःसामसंस्कृतम् । व्यवहारानुरूपेण न्यायेन च सदर्ज्जितम् । क्षत्रियस्य पयस्तेन प्रजापालनतो भवेत् । कृषिगोरक्षवाणिज्यादन्नमुत्पाद्य यच्छति । सीतायज्ञविधानेन वैश्यान्नं तेन सम्मतम् । अज्ञानतिमिरान्धस्य मद्यपानरतस्य च । रुधिरं तेन शूद्रान्नं वेदमन्त्रविवर्ज्जितम् । न वृथा शपथं कुर्य्यात् स्वल्पेऽप्यर्थे नरो बुधः । वृथा हि शपथं कुर्व्वन् प्रेत्येह च विनश्यति । कामिनीषु विवाहेषु गवां भक्ष्ये धनक्षये । ब्राह्मणाभ्युपपत्तौ च शपथे नास्ति पातकम् । सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः । गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्व्वैस्तु पा-

तकैः। अग्निं वाऽऽहारयेदेनमप्सु चैनं निमज्जयेत्। स्पर्शयेत् पुत्रदाराणां शिरांस्येनञ्च वा पृथक्।" अविकमाचारशब्दे ६२२ पृष्ठादौ द्रष्टव्यम्।

स च धर्म्मो व्याससंहितायाम् ३अ० उक्तो यथा

"नित्यं नैमित्तिकं काम्यमिति कर्म्म त्रिधा मतम्। त्रिविधं तच्च वक्ष्यामि गृहस्थस्यावधार्यताम्। यामिन्याः पश्चिमे यामे त्यक्तनिद्रो हरिं स्मरेत्। आलोक्य मङ्गलद्रव्यं कर्म्मावश्यकमाचरेत्। कृतशौचो निषेव्याग्निं दन्तान् प्रक्षाल्य वारिणा। स्नात्वोपास्य द्विजः सन्ध्यां देवादींश्चैव तर्पयेत्। वेदवेदाङ्गशास्त्राणि इतिहासानि चाभ्यसेत्। अध्यापयेच्च सच्छिष्यान् सद्विप्रांश्च द्विजोत्तमः। अलब्धं प्रापयेल्लब्ध्वा क्षणमात्रं समापयेत्। समर्थो हि समर्थेन नाविज्ञातः क्वचिद्वसेत्। सरित्सरःसु वापीषु गर्त्तप्रस्रवणादिषु। स्नायीत यावदुद्धृत्य पञ्च पिण्डानि वारिणा। तीर्थाभावेऽप्यशक्त्या वा स्नायात्तोयैः समाहृतैः। गृहाङ्गनगतस्तत्र यावदम्बरपीडनम्। स्नानमन्त्रैस्ततः कुर्य्यात् पावनैश्चापि मार्ज्जयेत्। मन्त्रैः प्राणांस्त्रिरायम्य सौरैश्चार्कं विलोकयेत्। तिष्ठन्, स्थित्वा तु गायत्रीं ततः स्वाध्यायमारभेत्। ऋचाञ्च यजुषां साम्नामथर्वाङ्गिरसामपि। इतिहासपुराणानां वेदोपनिषदां द्विजः। शक्त्या सम्यक् पठेन्नित्यमल्पमप्यासमापनात्। स यज्ञदानतपसामखिलं फलमाप्नुयात्। तस्मादहरहर्वेदं द्विजोऽधीयीत वाग्यतः। धर्म्मशास्त्रेतिहासादि सर्व्वेषां शक्तितः पठेत्। कृतस्वाध्यायः प्रथमं तर्पयेच्चाथ देवताः। जान्वा च दक्षिणं दर्भैः प्रागग्रैः सयवैस्तिलैः। एकैकाञ्जलिदानेन प्रकृतिस्थोपवीतकः। समजानुद्वयो ब्रह्मसूत्रधार उदङ्मुखः। तिर्य्यग्दर्भैश्च वामाग्रैर्यवैस्तिलविमिश्रितैः। अम्भोभिरुत्तरक्षिप्तैः कनिष्ठामूलनिर्गतैः। द्वाभ्यां द्वाभ्यामञ्जलिभ्यां मनुष्यांस्तर्पयेत्ततः। दक्षिणाभिमुखः सव्यजान्वा च द्विगुणैः कुशैः। तिलैर्जलैश्च देशिन्या मूलदर्भाद्विनिःसृतैः। दक्षिणांसोपवीतः स्यात् क्रमेणाञ्जलिभिस्त्रिभिः। सन्तर्पयेद्दिव्यपितॄंस्तत्परं च पितॄन् स्वकान्। मातृमातामहांस्तद्वत्त्रीनेवं हि त्रिभिस्त्रिभिः। मातामहानां येऽप्यन्ये गोत्रिणो दाहवर्ज्जिताः। तानेकाञ्जलिदानेन तर्पयेच्च पृथक् पृथक्। असंस्कृतप्रमीता ये प्रेतसंस्कारवर्ज्जिताः। वस्त्रनिष्पीडनाम्भोभिस्तेषामाप्यायनम्भवेत्। अतर्पितेषु पितृषु वस्त्रं निष्पीडयेच्च यः। निराशाः पितरस्तस्य भवन्ति सुरमानुषाः। पयोदर्भस्वधाकारगोत्रनामतिलैर्भवेत्। सुदत्तं तत्पुनस्तेषामेकेनापि वृथा विना। अन्यचित्तेन यद्दत्तं यद्दत्तं विधिवर्ज्जितम्। अनासनस्थितेनापि तज्जलं रुधिरायते। एवं सन्तर्पिताः कामैस्तर्पकांस्तर्पयन्ति च। ब्रह्मविष्णुशिवादित्यमित्रवरुणनामभिः। पूजयेल्लक्षितैर्मन्त्रैर्वेदमन्त्रोक्तदेवताः। उपस्थाय रवेः काष्ठां पूजयित्वा च देवताः। ब्रह्माग्नीन्द्रौषधीजीवविष्णुनामहृतांहसाम्। रूपां यत्तेति सत्कायं नमस्कारैः स्वनामभिः। कृत्वा मुखं समालभ्य स्नानमेवं समाचरेत्। ततः प्रविश्य भवनमावसथ्ये हुताशने। पाकयज्ञांश्च चतुरो विदध्याद्विधिवद्द्विजः। अनाहितावसथ्याग्निरादायान्नं घृतप्लुतम्। शाकलेन विधानेन जुहुयाल्लौकिकेऽनले। व्यस्ताभिर्व्याहृतिभिश्च समस्ताभिस्ततः परम्। षड्भिर्देवकृतस्येति मन्त्रवद्भिर्यथाक्रमम्। प्राजापत्यं स्विष्टकृतं हुत्वैवं द्वादशाहुतीः। ओङ्कारपूर्व्वः स्वाहान्तस्त्यागः स्विष्टविधानतः। भुवि दर्भान् समास्तीर्य्य बलिकर्म्म समाचरेत्। विश्वेभ्यो देवेभ्य इति सर्व्वभूतेभ्य एव च। भूतानां पतये चेति नमस्कारेण शास्त्रवित्। दद्याद्बलित्रयञ्चाग्ने पितृभ्यश्च स्वधा नमः। पात्रनिर्णेजनं वारि वायव्यां दिशि निःक्षिपेत्। उद्धृत्य षोडशग्रासमात्रमन्नं घृतोक्षितम्। इदमन्नं मनुष्येभ्यो हन्तेत्युक्त्वा समुत्सृजेत्। गोत्रनामस्वधाकारैः पितृभ्यश्चापि शक्तितः। षड्भ्योऽन्नमन्वहं दद्यात् पितृयज्ञविधानतः। वेदादीनां पठेत् किञ्चिदल्पं ब्रह्ममुखाप्तये। ततोऽन्यदन्नमादाय निर्गत्य भवनाद्बहिः। काकेभ्यः श्वपचेभ्यश्च प्रक्षिपेद्ग्रासमेव च। उपविश्य गृहद्वारि तिष्ठेद्यावन्मुहूर्त्तकम्। अप्रमत्तोऽतिथिं लिप्सुर्भावशुद्धः प्रतीक्षकः। आगतं दूरतः श्रान्तं भोक्तुकाममकिञ्चनम्। दृष्ट्वा सम्मुखमभ्येत्य सत्कृत्य प्रश्रयार्च्चनैः। पादधावनसम्मानाभ्यञ्जनादिभिरर्च्चितः। त्रिदिवं प्रापयेत्सद्यो यज्ञस्याभ्यधिकोऽतिथिः। कालागतोऽतिथिर्दृष्टवेदपारो गृहागतः। द्वावेतौ पूजितौ स्वर्गं नयतोऽधस्त्वपूजितौ। विवाह्यस्नातकक्ष्माभृदाचार्य्यसुहृदृत्विजः। अर्घ्या भवन्ति धर्म्मेण प्रतिवर्षं गृहागताः। गृहागताय सत्कृत्य श्रोत्रियाय यथाविधि। भक्त्योपकल्पयेदेकं महाभागं ,विसर्ज्जयेत्। विसर्ज्जयेदनुव्रज्य सुतृप्तश्रोत्रियातिथीन्। मित्रमातुलसम्बन्धि-

बान्धवान् समुपागतान्। भोजयेद्गृहिणोभिक्षां सत्कृतां भिक्षुकोऽर्हति। स्वाद्वन्नमश्नन्स्वादु ददद्गच्छत्यधोगतिम्। गर्भिण्यातुरभृत्येषु बालवृद्धातुरादिषु। बुभुक्षितेषु भुञ्जानो गृहस्थोऽश्नाति किल्विषम्। नाद्यादगृध्येन्न पारक्यं कदाचिदनिमन्त्रितः। निमन्त्रितोऽपि निन्द्येन प्रत्याख्यानं द्विजोऽर्हति। शूद्राभिशस्तवार्धुष्यवाग्दुष्टक्रूरतस्कराः। क्रुद्धापविद्धवद्धोपवधबन्धनजीविनः। शैलूषशौण्डिकोन्मत्तोन्मत्तव्रात्यव्रतच्युताः। नग्ननास्तिकनिर्लज्जपिशुनव्यसनान्विताः। कदर्य्यस्त्रीजितानार्य्यपरवादकृता नराः। अनीशाः कीर्त्तिमन्तोऽपि राजदेवस्वहारकाः। शयनासनसंसर्गवृत्तकर्मादिदूषिताः। अश्रद्दधानाः पतिता भ्रष्टाचारादयश्च ये। अभोज्यान्नाः स्युरन्नादो यस्य यः स्यात् स तत्समः। नापितान्वयमित्रार्द्धसीरिणो दासगोपकाः। शूद्राणामप्यमीषान्तु भुक्त्वान्नं नैव दुष्यति। धर्म्मेणान्योन्यभोज्यान्ना द्विजास्तु विदितान्वयाः। स्ववृत्त्योपार्जितं मेध्यमाकरस्थं समाक्षिकम्। अश्वलीढमगोघ्रातमस्पृष्टं शूद्रवायसैः। अनुच्छिष्टमसंदुष्टमपर्य्युषितमेव च। अस्नानवाह्यमन्नाद्यमाद्यं नित्यं सुसंस्कृतम्। कृशराऽपूपसंयावपायसं शष्कुलीति च। नाश्नीयाद्ब्राह्मणोमांसमनियुक्तः कथञ्चन। क्रतौ श्राद्धे नियुक्तो वा अनश्नन् पतति द्विजः। मृगयोपार्जितं मांसमभ्यर्च्य पितृदेवताः। क्षत्त्रियो, हीनशौर्यस्तत् क्रीत्वा वैश्योऽपि धर्म्मतः। द्विजोजग्ध्वा वृथामांसं हत्वाप्यविधिना पशून्। निरयेष्वक्षयं वासमाप्नोत्याचन्द्रतारकम्। सर्व्वान् कामान् समासाद्य फलमश्वमखस्य च। मुनिसाम्यमवाप्नोति गृहस्थो मांसवर्जनात्। द्विजैर्भोज्यानि गव्यानि माहिषाणि पयांसि च। पलाण्डुश्वेतवृन्ताकरक्तमूलकमेव च। गृञ्जनारुणवृक्षासृग्जतुगर्भफलानि च। अकालकुसुमादीनि द्विजोजग्ध्वैन्दवं चरेत्। वाग्दूषितमविज्ञातमन्यपीडितकार्य्यपि। भूतेभ्योऽन्नमदत्त्वा च तदन्नं गृहिणोदहेत्। हैमराजतकांस्येषु पात्रेष्वद्यात् सदा गृही। तदभावे साधुगन्धलोध्रद्रुमलतासु च। पलाशपद्मपत्रेषु गृहस्थोभोक्तुमर्हति। अभ्युक्ष्यान्नं नमस्कारैर्भुवि दद्याद्बलित्रयम्। भूपतये भुवः पतये भूतानां पतये तथा। अपः प्राश्य ततः पश्चात् पञ्चप्राणाहुतिक्रमात्। स्वाहाकारेण जुहुयाच्छेषमद्याद्यथासुखम्। अनन्यचित्तोभुञ्जीत वाग्यतोऽन्नमकुत्सयन्। आ तृप्तेरन्नमश्नीयादक्षुमं पात्रमुत्सृजेत्। उच्छिष्टमन्नमुद्धृत्य ग्रासमेकं भुवि क्षिपेत्। आचान्तः साधुसङ्गेन सद्विद्यापठनेन च। वृत्तवृद्धकथाभिश्च शेषाहमतिवाहयेत्। सायं सन्ध्यामुपासीत हुत्वाग्निं भृत्यसंयुतः। आपोशानक्रियापूर्व्वमश्नीयादन्वहं द्विजः। सायमप्यतिथिः पूज्यो होमकालागतोऽनिशम्। श्रद्धया शक्तितोनित्यं श्रुतं हन्यादपूजितः। नातितृप्त उपस्पृश्य प्रक्षाल्य चरणौ शुचिः। अप्रत्यगुत्तरशिराः शयीत शयने शुभे। शक्तिमानुदिते काले स्नानं सन्ध्यां न हापयेत्। ब्राह्मे मुहूर्त्ते चोत्थाय चिन्तयेद्धितमात्मनः। शक्तिमान् मतिमान् नित्यं वृत्तमेतत् समाचरेत्”।

वृहत्पराशरे तु तत्कृत्यं विस्तरतोविधानतश्चोक्तं विस्तरभयात् नोद्धृतम्।

दिवसीयमुहूर्त्तभेदे गृहस्थकर्त्तव्यधर्म्मभेदमाह दक्षः।

“प्रातरुत्थाय कर्त्तव्यं यद्द्विजेन दिने दिने। तत् सर्व्वं संप्रवक्ष्यामि द्विजानामुपकारकम्। उदयास्तमयं यावन्न विप्रः क्षणिकोभवेत्। नित्यनैमित्तिकैर्युक्तः काम्यैश्चान्यैरगर्हितैः। यः स्वकर्म्म परित्यज्य यदन्यत् कुरुते द्विजः। अज्ञानाद्यदि वा मोहात् स तेन पतितो भवेत्। दिवसस्याद्यभागे तु कृत्यं तस्योपदिश्यते। द्वितीये च तृतीये च चतुर्थे पञ्चमे तथा। षष्ठे च सप्तमे चैव अष्टमे च पृथक् पृथक्। विभागेष्वेषु यत्कर्म्म तत्प्रवक्ष्याम्यशेषतः। उषःकाले तु संप्राप्ते शौचं कृत्वा यथार्थवत्। ततः स्नानं प्रकुर्व्वीत दन्तधावनपूर्व्वकम्। अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः। स्रवत्येष दिवा रात्रौ प्रातःस्नानं विशोधनम्। क्लिद्यन्ति हि प्रसुप्तस्य इन्द्रियाणि स्रवन्ति च। अङ्गानि समतां यान्ति उत्तमान्यधमैः सह। नानास्वेदसमाकीर्णः शयनादुत्थितः पुमान्। अस्नात्वा नाचरेत् कर्म्म जपहोमादि किञ्चन। प्रातरुत्थाय यो विप्रः प्रातः स्नायी भवेत् सदा। समस्तजन्मजं पापं त्रिभिर्वर्षैर्व्यपोहति। उषस्युषसि यत् स्नानं सन्ध्यायामुदिते रवौ। प्राजापत्येन तत्तुल्यं महापातकनाशनम्। प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं हि तत्। सर्व्वमर्हति पूतात्मा प्रातःस्नायी जपादिकम्। स्नानादनन्तरं तावदुपस्पर्शनमुच्यते। अनेन तु विधानेन आचान्तः शुचितामियात्। प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदम्बु वीक्षितम्।

संहत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततोमुखम् । संहत्य तिसृभिः पूर्वमास्यमेवमुपस्पृशेत् । ततः पादौ समभ्युक्ष्य अङ्गानि समुपस्पृशेत् । अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम् । अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः । कनिष्ठाङ्गुष्ठया नाभिं हृदयञ्च तलेन वै । सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत् । सन्ध्यायाञ्च प्रभाते च मध्याह्ने च ततः पुनः । सन्ध्यां नोपासते यस्तु ब्राह्मणोहि विशेषतः । स जीवन्नेव शूद्रः स्यान्मृतः श्वा चैव जायते । सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु । यदन्यत् कुरुते कर्म न तस्य फलमश्नुते । सन्ध्याकर्मावसाने तु स्वयं होमोविधीयते । स्वयं होमे फलं यत्तु तदन्येन न जायते । ऋत्विक् पुत्त्रोगुरुर्भ्राता भागिनेयोऽथ विट्पतिः । एभिरेव हुतं यत्तु तद्धुतं स्वयमेव हि । देवकार्यं ततः कृत्वा गुरुमङ्गलवीक्षणम् । देवकार्याणि पूर्वाह्ने मनुष्याणाञ्च मध्यमे । पितॄणामपराह्ने च कार्याण्येतानि यत्नतः । पौर्वाह्णिकन्तु यत् कर्म यदि तत् सायमाचरेत् । न तस्य फलमाप्नोति वन्ध्यस्त्रीमैथुनं यथा । दिवसस्याद्यभागे तु सर्वमेतद्विधीयते । द्वितीये च तथा भागे वेदाभ्यासोविधीयते । वेदाभ्यासो हि विप्राणां परमं तप उच्यते । ब्रह्मयज्ञः स विज्ञेयः षडङ्गसहितस्तु सः । वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः । ततोदानञ्च शिष्येभ्यो वेदाभ्यासो हि पञ्चधा । समित्पुष्पकुशादीनां स कालः समुदाहृतः । तृतीये चैव भागे तु पोष्यवर्गार्थसाधनम् । पिता माता गुरुर्भार्या प्रजा दीनाः समाश्रिताः । अभ्यागतोऽतिथिश्चान्यः पोष्यवर्ग उदाहृतः । ज्ञातिर्बन्धुजनः क्षीणस्तथाऽनाथः समाश्रितः । अन्योऽप्यधनयुक्तश्च पोष्यवर्ग उदाहृतः । भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् । नरकं पीडने चास्य तस्माद्यत्नेन तं भरेत् । सार्वभौतिकमन्नाद्यं कर्त्तव्यन्तु विशेषतः । ज्ञानविद्भ्यः प्रदातव्यमन्यथा नरकं व्रजेत् । स जीवति य एवैकोबहुभिश्चोपजीव्यते । जीवन्तोऽमृतकाश्चान्ये य आत्मम्भरयो नराः । बह्वर्थे जीव्यते कश्चित् कुटुम्बार्थे तथा परः । आत्मार्थेऽन्यो न शक्नोति स्वोदरेणापि दुःखितः । दीनानाथविशिष्टेभ्योदातव्यं भूतिमिच्छता । अदत्तदाना जायन्ते परभाग्योपजीविनः । यद्ददाति विशिष्टेभ्यो यज्जुहोति दिने दिने । तत्तु वित्तमहं मन्ये शेषं कस्यापि रक्षति । चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत् । तिलपुष्पकुशादीनि स्नानञ्चाकृत्रिमे जले । नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते । तेषां मध्ये तु यन्नित्यं तत्पुनर्भिद्यते त्रिधा । मलापकर्षणं पश्चान्मन्त्रवत्तु जले स्मृतम् । सन्ध्यास्नानमुभाभ्याञ्च स्नानभेदा प्रकीर्त्तिताः । मार्जनं जलमध्ये तु प्राणायामोयतस्ततः । उपस्थानं ततः पश्चात् सावित्र्या जप उच्यते । सविता देवता यस्या मुखमग्निस्त्रिधा स्थितः । विश्वामित्र ऋषिश्छन्दो गायत्री सा विशिष्यते । पञ्चमे च तथाभागे संविभागो यथार्हतः । पितृदेवमनुष्याणां कीटानाञ्चोपदिश्यते । देवैश्चैव मनुष्यैश्च तिर्यग्भिश्चोपजीव्यते । गृहस्थः प्रत्यहं यस्मात्तस्माज्ज्येष्ठाश्रमी गृही । त्रयाणामाश्रमाणान्तु गृहस्थो योनिरुच्यते । तेनैव सीदमानेन सीदन्तीहेतरे त्रयः । मूलप्राणो भवेत् स्कन्दः स्कन्दाच्छाखाः सपल्लवाः । मूलेनैव विनष्टेन सर्वमेतद्विनश्यति । तस्मात् सर्वप्रयत्नेन रक्षितव्यो गृहाश्रमी । राज्ञा चान्यैस्त्रिभिः पूज्यो माननीयश्च सर्वदा । गृहस्थोऽपि क्रियायुक्तो न गृहेण गृहाश्रमी । न चैव पुत्रदारेण स्वकर्मपरिवर्जितः । अस्नात्वा चाप्यहुत्वा चाजप्त्वाऽदत्त्वा च मानवः । देवादीनामृणी भूत्वा नरकं प्रतिपद्यते । एक एव हि भुङ्क्तेऽन्नमपरोऽन्नेन भुज्यते । न भुज्यते सः एवैको यो भुङ्क्तेऽन्नं ससाक्षिकम् । विभागशीलो यो नित्यं क्षमायुक्तोदयापरः । देवतातिथिभक्तश्च गृहस्थः स तु धार्म्मिकः । दया लज्जा क्षमा श्रद्धा प्रज्ञा योगः कृतज्ञता । एते यस्य गुणाः सन्ति स गृही मुख्य उच्यते । संविभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत् । भुक्त्वा तु सुखमास्थाय तदन्नं परिणामयेत् । इतिहासपुराणाद्यैः षष्ठञ्च सप्तमं नयेत् । अष्टमे लोकयात्रा तु बहिः सन्ध्या ततः पुनः । होमो भोजनकञ्चैव यच्चान्यद्गृहकृत्यकम् । कृत्वा चैवं ततः पश्चात् स्वाध्यायं किञ्चिदाचरेत् । प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत् । यामद्वयंशयानो हि ब्रह्मभूयाय कल्पते । नैमित्तिकानि काम्यानि निपतन्ति यथा यथा । तथा तथैव कार्याणि न कालस्तु विधीयते । अस्मिन्नेव प्रयुञ्जानो ह्यस्मिन्नेव तु लीयते । तस्मात् सर्वप्रयत्नेन कर्त्तव्यं सुखमिच्छता । सर्वत्र मध्यमौ यामौ हुतशेषं हविश्च यत् । भुञ्जानश्च शयानश्च ब्राह्मणो नावसीदति ।

"कलौ विशेषञ्च गृहस्थकर्त्तव्यकर्म्मादिकं वृहत्पराशरेणोक्तं कृषिशब्देऽनुक्तत्वात् प्रसङ्गादिहोच्यते यथा १अ०

"अतःपरं गृहस्थस्य कर्म्माचारं कलौ युगे। धर्म्मसाधारणं साक्षाच्चतुर्व्वर्ण्यं क्रमागतम्। युष्माकं सम्प्रवक्ष्यामि पाराशरप्रचोदितम्। षट्कर्म्मसहितोविप्रः कृषिवृत्तिं समाश्रयेत्। हीनाङ्गं व्याधिसंयुक्तं प्राणहीनञ्च दुर्ब्बलम्। क्षुद्युक्तं तृषितं श्रान्तमनड्वाहं न वाहयेत्। स्थिराङ्गं नीरुजं तृप्तं शान्तं षण्ढविवर्ज्जितम्। अदृष्टं सबलप्राणमनड्वाहं तु वाहयेत्। वाहयेद्दिवसस्यार्द्धं पश्चात् स्नानं समाचरेत्। कृशैर्नैव कृषिं कुर्य्यात्सर्व्वथा धेनुसंग्रहः। बन्धनं पालनं रक्षां द्विजः कुर्य्याद्गृहे गवाम्। वत्साश्च यत्नतो रक्ष्या वर्द्धन्ते ते यथाक्रमम्। न दूरे तास्तु मोक्तव्या चरणाय कदाचन। दूरे गावश्चरन्त्यो वै न भवन्ति शुभायनाः। प्रातरेव हि दोग्धव्या दुह्याः सायं तथा गृहे। दोग्धुर्व्विपर्य्यये नैव वर्द्धन्ते ताः कदाचन। अनादेयतृणं जग्ध्वा स्रवन्त्यनुदिनं पयः। तुष्टिकृद्देवतादीनां पूज्या गावः कथन्न ताः। यस्याः शिरसि ब्रह्मास्ते स्कन्धदेशे शिवः स्मृतः। पृष्ठे विष्णुस्तथा तस्यौ श्रुतयश्चरणेषु तु। या अन्या देवताः काश्चित्तस्या लोमसु ताः स्थिताः। सर्व्वदेवमयी गौस्तु तुष्येत्तद्भक्तितो हरिः। हरति स्पर्शनात्पापं पयसा पोषयन्ति याः। प्रापयन्ति दिवं दत्ताः पुण्या गावः कथन्न ताः। यच्छफाहतभूमेस्तु उद्गताः पांशुसंस्पृशः। प्रीणयेत् पुरुषस्यैनो वन्द्या गावः कथन्न ताः। शकृन्मूत्रं हि यस्यास्तु पीतं पुनाति पातकम्। किमपूज्यं हि तस्या गोरिति पाराशरोऽब्रवीत्। गौरवत्सा न दोग्धव्या न चैव गर्भसन्धिनी। प्रसूता च दशाहार्व्वाग्दोग्धा चेन्नरकं व्रजेत्। दुर्ब्बला व्याधिसंयुक्ता पुष्पिता या द्विवत्सभूः। सा साधुभिर्न्न दोग्धव्या वर्णिभिः सुखमीप्सुभिः। कुलान्ते पुष्पिता गावः कुलान्ते बहुवत्सलाः। कुलान्ते चलचित्ता स्त्री कुलान्ते बन्धुविग्रहः। एकत्र पृथिवी सर्व्वा सशैलवनकानना। तथा गौर्ज्यायसी साक्षादेकत्रोभयतोमुखी। यथोक्तविधिना चैता वर्णैः पाल्यास्तु पूजिताः। पालयेत्पूजयच्चेताः स प्रेत्येह च मोदते। दक्षिणाभिमुखा गाव उत्तराभिमुखा अपि। बन्धनीयास्तथैतास्तु न च प्राक्पश्चिमामुखाः। गोष्ठ वाजिशालायां सुतीक्ष्णं लोहदात्रकम्। स्थाप्यं तु सर्व्वदा तस्यां गवि लुप्तविमोक्षणात्। गावो देयाः सदा रक्ष्याः पोष्याः पाल्याश्च सर्व्वदा। ताडयन्ति च ये पापा ये चाकर्षन्ति ता नराः। नरके पच्यन्तेऽङ्गानि श्वासेन च प्रपीडिताः। सपशुचर्म्मदण्डेन मृदु तासां निवर्त्तनम्। गच्छ गच्छेति तां ब्रूयात् मा मा भैरिति वारयेत्। संस्पृशन् गां नमस्कृत्य कुर्य्यात्तान्तु प्रदक्षिणम्। प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा। तृणोदकादिसंयुक्तं यः प्रदद्याद्गवाह्निकम्। सोऽश्वमेधसमं पुण्यं लभते नात्र संशयः। पृथिव्यां यानि तीर्थानि समुद्राश्च सरांसि च। गवां शृङ्गोदकस्नाने कलां नार्हन्ति षोडशीम्। कुतस्तेषां हि पापानि येषां गृहमलङ्कृतम्। सततं बालवत्साभिर्गोभिः स्त्रीभिरिव स्वयम्। ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम्। तिष्ठन्त्येकत्र मन्त्राणि हविरेकत्र तिष्ठति। गोभिर्यज्ञाः प्रवर्त्तन्ते गोभिर्देवाः प्रतिष्ठिताः। गोभिर्वेदाः समुद्गीर्णाः सषडङ्गपदाः क्रमात्। सौरभेयास्तु तस्याग्रे पृष्ठतोऽप्यस्य ताः स्थिताः। वसन्ति हृदये नित्यन्तासां मध्ये वसन्ति ये। ते पुण्यपुरुषाः क्षौण्यां नाकेऽपि दुर्लभाश्च ते। शृङ्गमूले स्थितो ब्रह्मा शृङ्गमूले तु केशवः। शृङ्गाग्रे शङ्करं विद्यात्त्रयोदेवाः प्रतिष्ठिताः। शृङ्गाग्रे सर्व्वतीर्थानि स्थावराणि चराणि च। सर्व्वे देवाः स्थिता देहे सर्व्वदेवमयी हि गौः। ललाटाग्रे स्थिता देवी नासामध्ये तु षण्मुखः। कम्बलाश्वतरौ नागौ तत्कर्णे यौ व्यवस्थितौ। स्थितौ तस्याश्च सौरभ्याश्चक्षुषोः शशिभास्करौ। दन्तेषु वसवश्चाष्टौ जिह्वायां वरुणः स्थितः। सरस्वती च हुङ्कारे यमयक्षौ च गण्डयोः। ऋषयो रोमकूपेषु प्रस्रावे जाह्नवीजलम्। कालिन्दी गोमये तस्या अपरा देवतास्तथा। अष्टविंशतिदेवानां कोट्यो लोमसु ताः स्थिताः। उदरे गार्हपत्योऽग्निर्हृद्देशे दक्षिणस्तथा। मुखे चाहवनीयस्तु चावसथ्यस्तु कुक्षिषु। एवं यो वर्त्तते गोषु ताडने क्रोधवर्जितः। महतीं श्रियमाप्नोति स्वर्गलोके महीयते। गुल्म्यं तस्या न लङ्घेत पूतिगन्धं न वर्जयेत्। यावत्पिबति तद्गन्धं तावत्पुण्यं प्रवर्द्धते। यो गां पयस्विनीं दद्यात्तरुणीं वत्ससंयुताम्। शिवस्यायतनं दत्तं दत्तेन तु विश्वकम्। उधा गौ वैधसा सृष्टा तस्य ह्लादनाय च। तैस्त्वादितशस्तेन सर्व्वमेतद्धि धार्य्यते। यश्चैतान् पालयेत्

यत्नाद्वर्द्धयेच्चैव यत्नतः। जयन्ति तेन सर्वाणि साक्षात् स्युः पार्जितानि च। यावद्गोपालने पुण्यमुक्तं पूर्वमनीषिभिः। ततोऽपि पालने तेषां फलं दशगुणं भवेत्। जगदेतद्धृतं सर्वमनडुद्भिश्चराचरम्। वृष ईदृशवता रक्ष्यः पालनीयस्तु सर्वदा। धर्मोऽयं भूतले साक्षाद्ब्रह्मणा हितकारिणा। त्रैलोक्यं धारणायालमन्नानाञ्च प्रसूयते। अनादेयानि घासानि विध्वंसति सकाशतः। भ्रमति भूतले दूरमुक्षाणङ्को न पूजयेत्। उत्पादयन्ति शस्यानि मर्दयन्ति वहन्ति च। आनयन्ति दवीयस्यमुक्ष्णोवा कोऽधिको भुवि। स्कन्धेन दूराच्च वहन्ति भारं द्राक्षादि किञ्चिन्न च खादयन्ति। स्वीयेन जीवेन परस्य जीवं रक्षन्ति पुष्णन्ति विवर्द्धयन्ति। पुण्यास्तु गावो वसुधातलेऽस्मी बिभ्रत्यहोपृष्ठगर्भभारम्। भारः पृथिव्या दशताडिताया एकस्य चोक्ष्णो ह्यपि साधुवाचः। एकेन दत्तेन वृषेण येन दत्ता भवेयुर्दश सौरभेयाः। माहेश्वरीयं धरणी समाना तस्माद्वृषात् पूजितमस्ति नान्यत्। उत्पाद्य शस्यानि तृणञ्चरन्ति तदेव भूयः सकलं वहन्ति। न भारखिन्नाः प्रवदन्ति किञ्चिदहोवृषाज्ज्ञार्थेति जीवलोकः। तृतीयेऽह्नि चतुर्थे वा यदेवोक्षाऽवढोभवेत्। तदा नसा तु भेत्तव्या नैव प्राग्दुर्बलस्य च। नासावेधनकीलन्तु खादिरं वाथ शैंशपम्। द्वादशाङ्गुलकङ्कार्यन्तज्ज्ञैस्त्रीणि समानि वा। शाला द्विजानां वृषगोहयानां तां याम्यदिग्द्वारवतीं विदध्यात्। सौम्या ककुब्द्वारवतीं सुशोभान्तेषां शमिच्छन् हितमात्मनश्च। गावो वृषो वा हयहस्तिनो वा अन्येऽपि सर्वे पशवो द्विजेन्द्राः। याम्यां मुखा दिङ्मुखमुत्तरादिङ्मुखांशकास्ते खलु बन्धनीयाः। शालाप्रवेशे वृषगोपशूनां राजापि यत्नाद्धयकुञ्जराणाम्। होमञ्च सम्यार्चिषि शास्त्रयुक्तं कुर्याद्विधिज्ञो द्विजपूजनञ्च। लाङ्गलं संप्रवक्ष्यामि यत्काष्ठं यत्प्रमाणतः। हलीशायास्तथामानं प्रतोदस्य युगस्य च। चत्वारिंशत्तथाचाष्टावङ्गुलानि कुहः स्मृतः। अधार्द्धमङ्गुलैर्भज्यं हलीशावेधतश्च यः। षोडशैव तु तस्याधः षड्विंशतिस्तथोपरि। वेधस्तथा च कर्त्तव्यः प्रमाणेन षडङ्गुलः। अष्टाङ्गुलमुरस्तस्य वेधादूर्द्धं प्रकल्पयेत्। ग्रीवा दशाङ्गुला चोर्द्धं हस्तग्राही ततः स्मृतः। अङ्गुलैश्चाष्टभिस्तत्र स्याद्वेधः स्यात् प्रतिहारकः। तस्याधस्तादाच्चत्वारि च वेधश्चतुरङ्गुलः। सार्वत्रैः शुभः कार्यस्ततद्वेधस्त्यङ्गुलो भवेत्। पञ्चाङ्गुलमुरस्तस्याः सीरस्येति विभाजनम्। पृथुत्वं शिरसोधार्य्यं हस्ततलप्रमाणकम्। अङ्गुलानि तथा चाष्टौ उरसः पृथुता स्मृता। बन्धाद्बहिः प्रतीहारी षट्त्रिंशदङ्गुला भवेत्। सुनीक्ष्णलोहपाशस्य मुक्तादामादिदारकत्। न सीरं चीरवृक्षस्य न बिल्वपिचुमर्दयोः। इत्यादीनां हि कुर्व्वाणो न नन्दति चिरं गृही। प्राञ्जला सप्तहस्ता तु हलीशा विदुषां मता। तस्या वेधः सवर्णायाः कार्य्यौ नववितस्तिभिः। प्रचाग्रयोर्न तत्कुर्य्यात् कीर्त्तिघ्नौ तौ प्रकीर्त्तितौ। प्रमादतस्तु ताः कुर्वन् सशस्यो नश्यते गृही। नीचोच्चवृषमानेन तज्ज्ञास्तां प्रवदन्ति हि। चतुर्हस्तं युगं कार्य्यं स्कन्धस्थानेऽर्धचन्द्रवत्। मेषशृङ्गाः कदम्बस्य शाखाधन्यतमस्य च। सव्या वेधाद्बहिः कार्य्या दशाङ्गुलप्रमाणिका। तन्मध्ये च प्रशाखौ च तदन्तरदशाङ्गुलम्। प्रतोदोविप्रपर्ण्यैर्वैणवश्च चतुःकरः। तदग्रे तु प्रकर्त्तव्यं यथाकारं तु लोहवत्। हीनातिरिक्तं कर्त्तव्यं नैव किञ्चित्प्रमाणतः। कुर्य्यादनडुहां दैन्याददैन्यात् नरकं व्रजेत्। यथाभीष्टं यथा शोभं वाहकस्य प्रमाणतः। भूमेश्च कर्षणायाश्च तज्ज्ञाः सर्वं वदन्ति हि। योजनं तु हलस्याथ प्रवक्ष्यामि यथा तथा। श्रेष्ठनक्षत्रसंयुक्ते पुण्येऽह्नि तद्विधीयते। यस्मिन् दिने तु बुध्येत तत्र कार्य्यं विजानता। यत्र कृत्यं हितं चापि पुण्यं वा मनसि स्मरेत्। तत्र विद्वान् द्विजश्रेष्ठः पुण्येऽह्नि तद्धि कारयेत्। मातृश्राद्धं द्विजः कृत्वा यथोक्तविधिना गृही। द्रव्यकालानुसारेण कुर्वतो धर्मतः कृषिम्। प्रोल्लिखन् मण्डलं पुष्पधूपदीपैः समर्चयेत्। इन्द्राय च तथाश्विभ्यां मरुद्भ्यश्च यथा द्विजः। कुर्य्याद्बलिं कृतिं विद्वान् उदकानाश्रयाय च। तथा कुमार्य्यै सीतायै अनुमत्यै तथा बलिम्। नमः स्वाहेति मन्त्रेण कामयन्नात्मनः शुभम्। दधिगन्धाक्षतैः पुष्पैः शमीपत्रैस्तिलैस्तथा। संपूज्य सीरफालाग्रे हेम्ना वा रजतेन वा। प्रलिप्य मधुसर्पिर्भ्यां कुर्य्याच्चैव प्रदक्षिणम्। अघोक्ष्णो मण्डलं कुर्य्यात् कृत्वा सीरप्रवाहणम्। पुष्पं लाङ्गलकल्याणं कल्याणाय नमोऽस्त्विति। सीतायाः स्थापनं कुर्य्यात् पाराशरमुनिं स्मरेत्। सीतां युञ्जत इत्याद्यैर्मन्त्रैः सीरं प्रवाहयेत्। दधिदूर्वाक्षतैः पुष्पैः शमीपत्रैश्च पुण्यदैः। सीतां पूज्य ततो भक्तोरत्नवस्त्रैर्विशाखकैः। सप्त धान्यानि चादाय प्रोक्ष्य पूर्वामुखो

हली। तानि दत्त्वा खलक्षेत्रे किरन् भूमौ कृषेद्द्विजः। न यवैर्न तिलैर्हीनं द्विजः कुर्य्याच्च कर्षणम्। तद्विहीनन्तु कुर्वाणं न प्रशंसन्ति देवताः। तिलमात्रच्युतं तोयं दक्षिणे शास्पतेर्दिशि। तेन तृप्यन्ति पितरो यावच्च तिलविक्रयः। न विक्रीय तिलान् यस्तु तर्पयेत्सर्वदेवताः। विमुच्य पितरस्तस्य प्रयान्तीव तिलैः सह। उषाजलं यवस्तम्बपत्रेभ्यो भूतले पतत्। पयोदधिघृताद्यैस्तु तर्पयेत्सर्वदेवताः। देवपर्जन्यभूसीरयोगात् कृषिः प्रजायते। व्यापारात् पुरुषस्यापि तस्मात्तत्रोद्यतो भवेत्। शालीन् भूशणकार्पासं वार्त्ताकुप्रभृतीनि च। वापयेत्सर्वबीजानि सर्ववापी न सीदति। चन्द्रक्षये पतिर्विप्रो यो युनक्ति वृषान् क्वचित्। तत्पञ्च दशवर्षाणि त्यजन्ति पितरो हि तम्। चन्द्रक्षये द्विजो विद्वान् यो भुङ्क्ते तु पराशनम्। भोक्तुर्मासार्जितं पुण्यं भवेदशनमस्य तत्। चन्द्रार्कयोस्तु संयोगे कुर्याद्यः स्त्रीनिषेवणम्। रेतोभोजिनस्तस्य षण्मासं पितरः स्थिताः। चन्द्रक्षये च यः, कुर्य्यान्नरस्तरुनिकृन्तनम्। तत्पर्णसङ्ख्यया तस्य भवन्ति भ्रूणहत्यकाः। वनस्पतिगते सोमे योऽप्यध्वानं व्रजेन्नरः। प्रभ्रष्टद्विजकर्माणं तं त्यजन्त्यमरादयः। वासांसीन्दुप्रणाशे यो रजकस्यामतिः क्षिपेत्। पिबन्ति पितरस्तस्य मासं वस्त्रजलन्तु तत्। सोमक्षये द्विजो याति तत्कामस्तु हुताशनम्। तदेव पितृशापाग्निदग्धो नरकमाविशेत्। अष्टमी कामभोगेन षष्ठी तैलोपभोगतः। कुहूस्तु दन्तकाष्ठेन हिनस्त्यासप्तमं कुलम्। चन्द्राप्रतीतौ पुरुषस्तु देवादद्यादमत्या यदि दन्तकाष्ठम्। सुराधिराजः सहतस्तु तेन घातः कृतः स्यात्पितृदेवतानाम्। तत्राभ्यज्य विषाणानि गावश्चैव वृषास्तथा। चरणाय विसृज्यन्ते आगतान्निशि भोजयेत्। य उत्पादेह शस्यानि सर्वाणि तृणचारिणः। जगत्सर्वं धृतं यैस्तु पूज्यन्ते किन्न ते वृषाः। येनैकेन प्रदत्तेन दत्तं गोदशकं भवेत्। यद्रूपेण स्थितो धर्मः पूज्यन्ते किन्न ते वृषाः। पाल्या हि यत्नतस्ते वै वाहनीया यथाविधि। स याति नरकं घोरं यो वाहयत्यपालयन्। नाधिकाङ्गो न हीनाङ्गः पुष्पिताङ्गो न दूषितः। वाहनीयो हि शूद्रेण वाहयन् क्षयमाप्नुयात्। वर्जनीयाष्टदोषा गावो वै दोहने नरैः। पाल्या वै यत्नतः सर्वे पालयन् शुभमाप्नुयात्। अन्नार्थमेतान् वृषभान् ससर्ज परमेश्वरः। अन्नेनाप्यायते सर्वं त्रैलोक्यं सचराचरम्। अग्निर्ज्वलति चान्नार्थं वाति चान्नाय मारुतः। गृह्णाति चाम्भसां सूर्य्यो रसमन्नाय रश्मिभिः। अन्नं प्राणो बलं चान्नमन्नाज्जीवितमुच्यते। अन्नं सर्वस्य चाधारः सर्वमन्ने प्रतिष्ठितम्। सुरादीनां हि सर्वेषामन्नं बीजं परं स्थितम्। तस्मादन्नात्परं तत्त्वं न भूतं न भविष्यति। द्यौः पुमान्धरणी नारी अम्भोबीजन्दिवश्च्युतम्। द्युधात्रीतोयसंयोगादन्नादीनां हि सम्भवः। आपोमूलं हि सर्वस्य सर्वमप्सु प्रतिष्ठितम्। आपोऽमृतरसो ह्याप आपः शुक्रं बलं महः। सर्वस्य बीजमापो वै सर्वमद्भिः समावृतम्। सद्य आप्यायना ह्यापः आपो ज्येष्ठतराह्यतः। किञ्चित्कालं विनाऽन्नाद्यैर्जीवन्ति मनुजादयः। न जीवन्ति विनाप्यद्भिस्तस्मादापोऽमृतं स्मृतम्। दत्तानि चाद्भिरेतस्यां किं न दत्तं क्षितौ भवेत्। तथान्नेन प्रदत्तेन सर्वं दत्तं भवेदिह। अतोऽप्यन्नार्थभावेन कर्त्तव्यं कर्षणं द्विजैः। यथोक्तेन विधानेन लाङ्गलादिप्रयोजनम्। सीते! सौम्ये! कुमारि! त्वं देवि! देवार्चिते! श्रिये। मत्कृता च यथासिद्धा तथा मे सिद्धिदा भव। सकृत्स्तनोर्विना नाम्ना सीतायाः स्थापनं विना। विनाप्यक्ष्णोरक्षणार्थं सर्वं हरति राक्षसः। वापने लवने क्षेत्रे खले मन्त्रीप्रवाहणे। एष एव विधिर्ज्ञेयो धान्यानाञ्च प्रवेशने। देवतायतनोद्याननिपातस्थानगोव्रजम्। सीमाश्मशानभूमिञ्च वृक्षच्छायाक्षितिं तथा। भूमिं निखातयूपाञ्च अयनस्थानमेव च। अन्यामपि हि चावाह्यां न कर्षेत् कृषिकृत् धराम्। नोषरां वाहयेद्भूमिं वर्चोश्मकर्करीवृताम्। वाहयेद्ग्राममध्यञ्च न नदीपुलिनं तथा। यद्यसौ वाहयेल्लोभाद्द्वेषाद्वापि हि मानवः। क्षीयते सोऽचिरात्पापात् सपुत्रपशुबान्धवः। नरकं घोरतामिस्रं पापीयान् याति चैव सः। योऽपहृत्य परकीयां कृषिकृद्वाहयेद्धराम्। स भूमिस्थेन पापेन ह्यनन्तनरकं वसेत्। न दूरे वाहयेत् क्षेत्रं नचैवात्यन्तिके तथा। वाहयेच्च पथि क्षेत्रं वाहयन्दुःखभाग्भवेत्। क्षेत्रेष्वेवं वृतिं कुर्य्यात् यामुष्ट्रो नावलोकयेत्। न लङ्घयेत्पशुर्याञ्च नातीयाद्याञ्च शूकरः। बन्धश्च यत्नतः कार्य्यो मृगादित्रासनाय च। अत्राप्युपद्रवं राजतस्करादिसमुद्भवम्। संरक्षेत्सर्वतो यत्नाद्यस्मात् गृह्णात्यसौ करात्। कृषिकृन्मानवस्त्वेवं मत्वा धर्मं कृषेद्ध्रुवम्। अनवद्यां शुभां स्निग्धां जलावगाहनक्षमाम्। निम्नां हि वाहयेद्भूमिं यत्र विस्रवेत्

अन्नम् । वाहयेत्तु बलाभ्यर्थे सुपुष्टैकसभावैः । शारदस्यन्त्रकैःस्थाने कलमादि वपेद्धली । अर्धाम्बुतासु कार्पासं तदन्यत्र तु हैमनम् । वसन्तग्रीष्मकालीयमप्यत्र स्निग्धेषु तद्विदः । केदारेषु तथा शालीन् जलोपान्तेषु चेक्षुकान् । हन्ताकशाकमूलानि कन्दानि च ग्रामान्तिके । हष्टिविश्रान्तपानीयक्षेत्रेषु च यवादिकान् । गोधूमांश्च मसूरांश्च खल्वान् खलकुलन्तथा । समस्निग्धेषु चोप्यानि भूमिलीवान् विजानता । तिलाश्चतुर्विधाश्चोप्या अतसीशणमेव च । स्टद्भुतो जगत्सर्वं वापयेत्कृषिकस्वरः । सम्भक्षेश्वरतः सर्वान् गोष्पादीन् स्वयङ्कृषी । चिन्तयेत्स्वर्गमात्मानं स्वयमेव कृषिं भजेत् । प्रथमं कृषिराणिज्यं द्वितीयं योनिपोषणम् । तृतीयं विक्रयं, यक्षं चतुर्थं राजसेवनम् । गर्भैर्विलिखने यस्या आयुर्दीर्घं मनीषिणः । तस्याः क्षीरविदारेण किन्न पापं क्षितेर्भवेत् । तृणैकच्छेदमात्रेण प्रोच्यते पाप आयुषः । अवहन्त्रकन्दनिर्यासादवहन्त्रातश्ववेष्टनम् । यदघं मत्स्यबधानां तथा पक्षिणामपि । मेषः कुक्कुटिकानाञ्च तदेव कृषिजीविनाम् । वधकानाञ्च यत्पापं यत्पापं मृगयोरपि । कदर्य्याणाञ्च यत्पापं तत्पापं कृषिजीविनाम् । वर्णानाञ्च गृहस्थानां कृषिहन्तुत्रपजीविनाम् । तदेनसो विमुक्त्यर्थं प्राह सत्यवतीपतिः । द्वादशो नवमो वापि सप्तमः पञ्चमोऽपि वा । धान्यभागः प्रदातव्यो देहिनः चेत्तिष्ठो भुवम् । यस्मात्तद्भूतभूमौ च विंशां वै चेतभुग्भवेत् । एकैकांशापकर्षः स्याद्यावद्दशमसप्तमौ । पार्थिवस्य नृपस्यापि वर्णिभिः कृषिजीविभिः ॥ स स भागः प्रदातव्यो यतस्तौ कृषिभागिनौ । व्यूढौ च सर्वभात्राणां देयोऽंशः स्याच्चतुर्थकः । एकैकांशापकर्षस्तु यावद्दशमसप्तमौ । ब्राह्मणस्तु कृषिं कुर्वन्नाह्वयेदिच्छया धराम् । न किञ्चित्कस्यचिद्दद्यात्स सर्वस्य प्रभुर्यतः । ब्रह्मा वै ब्राह्मणानां स्यात्प्रभुस्त्वष्टमुद्रादितः । तद्रक्षणाय बाहुभ्यामसृजत् क्षत्रियानपि । पशुपाल्याशनोत्पत्त्यै ऊरुभ्याञ्च तथा विशः । द्विजदास्याय पराय पद्भ्यां शूद्रमकल्पयत् । यत्किञ्चिज्जगती यत्र भूगेहाश्च गजादिकम् । स्वभावेनेह विप्राणां ब्रह्मा स्वयमकल्पयत् । ब्राह्मणश्चैव राजा च द्वावप्येतौ धृतव्रतौ । न तयोरन्तरं किञ्चित्प्रजा धर्मेण रक्षयेत् । तस्मात्तु ब्राह्मणो दद्यात् कुर्वाणो धर्मतः कृषिम् । पार्थिवस्य नृपस्यापि किञ्चिन्नितमसौ बलिम् । अथान्यत्प्रवक्ष्यामि कृषिकृद्विकारणम् ! संयुक्तः कर्षकोयेन स्वर्गलोकमवाप्नुयात् । सर्वसत्त्वोपकाराय सर्वत्र कृषिकरः । कुर्य्यात् कृषिं प्रयत्नेन सर्वसत्त्वोपजीव्यकान् । सर्वस्य स्थितिकारण्यात् देवपितृभिः पुनः । मनुष्याणान्तु पोषणाय कृषिं कुर्य्यात् कृषीवलः । वयांसि चान्यसत्त्वानि क्षुत्तृष्णापीडितान् द्विजान् । विमोच्य सर्वतापेभ्यः स्वर्गलोकमवाप्नुयात् । चतुर्दिक्षु खले कुर्य्यात् प्राच्यामतिपमाहृतिम् । सैकद्वारपिधानाञ्च पिदध्याच्चैव सर्वतः । खरोष्ट्राजोरगांस्तत्र विधृतश्च निवारयेत् । श्वशूकरसृगालादिकाकोलूककपोतकान् । त्रिसन्ध्यं प्रोक्षणं कुर्य्यात् दानीयाभ्युक्षाम्बुभिः । रक्षां च भस्मना कुर्य्याज्जलधाराभिरक्षयम् । त्रिसन्ध्यमर्चयेत्सीतां पराशरस्मृतिं स्मरन् । प्रेतभूतादिनामानि न वदेच्च तदग्रतः । सूतिकाम्बुकस्तत्र कर्त्तव्यं परिरक्षणम् । हरन्त्यरक्षितं यस्मात् रक्षांसि सर्वमेव हि । प्रथमे दिनपूर्वाह्णे नापराह्णे न सन्ध्ययोः । धान्योन्मानं सदा कुर्य्यात्सीतापूजनपूर्वकम् । यजेत खलभिक्षाभिः खलेरोहिण्यएव हि । भक्त्या सर्वं प्रदत्तं हि तत्सर्वमिहाक्षयम् । खलयज्ञदक्षिणैषा ब्रह्मणा निर्मिता पुरा । भागधेयमयीं कृत्वा तां गृह्णन्तीह मात्रिकाम् । शतक्रत्वादयो देवाः पितरः सोमपादयः । सनकादिमनुष्याश्च ये चान्ये दक्षिणाशनाः । तानुद्दिश्य च विप्रेभ्यो दद्याच्च प्रथमं हली । विवाहे खलयज्ञे च संक्रान्तौ ग्रहणेषु च । सुते जाते व्यतीपाते दत्तं भवति चाक्षयम् । अन्येषामर्थिनां पश्चात्कारुकाणां पुनः पुनः । दीनानामथ नाथानां कुष्ठिनां कुशरीरिणाम् । क्लीवान्धबधिरादीनां सर्वेषामपि दीयते । वर्णानां पतितानाञ्च द्युहग्भूतानि तर्पयेत् । चाण्डालानाञ्च पाकानां मौल्याल्पञ्चावचाददत् । ये केचिदागतास्तत्र पूज्यास्ते विधिवद्द्विजाः । स्तोकशः सीरिभिः सर्वैं वर्णिभिर्गृहमेधिभिः । दत्त्वा त्वन्ते तथा वाचा क्रमेणाथ विसर्जयेत् । तत् कृत्वा स्वगृहं गच्छेच्छ्राद्धमभ्युदयं चरेत् । शरद्धेमन्तवसन्तनवान्नैः श्राद्धमाचरेत् । नाकृत्वान्नन्तदश्नीयादन्नं स्तदघमश्नुते । कृत्वाकृत्याद्य धान्यानि खलयज्ञं समाप्य च । सर्वसत्त्वहिते युक्त इहामुत्र सुखी भवेत् । कृषेरन्यतमो धर्मो न भवेत् कृषितोऽन्यतः । न सुखं कृषितोऽन्यत्र यदि धर्मेण कर्षति । अवस्त्वं निरसत्वं कृषितो नैव जायते । अनातिथ्यञ्च दुष्टत्वं गोभतो न कदाचन । निर्धनत्वन-

सभ्यत्वं विद्यायुक्तस्य कर्हिचित्। अस्थानित्वमभाग्यत्वं न सुशीलस्य कर्हिचित्। वदन्ति कवयः केचित् कृष्यादीनां विशुद्धये। लाभस्याङ्गप्रदानाच्च सर्वेषां शुद्धिकृद्भवेत्। प्रतिपद्दाच्चतुर्थांशं वाणिग्लाभतृतीयकम्। कृषितो विंशतिञ्चैव ददतो नास्ति पातकम्। राज्ञो दत्त्वा च षड्भागं देवतानां च विंशतिम्। त्रयस्त्रिंशञ्च विप्राणां कृषिकर्म्मा न लिप्यते। कृष्या समुत्पाद्य यवादिकानि धान्यानि भूयांसि सखान् विधाय। युक्तो गृहस्थोऽपि पराशरेण तस्यापि नो कश्चिदवादि दोषः। देवा मनुष्याः पितरश्च सर्वे साध्याश्च यक्षाश्च सकिन्नराश्च। गावो द्विजेन्द्राः सह सर्वसत्त्वैः कृष्या न तृप्ताः किल कोऽत्र लोके। यश्चैतदालोच्य कृषिं विदध्यात् लिप्येन पापेन स भूभवेन। सीरेण तस्यापि विदारितापि स्याद्भूतधात्री वरदानदात्री। षट् कर्म्माणि कृषिं ये तु कुर्य्युर्ज्ञानविधिं द्विजाः। ते सुरादिवरप्राप्ताः स्वर्गलोकमवाप्नुयुः। षट्कर्म्मभिः कृषिः प्रोक्तो द्विजानां गृहमेधिनाम्। गृहञ्च गृहिणीमाहुस्तद्विवाहोऽप्ययोच्यते"। गृहस्थस्य भावः कर्म वा ष्यञ्। गार्हस्थ्य गृहस्थधर्मे न०।

गृहस्थाश्रम पु० न० गृहस्थरूपमाश्रमम्। गृहस्थकर्त्तव्यधर्मभेदे। [गृहालम्बनस्तम्भे अमरः।

गृहस्थूणा न०६त० गृहस्य गृहालम्बना स्थूणा समासे क्लीवता।

गृहाक्ष पु० गृहस्याक्षीव षच् समा०। गवाक्षे वातायने त्रिका०। [अतिथौ। २गृहागतमात्रे त्रि०।

गृहागत पु० गृहमागतः आ+गम—क्त २त०। १आगन्तुके,

गृहाधिप पु० ६त०। १गृहस्थे हलायु०। २गृहस्वामिनि त्रि०२राशीश्वरे च गृहपत्यादयोऽप्यत्र।

गृहाम्र न० गृहस्थितमाम्रम्। काञ्जिके (आमानि) त्रिका०

गृहायनिक पु० गृहरूपमयनं विद्यतेऽस्य ठन्। गृहस्थे शब्दर०। [उपवने अमरः।

गृहाराम पु० गृहे गृहसमीपे आरामः। गृहसमीपस्थे

गृहार्थ पु० गृहे तत्र निष्पाद्योऽर्थः तत्रत्यकृत्यम्। गृहकृत्ये "पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिष्क्रिया" मनुः। [धिकायां (टिकटिकि) हारा०।

गृहालिका स्त्री गृहे आलिरिव कायति कै—क। गृहगो-

गृहावग्रहणी स्त्री गृहमवगृह्यते अनेन अव+ग्रह—करणे ल्युट् ङीप्। देहल्याम् अमरः (देओयाल)।

गृहाशया स्त्री गृहे इव कायायुक्तस्थाने आशेते आ+शी—अच्। ताम्बूल्यां नागवल्ल्यां राजनि०। तस्या गृहाकारस्थाने (बरज) इति ख्याते उत्पन्नत्वात् तथात्वम्।

गृहाश्मन् पु० गृहस्थितोऽश्मा। पेषण्यां (शिल) त्रिका०।

गृहाश्रम पु०न० आश्रम्यतेऽत्र आ+श्रम—आधारे घञ् अर्द्धर्चादिः गृहमेवाश्रमः। १गृहरूपे आश्रमे "एवं गृहाश्रमे स्थित्वा विधिवत्स्नातको द्विजः" मनुः "स उपाध्यायेनानुज्ञातः समावृत्तस्तस्माद्गुरुकुलवासाद् गृहाश्रमं प्रत्यपद्यत" भा० आ०३अ०। २गृहस्थधर्मभेदे च ततोऽस्त्यर्थे इनि। गृहाश्रमिन् गृहस्थे। [अमरः

गृहासक्त त्रि० गृहे आसक्तः। गृहस्थिते पक्षिमृगादौ।

गृहिन् पु० गृहं भार्य्या विद्यतेऽस्य इनि। गृहस्थाश्रमिणि अमरः। "तस्मात् श्रेष्ठाश्रमी गृही" परा० "त्रिष्वप्रमाद्यन्नेतेषु त्रीन् लोकान् विजयेद् गृही" मनुः। गृहं गृहकृत्यं साध्यतयाऽस्त्यस्याः इनि ङीप् गृहिणी। २भार्य्यायाम् स्त्री हेमच०। गृहिणीकर्त्तव्यकर्म्माणि शुक्रनीतिशास्त्रे ४अ०उक्तानि यथा

"न विद्यते पृथक् स्त्रीणां त्रिवर्गविधिसाधनम्। पत्युः पूर्वं समुत्थाय देहशुद्धिं विधाय च। उत्थाप्य शयनीयानि कृत्वा वेश्मविशोधनम्। मार्ज्जनैर्लेपनैः प्राप्य सानलं यवसं गणम्। शोधयेद्यज्ञकाष्ठानि स्निग्धान्युष्णेन वारिणा। प्रोक्षणीयैरितान्येव यथा स्थानं प्रकल्पयेत्। शोधयित्वा तु पात्राणि पूरयित्वा तु धारयेत्। महानसस्य पात्राणि वहिः प्रक्षाल्य सर्वदा। मृद्भिश्च शोधयेच्चुल्लीं तत्राग्निं सेन्धनं न्यसेत्। स्मृत्वा नियोगपात्राणि रसान्नद्रविणानि च। कृतपूर्वाह्णकार्य्येयं श्वशुरावभिवादयेत्। ताभ्यां भर्त्रा पितृभ्यां वा भ्रातृमातुलबान्धवैः। वस्त्रालङ्काररत्नानि प्रदत्तान्येव धारयेत्। मनोवाक्कर्म्मभिः शुद्धा पतिदेशानुवर्त्तिनी। छायेवानुगता स्वच्छा सखीव हितकर्म्मसु। दासीव दिष्टकार्य्येषु भार्य्या भर्त्तुः सदा भवेत्। ततोऽन्नसाधनं कृत्वा पतये विनिवेद्य सा। वैश्वदेवोद्धृतैरन्नैर्भोजनीयांश्च भोजयेत्। पतिं च तदनुज्ञाता शिष्टमन्नाद्यमात्मना। भुक्त्वा नयेदहःशेषं सदसद्व्ययचिन्तया। पुनः सायं यथा प्रातर्गृहशुद्धिं विधाय च। कृतान्नसाधना साध्वी सभृत्यं भोजयेत् पतिम्। नातितृप्ता स्वयं भुक्त्वा गृहनीतिं विधाय सा। आस्तृत्य साधु शयनं ततः परिचरेत् पतिम्। सुप्ते पत्यौ तदध्यास्य स्वयं तद्गतमानसा। अनग्ना चाप्रमत्ता च निष्कामा च जितेन्द्रिया। नोच्चै-

वदेन्न परुष न बहु पतिमप्रियम्। न केनचिच्च विषदेदप्रलापविवादिनी। न चार्थव्ययशीला स्यान्न धर्मार्थविरोधिनी। प्रमादोन्मादरोषेर्ष्यावञ्चनान्यतिनिन्दितम्। पैशुन्यहिंसाविद्वेषमोहाहङ्कारधूर्त्तताम्। नास्तिक्यसाहसस्तेयदम्भान् साध्वी विवर्जयेत्। एवं परिचरन्ती या पतिं परमदैवतम्। यशस्त्विह यात्येव परत्र च सलोकताम्। योषितो नित्यकर्मोक्तं नैमित्तिकमथोच्यते। रजसो दर्शनादेषा सर्वमेव परित्यजेत्। सर्वैरपीक्षिता शीघ्रं लज्जितान्तर्गृहे वसेत्। एकाम्बरा कृशा दीना स्नानालङ्कारवर्जिता। स्वपेद्भूमावप्रमत्ता क्षपेदेवमहस्त्रयम्। स्नायीत सा त्रिरात्रान्ते सचेलाऽभ्युदिते रवौ। विलोक्य भर्तृवदनं शुद्धा भवति धर्मतः। कृतशौचा पुनःकर्म पूर्ववच्च समाचरेत्। द्विजस्त्रीणामयं धर्मः प्रायोऽन्यासामपीष्यते। कृषिपण्यादि पुंकृत्ये भवेयुस्ताः प्रसाधिताः। सङ्गीतैर्मधुरालापैः स्वायत्तस्तु पतिर्यथा। भवेत्तथा चरेयुर्वै मायाभिः कामकेलिभिः। मृते भर्त्तरि सङ्गच्छेत् भर्त्रा वा पालयेद्व्रतम्।” भा०व० “द्रौपदीसत्यभामासंवादे” २३२अ०

इतिवृत्तच्छलेन तस्याः पतिवशीकरणकर्मोक्तं यथा

“केन द्रौपदि! वृत्तेन पाण्डवानधितिष्ठसि?। लोकपालोपमान् वीरान् यूनः परमसंमतान्। कथञ्च वशगास्तुभ्यं न कुप्यन्ति च ते शुभे!। तव वश्या हि सततं पाण्डवाः प्रियदर्शने!। सुखप्रेक्ष्याश्च ते सर्वे तत्त्वमेतद्ब्रवीहि मे। व्रतचर्य्या तपो वास्ति स्नानमन्त्रौषधानि वा। विद्यावीर्य्यं मूलवीर्य्यं जपहोमागदास्तथा। ममाद्याचक्ष्व पाञ्चालि! यशस्यं भगदैवतम्। येन कृष्णे! भवेन्नित्यं मम कृष्णो वशानुगः?। एवमुक्त्वा सत्यभामा विरराम यशस्विनी। पतिव्रता महाभागा द्रौपदी प्रत्युवाच ताम्। असत्स्त्रीणां समाचारं सत्ये! मामनुपृच्छसि। असदाचरिते मार्गे कथं स्यादनुकीर्त्तनम्। अनुप्रश्नः संशयो वा नैतत्त्वय्युपपद्यते। तथा ह्युपेता बुद्ध्या त्वं कृष्णस्य महिषी प्रिया। यदैव भर्त्ता जानीयान्मन्त्रमूलपरां स्त्रियम्। उद्विजेत तदैवास्याः सर्पाद्वेश्मगतादिव। उद्विग्नस्य कुतः शान्तिरशान्तस्य कुतः सुखम्। न जातु वशगो भर्त्ता स्त्रियाः स्यान्मन्त्रकर्मणा। अमित्रप्रहितांश्चापि गदान् परमदारुणान्। मूलप्रवादैर्हि विषं प्रयच्छन्ति जिघांसवः। जिह्वया यानि पुरुषस्त्वचा वाप्युपसेवते। तत्र चूर्णानि दत्तानि हन्युः क्षिप्रमसंशयम्। जलोदरसमायुक्ताः श्वित्रिणः पलितास्तथा। अपुमांसः कृताः स्त्रीभिर्जडान्धबधिरास्तथा। पापानुगास्तु पापास्ताः पतीनुपसृजन्त्युत। न जातु विप्रियं भर्त्तुः स्त्रिया कार्य्यं कथञ्चन। वर्त्ताम्यहन्तु यां वृत्तिं पाण्डवेषु महात्मसु। तां सर्वां शृणु मे सत्यां सत्यभामे! यशस्विनि!। अहङ्कारं विहायाहं कामक्रोधौ च सर्वदा। सदारान् पाण्डवान्नित्यं प्रयतोपचराम्यहम्। प्रणयं प्रतिसंहृत्य निधायात्मानमात्मनि। शुश्रूषुर्निरभीमाना पतीनां चित्तरक्षिणी। दुर्व्याहृताच्छङ्कमाना दुःस्थितादुरवेक्षितात्। दुरासिताद्दुर्व्रजितादिङ्गिताध्यासितादपि। सूर्य्यवैश्वानरसमान् सोमकल्पान्महारथान्। सेवे चक्षुर्हणः पार्थानुग्रवीर्य्यप्रतापिनः। देवो मनुष्यो गन्धर्वो युवा चापि स्वलङ्कृतः। द्रव्यवानभिरूपो वा न मेऽन्यः पुरुषो मतः। नाभुक्तवति नास्नाते नासंविष्टे च भर्त्तरि। न संविशामि नाश्नामि सदा कर्मकरेष्वपि। क्षेत्राद्वनाद्वा ग्रामाद्वा भर्त्तारं गृहमागतम्। प्रत्युत्थायाभिनन्दामि आसनेनोदकेन च। प्रमृष्टभाण्डा मृष्टान्ना काले भोजनदायिनी। संयता गुप्तधान्या च सुसंमृष्टनिवेशना। अतिरस्कृतसम्भाषा दुःस्त्रियो नानुसेवती। अनुकूलवती नित्यं भवाम्यनलसा सदा। अनर्मं चापि हसितं द्वारि स्थानमभीक्ष्णशः। अवस्करे चिरं स्थानं निष्कुटेषु च वर्जये। अतिहासातिरोषौ च क्रोधस्थानञ्च वर्जये। निरताहं सदा सत्ये! भर्त्तॄणामुपसेवने। सर्वथा भर्त्तृरहितं न ममेष्टं कथञ्चन। यदा प्रवसते भर्त्ता कुटुम्बार्थेन केनचित्। सुमनोवर्णकापेता भवामि व्रतचारिणी। यच्च भर्त्ता न पिबति यच्च भर्त्ता न सेवते। यच्च नाश्नाति मे भर्त्ता सर्वन्तद्वर्जयाम्यहम्। यथोपदेशनिरता वर्त्तमाना वराङ्गने!। स्वलङ्कृता सुप्रयता भर्त्तुः प्रियहिते रता। ये च धर्माः कुटुम्बेषु श्वश्र्वा मे कथिताः पुरा। भिक्षा बलिः श्राद्धमिति स्थालीपाकाश्च पर्वसु। मान्यानां मानसत्कारा ये चान्ये विदिता मम। तान् सर्वाननुवर्त्तामि दिवारात्रमतन्द्रिता। विनयान्नियमांश्चापि सदा सर्वात्मना श्रिता। मृदून् सतः सत्यशीलान् सत्यधर्मानुपालिनः। आशीविषानिव क्रुद्धान् पतीन् परिचराम्यहम्। पत्याश्रयो हि मे धर्मो मतः स्त्रीणां सनातनः। स देवः सा गतिर्नान्या तस्य का विप्रियं चरेत्। अहं पतीन्नातिशये नात्यश्ने

नातिभूषये । नापि परिवदे श्वश्रूं सर्वदा परियन्त्रिता । अवधानेन सुभगे ! नित्योत्थिततयैव च । भर्त्तारो वशगा मह्यं गुरुशुश्रूषयैव च । नित्यमार्य्यामहं कुन्तीं वीरसूं सत्यवादिनीम् । स्वयं परिचराम्येतां पानाच्छादनभोजनैः । नैतामतिशये जातु वस्त्रभूषणभोजनैः । नाहं परिवदे वाचं तां पृथां पृथिवीसमाम् । अष्टावग्रे ब्राह्मणानां सहस्राणि स्म नित्यदा । भुञ्जते रुक्मपात्रीषु युधिष्ठिरनिवेशने । अष्टाशीतिसहस्राणि स्नातका गृहमेधिनः । त्रिंशद्दासीक एकैको यान् बिभर्त्ति युधिष्ठिरः । दशान्यानि सहस्राणि येषामन्नं सुसंस्कृतम् । ह्रियते रुक्मपात्रीभिर्यतीनामूर्द्ध्वरेतसाम् । तान् सर्वानग्रहारेण ब्राह्मणान् ब्रह्मवादिनः । यथार्हं पूजयामि स्म पानाच्छादनभोजनैः । शतं दासीसहस्राणि कौन्तेयस्य महात्मनः । कम्बुकेयूरधारिण्यो निष्ककण्ठ्यः स्वलङ्कृताः । महार्हमाल्याभरणाः सुवर्णाश्चन्दनोक्षिताः । मणीन् हेम च बिभ्रत्यो नृत्यगीतविशारदाः । तासां नाम च रूपञ्च भोजनाच्छादनानि च । सर्वासामेव वेदाहं कर्म चैव कृताकृतम् । शतं दासीसहस्राणि कुन्तीपुत्रस्य धीमतः । पात्रीहस्ता दिवारात्रमतिथीन् भोजयन्त्युत । शतमश्वसहस्राणि दश नागायुतानि च । युधिष्ठिरस्यानुयात्रमिन्द्रप्रस्थनिवासिनः । एतदासीत्तदा राज्ञो यन्महीं पर्यपालयत् । येषां संख्यां विधिञ्चैव प्रदिशामि शृणोमि च । अन्तःपुराणां सर्वेषां भृत्यानाञ्चैव सर्वशः । आगोपालाविपालेभ्यः सर्वं वेद कृताकृतम् । सर्वं राज्ञः समुदयमायञ्च व्ययमेव च । एकाहं वेद्मि कल्याणि ! पाण्डवानां यशस्विनि ! । मयि सर्वं समासज्य कुटुम्बं भरतर्षभाः । उपासनारताः सर्वे घटन्ति स्म वरानने ! । तमहं भारमासक्तमप्रधृष्यं दुरात्मभिः । सुखं सर्वं परित्यज्य रात्र्यहानि घटामि वै । अधृष्यं वरुणस्येव निधिपूर्णमिवोदधिम् । एकाहं वेद्मि कोषं वै पतीनां धर्मचारिणाम् । अनिशायां निशायाञ्च सहायाः क्षुत्पिपासयोः । आराधयन्त्याः कौरव्यांस्तुल्या रात्रिरहश्च मे । प्रथमं प्रतिबुध्यामि चरमं संविशामि च । नित्यकालमहं सत्ये ! एतत् संवननं मम । एतज्जानाम्यहं कर्त्तुं भर्त्तुः संवननं महत् । असत्स्त्रीणां समाचारं नाहं कुर्य्यां न कामये । तच्छ्रुत्वा धर्मसहितं व्याहृतं कृष्णया तदा । उवाच सत्या सत्कृत्य पाञ्चालीं धर्मचारिणीम् । अभिपन्नासि पाञ्चालि ! याज्ञसेनि ! क्षमस्व मे । कामकारः सखीनां हि सोपहासं प्रभाषितम्” २३२अ०।

“द्रौपद्युवाच । इमन्तु ते मार्गमपेतमोहं वक्ष्यामि चित्तग्रहणाय भर्त्तुः । अस्मिन् यथावत् सखि ! वर्त्तमाना भर्त्तारमाच्छेत्स्यसि कामिनीभ्यः । नैतादृशं दैवतमस्ति सत्ये ! सर्वेषु लोकेषु सदैवतेषु । यथा पतिस्तस्य हि सर्वकामा लभ्याः प्रसादात् कुपितश्च हन्यात् । तस्मादपत्यं विविधाश्च भोगाः शय्यासनान्युत्तमदर्शनानि । वस्त्राणि माल्यानि तथैव गन्धाः स्वर्गश्च लोको विपुला च कीर्त्तिः । सुखं सुखेनेह न जातु लभ्यं दुःखेन साध्वी लभते सुखानि । सा कृष्णमाराधय सौहृदेन प्रेम्णा च नित्यं प्रतिकर्मणा च । तथाऽऽसनैश्चारुभिरग्र्यमाल्यैर्दाक्षिण्ययोगैर्विविधैश्च गन्धैः । अस्याः प्रियोऽस्मीति यथा विदित्वा त्वामेव संश्लिष्यति तद्विधत्स्व । श्रुत्वा स्वरं द्वारगतस्य भर्त्तुः प्रत्युत्थिता तिष्ठ गृहस्य मध्ये । दृष्ट्वा प्रविष्टं त्वरितासनेन पाद्येन चैनं प्रतिपूजयस्व । संप्रेषितायामथ चैव दास्यामुत्थाय सर्वं स्वयमेव कार्य्यम् । जानातु कृष्णस्तव भावमेतं सर्वात्मना मां भजतीति सत्ये ! । त्वत्सन्निधौ यत् कथयेत् पतिस्ते यद्यप्यगुह्यं परिरक्षितव्यम् । काचित् सपत्नी तव वासुदेवं प्रत्यादिशेत्तेन भवेद्विरागः । प्रियांश्च रक्तांश्च हितांश्च भर्त्तुस्तान् भोजयेथा विविधैरुपायैः । द्वेष्यैरपक्षैरहितैश्च तस्य भिद्यस्व नित्यं कुहकोद्यतैश्च । मदं प्रमादं पुरुषेषु हित्वा संयच्छ भावं प्रतिगृह्य मौनम् । प्रद्युम्नशाम्बावपि ते कुमारौ नोपासितव्यौ रहिते कदाचित् । महाकुलीनाभिरपापिकाभिः स्त्रीभिः सतीभिस्तव सख्यमस्तु । चण्डाश्च शौण्डाश्च महाशनाश्च चौराश्च दुष्टाश्चपलाश्च वर्ज्ज्याः । एतद्यशस्यं भगदैवतञ्च स्वर्ग्यं तथा शत्रुनिवर्हणञ्च । महार्हमाल्याभरणाङ्गरागा भर्त्तारमाराधय पुण्यगन्धा” २३३अ० !

“गृहिणी सचिवो रहः सखी प्रियशिष्या ललिते कलाविधौ” रघुः “न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते” उ०त० स्मृतिः “प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः” कुमा० “शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने भर्त्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः । भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः” शकु० “ज्वालागताभ्योऽपि गृहं गृहिण्यः” माघः ।

गृहीत त्रि० ग्रह—कर्मणि क्त । १स्वीकृते, २ज्ञाते, ३प्राप्ते ४धृते च । "गृहीतपत्युद्गमनीयवेशा" कुमा० । "गृहीत इव केशेषु मृत्युना धर्ममाचरेत्" नीतिशा० "पत्नी गृहीतव्रता" वेणी० भावे क्त । ५ग्रहणादौ न० ततः तत्कृतमनेन इष्ट्यादि० इनि । गृहीतिन् कृतग्रहणे त्रि० स्त्रियां ङीप् ।

गृहीतगर्भा स्त्री गृहीतो गर्भो यया । गर्भवत्यां तल्लक्षणादि गर्भवतीशब्दे २५५५पृ० उक्तम् । [च हेमच० ।

गृहीतदिक् त्रि० गृहीता दिक् येन । १पलायिते २तिरोहिते

गृहु त्रि० ग्रह—कु । ग्रहीतरि "इद् भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय" ऋ० १०।११७।२

गृहेरुह पु० गृहे रोहति रुह—क-अलुक् ७त० । गृहजातवृक्षे स चाप्रशस्तः यथाह भा० आनु० १२७अ० "भिन्नभाण्डञ्च खट्वाञ्च कुक्कुटं शुनकं तथा । अप्रशस्तानि सर्वाणि यश्च वृक्षो गृहेरुहः"

गृहेनर्दिन् पु० गृहे एव नर्दति न युद्धे नर्द—इनि पात्रेसमितादिस० । कापुरुषे रणभीरौ गृहे आस्फालयितरि ।

गृहेश पु० ६त० । १गृहस्वामिनि गृहेश्वरादयोऽप्यत्र "अर्थस्तस्मिन् स्थाने गृहेश्वराधिष्ठितेऽक्षे वा" वृहत्सं० ५२अ० । २राशीश्वरे च ।

गृहोलिका स्त्री गृहे वलते वल—चलने कुन् वा०सम्प्र० । ज्येष्ठ्यां गृहगोधिकायाम् हेमच० ।

गृह्य पु० ग्रह—पदास्वैरीत्यादिना क्यप् । गृहासक्ते १खगे २मृगे च, पञ्जरादिबन्धनेन परतन्त्रीकृतत्वात् तेषां तथात्वम् । ३गुह्ये मलद्वारे, न० ४अस्वैरिणि ५आयत्ते, ६स्वपक्षीये पक्ष्ये च त्रि० मेदि० । "गुणगृह्यावचने विपश्चितः" किरा० "अगृह्यां वीतकामत्वाद्वेगृह्याभिनन्दिताम्" भट्टिः । गृहे भवः यत् ७गृहभवे, वस्तुनि त्रि० । ८गृहनिमित्तेऽग्नौ ९तत्रत्यकर्मणि च "उक्तानि वैतानिकानि गृह्याणि वक्ष्यामः" आश्व० गृ० १।१।१ गृहनिमित्तोऽग्निः गृह्यः । तत्र भवानि कर्माण्यपि लक्षणया गृह्याणीत्युच्यन्ते । गृहशब्दो भार्यायां शालायाञ्च वर्त्तते । यथा "सगृहो गृहमागतः" इत्यत्र हि पूर्वो गृहशब्दो भार्यावचनः उत्तरस्तु शालावचनः येषाञ्च भार्यासंयोगादुत्पन्नाग्नौ इमानि कर्माणि प्रवर्त्तन्ते तेषामयं गृह्यशब्दो भार्यावचनः । येषान्तु दायविभागकालेऽग्निरुत्पद्यते तेषां शालावचनः । "भार्यादिरग्निर्दायादिर्वा तस्मिन् गृह्याणि" इति गौतमसूत्रतः" नारा० "तेऽस्य गृह्याणि कर्माणि कुर्य्याद्वैतानिकानि च ।" "वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वकम् । अग्निहोत्रं समादाय गृह्याग्निपरिच्छदम्" इति च मनुः । तदस्त्यस्य साध्यतया अच् । १०वेदोदितकर्मप्रयोगज्ञापके गोभिलसूत्रादौ ग्रन्थभेदे च । गृह्यमग्निमधिकृत्य च शाखिभेदेन गृह्यकाराश्च गोभिलाश्वलायनकात्यायनादयोऽतिविख्याताः । ११नगरशाखास्थे ग्रामे स्त्री टाप् मेदिनिः स्वार्थे क । गृह्यक तत्रैवार्थे । संज्ञायां कन् । गृहासक्ते पक्षिमृगादौ अमरः ।

गॄ विज्ञापने चुरा० आत्म०सक० सेट् । गारयते अजीगरत् ।

गॄ शब्दे क्र्यादि०पर०प्वादि० सक० सेट् । गृणाति अगारीत जगार जगरतुः । गीर्य्यते गीर्णः । गीः ।

अनु+शंसनविषयहर्षानुकूलव्यापाररूपप्रोत्साहने तद्योगे पूर्वव्यापारस्य कर्त्ता संप्रदानसंज्ञो भवति यथा अध्वर्युः होत्रे अनुगृणाति होता प्रथमं शंसति तमध्वर्युः प्रोत्साहयतीत्यर्थः सि०कौ०

प्रति+अनुगृणातिवत् अर्थादि अस्यावपूर्वप्रयोगो नास्ति इति "अवाद्ग्रः" पा० सूत्रे भाष्यकार आह स्म

गॄ निगरणे तु० पर० सक० सेट् । अस्य वा रस्य लत्वम् गिरति-गिलति अगारीत् अगालीत् जगार (ल) । जगरतुः । गीर्य्यते गीर्णः गीर्णिः गिरः गिरिः

अव+नीचैःकथने आत्म० अवगिरते नीचैः कथयतीत्यर्थः ।

उद्+वमने । "रोमन्थः उद्गीर्य्य चर्वणम्" सि०कौ० "अनुद्गीर्णसुरायुधम्" कुमा० ।

सम्+प्रतिज्ञायाम् आत्म० । संगिरते प्रतिजानीते इत्यर्थः । "वस्तूनि देशांश्च निवर्त्तयिष्यन् रामं नृपः संगिरमाण एव" भट्टिः ।

गेद गतौ भ्वा० आत्म०सक० सेट् । गेदते अगेदिष्ट ऋदित् । अजिगेदत । जिगेदे । उदित् । गेदित्वा गेत्त्वा ।

गेन्दु(ण्डु)क पु० गच्छतीति गम—ड गः इन्दुरिव इवार्थे कन् । कन्दुके वस्त्रनिर्मिते गोलाकारे क्रीडनके । पृषो० वा डत्वे गेण्डुकश्च तत्रार्थे । पृषो० गेन्दू(ण्डू)कोऽपि दीर्घमध्यः । तत्रार्थे जटाधरः ।

गेय त्रि० गै—कर्त्तरि नि० यत् । १गायके "गेयो माणवकः साम्नाम्" सि०कौ० कर्मणि यत् । २गातव्ये त्रि० "अरण्ये गेयं साम" भावे यत् । ३गीतौ न० "गेये केन विनीतौ वाम्" रघुः । "वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव । अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता" माघः

गेव सेवने भ्वा०आ०सक०सेट् । गेवते अगेविष्ट । ऋदित् अजिगेवत । जिगेवे । [जिगेषे ऋदित् अजिगेषत् । गेष्णः ।

गेष अन्वेषणे भ्वा० आत्म० सक० सेट् । गेषते अगेषिष्ट ।

गेष्ण पु० गेष–बा० न । १पर्वणि ग्रन्थौ (गाँटि) २अवयवभेदे "तस्यर्क् च साम च गेष्णौ" छा०उ० "तस्य ऋक् च साम च गेष्णौ पृथिव्याद्युक्तलक्षणे पर्वणी" भा० "तस्य यद्रूपमस्य तद्रूपं यौ गेष्णौ तावस्य गेष्णौ" छा०उ०

गेष्णु त्रि० गै–इष्णुच् । गायने सि०कौ०

गेह न० गे गणेशो गन्धर्वो वा ईहः ईप्सितो यत्र । गृहे । "जामयोयानि गेहानि" "एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन" मनुः । "त्यक्त्वा गेहं झटिति यमुनामञ्जुकुञ्जं जगाम" पदाङ्कदू० "गेहदाहेऽग्नये" क्षामवते पुरोडाशः" कात्या०श्रौ०२५।४।२६। "यजमानस्य निवासगृहदाहेऽग्निगृहदाहे वा क्षामवतामाग्निमुद्दिश्य पुरोडाशः निर्वाप्य इत्यर्थः" कर्कः ।

स्वामिभेदादिना गेहानां नामभेदा हेमचन्द्रेण दर्शिता यथा

"प्रासादो देवभूपानां हर्म्यन्तु धनिनां गृहम् । मठावसथ्यावसथाः स्युश्छात्रप्रतिवेश्मनि । पर्णशालोटजश्चैव विहारो जिनसद्मनि । गर्भागारे प्रवरको वासौकः शयनास्पदम् । भाण्डागारं तु कोषः स्याच्चन्द्रशाला शिरोगृहम् । कुप्यशाला तु सन्धानी कायमानो तृणौकसि । होत्रीयन्तु हविर्गेहं प्रागवंशः प्राग् हविर्गृहात् । आथर्वणं शान्तिगृहमास्थानगृहमिन्द्रकम् । तैलिशाला यन्त्रगृहमरिष्टं सूतिकागृहम् । सूदशाला रसवती पाकस्थानं महानसम् । हस्तिशाला तु चतुरं वाजिशाला तु मन्दुरा । सन्दानिनी तु गोशाला चित्रशाला तु जालिनी । कुम्भशाला पाकपुटी तन्तुशाला तु गर्त्तिका । नापितशाला वपनी शिल्पा खरकुटी च सा । आवेशनं शिल्पिशाला सत्रशाला प्रतिश्रयः । आश्रमस्तु मुनिस्थानमुपघ्नस्त्वन्तिकाश्रयः । प्रपा पानीयशाला स्याद्गञ्जा तु मदिरागृहम् । पक्कणः शवरावासो घोषस्त्वाभीरपल्लिका । पण्यशाला निषद्याट्टो हट्टो विपणिरापणः । वेश्याश्रयः पुरं वेशो मण्डपस्तु जनाश्रयः" । ततोऽस्त्यर्थे इनि । गेहिन् मतुप् मस्य वः । गेहवत् गृहस्वामिनि स्त्रियां ङीप् । गेहं गेहकृत्यं साध्यतयाऽस्त्यस्याः इति ङीप् । भार्यायाम् "मद्गेहिन्याः प्रिय इति सखे! चेतसा कातरेण" मेघ०।

गेहेक्ष्वेडिन् त्रि० गेहे एव क्ष्वेडते क्ष्वेड–इनि पात्रे० स०। गृहासक्ते युद्धादावनासक्ते कापुरुषे । युक्तारोह्यादित्वात् अस्य आद्युदात्तता ।

गेहेदाहिन् त्रि० गेहे दहति दह–इनि पात्रे०स०। कापुरुषे एवं गेहेविजितिन् गेहेव्याड गेहेमेहिन् गेहेदृप्त गेहेधृष्ट इत्येतेऽपि पात्रे०स०। कापुरुषे आद्युदात्तता च

गेहेशूर पु० गृहएव शूरः पात्रेसमितादि स०। कापुरुषे युक्तारोह्या० आद्युदात्तता [अमरः ।

गेहोपवन न० गेहसमीपस्थमुपवनम् । गृहसन्निकृष्टोपवने

गेह्य त्रि०गेहे भवः गेहाय हितं वा यत् । १गेहभवे २गेहहिते च । "यस्मै धायुरदधा मर्त्यायाभक्तं चिद्भजते गेह्यम्" ऋ० ३।३०।७

गै गाने भ्वा०पर०सक०अनिट् । गायति । अगासीत् । जगौ जगतुः । गीयते गेयं गानं गीता गीतः गीतिः । गायकः गायनः गाथा गातुम् । गापयति जिगीषति । "यशोऽपि तावत् प्रभवामि गातुम्" नैष० "गेये केन विनीतं वाम्" ? रघुः । "तत्र स्म गाथा गायन्ति साम्ना परमवल्गुना" भा०व० १७८३ "गीतज्ञो यदि गीतेन नाप्नोति परमं पदम्" याज्ञ० "जयोदारणं बाहोर्गापयामास किन्नरान्" रघुः ।

अनु+पश्चाद्गाने । अनुगायति "काचिदञ्चितपञ्चमरागम्"

अभि+आभिमुख्येन समन्ताच्च गाने "राजधानीषु राज्ञां च समाजेष्वभ्यगायताम्" रामा० आ०

अव+निन्दने अवगीतम् ।

उत्+उच्चैर्गाने । "उद्गास्यतामिच्छति किन्नराणाम्" कुमा० "उद्गीयमानं वनदेवताभिः" रघुः ।

उप+समीपगाने । "शिष्यप्रशिष्यैरुपगीयमानमवेहि तन्मण्डनमिश्रधाम" शङ्करदिग्विजयः । आधिक्येन गाने च "निवृत्ततर्षैरुपगीयमानात्" भाग० [गमेष्वपि" मनुः ।

नि+निश्चयेन गाने । "तथा च श्रुतयो बह्व्यो निगीता नि

परि+समन्ततो गाने । "तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः" भाग० १।१।१७ "ऋषिभिः परिगीतानि छन्दोभिश्च पृथक् पृथक्" गीता

प्र+प्रकर्षेण गाने । "यावत् कीर्त्तिर्मनुष्यस्य पृथक् लोके प्रगीयते" भा०उद्यो० ११८४

वि+निन्दने । "मृगया न विगीयते नृपैः" विगीयसे (केतक!) मन्मथदेहदाहिना" नैष० विविधगाने च । [गायकैः ।

सम्+सम्यग्गाने । "सङ्गीयमानसत्कीर्त्तिः सस्त्रीभिः सुर-

गैर त्रि० गिरौ भवः अण् । १पर्वतभवे स्त्रियां ङीप् । सा च (विषलाङ्गला) २लाङ्गलीवृक्षे रत्नमा० (गेरिमाटि) ३उपधातुभेदे न० शब्दार्थचि०।

गैरकंबूल न० नीलकण्ठताजकोक्ते वर्षलग्नकालिक ग्रहयोगभेदे तल्लक्षणादि तत्रोक्तं यथा "यस्याधिकारः खर्चादि शुभोऽवाऽप्यशुभोऽपि वा । केनापि दृश्यमूर्त्तिश्च स शून्याध्वग इष्यते । लग्नकार्येशयोरित्थशाले शून्याध्वगः शशी । उक्तादिपदशून्यस्त्वा नेत्थशालोऽस्ति केनचित् । यद्यन्यर्क्षं प्रविश्यैषः स्वभोच्चस्येत्थशालवान् । गैरकंबूलमेतत्तु पदोनेनाशुभं स्मृतम् । उदा० । लिप्से सुखमिति प्रश्ने सिंहलग्नं रविः क्रिये । अष्टांशैः, सुखपः कुम्भे भौमोऽंशैः रविभिस्तयोः । इत्थशालोऽस्ति तत्रेन्दुः कन्यायां चरमेऽंशके । खर्चादिपदहीनस्य नेत्थशालोऽस्ति केनचित् । खर्चोज्झितेन शशिनाऽन्यर्क्षस्थे नेत्थशालकृत् । गैरकंबूलमन्येन सहायाल्लाभदायकम्" । इषो० गैरकंबूलमप्यत्र

गैरायण पुंस्त्री गिरेर्गोत्रापत्यम् अश्वा० फञ् । गिरिगोत्रापत्ये ।

गैरिक न० गिरौ भवम् ठञ् । (गेरिमाटि) उपधातुभेदे तद्गुणादि भावप्र० उक्तं यथा । "गैरिकं रक्तधातुश्च गैरेयं गिरिजं तथा । सुवर्णगैरिकं त्वन्यत् ततो रक्ततरं हि तत् । गैरिकद्वितयं स्निग्धं मधुरं तुवरं हिमम् । चक्षुष्यं दाहपित्तास्रकफहिक्काविषापहम्" [राजनि०।

गैरिकाक्ष पु० गैरिकमिवाक्षि पुष्पमस्य । जलमधुके वृक्षे ।

गैरेय न० गिरौ भवम् ढक् । शिलाजतुनि अमरः । (गेरिमाटी) ख्याते उपधातुभेदे भावप्र०।

गो पुंस्त्री गच्छत्यनेन गम—करणे डो । १स्वनामख्याते पशुभेदे वृषस्य यानसाधनत्वात् स्त्रीगव्याश्च दानद्वारा स्वर्गगतिसाधनत्वाच्च तथात्वम् । गतिसाधनतया तस्य तथार्थत्वयोगेन यौगिकत्वेऽपि योगरूढत्वम् । एतेन दर्पणकृता "व्युत्पत्तिलभ्यस्य मुख्यार्थत्वे गौः शेते इत्यत्रापि लक्षणा स्यात् "गमेर्डोः" इति व्युत्पादितस्य गोशब्दस्य शयनकालेऽपि प्रयोगात्" इति यदुक्तं तत् यामादिकमेव गमेर्डोः इत्युणादिप्रत्ययस्य कर्त्तृवाचकत्वानियमात् "ताभ्यामन्यत्रोणादयः पा०सूत्रे उणादीनां अपादानसंप्रदानभिन्नार्थत्वनियमात् अत्र करणार्थकडोप्रत्ययेन व्युत्पादितस्य गोशब्दस्य शयनकालेऽपि गतिसाधनस्वरूपयोग्यवाचकत्वात् फलोपधायकत्वनियमे यानासनशयनादीनामपि गतिशयनादिविगमकाले तच्छब्दवाच्यतानुपपत्तेः । गम्यते ज्ञायते अनेन करणे, शीघ्रं गच्छति कर्त्तरि वा डो । २रश्मौ किरणे तस्य शीघ्रगामित्वात् चाक्षुषज्ञानहेतुत्वाच्च तथात्वम् सूर्यादिकिरणसंपर्कं विना चाक्षुषज्ञानासम्भवात् रश्मेर्ज्ञानसाधनत्वात् तथात्वम् । ३वज्रे ४हीरके तस्यापि कठिनद्रव्येऽपि गतिमत्त्वात् तथात्वम् । कर्मणि डो । ५स्वर्गे कर्मिभिर्गम्यमानत्वात् तस्य तथात्वम् मेदि०। ६चन्द्रे विश्वः कर्मिभिस्तल्लोकगमनात्तस्य तथात्वम् ७सूर्ये ८गोमेधयज्ञे भानुदीक्षितः । सूर्यस्य शीघ्रगतिकत्वात् अर्चिरादिस्वधिष्ठातृतया आतिवाहिकत्वात् तथात्वम् । "संवत्सरादादित्यमादित्याच्चन्द्रमसम्" छा०उ०। आतिवाहिकशब्दे ६५१पृ०दृश्यम् ९ऋषभनामौषधे राजनि०। तस्य गोनामकत्वात् तथात्वम् । करणे डो । १०नेत्रे स्त्री तस्य चाक्षुषज्ञानसाधनत्वात् तथात्वम् । कर्त्तरि डो । ११वाणे स्त्री तस्य शीघ्रगतिकत्वात् तथात्वम् । कर्मणि डो । १२दिशि स्त्री दिशां पलायनकाले गम्यमानत्वात्तथात्वम् । १३वाचि स्त्री तस्याः ज्ञानहेतुत्वात् तथात्वम् । आधारे डो । १४भुवि स्त्री तस्याः गमनाधारत्वात् तथात्वम् १५जले च स्त्रीब०व० केचित् तस्य निम्नगतित्वात् १६पशुमात्रे अमरः १७मातरि १८लोमनि भानुदीक्षितः । १९वृषराशौ २०नवसंख्यायाम् गोभूमेर्नवखण्डात्मकत्वात् आकाशे सदागतिमद्ग्रहाणां नवत्वाद्वा तत्संख्यासाम्यात् तथात्वम् । २१पुत्रस्यभार्यायां गविजातशब्दे २५६६ पृ०दृश्यम् । ज्ञानहेतुत्वात् २२इन्द्रिये गोचरः । पदान्तस्थितस्योपसर्जनस्य समा० ह्रस्वः शीतगुः सहस्रगुः । अस्य उत्तरपदस्थत्वे तत्पुरुषे अच् समा०। पुंसि परमगवः स्त्रियां षित्त्वात् ङीष् दुग्धगवी गोः पुरीषं मयट् । गोमय (गोवर) ख्याते पदार्थे न० गौर्विद्यतेऽस्य मिनि गोमिन् । मतुप् । गोमत् गोविशिष्टे गोस्वामिनि च त्रि० स्त्रियां ङीप् । गोःस्थाने गोष्ठच् गोगोष्ठ गोस्थाने न० गोमांसगुणा भावप्र०उक्ता यथा "गोमांसं तु गुरु स्निग्धं पित्तश्लेष्मविवर्द्धनम् । वृंहणं वातहृत् बल्यमपथ्यं पीनसप्रणुत् । गोरिदं यत् "वान्तो यि प्रत्यये" पा० अवादेशः । गव्य गोदुग्धादौ भावप्र० तद्गुणाद्युक्तं यथा

"गव्यं दुग्धं विशेषेण मधुरं रसपाकयोः । शीतलं स्तन्यकृत् स्निग्धं वातपित्तास्रनाशनम् । दोषधातुमल-

स्रोतःकिञ्चित्क्लेदकरं गुरु। जरासमस्तरोगाणां शान्तिकृत् सेविनां सदा”। क्षीरवर्गशब्दे २२७७ पृ० विवृतिः। गव्यदधिगुणाः भावप्र०उक्ता यथा

“गव्यं दधि विशेषेण स्वाद्वम्लञ्च रुचिप्रदम्। पवित्रं दीपनं हृद्यं पुष्टिकृत् पवनापहम्। उक्तं दध्नामशेषाणां मध्ये गव्यं गुणाधिकम्”

“तन्नवनीतगुणाः” तत्रोक्ता यथा

“नवनीतं चितं गव्यं वृष्यं वर्णबलाग्निकृत्। संग्राहि वातपित्तासृक्क्षयार्शोऽर्दितकासहृत्। तद्धितं बालके वृद्धे विशेषादमृतं शिशोः”

तद्घृतगुणाः भावप्र० उक्ता यथा

“गव्यं घृतं विशेषेण चक्षुष्यं वृष्यमग्निकृत्। स्वादुपाककरं शीतं वातपित्तकफापहम्। मेधालावण्यकान्त्योजस्तेजोवृद्धिकरं परम्। अलक्ष्मीपापरक्षोघ्नं वयसः स्थापकं गुरु। बल्यं पवित्रमायुष्यं सुमङ्गल्यं रसायनम्। सुगन्धं रोचनं चारु सर्वाज्येषु गुणाधिकम्”।

तन्मूत्रगुणा भावप्र० उक्ता यथा

“गोमूत्रं कटु तीक्ष्णोष्णं क्षारं तिक्तं कषायकम्। लघ्वग्निदीपनं मेध्यं पित्तकृत्कफवातहृत्। शूलगुल्मोदरानाहकण्डूक्षिमुखरोगजित्। किलासगदवातामवस्तिरुक् कुष्ठनाशनम्। कासश्वासापहं शोथकामलापाण्डुरोगहृत्। कण्डूकिलासगदशूलमुखाक्षिरोगान् गुल्मातिसारमरुदामयमूत्ररोधान्। कासं सकुष्ठजठरक्रिमिपाण्डुरोगान् गोमूत्रमेकमपि पीतमपाकरोति। सर्वेष्वपि च मूत्रेषु गोमूत्रं गुणतोऽधिकम्। अतोऽविशेषात् कथने मूत्रं गोमूत्रमुच्यते। प्लीहोदरश्वासकासशोथवर्चोग्रहापहम्। शूलगुल्मरुजानाहकामलापाण्डुरोगहृत्। कषायं तिक्ततीक्ष्णञ्च पूरणात् कर्णशूलनुत्”।

तत्र सौरभ्याम् “पङ्के गौरिव सीदति” भा०वि० १८१। “यथा गौर्गवि चाफला” मनुः “गोव्रतवत् विहितः कल्पः” प्रा०त० विश्वा०। वाचि “पन्नगगवीगुम्फेषु चाजागरीत्” मल्लि० “प्रेयोद्गतपतङ्गपुङ्गवगवीहैयङ्गवीनं रसात्” नैष० नेत्रादिषु “गोमध्यमध्ये! स्वर्गगोधरे! हे सहस्रगोभूषणकिङ्कराणाम्। नादेन गोभृच्छिखरेषु मत्ता नृत्यन्ति गोकर्णशरीरभक्षाः” चौरः। “गामात्तसारां रघुरप्यवेक्ष्य” रघुः “क्षिप्रावरोधाङ्गनसत्पथेन गाम्” माघः। हितादौ यत्। गव्य गौर्हितादौ भुवि पदान्ते गोशब्दस्य अतिपरे पररूपं गोऽग्रं प्रकृतिभावश्च गो अग्रं अचिपरे वा अवङ् गवाग्रम्। अश्वशब्दे परे गवाश्वादि० द्वन्द्व एकवद्भावः। गवाश्वम्। [वैद्यक०

गोकण्ट पु० गोः पृथिव्याः कण्ट इव। (गोखुरी) क्षुपभेदे

गोकण्टक पु०न० गोः भूमेः कण्टक इव। १विकङ्कततरौ (वइचि) राजनि०। २गोः क्षुरे च मेदि० ३तत्क्षते स्थपुटे ४विषमोन्नते हेमच०।

गोकर्ण पु० गौरिव कर्णौ यस्य। १सर्पे, “नृत्यन्ति गोकर्णशरीरभक्षाः” इति चौरः। गोरिव कर्णावस्य। २अश्वतरे, ३मृगभेदे, ४गणदेवताभेदे, ५अनामिकायुतविस्तृताङ्गुष्ठमाने, शैवे ६तीर्थभेदे च मेदि०। ७रुद्रभेदे। “गजेन्द्रकर्ण! गोकर्ण पाणिकर्ण! नमोऽस्तु ते” भा०शा० २८६ अ० “महाबलस्य गोकर्णे” आगमः “गोकर्णे भद्रकर्णी स्यात्” देवीगीता “ततोऽभिव्रज्य भगवान् केरलांस्तु त्रिगर्त्तकान्। गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः”। भाग०। ८काशीस्थे शिवलिङ्गभेदे च “गोकर्णभारभूतेशौ तत्कर्णौ परिकीर्त्तितौ” काशीख०२१अ०।

गोकर्णी स्त्री गोः कर्ण इव पत्रमस्याः गौरा०ङीष्। मूर्वालतायाम् अमरः। [अणोपधत्वात् न ह्रस्वः। गवादौ

गोका स्त्री गौरेव स्वार्थे क। “केऽणः” पा०ह्रस्व पूर्वणकारेण

गोकामुख पु० भारतवर्षस्थे पर्वतभेदे “भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः। मलयमङ्गलप्रस्थ इत्युपक्रमे “नीलो गोकामुख इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलाः” भाग० ५।१९।१५।१०श्लो०

गोकिराटिका स्त्री गां वाचं किरति कॄ-क तथा सती अटति अट-ण्वुल्। सारिकायाम् खगभेदे हेमच०।

गोकिराटा स्त्री गोकिरा वाणीकिरा सती अटति अट-अच् गौरा० ङीष्। सारिकाखगे राजनि०।

गोकि(की)ल पु० गोः पृथिव्याः कील इव। १मुसले २हले च हारा०। पृषो० ह्रस्वमध्यः तत्रार्थे हेमच०।

गोकुल न० ६त०। १गोसमूहे। “ग्रामान् वा बहुगोकुलान्” भा०व०१७१।७८। गवां कुलमत्र। २गोष्ठे “गोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः। अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च” ति०त०शाता०। मथुरापुर्य्याः पूर्वदक्षिणस्थे यमुनापारवर्त्तिनि व्रजाख्ये ३नन्दगोपवासस्थाने च “कालेन व्रजता तात! गोकुले रामकेशवौ जानुभ्यां सह पाणिभ्यां रिङ्गमाणौ विजह्रतुः” भाग० १०स्क०। गोऽभिजनोऽस्य अण् तस्य बहुत्वे लुक्। पित्रा-

दिक्रमेण तद्वासिजनेषु आर्षे प्रयोगे क्वचित् एकार्थेऽपि लुक्। "लोकं विकुण्ठमुपनेष्यति गोकुलं स्म" भा० २।८।२२ "गोकुलं गोकुलवासिजनम्" श्रीधरः

गोकुलिक त्रि० गोर्नेत्रस्य कुलः संस्थानमत्र। १केकरे। गवि पङ्कस्थगव्यां कुलिकः जडइव। २पङ्कस्थगव्युपेक्षके च मेदि०।

गोकृत न० ६त०। १गोमये २गवा चरिते त्रि०।

गोक्ष्वोडक पुंस्त्री गवि क्ष्वोड इव कायति कै—क। सुश्रुतोक्ते प्रतुदस्वगभेदे कपोतादिगणे "कुलिङ्गगोक्ष्वोडकेत्याद्युक्त्वा "प्रतुदाः" इत्युक्तं सुश्रुतेन।

गोखा स्त्री गां भूमिं खनत्यनया खन—ड। नखे पाठान्तरे क्रोडादिषु पाठात् स्वाङ्गत्वेऽप्युपसर्जने न ङीष्

गोखु(क्षु)र पु० गोः पृथिव्याः खु(क्षु)र इव। स्वनामख्याते क्षुपभेदे। तत्पर्यायगुणाद्युक्तं भावप्र०
"गोक्षुरः क्षुरकोऽपि स्यात् त्रिकण्टः स्वादुकण्टकः। गोकण्टको गोक्षुरको वनशृङ्गाट इत्यपि। श्मूलं कषा श्वदंष्ट्रा च तथा स्यादिक्षुगन्धिका। गोक्षुरः शीतलः स्वादुर्बलकृद् वस्तिशोधनः। मधुरो दीपनो वृष्यः पुष्टिदश्चाश्मरीहरः। प्रमेहश्वासकासार्शःकृच्छ्रहृद्रोगवातनुत्"।

स च लघुपञ्चमूलान्तर्गतो दशमूलान्तर्गतश्च यथाह तत्रैव "शालपर्णी पृश्निपर्णी वार्त्ताकी कण्टकारिका। गोक्षुरः पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम्। पञ्चमूलं लघु स्वादु बल्यम्पित्तानिलापहम्। नात्युष्णं बृंहणं ग्राहि ज्वरश्वासाश्मरीप्रणुत्" "उभाभ्यां पञ्चमूलाभ्यां दशमूलमुदाहृतम्। दशमूलं त्रिदोषघ्नं श्वासकासशिरोरुजः। तन्द्राशोथज्वरानाहपार्श्वपीडाऽरुचीर्हरेत्।"

गोखुरिः इकारान्तोऽपि तत्रार्थे शब्दर०पृषो०साधु।

गोगोयुग न० गवोर्द्वित्वम् गो+द्वित्वे गोयुगच्। गवोर्द्वित्वे।

गोगोष्ठ न० गोः स्थानम् गो+स्थाने गोष्ठच्। गवां स्थाने।

गोगृष्टि स्त्री गौर्गृष्टिः जात्या समासे परनिपातः। सकृत्प्रसूतायां गवि सि०कौ०।

गोग्रन्थि पु० गोजातो ग्रन्थिः। १करीषे। गोर्ग्रन्थिर्यत्र। २गोष्ठस्थाने। ३गोर्ग्रन्थिरिव। गोजिह्विकौषधौ मेदि०।

गोघ्न त्रि० गां हन्ति हन—क ६त०। गोहन्तरि। तद्व्रतं मनुना दर्शितं यथा
"उपपातकसंयुक्तो गोघ्नो मासं यवान् पिबेत्। कृतवापो वसेद्गोष्ठे चर्मणा तेन संवृतः। चतुर्थकालमश्नीयादक्षारलवणं मितम्। गोमूत्रेण चरेत् स्नानं द्वौ मासौ नियतेन्द्रियः। दिवानुगच्छेत्ता गास्तु तिष्ठन्नूर्द्ध्वं रजः पिबेत्। शुश्रूषित्वा नमस्कृत्वा रात्रौ वीरासनं वसेत्। तिष्ठन्तीष्वनुतिष्ठेत्तु व्रजन्तीष्वप्यनुव्रजेत्। आसीनासु तथासीनो नियतो वीतमत्सरः। आतुरामभिशस्तां च चौरव्याघ्रादिभिर्भयैः। पतितां पङ्कमग्नां वा सर्वोपायैर्विमोचयेत्। उष्णे वर्षति शीते वा मारुते वाति वा भृशम्। न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः। आत्मनो यदि वान्येषां गृहे क्षेत्रे खलेऽथवा। भक्षयन्तीं न कथयेत् पिबन्तं चैव वत्सकम्। अनेन विधिना यस्तु गोघ्नो गामनुगच्छति। स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति। वृषभैकादशा गाश्च दद्यात् सुचरितव्रतः। अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत्।
"गोघ्नवत् विहितः कल्पश्चान्द्रायणमथापि वा" प्रा०त० स्मृतिः। गौर्हन्यतेऽस्मै सम्प्रदाने क। २अतिथिभेदे तस्यागमने हि मधुपर्कार्थं गोहननं विहितम् "महोक्षं वा महाजं वा श्रोत्रियाय प्रकल्पयेत्" इति स्मृतेः कलौ तु तन्निषेधः "मधुपर्के पशोर्वधः" इत्यादिब्रह्मपुराणे कलिवर्ज्येषु तस्योक्तेः।

गोघृत न० गोः पृथिव्या घृतमिव यस्य पोषकत्वात्। १वृष्टिजले त्रिका०। ६त०। २गव्ये घृते च

गोचन्दन न० गोशीर्षाख्यं चन्दनम् शा०त०। गोशीर्षाख्ये चन्दने "गोचन्दनामोहनिकामधुकमाक्षिकं मधु। सुवर्णमिति संयोगः पेयः सौभाग्यमिच्छता" सुश्रुतः

गोचर पु० गावः इन्द्रियाणि चरन्त्यस्मिन् नि० अच्। १इन्द्रियवेद्ये रूपरसादौ विषये। एकैकेन्द्रियविषयाश्च शब्दादयस्तत्र श्रोत्रस्य शब्दो विषयः, एवं त्वचः स्पर्शः, नेत्रस्य रूपम्, जिह्वाया रसः, घ्राणस्य गन्धः। २ज्ञानमात्रविषयेऽपि "सदसत्संशयगोचरोदरी" नैष० "अवाङ्मनसगोचरम्" वेदा०सा० गोचरत्वं ज्ञाननिरूपिता विषयता सा च स्वरूपसम्बन्धविशेषः। कर्त्तरि अच्। ३भूमिचरे त्रि० गावश्चरन्त्यस्मिन् अच्। ४गवां प्रचारवनादौ, "उपारताः पश्चिमरात्रिगोचरात्" किरा० ५गन्तव्यदेशे "इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्" कठोप० ६देशमात्रे, "ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे" देवीमा०। ७गवां व्योमगतिमतां ग्रहाणां चरः भावे अच्। गतिभेदे च "गोचरे वा विलग्ने वा ये ग्रहारिष्टसूचकाः" ज्यो० सनिमित्ततया-

ऽस्त्यस्य अच् । ज्योतिषोक्ते जन्मराश्यवधिकेषु तत्तत् स्थानेषु रव्यादिग्रहगमननिमित्तशुभाशुभनिरूपणे । ज्योतिषोक्त गोचरशुद्ध्यशुद्धी वामवेध दक्षिणवेधादिकं च मु॰चि॰ पी॰धा॰ उक्तम् यथा

"सूर्यो रसान्त्ये खयुगेऽग्निनन्दे शिवाक्षयोर्भौमशनी तमश्च । रसाङ्कयोर्लाभशरे गुणान्त्ये, चन्द्रोऽम्बराब्धौ गुणनन्दयोश्च (१)। लाभाष्टमे चाद्यशरे रसान्त्ये नगद्वये, ज्ञोद्विशरेऽब्धिरामे । रसाङ्कयोर्नागविधौ खनागे लाभव्यये, देवगुरुः शराब्धौ (२) । द्व्यन्त्ये नवाशे द्विगुणे शिवाग्नौ, शुक्रः कुनागे द्विनगेऽग्निरूपे । वेदाम्बरे पञ्चनिधौ गजेषौ नन्देशयोर्भानुरसे शिवाम्नौ (३) । क्रमाच्छुभो विद्ध इति ग्रहैः स्यात्पितुः सुतस्यात्र न वेधमाहुः । दुष्टोऽपि खेटो विपरीतवेधाच्छुभो द्विकोणे शुभदः सितेऽब्जः (४) । स्वजन्मराशेरिह वेधमाहुरन्ये ग्रहाधिष्ठितराशितः सः । हिमाद्रिविन्ध्यान्तर एव वेधो न सर्वदेशेष्विति काश्यपोक्तिः (५)। जन्मर्क्षे निधनं ग्रहे जनिभतो घातः, क्षितिः श्रीर्व्यथा चिन्ता सौख्यकलत्रदौस्थ्यमृतयः स्युर्माननाशः सुखम् । लाभोपाय इति क्रमात्तदशुभध्वस्त्यै जपः स्वर्णगोदानं शान्तिरथो ग्रहं त्वशुभदं नो वीक्ष्यमाहुः परे (६)। पापान्तःपापयुक् द्यूने पापाच्चन्द्रः शुभोऽप्यसत् । शुभांशे चाधिमित्रांशे गुरुदृष्टोऽशुभोऽपि सत् (७)। सितासितादौ सदृष्टे चन्द्रे पक्षौ शुभावुभौ । व्यत्यासे चाशुभौ प्रोक्तौ सङ्कटेऽब्जबलं त्विदम् (८)। वज्रं शुक्रेऽब्जे सुमुक्ता,प्रवालं भौमे,ऽगौ गोमेदमार्कौ सुनीलम् । केतौ वैदूर्यं, गुरौ पुष्पकं ज्ञे पाचिः, प्राङ्माणिक्यमर्के तु मध्ये (९)। माणिक्यमुक्ताफलविद्रुमाणि गारुत्मतं पुष्पकवज्रनीलम् । गोमेदवैदूर्यकमर्कतः स्युरत्नान्ययोग्यस्य मुदे सुवर्णम् (१०)। धार्यं राजावर्त्तकं राहुकेत्वोरौप्यं शुक्रेन्द्वोश्च, मुक्ता गुरोस्तु । लोहं मन्दस्यारभान्वोः प्रवालं ताराजन्मर्क्षाच्चिरादृत्तितः स्यात्" (११) । मुहू॰ चि॰ ।

"अथ गोचरप्रकरणं व्याख्यायते तत्र जन्मराशितः प्रोक्तनिषिद्धस्थानस्थितेदानीन्तनग्रहवशेन शुभाशुभनिरूपणं गोचर इत्युच्यते तत्र ग्रहाणां गोचरफलं शुभाशुभरूपमुपजातिकाद्वयेनेन्द्रवज्रया चोपजातिका पूर्वार्द्धेन चाह सूर्यो रसान्त्ये इत्यादौ सर्वोद्वन्द्वोविभाषयैकवद्भवतीति समाहारद्वन्द्व एकवचनान्तः। शिवाक्षयोरित्यादावितरेतरयोगद्वन्द्वः अम्बराब्धावित्यादिषु त्वनित्यमागमशासनमिति नुमभावोऽध्येयः एवं सर्वत्र व्याख्येयम् । अत्र चतुर्थश्लोकेनान्वयः स्वजन्मराशेरिति पञ्चमश्लोकस्य पदमत्राध्याहार्यम्। तत्र सूर्यो ग्रहः स्वजन्मराशेः रसान्त्ये क्रमाच्छुभो विद्धश्च स्यात् । सूर्यः स्वजन्मराशेः सकाशाद्यदि षष्ठस्थाने तदा शुभम् अतः जन्मराशेर्द्वादशस्थानस्थिताश्चेदन्ये ग्रहाः स्युस्तदा विद्धः शुभोऽप्यशुभफलदाता अत्र शनैश्चरस्य सूर्यपुत्रत्वात्तद्वेधो नाङ्गीकार्यः यतः पितुर्जनकस्य सुतसम्बन्धिनं वेधं नाहुः सुतस्यापि पितृसम्बन्धिवेधं नाहुः । तथा खयुगे जन्मराशेर्दशमे सूर्यः शुभश्चतुर्थस्थानस्थिताश्चेदन्ये ग्रहाः शनिवर्जिताश्च स्युःतदा विद्ध इत्येवं श्लोकत्रयं सम्यग्व्याख्येयम् । तथा अग्निनन्दे तृतीयनवमयोः, शिवाक्षयोरेकादशपञ्चमयोः सूर्यः क्रमाच्छुभो विद्धश्च ज्ञेयः उक्तञ्च नारदेन "शुभोऽर्को जन्मतस्त्र्यायदशषष्ठस्तु विध्यते। जन्मतो नवपञ्चाम्बुव्ययगैर्व्यार्किभिस्तदा"। अथ भौमेति। भौमशनी तमो राहुश्चैते ग्रहाः स्वजन्मराशितः रसाङ्कयोः षष्ठनवस्थानयोः क्रमाच्छुभा विद्धाश्चेत्यर्थः परन्तु शनेः सूर्यवेधो नास्तीत्युक्तमेवेति । यदाह वसिष्ठः "त्रिषडेकादशसंस्थितो धरासुतो रिष्फधर्मसुतसंस्थैः। दिनकरतनयोऽपि शुभो न विद्यते खेचरैर्विनोष्णकरमिति"। "शनिवद्राहुर्ज्ञेय" इति वचनाद्राहोरप्येवमेव विचारः । राहोरुपलक्षणत्वात्केतोरपि उक्तञ्च शार्ङ्गधरेण "राहुकेतुफलं सर्वं मन्दवत्कथितं बुधैः। वेधोऽपि तद्वदेवोक्तो वामवेधस्तथैव च ।" अथ चन्द्र इति जन्मराशितः अम्बराब्धौ दशमचतुर्थयोः, गुणनन्दयोस्तृतीयनवमयोः(१) लाभाष्टमे एकादशाष्टमयोः, आद्यशरे प्रथमपञ्चमयोः, रसान्त्ये षष्ठद्वादशस्थानयोः नगद्वये सप्तमद्वितीययोः स्थानयोश्चन्द्रः क्रमात्शुभः विद्धश्च ज्ञेयः चन्द्रस्य बुधवेधो नास्ति । उक्तञ्च नारदेन "विध्यते जन्मतोनेन्दुर्द्यूनाद्यायारिखत्रिषु। खेम्बष्टान्त्याम्बुधर्मस्थैर्विबुधैर्जन्मतः शुभः" इति । अथ ज्ञ इति जन्मराशेः द्विशरे द्विपञ्चमयोः अब्धिरामे चतुर्थतृतीययोः, रसाङ्कयोः षष्ठनवमयोः, नागविधौ अष्टमप्रथमयोः, खनागे दशमाष्टमयोः, लाभव्यये एकादशद्वादशयोः स्थानयोर्ज्ञो बुधः क्रमाच्छुभो विद्धश्च ज्ञेयः । परं त्वत्र चन्द्रवेधो नास्ति यदाह नारदः "ज्ञः स्वाब्ध्यङ्गाष्टखायेषु जन्मतश्चेन्न विध्यते । सुतत्र्याद्याष्टमान्त्यसंस्थितैरिन्दुजः शुभः" इति अथ देवगुरु-

रिति जन्मराशितः शराब्धौ पञ्चमचतुर्थयोः, (२) इत्यन्ये द्वितीयद्वादशस्थानयोः, नवाशे नवमदशमयोः स्थानयोः द्विगुणे द्वितीयतृतीययोः शिवाग्नौ एकादशतृतीययोः। देवगुरुर्वृहस्पतिः क्रमाच्छुभो विद्धश्च ज्ञेयः उक्तञ्च नारदेन "जन्मतः स्वायगोऽब्ध्रद्रिद्व्यन्त्याष्टखजलत्रिगैः जन्मराशेर्गुरुः श्रेष्ठो ग्रहैर्यदि न विध्यते" इति। अथ शुक्र इति जन्मराशेः कुनागे प्रथमाष्टमयोः, द्विनगे द्विसप्तमयोः, अग्निरूपे तृतीयप्रथमयोः, वेदाम्बरे चतुर्थदशमयोः, पञ्चनिधौ पञ्चमनवमयोः, गजेषौ अष्टमपञ्चमयोः, नन्देशयोर्नवमदशमयोः, भानुरसे द्वादशषष्ठयोः, शिवाग्नौ एकादशतृतीययोः स्थानयोः, (२) शुक्रः क्रमाच्छुभो विद्धश्च ज्ञेयः यदाह नारदः "जन्मभादासुताष्टाङ्कान्त्यायेष्विष्टो न विध्यते। भार्गवो मृत्युखाद्यस्वाङ्केशायारिपुत्रगैरिति" आसुतेत्यभिविधावाङः सहतेमान्त्राभिविधिरिति तेन प्रथमद्वितीयतृतीयचतुर्थपञ्चमानां गृहाणामित्यर्थः। इदमत्राकूतं यो यो ग्रहः रसत्र्यद्र्यादौ प्राक्पठितेषु स्थानेषु विद्यमानः स स ग्रहः शुभदः शुभस्थानव्यतिरिक्ताखिलस्थानेषु विद्यमानः स स ग्रहो,ऽशुभफलदाता अतएवाह श्रीपतिः "सर्वे लाभगृहस्थिताश्च खरिपुस्थार्कः कुजार्की त्रिषट्। प्राप्तौ साद्यसमन्मथारिषु शशी स्वास्तारिवर्जं भृगुः। धीधर्मास्तधनेषु वाक्पतिरिति स्वाष्टाम्बुखस्थो बुधः श्रेष्ठो जन्मगृहाद्धि गोचरविधौ विद्धो न चेत् स्याद्ग्रहैरिति"। अर्थादेवानुक्तस्थानेष्वशुभः स स ग्रहः। अत ग्रहाणां विद्धनिषिद्ध स्थानफलानि विव्रियते। तत्र

रवेः। "स्थानं जन्मनि नाशयेद्दिनकरः कुर्य्यात्, द्वितीये भयं, दुश्चिक्ये३ श्रियमातनोति हिबुके४ मानक्षयं यच्छति। दैन्यं पञ्चमगः करोति रिपुहा षष्ठेऽर्थहा सप्तमे पीडामष्टमगः करोति परुषां कान्तिक्षयं धर्म९गः। कर्मसिद्धिजनकस्तु कर्म१०गोवित्तलाभकृदथाय११संस्थितः। द्रव्यनाशजनितां महापदं यच्छति व्यय१२गतो दिवाकरः"

चन्द्रस्य—जन्मन्यन्नं दिशति हिमगुर्वित्तनाशं द्वितीये दद्यात् द्रव्यं सहज३भवने कुक्षिरोगं चतुर्थे। कार्य्ये नाशं तनय५स्थगोवित्तलाभं च षष्ठे द्यूने७ द्रव्यं युवतिसहितं मृत्यु८संस्थोऽपमृत्युम्। नृपभयं कुरुते नवमः शशी दशमधामगतस्तु महत् सुखम्। विविधमाय११गतः कुरुते धनं व्यय१२गतस्तु रुजं धनसंचयम्"

कुजस्य—"प्रथमगृहगः क्षौणीसूनुः करोत्यरिजं भयं क्षपयति धनं वित्त२स्थाने तृतीयगतोऽर्थदः। अरिभयमतः पाताले४ऽर्थान् क्षिणोति हि पञ्चमो रिपु६गृहगतः कुर्य्याद्वित्तं रुजं मदन७स्थितः। जननितो निधन८स्थः शत्रुबाधां धराजो दिशति नवमसंस्थः कायपीडामतीव। शुभमपि दशमस्थो लाभ११गो भूरिलाभं १२व्ययभवनगतोऽसौ व्याध्यनर्थार्थनाशान्"

बुधस्य—"बुधः प्रथमगोभयं दिशति बन्धमर्थे धने२ धनं रिपुभयान्वितं सहज३मथचतुर्थेऽर्थदः। अनिर्वृतिकरो भवेत्तनय५गोऽरि६गः स्थानदः करोति मदन७स्थितो बहुविधां शरीरव्यथाम्। अष्टमे शशिसुते धनवृद्धिर्धर्म९गस्तु महतीं तनुपीडाम्। कर्म१०गः सुखमथाय११गतोऽर्थं द्वादशे भवति वित्तविनाशः।

गुरोः—"भयं जन्मन्यायौ जनयति धन२स्थोऽर्थमतुलं तृतीयेऽक्लेशं दिशति च चतुर्थेऽर्थविलयम्। सुखं पुत्र५स्थाने रुजमपि च कुर्य्यादरि६गृहे गुरुर्द्यूने७ पूजां धननिचयनाशं च निधने८। धर्म९गतो धनवृद्धिकरः स्वात्मीविहरो दशमेऽमरपूज्यः। स्थानधनानि ददाति स चाये११ द्वादशगस्तनुमानसपीडाम्"

भृगोः। "जन्मन्यतिशयकरो भृगुजोऽर्थदोऽर्थे२ दुश्चिक्य३गः सुखकरोधनदश्चतुर्थे। स्यात् सुतदस्तनय५गोऽरि६गतोऽरिवृद्धिं शोकप्रदो मदन७गोनिधने८ऽर्थदायी। जनयति विविधाम्बराणि धर्मे९ न सुखकरो दशमस्थितस्तु शुक्रः। धननिचयकरः स लाभ११संस्थो व्यय१२भवनेऽपि धनागमं करोति"

शनेः। "वित्तभ्रंशं रुगाप्तिं दिनकरतनयो जन्मराशिं प्रपन्नो वित्तक्लेशं द्वितीये धनहरणकृतं वित्तलाभं तृतीये। पाताले४ शत्रुवृद्धिं सुतभवन५गतः पुत्रभृत्यार्थनाशं षष्ठे स्थानेऽर्थलाभं जनयति मदने७ दोषसंघातमार्किः। शरीरपीडां निधने८ च धर्मे९ धनक्षयं कर्मणि१० दौर्मनस्यम्। उपान्त्य११गो वित्तमनर्घमन्त्ये१२ शनिर्ददातीत्यवदद्वसिष्ठः"

राहोः केतोश्च—"राहुर्जन्मगतो भयं च कलहं सौभाग्यमानक्षयं वित्तभ्रंशमहासुखं नृपभयं कार्यक्षयं यच्छति। सन्तापं कलहं च वित्तमधिकं शीघ्रं विनाशं नृणां केतुस्तत्फलमेव राशिषु वदेत्कं सन्ति गर्गादयः"।

एतच्छुभाशुभरूपाग्रहा कक्षसन्धिगतास्तथा राशिसन्धिगता अग्रराशेः फलं ददति वक्रिणस्तु प्राग्राशेरित्याह कमलासनः "कक्षसन्धिगताः

खेटाः राशिसन्धिगता ग्रहाः । एषु राशेः फलं दद्युर्वक्री तद्विपरीतगमिति" राशिग्रहणं नक्षत्रस्याप्युपलक्षणम् । वसिष्ठोऽपि "भवनान्तगताधिष्ण्यान्तगताश्च गगनचराः । दद्युः परभवनफलं प्राग्भवनफलं च वक्रिता यत्र" इति । अस्यार्थः ऋक्षं नक्षत्रं तस्य सन्धिः एकस्मान्निर्गत्यापरत्र संक्रमणं सन्धिरेवं राशिसन्धिश्च । तत्र सन्धिज्ञानम् । "देवद्यङ्कर्त्तवोऽष्टाष्टौ नाड्योऽङ्काः खनृपाः क्रमात् । वर्ज्याः संक्रमणेऽर्कादेः प्रायोऽर्कस्यातिनिन्दिताः" इति विवाहप्रकरणे वक्ष्यति ग्रन्थकृत् । संक्रमणकाल एव सन्धिकालः सर्वेषां ग्रहाणाम् "घटिघ्नविम्बं ग्रहभुक्तिभक्त"मित्यादिना भास्करेणोक्तत्वात् । तदेतदस्माभिः संक्रान्तिप्रकरणे सप्रपञ्चं निरूपितं तत एवावधार्यम् । तत्र सूर्यादिग्रहाः देवद्यङ्केतिपद्योक्त घटिकोपलक्षिते नक्षत्रान्ते राश्यन्ते वा स्थिता जिगमिषितस्य नक्षत्रस्य राशेर्वा फलं प्रयच्छन्ति वक्रिणस्तु पूर्वोक्तलक्षणोपलक्षिते नक्षत्रादौ राश्यादौ वा स्थिता भुक्तस्य नक्षत्रस्य राशेर्वा फलं ददति । तत्र भौमाद्याः ग्रहाः वक्रातिचारयोः प्राप्याशिफलं कियन्ति दिनानि प्रयच्छन्तीत्याह वसिष्ठः "दशदिवसं पञ्चदिनं त्रिपक्षमतिचारवक्रयोर्दद्युः । भौमाद्याः पञ्चदिनं प्राप्याशिफलं च पञ्च मासांश्चेति" भौमाद्याः स्वगत्या यावता कालेन राशिं जहति ततोऽल्पेन न्यूनाधिकभावेन स चारः यदा चारसमये राशिं जहति सोऽतिचारः, वक्रं प्रसिद्धमेव । अथ वामवेधं शुक्लपक्षे चन्द्रबलं चोपजात्युत्तरार्द्धेनाह । दुष्टोऽपि स्वजन्मराशेः सकाशादनिष्टस्थानस्थितोऽपि खेटो विपरीतवेधात् वामवेधाच्छुभः शुभफलदाता । अयमर्थः येषु षष्ठदशमतृतीयैकादशेषु स्थितः सूर्यः शुभफलदाता तद्भिन्नान्यष्टौ स्थानान्यशुभान्येव तत्र द्वादशचतुर्थनवमपञ्चमाख्येष्वनिष्टस्थानेषु स्थितः सूर्यस्तदैवानिष्टफलदः स्याद्यदा प्राक् पठितैः क्रमेण षष्ठादिस्थानस्थितैः शनिवर्जितैः ग्रहैर्न विद्धः यदा तु विद्धस्तदा शुभफलदोऽपि षष्ठादिस्थाने शुभदो नैव स्यात् । अन्येषु स्थानेषु प्रथमद्वितीयसप्तमाष्टमेषु स्थितः सूर्योऽनिष्टफलद एव । एवं चन्द्रबुधयोः षडेव विरुद्धस्थानानीति क्रमवेधवामवेधौ स्याताम् । भौमस्य तु त्रीण्येव शुभानीतराण्यशुद्धान्येव तत्र नवपञ्चमद्वादशस्थानस्थितभौमस्याशुभस्य क्रमेण षष्ठैकादशतृतीयस्थानस्थैर्ग्रहैर्वामवेधेन शुभत्वमेव । अन्येष्वशुभस्थानस्थितेष्वशुभ एव भौमः । एवं शनिराहुकेतवोऽप्येयाः गुरोरप्येवमेव । तत्र तु प्रथमषष्ठस्थानस्थो गुरुरशुभ एव । शुक्रस्य तु नवस्थानानां शुभत्वात्तद्व्यतिरिक्तानि त्रीणि षष्ठसप्तमदशमस्थानान्यशुभानि तेषामेव क्रमेण द्वादशद्वितीयचतुर्थस्थानस्थग्रहजनितवामवेधेन शुभत्वमेव । अन्येषां तूत्तरपठितत्वात् स्थानानां शुभत्वादेव न वामवेधविचारार्हत्वमिति परिच्छिन्नोऽर्थः यदाह कश्यपः "अपि विद्धो ग्रहः कश्चिन्न ददाति शुभं फलम् । वामवेधविधानेन त्वशुभोऽपि शुभप्रदः । अतस्तद्द्विविधं मूलं विचार्यासत् फलं वदेत्" इति । वसिष्ठोऽपि "वेधसमन्वितखचराणां प्रदिशन्त्यसत्फलं किञ्चित् । स्वव्यत्ययवेधविधानादपि शुभास्ते शुभप्रदाः सततमिति" व्यत्ययवेधो वामवेधः । द्विकोण इति । सिते शुक्लपक्षेऽब्जश्चन्द्रो द्विकोणे द्वितीयनवमपञ्चमस्थानेषु स्थितः शुभदः अत्रापि क्रमेण षष्ठाष्टमचतुर्थस्थानस्थितैर्बुधवर्जितैर्ग्रहैर्नो विद्धः इत्यपि ध्येयं उक्तं च नारदेन "शुक्लपक्षे शुभश्चन्द्रो द्वितीयनवपञ्चगैः । रिपुमृत्यम्बुसंस्थैर्न विद्धो हि गगनेचरैरिति" यदि विध्यते तदाऽशुभफलद एव (४) अथ द्विविधवेधे मतद्वयमुपजात्याह स्वजन्मेति । इह द्विविधवेधविधायन्ये नारदादयः । स्वजन्मराशेः सकाशाद्द्विविधं वेधं क्रामिकं वामिकं चाहुः । तथा चोभयत्रापि नारदेन जन्मत इत्युक्तम् । अथ कश्यपादिमतमुच्यते । स पुनर्द्विविधोऽपि वेधो ग्रहाधिष्ठितराशितो ज्ञेयः यथा सूर्यो जन्मराशेः सकाशात् षष्ठस्थितः शुभः स सूर्यःस्वाक्रान्तराशितो द्वादशस्थानस्थितैः शनिवर्जितैर्ग्रहैर्न विद्धः तथा सूर्यो जन्मराशिद्वादशस्थोऽपि नेष्टः स सूर्यःस्वाक्रान्तराशिषष्ठस्थितैः शनिवर्जितैर्ग्रहैर्विद्धश्चेत्तदा शुभफलद इत्यर्थः । अथैतस्यैव द्विविधवेधस्य देशविशेषविषयत्वमुच्यते । हिमाद्रिविन्ध्यनामानौ पर्वतौ प्रदेशविशेषावस्थित्या प्रसिद्धौ तयोरन्तरालवर्त्तिन्येव देशे स द्विविधोऽपि वेधो ज्ञेयः न सर्वदेशेषु हिमाद्रिविन्ध्यान्तरालबहिर्भूतसर्वदेशेषु द्विविधोऽपि वेधदोषो नास्तीति कश्यपस्य मुनेरुक्तिर्वचनम् । जन्मनक्षत्रादौ स्थानभेदे ग्रहणफलमाह जन्मार्क्ष इत्यादि । "यन्नक्षत्रगतो राहुर्ग्रसते चन्द्रभास्करौ । तज्जातानां भवेत्पीडा ये नराः शान्तिवर्जिताः ।" भार्गवीये विशेषोऽपि "यस्य राज्यस्य नक्षत्रे स्वर्भानुरुपरज्यते । राज्यभङ्गं सुहृन्नाशं मरणं चात्र निर्द्दिशेदिति" राज्यस्य नक्षत्रे अभिषेकनक्षत्रे यदा

कदाचिद्राहुभुज्यमाननक्षत्रसुपरागनक्षत्रेणैक्यमेव तदायं सन्दिग्धफलनिर्देशः यदा तु नक्षत्रभेदस्तदोपरज्यमाननक्षत्रेऽप्येव फलनिर्देशः एवं राशिभेदेषूपरज्यमानराशिभेदेष्वप्येवम्। यतोऽस्मन्मते राहोर्दिग्देशकालावरणादिभेदात् ग्रहणत्वमेव नास्ति। तदुक्तं सिद्धान्तशिरोमणौ "दिग्देशकालावरणादिभेदान्न च्छादको राहुरिति ब्रुवन्ति"। एतदुपपत्तिर्भास्करेण स्वपदैरेव निरूपिता पितृचरणैश्च तोडरानन्दे राहुचारविलासे प्रपञ्चिता परन्तु राहुसाहित्यं विना ग्रहणानयनस्य शरसंक्रान्तिमाश्रित्य खण्डानयनविशिष्टस्यासुकरत्वादिति साहित्यविवक्षयैव राहोरुपरक्तत्वमुच्यते। अतएवोक्तं वराहेण "तस्मिन् काले सान्निध्यमस्य तेनोपचर्यते राहुः। याम्योत्तरा शशिगतिर्गणिते ह्युपचर्यते तेनेति"५। अथ जन्मादिराशिफलमुच्यते जनिभत इति। पञ्चस्यास्तसिल् जन्मराशेरारभ्य द्वादशसु राशिषु ग्रहणे सति क्रमादनुक्रमेण घातादिफलं भवति यथा जन्मराशौ ग्रहणे सति घातः शरीरपीडा, द्वितीयराशौ क्षतिः द्रव्यनाशः, तृतीयराशौ श्रीर्लक्ष्मीः, चतुर्थराशौ शरीरपीडा, पञ्चमराशौ चिन्ता पुत्रादीनां, षष्ठराशौ सौख्यं, सप्तमराशौ कलत्रदौस्थ्यं स्त्रीमरणं, अष्टमराशौ मृत्युर्मरणं, नवमराशौ माननाशः, दशमराशौ सुखम्, एकादशराशौ लाभः, द्वादशराशौ मृत्युः स्वात्मन इति केचित् द्रव्यस्येत्यपरे, इदं च फलं षण्मासपर्यन्तमनुक्रमपि ध्येयं तदुत्तरं हि ग्रहणान्तरसम्भवात् यथोक्तं दैवज्ञमनोहरे "घातं हानिमथ श्रियं जननिभाद्ध्वंसं च चिन्तां क्रमात् सौख्यं दारवियोजनं च कुरुते व्याधिं च मानक्षयम्। सिद्धिं लाभमपायमर्कशशिनोः षण्मासमध्ये ग्रहः इति" क्वचित्तु "स्थानान्तर एवं शुभमध्यमाधमाः" इत्युक्तम्। दैवज्ञमनोहरे "मासात्तृतीयोऽष्टमगश्चतुर्थस्तथायसंस्थः शुभदः स्वराशेः। नवांशधीसप्तमगश्च विद्भिः पूज्यो द्विषट्को दशमाद्यसंस्थः" इति अत्र वाक्ये मासराशितोगणनोक्ता "त्रिषड्दशायोपगतं नराणां शुभप्रदं स्याद्ग्रहणं रवीन्द्वोः। द्विसप्तनन्देषु च मध्यमं स्याच्छेषेष्वनिष्टं मुनयो वदन्तीति" अत्रावध्यपेक्षायां स्वजन्मराशेरित्याद्याहार्यमेव। अथाशुभसूचकग्रहणप्रतीकारमाह तदशुभेति तत्र सूर्यचन्द्रयोर्ग्रहणस्य सम्बन्धि यदशुभं दुष्टफलं तस्य ध्वंस्यै नाशाय जपः स्वर्णगोदानं जपो गायत्र्यादीनां मन्त्राणां स्वर्णं प्रसिद्धं गौः प्रसिद्धा भूमिर्वा उपलक्षणत्वादन्येषां रूप्यादीनां यथाशक्त्या दानं कार्यमिति शेषः उक्तं च दैवज्ञमनोहरे "सुवर्णनिर्मितं नागं सतिलं ताम्रभाजनम्। सदक्षिणं सवस्त्रं च श्रोत्रियाय निवेदयेत्। सौवर्णं राजतं वापि बिम्बं कृत्वा स्वशक्तितः। भवेदपगतक्लेशः छिद्रे विप्राय कल्पयेत्। दानमन्त्रश्च। तमोमय! महाभीम! सोमसूर्यविमर्दन!। हेमनाग! प्रदानेन मम शान्तिप्रदो भव"। स्कन्दपुराणे गोदानं भूमिदानं च स्वर्णदानं विशेषतः। ग्रहणे क्लेशनाशाय दैवज्ञाय निवेदयेत्"। किंचात्र देशविशेषः पात्रविशेषो द्रव्यविशेषश्च नापेक्ष्य इत्याह व्यासः "सर्वं गङ्गासमं तोयं सर्वे ब्रह्मसमा द्विजाः। सर्वभूमिः कुरुक्षेत्रं ग्रहणे चन्द्रसूर्ययोरिति"। तत्र स्नानदानादिकं कस्मिन् काले कर्त्तव्यमित्याह "ग्रस्यमाने भवेत् स्नानं ग्रस्ते होमो विधीयते। मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयत" इति तस्मिन् काले जपादिकमपि विधेयम् "सूर्येन्दुग्रहणं यावत्तावत् कुर्याज्जपादिकमिति" शिवरहस्योक्तेः आदिशब्दात् सुरार्चनमपि अत्र जन्मनक्षत्रजन्मराश्योर्ग्रहणशान्तिमाह वशिष्ठः "यस्यैव जन्मनक्षत्रे ग्रस्येते शशिभास्करौ तस्य व्याधिभयं घोरं जन्मराशौ धनक्षयः। द्रव्यमन्त्रविधानेन तस्य दोषापनुत्तये। उपरागस्नानविधिं सम्यग्वक्ष्ये समासतः। मण्डलं चतुरस्रं तु गोमयेन विलेपयेत्। गृहस्येशानदिग्भागे वर्णकैः समलङ्कृते। स्थापयेच्चतुरः कुम्भांस्तत्र तान् सागरात्मकान्। सप्तवेदात्मकान् कृत्वा सर्वतीर्थात्मकान् शुभान्। पल्लवोशीरसायुज्यसर्वौषधिसमन्वितान्। मृत्तिकाहेमरत्नेन दग्धगुग्गुलचन्दनैः। पञ्चगव्यामृतभ्राजिस्फटिकैः सर्वपावनैः"। इत्युपक्रमे "तिलहोमं व्याहृतिभिः सहस्रमष्टसंयुतम्। एवं कृत्वा प्रयत्नेन स्नानकर्म समाचरेत्। आमन्त्र्य नवभिर्मन्त्रैः कुम्भान् संकल्पपूर्वकान्। एतानेव ततो मन्त्रान् वर्णयेच्चैव संलिखेत्। कर्तुः शिरसि तं बद्ध्वा वार्त्तिकैर्वेदमन्त्रकैः। सुमन्त्रितैः कुम्भजलैः स्नाप्यं नीराजयेत्ततः। दध्याज्यमग्रे विप्रेभ्यः शुक्लमाल्याम्बरः शुचिः। ऋत्विग्भ्यो दक्षिणां दद्याच्छिष्टेभ्यश्च स्वशक्तितः। योऽसौ वज्रधरो देव आदित्यानां प्रभुर्मतः। सहस्रनयनश्चन्द्रग्रहपीडां व्यपोहतु १। यः कर्मसाक्षी लोकानां धर्मो महिषवाहनः। यमश्चन्द्रोपरागस्य ग्रहपीडां व्यपोहतु २। रक्षोगणाधिपः

साक्षात् प्रलयानलसन्निभः । चन्द्रस्य ग्रासे कायस्य रक्षःपीडां व्यपोहतु ३ । नागपाशधरो देवः सदा मकरवाहनः । वरुणोऽम्बुपतिश्चान्द्रग्रहपीडां व्यपोहतु४ । प्राणरूपो हि लोकानां वायुः कृष्णमृगप्रियः । वायुश्चन्द्रोपरागस्य पीडनं मे व्यपोहतु५ । योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः । चन्द्रोपरागकलुषां पीडां चापि व्यपोहतु६ । योऽसाविन्दुधरो रुद्रः पिनाकी वृषवाहनः । चन्द्रोपरागपीडाश्च नाशयेत् सङ्कटं तथा । ७ त्रैलोक्ये यानि भूतानि चराणि स्थावराणि च । ब्रह्मविष्ण्वर्कयुक्तानि तानि पापं दहन्तु मे८ । आमन्त्रणोल्लेखनोक्तास्त्वेत एव च मन्त्रकाः । अर्चयित्वा पितृन् देवान् गोभूस्वर्णाम्बरादिभिः । अनेन विधिना यस्तु ग्रहस्नानं समाचरेत् । तन्नास्य ग्रहपीडा स्याद्यानबन्धुधनक्षयः । परमां सिद्धिमाप्नोति पुनरावृत्तिदुर्लभम् । सूर्यग्रहेऽप्येवमेव सूर्यनाम्ना विधीयते ।” अत्र यद्यपि जन्मराशौ धनक्षय इत्युक्तं तत्र च दोषाल्पत्वात् प्रतिमादानशान्त्यकर्त्तव्यता प्रतीयते तथापि प्राग्विलिखितबहुवचःसु विरुद्धफलाभिधानादेवास्य जन्मराशावपि ग्रहणे शान्तिर्विधेया । उभयाभिधानेन शान्त्यभिधानात् उक्तं च मत्स्यपुराणे “यस्य राशिं समासाद्य भवेद्ग्रहणसम्भवः । तस्य शान्तिं प्रवक्ष्यामि मन्त्रौषधिविधानतः” । इति अतो जन्मनक्षत्रजन्मराशिव्यतिरिक्ते विरुद्धे ग्रहणे शान्तिर्न विधेया वचनाभावात् किन्तु स्वविभवरूपं दानादिरूपं विधेयमिति तात्पर्यार्थः । सूर्यग्रहेऽप्येवमेवेति योऽसौ वज्रधरो देव आदित्यानां प्रभुर्मतः । सहस्रनयनः सूर्यग्रहपीडां व्यपोहतु” इत्युक्तदिशा चन्द्रपदस्थाने सूर्यपदं पूर्वमन्त्रश्लोकेषु प्रयोज्यमित्यर्थः । अथेदं ग्रहणं स्थानविशेषेणारिष्टजनकमित्युक्तं तच्च ग्रहणं न द्रष्टव्यमित्याह नो वीक्ष्यमिति उक्तं च “जन्मसप्ताष्टरिष्फाङ्कदशमस्थे निशाकरे । दृष्टोऽरिष्टप्रदो राहुर्जन्मर्क्षे निधनेऽपि चेति” जन्मर्क्षं जन्मनक्षत्रं निधनं वधतारा सप्तमी । अत्र दृष्ट इति पदश्रवणात् दुष्टस्थानावस्थितो राहुर्दृष्टः पुंसोरिष्टजनकः यदा तु मेघाद्यावरणेन गृहमध्यावस्थित्या वा चक्षुष्मतोऽपि पुंसो राहुदर्शनाभावस्तदाऽरिष्टं नास्ति एवं चान्धस्य यत्र कुत्राप्यवस्थितस्य गृहाद्बहिर्गन्तुमशक्नुवतो वृद्धातुरादेः सर्वारिष्टस्नानादि वा नास्ति इति तेषामाशयः । अत्रेदं चिन्त्यते किमिदं ग्रहणं दृष्टमेव स्नानाद्यधिकारसम्पादकम् ? उत मेघाद्यावरणे नादृष्टमपि ? कुतः सन्देहः ? उभयथा वचनोपलब्धेस्तथा हि वृद्धवसिष्ठः “सर्वेषामेव वर्णानां सूतकं राहुदर्शने । सचेलं तु भवेत् स्नानं सूतकान्नं विवर्जयेदिति” । षट्त्रिंशन्मते “सर्वेषामेव वर्णानां सूतकं राहुदर्शने । स्नात्वा कर्माणि कुर्वीत शृतमन्नं विवर्जयेदिति” । शृतं पक्वं “शृतं पाके” पा० इति निपातनात् यद्यपि तस्मिन् सूत्रे “क्षीरहविषोरेवेति” महाभाष्यकृतोक्तं तथापि महाकविप्रयोगादन्यस्मिन्नपि द्रव्ये ओदनादौ पाकसामान्याद्वृत्तिः । विष्णुः “राहुदर्शनदत्तं हि आब्रह्माचन्द्रतारकमिति” । शातातपः “स्नानं दानतपः श्राद्धमनन्तं राहुदर्शने” इति एवमादीनि वचांसि दर्शनपदसहितान्युपलभ्यन्ते अन्यथापि वसिष्ठः “ग्रहणे संक्रमे वापि न स्नायाद्यदि मानवः । सप्तजन्मनि कुष्ठी स्याद्दुःखभागी च जायते” इति लिङ्गपुराणेऽपि “चन्द्रसूर्यग्रहे स्नायात् सूतके मृतकेऽपि च । अस्नायी मृत्युमाप्नोति स्नायी पापं न विन्दतीति” एवमादीनि दर्शनपदानाक्रान्तानि वचांस्युपलभ्यन्ते । तत्र दर्शनवादिन आहुः दर्शनपदानाक्रान्तेषु वचःसु ग्रहणस्य निमित्तत्वं प्रतिपाद्यते । “ग्रहणे संक्रमे वापीति” निमित्तसप्तम्युपलम्भात् । ज्ञानमेव च ग्रहणं स्नानदानादिकं प्रति निमित्तं भवति तज्ज्ञानापेक्षायां च राहुदर्शनपदोपेतवचनालोचनेन चाक्षुषज्ञानस्यैव निमित्तत्वं यतश्चाक्षुष एव ज्ञाने दर्शनमुख्यत्वं ज्योतिःशास्त्रीयज्ञाने तु लक्षणाप्रसक्तिः । एवं सति मेघाच्छन्नग्रहणदिवसजातचन्द्रग्रहणं रात्रिभवेषु सूर्यग्रहणेषु न स्नानदानादावधिकारः तस्माद्ग्रहणं दृष्ट्वा स्नानदानादिकं विधेयमित्यर्थः सम्पन्नो भवति, नैतत्सहृदयहृदयङ्गमं यतो वचनेषु राहुदर्शनग्रहणपदयोः समार्थकता नास्ति कथम् “अदृश्यरूपाः कालस्य मूर्त्तयो भगणाश्रिताः । शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः ।” इति सूर्यसिद्धान्ते चन्द्रादिग्रहपातानामदृश्यतोक्ता पातो राहुश्च पर्यायः । उक्तञ्च तत्रैव “दक्षिणोत्तरयोरेव पातो राहुः स्वरंहसा । विक्षिपत्येष विक्षेपं चन्द्रादीनामपक्रमादिति” केशवार्केणाप्युक्तम् “पर्यायेण तु राहुपातयोर्नामनी विदधुरेव तान्त्रिकाः इति । अतो राहुदर्शनमेव गगनकुसुमायमानम् । ननु ग्रहणे सूर्यचन्द्रयोश्छादको राहुर्दृश्यत एव अतएव “राहुग्रस्ते चैव निशाकरे” इत्यादि पुराणोक्तिः साधीयसीति चेत्

"भानोर्भार्द्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा। शशाङ्कपाते ग्रहणं कियद्भागाधिकोनके" इत्युपक्रम्य "छादको भास्करस्येन्दुरधःस्थो घनवद्भवेत्। भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसाविति"। अतो भूच्छायाऽस्य चन्द्रस्य छादको भवेदित्यर्थः इति सूर्यसिद्धान्ते स्पष्ट एव छाद्यच्छादकभावोऽभिहितः पुराणेन सह विरोधपरिहारस्तु "दिग्देशकालावरणादिभेदान्न छादको राहुरिति ब्रुवन्ति। यन्मानिनः केवलगोलविद्यां स्वसंहितावेदपुराणवाक्यमिति" पूर्वपक्षं विधाय "राहुः कुभामण्डलगः शशाङ्कं शशाङ्कगश्छादयतीनबिम्बम्। तमोमयः शम्भुवरप्रदानात् सर्वागमानामविरुद्धमेतदिति" भास्कराचार्यैरेवोक्तः "तस्मिन् काले सान्निध्यमस्य तेनोपचर्यते राहुरिति" वराहेण उक्तम् तस्माद्राहुदर्शनं तु नास्त्येव भवन्मते दर्शनं चाक्षुषमेवोच्यते नान्यत् एवं सति राहोर्दर्शनं राहुदर्शनमिति तत्पुरुषोऽनुपपन्नः। यदि तु समीपलक्षकदर्शनशब्दमङ्गीकृत्य तदर्थः क्रियते। तदापि यस्य स्वरूपमेवानुपपन्नं तस्य समीपे तु सुतरामिति बालैरप्येतद्बुध्यते। तस्माद्दर्शनशब्देनोपरागो लक्ष्यते राहुदर्शनं राहूपरागस्तस्मिन् राहुदर्शने इति। अयमर्थः। राहुर्नाम पातः तस्य सम्बन्धेन दर्शनमुपराग इति। न च राहुरेव लक्षणयोपरागपरस्तस्य दर्शनमिति पूर्वपक्षाभिमतार्थसिद्धिरिति वाच्यं लक्षणा स्वर्थान्तरान्तरासम्भवे सति वक्तव्या। "अत्यन्तादर्शनं राहोस्तथा चात्यन्तदर्शने। प्रजापीड़ा विनिर्देश्या व्याधिदुर्भिक्षतस्करैरिति" विष्णुधर्मोत्तरादिवाक्येषु पदान्तरासन्निधानाद्राहुदर्शनेनोपरागो लक्ष्यते। इदं च राहोः पातनामकग्रहणं प्रति हेत्वर्थान्तरमस्तीत्यतो राहुदर्शनग्रहणयोः समानार्थकता नास्तीत्येवं सिद्धमिति। प्रागुक्तानां सर्ववचसां ग्रहणे स्नानादित्येव वाक्यार्थः फलितो भवति। किञ्च ग्रहणे चाक्षुषमेव दर्शनं निमित्तं विवक्षितं चेत्तदा "नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कथञ्चन। नोपरक्तं न वारिस्थं न मध्ये नभसो गतम्" इत्युक्तोपरक्तसूर्यदर्शननिषेधो नोपपद्येत तस्य निषेधः सूर्योपरागदर्शने एव न चन्द्रोपराग इति चेन्न "नाशुची राहुतारकाम्" इत्यत्र राहुमात्रग्रहणाद्रविचन्द्रोपरागद्वयविषयकोपसंहारस्य युक्तत्वात् अशुचे रजस्वलापतितादेर्दर्शनं तु दोषाधिक्यसूचनार्थं यथा श्राद्धे कुलीनानां ब्राह्मणानामसम्भवे उक्ते अन्येषां निषिद्धत्वादेव कुण्डगोलकब्राह्मणानामनामन्त्रणे सिद्धे पुनर्निषेधो दोषाधिक्यार्थमेव। "भास्करालोकनाश्लीलपरिवादादि वर्जयेदिति" स्मृतिवाक्यस्य तूद्यदस्तगाम्यादित्यदर्शनपरतया व्याख्यानस्य युक्तत्वात्। केचित्तु दर्शनादर्शनविषयकयोर्विध्योस्तुल्यबलत्वात्[illegible] स्नायादिति व्याचख्युः तच्चिन्त्यं "जन्मसप्ताष्टरिफाङ्केत्यादिना सामान्यतो निषिद्धस्योपरक्तदर्शनस्य पुनर्निषेधात् प्रागुक्तदिशा राहुदर्शनपदस्य राहूपरागलक्षकत्वेन तुल्यबलत्वाभावाच्च तस्मादुपरक्तयोः सूर्यचन्द्रमसोर्यस्य कस्यापि दर्शननिषेधसत्त्वात् ग्रहणे स्नानदानाद्युक्तेरुज्ज्ञानं च ज्योतिःशास्त्रैकदेशगणितग्रन्थेभ्यो बुद्ध्वा तस्मिन् काले स्नानदानादि विधेयमिति सिद्धान्तः। अतएव मेघाद्यावृतेऽप्युपरागे स्नानादिकं विधेयमेव ननु गणितग्रन्थाधीनमुपरागज्ञानमेव चेत् स्नानादिप्रयोजकं तदा रात्रौ सूर्यग्रहणस्य जायमानत्वात्तदापि स्नानादिकं स्यात्। सत्यमेवैतत् वचनात्तथा न क्रियते। तदुक्तं निगमे "सूर्यग्रहो यदा रात्रौ दिवा चन्द्रग्रहो यदि। तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचिदिति"। अतएव तादृशे ग्रहणे दृष्टेऽपि दौष्ट्यं नास्तीत्यपि सूच्यते। न चैतद्भागे प्रतिषेधादित्यधिकरणेन पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवीत्युदाहृतवाक्यवन्नित्यानुवाद इति वाच्यं विधिशेषत्वाभावात् यथा पृथिव्यामग्निर्न्चेतव्य इति न निषेधविधिरस्ति तत्र नान्तरिक्षे न दिवीति दृष्टान्तो निषेधविधेः शेषस्तथात्र सूर्यग्रहो यदा रात्रावित्येतद्वाक्यस्य विधेः शेष इति। किञ्चैवं ब्रुवतस्तव मतेऽनर्थकमेव वाक्यं स्यान्नचैतद्युक्तम् अतएवाह जावालिः "संक्रान्तेः पुण्यकालस्तु षोडशोभयतः कलाः। चन्द्रसूर्योपरागे तु यावद्दर्शनगोचरः" इति। ग्रस्तास्तमनपर्यन्तं दर्शनगोचरत्वात्तावान् कालः पुण्यकालो भवतीति माधवो व्याचख्यौ तदुक्तं विश्वरूपनिर्णये "दिवा चन्द्रग्रहो रात्रौ सूर्यपर्व न पुण्यदम्। सन्धिस्थं पुण्यवत् ज्ञेयं यावद्दर्शनगोचरः" इति। अन्ये तु मेघावृते तदनावृते चोपरागे गणितागतस्थितिघटिकाः पुण्यकाल इत्याहुः। दर्शने त्वेवंविधे निर्णये भुजवृत्तादुपरिस्थितत्वमेव विवक्षितं तदाह वसिष्ठः स्वसिद्धान्ते "सूर्यस्यादर्शनं रात्रिर्दिनं तद्दर्शनात्मकम्। भुजवृत्तादुपरि च स्थितोऽर्को दर्शनं स्मृतमिति" अर्क इत्युपलक्षणं चन्द्रादिग्रहनक्षत्राणाम्। आकाशप्रदेशः समन्तान्नु संलग्न इव यत्र भाति स प्रदेशो भुजवल-

वाच्यः अतएव विष्णुधर्म्मोत्तरे "अहोरात्रं न भोक्तव्यं सूर्य्यचन्द्रग्रहो यदा। मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परमिति।" ग्रस्तास्ते भृगुः "ग्रस्तगौ वास्तमनं तु रवीन्दू प्राप्नुतो यदि। तयोः परेद्युरुदये स्नात्वाभ्यवहरेन्नरः" इत्यनयोर्व्वाक्ययोर्द्दर्शनोदयशब्दौ भुजङ्गोपरिस्थितत्वोपलक्षकौ अन्यथा मेघाद्यावरणेन परदिवसेऽपि दर्शनाभावे उपवासः प्रसज्येत तथा यत्र स्पर्शकाले ग्रहणं दृष्ट्वा स्नानं विहितं तत्रान्तरा मेघावरणात् सूर्य्यचन्द्रयोर्द्दर्शनाभावो दिवसद्वयं त्रयं वा स्यात्तत्राप्युपवासप्रसङ्गः। न च सर्व्वे शिष्टास्तथाऽऽचरन्ति। तस्माद्दर्शनार्थमभ्युपेत्य शास्त्रीयज्ञानपरतैव व्याख्या कर्त्तव्या। तस्यां च सत्यां पूर्व्वोक्तरीत्या च मेघानावृतेऽप्युपरागे तमदृष्ट्वैव प्रशस्तचक्षुषा अन्धेन च गन्तुमशक्नुवद्भिर्व्वातुरैश्च स्नानदानादिकं विधेयमिति फलितोऽर्थः। अतएव भागवते रविग्रहे कुरुक्षेत्रे स्नानाद्यर्थं मिलितानां पाण्डवीयलोकानां मध्ये धृतराष्ट्रोऽपि परिगणित इति विशिष्टाचारोऽप्यस्ति। एवं च सत्यरिष्टजनकत्वाभावेऽपि ग्रहणदर्शननिषेधः किं पुनररिष्टजनकत्वे। तस्माज्जन्मसप्ताङ्केत्यादिपद्यं निर्म्मूलत्वाद्युक्त्यसहत्वाच्चोपेक्ष्यं प्रत्यक्षोपलभ्यमानवसिष्ठमत्स्यपुराणादिवाक्येषु दर्शनपदाभावाच्च। अतएव मूले परे इति पदं प्रयुक्तम्। शान्तिस्तु दर्शनाभावेऽपि विधातुमुचिता यतोऽरिष्टयोगानां स्वरूपसतामेवारिष्टजनकत्वमस्ति अन्यथा ग्रहवेधस्योत्पातादिसूचितारिष्टनिवृत्तिहेतुः शान्तिर्दर्शनाभावे न विधीयेत इत्यलमतिप्रसक्तानुप्रसङ्गेन (६)। पी॰ धा॰। अधिकमुपरागशब्दे १२८५ पृ॰ द्रष्टव्यम्। "अथ चन्द्रबले विशेषमनुष्टुभाह पापान्तः इति शुभोऽपि शुभफलदोऽपि चन्द्रः पापान्तःपापयुग् द्यूने पापद्वयमध्यवर्त्ती पापग्रहयुक्तः पापद्यूने सप्तमस्थाने वर्त्तमानश्चेत् स्यात्तदा असन् अशुभ एव यदा त्वशुभोऽप्यशुभफलदातापि चन्द्रः शुभांशे सौम्यग्रहनवांशे स्यादथवाऽधिमित्रस्य नवांशे स्यात्तथा गुरुणा वृहस्पतिना दृष्टः सन् शुभफलदाता भवेत् यदाह राजमार्त्तण्डः "पापग्रहेण संयुक्तः पापजामित्रसंस्थितः। पापद्वयमध्यगतः शुभोऽप्यशुभदः शशी। अनिष्टस्थानसंस्थोऽपि भवेच्छुभकरः शशी। सौम्यभागाधिमित्रांशे गुरुणा वापि वीक्षित" इति (७)। अथ चन्द्रबलस्य विधानान्तरमनुष्टुभाह। सितेति सितादौ शुक्लपक्षप्रतिपदि समीचीने चन्द्रे सति सम्पूर्णः शुक्लपक्षः शुभः असितादौ कृष्णपक्षप्रतिपदि दुष्टे चन्द्रे सति सम्पूर्णः कृष्णपक्षः शुभः व्यत्यासे च पूर्व्वोक्तादर्थाद्वैपरीत्ये द्वावपि पक्षावनिष्टौ यदा शुक्लपक्षप्रतिपदि चन्द्रो दुष्टश्चेत्तदा सकलशुक्लपक्षोऽनिष्टः। यदा कृष्णपक्षप्रतिपदि चन्द्रः शुभश्चेत्तदा सम्पूर्णः कृष्णपक्षोऽनिष्टः इति उक्तञ्च रत्नमालायां "वलक्षपक्षादिगते हिमांशौ शुभे शुभं पक्षमुदाहरन्ति। सितेतरादावशुभे च पक्षाविन्द्वावनिष्टौ भवतोऽन्यथा तौ" कश्यपोऽपि शुक्लादीन्दुः शुभो यस्य तत्पक्षस्तस्य शोभनः। कृष्णादीन्दौ त्वशुभदे शुभस्तद्द्वयव्यत्ययेऽन्यथेति" इदमेतादृशमब्जबलं चन्द्रबलं तु सङ्कटे विवाहयात्रायज्ञकर्त्तव्ये तात्कालिचन्द्रबलाभावे ग्राह्यं नान्यथेत्यर्थः (८)। अथ ग्रहाणां दौष्ट्यपरिहारपूर्व्वकं तुष्टिसम्पादनार्थं नवरत्नसमुदायधारणं शालिन्याह वज्रं शुक्रे इति। अत्रैकां सुवर्णमुद्रिकां कृत्वा तत्र दशधाभागे वर्त्तुलाकारे नवधा विभक्ते प्रागादिक्रमेण नवरत्नानि दृढं निधेयानि तत्र प्रागिति पञ्चम्यन्तमव्ययं पञ्चमी चेयं ल्यब्लोपे अतः प्रागादिदिक्षु इत्ययमर्थो जातः तत्र शुक्रप्रीतये पूर्व्वस्यां दिशि वज्रकं हीरकं निधेयम्। एवं चन्द्रप्रीत्यर्थं शोभनमुक्ताफलमाग्नेय्यां, भौमप्रीत्यर्थं प्रवालं दक्षिणस्याम् अगौ राहुप्रीत्यर्थं गोमेदं नैर्ऋत्याम्। आर्क्की शनिप्रीतये शोभननीलं पश्चिमायाम्। केतुप्रीतये वैदूर्य्यं वायव्याम्। गुरुप्रीतये पुष्पकं पुष्परागम् उत्तरस्याम्। बुधप्रीतये पाचिः गारुत्मतम् ऐशान्यां सूर्य्यप्रीतये माणिक्यं मध्यमकोष्ठे इति (९)।

अथ सति द्रव्यसामर्थ्ये नवरत्नसमुदायधारणस्य शक्यत्वात्तदुक्त्वेदानीमसति द्रव्यसामर्थ्ये यद्ग्रहकृतं दौष्ट्यं तद्ग्रहरत्नधारणमिन्द्रवज्रयाह माणिक्येति। सूर्य्यप्रीत्यर्थं माणिक्यं धार्य्यम्। एवं चन्द्रस्य मुक्ताफलम्। भौमस्य विद्रुमम्। बुधस्य गारुत्मतं गारुडं पाचिः। गुरोः पुष्पकं पुष्परागः। शुक्रस्य वज्रम्। शनेर्नीलं राहोर्गोमेदं (लसुनिया इति) कान्यकुब्जभाषयाङ्कः केतोर्वैदूर्य्यमित्येवमर्कतोऽर्कादीनां ग्रहाणां रत्नानि धार्य्याणि स्युः। तत्र यद्ग्रहकृतं दौष्ट्यं तस्य ग्रहस्य तुष्ट्यै तद्रत्नं धार्य्यमित्यर्थः यदाह कश्यपः "सूर्य्यादीनां च संतुष्ट्यै माणिक्यं मौक्तिकं तथा। सुविद्रुमं मरकतं पुष्परागं च वज्रकम्। नीलगोमेदवैदूर्य्यं धार्य्यं स्वस्वदृढक्रमात्"। अथोक्तस्य मुद्रे सुवर्णमित्यग्रिमश्लोकेन सम्बन्धः (१०)

अथ महामूल्यरत्नधारणे यस्य सामर्थ्याभावस्तदर्थमल्प-

मूल्यानि रत्नानि ताराबलं च शालिन्याह धार्यमिति । अथो ज्ञस्य बुधस्य मुदे सन्तोषार्थं सुवर्णं यथाशक्ति धार्यम् । राहुकेत्वोः प्रीत्यै राजावर्त्तकं मणिविशेषो धार्यः एवं शुक्रेन्द्वोस्तुष्ट्यै रौप्यं, गुरोस्तुष्ट्यै मुक्ता । मन्दस्य शनेस्तुष्ट्यै लोहम् । आरभान्वोर्मङ्गलसूर्ययोः प्रीत्यै प्रवालं वार्यम् । उक्तं च श्रीपतिना "धार्यं तुष्टैर विद्रुमं भौमभान्वोरूप्यं शुक्रेन्द्वोश्च हेमेन्दुजस्य । मुक्ता सूरेर्लौहमर्कात्मजस्य राजावर्त्तः कीर्त्तितः शेषयोश्चेति" सूरेः सुरगुरोः । शेषयोः राहुकेत्वोः । दीपिकाकारस्तु औषधीमूलानि धार्याणीत्याह "मूलं धार्यं त्रिशूल्याः सवितरि विगुणे, चौरिकामूलमिन्दौ, जिह्वाहेर्भूमिपुत्रे, रजनिकरसुते वृद्धदारोश्च मूलम् । भार्गी जीवेऽथ शुक्रे भवति शुभकरं सिंहपुच्छस्य मूलं, विच्छोलं चार्कपुत्रे, तमसि मलयजं, केतुदोषेऽश्वगन्धमिति" त्रिशूली बिल्वः चौरिका चिरिणी जिह्वाहिर्नागजिह्वा वृद्धदारुर्विदारी । भार्गी प्रसिद्धा । सिंहपुच्छं (वाघोट चरिवारेति) मध्यदेशभाषया प्रसिद्धम् । मलयजं चन्दनम् । अश्वगन्धं प्रसिद्धम् । एतदोषधीमूलधारणं सर्वथा रत्नधारणाशक्तौ वेदितव्यम्" पी° धा° गोचरप्रसङ्गात् तारायलादिकमाह तत्रैव

तारेति । यद्दिने ताराबलमस्ति वा नवेति विचारस्त्रिकोषितस्तद्दिने या तारा सा जन्मर्क्षात् जन्मनक्षत्रात् त्रिरावृत्तितः पुनरावृत्तित्रयेण गणनीया स्यात् । त्रिरिति "द्वित्रिचतुर्भ्यः सुजिति" पा° सुजन्तमव्ययम् । स्वजन्मनक्षत्राद्दिननक्षत्रे गणिते नवभिर्भक्ते तिस्र आवृत्तयोभवन्त्यवशिष्टतारायाः शुभमशुभं वाच्यमिति फलितोऽर्थः ११ ।

"जन्माख्यसम्पद्विपदः क्षेमप्रत्यरिसाधकाः । बधमैत्रातिमैत्राःस्युस्तारा नामसदृक्फलाः १२ ॥ मृत्यौ स्वर्णतिलान् विपद्यपि गुडं, शाकं त्रिजन्मस्वथो दद्यात्प्रत्यरितारकासु लवणं, सर्वो विपत्प्रत्यरिः । मृत्युश्चादिमपर्यये न शुभदोऽथैषां द्वितीयेंशका नादिप्रान्त्यतृतीयका अथ शुभाः सर्वे तृतीये स्मृताः १३ ॥ षष्टि ६० घ्नं गतभम्भुक्तघटीयुक्तं युगा४हृतम् । शराब्धि ४५ हृल्लब्धतोऽर्क१२शेषेऽवस्थाः क्रियादिधोः १४ ॥ प्रवासनाशौ मरणञ्जयश्च हास्यारतिक्रीडितसुप्तभुक्ताः । ज्वराख्यकम्पस्थिरता अवस्था मेषात् क्रमान्नामसदृक्फलाः स्युः १५ । लाजाकुष्ठबलाप्रियङ्गुघनसिद्धार्थैर्निशादारुभिः पुङ्खालोध्रयुतैर्जलैर्निगदितं स्नानं ग्रहोत्थाघहृत् । धेनुः कम्बुररुणो वृषश्च कनकम्पीताम्बरङ्घोटकः श्वेतो, गौरसिता, महासिरज इत्येता रवेर्दक्षिणाः १६ । सूर्यारसौम्यास्फुजितोऽब्जनागसप्ताद्रिषस्त्राग्निविधुरग्निनाडीः । तमोयमेज्यास्त्रिरसाश्विमासान् गन्तव्यराशेः फलदाः पुरस्तात् १७ । दुष्टे योगे हेम, चन्द्रे च शङ्खं, धान्यं तिथ्यर्धे, तिथौ तण्डुलांश्च । वारे रत्नं भे च गां, हेम नाड्यां, दद्यात्सिन्धूत्थञ्च तारासु राजा १८। राश्यादिगौ रविकुजौ फलदौ, सितेज्यौ मध्ये, सदा शशिसुत, स्वरमेऽब्जमन्दौ । अध्वान्नवह्निभयसन्मतिवस्त्रसौख्यदुःखानि मासि जनिभे रविवासरादौ" १९ मु° चि° ।

अथ शेषक्रमेण सकलास्तारासंज्ञा अनुष्टुभाह । जन्मेति । स्पष्टार्थमिदम्पद्यम् । यदाह नारदः "जन्मसम्पद्विपत् क्षेमं प्रत्यरिः साधको बधः । मित्रम्परममित्रन्तु जन्मभाच्च पुनः पुनरिति" । एवं तारा गणनीया इति शेषः । तत्र तृतीयापञ्चमीसप्तम्यस्तारा निषिद्धाः अनिष्टफलश्रवणात् । अथान्याः समीचीनाः समीचीनफलश्रवणात् । उक्तञ्च "जन्मतारा द्वितीया च षष्ठी चैव चतुर्थिका । अष्टमी नवमी चैव षट् च ताराः शुभावहाः" इति । जन्मनक्षत्रन्तु कार्यविशेषे गृहीतं प्रतिषिद्धञ्च तच्चाग्रे निर्णेष्यते । तदिदन्ताराबलं कृष्णपक्षविषयं न तूभयपक्षसाधारणम् । तदाह नारदः "कृष्णे बलवती तारा शुक्लपक्षे बली शशीति" । युक्तञ्चैतत् यतोऽत्रार्थवादो रत्नमालायाम् "न खलु बहुलपक्षे शीतरश्मेः प्रभावः, कथितमिह हि तारावीर्यमार्यैः प्रधानम् । अतिविकलशरीरे प्रेयसि प्रोषिते वा प्रभवति खलु कर्तुं सर्वकार्याणि योषा । शुक्ले पक्षे शीतरश्मिर्बलीयान्न प्राधान्यं तारकायास्तु तत्र । शक्त्या युक्ते विद्यमानेऽपि कान्ते न स्वातन्त्र्यं योषितः क्वापि दृष्टमिति" १२ अथावश्यककृत्ये दुष्टताराणाम्प्रकारद्वयेन परिहारं शार्दूलविक्रीडितेनाह "मृत्यौ स्वर्णतिलानिति । मृत्यौ सप्तम्यां बधतारायां स्वर्णतिलान् यथाशक्ति सुवर्णयुक्तांस्तिलान् ब्राह्मणाय दद्यात् । विपद्यपि विपत्संज्ञायां तृतीयतारायां गुडमिक्षुविकारन्दद्यात् । त्रिजन्मसु तिसृषु जन्मतारासु शाकम्प्रसिद्धं वृन्ताकादि दद्यात् । अथो प्रत्यरितारकासु पञ्चम्यान्तारायां लवणन्दद्यात् । तदाह नारदः "जन्मत्रिपञ्चसप्ताख्या ताराऽनिष्टफलप्रदा । अनिष्टपरिहाराय दद्याद्दानन्द्विजातये । शाकं

गुडञ्च लवणं सतिलं काञ्चनं क्रमादिति" अत्र सतिलमिति विशेषणं काञ्चनपदस्य न लवणपदस्य तेन वधतारायां सतिलं काञ्चनन्देयम्। उक्तञ्च दीपिकायाम् "प्रत्यरौ लवणन्दद्याच्छाकन्दद्यान्निजन्मसु। विपत्तारे गुडन्दद्यान्निधने तिलकाञ्चनमिति" अथ द्वितीयः परिहार उच्यते। तत्रादिमपर्य्यये प्रथमावृत्तौ विपत्प्रत्यरिमृत्युश्च तृतीयापञ्चमीसप्तम्यस्ताराः सर्वा अपि सामान्यतः षष्टिघटिकात्मिका अपि न शुभदाः स्युः अथ द्वितीये पर्य्याये द्वितीयावृत्तौ विपत्प्रत्यरिमृत्यूनामादिप्रान्त्यतृतीयका अंशा न शुभदाः विपत्तारायां प्रथमविंशतिघटिकास्त्याज्याः। इतराश्चत्वारिंशच्छुभाः। प्रत्यरितारायां मध्यमा विंशतिघटिकास्त्याज्यास्तदुभयतो विंशतिर्विंशतिर्घटिकाः शुभाः। वधतारायामन्तिमा विंशतिघटिकास्त्याज्या आद्याश्चत्वारिंशच्छुभा इति नवीना व्याकुर्वते। जीर्णास्त्वंशशब्देन नक्षत्रचतुर्थांशमाहुः। तथासति आदिप्रान्त्यतृतीयकाश्चरणाः क्रमेण निषिद्धाः इतरे शुभाः। अथ तृतीये पर्याये तृतीयावृत्तौ विपत्प्रत्यरिमृत्यवश्चैते सर्वे षष्टिघटिकात्मका अपि शुभाः शोभनफलदाः स्मृताः। तथा च जगन्मोहने गुरुरित्युक्त्वा पठितं "पर्याये प्रथमे वर्ज्या विपत्प्रत्यरिनैधनाः। द्वितीये त्वंशका वर्ज्यास्तृतीये त्वखिलाः शुभाः" द्वितीये पर्याये अंशकानाह स एव। "अद्यांशो विपदि त्याज्यः प्रत्यरौ चरमोऽशुभः। वधे त्याज्यस्तृतीयोंऽशः शेषा अंशास्तु शोभनाः" इति। अत्रांशो नक्षत्रचतुर्थांश उच्यते। किमत्र प्रमाणमिति चेत् उच्यते। "जन्मर्क्षाद्दशमर्क्षञ्च संख्यातर्क्षन्तु षोडशम्। अष्टादशं सामुदायं त्रयोविंशं विनाशनम्। मानसं पञ्चविंशर्क्षं नाचरेच्छुभमेषु तु" इति नारदोक्तवैनाशिकाख्यत्रयोविंशभस्य दुष्टत्वम्। तदपवादमाह च्यवनः "वैनाशिकाख्ये नक्षत्रे अष्टाशीत्यंशकं विना। शेषांशाः शुभदा ज्ञेया जन्मनीन्दुगतांशकाः।" इति। अत्र वैनाशिकं प्रत्यरिसंज्ञकस्य चरमांशस्यानिष्टता प्राप्ता साष्टाशीत्यंशकं विनेत्यनेन बाध्यते इत्यत एकत्र दृष्टः शास्त्रार्थोऽपरत्रापि विनियुज्यत इति न्यायादत्रापि सैव व्याख्येति न नवीनमतञ्च प्रायोऽप्रमाणकत्वात् १३। अथ चन्द्रावस्था वक्ष्यति तद्गणनोपायमनुष्टुभाह षष्टिघ्नमिति। अत्र चन्द्रस्य राशौ राशौ द्वादश अवस्थाः सन्ति यदाह नारदः "चन्द्रस्य द्वादशावस्था राशौ राशौ यथाक्रमात्। यात्रोद्वाहादिके कार्ये संज्ञा तुल्यफलप्रदा" तत्राश्विनीमारभ्य गतभानि षष्ट्या गुण्यानि वर्तमाननक्षत्रभुक्तघटीयुक्तानि कार्याणि। तानि पुनर्युगैस्तुभिराहतानि शराब्धि ४५ हृत् पञ्चचत्वारिंशता भाज्यानि। यल्लब्धमागतं गतावस्थास्ताः शेषं वर्त्तमानावस्था तत्र लब्धाङ्कस्यापि द्वादशाधिक्ये द्वादशभिर्भागे प्रवासाद्यवस्था चन्द्रस्य गताः स्युः। ता अवस्था मेषराशेः पुंसः प्रवासादिसंज्ञा वृषराशिस्थे चन्द्रे नष्टादिसंज्ञाः स्युः। एवं मिथुनादिदशराशिषु मृतादिसंज्ञाश्चावस्थाः क्रमेण भवन्तीत्यर्थः। यदाह नारदः "षष्टिघ्नं चन्द्रनक्षत्रं तत्कालघटिकान्वितम्। वेदघ्नमिषु ४५ वेदाप्तमवस्था भानु १२ भाजिताः।" इति। अत्रोपपत्तिः एकैकस्मिन् राशौ द्वादशद्वादशावस्थाः सन्ति, सामान्यतो नक्षत्रभोगः षष्टिघटिकात्मक इत्येवं सति राशिभोगघटिकाः पञ्चविंशदधिकशतं भवन्ति। तत्र त्रैराशिकं यद्येताभि १२५ र्घटीभिर्द्वादशावस्था लभ्यन्ते तदेष्टघटीभिः किमिति तत्रैकः कल्प्यः गुणनायां विकारानापत्तेर्द्वादशानामयमङ्को १२५ भाजको जाता १२ तत्रानयोर्गुणकभाजकयोस्त्रिभिरपवर्त्ते गुणकश्चत्वारः ४ भाजकः पञ्चचत्वारिंशत् ४५ तत्कालघटीयोगस्तु न्यायप्राप्त एव। तथा द्वादशभागोऽपि तदाधिक्यस्य निष्प्रयोजनत्वात् अत्रेदमवधार्यम् यद्यपि नक्षत्राणां घटीन्यूनाधिकभावः सम्भवति तथापि षष्टिघटिकात्मकेन व्यवहारः कार्यः। विद्यमाननक्षत्र भुक्तं तु स्वभोगं ज्ञात्वा षष्टिघटिकात्मकं कृत्वा तत्र योज्यम्। यथा यदि स्वभोगेन षष्टिघटिका लभ्यन्ते तदेष्टघटीभिः किमिति त्रैराशिकेनेष्टघटीनां षष्टिगुणत्वो नक्षत्रभोगो भाजक इति १४। अथ द्वादशावस्थानामानि सफलान्युपजात्याह प्रवासनाशाविति। स्पष्टार्थमिदं पद्यम्। उक्तञ्च कश्यपेन "प्रवासनष्टा च मृता जया हास्या रतिर्मुदा। सुप्ता भुक्ता ज्वरा कम्पा सुस्थितिर्नामसन्निभा" इति। मुदा। "षिद्भिदादिभ्योऽङ्" पा० अङ् ततष्टाप् १५। अथ यात्रायां वैकृतपरिहारार्थं सौषधजलस्नानं दक्षिणाश्च शार्दूलविक्रीडितेनाह। लाजाकुष्ठमिति। लाजा भ्रष्टशालयः इति केचित् वस्तुतस्तु ओषधीसाहचर्याल्लाजाशब्देन लज्जावती गृह्यते। कुष्ठं प्रसिद्धम्। बला "वटियाग इति" कान्यकुब्जभाषायामाहुः। प्रियंगुः

रालः। घनो मुस्ता, सिद्धार्थाः सर्षपाः (शिरसा) इति महाराष्ट्राः (सरिषा) इति कान्यकुब्जाः। निशे हरिद्राद्वयं दारु देवदारुः पुङ्खा शरपुङ्खा। लोध्रं प्रसिद्धं एतैरौषधैर्युतानि गङ्गादिजलानि तैः कृत्वा स्नानं दुष्टग्रहप्रचितारिष्टनाशकं स्यात्। उक्तञ्च दीपिकायाम् "सिद्धार्थलोध्ररजनीद्वयकुष्ठधान्यं लाजाक्तकं सफलिनी सवचा च मांसी। स्नानं कुरु ग्रहगणप्रशमाय नित्यं सर्वे रविप्रभृतयः सुखखीभवन्ति।" दैवज्ञमनोहरेऽपि "सप्रियङ्गुरजनीद्वयमांसी कुष्ठलाजसितसर्षपखण्डैः। वारिभिः सहवचैः सहलोध्रैः स्नानमस्ति निखिलग्रहपीड़ामिति" वारिभिस्तीर्थोदकैः रत्नमालायां तु प्रत्येकं ग्रहाणामौषधभेदस्नानमुक्तं यथा।

रवेः—"मनःशिलैलासुरदारुकुङ्कुमैरुशीरयष्टीमधुपद्मकान्वितैः। सताम्रपुष्पैर्विषमे स्थिते रवौ शुभावहं स्नानमुदाहृतं बुधैः"।

चन्द्रस्य—"पञ्चगव्यगजदानविमिश्रैः शङ्खशुक्तिकुमुदस्फटिकैश्च। शीतरश्मिकृतवैकृतहन्तृ स्नानमेतदुदितं मपवीनाम्"।

कुजस्य—"बिल्वचन्दनबलारुणपुष्पैर्हिङ्गुकल्कफलिनीवकुलैश्च। स्नानमङ्गिरिह मांसियुताभिर्भौमदोषविनिवारणमाहुः"।

बुधस्य—"गोमयाक्षतफलैः सगरोजैः क्षौद्रशुक्तिनवमूलहेमभिः। स्नानमुक्तमिदमत्र भूभृतां बोधनाशुभविनाशनं बुधैः"।

गुरोः—"मालतीकुसुमयुक्तसर्षपैः पल्लवैश्च मदयन्तिकोद्भवैः। क्षिप्रमम्बु मधुकेन च स्फुटं वैकृतं गुरुकृतं विनिहन्ति"।

शुक्रस्य—"एलया च शिलया समन्वितैर्वारिभिः सफलमूलकुङ्कुमैः। स्नानतो भृगुसुतोपपादितं दुःखमेति विलयं न संशयः"।

शनेः—"असिततिलाञ्जनलोध्रबलाभिः शतकुसुमाघनबालायुताभिः। रवितनये कथितं विषमस्थे दुरितहृदाप्लवनं मुनिमुख्यैः"।

राहुकेत्वोः—"लोध्रगर्भतिलपत्रकमुस्ताहस्तिदानमृगनाभिपयोभिः। स्नानमार्त्तिमिह कृन्तति राहोः छागमूत्रमिदमेव च केतोः"। राहुकथितद्रव्यमजमूत्रसहितं केत्वर्थं स्यात्। अतएवोक्तं दीपिकायाम् "प्रयोज्यमौषधस्नानं ग्रहविप्रसुरार्चनम्। ग्रहानुद्दिश्य होमो वा ग्रहाणां प्रीतिमिच्छता" तत्र ग्रहपूजाहोमौ वशिष्ठसंहितायां महता प्रबन्धेनोक्तौ तौ तत एवावगन्तव्यौ इत्यलमतिविस्तरेण। अथ रवेरिति। रविमारभ्य दक्षिणा उच्यन्ते। तत्र सूर्य्यप्रीत्यर्थं धेनुर्गौः। चन्द्रप्रीत्यर्थं कम्बु शङ्खः। कम्बु इति नपुंसकलिङ्गम् पृथक्पदम् "शङ्खः स्यात्कम्बुरस्त्रियाम्" इत्यमरोक्तेः। मङ्गलप्रीत्यर्थमरुण आरक्तो वृषः। बुधप्रीत्यर्थं कनकं सुवर्णम्। गुरुप्रीत्यर्थं पीताम्बरं तच्च यथाविभवं कार्पासं कोषजं च। शुक्रप्रीत्यर्थं श्वेतो घोटकः। शनिप्रीत्यर्थमसिता श्यामवर्णा गौः। राहुप्रीत्यर्थं महाऽसिर्वैक्रमौल्यखड्गः। केतुप्रीत्यर्थमजः छागो दक्षिणेत्यर्थः। यदाह वसिष्ठः "धेनुं शङ्खं रक्तवृषं हेम पीताम्बरद्वयम्। श्वेताश्वं कृष्णधेनुञ्च कृष्णलोहमजं क्रमात्। स्वर्णेन वा समीकृत्य दातव्या दक्षिणा ततः। आचार्य्याय जापकेभ्यो ब्राह्मणेभ्योऽथ शक्तितः" इति। अत्र प्रत्येकं दानमन्त्रास्तत्रैवोक्ताः ग्रन्थभूयस्त्वभयान्न लिख्यन्ते। "एवं यः कुरुते सम्यक् ग्रहयज्ञं नृपोत्तमः। सर्वान् कामानवाप्नोति शुभस्थानफलं लभेत्" नृपोत्तम इत्युपलक्षणम्। तेन यः कश्चिदुपद्रुतोपि कुर्य्यात् तत्र स्वविभवानुरूपाणि ग्रहदानानि प्रोक्तानि कैश्चित् यथा।

रवेः—"कौसुम्भवस्त्रं गुडहेमताम्रमाणिक्यगोधूमसुवर्णवस्त्रम्। सवत्सगोदानमतिप्रणीतं दुष्टाय सूर्य्याय मसूरिकाश्च"।

चन्द्रस्य—"घृतकलसं सितवस्त्रं दधिशङ्खं चैव मौक्तिकसुवर्णौ। रजतञ्च सम्प्रदद्याच्चन्द्रारिष्टोपशमनाय"।

कुजस्य—"प्रवालगोधूममसूरिकाश्च वृषश्च ताम्रः करवीरपुष्पम्। आरक्तवस्त्रं गुडहेमताम्रं दुष्टाय भौमाय सचन्दनं हि"।

बुधस्य—"नीलं वस्त्रं शङ्खदानं बुधाय रत्नं पात्री दासिका हेमसर्पिः। कांस्यं दन्तः कुञ्जरश्चाथ मेषो रौप्यं सर्वं पुष्पजात्यादिकञ्च।

गुरोः—"अश्वः सुवर्णं शुकपीतवस्त्रं सपीतधान्यं लवणं सपुष्पम्। सशर्करं तद्रजनीप्रयुक्तं दुष्टाय शान्त्यै गुरवे प्रदेयम्" रजनी हरिद्रा।

शुक्रस्य—"चित्रवस्त्रमपि दानवार्चिते दुष्टगे मुनिवरैः परिगीतम्। तण्डुलं घृतसुवर्णरूप्यकं वज्रकं परिमलो धवलोऽश्वः"।

शनेः—"नीलकं महिषं कृष्णं वस्त्रं लोहं सदक्षिणम्। दद्याच्च दक्षिणायुक्तं शनिदोषप्रशान्तये"।

राहोः—"राहोर्दानं बुधैर्मेषो गोमेदं लोहकम्बलौ। सुवर्णं नागरूप्यञ्च सतिलं ताम्रभाजनम्" केतोः—"केतौ वैदूर्यममलं तैलं मृगमदस्तथा। ऊर्णातिलाश्च संयुक्ता दद्यात् क्लेशापनुत्तये"।

अन्यच्च संहिताप्रदीपे "भानुस्ताम्बूलदानादपहरति नृणां वैकृतं वासरोत्थं" सोमः श्रीखण्डदानादवनिसुतवरो भोजनात् पुष्पदानात्। सौम्यः शक्रस्य मन्त्री हरिहर नमनात् भार्गवः शुभ्रवस्त्रैस्तैलस्नानात् प्रभाते दिनकरतनयौ ब्रह्मनत्या परौ चेति"। ब्रह्मा ब्राह्मणः। परौ राहुकेतू १६। अथ सूर्यादयो ग्रहा गन्तव्यराशेः प्राक् कियद्भिर्दिनैः फलं दद्युरित्येतदुपजात्याह सूर्यारसौम्येति। सूर्यादयो ग्रहा गन्तव्यराशेर्जिगमिषितराशेः पुरस्तात् पूर्वमेवैतत्संख्यकदिवसघटीमासान् अत्र "कालाध्वनोरत्यन्तसंयोगे" इति पा० द्वितीया ततो नैरन्तर्येण तावन्तं कालं फलदाः स्युः तद्यथा। सूर्यो गन्तव्यराशेः प्राक् अव्यवसान् पञ्च दिवसान् फलदः। एवमारो भौमोऽष्ट दिवसान् पूर्वं फलदः, बुधः सप्त दिवसान्, शुक्रोऽपि सप्त दिवसान्, विधुश्चन्द्रः अग्निनाडीर्घटिकात्रयमेव प्राक् फलदः, राहुर्गन्तव्यराशेः प्राक् त्रिमासं फलदः एवं शनिः षण्मासान्। गुरुर्द्विमासान् पूर्वं फलद इत्यर्थः। उक्तञ्च "सूर्यः पञ्चदिनं शशी त्रिघटिकं भौमोऽष्ट वै वासरान् सप्ताहानि भृगुः ससोमतनयो, मासद्वयं वै गुरुः। षण्मासान् पुरतोऽपि सूर्यतनयो राहुश्च मासत्रयं, केतुश्चैव ददाति भावि सकलं गन्तव्यराशेः फलमिति"। जगन्मोहने त्वेवमुक्तम् "आदित्यादिग्रहा दद्युर्लग्ने वा गोचरेऽपि वा। सप्तविंशति २७ भागोर्द्ध्वं परराशिफलं खल्विति १७। अथ प्रसङ्गादावश्यकमङ्गलयात्राकर्त्तव्येषु सत्सु तिथ्यादिविषयकदुष्टयोगसद्भावे तद्दोषनिवारणार्थं दानं शालिन्याह। दुष्टे इति। दुष्टे व्यतीपातादिरूपे योगे सति हेम सुवर्णं यथाशक्ति राजा दद्यात्। च पुनश्चन्द्रे दुष्टे विहितान्यस्थानस्थिते शङ्खं दद्यात्। तिथ्यर्द्धे करणे भद्राख्ये दुष्टे धान्यं दद्यात्। तिथौ दुष्टे चतुर्थ्यादिरूपे तण्डुलान् दद्यात्। वारे दुष्टेऽनुपचयरूपे रत्नं प्रवालमुक्तादि दद्यात्। भे राशौ दुष्टे क्रूरग्रहाधिष्ठितत्वादिदोषसहिते सति गां दद्यात्। नाड्यां घटिकायां दुर्मुहूर्त्तादिना दुष्टायां सत्यां हेम सुवर्णं दद्यात् च पुनस्तारासु दुष्टासु विपत्प्रत्यरिवधरूपासु सिन्दूरं लवणं दद्यात्। पूर्वं दुष्टतारासु प्रत्येकं विशिष्य दानमुक्तमिदानीं तदशक्तौ लवणमेव देयमिति पुनरुक्तिपरिहारः। उक्तञ्च दीपिकायाम् "योगस्य हेम, करणस्य च धान्यमिन्दोः शङ्खञ्च, तण्डुलमणी तिथिवारयोश्च। तारावलाय लवणान्यथ गां च राशेर्दद्याद्द्विजाय कनकं शुचि नाडिकायामिति" १८ अथात्र गोचरप्रसङ्गात् सूर्यादयो ग्रहाः राश्यन्तरगताः सन्तः कदा शुभाशुभफलदातारो भवन्ति तथा चान्द्रमासाधिकरणकरविवासरादौ स्वजन्मनक्षत्रप्रवेशे सति फलविशेषं च वसन्ततिलकाद्वयेनाह राश्यादिगाविति। रविकुजौ सूर्यमङ्गलौ राश्यादिगौ राशिप्रथमदशांशमध्यस्थितौ सन्तौ फलदौ निखिलफलदातारौ। अवशिष्टांशेष्वीषदीषत् फलदौ। एवं सितेज्यौ शुक्रबृहस्पती मध्ये मध्यगतांशदशके निखिलफलदातारावन्यत्रेषदीषत्। शशिसुतो बुधः सदा त्रिंशदंशेषु निखिलफलदाता। अब्जमन्दौ चन्द्रशनैश्चरौ चरमदशके निखिलफलदातारावन्यत्रेषदीषत्। उक्तञ्च वसिष्ठेन "भवनादिगतौ फलदौ रविभौमौ मध्यगौ च गुरुशुक्रौ। अन्त्यगतौ शशिरविजौ सदैव फलदः शशाङ्कसुतः"। वराहेणापि "दिनकररुधिरौ प्रवेशकाले गुरुभृगुजौ भवनस्य मध्ययातौ। रविसुतशशिनौ विनिर्गमस्थौ शशितनयः फलदस्तु सर्वकालमिति" रुधिरो भौमः। अश्वेति। यस्मिन् मासे स्वीयजन्मनक्षत्रप्रवेशे सूर्यादिवाराश्चेत् स्युः तदा तस्मिन् मासेऽश्वादीनि फलानि वाच्यानि तद्यथा। रविवारे जन्मनक्षत्रप्रवेशे सति तस्मिन् मासे अश्वा मार्गोऽटनमिति यावत्, फलं तस्य पुंसो भवेत्। एवं चन्द्रवारे जन्मनक्षत्रप्रवेशे अन्नं भक्ष्यं तत्प्राप्तिः स्यादित्यर्थः। एवं भौमवारे वह्निभयं भवेत्। बुधवारे सन्मतिः। सती समीचीना धर्मयुक्ता बुद्धिर्भवेत्। गुरुवारे वस्त्रप्राप्तिर्भवेत्। भृगुवारे सौख्यं भवेत्। शनिवारे दुःखप्राप्तिः स्यादित्यर्थः। उक्तञ्च ज्योतिषरत्नसंग्रहे वामनेन "अध्वा भोजनमग्निभीः सुमतिता वस्त्रं सुखं चासुखं मासे मासि फलं भवेज्जननभे सूर्यादिवारे स्थिते" इति अत्र "मासास्तथा च तिथयस्तुहिनांशुमानादिति" भास्कराचार्यवाक्याच्चान्द्रः शुक्लप्रतिपदादि दर्शान्तो मासो गृह्यत इति शिवम्" १९ पी०धा०। अष्टवर्गशुभालाभ एव गोचरशुद्धेर्ग्राह्यता तन्मानम् अष्टवर्गशब्दे ५२२ पृ०उक्तम्

गोचर्म्मन् न० ६त०। १गवां चर्म्मणि, गोचर्म च स्तम्भने आसनतया विहितम् यथाह समयाचारतन्त्रे २पटले "मेषासनं तु वश्यार्थमाकृष्टौ व्याघ्रचर्म च। शान्तौ मृगाजिनं शस्तं मोक्षार्थं व्याघ्रचर्म च। गोचर्म स्तम्भने देवि! मोहने वाजिचर्म च"। "सप्तहस्तेन दण्डेन त्रिंशद्दण्डैर्निवर्त्तनम्। दश तान्येव गोचर्म ब्राह्मणेभ्यो ददाति यः" इति २बृहस्पत्युक्ते "दशहस्तेन वंशेन दशवंशान् समन्ततः। पञ्च चाभ्यधिकान् दद्यादेतद्गोचर्म चोच्यते" इति ३वशिष्ठोक्ते च भूमानभेदे "अपि गोचर्म्ममात्रेण भूमिदानेन पूयते" भा० आनु० ६२अ०।

गोचर्म्मवसन पु० गोचर्म वसनमस्य। महादेवे "गोपालिर्गोपतिर्ग्रामो गोचर्मवसनो हरः"· भा०आनु० १७अ० शिवसहस्रनामोक्तौ

गोचारक त्रि० गां चारयति घासादौ चर–णिच्–ण्वुल्। गोरक्षके (राखाल)

गोचारिन् त्रि० गौरिव चरति चर–णिनि। तपस्विभेदे "गोचारिणोऽथाश्मकुट्टादन्तोलूखलिकास्तथा। मरीचिपाः फेनपाश्च तथैव मृगचारिणः" भा०आनु० १४अ०

गोची स्त्री गाम् अञ्चति अनुच–क्विप् ङीप् नलोपे अल्लोपः। गवाचीशब्दार्थे १मत्स्यभेदे। गाः शिवस्तुतिरूपाः वाचः अञ्चति अनुच+क्विप् ङीप्। २हिमालयपत्न्यां शब्दार्थचि०

गोच्छाल पु० गां भूमिमाच्छादयति छद–णिच्–अण् पृषो०। भूकदम्बे (चाकुलिया)। रत्नमाला

गोज पु० "नृपायां नृपसंसर्गात् प्रमादाद्गूढजातकः। सोऽपि क्षत्रिय एव स्यादभिषेके च वर्जितः। अभिषेकं विना चायं गोज इत्यभिधीयते। सर्वं च राजवत्तस्य शस्यते पदवन्दनम्" इत्युशनसोक्ते सङ्कीर्णजातिभेदे अस्य राजशब्देन समासे राजदन्तादित्वात् पूर्वनिपातः द्वन्द्वे एकवद्भावश्च। "गोदुग्धप्रभवं किं वा छागदुग्धसमुद्भवम्। भवेत् गोजं त्रिदोषघ्नं रोचनं बलवर्द्धनम्। वह्निदीप्तिकरं हृद्यं सद्यस्तृप्तिकरं लघु। अतीसारेऽग्निमान्द्ये च ज्वरे जीर्णे प्रशस्यते"। भावप्र० उक्त लक्षणके २गोच्छागदुग्धविकारभेदे न०। ३गोजात-मात्रे त्रि०। गोलोमिकावृक्षे स्त्री राजनि०।

गोजर पु० गोषु मध्ये जरः जीर्णः। वृद्धवलीवर्द्दे "नाद्रियन्ते यथापूर्वं कीनाशा इव गोजरम्" भाग०३।३०। १४। "गोजरं वृद्धवलीवर्द्दम्" श्रीधरः

गोजल न० गवि जातं जलम्। गोमूत्रे राजनि०।

गोजा त्रि० गवि पृथिव्यां ब्रीह्यादिरूपेण जायते विट् आत्त्वम्। ब्रीह्यादिषु। ऋ०४।४०।५।उदा०। २गोलोमिकावृक्षे राजनि०। ३सुरभ्यां जाते च

गोजागरिक न० गवि स्वर्गे जागरः अप्रमत्तताऽस्त्यस्य ठन्। १मङ्गले मङ्गलस्य स्वर्गसाधनाय सदोद्यततया तथात्वम्। गवि भूमौ जागरिकः प्रहरीव अस्त्ररूपकण्टकधारित्वात्। २कण्टकारवृक्षे। गोषु ब्रीह्यादिषु जागरोऽस्त्यस्य ठन्। ३भक्ष्यकारके त्रि० शब्दार्थचि०

गोजात पु० गवि जातः। १गोनामकपुत्रस्यपत्नीजाते २सुरभीजाते वृतादौ ३स्वर्गजाते त्रि०"शृण्वन्तु नोदिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः"। ऋ०७.३५।१५

गोजापर्णी स्त्री गोजाः दुग्धफेन इव शुभ्रत्वात् पर्णमस्य गौरा० ङीष्। दुग्धफेनावृक्षे राजनि०।

गोजित् पु० गां भूमिं जयति जि–क्विप्। नृपे बलेन पृथिवीजयित्वात्तस्य तथात्वम्। ऋ०१।१०६।१। ८।५८।१०

गोजिह्वा स्त्री गोर्जिह्वेव। (गोजिया) लताभेदे। स्वार्थे क। तत्रैवार्थे अमरः। "गोजिह्वा गोजिका गोजी दार्विका खरपर्णिनी। गोजिह्वा वातला शीता ग्राहिणी कफपित्तनुत्। हृद्या प्रमेहकासास्रव्रणज्वरहरी लघुः। कोमला तुवरी तिक्ता स्वादुपाकरसा स्मृता" भावप्र० तद्गुणा उक्ताः।

गोजि(जी) स्त्री गोजिह्वा पृषो०। गोजिह्वाख्ये लताभेदे भावप्र० वा ङीष्। "गोजी च पिष्टा सह तालपत्रा" "समुद्रफेनशाकगोजीकाकोडुम्बरिकाः" इति च सुश्रुतः

गोजिरा स्त्री गौर्भूमिः तज्जशस्यादि जीर्य्यतेऽनया जृ–क ६त०। शस्यादिजारिकायाम् "गोजिरया रंहमाणः पुरन्ध्या" ऋ०८।११०।२ [कृमांसगुड़के भरतः

गोड पु० गोण्ड+पृषो०। (गोँड) इति ख्याते नाभौ प्रवृ-

गोडिम्ब पु० गोर्भूमेर्डिम्ब इव। शृगालजम्ब्वां शब्दार्थचि०।

गोडुम्बा स्त्री गां भूमिं तुम्बति अर्द्दति तुबि–क पृ०। (गोमुक) १गवादन्यां (तरमुज) २शीर्णवृन्ते पु० मेदि०। स्वार्थे क। गोडुम्बिका गवादन्याम् रत्नमाला

गोणी स्त्री गुण–घञ् नि० गुणः गोण+आवपनेऽर्थे ङीप्। धाङ्गधारे (गुण) ख्याते १आवपनपात्रे २छिद्रवस्त्रे, ३शाण्यां, ४द्विशूर्पात्मके मानभेदे, ५द्रोणीपरिमाणे च। "गोणी त्वावपनं चेत्" आजपदा० पा० सू० सि०कौ०। तस्य द्विशूर्पात्मकता भावप्र० उक्ता यथा

"शूर्पाभ्यान्तु भवेद्द्रोणी वाहो गोणी च सा स्मृता। द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः। चतुःसहस्रपलिका षण्णवत्यधिका च सा। पलानां द्विसहस्रन्तु भार एकः प्रकीर्त्तितः। तुला पलशतं ज्ञेयं सर्वत्रैवैष निश्चयः। माषटङ्काक्षबिल्वानि कुडवः प्रस्थमाढकम्। राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणम्"। पञ्चभिः सप्तभिर्वा गोणीभिः क्रीतः तद्धितार्थे द्विगौ परिमाणात् ठञ्। "द्विगोर्लुगनपत्ये" पा० तस्य लुकि उपसर्जनस्त्रीप्रत्ययस्य लुक्। ततः "इद्गोण्याः" पा० इत् पञ्चगोणि सप्तगोणि पञ्चगोण्यादिक्रीते पटादौ त्रि०। ह्रस्वा गोणी ष्टरच् षित्त्वात् ङीष्। गोणीतरी ह्रस्वगोण्याम्। [च ३तद्वति त्रि० मेदिनिः।

गोऽण्ड पु० गोरण्ड इव। १नीचजातिभेदे (गोँड) २वृद्धनाभौ

गोण्डाकरी स्त्री रागभेदे "गोण्डाकरीरागेण रूपकतालेन गीयते" गीतगो०।

गोतम पु० गोभिस्तमोध्वस्तं यस्य पृषो०। १मुनिभेदे तन्नामनिरुक्तिः भा० आनु० ९३ अ० यथा "गोतमोऽयं मतोऽधूमोटमस्ते मम दर्शनात्। गोभिस्तमोमम ध्वस्तं जातमात्रस्य देहतः। विद्धि मां गोतमं कृत्ये यातुधानि! निबोध मे" इति। स च श्वेतवराहकल्पे ब्रह्मणो मानसः पुत्रः यथाह वायु०गया०२अ० "ब्रह्मा संभृतसंभारो मानसानृत्विजोऽसृजत्" इत्युपक्रमे "स्रुकपालं गोतमस्य तथा वेदशिरोव्रतम्"। इति। स च गोत्रप्रवर्त्तकः गोत्रशब्दे दृश्यम्। गोतमस्यापत्यम् ऋष्यण्। गौतम तद्वंश्ये प्रवरप्रवर्त्तके ऋषिभेदे बह्वर्थे तस्य लुक् गोतमाः। गौतमशब्देऽधिकं वक्ष्यते आर्षशब्दे ८२७पृ०उदा० दृश्यम्। गोतमवंशप्राप्ताङ्गिरसगोत्रोत्पन्ना दश तद्भेदास्तत्रैव दृश्याः। अतिशयेन गौः जडत्वात् तमप्। २अतिजडे पु स्त्री। "मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम्। गोतमं तमवेतैव यथा वित्थ तथैव सः" नैष० चार्वाकोक्तिः। तस्य चान्वीक्षिकीविद्याप्रकाशकत्वमक्षपादशब्दे ४३पृ० दृश्यम् तच्छब्दे एव तच्छास्त्रप्रतिपाद्याद्युक्तम्। तस्य छात्रः गौतम गोतमच्छात्रे गौरा० ङीष्। गोतमी तद्भार्य्यायां शतानन्दमातरि ३अहल्यायाम् स्त्री

गोतमान्वय पु० गोतमोऽन्वयो वंशप्रवर्त्तको यस्य। शाक्यमुनौ मायादेवीसुते हेम०।

गोतमस्तोम पु० गोतमेन दृष्टः स्तोमः। १स्तोमभेदे "अथ प्रातर्गोतमस्य चतुरुत्तरस्तोमो भवति तस्य चतसृषु बहिष्पवमानषटास्वष्टास्वाज्यानि, द्वादशसु माध्यन्दिनः पवमानः, षोड़शसु पृष्ठानि, विंशत्यामार्भवः पवमानः, चतुर्विंशत्यामग्निष्टोम साम" शत०ब्रा०१३।५।१।१ दानशीलप्रजाकामनया कर्त्तव्ये एकाहसाध्ये २यज्ञभेदे च "गोस्तोमेन य इच्छेत् दानकामा मे प्रजा स्यादिति" आश्व० श्रौ० ९।५।१४ तद्विधानं तत्रैवोक्तम् दृश्यम्।

गोतमीपुत्र पु० ६त०। गोतम्या अहल्यायाः पुत्रे शतानन्दे

गोतल्लज पु० प्रशस्तः गौः "प्रशंसावचनैश्च" पा०पूर्वनि०। प्रशस्ते गवि स्त्रियामपि पुंस्त्वमेव नियतलिङ्गत्वात् अमरः। गोषु मध्ये तल्लज इति शब्दक०व्युत्पत्तिकल्पनं प्रामादिकमेव पाणिनीयसूत्रे कर्मधारये तद्विधानात्

गोतीर्थ न० गवा कृतं तीर्थम्। १गोष्ठे "बलिर्निवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना" सुश्रु० २तीर्थभेदे च। "तस्यां त्रितस्यो शनसोमनोश्च पृथोरथाग्नेरसितस्य वायोः। तीर्थं सुदासस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिषेवे" भाग० ३।१२।२। त्रितादीनामेकादश तीर्थानि तत्तन्नाम्ना प्रसिद्धानि" श्रीधरः

गोतीर्थक पु० "पार्श्वगतेन शस्त्रेण छेदो गोतीर्थको भवेत्" सुश्रुतोक्ते छेदभेदे "आधौ तत्र बद्धच्छिद्रे भिषजा वैविजानता। अर्द्धलाङ्गलिकश्छेदः कार्यो लाङ्गलिकोऽपि वा। सर्वतोभद्रको वापि कार्य्यो गोतीर्थकोऽपि च" सुश्रुते तत्प्रयोगे निमित्तमुक्तम्।

गोत्र पु० गां भूमिं त्रायते त्रैङ् पालने क। १पर्वते तस्य विष्कम्भरूपेण पृथिव्या धारकत्वात् तथात्वम् गोत्रभित्। गूयते शब्द्यतेऽनेन गुङ् शब्दे करणे ष्ट्रन् गुष्टपचीत्यादिना त्रो वा। २आख्यायां नामनि तथा शब्द्यमानत्वात्तस्यास्तथात्वम् गोत्रस्खलनम्। ३सम्भावनीयबोधे ४कानने ५क्षेत्रे ६मार्गे च मेदि०। ७छत्रे हेमच०। ८संघे ९वृद्धौ शब्दच०। १०वित्ते धने विश्वः ११मुनिभेदस्यापत्यादिवंशे न०। गोत्रकाराश्चाष्टौ सुप्रसिद्धाः यथाह नि० सि० बौधायनः "विश्वामित्रो जमदग्निर्भरद्वाजोऽथ गोतमः। अत्रिर्वशिष्ठः कश्यप इत्येते सप्त ऋषयः सप्तानामृषीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमिति" मनुस्तु सप्ताह यथा "जमदग्निर्भरद्वाजो विश्वामित्रात्रिगोतमाः। वशिष्ठकाश्यपागस्त्या मुनयो गोत्रकारिणः। एतेषां यान्यपत्यानि तानि गोत्राणि मन्वते" एतदुपलक्षणमन्येषामपि दर्शनात्। तद् च धर्म्मप्रदीपे गोत्राणि तु चतुर्विंशतिरित्याह तथा,"

वृद्धमनुः “शाण्डिल्याः कश्यपश्चैव वात्स्यः सावर्णकस्तथा। भरद्वाजो गौतमश्च सौकालीनस्तथापरः। कल्मषश्चाग्निवेश्यश्च कृष्णात्रेयवशिष्ठकौ। विश्वामित्रः कुशिकश्च कौशिकश्च तथापरः। घृतकौशिकमौद्गल्यौ आलम्बायनः पराशरः। सौपायनस्तथाऽत्रिश्च वासुकीरौहितस्तथा वैयाघ्रपद्यकश्चैव जामदग्न्यस्तथापरः। चतुर्विंशति गोत्राणां कथिता पूर्व्वपण्डितैः”। “सौकालीनकमौद्गल्यौ पराशरबृहस्पती। काञ्चनो विष्णुकौशिक्यौ कात्यायनात्रेयकाण्वकाः। कृष्णात्रेयः साङ्कृतिश्च कौण्डिल्यो गर्गसंज्ञकः। आङ्गिरस इति ख्यातः अनावृकाख्यसंज्ञितः। भव्यजैमिनिवज्राख्याः शाण्डिल्यो वत्सएव च। सावर्ण्यालम्बायनवैयाघ्रपद्या घृतकौशिकः। शक्तिः काण्वायनश्चैव वासुकिर्गौतमस्तथा। शुनकः सौपायनश्च मुनयो गोत्रकारिणः। एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते”। सर्व्वे द्विचत्वारिंशद्गोत्रकाराः। “अपत्यं पौत्रप्रभृति गोत्रम्” पा०१२उक्ते पौत्रप्रभृतौ अपत्यत्वेन विवक्षिते संज्ञा स०तस्यायमाशयः— प्रवराध्यायप्रसिद्धं लोके गोत्रमिह तु तदप्रसिद्धस्यापि संज्ञार्थमिदम् पौत्रादेरप्यपत्यत्वाव्यभिचारादपत्यपदस्यापत्यत्वेन विवक्षितमित्यर्थः तेन पौत्रादेस्तत्त्वेन विवक्षायामेव गोत्रत्वम्। पौत्रापत्यशब्दयोः सम्बन्धिकतया यदीयपौत्रादि तं प्रत्येव तस्य गोत्रत्वम् इति। अस्य प्रयोजनं तु “एकोगोत्रे” पा०नियमार्थं तथाहि गोत्रे एक एवापत्यप्रत्ययः स्यात्। उपगोर्गोत्रापत्यम् औपगवः। गार्ग्यः। नाडायनः। “गोत्रे स्वैकोन संख्यानां प्रत्ययानाम्परम्परा। यद्वा स्वद्यूनसंख्येभ्यो ऽनिष्टोत्पत्तिः प्रसज्यते। अपत्यमित्त्ररेव स्यात्ततः प्राचामपीति च। मतभेदेन तद्व्यर्थे सूत्रमेतत्तथोत्तरम्” सि०कौ० अयमर्थः पितुरेवापत्यमिति पक्षे हि उपगोस्तृतीये वाच्ये औपगवादि स्यात्। चतुर्थे त्वजीवज्ज्येष्ठे मृतवंश्ये औपगवेः फक्। इत्यमिञ्फकोः परम्परायां मूलाच्छततमे गोत्रे एकोनशतम्प्रत्ययाः स्युः। पितामहादीनामपीति मुख्यपक्षे तु तृतीये वाच्ये उपगोरणा इष्टे सिद्धेऽपि अणन्तादिञपि स्यात् चतुर्थे फगिति ततः फगिञाः परम्परायां शततमे गोत्रेऽष्टनवतिरनिष्टप्रत्ययाः स्युः। अतो नियमार्थमिदं सूत्रम्”। इति गोत्रापत्ये अनेकप्रत्ययाः पा०विहिता विस्तरभयान्नोक्ताः। गोत्रान्तरे जातस्यापि दानादितो गोत्रान्तरत्वं स्मृतिविहित यथा “गोत्ररिक्थे जनयितुर्न भजेद् दत्त्रिमः सुतः। गोत्ररिक्थानुगः पिण्डोव्यपैति ददतः स्वधा” मनुः। अयमाशयः दानात् जनयितुः स्वत्वे निवृत्ते द्वादशविधपुत्रान्तर्गतत्वेन दत्तकादीनां पुत्रनिधित्वेन विधानात् विधानेन संस्कारादिना च गृहीतुः पुत्रत्वे तद्गोत्रत्वम्। दत्तकन्यायान्तु वचनादेव पितृगोत्रापहारेण पतिगोत्रप्राप्तिः तथा च उ०त०व्यवस्थापितं यथा

“तदानीं गोत्रापहारमाह लघुहारीतः। “स्वगोत्राद्भ्रश्यते नारी विवाहात् सप्तमे पदे। पतिगोत्रेण कर्त्तव्या तस्याः पिण्डोदकक्रिया”। पाणिग्रहणादपि पितृगोत्रापहारमाह श्राद्धविवेके बृहस्पतिः। “पाणिग्रहणिका मन्त्राः पितृगोत्रापहारकाः। भर्त्तुर्गोत्रेण नारीणां देयं पिण्डोदकं ततः”। यत्तु सपिण्डनस्य गोत्रापहारित्वप्रतिपादकवचनम्। “संस्थितायान्तु भार्य्यायां सपिण्डीकरणान्तिकम्। पैतृकं भजते गोत्रमूर्द्ध्वन्तु पतिपैतृकम्” इति कात्यायनीयं तत् शाखान्तरीयं शिष्टव्यवहाराभावात्। अतएव “अनुमन्त्रिता गुरुं गोत्रेणाभिवादयेत” इति गोभिलोक्तं सप्तपदीगमनानन्तरं पत्युरभिवादनं तत् पतिगोत्रेण कर्त्तव्यमिति भट्टनारायणैरुक्तम् एतेन पितृगोत्रेणेति सरलाभवदेवभट्टाभ्यामुक्तं हेयम्। श्राद्धे गोत्रोल्लेखे विशेषः श्रा०त०प्रचेताः “गोत्रसम्बन्धनामानि पितॄणां परिकल्पयन्”। सामगानां श्राद्धादिकर्मभेदे तस्य विभक्तिविशेषान्ततामाह तत्रैव गोभिलः “गोत्रं स्वरान्तं सर्वत्र गोत्रस्याक्षय्यकर्मणि। गोत्रस्तु तर्पणे प्रोक्त एवं कर्त्ता न मुह्यति” शाखिभेदेन प्रेततर्पणे तु विशेषः ब्रह्मपु० उक्तः। “अमुकामुकगोत्रस्तु प्रेतस्तृप्यत्विदं जपन्”। “स्नात्वा सचेलमाचम्य सिञ्चेयुरुदकं जले। गोत्रनामानुवादादि तर्पयामीति चोत्तरम्” छन्दोगविषयं गोभिलवाक्यम् “विपक्षगोत्रं दयितेन लम्भिता” किरा० “स्फुटमिन्द्रताद्य मयि गोत्रभिदा” माघ०। “गोत्रविस्खलितमूचुरङ्गनाः” रघुः। “स्मरसि स्मर! मेखलागुणैरुत गोत्रस्खलितेषु बन्धनम्” कुमा०। “गोत्रभिदोऽप्यमर्षणः” रघुः। गोत्रं करोति कृ—णिनि। गोत्रकारिन् गोत्रप्रवर्त्तके ऋषिभेदे। “सप्तैते गोत्रकारिणः” बौधा०। तृच् गोत्रकर्त्तृ तत्रार्थे “तपस्विनो ब्रह्मविदो गोत्रकर्त्तार एव च” भा०आनु०४अ०। गां भूमिं त्रायते त्रै—क। १२मेघे निरु०। गोत्रभिच्छब्दे दृश्यम्।

गोत्रकीला स्त्री गोत्रः पर्वतः कील इव विष्टम्भकत्वात् यस्याः। पृथिव्यां हेमच०

गोत्रज पुंस्त्री गोत्रे समाने वंशे जायते जन–ड। एकगोत्रोत्पन्ने "तत्सुतो गोत्रजो बन्धुः" याज्ञ०। यद्यपि गोत्रोत्पन्नमात्रेऽस्य प्रवृत्तिस्तथापि अशौचप्रकरणे "दशाहेन सपिण्डास्तु शुध्यन्ति प्रेतसूतके। त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यन्ति गोत्रजाः" व्यासवाक्ये गोत्रजपदं पारिभाषिकं यथाह बृहन्मनुः "सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते। समानोदकभावस्तु निवर्त्तेताचतुर्दशात्। जन्मनाम्नां स्मृतेरेके तत्परं गोत्रजा मताः" इति "गोत्रजा निवृत्तसमानोदकभावाः" शु०त०रघु०। वस्तुतः गोत्रजपदस्य गोत्रोत्पन्नमात्रार्थकत्वेऽपि सामान्यविशेषन्यायेन सपिण्डादेर्विशेषाणां चोक्तेस्तद्भिन्नपरत्वम् अत एव "तत्सुतो गोत्रजोबन्धु"रित्यत्र याज्ञ०वचने गोत्रजपदेन पितामह्यादेर्ग्रहणमिति तद्व्याख्याने च मिता० "गोत्रजाः सपिण्डाः पितामह्यादयः समानगोत्राः" इत्युक्तम्।

गोत्रभाग पु० गोत्राणामेकगोत्रजातानां भागः। गोत्रजातानां परस्परविभागे "गोत्रसाधारणं त्यक्त्वा योऽन्यदेशं समाश्रितः। तद्वंशस्यागतस्यांशः प्रदातव्यो न संशयः। तृतीयः पञ्चमश्चैव सप्तमोवापि यो भवेत्। जन्मनामपरिज्ञाने लभेतांशं क्रमागतम्। यं परम्परया मौलाः सामन्ताः स्वामिनं विदुः। तदन्वयस्यागतस्य दातव्या गोत्रजैर्मही। भुक्तिस्त्रैपुरुषी सिध्येदपरेषां न संशयः। अनिवृत्ते सपिण्डत्वे सकुल्यानां न सिध्यति। अस्वामिना तु यद्भुक्तं गृहक्षेत्रापणादिकम्। सुहृद्बन्धुसकुल्यस्य न तद्भोगेन हीयते। विवाह्यश्रोत्रियैर्भुक्तं राज्ञामात्यैस्तथैव च। सुदीर्घेणापि कालेन तेषां सिद्ध्यति तत्तु न" बृहस्पतिः गोत्रसाधारणं द्रव्यमिति शेषः विवाह्यो जामाता

गोत्रभिद् पु० गोत्रं पर्वतं मेघं वा भिनत्ति भिद–क्विप्। इन्द्रे इन्द्रस्य वृष्ट्यर्थं मेघभेदनात् पर्वतपक्षशातनाद्वा तथात्वम्। "पुरन्दरो गोत्रभिद् वाज्ररायात्" यजु० २०।३८ गौर्भूमिस्तां वृष्ट्या त्रायन्ते गोत्रा मेघाः तान् वृष्ट्यर्थं भिनत्ति गोत्रान् गिरीन् वा भिनत्ति" वेददी०। तस्य गिरिपक्षभेदनकथा पौराणिकी अनुसन्धेया। यथा "ततोऽद्रयो जातपक्षा विष्णोरेव तु मायया। प्रस्थिता मेदिनीं त्यक्त्वा यथापूर्वं निवेशिताः। तत्स्थानमसुराणान्तु घातादिष्टं जलार्णवे। प्रतीच्यां पर्वताः सर्वे निमज्जुर्यथा गजाः। ततासुरेभ्यः शंसन्ते आधिपत्यं सुराश्रयम्। तच्छ्रुत्वैवासुराः सर्वं चक्रुरुद्योगमुत्तमम्" इत्युपक्रमे "धरण्यान्तु गिरीन् स्थाप्य स्वेषु स्थानेषु गोःपतिः। चिच्छेद पविना पश्चात् सर्वेषां भुवि चारिणाम्। एकः सपक्षो मैनाकः सुरैस्तत्समये कृतः" अग्नि पु०। "पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः" इति तदनुसारेण रघौ वर्णितम्। गोत्रं नाम भिनत्ति। २नामभेदके एकनामोच्चारणकाले अन्यनामोच्चारके च। "तदयुक्तमङ्ग तव विश्वसृजा न कृतं यदीक्षणसहस्रतयम्। प्रकटीकृता जगति येन खलु स्फुटमिन्द्रताद्य मयि गोत्रभिदा" माघः। "गोत्रभिदा पर्वतभिदा नामभेदिना च" मल्लि०।

गोत्रवृक्ष पु०गोत्रभवो नगजातो वृक्षः। धन्वनवृक्षे भावप्र०।

गोत्रस्खलन न०गोत्रे नामनि स्खलनम्। अन्यस्य नामग्रहणाशया अन्यस्य नामग्रहणरूपे रागहेतुके स्खलने। "जगाद गोत्रस्खलने च का न तम्"(नलम्) नैष०। "गोत्रस्खलने भ्रान्तिं मानिनि! जानीहि केवलां मेऽत्र। आख्यानतोविशेषप्रतिपत्तिः पाणिनीय इव" उद्भटः। भावे क्त "गोत्रस्खलितमप्यत्र न० "उत गोत्रस्खलितेषु बन्धनम्" कुमा० [स्थादिपोषणेन त्रै–क। २भूमौ अमरः।

गोत्रा स्त्री गवां समूहः त्र। १गोसमूहे गां त्रायते श-

गोत्रादि पु० "तिङोगोत्रादीनि कुत्सनाभीक्ष्ण्ययोः" पा० तिङन्तात् परस्य अनुदात्ततानिमित्ते शब्दगणे तद्गणश्च पा०ग०सूत्रे उक्तो यथा "गोत्र ब्रुव प्रवचन प्रहसन प्रकथन प्रत्यायन प्रपञ्च प्राय न्याय प्रचक्ष्व विचक्षण अवचक्षण स्वाध्याय भूयिष्ठ वानाम"।

गोत्व न० गोर्भावः त्व। गोशब्दप्रवृत्तिनिमित्ते गवेतरावृत्तौ सकलगोव्यक्तिस्थे जातिभेदे। तल्लक्षणन्तु गवेतरावृत्तित्वे सति सकलगोव्यक्तिवृत्तित्वम्। सत्ताद्रव्यत्वादिजातेः सकलगोव्यक्तिवृत्तित्वात् तद्वारणाय सत्यन्तम् विशेषणं गगनादेर्गवेतरावृत्तित्वात् विशेष्यदलम्। वृत्तिताद्वयञ्च समवायेन ग्राह्यं तेन गवेतरघटादौ कालिकसम्बन्धेन गोत्वस्य सत्त्वेऽपि नासम्भवः न वा गवेतरासमवेतस्य गगनादेः कालिकेन सकलगोव्यक्तिवृत्तित्वादतिव्याप्तिः। तस्याश्च जातेः गोपदप्रवृत्तिनिमित्तत्वमुक्तं काव्य० प्र० वाक्यपदीये "गौः स्वरूपेण न गौर्नाप्यगौः गोत्वाभिसम्बन्धात्तु गौः" यतो गोत्वसम्बन्धादेव गोर्गोपद-

वाच्यता अतो गोत्वस्य गोपदप्रवृत्तिनिमित्तत्वम्। तद्व्यञ्जकञ्च गलकम्बलादिमत्त्वरूपआकारभेदः संस्थानविशेषस्यैव जातिव्यञ्जकत्वात्। तत्र गोपदं गोत्वे शक्तं व्यक्तेर्भानमनुमानात् तुल्यवित्तिवेद्यत्वाद्वेति मीमांसकामन्यन्ते अनुमानञ्च गामानयेत्यादौ गोत्वानयनमिति शाब्दबोधात् परम् गोत्वकर्मकानयनं गोकर्मकानयनं विनाऽनुपपन्नमिति व्यतिरेकव्याप्तिग्रहाधीनम्। गोत्वविशिष्टे शक्तमिति तु नैयायिकाः व्यक्तिमात्रस्य शक्यत्वे व्यक्तीनामानन्त्यात् व्यभिचारः। अतद्व्यावृत्तिरूपोऽपोहो वा गोपदशक्य इति तु बौद्धाः

गोद पु॰ गां नेत्रं दायति शोधयति दै—क। १मस्तकस्थे मस्तिष्के हेम॰ मस्तिष्कस्य नेत्रप्रकाशहेतुत्वात् तथात्वम्। गां ददाति दा—क। २गोदातरि त्रि॰। “अन्नदस्तु श्रियं पुष्टां गोदोब्रध्नस्य पिष्टपम्” मनुः। गोदावर्य्याः समीपस्थे देशभेदे पु॰ ततः चतुरर्थ्याम् अण्। गौदः तद्देशादूरभवादौ त्रि॰ जनपदे तु वरणा॰ तस्य लुप्। गोदो जनपदः “विशेषणानाञ्चाजातेः” पा॰। लुबर्थस्य विशेषणानामपि तल्लिङ्गवचने न तु जातेः। गोदौ रमणीयौ” सि॰कौ॰

गोदत्र न॰ गोदं त्रायते त्रै—क। मस्तिष्करक्षके चुक्रटादौ

गोदन्त न॰ गोर्दन्त इवावयवोऽस्य ६त॰। हरिताले राजनि॰

गोदा स्त्री गां स्वर्गं ददाति स्नानेन दा—क। गोदावरीनद्याम् हेम॰। “नेष्टोऽथ गोदोत्तरतश्च यावत्” सु॰चि॰।

गोदान न॰ गावो केशा लोमानि वा दीयन्ते खण्ड्यन्तेऽत्र। आधारे ल्युट्। १केशान्ताख्ये द्विजातिसंस्कारभेदे केशान्तशब्दे २२५०पृ॰ दृश्यम्। “अथास्य गोदानविधेरनन्तरम्” रघुः। तच्च “एवेन गोदानम्” आश्व॰गृ॰१।१८।१ इत्यादिसूत्रजातेन निरूपितम्। “चूड़ोपनयनगोदानविवाहाः” आश्व॰गृ॰। गवि पृथिव्यां दीयते निधीयते स्नापकाले दा—कर्म्मणि ल्युट्। २दक्षिणकर्णसमीपस्थे शिरःप्रदेशे। “अपरेण दक्षिणाग्निम् दक्षिणं गोदानमुन्दति” कात्या॰ श्रौ॰ ५।२।१४। “दक्षिणं गोदानं वितार्य्योनत्तीमामापः” कात्या॰ श्रौ॰ ७।२।८। “अपङ्क्तिर्गवि पृथिव्यां दीयते इति गोदानं शिरसोदक्षिणं प्रदेशं वितार्य्य कङ्कतादिना तत्स्थाने केशान् विजटान् कृत्वा उन्दति क्लेदयति अद्भिरार्द्रं करोति इमामापः इत्यादि मन्त्रेण” कर्कः। ६त॰। गोः सुरभ्या वृषस्य वा ३दाने। गोप्रशंसापूर्वकं तद्दानप्रकारो हेमाद्रि॰दा॰ उक्तो यथा भविष्यत् पुराणे। ब्रह्मोवाच “आदित्यदुहिता गौर्हि पृथ्वीयं परिकीर्त्तिता। श्रेयोऽर्थं सर्वलोकानामुत्पन्ना क्रतुसिद्धये। ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम्। एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति। गोभ्यो यज्ञाः प्रवर्त्तन्ते गोभ्योदेवाः समुत्थिताः। गोभ्यो वेदाः समुत्कीर्णाः सषडङ्गपदक्रमाः। शृङ्गमूले गवां नित्यं ब्रह्मविष्णू समाश्रितौ। शृङ्गाग्रे सर्वतीर्थानि स्थावराणि चराणि च। शिरोमध्ये महादेवः सर्वभूतमयः स्थितः। ललाटाग्रे स्थिता देवी नासावंशे च षण्मुखः। कम्बलाश्वतरौ नागौ नासापुटमुपाश्रितौ। कर्णयोरश्विनौ देवौ चक्षुषोः शशिभास्करौ। दन्तेषु वायवः सर्वे जिह्वायां वरुणः स्थितः। सरस्वती च हुङ्कारे यमयक्षौ च गण्डयोः। सन्ध्याद्वयं तथोष्ठाभ्यां ग्रीवायामिन्द्रः समाश्रितः। रक्षांसि कक्षदेशे तु साध्याश्चोरसि संस्थिताः। चतुष्पात् सकलो धर्मः स्वयं जङ्घासु संस्थितः। खुरमध्ये तु गन्धर्वाः खुराग्रेषु च पन्नगाः। खुराणां पश्चिमाग्रेषु गणाह्यप्सरसां स्थिताः। रुद्राश्चैकादश पृष्ठे वसवः सर्वसन्धिषु। श्रोणीतटस्थाः पितरः सोमोलाङ्गूलमाश्रितः। आदित्यरश्मयोबाले पिण्डीभूता व्यवस्थिताः। साक्षाद्गङ्गा च गोमूत्रे गोमये यमुना स्थिता। क्षीरे सरस्वती देवी नर्मदा दधिसंस्थिता। हुताशनः स्वयं सर्पिर्ब्राह्मणानां गुरुः परः। अष्टाविंशतिदेवानां कोट्योरोमसु संस्थिताः। उदरे पृथिवी ज्ञेया सशैलवनकानना। चत्वारः सागराः पूर्णा गवाङ्के तु पयोधराः। एतद्धि कथितं सर्वं यथा गोषु प्रतिष्ठितम्। जगद्वै देवशार्दूल! स देवासुरमानवम्”। स्कान्दपुराणे “तृणानि खादन्ति वसन्त्यरण्ये पिबन्ति तोयान्यपरिग्रहाणि। दुह्यन्ति वाह्यन्ति पुनन्ति पापं गवां रसैर्जीवति जीवलोकः। तुष्टास्तु गावः शमयन्ति पापं दत्तास्तु गावस्त्रिदिवन्नयन्ति। संरक्षिताश्चोपनयन्ति वित्तं गोभिर्न तुल्यं धनमस्ति किञ्चित्। शष्पं समश्नाति ददाति नित्यं पापक्षतिं मित्रविवर्द्धनं च। स एव चार्थैः परिभुज्यते च गोभिर्न तुल्यं धनमस्ति किञ्चित्। तृणानि शुष्काणि वने चरित्वा पीत्वापि तोयान्यमृतं स्रवन्ति। यद्गोमयाद्याश्च पुनन्ति लोकान् गोभिर्न तुल्यं धनमस्ति किञ्चित्”। हारीतः “बहुक्षीराश्च यो गा वै ब्राह्मणायोपपादयेत्। उत्तारयेत्स आत्मानं सप्त सप्त कुलानि च”।

देवलः "सुशीलां लक्षणवतीं युवतीं वत्ससंयुताम्। बहुदुग्धवतीं स्निग्धां धेनुं दद्याद्विचक्षणः"। वेदव्यासः "यस्त्वात्मविक्रयं कृत्वा गाः क्रीत्वा संप्रयच्छति। आत्मविक्रयतुल्यास्ताः शाश्वतीः इत्युकौशिकः"। तथा संग्रामेष्वर्जयित्वा तु यो वै गाः सम्प्रयच्छति। यावतीः स्पर्शयेद्गावः स तावत् फलमश्नुते"। तावदिति पूर्वोक्त तावद्गोरोमसम्मितं संवत्सरं स्वर्गफलमित्यर्थः। "यो वै द्यूते धनं जित्वा क्रीत्वा गाः संप्रयच्छति। स दिव्यमयुतं शाक्रवर्षाणां फलमश्नुते"। 'अन्तर्जाताः, सुक्रयज्ञानलब्धाः पणक्रीता निर्जिताश्चौकजाश्च। कृच्छ्रोत्सृष्टाः पोषणाभ्यागताश्च द्वारैरेतैर्गोविशेषाः प्रशस्ताः"। अन्तर्जाता गर्भिण्य इति भारतपदप्रकाशकारः। सुक्रयलब्धाः यथामूल्यक्रयप्राप्ताः ज्ञानलब्धाः प्रतिग्रहलब्धाः पणक्रीताः भृतिलब्धाः निर्जिता युद्धादिना, ओकजाः गृहजाताः, कृच्छ्रोत्सृष्टाः पोषणाभ्यागता अतिव्याध्यादिकृच्छ्राक्रान्ताः सत्यः स्वामिना यास्त्यक्ताः स्वयं च पोषणं कृत्वा लब्धाः। "कृशा दुष्टा दुर्बला व्याधिता च न दातव्या या च मूल्यैरदत्तैः। क्लेशैर्विप्रं या फलैः संयुनक्ति तस्यावीर्याश्चाफलाश्चापि लोकाः"। मूल्यैरदत्तैः स्वीकृतेति शेषः। तथा। "न कृशां पापवत्सां वा वन्ध्यां रोगान्वितां तथा। न व्यङ्गां न परिश्रान्तां दद्याद्गां ब्राह्मणाय वै। योदद्यान्नोपयुक्तार्थां जीर्णां धेनुञ्च निष्फलाम्। तमः संप्रविशेद्दाता द्विजं क्लेशेन योजयन्"। ब्रह्मपुराणे "पीतोदकां जग्धतृणां दुग्धचोषां निरिन्द्रियाम्। उन्मत्तामङ्गहीनाञ्च मृतवत्सां महाशनाम्। केशवालपुरीषास्थिभक्ष्यादां सन्धिनीं खलाम्। पुटधेनुं यमलसूञ्चित्यं व्रणयितस्तनीम्। न दद्याद्ब्राह्मणेभ्यश्च सदोषं वृषभन्तथा"। पीतोदकां जग्धतृणामिति, वृद्धत्वोपलक्षणपरम्। दुग्धचोषां, स्वकीयस्तनपायिनीं, महाशनाम् बहुभक्षां, पुटधेनुं बाल्यावस्थैव या गर्भिणी। विश्वामित्रः "नैकशृङ्गाञ्च निःशृङ्गां स्फुटिताक्षीं चलत्खुराम्। न दद्यात् त्रिस्तनीञ्चैव गां शुभामेव दापयेत्"। महाभारते "अम्बरीषोगवां दत्त्वा ब्राह्मणेभ्यो प्रतापवान्। अर्बुदानि दशैकञ्च सराष्ट्रोऽभ्यपतद्दिवम्। दत्त्वा शतसहस्रन्तु गवां राजा प्रसेनजित्। सवत्सानां महातेजा गतोलोकाननुत्तमान्"। तथा। "प्रासादा यत्र सौवर्णाः शय्या रत्नोज्ज्वलास्तथा। वराश्चाप्सरसो यत्र तत्र गच्छन्ति गोप्रदाः। गोप्रदोनरकञ्चैति पयः पीत्वाम्बुजङ्गलम्। विमानेनार्कवर्णेन दिवि राजन्! विराजते। तञ्चारुवेशाः सुश्रोण्यः शतशोवरयोषितः। रमयन्ति विमानस्थं दिव्याभरणभूषिताः। वेणूनां वल्लकीनाञ्च नूपुराणाञ्च निःस्वनैः। हासैश्च हरिणाक्षीणां सुप्तः सन् प्रतिबुध्यते। यावन्ति रोमाणि भवन्ति धेन्वास्तावन्ति वर्षाणि महीयते स्वः। स्वर्गाच्च्युतश्चापि ततस्तु लोके कुले समुत्पत्स्यति गोमतां सः"। विष्णुः "गोप्रदानेन स्वर्गमाप्नोति दशधेनुप्रदोगोलोकं शतप्रदश्च ब्रह्मलोकम्"। जाबालः "होमार्थमग्निहोत्रस्य योगान्दद्यादयाचिताम्। त्रिर्वित्तपूर्णा पृथिवी तेन दत्ता न संशयः"। याज्ञवल्क्यः "यथाकथञ्चिद्दत्त्वा गां धेनुं वाऽधेनुमेव वा। अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते"। अङ्गिराः "गौरेकस्यैव दातव्या श्रोत्रियस्य विशेषतः। सा हि तारयते पूर्वान् सप्त सप्त च सप्त च"। नन्दिपुराणे "अपात्रे सा तु गौर्दत्ता दातारन्नरकं नयेत्। कुलैकविंशत्या युक्तं ग्रहीतारञ्च तारयेत्। विधिना च यदा दत्ता पात्रे धेनुः सदक्षिणा। तदा तारयते जन्तून् कुलानामयुतैः शतैः। पात्राण्यध्यात्मिका मुख्याः सुपुष्टाश्चाग्निहोत्रिणः। देयताश्च तथा मुख्या गोदानं ह्येतदुत्तमम्"। महाभारते "वृत्तिग्लाने सीदति चातिमात्रम् कव्यार्थं च होमहेतोः प्रसूत्याम्। गुर्वर्थं वा बालसंवृद्धये वा धेनुन्दद्यादेष काले विशिष्टे"। प्रसूत्यां सोमयागे। तथा "न वधार्थं प्रदातव्या न कीनाशे न नास्तिके। गोजीवे न च दातव्या तथा गौः पुरुषर्षभ!"। कीनाशो हलवाहकः। आत्रेयः "सीदते बहुभृत्याय श्रोत्रियायाऽऽहिताग्नये। अतिथिप्रियाय दान्ताय देया धेनुर्गुणान्विता। अकुलीनाय मूर्खाय लुब्धाय पिशुनाय च। हव्यकव्यव्यपेताय गौर्न देया कथञ्चन"। अथ दानविधिः। विश्वामित्रः "प्राङ्मुखीं गामवस्थाप्य सवत्सान्तां सुपूजिताम्। उदङ्मुखः पुच्छदेशे तु दाता वै स्नातो बद्धशिखो भवेत्। स्वस्तु विप्रः स्वात्मालक्षणलक्षितः। ताम्रपात्रं करे कृत्वा कनकेन समन्वितम्। निक्षिप्य पुच्छं तस्मिंस्तु धृतदिग्धं प्रगृह्य च। सतिलं विप्रपाणिन्तु प्राग्यन्तु निधापयेत्। सतिलं सकुशञ्चापि गृहीत्वा दानमाचरेत्। अनेनैव तु मन्त्रेण पात्रहस्ते जलं क्षि-

मेत् । यज्ञसाधनभूता या विश्वस्याघप्रणाशिनी । विश्वरूपः परो देवः प्रीयतामनया गवा । अनुव्रज्य तु तां धेनुं ब्राह्मणेन समन्विताम् । गोमतीन्तु ततो विद्वां जपेत प्रयतः शुचिः । उद्दिश्याथ वासुदेवं प्रीयतामिति चानघ ! । पात्रं मनसि सञ्चिन्त्य तोयमप्सु विनिक्षिपेत् । जलशायी ब्रह्मपिता पद्मनाभः सनातनः । अनन्तभोगशयनः प्रीयतां परमः पिता" । गोमतीमाह यमः "गावः सुरभयोनित्यं गावोगुग्गुलगन्धिकाः । गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत् । अन्नमेव परं गावो देवानां हविरुत्तमम् । पावनं सर्व्वभूतानां रक्षन्ति च वहन्ति च । हविषा मन्त्रपूतेन तर्पयन्त्यमरान्दिवि । ऋषीणामग्निहोतृणां गावो होमप्रतिष्ठिकाः । सर्व्वेषामेव भूतानां गावः शरणमुत्तमम् । गावः पवित्रं परमं गावो मङ्गलमुत्तमम् । गावः सर्व्वस्य लोकस्य गावोधन्याः शुभावहाः । नमोगोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च । नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः । ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् । एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति" । अन्यापि गोमती, महाभारतोक्ता तिलधेनुदाने दर्शिता । "ततश्चानयोर्विकल्पानुष्ठानमिति । सर्व्वगोदानसाधारणं मन्त्रमाह वशिष्ठः । "घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः । घृतनद्यो घृतावर्त्तास्ता मे सन्तु सदा गृहे । घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितम् । घृतं मे सर्व्वतश्चैव घृतं मे मनसि स्थितम् । गावोममाग्रतोनित्यं गावः पृष्ठतः एव च । गावोमे सर्व्वतश्चैव गवां मध्ये वसाम्यहम्" । "इत्याचम्य जपन् सायं प्रातश्च पुरुषः सदा । यदह्ना कुरुते पापं तस्मात् स परिमुच्यते" । दक्षिणा चात्र सुवर्णम् यदाह वशिष्ठः "सुवर्णं दक्षिणामाहुर्गोप्रदाने महाफले । सुवर्णं परमं ह्यायुर्दक्षिणार्थे न संशयः । गोप्रदानन्तारयते सप्त पूर्व्वान् नरांस्तथा । सुवर्णं दक्षिणां दत्त्वा तावद्द्विगुणमुच्यते । सुवर्णं परमं दानं सुवर्णं दक्षिणा परा । सुवर्णं पावनं प्राहुः परिमाणं परन्तथा" अत्र सुवर्णशब्दस्य हिरण्यपर्य्यायत्वे यथाशक्त्यनुष्ठानम् । अपरे त्वाहुः सकृदुच्चरितसुवर्णशब्दावगतपरिमाणार्थपरित्यागानुपपत्तेः सुवर्णशब्दस्य प्राहुरित्यादिक्रियाकर्म्मभूततया द्वितीयान्तत्वेन लिङ्गविशेषनिर्द्धारणाच्च परिमाणार्थतैव न्याय्येति । एवं च सत्यनियतानुष्ठानप्रसङ्गः तथा परिमाणपरत्वेत्येतदपि समञ्जसं न तु" ।
वर्णभेदेन गोदानफलादि तत्रोक्तं यथा

"कृष्णाङ्गान्ददते यस्तु पट्टच्छन्नां स्वलङ्कृताम् । घण्टामालाकुलां कृत्वा पुष्पैश्चैवाप्यलङ्कृताम् । विधिवच्च द्विजातिभ्यो यमलोकं न पश्यति । आयुरारोग्यमैश्वर्यं दाता कामांश्च मानवान् । श्वेताङ्गान्ददते यस्तु दिव्यरत्नैरलङ्कृताम् । घण्टामालाकुलां कृत्वा पुष्पैश्चैवाप्यलङ्कृताम् । मुखे धूपः प्रदातव्यो घृतेनास्यञ्च पूरयेत् । सुवर्णशृङ्गाभरणा तथा रौप्यखुरा शुभा । पट्टच्छन्ना शुभा चैव दातव्या ध्यानयोगिने । यस्तु दद्याच्च गां श्वेतां तस्य पुण्यफलं शृणु । जन्मप्रभृति यत् पापं मातृकं पैतृकं च यत् । कुलोद्गतस्य धूर्त्तस्य तत्क्षणादेव नश्यति । गान्ददानीह इत्येव वाचा पूयेत सर्व्वशः । पिता पितामहश्चैव तथैव प्रपितामहः । नरकस्थाः प्रमुच्यन्ते सोमलोकं व्रजन्ति ते । गौरीं चैव प्रयच्छेत्तु यस्तु गां वै नरः शुचिः । अहोरात्रोषितश्चैव कृतशौचोनरः सदा । स्वर्णशृङ्गीं रौप्यखुरां मुक्तालाङ्गूलभूषिताम् । घण्टामालाकुलां चैव गन्धपुष्पैरलङ्कृताम् । कुतपञ्चास्तरेत् प्राज्ञो मुखे धूपं प्रदापयेत् । भक्ष्यभोज्यान्नपानेन ब्राह्मणान् भोजयेत् पुमान् । गान्ददानीह इत्येव वाचा पूयेत सर्व्वशः । मातृकं पैतृकं चैव यच्चान्यद्दुष्कृतं भवेत् । पापञ्च तस्य तत् सर्व्वं दहत्यग्निरिवेन्धनम् । वर्षकोटिसहस्रन्तु पुमान् स दिवि मोदते । दासीदासैरलङ्कारैस्तूयते सर्व्वजन्तुभिः । अरोगश्चैव जायेत तेजस्वी च भवेन्नरः । नीलवर्णाञ्च गान्दद्याद्दोग्ध्रीं क्षीरगुणान्विताम् । स्वर्णशृङ्गीं रौप्यखुरां मुक्तालाङ्गूलभूषिताम् । पट्टच्छन्नां शुभां सौम्यां घण्टादामैरलङ्कृताम् । पञ्चरङ्गेण सूत्रेण गलवेष्टनशोभिताम् । रुद्रस्य प्रमुखे देया विष्णोश्च ब्रह्मणश्च ह । गां ददानीह इत्येव वाचा पूयेत सर्व्वशः । पिता पितामहश्चैव तथैव प्रपितामहः । नरकस्थाः प्रमुच्यन्ते नीलां गां ददते तु यः । वर्षकोटिसहस्राणि लोके तिष्ठति वारुणे । दधिक्षीरवहा नद्यो वर्त्तन्ते सर्व्वतः सदा । घृतशैलाः प्रपद्यन्ते नवनीतस्य पर्व्वताः । कृषिभागी बहुधनो दुर्भिक्षञ्च न पश्यति" ।

सवर्णवत्ससहितायाः कपिलादिकायागोदानविधिस्तत्रैव महाभारते ।

"समानवत्सां कपिलां धेनुं दत्त्वा पयस्विनीम् ।

सुव्रतां वस्त्रसम्पन्नां ब्रह्मलोके महीयते"। समानवत्सां समानवर्णवत्साम्। "रोहिणीं तुल्यवत्सां च धेनुं दद्यात्पयस्विनीम्। सुव्रतां वस्त्रसंवीतां इन्द्रलोके महीयते। समानवत्सां शवलां धेनुं दत्त्वा पयस्विनीम्। सुव्रतां वस्त्रसंवीतां सोमलोके महीयते"। शवलां कर्व्वुराम्। "समानवत्सां कृष्णान्तु धेनुं दत्त्वा पयस्विनीम्। सुव्रतां वस्त्रसंवीतामग्निलोके महीयते। वातरेणुसवर्णान्तु सवत्सां कामदोहनाम्। प्रदाय वस्त्रसंवीतां वायुलोके महीयते। समानवत्सां धूम्रान्तु धेनुं दत्त्वा पयस्विनीम्। सुव्रतां वस्त्रसंयुक्तां यमलोके महीयते। अघ्न्यां हेमसवर्णान्तु सवत्सां कामदोहनाम्। प्रदाय वस्त्रसंवीतां वारुणं लोकमश्नुते। अघ्न्या, गौः। कामदोहनां अनायासदोहाम्। "हिरण्यवर्णां पिङ्गाक्षीं सवत्सां कामदोहनाम्। प्रदाय वस्त्रसंवीतां कौवेरं लोकमाप्नुयात्"। पलालधूमवर्णान्तु सवत्सां कामदोहनाम्। प्रदाय वस्त्रसंवीतां पितृलोके महीयते। सवत्सां पीवरीन्दत्त्वा सितकण्ठीमलङ्कृताम्। वैश्वदेवमसम्बाधं स्थानं श्रेष्ठं प्रपद्यते। सितकण्ठीं कृष्णगलाम्। "समानवत्सां गौरीन्तु धेनुन्दत्त्वा पयस्विनीम्। सुव्रतां वस्त्रसंवीतां वसूनां लोकमश्नुते। सुव्रता सुखदोह्या। "पाण्डुकम्बलवर्णान्तु सवत्सां कामदोहनाम्। प्रदाय वस्त्रसंवीतां साध्यानां लोकमश्नुते। वत्सोपपन्नां नीलाङ्गीं सर्व्वरत्नसमन्विताम्। गन्धर्वाप्सरसां लोकान् दत्त्वा प्राप्नोति मानवः। गोप्रदानरतोयाति भित्त्वा जलदसञ्चयान्। विमानेनार्कवर्णेन दिवि राजन्! विराजते। तञ्चारुवेशाः सुश्रोण्यः सहस्रं वरयोषितः। रमयन्ति नरश्रेष्ठं गोप्रदानरतन्नरम्"।

देवतोद्देशेन गोदानविधिस्तत्रैव लिङ्गपुराणे

"देवदक्षिणदिग्भागे धेनुः कार्य्या उदङ्मुखी। प्राङ्मुखं वत्सलं कृत्वा ब्राह्मणं च उदङ्मुखम्। प्राङ्मुखो यजमानस्तु पूजयेद्ब्राह्मणं ततः। कोऽदादिति च मन्त्रेण गृह्णीयाद्ब्राह्मणः स्वयम्"। देवोऽत्र महेश्वरः। "एवंविधानतो दत्त्वा याति दाता शिवालयम्। तत्र भुक्त्वाक्षयान् भोगानन्ते ब्रह्मैति शाश्वतम्"। देवीपुराणे "नीलां वा यदि वा श्वेतां पाटलां कपिलामपि। सदुग्धां वत्सलाञ्चैव सुखदोह्यां शुभान्नृप"। "आदाय विधिवद्देवीं पूजयेत्कुम्भपङ्कजैः। धूपन्तु सर्ज्जनिर्य्यासन्तुरुष्कागुरुचन्दनम्। दत्त्वा तु मन्त्रपूर्व्वन्तु नैवेद्यमुपकल्पयेत्। पायसं घृतसंयुक्तं प्राशयेच्च तथा तु ताम्। द्विजाय शिवभक्ताय सवत्साङ्गां निवेदयेत्। सहेमवस्त्रकांस्याञ्च महापुण्यमवाप्नुयात्। यावत्तद्रोमसंख्यानं तावद्देव्याः पुरं वसेत्। इहैव गतपापोऽसौ जायते नृपसत्तम!।" विष्णुधर्म्मे "मान्धाता उवाच। ब्रह्मणः प्रीणनार्थाय केशवस्य शिवस्य च। यानि दानानि देयानि तान्याचक्ष्व द्विजोत्तम!। येन चैव विधानेन दानं पुंसः सुखावहम्। ऐहिकामुष्मिकाप्रेप्सु करोति न विहन्यते। वसिष्ठ उवाच। गोदानमादौ वक्ष्यामि प्रत्यक्षक्रमयोगतः। "येन चैव विधानेन धेनुं नाधिकविस्तरम्। पुण्यन्दिनमथासाद्य स्नात्वाऽऽतर्प्य पितॄंस्तथा। कृतोपवासः सम्प्राश्य पञ्चगव्यं नरेश्वर!। घृतक्षीराभिषेकञ्च कृत्वा विष्णोः शिवस्य च। तमभ्यर्च्च्य यथान्यायं पुष्पादिभिरनुक्रमात्। उदङ्मुखीं प्राङ्मुखीं वा गृष्टिं कृत्वा पयस्विनीम्"। गृष्टिः सकृत्प्रसूतेत्यर्थः। "सपुत्रां वस्त्रसंवीतां सितयज्ञोपवीतिनीम्। स्वर्णशृङ्गीं रौप्यखुरां सुवर्णापरिसंस्थिताम्। शक्तितोदक्षिणायुक्तां ब्राह्मणाय निवेदयेत्। गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः। गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्। प्रदक्षिणं ततः कृत्वा धेनुं द्विजवरस्य तम्। इमां नः प्रतिगृह्णीष्व धेनुर्दत्ता मया तव। स मे पापापनोदाय गोविन्दः प्रीयतामिति"। वह्निपुराणे तु अयमधिको मन्त्रः। "या धेनुः काश्यपस्यासीदत्रेर्वा गोतमस्य च। साभिकामफला देवी इह लोके परत्र चेति। एवमुच्चार्य्य तं विप्रं गोविन्दं नृप! कल्पयेत्। अनुव्रजेत्तु गच्छन्तं पदान्यष्टौ नराधिप!। अनेन विधिना धेनुं यो विप्राय प्रयच्छति। सर्व्वकामसमृद्धात्मा विष्णुलोकं स गच्छति। सप्तावरान् सप्तपरानात्मानञ्चैव मानवः। सप्तजन्मकृतात् पापान्मोचयत्यवनीपते!। पदेपदेऽश्वमेधस्य गोसवस्य च मानवः। फलमाप्नोति राजेन्द्र दद्यायैवङ्गां हरिः। सर्व्वकामदुघा सम्यक् सर्व्वकालेषु पार्थिव!। भवत्यथो पापहरा यावदिन्द्राश्चतुर्द्दश। सर्व्वेषामेव पापानां कृतानामविजानता। प्रायश्चित्तमिदं प्रोक्तमनुतापोपबृंहितम्। सर्व्वेषामेव देवानामेकजन्मानुगं फलम्। हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम्। ब्राह्मणैः क्षत्त्रियैर्व्वैश्यैः शूद्रैश्चान्यैश्च मानवैः। लोकाः कामदुघाः प्राप्ता दत्त्वैतद्विधिना नृप!। गोभ्योऽ-

धिकं जगति नापरमस्ति किञ्चिद्दानम् पवित्रमिति शास्त्रविदोवदन्ति । ताः सम्पदः सुरसदश्च समीहमानैर्देया सदैव विधिना द्विजपुङ्गवेभ्यः ।"

"अतः परन्तु गोदानं कीर्त्तयिष्यामि तेऽनघ ! । गावोऽधिकास्तपस्विभ्यो यस्मात् सर्वेभ्य एव च । तस्मान्महेश्वरो देवस्तपस्ताभिः सहास्थितः । ब्रह्मलोके वसन्त्येताः सोमेन सह भारत ! । यान्तां ब्रह्मर्षयः सिद्धाः प्रार्थयन्ति परां गतिम् । पयसा हविषा दध्ना शकृता चाथ चर्मणा । अस्थिभिश्चोपकुर्वन्ति शृङ्गैर्बालैश्च भारत ! । नासां शीतातपौ स्यातां सदैताः कर्म कुर्वते । न वर्षविषयं वापि दुःखमासां भवत्युत । ब्राह्मणैः सहिता यान्ति तस्मात् पारमकं पदम् । एकं गोब्राह्मणं तस्मात् प्रवदन्ति मनीषिणः । रन्तिदेवस्य यज्ञे ताः पशुत्वेनोपकल्पिताः । अतश्चर्मण्वती राजन् । गोचर्मभ्यः प्रवर्त्तिता । पशुत्वाच्च विनिर्मुक्ताः प्रदानायोपकल्पिताः । ता इमा विप्रमुख्येभ्यो यो ददाति महीपते ! । निस्तरेदापदं कृच्छ्रां विषमस्थोऽपि पार्थिव ! । गवां सहस्रदः प्रेत्य नरकं न प्रपद्यते । सर्वत्र विजयञ्चापि लभते मनुजाधिप ! । अमृतं वै गवां क्षीरमित्याह त्रिदशाधिपः । तस्माद्ददाति यो धेनुममृतं स प्रयच्छति । अग्नीनामव्ययं ह्येतद्धौम्यं वेदविदो विदुः । तस्माद्ददाति यो धेनुं स हौम्यं सम्प्रयच्छति । स्वर्गो वा मूर्त्तिमानेष, वृषभं यो गवां पतिम् । विप्रे गुणयुते दद्यात् स वै स्वर्गे महीयते । प्राणा वै प्राणिनामेते प्रोच्यन्ते भरतर्षभ ! । तस्माद्ददाति यो धेनुं प्राणानेष प्रयच्छति । गावः शरण्या भूतानामिति वेदविदो विदुः । तस्माद्ददाति यो धेनुं शरणं स प्रयच्छति । न वधार्थं प्रदातव्या न कीनाशे न नास्तिके । गोजीविने न दातव्या तथा गौर्भरतर्षभ ! । ददत् स तादृशानां वै नरो गां पापकर्मणाम् । अक्षय्यं नरकं यातीत्येवमाहुर्मनीषिणः । न कृशां नापवत्सां वा बन्ध्यां रोगान्वितां तथा । न व्यङ्गां न परिश्रान्तां दद्याद्गां ब्राह्मणाय च । दशगोसहस्रदो हि शक्रेण सह मोदते । अक्षयान् लभते लोकान्नरः शतसहस्रदः ॥ भा०आनु० ६६ अ०

गोदारण न० गां भूमिं दारयति दृ–णिच्–ल्यु । १लाङ्गले अमरः । २कुद्दाले हेमच० ।

गोदावरी गां स्वर्गं ददाति स्नानात् दा–वनिप् ङीप् रश्चान्तादेशः । स्वनामख्याते नदीभेदे सा च नदी दक्षिणस्थ दण्डकारण्यसमीपस्था यथाह "सत्कृत्य शरभङ्गं स दण्डकारण्यमाश्रितः । नदीं गोदावरीं रम्यामाश्रित्य न्यवसत्तदा" भा०व०२७६अ० । "ततो गोदावरीं प्राप्य नित्यं सिद्धनिषेविताम् । गवामयमवाप्नोति वासुकेर्लोकमुत्तमम् भा०व०८५अ०। "गङ्गे ! च यमुने ! चैव गोदावरि ! सरस्वति ! । नर्म्मदे ! सिन्धु ! कावेरि ! जलेऽस्मिन् सन्निधिं कुरु"। जले तीर्थावाहनमन्त्रः ।

गोदुग्ध न० ६त० । गोः क्षीरे । भावप्र० तद्गुणा उक्तास्तच्च वाक्यं गोशब्दे दर्शितम् । वर्णभेदेन गोदुग्धस्य गुणास्तत्रैव "कृष्णाया गोर्भवं दुग्धं वातहारि गुणाधिकम् । पीताया हरते पित्तं तथा वातहरं भवेत् । श्लेष्मलं गुरु शुक्लाया रक्तायाश्चापि वातहृत् । बालवत्सविवत्सानां गवां दुग्धं त्रिदोषकृत् । वष्कयिण्यास्त्रिदोषघ्नं तर्पणं बलकृत् पयः । जाङ्गलानूपशैलेषु चरन्तीनां यथोत्तरम् । पयो गुरुतरं स्नेहो यथाहारं प्रवर्त्तते । खल्यन्नभक्षणाज्जातं क्षीरं गुरु कफप्रदम् । तत्तु बल्यं परं वृष्यं स्वस्थानां गुणदायकम् । पलालतृणकार्पासबीजजं रोगिणो हितम्" राजनि०तु "गवां प्रत्यूषसि क्षीरं गुरु विष्टम्भि दुर्जरम् । तस्मादभ्युदिते सूर्ये यामं यामार्द्धमेव वा । समुत्तार्यं पयोग्राह्यं तत्पथ्यं दीपनं लघु । विवत्साबालवत्सानां पयो दोषलमीरितम् । शस्तं वत्सैकवर्णायाधवलीकृष्णायोरपि" दूर्वादा.मासपर्णादा ऊर्द्धशृङ्गी च या भवेत् । तासां गवां हितं क्षीरं शृतं वाऽशृतमेव वा । गवां सितानां वातघ्नं कृष्णानां पित्तनाशनम् । श्लेष्मघ्नं रक्तवर्णानां त्रीन् हन्ति कपिलापयः" राजनि० ।

गोदुग्धदा स्त्री गोदुग्धं ददाति सम्पादयति दा–क । चणिकाख्ये राजनि० । तस्याभोजनाद्गोदुग्धवृद्धेस्तस्यास्तथात्वम् ।

गोदुह् त्रि० गां दोग्धि दुह–क्विप् ६त० । १गोदोहके(दोयाल) "चिरं निदध्यौ दुहतः स गोदुहः" माघः । २गोपे च "चेतोऽस्माकं गुणवदगुणं गोदुहां देहमेतत्" उद्धवदू० दुह–क । गोदुहोऽप्यत्र पु० ।

गोदोह पु० भावे घञ् । ६त० । "१गोदोहने ।" "रुद्रायतने भूमौ गोदोहात् कोटिहोमाच्च" वृ०स० १६ अ० । कर्म्मणि घञ् । "अकर्म्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्म्मसंज्ञ इति वाच्यम्" वार्त्ति० अस्यार्थ

मासमास्ते गोदोहमास्ते इत्यादौ सर्व्वस्याकर्म्मकधातूनां व्याप्तिगर्भितस्वार्थपरतायां तात्पर्य्यग्राहकमिदं वार्त्तिकं यथाह हरिः

"कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः । सर्व्वैरकर्म्मकैर्योगे कर्म्मत्वमुपजायते । अतस्तैः कर्म्मभिर्युक्तो धातुर्द्व्यैरकर्म्मकः । तस्य कर्म्मणि भावे च निमित्तत्वाय कल्पते" इति । अस्यायं भावः मासमास्ते गोदोहमास्ते इत्यादौ धातोरेव सम्बन्धपूर्व्वकासनादौ आसनादिकरणक सम्बन्धे वा निरूढलक्षणाया ज्ञापकमेतद्वार्त्तिकम् । तत्र धातोराद्यार्थलक्षणायां प्रधानक्रियाया अकर्म्मकत्वात् दुहादिषु पाठाभावाच्च गौणकर्म्मणि लकारासम्भवेन भाव एव लकारस्तेन मासमास्यत इत्येव प्रयोगः । द्वितीयार्थलक्षणायान्तु प्रधानक्रियायाः सकर्म्मकतया कालादेस्तत्कर्म्मत्वेन मुख्यकर्म्मण्येव लकारस्तेन मास आस्यते गोदोह आस्यते इति प्रयोग इति विवेकः । अत्र सत्येत्यभिधानात् तद्योगे न तेभ्यः षष्ठीति द्योतितमिति मनोरमायां स्पष्टम् । २गोदुग्धे च "ह्यो गोदोहोद्भवं घृतम्" अमरः । आधारे घञ् । ३गोदोहनकाले च तत्कालश्च मुहूर्त्ताष्टमभागात्मकः यथाह आ० त० विष्णु पु० "ततो गोदोहमात्रं वै कालं तिष्ठेत् गृहाङ्गने । अतिथिग्रहणार्थाय तदूर्द्ध्वं वा यथेच्छया" गोदोहनकालश्च मुहूर्त्ताष्टमभागात्मकः "आचम्य च ततः कुर्य्यात् प्राज्ञो द्वारावलोकनम् । मुहूर्त्तस्याष्टमं भागमुद्वीक्ष्योह्यतिथिर्भवेत्" मार्क० पु० एकवाक्यत्वात्" आ० त० रघु० ।

गोदोहन न० भावे ल्युट् ६त० । १गोदोहने । आधारे ल्युट् । २गोदोहनकाले । "न लक्ष्यतेऽह्यवस्थानमपि गोदोहनं क्वचित्" भाग० १।१९।३९ । आधारे ल्युट् ङीप् । गोदोहनी गोदोहनाधारपात्रे गार्ग्याम् स्त्री जटाधरः ।

गोद्रव पु० द्रवति द्रु—अच् ५त० । गोमूत्रे राजनि० ।

गोधन न० गवां धनं समूहः । १गोसमूहे गौरेव धनमस्य । २गोरूपधनवति त्रि० । गौरेव धनम् । ३गोरूपे धने न० । "अद्यैव किं चिरेण स्म व्रजामः सह गोधनैः" हरिवं० ६६अ० "गोधनेषु प्रतोलीषु वरद्वारमुखेषु च । असंस्कारदोषेषु पर्य्युक्तास्तत्र शोभनाः" मा० वि० ४७अ० धन—रवे भावे अच् गोर्वृषस्य रव इव रवोऽस्य । ४स्थूलाग्रबाणे पु० शब्दक० हरिवं० मूलं द्रष्टव्यम् ।

गोधर पु० गां पृथिवीं विष्टम्भकतया धरति धृ—अच् । महीधरे पर्व्वते शब्दार्थचि० ।

गोधर्म्म पु० गोरिव धर्म्मः । मैथुनेऽविचाररूपे गोसदृशे धर्म्मे "गोधर्म्मं सौरभेयाच्च सोऽधीत्य निखिलं मुनिः (बृहस्पतिः)" भा० आ० १०४अ० उतथ्यशब्दे १०७५पृ० दृश्यम् ।

गोधा कौटिल्ये कण्ड्वादेराकृतिगणः नामधातुः पर० अक० सेट् । गोधायति अगोधायीत् ।

गोधा स्त्री गुध्यते वेष्ट्यते बाहुरनया करणे घञ् । धनुर्गुणाघातवारणाय प्रकोष्ठे १बध्यमाने चर्म्मणि । "बद्धगोधाङ्गुलित्रवान्" भा० व० १७अ० "गोधाश्लिष्टभुजाशाखैरभूद्भीमा रणाटवी" माघः । "ततश्चटचटाशब्दो गोधावातादभूत्तयोः" भा० द्रो० १२९अ० । कर्त्तरि अच् । (गोसाप) इति ख्याते २सर्पभेदे स्त्री अमरः "श्वाविधं शल्लकं गोधां खड्गकूर्म्मशशांस्तथा । भक्ष्यान् पञ्चनखेष्वेतानतुष्टांश्चैकतोदतः" मनुना तन्मांसं पञ्चनखेषु भक्ष्यतयाऽभिहितम् । तन्मांसपाकगुणादि भावप्र० उक्तं यथा "गोधाश्चोष्णजलैर्भूयः क्षालितां खण्डशः कृताम् । तलस्विन्नाञ्च तक्रतोयाभ्यां क्षालितां सूक्ष्मखण्डिताम् । तलयेद्वेसवाराद्यैः पलेहो वा विधानतः । विपाके मधुरा गोधा वातपित्तप्रणाशिनी । कषाया कटुका प्रोक्ता कफघ्नी बलवर्द्धिनी ।" सा तु स्थलजजलभेदाद्द्विधा । स्वार्थे क । अत्रैवार्थे । गोधायाः अपत्यम् वा ढक् । गौधेर पक्षे शुभ्रा० ढक् । गौधेय उदीचां० मते आरक् । गौधार तदपत्ये पुंस्त्री ढकि स्त्रीत्वे ङीप् इति भेदः ।

गोधापदी स्त्री गोधाया इव पादौ मूलमस्याः स्वाङ्गत्वात् जातित्वाद्वा कुम्भपद्या० ङीषि पद्भावः । (गोयालिया) लताभेदे । स्वार्थे क । अत्रैवार्थे रत्नमाला ।

गोधायस् त्रि० गां दधाति धा—बा० असुण् ६त० । गोधारके "गोधायसं वि धनसैरदर्द्दः" ऋ० १०।६८।७ ।

गोधावीणाका स्त्री गोधायाश्चर्म्मणा नद्धा वीणा ह्रस्वा सा कन् । ह्रस्वगोधाचर्म्मनद्धवीणायाम् । "गोधावीणाकाः काण्डवीणाश्च पत्न्योवादयन्त्युपगायन्ति" कात्या० श्रौ० १३।३।१७

गोधास्कन्ध पु० गोधेव स्कन्धोऽस्य । विट्खदिरे । राजनि० ।

गोधि पु० गौर्नेत्रं धीयते यस्मिन् आधारे इन् । १ललाटे अमरः गुध—इन् । २गोधायां सर्पभेदे शब्दचि० गोधि स्वार्थे क, गोधेव क अत इत्त्वं वा । गोधिका (गोसाप) गोधायाम् अमरः ।

गोधिकापुत्र पु० ६त० । १गोधाशावके सर्पात् गोधायामुत्पन्ने (सोना गोसाप) इति ख्याते २सर्पभेदे पुंस्त्री शब्दार्थचि०

गोधिनी स्त्री गुध–णिनि । हड्ठीभेदे राजनि०।

गोधुम पु० गुध–बा० उम । गोधूमे शब्दच० ।

गोधूम त्रि० गुध–ऊम । १नागरङ्गे २व्रीहिभेदे च (गोड़म) च मेदिनिः तद्भेदादि भावप्र०उक्तं यथा"गोधूमः सुमनोऽपि स्यात् त्रिविधः स च कीर्त्तितः । महागोधूम इत्याख्यः पश्चाद्देशात् समागतः । मधूली तु ततः किञ्चिदल्पा सा मध्यदेशजा । निःशूको दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः । गोधूमो मधुरः शीतो वातपित्तहरो गुरुः । कफशुक्रप्रदो बल्यः स्निग्धः सन्धानकृत्सरः । जीवनो बृंहणो वर्ण्योरुच्यो वीर्यस्थिरत्वकृत् । कफप्रदः नवीनो न च पुराणः पुराणयवगोधूमक्षौद्रजाङ्गलशूल्यभुगिति" वाग्भटेन वसन्ते ग्रहीतत्वात् । "मधूली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः । शुक्रला बृंहणी पथ्या तद्वन्नन्दीमुखा स्मृता" तस्य कृतान्नशब्दे २१८१पृ० पाकविशेषो दृश्यः ।

गोधूमक पुंस्त्री गोधूम इव कं शिरोऽस्य । राजिमत् सर्पभेदे अहिशब्दे ५८१ पृ० सुश्रुतवाक्यं दृश्यम् ।

गोधूमचूर्ण ६त०। (मयदा) इति ख्याते पदार्थे "शुष्कगोधूमचूर्णेन किञ्चित् पुष्टां तु रोटिकाम्" भाव०प्र०। कृतान्नशब्दे दृश्यम् ।

गोधूमसम्भव न० सम्भवत्यस्मात् सम्+भू–अपादाने अप् गोधूमः सम्भवोऽस्य । सौवीरे काञ्जिकभेदे राजनि०।

गोधूमसार पु०६त०। (गोहमेरपालो) इति ख्याते गोधूमस्य सारांशे तत्करणप्रकार; पाकराजेश्वरे "निस्तुषान् गोधूमानुदूखले कण्डयित्वा सायङ्काले मृत्तिकादिपात्रे जले मग्नं कृत्वा परदिने प्रभातसमये उपरिस्थं जलं क्रमेण दूरीकृत्याऽधःस्थं सारमातपे शुष्कं कृत्वा पात्रान्तरे स्थापयेदिति" । [गोलोमिकायां राजनि०।

गोधूमी स्त्री गां धूमयति धूम+णिच्–अण् गौरा० ङीष् ।

गोधूलि स्त्री गवां खुरोत्थितो धूलिरत्र काले। गवां प्रचारदेशात् गृहागमनकाले गोखुरोद्धूतधूलियुक्ते समयभेदे स च कालो यथा "सन्ध्यातपारुणितपश्चिमदिग्विभागे व्योम्नि स्फुरद्विरलतारकसन्निवेशे । रुद्धे गवां खुरपुटोद्गलितैरजोभिर्गोधूलिरेव कथितो भृगुजेन योगः" पी० धा० घृतवाक्योक्तः उपयमशब्दे १२७५।७६पृ० अस्य विहितिर्दृष्ट्या"तिथ्यादिषु निषिद्धेषु चन्द्रताराविलोमतः । आपां गोधूलियोगं वा स्वीकृत्य गमनं चरेत् । प्राच्यामूर्ध्वां प्रतीच्यान्तु गोधूलिं वर्जयेन्नृपः । दक्षिणे चाभिजिह्वैवमुत्तरे च निशां तथा" । ज्यो० त० वराहः गोरजस्तु शब्दोऽप्यत्र उपयमशब्दे २५७५।७६पृ० उदा०

गोधेनु स्त्री गौर्धेनुः जात्या समासे परनिपातः । दुग्धवत्यां सवत्सायां गवि

गोधेर त्रि० गुध–एरच् । गोप्तरि उणादिकोषः

गोध्र पु० गां भूमिं धरति धृ–मूलवि० क । महीधरे पर्वते

गोनन्दी स्त्री गवि जले नन्दति नन्द–अच् गौरा०ङीष् । १सारसपक्षिणि हारा० स्कन्दस्य २गणभेदे पु० "प्रियकस्यैव नन्दस्य गोनन्दस्य प्रतापवान्" भा०शल्य०४६अ०

गोनर्द पु० गवि जले नर्दति नर्द–अच् । १सारसखगे मेदि० गवा जलेन नर्दति । २कैवर्त्तीमुस्तके न० मेदि० । गवा वाचा नर्दते अच् । ३देशभेदे पु० स च कूर्मविभागे बृ०स० १४ अ०दक्षिणस्यामुक्तः "अथ दक्षिणेन लङ्का" इत्युपक्रमे "दशपुरगोनर्दकेरलाः" । सोऽभिजनोऽस्य अण् । गौनर्द तद्देशवासिनि बहुषु अणो लुक् । तद्देशवासिषु ब० व० । गोनर्दनीचमूद्रान् वैदेहांस्थानयः स्पृशति" बृ०स० ६अ० । "तद्राजेऽपि अण् । गौनर्द तस्य नृपे "काश्मीरराजो गोनर्दोदरदाधिपतिर्नृपः" काश्मीर राजो गोनर्दः कारूषाधिपतिस्तथा" हरि०८१अ० बहुषु तस्य लुप् । गवि वृषे नर्दते नर्द–अच् । ४महादेवे पु० "गोनर्दो गोप्रभावश्च गोवृषेश्वरवाहनः" भा०आ०२८६अ०। दक्षकृत शिवस्तुतौ । गोनर्दे देशे भवः "एङ् प्राचां देशे" पा० वृद्धसंज्ञत्वात् छः । गोनर्दीय तद्देशभवे त्रि० प्राचोऽन्यमते अण् । गौनर्द तत्रार्थे त्रि० ।

गोनर्दीय पु० गोनर्दे देशे भवः एङादित्वेन वृद्धसंज्ञत्वात् छ। पतञ्जलिमुनौ हेमच० । तस्य गोनर्ददेशोद्भवकथा बृहत्कथायां दृश्या सरलोपोद्घातेऽस्माभि दिङ्मात्रमुक्ता ।

गोन(ना)स पु०स्त्री०गोरिव नासा अस्य वा नसादेशः। मण्डलिसर्पभेदे (गोखुरासाप) अमरः स्त्रियां जातित्वात् ङीष्। दीर्घमध्य इति हेमचन्द्रः । अहिशब्दे५१८पृ०सुश्रुतवाक्यं दृश्यम् । गोनसस्तुदाकरोऽस्त्यास्या अच् गौरा० ङीष् । २ओषधिभेदे स्त्री । सुश्रुते गण्डणादि तत्र १५६१ पृ० उक्तम् । दीर्घमध्यस्य ३वैक्रान्तमणौ हेमच०। [मिनि च

गोनाथ पु० ६त० । १वृषे राजनि० । २भूमिनाथे ३गोस्वा-

गोनाय पु० गां नयति नी–अण् । १गोपे शब्दार्थचि० "तद्यथा गोनायोऽश्वनायः पुरुषनायः" इति का०उप० "गोनायः गोपालकः" भा० ।०

गोनिष्यन्द पु० गोर्निष्यन्दते निस्यन्द—अच् ५त०। गोमूत्रे राजनि०। तस्य गोतोनिष्यन्दमानत्वात्तथात्वम् ।

गोप पु०स्त्री गां भूमिं वा पाति रक्षति पा—क । (गोयाला) १जातिभेदे स्त्रियां ङीष् । "व्याधांच्छाकुनिकान्" गोपान् मनुः । "मणिवन्द्यां तन्तुवायात् गोपजातेश्च सम्भवः" पराशरः "सच्छूद्रौ गोपनापितौ" इत्युक्तेः तस्य सच्छूद्रत्वम् २ग्रामाधिकृते ३भूरक्षके, च पु० । ४गोष्ठाध्यक्षे च मेदि० । गोरक्षकमात्रे च । "गोपः क्षीरभृतोयस्तु स दुह्याद्दशतो वराम् । गोस्वाम्यनुमते भृत्यः सा स्यात्पालेऽभृते भृतिः" मनुः।"नन्दगोपगृहे जाता यशोदा गर्भसम्भवा"देवी भा०। "गोपवधूटी दुकूलचौराय"भाषा० "तद्वनं तापसानित्यं गोपाश्च वनचारिणः" भा० व० १२ अ० ।

गोपयति गुप—अच् । ६रक्षके । "सर्वे देवाभुवनस्यास्य गोपाः" भा०आनु० १० अ० । कस्मिंचित्कर्म्मण्युपपदे गुप—अण् । भूगोपादि तत्तद्वस्तु पालके । "दिव्यास्त्रविन्महातेजाः कर्णो वैकर्तनो वृषः । सेनागोपश्च स कथम्" भा० कर्ण० ८ अ० । "पृष्ठगोपे वृकोदरे" भा० आ० २०।अ० । स्त्रियां अणन्तत्वात् ङीप् । मुग्धबो० गौरा०ङीष् पा० । "शालिगोप्योजगुर्गुणान्" रघुः । ७ उपकारके त्रि० शब्दर० । गां जलं पिबति पा-क । ८ बोले शब्दार्थचि० ।

गोपक त्रि०गोप वा स्वार्थे क गुप—ण्वुल् ।१गोपे २बहुग्रामाध्यक्षे । ३रक्षके टाप् स्त्रियां ङीष् । ततः शिवा० अपत्ये अण् । गौपिक गोपिकापत्ये पु०स्त्री ।

गोपकन्या स्त्री गोपस्य कन्येव प्रियतया । १शारिवौषधौ राजनि० । ६त० । गोपजातिकन्यायां च "वल्लवीर्गोपकन्याश्च रात्रौ संकाल्य कालवित्" नाम दामोदरेत्येवं गोपकन्यास्तुदाऽब्रुवन्" हरिव०७७ अ०

गोपकर्कटिका स्त्री गोपप्रिया कर्कटिका शाक० त० । (राखालशसा) ख्याते वृक्षे राजनि० ।

गोपघोण्टा स्त्री० गोपप्रिया घोण्टा शा ०त० । "बदरीसदृशाकारो वृक्षः सूक्ष्मफलो भवेत् । अटव्यामेव सा घोण्टा गोपघोण्टेति कीर्त्तिता" शब्दर० उक्ते १वृक्षे । २हस्तिकोलौ, रत्नमा०।३विकङ्कतवृक्षे (वैंची) राजनि० ।

गोपति पु० ६त०। गवां पशूनां पत्यौ १शिवे, २वृषे, (षांड) "रक्षसां वधमापन्नं सिंहानामिव गोपतिम्" रामा० । भूमिपतौ ३नृपे ४श्रीकृष्णे, किरणपतौ ५सूर्ये, ६स्वर्गपतौ शक्रे, मेदिनिः । ७ऋषभनामौषधौ राजनि० । "गोपालिर्गोपतिर्ग्रामो गोचर्म्मवसनो हरः" भा०आनु० १७अ०शिवसहस्रनामोक्तौ । "उत्तरो गोपतिर्गोप्ता" विष्णुसं० "गवां पालनात् गोपवेशधारणात् गौर्महीतस्याः पालनाद्वा गोपतिः"भा० "सिंहेन निहतं गोष्ठे गोः सवत्सेव गोपतिम्" कि०४।२२। गोस्वामिनि च हारा०। "ध्रुवा अस्मिन् गोपतौ स्यात् बह्वीः" यजु०६।११ "गोपतौ गवां गवावस्मिन् यजमाने" वेददी०। सूर्यस्य किरणपतित्वात् तथात्वम् "मार्त्तण्डो गोपतिः श्रीमान् कृतज्ञश्च प्रतापवान्"। आदित्यहृदयम् "तपसाराध्य वरदं देवं गोपतिमीश्वरम्" भा० आ० १७२ अ० सूर्यकन्यातपतीविवाहोक्तौ" ८असुरभेदे "गोपतिस्तालकेतुश्च निहतौ शार्ङ्गधन्वना" हरिव० १६१ अ० ।

तस्य भावः त्व—गोपतित्व पत्यन्तत्वात् यत् । गोपत्य गोपतिभावे न० "येनांशेन हृता गावः कश्यपेन महात्मना । स तेनांशेन जगतीं गत्वा गोपत्यमेष्यति" हरिव० ५६ अ० ।

गोपथ पु० अथर्ववेदीयब्राह्मणभेदे ।

गोप(ष्प)पद न० गोः पदं पदस्थानयोग्यस्थानम् । "गोष्पदं सेवितासेवितप्रमाणेषु पा० उक्तार्थे सुट् षत्वं । गवामसेविते वनादौ । १गोसेविते गोर्गतिगोचरे स्थाने २गोपदमात्रप्रमाणे क्षेत्रे न० तद्भिन्नार्थे न सुट् । ४गोश्चरणे ।

गोपदल पु० गोपदं गोचरणन्यासयोग्यं स्थानं तदाकारं वा लाति ला—क । गुवाकवृक्षे तस्य गोचरणन्यासयोग्यस्थानस्थत्वात् तदाकार मूलकाण्डत्वाद्वा तथात्वम् ।

गोपन न० गुप—गोपने रक्षणे भावे ल्युट् । १अपह्नवे कृतस्य कर्म्मणोऽप्रकाशने २रक्षणे च "सैन्येन महता युक्त भरद्वाजस्य गोपने" भा० भी० ५२अ० । "क्षान्त्या महाधारणे गोपने च" भा० आनु० २६ अ० । चु०गुप—दीप्तौ भावे ल्युट् । ३दीप्तौ । गुप्य—ईर्ष्याकुलत्वयोः भावे ल्युट् ।४ईर्ष्यायाम् ६आकुलत्वे च । चु०गुप दीप्तौ भावे युच् गोपना ६दीप्तौ स्त्री ।

गोपनीय त्रि० गुप—गोपने रक्षणे वा कर्म्मणि अनीयर् । १अप्रकाश्ये २रक्षणीये च ।"गोपनीयमिदं दुःखमिति मे निश्चिता मतिः" भा० शान्ति० १४६ अ० । "गोपनीयं प्रयत्नेन न वाच्यं यस्य कस्यचित्" तन्त्रसा०

गोपव(व)धू स्त्री ६त० गोपस्य वधूरिव प्रियत्वात् ।

१शारिवौषधौ भावप्र० २गोपजातिस्त्रियां "गोपवधूटी दुकूलचौराय" भाषा०। "प्रकृतिमगमत् किल यस्य गोपवध्वः" भाग०१।८।२८। अत्र मुकुटः वधूशब्दस्य वर्ग्यवादित्वमाह स्म बध्नात्यविद्ययेति बन्धधातोरूप्रत्ययेन निष्पन्नत्वादिति। वस्तुतः ऊप्रत्ययस्याकित्त्वान्नलोपाभावप्रसङ्गः। किन्तु "वहो धश्च" उणा० ऊप्रत्यये धश्चान्तादेशेन सिद्धत्वेन अन्तस्थवादित्वमेव ज्यायः।

गोपभद्र न० गोपे भद्रमिव। १शालूके शब्दर०। गोपे भद्रा। २काश्मीरीवृक्षे स्त्री राजनि०। संज्ञायां कन्। ३गम्भारीवृक्षे रत्नमाला शालूकादीनां गोपप्रियत्वात् तथात्वम्।

गोपरस पु० गां जलं पिबति पा–क गोपः रसोऽस्य। बोले शब्दरत्ना०।

गोपराष्ट्र पु० ब०व०गोपप्रधानाः राष्ट्राः शा०त०। भारतवर्षस्थे आभीरप्रधाने जनपदभेदे। "अत ऊर्द्धं जनपदान्निबोध गदतो मम"इत्युपक्रमे"अश्मकाः पांशुराष्ट्राश्च गोपराष्ट्राः करीतयः" भा० भी० ९अ०।

गोपरिचर्य्या स्त्री ६त०। गोसेवायां तत्प्रकारो हेमा०दा० उक्तस्तत्रादौ ब्रह्मपुराणे

"वन्दनीयाश्च पूज्याश्च गावः सेव्याश्च नित्यशः। तथा। "गवाङ्गोष्ठे स्थितानान्तु यः करोति प्रदक्षिणम्। प्रदक्षिणीकृतं तेन जगत् सदसदात्मकम्।" विष्णुः "गावः पवित्रा माङ्गल्या गवि लोकाः प्रतिष्ठिताः। गावो वितन्वते यज्ञान् गावः सर्वाघसूदनाः। गोमूत्रं गोमयं सर्पिः क्षीरं दधि च रोचना। षडङ्गमेतत्परमं माङ्गल्यं सर्वदा गवाम्। शृङ्गोदकं गवां पुण्यं सर्वाघविनिसूदनम्। गवां कण्डूयनञ्चैव सर्वकल्मषनाशनम्। गवां ग्रासप्रदानेन स्वर्गलोके महीयते।" पद्मपुराणे "सदा गावः प्रणम्यास्तु मन्त्रेणानेन पार्थिव!। नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च। नमो ब्रह्मसुताभ्यश्च भूयो भूयो नमो नमः। मन्त्रस्य स्मरणादेव गोदानफलमाप्नुयात्"। आदित्यपुराणे "लवणं च यथाशक्त्या गवां ये वै ददयुत। तेषां पुण्यकृतां लोका, गवां लोकं व्रजन्ति ते। योऽग्रं भक्त्या किञ्चिदप्राश्य दद्याद्गोभ्यो नित्यं गोव्रती सत्यवादी। शान्तो बुद्धो गोसहस्रस्य पुण्यं संवत्सरेणाप्नुयाद्धर्मशीलः"। देवीपुराणे "गोपालको गवां गोष्ठे यस्तु धूमं न कारयेत्। मक्षिकालीननरके मक्षिकाभिः स भक्ष्यते। क्षुत्तृषान्तु गां यस्तु दमित्वा पिवते नरः। वाहिताऽस्वाश्चिरं तिष्ठेत् क्षुधार्त्तो वै नराधमः"। महाभारते "गोकुलस्य तृषार्त्तस्य जलार्त्ते वसुधाधिप!। उत्पादयति यो विघ्नं तमाहुर्ब्रह्मघातकम्। कृत्वा गवार्थे शरणं शीत-वात-चमं महत्। आसप्तमन्तारयति कुलं भरतसत्तम!"। ब्रह्मपुराणे "सदोषा गौर्गृहे जाता परिपाल्या सदा स्वयम्। दुःशीलोऽपि द्विजः पूज्यो न तु शूद्रः सुसंयतः। अनाथानां गवां यत्नात्कार्यस्तु शिशिरे मठः। पुण्यार्थं यत्र दीयन्ते तृण-तोये-न्धनानि च"। हारीतः "द्वौ मासौ पाययेद्वत्सं तृतीये द्विस्तनं दुहेत्। चतुर्थे त्रिस्तनञ्चैव यथान्यायं यथा बलम्"। ब्रह्मपुराणे "आषाढ्यामाश्वयुज्याञ्च पौष्यां माघ्यां च सर्वदा। न गृह्णीयाद्गवां क्षीरं सर्वं वत्साय निक्षिपेत्। न षण्डान्वाहयेच्चैव न गां भारेण पीडयेत्। युगादिषु युगान्तेषु षडशीतिमुखेषु च। दक्षिणोत्तरगे सूर्ये तथा विषुवतोर्द्वयोः। संक्रान्तिषु च सर्वासु ग्रहणे चन्द्रसूर्ययोः। पञ्चदश्याञ्चतुर्दश्यां द्वादश्यामष्टमीषु च। उपचारो गवां कार्यो मासि मासि यथाक्रमम्। लवणस्य तु चत्वारि पलान्यष्टौ घृतस्य च। परकीयस्य दुग्धस्य तथा देयानि षोडश। द्वात्रिंशत् शीतलस्यापि जलस्य च पलानि च। आदौ विचार्य पयसः परिमाणं बलं रुचि। आकस्मिकन्तु दातव्यं पुण्यार्थन्तु गवाह्निकम्। प्रभाते लवणं यत्र दीयते च ततो जलम्। ततस्तृणानि भोज्यञ्च पोषणं मांसवर्जितम्। निशि दीपः सतन्त्रीको दिव्या पौराणिकी कथा। एवं कृते महीं पूर्णां रत्नैर्दत्त्वा भवेत् फलम्। गोप्रदानात्तु यत्पुण्यं गवां संरक्षणाद्भवेत्। मनुष्यैस्तृणतोयाद्यैर्गावः पाल्याः प्रयत्नतः। देयाः पूज्याश्च पोष्याश्च प्रतिपाल्याश्च सर्वदा"। तथा "तृणोदकाद्येषु वनेषु मत्ताः क्रीडन्तु गावः सवृषाः सवत्साः। क्षीरं प्रमुञ्चन्तु सुखं स्वपन्तु शीतातपव्याधिभयैर्विमुक्ताः। इमं मन्त्रं स शुद्धात्मा जपेन्नित्यं समाहितः। गच्छन् तिष्ठन् जपन् जिघ्रन् भुञ्जन् क्रीडन् समुत्सृजन्। महाभयेषु सर्वेषु समेषु विषमेषु च। प्रयाणकाले च तथा श्रोतव्यमभयप्रदम्"। तथा "ग्रासपानादिकं देयं निशि दीपः सुभास्वरः। इतिहासपुराणानां व्याख्यानं सोपवीणनम्। अन्तस्तुष्टैर्यथाशक्त्या परिचर्या यथाक्रमम्। ताडनाक्रोशखेदाश्च स्वप्नेऽपि न कदाचन। तासां मूत्रपुरीषे तु नोद्वेगः

क्रियते क्वचित् । शोधनीयश्च गोवाटः शुष्कचारादिकैः सदा। ग्रीष्मे छायाकुलं वेश्म शीते तप्तं विकर्दमम्। वर्षासु चाथ शिशिरे सुखोष्णं वातवर्जितम्। उच्छिष्टं मूत्रविट् श्लेष्ममलं जह्याच्च तत्र च। रजस्वला न प्रवेश्या नान्त्यजातिर्न पुंश्चली। न लङ्घयेद्वत्सतरीं न क्रीडेद्गोष्ठसन्निधौ। न गन्तव्यं गवां मध्ये सोपानत्कैः सपादुकैः। हस्त्यश्वरथयानैश्च सवितानैः कदाचन। दक्षिणोत्तरगैः प्रह्वैर्गन्तव्यञ्च पदातिभिः। गावः क्षुधातुराः पाल्याः श्रद्धया पितृमातृवत्। गिरिप्रपातसिंहर्क्षशीतातपभयातुराः। महाकोलाहले घोरे दुर्दिने देशविप्लवे। गवां तृणानि देयानि शीतलञ्च तथा जलम्”। विष्णुधर्म्मोत्तरे “पुष्कर उवाच गवां हि पालनं राज्ञा कर्त्तव्यं भृगुनन्दन!। गावः पवित्रा माङ्गल्या गोषु लोकाः प्रतिष्ठिताः। गावो वितन्वते यज्ञं गावो विश्वस्य मातरः। शकृन्मूत्रं परं तासामलक्ष्मीनाशनं परम्। तद्धि मेध्यं प्रयत्नेन तत्र लक्ष्मीः प्रतिष्ठिता। उद्वेगश्च न गन्तव्यः शकृन्मूत्रे विजानता। गवां मूत्रपुरीषे तु ष्ठीवनाद्यं न संत्यजेत्। गोरजः परमं पुण्यमलक्ष्मीविघ्ननाशनम्। गवां कण्डूयनञ्चैव सर्वकल्मषनाशनम्। गवां शृङ्गोदकं राम! जाह्नवीजलसन्निभम्। गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। पवित्रं परमं ज्ञेयं स्नाने पाने च भार्गव!। रक्षोघ्नमेतन्माङ्गल्यं कलिदुःस्वप्ननाशनम्। रोचना च तथा धन्या रक्षोगदगरापहा। यस्तु कल्यं समुत्थाय मुखमाज्ये निरीक्षते। तस्याऽलक्ष्मीः क्षयं याति वर्द्धते न च किल्बिषम्। गवां ग्रासप्रदानेन पुण्यं सुमहदश्नुते। यावतीः शक्नुयाद्गास्तु सुखं धारयितुं गृहे। धारयेत्तावतीर्नित्यं क्षुधार्त्तास्ता न धारयेत्। दुःखिता धेनवो यत्र वसन्ति द्विजमन्दिरे। नरकं समवाप्नोति नात्र कार्या विचारणा। दत्त्वा परगवे ग्रासं पुण्यं सुमहदश्नुते। शिशिरं सकलं कालं ग्रासं परगवे तथा। दत्त्वा स्वर्गमवाप्नोति संवत्सरशतानि षट्। अग्रभक्तं नरो दत्त्वा नित्यमेव तथा गवाम्। समाष्टकेन लभते नाकलोकं समायुतम्। सायं प्रातर्मनुष्याणामशनं वेदनिर्मितम्। तथैकमशनं दत्त्वा गवां नित्यमतन्द्रितः। द्वितीयं यः समश्नाति तेन संवत्सरान्नरः। गवां लोकमवाप्नोति यावन्मन्वन्तरं द्विज!। शीतत्राणं गवां कृत्वा गृहे पुरुषसत्तम!। गवां प्रपाणे पानीयं कृत्वा पुरुषसत्तम!। वारुणं लोकमाप्नोति क्रीडत्यप्सरसां गणैः। गवां पानप्रवृत्तानां यस्तु विघ्नं समाचरेत्। ब्रह्महत्या कृता तेन घोरा भवति भार्गव!। परां तृप्तिं नचाप्नोति यत्र तत्राभिजायते। गवां प्रचारभूमिन्तु वाहयित्वा हलादिना। नरक महदाप्नोति यावदिन्द्राश्चतुर्दश। सिंहव्याघ्रभयत्रस्तां पङ्कलग्नां जले गताम्। गामुद्धृत्य नरः स्वर्गे कल्पभोगानुपाश्नुते। गवां लवणदानेन रूपवानभिजायते। सौभाग्यं महदाप्नोति लावण्यञ्च द्विजोत्तम!। औषधञ्च तथा दत्त्वा विरोगस्त्वभिजायते। औषधं लवणं तोयमाहारञ्च प्रयच्छति। तासाञ्चेदवरुद्धानाञ्चरन्तीनां मिथो वने। यासत्सृत्य वृको हन्यात्पालस्तत्र किल्बिषी। गोवधेन नरो याति नरकानेकविंशतिम्। तस्मात्सर्वप्रयत्नेन कार्यं तासान्तु पालनम्। विक्रयाच्च गवां राम! नरकं प्रतिपद्यते। तासान्तु कीर्त्तनादेव नरः पापात् प्रमुच्यते। तासां संस्पर्शनं धन्यं सर्वकल्मषनाशनम्। दानेन च तथा तासां कुलान्यपि समुद्धरेत्। उदक्याशूतिकादोषो नैव तत्र गृहे भवेत्। भूमिदोषस्तथान्योऽपि यत्रैका वसते च गौः। गवां निःश्वासवातेन परा शान्तिर्गृहे भवेत्। नीराजनं तत्परमं सर्वस्थानेषु कीर्त्त्यते। गवां संस्पर्शनाद्राम! कल्मषं क्षीयते नृणाम्। गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासश्च श्वपाकमपि शोधयेत्। पृथक् च प्रत्ययाभ्यस्तमिति सान्तपनं स्मृतम्। सर्वकामप्रदं राम! सर्वाशुभविनाशनम्। कृत्वातिकृच्छ्रं पयसा दिवसानेकविंशतिम्। निर्मलास्तेन चीर्णेन भवन्ति पुरुषोत्तमाः। त्र्यहमुष्णं पिबेन्मूत्रं त्र्यहमुष्णं घृतं पिबेत्। त्र्यहमुष्णं पयः पीत्वा वायुभक्षः परं त्र्यहम्। तप्तकृच्छ्रमिदं प्रोक्तं सर्वाशुभविनाशनम्। शीतकृच्छ्रस्तथैवैष क्रमाच्छीतैः प्रकीर्त्तितः। सर्वाशुभविनाशाय निर्मितो ब्रह्मणा स्वयम्। गोमूत्रेणाचरेत् स्नानं वृत्तिं कुर्याच्च गोरसैः। उत्थितासूत्थितस्तिष्ठेदुपविष्टासु च स्थितः। अभुक्तवत्यां नाश्नीयादपीतासु च नो पिबेत्। ताश्च चैवात्मना कार्यं भयार्त्तांश्च समुद्धरेत्। आत्मानमपि सन्त्यज्य गोव्रतं तत् प्रकीर्त्तितम्। सर्वपापप्रशमनं मासेनैकेन भार्गव!। व्रतेनानेन पूर्णेन गोलोकं पुरुषो व्रजेत्। अभीष्टमथवा राम! यावदिन्द्राश्चतुर्दश। गवा-

माहारनिर्मुक्तानश्नन् प्रतिदिनं यवान्। मासेन तदवाप्नोति यत्किञ्चिन्मनसेच्छति। गोमतीञ्च तथा विद्वान् सायं प्रातस्तथा जपेत्। गोलोकमाप्नोति नरो नात्र कार्या विचारणा। उपर्युपरि सर्वेषां गवां लोकः प्रकीर्त्तितः। निवसन्ति सदा यत्र गावस्ताकाशगा दिवि। विमानेषु विचित्रेषु हृतेष्वप्सरसाङ्गणैः। किङ्किणीजालचित्रेषु वीणासु रचनादिषु। सदा कामफला नद्यः क्षीरपायसकर्दमाः। शीतलामलपानीयाः सुवर्णसिकतास्तथा। पुष्करिण्यः शुभास्तत्र वैदूर्यकमलोत्पलाः। मानसी च तथा सिद्धिस्तत्र लोके भृगूत्तम!। तन्तु लोकं नरा यान्ति गवां भक्त्या न संशयः। गोमतीं कीर्त्तयिष्यामि सर्वपापप्रणाशिनीम्। तान्तु मे गदतो विप्र! शृणुष्व सुसमाहितः। गावः सुरभयो नित्यं गावो गुग्गुलुगन्धिकाः। गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं परम्। अन्नमेव परं गावो देवानां हविरुत्तमम्। पावनं सर्वदेवानां रक्षन्ति च वहन्ति च। हविषा मन्त्रपूतेन तर्पयन्त्यमरान् दिवि। ऋषीणामग्निहोत्रेषु गावो होमनियोजिताः। सर्वेषामेव भूतानां गावः शरणमुत्तमम्। गावः पवित्रं परमं गावो मङ्गलमुत्तमम्। गावः स्वर्गस्य सोपानं गावो धन्याः सनातनाः। नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च। नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः। ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम्। एकत्र मन्त्रास्तिष्ठन्ति हविरेकत्र तिष्ठति। देवब्राह्मणगोसाधुसाध्वीभिः सकलं जगत्। धार्यते वै सदा तस्मात् सर्वे पूज्यतमा मताः। यत्र तीर्थे सदा गावः पिबन्ति तृषिता जलम्। उत्तरन्त्यथ वा येन, स्थिता तत्र सरस्वती। गवां हि तीर्थे वसतीह गङ्गा पुष्टिस्तथासां रजसि प्रवृद्धा। लक्ष्मीः करीषे प्रणतौ च धर्मस्तासां प्रणामं सततञ्च कुर्यात्"। भविष्यत्पुराणे "ब्रह्मोवाच गामालभ्य नमस्कृत्य कुर्याद्यस्तु प्रदक्षिणम्। प्रदक्षिणी कृता तेन सप्तद्वीपा वसुन्धरा। गवां हुङ्कारशब्देन दृष्टिपातेन सत्तम!। पापं प्रणश्यते यस्मात्तस्मात्मयेत्रव स्पृशेच्च ताः। कुतस्तस्य भवेत्पापं गृहं यस्य विभूषितम्। सततं बालवत्साभिरर्जुनीभिरलङ्कृतम्। यावत्तीर्थानि मेदिन्यामासमुद्रं सरांसि च। गवां शृङ्गोदकस्नानकला नार्हन्ति षोडशीम्। गवामस्थि न लङ्घेत मृते गन्धं न वर्जयेत्। यावदाघ्राति तद्गन्धं तावत् पुण्येन युज्यते। गवां कण्डूयनं धन्यं गोप्रदानफलप्रदम्। तुल्यं गोशतदानस्य भयरोगादिपालनम्। तृणोदकादिसंयुक्तं यः प्रदद्याद्गवाह्निकम्। कपिलाशतदानस्य फलं विद्यान्न संशयः। पञ्चभूते! शिवे! पुण्ये! पवित्रे! सूर्यसम्भवे!। प्रतीच्छेदं मया दत्तं सौरभेयि! नमोऽस्तु ते। बहुना च किमुक्तेन गावः पाल्याः प्रयत्नतः। गावो देयास्तथा रक्ष्याः पूज्याः पाल्याश्च सर्वशः। गां वै ये ताडयन्तीह सर्वलोकस्य मातरम्। ते यान्ति रौरवं नाम नरकं नात्र संशयः। ताडयेद्यस्तु वै मोहात् यो वा कश्चिन्नराधमः। स गच्छेन्नरकं घोरं सम्मोडकमिति श्रुतिः। आयान्तीं हन्तुकामां यः सौरभेयीं विभावरीम्। क्षम मातरिति ब्रूयात् स याति परमं पदम्"। वराहपुराणे 'यम उवाच गावः पवित्रं मङ्गल्या देवानामपि देवता। यस्ताः शुश्रूषते भक्त्या स पापेभ्यः प्रमुच्यते। यावज्जीवं कृतं पापं तत्क्षणादेव नश्यति। लाङ्गूलेनोद्धृतं तोयं मूर्ध्ना गृह्णाति यो नरः। शरत्सु ह्युपजातेभ्यः स पापेभ्यः प्रमुच्यते। प्रसवे यो गवां स्नायात् रोहिण्यां मानवो भुवि। सर्वपापकृतान् दोषान् दहत्याशु न संशयः। धेनोस्तनाद्विनिष्क्रान्तां धारां क्षीरस्य यो नरः। शिरसा प्रतिगृह्णीयात्स पापेभ्यः प्रमुच्यते"। अधिकं कपिशब्दे २२०१।२ पृ० दर्शिते वृहत्पराशरवाक्ये दृश्यम्।

गोपवन न० गोपप्रधानं वनं शाक०त०। गोपभूयिष्ठे वने तत्र भवः विदा० अञ्। गौपवन तत्र भवे त्रि० "शकन्धेषमहालेयमबालेयमकाद्रवेयमशौभ्रेयमवामरथ्यमगौपवनम्" कात्या० १०।२।२१ सोऽभिजनोऽस्य विदा० अञ्। गौपवन पित्रादिक्रमेण तत्र वासिजने तस्य गोत्रापत्यम् अन्ध्यानन्तर्य्ये विदा० अञ्। तद्गोत्रापत्ये बहुषु तस्य लुक्। गोपवना गोपवनस्यपुरुषापत्येषु।

गोपवनादि बहुत्वे गोत्रप्रत्ययस्य लुगनिमित्ते शब्दगणे स च गणः पा० ग० उक्तो यथा।

गोपवन शिग्रु बिन्दु भाजन अश्वावतान श्यामाक श्यामक श्यापर्ण विदाद्यन्तर्गणोऽयम्। गोपवन शिग्रु बिन्दु भोगक भाजन शमिक अश्वावतान श्यामाक श्यामक श्यावलि श्यापर्ण हरितादिश्च।

हरित किन्दास वह्यस्क अर्कलूष वध्योग विष्णु वृद्ध प्रतिबोध रथीतर रथन्तर। गविष्ठिर निषाद शबर

अलस मठर सृडाकु सृपाकु सृदु पुनर्भू पुत्र दुहितृ ननान्दृ परस्त्री परशु च”।

गोपवल्ली स्त्री गां पाति पा—क कर्म०। १मूर्वालतायां राजनि०। २श्यामालतायां (श्यामाघास)। शब्दर०।

गोपस् त्रि०गुप—असुन् आर्द्धधातुकत्वाद्वाऽऽयाभावः। १गोप्तरि २रक्षितरि। “स जगार भुवनस्य गोपास्तं कापेयं नाभिपश्यन्ति” छा०उ० ‘गोपाः रक्षिता’ भाष्यम्। अस्य गोपाशब्दोदाहरणतया कस्यचिदुक्तिः प्रामादिकी। गोपूर्व्वकक्विबन्तपाधातुसिद्धगोपाशब्दस्य गोपालनकर्त्तृकत्वेन तत्र भुवनस्येतिकर्म्मणोऽनन्वयापत्तेः आयपक्षे गोपायस् गोप्तरि त्रि०।

गोपा स्त्री गां पाति पा—क टाप्। १श्यामालतायाम् शब्दरत्ना०। गां पाति पा—क्विप्। २गोरक्षके च। “गोपा विश्वपावत्” मुग्ध०

गोपाध्यक्ष पु० ६त०। गोरक्षकपतौ “गोपाध्यक्षो भयत्रस्तो रथमास्थाय सत्वरः” भा० वि० ३५ अ०।

गोपानसी स्त्री० गवां किरणानां पानं शोषणं गोपानं तत् स्यति सो—क गौरा० ङीष्। कुड्येषु छादनार्थं बद्धे १वक्रकाष्ठे (जुदनी) २वन्धनाधारे पटलाधारे वंशपञ्जरे च अमरः। “गोपानसीषु क्षणमास्थितानाम्” माघः। [“गोपायकानां भुवनत्रयस्य” किरा०।

गोपायक त्रि० गोपयति गुप—आय+ण्वुल्। रक्षके

गोपायन न० गुप—आय—भावे ल्युट्। १गोपने “गोपायनं प्रकुरुते जगतः सार्वलौकिकम्” हरिवं० ४ अ०। कर्त्तरि ल्यु। २रक्षके। “गोपानां बहुसाहस्रैर्बलैर्गोपायनैर्वृतः” भा० भी० ७अ०।

गोपायित त्रि० गुप—आय—कर्म्मणि क्त। १रक्षिते अमरः। भावे क्त। २अतीतगोपने न०।

गोपाल पु० गां भूमिं पशुभेदं वा पालयति पालि—अण् उप०स०। १नृपे २गोरक्षके च। “क्षत्रियात् शूद्रकन्यायां समुत्पन्नस्तु यः सुतः। स गोपाल इति ज्ञेयो भोज्योविप्रैर्न संशयः” पराशरोक्ते ३सङ्कीर्णजातिभेदे। “आर्द्धिकः कुलमित्रञ्च गोपालोदासनापितौ। एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्” मनुना तस्य भोज्यान्नतोक्ता। नन्दनन्दने ४विष्णोरवतारभेदे तद्रूपञ्च पद्मपु०पाताल-ख० “त्वामहं द्रष्टुमिच्छामि चक्षुर्भ्यां मधुसूदन!”। श्रीकृष्णं प्रति व्यासप्रार्थने भगवदुक्तिः व्यासवाक्ये यथा “पश्याद्य दर्शयिष्यामि स्वरूपं” वेदगोपितम्। ततोऽपश्यमहं भूप! बालं बालाम्बुदप्रभम्। गोपकन्यावृतं गोपं हसन्तं गोपबालकैः। कदम्बमूलमासीनं पीतवाससमुज्ज्वलम्। वनं वृन्दावनं नाम नवपल्लवमण्डितम्। कोकिलभ्रमरारावमनोभवमनोहरम्। नदीमपश्यं कालिन्दीमिन्दीवरदलप्रभाम्। गोवर्द्धनं तथाऽपश्यं कृष्णरामकरोद्धृतम्। महेन्द्रदर्पनाशाय गोगोपालसुखावहम्। दृष्ट्वा विहृष्टो ह्यभवं सर्व्वभूषणभूषणम्। गोपालमबलासङ्गमुदितं वेणुनादिनम्,।

तस्य ध्यानमन्त्रयन्त्रादिकं तन्त्रसारे दृश्यम्।

गोपालक पु० गां पालयति पालि—ण्वुल् ६त०। १गोरक्षके २भूमिरक्षके च ३शिवे त्रिका०गोपाल+स्वार्थे क। उक्तार्थे ४नन्दनन्दने।

गोपालकक्षा स्त्री गोपालप्रधाना कक्षा। भारतवर्षस्थे प्राच्ये देशभेदे “अत ऊर्द्ध्वं जनपदान्निबोध गदतो मम” इत्युपक्रमे “कक्षा गोपालकक्षाश्च जाङ्गलाः कुरुवर्णकाः”। भा० भी०९अ०। तस्य राजनि अण्। गौपालकक्षः तन्नृपे बहुत्वे तस्य लुक्। गोपालकक्षास्तन्नृपेषु “ततो गोपालकक्षांश्च सोत्तरानपि कोसलान्। मल्लानामधिपञ्चैव पार्थिवांश्चाजयत् प्रभुः” (भीमः) भा० स०२९अ०। भीमप्राचीविजयोक्तौ।

गोपालकर्कटी स्त्री। गोपालस्य गोरक्षकस्य प्रिया कर्कटी। राजनि०। क्षुद्रकर्कट्याम् (राखालशसा)।

गोपालतापनीय न० गोपालस्तापनीय सेव्यो यत्र। उपनिषद्भेदे उपनिषच्छब्दे १२२२ पृ० दृश्यम्। गोपालतापनमप्यत्र न०।

गोपालधानी त्रि० गोपालोधीयतेऽत्र धा—आधारे ल्युट् ङीप् ६त०। गोष्ठे। तस्य पूलासेन समासे राजद० पूर्व नि० समाहारैकत्वं च गोपालधानीपूलासम्।

गोपालव पु० गोपालं तद्धर्मं वाति वा—क उप० स०। गोपतिधर्मयुक्ते आयुधजीविनि राजन्यभेदे। तस्य बाह्वायुधजीवित्वेऽपि स्वार्थे न ञ्यट्। “अस्माद्धयोति किं गोपालवाः” सि० कौ०।

गोपालि पु० गां वृषभं पालयति पालि—इन्। १शिवे “गोपालिर्गोपतिर्ग्रामः” भा० आनु० १७ अ० शिवसहस्रनामोक्तौ २प्रवरभेदे प्रवराध्यायः।

गोपालिका स्त्री गोपालकस्य पत्नी पालकान्तत्वात् न ङीष् टापि अत इत्त्वम्। १आभीरपत्न्याम् २शारिवोषधौ च शब्दार्थचि०। गवां रक्षणात्तथात्वम ३कीटभेदे हेमच०।

गोपाली स्त्री गोपालस्तदादरोऽस्त्यत्र अच् गौरा० ङीष्। १गोपालकर्कट्याम् राजनि०। गोपालस्य पत्नी ङीष्। २गोपपत्न्याम्। गां पालयति पालि–अण् ईप् मुग्ध०। ३गोपालयित्र्यां ४कुमारानुचरे मातृभेदे च "अभ्रजाता च गोपाली बृहदम्बालिका तथा" भा० श० ४७ अ०।

गोपाष्टमी स्त्री गोपप्रियाष्टमी। कार्त्तिकस्य शुक्लाष्टम्याम्। "शुक्लाष्टमी कार्त्तिके तु स्मृता गोपाष्टमी बुधैः। तद्दिने वासुदेवोऽभूत् गोपः पूर्वं स वत्सपः। तत्र कुर्य्यात् गवां पूजां गोग्रासं गोप्रदक्षिणम्। गवानुगमनं कार्य्यं सर्वान् कामानभीप्सता" कूर्म्मपु०।

गोपिका स्त्री गोपायति गुप–ण्वुल्। १गोपालयित्र्याम् गोप्येव स्वार्थे क ह्रस्वः। २गोपपत्न्याम्। [त्रिका०।

गोपित्त न० गोः पित्तमिव। गोरोचनाख्ये गन्धद्रव्यभेदे

गोपिन् स्त्री गोपायति गुप–णिनि। १रक्षितरि स्त्रियां ङीप् सा च २श्यामालतायाम् शब्दच०। अतिशयेन गोपी इष्ठन् टिलोपः। गोपिष्ठ गोप्तृतमे त्रि०। "कामचारस्य वा कामाय्याय गोपिष्ठो गोपायादिति वा" शत० ब्रा० २।२।३।२ "गोपिष्ठः गोपायितृतमः" भाष्यम्।

गोपिल त्रि० गुप–इलच्। गोप्तरि ततश्चतुरर्थ्यां घञ्। गौपलेय गुपिलनिर्वृत्तादौ त्रि०।

गोपी स्त्री गोपजातिः स्त्री जातौ ङीष्। १गोपजातिस्त्रियाम्। वृन्दावनस्थगोप्यश्च श्रुतिदेवमुनिकन्यारूपा यथा पद्मपु० पाता० "गोप्यस्तु श्रुतयो ज्ञेयाः स्वधिका गोपकन्यकाः। देवकन्याश्च राजेन्द्र! न मानुष्यः कथञ्चन"। तत्र श्रेष्ठा राधाचन्द्रावलीविशाखाललितादयः। मूलम् उज्ज्वलमणौ दृश्यम्। "इत्येवं दर्शयन्त्यस्तास्चैवं गोप्योविचेतसः" भाग० १०।३।१२। स्क० प्रभा० ख० तु चन्द्ररूपकृष्णस्य कलारूपता तासामुक्ता यथा। "ततो गोप्यो महादेवि! आद्यायाः षोडश स्मृताः। तासां नामानि ते वक्ष्ये तानि ह्येकमनाः शृणु। लम्बिनी चन्द्रिका कान्ता कूठा शान्ता महोदया। भीषणी नन्दनी शोका सुपूर्णा विमलाऽक्षया। शुभदा शोभना पुण्या हंससुताः कलाः क्रमात्। हंसएव मनः कृष्णः परमात्माजनार्दनः। तस्यैताः शक्तयो देवि! षोडशैव प्रकीर्त्तिताः चन्द्ररूपी ततः कृष्णः कलारूपास्तु ताः स्मृताः संपूर्णमण्डला तासां मालिनी षोडशी कला। प्रतिपत्तिथिमारभ्य विहरत्याशु चन्द्रमाः। षोडशैव कला यास्तु गोपीरूपा वरानने! एकैकशस्ताः संभिन्नाः सहस्रेण पृथक् पृथक्"। गोपायति गुप–अच् गौरा० ङीष्। २रक्षिकायां स्त्रियाम् "गीतानि गोप्याः कलमं मृगव्रजः" माघः। स्वार्थे क। गोपिका तत्रार्थे "सहासमालोकयति स्म गोपिका" माघः।

गोपीगीता स्त्री भाग० १०स्क० उक्तायां गोपीभिः कृतकृष्णस्तुतौ सा च "जयति तेऽधिकं जन्मना व्रजेत्याद्येकत्रिंशत्तमाध्यायस्था।

गोपीजनवल्लभ पु० गोप्येव जनस्तस्य वल्लभः। श्रीकृष्णे "गोपीजनवल्लभाय स्वाहा" तन्त्रसारे तन्मन्त्रः। गोपीभर्त्तादयोऽप्यत्र "गोपीभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी" पदाङ्कदूतम्।

गोपीत पु० स्त्री गौर्गोरोचनेव पीतः। खञ्जनभेदे। वृ० स० ४५ अ० "पीतो गोपीत इति क्लेशकरः खञ्जनोद्दिष्टः" तस्य दर्शने क्लेशकारितोक्ता।

गोपीथ न० पा–भावे थक्–"गोपीथेत्यादि" पा० नि० गोः सोमस्य पीथः। सोमपाने। "प्रति त्वं चारुमध्वरं गोपीथाय प्रहूयसे" ऋ० १।१९।१। "गोपीथाय सोमपानाय" भा०। गावः पिबन्त्यस्मिन् आधारे थक्। २तीर्थे गोर्जलावतरणे सोपाने तीर्थस्य जलावतरणसोपानत्वात्तथात्वम्। "गोपीथं तीर्थमाख्यातम्" उणादि वृ०। गुप–भावे थक् नि०। ३रक्षणे पु० "गोपीथाय जगत्सृष्टेः काले स्वस्थाच्युतात्मकः" भाग० ४।२२।५०। "जगत्सृष्टेर्गोपीथाय रक्षणाय" श्रीधरः। "अजातशत्रुः पृतनां गोपीथाय मधुद्विषः" भाग० १।१०।२६। "गोपीथाय रक्षणाय" श्रीधरः। गोपीथाय हितं यत्। गोपीथ्य तत्र हिते त्रि० "जक्षिष इत्या गोपीथ्याय हि दधाथ तत् पुरूरवो य ओजः" ऋ० १०।९५।११।

गोपुच्छ पु० गोः पुच्छ इव पुच्छो यस्य। १गोलाङ्गूलाख्ये वानरे हेमच० "सर्ववानरगोपुच्छा यसृक्षाद्या भजन्ति वै" (यं सुग्रीवम्) भा० व० २८१ अ०। "गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्हतम्" (आश्रमम्) भाग० ३।२१।४२। "गोपुच्छशालावृकमर्कटाश्च" भाग० ८।२।१७। गोपुच्छाकारत्वात् २हारभेदे अमरः। ६त०। ३गोलाङ्गूले न०। "गोपुच्छस्थे वल्मीकगेऽथ वा दर्शनं भुजङ्गस्य" वृ० स० ९५ अ०। ततः शर्करा० स्वार्थे अण्। गोपुच्छ तत्रार्थे त्रि०।

गोपुटा स्त्री गोरिव पुटमस्याः। स्थूलैलायाम् राजनि०।

गोपुटिक न० गोः शिववृषस्य पुटिकं पुटयुक्तं मस्तकम्। शिववृषस्य मस्तके त्रिका०।

गोपुर न० पुर—अग्रगमने क गवां पुरम्, गवा जलेन पूर्य्यते पृ—घञर्थे क वा। १पुरद्वारे २मुख्यद्वारे अमरः। तत्र गवामग्रगमनात्तथात्वम्। ३कैवर्त्तीमुस्तके मेदि० तस्य जलेन पूरणात्तथात्वम् "गुप्तवप्रचयप्रख्यैर्गोपुरैर्नन्दनोपमैः" भा०आ०२०६०श्लो०। "गोपुराट्टालकोपेतं चतुर्द्वारं दुरासदम्" भा०व० १७३अ०। "पुरगोपुरं प्रति ससैन्यसागरम्" माघः। "पीडा पुरस्यैव च गोपुरस्य" (शनि) वृ० स० ८६ अ०।

गोपुरक पु० पुर—क ६त० गोपुर+स्वार्थे क। १गवां पूरके त्रिका० २गोपुरशब्दार्थे च गां भूमिं पिपर्त्ति पृ—क संज्ञायां कन्। ३कुन्दूरकवृक्षे राजनि०।

गोपुरीष न० ६त०। गोमये राजनि०।

गोपेन्द्र पु० गोप इन्द्र इव। १श्रीकृष्णे हेमच०। "गोपेन्द्रस्यानुजे ज्येष्ठे नन्दगोपकुलोद्भवे" भा० भी० २३अ०। ६त०। २गोपेश्वरे नन्दे च गोपेश्वरादयोऽप्यत्र।

गोपेश पु० ६त०। १नन्दघोषे "गोपेशं परितः परे" मुग्ध० २शाक्यमुनौ त्रिका०।

गोप्तव्य त्रि० गुप—कर्म्मणि तव्य वा आयाभावः। १अप्रकाश्ये २रक्षणीये च "पौरजानपदाश्चैव गोप्तव्यास्ते यथा सुखम्" भा० क० ६५ अ०। इट्पक्षे गोपितव्य आयपक्षे गोपायितव्य तत्रार्थे त्रि०।

गोप्तृ पु०गुप—तृच्। रक्षके। "तस्मै सभ्याःसभार्य्याय गोप्त्रे गुप्ततमेन्द्रियाः" रघुः। "तस्यार्थे सर्वभूतानां गोप्तारं धर्म्ममात्मजम्"। "मुच्यते ब्रह्महत्यायाः गोप्ता गोब्राह्मणस्य च" मनुः २संवरके च। ३विष्णौ पु० "उत्तरो गोपतिर्गोप्ता" विष्णुस० "सकलभूतपालनात् गोप्ता" भा०। "गोहितो गोपतिर्गोप्ता" विष्णुस०। "स्वात्मानं स्वमायया गोपायति संवृणोति गोप्ता" भा०। स्त्रियां ङीप्। "गुह्यातिगुह्यगोप्त्री त्वम्" देवीजपसमापनमन्त्रः। इट्पक्षे गोपितृ आयपक्षे गोपायितृ तत्रार्थे त्रि० स्त्रियां ङीप्।

गोप्य त्रि० गुप—कर्म्मणि यत्। १रक्षणीये २गोपनीये अप्रकाशनीये च। "आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम्। तपोदानापमानं च नव गोप्यानि यत्नतः" काशीख०। ३दासीपुत्रे पु० मेदि०।

गोप्यादित्य पु० प्रभासतीर्थस्थे गोपीस्थापितरविमूर्त्तिभेदे तत्कथा स्क० प्रभा० ख० यथा "ततो गच्छेन्महादेवि! गोप्यादित्यमनुत्तमम्। भूतेशाद्वायवे भागे धनुर्भिस्त्रिशतान्तरे। बलातिबलदैत्यघ्नी दक्षिणाग्नेयसंस्थितम्। धनुषां दशके देवि! संस्थितं पापनाशनम्। तस्योत्पत्तिं प्रवक्ष्यामि महापापहरां शुभाम्" इत्युपक्रमे "अथ तत्र कृतान् स्नात्वा प्रासादान् यादवैः पृथक्। ततो गोप्योऽपि ताः सर्वाः सहस्राणि च षोडश। कृष्णमाराध्य भावेन स्थापयाञ्चक्रिरे रविम् ऋषिभिर्नारदाद्यैस्तु तथा क्षेत्रनिवासिभिः तत् प्रतिष्ठापयामासुः प्रतिष्ठाविधिना रविम्। प्रतिष्ठिते ततः सूर्य्ये ददुर्दानानि भूरिशः। ततः क्षेत्र निवासिभ्यस्तीर्थे देवरतेषु वै! ततस्ते ऋषयः सर्वे सन्तुष्टा हृष्टमानसाः। चक्रुर्नाम रवेस्तत्र गोप्यादित्येति विश्रुतम्"।

गोप्याधि पु० कर्म्म०। आधिभेदे आधिशब्दे ७११ पृ० दृश्यम्। "गोप्याधिभोगे नो वृद्धिः" याज्ञ०।

गोप्रकाण्ड न० प्रशस्तो गौः (जातिः) "प्रशंसावचनैश्च" पा० नित्यस० परनि०। श्रेष्ठे गवि अमरः। नियतलिङ्गत्वात् क्लीवत्वमेव "प्रकाण्डमुद्घतल्लजौ" अमरोक्तेः। शब्दक० पुंस्त्वोक्तिश्चिन्त्या। यदपि तत्र गोषु मध्ये प्रकाण्ड इत्युक्तं तदपि प्रामादिकं "प्रशंसावचनैश्चेति सूत्रस्य कर्म्मधारयसमासमात्रविषयत्वात्।

गोप्रचार पु० प्रचरत्यस्मिन् प्र+चर—आधारे घञ् ६त०। १गोचारणस्थाने। "ग्रामेच्छया गोचारो भूमिराजवशेन वा" याज्ञ० "गवादीनां चारणाय कियानपि भूभागोऽकृष्टः कल्पनीयः" मिता०। स्कन्दपु० प्रभा० खण्डोक्ते २तीर्थभेदे। "गोप्रचारकथा पुण्या गोपीनां द्वारकागमः" वृहन्ना० तत्प्रतिपाद्योक्तौ।

गोप्रतार पु० गवां प्रतारः प्रतरणतुल्यः संमर्द्दोऽत्र। रामस्य वैकुण्ठगमनकाले तदनुगामिनां पुरवासिनां गोप्रतरणतुल्यसम्मर्दयुते सरयूस्थे १तीर्थभेदे। "गोप्रतारं ततो गच्छेत् सरय्वास्तीर्थमुत्तमम्। यत्र रामो गतः स्वर्गं सभृत्यबलवाहनः। देहं त्यक्त्वा महाराज! तस्य तीर्थस्य तेजसा। रामस्य च प्रसादेन व्यवसायाच्च भारत!। तस्मिंस्तीर्थे नरः स्नात्वा गोप्रतारे नराधिप!। सर्वपापविशुद्धात्मा स्वर्गलोके महीयते" भा०व०८४अ०। "ऋदोरप्" पा०अप्। गोप्रतरोऽप्यत्र "यद्गोप्रतरकल्पोऽभूत् संमर्दस्तत्र मज्जताम्। अतस्तदाख्यया तीर्थं पावनं भुवि पप्रथे" रघुः। अत्रापि दीर्घमध्यता इत्यन्ये।

गवा वृषभेन प्रतारो गमनमस्य। २शिवे पु०। "गोनर्दो गोप्रतारश्च गोवृषेश्वरवाहनः" भा० आनु० २८६ अ०। शिवसहस्रनामोक्तौ। अप् ६त०। ३गोःप्रतारे पु० अनुपदम् उक्तं रघुवाक्यम् उदा०।

गोप्रवेश पु०६त०। १गोवनादितो गृहप्रवेशे "गोप्रवेशसमयेऽग्रतोवृषोयाति कृष्णपशुरेव वा पुरः" वृ०सं० २५अ०। आधारे ल्युट्। २तत्काले। स च कालः सूर्य्यास्तमयात् प्राक्कालः तथा च वर्णितम् रघौ "सञ्चारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयाय गन्तुम्। प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः"।

गोफणा स्त्री सुश्रुतोक्ते व्रणबन्धनभेदे तत्र कोषदामेत्याद्युपक्रमे "वितानगोफणा पञ्चाङ्गी चेति चतुर्दश बन्धविशेषास्तेषां नामभिराकृतयः प्रायेण व्याख्याताः" सुश्रुतः "चिवुकनासौष्ठांसवस्तिषु गोफणाम्" (निदध्यात्) सुश्रुत०।

गोबाल पु० ६त०। १गोकेशे २तल्लोमनि च स च सीमाज्ञानाय भूमौ निधेयः यथाह मनुः "अश्मनोऽस्थीनि गोबालांस्तुषान् भस्म कपालिकाः। करीषमिष्टकाङ्गार शर्कराः बालुकास्तथा। यानि चैवं प्रकाराणि कालाद्भूमिर्न भक्षयेत्। तानि सर्वाणि सीमायामप्रकाशानि कारयेत्"। गोबाल इव बालोऽस्याः "पाककर्णेत्यादि" पा० ङीप्। ओषधिभेदे स्त्री सि० कौ०।

गोभण्डीर पु०स्त्री भट—भाषणे बा० ईरन् गवि जले भण्डीरः। जलकुक्कुभखगे त्रिका०। स्त्रियां जातित्वात् ङीष्। [सुतस्य चात्मजः" हरिवं० ३२ अ०।

गोभानु पु० तुर्वसुनृपपौत्रे "तुर्वसोस्तु सुतो वह्निर्गोभानु-

गोभिल पु० छन्दोपगृह्यकारके ऋषिभेदे।

गोभृत् पु० गां भूमिं बिभर्त्ति भृ-क्विप् ६त०। पर्वते "नादेन गोभृच्छिखरेषु मत्ताः नृत्यन्ति गोकर्णशरीरभक्ष्याः" चौरः। तेन निर्वृत्तम् सङ्कला०अञ्। गौभृत पर्वतनिर्वृत्ते त्रि० स्त्रियां ङीप्। [अजुगोमत् न।

गोम लेपने अद० चुरा० उभ० सक० सेट्। गोमयति-ते

गोमक्षिका स्त्री गोः क्लेशदायिका मक्षिका। (डाँस) ख्याते मक्षिकाभेदे शब्दर०।

गोमघ त्रि० गां मंहति ददाति मंहि—अच् छन्दसि निनलोपः ह्रस्व घस्य ६त०। गोदातरि। "कदा गोमघा हवनानि गच्छाः, ऋ० ६।१५।२ "मंहतेर्दानार्थस्य रूपमुत्तरपदम्" भा० "स गोमघा जरित्रे" ६।३५।४। "गोमघा गोदात्री" भा० "अश्वामघा गोमघा वा हुवेम" ऋ०७।७१।१।

गोमण्डल न० ६त०। १गोसमूहे २भूमण्डले। "मग्नां च तोयापदि दुस्तरायां गोमण्डलस्योद्धरणं चकार" माघः। ३किरणसंघे च।

गोमत् त्रि० गौरस्त्यस्य मतुप्। १गोस्वामिनि २गोयुक्ते च "इन्द्र! गोमन्निहायाहि" यजु०२६।४ "गावः स्तुतिरूपा वाचः किरणा वा विद्यन्तेऽस्य गोमान्" वेददी०। स्त्रियां ङीप्। सा च ३नदीभेदे स्त्री "गोमतीं धूतपापां च गण्डकीञ्च महानदीम्" भा० भी० ९अ०। स्कन्दपु० प्रभा० तन्माहात्म्यम् "गोमत्युत्पत्तिकथनं तस्यां स्नानादिजं फलम्। चक्रतीर्थस्य माहात्म्यं गोमत्युदधिसङ्गमः" इत्युक्त्वा० तत्खण्डप्रतिपाद्ये। अत्र उदधिसङ्गम इत्युक्तेः "गङ्गा सरस्वती पुण्या यमुना च महानदी। गोदावरी गोमती च नदी तापी च नर्मदा" इत्युपक्रमे "नद्यः समुद्रसंयोगात् सर्वाः पुण्याः शुभावहाः" प्रभा० खण्डोक्तेश्च सा समुद्रगा अन्या तु गोमती काशीतोऽनतिदूरे उत्तरस्यां गङ्गासङ्गता यथाह" भा० व० ८४ अ० यथा "गोमतीगङ्गयोश्चैव सङ्गमे लोकविश्रुते। अग्निष्टोममवाप्नोति कुलञ्चैव समुद्धरेत्" गोमतीस्नानफलं तत्रैव "रामतीर्थे नरः स्नात्वा गोमत्यां कुरुनन्दन!। अश्वमेधमवाप्नोति पुनाति च कुलं नरः। शतसाहस्रकं तीर्थं तत्रैव भरतर्षभ!। तत्रोपस्पर्शनं कृत्वा नियतो नियताशनः। गोसहस्रफलं पुण्यं प्राप्नोति भरतर्षभ!" गौः गोपदमाधिक्येन विद्यतेऽस्यां विद्यायां मतुप् ङीप्। ५विद्याभेदे सा च गोदानशब्दे २६८८पृ० दर्शिता अन्या तिलधेनुशब्दे वक्ष्यते "गोमत्या विद्यया धेनुं तिलानामभिमन्त्र्य च" भा०आनु०७८अ०। "पञ्चगव्येन गोघाती मासेनैकेन शुध्यति। गोमतीं च जपेद्विद्यां गवां गोष्ठे च संवसेत्" शाता०। गोमत्यां भवः पलद्या० अण्। गौमत तत्रभवे त्रि० स्त्रियां ङीप्। गोमत्या अदूरभवो देशः अण्। गौमत तत्सन्निकृष्ट देशादौ त्रि० स्त्रियां ङीप्। बहुत्वे तस्य वरणा० लुप्। गोमत्यः। उक्तगोमच्छब्दस्य सर्वनामस्थाने नुम् गोमान् गोमन्तावित्यादि रूपम्। गोमानिवाचरति गोमत्+क्विप् गोमतीति ततः क्विप् गोमत्। ४गोस्वामितुल्ये अत्र सर्वनामस्थाने धातुत्वात् न नुम्। गोमत् गोमतौ इत्येव। षष्ठीतत्पुरुषे गोमतीशब्दस्य "वैदेहि बन्धोर्हृदयं विदद्रे" इत्यत्रेव "ङ्यापोः संज्ञाच्छन्दसोः"

पा० आर्षे प्रयोगे वा ह्रस्वः । "सा लतेव महाशालं फुल्लं गोमतितीरजम्" भा० वि० २७ अ० । न तु ह्रस्वान्तं शब्दान्तरम् केषाञ्चित् तथा कल्पनं तु प्रामादिकम् । गौस्तदस्थि अत्रास्ति मतुप् ङीप् (भागाड़) ख्यातायां ५ भूमौ "भोजनं यत्र तत्रापि शयनं हट्टमन्दिरे । मरणं गोमतीतीरे" उद्भटः ।

गोमतल्लिका स्त्री प्रशस्ता गौः (जातिः) "प्रशंसावचनैश्च" पा० नित्यस० परनि० । प्रशस्ते गवि पुंस्यपि स्त्रीत्वमेव । "प्रशंसावचनैश्चेति" पा०सूत्रे वचनग्रहणं रूढमात्रशब्दपरिग्रहार्थं तेन ये यौगिकाः शस्तशोभनादयः ये च विशेषवचनाः शुचिसाध्वादयः ये च गौणवृत्त्या सिंहोमाणवक इत्यादौ प्रशंसां बोधयन्ति ते सर्व्वे व्युदस्यन्ते" मनो० । प्रशंसावचनरूढ़शब्दाश्चामरे पठिता यथा "मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ । प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः" । गोमचर्चिकाप्यत्रार्थे स्त्री ।

गोमत न० गवां मतम् । गव्यूतौ शब्दार्थ० ।

गोमत्स्य पु० गौरिव स्थूलो मत्स्यः । सुश्रुतोक्ते नादेये मत्स्यभेदे । "तत्र नादेयाः रोहितपाठीनपाटलाराजीववर्म्मिगोमत्स्यकृष्णमत्स्यवागुञ्जारमुरलसहस्रदंष्ट्राप्रभृतयः"

गोमथ त्रि० गां दुग्धं मथति मथ–अच् ६त० । गोदुहे गोपे । ततः चतुरर्थ्यां कुमुदा० ठक् । गौमथिक तन्निर्वृत्तादौ त्रि० ।

गोमन्त पु० सह्यपर्व्वतविवरस्थे पर्व्वतभेदे । "ततस्तु त्वरिताः गमिष्यामः सह्यस्य विवरं गिरिम् । गोमन्तमिति विख्यातं नैकशृङ्गविभूषितम्" हरिवं० ९६अ० । तद्वर्णनञ्च "एवं वयं जरासन्धादभितः कृतकिल्बिषाः । सामर्थ्यवन्तः सम्बन्धाद् गोमन्तं समुपाश्रिताः । त्रियोजनायतं सद्मत्रिस्कन्धं योजनावधि । योजनान्ते शतद्वारं वीरविक्रमतोरणम्" भा० स० १२ अ० ।

"तद्गच्छ कृष्ण ! शैलेन्द्रं गोमन्तं तु नगोत्तमम्" तत्रैव । जरासन्धेन तत्र कृष्णयुद्धकथा तत्पर्वतदाहकथा च हरिवं०९९अ०दृश्या । "मथुरापूर्वार्द्धं हिमवद्गोमन्तचित्रकूटस्थाः" वृ० स० १६ अ० ।

गोमन्द पु० पर्वतभेदे । "क्रौञ्चद्वीपे महाक्रौञ्चो गिरीरत्नचयाकरः । सम्पूज्यते महाराज ! चातुर्वर्ण्येन नित्यदा । गोमन्दः पर्वतो राजन् ! सुमहान् सर्वधातुकः । यत्र नित्यं निवसति श्रीमान् कमललोचनः" भा० भी० १२अ० ।

गोमय पुंन० गोः पुरीषं गो+मयट् अर्द्धर्चादि० । (गोवर) १गोः पुरीषे तद्गुणादिगोशब्दे २६८१पृ०दृश्यम् । "अत्यन्तजीर्णदेहाया वन्ध्यायाश्च विशेषतः । रोगार्त्तायाः प्रसूताया न गोर्गोमयमाहरेत्" शब्दार्थचि० स्मृतिः । गोमयस्य श्रेष्ठताकारणम् ।

"शतं वर्षसहस्राणां तपस्तप्तं सुदुष्करम् । गोभिः पूर्वं विसृष्टाभिर्गच्छेम श्रेष्ठतामिति । अस्मत्पुरीषस्नानेन जनः पूयेत सर्वदा । शकृता च पवित्रार्थं कुर्वीरन् देवमानुषाः । ताभ्यो वरं ददौ ब्रह्मा तपसोऽन्ते स्वयं प्रभुः । एवं भवत्विति विभुर्लोकांस्तारयतेति च" । तत्र लक्ष्म्या वासो यथा गोलक्ष्मीसंवादे "अवश्यमानना कार्य्या तवास्माभिर्यशस्विनि ! । शकृन्मूत्रे निवस त्वं पुण्यमेतद्धि नः शुभे ! । श्रीरुवाच । दिष्ट्या प्रसादो युष्माभिः कृतो मेऽनुग्रहात्मकः । एवं भवतु भद्रं वः पूजितास्मि सुखप्रदाः !" इति भा० शा० दानधर्मे उक्तम् । "गोमयं यमुना साक्षात् गोमूत्रं च सरस्वती" काशीख० । "गोमयाच्च वृश्चिको जायते" शास्त्रकारप्रवादः "दुग्धाङ्गना गोमयगोमुखानि" माघः । "शुचिं देशं विविक्तं च गोमयेनोपलेपयेत्" मनुः । २तदात्मके त्रि० स्त्रियां ङीप् ।

गोमयच्छत्र न० गोमये तदाधारस्थाने छत्रमिव । शिलीन्ध्रे (छातिया) । त्रि० स्वल्पार्थे ङीप् स्वार्थे क । गोमयच्छत्रिकापि तत्रार्थे स्त्री हारा० ।

गोमयप्रिय न० गोमयं प्रियमस्य साधनत्वात् । भूतृणे शिलीन्ध्रे रत्नमाला ।

गोमयोत्था स्त्री गोमयादुत्तिष्ठति उद्+स्था–क टाप् । (गुवरियापोका) कीटभेदे हेमच० ।

गोमयोद्भव त्रि० गोमयादुद्भवति उद्+भू–अच् । १गोमयजाते २आरग्वधे (सोंदाल) वृक्षे च पु० शब्दर० ।

गोमहिषदा स्त्री कुमारानुचरे मातृभेदे । "शृणु मातृगणान् राजन् ! कुमारानुचरानिमान्" इत्युपक्रमे "पयोदा गोमहिषदा गोविषाणी च भारत !" भा०श०४७अ० ।

गोमांस न० ६त० । गवां मांसे तद्गुणादि गोशब्दे २६८१पृ० उक्तं "गोमांसभक्षणे प्राजापत्यं चरेत्" सुमन्तुः तच्चाज्ञानतः, ज्ञानतस्तद्भक्षणे चान्द्रायणं यथाह शातातपः "अगम्यागमने चैव मद्यगोमांसभक्षणे । शुद्ध्यै चान्द्रा-

यणं कुर्य्यान्नदीं गत्वा समुद्रगाम्” विष्णुना तु द्विजातीनां तत्र पुनरुपनयनमुक्तं यथा “विड्वराह ग्रामकुक्कुटनरगोमांसभक्षणे सर्व्वेष्वेव द्विजातीनां प्रायश्चित्तान्ते भूयः संस्कारं कुर्य्यात् ।”

गोमातृ स्त्री ६त० । गवां मातरि सुरभौ कश्यपपत्नीभेदे । “गोमातरः सुशीलाद्यास्तत्र सन्ति शिवप्रियाः” काशीख० २अ० ।

गोमायु पु० स्त्री गां विकृतां वाचं मिनोति मा–उण् । १शृगाले,अमरः “अनुहुङ्कुरुते घनध्वनिं नहि गोमायुरुतानि केशरी” किरा०। “पांशुवर्षे दिशां दाहे गोमायुविरुते तथा” मनुः । तन्मूत्रादिभक्षणनिषेधमाह मनुः “विड्वराहखरोष्ट्राश्वगोमायोः कपिकाकयोः । प्राश्य मूत्रपुरीषाणि द्विजश्चान्द्रायणं चरेत् ।” तद्रुतादिशुभाशुभफलं वृ० सं० उक्तं यथा “श्वभिः शृगालाः सदृशाः फलेन विशेष एषां शिशिरे मदाप्तिः । हुहुरुतान्ते परतश्च टाटा पूर्णः स्वरोऽन्ये कथिताः प्रदीप्ताः । लोमाशिकायाः खलु कक्कशब्दः पूर्णः स्वभावप्रभवः स तस्याः । येऽन्ये स्वरास्ते प्रकृतेरपेताः सर्व्वे च दीप्ता इति सम्प्रदिष्टाः । पूर्व्वोदीच्योः शिवा शस्ता शान्ता सर्व्वत्र पूजिता । धूमिताभिमुखी हन्ति स्वरदीप्ता दिगीश्वरान् । सर्व्वदिक्ष्वशुभा दीप्ता विशेषेणाह्नशोभना । पुरे सैन्येऽपसव्या च कष्टा सूर्य्योन्मुखी शिवा । याहीत्यग्निभयं शास्ति टाटेति मृतवेदिका । धिग्धिग् दुष्कृतमाचष्टे सज्वाला देशनाशिनी । नैव दारुणतामेके सज्वालायाः प्रचक्षते । अर्कादनलवत्तस्या वक्त्रं लालास्वभावतः । अन्यप्रतिरुता याम्या सोद्बन्धमृतशंसिनी । वारुण्यनुरुता सैव शंसते सलिले मृतिम् । अक्षोभः श्रवणं चेष्टं धनप्राप्तिः प्रियागमः । क्षोभप्रधानभेदश्च वाहनानां च सम्पदाम् । फलमासप्तमादेतदग्राह्यं परतो रुतम् । याम्यायां तद्विपर्य्यस्तं फलं षट्पञ्चमादृते । या रोमाञ्चं मनुष्याणां शकृन्मूत्रं च वाजिनाम् । रावात् त्रासं च जनयेत्सा शिवा न शिवप्रदा । मौनं गता प्रतिरुते नरद्विरदवाजिनाम् । या शिवा सा शिवं सैन्ये पुरे या सम्प्रयच्छति । भेभे इति शिवा भयङ्करी भो भो व्यापदमादिशेच्च सा । मृतबन्धनिवेदनी फिफी हुहु चात्महिता शिवा स्वरे । शान्ता स्ववर्णात् परमं ध्वनन्ती टाटामुदीर्णमिति वाश्यमाना । टे टे च पूर्वं परतश्च थे थे तस्याः स्वतुष्टिप्रभवं रुतं तत् । उच्चैर्घोरं वर्णमुच्चार्य्य पूर्वं पश्चात् क्रोशेत् क्रोष्टुकस्यानुरूपम् । या सा क्षेमं प्राह वित्तस्य चाप्तिं संयोगं वा प्रोषितेन प्रियेण” । श्वरुतादिफलं श्वशब्दे वक्ष्यमाणं तत्तुल्यफलमेतस्येत्यतिदिष्टम् । २गन्धर्व्वभेदे जटाधरः । “बहुभिः सह गन्धर्व्वैः प्रागायत च तुम्बुरुः” इत्युपक्रमे “गोमायुः सूर्य्यवर्च्चाश्च सोमवर्च्चाश्च सप्तमः” हरिवं० २६ अ० ।

गोमायुभक्ष पु० गोमायुं भक्षयति भक्ष–अण् उप० स० । नीचजातिभेदे अर्कपुत्रस्येत्युपक्रमे “गोमायुभक्षशूलिक वोक्काणाश्वमुखविकलाङ्गाः” वृ०सं० १६ अ० तस्य शनिविभागे उक्तिः ।

गोमिन् त्रि० गोरस्त्यस्य मिनि । १गोस्वामिनि अमरः स्त्रियां ङीप् । “यदन्यगोषु वृषभो वत्सानां जनयेच्छतम् । गोमिनामेव ते वत्सा मोघं स्कन्दितमार्षभम्” मनुः । २उपासके ३शृगाले पु० मेदि० । ४बुद्धभिक्षुशिष्ये पु० त्रिका० । शालाशब्दे परे समासे छात्र्यादि०। “छात्र्यादयः शालायाम्” पा० अस्य उदात्तता ।

गोमीन पु० स्त्री गौरिव स्थूलो मीनः । गोमत्स्याख्ये मीनभेदे “न दद्यात् तिक्तकमठ पशुशृङ्गिणमेव । गोमीनं चक्रशकुलं वडालरावकं तथा” मत्स्यसूक्तम् ।

गोमुख पु० गोर्मुखमिव मुखमस्य । १नक्रे २यक्षभेदे च हेमच० । ३मातलिपुत्रे “बहुशोमातले त्वञ्च तव पुत्रश्च गोमुखः” भा०क०९९अ०। ४वाद्यभेदे ५कुटिलाकारे लेपने च न० मेदि० वाद्यभेदे पुंस्त्वमपि यथा “आडम्बरान् गोमुखांश्च डिण्डिमांश्च महास्वनान्” भा०श०४७अ० । “मृदङ्गाझर्झराभेर्य्यः पणवानकगोमुखाः” भा० द्रो० ८२ अ० । “पणवानकगोमुखाः सहसैवाभ्यहन्यन्त” गीता । लेपनञ्च तदाकारेण भित्तौ लेखनम् “मुग्धाङ्गनागोमयगोमुखानि” माघः । ६तदाकारे सन्धिभेदे (सुरङ्ग) तन्त्रोक्ते जपमालारक्षणाय पट्टवस्त्रादिनिर्मिते स्वनामख्याते ७पदार्थे न० । तस्य लक्षणं मुण्डमालात० उक्तं यथा ।

“चतुर्विंशाङ्गुलमितं पट्टवस्त्रादिसम्भवम् । निर्मायाष्टाङ्गुलिमुखं ग्रीवायां षड्दशाङ्गुलम् । ज्ञेयं गोमुखयन्त्रञ्च सर्व्वतन्त्रेषु गोपितम् । तन्मुखे स्थापयेन्मालां ग्रीवामध्यगते करे, प्रजपेद्विशिना शुद्धं वर्णमालाधिकं प्रिये ! निधाय गोमुखे मालां गोपयेन्मातृजारवत्” (गोमुड़) ख्याते ८नदीभेदे स्त्री गोमु-

स्वाकारत्वात् ८हिमालयात् भूमौ गङ्गापतनगुहायां स्त्री ङीष् ।

गोमूत्र न० ६त० । (चोना) इति ख्याते गोर्मूत्रे गोशब्दे २६८१ पृ० तद्गुणाद्युक्तम् । “शुद्धिर्विजानता कार्य्या गोमूत्रेणोदकेन वा ।” “गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा” “गोमूत्रेण चरेत् स्नानं द्वौ मासौ नियतेन्द्रियः” मनुः ।

गोमूत्रिका स्त्री गोमूत्रस्येव गतिरस्त्यत्र ठन् । चित्रालङ्कारभेदे तल्लक्षणमलङ्कारशब्दे ३६२ पृ० दृश्यम् । सा च पादार्द्धश्लोकविपरीतभेदाच्चतुर्विधा । दिङ्मात्रमुदाह्रियते”

प । द । चे । वि । क । स । द्वा । नं । सा । धा । ने । ष्य । वि । षा । दि । भिः ।
वा । इ । पे । वि । क । स । द्वा । नं । गु । धा । ना । ष्य । वि । षा । णि । भिः ।

माघे १९ स० ४६ श्लोके तल्लक्षणान्तरं मल्लिनाथोक्तं यथा “वर्णानामेकरूपत्वं यद्येकान्तरमर्द्धयोः । गोमूत्रिकेति तत् प्राहुर्दुष्करं तद्विदो विदुः” ।

षोडशकोष्ठद्वये पङ्क्तिद्वये द्वयं द्वयं क्रमेण विलिख्य एकान्तरविनिमयेन वाचने श्लोकनिष्पत्तिरिति तदुद्धारः । गोमूत्रप्रकारः प्रकारे स्थूला० कन् टापि अत इत्त्वम् । गोमूत्रतुल्ये वक्रसरलप्राये १प्रचारादौ । “गोमूत्रिकाप्रचारेषु” दशकु० “गोमूत्रतुल्यवक्रसरलप्रचारेषु” (ताम्बुडु) ख्याते ४तृणभेदे स्त्री राजनि० ।

गोमृग पु०स्त्री गवाकृतिर्मृगः । गवये तस्य गवाकृतित्वात् तथात्वम् । “अश्वस्तूपरो गोमृगस्ते प्राजापत्याः” यजु० २४।१। स्त्रियां जातित्वात् ङीष् ।

गोमेद पु०गौरिव मेद्यति मिद–अच् । १मणिभेदे २द्वीपभेदे तन्नामनिरुक्तिर्यथा “गोमेदे गोपतिर्नाम राजाभूद्गोसवोद्यतः । याज्योऽभूदृक्षिकल्यानामौतथ्यानां मनोः कुले । स तेषु हरियज्ञाय प्रवृत्तेषु भ्रमून् गुरून् । वव्रे, तं गोतमः कोपादशपत् सोऽगमत् क्षयम् । यज्ञवाटेऽस्य ता गावो दग्धाः कोपाग्निना मुनेः । तन्मेदसा मही छन्ना गोमेदः स ततोऽभवदिति” युक्तिकल्पतरुः । ३प्लक्षद्वीपस्थे वर्षाचलभेदे तद्वर्षोपक्रमे” मर्य्यादाकारकास्तेषां तथान्ये वर्षपर्वताः । सप्तैव तेषां नामानीत्यभिधाय “गोमेदश्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा । सोमकः सुमनाः शैलो वैभ्राजश्चैव सप्तमः” विष्णु पु० । स्वार्थे क । मणिभेदे तस्य परीक्षादियुक्तिकल्पतरावुक्तं यथा “हिमालये वा सिन्धौ वा गोमेदमणिसम्भवः । स्वच्छकान्तिर्गुरुः स्निग्धो वर्णाढ्यो दीप्तिमानपि । वलक्षः पिञ्जरो धन्यो गोमेद इति कीर्त्तितः । चतुर्द्धा जातिभेदस्तु गोमेदेऽपि प्रकाश्यते । ब्राह्मणः शुक्लवर्णः स्यात् क्षत्रियो रक्त उच्यते । आपीतो वैश्यजातिस्तु शूद्रस्त्वानील उच्यते । छाया चतुर्विधा श्वेता रक्ता पीताऽसिता तथा । गुरुप्रभाढ्यः सितवर्णरूपः स्निग्धो मृदुर्वीतमलानुरागः । स्वच्छस्तु गोमेदमणिर्धृतोऽयं करोति लक्ष्मीं धनधान्यवृद्धिम् । लघुर्विरूपोऽतिखरोऽन्यमानः स्नेहोपलिप्तो मलिनः खरोऽपि । करोति गोमेदमणिर्विनाशं सम्पत्तिभोगे बलवीर्य्यराशेः । ये दोषा हीरके ज्ञेयास्ते गोमेदमणावपि । परीक्षा वह्नितः कार्य्या शाणे वा रत्नकोविदैः ॥ स्फटिकेनैव कुर्वन्ति गोमेदप्रतिरूपकम् । शुद्धस्य गोमेदमणेस्तु मूल्यं सुवर्णतो द्वैगुणमाहुरेके । अन्ये तथा विद्रुमतुल्यमूल्यं तथा परे चामरतुल्यमाहुः । चतुर्विधानामेषान्तु धारणं परिसम्मतम्” । स च जलकालुष्यशोधकः यथाह सुश्रुतः“तत्र (जले) सप्त कालुष्यप्रसाधनानि भवन्ति तद्यथा कतकगोमेदकबिसग्रन्थिशैवालमूलवस्त्राणि मुक्तामणि० श्चेति” । स्वार्थे क । द्वीपभेदे । “शाकं ततः शाल्मलमत्र कौशं क्रौञ्चं च गोमेदकपुष्करे च । द्वयोर्द्वयोरन्तरमेकमेकं समुद्रयोर्द्वीपमुदाहरन्ति” सि० शि० ।

गोमेदसन्निभ पु० गोमेदेन तुल्यः नित्यस० । दुग्धपाषाणे राजनि० ।

गोमेध पु० मेध–वधे आधारे घञ् ६त० । गोसवाख्ये यज्ञभेदे गोसवशब्दे विवृतिः “गवां मेधमवाप्नोति अप्सरोभिश्च मोदते” भा० आनु० १०६ अ० ।

गोऽम्भस् न० ६त० । गोमूत्रे राजनि० ।

गोयज्ञ पु० गवा कृतो यज्ञः । १गोसवयज्ञे तच्छब्दे विवृतिः । गा उद्दिश्य यज्ञः । श्रीकृष्णेन गोपानां हितार्थं वृन्दावने प्रवर्त्तिते गोवर्द्धनगिरियज्ञसहिते गवां महोत्सवकारके २व्यापारभेदे वत्तथा हरिवं० ७२ अ० । “शरद्येवं सुशस्यायां प्राप्तायां प्रावृषः क्षये । नीलचन्द्रार्कवर्णैश्च रचितं बहुभिर्द्विजैः । फलैः प्रवालेन घनमिन्द्रचापघनोपमम् । भवनाकारविटपं लतापरमण्डितम् । विशालमूलविततं पवनाभोगधारिणम् । अर्चयामो गिरिं देवं गाश्चैव सविशेषतः । सावतंसैर्विषाणैश्च बर्हापीडैश्च दंशितैः । घण्टाभिश्च प्रलम्बाभिः पुष्पैः शारदिकैस्तथा । शिवाय गावः पूज्यन्तां

गिरियज्ञः प्रवर्त्त्यताम्। पूज्यतां त्रिदशैः शक्रो गिरिरस्माभिरिज्यताम्। गोयज्ञं कारयिष्यामि बलादेव न संशयः"। एवं श्रीकृष्णेनोक्ते गोपवाक्यं यथा "यत्त्वया ऽभिहितं वाक्यं गिरियज्ञं प्रति प्रभो। कस्तल्लङ्घयितुं शक्तो वेलामिव महोदधेः। स्थितः शक्रमहस्तात! श्रीमान् गिरिमहस्त्वयम्। त्वत्प्रणीतोऽद्य गोपानां गवां हेतोः प्रवर्त्त्यताम्। भाजनान्युपकल्पन्तां पयसः पेशलानि च। कुम्भाश्च विनिवेश्यन्तां उदपानेषु शोभनाः। पूर्य्यन्तां पयसा नद्यो द्रोण्यश्च विपुलायताः। भक्ष्यं भोज्यञ्च पेयञ्च तत्सर्व्वमुपनीयताम्। भाजनानि च मांसस्य न्यस्यन्तामोदनस्य च। त्रिरात्रञ्चैव सन्दोहः सर्व्वघोषस्य गृह्यताम्। विशस्यन्ताञ्च पशवो भोज्या ये महिषादयः। प्रवर्त्त्यताञ्च यज्ञोऽयं सर्वगोपसुसङ्कुलः। आनन्दजननो घोषो महान् मुदितगोकुलः। तूर्य्यप्रणादघोषैश्च वृषभाणाञ्च गर्ज्जितैः। हम्भारवैश्च वत्सानां गोपानां हर्षवर्द्धनः। दधिह्रदः शरावर्त्तः पयःकुल्यासमावृतः। मांसराशिप्रकृप्राद्यः प्रकाशौदनपर्वतः। सम्प्रावर्त्तत यज्ञः स गिरेर्गोभिः समाकुलः। तुष्टगोपगणाकीर्णो गोपनारीमनोहरः। अथाधिष्ठतपर्य्यन्ते पर्य्याप्ते यज्ञसंविधौ। यज्ञं गिरेस्तिथौ सौम्ये चक्रुर्गोपा द्विजैः सह। यजनान्ते तदन्नन्तु तत्पयो दधि चोत्तमम्। मांसञ्च मायया कृष्णो गिरिर्भूत्वा समश्नुते। तर्पिताश्चापि विप्राग्र्यास्तुष्टाः सम्पूर्णभोजनाः। उत्तस्थुः प्रीतमनसः स्वस्ति वाच्य यथासुखम्। भुक्त्वा चावभृथे कृष्णः पयः पीत्वा च कामतः। सन्तृप्तोऽस्मीति दिव्येन रूपेण प्रजहास वै। तं गोपाः पर्वताकारं दिव्यस्रगनुलेपनम्। गिरिमूर्द्धि स्थितं दृष्ट्वा कृष्णं जग्मुः प्रधानतः। भगवानपि तेनैव रूपेणाच्छादितः प्रभुः। सह तैः प्रणतो गोपैर्ववन्दात्मानमात्मना। तमूचुर्विस्मिता गोपा देवं गिरिवरे स्थितम्। भगवंस्त्वद्वशे युक्ता दासाः किं कुर्म? किङ्कराः। स उवाच ततो गोपान् गिरिप्रभवया गिरा। अद्य प्रभृति नाथोऽहं गोषु यद्यस्ति वो दया। अहं वः प्रथमो देवः सर्वकामकरः शुभः। मम प्रभावाच्च गवामयुतान्युपभोक्ष्यथ। शिवश्च वो भविष्यामि मद्भक्तानां वने वने। रंस्येऽहं सह युष्माभिर्यथा दिवि गतस्तथा। ये चेमे प्रथिता गोपा नन्दगोपपुरोगमाः। एषां प्रीतः प्रयच्छामि गोपानां विपुलं धनम्। पर्य्याप्नुवन्तु क्षिप्रं मां गावो वत्ससमाकुलाः। एवं मम परा प्रीतिर्भविष्यति न संशयः" ७४ अ०।

गोयान न० गवा कृष्टं यानम्। गवाकृष्टे याने (शगड) "गोयानेनागतस्तुष्टः पादाभ्यां शुभचष्टितः" सुश्रुतः गोयाने मैथुननिषेधमाह मनुः "मैथुनन्तु समासेव्य पुंसि योषिति वा द्विजः। गोयानेऽप्सु दिवा चैव सवासाः स्नानमाचरेत्"।

गोयूति स्त्री "गोर्यूतौ छन्दसि" पा० अध्वपरिमाणे" वार्त्ति० छन्दोध्वपरिमाणभिन्ने न वान्तादेशः। गोर्गतौ।

गोरक्ष पु० गां रक्षति सेवनात् रक्ष–अण् उप० स० (चाकुलिया) १लताभेदे २नागरङ्गे मेदि०। ३ऋषभनामौषधौ हेम०। ४गोपालके त्रि०। भावे घञ्। ५गोः रक्षणे च। "कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम्" मनुः।

गोरक्षक त्रि० गां रक्षति रक्ष–ण्वुल् ६त०। (राखाल) गोपालके "गोरक्षकान् वाणिजकान् तथा कारुकुशीलवान्। प्रेष्यान् वार्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत्" मनुः।

गोरक्षकर्क्कटी स्त्री कर्म०। क्षुद्रकर्कट्याम् (राखालकाकुड) भावप्र०। [२गोधूमे च जटा०।

गोरक्षजम्बू स्त्री गोरक्षे गोधूमे जम्बूरिव। १घोणटाफले

गोरक्षतण्डुला स्त्री गोरक्षः तण्डुलो बीजं यस्याः। (गोरक्षचाकुलिया) क्षुपभेदे रत्नमाला।

गोरक्षतुम्बी स्त्री गोरक्षी तुम्बी। कुम्भाकारतुम्ब्याम् राजनि०

गोरक्षदुग्धा स्त्री गोरक्षं गोपोषकं दुग्धं निर्यासोऽस्याः। मालवप्रसिद्धे क्षुपभेदे गोरक्षीक्षुपे राजनि०।

गोरक्षी स्त्री० गां रक्षति रक्ष–अण् ङीप् सुग्ध०। मालवप्रसिद्धे क्षुपभेदे राजनि०। [मेदि०।

गोरङ्कु पु०स्त्री गवा वाचा रङ्कुरिव। पक्षिभेदे नग्नके

गोरट पु० गवि रटति रट–अच्। दुष्खदिरे राजनि० तस्य गोः पोषणाय रटनात् तथात्वम्।

गोरण न० गुर–भावे ल्युट्। उत्तोलने उद्यमे अमरः।

गोरथ पु० मगधदेशस्थे पर्वतभेदे। "अतीत्य गङ्गां शोणञ्च त्रयस्ते प्राङ्मुखास्तदा। कुशचीरच्छदा जग्मुर्मागधं क्षेत्रमच्युताः। ते शश्वद्गोधनाकीर्णमम्बुमन्तं शुभद्रुमम्। गोरथं गिरिमासाद्य ददृशुर्मागधं (जरासन्धपुरम्) पुरम्"। भा० स० १९ अ०।

गोरस पु० ६त०। १गोदुग्धे २दध्नि ३तक्रे च हेम०। "व

खाद्यानां मांसपरमं मध्यानां गोरसोत्तरम्। तैलोत्तरं दरिद्राणां भोजनं भरतर्षभ!" भा०उ०३३अ०। "शालाः शालीक्षुगोरसैः" भा० आश्व० ८५ अ०। गोरसानुपभुञ्जान उपभोगांश्च भारत!"। भा० व० २३९ अ०। "अन्नं पर्य्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम्। अस्नेहा अपि गोधूमयवगोरसविक्रियाः" याज्ञ० अस्नेहस्य चिरस्थितस्य तद्विकारस्य भोज्यतामाह। "हरिद्रा गोरसो धान्यं पुनः पाकेन शुध्यति" स्मृतिः। ४वाक्यरसे च "कोरसो गोरसं विना" उद्भटः।

गोरसज न० गोरसात् दध्नो जायते जन–ड ५त०। तक्रे राजनि०।

गोराज पु० ६त० टच् समा०। श्रेष्ठवृषे शब्दर०।

गोराटिका गौरिव रटति रट+ण्वुल्। शारिकापक्षिणि राजनि०। अच् गौरा० ङीष्। गोराटीत्यपि तत्रैव हेमच०।

गोरिका स्त्री गोराटिका पृषो०। शारिकाखगे राजनि०।

गोरुत न०६त० १गवां शब्दे तद्रुतशुभाशुभफलं गवेङ्गितशब्दे २५६७ पृ० उक्तम्। गोरुतं तच्छब्दः श्रुतिगोचरत्वेन अस्त्यस्य अच्। गोरवश्रवणयोग्ये २क्रोशद्वयात्मके देशे हेमच०।

गोरूप न० ६त०। १गोः रूपे "जुगोप गोरूपधरामिवोर्वीम्" रघुः। गोः रूपमिव रूपमस्य। २महादेवे पु०। "गोरूपश्च महादेवो हस्त्यश्वोष्ट्रखराकृतिः" भा० आनु० १४ अ०। [राजनि०।

गोरोच न० गवा किरणेन रोचते रुच–अच्। हरिताले

गोरोचना स्त्री गोभ्यो जाता रोचना हरिद्रा। स्वनामख्याते गन्धद्रव्ये भावप्र०।

"गोरोचना हिमा तिक्ता वश्या मङ्गलकान्तिदा।
विषाऽलक्ष्मीग्रहोन्मादगर्भस्रावक्षतापहृत्" भावप्र०।

"गोरोचनापत्रविभक्तरम्याः" "गोरोचनाक्षेपनितान्तगौरैः" कुमा०। सा च यन्त्रलेखनद्रव्यं "गोरोचनालक्तककुङ्कुमेन" तन्त्रसारोक्तेः। [अमरः।

गोर्द न० गुर। कन्दादित्वात् नि०। मस्तिष्के मस्तकस्थे हते

गोल पु० गुड–अच् डस्य लः। १सर्ववर्तुले २मदनवृक्षे रत्नमा०। ३जारात् जाते विधवायाः सुते धरणिः। ४वोले जटाधरः। गोलः विषतयाऽस्त्यस्य अच्। खगोलभूगोलज्ञापके भास्करीये गोलाध्यायाख्ये ५ग्रन्थे च। "मं सां च प्रविपल गोलममलं वालावबोधं ब्रुवे। मध्याद्यं द्युसदां यदत्र गणितं तस्योपपत्तिं विना प्रौढिं प्रौढसभासु नैति गणको निःसंशयो न स्वयम्। भोज्यं यथा सर्वरसं विनाज्यं राज्यं यथा राजविवर्जितं च। सभा न भातीव सुवक्तृहीना गोलानभिज्ञो गणकस्तथात्र"। "गोलः स्मृतः क्षेत्रविशेष एष प्राज्ञैरतः स्याद्गणितेन गम्यः" सि० शि० उक्ते ६क्षेत्रभेदे ७मण्डले न० मेदि० ८ज्योतिषोक्ते ग्रहयोगभेदे पु०। "ग्रहाणामेकस्मिन् यदि भवति षण्णां निवसतिस्तदा गोलोयोग, प्रलयमदमिन्द्रोऽपि लभते। भवेल्लोको रुग्णः, परिहरति पुत्रञ्च जननी नृपाणां नाशः स्यात् ज्वलति वसुधा शुष्यति नदी" प्रश्नकौमुदी "सप्त ग्रहा यदैकस्था गोलयोगस्तदा भवेत्। दुर्भिक्षं राष्ट्रपीड़ा च तस्मिन् काले नृपक्षयः" मयूरचित्रकम्। "एकादिष्टक्षोपेतैरुक्तान् योगान् विहायसंख्याख्यान्। गोलयुक्शूलकेदारपाशदामाख्यवीणाः स्युः। दुःखितदरिद्रघातककृषिकर दुःशील पशुपनिपुणानाम्। जन्म क्रमेण दुःखिनः परभाग्यैः सर्व एवैते" दीपिका।

गोलक पु०गुड–ण्वुल् डस्य लः। १मणिके अलिञ्जरे (जाला) २गुड़े च हेमच०। ३गन्धरसे रत्नमाला ३कलाये (मटर) ख्याते शब्दच० तस्य गोलाकृतित्वात् तथात्वम्। गोल+स्वार्थे क। ४गोलशब्दार्थे ५पिण्डे च "तेजसां गोलकाः सूर्य्यः ग्रहर्क्षाण्यम्बुगोलकाः। प्रभावन्तो हि दृश्यन्ते सूर्य्यरश्मिप्रदीपिताः" सू०सि०। ६गोलोके न० "यद्रूपं गोलकं धाम तद्रूपं नास्ति मामके" तन्त्रसा०। जारजगोलकस्य संस्कारार्हता कुण्डशब्दे २०८७ पृ० उक्ता। ७इन्द्रियाधिष्ठानभेदे न०। चक्षुर्गोलकम्।

गोलक्षण न० ६त०। गोः शुभाशुभसूचके चिह्नभेदे वृ० सं०तल्लक्षणाद्युक्तं यथा

"पराशरः प्राह बृहद्रथाय गोलक्षणं यत् क्रियते ततोऽयम्। मया समासः शुभलक्षणास्ता सर्वास्तथाप्यागमतो ऽभिधास्ये। सास्राविलरूक्षाक्ष्यो मूषकनयनाश्च न शुभदा गावः। प्रचलच्चिपिटविषाणाः करटाः खरसदृशवर्णाः। दशसप्तचतुर्दन्त्यः प्रलम्बमुण्डानना विनतपृष्ठाः। ह्रस्वस्थूलग्रीवा यवमध्या दारितखुराश्च। श्यावातिदीर्घजिह्वा गुल्फैरतितनुभिरतिबृहद्भिर्वा। अतिककुदाः कृशदेहा नेष्टा हीनाधिकाङ्ग्यश्च। वृषोऽप्येवं स्थूलातिलम्ब-

वृषणः सिराततक्रोड़ः। स्थूलसिराचितगण्डस्थिस्थानं मेहते यश्च। मार्जाराक्षः कपिलः करटो वा न शुभदो द्विजस्येष्टः। कृष्णोष्ठतालुजिह्वः श्वसनो यूथस्य घातकरः। स्थूलशकृन्मणिशृङ्गः सितोदरः कृष्णसारवर्णश्च। गृहजातोऽपि त्याज्यो यूथविनाशावहो वृषभः। श्यामकपुष्पचिताङ्गो भस्मारुणसन्निभो विड़ालाक्षः। विप्राणामपि न शुभं करोति वृषभः परिगृहीतः। ये चोद्धरन्ति पादान् पङ्कादिव योजिताः कृशग्रीवाः। कातरनयना हीनाश्च पृष्ठतस्ते न भारसहाः। मृदुसंहतताम्रोष्ठास्तनुस्फिजस्ताम्रतालुजिह्वाश्च। तनुहृस्वोच्चश्रवणाः सुकुक्षयः स्पृष्टजङ्घाश्च। आताम्रसंहतखुरा व्यूढोरस्का वृहत्ककुदयुक्ताः। स्निग्धश्लक्ष्णतनुत्वग्रोमाणस्ताम्रतनुशृङ्गाः। तनुभूस्पृग्वालधयो रक्तान्तविलोचना महोच्छ्वासाः। सिंहस्कन्धास्तन्वल्पकम्बलाः पूजिताः सुगताः। वामावर्त्तैर्वामे दक्षिणपार्श्वे च दक्षिणावर्त्तैः। शुभदा भवन्त्यनडुहो जङ्घाभिश्चैणकनिभाभिः। वैदूर्य्यमल्लिकाबुद्बुदेक्षणाः स्थूलनेत्रवर्त्माणः। पार्ष्णिभिरस्फुटिताभिः शस्ताः सर्वेऽपि भारवहाः। घ्राणोद्देशे शवलो मार्जारमुखः सितश्च दक्षिणतः। कमलोत्पललाक्षाभः सुवालधिर्वाजितुल्यजवः। लम्बैर्वृषणैर्मेषोदरश्च संक्षिप्तवङ्क्षणक्रोड़ः। ज्ञेयो भाराध्वसहो जवेऽश्वतुल्यश्च शस्तफलः। सितवर्णः पिङ्गाक्षस्ताम्रविषाणेक्षणो महावक्त्रः। हंसोनाम शुभफलो यूथस्य विवर्धनः प्रोक्तः। भूस्पृग्वालधिराताम्रवङ्क्षणो रक्तदृक् ककुद्मी च। कल्माषश्च स्वामिनमचिरात् कुरुते पतिं लक्ष्म्याः। यो वा सितैकचरणो यथेष्टवर्णश्च सोऽपि शस्तफलः। मिश्रफलोऽपि ग्राह्यो यदि नैकान्तप्रशस्तोऽस्ति" ६१अ०।

गोलत्तिका स्त्री गवि भूमौ लत्तिकेव। वनचरपशुस्त्रीभेदे "रोहित् कण्डृणाची गोलत्तिका तेऽप्सरसाम्" यजु० २४।३७। "रोहित् ऋष्यः, कुण्डृणाची, वनचरी गोलत्तिकापि" वेददी०।

गोलन्द पु० ऋषिभेदे तस्यापत्यं गर्गा० यञ्। गौलन्द्य [तदपत्ये पु० स्त्री।

गोलयन्त्र न० सि० शि० उक्ते यन्त्रभेदे।

"अपवृत्तगरविचिह्नं क्षितिजे धृत्वा कुजेन संगते।
नाड़ीवृत्ते विन्दुं कृत्वा धृत्वाथ जलसमं क्षितिजम्।
रविचिह्नस्य च्छाया पतति कुमध्ये यथा तथा विधृते।
उडुगोले कुजविन्द्वोर्मध्ये नाड्यो द्युजाताः स्युः"।

"यथोक्तविधिना खगोलान्तर्भगोलं वद्ध्वा तत्र क्रान्तिवृत्ते मेषादेरारभ्य रविभुक्तं राशिभागाद्यं दत्त्वा तदग्रे तच्चिह्नं तदपवृत्तग-रविचिह्नमुच्यते। भगोलं चालयित्वा रविचिह्नं क्षितिजे धार्य्यम्। तथा धृते सति क्षितिजं प्राच्यां विषुवन्मण्डले यत्र लग्नं तत्र खटिकया विन्दुः कार्य्यः। ततः क्षितिजवृत्तं जलसमं यथा भवति तथा गोलयन्त्रं स्थिरं कृत्वा भगोलस्तथा चाल्यो यथा रविचिह्नस्य च्छाया भूगर्भे पतति। तथा कृते सति विषुवद्वृत्ते क्षितिजविन्द्वोर्मध्ये यावत्यो घटिकास्तावत्यस्तस्मिन् काले दिनगता ज्ञेयाः। अपवृत्ते मेषादेरारभ्य प्राक् क्षितिजपर्य्यन्तं यद्राशिभागाद्यं तल्लग्नं ज्ञेयम्" प्रमिताक्ष०।

गोलवण न० गवे देयं परिमितं लवणम्। यावद्गवे लवणं दीयते तावन्मिते लवणे। "गाधलवणयोः" पा० प्रमाणे गम्ये एतयोः परतः पूर्वं तत्पुरुषे प्रकृतिस्वरता।

गोला स्त्री गां वह्नभूमिम् आधारत्वेन लाति ला—क। १गोदावरीनद्याम्। गां वाचं लाति।२सख्यां,३कुनट्याम्। गां दीप्तिं जलं वा लाति। ४पत्राञ्जने, ५मणिके, ६मण्डले, ७वालक्रीडनके ८दुर्गायाञ्च मेदि०।

गोलाक्ष पु० ऋषिभेदे तस्य गोत्रापत्यम् अश्वा० फञ्। गौलाक्षायण तद्गोत्रापत्ये पु०स्त्री।

गोलाङ्गूल पु०स्त्री गोरिव लाङ्गूलमस्य। १वानरभेदे त्रिका० स च कश्यपपत्न्याः क्रोधायाः कन्यायां हरिनाम्न्यां जातः यथाह भा०आ० ६६अ० "नव क्रोधवशा नारीः प्रजज्ञे क्रोधसम्भवा। मृगी च मृगमन्दा च हरी भद्रजना अपि" इत्युपक्रमे "हर्य्याश्च हरयोऽपत्यं वानराश्च तरस्विनः। गोलाङ्गुलांश्च भद्रं ते हर्य्याः पुत्रान् प्रचक्षते"। २कृष्णवानरे राजनि०। तल्लक्षणञ्च काशी ख० ३अ०। "गोलाङ्गूला रक्तमुखा नीलाङ्गा यूथनायकाः।"

गोलाध्याय पु०गोलस्वरूपादिप्रतिपादके भास्करीये ग्रन्थभेदे।

गोलाम पु० गां भूमिं लासयति प्रकाशयति लस—णिच् अण् उप० स०। शिलीन्ध्रे हारा०।

गोलिह पु०गोभिर्लिह्यते लिह-घञर्थे क।१क्षुद्रिकायां २घण्टापाटलौ (घण्टापारुलि) च जटा०।

गोलीढ पु० गोभिर्लिह्यते लिह-क्त। घण्टापाटलौ (घण्टा-[पारुलि) अमरः।

गोलोक पु० वैकुण्ठोर्द्ध्वस्थे स्थानभेदे तत्स्थानमानादि ब्रह्मवै० पु० उक्तं यथा

"निराधारश्च वैकुण्ठो ब्रह्माण्डानां परोवरः। तत्परश्चापि गोलोकः पञ्चाशत्कोटियोजनात्। ऊर्द्ध्वे निराश्रयश्चापि रत्नसारविनिर्म्मितः। सप्तद्वारः सप्तसारः परिखासप्तसंयुतः। लक्षप्राकारयुक्तश्च नद्या विरजया युतः। वेष्टितो रत्नशैलेन शतशृङ्गेण चारुणा। योजनायुतमानञ्च यस्यैकं शृङ्गमुज्ज्वलम्। शतकोटियोजनश्च शैलउच्छ्रित एव च। दैर्घ्यं तस्य शतगुणं प्रस्थे च लक्षयोजनम्। योजनायुतविस्तीर्णस्तत्रैव रासमण्डलः। अमूल्यरत्ननिर्म्माणो वर्त्तुलश्चन्द्रविम्बवत्। पारिजातवनेनैव पुष्पितेन च वेष्टितः। कल्पवृक्षसहस्रेण पुष्पोद्यानशतेन च। नानाविधैः पुष्पवृक्षैः पुष्पितेन च चारुणा। त्रिकोटिरत्नभरणैर्गोपीलक्षैश्च रचितः। रत्नप्रदीपयुक्तश्च रत्नतल्पसमन्वितः। नानाभोगसमायुक्तो मधुवापीशतैर्वृतः। पीयूषवापीयुक्तश्च कामभोगसमन्वितः। गोलोकवृहसंख्यानं वर्णनं वा विशारदः। न कोपि वेद विद्वान् वा वेदविद्वान् व्रजेश्वर !"।

गोलोमिका स्त्री गोः लोमेव लोमास्य ङीप् ततः स्वार्थे के अणो ह्रस्वः। (पाथुरी) (गोधूमा) इति च ख्यातायां १प्रस्तारिण्याम्। २क्रोष्टुकपुच्छायाञ्च। राजनि०।

गोलोमी स्त्री गोर्लोमेव लोम लोमसदृशं दलादिकमस्या ङीप्। १श्वेतदूर्व्वायाम्। गोलोमेव जाता अण् ङीप्। २वचायाम्। गवा वाचा लोमयति अनुकूलयति लोमन्+नामधातु—अच् गौरा० ङीष्। ३वेश्यायां हेमच०। ४गोलोमिकावृक्षे राजनि०।

गोवत्स पु० ६त०। गवां वत्से तन्नामद्वादशीव्रतम् व्रतशब्दे दृश्यम्।

गोवत्सादिन् पु० गोवत्समत्ति अद—णिनि ६त०। वृके [(नेकडेवाव) राजनि०।

गोवन्दनी स्त्री गवि भूमौ वन्द्यते वन्द—कर्म्मणि ल्युट् ङीप्। १प्रियङ्गौ, अमरः २पीतदण्डोत्पले रत्नमाला।

गोवर न० गोषु व्रियते वृ—बा० अप्। "गोष्ठान्तर्गोखुरक्षुण्णशुष्कचूर्णितगोमयम्। गोवरं तत्समाख्यातं वरिष्ठं रससाधने" भावप्र० उक्ते शुष्कगोमयचूर्णे (गेटा)

गोवर्द्धन न० वृध—णिच् भावे ल्युट् ६त०। १गवां वर्द्धने। करणे ल्युट्। २गिरियज्ञभेदे तत्प्रकारो गोयज्ञशब्दे दृश्यः वृधि—णिच्—कर्त्तरि ल्यु ६त०। ३वृन्दावनस्थे पर्व्वतभेदे पु० तस्य पूजाकालो हरिभक्तिविलासे १६वि० उक्तो यथा "प्रातर्गोवर्द्धनं पूज्य द्यूतञ्चैव समाचरेत्। भूषणीयास्तथा गावः पूज्याश्च दोहवाहनाः। श्रीकृष्णदासवर्य्योऽयं श्रीगोवर्द्धनभूधरः। शुक्लप्रतिपदि प्रातः कार्त्तिकेऽर्च्च्योऽत्र वैष्णवैः"। "प्रातर्गोवर्द्धनं पूज्य रात्रौ जागरणं चरेत्" इति क्वचित् पाठः। तस्मात्तदिदं कर्म गोवर्द्धनप्राधान्येन गोप्रधान्येन च ख्यातमप्येकमेव ज्ञेयम्। तत्र दिननिर्णयमाह देवलः "प्रतिपद्दर्शसंयोगे क्रीडनैस्तु गवां मतम्। परविद्धान्तु यः कुर्य्यात् पुत्त्रदारधनक्षयः"। निर्णयामृतधृतं पुराणान्तरवचनम् "या कुहुः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप!। पूजामात्रेण वर्द्धन्ते प्रजा गावो महीपते!। ततः प्रातर्गोवर्द्धनं पूज्येति पूर्व्वाह्णतात्पर्य्यकं द्वितीयासर्गस्तु सर्व्वथा निषिद्धः तद्यथा "नन्दायां दर्शने रक्षाबलिदानदशासु च। भद्रायां गोकुलक्रीड़ा देशनाशाय जायते"। पुराणसमुच्चये तु सम्भावितचन्द्रोदयो द्वितीयासंयोग एव निषिध्यते "गवां क्रीडा दिने यत्र रात्रौ दृश्येत चन्द्रमाः। सोमोराजा पशून् हन्ति सुरभी पूजकांस्तथा"। तदुदयसम्भावनञ्च निर्णयामृते निर्णीतं यथा "प्रतिपद्यापराह्णिकत्रिमुहूर्त्तव्यापिन्यां द्वितीयायां चन्द्रदर्शनं सम्भाव्यते तदुक्तमग्न्याधानविषये वृद्धशातातपेन" द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद्यापराह्णिकी। अग्न्याधानञ्चतुर्द्दश्यां परतः सोमदर्शनादिति"। अपराह्णश्च पञ्चधा विभक्तस्याह्नस्तुर्य्यो भागः। ततश्च यत्र प्रतिपदि पराह्णत्रिमुहूर्त्तव्यापिनी द्वितीया तत्र चन्द्रदर्शनसम्भावनमिति। अन्यदा तूत्तरैव प्रतिपत्तत्र गृहीता तथैवोक्तं पुराणसमुच्चये "वर्द्धमानतिथौ नन्दा यदा सार्द्धत्रियामिका। द्वितीया वृद्धिगामित्वादुत्तरा तत्र चोच्यते"। किञ्च। यदा पूर्णप्रतिपत् परत्र निष्क्रामति तदाप्युत्तरैव कार्य्या यथोक्तं भविष्योत्तरे "यथा द्वादशभिर्मासैर्मासो वृद्धो मलिम्लुचः। तथैवाहोरात्रवृद्धा तिथिः प्रोक्ता मलिम्लुचः। यथा मलिम्लुचः पूर्वस्त्याज्योग्राह्यस्तथा परः। त्याज्या तिथिस्तथा पूर्वा ग्राह्या चैव तथोत्तरेति" निर्णयामृतमतम् किन्तु वञ्जुलीन्यायेन पूर्व्वैव मन्तुं शक्यते। तद्वदत्रापि देवलादिवचनप्रामाण्यमस्तीति। अथ गोवर्द्धनपूजाविधिः। तत्रैव पाद्मे "मथुरायास्तथान्यत्र कृत्वा गोवर्द्धनं गिरिम्। गोमयेन महास्थूलं तत्र पूज्यो गिरिर्यथा। मथुरायां तथा साक्षात् कृत्वा चैव प्रदक्षिणम्। वैष्णवं धाम संप्राप्य

मोदते हरिसन्निधौ”। पूजामन्त्रः। “गोवर्द्धन! धराधार! गोकुलत्राणकारक!। विष्णुबाहुकृतोच्छ्रायो गवां कोटिप्रदो भव” गोपूजामन्त्रः स्कान्दे तत्रैव “लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता। घृतं वहति यज्ञार्थं यमपाशं व्यपोहतु। अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः। गावो मे पार्श्वतः सन्तु गवां मध्ये वसाम्यहम्”। अथ तत्र गोक्रीड़ा तत्रैव “क्रोधापयेद्भावयेच्च गोमहिष्यादिकं ततः। वृषान् कर्षापयेद्गोपैरुक्तिप्रत्युक्तिवादनात्”। पाद्मे च तत्रैव “महिषादिस्तथा मया क्रीडनं वारणन्तथा”। तन्माहात्म्यञ्च तत्रैव “एवं गोवर्द्धनो गावश्च पूजनीया विधानतः। गोवर्द्धनमखोरस्यः कृष्णसन्तोषकारकः”। “गोवर्द्धनस्याकृतिरन्वकारि” माघः।

गोवर्द्धनधर पु० गोवर्द्धनं वृन्दावनस्थपर्वतभेदं धरति धर–अच् ६त०। श्रीकृष्णे नन्दनन्दने तस्य तद्धारणकथा हरि० ७५ अ० यथा “गवां तत् कदनं दृष्ट्वा दुर्दिनागमजं महत्। गोपांश्चासन्ननिधनान् कृष्णः कोपं समादधे। स चिन्तयित्वा संरब्धो दृष्टोपायो मयेति च। आत्मानमात्मना वाक्यमिदमूचे प्रियंवदः। अद्याहमिममुत्पाट्य सकाननवनं गिरिम्। कल्पयेयं गवां स्थानं वर्षत्राणाय दुर्द्धरम्। अयं धृतो मया शैलः पृथ्वीगृहमिवापरम्। त्रास्यन्ते सव्रजा गावो मद्वश्याश्च भविष्यन्ति। एवं सञ्चिन्तयित्वा तु कृष्णः सत्यपराक्रमः। बाहोर्बलं दर्शयिष्यन् समीपे तं महीधरम्। दोर्भ्यामुत्पाटयामास कृष्णो गिरिरिवापरः। स धृतः सङ्गतो मेघैर्गिरिः सव्येन पाणिना। गृहभावङ्गतस्तत्र गृहाकारेण वर्ष्मणा”। “धृतं गोवर्द्धनं दृष्ट्वा परित्रातञ्च गोकुलम्। कृष्णस्य दर्शनं शक्रो रोचयामास विस्मितः” हरि० ७६ अ०।

गोवर्द्धनधारिन् पु० गोवर्द्धनं नगं धारयति धारि–णिनि। नन्दनन्दने श्रीकृष्णे।

गोवशा स्त्री वशा बन्ध्या गौः जात्या समासे परनि०। [वन्ध्यायां गवि।

गोवाट न० ६त०। गोशालायां गोष्ठे “सार्गलद्वारगोवाटमध्ये गोस्थानसङ्कुलम्” हरिवं० ६१। “गोवाटेषु च ये वृक्षाः परिवृत्तार्गलेषु च। सर्वे गोष्ठाग्निषु गताः चयमच्चयवर्चसः” हरिवं० ६५ अ०।

गोवास पु० वस आधारे घञ्। ६त०। गवां वासस्थाने गोष्ठे “निवेशनमथा जग्मुर्जरासन्धस्य धीमतः। गोवासमिव वीक्षन्तः सिंहा हैमवता यथा” भा० स० २० अ०।

गोवासदासन पु० प्राच्ये देशभेदे तत्र भवः “एङ् प्राचां देशे” पा० एङादेर्वृद्धसंज्ञत्वात् छ। गोवासदासनीय तत्र भवे त्रि० तद्राजे पु० “गोवासदासनीयानां वशातीनाञ्च भारत!। प्राच्यानां वाटधानानां भोजानाञ्चाभिमानिनाम्” भा० व० २३ अ०।

गोवासन पु० गां वासयति वस–णिच्–ल्यु ६त०। गवां वासयितरि ब्राह्मणभेदे। “गोवासना ब्राह्मणाश्च दासनीयाश्च सर्वतः। प्रीत्यर्थं ते महाराज। धर्मराज्ञो महात्मनः” भा० स० ५१ अ०।

गोविकर्त्त पु० गां विकृन्तति वि+कृत–अण् उप० स०। १गोघातके २कर्षके हालिके च। “रौद्रीयजमानस्याच्छावापगोविकर्त्तगृहेभ्यो गवेधुकाम्” कात्या० श्रौ० १५।३।१२। अप्रहतां गां भूमिं विकृन्तति गोविकर्त्तः कर्षकः गोहिंसको व्याधो वा। “अच्छावापस्य गृहेभ्यो गोविकर्त्तस्य च गवेधुकां सम्भृत्य” शत० ब्रा० ५।३।१।१०। “गोविकर्त्तः मृगयासहायभूतो गोहिंसको व्याधः” भा०।

गोविकर्त्तृ पु० त्रि० गां विकृन्तति वि+कृत–तृच् ६त०। पाकाद्यर्थं गोघातके। “आरालिको गोविकर्त्ता सूपकर्त्ता नियोधकः। आसं युधिष्ठिरस्याहम्” भा० वि० २ अ०। “नियोधकः बाहुयुद्धकारी।

गोवितत पु० गावो वितता अत्र। गोभूयिष्ठे अश्वमेधयज्ञे “याजयामास तं कण्वो विधिवद्भूरिदक्षिणम्। श्रीमान् गोविततं नाम वाजिमेधमवाप सः” भा० आ० ७४ अ०। गोविनतोऽप्यत्र। “गोविनतेन शतानीकः शत० ब्रा० १३।५।४।१८। “आदाय सत्त्वा दशमास्यमश्वं शतानीको गोविनतेन” शत० ब्रा० १३।५।४।२। “गोविनतो नाम वक्ष्यमाणस्तोमविशेषोऽश्वमेधः” भा०। तत्स्तोमभेदाः “चतुर्विंशा पवमानाः, त्रिवृदभ्यावर्तं चतुश्चत्वारिंशाः पवमाना एकविंशान्याज्यानि त्रिणवान्युक्थान्येकविंशानि पृष्ठानि षट्त्रिंशाः पवमानास्त्रयस्त्रिंशमभ्यावर्तमग्निष्टोमसामादेकविंशान्युक्थान्येकविंशः षोडशी पञ्चदशी रात्रिस्त्रिवृत्सन्धिः” ता० ब्रा० उक्ताः।

गोविदांपति पु० गां वेदवाणीं विदन्ति गोविदः वेदज्ञास्तेषां पतिः अलुक्स०। परमेश्वरे “अनिरुद्धः सुरानन्दो गोविन्दो गोविदांपतिः” विष्णु स०।

गोविन्द पु० गां वेदमयीं वाणीं गां भुवं धेनुं स्वर्गं वा विन्दति "गवादिषु संज्ञायाम्" पा० श, ६त०। विष्णौ वराहरूपेण भुव ऐश्वर्य्यप्राप्तेः इन्द्रेण स्वर्गस्य निवेदनात् मत्स्यरूपेण वेदस्योद्धारणात् गोभिर्वेदान्तवाक्यैः विद्यते इति वा तस्य तथात्वम् "गोभिरेव यतो वेद्यो गोविन्दः समुदाहृतः" विष्णु सहस्र० भाष्यधृतवाक्यम्" "नष्टां तु धरणीं पूर्व्वमविन्दत् यत् गुहागताम्। गोविन्द इति तेनाहं देवैर्वाग्भिरभिष्टुतः" भा० शा० ३४४ अ०। "गौरेषा भवतो वाणी तां च वेदयते भवान्। गोविन्दस्तु ततोदेवमुनिभिः कथ्यते भवान्।" तद्भाष्यधृतहरिव०वाक्यम्। "अहं किलेन्द्रो देवानां त्वं गवामिन्द्रतां गतः। गोविन्द इति लोकास्त्वां स्तोष्यन्ति भुवि शाश्वतम्" हरिव० ७६ अ०। गोभिश्च गोविन्दस्याभिषेककथा हरिव० ७६ अ० यथा "ततः शक्रस्तु तान् दृष्ट्वा घटान् दिव्यपयोधरान्। अभिषेकेण गोविन्दं योजयामास योगवित्। दृष्ट्वाभिषेच्यमानं च गावस्तम् सह यूथपैः। स्तनैः प्रस्नवसंयुक्तैः सिषिचुः कृष्णमव्ययम्।" अभिषिक्तं तु तं गोभिः शक्रो गोविन्दमव्ययम्" इति च।

गोविन्दद्वादशी स्त्री गोविन्दप्रिया द्वादशी। फाल्गुनशुक्लद्वादश्याम् तत्स्वरूपविधानादि ब्रह्म पु० यथा "फाल्गुनामलपक्षे तु पुष्यर्क्षे द्वादशी यदि। गोविन्दद्वादशी नाम महापातकनाशिनी। तस्यामुपोष्य विधिवन्नरः संक्षीणकल्मषः। प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्तिदुर्लभामिति"। "आमर्दकी द्वादशीति लोके ख्यातेयमेव हि। यत्र आमर्द्दकीपूजा व्रतमस्यां विशेषतः"। तदुक्तं ब्राह्मे पापनाशिनीमाहात्म्य प्रसङ्गे "फाल्गुने तु विशेषेण विशेषः कथिता नृप! आमर्दक्याव्रतं पुण्यं विष्णुलोकपदं नृणाम्"। प्रभासखण्डे च देवीमहेश संवादे "फाल्गुनस्य सिते पक्षे एकादश्यामुपोषितः। स्नात्वा नद्यां तडागे वा वाप्यां कूपे गृहेऽपि वा। गत्वा गिरौ वने वापि यत्र सा प्राप्यते शिवा। क्षीरोदे मथ्यमाने तु यदा वृक्षः समुत्थितः। आमर्दश्चैव दैत्यानां तेन साऽऽमर्दकी स्मृता। शिवा लक्ष्मीः स्मृता वृक्षः सेव्यते सुरसत्तमैः। देवैर्ब्रह्मादिभिः सर्व्वैश्चोऽसौ वैष्णवः स्मृतः। तत्र गत्वा हरिः पूज्यो वृक्षमूलेऽथ वा शिवा। पूजया पुष्पैः शुभैरात्रौ कार्य्यं जागरणं हरेः। करकं जलपूर्णन्तु कर्त्तव्यं पात्रसंयुतम्। हविष्याच्च तु कर्त्तव्यं दीपः कार्य्यो विधानतः। एवं जागरणं कार्य्यं कथाश्रवणतत्परैः। मुच्यन्ते देहिनः पापैः कलिजैः कायसम्भवैः। देहान्ते च नराः सर्वे पूज्यन्ते हरिमन्दिरे"।

गोविष् स्त्री ६त०। गोमये अमरः।

गोविषाण न० ६त०। गोः शृङ्गे (सिँग्) "अनर्थकमनायुष्यं गोविषाणस्य भक्षणम्। दन्ताश्च परिमृज्यन्ते रसश्च न च लभ्यते" भा० शा० १४० अ०। "नैपालं वा गोविषाणोद्भवं वा" सुश्रुतः। गोविषाणं साधनतयाऽस्त्यस्य ठन्। गोविषाणिक गोविषाणनिर्मिते वाद्यभेदे पु०। "पटहान् झर्झरांश्चैव क्रकचान् गोविषाणिकान्" भा० शल्य० ४७ अ०।

गोविष्ठा स्त्री ६त०। गोमये राजनि०।

गोवीथि स्त्री गगनस्थे नक्षत्रभेदत्रयरूपे मार्गभेदे। "नागगजैरावतवृषभगोजरद्गवमृगाजदहनाख्याः। अश्विन्याद्याः कैश्चित्त्रिभाः क्रमाद्वीथयः कथिताः"। "पैतामहात् त्रिभास्तिस्रो गोवीथ्यामश्विन्यः पौष्णं द्वे चापि भद्रपदे" वृ०स० ६अ०।

गोवीर्य्य न० ६त०। गवां वीर्य्ये "भृतावनिश्चितायां तु दशमं भागमाप्नुयुः। लाभगोवीर्य्यशस्यानां वणिग्गोपकृषीवलाः" नारद स०।

गोवृन्द न० ६त०। गोसमूहे हला०।

गोवृन्दारक न० गौर्वृन्दारकमिव उपमितसमासे व्याघ्रादेराकृतिगणत्वेन सिद्धेऽपि "वृन्दारकनागकुञ्जरैः पूज्यमानम्" पा० सामान्यप्रयोगेऽपि अस्य समासार्थं पुनर्ग्रहणमिति सि० कौ०। श्रेष्ठे गवि।

गोवृष पु० गवि वर्षति रेतः वृष–क। श्रेष्ठे वृषे। "मणिः सूत्र इव प्रोतो नस्योत इव गोवृषः" भा० व० २०अ०। "गोवृषं वत्सकं वापि यथेच्छं विनिवेदयेत्" आ०त० भविष्यपु०। गोवृषं श्रेष्ठवृषम्" रत्नाकरः। "भगवान् गोवृषध्वजः" भा० अनु० ८४अ०। "ग्राम्याणां गोवृषश्चापि भवां लोकप्रपूजितः" भा० आनु० १४अ०। "मृगाणामथ शार्दूलं गोवृषन्तु गवामपि" हरिवं०४अ०। गौश्च वृषश्च तौ साहचर्य्यनास्त्यत्र अच्। सामान्यविशेषद्योतके गोवलीवर्द्दन्याये. गोवलीवर्दन्यायोऽप्यत्र

गोव्याघ्र न० गौश्च व्याघ्रश्च सदाविरोधित्वात् समाहा०द्व०। गोव्याघ्रसमाहारे।

गोव्याधिन पु० गोत्रप्रवर्त्तके ऋषिभेदे प्रवराध्याये मूलं दृश्यम्।

गोव्रज पु० ६त०। गोसमूहे। गावो व्रजन्त्यत्र व्रज–आधारे

क। २गोगतिस्थाने ३गोष्ठे च पु० “न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे” “नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा”। ‘कृतवापनो निवसेद् ग्रामान्ते गोव्रजेऽपि वा” मनुः।

गोव्रत न० गोहत्यानिमित्तं गोषु व्रतम्। १गोहत्यानिमित्ते गोषु व्रतभेदे तच्च व्रतं विष्णुगोक्तं यथा।
“मासमेकं कृतवापनो गवानुगमनं कुर्य्यात् आसीनास्वासीत स्थितासु स्थितः स्यात् अवसन्नाश्चोद्धरेत् भयेभ्यश्च रक्षेत् तासां शीतादित्राणमकृत्वा नात्मनः कुर्य्यात् गोमूत्रेण स्नायात् गोरसैश्च वर्त्तेत एतद् गोव्रतं गोवधे कुर्य्यात्” पराशरस्तु सापवादं तत्र विशेषमाह “गवां संरक्षणार्थाय न दुष्येद्रोधबन्धयोः। तद्वधन्तु न तं विद्यात् कामाकामकृतन्तथा। अङ्गुष्ठमात्रस्थूलोवा बाहुमात्रः प्रमाणतः। आर्द्रस्तु सपलाशश्च दण्डइत्यभिधीयते। दण्डादूर्द्धं यदन्येन प्रहरेद्वा निपातयेत्। प्रायश्चित्तं चरेत् प्रोक्तं द्विगुणं गोव्रतञ्चरेत्। रोधवन्धनयोक्त्राणि घातनञ्च चतुर्विधम्। एकपादञ्चरेद्रोधे द्विपादं बन्धने चरेत्। योक्त्रेषु पादहीनं स्याच्चरेत् सर्वं निपातने। गोचारे च गृहे वापि दुर्गेष्वपि समेष्वपि। नदीष्वपि समुद्रेषु खातेऽप्यथ दरीमुखे। दग्धदेशे स्थिताः गावस्तम्भनाद्रोध उच्यते। योक्त्रदामकडोरैश्च घण्टाभरणभूषणैः। गृहे वापि वने वापि बद्धा स्याद्गौर्मृता यदि। तदेव बन्धनं विद्यात् कामाकामकृतञ्च तत्। हलखे शकटे पङ्क्तौ भारे वा पीडितोनरैः। गोपतिर्मृत्युमाप्नोति योक्त्रो भवति तद्वधः। मत्तः प्रमत्तउन्मत्तश्चेतनोवाप्यचेतनः। कामाकामकृतक्रोधाद्दण्डैर्हन्यादथोपलैः। प्रहता वा मृता वापि तद्धि हेतुर्निपातने। मूर्च्छितः पतितोवापि दण्डेनाभिहतः स तु। उत्थितस्तु यदा गच्छेत् पञ्च सप्त दशैव वा (पदानि)। ग्रासं वा यदि गृह्णीयात्तोयं वापि पिबेद् यदि। पूर्वव्याध्युपसृष्टश्चेत् प्रायश्चित्तं न विद्यते। पिण्डस्थे पादमेकन्तु द्वौ पादौ गर्भसम्मिते। पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनम्। पादेऽङ्गरोमवपनं द्विपादे श्मश्रुणोऽपि च। त्रिपादे तु शिखावर्जं सशिखन्तु निपातने। पादे वस्त्रयुगञ्चैव द्विपादे कांस्यभाजनम्। पादोने गोवृषं दद्याच्चतुर्थे गोद्वयं स्मृतम्। निष्पन्नसर्वगात्रन्तु दृश्यते वा सचेतनम्। अङ्गप्रत्यङ्गसम्पन्ने द्विगुणं गोव्रतं चरेत्। पाषाणेनैव दण्डेन गावोयेनाभिघातिताः। शृङ्गभङ्गे चरेत् पादं द्वौ पादौ तेन पातने। लाङ्गूले कृच्छ्रपादन्तु द्वौ पादावस्थिभञ्जने। त्रिपादञ्चैव कर्णे तु चरेत् सर्वं निपातने। शृङ्गभङ्गेऽस्थिभङ्गे च कटिभङ्गे तथैव च। यदि जीवति षण्मासान् प्रायश्चित्तं न विद्यते। व्रणभङ्गे च कर्त्तव्यः स्नेहाभ्यङ्गस्तु पाणिना। यवसश्चापहर्त्तव्योयावद्दृढबलोभवेत्। यावत्सम्पूर्णसर्वाङ्गस्तावत्तं पोषयेन्नरः। गामेवं ब्राह्मणस्याग्रे नमस्कृत्य विसर्जयेत्। यद्यसम्पूर्णसर्वाङ्गोहीनदेहोभवेत्तदा। गोघातकस्य तस्यार्द्धं प्रायश्चित्तं विनिर्द्दिशेत्। काष्ठलोष्ट्रकपाषाणैः शस्त्रेणोपहतो बलात्। व्यापादयति यो गान्तु तस्य शुद्धिं विनिर्दिशेत्। चरेत् सान्तपनं काष्ठे, प्राजापत्यन्तु लोष्ट्रके। तप्तकृच्छ्रन्तु पाषाणे शस्त्रे चैवातिकृच्छ्रकम्। पञ्च सान्तपने गावः प्राजापत्ये तथा त्रयः। तप्तकृच्छ्रे भवन्त्यष्टावतिकृच्छ्रे त्रयोदश। प्रमापणे प्राणभृतां दद्यात्तत्प्रतिरूपकम्। तस्यानुरूपं मूल्यं वा दद्यादित्यब्रवीन्मनुः। अन्यत्राङ्कनलक्ष्मभ्यां वाहने दाहने तथा। सायं संयमनार्थन्तु न दुष्येद्रोधबन्धयोः। अतिदाहेऽतिवाहे च नासिकाभेदने तथा। नदीपर्वतसञ्चारे प्रायश्चित्तं विनिर्द्दिशेत्। अतिदाहे चरेत् पादं द्वौ पादौ वाहने चरेत्। नासिके पादहीनन्तु चरेत् सर्वं निपातने। दहनाच्च विपद्येत अबद्धोवापि यन्त्रितः। उक्तं पराशरेणैव ह्येकपादं यथाविधि। रोधबन्धनयोक्त्राश्च भारः प्रहरणं तथा। दुर्गप्रतरयोक्त्राश्च निमित्तानि वधस्य षट्। बन्धपाशसुगुप्ताङ्गोम्रियते यदि गोपशुः। भवने तस्य नाशस्य पापे कृच्छ्रार्द्धमर्हति। न नारिकेलैर्नच शाणवालैर्नचापि मौञ्जैर्नच वज्रशृङ्खलैः। एतैस्तु गावोन निबन्धनीयाबद्धा तु तिष्ठेत् परशुं गृहीत्वा। कुशैः काशैश्च बध्नीयाद्गोपशुं दक्षिणामुखम्। पाशलग्नाग्निदग्धेषु प्रायश्चित्तं न विद्यते। यदि तत्र भवेत् मृत्युः प्रायश्चित्तं कथं भवेत्?। जपित्वा पावनीं देवीं मुच्यते तत्र किल्विषात्। प्रेरयन् कूपवापीषु वृक्षच्छेदेषु पातयन्। गवाशनेषु विक्रीणंस्ततः प्राप्नोति गोवधम्। आराधितस्तु यः कश्चिद्भिन्नकक्षोयदा भवेत्। श्रवणं हृदयं भिन्नं मग्नोवा कूपसङ्कटे। कूपादुत्क्रमणे चैव भग्नोवा ग्रीवापादयोः। स एव म्रियते, तत्र त्रीन् पादांस्तु समाचरेत्। कूपखाते तटीबन्धे नदीबन्धे प्रपासु च। पानीयेषु विपन्नानां प्राय-

श्चित्तं न विद्यते। कूपखाते तटीखाते दीर्घखाते तथैव च। अन्येषु धर्मखातेषु प्रायश्चित्तं न विद्यते। वेश्मद्वार निवासेषु योनरः खातमिच्छति। स्वकार्य्ये गृहखातेषु प्रायश्चित्तं विनिर्द्दिशेत्। निशि बन्धनिरुद्धेषु सर्पव्याघ्रहतेषु च। अग्निविद्युद्विपन्नानां प्रायश्चित्तं न विद्यते। ग्रामघाते शरौघेण वेश्मभङ्गनिपातने। अतिवृष्टिहतानाञ्च प्रायश्चित्तं न विद्यते। संग्रामे प्रहतानाञ्च ये दग्धा वेश्मकेषु च। दावाग्नौ ग्रामघाते वा प्रायश्चित्तं न विद्यते। यन्त्रिता गौश्चिकित्सार्थं मूढगर्भविमोचने। यत्ने कृते विपद्येत प्रायश्चित्तं न विद्यते। व्यापन्नानां बहूनाञ्च बन्धने रोधनेऽपि वा। भिषङ्मिथ्योपचारे च प्रायश्चित्तं विनिर्द्दिशेत्। गोवृषाणां विपत्तौ च यावन्तः प्रेक्षकाजनाः। न वारयन्ति तां तेषां सर्वेषां पातकं भवेत्। एकोहतोयैर्बहुभिः समस्तैर्न ज्ञायते कस्य हतोऽभिघातात्। दिव्येन तेषामुपलभ्य हन्ता निवर्त्तनीयोनृपसन्नियुक्तैः। एका चेद्बहुभिः कापि दैवाद्व्यापादिता भवेत्। पादं पादञ्च हत्यायाश्चरेयुस्ते पृथक् पृथक्। हतेषु रुधिरं दृश्यं व्याधिग्रस्तः कृशोभवेत्। नाना भवति दृष्टेषु एवमन्वेषणं भवेत्। मनुना चैवमेकेन सर्वशास्त्राणि जानता। प्रायश्चित्तन्तु तेनोक्तं गोषु चान्द्रायणं चरेत्। केशानां रक्षणार्थाय द्विगुणं गोव्रतं चरेत्। द्विगुणे व्रतआदिष्टे दक्षिणा द्विगुणा भवेत्। राजा वा राजपुत्रोवा ब्राह्मणोवा बहुश्रुतः। अकृत्वा वपनं तस्य प्रायश्चित्तं विनिर्द्दिशेत्। यस्य न द्विगुणं दानं केशश्च परिरक्षितः। तत्पापं तस्य तिष्ठेत वक्ता च नरकं व्रजेत्। यत्किञ्चित् क्रियते पापं सर्व्वं केशेषु तिष्ठति। सर्वान् केशान् समुद्धृत्य च्छेदयेदङ्गुलिद्वयम्। एवं नारीकुमारीणां शिरसोमुण्डनं स्मृतम्। न स्त्रियाः केशवपनं न दूरे शयनासनम्। न च गोष्ठे वसेद्रात्रौ न दिवा गाअनुव्रजेत्। नदीषु सङ्गमे चैव अरण्येषु विशेषतः। न स्त्रीणामजिनं वा सोव्रतमेवं समाचरेत्। त्रिसन्ध्यं स्नानमित्युक्तं सुराणामर्च्चनं तथा। बन्धुमध्ये व्रतं तासां कृच्छ्रचान्द्रायणादिकम्। गृहेषु नियतं तिष्ठेच्छुचिर्नियममाचरेत्। इह यो गोव्रतं कृत्वा प्रच्छादयितुमिच्छति। स याति नरकं घोरं कालसूत्रमसंशयम्। विमुक्तोनरकात्तस्मान्मर्त्त्यलोके प्रजायते। क्लीवोदुःखी च कुष्ठी च सप्त जन्मानि वै नरः। तस्मात् प्रकाशयेत् पापं स्वधर्मं सततं चरेत्। स्त्रीबालभृत्यगोविप्रेष्वतिकोपं विवर्जयेत्"। अधिकं गोहत्याशब्दे दृश्यम्। गोहितं व्रतम्। २गोसेवारूपे व्रते गोशब्दे तत्परिचर्य्याप्रकरणे उदा०तत्प्रकारस्य तत्र दृश्यः।

गोशकृत् न० ६त०। गोमये जटा०। "उदकुम्भं सुमनसो गोशकृन्मृत्तिकाः कुशान्। पयोघृतं वाऽऽमरणाद्गोशकृद्रसमेव वा" मनुः।

गोशर्य्य त्रि० शॄ—कर्त्तरि बा० यत् गौः शर्य्या शीर्य्या यस्य। शीर्णगौ शयौ" "याभिर्गोशर्य्यमावतम्" ऋ० ८।८।२०। "गोशर्य्यः शयुः" भा०।

गोशाल(ला) स्त्री न०। गवां शाला "विभाषा सेनेत्यादिना" वा क्लीवता। गवां शालायाम्। तत्रजातः एङादित्वेन प्राचां मते वृद्धसंज्ञत्वाच् छ, अन्यमते अण्, तस्य स्थानान्तगोशालेत्यादि पा० लुक्। गोशाल तत्र जाते त्रि०। स्त्रीत्वपक्षे तु न लुक्। गोशालीय गौशाल वा तत्र जाते त्रि० इति भेदः।

गोशीर्ष पु० गोः शीर्षमिव शीर्षं यस्य। १ऋषभपर्व्वते तस्य गोशीर्षाकारशृङ्गत्वात् तथात्वम्। स आकरत्वेनास्त्यस्य अच्। २चन्दनभेदे। गोशीर्षोद्युत्पत्तिकथा रामा० कि० का० ४१स० ३६।४०श्लो०। "तस्य देशमतिक्रम्य महानृषभसंस्थितिः। सर्व्वरत्नमयः श्रीमानृषभो नाम पर्व्वतः। दिव्यगोशीर्षकं पद्मकं च हरिश्यामं च चन्दनम्। दिव्यमुत्पद्यते तत्र तच्चैवाग्निसमप्रभम्"। तदाकारे ३अस्त्रभेदे च "अयोगुडैर्भिन्दिपालैर्गोशीर्षोलुखलैरपि" भा० द्रो० १७६ अ०। ६त०। ४गोमुण्डे न०।

गोशीर्षक पु० गोः शीर्षमिव कायति कै—क। १द्रोणपुष्पीवृक्षे रत्नमा० स्वार्थे क। २चन्दनभेदे गोशीर्षशब्दे उदा०।

गोशृङ्ग पु० गोः शृङ्गमिव शृङ्गमस्य। ऋषिभेदे "हिमवद्वनमध्यस्थो गोशृङ्ग ऋषिसत्तमः" "गोशृङ्गस्य ऋषेस्तत्र दृश्यते तथाश्रमम्" स्क० पु० प्रभा० ख०। २दक्षिणदेशस्थे पर्व्वतभेदे च। "तथैव सहदेवोऽपि प्रययौ दक्षिणां दिशम्" इत्युपक्रमे "निषादभूमिं गोशृङ्गं पर्व्वतप्रवरं तथा। तरसैवाजयच्छ्रीमान्" भा० स० १०अ०। ६त०। ३गोविषाणे न०। तदाकारोऽस्त्यस्य अच्। ४वर्व्वर वृक्षे पु० राजनि०।

गोश्रुति पु० व्याघ्रपद्गोत्रापत्ये ऋषिभेदे "तद्धैतत् सत्यकामोजाबालो गोश्रुतये वैयाघ्रपद्यायोवाच" छा० उ०।

गोश्व पु० द्वि० व०। इतरे० द्व० परूपम् "गवाश्वप्रभृतीनि च" पा० "यथोच्चारितानि तथैव साधूनि स्युः" सि०

कौ० । पक्षे नैकवद्भावः न क्लीवता च । गवि अश्वे च । पक्षे एकवद्भावः अवङ् च । तत्रार्थे न० ।

गोष(स)खि पु०गौः सखाऽस्य वेदे वा षत्वम् । १गोसहायके "स्तोता मे गोषखा स्यात्" ऋ० ८।१४।१। "यस्मिन्निन्द्रः सोमं पिबति गोसखायम्" ऋ० ५।२७।४। इत० अच् समा० न षत्वम् । २गोः सहाये

गोषड्गव न० गवां षट्कम् गो+षड्गवच् । गोषट्के एवं छागषड्गवादयश्छागादिषट्के न० ।

गोषणि(सनि) त्रि० गां सनोति ददाति सन–दाने इन् सवनादिषु पाठात् न नित्यं षत्वम् किन्तु पूर्व्वपदात् वा षत्वम् । १गोदातरि "यस्ते अश्वसनिर्भक्षोयोगोसनिस्तस्य" यजु० ८।१२। पक्षे षत्वम् । "गोषणिं धियमश्वं वाजसासुत" ऋ० ६।५३।१०।

गोषद् त्रि०गवि वाचि सीदन्ति सद–क्विप् पूर्व्वपदात् षत्वम् । स्वजद्वाक्ये । गोषदितिशब्दोऽस्त्यत्राध्यायेऽनुवाके वा गोषदा० वुन् । गोषदक गोषच्छब्दयुक्ते अध्याये अनुवाके च पु० । अच् । गोषद तत्रार्थे त्रि० ।

गोषदादि पु० अध्यायानुवाकयोः "गोषदादिभ्यो वुन्" पा० मत्वर्थे वुन्प्रत्यय निमित्ते शब्दगणे । स च गणः पा०ग० सू० उक्तो यथा गोषद् इषेत्वा मातरिश्वन् देवस्यत्वा दैवीरापः कृष्णास्या खरेष्ठा देवीधियः रक्षोहण युञ्जान अञ्जन प्रभूत प्रतूर्त्त कृशानु गोषद" ।

गोषन् त्रि० गां सनोति सन–विच् इत० "सनोतेरनः" पा० नान्तस्य नित्यषत्वनिषेधेऽपि पूर्बपदात् वा षत्वम् । गोदातरि "शंसामि गोषणो नपात्" ऋ० ४।३२।२२ ।

गोषा त्रि० गां सनोति सन–विट् ङा । सनोतेरनः" पा० षत्वम् । गोदातरि "गोषा इन्द्रीन्षसामसि" सि० कौ० धृता श्रुतिः "इत्था गृणन्तो महिनस्य शर्म्मन् दिविष्याम पार्य्ये गोषतमाः" ऋ० ६।३३।५। अत्र "घरूपेत्यादि" पा० सू० गोषाशब्दस्य तमपि परे ह्रस्वः ।

गोषा(सा)ति स्त्री सो–भावे–क्तिन् ऊतियूतीत्यादिना नि०, सन–भावे क्तिन् ङा वा इत० षत्वम् । १गोलाभे २गोदाने च "गोषाता यस्य ते गिरः" ऋ० ८।८४।७। "गोषातौ गवां लाभे" भा० सप्तम्या डाच् एव सुत्तरत्र । गवां सातिर्लाभोऽस्य । ३लब्धगौ लब्धपशुके त्रि० "यत्र गोषाता धृषितेषु खादिषु" ऋ० १०।३८।१। गोषातौ लब्धपशुके" भा० ।

गोषादी स्त्री गां सादयति सद–णिच्–अण् उ० स० षत्वं गौरा० ङीष् । पक्षिभेदे । "गोषादी देवानां पत्नीभ्यः" यजु० २४।२४। ।

गोषेधा स्त्री गोरिव सेध उत्सेधोयस्याः पूर्बपदात् षत्वम् । दुर्लक्षणायां स्त्रियाम् । "विश्वपदीं इषदतीं गोषेधां विधमासुत" अथ० १।१८।४। [जुगोष्टे ।

गोष्ट संघाते भ्वा० आत्म० अक० सेट् । गोष्टते अगोष्टिष्ट ।

गोष्टोम पु० गोसंज्ञः स्तोमोऽत्र । उक्थसंस्थे बहुमन्त्रात्मके १स्तोमभेदे । २तदुपलक्षिते एकाहसाध्ये यागभेदे च "स एतान् स्तोमानपश्यत् ज्योतिर्गौरायुरितीमे वै लोका एते स्तोमा अयमेव ज्योतिरयम्मध्यमो गौरसावुत्तम आयुः" ता० ब्रा० ४।१।७।

"स पूर्व्वोक्तः प्रजापतिः एतान् स्तोमान् स्तोमशब्देन त्रिवृदादिस्तोमवन्त्यहानि लक्ष्यन्ते । तानि ज्योतिर्गौरायुरिति एतन्नामकान्यपश्यत् । तत्र ज्योतिरग्निष्टोमसंस्थः, गौरायुश्चैते उक्थसंस्थे० ज्योतिष इयं स्तोमकॢप्तिः । त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि पञ्चदशो माध्यन्दिनः पवमानः सप्तदशानि पृष्ठ्यानि सप्तदश आर्भव एकविंशोग्निष्टोमसामेति । अथ गोष्टोमस्य, पञ्चदशोबहिष्पवमानः त्रिवृदाज्यानि सप्तदशम्माध्यन्दिनं सवनमेकविंशं तृतीयसवनम् । अथायुष्टोमस्य त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशम्माध्यन्दिनं सवनमेकविंशं तृतीयसवनमिति । एते उक्ताः स्तोमा इमे लोका वै भूरादिकाः खलु, कः कतमोलोक इति बुभुत्सायामाह अयमेव लोकोज्योतिः, अयम्मध्यमोऽन्तरिक्षलोको वै असावुत्तमस्तृतीयः स्वर्लोक आयुः, स्तोमत्रयस्य लोकत्रयेण सह संख्यासाम्यात् तच्छब्दता एतैः त्रिभिः स्तोमैः साधनैस्त्रीन् लोकान् प्राजनयदिति शेषःअथैतान् विधत्ते" भा० ।

"यदेते स्तोमा भवन्तीमानेव लोकान् प्रजनयन्त्येषु लोकेषु प्रतितिष्ठन्ति" ता० ब्रा० ८ । "यदेषोऽतिरात्रो भवतीति वाक्यवदेतत्सर्वं व्याख्येयम् । अभिप्लवषडहस्योत्तरं त्र्यहं विधातुमाह" भा० "स एतन्त्र्यहं पुनः प्रायुङ्क्त तेन षड़हेन षट्कृतून् प्राजनयत्" ता०ब्रा०९ ।"स प्रजापतिरेतं पूर्व्वोक्तं त्र्यहं पुनः प्रयुक्तवान् । गौरायुर्ज्योतिरिति क्रमोऽत्रावगन्तव्यः । तथा चापस्तम्बः "ज्योतिष्टोममग्निष्टोमं रथन्तरसामानङ्गासुकथं बृहत्सामानमायुषसुक्थं रथन्तरसामानं ज्योतिष्टोमं बृहत्सामानमिति । तेन षडहेन षट् क्रतून् वसन्ता-

दीन् प्राजनयत् सृष्टवान् । अथार्थवादानुगुणयाय पूर्व्वविहितेन त्र्यहेन संयुज्य इममुत्तरं त्र्यहं विधत्ते" भा० । "तदेव षडहो भवति ऋतूनेव प्रजनयन्ति ऋतुषु प्रतितिष्ठन्ति" ता० ब्रा० १० ।

गोष्ठ न० गावस्तिष्ठन्त्यत्र घञर्थे क षत्वम् । गवां स्थाने अमरः । "गोष्ठेषु गोष्ठीकृतमण्डलासनान्" माघः । गोष्ठी बहुजनाः कर्त्तृतया त्यस्य अच् । २गोष्ठीकर्त्तव्ये श्राद्धभेदे न० "पित्र्ये स्वदितमित्येव वाच्यं गोष्ठे तु सुश्रुतम्" मनुः "गोष्ठे गोष्ठीश्राद्धे "गोष्ठ्यां शुद्ध्यर्थमष्टमम्" इति विश्वामित्रेण द्वादशविधश्राद्धगणनायां गोष्ठश्राद्धस्य विधानात्" कुल्लू० ।

गोष्ठपति पु० ६त० । गोः स्थानाध्यक्षे अमरः ।

गोष्ठश्व पु० गोष्ठे श्वा अचतुरेत्यादि अच् समा० । १गोष्ठस्थे शुनि तत्तुल्ये परहिंसके स्वगृहे स्थित्वा २परद्वेष्टरि च त्रिका० । षष्ठीसमासे तु न अच् समा० । गोष्ठश्वा इत्येव

गोष्ठागार न० ६त० । गोष्ठस्य सभाया बहुजनस्थानस्यागारम् । बहुजनागारे शब्दहारा० ।

गोष्ठाध्यक्ष पु० ६त० । गोष्ठपतौ ।

गोष्ठान न० गोः स्थानं वेदे पूर्वपदात् षत्वम् । १गवां स्थाने गोष्ठे । "व्रजं गच्छ गोष्ठानम्" यजु० १।२५ । लोके तु गोस्थानमित्येव । "गोष्ठं गोस्थानकम्" अमरः ।

गोष्ठा(पा)ष्टमी स्त्री "कार्त्तिके शुक्लपक्षे तु स्मृता गोष्ठा(पा)ष्टमी बुधैः । तद्दिने वासुदेवोऽभूत् गोपः पूर्वन्तु वत्सपः" इत्युक्तायामष्टम्याम् गोपाष्टमीशब्दे दृश्यम् ।

गोष्ठि स्त्री गावो वाग्विशेषास्तिष्ठन्त्यत्र स्था—बा० कि ६त० षत्वम् । १गोष्ठीशब्दार्थे २परस्परसंलापे च । "आलस्यं मदमोहौ च चापलं गोष्ठिरेव च । स्तब्धता चाभिमानित्वं तथाऽत्यागित्वमेव च । तएते सप्त दोषाः स्युः सदा विद्यार्थिनां मताः" भा० उ० १५६२ श्लो० ।

गोष्ठी स्त्री गावोऽनेकार्थवाचकास्तिष्ठन्ति अत्र स्था—घञर्थे क । ६त० अम्बाम्बेति षत्वम्" गौरा० ङीष् । १सभायां परिषदि । "तत्र गोष्ठीषु रथ्यासु सिद्धप्रव्रजितेषु च । भा० वि० ६ । २परस्परालापे "गोष्ठीसुखमनुभवन्तस्तिष्ठन्ति" हितो० । ३पोष्यवर्गे च" । "विषं गोष्ठी दरिद्रस्य" चाणक्यः । ४समूहे गोष्ठशब्दे उदा० । सभायाम् अस्य पुंस्त्वमपि । "सङ्कुक्रयान् पर्वतरुचिरोधान् गोष्ठान् हरीणां गिरिसेतुमालाः । भा० व० १७७ अ० ।

गोष्ठीपति पु० ६त० १बहुपोष्यवर्गपालके २सभापतौ च ।

गोष्ठेक्ष्वेडिन् पु० गोष्ठे क्ष्वेडते क्ष्विड—क्ते हे णिनि पात्रेसमि० नि० । प्रगल्भे । युक्तारोह्या० आद्युदात्ततास्य । एवं गोष्ठेगल्भ गोष्ठेपटु गोष्ठेपण्डितः गोष्ठेशूरः गोष्ठेविजित इत्येतेऽपि पात्रेसमिता नि० । सभाप्रगल्भे सभाकुशले । पूर्व्ववत् आद्युदात्तता चैषाम् ।

गोष्ठेशय पु० गोष्ठे गोस्थाने शेते शी—अच् अलुक् स० । गोव्रतार्थं गोष्ठशयनकारके । "पञ्चगव्यं पिबेद् गोघ्नो मासमासीत संयतः । गोष्ठेशयो गोऽनुगामी गोप्रदानेन शुध्यति" याज्ञ० ।

गोष्ठ्य त्रि० गोष्ठे भवः यत् । १गोष्ठे भवे । २रुद्रभेदे पु० । "नमोव्रज्याय च गोष्ठ्याय च" यजु० १६।४४ ।

गोष्पद न० गोः पदम्, गावः पद्यते यस्मिन् देशे वा "गोष्पदं सेवितासेवितप्रमाणेषु" पा० सेवितादौ सुट् । गोः पदजाते १गर्त्ते, २गोपदप्रमाणे च । ३गोभिः सेवितदेशे ४तदसेविते वनादौ च । "बाहुभ्यां सागरं तीर्त्त्वा लङ्घितुं गोष्पदं लघु" रामा०ल०६८स० । "भीष्मद्रोणार्णवं तीर्त्वा कर्णपाताल (वड़वानल) सम्भवम् । मा निमज्जस्व सगणः शल्यमासाद्य गोष्पदम्" भा० श० ७अ० । ५प्रभासक्षेत्रस्थे तीर्थभेदे । तत्स्थानादि स्क०पु० प्रभा० "इयं सरस्वती पुण्या सर्वदैव हि विद्यते । पञ्चस्रोताः प्रभासे तु दुष्प्रापा त्रिदशैरपि । तस्या यत्पञ्चमं स्रोतो न्यङ्कुमत्यास्तटानि च । तस्य मध्ये स्थितं तीर्थं गोष्पदेति च विश्रुतम्" "पापिनां मुक्तिदं तीर्थमाद्या रुद्र गया स्मृता । तदास्मिन् गोष्पदं नाम कलौ ख्यातं धरातले । यदा क्षीरोदमथनात् प्रसूता लोकमातरः । तदा देवि ! समन्तात्ता गतास्तीर्थसन्निधौ । पदं तत्र निमग्नं च नन्दिन्याश्च शिलातले । शिलां खुराङ्कितां दृष्ट्वा जानुदेशाङ्कितां तथा" इत्युपक्रमे देवान् प्रति नन्दिनीवाक्यम् । "इदं मम पदं देवाः ! शिलासंस्थं विराजते । गगनाङ्गणभूमिस्थं चन्द्रबिम्बमिवापरम् । अद्य प्रभृति भो देवा ! त्रैलोक्ये सचराचरे । गोष्पदं नाम विख्यातं लोके ख्यातिं गमिष्यति" ।

गोस पु० गां जलं स्यति सो—क । १बोले २उषःकाले ३विभाते मेदि० ।

गोसङ्ख्य पु० गाः संचष्टे सम्+चक्ष—अच् । गोपे । अमरः । "गोसङ्ख्य आसं कुरुपुङ्गवानाम्" । "तेषां गोसङ्ख्य आसं वै तन्त्रिपालेति मां विदुः" इति च भा० वि० १०अ० ।

गोसत्र पु० गोभिः कृतं सत्रम्। गवामयनाख्ये सत्रभेदे ''गावो वा एतत् सत्रमासत'' ता०ब्रा० ४,१,१, गवामयन शब्दे विवृतिः।

गोसदृक्ष पुंस्त्री गोः सदृक्षः। गोतुल्ये गवये हेम०। २जात्यादिना गोतुल्ये त्रि०। गोसदृशादयोऽपि तत्रार्थे।

गोसनि पु० गां सनोति सन–इण् इत० पूर्व्वपदात् वा षत्वे प्राप्ते सवना० न षत्वम्। गोदातरि गोषणिशब्दे उदा० दृश्यम्। ''गोसनिं वाचमुदेयम्'' अथ०३।२०।१०।

गोसम्प्रदाय त्रि० गां सम्प्रददाति सम्+प्र+दा–''आतोऽनुपसर्गे'' पा० अनुपसर्गइत्युक्तेः न कः किन्तु अण्। गोसंप्रदातरि।

गोसम्भवा स्त्री गोरिव सम्भवो लोमादिरूपाकारो यस्याः। १श्वेतदूर्व्वायां राजनि०। २गोजाते त्रि०।

गोसर्ग पु० गावःसृज्यन्तेऽत्र काले सृज–आधारे घञ्। गवां वनगमाय मोचन काले सूर्य्येण किरणानां त्यागकाले १प्रातःकाले ''गोसर्गे चार्द्धरात्रे च तथा मध्यन्दिनेषु च'' सुश्रु०। [ख्याते गोधाख्ये जन्तौ।

गोसर्प पुंस्त्री गोरिव चतुश्चरणवत्त्वात् सर्पः। (गोसाप)

गोसव पु० गौः सूयते हिंस्यतेऽत्र सू–हिंसायाम् आधारे अप् पूर्व्वपदात् वा न षत्वम्। गोसत्राख्ये यज्ञभेदे ''स्वर्जिता गोसवेन या'' हेमा० दा० लिङ्गपु०। तत्कर्त्तव्यता च कात्या० श्रौ० २२,११,२ सूत्रादौ उक्ता यथा ''ऋषभगोसवौ'' १सू० ''ऋषभोगोसवश्च क्रतू भवतः'' कर्कः ''पूर्वो राज्ञः'' २सू० ''पूर्वः ऋषभसंज्ञको राज्ञः'' कर्कः ''दक्षिणा ऋषभसहस्रं द्वादशं वा शतम्'' ५सू० ''विकल्पेन ऋषभसंज्ञक ऋषभाणां सहस्रं, द्वादशाधिकं शतं वा'' (दक्षिणा) कर्कः। ''उक्थ्यो गोसवोऽयुत दक्षिणः'' ६सू०। गोसवसंज्ञः क्रतुरुक्थसंस्थो भवति अयुतदक्षिणश्च' कर्कः। ''वशाप्रयज्ञ इत्येके'' ७सू० मन्यन्ते। ''सर्वेषामित्यपरे'' ८सू०। सराजानो विशो यं पुरस्कुर्वीरन् स एतेन यजेत'' ९सू०। ''राज्ञा सहिता विशः प्रजाः सर्वे पुरुषा यं पुरस्कुर्वीरन् मुख्यत्वेनाङ्गीकुर्वीरन् स गोसवेन यजेत''। ''आस्थण्डिलेऽभिषिच्यते'' १०सू०। ''प्रतिदुराहवनीयस्य दक्षिणतः'' ११सू०। ''स्थितः आगान्तुकत्वादन्ते। आहवनीयात् दक्षिणस्यां स्थण्डिले उपविष्टो यजमानः प्रतिदुहाधारोष्णेन दुग्धेनाभिषिच्यते ''संस्थपतिरित्येनं ब्रूयुः ''गोसवयाजिनं जनाः'' कर्कः। ''वैश्यस्तोम दक्षिणालिङ्गो मरुत्स्तोमोगणयज्ञो भ्रातृणां सखीनां वा १२सू०। वैश्यस्तोमदक्षिणायां यानि लिङ्गानि तान्यत्रापि भवन्ति'' कर्कः। गां स्वर्गं सुनोति सु–अच् षत्वम् ''दातुः स्वर्गदातरि'' ''तिलोऽसि सोमदैवत्यो गोसवो देवनिर्म्मितः'' तिलदानमन्त्रः।

गोशशस् पु० *गवि जले शशति शश–बा० असच् ७त०। वोले रायमुकुटः।

गोसहस्र न० गवां सहस्रं दातव्यतया यत्र। तुलापुरुषादिषोडशमहादानान्तर्गते पञ्चमे महादानभेदे ''अथातः संप्रवक्ष्यामि महादानानुकीर्त्तनम्''। ''यत्तत् षोडशधा प्रोक्तं वासुदेवेन भूतले'' इति चोपक्रम्य ''कल्पपादपदानञ्च गोसहस्रं च पञ्चमम्'' इत्युक्त्वा तद्दान प्रकारः हेमा० दा० मत्स्य पु० उक्तो यथा

''मत्स्य उवाच। अथातः संप्रवक्ष्यामि महादानमनुत्तमम्। गोसहस्रप्रदानाख्यं सर्वपापहरं परम्। पुण्यं तिथिमथासाद्य युगमन्वन्तरादिकम्। पयोव्रतस्त्रिरात्रं स्यादेकरात्रमथापि वा। लोकेशावाहनं कुर्य्यात् तुलापुरुषदानवत्। पुण्याहवाचनं कुर्य्याद्धोमः कार्य्यस्तथैव च। ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम्। वृषं लक्षणसंयुक्तं वेदिमध्येऽधिवासयेत्। गोसहस्राद्विनिष्कृष्य गवां दशकमेव''। पयोव्रतस्त्रिरात्रमिति दानदिनात् पूर्वं त्रिरात्रं पयोव्रतः स्यादित्यर्थः, अत्रादिशब्देन देशकाल–वृद्धिश्राद्ध–शिवादिपूजा–गुर्व्वृत्विग्वरण–मधुपर्कदान–कुण्डवेदिवितान–चक्रलेखनपताकादीनि मत्स्यपुराणोक्ततुलापुरुषदाने विहितानि गृह्यन्ते। वृषं लक्षणसंयुक्तं, वृषलक्षणानि, ''उन्नतस्कन्धककुदम् उज्ज्वलायतकम्बलम्'' इत्यादीनि वृषोत्सर्गप्रकरणे मत्स्यपुराणोक्तान्येव वेदितव्यानि, गोसहस्राद्विनिष्कृष्येति दशोत्तरगोसहस्रादिति वेदितव्यम्, अग्रे दशाधिकगोसहस्रविनियोगदर्शनात्। यद्यपि गवां दशकमित्यत्र गोमात्रप्रतीतिः तथापि उत्तरत्र ''ऋत्विग्भ्यो धेनुमेकैकां दशकाद्विनिवेदयेदिति'' धेनुसंशब्दनात्, पुराणान्तरे ''गोसहस्राद्विनिष्कृष्य सवत्सं दशकं गवामिति'' श्रवणाच्च धेनुदशकमेवाधिवासनीयम्। इतरत्र पुनर्नावश्यं धेनुरूपत्वादरः। ''गोसहस्रं बहिः कुर्य्याद्वस्त्रमाल्यविभूषितम्। सुवर्णशृङ्गाभरणं रौप्यपादसमन्वितम्। अन्तः प्रवेश्य दशकं वस्त्रमाल्यैस्तु पूजयेत्। सुवर्ण–घण्टिकायुक्तं ताम्रदोहनिकान्वितम्। सुवर्णतिलकोपेतं हेमपट्टैरलङ्कृतम्। कौशेयवस्त्रसंवीतं माल्यगन्ध-

समन्वितम् । हेमरत्नयुतैः शृङ्गैश्चामरैश्चापि शोभितम् । पादुकोपानहच्छत्रभाजनासनसंयुतम् । “दशसौवर्णिके शृङ्गे, खुराः, पञ्चपलास्तथा”। पञ्चाशत्पलमितोदोहनकः अन्यत्र तथाभिधानात् वणिक्कादौ सुवर्णशब्दोऽत्र षोडशमाषपरिमितहिरण्यवचनः, सकृदुच्चरितसुवर्णशब्दावगतपरिमाणपरित्यागानुपपत्तेः। पादुके काष्ठमय्यौ, चर्म्मकृते उपानहाविति भेदः । “गवां दशकमध्ये स्यात् काञ्चनो नन्दिकेश्वरः । कौशेयवस्त्रसंवीतो नानाभरणभूषितः। लवणद्रोणशिखरे-माल्येक्षुफलसंयुतः । कुर्य्यात् पलशतादूर्द्ध्वं सर्व्वमेतदशेषतः । शक्तितः फलसाहस्रत्रितयं यावदेव तु । गोशते वै दशांशेन सर्व्वमेतत् प्रकल्पयेत्” । लवणद्रोणशिखरे, लवणद्रोणोपरीत्यर्थः । नन्दिकेश्वरलक्षणं ललितविजयात् “ऊर्द्ध्वस्त्रिनेत्रो द्विभुजः सौम्यास्यो नन्दिकेश्वरः । वामे तु शूलभृद्धस्ते चाक्षमालासमन्वितः” इति ऊर्द्ध्व इति, अशयानानुपविष्ट इत्यर्थः । पलशतादूर्द्ध्वं पलसहस्रत्रितयं यावदिति, साभरणनन्दिकेश्वरविषयमेतत् आनन्तर्य्यात्। गोशते वै दशांशेनेति गोशते देये गामेकामेकञ्च वृषभं वेदिमध्येऽधिवासयेत्। पलशतादूर्द्ध्वं पलशतत्रयं यावदिति साभरणनन्दिकेश्वररचनादिकं कुर्य्यादित्यर्थः ।“पुण्यं कालमथासाद्य गीतिमङ्गलनिःस्वनैः। सर्व्वौषध्युदकस्नानस्नापितो वेदिपुङ्गवैः । इममुच्चारयेन्मन्त्रं गृहीतकुसुमाञ्जलिः” । अत्रापि पूर्व्ववत् पूर्व्वेद्युरधिवासनं विधाय द्वितीयदिवसे ब्राह्मणवाचनानन्तरमग्निकुण्डेषु ऋत्विगुपवेशनादिपूर्णाहुतिपर्य्यन्तं कर्म्मशेषं गुरुः समापयेत् । ततः पुण्यकालम् आत्मानुकूललग्नमुहूर्त्तादिलक्षणमासाद्य कुण्डसमीपस्थितकलसोदकेन ब्राह्मणैः स्नापितः शुक्लमाल्याम्बरधरो यजमानो वक्ष्यमाणमन्त्रानुदीरयेत् । “नमो वो विश्वमूर्त्तिभ्यो विश्वमातृभ्य एव च । लोकाधिवासिनीभ्यश्च रोहिणीभ्यो नमो नमः । गवामङ्गेषु तिष्ठन्ति भुवनान्येकविंशतिः । ब्रह्मादयस्तथा देवा रोहिण्यः पान्तु मातरः । गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः । गावः शिरसि मे नित्यं गवां मध्ये वसाम्यहम् । यस्मात् त्वं वृषरूपेण धर्म्म एव सनातनः । अष्टमूर्त्तेरधिष्ठानमतः पाहि सनातनः । इत्यामन्त्र्य तु यो दद्याद्गुरवे नन्दिकेश्वरम् । सर्व्वोपकरणोपेत गोयुगञ्च विचक्षणः । ऋत्विग्भ्यो धेनुमेकैकां दशकाद्विनिवेदयेत्। गवां च शतमप्येकं तदर्द्धं चाथ विंशतिम्” । दश पञ्चाथवा दद्यादन्येभ्यस्तदनुज्ञया” । दानवाक्यमत्र तुलापुरुषवद्वेदितव्यम्, एते च शतप्रभृति पञ्चपर्य्यन्ता विकल्पा ऋत्विग्विषयाः तदानन्तर्य्यात्, ततश्चायमर्थः सिद्धो भवति गोदशकमध्यान्नन्दिकेश्वरयुतं गोयुगं गुरवे प्रतिपाद्य शेषाणामष्टानामेकैकामेकैकस्मै ऋत्विजे दद्यात्, तथा गोसहस्रमध्यात् शतद्वयं गुरवे प्रदाय एकैकं शतमृत्विग्भ्यो दद्यात्, अथ वा शतं गुरवे पञ्चाशतं पञ्चाशतमृत्विग्भ्यः, अथ वा चत्वारिंशतं गुरवे विंशतिं विंशतिमृत्विग्भ्यः । विंशतिं, वा गुरवे दश दशर्त्विग्भ्यः, दश वा गुरवे पञ्च पञ्चर्त्विग्भ्यो दद्यात् शेषा गास्तदनुज्ञया अन्येभ्योऽपि दद्यात् । दक्षिणाञ्चात्र पूर्व्ववदेव दद्यात् अनुक्तदक्षिणासु सुवर्णः दक्षिणेति वचनात् यथाशक्ति सुवर्णं वा। ततः पूर्व्ववदेव पुण्याहवाचन-देवतापूजन-विसर्जनादि कुर्य्यात् । “नैका बहुभ्यो दातव्या यतो दोषकरी भवेत् । बह्व्यश्चैकस्य दातव्या श्रीमतारोग्यवृद्धये । पयोव्रतः पुनस्तिष्ठेदेकाहं गोसहस्रदः” । इदञ्च पयोव्रतानुष्ठानं, शक्तापेक्षम् “अशक्तौ नक्तमिष्यते” इति वचनात् । “श्रावयेत् शृणुयाद्वापि महादानानुकीर्त्तनम् । तद्दिनं ब्रह्मचारी स्याद्यदीच्छेद्विपुलां श्रियम्” । आथर्व्वणगोपथब्राह्मणे “अथातो गोसहस्रविधिर्गोष्ठ उदकान्ते शुचौ देशे प्राञ्चमिध्ममुपसमाधाय अन्वारभ्याथ जुहुयात्, महाव्रीहीणामैन्द्रञ्चरुं आ गावस्सूक्तेनाद्यं जुहुयात्, सौम्यञ्च सहस्रं तस्याः पयसि श्रपयित्वा गाव इति, एवमुभय इत्येतेन जुहुयात् पश्चादग्नेस्तीर्थोदकपूर्णकलसमवस्थाप्याहिसंवोगोष्ठेनेति दश गाः स्नापयेत् त्वरमाणोऽन्याः समभ्युक्ष्य सहस्रं, तस्याः स्नानोदकेनेममिन्द्रं वर्द्धय क्षत्रियं म इति, राजानमभिषिच्येमा आप इति, षड्भिर्यथोक्तमञ्जनाभ्यञ्जनानुलेपनं कृत्वा सहस्रतमीं प्रथमामलंकृत्य गावो मामुपतिष्ठत प्रजावती स्सूयवसादिति च पर्य्यासयेत् प्रियमशनन्दत्वा द्वियामह्य इति सहस्रतमीमालभ्य जपेत् मया गावः पतिना सवत्समिति मन्त्रेणानेनार्घं दत्त्वा सहस्रतमीं पुनरुपसंगृह्य भूमिष्ठा प्रतिगृह्णात्विति जपेत् सहस्रं, तस्याः पृष्ठतो व्रजन् सर्व्वाः प्रदक्षिणीकृत्य नमस्कृत्य स्वस्ति वाच्य ब्राह्मणेभ्यो निवेद्य दश गा दक्षिणाः कर्त्रे सहस्रं तस्मै वस्त्रयुग्मञ्च तदपि । सप्तजन्मानुगं पापं मुक्तं सप्तभिः कृतम् । तत्क्षणात् विधिनानेन नाशयेद्गोप्रदो नरः । सर्व्वेषामिह दानानां फलं यत् परिकीर्त्तितम् ।

तदवाप्नोति विप्रेभ्यो गोसहस्रप्रदोनरः। अश्वमेधं वृषोत्सर्गं गोसहस्रत्रयन्तु यः। दद्यान्मोक्षाय इत्याहुः पितरस्तर्पयन्ति हि। तस्मादनेन विधिना गोसहस्रन्तु योनरः। प्रदद्यात् स विशुद्धात्मा याति तत् परमं पदमिति"। मत्स्यपुराणे "अनेन विधिना यस्तु गोसहस्रप्रदोभवेत्। सर्वपापविनिर्मुक्तः सिद्धचारणसेवितः। विमानेनार्कवर्णेन किङ्किणीजालमालिना। सर्वेषां लोकपालानां लोके संपूज्यते सुरैः। प्रतिमन्वन्तरं तिष्ठेद्राजराजो भवेत् पुनः। अश्वमेधशतं कुर्याच्छिवध्यानपरायणः। वैष्णवं लोकमास्थाय ततो मुच्येत बन्धनात्। पितरश्चाभिनन्दन्ति गोसहस्रप्रदं शुभम्। अपि स्यात्स कुलेऽस्माकं पुत्रोदौहित्र एव च। गोसहस्रप्रदो भूत्वा नरकादुद्धरिष्यति। स यस्तत्कर्मकरो वा स्यादपि द्रष्टा तथैव च। संसारसागरादस्मादस्मान् सन्तारयिष्यति। इति पठति य एतद्गो-सहस्रप्रदानं सुरभुवनमुपेयात् स्मरेद्वापि पश्येत्। अनुभवति सुखं वा वाच्यमानो निकामम् प्रहतकलुषदेहः सोऽपि यातीन्द्रलोकम्"।

अन्यपुराणोक्तस्तद्विधिस्तत्रैव दृश्यः। ६त०। २गवां सहस्रे च। गोसहस्रं तद्दानफलं विद्यतेऽत्र अच्। गौरा० ङीष्। ३सोमवारयुतायाम् ४मङ्गलवारयुतायां वा। अमाख्यायाम् स्त्री। जाह्नवीस्नाने तस्यास्तथापुण्यजनकत्वमुक्तं ति० त० व्यासेन "अमावास्यां भवेद्वारो यदि भूमिसुतस्य च। गोसहस्रफलं दद्यात् स्नानमात्रेण जाह्नवी। सिनीवाली कुहूर्वापि यदि सोमदिने भवेत्। गोसहस्रफलं दद्यात् स्नानं यन्मौनिना कृतम्"।

गोसाद त्रि० गां सादयति सद-णिच् अण् उप० स०। गोचालके गोसारथौ "गोः सदसादिसारथिषु" पा० पूर्व्वपदप्रकृतिस्वरः।

गोसादिन् त्रि० गां सादयति सद-णिच्-णिनि ६त०। गोसारथौ। गोसादवत् पूर्व्वपदे प्रकृतिस्वरः।

गोसारथि पु० ६त०। गोचालके सारथौ गोसादवत् पूर्व्वपदे प्रकृतिस्वरः।

गोस्तन पु० गोः स्तन इव गुच्छो यस्य। १चतुर्यष्टिकहारे अमरः। ६त०। २गोःस्तने च "करीरपनसास्थि गोस्तनाकाराणि" "सुवृत्तं गोस्तनाकारं सर्वभूतगुणोद्भवम्" सुश्रु०।

गोस्तना(नी) स्त्री गोः स्तनइव फलमस्याः स्वाङ्गत्वात् वा ङीष्। १कपिलद्राक्षायाममर टावन्तः गोः स्तनाइव स्तना अस्याः ङीष्। २कुमारानुचरमातृभेदे। "शृणु मातृगणान् राजन्! कुमारानुचरानिमान्" इत्युपक्रमे" प्रभावती विशालाक्षी पालिता गोस्तनी तथा" भा० श० ४७अ०।

गोस्तोम पु० गोनामकः स्तोमः पूर्व्वपदात् वा षत्वाभावः। एकाहसाध्ये अग्निष्टोमाङ्गे यज्ञभेदे। "गोस्तोमभूमिस्तोमव्रतस्पतिसवानाम्" आश्व० श्रौ० ८।५।२। "गोस्तोमो भूमिस्तोमोवनस्पतिसव इति त्रयः एकाहाः कर्त्तव्याः" नारा० वृ०। गोष्टोमशब्दे विवृतिः।

गोस्थान न० ६त०। गोष्ठे अमरः "मध्ये गोस्थानसङ्कुलम्" हरिवं० ६१अ०। स्वार्थे क। तत्रार्थे।

गोस्वामिन् ६त०। गवां स्वामिनि। "तावत् भूयो वा गोस्वामिने दत्त्वा" कात्या० श्रौ०। १५।६।१२। "गोस्वाम्यनुमते भृत्यः सा स्यात् पालेऽभृते भृतिः" मनुः। "प्राजापत्यं चरेत् कृच्छ्रं गोस्वामी व्रतमुत्तमम्" पराशरः। गवामिन्द्रियाणां स्वामी। २जितेन्द्रिये यतीनामुपाधिभेदे। वोपदेवगोस्वामी रूपगोस्वामी।

गोह पु० गुह्यतेऽत्र गुह-घञ् बा० ऊत्त्वाभावः। गेहे "अद्रिमौशिजस्य गोहे" ऋ० ४,२१,६। ‘गुहा यदीमौशिजस्य गोहे" ७ "विदद् गौरस्य गवयस्य गोहे" ८ "गोहे गृहे" भाष्यम्। तस्यादूरभवो देशः सुवास्वा० अण्। गौह गेहादूरभवे त्रि० स्त्रियां ङीप्।

गोहत्या स्त्री ६त०। गोहनने। प्राणवियोगफलकव्यापारो हननम् यथाह वह्निपु० "स्यात् प्राणवियोगफलकव्यापारो हननं स्मृतम्। रागात् द्वेषात् प्रमादाद्वा स्वतः परत एव वा"। हत्याया ज्ञानाज्ञानकृतत्वं च प्रा० त० न्यरूपि यथा

"अथ ज्ञानकृतादिनिरूपणम्। तत्र गोवधस्य बुद्धिपूर्वकत्वं तदा भवति,यदि गां ज्ञात्वा एतां हन्मीति इच्छया हन्ति, तदा कामनाद्वारैव ज्ञानस्य प्रवृत्त्यङ्गत्वात्, तदभावे त्वबुद्धिपूर्वकत्वम्। अतएव प्रवृत्त्यङ्गज्ञानस्य कामनाव्यभिचाराभावादेव ‘कृच्छ्रांस्तु चतुरः कुर्य्यात् गोवधे बुद्धिपूर्वके। अमत्या च द्वयं कार्य्यम्, इति विश्वामित्रवचने ज्ञानाज्ञानाभ्यां द्वैविध्यमुक्तम् अन्यत्र कामाकामाभ्यामित्युक्तम् यथा वृहस्पतिः "कामाकामकृतं त्वेवं महापापं द्विधा मतम्। पुरुषापेक्षया चैव निष्कृतिर्द्विविधा स्मृता"। इत्यस्तु गवयादिभ्रमेण योगोवधस्तत्र वधस्य न ज्ञानकृतत्वं गोत्वेनाज्ञानात्। गोत्वेन गां जानन्नप्यन्योद्देशक्षिप्तनाराचादिना यदि हन्ति

तदापि न ज्ञानकृतत्वं तद्विषयकहननेच्छारूपद्वाराभावात्”। तत्र साक्षात् परम्पराकृतव्यापारभेद मिता० उक्तो यथा “साक्षात्कर्त्तृ निमित्तिनोश्च भेदस्तेनैव दर्शितः ‘पाषाणैर्लगुडैर्वापि शस्त्रेणान्येन वा बलात् । निपातयन्ति ये गास्तु कृत्स्नं कुर्युर्व्रतं हि ते। तथैव बाहुजङ्घांसपार्श्वग्रीवादिमोटनैरिति’। एतदुक्तम्भवति । पाषाणलगुडादिभिर्ग्रीवादिमोटनादिना वा ये गां निपातयन्ति । ते साक्षाद्धन्तारस्तेष्वेव कृत्स्नं प्रायश्चित्तम् । ये तु व्यवहित रोधबन्धादिव्यापारयोगिनस्ते निमित्तिनस्तेषां न कृत्स्नव्रतसम्बन्धः किन्तु तदवयवैरेव पादद्विपादादिभिरिति तत्रावरोधादीनां व्यवहितव्यापारत्वाविशेषेऽपि वचनात् क्वचित्पादः क्वचिद्द्विपादः पादोनं क्वचिदिति” युक्तम् ।

तस्याः शोधकं प्रायश्चित्तं स्वामिभेदाद्भिन्नं प्रा०त० उक्तं यथा तत्र ब्राह्मणस्वामिकस्य गोर्वधे मानवं प्रायश्चित्तं तच्च गोघ्नशब्दे दर्शितं तत्र सप्तदश धेनवः तन्मूल्यं वा । क्षत्रियस्वामिकस्य गोर्वधे देवलोक्तं तच्च तत्रैवोक्तं यथा “गोघ्नः षण्मासान् तच्चर्मणा परिहृतो गोग्रासाहारो गोव्रती यवाशी गोभिरभिसञ्चरन् विप्रमुच्यते”। गोग्रासाहारो गोग्रासाहर्त्ता “कर्मण्यण्” इति साधुः। षण्मासयावकभक्षणं द्वादशप्राजापत्यतुल्यं दक्षिणा च विशेषानुपदेशाद् यथाशक्ति देयेति। एतज्ज्ञानादज्ञानात्तदर्द्धं स्त्रीशूद्रबालवृद्धानामर्द्धम् एकस्योभयपरत्वे पादः । वैश्यसम्बन्धिनो गोर्वधे तु शातातपः “पञ्चगव्येन गोघाती मासिकेन विशुध्यति । गोमतीञ्च जपेद्विद्वां गवां गोष्ठे च संवसेत्”। पञ्चगव्यमाह शातातपः “गोशकृद् द्विगुणं, मूत्रं सर्पिर्विद्याच्चतुर्गुणम् । क्षीरमष्टगुणञ्चैव पञ्चगव्ये तथा दधि” तथाऽष्टगुणम् । यमः “आहृत्य प्रणवेनैव उत्थाप्य प्रणवेन च । प्रणवेन समालोड्य प्रणवेनैव तत्पिबेत्”। उत्थाप्य मिश्रीकृत्य । “मन्त्राज्ञाने मिताक्षरायां षट्त्रिंशन्मतम् ‘जपहोमादि यत्किञ्चित् कृच्छ्रोक्तं सम्भवेन्न चेत् । सर्वं व्याहृतिभिः कुर्य्यात् गायत्र्या प्रणवेन च”। गवां गोष्ठ इति श्रवणकुण्डलवत् तात्कालिकगोसत्त्वावबोधाय । गोमतीजपसहितमासपञ्चगव्यपानं प्राजापत्यपञ्चकतुल्यम् । एतदज्ञानकृते ज्ञानकृते तु द्वैगुण्यम् । स्त्रीशूद्रबालवृद्धानामर्द्धम् एकस्योभयधर्मपरत्वे पादः ।

शूद्रसम्बन्धिनो गोर्वधे तु विश्वामित्रः “कृच्छ्रांस्तु चतुरः कुर्य्यात् गोवधे बुद्धिपूर्वके । अमत्या च द्वयं कार्य्यं तदर्द्धं बालवृद्धयोः । स्त्रीशूद्रयोरेवमेतद्वधे चैव न संशयः”। कृच्छ्रान् प्राजापत्यानि । तच्चतुष्टयाशक्तौ चतस्रो धेनवः द्वादश कार्षापणा वा । एतज्ज्ञानकृते अज्ञाने तदर्द्धं स्त्रीशूद्रबालवृद्धानामर्द्धम् । एकस्योभयधर्म्मपरत्वे पादः । प्रा०त०रघु० । स्वामिकृतविशेषस्तु प्रायश्चित्तविवेकानुसाराद्युक्तः ।

गर्भिण्यादौ तु विशेषमाह बृहस्पतिः “गर्भिणीं कपिलां दोग्ध्रीं होमधेनुञ्च सुव्रताम् । रोधादिना घातयित्वा द्विगुणं गोव्रतञ्चरेत्”। गर्भिणीवधे तु विशेषमाह वृद्धयमः “गवां निपतने चैव गर्भनाशो यदा भवेत् । एकैकत्र चरेत् कृच्छ्रं यथापूर्वं तथा परम्”। कृच्छ्रपदं व्रतपरम् द्विगुणं गोव्रतमित्येकवाक्यत्वात् “पादमुत्पन्नमात्रे तु द्वौ पादौ गात्रसम्मिते। पादोनं व्रतमादिष्टं हत्वा गर्भमचेतनम् । अङ्गप्रत्यङ्गसम्पन्ने गर्भे चेतःसमन्विते । द्विगुणं गोव्रतं कुर्य्यात् प्रायश्चित्तं विशुद्धये”। सन्दिग्धवचनं भवदेवेन व्याख्यातम् यथा “यदि लगुडाद्यभिघातेन गौर्जीवति गर्भमात्रपातो भवति तदोत्पन्नगर्भमात्रपाते यथोक्तप्रायश्चित्तपादाचरणम् । गात्रावयवोत्पत्तौ प्रायश्चित्तपादद्वयं सकलगात्रसम्पत्तौ चैतन्याभावे प्रायश्चित्तपादत्रयम्। अर्थाच्चैतन्ययुक्तगर्भघाते कृत्स्नमेव प्रायश्चित्तमूहनीयम्”। मिताक्षरायान्तु गर्भिणीवधे यदा गर्भोऽपि निहतो भवति तदा प्रतिनिमित्तं नैमित्तिकमावर्त्तत इति न्यायादविशेषेण द्विगुणव्रतप्राप्तौ षट्त्रिंशन्मते विशेषोक्तिः ‘पादमुत्पन्नमात्रे तु द्वौ पादौ दृढतां गते । पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनम् । अङ्गप्रत्यङ्गसम्पन्ने गर्भे चेतःसमन्विते । द्विगुणं गोव्रतं कुर्य्यादेषा गोघ्नस्य निष्कृतिः”। दोग्ध्रीं बहुक्षीराम् । बृहस्पतिः “अतिवृद्धामतिकृशामतिबालाञ्च रोगिणीम् । हत्वा पूर्वविधानेन चरेदर्द्धं व्रतं द्विजः”। पूर्वविधानेन मन्वाद्युक्तत्रैमासिकादिना अतिवृद्धा तृणच्छेदनासमर्था अतिकृशा कृशत्वेन दोहनवाहनायोग्या अतिबाला वर्षमध्यस्था बाला तदतिक्रान्ता द्विवर्षीया । तथा च बृहदङ्गिराः ‘वर्षमात्रा तु बाला स्यादतिबाला द्विवार्षिकी । अतः परन्तु सा गौः स्यात्तरुणी दन्तजन्मनि”। अतएव वक्ष्यते ‘द्विपादस्तु द्विहायने’ इति संवर्त्तः । ‘व्यापन्नानां बहूनाञ्च बन्धने रोधनेऽपिवा । भिषङ्मिथ्योपचारे च द्विगुणं गोव्रतञ्चरेत् । एकप्रयत्ने निष्पन्ने बहूनां गवां वधे प्रायश्चित्तगौरवमुक्तं न तु तन्त्रता पापभेदाभावात्

एकप्रयत्नजन्यत्वेनैकमेव गुरुतरं पापमिति प्रायश्चित्तमपि तथा। बहूनामित्येकाधिकपरम्। तद्विवक्षायामपि गोद्वयवधे प्रयत्नाभेदेऽपि विशेषवचनाभावात् प्रायश्चित्तद्वैगुण्यं युक्तम्। अपिशब्दात् खड्गदारुदण्डादिना। क्रमकृते तु प्रायश्चित्तावृत्तिः। यथोपपातकानुवृत्तौ यमः "गोघ्नवद्धिहिनः कल्पश्चान्द्रायणमथापि वा। अभ्यासे तु तयोर्भूयस्ततःशुद्धिमवाप्नुयात्"। तयोर्गोवधतदन्योपपातकयोः। संवर्त्तापस्तम्बौ "एका चेद्बहुभिः कापि दैवाद्व्यापादिता भवेत्। पादं पादञ्च हत्यायाश्चरेयुस्ते पृथक् पृथक्"। हत्याया यत्र यद्विहितं व्रतं तत्र तस्यैव पादं प्रत्येकं कुर्युः। एकेत्युपलक्षणम् अतोबहुभिर्द्वयोर्बहूनाञ्च हनने प्रतिपुरुषं पादद्वयं त्रयं वा कल्पनीयमिति मिताक्षरा। वस्तुतस्तु एकाधिकानामेकैकपुरुषस्यैकप्रयत्नजन्यवधे "व्यापन्नानां बहूनामिति" पूर्वोक्तवचनात् एकैकपुरुषस्य द्विपादं प्रायश्चित्तम् प्रयत्नभेदे तु गोघ्नवदित्यनेन तन्त्रताया अभावात् प्रत्येकं प्रतिपुरुषं द्विपादावृत्तिरिति। एतच्चाकामतोवधे द्रष्टव्यम् दैवादिति विशेषोपादानात् कामकृते तु बहूनामपि प्रत्येकं कृत्स्नदोषसम्बन्धात् पूर्णप्रायश्चित्तं युक्तं वधिकानां फलमिव प्रतिपुरुषं कृत्स्नव्यापारसमवायात्। "एकं घ्नतां बहूनाञ्च यथोक्ताद्द्विगुणोदमः" इति प्रत्येकं दण्डद्वैगुण्यदर्शनाच्चेति मिताक्षरा। वस्तुतस्तु सर्वत्र पापे "स्यात्त्वकामकृते यत्तु द्विगुणं बुद्धिपूर्वके" इत्यङ्गिरोवचनेनाम्नानात् ज्ञाने द्वैगुण्यदर्शनादत्रापि ज्ञाने द्विपादएव युक्तः। सत्रे तु "सप्तदशावराऋद्धिकामाः सत्रमुपासीरन्निति" श्रवणात्तथेति। एकं घ्नतामिति परवचनन्तु गोवधातिरिक्तविषयम् गोवधे एका चेदित्युपदेशेन दण्डवत् प्रायश्चित्तानि भवन्तीत्यतिदेशानवसरात्। तदवसरत्वे प्रत्येकं पूर्णप्रायश्चित्तद्वैगुण्यं स्यात् न पूर्णप्रायश्चित्तमात्रम् अतएव प्रायश्चित्तविवेके "एकं घ्नतां बहूनामिति" मनुष्यवधे उक्तम्। बहुभिरित्युपादानात् द्वाभ्यां हनने तु प्रत्येकं सम्पूर्णप्रायश्चित्तम्"।

अथैकहायनादिगोवधप्रायश्चित्तम् वृद्धप्रचेताः "एकवर्षे गवि हते कृच्छ्रपादो विधीयते। अबुद्धिपूर्वं पुंसः स्यात् द्विपादस्तु द्विहायने। त्रिहायणे त्रिपादः स्यात् प्राजापत्यमतःपरम्"। इदमपि प्रायश्चित्तलाघवेन अबुद्धिपूर्वकावधमस्वामिकवधविषयमिति प्रायश्चित्तविवेकः। तेन यत् स्वामिकवधे यत् प्रायश्चित्तं तस्यैव तत्र पादादिकमूहनीयमतएवातिबालामित्यत्र तथैवोक्तम्। अतःपरं चतुर्हायणे इत्यर्थः। बुद्धिपूर्वे एतदेव द्विगुणमित्यर्थः" प्रा० त० रघुः।

अपालननिमित्तगोवधप्रायश्चित्तम् प्रा० त० उक्तं यथा पराशरः "शीतानिलहता चैव उद्बन्धनमृतापि वा। शून्यागाराद्युपेक्षायां प्राजापत्यं विनिर्दिशेत्। अपालनात् प्रणश्येत्तु गौश्चरन्ती कथञ्चन। जलौघपल्वले मग्ना नागविद्युद्धतापि वा। श्वभ्रे वा पतिताऽकस्मात् श्वापदैर्वापि भक्षिता। प्राजापत्यं चरेत् कृच्छ्रं गोस्वामी व्रतमुत्तमम्। सशिखं वपनं कार्यं त्रिसन्ध्यमवगाहनम्। शृङ्गैर्वापि खुरैर्युक्तं लाङ्गूलश्रवणादिभिः। आर्द्रमेव हि तच्चर्म परिधाय स गां व्रजेत्। तासां मध्ये वसेद्रात्रौ दिवा ताभिः समं व्रजेत्। ब्राह्मणस्य विशेषेण तथा राजन्यवैश्ययोः। प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम्। अनडुत्सहितां गाञ्च दद्याद्विप्राय दक्षिणाम्"। अत्र गोस्वामीत्यभिधानात् उत्सृष्टवत्सतरीषु स्वत्वाभावादपालननिमित्तकतद्वधे तदुत्स्रष्टुर्दोषोनास्तीति प्रतीयते। तत्स्वत्वाभावेनान्येषां स व्याख्यमानमौपादानिकस्वत्वं निराकरोति कल्पतरुधृतब्रह्मपुराणम् "अथ वृत्ते वृषोत्सर्गे दाता वक्रोक्तिभिः पदैः। ब्राह्मणानाह, यत् किञ्चित् मयोत्सृष्टन्तु निर्जने। तत् कश्चिदन्येन नयेद्विभाज्यञ्च यथाक्रमम्। न वाह्यं न च तत्क्षीरं पातव्यं केनचित् क्वचित्"। वक्रोक्तिभिः काकूक्तिभिः स्वाम्यभावेनोत्सृष्टपश्वोः पालननियमाभावाद्धान्यादिभक्षणे मोच्यत्वमप्याह याज्ञवल्क्यः "महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः। पालोयेषाञ्च ते मोच्या दैवराजपरिप्लुताः"। महोक्षोऽनिर्वीर्यः महाबलीवर्दः। उत्सृष्टपशवः देवतोद्देशेन पित्रादिनिष्फलोद्देशेन वा चक्राद्यङ्कितास्त्यक्तपशवः। सूतिका अनिर्गतदशाहाः। आगन्तुका ग्रामान्तरादागताः। आदिशब्दात् उशनसोक्ताश्च यथा "अदण्ड्या हस्तिनोऽश्वाश्च प्रजापाला हि ते स्मृताः। अदण्ड्याः काणकुण्ठाश्च वृषभः कृतलक्षणः" कुण्ठः खञ्जः। अत्र काणकुण्ठशब्दाभ्यामत्यन्ताक्षम उच्यते। वृषभः कृतलक्षणः प्रागुक्तोत्सृष्टपशुः एते सपाला विपाला वा सर्वथा मोच्याः तथा च मनुः "अनिर्दशाहां गां सूतां वृषान् देवपशूंस्तथा। सपालान् वा विपालान् वा अदण्ड्यान् मनुरब्रवीत्"। एतद्भिन्नानां [illegible] पालोऽपि

तेऽपि मोच्याः। अर्थात्तत्र पालो दण्डनीयः। दैवराजपरिप्लुताः गजादिद्रावणात् सैन्यादिदर्शनाद्वा पलायिताः पशवो यदि क्षेत्रे चरन्ति तदा न दोष इत्यर्थः। पालकान्तरसत्त्वे तु मनुः "दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे। योगक्षेमेऽन्यथा चेत्तु पालो वक्तव्यतामियात्"। "दिवा पशूनां पालहस्तन्यस्तानां योगक्षेमविषये दोषे जाते पालकस्य गर्हणीयता रात्रौ पुनः पालप्रत्यर्पितानां स्वामिनां दोषः। अन्यथा यदि रात्रावपि पालहस्तगता भवन्ति तदा दोषे उत्पन्ने पाल एव गर्हणीयतां प्राप्नोति" इति कुल्लूकभट्टः। स्मृतिसागरे बृहदङ्गिराः "अनागतस्य चानेता आगतस्य च रक्षकः। रात्रावपि यदान्योऽस्ति तदा स्वामी न दोषभाक्"। ननु दण्डप्रकरणोक्तमनुवचनं प्रायश्चित्ते कथमिति चेन्न। "दण्डवत् प्रायश्चित्तानि भवन्तीति" स्मृतेः तथा व्यवहाराच्च। एवञ्च "यत्रापवर्त्तते युग्यं वैगुण्यं प्राजकस्य च। तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमः" इति मनुवचने "यत्र सारथेरकौशलात् यानमन्यथा गच्छति तत्र हिंसायामशिक्षितसारथिनियोगात् स्वामी द्विशतं दण्डं दाप्यः स्यादिति" कुल्लूकभट्टव्याख्यानदर्शनात् अयोग्यपालकसमर्पणे स्वामिनो दोषात्तस्यैव प्रायश्चित्तमुक्तम्। 'यावत् शस्यं विनश्येत्तु क्षेत्री तावत् फलं लभेत्। पालस्ताड्योऽथ गोस्वामी पूर्वोक्तं दण्डमर्हति" याज्ञवल्क्यवचने गवादिदोषेण यावत् शस्यं विनश्यति तावदेव पालकात् प्राप्तव्यं पालकाशक्तौ पालकस्ताड्यः स्वामी पूर्वोक्तं दण्डादिमर्हतीति दर्शनाच्च। गोवधप्रायश्चित्ते पालकद्रव्यासम्भवे स्वामिना द्रव्यं दत्त्वा प्रायश्चित्तं कारयितव्यं कर्त्तव्यं वा। स्वेच्छापालके स्वयं कर्त्तव्यम्। सशिखवपनमित्यत्र नैमित्तिकेन सशिखवपनेन "सदा बद्धशिखेन तु" इत्यस्य "गायत्र्या तु शिखां बद्ध्वा नैर्ऋत्यां ब्रह्मरन्ध्रतः। जुटिकान्तु ततो बद्ध्वा ततः कर्म समाचरेत्" इति ब्रह्मपुराणोक्तस्य च नित्यस्य बाधो न दोषाय फलचमसेन सोमस्य बाधवत् गोदोहेन चमसस्य बाधवच्च। "सशिखं वपनं कार्यमास्नानात् ब्रह्मचारिणा। इति कात्यायनकृतच्छन्दोगपरिशिष्टेऽप्येवम्। एतदेकस्मृतिमूलकत्वात् तद्भृतपारस्करीये पर्युप्तशिरसमिति सूत्रेऽपि तथैवार्थः तद्व्याख्याता हरिशर्मणापि परिसर्वतोभावेनोप्तशिरसं मुण्डितशिरसमिति व्याख्यातम्। न च "घृते लूनशिखास्तस्य दशनैरचिरोद्गतैः। कुशाः काशा विराजन्ते वटवः सामगा इव" इति विष्णुपुराणीये सामगा इति विशेषणाच्चान्येषां लूनशिखत्वमिति वाच्यं प्रागुक्तवचनात् सर्वेषां सशिखवपनप्राप्तेः विध्यन्तरकल्पनापत्तेश्च। तृणसागरयोरौपम्यन्तु हरिणसुखहेतुत्वेनाप्युक्तं तयोः सुखहेतुत्वञ्च भक्ष्यत्वेन गायकत्वेनेति शेषः। एवं प्राचीनावीतित्वादिना "सदोपवीतिना भाव्यम्" इत्यस्यापि बाध इति प्रसङ्गादुक्तम्। ब्राह्मणस्य विशेषेणेति ब्राह्मणस्य गवानुगमनं मुख्यम्। एतेनापालनकृतगोवधे प्रजापत्यं करणीयमिति अत्रेतिकर्त्तव्यतापि. प्रजापत्यतुल्येति पण्डितसर्व्वस्वे हलायुधः। वृषभो गौश्च दक्षिणा। ब्राह्मणभोजनं विशेषयति यज्ञपार्श्वः "गर्भाधानादिकृत्येषु ब्राह्मणान् भोजयेद्दश"। प्राजापत्यद्वयाशक्तौ धेनुद्वयं तदशक्तौ षट् कार्षापणाः। एवञ्च वृषमूल्यं पञ्च कार्षापणाः गोमूल्यमेकः कार्षापणः। शूलपाणिप्रभृतिभिस्तु इतिकर्त्तव्यतायां विशेषो नादृतः। एतच्च शूद्रस्वामिकेतरवधविषयम् शूद्रस्वामिकस्याज्ञानात् साक्षाद्वधे यत्किञ्चिद्दक्षिणकृच्छ्रद्वयस्य निबन्धृभिर्व्यवस्थापितत्वेनापालनकृतवधे तदधिकस्यायुक्तत्वात् वरं तत्तुल्यं कृच्छ्रद्वयं युक्तमुत्पश्यामः। अतएव एतद्विषयएव स्मृतिसागरसारे बृहदङ्गिराः 'अरक्षिते तु भूपादौ हते व्याघ्रादिभक्षिते। व्रतार्द्धमाचरेत् स्वामी रक्षिते नास्ति दूषणम्''। व्रतार्द्धं कामकृतव्रतार्द्धं नास्ति दूषणमिति यदि प्रमत्ता गौर्निवारयन्तं पालमतिक्रम्य गर्त्तकान्तारादौ म्रियते तदा नेत्यर्थः। अन्यत्र सत्येव पालके सम्यक्पालनाभावेन श्वभ्रादौ पाताद्गोर्मरणे प्रायश्चित्तमाह विष्णुः 'पल्वलौघटकव्याघ्रश्वापदादिनिपातने। श्वभ्रोद्बन्धनसर्पाद्यैर्मृते पादोनमाचरेत्। पादोअपालने तु कृच्छ्रं स्यात् शून्यागाराद्युपप्लवे"। पादोनं प्राजापत्यमेव उत्तरवचने कृच्छ्रश्रवणात्। तथा "पादश्चाप्राप्तके देयो वत्से स्वामिन्यरक्षिते"। अप्राप्तके अप्राप्तदम्यावस्थे त्रिहायणपर्य्यन्ते इति यावत्। एवम्भूते वत्सेऽरक्षिते श्वभ्रपातादिना मृते सति स्वामिना प्राजापत्यपादः करणीयः। अत्र पादमात्रप्रायश्चित्तत्वात् बालत्वादिना नानुग्रहः। ततश्चाप्राप्तदम्यावस्थवत्समात्रनिमित्तकवधजन्यपापक्षयकाम इति प्रयोज्यम्" आतिदेशिकी गोहत्या बहुविधा यथा "सावित्र्युवाच। विप्रहत्याञ्च गोहत्यां किंविधामातिदेशिकीम्। क

वा न्द्रणामगम्या वा को वा सन्ध्याविहीनकः । एतेषां लक्षणं सर्वं वद वेदविदांवर ! । यम उवाच, गामाहारं प्रकुर्वन्तं पिबन्तं यो निवारयेत् । याति गोविप्रयोर्मध्ये गोहत्याञ्च लभेत्तु सः । दण्डैर्गान्ताडयन् मूढो यो विप्रो वृषवाहकः । दिने दिने गवां हत्यां लभते नात्र संशयः । ददाति गोभ्य उच्छिष्टं भोजयेद्वृषवाहकम् । भोजयेद्वृषवाहान्नं स गोहत्यां लभेद्ध्रुवम् । वृषलीपतिं याजयेद्योभुङ्क्तेऽन्नं तस्य यो नरः । गोहत्याशतकं सोऽपि लभते नात्र संशयः । पादं ददाति वह्नौ यो गाञ्च पादेन ताड़येत् । गृहं विशेदधौताङ्घ्रिः स्नात्वा गोबधमालभेत् ! यो भुङ्क्ते स्निग्धपादेन शेते स्निग्धाङ्घ्रिरेव च । सूर्य्योदये च द्विर्भोजी स गोहत्यां लभेद् ध्रुवम् । अवीरान्नञ्च योभुङ्क्ते योनिजीवी च ब्राह्मणः । यस्त्रिसन्ध्याविहीनश्च स गोहत्यां लभेद्ध्रुवम् । पितॄंश्च पर्वकाले च तिथिकाले च देवताः । न सेवतेऽतिथिं योहि स गोहत्यां लभेद्ध्रुवम् । स्वभर्त्तरि च कृष्णे वा भेदबुद्धिं करोति या । कटूक्त्या ताड़येत् कान्तं सा गोहत्यां लभेद्ध्रुवम् । गोमार्गखननं कृत्वा ददाति शस्यमेव च । तड़ागे च तदूर्द्ध्वे वा स गोहत्यां लभेद्ध्रुवम् । प्रायश्चित्तं गोबधस्य यः करोति व्यतिक्रमः । अर्थलोभादथाज्ञानं स गोहत्यां लभेद्ध्रुवम् । राजके दैवके यत्नात् गोस्वामी गां न पालयेत् । दुःखं ददाति यो मूढ़ो गोहत्यां लभते ध्रुवम् । प्राणिनं लङ्घयेत् यो हि देवार्च्चामनलं जलम् । नैवेद्यं पुष्पमन्नञ्च स गोहत्यां लभेद्ध्रुवम् । शश्वन्नास्तीति यो वादी मिथ्यावादी प्रतारकः । देवद्वेषी गुरुद्वेषी स गोहत्यां लभेद्ध्रुवम् । देवताप्रतिमां दृष्ट्वा गुरुं वा ब्राह्मणं सति ! । न सम्भ्रमान्नमेत् यो हि स गोहत्यां लभेद्ध्रुवम् । न ददात्याशिषं कोपात् प्रणताय च यो द्विजः । विद्यार्थिने च विद्याञ्च स गोहत्यां लभेद्ध्रुवम्" ब्रह्म वै० पु० प्रकृतिख०, २७अ० । "कुष्कमोषकरो विप्रो गोबधस्य व्रतं चरेत्" प्रा० त० उक्तेः कुष्कमोषोऽपि प्रादेशिकः गोवधः ।

गोहन् त्रि० गां हन्ति हन–क्विप् ६त० । १गोहन्तरि मेघस्य जलभेदके २इन्द्रे पु० । "आ रे गोहा नृहा बधोवः" ऋ० ७।५६।१७। "गोहा गवां मेघस्थसलिलानां भेदकः" भा० ।

गोहन त्रि० गुहू–संवरणे ल्यु ऊत्वाभावश्छान्दसः । संवरके "समाने अहन् त्रिरवद्य गोहनाः" ऋ० १।३४।३ "गुहू संवरणे नन्द्यादित्वात् ल्युः "ऊदुपधायाः गोहः" पा० प्राप्तस्य ऊत्वस्याभावश्छान्दसः" भा० ।

गोहमुख पु० भारतवर्षस्थे पर्वतभेदे । भागवतोक्तगोकामुखपर्वतस्य विष्णुपु० गोहमुखेति नाम । गोकामुखशब्दे दृश्यम् । [वृक्षे त्रिका० ।

गोहरितकी स्त्री गोः हरितकीव हितकारित्वात् । बिल्व-

गोहल्ल न० हल–विलेखे क्विप् तं लाति ला–क गोर्हल्लः । गोमये हारा० ।

गोहालिया स्त्री गवां हाले विलेखे साधु बा० घ । (गोयालिया) ख्याते लताभेदे "पीतं गोयालियामूलं तिलदध्याज्यसंयुतम् । निबद्धमूत्रं कथितं प्रवर्त्तयति शङ्कर !" इति गारुड़े १८०अ० ।

गोहित पु० गवां हितं यस्मात् ५ब० । १बिल्वे, २घोषालतायाञ्च । ३गोहितकारके त्रि० । ४विष्णौ पु० "गोहितो गोपतिर्गोप्ता" विष्णुसह० । "गोभ्यो हितो गोहितः, गोभूमेर्भारावतारणेच्छया शरीरग्रहणं कुर्वन् गोहितोवा" भाष्यम् । [मूले हेमच० ।

गोहिर न० गुह–बा० इरच् पृषो० ऊत्वाभावः । पाद-

गोह्य त्रि० गुह–वा ण्यत् अच्येव ऊत्वस्य नियमनात् नोत्त्वम् । १गुह्ये २अप्रकाश्ये ३संवरणीये च ।

गौकक्ष्य पुंस्त्री गोकक्षर्षेर्गोत्रापत्यं गर्गा० यञ् । गोकक्षर्षिगोत्रापत्ये । तस्य छात्रः कण्वा० अण् यलोपः । गौकक्ष तच्छात्रे गौकक्ष्यस्यापत्यं तिका० फिञ् । गौकक्ष्यायणि तदपत्ये पुंस्त्री । स्त्रियां क्रौड्यादि० ष्यञ् । गौकक्ष्या गोकक्षगोत्रस्त्रियाम् । बहुत्वे "यञञोश्च" पा० यञो लुक् । गोकक्षास्तद्गोत्रापत्येषु ।

गौग्गुलव त्रि० गुग्गुलौ भवः अण् । गुग्गुलुभवे धूपादौ स्त्रियां शार्ङ्गरवा० ङीन् ।

गौच्य पु० गोच्याः हिमालयपत्न्याः अपत्यम् ढकि प्राप्ते बा० यत् । हिमालयपुत्रे मैनाके शब्दार्थचि० ।

गौञ्जिक पु० गुञ्जा तुलामानभेदः तद्ग्रहणं शीलमस्य ठक् । स्वर्णकारे त्रिका० ।

गौड़ पु० "वङ्गदेशं समारभ्य भुवनेशान्तगं शिवे ! । गौड़देशः समाख्यातः सर्वविद्याविशारदः" स्कन्दपु० उक्ते १देशे २तद्देशस्थे जने ब०व० । "सारस्वताः कान्यकुब्जा गौड़मैथिलकोत्कलाः । पञ्च गौड़ा इति ख्याताविन्ध्यस्योत्तरवासिनः" स्कन्दपु० इत्युक्तेषु विन्ध्यप-

वर्त्तोत्तरभागवासिषु ३ब्राह्मणभेदेषु च। स्वार्थे क तत्रार्थे। "अथ पूर्व्वस्याम्" इत्युपक्रमे "उदयगिरिभद्रगौडकपौण्ड्रोत्कलकाशिमेकलाम्बष्ठाः" वृ०स०१४अ० कूर्म्मविभागे पूर्व्वस्यदेशोक्तौ। "अस्ति गौडविषये कौशाम्बी नाम नगरी" हितो०। "गौडोराष्ट्रमनुत्तमं निरुपमा तत्रापि राढा पुरी" प्रबोधच०। "सर्व्वे सिंहगुरुर्वर्ज्यः कलिङ्गे गौडगुर्जरे" मुहू० चि०। गुडस्य विकारः अण्। ४गुडविकारे खण्डासवादौ त्रि० "गुडस्य त्वप्रमत्तस्य पीत्वा गौडं सुरासवम्" भा० व० ४४अ०। "नानास्वादरसानाञ्च खाण्डवानां तथैव च। भोजनानि सुपूर्णानि गौडानि च सहस्रशः" रामा० वा० ५२ श्लो०। "गौडमस्त्वमनस्त्वं वा पानकं गुरु मूत्रलम्" सुश्रुतः। ५मदिराभेदे स्त्री "गौडी पैष्टी तथा माध्वी विज्ञेया त्रिविधा सुरा। यथैवैका तथा सर्व्वा न पातव्या द्विजोत्तमैः" मनुः। "गौडीं माध्वीं सुरां पैष्टीं पीत्वा विप्रः समाचरेत्। तप्तकृच्छ्रं पराकं च चान्द्रायणमनुक्रमात्" वृहस्पतिः। ६काव्यरीतिभेदे स्त्री "पदसंघटना रीतिरङ्गसंस्थाविशेषवत्। उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्विधा। वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा" विभज्य "ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः। समासबहुला गौडी" सा० द० तल्लक्षणमुक्तं यथा "चञ्चद्भुजभ्रमितचण्डगदाभिघात-संचूर्णितोरुयुगलस्य सुयोधनस्य। स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि! भीमः" वेणीसं०। एषा च गौडजनप्रियत्वात् गौडैः प्रयुज्यमानत्वाच्च गौडीसंज्ञां लभते। गौड+छ। गौडीया अत्रार्थे। "बहुतरसमासयुक्तामहाप्राणाक्षरा च गौडीया। रीतिरनुप्रासमहिमपरतन्त्राऽस्तोभवाक्या च" पुरुषोत्तमः। ७रागिणीभेदे स्त्री संगीतदा०। पुरशब्दे परे समासे अस्य "अरिष्टगौड़पूर्व्वम्" पा० अन्तोदात्तता। गौड़पुरम्।

गौड़पाद पुं० माण्डुक्योपनिषदि तदर्थकश्लोककारके वेदान्तिपण्डितभेदे। ते च "बहिःप्रज्ञो विभुर्विश्वो ह्यन्तःप्रज्ञस्तु तैजसः" इत्यादयः "दुर्दर्शमतिगम्भीरमजं साम्यं विशारदम्। बुद्धा पदमनानात्वं नमस्कुर्म्मो यथाबलम्" इत्यन्ताः शतं श्लोकाः।

गौड़वास्तुक पुंन० "तदेव च वृहत्पत्रं रक्तं चेत् गौड़वास्तुकम्" इत्युक्तलक्षणे वास्तुकभेदे। (चिल्लीशाक) राजनि०।

गौड़िक त्रि० गुडे साधु गुड़ा० ठक्। १इक्षौ। गौड़ः गुड़विकारः साधनतयाऽस्त्यस्य ठन्। २गुडविकारसाध्ये भक्ष्यभेदे। "वृंहणा गौड़िका भक्ष्या गुरवोऽनिलनाशनाः" "मधुमांसोपदंशं वा पिवेद्वाप्यथ गौड़िकम्" इति च सुश्रु०

गौण त्रि० गुणमधिकृत्य प्रवृत्ता गौणी तत आगतः अण्। १सादृश्यलक्षणलक्ष्यसम्बन्धरूपया गौण्या लक्षणया प्रवृत्ते शब्दे "गौणश्चेन्नात्मशब्दात्" शा० सू०। २अमुख्ये च। "यदाऽऽगामिक्रियामुख्यकालस्याप्यन्तरालवत्। गौणकालत्वमिच्छन्ति केचित् प्राक्तनकर्म्मणि" उद्वा०त० हरिहरपद्धतिः। "एवमागामियागीय मुख्य कालादधस्तनः। स्वकालादुत्तरो गौणः कालः सर्व्वस्य कर्म्मणः" छन्दोग०। "तदा गौणमनन्तस्य नामानन्तेति विश्रुतम्" भा० शा० १८२ अ०। "बहूनि मम नामानि कीर्त्तितानि महर्षिभिः। गौणानि तत्र नामानि कर्म्मजानि च कानि चित्" २४२ अ०। स्त्रियां ङीप्। "गौणश्रुतेः" शा० सू०। (गौणी-उत्पत्तिः) गुणं सादृश्यमधिकृत्य प्रवृत्ता अण् ङीप्। ३सादृश्यमूलकलक्षणाभेदे स्त्री। "सादृश्यात्तु मता गौण्यस्ताश्च षोड़शभेदिताः" सा०द०। "सादृश्येतरसम्बन्धेऽपि वृत्तेर्गौणत्वमिच्छन्ति। "अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते। लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता" काव्य प्र०।

गुणोऽप्रधानमेव स्वार्थे प्रज्ञा० अण्। ४अप्रधाने कर्मादौ। "गौणे कर्म्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्" व्या० का०। गौणस्य भावः ष्यञ् गौण्य न०, त्व गौणत्व न०, तल् गौणता स्त्री, अप्रधानत्वे "गवाश्वादेः स्वोऽन्ते गौण्येऽनीयसः" मुग्ध०। "वृत्तेरिष्टा तु गौणता" काव्यप्र० गौणत्वञ्च प्रसिद्धवस्तुभेदस्यैव यथाह शा०भा० "प्रसिद्धवस्तुभेदस्य गौणत्वमुख्यत्वप्रसिद्धेः। यस्य हि प्रसिद्धो वस्तुभेदः यथा केशरादिमानाकृतिविशेषोऽन्वयव्यतिरेकाभ्यां सिंहशब्दप्रत्ययभाङ् मुख्योऽन्यः प्रसिद्धः। ततश्चान्यः पुरुषः प्रायिकैः क्रौर्य्यशौर्य्यादिभिः सिंहगुणैः सम्पन्नः प्रसिद्धः तस्य पुरुषे सिंहशब्दप्रत्ययौ गौणौ भवतः नाप्रसिद्धवस्तुभेदस्य"।

गौणचान्द्र पुं०। "चान्द्रोऽपि द्विविधः प्रोक्तो गौणमुख्यप्रभेदतः। गौणः कृष्णप्रतिपदः पौर्णमास्यन्त ईरितः" शब्दर० उक्ते कृष्णपदादिपौर्णमास्यान्ते चान्द्रे मासे तत्र व्यवस्था नि० सि० उक्ता यथा

त्रिकाण्डमण्डनः "चान्द्रोऽपि शुक्लपक्षादिः कृष्णादिर्वेति च द्विधा" इत्युक्त्वा देशभेदेन तद्व्यवस्थामाह "कृष्णपक्षादिकं मासं नाङ्गीकुर्वन्ति केचन। येऽपीच्छन्ति न तेषाञ्च देशे विन्ध्यस्य दक्षिणे" इति विन्ध्यस्य दक्षिणे कृष्णादिनिषेधात् उत्तरतोद्वयोरभ्यनुज्ञा गम्यते तत्रापि शुक्लादिर्मुख्यः कृष्णादिर्गौणः शास्त्रेषु चैत्रशुक्लप्रतिपद्येव चान्द्रसंवत्सरारम्भोक्तेः तदुक्तं दीपिकायां "चान्द्रोऽब्दोमधुशुक्लप्रतिपदारम्भः" इति न हि ते कृष्णादिं मन्यन्ते तेषां वत्सरारम्भोऽसिद्ध्यते अतः शुक्लादिर्मुख्यः कृष्णादिना मलमासाकल्पनाच्च चान्द्रस्य सर्वनक्षत्रभोगेन नाक्षत्रमासः। सावनादीनां व्यवस्थोक्ता हेमाद्रौ ब्रह्मसिद्धान्ते "अमावास्यापरिच्छिन्नोमासः स्याद्ब्राह्मणस्य तु। संक्रान्तिपौर्णमासीभ्यां तथैव नृपवैश्ययोः"। अत्र ब्राह्मणादीनां यत्र कर्मविशेषे वचनान्तरेण "वसन्ते ब्राह्मणोऽग्निमादधीत" इत्यादिवन्मास उक्तस्तत्र दर्शान्तत्वमात्रं नियम्यते न तु सर्वकर्मसु दर्शान्तएवेति इष्ट्याद्यर्थसौभरेयादिनिधननियमवद्विधिलाघवात् त्रैवर्णिकानां सर्वकर्मसु मासविशेषविधेः सावनादीनां शूद्रानुलोमादिपरत्वापत्तेश्चेति गुरुचरणाः। ज्योतिर्गर्गः "सौरमासो विवाहादौ यज्ञादौ सावनः स्मृतः। आब्दिके पितृकार्ये च चान्द्रोमासः प्रशस्यते"। ऋष्यशृङ्गः "विवाहव्रतयज्ञेषु सौरं मासम्प्रचक्षते। पार्वणे त्वष्टकाश्राद्धे चान्द्रमिष्टन्तथाब्दिके" स्मृत्यन्तरे "एकोद्दिष्टविवाहादौ पारणादौ सौरसावनौ" ज्योतिर्गर्गः "आयुर्दायविभागश्च प्रायश्चित्तक्रिया तथा। सावनेनैव कर्त्तव्या शत्रूणां चाप्युपासना" विष्णुधर्मे "नक्षत्रसत्रायणानि चेन्दोर्मासेन कुर्य्यान्नगणात्मकेनेति" ब्राह्मे "तिथिकृत्ये च कृष्णादिं व्रते शुक्लादिमेव च। विवाहादौच सौरादिं मासं कृत्ये विनिर्दिशेत्"

गौणिक त्रि० गुणे रूपादौ साधु कथा०ठक्। १गुणसाधने। गुणं वेत्ति तत्प्रतिपादकं ग्रन्थमधीते वा उक्था० ठक्। वसन्ता० ठक् वा। २गुणवेत्तरि ३तद्ग्रन्थपाठके च त्रि० गुणैः सत्त्वादिभिः निर्वृत्तः ठञ्। सत्त्वादिनिर्वृत्ते ४पदार्थे स्त्रियां ङीप्। तत्र गुणभेदेन गतिभेदो मनुना दर्शितो यथा

"येन यांस्तु गुणेनैषां संसारान् प्रतिपद्यते। तान् समासेन वक्ष्यामि सर्वस्यास्य यथाक्रमम्। देवत्वं सात्त्विका यान्ति मनुष्यत्वञ्च राजसाः। तिर्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः। त्रिविधा त्रिविधैषा तु विज्ञेया गौणिकी गतिः। अधमा मध्यमाऽग्र्या च कर्मविद्याविशेषतः। स्थावराः कृमिकीटाश्च मत्स्याः सर्पाः सकच्छपाः। पशवश्च मृगाश्चैव जघन्या तामसी गतिः। हस्तिनश्च तुरङ्गाश्च शूद्रा म्लेच्छाश्च गर्हिताः। सिंहा व्याघ्रा वराहाश्च मध्यमा तामसी गतिः। चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिकाः। रक्षांसि च पिशाचाश्च तामसीषूत्तमा गतिः। झल्ला मल्ला नटाश्चैव पुरुषाः शस्त्रवृत्तयः। द्यूतपानप्रसक्ताश्च जघन्या राजसी गतिः। राजानः क्षत्रियाश्चैव राज्ञश्चैव पुरोहिताः। वादयुद्धप्रधानाश्च मध्यमा राजसी गतिः। गन्धर्वा गुह्यका यक्षा विबुधानुचराश्च ये। तथैवाप्सरसः सर्वा राजसीषूत्तमा गतिः। तापसा यतयो विप्रा ये च वैमानिका गणाः। नक्षत्राणि च दैत्याश्च प्रथमा सात्त्विकी गतिः। यज्वान ऋषयो देवा वेदा ज्योतींषि वत्सराः। पितरश्चैव साध्याश्च द्वितीया सात्त्विकी गतिः। ब्रह्मा विश्वसृजो धर्मो महानव्यक्तमेव च। उत्तमां सात्त्विकीमेतां गतिमाहुर्मनीषिणः। एष सर्वः समुद्दिष्टस्त्रिप्रकारस्य कर्मणः। त्रिविधस्त्रिविधः कृत्स्नः संसारः सार्वभौमिकः"। गुणएव अङ्गुल्या० स्वार्थे ठक्। ५गुणशब्दार्थे पु०

गौतम पु० गोतमस्यर्षेर्गोत्रापत्यम् ऋष्यण्। १गोतमर्षिगोत्रापत्ये २भरद्वाजमुनौ पु०। स च वैवस्वते मन्वन्तरे सप्तर्षिमध्यवर्त्ती यथाह हरिवं० ७अ० "अत्रिर्वसिष्ठोभगवान् कश्यपश्च महानृषिः। गौतमश्च भरद्वाजो विश्वामित्रस्तथैव च। तथैव पुत्रो भगवानृचीकस्य महात्मनः। सप्तमो जमदग्निश्च ऋषयः साम्प्रता दिवि" शतानन्दपिता अहल्यापतिश्च गौतमस्ततोभिन्न एव। तत्कथा च" रा० बा० ४८।४९अ० "गौतमस्याश्रमं श्रेष्ठ पूर्वमासीन्महात्मनः इत्यादौ दृश्या अहल्यापुत्रे ३शतानन्दे "गौतमस्य शतानन्दः" वीरच०। गोतमगोत्रस्य शरद्वतोऽपत्ये ४कृपाचार्य्ये ५तस्य भगिन्यां द्रोणपत्न्यां कृप्यां स्त्री ङीप्। "कृपः स्मृतः स वै तस्मात् गौतमी च कृपी मता। एते शारद्वताः प्रोक्ता एते ते गौतमाः स्मृताः" हरिवं ३२अ०। कृपशब्दे २१९२पृ० विवृतिः। "तत आसाद्य तरसा दारुणं गौतमीसुतम्" (अश्वत्थामानम्) भाग० १।७।४७श्लो०। ६मायादेवीसुते शाक्यमुनौ अमरः। एकतादीनां मुनीनां ७पितरि। "आसन् पूर्वयुगे राजन्! मुनयोभ्रातरस्त्रयः। एकतश्च द्वितश्चैव त्रितश्चादित्यसन्निभाः" इत्युपक्रमे "तेषाञ्च

तपसा प्रीतो नियमेन दमेन च । अभवद् गौतमो नित्यं पिता धर्म्मरतः सदा” भा॰ शा॰ ३७अ॰ । ८दुर्गायां स्त्री मेदि॰ “गौतमीं कंसभयदां यशोदानन्दवर्द्धिनीम्” हरिवं॰१७अ॰ । ९राक्षसीभेदे स्त्री शब्दर॰ । तस्येदमित्यण् ङीप् । १०गोदावरीनद्यां स्त्री गौरा॰ङीष् । “गौतमस्याघनाशिनी” इति गोदावरीस्नानमन्त्रलिङ्गादघनाशाय तस्यास्तत्सेवितत्वाद्वा तथात्वम्” “ताम्रारुणा वेत्रवती पर्णाशा गौतमी तु सा । गोदावरी च वेणा च” भा॰ आ॰१६५अ॰। ११गोरोचनायाञ्च स्त्री राजनि॰। १२शाक्यमुनिप्रणीतविद्यायाम् १३गौतमप्रणीतायां षोड़शपदार्थविद्यायाञ्च स्त्री । “अधीत्य गौतमीं विद्यां शृगालत्वमवाप्नुयात् । पुराणान्तरे तद्विद्याध्ययननिषेधः ।

गौतमसम्भवा स्त्री गौतमाय तदघनाशाय सम्भवतीति अच् । गौतमगङ्गायां गोदावरीनद्याम् राजनि॰। ब्रह्मपु॰गौतमं प्रति त्र्यम्बकवाक्यम् । “इयन्तु गौतमी पुत्र ! यत्र क्वापि ममाज्ञया । सर्वेषां सर्वदा नृणां स्नानान्मुक्तिं प्रदास्यति । क्वचित् काले पुण्यतमं किञ्चित्तीर्थं सुसङ्गमे । सर्वेषां सर्वदा तीर्थं गौतमीं नात्र संशयः । इयं माहेश्वरी गङ्गा गौतमी वैष्णवीति च । ब्राह्मी गोदावरी नन्दा सुनन्दा कामदायिनी । ब्रह्मतेजःसमानीता सर्वपापप्रणाशिनी” “एवमेषाऽपि ते प्रोक्ता गङ्गाख्याता महामते ! । माहेश्वरी वैष्णवी च सैव ब्राह्मी च पावनी । भागीरथी देवनदी हिमवच्छिखराश्रया । महेश्वरजटाभारैरेवं द्वैविध्यमागतम् । बिन्ध्यस्य दक्षिणे गङ्गा गौतमी सा निगद्यते । उत्तरे सापि विन्ध्यस्य भागीरथ्यभिधीयते”

गौत्तम पु॰ गच्छतीति गं गात्रमुत्तायति उद्+तम-अच् स्वार्थे अण् । स्थावरविषभेदे हेमच॰ । [सम्बन्धिनि ।

गौदन्तेय त्रि॰ गोदन्तस्येदम् शुभ्रा॰ ढक् । गोदन्तचन्दन

गौदानिक त्रि॰ गोदानं कर्म्मास्य ब्रह्मचर्य्यस्य महानाम्न्यादिभ्यः षष्ठ्यर्थे उपसंख्यानम्” वार्त्ति॰ ठक् । १गोदानाख्यब्रह्मचर्य्यसम्बन्धिनि । गोदाने उक्तं ठक् । २गोदानोक्ते कर्म्मणि । “उपरि सविधं कृत्वा गामनञ्च ब्राह्मणेभ्यः प्रदाय गौदानिकं कर्मः कुर्व्वीत” आश्व॰ गृ॰ ३।८।६। “ततो गोदानोक्तं कर्म्मेहापि कुर्य्यात्” नारा॰ वृत्तिः । [गौधेरोऽप्यत्र गोधाशब्दे दृश्यम् ।

गौधार पु॰गोधायाः अपत्यम् आरक् । गोधापुत्रे । गौधेयः

गौधूम त्रि॰ गोधूमस्य विकारः बिल्वा॰ अण् । गोधूमविकारे रोटिकादौ स्त्रियां ङीप् । “गौधूमं चषालं भवति” शत॰ ब्रा॰ ५।२।१।६। “उत्कीर्णसमाप्तो गोधूमचषालः” कात्या॰श्रौ॰१४।१।२७। “गोधूमपिष्टमयचषालो भवतीत्यर्थः । [भवनयोग्ये क्षेत्रे ।

गौधूमीन न॰गोधूमस्य भवनं क्षेत्रम् गोधूम-खञ् । गोधूम

गौधेरकायणि पुंस्त्री गोधेरस्यापत्यं वाकिना॰ फिञ् कुक् च । गौधेरापत्ये । पक्षे अत इञ् न कुक् । गौधेरि तदपत्ये पुंस्त्री ।

गौनर्द त्रि॰ गोनर्ददेशे भवः प्राचोभिन्नमते एङादित्वेऽपि वृद्धत्वाभावात् न छ, किन्तु अण् । १गोनर्ददेशभवे २पातञ्जलमुनौ पु॰

गौपत्य न॰ गोपतेर्भावः पत्यन्तत्वात् यक् । गोपतिभावे गोस्वामित्वे । “विश्वरूप्यूर्जा मा विश गौपत्येन” यजु॰ ३।२२। “रायस्पोषं गौपत्यन्” । ४१।५८।

गौपवन पु॰ गोपवनशब्दे व्युत्पत्तिः । ऋषिभेदे स च मधुकाण्डस्य वंशस्थोमुनिभेदः “अथ वंशः पौतिमाष्यात् गौपवनात् गौपपनः” वृ॰उ॰ ४।६।१ ।

गौपिक पु॰ स्त्री गोपिकाया अपत्यम् ढकोबाधकः शिवा॰ अण् । गोपिकाऽपत्ये स्त्रियां ङीप् ।

गौपिलेय त्रि॰ गोपिल+चतुरर्थ्यां सख्या॰ ढक् गोपिलनिर्वृत्तादौ । [सदृशे ।

गौपुच्छ त्रि॰गोपुच्छमिव शर्करा॰ इवार्थे अण् । गोपुच्छ-

गौपुच्छिक त्रि॰ गोपुच्छेन क्रीतम् ठञ् । १गोपुच्छक्रीते । गोपुच्छेन तरति ठञ् । २गोपुच्छेन तारके च ।

गौप्तेय पु॰ स्त्री गुप्ता वैश्यजातिस्त्री तस्या अपत्यम् शुभ्रा॰ ढक् तन्नामिकाणोऽपवादः । गुप्ताया अपत्ये ।

गौभृत त्रि गोभृता निर्वृत्तं सङ्कला॰अण् । गोभृता निर्वृत्ते

गौमत त्रि॰ गोमत्यां भवः पलद्या॰ अण् । गोमतीनदीभवे मत्स्यादौ ।

गौमतायन पु॰ स्त्री गोमत्यां भवादि वा॰ फञ् । गोमतीभवादौ । ततः अरीहणा॰चतुरर्थ्यां वुञ् । गौमतायनक॰ तन्निर्वृत्तादौ त्रि॰ । [निर्वृत्तादौ ।

गौमयिक त्रि॰ गोमयेन निर्वृत्तादि कुमुदा॰ ठञ् । गोमय

गौमायन पु॰स्त्री गोमिनोगोत्रापत्यम् अश्वा॰फञ् टिलोपः । गोस्वामिगोत्रापत्ये ।

गौर पु॰ गुङ्-गतौ र नि॰ वृद्धिः गुर-घञ् प्रज्ञाद्यण् वा । १चन्द्रे २श्वेतसर्षपे मेदि॰ ३धववृक्षे राजनि॰ ४पीतवर्णे ५श्वेतवर्णे ६अरुणवर्णे च पु॰ ७तद्विशिष्टे त्रि॰

स्त्रियां गौरा॰ङीप्। ८श्रीचैतन्यदेवे महाप्रभौ अनन्तसंहिता। ९पद्मकेशरे न॰ मेदि॰ १०स्वर्णे ११कुङ्कुमे च न॰ राजनि॰। तत्र श्वेतवर्णयुक्ते "कैलासगौरं वृषमारुरुक्षोः" रघुः पीतवर्णाद्ये "गोरोचनापेनितान्त गौरे" कुमा॰ अरुणवर्णाद्ये "कीर्णैः पिष्टातकौघैः कृतदिवसमुखैः कुङ्कुमक्षोदगौरैः" रत्नाव॰ "तरुणादित्यगौरैश्च शरगौरैश्च वानरैः" रामा॰ कि॰२०१स॰। "नितान्तगौर्य्यौ हृतकुङ्कुमेष्वलम्" किरा॰ १२परिमाणभेदे यथोक्तं याज्ञ॰ "जालसूर्य्यमरीचिस्थं त्रसरेणुरजः स्मृतम्। तेऽष्टौ लिक्षा च तास्तिस्रो राजसर्षप उच्यते। गौरस्तु ते त्रयः षट् च यवोमध्यस्तु ते त्रयः" इति। १३मृगभेदे पु॰ स्त्री "गौरजो महिषः कृष्णः शूकरो गवयो रुरुः। द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम!। खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा। एते चैकशफाः क्षत्तः!" भाग॰ ३।१०।२२। अ॰। "महोरगाश्च भयतो विद्रवन्ति सगौरकृष्णाः शरभाश्चमर्यः" भाग॰ ८।२।१६अ॰। १४विशुद्धे त्रि॰ मेदि॰। "कडारा॰कर्मधारयेऽस्य वा पूर्वनिपातः गौरपटः पटगौरः।

गौरक्ष्य न॰ गोरक्षस्य भावः कर्म्म वा ष्यञ्। वैश्यकर्म्मभेदे पाशुपाल्ये। "कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म्म स्वभावजम्" गीता।

गौरग्रीव पु॰ गौरी ग्रीवाऽस्य। १देशभेदे २तद्देशवासिनि च तस्यापत्यम् तस्येदं वा रैवतका॰ छ गौरग्रीवीय। ३तदपत्ये पुंस्त्री ४तत्सम्बन्धिनि त्रि॰ गौरग्रीवदेशश्च बृ॰स॰१४अ॰ कूर्म्मविभागे मध्यभागे उक्तः। "गौरग्रीवोद्देहिकगुडाश्वत्थपाञ्चालाः"।

गौरचन्द्र पु॰ चैतन्यदेवे महाप्रभौ "कृष्णचैतन्यो गौराङ्गो गौरचन्द्रः शचीसुतः। प्रभुर्गौरो गौरहरिर्नामानि भक्तिदानि मे" अनन्तसंहिता एतस्य दृढतरप्रमाणत्वं संप्रदायविदो न मन्यन्ते।

गौरजीरक पु॰ कर्म॰। श्वेतजीरके। राजनि॰।

गौरतित्तिरि पुंस्त्री श्वेततित्तिरिभेदे। "तित्तिरिः सर्व्वदोषघ्नो ग्राही वर्णप्रसादनः। हिक्काश्वासानिलहरो विशेषात् गौरतित्तिरिः" इत्युक्ते तन्मांसगुणोक्तिः [राजनि॰।

गौरत्वच् पु॰ गौरी त्वक् यस्य। इङ्गुदीवृक्षे (जियापुति)

गौरपृष्ठ पु॰ यमसभासदनृपभेदे। "इन्द्रद्युम्नो भीमजानुर्गौरपृष्ठो नलोगयः" भा॰स॰ अ॰ मयसभावर्णने।

गौरमुख पु॰ गौरं विशुद्धं मुखमस्य। शमीकर्षेः शिष्ये १मुनिभेदे तेन हि शिष्येण स्वपुत्रशृङ्गिशापवृत्तान्तं शमीकर्षिः परिक्षिते न्यवेदयत् तत्कथा भा॰आ॰४२अ॰। "एवमादिश्य शिष्यं स प्रेषयामास सुव्रतः। परिक्षिते नृपतये दयापन्नो महातपाः। संदिश्य कुशलप्रश्नं कार्य्यवृत्तान्तमेव च। शिष्यं गौरमुखं नाम शीलवन्तं समाहितम्। सोऽभिगम्य ततः शीघ्रं नरेन्द्रं कुरुवर्द्धनम्। विवेश भवनं राज्ञः पूर्व्वं द्वाःस्थैर्निवेदितः। पूजितस्तु नरेन्द्रेण द्विजो गौरमुखस्तदा। आचख्यौ च परिश्रान्तो राज्ञे सर्व्वमशेषतः। शमीकवचनं घोरं यथोक्तं मन्त्रिसन्निधौ। गौरमुख उवाच। शमीको नाम राजेन्द्र! विषये वर्त्तते तव। ऋषिः परमधर्म्मात्मा दान्तः शान्तो महातपाः" "तस्य त्वया नरव्याघ्र! सर्पः प्राणैर्वियोजितः। अवसक्तो धनुष्कोट्या स्कन्धे मौनान्वितस्य च। क्षान्तवांस्तव तत्कर्म पुत्रस्तस्य न चक्षमे। तेन शप्तोऽसि राजेन्द्र! पितुरज्ञातमद्य वै। तक्षकः सप्तरात्रेण मृत्युस्तव भविष्यति। तत्र रक्षां कुरुष्वेति पुनः पुनरथाब्रवीत्। तदन्यथा न शक्यञ्च कर्त्तुं केनचिदप्युत। न हि शक्नोमि तं यन्तुं पुत्रं कोपसमन्वितम्। ततोऽहं प्रेषितस्तेन तव राजन्! हितार्थिना"। गौरं शुक्लं मुखमस्य। श्वेतमुखादौ त्रि॰ स्त्रियां स्वाङ्गत्वात् वा ङीष्।

गौरमृग पु॰ स्त्री नित्यकर्म॰। गौरवर्णे मृगभेदे स्त्रियां ङीष्। "क्रोष्टा मायोरिन्द्रस्य गौरमृगः" यजु॰ २४।३।

गौरव न॰ गुरोर्भावः कर्म्म वा पृथ्वा॰ वा अण्। १गुरुत्वे २तत्कर्म्मणि च। "तथापि यन्मय्यपि ते गुरुरित्यस्ति गौरवम्" माघः। "तामगौरवभेदेन" "आयवलं गौरवमाश्रितेषु" कुमा॰। "सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते" मनुः। गौरवं साधनतयास्त्यत्र अच्। ३गौरवहेतुके अभ्युत्थाने हेम॰। गुरोरिदम् अण्। ४गुरुसम्बन्धिनि त्रि॰। "लघ्वगमया भगणेन गुरोर्गौरववत्सराः" वशिष्ठसिद्धान्तः।

गौरवाहन पु॰ श्वेतवाहने नृपभेदे। "कुन्तिभोजो महातेजाः पार्थिवो गौरवाहनः" भा॰ स॰ ३३अ॰।

गौरवित त्रि॰ गौरवं जातमस्य तार॰ इतच्। पूज्ये। "गौरवितक्रियाहेतुर्भक्तिः" शब्दचि॰ मथुरानाथः।

गौरशाक पु॰ गौरः शाकोऽस्य। मधूकभेदे जटा॰।

गौरशिरस् त्रि॰ गौरं शिरोऽस्य अतिवृद्धत्वात्। १शुक्लवर्णकेशयुक्ते २मुनिभेदे पु॰। "शङ्खश्च लिखितश्चैव तथा गौरशिरा मुनिः" भा॰ स॰ ७अ॰ इन्द्रसभ्योक्तौ। स च

राजनीतिशास्त्रप्रणेता यथाह" भा० शा० ५८अ० । "विशालाक्षश्च भगवान् काव्यश्चैव महातपाः । सहस्राक्षो महेन्द्रश्च तथा प्राचेतसो मनुः । भारद्वाजश्च भगवांस्तथा गौरशिरा मुनिः । राजशास्त्रप्रणेतारो ब्रह्मण्या ब्रह्मवादिनः"

गौरसर्षप पु०कर्म्म०। १श्वेतसर्षपे (सितसरिषा) रत्नमाला। तद्गुणा भावप्र० उक्ता यथा "गौरस्तु सर्षपः प्राज्ञैः सिद्धार्थ इति कथ्यते । सर्षपस्तु रसे पाके कटुः स्निग्धः सतिक्तकः। तीक्ष्णोष्णः कफवातघ्नो रक्तपित्ताग्निवर्द्धनः। रक्षोहरो जयेत् कण्डूं कुष्ठकोष्ठकृमिग्रहान्। यथा रक्तस्तथा गौरः किन्तु गौरो वरो मतः"। स च क्षौमशोधकः यथाह मनुः "श्रीफलैरंशुपट्टानां क्षौमाणां गौरसर्षपैः" द्रव्यशुद्धौ। "सगौरसर्षपैः क्षौरम्" "गौरसर्षपकल्केन साज्येन साधितस्य च" याज्ञ०। २राजसर्षपत्रयमिते परिमाणे च। "त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः। ता राजसर्षपास्तिस्रस्ते त्रयो गौरसर्षपः" मनुः।

गौरसुवर्ण पु० गौरः श्वेतः सुष्ठु वर्णोऽस्य। चित्रकूटप्रसिद्धे पत्रशाकभेदे "गौरसुवर्णं शिशिरं कफपित्तज्वरप्रणुत्। दाहारुचिभ्रान्तिरक्तश्रमहृत् पथ्यमेव च" राजनि० तद्गुणा उक्ताः।

गौरा स्त्री गौर+गौरादिगणे वर्णवाचिन एव गौरशब्दस्य ग्रहणात् विशुद्धार्थपरत्वे टाप्। विशुद्धायाम् स्त्रियाम् द्विरूपकोषः। तदर्थपरतायामेव टाबन्तता वर्णपरत्वे तु ङीषित्तत्याकारे स्थितम्।

गौराङ्ग पु० गौरं श्वेतं पीतं वाऽङ्गमस्य। १विष्णौ "श्वेतो रक्तस्तथा पीत इदानीं कृष्णतां गतः" भाग०१०स्क० तस्य युगावतारे श्वेताङ्गत्वात् पीताङ्गत्वाच्च तथात्वम्। गौरं विशुद्धमङ्गमस्य। विशुद्धकान्तियुक्ते नन्दनन्दने २श्रीकृष्णे च "गौराङ्गं गौरदीप्ताङ्गं पठेत् स्तोत्रं कृताञ्जलिः। नन्दगोपसुतं चैव नमस्यामि गदाग्रजम्" ब्रह्मयामलम्। "गौराङ्गो नादगम्भीरः स्वनामामृतलालसः" कृष्णयामलम्। ३नवद्वीपस्थशचीपुत्रे इति वैष्णवाः। ते हि तत् परतयैव यामलवाक्यद्वयं व्याचख्युः ४गौरवर्णदेहके त्रि०स्त्रियां ङीष्। गौराङ्गताहेतुरौषधमुक्तं गरु० पु० १६४ अ० यथा "कुष्माण्डनालक्षारस्तु सगोमूत्रश्च तत्त्वचः। जलपिष्टा हरिद्रा च सिद्धा मन्दानलेन हि। माहिषेण पुरीषेण वेष्टिता वृषभध्वज!। अस्या उद्वर्त्तनं कुर्य्यादङ्गगौरत्वसाधनम्"।

गौराजाजी स्त्री कर्म्म०। श्वेतजीरके राजनि०।

गौरादि पु० "षिद्गौरादिभ्यश्च" पा० उक्ते ङीष्निमित्ते शब्दगणभेदे स च गणः पा० ग० सू० उक्तो यथा "गौर मत्स्य मनुष्य शृङ्ग पिङ्गल हय गवय मुकय ऋष्य पुट द्रुण द्रुण द्रोण हरिण काकण पटर उणक आमलक कुवल बिम्ब बदर कर्कर तर्कार शर्कार पुष्कर शिखण्ड सलद शष्कण्ड सनन्द सुषम सुषव अलिन्द गडुल पाण्डश आढक आनन्द आश्वत्थ सृपाट आपच्चिक शष्कुल सूर्म शूर्प सूच यूष यूथ सूप मेथ वल्लक धातक सल्लक मालक मालत साल्वक वेतस वृष अतस उभय भृङ्ग मह मठ छेद पेश मेद श्वन् तक्षन् अनडुह अनड्वाह एषण (करणे) देह देहल काकादन गवादन तेजन रजन लवण औद्गाहमानि गौतम पारक अयस्थूण भौरिकि भौलिकि भौलिङ्गि यान मेध आलम्बि आलजि आलब्धि आलक्षि केवाल आपक आरट नट टोट नोट मूलाट शातन पोतन पातन पानठ आस्तरण अधिकरण अधिकार आग्रहायण प्रत्यवरोहिन् सेचन सुमङ्गल (संज्ञायाम्) अण्डर सुन्दर मण्डल मन्थर मङ्गल पट पिण्ड षण्ड उर्द गुर्द शम सूद आर्द ह्रद पाण्ड भाण्ड लोहाण्ड कदर कन्दर कदल तरुण तलुन कल्माष बृहत् महत् सोम सौधर्म रोहिणी (नक्षत्रे) रेवती (नक्षत्रे) विकल निष्कल पुष्कल कटी (श्रोणिवचने)। पिप्पल्यादयश्च। पिप्पली हरितकी कोशातकी शमी वरी शरी पृथिवी क्रोष्ट्री मातामही पितामही आकृतिगणः"। गौरशब्दस्य लोपधभिन्नवर्णवाचित्वेऽपि प्रातिपदिकस्वरेणोत्सर्गतः कृष्णेतिवदन्तोदात्ततया अन्यतो ङीषित्यस्याप्रवृत्तेर्गणे पाठः।

"उपाद् द्व्यजजिनमगौरादयः" पा० उपात् परस्य द्व्यजन्तादेरन्तोदात्ततायां पर्युदस्ते शब्दगणे स च गणः पा० ग० उक्तो यथा "गौर तैष तैल लेट लोट जिह्वा कृष्ण कन्या गृध कल्पपाद।" उपगौरः.

गौरार्द्रक न० नित्यकर्म्म०। स्थावरविषभेदे हेमच०।

गौरावस्कन्दिन् पु० गुरोरिदं गौरवं गुरुपत्नीरूपं कलत्रं तदास्कन्दति आ+स्कन्द–णिनि वेदे पृषो० वर्णविपर्य्ययः। अहल्याजारे शक्रे इन्द्रागच्छेत्युपक्रमे "गौरावस्कन्दिन्नहल्यायै जारेति" शत० ब्रा० ३।३।४।१८।

गौराश्व पु० गौरोऽश्वोऽस्य। १नृपभेदे। "अलर्कः कक्षसेनश्च गयो गौराश्व एव च" भा०स० ८ अ०। यमसभ्योक्तौ २श्वेतवाहने श्वेताश्वे अर्जुने च।

गौरास्य पुंस्त्री गौरमास्यं यस्य। गौरमुखे कृष्णदेहे वानरभेदे राजनि०। स्त्रियां जातित्वेऽपि योपधत्वात् न ङीष् किन्तु टाप्।

गौराहिक पुंस्त्री गौरः शुभ्रः अहिः कर्म०संज्ञायां कन्। सुश्रुतोक्ते निर्विषे सर्पभेदे "गौराहिकवृक्षशय" इति सुश्रु० अहिशब्दे दृश्यम्।

गौरि पु० गौरस्यापत्यम् इञ्। आङ्गिरसे ऋषिभेदे "गौरेराङ्गिरसस्य साम" श्रुतिः।

गौरिक त्रि० गौरवर्णोऽस्त्यस्य ठन्। १श्वेतवर्णयुक्ते २श्वेतसर्षपे पु० "यवाह्वगौरिकोन्मिश्रैः पादलेपः प्रशस्यते" सुश्रुतः।

गौरिमत् त्रि० गौरीं मन्यते मन+क्विप् ६त० ङ्यापोरिति संज्ञायां ह्रस्वः। १गौरीनामयुक्ते गौरीतीर्थे तत्रस्थे २नदीभेदे स्त्री शार्ङ्गर०ङीन्। (भोगवत् गौरीमत्) संज्ञायाम्" तद्गणसूत्रोक्तेः संज्ञायामेव ङीन् अन्यत्र ङीप्।

गौरिल पु० गौरवर्णोऽस्त्यस्य बा०इलच्। १सिद्धार्थे श्वेतसर्षपे २लौहचूर्णे च मेदि०।

गौरिवीति पु० गौर्य्यां वेदवाचि वीतिः विशेषगतिरस्य "ङ्यापोरिति" संज्ञायां ह्रस्वः। शक्तिसुनिपुत्रे ऋषिभेदे। "गौरवीतिः शाक्त्यः क्षत्रमिवाह" शत०ब्रा०१२।८।३।७। "स्तोमसामा गौरवीतेरवर्द्धनः" ऋ०५।२९।११। गौरिवीतेरेतन्नामकस्य मन्त्रद्रष्टुः" भा०। गौरिवीतिना दृष्टं साम अण्। गौरिवीत तद्दृष्टे सामभेदे "तृतीयसवनाच्चिद्विष्णोः शिपिविष्टवतीषु गौरिवीतेन" कात्या० श्रौ० २५।१२।३। "गौरिवीतं नाम सामभेदस्तेन स्तुवीरन्" कर्कः।

गौरिषक्थ पु० गौर्य्या इव सक्थि अस्य षच् समा० ह्रस्वः सुषामा० षत्वम्। गौरीतुल्यसक्थियुक्ते।

गौरी स्त्री गौर+गौरा० ङीष्। १गौरवर्णायां स्त्रियाम् "कपोलभित्तीरिव लोध्रगौरीः" माघः। २हिमालयसुतायां कालीनाम्न्यां मेनकाकन्यायां तस्याः प्राक् कृष्णवर्णत्वेन जातत्वेऽपि पश्चात् पीताङ्गत्वात् तथात्वं कालिकापुराणशब्दे २०१५पृ०४५अ०तन्मूलं दृश्यम्। पुराणान्तरे "योगाग्निदग्धदेहा सा पुनर्जाता हिमालये। शङ्खेन्दुकुन्दधवला ततो गौरीति सा स्मृता:" इत्युक्तम् तत् कल्पान्तरविषयम्। "अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी" स्मृत्युक्तायां ३अष्टवर्षायां स्त्रियाम्। ४हरिद्रायां ५दारुहरिद्रायाम् ६गोरोचनायां ७वरुणपत्न्याञ्च। ८प्रियङ्गुवृक्षे ९पृथिव्यां१०नदीभेदे च मेदि० "लेभे प्रसेनजिद्भार्य्यां गौरीं नाम पतिव्रताम्। अभिशस्ता तु सा भर्त्त्रा नदी वै बाहुदाऽभवत्" हरिवं० १२ अ० ११उक्तायां सूर्य्यवंश्यप्रसेनजिद्भार्य्यायाम् तस्याएव बाहुदानदीरूपत्वोक्तेः नदीविशेषः बाहुदानदीपर इति बोध्यम्। १२बुद्धशक्तिभेदे हेम०। १३मञ्जिष्ठायां १४श्वेतदूर्वायां १५मल्लिकायां १६तुलस्यां १७सुवर्णकदल्याम् १८आकाशमांस्याञ्च राजनि०। सर्व्वासाञ्चासां शुभ्रपीतरक्तविशुद्धपत्रपुष्पादियुक्तत्वात्तथात्वम् १९रागिणीभेदे संगीतदामो०। २०वाचि निघण्टुः। "गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी। अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्" ऋ०१।१६४।४०। "गौरी गेरणशीला शब्दब्रह्मात्मिका च वाक् मिमाय। मिमतिः प्रतिष्ठार्थे धातुः। प्रतिष्ठितानि घटादिद्रव्याणि तक्षती तत्तद्वाचकत्वेन निष्पादयन्ती। एकपदी अव्याकृतत्वेनैकप्रतिष्ठानैकरूपावात्मना। द्विपदी सुप्तिङ्भेदेन पदद्वयवती। चतुष्पदी नामाख्यातोपसर्गनिपातभेदेन। अष्टापदी आमन्त्रितसहितसप्तविभक्तिभिरष्टभेदेनाष्टापदी। नवपदी नवसु पदेषु भवन्ती बभूवुषी पश्चाद्बहुविधाभिव्यक्तिमुपेयुषी परमे व्योमन् उत्कृष्टे हृदयाकाशे मूलाधारे सहस्राक्षराऽनेकाकारेण व्याप्ताऽनेकध्वनिप्रकारा भवतीत्यर्थः" भा०। निरु०११।४। व्याख्यान्तरं दृश्यम्। गौरीरिति सुलोपाभावःच्छान्दसः। "सोमो गौरी अधिश्रितः" ऋ०९।१।१२।२। गौरी गौर्य्याम् मध्यमायां वाचि" भा० "सुपां सुलुक्" पा० सप्तम्या लुक्। "ईदूतौ च सप्तम्यर्थे" पा० तस्य प्रगृह्यसंज्ञत्वात् न यणादेशः, भा०। २१दीप्तिमत्यां स्त्रियां निरु०। "गौरी रोचते ज्वलतिकर्म्मणः। अय पीतोवा गौरोवर्णः एतस्मादेव प्रशस्तो भवति तस्या एषा भवति" "गौरीर्मिमाय सलिलानि" श्रुतिमधिकृत्य उक्तनिरुक्तिः। पार्वतीरूपा गौरी च माघशुक्लचतुर्थ्यां पूज्या यथाह ति० भविष्योत्त० पु० माघशुक्लमधिकृत्य "चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता। सौभाग्यमतुलं कुर्य्यात्"

गौरीकान्त पु० ६त० महादेवे गौरीनाथादयोऽप्यत्र।

गौरीगुरु पु०६त०। पार्वतीपितरि हिमालये "गौरीगुरोर्ग-

हरमाविवेश” रघुः “अखिलमिदममुष्य गौरीगुरोः” किरा० गौरीपित्रादयोऽप्यत्र ।

गौरीज न० गौर्य्या रजसो जायते जन–ड । १अभ्रके राजनि० अभ्रकशब्दे २११ पृ० दृश्यम् । २कार्त्तिकेये पु० ।

गौरीतक्र न० गौर्य्या निर्मितं तक्रम् । “लवणं मरिचं शिग्रुं जीरं नारङ्गजं त्वचम् । एलाचूर्णान्वितं तक्रं धूपयेत् हतहिङ्गुना । गौर्य्येदं विहितं तक्रं सर्वदोषनिवर्हणम्” शब्दार्थचि० उक्ते तक्रभेदे

गौरीपट्ट पु० गौर्य्याः पट्टमिव स्थानम् । शिवलिङ्गस्थे गौर्य्याः पूजास्थाने शिवलिङ्गशब्दे विवृतिः

गौरीपुत्र पु० ६त० । कार्त्तिके गौरीतनयादयोऽप्यत्र [राजनि०

गौरीपुष्प पु० गौरी हरिद्रेव पीतं पुष्पमस्य । प्रियङ्गुवृक्षे

गौरीमन्त्र पु० तन्त्रसारोक्ते गौर्य्या मन्त्रभेदे तस्योद्धारश्च “ह्रीं गौरि! रुद्रदयिते! योगेश्वरि! सवर्म (हुँ) फट् । द्विठान्तः षोडशवर्णोऽयं मन्त्रः सद्भिरुदीरितः”

गौरीललित न० गौरी हरिद्रेव ललितम् पीतवर्णत्वात् । हरिताले राजनि० ।

गौरीशिखर न० गौर्य्यास्तपःस्थानं शिखरम् । स्वनामख्याते पर्वतभेदशृङ्गरूपे तीर्थभेदे “प्रजासु पश्चात् प्रथितं तदाख्यया जगाम गौरी शिखरं शिखण्डिमत्” कुमा०

गौरीसुत पु० ६त० । १अष्टवर्षोढाजतनये शब्दार्थचि० । २कार्त्तिकेये च । [ठक् । गुरुपत्नीगामिनि ।

गौरुतल्पिक पु० गुरुतल्पं गुरुपत्नीं गच्छति परदारा०

गौलक्षणिक त्रि० गोलक्षणं वेत्ति तद्ग्रन्थमधीते वा “विद्यालक्षणकल्पान्ताच्च” वार्त्ति० ठक् । १गोलक्षणवेत्तरि २तद्ग्रन्थाध्येतरि च ।

गौलन्द्य पुंस्त्री गोलन्दगोत्रापत्यं गर्गा० यञ् । गोलन्दर्षिगोत्रापत्ये स्त्रियां जातित्वात् ङीष् यलोपः । गोलन्दी तदपत्यस्त्रियाम् । गौलन्द्यस्य छात्राः कण्वा० अण् यलोपः । गौलन्दास्तच्छात्रेषु ।

गौलाङ्कायन पुंस्त्री गोलाङ्कस्य गोत्रापत्यम् अश्वा० फञ् । गोलाङ्कर्षिगोत्रापत्ये स्त्रियां जातित्वात् ङीष् ।

गौलिक पु० गुडे साधु ठक् डस्य लः । मुष्ककवृक्षे राजनि०

गौलोमन त्रि० गोलोमेव शर्करा० अण् । गोलोमसदृशे स्त्रियां ङीप् ।

गौल्मिक पु० गुल्मे रक्षणार्थस्थानभेदे नियुक्तः ठक् । गुल्मरूपरक्षणार्थस्थाननियुक्ते यामिके सेनाभेदे “तथैव गुल्मे संप्रेक्ष्य शयानान् मध्यगौल्मिकान्” “त्यक्त्वा द्वाराणि च द्वाःस्थास्तथा गुल्मानि गौल्मिकाः” भा० शा० ८अ० [राजनि० ।

गौल्य न० गुडस्य भावः ष्यञ् डस्य लः । माधुर्ये मधुररसे

गौशतिक त्रि० गोशतमस्यास्ति “एकगोपूर्वात्” पा० शतसहस्रादित्यपकर्षात् ठञ् । गोशतस्वामिनि स्त्रियां ङीप् ।

गौष्ठ त्रि० गोष्ठ्यां भवः पलद्या० अण् । गोष्ठभवे स्त्रियां ङीप् । स्वार्थे अण् ङीप् गौष्ठीत्यपि गोष्ठ्याम् । तच्छब्दस्यैव पलद्यादिषु पाठ इत्यन्ये ।

गौष्ठीन न० पूर्वं भूत गोष्ठं खञ् । भूतपूर्वगोष्ठे । “तासुवाच स गौष्ठीने वने स्त्रीपुंसभीषणे” भट्टिः

गौसहस्रिक त्रि० गोसहस्रमस्त्यस्य गौशतिकवत् ठञ् । गोसहस्रस्वामिनि ।

गौह्लव्य पुंस्त्री गुह्लुलोर्ऋषेर्गोत्रापत्यम् गर्गा० यञ् । गुह्लुगोत्रापत्ये स्त्रियां ङीप् लोहिता० स्वार्थे ष्फः । गौह्लव्यायनी ।

ग्धि स्त्री अद–क्तिन् वेदे घसादेशः उपधालोपश्च तस्य जश्विधौ न स्थानिवत्त्वम् । भक्षणे । “सग्धिश्च मे” सि० कौ० धृता श्रुतिः ।

ग्ना स्त्री गम–बा० ना डिच्च । स्त्रीमात्रे “ग्नास्त्वा कृन्तन्नपसोऽतन्वत वयित्र्यो वयन्” ता० ब्रा० १।८।६। “गच्छन्ति पुंमासएना इति ग्नाः स्त्रियः” भा० “मेना ग्ना इति स्त्रीणां स्त्रियस्त्यायतेरपत्रपणकर्म्मणः । मेना मानयन्त्येनाम् । ग्ना गच्छन्त्येनाः” निरु० । २देवपत्न्याम् । “आ ग्ना अग्न इहावसे होत्राम्” ऋ० १।२२।१०। ग्ना देवपत्नी भा० । ग्ना अस्त्यस्य मतुप् मस्य वः । ग्नावत् सपत्नीके । “अभि यज्ञं गृणीहि नो ग्नावो नेष्टः” ऋ० १।१५।३। “मतुवसोरुः” संवुद्धौ विसर्गः भा० । ३वाचि निघ० । “त्वं ग्नावो मित्रमहः सजात्यम्” ऋ० २।१।५। ग्ना स्तुतियाचस्ताः सन्तीति मतुप् । “छन्दांसि वै ग्ना इति श्रुतेः ४वेदे च वेदस्य वाग्विशेषत्वात्तथात्वम् । “नराशंसो ग्नास्पतिर्नो अव्याः” ऋ० २.३८।१० ग्नास्पतिर्देवपत्नीनां पतिश्छन्दसां पतिर्वा” भा० “ग्नास्पतिरित्यत्र वा० सुट् । सान्तं वा शब्दान्तरम् अतएव निघण्टौ ग्नाः इति विसर्गान्तं पठितम् ।

ग्मा स्त्री गम्यतेऽत्र गम–बा० डा । पृथिव्यां निघ० ।

ग्रथ कुटिलीकरणे भ्वा० आत्म० इदित् सक० सेट् । ग्रन्थते अग्रन्थिष्ट जग्रन्थे । ग्रन्थते

ग्रथन न० ग्रन्थ–बा० क्यु नलोपः । (गाँथा) ।

“दोषस्थिरत्वात् ग्रथनाच्च” सुश्रुतः। “ग्रथनञ्च विदर्भस्य संपुटोरोधनं तथा। योगः पल्लव इत्येते विन्यासाः षट्सु कर्म्मसु”। “मन्त्रेणान्तरितान् कृत्वा साध्यवर्णान् यथाविधि।’ ग्रथनं तद्विजानीयात् प्रशस्तं शान्तिकर्म्मणि” २तन्त्रसारोक्ते “मन्त्रेणान्तरितसाध्यवर्णविन्यासभेदे च।

ग्रथित त्रि॰ ग्रन्थ—संदर्भे क्त नलोपः। सूत्रादिना कृतसन्दर्भे माल्यादौ “पर्य्यायग्रथिताक्षसूत्रवलयाः” प्रबो॰। “अथास्य रत्नग्रथितोत्तरीयम्” “कुसुमैर्ग्रथितामपार्थिवैः” (स्रजम्) रघुः। “तच्छ्लोककूटमद्यापि ग्रथितं सुदृढं मुने” भा॰ आ॰ १अ॰। “वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव” माघः। २क्रान्ते ३हिंसिते च मेदि॰।

ग्रथिन् त्रि॰ ग्रन्थ—बा॰ इनि किच्च नलोपः। जल्पके। “न्यक्रतून् ग्रथिनो मृध्रवाचः” ऋ॰ ७।६।३। “ग्रथिनो जल्पकान्” भा॰।

ग्रथ्न पु॰ ग्रन्थ—बा॰ नङ्। स्तवके। “शलाटु नीलमित्युक्तं ग्रथ्नः स्तवक उच्यते। कपुष्टिकाभितः केशाः मूर्द्ध्नि पश्चात् कपुष्टिका” भट्टनारायणधृतवाक्यम् “पश्चात् पतिरवस्थाय युग्ममौडुम्बरं शलाटुग्रथ्नमाबध्नाति” गोभिलसूत्रम्।

ग्रन्थ संदर्भे वा चु॰उभ॰पक्षे क्र्या॰ प॰सक॰सेट्। ग्रन्थयति—ते ग्रथ्नाति अजग्रन्थत् अग्रन्थीत्। ग्रन्थयामास बभूव चकार चक्रे। जग्रन्थ जग्रथतुः—जग्रन्थतुः। जग्रन्थिथ जग्रथिथ इत्येके। अस्य कविकल्पद्रुमे पा॰ गणे च परस्मैपदिष्वेव क्र्यादिकस्य पाठः। णिचि तु उभयपदिता। भारद्वाजीयास्तु पठन्ति “णिश्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणामात्मनेपदेषूपसंख्यानम्” श्रन्थिग्रन्थ्योराधृषीयत्वात् णिजभावपक्षे ग्रहणम्। ग्रन्थति ग्रन्थम्। श्रन्थति मेखलान्देवदत्तः। ग्रन्थते ग्रन्थः। अग्रन्थिष्ट। श्रन्थते। अश्रन्थिष्ट। इति भारद्वाजीयमते आत्म॰। तेनोभयपदता। सि॰कौ॰पक्षे भ्वा॰दित्वमपि तेन ग्रन्थति इत्यादि क्र्यादिकयोस्तु श्रथ्नीते। ग्रथ्नीते सि॰कौ॰। एतच्च कर्म कर्त्तरि न तु कर्त्तरि इत्यन्ये

उद् + उत्तोल्य ग्रथने। “केशपक्षान् उदग्रथ्नेतरान्” आश्व॰श्रौ॰१०।८।८ “लताप्रतानोद्ग्रथितैः स केशैः” रघुः। “माल्यानि तस्योद्ग्रथितानि पद्मैः” भा॰ व॰ ११२ अ॰ “कर्माशयं ग्रथितमुद्ग्रथयन्ति सन्तः” भाग॰ ४।२२।३७।

ग्रन्थ पु॰ ग्रन्थ—सन्दर्भे भावे घञ्। १गुम्फने। कर्म्मणि घञ्। २शास्त्रे “ग्रन्थग्रन्थिरिह क्वचित् क्वचिदपि न्यासि प्रयत्नान्मया” नैष॰। “ग्रन्थग्रन्थिं तदा चक्रे मुनिर्गूढं कुतूहलात्” भा॰ आ॰ १अ॰। ३धने ४द्वात्रिंशद्वर्णमितानुष्टुप् छन्दस्के श्लोके हेम॰।

ग्रन्थकार स्त्री ग्रन्थं करोति अण् उप॰ स॰। ग्रन्थकारके (शाकल्यम्) “तत्राह भगवांस्तुष्टो ग्रन्थकारो भविष्यति” भा॰ आनु॰ २८४ अ॰। कृ—क्विप् ६त॰। ग्रन्थकृदप्यत्र। “ग्रन्थकृल्लोकविख्यातो भविताप्यजरामरः” भा॰ आनु॰ १४अ॰। “ग्रन्थारम्भे विघ्नविघाताय समुचितेष्टदेवतां ग्रन्थकृत् परामृशति” काव्यप्र॰। तृच्। ग्रन्थकर्त्तृ ण्वुल् ग्रन्थकारक अत्रार्थे त्रि॰। तृचि स्त्रियां ङीप्।

ग्रन्थकुटी स्त्री ग्रन्थस्य कुटीव। लेख्यस्थाने त्रिका॰।

ग्रन्थन न॰ ग्रन्थ—भावे ल्युट्। (गाँथा) सन्दर्भे गुम्फने हेमच॰। चु॰ ग्रन्थ—युच्। ग्रन्थनाऽप्यत्र स्त्री।

ग्रन्थसन्धि पु॰ ६त॰। ग्रन्थस्य सन्धौ। तन्नामानि च कतिचित् त्रिका॰पठितानि। “सर्गो वर्गः परिच्छेदोद्घाताध्यायाङ्कसंग्रहाः। उच्छ्वासः परिवर्त्तश्च पटलः काण्डमस्त्रियाम्। स्थानं प्रकरणं पर्व्वाह्निकञ्च ग्रन्थसन्धयः”। उपक्रमे गुत्सादीत्युक्तेः अन्यदपि ग्रन्थसन्धिनाम भवतीति सूचितम्। तेन कुसुमाञ्जलौ स्तवकः, काव्यप्र॰उल्लासः,। वेदे प्रपाठकब्राह्मणानुवाकादयः।

ग्रन्थि पु॰ ग्रन्थ—संदर्भे भावे करणादौ वा यथायथं सर्व्वधातुभ्य, इन् नित्स्वरः, “खनिकषज्यसीत्यादिना इर्वा स्वरे भेदः। १वंशादिपर्व्वणि (गाँट) अमरः। २काण्डसन्धौ ३भद्रमुस्तायाम् ४हिताबल्यां ५पिण्डालौ राजनि॰। ६बन्धने ७रोगभेदे मेदि॰। ८मायापाशे “भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः” तैत्ति॰ उप॰। ग्रथि—कौटिल्ये भावे इन्। ९कौटिल्ये। कर्त्तरि इन्। १०ग्रन्थिपर्णवृक्षे मेदि॰। रोगभेद निदानादि सुश्रुते दर्शितं यथा “अथातो ग्रन्थ्यपच्यर्बुदगलगण्डानां निदानं व्याख्यास्यामः। वातादयो मांसमसृक्प्रदुष्टाः सन्दूष्य मेदश्च कफानुविद्धम्। वृत्तोन्नतं विग्रथितन्तु शोफं कुर्व्वन्त्यतोग्रन्थिरिति प्रदिष्टः। आयम्यते व्यथ्यत एति तोदं प्रत्यस्यते कृत्यत एति भेदम्। कृष्णोऽमृदुर्व्वस्तिरिवाततश्च भिन्नः स्रवेच्चानिलजोऽस्रमच्छम्। दन्दह्यते धूप्यति चानिमात्रं पापच्यते प्रज्वलतीव चापि। रक्तः सपीतोऽप्यथ वापि पित्ताद्भिन्नः स्रवेदुष्णमतीव चास्रम्। शीतो

विसर्गोऽल्परुजोऽतिकण्डुः पाषाणवत्संहननोपपन्नः । चिराभिवृद्धिश्च कफप्रकोपाद्भिन्नः स्रवेच्छुक्लघनञ्च पूयम् । शरीरवृद्धिक्षयवृद्धिहानिः स्निग्धोमहानल्परुजोऽतिकण्डुः । मेदःकृतो गच्छति चातिभिन्ने पिण्याकसर्पिःप्रतिमन्तु मेदः । व्यायामजातैरबलस्य तैस्तैराक्षिप्य वायुर्हि शिराप्रतानम् । संपीड्य सङ्कोच्य विशोष्य वापि ग्रन्थिं करोत्युन्नतमाशु वृत्तम् । ग्रन्थिः शिराजः स तु कृच्छ्रसाध्यो भवेद्यदि स्यात्सरुजश्चलश्च । अरुक् सएवाप्यचलो महांश्च मर्म्मोत्थितश्चापि विवर्जनीयः”

ग्रन्थिक न० ग्रन्थिरिव+कायति—कै—क ग्रन्थ+अस्त्यर्थे ठन् वा । १पिप्पलीमूले २ग्रन्थिपर्णे ३गुग्गुलौ ४करीरे वंशे ५दैवज्ञे ६सहदेवाख्ये पाण्डवे च पु० मेदि० ।

ग्रन्थित त्रि० ग्रथि—क्त । गुम्फिते अमरः ।

ग्रन्थिदला स्त्री ग्रन्थिर्दलेऽस्याः । मालाकन्दे राजनि० ।

ग्रन्थिदूर्वा स्त्री ग्रन्थिप्रधाना दूर्वा शा० त० । (गाँटदूर्वा) दूर्वाभेदे राजनि० ।

ग्रन्थिन् त्रि० ग्रन्थस्तदर्थो वा ज्ञेयतयाऽस्त्यस्य १ग्रन्थशिनि वा ग्रन्थार्थवेत्तरि २ग्रन्थयुक्ते तद्विशिष्टे ३ग्रन्थनकर्त्तरि च । अज्ञेभ्योग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणोवराः मनुः । “ग्रन्थी भवति पण्डितः” सर्वत्र स्त्रियां ङीप् । “सुम्न आपिर्हृदे चक्षुर्न ग्रन्थिनी चरण्युः” ऋ०१०।६५।६। ग्रन्थिनी ग्रन्थवती संदर्भवती” भा० ।

ग्रन्थिपत्र पु० ग्रन्थिप्रधानं पत्रमस्य । चोरकनाम गन्धद्रव्ये [राजनि० ।

ग्रन्थिपर्ण न० ग्रन्थौ पर्णान्यस्य ग्रन्थीनि ग्रन्थयुतानि वा पर्णान्यस्य । (गाठियाला) १वृक्षभेदे अमरः । “ग्रन्थिपर्णं तिक्ततीक्ष्णं कटूष्णं दीपनं लघु । कफवातविषश्वासकण्डूदौर्गन्ध्यनाशनम्” भावप्र० । २चोरनामगन्धद्रव्ये राजनि० ३जतुकालतायां स्त्री राजनि० ४गण्डदूर्वायां स्त्री राजनि० गौरा० ङीष् ।

ग्रन्थिफल पु० ग्रन्थि ग्रन्थियुक्तं फलमस्य । १कपित्थवृक्षे २मदनवृक्षे ३शाकरुण्डवृक्षे च राजनि० ।

ग्रन्थिबन्धन न० ६त० । (गाटबाँधा) पुस्तकादौ १दृढबन्धनार्थे बन्धनभेदे २जन्मतिथौ गोरोचनायुतसूत्रबन्धने च । “गुडदुग्धतिलानद्यात् जन्मग्रन्थेश्च बन्धनम् । गुग्गुलुनिम्बसिद्धार्थदूर्वागोरोचनायुतम्” कृत्यचि० ।

ग्रन्थिब(व)र्हिन् पु० ग्रन्थिं बर्हति बर्ह–स्तृतौ ग्रन्थिं बर्हति बर्ह–बधे णिनि । ग्रन्थिपर्णवृक्षे शब्दर०

ग्रन्थिभेद पु० ग्रन्थिं वस्त्रादिग्रन्थिं भिनत्ति भिद–अण् उप०स० । (गाटकाटा) चौरभेदे “अङ्गुलीं ग्रन्थिभेदस्य छेदयेत् प्रथमे ग्रहे । द्वितीये हस्तचरणौ तृतीये वधमर्हति” मनुः “उत्क्षेपकग्रन्थिभेदौ करसंदंशहीनकौ । कार्य्यौ द्वितीयापराधे करपादैकहीनकौ” याज्ञ०

ग्रन्थिमत् त्रि० ग्रन्थिरस्त्यत्र मतुप् । १ग्रन्थियुक्ते (गांटयुक्ते) स्त्रियां ङीप् “कृशात्वचं ग्रन्थिमतीं दधाना” कुमा० (हाडयोडा) २अस्थिसंहारिवृक्षे पु० भावप्र०

ग्रन्थिमत्फल पु० ग्रन्थिमत् फलमस्य । नकुचवृक्षे (मान्दार) इति ख्याते वृक्षे राजनि० ।

ग्रन्थिमूल न० ग्रन्थि गुम्फनवत् मूलं यस्य । १गृञ्जने राजनि० २मालादूर्वायां स्त्री टाप् राजनि० ।

ग्रन्थिल त्रि० ग्रन्थिर्विद्यतेऽस्य सिध्मा० लच् । ग्रन्थियुक्ते मेदि० २पिप्पलीमूले न० राजनि० । ३आर्द्रके न० शब्दच० ४विकङ्कतवृक्षे (वइँचि) ५करीरवृक्षे च अमरः । ६तण्डुलीयशाके ७छितावल्यां ८पिण्डालौ ९चोरनामगन्धद्रव्ये १०विकङ्कटवृक्षे च राजनि० । भद्रमुस्तायां ११मालादूर्वायां १२गण्डदुर्वायाञ्च स्त्री राजनि० ।

ग्रन्थिहर पु० ग्रन्थिं हरति हर–अच् । अमात्ये मन्त्रिणि [त्रिका०

ग्रन्थीक न० ग्रन्थिक+पृषो० । पिप्पलीमूले द्वि०को०

ग्र(ग्ल)प्स पु० ग्रथ+पृषो० द्विधारूपम् । स्तवके । “अथास्यै दुग्धेन शालाटुग्र(ग्ल)प्सेन, सीमन्तं व्यूहति” आश्व० गृ० १।१४।४। ग्र(ग्ल)प्सः स्तवक उच्यते” नारा० ।

ग्रस भक्षणे भ्वा० आत्म० सक० सेट् । ग्रसते अग्रसिष्ट जग्रसे । उदित् ग्रसित्वा ग्रस्त्वा । ग्रस्तः । “हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम्” माघः “सुमहान्तमपि ग्रासं ग्रसे लब्धं यदृच्छया” भा० शा० १७८ अ० । “य इमां पृथिवीं कृत्स्नां संक्षिप्य ग्रसते पुनः” भा०व० २६ श्लो० । “राहुग्रस्ते निशाकरे” भा० व० २६६७ श्लो० । ग्रासः । ग्रसनम् । क्विप् धातुत्वान्न दीर्घः ग्रत् ग्रसौ ग्रस इति ।

ग्रस भक्षणे वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् । ग्रासयति–ते ग्रसति अजिग्रसत्–त अग्रासीत् अग्रसीत् । ग्रासयाम् बभूव आस चकार चक्रे । ग्रसितः । “न च प्रापितमन्येन ग्रसेदर्थं कथञ्चन” मनुः ।

ग्रसन न० ग्रस–भावे ल्युट् । १भक्षणे “ग्रसनादजगरः शरीरप्राणहरो न विषात्” सुश्रु० । २राहुणा चन्द्रसूर्ययोरुपरागे च । वृ०स० ५ अ० उक्ते ल्वंशादि

३ग्रासे च । उपरागशब्दे विवृतिः । ४असुरभेदे पु० "दृष्ट्वा तदस्त्रमाहात्म्यं सेनानीर्ग्रसनोऽसुरः" । "तमप्यक्ष्यं जगतामजय्यं चक्रं पपात ग्रसनस्य कण्ठे" । "द्विधा तु कृत्वा ग्रसनस्य कण्ठं तद्रक्तधारारुणघोरनाभि" इति च मत्स्यपु० ।

ग्रसिष्ठ त्रि० अतिशयेन ग्रसिता ग्रसितृ+इष्ठन् तृचोलोपे इटोऽसिद्धिः । ग्रसितृतमे "भोगमानलादिद् ग्रसिष्ठ ओषधीरजीगः" ऋ० १।१६३।७ । "ग्रसिष्ठः ग्रसितृतमः" भा०

ग्रसिष्णु त्रि० ग्रस–इष्णुच् । १ग्रसनशीले "अत्ता चराचरग्रहणात्" शा० सू० न्यायात् २परब्रह्मणि च । "भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च" गीता ।

ग्रस्त त्रि० ग्रस–कर्मणि क्त उदित्त्वात् क्त्वोवेट्कत्वेन इडभावः । १भक्षिते लुप्तवर्णपदे २असंपूर्णोच्चारितशब्दे न० अमरः ।

ग्रस्तृ त्रि० ग्रस+तृच् आर्षे इडभावः । भक्षके । "सिंहिकासुषुवे राहुम्" "ग्रस्तारं चैव चन्द्रस्य सूर्य्यस्य च महाप्रभम्" हरिवं० २२६ अ० ।

ग्रस्तास्त पु० ग्रस्त एवास्तः । अदृष्टमोक्षे ग्रासोत्तरमस्तगते सूर्य्ये चन्द्रे च । उपरागशब्दे १२१५ पृ० विवृतिः ।

ग्रस्तोदय पु० ग्रस्तस्य उदयः । ग्रासोत्तरं रविचन्द्रयोरुदये "ग्रस्तास्तादौ विशेषमाह गुरुः "ग्रस्तास्ते त्रिदिनं पूर्वं पश्चात् ग्रस्तोदये तथा । खण्डग्रासे च त्रिदिनं निःशेषे सप्त सप्त चेति" । कश्यपस्तु "ग्रस्तोदये परे दोषो ग्रस्तास्तेऽर्वाक् शशीनयोः । द्युनिशार्द्धे तूभयं तत् खण्डाखण्डव्यवस्थया" इत्याह ।

ग्रस्य त्रि० ग्रस–कर्मणि बा० यत् । अदनीये "यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत्" भा० उ० ३३अ० । ण्यत् । ग्रास्य तत्रार्थे त्रि० ।

ग्रह हस्तव्यापारभेदे स्वीकारे ज्ञाने च क्र्या० उभ० सक० सेट् । गृह्णाति गृह्णीते । गृह्णीयात् गृह्णीत । गृह्णातु गृहाण । अगृह्णात् अगृह्णीत । अग्रहीत् अलिटि इटो दीर्घः । अग्रहीषाम् । अग्रहीष्ट । जग्राह जगृहतुः जग्रहिथ जगृहिव । जगृहे जगृहिषे । ग्रहीता गृह्यात् ग्रहीषीष्ट ग्रहीष्यति ते । ग्रहीतव्यः ग्रहणीयम् ग्राह्यम् पदास्वैरिपक्ष्येषु गृह्यम् । छन्दसि प्रतिगृह्यमपिगृह्यं लोके तु प्रतिग्राह्यम् अपिग्राह्यम् । जलचरे ग्राहः । ज्योतिषि अच् ग्रहः । गृहीतः गृहीतिः । ग्रहणम् अप् ग्रहः । उद्ग्राहः मुष्टौ संग्राहः सञ्चये संग्रहः । ग्रहीतुम् । गृहीत्वा प्रतिगृह्य । ज्ञाने "हंसं तनौ सन्निहितं चरन्तं मुनेर्मनोवृत्तिरिव स्विकायाम् । ग्रहीतुकामादरिणाशयेन" नैष० । "गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः" भाषा० । हस्तव्यापारे "गृहाण शस्त्रं यदि सर्ग एष ते" "तौ जगृहतुः पादान् राजा राज्ञी च मागधी" रघुः । "दश गृहान् गृह्णाति" श्रुतिः स्वीकारश्च स्वत्वापदनव्यापारः सेवनादिना आयत्तीकरणञ्च तत्राद्ये "तत्र किञ्चिन्न गृह्णीयात् प्राणैः कण्ठगतैरपि" प्रा०त० गङ्गामा० द्वितीये "शरद्रौद्रं न गृह्णीयात् गृह्णीयात् मार्गपौषयोः" नीतिः कर्मणि गृह्यते अग्राहि अग्राहिषाताम् अग्रहीषाताम् । अग्राहिष्यते अग्रहीष्यते । णिच् ग्राहयति ते अजीग्रहत् त । सन् जिघृक्षति ते । यङ् जरीगृह्यते । यङ्लुक् जरी(रि)गृहीति जर्गृहीति जरी(रि)गर्ढि जर्गर्ढि मुग्ध०" सि०कौ० जाग्रहीति जाग्राढि । ज्ञानसामान्यार्थत्वे णिचि प्रयोज्यस्य कर्मत्वं "शिष्यं वेदं ग्राहयतीति । ग्रहणमात्रार्थकत्वेऽपि कर्मत्वम् मुग्धबो० "अजीग्रहत्तं जनको धनुस्तत्" भट्टिः । "अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक" कुमा० अन्यमते भञ्जनीयत्वेन विवाह्यत्वेन च बोधयामासेत्यर्थकत्वात् नानुपपत्तिः । मुग्धबो० द्विकर्मकमध्ये पाठात् "जग्राह यज्वनो भोज्यम्" उदा० पा०मते न द्विकर्मकतेति भेदः । वेदे हस्य भकारः । "इमामगृभ्णन् रशनामृतस्य" श्रुतिः । आर्षेऽपि क्वचित् हस्य भः गृभीतशब्दे उदा० ।

अति+अतिक्रम्य वर्त्तने "अतिग्रहाव्यथनक्षेपेष्वकर्त्तरि तृतीयायाः" पा० "अतिक्रम्य ग्रहोऽतिग्रहः चारित्र्यतोऽतिगृह्यते चारित्रेणान्यानतिक्रम्य वर्त्तते इत्यर्थः" सि० कौ० "तएतानतिग्राह्यान् ददृशुस्तानत्यगृह्णत" शत०ब्रा० ४।५।४।२

अनु+आनुकूल्यकरणे "वयमप्यनुगृह्णीमो द्विधा कृत्वा वरूथिनीम्" भा० वि० ८८६ श्लो० ।

सम्+अनु+बन्धनादिना आनुकूल्ये "अवमुच्य किरीटं स केशान् समनुगृह्य च । उदतिष्ठज्जरासन्धः" भा० स० ८८५ श्लो० ।

अप+सन्ततधारातो विच्छिद्य पृथक्कृत्य ग्रहणे "अपगृह्य पुनरिन्द्रवायू" कात्या० श्रौ० ८।६।२ "अपगृह्य सन्ततधारातो विच्छिद्य पृथक्कृत्वा पुनस्तस्या एव धाराया गृह्णाति" कर्कः अपसारणे च "अथैक"

त्वामपगृह्णाति" शत॰ब्रा॰ १।८।३।१६। "उभौ त्वेवे अपगृह्योपासाते" २।५।२।४२ रोधने च। "स (च्यवनः) ते विप्रः सह वज्रेण बाहुमपगृह्यात्तपसा जातमन्युः" भा॰आश्व॰ ९अ॰

अपि+पिधाने "यत्रैतत् कर्णावपिगृह्य निनदमिव" छा॰उ॰ "अपगृह्य पिधाय" भा॰ "तस्मात् कर्णं पितृदैवतं हि तदपिगृह्यम्" शत॰ब्रा॰३।८।१।१५। आच्छादने च "तस्मात् कल्मषमस्थानपि गृह्णीत" शत॰ब्रा॰४।१।३।८

अभि+आभिमुख्येन ग्रहणे "अम्बालिका च बलवदभिगृह्य चतुर्वर्षेणा परिचेतुमात्मनोभवनमानीता" दशकु॰

अव+प्रतिरोधे नियमे च "मन्दोऽपि नाम न महानवगृह्य साध्यः" माघः "देवनीयं शंसति पदावग्रहम्" तैत्ति॰ "वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ" अमरः "रावणावग्रहक्लान्तमिति वागमृतेन सः"। "वृष्टिर्भवति शस्यानामवग्रहविशोषिणाम्" रघुः।

वि+अव+अवनतौ स्वक॰। "तत्रैव कपालम् व्यवगृहीतान्तमिव भवति व्यवगृहीतान्तेव हि द्यौः" शत॰ब्रा॰७।५।१।२ "व्यवगृहीतान्तं विविधमवगृहीतोऽवनतः अन्तो यस्य" भा॰

आ+आभिमुख्येनाकर्षणे "आ त एता वचोयुजा हरी गृभ्णाय सुमद्रथा" ऋ॰ ८।४५।३९ "आगृभाय अस्मदभिमुखं यातुं हस्ताभ्यामाकर्षयेत्यर्थः" भा॰। निर्बन्धे "चलेऽपि काकस्य पदार्पणाग्रहः" नैष॰।

आ+सम्+आभिमुख्येन संग्रहे "आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं संगृभाय" ऋ॰ ८।८१।१। आसंगृभाय आभिमुख्येन संगृहाण" भा॰

उद्+ऊर्द्ध्वं विष्टभ्य दाने "वाजस्य मा प्रसव उद्ग्राभेणोदग्रभीत्" यजु॰१७।६३। ऊर्द्ध्वं विष्टभ्य दानम् उद्ग्रहः" वेददी॰ "उद्गृह्णते स्वाहोद्गृहीताय स्वाहा" २२।२६। उद्धृत्य उत्तोल्य ग्रहणे "शक्तिं योऽग्राह्यमुदग्रहीत्" भट्टिः।

उद्+गृह+णिच्। उद्ग्राहि—उपन्यासे "उद्ग्राहितमुपन्यस्तम्" वैजयन्ती "विशेषविदुषः शास्त्रं यत्तवोद्ग्राह्यते मया" माघः। "सोज्जिगृहः सुनीतानि" भट्टिः

उप+उद्+ज्ञाने। "तस्य हि मुखमुपोद्गृह्णन्नुवाच" छा॰उ॰ "मुखं द्वारं विद्यायादाने तीर्थमुपोद्गृह्णन् जाननित्यर्थः" भा॰

उप+सामीप्येन ग्रहणे "तृणापवित्रमुपगृह्य हिंकरोति" शत॰ ब्रा॰ ४।२।२।११ अवष्टम्भे च "तेजो वा अग्नौ भूयस्तद्वा एतद्वायुमुपगृह्याकाशमभितपति" छा॰ उ॰ "तद्वा एतत्तेजो वायुमुपगृह्यावष्टभ्य स्वात्मना निश्चलीकृत्य वायुमाकाशमभिव्याप्नुवत्तपति" भा॰

नि+बलेन निरोधे प्रातिकूल्यकरणेन निबसने च। "स वै प्रविशमानस्तु शुद्रेणास्थेन रक्षिणा। निगृहीतो बलाद्द्वारि सोऽवातिष्ठत पार्थिवः" भा॰उ॰ १२६अ॰। "निगृहीतः कन्धरायां शिशुना दृढमुष्टिना" हरिव॰ २॰अ॰। "तस्मात् यस्य महाबाहो निगृहीतानि सर्वशः। इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता" गीता "अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति" याज्ञ॰

प्रति+नि+प्रतिरूपतया ग्रहणे "आदित्यपात्रेण द्रोणकलशात् प्रतिनिगृह्णीते" शत॰ब्रा॰ ४।३।५।६

वि+नि+विशेषेण निग्रहे "शिरःसु विनिगृह्यैताम् योधयामास पाण्डवः" भा॰ आ॰ १२८ अ॰

निस्+निःशेषेण ग्रहणे निग्रहे च "शक्रस्त्वमिति यो दैत्यैर्निर्गृहीतः किलाभवत्" भा॰आनु॰१९९८श्लो॰

परि+परितोग्रहणे "बाहुना परिजग्राह दक्षिणेन शिरोधराम्" भा॰आ॰६२२श्लो॰। "ज्ञानेन परिगृह्य तान्" भा॰ आ॰ मनुः। स्वीकारे च "कस्य गुप्तः परिग्रहः" भा॰ आ॰ गन्धर्वं प्रति अर्जुनोक्तिः

प्र+प्रकर्षेण ग्रहणे। "प्रगृहीतश्च योऽमात्योनिगृहीतश्च कारणैः" भा॰वि॰ १२श्लो॰। सन्धिकार्यनिषेधाय विशिष्य ग्रहणे "प्रगृह्यं पदम्" पा॰ प्रगृह्यशब्दे दृश्यम्।

प्रति+दत्तवस्तुनोग्रहणे "सप्त वित्तागमाः धर्म्या दायो लाभः क्रयो जयः। विभागः संप्रयोगश्च सत्प्रतिग्रह एव च" स्मृतिः "याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमर्ज्जयेत्" स्मृतिः अदृष्टार्थत्यक्तद्रव्यस्वीकार एव प्रतिग्रहो मुख्यः अन्यत्र भाक्तः। "तीरे प्रतिग्रहस्त्याज्यस्तत्रान्यो धर्मस्य विक्रयः" "तत्र न प्रतिगृह्णीयात् प्राणैः कण्ठगतैरपि" प्रा॰ त॰ गङ्गामा॰। "प्रतिग्रहादपावृत्तः सन्तुष्टो येन केनचित्" प्रा॰त॰ "अभिपद्य च बाहुभ्यां प्रत्यगृह्णादमर्षितः भा॰ व॰ ४४१ श्लो॰। प्रतिरूपतया शस्त्रादिग्रहणे च "तथैव पाण्डवो भीष्मे दिव्यमस्त्रमुदीरयन्। प्रत्यगृह्णादमेयात्मा" भा॰ वि॰ ६० अ॰। स्वीकारमात्रे "प्रतिग्रहीतुं प्रणयिप्रियत्वात्" कुमा॰ "अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः" रघुः।

वि+विरोधे रोधने। "सन्दधीत न चानार्यैर्विगृह्णीयाच्च कौन्तेय बन्धुभिः" भा॰ शा॰ ७॰अ॰ "विगृह्य शत्रून्

ज्ञेयः क्षितिपतिस्तदा" भा० आश्व० ६अ०। विशेषेण ज्ञाने "न विगृह्णाति वैषम्यम्" भाग० ३।२२।२४ श्लो०। "अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः" हरिः विशेषणग्रहः अवययीभावः। विग्रहो देहः। "रक्तप्रसाधितभुवः क्षतविग्रहाश्च" वेणी० पञ्चविधवृत्तिस्फुटीकरणवचनभेदे "वृत्त्यर्थविवरणं विग्रहः" सि०कौ० "समस्या विग्रहस्यया" शब्दश०प्र०।

सम्+सञ्चये नानास्थानपठितस्य एकत्र समावेशार्थे संदर्भभेदे "संग्रहेऽस्तमुपागते" वाक्यपदीयम्। सङ्कोचने "संगृह्णती कौशिकमुत्तरीयम्" भा०व० १५६०२श्लो० एकत्रीकरणे "संगृह्य तत्सम रङ्गैर्निर्ममे स्त्रियमुत्तमाम्" ८५५८ श्लो० सम्यग्ग्रहणे "औषधानि च सर्वाणि मूलानि च फलानि च। चतुर्विधांश्च वैद्यान् वै संगृह्णीयाद्विशेषतः" भा०शा० २६५४ श्लो०। मुष्टौ संग्राहः सञ्चये द्रव्यसंग्रहः" सि०कौ०

ह आदाने वा चुरा० उभ० पक्षे भ्वा० पर० सक० वेट्। ग्राहयति ते ग्रहति। अजिग्रहत्-त अग्रहीत् अग्राहीत्।

ग्रह पुं० ग्रह—अच्। १नवसु सूर्यादिषु। २बालारिष्टकारेषु स्कन्दग्रहादिषु भावे अप्। ३अनुग्रहे, ४निर्बन्धे, "अवश्यभव्येष्वनवग्रहग्रहा" नैष० ५आदाने ग्रहणे, ६रणोद्यमे, ७मलबन्धे, ८चन्द्रसूर्ययोग्रासे च "तदा सम्भाव्यते ग्रहः" इति ज्योतिषम् "एकरात्रं परित्यज्य कुर्यात् पाणिग्रहं ग्रहे" ज्योति० सूर्यादयश्च "सूर्यश्चन्द्रो मङ्गलश्च बुधश्चापि बृहस्पतिः। शुक्रः शनैश्चरो राहुः केतुश्चेति नव ग्रहाः"। एषां गतिभेदाः खगगतिशब्दे २४१२पृ० दर्शिताः। राहुकेत्वोर्यथा ग्रहत्वं पी०धा० व्यवस्थापितं तच्च केतुशब्दे २२२४ पृ० उक्तम्। शा०ति० १पटले "लोकानद्रीन् स्वरान् धातून् मुनीन् द्वीपान् ग्रहानपि। समिधः सप्तसंख्याताः सप्त जिह्वा हविर्भुजः" इत्यनेन ग्रहाणां यत् सप्तत्वमुक्तं तत् वराहमताभिप्रायेण। तच्च १२११पृ० उपरागशब्दे अमृतास्वादविशेषादित्याद्युक्तम्। अन्यमताभिप्रायेण ग्रहाणां नवत्वं ६पटले शा०ति० उक्तं यथा "नव वर्गाः समुत्पन्ना नवरत्नेश्वरा ग्रहाः। अर्केन्दुरक्तज्ञगुरुभृगुमन्दाहिकेतवः। माणिक्यं मौक्तिकं चारु विद्रुमं गारुडं पुनः। पुष्परागं लसद्वज्रं नीलं गोमेदकं शुभम्। वैदूर्यं नव रत्नानि"।

स्कन्दग्रहादीनां नवानां लक्षणविभागः सुश्रुते उक्तो यथा "अथातो नवग्रहाकृतिविज्ञानीयमध्यायं व्याख्यास्यामः॥ बालग्रहाणां विज्ञानं साधनञ्चाप्यनन्तरम्। उत्पत्तिं कारणञ्चैव सुश्रुतैकमनाः शृणु॥ स्कन्दग्रहस्तु१ प्रथमः स्कन्दापस्मारः२ एव च। शकुनी३ रेवती४ चैव पूतना५ चान्धपूतना६॥ पूतना शीतनामा७ च तथैव मुखमण्डिका८। नवमो नैगमेयश्च९ यः पितृग्रहसंज्ञितः॥ धात्रीमात्रोः प्राक्प्रदिष्टापचाराच्छौचभ्रष्टान्मङ्गलाचारहीनान्। त्रस्तान् हृष्टांस्तर्जितान् क्रन्दितान् वा पूजाहेतोर्हिंस्युरेते कुमारान्॥ ऐश्वर्यस्थास्ते न शक्या विशन्तो देहं द्रष्टुं मानुषैर्विश्वरूपाः। आप्तं वाक्यं तत्समीक्ष्याभिधास्ये लिङ्गान्येषां यानि देहे भवन्ति॥ शूनाक्षः क्षतजसगन्धिकः स्तनद्विट् वक्रास्यो हतचलितैकपक्ष्मनेत्रः। उद्विग्नः सुललितचक्षुरल्परोदी स्कन्दार्त्तो भवति च गाढमुष्टिवर्चाः१॥ निःसंज्ञो भवति पुनर्भवेत्ससंज्ञः संरब्धः करचरणैश्च नृत्यतीव। विण्मूत्रे सृजति विनद्य जृम्भमाणः फेनञ्च प्रसृजति तत्सखाभिपन्नः२॥ स्रस्ताङ्गो भयचकितो विहङ्गगन्धिः संस्राविव्रणपरिपीड़ितः समन्तात्। स्फोटैश्च प्रततनुः सदाहपाकैर्विज्ञेयो भवति शिशुः क्षतः शकुन्या३॥ रक्तास्यो हरितमलोऽतिपाण्डुदेहः श्यावो वा ज्वरमुखपाकवेदनार्त्तः। रेवत्या व्यथिततनुश्च कर्णनासं मृद्नाति ध्रुवमभिपीड़ितः कुमारः४॥ स्रस्ताङ्गः स्वपिति सुखं दिवा न रात्रौ विड्भिन्नं सृजति च काकतुल्यगन्धिः। छर्द्यार्त्तो हृषिततनूरुहः कुमारस्तृष्णालुर्भवति च पूतनागृहीतः५॥ यो द्वेष्टि स्तनमतिसारकासहिक्काछर्दीभिर्ज्वरसहिताभिरर्द्यमानः। दुर्वर्णः सततमधःशयोऽम्लगन्धिस्तं ब्रूयुर्भिषजोऽन्धपूतनार्त्तम्६॥ उद्विग्नो भृशमतिवेपते प्ररुद्यात् संलीनः स्वपिति च यस्य चान्त्रकूजः। विस्राङ्गो भृशमतिसार्यते च यस्तं जानीयाद्भिषगिह शीतपूतनार्त्तम्७॥ म्लानाङ्गः सुरुचिरपाणिपादवक्त्रो बह्वाशी कलुषसिराहृतोदरो यः। सोद्वेगो भवति च मूत्रतुल्यगन्धिः स ज्ञेयः शिशुरथ वक्त्रमण्डिकार्त्तः८॥ यः फेनं वमति विनम्यते च मध्ये सोद्वेगं विलपति चोर्द्ध्वमीक्षमाणः। ज्वर्य्येत प्रततमथो वसासगन्धिर्निःसंज्ञो भवति हि नैगमेयजुष्टः९॥ प्रस्तब्धो यः स्तनद्वेषी मुह्यते चाविशन्मुहुः। तं बालं नचिराद्धन्ति ग्रहः सम्पूर्णलक्षणः॥ विपरीतमतःसाध्यं चिकित्सेदचिरार्दितम्। गृहे पुरा-

षड्विधाभ्यज्य बालं शुचौ शुचिः ॥ सर्षपान् प्रकिरेत्तेषां तैलैर्दीपञ्च कारयेत् । सदासन्निहितञ्चापि जुहुयाद्धव्यवाहनम् ॥ सर्वगन्धौषधीवीजैर्गन्धमाल्यैरलङ्कृतम् । अग्नये कृत्तिकाभ्यश्च स्वाहा स्वाहेति संस्मरन् ॥ नमः स्कन्दाय देवाय ग्रहाधिपतये नमः । शिरसा त्वाभिवन्देऽहं प्रतिगृह्णीष्व मे बलिम् ॥ निरुजो निर्विकारश्च शिशुर्मे जायतां ध्रुवम्”॥

सोत्पत्तिकमन्यग्रहभेदा भा०व०२२९अ०उक्ताः यथा

“यावत् षोड़श वर्षाणि भवन्ति तरुणाः प्रजाः । प्रबाधन्त मनुष्याणां तावद्रूपैः पृथग्विधैः । अहञ्च वः प्रदास्यामि रौद्रमात्मानमव्ययम् । परमं तेन सहिताः सुखं वत्स्यथ पूजिताः । मार्कण्डेय उवाच । ततः शरीरात् स्कन्दस्य पुरुषः पावकप्रभः । भोक्तुं प्रजाः स मर्त्त्यानां निष्पपात महाबलः । अपतत् सहसा भूमौ विसञ्ज्ञोऽथ क्षुधार्दितः । स्कन्देन सोऽभ्यनुज्ञातो रौद्ररूपोऽभवद्ग्रहः । स्कन्दापस्मारमित्याहुर्ग्रहं तं द्विजसत्तमाः ।। विनता तु महारौद्रः कथ्यते शकुनीग्रहः । पूतनां राक्षसीं प्राहुस्तं विद्यात् पूतनाग्रहम् । कष्टा दारुणरूपेण घोररूपा निशाचरी । पिशाची दारुणाकारा कथ्यते शीतपूतना । गर्भान् सा मानुषीणान्तु हरते घोरदर्शना । अदितिं रेवतीं प्राहुर्ग्रहस्तस्यास्तु रैवतः । सोऽपि बालान्महाघोरो बाधते वै महाग्रहः । दैत्यानां या दितिर्माता तामाहुर्मुखमण्डिकाम् । अत्यर्थं शिशुमांसेन संप्रहृष्टा दुरासदा । कुमाराश्च कुमार्य्यश्च ये प्रोक्ताः स्कन्दसम्भवाः । तेऽपि गर्भभुजः सर्वे कौरव्य ! सुमहाग्रहाः । तासामेव तु पत्नीनां पतयस्ते प्रकीर्त्तिताः । अज्ञायमाना गृह्णन्ति बालकान् रौद्रकर्म्मिणः । गवां माता तु या प्राज्ञैः कथ्यते सुरभिर्नृप !। शकुनिस्तामथारुह्य सह भुङ्क्ते शिशून् भुवि । सरमा नाम या माता शुनां देवी जनाधिप !। सापि गर्भान् समादत्ते मानुषीणां सदैव हि । पादपानाञ्च या माता करञ्जनिलया हि सा । वरदा सा हि सौम्या च नित्यं भूतानुकम्पिनी । करञ्जे तां नमस्यन्ति तस्मात् पुत्त्रार्थिनो नराः । इमे त्वष्टादशान्ये वै ग्रहा मांसमधुप्रियाः । द्विपञ्चरात्रं (१०) तिष्ठन्ति सततं सूतिकागृहे । कद्रूः सूक्ष्मवपुर्भूत्वा गर्भिणीं प्रविशत्यथ । भुङ्क्ते सा तत्र तं गर्भं सा तु नागं प्रसूयते । गन्धर्वाणाञ्च या माता सा गर्भं गृह्य गच्छति । ततो विलीनगर्भा सा मानुषी भुवि दृश्यते । या जनित्री त्वप्सरसां गर्भमास्ते प्रगृह्य सा । उपविष्टं ततो गर्भं कथयन्ति मनीषिणः । लोहितस्योदधेः कन्या धात्री स्कन्दस्य सा स्मृता । लोहितायनिरित्येवं कदम्बे सा हि पूज्यते । पुरुषेषु यथा रुद्रस्तथार्य्या प्रमदास्वपि । आर्य्या माता कुमारस्य पृथक्कामार्थमिज्यते । एवमेते कुमाराणां मया प्रोक्ता महाग्रहाः । यावत् षोड़श वर्षाणि ह्यशिवास्ते शिवास्ततः । ये च मातृगणाः प्रोक्ताः पुरुषाश्चैव ये ग्रहाः । सर्वे स्कन्दग्रहा नाम ज्ञेया नित्यं शरीरिभिः । तेषां प्रशमनं कार्य्यं स्नानं धूपमथाञ्जनम् । बलिकर्म्मोपहारश्च स्कन्दस्येज्या विशेषतः । एवमभ्यर्चिताः सर्वे प्रयच्छन्ति शुभं नृणाम् । आयुर्वीर्य्यञ्च राजेन्द्र ! सम्यक्पूजानमस्कृताः । ऊर्द्धन्तु षोडशाद्वर्षाद्ये भवन्ति ग्रहा नृणाम् । तानहं संप्रवक्ष्यामि नमस्कृत्य महेश्वरम् । यः पश्यति नरो देवान् जाग्रद्वा शयितोऽपि वा । उन्मादयति स तु क्षिप्रं तन्तु देवग्रहं विदुः । आसीनश्च शयानश्च यः पश्यति नरः पितॄन् । उन्मादयति स तु क्षिप्रं स ज्ञेयस्तु पितृग्रहः । अवमन्यति यः सिद्धान् क्रुद्धाश्चापि शपन्ति यम् । उन्मादयति स तु क्षिप्रं ज्ञेयः सिद्धग्रहस्तु सः । उपाघ्राति च यो गन्धान्रसांश्चापि पृथग्विधान् । उन्मादयति स तु क्षिप्रं स ज्ञेयो राक्षसग्रहः । गन्धर्वाश्चापि यं दिव्याः संविशन्ति नरं भुवि । उन्मादयति स तु क्षिप्रं ग्रहो गान्धर्व एव सः । अधिरोहन्ति यं नित्यं पिशाचाः पुरुषं प्रति । उन्मादयति स तु क्षिप्रं ग्रहः पैशाच एव सः । आविशन्ति च यं यक्षाः पुरुषं कालपर्य्यये । उन्मादयति स तु क्षिप्रं ज्ञेयो यक्षग्रहस्तु सः । यस्य दोषैः प्रकुपितं चित्तं मुह्यति देहिनः । उन्मादयति स तु क्षिप्रं साधनं तस्य शास्त्रतः । वैक्लव्याच्च भयाच्चैव घोराणां चापि दर्शनात् । उन्मादयति स तु क्षिप्रं सान्त्वं तस्य तु साधनम् । कश्चित् क्रीड़ितुकामो वै भोक्तुकामस्तथाऽपरः । अभिकामस्तथैवान्य इत्येष त्रिविधो ग्रहः । यावत् सप्ततिवर्षाणि भवन्त्येते ग्रहा नृणाम् । अतःपरं देहिनान्तु ग्रहतुल्यो भवेज्ज्वरः । अप्रकीर्णेन्द्रियं दान्तं शुचिं नित्यमतन्द्रितम् । आस्तिकं शुद्धचारञ्च वर्ज्जयन्ति सदा ग्रहाः । इत्येष ते ग्रहोद्देशो मानुषाणां प्रकीर्त्तितः । न स्पृशन्ति ग्रहा भक्तान्नरान्देवे महेश्वरे”।

नवग्रहध्यानादिकं ग्रहयज्ञशब्दे वक्ष्यते। ग्रहकक्षादिमानं तद्भगणादिकञ्च तत्तद्ग्रहशब्दे उक्तं वक्ष्यमाणञ्च द्रष्टव्यम्। “उच्चस्थे ग्रहपञ्चके” ति०त० श्रीरामजन्मादौ “ग्रहैस्ततः पञ्चभिरुच्चसंस्थितैः” रघुः। गृह्यतेऽनेन करणे अप्। ३ सोमादिग्रहणपात्रे “दश ग्रहान् गृह्णाति” “ग्रहं समार्ष्टि” श्रुतिः सोमादिग्रहणसाधनपात्रनामानि च यागभेदेन भिन्नानि तानि “दश सोमग्रहान् गृह्णाति” इत्यादौ शत०ब्रा० दर्शितानि। एवं यागभेदे ग्रहभेदाः तत्रोक्ता द्रष्टव्याः। गृह्यतेऽनेन करणे अप्। ४ घ्राणाद्युपकृते घ्राणादीनां ग्रहत्वम् वृ०उ० उक्तं यथा “याज्ञवल्क्येति होवाच कति ग्रहाः कत्यतिग्रहाः? इति अष्टौ ग्रहा अष्टावतिग्रहा इति ये तेऽष्टौ ग्रहा अष्टावतिग्रहाः कतमे ते? इति। प्राणो१ वै ग्रहः सोऽपानेनातिग्राहेण गृहीतोऽपानेन हि गन्धं जिघ्रति। वाग्२ वै ग्रहः स नाम्नातिग्राहेण गृहीतो वाचा हि नामान्यभिवदति। जिह्वा३ वै ग्रहः स रसेनातिग्राहेण गृहीतो जिह्वया हि रसान्विजानाति। चक्षु४ वै ग्रहः स रूपेणातिग्राहेण गृहीतश्चक्षुषा हि रूपाणि पश्यति। श्रोत्रं५ वै ग्रहः स शब्देनातिग्राहेण गृहीतः। श्रोत्रेण हि शब्दाञ्छृणोति। मनो६ वै ग्रहः स कामेनातिग्राहेण गृहीतो मनसा हि कामान् कामयते। हस्तौ७ वै ग्रहः स कर्म्मणातिग्राहेण गृहीतो हस्ताभ्यां हि कर्म्म करोति। त्वग्८ वै ग्रहः स स्पर्शेनातिग्राहेण गृहीतस्त्वचा हि स्पर्शान्वेदयत इत्येतेऽष्टौ ग्रहा अष्टावतिग्रहाः” वृ०उ०।

“ये तेऽष्टौ ग्रहा अभिहिताः कतमे ते नियमेन ग्रहीतव्या इति तदाह। प्राणो वै ग्रहः प्राण इति घ्राणमुच्यते। प्रकरणाद्वायुसहितः सोऽपानेनेति गन्धेनेत्येतदपानसचरत्वाद्दपानो गन्ध उच्यते। अपानोपहृतं हि गन्धम् घ्राणेन सर्व्वोलोको जिघ्रति। तदेतदुच्यते अपानेन हि गन्धान् जिघ्रतीति। वाग्वै ग्रहो वाचा ह्यध्यात्मपरिच्छिन्नया आसङ्गविषयास्पदया सत्याऽनृताऽसभ्यबीभत्सादिवचनेषु व्यापृतया गृहीतो लोकोऽपहृतः तेन वाक् ग्रहः स नाम्नातिग्राहेण गृहीतः स वागाख्यो ग्रहो नाम्ना वक्तव्येन विषयेणातिग्राहेणातिग्राहेणेति दैर्घ्यं छान्दसं, नाम वक्तव्यार्थं हि वाक्। तेन वक्तव्येनार्थेन प्रयुक्ता वाक् तेन वशीकृता तेन तत्कार्य्यमकृत्वा नैव तस्या मोक्षः। अतो नाम्नातिग्राहेण गृहीता वागित्युच्यते वक्तव्यासङ्गेन हि प्रवृत्ता सर्व्वानर्थैर्युज्यते। समानमन्यद् दृश्यते त्वक्पर्य्यन्ता अष्टौ ग्रहाः स्पर्शपर्य्यन्ताश्च एतेऽष्टावतिग्रहा इति” भा०।

ग्रहकल्लोल पु० ग्रहेषु कल्लोल इव। राहौ त्रिका०।

ग्रहकुष्माण्ड पु० गृह्णाति ग्रह-अच् कुष्माण्डस्तदाकारोऽस्त्यस्य अच् कर्म्म०। नराणामुपद्रावके कुष्माण्डाकारे रुद्रभेदे। “डाकिनी शाकिनी भूतप्रेता वेतालराक्षसाः। ग्रहकुष्माण्डझोटिङ्गा कालकर्णीशिशुग्रहाः। सर्व्वे प्रणाशमायान्ति शिवतीर्थजलोक्षणात्” का० ख० ३३अ०। अत्र ग्रह इति भिन्नं पदमित्यन्ये

ग्रहगणित न० ग्रहाणां तद्गत्यादीनां गणितं गणनं यत्र। त्रिस्कन्धज्योतिषान्तर्गते तन्त्रनामके शास्त्रभेदे “ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम्” इत्युपक्रमे “स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानं त्वसौ” वृ० सं० १अ०। “ग्रहगणितहोरासंहिताहोराग्रन्थवेत्ता। तत्र ग्रहगणिते पौलिशरोमकवाशिष्ठसौरपैतामहेषु पञ्चस्वेतेषु सिद्धान्तेषु” इत्यनेन तत्रैव तद्भेदा उक्ताः। तत्प्रतिपाद्यविषयाश्च गणकशब्दे दर्शिततद्वाक्ये उक्तप्रायाः। सौरागमप्रतिपाद्यविषयाश्च सि०शि० सम्मता यथा। मध्यमाधिकारः कालमानम् भगोलः ग्रहस्फुटीकरणम्। ग्रहकक्षा प्रत्यब्दशुद्धिः अधिमासादिस्फुटीकरणम्। त्रिप्रश्नाधिकारः। पर्व्वसम्भवः चन्द्रग्रहणम् सूर्य्यग्रहणम् ग्रहणच्छाया ग्रहोदयास्तनिर्णयः। शृङ्गोन्नतिः ग्रहयुतिः भग्रहयुतिः पाताधिकारः। एतेषां च विशेषस्तत्तच्छब्दे उक्तोवक्ष्यते च।

ग्रहगोचर पु० ६त०। ग्रहाणां जन्मराशितःस्थानभेदेन शुभाशुभसूचके गतिभेदे। गोचरशब्दे उक्तप्रायोऽपि विशेषोऽत्र अभिधीयते यथा वृ०सं०१०४अ०। तत्र ये श्लोकायच्छन्दस्कास्तन्नामापि तत्र भङ्ग्योक्तं द्रष्टव्यम्

“प्रायेण गोचरो व्यवहार्य्योऽतस्तत्फलानि वक्ष्यामि। नानावृत्तैस्तन्नो मुखचपलत्वं च मन्त्वार्य्याः। माण्डव्य गिरं श्रुत्वा न मदीया रोचतेऽथवा नैवम्। साध्वी तथा न पुंसां प्रिया यथा स्याज्जवनचपला।

सूर्य्यः षट्त्रिदशास्थितस्त्रिदशषट्सप्ताद्यगश्चन्द्रमा जीवः सप्तनवद्विपञ्चमगतो वक्रार्कजौ षट्त्रिगौ। सौम्यः षड्द्विचतुर्दशाष्टमगतः सर्व्वेऽप्युपान्त्ये शुभाः शुक्रः सप्तमषड्दशार्करहितः शार्दूलवत्त्रासकृत्।

रवेः—जन्मन्यायासदोऽर्कः क्षपयति विभवान् कोष्ठरोगाध्वदाता वित्तभ्रंशं द्वितीये दिशति च न सुखं वञ्चनां दृग्रुजं च। स्थानप्राप्तिं तृतीये धननिचयमुदाकल्यकृच्चारिहन्ता रोगान्धत्ते चतुर्थे जनयति च मुहुः स्रग्धराभोगविघ्नम्। पीडाः स्युः पञ्चमस्थे सवितरि बहुशो रोगारिजनिताः षष्ठेऽर्को हन्ति रोगान् क्षपयति च रिपूञ्छोकांश्च नुदति। अध्वानं सप्तमस्थो जठरगदभयं दैन्यं च कुरुते रुक्त्रासौ चाष्टमस्थे भवति सुदृढता न क्वापि वनिता। रयावापद्दैन्यं रुगिति नवमे चित्तचेष्टाविरोधो जयं प्राप्नोत्युग्रं दशमगृहगे कर्मसिद्धिं क्रमेण। जयं स्थानं मानं विभवमपि चैकादशे रोगनाशं, सुवृत्तानां चेष्टा भवति सफला द्वादशे नेतरेषाम्।

विधोः—शशी जन्मन्यन्नप्रवरशयनाच्छादनकरो द्वितीये मानार्थौ क्षपयति सविघ्नश्च भवति। तृतीये वस्त्रस्त्रीधननिचयसौख्यानि लभते चतुर्थेऽविश्वासः शिखरिविभुजङ्गेन सदृशः। दैन्यं व्याधिं शुचमपि शशी पञ्चमे मार्गविघ्नं षष्ठे वित्तं जनयति सुखं शत्रुरोगक्षयं च। यानं मानं शयनमशनं सप्तमे वित्तलाभं मन्दाक्रान्ते फणिनि हिमगौ चाष्टमे भीर्न कस्य। नवमगृहगो बन्धोद्वेगश्रमोदररोगकृद्दशमभवने चाज्ञाफलसिद्धिकरः शशी। उपचयसुहृत्संयोगार्थप्रमोदमुपान्त्यगो वृषभचरितान्दश्चामन्त्ये करोति हि सव्ययान्।

कुजस्य—कुजेऽभिघातः प्रथमे, द्वितीये नरेन्द्रपीडा कलहारिदोषैः। भङ्गं च पित्तानलरोगचौरैरुपेन्द्रवज्रप्रतिमोऽपि यः स्यात्। तृतीयगश्चौरकुमारकेभ्यो भौमः सकाशात् कनकमादधाति। प्रदीप्तिशालीं धनमौक्तिकानि धात्वाकराख्यानि शिलापराणि। भवति धरणिजे चतुर्थगे ज्वरजठरगदासृक्स्रवः। कुपुरुषजनिताच्च सङ्गमात् प्रसभमपि करोति चाशुभम्। रिपुगदक्रोधभयानि पञ्चमे तनयकृताश्च शुचो महीसुते। द्युतिरपि नास्य चिरं भवेत् स्थिरा शिरसि कपेरिव मालती लता। रिपुभयकलहैर्विवर्जितः स कनकविद्रुमताम्रकागमः। रिपुभवनगते महीसुते किमपरवक्त्रविकारमीक्षते। कलत्रकलहाक्षिरुग्जठररोगकृत् सप्तमे क्षरत्क्षतजकृच्छ्रतः क्षपितवित्तमानोऽष्टमे। कुजे नवमसंस्थिते परिभवार्थनाशादिभिर्विलम्बितगतिर्भवत्यबलदेहधातुक्रमैः। दशमगृहगते सदा महीजे विविधधनाप्तिमुपान्त्यगे जयश्च। जनपदसुपरिस्थितश्च भुङ्क्ते फलमिव षट्चरणः सुपुष्पिताग्राम्। नानाव्ययैर्द्वादशगे महीसुते सन्ताप्यतेऽनर्थशतैश्च मानवः। स्त्रीकोपपित्तैश्च च नेत्रवेदनैर्योऽपीन्द्रवंशाभिजनेन गर्वितः।

बुधस्य—दुष्टवाक्यपिशुनाहितभेदैर्बन्धनैः सकलहैश्च हृतस्वः। जन्मगे शशिसुते पथि गच्छन् स्वागतेऽपि कुशलं न शृणोति। परिभवो धनगते धनलब्धिः सहजगे शशिसुते सुहृदाप्तिः। भूपतिशत्रुभयशङ्कितचित्तो द्रुतपदं व्रजति दुश्चरितैः स्वैः। चतुर्थगे स्वजनकुटुम्बवृद्धयो धनागमो भवति च शीतरश्मिजे। सुतस्थिते तनयकलत्रविग्रहो निषेवते न च रुचिरामपि स्त्रियम्। सौभाग्यं विजयमथोन्नतिं च षष्ठे वैवर्ण्यं कलहमतीव सप्तमे ज्ञः। मृत्युस्थो सुतजयवस्त्रवित्तलाभा नैपुण्यं भवति मतिप्रहर्षणीयम्। विघ्नकरो नवमः शशिपुत्रः कर्मगतो रिपुहा धनदश्च। स सुखं शयनं च विधत्ते तद्गृहदोऽव कुथास्तरणं च। धनसुखसुतयोषिन्मित्रवाहाप्तितुष्टिस्तुहिनकिरणपुत्रे लाभगे मृष्टवाक्यः। रिपुपरिभवरोगैः पीडितो द्वादशस्थे न सहति परिभोक्तुं मालिनीभोगसौख्यम्।

गुरोः—जीवे जन्मन्यपगतधनधीः स्थानभ्रष्टो बहुकलहयुतः। प्राप्यार्थेऽर्थान् व्यरिरपि कुरुते कान्तास्वाङ्गे भ्रमरविलसितम्। स्थानभ्रंशात् कार्यं ववानाश्च तृतीयेऽनेकैः क्लेशैर्बन्धुजनोत्थैश्च चतुर्थे। जीवे शान्तिं पीडितचित्तश्च विन्दत्येव ग्रामे नापि वने मत्तमयूरे। जनयति च तनयभवनगतः परिजनसुमहत्करितुरगपशून्। सकनकपुरगृहयुवतिवसनः। अरिगुणमिह कदापि विबुधगुरुः। न सखीवदनं मिष्टकोमलकं न भवनं शिखिकोकिलनादितम्। हरिणप्लुतगावविचलितं रिपुगते मनःसुखदं गुरौ। त्रिदशगुरुः शयनं रतिभोगं धनमशनं कुसुमान्युपवाह्यम्। जनयति सप्तमराशिमुपेतो ललिततरां च गिरं धिषणां च। बन्धं व्याधिं चाष्टमे शोकमुग्रं मार्गक्लेशं मृत्युतुल्यांश्च रोगान्। नैपुण्याज्ञा पुत्रकार्यार्थसिद्धिं धर्मे जीवः शालिनीनां च लाभम्। स्थानद्रव्यधनहा दशर्क्षगस्तत्प्रदो भवति लाभगो गुरुः। द्वादशेऽध्वनि विलोमदुःखभाग् याति यद्यपि नरो रथोद्धतः।

भृगोः—प्रथमगृहोपगो भृगुसुतः स्मरोपकरणैः सुरभिमनोज्ञगन्धकुसुमाम्बरैरुपचयम्। शयनगृहासनाशनयुतस्य चानुकुरुते सुमदविलासिनीमुखसरोजषट्चरणताम्।

शुक्रे द्वितीयगृहगे प्रमदार्थधान्यभूपालसन्ततिकुटुम्बहितम्यवाप्य। संसेवते कुसुमरत्नविभूषितश्च कामं वसन्ततिलकद्युतमूर्धजोऽपि। आज्ञाभिमानास्पदभूतिसत्त्वस्वगतक्षयान् दैत्यगुरुस्तृतीये। धत्ते चतुर्थश्च सुहृत्समाजं सुरेन्द्रप्रतिमां च शक्तिम्। जनयति शुक्रः पञ्चमसंस्थो गुरुपरितोषं बन्धुजनाप्तिम्। सुतधनलब्धिं मित्रसहायान् अनवनतत्वं चारिबलेषु। षष्ठो भृगुः परिभवरोगमापदः स्त्रीहेतुकं जनयति सप्तमोऽशुभम्। यातोऽष्टमं भवनपरिच्छदप्रदो लक्ष्मीवतीमुपनयति स्त्रियं च सः। नवमे तु धर्मवनितासुखभाग् भृगुजेऽर्थवस्त्रनिचयश्च भवेत्। दशमेऽवमानकलहान्नियमात् प्रमिताश्रयाण्यपि यदनु लभते। उपान्त्यगो भृगोः सुतः सुहृद्धनान्नगन्धदः। धनाम्बरागमोऽन्त्यगे स्थिरस्तु नाम्बरागमः।

शनेः—प्रथमे रविजे विषवह्निहतः स्वजनैर्वियुतः कृतबन्धुवधः। परदेशमुपेत्य सुहृद्भवनो विमुखार्थसुतोऽटनदीनमुखः। चारवशाद् द्वितीयगृहगे दिनकरतनये रूपसुखापवर्जिततनुर्विगतमदबलः। अन्यगुणैः कृतं च सुचयं तदपि खलु भवत्यभिमुखं यवपलपमितं न बहु न च चिरम्। सूर्यसुते तृतीयगृहगे धनानि लभते दासपरिच्छदोष्ट्रमहिषाश्वकुञ्जरखरान्। सद्मविभूतिसौख्यममतं गदव्युपरमं भीरुरपि प्रयात्यधिरिपुं च धीरजनितैः। चतुर्थं गृहं सूर्यसुतेऽभ्युपेते सुहृद्वित्तभार्यादिभिर्विप्रयुक्तः। भवत्यस्य सर्वत्र चासाधुदृष्टं भुजङ्गप्रयातानुकारं च चित्तम्। सुतधनपरिहीणः पञ्चमस्थे प्रचुरकलहयुक्तश्चार्कपुत्रे। विनिहतरिपुरोगः षष्ठयाते पिबति च वनितास्यं श्रीपुटोष्ठम्। गच्छत्यध्वानं सप्तमे चाष्टमे च हीनः स्त्रीपुत्रैः सूर्यजे दीनचेष्टः। तद्वद्धर्मस्थे वैरहृद्रोगबन्धैर्धर्मोऽप्यस्य च्छिद्यते स्वदेवीक्रियाद्यः। कर्मप्राप्तिर्दशमेऽर्थक्षयश्च विद्याकीर्त्योः परिहाणिश्च सौरे। तैक्ष्ण्यं लाभे परयोषार्थलाभावन्त्ये प्राप्नोत्यपि शोकोर्मिमालाम्। अपि कालमपेक्ष्य च पात्रं शुभकृद्ददात्यनुरूपम्। न मधौ बहु कं कुडवं च विसृजत्यपि मेघवितानः। रक्तैः पुष्पैर्गन्धैस्ताम्रैः कनकद्रवकुङ्कुमैर्दिवाकरभूसुतौ भक्त्या पूज्याविन्दुर्धेन्वा सितकुसुमरजतमधुरैः सितश्च मदप्रदैः। कृष्णद्रव्यैः सौरिः सौम्यो मणिरजततिलककुसुमैर्गुरुः परिपीतकैः प्रीतैः पीडा न ग्रहकृताद्यदि पतति विधाति यदि वा भुजङ्गविजृम्भितम्। शमयेद् ग्रहगतामशुभदृष्टिमपि विबुधविप्रपूजया। शान्तिजपनियमदानदमैः सुजनाभिभाषणसमागमैस्तथा। रविभौमौ पूर्वार्द्धे शशिसौरौ कथयतोऽन्त्यगौ राशेः। सदसज्ज्ञश्च भार्यागोत्युपगोत्योर्यथासंख्यम्। आदौ यादृक् सौम्यः पश्चादपि तादृशो भवति। उद्गीतिर्मालाणां गणवत् सम्प्रयोगी वा। आर्याणामपि कुरुते विनाशमन्त्यगुरुर्विषमसंस्थः। गण इव षष्ठः दृष्टश्च सर्वलघुनां गतो भवति। अशुभनिरीक्षितः शुभफलो बलिना बलवान् अशुभफलप्रदश्च शुभदृग्विषयोपगतः। अशुभशुभावपि स्वफलयोर्व्रजतः समताम् इदमपि गीतकं च खलु नर्दटकं च यथा। नीचेऽरिभेऽस्ते च रिहस्य सौस्थ्यं यत्परिकीर्तितम्। पुरतोऽस्य शोभि भामिन्याः सविलासकटाक्षनिरीक्षणम्। सूर्यसुतोऽर्कफलसमश्चन्द्रसुतश्चन्द्रतः समनुयाति। यथास्कन्धकमार्यागीतिर्वैतालीयं च मागधी गाथार्धम्। सौरेः क्रूरविरागात् सविकारो लब्धवृद्धिरधिकतरम्। पित्तादाचरति यथा पथ्यकतां न तु तथार्याणाम्। यादृशेन गृहेणेन्दुर्युक्तस्तादृग्भवेत्सोऽपि। मनोवृत्तिसमायोगादाकार इव वक्त्रस्य। पञ्चमं सर्वपादेषु सप्तमं द्विचतुर्थयोः। यद्वच्छ्लोकाक्षरं तद्वल्लघुतां याति दुःस्थितैः। प्रकृत्यापि लघुर्यस्तु वृत्तबाह्यो व्यवस्थितः। स याति गुरुतां लोके यदा स्युः सुस्थिता ग्रहाः। पारब्धात्सुस्थितैर्गृहैश्चेत् कर्माभिविश्रब्धेऽबुधैः। विनिघ्नन्ति तदेव कर्म तान् वैतालीयमिवायथाकृतम्। दौःस्थित्यमवेक्ष्य यो ग्रहेभ्यः काले प्रक्रमणं करोति राजा। अणुनापि स पौरुषेण वृत्तस्योपच्छन्दसिकस्य याति पारम्"। अत्र ग्रहगोचरफलमध्ये राहुकेत्वोः फलानुत्कीर्तनं ग्रहसप्तकाभिप्रायेणेति बोध्यम्। अत्र विशेषः ज्यो॰त॰ उक्तो यथा "गोचरपीडायामपि राशिबलिभिः शुभग्रहैर्दृष्टः। पीडां न करोति तथा पापैरेवं विपर्यासः"। गोचरापवादः। "दिनकररुधिरौ प्रवेशकाले गुरुभृगुजौ भवनस्य मध्ययातौ। रविसुतशशिनौ विनिर्गमस्थौ शशितनयः फलदस्तु सर्व्वकालम्"। राशिविभागफलम्। "सप्तमोपचयाद्यस्थश्चन्द्रः सर्व्वत्र शोभनः। शुक्लपक्षे द्वितीयस्तु पञ्चमो नवमस्तथा। सितशनिकुजजीवार्कास्तदन्तर्नराणां व्ययसुखनवमस्थोऽपीडदाताऽथ तेषाम्। स्वसुतनिधनगश्चेत् मृत्युपुत्रायगोऽपि प्रचुरशुभफलः स्याद्

वामवेधेन शुद्धः"। वामवेधस्य दूरगजन्मेति एतमत्रेति वक्ष्यमाणवचनाभ्यामेकार्थत्वाद्द्वैद्वयम्। "उपचयकरयुक्तः सव्यगः शुक्लपक्षे शुभमभिलषमाणः सौम्यमध्यस्थितो वा। अखिलविशदग्रहयुक्तः कारकर्क्षेऽपि चेन्दुर्जयधनसुखदाता तत्प्रहर्त्तान्यथा तु"। सव्यग उत्तरायणचारी। उपचयकरस्य पश्चाद्वर्त्ती वा अतएवोक्तम्। "भानां यथा सम्भवमुत्तरेण पश्चाद्ग्रहाणां यदि वा शशाङ्कः। शुभप्रदानां शुभदः प्रयाणे याम्येन यातो न शुभः शशाङ्कः। योयस्य दशमगृहगः स तस्य वश्यो भवति नियमेन। स्वर्क्षतुङ्गमूलत्रिकोणगाः कण्टकेषु यावन्तश्चास्थिताः। जन्मकालवशगास्ते तु कारकाः कर्म्मगस्तु तेषां विशेषतः। सितपक्षादौ चन्द्रे शुभे शुभं पक्षमशुभमशुभे च। कृष्णे गोचरशुद्धे न शुभः पक्षः शुभोऽतोऽन्यः"। भीमपराक्रमे। "शुक्ले पक्षे प्रतिपदि चन्द्रे शिवे शिवं पक्षम्। कृष्णे प्रतिपदि ताराशुद्धौ शुभं विदुः पक्षम्"। सर्वापवादस्तत्रैव

"मार्कण्डेय पुराणम् "द्रव्ये गोष्ठेषु भृत्येषु सुहृत्सु तनयेषु च। भार्य्यायाञ्च गृहे दुष्टे भयं पुण्यवतां नृणाम्। आत्मन्यथाल्पपुण्यानां सर्व्वत्रैवातिपापिनाम्। न कुत्रापि ह्यपापानां नराणां जायते भयम्"।

ग्रहगति स्त्री ६त०। ग्रहाणां प्रत्यहं भांशगमनभेदे। तत्र खगगति शब्दे २४१४ पृ० ग्रहगतिभेदास्तत् कारणादिकं च दर्शितम्। तत्र ग्रहाणां सावनदिनगतिमानं सि०शि० उक्तं तच्च खगोलशब्दे २४२२पृ० उक्तमयमपि विशेषोऽत्रोच्यते। तत्र ग्रहाणां दिनगतिसाधनं सि०शि० उक्तं यथा

"महीमितादहर्गणात् फलानि यानि तत्कराः। भवन्ति मध्यमाः क्रमान्नभःसदां द्युभुक्तयः। समा गतिस्तु योजनैर्नभःसदां सदा भवेत्। कलादिकल्पनावशान्मृदुद्रुता च सा स्मृता" सि०शि०।

"अत्रोपपत्तिस्त्रैराशिकेन। पूर्वं गतिर्योजनात्मिका ग्रहाणां तुल्यैवोक्ता। इदानीमतुल्या। सा कलादिकल्पनावशात्। इदानीमतुल्यत्वे कारणमाह" प्रमिता०

"कक्षाः सर्वा अपि दिविषदां चक्रलिप्ताङ्कितास्ता वृत्ते लघ्व्यो लघुनि महति स्युर्महत्यश्च लिप्ताः। तस्मादेते शशिजभृगुजादित्यभौमेज्यमन्दा मन्दाक्रान्ता इव शशधराद्भान्ति यान्तः क्रमेण" सि०शि०।

"यतः सर्वा अपि कक्षाश्चक्र२१६००। लिप्ताभिरेवाङ्किताः अतो महति वृत्ते महत्यो लिप्ताः स्युः। लघुनि लघ्व्यः। तद्यथा चन्द्रकक्षा सर्वाधःस्था लघुः। तस्यामेका कला पञ्चदशभिर्योजनैर्भवति। शनेः कक्षा सर्वोपरिस्था सा महती। तस्यामेका कला योजनानां षड्भिः सहस्रैरेकसप्तत्योनैः ५९२९ भवति। योजनं चतुःक्रोशैरेव। अतश्चन्द्रात् सकाशादूर्ध्वोर्ध्वस्था बुधशुक्रादयः क्रमेण मन्दाक्रान्ता मन्दगतय इव भान्ति। मन्दाक्रान्ताच्छन्दोऽपि सूचितम्" प्रमिता०। स्फुटगतिमाह

"दिनान्तरस्पष्टखगान्तरं स्याद्गतिः स्फुटा तत्समयान्तराले। कोटीफलघ्नी मृदुकेन्द्रभुक्तिस्त्रिज्योद्धृता कर्किमृगादिकेन्द्रे। तया युतोना ग्रहमध्यभुक्तिस्तात्कालिकी केन्द्रपरिस्फुटा स्यात्। समीपतिथ्यन्तसमीपचालनं विधोस्तु तत्कालजयैव युज्यते। सुदूरसंचालनमाद्यया यतः प्रतिक्षणं सा न समा महत्त्वतः" सि०शि०

अद्यतनश्वस्तनस्फुटग्रहयोरौदयिकयोर्दिनार्द्धजयोर्वास्तकालिकयोर्वा यदन्तरं कलादिकं सा स्फुटा गतिः। अद्यतनात् श्वस्तने न्यूने वक्रा गतिर्ज्ञेया। तत्समयान्तराल इति। तस्य कालस्य मध्येऽनया गत्या ग्रहश्चालयितुं युज्यत इति। इयं किल स्थूला गतिः। अथ सूक्ष्मा तात्कालिकी कथ्यते। तुङ्गगत्यूना चन्द्रगतिः। अन्येषां ग्रहाणां ग्रहगतिरेव केन्द्रगतिः। मृदुकेन्द्रकोटिफलं कृत्वा तेन केन्द्रगतिर्गुणिता त्रिज्यया भाज्या लब्धेन कर्क्यादिकेन्द्रे ग्रहगतिर्युक्ता कार्या। मृगादौ तु रहिता कार्या। एवं तात्कालिकी मन्दपरिस्फुटा स्यात्। तात्कालिक्या भुक्त्या चन्द्रस्य विशिष्टं प्रयोजनम् तदाह। समीपतिथ्यन्तसमीपचालनमिति। यत्कालिकश्चन्द्रस्तस्मात् कालाद्गतो गम्यो वा यदासन्नस्तिथ्यन्तस्तदा तात्कालिक्या गत्या तिथिसाधनं कर्त्तुं युज्यते। तथा समीपचालनं च। यदा तु दूरतरस्तिथ्यन्तो दूरचालनं वा चन्द्रस्य तदाद्यया स्थूलया कर्त्तुं युज्यते स्थूलकालत्वात्। यतश्चन्द्रगतिर्महत्त्वात् प्रतिक्षणं समा न भवति। अतस्तदर्थमयं विशेषोऽभिहितः। अथ गतिफलवासना। अद्यतनश्वस्तनग्रहयोरन्तरं गतिः। अत एव ग्रहफलयोरन्तरं गतिफलं भवितुमर्हति। अथ तत्साधनम्। अद्यतनश्वस्तनकेन्द्रयोरन्तरं केन्द्रगतिः। भुजज्याकरणे यद्भोग्यखण्डं तेन सा गुण्या शरद्विदस्रैः २२५ भाज्या। तत्र तावत् तात्कालिकभोग्यखण्ड-

करणायानुपातः। यदि त्रिज्यातुल्यया कोटिज्ययाद्यं भोग्यखण्डं शरद्विदस्रतुल्यं लभ्यते तदेष्टया किमित्यत्र कोटिज्यायाः शरद्विदस्रा २२५ गुणस्त्रिज्या हरः। फलं तात्कालिकं स्फुटभोग्यखण्डं तेन केन्द्रगतिर्गुणनीया शरद्विदस्रैर्भाज्या। अत्र शरद्विदस्रमितयोर्गुणकभाजकयोस्तुल्यत्वान्नाशे कृते केन्द्रगतेः कोटिज्या गुणस्त्रिज्या हरः स्यात्। फलमद्यतनकेन्द्रदोर्ज्ययोरन्तरं भवति। तत्फलकरणार्थं स्वपरिधिना गुण्यं भांशै ३६० र्भाज्यम्। पूर्वं किल गुणकः कोटिज्या सा यावत् परिधिना गुण्यते भांशै ३६० र्ह्रियते तावत् कोटिफलं जायत इत्युपपन्नं कोटीफलघ्नी मृदुकेन्द्रभुक्तिरित्यादि। एवमद्यतनश्वस्तनग्रहफलयोरन्तरं तद्गतेः फलं कर्क्यादिकेन्द्रे ग्रहर्णफलस्यापचीयमानत्वात् तुलादौ धनफलस्योपचीयमानत्वाद्धनम्। मकरादौ तु धनफलस्यापचीयमानत्वान्मेषादावृणफलस्योपचीयमानत्वादृणमित्युपपन्नम्" प्रमिता०।

ग्रहगन्ध पु० ६त०। ग्रहयज्ञशब्दे वक्ष्यमाणे सूर्यादुद्देशेन देये रक्तचन्दनादौ।

ग्रहचिन्तक पु० ग्रहान् शुभाशुभदायकतया चिन्तयति चिन्ति—ण्वुल् ६त०। दैवज्ञे सांवत्सरिके। "वक्तव्यमिष्टं जगतोऽशुभं वा शास्त्रोपदेशाद् ग्रहचिन्तकेन" वृ० स० २४अ०।

ग्रहण न० ग्रह—भावे ल्युट्। १स्वीकारे २ज्ञाने। ३आदरे ४उपरागे चन्द्रसूर्य्ययोः राहुणा ग्रसने करणे ल्युट्। ५करे मेदि०। ६इन्द्रिये राजनि०। ७शब्दे जटा०। तत्र करस्य ग्रहणसाधनत्वात् इन्द्रियाणां शब्दस्य च ज्ञानसाधनत्वात् तथात्वम्। उपरागस्य यथा राहुकृतत्वं तथा उपरागशब्दे १२११पृ० उक्तम्।

"चक्षुषा दर्शनं राहोर्यत्तद्ग्रहणमुच्यते" संवत्सरप्रदीपः। तत्रातुरस्यापि स्नानमाह "आदित्यकिरणैः पूतं पुनः पूतञ्च वह्निना। जलं, व्याध्यातुरः स्नायाद् ग्रहणेऽप्युष्णवारिणा" व्यासः। तत्र सर्वजलस्य गाङ्गतुल्यतामाह व्यासः "सर्वं भूमिसमं दानं सर्वे व्याससमा द्विजाः। सर्वं गङ्गासमं तोयं ग्रहणे नात्र संशयः"। तत्र श्राद्धस्यावश्यकतामाह शाता०। "सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने। अकुर्वाणस्तु तत् श्राद्धं पङ्के गौरिव सीदति"। तत्रामान्नेन श्राद्धमाह प्रचेताः "आपद्यनग्नौ तीर्थे च चन्द्रसूर्य्यग्रहे तथा। आमश्राद्धं द्विजैः कार्य्यं शूद्रेण तु सदैव हि"। आमश्राद्धेऽपि विशेषो योगिनीतन्त्रे "निरग्नेरामश्राद्धे तु अन्नं न चालयेत् क्वचित्। वृद्धौ तु चालयेदन्नं संक्रमे ग्रहणेषु च"। ग्रहणश्राद्धादिकं मलमासेऽपि कार्यं यथाह कालमा० स्मृतिः "चन्द्रसूर्य्यग्रहे स्नानं श्राद्धदानजपादिकम्। कार्य्याणि मलमासेऽपि नित्यं नैमित्तिकं तथा"। तत्र दीक्षायां नैव कालादिशुद्ध्यपेक्षा "सत्तीर्थेऽर्कविधुग्रासे तन्तुदामनपर्वणोः। मन्त्रदीक्षां प्रकुर्वाणो मासर्क्षादीन् न शोधयेत्" सारसंग्रहः। तत्र वारभेदे गुणाधिक्यम् "चन्द्रग्रहश्चन्द्रवारे रवौ सूर्य्यग्रहस्तथा। चूड़ामणिरयं योगस्तत्रानन्तफलं स्मृतम्। अन्यस्माद्ग्रहणात् कोटिगुणमत्र फलं लभेत्" गरु०पु०। अत्र पुरश्चरणप्रकारः "अथ वान्यप्रकारेण पुरश्चरणमिष्यते। ग्रहणेऽर्कस्य चेन्दोर्वा शुचिः पूर्वमुपोषितः। नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः। यद्वा पुण्योदके स्नात्वा शुचिः पूर्वमुपोषितः। ग्रहणादि विमोक्षान्तं जपेन्मन्त्रं समाहितः। अनन्तरं दशांशेन क्रमाद्धोमादिकं चरेत्। तदन्ते महतीं पूजां कुर्य्याद्ब्राह्मणतर्पणम्। ततो मन्त्रप्रसिद्ध्यर्थं गुरुं संपूज्य तोषयेत्। एवञ्च मन्त्रसिद्धिः स्याद्देवता च प्रसीदति"। ति०त० पुरश्चरणच०। तत्र स्नानस्यावश्यकतामाह वृद्धवसिष्ठः "संक्रमे ग्रहणे चैव न स्नायाद्यस्तु मानवः। सप्तजन्मसु कुष्ठी स्याद्दुःखभागी च सर्वदा" अत्राशौचेऽपि साङ्गस्नानमात्रं कार्य्यं यथाह स्मृतिः। "सूतके मृतके चैव न दोषो राहुदर्शने। स्नानमात्रन्तु कर्त्तव्यं दानश्राद्धविवर्जितम्"। अत्र क्षताशौचं नास्ति यथोक्तम् "चन्द्रसूर्य्यग्रहे चैव मृतानां पिण्डकर्मणि। महातीर्थे तु संप्राप्ते क्षतदोषो न विद्यते" भविष्यपु०।

तत्र ज्ञाने "भार्य्यात्वसंपादकं ग्रहणं विवाहः" उद्वा०त० रघु०। "स्वतएव सतां परार्थता ग्रहणानां हि यथा यथार्थता" नैष०। आदाने "पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्" उ० त० स्मृतिः। "आचारधूमग्रहणात् वभूव" रघुः "स बाहुशतमुद्यम्य सर्व्वास्त्रग्रहणं रणे" हरिवं०४८अ०। अर्थवद्ग्रहणेनानर्थकस्य" "अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन तदन्तविधिं प्रयोजयन्ति" व्या० परिभाषा।

ग्रहणक न० गृह्यतेऽनेन ग्रह—करणे ल्युट् ततः स्वार्थे क। ग्राहके शास्त्रे। "इकारादीनामपि ग्रहणकशास्त्रबलात्

अचत्वं स्यात्” सि०कौ०। शब्देन्दुशेखरे तु ग्रहणकोत्वस्य गाहवैति पाठः।

ग्रह(णि)णी स्त्री गृह्णाति रोगिणोदेहम् ग्रह–अनि वा ङीप्। १पित्तधराख्ये कलाभेदे २तदाश्रिते रोगभेदे प्रवाहिकायां च तद्रोगस्थाननिदानाद्युक्तं सुश्रुते यथा “दुष्यति ग्रहणी जन्तोरग्निसादनहेतुभिः। अतिसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः। भूयः सन्दूषितो वह्निर्ग्रहणीमभिदूषयेत्। तस्मात्कार्य्यः परीहारस्त्वतीसारे विरिक्तवत्। यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा। षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता। पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्त्तिता। ग्रहण्यां बलमग्निर्हि स चापि ग्रहणीश्रितः। तस्मात् संदूषिते वह्नौ ग्रहणी सम्प्रदुष्यति। एकशः सर्वशश्चैव दोषैरत्यर्थमूर्च्छितैः। सा दुष्टा बहुशो भुक्तमाममेव विमुञ्चति। पक्वं वा सरुजं पूति मुहुर्बद्धं मुहुर्द्रवम्। ग्रहणीरोगमाहुस्तमायुर्वेदविदो जनाः। तस्योत्पत्तौ विदाहान्नसदनालस्यतृट्क्लमाः। बलक्षयोऽरुचिः कासः कर्णक्ष्वेडान्त्रकूजनम्। अथ जाते भवेज्जन्तुः शूनपादकरः कृशः। पर्व्वरुग्लौल्यतृट्छर्दिज्वरारोचकदाहवान्। उद्गिरेच्छुक्ततिक्ताम्ललोहधूमामगन्धिकम्। प्रसेकमुखवैरस्यतमकारुचिपीडितः। वाताच्छूलाधिकैः पायुहृत्पार्श्वोदरमस्तकैः। पित्तात्सदाहैर्गुरुभिः कफात्त्रिभिस्त्रिलक्षणैः। दोषवर्णैर्नखैस्तद्वद्विण्मूत्रनयनाननैः। हृत्पाण्डूदरगुल्मार्शःप्लीहाशङ्की च मानवः”।

“नानाविधद्रव्यचौरो जायते ग्रहणीयुतः” शाता०। तस्याः कर्मभेदविपाकतोक्ता। तस्या महारोगत्वमदाह्यशब्दे उक्तम् “वृद्धस्य ग्रहणीरोगो नाष्टहीत्वा निवर्त्तते” वैद्य०।

ग्रहणीहर न० ग्रहणीं हरति हृ–अच्। १लवङ्गे शब्दच० २ग्रहणीहारके औषधादौ त्रि०।

ग्रहदक्षिणा पु० ग्रहाणां ग्रहोद्देशेन देया दक्षिणा। ग्रहोद्देशेन ग्रहयज्ञे देयधेन्वादिदक्षिणायाम् ग्रहयज्ञशब्दे विवृतिः।

ग्रहदान पु०६त०। ग्रहोद्देशेन तदशुभशान्त्यै दानम्। ग्रहाशुभनिवारणार्थं देये द्रव्यभेदे गोचरशब्दे ग्रहगोचरशब्दे ग्रहविप्रशब्दे च तद्विवृतिः।

ग्रहदृष्टि स्त्री। ६त०। ग्रहाणां स्वस्थानापेक्षया स्थानभेदेषु दर्शनभेदे सा च वृहज्जातके तट्टीकायां चोक्ता यथा “त्रिदशत्रिकोणचतुरस्रसप्तमान्यवलोकयन्ति चरणाभिवृद्धितः। रविजामरेज्यरुधिराः परे च ये क्रमशो भवन्ति किल वीक्षणेऽधिकाः” वृहज्जा०। “यस्मिन् स्थाने खेटाः स्थितास्तस्मात्त्रिदशादीनि स्थानानि चरणाभिवृद्धितः पादवृद्ध्यावलोकयन्ति खेटो यस्मिन् राशौ व्यवस्थितः तस्माद्यस्तृतीयगः खेटो दशमगतश्च तौ तृतीयदशमराशी च पादेन चतुर्भागदृष्ट्यावलोकयति एवं त्रिकोणस्थौ नवपञ्चमस्थानगतावर्द्धदृष्ट्या, चतुरस्रेऽष्टमचतुर्थे अष्टमचतुर्थस्थानस्थौ पादहीनदृष्ट्या सप्तमगे खेटं परिपूर्णदृष्ट्या। चरणाभिवृद्धित इत्यत्राभिशब्दो वीप्सां द्योतयति चरणचरणवृद्ध्या पादपादवृद्ध्येत्यर्थः। यावत्पाददृष्ट्या पश्यन्ति तावत् फलं प्रयच्छन्ति तथा च स्वल्पजातके “दशमतृतीये नवमपञ्चमे चतुर्थाष्टमे कलत्रं च। पश्यन्ति पादवृद्ध्या फलानि चैवं प्रयच्छन्ति”। अर्थादेव खेटा उक्तस्थानानि पश्यन्तीति तथा च सारावल्याम् “सव्यं पश्यति सदा खगाश्चरणवृद्धितः सर्वे। त्रिदशत्रिकोणचतुरस्रसप्तमगतान् फलं क्रमेणैव। पूर्णं पश्यति रविजस्तृतीयदशमे त्रिकोणमपि जीवः। चतुरस्रं भूमिसुतः सितार्कबुधहिमकराः कलत्रं च”। तथा यवनेश्वरः” द्वौ पश्चिमौ ११।१२। षष्ठमथ द्वितीयं संस्थानराशेः परिहृत्य राशिम्। शेषान् खगः पश्यति सर्वकालमिष्टेषु चैषां विहिता दृगिष्टा। जामित्रभे दृष्टिफलं समस्तं सपादहीनं चतुरस्रयोश्च। त्रिकोणयोर्दृष्टिफलार्द्धमाहुर्दुश्चिक्यसंज्ञे दशमे च पादम्”। रविजामरेज्यरुधिरा इति। किलेत्यागमसूचने चरणाभिवृद्धित इत्यनुवर्त्तते एते रविजादयश्चरणाभिवृद्धितः पादोपचयाद्वीक्षणे दर्शने क्रमशोऽधिकफलप्रदा भवन्ति रविजः सौरिः स दर्शने पादफलप्रदः, अमरेज्यो वृहस्पतिरर्द्धफलप्रदः रुधिरोऽङ्गारकः स पादहीनफलप्रदः। अपरेऽर्कचन्द्रबुधशुक्रास्ते वीक्षणे समस्तफलप्रदाः। एतन्नैसर्गिकं ग्रहाणां दृष्टिफलम्। स्थानवशादेतेषां यथास्वं दृष्टिफलमूह्यम् एवमेके व्याचक्षते। अपरे तु आहुः स्थानफलमेतत् तेन त्रिदशादिस्थानगतान् ग्रहराशीन् पश्यन्तो रविजादयो दर्शनेऽधिकफलप्रदा भवन्ति तद्यथा तृतीयदशमस्थान् ग्रहान् राशीन् वा शनैश्चरः पश्यन्नन्येभ्यो ग्रहेभ्योऽधिकफलप्रदो भवति परिपूर्णं पश्यतीत्यर्थः। एवं त्रिकोणस्थान् जीवः, चतुरस्रगान् भौमः, सप्तमस्थान् परे सूर्यचन्द्रबुधशुक्राः। एतच्च बहुतराचार्याणां मतम्। तथा च भगवान्

गर्गः "दुश्चिक्य३ दशमान् सौरिस्त्रिकोणस्थान् बृहस्पतिः। चतुर्थाष्टमगान् भौमः शेषाः सप्तमसंस्थितान्। भवन्ति वीक्षणे नित्यमुक्ताधिकफलाः खगाः"। भट्टो० वराहमते राहोर्ग्रहत्वाभावेन न तस्य दृष्टिस्तेनोक्ता। ज्यो० त० अन्यखेटदृष्टिः तद्दृष्टिश्चोक्ता यथा

"दशमे च तृतीये च पाददृष्टिरुदाहृता। अर्द्धदृष्टिश्च नवमे पञ्चमे परिकीर्त्तिता। चतुर्थे त्वष्टमे चैव पादोना परिकीर्त्तिता। सप्तमे परिपूर्णा च फलमेवं प्रकल्प्यते। तृतीयदशमावार्किः पश्यन् पूर्णफलप्रदः। त्रिकोणगान् गुरुश्चैव चतुर्थाष्टमगान् कुजः। सुतमदननवान्त्ये पूर्णदृष्टिः ६०सुरारेर्युगलदशमराशौ दृष्टिपादत्रयार्हः४५। सहजरिपुचतुर्थेष्वष्टमे चार्द्धदृष्टिः ३०स्थितिभवनमुपान्त्यं नैव दृश्यं हि राहोः"।

सर्वकर्मोपयोगिनैसर्गिकग्रहदृष्टिचक्रम्।

स्थान	र	च	म	बु	ह	शु	श	रा
१	०	०	०	०	०	०	०	०
२	०	०	०	०	०	०	०	४५
३	१५	१५	१५	१५	१५	१५	६०	३०
४	४५	४५	६०	४५	४५	४५	४५	३०
५	३०	३०	३०	३०	६०	३०	३०	६०
६	०	०	०	०	०	०	०	३०
७	६०	६०	६०	६०	६०	६०	६०	६०
८	४५	४५	६०	४५	४५	४५	४५	३०
९	३०	३०	३०	३०	६०	३०	३०	६०
१०	१५	१५	१५	१५	१५	१५	६०	४५
११	०	०	०	०	०	०	०	०
१२	०	०	०	०	०	०	०	६०

तात्कालिकदृष्टिस्तु द्रष्टृदृश्यग्रहयोर्द्रष्टृखेटराश्योर्वा अनुपदं वक्तव्यताजकोक्तवत् कल्पनीया दृर्यास्तु विशेषः तत्र एकादिशेषे ये ध्रुवा उक्ता अत्र न तथा किन्तु दर्शितचक्रानुसारेण खगभेदे ध्रुवाः कल्पनीया इति। नैसर्गिकतात्कालिकमित्रादिकं तु अरिशब्दे मित्रादिदृष्टिरूह्या २२५पृ० उक्तम्। तदनुसारेण नीलकण्ठताजके तु वर्षप्रवेशफलोपयोगिनी अन्यविधैव स्यान्नवपञ्चमे बलवती प्रत्यक्षतः दृष्टिरुक्ता यथा "दृष्टिः साधनकरी मेलापकाख्यो-क्षे हृदा पादोना४५ऽखिलकार्य संसिद्धिदा-ख्यते। गुप्तस्नेहकरी तृतीयभवभे कार्यस्य षड्भाग१०दृष्टिर्भवे ११। त्वद्ंशोनी ४०कथिता तृतीयभवने

दृष्टिः पादमिता१५ चतुर्थदशमे गुप्तारिभावा स्मृताऽन्योन्यं सप्तमभे तथैकभवने प्रत्यक्षवैराऽखिला६०। दृष्टं दृक्त्रितयं क्षुताह्वयमिदं कार्यस्य विध्वंसनं संग्रामादिकलिप्रदं दश इमाः स्युर्द्वादशांशान्तरे।

वर्षप्रवेशोपयोगिग्रहदृष्टिचक्रम्।

स्थान	र	च	मं	बु	ह	शु	श	
१	६०	६०	६०	६०	६०	६०	६०	प्रत्यक्षवैरा
२	०	०	०	०	०	०	०	
३	४०	४०	४०	४०	४०	४०	४०	गुप्तस्नेहा
४	१५	१५	१५	१५	१५	१५	१५	गुप्तारिः
५	४५	४५	४५	४५	४५	४५	४५	प्रत्यक्षमित्रा
६	०	०	०	०	०	०	०	०
७	६०	६०	६०	६०	६०	६०	६०	प्रत्यक्षवैरा
८	०	०	०	०	०	०	०	०
९	४५	४५	४५	४५	४५	४५	४५	प्रत्यक्षस्नेहा
१०	१५	१५	१५	१५	१५	१५	१५	गुप्तारिः
११	१०	१०	१०	१०	१०	१०	१०	गुप्तमित्रा
१२	०	०	०	०	०	०	०	

तात्कालिकस्फुटदृष्टिस्तु

"अपास्य पश्यं निजदृश्यखेटादेकादिशेषे ध्रुवलिप्तिकाः स्युः। शून्यं खवेदास्तिथयोऽक्षवेदाः खं षष्टिरभ्रं शरवेदसंख्या। तिथ्यभ्रचन्द्रावियदभ्रतर्काः शेषांशयातैष्यविशेषघातात्। लब्धैः खराभैरधिकोगतैष्ये स्वर्णं ध्रुवैताः स्फुटदृष्टिलिप्ताः" नी०ता०उक्तया दिशा आनेया।

ग्रहदेवता स्त्री ६त०। सूर्यादिग्रहाणामधिष्ठातृरुद्रादिदेवभेदे सा च ग्रहयज्ञशब्दे दर्शया ग्रहाधिदेवतादयोऽप्यत्र। [वक्ष्यमाणे गुग्गुलुप्रभृतौ धूपे।

ग्रहधूप पु० ग्रहाणां ग्रहोद्देशेन धूपः। ग्रहयज्ञशब्दे

ग्रहनायक पु०६त० १सूर्ये २अर्कवृक्षे ३शनौ च शब्दरत्ना०

ग्रहनाश पु० ग्रहं मलवन्धं नाशयति नश-णिच्-अण् उप० स०। शाकवृक्षे (क्षातियान्) शब्दर०।

ग्रहनाशन पु० ग्रहं मलवन्धं नाशयति नश-णिच्-ल्यु शाकवृक्षे रत्नमा०।

ग्रहनेमि पु०ग्रहाणां ग्रहकक्षाणां नेमिरिव। चन्द्रे शब्दच० तस्य च ग्रहकक्षाधःस्थितत्वेन नेमितुल्यत्वात् तथात्वम्।

ग्रहपति पु० ६त०। १सूर्य्ये २अर्कवृक्षे अमरः। ३चन्द्रे च। "तस्य विस्तीर्य्यते राज्यं ज्योत्स्नाः ग्रहपतेरिव" भा० शा० १६८ अ०।

ग्रहपुष पु० ग्रहं पुष्णाति स्वकरैः पुष--क। सूर्य्ये हेम० तस्य च तथात्वं खगोलशब्दे पृ० दृश्यम्।

ग्रहप्रत्यधिदैवत न० ६त०। ग्रहाणां देवतानां देवतासु अग्न्यादिषु ग्रहयज्ञशब्दे २४३५पृ० दृश्यम्।

ग्रहबल न० ६त०। ग्रहाणां बलभेदे तानि च वृहज्जातके तद्व्याख्याने भट्टोत्पलेन चोक्तानि यथा

"स्वोच्चसुहृत्स्वत्रिकोणनवांशैः स्थानबलं स्वगृहोपगतैश्च। दिक्षु बुधाङ्गिरसौ रविभौमौ सूर्यसुतः सितशीतकरौ च। उदगयने रविशीतमयूखौ वक्रसमागमगाः परिशेषाः। विपुलकरा युधि चोत्तरसंस्थाश्चेष्टितवीर्य्ययुताः परिकल्प्याः। निशिशशिकुजसौराः सर्वदा ज्ञोऽह्नि चान्ये बहुलसितगताः स्युः क्रूरसौम्याः क्रमेण। द्व्ययनदिवसहोरामासपैः कालवीर्यं शकुबुगुशुचराद्याद्वृद्धितो वीर्य्यवन्तः" वृहज्जा०। "अत्र ग्रहाणां चतुर्विधं स्थानदिक्चेष्टाकालाख्यं बलम्। तत्र तावत् स्थानदिग्बलं दोधकेनाह "स्वोच्चसुहृदिति स्वगृहणं प्रत्येकमभिसंबध्यते तत्र स्वोच्चे स्थितो ग्रहो बलवान् भवति, तात्कालिकस्य सुहृदो मित्रस्य क्षेत्रे स्थितो बलवानेव स्वत्रिकोणे आत्मीयमूलत्रिकोणे स्थितः, स्वनवांशे स्थितः, स्वगृहे स्वराशावुपगतः प्राप्तो बलवानेव, एतेषामन्यतमे व्यवस्थितो ग्रहः स्थानबलयुक्तो भवति। तत्रार्कस्य सिंहः स्वत्रिकोणम् तदेव गृहं क्षेत्रम्। चन्द्रस्य वृष उच्चः स एव त्रिकोणम्, भौमस्य मेषः त्रिकोणम् तदेव स्वक्षेत्रं, बुधस्य कन्या उच्चः सैव मूलत्रिकोणं स्वक्षेत्रं च। गुरोः धन्वी त्रिकोणं, तदेव स्वक्षेत्रम् सौरेः कुम्भस्त्रिकोणम् तदेव स्वक्षेत्रम्। शुक्रस्य तुला त्रिकोणं तदेव स्वक्षेत्रम् एतेषामाचार्य्येण विशेषो नोक्तः अस्माभिरन्यहोरशास्त्रादानीय शिष्यहितायेह लिख्यते तथा च सारावल्याम् "विंशतिरंशाः सिंहे त्रिकोणमपरे स्वभवनमर्कस्य। उच्चं भागत्रितयं वृष इन्दोः स्यात्त्रिकोणमपरेऽंशाः। द्वादशभागा मेषे त्रिकोणमपरे स्वभन्तु भौमस्य। उच्चफलं कन्यायां बुधस्य तुङ्गांशकैः सदा चिन्त्यम्। परतस्त्रिकोणजातः पञ्चभिरंशैः स्वराशिजं परतः। दशभागा जीवस्य त्रिकोणफलं स्वभं परं चापे। शुक्रस्य तु तिथयोंऽशास्त्रिकोणमपरे घटे स्वराशिश्च। कुम्भे त्रिकोणजनिते रविजस्य रवेर्यथा सिंहे" एतदार्य्याचतुष्टयम्। दिक्षु बुधाङ्गिरसावित्यादि। प्राच्याद्यासु चतसृषु दिक्षु क्रमाद्बुधादयो बलिनो भवन्ति तत्र पूर्वस्यां बुधाङ्गिरसौ ज्ञजीवौ बलिनौ भवतः लग्नस्थावित्यर्थः दक्षिणस्यां रविभौमौ सूर्याङ्गारकौ दशमस्थावित्यर्थः पश्चिमायां सूर्य्यसुतः शनिः सप्तमस्थ इत्यर्थः। उत्तरस्यां सितशीतकरौ शुक्रचन्द्रौ चतुर्थस्थावित्यर्थः। यो ग्रहो यत्र बली स तस्मात्सप्तमस्थानस्थो विबलो भवति मध्येऽनुपात ऊह्य इति सर्वत्रेयं परिभाषा ग्रहाणामुच्चनीचप्रविभागे राशीनां दिग्बलप्रविभागेऽपि, तथा च यवनेश्वरः "गुर्विन्दवौ पूर्वविलग्नसंस्थौ नभस्तलस्थौ च दिवाकरारौ। सौरोऽस्तगः शुक्रनिशाकरौ तु तुर्य्ये स्थितौ तौ सबलौ भवेतामिति"। अन्यबले ग्रहाणाम् अन्तरेऽनुपात एव युक्तः। एतद्ग्रहाणां दिग्बलमुच्यते। अधुना चेष्टाबलं दोधकेनाह उदगयने इति मकरादिराशिषट्कमुत्तरमयनं कर्कटादिराशिषट्कं दक्षिणमयनमिति उदगयने उत्तरायणे रविशीतमयूखौ सूर्यचन्द्रमसौ बलिनौ भवतः। परिशेषाः भौमबुधगुरुसितसौराः वक्रगाः विपरीतगतयो बलिनो भवन्ति तथा समागमगाश्चन्द्रेण सहिताः बलिन एव चन्द्रेण संयोगो ग्रहाणां समागमशब्दवाच्यः रविणा सहास्तमयो भौमादीनां परस्परं युद्धम् उक्तं आचार्य्यविष्णुचन्द्रेण "दिवसकरेणास्तमयः समागमः शीतरश्मिसहितानाम्। कुसुतादीनां युद्धम् निगद्यतेऽन्योन्ययुक्तानामिति" विपुलकरा इति विपुलाः करा येषां ते विपुलकराः विस्तीर्णरश्मयो बलिनो भवन्ति शीघ्रकेन्द्रे द्वितीयतृतीयपदस्थे ग्रहस्य विपुलकरत्वं प्रायः सम्भवति वक्रासन्नत्वात् युधि संग्रामे चोत्तरसंस्था बलिन एव कुसुतादीनां युद्धमित्युक्तम्। तत्र यः उत्तरदिग्भागसंस्थितो जयी स च बलवान् उत्तरसंस्थत्वमत्रोपलक्षणार्थम्। यस्तेजस्वी स एव बलवान् तत्र तज्जयलक्षणम् "दक्षिणदिक्स्थः परुषो वेपथुरप्राप्य सन्निकृष्टतनुः। अधिरूढो विकृतो निःप्रभो विवर्णश्च यः। स जितः उक्तविपरीतलक्षणसम्पन्नो जयगतो विनिर्दिष्टः। विपुलः स्निग्धो द्युतिमान् दक्षिणदिक्स्थोऽपि जय उक्तः" इति एतच्छुक्रस्य प्रायः सम्भवति यस्मात्पुलिशाचार्यः "सर्वे जयिन उदक्स्था दक्षिणदिक्स्थो जयी शुक्रः" इति। एतच्चेष्टाबलम् एषामन्यतमेन संयुक्तश्चेष्टाबलसंयुक्तो भवति। अधुना ग्रहाणां कालबलं नैसर्गिकबलं च मालिन्याह निशीति शशिकुजसौराश्च भौमशनयः निशि रात्रौ वीर्य्यवन्तो बलिनः। ज्ञोऽ

सर्वदा सर्वस्मिन् काले निशि दिने च बली । अन्ये परे रविगुरुसिता अह्नि दिने बलिनः । क्रूराः पापाः प्रागुक्ताः बहुलपक्षे, अत्र सोऽपि क्रूरो बलवान् भवति यवनेश्वरः "मासे तु शुक्ले प्रतिपत्प्रवृत्ते पूर्वे शशी मध्यबलो दशाहे । श्रेष्ठो द्वितीयेऽल्पबलस्तृतीये सौम्यैस्तु दृष्टो बलवान् सदैवेति" सितगताः शुक्लपक्षे स्थिताः सौम्याः बलिनः । द्व्ययनेति द्वे अयने प्रमाणं यस्य द्व्ययनं तत्तु वर्षं स्ववर्षे आत्मीयवर्षे, यो ग्रहो यत्र वर्षेऽधिपतिः स तत्र बलवान् स्वदिवसे आत्मीयवासरे स्वहोरायां कालहोरायाम् । तथा स्वमासे यस्मिन् मासे योऽधिपतिः स तत्र बली द्व्ययनदिवसहोरामासानां ये अधिपतयस्तैर्ग्रहैः कालबलोपेतैरुपलक्षणीयम् । ते कालबलोपेता इत्यर्थः केचिद्द्व्ययनदिवसहोरामासपैरिति पठन्ति अन्ये स्वदिवसमहोरामासपैरिति पठन्ति य एषामपरः पाठः एतेषु कालेषु सर्वे एव बलिनो भवन्ति एतत् ग्रहाणां कालवीर्यम् । एतेषामन्यतमेन संयुक्तः कालबलसम्पन्नो भवति । शकुबुगुशुचराद्या इति शादयो वर्णाः आद्या येषाम् ते शकाराद्यः शनैश्चरः सर्वेभ्यो बलहीनः कुकाराद्यः कुजः भौमः शनैश्चराद्बलवान् । बुकाराद्यो बुधः स भौमाद्बलवान् गुकाराद्यो गुरुः स बुधाद्बली, शुकाराद्यः शुक्रः स जीवाद्बली चकाराद्यश्चन्द्रः स शुक्राद्बली रकाराद्यो रविः स चन्द्राद्बलीति । एतद्ग्रहाणां नैसर्गिकबलम् । यस्मादेयानेन स्वल्पजातके उक्तम् "मन्दारसौम्यवाक्पतिसितचन्द्रार्का यथोत्तरं बलिनः । नैसर्गिकबलमेतद्बलसाम्ये स्यादधिकचिन्तेति"। यदा ग्रहाणां ग्रहयोर्वा बलसाम्यं भवति तदा बलाधिक्यम् अधिकवीर्यवत्ता च वेति । अत्राचार्येण चतुःप्रकारस्य फलं नोक्तं तच्चान्यशास्त्राल्लिख्यते तथा च सारावल्याम् "उच्चबलेन समेतः परां विभूतिं खगः प्रसाधयति । स्वत्रिकोणबलः पुंसां साचिव्यं बलपतित्वं वा । स्वर्क्षबलेन च सहितः प्रमुदितधनधान्यसंपदाक्रान्तम् । मित्रबलसंयुक्तो जनयति कीर्त्यान्वितं पुरुषम् । तेजस्विनमति सुखिनं सुस्थिरविभवं स्वपाञ्च लब्धधनम् । स्वनवांशकबलयुक्तः करोति पुरुषं प्रसिद्धं च"। स्वल्पजातके चोक्तम् "बलवान्मित्रस्वगृहोच्चनवांशकेष्वीक्षितः शुभैश्चापि । चन्द्रः सितः स्त्रीक्षेत्रे पुरुषक्षेत्रोपगाः शेषाः" इति तत्र शुभबलादिफलं तावत् "शुभदर्शनबलसहितः पुरुषं कुर्यादङ्गनाभिमतं ख्यातम् । सुभगं प्रधानमखिलं बहुपदेशं च सौम्यं च । पुंस्त्रीभवनबलेन च करोति जनपूजितं कलाकुशलम् । पुरुषं प्रसन्नचित्तं कल्यं परलोकभीतञ्च" याम्याबलसमवेतो नयति स्वदिशं नभश्चरः पुरुषम् । नत्या वस्त्रविभूषणवाहनसौख्यान्वितं कुरुते । क्वचिद्राज्यं क्वचित्पूजां क्वचिद्द्रव्यं क्वचद्यशः । ददाति विहगश्चित्रं चेष्टावीर्यसमन्वितः । वक्रिणस्तु महावीर्याः शुभा राज्यप्रदाः खगाः । पापा व्यसनदाः पुंसां कुर्वन्ति च वृथाटनम् । स्वस्थं शरीरसमागमसुखमाहवजयबलेन विदधाति । शुभमतुलं विहगेन्द्रो राज्यं च विनिर्जितारातिम् । रात्रिंदिवाबलपूर्णैर्भूगजलाभेन शौर्यपरिवृद्धा । अलिनयति शत्रुपक्षं भुङ्क्ते लक्ष्मीं नभश्चरैः पुरुषः । द्विगुणं द्विगुणं दद्युर्वर्षायनमासदिवसहोरेशाः । कुर्युश्चात्र सौख्यं स्वदशासु धनं च कीर्त्तिञ्च । पक्षबलाद्युनाथं वराम्बरहस्तिसम्पदं दद्युः । स्त्रीकनकभूमिलाभं कीर्त्तिञ्च शशाङ्कधवलतराम् । सकलबलभारभरिता निर्मलकरजालभासुराः सततम् । राज्यं खगा विदध्युः सौख्यञ्च मनोरथातीतम् । अध्वारसौख्यशुभशौचयुताः सुरूपास्तेजस्विनः कृतविदो द्विजदेवभक्ताः । सद्वस्त्रमाल्यजनभूषणसंप्रियाश्च सौम्यग्रहैर्बलयुतैः पुरुषा भवन्ति । लुब्धाः कुकर्मनिरता निजकार्यनिष्ठाः पापान्विताः सकलहाश्च तमोऽभिभूताः । क्रूराः शठा वधरता मलिनाः कृतघ्नाः पापग्रहैर्बलयुतैः पिशुनाः कुरूपाः । पुंराशिषु ग्रहेन्द्रैर्वीराः संग्रामकाङ्क्षिणो बलिनः । निःस्नेहाः सुकठोराः क्रूरा मूर्खाश्च जायन्ते । युवतिभवनस्थितेषु च मृदवः संग्रामभीरवः पुरुषाः । जलकुसुमवस्त्रनिरताः सौम्याः कलहैः सुसंयुक्ताः इति" एतत्सर्वं सुगमम्" भट्टोत्पलः । ताजकोक्तखगबलं च पञ्चवर्गीशब्दे द्वादशद्वादशवर्गीशब्दे च वक्ष्यते । [होड़येन देशे गुडोदनादौ द्रव्ये।

ग्रहबलि पुं० चतुर्थ्यर्थे ६त० । ग्रहयज्ञे वक्ष्यमाणे

ग्रहभक्ति स्त्री ६त० । ग्रहाणां विभागरूपे देशपुरुषद्रव्यादिभेदे सा च बृ०सं० १६अ० उक्ता यथा

रवेः—"प्राङ्नर्मदार्धशोणोड्रवङ्गसुह्माः कलिङ्गवाह्लीकाः । शकयवनमगधशवरप्राग्ज्योतिषचीनकाम्बोजाः । मेकलकिराताटविका बहिरन्तःशैलजाः पुलिन्दाश्च । द्रविडानां प्रागर्धं दक्षिणकूलं च यमुनायाः । चम्पोदुम्बरकौशाम्बिचेदिविन्ध्याटवीकलिङ्गाश्च । पुण्ड्रा गोलाङ्गूलश्रीपर्वतवर्धमानाश्च । इक्षुमतीत्यथ तस्करपारतकान्तारगोपबीजानाम् । तुषधान्यकटुकतरुकनकदहनविषसम-

रशूराणाम्। भैषजभिषक्चतुष्पदकृषिकरनृपहिंस्रयायिचौराणाम्। व्यालारण्ययशोयुततीक्ष्णानां भास्करः स्वामी”।

विधोः—“गिरिसलिलदुर्गकोशलभरुकच्छसमुद्ररोमकतुषाराः। वनवासितङ्गणहलस्त्रीराज्यमहार्णवद्वीपाः। मधुररसकुसुमफलसलिललवणमणिशङ्खमौक्तिकाब्जानाम्। शालियवौषधिगोधूमसोमपाक्रन्दविप्राणाम्। सितसुभगतुरगरतिकरयुवतिचमूनाथभोज्यवस्त्राणाम्। शृङ्गिनिशाचरकर्षकयज्ञविदां चाधिपश्चन्द्रः”।

कुजस्य—“शोणस्य नर्मदाया भीमरथायाश्च पश्चिमार्द्धस्थाः। निर्विन्ध्या वेत्रवती सिप्रा गोदावरी वेणा। मन्दाकिनी पयोष्णी महानदी सिन्धुमालतीपाराः। उत्तरपाण्ड्यमहेन्द्राद्रिविन्ध्यमलयोपगाश्चोलाः। द्रविडविदेहान्ध्राश्मकभासापुरकौङ्कणाः समं त्रिशिखाः। कुन्तलकेरलदण्डककान्तिपुरम्लेच्छसङ्करजाः। नासिक्यभोगवर्द्धनविराटविन्ध्याद्रिपार्श्वगा देशाः। ये च पिबन्ति सुतोयां तापीं ये चापि गोमतीसलिलम्। नागरकृषिकरपारतहुताशनाजीविशस्त्रवार्त्तानाम्। आटविकदुर्गकर्वटवधकनृशंसावलिप्तानाम्। नरपतिकुमारकुञ्जरदाम्भिकडिम्भाभिघातपशुपानाम्। रक्तफलकुसुमविद्रुमचमूपगुडमद्यतीक्ष्णानाम्। कोशभवनाग्निहोत्रिकधात्वाकरशाक्यभिक्षुचौराणाम्। शठदीर्घवैरबह्वाशिनां च वसुधासुतोऽधिपतिः”।

बुधस्य—“लौहित्यः सिन्धुनदः सरयूर्गम्भीरिका रथाख्या च। गङ्गाकौशिक्याद्याः सरितो वैदेहकाम्बोजाः। मथुरायाः पूर्वार्द्धं हिमवद्गोमन्तचित्रकूटस्थाः। सौराष्ट्रसेतुजलमार्गपण्यबिलपर्वताश्रयिणः। उदपानयन्त्रगान्धर्वलेख्यमणिरागगन्धयुक्तिविदः आलेख्यशब्दगणितप्रसाधकायुष्यशिल्पज्ञाः। चरपुरुषकुहकजीवकशिशुकविशठसूचकाभिचाररताः। दूतनपुंसकहास्यज्ञभूततन्त्रेन्द्रजालज्ञाः। आरक्षकनटनर्त्तकघृततैलस्नेहबीजतिक्तानि। व्रतचारिरसायनकुशलवेसरा चन्द्रपुत्रस्य”।

गुरोः—“सिन्धुनदपूर्वभागो मथुरापश्चार्द्धभरतसौवीराः। स्रुघ्नोदीच्यविपाशासरिच्छतद्रू रमठशाल्वाः। त्रैगर्त्तपौरवाम्बष्ठपारतावाटधानयौधेयाः। सारस्वतार्जुनायनमत्स्यार्द्धग्रामराष्ट्राणि। हस्त्यश्वपुरोहितभूपमन्त्रिमाङ्गल्यपौष्टिकासक्ताः। कारुण्यसत्यशौचव्रतविद्यादानधर्मयुताः पौरमहाधनशब्दार्थवेदविद्वदभिचारनीतिज्ञाः। मनुजेश्वरोपकरणं छत्रध्वजचामराद्यं च। शैलेयकमांसीतगरकुष्ठरससैन्धवानि वल्लीजम्। मधुररसमधूच्छिष्टानि चोरकश्चेति जीवस्य”।

भृगोः—“तक्षशिलामार्त्तिकावतबहुगिरिगान्धारपुष्कलावतकाः। प्रस्थलमालवकैकयदाशार्णोशीनराः शिबयः। ये च पिबन्ति वितस्तामिरावतीं चन्द्रभागसरितं च। रथरजताकरकुञ्जरतुरगमहामात्रधनयुक्ताः। सुरभिकुसुमानुलेपनमणिवज्रविभूषणाम्बुरुहशय्याः। वरतरुणयुवतिकामोपकरणमृष्टान्नमधुरभुजः। उद्यानसलिलकामुककामयशःसुखौदार्यरूपसम्पन्नाः। विद्वदमात्यवणिग्जनघटकृच्चित्राण्डजास्त्रिफलाः। कौशेयपट्टकम्बलपत्रौर्णिकरोध्रपत्रचोचानि। जातीफलागुरुवचापिप्पल्यश्चन्दनं च भृगोः”।

शनेः—“आनर्त्तार्बुदपुष्करसौराष्ट्राभीरशूद्ररैवतकाः। नष्टा यस्मिन्देशे सरस्वती पश्चिमो देशः। कुरुभूमिजाः प्रभासं विदिशा वेदस्मृतीमहीतटजाः। खलमलिननीचतैलिकविहीनसत्त्वोपहतपुंस्त्वाः। बन्धनशाकुनिकाशुचिकैवर्त्तविरूपवृद्धसौकरिकाः। गणपूज्यस्खलितव्रतशबरपुलिन्दार्थपरिहीनाः। कटुतिक्तरसायनविधवयोषितो भुजगतस्करमहिष्यः। खरकरभचणकवातुलनिष्पावाश्चार्कपुत्रस्य”।

राहोः—“गिरिशिखरकन्दरदरीविनिविष्टा म्लेच्छजातयः शूद्राः। गोमायुभक्षशूलिकवोक्काणा श्वमुखविकलाङ्गाः। कुलपांसनहिंस्रकृतघ्नचौरनिःसत्त्वशौचदानाश्च। खरचरनियुद्धवित्तीव्ररोषगर्भाशया नीचाः। उपहतदाम्भिकराक्षसनिद्राबहुलाश्च जन्तवः सर्वे। धर्मेण च सन्त्यक्ता माषतिलाश्चार्कशशिशत्रोः”।

केतोः—“गिरिदुर्गपह्लवश्वेतहूणचोलावगाणमरुचीनाः। प्रत्यन्तधनिमहेच्छव्यवसायपराक्रमोपेताः। परदारविवादरताः पररन्ध्रकुतूहला मदोत्सिक्ताः। मूर्खाधार्मिकविजिगीषवश्च केतोः समाख्याताः”।

“उदयसमये यः स्निग्धांशुर्महान् प्रकृतिस्थितो यदि च न हतो निर्वातोल्कारजोग्रहमर्दनैः। स्वभवनगतः स्वोच्चप्राप्तः शुभग्रहवीक्षितः स भवति शिवस्तेषां येषां प्रभुः परिकीर्त्तितः। अभिहितविपरीतलक्षणैः क्षयमुपगच्छति तत्परिग्रहः। डमरभयगदातुरा जना नरपतयश्च भवन्ति दुःखिताः। यदि न रिपुकृतं भयं नृपाणां स्वसुतकृतं नियमादमात्यजं वा। भवति जनपदस्य चाप्यवृष्ट्या गमनमपूर्वपुराद्रिनिम्नगासु”।

ग्रहभीतिजित् पु० ग्रहभीतिं जयति जि–क्विप् ६त०। (चिड़ानाम) गन्धद्रव्ये राजनि०।

ग्रहभोजन न० ६त०। ग्रहाणां देये बलिरूपे गुड़ौदनादिद्रव्ये ग्रहयज्ञशब्दे विवृतिः।

ग्रहमण्डल न० ६त०। १ग्रहसमूहे। ग्रहोद्देशेन पूजामण्डलम्। तत्पूजार्थे अष्टपद्माकारे २स्थानभेदे च ग्रहयज्ञशब्दे विवृतिः।

ग्रहमैत्र न० ग्रहयोर्दम्पतिचन्द्राधिष्ठितराशिपयोर्मैत्रम्। विवाहे विचारणीये दम्पतिराशिपग्रहयोर्मैत्रे। उपयमशब्दे विवृतिः।

ग्रहयज्ञ पु० ग्रहाणां तदुद्देशेन यज्ञः। शान्तिपुष्ट्याद्यर्थं ग्रहोद्देशेन क्रियमाणे यज्ञभेदे तदारम्भकालादिकम् संस्का० त० उक्तं यथा

दीपिकायाम् "शुभग्रहार्कवारेषु मृदुक्षिप्रध्रुवेषु च। शुभराशिविलग्नेषु शुभं शान्तिकपौष्टिकम्"। मृदुगणः चित्रानुराधामृगशिरोरेवत्यः। क्षिप्रगणो लघुगणः पुष्याश्विहस्ताः। ध्रुवगणो रोहिण्युत्तरात्रयम्। "गोचरे वा विलग्ने वा ये ग्रहा रिष्टसूचकाः। पूजयेत्तान् प्रयत्नेन पूजिताः स्युः शुभावहाः" गोचरे स्वराश्यपेक्षया यदा कदापि। विलग्ने जन्मलग्ने सूचकान्तु रिष्टकारकाः। तेन दुष्टग्रहसूचनीयदोषोपशमनं फलम्। मत्स्यपुराणे "उत्सवानन्दसन्तानयज्ञोद्वाहादिमङ्गले। मातरः प्रथमं पूज्याः पितरस्तदनन्तरम्। ततो मातामहाद्याश्च विश्वेदेवास्तथैव च"। नान्दीमुखे वारादिदोषोनास्ति। "नान्दीमुखे पितृश्राद्धे संक्रान्तौ ग्रहयज्ञे"। अत्र शूद्रस्याप्यधिकारः "स्मार्त्तं शूद्रः समाचरेदिति" वचनात् अस्य स्मार्त्तत्वेन प्रतिनिधिनाप्यारम्भः कर्त्तव्यः "श्रौतं कर्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत्। अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्ततः" इति शातातपीयात्। अन्तत उपक्रमात् परतः।

तत्प्रकारः मत्स्य पु० ९२ अ० उक्तो यथा

श्रीकामः शान्तिकामो वा ग्रहयज्ञं समारभेत्। वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन् पुनः। येन ब्रह्मन्! विधानेन तन्मे निगदतः शृणु। सर्वशास्त्राण्यनुक्रम्य संक्षिप्य ग्रन्थविस्तरम्। ग्रहशान्तिं प्रवक्ष्यामि पुराणश्रुतिनोदिताम्। पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम्। ग्रहान् ग्रहादिदेवांश्च स्थाप्य होमं समारभेत्। ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः। प्रथमोऽयुतहोमः स्याल्लक्षहोमस्ततः परम्। तृतीयः कोटिहोमस्तु सर्वकामफलप्रदः। अयुतेनाहुतीनाञ्च नवग्रहमखः स्मृतः। तस्य तावद्विधिं वक्ष्ये पुराणश्रुतिभाषितम्।

ग्रहवेदिः—"गर्त्तस्योत्तरपूर्वेण वितस्तिद्वयविस्तृताम्। वप्रद्वयावृतां वेदिं वितस्त्युच्छ्रयसम्मिताम्। संस्थापनाय देवानां चतुरस्रामुदङ्मुखाम्। अग्निप्रणयनं कृत्वा तस्यामावाहयेत् सुरान्। देवतानां ततः स्थाप्या विंशतिर्द्वादशाधिका३२। सूर्य्यः सोमस्तथा भौमो बुधजीवसितार्कजाः। राहुः केतुरिति प्रोक्ता ग्रहा लोकहितावहाः"।

मण्डलेस्थानम्—"मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु। उत्तरेण गुरुं विद्याद्बुधं पूर्वोत्तरेण तु। पूर्वेण भार्गवं विद्यात् सोमं दक्षिणपूर्वके। पश्चिमेन शनिं विद्याद्राहुं पश्चिमदक्षिणे। पश्चिमोत्तरतः केतुं" स्थापयेच्छुक्लतण्डुलैः"।

अधिदेवता—"भास्करस्येश्वरं विद्यादुमाञ्च शशिनस्तथा। स्कन्दमङ्गारकस्यापि बुधस्य च तथा हरिम्। ब्रह्माणञ्च गुरोर्विद्याच्छुक्रस्यापि शचीपतिम्। शनैश्चरस्य तु यमं राहोः कालं तथैव च। केतोर्वै चित्रगुप्तञ्च सर्वेषामधिदेवताः"।

प्रत्यधिदेवता—"अग्निरापः क्षितिर्विष्णुरिन्द्र ऐन्द्री च देवताः। प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवताः"।

पञ्चलोकपालाः—"विनायकं तथा दुर्गां वायुमाकाशमेव च। आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ"।

ग्रहवर्णाः—"संस्मरेद्रक्तमादित्यमङ्गारकसमन्वितम्। सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिङ्गलौ (पीतौ)। मन्दराहू तथा कृष्णौ धूम्रं (चित्रम्) केतुगणं विदुः"।

ग्रहवर्णानि देयानि वासांसि कुसुमानि च। धूपामोदोऽत्र सुरभिरुपरिष्टाद्वितानकम्। शोभनं स्थापयेत्प्राज्ञः फलपुष्पसमन्वितम्।

ग्रहबलिः—गुड़ौदनं रवेर्दद्यात्सोमाय घृतपायसम्। अङ्गारकाय संयावं बुधाय क्षीरषष्टिकम्। दध्योदनञ्च जीवाय, शुक्राय च घृतौदनम्। शनैश्चराय कृसरमाजमांसञ्च राहवे। चित्रौदनञ्च केतुभ्यः सर्वैर्भक्ष्यैरथार्चयेत्"। "प्रागुत्तरेण तस्माच्च दध्यक्षतविभूषितम्। चूतपल्लवसंछन्नं फलवस्त्रयुगान्वितम्। पञ्चरत्नसमायुक्तं पञ्चभङ्गसमन्वितम्। स्थापयेदव्रणं कुम्भं वरुणं तत्र विन्यसेत्। गङ्गाद्याः

सरितः सर्व्वाः समुद्राश्च सरांसि च । गजाश्वरथ्यावल्मीकसङ्गमाद्ध्रदगोकुलात् । मृदमानीय विप्रेन्द्र ! सर्व्वौषधिजलान्वितम् । स्नानार्थं विन्यसेत्तत्र यजमानस्य धर्म्मवित् । सर्व्वे समुद्राः सरितः सरांसि च नदास्तथा । आयान्तु यजमानस्य दुरितक्षयकारकाः । एवमावाह्यदेतानमरान् मुनिसत्तम ! । होमं समारभेत् सर्पिर्यवव्रीहितिलादिना" ।

ग्रहसमित्—"अर्कः पलाशखदिरावपामार्गोऽथ पिप्पलः । औदुम्बरः शमी दूर्व्वा कुशाश्च समिधः क्रमात्" ।

एकैकस्याष्टकशतमष्टाविंशतिरेव वा । होतव्या मधुसर्पिर्भ्यां दध्ना चैव समन्विताः । प्रादेशमात्राः सशिखाः सवल्काः ह्युपलाशिनीः । समिधः कल्पयेत् प्राज्ञः सर्व्वकर्म्मसु सर्व्वदा । देवानामपि सर्व्वेषामुपांशु परमार्थवित् । स्वेन स्वेनैव मन्त्रेण होतव्याः समिधः पृथक् । होतव्यं च घृताभ्यक्तं चरुभक्ष्यादिकं पुनः । मन्त्रैर्दशाहुतीर्हुत्वा होमं (अयुतम्) व्याहृतिभिस्ततः । उदङ्मुखाः प्राङ्मुखा वा कुर्य्युर्ब्राह्मणपुङ्गवाः । मन्त्रवन्तश्च कर्त्तव्याश्चरवः प्रतिदैवतम् । हुत्वा च तांश्चरून् सम्यक् ततो होमं समाचरेत्" ।

ग्रहादिमन्त्राः—"आ कृष्णेनेति सूर्य्याय होमः कार्य्यो द्विजन्मना । आप्यायस्वेति सोमाय मन्त्रेण जुहुयात् पुनः । अग्निर्मूर्द्धा दिवो मन्त्र इति भौमाय कीर्त्तयेत् । अग्ने ! विवस्वदुषस इति सोमसुताय वै । बृहस्पते ! परिदीया रथेनेति गुरोर्म्मतः । शुक्रन्ते अन्यदिति च शुक्रस्यापि निगद्यते । शनैश्चरायेति पुनः शन्नो देवीति होमयेत् । कया नश्चित्र आभुव इति राहोरुदाहृतः । केतुं कृण्वन्नपि ब्रूयात् केतूनामपि शान्तये" ।

अधिदेवतामन्त्राः—"आ वो राजेति रुद्रस्य वह्निहोमं समाचरेत् । आपोहिष्ठेत्युमायास्तु स्योनेति स्वामिनस्तथा । विष्णोरिदं विष्णुरिति तमीशेति स्वयम्भुवः । इन्द्रमिद्देवतातये इन्द्राय जुहुयात्ततः । तथा यमस्य चायं गौरिति होमः प्रकीर्त्तितः । कालस्य ब्रह्मजज्ञानमिति मन्त्रः प्रशस्यते । चित्रगुप्तस्य चाज्ञातमिति मन्त्रविदो विदुः" ।

प्रत्यधिदेवतामन्त्राः—"अग्निं दूतं वृणीमहे इति वह्नेरुदाहृतः । उदुत्तमं वरुणमित्यपां मन्त्रः प्रकीर्त्तितः । भूमेः पृथिव्यन्तरिक्षमिति वेदेषु पठ्यते । सहस्रशीर्षा पुरुष इति विष्णोरुदाहृतः । इन्द्रायेन्द्रो मरुत्वत इति शक्रस्य शस्यते । उत्तानपर्णे सुभगे इति देव्याः समाचरेत् । प्रजापतेः पुनर्होमः प्रजापते इति स्मृतः । नमोऽस्तु सर्पेभ्य इति सर्पाणां मन्त्र उच्यते । एष ब्रह्मा य ऋत्विज इति ब्रह्मण्युदाहृतः" ।

लोकपालमन्त्राः—"विनायकस्य चानून इति मन्त्रा बुधैः स्मृतः । जातवेदसे सुनवामेति दुर्गामन्त्र उच्यते । आदित्प्रत्नस्य रेतस आकाशस्य उदाहृतः । प्रा(का)णाशिशुर्महीनाञ्च वायोर्मन्त्रः प्रकीर्त्तितः । एषो उषा अपूर्व्येति अश्विनोर्मन्त्र उच्यते" ।

पूर्णाहुतिञ्च मूर्द्धानं दिव इत्यभिपातयेत् । अथाभिषेकमन्त्रेण वाद्यमङ्गलगीतकैः । पूर्णकुम्भेन तेनैव होमान्ते प्रागुदङ्मुखम् । अव्यङ्गावयवैर्ब्रह्मन् ! हेमस्रग्दामभूषितैः । यजमानस्य कर्त्तव्यं चतुर्भिः स्नपनं द्विजैः ।

अभिषेकमन्त्रः—"सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः । वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः । प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते । आखण्डलोऽग्निर्भगवान् यमो वै निरृतिस्तथा । वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः । ब्रह्मणा सहितः शेषो दिक्पालास्त्वामवन्तु ते । कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः । बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः । एतास्त्वामभिषिञ्चन्तु धर्म्मपत्न्यः समागताः । आदित्यश्चन्द्रमा भौमो बुधजीवौ सितोऽर्कजः । ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः । देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः । ऋषयो मुनयो गावो देवमातर एव च । देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसाङ्गणाः । अस्त्राणि सर्व्वशस्त्राणि राजानो वाहनानि च । औषधानि च रत्नानि कालस्यावयवाश्च ये । सरितः सागराः शैलास्तीर्थानि जलदा नदाः । एते त्वामभिषिञ्चन्तु सर्व्वकामार्थसिद्धये" ।

ततः शुक्लाम्बरधरः शुक्लगन्धानुलेपनः । सर्व्वौषधैः सर्व्वगन्धैः स्नापितो द्विजपुङ्गवैः । यजमानः सपत्नीकः ऋत्विजः सुसमाहितान् । दक्षिणाभिः प्रयत्नेन पूजयेद्गतविस्मयः" ।

ग्रहदक्षिणाः—"सूर्य्याय कपिलां धेनुं शङ्खं दद्यात्तथेन्दवे । रक्तं धुरन्धरं दद्याद्भौमाय च ककुद्मिनम् । बुधाय जातरूपन्तु गुरवे पीतवाससी । श्वेताश्वन्दैत्यगुरवे कृष्णाङ्गामर्कसूनवे । आयसं राहवे दद्यात् केतुभ्यश्छागमुत्तमम् । सुवर्णेन समा कार्य्या यजमानेन दक्षिणा । सर्व्वेषामथ वा गावो दातव्या हेमभूषिताः । सुवर्णमथ वा

दद्याद्गुरुर्वा येन तुष्यति । स्वमन्त्रेणैव दातव्याः सर्वाः सर्वत्र दक्षिणाः" ।

द्रव्यदानमन्त्राः तत्र कपिलायाः—"कपिले ! सर्वभूतानां पूजनीयासि रोहिणि ! । सर्वदेवमयी यस्मादतः शान्तिं प्रयच्छ मे" ।

शङ्खस्य—"पुण्यस्त्वं शङ्ख ! पुण्यानां मङ्गलानाञ्च मङ्गलम् । विष्णुना विधृतश्चासि ततः शान्तिं प्रयच्छ मे ।

वृषस्य—"धर्म्मस्त्वं वृषरूपेण जगदानन्दकारक ! । अष्टमूर्त्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे" ।

हेम्नः—"हिरण्यगर्भगर्भस्थं हेम ! बीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे" ।

पीतवस्त्रस्य—"पीतवस्त्रयुगं यस्माद्वासुदेवस्य वल्लभम् । प्रदानात्तस्य मे विष्णो ! ह्यतः शान्तिं प्रयच्छ मे" ।

अश्वस्य—"विष्णुस्त्वमश्वरूपेण यस्मादमृतसम्भवः । चन्द्रार्कवाहनो नित्यमतः शान्तिं प्रयच्छ मे" ।

धेनोः—"यस्मात्त्वं पृथिवी सर्वा धेनुः केशवसन्निभा । सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे" ।

आयसः—"यस्मादायसकर्म्माणि तवाधीनानि सर्वदा । लाङ्गलाद्यायुधादीनि तस्माच्छान्तिं प्रयच्छ मे" ।

छागस्य—"यस्मात्त्वं सर्वयज्ञानामङ्गत्वेन व्यवस्थितः । यानं विभावसोर्नित्यमतः शान्तिं प्रयच्छ मे" ।

गोः—गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश । यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च" ।

शय्यायाः—"यस्मादशून्यं शयनं केशवस्य च सर्वदा । शय्या ममाप्यशून्याऽस्तु दत्ता जन्मनि जन्मनि" ।

रत्नानाम्—"यथा रत्नेषु सर्वेषु सर्वे देवाः प्रतिष्ठिताः । तथा रत्नानि यच्छन्तु रत्नदानेन मे सुराः" ।

भूमेः—"यथा भूमिप्रदानस्य कलां नार्हन्ति षोड़शीम् । दानान्यन्यानि मे शान्तिर्भूमिदानाद्भवत्विह" ।

"एवं संपूजयेद्भक्त्या वित्तशाठ्येन वर्जितः । रत्नकाञ्चनवस्त्रौघैर्धूपमाल्यानुलेपनैः । अनेन विधिना यस्तु ग्रहपूजां समाचरेत् । सर्वान् कामानवाप्नोति प्रेत्य स्वर्गे महीयते । यस्तु पीडाकरो नित्यमल्पवित्तस्य वा ग्रहः । तञ्च यत्नेन संपूज्य शेषानभ्यर्चयेद् बुधः । ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषतः । पूजिताः पूजयन्त्येते निर्दहन्त्यवमानिताः । यथा बाणप्रहाराणां कवचं वारणं भवेत् । तद्वद्दैवोपघातानां शान्तिर्भवति वारणम् । तस्मान्न दक्षिणाहीनं कर्त्तव्यं भूतिमिच्छता । संपूर्णया दक्षिणया यस्माद्देवोऽपि तुष्यति । सदैवायुतहोमोऽयं नवग्रहमखे स्थितः । विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्म्मसु । निर्विघ्नार्थं मुनिश्रेष्ठ ! तथोद्वेगाद्भुतेषु च । कथितोऽयुतहोमोऽयं लक्षहोममतः शृणु" ।

लक्षहोमः—"सर्वकामाप्तये यस्माल्लक्षहोमं विदुर्बुधाः । पितॄणां वल्लभं साक्षाद्भुक्तिमुक्तिफलप्रदम् । ग्रहताराबलं लब्ध्वा कृत्वा ब्राह्मणवाचनम्" ।

मण्डपः—"गृहस्योत्तरपूर्वेण मण्डपं कारयेद् बुधः । रुद्रायतनभूमौ वा चतुरस्रमुदङ्मुखम् । दशहस्तमथाष्टौ वा हस्तान् कुर्य्याद्विधानतः । प्रागुदक्प्लवनां भूमिं कारयेद् यत्नतो बुधः । प्रागुत्तरं समासाद्य प्रदेशं मण्डपस्य तु । शोभनं कारयेत् कुण्डं यथावल्लक्षणान्वितम् । चतुरस्रं समन्तात् सयोनिवक्त्रं समेखलम् । चतुरङ्गुलविस्तारा मेखला तद्वदुच्छ्रिता । प्रागुदक्प्लवना कार्या सर्वतः समवस्थिता । शान्त्यर्थं सर्वलोकानां नवग्रहमखः स्मृतः । मानहीनाधिकं कुण्डमनेकभयदायकम् । यस्मात्तस्मात् सुसम्पूर्णं शान्तिकुण्डं विधीयते" ।

विस्तरभयात् कोटिहोमो नोक्तः तत्रैवाध्यायशेषे दृश्यः ।

अत्र याज्ञवल्क्येन ग्रहाणां मन्त्रान्तरमुक्तं यथा "आ कृष्णेन, इमन्देवा, अग्निर्मूर्द्धा दिवः ककुत् । उद्बुध्यस्वेति च ऋचो यथासंख्यं प्रकीर्त्तिताः । बृहस्पते अतिदयं, स्तथैवान्नात्परिस्रुतः । शन्नोदेवीस्तथा, काण्डात्केतुङ्कृण्वन्निमास्तथा" ।

विधानपा० विष्णुधर्म्मोत्तरवाक्यादन्ये मन्त्रा उक्ताः हेमाद्रिशान्तिकाण्डे विधानमालादौ चापरे मन्त्रा उक्ता एवं विप्रतिपत्तौ शाखिभेदाद्व्यवस्था । शाखिभेदान्मन्त्रभेदाश्च मत्कृततुलादानादिपद्धतौ दृश्याः । तत्प्रतीकानि च विवरणपत्रे वक्तव्यानि तानि च तत्र दृश्यानि । क्वचित् मत्स्यपुराणवाक्यान्मन्त्रभेदस्तु शाखिभेदात् व्यवस्थाप्यः ।

तत्र ग्रहयज्ञे ग्रहाणां पूजनाय स्फटिकादिमूर्त्तिकरणं तदभावे पटे लेखनं तदभावे मण्डले वर्त्तुलाद्याकारलेखनं वा कृत्वा पूजादिकं कार्यं यथाह याज्ञ० स्मृ०

"सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः । शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः" याज्ञ० । "एते सूर्य्यादयो नव ग्रहाः पूज्या इत्युक्तं किं कृत्वेत्याह" मिता० "ताम्रकात् स्फाटिकाद्रक्तचन्दनात् स्वर्णकाद्भौ ।

रजताद्यश्च सीसात्कांस्यात् कार्या ग्रहाः क्रमात्। स्ववर्णैर्वा पटे लेख्या गन्धैर्मण्डलकेषु वा” याज्ञ०। “सूर्य्यादीनां मूर्त्तयस्ताम्रादिभिर्यथाक्रमङ्कार्यास्तदलाभे स्ववर्णकैः पटे लेख्या मण्डलेषु वा गन्धैरक्तचन्दनादिभिर्यथावर्णं लेख्या इत्यन्वयः। द्विभुजत्वादिविशेषस्तु मत्स्यपुराणोक्तो द्रष्टव्यः तद्यथा “पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः। सप्ताश्वरथसंस्थोऽपि द्विभुजः स्यात् सदा रविः। श्वेतः श्वेताम्बरधरो दशाश्वः श्वेतभूषणः। गदापाणिर्द्विबाहुश्च कर्त्तव्यो वरदः शशी। रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः। चतुर्भुजो मेषगमो वरदः स्याद्धरासुतः। पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः। खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः। देवदैत्यगुरू तद्वत् पीतश्वेतौ चतुर्भुजौ। दण्डिनौ वरदौ कार्य्यौ साक्षसूत्रकमण्डलू। इन्द्रनीलद्युतिः शूली वरदो गृध्रवाहनः। बाणबाणासनधरः कर्त्तव्योऽर्कसुतः सदा। करालवदनः खड्गचर्मशूली वरप्रदः। नीलः सिंहासनस्थश्च राहुरत्र प्रशस्यते। धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः। गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः। सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः। स्वाङ्गुलेनोच्छ्रिताः सर्वे शतमष्टोत्तरं सदेति”।

“यथावर्णं प्रदेयानि वासांसि कुसुमानि च। गन्धाश्च बलयश्चैव धूपोदेयश्च गुग्गुलुः। कर्त्तव्या मन्त्रवन्तश्च चरवः प्रतिदैवतम्” याज्ञ०। “यथावर्णं यस्य ग्रहस्य योवर्णस्तद्वर्णानि वस्त्रगन्धपुष्पाणि देयानि” मिता०।

मण्डले ग्रहलेखनाकारस्तु

“वर्त्तुलो भास्करः कार्योह्यर्द्धचन्द्रो निशाकरः। अङ्गारकस्त्रिकोणस्तु बुधश्चापाकृतिस्तथा। पद्माकृतिः गुरुः कार्यश्चतुःकोणस्तु भार्गवः। सर्पाकृतिः शनिः कार्यो राहुस्तु मकराकृतिः। खड्गाकृतिस्तथा केतुः कार्य्यो मण्डलपूजने” शान्तिदीपिकोक्तः।

ग्रहध्यानं मत्स्यपुराणोक्तमपि ग्रहयागतत्त्वोक्तं मण्डले मानभेदगोत्रजन्मभूम्याद्यनुगुणं ध्यानं प्रदर्श्यते।

सूर्य्यस्य “क्षत्रियं काश्यपं रक्तं कालिङ्गं द्वादशाङ्गुलम्। पद्महस्तद्वयं पूर्वाननं सप्ताश्ववाहनम्। शिवाधिदैवतं सूर्य्यं वह्निप्रत्यधिदैवतम्”।

सोमस्य “सामुद्रं वैश्यमात्रेयं हस्तमात्रं सिताम्बरम्। श्वेतं द्विबाहुं वरदं दक्षिणं सगदेतरम्। दशाश्वं श्वेतपद्मस्थं विचिन्त्योमाधिदैवतम्। जलप्रत्यधिदैवञ्च सूर्य्यास्यमाह्वयेत् तथा”।

मङ्गलस्य “आवन्त्यं क्षत्रियं रक्तं मेषस्थं चतुरङ्गुलम्। आरक्तमाल्यवसनं भारद्वाजं चतुर्भुजम्। दक्षिणोर्द्ध्वक्रमाच्छक्तिवराभयगदाकरम्। आदित्याभिमुखं देवं तद्वदेव समाह्वयेत्। स्कन्दाधिदैवतं ध्यायेत् क्षितिप्रत्यधिदैवतम्”।

बुधस्य “मागधं द्व्यङ्गुलात्रेयं वैश्यं पीतं चतुर्भुजम्। वामोर्द्ध्वक्रमतश्चर्मगदावरदखड्गिनम्। सूर्य्यास्यं सिंहगं सौम्यं पीतवस्त्रं तथाह्वयेत्। नारायणाधिदैवञ्च विष्णुप्रत्यधिदैवतम्”।

बृहस्पतेः “द्विजमाङ्गिरसं पीतं सैन्धवञ्च षडङ्गुलम्। ध्यात्वा पीताम्बरं जीवं सुपद्मस्थं चतुर्भुजम्। दक्षोर्द्धादक्षवरदकरकादण्डमाह्वयेत्। ब्रह्माधिदैवं सूर्य्यास्यमिन्द्रप्रत्यधिदैवतम्”।

शुक्रस्य “शुक्रं भोजकटं विप्रं भार्गवञ्च नवाङ्गुलम्। पद्मस्थमाह्वयेत् सूर्य्यमुखं श्वेतं चतुर्भुजम्। सदाक्षवरकरकादण्डहस्तं सिताम्बरम्। शक्राधिदैवतं ध्यायेत् शचीप्रत्यधिदैवतम्”।

शनेः “सौराष्ट्रं काश्यपं शूद्रं सूर्य्यास्यं चतुरङ्गुलम्। कृष्णं कृष्णाम्बरं गृध्रगतं सौरिं चतुर्भुजम्। तद्वाणवरशूलधनुर्हस्तं तथाह्वयेत्। यमाधिदैवतं प्रजापतिप्रत्यधिदैवतम्”।

राहोः “राहुं मलयजं शूद्रं पैठीनं द्वादशाङ्गुलम्। कृष्णं कृष्णाम्बरं सिंहासनं ध्यात्वा तथाह्वयेत्। चतुर्बाहुं खड्गवरशूलचर्मकरन्तथा। कालाधिदैवं सूर्य्यास्यं सर्पप्रत्यधिदैवतम्”।

केतूनाम् “कौशद्वीपं केतुगणं जैमिनीयं षडङ्गुलम्। धूम्रं गृध्रगतं शूद्रमाह्वयेद्विकृताननम्। सूर्य्यास्यं धूम्रवसन वरदं गदिनं तथा। चित्रगुप्ताधिदैवञ्च ब्रह्मप्रत्यधिदैवतम्”।

अत्र चन्द्रस्य सामुद्रत्वं राहोर्मलयजत्वं केतोः कौशद्वीपत्वमुक्तं पुराणान्तरानुसारेण वक्ष्यमाणजन्मभूम्यादिबोधकवचनेन विरोधभिया विकल्प आश्रयणीयः स चाचारभेदात् “व्यवस्थित इति बोध्यम्। एवं वाहनेऽपि विकल्पः। मत्स्यतुलादानादिपद्धतौ एतेषां मध्ये केषाञ्चिदन्यवाहनत्वस्य दर्शितत्वात्”।

अधिदेवादीनां ध्यानमुक्तं विष्णुधर्मोत्तरे।

शिवस्य "पञ्चवक्त्रो वृषारूढः प्रतिवक्त्रं त्रिलोचनः। कपालशूलखट्वाङ्गी चन्द्रमौलिः सदाशिवः"।

उमायाः "अक्षसूत्रं च कमलं दर्पणं च कमण्डलुम्। उमा बिभर्त्ति हस्तेषु पूजिता त्रिदशैरपि"।

स्कन्दस्य "कुमारः षण्मुखः कार्य्यः शिखण्डकविभूषणः। रस्यरक्ताम्बरोदेवो मयूरवरवाहनः। कुक्कुटश्च तथा घण्टा तस्य दक्षिणहस्तयोः। पताका वैजयन्त्याख्या शक्तिः कार्य्या च वामयोः"।

विष्णोः "विष्णुः कौमोदकीपद्मशङ्खचक्रधरः क्रमात्। प्रदक्षिणं दक्षिणाधःकरादारभ्य नित्यशः"।

ब्रह्मणः "पद्मासनस्थो जटिलो ब्रह्मा कार्य्यश्चतुर्भुजः। अक्षमालां स्रुवं बिभ्रत् पुस्तकं च कमण्डलुम्। वासः कृष्णाजिनं तस्य पार्श्वे हंसस्तथैव च"।

शक्रस्य "चतुर्दन्तगजारूढो वज्री कुलिशभृत्करः। शचीपतिः प्रकर्त्तव्यो नानाभरणभूषितः"।

यमस्य "ईशचीलोयमः कार्य्योदण्डहस्तोविजानता। रक्तदृक् पाशहस्तश्च महामहिषवाहनः"।

कालस्य "कालः करालवदनो नीलाङ्गश्च विभीषणः। पाशहस्तोदण्डहस्तः कार्य्यो दृसिकरोमवान्"।

चित्रगुप्तस्य "अपीच्यवेशः स्वाकारः द्विभुजः सौम्यदर्शनः। दक्षिणे लेखनीं चित्रगुप्तो वामेऽस्य पत्रकम्। पिङ्गलश्मश्रुकेशान्तः पीनाङ्गजठरोऽरुणः"। "पिङ्गाक्षत्रितयोऽरुणः" इति वा पाठः।

प्रत्यधिदेवानां तत्राग्नेः "छागस्थः साक्षसूत्रोऽग्निः सप्तार्चिः शक्तिधारकः। चिह्नितं चमरेणास्य करमन्यं प्रकल्पयेत्"।

जलस्य "आपः स्त्रीरूपधारिण्यः श्वेता मकरवाहनाः। दधानाः पाशकलशौ मुक्ताभरणभूषिताः"।

क्षितेः "शुक्लवर्णा मही कार्य्या दिव्याभरणभूषिता। चतुर्भुजा सौम्यवपुश्चन्द्रांशुसदृशाम्बरा। रत्नपात्रं सस्यपात्रं पात्रमौषधिसंयुतम्। पद्मं करे च कर्त्तव्यं भुवो यादवनन्दन!। दिग्गजानां चतुर्णां सा कार्य्या पृष्ठगता तथा"। विष्णोरिन्द्रस्य च लक्षणमुक्तम्।

शच्याः "वामे शच्याः करे कार्य्या सौम्यसन्तानमञ्जरी। वरदा भूषिता कार्य्या द्विभुजा च तथा शची"।

प्रजापतेः "यज्ञोपवीती हंसस्थ एकवक्त्रश्चतुर्भुजः। अक्षं स्रुचं स्रुवं बिभ्रत् कुण्डिकाञ्च प्रजापतिः"। अक्षं अक्षमालाम्। कुण्डिकां कमण्डलुम्।

सर्पाणाम् "अक्षसूत्रधराः सर्पाः कुण्डिकापुस्तभूषणाः। एकभोगास्त्रिभोगा वा सर्वे कार्य्याश्च भीषणाः"।

ब्रह्मलक्षणं प्रागुक्तम्।

अथ विनायकादिपञ्चलोकपाललक्षणानि विष्णुधर्मोत्तरे

विनायकस्य "चतुर्भुजस्त्रिनेत्रश्च कर्त्तव्योऽत्र गजाननः। नागयज्ञोपवीतश्च शशाङ्ककृतशेखरः। दण्डं दक्षकरे दद्याद् द्वितीये चाक्षसूत्रकम्। तृतीये परशुं दद्याच्चतुर्थे मोदकं तथा"।

दुर्गायाः "शक्तिं बाणं तथा शूलं खड्गं चक्रं च दक्षिणे। चन्द्रबिम्बमधो वामे खेटमूर्द्ध्वे कपालकम्। शुकं टङ्कं च बिभ्राणा सिंहारूढोरुदिग्भुजा। एषा देवी समुद्दिष्टा दुर्गा दुर्गार्त्तिहारिणी"

वायोः "धावद्धरिणपृष्ठस्थो ध्वजधारी समीरणः। वरदानकरो धूम्रवर्णः कार्य्यो विजानता"।

आकाशस्य "नीलोत्पलाभं गगनं तद्वर्णाम्बरधारि च। चन्द्रार्कहस्तं कर्त्तव्यं द्विभुजं सौम्यखण्डवत्"।

अश्विनोः "पीतपद्मसवर्णाभौ पद्मपत्रसमाम्बरौ। द्विभुजौ देवभिषजौ कर्त्तव्यौ रूपसंयुतौ। तयोरोषधयः कार्य्या दिव्या दक्षिणहस्तयोः। वामयोः पुस्तके कार्य्ये दर्शनीया स्तथाश्विजाः (खगाः)। एकस्य दक्षिणे पार्श्वे वामे चान्यस्य यादव!। नारीयुगं प्रकर्त्तव्यं सुरूपं चारुदर्शनम्"

ग्रहाणां वर्णमोलादिरूपकध्यानानि यागतत्त्वोक्तानि पूर्वदर्शितान्येव

विनायकादीनां मण्डले स्थापनस्थानमुक्तं रुद्रकल्पे विष्णुध०यथा

"राहुमन्ददिनेशानामुत्तरस्यां यथाक्रमम्। गणेशदुर्गा वायुश्च, राहुकेत्वोश्च दक्षिणे। आकाशमश्विनौ चेति पञ्च तान् स्थापयेद् द्विजः"।

धूपादौ विशेषः हेमाद्रौ स्क०पु० "रवेः कुन्दुरकं धूपं शशिनस्तु घृताक्षतम्। भौमे सर्जरसं चैव अगुरुञ्च बुधे तथा। सिन्धुजं गुरवे दद्यात् शुक्रे बिल्वागुरु स्मृतम्। गुग्गुलुर्मन्दवारे तु लाक्षा राहोश्च केतवे"। कुन्दुरकं शल्लकीनिर्यासः बिल्वागुरु बिल्वफलनिर्याससहितमगुरु। गन्धभेदस्तत्रैव "दिवाकरकुजाभ्यां तु दापयेद्रक्तचन्दनम्। चन्द्रे गन्धं भार्गवे च सितचूर्णं प्रदापयेत्। कुङ्कुमेन च संयुक्तं चन्दनं जीवसौम्ययोः। अगुरुं चापि कस्तूरी राहुकेत्वर्कजेषु च"।

विधानमालादौ अन्यविधा गन्धधूपाः पुष्पभेदाश्चोक्तास्ते

च विवरणपत्रे द्रष्टव्याः तत्र जीवस्य चतुःसमगन्ध उक्तः स च “कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य तु । कुङ्कुमस्य त्रयश्चैव शशिनश्च चतुःसमम्” इत्युक्तः गुरोर्दशाङ्गधूपस्तत्रोक्तः स च “हेमाद्रौ व्रतखण्डे” षड्भागकुष्ठं द्विगुणो गुडश्च लाक्षात्रयं पञ्च नखस्य भागाः हरीतकी सर्जरसः समांसी भागैकमेकं त्रिलवं शिलाजम् । घनस्य चत्वारि पुरस्य चैको धूपो दशाङ्गः कथितो मुनीन्द्रैः” रत्नानि तु ग्रहशब्दे शारदा० हृप० उक्तानि द्रष्टव्यानि । “अभावे सितपुष्पाणि चन्दनं च विलेपनम् । एतेषां गुग्गुलुर्धूपो नैवेद्यं घृतपायसम्” ।

ग्रहमण्डललेखनप्रकारः—उभयतो हस्तमिते ग्रहवेदिमध्यस्थले पूर्वपश्चिमाग्रास्तिस्रो दक्षिणोत्तराग्राश्च चतस्रो रेखाः कुर्यात् तथा करणे अष्टाङ्गुलदीर्घविस्ताराणि समान्तरालानि नव खण्डानि सम्पद्यन्ते तत्र विवरणपत्रे वक्ष्यमाणमानकं सूर्यादीनां वर्त्तुलाद्याकारं कुर्यात् । स्वस्वमण्डले च स्व स्व स्थापनम् स्वस्ववामेऽधिदेवानां स्वस्वदक्षिणे प्रत्यधिदेवानां सूर्याभिमुखतया सर्वेषां स्थापनम् विनायकादिस्थापनञ्च प्रागुक्तस्थानेष्विति विवेकः ।

होमे समिद्द्रव्यसंख्यादिकं विधानपारि० स्कन्दपु० “प्रादेशमात्रा अर्कस्य समिधश्चार्कसम्भवाः । दधिमध्वाज्यसंयुक्ताः प्रतिदेवञ्च होमयेत् । पालाशीश्चैव सोमाय । खादिरीर्लोहिताय च । अपामार्गीर्बुधायेति आश्वत्थीश्च बृहस्पतेः । औदुम्बरीश्च शुक्राय मन्दाय च शमीमयीः । दौर्वीर्राहोः कुशान् केतोर्होममन्त्रास्ततः परम्” । समिल्लक्षणं चिन्तामणौ “समिधां लक्षणं वक्ष्ये संख्या तासां तथैव च । विशीर्णा विदला ह्रस्वा वक्राः सशुषिरा कृशाः । अतिस्थूलातिदीर्घाश्च समिधः कार्य्यनाशकाः । विशीर्णाऽऽयुःक्षयकरी विदला पुत्रनाशिनी । शुषिरा व्याधिजननी कृशा च रिपुवर्द्धिनी । दीर्घा विदेशगमनी स्थूला चात्मविनाशिनी । अकृशा सुसमाऽस्थूला साद्रा च सुफलाशिनी । प्रादेशान्नाधिका न्यूना समित् स्यात् सर्व्वकर्म्मणि” । अर्कादीनां फलं होमसंख्या च तत्रैव दर्शितं यथा “अर्को नाशयति व्याधिं पलाशः सर्व्वकामदः । खदिरश्चार्थलाभाय अपामार्गः सुदर्शनः । अश्वत्थः सर्वकामाय भाग्यायौदुम्बरस्तथा । शमी शमयते पापं दूर्व्वाऽऽयुष्यविवर्द्धिनी । कुशास्तु सर्व्वकामानां रक्षार्थं रक्षसां विदुः । अष्टोत्तरन्तु साहस्रं शतमष्टाधिकं तु वा । अष्टाविंशतिमष्टौ वा एकैकस्य तु होमयेत् । देवानामपि सर्व्वेषामुपांशु परमार्थवित् । स्वेन स्वेनैव मन्त्रेण होतव्याः समिधः पृथक् । होतव्यं च घृताद्यक्तं चरुभक्तादिकं पुनः । मन्त्रैर्दशाहुतीर्दद्याद्धोमोव्याहृतिभिस्ततः’ अयुतादिहोमप्रक्रमात् व्याहृतिभिरयुतादिहोमः ।

ग्रहाणां जन्मभूम्यादिज्ञानावश्यकतामाह स्कन्दपु० “जन्मभं गोत्रमग्निश्च वर्णस्थाने मुखानि च । योऽज्ञात्वा कुरुते शान्तिं ग्रहास्तेनावमानिताः” अतः शान्तिकाले तेषां जन्मभूम्यादिज्ञानमपेक्षितं तच्च विशेषेण ध्याने दर्शितमपि प्रपञ्चार्थमिहोच्यते । तत्र रव्यादीनां जन्मभूम्यादयो यथा तत्रैव

जन्मभूः—“उत्पन्नोऽर्कः कलिङ्गेषु यमुनायाञ्च चन्द्रमाः । अङ्गारकस्त्ववन्त्यां वै मगधेषु हिमांशुजः । सैन्धवेषु गुरुर्जातः शुक्रो भोजकटे तथा । शनैश्चरश्च सौराष्ट्रे राहुर्बर्बरके पुरे । अन्तर्वेद्यां तथा केतुरित्येता ग्रहभूमयः । यस्य यस्य च यद्गोत्रं तत्ते वक्ष्याम्यतः परम्” ।

ग्रहगोत्रम्—“आदित्यः काश्यपे गोत्रे आत्रेयश्चन्द्रमा भवेत् । भारद्वाजो भवेद्भौमस्तथात्रेयश्च सोमजः । शक्रपूज्योऽङ्गिरोगोत्रः शुक्रो वै भार्गवस्तथा । शनिः काश्यप एवायं राहुः पैठिनसिस्तथा । केतवो जैमिनीयाश्च ग्रहाग्निस्तदनन्तरम्” ।

ग्रहवह्निः—“आदित्ये कपिलो नाम पिङ्गलः सोम उच्यते । धूमकेतुस्तथा भौमे जाठरोऽग्निर्बुधे स्मृतः । गुरौ चैव शिखी नाम शुक्रे भवति हाटकः । शनैश्चरे महातेजा राहुकेत्वोर्हुताशनः” इति । इत्थमेव होमकाले तत्तदग्निनाम कृत्वा जुहुयात् ।

अथैषां वर्णः स च द्विधा विप्रादिजातिरूपभेदात् तत्र रूपे तत्रैव “भास्कराङ्गारकौ रक्तौ शुक्लौ शुक्रनिशाकरौ । सोमपुत्रो गुरुश्चैव तावुभौ पीतकौ स्मृतौ । कृष्णः शनैश्चरस्तद्वत् राहुश्चित्रश्च केतवः” । विप्रादिवर्णस्तु ।“ब्राह्मणौ शुक्रवागीशौ क्षत्रियौ भौमभास्करौ । चन्द्रो वैश्यो बुधः, शूद्रा मन्दो राहुश्च केतवः” । स्थानं तत्रैव “मध्ये तु भास्करं विद्याच्छशिनं पूर्वदक्षिणे । दक्षिणे लोहितं विद्यात् बुधं पूर्व्वोत्तरेण तु । उत्तरे तु गुरुं विद्यात् पूर्व्वतो भार्गवं न्यसेत् । पश्चिमेन शनिं विद्याद्राहुं दक्षिणपश्चिमे । पश्चिमोत्तरतः केतुः स्थाप्या वै शुक्लतण्डुलैः इति” ।

मुखं स्कान्दे "शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुज्ञौ तूदङ्मुखौ। प्रत्यङ्मुखः शनिः सोमः शेषा दक्षिणतोमुखाः"। अत्र प्राङ्मुखौ ऊर्द्ध्वदृष्टी, उदङ्मुखौ वामदृष्टी, प्रत्यङ्मुखोऽधोदृष्टिः, दक्षिणतोमुखा दक्षिणदृष्टय इति व्याख्येयम् "आदित्याभिमुखाः सर्व्वे" इत्यनेन सर्व्वेषां सूर्य्याभिमुखत्वोक्तेः इति विधानपारिजातादयः। "वर्णरूपगुणैर्युक्तान् आहूयावाहयेत्तु तानिति" स्कान्दोक्ते रावाहनमन्त्रेऽपि वर्णभूम्यादिकीर्त्तनपूर्व्वं क्रमावाहनं कार्य्यमेवमग्रेऽपि होमकाले तथास्तरणमिति बोध्यम् "चित्राणं च "अजाक्षीरेण संसिक्ता यवाश्च तिलतण्डुलाः। अजाकर्णस्य रक्तेन रक्ताःश्वेताश्च संस्थिताः" दीपिकोक्तम् प्रयोगो मत्कृततुलादानादिपद्धतौ द्रष्टव्यः।

सूर्य्यादिग्रहाणां जन्मभूम्यादिसूचकविवरणपत्रम्।

जन्मभूम्यादि	सूर्य्यस्य	चन्द्रस्य	भौमस्य	बुधस्य	जीवस्य	शुक्रस्य	शनेः	राहोः	केतोः
जन्मभूमिः	कलिङ्गः	यमुना	अवन्तिः	मगधः	सैन्धवः	भोजकटः	सौराष्ट्रः	वर्वरकः	अन्तर्वेदी
गोत्रम्	काश्यपः	अत्रिः	भरद्वाजः	अत्रिः	आङ्गिराः	भृगुः	काश्यपः	पैठिनसिः	जैमिनिः
अग्निः	कपिलः	पिङ्गलः	धूमकेतुः	जाठरः	शिखी	हाटकः	महातेजाः	हुताशनः	हुताशनः
विप्रादिवर्णः	क्षत्रियः	वैश्यः	क्षत्रियः	वैश्यः	विप्रः	विप्रः	शूद्रः	शूद्रः	शूद्रः
रूपात्मकवर्णः	रक्तः	शुक्लः	रक्तः	पीतः	पीतः	शुक्लः	कृष्णः	कृष्णः	चित्रम्
मण्डले स्थानम्	मध्यम्	पूर्वदक्षिणः	दक्षिणः	पूर्वोत्तरः	उत्तरः	पूर्वः	पश्चिमः	दक्षिणपश्चिमः	पश्चिमोत्तरः
मुखम् (सर्वे सूर्याभिमुखाः)	ऊर्द्ध्वदृष्टिः	अधोदृष्टिः	दक्षिणदृष्टिः	वामदृष्टिः	वामदृष्टिः	ऊर्द्ध्वदृष्टिः	अधोदृष्टिः	दक्षिणदृष्टिः	दक्षिणदृष्टिः
मण्डले आकारः	वर्त्तुलः	अर्द्धचन्द्रः	त्रिकोणः	चापः	पद्मम्	चतुष्कोणः	शर्णः	मकरः	खड्गः
उभयतोऽङ्गुलमानकोणेषु तन्मानम्	४।व्या० १२प०	८ व्या० २४प०	४।व्या० १२प०	२।व्या० ६प०	४व्या० १२प०	३व्या० ९प०	४व्या० १२प०	४व्या० १२प०	६व्या० १८प०
वाहनम्	सप्ताश्वरथः	दशाश्वरथः	मेषः	सिंहः	हस्ती	हयः	गृध्रः	सिंहः	गृध्रः
मूर्त्तिद्रव्यम्	ताम्रम्	स्फटिकम्	श्वेतचन्दनम्	स्वर्णम्	स्वर्णम्	रजतम्	लौहम्	सीसम्	कांस्यम्
गन्धभेदा द्विधा	रक्तचन्दनम्	श्वेतचन्दनम्	रक्तचन्दनम्	कुङ्कुमम्	कुङ्कुमम्	श्वेतचन्दनम्	कस्तूरी	कस्तूरी	कस्तूरी
मतान्तरे	तत्	तत्	तत्	तत्	चतुःसमम्	तत्	सा	कृष्णागुरु	सा
पुष्पभेदाः	करवीरम्	कुमुदं	जवा	चम्पकम्	पद्मम्	जातिः	मल्लिका	कुन्दम्	मल्लिका
धूपभेदाः	गुग्गुलुः	घृताक्तयवधूपः	सर्जरसाक्षौद्रसक्तकम्	पीतागुरुसिह्लकम्	दशाङ्गम्	साज्यविल्वागुरु	पद्मकाष्ठम्	यवधूपः	मधुमिश्रगुडत्वचम्
मतान्तरे	कुन्दुरकम्	घृताक्तम्	सर्जरसः	पीतागुरु	सिन्धुजम्	विल्वागुरु	गुग्गुलुः	लाक्षा	लाक्षा
फलम्	द्राक्षा	इक्षुः	पूगम्	नागरङ्गम्	जम्बीरम्	वीजपूरम्	जातिफलम्	नारिकेलम्	दाडिमम्
वस्त्रम्	रक्तम्	श्वेतम्	रक्तम्	पीतम्	पीतम्	श्वेतम्	कृष्णम्	कृष्णम्	चित्रम्
रत्नानि	माणिक्यम्	मुक्ता	प्रवालम्	गारुत्मतम्	पुष्परागम्	हीरकम्	नीलकम्	गोमेदकम्	वैदूर्य्यम्
बलिभेदाः	गुडौदनः	घृतपायसम्	यावकम्	क्षीरयष्टिकम्	दध्योदनः	घृतौदनः	कृसरम्	आजमांसम्	चित्रान्नम्
समिधः	अर्कः	पलाशः	खदिरः	अपामार्गः	अश्वत्थः	उडुम्बरः	शमी	दूर्वात्रयम्	कुशत्रयम्
दक्षिणा	कपिलाधेनुः	शङ्खः	रक्तवृषः	स्वर्णम्	पीतवस्त्रं	श्वेताश्वः	कृष्णाधेनुः	खड्गः	छागः
जपसंख्या	६०००	१००००	७०००	१७०००	१६०००	२००००	१९०००	१८०००	७०००
अधिदेवता	शिवः	उमा	स्कन्दः	नारायणः	ब्रह्मा	शक्रः	यमः	कालः	चित्रगुप्तः
प्रत्यधिदेवता	अग्निः	जलम्	क्षितिः	विष्णुः	इन्द्रः	शची	प्रजापतिः	सर्पः	ब्रह्मा

वेदभेदे ग्रहादीनां मन्त्रभेदा हेमाद्र्याद्युक्ताः प्रतीकतो दर्श्यन्ते

ग्रहादीनाम्	ऋग्वेदिनः	यजुर्वेदिनः	सामवेदिनः	अथर्ववेदिनः
रवेः	आ कृष्णेन रजसा	आ कृष्णेन रजसा	उदु त्यं जातवेदसम्	विषासहिं सहमानम्
चन्द्रस्य	आप्यायस्व समेतु	इमं देवा असपत्नम्	सन्ते पयांसि समुयन्तु	प्रकष सं नक्षत्राणि
भौमस्य	अग्निर्मूर्द्धा दिवः	अग्निर्मूर्द्धा दिवः	अग्निर्मूर्द्धा दिवः	त्वया मन्यो ! सरथम्
बुधस्य	अग्ने ! विवस्वदु	उद्बुध्यस्वाग्ने !	अग्ने ! विवस्वत्	यद्राजानो विभजन्तः
गुरोः	बृहस्पते ! परिदीया	बृहस्पते ! अतियदर्य्यः	बृहस्पते ! परिदीय	बृहस्पतिर्नः परिपातु
शुक्रस्य	शुक्रं ते अन्यत्	अन्नात्परिस्रुतः	शुक्रं ते अन्यत्	हिरण्यवर्णाः शुचयः
शनेः	शमग्निरग्निभिः	शन्नोदेवीरभीष्टये	शन्नोदेवीरभीष्टये	सहस्रबाहुः पुरुषः
राहोः	कया नश्चित्रः	काण्डात् काण्डात्	कया नश्चित्रः	दिव्यं चित्रमृतुथा
केतोः	केतुं कृण्वन्नकेतवे	केतुं कृण्वन्नकेतवे	केतुं कृण्वन्नकेतवे	यस्ते पृथुःस्तनयित्नुः
सूर्याधिदेववह्नेः	आ वीराजानम्	त्र्यम्बकम्	आ वीराजानम्	मानोविदन् विव्याधिनः
चन्द्राधिदेवोमायाः	गौरीर्मिमाय	श्रीश्च ते लक्ष्मीश्च	आपोहि ष्ठा	आपोहि ष्ठा
कुजाधिदेवस्कन्दस्य	कुमारं माता	यदक्रन्दः प्रथमम्	स्योना पृथिवि !	अग्निरिव मन्यो ! त्विषितः
बुधाधिदेवविष्णोः	इदं विष्णुर्विचक्रमे	विष्णोरराटमसि	इदं विष्णुर्विचक्रमे	प्र तद्विष्णुः स्तवते
जीवाधिदेवब्रह्मणः	त्वमित् सप्रथाः	आ ब्रह्मन् ब्राह्मणः	त्वमित् सप्रथाः	ब्रह्म जज्ञानम्
शुक्राधिदेवेन्द्रस्य	इन्द्रं वो विश्वतः	सजोषा इन्द्र !	इन्द्रमित् देवतातये	इन्द्रेमं प्रतरम्
शन्यधिदेवयमस्य	यमाय सोमं सुनुत	यमाय त्वाङ्गिरस्वते	आयं गौः पृश्निः	यः प्रथमं प्रवतमाससाद
राह्वधिदेवकालस्य	ब्रह्म जज्ञानम्	कार्षिरसि समुद्रस्य	ब्रह्म जज्ञानम्	रोहितः कालो अभवत्
केत्वधिदेवचित्रगुप्तस्य	उषोवाजं हि	चित्रावसो ! स्वस्ति	चित्र इच्छिशोः	आघ्रातं यदनाघ्रातम्
सूर्यप्रत्यधिदेवाग्नेः	अग्निं दूतं वृणीमहे	अग्निं दूतं पुरोदधे	अग्निं दूतं वृणीमहे	समास्त्वाग्ने ऋतवः !
चन्द्रप्रत्यधिदेवजलस्य	अप्सु मे सोमः	आपोहि ष्ठा	उदुत्तमं वरुण !	शन्नोदेवीरभीष्टये
भौमप्रत्यधिदेवक्षितेः	स्योना पृथिवि !	स्योना पृथिवि !	पृथिव्यन्तरिक्षम्	भूमे ! मातर्निधेहि
बुधप्रत्यधिदेवहरेः	सहस्रशीर्षा पुरुषः	इदं विष्णुर्विचक्रमे	सहस्रशीर्षा पुरुषः	इदं विष्णुर्विचक्रमे
जीवप्रत्यधिदेवेन्द्रस्य	इन्द्रायेन्दो ! मरुत्वते	इन्द्र आसां नेता	इन्द्रायेन्दो !	इन्द्र ! जुषस्व प्रवह
शुक्रप्रत्यधिदेवशच्याः	उत्तानपर्णे ! सुभगे !	अदित्यै रास्नासि	एकाष्टका तपसे	प्रेतं पादौ प्रस्फुरतम्
शनिप्रत्यधिदेवप्रजापतेः	प्रजापते ! न त्वदु	प्रजापते ! न त्वदु	प्रजापते ! न त्वदु	नक्तं जातास्योषधे
राहुप्रत्यधिदेवसर्पाणाम्	आयं गौःपृश्निः	नमोऽस्तु सर्पेभ्यः	तवेदिन्द्रावमम्	घोरसक घोरभ !
केतुप्रत्यधिदेवब्रह्मणः	ब्रह्म जज्ञानम्	ब्रह्म जज्ञानम्	एष ब्रह्मा य ऋत्विजः	ये दिशामन्तर्देशेभ्यः
विनायकस्य	आ तू न इन्द्र !	गणानां त्वा गणपतिम्	आ तू न इन्द्र !	निर्लक्ष्म्यं ललाम्यम्
दुर्गायाः	जातवेदसे सुनवाम	अम्बे ! अम्बिके !	इमं स्तोममर्हते	पृतनाजितं सहमानम्
वायोः	क्राणा शिशुर्महीनाम्	वायो ! ये ते सहस्रिणः	क्राणा शिशुर्महीनाम्	अन्तरीक्षे वायवे
आकाशस्य	आदित् प्रत्नस्य	घृतं घृतपावानः	आदित् प्रत्नस्य	आम्यतः पचतो विद्धि
अश्विनोः	एषो उषा अपूर्व्या	या वां कशा	एषो उषा अपूर्व्या	सं चेसया यो अश्विना
	एते च मन्त्रा ऋग्वेदस्य यादृशस्थानस्थास्तच्चिह्नसहितं तुलादानादिपद्धतौ ७५—७६ पत्रेषु स्वरूपतो दर्शितास्तत एवावसेयाः ।	एते च मन्त्राः शुक्लयजुर्वेदे यादृशस्थानस्थास्तच्चिह्नसहितं तुलादानादिपद्धतौ १०६—११० पत्रेषु स्वरूपतो दर्शिताः ।	एते च मन्त्राः सामवेदस्य यादृशस्थानस्थास्तच्चिह्नानुसारेण तुलादानादिपद्धतौ १२७—१२० पत्रेषु स्वरूपतो दर्शिताः ।	एते च मन्त्राः अथर्ववेदे यादृशस्थानस्थास्तच्चिह्नानुसारेण तुलादानादिपद्धतौ १४८—१५२ पत्रेषु स्वरूपतो दर्शिताः ।

ग्रहयुति पु० ६त०। ग्रहाणामेकराश्यादिस्थितिभेदेन भूतलस्थानां कल्पनीययोगभेदे तद्विशेषः सूर्य्यसि० उक्तो यथा "ताराग्रहाणामन्योन्यं स्यातां युद्धसमागमौ। समागमः शशाङ्केन सूर्य्येणास्तमनं सह" सू०सि० "ताराग्रहाणां भौमादिपञ्चग्रहाणां परस्परं योगे युद्धसमागमौ वक्ष्यमाणलक्षणाभिन्नौ स्तः। चन्द्रेण सह पञ्चतारान्यतमस्य योगः समागमसञ्ज्ञः। सूर्य्येण सह पञ्चताराणामन्यतमस्य चन्द्रस्य वा योगस्तदस्तमनं पूर्वोक्तलक्षणम् न तत्समागमम् युतभावे प्रागपरकालेऽस्य सत्त्वात्। अथ युतेर्गतैष्यत्वं सार्द्धश्लोकेनाह" रङ्गना० "शीघ्रे मन्दाधिकेऽतीतः संयोगो भवितान्यथा। द्वयोः प्राग्यायिनोरेवं वक्रिणोस्तु विपर्य्ययात्। प्राग्याय्यन्यधिकेऽतीतो वक्रिण्येष्यः समागमः" सू०सि०।

"ययोर्ग्रहयोर्योगोऽभिमतस्तयोर्ग्रहयोर्मध्ये यः शीघ्रगतिर्ग्रहस्तस्मिन् मन्दाधिके मन्दगतिग्रहादधिके सति तयोः संयोगो युतिसञ्ज्ञोऽतीतः पूर्वं जात इत्यर्थः। अन्यथा मन्दगतिग्रहे शीघ्रगतिग्रहादधिके सतीत्यर्थः। तयोर्योगो भविता एष्यः। एवमुक्तं गतैष्यत्वम् द्वयोर्ग्रहयोः प्राग्यायिनोः पूर्व्वगतिकयोर्भवति। वक्रिणोर्वक्रगतिग्रहयोर्विपर्य्ययादुक्तवैपरीत्यात्। तुकारादुक्तगतैष्यो योगो भवति। शीघ्रगतिग्रहे मन्दगतिग्रहादधिके एष्यः संयोगो, मन्दगतिग्रहे शीघ्रगतिग्रहादधिके गतः संयोग इत्यर्थः। अथैकस्य वक्रत्वे आह। प्राग्यायिनीति। द्वयोर्मध्ये एकतरस्मिन् वक्रिणि सति तदा वक्रगतिग्रहात् पूर्वगतिग्रहेऽधिके सति गतो यातः। यदा तु पूर्व्वगतिग्रहाद्वक्रगतिग्रहेऽधिके सति समागमो योगस्तदा एष्यः स्यात्। अत्रोपपत्तिः। पूर्वगत्योर्ग्रहयोर्मध्ये शीघ्रगस्याधिकत्वेऽग्रे योगासम्भवात् पूर्व्वं योगो जातः। मन्दगस्याधिकत्वे शीघ्रगस्य न्यूनत्वादग्रे योगो भविष्यति। वक्रिणोस्तु शीघ्रगस्याधिकत्वेऽग्रे तस्य न्यूनत्वेन योगसम्भवादेष्यो योगो मन्दगस्याधिकत्वे शीघ्रगस्योत्तरोत्तरं न्यूनत्वसम्भवेनाग्रे योगासम्भवाद्गतो योगः। अथ वक्रगतिग्रहात् पूर्व्वगतिग्रहेऽधिके उत्तरोत्तरं योगासम्भवाद्गतो योगः। पूर्वगतिग्रहाद्वक्रगतिग्रहेऽधिके वक्रगतिग्रहस्य न्यूनत्वेनाग्रे योगसम्भवादेष्यः संयोग इति। अथ युतिकाले तुल्यग्रहयोरानयनं युतिकालस्य गतैष्यदिनाद्यानयनं च सार्द्धश्लोकद्वयेनाह" रङ्गना०।

"ग्रहान्तरकलाः स्वस्वभुक्तिलिप्तासमाहताः। भुक्त्यन्तरेण विभजेदनुलोमविलोमयोः। द्वयोर्वक्रिण्यथैकस्मिन् भुक्तियोगेन भाजयेत्। लब्धं लिप्तादिकं शोध्यं गते, देयं भविष्यति। विपर्य्ययाद्वक्रगत्योरेकस्मिंस्तु धनव्ययौ। समलिप्तौ भवेतां तौ ग्रहौ भगणसंस्थितौ। विवरं तद्वदुद्धृत्य दिनादि फलमिष्यते" सू०सि०।

"युतिसम्बन्धिनोर्ग्रहयोरभीष्टैककालिकयोरन्तरस्य कलाः पृथक् स्वस्वगतिकलाभिर्गुणिताः (कर्मभूताः) द्वयोश्चेद्ग्रहयोरनुलोमविलोमयोर्मार्गगयोर्वक्रगयोर्वेत्यर्थः। स्फुटगत्यन्तरेण गणको भजेत्। विशेषमाह। वक्रिणीति अथानन्तरं द्वयोर्मध्ये एकतरे वक्रिणि सति तद्गतियोगेन भजेत्। फलं कलादि स्वं स्वं गते योगे सति ग्रहयोर्मार्गगयोः शोध्यं, भविष्यति—एष्ये योगे सति तयोर्देयं योज्यम्। द्वयोर्वक्रगत्योः स्वं स्वं फलं विपर्य्ययादुक्तवैपरीत्यात् कार्य्यम्। गते योगे योज्यम्। एष्ये योगे हीनमित्यर्थः। द्वयोर्मध्ये एकतरे तुकाराद्वक्रिणि सति तयोर्ग्रहयोर्वक्रमार्गगयोः स्वस्वकलात्मकफलाङ्कौ धनव्ययौ युतहीनौ कार्य्यौ। तथाहि। गतयोगे मार्गगग्रहे स्वफलं हीनं, वक्रिणि ग्रहे योज्यम्। एष्ये योगे वक्रग्रहे शोध्यम्। मार्गगग्रहे योज्यमिति। एवं कृते तौ युतिसम्बन्धिनौ ग्रहौ भगणसंस्थौ भगणे राश्यधिष्ठितचक्रे संस्थितयोस्तौ राश्याद्यात्मकौ समलिप्तौ समकलौ स्तः। लिप्तापदस्य भगणावयवोपलक्षणत्वेन समौ स्त इत्यर्थः। अथ युतिकालज्ञानमाह विवरमिति। अभीष्टकालिकयोर्युतिसम्बन्धिनोर्ग्रहयोरन्तरं कलात्मकं तद्वत् समकलोपयुक्तफलज्ञानार्थं यथा गतगुणितमन्तरं गतियोगेन गत्यन्तरेण भक्तं तथेत्यर्थः। तेन हरेण भक्ता फलं दिनादिकं गतैष्ययुतिवशादभीष्टकालाद्गतैष्यमुच्यते। तत्समये तद्युतिकाले तौ ग्रहौ समौ स्त इत्यर्थः। अत्रोपपत्तिः। यदि गत्यन्तरेण गतिकलास्तदा ग्रहान्तरकलाभिः का? इति फले गतयुतौ ग्रहयोः शोध्ये। एष्ययुतौ योज्ये। द्वयोर्वक्रत्वे गत्यन्तरभक्तफले गतयुतौ ग्रहयोर्योज्ये। एष्ययुतौ शोध्ये वक्रग्रहस्योत्तरोत्तरं न्यूनत्वात्। अथैको वक्री तदा तयोरन्तरं प्रत्यहं गतियोगेनोपचितम्। अतो गतियोगहरेणागतं फलं गतयोगे मार्गगग्रहे हीनं, पूर्वं तस्य न्यूनत्वात्। वक्रग्रहे योज्यम् पूर्वं तस्याधिकत्वात्। एष्ययोगे मार्गगग्रहे योज्यम् उत्तरोत्तरमधिकत्वात्। वक्रग्रहे शोध्यम् तस्याग्रे न्यूनत्वात्। यदि गतियोगेन गत्यन्तरेण वा

दिनमेकं लभ्यते तदान्तरकलाभिः किम्? इत्यनुपातेन गतैष्यदिनाद्यागमः" रङ्गना०

ग्रहयुद्ध न० ६त०। ग्रहाणामपृथु परिस्थितानां किरणसंस्पर्शादिना युद्धभेदे तद्भेदादिक सू० सि० उक्तं यथा

"उल्लेखं तारकास्पर्शाद्भेदे भेदः प्रकीर्त्यते। युद्धमंशुविमर्दाख्यमंशुयोगे परस्परम्। अंशादूनेऽपसव्याख्यं युद्धमेकोऽत्र चेदणुः। समागमोंऽशादधिके भवतश्चेद्बलान्वितौ" सू०सि०।

"भौमादिपञ्चताराणां मध्ये द्वयोर्युतौ तारकास्पर्शाद्बिम्बनेम्योः स्पर्शमात्रादुल्लेखसञ्ज्ञं युद्धं वदन्ति युतिभेदज्ञाः। इदं तु द्वयोर्मानैक्यखण्डतुल्ययाम्योत्तरान्तरे। भेदे मण्डलभेदे भेदो भेदसञ्ज्ञो युद्धापरभेदो युद्धभेदतत्त्वज्ञैः कथ्यते। अयं भेदो मानैक्यखण्डादूने द्वयोर्याम्योत्तरान्तरे। अत्र भास्कराचार्य्यैस्तु "मानैक्यार्धाद्द्युचरविवरेऽल्पे भवेद्भेदयोगः कार्यं स्पर्शग्रहवदखिलं लम्बनाद्यं स्फुटार्थम्। कल्प्योऽधःस्थः सुधांशुस्तदुपरिगतनो लम्बनादिप्रसिद्ध्यै किं त्वर्कादिव लग्नं ग्रहयुतिसमये कल्पितार्काच्च साध्यम्। प्राग्वत् तल्लम्बनेन ग्रहयुतिसमयः संस्कृतः प्रस्फुटः स्यात्। खेटौ तौ दृष्टियोग्यौ ग्रहयुतिसमये कार्यमेवं तदैव। याम्योदक्स्थद्युचरविवरं भेदयोगे स बाणो ज्ञेयः सूर्य्याद्भवति च यतः शीतगुः वा शराख्यः। मन्दाक्रान्तोऽल्पकुरपि तदाधःस्थितः स्यात् तदैन्द्र्यां स्पर्शो मोक्षोऽपरदिशि तदा पारिलेख्येऽवगम्यः" इति विशेषोऽभिहितः। भगवता तु सूक्ष्मबिम्बयोराकाशे दूरतो विविक्तदर्शनासम्भवाद्यर्थमयाभादुपेक्षितमिति ध्येयम्। युतावन्योऽन्यं किरणयोगे सति अंशुमर्दाख्यं किरणसङ्कट्टनसञ्ज्ञं युद्धं स्यात्। द्वयोर्याम्योत्तरान्तरेऽपि षष्टिकलात्मकेऽशभागादूनेऽनधिके सव्यापसव्यसञ्ज्ञं युद्धं भवति। अत्र विशेषमाह। एक इति। अत्रापसव्ययुद्धे एको द्वयोरन्यतरोऽणुरल्पबिम्बश्चेत् तदापसव्यं युद्धं व्यक्तं स्यादन्यथा त्वव्यक्तं युद्धं स्यात्। एषां चतुर्णां फलम्। "अपसव्ये भयं ब्रूयात् संग्रामं रश्मिसङ्कुले। लेखनेऽमात्यपीडा स्याद्भेदने तु धनक्षयः" इति भार्गवीयोक्तं ज्ञेयम्। युद्धभेदानुक्त्वा समागममाह समागम इति। द्वयोर्याम्योत्तरान्तरे षष्टिकलात्मकैकभागादभ्यधिके सति समागमो योगो भवति। तत्रापि विशेषमाह भवत इति। युतिविषयकौ ग्रहौ बलान्वितौ बलेन—"स्थानादिबलचिन्तात्र व्यर्था केनापि न स्मृता। प्रत्यक्षयेऽप्यत्रास्मिन् स्थौल्यस्नैग्ध्यबलं स्मृतम्" इति ब्रह्मसिद्धान्तवचनात् स्थूलमयूखबलान्वितौ युक्तौ स्थूलबिम्बौ समावित्यर्थः। चेत् स्याताम् तदा समागमस्तयोर्व्यक्तः स्यात्। अन्यथा त्वव्यक्तः समागमः। "द्वावपि मयूखयुक्तौ विपुलौ स्निग्धौ समागमे भवतः। अत्रान्योऽन्यं प्रीतिर्विपरीतावात्मपक्षघ्नौ। युद्धं समागमो वा यद्यव्यक्तं तु लक्षणैर्भवतः। भुवि भूभृतामपि तथा फलमव्यक्तं विनिर्दिष्टम्" इत्युक्तेः। "भेदोल्लेखांशुसम्मर्दा अपसव्यस्तथापरः। ततो योगो भवेद्देवामेकांशकलनापनात्" इति काश्यपोक्तेश्च सर्वं निरवद्यम्। अथ युद्धे पराजितस्य ग्रहस्य लक्षणमाह" रङ्गना०

"अपसव्ये जितो युद्धे पिहितोऽणुरदीप्तिमान्। रूक्षो विवर्णो विध्वस्तो विजितो दक्षिणाश्रितः" सू०सि०।

"द्वयोर्मध्ये यस्तदितरेण विध्वस्तो हतः स विजितः पराजितो ज्ञेयः। हतस्य लक्षणमाह अपसव्य इति। एतेनापसव्ये युद्धे यो जितो जयलक्षणैर्विवर्जितः। एतेनोल्लेखादित्वे सञ्ज्ञाफलं न पराजितस्य फलमिति सूचितम्। पिहित आच्छादितोऽव्यक्त इति यावत्। अणुरितरग्रहबिम्बादल्पबिम्बः। अदीप्तिमान् प्रभारहितः। रूक्षोऽस्निग्धः विवर्णः वर्णेन स्ववर्णेन स्वाभाविकेन रहित इत्यर्थः। दक्षिणाश्रित इतरग्रहापेक्षया दक्षिणदिशि स्थितः। "श्यामो वा व्यपगतरश्मिवान् रश्मिमण्डलो वा रूक्षो वा व्यपगतरश्मिवान् लघुर्वा। आक्रान्तो विनिमीलितः कृतापसव्यो विज्ञेयो हत इति मग्नो ग्रहेण" इति भार्गवीयोक्तेः। अथ श्लोकोत्तरार्धेन जयिनो ग्रहस्य लक्षणमाह" रङ्गना०

"उदक्स्थो दीप्तिमान् स्थूलो जयी याम्येऽपि यो बली" सू० सि० "इतरग्रहापेक्षयोत्तरदिक्स्थः दीप्तिमान् प्रभायुक्तः स्थूल इतरग्रहबिम्बापेक्षया पृथुबिम्बः। जयी जययुक्तः स्यात्। अथोत्तरदक्षिणदिक्स्थत्वक्रमेण जयपराजयौ न स्त इत्याह याम्य इति। दक्षिणदिशि यो ग्रहो बली दीप्तिमान् पृथुबिम्बो भवति स जयी। अपिशब्द उत्तरदिशासमुच्चयार्थकः। तथा च जयपराजयलक्षणयोर्दिक्स्थानमनुपयुक्तमिति भावः। अथ युद्धे विशेषमाह" रङ्ग०। "आसन्नावप्युभौ दीप्तौ भवतश्चेत् समागमः। स्वल्पौ द्वावपि विध्वस्तौ भवेतां कूटविग्रहौ" सू०सि०। "उभौ द्वौ आसन्नावेकभागान्तरगतान्तरितौ। अपिशब्दाद् बलान्विताक्रान्तौ। दीप्तौ प्रभायुक्तौ चेत् स्यातां तदा बलान्विता-

षिति समागमलक्षणैकदेशसद्भावात् समागमाख्यं युद्धम्। द्वावपि ग्रहौ स्थूलौ स्थूलबिम्बौ विध्वस्तौ द्वावपि पराजयलक्षणाक्रान्तौ स्यातां तदा क्रमेण कूटविग्रहसञ्ज्ञकौ युद्धभेदौ स्याताम्। अथोत्सर्गतः शुक्रस्य जयलक्षणाक्रान्तत्वमस्तीति वदन् समागमः शशाङ्केनेति प्राक्प्रतिज्ञातसमागमे उक्तप्रकारमतिदिशति" रङ्ग०।

"उदक्स्थो दक्षिणस्थो वा भार्गवः प्रायशो जयी। शशाङ्केनैवमेतेषां कुर्य्यात् संयोगसाधनम्" सू०सि०।

"इतरग्रहापेक्षयोदक्स्थो दक्षिणदिक्स्थो वोभयदिशीत्यर्थः। शुक्रः प्रायश उत्सर्गतो जयलक्षणाक्रान्तत्वेन जयी। कदाचित् पराजयलक्षणाक्रान्तो भवतीति तात्पर्य्यार्थः। एतेषां भौमादिपञ्चताराणां चन्द्रेण सह संयोगसाधनं युतिसाधनमेषाद्युक्तरीत्या गणकः कुर्य्यात्। अत्र विशेषार्थकम्। 'अवनत्या स्फुटो ज्ञेयो विक्षेपः शीतगोर्युतौ" इत्यर्द्धं क्वचित् पुस्तके दृश्यते न सर्व्वत्रेति क्षिप्तत्वात्तदुपेक्षितम् अधिकारस्यापूर्णश्लोकत्वापत्तेश्च। एतदुक्तग्रन्थयोगे नतिसंस्कारनिषेधस्य सिद्धेस्तस्यायुक्तत्वमिति तदयुक्तौ सूर्य्यग्रहणोक्तरीत्या साधारण्येन सर्व्वत्र तद्विशेषोक्तेरर्थसिद्धेरिति ध्येयम्। नन्वेषां ग्रहाणां दूरान्तरेण सदोर्द्ध्वाधरान्तरसद्भावात् परस्परं योगासम्भवेन कथं युतिः सङ्गतेत्यत आह" रङ्ग०।

"भावाभावाय लोकानां कल्पनेयं प्रदर्शिता। स्वमार्गगाः प्रयान्त्येते दूरमन्योन्यमाश्रिताः" सू०सि०।

"एते ग्रहाः स्वमार्गगाः स्वस्वकक्षास्था अन्योन्यमाश्रिता युतकालजर्द्ध्वाधरन्तराभावेन संयुक्ताः सन्तः प्रयान्ति गच्छन्ति इति दूरं दूरान्तरेण दर्शनादियं ग्रहयुतिकल्पना कल्पनात्मिकाऽवास्तवा प्रदर्शिता पूर्व्वोक्तग्रन्थेन कथिता। नन्ववस्तुभूता किमर्थमुक्तेत्यतः प्रयोजनमाह भावाभावायेति। लोकानां भूस्थप्राणिनां भावः शुभफलमभावोऽशुभफलं तयोः शुभाशुभफलादेशायावस्तुभूतापि युतिरुक्तेति भावः" रङ्ग०।

युद्धभेदास्तत्फलविशेषाः समागमजयादिफलभेदाश्च वृ० सं० १७अ० उक्ता यथा

"युद्धं यथा यदा वा भविष्यदादिश्यते त्रिकालज्ञैः। तद्विज्ञाने करणं मया कृतं सूर्य्यसिद्धान्तात्। वियति चरतां ग्रहाणामुपर्य्युपर्य्यात्ममार्गसंस्थानाम्। अतिदूराद्दृग्विषये समतामिव सम्प्रयातानाम्। आसन्नक्रमयोगाद्भेदोल्लेखांशुमर्दापसव्यैः। युद्धं चतुःप्रकारं पराशराद्यैर्मुनिभिरुक्तम्। भेदे वृष्टिविनाशो भेदः सुहृदां महाकुलानां च। उल्लेखे शस्त्रभयं मन्त्रिविरोधः प्रियान्नत्वम्। अंशुविरोधे युद्धानि भूभृतां शस्त्ररुक्क्षुदवमर्दाः। युद्धे चाप्यपसव्ये भवन्ति युद्धानि भूपानाम्। रविराक्रन्दो मध्ये पौरः पूर्व्वेऽपरे स्थितो यायी। पौरा बुधगुरुरविजा नित्यं शीतांशुराक्रन्दः। केतुकुजराहुशुक्रा यायिन एते हता ग्रहा हन्युः। आक्रन्दयायिपौरान् जयिनो जयदाः स्ववर्गस्य। पौरे पौरेण हते पौराः पौरान् नृपान् विनिघ्नन्ति। एवं याय्याक्रन्दौ नागरयायिग्रहाश्चैव। दक्षिणदिक्स्थः परुषो वेपथुरप्राप्य सन्निवृत्तोऽणुः। अधिरूढो विकृतो निष्प्रभो विवर्णश्च यः स जितः। उक्तविपरीतलक्षणसम्पन्नो जयगतो विनिर्दिष्टः। विपुल स्निग्धो द्युतिमान् दक्षिणदिक्स्थोऽपि जययुक्तः। द्वावपि मयूखयुक्तौ विपुलौ स्निग्धौ समागमे भवतः। तत्रान्योऽन्यप्रीतिर्विपरीतावात्मपक्षघ्नौ। युद्धं समागमो वा यद्यव्यक्तौ तु लक्षणैर्भवतः। भुवि भूभृतामपि तथा फलमव्यक्तं विनिर्दिश्यम्"।

कुजजयस्य "गुरुणा जितेऽवनिसुते वाह्लीका यायिनोऽग्निवार्त्ताश्च। शशिजेन शूरसेनाः कलिङ्गसाल्वाश्च पीड्यन्ते। सौरेणारे विजिते जयन्ति पौराः प्रजाश्च सीदन्ति। कोष्ठागारम्लेच्छक्षत्रियतापाश्च शुक्रजिते"।

बुधजयस्य "भौमेन हते शशिजे वृक्षसरित्तापसाश्मकनरेन्द्राः। उत्तरदिक्स्थाः क्रतुदीक्षिताश्च सन्तापमायान्ति। गुरुणा बुधे तु विजिते म्लेच्छशूद्रचौरार्थयुक्तपौरजनाः। त्रैगर्त्तपार्व्वतीयाः पीड्यन्ते कम्पते च मही। रविजेन बुधे ध्वस्ते नाविकयोधाब्जसधनगर्भिण्यः। भृगुणा जितेऽग्निकोपः सस्याम्बुदयायिविध्वंसः"।

जीवजयस्य "जीवे शुक्राभिहते कुलूतगान्धारकैकया मद्राः। साल्वा वत्सा वङ्गा गावः सस्यानि नश्यन्ति। भौमेन हते जीवे मध्यो देशो नरेश्वरा गावः। सौरेण चार्जुनायनवसातियौधेयशिविविप्राः। शशितनयेनापि जिते वृहस्पतौ म्लेच्छसत्यशस्त्रभृतः। उपयान्ति मध्यदेशश्च संक्षयं यच्च भक्तिफलम्"।

शुक्रजयस्य "शुक्रे बृहस्पतिहते यायी श्रेष्ठो विनाशमुपयाति। ब्रह्मक्षत्रविरोधः सलिलं च न वासवस्त्यजति। कोशलकलिङ्गवङ्गा वत्सा मत्स्याश्च मध्यदेशयुताः। महतीं व्रजन्ति पीडां नपुंसकाः शूरसे-

नाश । कुजविजिते भृगुतनये बलमुख्यवधो नरेन्द्रसंग्रामाः । सौम्येन पार्वतीयाः क्षीरविनाशोऽल्पवृष्टिश्च । रविजेन सिते विजिते गणमुख्याः शस्त्रजीविनः चलम् । जलजाश्च निपीड्यन्ते सामान्यं भक्तिफलमन्यत्” ।

शनिजयस्य “असिते सितेन निहतेऽर्घवृद्धिरहिविहगमानिनां पीडा । शशिजेन टङ्कणान्ध्रोड्रकाशिवाह्लीकदेशानाम् । सौम्येन पराभूते मन्देऽङ्गवणिग्विहङ्गपशुनागाः । सन्ताप्यन्ते गुरुणा स्त्रीबहुला महिषकशकाश्च” ।

अयं विशेषोऽभिहितो हतानां कुजज्ञवागीशसितासितानाम् । फलं तु वाच्यं ग्रहभक्तितोऽन्यद् यथा तथा घ्नन्ति हताः स्वभक्तीः” ।

“नीचस्थितेऽरिष्टगृहेऽथ पराजिते वा जीवे भृगौ व्रतविधौ स्मृतिकर्महीनः” ज्यो० त० । उपयमशब्दे तत्कालस्य वर्ज्यतोक्तिर्द्रष्टव्या । ग्रहविग्रहग्रहविमर्दादयोऽप्यत्र, तत्र च चन्द्रस्यान्यखेटैः समागमे विशेषः न युद्धम् इत्युक्तं वृ० सं० १८ अ० यथा

“भानां यथासम्भवमुत्तरेण यातो ग्रहाणां यदि वा शशाङ्कः । प्रदक्षिणं तच्छुभकृन्नराणां याम्येन यातो न शिवः शशाङ्कः । चन्द्रमा यदि कुजात् प्रयात्युदक् पार्वतीयबलशालिनां जयः । क्षत्रियाः प्रमुदिताः सयायिनो भूरिधान्यमुदिता वसुन्धरा । उत्तरतः शशिसुतस्य शशाङ्कः पौरजयाय सुभिक्षकरश्च । सस्यचयं कुरुते जयहार्दिं कोशचयं च नराधिपतीनाम् । बृहस्पतेरुत्तरगे शशाङ्के पौरद्विजक्षत्रियपण्डितानाम् । धर्मस्य देशस्य च मध्यमस्य वृद्धिः सुभिक्षं मुदिताः प्रजाश्च । भार्गवस्य यदि यात्युदक् शशी कोशयुक्तगजवाजिवृद्धिदः । यायिनां च विजयो धनुष्मतां सस्यसम्पदपि चोत्तमा तदा । रविजस्य शशी प्रदक्षिणं कुरुतेत्पुरभूभृतां जयः । शकवाह्लिकसिन्धुपह्लवा मुदमाप्ता यवनैः समन्विताः । येषामुदग्गच्छति भग्रहाणां प्रालेयरश्मिर्निरुपद्रवश्च । तद्व्यपौरेतरभक्तिदेशान् पुष्णाति याम्येन निहन्ति तानि । शशिनि फलमुदक्स्थे यद्ग्रहस्योपदिष्टं भवति तदपसव्ये सर्वमेव प्रतीपम् । इति शशिसमवायाः कीर्त्तिता भग्रहाणां न खलु भवति युद्धं साकमिन्दोर्ग्रहर्क्षैः” ।

ग्रहयुग्भ न० ग्रहयोर्युग्मं यत्र तादृशं भम् । ग्रहयुद्धाधिकरणे नक्षत्रे उपमयशब्दे उदा० ।

ग्रहवर्षादिफल न० ६त० । १रव्यादिग्रहस्वामिकवर्षमासफलभेदे । ७त० । २तद्बोधकशास्त्रे च तच्च वृ० सं० २० अध्यायात्मकं यथा

रवेः—“सर्वत्र भूर्विरलसस्ययुता वनानि दैत्याद्विभक्षयिपुदंष्ट्रिसमाहतानि । स्यन्दन्ति नैव च पयः प्रचुरं स्रवन्त्यो रुग्भेषजानि न तथातिबलान्वितानि । तीक्ष्णं तपत्यदितिजः शिशिरेऽपि काले नात्यम्बुदा जलमुचोऽचलसन्निकाशाः । नष्टप्रभर्क्षगणशीतकरं नभश्च सीदन्ति तापसकुलानि सगोकुलानि । हस्त्यश्वपत्तिमदसद्बलैरुपेता बाणासनासिमुसलातिशयाश्चरन्ति । घ्नन्तो नृपा युधि नृपानुचरैश्च देशान् संवत्सरे दिनकरस्य दिनेऽथ मासे” ।

विधोः—“व्याप्तं नभः प्रचलिताचलसन्निकाशैर्व्यालाञ्जनालिगवलच्छविभिः पयोदैः । गां पूरयद्भिरखिलाममलाभिरद्भिरुत्कण्ठकेन गुरुणा ध्वनितेन चाशाः । तोयानि पद्मकुमुदोत्पलवन्त्यतीव फुल्लद्रुमाण्युपवनान्यलिनादितानि । गावः प्रभूतपयसो नयनाभिरामा रामा रतैरविरतं रमयन्ति रामान् । गोधूमशालियवधान्यवरेक्षुवाटा भूः पाल्यते नृपतिभिर्नगराकराढ्या । चित्यङ्किता क्रतुवरेष्टिविघुष्टनादा संवत्सरे शिशिरगोरभिसम्प्रवृत्ते” ।

कुजस्य—“वातोद्धतश्चरति वह्निरतिप्रचण्डो ग्रामान् वनानि नगराणि च सन्दिधक्षुः । हाहेति दस्युगणपातहता रटन्ति निःस्वीकृता विपशवो भुवि मर्त्यसङ्घाः । अभ्युन्नता वियति संहतमूर्तयोऽपि मुञ्चन्ति न क्वचिदपः प्रचुरं पयोदाः । सीम्नि प्रजातमपि शोषमुपैति सस्यं निष्पन्नमप्यविनयादपरे हरन्ति । भूपा न सम्यगभिपालनसक्तचित्ताः पित्तोत्थरुक्प्रचुरता भुजगप्रकोपः । एवंविधैरुपहता भवति प्रजेयं संवत्सरेऽवनिसुतस्य विपन्नसस्या” ।

बुधस्य—“मायेन्द्रजालकुहकाकरनागराणां गान्धर्वलेख्यगणितास्त्रविदां च वृद्धिः । पिपीषया नृपतयोऽद्भुतदर्शनानि दित्सन्ति तुष्टिजननानि परस्परेभ्यः । वार्त्ता जगत्यवितथाऽविकला त्रयी च सम्यक् चरत्यपि मनोरिव दण्डनीतिः । अध्यध्वरं स्वभिनिविष्टधियोऽत्र केचित् आन्वीक्षिकीषु च परं पदमीहमानाः । हास्यज्ञदूतकविबालनपुंसकानां युक्तिज्ञसेतुजलपर्वतवासिनां च । हार्दिं करोति मृगलाञ्छनजः स्वकेऽब्दे मासेऽथ वा प्रचुरतां भुवि चौषधीनाम्” ।

गुरोः—“ध्वनिरुच्चरितोऽध्वरे द्युगामी विपुलो यज्ञभुजां मनांसि भिन्दन् । विचरत्यनिशं द्विजोत्तमानां

हृदयानन्दकरो ऽध्वरांशभाजाम् । क्षितिरुत्तमयज्ञवत्यनेकद्विपपत्त्यश्वधनोरुगोकुलाढ्या । क्षितिपैरभिपालनप्रहृष्टा द्युचरस्पर्धिजना तदा विभाति । विविधैर्वियदुन्नतैः पयोदैर्वृतभूमिं पयसाभितर्पयद्भिः । सुरराजगुरोः शुभेऽब्दे वर्षे बहुसस्या क्षितिरुत्तमर्द्धियुक्ता" ।

शुक्रः—"शालीक्षुमत्यपि धरा धरणीवराभधाराम्बरोज्झितपयःपरिपूर्णवप्रा । श्रीमत्सरोरुहततान्बुतडागकीर्णा योषेव भात्यभिनवाभरणोज्ज्वलाङ्गी । क्षत्रं क्षितौ क्षपितभूरिबलारिपक्षम् उद्घुष्टनैकजयशब्दविराजिताशम् । संहृष्टशिष्टजनदुष्टविनष्टवर्गां गां पालयन्त्यवनिपा नगराकराढ्याम् । पेपीयते मधु मधौ सह कामिनीभिर्जेगीयते श्रवणहारि सवेणुवीणम् । बोभुज्यतेऽतिथिसुहृत्स्वजनैः सहान्नम् अब्दे सितस्य मदनस्य जयावघोषः" ।

शनेः—"उद्वृत्तदस्युगणभूरिरणाकुलानि राष्ट्राण्यनेकपशुवित्तविनाकृतानि । रोरुद्यमाणहतबन्धुजनैर्जनैश्च रोगोत्तमाकुलकुलानि बुभुक्षया च । वातोद्धताम्बुधरवर्जितमन्तरिक्षम् आरुग्णनैकविटपं च धरातलं, द्यौः । नष्टार्कचन्द्रकिरणातिरजोऽवनद्धा, तोयाशयाश्च विजलाः सरितोऽपि तन्व्यः । जातानि कुत्रचिदतोयतया विनाशम् ऋच्छन्ति पुष्टिमपराणि जलोक्षितानि । सस्यानि मन्दमभिवर्षति वृत्रशत्रौ वर्षे दिवाकरसुतस्य सदा प्रवृत्ते" । "अपटुरपटुमयूखो नीचगोऽन्यैर्जितो वा न सकलफलदाता पुष्टिदोऽतोऽन्यथा यः । यदशुभमशुभेऽब्दे मासजं तस्य वृद्धिः शुभफलमपि चैवं साम्यमन्योऽन्यतायाम्" ।

ग्रहवह्नि पु० ६त० । ग्रहयज्ञे ग्रहोद्देशेन होमाऽधिकरणे वह्निभेदे स च ग्रहयज्ञशब्दे २७६२पृ० दर्शितः ।

ग्रहविप्र पु० ६त० । ग्रहोद्देश्यकदानग्रहणेन पतिते विप्रभेदे (दैवज्ञ) "तस्य ग्रहदानोद्देश्यता च ग्रहयामले ६पटले उक्ता यथा "तुलादानस्य यो दद्याद् ग्रहविप्राय सुन्दरि । आपन्मुक्तो भवेत् सोऽपि भुवि संमोदते सुखम् । सुवर्णस्य तुलां दद्याद् ग्रहविप्राय यः प्रिये ! । तस्य तुष्टः सुरगुरुः पुष्टिं करोति सः । यस्तु रौप्यतुलादानं दद्यात् ग्रहद्विजाय च । सन्तुष्टस्तस्य शुक्रः सन् स सृजेद्दीर्घजीवितम् । ग्रहद्विजाय यो दद्यात्तुलां ताम्रस्य पार्वति ! । सन्तुष्टो मङ्गलस्तस्य दीर्घायुर्मङ्गलं करोति हि । यो दद्याद् ग्रहविप्राय पित्तलस्य तुलां प्रिये ! । तस्य तुष्टो बुधः कुर्य्यादायुःपुष्टिं सुगौरवम् । ग्रहविप्राय लौहस्य तुलां यस्तु प्रयच्छति । प्रीतः शनैश्चरस्तस्य विपुलायुः प्रयच्छति । सीसकस्य तुलां दद्याद् ग्रहविप्राय यः प्रिये ! । तस्मै राहुः सुप्रीतः सौभाग्यायुः प्रयच्छति । यः खर्परतुलां दद्याद् ग्रहविप्राय सुन्दरि ! सन्तुष्टो भगवान् केतुस्तस्यायुर्वर्द्धयेत् सुखम् । तुलां ताम्रस्य यो दद्याद् ग्रहविप्राय सुन्दरि ! । आदित्यस्तस्य स प्रीतो दीर्घायुः परियच्छति । ग्रहविप्राय यो दद्यात् तुलां कांस्यस्य सुन्दरि ! । सन्तुष्टस्तस्य रात्रीशो विभूत्यायुः प्रयच्छति" ।

ग्रहशृङ्गाटक न० बृ० सं० २०अ० उक्ते ग्रहयोगभेदे यथा "यस्यां दिशि दृश्यन्ते विशन्ति तारग्रहा रविं सर्वे । भवति भयं दिशि तस्यामायुधकोपक्षुधातङ्कैः । चक्रधनुःशृङ्गाटकदण्डपुरप्रासवज्रसंस्थानाः । क्षुदवृष्टिकरा लोके समराय च मानवेन्द्राणाम् । यस्मिन् खांशे दृश्या ग्रहमाला दिनकरे दिनान्तगते । तस्मान्यो भवति नृपः परपक्षोपद्रवश्च महान् । यस्मिन्नृक्षे कुर्युः समागमं तज्जनान् ग्रहा हन्युः । अविभेदनाः परस्परममलमयूखाः शिवास्तेषाम् । ग्रहसंवर्तसमागमसम्मोहसमाजसन्निपाताख्याः । कोशश्चेत्येतेषामभिधास्ये लक्षणं सफलम् । एकर्क्षे चत्वारः सह पौरैर्यायिनोऽथ वा पञ्च । संवर्तो नाम भवेच्छिखिराहुयुतः स सम्मोहः । पौरः पौरसमेतो यायी सह यायिना समाजाख्यः । यमजीवसङ्गमेऽन्यो यद्यागच्छेत्तदा कोशः । उदितः पश्चादेकः प्राक् चान्यो यदि स सन्निपाताख्यः । अविकृततनवः स्निग्धा विपुलाश्च समागमे धन्याः । शुभौ तु संवर्तसमागमाख्यौ सम्मोहकोशौ भयदौ प्रजानाम् । समाजसञ्ज्ञः सुसमः प्रदिष्टो वैरप्रकोपः खलु सन्निपाते"

ग्रहसमागम पु० ६त० । चन्द्रेण सह भौमादिपञ्चग्रहयोगभेदे । ग्रहयुतिशब्दे ग्रहशृङ्गाटकशब्दे च विवृतिः

ग्रहादि पु० पा० उक्ते कर्त्तरि णिनिप्रत्ययनिमित्ते धातुगणभेदे स च गणः णिन्यन्ततया पा० ग० सू० उक्तो यथा "ग्राही उत्साही उद्दासी उद्भासी स्थायी मन्त्री संमर्द्दी (रक्षश्रुवपशां नौ) निरक्षी निश्रावी निवापी निशायी (याचृव्याहृव्रजवदवसां प्रतिषिद्धानाम्) अयाची अव्याहारी असंव्याहारी अव्राजी अवादी अवासी (अचः अचित्तकर्तृकाणाम्) अकारी अहारी अविनायी विशायी विषायी (अभिभावी भूते) अपराधी उपरोधी परिभवी परिभावी इति ग्रहादिराकृतिगणः"

ग्रहाधार पु० ६त०। ध्रुवनक्षत्रे। तस्य तथात्वञ्च खगोलशब्दे पृ० २४१६।२० दर्शितम् ग्रहाश्रयादयोऽप्यत्र।

ग्रहाधिकरण न० ग्रहस्य पात्रविशेषस्यैकत्वाविवक्षाया ज्ञापकमधिकरणम्। न्यायरूपे पञ्चाङ्गे अधिकरणभेदे तच्च जै० ३अ० १पादे दर्शितं संक्षेपतस्तत उद्धृत्य तत्त्वबोधिन्यामुक्तं यथा

"सोमयागे श्रूयते "दशापवित्रेण ग्रहं संमार्ष्टीति" दशापवित्रं वासःखण्डं ग्रहः सोमरसादिहविःपात्रविशेषः तत्र एकस्यैव मार्ज्जनमुत एकत्वाविवक्षया सर्व्वेषामिति संशये "पशुना रुद्रं यजेत" इत्यत्रेव एकवचनादेकत्वविवक्षया एकस्यैव मार्ज्जनं न सर्व्वेषां तथा च सू० "एकत्वं युक्तमेकस्य श्रुतिसंयोगादिति, प्राप्ते ब्रूमः। ग्रहाणां यागोपकरणतया प्राप्तानामनेन मार्जनसंस्कारो विधीयते तत्र ग्रहमिति द्वितीयया एकस्योद्देश्यत्वं फलवत्त्वञ्च बोध्यते प्रधानं ग्रहं प्रति मार्ज्जनं गुणः "प्रतिप्रधानं गुण आवर्त्तनीयः" इति न्यायेन सर्व्वेषां मार्जनं प्राप्तम् उद्देश्यगतमेकत्वमविवक्षितं न च ग्रहत्वजातिर्मार्ज्जनेन संस्कार्य्या इति तदाश्रयैकमार्जनेन सर्वे संस्कृता भवन्ति, जातेः सर्ववृत्तित्वादित्येकत्वविवक्षायामपि सर्वमार्ज्जनसिद्धिरिति वाच्यं जातेरमूर्त्तत्वात् अपूर्वसाधनत्वाच्च तदाश्रितानां द्रव्याणामपूर्व्वसाधनतया संमार्गात् तदुक्तम् "उद्देश्यलक्षणं जातिर्यद्द्रव्यं लक्ष्यते तया। तस्याङ्गमेव संमार्गः सर्वस्येति विनिश्चयः"। नचैकत्वं नोद्देश्यगतम् अपि तु एकत्वं सम्मार्ज्जनञ्चोभयं विधेयमिति वाच्यं "ग्रहं संमृज्यात् सचैकः कार्य्य इति वाक्यभेदापत्तेः एकत्वस्य सर्वग्रहेषु सिद्धत्वेन विधानासम्भवात् स्वसमानाधिकरणकर्म्मतानिरूपकमार्ज्जनसजातीयकर्मतासमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकैकत्वरूपविशिष्टमेकत्वं विधेयं तथा सति सर्वमार्जनासिद्धिः अतएव एकत्वविशिष्टग्रहस्य मार्जनं विधीयते एकत्वं ग्रहत्वञ्च सर्वेषु वर्त्तत इति एकत्वविवक्षायामपि सर्वमार्जनसिद्धिरित्यपि परास्तं तादृशैकत्वस्याव्यावर्त्तकत्वात् विशिष्टैकत्वविवक्षायाञ्च उक्तदोषादिति साम्प्रदायिकाः। अत्रेदमवधेयम् एकत्वविवक्षायामपि सर्वमार्जनसिद्धिः तथाहि एकत्वविवक्षायां प्रत्येकमेव मार्जनं न तु मिलितानामेकं मार्जनं तथात्वे साहित्ये बहुवचनं निर्द्दिश्येत। तस्मादेकवचननिर्द्देशात् प्रतिप्रधानं गुणावृत्तिन्यायात् प्रत्येकं सर्वेषां मार्जनमिति। इत्थञ्च स्वसमानाधिकरणकर्मतानिरूपकमार्जननिरूपितकर्मतासमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकैकत्वरूपविशिष्टैकत्वमेव विवक्षितं स्यात्। अविवक्षितत्वसिद्धान्तस्तु एकस्यैव मार्जनं न सर्वेषामिति प्रापकस्य स्वसमानाधिकरणेत्यादिपूर्व्वपक्षोक्तस्य सामान्यतो मार्जनघटितैकत्वस्य विवक्षामादाय। न त्वेवं ग्रहं संमार्ष्टीति वाक्यात् कथं सर्वेषां मार्जनबोधः ग्रहत्वेनोपस्थितस्यैव ग्रहस्य मार्जनबोधनादिति वाच्यम् उद्देश्यविधेयभेदेन भिन्नानामेव वाक्यानां तन्त्रेणोच्चारणात् प्रतिप्रधानं गुणावृत्तिन्यायात् सर्वमार्जनसिद्धौ वाक्यभेदकल्पनागौरवस्याप्रामाणिकत्वात् अतएव भावार्थदीपिकायां रुक्मिणीस्वयंवरीयषड्वधारणव्याख्याने "न चैवं वाक्यभेदः अनूद्यविधेयभेदेन विभिन्नानामेव वाक्यानां सकृत्प्रयोगात् ग्रहं संमार्ष्टीतिवदिति दृष्टान्तीकृतं श्रीधरस्वामिचरणैः"।

ग्रहाधीश पु० ६त०। सूर्य्ये ग्रहाध्यक्षादयोऽप्यत्र।

ग्रहामय पु० ग्रहकृत आमयः। ग्रहावेशे स्कन्दग्रहाद्यावेशे राजनि०।

ग्रहावमर्द्दन पु० ग्रहौ चन्द्रसूर्य्यौ अवमृद्नाति अव+मृद–ल्यु। १राहौ। चन्द्रसूर्य्योरवमर्द्दनमिति तद्ध्यानविज्ञात्तस्य तथात्वम्। भावे ल्युट् ६त०। २ग्रहयोः परस्परयुद्धे च। "ग्रहावमर्द्दने चैव पुष्यस्नानं समाचरेत्" वृ० सं० ४८अ०।

ग्रहाशिन् पु० ग्रहं स्कन्दग्रहदोषमश्नाति नाशयति अश–णिनि। ग्रहनाशकवृक्षे शब्दर०।

ग्रहाह्वय पु० ग्रहं ग्रहदोषमाह्वयति नाशाय आकारयति आ+ह्वे–श। भूताङ्कुश वृक्षे राजनि०। तस्य ग्रहदोषनाशनेऽङ्कुशतुल्यत्वात्तथात्वम्।

ग्रहिल त्रि० ग्रहोऽस्त्यस्य काशा० इलच्। निर्बन्धयुक्ते। निर्बन्धश्च कोपादनुरागातिशयाच्च भवति तत्र "कोपमूलनिर्बन्धयुक्ते। "न निशाऽखिलयाऽपि वापिका प्रससाद ग्रहिलेव मानिनी" नैष०। अनुरागाधीननिर्बन्धयुक्ते "प्रसाधनग्रहिलैरस्माभिः रसादीनां व्यङ्ग्यत्वमुक्तम्" सा०द०।

गृहीतृ त्रि० ग्रह–तृच् इटोदीर्घः। १ग्रहणकर्त्तरि २ज्ञानग्राहिणि च। "विषयाणां ग्रहीतॄणि शनैः पञ्चेन्द्रियाणि च" मनुः। "ग्रहीता यदि नष्टः स्यात् कुटुम्बार्थे कृतो व्ययः" मनुः।

ग्रह्य पु० ग्रहः हविःपात्रभेदएव स्वार्थे यत्। हविःपात्ररूपे यज्ञिये पात्रभेदे। "आक्राकोऽसि शुक्रस्ते ग्रह्यो विचितस्त्वा" यजु० ४।२४। "ग्रहएव ग्रह्यः शुक्रपदमैन्द्रवायवादिग्रहाणामुपलक्षणम्" वेददी०।

ग्राभ पु० ग्रह—ण वेदे हस्य भः। ग्राहके। "आ तू न इन्द्र! क्षुमन्तं चित्रं ग्राभं संगृभाय" ऋ० ८।८१।१। "ग्राभं ग्राहकम्" भा०।

ग्राम पु० ग्रस—मन् आदन्तादेशः। "विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्ति हि। स तु ग्राम इति प्रोक्तः शूद्राणां वास एव वा इति" "तथा शूद्रजनप्रायाः सुसमृद्धकृषीवलाः। क्षेत्रोपयोगभूमध्ये वसतिर्ग्रामसंज्ञिका" इति चोक्तलक्षणे विप्रादीनां १वासस्थाने, "धनुः शतं परीणाहो ग्रामात् क्षेत्रान्तरं भवेत्" याज्ञ०। "ग्रामेष्वात्मविसृष्टेषु" रघुः। "त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्" हितोप०। "यथा कुटुम्बिनः सर्व्वेऽप्येकीभूता भवन्ति हि। तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते" इत्युक्ते २स्वरसंघभेदे, "षड्जग्रामो भवेदादौ मध्यमग्रामएव च। गान्धारग्राम इत्येतत् ग्रामत्रयमुदाहृतम्" "नन्द्यावर्त्तोऽथ जीमूतः सुभद्रो ग्रामकास्त्रयः। षड्जमध्यमगान्धारास्त्रयाणां जन्महेतवः" मल्लिनाथधृतवाक्यम् तेषाञ्च सप्तस्वरविशेषयोगात् एकविंशतिमूर्च्छनाहेतुत्वं यथोक्तं तत्रैव "क्रमात् स्वराणां सप्तानामारोहश्चावरोहणम्। सा मूर्च्छनोच्यते ग्रामस्था एताः सप्त सप्त च"। "ग्रामत्रयेऽपि प्रत्येकं सप्त सप्त मूर्च्छनाइत्येकविंशतिमूर्च्छना भवन्तीति" मल्लि०। अधिकं संगीतदामोदरे दृश्यम्। "स्फुटीभवद्ग्रामविशेषमूर्च्छनाम्" माघः। किञ्चिच्छब्दपूर्वकस्य ३तदर्थसंघाते च यथा शब्दग्रामः अर्थग्राम इत्यादि। "शब्दाकरकरग्रामः" कविकल्पद्रुमः। ४जनपदे च "यस्याश्वासः प्रदिशि यस्य गावो यस्य ग्रामा यस्य विश्वे रथासः" ऋ० २।१२।७। "ग्रसन्तोऽत्र ग्रामाजनपदाः" भा०। स्वार्थे क तेष्वर्थे "दीयन्तां ग्रामकाः केचित्" भा० उद्यो० १४६६ श्लो०। स्वल्पार्थे टी ततः स्वार्थे क ग्रामटिका स्वल्पग्रामे स्त्री "स्वर्ग ग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः" सा० द०। ५ग्रामवासि कर्षकादिजने ६ग्रामसदृशे संहते ग्रामसेदमथ्। ७तत्सम्बन्धिनि दयास्यधर्म्मे च।

ग्रामकाम त्रि० ग्रामं स्वकीयत्वेन कामयते कम—णिङ् अण् उप० स०। आत्मसम्बन्धितया ग्रामस्य कामुके। "यवाग्वा ग्रामकामः" कात्या० श्रौ० ४।१५।२२। "उपहव्यो ग्रामकामस्य" २२।८।७। "दीर्घव्याधिग्रामकामप्रजाकामपशुकामानां वा" २२।६।१७।

ग्रामकुक्कुट पुंस्त्री ७त०। ग्राम्ये कुक्कुटभेदे "कलविङ्कं प्लवं हंसं चक्राङ्गं ग्रामकुक्कुटम्" "छत्राकं विड्वराहं च लसुनं ग्रामकुक्कुटम्। पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेत् द्विजः" इति मनुना तन्मांसभक्षणं निषिद्धम् स्त्रियां जातित्वात् ङीष्।

ग्रामकुमार त्रि० ग्रामेषु मध्ये कुमारः सुन्दरः। ग्रामसुन्दरे। तस्य भावः मनोज्ञा० वुञ्। ग्रामकुमारक तद्भावे न०।

ग्रामकुलाल पु० ग्रामे कुलालः। ग्राम्ये कुलाले कुम्भकारे "ग्रामः शिल्पिनि" पा० अस्य वा प्रकृतिस्वरता ग्रामशब्दस्य आद्युदात्तः। एवं ग्रामनापितादिषु वा आद्युदात्तता। ततः मनोज्ञा० भावे वुञ्। ग्रामकुलालक तद्भावे न०

ग्रामकूट पुंस्त्री ग्रामस्य कूट इव वञ्चनाप्रधानत्वात्। शूद्रे [हारा०। स्त्रियां जातित्वात् ङीष्।

ग्रामक्रोड पुंस्त्री ग्रामे क्रोडः। ग्राम्यशूकरे स्त्रियां जातित्वात् ङीष्। "स दोग्ध्रीं धेनुमुत्सृज्य ग्रामक्रोडीं दुधुक्षति" काशीख० २६ अ०। ग्रामशूकरादयोऽप्यत्र पुंस्त्री०।

ग्रामगृह्य त्रि० ग्रह—बाह्यार्थे क्यप् ५त०। १ग्रामबाह्ये स्त्रियां टाप् सा च २ग्रामबाह्यसेनायाम्।

ग्रामगेय न० ग्रामे गेयम्। सामभेदे तस्य ग्रामे गेयत्वात् [तथात्वम्।

ग्रामगोदुह् पु० ७त०। ग्राम्ये गोपे "ग्रामः शिल्पिनि" पा० वा अस्य प्रकृतिस्वरत्व प्राप्ते युक्तारोह्या० आद्युदात्तता।

ग्रामघात पु० ६त०। ग्रामस्य द्रव्यहरणेन हननप्राये व्यापारे। "ग्रामघाते हिताभङ्गे पथि मोषाभिदर्शने। शक्तितोनाभिधावन्तो निर्वास्याः सपरिच्छदाः" मनुः। "ग्रामघाते ग्रामलुण्ठने" कुल्लू०। २ग्रामस्थितजनहनने च। "मृगोऽसकृद्ग्रामघातमाचष्टे" वृ० सं० ३०अ०। "एकस्थाने रुवन्दीप्तः सप्ताहाद् ग्रामघातकृत्" ८६अ०।

ग्रामघातिन् पुंस्त्री ग्रामार्थं तत्रस्थलोकभक्षणार्थं हन्ति पशून् हन—णिनि। ग्रामस्थबहुलोकपोषणार्थं पशुघातके। "ग्रामघाती च कौन्तेय! मांसस्य परिविक्रयी" भा० शा० ३४ अ० प्रायश्चित्तीयोपाख्याने।

ग्रामघोषिन् पु० ग्रामे लपको घोषोऽस्त्यस्य इनि। संक्रन्दने

इन्द्रे। "संक्रन्दनः प्रवदो धृष्णुषेणः प्रवेदकृद्बहुधा ग्रामघोषी" अथ० ५।२०।९। इष्ठार्थं इषकेण शब्दमानत्वात्तस्य तथात्वम्।

ग्रामचर्य्या स्त्री ६त०। ग्राम्यधर्म्मे स्त्रीसम्भोगे "सर्व्वथो वर्जयेद्ग्रामचर्य्याम्" आश्व०श्रौ० १२।८।३। सतिधर्म्मोक्तौ "ग्रामचर्य्या स्त्रीसम्भोगः" नारा०वृ०।

ग्रामज त्रि० ग्रामे जायते जन–ड। ग्राम्ये धान्यादौ।

ग्रामजनिष्पावी स्त्री कर्म्म०। नखनिष्पाव्यां धान्यभेदे राजनि०।

ग्रामजात त्रि० ग्रामे जायते जन–कर्त्तरि क्त। ग्राम्ये धान्यादौ "न ग्रामजातान्यार्त्तोऽपि मूलानि च फलानि च" मनुः वानप्रस्थधर्म्मोक्तौ। "ग्रामजातानि अफालकृष्टभागे जातान्यपि फलादीनि न भक्षयेत्" कुल्लू०।

ग्रामजाल न०। ग्रामसमूहे चक्रशब्दार्थे त्रिका०।

ग्रामजित् त्रि० ग्रामं संहतं जयति विश्लेषणेन, जि–क्विप्। संघातकस्य वस्तुनः विश्लेषयितरि। "नियुत्वन्तो ग्रामजितो यथा नरः" ऋ० ५।५४।८।

ग्रामणी त्रि० ग्रामं समूहं नयति प्रेरयति स्वस्वकार्य्येषु नी–क्विप् णत्वम्। १प्रधाने २ग्रामाध्यक्षे ३नापिते पु० मेदि०। "ग्रामणीभ्योऽन्नं सुरां सुरापेभ्यः" कौषीत० ब्रा०। ग्रामं ग्रामधर्म्मं नयति। ४भोगिके हेम० ग्रामेण मैथुनव्यापारेण नयति कालम्। बहुजनभोग्यायां स्त्रियां ५वेश्यायां ६नीलिकायां च स्त्री हेमच०। ७विष्णौ पु० "अग्रणीर्ग्रामणीः श्रीमान्" विष्णुस०। "भूतग्रामस्य नेतृत्वात् ग्रामणीः" भा०। ग्रामण्यः इदम् तक्ष्णादि० अण्। ग्रामण तत्सम्बन्धिनि त्रि०। ग्रामणीरिवाचरति क्यच् ग्रामणीयते। ततः कर्त्तरि अच् ग्रामणीय तत्तुल्ये त्रि० "सिन्धुकूलाश्रिताये च ग्रामणीयमहारथाः" भा० स० ३१अ०।

ग्रामणीथ्य न० ग्रामण्यः भावः त्व वेदे पृषो०। आधिपत्ये। "एषोऽलं श्रियै धारणाय राज्यस्य वा ग्रामणीथ्याय" शत० ब्रा० ८।६।२।१। [तक्षितरि।

ग्रामतक्ष पु० ६त० टच् समा०। बहूनां साधारणे काष्ठ

ग्रामता स्त्री ग्रामाणां समूहः तल्। ग्रामसमूहे "तस्माद्वेदं प्राच्यो ग्रामता बहुविष्टालाः" ऐत० ३।४४।

ग्रामधर्म्म पु० ग्रामे भवः अण् ग्रामो धर्म्मः। ग्राम्यधर्म्मे मैथुने शब्दार्थचि० तस्य स्त्रीपुंधर्म्मत्वात्तथात्वम्।

ग्रामपाल पु० ग्रामं पालयति पालि–अण् उप० स०। ग्रामरक्षके १सैन्यभेदे २ग्रामाध्यक्षे च।

ग्रामपुत्र पु० ग्रामस्य ग्रामस्थबहुजनस्य पुत्र इव पाल्यत्वात्। बहूनां पाल्यतया पुत्रतुल्ये। ततो मनोज्ञा० भावे वुञ्। ग्रामपुत्रक तद्भावे न०।

ग्रामप्रेष्य पु० ६त०। बहूनां प्रेष्ये। ततः मनोज्ञा० भावे वुञ्। ग्रामप्रेष्यक तद्भावे न० ग्रामप्रेष्यस्य श्राद्धेऽपात्रतोक्ता यथा "वृषलीपतिः पिशुनो नर्त्तनस्य ग्रामप्रेष्यो यस्य भवेत् त्रिकर्म्मा" भा०या०६५अ०। "प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः" मनुः।

ग्रामभृत पु० ग्रामेण तत्रस्थसमूहेन भृतः प्रेष्यः। बहुजनभरणीये। स च अब्राह्मणः यथाह शाता० "अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववादिना। आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी। तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः। पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च। अनागतां तु यः पूर्वां सादित्यां चैव पश्चिमाम्। नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः"।

ग्राममद्गुरिका स्त्री ग्रामस्य प्रिया मद्गुरिका। ग्रामस्य मद्गुरिकेव वा (सिङ्गी) १मत्स्यभेदे २ग्रामयुद्धे च मेदि०।

ग्राममुख पु० ग्रामो ग्रामस्थजनो मुखमिवास्य। हट्टे त्रिका० तस्य ग्रामजननिष्पाद्यत्वात्तन्मुखत्वम्।

ग्राममृग पु० ६त०। कुक्कुरे हारा०। कुक्कुरस्य ग्रामे मृगतुल्यत्वात्तथात्वम् स्त्रियां जातित्वात् ङीष्।

ग्रामयाजक पु० ६त०। ग्रामस्य नानावर्णानां याजके अपकृष्टविप्रे। ग्रामभृतशब्दे दृश्यम्। "गुरौ चानृतके पापे कृतघ्ने ग्रामयाजके" भा० व० १९९अ०। अपालोक्तौ।

ग्रामयाजिन् पु० ग्रामान् ग्रामस्थनानावर्णान् याजयति यज–णिच्–णिनि। ग्रामयाजके। "नाश्रोत्रियतते यज्ञे ग्रामयाजिहुते तथा" मनुः अभोज्यान्नोक्तौ।

ग्राम(मे)वास पु० ७त० वा अलुक्स०। ग्रामे स्थितौ

ग्राम(मे)वासिन् त्रि० ग्रामे वसति वस–णिनि वा अलुक्स०। ग्रामे स्थायिनि स्त्रियां ङीप्।

ग्रामषण्ड पु० ग्रामे ग्रामधर्मे षण्डः। ग्राम्यधर्मरहिते क्लीबे। ततः मनोज्ञा० भावे वुञ्। ग्रामषण्डक तद्भावे न०।

ग्रामस्थ त्रि० ग्रामे तिष्ठति स्था–क। ग्रामवासिनि

ग्रामहासक पु० ग्रामं हासयति हस–णिच्–ण्वुल्। भगिनीपतौ शब्दच०।

ग्रामाधान न० ग्रामस्य ग्रासपोषणार्थमाधीयते आ+धा–ल्युट्। मृगयायाम् हलायुधः।

ग्रामान्त न० ६त० । ग्रामसमीपे उपशल्ये "नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा" "कृतवापनो निवसेत् ग्रामान्ते गोव्रजेऽपि वा" मनुः । ग्रामान्ते भवः वृद्धत्वाच्छः । ग्रामान्तीय ग्रामसमीपभवे त्रि० "पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथ वा पुनः" मनुः ।

ग्रामिक पु० ग्रामे तद्रक्षणे नियुक्तः ठञ् । ग्रामरक्षणाय नियुक्ते ग्रामाध्यक्षे "ग्रामे दोषान् समुत्पन्नान् ग्रामिकः शनकैः स्वयम् । शंसेत् ग्रामदशेशाय दशेशो विंशतीशिने" मनुः । "यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः । अन्नपानेन्धनादीनि ग्रामिकस्तान्यवाप्नुयात्" मनुना तद्वृत्तिरुक्ता । "ग्रामेयान् गुणदोषांश्च ग्रामिकः प्रतिभावयेत्" "यानि ग्राम्याणि भोज्यानि ग्रामिकस्तान्युपाश्नीयात्" भा०शा० ८७अ० । तस्य भावः पुरोहि० यक् । ग्रामिक्य तद्भावे न० ।

ग्रामिन् त्रि० ग्रामः स्वामित्वेन आधारत्वेन वाऽस्त्यस्य इनि । १ग्रामस्वामिनि २ग्रामवासिनि च । ३ग्राम्यधर्मयुक्ते मैथुनयुक्ते च । "आसुरी मेढ्मर्वाग्द्वार्व्यवाये ग्रामिणां रतिः" भाग० ४।२९।१४। स्त्रियां ङीप् । सा च ४नीलीवृक्षे स्त्री जटा० ।

ग्रामीण पुंस्त्री ग्रामे भवः खञ् । १कुक्कुरे, २काके, मेदि० ३ग्राम्यशूकरे च राजनि० । ४ग्रामोद्भवे त्रि० । "ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम्" भाषा० । "ग्रामीणवध्वस्तमलक्षिता जनैः" माघः । ५नीलिकौषधौ, मेदि० ६पालङ्क्यशाके च स्त्री राजनि० ।

ग्रामेय त्रि० ग्रामे भवः ना०ढक् । १ग्रामभवे "ग्रामेयान् गुणदोषांश्च" मनुः । २वेश्यायां स्त्री

ग्रामेयक त्रि० ग्रामे भवः कत्र्या० ढकञ् । ग्रामभवे । "ग्रामेयककुलानाञ्च समक्षं सीम्नि साक्षिणः" मनुः । अत्र ग्रामयिकेति पाठः लिपिकरप्रमादात् ।

ग्रामेश पु० ६त० । ग्रामपतौ ग्रामाध्यक्षे ग्रामेश्वरादयोऽप्यत्र ।

ग्राम्य त्रि० ग्राम–भवार्थे–वा यत् । १ग्रामभवे कृषकादौ "अल्पव्ययेन सुन्दरि! ग्राम्यजनो मिष्टमश्नाति" उ०र० । २मूढे ३प्राकृते । ४मैथुने च "व्यवायो ग्राम्यधर्मश्च" अमरः । प्राकृते "ग्राम्यानपश्यत् कपिशं पिपासतः" माघः । मूढे "ग्राम्यभावमपहातुमिच्छवः" माघः । ५स्त्रीकारे ६रतबन्धे ७भण्डादिवचने अश्लीले हालिकादिप्रसिद्धवाक्ये च न० शब्दार्थचि० । ८काव्यदोषभेदे पु० । स च शब्दगतोऽर्थगतश्च तत्र शब्दगतः सा० द० । शब्ददोषविभागे "दुःश्रव्यत्रिविधाश्लीलानुचितार्थाप्रयुक्ताः । ग्राम्योऽप्रतीतसन्दिग्धनेयार्थनिहतार्थताः" इत्यादिना शब्ददोषान् विभज्य "कटिस्ते हरते मनः" इत्युदाहृतम् "अपुष्टदुष्क्रमग्राम्यव्याहताश्लीलकष्टताः" इत्यादिनाऽर्थदोषान् विभज्य च "स्वपिहि त्वं समीपे मे स्वपिम्येवाधुना प्रिय !" इत्यर्थस्य ग्राम्यत्वमुदाहृतम् । "ग्राम्या मिथुनतुलास्त्रीचापाश्विघटा निशासु मेषवृषौ च" ज्यो०उक्तेषु ९सदामिथुनादिराशिषु १०राशौ मेषवृषराश्योश्च पु० । ११पशुभेदे पुंस्त्री० । यथाह पैठीनसिः "ग्राम्यारण्याश्चतुर्दश गौरविरजोऽश्वोऽश्वतरो गर्द्दभो मनुष्यश्चेति सप्त ग्राम्याः पशवः, महिषवानरऋक्षसरीसृपरुरुपृषतमृगाश्चेति सप्तारण्याः" । "अश्वाश्वतरगोखरोष्ट्रबस्तोरभ्रमेदःपुच्छकप्रभृतयो ग्राम्याः" इति सुश्रुतोक्ते १२पशुभेदे पुंस्त्री० "ग्राम्या वातहराः सर्वे वृंहणाः कफपित्तलाः । मधुरा रसपाकाभ्यां दीपना बलवर्द्धनाः" सुश्रु० । १३ओषधिभेदे स्त्री । "तिलमाषव्रीहियवाः प्रियङ्गवो गोधूमाश्चेति सप्त ग्राम्या ओषधयः" तैत्ति० । ओषधि शब्दे १५६४ पृ० दृश्यम् ।

ग्राम्यकन्द पु० कर्म० । कन्दभेदे (ग्रामेर ओल) रत्नमा० ।

ग्राम्यकर्कटी स्त्री कर्म० । कुष्माण्डे त्रिका० ।

ग्राम्यकर्मन् न० ग्राम्यस्य प्राकृतस्य हालिकादेः कर्म । मैथुने व्यवाये । "ग्राम्यकर्म्मणैव विसृतकालावधिः" भाग० ५।१४।२।

ग्राम्यकुङ्कुम न० कर्म० । कुसुम्भे त्रिका० ।

ग्राम्यधर्म पु० ग्राम्यस्य प्राकृतस्य हालिकादेः धर्मः । व्यवाये मैथुने अमरः । "प्रमत्तो ग्राम्यधर्मेषु" भा०व० ४८ अ० । "प्रमत्तं ग्राम्यधर्मेषु" २८० अ० । स अस्त्यस्य इनि ग्राम्यधर्म्मिन् मैथुनरते त्रि० । "शूद्रादायोगवस्यापि वैश्यायां ग्राम्यधर्मिणः" भा०आनु०४८अ० । [दर्शिताः ।

ग्राम्यपशु पु० कर्म० । पशुभेदेषु ते च पशवः ग्राम्यशब्दे

ग्राम्यमद्गुरिका स्त्री कर्म० । मद्गुरीमत्स्ये हारा० ।

ग्राम्यमृग पुंस्त्री कुक्कुरे जटा० स्त्रियां ङीष् ।

ग्राम्यवल्लभा स्त्री ६त० । १पालङ्क्यशाके (पालङ्) राजनि० हालिकादिग्राम्यप्रियत्वात्तस्य तथात्वम् । २वेश्यायाञ्च

ग्राम्यवादिन् त्रि० ग्राम्यं वदति णिनि । ग्राम्यशब्दवादके हालिकादौ । "यः परस्तात् ग्राम्यवादी तस्य गृहाद्व्रीहीनाहरेत्" तैत्ति० ०।१।१।१।

ग्राम्यशूकर पुंस्त्री कर्म्म०। विड्वराहे स्त्रियां ङीष्।

ग्राम्या स्त्री ग्रामे भवा यत्। १तुलस्यां शब्दार्थचि० २नीलीवृक्षे ३निष्पावीवृक्षे च राजनि०।

ग्राम्यायणि पुंस्त्री० ग्राम्यस्यापत्यम् तिका० फिञ्। ग्राम्यस्य प्राकृतादेरपत्ये। स्त्रियां इदन्तत्वात् वा ङीप्।

ग्राम्याश्व पु० कर्म०। गर्दभे त्रिका०। स्त्रियां जातित्वेऽपि अजा० टाप्।

ग्रावग्राभ पु० ग्रावाणमभिषवसाधनपाषाणं स्तुत्या गृह्णाति ग्रह–अण् हस्य भः उप० स०। ग्रावस्तुति ऋत्विग्भेदे। "अग्निमिन्धो ग्रावग्राभ उत शस्ता सुविप्रः" ऋ० १।१६२।५। "ग्रावग्राभः ग्राव्णः स्तुत्या गृह्णातीति ग्रावस्तुत्" भा०।

ग्रावन् पु० ग्रसते ग्रस–ड ग्रः आवनति वन–संभक्तौ विच् कर्म०। १प्रस्तरे, २पर्व्वते, अमरः ३मेघे विश्वः। ४दृढ़े त्रि० शब्दर०। "श्रोता ग्राव्णोऽविदुषो न यज्ञम्" यजु० ६।२६। "मूर्द्ध्नि ग्राव्णां जर्ज्जरा निर्झरौघाः" माघः। "ग्राव्णस्तु संमुखेष्वधिनिदधाति क्षत्रं वै सोमो विशो ग्रावाणः" शत० ब्रा० ३।८।३।२।

ग्रावरोहक पु० ग्रावणि रोहति रुह–ण्वुल् ७त०। अश्मगन्धाख्ये रत्नमा०।

ग्रावस्तुत् पु० ग्रावाणं स्तौति स्तु–क्विप् ६त०। होतुः सहाय ऋत्विग्भेदे अच्छावाकशब्दे ८८ पृ० विवृतिः। टच्। ग्रावस्तोताप्यत्र। तस्येदम् घ ग्रावस्तोत्रिय अण् ग्रावस्तोत्र तत्सम्बन्धिनि त्रि० ग्रावस्तोत्राय हितम् छ। ग्रावस्तोत्रीय तस्मै हिते त्रि० "प्रस्तोता ब्राह्मणाच्छंसि ग्रावस्तोत्रीयः" कात्या० श्रौ० २४।५।४५।

ग्रावहस्त पु० ग्रावा अभिषवसाधनं पाषाणो हस्तेऽस्य। अभिषवसाधनपाषाणयुक्तहस्ते ग्रावस्तुति ऋत्विग्भेदे। "ग्रावहस्तासो अध्वरे" ऋ० १।१५।७।

ग्रावायण पु० प्रवरभेदे हेमा० व्र० ख० प्रवराध्याये दृश्यम्।

ग्रास पु० ग्रस्यते ग्रस–कर्म्मणि घञ्। मुखपूरणयोग्यान्नादौ तन्मानञ्च "कुक्कुटाण्डप्रमाणस्य यावान् वा प्रविशेन्मुखम्। एतं ग्रासं विजानीयात् शुद्ध्यर्थं कायशोधनम्" पराशरः। "यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित्। तावतो ग्रसते प्रेत्य दीप्तशूलर्ष्ट्ययोगुडान्" "ग्रामादाहृत्य चाश्नीयादष्टौ ग्रासान् वने वसन्" "एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्व्ववत्" इति च मनुः। "सायं द्वात्रिंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः। अयाचिते चतुर्विंशः परञ्चानशनं स्मृतम्" पराशरः। प्रायश्चित्ते ग्रासभोजनस्य परिसङ्ख्यारूपत्वमुक्तं प्रा० त० "भोजनस्य रागप्राप्तत्वात् नाप्राप्तप्रापको विधिः। नापि सचाहरहः सन्ध्यामुपासीत इत्येवं रूपः। नापि तद्भक्षणस्यानावश्यकत्वेन स्वायोगव्यवच्छेदमात्रफलको नियमविधिः। स च तत्तिथौ तत्तद्ग्रासान् भुञ्जीतेत्येवं रूपः। तथा च "स्वरुच्या क्रियमाणे च यत्रावश्य क्रिया क्वचित्। चोद्यते नियमः सोऽत्र ऋतावभिगमो यथा"। तथात्वे च पितृमरणादावपि भोजनं प्रसज्येत हविष्यान्नभोजनव्रतादावपि उपवासाभाव एव सम्पद्येत तद्भक्षणसमकालेनान्यभक्षणेऽपि न दोषः स्यात्। तस्मादगत्या "श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात्। प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदोषिका" इत्युक्तस्वार्थहान्यर्थान्तरकल्पनरागप्राप्तबाधरूपदोषत्रयदुष्टापि अन्ययोगव्यवच्छेदफलिका परिसंख्यैव युक्ता, सा च रुति भोजने तत्तत्तिथौ तत्तद्ग्रासानेव भुञ्जीत नान्यदित्येवं रूपा तस्मात्तदतिरिक्तभोजनाभावपरत्वेन उपवासेऽपि दोषाभावः। तदुक्तं भट्टपादैः "अन्यार्थश्रूयमाणा च यान्यार्थप्रतिषेधिका। परिसंख्या तु सा ज्ञेया यथा प्रोक्षितभोजनम्"। अन्यथा प्राजापत्यव्रतेऽपि "त्र्यहमद्यादयाचितमिति" "अयाचितन्तु मध्याह्ने चतुर्विंशन्तु शुद्धये" इति ब्रह्मपुराणोक्तस्यायाचितस्यालाभे व्रतलोपापत्तिः स्यात्"॥ १ग्रहणे छाद्यच्छादकयोः २स्पर्शे। "छादको भास्करस्येन्दुरधःस्थो घनवद् भवेत्। भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ" इत्युपक्रम्य "यद्ग्राह्यमधिके तस्मिन् सकलं न्यूनमन्यथा। योगार्द्धादधिके न स्याद्विक्षेपे ग्राससम्भवः" इति। "स्फुटतिथ्यवसाने तु मध्यग्रहणमादिशेत्। स्थित्यर्द्धनाडिकाहीने ग्रासो मोक्षस्तु संयुते" सू० सि०। "स्पष्टतिथ्यन्तकाले तुकारात् तत्पूर्व्वापरकालनिरासः। मध्यग्रहणं ग्रासोपचयसमाप्तिं कथयेत्। मध्यग्रहणसम्बन्धेन मध्यसूर्य्यचन्द्रानीतमध्यतिथ्यन्ते तत्सम्भव इति कस्यचिद्भ्रमस्तद्वारणार्थम् स्फुटेति। स्थित्यर्द्धघटिकाभिर्हीने तिथ्यन्ते ग्रासः स्पर्शः। संयुते स्थित्यर्द्धघटीभिर्युते तिथ्यन्ते काले मोक्षः। तुकारः स्पर्शमोक्षस्थित्यर्द्धाभ्यां स्पर्शमोक्षकालाविति विपर्ययव्यस्यार्थकः। अत्रोपपत्तिः। तिथ्यन्तकाले छाद्यच्छादकयोः पूर्व्वापरान्तराभावाद्योगे मण्डलस्पर्शो यावान् अनवि

ततः पूर्व्वाग्रिमकालयोर्न्यून एवातोऽत्र मध्यग्रहणकालः" रघुना०।

ग्रासशल्य न० ग्रासे शल्यम्। ग्रासस्थिते मत्स्यादिकण्टकरूपे शल्ये तदुद्धारोपायः सुश्रुते दर्शितोयथा "ग्रासशल्ये तु कण्ठासक्ते निःशङ्कमनवबुद्धस्कन्धे मुष्टिनाभिहन्यात् स्नेहं मद्यं पानीयं वा पाययेत्"।

ग्राह पु० ग्रह—जलचरे ण। (हाँगोर) ख्याते जलचरभेदे अमरः "सन्निमज्जज्जगदिदं गम्भीरे कालसागरे। जरामृत्युमहाग्राहे न कश्चिदवबुध्यते" भा० शा० २८ अ०। "जग्राहाजगरो ग्राहो भुजयोरुभयोर्बलात्" भा० व० १७८अ०। "कृच्छ्राद् ग्राहाद्विमुच्यते" मनुः। भावे घञ्। २स्थाने ३आग्रहे निर्बन्धे च। "मूढग्राहेणात्मनो यत् पीडया क्रियते तपः" गीता। "मूढग्राहेण अविवेककृतेन दुराग्रहेण" श्रीधरः। ४आदाने हस्तव्यापारे ५स्वीकारे जलचरभिन्नेऽपि कर्त्तरि वेदे ण। ६गृहीतरि त्रि० "अध्वर्युं यजमानं वा ग्राहो विन्दति" शत०ब्रा० ३।५।३।२५। कस्मिंश्चित् कर्मणि उपपदे अण्। तत्तत्कर्म ग्राहके "पार्ष्णिग्राहस्तु पृष्ठतः" अमरः। "रिक्थग्राह ऋणं दाप्यः" याज्ञ०।

ग्राहक पु० ग्रह—ण्वुल्। १श्येनपक्षिणि २विषवैद्ये च। ३गृहीतरि त्रि०। ग्रह—णिच्—ण्वुल्। ४ज्ञापके लिङ्गेन्द्रियादौ "ग्राहकैर्दृश्यते चौरो लोप्त्रेणाथ पदेन वा" याज्ञ०। "यथास्वं ग्राहकाण्येषां शब्दादीनामिमानि तु। इन्द्रियाणि सदा देही धारयन्निव तप्यते" भा० वन० २१०अ०। ५सितावरशाके राजनि०।

ग्राहिन् पु० ग्रह—णिनि। १कपित्थे शब्दच०। २मलबन्धकारके, (धारक) त्रि० वैद्यकम्। "कषायानुरसं ग्राहि स्निग्धं मेधाबलावहम्" भावप्र० दाडिमफलगुणोक्तौ। ३ग्राहके "व्यालग्राही यथा व्यालान् बलादुद्धरते बिलात्" काशीख०। "पल्लवग्राहि पाण्डित्यम्" उद्भटः। स्त्रियां ङीप्। सा च ४प्रतिकूलायाम्। "मा स्म भूर्ग्राहिणी भीरु!" "भक्तिः ग्राहिणी प्रतिकूला" जयम०। ५क्षुद्रदुरालभायां स्त्री राजनि०। ६मास्त्रमूलावृक्षे (चोरक) रत्नमाला तयोर्मलबन्धकारित्वात्तथात्वम्। [राजनि०।

ग्राहिफल पु० ग्राहि मलबन्धकं फलं यस्य। कपित्थवृक्षे।

ग्राहुक त्रि० ग्रह—बा० उकञ्। ग्रहणशीले "उदावर्त्तः प्रजा ग्राहुकः स्यात्" तैत्ति० ६।४।१।१।

ग्राह्य त्रि० ग्रह—ण्यत्। १गृहीतुमुचिते, २ग्रहणयोग्ये, ३उपादेये, ४स्वीकार्य्ये, ५ज्ञेये च। "शस्त्रं द्विजातिभिर्ग्राह्यं धर्म्मो यत्रोपरुध्यते" मनुः। "अस्मिंस्तु किन्न संमर्द्दे ग्राह्यम् विविधमायुधम्" भा०द्रो०११२ अ०। "अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्म्मणः" स्मृतिः "विषादप्यमृतं ग्राह्यम्" मनुः। "चक्षुर्ग्राह्यं भवेद्रूपम्" भाषा०। ६प्रतिबध्यज्ञाने प्रकारीभूतधर्म्मे यथा ह्रदो वह्न्यभाववानिति ज्ञानस्य प्रतिबध्यं ह्रदो वह्निमानिति ज्ञानं तत्र प्रकारीभूतो वह्निः।

ग्रीवा स्त्री गिरत्यनया गॄ—वनिप् नि०। कन्धरायाम् "ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः" शकु०। तन्मानादिकमुक्तं सुश्रुते यथा "चतुरङ्गुलानि मेहनवदनान्तरनासाकर्णललाटग्रीवोच्छ्रायदृष्ट्यन्तराणि। द्वादशाङ्गुलानि भगविस्तारमेहननाभिहृदयग्रीवास्तनान्तरमुखायाममणिबन्धप्रकोष्ठस्थौल्यानि। चतुर्विंशतिविस्तारपरिणाहं सुबद्धग्रीवम्" सुश्रु०। "ग्रीवाग्रसंसक्तयुगैस्तुरङ्गैः" माघः। "पादयोर्द्दाढिकायाञ्च ग्रीवायां वृषणेषु च" मनुः। "प्राग्ग्रीवमुत्तरलोम" आश्व०गृ० १।१४।२। "इदमहं रक्षसां ग्रीवा अपि कृन्तामि" यजु० ५।२२। दशग्रीवः कम्बुग्रीवः इत्यादि। [तद्गोत्रापत्ये पुंस्त्री स्त्रियां ङीप्।

ग्रीवाक्ष पु० ऋषिभेदे तस्य गोत्रापत्यं शिवा० अण्। ग्रैवाक्ष

ग्रीवाघण्टा स्त्री ७त०। ग्रीवास्थितघण्टायां त्रिका०।

ग्रीवाबिल न० ६त०। ग्रीवान्तर्गते गर्त्तभेदे त्रिका०।

ग्रीविन् पुंस्त्री० दीर्घा ग्रीवाऽस्त्यस्य बा० इनि टिलोपः। १उष्ट्रे जटाधरः स्त्रियां ङीप्। २दीर्घग्रीवायुक्ते त्रि०।

ग्रीष्म पु० ग्रसते रसान् ग्रस—मनिन्। ज्यैष्ठाषाढ़मासद्वयात्मके १ऋतुभेदे। "ग्रीष्मे तीव्रकरो भानुर्हेमन्ते तथाविधः" सूर्य्यसि०। "विहर्त्तुमिच्छोर्वनितासखस्य तस्याम्भसि ग्रीष्मसुखे बभूव" रघुः। "अनेन विधिना श्राद्धं त्रिरब्दस्येह निर्व्वपेत्। हेमन्तग्रीष्मवर्षासु पाञ्चयज्ञिकमन्वहम्" "ग्रीष्मे पञ्चतपास्तु स्यात् वर्षास्वभ्रावकाशिकः" मनुः। स्वार्थे अण्। ग्रैष्म तत्रार्थे तस्येदमण्। तत्सम्बन्धिनि त्रि० "शुक्रश्च शुचिश्च ग्रैष्मावृतू" यजु०१।६। "ग्रैष्मौ ग्रीष्मसम्बन्धिनौ ऋतू ऋत्ववयवौ" वेददी०। ऋतोश्च यथा चान्द्रमासात्मकता तथर्त्तुशब्दे १४३७ पृ० दर्शिता। सौरत्वं तु ज्योतिर्गणनामात्रोपयोगित्वेन ज्योतिषे व्यवह्रियते तदपि तत्रैव शब्दे दर्शितम्। सुश्रुतोक्तग्रीष्मगुणादिकम् ऋतुशब्दे दर्शितम्।

ग्रीष्मे सूर्यकिरणस्य तीव्रत्वे कारणम् सू०सि०उक्तं यथा "मेषादौ देवभागस्थे देवानां याति दर्शनम्। असुराणां तुलादौ तु सूर्यस्तद्भागसञ्चरः" सू०।

"जम्बुद्वीपलवणसमुद्रसन्धौ परिधिवृत्तं भूगोलमध्ये तत्र मण्डले चाकाशे वृत्तं विषुवद्वृत्तं तत्र क्रान्तिवृत्तं षड्भान्तरेण स्थानद्वये लग्नं तन्मेषतुलास्थानं प्रवहवायुना विषुवद्वृत्तमार्गे भ्रमति मेषस्थानात् कर्कादिस्थानं विषुवद्वृत्ताच्चतुर्विंशत्यंशान्तर उत्तरतः, मकरादिस्थानं विषुवद्वृत्ताच्चतुर्विंशत्यंशान्तरे दक्षिणतः, तत् स्वस्थाने प्रवहवायुना भ्रमति। एवं क्रान्तिवृत्तप्रदेशाः स्वस्वस्थाने प्रवहवायुना भ्रमन्ति। तत्र मेषादौ देवभागस्थः "जम्बुद्वीपं च देवानां देवासुरविभागकृदिति" पूर्वोक्तेः। तत्सम्बद्धा मेषादिकन्यान्ता राशय उत्तरगोलः। तत्रस्थः सूर्यो मेषादौ मेषादिप्रदेशे देवानां मेरोरुत्तराग्रवर्त्तिनां दर्शनं षण्मासामन्तरं प्रथमदर्शनं याति गच्छति प्राप्नोतीत्यर्थः विषुवद्वृत्तस्य तत्क्षितिजत्वात्। एवं दैत्यानां मेरोर्दक्षिणाग्रवर्त्तिनामसुराणामित्युक्तेनैवोक्तम्। तद्भागसञ्चरो दैत्यभागे समुद्रादिदक्षिणविभागस्थस्तुलादिमीनान्ता राशयो दक्षिणगोलस्तत्र सञ्चरो गमनं यस्येत्थं तादृशः सूर्यस्तुलादिप्रदेशे तुकराददर्शनानन्तरं प्रथमदर्शनं प्राप्नोतीत्यर्थः तेषामपि विषुवद्वृत्तस्य क्षितिजत्वात्। अथ प्रसङ्गाद्ग्रीष्मे तीव्रकरः इत्याद्युक्तप्रश्नस्योत्तरमाह" रङ्गना०।

"अत्यासन्नतया तेन ग्रीष्मे तीव्रकरा रवेः। देवभागेऽसुराणां तु हेमन्ते मन्दताऽन्यथा" सू० सि०।

"तेन—उत्तरदक्षिणगोलयोः सूर्यस्योत्तरदक्षिणसञ्चाररूपकारणेनेत्यर्थः। देवभागे जम्बुद्वीपे अत्यासन्नतया सूर्यस्यात्यन्तनिकटस्थत्वेन ग्रीष्मे ग्रीष्मर्त्तौ सूर्यस्य तेजोगोलकस्य किरणास्तीक्ष्णा अत्युष्णाः, असुराणां देवभाग इत्यस्यामन्नतया भाग इत्यस्य सम्बन्धाद्दैत्यानां भागे समुद्रादिदक्षिणप्रदेशे हेमन्ते हेमन्तर्त्तौ तुकारात् अन्यथा सूर्यस्य दूरस्थत्वेन मन्दता किरणानामत्युष्णताभावः। देवभागे हेमन्तर्त्तौ कराणां मन्दता। अतएव तत्र शीताधिक्यं च। तथाच देवभागे दक्षिणगोले सूर्यस्य दूरस्थत्वमुत्तरगोले निकटस्थत्वं मध्याह्ने नतांशानां क्रमेणाधिकाल्पत्वादिति भावः" र० ना०।

२तत्कालभवे ऊष्मणि पु० ३तद्वति त्रि० मेदि०।

ग्रीष्मजा स्त्री ग्रीष्मे जायते जन—ड। (जोणा आता) १खवल्याम् २नवमल्लिकायाञ्च शब्दच०। ३ग्रीष्मजातमात्रे त्रि०

ग्रीष्मधान्य न० ग्रीष्मे जातं तत्कालभवं धान्यम्। धान्यभेदे (बोरो) "ग्रीष्मधान्यजननोऽत्र राक्षसः" वृ०स०८अ०। वर्षभेदफलोक्तौ [राजनि०।

ग्रीष्मपुष्पी स्त्री ग्रीष्मे पुष्पं यस्याः ङीप्। करुणपुष्पवृक्षे।

ग्रीष्मभवा स्त्री ग्रीष्मे भवति भू—अच्। १नवमल्लिकायाम् रत्नमाला। २ग्रीष्मजातमात्रे त्रि० [स्वार्थे क तत्रार्थे।

ग्रीष्मसुन्दर पु० ७त०। (गिमः) शाकभेदे। राजनि०।

ग्रीष्महास न० ग्रीष्मे हासो विकाशोऽस्य। इन्द्रतूले। (वुडिरसुता) तस्य वियति ग्रीष्मे उड्डीयमानत्वात् इन्द्रतूलतुल्यत्वात्तथात्वम्।

ग्रीष्मी स्त्री ग्रीष्मः कालः कारणत्वेनास्त्यस्य अच् गौरा० ङीष्। नवमल्लिकायां राजनि०।

ग्रीष्मोद्भवा स्त्री ग्रीष्मे काले उद्भवति उद्+भू—अच्। १नवमल्लिकायां राजनि० २ग्रीष्मजातमात्रे त्रि०।

ग्रुच चौर्य्ये गतौ च भ्वा० पर०सक० सेट्। ग्रोचति इरित् अग्रुचत् अग्रोचीत्। जुग्रोच। उदित् ग्रुचित्वा० ग्रक्त्वा। क्त्वो वेट्कत्वात् निष्ठायां नेट् ग्रुक्तः।

ग्रैव त्रि० ग्रीवायां भवः शरीरावयवत्वात् यति प्राप्ते "ग्रीवाभ्योऽण् च" पा० अण्। ग्रीवाभवे "नाग्रसत् करिणां ग्रैवं त्रिपदीच्छेदिनामपि" रघुः।

ग्रैवेय त्रि० ग्रीवायां भवः "ग्रीवाभ्योऽण् च" पा० चात् ढञ्। ग्रीवाभवे "सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषाम्" रघुः।

ग्रैवेयक न० ग्रीवायां बद्धः अलङ्कारः "कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु" पा० ढकञ्। ग्रीवाबद्धे अलङ्कारभेदे (कण्ठी) "अस्माकं सखि! वाससी न रुचिरे ग्रैवेयकं नोज्ज्वलम्" सा० द०।

ग्रैव्य त्रि० ग्रीवायां भवः वेदे ष्यञ्। ग्रीवाभवे। "सप्तचयाः सप्ततिः संयन्ति ग्रैव्या अभि" अथ० ६।२५।२।

ग्रैष्मी स्त्री ग्रीष्मे ऋतौ भवः पक्षे ऋत्वण् ङीप्। १नवमल्लिकायाम् त्रिका० २ग्रीष्मर्त्तुसम्बन्धिनि त्रि० ग्रीष्म ऊष्मा तस्येदम् उत्सा० अञ्। ३ऊष्मसम्बन्धिनि त्रि० उभयतः स्त्रियां ङीप्।

ग्रैष्मक त्रि० ग्रीष्मे ऋतौ भवः "ग्रीष्मवसन्ताभ्यामन्यतरस्याम्" पा० पक्षे वुञ्। ग्रीष्मर्त्तुभवे "ग्रैष्मकधान्यं कुरुते समर्पयत्युभयोपयोग्यञ्च" वृ०स०४अ० "कुरुते पुष्णाति च ग्रैष्मकम्" टी०। उभयत्र ग्रैष्मिकमित्यपपाठः भवार्थे ठञोऽविधानात् तदधीते वेदेत्यधिकारे एव वसन्ता० ठञो विधानात् भवार्थे वुञोविधानाच्च।

ग्रैष्मिक त्रि० ग्रीष्मधर्मं वेद तत्प्रतिपादकग्रन्थमधीते वा वसन्ता० ठञ्। १ग्रीष्मधर्म्मवेत्तरि २तद्ग्रन्थाध्यायिनि च

ग्लपन न० ग्लै—णिच् पुक् ह्रस्वः भावे ल्युट्। १ग्लानिकरणे "तद्वैशद्यलाघवग्लपनक्लेदनविचारणकरम्" सुश्रुतः। कर्त्तरि ल्यु। २ग्लानिकारके त्रि०।

ग्लस भक्षणे भ्वा० आत्म० सक० सेट्। ग्लसते अग्लसिष्ट। जग्लसे। उदित् ग्लसित्वा-ग्लस्त्वा। ग्लस्तः।

ग्लस्त त्रि० ग्लस—क्त क्त्वावेट्कत्वात् नेट्। भक्षिते अमरः

ग्लह आदाने वा चुरा० उभ० पक्षे भ्वा० सक० सेट्। ग्लाहयति ते ग्लहति अजिग्लहत् त अग्लहीत् अग्लाहीत्। णिचोऽभावे ग्लहा। ग्लहः इत्यादि आदानं च द्यूतक्रीडार्थं पणादानम्। "तदेषां ग्लहमानानां ध्रुवौ जयपराजयौ" भा० क० ८७ अ०। "दुर्य्योधनो ग्लहते पाण्डवेन" भा० व० ६१अ० "शकुने! हन्त दिव्यामो ग्लहमानाः परस्परम्" भा० स० ५६ अ०। सर्वत्र आर्षम् आत्मनेपदम्। "इमाश्चेत् पूर्वं कितवोऽग्लहीयत्" भा० स० ६६ अ०।

ग्लह पु० ग्रह—ग्लह—वा "अक्षेषु ग्लहः" पा० कर्मणि नि०। देवनविषये पणरूपे ग्राह्ये वस्तुनि (कड़ि)(बाजि) ख्याते पदार्थे "व्यात्युक्षीमभिसरणग्लहामदीव्यन्" माघः। "अक्षग्लहः सोऽभिभवेत् परं नः" भा० स० ५८अ०। "महाधनं ग्लहं त्वेकं शृणु मे भरतर्षभ!" ७४ अ०। सभिकस्य द्यूतविषये ग्लहविभागभेदः याज्ञ० दर्शितो यथा "ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकम् शतम्। गृह्णीयात् धूर्त्तकितवादितरात् दशकं शतम्"।

ग्लान त्रि० ग्लै—कर्त्तरि क्त। १रोगादिना क्षीणदेहादौ दीने अमरः। भावे क्त। २दैन्ये न०

ग्लानि स्त्री ग्लै—भावे नि। १दौर्बल्ये २स्वकार्य्याक्षमतायाम् हेम०। "स्वकर्मस्थोनिवर्त्तन्ते मनस्तु ग्लानिरृच्छति" मनुः। "रत्यायासमनस्तापक्षुत्पिपासादिसम्भवा। ग्लानिर्निष्प्राणता कम्पकार्श्यानुत्साहतादिकृत्" सा०द० उक्ते ३व्यभिचारिगुणभेदे यथा

"किसलयमिव मुग्धं बन्धनाद्विप्रलूनं हृदयकुसुमशोषी दारुणो दीर्घशोकः। ग्लपयति परिपाण्डु क्षाममस्याः शरीरं शरदिज इव घर्मः केतकीपत्रगर्भम्" सा० द०।

ग्लाव पु० दल्भभिल्वयोरपत्ये द्व्यामुष्यायणे ऋषिभेदे। "अथातः शौव उद्गीथ तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्वव्राज" छा० उप०।

ग्लाविन् त्रि० ग्लै बा० विनि। धृष्टे "पश्चादोषाय ग्लाविनम्" यजु० ३०।१७। "ग्लाविनमधृष्टम्" वेददी०।

ग्लास्नु त्रि० ग्लै—स्नु। ग्लानियुक्ते अमरः। "वसनु माल्यवति ग्लास्नू रामोजिष्णुरधृष्णुवत्" भट्टिः।

ग्लुच चौर्य्ये गतौ च भ्वा० पर० सक० सेट्। ग्लोचति इरित् अग्लुचत्-अग्लोचीत्। जुग्लोच उदित् क्त्वा वेट्। ग्लुचित्वा ग्लुक्त्वा क्तो वेट्कत्वात् ग्लुक्तः। "बहूनामग्लुचत् प्राणानग्लोचीच्च रणे यशः" भट्टिः।

ग्लुचुक पु० ऋषिभेदे तस्य गोत्रापत्यम् "प्राचामवृद्धात् फिन् बहुलम्" पा० फिन्। ग्लुचुकायनि तद्गोत्रापत्ये पुंस्त्री० स्त्रियां वा ङीप्। ग्लुचुकायनिर्भक्तिः सेव्योऽस्य "गोत्रक्षत्रियाभ्यो बहुलम्" पा० वुञ्। ग्लौचुकायनक तत्सेवके त्रि०।

ग्लुन्च चौर्य्ये गतौ च भ्वा० पर० सक० सेट्। ग्लुञ्चति इरित् अग्लुचत् अग्लुञ्चीत् जुग्लुञ्च। जुग्लुच(ञ्च)तुः। उदित् ग्लुञ्चित्वा ग्लुक्त्वा। क्तो वेट्टकात् ग्लुक्तः।

ग्लेप दैन्ये अक० गतौ चाले च सक० भ्वा० आ० सेट्। ग्लेपते अग्लेपिष्ट जिग्लेपे ऋदित् अजिग्लेपत् त।

ग्लेव सेवने भ्वा० आ० सक० सेट्। ग्लेवते अग्लेविष्ट। जिग्लेवे ऋदित् अजिग्लेवत् त।

ग्लेष अन्वेषणे भ्वा० आ० सक० सेट्। ग्लेषते अग्लेषिष्ट जिग्लेषे। ऋदित्। अजिग्लेषत्।

ग्लै क्लमे हर्षक्षये च भ्वा० पर० अक० अनिट्। ग्लायति अग्लासीत्। जग्लौ जग्लिथ--जग्लाथ। ग्लानिः ग्लास्नुः। ग्लानः। ग्लेयम्। णिचि ग्लपयति ते अजिग्लपत् त। ग्लानिशब्दे उदा०। "मनो ग्लपयते तीव्रम् विषं गन्धेन सर्वशः" भा० आनु० ४६८४ श्लो०। "ग्लपयति यथा शशाङ्कम् न तथा हि कुमुद्वती दिवसः" शकु०। "पतङ्गैर्ग्लपिताश्रयम्" भट्टिः "बालस्य लक्ष्मीं ग्लपयन्तमिन्दोः" कुमा०। "यस्य वैराणि कोषश्च सुहृद्दण्डमजिग्लपः" भट्टिः।

ग्लौ पु० "ग्लानुदर्भ्यां डौः" उणा० ग्लै—डौ। १चन्द्रे तस्य प्रतिमासं कृष्णपक्षे क्षीयमाणत्वात्तथात्वम् तन्नामनामके २कर्पूरे च अमरः। "लक्नेट कश्चिग्लैरिव रिपौ क्षतौ ग्लौर्लक्नेट सराराश्च मदे च सत्त्वे" मुग्ध० क्रि०। ३हृदयनाड्याञ्च "ग्लौभिर्गुल्मान् हिराभिः स्रवन्तीः" यजु० २५।८। "ग्लौ यन्ति आर्भ्यन्ति ग्लावो हृदयनाड्यः" वेददी०।

इति वाचस्पत्ये गकारादि शब्दार्थनिरूपणम्।

घ

घ घकारस्योच्चारणं स्थानं जिह्वामूलं "जिह्वामूले तु कुः प्रोक्तः" शिक्षोक्तेः "अकुहविसर्जनीयानां कण्ठः" इत्युक्तिस्तु जिह्वामूलरूपकण्ठपरा। अस्योच्चारणे आभ्यन्तरः प्रयत्नः स्पर्शः जिह्वामूलस्पर्शनेन तदुच्चारणात् अतएवास्य स्पर्शवर्णत्वम्। बाह्यप्रयत्नास्तु घोषनादसंवारमहाप्राणाः सि॰कौ॰मूलं दृश्यम्। तस्य तन्त्रे वाचकशब्दा उक्ता यथा "घः खड्गी घुर्घरा चण्डी सुचण्डीशस्त्रिपुरान्तकः। वायुः शिवोत्तमः सत्यकिङ्किणी घोरनादकः। मरीचिर्वरुणो मेधा कालरूपी च दाम्भिकः। लम्बोदरी ज्वालमाला नन्दीशो हननं ध्वनिः। त्रैलोक्यविद्या संहर्त्री कामाख्या मनवा मघा" वर्णोद्धारतन्त्रम्। अस्य ध्येयरूपं यथा "मालतीपुष्पसङ्काशां षड्भुजां रक्तलोचनाम्। शुक्लाम्बरपरीधानां शुक्लमाल्यविभूषिताम्। सदा स्मेरमुखीं रम्यां लोचनत्रयराजिताम्। एवं ध्यात्वा घकारन्तु तन्मन्त्रं दशधा जपेत्"। अस्य मातृकान्यासे दक्षिणकराङ्गुलीषु न्यस्यता।

घ पु॰ घट–बा॰ ड। १घटायां २घर्घरशब्दे च मेदि॰।

घकार पु॰ घ–स्वरूपे कार। घस्वरूपे वर्णे "एवं ध्यात्वा घकारन्तु" वर्णोद्धारत॰। [जघग्घ।

घग्घ हसने भ्वा॰ पर॰ अक॰ सेट्। घग्घति अघग्घीत्।

घट चेष्टायां भ्वा॰ आत्म॰ अक॰ सेट् घटादि। घटते अघटिष्ट जघटे घटमानः। षित् अङ् घटा। "घटस्व परया शक्त्या मम त्वमपि सायकान्" भा॰ व॰ १५८१ श्लो॰। "कदाचित् तस्य दृष्टस्य घटमानस्य यत्नतः" १०४७२श्लो॰। "प्रागेव मरणात्तस्माद् राज्यायैव घटामहे" १२८१ श्लो॰। "अङ्गदेन समं योद्धुमघटिष्ट नरान्तकः" भट्टिः। णिच् योजने सक॰ मित्त्वात् ह्रस्वः घटयति। अजीघटत् त "अनेन भैमीं घटयिष्यतो विधेः" नैष॰। "अन्यथा घटयिष्यामि" शकु॰। "इत्थं नारीर्घटयितुमलं कामिभिः काममासः" माघः।

उद्+घटि–आवरणनिवारणे निरावरणकरणे। "द्वारे पुरस्योद्घटितापिधाने" कुमा॰।

प्र+प्रारम्भे "ततः प्रजघटे युद्धम्" भट्टिः।

वि+वियुक्तौ अक॰ "ततो विजघटे शैलैः" भट्टिः। "कार्य्यमुद्घाटितं क्वापि मध्ये विजघटे यतः" हितो॰। "विघटितास्तु मृणालतास्वन्वयः" प्रबो॰। णिच्–वियोजने सक॰ विघटयति ते।

सम्+ सम्यक्श्लेषे संयोगे अक॰। संघटते संयुज्यते इत्यर्थः णिच् संयोजने सक॰ संघटयति–संयोजयतीत्यर्थः।

घट हिंसे सक॰ संघाते अक॰ चु॰ उभ॰ सेट्। घाटयति-ते अजीघटत्-त। घाटा।

उद्+निरावरणे उद्घाटयति द्वारम् "उद्घाटिनी कुञ्चिका" शब्दक॰। "उन्मादः स्वयमुद्घाटितेऽथ पिहिते स्वयं कुलविनाशः" वृ॰स॰ ५३अ॰।

घट दीप्तौ वा चु॰ उभ॰ पक्षे भ्वा॰ पर॰ अक॰ सेट्। घाटयति ते घटति। अजीघटत् त अघाटीत् अघटीत्।

घट शब्दकरणे चुरा॰ उभ॰ अक॰ सेट् इदित्। घण्टयति ते अजघण्टत् त। घण्टा निघण्टुः।

घट पु॰ घटते अच्। कम्बुग्रीवादिमति पृथुबुध्नोदरादियुक्ते पदार्थे अमरः कुम्भतुल्यनिश्चलताहेतुत्वात् प्राणायामभेदे २कुम्भके। ३हस्तिकुम्भे च मेदि॰। "कुम्भस्तु द्रोणविंशतिः" कात्यायनोक्ते द्रोणविंशतिपरिमाणे इति शब्दक॰। तच्चिन्त्यम् कुम्भशब्दस्य तदर्थे परिभाषितत्वात् तदर्थकशब्दमात्रस्य तत्तापरिभाषितत्वाच्च। वैद्यकोक्तद्रोणपरिमाणार्थकतापि तत्रोक्ता चिन्त्या तत्र कुम्भशब्दस्यैव परिभाषितत्वात्। ४कुम्भराशौ "हरिः कीटघटेन च" ज्यो॰ त॰ पताकीवेधे

घटक त्रि॰ घटयति घट–णिच–ण्वुल्। १योजके। तद्भेदाः "धावकोभावकश्चैव योजकश्चांशकस्तथा दूषकः स्तावकश्चैव षड़ेते घटकाः स्मृताः" इत्युक्ताः। "घटकं ब्राह्मणं देवि! स्पर्शेषु यत्नतस्त्यजेत्" महिषमर्द्दिनीत॰ तस्यास्पृश्यतोक्ता। योजकश्च वरकन्ययोर्विवाहे योजकः, वधूमातृयोर्योजकश्चेति द्विधा।

२स्वविषयताव्यापकविषयताविशिष्टे "यः स्वार्थघटकार्थस्य स्वार्थान्वयिनि बोधने। अनुकूलो बहुव्रीहिः इतरयोरथवादिनः" शब्दश॰। "साध्याभावाधिकरणत्वं च साध्यवत्ताग्रहविरोधिताघटकसम्बन्धेनेति साध्याभावप्रतियोगित्वञ्च साध्यताघटकसम्बन्धेन इति नव्यनैया॰। तस्य भावः त्व घटकत्वम् स्वभिन्नत्वस्वव्यापकत्वोभयसम्बन्धेन विषयताविशिष्टत्वं। भवति च वह्न्यभावे वह्नेर्घटकत्वम् वह्न्यभावज्ञानीयविषयताया वह्निविषयताव्याप्यत्वात्।

घटकर्पर पु॰ विक्रमादित्यसभ्ये नवरत्नान्तर्गते कविभेदे। "धन्वन्तरिःक्षपणकोऽमरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः। ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचि र्नव विक्रमस्य" ज्योतिर्विदाभरणम्। तत्कृतकाव्यञ्च नीतिसाराख्यं तन्नाम्ना प्रसिद्धमस्ति। तत्र "गिरौ कलापी गगने पयोदाः" इत्यादिकं "यथा करोतु नीतिज्ञो व्यवसायमितस्ततः। फलं पुनस्तदेव स्याद् यद्विधेर्मनसि स्थितम्" इत्यन्तम्। ६त॰। २भग्नघटावयवभेदे (खावरा) "तस्मै वहेयमुदकं घटकर्परेण" नीतिसारः "घटकर्परतीक्ष्णाग्रः" पञ्चत॰।

घटकार त्रि॰ घटं करोति कृ-अण् उप॰ स॰। कुम्भकारे (कुमार) शिल्पिभेदे "घटकारपुरोहिताद्द्याः" वृ॰स॰ १६अ॰। ण्वुल्। घटकारकोऽप्यत्र।

घटकृत् त्रि॰घटं करोति कृ-क्विप्। कुम्भकारके "विद्वदमात्यवणिग्जनघटकृच्चित्रान्त्यजास्त्रिफलाः" वृ॰स॰ १६अ॰।

घटग्रह त्रि॰ घटं गृह्णाति कर्मण्युपपदेऽपि न अण् किन्तु "शक्तिलाङ्गलाङ्कुशतोमरयष्टिघटघटीधनुःषु ग्रहेरुपसंख्यानम्" वार्त्ति॰ अनुद्यमने अच्। कुम्भग्राहके। उद्यमते तु अण्। घटग्राह तत्रार्थे त्रि॰

घटज पु॰ घटात् जायते जन-ड। कुम्भसम्भवे अगस्त्ये मुनौ। कुम्भयोनिशब्दे २११७ पृ॰ दृश्यम्। "किं बहूक्तेन घटज! काशी प्राप्राथ तेन वै" काशीख॰२०अ॰। घटजातादयोऽप्यत्र। [अच् ह्रस्वः। कुट्टिन्यां त्रिका॰।

घटदासी स्त्री घटयति नायकौ परस्परं योजयति घटि-

घटन न॰घटि+ल्युट्। योजने संमेलने "अघटनघटनापटीयसी माया" वेदा॰। "तप्तेन तप्तमयसा घटनाय योग्यम्" विभा॰।

घटना स्त्री चु॰घट-युच्। १संहतकरणे, २योजने ४मेलने, ४करिणां समूहे च अमरः। "वाच्यं सटनिजपराङ्गघटनामालोक्य कालविद्भिः" वृ॰ स॰ ५१अ॰। "प्रियजनघटनामासु दुःशीलतां च" वृ॰ स॰ ५२अ॰।

घटराज पु॰ घटेन योजनेन राजते राज-अच्। कुम्भे हारा॰ कपालद्वययोजनात्तस्य जातत्वात्तथात्वम्।

घटपर्य्यसन न॰ ६त॰। प्रायश्चित्ते पराङ्मुखस्य पतितस्य त्यागार्थं जीवतएव तस्य प्रेतकार्य्यार्थं च ज्ञातिभिः क्रियमाणे दास्याः पादेन कुम्भस्य निरुदककरणे तद्विधिः मनुना दर्शितो यथा

"पतितस्योदकं कार्य्यं सपिण्डैर्बान्धवैर्बहिः। निन्दितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसन्निधौ। दासी घटमपां पूर्णं पर्य्यस्येत् प्रेतवत् पदा। अहोरात्रमुपासीरन्नशौचं बान्धवैः सह। निवर्त्तेरंश्च तस्मात्तु सम्भाषणसहासने। दायाद्यस्य प्रदानञ्च यात्रा चैव हि लौकिकी। ज्येष्ठता च निवर्त्तेत ज्येष्ठावाप्यञ्च यद्धनम्। ज्येष्ठांशं प्राप्नुयाच्चास्य यवीयान् गुणतोऽधिकः" "पतितस्येति। महापातकिनो जीवतएव प्रेतस्योदकक्रिया वक्ष्यमाणरीत्या सपिण्डैः समानोदकैश्च ग्रामाद्बहिर्गत्वा ज्ञात्यृत्विग्गुरुसन्निधाने रिक्तायां नवम्यादौ तिथौ दिनान्ते कर्त्तव्या। दासीति। सपिण्डसमानोदकप्रयुक्ता दासी उदकपूर्णं घटं प्रेतवदिति दक्षिणाभिमुखीभूय पादेन क्षिपेत् यथा स निरुदको भवति तदनु ते सपिण्डाः समानोदकैः सहाहोरात्रमशौचमाचरेयुः। निवर्त्तेरन्निति। तस्मात् पतितात् सपिण्डादीनां सम्भाषणमेकासनोपवेशनं च तस्मै रिक्थदानं सांवत्सरिकादौ निमन्त्रणादिरूपो लोकव्यवहारः एतानि निवर्त्तेरन्। ज्येष्ठतेति। ज्येष्ठस्य यत् खयुत्थानादिकं कार्य्यं तत्तस्य न कार्य्यं ज्येष्ठलभ्यं च तस्य विंशोद्धारादिकं धनं न देयं यद्यपि रिक्थप्रदानप्रतिषेधादेवाप्युद्धारप्रतिषेधः सिद्धः तथापि यवीयसस्तत्प्राप्त्यर्थमनूद्यते तस्यैव ज्येष्ठस्य सम्बन्धि धनं सोद्धारांशं तदनुजो गुणाधिको लभते" कुल्लू॰।

विस्तरस्तु मिताक्षरायामुक्तोयथा

"यस्त्वौद्धत्यादेतन्न चिकीर्षति तस्य किं कार्य्यमित्याह "दासीकुम्भं बहिर्ग्रामान्निनयेरन् स्वबान्धवाः। पतितस्य बहिः कुर्युः सर्वकार्येषु चैव तम्" या॰। "जीवतएव पतितस्य स्वज्ञातयोबान्धवाः मातृपक्षाश्च ते सर्वे सन्निपत्य दासी प्रेष्या तया सपिण्डादिप्रेषितयाऽऽनीतं कुम्भमपां पूर्णं ग्रामाद्बहिर्निनयेयुः। एतच्चतुर्थ्यादिरिक्तातिथ्यह्नः पञ्चमे भागे गुर्वादिसन्निधौ कार्यम् "पतितस्योदकङ्कार्यं सपिण्डैर्बान्धवैःसह। निन्दितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसन्निधाविति" मनुस्मरणात्। अथ वा दास्येव सपिण्डादिप्रयुक्ता निनयेत् यथाह मनुः "दासी घटमपाम्पूर्णम्पर्यस्येत् प्रेतवत्तदा। अहोरात्रमुपासीरन्नशौचं बान्धवैः सहेति"। प्रेतवदिति दक्षिणामुखापसव्यत्वयोः प्राप्त्यर्थम्। तच्च निनयनमुदकपिण्डदानादिप्रेतक्रियोत्तरकालं द्रष्टव्यम्। "तस्य विद्यागुरुयोनिसम्बन्धांश्च सन्निपात्य सर्वाण्युदकादीनि प्रेतकर्म्माणि कुर्युः पात्रञ्चास्य विपरिविद्ध्युर्दासः कर्म्मकरोवावकरात्पात्रमानीय दासी घटं पूरयित्वा दक्षिणामुखी पदा विपर्य्-

स्येदनुदकमुदकङ्करोति नामग्राहान्तं सर्वे त्वालभेरन् प्राचीनावीतिनोमुक्तशिखा विद्यागुरवो योनिसम्बन्धाश्च वीक्षेरन्नप उपस्पृश्य ग्रामम्प्रविशेयुरिति" गौतमस्मरणात्। अयञ्च त्यागोर्यदि बन्धुभिः प्रेर्य्यमाणोऽपि प्रायश्चित्तं न करोति तदा द्रष्टव्यः "तस्य गुरोर्बान्धवानां राज्ञश्च समक्षन्दोषानभिख्याप्यानुभाष्य पुनः पुनराचारं लभस्वेति स यद्येवमप्यनवस्थितमतिः स्यात्ततोऽस्य पात्रं विपर्यस्येदिति" शङ्खस्मरणात्। ततस्तं लब्धोदकम्पतितं सर्वकार्येषु सम्भाषणसहासनादिषु वहिःकुर्युर्वर्जयेयुः। तथा च मनुः "निर्वर्त्तेरंस्ततस्तस्य सम्भाषणसहासने। दायाद्यस्य प्रदानञ्च यात्रा चैव हि लौकिकी"। यदि स्नेहादिना सम्भाषणङ्करोति तदा प्रायश्चित्तं कार्यम्। "अत ऊर्द्धन्तेन सह सम्भाष्य तिष्ठेदेकरात्रं जपन् सावित्रीमज्ञानपूर्व्वं ज्ञानपूर्व्वं त्रिरात्रमिति"। घटनिनयनादयोऽप्यत्र।

घटप्रक्षेप पु० ६त०। "कृतप्रायश्चित्तेन महापुण्यजलाशय स्नानोत्तरं सपिण्डसमीपे पुण्यजलपूर्णघटस्यापवर्जने तद्विधिः मिता० दर्शितो यथा "यदा तु बन्धुत्यागादन्यथा वा जातवैराग्यः प्रायश्चित्तं कुर्य्यात्तदा किं कार्य्यमित्याह "चरितव्रत आयाते निनयेरन्नवं घटम्। जुगुप्सेरन्न चाप्येनं संवसेयुश्च सर्वशः" या०। "कृतप्रायश्चित्ते बन्धुसमीपम्पुनरायाते तत्सपिण्डाद्यास्तेन सहिता नवमनुपहतं घटमुदकपूर्णं निनयेयुः। एतञ्च निनयनं पुण्यह्रदादिस्नानोत्तरकालं द्रष्टव्यम्। "प्रायश्चित्ते तु चरिते पूर्णकुम्भमपां नवम्। तेनैव सार्द्धं प्रास्येयुः स्नात्वा पुण्यजलाशये" इति मनुस्मरणात्। गोतमेन तु विशेष उक्तः "यस्तु प्रायश्चित्तेन शुध्येत्तस्मिन्शुद्धे शातकुम्भमयम्पात्रं पुण्यतमाद्ध्रदात्पूरयित्वा स्रवन्तीभ्यो वा स एनमप उपस्पर्शयेयुरथास्मै तत्पात्रन्दद्युस्तत्सम्प्रतिगृह्य जपेत् शान्ता द्यौः शान्ता पृथिवी शान्तं शिवमन्तरिक्षं योरोचनस्तमिह गृह्णामीत्येतैर्यजुर्भिः पावमानीभिस्तरत्समन्दीभिः कूष्माण्डैश्चाज्यं जुहुयाद्धिरण्यं दद्याद्गाञ्चाचार्याय यस्य तु प्राणान्तिकम्प्रायश्चित्तं स मृतः शुध्येदेतदेव शान्त्युदकं सर्वेषूपपातकेष्विति तत्र एनङ्कृतप्रायश्चित्तिनं नैव कुत्सयेयुस्तथा सर्वकार्य्येषु क्रयविक्रयादिषु तेन सह संव्यवहरेयुः"। "प्रकृतएव चरितव्रतविधौ विशेषमाह "घटेऽपवर्जिते ज्ञातिमध्यस्थो यवसं गवाम्। प्रदद्यात् प्रथमं गोभिः सत्कृतस्य हि सत्क्रिया" या० मिताक्ष अत्रेदं बोध्यम् घटेऽपवर्जिते इत्यादि याज्ञ० वचनस्य प्रायश्चित्ते तु चरिते इत्यादि मनुवचनस्य च प्रकरणात् घटप्रक्षेपस्य पतितविषयकत्वावधारणे "स्वशिरसा यवसमादाय गोभ्योदद्यात्" इति हारीतवचनस्य गोग्रासमात्रदानप्रतिपादकत्वेन तस्य सर्वप्रायश्चित्तशेषत्वेनावधारणेऽपि "एवं हारीतयाज्ञवल्क्यवचनैकवाक्यतया वक्ष्यमाणमनुवचनद्वयमपि सामान्यप्रायश्चित्तोत्तरकर्त्तव्यतापरं न तु प्रकरणादसत्प्रतिग्रहमात्रपरं तस्यासत्प्रतिग्रहमात्रपरतया यत् कुल्लूकभट्टव्याख्यानं तत्प्रदर्शनमात्रम् एवं घटापवर्जनमपि न पतितमात्रविषयम् यथाह मनुः "उपवासकृशं तं तु गोव्रजात् पुनरागतम्। प्रणतं परिपृच्छेयुः साम्यं सौम्येच्छसीति किम्। सत्यमुक्ते तु विप्रेषु विकिरेत् यवसं गवाम्"। इत्यन्तेन प्रा० त० यद् घटापवर्जनस्यापि सर्वप्रायश्चित्तशेषतया व्यवस्थापितम् तच्चिन्त्यम् दर्शितहारीतवाक्ये "उपवासकृशमित्यादिमनुवाक्ये च घटापवर्जनस्यानुक्तेः पतितविषये च प्रागुक्तमनुयाज्ञवल्क्यवाक्ययोर्घटापवर्जनस्योक्तेः उभयस्यैकविषयत्वाभावात् ततश्च सर्वप्रायश्चित्ते तु केवलं गोग्रासदानमात्रं शेषकर्त्तव्यं पतितप्रायश्चित्ते तु घटापवर्जनरूपविशेषकार्य्यसहितगोग्रासदानमिति विषयविवेकसम्भवे मनुयाज्ञवल्क्यवचनसङ्कोचस्यायुक्तत्वात् किन्तु हारीतवचनस्य गोग्रासदानविषयकत्वेन अवश्यंऽपि याज्ञवल्क्यवाक्ये "घटेऽपवर्जिते इत्यनेन प्राप्तपतितविषयकघटापवर्जनमनूद्य गोग्रासमात्रविधायकत्वात् न सामान्यपरत्वं यद्विषये घटापवर्जनं विहितं तद्विषयेऽपि गोग्रासदानाधिक्यविधानार्थं तस्य प्रवृत्तेः घटापवर्जनं तु पतितविषयकं प्रकरणादवगम्यते। किन्तु पतितविषये दासीपदा घटप्रक्षेपपूर्व्वकं निरुदकघटकरणं घटपर्य्यसनशब्दे मन्वादिवाक्येन दर्शितम् तदुत्तरमेव मनुयाज्ञवल्क्याभ्यां घटापवर्जनं विहितमिति तस्य तद्विषयकत्वौचित्यात् न तु तत्सङ्कोचः इति। वस्तुतस्तु घटपर्य्यसनशब्दे दर्शितगौतमवाक्ये "एतदेव शान्त्युदकं सर्व्वेषूपपातकेषु" इत्युक्तेः शान्त्युदकघटस्य सर्वोपपातक प्रायश्चित्तशेषत्वावधारणात् शान्त्युदकघटस्य च पूर्णघटनिनयनपूर्वकत्वौचित्येन सर्व्वोपपातकप्रायश्चित्ते शान्त्युदकग्रहणार्थं घटनिनयनं कार्य्यमिति सुधीभिर्भाव्यमिति। घटापवर्जनघटनिनयनादयोऽप्यत्र।

घटसम्भव पु॰ सम्भवत्यस्मात् सम्+भू—अपादाने अप् घटः सम्भवोऽस्य। कुम्भसम्भवे अगस्त्ये घटोद्भवादयोऽप्यत्र

घटसृञ्जय पु॰ब॰व॰। दक्षिणस्थे जनपदभेदे "अथापरे जनपदा दक्षिणा भरतर्षभ!" इत्युपक्रमे "मूषकास्तनबालाश्च सनीपा घटसृञ्जयाः" जम्बुखण्डनिर्म्माणे भा॰भी॰९अ॰।

घटा स्त्री घट–भावे अङ्। १सङ्घाते "यदगारघटाट्टकुट्टिमस्रवदिन्दूपलतुन्दिलापया" नैष॰। २घटनायां ३गोष्ठ्यां ४सभायाञ्च मेदि॰। ५करिणां युद्धादावेकत्र संघाते अमरः "आयामवद्भिः करिणां घटाशतैः" माघः। ६घटने योजने च अच्। ७तत्रार्थे पु॰।

घटाटोप पु॰ घटया आटोपः। आडम्बरे।

घटाभ पु॰ हिरण्यकशिपुसेनापतौ असुरभेदे। "तत्रासीनं महाबाहुं हिरण्यकशिपुं प्रभुम्। उपासन्ति" इत्युपक्रमे "घटाभो विकटाभश्च संह्रादश्चेन्द्रतापनः" हरिवं॰ २२१ अ॰। कुम्भाकारत्वात्तस्य तथात्वम्।

घटाल त्रि॰ घटा घटनाऽस्त्यस्य निन्दिता सिध्मा॰। "जटाघटाकटाकालाः क्षेपे" ग॰सू॰ लच्। निन्दितघटनायुक्ते।

घटालाबू स्त्री घटइवालाबूः। कुम्भतुम्ब्याम् (गोललाउ) [राजनि॰।

घटिक न॰ घटेन तरति तरतीत्यधिकारे "नौद्व्यचष्ठन्" पा॰ ठन्। घटेन नद्यादितारिणि।

घटिका स्त्री "गुर्व्वक्षराणामुदितं च षष्ट्या पलं पलानां घटिका किलैका" इति ज्योतिर्विदाभरणोक्ते १षष्टिपलात्मके दण्डरूपे काले। घटयति विहितकार्य्यकरणाय घट–णिच्–ण्वुल्। २दण्डद्वयरूपे मुहूर्त्तात्मके काले। अल्पो घटः ङीप् ततः स्वार्थे क। ३स्वल्पे घटे। इवार्थे कन्। ४नितम्बे न॰शब्दच॰। "चतस्रो घटिकाः प्रातररुणोदय उच्यते। यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः। त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम्। नाडीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" कालमा॰ ब्रह्मवै॰। "व्रतोपवासस्नानादौ घटिकैका यदा भवेत्। उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनी" विष्णुधर्मो॰। "अथ घटिका मुहूर्त्तं श्राद्धयोग्यकालानुरोधादिति वक्ष्यते ब्रह्मवै॰ घटिकाद्दण्डरूपा परवचने नाडीनामाद्यन्तचतुष्टयमित्यनुरोधात्" ति॰ त॰ रघु॰। "त्रिंशत् कलाश्चौ घटिका क्षणः स्यात् नाडीद्वयं ते खगुणैर्दिनञ्च" सि॰ शि॰ "जातौ भचक्रभ्रमस्य षष्टिभागः घटिका" प्रमिता॰

घटिघट पु॰ घट्या घटते घट–अच् संज्ञात्वात् ह्रस्वः। महादेवे तस्य कालरूपेण घटीवत् स्थितत्वात् तथात्वम्। "नमोऽघटाय घटाय नमो घटिघटाय च" हरिवं॰ २७८ अ॰ शिवस्तुतौ।

घटित त्रि॰ घट–णिच्–क्त। १योजिते रचिते २स्वविषयताव्याप्यविषयताविशिष्टे भवति च वह्न्यभावः वह्निघटितः वह्न्यभावविषयताया वह्निविषयताव्याप्यत्वात्" "प्रतियोगिवैयधिकरण्यघटितव्यापकताया निवेशः" व्युत्पत्तिवादे गदाधरः। तस्य भावः त्व घटितत्व तद्भावे न॰। विशिष्टान्तराघटितत्वं विशिष्टद्वयाघटितत्वम् इति च सामान्यनिरुक्तौ गदाधरः।

घटिन् पु॰ घट+तदाकारो अस्त्यस्य इनि १कुम्भराशौ "मत्स्यौ घटी नृमिथुनं सगदं सवीणम्" ज्यो॰ त॰। तस्य कुम्भाकारत्वात् शिरसि तद्युक्तत्वाच्च तथात्वम् २कुम्भयुक्ते त्रि॰ स्त्रियां ङीप्।

घटिन्धम त्रि॰ घटीं धमति ध्मा–खश् मुम् ह्रस्वश्च। मुखमारुतेन घटीवादके।

घटिन्धय त्रि॰ घटीं धयति धेट–खश् मुम् ह्रस्वश्च। कुम्भ[धायके।

घटिल त्रि॰ घटोऽस्त्यस्य पिच्छा॰ इलच्। कुम्भयुक्ते।

घटी स्त्री घटः कालमानज्ञापकः सच्छिद्रः कुम्भः ज्ञापकतयाऽस्त्यस्याम् अच् गौरा॰ ङीष्। १दण्डात्मके काले। "गुर्व्वक्षरैः खेन्दुमितैरसुस्तैः। षड्भिः पलं तैर्घटिका खषड्भिः। स्याद्वा घटीषष्टिरहः खरामैः" सि॰ शि॰। अल्पार्थे ङीप्। २क्षुद्रे कुम्भे।

घटीकार स्त्री घटीं करोति अण्। कुम्भकारे शिल्पिभेदे।

घटीग्रह त्रि॰ घटीं गृह्णाति ग्रह–अनुद्यमने घटग्रहवत् अच्। घटीग्राहके उद्यमेन तु अण्। घटीग्राह तदर्थे त्रि॰।

घटीयन्त्र न॰ घट्याः दण्डरूपकालस्य ज्ञापकं यन्त्रम्। कालमानज्ञापके यन्त्रभेदे। (घडि) तच्च यन्त्रं नानाविधं सू॰ सि॰ रङ्गनाथयोर्दर्शितं तत्र दिवसे कालज्ञानस्य शङ्कुच्छायादियन्त्रैकसाध्यत्वमुक्त्वा घटीयन्त्रादिकं तु अहर्निशतज्ज्ञानसाधनमिति घटीयन्त्रादिकमेवात्र तत्रोक्तं प्रदर्श्यते यथा

"अथ घटीयन्त्रादिभिश्चमत्कारियन्त्रैर्वा सर्वोपजीव्यं कालं सूक्ष्मं साधयेदिति कालसाधनमुपसंहरति"

"तोययन्त्रकपालाद्यैर्मयूरनरवानरैः। ससूत्ररेणुगर्भैश्च सम्यक् कालं प्रसाधयेत्" सू॰सि॰।

"जलयन्त्रं तत् कपालं च कपालाख्यं जलयन्त्रं वक्ष्यमाणं

तदाद्यं प्रथमं येषां तैर्यन्त्रैर्वालुकायन्त्रप्रभृतिभिः सापेक्षघटीयन्त्रैर्मयूरनरवानरैः। मयूराख्यं स्वयंवहयन्त्रं निरपेक्षं नरयन्त्रं शङ्क्वाख्यं छायायन्त्रं पूर्वोद्दिष्टं वानरयन्त्रं स्वयंवहं निरपेक्षमेतैः ससूत्ररेणुगर्भैः सूत्रसहिता रेणवो धूलयो गर्भे मध्ये येषां तैः सूत्रप्रोताः षष्टिसङ्ख्याका सङ्घटिता मयूरोदरस्था मुखाद् घटिकान्तरेण स्वत एव निःसरन्तीति लोकप्रसिद्धा तादृशैर्यन्त्रैरित्यर्थः। यद्वा सूत्राकारेण रेणवः सिकतांशा गर्भे उदरे यस्यैतादृशं यन्त्रं वालुकायन्त्रं प्रसिद्धम्। तेन सहितैर्मयूरादियन्त्रैर्मयूराद्युक्तयन्त्रैर्वालुकायन्त्रेण चेति सिद्धोऽर्थः। चकारस्तोययन्त्रकपालाद्यैरित्यनेन समुच्चयार्थकः। कालं दिनगतादिकं सम्यक् सूक्ष्मं प्रसाधयेत्। प्रकर्षेण सूक्ष्मत्वेनातिसूक्ष्मत्वेनेत्यर्थः। जानीयादित्यर्थः। ननु मयूरादिस्वयंवहयन्त्राणि कथं साध्यानीत्यतस्तत्साधनप्रकारा वहवो दुर्गमाश्च सन्तीत्याह” र०ना० “पारदाराम्बुसूत्राणि शुल्वतैलजलानि च। वीजानि पांशवस्तेषु प्रयोगास्तेऽपि दुर्लभाः” सू०। “तेषु मयूरादियन्त्रेषु स्वयंवहार्थमेते प्रयोगाः प्रकर्षेण योज्याः। प्रकर्षस्तु यावदभिमतसिद्धेः। एते क इत्यत आह। पारदाराम्बुसूत्राणीति। पारदयुक्ता आराः। तथा च सिद्धान्तशिरोमणौ “लघुकाष्ठजसमचक्रे समसुषिरारा: समान्तरा नेम्याम्। किञ्चिद्वक्रा योज्याः सुषिरस्यार्धं पृथक् तासाम्। रसपूर्णं तच्चक्रं द्व्याधाराक्षस्थितं स्वयं भ्रमति”। (१) इति। अम्बु जलस्य प्रयोगः। सूत्राणि सूत्रसाधनप्रयोगः। शुल्वं ताम्रम्। तैलजलानि तैलयुक्तजलस्य प्रयोगः। चकारात् तयोः पृथक् प्रयोगोऽपि। तथा च सिद्धान्तशिरोमणौ “उत्कीर्य नेमि(२) मथवा परितो मदनेन संलग्नम्। तदुपरि तालदलाद्यं कृत्वा सुषिरे रसं क्षिपेत् तावत्। यावद्रसैकपार्श्वं क्षिप्रजलं नान्यतो याति। पिहितच्छिद्रं सदतश्चक्रं भ्रमति स्वयं जलाकृष्टम्।(२) ताम्रादिमयस्याङ्कुशरूपनलस्याम्बुपूर्णस्य। एकं कुण्डजलान्तर्द्वितीयमग्रं त्वधोमुखं च बहिः। युगपन्मुक्तं चेत् कं नलेन कुण्डाद्बहिः पतति। नेम्यां बद्ध्वा घटिकाश्चक्रं जलयन्त्रवत् तथा धार्य्यम्। नलकप्रच्युतसलिलं पतति यथा तद्घटीमध्ये। भ्रमति ततस्तत् सततं पूर्णघटीभिः समाकृष्टम्। चक्रच्युतं तदुदकं कुण्डे याति प्रणालिकया” इति। वीजानि केवलं तत्तद्वीजप्रयोगाः। पांशवो धूलिप्रयोगास्तैर्युक्ताः। अपिशब्दात् प्रयोगेषु सुगमतरा इत्यर्थः। दुर्लभाः साधारणत्वेन मनुष्यैः कर्त्तुमशक्या इत्यर्थः। अन्यथा प्रतिगृहं स्वयंवहानां प्राचुर्य्यापत्तेः। इयं स्वयंवहविद्या समुद्रान्तर्निवासिजनैः फिरङ्गाख्यैः सम्यगभ्यस्तेति। कुहकविद्यात्वादत्र विस्तारानुद्योग इति संक्षेपः। अथ कपालाख्यं जलयन्त्रमाह” रङ्गना०। “ताम्रपात्रमधश्छिद्रं न्यस्तं कुण्डेऽमलाम्भसि। षष्टिर्मज्जत्यहोरात्रे स्फुटं यन्त्रं कपालकम्” सू०। “यत् ताम्रघटितं पात्रमधश्छिद्रमधोभागे छिद्रं यस्य तत्। अमलाम्भसि निर्मलं जलं विद्यते यस्मिन् तादृशे कुण्डे बृहद्भाण्डे न्यस्तं धारितं सदहोरात्रे नाक्षत्राहोरात्रे षष्टिः षष्टिवारमेव न न्यूनाधिकं मज्जति अधश्छिद्रमार्गेण जलागमनेन जलपूर्णतया निमग्नं भवति। तत् कपालकं कपालमेव कपालकं घटखण्डानां कपालपदवाच्यत्वात् घटाधस्तनार्धाकारं यन्त्रं घटीयन्त्रं स्फुटं सूक्ष्मम् तद्घटनं तु। “शुल्बस्य दिग्भिर्विहितं पलैर्यत् षडङ्गुलोच्चं द्विगुणायतास्यम्। तदम्भसा षष्टिपलैः प्रपूर्य्यं पात्रं घटार्धप्रतिमं घटी स्यात्। सत्र्यंशमाषत्रयनिर्मिता या हेम्नः शलाका चतुरङ्गुला स्यात्। विद्धं तया प्राक्तनमत्र पात्रं प्रपूर्य्यते नाडिकयाम्बुभिस्तत्” इति व्यक्तम्। भगवता तु सूक्ष्ममुक्तम्। अथ शङ्कुयन्त्रं दिवैव कालज्ञानार्थं नान्यदेत्याह” रङ्गना० “नरयन्त्रं तथा साधु दिवा च विमले रवौ। छायासंसाधनैः प्रोक्तं कालसाधनमुत्तमम्” सू०सि०। रङ्गनाथधृतसि०शि०वाक्यानि प्रमि० व्याख्यातानि यथा लघुदार्व्वित्यादि (१) ग्रन्थिकीलरहिते लघुदारुमयी भ्रमसिद्धे चक्रे आराः। किंविशिष्टाः। समप्रमाणाः समसुषिराः समतौल्याः समान्तरा नेम्यां योज्याः। ततस्तानद्यावर्त्तवदेकत एव सर्वाः किञ्चिद्वक्रा योज्याः। ततस्तासामाराणां सुषिरेषु पारदस्तथा क्षेप्यो यथा सुषिरार्धमेव पूर्णं भवति। ततो मुद्रितारास्तच्चक्रमयस्कारशलाकाद्व्याधारस्थं स्वयं भ्रमति। अत्र युक्तिः। यन्त्रैकभागे रसो ह्यारामूलं प्रविशति। अन्यभागे त्वाराग्रं धावति। तेनाकृष्टं तत् स्वयं भ्रमतीति” प्रमि०। उत्कीर्य्येत्यादि “(२) दन्तनेमिं भ्रमयन्त्रेण समन्तादुत्कीर्य्य द्व्यङ्गुलमात्रं सुषिरस्य वेधो विस्तारश्च यथा भवति ततस्तस्य सुषिरस्योपरि तालपत्रादिकं मदनादिना संलग्नं कार्य्यम्। तदपि चक्रं द्व्याधाराक्षस्थितं कृत्वामदि नेम्यां तालदलं विद्धा सुषिरे रसस्तावद् क्षेप्यो ताम्र

सुषिरस्याधोभागो रसेन मुद्रितः। पुनरेकपार्श्वे जलं प्रक्षिपेत्। तेन जलेन द्रवोऽपि रसो गुरुत्वात् परतः सारयितुं न शक्यते। अतो मुद्रितच्छिद्रं तच्चक्रं जलेनाकृष्टं स्वयं भ्रमतीति" प्रमि०।

ताम्रादिमयस्येत्यादि (२) "ताम्रादिधातुमयस्याङ्कुशरूपस्य वक्रीकृतस्य नलस्य जलपूर्णस्यैकमग्रं जलभाण्डेऽन्यदग्रं वहिरधोमुखं चैकहेलया यदि विमुच्यते त भाण्डजलं सकलमपि नलेन वहिः सरति। तद्यथ छिन्नकमलस्य कमलिनीनलस्य जलभृद्भाण्डे क्षिप्तस्य जलपूर्णसुषिरस्यैकमग्रं भाण्डाद्बहिरधोमुखं द्रुतं यदि ध्रियते तदा भाण्डजलं सकलमपि नलेन बहिर्याति। इदं कुक्कुटनाडीयन्त्रमिति शिल्पिनां हरमेखलिनां च प्रसिद्धम्। अनेन बहवश्चमत्काराः सिद्ध्यन्ति। अथ चक्रनेम्यां घटीर्बद्धा जलयन्त्रवत् द्व्याधाराक्षसंस्थितं तथा निवेशयेद्यथा नलकप्रच्युतजलं तस्य घटीमुखे पतति। एवं पूर्णघटीभिराकृष्टं तद्भ्रमत् केन निवार्य्यते। अथ चक्रच्युतस्योदकस्याधःप्रणालिकया कुण्डगमने कृते कुण्डे पुनर्जलप्रक्षेपणैरपेक्षम्" प्रमि०।

विष्णुपु० अन्यथा तन्निर्माणप्रकार उक्तो यथा "नाडिकातु प्रमाणेन कला दश च पञ्च च। उन्मानेनाम्भसः सा तु पलान्यर्द्धत्रयोदश। हेममाषैः कृतच्छिद्रा चतुर्भिश्चतुरङ्गुलैः। मागधेन प्रमाणेन जलप्रस्थस्तु संस्मृतः" विष्णु० पु०।

"अम्भस उन्मानेन उन्मीयतेऽनेनेत्युन्मानं पात्रम्। अर्द्धेन योगे त्रयोदश सार्द्धद्वादशेत्यर्थः। उन्मानरूपेण घटितानि सार्द्धद्वादशपर्वाणि सा नाडिका सार्द्धद्वादशपलताम्रनिर्मितपात्रेण सा नाडिका ज्ञातव्येत्यर्थः। किं प्रमाणं तत् पात्रं कार्य्यं तदाह। सार्द्धद्वादशपलजलेन हि मागधदेशप्रस्थः पूर्य्यते तत्प्रमाणं पात्रं कार्य्यम् इत्यर्थात् सिद्धम्। ननु तथापि पात्रेण कथं नाडिकामानं क्रियापरिच्छेद्यत्वात् कालस्येत्याशङ्क्य क्रियासिद्धये प्रस्थादि विशिनष्टि हेमेति। माषः पञ्चगुञ्जः। हेम्नोमाषैश्चतुर्भिश्चतुरङ्गुलेन शलाकारूपेण रचितैः कृतच्छिद्रा। एतदुक्तं भवति। सार्द्धद्वादशपलताम्रमयं मागधप्रस्थसंमितमूर्द्धायतं पात्रं चतुर्माषचतुरङ्गुलहेमशलाकया कृताधश्छिद्रं जले स्थापितं तेन छिद्रेण यावता कालेन पूर्य्यते तावान् कालो नाडिकेति। तथाच शुकः "द्वादशार्द्धपलोन्मानं चतुर्भिश्चतुरङ्गुलैः। स्वर्णमाषैः कृतच्छिद्रं यावत् प्रस्थजलप्लुतमिति"। श्रीधरव्याख्या। ६त०। ङ्यापोः संज्ञायां ह्रस्वः। घटियन्त्रमप्यत्र "ततः संसारचक्रेऽस्मिन् भ्राम्यते घटियन्त्रवत्" मार्कं०पु०। वध्वा कूपात् उद्धारणार्थं यन्त्रम्। २कूपात् कुम्भोद्धारणार्थे यन्त्रभेदे। घटीयुक्तं यन्त्रं घटीयन्त्रं तच्च घटीयुक्तजलोद्धारणयन्त्रं पश्चिमदेशे प्रसिद्धम्। (जलतोलार कल)। "कमलपत्रपुटघटितवटीयन्त्रकाणि" काद०।

घटोत्कच पु० भीमेन हिडिम्बायामुत्पन्ने राक्षसभेदे तदुत्पत्तिकथा भा० आ० हिडिम्बवधप० १५५अ० यथा "बिभ्रती परमं रूपं रमयामास पाण्डवम्। रमयन्ती तथा भीमं तत्र तत्र मनोजवा। प्रजज्ञे राक्षसी पुत्रं भीमसेनान्महाबलम्। विरूपाक्षं महावक्त्रं शङ्कुकर्णं विभीषणम्। भीमनादं सुताम्रौष्ठं तीक्ष्णदंष्ट्रं महारवम्। महेष्वासं महावीर्य्यं महासत्त्वं महाभुजम्। महाजवं महाकायं महामायमरिन्दमम्। दीर्घघोणं महोरस्कं विकटोद्वद्धपिण्डिकम्। अमानु मानुषजं भीमवेगं महाबलम्। यः पिशाचानतीत्यान्यान् बभूवातीव राक्षसान्। बालोऽपि यौवनं प्राप्तो मानुषेषु विशाम्पते!। सर्व्वास्त्रेषु परं वीरः प्रकर्षमगमद्बली। सद्यो हि गर्भान् राक्षसो लभन्ते प्रसवन्ति च। कामरूपधराश्चैव भवन्ति बहुरूपिकाः। प्रणम्य विकचः पादावगृह्णात् स पितुस्तदा। मातुश्च परमेष्वासस्तौ च नामास्य चक्रतुः। घटो हास्योत्कच इति माता तं प्रत्यभाषत। अब्रवीत्तेन नामास्य घटोत्कच इति स्म ह। अनुरक्तश्च तानासीत् पाण्डवान् स घटोत्कचः। तेषाञ्च दयितो नित्यमात्मभूतो बभूव ह। संवाससमयो जीर्ण इत्याभाष्य ततस्तु तान्। हिडिम्बा समयं कृत्वा स्वां गतिं प्रत्यपद्यत। कृत्यकाल उपस्थास्ये पितॄनिति घटोत्कचः। आमन्त्र्य राक्षसश्रेष्ठः प्रतस्थे चोत्तरां दिशम्। स हि सृष्टो मघवता शक्तिहेतोर्महात्मना। कर्णस्याप्रतिवीर्य्यस्य प्रतियोद्धा महारथः"।

स च द्रोणप० घटोत्कचबधप० इन्द्रदत्तशक्त्या कर्णेन निहतः। तत्कथा तत्र १८० अ० दृश्या यथा "ततोऽब्रुवन् कुरवः सर्व एव कर्णं दृष्ट्वा घोररूपाञ्च मायाम्। शक्त्या रक्षो जहि कर्णाद्य तूर्णं नश्यन्त्येते कुरवो धार्त्तराष्ट्राः। करिष्यतः किञ्च नो भीमपार्थौ

सपत्नमेनं जहि पापं निशीथे। यो नः संग्रामाद्घोररूपाद्विमुच्येत् स नः पार्थान् सबलान् योधयेत। तथाद्येवं राक्षसं घोररूपं जहि शक्त्या वै दत्तया वासवेन। मा कौरवाः सर्व्व एवेन्द्रकल्पा रात्रियुद्धे कर्ण! नेशुः सयोधाः। स वध्यमानो रक्षसा वै निशीथे दृष्ट्वा राजंस्त्रास्यमानं बलञ्च। महच्च श्रुत्वा निनदं कौरवाणां मतिं दध्रे शक्तिमोक्षाय कर्णः। स वै क्रुद्धः सिंह इवात्यमर्षी नामर्षयत् प्रतिघातं रणे तम्। शक्तिं श्रेष्ठां वैजयन्तीमसह्यां समाददे तस्य वधं चिकीर्षन्। यासौ राजन्! निहिता वर्षपूगान् वधायाजौ सत्कृता फाल्गुनस्य। यां वै प्रादात् सूतपुत्राय शक्रः शक्तिं श्रेष्ठां कुण्डलाभ्यां निमाय। तां वै शक्तिं लेलिहानां प्रदीप्तां पाशैर्युक्तामन्तकस्यैव रात्रिम्। मृत्योः स्वसारं ज्वलितामिवोल्कां वैकर्त्तनः प्राहिणोद्राक्षसाय। तामुत्तमां परकायापहन्त्रीं दृष्ट्वा सौतेर्बाहुसंस्थां ज्वलन्तीम्। भीतं रक्षो विप्रदुद्राव राजन्! कृत्वात्मानं विन्ध्यतुल्यप्रमाणम्। दृष्ट्वा शक्तिं कर्णबाह्वन्तरस्थां नेदुर्भूतान्यन्तरीक्षे नरेन्द्र!॥ ववुर्वातास्तुमुलाश्चापि राजन्! सनिर्घाता चाशनिर्गां जगाम। सा तां मायां भस्म कृत्वा ज्वलन्ती भित्त्वा गाढं हृदयं राक्षसस्य। ऊर्द्ध्वं ययौ दीप्यमाना निशायां नक्षत्राणामन्तराण्याविशन्ती। युद्धा चित्रैर्विविधैः शस्त्रपूगैर्दिव्यैर्वीरो मानुषैराक्षसैश्च। नदन्नादान् विविधान् भैरवांश्च प्राणानिष्टांस्त्याजितः शक्रशक्त्या। इदञ्चान्यच्चित्रमाश्चर्य्यरूपं चकारासौ कर्म्म शत्रुक्षयाय। तस्मिन् काले शक्तिनिर्भिन्नमर्म्मा बभौ राजन्! शैलमेघप्रकाशः। ततोऽन्तरीक्षादपतद्गतासुः स राक्षसेन्द्रो भुवि भिन्नदेहः। अवाक्शिरास्तब्धगात्रो विजिह्वो घटोत्कचो महदास्थाय रूपम्। स तद्रूपं भैरवं भीमकर्म्मा भीमं कृत्वा भैमसेनिः पपात। हतोऽप्येवं तव सैन्यैकदेशमपोथयत् स्वेन देहेन राजन्!"। [प्रभृतयोऽप्यत्र।

घटोत्कचान्तक पु० ६त०। कर्णे त्रिका०। घटोत्कचारि-

घटोदर पु० घट इव उदरमस्य। असुरभेदे। "घटोदरो महापार्श्वः प्रथनः पिठरस्तथा" हरिवं० २२२अ०। हिरण्यकशिपुसेनापत्युक्तौ। स च वरुणसभ्यः यथाह भा० स० ९अ०। घटोदर इत्यादि समानम्।

घट्ट चालने भ्वा० आत्म० सक० सेट्। घट्टते अघट्टिष्ट। जघट्टे। घट्टितः घट्टनम्।

घट्ट चालने चुरा० उभ० सक० सेट्। घट्टयति-ते अजघट्टत्-त। घट्टित "विघट्टितानां सरलद्रुमाणाम्" कुमा०। "तदीयमातङ्गघटाविघट्टितैः" "वसन्ती चलशफरीविघट्टितघट्टनाः" माघः। परिस्फुरन्मीनविघट्टितोरवः" किरा०। "रणद्भिराघट्टनया नभस्वतः माघः"।

घट्ट पु० घट्यतेऽत्र घञ्। १स्नानाद्यावतरणस्थाने (घाट) २शुल्कग्रहणस्थाने (घाटि) "घट्टादिदेये शुल्कोऽस्त्री" अमरः। भावे घञ्। ३चालने। अमरः।

घट्टकुटीप्रभात न० घट्टस्य कुटी तत्र प्रभातमिव। न्यायभेदे शुल्कदानभिया विपथेन रात्रौ पलायमानस्य चोरवणिजः घट्टस्थकुटीसमीपे प्रभाते यथा अभीष्टसिद्ध्यभावः एवं विपथेन धावमानस्य तद्दोषतादवस्थ्यरूपो हि न्यायभेदस्तथाभूतः "तदिदं घट्टकुटीप्रभातवृत्तान्तमनुहरति"। खण्डनखण्डखाद्यम्।

घट्टगा स्त्री नदीभेदे। राजनि०।

घट्टजीविन् पु० घट्टं तरिकशुल्कस्थानं नद्यवतरणस्थाने देयं शुल्कं वा जीवति जीव-णिनि। (पाटुनि) नौकातारके वर्णसङ्करजातिभेदे स च "वैश्यायां रजकाज्जातः" विवादभङ्गार्णवसेतुः

घट्टना स्त्री चु० घट्ट-युच्। १चालने "रणद्भिराघट्टनया नभस्वतः" माघः। २वृत्तौ च हेमच०। भ्वा० घट्ट-ल्युट्। ३चालने न०। "बृहच्छिलानिष्ठुरकण्ठघट्टनात्" माघः। "कम्पयन्तौ महावृक्षानुरुपादपघट्टनैः" हरिवं०३७०अ०। "सुप्तसर्प इव दण्डघट्टनात्" रघुः।

घट्टित त्रि० घट्ट-कर्मणि क्त १निर्मिते, २चालिते, चित्रपटादेरञ्जनार्थम् अन्नचूर्णलिप्ते वसनादौ (कलप दिया घोँटा)। शब्दार्थचि०।

घण दीप्तौ तना० उभ० अक० सेट्। घणोति घणुते। अघाणीत्-अघणीत् अघणिष्ट जघाण जघणे। उदित् घणित्वा-घण्ट्वा। क्लीवेट्कत्वात् निष्ठा त्वनिट् घण्टः।

घण्ट त्रि० घण-क्त उदित्त्वेन नेट्। १दीप्ते २स्वनामख्याते व्यञ्जनभेदे पु०।

घण्टक पु० घण्ट+संज्ञायां कन्। (घट्काण) क्षुपभेदे राजनि०।

घण्टकर्ण पु० घण्टोदीप्तः कर्ण इव पत्रमस्य। (घट्काण) क्षुपभेदे राजव०।

घण्टा स्त्री चु० घटि-शब्दकरणे अच्। कांस्यनिर्मिते वाद्यभेदे। "घण्टां वा परशुं चापि वामतः सन्निवेशयेत्" दुर्गाध्यानम्। तन्निर्माणप्रकारमाहात्म्ये स्कान्दे ब्रह्मनारदसंवादे स्नानार्च्चनक्रियाकाले घण्टानादं

करोति यः। पुरतो वासुदेवस्य तस्य पुण्यफलं शृणु। वर्षकोटिसहस्राणि वर्षकोटिशतानि च। वसते देवलोके तु अप्सरोगणसेवितः। सर्ववाद्यमयी घण्टा केशवस्य सदा प्रिया। वादनाल्लभते पुण्यं यज्ञकोटिसमुद्भवम्। वादित्रनिनदैस्तूर्य्यगीतमङ्गलनिस्वनैः। यः स्नापयति गोविन्दं जीवन्मुक्तो भवेद्धि सः। वादित्राणामभावे तु पूजाकाले हि सर्वदा। घण्टाशब्दो नरैः कार्य्यः सर्ववाद्यमयो यतः। सर्ववाद्यमयी घण्टा देवदेवस्य वल्लभा। तस्मात् सर्वप्रयत्नेन घण्टानादन्तु कारयेत्। मन्वन्तरसहस्राणि मन्वन्तरशतानि च। घण्टानादेन देवेशः प्रीतो भवति केशवः"। विष्णुधर्म्मोत्तरे श्रीभगवत्प्रह्लादसंवादे "शृणु दैत्येन्द्र! वक्ष्यामि घण्टामाहात्म्यमुत्तमम्। प्रह्लाद! त्वत्समो नास्ति मद्भक्तो भुवनत्रये। मम नामाङ्किता घण्टा पुरतो मम तिष्ठति। अर्च्चिता वैष्णवगृहे तत्र मां विद्धि दैत्यज!। वैनतेयाङ्कितां घण्टां सुदर्शनयुतां यदि। ममाग्रे स्थापयेद्यस्तु देहे तस्य वसाम्यहम्। यस्तु वादयते घण्टां वैनतेयेन चिह्निताम्। धूपे नीराजने स्नाने पूजाकाले विलेपने। ममाग्रे प्रत्यहं वत्स! प्रत्येकं लभते फलम्। मखायुतं गोऽयुतञ्च चान्द्रायणशतोद्भवम्। विधिना च कृता पूजा सफला जायते नृणाम्। घण्टानादेन तुष्टोऽहं प्रयच्छामि स्वकं पदम्। नागारिचिह्निता घण्टा रथाङ्गेन समन्विता। वादनात् कुरुते नाशं जन्ममृत्युभयस्य च। गरुडेनाङ्कितां घण्टां दृष्ट्वाहं प्रत्यहं सदा। प्रीतिं करोमि दैत्येन्द्र! लक्ष्मीं प्राप्य यथाऽधनः। दृष्ट्वाऽमृतं यथा देवाः प्रीतिं कुर्व्वन्त्यहर्निशम्। सुपर्णे च तथा प्रीतिं घण्टाशिखरमास्थिते। सुकरेण प्रकुर्व्वन्ति घण्टानादं सुभक्तितः। मदीयार्च्चनकाले तु फलं कोट्यैन्दवं कलौ"। अन्यत्र च "घण्टादण्डस्य शिखरे सचक्रं स्थापयेत्तु यः। गरुडं वै प्रियं विष्णोः स्थापितं भुवनत्रयम्। सचक्रघण्टानादन्तु मृत्युकाले शृणोति यः। पापकोटियुतस्यापि नश्यन्ति यमकिङ्कराः। सर्व्वे दोषाः प्रलीयन्ते घण्टानादे कृते हरेः। देवतानां मुनीन्द्राणां पितृणामुत्सवो भवेत्। अभावे वैनतेयस्य चक्रस्यापि न संशयः। घण्टानादेन भक्तानां प्रसादं कुरुते हरिः। गृहे यस्य भवेन्नित्यं घण्टा नागारिसंयुता। न सर्पाणां तत्र भयं नाग्निविद्युत्समुद्भवम्। यस्य घण्टा गृहे नास्ति भक्तस्य पुरतो हरेः। कथं भागवतं नाम गीयते तस्य देहिनः" "अतो भगवतः प्रीत्यै घण्टा श्रीगरुडान्विता। संस्थाप्या वैष्णवैर्यत्नाच्चक्रेणोपरिमण्डिता। स्नाने शङ्खादिवाद्यन्तु नामसंकीर्त्तनं हरेः। गीतं नृत्यं पुराणादिपठनञ्च प्रशस्यते" हरिभक्तिविलासः। सर्व्वदेवपूजने धूपदीपदानोत्तरं वामहस्तेन घण्टावादनं तन्त्रसारे उक्तं यथा "धूपभाजनमस्त्रेण (फट्) प्रोक्ष्याभ्यर्च्य हृदानुना (नमः)। अस्त्रेण पूजितां घण्टां वादयन् गुग्गुलुं दहेत्"। श्यामादौ तु तन्मन्त्रविशेषः तन्त्रसारे उक्तः "तथा जयध्वनिमन्त्रमातः स्वाहेत्युदीर्य्य च। अभ्यर्च्य वादयेद् घण्टामस्त्रेण धूपयेत्ततः" गौतमीये "उत्तोल्य दृष्टिपर्य्यन्तं घण्टां वामदिशि स्थिताम्। वादयन् वामहस्तेन दक्षहस्तेन चार्च्चयेत्"। एवं नीराजनेऽपि। २घण्टापाटलिवृक्षे शब्दर०। ३अतिबलायां ४नागबलायां च राजनि०। [वृक्षे शब्दर०।

घण्टाक पु० घण्टेव कायति फलेन कै–क। घण्टापाटलि

घण्टाकर्ण पु० शिवानुचरभेदे (घेँटु) ख्याते "घण्टाकर्णो गणः श्रीमान् शिवस्यातीव वल्लभः" शिवपु०। मीनसंक्रान्तौ तस्य पूज्यतामाह कृत्यचिन्तामणौ "चैत्रे मासि च संपूज्यो घण्टाकर्णो वटात्मकः। आरोग्याय स्नुहीमूले संक्रान्त्यां तत्र कारयेत्"। पूजामन्त्रः। "घण्टाकर्ण! महावीर! सर्व्वव्याधिविनाशन!। विस्फोटकभये प्राप्ते रक्ष रक्ष महाबल!" ति० त०। २काशीस्थे ह्रदभेदे। "इयञ्च चित्रघण्टेशी घण्टाकर्णस्वयं ह्रदः" काशी० ३३अ०।

घण्टाताड पु० घण्टां कालज्ञापकघण्टां ताडयति ताडि–अण् उप० स०। १कालसूचकघण्टावादके (घण्टापाँड़े) "मैत्रेयकन्तु वैदेहो माधुकं संप्रसूयते। नॄन् प्रशंसत्यजस्रं यो घण्टाताडोऽरुणोदये" मनूक्ते २सङ्कीर्णजातिभेदे च

घण्टानाद पु० ६त०। १घण्टाशब्दे। घण्टाया नाद इव नादोऽस्य। २कुवेरमन्त्रिभेदे शब्दार्थचि०।

घण्टापथ पु० घण्टानां घण्टादिवाद्यानां घण्टायुक्तहस्त्यादीनां वा पन्थाः ६त० अच् समा०। महति १राजपथे "दशधन्वन्तरो राजमार्गो घण्टापथः स्मृतः" कौटिल्यः।

घण्टापाटलि पु० हन्यते हन–कर्म्मणि ड टस्य नेत्वम् नि० घत्वं पट–गतौ घञ् पाटस्तं लाति ला–का० लि कर्म०। (घण्टापारुलि) वृक्षभेदे अमरः।

घण्टारवा स्त्री घण्टेवारौति आ+रु–अच्। (वनशण) वृक्षभेदे अमरः यस्य फलं पक्वं सत् घण्टेवारौति

घण्टाली स्त्री घण्टां तच्छब्दमलति अल–अण् ङीप्। १कोषातक्याम्। ६त०। २घण्टाश्रेण्यौ। राजनि०।

घण्टाबीज पु० घण्टेव बीजमस्य। जयपालवृक्षे। राजनि०

घण्टाशब्द पु० घण्टायाः शब्दइव शब्दोयस्य। १कांस्ये हेमच०। ६त०। २तच्छब्दे

घण्टिका स्त्री क्षुद्रा घण्टा स्वल्पार्थे कन्। क्षुद्रघण्टायां तत्तुल्याकारत्वात् २तालुस्थजिह्वायाञ्च (आलजिब) हेमच०।

घण्टिनीबीज न० घण्टाऽस्त्यस्याःतदाकारफलत्वात् इनि ङीप् घण्टिन्याः घण्टायुक्ताया बीजम्। जयपाले राजनि०।

घण्टु पु०घटि–उन्।१गजघण्टायां २प्रतापे च उणादिकोषः

घण्टेश्वर पु० मङ्गलपुत्रे व्रणदातरि देवभेदे "मङ्गलस्य प्रिया मेधा तस्यां घण्टेश्वरोमहान्। व्रणदाता च तेजस्वी विष्णुतुल्यो बभूव ह" ब्रह्मवै०।

घण्ड पु० घण–बा० ड तस्य नेत्त्वम्। भ्रमरे संक्षिप्तसारः।

घतन त्रि० हन्ति हन–हन्तेर्युं घाद्यन्तयोर्घत्वतत्वे" उणा० युन्। मारके उज्ज्वलद० तत्रार्थे घातनेति पाठोऽयुक्तः

घन पु० हन–मूर्त्तौ अप् घनादेशश्च। १मेघे २मुस्तके ३समूहे ४दार्ढ्ये ५विस्तारे च ६लौहमुद्गरे मेदि० ७शरीरे ८कफे ९अभ्रके राजनि०। "समत्रिघातश्च घनः प्रदिष्टः" इति १०लीलावत्युक्ते समाङ्कत्रयवधे। ११निविडे सान्द्रे त्रि० अमरः १२ दृढे त्रि० मेदि०। १३पूर्णे १४सम्पुटे त्रि० शब्दर०। १५करतालादिकांस्यवाद्यभेदे १६मध्यमनृत्ये च न० अमरः। १७लौहे न० हेमच० १८त्वचे न० राजनि०। तत्र मेघस्योत्पत्तिभेदादिकं पुराणसर्वस्वे ब्रह्माण्डपु० उक्तं यथा

"सूर्य्यः किरणजालेन वायुयुक्तेन सर्व्वतः। जगतो जलमादत्ते कृत्स्नस्य द्विजसत्तमाः!। आदित्यभूतं भूतेभ्यः सोमं संक्रमते जलम्। नाडीभिर्वायुयुक्ताभिर्लोकाधारः प्रवर्त्तते। यत् सोमाच्च्यवते सूक्ष्मं तदभ्रेष्ववतिष्ठते। मेघावाय्वभिघातेन विसृजन्ति जलं भुवि। एवं प्रक्षयेमेव पतते चासकृज्जलम्। न नाशमुदकस्यास्ति तदेव परिवर्त्तते। सन्धारणार्थं भूतानां मायैषा विष्णुनिर्मिता। अनया मायया व्याप्तं त्रैलोक्यं सचराचरम्। विश्वेशो लोककृद्देवः सहस्रांशुः प्रजापतिः। धाता कृत्स्नस्य लोकस्य प्रभविष्णुर्दिवाकरः। सार्व्वलौकिकमम्भोयत् सोमो नभसोरसः। एवं भूतं जगत् सर्व्वमेतत्तथ्यं प्रकीर्त्तितम्। सूर्य्यादुष्णं निस्रवति सोमाच्छीतं प्रवर्त्तते। शीतोष्णवीर्य्यौ द्वावेतौ युक्त्या पालयतो जगत्। सोमासूतोद्भवा गङ्गा पवित्रा विमलोदका। भद्रासोमपुरोगाश्च महानद्यो द्विजोत्तमाः!। सर्व्वभूतशरीरेषु यास्वापोऽपसृताभुवि। तेषु सन्दह्यमानेषु जङ्गमस्थावरेषु च। पूर्य्यन्ते सर्वभूतेभ्यो निष्क्रामन्तीह सर्वशः। तेन चाभ्राणि जायन्ते स्थानमभ्रमयं स्मृतम्। तेजोऽर्कः सर्वभूतेभ्य आदत्ते रश्मिभिर्जलम्। समुद्राद्वायुसंयोगाद्रश्मयः प्रवहन्त्यपः। ततस्त्वृतुगते काले परिवृत्तो दिवाकरः। नियच्छत्यपोमेघेभ्यः शुक्लकृष्णैर्गभस्तिभिः। अभ्रस्थाः प्रपतन्त्यापो वायुना समुदीरिताः। सर्वभूतहितार्थाय रसभूताः समन्ततः। ततो वर्षति षण्मासान् सर्वभूतविवृद्धये। वायव्यं स्तनितञ्चैव विद्युदग्निसमुद्भवा। मेहनाच्च मिहेर्धातोर्मेघत्वं व्यञ्जयन्त्युत। न भ्रश्यन्ति यतश्चापस्तदभ्रं कवयो विदुः। मेघानां पुनरुत्पत्तौ त्रिविधा योनिरुच्यते। अग्निजा ब्रह्मजा चैव पक्षजा च पृथग्विधाः। त्रिधा घनाः समाख्यातास्तेषां वक्ष्यामि सम्भवम्। आग्नेयाः सूक्ष्मजाः प्रोक्तास्तेषां धूमात् प्रवर्त्तनम्। शीतदुर्दिनवाता ये स्वगुणास्ते व्यवस्थिताः। महिषाश्च वराहाश्च मत्तमातङ्गरूपिणः। भूत्वा धरणिमभ्येत्य रमन्ति विचरन्ति च। जीमूता नाम ते मेघा ये तेभ्यो वीजसम्भवाः। विद्युद्गुणविहीनाश्च जलधारावलम्बिनः। मूका मेघा महाकाया आवहस्य वशानुगाः। क्रोशमात्राच्च वर्षन्ति क्रोशार्द्धादपि वा पुनः। पर्वताग्रनितम्बेषु वर्षन्ति गह्वरेषु च। बलाकागर्भदाश्चैव बालाकागर्भधारिणः। ब्रह्मजाश्चैव ये मेघा ब्रह्मनिश्वाससम्भवाः। ते हि विद्युद्गणोपेताः स्तनयित्नुप्रियस्वनाः। तेषु शब्दप्रणादेन भूमिःस्वाङ्गरुहोद्भवैः। वायुवाह्याभिषिक्तेषु वायुर्यौवनमश्नुते। तेष्वियं प्रावृडासक्ता भूतानां जीवितोद्भवा। जीमूता नाम ते मेघा ये तेभ्यो जीवसम्भवाः। द्वितीयं प्रवहं वायुं मेघास्ते तु समाश्रिताः। इतो योजनमात्राच्च सार्द्धार्द्धादपि वा च ते। वृष्टिधर्मौ द्विधा तेषः धाराऽऽसारः प्रकीर्त्तितः। पुष्करावर्त्तका नाम ये मेघाः पक्षसम्भवाः। संयोगाद्वायुनोच्छिन्नाः पर्वतानां महौजसाम्। कामगानां च लोकानां सर्व्वेषां शिवमिच्छताम्। पुष्करा नाम ते मेघा वृहन्तो ।:समद-

धराः। पुष्करावर्त्तकास्तेन कारणेनेह शब्दिताः। नानारूपधराश्चैव महाघोरस्वनाश्च ये। कल्पान्तवृष्टेः स्रष्टारः संवर्त्ताग्नेर्नियामकाः। वर्षन्ति ते युगान्तेषु तृतीयास्ते प्रकीर्त्तिताः। अनेकरूपसंस्थानाः पूरयन्तो महीतलम्। वायुं परिवह ते स्युः श्रिताः कल्पान्तसाधकाः। योऽण्डस्य च विभिन्नस्य प्राकृतस्याभवत्तदा। यस्मात् ब्रह्मा समुत्पन्नश्चतुर्वक्त्रः स्वयम्भुवः। तस्यैवाण्डकपालानि सर्वमेघाः प्रवर्त्तिताः। तेषामाप्यायनं धूमः सर्वेषामविशेषतः। तेषां श्रेष्ठस्तु पर्जन्यश्चत्वारश्चैव दिग्गजाः। गजानां पर्वतानाञ्च मेघानां भोगिभिः सह। कुलमेकं पृथक् भूतं योनिस्त्वेकं जलं स्मृतम्। पर्जन्यो दिग्गजाश्चैव हेमन्ते शीतसम्भवाः। तुषारवृष्टिं वर्षन्ति हिमं सस्यविवृद्धये"।

वायुविशेषकृतएव घनभेदो भा॰शा॰३२०अ॰ दर्शितो यथा "प्रेरयत्यभ्रसंघातान् धूमजांश्चोष्मजांश्च यः। प्रथमः प्रथमे मार्गे प्रवहो नाम योऽनिलः। अम्बरे स्नेहसम्भ्येत्य तडिद्भ्यश्चोत्तमद्युतिः। आवहो नाम संभाति द्वितीयः श्वसनोनदन्। उदयं ज्योतिषां शश्वत् सोमादीनां करोति यः। अन्तर्देहेषु चोदानं यं वदन्ति मनीषिणः। यश्चतुर्भ्यः समुद्रेभ्यो वायुर्धारयते जलम्। उद्धृत्याददते चापो जीमूतेभ्योऽम्बरेऽनिलः। योऽद्भिः संयोज्य जीमूतान् पर्ज्जन्याय प्रयच्छति। उद्वहो नाम वंहिष्ठस्तृतीयः स सदागतिः। समुह्यमाना बहुधा येन नीताः पृथग्घनाः। वर्षमोक्षकृतारम्भास्ते भवन्ति घनाघनाः। संहता येन चाविद्धा भवन्ति नदता नदाः। रक्षणार्थाय सम्भूताः मेघत्वमुपयान्ति च। योऽसौ वहति भूतानां विमानानि विहायसा। चतुर्थः संवहो नाम वायुः स गिरिमर्द्दनः। येन वेगवता रुग्णा रूक्षेणारुजता नगान्। वायुना सहिता मेघा स्ते भवन्ति बलाहकाः। दारुणोत्पातसञ्चारो नभसः स्तनयित्नुमान्। पञ्चमः स महावेगो विवहो नाम मारुतः। यस्मिन् पारिप्लवा दिव्या वहन्त्यापो विहायसा। पुण्याश्चाकाशगङ्गायास्तोयं विष्टभ्य तिष्ठति"।

घननिघातस्तेत्यादेरयमर्थः समसंख्यानां तदाख्या घातः यद्यप्यत्र समयोर्द्वयोर्घातेन वर्गरूपेण तत्फलस्य समत्वं नास्ति तथापि समशब्देन सदृशघातद्वित्वतत्त्वेन समत्वं बोध्यं यथा १घनः १। द्वाभ्यां द्वयोर्गुणने ४ चत्वारः तेषां द्वाभ्यां गुणने ८। एवं त्रयाणां त्रिभिर्गुणने ९ नव तेषां पुनस्त्रिभिर्गुणने २७। एवं क्रमेण वारत्रयं समसमद्विघातरूपवर्गगुणनात् घनरूपत्वं जायते तत्रैकादीनां दशपर्य्यन्तानां घनसंख्याः सुबोधाय प्रदर्श्यन्ते यथा

१।२।३।४।५।६।७।८।९।१०

१।८।२७।६४।१२५।२१६।३४३।५१२ ७२९।१०००

अस्य प्रकारान्तरं स्थाप्योघनोऽन्त्यस्येत्यादि लीलावत्यां दृश्यं विस्तरभयान्नोक्तम्।

"जटामुक्तां विपर्य्यस्य घनमाहुर्मनीषिणः" इत्युक्ते १९वेदपाठभेदे ऋग्वेदशब्दे १४०९।११।१२ पृ॰ विवृतः तत्र सान्द्रे प्रचण्डघनगर्जितप्रतिरुतानुकारी (रवः) मुहुः"वेणी॰। "जघनेन घनेन सा" "लौहोद्घनघनस्कन्धाः" भट्टिः। लौहमुद्गरे "प्रतिजघान घनैरिव मुष्टिभिः" किरा॰। मेघे "प्रावृषमिव घनकेशजालाम्" काद॰। "रजनीतिमिरावगुण्ठिते पुरमार्गे घनशब्दविक्लवाः" कुमा॰ "असम्भ्रमद्घनरसा शतालोपरिषेविता" उद्भटः। घनश्यामः। मूर्त्तौ—काठिन्ये "द्वारं तमोघनमस्तम्" भट्टिः। "तमसोघनो मूर्त्तिः काठिन्यम् तेन मूर्त्तिमत्तमःसमम्"
[त्रिका॰।
जयम॰।

घनकफ पु॰ घनस्य मेघस्य कफ इव। मेघोपले करके।

घनकाल पु॰ घनप्रधानः कालः। वर्षर्त्तौ शब्दच॰।

घनगोलक पु॰ घनेन मूत्रां गोल इव कायति कै—क। संश्लिष्टस्वर्णरजते हेमच॰। [चि॰।

घनच्छद पु॰ घना निविडाश्छदा यस्य। शिग्रौ। शब्दार्थ

घनजम्बाल पु॰ कर्म॰। सान्द्रजम्बाले चुलुके (घनसेओयाला) त्रिका॰।
[दीप्तौ च शब्दर॰।

घनज्वाला स्त्री घनस्य ज्वालेव। १वज्राग्नौ। ६त॰। २मेघ-

घनताल पुंस्त्री॰ घनतायां निविडतायाम् अलति पर्य्याप्नोति अल—अच्। १सारङ्गखगे स्त्रियां जातित्वात् ङीष् कर्म॰। २वाद्यादितालभेदे।

घनतोल पुंस्त्री॰ घनं मेघं तोलयति ऊर्द्ध्वं नयति आह्वानेन तुल—णिच्—अण् उप॰ स॰। चातके खगे तद्रावेण हि मेघोत्थानमनुमीयते इति तस्य तथात्वम्। स्त्रियां जातित्वात् ङीष्।

घनत्वच् पु॰ घना निविडा त्वक् यस्य। शिग्रौ शब्दार्थचि॰।

घनद्रुम पु॰ कर्म॰। विकण्टकवृक्षे राजनि॰।

घननाभि पु॰ घनस्य मेघस्य नाभिरिव योनित्वात्। धूमे शब्दर॰ धूमस्य मेघयोनित्वात् तथात्वम् मेघस्य धूमयोनित्वं च घनशब्दे २७८६पृ॰ दर्शितम्।

घनपत्र पु० घनानि पत्राण्यस्य । १पुनर्णवायाम् राजनि० । २घनच्छदे शिग्रौ च ।

घनपदवी स्त्री ६त० । आकाशे शब्दार्थचि० । तस्य मेघाधारतया तत्सञ्चारस्थानतया च तथात्वम् । “क्रामद्भिर्घनपदवीमनेकसंख्यैः” किरा० ।

घनपल्लव पु० घना निविड़ाः पल्लवा अस्य । शोभाञ्जने जटा० ।

घनपाषण्ड पुंस्त्री घनेन मेघध्वनिना पाषण्ड इव उन्मत्तत्वात् । मयूरे शब्दमा० । स्त्रियां जातित्वात् ङीष् ।

घनफल पु० घनानि निविडानि फलान्यस्य । विकङ्कतवृक्षे राजनि० तत्फलानां निविडतया जायमानत्वात्तथात्वम् ।

घनमूल न० घनस्य समत्रिघातस्य मूलमाद्यम् । यस्य समाङ्कत्रयघातस्य घनरूपता तादृशे अङ्के । एकाद्यङ्कानां घनमूलादि प्रदर्श्यन्ते

१।८।२७।६४।१२५।२१६।३४३।५१२।७२९।१०००
१।२।३।४।५।६।७।८।९।१०

तस्य मूलानयनं लीला० उक्तं यथा

“अथ घनमूले करणसूत्रं वृत्तद्वयम् । “आद्यं घनस्थानमथाघने द्वे पुनस्तथान्त्याद्घनतो विशोध्य । घनं पृथक्स्थं, पदमस्य कृत्या त्रिघ्न्या तदाद्यं विभजेत् फलन्तु । पंक्त्यां न्यसेत्, तत्कृतिमन्त्यनिघ्नीं त्रिघ्नीं त्यजेत्तत्प्रथमात्, फलस्य । घनं तदाद्याद्घनमूलमेवं पङ्क्तिर्भवेदेवमतः पुनश्च”

अस्यार्थः यस्य घनमूलं गृह्यते तस्याद्यं स्थानं घनस्थानं स्यात् घनशोधनस्थानमित्यर्थः । अथ द्वे स्थाने अघने तदतिरिक्ते तथा पुनः घनस्थानम् अघने द्वे इति पुनःपुनरित्यर्थः। अन्त्यात्घनतः स्थानात्घनं विशोध्य तस्य घनस्य पदं पृथक्स्थं स्थाप्यं तस्य पदस्य कृत्या त्रिघ्न्या तदाद्यम् अघनस्थानं विभजेत् । फलं तु पदमूलपङ्क्त्यां न्यसेत् । तस्य फलस्य कृतिम् अन्त्यनिघ्नीं पङ्क्तिस्थतदतिरिक्तपदकृतिनिघ्नीमित्यर्थः । त्रिघ्नीञ्च तत्प्रथमादाद्यघनस्थानात् त्यजेत् । तदाद्यात्घनस्थानात्फलघनं त्यजेत् । एवं पुनः तथा अस्य पङ्क्त्यात्मकपदस्य कृत्या त्रिघ्न्या तदाद्यं विभजेत् । फलन्तु पङ्क्त्यां न्यसेत् । तत्कृतिम् अन्त्यनिघ्नीं त्रिघ्नीं तत्प्रथमात् त्यजेत् । तदाद्यात् फलस्य घनं त्यजेदिति । एवंकृते या पङ्क्तिर्भवेत् तद् घनमूलं भवति” । “अङ्कस्य वामागतिः” इत्युक्तेः वामस्थिताङ्कस्यान्त्यत्वं दक्षिणस्थस्य चाद्यत्वमिति बोध्यम् । घनपदमप्यत्र । “घनपदञ्च ततोऽपि घनात् सखे ! यदि घनेऽस्ति घना भवतो मतिः” लीला० । घनं मूलमस्य । २मोरटवृक्षे पु० राजनि० ।

घनरस पु० घनस्य मेघस्य मुस्तकस्य वा रसो निष्यन्दः । १जले । २कर्पूरे च कर्स० । ३ सान्द्ररसे । घनो रसोऽस्य । ४पीलुपर्ण्यां ५मोरटवृक्षे च मेदि० । ६निविड़रसके त्रि० । जले तु न० रत्नको० ।

घनवर्त्मन् न० ६त० । आकाशे “घनवर्त्म सहस्रधेव कुर्वन्” [किरा० ।

घनवल्लिका स्त्री घना निविड़ा वल्ली यस्याः कप् ह्रस्वः । १अमृतस्रवालतायाम् । घनस्य वल्लीव २विद्युति राजनि० ।

घनवल्ली स्त्री घनस्य मेघस्य वल्लीव । १विद्युति २अमृतस्रवालतायाम् राजनि० ।

घनवात पु० घनो निविड़ो वातोऽत्र । १नरकभेदे हेमच० । [६त० । २मेघवाते ।

घनवास पु० घनो वासो गन्धोऽस्य । कुष्माण्डे हारा० ।

घनवाहन पु० घन इव शुभ्रं वाहनमस्य । १शिवे । घनो मेघो वाहनमस्य । २इन्द्रे च हेमच० ।

घनवीथि स्त्री घनानां वीथिः । आकाशे । “घनवीथिवीथिमवतीर्णवतः” माघः ।

घनश्याम पु० घनः मेघइव श्यामः । निविड़कृष्णवर्णे । यदि “अये राम घनश्याम ! चुम्बामि मुखपङ्कजम् । जीवामि शोकेन पुनर्द्रक्ष्यामि ते मुखम्” महानाटकम् । हेमाम्बरं “समानकर्णविन्यस्तस्फुरन्मकरकुण्डलम् । घनश्यामं श्रीवत्सं श्रीनिकेतनम्” भाग० श्रीकृष्णोक्तौ ।

घनसार पु० घनस्य मुस्तकस्य सारः । १कर्पूरभेदे १७२२ पृ विवृतिः । “शरदिन्दुकुन्दघनसारनीहारहारेत्यादि” दशकुमा० । घनो निविड़ः सारोऽस्य । २दक्षिणावर्त्तपारदे मेदि० । ३वृक्षभेदे ४जले च धरणी । ६त० । ५अभ्रे वारिदे ।

घनस्कन्ध पु० घनः स्कन्धो यस्य । कोशाम्रवृक्षे राजनि० ।

घनस्वन पु० ६त० । १मेघध्वनौ । घनेन तज्जलेन सुष्ठु स्वनिति स्वन—अच् ३त० । २तण्डुलीयशाके राजनि० ।

घनहस्त पु० घनः समत्रिघातमितो हस्तोऽत्र । दीर्घविस्तारोच्चेषु १हस्तमाने २मागधप्रस्थखारिकायां च “हस्तोन्मितैर्विस्तृतिदैर्घ्यपिण्डैर्यद्द्वादशास्रं घनहस्तसंज्ञम् । धान्यादिके तद्घनहस्तमानं शास्त्रोदिता मागधखारिका सा” लीला० ।

घना स्त्री घन+अस्त्यर्थे अच् । १माषपर्ण्यां २रुद्रजटायाञ्च राजनि० तयोर्निविडपत्रत्वात् तथात्वम् । ३निविडायां स्त्रियाम् । “गरीयसीमपि घनाम्” (वाचम्) माघः ।

घनाकर पु० ६त०। घनानामाकरः घनान् आकिरति आ+कॄ-अच् वा। वर्षाकाले शब्दरत्ना०।

घनागम पु० आगम्यतेऽत्र आ+गम-आधारे घञ्। घनानां मेघानामागमः ६त०। वर्षाकाले "घनागमे राजपथे हि पिच्छिले" नैष०। भावे घञ् ६त०। २मेघागमने च।

घनाघन पु० हन-अच् नि०। १इन्द्रे २वर्षुकमेघे मत्ते घातुके ३गजे, अमरः ४अन्योन्यघट्टने पु०। ५निरन्तरघातुके त्रि० हेमच०। "ततोऽर्जुनं भिन्नकटेन दन्तिना घनाघनेनानिलतुल्यवर्चसा" भा० क० १८अ०। वर्षुकमेघश्च भा० शा० २२०अ० दर्शितो यथा "समुह्यमाना बहुधा येन नीताः पृथग्घनाः। वर्षमोचकृतारम्भास्ते भवन्ति घनाघनाः" "असज्जद्वायुनाक्षिप्तो यथा खस्थो घनाघनः" हरि० ८७। ७काकमाच्यां स्त्री

घनात्यय पु० घनानामत्ययोऽत्र। शरत्काले हेमच०। "वार्त्तिकानां घनात्यये" सुश्रु०। ६त०। २घनातिक्रमे पु०। घनव्यवायोऽप्यत्र। "घनव्यवायेन गभस्तिमानिव" रघुः

घनामय पु० घनो दृढः आमयो यस्मात् ५ब०। खर्ज्जूरवृक्षे त्रिका०।

घनामल पु० घनोऽमलः विशेषणस०। वास्तूकशाके त्रिका०

घनाश्रय पु० ६त०। आकाशे हेमच०।

घनोदधि पु० घन उदधिरत्र। नरकभेदे हेमच०।

घनोपल पु० ६त०। करके (शिल) हेमच०।

घम्ब गतौ भ्वा० पर० सक० सेट्। घम्बति अघम्बीत्। जघम्ब

घर पु० हन्यते गम्यतेऽतिथिभिः हन- "हन्तेरन् घ च" उणा० नलोपश्च। गृहे दशपादीवृत्तिः।

घरट्ट पु० घृ-सेके णिच् घरं सेकमट्टते अट्ट-अतिक्रमे अण् उप० स०। (याँता) प्रसिद्धे सक्तुपेषण्याम् "प्रतिहट्टपथे घरट्टजात्" नैष०।

घर्घट पु० घृ-णिच् घरे सेकाय घटते घट अच्। (आङ्गारा) [मत्स्यभेदे शब्दर०।

घर्घर पु० घर्घेत्यनुकरणशब्दं राति रा-क। १घरट्टजादिध्वनिभेदे। २तद्युक्ते त्रि० "कलहान्न घनान् यदुत्थितादधुनाप्युज्झति घर्घरस्वरः" नैष०। ३पर्व्वतद्वारे ४द्वारे ५उलूके ६नदभेदे च पु० मेदि०। ६ध्वनिमात्रे ७हास्ये हेमच०। घर्घरनदश्च कङ्कदेशान्तर्गतः विन्ध्याद्रेर्निर्गतः गङ्गायां सङ्गतः चम्पानगरीतोऽनतिदूरपूर्वस्थः। (घाघर) लोकप्रसिद्धः ८क्षुद्रघण्ट्यां स्त्री। "घर्घरा क्षुद्रघण्टी स्यात्" मल्लि० धृतवाक्यम्। "चलावचूलाः कलघर्घरारवैः" माघः। घर्घरेति शब्दानुकरणम् तथा ध्वनिभेदः। तादृशध्वनिभेद एव घर्घरेति मल्लि०। ९वीणाभेदे मेदि०। घर्घर+अस्त्यर्थे अच्। घर्घर नदसङ्गतायां १०गङ्गायां स्त्री षा गौरा० ङीष्। घर्घरस्वनाप्यत्र। "घूर्णायती घूर्णिनिधिर्घर्घरी घूकनादिनी। घूकघूर्णापिञ्जरतनुर्घर्घरा घर्घरस्वना" काशीख० २९अ० गङ्गानामोक्तौ। स्वार्थे क नदभेदे पु०। "शोणे घर्घरके जलं तु रुचिदं सन्तापशोषापहम्। पथ्यं वह्निकरम् तथा तु बलदं क्षीणाङ्गपुष्टिप्रदम्" राजनि०।

घर्घरिका स्त्री घर्घरोऽस्त्यस्याः ठन्। १क्षुद्रघण्टिकायां २नदीभेदे ३वादित्रभाण्डे ४भृष्टधान्ये हेमच०। ५वाद्यभेदे विश्वः।

घर्घरित न० घर्घरं करोति णिच्-भावे क्त। शूकरजातीयध्वनिभेदे। "निशम्यते घर्घरितं स्वखेदं क्षयिष्णु मायामयशूकरस्य" भाग० ३।१३।२५।

घर्घुर्घा स्त्री घृ-णिच् घुर-ध्वनौ क्विप् तौ हन्ति हन-ड नि० हस्य घः। (घुरघुरिया) कीटभेदे यमकीटे रत्नमा०

घर्ब गतौ भ्वा० पर० सक० सेट्। घर्बति अघर्बीत्। जघर्ब

घर्म्म पु० घरति अङ्गात् घृ-सेके (घरणे) कर्त्तरि मक् नि० गुणः। १अङ्गनिष्यन्दे स्वेदे श्रमजवारिणि। घरत्यङ्गमनेन करणे मक्। २आतपे ३ग्रीष्मकाले तयोः अङ्गस्वेदसाधनत्वात्तथात्वम्। ४आतपयुक्ते दिवसे निघ०। घर्मश्च आतपादिव स्वरविकारसत्वादपि भवति यथाह शा०द०। "विकाराः सत्त्वसम्भूताः सात्त्विकाः परिकीर्त्तिताः। सत्त्वमात्रोद्भवत्वात्ते भिन्ना अप्यनुभावतः। स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः" इति विभज्य "वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिरिति" लक्षणं स्वेदो लक्षितः ५यज्ञे निघ०। "पितृभिर्घर्म्मसद्भिः" ऋ० १०।१५।९। "धर्म्मसद्भिः यज्ञसादिभिः" भा०। वै० घृ-दीप्तौ मक्। वैदिकप्रयोगे ६दीप्ते त्रि० घर्मस्वरशब्दे उदा०। ७रसे "मधुनः सारघस्य घर्मं पात वसवः" यजु० ३८।६। "घर्मं रसम्" वेददी० दुग्धादि निष्यन्दे दुग्धे पु० तस्य गोःक्षरणात्तथात्वम्। "घर्माय दीष्व" यजु० ३८।२। हे वत्स! घर्माय घर्मार्थं दीष्व देहि पयः क्षेपय मा सर्वं पासीत्यर्थः" वेददी०। "रज्जुं संदानमादाय" कात्या० श्रौ० २६।४।१। "सन्दानम् घर्मधुगबन्धनार्थाय पाशवती रज्जुः" कर्कः। "उपयमन्यामासिञ्चति घर्म्ममु

कात्या०श्रौ० २६।६।१७। "घर्म्यं घर्मसंबन्धि तन्मध्यस्थितमाज्यमुपयमन्यां स्रुचि आसिञ्चति" कर्कः परीशाभ्यां घर्मं सुत्पाद्य स्रुक्पुष्करस्योपर्य्यधोमुखं करोतीत्यर्थः" सं०व्या०घर्मसम्बन्धि घृतमुपयमन्यामासिञ्चति पूर्वं स्रुक्स्थम् नीतमधुना घर्मस्थं स्रुचि नयतीत्यर्थः" यजु० ३८।१६। वेददी०। तत्र निदाघकाले "निःश्वासहार्य्यांशुकमाजगाम घर्मः प्रियावेशमिवोपदेष्टुम्" रघुः। ऊष्मणि "स वमन् रुषाम्बु घनघर्मविगलदुरुगण्डमण्डलः" माघः।

घर्म्मचर्च्चिका स्त्री घर्मकृता चर्चिकेव। (घामाचि) इति ख्याते घर्मविचर्च्चिकायाम्। "स्वेदवाहीनि दुष्यन्ति क्रोधशोकभयैस्तथा। ततः स्वेदः प्रवर्त्तेत दौर्गन्ध्यं घर्मचर्च्चिका। राजिकाकृतिरुष्णोत्था यतो घर्मविचर्च्चिका" इति प्रयोगान्तरम्। घर्मविचर्च्चिकाप्यत्र।

घर्म्मदीधिति पु० घर्म्मा दीधितिर्यस्य। सूर्य्ये "यः सोम इव घर्म्मदीधितिः" रघुः। घर्म्मद्युति घर्म्मभानु घर्म्मरश्मिप्रभृतयोऽप्यत्र "घर्म्मद्युतेरिह दुहः पटलेन धाम्नाम्" किरा०। "या घर्म्मभानोस्तनयापि शीतलैः" माघः। "लोकालोकव्याहतो घर्म्मरश्मिः" भावः।

घर्म्मदुह् स्त्री घर्म्मं दुग्धं दोग्धि दुह–क्विप् ६त०। दुग्धदुहायां धेन्वाम् "घर्म्मधुग्ध्वाले चादोहे च" कात्या० श्रौ० २५।६।२। घर्म्मदुघाप्यत्र। "घर्म्मदुघाया दोहनप्रदेशे" तत्सूत्रे कर्कः।

घर्म्मपावन् घर्म्मं प्रवर्ग्यं पिबति पा–वनिप्। ऊष्मपाख्ये पितृगणभेदे। "स्वाहा पितृभ्य ऊर्द्ध्वबर्हिभ्यो घर्म्मपावभ्यः" यजु० ३८।१५।

घर्म्मसद् पु० घर्म्मे यज्ञे सीदति सद–क्विप्। यज्ञसादिषु पितृषु। "पूर्वैः पितृभिर्घर्म्मसद्भिः" ऋ० १०।१५।८।१०। "घर्म्मसद्भिः यज्ञसादिभिः" भा०।

घर्म्मस्तुभ् पु० घर्म्मं स्तुभ्नाति स्तुभ–क्विप्। वायौ। प्रचारेण घर्म्मनाशात्तस्य तथात्वम्। "घर्म्मस्तुभे (मारुताय) दिव आ पृष्ठे यज्वने" ऋ० ५।५४।१।

घर्म्मस्वरस् पु० जिघर्त्ति वै० घृ–क्षरणे दीप्तौ मक् नि०। घर्म्माः दीप्ताः स्वृ–असुन् स्वरसो येषाम्। दीप्तध्वनौ। "घर्म्मस्वरसो नद्यो अप व्रन्" ऋ० ४।५५।६ "घर्म्मस्वरसो दीप्तध्वनयः" भा०।

घर्म्मस्वेद पु० घर्मोद्दीप्तः स्वरन् वा स्वेदो, घर्मे यस्य स्वेदो गतिर्वाऽस्य। १दीप्तगमने २क्षरत्स्वेदजले ३यज्ञे गन्तरि च "ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्मस्वेदेभिर्द्रविणं व्यानट्" ऋ० १०।६७।७। घर्मस्वेदेभिः दीप्तागमनैर्यद्वा क्षरदुदकैः अथवा घर्मो यज्ञः तं प्रति गन्तृभिः" भा०।

घर्म्मान्त पु० घर्मस्य ऊष्मणोऽन्तो यत्र। वर्षाकाले राजनि०। "घर्मान्ते तोयदोर्म्मिभिः" हरिवं० १७७अ०।

घर्म्मान्तकामुकी स्त्री ७त०। बलाकायाम् राजनि०। वर्षाकाले एव तस्याः कामयमानत्वात् तथात्वम्।

घर्षण न० घृष–भावे ल्युट्। (घषा) व्यापारभेदे।

घर्षणाल पु० घर्षणायालति अल+पर्य्याप्तौ अच्। शिलापुत्रे (लोटा) त्रिका०। [त्रिका०।

घर्षणी स्त्री घृष्यतेऽसौ कर्म्मणि ल्युट् ङीप्। हरिद्रायां

घल न० घोल+पृषो०। तक्रे घोले शब्दच०।

घष(स) क्षरणे भ्वा० आत्म० अक० सेट् इदित्। घंष(स)ते अघंषि(सि)ष्ट। जघंषे(से)

घस भक्षणे भ्वा० पर० सक० अनिट्। घसति। लृदित् अघसत्। जघास जक्षतुः जघसिथ जघस्थ। घस्तः वेदे ग्धः लोके, घस्तः।

घसि पु० घस–भावे इन्। भक्षणे हेमच०।

घस्मर त्रि० घस–क्मरच्। भक्षणशीले। "सुराध्वरे घस्मरजित्वरेण" भट्टिः। "घस्मरा नष्टशौचाश्च भाव इत्यनुशुश्रुमः" भा० क० ४० अ०। कौशिकपुत्राणां गर्गशिष्याणां गुरुगवीमांसभक्षणात् व्याधमृगादियोनिप्राप्तानां सप्तानां मध्ये मृगभेदे "शुभेन कर्मणा तेन जाता जातिस्मरा मृगाः। त्रासादुत्पाद्य संविग्ना रम्ये कालञ्जरे गिरौ। पण्डितो उन्मुखो नित्यवित्रस्तः स्तब्धकर्णो विलोचनः। घस्मरो नादी नामतस्तेऽभवन्मृगाः" हरिवं० २१अ०।

घस्र पु० घसत्यन्धकारं घस–रक्। १दिवसे अमरः। २हिंस्रे त्रि० मेदि० ३कुङ्कुमे न त्रिका०।

घा स्त्री हन–बा०ड हस्य घश्च। १आघातं २घाते च मेदि०।

घाट पु० घुण्घट–अच्। ग्रीवायाः पश्चाद्भागे अवटौ (घाड़) शब्दर०। तत्रैवार्थे स्त्री टाप् अमरः। "दोषास्तु दुष्टास्त्रय एव मन्यां संपीड्य घाटां सरुजाः सतीव्राम्" सुश्रु०। ३घट्टे ४गवादिप्रचारस्थानभेदे "घाटाः किं बह्वोमातरभिन्नाः सर्व्वतोव्रजे" हरिवं० ३२१अ०। घाटा अस्त्यस्य अर्श०अच्। ५घाटायुक्ते त्रि०।

घाटाल पु० घाटा+सिध्मा० अस्त्यर्थे लच्। सुश्रुतोक्ते सान्निपातिकविद्रधिरोगलक्षणभेदे "नानावर्णरुजास्रावो घाटालो विषमो महान्। विषमं पच्यते चापि विद्रधिः सान्निपातिकः" सुश्रुतः"। घाटालस्य नद्यादावता-

एस्थानत्रय गम्भीरतायुक्तत्वात् तद्वदुन्नतामतत्वेन च तथात्वम् ।

घाटिका स्त्री घाटा स्वार्थे क । घाटायाम् शब्दच० ।

घाण्टिक पु० घण्टया चरति ठक् । "राज्ञां प्रबोधसमये घण्टाशिल्पास्तु घाण्टिकाः" इत्युक्तलक्षणे राज्ञां प्रबोधनाय घण्टां वादयित्वा १स्तुतिपाठके २घण्टावादके त्रि० अमरः । अस्तु घाटिकइत्यमरटीकायां भरतः पपाठ । घण्टा तदाकारं पुष्पमस्त्यस्य ठन् । ३धुस्तुरे हारा० तस्य तदाकारकुसुमत्वात्तथात्वम् "पुष्पे घाण्टिकघोषिकयवनवणिक्क्रितवकुसुमानि" । "उपतापं यान्ति च घाण्टिका विभेदश्च शिलानाम् । वृ०स०१०अ० । शपथवचनेन ४व्यवहारिणि" प्रा० वि० । "राजपौरुषिके विप्रे घाण्टिके परिचारके" । दैवपैत्रयोः अपाङ्क्तौ तस्याभोज्यान्नतामाह यमः "राजान्नं हरते तेजः" इत्युपक्रमे "पाप्मा तथान्नं शौण्डस्य घाण्टिकस्य तथैव च । इतरे ये त्वभोज्यान्नास्तेषामन्नं विवर्जयेत् । तप्तकृच्छ्रं द्वादशरात्रं वा तप्तकृच्छ्रमथापि वा" । "घाण्टिकोदिव्यवाचकः" प्रा० वि० ।

घात पु० हन-घञ् । १प्रहारे, २मारणे, ३ पूरणे, गुणने च । "चरेत् व्रतमहत्वाऽपि घातार्थञ्चेत् समागतः" याज्ञ० । "पतन्ति द्विरदा भूमौ वज्रघातादिवाचलाः" भा० आ० १४८अ० । "समद्विघातः कृतिरुच्यतेऽथ" लीला० । करणे घञ् । ४वाणे मेदि० । चतुरङ्गक्रीडायां वस्त्रादिबलानां स्थानविशेषेषु ५अन्यबलनागमे तदपसारणेन तत्स्थाने तदाक्रमे । चतुरङ्गशब्दे दृश्यम् । जन्मतारापेक्षया ६निधनाख्ये सप्तमषोडशपञ्चविंशतितमनक्षत्रे च ।

घातक त्रि० घातयति हन-ण्वुल् । हननकर्त्तरि । "अनुमन्ता विशसिता निहन्ता क्रयविक्रयी । संस्कर्त्ता चोपहर्त्ता च खादकश्चेति घातकाः" मनुः । अत्र खादकस्यापि घातकत्वमुक्तं मिताक्षरायां तु कर्तृप्रयोजकादीनां घातकत्वं समर्थितं यथा

"हन्तिरयं प्राणवियोगफले व्यापारे रूढः । यद्व्यापारसमनन्तरङ्कालान्तरे वा कारणान्तरनिरपेक्षः प्राणवियोगो भवति स ब्राह्मणं हतवानिति मुख्यः" । "तथाशब्दः प्रकारवचनोऽनुग्राहकप्रयोजकादिकर्तृसंप्रहार्थः । अनुग्राहकश्च यः पलायमानममित्रमुपरुन्धन् परेभ्यश्च हन्तारम्परिरक्षन् हन्तुर्दृढिमानमुपजनयन्नुपकरोति स उच्यते । अतएव मनुना अनुग्राहकस्य हिंसाफलसम्बन्धो दर्शितः "बहूनामेककार्याणां सर्वेषाम् शस्त्रधारिणाम् । यद्येकोघातयेत्तत्र सर्वे ते घातकाः स्मृताः" इति । तथा प्रयोजकादीनामप्यापस्तम्बेन फलसम्बन्ध उक्तः "प्रयोजयिताऽनुमन्ता कर्त्ता चेति स्वर्गनरकफलेषु कर्म्मसु योभूय आरभते तस्मिन् फलविशेषः" इति । तत्राप्रवृत्तस्य प्रवर्त्तकः प्रयोजकः स च त्रिप्रकारः । आज्ञापयिताऽभ्यर्थयमान उपदेष्टेति । तत्राज्ञापयिता नाम स्वयमुक्तः सन्नोचभृत्यादिकं यः प्रेरयति मदीयममित्रञ्जहीति स उच्यते । अभ्यर्थयमानस्तु यः स्वयमसमर्थः प्रार्थनादिना मच्छत्रुं व्यापादयेति समर्थं प्रवर्त्तयति सोऽभिधीयते । अनयोश्च स्वार्थसिद्ध्यर्थमेव प्रयोक्तृत्वम् । उपदेष्टा पुनः स्वं शत्रुमिमं व्यापादयेति मर्म्मोद्घाटनाद्युपदेशपुरःसरम्प्रेरयन् कथ्यते । तत्र च प्रयोज्यगतमेव फलमिति तेषाम्भेदः । अनुमन्ता तु प्रवृत्तस्य प्रवर्त्तकः स च द्विप्रकारः कश्चित् स्वार्थसिद्ध्यर्थमनुजानाति कश्चित्परार्थमिति । नन्वनुमननस्य कथं हिंसाहेतुत्वं न तावत् प्राणवियोगसम्पादनेन, तस्य साक्षात्कर्तृव्यापारजन्यत्वात् नापि प्रयोजकस्येव साक्षात् कर्तृप्रवृत्त्युत्पादनद्वारेण, प्रवृत्तस्य प्रवर्त्तकत्वात् । न च साधु त्वया व्यवसितमिति प्रवृत्तमेवानुमन्यत इति शङ्कनीयम् । तादृशस्यानुमननस्य हिंसाप्रत्यहेतुत्वादप्रार्थत्वाच्च । उच्यते यत्र हि राजादिपारतन्त्र्यात् स्वयं मनसा प्रवृत्तोऽपि प्रवृत्तिविच्छेदादागामिदण्डभयाद्वा शिथिलप्रयत्नो राजाद्यनुमतिमपेक्षते तत्रानुमतिर्हन्तुः प्रवृत्तिमुपोद्बलयन्ती हिंसाफलम्प्रति हेतुतां प्रतिपद्यते । तथा योऽपि भर्त्सनेन ताडनधनापहारादिना परान् कोपयति सोऽपि मरणहेतुभूतमन्यूत्पादनद्वारेण हिंसाहेतुर्भवत्येव । अतएव विष्णुनोक्तम् "आक्रुष्टस्ताडितोवापि धनैर्वापि वियोजितः । यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" । तथा "ज्ञातिमित्रकलत्रार्थं सुहृत्क्षेत्रार्थमेव च । यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकमिति" । न च कृतेष्वाक्रोशनादिषु कस्यचिन्मन्यूत्पत्त्यदर्शनादकारणतेति शङ्कनीयम् पुरुषस्वभाववैचित्र्यात् येऽल्पतरेणापि निमित्तेन जातमन्यवोभवन्ति तेष्वव्यभिचार इति नाकारणता । एतेषाञ्चानुग्राहकप्रयोजकादीनां प्रत्यासत्तिव्यवधानापेक्षया व्यापारगतगुरुलाघवापेक्षया च फलगुरुलाघवात् प्रायश्चित्तगुरुलाघवञ्चोह्य-

व्यम् "यो भूय आरभते तस्मिन् फलविशेषः" इति वचनात्तथाह्यनुग्राहकस्य तावत् स्वयमेव हिंसायां प्रवृत्तत्वेन स्वतन्त्रकर्तृत्वे सत्यपि साक्षात्प्राणवियोगफलकखड्गप्रहारादिव्यापारयोगित्वाभावेन साक्षात्कर्तृवद्भूयो हिंसारम्भकत्वाभावादल्पफलत्वमल्पप्रायश्चित्तं च, प्रयोजकस्य तु स्वतन्त्रकर्तृप्रवृत्तिजनकत्वेन व्यवहितत्वात्ततोऽल्पफलत्वं, प्रयोजकादीनां मध्ये परार्थप्रवृत्तेरुपदेष्टुरल्पफलत्वम्। ननु प्रयोजकस्य हस्तस्थानीयत्वात् प्रयोज्यस्य न फलसम्बन्धो युक्तः यदि परप्रयुक्त्या प्रवर्त्तमानस्यापि फलसम्बन्धस्तर्हि स्वपतितडागखनित्रप्रभृतीनामपि मूल्येन प्रवर्त्तमानानां स्वर्गादिफलप्राप्तिप्रसङ्गः। उच्यते। "शास्त्रफलम्प्रयोक्तरीति" न्यायेनाधिकारिकर्तृगतफलजनका देवकुलतडागनिर्माणादयः। न च स्वपतितडागखनित्रादयो देवकुलतडागादिकरणादिष्वधिकारिणोऽस्वर्गकामित्वात्। अत्र पुनः परप्रयुक्त्या प्रवर्त्तमानानामपि हिंसायामधिकारित्वाद्भवत्येव तदतिक्रमनिबन्धनो दोषः। अनुमन्तुस्तु प्रयोजकादप्यल्पफलत्वम्प्रयोजकव्यापाराद्बहिरङ्गत्वाल्लघुत्वाच्च अनुमननस्य, निमित्तकर्तुः पुनराक्रोशकादेः प्रवृत्तिहेतुभूतमन्युजनकत्वेन व्यवहितत्वात्कारणानुसन्धानं विना प्रवृत्तत्वाच्चानुमन्तुः सकाशादल्पफलत्वम्। ननु यदि व्यवहितस्यापि कारणत्वन्तर्हि मातापित्रोरपि हन्तृपुरुषोत्पादनद्वारेण हननकर्तृत्वप्रसङ्गः। उच्यते नहि पूर्वभावित्वमात्रेण कारणत्वम् अकारणस्यापि तथा भावित्वापत्तेः। यत् खलु स्वव्यतिरिक्तकार्योत्पत्त्यनुगुणव्यापारयोगि भवति तद्धि कारणं, "यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयादिति" रथन्तरसामत्वैव क्रतोरैन्द्रवायवाग्रताकरणं, न हि तत्र सोमयागः स्वरूपेण कारणं व्यभिचारात्। न च पित्रोस्तादृग्विधकारणलक्षणयोगित्वमिति नातिप्रसङ्गः। अनेनैव न्यायेन धर्माभिसन्धिना निर्मितकूपवाप्यादौ प्रमादपतितब्राह्मणादिमरणे खानयितुर्दोषाभावः। न हि कूपोऽनेन खानितः अतोऽहमात्मानं व्यापादयामीत्येवं कूपखनननिमित्तव्यापादनं यथाऽऽक्रोशादौ अतः कूपकर्तुरपि कारणत्वमेव न पुनर्हिंसाहेतुत्वमिति मातापितृतुल्यतैव। तथा कचित्सत्यपि हिंसानिमित्ततायोगित्वे परोपकारार्थं प्रवृत्तौ वधदोषाभावः यथाह संवर्त्तः "बन्धने गोचिकित्सार्थे मूढगर्भविमोचने। यत्ने कृते विपत्तिश्चेत् प्रायश्चित्तं न विद्यते। औषधं स्नेहमाहारं ददद्गोब्राह्मणादिषु। दीयमाने विपत्तिः स्यान्न स पापेन लिप्यते। दाहच्छेदशिराभेदप्रयत्नैरुपकुर्वताम्। प्राणसन्त्राणसिद्ध्यर्थं, प्रायश्चित्तं न विद्यते" इति। एतच्च दानं निदाननिपुणभिषग्विषयम्। इतरत्र "भिषङ्मिथ्या चरन् दाप्यः" इत्यत्र दोषो दर्शितः। यत्र तु मन्युनिमित्ताक्रोशनादिकमकुर्वतोऽपि नाम गृहीत्वोन्मादादिनात्मानं व्यापादयति तत्रापि न दोषः। "अकारणं तु यः कश्चित् द्विजः प्राणान् परित्यजेत्। तस्यैव तत्र दोषः स्यान्न तु यम्परिकीर्त्तयेदिति" स्मरणात्। तथा यत्राप्याक्रोशकादिजनितमन्युरात्मानं खड्गादिना प्रहृत्य मरणाद्वागाक्रोशनादिकृता धनदानादिना सन्तोषितो यदि जनसमक्षमुच्चैः श्रावयति नाक्रोशकस्यापराध इति तत्रापि वचनान्न दोषः। यथाह विष्णुः "उद्दिश्य कुपितो हत्वा तोषितः श्रावयेत्पुनः। तस्मिन्मृते न दोषोऽस्ति द्वयोरुच्छ्रावणे कृते" इति। एतेषाञ्च प्रयोजकादीनां दोषगुरुलघुभावपर्यालोचनया प्रायश्चित्तविशेषं वक्ष्यामः" मिता०।

प्राय० वि० तस्य षड्विधत्वमुक्तं यथा "प्राणवियोगफलकव्यापारो वधः तन्निष्पादकत्वञ्च साक्षात् परम्परोदासीनं स्मृतिकारपरिगणितं वधित्वम् अतो नैषुकारादिष्वतिव्याप्तिः तच्च पञ्चविधं स्मृतिस्वरसात् कर्त्ता प्रयोजकोऽनुमन्ता अनुग्राहको निमित्ती चेति यथा आपस्तम्बः "प्रयोजयिता अनुमन्ता कर्त्ता चेति सर्वे स्वर्गनरकफलभोक्तारो योभूय आरभते तस्मिन् फले विशेषः"। अनुग्राहकमाह याज्ञवल्क्यः "घ्नन्तं सहत्वापि घातार्थञ्चेत् समागतः" तथा मनुः नामेककार्याणां सर्वेषां शस्त्रधारिणाम्। यद्येको घातकस्तत्र सर्वे ते घातकाः स्मृताः"। भविष्ये "यद्येकं बहवो विप्रा घ्नन्ति विप्रमनागसम्। तदेषां निष्कृतिं वच्मि शृणुष्वैकमना गुह!। तेषां यस्य प्रहारेण स विप्रो निधनं गतः। सरस्वतीप्रतिस्रोतः सञ्चरेत् पापशुद्धये"। स च द्विविधः। एकोवध्यप्रतिरोधकः अन्यः स्वल्पप्रहर्त्ता। निमित्तिनमाह विष्णुः "अन्यायेन गृहीतस्वो न्यायमर्थयते तु यः। यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्"। अत्र नरान्तरव्यापारव्यवधानेन वधनिष्पादकः कर्त्ता यः कर्त्तारं कारयति स प्रयोजकः सोऽपि द्विविधः। एकः स्वतोऽप्रवृत्तमेव पदातिं वेतनादिना वधार्थं प्रवर्त्तयति

अपरः स्वतःप्रहन्तैव मन्त्रोपायोपदेशादिना प्रोत्साहयति। अनुमतिदाता अनुमन्ता अनुमतिश्च द्विविधा। एका यद्विरोधाद्धननं न सम्भवति तस्य विरोधिनोऽभया निरोधः कर्त्तव्य इति बुद्धिरनुमतिः। अपरा एवं हन्मीतिवचने शक्तस्याप्रतिषेधः। अतएव कात्यायनः "स्वं द्रव्यं दीयमानन्तु यत् स्वामी न निवारयेत्। अर्थिभिर्वा परेणापि दत्तं तेनैव तद्भवेत्" दत्तमिति दातुमनुमतमित्यर्थः। तथा "प्रार्थ्यमानोऽर्थिना यत्र योऽर्थो न विधारितः। दानकालेऽथवा तूष्णीं स्थितः सोऽर्थोऽनुमोदितः"। अत्राप्रतिषेध एवानुमतिरुक्ता। अतएव "परवचनमप्रतिषिद्धमनुमतं भवतीति" न्यायविदः। वध्यस्य पलायनादिरोधकोऽनुग्राहकः। उद्देश्यत्वे सति हन्तुर्मन्यूत्पादको निमित्ती। तत्र प्रयोजकस्य कर्तृप्रयुक्तिद्वारेण वधकारणत्वम् अनुमन्तुश्च हन्तुर्निर्भयत्वेन दृढतरप्रहारोत्पत्तिद्वारेण, अनुग्राहकस्य पलायनाद्यस्तम्भनेन हननीयस्थैर्यं कुर्वतः प्रहारस्वरूपोत्पत्तिद्वारेण कारणत्वं, निमित्तिनो हन्तृमन्यूत्पादनद्वारेण इति प्रयोजकादीनां च चतुर्णां व्यवहितहननकारणानाम् अवान्तरव्यापारप्रकारभेदाद्भेदः। अतः पञ्चविधं वधित्वम्"॥

मतोजिकनमतं प्रदर्श्य दूषयित्वा स्वमतं तेन दर्शितं यथा "तस्माच्चेतनान्तरव्यापाराव्यवधानेन धात्वर्थनिष्पादकश्चेतनः कर्त्ता, कर्मकारकादिकारकचक्रप्रयोक्ता वा कर्त्तेति सामान्येन कर्तृलक्षणम्। यत्र पदातिद्वारा ब्राह्मणं हन्ति तत्र न पदातेः कारणत्वं हननकर्मकाले कर्तृव्यापारव्याप्यत्वाभावात् न वा तस्याव्यवधायकत्वं प्रमाणाभावात् खड्गस्य तु व्यवधायकत्वेऽपि न दोषः तस्य चेतनत्वाभावात् न वा तस्य व्यवधायकत्वं हन्तृव्यापारे हन्तुः साक्षादेव कारणत्वात् द्वैधीभावफलनिष्पत्तौ खड्गव्यापारस्य सहकारितामात्रम् अतएवाश्वेन पदातिना च राजा सञ्चरतीति सत्यपि चेतनान्तरव्यापारे तस्य सहकारितामात्रं न तु व्यवधायकत्वं स्वव्यापारे राज्ञः साक्षात्कारणत्वात् तवस्तु यजमानस्य स्वव्यापारे यागे देवतोद्देशेन द्रव्यत्यागलक्षणे साक्षात्कारणत्वमेव प्रक्षेपादौ च तदङ्गे ऋत्विगादिव्यापारः सतोऽपि साधारणद्रव्यत्यागात् सप्तदशानामेव कर्तृत्वम् एकस्य तदसम्भवात् यागव्यतिरिक्तकर्म्मण्यपि प्रत्येकं सप्तदशानां कर्म्मव्यवस्था। अथ वा "स्वर्गकामो यजेत" "सप्तदशावरा ऋद्धिकामाः सत्रमुपासीरन्निति" वेदे कामिनां कर्तृत्वावगतेस्तदनुपपत्त्या ऋत्विग्व्यापाराणां भावो न व्यवधायकः आग्नेयादिकरणत्वानुपपत्तिकल्पितोऽनपत्यपूर्व्वमिव। न चेह तथा, कर्तृत्वे प्रमाणाभावात् तस्मात् पूर्व्वोक्तकर्तृलक्षणाक्रान्तत्वादप्रहन्तः प्रहन्तृपदातिप्रेरको न वधकर्त्ता किन्तु प्रयोजक एव। अनुग्राहकोऽपि न कर्त्ता कर्तृलक्षणाव्याप्तत्वात् एवं तु विशेष उक्त एव। पाक्षिकमरणानुमन्तृत्वान्निमित्तिनोऽनुमन्तृत्वलक्षणम् एवं प्रयोजकस्यानुमन्तृत्वापत्तेः अतो मन्यूत्पादनद्वारा योनिमित्तवान् स निमित्तीत्यनुमन्तृतः प्रकारान्तरप्रणयं प्रयोजकादिवत् कृतो यथा कथञ्चिन्निमित्ततामात्रेण यदि निमित्तवधः तदा मातापित्रोरिषुकारस्यापि निमित्तत्वं स्यादिति निरस्तं, ननु सत्यपि मन्यूत्पादने, न निमित्तत्वं यथा वध्यस्य वधकमन्यूत्पादकस्य, नह्यनुत्पादितमन्युः कश्चित् कमपि व्यापादयति, असत्यपि मन्यूत्पादे निमित्तत्वं यथा मरणाभिसन्धानेन अन्ने विषप्रक्षेप्तुर्नहि तस्य कर्तृत्वं सम्भवति नरान्तरविषभक्षणव्यापारव्यवधानात् अतस्तत्रापि कर्तृत्वमस्तीति भवदेवमतं निरस्तं सर्वं कर्त्रादिचतुष्टयविलक्षणो वाचनिकनिषिद्धनिमित्तभाव एव निमित्तीति निमित्तिलक्षणं नेषुकारस्य वध्यस्य वा निमित्तमात्रो निषिद्धः अभव्यान्नदातुश्च निषिद्ध एव। अहितमाहारादिकं मरणफलकं हितनिश्चयेन क्रियमाणं न पापहेतुरिति वदता अहितं मरणफलकमहितबुद्ध्या क्रियमाणं पापहेतुरिति दर्शितं निमित्तवधापवादकवचनेन, एतच्च वक्ष्यते एवं यत्राभिसन्धानं नास्ति हेत्वन्तरव्यवस्थापितं विषं खादित्वा कश्चिन्म्रियते तत्र न वधित्वम् एवं व्याघ्रादिमारणार्थकृतयन्त्रादावन्यस्य मरणे न वधित्वम् एवं कूपखातादावपि। मरणाभिसन्धाने तु तत्रास्त्येव। तथा यः कश्चित् संशयस्थाने प्रस्थाप्यते बलवती च मरणाशङ्का भवति तत्र प्रस्थापितोयदि म्रियते तत्र वधित्वं, पाक्षिकमरणाभिसन्धानात् अतएवेतरनिमित्तिनो विषप्रक्षेप्तुर्जघन्यत्वम् तथा च याज्ञवल्क्यः "कृच्छ्रत्रयं गुरुः कुर्यात् म्रियेत प्रहितो यदि"। बौधायनः "गुरुः प्रयुक्तश्चेन्म्रियते गुरुस्त्रीन् कृच्छ्रान् चरेत्"। उपकाराचरणेन वधनिष्पत्तौ निमित्तवधापवादमाह संवर्त्तः "औषधं स्नेहमाहारं ददद्गोब्राह्मणेषु च। प्राणिनां प्राणवृत्त्यर्थं प्रायश्चित्तं न विद्यते। यन्त्रणे गोचिकित्सायां मूढगर्भविमोचने।

यत्ने कृते विपत्तिः स्यात् प्रायश्चित्तं न विद्यते"। मूढगर्भो ऽन्तर्मृतगर्भः। तथा "दाहच्छेदशिराभेदप्रयत्नैरुपकुर्व्वताम्। द्विजानां गोहितार्थेषु प्रायश्चित्तं न विद्यते"। याज्ञवल्क्यः "क्रियमाणोपकारे तु मृते विप्रे न पातकम्। विपाके गोवृषाणाञ्च भेषजाग्निक्रियासु च"। विशेषमाहाङ्गिराः "औषधे तु न दोषोऽस्ति स्वेच्छया पिबते यदि। अन्यथा दीयमाने तु प्रायश्चित्तं न संशयः"। मृत्यूत्पादने निमित्तवधमाह वृद्धशातातपः "गोभूहिरण्यहरणे स्त्रीसम्बन्धकृतेऽपि च। यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" विष्णुः "अन्यायेन गृहीतस्वो न्यायमर्थयते तु यः। यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्"। तथा वृहस्पतिनाम्ना पठितानि वचनानि "ज्ञातिमित्रकलत्रार्थं सुहृत्क्षेत्रार्थमेव च। यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्। गोभूहिरण्यहरणे स्त्रीणां क्षेत्रगृहस्य च। यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्। गुर्व्वर्थं पितृमातृर्थमात्मार्थमथ वा पुनः। यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्" षट्त्रिंशन्मतमिति कृत्वा पठितम् "आक्रोशितस्ताडितो वा धनैर्वा परिपीडितः। यमुद्दिश्य त्यजेत् प्राणांस्तमाहुर्ब्रह्मघातकम्"। अत्रोद्देशप्रति सर्व्वत्र कीर्त्तनात् उद्देशाभावे निमित्ततामात्रेण वधित्वं नास्ति, अर्थाद्धरणाक्रोशनताडनादीनां मन्युकारणानामुपात्तत्वादेतेषामभावे धनाद्यर्थं वृक्षारोहणादिना ये म्रियन्ते तत्र कीर्त्तनमात्रेण निमित्तवधो नास्ति तथा च पठन्ति "असम्बन्धेन यः कश्चिद् द्विजः प्राणान् परित्यजेत्। तस्यैव तद्भवेत् पापं न तु यं परिकीर्त्तयेत्"। असम्बन्धेनेति वाक्कृतादिसकलापराधसम्बन्धाभावपरम्। यच्च "सम्बन्धेन विना देव! शुष्कवादेन कोपितः"। इति भविष्यपुराणवचनं आर्षिकप्रायश्चित्तविधायकम् तत् वाक्कृतेतरापराधसम्बन्धाभावपरं "शुष्कवादेन कोपितः" इत्यभिधानात्। एवं यत्राक्रोशनादौ पश्चात्कृतेनापराधः तत्रापि न वधः। यथा वृहस्पतिः "आकृष्टस्तु यदाऽऽक्रोशं ताडितः प्रतिताडयन्। हत्वाततायिनञ्चैव नापराधी भवेन्नरः" शास्त्रविहितताडनादौ कृते यत्र शिष्यादिर्म्रियते तत्रापि वधो नास्त्येव यथा भविष्यपुराणे "एवं शिष्यस्तथा भार्य्या शासितश्चोद्विजन्प्रति। न शास्ता तत्र दोषेण लिप्यते देवसत्तम!"। अथास्याव ताडनादौ अवधेय यथा मनुः "पुत्रः शिष्यस्तथा भार्य्या दासी दासस्तु पञ्चमः। प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा। अधस्तात्तु प्रहर्त्तव्यं नोत्तमाङ्गे कदाचन। अतोऽन्यथा तु प्रहरंश्चौरस्याप्नोति किल्विषम्"। एवञ्च विहितदण्डाचरणे शास्त्रीयकरग्रहणे क्रियमाणे यदि म्रियते तदापि वधो नास्त्येव दण्डादिशास्त्रविधिविरोधान्निषेधाप्रवृत्तेः। सोमविक्रयणे तु रागादेव प्रवृत्तिसम्भवान्न विरोधः। आततायिवधापवादमाह वृहस्पतिः "नाततायिवधे हन्ता किल्विषं प्राप्नुयात् क्वचित्। विनाशिनमथायान्तं घातयन्नापराध्नुयात्" किल्विषाभावः प्रायश्चित्तनिषेधार्थः। अपराधाभावो दण्डनिषेधार्थः। यतः "सर्व्वत एवात्मानं गोपायीत इति श्रुतिमूलमिदम् अतः पलायनादिनापि आत्मरक्षणाभावे इदं बोद्धव्यम्। कात्यायनः "आततायिनमायान्तमपि वेदान्तपारगम्। जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्"। जिघांसीयात् हन्यात् गच्छेदित्यर्थः। देवलः "उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम्। निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत्"। भ्रूणो ब्राह्मणविशेषः दोषदर्शनं नियमार्थम्। मनुविष्णू "गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्। आततायिनमायान्तं हन्यादेवाविचारयन्"। एवकारो नियमार्थः "तथा नाततायिवधे दोषोहन्तुर्भवति कश्चन। प्रकाशं वाऽप्रकाशं वा मन्युस्तन्मन्युमृच्छति" यस्माद्धन्तुर्मन्युर्हन्यमानमन्युं नाशयति न पुनः पुरुषोहन्ति हन्यते वेति हननविधेरनुवादः। "आततायिनमाह वशिष्ठः" "अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः। क्षेत्रदारापहारी च षडेते आततायिनः" विष्णुकात्यायनौ "उद्यतासिविषाग्निश्च शापोद्यतकरं तथा। आथर्वणेन हन्तारं पिशुनञ्चैव राजसु। भार्य्यातिक्रमिणञ्चैव विद्यात् सप्ताततायिनः। यशोवित्तहरानन्यानाहुर्धर्म्मार्थहारकान्"। विशेषमाह कात्यायनः "अनाचारितपूर्व्वोयस्त्वपराधे प्रवर्त्तते। प्राणद्रव्यापहारे च प्रवृत्तस्याततायिता" अनाचारितोऽनपकृतः। एतेन पूर्व्वकृतापकारस्य मारणोद्यतस्य नाततायिता तेन प्रत्यपकारिवधे दोष एव। ननु आततायिनोऽपि गोब्राह्मणयोर्हनने दोषमाह सुमन्तुः "आततायिवधे न दोषोऽन्यत्र गोब्राह्मणात यदा हन्यात् तदा प्रायश्चित्तं कुर्य्यात्"। तथा भविष्ये "शिखवानमपि गोविप्रं न हन्यात् कदाचन" इति अतः पूर्व्ववचनविरोधः तत्राह-

स्यामाह कात्यायनः "आततायिनि चोत्कृष्टे तपःस्वाध्यायजन्मतः। वधस्तत्र तु नैव स्यात् पापे हीने वधो भृगुः"। जन्मपदेन जातिः कुलञ्चोच्यते। तेन हन्तुरपेक्षया तपोविद्याजातिकुलैरुत्कृष्टेनाततायी बध्यएव। अतएव भगवद्गीतायामाह "पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः" इति एतान् भीष्मादीन् अत्यन्तोत्कृष्टगुणानित्यर्थः। एवञ्च ताततायिनश्चाहनने फलमप्याह बृहस्पतिः "आततायिनमुत्कृष्टं वृत्तस्वाध्यायसंयुतम्। यो न हन्याद्वधप्राप्तं सोऽश्वमेधफलं लभेत्" यद्यपि "गुरुं बहुश्रुतं हन्यात्" इति श्रूयते तथापि गुरोः सकाशात् कुलविद्यातपोभिः शिष्यस्याऽप्युत्कर्षसम्भवात् एवं बहुश्रुतादपि। एवमधमवर्णस्योत्तमवर्णो न वध्यः। पूर्वकृतापराधविषयं वा सुमन्तुवचनम्। गौराततायपि न वध्यः "नखिनां शृङ्गिणां चैव दंष्ट्रिणामाततायिनाम्। हस्त्यश्वानां तथान्येषां वधे हन्ता न दोषभाक्" इति कात्यायनवचनं गोव्यतिरिक्तशृङ्गिविषयम् विशेषमाह कात्यायनः "उद्यतानान्तु पापानां हन्तुर्दोषो न विद्यते। निवृत्तास्तु यदारम्भादुपग्रहणं न बधः स्मृतः"। तन्त्रोक्ते साध्यमन्त्रसाधकयोः २शुभाशुभज्ञापके राशिचक्रस्थे साधकराश्यपेक्षया साध्यराशेर्द्वादशाष्टचतुःसंख्यान्विते कोष्ठेऽवस्थाने। चक्रशब्दे च राशिचक्रं वक्ष्यते तत्र विवृतिः "वह्निरुद्रमुनयस्तु पोषका द्वादशाष्टचतुरस्तु घातकाः" एतच्च विष्णुविषयम् रामार्चनचन्द्रिकाधृतत्वात्" कृष्णानन्दः।

घातन न० हन–हन्त्यर्थत्वात् स्वार्थे णिच्–भावे ल्युट्। १मारणे हनने २यज्ञार्थपशालम्भने शब्दार्थ०। घातयति कर्त्तरि ल्यु। २मारके त्रि० हन्तेरौणादिके युनि तु घतन इत्येव घतनशब्दे विवृतिः। शब्दकल्पद्रुमे तु घतनेत्यत्र लिपिकरप्रमादकृतघातनशब्ददर्शनात् सि० कौ० सम्मतत्वेन घातनशब्दकल्पनं प्रामादिकमेव "हन्तेर्युं साद्यन्तयोर्घत्वतत्वे" उणा० ५।४२। घतनस्यैव सिद्धेः दीर्घत्वे निमित्ताभावात्। चुरा०हन्तेस्तथाप्रत्ययकल्पने घत्वतत्वविधानानर्थक्यप्रसङ्गात्। एवं मुद्रितपुस्तके "घातनो मारकः" इति दीर्घपाठोऽपि प्रमादकृतएव।

घातवार पु० राशिविशेषजातस्याशुभसूचके वारभेदे यथा "नक्रे भौमो गोहरिस्त्रीषु मन्दश्चन्द्रो द्वन्द्वेऽर्कोऽलिभे ज्ञश्च कर्के। शुक्रः कोदण्डालिमीनेषु, कुम्भे यूके जीवो घातवारा न शस्ताः" शब्दार्थचि० ज्यो० वाक्यम्।

घातस्थान न० ६त०। श्मशाने शब्दार्थचिन्तामणिः।

घाति पु० हन–इण्। पक्षिबन्धने संक्षिप्तसारे उणादिवृत्तिः।

घातिन् त्रि० हन-ताच्छील्यार्थे णिनि। हननकरणशीले। स्त्रियां ङीप्।

घातिपक्षिन् पुंस्त्री०कर्म०। श्येनखगे हारा०। स्त्रियां ङीप्।

घातुक त्रि० हन-उकञ्। १हिंस्रे २क्रूरे च अमरः।

घात्य त्रि० हन–ण्यत्। १बध्ये २बधार्हे ३गुणनीये च।

घार पु० घृ–सेके घञ्। सेचने।

घारि न० छन्दोविशेषे। "रं विधाय लं निधाय घारि नाम वृत्तमेहि"। यथा "राम राम राम राम। सारमेतदेव नाम"। शब्दार्थ चि०।

घार्तिक त्रि० पु० घृतेन निर्वृत्तः ठञ्। घृतप्रचुरे छिद्रबहुले (घियोड़) पक्वान्नभेदे हेमच०। घृतपूरशब्दे दृश्यम्। "तृतीयस्य घार्त्तिकं ददाति स दृढाह "छिद्रेष्वनर्था बहुलीभवन्ति" पञ्चत०।

घार्त्तेय त्रि० घृताया अपत्यम् द्व्यच्कत्वात् ढक्। १दीप्ताया अपत्ये ततः यौधेया० स्वार्थे अञ्। तदर्थे स्त्रियां शार्ङ्गरवा० ङीन्। २तद्राजे च तस्य च यौधेया० तद्राजस्य स्त्रियां न लुक्। घार्त्तेयी। तत्र घार्त्तेयी इति तत्र पाठान्तरम्।

घास पु० घस–कर्म्मणि घञ्। गवादीनां भक्ष्ये तृणभेदे अमरः। "घासमुष्टिं परगवे दद्यात् संवत्सरं तु यः" भा० आनु० ६८अ०। "घासं दद्यात् परगवे" प्रा०त० २भक्ष्यद्रव्यमात्रे च "अश्वायेव तिष्ठते घासमस्मै" यजु० ११।७५। "घासं समिद्रूपम्" वेददी०। "कर्षितं व्याधितं क्लिष्टमपानीयमघासकम्। परिश्रान्तं च मन्दञ्च प्रहर्त्तव्यमरेर्बलम्" भा० आ० १४४अ०।

घासकुन्द पु० घासार्थः कुन्दः। घासार्थकुन्दे तत्प्रचुरस्थाने ततः कुमुदा० चतुरर्थ्यां ठक्। घासकुन्दिक तत्सन्निकृष्टदेशादौ त्रि०।

घासि पु० घस बा०–इण्। १अग्नौ त्रिका० कर्म्मणि इण्। २भक्ष्ये तृणादौ त्रि० उज्ज्वलदत्तः यश्च पपौ यश्च घासिं जघान" ऋ०१।१६२।१४। "घासिमदनीयम्" भा०।

घिण्ण ग्रहणे भ्वा०आ०सक० सेट् इदित्। घिण्णते अघिघिण्णिष्ट जिघिण्णे।

घु ध्वनौ भ्वा० आत्म० अक० अनिट्। घवते अघोष्ट। जुघुवे।

घु पु० घु–ध्वनौ बा० डु। १ध्वनौ जटाधरः। अत्र ध्वनिः वनकपोतस्य (घुघु) ख्यातस्य ध्वनिः। नैष० शाके अन्नं

भविष्यति "दाधाघ्वदाप् पा०उक्ते दाधारूपे पारिभाषिके २धातुद्वये च। "यास्त्वेताः स्वेच्छया संज्ञाः क्रियन्ते टिघुभादयः। कथं नु तासां साधुत्वं ? नैव ताः साधवोमताः" इत्याशङ्क्य "अनपभ्रंशरूपत्वं नाप्यासामपशब्दता। असाधूनां प्रयोगे वा प्रत्यवायोऽपि नो तथा" इति हरिणा तासामनपभ्रंशत्वेन साधुत्वमुक्तं संज्ञाकरणफलं तु स्वशास्त्रे तथा व्यवहारः यथा "उपसर्गात् घोः किः" पा०। "दाक्षीपुत्रस्य तन्त्रे ध्रुवमयमभवत् कोऽप्यधीती कपोतः (घुघु) कण्ठे शब्दौघसिद्धिक्षतबहुकठिनीशेषभूषानुयातः। सर्व्वं विस्मृत्य दैवात् स्मृतिमुपसि गतां घोषयन् यो घुसंज्ञां प्राक्संस्कारेण सम्यगपि धुवति शिरः पट्टिकापाठजेन" नैष०। "स्त्र्यौ गुरू" मुग्ध० परिभाषिते ३लघुवर्णे च।

घुट आवर्त्तने (घाँटा) भ्वा० आत्म० सक० सेट्। घोटते लृदित् अघुटत् जुघुटे। [जुघोट।

घुट प्रतिघाते तु० कुटा० पर० सक० सेट्। घुटति अघुटीत्

घुट पु० कु० घुट-अच्। चरणग्रन्थौ गुल्फे हेम०। ततः स्वार्थे क, घुट-ण्वुल् वा। घुटक अत्रैवार्थे पु०।

घुटि (टी) स्त्री कुटा० घुट-इन् वा ङीप्। गुल्फे द्विरूपको०।

घुटिक पु० घुट+अस्त्यर्थे ठन्। गुल्फे हेमच०। तत्रार्थे स्त्री टाप् अमरः। [जुघोड।

घुड व्याघाते तु० कु० पर० सक० सेट्। घुडति अघुडीत्

घुण भ्रमणे भ्वा० आ० अक० सेट्। घोणते अघोणिष्ट। जुघुणे।

घुण भ्रमणे तु० प० अक० सेट्। घुणति अघोणीत् जुघोण।

घुण्ण ग्रहणे भ्वा० आ० इदित् सक० सेट्। घुण्णते अघुण्णिष्ट जुघुण्णे।

घुण पु० घुण-क। स्वनामख्याते काष्ठभक्षके कीटभेदे। "घुणोपहतकाष्ठेषु नलनालीदृत्कालावुमुखेष्वप्रस्य" सुश्रुतः। "भग्नं भग्नघुणैर्घुणैरुपहतम्" महाना०।

घुणप्रिया स्त्री ६त०। उदुम्बरपत्रवृक्षे शब्दार्थचि०।

घुणवल्लभा स्त्री ६त०। अतिविषायां भावप्र०।

घुणाक्षर न० घुणकृतमक्षरम्। घुणाख्यक्रमिणा काष्ठच्छेदनद्वारेण अयत्ननिष्पादिते १अक्षराकाररेखाभेदे। तत्तुल्यतयाऽस्त्यस्य अच्। तत्तुल्ये अनुद्देशेनापि किञ्चिदभीष्टसिद्धिस्वरूपे २न्यायभेदे पु० "वक्रव्यञ्जनदर्शिरासम्यन्ते हि घुणाक्षरम्" राजत०। "अवैद्यजीविनां सिद्धिः स्यात् घुणाक्षरवत् क्वचित्" रत्नाव०।

घुणि त्रि० घुण-इन्। भ्रान्ते "सं वा शरिष्यते घुणिर्भविष्यति" शत० ब्रा० ११।४।२।१४। [तत्रैवार्थे। हेमच०।

घुण्ट पु० घुट-क नि० नुम्। १गुल्फे शब्दमाला। स्वार्थे क।

घुण्टिक न० घुण्टस्तदाकारोऽस्त्यत्रास्य ठन्। गुल्फाकारतुल्ये वनस्थे करीषे (कागडा) शब्दच०।

घुण्ड पुंस्त्री घुण-ड तस्य नेत्त्वम्। भ्रमरे उणा० गो०।

घुम् अ० घुण-बा० डुम्। अव्यक्तशब्दे चादावाकृति गणः।

घुर ध्वनौ भीमभवने च तु० पर० अक० सेट्। घुरति अघोरीत्। जुघोर। "अघोरीच्च महाघोरम्" "जुघुरे घातिभैरवम्" भट्टिः। भावे नञ्। घोरम्।

घुर त्रि० घुर-क। ध्वनिभेदकारके। प्रकारे तस्य द्वित्वम्। घुरघुर घुरप्रकारे घोणाशब्दे कादं० उदा०।

घु(रि)री स्त्री घुर-बा० कि वा ङीप्। शूकरतुण्डे "कः कः कुत्र न घुर्घुरायितघुरीघोरोत्सुकः शूकरः" सा०द०।

घुर्घुर पु० घुरित्यव्यक्तं घुरति घुर-क। (घुरघुरिया) १यमकीटे त्रिका०। २शूकरशब्दे च। घुर्घुर इवाचरति क्यङ्। घुर्घुरायते। "कासश्वासकृतायामः कण्ठे घुर्घुरायते" वैद्यकम्। "कः कः कुत्र न घुर्घुरायितघुरीघोरोत्सुकः शूकरः" सा०द०।

घुर्घुरक पु० घुर्घुर इव कायति कै-क। सुश्रुतोक्ते दर्वीकरविषोद्भवभेदे। "दर्वीकरविषेण इत्युपक्रमे "स्वरावसादो घुर्घुरको जडतेत्यादि" सुश्रु०।

घुर्घुरिका स्त्री घुर्घुरोवराहध्वनिरस्त्यस्याः ठन्। तमककासोपद्रवे रुग्भेदे (गला घड्घडे) "तृट्स्वेदवमथुप्रायः कण्ठघुर्घुरिकान्वितः। विशेषाद्दुर्दिने ताम्येच्छ्वासः स्यात् तमकोऽसतः" सुश्रु०।

घुर्घुरी स्त्री घुर्घुरः प्रकारशब्दोऽस्त्यस्य अच् गौरा० ङीष्। जलजन्तुभेदे स्त्रकिरायाम्" त्रिका०।

घुलञ्च पु० घुर-क्विप् तमञ्चति अञ्च-अण् उप० स० रस्य लः। (गडगडे) गवेधुकाधान्ये रत्नमाला।

घुलघुलारव पुंस्त्री घुलघुलित्यव्यक्तमारौति आ+रु-अच्। पारावतभेदे राजनि०।

घुष कान्तौ अक० कृतौ स० भ्वा० आत्म० सेट् इदित्। घुंषते अघुंषिष्ट जुघुंषे सान्तोऽयमित्यन्ये [illegible]।

घुष वधे भ्वा० पर० सक० सेट्। घोषति इरित् अघुषत् अघोषीत्। जुघोष। घोषः। घुषितः।

घुष स्तुतौ आविष्कारे च वा चु० उभ० पक्षे भ्वा० पर० सक० सेट्। घोषयति ते घोषति अजूघुषत् त इरित्

अघुषत् अघोषीत्। जुघोषाम् बभूव आस चकार चक्रे। जुघोष णिजभावे घुषितः—घुष्टः। घोषः घोषणा। घोषणम्। "इति स द्रुपदो राजा स्वयंवरमघोषयत्" भा० आ० १८५ अ०। "सुहृदां प्रियमाख्यातं घोषयन्तु च ते जयम्" भा० वि० ३४अ०। "जयमघोषयदस्य तु केवलम्" रघुः। आविष्करणञ्च सर्वजनश्रुतियोग्यशब्दकरणम्। (ढेडरादेटा)

आ+सम्यक् घोषणे। "आघोषयत् भूमिपतिः समस्तम्" भट्टिः। सततक्रन्दने इत्यन्ये। [हे० स०१६अ०।

उद्+ऊर्द्ध्वमाविष्करणे। "उद्घुष्टजयशब्दविराविताशाः"

घु(ष्ट)षित त्रि० घुष—क्त वा इट्। शब्दिते इडभावे। घुष्ट इत्यपि तत्र उच्चशब्देन प्रकटिताभिप्राये २वाक्यादौ न०।

घुष्टान्न न० घुष्टं को भोक्तेत्युद्घुष्य देयमन्नम्। कोभोक्तेत्युद्घुष्य सत्रादौ दीयमानेऽन्ने तस्याभोज्यतामाह मनुः "गवा चान्नमुपघ्रातं घुष्टान्नञ्च विशेषतः। गणान्नं गणिकान्नं च विदुषा च जुगुप्सितम्"।

घुसृण न० घुषि(सि)—बा० क्ष्णक् पृषो० नलोपः घुषेःषस्य सः। कुङ्कुमे त्रिका०। "घुसृणैर्यत्र जलाशयोदरे" इति नैषधम्।

घुसृणापिञ्जरतनु स्त्री घुसृणमिव घुसृणेन वा आपिञ्जरा तनुरस्याः। गङ्गायां "घुसृणापिञ्जरतनुर्घर्घरी घर्घरस्वना" काशी० २९अ० गङ्गानामोक्तौ

घूक पुस्त्री० घू इत्यव्यक्तं कायति कै—क। उलूके पेचके। हेमच०। स्त्रियां जातित्वात् ङीष्।

घूकनादिनी स्त्री घूक इव नदति नद—णिनि ङीप्। गङ्गायाम् "घर्घरा घूकनादिनी" काशी० २९अ०। गङ्गानामोक्तौ।

घूकारि पुंस्त्री० ६त०। काके हेमच०। तस्य पेचकवैरित्वं लोकसिद्धम्। स्त्रियां जातित्वात् वा ङीप्।

घूकावास पु० ६त०। शाखोटवृक्षे राजनि०। तस्य निबिडदलशाखायुतत्वेन कोटरतुल्यत्वात् दिवाभीरोलूकस्यान्धकाराद्भयत्वे नावासस्थानत्वात्तथात्वम्।

घूर हिंसायां सक० जीर्णतायाम् अक० दि० आत्म० सेट्। घूर्यते अघूरिष्ट। जुघूरे ईदित्। घूर्णः। धातौ च "जुघूरेचातिरवम्" भट्टौ दीर्घमध्यं पठित्वा तस्य ध्यन्त्यर्थकतां भरत आह।

घूर्ण भ्रमणे अक० तु० उभ० सेट्। घूर्णति ते। अघूर्णीत् अघूर्णिष्ट। जुघूर्ण जुघूर्णे। "गुरुभारसमाक्रान्तश्चाल च जुघूर्णे च" रामा० कि०। "केचिदासिषत स्तब्धा भयात् केचिदघूर्णिषुः" "अघूर्णिष्टां क्षतौ ध्माता तावशिश्रियतामुभौ" इति च भट्टिः। घूर्णितः घूर्णितवान्। "ततोरथो घूर्णितवान् नरेन्द्र!" भा० क० ९०अ०। "कादम्बरीमदविघूर्णितलोचनस्य युक्तं हि लाङ्गलभृतः पतनं पृथिव्याम्" उद्भटः। "भो वृक्षाः पर्वतस्थाः बहुकुसुमयुता वायुना घूर्णमाना" महाना०। वायुनेति हेतौ तृतीया सयकारपाठे ण्यन्तात् कर्मणि शानच् कर्त्तरि तृतीयेति भेदः। णिचि घूर्णयति ते अजुघूर्णत् त। "नयनान्यरुणानि घूर्णयन्" कुमा०। "घूर्णयन् मदिरास्वादमदपाटलितद्युती" माघः। कर्म्मणि घूर्ण्यते अघूर्णि। घूर्ण्यमानः। "वायुना घूर्ण्यमानाः" महाना० पाठान्तरम्।

घूर्ण पु० घूर्णयति अच्। (गिमा) १शाकभेदे ग्रीष्मसुन्दरके शब्दच०। २भ्रान्ते त्रि०। भावे घञ्। ३भ्रमणे। घूर्ण—णिच्—अच्। ४घूर्णकारके रोगभेदे

घूर्णन न० घूर्ण—भावे ल्युट्। १भ्रमणे चक्राकारावर्त्ते। हेमच०। युच्। घूर्णनाप्यत्र स्त्री "घूर्णनागात्रपतनभ्रमणादर्शनादिकृत्" सा०द०।

घूर्णायमान त्रि० घूर्णः भ्रान्त इवाचरति भृशा० च्व्यर्थे वा क्यङ् कर्त्तरि शानच्। भ्राम्यमाणे। "इन्द्राद्यै रक्षिसार्थसाधनपरैः संस्तूयमानं मुदः पीतोन्मत्तफलाऽतुलाससतया घूर्णायमानेक्षणम्" इति कलापधातुव्याख्यासारः।

घूर्णि पु० घूर्ण—भावे इन्। भ्रमणे हेमच०।

घूर्णित त्रि० घूर्ण—णिच् कर्मणि क्त। १भ्रामिते। कर्त्तरि क्त। २भ्रान्ते प्रचलायिते अमरः। घूर्णमाने उदा०।

घूर्णिका स्त्री शुक्राचार्यकन्यादेवयानीसखीभेदे। "गते तु नाहुषे तस्मिन् देवयान्यप्यनिन्दिता। उवाच शोकसन्तप्ता घूर्णिकामागतां पुरः। देवयान्युवाच। त्वरितं घूर्णिके! गच्छ शीघ्रमाचक्ष्व मे पितुः। नेदानीं संप्रवेक्ष्यामि नगरं वृषपर्वणः। वैशम्पायन उवाच। सा तत्र त्वरितं गत्वा घूर्णिकाऽसुरमन्दिरम्। दृष्ट्वा काव्यमुवाचेदं सम्भ्रमाविष्टचेतना" भा० आ० ७८अ०।

घृ सेके भ्वा० पर० सक० अनिट्। घरति अघार्षीत्। जघार

घृ सेके छादने च चु० उभ० सक० सेट्। घारयति ते अजीघरत् त। घारयां बभूव आस चकार चक्रे। घारितः।

आ+समन्तात्सेके आघारः। तच्छब्दे ६२५ दृश्यम्। "प्रणीत एषदाज्याभिघारसौरा" वीरच०।

घृ भासे अक॰ सेके सक॰ जु॰ पर॰ अनिट्। जिघर्त्ति अघार्षीत्। अयं वैदिकः। घर्मः (दीप्तः)।

घृङ् अव्य॰ अव्यक्तशब्दे। "घृङ्ङिति पपात" इत्युपक्रमे तद्यद्घृङ्ङित्यपतत्तस्माद्घर्मः" शत॰ ब्रा॰ १४।१।१।१०।

घृण दीप्तौ तना॰ उभ॰ अक॰ सेट्। घर्णोति घृणोति घर्णुते घृणुते अघर्णीत् अघर्णिष्ट जघर्ण जघृणे घृणा। उदित्। घर्णित्वा घृष्ट्वा। क्तो वेट्कत्वात् निष्ठा त्वनिट्। घृणः। वेदे गणव्यत्ययोऽपि "आ यो घृणे न ततृषाणो अजरः" ऋ॰ ६।१५।५। "आघृणे आदीप्यते" भा॰।

घृण ग्रहणे भ्वा॰ आत्म॰ सक॰ सेट् इदित्। घृण्णते अघृण्णिष्ट। जघृण्णे।

घृण पु॰ घृण–दीप्तौ क। १दिवसे निघ॰। २दीप्ते ३उष्णे च। "अह्ना यं भानुना यं हिमा यं घृणेन ऋ॰ १०।३७।१०। "घृणेन उष्णेन" भा॰। "घृणान्न भीषा अद्रिवः ऋ॰ १।१३३।६। "घृणात् दीप्तात्" भा॰।

घृणा स्त्री घृ–सेके नक्। १कारुण्ये–दयायां कारुण्येन हि हृदयं सिक्तमिवार्द्रं भवतीति तस्य तथात्वम्। "मन्दमस्यन्निषुलतां घृणया मुनिरेष वः" किरा॰। "इत्यङ्गते गतघृणः किमयं विधत्ताम्" रघुः २जुगुप्सायां निन्दायाञ्च अमरः "तां विलोक्य वनिताबधे घृणाम्" "प्रागजीयत घृणा ततो मही" इति च रघुः। "अधारि पद्मेषु तदङ्घ्रिणा घृणा" नैष॰।

घृणालु त्रि॰ घृणा+वा॰ आलुच्। कृपायुक्ते "निष्पादितस्य कार्त्स्न्येन भगवद्भिर्घृणालुभिः" भाग॰ ४।२२।४१।

घृणावत् त्रि॰ घृणा+अस्त्यर्थे मतुप् मस्य वः १कृपायुक्ते स्त्रियां ङीप्। सा च २गङ्गायाम् घृणिनिधिशब्दे उदा॰।

घृणावास पु॰ ६त॰। १कुष्माण्डे त्रिका॰। २कृपायुक्ते च

घृणि पु॰ घृ–नि नि॰ गुणाभावः। १किरणे, २ज्वालायाम्, अमरः। ३तरङ्गे, ४सूर्य्ये ५जले न॰ मेदि॰ ६दीप्ते त्रि॰ "तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः" भाग॰ ७।१।६। घृणेर्दीप्तस्य

घृणिनिधि पु॰ निधीयते अस्मिन् नि+धा आधारे कि ६त॰। १सूर्य्ये २गङ्गायाञ्च "घृणावती घृणिनिधिः" काशीख॰ गङ्गानामोक्तौ।

घृणीवत् त्रि॰ घृणिरस्त्यस्य मतुप् वा॰ वेदे न मस्य वः दीर्घः। दीप्तिमति। "घृणीवाँ चेतति त्मना" ऋ॰ १०।१७६।३। "घृणीवान् दीप्तिमान्" भा॰।

घृत पुंन॰ घृ–सेके क्त। अर्द्धघनीदि दुग्धभवे "सर्पिर्विलीनमाज्यं तु घनीभूतं घृतं भवेत्" उक्ते घनीभूते १आज्ये घृत गुणभेदादि भावप्र॰ उक्तं यथा.

"घृतमाज्यं हविः सर्पिः कथ्यन्ते तद्गुणा अथ। घृतं रसायनं स्वादु चक्षुष्यं वह्निदीपनम्। शीतं वीर्य्ये विषालक्ष्मीपापपित्तानिलापहम्। अल्पाभिष्यन्दि कान्त्योजस्तेजोलावण्यबुद्धिकृत्। स्वरस्मृतिकरं मेध्यमायुष्यं बलकृद्गुरु। उदावर्त्तज्वरोन्मादशूलानाहव्रणान् हरेत्। स्निग्धं कफकरं रक्षःक्षयवीसर्परक्तनुत्।

गव्यस्य घृतस्य गुणाः गव्यं घृतं विशेषेणेत्यादि भावप्र॰ वाक्यम् २५८२ पृ॰ उक्तम् घृतभेदगुणा भावप्र॰उक्ता यथा

माहिषस्य गुणाः। "माहिषन्तु घृतं स्वादु पित्तरक्तानिलापहम्। शीतलं श्लेष्मलं वृष्यं गुरु स्वादु विपच्यते"।

छागस्य गुणाः "आजमाज्यङ्करोत्यग्निं चक्षुष्यं बलवर्द्धनम्। कासे श्वासे क्षये चापि हितं पाके भवेत्कटु"।

अथ उष्ट्रीघृतम् "औष्ट्रं कटु घृतं पाके शोषकृमिविषापहम्। दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम्"।

अथ आविकघृतम् "पाके लघ्वाविकं सर्पिः सर्वरोगविनाशनम्। वृद्धिं करोति चास्थीनामश्मरीशर्करापहम्। चक्षुष्यमग्निदं वृष्यं वातदोषनिवारणम्"।

अथ नारीघृतम्। "कफेऽनिले योनिदोषे पित्ते रक्ते च तद्धितम्। चक्षुष्यमाज्यं स्त्रीणां या सर्पिः स्यादमृतोपमम्"।

अथाश्वघृतम् "वृद्धिं करोति देहाग्न्योर्लघु पाके विषापहम्। तर्पणं नेत्ररोगघ्नं दाहनुद्वडवाघृतम्"।

दुग्धघृतस्य गुणाः "घृतं दुग्धभवं ग्राहि शीतलं नेत्ररोगहृत्। निहन्ति पित्तदाहास्रमदमूर्च्छाभ्रमानिलान्"।

अथ ह्यस्तनदधिजघृतगुणाः "हविर्ह्यस्तनदुग्धोत्थं तद्धाहैयङ्गवीनकम्। हैयङ्गवीनं चक्षुष्यं दीपनं रुचिकृत्परम्। बलकृद्बृंहणं वृष्यं विशेषाज्ज्वरनाशनम्"।

पुराणघृतस्य गुणाः "वर्षादूर्द्ध्वं भवेदाज्यं पुराणं तत्त्रिदोषनुत्। मूर्च्छाकुष्ठविषोन्मादापस्मारतिमिरापहम्। यथा यथाऽखिलं सर्पिः पुराणमधिकं भवेत्। तथा तथा गुणैः स्वैः स्वैरधिकं तदुदाहृतम्"।

अथ नूतनस्य घृतस्य विषयाः "योजयेन्नवमेवाज्यं भोजने तर्पणे श्रमे। बलक्षये पाण्डुरोगे कामलानेत्ररोगयोः"।

घृतप्रयोगस्याविषयाः "राजयक्ष्मणि बाले च वृद्धे श्लेष्मकृते गदे। रोगे सामे विसूच्याञ्च विबन्धे च मदात्यये। ज्वरे च दहने मन्दे न सर्पिर्बहु मन्यते"।

अस्य गव्यादिघृतभेदास्तद्गुणादिकं च सुश्रुतेनोक्तं यथा "घृतन्तु सौम्यं शीतवीर्यं मृदु मधुरमल्पाभिष्यन्दि स्नेहनमुदावर्त्तोन्मादापस्मारशूलज्वरानाहवातपित्तप्रशमनमग्निदीपनं स्मृतिमतिमेधाकान्तिस्वरलावण्यसौकुमार्य्यौजस्तेजोबलकरमायुष्यं वृष्यं मेध्यं वयःस्थापनं गुरु चक्षुष्यं श्लेष्माभिवर्द्धनं पाप्मालक्ष्मीप्रशमनं विषहरं रक्षोघ्नञ्च। विपाके मधुरं शीतं वातपित्तविषापहम्। चक्षुष्यमग्र्यं बल्यञ्च गव्यं सर्पिर्गुणोत्तरम्। आजं घृतं दीपनीयं चक्षुष्यं बलवर्द्धनम्। कासे श्वासे क्षये चापि पथ्यं पाके च तल्लघु। मधुरं रक्तपित्तघ्नं गुरु पाके कफापहम्। वातपित्तप्रशमनं सुशीतं माहिषं घृतम्। औष्ट्रं कटु रसं पाके शोफक्रिमिविषापहम्। दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम्। पाके लघ्वाविकं सर्पिर्न च पित्तप्रकोपणे। कफेऽनिले योनिदोषे शोषे कम्पे च तद्धितम्। पाके लघूष्णवीर्य्यञ्च कषायं कफनाशनम्। दीपनं बद्धमूत्रञ्च विद्यादैकशफं घृतम्। चक्षुष्यमग्र्यं स्त्रीणान्तु सर्पिः स्यादमृतोपमम्। वृद्धिं करोति देहाग्न्योर्लघुपाकं विषापहम्। कषायं बद्धविण्मूत्रं तिक्तमग्निकरम् लघु। हन्ति कारेणवं सर्पिः कफकुष्ठविषक्रिमीन्। क्षीरघृतं पुनः संग्राहि रक्तपित्तभ्रममूर्च्छाप्रशमनं नेत्ररोगहितञ्च।

सर्पिर्मण्डस्तु मधुरः सरो योनिश्रोत्राक्षिशिरसां शूलघ्नो वस्तिनस्याक्षिपूरणेषूपदिश्यते। सर्पिः पुराणं सरं कटुविपाकं त्रिदोषापहं मूर्च्छामेदउन्मादोदरज्वरगरशोफापस्मारयोनिश्रोत्राक्षिशिरःशूलघ्नं दीपनं वस्तिनस्याक्षिपूरणेषूपदिश्यते। भवन्ति चात्र। पुराणं तिमिरश्वासपीनसज्वरकासनुत्। मूर्च्छाकुष्ठविषोन्मादग्रहापस्मारनाशनम्। एकादशशतञ्चैव वत्सरानुषितं घृतम्। रक्षोघ्नं कुम्भसर्पिः स्यात्परतस्तु महाघृतम्। पेयं महाघृतं भूतैः कफघ्नं पवनाधिकैः। बल्यं पवित्रं मेध्यञ्च विशेषात्तिमिरापहम्। सर्वभूतहरञ्चैव घृतमेतत्प्रशस्यते"। "उग्रगन्धं पुराणं स्याद्दशवर्षस्थितं घृतम्। लाक्षारसनिभं शीतं प्रपुराणमतः परम्" राजवल्लभः। तस्य गुरुतमत्वमाह वैद्यके "अन्नादष्टगुणं चूर्णं चूर्णादष्टगुणं पयः। पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम्" पक्वघृतस्य वर्षोर्द्धेऽवीर्य्यतामाह "घृतमब्दात् परं पक्वं हीनवीर्य्यत्वमाप्नुयात्" राजव०। "घृतं कांस्ये दशाहिकम्" इत्युक्तेर्घृतस्याभक्ष्यता। "तेजो वै घृतमिति" श्रुत्या वाक्यशेषे घृतप्रशंसनात् "अक्ताः शर्करा उपदधाति" इत्यादौ घृतेनैवाञ्जनम् न तैलेनेति मीमांसायां स्थितम्। घृतघटितौषधस्य षण्मासपर्य्यन्तं वीर्य्यवत्त्वं वैद्यके उक्तम्। पक्वघृतादि नानाविधं चक्रदत्तादौ उक्तं विस्तरभयान्नोक्तम्। "घृतं घृतपावानः पिबत वसां वसापावानः" यजु० ६।१९। घृ—दीप्तौ कर्त्तरि—क्त। २दीप्ते ३सेचके च त्रि० शब्दर०। अस्य घृतादित्वात् अन्तोदात्तता। ४जले न० शब्दार्थचि०।

घृतकरञ्ज पु० घृतमिव घनीभूतनिर्यासकत्वात् करञ्जः। (घियाकरञ्चा) करञ्जभेदे राजनि०।

घृतकुमारी स्त्री घृतमिव कुमारी सुन्दरी। घृततुल्यनिर्यासे स्वनामख्याते गुल्मभेदे शब्दरत्ना० स्वार्थे क ह्रस्वः। घृतकुमारिकाप्यत्र स्त्री भावप्र० कुमारीशब्दे दृश्यम्।

घृतकुल्या स्त्री घृतपूरिता कुल्या। घृतपूरितकृत्रिमसरिति।

घृतकेश पु० घृतोद्दीप्तः केश इव ज्वाला अस्य। वह्नौ "ऊर्जोनपातं घृतकेशमीमहे" ऋ० ८।६०।२।

घृतकौशिक पु० घृतोद्दीप्तः कौशिकः। १गोत्रभेदे २तद्गोत्रान्तर्गतप्रवरभेदे च "घृतकौशिकगोत्रस्य कुशिककौशिकघृतकौशिकाः प्रवराः" उ० त० रघु०। "स च यजुर्वेदीयवंशान्तर्गतः "घृतकौशिकात् घृतकौशिकः" शत० ब्रा० १४।५।५।२१। तथा तत्रैव १४।७।३।२७।

घृतच्युता स्त्री घृतं च्युतं यस्याः। कुशद्वीपस्थे नदीभेदे। कुशशब्दे २१४५ पृ० दृश्यम्। [त्रिका०।

घृतदीधिति पु० घृतेन घृता दीप्ता वा दीधितिरस्य। अग्नौ

घृतधारा स्त्री घृतं घृततुल्यं जलं धारयति धारि—अण् उप० स०। पश्चिमदेशस्थे नदीभेदे। "शुभामतिरसाञ्चैव घृतधारेति विश्रुताम्। वराहः सरितं पुण्यां प्रतीच्यामकरोत् प्रभुः" हरिवं० २२५ अ०। ६त०। २घृतस्याविच्छिन्नसन्ततौ च।

घृतनिर्णिज् त्रि० घृतं दीप्तं निर्णिक् रूपं यस्य। १दीप्तरूपे। "दीदाय यानिध्मो घृतनिर्णिगप्सु" ऋ० २।३५।४। "निर्णिगिति रूपनाम दीप्तरूपः" भा०। "जुष्टासो अद्य घृतनिर्णिजो गुः" ऋ० ४।२५।२। "घृतनिर्णिजो मिश्रद्रव्येण दीप्तरूपाः" भा०। घृतं निर्णेनेक्ति निर्+निज—क्विप् ६त०। तापनद्वारा विलापनेन २घृतशोधके वह्नौ। "शोचिष्केशो घृतनिर्णिक् पावकः" ३।१७।१। "घृतनिर्णिक् घृतस्य तापनद्वारा विलापनेन शोधकः" भा०।

घृतप पु॰ ब॰व॰ घृतमाज्यं पिबन्ति+पा—क उप॰ स॰। आज्यपाख्ये पितृगणभेदे। "घृतपाः सोमपाः यव्या वैश्वानरमरीचिपाः" भा॰ शा॰ १६६अ॰। २घृतपानकर्त्तरि त्रि॰।

घृतपदी स्त्री घृतं पादे संस्थितं यस्या पाद्भावः स्वाङ्गत्वात् ङीषि पद्भावः। १इडादेवताभेदे। शत॰ ब्रा॰ इडा ब्राह्मणे १।८।१।२६। तन्निरुक्तिर्दर्शिता यथा "मानवी घृतपदीति मनुर्ह्येतामग्रेऽजनयत तस्मादाह मानवीति घृतपदीति यदेवास्यै घृतं पादे समतिष्ठत तस्मादाह घृतपदीति"। तद्ब्राह्मणोपोद्घाते "इडाया मानवीमिडादेवतां वक्तुं मानवी घृतपदीमैत्रावरुणीत्येतानि च निगदपदानि व्याख्यायन्ते" भा॰। घृताः दीप्ताः पादा यस्याः प्राग्वत् पाद्भावादि। २सरस्वत्यामिडादेव्याञ्च। "हविषीडा देवी घृतपदी जुषन्त" ऋ॰ १०।७०।८। इडे तन्नामिका देवी सरस्वती घृतपदी दीप्तपदोपेता" भा॰। [राजनि॰।

घृतपर्णक पु॰ घृतमिव स्वादु पर्णमस्य कप्। घृतकरञ्जे

घृतपीत त्रि॰ घृतं पीतं येन आहिता॰ वा परनिपातः। घृतपानकर्त्तरि पक्षे पीतघृत इत्यपि तत्रार्थे त्रि॰।

घृतपूर पु॰ घृतेन पूर्य्यते पूरि—कर्म्मणि अच्। पक्वान्नभेदे तस्य प्रचुरघृतेन पक्वत्वात्तथात्वम् तत्पाकप्रकारादि शब्दार्थचि॰। "मर्द्दितां समितां क्षीरनालिकेरघृतादिभिः। अवगाल्य घृते पक्वा घृतपूरोऽयमुच्यते। घृतपूरो गुरुर्वृष्यः कफकृद्रक्तमांसदः। रक्तपित्तहरो हृद्यः स्वादुः पित्तहरोऽग्निदः। अपि च "क्षीरेण मर्दितं चूर्णं गोधूमानां सुगालितम्। विस्तार्य्य सर्पिषा पाच्यं कटाहेऽथ सितान्वितम्। घृतपूरोऽयमुद्दिष्टः कर्पूरमरिचान्वितः"। नारिकेलजस्तु "समिता मर्दिता क्षीरे नालिकेलसितार्द्रकैः। अवगाल्य घृते पाच्यो घृतपूरोऽपरः स्मृतः"। दुग्धजोऽपि "पाकपिण्डीकृतं क्षीरं शर्कराचूर्णमिश्रितम्। घृतपूरविनिर्माणं कारयेत् स्वल्पसर्पिषि"। शालिभवोऽपि "सुशालीपिष्टं दुग्धन्तु क्वाथितं वस्त्रगालितम्। खण्डयुक्तं घृते पक्वं घृतपूरो भवेदयम्"। कसेरुजोऽपि "कसेरुचूर्णं निःक्षिप्य पाकपिण्डीकृतं पयः। निर्माणं घृतपूराणां शर्करासहितं भवेत्"। आम्ररसजः "पक्वान्नस्य घृते तप्ते रसस्त्वमलपिण्डितः। शुद्धशर्करया योज्यो घृतपूरो यदृच्छया। क्षीरमाद्यं स्वरूपं हि खण्डं चूर्णं ततः स्मृतम्। योजिते यो विशेषोऽत्र तदाख्यावर्णसंश्रितः। घृतपूरो गुरुर्वृष्यो हृद्यः पित्तानिलापहः। सद्यः प्राणप्रदो बल्यः सुरुच्योऽग्निप्रदीपनः। शृङ्गाटकमुखानामप्येवं स्याद् घृतपूरकः। विचार्य्य वस्तुसंयोगं तद्गुणानपि चाहरेदिति"।

घृतपूर्णक पु॰ घृतं पूर्णमत्र कप्। करञ्जभेदद्वये त्रिका॰ घृतपूर्णकरञ्जकोऽप्यत्र भावप्र॰ करञ्जशब्दे १६८८पृ॰ दृश्यम्।

घृतपृष्ठ पु॰ घृतं दीप्तं पृष्ठमस्य। क्रौञ्चद्वीपपतौ प्रियव्रतपुत्रे राजभेदे। क्रौञ्चशब्दे २२४१पृ॰ विवृतिः।

घृतप्रतीक पु॰ घृतं प्रतीकं मुखं यस्य। अग्नौ। तस्य उत्तरवेद्यामाज्याघारेणोद्दीपनात् तथात्वम् "घृतप्रतीको घृतयोनिः" यजु॰ २५।१७।

घृतप्रयस् पु॰ घृतं तत्सहितं प्रयोऽन्नं यस्य। वह्नौ "घृतप्रयाः सधमादे मधूनाम्" ऋ॰ ३।४२।२। "घृतप्रयाः घृतसहितानि प्रयांसि अन्नरूपाणि हवींषि यस्य" भा॰।

घृतप्रसत्त पु॰ प्र+सद—आ॰ क्त ३त॰। घृतेन प्रसन्ने वह्नौ। "घृतप्रसत्तो असुरः सुशेवः" ऋ॰ ५।१५।१।

घृतमण्ड पु॰ ६त॰। घृतसारे। गलितघृतस्याधःस्थे सारांशभेदे (जोमादानाघि) "ततः स घृतमण्डेन हृद्येनेन्द्रियबोधिना"। "भुक्तवन्तं घृतमण्डेन यष्टीमधुकसिद्धेन तैलेन वानुवासयेत्" सुश्रु॰। सर्पिर्मण्डोऽप्यत्र घृतशब्दे तद्गुणाः सुश्रुतोक्ता दर्शिताः। घृतमण्डोऽस्त्यस्याः अच्। २काकोल्यां स्त्री शब्दच॰।

घृतमण्डलिका स्त्री घृतमण्डं तदाकारनिर्यासं लाति ला—क संज्ञायां कन् अत इत्वम्। हंसपदीवृक्षे राजनि॰।

घृतलेखनी स्त्री घृतं लिख्यतेऽनया लिख—करणे ल्युट् ङीप्। दारुमये घृतलेखनपात्रीभेदे हेमच॰।

घृतवती स्त्री द्वि॰व॰। घृतमुदकं हेतुत्वेन कार्य्यत्वेन वास्त्यासाम् मतुप् मस्य वः ङीप्। द्यावापृथिव्योः निघ॰। "अद्भ्यः पृथिवी" इति श्रुतेर्भूमेर्जलहेतुकत्वात् तथात्वम् दिवश्च उदकहेतुत्वात् तथात्वम्। २आज्ययुक्ते ३घृतपदयुक्ते च त्रि॰ स्त्रियां ङीप्। "तैलं प्रतिनिधिं कुर्य्यात् घृतार्थे याज्ञिको यदि। प्रकृत्यैव तदा ब्रूयात् होता घृतवतीमिति" ति॰ त॰ समपार्श्वः।

घृतवर पु॰ घृतं वरमत्र। घृतपूरे पक्वान्नभेदे हेमच॰। तस्य घृतप्रचुरत्वात्तथात्वम्।

घृतस्थला स्त्री घृतमुदकं स्थलमुत्पत्तिस्थानं यस्याः घृतं दीप्तं स्थलं नितम्बस्थलं यस्या वा। अप्सरोभेदे।

सरसां हि जलोद्भवत्वं भाग० ८।७।६। समुद्रमन्थने उक्तं यथा "ततश्चाप्सरसो जाता निष्ककण्ठ्यः सुवाससः" तासां मध्ये अस्याः प्रशस्तनितम्बस्थलत्वात् तथात्वम्। "घृतस्थला घृताची च विश्वाची चोर्वशी तथा" हरिवं० २२६ अ० ।

घृतस्पृश् त्रि० घृतं स्पृशति स्पृश–क्विन्। घृतस्पर्शिनि क्विन्नन्तत्वात् स्वादौ कुः। घृतस्पृक् घृतस्पृग्भ्यामित्यादि

घृताची स्त्री घृतमुदकं कारणतयाऽञ्चति अन्च–क्विप् नलोपे स्त्रियां ङीप् पूर्वाणोदीर्घश्च। १अप्सरोभेदे तस्या अङ्गाज्जातत्वात् तथात्वम्। घृतस्थलाशब्दे दृश्यम्। सा च पौरवरौद्राश्वन्टपस्य परिग्रहे दश पुत्रान् कन्याश्च दश सुषुवे यथा हरिवं० ३१अ० ।

"रौद्राश्वस्य घृताच्यां वै दशाप्सरसि सूनवः। ऋचेयुः प्रथमस्तेषां कक्षेयुस्तथैवच। कच्चेयुः स्थण्डिलेयुश्च सन्नतेयुस्तथैवच। दशार्णेयुर्जलेयुश्च स्थलेयुश्च महाबलः। वननित्योवनेयुश्च पुत्रिकाश्च दश स्त्रियः। रुद्रा शूद्रा च भद्रा च मलदा मलहा तथा। स्थलदा चैव राजेन्द्र! नलदा सुरसाऽपि च। तथा गोचपला च स्त्री रत्नकूटा च ता दश"।

२रात्रौ निघ० तस्याः सोमरश्मिजादिशिशिरजलभूयस्त्वात् तथात्वम्। घृतमाज्यमञ्चति प्राप्नोति। ३घृतप्रापरि त्रि० स्त्रियां ङीप्। "घृताच्यसि जुहूर्नाम्ना" यजु०२।६। ४उदकयुक्ते त्रि० स्त्रियां ङीप्। "ईं वहन्ति सूर्य्यं घृताचीः" ऋ०७।६०।३ "घृताचीः उदकवत्यः" भा०। घृतं दीप्तं रूपमञ्चति। ५दीप्तरूपवति त्रि० स्त्रियां ङीप् पूर्ववत् सर्वम्। "स विश्वाचीरभिचष्टे घृताचीः" ऋ०१०।१३९।२। "घृताचीर्दीप्तरूपवतीः" भा०।

घृताचीगर्भसम्भवा स्त्री घृताच्या गर्भ इव सम्भवति सम्+भू–अच्। स्थूलैलायाम् राजनि०। घृताच्या गर्भे सम्भवोऽस्य। २ऋतेयुःभृतौ पौरवे न्टपभेदे पु० ३तत्कन्यायां स्त्री घृताचीशब्दे विवृतिः।

घृतादि पु० घृतमादिर्यस्य "घृतादीनाञ्च" शान्तनवाचार्य्यसूत्रोक्ते अन्तोदात्ततानिमित्ते शब्दगणे स च आकृतिगणः" सि० कौ० ।

घृतान्न पु० घृतमाज्यमन्नमदनीयं यस्य। हविर्भुजि वह्नौ। "तपुर्मूर्द्धा घृतान्नः पावकः" ऋ० ७।३।१। २घृतभोजिनि त्रि० घृतेन मिश्रितमन्नम्। ३घृतमिश्रिते अन्ने न०।

घृतार्चिस् पुं० घृतेनार्चिर्यस्य घृतं दीप्तमर्चिर्यस्य वा। वह्नौ। "घृतार्चिः प्रीतिमांश्चापि प्रजज्वाल दिधक्षया" भा० आ० ५८ अ० ।

घृतावनि स्त्री घृतस्यावनिरिव। यूपकर्णे हेमच० ।

घृतावृध् त्रि० घृतमुदकं वर्द्धतेऽनया क्विप् दीर्घः इत०। उदकवर्द्धके "घृतेन द्यावापृथिवी अभिवृते घृतश्रिया घृतपृचा घृतावृधा" ऋ०६।७०।४। उदकवर्द्धिके द्यावापृथिव्यावित्यर्थः औस्थाने आच्।।

घृतासुति पु० घृतमुदकं वृष्टिरूपमासुवति आ+सु–क्तिच् वृष्टिसंपादकयोर्मित्रावरुणयोः "ता (मित्रावरुणौ) सम्राजा घृतासुती यज्ञे यज्ञ उपस्तुता" ऋ० १।१३६।६। औस्थाने आच्। घृतमासुतिरन्नं यस्य। घृतान्नयोः इन्द्राविष्णोः। (इन्द्राविष्णू) "घृतासुती द्रविणं दत्तमस्मे" ऋ० ६।६९।६। अस्मे अस्मभ्यम्।

घृताहवन पु० घृतेनाहूयतेऽस्मिन् आ+हु–आधारे ल्युट् जुहोतेरविवक्षितकर्म्मकत्वेनाकर्म्मकत्वात् घृतस्य करणत्वमेव "तृतीया च होश्छन्दसि" पा० कर्म्मणि न तृतीया किन्तु "कर्त्तृकरणयोस्तृतीया" पा० करणे तृतीया ३त०। घृतेनाहवनाधिकरणे वह्नौ। "घृताहवन! दीदिवः प्रति ष्म रिषतो दह। अग्ने! त्वं रक्षस्विनः" ऋ०१।१२।५। घृताहवन!। अग्ने!" भा०।

घृताहुति स्त्री घृतेनाहुतिः "तृतीया च होश्छन्दसि" पा० कर्मणि तृतीया जुहोतेरविवक्षितकर्म्मकत्वेनाकर्मकत्वात् करणे तृतीया वा ३त०। घृतेनाहुतौ। "यद्यजूंषि घृताहुतिभिः। यत्सामानि मध्वाहुतिभिः" आश्व० गृ० ३।३।२।

घृताह्व पु० घृतं तद्गन्धमाह्वयते स्पर्द्धते निर्यासेन आ+ह्वे–क उप० स०। घृततुल्यगन्धनिर्यासके सरलद्रुमे त्रिका०।

घृतिन् त्रि० घृतमाज्यमुदकं वा प्राशस्त्येनास्त्यस्य इनि। १प्रशस्ताज्यके २प्रशस्तजलके च स्त्रियां ङीप्। "पयस्विनीं घृतिनीमत्युदाराम्" (गङ्गाम्) भा०आनु०२६अ०।

घृतेयु पु० पौरवे रौद्राश्वन्टपपुत्रभेदे ऋतेयुशब्दे दृश्यम् तत्र जलेयुरित्यत्र घृतेयुरिति विष्णुपु० पाठः

घृतेली स्त्री घृते स्नेहद्रव्ये इलति शेते इल–शय अच् गौरा० ङीष्। तैलपायिकायां (तेलापोका) हेमच०

घृतोद पु० घृतमिव स्वादु उदकमस्य उदकस्योदः। कुशद्वीपावरके समुद्रभेदे घृतोदध्यादयोऽप्यत्र कुशशब्दे २१४२ पृ० दृश्यम्।

घृतौदन पु० घृतेन मिश्रः ओदनः। "भक्ष्येण मिश्रणे" पा०३त०। आज्यमिश्रिते ओदने। "दध्योदनं च जीवाय शुक्राय च घृतौदनम्" ग्रहबलिकथने सं० त०।

घृत्समद पु०गृत्समद+पृषो०। ऋषिभेदे विष्णुपु०तथापाठः।

घृष सघर्षे स्पर्द्धायाञ्च सक० पर० सेट्। घर्षोमर्द्दनम् (घषा) व्यापारभेदः संमर्द्दो वा घर्षति अघर्षीत् जघर्ष। घर्षणं घर्षः। उदित् घर्षित्वा घृष्ट्वा। क्त्वो वेट्कत्वात् निष्ठा त्वनिट् घृष्टः। घर्षित इति प्रयोगस्तु तारका० इतजन्तः। "धातुजं सृजते रेणुं वायुवेगेन घर्षितम्" (शैलराजः) रामा० २।७९अ०।

घृष्ट त्रि० घृष–कर्म्मणि क्त। मर्द्दिते १कृतघर्षणे "घृष्टरसाञ्जनं नार्याः क्षीरेण" सुश्रु०। "द्रौपद्या ननु मत्स्यराजभवने घृष्टं न किं चन्दनम्" पञ्चतन्त्रम्। २गन्धभेदे "घृष्टोमलयजोगन्धः सरलश्च नमेरुणा। अगुरुप्रभृतिश्चापि यस्य पङ्कः प्रदीयते। घृष्टः संघृष्टगन्धोऽयं द्वितीयः परिकीर्त्तित" इति शब्दार्थचि० धृतवाक्यम्।

घृष्टि पुंस्त्री घृष–कर्त्तरि क्तिच्। १शूकरे मेदि० स्त्रियां वा ङीप्। (चामरआलु) २वाराह्याम् अमरः। ३अपराजितायाम् स्त्री मेदि०। भावे क्तिन् घर्षणे (घसा) ४व्यापारभेदे ५स्पर्द्धायाञ्च स्त्री मेदि०। क्तिन्नन्तत्वात् न ङीप् (कुलिया)। रत्नमा०।

घृष्टिला स्त्री घृष्टिं लाति ला–क। पृश्निपर्ण्याम्। (चा-

घृष्वि पुंस्त्री घर्षति भूमिं तुण्डेन घृष–क्विन् कविघृष्वि छवीत्यादि उ०नि०न वलोपः। १वराहे २घर्षणशीले त्रि०। "मदन्ति वीरा विदथेषु घृष्वयः" ऋ० १।८५।१। "प्र वः शर्द्धाय घृष्वये" १।३७।४। "घृष्वये शत्रुघर्षणयुक्ताय" भा०। "क्रीडन्ति क्रीडा विदथेषु घृष्वयः" १।१६६।२। एवं सर्वत्र घृष्विशब्दस्य इदन्तत्वेन प्रयोगदर्शनात् क्विन्प्रत्ययान्तत्वेन निष्पन्नत्वात् कृष्विर्वराह इति सि०कौ० उक्तेश्च शब्दक० घृष्वन्शब्दस्य नान्तत्वकल्पनं प्रामादिकमेव। स्त्रियां वा ङीप्।

घेल्कुलिका स्त्री (घेँचु) ख्याते क्रौञ्चादने हचे रत्नमाला।

घोङ्क पुंस्त्री पक्षिभेदे शब्दच० स्त्रियां ङीष्।

घोट(क) पु० घुट–अच् ण्वुल् वा। अश्वे। तस्य भुविवेष्टनाकारेण चेष्टनात्तथात्वम्। स्त्रियां जातित्वात् ङीष्। "घोटी ह्येषा विकृतविकृतं त्व हेलहीनं हसन्ती" सा०द०। तल्लक्षणादि अश्वशब्दे ४९८पृ० दृश्यम्" भा०।

घोटकमुख पु० घोटकस्य मुखमिव मुखमस्य १किन्नरभेदे २प्रवरर्षिभेदे च हेमा० व्र० प्रवराध्याये दृश्यम्।

घोटकारि पु० ६त०। महिषे शब्दार्थ चि०। तस्य यथाऽश्ववैरं तथा उपयमशब्दे १२५० पृ० उक्तम् स्त्रियां वा ङीप्। २हयारिवृक्षे करवीरे च। हयारिशब्दे दृश्यम्।

घोटिका स्त्री घुट्–ण्वुल् टापि अत इत्वम्। कर्कट्याम् राजनि०।

घोणा स्त्री घुण–अच्। १अश्वनासिकायां, २नासामात्रे च अमरः। "जवनिरोधस्फीतरोषघुरघुरायमाणघोरघोणेन" काद०। "गौरः प्रलम्बोज्ज्वलचारुघोणः" भा० आ० १८९ अ०। अस्य क्रोड़ादित्वात् स्वाङ्गत्वेऽपि न ङीष् दीर्घघोणा स्त्री।

घोणिन् पुंस्त्री दीर्घा घोणाऽस्त्यस्य व्रीह्या० इनि। शूकरे अमरः स्त्रियां ङीप्।

घोण्टा स्त्री घुण–वा ट तस्य नेत्त्वम्। वदरीभेदे (सेओलाकुल) २पूगवृक्षे च मेदि०। हेमच०।

घोण(न)स पु० गोनस+पृषो०। तिलत्से गोनसे सर्पभेदे

घोर न० घुर–अच्। १विषे राजनि० २भयानके त्रि० हेम०। घोणाशब्दे उदा०। "शिवाघोरस्वनां पश्चात्" रघुः। "घोरेऽस्मिन् भूतसंसारे" मनुः। "घोररावां महारौद्रीम्" कालीध्यानम्। ३शिवे पु० "घोराय घोररूपाय घोरघोरतराय च" भा०शा०२८६अ० शिवस्तोत्रे। "नमोवः पितरोघोराः" यजु० २।३२।।

घोरक पु० ब०। देशभेदे। "काश्मीरश्च कुमारश्च घोरका हंसकायनाः" भा० स० ५१अ०।

घोरघुष्य न० घोरं घुष्यते घुष–क्यप्। कांस्ये राजनि०। घोरं घृष्टं यस्य घोरघुष्टमित्यपि तत्र पाठः। तत्रार्थे राजनि०।

घोरघोरतर पु० घोर+प्रकारे द्वित्वम् ततः तरप्। १शिवे घोरशब्दे दृश्यम् २अत्यन्तघोरे त्रि०।

घोरदर्शन पुंस्त्री घोरं दृश्यतेऽसौ दृश–कर्म्मणि ल्युट्। १उलूके राजनि० स्त्रियां जातित्वात् ङीष्। २भयानके त्रि०। "वीक्षाञ्चक्रे महाबाहुस्तद्वनं घोरदर्शनम्" भा० सौ० १अ०।

घोररासन पुंस्त्री घोरं रासनं शब्दोऽस्य। १शृगाले शब्दर०। स्त्रियां जातित्वात् ङीष्। २घोरशब्दयुक्ते त्रि०।

घोररासिन् पुंस्त्री० घोरं रसति रस–णिनि। १शृगाले हेमच०। स्त्रियां ङीप्। २घोरशब्दकारिणि त्रि०

घोररूप पु० घोरमुग्रं रूपमस्य १महादेवे। घोरशब्दे दृश्यम्। २उग्ररूपे त्रि०।

घोरवाशन पुंस्त्री० घोरं वाशते वाश—ल्यु। १शृगाले शब्दर० स्त्रियां जातित्वात् ङीष्। २भयानकशब्दकारिणि तिर्य्यग्जातिमात्रे त्रि०।

घोरवाशिन् पुंस्त्री० घोरं वाशते वाश—णिनि। १शृगाले हेमच० २भयानकशब्दकारिणि पक्षि मृगादौ च स्त्रियां ङीप्।

घोरा स्त्री घुर—अच्। १देवताडीलतायां, राजनि० भयानकायां स्त्रियां त्रिका०। "२करालवदनां घोराम्" कालीध्यानम्। ३रात्रौ, ४सांख्योक्तायां राजस्यां मनोवृत्तौ शब्दार्थचि० ज्योतिषोक्ते "रवावुग्रभे संक्रमे भास्करस्य भवेद्घोरनाम्नीत्युक्ते" २।१०। ११।२०।२५। संज्ञकनक्षत्रे ५रविसंक्रान्तिभेदे च। संक्रमशब्दे विवृतिः

घोल पुंन० घुड—कर्म्मणि घञ् डस्य लः। १तक्रे मथितदध्नि। "तत्तु सस्नेहमजलं मथितं घोलमुच्यते" सुश्रु०। "सशरं निर्जलं घोलं वातपित्तहरं स्मृतम्। मस्तुना रहितं गाल्यं दधि शुभ्रतरे पटे। जीरसैन्धवसंमिश्रं घोलं घनतरं स्मृतम्। जीरसैन्धवसंयुक्तं घोलं वातप्रणाशनम्। अतीसारे च मन्देऽग्नौ हितं रुच्यं बलप्रदम्" शब्दार्थचि० वैद्यकम्। "हिङ्गुजीरयुतं घोलं सैन्धवेन च संयुतम्। भवेदतीव वातघ्नमर्शोऽतीसारहृत् परम्। रुचिदं पुष्टिदं बल्यं वस्तिशूलविनाशनम्। मूत्रकृच्छ्रे तु सगुडं पाण्डुरोगे सचित्रकम्। भावप्र० द्रव्यभेदयुतस्य तस्य गुणादिकमुक्तम्।

घोलज न० घोलात् जायते जन—ड। घोलजाते घृतादौ।

घोलवटक पु० घोलमिश्रितो वटकः। वटकभेदे "विष्टम्भी घोलवटको विदाही पवनापहः" मदनपालनि०।

घोलि(ली) घुड—इन् डस्य वा ङीप्। पत्रशाकभेदे राजनि०।

घोष पु० घुष—आधारे घञ्। १आभीरपल्ल्यां तस्यां गोनिनादात् तथात्वम् कर्त्तरि अच्। २गोपाले ३कांस्ये न० मेदि० ४मशके त्रिका०। भावे घञ्। ५ध्वनौ ६मेघशब्दे "स्वरा यमः खयः+कँपौ विसर्गः शर एव च। एते श्वासानुप्रदाना अघोषाश्च विवृण्वते। कण्ठमन्ये तु घोषाः स्युः" शिक्षोक्ते ७वर्णोच्चारणबाह्यप्रयत्नभेदे। ८घोषलतायाम् स्त्री शब्दार्थचि० "न च वृन्दावने कार्य्यो गवां घोषः कदाचन" हरिवं० ३२८१श्लो० शब्दे "द्युमन्तं घोषं विजयाय कृण्महे" ऋ० १०।८४।४। "तत्र भुक्त्वा पुनः किञ्चित् तूर्य्यघोषैः प्रहर्षितः" मनुः। गोपे "हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान्" रघुः। भूमा० वुञ्। घौषक आभीरपल्लीभवे त्रि०।

घोषक पु० घोष+स्वार्थे क। धामार्गवे घोषातकीलतायाम् अमरः। [श्वेतघोषातकीलताभेदे रत्नमा०।

घोषकाकृति पु० घोषकस्य लताभेदस्याकृतिरिवाकृतिरस्य।

घोषण न० घुष—भावे ल्युट्। १ध्वनौ णिच्—भावे ल्युट्। उच्चैःशब्देन ज्ञापने २व्यापारभेदे (ढेंड़रा पेटा)। "वीर्य्यविक्रमशौर्य्याणां घोषणं सहितं भवेत्" रामा० सुन्द० ५८अ०। युच्। घोषणाऽप्यत्र स्त्री। "राजा सर्व्वत्र पटहशब्देन घोषणामाज्ञापयामास" पञ्चत०। "दिग्विजृम्भितकाकुत्स्थपौलस्त्यजयघोषणः" रघुः।

घोषयित्नु पुंस्त्री० घुष—णिच् बा० इत्नुच्। १ब्राह्मणे २कोकिले। ३वन्दिनि त्रि० शब्दरत्ना०।

घोषवत् त्रि० घोषः ध्वनिः वर्णभेदोच्चारणे बाह्यप्रयत्नो वाऽस्यस्य मतुप् मस्य वः। १घोषरूपबाह्यप्रयत्नयुक्ते गकारादिवर्णभेदे। "सर्व्वे स्वरा बलवन्तो घोषवन्तः कर्त्तव्याः" छा० उ०। "घोषवदाद्यन्तरन्तस्थमभिनिष्ठानान्तं द्व्यक्षरं चतुरक्षरं वा" आश्व० गृ० १।१५।५।६। "वर्गप्रथमद्वितीयवर्णा ऊष्माणश्च हकारवर्जमघोषवन्तः शिष्टाः घोषवन्तः। तदादौ यस्य तत्तथोक्तं अन्तर्मध्येऽन्तःस्थायरलवा यस्य तत् तथोक्तम्। अभिनिष्ठानो विसर्गः अन्ते यस्य तत् अक्षरं स्वरः। अकारादयो द्वादश स्वराः शिष्टं व्यञ्जनम् अपरिमित व्यञ्जनः। चतुरक्षरं वा। तत्र द्व्यक्षरे भद्रः देवः भवः। चतुरक्षरे भवनाथः नागदेवः रुद्रदत्तः नारा० "आदौ घोषवदक्षरं यरलवान् मध्ये पुनःस्थापयेदन्ते दीर्घविसर्जनीयरहितं नाम प्रयत्नात् कृतम्" गर्गः। शाखिभेदात् ऽविसर्गान्तता व्यवस्थाप्या। २ध्वनियुक्ते च। "त्वं वज्रमतुलं घोषं घोषवांस्त्वं बलाहकः" भा० आ० २५अ०। स्त्रियां ङीप्। सा च ३वीणायां हेमच०।

घोषा स्त्री घुष्यते भ्रमरैरियं कर्म्मणि घञ्। १शतपुष्पायां, मधुरिकायां, (मौरि) मेदि० ३कर्कटशृङ्ग्यां, राजनि०। ४कोशातक्याञ्च शब्दार्थचि०। [घोषालतायां रत्नमा०।

घोषातकी स्त्री कोषातकी+पृषो०। कोषातकीलतायां श्वेत-

घोषादि पु० "घोषादिषु च" पा० परस्मिन्नेतेषु पूर्व्वपदस्याद्युदात्ततानिमित्तेषु शब्दभेदेषु स च गणः घोष कट वल्लभ ह्रद बदरी पिङ्गल पिशङ्ग माला रक्षा शाला कूटशाल्मली अश्वत्थ तृण शिल्पी मुनि प्रेक्षा।"

घौर पु० घोरस्यर्षेरपत्यम् अण्। कण्वगोत्रप्रवरे ऋषिभेदे। "कण्वानामाङ्गिरसाजमीढ एवेति घोरमु हैके ब्रुवतेऽथाजमीढनाङ्गिरसघौरकाण्वेति" आ० श्रौ० १२।१३।१

घ्रंस पु० ग्रस्यन्ते रसा अस्मिन् ग्रस–आधारे घञ् पृषो०। १दिवसे निघ०। "यो अस्मै घ्रंस उत वा य ऊधनि" ऋ० ५।३४।३। इमामृचमधिकृत्य निरु० ६।१०। उक्तं. यथा घ्रंस इत्यहर्नाम ग्रस्यन्तेऽस्मिन् रसाः" इति। अहस्तुल्ये २दीप्ते त्रि० "परि घ्रंसमोमना वां वयो गात्" ऋ० ७।६९।४। घ्रंसं दीप्तम्" भा०। इमामृचमधिकृत्य निरुक्ते तु घ्रंसमहरिति व्याख्यातम्। पृषो० अन्त्यलोपे घ्रंस् अप्यत्र। "न घ्रंस्तताप न हिमो जघान" अथ० ७।१८।२।

घ्रस ग्रसवत् धातुरिति केचित्।

घ्रा गन्धग्रहणे अक० घ्राणजज्ञाने सक० भ्वा० प० अनिट्। जिघ्रति अघ्रात् अघ्रासीत् अघ्रातास् अघ्रासिष्टाम्। जघ्रौ जघ्रिथ जघ्राथ। घ्राता घ्रेयात् घ्रायात्। कर्मणि भावे वा घ्रायते अघ्रायि "अघ्रायि वान् गन्धवहः सुगन्धः" भट्टिः। "षाड्वर्गिकं जिघ्रति षड्गुणेशः" भाग० १।२।६। नासिकया गन्धज्ञानमिह (सोङा) ग्रहणम्। उपसर्गपूर्वकस्तत्तदुपसर्गद्योत्यार्थयुक्ते ग्रहणे। घ्रेयः घ्रातं–घ्राणम् घ्रातिः

घ्राण न० घ्रा–करणे ल्युट्। १नासिकेन्द्रिये। तस्य मतभेदेन भौतिकादिता इन्द्रियशब्दे ८५४०पृ० दर्शिता। "इन्द्रियं घ्राणलक्षणम्" भाषा०। तस्य पार्थिवत्वे प्रमाणं सि० मु० दर्शितं यथा

"घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात् कुङ्कुमगन्धाभिव्यञ्जकघृतवत् न च दृष्टान्ते स्वकीयरूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यं परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात् न च नवशरावगन्धव्यञ्जकजलेन नैकान्तमिति वाच्यं तस्य सक्तुरसाभिव्यञ्जकत्वात् यद्वा परकीयेति न देयं, वायूपनीतसुरभिभागस्य दृष्टान्तत्वसम्भवात् न च घ्राणेन्द्रियसन्निकर्षस्य गन्धनाशव्यञ्जकत्वात् तत्र व्यभिचार इति वाच्यं द्रव्यत्वे सतीति विशेषणात्"। कर्मणि क्त वा तस्य नः। २कृतघ्राणे त्रि० घ्राणोऽमल। भावे ल्युट्। (सोङा) ३व्यापारे न० "घ्राणेन शूकरो हन्ति पक्षवातेन कुक्कुटः" मनुः। तत्राथघातारावधिनौ।

घ्राणज न० घ्राणे जायते करणस्याधारत्वविवक्षया "सप्तम्यां जनेर्डः" पा० जन–ड ७त०। नासिकेन्द्रियजाते प्रत्यक्षभेदे "घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम्" भाषा० तत्र प्रत्यक्षं गन्धादेर्यथाह तत्रैव "घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः"। "घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः" इति च

घ्राणतर्पण पु० घ्राणमिन्द्रियं तर्पयति। सुगन्धे अमरः।

घ्राणदुःखदा स्त्री घ्राणस्य दुःखं ददाति दा–क। छिक्कन्यां (हाँचि) भावप्र०।

घ्राणश्रवस् पु० घ्राणमिव श्रवः कर्णोऽस्य। कार्त्तिकेयसैन्यभेदे। "घ्राणश्रवाः प्रतिस्कन्धः काञ्चनाक्षोजलन्धरः" भा० आनु० ४६ अ० कुमारसैनिकोक्तौ

घ्राति स्त्री घ्रायते अनया घ्रा–करणे क्तिन्। १नासिकायां शब्दच०। भावे क्तिन्। २घ्राणे (सोङा) व्यापारे स्त्री "ब्राह्मणस्य रुजः कृत्या घ्रातिरघ्रेयमद्ययोः" मनुः।

इति वाचस्पत्ये घकारादिशब्दार्थनिरूपणम्।

ङ

ङकारः व्यञ्जनवर्णभेदः कवर्गपञ्चमः तस्योच्चारणस्थानं कण्ठनासिका च "जिह्वामूले तु कुः प्रोक्तः" इति "यमोऽनुनासिका नह्रौ" इति च शिक्षोक्तेः तदुच्चारणे आभ्यन्तरप्रयत्नः कण्ठमूले जिह्वामूलस्पर्शः। बाह्यप्रयत्नाः संवारनादघोषाल्पप्राणाः। मातृकान्यासेऽस्य दक्षकराङ्गुल्यग्रेषु न्यस्तता। तस्य तन्त्रे वाचकशब्दा वर्णोद्धारतन्त्रे उक्ता यथा "ङः शङ्खो भैरवश्चण्डो बिन्दूत्तंसः शिशुः प्रियः। एकोरुद्रोदक्षनखः खर्परोविषयस्पृहः। कान्तिः खेटाह्वयोऽघीरो द्विजात्मा ज्वालिनी वियत्। मन्त्रशक्तिश्च मदनो विघ्नेशी चात्मनायकः। एकनेत्रो महानन्दो दुर्धरश्चन्द्रमा मतिः। शिवचक्रो नीलकण्ठः कामेशी चषमांशुकौ"। कामधेनुतन्त्रे तस्य ध्येयरूपमुक्तं यथा। "ङकारं परमेशानि। स्वयं परमकुण्डलीम्। सर्वदेवमयं वर्णं त्रिगुणं लोललोचने!। पञ्चप्राणमयं वर्णं ङकारं प्रणमाम्यहम्" "ङकार-

आद्यनुस्वारपञ्चमौ भिन्नविधातुषु" कामधेनौ भणनात् सर्वधातुषु वर्गपञ्चमवर्णस्य नकारजत्वोक्तेः ङकारस्य तत्र नकारजत्वम् तेन अङ्क–क्विपि अन् इत्यादिरूपम्। तस्य काव्यादौ प्रथमनिर्द्देशफलं यथा "कः खः गोघश्च लक्ष्मीं वितरति नियतो ङस्तथा चः सुखं छः" वृ॰र॰ टी॰ इत्युक्तेरपयशः। [एकाक्षरकोषः।

ङ पु॰ ङु–बा॰ ड। १विषये २विषयस्पृहायां मेदि॰ ३भैरवे

ङु ध्वनौ भ्वा॰ आत्म॰ अक॰ अनिट्। ङवते अङविष्ट। जुङुवे। सनि जुङूषते।

इति वाचस्पत्ये ङकारादिशब्दार्थनिरूपणम्।

च

चकारः व्यञ्जनवर्णभेदः चवर्गस्याद्यः अस्योच्चारणस्थानं तालु "इचुयशानां तालु" सि॰कौ॰ उक्तेः तस्योच्चारणे आभ्यन्तरप्रयत्नः तालुनि जिह्वामध्यस्पर्शः श्वासविवाराघोषाल्पप्राणा बाह्यप्रयत्नाः। मातृकान्यासे वामबाहुमूलेऽस्य न्यस्यता। अस्य वाचकशब्दाः वर्णोद्धारतन्त्रे उक्ता यथा।"चः चण्डांशो हली वाणी चालशक्तिः सुदर्शनः। चर्म्ममुण्डधरो लोलो मदिराचारलक्षणः। एकरुद्रो कोचः कूर्म्मः स्वाङ्गुष्ठा दीर्घबाहुकः। वामबाहुमूलं माया चतुर्मूर्त्तिस्वरूपिणी। दयितश्च त्रिनेत्रश्च लक्ष्मीस्तृतीयलोचनः। चन्दनं चन्द्रमा दैवज्ञनो वस्तिको बुधः। देवी कोटमुखस्वात्मा कुमारी पूर्वफाल्गुनी। अनङ्गमेखला वायुर्नोदिनी च द्रावणी"। तस्य ध्येयरूपं यथा "चवर्णं शृणु सुश्रोणि! चतुर्वर्गप्रदायकम्। कुण्डलीसहितं देवि! स्वयं परमकुण्डलीम्। सततं कुण्डलीयुक्तं पञ्चप्राणमयं सदा। पञ्चप्राणमयं वर्णं पञ्चप्राणात्मकं सदा। त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं प्रिये!" कामधेनुतन्त्रम्। काव्यबन्धादौ प्रयोगे सुखदायकता ङकारे तन्मूलमुक्तम्।

च अव्य॰ चि–चण–वा बा॰ ड। १पादपूरणे २पक्षान्तरद्योतने ३अवधारणे मेदि॰ ४हेतौ त्रिका॰। पादपूरणार्थस्य निरर्थकतैव। "निरर्थकं चादि पादपूरणैकप्रयोजनम्" चन्द्रालोकः ५समुच्चये ६अन्वाचये ७इतरेतरयोगे ८समाहारे च" अमरः। "चार्थे द्वन्द्वः" पा॰ सि॰कौ॰ व्याख्यातं यथा

"समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः। परस्पर (१) निरपेक्षस्याऽनेकस्य (२) एकस्मिन् (३) अन्वयः समुच्चयः। अन्यतरस्यानुषङ्गिक (४) त्वेऽन्वाचयः। मिलितानाम (५) मन्वय इतरेतरयोगः। समूहः (६) समाहारः। तत्रेश्वरं गुरुञ्च भजस्वेति समुच्चये भिक्षामट गाञ्चानयेत्यन्वाचये च न समासोऽसामर्थ्यात् (७)। धवखदिरौ। संज्ञापरिभाषम्"।

व्याख्यातं चैतदस्माभिः सरलायाम्।

(१) "परस्परनिरपेक्षस्येति एकस्य क्रियान्वयोत्तरमपरस्यावृत्त्या तदन्वय इति न तयोः परस्पराकाङ्क्षा। (२) अनेकस्येति तेनैकस्य सापेक्षत्वेऽपि न दोष उभयोस्तथात्वाभावात्। समुच्चये चशब्देन स्वसमभिव्याहृतपदार्थेतरसापेक्षत्वं बोध्यते तदसमभिव्याहारे तु न। अत एवात्रैक एव चशब्दः प्रयुज्यते तेन यच्छब्दोत्तरं चशब्दस्तस्यैव समभिव्याहृतक्रियादावन्वये इतरसापेक्षत्वं न त्वन्यस्येति बोध्यम्। (३)एकस्मिन् एकधर्मावच्छिन्ने इत्यर्थः अन्वय इत्येतस्य यत्रेत्यादिस्तथाच यत्रैवमन्वयस्तत्र समुच्चयश्चशब्दार्थ इति भावः। न त्वन्वय एव समुच्चय इति भ्रमितव्यम्। अन्वयश्च विशेष्यतया विशेषणतया वा तत्राद्यं चैत्रो गच्छति पचति चेत्यादौ क्रियासमुच्चये, अन्त्यम् ईश्वरं गुरुञ्च भजस्वेत्यादौ द्रव्यसमुच्चये। (४) आनुषङ्गिकत्वमुद्देश्यत्वानन्यतरस्य प्राधान्यञ्च तच्च स्वन्वितक्रियायाः अवश्यकर्त्तव्यत्वरूपं तथाच समभिव्याहृतक्रियादिगतमानुषङ्गिकत्वमप्राधान्यत्वमन्वाचयचकारार्थः। (५) मिलितानामिति परस्परापेक्षाणामुद्भूतावयवभेदकसमूहरूपाणामित्यर्थः। अन्वय इत्यस्यैकधर्मावच्छिन्नेनान्वय इत्यर्थः। तेन णीञ्धातोः संयोगजनकव्यापारजनकव्यापारबोधकतया द्विकर्मकत्वेन अजां ग्रामं नयतीत्यादौ अजाग्रामयोरन्वयोरपि धात्वर्थक्रियायामन्वयेन तत्र न चकारयोगो नापि समासः तयोरेकस्य संयोगेऽपरस्य संयोगानुकूलव्यापारेऽन्वयादेकत्रान्वयाभावात्। अत एव तत्रानेकचकारप्रयोगः, यत्रैवमन्वयस्तत्रेतरेतरयोगस्तादृशसमूहश्च चार्थ इत्यर्थः। (६) अनुद्भूतावयवभेदसमूहस्य प्रतीत्या प्रत्येकावयववृत्तिधर्म्म एव मह-

त्तिनिमित्तं समाहारे तु द्वित्वत्रित्वादिनैव समूहस्य भानात् समूहत्वेनैव प्रवृत्तिनिमित्तमिति विशेषः। एवञ्च उभयत्रैव समूहस्य बोधः। (७) असामर्थ्यादिति एकार्थीभावाभावादित्यर्थः। तथाहि बहुव्रीहिघटकपदानां कर्माद्यन्तर्भावेणैव द्वन्द्वघटकपदानां चार्थान्तर्भावेणैव एकार्थीभाव आवश्यकः "समर्थः पदविधिरिति" पा॰ परिभाषितत्वात् चार्थे द्वन्द्व इत्युक्तेश्च। नचेतरेतरान्वये परस्परनिरपेक्षाणामेकार्थीभावः सम्भवति येन समुच्चयान्वाचयावेकार्थीभावेऽन्तर्भूतौ स्याताम्। ततश्चेतरेतरयोगे समाहारे च साहित्यस्य सत्त्वादेकार्थीभावस्तयोस्तदभावान्न तयोरिति बोध्यम्। इयांस्तु विशेष इतरेतरयोगे साहित्यं विशेषणं द्रव्यं विशेष्यं, समाहारे तु साहित्यं प्रधानं द्रव्यं विशेषणमिति यथा चानयोर्बोधवैलक्षण्यं तथाकरे द्रष्टव्यम्"। पक्षान्तरं चात्र पुनरर्थकम् यथा "मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः। तावच्च शोभते मूर्खो यावत् किञ्चित् न भाषते" हितो॰। ९तुल्ययोगित्वे १०विनियोगे च शब्दार्थचि॰। तत्र तुल्ययोगितालङ्कारस्य चेन द्योतनात्तस्य तदर्थकता यथा "सङ्कुचन्ति सरोजानि स्वैरिणी वदनानि च" चन्द्रा॰। एवं दीपकालङ्कारद्योतकताऽपि ३९९पृ॰ दृश्या। "सती च प्रयोषित् प्रकृतिश्च निश्चला" माघः। चकारद्वयप्रयोगे क्वचिद्विलम्बयोगितायाः क्वचित्तुल्यप्राधान्यस्य चावबोधनम् यथा "इतीरिता पत्ररथेन तेन ह्रीणा च हृष्टा च बभाण भैमी" नै॰। "कला च सा कान्तिमती कलाभृतस्त्वमस्य लोकस्य च नेत्रकौमुदी" कुमा॰। लिदनुबन्धः चण् यदर्थे तस्य प्रयोगे णित्त्वम्।

च पु॰ चीयते शुक्लपक्षे किरणैः अङ्गं परधनं वा चिनोति वा चि—ड। १चन्द्रे २कच्छपे ३चौरे ४चण्डेशे ५चर्वणे च मेदि॰। ६निर्बीजे ७दुर्जने च त्रि॰ शब्दरत्ना॰।

चक भ्रान्तौ सौ॰ पर॰अक॰ सेट् इदित्। चङ्कति अचङ्कीत्। चचङ्क।

चक प्रतिघाते तृप्तौ च भ्वा॰ आ॰ अक॰ सेट्। चकते अचकिष्ट चचके। मिते चकयति। प्रतिघातः भयहेतुकोऽनिष्टशङ्कया गमनादिप्रतिरोधः। "व्याधानुसारचकिता हरिणीव यासि" मृच्छ॰। "पौलस्त्यचकितेश्वरः" रघुः। उद्+अप्रतिघाते। "यं चेकितानमनुचित्य उच्चकन्ति" भाग॰ ६।१७।४६। उच्चकन्ति अप्रतिहतानि भवन्ति

चकास दीप्तौ अदा॰ जक्षा॰ पर॰ अक॰ सेट्। चकास्ति अचकासीत्। चकासाम्-बभूव आस चकार। इदित्। अचचकासत्। "चकासति च मांसादास्तथा रक्षेषु जाग्रति"। "चकासां चक्रुरुत्तस्थुः" "शोकादभूपैरपि भूचकासाञ्चकार नागेन्द्ररथाश्वसिम्बैः" भट्टिः। "चकासतं चारु चमूरुचर्म्मणा" माघः।

चकित न॰ चक—भावे क्त। १भये २सम्भ्रमे च। "कुतोऽपि दयितस्याग्रे चकितं भयसम्भ्रमः" सा॰ द॰ उक्ते ३स्त्रीणां सात्त्विकालङ्कारभेदे यथा "त्रस्यन्ती चलशफरीविघट्टितोरुर्वामोरुरतिशयमाप विभ्रमस्य। क्षुभ्नन्ति प्रसभमहो विनाऽपि हेतोर्लीलाभिः किमु सति कारणे तरुण्यः" "सचकितशङ्खितवक्त्रवारिजश्रीः"। "भयचकितमाह्वे निजम्" माघः। "भः सभनगा यस्यां साष्टच्छिदिह चकिता" वृ॰ र॰ उक्ते ४छन्दोभेदे स्त्री। कर्त्तरि क्त। ८शङ्किते ५भीते च त्रि॰।

चकोर पु॰ चक—तृप्तौ ओरन्। स्वनामख्याते—पक्षिभेदे "कोकप्रीतिचकोरपारणपटुः" मुरारिः। "इमां किमाचामवसे न चक्षुषी चिरं चकोरस्य भवन्मुखस्पृशी" नैष॰। "इतश्चकोराक्षि! विलोकयेति" रघुः। स्वार्थे क तत्रार्थे अमरः। "तन्मांसगुणा राजनि॰ उक्ता यथा "चाटकं शीतलं रुच्यं हृष्यं कापिञ्जलामिषम्। तद्वच्चकोरजं मांसं वृष्यञ्च बलपुष्टिदम्"।

चक्क आर्त्तौ चुरा॰उभ॰सक॰सेट्। चक्कयति ते अचचक्कत् त।

चक्र पु॰ क्रियतेऽनेन कृ—घञर्थे क नि॰ द्वित्वम्। १चक्रवाके पक्षिणि, (चका) अमरः २रथाङ्गे, (चाका) ३सैन्ये, ४समुदाये, ५राष्ट्रे, ६दम्भभेदे, ७कुम्भकारोपकरणे, "कलसे निजहेतुदण्डजः किमु चक्रभ्रमिकारितागुणः" नैषधम्। ८अस्त्रभेदे। ९व्यूहभेदे, १०जलावर्त्ते, मेदि॰ ११ग्रामजाले, त्रिका॰ १२तगरपुष्पे, १३तैलिकयन्त्रे तन्त्रोक्तेषु मूलाधारादिषु स्थितेषु षट्सु १४पद्मेषु, १५सर्वतोभद्रादिषु, १६देवार्चनयन्त्रेषु "श्रीचक्रमेतदुदितं परदेवतायाः" तन्त्रम्। मन्त्रदोषोपयोगिषु १६अकडमादिषु, १७वर्गैक्यादिचक्रेषु, "प्रवृत्ते भैरवीचक्रे सर्वे वर्णा द्विजोत्तमाः इति" तन्त्रम् १८अलङ्कारोक्ते काव्यबन्धविशेषे च न॰। अलङ्कारशब्दे २९०पृ॰ दृश्यम् अर्द्धर्चादित्वात् द्विलिङ्गत्वेऽपि शब्दभेदेनैवास्य लिङ्गभेदनियमः। तत्र अस्त्रभेदचक्रलक्षणं हेमाद्रौ परि॰ लक्षणसमुच्चये "औशनसे धनुर्वेदे जमदग्निं प्रति शुक्र उवाच। वक्ष्ये यथावत्समुपदिश्यमानं निबोध तत्रोत्तममध्यमाधमभेदेन

चक्रं त्रिविधं भवति । चक्रमष्टाभिरारैरुत्तमं, षडारं मध्यमं चतुर्भिरारैः सम्पन्नमधमं भवति । तत्र श्लोकः । अष्टारमुत्तमं चक्रं षडारं मध्यमं भवेत् । जघन्यं चतुरारं स्यादिति चक्रं भवेत्त्रिधा । द्वादशपलमुत्तममेकादशपलं मध्यमं दशपलमधमं चेति बालानाम् । अबालानां पञ्चाशत्पलमुत्तमं चत्वारिंशत्पलं मध्यमं त्रिंशत्पलं कनिष्ठमिति । तथाऽष्टाङ्गुलमुत्तमं सप्ताङ्गुलं मध्यममधमं षडङ्गुलं भवति बालानाम्, अबालानान्तु षोड़शाङ्गुलमुत्तमं चतुर्दशाङ्गुलं मध्यममधमं द्वादशाङ्गुलं भवति । तत्र श्लोकौ । द्वादशैकादशदशपलानि क्रमशः शिशोः । अबालस्य द्विरष्टौ स्युर्द्विसप्त द्वादशापि च । बालानां त्रिविधं चक्रमष्टसप्तषडङ्गुलम् । षोडशाङ्गुलमन्येषां द्विहीने मध्यमाधमे । त्रिविधं चतुर्दशाङ्गुलमाद्यं द्विद्विहीनं मध्यमं कनिष्ठं वेति । तत्र त्र्यङ्गुला सैक्यायसमयी प्रथमा नेमिः । सार्द्धद्व्यङ्गुला मध्यमा नेमिर्द्व्यङ्गुला तु कनिष्ठा नेमिःस्यात्तु मध्यमपरिमण्डला नेमिभिर्विस्तृताभिःस्यात् मणिरत्नालङ्कृता स्थूलमूला या नेमिः सा चक्रे पूजिता भवति । तत्र सैक्यं शिल्पिभिर्विचित्रमनेकविधसंस्थानमतिमनोहरं चक्रं कर्त्तव्यमव्रणं सुधारवक्त्रं कुर्व्वीत" ।

विष्णुचक्रलक्षणन्तु हरिभ० ४वि० । "द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम् । चक्रं स्याद्दक्षिणावर्त्तः शङ्खश्च श्रीहरेः स्मृतः"

तन्त्रोक्तं भैरवीचक्रं च तत्त्वचक्रत्वेन प्रसिद्धम् तत्र च निष्कामाणामधिकारः रुद्रयामलोक्ते चक्रपञ्चके तु सकामानाम् यथाह चक्रं पञ्चविधं प्रोक्तं तन्त्रे तु रुद्रयामले । विधिना पूजिते चक्रे सौख्यमोक्षफलं लभेत् । महाचक्रं राजचक्रं दिव्यचक्रं तथाऽपरम् । वीरचक्रम् चतुर्थञ्च पशुचक्रञ्च पञ्चमम् । राजचक्रं राज्यदं स्यान्महाचक्रं तु मोक्षदम् । देवत्वदं देवचक्रं वीरचक्रं तु सिद्धिदम् । पशुचक्रं तु दारिद्र्यशोकदुःखामयप्रदम् । कापट्ये दक्षिणाहीने सर्व्वचक्रन्तु निष्फलम् । सकामाश्चैव निष्कामाद्विविधा भुवि मानवाः । क्षुद्राशयाः कामिनो ये तेषामत्राधिकारिता । ब्रह्मज्ञानाय तु प्रोक्तं भैरवीचक्रमुत्तमम् । ब्रह्मज्ञानयुतानां तु तत्त्वचक्रेऽधिकारिता ।" महानिर्व्वाणे च "नात्राधिकारः सर्व्वेषां ब्रह्मज्ञान् साधकान् विना । परब्रह्मोपासका ये ब्रह्मज्ञा ब्रह्मतत्पराः । शुद्धान्तःकरणाः शान्ताः सर्व्वप्राणिहिते रताः । निर्व्विकारा निर्व्विकल्पा दयाशीला दृढव्रताः । सत्यसङ्कल्पका ब्राह्मास्त एवात्राधिकारिणः । ब्रह्मभावेन तत्त्वज्ञा ये पश्यन्ति चराचरम् । तेषां तत्त्वविदां पुंसां तत्त्वचक्रेऽधिकारिता । सर्व्वब्रह्ममयो भावश्चक्रेऽस्मिन् तत्त्वसंज्ञके । येषामुत्पद्यते देवि ! त एव तत्त्वचक्रिणः" । अत्र सर्व्वत्र चक्राकारेण साधकैरुपवेशनात् चक्रत्वम् । चक्रानुष्ठानञ्च श्यामारहस्यादौ द्रष्टव्यम् । योगोपयोगितया देहस्थमूलाधारादिचक्रनिरूपणाय इडादिनाडीनिवेशनोक्तिपूर्व्विका चक्रभेदोक्तिः तन्त्रसारे "गौतम उवाच । देवर्षे ! योगयुक्तानां योगानुभवदर्शक ! । सांख्ययोगविशेषज्ञ । कर्म्मयोगनिषेधक ! विना योगं न सिध्येत्तु कुण्डलीचङ्क्रमः प्रभो ! । मूलपद्मे कुण्डलिनी यावन्निद्रायिता प्रभो ! । तावत् किञ्चिन्न सिध्येत मन्त्रयन्त्रार्च्चनादिकम् । जागर्त्ति यदि सा देवी बहुभिः पुण्यसञ्चयैः । तदा प्रसादमायान्ति मन्त्रयन्त्रार्च्चनादयः । शिववद्विहरेल्लोके षडैश्वर्य्यसमन्वितः । योगयोगाङ्गवेत्तृत्वे मन्त्रसिद्धिरनुत्तमा । सिद्धे मन्त्रे परावाप्तिरिति शास्त्रेषु निर्णयः । तस्मात् कार्य्यं परं योगं कथयस्व मुनीश्वर ! । मुक्तात्मा येन विहरेत् स्वर्गे मर्त्त्ये रसातले । जीवन्मुक्तश्च देहान्ते निर्व्वाणपदमाप्नुयात् । नारद उवाच । कथयामि तव स्नेहाद्योगयोग्योऽसि गौतम ! । संसारोत्तरणे युक्तिर्योगशब्देन कथ्यते । ऐक्यं जीवात्मनोराहुर्योगं योगविशारदाः । तव स्नेहात् समाख्यास्ये योगविघ्नकरास्त्विमे । कामक्रोधलोभमोहमदमात्सर्य्यसंज्ञकाः । योगाङ्गैरेभिर्निर्ज्जित्य योगिनो योगमाप्नुयुः । यमनियमावासनप्राणायामौ ततः परम् । प्रत्याहारं धारणाख्यं ध्यानं सार्द्धं समाधिना । योगाङ्गान्याहुरेतानि योगिनां योगसाधने" । "यमादयस्तु । "अहिंसा सत्यमस्तेयं ब्रह्मचर्य्यं दयाऽऽर्जवम् । क्षमा धृतिर्म्मिताहारः शौचञ्चेति यमा दश । तपः सन्तोषमास्तिक्यं दानं देवस्य पूजनम् । सिद्धान्तश्रवणञ्चैव ह्रीर्मतिश्च जपो हुतम् । दशैते नियमाः प्रोक्ता योगशास्त्रविशारदैः" आसनानि प्रोक्तानि । "इडयाकर्षयेद्वायुं बाह्यं षोडशमात्रया । धारयेत् पूरितं योगी चतुःषष्ट्या तु मात्रया । सुषुम्णा मध्यगं सम्यग्द्वात्रिंशन्मात्रया शनैः । नाड्या पिङ्गलया चैव रेचयेद्योगवित्तमः । प्राणायाममिमम्प्राहुर्योगशास्त्रविशारदाः । भूयो भूयः क्रमात्तस्य व्यत्यासेन क्रमाच्चरेत् । मात्रावृद्धिक्रमेणैवं

सम्यग्द्वादश षोडश । जपध्यानादिभिर्युक्तं सगर्भं तं विदुर्बुधाः । तदपेतं निगर्भञ्च प्राणायामस्परं विदुः । क्रमादभ्यस्यतः पुंसो देहस्वेदोद्गमोऽधमः । मध्यमः कम्पसंयुक्तो भूमित्यागः परोमतः । उत्तमस्य गुणावाप्तिर्यावच्छीलनमिष्यते । इन्द्रियाणां विचरतां विषयेषु निवर्हणम् । बलादाहरणं तेभ्यः प्रत्याहारोऽभिधीयते । अङ्गुष्ठगुल्फजानूरुसीमनीलिङ्गनाभिषु । हृद्ग्रीवाकण्ठदेशे तु लम्बिकायां तथा नसि । भ्रूमध्ये मस्तके मूर्द्ध्नि द्वादशान्ते यथाविधि । धारणं प्राणमरुतो धारणेति निगद्यते । समाहितेन मनसा चैतन्यान्तरवर्त्तिना । आत्मन्यभीष्टदेवानां ध्यानं ध्यानमिहोच्यते । समत्वभावनां नित्यं जीवात्मपरमात्मनोः । समाधिमाहुर्मुनयः प्रोक्तमष्टाङ्गलक्षणम् । इत्यादि कथितं विप्र ! कामादिषट्कनाशनम् । इदानीं कथयिष्येऽहं मन्त्रयोगमनुत्तमम् । विश्वं शरीरमित्युक्तं पञ्चभूतात्मकं मुने ! । चन्द्रसूर्य्याग्नितेजोभिर्जीवब्रह्मैक्यरूपकम् । तिस्रः कोट्यस्तदर्द्धेन शरीरे नाड्योमताः । तासु मुख्या दश प्रोक्तास्तासु तिस्रोऽध्यवस्थिताः । प्रधाना मेरुदण्डेऽत्र सूर्य्याग्निचन्द्ररूपिणी । शक्तिरूपा सा च नाड़ी साक्षादमृतविग्रहा । दक्षिणे पिङ्गलाख्या तु पुंरूपा सूर्य्यविग्रहा । दाडिमीकुसुमप्रख्या विसाभा मुनिभिः स्मृता । मेरुमध्यस्थिता या तु मूलस्था ब्रह्मविग्रहा । सर्वतेजोमयी सा तु सुषुम्णा वह्निरूपिणी । तस्यामध्ये विचित्राख्या अमृतस्राविणी शुभा । सर्वदेवमयी सा तु योगिनां हृदयङ्गमा । विसर्गाद्विन्दुपर्यन्तं व्याप्य तिष्ठति तत्त्वतः । मूलाधारे त्रिकोणाख्ये इच्छाज्ञानक्रियात्मके । मध्ये स्वयम्भूलिङ्गन्तु कोटिसूर्य्यसमप्रभम् । तदूर्द्ध्वे कामवीजन्तु कलाशान्तीन्दुनादकम् । तदूर्द्ध्वे तु शिखाकारा कुण्डली ब्रह्मविग्रहा । तद्वाह्ये हेमवर्णाभं शसवर्णं चतुर्द्दलम् । द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत् । तदूर्द्ध्वेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम् । वादिलान्तषड्वर्णेन युक्ताधिष्ठानसंज्ञकम् । मूलमाधारषट्कानां मूलाधारं ततो विदुः । स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः । तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महाप्रभम् । मेघाभं विद्युदाभञ्च बहुतेजोमयन्ततः । मणिवद्भिन्नं तत् पद्मं मणिपूरं तथोच्यते । दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् । शिवेनाधिष्ठितं पद्मं विश्वलोकैककारणम् । तदूर्द्ध्वेऽनाहतं पद्ममुद्यदादित्यसन्निभम् । कादिठान्ताक्षरैरर्क१२पत्रैश्च समधिष्ठितम् । तन्मध्ये वाणलिङ्गन्तु सूर्य्यायुतसमप्रभम् । शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र लक्ष्यते । तेनाहताख्यं पद्मं तन्मुनिभिः परिकीर्त्तितम् । आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम् । तदूर्द्ध्वन्तु विशुद्धाख्यं षोड़शदलपङ्कजम् । स्वरैः षोडशभिर्युक्तं धूम्रवर्णं महाप्रभम् । विशुद्धिं तनुते यस्माज्जीवस्य हंसलोकनात् । विशुद्धं पद्ममाख्यातमाकाशाख्यं महाप्रभम् । आज्ञाचक्रन्तदूर्द्ध्वे तु आत्मनाधिष्ठितं परम् । आज्ञासंक्रमणन्तत्र गुरोराज्ञेति कीर्त्तितम् । द्विदलं हलसंयुक्तं बोधनन्तु तदूर्द्ध्वतः । एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रत ! । सहस्राराम्बुजं विन्दुस्थानं तदूर्द्ध्वमीरितम् । इत्येतत् कथितं सर्व्वं योगमार्गमनुत्तमम्” ।

दीक्षणीयतन्त्रोक्तमन्त्राणां साधकस्य शुभाशुभदायकता विचाराङ्गचक्राणि तन्त्रसारे दर्शितानि यथा

“अनुकूलं मन्त्रं गृह्णीयात्तथाच ‘स्वताररराशिकोष्ठानामनुकूलान् भजेन्मनून्’’। वाराहीतन्त्रे “ताराचक्रं राशिचक्रं नामचक्रं तथैव च। तत्र चेत् सगुणो मन्त्रो नान्यचक्रं विचारयेत्”। इति तु प्रधानतया बोद्धव्यम्। “अरिमन्त्रं न गृह्णीयादकुलञ्च तथैव च’’। इत्यादिदर्शनात् ततश्च चक्रविचारस्यावश्यकत्वात् प्रथमं तन्निरूप्यते। तत्र सिद्धिसारस्वते “नृसिंहार्कवराहाणां प्रसादप्रणवस्य च । सपिण्डाक्षरमन्त्राणां सिद्धादीन्नैव शोधयेत्। स्वप्नलब्धे स्त्रिया दत्ते मालामन्त्रे च त्र्यक्षरे । वैदिकेषु च सर्व्वेषु सिद्धादीन्नैव शोधयेत्। एकाक्षरस्य मन्त्रस्य मालामन्त्रस्य पार्व्वति !। वैदिकस्य च मन्त्रस्य सिद्धादीन्नैव शोधयेत्”। मालामन्त्रो यथा वाराहीतन्त्रे “विंशत्यर्णाधिका मन्त्रा मालामन्त्राः प्रकीर्त्तिताः। नपुंसकस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत् । हंसस्याष्टाक्षरस्यापि तथा पञ्चाक्षरस्य च । एकद्वित्र्यादिवीजस्य सिद्धादीन्नैव शोधयेत्” चामुण्डातन्त्रे “काली तारा महाविद्या षोड़शी भुवनेश्वरी । भैरवी छिन्नमस्ता च विद्या धूमवती तथा। वगला सिद्धविद्या च मातङ्गी कमलात्मिका। एता दश महाविद्याः सिद्धा विद्याः प्रकीर्त्तिताः। नात्र सिद्धाद्यपेक्षास्ति नक्षत्रादिविचारणा । कालादिशोधनं नास्ति न चामित्रादिदूषणम् । सिद्धविद्या तथा नात्र युगसेवापरिश्रमः । नास्ति किञ्चिन्महादेवि ! दुःखसाध्यं कथञ्चन” । मालिनीविजये “काली तारा महाविद्या त्वरिता छिन्नमस्तका । वाग्वादिनी चान्नपूर्णा

तथा प्रत्यङ्गिरा मता । कामाख्यावासिनी बाला मातङ्गी शैलवासिनी । इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः । सिद्धविद्यास्तथा नात्र युगसेवापरिश्रमः । तथा चैता महाविद्याः कलिदोषैर्न बाधिताः” इत्यादिवचनादेषु विचारो नास्ति । वस्तुतस्तु इदन्तु प्रशंसापरम् सर्व्वत्र विचारस्यावश्यकत्वम् । दुरदृष्टवशात् कदाचिद्वैरिमन्त्रस्य स्वप्नादौ प्राप्त्या तत्तद्दोषस्य दृष्टत्वादिति तु साम्प्रदायिकाः । तत्रादौ

कुलाकुलचक्रम् तच्च तच्छब्दे २१२४पृ० दर्शितम् ।

राशिचक्रम् आगमकल्पद्रुमे “रेखाद्वयं पूर्व्वपरेण कुर्य्यात्तन्मध्यतो याम्यकुवेरभेदात् । एकैकमीशाननिशाचरे तु हुताशवाय्वोर्विलिखेत्ततोऽर्णान् । वेदाग्निवह्नियुगजन्मवणाब्धिसंख्यान् पञ्चेषुवाणशरपञ्चचतुष्टयार्णान् । मेषादितः प्रविलिखेत् सकलांस्तु वर्णान् कन्यागतान् प्रविलिखेदथ शादिवर्णान्” । सङ्केतान्तरं शारदायाम् “बालं गौरं खुरं शोणं शमो शोभेति राशिषु । क्रमशोभेदिता वर्णाः कन्यायां शादयः स्मृताः” । अ आ इ ई मेषः । उ ऊ ऋ वृषः । ॠ ऌ ॡ मिथुनम् । ए ऐ कर्कटः । ओ औ सिंहः । अं अः श ष स ह ल क्षाः कन्यका । कवर्गस्तुला । चवर्गो वृश्चिकः । टवर्गो धनुः । तवर्गोमकरः । पवर्गः कुम्भः । यवर्गो मीनः । स्वराशीनामनुकूलं मन्त्रं भजेत् “स्वताराशिकोष्ठानामनुकूलान् भजेन्मनून्” इति वचनात् । “राशीनां शुभता ज्ञेया त्यजेच्छत्रु स्मृतिं व्ययम् । स्वराशेर्मन्त्रराश्यन्तं गणनीयं विचक्षणैः” । यदा तु स्वराशेरज्ञानम् तदा साधकनामाक्षरसम्बन्धिनं राशिं गृहीत्वा गणयेत् । “साध्याद्याक्षरराश्यन्तं गणयेत् साधकाक्षरादिति” रामार्च्चनचन्द्रिकाधृतवचनात् । नारायणीये च “अज्ञाते राशिनक्षत्रे नामाद्यक्षरराशितः” इति । रामार्च्चनचन्द्रिकायाम् “एकपञ्चनवबान्धवाः स्मृताः द्वौ च षट् च दशमास्तु सेवकाः । वह्निरुद्रमुनयस्तु पोषकाः द्वादशाष्टचतुरस्तु घातकाः” । चतुरस्तु घातका इति विष्णुविषयं रामार्च्चनचन्द्रिकाधृतत्वात् । शक्त्यादौ तु षष्ठं वर्जनीयम् “षष्ठाष्टमद्वादशानि वर्जनीयानि यत्नतः” इति वचनात् । तन्त्रान्तरे “लग्नं धनं भ्रातृबन्धू पुत्रामित्रकलत्रकम् । मरणं धर्म्मकर्म्मायव्यया द्वादश राशयः । लग्नोऽतिक्लेशजनको धनदश्च धनम्भवेत् । भ्राता रत्नाकरो बन्धुरर्थकृत् सुखदः सुतः । शत्रुनाशाय, सम्पत्त्यै कलत्रं भवति ध्रुवम् । मरणं मरणायैव, धर्म्मो धर्म्माय कल्पते । कर्म्मणि स्वल्पसिद्धिः स्यादायोऽतिशीघ्रदस्तथा । लाभालाभौ व्ययः कुर्य्यादेषां क्रमविचारणा । नामानुरूपमेतेषां शुभाशुभफलं दिशेत् । वैष्णवे तु शत्रुस्थाने बन्धुरिति पाठः । तथा च तन्त्रराजे “तेन मन्त्रादिवर्णेन नाम्नश्चाद्याक्षरेण च । गणयेद्यदि षष्ठं वाप्यष्टमं द्वादशन्तु वा । रिपुर्मन्त्राद्यवर्णः स्यात्तेन तस्याहितं भवेत् ।”

अष्टवर्गचक्रम्—अष्टवर्गशब्दे ५२२ पृ० तच्चोक्तम् ।

नक्षत्रचक्रम्—भैरवीतन्त्रे “ऊर्द्ध्वगा दश रेखाः स्युस्तिर्य्यग्रेखाश्चतस्रकाः । सप्तविंशतिकोष्ठानि भेषु वर्णांल्लिखेद्यथा । गणाक्षरनिर्णयः । अ आ अश्विनी देवगणः । इ भरणी मानुषः । ई उ ऊ कृत्तिका राक्षसः । ऋ ॠ ऌ ॡ रोहिणी मानुषः । ए मृगशिरोदेवः । ऐ आर्द्रा मानुषः । ओ औ पुनर्वसू देवः । कः पुष्योदेवः । ख ग अश्लेषा राक्षसः । घ ङ मघा राक्षसः । च पूर्व्वफल्गुनी मानुषः । छ ज उत्तरफाल्गुनी मानुषः । झ ञ हस्ता देवः । ट ठ चित्रा राक्षसः । ड स्वाती देवः । ढ ण विशाखा राक्षसः । त थ द अनुराधा देवः । ध ज्येष्ठा राक्षसः । न प फ मूला राक्षसः । ब पूर्व्वाषाढ़ा मानुषः । भ उत्तराषाढ़ा मानुषः । म श्रवणा देवः । य र धनिष्ठा राक्षसः । ल शतभिषा राक्षसः । व श पूर्व्वभाद्रपदा मानुषः । ष स ह उत्तरभाद्रपदा मानुषः । अं अः ल क्ष रेवती देवः । निबन्धे “प्राप लोभात् पटुः प्राद्यं रुद्रस्याद्रिरुरुःकरम् । लोकलोपपटुः प्रायः खलौ योभेषु भेदिताः । वर्णाः क्रमात् स्वरान्त्यौ तु रेवत्यंशगतौ तदा । अन्त्यव्यञ्जनसंख्यात . प्राह्या वर्गादिवर्णतः” । तथा च पिङ्गलातन्त्रे “उत्तराद्दक्षिणायान्तु रेखां कुर्य्याच्चतुष्टयीम् । दश रेखाः पश्चिमाग्राः कर्त्तव्या वरवर्णिनि ! । अश्विन्यादिक्रमेणैव विलिखेत्तारकाः पुनः । वक्ष्यमाणविधानेन तन्मध्ये वर्णकान् लिखेत् । अकारादिलकारान्तान् द्विचन्द्रवह्निवेदकान् । भूमीन्दुनेत्रचन्द्रांश्च अश्लेषायां खगौ प्रिये ! । द्विभूनेत्रनेत्रयुग्मानि चेन्दुनेत्राग्निचन्द्रकान् । मघादिज्येष्ठापर्य्यन्तं द्वितीयं नवतारकम् । वह्निभूमीन्दुचन्द्रांश्च यमेन्दु नेत्रवह्निकान् । वेदेन भेदितान् वर्णान् रेवत्यन्त्ययुगे क्रमात् । पक्षैकत्र्यब्धिरूपावनिभुजकुयुगायुग्मभूयुग्मपक्षाद्युग्मैकाद्वित्रिरूपानलशशिशशिभूद्व्येकपक्षाग्निवेदाः । वर्णाः क्रमात् स्वरान्त्यौ तु रेवत्यंशगतावुभौ । तथा च निबन्धे “पूर्वोत्तरा-

त्रयञ्चैव भरण्याद्रीं च रोहिणी। इमानि मानुषाण्याहुर्नक्षत्राणि मनीषिणः। ज्येष्ठाशतभिषामूलधनिष्ठाश्लेष कृत्तिकाः। चित्रामघाविशाखाः स्युस्तारा राक्षसदेवताः। अश्विनी रेवती पुष्यः स्वाती हस्तपुनर्वसू। अनुराधा मृगशिरःश्रवणा देवतारकाः। तथाच "स्वजातौ परमा प्रीतिर्मध्यमा भिन्नजातिषु। रक्षोमानुषयोर्नाशो वैरं दानवदेवयोः। जन्मसम्पद्विपत्क्षेमं प्रत्यरिः साधको वधः। मित्रं परममित्रञ्च जन्मादीनि पुनः पुनः। जन्मतृतीयपञ्चमसप्तमानि नक्षत्राणि वर्ज्यानि। तथा च "रसाष्टनवभद्राणि युगयुग्मगतान्यपि। इतराणि न भद्राणि" इत्यादि। स्वनक्षत्रादेव नक्षत्रं गणनीयम्। स्वनक्षत्राज्ञाने स्वनामाद्यक्षरसम्बन्धिनक्षत्रादेव नक्षत्रं गणनीयमिति। प्रादक्षिण्येन गणयेत् साधकाद्याक्षरात् सुधीः"।

अकथहचक्रम्—तच्च अकथहशब्दे ३८ पृ० द्रष्टव्यम्

अकडमचक्रम्—गोपालविषयम् अकडमशब्दे २७पृ० उक्तम्

ऋणिधनिचक्रम्—ऋणिधनिचक्रशब्दे १४२८ पृ० द्रष्टव्यम्

अन्यान्यपि तदुपयोगीनि चक्राणि रुद्रयामले द्रष्टव्यानि। स्वरोदयसम्मतानि नरपतिजयचर्य्योक्तानि "स्वरचक्राणि चक्राणि भूबलानि बलानि च" इत्यादिना षड़ङ्गोपक्रमे उक्तानि २० स्वरचक्राणि सर्वतोभद्रादीनि ८४ चक्राणि च क्रमशः प्रदर्श्यन्ते। तत्र षडङ्गेषु प्रथमाङ्गे स्वरचक्राणि विंशतिस्तत्रादौ

१ मात्रास्वरचक्रम्—"अथातः संप्रवक्ष्यामि प्रोक्ता ये ब्रह्मयामले। मात्रादिभेदभिन्नानां स्वराणां षोड़शोदयात्। मातृकायां पुरा प्रोक्ताः स्वराः षोड़शसंख्यया। तेषां द्वावन्तिमौ त्याज्यौ चत्वारश्च नपुंसकाः। दश शेषाः स्वराग्राह्याःस्यादेकैकं द्विके द्विके। ज्ञेयास्तत्र स्वरा आद्या ह्रस्वाः पञ्च स्वरोदये। लाभालाभं सुखं दुःखं जीवितं मरणं तथा। जयः पराजयो वेति सर्वं ज्ञेयं स्वरोदये। स्वरादिमातृकोच्चारोमातृव्याप्तं जगत्त्रयम्। तस्मात् स्वरोद्भवं सर्वं त्रैलोक्यं सचराचरम्। स्वरवेत्ता हितस्तेन दैवज्ञो देवतांशकः अकारादिस्वराःपञ्च ब्रह्माद्याः पञ्च देवताः। निवृत्त्याद्याः कलाः पञ्च इच्छाद्यं शक्तिपञ्चकम्। मायाद्या मन्त्रभेदाश्च धराद्यं भूतपञ्चकम्। शब्दादिविषयास्ते च कामबाणा इतीरिताः। पिण्डं पदं तथा रूपं रूपातीतं निरञ्जनम्। स्वरभेदस्थितं ज्ञानं ज्ञायते गुरुतः सदा। अकारादिस्वराः पञ्च तेषामष्टौभिदास्त्वमूः। मात्रा वर्णो ग्रहो जीव राशिर्भं पिण्ड योगकम्। "प्रसुप्तो भाषते येन येनागच्छति शब्दितः। नामाद्यवर्णो या मात्रा मात्रास्वरः स हि स्मृतः"।

२ वर्णस्वरचक्रम्—"कादिहान्तान् लिखेद्वर्णान् स्वराधोङञणोज्झितान्। तिर्य्यक्पङ्क्तिक्रमेणैव पञ्चत्रिंशत्प्रकोष्ठके। नरनामादिमोवर्णो यस्मात् स्वरादधः स्थितः। स स्वरस्तस्य वर्णस्य वर्णस्वर इहोच्यते। वबौ शसौ खषौ चैव जयौ चेति परस्परम्। ज्ञेयौ तुल्यबलौ भिन्नस्वराधःस्थितावपि। न प्रोक्ता ङ ञ णो वर्णा नामादौ सन्ति ते न हि। चेद्भवन्ति तथा ज्ञेया गजडास्ते यथाक्रमम्। बहूनि यस्य नामानि नरस्य स्युः कथञ्चन। तस्य पश्चाद्भवं नाम ग्राह्यं स्वरविशारदैः। यदि नाम्नि भवेद्वर्णः संयुक्ताक्षरलक्षणः। ग्राह्यस्तस्यादिमो वर्ण इत्युक्तं ब्रह्मयामले।"

३ ग्रहस्वरचक्रम्—"अस्वरोमेषसिंहालि। इः कन्याद्वन्द्वकर्कटाः। उस्वरे च धनुर्मीनौ एस्वरे तु तुलावृषौ। ओस्वरे मृगकुम्भौ च राशीशास्तु ग्रहस्वराः। स्वराधः स्थापयेत् खेटान् राशेर्यो यस्य नायकः। भौमशुक्रज्ञचन्द्रार्कबुधशुक्रारमन्त्रिणः। सौरिः सौरिस्तथा जीवो मेषादीनामधीश्वराः"।

४ जीवस्वरचक्रम्—"षोड़शाक्षरोऽत्रावर्गःस्यात् कादिवर्गास्तु पञ्चकाः। चतुर्वर्णौ यशौ वर्गौ संख्यावर्गे प्रकीर्त्तिताः। पिण्डनाम्नि वर्णाः स्वराग्राह्यावर्गाणां वर्णसंख्यया। पिण्डिताः पञ्चभिर्भक्ताः शेषं जीवस्वरं विदुः

५ राशिस्वरचक्रम्—"मेषवृषावकारे च मिथुनाद्याः षड़ंशकाः। मिथुनांशत्रयञ्चैवमिकारे सिंहकर्कटौ। कन्यातुले उकारे च वृश्चिकाद्यास्त्रयोंऽशकाः। एकारे वृश्चिकस्यांशाः षट् चापे षट् मृगादिमाः। अंशास्त्रयोमृगस्यान्त्याः कुम्भमीनौ तथौस्वरे। एवं राशिस्वराः प्रोक्ता नवांशकक्रमोदिताः

६ ऋक्षस्वरचक्रम्—"अकारे सप्तऋक्षाणि रेवत्यादि क्रमेण च। पञ्च पञ्च इकारादावेवमृक्षस्वरोदये"

७ पिण्डस्वरचक्रम्—"नाम्नि वर्णस्वरात् संख्यातस्य मात्रास्वरात्तथा। पिण्डे शरहृते शेषे पिण्डस्वरइहोच्यते"

८ योगस्वरचक्रम्—"मात्रादिस्वरभेदेन स्वरानुत्पाद्य नामतः। योगे शरहृते शेषे योगस्वर इहोच्यते"

९ द्वादशवार्षिकस्वरचक्रम्—"प्रोक्ता नैसर्गिकाश्चाष्टौ मात्राद्या नामजाःस्वराः। एतेषामुदयान् वक्ष्ये द्वादशाब्दादिषु

क्रमात्। प्रभवादिक्रमेणैव अकारादिस्वरास्तथा। वर्षैर्द्वादशभिर्मानमेकैकस्य स्वरोदये। उदयोद्वादशाब्दानां प्रत्येकं द्वादशाब्दिकः। अस्यान्तरोदयोवर्षमासमेकं दिनद्वयम्। लोकाश्विनाडिकाः ४२ प्रोक्ता अष्टत्रिंशत्पलानि च”

१० वार्षिकस्वरचक्रम्—प्रभावाद्यब्दमेकैकमुदयश्चास्वरादिकः। द्वादशाब्दस्य वर्षौना तद्भुक्तिर्वार्षिके स्वरे”

११ अयनस्वरचक्रम्—“अस्वरोदक्षिणे स्वामी इस्वरश्चोत्तरायणे। वर्षभुक्त्यर्द्धमानेन भोगः षाण्मासिकस्वरे”।

१२ ऋतुस्वरचक्रम्—“अकारादिस्वराः पञ्च वसन्तादिक्रमोदयाः। एकैकस्मिन् स्वरे प्रोक्तोद्विसप्ततिदिनोदयः। षड्दिनानि रदा३२ नाड्यो वह्निवेद३४ पलानि च। अन्तरोदयमानं स्याद् ऋतुनाम्नि स्वरोदये” इति

१३ मासस्वरचक्रम्—“नभस्यमार्गवैशाखेष्वस्वरस्योदयोभवेत्। आश्विनश्रावणाषाढेष्विकारो नायकः स्मृतः। उकारश्चैत्रपौषे स्यादेकारो ज्यैष्ठकार्त्तिके। ओकार उदयं याति माघफाल्गुनमासयोः। द्वे दिने त्र्यब्धयो४२ नाड्यश्चाष्टत्रिंशत् पलानि च। अन्तरोदयउक्तोऽसाविति मासस्वरोदये”

१४ पक्षस्वरचक्रम्—“अस्वरः कृष्णपक्षेशः शुक्लपक्षेश इस्वरः। पक्षात्मिकान्तरा भुक्तिर्मासभुक्त्यर्द्धमानतः”

१५ तिथिस्वरचक्रम्—“अकारादिक्रमाच्चस्य नन्दादितिथिपञ्चकम्। नन्दा भद्रा जया रिक्ता पूर्णा च कथिताः क्रमात्। दिनस्वरोदयोनित्यं स्वस्वतिथ्यादि जायते। एकैकस्य स्वरस्य स्युर्घटी पञ्च पलानि भैः२७। अस्यान्तरोदयः प्रोक्तोदिनस्वरस्य सूरिभिः”

१६ घटीस्वरचक्रम्—“घटीस्वरो घटीपञ्च पलानि सप्तविंशतिः। एवं घटीस्वरोयाति दिनस्वरघटीस्वरः। अस्यान्तरोदयः प्रोक्तोघटिकार्द्धप्रमाणतः”

१७ तिथिवारर्क्षादिस्वरचक्रम्—“द्वादशाब्दादिनाड्यन्ताः स्वस्थानाच्च स्वकालतः। उदयन्ते पुनस्ते च ते चैकादशधा स्वराः। वर्षमासदिनानाडीपलानि च यथाक्रमम्। कालमानं मया प्रोक्तं पञ्चधात्र स्वरोदये। द्वादशाब्दस्वरादीनां भुक्तं पलमयन्तु यत्। तद्भक्तं च स्वभोगेन लब्धशेषादिकं भवेत्। लब्धभुक्तस्वरा ज्ञेयाः शेषश्चैवोदिताः स्वराः। अस्मिन् षष्ट्यादिभक्ते च भुक्तं स्यादुदितः स्वरः। उदितस्य स्वरस्य स्युर्नामस्वरवशेन ताः। पञ्च बालादिकावस्थाः स्वस्वकालप्रमाणतः”।

(यो यस्य कालसंभोगी तस्य कालगतान्तरम्। पिण्डितं भुक्तिसंभक्तं लब्धाङ्केन गतोदयः। शेषस्वरोदयोज्ञेयः स्वस्य संख्याहृते ततः। पञ्चावस्थाः स्वरूपेण ज्ञेयं तस्य बलाबलम्। उदयास्तस्वरौ यत्र नामाद्यक्षरजस्वरात्। तत्र बालादयोऽवस्था भवन्त्येकादिसंख्यया। नामस्वरोदयोबालः कुमारश्च द्वितीयकः। तत्तृतीयो युवा तुर्यो वृद्धोमृत्युस्तु पञ्चमः) ग्रन्थान्तरेऽधिक पाठः। आद्योबालः कुमारश्च युवा वृद्धो मृतिस्तथा। निजावस्थास्वरूपेण फलदा नात्र संशय। किञ्चिल्लाभकरोबालः कुमारस्त्वर्द्धलाभदः। सर्वसिद्धिं युवा दत्ते वृद्धे हानिर्मृते क्षयः। यात्रायुद्धे विवादे च मष्टद्रष्टे रुजान्विते। बालस्वरोभवेद्दुष्टोविवाहादिशुभे शुभः। सर्वेषु शुभकार्येषु यात्राकाले तथैव च। कुमारः कुरुते सिद्धिं संग्रामे सर्वतोजयम्। शुभाशुभेषु कार्येषु मन्त्रयन्त्रादिसाधने। सर्वसिद्धिं युवा दत्ते यात्रायुद्धे विशेषतः। दाने देवार्चने दीक्षागूढमन्त्रप्रकल्पने। वृद्धस्वरो भवेद्भव्योरणे भङ्गो भयं गमे। विवाहादिशुभं सर्व्वं संग्रामाद्यशुभं तथा। न कर्त्तव्यं नृभिः किञ्चिज्जाते मृत्युस्वरोदये। मृतोबालस्तथा वृद्धः कुमारस्तरुणस्वरः। यथोत्तरबलाः सर्व्वे ज्ञातव्याः स्वरवेदिभिः। योयस्य पञ्चमे स्थाने स स्वरो मृत्युदायकः। तृतीये तु भवेत् वृद्धिः शेषामध्यफलप्रदाः। मृत्युहीनस्वरे नाम्नि जयोनाम्नि स्वराधिके। समनाम्नि भवेत् साम्यं सन्धिर्जयपराजयौ। एकमात्रो द्विमात्रश्च त्रिचतुःपञ्चमात्रकाः। यथोत्तरबलाः सर्व्वे ज्ञातव्याः स्वरपारगैः। एकमात्रः कवर्णश्च किवर्णश्च द्विमात्रकः। कुस्तृतीयस्तु तुर्य्यः केः, कोवर्णः पञ्चमात्रकः। आद्ये स्वरे भवेत् साम्यं द्वितीयोऽर्द्धफलप्रदः। तृतीये तु फलं पूर्णं तुर्य्ये बन्धपरम्परा। शत्रोर्मृत्युस्वरे प्राप्ते यूनि प्राप्ते स्वकीयके। तत्काले प्रारभेद्युद्धं विजयो भवति ध्रुवम्। तत्काले मात्रिकोग्राह्योदिने वर्णस्वरस्तथा। पक्षे ग्रहस्वरोज्ञेयो मासे जीवस्वरोदयः। ऋतौ राश्यंशकोग्राह्यः षण्मासे धिष्ण्यसम्भवः। अब्दे पिण्डस्वरोज्ञेयो योगो द्वादशवार्षिके। सर्व्वकाले बली वर्णः सर्वव्यापी न संशयः। तस्मात्सर्व्वप्रयत्नेन वर्णे वीक्ष्यं बलाबलम्। यथा पदं हस्तिपदे प्रविष्टं यथा हि नद्यः खलु सागरेषु। यथा हरेर्द्देहगताश्च देवास्तथा स्वरा वर्णफलोदयाःस्युः। साधनं मन्त्रयन्त्रस्य यात्रायोगश्च सर्व्वदा। अन्योसुखानि कार्य्याणि मात्रास्वरबले कुरु। वर्णस्वरबले सर्वं कर्त्तव्यं

च शुभाशुभम्। सिद्धिदं सर्व्वकार्य्येषु युद्धकाले विशेषतः। मारणं मोहनं स्तम्भविद्वेषोच्चाटनं तथा विवादं विग्रहं वातं कुर्य्यात् मृतस्वरोदये। स्नानपानादिकं सर्व्वं वस्त्रालङ्कारभूषणम्। विद्यारम्भं विवाहञ्च कुर्य्याज्जीवस्वरोदये। प्रासादारामहर्म्याणि देवतास्थापनार्चनम्। राजाभिषेचनं यात्रा प्रवेशो वीजवापनम्। स्त्रीविवाहस्य दीक्षा च कर्त्तव्या राशिके स्वरे। शान्तिकं पौष्टिकं यात्रा प्रवेशोवीजवापनम्। स्त्रीविवाहस्तथा सेवा कर्त्तव्या भस्वरोदये। शत्रूणां देशभङ्गस्य कोटयुद्धं च वेष्टनम्। सेनाध्यक्षस्तथा मन्त्री कर्त्तव्यः पिण्डकोदये। योगेन साधयेद्योगं देहस्थं ज्ञानसम्भवम्। आणवं शाम्भवं चैव शाक्तेयञ्च तृतीयकम्। तिथिवारञ्च नक्षत्रं पृथक् पृथक् प्रभाषितम्। यत्तदेकत्र संमेल्य कुर्य्याद्वर्णस्वरोदये। सस्वरो वर्णतोयत्र तत्तस्याधःस्थितं कुरु। यस्य नामादिमं वर्णं तिथिवारर्क्षसञ्जम्। तद्दिनं वर्जयेत्तस्य हानिर्मृत्युकरं यतः। अनेन स्वरयोगेन शत्रूणां मारणादिकम्। मन्त्रयन्त्रक्रियाहोमं साधयेत्तद्दिने बुधः। तत्र बालादयोऽवस्थाभानुसंख्याभवन्ति हि। उदयन्ते क्रमेणैव स्वस्वभुक्तिप्रमाणतः। घटिकाख्ये दिने पक्षे मासे ऋत्वयने तथा। वर्षे द्वादशवर्षे च अवस्था जायते स्वरे। भपलानि घटीपञ्च सपादार्द्धं दिनद्वयम्। षडहं पक्षमासं च वर्षैकं भुज्यते क्रमात्। भुक्तस्वरप्रमाणं च पिण्डस्थं भोगभाजितम्। गतावस्था गताङ्केन शेषास्तत्कालजा मताः। मूका १च बाला२ शिशु३ हासिका४ च कुमारिका५ यौवन६ राज्यदा७ च। क्लेशा८ च मोघा९ ज्वरिता१० प्रवासा११ मृता१२ च बालस्वरजा अवस्था। स्वस्था१ शुभा२ मोहन३ हर्ष४ वृद्धि५ महोदया६ शान्तिकरी७ सदर्पा८। मदा९ समा१० शान्तिगुणोदया११ च माङ्गल्यदा१२ द्वादशधा कुमारे। उत्साह१ धैर्य्योग्रजया २।३।४। च बाला५ माङ्गल्ययुक्ता६ च सकाम७ पुष्टी८। सुखा९ च सिद्धिस्व१० धनेश्वरी११ च शान्ताभिधा१२ द्वादशधा युवाख्ये। वैकल्य१ शोषा२ च तथा च मोघा३ च्युतेन्द्रिया४ दुःखित५ रात्रि६ निद्रा७। बुद्धिप्रभङ्गा८ च तपा९ च खिन्ना१० जरा११ मृता१२ द्वादश वृद्धजा च। छिन्ना१ च बन्धा२ रिपुघातकारी३ शोका४ मही५ ज्वालन६ कुष्ठा७ च। व्रणाङ्किता८ भेदकरी९ च दाहा१० मृत्युः११ क्षया१२ द्वादश मृत्युजा इमाः। एवं षष्टिरवस्थाः स्युरवस्थापञ्चके सदा। तासु सर्व्वासु विज्ञेयं स्वनामसदृशं फलम्। अवस्था फलम्।

१८ तात्कालिकदिनस्वरचक्रम्—“तिथ्यादावुदयं याति अकारादिर्घटीस्वरः। बालस्वरादिकं प्रश्ने फलं तस्य वदाम्यहम्। तिथिभुक्तघटीसंख्यां कृत्वा पलमयीं ततः। ऋक्षवह्नि२२७हृते शेषे स्वरस्तत्कालसम्भवः। तिथिभुक्तघटी या स्याद्रुद्रघ्न११ षष्टिभाजिता। शेषे तिथिस्वरात् भोक्तास्तत्कालजघटीस्वरः। शेषं रुद्रा११ हतं षष्ट्या भाजयेच्चान्तरोदयः। वर्णतस्तु फलं वाच्यं शेषे तत्कालजस्वरः। तिथिभुक्तघटीसंख्या विंशघ्ना नवखेन्दुना१०९ हृता घटीस्वरः शेषे तत्र स्यादन्तरोदयः। यमुद्दिश्य कृतः प्रश्नः फलं तस्य प्रजायते। यत्र नोद्दिश्यते किञ्चित् तत्र प्रष्टुः शुभाशुभम्। बालोदये यदा पृच्छा लाभार्थे स्वल्पलाभदा। रुजार्थे चिररोगस्य गमे हानिः क्षयो रणे। कुमारोदयवेलायां लाभोभवति पुष्कलः। रुजानाशोजयी युद्धे यात्रा सर्व्वत्र सिद्धिदा। युवोदये लभेद्राज्यं क्लेशच्छेदश्च तत्क्षणात्। संग्रामे शत्रुहन्ता च यात्रा च सफला भवेत्। वृद्धोदये न लाभः स्यात् क्लेशिनां क्लेशवर्द्धनम्। संग्रामे भङ्गमायाति यात्रायां न निवर्त्तते। मृतोदये यदा दूतः पृच्छति स्वप्रयोजनम्। तत् सर्व्वं मृत्युदं ज्ञेयं युद्धे मृत्युश्च भङ्गदः। ओजस्वराः पुमांसः स्युः स्त्रियो युग्मस्वरान् विदुः। स्वस्वरोदये जाते पुंसां स्त्रीणां बलं भवेत्। बलिनःस्युस्तदा तेभ्यो बली स्वस्य स्वरोदये। गर्भार्थे पुंस्वरे पुत्रः। कन्या कन्यास्वरोदये। युग्मे युग्मं, क्षयो नष्टे मातृमृत्युश्च संक्रमे। द्युनाडीस्वरयोः पुंसोः पुंयुग्मं, स्त्रीयुगं स्त्रियोः। तयोस्तु पुंस्त्रियोः पुंस्त्रीयुग्मं गर्भे विनिर्द्दिशेत्। तिथिनाडीस्वरे साम्ये पुंपुंस्त्रीस्त्री प्रजायते। असाम्ये तिथिनाडीस्थे गर्भे साम्यं न विद्यते”।

“तत्रजन्मनि विशेषः।“जन्मर्क्षे जन्मपादस्तद्वर्णे योऽक्षरजस्वरः। तेनाक्षरेण विज्ञेयःस्वभावः प्राणिनामिह। चपलः कातरोमूर्खः कृपणश्चाऽजितेन्द्रियः। असत्यवहुभाषी च जाते बालस्वरोदये। व्यवसायी कलाभिज्ञः स्त्रीरतः सुभगः सदा। दीर्घायुर्विग्रही शूरः कुमारोदयसम्भवः। सर्व्वलक्षणसम्पूर्णोराजा भवति धार्म्मिकः। सर्व्वकालजयी युद्धे जातो युवोदये शुभः। स्त्रीजितो धार्म्मिकः कामी विवेकी स्थिरसाहसः। सत्यवादी सदाचारः

पुमान् वृद्धोदयोद्भवः। क्लेशी समत्सरः क्रूरोनिःकामोविकलेन्द्रियः। सर्वकार्य्यालसो दुष्टोजन्म यस्य मृतोदये" जातस्य शुभाशुभनिर्णयः। "ककारादिढकारान्ताः पञ्च ह्रस्वाः स्वरास्तथा। बलिनः स्युः सिते पक्षे शेषाः सर्वे सितेतरे। एकस्वरः पृथक् वर्णोयोधयोरुभयोर्य्यदि। तत्र पक्षबलं ग्राह्यं शुक्लकृष्णविभेदतः। एकपक्षाक्षरैरेकस्वरश्चेद्योधयोर्द्वयोः। शुक्ले गौरः परः कृष्णे युद्धे जयति निश्चितम्। यस्मिन्नेव स्वरे कृष्णो गौरोवा सुभटोयदि। स्वरासन्नाक्षरे ह्रस्वोदीर्घोदूराक्षरे जयी। प्रमाणनामवर्णैक्यं युद्धकारकयोर्यदि। तत्र युद्धे बलं देयं यायिस्थायिविभेदतः। योधयोः सर्वभेदैक्ये स्वरे यूनि कुमारके। यायी जयी तथा स्थायी बालवृद्धान्तिमस्वरे। आद्यास्तिथेस्त्रयोवर्णा द्वौ द्वौ शेषकयोर्मतौ। एवं तिथित्रये ज्ञेया वर्णसंख्या तिथिस्वरे। वर्णतिथ्यादितिथ्याख्या जन्महानिर्मृतिस्तथा। श्रीर्जन्म नीरुजा हानौ मृतौ मृत्युर्न संशयः। यदुक्तं यामले तन्त्रे ज्ञातं गुरुप्रसादतः। स्वराह्निफलं वक्ष्ये पुंसां कर्मप्रकाशकम्। योगपिण्डं राश्याख्यान् जीवखेटाऽक्षरस्वरान्। उत्पाद्य नामतश्चाष्टौ मात्रान्तान् स्थापयेत् क्रमात्। तस्याधःस्थान्लिखेच्चाष्टौ द्वादशाव्दादिकालजान्। स्वभोगेन समायुक्तान् भोगश्चैकादशांशकः। यथोत्तरबलाः सर्वे तथा कालबलात् पुनः। कालोदयबलाश्चापि ज्ञातव्याः स्वरवेदिभिः। अकारादिस्वराधःस्था संख्याः वेदप्रमाणिकाः। विन्यस्य चक्रयोगेण तेन विंशोपकामताः। योगात् द्वादशवर्षाःस्युरवस्था पिण्डतोवद्के। भस्वरादयने ज्ञेया राशिस्वराद्दतुस्वरे। जीवात् मासस्वरेऽवस्था ग्रहात्पक्षस्वरे तथा। वर्णाद्दिनस्वरे ज्ञेया मात्रास्वरात्घटीस्वरे। द्वादशाव्दादिकः कालोयत्राऽकारादिकस्वरे। स्थितस्तत्र शुभो न स्यात् पञ्चावस्थाशुभोऽपि च। स्वरौ वृद्धान्तिमौ दुष्टौ बालपूर्वदलं तथा। शेषं सार्द्धद्वयं भव्यमिति ज्ञेयं शुभाशुभम्। बालवृद्धान्तिमादुष्टाः, शुभौ युवकुमारकौ। उत्पाद्यौ क्रमयोगेण योद्धुरङ्कौ शुभाशुभौ। यो यत्र वर्त्तते कालो द्वादशाव्दादिसम्भवः। अकारादिस्वरस्थाने योगादिफलनिर्णयः। योगाद् द्वादशवर्षं च पिण्डाद्वर्षं च सायनम्। भाद्दतुर्जीवतोमासं ग्रहात् पक्षोऽक्षरात् दिनम्। योगादिस्वरयोगेण द्वादशाव्दादिकः क्रमात्। यावदुत्पाद्यते राशिस्तावत् ज्ञेयं शुभाशुभम्।" (अङ्कयुग्माधिकत्वेन तद्दिने तस्य तत्फलम्। द्वादशवार्षिकाद्या ये स्वान्तरोदयसंस्थिताः। ते शुभाश्चैकतः स्थाप्यास्त्वशुभास्त्वन्यतः पृथक्। वेदवेदाङ्गनेत्राणि वेदसंख्या क्रमेण च। शुभाशुभस्वरूपस्य राशियुग्मस्य मध्यतः। एकस्मात्पतिते शेषे ज्ञेयं तद्दिनजं फलम्। विंशत्या ताडिते शेषे चतुःषष्टिविभाजिते। लब्ध्या विंशोपकास्तत्र शुभाशुभप्रकाशकाः। योगे स्वकर्म्मतः, पिण्डे शरीराङ्गे सुहृज्जनात्। राशौ स्वकुलतो, जीवे स्ववित्ताद्, ग्रहतो रिपोः। वर्णे स्वस्वामिनो ज्ञेयो, मात्रायां स्त्रीजनात् फलम्। एवं ज्ञात्वा वदेद्विद्वान्दिने फलशुभाशुभम्)"। ग्रन्थान्तरेऽधिकपाठः

१९ दिक्चक्रम्—"पूर्वस्मिन्नस्वरः स्वामी इस्वरो दक्षिणे तथा। उस्वरः पश्चिमे ज्ञेयः एःसौम्ये मध्य ओस्वरः। यस्यां दिश्युदयं याति स्वरस्तत्पञ्चमीं दिशम्। वर्जयेत् सर्वकार्य्येषु यात्राकाले विशेषतः। गच्छतः पृच्छकस्याशु स्वरस्यास्तमितां दिशम्। हानिर्मृत्युभयं रोगो जायते नात्र संशयः

२० देहजस्वरचक्रम्—"अथान्यत् संप्रवक्ष्यामि शरीरस्थं स्वरोदयम्। हंसचारस्वरूपेण येन ज्ञानं त्रिकालजम्। कुण्डलिनी महाशक्तिर्नाभिस्थाऽहिस्वरूपिणी। ततोदशोर्द्धगा नाड्योदश चाधोगतास्ततः। द्वे द्वे तिर्य्यग्गते नाड्यौ चतुर्विंशतिसंख्यया। कुण्डलिन्यां महाशक्तौ मूलमार्गे भवन्त्यमूः। ताभ्यः सूक्ष्ममुखा नाड्यः शरीरस्यातिपोषिकाः। सप्त शतानि जायन्ते सप्तोत्तराणि संख्यया। प्रधाना दश नाड्यस्तु दशवायुप्रवाहिकाः। नामानि नाड़िकानाञ्च वातानाञ्च वदाम्यहम्। इड़ा पिङ्गला सुषुम्णा गान्धारी हस्तिजिह्विका। पूषा यशाऽलंबुषा च कुहूः शङ्खिनिका तथा। प्राणोऽपानःसमानश्चोदानव्यानौ तथैव च। नागः कूर्मः ककरश्च देवदत्तो धनञ्जयः। प्रकटो वायुसञ्चारो लक्ष्यते देहमध्यगः। पिङ्गलेड़ासुषुम्णाभिर्नाडीभिस्तिसृभिर्बुधैः। (अष्टाङ्गुले वहेद्वह्निरनिलश्चतुरङ्गुलः। दिवाकराङ्गुला पृथ्वी सलिलं षोड़शाङ्गुलम्। नीलवर्णो भवेद्वायूरक्तवर्णोहुताशनः। पीतवर्णस्तु माहेयः शुक्लवर्णस्तु वारुणः। चापाकारो भवेद्वायुस्त्रिकोणो वह्निरुच्यते। चतुरस्रस्तु माहेयो वर्त्तुलो वारुणःस्मृतः। कटुस्वादुर्भवेद्वायुस्तीक्ष्णास्वादोऽनलोभवेत्। कषायकस्तु माहेयो मधुरो वारुणोमतः) अधिकपाठः। "इड़ानाड़ीस्थितश्चन्द्रः पिङ्गला

भानुवाहिनी। सुषुम्णा शम्भुरूपेण शम्भुर्हंसस्वरूपकः। हकारो निर्गमे प्रोक्तः सकारस्तु प्रवेशकः। हकारः शम्भुरूपेण सकारः शक्तिरुच्यते। शक्तिरूपस्थितश्चन्द्रो वामनाडीप्रवाहकः। दक्षनाडीप्रवाहे तु शम्भुरूपी दिवाकरः। एकैकस्य कलाः पञ्च क्रमेणैवोदयन्ति ताः। पृथिव्यापस्तथा तेजो वायुराकाशमेव च। मध्ये पृथ्वी अधश्चाप ऊर्द्धं वहति चानलः। तिर्य्यग्वायुप्रवाहश्च नभोवहति संक्रमे। चलाहितं नभःप्रोक्तं सर्व्वशास्त्रेषु भाषितम्। अपां स्थाने स्थितं वस्तु पृथिव्यास्तुत्तरं गतम्। तेजसा पूर्वगं वस्तु त्वाकाशे दक्षिणं गतम्। त्रिंशद्दिनावधिः पृथ्वी सलिलं पञ्चसंख्यकम्। एकविंशद्दिनं तेजोवायुः पञ्चदिनं स्मृतम्। वर्षसंज्ञं तु व्योम्नि स्यात् प्रश्नशास्त्रेषु सम्मतम्। दूतोक्तवर्णसंख्याङ्कोद्विगुणोभज्यते त्रिभिः। यद्येकं द्वितयं श्रेष्ठं तृतीये मरणं भवेत्। लग्नं तिथिसमायुक्तं सनक्षत्रं त्रयान्वितम्। पञ्चभिस्तु हरेद्भागं शेषाङ्कं तत्त्वमुच्यते। पृथ्व्यापौ चोत्तमौ प्रोक्तौ तैजसे सर्वसिद्धयः। वायौ च निष्फलं ज्ञेयमाकाशे मरणं ध्रुवम्। पृथ्व्याद्येकैकतत्त्वस्याप्येकैकघटिकोदयः। अहोरात्रस्य मध्ये स्यात्तेन द्वादशसङ्क्रमाः। आदौ चन्द्रः सिते पक्षे भास्करस्तु सितेतरे। प्रतिपदादिदिनान्येवं त्रीणि त्रीणि क्रमोदयौ। चन्द्रोदये यदा सूर्यश्चन्द्रः सूर्योदये यदा। अशुभं हानिरुद्वेगः शुभं सर्वं निजोदये। शशाङ्कं चारयेद्रात्रौ दिवा चार्य्यो दिवाकरः। इत्यभ्यासरतोनित्यं स योगी नात्र संशयः। यात्रादाने विवाहे च वस्त्रालङ्कारभूषणे। शुभकर्मणि सन्धौ च प्रवेशे च शशी शुभः। विग्रहे द्यूतयुद्धेषु स्नानभोजनमैथुने। व्यवहारे भये भङ्गे भानुनाड़ी प्रशस्यते। दूरयुद्धे जयी चन्द्रः समासन्ने दिवाकरः। वहन्नाडीपदेनैव कृता यात्राऽतिसिद्धिदा। पृथ्वीजले शुभे तत्त्वे तेजोमिश्रफलोदयम्। हानिमृत्युकरौ पुंसामुभयौ व्योममारुतौ। योद्धृद्वयकृते प्रश्ने पूर्णे च प्रथमोजयी। रिक्तसंस्थे द्वितीयस्तु जयी भवति नान्यथा। युद्धकाले यदा चन्द्रः स्थायी जयति निश्चितम्। यदा सूर्य्यप्रवाहश्च यायी च विजयी तदा। पार्थिवे सक्षतं युद्धं सन्धिर्भवति वारुणे। विजयोवह्नितत्त्वेन वायौ भङ्गो मृतिस्तु खे। पूर्णनाडीगते पृष्ठे शून्यमग्रे तदग्रतः। शून्यस्थाने कृते शत्रुर्म्रियते नात्र संशयः। पूर्व्वोत्तरदिशोश्चन्द्रे भानौ पश्चिमयाम्ययोः। स्थितस्तत्र जयी युद्धे स्थायी यायी क्रमेण च। वामनाड्युदये चन्द्रः कर्त्तव्योवामसंमुखः। सूर्य्यवाहे तथा सूर्य्यः पृष्ठदक्षिणयोर्जयी। शयने वा प्रसङ्गे वा युवत्यालिङ्गनेऽपि वा। यः सूर्य्येण पिबेच्चन्द्रं स भवेन्मकरध्वजः। जीवेन गृह्यते जीवो जीवो जीवस्य दीयते। जीवस्थानगतो जीवोबाला जीवान्तवश्यगा। रात्रित्रियामवेलायां प्रसुप्ते कामिनीजने। ब्रह्मजीवं पिबेद्यस्तु बालाजीवहरोनरः। अष्टाक्षरं जपित्वा तु तस्मिन् क्षणे रते सति। तत्क्षणे दीयते चन्द्रोमोहमायाति कामिनी। शिव आलिङ्ग्यते शक्त्या प्रसङ्गे यत्क्षणेन तु। तत्क्षणे पाययेच्चन्द्रं मोहमायाति कामिनी। चन्द्रचारी विषं हन्ति सूर्य्यो बालां वशं नयेत्। सुषुम्णायां भवेन्मोक्ष एकोदेवस्त्रिधा स्थितः। भुक्तमात्रे च मन्दाग्नौ स्त्रीणां वश्यार्थकर्म्मणि। शयनं सूर्य्यवाहेन कर्त्तव्यं सर्वदा बुधैः। श्रान्ते शोके विषार्त्ते च ज्वरिते मूर्छितेऽपि च। सज्जनस्यापि दूतोबोधार्थे चन्द्रचारं प्रवाहयेत्। ऊर्द्धं वामाग्रतो दूतो ज्ञेयोवामपथोदये। पृष्ठे दक्षे तथाऽधस्तात् सूर्य्यवाहगमोमतः। पूर्णनाडीगतो दूतो यत् पृच्छति शुभाशुभम्। तत् सर्व्वं सिद्धिदं ज्ञेयं शून्ये शून्यं न संशयः। शोभनञ्च पृथिव्यादिद्वितत्त्वेन दिनमासाब्दकं फलम्। शोभनञ्च तथा दुष्टं व्योममारुतवह्निभिः। श्वासप्रवेशकाले तु दूतोवाञ्छति जल्पितुम्। सर्वतः सिद्धिमायाति निर्गमे नास्तिसुन्दरम्। सूर्य्ये च विषमान् वर्णान् समवर्णान् निशाकरे। वाहस्थो भाषते दूतस्तदा लाभोऽन्यथा न हि। गर्भप्रश्ने यदा दूतः पूर्णे पुत्रः प्रजायते। शून्ये कन्यायुगे युग्मं गर्भपातश्च संक्रमे। मारणं मोहनं स्तम्भं विद्वेषोच्चाटनं वशम्। प्रेरणाकर्षणं क्षोभं भानुनाड्युदये कुरु। शान्तिकं पौष्टिकं क्षेमं दिव्यौषधिरसायनम्। योगाभ्यासादिकर्माणि कर्त्तव्यानि निशाकरे। चन्द्रसूर्य्यस्वराभ्यासं ये कुर्वन्ति सदा नराः। अतीतानागतज्ञानं तेषां हस्तगतं सदा"

इति स्वरोदये स्वरचक्रनिर्णायकं प्रथमाङ्कम्।

सर्वचक्रोपयोगि बालादिचक्रं ज्यो॰ त॰ दर्शितं यथा "ऋवर्णञ्च लृवर्णञ्च त्यक्त्वा कोष्ठेषु पञ्चसु। अकाराद्याः स्वरा लेख्या एकैकस्मिन् द्विकं द्विकम्। कादिहान्तान् लिखेद्वर्णान् स्वराधोङञणोज्झितान्। तिर्य्यक्पङ्क्तिक्रमेणैव पञ्चत्रिंशत्प्रकोष्ठके। अकारादिक्रमात् न्यस्य नन्दादितिथिपञ्चकम्। अर्ककुजौ विधुज्ञौ च गुरुः शुक्रः

शनिस्तथा। वाराः कोष्ठेष्वधो लेख्या अस्वरे सप्त भानि च। पञ्च पञ्च इकारादौ रेवत्यादिक्रमेण च। प्रश्नो बुध्यते येन°येनागच्छति शङ्कितः। तस्य नाम्नस्त्वादिवर्णोयत्र तिष्ठेन्नरस्य च। तस्माद्बालः कुमारश्च युवा वृद्धोमृतिः क्रमात्। किञ्चिल्लाभकरोबालः कुमारस्त्वर्द्धलाभदः। सर्व्वसिद्धिं युवा धत्ते वृद्धे हानिर्मृते क्षयः। यदि नाम्नि भवेद्वर्णः संयुक्ताक्षरलक्षणः। ग्राह्यस्तस्यादिमोवर्ण इत्युक्तं ब्रह्मयामले। तिथिवारर्क्षभेदेन प्रत्येकं बलमादितः। नामवर्णादितो ज्ञेयं फलं पुंसां दिने दिने। तिथ्यादिमेलनवशात् फलं ज्ञेयं शुभाशुभम्। युवत्रये शुभं पूर्णं अशुभञ्च मृतित्रये। अन्यत्राप्येवमुह्यं स्यात् शङ्करेण शुभाशुभम्।’’

बालादेरेव नामान्तराणि क्रमेण जन्मकर्म्माधानपिण्डच्छिद्राणि पञ्चस्वराग्रन्थे उक्तानि तत्र च तिथिसंख्याभेदेनाङ्गभेदाश्चोक्ताः। ८१।८७।९३।९९।१०५।

द्वितीयमङ्गं ८४ चक्रात्मकं स्वरोदये उक्तं तेषां नामोद्देशः अङ्कशब्दे ७२पृ०दर्शितः तत्रादौ एकाशीतिपदं

१ सर्व्वतोभद्रचक्रम्—‘‘अथातः संप्रवक्ष्यामि चक्रं त्रैलोक्यदीपनम्। विख्यातं सर्व्वतोभद्रं सद्यःप्रत्ययकारकम्। ऊर्द्ध्वगा दश विन्यस्य तिर्य्यग्रेखास्तथा दश। एकाशीतिपदं चक्रं जायते नात्र संशयः। अकारादिस्वराः कोष्ठेष्वीशादौ विदिशि क्रमात्। सृष्टिमार्गेण दातव्याः षोड़शैव चतुर्भ्रमम्। कृत्तिकादीनि धिष्ण्यानि पूर्व्वाशादौलिखेत्ततः। सप्त सप्त क्रमेणैव अष्टाविंशतिसंख्यया। अवकहडा दिशि प्राच्यां मटपरता दक्षिणे देयाः। नयभजखाश्च वारुण्यां गषदचलाश्चोत्तरस्यां स्युः। त्रयस्त्रयोवृषाद्यास्तु पूर्व्वादिक्रमतोबुधैः। राशयो द्वादशस्थाप्या मेषान्ता दक्षमार्गतः। शेषेषु कोष्ठकेष्वेवं नन्दादितिथिपञ्चकम्। वाराणां सप्तकं लेख्यं भौमाद्यं तत्तिथिक्रमात्। भौमादित्यौ तु नन्दायां भद्रायां सोमसोमजौ। जयायां देवपूज्यञ्च रिक्तायां भृगुजं लिखेत्। पूर्णायाञ्च शनिः प्रोक्तो ग्रहवेधं विलोकयेत्। शन्यर्कराहुकेत्वाराः क्रूरा शेषाः शुभाग्रहाः। क्रूरयुक्तो बुधः क्रूरः क्षीणचन्द्रस्तथैव च। इत्येष सर्व्वतोभद्रप्रस्तावः कथितोमया। यस्मिन्नृक्षे स्थितः खेटस्ततो वेधत्रयं भवेत्। ग्रहदृष्टिवशेनात्र वामदक्षिणसंमुखे। भुक्तं भोग्यं तथाक्रान्तं विद्धं क्रूरग्रहेण भम्। शुभाशुभेषु कार्य्येषु वर्जनीयं प्रयत्नतः। वक्रगे दक्षिणा दृष्टिर्वामा दृष्टिश्च शीघ्रगे। संमुखी मध्यचारे च ज्ञेया भौमादिपञ्चके। सूर्य्ययुक्ता ग्रहाः शीघ्रास्तथा चार्कें द्वितीयगे। समास्तृतीयगे ज्ञेया मन्दा भानौ चतुर्थगे। वक्राः स्युः पञ्चषष्ठेऽर्कें त्वतिवक्रा नगाष्टगे। नवमे दशमे भानौ जायते सहजा गतिः। द्वादशैकादशे सूर्य्ये लभन्ते शीघ्रतां पुनः। रविस्थित्यंशकत्रिंशावधेः संख्याऽत्र कल्प्यते। न तु राश्यन्तरस्पर्शात् द्वितीयादिनिरूपणम्। राहुकेतू सदा वक्रौ शीघ्रगौ चन्द्रभास्करौ। गतेरेकस्वभावत्वादेषां दृष्टित्रयं सदा। क्रूरा वक्रा महाक्रूराः सौम्या वक्रा महाशुभाः। स्युः सहजाः स्वभावस्थाः सौम्याः क्रूराश्च शीघ्रगाः। ऋक्षसन्धिगताः खेटा राशिसन्धिगतास्तथा। एष्यराशेः फलं दद्युर्वक्रे तु विपरीतगम्। घङञ्छाः षणठाश्चैव धफटस्थभञास्तथा। एतत्त्रिकं त्रिकं विद्धं विद्धैः कपभदैः क्रमात्। घङञ्छा रौद्रगे वेधे षणठाहस्तगे ग्रहे। धफढाःपूर्व्वाषाढ़ायां थभञा भाद्र उत्तरे। बवौ शसौ खषौ चैव जयौ णनौ परस्परम्। एकेन हि द्वयं विद्धं शुभाशुभग्रहव्यधे। अवर्णादिस्वरद्वन्द्वे त्वेकवेधात् द्वयोर्व्यधः। युग्मवर्णात्मके वेधे अनुस्वारविसर्गयोः’’। (अकारादियुग्मवर्णात्मकवेधवदनुस्वारविसर्गयोरेकवेधादुभयवेधइत्यर्थः)। ‘‘कोणस्थधिष्ण्यत्रयीमध्ये अन्त्यादिपादगे ग्रहे। अकारादिचतुष्के तु वेधः पूर्णतिथौ तथा। एकादिक्रूरवेधेन फलं पुंसां प्रजायते। उद्वेगश्च भयं हानिर्व्याधिर्मृत्युः क्रमेण च। ऋक्षे भ्रमोऽक्षरे हानिः स्वरे व्याधिर्भयं तिथौ। राशौ विद्धे महाविघ्नः पञ्चविद्धोन जीवति। एकवेधे भयं युद्धे युग्मवेधे धनक्षयः। त्रिवेधे तु भवेद्भङ्गो मृत्युर्वेधे चतुर्ग्रहैः’’। (दृष्टित्रये उदाहरणम् ‘‘भरण्यकारवृषभं नन्दां भद्रां तुलाञ्च तम्। विशाखां हरिभं विध्येद्ग्रह आग्नेयसंस्थितः। उदाहरणान्तरम् ‘‘वं युग्ममौस्वरं कन्यां रेफं स्वातीमुकारकम्। अश्विनीं रोहिणीस्थोऽभिजिद्भमेवं परेष्वपि) जात्या दुष्टफलाः क्रूरास्तथा सौम्याः शुभप्रदाः। क्रूरयुक्ताःपुनः सौम्याज्ञेयाः क्रूरफलप्रदाः। अर्कवेधे मनस्तापोद्रव्यहानिश्च भूसुते। रोगपीड़ाकरः सौरीराहुकेतू च विघ्नदौ। चन्द्रे मिश्रफलं पुंसां रतिलाभश्च भार्गवे। बुधवेधे भवेत् प्रज्ञा जीवः सर्व्वशुभप्रदः। स्वक्षेत्रस्थे बलं पूर्णं पादोनं मित्रभे ग्रहे। अर्द्धं समगृहे प्रोक्तं पादं शत्रुगृहे

स्थिते। इदञ्च सौम्यक्रूराणां बलं स्थानवशात् समम्। एतदेव फलं विद्धि सौम्ये क्रूरे विपर्य्ययात्। स्थानवेधसमायोगात् यत्संख्यं जायते बलम्। तत्संख्यं वेध्यवस्तूनां फलं ज्ञेयं शुभाशुभम्। ग्रहाः सौम्यास्तथा क्रूराः वक्राः शीघ्रोच्चनीचगाः। स्थानञ्च वेध्यमित्येवं बलं ज्ञात्वा फलं वदेत्। वक्रग्रहे फलं द्विघ्नं त्रिगुणं स्वोच्चसंस्थिते। स्वभावजं फलं शीघ्रे नीचस्थेऽर्द्धफलोग्रहः। तिथिराश्यंशनक्षत्रं विद्धं क्रूरग्रहेण यत्। सर्व्वेषु शुभकार्य्येषु वर्ज्जयेत्तत् प्रयत्नतः। न नन्दति विवाहे च यात्रायां न निवर्त्तते। न रोगात्मुच्यते रोगी वेधवेलाकृतोद्यमः। रोगकाले भवेद्वेधः क्रूरखेचरसम्भवः। वक्रमत्या, भवेन्मृत्युः शीघ्रे चाग्ररुजान्वितः। बेधस्थाने रणे भङ्गो दुर्गे खण्डः (भङ्गः) प्रजायते। कविप्रवेशनं तत्र योधाघातश्च तत्र वै”। (कविश्चौरयोद्धा)। “यत्र पूर्व्वादिकाष्ठायां वृषराश्यादिगो रविः। सा दिगस्तमिता ज्ञेया शेषास्तस्य सदोदिताः। ईशानस्थाः स्वराः प्राच्यां ज्ञेया आग्नेयगा यमे। नैरृतस्थाश्च वारुण्यां, वायव्यां सौम्यगा मताः। नक्षत्राणि स्वरा वर्णा राशयस्तिथयोदिशः। ते सर्व्वेऽस्तमिता ज्ञेया यत्र भानुस्त्रिमासिकः। नक्षत्रेऽस्ते रुजा, वर्णे हानिः, शोकः स्वरेऽस्तगे। राशौ विघ्न, स्तिथौ भीतिः, पञ्चास्ते मरणं भवेत्। यात्रा युद्धं विवादश्च द्वारं प्रासादहर्म्म्ययोः। न कर्त्तव्यं शुभं चान्यदस्ताशाभिमुखं नरैः। अस्ताशायां स्थितं यस्य नाम्नः प्रथममक्षरम्। स आर्त्तः सर्व्वकार्येषु ज्ञेयो दैवहतो नरः। अरौ कोटे तथा युद्धे चातुरङ्गे महाबले। त्यजेदस्तंगतान् योद्धा यदीच्छेद्विजयं रणे। नक्षत्रेऽभ्युदिते पुष्टि, वर्णे लाभः, स्वरे सुखम्। राशौ जय, स्तिथौ तेजः पदाप्तिः पञ्चकोदये। प्रश्नकाले भवेद्विद्धं यल्लग्नं क्रूरखेचरैः। तद्दुष्टं, शोभनं सौम्यै, र्मिश्रैर्मिश्रफलं भवेत्। ग्रहैर्न विद्धं यल्लग्नं फलं लग्नस्वभावतः। ज्ञातव्यं देशिकेन्द्रेण भाषितं यच्चरादिकम्। (शीर्षोदये सौम्यविलग्नवर्गे लग्नेऽपि वा सौम्ययुते शुभं स्यात्। अतोऽन्यथात्वे तु तदन्यथात्वं, मिश्रं विमिश्रैरधिकं बलाद्यैः। केन्द्रोपगा नवमपञ्चमगाश्च सौम्याः केन्द्राष्टवर्जमशुभास्त्रिषड़ायसंस्थाः। सर्व्वार्थसाधनकराः परिपृच्छतां स्यु रेभिर्व्विपर्य्ययगतैस्तु विपर्य्ययः स्यात्। लग्नाधिनाथोयदि केन्द्रगः स्यात् तन्मित्रमेतस्य च केन्द्रगं वा। व्ययाष्टकेन्द्राण्यपहाय पापा अन्यत्र याता यदि तच्छुभं स्यात्। आद्योलग्नाधिपः कार्ये लग्ने कार्य्याधिपोयदि। लग्नपः कार्य्यपस्यापि लग्ने यदि तृतीयकः। चतुर्थः कार्य्यगौ स्यातां यदि लग्नपकार्य्यपौ। कार्य्यसिद्धिस्तदा ज्ञेया मित्रत्वेदधिकं फलम्। एवं दृष्टिवशाज्ज्ञेयं फलं तद्वच्चतुष्टयम्। पूर्णनाड़ीस्थितो दूतोयत् पृच्छति शुभाशुभम्। तत् सर्व्वं सिद्धिमाप्नोति शून्ये शून्यं समीरणे। आदौ शून्यगतः पृच्छेत् पश्चात् पूर्णां विशेद् यदि। तदा सर्व्वार्थसिद्धिः स्यात् वामे वामं न संशयः। श्वासप्रवेशकाले चेद् दूतोजल्पति वाञ्छितम्। तस्यार्थसिद्धिमाप्नोति निर्गमे नास्ति सुन्दरम्। ऊर्द्ध्वं वामाग्रतोदूतोज्ञेयो वामपथस्थितः। पृष्ठे दक्षे तथाधस्ताद्दक्षवाहौ गतोमतः। यात्रादानविवाहेषु वस्त्रालङ्कारभूषणे। शुभे कर्मणि सन्धौ च प्रवेशे वामगः शुभः। कलहद्यूतयुद्धेषु स्नानभोजनमैथुने। व्यवहारे भये भङ्गे दक्षनाड़ी प्रशस्यते)। अन्यप्रकरणोक्तमेतत् ज्यो० त० परिशिष्टम्। “क्रूरैरुभयतोविद्धा यस्याभरतिथिस्वराः। राशिधिष्ण्यञ्च पञ्चापि तस्य मृत्युर्न संशयः। मण्डलं नगरं ग्रामोदुर्गं देवालयं पुरम्। क्रूरैरुभयतोवेधे विनश्यन्ति न संशयः। कृत्तिकायां तथा पुष्ये रेवत्याञ्च पुनर्व्वसौ। वेधे सति क्रमाद्वेधोवर्णेषु ब्राह्मणादिषु। पूर्व्वात्रयं सयाग्नेयं ब्राह्मणानां विनिर्द्दिष्टं प्रकीर्त्तितम्। उत्तरात्रितयं पुष्यं क्षत्रियाणां विनिर्द्दिशेत्। पौष्णं मैत्रं मघा चैव प्राजापत्यं विशाम्पतेः। आदित्यमश्विनीं हस्तं शूद्राणामभिजित्तथा। विद्धैरेभिर्द्विजातीनां कारुकाणां च शेषकैः। तौल्यं भाण्डं रसोधान्यं गजाश्वादिचतुष्पदाः। सर्व्वं महार्घतां याति यावत् क्रूरोव्यधे स्थितः। क्रूरवेधसमायोगे यस्योपग्रहसम्भवः। तस्य मृत्युर्न सन्देहो रोगाद्वापि रणेऽपि वा। सूर्य्यभात् पञ्चमं धिष्ण्यं ज्ञेयं विद्युन्मुखाभिधम्। शून्यञ्चाष्टमभं प्रोक्तं सन्निपातश्चतुर्द्दशम्। केतुरष्टादशं प्रोक्तमुल्का स्यादेकविंशतिः। द्वाविंशतितमं कम्पस्त्रयोविंशश्च वज्रकम्। निर्घातश्च चतुर्विंशमुक्ता अष्टावुपग्रहाः। प्रस्थाने विघ्नदाः प्रोक्ताः सर्व्वकार्य्येषु सर्व्वदा। प्रसङ्गादत्र

१ षड्नाडीचक्रं नवनाडीचक्रञ्चोक्तं यथा “जन्मभं कर्म्माधानं विनाशः सामुदायिकम्। सांघातिकमिदं धिष्ण्यं षट्कं सार्वजनीनकम्। जातिदेशाभिषेकैश्च नव धिष्ण्यानि

पतेः। वेधं ज्ञात्वा फलं ब्रूहि सौम्यैः क्रूरैः शुभाशुभम्। जन्मभं जन्मनक्षत्रं दशमं कर्म्मसंज्ञकम्। एकोनविंशमाधानं त्रयोविंशं विनाशकम्। अष्टादशञ्च नक्षत्रं सामुदायिकसंज्ञकम्। सांघातिकञ्च विज्ञेयं धिष्ण्यञ्च षोड़शमेव हि। षट्त्रिकञ्चैव राजजातेर्जातिनाम स्वनामभम्। देशभं देशनामर्क्षं राज्यभं चाभिषेकभम्। मृत्युः स्याज्जन्मभे विद्धे कर्म्मभे क्लेश एव च। आधानर्क्षे प्रवासः स्यात् विनाशे बन्धुविग्रहः। सामुदायिकभे रिष्टं हानिः सांघातिके तथा। जातिभे कुलनाशः स्यात् बन्धनञ्चाभिषेकभे। देशर्क्षे देशभङ्गः स्यात् क्रूरैरेवं शुभैः शुभम्। उपग्रहसमायोगे मृत्युर्भवति नान्यथा। भयं भङ्गश्च घातश्च मृत्युर्भङ्गयुता क्षतिः। क्रूरैरेकादिपञ्चान्तैर्युधि वेधे फलं भवेत्। तिथिं धिष्ण्यं स्वरं राशिं वारञ्चैव तु पञ्चमम्। यद्दिने वेधयेच्चन्द्रस्तद्दिने स्यात् शुभाशुभम्। तिथ्यादिपञ्चके विद्धे चन्द्रयोगोयदा भवेत्। उक्तं फलं तदा वाच्यं तद्दिने ग्रहसम्भवम्।

अथार्घं संप्रवक्ष्यामि यदुक्तं चादिजामले। एकाशीतिपदे चक्रे ग्रहभेदाच्छुभाशुभम्। देशः कालस्ततः पण्यमिति त्रीण्यर्घनिर्णये। चिन्तनीयानि विज्ञानि सर्वकालं विचक्षणैः। देशोऽथ मण्डलं स्थानमिति देशस्त्रिधोच्यते। वर्षमासदिनं चेति त्रिधा कालोऽपि कथ्यते। धातुर्मूलं च जीवश्च इति पण्यं त्रिधा मतम्। अथ त्रिकत्रयस्यास्य वक्ष्यामि स्वामिखेचरान्। देशेशा राहुमन्देज्या मण्डलस्वामिनः पुनः। केतुसूर्य्यसिताः स्थाननाथाश्चन्द्रारचन्द्रजाः। वर्षेशा राहुकेत्वार्किजीवा मासाधिपाः पुनः। भौमार्कज्ञसिता ज्ञेयाश्चन्द्रः स्यात् दिवसाधिपः। धात्वीशाः सौरिपातारा, जीवेशाज्ञेन्दुसूरयः। मूलेशाः केतुशुक्रार्का इति पण्याधिपाग्रहाः। पुंग्रहा राहुकेत्वर्कजीवभूमिसुता मताः। स्त्रीग्रहौ शुक्रशशिनौ सौरिसौम्यौ नपुंसकौ। सितेन्दू सितवर्णेशौ रक्तेशौ भौमभास्करौ। पीतेशौ ज्ञगुरू कृष्णनाथाः केतुतमोऽर्कजाः। ग्रहोवक्रोच्चयोर्यः स्यादुदये च बलाधिकः। देशादीनां स एवैकः स्वामी खेटस्तदा मतः। स्वर्क्षे वक्रतुङ्गे स्यादुदये च बलाधिकः। वक्रोदये स्वहर्म्ये च पूर्णवीर्य्यो ग्रहो भवेत्। तदग्रपृष्ठगे खेटे बलं त्रैराशिकात् मतम्। उच्चांशस्थे बलं पूर्णं नीचांशस्थे दलं बलम्। त्रैराशिकवशात्ज्ञेयमन्तरे तु बलं बुधैः। एवं देशादिनाथा ये ग्रहवेधे व्यवस्थिताः। सुहृदः शत्रवोमध्याश्चिन्तनीयाः प्रयत्नतः। स्वमित्रसमशत्रूणां विध्यन् देशादिकं क्रमात्। शुभग्रहः शुभं दत्ते चतुस्त्रिद्व्येकपादकैः। दुष्टं दुष्टग्रहः कुर्य्यादेकद्वित्रिचतुःपदैः। विद्धं पूर्णदृशा पश्यन् तत्पादेन फलं ग्रहः। अविद्धं त्वन्यथा ज्ञेयं फलं दृष्ट्यनुमानतः। वर्णादिस्वरराशीनां मेषाद्ये राशिमण्डले। ग्रहदृष्टिवशात् सर्वं विद्धं वर्णादिकं मतम्। स्वरवर्णः स्वचक्रोक्तस्तिथिवेधाच्च पीडयेत्। तिथिवर्णेषु यो राशिस्तद्दृष्टिः स्यात्तिथीक्षणात्। अशुभो वा शुभोवापि शुक्ले विध्यँस्तिथिं ग्रहः। सर्वं निजफलं दत्ते कृष्णे पक्षे तु तद्दलम्। खेटकैकैकांशके ज्ञेया पूर्णा दृष्टिः सदा बुधैः। दृष्टिहीने पुनर्वेधे न स्यात् किञ्चित् शुभाशुभम्। इत्येवं दृष्टिभेदेन निर्द्दिष्टं सकलं फलम्। वर्णादिपञ्चके विद्धे ग्रहो दत्ते शुभाशुभम्। सौम्यः पूर्णदृशा पश्यन् विद्धं वर्णादिपञ्चकम्। फलं विंशोपकाः पञ्च क्रूरस्य चतुरोदिशेत्। वर्णादिपञ्चके यावत् स्थानवेधे च तावती। दृष्टिस्तदनुमानेन वाच्या विंशोपका बुधैः। एवं विंशोपका येऽत्र सम्भवन्ति शुभाशुभाः। अन्योन्यं शोधयेत्तेषां शेषात् ज्ञेयं शुभाशुभम्। देशध्वंसः प्रजापीडा नृपविप्रवधस्तथा। यत्र दृष्टिस्तु तत्र स्याद् दुर्भिक्षं मण्डले तथा। वर्त्तमानार्घविंशांशाः कल्प्या विंशोपका इह। ते क्रमात् वर्त्तमानार्घे देयाः पात्याः शुभाशुभाः। अकालेऽपि फलं पुष्पं वृक्षाणां यत्र जायते। स्वजातिमांसभुक्तिश्च दुर्भिक्षं तत्र रौरवम्। परचक्रागमोयत्र विग्रहश्च स्वराज्यके। ऋतोर्विपर्य्ययो यत्र दुर्भिक्षं मण्डले भवेत्। भूमिकम्पोरजःपातोरक्तवृष्टिश्च जायते। देशे सर्वसुखोपेते वेधादेतद्वदेद्बुधः। दीपो यथा गृहस्यान्तमुद्द्योयति सर्वतः। तथेदं सर्वतोभद्रं चक्रं ज्ञानप्रकाशकम्"।

२ शतपदचक्रम्—"चक्रं शतपदं वक्ष्ये ऋक्षांशाक्षरसम्भवम्। नामादिवर्णतोज्ञेया ऋक्षराश्यंशकास्तथा। तिर्य्यगूर्द्ध्वगता रेखा रुद्रसंख्यालिखेद्बुधः। जायते कोष्ठकानाञ्च शतैकं १०० नात्र संशयः। न्यसेदवकहड़ादि रौद्रादिविदिशि क्रमात्। (अ व क ह ड़ा ऐशान्यां म ट प र ता हरिति चाग्नेय्याम्। न य भ ज खा नैर्ऋत्यां ग श द च लावायव्याम्) पञ्च पञ्च क्रमेणैव विंशवर्णान् नियोजयेत्। पञ्चस्वरसमायोगे

एकैकं पञ्चधा कुरु । (अवर्णाद्यास्त्रयोज्ञेयाः सन्ध्यक्षर युतस्तथा । सजातीयैक्यमास्थाय पञ्चस्वरविनिर्णयः । ऋदृलृतोरण्यकारेण शेन सस्य परिग्रहः) अधिक पा० । "कुर्य्यात् कुपुभुदुस्थाने त्रीणि त्रीण्यक्षराणि च । कुघङञ्छो भवेत् स्तम्भे रौद्रे त्वीशानगोचरे । पुषणठो भवेत् स्तम्भे हस्ते चाग्नेयसंज्ञके । भुधफढोभवेत् स्तम्भे पूर्व्वाषाढ़े च नैरृते । दुथझञो भवेत् स्तम्भे वायव्ये भाद्रउत्तरे । एवं स्तम्भचतुष्कञ्च ज्ञातव्यं स्वरवेदिभिः । धिष्ण्यानि कृत्तिकादीनि प्रत्येकं चतुरक्षरैः । साभिजिन्त्यंशकास्तत्र शतैकं द्वादशाधिकम् । यदृक्षांशककोष्ठस्थः क्रूरः सौम्योऽपि वा ग्रहः । ततस्तं वेधयेत् तिर्य्यक् पुंसोनामादिमाक्षरम् । सौम्यैर्विद्धं शुभं ज्ञेयमशुभं पापखेचरैः । मिश्रैर्मिश्रफलं तत्र निर्वेधे न शुभाशुभम् । यदुक्तं सर्व्वतोभद्रे ग्रहोपग्रहवेधतः । शुभाशुभफलं सर्व्वं तदिहापि विचिन्तयेत्" । (पञ्च स्वराः अ इ उ ए ओकारास्तैर्योगे धिष्ण्यानि नक्षत्राणि । अत्र चतुर्भिर्व्वर्णैरेकं नक्षत्रं यथा । अ इ उए ३।ओ वविवु । ४ । वेवोककि । ५ । कुघङञ्छ । ६ । केकोहहि । ७ । डुहेहोड । ८ । डिडुडेडो । ९ । ममिमुमे । १० । मोटटिटु । ११ टेटोपपि । १२ । पुषणठ १३ । पेपोररि । १४ । रुरेरोत । १५ । तितुतेतो । १६ । ननिनुने । १७ । नोययियु । १८ । येयोभभि । १९ । भुधफढ । २० । भेभोजजि । २१ । जुजेजोख । (अभिजित्)० । खिखुखेखो । २२ । गगिगुगे । २३ । गोशशिशु । २४ । शेशोददि । २५ । दुथझञ । २६ । देदोचचि । २७ । चुचेचोल । १ । लिलुलेलो । २ । ऋट्लृयुक्तः ऋकारयुक्तेन ज्ञेयः । ह्रस्वेन दीर्घोज्ञेयः । तालव्यशकारेण दन्त्यसकारोज्ञेयः) ।

३अंशचक्रम् — "अष्टाविंशोर्द्ध्वगा रेखा अष्टाविंशतितिर्य्यग्गाः । अंशचक्रं भवत्येवं यदुक्तं चादिजामले । कृत्तिकादीनि भान्यत्र पादाक्षरक्रमेण च । साभिजिन्ति न्यसेत् सर्व्वाण्यष्टाविंशतिसंख्यया । यो ग्रहो यत्र ऋक्षांशे तं तत्रैव न्यसेद्बुधः । वेधयेत् संमुखं वर्णं शुभो वाप्यशुभोऽपि वा । आद्यंशेन चतुर्थांशं चतुर्थांशेन चादिमम् । द्वितीयेन तृतीयं तु तृतीयेन द्वितीयकम् । यस्य नामाक्षरं विद्धमंशचक्रे ग्रहेण तु । क्रूरैः रिष्टं, शुभैर्हानिर्द्वाभ्यां मृत्युर्न संशयः । क्रूरोभयस्थिते वेधे मृत्युर्विघ्नं शुभाशुभैः । शुभोभयगते वेधे व्याधिपीड़ा च बन्धनम् । वैधव्यञ्च विवाहे तु यात्राकाले महाभयम् । रोगे मृत्यू रणे भङ्गः क्रूरवेधे न संशयः । अद्रयः सागरानद्यो देशग्रामपुराणि च । क्रूरवेधे विनश्यन्ति नात्र कार्य्या विचारणा । चन्द्रस्यर्क्षांशको विद्धो भवेद्यत्रापरग्रहैः । तन्मानं तद्दिनं वर्ज्यं सर्व्वदा शुभकर्म्मणि"

४ छत्रत्रयचक्रम्—आदौ चक्रं समालिख्य छत्रत्रयसुशोभितम् । अश्विन्यादीनि लेख्यानि सप्तविंशतिभानि च । अश्विन्याद्यं मघाद्यञ्च मूलाद्यञ्च क्रमेण च । उत्तरे पूर्व्वके याम्ये चैतच्छत्रत्रयं मतम् । प्रतीचीमध्यरेखायामीशानान्तं हयाधिपः । आग्नेयान्तं नराधीशस्तन्मध्ये च गजाधिपः । अश्वाध्यक्षा गजाध्यक्षोनराध्यक्षः क्रमेण च । एषां छत्रविभागेन ज्ञातव्यं हि शुभाशुभम् । अन्येषां भूभृतामृक्षं यत्र छत्रे व्यवस्थितम् । तच्छत्रं तस्य भूपस्य शुभाशुभफलप्रदम् । यत्र छत्रे स्थितः सौरिर्भङ्गं तस्य विनिर्दिशेत् । फलञ्च चामरादीनां प्रत्येकं च वदाम्यहम् । चामरं कलसं वीणा छत्रं दण्डं पतद्ग्रहम् । आसनं कीलकं रज्जुर्न्नव भेदा प्रकीर्त्तिताः । चामरे १चण्डता वायोरनावृष्टिश्च जायते । दुर्भिक्षं च भवेद्घोरं प्रजापीड़ा न संशयः । कलसस्थे २भवेद्युद्धं रणे भङ्गो महद्भयम् । वातपातादिकं सर्व्वं जायते नात्र संशयः । वीणासंस्थे ३चार्कपुत्रे पट्टराज्ञी विनश्यति । चलचित्तो भवेद्राजा भयभीता च मेदिनी । यदाक्रत्रत्रये सौरिश्छत्रे४ दण्डे५ पतद्ग्रहे७ । तदा तस्य भवेद्भङ्गश्छत्रस्यापि न संशयः । आसनस्य भवेन्नाश आसनस्थे७ शनैश्चरे । युवराजक्षयः कीले८ बन्धनं रज्जुसंस्थिते९ । सौम्ययुक्तोऽतिचारस्थः शनिरक्ताफलो न हि । वक्रगः क्रूरयुक्तश्च सर्व्वं क्रूरं करोति सः । शनिराहुकुजादित्यायदाजीवेन्दुसंयुताः । उत्तराधीशराज्यस्य निश्चितं छत्रभङ्गदाः । क्रूरचतुष्टयं चैव बुधचन्द्रेण संयुतम् । पूर्व्वछत्रविनाशाय कथितं पूर्व्वसूरिभिः । एवं पापचतुष्कं च यदा शुक्रेन्द संयुतम् । दक्षिणाधिपतेश्छत्रविनाशो भाषितो बुधैः । एवमन्येषु राज्येषु यत्र यस्य च सम्भवः । उपग्रहसमायोगाच्छत्रभङ्गं विनिर्दिशेत् । यथा दुष्टफलः सौरिस्तथा सौम्यफलोगुरुः । भौमज्ञौ शुक्रराहू च रविचन्द्रौ बले समौ । यथा हानिकराः क्रूरास्तथा सौम्याः शुभप्रदाः । क्रूरयुक्तो भवेत् क्रूरश्चन्द्रः सौम्ययुतः शुभः । सौम्यक्रूरा यदा छत्रे अष्टावेकत्र संस्थिताः । छत्रभङ्गो भवे-

त्तस्य परचक्रागमेण च। नृपनामर्क्षगोराहुः केतुर्वा यस्य संस्थितः। छत्रभङ्गोभवेत्तस्य विषदानेन भूपतेः। मृगयां साहसं यात्रां दुष्टाश्वगजवाहनम्। विग्रहञ्च त्यजेद्राजा छत्रस्थैः क्रूरखेचरैः। एवं ज्ञात्वा सदा राजा करोति ग्रहशान्तिकम्। यदुक्तं यामले तन्त्रे तेन शान्तिर्भविष्यति” इति

५ सिंहासनचक्रम्(२)——“अथातः संप्रवक्ष्यामि चक्रं सिंहासनत्रयम्। येन विज्ञातमात्रेण क्रियते राज्यनिर्णयः। सप्तविंशतिनक्षत्रेष्वेकैकन्तु नवात्मकम्। अश्विनीमघमूलाद्यं पञ्चनाड़ीविभेदितम्। अश्विन्याद्युत्तरे भागे मघाद्यं पूर्वतः स्थितम्। मूलाद्यं दक्षिणे भागे ज्ञातव्यं नृपतित्रयम्। इतरेषु च राज्येषु नृपनामर्क्षतोवदेत्। शुभाशुभमिदम् सर्वं यस्य यत्र शनिः स्थितः। नाड़िकापञ्चभेदेन एकैकस्याऽऽसनं भवेत्। आधारमासनं पट्टं सिंहं सिंहासनं तथा। आधारादिफलं सर्वमेकैकस्य वदाम्यहम्। ग्रहवेधवशाज्ज्ञेयं सौम्यैः क्रूरैः शुभाशुभम्। नृपस्याऽऽधारनामर्क्षे यदा पट्टाभिषेचनम्। पराधीनगतं राज्यं कुरुते नात्र संशयः। आसनस्थेन ऋक्षेण नीतियुक्तो भवेन्नृपः। प्रधानपुरुषादेशी प्रजाशान्तिकरो भवेत्। पट्टऋक्षे यदा राजा चोपविष्टो यदासने। पूर्वराजस्थितेस्तुल्यं चिरं पालयते महीम्। सिंहरूपी भवेद्राजा सिंहऋक्षासने स्थितः। संग्रामस्य प्रियोनित्यमसाध्यो मन्त्रिणः सदा। सिंहासनगते ऋक्षे तेजस्वी भीषणाकृतिः। चलचित्तो महाक्रोधी प्रजापीड़ाकरोनृपः। तत्कालेन्दुगते ऋक्षे क्रूरनिर्वेधनाडिके। शुभावस्थे शुभलग्ने संस्थायी नृप आसने। ईदृशे च समायोगे उपविष्टो यदासने। उच्छिद्य शत्रुसंघातमेकच्छत्रं करोति सः। क्रूरग्रहगतनाड्यामुपविष्टो यदासने। बन्धनं भूमिनाशश्च तथा मृत्युः प्रजायते। आधारादिफलं सत्र क्रूरैरेव शुभैः शुभम्। आधारऋक्षगः सौरिरनावृष्टिं करोति सः। आसनस्थो दुर्भिक्षं रौरवं घोरं प्रजामृत्युः प्रजायते। अथ वा व्याधिपीडा च यदा सौरिर्युद्धे भङ्गप्रदोभवेत्। पट्ट ऋक्षे यदा सौरिः पट्टराज्ञी घातदुःखञ्च जायते। प्रियो वाथ कुमारो वा मन्त्रिवर्गक्षयोऽपि वा। सिंहे सिंहासने वाथ यदि तिष्ठति सूर्य्यजः। तदा मृत्युर्न सन्देहो यदि शक्रसमोनृपः। शन्यर्कराहुमाहेया यदा चन्द्रर्क्षसंयुताः। यस्यासनगता एते तदा तस्य क्षयङ्कराः। क्रूरयुक्तोऽतिवक्रश्च क्रूरनाडीगतोऽपि वा। आसने चन्द्रयोगेण कालरूपी शनैश्चरः। एवं शुभफलं दद्याद्देवमन्त्री न संशयः। करोति विपुलं राज्यं यस्यासनगतो गुरुः”

६ कूर्मचक्रम्(५)——“कूर्मचक्रं प्रवक्ष्यामि यदुक्तं कौशलागमे। येन विज्ञातमात्रेण ज्ञायते देशनिर्णयः। यस्य पृष्ठैकदेशस्था देवास्त्रिंशकोटयः। स मेरुः पृथिवीमध्ये श्रूयते दृश्यते न तु। तादृशाः पर्वताश्चाष्टौ सागरा द्वीपदिग्गजाः। सर्वे तु विधृता भूम्या सा धृता येन तं शृणु। दंष्ट्रायां सा वराहेण विधृता सचराचरा। मुस्ताखननतोयस्य शोभते मृत्तिका यथा। ईदृशोऽपि महाकायो वराहः शेषमस्तके। तस्य चूड़ामणेरूर्द्ध्वं शोभते मशकोपमः। एवंविधः स शेषोऽपि कुण्डलीभूय संस्थितः। कूर्मपृष्ठैकभागेन विसतन्तुरिवाबभौ। वपुःस्कन्धः शिरः पुच्छनखाङ्घ्रिप्रभृतीनि च। मानेन तस्य कूर्मस्य कथयामि प्रयत्नतः। शङ्खोः शतसहस्राणि योजनानि वपुः स्थितम्। तदर्द्धेन भवेत् पुच्छं पुच्छार्द्धेन तु कुक्षिकम्। ग्रीवाऽस्याऽयुतकोटीभिर्मस्तकं सप्तकोटिभिः। नेत्रयोरन्तरं तस्य कोटिरेका प्रजायते। मुखं कोटिद्वयं तस्य द्विगुणेन च पादयोः। अङ्गुलीनां नखाग्रे तु योजनायुतसंख्यया। एवं कूर्मप्रमाणन्तु कथितं चादियामले। तस्योपरिस्थिता चेयं सप्तद्वीपवती मही। कूर्माकारं लिखेच्चक्रं सर्वावयवसंयुतम्। पूर्वभागे मुखं तस्य पुच्छं पश्चिममण्डले। पूर्वापरं लिखेद्वेधं वेधश्चोत्तरदक्षिणे। ईशानराक्षसे वेधं वेधमाग्नेयमारुते। नाभिशीर्षचतुःपादकुक्षिपुच्छेषु संस्थिते। तारात्रयाङ्किते ह्यस्मिन् सौरिं यत्नेन चिन्तयेत्। अधिके भत्रिके तत्र पादार्द्धेषु भमण्डलम्। चतुर्विंशतिसंख्याः स्युस्तांश्च हन्ति शनिः क्रमात्। अश्विन्याद्युत्तरेभागे मघाद्यं पूर्वतः स्थितम्। मूलं च दक्षिणे भागे ज्ञातव्यं नृपतित्रयम्। व्यापकग्रहराशिस्थे चन्द्रे मन्दोविशेद्यदा। यद्यद्धिष्ण्यपदार्द्धे च तत्र दोषा भवन्त्यमी। अतिवृष्टिरनावृष्टिर्मूषिकाः शलभाः शुकाः। स्वचक्रं परचक्रञ्च सप्तैताः ईतयः स्मृताः। कृत्तिका रोहिणी सौम्यं (५) कूर्मनाभीगतं त्रयम्। साकेता मिथिला चम्पा कौशाम्बी कौशिकी तथा। अहिच्छत्रं गया विन्ध्यमन्तर्वेदी च मेकला। कान्यकुब्जं प्रयागञ्च मध्यदेशो विनश्यति। रौद्रम्पुनर्वसू पुष्यः कूर्मस्य च शिरःस्थितम्। सगौड़ो हस्तिबन्धश्च पञ्चराटश्च कामरूः। वरेन्द्री च तथा ज्ञेया मगधश्च तथैव च। सूरसेनो वगे-

यासः पूर्व्वदेशोविनश्यति । अश्लेषा च मघापूर्व्वफाल्गुन्याग्नेयगोचरे । अङ्गवङ्गौ कलिङ्गश्च पूर्व्वजाश्चैव कोशलाः । डाहलोजयहन्ता च तथैवच सुलञ्जिका । उड्डीयानं वराटश्च अग्निदेशो विनश्यति । उत्तरा हस्तचित्रा च दक्षिणं कुक्षिमाश्रिताः । दर्दुरश्च महेन्द्रश्च वनवासश्च सिंहलः । तापी भीमरथी लङ्का त्रिकूटं मलयस्तथा । श्रीपर्व्वतः किष्किन्धा इति नश्यति दक्षिणः । स्वाती विशाखा मैत्रं च कूर्म्मनैरृत्यगोचरे । नासिक्यं च सुराष्ट्रं चोत्तरमालवकं तथा । वाह्लीकं च प्रकाशञ्च भृगुकच्छञ्च कोङ्कणम् । खेटापुरं च मौटेरं देशा नश्यन्ति चेदृशाः । ज्येष्ठा मूलं तथाषाढा पुच्छे कूर्म्मस्य संस्थिताः । पारावतं कच्छमवन्ती पूर्व्वमालवः । पारातवर्व्वरद्वीपं सौराष्ट्रं सैन्धवं तथा । ज्ञानस्थानं विनश्यन्ति स्त्रीराज्यं पुच्छपीडने । उत्तरादित्रिऋक्षाणि पादे वायव्यगोचरे । गुर्ज्जरं तङ्गणञ्चैव मरुदेशं सरस्वतीम् । जालन्धरं वराटं च वालुकोदधिसंयुतम् । मेरुशृङ्गं विनश्यन्ति ये चान्ये कोणसंस्थिताः । शतभिषादित्रयञ्चैव उत्तरं कुक्षिमाश्रितम् । नेपालं कीरकाश्मीरगज्जन खुरसानकम् । माथुरं म्लेच्छदेशञ्च रुद्रकेदारमण्डले । हिमाश्रया विनश्यन्ति ये देशाश्चोत्तराश्रयाः । रेवती चाश्विनी याम्यं२ पादे त्वीशानगोचरे । गङ्गाद्वार कुरुक्षेत्रं श्रीकण्ठं हस्तिनापुरम् । अश्ववक्त्रैकपादाश्च गजकर्णास्तथैव च । विनश्यन्ति च ते सर्व्वे देशा स्त्वीशानगोचरे । सौरिः स्वदेशगो यत्र तत्र यत्नेन चिन्तयेत् । परदेशस्थितः कुर्य्याद्विग्रहं दृष्टौ यथोदितैः । यत्रस्थः पीडयेत्तत्र वेधस्थाने तथैव च । देशनामर्क्षगः सौरिर्भङ्गदो नात्र संशयः । १पृथ्वीकूर्म्मं समालेख्यं कृत्तिकादि यमान्तकम् । देशादिस्वस्वऋक्षादि वक्ष्ये कूर्म्मचतुष्टयम् । पूर्व्ववच्चक्रमालिख्य देशनामर्क्षपूर्व्वकम् । २देशकूर्म्मो भवेत्तत्र यत्र सौरिर्व्यवस्थया । नगरे ३नागरऋक्षं कृत्वा लेख्यं तु पूर्व्ववत् । सौरिस्थाने भवेद्दुष्टं वेधस्थाने तथैव च । ४क्षेत्रजे क्षेत्रभान्यत्र कृत्वा कूर्म्मं यथास्थितम् । सौरिस्थाने तथा वेधे जायतेऽत्र महद्भयम् । ५गृहकूर्म्मं समालिख्य गृहद्वारमुखस्थितम् । स्वाम्यर्क्षपूर्व्वकम् कृत्वा ततोवीक्ष्य शुभाशुभम् । गृहमध्यस्थितः सौरिः शोकसन्तापदायकः । द्वारे विघ्नप्रदोज्ञेयः पावके वह्निदायकः । ज्ञेयो मृत्युप्रदो याम्ये राक्षसे राक्षसाद्भयम् । वारुणे शुभदोज्ञेयो वायव्ये शून्यदायकः । अर्थलाभप्रदः सौम्ये शाङ्करे सर्व्वसिद्धिदः । सौरिर्व्वलाधिकोदुष्टः स्वल्पवीर्य्यः शुभावहः । समकालं पीडयेद्यत् भानुजः कूर्म्मपञ्चकम् । तत् स्थाने महायुद्धं जायते नात् संशयः । दुष्टस्थाने गते चन्द्रे कर्त्तव्यन्तत् शान्तिकम् । यदुक्तं यामले तन्त्रे सर्व्वविघ्नविनाशकम् । यन्देशश्चैवं पश्यन्ति राहुभौमशनैश्चराः । परचक्रभयं चाग्निदुर्भिक्षन्तत्र दारुणम् । कूर्म्मचक्रं महाचक्रं कथितञ्चादियामले । त्रिकालविषयज्ञानं प्राणिस्थं येन जायते” ।

तन्त्रोक्ते मन्त्रग्रहणतत्साधनोपयोगिकूर्म्मचक्रे तु कूर्म्मचक्रशब्दे दृष्टे उक्तो तत्र दृश्यं ।”

७ पद्मचक्रम्—“पद्माकारं लिखेच्चक्रमष्टपत्रं सुशोभनम् । कोष्ठकं नवमं मध्ये पद्मचक्रं प्रजायते । कृत्तिकादीनि भान्यत्र त्रीणि त्रीणि यथाक्रमम् । मध्यकोष्ठादि रुद्रान्तं सप्तविंशतिसंख्यया । नव खण्डा धरा सा च नवभागेषु संस्थिता । यत्र खण्डे स्थितः सौरिः खण्डं तच्च विनश्यति”

८ फणीश्वरचक्रम्—“कृत्तिकाद्यं लिखेच्चक्रं सर्पाकारं फणीश्वरम् ; सप्तनाड़ीसमायुक्तं सौरिवेधं विलोकयेत् । नाड्येकैकसमायोगे जम्बूद्वीपादि गण्यते । सप्त द्वीपाः क्रमेणैव पीड्यन्ते सौरिपीड़या । जम्बूप्लक्षस्तथा शाकः कुशः क्रौञ्चश्च शाल्मलिः । सप्तमः पुष्करद्वीपः पीड्यन्ते सौरिपीडया” । कालानलचक्राणि सप्त

९ राहुकालानलचक्रम्—(२)“अथातः संप्रवक्ष्यामि प्रोक्ता या ब्रह्मयामले । राहुकालानलौ यात्रा सद्यःप्रत्ययकारणम् । ग्रहयोगवशाद्यात्रा ज्योतिःशास्त्रे प्रभाषिता । या सा शुभेषु कार्य्येषु फलदा न तु सङ्गरे । यस्य छायाप्रभावेण छाद्येते शशिभास्करौ । तस्य राहोः प्रभावञ्च वक्ष्येऽहं रणकर्म्मणि । केचिद् मूर्खा वदन्त्येवं ग्रहोराहुरकारणम् । यतो वर्षे दिने लग्नेष्वाधिपत्य न दृश्यते । आधिपत्ये स्थिता ये च वर्षे मासि दिवानिशोः । ते चाधिकारिणोज्ञेया राहुः राजाऽभिधीयते । वेदागमपुराणेषु विख्यातो राहुखेचरः । तस्य माहात्म्यमज्ञात्वा मिथ्या जल्पति स्वल्पवित् । दुष्टारिष्टेषु सर्व्वेषु जातकादिषु मन्यते । सद्यः प्रत्ययदो राहुः स कथं स्यादकारणम् । भ्रमँस्य कालरूपेण संहारेण गृहीतले । स्ववक्त्रादंष्ट्रया रौद्रोज्ञेयो राहुर्न संशयः । महाग्रासभयाद् यस्य दृष्टिमार्गे भ्रमन्ति च । तस्य नामान्यहं वक्ष्ये मुखं पुच्छं क्रमेण च । राहुरग्रक्रमः

पातः स्वर्भानुः सिंहिकासुतः । दैत्यश्छाया शिरोवक्त्रं पर्व्वारिश्च विधुन्तुदः । पुच्छं केतुः शिखी सर्पो गुदं गुह्यं घटोभतम् । उत्पातो विषगर्भश्च धूम्रकालः ग्रहान्तकः । कक्षाधारगताराहुः सर्परूपेण संस्थितः । तस्य चक्रं प्रवक्ष्यामि राहुकालानलाख्यकम् । शलाकाष्टकं चक्रं भोगादौ कृत्तिकादिकम् । साभिजित् सर्व्वमालिख्य अष्टाविंशतितारकाः । यत्र ऋक्षस्थितोराहुर्वदनं तद्विनिर्दिशेत् । मुखात् पञ्चदशे ऋक्षे पुच्छं तस्य व्यवस्थितम् । एकोत्तरशतं ख्याताः जायन्ते तत्र केतवः । व्याप्नुवन्ति जगत्सर्व्वं सहस्रार्कसमत्विषः । राहुभुक्तानि ऋक्षाणि जीवपक्षे त्रयोदश । त्रयोदशाऽपि भोग्यानि मृतपक्षप्रकीर्त्तितः । मृतपक्षे मुखकस्य गुदं जीवाङ्गमध्यगम् । एवमङ्गद्वयं राहोर्ज्ञातव्यं स्वरवेदिभिः । जीवपक्षे क्षपानाथे मृतपक्षे रवौ स्थिते । तस्मिन् काले शुभा यात्रा विपरीता तु हानिदा । चन्द्रादित्यौ यदा युक्तौ जीवपक्षव्यवस्थितौ । तत्र क्षेमं जयो लाभो यात्राकाले न संशयः । मृतपक्षे यदा काले सुस्थितौ चन्द्रभास्करौ । तदा हानिर्भयं भङ्गोमृत्युर्यात्राफलं मतम् । जीवपक्षस्थिते चन्द्रे कार्य्यं स्यादमृतोपमम् । मृतपक्षे मृतं ज्ञेयं यतश्चन्द्रबलात् बलम्" तत्राङ्गभेदेन फलभेद उक्तस्तत्

राहुषडङ्गविभागस्तन्त्रम्—"अतः षडङ्गभेदेन राहुचक्रं वदाम्यहम् । मुखं हृदुदरं गुह्यं पुच्छं मस्तकमेव च । मुखैकं हृदये सप्त षड्क्षाणि तथोदरे । ऋक्षैकं गुह्यगं तस्य षट् पुच्छे

"मुखाद्यङ्गनामभेदः सप्तमस्तके मुखाद्यङ्गस्य नामानि फलं चास्य वदाम्यहम् । यथोत्तरं क्रमेणैव चन्द्रार्कभ्रमणेन च । यत्र ऋक्षे स्थितो राहुस्तस्याभिधानमीरितम् । राहुगिलितं कर्त्तरी जिह्वा चन्द्राङ्गं वदनं तथा । राहुधिष्ण्याग्रतः सप्त भुक्तधिष्ण्यानि यानि च । तानि सम्पुटसंज्ञानि कामाङ्गं हृदयन्तथा । हृदयाग्रे स्थिताश्च तारका रससंख्यया । कामाङ्गं जठरं जीवं सम्पुटोदरसंज्ञकम् । तत्पुरोयत्तु नक्षत्रमेकं पञ्चदशं मुखात् । गुदमुद्गिलितं गुह्यं केतुश्चन्द्राङ्गकर्त्तरी । गुदधिष्ण्याग्रतोयानि धिष्ण्यानि रससंख्यया । पुच्छं सूर्य्याङ्गवज्राङ्गपुष्टिमृत्युस्तथैव च । शेषाणि सप्त भान्यत्र मध्यस्थान्यस्य पुच्छयोः । कपालं मस्तकं शीर्षं रुद्राङ्गं भोगिमण्डलम् । स्थिररूपी स्थितोभानुश्चररूपश्च चन्द्रमाः । क्रमेणैकैकशोऽङ्गानां योगषट्कं वदाम्यहम् ।

मुखादियोगषट्कम्—"राहुवक्त्रे स्थिते सूर्य्ये चन्द्रे हृदयसंस्थिते । यायिनो विजयस्तत्र स्थायिनो भङ्ग आहवे । मुखाग्रसंस्थिते सूर्य्ये चन्द्रे चोदरगे तथा । अत्र यायो जयेद्युद्धे हेलया नात्र संशयः । भास्करे गिलिताङ्गस्थे चन्द्रे वज्राङ्गसंस्थिते । स्थायी भङ्गमवाप्नोति यायी जयति सत्वतः । राहुऋक्षस्थितो भानुश्चन्द्रे पुच्छाङ्गसंस्थिते । स्थायिनोविजयोयुद्धे यायिनो मृत्युमादिशेत् । राहुजिह्वां गते सूर्य्ये चन्द्रे रुद्राङ्गसंस्थिते । बलावर्त्तौ भवेत्तत्र सैन्ययोरुभयोरपि । राहुऋक्षस्थितोभानुश्चन्द्रस्तत्रैव संस्थितः । न कश्चिज्जयमाप्नोति सैन्ययोरुभयोःक्षयः" ।

हृदयादियोगषट्कम् । "हृदयस्थे दिवानाथे जठरस्थे निशाकरे । निर्द्दिष्टः स्थायिनोमृत्युर्यायी जयति निर्व्रणः । हृदयस्थो यदा भानुः शशाङ्कोगुदमाश्रितः । हेलया जयते यायी स्थायी च म्रियते रणे । कामाङ्के दिवानाथे पुच्छघटके निशाकरे । स्थायिनो विजयस्तत्र यायिनश्च पराजयः । सम्पुटस्थो यदादित्यो रुद्राङ्के चन्द्रमा स्थितः । यायी च भङ्गमायाति किञ्चित्स्थायी जयी रणे । कामाङ्गं याति चेत् भानुश्चन्द्रे राहुमुखस्थिते । संग्रामे विजयी यायी, स्थायिनो भङ्गमादिशेत् । हृदयाङ्गे यदा युक्तौ चन्द्रादित्यौ व्यवस्थितौ । देवानपि जयेत् यायी किंपुनर्म्मानवं बलम्" ।

उदरादियोगषट्कम्—"उदरस्थे दिवानाथे निशानाथे गुदस्थिते । समयुद्धं भवेत्तत्र किञ्चित् यायी जयी रणे । सम्पुटस्थो यदा भानुः पुच्छे भवति चन्द्रमाः । यायिभङ्गो, जयः स्थातुस्तत्र काले न संशयः । कामाङ्गगः सहस्रांशुर्म्मस्तकस्थो निशाकरः । यात्रिकोभङ्गमायाति स्थाने वासी जयी रणे । भानुरुदरगोयत्र निशेशोराहुवक्त्रगः । विवादी क्षीयते तत्र स्थायी जयति नान्यथा । स्वर्भानोरुदरे भानुर्हृदये तारकाधिपः । अनायासेन संग्रामे यायिनो जयमादिशेत् । उदराङ्गे यदा युक्तौ चन्द्रादित्यौ व्यवस्थितौ । तदा सन्धिर्न सन्देहः सैन्ययोरुभयोरपि" ।

गुदादियोगषट्कम्—"केतुधिष्ण्ये स्थिते सूर्य्ये चन्द्रे वज्राङ्गसंस्थिते । यायिभङ्गो, जयी स्थायी भाषितं ब्रह्मयामले । गुदे तीक्ष्णांशुसंयुक्ते कपालस्थे निशाकरे । यायी च भज्यते तत्र स्थायी जयति नान्यथा । गुदऋक्षस्थितः सूर्य्योराहुऋक्षस्थितः शशी । महाहवं भवेद् घोरं किञ्चित् स्थायी जयी रणे । भानुरुद्गिलिते ऋक्षे शशभृत्

संपुटे यदि। यायिनो विजयस्तत्र स्थायिनो भङ्गमादिशेत्। गुदभे वर्त्तते भानुर्ज्जठरे रोहिणीपतिः। दण्डयित्वा रिपोः सैन्यं याताभ्येति निजालयम्। गुदे दिनकरो यत्र तत्रैव यामिनीकरः। समयुद्धं भवेत्तत्र किञ्चिदागन्तुको जयी"।

वज्राङ्गयोगषट्कम्—"सूर्य्याङ्गस्थः सहस्रांशुर्ज्जिह्वायां शीतगुः स्थितः। यायिनोविजयं विद्यात् स्थायिनश्च पराजयम्। पुच्छक्षेत्रस्थितो भानुः रुद्रक्षेत्रे तु चन्द्रमाः। यायिनो मृत्युरायाति जयलाभौ च स्थायिनः। पुच्छषट्के यदादित्यः कामाङ्गे चन्द्रमाः स्थितः। यायी विजीयते तत्र शक्रतुल्योऽपि वैरिभिः। अंशुमाली स्थितोवज्रे जठरस्थे सुधाकरे। आदत्तेऽरिश्रियं सर्व्वां जित्वा यायी रणाङ्गणे। भास्करे राहुपुच्छस्थे मृगाङ्के गुदमाश्रिते। समयुद्धं भवेत् तत्र किञ्चित् यायी जयी रणे। सूर्य्याचन्द्रमसौ यत्र वज्राङ्गे यदि संस्थितौ। सैन्ययोरुभयोस्तत्र वधो भवति निश्चितम्"।

कपालादियोगषट्कम्—"रुद्राङ्गस्थे दिवानाथे राहुजिह्वाङ्गगः शशी। स्थायिनस्तु जयस्तत्र भङ्गो भवति यायिनः। राहुशीर्षस्थिते मित्रे शशाङ्के हृदि संस्थिते। विना युद्धेन गृह्णीयाद्यायी सर्व्वामरिश्रियम्। कपाल संस्थितः सूर्य्यः सम्पुटस्थो यदा शशी। यायिना जीयते तत्र स्थायिनो भङ्गमादिशेत्। मस्तकस्थे दिवानाथे धिष्ण्यनाथे गुदश्रिते। यायिनो विजयो युद्धे स्थायिनस्तु पराजयः। राहुशीर्षगतोभानुः पुच्छस्थे तु निशाकरे। अन्योऽन्यं विग्रहं घोरं युद्धं भवति दारुणम्। दिनेशो राहुरुद्राङ्गे चन्द्रस्तत्रैव सङ्गतः। विनाशं कोषराज्यस्य यायिनो मृत्युमादिशेत्।"

राहुदशाङ्गविभागचक्रम्—"हृदयादीनि चाङ्गानि जिह्वान्तानि क्रमेण च। दशसंख्यान्यहं वच्मि राहुचक्रस्य मध्यतः। पुष्पितं फलितं चैव निःफलं झटितं गुदम्। राजसन्तामसं हृद्ध मृतं जिह्वा क्रमेण च। पुष्पिते त्रीणि धिष्ण्यानि क्षेमलाभकराणि च। शत्रुभङ्गो भवेद्युद्धे यात्रा मासेन लाभदा। ततश्चत्वारि धिष्ण्यानि पक्षैकेण फलन्ति च। गजवाजिधनं देशं यायी तु लभते ध्रुवम्। अफलेषु त्रिधिष्ण्येषु षण्मासैर्य्यायिनं प्रति। सन्धिं सेवां तथा देशं स्थायी यच्छति निश्चितम्। फलं प्राप्नोति वर्षेण झटितैश्च त्रितारकैः। हस्त्यश्वपत्तिमित्रादि देशकोषपरिग्रहैः। गुदैकेन भार्य्यां लक्ष्मीः पद्मिनी प्रियवादिनी। रूपयौवनसम्पन्ना मासयुग्मेन लभ्यते। विग्रहस्य भवेद्वृद्धिर्युद्धे भङ्गस्तथैव च। रोगपीड़ा भवेद्वर्षे राजसाख्यैस्त्रितारकैः। हस्त्यश्वपत्तिमित्रादि देशकोषपरिग्रहाः। षड्भिर्मासैर्विनश्यन्ति यायिनस्तामसत्रये। तामसाग्रे चतुष्के तु तारकाष्टद्वसंज्ञकाः। सर्व्वनाशकराः प्रोक्ता मासैकेन न संशयः। ततस्त्रीणि मृत्युभानि राजमृत्युप्रदानि च। आशीर्व्वातश्च गुल्मश्च पक्षैकेण फलन्ति च। युद्धे भङ्गोमहाभीतिर्द्रव्यनाशः कुलक्षयः। सद्यो मृत्युं लभेद्यायी राहुचक्रे सुनिश्चितम्।" इति दशाङ्गफलम्।

"युद्धकाले यदा शीघ्रं यात्रायोगो न लभ्यते। उत्पाद्येते तदा शीघ्रं तत्कालेन्दुदिवाकरौ। इष्टनाड्योहताधिष्ण्यैः षष्टिभागाप्तशेषके। अश्विन्यादीन्दुभुक्तेन युतस्तत्कालचन्द्रमाः। यथा चन्द्रस्तथा सूर्य्यः कर्त्तव्यश्चेष्टकालिकः। अहोरात्रस्य मध्ये तौ विभ्रान्तौ धिष्ण्यमण्डले। स्थिरचक्रे पुरा प्रोक्तं चन्द्रादित्यफलं मया। चरचक्रेऽप्यनेनैव प्रकारेण फलम्भवेत्। सर्व्वेषु शुभकार्य्येषु यात्राकाले विशेषतः। सर्वकाले शुभश्चन्द्रोज्ञेयो हृदि गुदोदरे। पुच्छषट्के कपालस्थे शशाङ्के राहुवक्त्रगे। बन्धनं हानिमृत्युश्च सर्वकार्य्येषु जायते। हृदि गुदोदरे चन्द्रे विवाहे नन्दति द्वयम्। नैःस्वं वैधव्यविद्वेषौ मुखे पुच्छे तु मस्तके। पुष्पिते फलिते गुह्ये प्रश्नकाले शशी शुभः। अफले झटिते मध्ये मृत्युः शेषाङ्गगे विधौ। ऊर्द्ध्वं तु खेचरं चक्रमधोभूचरमुच्यते। उभयोः सन्निपातेन राहुकालानलं मतम्"।

१० सूर्य्यकालानलचक्रम्—"ऊर्द्ध्वगास्तिस्रः शूलाग्रास्तिस्रस्तिर्य्यक् च संस्थिताः। द्वे द्वे नाड्यौ स्थिते कोणे षट्कयुग्मं तथैकया। मध्ये त्रिशूलदण्डाधो भानुभाद्यं भमण्डलम्। साभिजिच्च प्रदातव्यं सव्यमार्गेण सर्वदा। ऋक्षाष्टके जयोलाभः ऋक्षषट्के तथा पुनः। षट्कयुग्मे रुजाभङ्गो मृत्युः शूलत्रये स्फुटम्। नामऋक्षं स्थितं यत्र ज्ञेयं तत्र शुभाशुभम्। अधोगतैश्च नक्षत्रैर्बद्धगोबधबन्धनम्। विवाहे विग्रहे युद्धे रोगार्त्तौ गमने तथा। सूर्य्यकालानलं चक्रं ज्ञातव्यं च प्रयत्नतः।" (रोगे च कुजनक्षत्रं दिन ऋक्षन्तु युद्धके। प्रयाणे कृत्तिका लेख्या अन्यत्रार्कस्य दीयते)। क्वचित् अधिकपाठः।

११ चन्द्रकालानलचक्रम्—‘चन्द्रकालानलं चक्रं व्योमाकारं लिखेद्बुधः। चतुर्द्दिक्षु त्रिशूलानि मध्ये भिन्नानि कार-

येत् । पूर्व्वत्रिशूलमध्यस्थं दिगृक्षत्वादि लेखयेत् । सव्यमार्गेण दातव्या अष्टाविंशतितारकाः । त्रिशूले च बहिर्मध्ये मध्ये बहिस्त्रिशूलके । त्रिशूले चक्रबाह्ये च चक्रमध्ये तथैव च । नामऋक्षं स्थितं यत्र तत्र ज्ञेयं शुभाशुभम् । त्रिशूले च भवेन्मृत्युर्मध्यञ्च बहिरष्टकम् । लाभः क्षेमं जयः मध्या चन्द्रगर्भे न संशयः । वर्ज्जनीयं प्रयत्नेन प्रथमाष्टत्रिपञ्चकम् । ऋक्षं द्वात्रिंशकं चात्र कालरूपं न संशयः । लाभालाभौ सुखं दुःखं जयश्चैव पराजयः । चन्द्रकालानलं चक्रं ज्ञात्वा संशयवर्ज्जितम्" ।

१२ चोरकालानलचक्रम्—"शलाकासप्तकं चक्रं लिखित्वा चन्द्रभादितः । त्रिषु त्रिषु च ऋक्षेषु नव सूर्य्यादयोग्रहाः । यदङ्के नामनक्षत्रं युद्धकारस्य जायते । फलमस्य प्रवक्ष्यामि एकैकस्य यथाक्रमम् । भानुना शोकसन्तापः शशाङ्कः क्षेमलाभदः । भूसुतो मृत्युमाधत्ते बुधे बुद्धिः प्रजायते । जीवे लाभः, शुभं शुक्रे, सूर्य्यपुत्रे महद्भयम् । राहुणा घातपातश्च केतौ मृत्युर्न संशयः । यात्राजन्मविवाहेषु संग्रामे विग्रहेऽपि वा । घोरकालानलं चक्रं ज्ञात्वा कर्म समारभेत्" ।

१२ गूढकालानलचक्रम्—"सप्तरेखोद्भवं चक्रं चन्द्रभाद्यं भमण्डलम् । लिखित्वा कल्पयेच्चक्रं षडङ्गं जयकाङ्क्षिभिः । दिनर्क्षाद्गण्यते चक्रे गूढसम्पुटकर्त्तरी । दण्डः कपालं वज्राङ्गं ज्ञातव्यं स्वरवेदिभिः । यत्र ऋक्षे स्थितश्चन्द्रस्तत्रादौ त्रीणि गूढकम् । सम्पुटे नव भान्यत्र कर्त्तरी च ततस्त्रिभिः । दण्डे धिष्ण्यानि च त्रीणि कपाले धिष्ण्यसप्तकम् । वज्राङ्गे त्रीणि धिष्ण्यानि षडङ्गस्येति निर्णयः । यदङ्के नामनक्षत्रं युद्धकारस्य जायते । वक्ष्ये शुभाशुभं तस्य गूढकालानले स्थितम् । गूढस्थे विभ्रमौ, युद्धे जयो भवति सम्पुटे । कर्त्तर्य्यां सक्षतं युद्धं, दण्डे भङ्गो न संशयः । कपालस्थे भवेन्मृत्युर्वज्रे तस्य महद्भयम् । गूढकालानलं चक्रं भाषितं ब्रह्मयामले" ।

१४ शनिसूर्य्यकालानलचक्रम्—"द्वादशारं लिखेच्चक्रं मेषादि द्वादशान्वितम् । क्षेत्रयुग्मञ्च तत्रैव विख्यातं रविचन्द्रयोः । सिंहाद्यं मकरान्तञ्च भानुक्षेत्रमुदाहृतम् । कुम्भादिकर्कपर्य्यन्तं चन्द्रक्षेत्रं न संशयः । चन्द्रक्षेत्रगते सूर्य्ये चन्द्रस्तत्रैव संस्थितः । यायिनो विजयो युद्धे स्थायिनो भङ्गमादिशेत् । सूर्य्यक्षेत्रे गते चन्द्रे सूर्य्यस्तत्रैव संस्थितः । यायी भङ्गमवाप्नोति स्थायिनो विजयो भवेत् । सूर्य्ये सूर्य्याङ्गसंयुक्ते चन्द्रे चन्द्राङ्गसंगते । तदा काले भवेत्सन्धिर्युद्धं तस्य विपर्य्यये । सूर्य्यक्षेत्रगते चन्द्रे चन्द्रक्षेत्रगते रवौ । महायुद्धं प्रवर्त्तेत संहारः सैन्ययोर्द्वयोः । यात्रायां युद्धकाले च चक्रमेतद्विलोकयेत्" । अत्र विशेषः । "एकेन क्रूरवेधेन विद्धो भवति चन्द्रमाः । स्वल्पं युद्धं तदा काले जायते नात्र संशयः । द्वाभ्यां वापि त्रिभिर्व्वापि पापैर्विद्धो यदा शशी । तदा युद्धं महाघोरं सैन्ययोरुभयोरपि । वक्रैः पृष्ठे भवेद्युद्धमग्रे चैवातिचारिभिः । मध्यगत्या भवेन्मध्ये पापैः सौम्यैस्तु तत् न हि । ऊर्द्ध्वदृष्टौ भवेदूर्द्ध्वं मध्यदृष्टौ तु मध्यमे । अधोदृष्टावधस्ताच्च केकरे पार्श्वतो भवेत् । शनिराहुकुजादित्यास्त्वेकरेखागता यदि । चन्द्रेण संयुतास्ते च तदा पातचतुष्टयम् । शनिना चन्द्रयुक्तेन जीववेधगतेन च । तदा दृष्टिर्भवेन्नूनं वर्षोपलमयोच्छ्रितम् । भौमेनाग्नेर्भवेत् पातो राहुणा लौहपातकृत् । भानुना चण्डवातश्च सर्व्वैः सर्व्वे भवन्ति च । शुक्रेण जलपातोऽपि पांशुपातः शशाङ्कजे । गुरुणा चञ्चलापातः दिग्दाहः केतुना भवेत्" ।

१५ संघट्टचक्रम्—"अश्विन्यादि लिखेत् चक्रं सप्तविंशतितारकम् । त्रिकोणं नवभिर्वेधः कर्त्तव्यस्तिर्य्यगाकृति । अश्विनीरेवतीवेधो वेधश्चाश्विनिज्येष्ठयोः । मघापौष्णे मघाश्लेषे अश्लेषामूलयोस्तथा । एवं संघट्टचक्रं च कार्य्यमृक्षगता ग्रहाः । भूपनामर्क्षसंघट्टे युद्धं भवति नान्यथा । निर्व्वेधे सौम्यवेधे च युद्धं नास्ति न संशयः । क्रूरवेधे भवेद्युद्धं तत्काले घोरदर्शनम् । युद्धकाङ्क्षी भवेद्राजा यस्य भं क्रूरवेधितम् । युद्धद्वेषी भवेत् सौम्ये तथा वेधविवर्जिते । सौम्यक्रूरविभागेन मिश्रामिश्रक्रमेण च । वक्रातिचारगत्या च युद्धं स्वल्पञ्च नास्ति च" ।

१६ कुलाकुलचक्रम्(२)—"द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम् । विषमा अकुलाः सर्व्वाः शेषाश्च तिथयः कुलाः १ । रविचन्द्रौ गुरुः सौरिश्चत्वारोऽप्यकुला मताः । भौमशुक्रौ कुलाख्यौ च बुधवारः कुलाकुलः२ । वारुण्यार्द्राभिजिन्मूलं कुलाकुलमुदीरितम् । कुलानि समधिष्ण्यानि शेषभान्यकुलानि च३ । तिथौ वारे च नक्षत्रे अकुले यायिनो जयः । कुलाख्ये स्थायिनो नूनं सन्धिस्सैव कुलाकुले" ।

१७ कुम्भचक्रम्(२)—“कुम्भाकारं लिखेच्चक्रं तिर्य्यग्रेखाप्रभेदितम्। तस्य चोर्द्ध्वमधोलेख्यमेकैकान्तरभं क्रमात्। भानुभाद्यं न्यसेत्तत्र रिक्तां पूर्णामिति क्रमात्१। एवं राशिक्रमाल्लेख्या रिक्ता पूर्णा इति क्रमात्२। रिक्ते रिक्ता भवद्यात्रा पूर्णे यात्रा शुभावहा। इति यात्रा फलं ज्ञेयं कुम्भचक्रद्वये स्थितम्”।

१८ प्रस्तारचक्र—“त्रयोदशोर्द्ध्वगा रेखा दश रेखाश्च तिर्य्यगाः। भवेयुः कोष्ठकास्तत्र सङ्ख्ययाष्टोत्तरं शतम्। मेषाद्या राशयो लेख्यास्तिर्य्यक् प्रथमपङ्क्तिषु। नवांशराशयश्चाधो नवधा सर्व्वराशिषु। कवर्गान्नवधा लेख्यं कोष्ठके प्रथमाष्टके। द्वितीये सप्तमे चाद्या एवं टाद्यास्त्रिषष्ठके। यशवर्गौ चतुर्थे च थवर्गः पञ्चमे तथा। नवद्वादशके ताद्याः शेषे पाद्याः द्विकोष्ठके। चतुरक्षरसंयोगात् अश्विन्यादिक्रमेण च। ज्ञेया नवांशका वस्ता मेषादिराशिमण्डले। भौमं शुक्रं बुधं चन्द्रं भानुं सौम्यं सितं कुजम्। गुरुं सौरिं शनिं जीवं विदध्यात् कोष्ठकोपरि। कोष्ठाक्षरगतो ज्ञेय चन्द्रस्तत्कालसम्भवः। तदधीनं फलं सर्व्वं लाभालाभजयादिकम्। दिनऋक्षगतानाड्यः सप्तविंशतिताडिताः। षष्टिभक्ते भवेदृक्षं तत्कालेन्दुगतं स्फुटम्। इष्टनाड्योद्धृताधिष्ण्यैः षष्टिभागाप्तशेषके। अश्विन्यादीन्दुभुक्तेन युक्तस्तत्कालचन्द्रमाः। क्रूरक्षेत्राक्षरे चन्द्रे न शुभं सर्व्वकर्म्मसु। शुभक्षेत्रे शुभं चैव प्रस्तारे चन्द्रनिर्णयः। नाडीफलौ यशौ वर्गौ ववर्गीयफलोदयः। कुःपक्षेण च मासेन ऋतौ च तोऽयनोदयः। जन्मकाले विवाहे च याने जन्मनि सङ्करे। शशाङ्कस्य फलं श्रेष्ठं स्वरशास्त्रेषु निश्चितम्। अंशकेनांशकं गुण्यं भुवयुक्तं कृतं पुनः। चतुःस्थामुनयः (७,७,७ ७), सूर्य्याः १२ सप्त७ रन्ध्र ९ गुणेषवः५२। मासाः१२ शैलाः७ इनाः१२ तत्त्वा२४ राशीनां च भुवादिमे। गुणाः ३ शैलाः ७ युगाः ४ पञ्च सप्त पञ्चादयो ७ युगाः४। नागा८ बाणा ५ रसा६ भूताः५ मेषादेरंशका इमे। लग्नस्य योऽंशकोदेवि! तस्य स्वामी च यो ग्रहः। तद्वशात् कालविज्ञानमुदितांशकसंख्यया। सूर्य्येऽयनं चाब्दश्चन्द्रे दिनान्यारे तथा बुधे। ऋतवश्च, गुरौ मासाः, शुक्रे पक्षः प्रकीर्त्तितः। सूर्य्यपुत्रे समा देवि! सर्व्वदैवविधिः स्मृतः”।

१९ तम्बरचक्रं दृष्टिचक्रम्—“प्रस्तारे द्वादशारे च पञ्चाक्षरक्रमेण च। नवांशराशिमार्गेण चक्रं भवति तम्बरम्। यत्र मेषादिराशिस्थस्तत्कालेन्दुः प्रजायते। ग्रहदृष्टिवशात् सर्व्वं ज्ञेयं तत्र शुभाशुभम्। त्रिदशे पञ्चमे धर्मे चतुर्थाष्टमसप्तमे, पादवृद्ध्या निरीक्षन्ते प्रपश्यन्ति तथा फलम्। ऊर्द्ध्वदृष्टी च भौमार्कौ केकरौ बुधभार्गवौ। समदृष्टौ च जीवेन्दू शनिराहू त्वधोमुखौ। मेषो वृषो मृगः कन्या कर्कमीनतुलास्तथा। आदित्यादिग्रहेषूच्चा नीचं तु तस्य सप्तमम्। परमोच्चा दिशो१० रामा३ अष्टाविंशतिथीन्द्रियाः १५।५। सप्तविंशास्तथा विंशः सूर्य्यादीनां तथांशकाः। परमोच्चात् परं नीचमर्द्धचक्रांशसंख्यया। नीचस्थानात् क्रमेणोच्च उक्तोऽसावत्र खेचरः। उच्चान्नीचाच्च यत्तुर्य्यं समस्थानं तदुच्यते। समस्थाने चन्द्रं ज्ञात्वा फलं वदेत्। उच्चस्थानस्थितं चन्द्रं भौमादित्यौ प्रपश्यतः। समस्थाने च गुर्विन्दू नीचस्थं राहुसूर्य्यजौ। बुधशुक्रौ त्रिकोणे च चन्द्रं तत्कालसम्भवम्। अन्यत्रस्थं न पश्यन्ति जात्यन्धा इव खेचराः। सौम्यदृष्टिस्थिते चन्द्रे सर्व्वं सौख्यं प्रजायते। क्रूरदृष्टिगतं पुंसां मृत्युर्हानिर्महद्भयम्। एवं शुभयुते चन्द्रे सर्व्वं सौख्यं प्रजायते। क्रूरैः क्रूरफलं तत्र मिश्रैर्मिश्रं न संशयः। रक्तं पीतं सितं कृष्णं चन्द्रे वर्णचतुष्टयम्। ज्ञातव्यञ्च प्रयत्नेन प्रश्नकाले सदा बुधैः। रविर्भौमः सितः सौम्योगुरुः सौरिः शशी तमः। वर्गेशाश्च अवर्गादौ ग्रहाज्ञेया विचक्षणैः। स्यातां रविकुजौ रक्तौ पीतौ जीवबुधौ स्मृतौ। शशिशुक्रौ सितौ वर्णौ कृष्णत्वं राहुमन्दयोः। यद्वर्णे वर्गगश्चन्द्रस्तस्य स्वामी च यो ग्रहः। तस्य वर्णेन वर्णत्वं शशाङ्कस्य प्रजायते। रक्ते चन्द्रे भवेद्युद्धं कृष्णे मृत्युर्न संशयः। पीते शुभं विजानीयात् सिते शुभतरं फलम्”।

२० तुम्बुरचक्रम्—“द्वादशारं लिखेच्चक्रं नाडिकैका त्रिधा पुनः। पञ्चमे पञ्चमे स्थाने तिर्य्यग्वेधं तथा कुरु। अष्टोत्तरशतं चैव नाडीसंख्या प्रजायते। अक्षरागतस्य चक्रस्य नाडिकाग्रेषु विन्यसेत्। क्रूरवेधाक्षरे चन्द्रो यदा तत्कालसम्भवः। तदा तस्य फलं वक्ष्ये विवाहादौ शुभाशुभम्। विवाहे क्रूरवेधेन वैधव्यं च विशीलता। यात्रायाञ्च भवेद्धानिर्मृत्युर्भङ्गो महाहवे। क्रूराः सर्व्वे हानिकरा ग्रहाः सौम्याः शुभप्रदाः। द्व्यादिवेधा भवेद्यस्य तस्य मृत्युर्न संशयः। तत्कालेन्दुफल ह्ये

यदुक्तं चादियामले। गोपितं त्वन्यशास्त्रेषु मया चात्र प्रकाशितम्"। अङ्कशब्दे ७३पृ० चक्रनामोद्देशे चरमित्यशुद्धम्। तुम्बरमिति शुद्धम् एवमन्यस्याप्यशुद्धस्यात् दर्शितचक्रनामानुसारेण तत्र शुद्धता बोध्या

२० भूचरखेचरचक्रम्— अधःस्थं भूचरं चक्रमूर्द्धस्थं खेचरं तथा। चरस्थिरादिभागेन स्थायी यायी फलं क्रमात्। मेषादिद्वादशारे च वाममार्गेण भूचरम्। तस्योर्द्ध्वं खेचरं चक्रं दक्षमार्गेण सर्वदा। ये ग्रहाराहुमार्गस्था भूचक्रे ते व्यवस्थिताः। सूर्य्यमार्गेण ये लग्नाः खेचराः खेचरस्थिताः। भूचक्रे संस्थितैः पापैः खेचक्रे सौम्यखेचरैः। स्थायियायिबलं ज्ञेयं क्रमात् स्वरविचक्षणैः। सौम्याश्च भूचरे चक्रे क्रूराः खेचरगा यदि। संहारोजायते तत्र सैन्ययोरुभयोरपि। भूचरस्थाग्रहा यत्र दृश्यन्ते च शुभाशुभाः। यायी संहारमायाति स्थायी सार्द्धवगे जयी। खेचरे खेचराः सर्वे सौम्याः पापगतायदा। स्थायिनो बलसंवर्त्तौ यायी जयति सर्वतः। भूचरे खेचरे सर्वे यदा मिश्रा शुभाशुभाः। तदा मिश्रं फलं वाच्यं स्थायिनो यायिनोऽपि वा"।

२१ पथचक्रम्—"अश्विन्यादीनि धिष्ण्यानि पङ्क्तियुक्त्या लिखेद्बुधः। नाडीनाञ्च त्रये वेधः सर्पाकारः पथाख्यके। क्रूरवेधस्थिता नाडी तद्धिष्ण्येन युते दिने। यात्रा युद्धं न कर्त्तव्यं पथचक्रे त्विदम फलम्"।

२२ नाडीचक्रम्(२)—आर्द्रादिकं लिखेच्चक्रं मृगान्तञ्च त्रिनाडिकम्। भुजङ्गसदृशाकारं मध्ये मूलं प्रतिष्ठितम्। यद्दिने चैकनाडीस्थाश्चन्द्रनामर्क्षभास्कराः। तद्दिनं वर्जयेत्तस्य विवाहे विग्रहे रणे।" १एकनाडीगते भौमे रविजीवसमन्विते। यदा चन्द्रेण संयुक्ते तदाक्षौणी परिप्लुता। ऊर्द्ध्वनाडीगतो वायुर्मध्यनाड्यां समोभवेत्। अधोनाड्यां भवेद्वृष्टिरेतद्दृष्टेस्तु लक्षणम्२ विवाहाङ्गत्रिनाड़ीचक्रम्—"अश्विन्यादि लिखेच्चक्रं सर्पाकारं त्रिनाडीकम्। तत्र वेधवशात् ज्ञेयं विवाहादि शुभाशुभम्। आद्यनाडीगनक्षत्राण्यश्विरौद्रपुनोत्तराः७।१२। हस्तेन्द्रमूलवारुण्यः पूर्वभाद्रपदस्तथा१ याम्यः सौम्योपू गुरुदर्योनि११श्चित्रा मित्र१७ जलाह्वयम् २०। धनिष्ठा चोत्तरा भाद्रा मध्यनाड़ीव्यवस्थिताः। कृत्तिका रोहिणी सार्प९ मघास्वातीविशाखकम्। उत्तरा श्रवणं पौष्णं२७ पृष्ठनाड़ीव्यवस्थिताः। वेधनाड्यश्चमश्विन्यादि पञ्चं च द्वितीयकम्। याम्यादि तुर्य्यतुर्य्यं च कृत्तिकादि द्विकं द्विकम्। एवं निरीक्ष्य बोद्धव्यं कन्यामन्त्रे गुरौ स्वरे। पण्यस्त्रीस्वामिमित्रेषु देशे ग्रामे पुरे गृहे। एकनाड़ीस्थऋक्षाणि यदा स्युर्वरकन्ययोः। तदा वेधं विजानीयाद्गुर्वादिषु तथैव च। प्रकटं यस्य जन्मर्क्षं तस्य जन्मर्क्षतोवदेत्। प्रनष्टं जन्मभं यस्य तस्य नामार्क्षतो वदेत्। द्वयोर्ज्जन्मभयोर्वेधो द्वयोर्न्नामर्क्षयोस्तथा। जन्मनामर्क्षयोर्वेधो न कर्त्तव्यः कदाचन। एकनाड़ीस्थिता दुष्टा भर्त्तुश्चैव कुलाङ्गना। तस्मान्नाड़ीव्यधोवीक्ष्या विवाहे शुभमिच्छता। आद्यनाड़ीव्यधे भर्त्ता मध्यनाड़ीव्यधे द्वयम्। पृष्ठनाड़ीव्यधे कन्या म्रियते नात्र संशयः। समासन्ने व्यधे शीघ्रं दूरवेधे चिरेण तु। व्यधान्तरभमानेन वर्षै रिष्टं प्रजायते। एकर्क्षं जायते यत्र विवाहे वरकन्ययोः। मूलवेधो भवेत्तत्र महादुष्टफलप्रदः। एकनाड़ीस्थिता यत्र गुरुर्मन्त्रश्च देवताः। तत्र द्वेषं रुजं मृत्युं क्रमेण फलमादिशेत्। प्रभुःपण्याङ्गना मित्रं देशो ग्रामः पुरं गृहम्। एकनाड़ीगता भव्या न भव्या वेधवर्ज्जिताः। क्रूरग्रहगता नाड्यो यस्य जन्मर्क्षसम्भवाः। तस्य मृत्युर्न सन्देहो यात्रायुद्धे भयं भवेत्। द्व्यादिक्रूरव्यधो यस्य चक्रे चैव त्रिनाडिके। हानिर्विघ्नं भयं क्लेशोजायते बधबन्धनम्। एवं सौम्यव्यधो यस्य जन्मधिष्ण्ये प्रजायते। जयो लाभः सुखं तस्य जायते नात्र संशयः। शुभपापग्रहैर्विद्धा यस्य जन्मर्क्षनाड़िका। तस्य मिश्रं फलं वाच्यं नाड़ीचक्रे स्वरज्ञकैः" २।

"एतच्चक्रं समालिख्य अश्विन्याद्यं हि पङ्क्तितः। वेधो द्वादशनाड़ीभिः कर्त्तव्यः पन्नगाकृतिः। आद्यांशेन चतुर्थांशं चतुर्थांशेन चादिमम्। द्वितीयेन तृतीयञ्च तृतीयेन द्वितीयकम्। एवं चांशव्यधोयेषां जायते वरकन्ययोः। तेषां मृत्युर्न सन्देहः शेषांशाः स्वल्पदुःखदाः। गुरुमन्त्राश्च देवाश्च स्वस्थाने च सुशोभनाः। अन्यांशकगताभव्या ज्ञातव्या स्वरवेदिभिः। एवं जानाति यश्चक्रं चक्रराजं त्रिनाडिकम्। तस्य पाणितले ज्ञानं सर्व्वदैव प्रतिष्ठितम्" ३।

२२ कालचक्रम्—"नवोर्द्ध्वगानि धिष्ण्यानि नव तिर्य्यग्गतानि च। अधोगतानि धिष्ण्यानि नव चैव विनिर्द्दिशेत्। चतुर्न्नाडीकृतो वेधो मध्यनक्षत्रयोस्थितः। सर्पाकारश्च तच्चक्रं कालचक्रं प्रजायते। त्रीणि मध्यगतर्क्षाणि तानि कालमुखानि च। कोणस्थिते च ये धिष्ण्ये ते च

दंष्ट्रे द्वयं मतम्। दिनर्क्षमादितः कृत्वा नामर्क्षं यत्र संस्थितम्। मुखदंष्ट्रागतो मृत्युः शुभमन्यत्र संस्थिते। ज्वरिते नष्टदग्धे च विवाहे विग्रहे रणे। कालदंष्ट्राग्रगं नाम दस्य तस्य महद्भयम्"।

२४ सूर्य्यफणिचक्रम्—"सप्तविंशतिभान्यत्र पङ्क्तियुक्त्या क्रमेण च। त्र्यन्तरे त्र्यन्तरे चैव फणिचक्रं त्रिनाडिकम्। यत्र ऋक्षे स्थितो भानुस्तदादि गणयेद्बुधः। नामर्क्षं च स्थितं यत्र ज्ञेयं तत्र शुभाशुभम्। कुर्य्यान्मृत्युं च रोगञ्च नाडीवेधं गतो नृणाम्। वर्ज्जयेत् सर्व्वकार्य्येषु युद्धकाले विशेषतः। निर्व्वेधर्क्षकमध्यस्थं यस्य नाम प्रजायते। सिध्यन्ति तस्य कार्य्याणि संग्रामे विजयो भवेत्"।

२५ "चन्द्रफणिचक्रम्—"सूर्य्यफणीश्वरे चक्रे यदुक्तं च शुभाशुभम्। चन्द्रादौ तत्फलं चक्रे ज्ञेयं सर्व्वं फणीश्वरे।"

२६ कविचक्रम्—"हीनसैन्यः सदा स्थायी यायी सैन्याधिकः सदा। अबलस्य बलोपायं वक्ष्येऽहं कविसङ्गरे। प्रयाणे चोत्प्रयाणे वा निशीथे मृगयाकृते। शोकार्त्ति व्यसनप्राप्ते हतसैन्ये विनायके। अष्टधा कविकालस्तु कथितो दुर्ब्बले नृपे। इत्थं कुर्व्वन् परान् युद्धे जयतीह न संशयः। चतुरस्रं त्रिनाडीकम् कविचक्रं लिखेद्बुधः। प्रवेशे निर्गमे भानि स्थानधिष्ण्यादि विन्यसेत्। यत्र नामाङ्किते स्थाने शत्रुसैन्यं व्यवस्थितम्। तत्र चक्रस् समालेख्यं सेनाध्यक्षपूर्व्वकम्। त्रीणि त्रीणि प्रवेशे च ईशादौ विदिशि क्रमात्। निर्गमे तुर्य्यतुर्य्यौ च पूर्व्वाशादिक्रमेण च। सौम्याः क्रूरा ग्रहा यत्र प्रवेशे निर्गमे स्थिताः। वक्रातिचारगास्तत्र ज्ञात्वा कविरणं कुरु। जीवपक्षस्थिते चन्द्रे ऋकुलर्क्षे प्रवेशके। यानं कविरणे प्रोक्तं ज्ञात्वा प्रवेशनिर्गमौ। उदितेऽस्तस्वरो यस्य यत् जन्मेन्दुसम्भवः। तद्दिने ते भटाः सर्व्वे वर्ज्जनीयाः कवौ रणे। क्रूरे शीर्षे प्रवेशर्क्षे यत्र तत्र विशोद्रणे। वक्रस्थे निर्गमे सौम्ये तद्दिशि निर्गमं कुरु। प्रवेशर्क्षे प्रवेशं च निर्गमे निर्गमे कुरु। भूबलं पृष्ठतः कृत्वा प्रोक्तः कविरणे जयः।"

२७ खलचक्रम्—"चतुरस्रं चतुर्द्वारं खलचक्रं लिखेद्बुधः। नन्दाद्यास्तिथयोन्यस्याः पूर्व्वद्वारक्रमेण च। पूर्व्वाशादिचतुष्के तु सप्त सप्त क्रमेण तु। कृत्तिकादि लिखेन्मध्ये खले भान्यष्टविंशतिम्। शनिचन्द्रौ कुज सौम्यौ भानुशुक्रौ बृहस्पतिः। मध्ये बहिर्गतादेया अपसव्यं दिशां क्रमैः। यद्दिने यद्दिशि स्युस्ते तिथिधिष्ण्यादिनाधिपाः। प्रवेशः खलकद्वारे कर्त्तव्यस्तेन सर्व्वदा। खलकाभ्यन्तरे कालः शनिसूर्य्येज्यमङ्गलैः। बुधशुक्रेन्दुभिर्बाह्ये यायी स्थायी क्रमाज्जयी। खलके मध्यनक्षत्रे यो ग्रहो यत्र संस्थितः। तत्र स्थानेगते चन्द्रे फलं वक्ष्ये शुभाशुभम्। सूर्य्यस्थानेस्थिते शूरे मृत्युश्चन्द्रसमाश्रिते। भौमस्थाने महाक्रोधी बुधस्थाने महद्भयम्। गुरुस्थाने स्थितः स्यात्तु भङ्गमायाति भार्गवे। शनिस्थे सततं युद्धं राहुस्थे मरणं ध्रुवम्। वक्रस्थाने भवेद्युद्धं शीघ्रस्थाने च धावति। समचारगते स्थायी क्षीणेन्दुस्थे च मोहनम्। क्रूरपृष्ठे जयो युद्धे, सौम्यपृष्ठे पराजयः। क्रूरे च संमुखे मृत्युर्ज्जयः सौम्यग्रहे स्थिते। योधयोः पृष्ठगाः क्रूरा उभयोर्मृत्युकारकाः। सौम्याः सन्धिप्रदा युद्धे मिश्रा मिश्रफलप्रदाः।

२८ कोटचक्रम्(८)—"अथातः सं प्रवक्ष्यामि कोटयुद्धस्य निर्णयम्। अल्पारिः कुरुते यत्र भूरिसैन्यपराभवम्। यस्याश्रयबलादेव राज्यं कुर्व्वन्ति भूतले। विग्रहं चतुराशायां सामात्यैः शत्रुभिःसह। विषमं दुर्गमं घोरं चक्रं भीरुभयावहम्। कपिशीर्षञ्च शोभाढ्यं रौद्राट्टलकमण्डितम्। प्रतोली यत्र कालास्यं परिखा कालरूपिणी। रणमण्डकृताटोपः ठिङ्कुनीयन्त्रमण्डितम्। मुसलैर्मुद्गरैः पाशैःकुन्तखड्गैर्धनुःशरैः। संयुतः सुभटैः शूरैरिति दुर्गं समादिशेत्। दुर्गस्थो दुर्गमः शत्रुरसाध्यो येन सिध्यति। कोटचक्रं प्रवक्ष्यामि विशेषादष्टधा मतम्। प्रथमं मृण्मयं कोटं जलकोटं द्वितीयकम्। तृतीयं ग्रामकोटञ्च चतुर्थं गिरिगह्वरम्। पञ्चमं पर्वतारोहं षष्ठकोटञ्च डामरम्। सप्तमं वक्रभूमिस्थं विषमाख्यं तथाष्टमम्। मृण्मये साधयेत् खण्डं जलस्थे जलमोचनम्। ग्रामदुर्गेऽग्निदानञ्च प्रवेशो गह्वरस्य च। पर्व्वते स्थानभेदश्च भूबलं डामरेरणे। चक्राख्ये कवियोगश्च विषमे स्थायियायिता। अतिवर्णं कालवर्णञ्चक्रावर्त्तं च डामरम्। नानावर्त्तञ्च पद्मनाङ्गं यन्त्रभेदश्च शाम्बरम्। एतन्नामाष्टकं ज्ञेयं दुर्गाष्टकक्रमेण च। यस्य वर्गस्य यो भक्ष्यः स वर्गस्तस्य भङ्गदः। अ गरुडः क मार्ज्जारः च सिंहः ट शुनीसुतः। त सर्पः प आखुकश्च य गजः श अजासुतः। दुर्गवर्गस्य ये भक्ष्या वर्ज्यास्तद्ग्रामजा नराः।

तद्वर्ग्यास्तु रणे त्याज्या न कर्त्तव्या गडाधिपाः खवर्गपञ्चमे स्थाने खण्डिर्भङ्गश्च जायते। अवर्गाद्यष्टकं ज्ञेयं पूर्वाद्यष्टदिशां क्रमात्। कोटचक्रं लिखेच्चादौ चतुरस्रं त्रिनाडिकम्। कृत्तिकादीनि भान्यत्र साभिजिन्ति न्यसेद्बुधः। बहिः कोटे च मध्ये च मध्ये दुर्गे बहिर्बहिः। प्रवेशो निर्गमस्तत्र ज्ञातव्यः खरवेदिभिः। ईशात् प्रवेशधिष्ण्यानि मध्यात् प्राचीविनिर्गमः। वहिर्द्वादश भान्यत्र प्राकारे तारकाष्टकम्। दुर्गमध्ये तथा चाष्टौ तन्मध्ये स्तम्भतुर्य्यकम्। कृत्तिका पुष्यसार्पञ्च मघास्वातीविशाखकम्। अनुराधाभिजित् कर्णौ धनिष्ठाश्वियमाह्वयम्। ब्राह्मं पुनर्वसु भाग्यं चित्रा ज्येष्ठा तथोत्तरा१२। शतभं रेवती चैव प्राकारे तारकाष्टकम्। मृगरौद्रोत्तराहस्तंमूलमाषाढपूर्वकम्। पूर्वोत्तरा तथा भाद्रा मध्ये ताराष्टकं तथा। प्राच्यां रौद्रं यमे हस्तं पूर्वाषाढ़ा च पश्चिमे। कौवेर्य्यामुत्तरा भाद्रा ह्येतत्स्तम्भचतुष्टयम्। कृत्तिकाद्यं मघाद्यञ्च मैत्राद्यं वासवादिकम्। त्रीणि त्रीणि प्रवेशे च द्वादशर्क्षाणि निर्गमे। कृत्तिकादिरयं न्यासः सुबोधार्थः प्रदर्शितः। दुर्गभाद्गणना चात्र ग्रहैर्वाच्यं ततः फलम्। तदाशादि दुर्गनामस्थितो वर्णोयद्वर्गोच्चारितः स्फुटम्। लिखेच्चक्रं क्रमात् खरविचक्षणैः। चतुरस्रं१ वृत्तं२ दीर्घं३ त्रिकोणं४ वृत्तदीर्घकम्५। अर्द्धचन्द्रं६ तथा ज्ञेयं गोस्तनं७ धनुराकृति८। चतुरस्रे यथा न्यासो भूमिभागक्रमेण च। दुर्गे भित्तिप्रवेशे निर्गमे ह्यस्ति तथा वृत्तादिसम्भवे। तत्रस्थैः खेचरैः सर्वैः विभागेन दातव्यं धिष्ण्यमण्डलम्। तत्रस्थैः खेचरैः सर्वैः फलं वाच्यं यथोदितम्। बाह्यभे मध्यभे वापि यत्रस्थाः क्रूरखेचराः। तत्र स्थाने कृतं यत्नं हन्ति दुर्गं ससैनिकम्। बुधशुक्रेन्दुजीवाश्च सदा सौम्या ग्रहा मताः। शन्यर्कराहुकेत्वारा मताः क्रूरा बुधैरिमे। त्रिप्रकारो ग्रहे चारो वक्रः शीघ्रः समोमतः। उच्चनीचसमास्ते च त्रिधा चक्रे भ्रमन्ति च। ऊर्द्ध्वं चाधः समास्तिर्य्यग्दृष्टिभेदश्चतुर्विधः। स्वक्षे मित्रे समं शत्रौ चतुर्द्धा च गृहे ग्रहः। सूर्य्यमुक्ता उदीयन्ते शीघ्राश्चार्कद्वितीयगे। समास्तृतीयगे यान्ति मन्दगत्या चतुर्थगे। वक्रः स्यात् पञ्चषष्ठेऽर्के त्वतिवक्रोऽष्टसप्तमे। नवमे दशमे भानौ जायते कुटिला गतिः। शीघ्रगाश्च भवन्त्यत्र द्वादशैकादशे तथा। राहुर्वक्रः सदा ज्ञेयो रवीन्दू शीघ्रगौ तथा। शीघ्रोऽतिचारगत्या च समश्च सप्तमन्दया। वक्रातिवक्रकौटिल्यगत्या वक्रग्रहोमतः। क्रूरोऽतिक्रूरतां याति सौम्योयात्यतिसौम्यताम्। वक्रचारे समुत्पन्ने शीघ्रे तूक्तविपर्य्ययः। मेषो वृषोमृगः कन्या कर्क्कीमीनतुलास्तथा। रव्यादीनां क्रमादुच्चं नीचं यत्तस्य सप्तमम्। उच्चान्नीचाच्च यत्तुर्य्यं समस्थानं तदुच्यते। उच्चस्थं मध्यमं नीचं वक्रे यत्र व्यवस्थितम्। ऊर्द्ध्वदृष्टी च भौमार्कौ केकरौ बुधभार्गवौ। समदृष्टी च जीवेन्दू शनिराहू त्वधोदृशौ। सुहृदोर्केन्दुभौमेज्या एवं शुक्रज्ञभानुजाः। अन्योन्यं वैरिणोह्येते राहोः सर्वे च शत्रवः। स्वक्षेत्रस्थे बलं पूर्णं पादोनं मित्रभे ग्रहे। अर्द्धं समगृहे ज्ञेयं पादं शत्रुगृहस्थिते। क्रूरोगर्भे पुरं हन्ति प्राकारे खण्डिकारकः। बहिःस्थो वेष्टके सैन्ये मृत्युदो नात्र संशयः। क्रूरागर्भे, शुभा बाह्ये निश्चितन्ते पुरान्तकाः। सौम्या मध्ये बहिः क्रूरा असाध्यं दुर्गमुच्यते। क्रूरचतुष्टयं मध्ये प्राकारे सौम्यखेचराः। भेदोभङ्गो भवेत्तत्र विना युद्धेन गृह्यते। प्राकारे संस्थिताः क्रूरामध्ये सौम्याग्रहा यदि। दुर्गभङ्गे समुत्पन्ने भङ्गमायाति वेष्टकः। मध्ये नाडीस्थिताः सौम्याः क्रूरा बहिरवस्थिताः। सैन्यावर्त्तोर्बहिः शत्रोर्विना युद्धेन जायते। प्राकारे पुरमध्ये च यदा क्रूरा व्यवस्थिताः। सौम्या बाह्ये तदा दुर्गमयत्नेनापि सिद्ध्यति। सौम्या मध्ये च कोटे च बाह्ये पापग्रहा यदि! देवैर्ब्रह्मादिभिर्दुर्गं रणारम्भे न गृह्यते। प्राकारबाह्यगाः क्रूराः सौम्या मध्यगता यदि। युद्धे प्राकारखण्डिश्च पुरभङ्गो न जायते। सौम्या बाह्ये तथा कोटे मध्ये क्रूरग्रहाःस्थिताः। स्वयं दुर्गं प्रयच्छन्ति वेष्टकस्य गडाधिपाः। बाह्याभ्यन्तरगाः क्रूराः प्राकारे शोभना ग्रहाः। रिपुपक्षः क्षयं याति विनायुद्धेन निश्चितम्। प्राकारस्था ग्रहाः क्रूराश्चेन्मध्ये शुभाःस्थिताः। समयुद्धं भवेत्तत्र खण्डिःपातो दिने दिने। स्तम्भान्तरगता यस्य ग्रहाः सौम्याः शुभान्विताः। भवेयुस्तस्य कोटस्य न नाशस्तु कदाचन। यदि साक्षादहं (शिवः) तत्र युध्यमानोरणेऽम्बिके!! तथापि न भयं विद्यादिति सत्यं च नान्यथा। सौम्याः क्रूराग्रहाश्चाष्टौ मध्ये प्राकारबाह्यगाः। एकस्था यत्र कुर्वन्ति सङ्ग्रामं तत्र दारुणम्। गजाश्वरथभूपालैः सामन्तैर्मण्डलेश्वरैः। तत्राध्यक्षभटामर्द्द उभयोः सैन्ययोः क्षयः। बाह्ये शत्रुप्रवेशर्क्षे

संग्रामं चारभेद्यदा । तदा सिध्यति तत् दुर्गं न करोतीह विस्मितम् । कोटस्थैस्तु गतोयोद्धा शस्त्रहस्तो महाबलः । शस्त्रं त्यक्त्वा ब्रवीत्येवं धर्म्ममार्गं ददस्व मे । निर्गमेषु च वक्रेषु संग्रामं यदि चारभेत् । नैव सिध्यति तद्दुर्गं कोटस्थस्य जयावहः । बाह्यनाड्यां स्थिता ये च ग्रहाः पापान्विता यदा । मध्ये शुभान्विता ये च तत्र भङ्गो न जायते । गडाधीशाः स्मृताः सौम्या वेष्टाधीशाश्च पापकाः । क्षेत्रयुग्मे स्थिता ये च ज्ञातव्याश्च प्रयत्नतः । गडाधीशो भवेच्चन्द्रो वेष्टाधीशश्च भास्करः । चन्द्रसूर्य्यविभागेन ज्ञातव्यं च बलाबलम् । अंशाधीशोभवेच्चन्द्रस्ताराधीशोहि भास्करः । चन्द्रसूर्य्यगतिं ज्ञात्वा पश्चाद्वेधं तु कारयेत् । वेष्टाधीशो भवेन्मध्ये गडाधीशो हि बाह्यगः । स्वयं दुर्गं प्रयच्छन्ति वेष्टकस्य महाधिपाः । चापकुन्तगदापाशखड्गहस्तैर्महाभटैः । अभङ्गयोर्द्वयो राज्ञोः सैन्यावर्त्तो हि जायते । वाहिन्यो रक्तवाहिन्यो दुस्तराः प्रेतसङ्कुलाः । वसासृक्पङ्कलिप्ताङ्गा अन्त्रमालावगुण्ठिताः । गृध्रकाकशिवाश्येनशाकिनीप्रेतराक्षसाः । वेतालखेचरा भूताः पिशाचाः स्वेच्छयावृताः । ईदृशञ्च महाघोरं तत्काले जायते ध्रुवम् । न कश्चिद्विजयी युद्धे द्वयं याति यमालयम् । समसंख्याः शुभाः क्रूराः बहिर्म्मध्ये यदा स्थिताः । तदा सन्धिं विजानीयात् सैन्ययोरुभयोरपि । क्रूरैर्भङ्गोजयः सौम्यैर्मिश्रैर्मिश्रं फलं मतम् । विचार्य्य युद्धं कर्त्तव्यं कोटचक्रे स्वरोदये । प्रवेशधिष्ण्यगे चन्द्रे जीवपञ्चर्क्षसंस्थिते । निशि कविरक्षं दुर्गं कर्त्तव्यं बाह्यसैन्यकैः । निर्गमर्क्षसंस्थिते चन्द्रे दुर्गाभ्यन्तरगैर्नृपैः । कर्त्तव्यं कवियुद्धं तु रात्रौ शुभे वहिर्ज्जने । प्रवेशनिर्गमायुक्तौ सैन्ययोरुभयोर्निशि । कवौ कोटे जयोयुद्धे विपरीते पराजयः । क्रूरोवक्री प्रवेशर्क्षे पुरमध्यगतो यदा । तदा कोटविनाशाय कोटस्थो बाह्यभूपतेः । प्रवेशे बाह्यगैर्वक्रैः क्रूरैः स्वसैन्यविग्रहः । दुर्भिक्षं मृत्युर्भङ्गश्च बहिःसैन्यस्य जायते । निर्गमर्क्षे बहिःस्थे च क्रूरोवक्रं करोति चेत् । प्राकारस्य भवेद्भङ्गः प्राकारस्थे पुरस्य च । पुरभे निर्गमे वक्राः कथञ्चित् क्रूरखेचराः । दुर्गं मुक्त्वा तदा काले दुर्गस्थः प्रपलायते । यथा क्रूरैस्तथा सौम्यैः फलं ग्राह्यं विपर्य्यये । मिश्रैर्मिश्रं विजानीयात् कोटचक्रे न संशयः । उपग्रहैः समायोगो न चान्यैर्बलोज्झितैः । न भास्करकरोच्छिन्नैर्न खेचरपराजितैः । दुर्गसैन्यं तथा तुङ्गे प्राकारे मध्यभागतः । नीचस्थं वेष्टकं सैन्यं ज्ञातव्यं स्वरवेदिभिः । कोटं कोटाधिपौ नीचौ निघ्नन्तौ भौमभास्करौ । समस्थौ च पुरं सर्वमुच्चस्थौ निफलौ च तौ । प्राकारवेष्टकान् घ्नन्तावुच्चस्थौ राहुसूर्य्यजौ । प्राकारस्थौ बहिःसैन्यं नीचस्थौ निःफलौ च तौ । समदृष्ट्या गुरुचन्द्रौ पश्यतः सर्वतः सदा । तिर्य्यक्स्थानं बुधशुक्रौ फलदौ नात्र संशयः । ऊर्द्ध्वदृष्टिग्रहैः कुर्य्यात् ढङ्कुलीयन्त्रवाहनम् । समे च साधयेत् खड्गिरन्ध्रपातमधोमुखे । दुर्गमध्यस्थिते सूर्य्ये जलशोषः प्रजायते । चन्द्रे भङ्गः, कुजे दाहो, बुधे बुद्धिबलानराः । वाक्पतौ दुर्गमध्यस्थे सुभिक्षं प्रचुरं जलम् । चलचित्तानराः शुक्रे, मृत्युरोगौ शनैश्चरे । दुर्गमध्ये स्थिते राहौ भेदोभङ्गो महद्भयम् । केतौ मध्यगते तत्र विषदानं गडाधिपे । इत्युक्तं फलं मध्ये एवं बाह्यस्थितैर्ग्रहैः । उपग्रहसमायोगादत्यन्तं प्राणसंशयः । अकारादिस्वराः पञ्च पूर्व्वाद्याशाचतुष्टये । मध्येऽन्त्यं सव्यमालिख्य अन्तस्थाने च खण्डिका । दुर्गनाम्नः स्वरोयस्य बालो वास्तमितोऽपि वा । तद्दिने प्रारभेद्युद्धं दुर्गं सिध्यति नान्यथा । भञ्जने यमवज्रार्गलविधानं च कर्त्तव्यं दुर्गरक्षणे । राजाख्यं यदुक्तं चादियामले । शुक्रोबुधोगुरुर्मन्दो राहुर्मन्दः सितोबुधः । चन्द्रः सूर्य्यः शनिः सौम्यो वैशाखात् कोटपालकाः" ।

२९ गजचक्रम्—"अथातः सं प्रवक्ष्यामि चक्रं मातङ्गनामकम् । येन विज्ञातमात्रेण यात्रायुद्धे जयोभवेत् । अष्टाविंशति गजाकारं लिखेच्चक्रं सर्व्वावयवसंयुतम् । मुखे शुण्डाय भान्यत्र देयानि सृष्टिमार्गतः । नेत्रे च कर्णे शीर्षाङ्घ्रिपुच्छके । द्विकं द्विकञ्च दातव्यं पृष्ठोदरे चतुश्चतुः । द्विरदनामभान्यादौ वदनाद्गणयेद्बुधः । यत्र धिष्ण्ये स्थितः सौरिर्ज्ञेयं तत्र शुभाशुभम् । मुखशुण्डाग्रनेत्रे च सौरिभं मस्तकोदरे । युद्धकाले भवेद्यस्य जयस्तस्य न संशयः । पादे पृष्ठे च पुच्छे च कर्णसंस्थे शनैश्चरे । मृत्युर्भङ्गो रणे तस्य ऐरावतसमोयदि । एतेषां दुष्टभानाञ्च यत्काले संस्थितः शनिः । तत्काले पट्टबन्धश्च वर्जनीयः प्रयत्नतः । पृथिव्या भूषणं मेरुः शर्व्वर्य्या भूषणं शशी । नराणां भूषणं विद्या सैन्यानां भूषणं गजः । शरतोमरचक्राद्यैर्गजस्कन्धहतावराः ।

तत्क्षणात् स्वर्गमायान्ति तस्मात् स्वर्गोपमागजाः। नास्ति हस्तिसमोयोद्धा नास्तिहस्तिसमः सखा। नास्ति हस्तिसमोबन्धुर्नास्ति हस्तिसमोरिपुः"।

२० अश्वचक्रम्—"अश्वाकारं लिखेच्चक्रमश्वधिष्ण्यादितारकाः। वदनात् सृष्टिगा देया अष्टाविंशतिसंख्यया। मुखाक्षिकर्णशीर्षेषु पुच्छाङ्घ्रौ युग्मसंख्यया। पञ्च पञ्चोदरे पृष्ठे सौरिर्यत्र फलं ततः। मुखाक्ष्युदरशीर्षेषु यदा सौरिर्व्यवस्थितः। युद्धकाले तदा तस्य जयो भवति नान्यथा। कर्णपुच्छाङ्घ्रिपृष्ठस्थे अश्वचक्रेऽर्कनन्दने। विभ्रमं भङ्गं हानिञ्च करोत्यश्वो महाहवे। एतत्स्थाने स्थितः सौरिर्यदा काले हयस्य च। पट्टस्थे गमे युद्धे वर्ज्जयेत्तं हयं नृपः। देशान्तरस्थितास्तस्य रिपवः सन्ति शङ्किताः। तुरङ्गा यस्य भूपस्य विचरन्ति महीतले। मेदिनी तस्य यस्याश्वा इति वाक्यं विनिश्चितम्। सर्व्वाःश्रियो न राजन्ते विनाऽश्वेन महीभुजाम्"।

२१ रथचक्रम्—"आदौ चक्रं समालिख्य रथाकारं सुशोभनम्। रथाग्रे त्रित्रिशूलानि रथचक्रं त्रिदण्डकम्। भानुभं मध्यशूलाग्रे ततः स्वर्क्षगतानि च। त्रीणि त्रीणि लिखेदेवं सप्तविंशतिसंख्यया। महारथिकनक्षत्रं यत्र तत्र शुभाशुभम्। भङ्गे मृत्युर्ज्जयश्चक्रे रथे सन्धिः सदण्डके"।

२२ व्यूहचक्रम्—"अष्टारं वर्त्तुलाकारं व्यूहचक्रं त्रिनाडिकम्। दण्डचतुष्टयं बाह्ये कर्त्तव्यञ्च चतुर्द्दिशम्। पूर्व्वदण्डाग्रतोन्यस्य दिनभाद्यं भमण्डलम्। प्रवेशे निर्गमे चैव त्रीणि त्रीणि प्रदक्षिणे। शशिसंज्ञाष्टकं मध्ये तद्बाह्ये भानुसंज्ञकम्। तृतीयं राहुसंज्ञं च केतु दण्डचतुष्टये। चन्द्रर्क्षे विजयोलाभः सूर्य्यर्क्षे मध्यमं फलम्। राहुधिष्ण्याष्टके विघ्नं मृत्युः केतुचतुष्टये। एवमुक्तं चतुःस्थाने यद्दिने यस्य नामभम्। तद्दिने तत् फलं तस्य सर्व्वकार्य्येषु सर्व्वदा"।

२३ कुन्तचक्रम्—"कुन्ताकारं लिखेच्चक्रं तीक्ष्णदण्डसमन्वितम्। दिनभादि समारभ्य कर्त्तव्यं नवकत्रयम्। राजभं नवके यत्र तत्र वक्ष्ये शुभाशुभम्। तीक्ष्णे मृत्युर्ज्जयोदण्डे शेषधिष्ण्ये समं रणम्"।

२४ खड्गचक्रम्—"खड्गचक्रं समालिख्य नवभेदसमन्वितम्। योधधिष्ण्यात् समारभ्य त्रीणि त्रीणि लिखेद्बुधः। एवं वज्रं तथा मुष्टिं पालिकां बन्धधारिके। खड्गं तीक्ष्णं विजानीयान् नवाङ्गानि विधानतः। यवादौ यत्र बन्धान्ते जायन्ते क्रूरखेचराः। मृत्युर्भङ्गो भवेद्युद्धं सौम्यैर्लाभो जयस्तथा। खड्गे धाराद्वये तीक्ष्णे क्रूरैर्जयति सङ्गरे। सौम्यैस्तथा भवेद्भङ्गो मिश्रैर्मिश्रफलं मतम्"।

२५ छुरिकाचक्रम्। "यथा खड्गं तथा विद्याच्छुरिकाचक्रनिर्णयम्। क्रूरसौम्यविभागेन योधधिष्ण्यादि विन्यसेत्"।

२६ चापचक्रम्—"चापचक्रं समालेख्य गुणबाणसमन्वितम्। शशिनक्षत्रतोभानि त्रीणि त्रीणि समालिखेत्। त्रीणि बाणस्य मूले तु मध्ये मूर्द्ध्नि क्रमात्तथा। चापमूलस्य मध्योर्द्ध्वे त्रीणि त्रीणि तथा पुनः। गुणे तु त्रीणि त्रीण्येव योधनक्षत्रतः फलम्। शरमूले भवेन्मृत्युर्मध्ये व्याधिः फले जयः। गुणमध्ये भवेद्भङ्गश्चापमध्ये धनक्षयः। चापोर्द्ध्वे विजयोज्ञेयो, गुणोर्द्ध्वे लाभसंयुतः। चापाधो विग्रहो मृत्युर्गुणाधोऽपि तथा फलम्। पापग्रहयुते नेष्टं विशेषेण तु नान्यथा। सौम्ययोगे जयोलाभश्चापचक्रे समादिशेत्। शुभपापसमायोगे बलाधिक्ये बलं स्फुटम्"।

२७ शनिचक्रम्—"शनिचक्रं नराकारं लिखित्वा सौरिभादितः। नामधिष्ण्यं भवेद्यत्र ज्ञेयं तत्र शुभाशुभम्। मुखैकन्दक्षदोस्तुर्य्यं षट्पादे तुर्य्यं वामके। हृदि पञ्च त्रयं शीर्षे नेत्रगुह्ये द्विकं द्विकम्। हान्यास्ये दक्षदोर्लाभः भ्रमोऽङ्घ्रौ वामदोरुजम्। हृदि श्रीर्मस्तके राज्यं नेत्रे सौख्यं मृतिर्गुदे। जन्माष्टद्वादशे तुर्य्ये यदा विघ्नकरः शनिः। तदा सौस्थ्यं वपुस्थं चेत् हृत्शीर्ष नेत्रदक्षदोः। तृतीयैकादशे षष्ठे यदा सौख्यकरः शनिः। तदा विघ्नं शरीरं चेत् वक्त्राङ्घ्रिगुह्यवामदोः। यस्य पीड़ाकरः सौरिस्तस्य चक्रमिदं स्फुटम्। लिखित्वा कृष्णवर्णेन तैलमध्ये क्षिपेद्बुधः। निःक्षिप्य भूमिमध्यस्थं कृष्णपुष्पैः मपूजयेत्। तुष्टिं याति न सन्देहः पीड़ां मुक्त्वा शनैश्वरः"।

२८ सेवाचक्रम्—"सेवाचक्रं शरीरे सप्त पृष्ठे सप्त तयोदरे। पादयोः सप्त ऋक्षाणि साभिजिन्त्यत्र विन्यसेत्। स्वामिभाद्भृत्यभं गण्यं, भृत्यभात् स्वामिभं तथा। निष्फलं पादपृष्ठस्थे फलदं मस्तकोदरे"।

२९ नरचक्रम्—"नरचक्रं समालिख्य अष्टावयवसंयुतम्। येन विज्ञातमात्रेण क्रियते घातनिर्णयः। मुखैकं मस्तके

त्रीणि हस्ते पादे चतुश्चतुः । हृदि पञ्च त्रिकं कण्ठे साभिजित् तत्र विन्यसेत् । क्रमशो योधभमादौ तु मुखमस्तकवामके । हस्तपादोदरे कण्ठे दक्षहस्ताङ्घ्रि गण्यते । यत्राङ्गे भानुभौमार्किराहवोधिष्ण्यसंस्थिताः । तत्र घातं विजानीयात् चन्द्रयोगे विशेषतः । ग्रहभुक्तिप्रमाणेन नवांशकक्रमेण च । प्रहारो जायते तत्र चक्रे द्विगुणसंख्यया । निजभे चार्द्धघातं च पादोनं मित्रभे पुनः । उदासीने भवेत् सर्वं द्विगुणं शत्रुभेत्रगे । एकोऽप्यनेकघातं च करोति भूबलोज्झितः । भूबले च यदा खेटाः स्थिताघातं न कुर्वते । यत्र यत्र स्थिते घातो यत्रयत्रस्थितेन हि । तत्फलं कथयिष्यामि ग्रहभूमिवशात्पुनः । क्रूराघातं न कुर्वन्ति पृष्ठदक्षिणगा रणे । सम्मुखावामगा ह्येते योधाङ्गे घातकारकाः । दक्षिणाङ्गे गताः क्रूराः सौम्यावामाङ्गसंस्थिताः । शिरश्छेदे समुत्पन्ने भटं धावति सम्मुखम् । यस्य वामाङ्गगाः क्रूराः सौम्या यस्य च दक्षिणे । तस्य भङ्गे रणे नूनं यदि शूरो महाभटः”।

४० डिम्भचक्रम्—“डिम्भचक्रे न्यसेद्भानि भानुभात् त्रीणि मस्तके । मुखे त्रीणि द्वयं स्कन्धे एकैकं बाहुहस्तयोः । पञ्चहृन्नाभिगुह्यैकं षट्जान्वैकैकपादयोः । विलेख्यं सूर्य्यनक्षत्रात् जन्मभं तत्र चिन्तयेत् । शीर्षस्थे छत्रलाभश्च वक्त्रे मिष्टान्नभोजनम् । स्कन्धेऽवनी च, बाहुभ्यां स्थानभ्रष्टो भवेन्नरः पाणिभ्यां तस्करो लक्ष्मी हृद्यल्पायुश्च नाभिभे । गुह्ये कामी, श्रमी, जानौ, स्तोकजीवी च पादयोः” ।

४१ पक्षिचक्रम्—“चञ्चुमस्तककण्ठे च हृद्युदराङ्घ्रिपक्षयोः । त्रीणि त्रीणि क्रमेणैव शशिभाद्विन्यसेद्बुधः । चञ्चुस्थे नामभे मृत्युः, शीर्षे कण्ठोदरे हृदि । विजयः चे धनलाभश्च भङ्गदं पादपक्षयो.” ।

४२ वर्गचक्रम्—“अगरुडः क मार्जारश्चः सिंहः टः शुनीसुतः । तः सर्पः प आखुश्च य गजः श अजासुतः । वसुवाणाङ्गवेदास्तु चन्द्राग्निनेत्रवह्नयः । वर्गाङ्काः क्रमशो ज्ञेया वैनतेयाद्यजान्तकाः । पूर्वादिक्रमशो ज्ञेयं वर्गाधिदिगष्टकम् । नाम्नि मात्राक्षराः ग्राह्या वर्गाङ्कोपेत संख्यया । प्रत्येकं स्थापयेत्तत्र पिण्डं कृत्वाष्टभिर्भजेत् । शेषसंख्यो ध्वजो१धूमः२ सिंहः३ श्वा४ वृष५ रासभौ६ । गजो७ध्वाङ्क्षः८ क्रमेणैवमायास्त्वष्टौ भवन्ति च । ध्वाङ्क्षश्वरासभौ क्षीणौ गजः सिंहो ध्वजोऽनलः । यथोत्तरवलाः सर्वे ज्ञातव्याः स्वरवेदिभिः । प्रभौ योधे पुरे देशे मित्रनारीगृहेषु च । वलिन्याये भवेल्लाभोन लाभोमलवर्ज्जिते” ।

४३ आयचक्रम्—“ध्वजो धूम्रोऽथ सिंहःश्वा सौरभेयः खरोगजः । ध्वाङ्क्षश्चेति क्रमेणैव आयाष्टकदिशाष्टके । प्रतिपदाद्वितीयादौ तिथिभुक्तिप्रमाणतः । अहोरात्रे ततः सर्वे यामभुक्त्या भ्रमन्ति च । इन्द्रस्थाने महालाभ आग्नेय्यां मरणं ध्रुवम् । दक्षिणे विजयः सौख्यं, नैर्ऋत्यां बन्धनं क्षतिः । वारुण्यां सर्वलाभश्च वायव्यां हानिकारकम् । उत्तरे धनधान्यं च ऐशान्यां निःफलं मतम् । अतीतं गोहरिध्वाङ्क्षैर्वर्त्तमानं ध्वजेऽनले । अनागतं परं विद्यात् धूम कुक्कुट हस्तिभिः । वृषे ध्वजे समीपस्थं, दूरस्थः गजसिंहयोः । श्वाने खरे च मार्गस्थो निःफलं धूम्रध्वाङ्क्षयोः । ऐन्द्राग्नेय्यो मूलचिन्ता धातोर्द्दक्षिणनैर्ऋतौ । वारुण्यां धातुचिन्ता च जीवचिन्तोत्तरे शिवे” । आयावर्गाष्टके ज्ञेया दिगष्टकक्रमेण च । स्वोदये मृत्युदं सर्वं सर्वकार्य्येषु सर्वदा” ।

४४ विरिञ्चिचक्रम्—“अथातः संप्रवक्ष्यामि सद्यःप्रत्ययकारकम् । चक्रं विरिञ्चिविख्यातं यत्सुरैरपि दुर्गमम् । कृत्तिका चोत्तरा फाल्गुन्युत्तराषाढभादितः । पङ्क्तियुक्त्या न्यसेद्भानि क्रमेण नवकत्रयम् । वेधोऽपि तिर्य्यगस्तत्र कर्त्तव्यो नवकत्रये । क्रूरसौम्यैर्ग्रहैर्विद्धं ज्ञेयं तत्र शुभाशुभम् । जन्मसम्पद्विपत्क्षेमं प्रत्यरिः साधको वधः । मित्रातिमित्रगास्तारा नव भेदा भवन्ति च । जन्मत्रयस्य वेधेन मृत्युः क्रूरग्रहैर्भवेत् । जयो लाभः शुभैस्तत्र मिश्रैर्मिश्रफलं मतम् । सौम्यो यः शुभताराख्यस्तत्ताराभावपोषकः । दुष्टास्थो दुष्टमाधत्ते क्रूरे तद्वाद्विपर्य्ययः । जन्मत्रये स्थितः सौरिः चेन्मार्त्त राहुभूमिजौ । मित्रातिमित्रगे सूर्ये जायते वधबन्धनम् । जन्मत्रये यदा मन्दो क्षेमाये बुधभार्गवौ । मित्रातिमित्रगे चन्द्रे जयलाभसुखानि च । त्रिपञ्चसप्ततारासु रोगेषु पत्तिर्यदा तदा । चिरं रोगे क्षतिस्तासु क्रूरविद्धासु जायते” ।

४५ सप्तशलाकचक्रम्—“तिर्य्यगूर्द्ध्वं गतारेखा सप्तसप्त न्यसेद्बुधः । कृत्तिकादीनि भान्यत्र साभिजिन्ति क्रमेण च । भुक्तं भोग्यं तथाऽऽक्रान्तं विद्धं पापग्रहेण भम् । शुभाशुभेषु कार्य्येषु वर्ज्जनीयं प्रयत्नतः । यस्याभिधाने

नक्षत्रं विद्धं क्रूरग्रहेण च । देशग्रामं पुरं सैन्यं नरोनारी विनश्यति”। अधिकमुपयमशब्दे १२६४पृ० द्रष्टव्यम् ।

४६ पञ्चशलाकचक्रम्—“तिर्य्यगूर्द्ध्वगताः पञ्च द्वे द्वे रेखे च कोणयोः । ईशकोणाग्ररेखायां कृत्तिकां विलिखेद्बुधः । विशाखाकृत्तिकावेधो भरण्याश्चानुराधया । धनिष्ठासार्पयोर्वेधो मघाश्रवणयोस्तथा । शुभाशुभैर्ग्रहैर्विद्धं विवाहे परिवर्जयेत् । यदि विद्धं महादुष्टं क्रूरवेधे महद्भयम्” । अधिकमुपयमशब्दे १२६४पृ० द्रष्टव्यम् ।

४७ चन्द्रचक्रम्—“चक्रेन्दुसदृशं चक्रं त्रित्रिशूलसमन्वितम् । मध्ये द्वादश भान्यत्र षट् पृष्ठे नव शूलके । मध्ये शूलस्य मध्यस्थं शशभृद्भमादितः । सव्येन गण्यते चक्रं यावद्द्रयोधस्य नामभम् । शृङ्गे मृत्युर्भयं मध्ये, पृष्ठे भङ्गो महाहवे । चतुरङ्गे कवौ कोटे द्वन्द्वे युद्धे विशेषतः” ।

४८ भास्करचक्रम्—“रेखात्रयं त्रिशूलाग्रं तिर्य्यग्रेखाषडन्वितम् । एकैकाः कोणगास्तत्र मध्याधोभानुभादितः । अधस्त्रये भवेन्मृत्युश्चतुर्भिः कोणगैः शुभम् । द्वादश मध्ये संप्रोक्ता नवर्क्षाश्चैव दाहकाः ।”

४९ प्रथममातृकाचक्रम्—“षोड़शोर्द्ध्वगतारेखाः पञ्च रेखाश्च तिर्य्यगाः । कोष्ठकानां भवेद्द्वि षष्टिर्मात्राङ्कस्वरयोजना । पूर्णिमादिविलोमर्क्षान् लिखेत् प्रतिपदादिकान् । तदधो मातृकालेख्या ङञणान्त्यस्वरोज्झितान् । संगृह्य नामवर्णाङ्कान् मात्राभेदेन संयुतान् । मुनिभि(७)स्तु हरेद्भागं पश्चात् ज्ञेयं शुभाशुभम् । मात्राधिके भवेल्लाभो मात्राहीने पराजयः । मातृकायाः प्रभेदोऽयं तस्मात् ज्ञेयः प्रयत्नतः” ।

५० द्वितीयमातृकाचक्रम्—“द्वादशोर्द्ध्वगता रेखाः पञ्चरेखाश्च तिर्य्यगाः । मातृकाप्रस्तरे तत्र षण्डान्त्यस्वरवर्ज्जितान् । कोष्ठकाधो लिखेदङ्कान् पञ्च युग्मं त्रिकं त्रयम् । षड्द्वयमष्टकं त्रीणि नवकैकं तथैव च । नामवर्णस्य या संख्या मात्रासंख्या तथैव च । पिण्डिता नवभिर्भक्ता जयो मात्राधिके रणे ।”

५१ तृतीयमातृकाचक्रम्—“भानुमार्त्तण्डदोर्वाणतिथ्यद्रिरसदिग्गजाः । नवाङ्कास्तदधः स्थाप्याः पञ्चस्वरकखादितः । ङञणोना हकारान्ता नवधा कोष्ठकक्रमैः । नाममात्राक्षराङ्कैक्यमप्रशेषेऽधिके जयः” ।

“भूवाणादित्यदोर्वाणतिथिवेदाश्वदिग्रसान् । वसुनन्दान्तकान् लिख्य षण्डकोज्झितमातृकाम् । पुन्नामवर्णमात्राणामङ्कयोगेऽष्टशेषके । मात्राधिके जयो युद्धे मात्राहीने पराजयः” पाठान्तरम् ।

५२ विजयचक्रम्—“अथ सारतरं वक्ष्ये लम्पटाचार्य्यभाषितम् । जयपराजयौ येन नामोच्चारणतः स्फुटम् । लम्बालग्नप्रभेदेन घोषाघोषक्रमेण च । प्रवेशनिर्गमाभ्यां च चक्रं जयपराजयम् ।”

५३ श्येनचक्रम्—“श्येनचक्रं समालिख्यत्र पक्षिरूपं सुशोभनम् । चञ्च्वग्रे भानुभं कृत्वा अष्टाविंशतिभं लिखेत् । ऋक्षैकं चञ्चुकोटिस्थं शीर्षे नेत्रे त्रिकं त्रिकम् । पादे पृष्ठे चतुष्कं च उदरे नव भानि च । नाम ऋक्षं स्थितं यत्र फलं तस्य वदाम्यहम् । चञ्च्वग्रे बधबन्धाय नामर्क्षं च यदा भवेत् । लाभः शीर्षोदरे नेत्रेऽशुभं स्यात् पादपृष्ठयोः ।”

५४ तोरणचक्रम्—“नाड़ीचतुष्टयं चक्रं लिखित्वा तोरणाकृति । वृषभाद्विन्यसेत् भानि प्रवेशे निर्गमे तथा । स्तम्भमूले स्थितान्यष्टौ सिंहद्वारे तथाष्टकम् । मालायामष्टकं चैव चतुर्धिष्ण्यानि तोरणे । निर्गमे चन्द्रमा यत्र प्रवेशे यत्र भास्करः । तत्र काले शुभा यात्रा विपरीता च हानिदा । चन्द्रःप्रवेशऋक्षस्थो निर्गमस्थो दिवाकरः । बधबन्धनदा यात्रा प्रवेशे तत्र शोभना । चन्द्रादित्यौ प्रवेशर्क्षे अथ वा निर्गमे स्थितौ । मिश्रं फलं भवेत्तत्र प्रवेशे वाऽथ निर्गमे । क्रूरग्रहयुतश्चन्द्रः प्रवेशे वाऽथ निर्गमे । तद्दिने भूभुजां चैव निषिद्धा राजपट्टिका । शुभग्रहयुते चन्द्रे सिंहद्वारभसंस्थिते । प्रवेशः पट्टबन्धश्च भूभुजां शोभनः स्मृतः । स्तम्भे सौरिर्नृपं हन्ति सिंहे स्वचक्रविग्रहः । मालास्थिते बलं राज्यं तोरणे सर्वसिद्धिदः” ।

५५ अहिचक्रम्—“अहिचक्रं प्रवक्ष्यामि यथा सर्वज्ञभाषितम् । द्रव्यं शल्यं तथा शून्यं येन जानन्ति साधकाः । निधिर्निवर्त्तनैकस्थः सम्भ्रान्तो यत्र भूतले । तत्रचक्रमिदं स्थाप्यं स्थानद्वारमुखस्थितम् । ऊर्द्ध्वरेखाष्टकं लेख्यं तिर्य्यक् पञ्च तथैव च । अहिचक्रं भवत्येवमष्टाविंशतिकोष्ठकम् । अहिगत्या च नक्षत्रे तत्काले यत्र चन्द्रमाः । द्रव्यं शल्यं भवेत्तत्र चन्द्रभास्करसंक्रमे । तत्र पौष्णाश्वियाम्यर्क्षकृत्तिकामघभाग्यकम् । उत्तराफाल्गुनी लेख्यं पूर्व्वपङ्क्त्यां भसंज्ञकम् । अहिर्बुध्न्याजपादर्क्षं शतभं ब्राह्मसर्पभम् । पुष्यं हस्तं समालेख्यं द्वितीयपङ्क्तिसंस्थितम् । चित्रां

विष्णु धनिष्ठाख्यं सौम्यं रौद्रं पुनर्वसुम्। चित्रभं च तृतीयायां पङ्क्तौ वै धिष्ण्यसप्तकम्। विश्वभं तोयभं मूलं ज्येष्ठां चैत्रविशाखके। स्वातीं पङ्क्त्यां चतुर्थ्यां च कृत्वाथ प्रविलोकयेत्। एवं प्रजायते चक्रे प्रस्तारः पन्नगाकृतिः। द्वारस्तम्भे मघायास्ये द्वारस्था कृत्तिका ततः। अश्विन्यादित्रिकञ्चैव आर्द्रादिपञ्चकं तथा। रेवती पूर्वभाद्रेन्दोः पूर्वाषाढचतुष्टयम्। शेषाणि भानुभान्यत्र प्रोक्तानि सर्वसंख्यया। शशाङ्के चन्द्रभे द्रव्यं शल्यं भवति सूर्य्यभे। उदयादिगतानाड्यो भ२७घ्नाःषष्ट्याप्तशेषके। दिनेन्दुभुक्तयुक्तोऽसौ भवेत् तत्कालचन्द्रमाः। ग्रहैर्भुक्तानि धिष्ण्यानि खखभैर्गुणयेत्ततः। भुक्तपादकलायोज्याः षष्ट्या भागं ततोहरेत्। लब्धस्य त्रिंशता भागो ग्रहाःस्युः शशिपूर्वकाः। अश्विन्यादीन्दुभुक्तानि भानि षष्टिहतानि च। स्वभुक्तनाडीसंयुक्तं द्वित्रं नन्द९हृतं त्रिधा। दिनेन्दुभुक्तभागादि जायन्ते चेष्टकालिकाः। चन्द्रवत् साधयेत्सूर्य्यमृक्षस्थं चेष्टकालिकम्। पश्चात् विलोकयेत् तौ च स्वनक्षत्रे चान्यभे स्थितौ। चन्द्रर्क्षे च यदाऽर्केन्दू तदास्ति निश्चितं निधिः। भानुनक्षत्रेगतौ द्वौ च तदा शल्यं न संशयः। स्वस्वभे द्वितयं ज्ञेयं नास्ति किञ्चिद्विपर्य्यये। स्थितं न लभ्यते द्रव्यं चन्द्रे क्रूरग्रहान्विते। पुष्टे चन्द्रे भवेत्पुष्टः क्षीणे चन्द्रेऽल्पको निधिः। ग्रहदृष्टिवशात् सोऽपि विज्ञेयो नवधा बुधैः। नवांशकानुमानेन भूमानं तस्य कल्पयेत्। कालमानेन नवसंख्या धातुज्ञानं निरीक्षणैः। हैमं तारं च ताम्रं च रत्नं कांस्यायसं त्रपु। चन्द्रे नागं विजानीयाद् भास्करादिग्रहेक्षिते। मिश्रैर्मिश्रं भवेद्द्रव्यं शून्यं दृष्टिविवर्जिते। सर्वग्रहेक्षिते चन्द्रे निर्दिष्टोऽसौ महानिधिः। हैमं तारञ्च ताम्रारं पाषाणं मृण्मयायसम्। सूर्यादिदृग्गे चन्द्रे द्रव्यभाण्डं प्रजायते। भुक्तराश्यंशमानेन भूमानं वायिकैः करैः। नीचे निम्नः, परे नीचेजलस्थोऽसौ महानिधिः। स्वोच्चस्थे ऊर्द्ध्वगं द्रव्यं नवांशकक्रमेण च। कोष्ठद्वयं परित्यज्य लेख्या मेषादयः क्रमात्। प्रश्नलग्नाधिपोयत्र तत्र द्रव्यं विनिर्दिशेत्। परमोच्चे परे तुङ्गे भित्तिस्थमृक्षसंक्रमे। चन्द्रांशभुक्तिमानेन द्रव्यसंख्याभिधीयते। तस्माद्दशगुणा वृद्धिः षड्वर्गे तु बलक्रमात्। अधिष्ठितं भवेत् द्रव्यं यत्र चन्द्रो ग्रहान्वितः। तदधिष्ठायको ज्ञेयो भास्करादिग्रहक्रमात्। ग्रहं मुख्यग्रहं चैव क्षेत्रपालं च मातृकाम्। दीपेशं भीषणं रुद्रं यक्षं नागं विदुः क्रमात्। ग्रहे होमः प्रकर्त्तव्यो मुख्ये नायराणो बलिः। क्षेत्रपाले सुरामांसं मातृकायां महाबलिः। दीपेशे दीपिकापूजा भीषणे भीषणार्चनम्। रुद्रे च रुद्रियोजाप्योयक्षे यक्षादिशान्तयः। नागे नागग्रहाःपूज्या गणनाथेन संयुताः। लक्ष्मीधरादितत्त्वानि सर्वकार्य्येषु पूजयेत्। निर्वर्त्तनैकमध्ये च सम्भ्रान्तो यत्र भूतले। तत्र चक्रं लिखेद्धीमान् द्रव्यशल्यस्य निर्णयम्। एवं कृतविधाने तु असाध्यो निधिराप्यते। निधिं प्राप्य नरा लोके वन्दनीया न संशयः"।

५६ चन्द्रशृङ्गोन्नतिचक्रम्—"मीनमेषोदयश्चन्द्रः सततं दक्षिणोत्तरा। उत्तरोत्तरशेषेषु समत्वं वृषकुम्भयोः। इति विट्वरं स्यात् समे चन्द्रे दुर्भिक्षं दक्षिणोन्नते। रोगं भयं शूले सुभिक्षं तूत्तरोन्नते"।

५७ जीवचक्रम्—"शीर्षे राज्यं चतुर्भिर्भवति खलु करे दक्षिणे श्रीश्चतुर्भिः पीड़ां षड्भिः पदस्थैर्मृतिरपि च भवेद्वामहस्ते चतुर्भिः। कण्ठे चैकेन भूतिर्मदनशरमितैर्वक्षसि प्रीतिलाभः स्थाने नेत्रस्थैस्त्रिभिरपि वशसुखं वाक्पतेश्चक्रमेतत्"।

५८ लाङ्गलचक्रम्—"लाङ्गलं दण्डकायूकं योत्रद्वयसमन्वितम्। दण्डकादि लिखेद्भानि दिनेशाक्रान्तभादितः। दण्डकाहलयूकानां द्विद्विस्थाने त्रिकं त्रिकम्। योत्रयोः पञ्चकं सव्यगणना चक्रलाङ्गले। दण्डस्थे च गर्भं हानिर्युगस्थे स्वामिनो भयम्। लक्ष्मीर्लाङ्गलयोत्रस्थे चेलारम्भो दिनर्क्षगे"। "त्रिकं त्रिकं त्रिकं पञ्च त्रिकं पञ्च द्विकं द्विकम्। अशुभानि शुभानि स्युश्चक्रे लाङ्गलसंज्ञके" क्वचिदधिकः पाठः।

५९ बीजोप्तिचक्रम्—"सूर्य्यभादुरगं स्थाप्यं त्रिनाड्यक्रान्तन्तरं क्रमात्। मुखे त्रीणि गले त्रीणि भानि द्वादश चोदरे। पुच्छे तुर्य्यं बहिः पञ्च दिनभाच्च फलं वदेत्। वदने पुलाकं विद्याद्गलकेऽङ्गारकस्तथा। उदरे धान्यवृद्धिश्च पुच्छे धान्यक्षयोभवेत्। ईतिरोगभयं बाह्ये चक्रे बीजोप्तिसम्भवे"।

६० वृषचक्रम्—"वृषचक्रं वृषाकारं सर्वावयवसंयुतम्। सुखालिलिखित्वा विन्यसेद्भानि वृषनामर्क्षपूर्वकम्। कर्णशीर्षेषु शृङ्गस्कन्धे द्विकं द्विकम्। त्रीणि पृष्ठे त्रिकं

पुच्छे द्विर्द्विः पादोदरे न्यसेत् । हलप्रवाहवीजोप्तिमारम्भादिदिनर्क्षकम्। यत्राङ्गे संस्थितश्चन्द्रस्तस्य वच्मे शुभाशुभम्। हान्यास्ये च सुखानि लोचनगते कर्णे च भिक्षाटनम्, शीर्षे स्यात् क्षतिरत्र षट्कयुगे स्कन्धे स्थिते शोभनम्। पृष्ठे राजभयं च पुच्छगते पादे श्रमं हृत्सुखमेवं चन्द्रभवं फलं प्रकटितं चक्रे वृषाख्येत्र नृणाम्"।

६१ सप्तनाडीचक्रम्——"अथातः संप्रवक्ष्यामि यच्चक्रं सप्तनाडिकम्। येन विज्ञातमात्रेण वृष्टिं जानन्ति साधकाः। कृत्तिकादि लिखेद्भानि साभिजिन्ति क्रमेण च। सप्तनाड्यधस्तत्र कर्त्तव्यः पन्नगाकृतिः। ताराचतुष्कवेधेन नाड्येकैका प्रजायते। तासां नामान्यहं वक्ष्ये तथा चैव फलानि च। कृत्तिका च विशाखा च मैत्राख्यं भरणी तथा। चण्डाख्या शनिनाडी स्याच्चण्डनाड्यभिधा मता। रोहिणी स्वाति ज्येष्ठाश्वि द्वितीया नाडिका मता। आदित्यप्रभवा नाडी वायुनाडी तथैव च। सौम्यं चित्रा तथा मूलं पौष्णार्कं च चतुष्टकम्। तृतीयाऽङ्गारका नाडी दहनाख्या तथैव च। रौद्रं हस्तं तथा पूर्वाषाढभाद्रोत्तरा तथा। चतुर्थी जीवनाडी स्यात् सौम्या नाडी प्रकीर्त्तिता। पुनर्वसूत्तराफाल्गुन्युत्तराषाढतारका। पूर्वभाद्रश्च शुक्राख्या पञ्चमी नीरनाडिका। पुष्यर्क्षं फाल्गुनी पूर्वा साभिजिच्छ्रुततारका। षष्ठी नाडी च विज्ञेया बुधाख्या जलनाडिका। अश्लेषर्क्षं मघा कर्णो धनिष्ठाभं तथैव च। अमृताख्या हि चन्द्रस्य सप्त नाड्यः प्रकीर्त्तिताः। मध्यमार्गे स्थिताः सौम्या नाडी तस्याग्रपृष्ठतः। सौम्ययाम्यगतं ज्ञेयं नाडिकानां त्रिकं त्रिकम्। क्रूरा याम्यगता नाड्यः सौम्याः सौम्यदिगाश्रिताः। मध्यनाडी च मध्यस्था ग्रहरूपफलप्रदा। एकनाडीगता द्व्याद्या ग्रहाःक्रूराः शुभा यदि। ततोनाड़ीफलं वाच्यं शुभं वा यदिवाऽशुभम्। ग्रहाः कुर्युर्महावातं गताश्चण्डाख्यनाडिकाम्। वायुनाडीं गतावायुं दहन्यामपि दाहकाः। सौम्यनाडीगतामध्या नीरस्था मेघवाहकाः। जलायां वृष्टिदा चन्द्रनाडिकाऽप्यतिवृष्टिदा। एकोऽप्येतत्फलं दत्ते स्वनाडीसंस्थितो ग्रहः। भूसुतः सर्वनाडीषु धत्ते नाडीभवं फलम्। प्रावृट्काले समायाते रौद्रर्क्षगते रवौ। नाडीवेधसमायोगे जलयोगं वदाम्यहम्। यत्र नाडीस्थितश्चन्द्रस्तत्रस्थाः खेचरा यदि। क्रूरसौम्यैर्विमिश्रैश्च तद्दिने वृष्टिरुत्तमा। एवमेकांशसंयोगो जायते यदि खेचरैः। तत्र काले महावृष्टिर्यावत्तु तस्यांशके शशी। केवलैः सौम्यपापैर्वा ग्रहैर्विद्धो यदा शशी। तदा तु तुच्छपानीयं दुर्द्दिनं तु भवेद्ध्रुवम्। यस्य ग्रहस्य नाडीस्थश्चन्द्रमास्तद्ग्रहेण च। दृष्टो युक्तः करोत्यम्भो यदि क्षीणोन जायते। पीयूषनाडीगश्चन्द्रस्तत्र खेटाः शुभाशुभाः। त्रिचतुःपञ्चपानीयं दिनान्येकत्रिषप्तकम्। एवं जलाख्यनाडीस्थे चन्द्रे मिश्रग्रहान्विते। दिनार्द्धं दिवसं पञ्च दिनानि जायते जलम्। नीरनाड़ीस्थिते चन्द्रे तत्रस्थैः पूर्ववद्ग्रहैः। यामं दिनार्द्धकं त्रीणि दिनानि जायते जलम्। अमृतादित्रये यत्र भवन्ति सर्वखेचराः। तत्र वृष्टिः क्रमाज्ज्ञेया ध्यर्करसवासरान्। सौम्यनाडीगताः सर्वे वृष्टिदास्ते दिनत्रयम्। शेषनाड्यां महावात दुष्टवृष्टिप्रदा ग्रहाः। निर्जला जलदानाड़ी भवेद्योगे शुभाधिके। क्रूराधिकसमायोगे जलदाऽप्यम्बुवाहिका। एकनाडीसमारूढौ चन्द्रमोधरणीसुतौ। यदि तत्र भवेज्जीवस्तदा वारिमयी मही। याम्यनाडीगताः क्रूरा अनावृष्टिप्रसूचकाः। शुभयुक्ता जलाख्यास्थास्तेऽतिवृष्टिप्रदायकाः। बुधशुक्रौ यदैकत्र गुरुणा च समन्वितौ। चन्द्रयोगे तदा काले जायते वृष्टिरुत्तमा। जलयोगसमायाते यदा चन्द्रसितौ ग्रहौ। क्रूरैर्दृष्टौ युतौ वापि तदा मेघोऽल्पवृष्टिदः। उदयास्तमिते मार्गे वक्रे युत्ते च संक्रमे। जलनाडीगताः खेटा महावृष्टिप्रदामताः"। "प्रावृषि शीतकरो भृगुपुत्रात् सप्तमराशिगतः शुभदृष्टः। सूर्यसुतान्नवपञ्चमगोवा सप्तमगश्च जलागमनाय"। क्वचित् पाठान्तरम्।

६२ संवत्सरचक्रम्——"चक्रं सांवत्सरं वक्ष्ये यदुक्तं कौशलागमे। येन विज्ञायते सम्यग्वर्षे वर्षे शुभाशुभम्। द्वादशारं लिखेच्चक्रं तत्र मेषादिराशयः। संस्थाप्याः क्रमयोगेण मीनान्ताः सव्यमार्गगाः। तत्र चक्रे समालेख्य मेषादिराशिमार्गगाः। प्रभवाद्यब्दमेकैकं षष्टिपञ्चप्रवर्त्तनैः। एकराशौ स्थितो यत्र वत्सरो वर्त्तमानकः। तद्राशिस्थं फलं वीक्ष्य यत्किञ्चिद् वार्षिकं मतम्। चैत्रे या प्रतिपच्छुक्ला तस्याः काले प्रवेशयेत्। एतद्विलोकयेच्चक्रं कालज्ञानविनिश्चये। तत्र सप्त ग्रहाश्चास्य राशौ यो यत्र संस्थितः। वर्षे राशौ विचिन्त्यास्ते रेखास्थानगता ग्रहाः। उपचयेषु गताः, क्रूराः सौम्या

शिखड्डान्यवर्ज्जिताः। ग्रहरेखाप्रदाज्ञेया मित्रमध्यस्थिता ग्रहाः। स्वर्क्षे छिन्नं फलं दत्ते स्वोच्चे त्रिन्नं तथैव च। फलार्द्धं शत्रुगेहस्थो नीचस्थो निष्फलो ग्रहः। एवं रेखाप्रमाणेन वर्षविंशोपका मताः। ज्ञातव्यादिशि केन्द्रेण वर्षे वर्षे प्रयत्नतः। एवं वर्षफलं प्रोक्तं चैत्रमासाद्यवासरात्। आषाढ़े कार्त्तिकेऽप्येवं जलं धान्यं विचिन्तयेत्। ननु देशे पुरे ग्रामे फलं भिन्नं प्रदृश्यते। तस्मात् तत्कारणं वाच्यं येन जानन्ति साधकाः। देशादिराशिनाथस्य यो रेखादायको ग्रहः। मित्रोदासीनशत्रुत्वे फलं भिन्नं करोति सः। मित्रं छिन्नं फलं दत्ते समः साम्यं करोति च। शत्रुः सर्व्वं हरोज्ञेयः सर्वदा कालचिन्तकैः। एवं विचार्य्य कर्त्तव्या कालविंशोपकाबुधैः। तथा पानीयधान्यानां स्वकाले च विचिन्तयेत्"।

६२ स्थानचक्रम्——"स्थानचक्रं प्रवक्ष्यामि यदुक्तं जम्पटागमे। येन विज्ञायते सम्यक् स्थाने स्थाने शुभाशुभम्। स्थानपीड़ाप्रभावेण राज्ञां पीड़ा प्रजायते। तस्मादपीड़िते स्थाने स्थातव्यं सर्व्वदा बुधैः। स्थाननामोद्भवं राशिं कृत्वादौ द्वादशारके। राशिमण्डलकं न्यस्य वाममार्गेण संस्थितम्। तत्र नव ग्रहा स्थाप्याः मासचन्द्रः स्वराशिभे। तेषां विलोकनं वीक्ष्य स्थानराशिगतायथा। तृतीयैकादशे पादं द्विपादं व्योमबन्धुने१०।४। त्रिकोणे५।९। तुरङ्गि मूर्त्यस्ते १।७। पूर्णं पश्यन्ति खेचराः। शन्यर्क्कराहुकेत्वाराः पञ्च क्रूरा ग्रहा मताः। शेषं चतुष्टयं सौम्यं मासेन्दुश्चापि पञ्चमः। एवं पञ्च ग्रहाः क्रूराः पञ्च सौम्यास्तथैव च। तेषां शुभाशुभाम् दृष्टिं ज्ञात्वा स्थानबलं वदेत्। एकैकग्रहजा दृष्टिः पूर्णपादचतुष्टयम्। पञ्चमे लापकैस्तेषां पादानां विंशतिर्भवेत्। तत्र विंशोपकाज्ञेया सौम्यक्रूरग्रहोद्भवाः। एवं प्रसाधयेद्दृष्टिं युग्मं मानं शुभाशुभम्। बह्वी स्तोकोनिता शेषा जायते दृक्शुभाशुभा। ते च विंशोपकास्तस्य स्थानस्य बलनिर्णये। एवं देशे पुरे ग्रामे बलं यत्र शुभाधिकम्। तत्र स्थाने स्थितोराजा दुष्टारिष्टैर्न पीड्यते। स्थानबलप्रभावेण स्वबलस्य बलोदयः। शत्रुसैन्यं क्षयं याति यावत्स्थाने शुभे स्थितः। एतानि सर्व्वचक्राणि ज्ञात्वा युद्धं समारभेत्। जयेदिह न सन्देहः शक्रतुल्योऽपि भूभुजि"। एतेषां त्रिंशत्संख्याकत्वेऽपि अवान्तरचक्रस्याभेदेन चतुरशीतिसंख्यापूरणम्।

अङ्गशब्दे ७२ पृ० दर्शितानि "तथाचान्तरचक्रं च स्वरचक्रं तथैव च। स्वचक्रं वातचक्रञ्च चक्राङ्गेषु चतुष्टयम्" गर्गोक्तानि च चत्वारि चतुष्षष्ट्यङ्गज्योतिषमध्ये. अन्तरादिचक्राणि यान्ति तत्र चान्तरचक्रं वृ० सं० ८७अ० उक्तं यथा

"ऐन्द्र्यां दिशि शान्तायां विरुवन्नुपसंश्रितागमं वक्ति। शकुनिः पूजालाभं मणिरत्नद्रव्यसम्प्राप्तिम्। तदनन्तरदिशि कनकागमो भवेद्वाञ्छितार्थसिद्धिश्च। आयुधधनपूगफलागमस्तृतीये भवेद्भागे। स्निग्धद्विजस्य सन्दर्शनं चतुर्थे तथाऽऽहिताग्नेश्च। कोणेऽनुजीविभिक्षुप्रदर्शनं कनकलोहाप्तिः। याम्ये त्वाद्ये नृपपुत्रदर्शनं सिद्धिरभिमतस्याप्तिः। परतः स्त्रीधर्म्माप्तिः सर्षपयवलब्धिरप्युक्ता। कोणाच्चतुर्थखण्डे लब्धिर्द्रव्यस्य पूर्वनष्टस्य। यद्वा तद्वा फलमपि यात्रायां प्राप्नुयाद्यात्रा। यात्रासिद्धिः प्रथमदक्षिणेन शिखिमहिषकुक्कुटाप्तिश्च। याम्याद्वितीयभागे चारणसङ्गः शुभं प्रीतिः। ऊर्ध्वं सिद्धिः कैवर्त्तसङ्गमो मीनतित्तिराद्याप्तिः। प्रव्रजितदर्शनं तत्परे च पक्वान्नफललब्धिः। नैर्ऋत्यां स्त्रीलाभस्तुरगालङ्काररदूतलेखाप्तिः। परतोऽस्य चर्मतच्छिल्पिदर्शनं चर्म्ममयलब्धिः। फलकुसुमवानरभिक्षुश्रमणावलोकनं नैर्ऋतीतृतीयांशे। वारुण्यामर्णवजातरत्नवैदूर्य्यमणिमयप्राप्तिः। परतोऽतः शबरव्याधचौरसङ्गः पिशितलब्धिः। परतो ऽपि दर्शनं वातरोगिणां चन्दनागुरुप्राप्तिः। आयुधपुस्तकलब्धिस्तद्वृत्तिसमागमश्चोर्ध्वम्। वायव्ये फेनकचामरौर्णिकाप्तिः समेति कायस्थः। मृण्मयलाभो ऽन्यस्मिन् वैतालिकडिण्डिभाण्डानाम्। वायव्याद्यतृतीये मित्रेण समागमो धनप्राप्तिः। वस्त्राश्वाप्तिरतः परमिष्टसुहृत्सम्प्रयोगश्च। दधितण्डुललाजानां लब्धिरुद्गदर्शनं च विप्रस्य। अर्थाप्तिरनन्तरमुपगच्छति सार्थवाहस्य। वेश्यावटुदाससमागमः परे शुष्कपुष्पफललब्धिः। अतः परं चित्रकरस्य दर्शनं वस्त्रसम्प्राप्तिः। ऐशान्यां देवलकोपसङ्गमो धान्यरत्नपशुलब्धिः। प्राक् प्रथमे वस्त्राप्तिः समागमश्चापि वन्वक्रया। रजकेन समायोगो जलजद्रव्यागमश्च परतोऽतः। हस्त्युपजीविसमाजश्चास्माद्धनहस्तिलब्धिश्च। द्वात्रिंशत् प्रविभक्तं दिक्चक्रं वास्तुबन्धनेऽप्युक्तम्। नाअरनाभिस्थैरन्तः फलानि नवधा विकल्प्यानि। प्राग्रश्मिस्थे बन्धुसुहृत्समागमस्तुष्टिरुत्तमा भवति।

पट्टवस्त्रागमस्त्वरे नृपतिसंयोगः । आग्नेये कौलिकतक्षपारिकर्माश्वसूतसंयोगः । लब्धिश्च तत्कृतानां द्रव्याणामश्वलब्धिर्वा । नेमीभागं बुद्धा नाभीभागं च दक्षिणेयोऽरः । धार्म्मिकजनसंयोगस्तत्र भवेद्धर्मलाभश्च । उन्मत्तक्रीडककापालिकागमो नैरृते समुद्दिष्टः । वृषभस्य चात्र लब्धिर्माषकुलत्थाद्यमशनं च । अपरस्यां दिशि योऽरस्तत्रासक्तिः क्षीवलैर्भवति । सामुद्रद्रव्यसुसारकाचफलमद्यलब्धिश्च । भारवहतक्षभिक्षुकसन्दर्शनमपि च वायुदिक्संस्थे । तिलककुसुमस्य लब्धिः सनागपुन्नागकुसुमस्य । कौवेर्य्यां दिशि शकुनः शान्तायां वित्तलाभमाख्याति । भागवतेन समागममाचष्टे पीतवस्त्रैश्च । ऐशाने व्रतयुक्तवनितासन्दर्शनं समुपयाति । लब्धिश्च परिज्ञेया कृष्णायोवस्त्रघण्टानाम् । याम्येऽष्टांशे पश्चाद्विषट्त्रिसप्ताष्टमेषु मध्यफला । सौम्येन च द्वितीये शेषेष्वतिशोभना यात्रा । अभ्यन्तरे तु नाभ्यां शुभफलदा भवति षट्सु चारेषु । वायव्यानैरृतयोरुभयोः क्लेशावहा यात्रा । शान्तासु दिक्षु फलमिदमुक्तं दीप्तास्वतोऽभिधास्यामि । ऐन्द्र्यां भयं नरेन्द्रात् समागमश्चैव शत्रूणाम् । तदनन्तरदिशि नाशः कनकस्य भयं सुवर्णकाराणाम् । अर्थक्षयस्तृतीये कलहः शस्त्रप्रकोपश्च । अग्निभयं च चतुर्थे भयमाग्नेये च भवति चौरेभ्यः । कोणादपि द्वितीये धनक्षयो नृपसुतविनाशः । प्रमदागर्भविनाशस्तृतीयभागे भवेच्चतुर्थे च । हैरण्यककारुकयोः प्रध्वंसः शस्त्रकोपश्च । अथ पञ्चमे नृपभयं मारीस्तत्दर्शनं च वक्तव्यम् । षष्ठे तु भयं ज्ञेयं गन्धर्वाणां सडोम्बनाम् । धीवरशाकुनिकानां सप्तमभागे भयं भवति दीप्ते । भोजनविघात उक्तो निर्ग्रन्थिभयं च तत्परतः । कलहो नैरृतभागे रक्तस्रावोऽथ शस्त्रकोपश्च । अपराद्ये चर्मकृतं विनश्यति चर्मकारसुभयम् । तदनन्तरे परिव्राट्श्रमणभयं तत्परे त्वनशनभयम् । वृष्टिभयं वारुण्यां श्वतस्कराणां भयं परतः । वायुग्रस्ते विनाशः परे परे शस्त्रपुस्तवार्त्तानाम् । कोणे पुस्तकनाशः परे विषस्तेन वायुभयम् । परतो वित्तविनाशो मित्रैः सह विग्रहश्च विज्ञेयः । तस्यासन्नेऽश्ववधो भयमपि च पुरोधसः प्रोक्तम् । गोहरणशस्त्रघातावुदक् परे सार्थघातधननाशौ । आसन्ने च श्वभयं व्रात्यद्विजदासगणिकानाम् । ऐशानस्यासन्ने चित्राम्बरचित्रकद्वयं प्रोक्तम् । ऐशाने त्वग्निभयं दूषणमप्युत्तमस्त्रीणाम् । प्रोक्तस्यैवासन्ने दुःखोत्पत्तिः स्त्रिया विनाशश्च । भयमूर्ध्वं रजकानां विज्ञेयं काच्छिकानां च । हस्त्यारोहभयं स्याद् द्विरदविनाशश्च मण्डलसमाप्तौ । अभ्यन्तरे तु दीप्ते पत्नीमरणं ध्रुवं पूर्वे । शस्त्रानलप्रकोपावाग्नेये वाजिमरणशिल्पिभयम् । याम्ये धर्मविनाशः परेऽग्नत्रवस्कन्दचोक्षवधाः । अपरे तु कर्मिणां भयमथ कोणे चानिले खरोष्ट्रवधः । अत्रैव मनुष्याणां विसूचिकाविषभयं भवति । उदगर्थविप्रपीडा दिश्यैशान्यां तु चित्तसन्तापः । ग्रामीणगोपपीडा तत्र च नान्या तथात्मवधः” ।

२मृगचक्रं वृ॰स॰ ६२अ॰ यथा

“सीमागता वन्यमृगा रुवन्तः स्थिता व्रजन्तोऽथ समापतन्तः । सम्प्रत्यतीतैष्यभयानि दीप्ताः कुर्वन्ति शून्यं परितो भ्रमन्तः । ते ग्राम्यसत्त्वैरनुवाश्यमाना भयाय रोधाय भवन्ति वन्यैः । द्वाभ्यामपि प्रत्यनुवाशितास्ते वन्दिग्रहायैव मृतौ भवन्ति । वन्ये सत्त्वे द्वारसंस्थे पुरस्य रोधो वाच्यः सम्प्रविष्टे विनाशः । सूते मृत्युः, स्याद्भयं संस्थिते च गेहं याते बन्धनं सम्प्रदिष्टम् ।” ।

३ श्वचक्रं वृ॰ स॰ ८६ अ॰

“नृतुरगकरिकुम्भपर्याणसक्षीरवृक्षेष्टकासञ्चयच्छत्रशयासनोलूखलानि ध्वजं चामरं शाद्वलं पुष्पितं वा प्रदेशं यदा श्वावमूत्र्याग्रतो याति यातुस्तदा कार्यसिद्धिर्भवेदार्द्रके गोमये मिष्टभोज्यागमः शुष्कसम्मूत्रणे गोडिकामोदकावाप्तिरेवाथ वा । अथ विषतरुकण्टकीकाष्ठपाषाणशुष्कद्रुमास्थिश्मशानानि मूत्र्यावहत्यायवा यायिनो ऽग्रेसरो ऽनिष्टमाख्याति शय्याकुलालादिभाण्डान्यभुक्तान्यभिन्नानि वा मूत्रयन् कन्यकादोषकृद् भुज्यमानानि चेद् दुष्टतां तद्गृहिण्यास्तथा स्यादुपानत्फलं गोस्तु सम्मूत्रणे वर्णजः सङ्करः । गमनसुखमुपानहं सम्प्रगृह्योपतिष्ठेद्यदा स्यात्तदा सिद्धये मांसपूर्णानने ऽर्थाप्तिरार्द्रेण चास्थ्ना शुभं साग्नज्वलातेन शुष्केण चास्थ्ना मृतीन मृत्युः प्रशान्तोल्मुकेनाभिघातो ऽथ पुंसः शिरोहस्तपादादिवक्त्रे भुवो ह्यागमो वस्त्रचौरादिभिर्व्यापदः केचिदाहुः सवस्त्रे शुभम् । प्रविशति तु गृहं सशुष्कास्थिवक्त्रो प्रधानस्य तस्मिन् वधः शृङ्खलाशीर्णवल्लीवरत्रादि वा बन्धनं चोपगृह्योपतिष्ठेद्यदा स्यात्तदा बन्धनं लेढि पादौ विधुन्वन् स्वकर्णावुपर्याक्रमंश्चापि विज्ञाय यातुर्विरोधे विरोधस्तथा स्याङ्गकण्डूयने स्यात् स्वपंश्चोर्ध्वपादः सदा दो-

चक्रम्। सूर्योदये ऽर्काभिमुखो विरौति ग्रामस्य मध्ये यदि सारमेयः। एको यदा वा बहवः समेताः शंसन्ति देशाधिपमन्यमाशु। सूर्योन्मुखः श्वा ऽनलदिक्स्थितश्च चौरानलत्रासकरोऽचिरेण। मध्याह्नकाले ऽनलमृत्युशंसी सशोणितः स्यात्कलहो ऽपराह्णे। रुवन्दिनेशाभिमुखो ऽस्तकाले कृषीवलानां भयमाशु धत्ते। प्रदोषकालेऽनिलदिङ्मुखस्तु धत्ते भयं मारुततस्करोत्थम्। उदङ्मुखश्चापि निशार्धकाले विप्रव्यथां गोहरणं च शास्ति। निशावसाने शिवदिङ्मुखश्च कन्याभिदूषानलगर्भपातान्। उच्चैःस्वराः स्युस्तृणकूटसंस्थाः प्रासादवेश्मोत्तमसंस्थिता वा। वर्षासु वृष्टिं कथयन्ति तीव्रामन्यत्र मृत्युं दहनं रुजश्च। प्रावृट्कालेऽवग्रहे ऽम्भो ऽवगाह्य प्रत्यावृत्ते रेचकैश्चाप्यभीक्ष्णम्। आधुन्वन्तो वा पिबन्तश्च तोयं वृष्टिं कुर्वन्त्यन्तरे द्वादशाहात्। द्वारे शिरो न्यस्य बहिः शरीरं रोरूयते श्वा गृहिणीं विलोक्य। रोगप्रदः स्यादथ मन्दिरान्तर्बहिर्मुखः शंसति बन्धकीं ताम्। कुड्यमुत्किरति वेश्मनो यदा तत्र खानकभयं भवेत्तदा। गोष्ठमुत्किरति गोग्रहं वदेद्धान्यलब्धिमपि धान्यभूमिषु। एकेनाक्ष्णा साश्रुणा दीनदृष्टिर्मन्दाहारो दुःखकृत्तद्गृहस्य। गोभिः सार्धं क्रीडमानः सुभिक्षं क्षेमारोग्यं चाभिधत्ते मुदं च। वामं जिघ्रेज्जानु वित्तागमाय स्त्रीभिः सार्कं विग्रहो दक्षिणं चेत्। ऊरुं वामं चेन्द्रियार्थोपभोगाः सव्यं जिघ्रेदिष्टमित्रैर्विरोधः। पादौ जिघ्रेद्यायिनश्चेद्यात्रां प्राहार्थाप्तिं वाञ्छितां निश्चलस्य। स्थानस्थस्योपानहौ चेद्विजिघ्रेत् क्षिप्रं यात्रां सारमेयः करोति। उभयोरपि जिघ्रतीह बाह्वोर्विज्ञेयो रिपुचौरसम्प्रयोगः। अथ गोपायति भषन्ति स्वभक्ष्यान् मांसास्थीनि च शीघ्रमग्निकोपः। ग्रामे भषित्वा च बहिः श्मशाने भषन्ति चेदुत्तमपुंविनाशः। यियासतश्चाभिमुखो विरौति यदा तदा श्वा निरुणद्धि यात्राम्। उकारवर्णेन रुते ऽर्थसिद्धिरोकारवर्णेन च वामपार्श्वे। व्याक्षेपमौकाररुतेन विद्यान् निषेधकृत्सर्वरुतैश्च पश्चात्। खखेति चोच्चैश्च मुहुर्मुहुर्ये रुवन्ति दण्डैरिव ताड्यमानाः। श्वानो ऽभिधावन्ति च मण्डलेषु ते शून्यतां मृत्युभयं च कुर्युः। प्रकाश्य दन्तान् यदि लेढि सृक्किणी तदाऽशनं मिष्टमुशन्ति तद्विदः। यदाननं चावलिहेन्न सृक्किणी प्रवृत्तभोज्ये ऽपि तदान्नविघ्नकृत्। ग्रामस्य मध्ये यदि वा पुरस्य भषन्ति संहृत्य मुहुर्मुहुर्ये। ते क्लेशमाख्यान्ति तदीश्वरस्य श्वारगढसंस्थो मृगयर्द्धिचिन्त्यः। वृक्षोपगे क्रोशति तोयपातः स्यादिन्द्रकीले सचिवस्य पीडा। वायोर्गृहे शस्यभयं गृहान्तः पीडा पुरस्यैव च गोपुरस्थाः। भयं च शय्यासु तदीश्वराणां याने भषन्तो भयदाश्च पश्चात्। अथापसव्या जनसन्निवेशे भयं भषन्तः कथयन्त्यरीणाम्”।

४ अनिलचक्रञ्च अनिलशब्दे १६६ पृ० दर्शितम्। व्यूहस्यात चक्राकारः स च द्रोणेनाभिमन्युवधपर्व्वणि कृतः। “चक्रव्यूहो महाराज! द्रोणाचार्य्येणाभिकल्पितः” भा० द्रो० ३४ अ०। इत्यादिनोक्तः। यन्त्ररूपचक्राणि यन्त्रशब्दे वक्ष्यन्ते। तत्र राष्ट्रे “स्वचक्रं परचक्रञ्च” इति कथने एतच्छब्दे अनुपदं दर्शितवाक्ये। समूहे ‘‘भूरेणवो नभसि नद्धपयोदचक्रम्” माघः। “दिक्चक्रमाक्रामति” मृच्छ०। सुदर्शनाख्ये राष्ट्रे च। ‘‘अविचालितचारुचक्रयोरनुरागादुपगूढयोः श्रिया” माघः। ‘‘न चक्रमस्याक्रमताधिकन्धरम्” माघः। चक्रवाके। ‘‘तव तन्वि! कुचावेतौ नियतं चक्रवर्त्तिनौ” उद्भटः। कुम्भकारचक्रे चक्रवाके च। स तद्‌निजहेतुदण्डजः किमु चक्रभ्रमिकारितागुणः। स तदुच्चकुचौ भवन् प्रभाभरचक्रभ्रमिमातनोति यत्” नैष०। राशिचक्रे ‘‘त्रिंशत्कृत्यो युगे भानां चक्रं प्राक्परिवर्त्तते” सू० सि०। ‘‘रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टम्” सि० शि०। २० मण्डलाकारे रेखाविन्यासभेदे ‘‘चक्रीभ्रचक्रनिभचङ्क्रमणच्छलेन” ‘‘वितत्य वात्यामयचक्रचङ्क्रमान्” नैष०। ‘‘शालग्रामशिलाचक्रम् गोमतीचक्रम्” एकद्वारे चतुश्चक्रं वनमालाविभूषितम्” शालग्रामशब्दे दृश्यम्।

चक्रक पु० चक्रमिव कायति कै-क। तर्कभेदे। तल्लक्षणं स्वापेक्षणीयापेक्षितसापेक्षत्वनिबन्धनः प्रसङ्गश्चक्रकः” तर्के जगदीशः। अपेक्षा च ज्ञप्तौ उत्पत्तौ स्थितौ च। अन्योन्याश्रयशब्दे दर्शिते आपादके जन्यपदमन्तर्भाव्योदाहरणम्। अपेक्षा चात्र साक्षात्परम्पराधारणी ग्राह्या” तर्के जगदीशः। तत्र ज्ञप्तौ एतद्घटज्ञानं यद्येतद्घटज्ञानजन्यज्ञानजन्यज्ञानजन्यं स्यात् तदा एतद्घटज्ञानजनकज्ञानजन्यज्ञानभिन्नं स्यात्। उत्पत्तौ घटोऽयं यद्येतद्घटजन्यजन्यजन्यः स्यात् तदा एतद्घटजन्यजनकभिन्नः स्यात्। स्थितौ घटोऽयं यद्येतद्घटवृत्तिवृत्तिः स्यात् तथात्वेनोपलभ्येतेति। २१ ऋषिभेदे पु० चक्रस्य गोत्रा-

गन्धम् अश्वा० फञ्। चाक्रायण चक्रगोत्रापत्ये पुंस्त्री "उषस्तिर्ह चाक्रायणः" छा०उ०। कुण्डलकलितनगणमिह सुलभं गन्धकुसुमरसविरचितवलयम्। चक्रमुरगपतिवरपरिगणितं षोडशकलमतिसुललितभणितम्" इत्युक्तलक्षणे २२ छन्दोभेदे चक्राकारे २३ दद्रुरोगे चक्रमर्द्दः। २४मनस्तत्त्वे चक्रगदाधरशब्दे उदा०। गिरिनद्या० ततः परं नदीनितम्बशब्दस्थनस्य वा णत्वम्।

चक्रकारक न० चक्रं चक्राकाररेखां करोति कृ-ण्वुल् ६त०। १नखे शब्दार्थचि०। तस्य नारीकुचयोः चक्राकाररेखाकरणात् तथात्वम् २व्याघ्रनखाख्ये गन्धद्रव्ये अमरः। [(चाकुलिया) शब्दच०।

चक्रकुल्या स्त्री चक्रस्य तदाकारस्य कुल्येव। १चित्रपर्ण्याम्

चक्रगज पु० चक्रे चक्राकारे दद्रुरोगे गजइव मर्द्दकत्वात्। चक्रमर्द्द वृक्षे (दादमर्दनवृक्ष) राजनि०।

चक्रगण्ड पु० चक्रमिव गण्डुः। (गालवालिश)ख्याते उपधानभेदे हेमच०।

चक्रगदाधर पु० "मनस्तत्त्वात्मकं चक्रं बुद्धितत्त्वात्मिकां गदाम्। धारयन् लोकरक्षार्थं मुक्तश्चक्रगदाधरः" विष्णु सं० भाष्यधृतवाक्योक्ते परमेश्वरे

चक्रगुच्छ पु० चक्रमिव गुच्छोऽस्य। अशोकवृक्षे शब्दच०।

चक्रचर त्रि० चक्रेण संघशश्चरति चर-ट। संघीभूय चारिणि गजविहङ्गादौ। "तथा नागाः सुपर्णाश्च विहङ्गाश्चक्रचरास्तथा" भा० व० ८२१४ श्लो०।

चक्रचारिन् पु० चक्रेण चरति णिनि। रथे। "विधिरेकक चक्रचारिणं किमु निर्म्मित्सति मान्मथं रथम्" नैष०।

चक्रजीवक पु०चक्रेण कुम्भसाधनचक्रेण जीवति जीव-ण्वुल् ६त०। कुम्भकारे हेमच०।

चक्रतीर्थ न०चक्रेण सुदर्शनेन क्षालनेन कृतं तीर्थम्। प्रभासक्षेत्रस्थे वैष्णवे तीर्थभेदे तत्कथा स्क० प्रभा० "तस्य सीमां प्रवक्ष्यामि विष्णुक्षेत्रस्य भामिनि!। पूर्वेयमेश्वरं यावत् श्रीभीमेश्वरस्तु पश्चिमे। उत्तरे तु विशालाक्षी दक्षिणे सरितां पतिः" इत्युपक्रमे "चक्रतीर्थे नरः स्नात्वा सोपवासो जितेन्द्रियः। द्वादश्यां कार्त्तिके मासि दद्यात् विप्रेषु काञ्चनम्। विष्णुं संपूज्य विधिना मुच्यते सर्वपातकैः। देव्युवाच चक्रतीर्थं कथं नाथ त्वया प्रोक्तं वृषध्वज!। कुत्र तिष्ठति तत्तीर्थं किंप्रभावं वदस्व मे। ईश्वर उवाच। पुरा देवासुरे युद्धे हत्वा दैत्यान् जनार्द्दनः। चक्रं प्रक्षालयामास तत्र वै रक्तरञ्जितम्। अष्ट कोटीस्तु तीर्थानि तत्रानीय स्वयं हरिः। तीर्थं प्रकल्पयामास शुद्धिं कृत्वा सुदर्शने। तीर्थस्य चक्रे नामापि चक्रतीर्थमिति श्रुतम्। अष्टायुतानि तीर्थानामष्टौ कोट्यस्तथैव च। तत्र सन्ति महादेवि! चक्रतीर्थे न संशयः। यस्तत्र कुरुते स्नानमेकचित्तो नरोत्तमः। सर्वतीर्थाभिषेकस्य स प्राप्नोत्यखिलं फलम्। तीर्थानामष्टकोट्यस्तु निवसन्ति वरानने!। एकादश्यां विशेषेण चन्द्रसूर्य्यग्रहे तथा। तत्र स्नात्वा महादेवि! यज्ञकोटिफलं लभेत्। तस्य कल्पेषु नामानि शृणु ते कथयाम्यहम्। कोटितीर्थं पूर्वकल्पे श्रीनिधानं द्वितीयके। तृतीये शतधारं च चक्रतीर्थं चतुर्थके। एवं तै कल्पनामानि अतीतान्यखिलानि ते। कथितान्येवमन्यानि ज्ञेयानि विबुधैः क्रमात्। तत्र यद्दीयते दानं तस्य संख्या न विद्यते। अर्द्धक्रोशप्रमाणञ्च विष्णुक्षेत्रं प्रकीर्त्तितम्। ब्रह्महत्यापसर्पाय सत्यमेतन्मयोदितम्। मासोपवासी तत्क्षेत्रमग्निहोत्री पतिव्रता। स्वाध्यायी यज्ञयाजी च तपश्चान्द्रायणादिकम्। तिलोदकं च पितॄणां श्राद्धञ्च विधिपूर्ब्बकम्। एकरात्रं त्रिरात्रं वा कृच्छ्रसान्तपनं तथा। मासोपवासी तत्रैव अल्पकं [illegible] शयकर्म्म कृत्। दैत्यारिक्षेत्रमासाद्य यत्किञ्चित् कुरुते नरः। अन्यक्षेत्रात् कोटिगुणं पुण्यं भूयान्न संशयः। सुदर्शने वरे तीर्थे गोदानं तत्र दापयेत्। सम्यक्यात्राफलप्रेप्सुः सर्वपापविशुद्धये। चाण्डालः श्वपचो वापि तिर्य्यग्योनिगतस्तथा। तस्मिन् तीर्थे मृतः सम्यक् अच्युतं लोकमाप्नुयात्। इति संक्षेपतः प्रोक्तं चक्रतीर्थसमुद्भवम्। माहात्म्यं सर्वपापघ्नं सर्वकामफलप्रदम्"।

चक्रतैल न० चक्रस्य तत्फलस्य तैलम्। चक्रमर्द्दफलजाते तैले। "चक्रतैलेन चाभ्यज्य रूक्षचूर्णेन चूर्णयेत्"। "कृत्वा सूक्ष्मेण नेत्रेण चक्रतैलेन तर्पयेत्" सुश्रुतः।

चक्रदंष्ट्र पुंस्त्री चक्रमिव दंष्ट्रास्य। शूकरे राजनि०।

चक्रदत्त न० चक्रपाणिना निर्म्मिते वैद्यकशास्त्रभेदे

चक्रदन्ती पु० चक्रमिव फलरूपदन्तोऽस्याः। दन्तीवृक्षे राजनि०।

चक्रदन्तीवीज न० ६त०। जयपालबीजे राजनि०।

चक्रदेव पु० यादवे नृपभेदे। "अष्टादश सहस्राणि भ्रातॄणां सन्ति नः कुले। आहुकस्य शतं पुत्रा एकैकस्त्रिदशावरः। चारुदेष्णः सह भ्रात्रा चक्रदेवश्च सात्यकिः। अहञ्च रौहिणेयश्च" भा० स० १२अ०। कृष्णोक्तिः।

चक्रद्वार पु० चक्रमिव द्वारमत्र। पर्व्वतभेदे। "द्रोणश्च शतशृङ्गश्च चक्रद्वारश्च पर्वतः" भा० शा० ३२२अ०।

चक्रधनुस् पु० सूर्य्याज्जाते कपिलाख्ये ऋषिभेदे। "अत्र चक्रधनुर्नाम सूर्य्याज्जातो महानृषिः। विदुर्यं कपिलं देवं येनार्त्ताः सगरात्मजाः" भा० उ० १०८अ०।

चक्रधर पु० चक्रं मनस्तत्त्वं सुदर्शाख्यमस्त्रं वा धरति–धृ–अच्। १चक्रधारिणि विष्णौ २ग्रामयाजिनि च मेदि०। "प्रचक्रमे चक्रधरप्रभावः" रघुः। ३चक्रास्त्रधारकमात्रे नृपादौ "यजन्ते क्रतुभिर्देवास्तथा चक्रधरानृपाः" भा० व० ८५अ०।

चक्रधर्म्मन् पु० विद्याधरभेदे। "विद्याधराधिपश्चैव चक्रधर्म्मा सहानुजैः। उपाचरति तत्रस्थं धनानामीश्वरं प्रभुम्" भा० स० १० अ०।

चक्रधारण न० चक्रं धार्य्यतेऽनेन धारि–करणे ल्युट्। रथावयवभेदे अक्षनाभौ शब्दार्थ०।

चक्रधारा स्त्री ६त०। चक्रस्याग्रे शब्दार्थ०।

चक्रनख पु० चक्रमिव नखोऽस्त्यस्य अच्। व्याघ्रनखे गन्धद्रव्यभेदे राजनि०।

चक्रन(ण)दी स्त्री चक्रप्रधाना विष्णुचक्राविर्भवस्थानं नदी गिरिनद्या० वा णत्वम्। गण्डकीनद्याम्। "यत्राश्रमपदान्युभयतो नाभिर्दृशच्चक्रैश्चक्र(ण)नदी नाम सरित्प्रवरा सर्वतःपवित्रीकरोति" भाग०५।७।११। "चक्रनदी गण्डकी" श्रीधरः।

चक्रनाभि पु० ६त०। चक्रस्य नाभौ। "यावत्यस्तु सिराः काये सम्भवन्ति शरीरिणाम्। नाभ्यां सर्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः। नाभिस्थाः प्राणिनां प्राणाः प्राणान्नाभिर्व्युपाश्रिता। सिराभिरावृता नाभिश्चक्रनाभिरिवारकैः" सुश्रुतः।

चक्रनामन् पु० चक्रात् मक्षिकाचक्रात् नाम यस्य। १माक्षिकधातौ हेमच०, तस्य मक्षिकापटलजातत्वात् तथात्वम् २चक्रनामनामके चक्रवाके च।

चक्रनायक पु० चक्रं तदाकारं नयति नी–ण्वुल् ६त०। व्याघ्रनखे गन्धद्रव्यभेदे राजनि०।

चक्रपद्माट पु० चक्रः चक्राकारो दद्रुरोगः पद्ममिव तत्राटति प्रभवति अच् ७त०। चक्रमर्द्दवृक्षे दद्रुघ्ने शब्दर०।

चक्रपद न० "चक्रपदमिह भनननगुरुभिः" वृ०र०टी० उक्ते त्रयोदशाक्षरपादे छन्दोभेदे। [६त०। आरगवधे वैद्यकम्।

चक्रपरिव्याध पु० चक्रं दद्रुरोगं परिविध्यति परि+व्यध–ण

चक्रपर्णी स्त्री चक्रमिव पर्णमस्याः ङीप्। पृश्निपर्ण्याम् शब्दच०

चक्रपाणि पु० चक्रं पाणावस्य प्रहरणार्थत्वात् सप्तम्याः परनि० व्य० बहु०। विष्णौ। "निघ्नन्नमितान् समरे चक्रपाणिरिवासुरान्" भा० भी० ४८अ०। "प्रायेण निष्क्रामति चक्रपाणौ" माघः।

चक्रपाणिदत्त पु० चक्रदत्ताख्यवैद्यकग्रन्थकारके विद्वद्भेदे।

चक्रपाद पु० चक्रं पाद इव यस्य। रथे अजयपालः।

चक्रपाल पु० चक्रं पालयति पालि+अण्। सेनापति चक्ररक्षके योधभेदे। चक्ररक्षशब्दे दृश्यम्।

चक्रपुष्करिणी चक्रेण खननात् विष्णुना कृता पुष्करिणी। काशीस्थे मणिकर्णिकाख्ये पुष्करिणीभेदरूपे तीर्थे तत्कथा काशीख० २६अ० यथा

"खनित्वा तत्र चक्रेण रम्यां पुष्करिणीं हरिः। निजाङ्गस्वेदसन्दोहसलिलैस्तामपूरयत्। समाः सहस्रं पञ्चाशत् तपउग्रञ्चकार सः। चक्रपुष्करिणीतीर्थे तत्र स्थाणुसमाकृतिः" इत्युपक्रमे "त्वदीयचरणाम्भोजमकरन्दमधुव्रतः। मच्चेतोभ्रमरो भ्रान्तिं विहायास्त्वाशु निश्चलः। त्वदीयस्यास्य तपसो महोपचयदर्शनात्। यन्मया लोलितो मौलिरहिश्रवणभूषणः। तदान्दोलनतः कर्णात् पपात मणिकर्णिका। मणिभिः खचिता रम्या ततोऽस्तु मणिकर्णिका। चक्रपुष्करिणीतीर्थं पुरा ख्यातमिदं शुभम्। त्वया चक्रेण खननात् शङ्खचक्रगदाधर!। मम कर्णात् पपातेयं यदा च मणिकर्णिका। ततः प्रभृति लोकेऽत्र ख्यातास्तु मणिकर्णिका"। "अस्मिंस्तीर्थवरे शम्भो! मणिश्रवणभूषणे। सन्ध्यां स्नानं जपं होमं वेदाध्ययनमुत्तमम्। तर्पणं पिण्डदानञ्च देवतानाञ्च पूजनम्। गोभूतिलहिरण्यानि दीपान्नाम्बरभूषणम्। कन्यादानं प्रयत्नेन सप्ततन्तूननेकशः। व्रतोत्सर्गं वृषोत्सर्गं लिङ्गादिस्थापनं तथा। करोति यो महाप्राज्ञो ज्ञात्वायुः क्षणगत्वरम्। विपत्तिं विपुलाञ्चापि सम्पत्तिमतिभङ्गुराम्। अक्षया मुक्तिरेकाऽस्तु विपाकस्तस्य कर्म्मणः। अन्यच्चापि शुभं कर्म्म यद्दत्तं श्रद्धया हुतम्। विनात्मघातमीशान! त्यक्त्वा प्रायोपवेशनम्। नैःश्रेयस्याः श्रियो हेतुस्तदस्तु जगदीश्वर!। नानुशोचति नाख्याति कृत्वा कालान्तरेऽपि यत्। तदिहाक्षयमेवास्तु तस्येश! त्वदनुग्रहात्। तव प्रासादात्तस्येश! सर्वमक्षयमस्तु तत्। यदस्ति यद् भविष्यञ्च यद्भूतञ्च सदाशिव!। तस्मादेतस्य सर्वस्मात् क्षेत्रमस्तु शुभोदयम्। यथा सदाशिव!

त्वत्तो न किञ्चिदधिकं शिव!। तथाऽऽनन्दवनादस्मात् किञ्चनास्त्यधिकं क्वचित्। विना सांख्येन योगेन विना स्वात्मावलोकनम्। विना व्रततपोदानैः श्रेयोऽस्तु प्राणिनामिह"। [अस्त्रभेदे त्रिका०।

चक्रफल न० चक्रमिव फलमग्रं यस्य। चक्राकाराग्रयुक्ते

चक्रबन्धु पु० ६त०। सूर्य्ये हेमच०। चक्रबान्धवादयोऽप्यत्र।

चक्रभृत् पु० चक्रं बिभर्त्ति भृ—क्विप् ६त०। १सुदर्शनधरे विष्णौ २चक्रास्त्रधारिणि च

चक्रभेदिनी स्त्री चक्रौ चक्रवाकौ भिनत्ति वियोजयति भिद्—णिनि ङीप्। रात्रौ त्रिका० रात्रौ हि तयोर्वियोगात्तथात्वम्।

चक्रभोग पु० चक्रस्य राशिचक्रस्य भोगः। "यत्स्थानमारभ्य चलितो ग्रहः पुनस्तत्स्थानमायाति स चक्रभोगः परिवर्त्त संज्ञः" इति सू०सि०टी०रङ्गनाथोक्ते ग्रहाणां राशिचक्रभोगे "तेषान्तु परिवर्त्तेन पौष्णान्ते भगणः स्मृतः" इति सू० सि० टीकायां दृश्यम्।

चक्रभ्रम पु० चक्रमिव भ्रमति भ्रम—अच्। कुन्दाख्ये शिल्पिनां यन्त्रभेदे शब्दार्थचि०। इन् चक्रभ्रमिरप्यत्र। भावे इन्। चक्रभ्रमणे चक्रवाकभ्रान्तौ च "किमु चक्रभ्रमिकारिता गुणः" नैष०।

चक्रमण्डलिन् पुंस्त्री० चक्रमिव मण्डलोऽस्त्यस्य इनि। अजगरसर्पे हेम० स्त्रियां ङीप्। [भा०मौ०४अ०।

चक्रमन्द पु० नागभेदे। "तथा नागौ चक्रमन्दातिषण्डौ"

चक्रमर्द्द पु० चक्रं चक्राकारं दद्रुरोगं मृद्नाति मृद्—अण् उप० स० (दादमर्द्दन) क्षुपभेदे राजनि०। ण्वुल्। चक्रमर्द्दकोऽप्यत्र अमरः। "चक्रमर्द्दो लघुः स्वादूरूक्षः पित्तानिलापहः। हृद्यो हिमः कफश्वासकुष्ठदद्रुक्रिमीन् हरेत्। हन्त्युष्णं तत्फलं कुष्ठकण्डूदद्रुविषानिलान्। गुल्मकासक्रमिश्वासनाशनं कटुकं स्मृतम्" भावप्र०।

चक्रमुख पुंस्त्री चक्रमिव वृत्तं मुखमस्य। शूकरे हारा० स्त्रियां जातित्वात् ङीष्।

चक्रमुद्रा स्त्री "हस्तौ तु संमुखौ कृत्वा संलग्नौ सुप्रसारितौ। कनिष्ठाङ्गुष्ठकौ लग्नौ मुद्रैषा चक्रसंज्ञिका" तन्त्रसारोक्ते देवपूजनाङ्गमुद्राभेदे।

चक्रमुषल पु० चक्रं मुषलञ्च साधनतया अत्रास्ति अच्। चक्रमुषलनिष्पाद्ये युद्धभेदे "तत चक्रं हलञ्चैव गदां कौमोदकीन्तथा। सौनन्दं मुषलञ्चैव वैष्णवान्यायुधानि च। दर्शयिष्यन्ति संग्रामे पास्यन्ति च महीक्षिताम्। रुधिरं कालयुक्तानां वपुर्भिः कालसन्निभैः। स चक्रमुषलो नाम संग्रामः कृष्ण! विश्रुतः। दैवतैरिह निर्द्दिष्टः कालः स्यादेष संज्ञितः" हरि०९६अ०। चक्रेण निर्वृत्तम् अण्। चाक्रं तन्निर्वृत्ते युद्धे "चाक्रं मौषलमित्येवं संग्रामं रणवित्तमाः। कथयिष्यन्ति लोकेऽस्मिन् ये धरिष्यन्ति पार्थिवाः" हरि० १०अ०।

चक्रयान न० चक्रयुक्तं यानम्। चक्रयुक्ते याने रथादौ। "असौ पुष्य(ष्प)रथश्चक्रयाणं न समराय यत्" अमरः।

चक्ररक्ष पु० चक्रं रक्षति अण् उप० स०। युद्धे सेनापतिचक्ररक्षके योधभेदे। "माद्रेयौ चक्ररक्षौ तु फाल्गुनस्य तदाऽकरोत्" भा०आ०१२८अ०। "यमौ च चक्ररक्षौ ते भवितारौ महाबलौ" भा० वि० २२अ०। "चक्ररक्षश्च शूरोवै मदिराश्वोऽतिविश्रुतः" २३अ०। ण्वुल् चक्ररक्षकोऽप्यत्र। [जातित्वात् ङीष्।

चक्ररद पुंस्त्री चक्रमिव वृत्तो रदोऽस्य। शूकरे त्रिका० स्त्रियां

चक्रलक्षणा स्त्री चक्रे मण्डलाकारकुष्ठे लक्षणं प्रतीकारसाधनरूपं चिह्नमस्य। गुडूच्याम् रत्नमा०।

चक्रलताम्र पु० चक्र—तृप्तौ करणे रक्। चक्रः तृप्तिसाधनं लताम्रः। इक्षुरसालवृक्षे राजनि० [मुस्ताभेदे अमरः।

चक्रला स्त्री चक्रं दद्रुरोगं लाति ला—क। उच्चटायाम्

चक्रलिप्ता स्त्री ६त०। राशिचक्रस्य कलारूपे भागभेदे कलाश्च २१६०० मिताः। तथाहि द्वादशराश्यात्मकचक्रस्य एकैकराशेस्त्रिंशांशात्मकत्वात् ३६० अंशात्मकं राशिचक्रम् अंशस्य ६० कलामितः तदङ्कस्य षष्ट्या गुणने २१६०० कलाभवन्ति इति कलापर्य्यायलिप्तानां तावन्मितत्वम्।

चक्रवत् त्रि० चक्रमस्त्यस्य मतुप् मस्य वः। १चक्रास्त्रयुक्ते स्त्रियां ङीप्। २तैलिके च। "सुनाचक्रध्वजवतां वेशेनैव च जीवताम्" मनुः। "सुनावान् पशुमारणपूर्व्वकमांसविक्रयजीवी। चक्रवान् बीजवधविक्रयजीवी तैलिकः ध्वजवान् मद्यविक्रयजीवी शौण्डिकः" कुल्लूकः। चक्रं तदाकारोऽस्त्यस्य। चक्राकारसदृशाकारयुक्ते ३पर्व्वतभेदे पु०। "तत्रैव चक्रसदृशं चक्रवन्तं महाचलम्। सहस्रकूटं विपुलं भगवान् संन्यवेशयत्" हरिवं० २२५अ०।

चक्रवर्त्तिन् पु० चक्रे भूमण्डले, वर्त्तितुं, चक्रं सैन्यचक्रं वा सर्व्वभूमौ वर्त्तयितुं शीलमस्य वृत—वृत—णिच्—वा णिनि १समुद्रपर्य्यन्तक्षितेरधीश्वरे, अमरः २वास्तूकशाके राजनि०। ३जतुकायां शब्दार्थचि० ५जटामांस्याम् ४अलक्तके च स्त्री ङीप् राजनि०। ५जनीनाम··

गन्धद्रव्ये स्त्री अमरः चक्र इव वर्त्तते। चक्रवाकतुल्ये त्रि० “तव तन्वि ! कुचावेतौ नियतं चक्रवर्त्तिनौ। आसमुद्रक्षितीशोऽपि भवान् यत्र करप्रदः” उद्भटः। “यश्चक्रवर्त्तित्वमवाप वीरः स्वैः कर्म्मभिः शक्रसमप्रभावः” हरिवं०१५४अ०। “इन्द्रैर्गजानां गिरिचक्रवर्त्ती” कुमा०। “जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव। पुत्रमेवं गुणोपेतं चक्रवर्त्तिनमाप्नुहि” शकु०। “विद्याधरराज्यमिव चक्रवर्त्तिनरवाहनोचितम्” काद०।

चक्रवाक पुंस्त्री० चक्रशब्देन उच्यते वच—परिभाषणे कर्मणि घञ् न्यङ्क्वा० कुत्वम्। स्वनामख्याते खगे अमरः। “परस्पराक्रन्दिनि चक्रवाकयोः पुरोवियुक्ते मिथुने कृपावती” कुमा०। स्त्रियां जातित्वात् ङीष्। “वरुणाय चक्रवाकीम्” यजु० २४।२२। “सरिदपरतटान्तादागता चक्रवाकी” माघः। “दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्” मेघ०।

चक्रवाकवती स्त्री चक्रवाकाः भूम्ना सन्त्यत्र मतुप् मस्य वः ङीप् अजिरा० संज्ञायामपि न दीर्घः। बहुलचक्रवाकयुक्ते नदीभेदे।

चक्रवाट पु० चक्रस्येव वाटोऽत्र वट—वेष्टने घञ्। १क्रियाराहे कर्म्मप्रारम्भे २पर्य्यन्ते ३शिखातरौ च मेदि०।

चक्रवाड(ल) पु० चक्रमिव वाडते वेष्टयति वाड—अच्। वा डस्य लः चक्रमिव वलते वल वा० ण तस्य वा डः। १लोकालोकपर्व्वते। २मण्डले न० अमरः। लोकालोकपर्व्वतस्य भूमण्डलवेष्टनाकारेण स्थितत्वात् तथात्वम्। ३मण्डलाकारेण वर्त्तिनि समूहमात्रे च “किरीटहाराङ्गदचक्रवाडैर्विभूषिताङ्गाः पृथुबाहुवक्षसे” भा० आ० १८७अ०। “एवं स कृष्णो गोपीनां चक्रवालैरलङ्कृतः” हरिवं० ७७अ०। वलधातोर्वाडधातोर्वा अन्तःस्थादित्वेन वर्ग्यादित्वाभावात् अस्य शब्दस्य वर्ग्यमध्यत्वकल्पनं प्रामादिकमेव।

चक्रवात पु० चक्रमिव वातः। (घुर्णी)। भ्रमिवायौ वात्यायाम्। “दैत्योनाम्ना तृणावर्त्तः कंसभृत्यः प्रचोदितः। चक्रवातस्वरूपेण जहारासीनमर्भकम्” भाग० ७।१८श्लो०

चक्रवृद्धि स्त्री चक्रमिव वृद्धिः। “वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृता” इति नारदोक्ते १वृद्धिभेदे। तद्दानादिप्रकारः मनुना दर्शितो यथा “नातिसांवत्सरीं वृद्धिं न चादृष्टां पुनर्हरेत्। चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या। ऋणं दातुमशक्तो यः कर्त्तुमिच्छेत् पुनः क्रियाम्। स दत्त्वा निर्जितां वृद्धिं करणं परिवर्त्तयेत्। अदर्शयित्वा तत्रैव हिरण्यं परिवर्त्तयेत्। यावती सम्भवेद् वृद्धिस्तावतीं दातुमर्हति”। “ममैकस्मिन्मासि मासद्वये मासत्रये वा गते तस्य वृद्धिः विगणय्य एकदा दातव्येत्येवं विधिनियमपूर्व्वकवृद्धिग्रहणमुत्तमर्णः संवत्सरपर्य्यन्तं कुर्य्यात् नातिक्रान्ते संवत्सरे वृद्धिं गृह्णीयात् न च शास्त्रोक्तधर्म्यद्विकत्रिकशताद्यधिकां गृह्णीयात्। अधर्म्यत्वबोधनार्थो निषेधः। चक्रवृद्ध्यादिचतुष्टयीं चाशास्त्रीयां न गृह्णीयात्। तासां स्वरूपमाह बृहस्पतिः “कायिका कायसंयुक्ता मासग्राह्या च कालिका। वृद्धेर्वृद्धिश्चक्रवृद्धिः कारिता ऋणिना कृता”। तत्र चक्रवृद्धिः स्वरूपेणैव गर्हिता। कालवृद्धिस्तु द्विगुणाधिकग्रहणेन। कायिका चातिवाहदोहादिना। कारिता ऋणिकेन या आपत्काल एव उत्तमर्णपीडया कृता। चतस्रोऽपि ह्यशास्त्रीया न गृह्णीयात्। तथा च बृहस्पतिः “भागो यद्द्विगुणादूर्द्ध्वं चक्रवृद्धिश्च गृह्यते। पूर्व्वं च सोदयं पश्चात् वार्द्धुष्यं तद्विगर्हितम्”। कात्यायनः “ऋणिकेन कृता वृद्धिरधिका सम्प्रकल्पिता। आपत्कालकृता नित्यं दातव्या कारिता तथा। अन्यथा कारिता वृद्धिर्न दातव्या कथञ्चन”। ऋणं दातुमिति। अधमर्णो धनदानासामर्थ्यात् यदि पुनर्लेख्यादिक्रियां कर्त्तुमिच्छेत् स निर्ज्जितां उत्तमर्णेन सत्यतया आत्मसात् कृतां वृद्धिं दत्त्वा करणं लेख्यं पुनः कुर्य्यात्। अदर्शयित्वेति। यदि दैवगत्या वृद्धिहिरण्यमपि समग्रं दातुं न शक्नोति तदा तद्गृहीत्वैव तत्रैव पुनः क्रियमाणे लेख्यादौ वृद्धिहिरण्यादिशेषमारोपयेत्। यत्प्रमाणं चक्रवृद्धिधनं तदानीं सम्भवति तद्दातुमर्हति” कुल्लू०। चक्रमस्त्यस्य अच् चक्रं चक्रवच्छकटादि तन्निमित्ता वृद्धिः। २शकटादिभाटकरूपलाभे च। “चक्रवृद्धिं समारूढो देशकालव्यवस्थितः। अतिक्रामन् देशकालौ न तत्फलमवाप्नुयात्” मनुः। “चक्रवृद्धिमिति। चक्रवृद्धिशब्देनात्र चक्रवच्छकटादिभाटकरूपा वृद्धिरभिमता चक्रवृद्धिमाश्रित उत्तमर्णो देशकालव्यवस्थितः। यदि वाराणसीपर्य्यन्तं लवणादि शकटेन वहामि तदा ममेयद्धनं दातव्यमिति वेतने देशव्यवस्थितिः। यदि मासं यावद्वहामि तदा ममेयद्धनं दातव्यमिति कालव्यवस्थितिः। एवमभ्युपगतदेशकालौ नियमस्थौ दैवादपूरयन् शकटादिभाऽवहन् लाभरूपफलं सकलं न प्राप्नोति” कुल्लू०।

चक्रव्यूह पु० चक्राकारः व्यूहः। चक्राकारे सेनासन्निवेशभेदे चक्रशब्दे दृश्यम्।

चक्रशल्या स्त्री चक्रमिव शल्यमत्र। श्वेतगुञ्जायां राजनि०

चक्रश्रेणी स्त्री चक्राणां श्रेणिरत्र ङीप्। अजशृङ्ग्याम् वृक्षभेदे रत्नमाला तस्याःफलानां चक्राकारशृङ्गरूपतया जातत्वा त्तथात्वम्। [२चक्रवाके अमरः।

चक्रसंज्ञ न० चक्रस्य संज्ञा संज्ञास्य। १वङ्गे धातुभेदे हेमच०

चक्रसंवर पु० चक्रमिन्द्रियचक्रं संवृणोति अच्। बुद्धभेदे त्रिका०।

चक्रसक्थ त्रि० चक्रमिव सक्थि अस्य षच् षचः षित्त्वेन नित्यमन्तोदात्तता "सक्थञ्चाचक्रान्तात्" पा० चक्रान्तप्रतिषेधात् न विभाषयाऽन्तोदात्तता। चक्रतुल्यसक्थियुक्ते।

चक्रसाह्वय पुंस्त्री० चक्रेण समाना आह्वा यस्य। चक्रवाके "चकोरान् वानरान् हंसान् सारसान् चक्रसाह्वयान्" भा० आनु० ५४अ०। जातित्वेऽपि योपधत्वात् स्त्रियां टाप्।

चक्रहस्त पु० चक्रं हस्तेऽस्य। १चक्रपाणौ विष्णौ २चक्रधारिमात्रे त्रि०। [ङ्ग्याञ्च राजनि०।

चक्रा स्त्री चक-तृप्तौ रक्। १नागरमुस्तायां, २कर्कटशृ-

चक्रांश पु० चक्रस्य राशिचक्रस्यांशः। राशिचक्रस्य ३६० षष्ट्युत्तरशतत्रयात्मके भागे।

चक्रा(क्री)ङ्गी स्त्री चक्राकारेणाकृति अङ्कते वा चक-गतौ अकिङ् गतौ अच् गौरा० ङीष्। हंस्यां शब्दरत्ना०।

चक्राङ्ग पु० चक्रमिवाङ्गं चक्रमिवाङ्कं यस्य। १हंसे। स्त्रियां जातित्वात् ङीष्। चक्रमङ्गमस्य। २रथे अमरः। "दूरमूचुश्च चक्राङ्गा वचः काकं विहङ्गमाः" भा० कर्ण० ४१अ० हंसकाकीये। ३चक्रवाके "कलविङ्कं प्लवं हंसं चक्राङ्गं ग्रामकुक्कुटम्" मनुः अभक्ष्यमांसोक्तौ। हंसस्य पृथगुपादानादस्य चक्रवाकार्थता। [लतायां रत्नमाला।

चक्राङ्गा स्त्री चक्रमिवाङ्गमस्त्यस्याः अच्। सुदर्शनायां

चक्राङ्गी स्त्री चक्रमिव चक्रं तृप्तिकरमङ्गं वाऽस्याः ङीष्। १कटुरोहिण्याम् मेदि०। २हंस्यां शब्दर०। ३हिलमोचिकायां त्रिका०। ४मञ्जिष्ठायां ५वृषपर्ण्यां च राजनि०। ६कर्कटशृङ्ग्यां रत्नमा०।

चक्राट पु० चक्रं चक्राकारमटति अट-अण् उप० स०। १विषवैद्ये २धूर्त्ते ३दीनारे परिमाणभेदे च मेदि०।

चक्राधिवासिन् पु० चक्रं तृप्तिकरमधिवासयति अधि+वासि णिनि। तृप्तिकरसौरभयुक्ते नागरङ्गवृक्षे(नारेङ्गानेवु)त्रिका०।

चक्रायुध पु० चक्रमायुधमस्य। १विष्णौ "चक्रायुधेन चक्रेण पिबतोऽमृतमोजसा। शिरश्छिन्नम्" भा०आ०१९२अ०। २चक्रास्त्रधारिमात्रे चक्रप्रहरणादयोऽप्यत्र।

चक्रावर्त्त पु० चक्रस्येवावर्त्तः। घूर्णने हेमच०।

चक्राह्व पु० चक्रेति आह्वा यस्य। १चक्रमर्द्दे राजनि०। २चक्रवाके च।

चक्रि त्रि० कृ-कि द्वित्वम्। करणशीले "चक्रिं विश्वानि चक्रये" ऋ० १।९।२। विश्वानीत्यत्र कियोगे षष्ठीनिषेधात् कर्म्मणि द्वितीया। [राजनि०।

चक्रिका स्त्री चक्रं तदाकारोऽस्त्यस्याः ठन्। जानुनि

चक्रिन् पु० चक्रमस्त्यस्य इनि। १विष्णौ २ग्रामजालिके ३चक्रवाके ४सर्पे पुंस्त्री०। ५कुलाले ६सूचके त्रि० मेदि०। ७अजे पुंस्त्री ८तैलिके शब्दर०। चक्रं राष्ट्रचक्रं स्वत्वेनास्त्यस्य इनि। ९चक्रवर्त्तिनि हेमच०। १०चक्रमर्द्दे तस्य तदाकारपत्रत्वात्। ११तिनिशे १२व्याघ्रनखे पु० १३काके १४गर्दभे च पुंस्त्री० राजनि०। तयोश्चक्रवद्भ्रमणवत्त्वात्तथात्वम्। १५चक्रयुक्ते त्रि० सर्वत्र स्त्रियां ङीप्। १६चक्रयुक्तरथाद्यारूढे त्रि०। "चक्रिणोदशमीस्थस्य" मनुः। "चक्रिणः चक्रयुक्तरथाद्यारूढस्य" कुल्लू०। "वैश्यायां शूद्रतश्चौराज्जातश्चक्री स उच्यते" उशनसोक्ते १७संकीर्णजातिभेदे पुंस्त्री०। "पदं महेन्द्रालयचारु चक्रिणः" माघः। विष्णोश्च मनस्तत्त्वात्मकचक्रस्य लोकरक्षार्थं सुदर्शनचक्रस्य वा धारणात् तथात्वम्। अतएव "अरौद्रः कुण्डली चक्री" "शङ्खभृन्नन्दकी चक्री" विष्णुस० द्विधा प्रयोगः अन्वयार्थभेदाभ्यामिति बोध्यम्।

चक्रीवत् पुंस्त्री० चक्रं तदङ्गमस्त्यस्य मतुप् आसन्दीवदित्या० पा० नि०। १गर्दभे अमरः। "चक्रीवदङ्गरुह धूम्ररुचो विसस्रुः" माघः। २राजभेदे पु० सि०कौ०। वैदिकप्रयोगे ३चक्रयुक्तमात्रे च। "सदोहविर्धानानि चक्रीवन्ति" कात्या० श्रौ० २४।२३।१०। "सदोहविर्धानाग्नीध्राणि चक्रीवन्ति" २४।५।२६। स्त्रियां सर्वत्र ङीप्

चक्रु त्रि० कृ-कु द्वित्वञ्च। कर्त्तरि उज्ज्वलद०।

चक्रेश्वरी स्त्री ६त०। १जिनानां विद्याभेदे २राष्ट्रेश्वरे पु०।

चक्रोपजीविन् त्रि० चक्रं तैलनिष्पीडनयन्त्रमुपजीवति उप जीव-णिनि। तैलिके।

चक्ष कथने त्यागे च अदा० आत्म०सक०सेट्। चष्टे। अख्यत् अख्यत त्यागे तु समचक्षिष्ट चख्यौ चख्ये चचक्षे। भाष्यमते अक्शासीत् अक्शास्त। चक्शौ चक्शे।

अनु+पश्चादुक्तौ "परायतीं मातरमन्वचष्ट" ऋ० ४।१८।३।

अभि+आभिमुख्येन दर्शने "कदा चिकित्वो अभिचक्षसे नः" ऋ० ५।३।९।

अव+अधोदर्शने। "सुपर्णोऽवचक्षत क्ष्मां सोमः" ऋ०९।७१।९।

आ+आख्याने। "विचक्षणः प्रस्तुतमाचचक्षे। "स रावणहृतां ताभ्यां वचसाचष्ट मैथिलीम्" रघुः। [२।४।४।२।

अनु+आ+अन्वाख्याने "एतमेव तदन्वाचष्टे" शत० ब्रा०

अभि+आ+आभिमुख्येनाख्याने। "अभ्याचष्टानुरागास्रैरन्धीभूतेन चक्षुषा" भाग० १।९।११। "अभ्याचष्टुं प्रचक्रमे" ८।५।१४। [शत० ब्रा० ३।२।२।४।

उद्+आ+उदाहरणे "तस्मादध्वर्युरेव गोर्वीर्य्यमुदाचष्टे"

प्रति+आ+प्रत्याख्याने निराकरणे "गुरुपत्नीति कृत्वाऽहं प्रत्याचक्षे न दोषतः" भा० आ०७७अ०।

वि+आ+व्याख्याने विवरणे। "व्याचक्षाणस्य तु मे निदिध्यासस्व" शत० ब्रा० १४।५।४।४।

सम्+आ+सम्यगाख्याने। "तत्सत्यं नः समाचक्ष्व" भाग०१।४।१३। [परिचक्षते" मनुः।

परि+परितः कथने विख्यातौ "वेदप्रदानादाचार्य्यं पितरं

प्र+प्रकर्षेण कथने विख्यातौ। "तं देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते" मनुः "दहति प्रेतमिति प्रचक्षते" रघुः।

प्रति+प्रत्युत्तरोक्तौ प्रतिरूपोक्तौ च "यदा तु सर्व्वभूतेषु दारुष्वग्निमिव स्थितम्। प्रतिचक्षीत मां लोकः" भाग०३।९।३।

वि+विशेषेण कथने विख्यातौ "विश्वं विचक्षते धीराः योगराद्धेन चक्षुषा" भाग० ३।११।१७। विचक्षणः।

सम्+सम्यक्कथने। "मेरोरप्यन्तरे पार्श्वे पूर्व्वं संचक्ष्व सञ्जय!" भा० भी०७अ०।

चक्षण न०चक्ष—ल्युट् न ख्यादेशः। १अनुग्रहेण दर्शने "कद्रुणस्य चक्षणम्" ऋ० १।१०५।६। "चक्षणमनुग्रहदर्शनम्" भा०। २कथने च। करणे ल्युट्। ३अवदंशे मद्यपानादिरोचके (चाकना) द्रव्यभेदे हेमच०।

चक्षणि त्रि० चक्ष—अनि। प्रकाशके। "स नो विभावा चक्षणिर्न" ऋ०६।४।२। [२उपाध्याये उणादिकोषः।

चक्षस् पु० चक्ष—असि न ख्यादेशः। १बृहस्पतौ त्रिका०।

चक्षुःश्रवस् पुंस्त्री० चक्षुषा शृणोति श्रु—असुन्, चक्षुरेव श्रवः कर्णौ यस्य वा। सर्पे अमरः। "अदस्तदाकर्णिफलाढ्यजीवितं दृशोर्द्वयं नस्तदवीक्षि चाफलम्। इति स्म चक्षुःश्रवसां प्रिया नले स्तुवन्ति निन्दन्ति हृदा तदात्मनः" नैष०।

चक्षुर्मल न० ६त०। (पिँचुटि) नेत्रमले शब्दार्थचि०।

चक्षुर्वर्द्धनिका स्त्री शाकद्वीपस्थे नदीभेदे। "महानदी च कौरव्य! तथा मणिजला नदी। चक्षुर्वर्द्धनिका चैव नदी भरतसत्तम!" भा०भी० ११अ०। [रत्नमा०।

चक्षुर्वहन न०चक्षुस्तज्ज्योतिर्वहति वह—ल्यु। १मेषशृङ्गीवृक्षे

चक्षुर्विषय पु० ६त०। १चक्षुर्ग्राह्ये रूपादौ। स च भाषा०उक्तो यथा "उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये। विभागसंयोगपरापरत्वे स्नेह द्रव्यत्वं परिमाणयुक्तम्। क्रियां जातिं योग्यवृत्तिं समवायञ्च तादृशम्। गृह्णाति चक्षुः, सम्बन्धादालोकोद्भूतरूपयोः"। २नेत्रप्रचारस्थाने च "गुरोस्तु चक्षुर्विषये न यथेष्टासनो भवेत्" मनुः।

चक्षुर्हन् त्रि० चक्षुषा हन्ति हन—क्विप् ३त०। दृष्टिमात्रेण घातिनि "सर्पस्पर्शसमाः केचित्तथान्ये मकरस्पृशः। विभाव्य घातिनः केचित्तथा चक्षुर्हणोऽपरे" भा०आनु० ३५अ०। "त्वां ते चक्षुर्हणं प्राप्य दग्धा घोरेण चक्षुषा" भा०भी० १२२अ०।

चक्षुष्मत् त्रि० प्रशस्तं चक्षुरस्त्यस्य मतुप्। प्रशस्तनेत्रयुक्ते "चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्य्यार्थदर्शिना" रघुः।

चक्षुष्य त्रि० चक्षुषे हितः यत्। १चक्षुर्हिते २प्रियदर्शने जटा०। ३केतकवृक्षे ४पुण्डरीकवृक्षे पु० मेदि० ५शोभाञ्जनवृक्षे पु० राजनि० ६रसाञ्जने हेमच०। ७सौवीराञ्जने ८खर्परीतुत्थे ९प्रपौण्डरीके च न० राजनि०। "शीतेन शिरसः स्नानं चक्षुष्यमिति निर्द्दिशेत्" सुश्रु०। "चक्षुष्यः स्तुतो भवति य एवं वेद" छा० उ०। १०नेत्रजाते त्रि०। चक्षुषि भवः शरीरावयवत्वात् यत्। "चक्षुष्यः खलु महतां परैरलङ्घ्यः" माघः। "चक्षुष्यः अक्षिजः प्रियश्च। "प्रियेऽक्षिजे तु चक्षुष्य" इति विश्वः" मल्लि०।

चक्षुस् न० चक्ष—धातूनामनेकार्थत्वात् दर्शने करणे उसि। १नेत्रे तच्च चाक्षुषज्ञानसाधनमिन्द्रियभेदः अक्षिशब्दे ४५ पृ० दृश्यम् तस्य तैजसत्वं मुक्ता० समर्थितं यथा "चक्षुस्तैजसं परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत् प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादाद्यं परकीयेति घटादेः स्वीयरूपव्यञ्जकत्वात् व्यभिचारवारणाय द्वितीयं परकीयेति अथवा प्रभायादृष्टान्तत्वसम्भवादाद्यं परकीयं न देयम्" चक्षुःसन्निकर्षे नयात्ववारणाय द्रव्यत्वे सतीति वाच्यम्"। चक्षुषोऽधिष्ठातृदेवः

सूर्यः। “दिग्वातार्कं प्रचेतोश्वीत्यादि” शा॰ति॰उक्तेः। २तेजसि च। सूर्य्यश्चक्षुषे” ताण्ड॰ ब्रा॰। चक्षुषे तेजसे” भा॰।

चक्षुष्या स्त्री चक्षुषे हिता यत्। १सुभगायां स्त्रियां २कुलत्थिकायां मेदि॰। ३अजशृङ्ग्याम् ४वनकुलत्थिकायाञ्च राजनि॰।

चक्षूराग पु॰ चक्षुषोरागः रक्तता। १नेत्रारुणतायां चक्षुषः तदाकर्षकः रागः अनुरागः। २नेत्राकर्षके अनुरागे “चक्षूरागः कोकिलेषु (न परकलत्रेषु)” काद॰।

चक्षूरोग पु॰ ६त॰। नेत्ररोगे नेत्रावयवविभागः सुश्रुतोक्तः अक्षिशब्दे ४५ पृ॰दर्शितः। तत्र निदानादि सुश्रुते उक्तं “उष्णाभितप्तस्य जलप्रवेशाद्दूरेक्षणात् स्वप्नविपर्य्ययाच्च। प्रसक्तसंरोदनशोककोपक्लेशाभिघातादतिमैथुनाच्च। शुक्तारनालाम्लकुलत्थमाषनिषेवणाद्वेगविनिग्रहाच्च। स्वेदादथो धूमनिषेवणाच्च छर्देर्विघाताद्वमनातियोगात्। बाष्पग्रहात् सूक्ष्मनिरीक्षणाच्च नेत्रे विकारान् जनयन्ति दोषाः। वाताद्दश तथा१० पित्तात् कफाच्चैव त्रयोदश। रक्तात् षोडश विज्ञेया सर्वजाः पञ्चविंशतिः। तथा बाह्यौ पुनर्द्वौ च रोगाः षट्सप्ततिः स्मृताः। हताधिमन्थोऽनिमिषो दृष्टिर्गम्भीरिका च या। यच्च वातहतं वर्त्म न ते सिध्यन्ति वातजाः। याप्योऽथ तन्मयः काचः साध्याः स्युः सान्यमारुताः। शुष्काक्षिपाकाधीमन्थस्यन्दमारुतपर्य्ययाः। असाध्यो ह्रस्वजात्यो यो जलस्रावश्च पैत्तिकः। परिम्लायी च नीलश्च याप्यः काचोऽथ तन्मयः। अभिष्यन्दोऽधिमन्थोऽम्लाध्युषितं शुक्तिकाह्वया। दृष्टिः पित्तविदग्धा च पोथक्यो लगणश्च यः। असाध्यः कफजस्रावो याप्यः काचोऽथ तन्मयः। अभिष्यन्दोऽधिमन्थश्च बलासग्रथितञ्च यत्। दृष्टिः श्लेष्मविदग्धा च पोथक्यो लगणश्च यः। क्रिमिग्रन्थिः परिक्लिन्नवर्त्म शुक्लार्म्म पिष्टकाः। श्लेष्मोपनाहः साध्यस्तु कथिताः श्लेष्मजेषु तु। रक्तस्रावोऽजकाजातं शोणितार्शोऽवलम्बितम्। शुक्रं न साध्यं काचश्च याप्यस्तज्जः प्रकीर्त्तितः। मन्यस्यन्दौ क्लिष्टवर्त्म हर्षोत्पातौ तथैव च। सिराजावञ्जनाख्या च सिराजालञ्च यत् स्मृतम्। पर्वण्यथाव्रणं शुक्रं शोणितार्म्मार्ज्जुनश्च यः। एते साध्या विकारेषु रक्तजेषु भवन्ति हि। पूयस्रावो नाकुलान्ध्यमक्षिपाकात्ययोऽलजी। असाध्याः सर्वजा याप्याः काचः कोपश्च पक्ष्मणः। वर्त्मावबन्धो यो व्याधिः सिरासु पिडका च या। प्रस्तार्य्यर्माधिमांसार्मस्नाय्वर्मोत्सङ्गिनी च या। पूयालसश्चार्बुदञ्च श्यावकर्दमवर्त्मनी। तथार्शोवर्त्म शुक्लार्मः शर्करावर्त्म यच्च वै। सशोफश्चाप्यशोफश्च पाको बहलवर्त्म च। अक्लिन्नवर्त्म कुम्भीका विसवर्त्म च सिध्यति। सनिमित्तोऽनिमित्तश्च द्वावसाध्यौ तु बाह्यजौ। षट्सप्ततिविकाराणामेषा संग्रहकीर्त्तना। नव सन्ध्याश्रयास्तेषु वर्त्मजास्त्वेकविंशतिः। शुक्रभागे दशैकश्च चत्वारः कृष्णभागजाः। सर्व्वाश्रयाः सप्तदश दृष्टिजा द्वादशैव तु। बाह्यजौ द्वौ समाख्यातौ रोगौ परमदारुणौ। भूय एतान् प्रवक्ष्यामि सङ्ख्यारूपचिकित्सितैः”।

“अथातः सन्धिगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः। पूयालसः१ सोपनाहः२ स्रावाः ३।४।५।६ पर्वणिकालजी ७।८। क्रिमिग्रन्थिश्च९ विज्ञेया रोगाः सन्धिगता नव। पक्वः शोफः सन्धिजः संस्रवेद्यः सान्द्रं पूयं पूति पूयालसः१ सः। ग्रन्थिर्नाल्पो दृष्टिसन्धावपाकः कण्डूप्रायो नीरुजस्तूपनाहः२। गत्वा सन्धीनश्रुमार्गेण दोषाः कुर्युः स्रावान् रुग्विहीनान् स्वलिङ्गान्। तान् वै स्रावान् नेत्रनाडीमथैके तस्या लिङ्गं कीर्त्तयिष्ये चतुर्द्धा। पाकः सन्धौ संस्रवेद्यस्य पूयं पूयास्रावो२ नैकरूपः प्रदिष्टः। श्वेतं सान्द्रं पिच्छिलं यः स्रवेच्च श्लेष्मास्रावो नीरुजः स प्रदिष्टः। रक्तास्रावः२ शोणितोत्थः सरक्तं कोष्णं नाल्पं संस्रवेन्नातिसान्द्रम्। पीताभासं नीलमुष्णं जलाभं पित्तस्रावं४ संस्रवेत् सन्धिमध्यात्। ताम्रा तन्वी दाहशूलोपपन्ना रक्ताज्ज्ञेया पर्वणी७ वृत्तशोफा जाता सन्धौ कृष्णशुक्लेऽलजी८ स्यात्तस्मिन्नेवाख्यापिता पूर्वलिङ्गैः। क्रिमिग्रन्थिर्वर्त्मनः पक्ष्मणश्च कण्डूं कुर्य्युः क्रिमयः९ सन्धिजाताः। नानारूपा वर्त्मशुक्लस्य सन्धौ चरन्तोऽन्तर्नयनं दूषयन्ति।” “अथातोवर्त्मगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः। पृथग्दोषाः समस्ताश्च यदा वर्त्मव्यपाश्रयाः। सिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः। विवर्द्ध्य मांसं रक्तञ्च तदा वर्त्मव्यपाश्रयान्। विकारान् जनयन्त्याशु नामतस्तान्निबोधत। उत्सङ्गिन्यथ१ कुम्भीका२ पोथक्यो३ वर्त्मशर्करा४। तथार्शोवर्त्म५ शुष्कार्श६स्तथैवाञ्जननामिका७। बहलवर्त्म८ यच्चापि व्याधिर्वर्त्मावबन्धकः९। क्लिष्टकर्दमवर्त्माख्यौ१० श्याववर्त्म११ तथैव च। प्रक्लिन्न१२मपरि-

क्लिन्नं१३ वर्त्म१४ वातहत१५न्तु यत् । अर्बुदं१६ निमिष१७श्चापि शोणितार्श१८श्च यत् स्मृतम् । लगणो१९ विसनामा२० च पक्ष्मकोप२१स्तथैव च । एकविंशतिरित्येते विकारा वर्त्मसंश्रयाः । नामभिस्ते समुद्दिष्टा लक्षणैस्तान् प्रवक्ष्महे । पिडकास्त्वन्तरमुखी बाह्याधोवर्त्मसंश्रया। विज्ञेयोत्सङ्गिनी१ नाम तद्रूपपिडकान्विता । कुम्भीकवीजप्रतिमाः पिडकाः पक्ष्मवर्त्मनोः । आध्मायन्ते तु भिन्ना याः कुम्भीकपिडकास्तु ताः२ । कण्डूस्रावान्विता गुर्व्यो रक्तसर्षपसन्निभाः । पिडकाश्च रुजावत्यः पोथक्य३ इति संज्ञिताः । पिडकाभिः सुसूक्ष्माभिर्घनाभिरभिसंवृता । पिडका या खरा स्थूला सा ज्ञेया वर्त्मशर्करा४ । सूक्ष्माः खराश्च वर्त्मस्थास्तदर्शो वर्त्म५ कीर्त्यते । दीर्घोऽङ्कुरः खरः स्तब्धो दारुणो वर्त्मसम्भवः। व्याधिरेष समाख्यातः शुष्कार्श६ इति संज्ञितः। दाहतोदवती ताम्रा पिडका वर्त्मसम्भवा । मृद्वी मन्दरुजा सूक्ष्मा ज्ञेया साऽञ्जननामिका७। वर्त्मोपचीयते यस्य पिडकाभिः समन्ततः । सवर्णाभिः समाभिश्च विद्याद्बहलवर्त्म८ तत् । कण्डूमताल्पतोदेन वर्त्मशोफेन यो नरः । न समं छादयेदक्षि भवेद्बन्धः९ स वर्त्मनः । मृद्वल्पवेदनं ताम्रं यद्वर्त्म सममेव च । अकस्माच्च भवेद्रक्तं क्लिष्टवर्त्म१० तदादिशेत्। क्लिष्टं पुनः पित्तयुक्तं विदहेच्छोणितं यदा । तदा क्लिन्नत्वमापन्नमुच्यते वर्त्मकर्दमम्११ । यद्वर्त्म बाह्यतोऽन्तश्च श्यावं शूनं सवेदनम् । दाहकण्डूपरिक्लेदि श्याववर्त्मेति१२ तन्मतम् । अरुजं बाह्यतः शूनमन्तः क्लिन्नं स्रवत्यपि । कण्डूनिस्तोदभूयिष्ठं क्लिन्नवर्त्म१३ तदुच्यते । यस्य धौतानि धौतानि सम्बध्यन्ते पुनः पुनः । वर्त्मान्यपरिपक्वानि विद्यादक्लिन्नवर्त्म१४ तत् । विमुक्तसन्धिनिश्चेष्टं वर्त्म यन्न निमील्यते । एतद्वातहतं१५ विद्यात् सरुजं यदि वाऽरुजम् । वर्त्मान्तरस्थं विषमं ग्रन्थिभूतमवेदनम् । विज्ञेयमर्बुदं१६ पुंसां सरक्तमवलम्बितम् । निमेषणीः सिरा वायुः प्रविष्टो वर्त्मसंश्रयाः । चालयेदतिवर्त्मानि निमेषः१७ स गदो मतः । छिन्नाश्छिन्ना विवर्द्धन्ते वर्त्मस्था मृदवोऽङ्कुराः । दाहकण्डूरुजोपेतास्तेऽर्शः शोणितसम्भवाः१८। अपाकः कठिनः स्थूलो ग्रन्थिर्वर्त्मभवोऽरुजः । सकण्डूः पिच्छिलः कोलप्रमाणो लगणस्तु१९ सः। शूनं यद्वर्त्म बहुभिः सूक्ष्मैश्छिद्रैः समन्वितम् । विसमन्तर्जल इव विसवर्त्मेति२०तन्मतम् । पक्ष्माशयगता दोषास्तीक्ष्णाग्राणि खराणि च । निर्वर्त्तयन्ति पक्ष्माणि तैर्घृष्टं चाक्षि दूयते । उत्पाटितैः पुनः शान्तिः पक्ष्मभिश्चोपजायते । वातातपानलद्वेषी पक्ष्मकोपः२१ स उच्यते ।” शुक्लभागरोगभेदास्तु११ अर्म्मन् शब्दे ३७९पृ० सुश्रुतोक्ता दर्शिताः तत्रत्यं ततः शेषन्तु यथा

“स्नाय्वर्म्मेत्यभिपठितं खरं प्रपाण्डु५। श्यावाः स्युः पिशितनिभास्तु विन्दवो ये शुक्तिर्वा सितनयने स शुक्तिसंज्ञः६। एको यः शशरुधिरोपमः सुविन्दुः शुक्लस्थो भवति तमर्ज्जुनं७ वदन्ति । उत्सन्नः सलिलनिभोऽथ पिष्टशुक्लो विन्दुर्यः स भवति पिष्टकः८ सुवृत्तः । जालाभः कठिनसिरो महान् स रक्तः सन्तानः स्मृत इह जालसंज्ञित९स्तु । शुक्लस्याः सितपिडकाः सिरावृता यास्ता विद्यादसितसमीपजाः सिराजाः१० । कांस्याभो भवति सिरावृतः सिते यो विन्दुर्वा स तु निरुजो वलासकाख्यः११ ।”

कृष्णभागतरोगास्तु तत्रोक्ताः४ कृष्णगतशब्दे २२१२पृ० दर्शिताः: । सर्वगतरोगास्तु१५ तत्रोक्ता यथा

“अथातः सर्वगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः । तथाभिष्यन्दास्तु४ चत्वार इहोपदिष्टास्तावन्त एवेह तथाधिमन्थाः४। शोफान्वितो०ऽशोफयुत१७श्च पाकावित्येवमेते दश सम्प्रदिष्टाः । हताधिमन्थो११ऽनिलपर्य्यय१२श्च शुष्काक्षिपाको ऽन्यत एव वातः१४ । दृष्टिस्तथाम्लाध्युषिता१५ सिराणामुत्पातहर्षावपि१६ सर्वभागाः । प्रायेण सर्वे नयनामयास्ते भवन्त्यभिष्यन्दनिमित्तमूलाः । तस्मादभिष्यन्दमुदीर्य्यमाणमुपाचरेदाशु हिताय धीमान् । निस्तोदनं स्तम्भनरोमहर्षसङ्घर्षपारुष्यशिरोऽभितापाः । विशुष्कभावाः शिशिराश्रुता च वाताभिपन्ने नयने भवन्ति१। दाहप्रपाकौ शिशिराभिनन्दा धूमायनं वाष्पसमुच्छ्रयश्च । उष्णाश्रुता पीतकनेत्रता च पित्ताभिपन्ने नयने भवन्ति२। उष्णाभिनन्दा गुरुताक्षिशोफः कण्डूपदेहौ सिततातिशैत्यम् । स्रावो मुहुः पिच्छिल एव चापि कफाभिपन्ने नयने भवन्ति३ । ताम्राश्रुता लोहितनेत्रता च राज्यः समन्तादतिलोहिताश्च । पित्तस्य लिङ्गानि च यानि तानि रक्ताभिपन्ने नयने भवन्ति४ । वृद्धैरेतैरभिष्यन्दैर्नराणामक्रियावताम् । तावन्तस्त्वधिमन्थाः स्युर्नयने तीव्रवेदनाः । उत्पाट्यत इवात्यर्थं नेत्रं निर्मथ्यते तथा । शिरसोऽर्द्धन्तु तं विद्यादधिमन्थं स्वलक्षणैः । सङ्घर्षतोदनिर्भेदत्याद्यत इव मथ्यतेऽरणिवच्च यत् ।

मांससंरब्धमाविलम् । कूजनास्फोटनाध्मानवेपथुव्यथनैर्युतम् । शिरसोऽर्द्धञ्च येन स्यादधिमन्थः स मारुतात्५ । रक्तराजिचितं स्रावि वह्निनेवावदह्यते । यकृत्पिण्डोपमं दाहि क्षारेणाक्तमिव क्षतम् । प्रपक्वोच्छूनवर्त्मान्तमस्वेदं पीतदर्शनम् । मूर्च्छाशिरोदाहयुतं पित्तेनाक्ष्यधिमन्थितम्६ । शोफवन्नातिसंरब्धं स्रावकण्डूसमन्वितम् । शैत्यगौरवपैच्छिल्यदूषिकाहर्षणान्वितम् । रूपं पश्यति दुःखेन पांशुपूर्णमिवाविलम् । नासाध्मानशिरोदुःखयुतं श्लेष्माधिमन्थितम्७ । बन्धुजीवप्रतीकाशं ताम्यति स्पर्शनाक्षमम् । रक्तास्रावं सनिस्तोदं पश्यत्यग्निनिभा दिशः । रक्तमग्नारिष्टवच्च कृष्णभागश्च लक्ष्यते । यद्दीप्तं रक्तपर्य्यन्तं तद्रक्तेनाधिमन्थितम्८ । हन्याद्दृष्टिं सप्तरात्रात्कफोत्थोऽधीमन्थोऽसृक्सम्भवः पञ्चरात्रात् । षड्रात्राद्वा मारुतोत्थो निहन्यान्मिथ्याचारात्पैत्तिकः सद्य एव । कण्डूपदेहाश्रुयुतः पक्वोडुम्बरसन्निभः । दाहसंहर्षताम्रत्वशोफनिस्तोदगौरवैः । जुष्टो मुहुः स्रवेद्यास्रमुष्णशीताम्बुपिच्छिलम् । संरम्भी पच्यते यश्च नेत्रपाकः स शोफजः९ ॥ शोफहीनानि लिङ्गानि नेत्रपाके त्वशोफजे१० । अन्तःसिराणां श्वसनः स्थितो दृष्टिं प्रतिक्षिपन् ॥ हताधिमन्थं११ जनयेत्तमसाध्यं विदुर्बुधाः । पक्ष्मद्वयाक्षिभ्रुवमाश्रितस्तु यत्रानिलः सञ्चरति प्रदुष्टः । पर्य्यायशश्चापि रुजः करोति तं वातपर्य्याय१२मुदाहरन्ति ॥ यत्कूणितं दारुणरूक्षवर्त्म विलोकने चाविलदर्शनं यत् । सुदारुणं यत्प्रतिबोधने च शुष्काक्षिपाकोपहतं१३ तदक्षि ॥ यस्यावटूकर्णशिरोहनुस्थो मन्यागतो वाप्यनिलोऽन्यतो वा । कुर्य्याद्रुजोऽतिभ्रुवि लोचने वा तमन्यतोवात१४मुदाहरन्ति ॥ अम्लेन भुक्तेन विदाहिना वा सञ्छाद्यते सर्व्वत एव नेत्रम् । शोफान्वितं लोहितकं सनीलैरेतादृगम्लाध्युषितं१५ वदन्ति ॥ अवेदना वापि सवेदना वा यस्याक्षिराज्यो हि भवन्ति ताम्राः । मुहुर्विरज्यन्ति च ताः समन्ताद्व्याधिः सिरोत्पात१६ इति प्रदिष्टः ॥ महान् सिरोत्पात उपेक्षितस्तु जायेत रोगस्तु सिराप्रहर्षः१७ । ताम्राच्छमस्रं स्रवति प्रगाढं तथा न शक्नोत्यभिवीक्षितुञ्च ॥ अथातो दृष्टिगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः ॥ मसूरदलमात्रान्तु पञ्चभूतप्रसादजाम् । खद्योतविस्फुलिङ्गाभां सिद्धां तेजोभिरव्ययैः ॥ आवृतां पटलेनाक्ष्णोर्बाह्येन विवराकृतिम् । शीतसात्म्यां नृणां दृष्टिमाहुर्नयनचिन्तकाः ॥ रोगांस्तदाश्रयान् घोरान् षट् च षट् च प्रचक्ष्महे । पटलानुप्रविष्टस्य तिमिरस्य च लक्षणम् ॥ सिराभिरभिसम्प्राप्य विगुणोऽभ्यन्तरे भृशम् । प्रथमे पटले दोषो यस्य दृष्टौ व्यवस्थितः ॥ अव्यक्तानि स रूपाणि सर्व्वाण्येव प्रपश्यति । दृष्टिर्भृशं विह्वलति द्वितीयं पटलं गते ॥ मक्षिकान् मशकान् केशान् जालकानि च पश्यति । मण्डलानि पताकाश्च मरीचीः कुण्डलानि च ॥ परिप्लवांश्च विविधान् वर्षमभ्रं तमांसि वा । दूरस्थान्यपि रूपाणि मन्यते च समीपतः ॥ समीपस्थानि दूरे च दृष्टेर्गोचरविभ्रमात् । यत्नवानपि चात्यर्थं सूचीपाशं न पश्यति ॥ ऊर्द्ध्वं पश्यति नाधस्तात्तृतीयं पटलं गते । महान्त्यपि च रूपाणि च्छादितानीव वाससा ॥ कर्णनासाक्षियुक्तानि विपरीतानि वीक्षते । यथादोषञ्च रज्येत दृष्टिर्दोषे बलीयसि ॥ अधःस्थिते समीपस्थं दूरस्थञ्चोपरिस्थिते । पार्श्वस्थिते तथा दोषे पार्श्वस्थानि न पश्यति ॥ समन्ततः स्थिते दोषे सङ्कुलानीव पश्यति । दृष्टिमध्यगते दोषे स एकं मन्यते द्विधा ॥ द्विधास्थिते त्रिधा पश्येद्बहुधा चानवस्थिते । तिमिराख्यः स वै दोषश्चतुर्थपटलङ्गतः ॥ रुणद्धि सर्व्वतो दृष्टिं लिङ्गनाशः स उच्यते । तस्मिन्नपि तमोभूते नातिरूढे महागदे ॥ चन्द्रादित्यौ सनक्षत्रावन्तरिक्षे च विद्युतः । निर्म्मलानि च तेजांसि भ्राजिष्णूनि च पश्यति ॥ स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः । तत्र वातेन रूपाणि भ्रमन्तीव स पश्यति ॥ आविलान्यरुणाभानि व्याविद्धानि च मानवः । पित्तेनादित्यखद्योतशक्रचापतडिद्गुणान् ॥ शिखिबर्हविचित्राणि नीलकृष्णानि पश्यति । गौरचामरगौराणि श्वेताभ्रप्रतिमानि च ॥ पश्येदसूक्ष्माण्यत्यर्थं व्यभ्रे चैवाभ्रसंप्लवम् । सलिलप्लावितानीव परिजाड्यानि मानवः ॥ तथा रक्तेन रक्तानि तमांसि विविधानि च । कफेन पश्येद्रूपाणि स्निग्धानि च सितानि च । हरितश्यावकृष्णानि धूमधूम्राणि चेक्षते ॥ सन्निपातेन चित्राणि विप्लुतानीव पश्यति । बहुधा वा द्विधा वापि सर्व्वाण्येव समन्ततः । हीनाधिकाङ्गान्यथ वा ज्योतींष्यपि च पश्यति ॥ पित्तं कुर्य्यात्परिम्लायि मूर्च्छितं रक्ततेजसा । पीता दिशस्तथोद्यन्तमादित्यमिव पश्यति ॥ विकीर्य्यमाणान् खद्योतैर्वृक्षांस्तेजोभिरेव च । वक्ष्यामि षड्विधैरागैर्लिङ्गनाशमतः परम् ॥ रागोऽरुणो मारुतजः प्रदिष्टः पित्तात्

परिम्लाय्यथापि नीलः। कफात् सितः शोणितजस्तु रक्तः समस्तदोषोऽथ विचित्ररूपः॥ रक्तजं मण्डलं दृष्टौ स्थूलकाचारुणप्रभम्। परिम्लायिनि रोगे स्यान्म्लाय्यानीलञ्च मण्डलम्॥ दोषक्षयात् कदाचित् स्यात्स्वयं तत्र च दर्शनम्॥ अरुणं मण्डलं वाताच्चञ्चलं परुषन्तथा। पित्तान्मण्डलमानीलं कांस्याभं पीतमेव वा॥ श्लेष्मणा बहलं स्निग्धं शङ्खकुन्देन्दुपाण्डुरम्। चलत्पद्मपलाशस्थः शुक्लबिन्दुरिवाम्भसः॥ मृद्यमाने च नयने मण्डलं तद्विसर्पति। प्रवालपद्मपत्राभं मण्डलं शोणितात्मकम्॥ दृष्टिरागो भवेच्चित्रो लिङ्गनाशे त्रिदोषजे। यथास्वदोषलिङ्गानि सर्वेष्वेव भवन्ति हि॥ षड् लिङ्गनाशाः षडिमे च रोगा दृष्ट्याश्रयाः षड् च षडेव च स्युः। तथा नरः पित्तविदग्धदृष्टिः१ कफेन चान्यः२स्त्वथ धूमदर्शी३॥ यो ह्रस्वजात्यो४ नकुलान्ध्यता५ च गम्भीरसंज्ञा६ च तथैव दृष्टिः॥ पित्तेन दुष्टेन गतेन दृष्टिं पीता भवेद्यस्य नरस्य दृष्टिः। पीतानि रूपाणि च मन्यते यः स मानवः पित्तविदग्धदृष्टिः१॥ प्राप्ते तृतीयं पटलन्तु दोषे दिवा न पश्येन्निशि वीक्षते च। तथा नरः श्लेष्मविदग्धदृष्टिः२ तान्येव शुक्लानि हि मन्यते तु॥ त्रिषु स्थितोऽल्पः पटलेषु दोषो नक्तान्ध्यमापादयति प्रसह्य। दिवा स सूर्यानुगृहीतदृष्टिर्वीक्षेत रूपाणि कफाल्पभावात्॥ शोकज्वरायासशिरोभितापैरभ्याहता यस्य नरस्य दृष्टिः। सधूमकान् पश्यति सर्वभावांस्तं धूमदर्शीति३ वदन्ति रोगम्॥ स ह्रस्वजात्यो४ दिवसेषु कृच्छ्राद्ध्रस्वानि रूपाणि च यो न पश्येत्। रात्रौ स शीतानुगृहीतदृष्टिः पित्ताल्पभावादपि तानि पश्येत्॥ विद्योतते येन नरस्य दृष्टिर्दोषाभिपन्ना नकुलस्य यद्वत्। चित्राणि रूपाणि दिवा स पश्येत् स वै विकारो नकुलान्ध्यसंज्ञः५। दृष्टिर्विरूपा श्वसनोपसृष्टा सङ्कुच्यतेऽभ्यन्तरतश्च याति॥ रुजावगाढा च तमक्षिरोगं गम्भीरिकेति६ प्रवदन्ति तज्ज्ञाः। बाह्यौ पुनर्द्वाविह सम्प्रदिष्टौ निमित्ततश्चाप्यनिमित्ततश्च॥ निमित्ततस्तत्र शिरोऽभितापाज्ज्ञेयस्त्वभिष्यन्दनिदर्शनैश्च। सुरर्षिगन्धर्वमहोरगाणां सन्दर्शनेनापि च भास्वराणाम्॥ हन्येत दृष्टिर्मनुजस्य यस्य स लिङ्गनाशस्त्वनिमित्तसंज्ञः। तत्राक्षि विस्पष्टमिवावभाति वैदूर्यवर्णा विमला च दृष्टिः। विदीर्यते सीदति हीयते वा नृणामभीघातहता तु दृष्टिः। इत्येते नयनगता महाविकाराः सङ्ख्याताः पृथगिह षड् च सप्ततिश्च। एतेषां पृथगिह विस्तरेण सर्वं वक्ष्येऽहं तदनु चिकित्सितञ्च तावत्”॥ [चचाय।

चघ घातने स्वादि०पर०सक०सेट्। चघ्नोति अचघीत् अचाघीत्

चङ्कुर पु० सौ० चकि—भ्रान्तौ कर्त्तृकरणादौ—उरच्। १रथे २वृक्षे च मेदि०। ३यानमात्रे न० त्रिका०।

चङ्क्रमण न० क्रम+यङ् ल्युट् यञोलुक्। १अतिवेगेन गमने २पुनः पुनर्भ्रमणे च। तस्य गुणमाह सुश्रुतः “यत्तु चङ्क्रमणं नातिदेहपीडाकरं भवेत्। तदायुर्बलमेधाग्निप्रदमिन्द्रियबोधनम्”। “श्रमानिलहरं वृष्यं पुष्टिनिद्राधृतिप्रदम्” “अनारोग्यमनायुष्यं चक्षुषोरुपघातकृत्। पादाभ्यामनुपानद्भ्यां सदा चङ्क्रमणं नृणाम्” इति च सुश्रुतः। रोगभेदे तन्निषेधः सुश्रुते दर्शितो यथा अन्तर्दृष्ट्युपक्रमे “वर्ज्जयेदित्यनुवृत्तौ अश्वादियानं व्यायामं मैथुनं वेगनिग्रहम्। अत्यशनं चङ्क्रमणमुपवासं गुरूणि च”। “स्थानासनं चङ्क्रमणं यानयानाभिभाषणम्। व्रणवान्न निषेवेत”। “तत्र स्निग्धस्विन्नवान्तविरिक्तास्थापितानुवासितसिराविद्धैः परिहर्त्तव्यानि क्रोधायासमैथुनदिवास्वप्नवाग्व्यायामयानोत्थानासनचङ्क्रमणशीतवातातपविरुद्धासात्म्याजीर्णान्याबललाभात् मासमेके मन्यन्ते”।

चङ्ग त्रि० चीयते ची० बा० ड चमङ्गं यस्य शक०। (चाङ्गा) ख्याते १सुस्थे २शोभने ३दक्षे च मेदि०।

चचर त्रि० चर—अच् बा० द्वित्वम्। चरणशीले “पतरेव चचरा चन्द्र निर्णिक्” ऋ० १०।१०६।८। चचरा संचरन्तौ भा० औस्थाने आच्।

चचेण्डा स्त्री चम् उपचीयमानं प्रकारं द्वित्वम् उपचीयमानं प्रकारण अण्डमिव फलमस्य पृषो०। (टिचिड़ा) ख्याते बृहत्फले पटोल सदृशे लताभेदे वैद्य०।

चञ्च पु० चन्च—अच्। पञ्चाङ्गुले मानभेदे शब्दार्थचि०।

चञ्चत्पुट पु० “ताले चञ्चत्पुटे ज्ञेयं गुरुद्वन्द्वं लघुप्लुतम्” संगीतदा० उक्ते तालभेदे।

चञ्चरिन् पुंस्त्री० चर—यङ्लुक् बा० उत्वाभावः णिनि। भ्रमरे। “करी वरीभरीति चेत् दिशं सरीसरीतिकाम्। स्थिरी चरीकरीति चेत् न चञ्चरीति चञ्चरी” उद्भटः” स्त्रियां ङीप्।

चञ्चरीक पुंस्त्री० चर—फर्फरीकादि० ईकन् नि० द्वित्वम्। [भ्रमरे त्रिका०।

चञ्चरीकावली स्त्री“यमौ रौ विख्याता चञ्चरीकावली गः” वृ० र० टी० उक्ते त्रयोदशाक्षरपादके वर्णवृत्तभेदे।

चञ्चल पु० चन्च–अलच् चञ्चं गतिं लाति ला–क वा । १कामुके, २वायौ शब्दार्थ० । ३चपले, ४अस्थिरे च त्रि० अमरः । ५विद्युति, ६लक्ष्म्याञ्च स्त्री मेदि० । पिप्पल्यां शब्दच० । “चञ्चलचूडं चपलैर्वत्सकुलैः केलिपरम्” । (कृष्णम्) छन्दोम० । “नागजिह्वेव चञ्चला” भा० क० ७७अ० ।

चञ्चा स्त्री चन्च–अच् । नलनिर्म्मिते कटभेदे (चाँच) मेदि० । चञ्चेवेति इवार्थे कन् “लुब् मनुष्ये” इति तस्य लुप् । तृणमयपुरुषे लुपिव्यक्तिवचनत्वात् स्त्री

चञ्चु पु० चन्च–उन् । १एरण्डवृक्षे मेदि० २मृगे शब्दर० । ३रक्तैरण्डे ४क्षुद्रचञ्चुवृक्षे राजनि० । ५नाडीचशाके शब्दार्थचि० (चेचुनाड़ी) ख्याते ६पत्रशाकभेदे स्त्री भावप्र० । “चिञ्चुश्चञ्चुश्चिञ्चुकी च दीर्घपत्रा सतिक्तिका । चञ्चुः शीता सरा रुच्या स्वाद्वी दोषत्रयापहा । धातुपुष्टिकरी बल्या मेध्या पिच्छिलिका स्मृता” । ७पक्षिणामोष्ठे स्त्री वा ङीप् । “खगचञ्चुपुटद्रोणीपूरणे तव कः श्रमः” चातका० । “करयन्त्रणदन्तुरान्तरे व्यलिखच्चञ्चुपुटेन पक्षती” “नुनुदे तनुकण्डुपण्डितः पटुचञ्चूपुटकोटिकुट्टनैः” इति च नैष० । स्वार्थे क । पक्षिणामोष्ठे स्त्री ।

चञ्चुपत्र पु० चञ्चुरिव पत्रमस्य । चञ्चुशाके राजनि० ।

चञ्चुभृत् पुंस्त्री० चञ्चुं बिभर्त्ति भृ–क्विप् । पक्षिणि त्रिका०

चञ्चुमत् पुंस्त्री चञ्चुरस्त्यस्य मतुप् । पक्षिणि हारा० स्त्रियां ङीप् ।

चञ्चुर पु० चन्च–उरच् । १पत्रशाकभेदे चञ्चुनामके शाके राजनि० । २दक्षे त्रि० “पुराणः पुण्यचञ्चुरः” भा० आ० ६०४७अ० । “विज्ञाताखिलशास्त्रार्थो लौकिकाचारचञ्चुरः” काशी० १०अ० ।

च(चु)ञ्चुल पु० विश्वामित्रपुत्रभेदे । “विश्वामित्रस्य च सुता” इत्युपक्रमे “उदुम्बराश्चभिष्णातास्तारकायणच(चु)ञ्चुलाः” हरि० २७अ० ।

चञ्चुशाक न० चञ्चुनामकं चञ्चुसदृशं वा शाकमस्य । शाकभेदे ।

चञ्चुसूचि पुंस्त्री० चञ्चुः सूचिरिव यस्य । कारण्डवपक्षिणि स्त्रीत्वपक्षे वा ङीप् । वा कप् । अत्रैव ।

चट भेदे भ्वा० पर० सक० सेट् । चटति अचटीत्–अचाटीत् । चचाट । चटुः चाटुः ।

चट वधे भेदे च चु० उभ० सक० सेट् । चाटयति ते अचीचटत् त । उद्+भेदने वधे उच्चाटने स्थानान्तरायने च । “उच्चाटनीयः करतालिकानाम्” नैष० । उच्चाटनम् ।

चटक पुंस्त्री० चटति भिनत्ति धान्यादिकम् चट–क्वुन् । १कलविङ्के (चडुइ) अमरः जातित्वेऽपि स्त्रियामजादित्वात् टाप् न तु ङीप् । स्वार्थे क । चटककोऽप्यत्र । स्त्रियां जातित्वेऽपि टापि क्षिपका० नित्यं न अत इत्त्वम् । तन्मांसगुणादि भावप्र० उक्तं यथा “चटकः कलविङ्कः स्यात् कुलिङ्गः कालकण्ठकः । कुलिङ्गः शीतलः स्निग्धः स्वादुः शुक्रकफप्रदः । सन्निपातहरो ग्रामचटकश्चातिशुक्रलः” । २पिप्पलीमूले न० अमरटीका । ३श्यामाखगे स्त्री राजनि० । चटका+स्वार्थे क । अतो वेत्त्वम् चटकका चटकिका” सि० कौ० । चटकस्य चटकाया वा अपत्यं पुमान् अण् ऐरक् । चाटकैर चटकापत्ये पुंसि । स्त्रियान्तु अणो लुक् । चटका चटकयोः स्त्र्यपत्ये स्त्री ।

चटकामुख न० चटकाया मुखमिव मुखमस्य । अस्त्रभेदे “क्षुरप्रैश्चटकामुखैः” भा० क० ४० अ० । हेमच० ।

चटकाशिरस् पु० चटकायाः शिर इव । पिप्पलीमूले ।

चटचटाय चट–भेदने अच् प्रकारे द्वित्वम् । चटचटम् चटचटेत्यव्यक्तं शब्दं वा करोति भृशा० च्व्यर्थे वा क्यङ् नामधातुः आत्म० अक० सेट् । चटचटायते अचटचटायिष्ट । “हुतभुक्तेन चान्नेन भृशं चटचटायते” सुश्रु० । “चामरतिलसिद्धार्थकादीन् निरन्तरं चटचटायितान्” दशकु० । क्विप् यङ्लोपाल्लोपौ । चटचटा तादृशशब्दकरणे “ततश्चटचटाशब्दः प्रादुरासीत् महारवे” । हला० ।

चटिका स्त्री चट–बा० इकन् । १पिप्पलीमूले २चटकायां

चटिकाशिरस् न० चटिकायाः शिर इव । पिप्पलीमूले अमरः । “सर्व्वे सान्ता अदन्ताःस्युः” इत्युक्तेः पृषो० चटिकाशिरोऽप्यत्र भरतः ।

चटु पु० चट–उन् । १प्रियवाक्ये, २व्रतिनामासनभेदे, ३उदरे च मेदि० । प्रियवाक्ये न० संक्षि० । “छायां निजस्त्रीचटुलालसानाम्” माघः ।

चटुल त्रि० चट–उलच् । १चञ्चले, चपले हेमच० । २विद्युति स्त्री जटाधरः । “मदेन किञ्चिच्चटुलालसानां” “आयस्तमैक्षत जनश्चटुलाग्रपादम्” “चञ्चूपदृष्टचटुलाहिपताकयाऽन्ये” माघः । “त्रासातिमात्रचटुलैः स्मरतः सुनेत्रैः” रघुः ।

चटूल्लोल त्रि० चटौ उल्लोलः । १चाटुकारलोके २चञ्चले त्रिका० ३सुन्दरे उणादिको० सुचञ्चले हारा० ।

चड कोपे भ्वा०आत्म०अक०सेट् इदित् । चण्डते अचण्डिष्ट । चचण्डे । चण्डः चण्डी [चण्डत् त ।

चड कोपे चुरा०उभ०अक०सेट् इदित् । चण्डयति ते अच-

चण शब्दे भ्वा०पर०सक०सेट् । चणति अचाणीत्—अचणीत् चचाण चेणतुः ।

चण गतौ हिंसे च भ्वा०पर०सक० सेट् वा घटा० मित् । चणति अचाणीत्—अचणीत् । चचाण चेणतुः चणयति ते—चाणयति ते ।

चण दाने भ्वा० पर० अक० सेट् घटा० । चणति अचणीत्-अचाणीत् । चणयति । चचाण चेणतुः । चणकः ।

चण् अव्य० चण्—क्विप् । चेदर्थे अस्य णित्त्वम् । समुच्चयादौ तु अनत्तुबन्ध एव चशब्द इति मनोरमा

चण पु० चण—अच् । चणके शस्यभेदे (छोला) राजनि० ।

चणक पु० चण—दाने कुन् । १शस्यभेदे (बुट)(छोला) अमरः २मुनिभेदे च तस्य गोत्रापत्यं गर्गा०यञ् चाणक्यः ।"चणकः शीतलो रूक्षः पित्तरक्तकफापहः । लघुः कषायो विष्टम्भी वातलो ज्वरनाशनः । सचाङ्गारेण संभृष्टस्तैलभृष्टस्य तद्गुणः । आर्द्रभृष्टो बलकरो रोचनश्च प्रकीर्त्तितः । शुष्कभृष्टोऽतिरूक्षः स्याद्वातकुष्ठप्रकोपनः । स्विन्नः पित्तकफं हन्यात् सूपः क्षोभकरोऽहितः । आर्द्रोऽतिकोमलो रुच्यः रक्तपित्तहरो हिमः" । हरितार्द्रचणकरन्धनन्तु । "सुहरित हरिमन्थः क्षोदभिन्नो नखाग्रैः प्रथममुदकसिक्तो वेसवारेण सिद्धः । लवणमरिचसङ्गात् तैलहिङ्गुप्रसिक्तः शिखरयति विभोक्तुर्जाठरं मन्दवह्निम् । छोलाभिधायकफलं परिगृह्य शुद्धं तप्ते घृते सुललितक्वथितोषणाभ्याम् । संसाधितम् सुरभितं शुचिरामठेन जिह्वातले विशति नित्यमतिप्रकामम्"शब्दार्थ०चि०धृतवैद्यकम् ।

तस्य शाकगुणपाकादि तत्रैव दर्शितं यथा "रुच्यं चणकशाकं स्याद् दुर्जरं कफवातकृत् । अम्लं विष्टम्भजनकं पित्तनुद्दन्तशोथहृत् । सकलु चाणकं शाकमम्लतक्रेण साधितम् । सहिङ्गुलवणे तप्ते भर्जितं रामठान्वितम् । क्षाराम्लभावसहजाश्चणकप्रवालाः सम्मर्दिता मरिचसैन्धवशृङ्गवेरैः । संचूर्णिताः कटुकतैलयुतैः सुपक्वैर्भृष्टैः सुहिङ्गुचणकैः परिदत्तवासाः ।"

चणकरोटिका स्त्री चणकचूर्णनिर्मिता रोटिका । "चाणक्या रोटिका रूक्षा श्लेष्मपित्तास्रनुत् गुरुः । विष्टम्भिनी न चक्षुष्या" शब्दार्थचि० धृतवैद्योक्ते चणकरोटिकारूपे भक्ष्यभेदे

चणकात्मज पु० ६त० । चाणक्ये वात्स्यायने मुनौ हेमच०

चणकाम्ल न० चणकजातमम्लम् । चणकक्षारे तच्छाकपाकेन निष्पादिते क्षारभेदे "चणकाम्लकमत्यम्लं दीपनं दन्तहर्षणम् । लवणानुरसं रुच्यं शूलाजीर्णविबन्धनुत्" भावप्र० । [शब्दार्थचि० ।

चणकाम्लवारि न० ६त० । क्षेत्रस्थचणकपत्रशिशिरजले

चणद्रुम पु० चणश्चणकइव द्रुमः । क्षुद्रगोक्षुरे राजनि० ।

चणपत्री स्त्री चणस्य चणकस्य पत्रमिव पत्रमस्याः ङीप् । रुदन्तीवृक्षे राजनि०

चणिका स्त्री चणति रसं चण—दाने बा० कुन् चण इव इवार्थे कन् वा । गोदुग्धायाम् तृणभेदे राजनि०

चण्ड न० चडि—कोपे अच् चण—दाने चम—अदने बा० ड तस्य नेत्त्वम् । १तीक्ष्णे शब्दर० । २तिन्तिडीवृक्षे यमकिङ्करे ३दैत्यभेदे च पु० मेदि० ।। "चण्डमुण्डौ महासुरौ" देवीमा० । ४अत्यन्तकोपने त्रि० अमरः ५तीव्रतायुक्ते त्रि०शब्दर० । "अथैकधेनोरपराधचण्डात्" रघुः । बह्वा० "चण्डग्राहवतीं श्रीमान्" भा० आ० १७७अ० । बह्वा० पाठात् स्त्रियां वा ङीष् । चण्डी चण्डा । तस्य भावः तल् चण्डता स्त्री त्व चण्डत्व न०इमनिच् चण्डिमन् पु० ततः तीव्रत्वे । "भ्राम्यत्पिण्डितचण्डिमा" वीरच० । ततः शिवा० अपत्ये अण् चाण्ड तदपत्ये पुंस्त्री स्त्रियां ङीप्

चण्डकौशिक पु० १ऋषिभेदे "अथ काक्षीवतः पुत्रं गौतमस्य महात्मनः । शुश्राव तपसि श्रान्तमुदारं चण्डकौशिकम्" भा०स०१६अ० । चण्ड कौशिको वर्ण्यतेऽत्र अच् । २स्वनामख्याते नाटकभेदे न० ।

चण्डतुण्डक पु० गरुडात्मजभेदे "सुवर्णचूडो नागाशी दारुणश्चण्डतुण्डकः" भा० उ० १००अ० गरुडात्मजोक्तौ

चण्डनायिका स्त्री दुर्गानायिकाभेदे । एवं चण्डवती चण्डोग्रा अपि दुर्गानायिकाभेदे ।

चण्डबल पु० वानरभेदे "बलं चण्डबलाख्यस्य वज्राङ्कस्य वानरस्य" भा० व० २८६अ० ।

चण्डभार्गव पु० च्यवनवंश्ये ऋषिभेदे । "तत्र होता बभूवाथ ब्राह्मणश्चण्डभार्गवः । च्यवनस्यान्वये ख्यातोविप्रो वेदविदां वरः" भा० आ० ५३अ० । सर्पसत्रे होताद्युक्तौ

चण्डमुण्डा स्त्री चण्डस्य मुण्डस्य ग्राह्यत्वेनास्त्यस्याः अच् । चामुण्डायां हेमच० । चामुण्डाशब्दे दृश्यम् ।

चण्डमुण्डी स्त्री स्थानभेदे "चण्डमुण्डीमहास्थाने दण्डिनी परमेश्वरी" तन्त्र० ।

चण्डरुद्रिका स्त्री चण्डोरुद्रोवेद्यत्वेनास्त्यस्याः ठन्। विद्याभेदे शब्दरत्ना०।

चण्डवृष्टिप्र(यात)ताप पु० "यदिह नयुगलं ततः सप्तरेफास्तदा चण्डवृष्टिप्र(यातो) पातोभवेद्दण्डकः" वृ० र० उक्ते दण्डकभेदे।

चण्डशक्ति पु० चण्डा शक्तिरस्य। बलिसैन्यस्थदैत्यभेदे। "शुम्भू एश्चण्डशक्तिश्च कुशनेतः शशिध्वजः" हरि०२४अ०

चण्डा स्त्री चडि—अच् चन—चमु वा ड तस्य नेत्त्वं वा टाप्। १दुर्गानायिकाभेदे। "उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका। चण्डा चण्डवती चण्डनायिकाप्यति चण्डिका" देवीपु०। जिनानां २शासनदेवताभेदे हेम०। ३चोरनामगन्धद्रव्ये अमरः ४शङ्खपुष्पीद्रुमे मेदि०। ५लिङ्गिनीलतायां ६कपिकच्छ्वाम् ७आखुपर्ण्यां ८श्वेतदूर्वायां च राजनि०। ९नदीभेदे शब्दर०। एतासांचण्डवीर्य्यत्वात् तथात्वम्। १०कोपनायां स्त्रियां च स्त्री

चण्डांशु पु० चण्डास्तीव्रा अंशवो यस्य। सूर्य्ये अमरः। चण्डदीधितिचण्डभानुप्रभृतयोऽप्यत्र।

चण्डात पु० चण्डमतति अत—अण्। करवीरे अमरः।

चण्डातक पु० न० चण्डां कोपनामतति अत—ण्वुल्। वरस्त्रीणामर्द्धोरुपर्य्यन्ते वस्त्रे अमरः अस्य पुंस्त्वमप्येके

चण्डाल पु० चडि—आलच्। १स्वनामख्याते जातिभेदे, शूद्रेण ब्राह्मण्यामुत्पादिते सङ्कीर्णवर्णे "शूद्रादायोगवः क्षत्ता चण्डालश्चाधमोमतः" मनुना वैश्यक्षत्रविप्राङ्गनासु शूद्राज्जातानां क्रमेण आयोगवादिसंज्ञा कृता। ततः जातित्वात् स्त्रियां ङीषि प्राप्ते शार्ङ्गरवा० ङीन् स्वरे भेदः। "चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतोविप्रः ज्ञानात् साम्यन्तु गच्छति" स्मृतिः। चण्डालस्पृष्टजलस्य अपेयशब्दे २५४ पृ० तदन्नभक्षणस्य अभक्ष्यशब्दे २७४पृ०तत्स्पर्शस्य अस्पृश्यशब्दे ५७० पृ० तद्द्रव्यग्रहणस्य च निषेधः अग्राह्यशब्दे ६७ पृ० उक्तः। "अथ रात्र्यां व्यतीतायां तस्यां राजा बभूव ह। चण्डालदर्शनो राम! सद्य एव दुराकृतिः। नीलपीताम्बरधरो रक्ताम्बरकृतोत्तरः। संरब्धताम्रघोराक्षः करालो हरिपिङ्गलः। कृष्णचर्मनिवासी च लौहाभरणभूषितः" तस्य स्वरूपादिकं रामा० उक्तम्। तत्कर्म्मादि मनुनोक्तं यथा "चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः। अपपात्राश्च कर्त्तव्या धनमेषां श्वगर्द्दभम्। वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम्। कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः। न तैः समयमन्विच्छेत् पुरुषो धर्ममाचरन्। व्यवहारो मिथस्तेषां विवाहः सदृशैः सह। अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने। रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च। दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः। अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः। बध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया। बध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च।" २क्रूरकर्मणि त्रि०। "कर्म्मचण्डालयोगोत्थं मम पापचयं कुरु" ग्रहणमुक्तिस्नानमन्त्रम्

चण्डालकन्द पु० चण्डालप्रियः कन्दः शाक०। कन्दभेदे राजनि

चण्डालवल्लकी स्त्री ६त०। वीणाभेदे कण्डोले अमरः।

चण्डालिका स्त्री चण्डालःभक्षकत्वेन वादकत्वेनवास्त्यस्याः ठन्। १चण्डालवीणायां २ओषधिभेदे च। चण्डमलति अल—ण्वुल्। ३उमायां स्त्री मेदि०।

चण्डि स्त्री चडि—कोपे इन्। दुर्गायां भरतः

चण्डिकघण्टा पु० चण्डस्तीक्ष्णस्वनोऽस्त्यस्याः ठन् चण्डिका तीक्ष्णस्वना घण्टा यस्य। शिवे। "नमश्चण्डिकघण्टाय घण्टाय घण्टघण्टिने" भा० शा० २८६अ० शिवस्तुतौ

चण्डिका स्त्री चण्डी स्वार्थे क चडि कोपे ण्वुल् वा। दुर्गायाम् अमरः।

चण्डिल पु० चडि—कोपे इलच् चण्ड+अस्त्यर्थे इलच् वा। १नापिते २वास्तुकशाके हेम० नापितस्य तीक्ष्णास्त्रवत्त्वात् वास्तुकस्य तीक्ष्णवीर्य्यवत्त्वाच्च तथात्वम्। ३नदीभेदे स्त्री उणादिको०

चण्डी स्त्री चण्ड—बह्वा० वा ङीष्। १दुर्गायां सप्तशतीव्याख्यायां गुप्तवत्यां तु तन्नामनिरुक्त्यादिरुक्तं यथा "प्रसादो निष्फलो यस्य कोपोऽपि च निरर्थकः। न तं भर्त्तारमिच्छन्ति षण्डं पतिमिव स्त्रियः" इत्यादिना महाभयजनकत्वेनैव कोपस्य साफल्योक्तेस्तादृश एव कोपे चडिधातोर्व्युत्पत्त्या प्रवृत्तेस्तद्वशादेव "नमस्ते रुद्र मन्यव" इत्यादिना प्रथमं मन्यव एव नमस्कार दर्शनात् "भीषास्माद्वातः पवते भीषोदेति सूर्य्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः" इत्यादिश्रुत्या वाय्वादिभयजनककोपस्यापि परब्रह्मलिङ्गत्वमवगतमेव अतएव "महद्भयं वज्रमुद्यतमिति श्रुतौ वज्रपदेन ब्रह्मैवोच्यते नायुधविशेषो भयजनकत्वलिङ्गादित्युक्तमुत्तरमीमांसायाम्। "कम्पनादित्यधिकरणे। तस्माच्छब्दात् पुंयोगलक्षणे ङीषि चण्डीति पदनिष्पत्तिः। तत्स्वरूपं चोक्तं रत्नत्रयपरीक्षायाम्

दीक्षितैः "नित्यं निर्दोषगन्धं निरतिशयसुखं ब्रह्मचैतन्यमेकं धर्मोधर्मीति भेदद्वितयमिति पृथग्भूय मायावशेन। धर्मस्तत्रानुभूतिः सकलविषयिणी सर्वकार्य्यानुकूला शक्तिश्चेच्छादिरूपा भवति गुणगणश्चाश्रयस्त्वेक एव। कर्त्तृत्वं तत्र धर्मी कलयति जगतां पञ्चसृष्ट्यादिकृत्ये धर्मः पुंरूपमाप्य सकलजगदुपादानभावं बिभर्त्ति। स्त्रीरूपं प्राप्य दिव्या भवति च महिषी स्वाश्रयस्यादिकर्त्तुः प्रोक्तौ धर्मप्रभेदावपि निगमविदां धर्मिवत् ब्रह्मकोटी इति॥" वृहद्वासिष्ठे उत्पत्तिप्रकरणे द्वादशे सर्गे सृष्ट्यारम्भकालिकं ब्रह्मसत्तामात्रं प्रक्रम्य "तदात्मनि स्वयं किञ्चिच्चेत्यतामिव गच्छति। अगृहीतात्मकं संविदहंमर्शनपूर्वकम्। भाविनामार्थकलनैः किञ्चिदूहितरूपकम्। आकाशादणु शुद्धं च सर्वस्मिन् भाति बोधनम्। ततः सा परमा सत्ता सचेतश्चेतनोन्मुखी। चिन्नामयोग्या भवति किञ्चिल्लभ्यतया तदा। घनसंवेदना पश्चाद्भाविजीवादिनामिका। सम्भवत्यात्तकलना यदोज्झति परं पदमित्यादि"। तट्टीकायामपि सन्मात्रस्य ब्रह्मणः "स ईक्षत लोकान्नु सृजै" इति श्रुतिसिद्धमीक्षणभावं दर्शयति तदिति त्रिभिः। अगृहीतात्मकम् अहङ्काराध्यासरहितम्। अतएव संविन्मात्रेणाहन्ताविमर्शः। सर्वस्मिन्नपि सृज्यविषये भाविनामरूपानुसन्धानांशेऽपि किञ्चिदेव संपृक्तमिव। अतएवाकाशादप्यण्वेव न तु घनम्। अतएव च शुद्धमेव घनमालिन्याभावाद्ब्रह्मैव। चेत्यतां गच्छन्तीव सती सचेतश्चेतना ईक्षणवृत्त्यभिव्यक्तचैतन्यं तदुन्मुखी तत्प्रधाना सती किञ्चिल्लभ्यतया वाक्प्रवृत्तिविषयधर्म्मलाभेन तदा चिन्नामयोग्या भवतीत्यर्थः। पश्चात्तु सैव वृत्तिचिरावृत्त्या घनीभूता सम्यगेवात्तकलना सूक्ष्मप्रपञ्चात्मभावलक्षणपरिच्छेदग्राहिणी सती परं पदमपरिच्छिन्नभूमानन्दात्मभावं यदा विस्मरति तदा हिरण्यगर्भाख्यसमष्टिजीवादिनामिका भवतीत्याह। घनेति। ईदृशेक्षणाद्यात्मिका चण्डी चिदादिनामकसमष्टिवृत्तिरूपधर्म्मात्मकशुद्धब्रह्माभिन्नानां ज्ञानेच्छाक्रियाणां तिसृणां व्यष्टीनां महासरस्वतीमहाकालीमहालक्ष्मीरिति प्रवृत्तिनिमित्तवैलक्षण्येन नामरूपान्तराणि तादृशनामरूपविशिष्टदेवतात्रयसमष्टित्वं प्रवृत्तिनिमित्तीकृत्य धर्म्मी चण्डिकेति व्यवहारः। एवं व्यष्टीनां वामाज्येष्ठारौद्रीति पश्यन्तीमध्यमावैखरीति ब्रह्मा विष्णुः रुद्र इति रूपभेदेन समष्टेरपि अम्बिका शान्ता परेत्यादि संज्ञा अनन्तास्तन्त्रान्तरादवगन्तव्याः। द्वितीयसमष्टित्वादेवैषा तुरीयेति शक्ति निर्दिश्यते आचार्य्यभगवत्पादैरप्युक्तं "गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो हरेः पत्नीं पद्मां हरसहचरीमद्रितनयाम्। तुरीया कापि त्वं दुरधिगमनिःसीममहिमा महामाये! विश्वम्भ्रमयसि परब्रह्ममहिषीति"। २हिंसायां ३कोपनायाञ्च मेदिनी। "मल्लिकाक्षकुले चण्डि!" सा० द०। "नयुगसयुगगुरुभिः किल चण्डी" वृत्त० र० उक्ते ४छन्दोभेदे उपचारात् दुर्गामाहात्म्यावेदके मार्कण्डेयपुराणान्तर्गते सप्तशतीमालामन्त्रात्मके ५स्तवभेदे। तत्पाठप्रकारादि यथा वाराहीत० "अर्गलं कीलकञ्चादौ पठित्वा कवचं पठेत्। जपेत् सप्तशतीं पश्चात् क्रम एष शिवोदितः। अर्गलं दुरितं हन्ति कीलकं फलदं तथा। कवचं रक्षयेन्नित्यं चण्डिका त्रितयं तथा" तिथित० मत्स्यसू०। "जप्त्वा च प्रणवं चादौ स्तोत्रं वा संहितां पठेत्। अन्ते च प्रणवं दद्यादित्युवाचादिपूरुषः। सर्वत्र पाठे विज्ञेयो ह्यन्यथा विफलं भवेत्। शुद्धेनाऽनन्यचित्तेन पठितव्यं प्रयत्नतः। न कार्य्यासक्तमनसा कार्य्यं स्तोत्रस्य वाचनम्। आधारे स्थापयित्वा तु पुस्तकं वाचयेत् सुधीः। हस्तसंस्थापनादेव यस्मादल्पफलं लभेत्। स्वयञ्च लिखितं यत्तु कृतिना लिखितं न यत्। अब्राह्मणेन लिखितं तच्चापि विफलं भवेत्। ऋष्यादिच्छन्दादिकं न्यस्य पठेत् स्तोत्रं विचक्षणः। स्तोत्रे न दृश्यते यत्र प्रणवन्यासमाचरेत्। सङ्कल्पिते स्तोत्रपाठे संख्यां कृत्वा पठेत् सुधीः। अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन। कृते विरामे मध्ये तु अध्यायादिं पठेन्नरः" तत्रैव भविष्यपु०। "ब्राह्मणं वाचकं विद्यान्नान्यवर्णजमादरात्। श्रुत्वान्यवर्णजाद्राजन्! वाचकान्नरकं व्रजेत्। देवार्च्चामग्रतः कृत्वा ब्राह्मणानां विशेषतः। ग्रन्थिञ्च शिथिलं कुर्य्याद्वाचकः कुरुनन्दन!। विसृष्टम्पुनर्बध्नीत तत्सूत्रं न मुक्ता धारयेत् क्वचित्। द्रुतं शान्तं स्पष्टाक्षरपदन्तथा। कलस्वरसमायुक्तं रसभावसमन्वितम्। बुध्यमानः सदर्थं वै ग्रन्थार्थं कृत्स्नशो नृप!। ब्रह्मणादिषु सर्वेषु ग्रन्थार्थञ्चार्पयन्निव। य एवं वाचयेद्ब्रह्मन्! स विप्रो व्यास उच्यते। सप्तस्वरसमायुक्तं काले काले विशाम्पते!। प्रदर्शयन् रसान् सर्वान् वाचयेद्वाचको नृप!"। तस्य फलं यथा "चण्डीपाठ-

फलं देवि! शृणुष्व गदतो मम। एकावृत्त्यादिपाठानां यथावत् कथयामि ते। संकल्पपूर्वं संपूज्य न्यस्याङ्गेषु मनून् सकृत्। पाठाञ्जलिप्रदानाद्धि सिद्धिमाप्नोति मानवः। उपसर्गस्य शान्त्यर्थं त्रिरावृत्तं पठेन्नरः। ग्रहोपशान्त्यै कर्त्तव्यं पञ्चावृत्तं वरानने!। महाभये समुत्पन्ने सप्तावृत्तं समुन्नयेत्। नवावृत्त्या भवेच्छान्तिर्वाजपेयफलं लभेत्। राजवश्याय भूत्यै च रुद्रावृत्तमुदीरयेत्। अर्कावृत्त्या काम्यसिद्धिर्वैरहानिश्च जायते। मन्वावृत्त्या रिपुर्वश्यस्तथा स्त्री वश्यतामियात्। सौख्यं पञ्चदशावृत्त्या श्रियमाप्नोति मानवः। कलावृत्त्या पुत्रपौत्रधनधान्यागमं विदुः। राज्ञां भीतिविमोक्षाय वैरस्योच्चाटनाय च। कुर्य्यात् सप्तदशावृत्तं तथाष्टादशकं प्रिये!। महाव्रणविमोक्षाय विंशावृत्तं पठेत् सुधीः। पञ्चविंशावर्त्तनात्तु भवेद्बन्धविमोक्षणम्। सङ्कटे समनुप्राप्ते दुश्चिकित्स्यामये तथा। जातिध्वंसे कुलोच्छेदे आयुषो नाश आगते। वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये। तथैव त्रिविधोत्पाते तथा चैवातिपातके। कुर्य्याद् यत्नात् शतावृत्तं ततः सम्पद्यते शुभम्। श्रियोवृद्धिः शतावृत्ताद्राज्यवृद्धिस्तथापरे। मनसा चिन्तितं देवि! सिध्येदष्टोत्तराच्छतात्। शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते!। सहस्रावर्त्तनात् लक्ष्मीरावृणोति स्वयं स्थिरा। भुक्त्वा मनोरथान् कामान् नरो मोक्षमवाप्नुयात्। यथाश्वमेधः क्रतुराट् देवानाञ्च यथा हरिः। स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः। अथ वा बहुनोक्तेन किमेतेन वरानने!। चण्ड्याः शतावृत्तपाठात् सर्वाः सिद्ध्यन्ति सिद्धयः" तिथित०मत्स्यसूक्तादि "सकामैः संपुटो जाप्यो निष्कामैः संपुटं विना। शतमादौ शतञ्चान्ते संपुटोऽयमुदाहृतः" इत्याद्युक्तेः कामनाभेदेन नवार्ण (ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे) मन्त्रादिभिरस्याः संपुटता, अनया वा नवार्णस्य संपुटता कार्य्येति मतद्वयं तत्र गुप्तवत्यां सप्तशतीस्तोत्रेण नवार्णस्य संपुटतोक्ता यथाह डामरतन्त्रे "मार्कण्डेयपुराणोक्तं नित्यं चण्डीस्तवं पठन्। पुटितं मूलमन्त्रस्य जपेनाप्नोति वाञ्छितमिति"। पुटितमिति पाठक्रियाविशेषणम्। पुटितत्वं संपुटाकारता। तथा च स्तवो यथा मूलमन्त्रजपस्य संपुटाकारो भवति तथा पठनान्मूलजपस्य यद्वाञ्छितम्फलन्तत्सिध्यतीत्यर्थः। ततस्तवीयऋष्यादिन्यासपूर्वकञ्चरित्रत्रयम्पठित्वा मध्ये स्वसङ्कल्पितसंख्यानुसारेण सहस्रादिसंख्याकं नवार्णञ्जपित्वा पुनश्चण्डीस्तवं पूर्ववत्पठेत्। परं त्वेतदन्ते पुनर्मूलमष्टोत्तरशतमात्रं जप्त्वाऽऽत्मनिवेदनादिकं कुर्यात्। अयं च जपोऽङ्गभूतो न प्रधानसंख्यायामुपयुज्यते इति विशेषः। तदप्युक्तं तत्रैव चरित्रत्रयस्य ऋष्यादीनुक्त्वा "एवं संस्मृत्य ऋष्यादीन्ध्यात्वा पूर्वोक्तमार्गतः। सार्धस्तुतिः पठेच्चण्डीस्तवं स्पष्टपदाक्षरम्। समाप्तौ तु महालक्ष्मीं ध्यात्वा कृत्वा षडङ्गकम्। जपेदष्टशतं मूलं देवतायै निवेदयेदित्यादि"। केचित्तु मूलमन्त्रजपेन पुटितं चण्डीस्तवं पठन्तीति प्रथमश्लोकं योजयन्तश्चरमश्लोके पुनर्विधानं संख्यामात्रपरमिति मन्यमानाः सप्तशतीस्तोत्रस्यैव मूलेन संपुटीकारो विधीयत इत्यङ्गाङ्गीभाववैपरीत्यमिच्छन्ति। तदयुक्तं "बहुषु तन्त्रेषु नवार्णं प्रकृत्य तत्प्रकरणे सप्तशतीपाठविधानेन नवार्णजपस्य प्राकरणिकत्वेनान्याङ्गत्वायोगात्। तत्र विद्यमानाया अपि स्तोत्रे फलश्रुतेः प्रयाजफलश्रुतेः "वसन्तमेवर्त्तूनामवरुन्धे" इत्यस्येवाविवक्षितार्थकत्वात्। मरीचिकल्पे "रात्रिसूक्तं जपेदादौ मध्ये चण्डीस्तवम्पठेत्। प्रान्ते तु जपनीयं वै देवीसूक्तमिति क्रमः। एवं संपुटितं स्तोत्रं पूर्वोक्तफलदायकम्" इत्यनेन वैदिकसूक्तद्वयेन संपुटिततायाः सप्तशत्यां विधानाच्च। स च स्तवः मार्कण्डेयपुराणस्थत्रिसप्तत्यध्यायोत्तरं षडशीतितमाध्यायान्तमभिव्याप्तः। "सावर्णिः सूर्यतनयः" इत्यारभ्य सावर्णिर्भविता मनुरित्यन्तस्त्रयोदशभिरध्यायैः परिच्छिन्नः श्लोकसमूहात्मको मालामन्त्रत्वेन प्रसिद्धः। अस्य सप्तशतीत्वव्यवहारस्तु न श्लोकसंख्यया तेषां षट्शतीतोऽपि न्यूनत्वात्। नापि कवचादित्रयरहस्यत्रययोर्मेलनेन, संख्याधिक्यापत्तेः। "जपेत् सप्तशतीं चण्डीं कृत्वा तु कवचं पुरः" इत्यनेन कवचस्य सप्तशत्याः पृथङ्निर्देशाच्च। तस्माज्जपे एकमन्त्रात्मकस्यापि मालामन्त्रस्य होमाङ्गत्वेन संपुटार्थत्वेन च सप्तशतधा विभजनात् शतरुद्रियस्येवैकानेकमन्त्रात्मकत्वे विरोधाभावात्तथा व्यवहारोपपत्तिः। एतस्योत्तमत्वन्तु तन्त्रान्तरे "यथाश्वमेधः क्रतुषु देवानाञ्च यथा हरिः। स्तवानामपि सर्वेषान्तथा सप्तशतीस्तवः"। तत्रापि कलावतिप्रशस्तः "कलौ चण्डीविनायकाविति" वचनात्। वाराहीतन्त्रे सर्वेषां स्तोत्राणां परशुरामशापमुक्त्वा तद्विरहितानि कतिचिद्वर्णितानि "भीष्मपर्वणि या गीता सा प्रशस्ता कलौ युगे। विष्णोर्नाम

सहस्राख्यं महाभारतमध्यगम्। चण्ड्याः सप्तशतीस्तोत्रं तथा नामसहस्रकम्" इत्यादिना "भार्गवाख्येन रामेण शप्तान्यन्यानि कारणात्" इत्यन्तेन। यद्यपि तन्त्रान्तरेऽस्यापि स्तोत्रस्य शिवशापः कीलनं चेति सिद्धिनिरोधकावुक्तौ तथापि तत्रैव शापोद्धारोत्कीलनयोः कर्मविशेषयोस्तदङ्गत्वेन सत्कारणविधानात्तदकरणे सिद्धिविरहोक्त्या तदावश्यकत्वपरौ तावर्थवादौ। तत्र शापोद्धारो यथा त्रयोदशप्रथमौ, द्वादशद्वितीयौ, एकादशतृतीयौ, दशमचतुर्थौ, नवमपञ्चमौ, अष्टमषष्ठौ, अध्यायौ पठित्वा सप्तममध्यायं द्विः पठेदित्याकारकः प्रयोगः। उत्कीलनं यथा। आदौ मध्यमचरित्रं पठित्वा ततः प्रथमचरित्रन्ततस्तृतीयचरित्रं पठेदित्याकारकः। "अन्त्याद्यार्कद्विरुद्रत्रिदिगब्ध्यङ्केष्विभर्तवः। अश्वोऽश्व इति सर्गाणां शापोद्धारे मनोः क्रमः। उत्कीलने चरित्राणां मध्याद्यान्त्यमिति क्रमः"। अङ्कोनवमः इषुः पञ्चमः इभोऽष्टमः। "ददाति प्रतिगृह्णाति नान्यथैषा प्रसिद्ध्यति" इति विहितं दानप्रतिग्रहनामकमुत्कीलनं तु कीलकाध्यायव्याख्यावसरे विशदीकरिष्यते। एवं सम्प्रदायज्ञस्य निर्दोषमुत्तमङ्गलौ शीघ्रसिद्धिदमिदमिति सिद्धम्। एतद्वाचनक्रमो वाराहीतन्त्रे "यावन्न पूर्य्यतेऽध्यायस्तावन्न विरमेत्पठन्। यदि प्रमादादध्याये विरामो भवति प्रिये!। पुनरध्यायमारभ्य पठेत्सर्वं मुहुर्मुहुः। अनुक्रमात्पठेदेव शिरःकम्पादिकं त्यजेत्। न मानसं पठेत्स्तोत्रं वाचिकन्तु प्रशस्यते। कण्ठतः पाठाभावे तु पुस्तकोपरि वाचयेत्"। तल्लेखनेऽपि तत्र विशेषः "न स्वयं लिखितं स्तोत्रं नाब्राह्मणलिपिम्पठेत्। न च स्वयंकृतं स्तोत्रं तथान्येन च यत्कृतम्। यतः कलौ प्रशंसन्ति ऋषिभिर्भाषितं तु यत्"। यत्तु "आधारे स्थापयित्वा तु पुस्तकं वाचयेत्ततः। हस्तसंस्थापनादेव भवेदर्द्धफलं ध्रुवमिति"। तस्य व्यवस्थापि तत्रैव "पुस्तके वाचनं हस्ते सहस्रादधिकं यदि। ततोन्यूनस्य तु भवेद्वाचनं पुस्तकं विना"। सहस्रान्यूनमन्त्रस्य कण्ठे पाठसत्त्वे पुस्तकं विनैव वाचनं, तदभावे आधारे पुस्तकस्थापनेनैव वाचनं सहस्राधिकस्य तु पाठसत्त्वेऽप्याधारस्थापितपुस्तकोपर्य्येव वाचनमिति वचनार्थः। प्रकृतस्तोत्रस्य सहस्रान्यूनत्वात् "ततः कृताञ्जलिपुटः स्तुवीत चरितैरिमैरिति" वैकृतिकरहस्ये विधानाच्च कण्ठपाठाभावे पुस्तकस्याधारे स्थापनेनैव वाचनम्। कण्ठपाठीकृत्य पुस्तकं विनैव तु कृताञ्जलितया पठनमुत्तममिति द्रष्टव्यम्। अत्र सहस्रशब्देन द्वात्रिंशदक्षरात्मकस्यैकैकानुष्टुप्कल्पनेन तादृशानुष्टुप्छन्दःसहस्रं ज्ञेयमिति स्पष्टम्। शक्तिसङ्गमतन्त्रराजे "द्वात्रिंशता स्वरैर्युक्त एकोऽनुष्टुभो निगद्यते। सएव गदितः श्लोकस्तारानेत्रसमुद्भवः" इत्यादिना। तेन गद्यात्मकमालामन्त्रेष्वप्यस्य नियमस्य प्रसरो ज्ञेयः। स्तोत्रपूर्व्वोत्तरभागपाठाभावे नैष्फल्यादिवचनानि शक्तिसङ्गम एव द्रष्टव्यानि। "ऋषिच्छन्दोदेवतादि पठेत् स्तोत्रं समाहितः। यत्र स्तोत्रे न दृश्येत प्रणवन्यासमाचरेत्"। डामरे "सप्तशत्याश्चरित्रे तु प्रथमे पद्मभूर्मुनिः। छन्दो गायत्रमुदितं महाकाली तु देवता। वाग्बीजं पावकस्तत्त्वं धर्मार्थे विनियोजनम्। मध्यमस्य चरित्रस्य मुनिर्विष्णुरुदाहृतः। उष्णिक्छन्दो महालक्ष्मीर्देवता बीजमद्रिजा। वायुस्तत्त्वं भवेत्तत्र मोक्षार्थे विनियोजनम्। उत्तरस्य चरित्रस्य ऋषिः शङ्कर ईरितः। त्रिष्टुप् छन्दो देवतास्य महापूर्वा सरस्वती। कामो बीजं रविस्तत्त्वं कामार्थे विनियोजनम्। ह्रीं चण्डिकायै व्यस्तेन समस्तेन षडङ्गकौ। वाग् ऐँ अद्रिजा ह्रीँ कामः क्लीँ इति नवार्णप्रथमबीजत्रयम् ध्यानादिकं नवार्णवत्। अस्य पुरश्चरणस्वरूपं मरीचिकल्पे "कृष्णाष्टमीं समारभ्य यावत्कृष्णचतुर्दशीम्। एकैकोत्तरमाजाप्यं पूर्वसंपुटितन्तु तत्। एवं देवि! मया प्रोक्तः पौरश्चरणिकः क्रमः। तदन्ते हवनं कुर्य्यात्प्रतिश्लोकेन पायसैः। रात्रिसूक्तं प्रतिऋचं तथा देव्याश्च सूक्तकम्। हुत्वान्ते प्रजपेत्स्तोत्रमादौ पूजादिकं मुने!" इति। पूर्वाभ्यां पूर्व्वोक्ताभ्यां रात्रिसूक्तदेवीसूक्ताभ्यां संपुटितम्। प्रतिश्लोकेनेति मन्त्रविभागोपलक्षणम् कात्यायन्यादितन्त्रोक्तसप्तशतीविभागग्रन्थस्य हवनादिविधिं प्रति वाक्यशेषत्वेन तेनैव वेद्यपदार्थनिर्णयावश्यम्भावात् "यन्न दुःखेनेत्यादेः स्थलान्तरस्थस्याप्यग्निहोत्रादिविधिशेषत्वेन स्वीकारेण स्वर्गपदार्थनिर्णयस्य वैदिकसंमतत्वात्। होमसंख्या तु स्तोत्रस्य त्रिरावृत्तिरूपेति वृद्धाः। रात्रिसूक्तदेवीसूक्ते च ऋग्वेदशाकलसंहितायां प्रसिद्धे। तथेत्यनेन जपे क्रमः संपुटाकारो निर्दिश्यते। तच्छब्दस्य पूर्व्वपरामर्शित्वात्। तस्य श्लोकपूरणमात्रार्थत्वे तु द्वाभ्यामपि सूक्ताभ्यां त्रिरावृत्तसप्तशतीहोमोत्तरमेव पाठक्रमानुसारेण होमः। "विश्वेश्वरीं जगद्धात्रीम्"

इति स्तवो रात्रिसूक्तम् । "नमो देव्यै महादेव्यै" इति स्तवो देवीसूक्तमिति कश्चित् । तन्न । प्रतिश्लोकेन प्रतिऋचमिति प्रतिनियतनिर्द्देशविरोधात् । ऋक्-सूक्तादिशब्दानां वैदिकमन्त्रेष्वेव रूढ्या प्रसिद्धेः । मत्स्यसूक्तमित्यादिकाचित्कतान्त्रिकव्यवहारस्य केवल यौगिकत्वेनोपपत्तेः । तेन ऋक्पदस्य श्लोके लक्षणेत्युक्तिरपि साहसमात्रम् । समुद्रमनोध्यानादिविधौ बृहद्रथन्तरपदयोः प्रतिनियतनिर्द्देशबलादेव लक्षणाव्यवस्थाया इव प्रकृते लाप्राया एव शक्तेर्व्यवस्थादार्ढ्यस्य कैमुतिकन्यायेनैव सिद्धेः । यदि त्वेवमालोच्यते "विश्वेश्वर्यादिकं सूक्तं दृष्टं यद्ब्रह्मणा पुरा । स्तुतये योगनिद्राया मम देव्याः पुरन्दर ! ॥ महिषान्तकरी सूक्तं सर्वसिद्धिप्रदन्तथा । देव्या ययादिकं दिव्यं दृष्टं देवैः महर्षिभिः ॥ देवि ! प्रपन्नार्त्तिहरे प्रसीदेत्यादिकं तथा । नारायणीस्तुतिर्नाम सूक्तं परमशोभनम् । असुरघ्नास्तुतये दृष्टं ब्रह्माद्यैः सकलैः सुरैः ॥ नमो देव्यादिकं सूक्तं सर्वकामफलप्रदमिति" विशकलितवेषेण पाञ्चरात्रलक्ष्मीतन्त्रे व्यवहारदर्शनादेतेषां स्तोत्राणामपौरुषेयसिद्धान्तत्वाच्च सूक्तार्चव्यवहारो युज्यत एवेति, तदा कात्यायनीतन्त्रमते विश्वेश्वरीमिति श्लोकात् पूर्वं ब्रह्मोवाचेत्यस्य पाठाभावात्तदुत्तरमेव तत्पाठाच्च त्वं स्वाहेत्यारभ्यैव स्तोत्रारम्भः तस्य च योगनिद्रात्मकरात्रिदेवतात्वान्मरीचितन्त्रे रात्रिसूक्तपदेन निर्द्देश इति समाधेयम् । परन्तु तत्तन्त्रमनुसरता विश्वेश्वरीमिति श्लोकाद्धोमदशायां न होतव्यम् । स्तोत्रान्तिम श्लोकस्य द्वेधा विभागोऽपि न कार्य्यः । देवीसूक्तेऽपि त्रेधा विभागोऽङ्गहोमे न विधेयः प्रधानविधिशेषस्याङ्गविधावन्वयेन प्रतिऋचमिति पदे लक्षणाकल्पने मानाभावादित्यवधेयम् । क्रोडतन्त्रे "प्रत्येकावर्त्तनं देवि ! त्वश्वमेधेन संमितम् । त्रिरावृत्त्या लभेत्कामान् पञ्चावृत्त्या रिपून् जयेत्" । काम्ये तु प्रयोगे विशेषः । कात्यायनी तन्त्रे "एकावृत्त्यादिपाठानां प्रत्यहं पठतां नृणाम् । सङ्कल्पपूर्व्वं संपूज्य न्यस्याङ्गेषु मनून् सकृत् । पश्चाद्बलिप्रदानेन फलं प्राप्नोति मानवः" । बलिश्च ब्राह्मणादिभेदेन व्यवस्थयोक्तः कालिकापुराणे विशेषः द्रष्टव्यः । तत्राशक्तानामपि तत्रैव "कुष्माण्डमिक्षुदण्डञ्च मद्यमासव मेव च । एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः सदा" । छागसमाः पञ्चविंशतिवर्षावधितृप्तिजनकाः "अजाविकानां रुधिरैः पञ्चविंशतिवार्षिकीम् । तृप्तिमाप्नोति परमां शार्दूलरुधिरैस्तथेति" तत्रैवोक्तेः । वस्तुतस्तु "न हिंस्या दिति" निषेधस्य संकोचमन्तरेणैव छागसमानतृप्तिसम्भवे छागबलिर्ब्राह्मणैर्न कार्य्यएव । एवं मद्यासवे अपि न देये । "वरं प्राणाः प्रगच्छन्तु ब्राह्मणो नार्पयेत्सुरामिति" "ब्राह्मणो मदिरां दत्त्वा ब्राह्मण्यादेवहीयते" इति च बृहत्सङ्गमतन्त्रवचनात् । अत एव तत्प्रतिनिधिरपि कालिकापुराणे स्मर्य्यते "अवश्यं विहितं यत्र मद्यं तत्र द्विजः पुनः । नारिकेल जलङ्कांस्ये, ताम्रे चैवोत्सृजेन्मधु" । कात्यायनी तन्त्रे "उपसर्गोपशान्त्यर्थं त्रिरावृत्तिं पठेन्नरः । ग्रहदोषोपशान्त्यर्थं पञ्चावृत्तं वरानने ! ॥ महाभये समुत्पन्ने सप्तावृत्तमुदीरयेत्" इत्यादिना फलभेदेन संख्याभेदाननेकानुक्त्वोपसंहृतम् "अथ वा बहुनोक्तेन किमन्येन वरानने ! ॥ चण्ड्याः शतावृत्तपाठात्सर्वाः सिध्यन्ति सिद्धयः" इति । इतोऽप्यधिकाः सहस्रसंख्यादयोऽत्र द्रष्टव्याः । हरगौरीतन्त्रे "श्रीकामः पुत्रकामोवा सृष्टिमार्गक्रमेण तु । अमेच्छक्रादिमारभ्य शुम्भदैत्यवधावधि । आदिमारभ्य प्रजपेत्पश्चाच्छेषं समापयेत् । शान्त्यादिकामः सर्व्वत्र स्थितिमार्गक्रमेण तु । सावर्णिः सूर्य्यतनयः सावर्णिर्भविता मनुः । सङ्कटे चान्त्यमारभ्य पश्चादादि समापयेत्" । इत्यादिकस्य कामनाभेदेन पाठवैचित्र्यस्य कतिपयश्लोकमात्रपाठेन तत्तत्प्रयोगवैचित्र्यस्य च विस्तरो डामरादितन्त्रस्थोऽन्यान्तरेभ्य एवावगन्तव्यः । केरलास्तु एकैकस्मिन्दिवसे एकैकमेव चरितं पठेदिति दिनत्रयेणैकावृत्तिरित्येकः पक्षः । "चन्द्राब्धिभूवेदकरेन्दुदस्रसङ्ख्याकानध्यायान् क्रमेण दिनभेदेन पठेदिति सप्तभिर्दिनैरेका वृत्तिरित्यन्यः पक्षः इत्याहुः । अत्र द्वितीयमेव पक्षं पाठोऽयं द्विप्रकारः । इति सप्ताचार्यां संगृह्न्त बहवस्तदनुयायिनोऽनुतिष्ठन्ति कचटतपयशयगैर्विहभपिण्डान्त्यैरच रैरङ्काः नेत्रे शून्यं ज्ञेयं तथा स्वरे केवले कथिते" इति प्रसिद्धपरिभाषया पकारयकारककारा एकस्मिन् ठप्ररेफा द्वयो र्द्विशब्दस्तत्सु संकेतित इति । तत्रमूलतत्त्वाणि त एव जानन्ति । सन्त्यपि तानि तन्त्रवचनानि एकदिनेनैकावृत्त्यशक्तपराणि । अस्ति किं तादृशोऽप्यस्य प्रयोगः कात्यायनीतन्त्रे मन्त्रविभजनान्ते" होमे स्वाहान्तिमा एते पूजायां तु नमोऽन्तिमाः । तर्पणे तर्पया-

स्वन्ता अहनीयानुषैर्मताः” इति वचनात् सप्तशतब्राह्मणभोजने प्रतिव्यक्त्येकैकमन्त्रेण काण्डानुसमयेन षोडशोपचाराणां पदार्थानुसमयेन वा पञ्चोपचाराणां वा कर्त्तुमशक्यतया स्वेच्छयाऽध्यायभेदेन वाऽनेक दिनसाध्यैकप्रयोगप्रसक्तौ उक्तवचनैर्विभजननियमो विधीयत इति । अत्र स्वयं पठितुमसमर्थस्य वा प्रभोर्वा ब्राह्मणद्वाराऽपि प्रयोग इष्टः । तत्पक्षे दक्षिणा नियमस्तन्त्रेषु “पञ्चस्वर्णा शतावृत्तेः पञ्चावृत्तेस्तु तत्त्रयम् । पञ्चावृत्तेः स्वर्णमेकं त्रिरावृत्तेस्तदर्धकम् । एकावृत्तौ पादमेकं दद्याद्वा शक्तितो बुधः” इति गुप्तवती । पाठे इतिवधशब्दौ न पाठ्यौ अध्यायान्ते विधानपारिजाते स्थितम् ।

नन्दादिशक्तिभेदाश्चामर्य्यादिवीजभेदाश्च अन्यत्रोक्ता द्रष्टव्याः।

चण्ड्याः होमाङ्गत्वेन संपुटार्थत्वेन च सप्तशतमन्त्रविभागः कात्यायनीतन्त्रे दर्शितः गुप्तवत्यां च तद्वाक्यव्याख्यानपूर्वकं मन्त्रविभागे विशेषं युक्त्या निर्णीय संग्रहश्लोकैर्यथा निर्णीतं तथात्र प्रदर्श्यते। तत्र एकाध्यायात्मक प्रथमचरित्रस्य मन्त्रविभागसूचकास्तत्रत्याः श्लोका यथा

“मार्कण्डेय उवाचेति मन्त्रः प्राथमिकोमतः। सावर्ण्याद्या रुनिवराश्रमान्ताः श्लोकका दश। सोऽचिन्तयत् तदा तत्रेत्यर्धश्लोकात्मकोमनुः । मत्पूर्वैरित्युपक्रम्य सप्त श्लोका नृपान्तिमाः । अथ वैश्यः, समाध्याद्याःसंस्थितान्तास्ततस्त्रयः । किं नु तेषां कथं ते किम् इत्यर्धश्लोककौ मनू ; राजोवाच ततोयैस्तैरित्यर्धश्लोकमन्त्रकौ । मार्कण्डेयस्त नस्तौ समाधिः श्लोकार्धमन्त्रकौ । वैश्योक्तिरेवमित्याद्या वन्धुष्वन्तास्ततस्त्रयः। तेषां कृते करोमीति द्वावर्द्धश्लोकमन्त्रकौ। कृत्वा तु ताविति श्लोको राजोक्तिर्भगवन्निति। दुःखायेति च मन्त्रौ द्वावर्धश्लोकात्मकौ मतौ । ममत्वाद्यामूढतान्ताश्चत्वारोऽथ ऋषेर्वचः । ज्ञानमस्तीत्युपक्रम्य मुक्तयेऽस्मात्ततोदश । सा विद्येति च संसारेत्यर्धश्लोककौ मनू। राजोक्तिर्भगवन् केति श्लोको यत्तदिति द्वयम् । अर्द्धश्लोकात्मकस्त्वृषिर्नित्यैवेति तथापि तत् । द्वावर्धश्लोकमन्त्रौ स्तो देवानां कार्य्यमादितः । तेजसः प्रभुरित्यन्ता श्लोकाः षड् ब्रह्मणोऽथ वाक्। त्वं स्वाहा त्वं स्वधेत्याद्याः श्लोकमन्त्रास्त्रयोदश । प्रबोधं चेति बोधश्चेत्यर्धश्लोकात्मकौ मनू । ऋषिरेवं स्तुतेत्यादि विश्वन्तं श्लोकपञ्चकम् । तावपीत्युक्तवन्तावित्यर्द्ध श्लोकमनुद्वयम् । भगवांश्च भवेतां किमन्येनेत्यर्धयुग्मकम् । ऋषिवाक्यं वञ्चिताभ्यामित्येकः श्लोकमन्त्रकः । आवां जहीत्यर्धमृषिस्तथेति श्लोकयोर्युगम् । इत्यष्टसप्ततिश्लोकै७८रध्यायप्रथमात्मनः। प्रथमस्य चरित्रस्य सर्व्वे मन्त्राश्चतुःशतम्ः१०४ । तेष्वाचाङ्किता मन्त्रा द्व्येकद्व्येकत्रिपञ्चभिः । मृकण्डपुत्रभगवद्वैश्यब्रह्मनृपर्षिभिः । चतुर्द्दश स्युः श्लोकार्द्धाश्चतुर्विंशतिरीरिताः । अवशिष्टास्तु षट्षष्टिःश्लोकमन्त्रा इति स्थितिः”।

अध्यायत्रयात्मकस्य द्वितीयचरित्रस्य मन्त्रविभागसूचकास्तत्रत्याः संग्रहश्लोका यथा

“ऋषिवागष्टषष्टिः स्युः श्लोकादेवासुरादयः । एवं द्वितीयकेऽध्याये मन्त्रा एकोनसप्ततिः६९ । ऋषिर्निहन्यमानाद्याः पञ्चत्रिंशच्च मन्त्रकाः । देव्युक्तिर्गर्ज गर्जेति श्लोक एक ऋषेर्वचः । पञ्च श्लोका इति चतुश्चत्वारिंशत्४४ तृतीयके । ऋषिः शक्रादयः श्लोकाः षड्विंशतिरथर्षिवाक् । श्लोकद्वयमथो देवी श्लोकार्धं व्रियतामिति । देवा ऊचुस्त्रयः श्लोका भगवत्या कृतादिकाः । इह येऽस्मत्प्रपन्ना त्वमित्यर्धश्लोककोमनुः । ऋषेर्वचश्चतुःश्लोकीत्यध्याये तु चतुर्थके । मन्त्रा द्विचत्वारिंशत्४२ स्युरध्यायत्रितयात्मनः । मध्यमस्य चरित्रस्य पञ्चपञ्चाशदुत्तराः । शतं१५५ मन्त्रास्तेषु देव्या वचसी द्वे ऋषेस्तु षट् । देवानामेकमर्धं द्वे अन्ये श्लोका इति स्थितिः” ।

नवाध्यायात्मकस्य तृतीयचरित्रस्य मन्त्रविभागसूचकाः तत्रत्याः संग्रहश्लोका यथा

“ऋषि वाक्पुराशुम्भेत्यादयः श्लोककास्तु षट् । देवा ऊचुर्नमोदेव्या इत्यादिश्लोकपञ्चकम् । ततःश्लोकैकविंशत्या प्रतिश्लोकं त्रिशस्त्रिशः । विभागादनुषङ्गाभ्यां त्रिषष्ट्याः स्तुतयो यथा । महाकाल्याद्यर्थभेदान्नमस्तस्या इति त्रयः । मन्त्राः पूर्वोत्तरौ शेषौ या देव्यर्धं नमोनमः । तेषामाद्यन्तयोर्योज्यौ प्रतिमन्त्रक्रमेण तौ । तेन पर्य्यवसानं स्यादेकैकोमन्त्र ईदृशः । या देवीत्यर्धमुच्चार्य्य नमस्तस्यै नमोनमः । इत्युच्चरेत् त्रिपाद्गायत्र्या त्वर्धविवर्णिका । एते पूर्वार्धतुर्य्याङ्घ्रियोगेत्या एकविंशतिः । भवन्ति विष्णुमायादिभ्रान्त्यन्तपदगर्भिताः । प्रथमा विष्णुमायोक्ता द्वितीया चेतना ततः। बुद्धिर्निद्रा क्षुधा छाया शक्तिस्तृष्णा तथाष्टमी । क्षान्तिर्जातिरथो लज्जा शान्तिः श्रद्धा त्रयोदशी । कान्तिर्लक्ष्मीस्ततोवृत्तिः स्मृतिरूपेण संस्थिता । दया तुष्टिस्ततोमाता भ्रान्तिरित्येकविंशतिः । स्वस्थानदृष्ट्या त्रिः प्रोक्ता स्त्रिषष्टिर्मनवः स्मृताः । इन्द्रियाणामितिश्लोक एकमन्त्रस्तदुत्तरः । चिति

ऋषेण येत्येष प्राग्वत् मन्त्रत्रयात्मकः। स्तुता सुरैरिति श्लोकाष्टभिरेव स्तवादिकाः। श्लोकाः सप्तदशार्थर्षिर्निशम्येति मनुत्रयम्। दूतोक्तिर्देवि! दैत्येति नवश्लोका ऋषेर्वचः। इत्युक्ता सा तदेत्येकः श्लोको देवीवचस्ततः। सत्यमुक्तमिति श्लोकचतुष्कमथ दूतवाक्। अवलिप्तेति चत्वारः श्लोका देव्यास्ततोवचः। एवमेतदिति द्वावित्येकोनत्रिंशदुत्तरम्। शतं १२९ मन्त्राः पञ्चमे षट्सप्तति७६ श्लोकमण्डिते। अथर्षिरित्याकर्ण्येति चतुःश्लोकी ऋषेर्वचः। तेनाज्ञप्त इति श्लोकत्रयं देवीवचस्ततः। दैत्येश्वरेणेत्येकोऽथ ऋषिरित्युक्तद्वयमी। द्वादशेति मताः षष्ठे चतुर्विंशतिमन्त्रकाः२४। अथर्षिवाक् मयाज्ञप्ता इत्याद्यास्त्र्याढ्यविंशतिः २३। ऋषिस्तावित्युभावित्थं सप्तमे सप्तविंशतिः२७। अथर्षिर्वाणी चण्डे चेत्यारभ्याभिजघान तम्। इत्यन्तः पञ्च पञ्चाशच्छ्लोकामन्त्रास्ततःपरम्। मुखेन काली जगृहे इत्यर्धश्लोकमन्त्रकः। ततोऽसाविति षट् श्लोकास्त्रिषष्टिरित्थमष्टमे६३। राजा विचित्रमित्यादि श्लोकद्वयमथो ऋषिः। चकार कोपमित्याद्याः सप्तत्रिंशदुदीरिताः। इत्येकचत्वारिंशत्४१स्युर्नवमाध्यायमन्त्रकाः। ऋषिर्निशुम्भं निहतमिति द्वावम्बिकावचः। एकैवेति द्वयं देवी तत एकोऽहमित्यृषिः। ततः प्रवृत्ते युद्धमिति श्लोकास्त्रयोदश। तत्रापि सा निराधारेत्यर्धश्लोकात्मकोमनुः। नियुद्धं खे तदा दैत्य इत्याद्या मनवोनव। इत्येवं दशमेऽध्याये द्वात्रिंशन्मनवोमताः३२। ऋषेर्देव्या हते तत्रेत्याद्यास्त्रिंशच्चतुर्युताः३४। देवीवाग् वरदेत्येको देवाः सर्वेति चैककः। देवी वैवस्वतेत्यष्टावथ शाकम्भरी मनुः। अर्धश्लोकात्मकः पश्चाच्छ्लोकास्तत्रैव चेति षट्। एवमेकादशे मन्त्राः पञ्चपञ्चाशदीरिताः५५। देवीवागेभिरित्याद्याः श्लोका अष्टादशोदिताः। सर्वं ममैतदित्यर्धं दशाद्याः श्लोकका दश। ऋषेर्वचनमित्युक्तेत्याद्याः श्लोकास्ततस्त्रयः। निशुम्भे चेत्यर्धमनुरेवं भगवतीति षट्। इत्येकचत्वारिंशत्४१स्युर्द्वादशाध्यायमन्त्रकाः। ऋषिरेतत्त इत्यर्धश्लोको मन्त्रस्ततस्त्रयः। एवंप्रभावा सेत्याद्या मार्कण्डेय उवाच ह। इति तस्येति षट् श्लोका देवी यदिति चैककः। मार्कण्डेय उवाचाथ ततो वव्रे मनुद्वयम्। देव्युवाच ततः स्वल्पैरहोभिरिति प्रशस्ताः। अर्धश्लोकात्मका मन्त्रा मार्कण्डेयवचस्ततः। इति दत्त्वा तयोरेवं देव्यावरमिति द्वयम्। द्विर्दण्डकलितन्यायादाद्यन्तं स्याच्चतुष्टयम्। इत्येवमेकोनत्रिंशन्२९मनवःस्युः त्रयोदशे। अत्रापरे नवार्धानि केचिदेकादशाभ्यधुः न तत् कात्यायनीतन्त्रजल्पितं किन्तु कल्पितम्। इत्युत्तरचरित्रेऽस्मिन्नध्यायत्रिघना९ तानि। सम्भूय मन्त्रसंख्यैकचत्वारिंशच्चतुःशतो४४१। अर्धश्लोकात्मका मन्त्रास्तेषु द्वादश कीर्त्तिताः। त्रिपाद् मन्त्रास्तु षट्षष्टिर्द्वौश्लोकौ पुनरुक्तकौ। श्लोका अपुनरुक्तास्तु त्रिशती सप्तविंशतिः३२७। राजैको देवदूतोक्ती द्वे द्वे देव्युक्तयोदश। मार्कण्डेयोक्तयस्तिस्र ऋषिवाक्यानि षोडश। इत्युवाचाङ्किता मन्त्राश्चतुस्त्रिंशदिति ३४ स्थितिः। अथ सर्वे मिलितास्तदध्यायेषु त्रयोदशसु। पञ्च शतानि श्लोका अष्टसप्ततियुतानि५७८। तेष्वन्त्यौ श्लोकौ द्विगुणौ भवतस्त्रेधा द्वात्रिंशतिर्भागः। एकोनविंशतेश्च द्वेधा ते पञ्चषष्टिरतिरिक्ताः। ब्रह्मा भगवान्दूतोवैश्यो देवा नृपो मृकण्डुसुतः। देव्युभयश्चैकैकाद्विद्वित्रिचतुःशरार्कऋचमिताः। इति सप्ताधिकपञ्चाशदुवाचपदाङ्किता अमी अधिकाः। द्वाविंशतिशतमेषां श्लोकैर्योगेन मन्त्रसप्तशती। इति विभजनमुदितप्रतिमन्त्रं कात्यायनीतन्त्रे। तस्मादेतत् प्रकृतिकमपूर्णमन्यत्तु यामलप्रभृति। एकमन्त्रस्त्रिपान्मन्त्रः पुनरुक्तोऽर्धमन्त्रकः। उवाचाङ्कितइत्येवं मन्त्रः प्रोक्तोऽत्र पञ्चधा। मन्त्रपिण्डः श्लोकपिण्डोऽध्यायपिण्ड इति त्रिधा।” गुप्तवती

नागोजीभट्टकृतविभागस्त्वन्यादृशः विस्तरभयान्नोक्तः उभयोश्च युक्तायुक्तत्वमुभयग्रन्थदर्शनेन सुधीभिर्विचिन्त्यम्।

तदयं संक्षेपः।

अध्यायः	श्लोकः	श्लोकात्मा	अर्द्धश्लोकात्मा	त्रिपाद्	उवाचाङ्कितः	मन्त्रः
१च० १	७८	६६	२४	०	१४	१०४
२	६८	६८	०	०	१	६९
३	४१	४१	०	०	३	४४
४	३६	३५	२	०	५	४२
२च०२	१४५	१४४	२	०	९	१५५
५	७६	५४	०	६६	९	१२९
६	२०	२०	०	०	४	२४
७	२५	२५	०	०	२	२७
८	६१॥	६१	१	०	१	६३

अध्यायः	श्लोकः	श्लोकात्मा	अर्द्धश्लोकात्मा	त्रिपाद्	उवाचाङ्कितः	मन्त्रः
९	३९	३९	०	०	२	४१
१०	२७॥	२७	१	०	४	३२
११	५०॥	५०	१	०	४	५५
१२	३८	३७	२	०	२	४१
१३	१७॥	१४	७	०	६	पुनरुक्त२२९
३च० ९	३५५	३२७	१२	६६	३४	पुनरुक्त२४४१
समष्टिः१३	५७८	५३७	३८	६६	५७	पुनरुक्त२ ७००

अस्या रहस्यमुक्तं मार्कण्डेय पु० प्राधानिकादिरहस्ये “राजोवाच। भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः। एतेषां प्रकृतिम्ब्रह्मन्! प्रधानं वक्तुमर्हसि। आराध्यं यन्मया देव्याः स्वरूपं येन च द्विज!। विधिना! ब्रूहि सकलं यथावत् प्रणतस्य मे। ऋषिरु०“इदं रहस्यं परममनाख्येयं प्रचक्षते। भक्तोऽसीति न मे किञ्चित्तवावाच्यं नराधिप!। सर्व्वस्याद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी। लक्ष्यालक्ष्यस्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता। मातुलिङ्गङ्गदां खेटं पानपात्रं च बिभ्रती। नागं लिङ्गं च योनिञ्च बिभ्रती नृप मूर्द्धनि। तप्तकाञ्चनवर्णाभा तप्तकाञ्चनभूषणा। शून्यं तदखिलं स्वेन पूरयामास तेजसा। शून्यं तदखिलं लोकं विलोक्य परमेश्वरी। बभार रूपमपरन्तमसा केवलेन हि। सा भिन्नाञ्जनसंकाशा दंष्ट्राञ्चितवरानना। विशाललोचना नारी बभूव तनुमध्यमा। खड्गपात्रशिरःखेटैरलङ्कृतचतुर्भुजा। कबन्धहारं शिरसा बिभ्राणा हि शिरःस्रजम्। ताञ्चोवाच महालक्ष्मीस्तामसीं प्रमदोत्तमाम्। ददामि तव नामानि यानि कर्म्माणि तानि ते। महामाया महाकाली महामारी क्षुधा तृषा। निद्रा तृष्णा चैकवीरा कालरात्रिर्दुरत्यया। इमानि तव नामानि प्रतिपाद्यानि कर्म्मभिः। एभिः कर्म्माणि ते ज्ञात्वा योऽधीते सोऽश्नुते सुखम्। तामित्युक्त्वा महालक्ष्मीः स्वरूपमपरन्नृप। सत्त्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभन्दधौ। अक्षमालाङ्कुशधरा वीणापुस्तकधारिणी। सा बभूव वरा नारी नामान्यस्यै च सा ददौ। महाविद्या महावाणी भारती वाक् सरस्वती। आर्य्या ब्राह्मी महाधेनुर्वेदगर्भा सुरेश्वरी। अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीम्। युवां जनयतान्देव्यौ मिथुने स्वानुरूपतः। इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयम्। हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ। ब्रह्मन्विधे विरिञ्चेति धातरित्याह तं वरम्। श्रीःपद्मे कमले लक्ष्मीत्याह माता स्त्रियञ्च ताम्। महाकाली भारती च मिथुने सृजति स्म ह। एतयोरपि रूपाणि नामानि च वदामि ते। नीलकण्ठं रक्तबाहुं श्वेताङ्गं चन्द्रशेखरम्। जनयामास पुरुषं महाकाली सितां स्त्रियम्। स रुद्रः शङ्करः स्थाणुः कपर्द्दी च त्रिलोचनः। त्रयी विद्या कामधेनुः शास्त्रीभाषाक्षरास्वरा। सरस्वती स्त्रियङ्गौरीं कृष्णं च पुरुषं नृपः। जनयामास नामानि तयोरपि वदामि ते। विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः। उमा गौरी सती चण्डी सुन्दरी सुभगा शिवा। एवं युवतयः सद्यःपुरुषत्वं प्रपेदिरे। चक्षुष्मन्तोऽनुपश्यन्ति नेतरेऽतद्विदो जनाः। ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप त्रयीम्। रुद्राय गौरीं वरदां वासुदेवाय च श्रियम्। स्वरया सह सम्भूय विरिञ्चोऽण्डमजीजनत्। अण्डमध्ये बिभेद भगवान्रुद्रस्तद्गौर्य्या सह वीर्यवान्। प्रधानादि कार्य्यजातमभून्नृप!। महाभूतात्मकं सर्वं जगत्स्थावरजङ्गमम्। पुपोष पालयामास तं लक्ष्म्या सह केशवः। महालक्ष्मीरेवमजा राजन्! सर्वैश्वर्येश्वरी। निराकारा च साकारा सैव नानाभिधानभृत्। नामान्तरैर्निरूप्यैषा नाम्ना नान्येन केनचित्” १४अ०। “ऋषिरुवाच। त्रिगुणा तामसी देवी सात्त्विकी या त्रिधोदिता। सा शर्वा चण्डिका दुर्गा भद्रा भगवतीर्य्यते। योगनिद्रा हरेरुक्ता महाकाली तमोगुणा। मधुकैटभनाशार्थं यान्तुष्टावाम्बुजासनः। दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा। विशालया राजमाना त्रिंशल्लोचनमालया। स्फुरद्दशनदंष्ट्रा सा भीमरूपापि भूमिप!। रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियाम्। खड्गबाणगदाशूलचक्रशङ्खभुशुण्डिभृत्। परिघं कार्म्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ। एषा सा वैष्णवी माया महाकाली दुरत्यया। आराधिता वशीकुर्य्यात्पूजाकर्त्तुश्चराचरम्। सर्वदेवशरीरेभ्यो याऽऽविर्भूताऽमितप्रभा। त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्द्दिनी। श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला। रक्तमध्या रक्तपादा नीलजङ्घोरुरुन्मदा। सुचित्रजघना चित्रमाल्याम्बरविभूषणा। चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी। अष्टादशभुजा पूज्या सा सहस्रभुजा सती। आयुधान्यत्र वक्ष्यन्ते दक्षिणाधःकर-

क्रमात् । अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा । चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः । शक्तिर्दण्डश्चर्म्म चापं पानपात्रं कमण्डलुः । अलङ्कृतभुजामेभिरायुधैः कमलासनाम् । सर्व्वदेवमयीमीशां महालक्ष्मीमिमां नृप ! । पूजयेत्सर्व्वदेवानां स लोकानां प्रभुर्भवेत् । गौरीदेहात्समुद्भूता या सत्त्वैकगुणाश्रया । साक्षात्सरस्वती प्रोक्ता शुम्भासुरनिवर्हिणी । दधौ चाष्टभुजा बाणमुषले शूलचक्रभृत् । शङ्खं घण्टां लाङ्गलञ्च कार्म्मुकं वसुधाधिप ! । एषा संपूजिता भक्त्या सर्व्वज्ञत्वं प्रयच्छति । निशुम्भमथिनी देवी शुम्भासुरनिवर्हिणी । इत्युक्तानि स्वरूपाणि मूर्त्तीनान्तव पार्थिव ! स्वरूपाणि जगन्मातुः, पृथगर्च्चां निशामय । महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती । दक्षिणोत्तरयोः पूज्ये पृष्ठतो मिथुनत्रयम् । विरिञ्चिः स्वरया मध्ये रुद्रो गौर्य्या च दक्षिणे । वामे लक्ष्म्या हृषीकेश इत्येवन्देवतात्रयम् । अष्टादशभुजा मध्ये वामे चास्या दशानना । दक्षिणेऽष्टभुजा लक्ष्मीर्महती तां समर्च्चयेत् ! अष्टादशभुजा चैषा यदा पूज्या नराधिप ! । दशानना चाष्टभुजा दक्षिणोत्तरयोस्तदा । कालमृत्यू च संपूज्यौ सर्व्वारिष्टप्रशान्तये । यदा चाष्टभुजा पूज्या शुम्भासुरनिवर्हिणी । नवास्याः शक्तयः पूज्यास्तदा रुद्रविनायकौ । नमो देव्या इति स्तोत्रैर्महालक्ष्मीं समर्च्चयेत् । अवतारत्रयार्च्चायां स्तोत्रमन्त्रास्तदाश्रयाः । अष्टादशभुजा चैषा पूज्या महिषमर्द्दिनी । महालक्ष्मीर्महाकाली महती च सरस्वती । ईश्वरी पुण्यपापानां सर्व्वलोकमहेश्वरी । महिषान्तकरी येन पूजितासौ जगत्प्रभुः । पूजयेज्जगतां धात्रीं चण्डिकां भक्तवत्सलाम् । अर्घ्यादिभिरलङ्कारैर्गन्धपुष्पैस्तथोत्तमैः । धूपैर्दीपैः सनैवेद्यैः नानाभक्ष्यसमन्वितैः । रुधिराक्तेन बलिना मांसेन सुरया नृप ! ! सुरभिणा स्नानीयेन चन्दनेन सुगन्धिना । सकर्पूरैश्च ताम्बूलैर्भक्तिभावसमन्वितैः । वामभागेऽग्रतो देव्याः छिन्नशीर्षं महासुरम् । पूजयेन्महिषं येन गतं सायुज्यमीशया । दक्षिणे पुरतः सिंहमत्युग्रं धर्म्ममीश्वरम् । ततः कृताञ्जलिर्भूत्वा स्तुवीत चरितैस्त्रिभिः । एकेन वा मध्यमेन नैकेनेतरयोरिह । चरितार्द्धञ्च न जपेज्जपन् छिद्रमवाप्नुयात् । स्तोत्रमन्त्रैः स्तुवीतेमां यदि वा जगदम्बिकाम् । प्रदक्षिणनमस्कारं कृत्वा मूर्द्ध्नि कृताञ्जलिः । क्षमापयेज्जगद्धात्रीं मुहुर्म्मुहुरतन्द्रितः । प्रतिश्लोकञ्च जुहुयात्पायसं तिलसर्पिषा । जुहुयात्स्तोत्रमन्त्रैर्वा चण्डिकायै शुभं हविः । नमोनमः पदैर्द्देवीं पूजयेत् सुसमाहितः । प्रयतः प्राञ्जलिः प्रह्वः प्राणानारोप्य चात्मनि । सुचिरम्भावयेदीशां चण्डिकान्तन्मयो भवेत् । एवं यः पूजयेद्भक्त्या प्रत्यहं परमेश्वरीम् । भुक्त्वा भोगान्यथाकामं देवीसायुज्यमाप्नुयात् । यो न पूजयते नित्यं चण्डिकां भक्तवत्सलाम् । भस्मीकृत्यास्य पुण्यानि निर्द्दहेत्परमेश्वरी । तस्मात्पूजय भूपाल ! सर्व्वलोकमहेश्वरीम् । यथोक्तेन विधानेन चण्डिकां सुखमाप्स्यसि” १५ अ० ।

“ऋषिरुवाच । नन्दा[१] भगवती नाम या भविष्यति नन्दजा । संस्तुता पूजिता ध्याता वशीकुर्य्याज्जगत्त्रयम् । कनकोत्तमकान्तिः सा सुकान्तिकनकाम्बरा । देवी कनकदामाढ्या कनकोत्तमभूषणा । कमलाङ्कुशपाशाब्जैरलङ्कृतचतुर्भुजा । इन्दिरा कमला लक्ष्मीः सा श्रीरुक्माम्बुजासना[१] । या रक्तदन्तिका[२] नाम देवी प्रोक्ता मयानघ । तस्याः स्वरूपं वक्ष्यामि शृणु सर्व्वभयापहम् । रक्ताम्बरा रक्तवर्णा रक्तसर्व्वाङ्गभूषणा । रक्तायुधा रक्तनेत्रा रक्तकेशाऽतिभीषणा । रक्ततीक्ष्णनखा रक्तदशना रक्तदंष्ट्रिका । पतिं नारीवानुरक्ता देवी भक्तं भजेज्जनम् । वसुधाभनितम्बा सा सुमेरुयुगलस्तनी । दीर्घौ लम्बावतिस्थूलौ तावतीव मनोहरौ । कर्कशावतिकान्तौ तौ सर्व्वानन्दपयोनिधी । भक्तान् सम्पाययेद्देवी सर्व्वकामदुघौ स्तनौ । खड्गपात्रं च मुषलं लाङ्गलञ्च बिभर्त्ति सा । आख्याता रक्तचामुण्डा देवी योगेश्वरीति सा । अनया व्याप्तमखिलं जगत्स्थावरजङ्गमम् । इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरम् । अधीते य इमं नित्यं रक्तदन्तीवपुस्तवम् । तं सा परिचरेद्देवी पतिं प्रियमिवाङ्गना[२] । शाकम्भरी[३] नीलवर्णा नीलोत्पलविभूषणा । गम्भीरनाभिस्त्रिवलीविभूषिततनूदरी । सुकर्कशसमोत्तुङ्गवृत्तपीनघनस्तनी । मुष्टिं शिलीमुखैः पूर्णं कमलं कमलालया । पुष्पपल्लवमूलादिफलादिशाकसञ्चयान् । काम्यानन्तरसैर्युक्तं क्षुत्तृण्मृत्युजरापहम् । कार्म्मुकञ्च स्फुरत्कान्तिबिभर्त्ति परमेश्वरी । शाकम्भरी शताक्षी स्यात्सैव दुर्गा[४] प्रकीर्त्तिता । शाकम्भरीं स्तुवन्ध्यायन् जपन्संपूजयन्नमन् । अक्षय्यमश्नुते शीघ्रमन्नपानादि सर्व्वशः । भीमाऽपि[२] नीलवर्णा सा दंष्ट्रादशनभासुरा ।

विशाललोचना नारी वृत्तपीनघनस्तनी । चन्द्रहासं च डमरुं शरं पात्रञ्च बिभ्रती । एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता५ । तेजोमण्डलदुर्धर्षाभ्रामरी६ चित्रकान्तिभृत् । चित्रभ्रमरपाणिः सा महामारीति गीयते६ । इत्येतामूर्त्तयोदेव्या व्याख्याता वसुधाधिप ! । जगन्मातुश्चण्डिकायाः कीर्त्तिताः कामधेनवः । इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया । व्याख्यानं दिव्यमूर्त्तीनामधीष्वावहितः स्वयम् । देव्याध्यानं मया प्रोक्तं गुह्याद्गुह्यतरम्महत् । तस्मात्सर्व्वप्रयत्नेन सर्व्वकामफलप्रदम् । १६ अ० ।

शतचण्डीविधानं मन्त्रमहोदधौ १८ तरङ्गे नवार्ण प्रयोगानन्तरं प्रतिपादितं यथा

‘‘शतचण्डीविधानन्तु प्रवक्ष्ये प्रीतये नृणाम् । नृपोपद्रवआपन्ने दुर्भिक्षे भूमिकम्पने । अतिवृष्टावनावृष्टौ परचक्रभये क्षये । सर्व्वे विघ्ना विनश्यन्ति शतचण्डीविधौ कृते । रोगाणां वैरिणां नाशो धनपुत्त्रसमृद्धयः । शङ्करस्य भवान्या वा प्रासादनिकटे शुभम् । मण्डपं द्वारवेद्याढ्यं कुर्य्यात् सध्वजतोरणम् । तत्र कुण्डं प्रकुर्व्वीत प्रतीच्यां मध्यतोऽपि वा । स्नात्वा नित्यकृतिं कृत्वा वृणुयाद्दश वाडवान् । जितेन्द्रियान् सदाचारान् कुलीनान् सत्यवादिनः । व्युत्पन्नांश्चण्डिकापाठरताँश्च्छादयावतः । मधुपर्कविधानेन वस्त्रस्वर्णादिदानतः । जपार्थमासनं मालां दद्यात्तेभ्योऽपि भोजनम् । ते हविष्यान्नमश्नन्तो मन्त्रार्थगतमानसाः । भूमौ शयानाः प्रत्येकं जपेयुश्चण्डिकास्तवम् । मार्कण्डेयपुराणोक्तं दशकृत्वः सचेतसः । नवार्णं चण्डिकामन्त्रं जपेयुश्चाऽयुतं पृथक् । यजमानः पूजयेच्च कन्यानां नवकं शुभम् । द्विवर्षाद्द्वादशाब्दान्ताः कुमारीः परिपूजयेत् । नाधिकाङ्गां न हीनाङ्गीं कुष्ठिनीञ्च व्रणाङ्किताम् । अन्धां काणां केकराञ्च कुरूपां रोमयुक्तनुम् । दासीजातां रोगयुक्तां दुष्टां कन्यां न पूजयेत् । विप्रां सर्व्वेष्टसंसिद्ध्यै यशसे क्षत्त्रियोद्भवाम् । वैश्यजां धनलाभाय पुत्त्राप्त्यै शूद्रजां यजेत् । द्विवर्षा सा कुमार्य्युक्ता त्रिमूर्त्तिर्हायनत्रिका । चतुरब्दा तु कल्याणी पञ्चवर्षा तु रोहिणी । षडब्दा कालिका प्रोक्ता चण्डिका सप्तहायनी । अष्टवर्षा शाम्भवी स्याद्दुर्गा च नवहायनी । सुभद्रा दशवर्षोक्ता ता मन्त्रैः परिपूजयेत् । एकाब्दायाः प्रीत्यभावो रुद्राब्दा तु विवर्जिता । तासामावाहने मन्त्रः प्रोच्यते शङ्करोदितः । मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् । नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् । कुमारिकादिकन्यानां पूजामन्त्रान् ब्रुवेऽधुना । जगत्पूज्ये ! जगद्वन्द्ये ! सर्व्वदेवस्वरूपिणि । पूजां गृहाण कौमारि !१ जगन्मातर्नमोऽस्तु ते । त्रिपुरां२ त्रिपुराधारां त्रिवर्गज्ञानरूपिणीम् । त्रैलोक्यवन्दितां देवीं त्रिमूर्त्तिं पूजयाम्यहम् । कालात्मिकां कलातीतां कारुण्यहृदयां शिवाम् । कल्याणजननीं देवीं कल्याणीं३ पूजयाम्यहम् । अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम् । अनन्तशक्तिकां लक्ष्मीं रोहिणीं४ पूजयाम्यहम् । कामचारीं शुभां कान्तां कालचक्रस्वरूपिणीम् । कामदां करुणोदारां कालिकां५ पूजयाम्यहम् । चण्डवीरां चण्डमायां चण्डमुण्डप्रभञ्जिनीम् । पूजयामि महादेवीं चण्डिकां६ चण्डविक्रमाम् । सदानन्दकरीं शान्तां सर्व्वदेवनमस्कृताम् । सर्व्वभूतात्मिकां देवीं शाम्भवीं७ पूजयाम्यहम् । दुर्गमे दुस्तरे कार्य्ये भवार्णवविनाशिनीम् । पूजयामि सदा भक्त्या दुर्गां८ दुर्गार्त्तिनाशिनीम् । सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् । सुभद्रजननीं देवीं सुभद्रां९ पूजयाम्यहम् । एतैर्मन्त्रैः पुराणोक्तैस्तां तां कन्यां प्रपूजयेत् । गन्धैः पुष्पैर्भक्ष्यभोज्यैर्वस्त्रैराभरणैरपि । वेद्यां विरचिते रम्ये सर्व्वतोभद्रमण्डले । घटं संस्थाप्य विधिवत्तत्रावाह्यार्च्चयेच्छिवाम् । तदग्रे कन्यकाश्चापि पूजयेद्ब्राह्मणानपि । उपचारैस्तु विविधैः पूर्व्वोक्तावरणान्यपि । एवं चतुर्द्दिनं कृत्वा पञ्चमे होममाचरेत् । पायसान्नं त्रिमध्वक्तं द्राक्षारम्भाफलैरपि । मातुलुङ्गैरिक्षुखण्डैर्नारिकेलैः पुरैस्तिलैः । जातिफलैराम्रफलैरन्यैर्मधुरवस्तुभिः । सप्तशत्या दशावृत्त्या प्रतिश्लोकं हुतञ्चरेत् । अयुतञ्च नवार्णेन स्थापितेऽग्नौ विधानतः । कृत्वाऽऽवरणदेवानां होमं तन्नाममन्त्रतः । कृत्वा पूर्णाहुतिं सम्यग्देवमग्निं विसृज्य च । अभिषिञ्चेच्च यष्टारं विप्रौघः कलसोदकैः । निष्कं सुवर्णमथ वा प्रत्येकं दक्षिणां दिशेत् । भोजयेच्च शतं विप्रान् भक्ष्यभोज्यैः पृथग्विधैः । तेभ्योऽपि दक्षिणान्दत्त्वा गृह्णीयादाशिषस्ततः । एवं कृते जगद्वश्यं सर्व्वे नश्यन्त्युपद्रवाः । राज्यं धनं यशः पुत्त्रानिष्टमन्यं लभेत सः’’ ।

सहस्रचण्डीविधानं तत्रैव १८ तरङ्गे

"एतद्दशगुणं कुर्य्याच्चण्डीसाहस्रिकं विधिम्। विद्यावतः सदाचारान् ब्राह्मणान् वृणुयाच्छतम्। प्रत्येकं चण्डिकापाठान् विदध्युस्ते दिशा१० मितान्। अयुतं प्रजपेयुस्ते प्रत्येकं च नवार्णकम्। पूर्व्वोक्ताः कन्यकाः पूज्याः पूर्व्वमन्त्रैः शतं शुभाः। दशाहमेवं संपाद्य होमं कुर्य्युः प्रयत्नतः। सप्तशत्याः शतावृत्त्या प्रतिश्लोकं विधानतः। लक्षसंख्यं नवार्णेन पूर्व्वोक्तैर्द्रव्यसञ्चयैः। होतृभ्यो दक्षिणान्दत्त्वा पूर्व्वोक्तान् भोजयेद्द्विजान्। सहस्रसंमितान् साधून् देव्याराधनतत्परान्। एवं सहस्रसंख्याके कृते चण्डीविधौ नृणाम्। सिध्यत्यभीप्सितं सर्वं दुःखौघश्च विनश्यति। मारीदुर्भिक्षरोगाद्या नश्यन्ति व्यसनोच्चयाः। नेमं विधिं वदेद्दुष्टे खले चौरे गुरुद्रुहि! साधौ जितेन्द्रिये दान्ते वदेद्विधिमिमं परम्। एवं सा चण्डिका तुष्टा वक्तृन् श्रोतृंश्च रक्षति"।

चण्डीनवाक्षरविधानं तत्रैव १८तरङ्गे

"अथोनवाक्षरमन्त्रं वक्ष्ये चण्डीप्रसत्तये। वाङ्माया मदनो दीर्घलक्ष्मीस्तन्द्रा श्रुतीन्दुयुक्। डायै सटक् जलं कूर्म्मद्वयं झिण्टीशसंयुतम्। (ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे) नवाक्षरोऽस्य ऋषयो ब्रह्मविष्णुमहेश्वराः। छन्दांस्युक्तानि मुनिभिर्गायत्र्युष्णिगनुष्टुभः। देव्यः प्रोक्ता महापूर्व्वा काली लक्ष्मीः सरस्वती। नन्दाशाकम्भरी भीमाः शक्तयोऽस्य मनोः स्मृताः। स्याद्रक्तदन्तिकादुर्गाभ्रामर्य्योवीजसञ्चयः। अग्निवायुभगास्तत्त्वम्फलं वेदत्रयोदितम्। सर्व्वाभीष्टप्रसिद्ध्यर्थं विनियोगउदाहृतः। ऋषिच्छन्दोदैवतानि शिरोमुखहृदि न्यसेत्। शक्तिवीजानि स्तनयोस्तत्त्वानि हृदये पुनः। एकैनैकेन चैकेन चतुर्भिर्युगलेन च। समस्तेन च मन्त्रेण कुर्य्यादङ्गानि षट् सुधीः। ततएकादश न्यासान् कुर्वीतेष्टफलप्रदान्। प्रथमोमातृकान्यासः कार्य्यः पूर्व्वोक्तमार्गतः। कृतेन येन देवस्य सारूप्यं याति मानवः। अथ द्वितीयं कुर्व्वीत न्यासं सारस्वताभिधम्। वीजत्रयन्तु मन्त्राद्यं तारादि हृदयान्तिकम्। क्रमादङ्गुलिषु न्यसेत् कनिष्ठाद्यासु पञ्चसु। करयोर्मध्यतः पृष्ठे मणिबन्धे च कुर्परे। हृदयादिषडङ्गेषु विन्यसेत् जातिसंयुतम्। अस्मिन् सारस्वते न्यासे कृते जाड्यं विनश्यति। ततस्तृतीयं कुर्व्वीत न्यासं मातृगणान्वितम्। मायावीजादिका ब्राह्मी पूर्व्वतः पातु मां सदा। माहेश्वरी तथाग्नेय्यां कौमारी दक्षिणेऽवतु। वैष्णवी पातु नैर्ऋत्ये वाराही पश्चिमेऽवतु। इन्द्राणी वायुकोणे च चामुण्डा चोत्तरेऽवतु। ऐशाने तु महालक्ष्मीरूर्द्ध्वं व्योमेश्वरी तथा। सप्तद्वीपेश्वरी भूमौ रक्षेन्नागेश्वरी तले। तृतीयेऽस्मिन् कृते न्यासे त्रैलोक्यविजयी भवेत्। न्यासं चतुर्थं कुर्व्वीत नन्दजादिसमन्वितम्। नन्दजा पातु पूर्व्वाङ्गे कमलाङ्कुशमण्डिता। खड्गपात्रकरा पातु दक्षिणे रक्तदन्तिका। पृष्ठे शाकम्भरी पातु पुष्पपल्लवसंयुता। धनुर्वाणकरा दुर्गा वामे पातु सदैव माम्। शिरःपात्रकरा भीमा मस्तकाच्चरणावधि। पादादि मस्तकं यावद्भ्रामरी चित्रकान्तिभृत्। तुर्य्यं न्यासं नरः कुर्वन् जरामृत्यू व्यपोहति। अथ कुर्वीत ब्रह्माद्यं न्यासं पञ्चममुत्तमम्। पादादिनाभिपर्य्यन्तं ब्रह्मा पातु सनातनः। नाभेर्विशुद्धिपर्य्यन्तं पातु नित्यं जनार्द्दनः। विशुद्धेर्ब्रह्मरन्ध्रान्तं पातु रुद्रस्त्रिलोचनः। हंसः पातु पदद्वन्द्वं वैनतेयः करद्वयम्। चक्षुषी वृषभः पातु सर्वाङ्गाणि गजाननः। परापरौ देहभागौ पात्वानन्दमयोहरिः। कृतेऽस्मिन् पञ्चमे न्यासे सर्वान् कामानवाप्नुयात्। षष्ठं न्यासं ततः कुर्य्यान्महालक्ष्म्यादिसंयुतम्। मध्यं पातु महालक्ष्मीरष्टादशभुजान्विता। ऊर्द्ध्वं सरस्वती पातु भुजैरष्टाभिरूर्जिता। अधः पातु महाकाली दशबाहुसमन्विता। सिंहोहस्तद्वयं पातु मम हंसोऽक्षियुग्मकम्। महिषं दिव्यमारूढोयमः पातु पदद्वयम्। महेशश्चण्डिकायुक्तः सर्वाङ्गाणि ममावतु। षष्ठेऽस्मिन् विहिते न्यासे सद्गतिं प्राप्नुयान्नरः। मूलाक्षरन्यासरूपं न्यासं कुर्वीत सप्तमम्। ब्रह्मरन्ध्रे नेत्रयुगे श्रुत्योर्नासिकयोर्मुखे। पायौ मूलमनोर्वर्णांस्ताराद्यान्नमसाऽन्वितान्। विन्यसेत् सप्तमे न्यासे कृते रोगक्षयोभवेत्। पायुतो ब्रह्मरन्ध्रान्तं पुनस्तानेव विन्यसेत्। कृतेऽस्मिन्नष्टमे न्यासे सर्वदुःखं विनश्यति। कुर्वीत नवमं न्यासं मन्त्रव्याप्तस्वरूपकम्। मस्तकाच्चरणं यावच्चरणान्मस्तकावधि। पुरोदक्षे पृष्ठदेशे वामभागे ऽष्टशो न्यसेत्। मूलमन्त्रं कृतोन्यासो नवमो देवताप्तिकृत्। ततः कुर्वीत दशमं षडङ्गन्यासमुत्तमम्। मूलमन्त्रं जातियुक्तं(दीर्घस्वरयुक्तम्)हृदयादिषु विन्यसेत्। कृतेऽस्मिन् दशमे न्यासे त्रैलोक्यं वशगं भवेत्। दशन्यासोक्तफलदं कुर्य्यादेकादशं ततः। खड्गिनी शूलिनीत्यादि(१अ०६१—६५) पठित्वा श्लोकपञ्चकम्। आद्यं(ऐँ)कृष्णतरं वीजं ध्यात्वा सर्वाङ्गके न्यसेत्।

मूलेन पाहि नो देवीत्यादि (४अ०२३—२६) श्लोकचतुष्टयम्। पठित्वा सूर्य्यसदृशं द्वितीयं (ह्रीँ) सर्व्वतोन्यसेत्। सर्व्वस्वरूपे सर्व्वेशे इत्यादि (११अ०२३—२७) श्लोकपञ्चकम्। पठित्वा स्फटिकाभासं तृतीयं (क्लीँ) स्वतनौ न्यसेत्। ततः षडङ्गं कुर्व्वीत विभक्तैर्मूलवर्णकैः। एकेनैकेन चैकेन चतुर्भिर्युगलेन च। समस्तेन च मन्त्रेण कुर्य्यादङ्गानि षट् सुधीः। शिखायां नेत्रयोः श्रुत्योर्नसोर्वक्त्रे गुदे न्यसेत्। मन्त्रवर्णान् समस्तेन व्यापकं त्वष्टशश्चरेत्। खड्गं चक्रगदेषुचापपरिघान् शूलं भुशुण्डीं शिरः शङ्खं सन्दधतीं करैस्त्रिनयनां सर्व्वाङ्गभूषावृताम्। नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां यामस्तौत् शयिते हरौ कमलजो हन्तुं मधुकैटभौ। अक्षस्रक्परशू गदेषुकुलिशं पद्मं धनुः कुण्डिकां दण्डं शक्तिमसिञ्च चर्म्म जलजं घण्टां सुराभाजनम्। शूलं पाशसुदर्शने च दधतीं हस्तैः प्रवालप्रभां सेवे सैरिभमर्द्दिनीमिह महालक्ष्मीं सरोजस्थिताम्। घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकं हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम्। गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महापूर्व्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्द्दिनीम्। एवं ध्यात्वा जपेल्लक्षचतुष्कं तद्दशांशतः। पायसान्नेन जुहुयात् पूजिते हेमरेतसि। जयादिशक्तिभिर्युक्ते पीठे देवीं यजेत्ततः। तत्त्व२५पत्राष्टतत्र्यस्रे षट्कोणाष्टदलान्विते। त्रिकोणमध्ये संपूज्य ध्यात्वा तां मूलमन्त्रतः। पूर्व्वकोणे विधातारं स्वशक्त्या सह पूजयेत्। विष्णुं श्रिया च नैर्ऋत्ये, वायव्ये उमया शिवम्। उदग्दक्षिणयोः सिंहं महिषञ्च क्रमाद्यजेत्। षट्कोणेषु च पूर्व्वादौ नन्दजां रक्तदन्तिकाम्। शाकम्भरीं तथा दुर्गां भीमाञ्च भ्रामरीं यजेत्। सविन्दुनामवर्णाद्यास्ताराद्याश्च नमोऽन्तिमाः। नन्दजाद्या यजेच्छक्तीर्वक्ष्यमाणा अपीष्टधीः। अष्टपत्रेषु ब्रह्माणी पूज्या माहेश्वरी परा। कौमारी वैष्णवी चाथ वाराही नारसिंह्यपि। पश्चादैन्द्री च चामुण्डा तथा तत्त्व २५ दलेष्विमाः। विष्णुमाया चेतना च बुद्धिर्निद्रा क्षुधा ततः। छाया शक्तिः परा तृष्णा क्षान्तिर्ज्जातिश्च लज्जया। शान्तिः श्रद्धा कान्तिलक्ष्म्यौ धृतिर्वृत्तिः श्रुतिः स्मृतिः। दया तुष्टिस्ततः पुष्टिर्माता भ्रान्तिरिति क्रमात्। बहिर्भूगृहकोणेषु गणेशः क्षेत्रपालकः। वटुकश्चापि योगिन्यः पूज्या इन्द्रादिका अपि। एवं सिद्धे मनौ मन्त्री भवेत् सौभाग्यभाजनम्। मार्कण्डेयपुराणोक्तं नित्यं चण्डीस्तवं पठन्। पुटितं मूलमन्त्रेण जपन्नाप्नोति वाञ्छितम्। आश्विनस्य सिते पक्षे आरभ्याग्नितिथिं सुधीः। अष्टम्यन्तं जपेल्लक्षं दशांशं होममाचरेत्। प्रत्यहं पूजयेद्देवीं पठेत् सप्तशतीमपि। विप्रानाराध्य मन्त्री स्वमिष्टार्थं लभतेऽचिरात्। सप्तशत्याश्चरित्रे तु प्रथमे पद्मभूर्मुनिः। छन्दो गायत्र्युदितं महाकाली तु देवता। वाग्वीजं (ऐँ) पावकस्तत्त्वं धर्म्मार्थे विनियोजनम्। मध्यमे च चरित्रे तु मुनिर्विष्णुरुदाहृतः। उष्णिक्छन्दो महालक्ष्मीर्द्देवता वीजमद्रिजा(ह्रीँ)। वायुस्तत्त्वं धनप्राप्त्यै विनियोग उदाहृतः। उत्तरस्य चरित्रस्य ऋषिः शङ्कर ईरितः। त्रिष्टुप्छन्दो देवता च महापूर्व्वा सरस्वती। कामोवीजं (क्लीँ) रविस्तत्त्वं कामाप्त्यै विनियोजनम्। एवं संस्मृत्य ऋष्यादीन् ध्यात्वा पूर्व्वोक्तमार्गतः। सार्थस्मृति पठेच्चण्डीस्तवं स्पष्टपदाक्षरम्। समाप्तौ तु महालक्ष्मीं ध्यात्वा कृत्वा षडङ्गकम्। जपेदष्टशतं१०८ मूलं देवतायै निवेदयेत्। एवं यः कुरुते सोऽत्र नावसीदति जातुचित्। चण्डिकां प्रभजन्मर्त्त्यो धनैर्धान्यैर्यशश्चयैः। पुत्रैः पौत्रैस्तथाऽऽरोग्यैर्युक्तो जीवेद्बह्वः समाः"।

निर्णयसि० २परि० शतचण्डीविधौ विशेष उक्तो यथा रुद्रयामले "शतचण्डीविधानञ्च प्रोच्यमानं शृणुष्व तत् सर्व्वोपद्रव्यनाशार्थं शतचण्डीं समारभेत्। षोड़शस्तम्भसंयुक्तं मण्डपं पल्लवोज्ज्वलम्। वह्निकोणयुतां वेदीं मध्ये कुर्य्यात्त्रिभागतः। पक्वेष्टकचितां रम्यामुच्छ्राये हस्तसम्मिताम्। पञ्चवर्णरजोभिश्च कुर्य्यान्मण्डलकं शुभम्। पञ्चवर्णवितानञ्च किङ्किणीजालमण्डितम्। आचार्य्येण समं विप्रान् वरयेद्दश सुव्रतान्। ऐशान्यां स्थापयेत्कुम्भं पूर्व्वोक्तविधिनाचरेत्। वारुण्याञ्च प्रकर्त्तव्यं कुण्डं लक्षणलक्षितम्। मूर्त्तिं देव्याः प्रकुर्व्वीत सुवर्णस्य पलेन वै। तदर्द्धेन तदर्द्धेन तदर्द्धेन महामते!। अष्टादशभुजान्देवीं कुर्य्याद्वाष्टकरामपि। पट्टकूलयुगच्छन्नान्देवीं मध्ये निधापयेत्। देवीं संपूज्य विधिवज्जपं कुर्य्युर्दश द्विजाः। शतमादौ शतञ्चान्ते जपेन्मन्त्रं नवार्णकम्। चण्डीं सप्तशतीम्मध्ये संपुटोऽयमुदाहृतः। एकं द्वे त्रीणि चत्वारि जपेद्दिनचतुष्टयम्। रूपाणि क्रमशस्तद्वत् पूजनादिकमाचरेत्। पञ्चमे दिवसे प्रातर्होमं कुर्य्याद्विधा-

नतः। गुडूचीम्पायसन्दूर्वान्तिलान् शुक्लान् यवानपि। चण्डीपाठस्य होमन्तु प्रतिश्लोकन्दशांशतः। होमं कुर्य्याद् ग्रहादिभ्यः समिदाज्यचरून् क्रमात्। हुत्वा पूर्णाहुतिन्दद्याद्विप्रेभ्यो दक्षिणां क्रमात्। कपिलाङ्गां नीलमणिं श्वेताश्वं छत्रचामरे। अभिषेकन्ततः कुर्य्युर्यजमानस्य ऋत्विजः। एवङ्कृतेऽमरेशान! सर्वसिद्धिः प्रजायते”। “सहस्रचण्डीं विधिवच्छृणु विष्णो महामते!। राज्यभ्रंशे महोत्पाते जनमारे महाभये। गजमारेऽश्वमारे च परचक्रभये तथा। इत्यादिविविधे दुःखे क्षयरोगादिजे भये। सहस्रचण्डिकापाठं कुर्य्याद्वा कारयेत्तथा। जापकास्तु शतम्प्रोक्ता विंशद्धस्तश्च मण्डपः। भोज्याः सहस्रं विप्रेन्द्रा गोशतं दक्षिणान्दिशेत्। गुरवे द्विगुणन्देयं शय्यादानन्तथैव च। सप्तधान्यं च भूदानं श्वेताश्वं च मनोहरम्। पञ्चनिष्कमिता मूर्त्तिः कर्त्तव्या वाऽर्धमानतः। अष्टादशभुजा देवी सर्वायुधविभूषिता। अवारितान्नं दातव्यं सहस्रं तत्रहम्प्रभो!। शतं वा नियताहारः पयःपानेन वर्त्तयेत्। एवं यश्चण्डिकापाठं सहस्रं तु समाचरेत्। तस्य स्यात्कार्यसिद्धिस्तु नात्र कार्या विचारणेति”। एतद्द्वयं यद्यपि महानिबन्धेषु नास्ति तथापि प्रचरद्रूपत्वादुक्तमिति दिक्। वाराहीतन्त्रे “सङ्कटे समनुप्राप्ते दुश्चिकित्स्यामये तथा। जातिध्वंसे कुलोच्छेदेऽप्यायुषो नाश आगते। वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये। तथैव त्रिविधोत्पाते तथा चैवातिपातके। कुर्य्याद्यश्चण्ड्याः शतावृत्तिन्ततः सम्पद्यते शुभम्। श्रेयोवृद्धिः शतावृत्ताद्राज्यवृद्धिस्तथा परा। मनसा चिन्तितन्देवि! सिध्येदष्टोत्तराच्छतात्। सहस्रावर्त्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा। भुक्त्वा मनोरथान् कामान्नरो मोक्षमवाप्नुयात्। चण्ड्याः शतावृत्तपाठात्सर्वाः सिध्यन्ति सिद्धयः”। २काल्या भैरवभेदे पु०। “असिताङ्गो रुरुश्चण्ड उन्मत्तः क्रोधनस्तथा” तन्त्रसा०। शत्रामावरणाष्टभैरवोक्तौ। संज्ञायां कन्। चण्डिका सप्तवर्षीयां कुमार्य्याम् अत्रैव शब्दे मन्त्रमहोदधिवाक्यम् दृश्यम्। [राजनि०।

चण्डीकुसुम पु० चण्डीप्रियं कुसुमं यस्य। रक्तकरवीरवृक्षे।

चण्ड(ण्डे)ण्डीश पु० रुद्रगणभेदे “चण्डे(ण्डी)शः पूषणां देवं भगं नन्दीश्वरोऽग्रहीत्” भाग०४।५।१६। ६त०। २शिवे पु०चण्डीश्वरोऽप्यत्र त्रिभुवनगुरोर्धाम चण्डीश्वरस्य” मेघ०

चण्डु पु० चडि–उन्। उन्दुरे मूषिके शब्दच०।

चण्डेश्वर पु० चण्ड ईश्वरः। रक्ततनौ शिवमूर्त्तिभेदे “चण्डेश्वरं रक्ततनुं त्रिनेत्रम्” तन्त्रसारः।

चण्डोग्रशूलपाणि पु० शिवमूर्त्तिभेदे। “चण्डोग्रशूलपाणेश्च मन्त्रः सर्वार्थसाधकः” तन्त्रसारे तन्मन्त्रः उक्तः।

चत याचने भ्वा० उभ० द्वि० सेट्। चतति ते एदित् अचतीत्। अचतिष्ट। चचात चेते। निरुक्तौ अयं गत्यर्थतयोक्तः। “गुहा चतन्तमुशिजो नमोभिः” ऋ० १०।४६।२। “चतन्तं चततिर्गतिकर्म्मा” निरु० भा०। अस्य वैदिकेऽनिट्त्वम् चत्तः। “चत्तो इतश्चत्तामुतः” ऋ० १०।१५५।२। “दूरे चत्तायच्छन्त्सद्गहनम्” ऋ० १।१३२।६। याचनस्य हिंसायां वृत्तेरस्य हिंसार्थत्वमपि। “तं व इन्द्रं चतिनमस्य” ऋ० ६।१९।४। “चतिनं नाशकमिति” भा०। बा० इनि।

चतुःकूटा स्त्री श्रीविद्यामन्त्रभेदे तन्त्रसारे तत्स्वरूपं दृश्यम् “चतुःकूटा महाविद्या शङ्करेण प्रपूजिता” तन्त्रसा०।

चतुःपञ्च त्रि० चत्वारः पञ्च वा वार्थे बहु० डच्। चतुःसंख्यके पञ्चसंख्यके वा। “अजानतामिवान्योन्यं चतुःपञ्चावशेषिताः” भाग० १।१५।२३। वा रस्य षत्वे चतुष्पञ्चेत्यप्यत्र।

चतुःपञ्चाशत् त्रि० चतुरधिका पञ्चाशत्। (चौयान्न) १चतुरधिकपञ्चाशत्संख्यायां २तत्संख्यान्विते च “पशुपुरोडाशो हविस्तच्चतुःपञ्चाशत्” शत० ब्रा० ६।२।२।३७। ततः पूरणार्थे डट्। चतुःपञ्चाश तत्संख्यापूरणे त्रि० स्त्रियां ङीप्। वा रस्य षत्वे चतुष्पञ्चाश इत्यप्यत्र।

चतुःपत्री स्त्री चत्वारि चत्वारि पत्राण्यस्याः। क्षुद्रपाषाणभेदे राजनि०। वा रस्य षत्वे चतुष्पत्रीत्यप्यत्र

चतुःपर्णी स्त्री चत्वारि चत्वारि प्रतिपर्णं पर्णान्यस्याः। क्षुद्राम्लिकायाम् (आमरुल्)। राजनि०। वा रस्य षत्वे चतुष्पर्णीत्यप्यत्र।

चतुःपुण्ड्र पु० चत्वारि पुण्ड्राणीवास्य। भिण्डावृक्षे राजनि०। वा रस्य षत्वे चतुष्पुण्ड्र इत्यप्यत्र।

चतुःफला स्त्री चतुर्धा विभक्तं फलमस्याः। नागबलायाम् राजनि०। वा रस्य षत्वे चतुष्फलाप्यत्र।

चतुःशाल न० चतसृणां शालानां समाहारः। अन्योन्याभिमुखशालाचतुष्टये “एकग्रामे चतुःशाले दुर्भिक्षे राष्ट्रविप्लवे। पतिना नीयमानायाः पुरः शुक्रो न दुष्यति” ज्यो० त०। वा रस्य विसर्गषत्वे चतुश्शालेत्यप्यत्र। ह्रस्वे वा ङीप् चतुः(श)शालीत्यप्यत्र स्त्री।

चतुःषष्टि स्त्री चतुरधिका षष्टिः। (चौषटि) १ चतुरधिकषष्टिसंख्यायां २ तत्संख्यान्विते च। वा रस्य विसर्गषत्वे। ततः पूरणे डट्। चतुःषष्ट तत्संख्यापूरणे त्रि॰ स्त्रियां ङीप्।

चतुःषष्टिकला स्त्री चतुःषष्टिमिता कला। उपविद्याभेदे तास्च कलाशब्दे श्रीधरधृतवाक्ये दर्शिताः। खिलशुक्रनीतिशास्त्रे तु २अ॰ अन्यविधा उक्ता यथा "पृथक् पृथक् तु विद्यानां लक्षणं संप्रकाशितम्। कलानां न पृथग् लक्ष्म नाम चास्तीह केवलम्। पृथक् पृथक् क्रिया चात्र कलाभेदस्तु जायते। यां यां कलां समाश्रिता, तन्नाम्ना जातिरुच्यते। हावभावादि संयुक्तं नर्त्तनं १ च कला स्मृता। अनेकवाद्यविकृतौ ज्ञानं तद्वादने २ कला। वस्त्रालङ्कारसंधानं ३ स्त्रीयूनोश्च कला मता। अनेकरूपाविर्भावकृतिज्ञानं ४ कला स्मृता। शय्यास्तरणसंयोगे पुष्पादिग्रथनं ५ कला। द्यूताद्यनेकक्रीड़ाभिरञ्जनं ६ तु कला स्मृता। अनेकासन संधाने रतिज्ञानं ७ कला स्मृता। कलासप्तकमेतद्धि गान्धर्वे समुदाहृतम्। मकरन्दासवादीनां मद्यादीनां कृतिः ८ कला। शुल्यंशलग्रहृतौ ज्ञाने सिराव्रणव्यधः ९ कला। हीनादिरससंयोगे ऽन्नादिसंपाचनं १० कला। वृक्षादिप्रसवारोपपालनादिकृतिः ११ कला। पाषाणधात्वादिद्रुतिस्तद्भस्मकरणं १२ कला। यावदिक्षुविकाराणां कृतिज्ञानं १३ कला स्मृता। धात्वोषधीनां संयोगक्रियाज्ञानं १४ कला स्मृता। धातुसाङ्कर्य्यपार्थक्यकरणं १५ तु कला स्मृता। संयोगपूर्वविज्ञानं १६ धात्वादीनां कला स्मृता। क्षारनिष्कासनज्ञानं १७ कलासंज्ञं तु तत् स्मृतम्। कलादशकमेतत्तु ह्यायुर्वेदागमेषु च। शस्त्रसन्धानविक्षेपः १८ पदादिन्यासतः कला। सन्ध्याघाताकृष्टिभेदैर्मल्लयुद्धं १९ कलास्मृता। कृताऽभिलक्षिते देशे यन्त्राद्यस्त्रनिपातनम् २०। वाद्यसंकेततोव्यूहरचनादि २१ कला स्मृता। गजाश्वरथगत्या तु युद्धसंयोजनं २२ कला। कलापञ्चकमेतद्धि धनुर्वेदागमस्थितम्। विविधासनमुद्राभिर्देवतातोषणं २३ कला। सारथ्यञ्च गजाश्वादेर्गतिशिक्षा २४ कला स्मृता। मृत्तिकाकाष्ठपाषाणधातुभाण्डादिसत्क्रिया २५।२६।२७।२८। पृथक् कलाचतुष्कं तु चित्राद्यालेखनं २९ कला। तडागवापीप्रासादसमभूमिक्रिया ३० कला। घट्याद्यनेकयन्त्राणां वाद्यानां कृतिः ३१ कला। हीनमध्यादिसंयोगवर्णादेरञ्जनं ३२ कला। जलवाय्वग्निसंयोगनिरोधादिक्रिया ३३ कला। नौकारथादियानानां कृतिज्ञानं ३४ कला स्मृता! सूत्रादिरज्जुकरणे विज्ञानं ३५ तु कला स्मृता। अनेकतन्तुसंयोगैः पटबन्धः ३६ कला स्मृता। वेधादिसदसज्ज्ञानं ३७ रत्नानां तु कला स्मृता। स्वर्णादीनां तु याथात्म्यविज्ञानं ३८ च कला स्मृता। कृत्रिमस्वर्णरत्नादिक्रियाज्ञानं ३८ कला स्मृता। स्वर्णाद्यलङ्कारकृतिः ३९ कला लेपादिसत्कृतिः ४०। मार्द्दवादिक्रियाज्ञानं ४१ चर्म्मणां तु कला मता। पशुचर्म्माङ्गनिर्हारक्रियाज्ञानं ४२ कला स्मृता। दुग्धदोहादिविज्ञानं ४३ घृतान्तं तु कला स्मृता। सीवने कञ्चुकादीनां विज्ञानं ४४ तु कला स्मृता। बाह्वादिभिश्च तरणं ४५ कलासंज्ञं जले स्मृतम्। मार्जने गृहभाण्डादेर्विज्ञानं ४६ तु कला मता। वस्त्रसम्मार्जनं ४७ चैव क्षुरकर्म्म ४८ कले ह्युभे। तिलमांसादिस्नेहानां कला निष्कासनं ४९ मता। सीराद्याकर्षणे ज्ञानं ५० वृक्षाद्यारोहणे ५१ कला। मनोऽनुकूलसेवायाः कृतिज्ञानं ५२ कला मता। वेणुतृणादिपात्राणां कृतिज्ञानं ५३ कला मता। काचपात्रादिकरणविज्ञानं ५४ तु कला मता। संसेचनं ५५ संहरणं ५६ जलानां तु कला स्मृता। लोहाभिसारशस्त्रास्त्रकृतिज्ञानं ५७ कला मता। गजाश्ववृषभोष्ट्राणां पल्याणादिक्रिया ५८ कला। शिशोः संरक्षणे ज्ञानं ५९ धारणे ६० क्रीड़ने ६१ तथा। सुयुक्तताडनज्ञानं ६२ मपराधिजने तथा। नानादेशीयवर्णानां सुसम्यग्लेखनं ६३ कला। ताम्बूलरक्षादिकृतिविज्ञानं ६४ तु कला स्मृता। आदाने आशुकारित्वं प्रतिदाने चिरक्रिया। कलासु द्वौ गुणौ ज्ञेयौ सर्व्वास्वेतौ मनीषिभिः। चतुःषष्टिः कला ह्येताः संक्षेपेण निदर्शिताः। यां यां कलामाश्रितोयस्तां तां कुर्य्यात् स एव हि"। "चतुःषष्टिकलाविद्या ईश्वरीप्रीतिवर्द्धनम्" गायत्रीकवचम्। वा रस्य विसर्गषत्वे चतुष्षष्टिकलाप्यत्र

चतुःसप्तति स्त्री चतुरधिका सप्ततिः। (चौहत्तर) १ चतुरधिकसप्ततिसंख्यायां २ तत्संख्यान्विते च ततः पूरणे डट्। चतुःसप्त त तत्पूरणे त्रि॰ स्त्रियां ङीप्। वा रस्य विसर्गसत्वम्।

चतुःसम न॰ चत्वारि समानि यत्र। "लवङ्गं जीरकं पथ्या यमानी च चतुःसमम्" वैद्यकोक्ते लवङ्गादिचतुर्द्रव्यात्मके

औषधभेदे, शब्दार्थचि० वैद्यके तद्गुणा उक्ता यथा "लवङ्गं जीरकं पथ्या यमानी च चतुः समम्। आमशूलविबन्धघ्नं पाचनं भेदि शोषनुत्"। "कस्तूरिकाया द्वौ भागौ चत्वारश्चन्दनस्य तु। कुङ्कुमस्य त्रयश्चैव शशिनश्च चतुःसमम्" इत्युक्तेषु २मिलितेषु तत्तत्परिमाणान्वितकस्तूरीचन्दनकुङ्कुमकर्पूरेषु च। वा रस्य विसर्गसत्वे चतुस्सममप्युभयत्र।

चतुर् त्रि० ब० व० चत–उरन्। १चतुःसंख्यायाम्, २चतुःसंख्यान्विते च। "चत्वारोवयमृत्विजः स भगवान् कर्म्मोपदेष्टा हरिः" वेणी०। स्त्रियां गौणे मुख्ये च चतस्रादेशः। "तासामाद्याश्चतस्रस्तु निन्दितैकादशी च या" मनुः। प्रियचतस्रा अतिचतस्रा। नञा सुना विना च समासे बहु० अच् समा०। अचतुरः सुचतुरः विचतुरः। अव्ययीभावे टच् समा० उपचतुरम्। अवयवे तयप् चतुष्टय। चतुःसंख्यायां तदन्विते च त्रि० स्त्रियां ङीप् "चरितार्था चतुष्टयी" कुमा०। "ततोवारे सुच् "रात्सस्य" पा० सलोपे। चतुर् २चतुर्वारे अव्य०। तत्रार्थे चतुस् इति शब्दकल्पनं प्रामादिकम्। "चतुरवत्तः कात्या० श्रौ०। "चतुर्नमो अष्टकृत्वो भवाय" अथ० ११।२।९। "चतुरुपह्वयते" तै० सं० २।६।७।३। चतुष्टयार्थे च "गूढमैथुनधर्म्मं च काले काले च संग्रहम्। अप्रमादमनालस्यं चतुः शिक्षेत वायसात्" इति चाणक्यः।

चतुर पु० चत–उरच्। १वक्रगतौ २हस्तिशालायाञ्च हेमच०। ३कार्य्यदक्षे ४आलस्यहीने ५निपुणे च त्रि०। ६नायकभेदे पु० तल्लक्षणं रसमञ्जर्याम् "वाक्चेष्टाव्यङ्ग्यसमागमश्चतुरः। तत्र वचनव्यङ्ग्यसमागमो यथा "तमोजटाले हरिदन्तराले काले निशायास्तव निर्गतायाः। तटे नदीनां निकटे वनानां घटेत शातोदरि! कः सहायः"। चेष्टाव्यङ्ग्यसमागमो यथा "कान्ते कनकजम्बीरं करे कमपि कुर्व्वति। अपारनिश्चले भानौ विन्दुमिन्दुमुखी ददौ"। तां वीक्ष्य लीलाचतुरामनङ्गः "नव प्रियं यश्चतुरावलोकिनः" कुमा०। "न पुनरैति मतं चतुरं वयः"। "मृगया जहार चतुरेव कामिनी" रघुः। चतुर्+अर्श० अच्। ७चतुर्विशिष्टे त्रि०।

चतुरंशा स्त्री वर्णवृत्तभेदे "द्विजवरकर्णौ विहरसवर्णौ भवति यदा सा किल चतुरंशा" छन्दोम०।

चतुरक्रम पु० "द्रुतद्वन्द्वं लुतद्वन्द्वं तथा प्रान्ते गुरुर्भवेत्। द्वात्रिंशदक्षरैर्युक्तः शृङ्गारे चतुरक्रमः" इति संगी०दा० उक्ते रूपकभेदे।

चतुरङ्ग न० चत्वारि अङ्गानि यस्य। १हस्त्यश्वरथपदातिरूपाङ्गचतुष्टययुते सैन्ये। "प्रयातेऽस्मिन्नरव्याघ्र! बलेन महताहतः। कृष्णेन चतुरङ्गेण यत्तेन जितकासिना" भा०व०२० अ०। रक्तहरितपीतश्यामलरूपाणि चत्वारि बलस्वरूपाणि क्रीड़ासाधनान्यङ्गान्यस्य। (चतूराजी) २क्रीड़ाभेदे। तत्क्रीड़ाप्रकारः ति०त०व्यासयुधिष्ठिरसंवादे "युधिष्ठिर उवाच। अष्टकोष्ठ्याञ्च या क्रीड़ा तां मे ब्रूहि तपोधन!। प्रकर्षेणैव मे नाथ! चतुराजी यथा भवेत्। व्यास उवाच। अष्टौ कोष्ठान् समालिख्य प्रदक्षिणक्रमेण तु। अरुणं पूर्वतः कृत्वा दक्षिणे हरितं बलम्। पार्थ! पश्चिमतः पीतमुत्तरे श्यामलं बलम्। राज्ञोवामे गजं कुर्य्यात् तस्मादश्वं ततस्तरिम्। कुर्य्यात् कौन्तेय! पुरतो युद्धे पत्तिचतुष्टयम्। कोणे नौकाद्वितीयेऽश्वस्तृतीये च गजोवसेत्। तुरीये च वसेद्राजावटिकाः पुरतः स्थिताः। पञ्चकेन वटी राजा, चतुष्कोणैव कुञ्जरः। त्रिकोणैव चलत्यश्वः पार्थ! नौका द्वयेन तु। कोष्ठमेकं विलङ्घ्याथ सर्व्वतोयाति भूपतिः। अग्रएव वटी याति बलं हन्त्यग्रकोणगम्। यथेष्टं कुञ्जरोयाति चतुर्दिक्षु महीपते!। तिर्य्यक् तुरङ्गमो याति लङ्घयित्वा त्रिकोष्ठकम्। कोणकोष्ठद्वयं लङ्घ्य व्रजेन्नौका युधिष्ठिर। सिंहासनं चतूराजी नृपाकृष्टञ्च षट्पदम्। काककाष्ठं वृहन्नौका नौकाकृष्टप्रकारकम्। घाताघाते वटी नौका बलं हन्ति युधिष्ठिर!। राजा गजोहयश्चापि त्यक्त्वा घातम् निहन्ति च। अत्यन्तं स्वबलं रक्षेत् स्वराजबलमुत्तमम्। अल्पस्य रक्षया पार्थ! हन्तव्यं बलमुत्तमम्"। नौकायाश्चत्वारि पदानि अश्वस्याष्टौ पदानि इत्याधिक्यमश्वस्य। "मतङ्गजस्य गर्व्वेण राजा क्रीड़ति निर्भरम्। तस्मात् सर्व्वबलं दत्त्वा रक्ष कौन्तेय! कुञ्जरम्। सिंहासनं चतूराजी यदन्यस्थानतो भवेत्। सर्व्वसैन्यैर्गजैर्व्वापि रक्षितव्यो महीपतिः। अन्यराजपदे गत्वा यदा घातो युधिष्ठिर। तदा सिंहासनं तस्य भण्यते नृपसत्तम। राजा च नृपतिं हत्वा कुर्य्यात् सिंहासनं यदा। द्विगुणं वाहयेत् पण्यमन्यथैकगुणं भवेत्"। द्विगुणं पणं दातव्यत्वेन प्रापयेत्। "मित्रसिंहासनं पार्थ! यदारोहति भूपतिः। तदा सिंहासनं नाम सर्व्वं नयति तद्बलम्। यदा सिंहासनं कर्त्तुं राजा घष्ट-

यदाश्रितः। तदा घातेऽपि हन्तव्यो बलेनापि सुरक्षितः। विद्यमाने नृपे यस्य स्वकीये च नृपत्वयम्। प्राप्नोति तु यदा तस्य चतूराजी तदा भवेत्। नृपेणैव नृपं हत्वा चतूराजो यदा भवेत्। द्विगुणं वाहयेत् पणमन्यथैकगुणं भवेत्। स्वपदस्थं यदा राजा राजानं हन्ति पार्थिव!। चतुरङ्गे तदा भूप! वाहयेच्च चतुर्गुणम्। यदा सिंहासने काले चतूराजी समुत्थिता। चतूराजी भवत्यत्र ननु सिंहासनं नृप!"। अत्रेदं बीजम् उभयथा जयेऽपि परसिंहासनाधिकारात् परराजवधे शौर्य्याधिक्यनिष्कण्टकत्वदर्शनात् क्रीड़ायामपि तथा कल्प्यते। "राजद्वयं यदा हस्ते आत्मनोराज्ञि संस्थिते। परेण संहृतश्चैको बलेनाप्यपहार्य्यते। राजद्वयं यदा हस्ते न स्यादन्यकरे परः। तदा राजा हि राजानं घातेऽपि तं हनिष्यति। नृपाकृष्टो यदा राजा गमिष्यति युधिष्ठिर!। घाताघाते पि हन्तव्यो राज्ञा तत्र न रक्षकः। कोणं राजपदं त्यक्त्वा वटिकान्तं यदा व्रजेत्। वटी च षट्पदं नाम तदा कोष्ठबलं नयेत्। यदा तस्य भवेत् पार्थ! चतूराजी च षट्पदम्। तदापि च चतूराजी भवत्येव न संशयः। पदातेः षट्पदे सिद्धे राज्ञा वा हस्तिना तथा। षट्पदं न भवेत्तस्य अवश्यं शृणु पार्थिव!। सप्तमे कोष्ठके यत् स्याद्वटिका दशमेन वै। तदान्योन्यश्च हन्तव्यं सुखाय दुर्बलं बलम्। त्रिवटीकस्य कौन्तेय! पुरुषस्य कदाचन। षट्पदं न भवत्येव इति गोतमभाषितम्। नौकैका वटिका यस्य विद्यते खेलने यदि। गाढ़ावटीति विख्याता पदं तस्य न दुष्यति"। पदं राजपदं कोणपदञ्च। "हस्ते रङ्गे बलं नास्ति काककाष्ठं तदा भवेत्। वदन्ति राक्षसाः सर्वे तस्य शस्तौ जयाजयौ। प्रोत्थिते पञ्चमे राज्ञि मृते वध्यास्य षट्पदे। अशौचं स्यात्तदा हन्ति चलित्वा चालितं बलम्। द्विरष्टत्वागते तस्मात् हन्यात् परबलं जयी। पार्थ! सिंहासने काले काककाष्ठं यदा भवेत्। सिंहासनं भवत्येव काककाष्ठं न भण्यते। उपरिष्टाच्च यत्स्थानं तस्योपरि चतुष्टये। नौकाचतुष्टयं यत्र क्रियते तस्य नौकया। नौकाचतुष्टयं तस्य वृहन्नौकेति भण्यते। न कुर्य्यादेकदा राजन्! गजस्याभिमुखं गजम्। यदि कुर्वीत धर्म्मज्ञः पापग्रस्तो भविष्यति। स्थानाभावे यदा पार्थ! हस्तिनं हस्तिसंमुखम्। करिष्यति तदा राजन्! इति गोतमभाषितम्। प्राप्ते गजद्वये राजन्। हन्तव्योवामतोगजः"। इति चतुरङ्गक्रीड़नम्।

चतुरङ्गिन् त्रि० चत्वारि अङ्गानि हस्त्यश्वरथपदातयः भूम्ना सन्त्यस्य इनि। बाहुल्येन हस्त्यश्वादिसेनाङ्गचतुष्टययुक्ते। "चाजयन् वसुधां चेमां बलेन चतुरङ्गिणा" भा० आ० ६४अ०। स्त्रियां ङीप्। "प्रेषयिष्ये तवार्थाय वाहिनीं चतुरङ्गिणीम्" ७३अ०।

चतुरङ्गुला स्त्री चतस्रोऽङ्गुलयः प्रमाणमस्य पर्वणः अच् समा०। १आरग्बधे (सोन्दाल)। अमरः। २चतुरङ्गुलमिते त्रि०। "स चतुरङ्गुलमेवोभयतोऽन्तत उपगूहति" शत० ब्रा० १०।२।२।१। "तच्छाखाश्च समा दीर्घाः प्रादेशाश्चतुरङ्गुलाः" श्रा० त० छन्दोप०।

चतुरम्ल न० चतुर्णामम्लद्रव्याणां समाहारः पात्रा० न स्त्रीत्वम्। "अम्लवेतसवृक्षाम्लबृहज्जम्बीरनिम्बुकैः। चतुरम्लं हि, पञ्चाम्लं बीजपूरयुतं भवेत्" भावप्र० उक्ते अम्लवेतसादिचतुष्के।

चतुरशीति स्त्री चतुरधिका अशीतिः। (चौराशी) १चतुरधिकाशीतिसंख्यायां २तत्संख्यान्विते च। पूरणे डट्। चतुरशीत तत्संख्यापूरणे त्रि० स्त्रियां ङीप्।

चतुरस्र त्रि० चतस्रोऽस्रयः कोणा अस्य नि० अच्। १चतुष्कोणे पा० तालव्यमध्यस्यैव निपातनम्। दन्त्यमध्यत्वे चतुरश्रिरित्येव स्यात्। अस्य दन्त्यमध्यत्वं शब्दकल्पद्रुमोक्तं चिन्त्यम् सुप्रातसुश्वेति" पा० ५।४।१ सू० तालव्यमध्यस्यैव ग्रहणात् "चतुरस्रं त्रिकोणं वा वर्त्तुलं चार्द्धचन्द्रकम्। कर्त्तव्यमानुपूर्व्वेण ब्राह्मणादिषु मण्डलम्" बौधा०। २ब्रह्मसन्ताने केतुभेदे पु० "चतुरस्रा ब्रह्मसन्तानाः" बृ०सं०११अ०। केतुशब्दे दृश्यम्। ३अन्यूनानतिरिक्ते त्रि०। "बभूव तस्याश्चतुरस्रशोभि" कुमा०। "चतस्रोऽस्रयोऽस्य तच्चतुरस्रमन्यूनानतिरिक्तम्" मल्लि०।

चतुरात्मन् पु० चतुरं निपुणम् आत्मा मनोऽस्य चत्वारो बुद्ध्यादय आत्मानोयस्य, चतस्रोविभूतय आत्मानोऽस्य वा। परमेश्वरे विष्णौ। "चतुरात्मा चतुर्व्यूहः" "चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपाद्" इति च विष्णुस०। "रागद्वेषादिरहितत्वाच्चतुरं मनोऽस्येति मनोबुद्धिरहङ्कारश्चित्तं चतुष्टयमात्मा अस्येति वा चतुरात्मा। "ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः। विभूतयो हरेरेता जगतः सृष्टिहेतवः। विष्णुर्मन्वादयः कालः सर्वभूतानि च द्विज!। स्थितेर्निमित्तभूतस्य विष्णोरेता

विभूतयः। रुद्रः कालान्तकाद्याश्च समस्ताश्चैव जन्तवः। चतुर्धा प्रलयायैता जनार्दनविभूतयः" विष्णु पु०। उभयविधव्युत्पत्त्या द्विधानामकत्वात् विष्णुस० द्विरुक्तिः

चतुरानन पु० चत्वारि आननान्यस्य। चतुर्मुखे वेधसि अमरः। "तस्यां स चाम्भोरुहकर्णिकायामवस्थितो लोकमपश्यमानः। परिक्रमन् व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानि" भाग० ३।८।१८। उक्तेस्तस्य तथात्वम्। "इतरतापशतानि यदृच्छया वितर तानि सहे चतुरानन!" उद्भटः

चतुराश्रम न० चतुर्णामाश्रमाणां समाहारः। "चत्वार आश्रमा ब्रह्मचारिगृहस्थवानप्रस्थपरिव्राजकाः" वसिष्ठोक्तेषु ब्रह्मचार्य्यादिषु। तेषां विशेषधर्म्मास्तत्तच्छब्दे दृश्याः। तेषां साधारणधर्म्मा मनुनोक्ता यथा "चतुर्भिरपि चैवैतैर्नित्यमाश्रमिभिर्द्विजैः। दशलक्षणको धर्म्मः सेवितव्यः प्रयत्नतः। धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः। धीर्विद्या सत्यमक्रोधो दशकं धर्म्मलक्षणम्। दश लक्षणानि धर्म्मस्य ये विप्राः समधीयते। अधीत्य चानुवर्त्तन्ते ते यान्ति परमां गतिम्। दशलक्षणकं धर्म्ममनुतिष्ठन् समाहितः। वेदान्तं विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः"। तस्य भावः ष्यञ्, स्वार्थे वा ष्यञ्। चातुराश्रम्य तद्धर्म्मे चतुर्ष्वाश्रमेषु च न०। "चातुराश्रम्यधर्म्मांश्च वेदधर्म्मांश्च पार्थिवः" भा० शा० ६५अ०।

चतुरूषण न० चतुर्णामूषणानां समाहारः। पिप्पलीमूलसहिते शुण्ठीपिप्पलीमरिचरूपे त्रिकटौ। "त्र्यूषणं सकणामूलं कथितं चतुरूषणम्। व्योषस्येव गुणाः प्रोक्ता अधिकाश्चतुरूषणे" भावप्र०।

चतुर्गति स्त्री चतुर्णां वर्णाश्रमाणां यथोक्तकारिणां गतिः। १परमेश्वरे। "चतुर्मूर्त्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः" विष्णुसं०। चतुर्भिर्गतिरस्य। २कच्छपे पु०स्त्री हेमच०।

चतुर्जातक न० चतुर्णां जातकानां सुरन्दराणां सुरभीणां समाहारः। त्वगेलापत्रकनागकेशरेषु तदुपक्रस्य "एतच्च रोचनं रूक्षं तीक्ष्णोष्णं मुखगन्धहृत्। लघु पित्ताग्निकृद्वर्ण्यं कफवातविषापहम्" भावप्र०। "त्रिकटु चतुर्जातककुस्तुम्बुरुमिश्रं खादेत्" सुश्रुतः।

चतुर्ण(न)वति स्त्री चतुर्भिरधिका नवतिः पूर्व्वपदाद्वा णत्वम्। (चौरानव्बइ) १चतुरधिकनवतिसंख्यायां २तत्संख्येये च। चतुर्ण(न)वत्यधिकानि त्रीणि शतानि" कात्या० श्रौ० १६।८।२३। पूरणे डट्। चतुर्ण(न)वत तत्संख्यापूरणे त्रि० स्त्रियां ङीप्।

चतुर्थ त्रि० चतुर्णां पूरणः डट् थुक् च। चतुःसंख्यापूरणे स्त्रियां ङीप् सा च चन्द्रस्य २चतुर्थकलायाः ह्रासवृद्धिरूपायां तिथौ" चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन" ति० त० पुरा०। ३व्याकरणपरिभाषिते ङेभ्याम्भ्यस्रूपे विभक्तिभेदे "सम्प्रदाने चतुर्थी" पा० "धृतिहोमे न प्रयुञ्ज्यात् गोनामसु तथाष्टसु" छन्दोगप०। चतुर्थीमिति शेषः शुक्लकृष्णपक्षयोश्चतुर्थ्यां उभयदिनप्राप्तौ कस्या ग्राह्यता तन्निर्णयः कालमा० चतुर्थीप्र० यथा "अथ चतुर्थी निर्णीयते। सा च युग्मवाक्यात् परविद्धा पूज्या। न च शुक्लपक्षे तथात्वेऽपि कृष्णपक्षे पूर्वैव स्यादिति शङ्कनीयम् युग्मवाक्यस्य पक्षद्वयसाधारणत्वात्। "चतुर्दश्या च पूर्णिमेत्येतच्छुक्लपक्षविषयत्वे लिङ्गमिति चेत् तस्यैकस्य युग्मस्य शुक्लपक्षविषयत्वेऽपि "प्रतिपदाप्यमावास्या" इत्यनेन पक्षद्वयस्पर्शिना युग्मेन साहचर्यादितरेषामपि पक्षद्वयस्पर्शित्वं किं न स्यात्। एवं तर्हि साहचर्य्ययोर्द्वयोरपि परस्परकलहादनिर्णय इति चेत् न कारणान्तरेण निर्णेतव्यत्वात्। नहि चतुर्दशीपूर्णिमायुग्ममेकपक्षवर्त्तितिथिद्वयात्मकत्वात् द्वितीयादियुग्मैः सदृशं प्रतिपदामावास्यायुग्मन्तु भिन्नपक्षद्वयवर्तितिथिद्वयरूपत्वाद्विलक्षणम्। अतः पूर्णिमायुग्मसाहचर्य्यमेव निर्णय इति चेन्नैवम् श्रुत्या साहचर्य्यस्य बाध्यमानत्वात्। द्वितीयादिशब्दो मुख्यया वृत्त्या पक्षद्वयवर्त्तिनस्तिथीन् ब्रूते। सोऽयं श्रुतिलिङ्गादिषु षट्सु प्रथमं प्रमाणं साहचर्य्यन्तु सन्निधिः। स च स्थानावान्तरभेदत्वात् पञ्चमं प्रमाणम्। तच्च प्रथमादत्यन्तदुर्बलं सोऽयमर्थः पूर्वमीमांसायां तृतीयाध्याये श्रुतिलिङ्गादिस्थले महता प्रबन्धेन प्रपञ्चितः जै० सूत्रञ्चैतत् "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति"। इममेव च श्रुतिसन्निध्योर्विरोधमुद्दिश्योत्तरमीमांसायां गुणोपसंहारे विचारितम्। तथा हि ताण्डिशाखायां श्रूयते "ओमित्येतदक्षरमुद्गीथमुपासीतेति"। अस्यायमर्थः। पञ्चभक्तियुक्तस्य साम्न उद्गीथाख्या भक्तिः कश्चिदवयवः तञ्चावयवमुद्गाता यागकाले गायति। गीयमानं तमुद्गीथं स एवोद्गाता ताण्डिशाखागतोपनिषद्विहितैरनेकैर्गुणैरुपासीतेति ते च गुणास्ताण्डिशाखायामेव विहिताः। उद्गी-

थभक्तिस्तु ताण्डिशार्दूलजैमिनीयतलवकारादिषु सर्व्वासु सामशाखासु पठिता । तत्र यदिदन्ताण्डिशाखोक्तगुणानामुपासनं तत्किन्ताण्डिशाखागत एवोद्गीथविशेषे अवतिष्ठते किं वा सर्व्वशाखागत उद्गीथसामान्ये सञ्चरतीति संशयः । तत्र सन्निधिवशादुद्गीथविशेषेऽवतिष्ठत इति पूर्व्वः पक्षः । उद्गीथशब्दो मुख्यया वृत्त्योद्गीथसामान्यं ब्रूते । न च सन्निधिना पञ्चमप्रमाणेन प्रथमप्रमाणस्य श्रुतेः सङ्कोचोयुक्तः । तस्मादुपासनमुद्गीथसामान्ये संचरतीति राद्धान्तः। अनेन न्यायेन प्रकृतेऽपि साहचर्य्याख्येन सन्निधिना द्वितीयादिश्रुतः सङ्कोचायोगाद्युग्मादि शास्त्रं पक्षद्वयविषयं द्रष्टव्यम् । यदि चतुर्दशीपूर्णिमयोः कृष्णपक्षविषयत्वं न सम्भाव्यते तर्हि तत्रैकत्र शुक्लपक्षविषयत्वमस्तु । तथा प्रतिपद्युग्ममपि गत्यन्तराभावात्पक्षद्वयसम्बन्धिविषयम् एवं व्यवस्थितौ सत्यां युग्मशास्त्रेण पक्षद्वयेऽपि चतुर्थी परविद्धैव प्राप्नोति । ननु वचनान्तरेण चतुर्थीद्वयस्य व्यवस्था प्रतीयते । तथा च मार्कण्डेयपुराणे “शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितोरविः । कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितोरविरिति” । अत्र च वक्तव्यं किमिदं शुक्लादिवाक्यं युग्मादिशास्त्रनियमद्वारा एकवाक्यतया तिथीनां व्यवस्थापकमुत स्वातन्त्र्येण । यदि नियमद्वारा तर्हि युग्माग्नीत्यादियुग्मे पूर्व्वतिथीनामुत्तरविद्धानाम्पूज्यत्वेन “शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितोरविः” इत्येतत्पूर्व्वार्द्धमविरोधि उत्तरार्द्धन्तु विरोधि । तथा तेष्वेव युग्मेषु चरमतिथीनां पूर्व्वविद्धानां पूज्यत्वेन “कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितोरविः” इत्युत्तरार्द्धमविरोधि । पूर्व्वार्द्धन्तु विरोधि । तथा दर्शप्रतिपद्युग्मे कृष्णपक्षगतस्य दर्शस्योदये पूज्यत्वं शुक्लपक्षगतायाः प्रतिपदोऽस्तमये पूज्यत्वं तथा सति तत्रोभयत्र विरोधः स्फुटतरः । तस्मान्न युग्मादिशास्त्रमनेन नियन्तुं शक्यम् । नापि स्वातन्त्र्येण तिथीनां व्यवस्थापकम् तत्र युग्मादिशास्त्रविरोधस्यापरिहार्य्यत्वात् । अविरोधेन तु शुक्लादिवाक्यस्य दशम्यादिविषयत्वम्प्रतिपत्प्रकरणे प्रसङ्गादुदाहृतम् । तस्माच्छुक्लकृष्णयोरपि पक्षयोर्युग्मादिशास्त्राच्चतुर्थी परविद्धा ग्राह्या । वृद्धवसिष्ठोऽपि “एकादशी तथा षष्ठी अमावास्या चतुर्थिका । उपोष्याः परसंयुक्ताः पराः पूर्व्वेण संयुताः” इति । ननु परविद्धोपवासः क्वचित् प्रतिषिध्यते । “द्वितीया पञ्चमी वेधाद्दशमी च त्रयोदशी । चतुर्द्दशी चोपवासे हन्युः पूर्व्वोत्तरे तिथी” इति । अयमर्थः । पञ्चमी वेधेन पूर्व्वाञ्चतुर्थीन्तिथिमुत्तराञ्च षष्ठीं तिथिमुपवासविषये हन्ति अतः पञ्चमीविद्धायां चतुर्थ्यान्नोपवास इति । नैषदोषः व्रतभेदेन व्यवस्थोपपत्तेः सन्ति हि चतुर्थ्याम्भिन्नदेवताविषयाणि बहूनि व्रतानि । तत्र विष्णुधर्म्मोत्तरप्रोक्ते चतुर्मूर्त्तिव्रते मूर्त्तिचतुष्टयोपेतो विष्णुर्देवता । स्कन्दपुराणोक्ते अङ्गारकचतुर्थीव्रते भौमो देवता कूर्म्मपुराणोक्ते यमव्रते. यमोदेवता । सौरपुराणादिप्रोक्तेषु दूर्वागणपत्यादिव्रतेषु विनायको देवता कूर्म्मपुराणप्रोक्ते नागचतुर्थीव्रते शेषशङ्खपालादयः सर्पादेवतास्तत्र विनायकनागव्यतिरिक्तानां व्रते परेद्युरुपवासः प्राप्नोति तादृशे विषये पञ्चमीवेधनिषेधो व्यवस्थापनीयः ! तथा पूर्व्वविद्धाप्रशंसा च तस्मिन्नेव विषये द्रष्टव्या । अतएव ब्रह्मवैवर्त्ते पूर्व्वोत्तरविद्धयोर्विधिनिषेधौ स्मर्य्येते “चतुर्थीसंयुता कार्या तृतीया, च चतुर्थिका । तृतीयया युता, नैव पञ्चम्या कारयेत्क्वचिदिति” । तथा तत्रैव पूर्व्वविद्धा प्रशस्यते “चतुर्थीसंयुता या च सा तृतीया फलप्रदा । चतुर्थी तु तृतीयाया महापुण्यफलप्रदेति” । तस्याश्च विनायकव्रतविषयत्वं तत्रैव सूचितम् “कर्त्तव्या व्रतिभिर्वत्स ! गणनाथसुतोषणीति” स्कन्दपुराणेऽपि “विनायकव्रते कार्य्या सर्व्वमासेषु षण्मुख ! । चतुर्थी तु जयायुक्ता गणनाथसुतोषणीति” । विनायकव्रतानुष्ठाने चतुर्थ्यां मध्याह्नव्यापित्वं मुख्यं प्रयोजकम् । तदाह बृहस्पतिः “चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते । मध्याह्नव्यापिनी चेत् स्यात्परतश्चेत्परेऽहनीति” । (विनायकस्य माता दुर्गातत्तिथिस्तृतीया तया विद्धा) यदा पूर्वेद्युर्मध्याह्नव्यापिनी भवति तदा मुख्यप्रयोजकस्य विद्यमानत्वान्मातृविद्धत्वगुणसद्भावाच्च सा ग्राह्या तादृशे विषये परेद्युः सत्या अपि मध्याह्नव्यापिन्यास्त्याज्यता । अतएव प्रशस्यत इत्युक्तम् । परेद्युरेव यदा मध्याह्नव्यापिनी तदा मातृविद्धत्वगुणाभावेऽपि प्रधानप्रयोजकानुसारेण परविद्धैव ग्राह्या । तथा च स्मृत्यन्तरम् “मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणनायके । मध्याह्नेऽपरतश्चेत् स्यान्नागविद्धा प्रशस्यते”इति । ननु बहुषु वचनेषु पूर्वविद्धाया गणनाथसन्तोषकत्वमुक्तम् । अतः पूर्वविद्धत्वस्यैव मुख्यप्रयोजकता युक्ता । नैवम् । मध्याह्न-

व्यापित्वस्यैव वैयर्थ्यप्रसङ्गात्। अवश्यं हि तदा मध्याह्नव्यापित्वं प्रसङ्गाद्भवति। अतस्तद्विधानं व्यर्थं व्यावर्त्याभावात्। अथोच्येत पक्षान्तरेऽप्यनेकवचनविहितस्य पूर्वविद्धत्वस्य वैयर्थ्यन्तदवस्थम् मध्याह्नव्यापित्वेनैव तन्निर्णयादिति तन्न यदा तिथिक्षयवशादुभयत्र मध्याह्नव्याप्तिर्नास्ति यदा चोभयत्र कृत्स्नमध्याह्नव्यापित्वं तदेकदेशव्यापित्वं वा समानन्तत्र सर्वत्र मध्याह्नव्याप्त्या निर्णयाभावे सति पूर्वविद्धत्वेनैव निर्णेतव्यत्वात्। एवं तर्हि सावकाशनिरवकाशयोर्निरवकाशम्बलीय इति न्यायेन मध्याह्नव्यापित्वस्य निरवकाशतया प्राबल्यमित्येव वक्तव्यन्तु मुख्यतयेति चेत्। मुख्यत्वस्यापि सम्भवात् तिथिनिर्णये कर्मकालव्याप्तिशास्त्रस्य मुख्यत्वञ्चास्य प्रकरणस्य प्रारम्भे दर्शितम्। कर्मकालश्च विनायकव्रतस्य मध्याह्नः। "प्रातःशुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृपेति" तत्कल्पे विधानात्। अतो मुख्यत्वादपि मध्याह्नव्यापित्वं प्रबलमिति। ननु कस्याञ्चित्स्मृतौ पूर्वविद्धत्वेन मध्याह्नव्यापित्वबाध उपलभ्यते। "जया च यदि सम्पूर्णा चतुर्थी ह्रसते यदि। जया सैव हि कर्त्तव्या नागविद्धान्न कारयेदिति" स्मरणात्। मैवम्। अस्य वचनस्य दिनद्वये मध्याह्नस्पर्शाभावविषयत्वेनाप्युपपत्तेः। तथाहि पूर्वदिने विनायकव्रतप्रयोजके मध्याह्ने जया सम्पूर्णा, परेद्युर्मुहूर्त्तत्रयक्षयवशान्मध्याह्नादर्वागेव चतुर्थी समाप्ता तदा दिनद्वये कर्मकाले व्याप्तितिथेश्चतुर्थ्या अभावाद्विनायकव्रते किन्दिनमुपादेयमिति वीक्षायां पूर्वदिनं विधातुं परदिनं प्रतिषेधति। अथोच्येत। "जया च यदि सम्पूर्णा" इत्यनेन कर्मकालरूपमध्याह्नसमाप्तिपर्यन्तत्वन्न विवक्षितम् किन्त्वहःस्तमयपर्यन्तत्वमिति। एवं तर्हि पूर्वविद्धतैव नास्ति वेधिकायाः पूर्वतिथेः सम्पूर्णत्वे सति वेध्यायाश्चतुर्थ्या अनवकाशत्वात्। अथ मा भूत्पूर्वविद्धत्वं तथापि मध्याह्नव्यापिन्यां जयायां विहितायां परेद्युर्मध्याह्नव्यापित्वं बाध्यत इति चेत्। मैवम्। न खलूत्तरदिनहेयत्वे मध्याह्नव्यापित्वं कारणतयोपन्यस्यते किन्तु नागविद्धत्वम्। अतो नागविद्धत्वनिन्दायां वचनस्य तात्पर्यम् न चतुर्थीरहितजयाविधाने। अन्यथा चतुर्थीनिन्दायामपि तात्पर्यं प्रसज्येत। नच तद्युक्तम्। नहि वरघाताय कन्यामुद्वाहयन्ति। वचनच्छाया तु कैमुतिकन्यायेनाभिलक्ष्यते यदिशब्दप्रयोगात्। यद्यपि जया सम्पूर्णा तथापि नागविद्धा हेया। किमुत जया युक्तायाश्चतुर्थ्यां सम्भवन्त्यामितिहि वचनव्यक्तिः। मध्याह्नव्याप्तावियती भक्तिः कुतस्तवेति चेत्। चतुर्थीरहितायां शुद्धतृतीयायान्तवापि कुतो भक्तिरिति समानः पर्यनुयोगः। वचनबलादित्युत्तरमस्माकमपि। वचनयोः परस्परकलहे पूर्वोक्ताभ्यां मुख्यत्वनिरवकाशत्वाभ्याम्मध्याह्नवचनमेवातिप्रबलं सिद्धिविनायकव्रते तस्य प्रतिपदोक्तत्वादपि प्रबलत्वम्। जयावचनन्तु गौर्यादिव्रते चरितार्थम्। तच्च व्रतं भविष्यत्पुराणेऽभिहितम् "विनायकं समभ्यर्च्य चतुर्थ्यां यदुनन्दन!। सर्वविघ्नविनिर्मुक्तः कार्यसिद्धिमवाप्नुयात्" इत्यभिधायानन्तरमिदं पठ्यते "निद्रां रतिं शिवां भद्रां कीर्त्तिं मेधां सरस्वतीम्। प्रज्ञां तुष्टिं तथा कान्तिं तत्रैवाहनि पूजयेत्। विद्याकामो विशेषेण पूजयेच्च सरस्वतीमिति"। लिङ्गपुराणेऽपि "चतुर्थ्यान्तु गणेशस्य गौर्य्याश्चैव विधानतः। पूजां कृत्वा लभेत्सिद्धिं सौभाग्यञ्च नरः क्रमादिति"। नारदीयपुराणेऽपि "माघशुक्लचतुर्थ्यान्तु गौरीमाराधयेद्बुधः। चतुर्थी वरदा नाम गौरी तत्र सुपूजितेति"। अतो यथोक्तरीत्या विनायकव्रते मध्याह्नव्यापित्वेनैव निर्णयः। गौरीव्रते तु जयावचनन्द्रष्टव्यम्। तत्र यदा दिनद्वयेऽप्येतद्वैषम्ये मध्याह्नैकदेशव्यापिनी तदा पूर्वदिने तन्महत्त्वञ्चेत् तदेवोपादेयम्। उत्तरदिने तन्महत्त्वे किन्महत्त्वगुणेन तदुपादेयं? किं वा सातृविद्धत्वगुणेन पूर्वमुपादेयमिति? संशये पूर्वमिति ब्रूमः। परस्य नागविद्धत्वदोषोपेतत्वात् पूर्वस्य च तदभावात्। एतदेवाभिप्रेत्य स्कान्दपुराणे पठ्यते "ज्यैष्ठे च वटसावित्री तथानङ्गत्रयोदशी। विनायकचतुर्थी च कर्त्तव्या संमुखी तिथिरिति"। विनायकव्रतवन्नागव्रतेऽपि चतुर्थी मध्याह्नव्यापिनी ग्राह्या। नागव्रतञ्च कूर्मपुराणे दर्शितम्। "तिथौ युगाह्वयायाञ्च समुपोष्य यथाविधि। शङ्खपालादिनागानां शेषस्य च महात्मनः। पूजा कार्या पुष्पगन्धक्षीराप्यायनपूर्वकम्। विषाणि तस्य नश्यन्ति नच तान् घ्नन्ति पन्नगाः" इति। युगाह्वया चतुर्थी। मध्याह्नव्यापित्वञ्च देवलेनोक्तम् "युगमध्यन्दिने यत्र तत्रोपोष्य फणीश्वरान्। क्षीरेणाप्याय्य पञ्चम्यां पूजयेत्प्रयतो नरः। विषाणि तस्य नश्यन्ति न तान् हिंसन्ति पन्नगाः" इति विनायकचतुर्थीनागचतुर्थ्योरियान्विशेषः। एकभक्तन्यायेन मध्याह्नव्याप्तेः षोढा-

भेदे सति यदा परेद्युरेव मध्याह्नव्याप्तिस्तदा विनायकचतुर्थी परा। इतरेषु तु पञ्चसु भेदेषु जयायोगस्य प्रशस्तत्वात् पूर्वेद्युरेव सा भवति। यदा तु पूर्वेद्युरेव मध्याह्नव्यापिनी तदा नागचतुर्थी पूर्वा। इतरेषु तु पञ्चसु भेदेषु पञ्चमीयोगस्य प्रशस्तत्वात् उत्तराभवति। तत्प्राशस्त्यञ्च पूजयेदिति वचनादवसीयते"।

चतुर्थक पु० चतुर्थेऽह्नि भवो रोगः कन्। "दिनत्रयमतिक्रम्य यः स्यात् स हि चतुर्थकः" इति वैद्यकोक्ते विषमज्वरभेदे।

चतुर्थकाल पु० चतुर्थः कालःभोजनकालः। "मुनिभिर्द्विरशनं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यम्। अहनि च तमस्विन्याम्" छन्दोपरिशिष्टेन दिने भोजनद्वयस्य विधानेन तृतीयभोजनकालोत्तरे सार्द्धदिनात्मके भोजनकाले। "चतुर्थकालमश्नीयादक्षारलवणं मितम्" मनुः।

चतुर्थभक्त न० चतुर्थे चतुर्थकाले भक्तं यत्र। सार्द्धदिनात्मके भक्तकाले। "चतुर्थभक्तक्षपणं वैश्ये शूद्रे विधीयते" भा० आनु० १०६अ०।

चतुर्थभाज् पु० चतुर्थमंशं धान्यादेः भजते कररूपेण भज-ण्वि। आपदि चतुर्थभागरूपकरग्राहिणि नृपे! "चतुर्थमाददानोऽपि क्षत्रियोभागमापदि। प्रजाः रक्षन् परं शक्त्या किल्विषात् प्रतिमुच्यते" मनुः। "चतुर्थभाङ् महाराज! भोज इन्द्रसखो बली" भा० स० १६अ०।

चतुर्थांश पु०कर्म्म०। १चतुर्भागैकभागे "चतुर्थांशोऽस्य धर्म्मस्य रक्षिता लभते फलम्" हरिवंशे १७०अ०। चतुर्थोऽंशोऽस्य। २चतुर्थांशस्वामिनि त्रि०। "सर्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे। तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः" मनुः दक्षिणार्थगोशतविभागोक्तौ। तुरीयांशादयोऽप्यत्र। "औरसे पुनरुत्पन्ने तुरीयांशहराः सुताः" कात्या० स्मृ०।

चतुर्थिका स्त्री। पलपरिमाणे वैद्यकपरिभाषा तस्य चतुःकर्षात्मकत्वात्तथात्वम्।

चतुर्थीकर्म्म पु० विवाहादनन्तरं चतुर्थ्यां तिथौ कर्त्तव्ये कर्म्मभेदे। "अथातश्चतुर्थीकर्म्म" गोभिलः "विवाहनिष्पत्त्यनन्तरं चतुर्थ्यां तिथौ वक्ष्यमाणं कर्म्म वर्त्तिष्यते" सं०त० रघुनन्दनः।

चतुर्दंष्ट्र पु०चतस्रोदंष्ट्रा यस्य। स्कन्दस्य सैनिकभेदे। "चतुर्दंष्ट्रोऽष्टजिह्वश्च मेघनादः पृथुश्रवाः" भा०श०४६०अ० स्कन्दसैनिकोक्तौ। २वलिसैन्यभेदे। "अष्टदंष्ट्रश्चतुर्दंष्ट्रो मेघनादो जलन्धमः" हरिव०२४०अ०वलिसैन्योक्तौ। ३परमेश्वरे च। "चतुर्द्दंष्ट्रश्चतुर्भुजः" विष्णु स०। "चतस्रोदंष्ट्रा अस्य चतुर्दंष्ट्रो नृसिंहविग्रहः सादृश्याद्वा शृङ्गं दंष्ट्रा इत्युच्यते चतस्रोदंष्ट्राः शृङ्गाणि अस्य "चत्वारि शृङ्गा द्वे शीर्षे" इत्यादिश्रुतेः" भा०।

चतुर्द्दन्त पु० चत्वारो दन्ता अस्य। ऐरावते इन्द्रगजे हेमच०। "चतुर्दन्तगजारूढो वज्री कुलिशभृत्करः" विष्णुध० इन्द्रध्यानम्। चत्वारोदन्ता अस्य गवादेः संख्यापूर्व्वकत्वात् वयसि दत्रादेशः। चतुर्दत् चतुर्दन्तोपलक्षितवयोविशिष्टे गवादौ स्त्रियां ङीप्।

चतुर्द्दशन् पु० ब० व०। चतुरधिकादश। (चौद्दा) १चतुरधिकदशसंख्यायां २तत्संख्येये च। ततः पूरणे डट्। चतुर्दश तत्संख्यापूरणे त्रि० स्त्रियां ङीप्। सा च चन्द्रस्य चतुर्दशकलाया ह्रासवृद्धिरूपक्रियारूपायां तिथौ। "चतुर्दश्यष्टमी चैव अमावास्या च पूर्णिमा" ति० त० पु०।

उभयपक्षयोस्तस्या उभयदिनसत्त्वे कर्म्मभेदे कस्या ग्राह्यता तन्निर्णयः कालमा० चतुर्द्दशीप्रक० यथा "अथ चतुर्दशी निर्णीयते। अत्रापि शुक्लकृष्णपक्षभेदेन व्यवस्था भवति। तत्र युग्मशास्त्रेण शुक्लचतुर्दशी परविद्धा ग्राह्या। तथा व्यासोऽपि "शुक्ला चतुर्द्दशी ग्राह्या परविद्धा सदा व्रते" इति। पूर्वविद्धाप्रतिषेध उत्तरविधिश्चेत्युभयम्भविष्यत्पुराणे पठ्यते "सदा कार्या त्रयोदश्या न तु युक्ता चतुर्दशी। पौर्णमासीयुता सा स्याच्चतुर्द्दश्या च पूर्णिमेति'। नारदीयेऽपि "तृतीयैकादशी षष्ठी शुक्लपक्षे चतुर्दशी। पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुतेति"। यत्तु भाद्रशुक्लचतुर्दश्यामनन्तव्रतम्भविष्योत्तरेऽभिहितम् तत्र पूर्वविद्धा परविद्धा वा मध्याह्नव्यापिनी ग्राह्येति केचिदाहुः। लिङ्गञ्च तत्र प्रमाणत्वेनोदाहरन्ति। "मध्याह्ने भोज्यवेलायां समुत्तीर्य सरित्तटे। ददर्श शीला सा स्त्रीणां समूहं रक्तवाससाम्। चतुर्दश्यामर्चयन्तीम्भक्त्या देवं पृथक् पृथगिति"। "अत्र मध्याह्ने भोज्यवेलायामित्यनेन मध्याह्नस्य कर्म्मकालत्वं प्रतीयते। अतस्तद्व्यापिनी तिथिर्ग्राह्या। नैतत्सारम्। यथा विनायकव्रते "मध्याह्ने पूजयेन्नृपेति मध्याह्नः कर्म्मकालत्वेन विहितः। नात्र तथा विधिरस्ति। उदाहृतं तु लिङ्गमर्थवादगतत्वाच्च स्वातन्त्र्येण कस्यचिदर्थस्य प्रमापकं किन्तु सति प्रमाणान्तरे तस्योपोद्बलकं [illegible] भवति। नचात्र प्रमाणान्तरम्पश्यामः।

लघ्वाङ्गः कर्म्मकालः। तथा सति ह्यौदयिकी ग्राह्येति वचनेन युग्मशास्त्रादिभिश्चोदयव्यापिनी ग्राह्या। सा च तिथ्यन्तरवर्ज्जित्रिमुहूर्त्तेति मुख्यः कल्पः द्विमुहूर्त्तेत्यनुकल्पः एवं सति शिष्टाचारोऽप्यनुगृहीतो भवति। चैत्रश्रावणचतुर्द्दश्यौ शुक्लपक्षे अपि रात्रियोगिन्यौ ग्राह्येति। तथा च बौधायनः "नभोः श्रावणमासस्य शुक्ला या तु चतुर्द्दशी। सा रात्रिव्यापिनी ग्राह्या परा पूर्व्वाह्णगामिनीति"। परा मासान्तर्वर्त्तिनी शुक्लचतुर्द्दशी। कृष्णा चतुर्द्दशी तु पूर्व्वविद्धैव ग्राह्या। तथा चापस्तम्बः "कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्द्दशी। पूर्व्वविद्धा तु कर्त्तव्या परविद्धा न कस्यचिदिति"। अपराह्णव्यापित्वे तु शुक्लचतुर्द्दश्यपि पूर्व्वविद्धा ग्राह्या तथा च स्कन्दपुराणे "चतुर्द्दशी च कर्त्तव्या त्रयोदश्या युता विभो!। मम भक्तैर्महाबाहो! भवेद्या चापराह्णिकी। दर्शविद्धा न कर्त्तव्या राकाविद्धा कदाचनेति"। अत्र मम भक्तैरितीश्वरोक्तिलिङ्गाच्छिवचतुर्द्दशीविषयत्वं द्रष्टव्यम्। तदेवं व्रतान्तरेषु चतुर्द्दशी निर्णीता। अथ शिवरात्रिव्रतं निर्णीयते। तत्रेदञ्चिन्त्यते। किमयं शिवरात्रिशब्दः रूढः ?। किं वा यौगिकः ?। उत लाक्षणिकः ?। अथ वा योगरूढ ? इति। किन्तावत्प्राप्तम्। रूढ़इति। तिथिविशेषे शिवरात्रिशब्दस्य संज्ञारूपेण स्मरणात्। तथा च स्क० नागरखण्डे "माघमासस्य शेषे या प्रथमा फाल्गुनस्य च। कृष्णे चतुर्द्दशी सा तु शिवरात्रिः प्रकीर्त्तितेति"। कामिके "माघमासेऽसिते पक्षे विद्यते या चतुर्द्दशी। तद्रात्रिः शिवरात्रिः स्यात्सर्व्वपुण्यशुभावहेति"। यद्यप्यत्र शिवस्य रात्रिः शिवरात्रिरित्यवयवार्थः प्रतीयते तथापि योगात् रूढ़ेर्बलवत्त्वाद्योगोऽत्र न ग्राह्यः। प्राबल्यञ्चाश्वकर्णादिशब्देष्ववगम्यते। अश्वस्य कर्ण इत्यवयवार्थप्रतीतावपि तमुपेक्ष्य रूढ्या वृक्षविशेषवाचित्वस्वीकारात्। ननु काकदन्तपरीक्षासमानोऽयं विचारः। यद्ययं शिवरात्रिशब्दो रूढ़ः यदि वा यौगिकः उभयथाप्यनुष्ठाने विशेषाभावात्। मैवम्। अस्त्येव महान् विशेषः। यौगिकत्वे शिवसम्बन्धिव्रतजातं सर्व्वं यस्यां रात्रावनुष्ठीयते सा सर्व्वा शिवरात्रिः स्यात्। माघमासादिपदञ्च तदानीमुपलक्षणं भवेत्। रूढ़िपक्षे तु माघमासादेर्व्विशेषणत्वात् तद्विशिष्टाया एकस्याएव तिथेः शिवरात्रित्वम्। अतः कर्त्तव्यएव विचारः। तत्राहीनन्यायेन रूढ़िमेवाद्रियामहे। तस्य च न्यायस्य संग्राहकावेतौ श्लोकौ भवतः "अहीनस्य द्वादशेति प्रकृतौ विकृतावुत। न हीन इति योगेन प्रकृतौ तद्विकल्प्यताम्। शीघ्रधीहेतुतो रूढ़ेरहीने विकृताविदम्। उत्कृष्यतां द्वादशत्वं साह्नात् प्रकृतकर्म्मणः"। अयमर्थः ज्योतिष्टोमे श्रूयते "तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य यज्ञस्य सवीर्य्यत्वायेति"। अह्ना सह वर्त्तत इति साह्नः। एकदिननिष्पाद्यो ज्योतिष्टोमः। तस्य प्राचीनेषु त्रिषु दिनेष्वङ्गत्वेनानुष्ठेया होमा उपसच्छब्दवाच्याः। तास्तिस्र उपसदो विहाय पुनरहीनशब्दवाच्यस्य कर्म्मणो द्वादशोपसदो विधीयन्ते। तत्र संशयः। किमिदं द्वादशोपसत्त्वं द्विरात्राद्यहीनप्रकृतिभूते साह्नशब्दवाच्ये प्रकृते ज्योतिष्टोमे निविशते ? आहोस्विदहीनशब्दवाच्ये विकृतिरूपे द्विरात्रादावुत्कृष्यते ? इति। तदर्थमिदञ्चिन्त्यते। अहीनशब्दो यौगिको रूढो वेति। तत्र न हीन इति व्युत्पत्तेर्व्विस्पष्टं प्रतिभासाद्यौगिकएवायम्। तदर्थश्च प्रकृतावुपपन्नः। साङ्गप्रधानस्य सर्व्वस्य साक्षाद्वाचकशब्दैरेवोपदिष्टत्वेन हीनत्वाभावाद्विकृतौ तु विशेषएव वाचकशब्दैरुपदिश्यते। इतरत्सर्व्वमतिदेशात् प्राप्यते। अत उक्तिसङ्कोचात् विकृतेर्हीनत्वम्। एवञ्च सत्यहीनशब्दस्य ज्योतिष्टोमे प्रवृत्तिसम्भवात्प्रकरणानुग्रहणाच्च तत्रैव द्वादशत्वं निविशते। न च पूर्व्ववाक्यविहितेन त्रित्वेन बाधः शङ्कनीयः वाक्ययोः समानबलत्वेन व्रीहियववद्विकल्पोपपत्तेः। तस्माद्ज्योतिष्टोमएव द्वादशत्वविधिरिति प्राप्ते ब्रूमः। विकृतिरूपे द्विरात्रादाविदं द्वादशत्वं विधीयते। कुतः अहीनशब्दस्य श्रौतप्रयोगबाहुल्येन तत्रैव रूढत्वात्। रूढिश्च शीघ्रबुद्धिहेतुत्वेन योगाद्बलीयसी, योगे त्ववयवार्थं प्रथमतो निश्चित्य पश्चात्समुदायार्थो निश्चेतव्य इति विलम्बः। न चात्र प्रकरणविरोधः शङ्कनीयः बलीयसा वाक्येन प्रकरणस्य बाधितत्वात्। तस्मादिदं द्वादशत्वं प्रकृतज्योतिष्टोमादुत्कृष्य विकृतिषु द्विरात्रादिषु निवेशनीयमिति। अत्र यथा रूढोऽहीनशब्दस्तथा शिवरात्रिशब्दोऽपि रूढ़ इति प्रथमः पक्षः। अपर आह। यौगिकएवायं शिवरात्रिशब्दः। कुतः शिवसम्बन्धमुपजीव्य तच्छब्दस्य प्रवृत्तत्वात्। तथा च स्कन्दपुराणे "माघस्य कृष्णपक्षे या तिथिश्चैव चतुर्द्दशी। शिवरात्रिस्तु सा ख्याता सर्व्वपापनिषूदनी"। "तस्य रात्रिः समाख्याता शिवरात्रिः शिवप्रिया। तस्यां सर्व्वेषु लि-

ङ्गेषु सदा संक्रमते हरः। यानि कानि च लिङ्गानि चराणि स्थावराणि च। तेषु संक्रमते देवि! तस्यां रात्रौ यतो हरः। शिवरात्रिस्ततः प्रोक्ता तेन सा हरवल्लभेति"। शिवरहस्ये "तत्प्रभृत्येव देवर्षे! माघकृष्णचतुर्दशी। शिवरात्रिः समाख्याता शिवेशस्त्रिपुरद्विषः" इति स्कं० अवन्तिखण्डे "माघफाल्गुनयोर्मध्ये असिता या चतुर्दशी। शिवरात्रिस्तु सा ख्याता सर्वपापनिषूदनी"। तस्माच्छिवसम्बन्धिनी रात्रिः शिवरात्रिरिति यौगिकोऽर्थः प्रोक्षणीन्यायेन ग्रहीतव्यः। तस्य च न्यायस्य संग्राहकावेतौ श्लोकौ "संस्कारजातियोगेषु कं ब्रूते प्रोक्षणीरिति। संस्कारं सार्वभौमत्वाज्जातिमुद्वेजनोक्तितः। अन्योन्याश्रयतो नाद्येन जातिः कल्प्यशक्तितः। यौगिकः क्लृप्तशक्तित्वात्क्लृप्तिर्व्याकरणे स्थिता" अयमर्थः। दर्शपूर्णमासाङ्गतया श्रूयते "प्रोक्षणीरासादयतीति"। तत्र संशयः। किमयं प्रोक्षणीशब्दोऽभिमन्त्रणासादनाद्युदकसंस्कारं ब्रूते?। किं वा जलावान्तरजातिविशेषम्? आहोस्वित् प्रोक्ष्यन्ते पात्राण्याभिरिति योगम्?। तत्र संस्कारं ब्रूत इति तावत्प्राप्तङ्कुतः? सार्वभौमत्वात्। सर्वेषु हि संस्कारविधिवाक्यादिप्रदेशेषु प्रोक्षणीशब्दः श्रूयते। "प्रोक्षणीरासादयेध्माबर्हिरुपसादयेति" प्रैषवाक्यप्रयोगः। "प्रोक्षणीरासादयतीति" विधिवाक्ये। एवमभिमन्त्रणादिवाक्यान्युदाहरणीयानि तस्मात्संस्कारं ब्रूत इत्येकः पक्षः। जातिं ब्रूत इति पक्षान्तरम्। लोके हि जलक्रीडासु प्रोक्षणीभिरुद्वेजिताः स्म इत्युदकजातौ प्रयोगो दृश्यते। तत्र न तावत्संस्कारं ब्रूत इत्याद्यः पक्ष उपपद्यते। कुतः? अन्योन्याश्रयत्वात्। नापि जातिं ब्रूत इति द्वितीयः पक्षो युक्तः उदकजातौ प्रोक्षणीशब्दशक्तेर्व्यवहारे पूर्वमक्लृप्तत्वेनातः परं शक्तेः कल्पनीयत्वप्रसङ्गात्। नच योगेऽपि शक्तिः कल्पनीया व्याकरणेनैव क्लृप्तत्वात् व्याकरणे हि उक्ष सेचने इत्यस्माद्धातोः करणे ल्युट्प्रत्ययेन शब्दो व्युत्पादितः। तथा सति प्रकर्षेणोक्ष्यते अनेनेति योगेन सेचनसाधनमुदकादिकं सर्वं प्रोक्षणशब्दवाच्यं सम्पद्यते। प्रकृते तु स्त्रीशब्दवाच्यानामपां सेचनसाधनत्वात् तद्वचनस्य प्रोक्षणशब्दस्य ङीप्प्रत्ययान्तत्वेन प्रोक्षणीरिति द्वितीयाबहुवचनान्तः शब्दो निष्पद्यते। नन्वहीनाधिकरणे रूढेः प्राबल्यमुक्तम्। प्रोक्षण्यधिकरणे च योगस्य प्राबल्यमुच्यते। अतः परस्परविरोधः। नैवम् लब्धात्मिका हि रूढि योगमपहरतीति। नच प्रोक्षणीशब्दे रूढिर्लभ्यते। वृद्धव्यवहारेण जातावव्युत्पादितत्वात्। अहीनशब्दोऽपि द्विरात्रादिषु न वृद्धैर्व्युत्पादित इति चेत् न। व्याकरणेन व्युत्पादितत्वात्। "अह्नः खः क्रतौ" इत्यनेन वार्तिकेनाहन्शब्दात् खप्रत्ययकल्पादत्र तस्येनादेशं कृत्वा क्रतुविषयतया व्युत्पादितो अहीनशब्दः। नन्वेवं सति घट्टकुटीप्रभातन्यायस्तत्र प्रसज्येत यतोऽहीनशब्दे योगम्परिहर्तुकामेन भवता व्याकरणमुपजीव्य योगे पर्यवसानं कृतम्। नायन्दोषः। पूर्वपक्षिणोऽभिमते समासलक्षणे योगे पर्यवसानस्यानभिधानात्। नच नञ्समासोऽपि व्याकरणेषु व्युत्पादित इति शङ्कनीयम्। नञ्समासस्वीकारे सति "अयज्ञोवाएष" इत्यादाविवाऽहीनशब्दस्याद्युदात्तत्वप्रसङ्गात् मध्योदात्तो ह्ययं शब्द आम्नायते। तस्मात्पक्षद्वये योगसाम्येऽपि समासरूपयोगम्पूर्वपक्षाभिमतं निराकृत्य श्रौतरूढिः सिद्धान्तिना समाश्रिता। तामेव रूढिं प्रकटयितुं वररुचिना वार्त्तिकं कृतम् अतः सत्यपि प्रकृतिप्रत्ययविभागे यौगिकत्वं न शङ्कितुं शक्यते। तथा गोत्वजातौ रूढस्यापि गोशब्दस्यौणादिकसूत्रेषु "गमेर्डोः" इति प्रकृतिप्रत्ययविभागङ्कृत्वा गच्छतीति गौरिति व्युत्पत्तिः प्रदर्शिता। तद्वदत्राप्यवगन्तव्यम्। प्रोक्षणीशब्दे तु न रूढिज्ञापनाय किञ्चित्सूत्रं स्वतन्त्रं विहितमस्ति। किन्तर्हि सर्वधातुसाधारणेनावयवार्थव्युत्पादकेन ल्युट्प्रत्ययेन व्युत्पादितत्वात्। यौगिक एवायं प्रोक्षणीशब्दः। तस्मात्प्रोक्षणीशब्दवच्छिवरात्रिशब्दो यौगिक इति द्वितीयः पक्षः। अन्ये तु पुनर्मन्यन्ते। लाक्षणिकोऽयं शिवरात्रिशब्दः। तिथिवाचकेन शब्देन तत्तिथौ क्रियमाणस्य व्रतविशेषस्य लक्ष्यमाणत्वात्। अतएवेशानसंहितायामुक्तम् "शिवरात्रिव्रतन्नाम सर्वपापप्रणाशनम्। आचाण्डालमनुष्याणां भुक्तिमुक्तिप्रदायकम्। अर्द्धरात्रादधश्चोर्द्ध्वं युक्ता यत्र चतुर्दशी। तत्तिथावेव कुर्वीत शिवरात्रिव्रतं व्रती। शिवरात्रिव्रतङ्कार्यं भूतान्वितमहानिशि। शिवरात्रिव्रतन्देव करिष्ये शिवसन्निधौ। निर्विघ्नं कुरु मे देव। भक्त्याह्य महेश्वरेति"। नारदीयसंहितायाम् "अर्द्धरात्रयुता यत्र माघकृष्णचतुर्दशी। शिवरात्रिव्रतं तत्र कुर्याज्जागरणं तथेति"। पद्मपुराणेऽपि "अर्द्धरात्रादध-

सोर्ध्वं यदि युक्ता चतुर्दशी। तस्यामेव कुर्वीत शिवरात्रिव्रतं व्रती" स्कान्दपुराणे "शिवरात्रिव्रतन्देव! कथयस्व महेश्वरेति"। नच कालवाचकस्य शब्दस्य लाक्षणिकत्वमदृष्टचरमिति शङ्कनीयम्। कालवाचकाभ्याममावास्यापौर्णमासीशब्दाभ्यां यागद्वयरूपयोरिष्ट्योस्तत्कालसम्बन्धिन्योरुपलक्षितत्वात्। अतएव श्रूयते "यएवंविद्वान् पौर्णमासीं यजते य एवं विद्वानमावास्यां यजते" इति। स्मृतिष्वपि सर्वत्र तिथिवाचकैः शब्दैस्तत्सम्बन्धिनो व्रतविशेषा लक्ष्यन्ते। स्कान्दपुराणे "जन्माष्टमी नैव कृता कदाचित्कल्पायुतं पच्यते रौरवेष्विति"। ऋष्यशृङ्गोऽपि "एकादशीन्तु कुर्वीत क्षीयते द्वादशी यदेति" एवमन्यत्राप्युदाहार्य्यम्। तस्माल्लाक्षणिकोऽयं शिवरात्रिशब्द इति तृतीयः पक्षः। अथ सिद्धान्तं ब्रूमः। योगरूढ़एवायं शिवरात्रिशब्दः। योगो द्वितीयपक्षोपन्यासेन दर्शितः। रूढ़िश्च प्रथमोपन्यासेन। तत्रैकस्य स्वीकारे सत्यन्यविषयं शास्त्रन्तदनुग्राहकउदाहृतो न्यायश्च बाध्येत। नच यौगिकत्वे सति शिवव्रतोपेतेषु त्रयोदश्यादितिथ्यन्तरेषु शिवरात्रित्वं प्रसज्येतेति वाच्यम्। तस्यातिप्रसङ्गस्य रूढ़्या निवारणात्। यथा पङ्कजशब्दे पङ्काज्जायत इति योगं स्वीकृत्य भेकादिष्वतिप्रसङ्गो रूढ़िस्वीकारेण निवार्य्यते। तद्वदत्रापि योगरूढ़तायां न कोऽप्यतिप्रसङ्गः। नच मुख्ये सम्भवति लक्षणाश्रयणमुचितम्। अथोच्येत। लक्षणाया अभावे व्रतविषयत्वन्न स्यादिति। तन्न। बहुव्रीहिस्वीकारे योगेनैव तत्सिद्धेः। शिवस्य प्रिया रात्रिर्यस्मिन्व्रतेऽङ्गत्वेन विहिता तद्व्रतं शिवरात्र्याख्यं तस्मान्निर्मन्थ्यन्यायेनात्र योगरूढ़ः शिवरात्रिशब्दः। तस्यात्र न्यायस्य संग्राहकः श्लोकः "निर्मन्थ्यो यौगिको योगरूढ़ो वा योगशासनात्। यौगिकोऽचिरजातेऽग्नौ नियते यौगरूढ़िभाक्"। अस्यायमर्थः। इष्टकाचयने श्रूयते "निर्मन्थ्येनेष्टकाः पचन्तीति"। तत्र संशयः। किमयं निर्मन्थ्यशब्दो यौगिकः? किं वा योगरूढ़ः? इति। निःशेषेण मथ्यत इति योगस्य प्रतीयमानत्वात्प्रोक्षणीन्यायेन योग इति पूर्वःपक्षः। अत्र द्वावग्नी विद्येते चिरनिर्मथितोऽचिरनिर्मथितश्च। चयनप्रक्रम्योखां निर्माय तस्यामुखायांक्षिप्त्वाऽऽहरणाय योऽग्निर्निर्मथ्यते सोऽचिरनिर्मथितः। तेनेष्टकाः पच्यन्ते तस्यैव प्रत्यासन्नत्वात्। तथा च मन्थनस्याग्निद्वितयसाधारण्येऽप्यचिरनिर्मथितमग्निं नियन्तुं रूढ़िराश्रयणीया। यथा वा नावनीतं घृतमित्यत्र नवनीतजन्यत्वयोगस्य चिराचिरयोरुभयोः साधारण्येऽपि नूतनएव घृते नावनीतशब्दो लोके प्रसिद्धेर्नियम्यते तद्वदत्राप्यवगन्तव्यम्। तथा च सति प्रतीयमानयोगस्यापरित्यक्तत्वान्नियत्यै रूढ़िस्वीकाराच्च योगरूढ़ोऽयं निर्मन्थ्य इति राद्धान्तः। अनेनैव न्यायेन शिवरात्रिशब्देऽपि योगरूढ़िराश्रीयते। तत्र शिवस्य रात्रिः शिवरात्रिरिति तत्पुरुषसमासेन योगेन प्रवर्त्तमानः शब्दो रूढ़्या माघकृष्णचतुर्दशीरूपे कालविशेषे नियम्यते। शिवस्य रात्रिर्यस्मिन् व्रते इति बहुव्रीहिसमासेन योगेन प्रवृत्तः शब्दो रूढ़्या व्रतविशेषे नियम्यते। तच्च शिवरात्रिव्रतमेकादशीजयन्तीव्रतवत् योगपृथक्त्वन्यायेन नित्यङ्काम्यञ्चेत्युभयविधम्। तत्र नित्यत्वमकरणे प्रत्यवायवीप्सानित्यनिश्चलशब्दैरवगन्तव्यम्। तत्राकरणे प्रत्यवायः स्कान्दपुराणे पठ्यते "परात्परतरन्नास्ति शिवरात्रिः परात्परम्। न पूजयति भक्त्येशं रुद्रन्त्रिभुवनेश्वरम्। जन्तुर्जन्मसहस्रेषु भ्रमते नात्र संशयः"। वीप्सापि तत्र पठिता "वर्षेवर्षे महादेवि! नरोनारी पतिव्रता। शिवरात्रौ महादेवङ्कामम्भक्त्या प्रपूजयेदिति"। नित्यनिश्चलशब्दौ च तत्रैव "माघकृष्णचतुर्दश्यां यः शिवं शंसितव्रतः। मुमुक्षुः पूजयेन्नित्यं स लभेदीप्सितम्फलमिति"। "अर्णवो यदि वा शुष्येत् क्षीयते हिमवानपि। मेरुमन्दरलङ्काश्च श्रीशैलोविन्ध्य एव च। चलन्त्येते कदाचिद्वै निश्चलं हि शिवव्रतमिति"। काम्यत्वञ्च फलश्रवणादवगन्तव्यम्। तच्च स्कान्दपुराणे "शिवञ्च पूजयित्वा योजागर्त्ति च चतुर्दशीम्। मातुः पयोधररसन्न पिबेत्स कदाचन। यदीच्छेद्वाञ्छितान् भोगान् दिवि देवमनोरमान्। आगमोक्तविधिं कृत्वा प्राप्नोति परमम्पदम्। मम भक्तस्ततो देवि! शिवरात्रिमुपोषकः। गणत्वमक्षयन्दिव्यमक्षयञ्च शिवशासनम्। सर्वान्भुक्त्वा महाभोगान्मृतो भूयोन जायते" इति। काम्यव्रतस्येशानसंहितायां वर्षसंख्या पठ्यते "एवमेतद्व्रतङ्कुर्यात्प्रतिसंवत्सरं व्रती। द्वादशाब्दिकमेतत्स्याच्चतुर्विंशाब्दिकन्तु वा। सर्वान् कामानवाप्नोति प्रेत्य चेह च मानवः" इति। नित्यकामरूपस्यास्य व्रतस्य सर्वाधिकारित्वमीशानसंहितायामुक्तम् "शिवरात्रिव्रतन्नाम सर्वपापप्रणाशनम्। आचाण्डालमनुष्याणां भुक्तिमुक्तिप्रदायकमिति"। अधिकारिवि

यमाः स्कन्दपुराणे दर्शिताः “माघमासे तु कृष्णा या फाल्गुनादौ चतुर्दशी। सा च पुण्या तिथिर्ज्ञेया सर्वपातकनाशिनी। अहिंसा सत्यमक्रोधो ब्रह्मचर्यं दया क्षमा। शान्तात्मा क्रोधहीनश्च तपस्वी ह्यनसूयकः। तस्मै देयमिदन्देवि! गुरुपादानुगो यदि। अन्यथा यो ददातीदं स तदा नरकं व्रजेदिति”। उक्ताधिकारिणानुष्ठेयं व्रतस्वरूपं त्रिविधम् “उपवासो जागरणं पूजा च। तदुक्तं नागरखण्डे “उपवासप्रभावेण बलादपि च जागरात्। शिवरात्रौ तथा तस्य लिङ्गस्यापि च पूजया। अक्षयान् लभते भोगान् शिवसायुज्यमाप्नुयादिति”। स्क० ब्रह्मखण्डे “स्वयञ्च लिङ्गमभ्यर्च्य सोपवासः सजागरः। अजानन्नपि निष्पापो निषादो गणतां गतः”। अत्रेदञ्चिन्त्यते किमेता उपवासजागरपूजा व्रतस्य स्वरूपे स्वेच्छया विकल्प्यन्ते?। उत समुच्चिता एवेति?। तत्र विकल्प्यन्ते इति तावत् प्राप्तम्। कुतः। एकैकस्येतरनिरपेक्षतया विधानात्। तथाहि स्कन्दपुराणे केवलोपवासविधिः पठ्यते “अखण्डितव्रतो यो हि शिवरात्रिमुपोषयेत्। सर्वान् कामानवाप्नोति शिवेन सह मोदत इति”। तथा केवलजागरणं पठ्यते “कश्चित्पुण्यविशेषेण व्रतहीनोऽपि यः पुमान्। जागरं कुरुते तत्र स रुद्रसमतां व्रजेत्”। तथा केवलपूजा पठ्यते “यःपूजयति भक्त्येशमनेकफलतां व्रजेदिति”। तस्मादुपवासादयस्त्रयोऽपि विकल्प्यन्ते। यदि नागरखण्डब्रह्मखण्डयोः समुच्चयविधिरस्तीत्युच्यते। तर्हि प्रत्येकं वा समुदायो वा यथेष्टमनुष्ठीयतामिति प्राप्ते ब्रूमः। वैश्वानरविद्योपासनन्यायेन समुदाय एवात्रानुष्ठेयः। तस्य च न्यायस्य संग्राहकावेतौ श्लोकौ “वैश्वानरमुपास्तेऽत्र प्रत्येकसमुदायतः। विकल्पः समुदायो वा नियतो द्विविधाद्विधेः। विकल्प इति चेन्नैवं समुदायप्रशस्तितः। अवयुत्यानुवादेन प्रत्येकोक्त्युपपत्तितः” इति। अयमर्थः। छन्दोगैराम्नायते “वैश्वानरमुपास्ते इति। द्युलोकादित्यवाय्वाकाशोदकपृथिवीरूपैः षड्भिरवयवैरुपेतोऽवयवी सर्वात्मको विराट् पुरुषो वैश्वानरशब्दवाच्यः। तत्र संशयः। किं द्युलोकाद्यवयवा अवयवी च प्रत्येकं विकल्पेनोपास्याः? उतावयव्येव नियमेनोपास्यः? इति। विकल्प इति तावत् प्राप्तम् कुतः द्विविधस्य विधेः श्रूयमाणत्वात्। प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनबुडिलोद्दालकनामभिः षड्भिर्महर्षिभिः क्रमेण द्युलोकादयः षडवयवाः प्रत्येकमुपासिताः। तद्वृत्तान्तकथनपरेषु वाक्येषु षण्णामवयवानां प्रत्येकमुपास्तिविधयो नियमाश्च फलसहिता उपलभ्यन्ते। पुनश्चान्ते षड्भ्यस्तेभ्यो महर्षिभ्योऽश्वपती राजा समुदायोपास्तिमवोचत। अतो द्विविधविधिबलेन यथेच्छं विकल्प इति प्राप्ते ब्रूमः। समुदाय एवात्र नियमेनोपासितव्यः कुतः प्रस्तुतत्वात्। अवयवोपास्तिवाक्यान्यवयुत्यानुवादरूपत्वेनाप्युपपद्यन्ते। तस्मात्समुदाय उपास्य इति राद्धान्तः। अनेन न्यायेन प्रकृतेऽप्युपवासादीनान्त्रयाणां समुदायस्यैव व्रतरूपत्वम्। ननु कश्चिदुपवासादित्रयं विधाय पुनः पक्षान्तररूपेणोपवासव्यतिरिक्तं द्वयं पठ्यते। “अथवा शिवरात्रिञ्च पूजाजागरणैर्नयेदिति”। नायन्दोषः। अथ वेत्यनुकल्पोपक्रमेणाशक्तविषयत्वोपपत्तेः। अत्र व्रते विहितानान्त्रयाणां परस्परसङ्गाङ्गिभावबोधकप्रमाणाभावादाग्नेयादिषड्यागवत्प्रत्येककालसम्बन्धविधानात् फलविधानाच्च सर्वं प्राधान्यन्द्रष्टव्यम्। अस्यैवोपोद्बलकं लिङ्गमभिधीयते। लुब्धकस्य भद्राख्यजन्म प्राप्तवतो दुर्वाससा सह संवादे पठ्यते “कृष्णपक्षे चतुर्दश्यां कश्चिन्मृगमाप्तवान्। असावपि प्राणरक्षार्थं क्षुधासम्पीडितोऽवसत्” इत्युपक्रम्य “धनुःकोट्याहतान्येव बिल्वपत्राणि मानद!। पतितानि महाराज! शम्भोः शिरसि भूतले। तत्रैव तस्थौ राजेन्द्र! सर्वरात्रमतन्द्रितः। रात्रिशेषं स्थितो व्याधः स्तब्धदृष्टिरनामिषः। प्रभाते विमले जाते दृष्ट्वा तत्रैव शङ्करम्। बिल्वपत्रैर्नरश्रेष्ठ! कन्दमूलैश्च पारितः” इति। एतस्मिन् यथोक्ततिथिन्निर्णीतम् इदं विचार्यते। किं व्रतान्तरेष्विवात्राप्युदयास्तमयवेध आदर्त्तव्यः? किं वा प्रदोषवेधः? आहोस्विन्निशीथवेध? इति। तत्र पूर्वेद्युरुदये त्रयोदशीवेधः परेद्युरस्तमये दर्शवेध इत्युदयास्तमये वेधो युक्तः तस्य व्रतान्तरेषु क्लृप्तत्वात् क्लृप्तस्य च कल्प्याद्बलीयस्त्वात्। मैवम्। सामान्याद्विशेषस्य बलीयस्त्वात्। समानरूपोदयास्तमयवेधः सर्वतिथिषु समानत्वात् विशेषरूपौ प्रदोषनिशीथवेधौ कृष्णचतुर्दशीवत्यो तिथिविशेषे शिवरात्र्याख्यं व्रतविशेषमुपजीव्य प्रवृत्तत्वात्। एतदेवाभिप्रेत्य ईशानसंहितायामुक्तम्। “उदयेऽन्विताः कश्चिद्ग्राह्याः कश्चिदस्तमयेऽन्विताः। व्रतिभिस्तिथयो यस्माद्वर्जयित्वा व्रतन्त्विदमिति”। अस्मिंस्तु व्रते प्रदोष

वेधोवायुपुराणे दर्शितः "त्रयोदश्यस्तगे सूर्य्ये चतसृष्वेव नाडिषु। भूतविद्धा तु या तत्र शिवरात्रिव्रतञ्चरेदिति"। स्मृत्यन्तरेऽपि "प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्द्दशी। रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेदिति"। कामिके "आदित्यास्तमये काले अस्ति चेद्या चतुर्द्दशी। तद्रात्रिः शिवरात्रिः स्यात् सा भवेदुत्तमोत्तमेति"। निशीथवेधो नारदीयसंहितायां दर्शितः। "अर्द्धरात्रयुता यत्र माघकृष्णचतुर्द्दशी। शिवरात्रिव्रतन्तत्र सोऽश्वमेधफलं लभेदिति"। स्मृत्यन्तरेऽपि "भवेद्यत्र त्रयोदश्यां भूतव्याप्ता महानिशा। शिवरात्रिव्रतन्तत्र कुर्य्याज्जागरणन्तथेति"। ईशानसंहितायाम् "माघकृष्णचतुर्द्दश्यामादिदेवो महानिशि। शिवलिङ्गतयोद्भूतः कोटिसूर्य्यसमप्रभः। तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिः। अर्द्धरात्रादधस्तोर्द्ध्वं युक्ता यत्र चतुर्द्दशी। तत्तिथावेव कुर्व्वीत शिवरात्रिव्रतं व्रती। नार्द्धरात्रादधस्तोर्द्ध्वं युक्ता यत्र चतुर्द्दशी। नैव तत्र व्रतं कुर्य्यादायुरैश्वर्य्यहानिदेति"। "व्याप्यार्द्धरात्रं यस्यान्तु लभ्यते या चतुर्द्दशी। तस्यामेव व्रतं कार्य्यं मत्प्रसादार्थिभिर्नरैः। पूर्व्वेद्युर्वा परेद्युर्वा महानिशि चतुर्द्दशी। व्याप्ता सा दृश्यते यस्यान्तस्यां कुर्य्याद्व्रतन्नरः। लिङ्गाविर्भावकाले तु व्याप्ता ग्राह्या चतुर्द्दशी। तदूर्द्ध्वाधोऽन्विता भूता सा कार्य्या व्रतिभिः सदा। मम प्रियकरी ह्येषा माघकृष्णचतुर्द्दशी। महानिशान्वितायान्तु तत्र कुर्य्यादिदं व्रतमिति"। एवं सति पूर्व्वेद्युरेव यत्र प्रदोषनिशीथोभयव्याप्तिस्तत्र व्रतमाचरणीयम्। पूर्व्वेद्युरेवोभयव्याप्तौ स्कन्दपुराणे पठ्यते। "त्रयोदशी यदा देवि! दिनभुक्तिप्रमाणतः। जागरे शिवरात्रिः स्यान्निशि पूर्णा चतुर्द्दशी। दिनभुक्तिरस्तमयः। परेद्युरेवोभयव्याप्तौ कामिके पठ्यते "निशाद्वये चतुर्द्दश्यां पूर्व्वा त्याज्या परा शुभेति"। दिनद्वयेऽप्युभयव्याप्तिस्तु न सम्भाव्यते यामद्वयवृद्धेरभावात्। दिनद्वयेऽप्युभयव्याप्त्यभावोऽपि न सम्भाव्यते यामद्वयक्षयस्याभावात्। एकैकस्मिन् दिनएकैकव्याप्तौ तु कथमिति चेत्। सा चेत्थं प्रसज्यते। पूर्व्वेद्युर्निशीथव्याप्तिः परेद्युः प्रदोषव्याप्तिरिति। तत्रैकव्याप्ते दिनद्वये समानत्वेऽपि जयायोगस्य प्रशस्तत्वाद्दर्शयोगस्य निन्दितत्वाच्च पूर्व्वेद्युरेवोपवासः। जयायोगप्राशस्त्यञ्चानेकवचनैरादृतत्वादवगम्यते। तथा च स्कन्दपुराणे पठ्यते "कृष्णाष्टमी स्कन्दषष्ठी शिवरात्रिचतुर्द्दशी। एताः पूर्व्वयुताः कार्य्यास्तिथ्यन्ते पारणम्भवेत्"। "जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च। पूर्व्वविद्धैव कर्त्तव्या तिथिभान्ते च पारणम्"। "श्रावणी दुर्गनवमी तथा दूर्व्वाष्टमी च या। पूर्व्वविद्धा तु कर्त्तव्या शिवरात्रिर्बलेर्दिनमिति"। "जयन्ती शिवरात्रिश्च कार्य्ये भद्राजयान्विते" इति। नागरखण्डे "माघफाल्गुनयोर्मध्ये असिता या चतुर्द्दशी। अनङ्गेन समायुक्ता कर्त्तव्या सा सदा तिथिरिति" पद्मपुराणे "अर्द्धरात्रात् पुरस्तात्तु जयायोगो यदा भवेत्। पूर्व्वविद्धैव कर्त्तव्या शिवरात्रिः शिवप्रियैरिति"। ब्रह्मवैवर्त्ते "रुद्रव्रतेषु सर्व्वेषु कर्त्तव्या संमुखी तिथिः। अन्येषु व्रतकल्पेषु परयुक्तामुपावसेदिति"। दर्शयोगनिन्दा च स्कन्दपुराणे दर्शिता "महतामपि पापानां दृष्टा वै निष्कृतिः पुरा। न दृष्टा कुर्व्वतां पुंसां कुहूयुक्तां तिथिं शिवामिति"। अन्यान्यपि यानि कानिचिद्दर्शयोगनिन्दावचनानि तत्र तत्र स्मर्य्यन्ते। तानि सर्व्वाण्यस्मिन्विषये योजनीयानि। यदा पूर्व्वेद्युर्निशीथादूर्द्ध्वं प्रवृत्ता चतुर्द्दशी, परेद्युः क्षयवशात्निशीथादर्व्वागेव समाप्ता तदा पूर्व्वेद्युः प्रदोषनिशीथव्याप्त्योरुभयोरप्यसत्त्वात्परेद्युः प्रदोषव्याप्तेरेकस्याः सद्भावाच्च परविद्धैव ग्राह्या। एतदेवाभिप्रेत्य स्मर्य्यते "माघासिते भूतदिनं कदाचिदुपैति योगं यदि पञ्चदश्या। जयाप्रयुक्तां न तु जातु कुर्य्याच्छिवस्य रात्रिं प्रियकृच्छिवस्येति"। यदा पूर्व्वेद्युः प्रदोषादूर्द्ध्वं प्रवृत्ता चतुर्द्दशी, परेद्युः क्षयवशात्प्रदोषादर्व्वागेव समाप्ता तदा परेद्युर्व्याप्तिद्वयाभावात्पूर्व्वेद्युर्निशीथव्याप्तेः सद्भावाज्जयायोगाच्च पूर्व्वेद्युरेवोपवासः। अत्रायं विवेकः सम्पन्नः। दिनद्वये निशीथव्याप्तौ तदव्याप्तौ च प्रदोषव्याप्तिर्नियामिका। तथा दिनद्वयेऽपि प्रदोषव्याप्तौ तदव्याप्तौ च निशीथव्याप्तिर्नियामिका। एकैकस्मिन् दिन एकैकव्याप्तौ जयायोगो नियामक इति। अस्य शिवरात्रिव्रतस्याहोरात्रसाध्यत्वेनाह्नि रात्रौ च सम्बन्धे साधारणे सति अहर्व्वेधमुपेक्ष्य प्रदोषनिशीथयोरेव कुतः शास्त्राणां पक्षपात इति चेत्। रात्रेरत्र प्रधानत्वादिति ब्रूमः। तत्प्राधान्येन चोपपत्तिः स्कन्दपुराणे पठ्यते "निशि भ्रमन्ति भूतानि शक्तयः शूलभृद्यतः। अतस्तस्यां त्रयोदश्यां सत्यां तत्पूजनम्भवेदिति"। तस्यान्त्रयोदश्यामिति अधिकरणे सप्तमी। तथा

पारणार्थः सम्पद्यते । त्रयोदशीनिशीथे तस्यां चतुर्द्दश्यां विद्यमानायां शिवपूजनमाचरेदिति । नागरखण्डेऽपि "माघमासस्य कृष्णायां चतुर्दश्यां सुरेश्वर ! । अहं यास्यामि भूपृष्ठे रात्रौ नैव दिवा कलौ । लिङ्गेषु च समस्तेषु चरेषु स्थावरेषु च । संक्रमिष्याम्यसन्दिग्धं वर्षपापविशुद्धये । रात्रौ तस्यां हि मे पूजां यः करिष्यति मानवः । मन्त्रैरेतैः सुरश्रेष्ठ ! विपापः स भविष्यतीति" । सा च शिवरात्रिचतुर्दशी त्रिधा भवति । एकतिथ्यात्मिका तिथिद्वयात्मिका तिथित्रयात्मिका चेति । तत्र सूर्योदयमारभ्य प्रवृत्ता परदिनोदयपर्य्यन्तैकतिथ्यात्मिका । सा वेधदोषाभावात् प्रशस्ता । तिथिद्वयात्मकत्वं च द्वेधा भवति । जयायोगेन दर्शयोगेन च । तत्र योगद्वयमेकैकस्मिन्विषये प्रशस्तम् । स च विषयविशेषः पूर्वमेवोदाहृतः । तिथित्रयात्मकत्वन्त्वतिप्रशस्तम् । एतदेवाभिप्रेत्य पुराणे पठ्यते "त्रयोदशीकलाप्येका मध्ये चैव चतुर्दशी । अन्ते चैव सिनीवाली त्रिस्पृश्यां शिवमर्चयेत्" । यथा त्रिस्पृशी प्रशस्ता तथा वारविशेषेण योगविशेषेण च प्रशस्ता भवति । तथा च स्कन्दपुराणे पठ्यते "माघकृष्णचतुर्दश्यां रविवारो यदा भवेत् । भौमोवाथ भवेद्देवि ! कर्त्तव्यं व्रतमुत्तमम् । शिवयोगस्य योगे वै तद्भवेदुत्तमोत्तमम् । शिवरात्रिव्रतन्त्वेतत्तद्भवेदुत्तमोत्तममिति" । ननु यदा पूर्वविद्धायामुपवासस्तदा परेद्युः किं तिथ्यन्ते पारणम्भवति किं वा तिथिमध्ये । शास्त्रन्तु पक्षद्वयेऽपि समानम् । तत्र तिथ्यन्तपारणवचनानि पूर्वमुदाहृतानि "तिथिमध्यपारणवचनन्तु स्कन्दपुराणे पठ्यते "उपोषणं चतुर्दश्यां चतुर्दश्यान्तु पारणम् । कृतैः सुकृतलक्षैश्च लभ्यते वाथ वा न वा । ब्रह्मा स्वयं चतुर्वक्त्रैः पञ्चवक्त्रैस्तथाप्यहम् । सिक्थे सिक्थे फलन्तस्य शक्तौ वक्तुं न पार्वति ! । ब्रह्माण्डोदरमध्ये तु यानि तीर्थानि सन्ति वै । संस्थितानि भवन्तीह भूतायां पारणे कृते" । "तिथीनामेव सर्वासामुपवासव्रतादिषु । तिथ्यन्ते पारणं कुर्य्याद्विना शिवचतुर्दशीमिति" । बाढम् । अस्ति हि द्विविधं शास्त्रं तस्य च द्विविधस्य शास्त्रस्य प्रतिपत्प्रकरणोक्तन्यायेन व्यवस्था द्रष्टव्या । यदा यामत्रयादर्वागेव चतुर्दशी परिसमाप्यते । तदा तिथ्यन्ते पारणम् । यदा तु चतुर्दशी यामत्रयमतिक्रामति तदा चतुर्दशीमध्ये पूर्वाह्णे पारणं कुर्य्यात्" । ति॰त॰ अन्ययोक्तं गौडमात्रग्राह्यत्वान्नोक्तम् ।

चतस्रोदशा अस्य । २चतुर्दशायुक्ते त्रि॰ । "अशीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः । चतुर्दशत्वं कृतवान् कुतः ? स्वयं न वेद्मि विद्यासु चतुर्दश स्वयम्" नैष॰ । प्रकारे धाच् । चतुर्दशधा चतुर्दशप्रकारे अव्य॰ । नान्तत्वात् पूरणे डटि प्राप्ते असंख्यादेरिति पर्य्युदासेऽपि क्वचिदार्षे मट् । चतुर्दशम चतुर्दशपूरणे त्रि॰ । "मनुर्वा इन्द्रसावर्णिश्चतुर्दशम इत्यपि" भाग॰ ८।१३।१५।

चतुर्दशभुवन न॰ समा॰ द्विगुः पात्रादि न ङीप् स्त्रीत्वे । भूलोकादिषु चतुर्दशसु लोकेषु । "भूर्लोकाख्यो दक्षिणो व्यक्तदेशात् तस्मात् सौम्योऽयं भुवः स्वश्च मेरुः । लभ्यः पुण्यैः खे महः स्याज्जनोऽतोऽनल्पानल्पैः स्यात्तपः सत्यमन्त्यः" "सि॰ शि॰ भुवनकोषे भूलोकादिसप्तकमुक्तम् "अवनेरप्यधस्तात् सप्त भूविवरा एकैकशो योजनायुतान्तरेणायामविस्तारेणोपकॢप्ताः । अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति" भाग॰ ५।२४।११ श्लोके अतलादिसप्तकमुक्तम् 'तद्विवरणं तत्राध्याये दृश्यम् । भूलोकादिविवरणं काशीख॰ २३अ॰ । "पादगम्यं हि यत् किञ्चिद्वस्त्वस्ति धरणीतले । तद्भूर्लोक इति ख्यातं साब्धिद्वीपाद्रिकाननम् । भूर्लोकाच्च भुवर्लोक आभ्रमात् समुदाहृतः । आदित्यादाध्रुवं विप्र ! स्वर्लोक इति गीयते । महर्लोकः क्षितेरूर्द्ध्वमेककोटिप्रमाणतः । कोटिद्वयोत्तरः ख्यातो जनो भूर्लोकयोजनैः । चतुःकोटिप्रमाणस्तु तपोलोको हि भूतलात् । उपरिष्टात् क्षितेरष्टौ कोटयः सत्यमीरितम्" । योगिनां तनुमध्ये ध्येयानि स्थानभेदे चतुर्दश भुवनादीनि योगस्वरोदये उक्तानि यथा । "ब्रह्माण्डे सन्ति ये अण्डाः पिण्डमध्येऽपि संस्थिताः । तलं पादाङ्गुष्ठतले तस्योपरि तलातलम् । महातलं गुल्फमध्ये गुल्फोपरि रसातलम् । सुतलं जङ्घयोर्मध्ये वितलं जानुमध्यगम् । ऊर्वोर्मध्ये तलं प्रोक्तं सप्तपातालमीरितम् । तलातलञ्चातलञ्च महातलरसातलम् । सप्तपातालमेतत्तु सुतलं वितलं तलम् । इदानीं पिण्डमध्ये तु सप्तलोकं शृणु प्रिये ! । मूलाधारे तु भूर्लोको लिङ्गाग्रे तु भुवस्ततः । स्वर्लोको लिङ्गमूले तु मेरुमूले महस्तथा । मेरुच्छिद्रे जनोलोको मेरुनाड्यां तपस्तथा । कमले सत्यलोकस्तु इति लोकाः पृथक् पृथक्

भूर्भुवःस्वर्महश्चेति जनश्चैव तपस्तथा। सप्तमःसत्यलोकस्तु सप्त लोका इति स्मृताः। सप्तलोकैस्तु पातालैर्भुवनानि चतुर्दश। अथ ब्रह्माण्डमध्यस्थाश्चत्वारो लोकपालकाः। पिण्डमध्ये तु तान् ज्ञात्वा सर्वसिद्धीश्वरोभवेत्। इन्द्रो ब्रह्मा विष्णुरीशश्चत्वारश्चात्मदेवताः। मूलाधारे चतुःपत्रे गजारूढो महानिति। सृष्टिकर्त्ता च तत्रैव स्वाधिष्ठाने महान् हरिः। मणिपूरे मूलपाणिरष्टसिद्धीश्वरो महान्। तालुद्वारे तालुमध्ये ललाटे वक्षःकण्ठके। नवचक्रश्टङ्गाटिकाकपाले च लम्बिकाब्रह्मरन्ध्रके। मूर्द्धचक्रं ६ त्रिकूटेत्येकत्रिंशतिः। ब्रह्माण्डानि वसन्तीति ज्ञातव्यानि प्रयत्नतः। सप्त द्वीपानि कथ्यन्तेऽधुना तानि श्टणु प्रिये!। जम्बुद्वीपन्तु मज्जायां शाकद्वीपन्तु मध्यमे। शाल्मद्वीपः शिरोमध्ये मांसमध्ये कुशस्तथा। त्वचि क्रौञ्चोलोममध्ये गोमेदद्वीप ईरितः। नखमध्ये तथा श्वेतः सप्तद्वीपा वसुन्धरा। जम्बुःशाकस्तथा शाल्मःकुशःक्रौञ्चश्च गोमयः। श्वेतः सप्तेति खण्डानि सप्तखण्डैर्वसुन्धरा। सप्तान्येतानि रूपाणि देहमध्ये स्थितानि च। समुद्राःसप्त कथ्यन्ते पिण्डमध्ये व्यवस्थिताः। लवणेक्षुसुरासर्पिर्दधिदुग्धजलान्तकाः। लवणः स्वेदमध्ये तु इक्षूरक्ते मधु त्वचि। सर्पिर्मेदोवसामध्ये दधिक्षीरं ललाटके। वीर्य्यमध्येऽमृतोज्ञेयः पादे कूर्म्मः स्थितोमहान्। इदानीन्तु नवद्वारे नवखण्डानि संश्टणु। पाय्वादौ भारतं खण्डं काश्मीरं त्रिकमण्डलु। द्विजखण्डमेकपादं खण्डं वक्ष्ये समण्डलम्। कैवर्त्तगर्त्तगान्धारं नवखण्डमिति स्थितम्। इदानीं पर्वताष्टौ च कथ्यन्ते श्टणु यत्नतः। मेरुदण्डे सुमेरुस्तु पीठमध्ये हिमालयः। वामस्कन्दे तथा दक्षे मलयोमन्दराचलः। विन्ध्यस्तु दक्षिणे कर्णे वामे मैनाक ईश्वरि!। ललाटे मध्यदेशे तु श्रीशैलः परमेश्वरि!। तथा ब्रह्मकपालस्थः कैलाशःपर्वतोमहान्। सुमेरुर्हिमवान् विन्ध्योमलयोमन्दरस्तथा। श्रीशैलः मैनाकश्चेति कैलाशोऽष्टौ च पर्वताः। अपरे पर्वताःसर्वे अङ्गुलीमध्यवासिनः। शरीरे नवनाड़ीस्था नर्म्मदा च महेश्वरि!। इड़ायां यमुना देवि! पिङ्गलायां सरस्वती। सुषुम्णायां वहेद्गङ्गा चान्याऽन्यासु च नाड़िषु। गङ्गासरस्वतीगोदानर्म्मदायमुनातथा। कावेरी चन्द्रभागा च वितस्ता च इरावती। द्विसप्ततिसहस्रेषु नदीनदपरिस्रवः। इतस्ततोदेहमध्ये ऋक्षाणि सप्तविंशतिः। योगाश्च राशयश्चैव ग्रहाश्च तिथयस्तथा। लहरीषु मीनमणी वाहनं स्थापनं तथा। सर्वाङ्गेषु च देवेशि! समग्रमृक्षमण्डलम्। त्रयस्त्रिंशत्कोटयस्तु निवसन्ति च देवताः। तथा पीठानि सर्वाणि देहमध्ये स्थितानि च। हृदे व्योममध्ये तु अनन्ताद्यास्तु वासुकिः। उदये व्योममध्ये तु परे नागा वसन्ति हि। गन्धर्व्वकिन्नराःशूरा विद्याधराप्सरादयः। अनेकवर्त्तीर्हवर्णाश्च गुह्यकाश्च वसन्ति हि। अनन्तसिद्धये वुद्ध्याप्रकाशोवर्त्तते हृदि। मेघस्य मण्डलं ज्ञेयमम्बुपाने तथैव च। चन्द्रार्कौ नेत्रयोर्म्मध्ये जङ्घलोमसु साक्षिणः। तृणगुल्मादिकञ्चापि विश्वरूपं स्मरेत्ततः। समग्रदर्शनान्मुक्तः स्वर्गभोगञ्च सत्सुखम्। तदेतच्चिन्तया याति रोगशोकविवर्ज्यताम्"।

चतुर्दशविद्या स्त्री ब० व० संज्ञात्वात् कर्म्म०। वेदादिषु चतुर्दशसु विद्यासु। ताश्च "विद्याश्चतुर्दश प्रोक्ताः क्रमेण तु यथास्थिति। षडङ्गमिश्रितावेदा धर्म्मशास्त्रं पुराणकम्। मीमांसातर्कमपि च एता विद्याश्चतुर्दश" नन्दि पु०। "पुराणन्यायमीमांसाधर्म्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्म्मस्य च चतुर्दश" या० स्मृतौ विद्यास्थानत्वोक्तेस्तासां तथात्वम्।

चतुर्द्दशाङ्ग न० चतुर्दश अङ्गान्यस्य। "चिरज्वरे वातकफोल्वणे वा त्रिदोषजे वा दशमूलमिश्रः। किराततिक्तादिगणः प्रयोज्यः शुद्ध्यर्थिना वा त्रिवृता विमिश्रः" चक्रदत्तोक्ते पाचनभेदे।

चतुर्द्दिश न० चतसृणां दिशानां समाहारः असंज्ञात्वात् द्विगुः। चतसृषु दिक्षु। दिक्शब्देन समासे चतुर्दिश् इत्येव। संज्ञात्वे तु कर्म्मधा०। प्राच्यादिषु चतसृषु दिक्षु ब० व०। "शिवाभिर्घोररावाभिश्चतुर्द्दिक्षु समन्विताम्" कालीध्यानम्।

चतुर्द्दोल पुं न० (चण्डोल) इति (चन्दोल) इति ख्याते "राज्ञोयद् द्विपदं यानं विशेषाख्यमलं विदुः। चतुर्भिरुह्यते यत्तु चतुर्दोलं तदुच्यते" उक्ते चतुर्भिर्वाह्ये यानविशेषे। प्रसङ्गाच्चतुर्दोलाष्टदोललक्षणभेदादिकं भोजदेवोक्तं प्रदर्श्यते। "चतुर्भिर्वाहकै र्दण्डैः षड्भिः कुम्भैः सुसंस्थितैः। स्तम्भैरष्टाभिरुदितं चतुर्द्दोलमनुत्तमम्। तद्भेदा जयकल्याणवीरसिंहा यथाक्रमम्। चतुर्विधानां भूपानां चतुर्द्दोलाः प्रकाशिताः। त्रिहस्तसम्मितायामो द्विहस्तपरिणाहवान्। हस्तद्वयोन्नतः प्रोक्तश्चतुर्द्दोलोजयाख्यया। चतुर्हस्तायतोयस्तु सार्द्धहस्त-

स्तु विस्तृतौ। चतुर्द्दोलः समाख्यातः कल्याणस्तावदुन्नतः। पञ्चहस्तायतोयस्तु त्रिहस्तपरिणाहवान्। तावदेवोन्नतोवीरश्चतुर्द्दोल उदाहृतः। आयामपरिणाहाभ्यां चतुर्हस्तमितोहि यः। चतुर्द्दोलोह्ययं सिंहस्तदर्द्धेनोन्नतः शुभः। सर्वोऽथ द्विविधः प्रोक्तः सच्छदिश्चापि निश्छदिः। आद्यः समरवर्षासु परः केलिवनात्यये। सर्वेषामेव काष्ठानां दण्डः स्याद्वज्रवारणः। चन्दनेनैव घटना सर्वेषामुपयुज्यते। लोमजं सर्ववस्त्रेषु कनकं सर्वधातुषु। कुम्भस्य पद्मकोषस्य शिरस्येति यथाक्रमम्। तैर्देशानां महीन्द्राणां चतुर्द्दोलेषु विन्यसेत्। दर्पणं चार्द्धचन्द्रञ्च हंसः केकी शुकोमजः। अश्वः सिंहश्च तस्याग्रे आदित्यादिदशोत्तरान्"। मणिनियमस्तु दण्डवत्। "रक्तः शुक्लश्च पीतश्च कृष्णश्चित्रस्तथाऽरुणः। नीलः कपिल इत्युक्तः पताकानान्तु सङ्ग्रहः। चतुर्द्दोलः सपताकः शुभयानमिति स्मृतः। मुक्तास्तवकैर्दशभिर्युक्तः स्याद्राजकेशानाम्। चामरदण्डैर्दशभिर्दिग्जयिनां चतुर्द्दोलः। चाषपक्षस्य पुच्छश्चेत् सर्वोपरि परिन्यसेत्। यात्रासिद्धिरयं नाम्ना चतुर्द्दोलो महीभुजाम्। स्तम्भच्छदिरहितो निश्छदिरुक्तश्चतुर्द्दोलः"। मानं पूर्ववत्। "स पुनर्द्विविधः प्रोक्तः सध्वजश्चाथ निर्ध्वजः। ध्वजान् षड़त्र न्यस्यन्ति षड्वर्गविजयैषिणः। तेषां मानन्तु चत्वारः स्वामिहस्तैकसम्मिताः। कोणेषु पश्चादग्रेषु हस्तद्वयमितौ ध्वजौ। सुवर्णं रजतं युग्मं त्रिविधानां महीभुजाम्। मणिचामरकुम्भानां खड्गादीनां विनिश्चयः। चतुर्द्दोलध्वजोराज्ञां विज्ञेयो नवदण्डवत्। निर्ध्वजे तु चतुर्द्दोले मानमन्यविधं शृणु। आयामपरिणाहाभ्यां चतुर्हस्तमितोहि यः। विजयोनाम विज्ञातश्चतुर्द्दोलोमहीभुजाम्।' विजयो मङ्गलो भव्योवितस्त्यैकैकवर्द्धितः। त्रिविधानां महीन्द्राणां यानत्रयमुदाहृतम्। अष्टाभिरुह्यते यस्तु अष्टदोलं उशन्ति तम्। सोपानद्वितयञ्चात्र विज्ञेयं शिल्पिनिर्मितम्"। भोजस्तु। "अष्टाभिर्वाहकैर्दण्डैः षड्भिस्तु दशभिर्घटैः। स्तम्भैस्तु दशभिर्ज्ञेयमष्टदोलं महीभुजाम्। तद्भेदाजयकल्याणवीरसिंहा यथाक्रमम्। चतुर्विधानां भूपानामष्टदोलाः प्रकीर्त्तिताः। षड्भिर्हस्तैर्मितायामः परिणाहे चतुर्भुजः। चतुर्हस्तोन्नतो राज्ञामष्टदोलं जयं विदुः। आयामपरिणाहाभ्यां पञ्चहस्तमितोहि यः। कल्याणाख्योऽष्टदोलोऽयं चतुर्हस्तमितोन्नतिः। सप्तहस्तायतः कार्योविस्तरे पञ्चहस्तकः। पञ्चहस्तोन्नतो वीरश्चाष्टदोलो महीभुजाम्। आयामपरिणाहाभ्यामष्टहस्तमितोहि यः। सिंहनामाष्टदोलोऽयं विज्ञेयः षड्भुजोन्नतः। सर्वोऽथ द्विविधः प्रोक्तः सच्छदिश्चापि निश्छदिः। काष्ठवस्त्रघटादीनां मणीनां चामरस्य च। चतुर्द्दोलवदुन्नेयोनियमोऽन्योऽपि सूरिभिः। पूर्ववन्निश्छदेर्मानं ध्वजमानमिहोच्यते। दशध्वजास्तेषु चाष्टौ स्वामिहस्तद्वयोन्नताः। पश्चादग्रे ध्वजौ राज्ञश्चतुर्हस्तमितौ मतौ। मणिचामरपत्राणां निर्णयो निष्पताकवत्। निर्ध्वजश्चाष्टदोलोयः शिविकेति स गद्यते। मणिकुम्भमुखादीनां नियमो नवदण्डवत्"। "एवं द्वादश षोड़श विंशति दोलादिकाः कार्य्याः। मानं सार्द्धद्विगुणितं सार्द्धत्रिगुणितं युक्तमेतेषाम्। विंशतिदोलात् परतो भोजमते सम्भवेद्यालम्"। यानं वह्वनुयोज्यं बहुगुणमेतज्जगाद वैव्यासः"। भविष्योत्तरेऽपि "यदुक्तं द्वैपदं यानं तिन्मानेन योनृपः। स्वयानं कुरुते दिव्यं स चिरं सुखमश्नुते। स्वयोगयुक्तयानस्थो भोगमाप्नोति मानवः। योदम्भादथवाऽज्ञानाद्यानं प्रकुरुतेऽन्यथा। तस्यैतानि विनश्यन्ति आयुर्विद्यायशोधनम्। प्रधानं यानमाश्रित्य नियमोऽयं समाश्रितः। नाप्रधाने निर्णयोऽस्ति तस्मिन्कुन्तु मनोज्ञता"।

चतुर्द्वार न० चत्वारि द्वाराण्यस्य। १चतुर्मुखे गृहभेदे। समाहारद्विगुः। २चतुर्षु द्वारेषु न०। "मण्डपं कारयेत्तत्र चतुर्द्वारसमन्वितम्" हेमाद्रौ तुलादानप्रकरणे।

चतुर्द्धा अव्य० चतुःप्रकारम् धाच्। चतुःप्रकारे। "ततश्च शेषं प्रविभज्य शीघ्रमर्द्धं चतुर्द्धा मम चात्मनश्च" भा० आ० १८२ अ०। "द्विधा विधाय चैकैकं चतुर्द्धा प्रथमं पुनः। स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते" पञ्चदशी

चतुर्बाहु पु० चत्वारोबाहवोऽस्य। १विष्णौ "पीतवासाश्चतुर्बाहुः शङ्खचक्रगदाधरः" भाग० ८।१७।२। २चतुर्भुजयुक्तमात्रे त्रि०। ३चतुष्कोणे क्षेत्रे च न०।

चतुर्भद्र न० चतुर्णां धर्म्मार्थकाममोक्षाख्यानां भद्राणां श्रेयसां समाहारः। १धर्म्मार्थकाममोक्षेषु अमरः। चत्वारि भद्राण्यस्य। २तद्युक्ते त्रि०। "स चेन्मार सञ्जय। चतुर्भद्रतरस्त्वया" भा० भा० द्रो० अभिमन्युव० प० षोड़शराजिके बहुक्षत्वः प्रयुक्तम्।

चतुर्भाव पु० चतुर्णां भावः उत्पत्त्युपादानम्। विष्णौ परमेश्वरे "चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्" विष्णुस०। "धर्मार्थकाममोक्षाख्यं पुरुषार्थचतुष्टयं भवत्युत्पद्यतेऽस्मादिति चतुर्भावः" भा०।

चतुर्भुज पु० चत्वारो भुजा यस्य। १विष्णौ "चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः" विष्णुस०। २तदवतारे वासुदेवे नन्दनन्दने च "तेनैव रूपेण चतुर्भुजेन सहस्रबाहो! भव विश्वमूर्त्ते!" गीता। "तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधम्" भाग० १०।६।८। स्त्री० ३चतुर्बाहुयुक्ते त्रि०। "मुक्तकेशीं चतुर्भुजाम्" श्यामाध्यानम्। "सबाल आसीद्वपुषा चतुर्भुजः" (शिशुपालः) माघः। ४चतुष्कोणे क्षेत्रे न०। भुनक्ति भुज—क चतुर्णां धर्मार्थकामानां भुजः। ५धर्मार्थकाममोक्षभाजने त्रि०।

चतुर्मुख पु० चत्वारि मुखान्यस्य। १चतुरानने वेधसि चतुराननशब्दे दृश्यम्। "चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगम्। चतुर्वर्णमयोलोकस्त्वत्तः सर्वं चतुर्मुखात्" मनुः। २चतुर्द्वारे गृहे न०। चतुर्णां मुखानां समाहारः ङीप्। ३चतुर्षु मुखेषु स्त्री। चतुर्मुखसमीरिताः" कुमा०। "चतुर्भिर्मुखैः समीरिताः वाक्ये उत्तरपदद्विगुः। समाहारे चतुर्मुखी स्यात्। ४औषधभेदे पु० तल्लक्षणं वैद्यके यथा "रसगन्धकलौहाभ्रं समं सूताद्धि हेम च। सर्वं खल्लतले क्षिप्त्वा कन्यारसविमर्दितम्। एरण्डपत्रै रावेष्ट्य धान्यराशौ दिनत्रयम्। संस्थाप्य तत उद्धृत्य सर्वरोगेषु योजयेत्। एतद्रसायनवरं त्रिफलामधुसंयुतम्। तदाथाग्निबलं खादेत् वलीपलितनाशनम्। क्षयमेकादशविधं कासं पञ्चविधं तथा। कुष्ठमष्टादशविधं पाण्डुरोगान् प्रमेहकान्। शूलं श्वासञ्च हिक्काञ्च मन्दाग्निं चाम्लपित्तकम्। व्रणान् सर्वानाम्लवातविसर्पं विद्रधिं तथा। अपस्मारमहोन्मादान् सर्वार्शांसि त्वगामयान्। क्रमेण सेवितं हन्ति वृक्षमिन्द्राशनिर्यथा। पौष्टिकं बलदमायुष्यं पुत्रप्रसवकारकम्। चतुर्मुखेण देवेन कृष्णात्रेयेण सूचितम्"। चतुर्मुखप्रकाशितत्वादस्य चतुर्मुखत्वम्।

चतुर्मूर्त्ति पु० चतस्रो मूर्त्तयोऽस्य। १परमेश्वरे तस्य विराट्सूत्रात्माव्याकृततुरीयमूर्त्तिकत्वात् तथात्वम्। "चतुर्मूर्त्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः" विष्णुस०। चतस्रो मूर्त्तयः विराट्सूत्रात्माव्याकृततुरीयात्मानोऽस्य" शाङ्करभाष्यम्।

चतुर्युग न० चतुर्णां युगानां समाहारः पात्रादि० न ङीप्स्त्रीत्वे। सत्यत्रेताद्वापरकलिरूपेषु चतुर्षु युगेषु "तद्द्वादशसहस्राणि चतुर्युगमुदाहृतम्। सूर्य्याब्दसङ्ख्यया द्वित्रिसागरैरयुताहतैः ४३२००००। सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम्" सू० सि०।

चतुर्वक्त्र पु० चत्वारि वक्त्राण्यस्य। चतुरानने चतुर्वदनादयोऽप्यत्र।

चतुर्वय पु० चत्वारोवयाः शाखा अवयवा यस्य। चमसभेदे। "एकं वि चक्र चमसं चतुर्वयम्" ऋ० ४।३६।४। वयाः शाखाः चतुःशाखं चतुरवयवम्" भा०।

चतुर्वर्ग पु० ६त०। धर्मार्थकाममोक्षसमुदाये "चतुर्वर्ग फलं ज्ञानं कालावस्थाश्चतुर्युगम्" मनुः।

चतुर्वर्गचिन्तामणि पु० हेमाद्रिकृते स्मृतिनिबन्धभेदे "यः पूर्वं चारुचिन्तामणिममितगुणं मन्दराद्रिः समुद्रम् निर्मथ्य प्रायशोऽयं वितरति बहुशः प्रार्थनादर्थमेव। सम्प्रत्यालोच्य सर्वस्मृतिनिगमपुराणेतिहासाम्बुराशीन् हेमाद्रिः सङ्गृह्यैव प्रकटयति चतुर्वर्गचिन्तामणिं सः। "खण्डानि चास्मिन् व्रतदानतीर्थमोक्षाभिधानि क्रमशो भवन्ति। यत्पञ्चमं तत्परिशेषखण्डमखण्डितो यत्र विभाति धर्मः" हेमाद्रि व्र०ख०। "चतुरेण चतुर्वर्गचिन्तामणिवणिज्यया। हेमाद्रिर्बोपदेवेन मुक्ताफलमचीकरत्" मुक्ताफलम्।

चतुर्वर्ण पु० ब०व० चत्वारोवर्णाः संज्ञात्वात् न समा० द्वि० कर्म्म०। ब्राह्मणक्षत्रियवैश्यशूद्रेषु चतुर्षु वर्णेषु। "चतुर्वर्णमयोलोकस्त्वत्तः सर्वं चतुर्मुखात्" मनुः। स्वार्थे भावे वा ष्यञ् चातुर्वर्ण्य चतुर्षु वर्णेषु तद्भावे च न०। "चातुर्वर्ण्यं मया प्रोक्तं गुणकर्मविभागशः" गीता०।

चतुर्वर्णादि पु० स्वार्थे ष्यञ्प्रत्ययनिमित्ते का० वार्त्तिकोक्ते शब्दगणे। "चतुर्वर्णादीनां स्वार्थे उपसंख्यानम्" का० वार्त्ति०। स च गणः "चतुर्वर्ण चतुराश्रम सर्वविद्य त्रिलोक त्रिस्वर षड्गुण सेना अनन्तर सन्निधि समीप उपमा सुख तदर्थ इतिह मणिक" चतुर्वर्णादिः।

चतुर्विंशति स्त्री चतुर्भिरधिका विंशतिः। (चव्विश) १चतुरधिकविंशतिसंख्यायां २तत्संख्येये च। पूरणे डट्। चतुर्विंश तत्संख्यापूरणे त्रि० स्त्रियां ङीप्।

चतुर्विंशतिक त्रि० चतुरधिका विंशति र्यत्र कप्। १चतुर्विंशतिसंख्यायुक्ते। २सांख्योक्ते प्राकृतिके गणे पु०

“पञ्चभिः पञ्चभिः ब्रह्मश्चतुर्भिर्दशभिस्तथा । एतच्चतुर्विंशतिकं गणं प्रधानिकं विदुः । महाभूतानि पञ्चैव भूरापोऽग्निर्मरुन्नभः । तन्मात्राणि च तावन्ति५ गन्धादीनि मतानि वै । इन्द्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः । वाक्करौ चरणौ मेढ्रं पायु र्दशम उच्यते । मनोबुद्धिरहङ्कारश्चित्तमित्यन्तरात्मकम् । चतुर्द्धा लक्ष्यते. मनोवृत्त्या लक्षणरूपया” भाग०३।२६।१४। तादृशगणश्च “प्रकृतेर्महान् महतोऽहङ्कारस्तस्मात् गणश्च षोडशकः । तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि” सा० का० उक्तः ।

चतुर्विंशतिमूर्त्ति स्त्री कर्म० । विष्णोर्हस्तभेदेनचक्रादिविन्यासभेदेन चतुर्विंशतिसंख्यके मूर्त्तिभेदे तन्मूर्त्तिलक्षणं तद्भेदेन विष्णोर्नामभेदाश्च अग्निपु० उक्ताः यथा “ओंरूपः १केशवः पद्मशङ्खचक्रगदाधरः । २नारायणः शङ्खपद्मगदाचक्री प्रदक्षिणम् । ततो गदी ३माधवोऽरिशङ्खपद्मी नमामि तम् । चक्रकौमोदकीपद्मशङ्खी ४गोविन्द ऊर्जितः । मोक्षदः श्रीगदी पद्मी शङ्खी विष्णु५श्च चक्रधृक् । चक्रशङ्खाब्जगदिनं ६मधुसूदनमानमे । भक्त्या त्रिविक्रमः ७पद्मी गदी शङ्खी च चक्र्यपि । शङ्खचक्रगदापद्मी वामनः ८ पातु मां सदा । मुक्तिदः श्रीधरः ९ पद्मी चक्री गदी च शङ्ख्यपि । हृषीकेशो१० गदाचक्री पद्मी शङ्खी च पातु नः। वरदः पद्मनाभ११स्तु शङ्खाब्जारिगदाधरः । दामोदरः १२ पद्मशङ्खगदाचक्री नमामि तम् । रक्षेद्गदी शङ्खचक्री वासुदेवो१३ऽब्जभृज्जगत् । सङ्कर्षणो १४ गदी शङ्खी पद्मी चक्री च पातु नः । चक्री शङ्खगदी पातु प्रद्युम्नः १५पद्मभृत् प्रभुः । अनिरुद्ध१६श्चक्रगदी शङ्खी पद्मी च पातु नः । सुरेशोऽर्य्यब्जशङ्खाढ्यः श्रीगदी पुरुषोत्तमः१७ । अधोक्षजः१८ पद्मगदी चक्री शङ्खी च पातु नः । देवो नृसिंह१९ श्चक्राब्जगदाशङ्खी नमामि तम् । अच्युतः२० श्रीगदी पद्मी चक्री शङ्खो च पातु नः । बालरूपी शङ्खगदी उपेन्द्र२१श्चक्रपद्म्यपि । जनार्द्दनः२२ पद्मचक्री शङ्खधारी गदाधरः । शङ्खी चक्री च पद्मी च हरिः२३ कौमोदकीधरः। कृष्णः२४ शङ्खी गदी पद्मी चक्री मे भुक्तिमुक्तिदः । आदिमूर्त्तिर्वासुदेवस्तस्मात् सङ्कर्षणोऽभवत् । सङ्कर्षणाच्च प्रद्युम्नः प्रद्युम्नादनिरुद्धकः । केशवादिप्रभेदेन एकैकस्य त्रिधा क्रमात् । द्वादशाक्षरकं स्तोत्रं चतुर्विंशतिमूर्त्तिमत् । यः पठेच्छृणुयाद्वापि निर्मलः सर्वमाप्नुयात्” ।

चतुर्विंशतिमूर्त्तीनां दक्षहस्तोर्द्ध्वादिष्वस्तन्यासभेदेन नामभेदविवृतिः ।

मूर्त्तिनाम	दक्षोर्द्ध्वं	दक्षाधः	वामोर्द्ध्वं	वामाधः ।
१केशवस्य	१पद्मम्.	१शङ्खः	१चक्रम्	१गदा
२नारायणस्य	१शङ्खः	१पद्मम्	१गदा	१चक्रम्
३ माधवस्य	१गदा	१चक्रम्	१शङ्खः	१पद्मम्
४ गोविन्दस्य	१चक्रम्	१गदा	१पद्मम्	१शङ्खः
५ विष्णोः	२गदा	२पद्मम्	२शङ्खः	२चक्रम्
६ मधुसूदनस्य	२चक्रम्	२शङ्खः	२पद्मम्	२गदा
७ त्रिविक्रमस्य	२पद्मम्	२गदा	३शङ्खः	३चक्रम्
८ वामनस्य	२शङ्खः	२चक्रम्	२गदा	पद्मम्
९ श्रीधरस्य	३पद्मम्	३चक्रम्	३गदा	२शङ्खः
१० हृषीकेशस्य	३गदा	४चक्रम्	३पद्मम्	३शङ्खः
११ पद्मनाभस्य	३शङ्खः	३पद्मम्	२चक्रम्	३गदा
१२ दामोदरस्य	४पद्मम्	३शङ्खः	४गदा	४चक्रम्
१३ वासुदेवस्य	४गदा	४शङ्खः	३चक्रम्	३पद्मम्
१४ सङ्कर्षणस्य	५गदा	५शङ्खः	४पद्मम्	५चक्रम्
१५ प्रद्युम्नस्य	३चक्रम्	६शङ्खः	५गदा	४पद्मम्
१६ अनिरुद्धस्य	४चक्रम्	३गदा	४शङ्खः	५पद्मम्
१७ पुरुषोत्तमस्य	५चक्रम्	४पद्मम्	५शङ्खः	४गदा
१८ अधोक्षजस्य	५पद्मम्	४गदा	४चक्रम्	४शङ्खः
१९ नृसिंहस्य	६चक्रम्	५पद्मम्	६गदा	५शङ्खः
२० अच्युतस्य	६गदा	६पद्मम्	५चक्रम्	६शङ्खः
२१ उपेन्द्रस्य	४शङ्खः	५गदा	६चक्रम्	६पद्मम्
२२ जनार्द्दनस्य	६पद्मम्	५चक्रम्	६शङ्खः	५गदा
२३ हरेः	५शङ्खः	६चक्रम्	५पद्मम्	६गदा
२४ कृष्णस्य	६शङ्खः	६गदा	६पद्मम्	६चक्रम्

हेमाद्रिव्र० ख० मुद्रितपुस्तके ११४पृ० चतुर्विंशतिमूर्त्तीनां ध्यानवाक्यत्वेन यन्मुद्रितं तत्र केशवमूर्त्तिं विहाय त्रयोविंशतिमूर्त्तीनां ध्यानानि सन्ति तत्र चरमे “विष्णुर्बिभर्त्ति यः” इत्यत्र “कृष्णोबिभर्त्ति य” इत्येव भवितुमुचितम् विष्णोः पूर्व्वमुक्तत्वात् कृष्णस्यानुक्तत्वात् । तथा वासुदेवादीनां त्रयोविंशतिमूर्त्तीनामेव मूर्त्तिज्ञापकाः सार्द्धैकादशश्लोकाः सन्ति केशवमूर्त्तिज्ञापकमर्द्धपद्यं पतितम् । तच्च संस्कर्त्तुः प्रमादवशात् एवं मूर्त्तिभेदलक्षणैक्यमपि इति सुधीभिश्चिन्त्यम् ।

चतुर्षु हस्तेषु चतुरस्त्रविन्यासभेदाच्चतुर्विंशतिसंख्यकाएव मूर्त्तिभेदा भवन्ति। "स्थानान्तमेकादिचयाङ्कघातः संख्याविभेदाः" लीला० उक्तदिशा १।२।३।४। २४सख्या इति तद्वृत्तौ उक्तम्।

चतुर्विद्या स्त्री चतस्रः विद्या संज्ञात्वात् कर्म्म०। १ऋग्यजुःसामाथर्वाख्यासु विद्यासु। चतस्रोवेदरूपा विद्याअस्य। २चतुर्वेदाभिज्ञे। ततः स्वार्थे चतुर्वर्णा० ष्यञ् अनुशतिका० उभयपदवृद्धिः। चातुर्वैद्य चतुर्वेदाभिज्ञे

चतुर्विध त्रि० चतस्रो विधा अस्य। चतुःप्रकारे "एष वोऽभिहितो धर्म्मोब्राह्मणस्य चतुर्विधः"। "पारुष्यमनृतं चैव पैशुन्यञ्चापि सर्वशः। असम्बन्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम्" इति च मनुः। चतुर्विधशरीराणि (जरायुजाण्डजस्वेदजोद्भिज्जाख्यानि) धृत्वा मुक्त्वा सहस्रशः। सुकृतान्मानवोभूत्वा ज्ञानी चेन्मोक्षमाप्नुयात्" शब्दार्थचि० धृतवाक्यम्।

चतुर्वीज न० समाहारद्विगुः। "मेथिकाचन्द्रसूरश्च कृष्णा जाजी यवानिका। एतच्चतुष्टयं युक्तं चतुर्वीजमिति स्मृतम्" भावप्र० उक्ते वीजचतुष्टये। "तच्चूर्णं भक्षितं नित्यं निहन्ति पवनामयान्। अजीर्णं शूलमाध्मानं पार्श्वशूलं कटिव्यथाम्" भावप्र० तद्गुणा उक्ताः।

चतुर्वेद पु० चत्वारोवेदाः प्रतिपादका अस्य, चतुरो वेदान् वेत्ति अधीते वा विद–अण् उप० स० वा। १परमेश्वरे "चतुर्वेदश्चतुर्होत्रश्चतुरात्मा सनातनः" हरिवं०२२८अ०। २चतुर्वेदाभिज्ञे च। ततः स्वार्थे ष्यञ्। चतुर्वेदस्योभयपदवृद्धिः। चातुर्वैद्य तदर्थे पु०।

चतुर्वेदविद् पु० चतुरो वेदान् वेत्ति विद–क्विप् ६त०। १विष्णौ "चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्" विष्णु स०। चतुर्वेदाभिज्ञमात्रे च।

चतुर्व्यूह पु० चत्वारो व्यूहा अस्य। १विष्णौ "चतुर्व्यूहश्चतुर्गतिः" विष्णु स०। "शरीरपुरुषः, छन्दः पुरुषोवेदपुरुषो महापुरुषः इयि बह्वृचोपनिषदुक्ताश्चत्वारोव्यूहा अस्येति चतुर्व्यूहः" भा०। "चतुरात्मा चतुर्व्यूहः" विष्णु स०। "सृष्ट्यादिकार्य्यार्थं चत्वारोव्यूहा विभागा वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धसंज्ञा मूर्त्तयो यस्य सः" भाष्यम्। उभयविधव्युत्पत्तियोगात्तु द्विनामतया द्विधा प्रयोगः। तथा। "व्यूहात्मानश्चतुर्धा वै वासुदेवादिमूर्त्तिभिः। सृष्ट्यादीन् प्रकरोत्येष विश्वात्मा जनार्द्दनः" इति विष्णुपु०। मार्कण्डेयपुराणे च "मूलकारणं वासुदेवाख्यं व्यूहमुक्तोक्तम् "द्वितीया पृथिवीं मूर्द्ध्ना शेषाख्या धारयत्यधः। तामसी सा समाख्याता तिर्य्यक्त्वं समुपाश्रिता। तृतीया कर्म कुरुते प्रजापालनतत्परा। सत्वोद्रिक्ता तु सा ज्ञेया धर्मसंस्थानकारिणी। चतुर्थी जलमध्यस्था शेते पन्नगतल्पगा। राजसास्तद्गुणः सर्गं सा करोति सदैव हि"। साङ्ख्ये २मोक्षशास्त्रे। तत्र हि हेयं हानं हेयहेतुः हानोपायश्चेति चत्वारोव्यूहाः प्रतिपाद्याःसन्ति। तत्र त्रिविधं दुःखं हेयम्। तदत्यन्तनिवृत्तिर्हानम्। प्रकृतिपुरुषसंयोगद्वारा चाविवेको हेयहेतुः। विवेकख्यातिस्तु हानोपाय इति। ३चिकित्साशास्त्रे च न०। तत्र च रोग आरोग्यं रोगनिदानं भैषज्यमिति चत्वारोव्यूहा उक्ताः इति तस्य तथात्वम्।

चतुर्हायन(ण) त्रि० चत्वारोहायना अस्य। चतुर्वर्षोद्भवे जन्तौ वयोवाचित्वे स्त्रियां ङीप् णत्वञ्च। वयोऽन्यत्र न ङीप् णत्वं वा। चतुर्हायना शाला।

चतुर्होतृ पु० कर्म्म०। चतुर्वेदोक्तहोमचतुष्टयकारिषु होतृषु "चतुर्होतार आप्रियश्चातुर्मास्यानि नीविदः" अथ० ११।७।१९। चतुर्होतृणां कर्म्म अण्। चातुर्होत्र तत्कृतकर्म्मणि। "चतुर्भुजश्चतुर्मूर्त्तिश्चातुर्होत्रप्रवर्त्तकः" हरिवं० २७९ अ०।

चतुर्होत्र पु० चत्वारि होत्राणि होमा प्रीत्यर्था अस्य। १विष्णौ परमेश्वरे। "चतुर्वेदश्चतुर्होत्रश्चतुरात्मा सनातनः" हरिवं० २२८अ०।

चतुर्होत्रक न० चत्वारि होत्राणि यत्र कर्म्मणि कप्। चतुर्होत्रविधायके चतुर्वेदे "त्रय्या चतुर्होत्रकविद्यया च" भाग० ७।३।२८।

चतुल त्रि० चत–उलच्। स्थापयितरि संक्षिप्तसा०।

चतुश्चक्र न० रुद्रयामलोक्ते दीक्षाङ्गमन्त्रशुद्धिज्ञापके चक्रभेदे यथा "चतुश्चक्रं प्रवक्ष्यामि शृणु पार्वतीवल्लभ!। वामदक्षिणयोगेन रेखापञ्चकमालिखेत्। पूर्वपश्चिमभेदेन पञ्च रेखाः समालिखेत्। चतुष्कोष्ठे दक्षभागे चतुष्कोष्ठे च मन्त्रवित्। तदधश्च चतुष्कोष्ठे मध्यमस्थे चतुर्गृहे। प्रलिखेत् क्रमशश्चाद्यो चतुर्मन्दिरमध्यगे। स्निग्धञ्च शीतलं जप्तं सिद्धञ्चापि ततः परम्। अकारञ्च उकारञ्च लृमोकारं ततः परम्। स्निग्धस्थमिति वर्णं च शीतलस्थं शृणु प्रभो!। आकारञ्च ऊकारञ्च लृमौकारं ततः परम्। तदधोजप्तगेहस्थं वर्णं शृणु महाप्रभो!!

इकारश्च ऋकारश्च एतमोङ्कारतः परम् । सिद्धगेहस्थितं वर्णं शृणु सर्वसुखप्रदम् । ईकारश्च ॠकारश्च औकारश्च ततः परम् । दत्ते चतुर्गेहस्थितान् वर्णान् तव वदामि तान् । आह्लादं चापि प्रत्यायं सुख्यञ्च शुद्धमित्यपि । एतत्कोष्ठस्थितान् सर्वान् शुभाशुभफलप्रदान् । ककारञ्च खकारञ्च झकारञ्च ञकारकम् । आह्लादस्येति प्रोक्तं प्राप्तिमात्रेण सिद्धिदम् । प्रत्यायस्य गकारञ्च वकारं सचमित्यपि । सुख्यस्य हि ङकारञ्च टकारं छठमित्यपि । शुद्धस्यञ्च ढकारञ्च णकारं सतमित्यपि । तदधःस्थं चतुर्गेहं लौकिकं सात्विकं तथा । मानसिकं राजसिकं चतुर्गेहस्थितं त्विमम् । लौकिकस्य थकारञ्च दकारं च मकारकम् । सात्विकस्य धकारञ्च नकारञ्च यकारकम् । मानसिकस्य शृणु भो पकारं च फकारकम् । तद्वामस्य चतुर्गेहं शृणु पञ्चानन ! प्रभो ! । सुप्तं चिप्तञ्च लिप्तञ्च दुष्टमन्दं प्रकीर्त्तितम् । एतद्गेहस्थितान् वर्णसात्वान् गृह्णाति सोनरः । वर्जयित्वा सुप्तमन्त्रं चिप्तं लिप्तञ्च दुष्टकम् । ऐहिके सिद्धिमाप्नोति परे मुक्तिमवाप्नुयात् । यद्यभाग्यवशात् सुप्तादिषु गेहेषु लभ्यते । तदा मन्त्रं शोधयेद् वै सुप्तस्तम्भितकीलितैः । वर्द्धितैर्दीपजालस्यैरशुभं भूतशुद्धये । भूतलिप्या पुटीकृत्य जपत्वा सिद्धिं ततो लभेत् । न तु वा वर्जयेत् गेहं चतुष्कं वर्णवेष्टितम् । सुप्तगेहस्थितं वर्णं शृणुष्व पञ्चकानन । बकारञ्च भकारञ्च ततोऽन्यगृहसंस्थितम् । शकारञ्च लकारञ्च लिप्तगेहस्थितं द्वयम् । षकारञ्च सकारञ्च लिप्तगेहस्थितं द्वयम् । दुष्टगेहे स्थितं नाथ ! हकारं गगनं तथा । निजस्वभावयुक्तं यत्तन्मन्त्रं समुपाश्रयेत्" ।

चतुश्चत्वारिंशत् स्त्री चतुरधिका चत्वारिंशत् । (चोयाल्लिश) १चतुरधिकचत्वारिंशत्संख्यायां २तत्संख्यान्विते च । पूरणे डट् । चतुश्चत्वारिंश तत्संख्यापूरणे त्रि० स्त्रियां ङीप् ।

चतुश्शृङ्ग पु० चत्वारि शृङ्गाण्यस्य । १कुशद्वीपस्य वर्षपर्वते "बभ्रुश्चतुःशृङ्गः कपिलाचित्रकूटोदेवानीकऊर्द्धरोमा द्रविणः" भाग०५।२०।११ श्लो० । २परमेश्वरे च । "चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे" इत्यादि श्रुतौ तस्य चतुःशृङ्गत्वोक्तेस्तथात्वम् । ३शब्दशास्त्रे च तस्य नामाख्यातनिपातोपसर्गरूपचतुर्विधार्थबोधकत्वात् तथात्वम् ।

चतुष्क न० चतुरवयवं चत्वारोऽवयवा यस्य वा कन् । १चतुःसंख्यायां २तदन्विते च "एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथा । नामार्था इति सर्वेऽमी पक्षाः शास्त्रे व्यवस्थिताः" हरिः । "एतत् कष्टतमं विद्यात् चतुष्कं कामजे गणे" द्विकन्त्रिकञ्चतुष्कञ्च पञ्चकञ्च शतं समम्" इति च मनुः । ३चतुस्तम्भे मण्डपभेदे "चतुष्कपुष्पप्रकरावकीर्णयोः" "नार्य्यश्चतुष्काभिमुखं व्यनैषुः" इति च कुमा० । "नारीमनांसीव चतुष्कमन्तः" रघुः । ४मध्यकार्य्यां (मशारि) ५पुष्करिणीभेदे च स्त्री ङीप् मेदि० । ६यष्टिभेदे न० शब्दार्थ० ।

चतुष्कर्णी स्त्री चत्वारः कर्णा अस्याः ङीष् । १कुमारानुचरमातृभेदे "क्षुरकर्णी चतुष्कर्णी कर्णप्रावरणा तथा" भा० श० ४७अ० कुमारानुचरमातृगणोक्तौ । चत्वारः कर्णाः श्रवणसाधनं यत्र । २द्वाभ्यां क्रियमाणे मन्त्रे पु० "षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णः स्थिरोभवेत्" पञ्चत० ।

चतुष्कल पु० चतस्रः कलाः मात्रा यत्र । आर्य्यादिषु चतुर्मात्रायुते गणभेदे "ज्ञेया सर्वान्तमध्यादिगुरवोऽत्र चतुष्कलाः । गणाश्चतुर्लघूपेताः पञ्चार्य्यादिषु संस्थिताः" वृ०र० ।

चतुष्कोण त्रि० चत्वारः कोणा अत्र । १चतुरस्रे तदाकारे २क्षेत्रभेदे न० ।

चतुष्टय त्रि० चत्वारोऽवयवा विधा अस्य तयप् । १चतुर्विधे भागवति चतुष्के । स्त्रियां ङीप् "प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी" कुमारः । "तदेषु सर्वेष्वेतदुपयुञ्जीत चतुष्टयम्" मनुः । "चतुष्टयमर्थदेहादिदण्डम्" । चतुर्णामवयवः तयप् । २चतुःसंख्यायाम् "युक्तां मणिस्तम्भचतुष्टयेन" कुमा० । "केन्द्रं चतुष्टयं ज्ञेयम्" नील०ता० उक्तेषु ३लग्नचतुर्थसप्तमदशमस्थानेषु न० ।

चतुष्टोम पु० चतुरुत्तरः स्तोमः त्रिवृत्पञ्चदशसप्तदशैकविंशानां समूहः मध्यपदलोपी स० । चतुरुत्तरस्तोमे "विवर्त्तोऽष्टाचत्वारिंशः धर्त्रं चतुष्टोमः" यजु० १४।२३। चतुर्दिक्षु स्तूयमानत्वात् २वायौ च । "यएव चतुष्टोमस्तोमस्तं तदुपदधाति तद्यत्तमाह धर्त्रमिति प्रतिष्ठा वै धर्त्रं प्रतिष्ठा चतुष्टोमोऽथो वायुर्वै धर्त्रं चतुष्टोमः स आभिश्चतसृभिर्दिग्भिः स्तुते वायुर्वै सर्वेषां भूतानां प्रतिष्ठा तदेतद्रूपमुपदधातीति" शत० ब्रा० ८।४।१।२६। ३स्तोमभेदे । "समीचीर्दिशः स्तुताश्चतुष्टोमः स्तोमः" यजु० १४।२५। "चतुष्टोमेन स्तोमेन समीचीः समीच्यादिशः स्तुताः" वेददी० ।

चतुष्पञ्चाशत् स्त्री चतुरधिका पञ्चाशत्। (चौयान्न) १चतुरुत्तरपञ्चाशत्संख्यायां २तत्संख्येये च। ततः पूरणे डट्। चतुष्पञ्चाश तत्संख्यापूरणे त्रि० स्त्रियां ङीप्।

चतुष्पत्री स्त्री चत्वारि चत्वारि पत्राण्यस्याः जातित्वात् ङीष्। १सुनिषण्णके (सुसुनि) शाकभेदे "चाङ्गेरी सदृशः पत्रैश्चतुर्द्दल इति स्मृतः। शाकोजलान्विते देशे चतुष्पत्रीति चोच्यते" शब्दार्थचि०। २क्षुद्रपाषाणभेदिनि च राजनि०।

चतुष्पथ पु० चत्वारः पन्थानः ब्रह्मचर्य्यादयः आश्रमा यस्य अच् समा०। १ब्राह्मणे अमरः ब्राह्मणानां हि "एष वोऽभिहितो धर्म्मो ब्राह्मणस्य चतुर्विधः" मनुना चातुराश्रम्यस्य उक्तत्वात् तथात्वम्। चतुर्णां पथां समाहारः अच्। २चतुर्मुखे (चौमाथा) पथि।

चतुष्पथनिकेता स्त्री चतुष्पथे निकेतोऽस्याः। कुमारानुचरमातृभेदे "चतुष्पथनिकेता च गोकर्णी महिषानना" भा० श० ४७अ० कुमारानुचरमातृगणोक्तौ।

चतुष्पथरता स्त्री ७त०। कुमारानुचरमातृभेदे। "चतुष्पथरता चैव भूतितीर्थाऽन्यगोचरा" भा० श०४७अ०।

चतुष्पद पुंस्त्री चत्वारि पदानि चरणा अस्य। १चतुश्चरणे गवादौ जन्तौ स्त्रियां जातित्वात् ङीष्। २तिर्य्यङ्रूपे ध्रुवकरणभेदे न०। करणशब्दे १६८०पृ०सू०सि० वाक्यं दृश्यम्। अस्य शब्दक० पुंस्त्रोक्तिः सौरागमविरुद्धा। "मृगधनुराद्यान्त्यार्द्धे द्विपाजसिंहाश्चतुश्चरणाः" ज्यो० त० उक्तेषु ३मकराद्यार्द्धधनुरन्त्यार्द्धमेषवृषसिंहराशिषु पु०। स्त्रीणां ४करणभेदे न० हेमच०।

चतुष्पदवैकृत न० ६त०। वृ० स० उक्ते चतुष्पदजन्तुप्रसवादिविकारे यथा

"परयोनावभिगमनं भवति तिरश्चामसाधु धेनूनाम्। उक्षाणो वान्योऽन्यं पिबन्ति श्वा वा सुरभिपुत्रम्। मासत्रयेण विद्यात् तस्मिन्निःसंशयं परागमनम्। तत्प्रतिघातायैतौ श्लोकौ गर्गेण निर्द्दिष्टौ। त्यागो विवासनं दानं तत्तस्याशु शुभं भवेत्। तर्पयेद्ब्राह्मणांश्चात्र जपहोमांश्च कारयेत्। स्थालीपाकेन धातारं पशुना च पुरोहितः। प्राजापत्येन मन्त्रेण यजेद्बहुलदक्षिणम्" ४६अ०।

चतुष्पदी स्त्री चत्वारः पादा अस्याः अन्त्यलोपः समा० वा ङीप् पादः पद्भावः। १पद्ये "पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा" छन्दोम०। २प्राकृतभाषादिप्रसिद्धे (चौपाया) छन्दोभेदे ३चतुश्चरणस्त्रीपशौ च अन्यलिङ्गे चतुष्पादित्येव।

चतुष्पर्णी स्त्री चत्वारि चत्वारि पर्णे पर्णे पर्णान्यस्याः ङीष्। (सुसुनी) शाकभेदे। राजनि०।

चतुष्पाटी स्त्री चतस्रोदिशः पाठयति पाटि–अण् उप०स०। नद्यां शब्दमाला

चतुष्पाठी स्त्री चतुर्णां वेदानां पाठोऽत्र गौरा० ङीष्। छात्राणामध्ययनमण्डपे (चौपाडी) गृहे।

चतुष्पाणि पु०चत्वारः पाणयोऽस्य। १विष्णौ हारा० २चतुर्बाहुयुक्तमात्रे त्रि०।

चतुष्पाद् त्रि० चत्वारः पादा अस्य अन्त्यलोपः समा०। चतुश्चरणयुक्ते गवादौ स्त्रियां ङीष् पादः पद्भावः चतुष्पदीत्येव। समासान्तविधेरनित्यत्वात् अन्त्यलोपाभावे चतुष्पादोऽपि तत्रार्थे "भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम्" छन्दोम०।

चतुस्तन स्त्री चत्वारः स्तना अस्याः वा न ङीष्। सुरभौ गवि। "तस्य स्तनानुद्वयति। ऊधसस्तत् स्तनानुद्वयति सा चतुस्तना भवति चतुस्तना हि गौः" शत० ब्रा० ६।५।२।१८।२। महिष्यादौ च पक्षे ङीषि चतुस्तनीत्यपि।

चतुस्त्रिंशत् स्त्री चतुरधिका त्रिंशत्। (चौतिश) १चतुरधिकत्रिंशत्संख्यायां २तत्संख्येये च। पूरणे डट्। चतुस्त्रिंश तत्संख्यापूरणे त्रि० स्त्रियां ङीप्।

चतुस्त्रिंशज्जातक पु० बुद्धभेदे हेमच०।

चतुस्सन पु० ब० स० चतुर्णां धर्म्मार्थकाममोक्षाणां सनः दाता सन–दाने अच् ६त० चत्वारः सनेतिशब्दा नाम्नि येषां वा। १सनकसनत्कुमारसनन्दसनातनेतिनामकेषु चतुर्षु ब्रह्मपुत्रेषु ऋषिषु तन्नाम्नां सनादित्वेन तथात्वम्। २तदवतारधारिणि चतुर्वर्गदातरि वा २विष्णौ पु० "तप्तं तपो विविधलोकसिसृक्षया मे आदौ सनात् स्वतपसः स चतुःसनोऽभूत्" भाग० २।७।६।

चतुस्स्रक्ति पु० चतस्रः स्रक्तयः कोणादिरूपा अस्य। चतुर्दिगवच्छिन्ने। "चतुःस्रक्तिर्नाभिरृतस्य" यजु० ३८।२०। "चतस्रः स्रक्तयः कोणा दिग्रूपा यस्य सः" वेददी०। "चतुःस्रक्तिरेव कूपो भवति" शत० ब्रा० ६।३।३।२६।

चतूराजी स्त्री चतसॄणां राज्ञां समाहारः टच् समा०। चतुरङ्गक्रीडायां क्रीडाभेदे चतुरङ्गशब्दे २८६३पृ० दृश्यम्।

चतूरात्र न०चतसॄणां रात्रीणां समाहारः चतसृभिः रात्रिभिर्निर्वृत्तः अण् तस्य लुक् वा अच् समा० "संख्यापूर्व्वं

रात्रमिति” पा० क्लीवत्वम् । १चतसृषु रात्रिषु २तत्साध्ये क्रतुभेदे च । “चतूरात्रम्” कात्या० श्रौ० १८।१।१४। “अयं क्रतुर्भवतीति शेषः” कर्कः । चतूरात्रादिष्वधिकम्” कात्या० श्रौ० २३।१।७। “सहस्रमधिकं दक्षिणा” कर्कः ।

चत्वर न० चत–ष्वरच् । १स्थण्डिले होमार्थं कृतसंस्कृत भूभागे २गृहाद्बहिरङ्गने (उठान) (चाताल) इति च ख्याते ३स्थाने अमरः “उद्यान्तां गृहवास्तूनि कार्य्यन्तां त्रिकचत्वराः” हरि० ११३अ० । ४नानाजनस्थानानां वासस्थाने “सहि श्रेष्ठिचत्वरे प्रतिवसति” मृच्छ० । “न चत्वरे निशि तिष्ठेत् निगूढः” भा० उ० ३६अ० । (चोतारा) ५ख्याते स्थाने “चत्वरान् राजमार्गांश्च समानन्तःपुराणि वः” हरिवं० ११६अ० । ६चतसृणां रथ्यानां सङ्गमे शब्दार्थचि० । “अनुरथ्यासु सर्वासु चत्वरेषु च कौरव!” भा० स० १५अ० ।

चत्वरवासिनी स्त्री चत्वरे वस्तुं शीलमस्याः वस–णिनि ङीप् । कुमारानुचरमातृभेदे । “कृच्छाम्बिका निष्कुटिका रामा चत्वरवासिनी” भा० ४७अ० ।

चत्वारिंशत् स्त्री चतस्रो दशतयः परिमाणमस्याः । “पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्” इत्यादि” पा० नि० । (चाल्लिश) १संख्यायां २तत्संख्येये च । ततः पूरणे तमप् । चत्वारिंशत्तम तत्संख्यापूरणे त्रि० स्त्रियां ङीप् ।

चत्वाल पु० चत–वालञ् संज्ञापूर्वकत्वेन वृद्धेरनित्यत्वात् न वृद्धिः । चात्वाले १होमकुण्डे २दर्भे च मेदि० ।

चद याचने भ्वा० द्विक० उभ० सेट् । चदति ते एदित् अचदीत् अचदिष्टाम् । चचाद चेदतुः चेदे ।

चद आह्लादे दीप्तौ च भ्वा० अक० प० सेट् इदित् । चन्दति अचन्दीत् चचन्द चचन्दतुः । चन्द्रः ।

चदिर पुंस्त्री चद–किरच् । १हस्तिनि २भुजगे च स्त्रियां जातित्वात् ङीष् । ३चन्द्रे ४कर्पूरे च पु० संक्षिप्तसा० ।

चन हिंसे भ्वा० प० सक० सेट् । चनति अचनीत–अचानीत् चचान चेनतुः । मित् णिचि चनयति ते ।

चन शब्दे तु० प० अक० सेट् । चनति अचा(च)नीत् चचान चेनतुः । णिचि चानयति ।

चन अव्य० चन–शब्दे अच् । असाकल्ये “असाकल्ये तु चिच्चन” इत्यमरः । समुच्चयार्थकचशब्देन नञः समास इत्यन्ये “युवोरिदापश्चन प्र मिणन्ति व्रतं वाम्” ऋ० २।२४।१२। “चनेत्येतत्पदद्वयसमुदायः । ऐकपद्यं त्वव्यापक साम्प्रदायिकम् । २नेत्यर्थे “पूर्वीश्चन प्रसितयस्तरन्ति” ऋ० ७।३२।१३। “चनेति समुदायो नेत्यर्थे” भा० । ३अप्यर्थे “स्वप्नश्चनेदनृतस्य प्रयोता” ऋ० ७।८६।६। “स्वप्नश्चन स्वप्नोऽपि” भा० । “नहिष्वा एषां पितरश्चनेशिरे” ऋ० १०।५६।४। पितरश्चन पितरोऽपि” यत्तु मुग्धबो० “किमः क्रान्ताच्चिच्चनौ” विभक्त्यन्तात् किमः चिच्चनप्रत्ययौ विहितौ तच्चिन्त्यम् अप्यर्थकेन असाकल्यार्थेन वा चनशब्देन गतार्थत्वात् कदाचन कथञ्चनेत्यादौ कदापि कथमपीत्यर्थलाभात् न प्रत्ययान्तरकल्पनम् । प्रागुक्तप्रयोगे किमोऽभावेऽपि प्रयोगदर्शनात् किम इत्यस्य प्रायिकत्वकल्पनेऽपि चनप्रत्यये परे पूर्व्वस्य लोपापत्तेश्च । तन्मते चित्त्वेन प्रत्ययस्याव्ययसंज्ञकत्वात् तयोश्चित्त्वाभावेनानव्ययत्वापत्तेः स्वरवैलक्षण्यानुपपत्तेश्च ।

चनस् न० चाय पूजादौ “चायतेरन्ने ह्रस्वश्च” उणा० असुन् चात् नुट् । १भक्ते उज्ज्व० । “चनो धाः सहसो यहो” ऋ० १।२६।१०। “चनोदधिष्व पचतोत सोमम्” निरुक्तोद्धृतश्रुतिः ।

चनसित न० च न शब्दे अच् चनः सित अवसानमस्य । ब्राह्मणस्यापत्यस्य नामभेदे । “नाध्यक्षनाम्नाऽऽमन्त्रीत चनसितेत्यर्हता सह । सम्भाषमाणो ब्रूयाद्विचक्षणेतीतरैरिति” कर्कोद्धृतमनुवाक्यम् । “जागर्त्त्येतां रात्रिं क्रीते राजनि द्वितीयां श्वः सुत्यायां तृतीयां चनसितं विचक्षणमिति” नामधेयान्तेषु दधाति चनसितेति ब्राह्मणं, विचक्षणेति राजन्यवैश्यौ” “विचक्षणचनसितवतीं वाचम्” कात्या० श्रौ० ७।५।७। “विचक्षणशब्दवतीं चनसितशब्दवतीं च [illegible] ब्राह्मणादिनामधेयभूतां वाणीं वदेत्” कर्कः ।

चनस्य चनोऽन्नमिच्छति क्यच् नामधातुः अन्नेच्छायां पर० अक० सेट् । चनस्यति अचनस्यीत् । “पुरुभुजा चनस्यतम्” ऋ० १।३।१।

चनिष्ठ त्रि० चनोऽन्नम् उपचारात् तद्वान् ततः अतिशये इष्ठन् डिद्भावे टिलोपः । अन्नवत्तमे “अस्मे वो अस्तु सुमतिश्चनिष्ठा” ऋ०७।५७।४। “चनिष्ठा अन्नवत्तमा” भा० ।

चन्द पु० चदि आह्लादने णयन्तात् अच् । १चन्द्रे २कर्पूरे च शब्दार्थचि० ।

चन्द(न्द्र)क पु० चन्द(न्द्र) इव कायति शुभ्रत्वात् कै–क । (चाँदा) मत्स्यभेदे “चन्द(न्द्र)कोऽरुचिकृत् बल्यश्चानभिष्यन्दकृदपि” राजवल्लभः ।

चन्दन पु०न० चदि–णिजन्तात् ल्यु । स्वनामख्याते मलयाच-

स्त्रजे द्रव्यविशेषे तद्भेदगुणादिकं भावप्र० उक्तं यथा "श्रीखण्डं चन्दनं न स्त्री भद्रश्रीस्तैलपर्णिकः। गन्धसारो मलयजस्तथा चन्द्रद्युतिश्च सः। स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितम्। ग्रन्थिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते। चन्दनं शीतलं रूक्षं तिक्तमाह्लादनं लघु। श्रमशोषविषश्लेष्मतृष्णापित्तास्रदाहहृत्। अथ पीतचन्दनम् (कलम्बक)। "कालीयकन्तु कालीयं पीताभं हरिचन्दनम्। हरिप्रियं कालसारं तथा कालानुसार्य्यपि। कालीयकं रक्तगुणं विशेषाद्व्यङ्गनाशनम्"। अथ रक्तचन्दनम् "रक्तचन्दनमाख्यातं रक्ताङ्गं क्षुद्रचन्दनम्। तिलपर्णं रक्तसारं तत्प्रवालफलं स्मृतम्। रक्तं शीतं गुरु स्वादु छर्दितृष्णास्रपित्तहृत्। तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहम्। तत्र पुंसि "सत्वसंश्रयसुखोऽपि दूष्यते कृष्णसर्पशिशुनेव चन्दनः" शकु०। क्लीवे "विना मलयमन्यत्र चन्दनं न विवर्द्धते" पञ्चत०। "ततः कनाङ्किकाः सर्व्वे दिव्यचन्दनभूषिताः" भा० स० ५७अ०। "चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम्" सा०द० तस्य शृङ्गारोद्दीपकत्वमुक्तम्। २रक्तचन्दने न० मेदि० ३वानरभेदे पु० हेम०। ४शारिवौषधौ स्त्री राजनि०। (मधुखाली) नगरीसमीपस्थे ५नदीभेदे च स्त्री।

चन्दनगिरि पु० चन्दनस्योत्पत्तिस्थानं गिरिः। मलयाचले

चन्दनगोपी स्त्री चन्दनमपि गोपायति गुप-अण्। शारिवाभेदे राजनि०।

चन्दनधेनु स्त्री पतिपुत्रवत्या मृताया नार्य्या उद्देशेन पुत्रदातव्यायां चन्द्रनाङ्कितधेनौ। तद्विधिमाह रत्नाकरे देवलः "जीवद्भर्त्री तु या नारी पुत्रिणी म्रियते यदि। सवत्सामङ्कितां धेनुमाचार्य्याय प्रदापयेत्। पतिपुत्रवती नारी म्रियते याग्रतस्तयोः। वृषं नचोत्सृजेत् पुत्रः पिता यावच्च जीवति"। तथा कर्म्मोपदेशिन्यां ब्राह्मणसर्व्वस्वे च हलायुधधृतानि वचनानि स्मृतिः "पतिपुत्रवती नारी म्रियते भर्त्तुरग्रतः। चन्दनेनाङ्कितां धेनुं तस्याःस्वर्गाय कल्पयेत्"। तथा जातूकर्ण्यः "धेनुं चन्दनमालिप्य यो दद्यान्मातृहेतवे। यदि पापशतैर्युक्ता तथापि स्वर्गमाप्नुयात्"। तथा वशिष्ठ० "न युक्तश्च वृषोत्सर्गः पिता यावत् तु जीवति। चन्दनेनाङ्कितां धेनुमाचार्य्याय प्रदापयेत्"। "चतुर्हस्तो भवेद्यूपो वध्यद्रव्यसमन्वितः। वर्त्तुलः शोभनः स्थूलः कर्त्तव्यो धेनुमौलिकः। बिल्वस्य बकुलस्यैव कलौ यूपः प्रशस्यते। अभावे वारुणेनापि यूपं कुर्य्याद्विधानतः"। "तरुणीरूपसम्पन्ना सुशीला च पयस्विनी। न्यायार्ज्जिता गृहे जाता देया सा श्रोत्रियाय गौः। नदीतीरे वने गोष्ठे देवतायतनेषु च। ब्रीहिक्षेत्रे कुशक्षेत्रे राजद्वारे चतुष्पथे"। एषु वचनेषु वृषोत्सर्गनिषेधचन्दनधेनूत्सर्गविध्योर्युगपदुपसंहारदर्शनात् वृषोत्सर्गस्थाने प्रधानतया चन्दनधेनूत्सर्गः प्रतीयते अतोऽस्य वृषोत्सर्गकार्य्यकारित्वात् तत्फलहेतुत्वं लभ्यते। "एकोद्दिष्टं न कुर्व्वीत न्यासिनाञ्चैव सर्वदा। अहन्येकादशे प्राप्ते पार्वणं तु विधीयते" इति श्राद्धविवेकधृतोशनोवचने त्रिदण्डसन्न्यासिनाम् एकोद्दिष्टनिषेधपार्वणविध्योर्युगपदुपसंहारात् एकोद्दिष्टस्थाने पार्वणमिव। यद्वा पतिपुत्रवतीरूपप्रेतविशेषाधिकृतवृषं न चोत्सृजेदिति निषेधचन्दनधेनूत्सर्गविधिभ्यां प्रेतमात्राधिकृतसामान्यवृषोत्सर्गविध्यवगतफलभावनाकरणीभूतवृषकर्मकत्यागमनूद्य तत्कर्म्मीभूतवृषमपहाय तत्स्थाने धेनुमात्रगुणविधिर्न्यायादवगम्यते। पशुयागे सामान्यविध्यवगतापःप्रणयनीयाधिकरणचमसस्थाने "गोदोहनेनापः प्रणयेदिति" विशेषविधिना गोदोहगुणविधिवत्। "नालाभेऽपि प्रवेशिनीम्। उपोष्य द्वादशीं तत्र त्रयोदश्यान्तु पारणम्" इत्यत्र एकादशीरूपनिमित्तस्थाने द्वादशीमात्रगुणविधिवच्च। अन्यथा धेनूत्सर्गस्य पृथक्कर्म्मत्वे फलभावनातत्करणनियोज्यानां पृथक्कल्पने गौरवं स्यात्। उक्तविधिनिषेधयोरुपसंहारवैयर्थ्यञ्च स्यात्। ततश्च कारणैक्यात् फलैक्यमिति। चन्दनधेनूत्सर्गेऽपि प्रेतत्वविमुक्तिपूर्वकस्वर्गप्राप्तिः फलम्। एवं कपिलोक्तमन्त्रस्य पापव्यपगमस्वर्गप्रार्थनायामपि तथैव तात्पर्य्यम्। तथा जातूकर्ण्यवचनस्थपापस्वर्गपदयोरपि तथैव तात्पर्य्यं बोध्यम्। भूतार्थानां विधिशेषिणामेव जैमिन्युक्तप्रामाण्येन प्रकृते सिद्धे विधिशेषित्वे लाघवात् "पापिष्ठमपि शुद्धेन शुद्धं पापकृतापि वेति" कात्यायनवचनस्थपापपदस्य प्रेतत्व एव तात्पर्य्यदर्शनाच्च। अत्र यद्यपि पतिपुत्रवतीत्यत्र पतिपुत्रसत्त्वस्य विशेषणीभूतकर्त्रन्वयिमरणानन्वयित्वेन न विशेषणत्वं किन्तूपलक्षणत्वमेव ततश्च काकवन्तो देवदत्तस्य गृहा इतिवत् कादाचित्कतद्वत्तामादायापि पतिपुत्रवतीति प्रयोग उपपद्यते। तथापि

"अग्रतस्तयोः" "भर्त्तुरग्रतः" इत्याभ्यां मरणकालिकी पतिपुत्रसत्ताऽवगम्यते गवां गोष्ठे इतिवत्। अथ वा परार्द्धान्वयेन धेनूत्सर्गकालिकीति। यच्च "अपुष्पिता मृता काचित् तस्याधेनुर्विगर्हिता" इति कपिलवचने अपुष्पितायाः पुत्रकर्त्तृकधेनूत्सर्गनिषेधस्याप्रसक्ततया सपत्नीपुत्रकर्त्तृकधेनूत्सर्गनिषेधप्राप्तौ तद्दृष्ट्या पतिपुत्रवतीत्यस्य सपत्नीपुत्रवतीपरत्वम् अवश्यं वाच्यम्। तदेकवाक्यतया पुत्रिणीत्यादावपि तथात्वमिति वाच्यम्। अपुष्पितेति कपिलार्द्धस्य प्रसक्तिपूर्वकतार्थं पतिपुत्रयदुनिवृत्त रजस्कायाः धेनूत्सर्गनिषेधार्थत्वात् गत्यां सत्यां लक्षणाया वीजाभावात्। प्रतियोगिवत् ध्वंसप्रागभावयोरपि अत्यन्ताभावविरोधित्वमते तु अजातपुष्पस्त्रीपरत्वं वा भवतु तथात्वेऽपि "तस्या धेनुर्विगर्हितेति" अप्रसक्तार्थापि अपुष्पिता धेनुदाननिन्दा स्तुतिपरा। यथा हरेरुत्थाने "पौष्णशेषेण क्लिन्नेन प्रतिपद्यथ योनिषि" इत्यप्रसक्तापि निन्दा एकादश्यादिपौर्णमास्यन्तपञ्चके रेवत्यन्तपादयोगविधिस्तुतिपरा यथा वा वेदगाने "यो गिरा गिरेति ब्रूयात् स आत्मानमपि गिरेत्" इत्यप्रसक्तनिन्दा "ऐरं कृत्वा अवगिरेदिति विधेः स्तुतिपरा। अतएव उक्तं शावरभाष्ये "न हि निन्दा निन्द्यं निन्दितुं प्रवर्त्तते अपि तु इतरत् स्तोतुमिति"। स्तुतौ हि अप्रसिद्धगुणदोषारोपो न दोषाय। नचात्र काम्यस्यैव कार्त्तिक्यादिवृषोत्सर्गस्य स्थाने धेनुदानं विधीयते इति वाच्यम्। तन्मात्रपरत्वे मानाभावात्। प्रत्युत म्रियत इति वर्त्तमानार्थकविभक्त्या वर्त्तमानसामीप्येनाचिरप्रमीतोपस्थितेश्च। ये तु "बह्वीनामेकपत्नीनामेका चेत् पुत्रिणी भवेत्। सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुरिति" मनुना पुत्रवतीत्वाभिधानादेव पतिपुत्रवतीत्यत्र सपत्नीपुत्रवती प्रतीयते इति ब्रुवते तेऽतीव भ्रान्ताः। पुत्रवतीतिपदस्याखण्डतया मतुपा पतिपदस्यान्वये तटस्थत्वापत्तेः। ननु "वृषतुल्यवयोवर्णो वृषः स्याद्दक्षिणा द्विजाः। वृषोत्सर्गे तथा पुंसां स्त्रीणां स्त्रीगौर्विधीयते" इति भविष्यसंवादाद्धेनुदानमिदं पतिपुत्रवत्या वृषोत्सर्गे दक्षिणादानस्य विशेषरूपम्, न तु प्रधानकर्मान्तरं गौरवात्। न च दक्षिणाया अङ्गत्वेन फलासङ्गतिः। "यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोतीति" वदुपपत्तेरिति चेत् न वृषोत्सर्गदक्षिणातश्चन्दनाङ्कितधेनुदानस्य प्रकरणान्तराम्नायेन प्रकरणान्तरन्यायतः प्रधानत्वसिद्धेः वृषोत्सर्गस्थानीयत्वेनानुवर्त्तमानशिष्टाचारात्। धेनुदानयुगपद्वृषोत्सर्गनिषेधानामसङ्गतेः कपिलपञ्चरात्रे चन्दनधेनुदानस्यापीतिकर्त्तव्यतायां वृषरूपदक्षिणादानविधानाच्च। यथा कपिल उवाच "अतःपरं प्रवक्ष्यामि धेनुदानमनुत्तमम्। पतिपुत्रवती नारी म्रियते भर्त्तुरग्रतः। चन्दनेनाङ्कितां धेनुमाचार्य्याय निवेदयेत्"। तथा "जीवद्भर्त्री तु या नारी पुत्रिणी म्रियते यदि। सवत्सामङ्कितां धेनुमाचार्य्याय निवेदयेत्। साध्वी पतिव्रता नारी म्रियते याग्रतस्तयोः। वृषं नैवोत्सृजेत् पुत्रः पिता यावत् तु जीवति। मृतपुत्रा च या नारी संगृहीता तु या भवेत्। तस्या धेनुर्न दातव्या वृषोत्सर्गो विधीयते। "अपुष्पिता मृता काचित्तस्या धेनुर्विगर्हिता। दद्याद्धेनुं सुतो ज्येष्ठः कनिष्ठो वृषमुत्सृजेत्। द्वयोः सोदरयोरेको भवेत् ज्येष्ठः प्रधानतः। त्रयाणां द्वौ सुतौ ज्येष्ठौ, चतुर्णाञ्च त्रयः स्मृताः। पञ्चानां सोदराणाञ्च त्रयो ज्येष्ठाः प्रकीर्त्तिताः। ज्येष्ठेनैव तु कर्त्तव्यं धेनुदानं विधानतः। हेमशृङ्गीं खुरैः रूप्यैः सुशीलां वस्त्रसंयुताम्। प्रवाल कांस्योदरीं ताम्रपृष्ठां घण्टाचामरभूषिताम्। चन्दनेनाङ्कितां मालिकां दद्यात् कर्णयोरुभयोरपि। गवां लोकमवाप्नोति धेनुमाचार्य्याय निवेदयेत्। चन्दनेनाङ्कितां धेनुं दत्त्वा दिवि देवैश्च मोदते। तावत्तिष्ठति स्वर्लोके यावदाहूतगच्छेत् सुरालयम्। नचोत्सर्गो वृषस्यात्र वत्सतर्य्यन्वितस्य संप्लवम्। च। वृषोत्सर्गविधानेन कर्त्तव्यं सर्वकर्म च। मानस्तोकेति मन्त्रेण दक्षे वृषोऽज्यसीति च। धेनोश्च सक्थिदेशे तु त्रिशूलाङ्कं समालिखेत्। वामभागे विशेषोऽयं दक्षे चक्रं समालिखेत्। तथान्यद्दर्शयेद्विद्वानाचार्य्यस्तु विधानवित्। ततो वै संलिखेच्चक्रं पञ्चाङ्गुलप्रमाणकम्। शूलं पञ्चाङ्गुलं कार्य्यं दक्षे वामे यथाविधि। पूर्वाशाभिमुखीं धेनुं यजमानोत्तरामुखः। मस्तकादिक्रमेणैव प्रतिमन्त्रैः प्रपूजयेत्"। "एवंविशिष्टां तां धेनुं दत्त्वा तर्पणमारभेत्। पुच्छं गृहीत्वा पितादीन् सर्वोत्सर्गविधानतः। [illegible] चालयेत् किञ्चित् आचार्य्याय च दक्षिणाम्। वृषभञ्च ततो दद्यादाचार्य्याय गुणान्वितम्। पूजयेद् ब्राह्मणांश्चैव

षस्त्रमाल्यादिभिस्ततः। कांस्यपात्रं वस्त्रयुग्मं सुवर्णञ्च विशेषतः। आचार्य्याय प्रदातव्यं ब्राह्मणे कनकन्तथा। आगतान् पूजयेद्भक्त्या यथाशक्ति विधानतः। दीनान्धकृपणादींश्च अन्नाद्यैः परिपोषयेत्"। पुस्तकान्तरे पाठाधिक्यं यथा

"एकादशाहे प्रेतायाः षण्मासे चाब्दिके तथा। त्रिपक्षे मासिके वापि दद्याद् गां चन्दनाङ्किताम्"तथा वराहपुराणम् "अयने विषुवेऽष्टम्यां युगाद्यापूर्णिमासु च। दर्शे मन्वन्तरे चैव धेनुं दद्यात् सुपूजिताम्"। ननु "आद्यश्राद्धे त्रिपक्षे वा" इत्यादिना आद्यश्राद्धकर्त्तव्यनित्यवृषोत्सर्गकालस्य परपरकालो गौणः। न वा सर्वे मुख्याः कालाः स्युः। तत्र नाद्यः त्रिपक्षादौ शिष्टाचारविरोधात्। नापि द्वितीयः त्रिपक्षादौ नित्यत्वबोधकाभावात्। वस्तुतः आद्यश्राद्धे वृषोत्सर्गस्य नित्यत्वं त्रिपक्षादौ काम्यत्वम्। आद्यश्राद्धपदम् अशौचान्तद्वितीयदिनपरम् "अशौचान्तात् द्वितीयेऽह्नीत्याद्येकवाक्यत्वात्। अत्र च आद्यश्राद्धस्य विघ्नपतितत्वेन एकादश्यादौ क्रियमाणत्वे वृषोत्सर्गमपि न कुर्य्यात्। आद्यश्राद्धदिने वृषोत्सर्गाकरणे त्रिपक्षाद्यान्यतमकालेऽपि वृषोत्सर्गस्यावश्यं तत्र प्रतीकारकत्वेन तस्य पुनः- संवत्सरसाध्यसकृत्कृतस्य नित्यत्वं कल्प्यम्। एवं धेनुदानस्यापि। अतएव पूर्णसंवत्सरे मलमासपातेऽपि प्रागकृतश्चेत् कार्य्य एव इति नवीना जगुः। एककर्त्तृकानेकवृषोत्सर्गोऽपि शिष्टाचारादेकदिनेऽपि। तथा हि स्वर्गलोकगमनफलश्रुतेः काम्यत्वेन "यो भूय आरभते तस्मिन् फले विशेषः" इति न्यायादविरोधः। ननु नैमित्तिकत्वात् कथमावृत्तिः "सकृत् कृते कृतः शास्त्रार्थः" इति न्यायात् "नचैकत्र क्रियाद्वयमिति वचनाच्च। अत्रायं विशेषः काम्यनैमित्तिकं फलविशेषार्थं भूयः कार्य्यं, नैमित्तिकमात्रन्तु सकृदेव। किञ्च। संक्रान्त्यादिनिमित्तकश्राद्धमपि पुनः पुनः स्यात्। नैवं तत्र पितृतृप्तिरूपप्रधानफलस्य सत्त्वेन चरितार्थत्वात्। अत्रोक्तानि सर्वाण्येतानि वचनानि तिर्य्यगधिकरणन्यायमूलानि तथा हि तिर्य्यगधिकरणे तिर्य्यक्पङ्गुत्र्यार्षेयदेवतानामनधिकार इति यागमात्रे उक्तम्। तत्र हेतवः तिरश्चां विविक्तान्तःकरणविरहात् त्र्यार्षेयाणाम् अन्धबधिरमूकानामवेक्षणश्रवणोच्चारणविरहात् साङ्गयागासामर्थ्यं तेषां यथा यागानधिकारस्तद्वत् "अपितुः पितृकृत्येषु अधिकारो न विद्यते" इति छन्दोगपरिशिष्टे अग्निष्वात्ताद्यन्तर्गणानुक्त्या "जीवत्पितृकश्चैतानन्यांश्चेतर" इति कात्यायनसूत्रे च जीवत्पितृकस्य पितृतर्पणनिषेधात् वृषोत्सर्गे तदङ्गभूततत्पुच्छगलितोदकतर्पणविरहात् साङ्गकरणासामर्थ्यात् वृषोत्सर्गेऽनधिकारः। अतएव द्वैतनिर्णयेऽपि स्त्रियाः करणीभूतच्छागबाधेन यागवद् वृषोत्सर्गस्य बाध उक्तो वाचस्पतिमिश्रेण। धेनुदानाङ्गतर्पणे तु प्रधानाधिकारश्रुतेः जीवत्पितृकाधिकृतविशेषविधानाच्चाधिकार एवाभ्युदयिकश्राद्धवत्। जन्ममास्युपनयनाङ्गसशिखवपनवच्च अयन्तु सामान्यशास्त्रोपजीवित्वेन निषेधः पर्य्युदास एव। स यदि पतिपुत्रवतीभिन्नाया वृषोत्सर्गं कुर्य्यात् इत्येवंमात्रस्तदा पूर्व्वभागवैयर्थ्यं स्यात्। यदि पतिपुत्रवत्या जीवत्पितृकपुत्रभिन्नो वृषोत्सर्गं कुर्य्यादिति विशिष्टरूपस्तथापि पतिपुत्रवत्यास्तदुभयरहितायाश्च जीवत्पितृकपौत्रादिना वृषोत्सर्गः स्यात्। स चायुक्त एव प्रागुक्तवचनन्यायविरोधात्। तस्मात् समुदायवचनसार्थक्याय पतिपुत्रवतीभिन्नाया वृषोत्सर्गं कुर्य्यात्। तथा जीवत्पितृकभिन्नो वृषोत्सर्गं कुर्य्यात् इति वचनन्यायसंवादाद्वाक्यद्वयमेव सिद्ध्यति प्रमाणवद्गौरवस्य सर्वैरङ्गीकृतत्वात् दर्शपौर्णमासयोः षट्प्राधानापूर्व्ववत्। अथ प्रोक्तदेवलादिवचने "ज्येष्ठेनैव तु कर्त्तव्यं धेनुदानं विधानतः" इत्यन्तकापिलादिसकलवचनपर्य्यालोचनया कनिष्ठपुत्रवतीभिन्नपतिपुत्रवतीतरजनस्य कापिलपतिप्रसूतकनिष्ठपुत्रभिन्नजीवत्पितृकादन्यो जनो वृषोत्सर्गं कुर्य्यात् इति सामान्यत एव वृषोत्सर्गविधिः। तथा पतिपुत्रवत्या ज्येष्ठपुत्र एव चन्दनाङ्कितधेनुमुत्सृजेदिति विधिश्च सिद्ध्यति। ततश्च पतिपुत्रवत्याः कनिष्ठपुत्रसत्त्व एव तदन्यमृतपितृकेण वा वृषोत्सर्गः कार्य्यः। कनिष्ठपुत्राभावे तु न केनापि। एवं पत्यादिना न चन्दनधेनुदानमिति। प्रतिप्रसूतकनिष्ठान्यजीवत्पितृकेण न कस्यापि वृषोत्सर्गः कार्य्य इत्यपि च पर्य्यवसितम्। वस्तुतस्तु पतिपुत्रवत्या वृषोत्सर्गनिषेधे तत्पुत्रस्य जीवत्पितृकत्वेनानधिकार एव हेतुः न तु स्त्रियाः पतिसत्त्वं पुत्रसत्त्वं वा मृतपुत्रेत्यादिप्रागुक्तकापिलवचने पतिसत्त्वे कनिष्ठपुत्रसत्त्वे च वृषोत्सर्गावगतेः तत्पुत्रस्य पितुः सत्त्व एवानधिकारोक्त्या तन्मरणे वृषोत्सर्गावगमाच्च। न वा तदुभयसत्त्वं मिलितम् उक्त-

न्यायावगतस्य तत्पुत्रस्य जीवत्पितृकत्वहेतोरेव तादृश निषेधप्राप्तेः पतिपुत्रसत्त्वयोर्निर्वीजहेतुत्वकल्पनानौचित्यात् तयोर्वाचनिकहेतुत्वे तु अदृष्टकल्पनाया अनाय्यत्वात् सिद्धजीवत्पितृकनिषेधप्रपञ्चतया पतिपुत्रवत्या निषेधोपपत्तौ अधिकनिषेधकल्पने गौरवाच्च । यत्तु जीवत्पितृकवृषोत्सर्गनिषेधे पतिपुत्रवत्याः पृथगुपसंहारः सोऽपि तस्याः पुत्रानधिकारमात्रप्रयुक्तसिद्धवृषोत्सर्गाभावभागित्वानुवादः पूर्ववाक्यावगतधेनुदानस्य वृषोत्सर्गस्थानीयत्वज्ञापनार्थ एवेति प्रागपि निरूपितम् । तत्रश्चोक्तवचने तिर्य्यगधिकरणन्यायप्राप्तं जीवत्पितृकस्य वृषोत्सर्गकर्तृत्वाभावमनूद्य सपतिकाया वृषोत्सर्गस्थाने चन्दनाङ्कितधेनूत्सर्ग एव विधीयते । एतेन वृषोत्सर्गकर्त्तरि कपिलप्रतिप्रसूतसपतिकावृषोत्सर्गकृतिमत्कनिष्ठपुत्रान्यजीवत्पितृकेतरत्वविशेषणं सपतिकाया वृषोत्सर्गस्थाने ज्येष्ठपुत्रस्यैव चन्दनाङ्कितधेनूत्सर्गमात्रञ्च लभ्यते । अतोजीवत्पितृकेण काम्यवृषोत्सर्गः पतिते प्रव्रजिते वा पितरि जीवति पितामहादिवृषोत्सर्गश्च न कार्य्यः । एवं सपतिकाया अपि पुत्रस्य कनीयोस्यत्वे असत्त्वे वा पत्या कन्यादिना वा वृषोत्सर्गः कार्य्य एवेति स्थितम् । इदन्तु रत्नाकरहलायुधाचार्य्यचूड़ामणिविद्याभूषणशुभङ्करमहादेवभट्टाचार्य्यप्रभृतीनामपि सम्मतं तेषां पृथक् पृथक् पद्धतिरपि प्रसिद्धास्ति । क्वचिद्देशे स्मार्त्तभट्टाचार्य्यस्यापि समूलपद्धतिर्दृश्यते । अत एवात्र विशेषादर्शिनामनाचारोऽनाचार एव । अत्र भविष्योक्तप्रकारस्तु वैकल्पिकएव "स्मृतिशास्त्रे विकल्पो हि आकाङ्क्षापूरणे सतीति" जैमिन्युक्तेः । तत्रत्यपूजाहोमाद्यङ्गेषु विशेषमन्त्रोक्तेः । कपिलकल्पेन वृषोत्सर्गधर्म्मातिदेशेन विशेषोक्तनिरासाच्च" नव्यवाचस्पतिमतम् । रघुनन्दनमते तु चन्दनधेनोः काम्यत्वमात्रत्वात् वृषोत्सर्गं विहाय केवलचन्दनधेनुदानं न शास्त्रसिद्धं काम्येन नित्यबाधायोगात् सति सामर्थ्ये उभयकर्त्तव्यतार्थं वृषोत्सर्गनिन्दा चन्दनधेनुदानस्तुतिपरा । रघुनन्दनकृततत्पद्धतिसत्त्वेऽपि तस्य काम्यस्यैव विधानार्थत्वम् इति साम्प्रदायिकाः

चन्दनपुष्प न०चन्दनमिव सुगन्धि पुष्पमस्य । लवङ्गे राजनि०

चन्दनमय त्रि० चन्दनात्मकः मयट् । चन्दनवृक्षनिर्म्मिते पर्य्यङ्कादौ "यः सर्वः श्रीपर्णीः पर्य्यङ्को निर्म्मितः स फलदाता" इत्युपक्रमे "चन्दनमयोरिपुघ्नो धर्म्मयशोदीर्घजीवितकृत्" वृ०स०७९अ० तन्मयपर्य्यङ्कस्य फलमुक्तम् ।

चन्दनशारिवा स्त्री चन्दनइव सुगन्धिः शारिवा । शारिवाभेदे राजनि० । [६त० । २षट्चन्दनसारे च ।

चन्दनसार पु० चन्दनस्येव सारोऽस्य । १वज्रक्षारे राजनि०

चन्दनाचल पु० चन्दनस्याकरोऽचलः । मलयाचले राजनि० । चन्दनाद्रिप्रभृतयोऽप्यत्र ।

चन्दनादि पु० "चन्दनञ्च तथोशीरं कर्पूरोगन्धवाकुची । एलाकर्चूरगोह्वलाः सप्तैते चन्दनादयः" इति वैद्यकोक्ते पित्तोपशमने द्रव्यसप्तके ।

चन्दनाद्य न० "चन्दनाद्यं नखं वाप्यं यष्टिशैलेयपद्मकम् । मञ्जिष्ठा सरलं दारु शट्येलापूतिकेशरम् । पत्रं तैलं मुरा मांसी कक्कोलं वनिताम्बुदम् । हरिद्रे शारिवे तिक्ता लवङ्गागुरुकुङ्कुमम् । त्वग्रेणुनलिकटुभिस्तैलं मस्तु चतुर्गुणम् । लाक्षारससमं सिद्धं ग्रहघ्नं बलवर्णकृत् । अपस्मारज्वरोन्मादकृत्याऽलक्ष्मीविनाशनम् । आयुःपुष्टिकरं चैव वशीकरणमुत्तमम्" चक्रदत्तोक्ते तैलभेदे ।

चन्दनीया स्त्री चन्द्यतेऽनया बा० करणे अनीयर् । गोरोचनायाम् राजनि० । [पु० मेदि० ।

चन्दिर पुंस्त्री० चदि–किरच् । १गजे स्त्रियां ङीष् । २चन्द्रे

चन्द्र पु० चदि–आह्लादे णिच्–रक् । व्योमस्थे जलमये मण्डलाकारे (चाँद) ख्याते पदार्थे । तन्मण्डलमानादि इन्दुशब्दे ९५५।५६ पृ०उक्तम् । स च ग्रहभेदः तदधिष्ठातृदेवादि ग्रहयज्ञशब्दे २७५७ पृ० दर्शितम् । तस्योत्पत्तिः कमिन्दुशब्दे ९३० पृष्ठादौ दृश्यम् । अत्रिजशब्दे १११पृ०उक्तम् । तद्वंशादि हरिवंशे भागवते च दृश्यम् । चन्द्रस्य दिग्बलवर्णादिज्ञानाय सर्वग्रहाणां दिग्बलाद्युच्यते तत्र ज्यो० त० "रक्तश्यामोभास्करोगौरइन्दुर्नात्युच्चाङ्गोरक्तगौरोमहीजः । दूर्वाश्यामोज्ञोगुरुर्गौरगात्रः श्यामः शुक्रोभास्करिः कृष्णदेहः" । "सूर्य्यः शुक्रः क्षमापुत्रः सैंहिकेयः शनिः शशी । सौम्यस्त्रिदशमन्त्री च प्राच्यादिदिगधीश्वराः" । "प्राच्यां सौम्यसुराचार्य्यौ याम्यां भास्करभूमिजौ । प्रत्यक् सौरिरुदीच्यान्तु सितेन्दू दिग्बलान्वितौ" । "भौमार्कजीवाः पुरुषाः क्लीवौ सोमजभानुजौ । स्त्र्याख्यौ भार्गवचन्द्रौ द्वौ तत्पतित्वात्तयोच्यते" । "चन्द्रार्कजीवाज्ञसितौ कुजार्कौ यथाक्रमं

सत्त्वरजस्तमांसि"। "कटुलवणतिक्तमिश्रितमधुराम्लौ च कषायकोऽर्कतः"। "ब्राह्मणे शुक्रवागीशौ क्षत्रिये भौमभास्करौ। चन्द्रो वैश्ये बुधः शूद्रे पतिर्मन्दोऽन्त्यजे जने"। "ऋग्वेदाधिपतिर्जीवो यजुर्वेदाधिपः सितः। सामवेदाधिपो भौमः शशिजोऽथर्ववेदराट्"। "मधुपिङ्गलदृक् चतुरस्रतनुः पित्तप्रकृतिः सविताल्पकचः। तनुवृत्ततनुर्बहुवातकफः प्राज्ञः शशी मृदुवाक् शुभदृक्। भूमिजस्तरुणमूर्त्तिरुदारः पैत्तिकः सुचपलः कृशमध्यः। श्लिष्टवाक् सततहास्यरुचिर्ज्ञः पित्तमारुतकफप्रकृतिश्च। बृहत्तनुः पिङ्गलमूर्द्धजेक्षणो बृहस्पतिः श्रेष्ठमतिः कफात्मकः। भृगुः सुखी कान्तवपुः सुलोचनः कफानिलात्माऽसितवक्रमूर्द्धजः। मन्दोऽलसः कपिलदृक् कृशदीर्घगात्रः स्थूलोऽद्विजः परुषलोमकचोऽनिलात्मा" "मित्राणि सूर्य्याच्छशिभौमजीवाः सूर्य्येन्दुजौ सूर्य्यशशाङ्कजीवाः। आदित्यशुक्रौ रविचन्द्रभौमा बुधार्कजौ चन्द्रजभार्गवौ च। "सितासितौ चन्द्रमसो न कश्चित् बुधः शशी सौम्यसितौ रवीन्दू। रवीन्दुभौमा रवितस्त्वमित्रा मित्राविशेषस्तु समः प्रदिष्टः। बुधः कुजेज्यास्फुजिदर्कपुत्राः, शुक्रार्कजौ, भौमसुरेज्यमन्दाः। शनिः, कुजेज्यौ सुरराजमन्त्री रव्यादितोऽमी समसंज्ञिताः स्युः"। नक्षत्रफलादिकम् ज्यो॰त॰ उक्तम् तच्च इन्दुशब्दे ९३१।३२ पृ॰ दृश्यम् "अर्द्धादूनः शशी पापः" समयामृतम्। अत्रिजातसोमस्य चन्द्रलोकप्राप्तिकथा काशीख॰ १४अ॰।

"पिता सोमस्य भो विप्र! जज्ञेऽत्रिर्भगवानृषिः। ब्रह्मणो मानसात् पूर्वं प्रजासर्गं विधित्सतः। अनुत्तरं नाम तपो येन तप्तं हि तत् पुरा। त्रीणि वर्षसहस्राणि दिव्यानीति हि नौ श्रुतम्। ऊर्द्ध्वमाचक्रमे तस्य रेतः सोमत्वमीयिवः। नेत्राभ्यां तच्च सुस्राव दशधा द्योतयत् दिशः। तं गर्भविधिना हृष्टा दश देव्यो दधुस्ततः। समेत्य धारयामासुर्नैव ताः समशक्नुवन्। यदा न धारणे शक्तास्तस्य गर्भस्य ता दिशः। ततस्ताभिः सजूः सोमो निपपात वसुन्धराम्। पतितं सोममालोक्य ब्रह्मा लोकपितामहः। रथमारोपयामास लोकानां हितकाम्यया। स तेन रथमुख्येन सागरान्तां वसुन्धराम्। त्रिः सप्तकृत्वो द्रुहिणश्चकाराये प्रदक्षिणम्। तस्य यत् स्रावितन्तेजः पृथिवीमन्वपद्यत। तेनौषध्यः समुद्भूता याभिः सन्धार्य्यते जगत्। स लब्धतेजा भगवान् ब्रह्मणा वर्द्धितः स्वयम्। तपस्तेपे महाभाग! पद्मानां दशतीर्दश। अविमुक्तं समासाद्य चेदं परमपावनम्। संस्थाप्य लिङ्गममृतं चन्द्रेशाख्यं स्वनामतः। बीजौषधीनां तोयानां राजाऽभूच्च द्विजन्मनाम्। प्रसादाद्देवदेवस्य विश्वेशस्य पिनाकिनः। तत्र कुण्डं विधायैकममृतोदमिति स्मृतम्। यस्याम्बुपानस्नानाभ्यां नरोऽज्ञानात् प्रमुच्यते। तुष्टेन देवदेवेन स्वमौलौ योधृतः सदा। आदाय तत्कलामेकां जगत्सञ्जीवनीं पराम्। पक्षाद्दक्षेण शप्तोऽपि मासान्ते क्षयमाप्य च। आप्याय्यतेऽसौ कलया पुनरेव मया शशी। स तत् प्राप्य महद्राज्यं सोमः सोमवतां वरः। राजसूयं समाजह्रे सहस्रशतदक्षिणम्। दक्षिणामददत् सोमस्त्रिलोकानिति नौ श्रुतम्। तेभ्यो ब्रह्मर्षिमुख्येभ्यः सदस्येभ्यश्च भो द्विज!। हिरण्यगर्भो ब्रह्मात्रिर्भृगुर्यत्रर्त्विजोऽभवन्। सदस्योऽभूद्धरिस्तत्र बहुभिर्मुनिभिर्वृतः। तं सिनी च कुहूश्चैव द्युतिः पुष्टिः प्रभा वसुः। कीर्त्तिर्धृतिश्च लक्ष्मीश्च नव देव्यः सिषेविरे। उमया सहितं रुद्रं सन्तर्प्याध्वरकर्मणा। प्राप सोम इति ख्यातिं दत्तां सोमेन शम्भुना। तत्रैव तप्तवान् सोमस्तपः परमदुष्करम्। तत्रैव राजसूयञ्च चक्रे चन्द्रेश्वराग्रतः। तत्रैव ब्राह्मणैः प्रीतैरित्युक्तोऽसौ कलानिधिः। सोमोऽस्माकं ब्राह्मणानां राजा त्रैलोक्यदक्षिणः। तत्रैव देवदेवस्य त्रिलोचनपदङ्गतः। शम्भुना प्रीतमनसा त्रैलोक्याह्लादहेतवे। त्वं ममापि परा मूर्त्तिरित्युक्तस्तत्तपोबलात्! जगत्तवोदयं प्राप्य भविष्यति सुखोदयम्। त्वत्पीयूषमयैर्हस्तैः स्पृष्टमेतच्चराचरम्! भानुतापपरीतञ्च परां ग्लानिं विहास्यति"।

"इति दत्त्वा वरान् शम्भुस्तस्मै चन्द्रमसे द्विज!। अन्तर्हितो महेशानस्तस्मिन् वैश्वेश्वरे पुरे। तदारभ्य च लोकेऽस्मिन् द्विजराजाऽधिपोऽभवत्"। तस्य मासमध्ये दक्षशापात् क्षयवृद्धी पाद्मे स्वर्गखण्डे उक्ते यथा

"अश्विन्याद्यास्तु दक्षस्य उपयेमे सुता विधुः। रोहिण्या नैव सततं बहुप्रेमा रराम ह। दृष्ट्वा तदितरास्तास्तु तप्ताः पितरमब्रुवन्। अस्माकं कामदस्तात! जामाता तव रोहिणीम्। रमयत्येव सततं तेन तप्ता वयं पितः!। तत् श्रुत्वा चाप्रियं दक्षः सोममाह भजस्व भोः। प्रेम्णा समेन सर्व्वास्त्वं दुहितॄर्मम मानद!। जगृहे न दक्षोनैव सोमः सप्रेम रोहिणीम्। तथैव रमयामास श्रुत्वा दक्षश्चुकोप ह। शशाप तेन भविताऽ पक्षीणोऽस्मद्वचोतिगः। यक्ष्मणा च परिग्रस्तो भव त्वं क्षीणरेतकः।

अथ क्षयमिते तस्मिन् सर्व्वास्ताः सहिताः स्त्रियः। पितरं शरणं प्राप्ताः क्षीयते नः पतिः पितः!। न वयं तेन वर्त्तामो विना सुखनिराकृताः। उवाच दक्षस्ताः सर्व्वा शापो मे नान्यथा भवेत्। मासमध्ये पक्षमेकं वर्द्धतां स क्रमेण वै। क्षयं क्रमेण प्राप्नोतु पक्षमेकं व्यवस्थया। एवं शापं वरञ्चैव लेभे तस्य व्यवस्थया। तथैव राजते व्योम्नि क्षयवृद्धी दधद्विधुः”। ज्योतिषोक्ततत्कारणन्तु इन्दुशब्दे ९३२ पृ० दर्शितम्। २आह्लादजनकद्रव्यमात्रे त्रिका०। ३कर्पूरे ४स्वर्णे ५जले ६काम्पिल्ले पु० मेदि०। ७द्वीपभेदे शब्दमा०। ८विसर्गवर्णे तन्त्रसंकेतः चदि—दीप्तौ रक्। ९कमनीये त्रि० १०मयूरपिच्छे मेचके हेमच०। ११शोणमुक्ताफले व्याडिः। अन्त्यपदलोपे १२चन्द्रगुप्ते नृपे च। “क्रूरग्रहः सकेतुश्चन्द्रमसम्पूर्णमण्डलमिदानीम्” मुद्रारा०। “चन्द्रं गता पद्मगुणान्न भुङ्क्ते” कुमा०। “वधूजनश्चन्द्रमसश्चकार” माघः। “चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम्” सा० द० तस्य शृङ्गाररसोद्दीपकत्वमुक्तम्। स्वर्णे “चन्द्ररथः “होता मन्द्रः शृणवच्चन्द्ररथः” ऋ०१।१४१।१२।१३हीरके। चन्द्राधिष्ठातृके १४मृगशिरोनक्षत्रे १५एकाङ्के च।

चन्द्रक पु० चन्द्र इव कायति कै—क। मयूरपुच्छस्थे चन्द्राकारे १पदार्थे अमरः। २नखे शब्दच० ३मत्स्यभेदे (चाँदा) राजनि०। “चन्द्रकस्त्वनभिष्यन्दी मधुरो बलवर्द्धनः” राजनि० तद्गुणा उक्ताः। स्वार्थे क। ४चन्द्रशब्दार्थे जले पतितस्नेहांशस्य चन्द्राकारे ५मण्डले च “यां चन्द्रकैर्मदजलस्य महानदीनाम्” माघः। ६सितमरिचे न० राजनि० ७शिग्रुवीजे न० शब्दार्थचि० चन्द्रकोजातोऽस्य तारका० इतच्। चन्द्रकित जातचन्द्रके त्रि०।

चन्द्रकला स्त्री ६त०। चन्द्रमण्डलस्य षोडशभागैकभागे तासां नामानि कलाशब्दे १७८४पृ० दर्शितानि तिथिभेदे स्त्रीणां देहांशभेदे स्थितानां तासां नामभेदाश्च कामशास्त्रे उक्ता यथा

“पूषा यशा सुमनसा रतिः प्राप्तिस्तथा धृतिः। ऋद्धिः सौम्या मरीचिश्च तथा चैवांशुमालिनी। अङ्गिरा शशिनी चेति छाया सम्पूर्णमण्डली। तुष्टिश्चैवामृता चेति कलाः सोमस्य षोड़श”।

चन्द्रकवत् पुंस्त्री चन्द्रकोऽस्त्यस्य मतुप् मस्य वः। मयूरे “प्रादुद्रुवत् सपदि चन्द्रकवान् द्रुमाग्रात्” माघः। स्त्रियां ङीप्।

चन्द्रकाटुकि पु० मत्स्यभेदे हेमा० व्र० ख० मूलं दृश्यम्।

चन्द्रकान्त पु० चन्द्रः कान्तोऽभीष्टो यस्य। स्वनामख्याते १मणिभेदे तद्दर्शने हि तस्य जलस्रावात् तत्कान्तत्वम्। २कैरवे, ३श्रीखण्डचन्दने च न०। ४रात्रौ, ५ज्योत्स्नायां, स्त्री मेदि० ६चन्द्रघोषायां, चन्द्रपत्न्याञ्च स्त्री हेमच०। “चन्द्रकान्तोद्भवं वारि पित्तघ्नं विमलं स्मृतम्” सुश्रु०। “सायं शशाङ्ककिरणाहतचन्द्रकान्तः” “दृष्ट्वा तथामलवपुरिदं चन्द्रकान्तानुसारि” अमरुश०। “चन्द्रकान्ताभिधा रौ तौ विरामः स्वराष्टौ” वृ० र० टी० उक्ते पञ्चदशाक्षरपादके ७छन्दोभेदे स्त्री। “८लक्ष्मणात्मजचन्द्रकेतुराजधान्यां स्त्री चन्द्रकेतुशब्दे दृश्यम्।

चन्द्रकान्ति न० चन्द्रस्येव कान्तिरस्य शुभ्रत्वात्। १रजते रूप्ये, ६त०। तद्गुणादि भावप्र० उक्तं यथा

“त्रिपुरस्य वधार्थाय निर्न्निमिषैर्विलोकनैः। निरीक्षयामास शिवः क्रोधेन परिपूरितः। अग्निस्तत्कालमपतत्तस्यैकस्माद्विलोचनात्। ततोरुद्रः समभवद्वैश्वानर इव ज्वलन्। द्वितीयादपतन्नेत्रादश्रुविन्दुस्तु वामकात्। तस्माद्रजतमुत्पन्नमुक्तकर्म्मसु योजयेत्। कृत्रिमञ्च भवेत्तद्धि वङ्गादिरसयोगतः। रूप्यन्तु रजतं तारञ्चन्द्रकान्ति सितप्रभम्। गुरु स्निग्धं मृदु श्वेतं दाहे छेदे घनक्षमम्। वर्णाढ्यं चन्द्रवत् स्वच्छं रूप्यं नवगुणं शुभम्। कठिनं कृत्रिमं रूक्षं रक्तं पीतं दलं लघु। दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्रकीर्त्तितम्। रूप्यं शीतं कषायाम्लं स्वादु पाकरसं सरम्। वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित्। प्रमेहादिकरोगांश्च नाशयत्यचिराद्ध्रुवम्। तारं शरीरस्य करोति तापं विड्वं कनं बलं यच्छति शुक्रनाशम्। वीर्य्यं बलं हन्ति तनोश्च पुष्टिं महागदान् पोषयति ह्यशुद्धम्”। चन्द्रस्य २दीप्तौ

चन्द्रकिन् पु० स्त्री चन्द्रकोऽस्त्यस्य इनि। मयूरे त्रिका० [स्त्रियां ङीप्।

चन्द्रकुण्ड पुंन० ६त०। कामरूपस्थे चन्द्रकृते कुण्डभेदे चन्द्रकूटशब्दे दृश्यम्।

चन्द्रकूट पु०कामरूपस्थे पर्व्वतभेदे तत्कथा कालिका०८१अ०

“पूर्व्वं वायुगिरेः शैलश्चन्द्रकूट इति स्मृतः। त्रिकोणाम्रसङ्काशस्तदूर्द्धे चन्द्रमण्डलम्। द्वितीयवर्गास्याद्यन्तु विन्दिन्दुभ्यामलङ्कृतम्। चन्द्रवीजमिति प्रोक्तं तेन चन्द्रं प्रपूजयेत्। अद्यापि प्रतिदर्शे तु पर्व्वतं तं निशापतिः। प्रदक्षिणीकरोत्येव दृशभीरश्मिभिः

युतः। तस्यैव पूर्व्वभागे तु सोमकुण्डाह्वयं सरः। तत्र स्नात्वा च पीत्वा च नरः कैवल्यमश्नुते। स्वर्गादभ्येतश्चन्द्रः कामाख्यासेवने यदा। तदा तद्रश्मिसंघात निःसृतास्तोयराशयः। तैस्तोयैर्व्वासवः कुण्डमकरोदिन्द्रचन्द्रयोः। मध्ये पुण्यतमस्थाने स्वयं ब्रह्म शिलोपरि। चन्द्ररश्मिसमुद्भूत! चन्द्रकुण्डमहोदधेः! सुधास्रवण! साह्लाद! त्वं चन्द्र! कलुषं हर। इत्यनेन तु मन्त्रेण सुस्नातश्च चन्द्रपाथसि। चन्द्रकूटं समारुह्य पूजयेद्यस्तु तं नरः। अविच्छिन्ना सन्ततिस्तु सुकान्ता तस्य जायते। परत्र चन्द्रभवनं भित्त्वा याति परं पदम्। तीरे तु चन्द्रकूटस्य नन्दनो नाम वै गिरिः। तस्मिन् वसति शक्रस्तु कामाख्यासेवने रतः। न्यक्षभावं समासाद्य सर्व्वदेवेश्वरो हरिः। सेवितुं त्रिदशेशानीं सततं वर्त्तते नरः। चन्द्रकूटस्य तु गिरेर्नन्दनस्य तथा गिरेः। प्रतिदर्शं तथा चन्द्रः प्रदक्षिणयति त्रिधा। चन्द्रकुण्डजले स्नात्वा समारुह्याथ नन्दनम्। आराध्य शक्रं लोकेशं महाफलमवाप्नुयात्"।

चन्द्रकूप पु॰ चन्द्रकृतः कूपः। काशीस्थे कूपभेदे। "चन्द्रकूपजले स्नात्वा जग्राह नियमं व्रती" काशीख॰ १०अ॰।

चन्द्रकेतु पु॰ भारतप्रसिद्धे १सौबलानुचरे सैन्यभेदे "शत्रुञ्जयं चन्द्रकेतुं महामेघं सुवर्च्चसम्। सूर्य्यभासञ्च पञ्चैतान् हत्वा विव्याध सौबलम्"भा॰द्रो॰४८अ॰। २लक्ष्मणात्मजभेदे। तस्य देशभेदे राज्याभिषेककथा रामा॰ उ॰१०२स॰ "इमौ कुमारौ सौमित्रे! तव धर्म्मविशारदौ। अङ्गदश्चन्द्रकेतुश्च राज्यार्थे दृढविक्रमौ। इमौ राज्येऽभिषेक्ष्यामि देशः साधु विचीयताम्। रमणीयो ह्यसंबाधो रमेतां यत्र धन्विनौ। न राज्ञां यत्र पीड़ा स्यान्नाश्रमाणां विनाशनम्। स देशो दृश्यतां सौम्य नापराध्यामहे यथा। तथोक्तवति रामे तु भरतः प्रत्युवाच ह। अयं कारुपथो देशो रमणीयो निरामयः। निवेश्यतां तत्र पुरमङ्गदस्य महात्मनः। चन्द्रकेतोः सुरुचिरं चन्द्रकान्तं निरामयम्। तद्वाक्यं भरतेनोक्तं प्रतिजग्राह राघवः। तञ्च कृत्वा वशे देशमङ्गदस्य न्यवेशयत्। अङ्गदीया पुरी रम्याप्यङ्गदस्य निवेशिता। रमणीया सुगुप्ता च रामेणाक्लिष्टकर्म्मणा। चन्द्रकेतोश्च मल्लस्य मल्लभूम्यां निवेशिता। चन्द्रकान्तेति विख्याता दिव्या स्वर्गपुरी यथा। ततो रामः परां प्रीतिं लक्ष्मणो भरतस्तथा। ययुर्युद्धे दुराधर्षा अभिषेकञ्च चक्रिरे। अभिषिच्य कुमारौ द्वौ प्रस्थाप्य सुसमाहितौ। अङ्गदं पश्चिमां भूमिं चन्द्रकेतुमुदङ्मुखम्। अङ्गदञ्चापि सौमित्रिर्लक्ष्मणोनुजगाम ह। चन्द्रकेतोस्तु भरतः पार्ष्णिग्राहो बभूव ह"। [अमावास्यायाम् मेदि॰।

चन्द्रक्षय पु॰ क्षीयतेऽस्मिन् क्षि—आधारे अच्। ६त॰।

चन्द्रगिरि पु॰ चन्द्रकूटाख्ये पर्व्वतभेदे

चन्द्रगुप्त पु॰ मौर्य्यवंश्ये राजभेदे तद्राज्याभिषेककथा बृहत्कथायां विस्तरतो दृश्या। "नव नन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति। तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति वै कलौ। स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति" भाग॰ १२।१।७। श्लो॰। "द्विजः कश्चित् चाणक्यः" श्रीधर॰ "ततोऽपि द्विसहस्रेषु दशाधिकशतत्रये। भविष्यं नन्दराज्यञ्च चाणक्यो यान् हनिष्यतीति" स्कन्दपुराणैकवाक्यत्वात् तत्राथता।

चन्द्रगृह न॰ ६त॰। कर्कराशौ। चन्द्रमन्दिरादयोऽप्यत्र

चन्द्रगोल पु॰ चन्द्र एव गोलः। गोलाकारे चन्द्रमण्डले

चन्द्रगोलस्थ पु॰ ब॰व॰। चन्द्रगोले तिष्ठन्ति स्था—क। चन्द्रलोकस्थेषु स्वधाभोजिषु पितृलोकेषु त्रिका॰। "विधूर्द्ध्वभागे पितरो वसन्ति" सू॰सि॰उक्तेस्तेषां तथात्वम्।

चन्द्रगोलिका स्त्री चन्द्रगोलः साधनत्वेनास्त्यस्य ठन्। ज्योत्स्नायां हेम॰।

चन्द्रचञ्चल पु॰ चन्द्र इव चञ्चलः। (खलिसा) १मत्स्यभेदे जटा॰। (चाँदा) २मत्स्ये स्त्री शब्दर॰।

चन्द्रचार पु॰ चन्द्रस्य चारः गतिभेदः। चन्द्रमण्डलस्य राशिविशेषे गतौ तत्फलम् इन्दुशब्दे ८२१पृ॰ उक्तम्

चन्द्रचूड़ पु॰ चन्द्रः चूडायाम् यस्य। चन्द्रशेखरे शिवे।

चन्द्रज पु॰ चन्द्राज्जायते जन—ड। बुधे चन्द्रजातादयोऽप्यत्र। इन्दुजशब्दे ८३४पृ॰ दृश्यम्। "रौद्रादीनि मघान्तान्युपाश्रिते चन्द्रजे प्रजापीड़ा" वृ॰स॰७।३।

चन्द्रतापन पु॰ दानवभेदे। "श्वेतशीर्षश्चन्द्रहनुश्चन्द्रहा चन्द्रतापनः" हरिवं॰ २४०अ॰ दानवोक्तौ

चन्द्रदार पु॰ ब॰ व॰ ६त॰। अश्विन्यादिषु १दक्षकन्यासु चन्द्रकलत्रेषु २तन्नामनक्षत्रेषु च।

चन्द्रदेव पु॰ भारतप्रसिद्धे कुरुदलस्थे नृपभेदे "प्रत्युद्ययुस्त्रिगर्त्तास्तम् (अर्जुनम्) इत्युपक्रमे" "सत्यसेनश्चन्द्रदेवो मित्रदेवः श्रुतञ्जयः" "शत्रुञ्जयञ्च विंशत्या चन्द्रदेवं तथाष्टभिः" इति च भा॰ क॰ २७अ॰।

चन्द्रद्युति पु॰ चन्द्रस्य द्युतिरिव द्युतिरस्य। चन्दने

भावप्र० चन्दनशब्दे दृश्यम् ६त०। २चन्द्रस्य प्रकाशे स्त्री

चन्द्रनाभ पु० चन्द्रोनाभौ यस्य संज्ञायाम् अच्। भारतप्रसिद्धे दानवभेदे। "सूर्य्यनाभश्च विक्रान्तश्चन्द्रनाभश्च भारत !" हरिवं० २२४अ० दानवोक्तौ।

चन्द्रनामन् पु० चन्द्रस्य नामान्येव नामान्यस्य। कर्पूरे शब्दार्थचि०। चन्द्रसंज्ञचन्द्राह्वयादयोऽप्यत्र

चन्द्रपाद पु० ६त०। चन्द्रकिरणे। "नियमितपरिखेदा तच्छिरश्चन्द्रपादैः" कुमा०। चन्द्रचरणादयोऽप्यत्र।

चन्द्रपुत्र पु० ६त०। बुधे चन्द्रनन्दनादयोऽप्यत्र।

चन्द्रपुष्पा स्त्री चन्द्र इव श्वेतं पुष्पमस्याः। श्वेतकण्टकार्य्याम् राजनि०।

चन्द्रप्रभ पु० चन्द्रस्य प्रभेव प्रभाऽस्य। १जैनभेदे हेम०। "कृमिरिपुदहनव्योषत्रिफलामरदारुचव्यभूनिम्बम्। मागधिमूलं मुस्तं सशटिवचामाक्षिकञ्चैव। लवणक्षार निशायुगकुस्तुम्बुरुगजकरणातिविषाः। कर्षांशकान्येव समानि कुर्य्यात् पलाष्टकञ्चाश्मजतोर्विदध्यात्। निष्पत्रशुद्धस्य पुरस्य धीमान् पलद्वयं लौहरजस्तथैव। सिताचतुष्कं पलमत्र वंशज्ञानिकुम्भकुम्भत्रिसुन्वियुक्तम्। चन्द्रप्रभेयं गुटिका प्रयोज्या चार्शांसि निर्यातयते षडेव। भगन्दरं पाण्डुरकामलाश्च निर्नष्टवह्नेः कुरुते च दीप्तिम्। हन्त्यामयान् पित्तकफानिलोत्थान् नाडीगते मर्म्मगतव्रणे च। ग्रन्थ्यर्बुदे विद्रधिराजयक्ष्मणोर्मेहे भगाख्ये प्रबले च योज्या। शुक्रक्षये चाश्मरिमूत्रकृच्छ्रे शुक्रप्रवाहेऽप्युदरामये च। भक्तस्य पूर्व्वं सततं प्रयोज्या तक्रानुपानं त्वथ मस्तुपानम्। आजोरसो जाङ्गलजो रसो वा पयोऽथ वा शीतजलानुपानम्। बलेन नागस्तुरगोजवेन दृष्ट्या सुपर्णः श्रवणे वराहः। बलीपलितनिर्मुक्तो वृद्धोऽपि तरुणायते। न पानभोजेत्र परिहार्य्यमस्ति न शीतवातातपमैथुनेषु। शम्भुं समभ्यर्च्य कृतप्रसादेनाप्ता वटी चन्द्रमसः प्रासादादिति" सुखबोधोक्ते गुटिकाभेदे स्त्री चक्रदत्तोक्ते २वर्त्तिभेदे स्त्री तत्प्रकारो यथा "त्रिफलाकुक्कुटाण्डत्वक्कासीसमयसोरजः। नीलोत्पलं विडङ्गानि फेनञ्च सरितां पतेः। आजेन पयसा पिष्ट्वा भावयेत्ताम्रभाजने। सप्तरात्रं स्थितं भूयः पिष्ट्वा क्षीरेण वर्त्तयेत्। एषा दृष्टिप्रदा वर्त्तिरन्धस्याभिन्नचक्षुषः। चन्दनत्रिफलापूगपलाशतरुशोणितैः। जलपिष्टैस्त्वियं वर्त्तिरशेषतिमिरापहा। निशाद्वयाभयामांसीकुष्ठतृणानिचूर्णिता। सर्व्वनेत्रामयान् हन्यादेतत् सौगतमञ्जनम्। व्योषोत्पलाभयाकुष्ठतार्क्ष्यैर्वर्त्तिः कृता हरेत्॥ अर्बुदं पटलं काचं तिमिरार्म्माश्रुनिस्रुतिम्। तूत्थकं त्रिफलावक्रसैन्धवालमनःशिलाः। कृतोपदेहकण्डूघ्नी वर्त्तिः शस्ता कफापहा। एकगुणा मागधिका द्विगुणा च हरीतकी। सलिलापिष्टा वर्त्तिरियं नयनसुखार्म्मतिमिरपटलकाचास्रुहरी। अञ्जनं श्वेतमरिचं पिप्पली मधुयष्टिका। विभीतकस्य मध्यन्तु शङ्खनाभिर्मनःशिला। एतानि समभागानि अजाक्षीरेण पेषयेत्। छायाशुष्कां कृतां वर्त्तिं नेत्रेषु च प्रयोजयेत्। अर्बुदं पटलं काचं तिमिरं रक्तराजिकाम्। अधिमांसं मलञ्चैव यश्च रात्रौ न पश्यति। वर्त्तिश्चन्द्रप्रभा नाम जातान्ध्यमपि शोधयेत्।"

चन्द्रशाला स्त्री चन्द्रस्य कर्पूरस्य शालेव तुल्यगन्धित्वात्। १स्थूलैलायाम् राजनि०। छन्त्रस्थवमध्य इत्यन्ये। २औषधभेदे ६त०। ३ज्योत्स्नायां ४चन्द्रपत्न्याश्च।

चन्द्रभस्मन् न० चन्द्र इव शुभ्रं भस्म। कर्पूरे शब्दार्थचि०।

चन्द्रभाग पु० चन्द्रस्य भागोऽत्र। १पर्व्वतभेदे तत्र जातायां २नद्यां स्त्री। तयोः कथा कालि०पु० २०।२२अ० यथा "ऋषय ऊचुः। "चन्द्रभागा कथं सिन्धुत्वोत्पन्ना महागिरौ। कीदृक्सरस्तद्विप्रेन्द्र! बृहल्लोहितसंज्ञकम्। कथं स पर्व्वतश्चन्द्रभागाह्वयोऽभवत्। चन्द्रभागाह्वया कस्मान्नदी जाता दृषोदका। एतन्नः श्रोष्यमाणानां जायते कौतुकं महत्। माहात्म्यं चन्द्रभागायाः कासारस्य गिरेस्तदा। मार्कण्डेय उवाच। श्रूयतां चन्द्रभागाया उत्पत्तिर्द्विज सत्तमाः!। युष्माभिश्चन्द्रभागस्य महात्म्यं नाम कारणम्। हिमवद्गिरिसंसक्तशतयोजनविस्तृतः। योजनत्रिंशतोच्छ्रायः कुन्देन्दुधवलो गिरिः। तस्मिन् गिरौ पुरा वेधाश्चन्द्रं शुभ्रं सुधानिधिम्। विभज्य कल्पयामास देवार्थं स पितामहः। पित्रर्थञ्च तथा तस्य तिथिवृद्धिक्षयात्मकम्। कल्पयामास जगतां हिताय कमलासनः। विभक्तश्चन्द्रमा यस्मात् तस्मिन् पर्व्वतसत्तमे। अतो देवाश्चन्द्रभागं नाम्ना चक्रुः पुरा गिरिम्" कालि० पु० २०।२२अ०। "मार्कण्डेय उवाच। "यत्र देवसमा भूता सानौ तस्य महागिरेः। तत्र जाता देवनदी शीताख्या वचनाद्विधेः। स्नापयित्वा यदा चन्द्रं शीतातोयैर्मनोहरैः। चन्द्र

षपुर्वेष्ठवाक्यात् सर्व्वे ते त्रिदिवौकसः। तदा सीताजलं चन्द्रस्नानयोगाच्च साम्प्रतम्। भूत्वा निपतितं तस्मिन् बृहल्लोहितसंज्ञके। तद्दिव्यं तदा तोयम् तस्मिन् सरसि निर्म्मलम्। तद्दृष्ट्वा स्वयं ब्रह्मा विष्टब्ध साधु तज्जलम्। तद्दर्शनाज्जलात्तस्मादुत्थिता कन्यकोत्तमा। चन्द्रभागेति तन्नाम विधिश्चक्रे स्वयं ततः। भार्य्यार्थे सागरस्तान्तु जग्राह ब्रह्मसम्मते। तत्रैवाधिष्ठितं तोये गदाग्रेण निशापतिः। निर्भिद्य पश्चिमे पार्श्वे गिरिं तत्तु प्रवाहते। तत्साम्प्रतजलं भित्त्वा बृहल्लोहितसंज्ञकम्। कासारं सागरं जातं चन्द्रभागा नदी तु सा। सागरोऽपि तदा भार्य्यां चन्द्रभागां महानदीम्। तेन तोयप्रवाहेण निनाय भुवनं स्वकम्। एवं तस्मिन् समुत्पन्ना चन्द्रभागाह्वया नदी। चन्द्रभागे महाशैले गुणैर्गङ्गासमा सदा"।

चन्द्रभूति न० चन्द्रस्येव भूतिः कान्तिरस्य। रजते राजनि०। तस्य चन्द्रतुल्यकान्तिमत्त्वात् तथात्वम्। [हेमच०।

चन्द्रमणि पु० चन्द्रप्रियो मणिः शाक० त०। चन्द्रकान्तमणौ

चन्द्रमण्डल न० ६त०। गोलाकारे विम्बे चन्द्रस्य तन्मानादि इन्दुशब्दे ९१२ पृ० दृश्यम्।

चन्द्रमल्ली स्त्री चन्द्र इव मल्ली। अष्टापद्यां शब्दचि०।

चन्द्रमस् पु० चन्द्रमाह्लादं मिमीते मि—असुन् मादेशः चन्द्रं कर्पूरं माति तुलयति मा—असुन् वा। १चन्द्रे २कर्पूरे च अमरः। "सितासितौ चन्द्रमसोन कश्चित्"ज्यो०त०। "राहुर्वै हस्ती भूत्वा चन्द्रमसं गृह्णाति"श्रुतिः। "क्रूरग्रहः सकेतुश्चन्द्रमसं पूर्णमण्डलमिदानीम्" मुद्राराः०। तस्येदमित्यण् चान्द्रमस तत्सम्बन्धिनि "तिथिश्चान्द्रमसं दिनम्" सू० सि०। स्त्रियां ङीप्। "पद्माश्रिता चान्द्रमसीमभिख्याम्" कुमा०।

चन्द्रमा स्त्री चन्द्रेण मीयते मा—घञर्थे क। नदीभेदे। "कौशिकी निम्नगा शोणं बाहुदामथ चन्द्रमाम्" भा० भी० ९अ० भारतवर्ष नदीकथने।

चन्द्रमौलि पु० चन्द्रो मौलावस्य। महादेवे इन्दुमौलिशब्दे ९३६ पृ० दृश्यम्। "चन्द्रमौलिः सदाशिवः" विष्णुधर्म्मो०।

चन्द्ररसा स्त्री चन्द्र इवाह्लादको रसोऽस्याः। भारतवर्षस्थे नदीभेदे। "चन्द्ररसा ताम्रपर्णीत्यादि" भाग०५।१८।१८। नद्युक्तौ "तत्रचन्द्ररसा ताम्रपर्ण्यादयः" भाग०४।२।२१।

चन्द्ररेखा स्त्री ६त०। चन्द्रस्य मण्डलस्थचकरेखाभेदे २अप्सरोभेदे च "चन्द्ररेखा तिलोत्तमा" काशीख०८अ०। ३वाकुचीलतायाम् राजनि०। ४चन्द्रशेखरसहजायां चन्द्रशेखरशब्दे दृश्यम्। "नसरयुगलैश्चन्द्ररेखर्त्तुलोकैः" वृ० र० टी० उक्ते ५छन्दोभेदे च

चन्द्ररेणु पु० चन्द्र आह्लादकोरेणुरिव। काव्यचौरे त्रिका०।

चन्द्रला स्त्री कर्णाटदेशख्याते १देवीभेदे २तत्स्थाने च शब्दार्थचि०

चन्द्रलेखा स्त्री चन्द्रं तत्कान्तिं लिखति लिख—अण् उप० स०। (हाकुच्) ख्याते १लताभेदे राजनि०। ६त०। २चन्द्ररेखायाम्। "म्रौमोयौ चेद्भवेतां सप्ताष्टकैश्चन्द्रलेखा" छन्दोम० उक्ते पञ्चदशाक्षरपादके ३छन्दोभेदे च।

चन्द्रलोहक चन्द्र इव शुभ्रं लोहकं धातुद्रव्यम्। रजतधातौ राजनि०।

चन्द्रवंश पु० ६त०। चन्द्रस्य सन्तानादिपरम्परायां स च हरिवं २५अध्यायादौ उक्तः। तत्र भवः यत्। चन्द्रवंश्य तद्वंशोद्भवे त्रि०। [द्वादशाक्षरपादके छन्दोभेदे।

चन्द्रवर्त्मन् न० चन्द्रवर्त्म निगदन्ति वनभसैः वृ० र० उक्ते

चन्द्रवल्लरी स्त्री ६त०। सोमलतायाम् भरतः।

चन्द्रवल्ली स्त्री चन्द्र इव वल्ली सुधातुल्यमधुस्राविस्वात्। १माधवीलतायाम् राजनि०। २सोमलतायां च।

चन्द्रविन्दु पु० चन्द्रः अर्द्धचन्द्रयुक्तोविन्दुः। अर्द्धचन्द्राकारोपरिगतविन्दुरूपसन्निवेशरूपे वर्णभेदे।

चन्द्रविहङ्गम पुंस्त्री चन्द्र इव अर्द्धाङ्गे शुभ्रः विहङ्गमः। (शङ्खचिल)शकुनि खगे त्रिका०। स्त्रियां जातित्वात् ङीष्

चन्द्रव्रत न० चन्द्रस्य चन्द्रलोकप्राप्तये व्रतम् नियमः। चान्द्रायणसंज्ञके व्रते। चान्द्रायणशब्दे दृश्यम्।

चन्द्रशाला स्त्री चन्द्रः शालेवाधारो यस्याः। १ज्योत्स्नायाम् त्रिका०। चन्द्र इव शाला उच्चस्थितत्वात्। २प्रासादोपरिस्थे गृहे (चिलेघर) हारा०। "वियद्गतः पुष्पकचन्द्रशालाः" रघुः। "गृहराजः षोडशकस्त्रिचन्द्रशाला भवेद्वलभी" "बहुरुचिरचन्द्रशाला षड्विंशः पञ्चभौमश्च" वृ० स० ५६अ०। ततः स्वार्थे क। चन्द्रशालिका १वटभ्यां त्रिका०।

चन्द्रशिला स्त्री चन्द्रप्रिया शिला शाक०मध्यपद०स०। चन्द्रकान्ते प्रस्तरभेदे। "प्रह्लादिता चन्द्रशिलेव तूर्णम्" भट्टिः।

चन्द्रशू(सू)र पु० चन्द्रे तज्जे श्लैष्मिके रोगे शू(सू)र इव। चादसूर) (हालौ) इति च ख्याते वृक्षभेदे तत्फले न०" भावप्र०। "चन्द्रशू(सू)रं हितं हिक्कावातश्लेष्मातिसारिणाम्"। तद्गुणा उक्ताः

चन्द्रशेखर पु० चन्द्रः चन्द्रकला शेखरेऽस्य । १महादेवे इन्दुभृच्छब्दे ९३५ पृ० दृश्यम् । "रंहस्युपालभ्यत चन्द्रशेखरः" कुमा० । चन्द्रयुक्तः शेखरोऽस्य । २पर्व्वतभेदे । ३पौष्यन्टपपुत्रे करवीरपुराधीशे न्टपभेदे कालिका पु० ४६ अ० तत्कथा यथा

"ततः पुत्रार्थिनं भूपं प्रसन्नो वृषभध्वजः । ब्रह्मदत्तफलं हस्ते कृत्वेदं तमुवाच ह । ईश्वर उवाच । इदं फलं ब्रह्मदत्तं विभज्य न्टपते ! त्रिधा । भोजयैताः स्वजाया स्त्वं प्रहृष्टः सुस्थमानसः । ततः प्रवृत्ते भवत एतासु ऋतुसङ्गमे ॥ आधास्यन्ति च गर्भांस्तु भार्य्यास्ते युगपन्नृप ! । काले प्राप्ते च युगपत् प्रसवो योषितां तव । भविष्यति न्टपश्रेष्ठ ! तदेवं त्वं करिष्यसि । एकस्या जठरे शीर्षं भार्य्यायास्ते भविष्यति । अपरस्यास्तथा कुक्षौ मध्यभागो भविष्यति । अधोनाभ्यास्तु यो भागः सोऽपरस्यां भविष्यति । ततः खण्डत्रयं भूप ! यथास्थानं पृथक् पृथक् । योजयिष्यसि पश्चात्ते पुत्र एको भविष्यति । तस्य शीर्षे चन्द्ररेखा सहजा संभविष्यति । तेनैव नाम्ना सा ख्यातिं गमिष्यति च भूपते ! ।" इत्युपक्रमे "इत्युक्त्वा स महादेवस्तासां गर्भान् स्वयं तदा । संस्कर्त्तुं जाह्नवीतोयमात्मनः शिरसो न्यधात् । ततःफले स्वयं देवः प्रविवेश वृषध्वजः । तत्क्षणात् तत्फलं भूतं त्रिभागं स्वयमेव ह । पौष्यस्तत्फलमादाय मुदितः सह भार्य्यया । प्रययौ मन्दिरं हृष्टोह्यनुज्ञाप्य वृषध्वजम् । ततः समुचिते काले प्राप्ते ताभिस्तु भक्षितम् । तत् फलं न्टपशार्दूलात् गर्भाश्चाप्याहिताःशुभाः । सम्पूर्णे गर्भकाले तु गर्भेभ्यः समजायत । खण्डत्रयं पृथक् राजा यथा भर्गेण भाषितम् । तच्च खण्डत्रयं पौष्यो यथास्थानं नियोज्य च । एकं पिण्डं चकाराशु तत्र पुत्रो व्यजायत । तस्य शीर्षे तदा राजन् सहजेन्दुकला शुभा । विरराज यथा स्वच्छा शरत्काले कला विधोः । तं सर्वलक्षणोपेतं पीनोरस्कं सुनासिकम् । सिंहग्रीवं विशालाक्षं दीर्घायतभुजं तदा । दृष्ट्वा पौष्यो ऽथ भार्य्याभिस्तिसृभिः सह संमुदम् । लेभे दरिद्रः सत्कोषं प्राप्येव विपुलं ततः । तस्य नामाकरोद्राजा ब्राह्मणैः स्वैः पुरोहितैः । चन्द्रशेखर इत्येवं कान्त्या चन्द्रस सा समः । ववृधे स महाभागः प्रत्यहं चात्यरोच । कलाभिरिव तेजस्वी शरदीव निशाकरः । एवं तिसृणामस्त्रानां गर्भे जातो यतोहरः । अतस्त्र्यम्बकनामाऽभूत् प्रथितो लोकदेवयोः" इत्युपक्रमे "सर्व्वां क्षितिं वशे चक्रेऽमात्यैः स चन्द्रशेखरः । सार्वभौमो न्टपोभूत्वा राजभिः परिषेवितः । अमरैरिव देवेन्द्रो विजहार श्रिया युतः । एवं पौष्यसुतो भूत्वा त्र्यम्बकः प्राप्य निर्वृतिम् । ब्रह्मावर्त्ताह्वये रम्ये करवीराह्वये पुरे । दृषद्वतीनदीतीरे राजा भूत्वा मुमोद ह" । "ऊनविंशतिवर्णाढ्यः सिद्धिदश्चन्द्रशेखरः । कथितः कौन्दुके ताले भवेत् शृङ्गारवीरयोः" संगी० दा० उक्ते ४ध्रुवकभेदे । ५चट्टलदेशस्थमहापीठे ६तत्रस्थे भैरवभेदे "चट्टले दक्षबाहुर्मे भैरवश्चन्द्रशेखरः । व्यक्तरूपा भगवती भवानी तत्र देवता" । "विशेषतः कलियुगे वसामि चन्द्रशेखरे" तन्त्रचूडामणिः । [स्त्री शब्दच० ।

चन्द्रसम्भव पु० चन्द्रः सम्भवोऽस्य । १बुधे । २क्षुद्रैलायाम्

चन्द्रसेन पु० चन्द्रः आह्लादिका सेनाऽस्य । भारतप्रसिद्धे समुद्रसेनपुत्रे राजभेदे "समुद्रसेनपुत्रश्च चन्द्रसेनः प्रतापवान्" भा० आ० १८६ अ० । "जघान स (द्रौणिः) वृषद्रुञ्च चन्द्रसेनञ्च मानिनम्" भा० द्रो० १५६ अ० । "समुद्रसेनं निर्ज्जित्य चन्द्रसेनञ्च पार्थिवम्" भा० स० २९ अ० । भीमप्राचीविजये ।

चन्द्रहन् पु० चन्द्रं हतवान् हन–क्विप् । १दानवभेदे राहौ "एकाक्षश्चन्द्रहा राहोः संहारो मृदुलस्वनः" हरिवं० ४२अ० । श्वेतशीर्षश्चन्द्रहनुश्चन्द्रहा चन्द्रतापनः २४०अ० ।

चन्द्रहनु पु० चन्द्र इव हनुरस्य । दानवभेदे चन्द्रहन् शब्दे उदा० ।

चन्द्रहन्तृ पु० चन्द्रं हन्ति हन–तृच् ६त० । असुरभेदे भारतयुद्धकाले स एव शुनकन्टपरूपेण प्रादुर्भूतः । यथाह भा० आ० सम्भ० ६७अ० । "चन्द्रहन्तेति यस्तेषां कीर्त्तितः प्रवरोऽसुरः । शुनकोनाम राजर्षिः स बभूव नराधिपः" "चन्द्रहन्ता क्रोधहन्ता क्रोधवर्द्धन एव च" हरिवं० ४२अ० । दानवकथने

चन्द्रहास पु० चन्द्रस्येव हासः प्रभाऽस्य, चन्द्रं हसति सितत्वात् हस–अण् वा । १खड्गे २रावणखड्गे च मेदि० । ३रौप्ये न० राजनि० । ४गुडूच्यां स्त्री राजनि० ।

चन्द्रा स्त्री चदि–आह्लादे रक् । १एलायां २विताने चन्द्रातपे च शब्दरत्ना० ३गुडूच्यां शब्दार्थचि० ।

चन्द्रांशु पु० चन्द्रस्यांशुरिवाह्लादकोऽंशुरस्य । १विष्णौ परमेश्वरे "ऋद्धः स्पष्टाक्षरोमन्त्रश्चन्द्रांशुर्भास्करद्युतिः" विष्णुस० । "संसारतापतिग्मांशुतापतापितचेतसां च

न्द्रांशुरिवाह्लादकत्वात्” भा०। ६त०। २चन्द्रस्य किरणे च।

चन्द्रातप पु० चन्द्रस्य आतो गमनं ततः पाति पा-क। (चाँदोया) १विताने चन्द्रस्य आतप इव किरणः। २ज्योत्स्नायाम् हेम०। “चन्द्रातपमिव रसतामुपेतम्” काद०। [तनयादयोऽप्यत्र।

चन्द्रात्मज पु० ६त०। बुधे इन्दुजशब्दे दृश्यम्। चन्द्र-

चन्द्रानन पु० चन्द्र इवाननमस्य। कार्त्तिकेये “अमोघस्त्वनघो रौद्रः शिवश्चन्द्राननस्तथा” भा० व० २३१ अ०। कार्त्तिकेयनामोक्तौ। २चन्द्रतुल्यवदने त्रि०।

चन्द्रार्द्ध पु० ६त०। चन्द्रस्य कलारूपे भागे तुल्यभागार्द्धपरत्वे अर्द्धचन्द्र इत्येव स्यात्। “भुजासक्तेन शुशुभे गजदन्तेन केशवः। चन्द्रार्द्धबिम्बसंसक्तो यथैकशिखरो गिरिः” हरिवं० ८७अ०। “मोहयन्नम्बुजाक्षीहन्द चन्द्रार्द्धचूडे! प्रभवति स महाघोरबाणावतंसे!” श्यामास्तवः।

चन्द्रालोक पु० पीयूषवर्षकविकृते अलङ्कारप्रबन्धभेदे। “चन्द्रालोकममुं स्वयं वितनुते पीयूषवर्षः कविः” इति तदारम्भपद्यम्।

चन्द्रावली स्त्री वृन्दावनस्थे गोपीभेदे। “राधाचन्द्रावलीमुख्याः प्रोक्ता नित्यं प्रिया व्रजे। कृष्णवन्नित्यसौन्दर्य्यवैदग्ध्यादिगुणाश्रयाः” उज्ज्वलमणिः। [राजनि०।

चन्द्रास्पदा स्त्री चन्द्र आस्पदं यस्याः। कर्कटशृङ्ग्याम्।

चन्द्रिका स्त्री चन्द्रोऽस्त्यस्याः आश्रयत्वेन ठन् चदि-दीप्तौ रक् ततः स्वार्थे क वा। १ज्योत्स्नायाम् अमरः। २स्थूलैलायां(चाँदा)। ३मत्स्यभेदे ४चन्द्रभागानद्याञ्च शब्दर०। ५कर्णस्फोटालतायां ६मल्लिकायां०। ७श्वेतकण्टकार्य्यां ८मेथिकायां ९स्थूलैलायां राजनि०।१०चन्द्रशूरे भावप्र०। “मेघमुक्तविशदां स चन्द्रिकाम्” रघुः। “नवचन्द्रिकाकुसुमकीर्णतमः” माघः। “न कस्य कुरुते शिरश्रमं चन्द्रिका” सा० द०। चन्द्रि चन्द्रयुक्तं कं शिरोऽस्य ११शिवे पु०। “चन्द्रिकानुप्रभावेन कृता दत्तकचन्द्रिका” १२ज्योत्स्नाया इव आह्लादिकायां स्त्रियां स्त्री स्मृतिचन्द्रिका अलङ्कारचन्द्रिका इत्यादि।

चन्द्रिकाद्राव पु० चन्द्रिकया द्रावो निष्यन्दो यस्य। चन्द्रकान्तमणौ राजनि०।

चन्द्रिकापायिन् पुंस्त्री चन्द्रिकां पिबति पा-णिनि। चकोरपक्षिणि शब्दार्थचि० स्त्रियां ङीप्।

चन्द्रिकाम्बुज न० चन्द्रिकेव शुभ्रमम्बुजम्। सितोत्पले राजनि०।

चन्द्रिन् त्रि० चन्द्रोऽस्त्यस्य इनि। १चन्द्रयुक्ते “चन्द्रिकानुप्रभावेण कृता दत्तकचन्द्रिका” २सुवर्णयुक्ते च “चन्द्री यजति प्रचेताः” यजु० २०।३७। “चन्द्री” सुवर्णमयः” वेददीपः। [३वास्तूके च मेदि०।

चन्द्रिल पु० चन्द्र+वा० अस्त्यर्थे इलच्। १शिवे। २नापिते

चन्द्री स्त्री चदि-रक् गौरा० ङीष्। वाकुच्याम् राजनि०।

चन्द्रेश्वर पु० चन्द्रसेविते काशीस्थे शिवमूर्त्तिभेदे चन्द्रशब्दे दृश्यम्। चन्द्रेशोऽप्यत्र लिङ्गपरत्वे न०

चन्द्रेष्टा स्त्री चन्द्र इष्टोयस्याः निशायाः वा परनिपातः। उत्पलिन्याम् राजनि०।

चन्द्रोदकुण्ड पु० चन्द्रकृतमुदकं यत्र वा उदादेशः कर्म०। काशीस्थे कुण्डरूपे तीर्थभेदे “तथा चन्द्रोदकुण्डे च श्राद्धात्तृप्यन्ति पूर्व्वजाः” काशीख० १४ अ०।

चन्द्रोदय पु० चन्द्रस्योदयः। विधोः प्राथमिकदर्शनयोग्यस्थानेषु १प्रकाशे दिनेषु तिथिखण्डभेदस्थित्या तन्निरूपणं हरिभक्तिविलासे १६ वि० यथा

“प्रतिपद्यापराह्णिकत्रिमुहूर्त्तव्यापिन्यां द्वितीयायां चन्द्रदर्शनं सम्भाव्यते। तदुक्तमग्न्याधानविषये वृद्धशातातपेन। “द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद्यापराह्णिकी। अग्न्याधानं चतुर्दश्यां परतः सोमदर्शनादिति अपराह्णश्च पञ्चधा विभक्तस्याह्नश्चतुर्थोभागः। ततश्च यत्र प्रतिपदि अपराह्णे त्रिमुहूर्त्तव्यापिनी द्वितीया तत्र चन्द्रदर्शनसम्भावनमिति”

सुखबोधोक्ते २औषधभेदे तत्पाकप्रकारो यथा सुखबोधे “पलं मृदुस्वर्णदलं रसेन्द्रं पलाष्टकं षोड़श गन्धकस्य। शोणैः सुकार्पासभवैः प्रसूनैः सर्वं विमर्द्याथ कुमारिकाद्भिः। तत्काचकुम्भे निहितं सुगाढ़े मृत्कर्पटैस्त्रिदिवसत्रयञ्च। पचेत् क्रमाग्नौ सिकताख्ययन्त्रे ततो रजः पल्लवरागरम्यम्। निगृह्य चैतस्य पलं पलानि चत्वारि कर्पूररजस्तथैव। जातीफलं शोषणमिन्दुपुष्पं कस्तूरिकाया इह शाण एकः। चन्द्रोदयोऽयं कथितस्तु माषो भुक्तोऽहिवल्लीदलमध्यवर्त्ती। मदोन्मदानां प्रमदाशतानां गर्वाधिकत्वं श्लथयत्यकाण्डे। घृतं घनीभूतमतीव दुग्धं मृदूनि मांसानि समस्तकानि। माषान्नपिष्टानि भवन्ति पथ्यान्यानन्ददायीन्यपराणि ज्ञात्। वलीपलितनाशनस्तनुभृतां वयःस्तम्भनः समस्त-

मदखण्डनः प्रचुररोगपञ्चाननः । दृष्टेषु रसराड़यं भवति यस्य चन्द्रोदयः सपञ्चशरदर्पितो मृगदृशां भवेद्दुर्लभः" । २चक्रदत्तोक्ते वर्त्तिभेदे स्त्री तत्प्रकारो यथा "हरीतकी वचाकुष्ठं पिप्पली मरिचानि च । विभीतकस्य मज्जा च शङ्खनाभिर्मनःशिला । सर्वमेतत् समं कृत्वा छागीक्षीरेण पेषयेत् । नाशयेत्तिमिरं कण्डूं पटलान्यर्बुदानि च । अधिकानि च मांसानि यश्च रात्रौ न पश्यति । अपि द्विवार्षिकं पुष्पं मासेनैकेन साधयेत् । वर्त्तिश्चन्द्रोदया नाम नृणां दृष्टिप्रसादनी" ।

चन्द्रोपल पु० चन्द्रप्रियः उपलः । चन्द्रकान्तमणौ हेमच० चन्द्रकिरणसंपर्कात् तस्य क्षरणात् तत्प्रियत्वम् ।

चन्द्रौरस पु०६त० । १बुधे "म्नौ न्यौ ल्गौ चेदिह भवति च चन्द्रौरसः" वृ० र० टीकोक्ते चतुर्दशाक्षरपादके २वर्णवृत्तभेदे च

चप चूर्णीकरणे चु० उभ० सक० सेट् घटा० । चपयति-ते अचीचपत्-त । चिवातोरेव स्वार्थे णिचि तद्रूपमित्यन्ये ।

चप सान्त्वने भ्वा० पर० सक० सेट् । चपति अचापीत-अचपीत् । णिचि चापयति ।

चप गतौ चु०उभ०सक०सेट् इदित् । चम्पयति ते अचचम्पत् त

चपट पु० चपेट+पृषो० । (चड) चपेटे अमरटीका ।

चपल न० चुप-मन्दायां गतौ कल उपधोकारस्याकारः । १शीघ्रे मेदि० २क्षणिके त्रि० हेमच० । ३पारदे ४मत्स्ये ५चातके ६प्रस्तरभेदे च पु० मेदि० । ७चये पु० राजनि० । ८तरले चञ्चले च त्रि० मेदि० । ९दोषमनिश्चित्य कर्मकारिणि त्रि०अम० । १०विकले त्रि० शब्दर० । ११लक्ष्म्यां स्त्री "निलयः श्रियः सततमेतदिति प्रथितं यदेव जलजन्मतया । दिवसात्ययात्तदपि मुक्तमहो चपलाजनं प्रति न चोद्यमदः" माघः । १२विद्युति १३पुंश्चल्यां १४पिप्पल्याञ्च स्त्री मेदि० । १५जिह्वायां स्त्री शब्दच० । १६विजयायां १७मदिरायां स्त्री राजनि० । "नीचि नियतमिह यच्चपलो नियतः स्फुटं नभसि निम्नगासुतः" माघः "शैशवाच्चपलमप्यशोभत" रघुः । "न पाणिपादचपलो न नेत्रचपलोऽनृजुः" मनुः । शौण्डा० ७त० । नेत्रचपलः । पादचपलः । श्रेण्या० कृतादिभिः अभूततद्भावार्थे समासः । चपलकृतःचपलभूतः । विस्पष्टा० गुणवचनशब्दे परे तत्पुरुषे अस्य प्रकृतिस्वरत्वात् अन्तोदात्तता । चपलकटुकम् । प्रियादि०तस्मिन् परे पूर्वस्य न पुंवत् । प्रकाशमाना चपला विद्युत् यत्र प्रकाशमानाचपल इत्यादि । चपलस्य भावः अण् चापल न० ष्यञ् चापल्य न० त्व चपलत्व न० अनवस्थितत्वे "सहजचापलदोषसमुद्धतः" माघः । "मा चापलायेति गणान् न्यषेधीत्" कुमा० । "उभयार्द्धयोर्जकारो द्वितीयतुर्य्यौ गमध्यगौ यस्याः । चपलेति नाम तस्याः प्रकीर्त्तितं नागराजेन" वृ० र० उक्ते आर्य्याविशेषे १८मात्रावृत्तभेदे स्त्री । स्वार्थे क । चञ्चले त्रि० । भृशा० अभूततद्भावार्थे क्यङ् । चपलायते अचपलायिष्ट

चपलता स्त्री चपल-तल् । चाञ्चल्ये सा०द० उक्ते २व्यभिचारिगुणभेदे । "सधृतिचपलताग्लानिचिन्तावितर्काः" व्यभिचारिण उद्दिश्य "मात्सर्यद्वेषरागादेश्चापल्यमनवस्थितिः । तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः" इति लक्षित्वा "अन्यासु तावदुपभोगसहासु भृङ्ग ! लोलं विनोदय मनः सुमनोलतासु । मुग्धामजातरजसं कलिकामकाले व्यर्थं कदर्थयसि किं नवमालिकायाः" सा० द० उदाहृतम् ।

चपलाङ्ग पु० चपलमङ्गमस्य । शिशुमारे जलजन्तुभेदे । हारा० ।

चपलावक्त्र न० "चपलावक्त्रमयुजोर्नकारश्चेत् पयोराशेः" वृ० [र० उक्ते छन्दोभेदे ।

चपेट पु० चप-वञर्थे क चपाय सान्त्वनाय एटति गच्छति इट-क । विस्तृताङ्गुलिके हस्ते (चापड़) स्त्रीत्वमीप्सते "खण्डिकोपाध्यायः शिष्याय चपेटां ददातीति" भाष्यप्रयोगात् । स्वार्थे क । अत्रैवार्थे अमरः ।

चपेटी स्त्री भाद्रशुक्लषष्ठ्याम् । "प्रसूत्या द्वादशे मासि सम्पूज्यापत्यवृद्धये । सुते जाते तथा षष्ठ्यां षष्ठीद्वादशरूपिणी । वैशाखे चान्दनी षष्ठी ज्यैष्ठे चारण्यसंज्ञिता । आषाढ़े कार्दमी ज्ञेया श्रावणे लुण्ठनी मता । भाद्रे चपेटी विख्याता दुर्गाख्याश्वयुजे तथा । नाड़ाख्या कार्त्तिके मासि मार्गे मूलकरूपिणी । पौषे मासान्नरूपा च शीतला तपसि स्मृता । गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता" स्कन्द० पु०

चप्य त्रि० चप-पवर्गान्तत्वात् कर्म्मणि यत् । "चप्यं भवत्यन्नाद्यस्यावरुद्ध्यै" शत० ब्रा० १२.७।२।१३ "चप्यं न पायुर्भिषगस्य" यजु० १९ । ८८ ।

चम अदने भ्वा० प० सक० सेट् । चमति आचामति । विचमति । आचमीत् चचाम चेमतुः । उदित् चमित्वा चान्त्वा । आचान्तः । आचमनम् आचमनीयम् । "आचान्तः पुनराचामेत्" स्मृतिः । "मनाग् मनागपि नाचामसि" प्रबोधच० । "चचाम मधु माध्वीकम्"

भट्टिः। णिचि चामयति। "इमां किमाचामयसे न चक्षुषी" नैष०।

चम भक्षे स्वादि० वैदिकः प० सक० सेट्। चम्नोति उदित् चमित्वा चान्त्वा। कविकल्पद्रुमे "क्षुभ्रिचां गम्लृ गत्यां चम् नृचम् जस् जिसु भम" इति वाक्ये "परोऽनुबन्धः पूर्व्वेषाम्" इति तत्रोक्तेः सर्व्वेषामुदित्त्वं तेन शब्दकल्पद्रुमे स्वादिगणीयस्य उदित्त्वाद्युक्तिः प्रामादिकी

चमत्कार पु० चमदित्यव्यक्तं क्रियते कृ–भावे घञ्। लोकातीतवस्तु दृष्ट्वा चित्तस्य आनन्दहेतौ १प्रकाशे विस्मये, "लोकोत्तरचमत्कारप्राणदस्य प्रमातृभिः"। "चमत्कारश्च चित्तविस्ताररूपो विस्मयापरपर्य्याय" सा० द०। "रसे सारश्चमत्कारः सर्व्वत्राप्यनुभूयते" तद्वृतधर्म्मदत्तवाक्यम्। "चमत्कारश्च लोकातीतार्थकलनेन किमेतदितिज्ञानधाराजननेन चित्तवृत्तेः दीर्घविस्तारः। दृष्टहेतुभ्योऽसम्भावितत्वज्ञानेन हेत्वन्तरानुसन्धानाय मनसो व्यापारभेद एव चित्तविस्तार इत्यन्ये। सुखविशेष एव चमत्कार इत्यपरे। चमत्कारत्वञ्च आह्लादगतो जातिविशेषः यथाह रसगङ्गाधरे "रमणीयार्थप्रतिपादकः शब्दः काव्यं रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता लोकोत्तरत्वञ्च आह्लादगतश्चमत्कारत्वापरपर्य्यायोऽनुभवसाक्षिकोजातिविशेषः" इति। "इत्थं च चमत्कारजनकभावनाविषयार्थप्रतिपादक शब्दत्वं यत्प्रतिपाद्यार्थविषयकभावनात्वं चमत्कार जनकतावच्छेदकं तत्त्वं, स्वविशिष्टजनकतावच्छेदकार्थ प्रतिपादकतासंसर्गेण चमत्कारत्ववत्त्वमेव वा काव्यत्वमिति फलितम्" इति च। कर्त्तरि अण्। २अपामार्गे त्रिका०।

चमर पुंस्त्री चम–अरच्। १महिषाकृतौ मृगभेदे, यस्य पुच्छेन चामराख्यं व्यजनं भवति, स्त्रियां जातित्वात् ङीष्। "कुर्व्वन्ति बालव्यजनैश्चमर्य्यः" "बालप्रियत्वं शिथिलं चमर्य्यः" कुमा०। "स्फुरति चारुवनं चमरीचयः" माघः। २दैत्यभेदे पु०। ३चमरबालजाते चामरे न०।

चमरपुच्छ पुंस्त्री चमरस्य पुच्छमिव पुच्छमस्य। (केंकडे) बिलेशये १पशुभेदे। राजनि०। ६त०। २चामरे न०

चमरिक पु० चमरमिव केशरोऽस्त्यस्य ठन्। कोविदारवृक्षे रक्तकाञ्चनारे वृक्षे अमरः

चमरी स्त्री चमरजातिस्त्री ङीष् चमरमिवाकारोऽस्त्यस्या अच् गौरा० ङीष् वा। १चमरजातिस्त्रियां चमरशब्दे उदा०। २मञ्जर्यां मेदि०।

चमस पुंन० अर्द्धर्चादि० चमत्यस्मिन् चम–असच्। १पलाशादिकाष्ठजाते यज्ञियपात्रभेदे तल्लक्षणभेदादिकं यज्ञपार्श्वे उक्तं यथा "चमसानां तु वक्ष्यामि दण्डाः स्युश्चतुरङ्गुलाः। त्र्यङ्गुलस्तु भवेत्स्कन्धो विस्तारश्चतुरङ्गुलः। विकङ्कतमयाः श्लक्ष्णावाग्बिलाश्चमसाः स्मृताः। अन्येभ्यो वापि वा कार्य्यास्तेषां दण्डेषु लक्षणम्। होतुर्मण्डल एव स्याद्ब्रह्मणश्चतुरश्रकः। उद्गातॄणां च त्र्यश्रिः स्याद्यजमानः पृथुः स्मृतः। प्रशास्तुरवतष्टः स्यादुत्तष्टो ब्रह्मशंसिनः। पोतुरग्रे विशाखी स्यान्नेष्टुः स्याद्विरटहीतकः। अच्छावाकस्य रास्नाव आग्नीध्रस्य मयूखकः। इत्येते चमसाः प्रोक्ता ऋत्विजां यज्ञकर्म्मणि। पलाशाद्वा वटाद्वान्यष्टचाद्वा चमसाः स्मृताः" कात्या० श्रौ० १।२।२३। सूत्रभाष्ये कर्कः "स च चमसश्चतुरस्रो द्वादशाङ्गुलदीर्घश्चतुरङ्गुलखातः सदन्तश्च भवति परिशिष्टात् सूत्रकारप्रस्थानाच्च। चमसवत्स्रुवेणेति स्रुवस्य चतुरस्रतां विधातुं चमसवदित्येव चमसस्य बिलां चतुरस्रतामाह" कात्या० श्रौ० २।३।१। "चमसवदविशेषात्" शारी० सू०। "अर्वाग्बिलश्चमस" इति तद्भाष्यधृतश्रुतिः। स्त्रीत्वमपि मेदि०। २सोमपानपात्रभेदे च। कर्म्मणि अच्। ३पर्पटे पिष्टकभेदे ४लड्डुके च पु० "चूर्णं यच्छुष्कमाषाणां चमसी साऽभिधीयते" भावप्र० उक्ते (धूमसी) ख्याते ५माषचूर्णे च स्त्री गौरा० ङीष्।

चमसिन् पु० चमस+अस्त्यर्थे इनि। चमसयुक्ते स्त्रियां ङीप्। ततः नडा० अपत्ये फक्। चामसायन तदपत्ये पुंस्त्री०

चमसोद्भेद पु० भारतप्रसिद्धे प्रभासान्तिकस्थे तीर्थभेदे। "ततस्तु चमसोद्भेदमच्युतस्त्वगमद्बली। चमसोद्भेद इत्येवं यं जनाः कथयन्त्युत" भा० शल्य० ३६अ०। "एष वै चमसोद्भेदो यत्रादृश्या सरस्वती। यत्रैनामभ्यवर्त्तन्त सर्व्वाः पुण्याः समुद्रगाः" भा०व० १३०अ०। चमसोद्गनमप्यत्र न० "आम्नजान् सरितश्चैव सरांसि च नराधिप!। चमसोद्भेदनं विप्रास्तत्रापि कथयन्त्युत" ८८अ०। "स्नात्वा तु चमसोद्भेदे अग्निष्टोमफलं लभेत्" ८२अ०।

चमीकर पु० कृतस्वराभिधे स्वर्णस्योत्पत्तिस्थाने शब्दार्थचि० यद्योगात् स्वर्णं चामीकरमित्युच्यते।

चमू स्त्री चम–ऊ। सेनामात्रे (गजाः ७२९, रथाः ७२९ अश्वाः २१८७, पदात्यः ३६४५), एतत्संख्याभेदान्विते सैन्यभेदे च अमरः। "अक्षौहिणीशब्दे ४६पृ० दृश्यम्,

“रक्षाहेतोर्नवशशिभृता वासवीनां चमूनाम्” मेघ०। आधारे क्त। ३चमसे स्त्री “द्रप्सा मधश्चमूषदः” ऋ० १।१४।४। “चमूषदः चमसादिपात्रेषु अवस्थिताः” भा०। ४द्यावापृथिव्योः द्वि० व० निघ०

चमूचर पु० चमूषु चरति चर-ट। २सैनिके शब्दार्थचि०।

चमूनाथ पु० ६त०। सैन्याध्यक्षे “युवतिचमूनाथभोज्यवस्त्राणाम्” वृ० सं० १६अ०। चमूपत्यादयोऽप्यत्र।

चमूरु पुंस्त्री चम-खर्जूरा० ऊर प्रषो० अत उत्त्वम्। मृगभेदे। “चकाशतं चारुचमूरुचर्म्मणा” माघः। “दृदमरुयुगं न चमूरुदृशः” प्रसन्नरा०।

चमूहर पु० चमुं दैत्यसैन्यं हरति हृ-अच्। महादेवे ‘चमूहरः सुरेशश्च व्योमारिः शङ्करोभवः” भा० आनु० ९१अ० शिवनामोक्तौ। [पुष्पादौ न०।

चम्प पु० तु० चपि-अच्। १कोविदारवृक्षे शब्दमाला २तत्-

चम्पक पु० चपि-ण्वुल्। (चाँपा) प्रसिद्धपुष्पप्रधाने १वृक्षभेदे अमरः। “चम्पकः कटुकस्तिक्तः कषायो मधुरोहिमः। विषक्रिमिहरः कृच्छ्रकफवाता स्रपित्तहृत्” भावप्र० तद्गुणा उक्ताः। २तत्पुष्पादौ न० “व्यालोकयच्चम्पककोरकावलीः” नैष०। “उन्निद्रपुष्पचनचम्पकपिङ्गभासा” माघः। ३पनसफलैकभागभेदे (चाँपी) ख्याते पदार्थे (चाँपाकला) प्रसिद्धे ४कदलीभेदे पु० तत्फले न० राजनि०। “चम्पकं वातपित्तघ्नं गुरु वीर्य्यकरं तथा। अतिशीतं रसे पाके मधुरं कथितं बुधैः” भावप्र० तद्गुणा उक्ताः। ५साङ्ख्यमतसिद्धे सिद्धिभेदे “न्यायेन स्वयं परीक्षितमप्यर्थं तावन्न श्रद्दधते यावद्गुरुशिष्यसब्रह्मचारिभिः सह न संवाद्यते अतः सुहृदां गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः सुहृत्प्राप्तिः सा सिद्धिस्तथा चम्पकमुच्यते इति” सांख्यशास्त्रम्।

चम्पकचतुर्द्दशी स्त्री ज्यैष्ठशुक्लचतुर्द्दश्याम् ज्यैष्ठमासे इत्युपक्रमे “चतुर्द्दश्यां च शुक्लायां चम्पकैः पूजयेत् शिवम्। अयुतैर्वा सहस्रैर्वा शतैर्वा परमेश्वरि!। पायसञ्च बलिं दद्यात् ततो नक्तं चरेद्व्रती। वृषस्थेऽर्के विशेषेण न भूयो जायते भुवि। त्रिमध्वक्तैश्चम्पकैश्च सहस्रं जुहुयान्निशि। चयष्टिं ज्वरान् हन्ति कृत्वा द्रोहांश्च यानि च। चम्पकचतुर्द्दशी ख्याता पूजयेद्वै सदाशिवम्। दशजन्मकृतं पापमर्च्चनादेव नश्यति” मत्स्यसू० ४५प०

चम्पकमाला स्त्री चम्पकपुष्पनिर्मिता माला ६त०। १चम्पकपुष्पमालायाम्। २चम्पकपुष्पाकारे स्त्रीणां कण्ठाभरणभेदे। (चापकलि) शब्दार्थ०। “भौ सगयुक्तौ चम्पकमाला” वृ०र० उक्ते दशाक्षरपादके ३वर्णवृत्तभेदे चम्पकमालेत्यत्र “रुक्मवतीयम्” इत्यपि पाठः।

चम्पकरम्भा स्त्री चम्पकोपपदा रम्भा शा० त०। (चाँपाकला) कदलीभेदे राजनि०।

चम्पकारण्य न० चम्पकप्रधानमरण्यम्। भारतप्रसिद्धे तीर्थभेदे “ततो गच्छेत राजेन्द्र! चम्पकारण्यमुत्तमम्। तत्रोष्य रजनीमेकां गोसहस्रफलं लभेत्” भा० व० ८४अ०। [उण्। पनसे (काँटाल) शब्दार्थचि०

चम्पकालु पु० चम्पकेन पनसावयवभेदेन अलति अल-

चम्पकावती पु० चम्पक+अस्त्यर्थे मतुप् मस्य वः संज्ञायां दीर्घः। चम्पापुर्य्यां कर्णराजधान्याम् (भागलपुर) ख्याते पुरीभेदे शब्दरत्ना०। (चाँदकुँड़ा)

चम्पकुन्द पु० चम्प इव कुन्दते कुदि-अच्। मत्स्यभेदे राजनि०। [६त०। पनसे त्रिका०।

चम्पकोष पु० चम्पकैरुष्यते अत्र वस-घञर्थे आधारे क

चम्पा स्त्री चम्प-अच्। कर्णपुर्य्यामङ्गदेशस्थे १पुरीभेदे। (चाँपाइ) ख्याते तन्निकटस्थे २नदीभेदे ३पनसावयवभेदे (चाँपि) शब्दार्थचि० [शब्दे ७८पृ० दृश्यम्।

चम्पाधिप पु० ६त०। कर्णे तस्य तद्राज्यकथा अङ्गाधिप-

चम्पापुरी स्त्री चम्पानामिका पुरी। अङ्गदेशस्थे कर्णराजधान्याम्। चम्पानगर्य्यादयोऽप्यत्र।

चम्पालु पु० चम्पया अलति अल-उण्। पनसे शब्दरत्ना०।

चम्पावती स्त्री चम्पा अङ्गदेशस्थः नदीभेदः अस्त्यस्याः मतुप् मस्य वः। चम्पापुर्य्यां शब्दरत्ना०।

चम्पू स्त्री चपि-ऊ। “गद्यपद्यमयी वाणी चम्पूरित्यभिधीयते” इत्युक्ते काव्यभेदे जटा०। [वासिषु ब०व०

चम्पेश पु० ६त०। कर्णे त्रिका०।

चम्पोपलक्षित पु० ३त०। १अङ्गदेशे हेमच० २तद्देश-

चम्ब गतौ भ्वा० पर० सक० सेट्। चम्बति अचम्बीत्। चचम्ब-

चम्रिष त्रि० चमूषु चमसेषु इष्यति गच्छति इष-क्विप् वेदे नि० वस्य रः। चमसस्थे। “तस्य चम्रिषोऽत्यो न” ऋ० १।५६।१। “चमूषु चमसेषु इषः वर्त्तमानाः” भा०। पृषो० दीर्घः चम्रीष इत्यप्यत्रार्थे। “चम्रीषो न शरदा पाञ्चजन्यः” ऋ० १।१००।१२। [चेये।

चय गतौ भ्वा० आ० सक० सेट्। चयते अचयिष्ट

चय पु० चि-भावकर्म्मादौ अच्। १समूहे। २वप्रे ३प्राकारमूलबन्धने। यदुपरि प्राकारो निरूप्यते प्राकारमूलस्थित

वेदिकेति यावत्। तथा चार्थशास्त्रम्। "खातमुद्धृत मृदा वप्रं कारयेद् तस्योपरि प्राकारमिति"। पगार इति गौड़भाषा। ४परिखोद्धृतमृत्स्तूपे। तत्रसमूहे "स्फुरति चानुवनं चमरीचयः"। "निलयेषु नक्तमसिनाश्मनाञ्चयैः" "चयस्त्विषामित्यवधारितं पुरः" इति च माघः। वप्रे "चयाट्टालकशोभिना" भा०व०१६०अ०। ५अग्न्यादेश्चयने संस्कारभेदे। "यज्ञांश्च प्रचयानलान्" हरिवं० ४१अ०। ६पुष्पादेः समाहरणे ७पीठे मेदि०। चये कुशलः आकर्षा० कन्। चयक चयनकुशले त्रि०।

चयन न० चि—भावे ल्युट्। १पुष्पादेः समाहरणे २अग्न्यादेः संस्कारभेदे च। चयनप्रकारः कातीयादौ दृश्यः "स यथा कामयेत तथा कुर्य्यादिति अचयनस्य तथाचयनस्येति" शत०ब्रा०६।५।२।११। चीयतेऽनेन करणे ल्युट्। संस्कारसाधने श्यूपादौ च। "येन भागीरथी गङ्गा चयनैः काञ्चनैश्चिता" भा० द्रो० ५१अ०।

चर गतौ भ्वा० पर० सक० सेट्। चरति अचारीत्। चचार चेरतुः। "दिवा चरेयुः कार्य्यार्थं चिह्निताराजशासनैः" मनुः। "चेरतुः खरदूषणौ" भट्टिः "हंसं तनौ सन्निहितं चरन्तम्" नैष०। चरः चारः चरणम् चरितं चरित्रम्। चरन् चंचूर्य्यते "ततश्चंचूर्य्यमाणाशौ" भट्टिः। यङ्लुकि चंचुरीति चंचूर्त्ति।

अति+अतिक्रम्य गमने "अतिचेरुर्वक्रगत्या युयुधुश्च परस्परम्" भाग० १।१७।१४। "अयोगतश्चात्यचरत् योगं दिवि निशाकरः" हरिवं० २२६अ०। "पुत्राः पितॄनत्यचरन्नार्य्यश्चात्यचरन् पतीन्" भा० शा० ८२८७श्लो०। अतिचारशब्दोक्तेऽर्थे अतिचारशब्दे ८८पृ० दृश्यम्।

वि+अति व्यतिक्रमे "त्वामहं न व्यतिचरे मनसाऽपि कदाचन" रामा० ल० १०१।

अधि+आधिक्येन चरणे। "यासुपरिष्टादधिचरसि" शत० [१।६।१।८

अनु+अनुगमने पश्चाद्गमने साहाय्यकरणे। अनुचरः।

अप+अपकारे अनिष्टसम्पादने। "दोषस्तेषामपचरेत् न माचक्षीत वै द्विजः" भा०शा० ६५८६।। "पितृदेवर्षिभृत्याश्च न चापचरिता मया" मार्क० पु०।

अभि+आभिमुख्येन चरणे अतिक्रमे व्यभिचारे च "पतिं या नाभिचरति मनोवाग्देहसंयता" मनुः "यथैवाहं नाभिचरे कदाचित" भा० वि० ४५७ अ०। अनिष्टसम्पादने "श्येनेनाभिचरन् यजेत" श्रुतिः। अभिचारश्च मारणोच्चाटनादीनि षट्कर्माणि "प्रति तमभिचर योऽस्मान् द्वेष्टि" अथ० २।११।२। अभिचारशब्दे दृश्यम्।

वि+अभि+विशेषेण अतिक्रमे। यस्य यथात्वमुचितं तस्य तदतिक्रमे। "उस्राणां व्यभिचरतीव सप्तसप्तौ" किरा०। "व्यभिचचार न तापकरोऽनलः" नैष०। हेतोः साध्याभाववद्वृत्तित्वं, साध्यस्य च हेतुसमानाधिकरणाभावप्रतियोगित्वं व्यभिचारः। "न तावदव्यभिचरितत्वं तद्धि न साध्याभाववदवृत्तित्वम्" अनुमानचिन्ता०। स्त्रीणाञ्च पतिमतिक्रम अन्यपुंसि गमनं व्यभिचारः।

अव+समन्तात् चरणे। "कषायं अवचारितम्"। "कफवातज्वरं हन्याच्छीघ्रं कालेऽवचारितम्" "प्रमार्जनं धावनञ्च वीक्ष्य वीक्ष्यावचारयेत्" "दूर्वां पुनर्यवाञ्चैव लेपे साध्ववचारयेत्" इति च सुश्रु०।

आ+अनुष्ठाने। "प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः" रघुः। "यद्यदाचरति श्रेष्ठः" गीता। प्रतिपाल्यत्वादिना सदृशीकरणे च "संप्राप्ते षोडशे वर्षे पुत्रं मित्रवदाचरेत्" चाण०।

अधि+आ+आधिक्येनाचरणे "शय्यासनेऽध्याचरिते श्रेयसा न समाविशेत्" मनुः।

अनु+आ+अनुगमने तुल्यरूपानुष्ठाने "कोनु तत्कर्म्म राजर्षेर्नाभेरन्वाचरेत् पुमान्" भाग० ४।५।७।

सम्—उद्+आ सम्यगाचरणे। "बालानपि च मार्गस्थान् सान्त्वेन समुदाचरेत्" भा० शा० ३३अ०।

उप+आ+उपासने। "उपाचरति तत्रस्थ धनानामीश्वरम् प्रभुम्" भा० स० १०अ०।

सम्+आ+सम्यगाचारे। "त्वया पापानि घोराणि समाचीर्णानि पाण्डुषु" भा० क० ३१अ०। उपधातइत्त्वम्। "उच्छिष्टान्ननिषेकञ्च दूरादेव समाचरेत्" मनुः।

उद्+उल्लङ्घ्य गतौ सक० आत्म०। धर्म्ममुच्चरते "धर्म्ममुल्लङ्घ्य गच्छतीति" सि० कौ०। उपरिष्टाद्गतौ अक० प०। वाष्प उच्चरति "उपरिष्टाद्गच्छति" सि० कौ०। "सौदामनीमुच्चरन्तीं यथैव" भा० व० ११६क०। "क्षीवाट्टन्दैरुदचरत्" भट्टिः "दिव्यस्तूर्य्यध्वनिरुदचरत् व्यश्नुवानो दिगन्तान्" रघुः। कण्ठताल्वाद्यभिघातेन उत्पादने "सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति न्यायः। "अन्यदा जगति राम इत्ययं शब्द उच्चरित एव मामगात्" रघुः।

वि+उद्+विशेषेण उत्थितौ। "यथाऽग्नेः क्षुद्राविस्फुलिङ्गा व्युच्चरन्ति" शत० ब्रा० ४।५।१।२२।

सम्+उद्+सम्यगुत्थितौ। "समुच्चरन्त्यस्मादापः" निरु०६।११

उप+उपासने "गिरिशमुपचचार प्रत्यहं सा सुकेशी" कुमा०। अन्यथास्थितस्य वस्तुनोऽन्यथात्वप्रतिपादनरूपे शब्दादिव्यापारभेदे उपचारस्य लक्षणा छलं वा। "यथा लोके खशक्तिषु योधेषु वर्तमानौ जयपराजयौ राज्ञि उपचर्य्येते" सा० द०। "तेनोपचर्य्यन्ते राज्ञः"। "याम्योत्तरा शशिगतिर्गणितेऽप्युपचर्य्यते तेन" वृ० स० ५।१५।

दुस्+दुष्टाचरणे। "कामवक्तव्यहृदया भर्त्तारं दुश्चरन्ति याः" रामा० आर० २।२५।

निस्+निर्गमने "द्रुतश्चेतश्च निश्चेरुर्हृष्टाः सर्वे युयुत्सवः" हरिवं० २२अ०। "यतोयतोनिश्चरति मनश्चञ्चलमस्थिरम्" गीता।

परि+परितोगमने "कङ्का श्येनास्तथा गृध्रा नीचैः परिचरन्ति च" रामा० ल० १६।११। परितः सेवने "गात्रसंवाहनैश्चैव श्रमापनयनैस्तथा। शक्रः सर्वेषु कालेषु दितिं परिचचार ह" रामा० बा० ४६ अ० ११। "आम्रं छित्त्वा कुठारेण निम्बं परिचरेत्तु यः" रा० अयो० ३५।१४। परिचर्य्या परिचारकः।

प्र+प्रकाशेन गतौ। "प्राणः प्रालीयत ततः पुनश्च प्रचचार ह" भा०आश्व०२३अ०। प्रकर्षेण चरणे च। "यैः कर्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः" मनुः। प्रचारः।

सम्+प्र+सम्यक् प्रकाशके। "अद्य प्रभृति चैवेह लोके संप्रचरिष्यति" भा० आनु० ८६अ०।

वि+विशेषेण गतौ "विचरन्ति महीपाला यात्रार्थं विजिगीषवः" रामा० आर० २२।७। "ततोद्रौणिर्महावीर्य्यः पार्थस्य विचरिष्यतः" भा० वि० ५८अ०। "रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च" "इन्द्रियाणां विचरतां विषयेष्वपहारिषु" मनुः। वि+चु० चर पर्य्यालोचनया निर्णये। "आयतिं सर्वकार्य्याणां तदात्वञ्च विचारयेत्" मनुः। "मित्रामित्रं विचारयेत्" भा० शा० ३८२६। "विचारदृक्चारदृगप्यवर्त्तत" "भविता न विचारचारु चेत्" नैष०।

सम्+सम्यग्गतौ "नैव वाताः प्रवायन्ते न मेघाः सञ्चरन्ति च" हरिवं० १०७५८। "आमेखलं सञ्चरतां घनानाम्" कुमा० "सञ्चाऽरतिमन्दिरावधि" रतिमञ्जरी करणविभक्तिसहकारे आत्म०। "रथेन सञ्चरते" सि० कौ०। "पक्षाग्रां नृपः सञ्चरमाण एव" नैष०।

चुर संशये असंशये च चुरा० उभ० सक० सेट्। चारयति-ते अचीचरत् त विचारयति विचारणा विचारितः

चर पु० चर—अच्। स्वपरराष्ट्रवृत्तान्तज्ञानार्थं राजनियोगेन दूतकृतो भ्रमणकर्त्तरि चारे १प्रणिधौ, अमरः २कपर्दके, राजनि०। ज्योतिषोक्तेषु ३मेषकर्कटतुलामकरराशिषु ४स्वातिपुनर्वसुश्रवणादित्रिकरूपे नक्षत्रभेदे ५भौमवारे ६अक्षद्यूतभेदे। ७चले अनवस्थिते त्रि०मेदि०। ८खञ्जनखगे पुंस्त्री शब्दमा०। चरलक्षणादिकमुक्तं युक्तिकल्पतरौ "विवस्वानिव तेजोभिर्नभस्वानिव वेगतः। राजा चरैर्जगत् सर्वं प्राप्नुयाल्लोकसन्मतैः। तर्केङ्गितज्ञः स्मृतिमान् स्वीयभावप्रकाशकः। क्लेशायाससहो दक्षः सर्वत्र भयवर्जितः। सुभक्तो राजसु तथा कार्य्याणां प्रतिपत्तिमान्। नृपोनिकृन्याच्चारेण परराष्ट्रं विचक्षणः। कालज्ञो मन्त्रकुशलान् सांवत्सरचिकित्सकान्। तथान्यानपि युञ्जीत समर्थान् शुद्धचेतसः। अक्रुद्धांश्च तथाऽलुब्धान् दृष्टार्थान् तथ्यभाषिणः। पाषण्डिनस्तापसादीन् परराष्ट्रे नियोजयेत्। स्वदेशपरदेशज्ञान् सुशीलान् सुविचक्षणान्। वार्त्ताहर्य्याण् बहूंश्चैव चराणां विनियोजयेत्। नैकस्य वचने राजा चारस्य प्रत्ययं वहेत्। द्वयोः संवादमाज्ञाय यद्युक्तं कार्य्यमारभेत्। तस्माद्राजा प्रयुञ्जीत चरान् वङ्कसुखान बहून्। नीरेतोवामनाः कुब्जास्तद्विधा ये च कारवः। भिक्षुक्यश्चारणा दास्यो मालाकार्य्यः कलाविदः। अन्तःपुरगतां वार्त्तां निर्हरेयुरलक्षिताम्। प्रकाश[illegible]प्रकाशश्च चरस्तु द्विविधो मतः। अप्रकाशोऽयमुद्दिष्टः प्रकाशो दूतसंज्ञकः"। "शत्रुप्रजाभृत्यवृत्तं विद्यात्तु कुशलाश्च ये। ते गुह्यचाराः कर्त्तव्याः यथार्थस्तुतबोधकाः" शुक्रखिलनीतिशा०। "चरस्थिरद्व्यात्मकनामधेया मेषादयोऽमी क्रमशस्त्रिधा स्युः" ज्यो०त०। "वातादित्यहरित्रयं चरगणः" ज्यो० त० १५।१३।२२।२३।२४ संख्यकनक्षत्राणि चराणि। "येऽनेन लङ्कोदयकालिकास्ते देशान्तरेण स्वपुरोदये स्युः। देशान्तरं प्रागपरं तथान्यद् याम्योत्तरं तच्चरसंज्ञमुक्तम्" सि०शि० "यदुदयान्तरकर्मणा लङ्कायामौदयिका ग्रहा जातास्ते देशान्तरकर्मणा स्वपुरौदयिकाः स्युः। तच्च देशान्तरं द्विविधम्। एकं पूर्वापरमन्यद्याम्योत्तरम्। तच्चरसंज्ञमुक्तम्" प्रमि० उक्ते याम्योत्तरादौ देशान्तरे। चरानयनप्रकारादि सू० सि०र० नारयाभ्यां दर्शितं यथा

"अथ दिनरात्रिमानज्ञानार्थं चरानयनं विवक्षुः प्रथमं तदुपयुक्तां स्पष्टक्रान्तिमाह" र° ना°

"विक्षेपापक्रमैकत्वे क्रान्तिर्विक्षेपसंयुता। दिग्भेदे वियुता स्पष्टा भास्करस्य यथाऽऽगता" सू°

"यस्य ग्रहस्य स्पष्टक्रान्तिरभीष्टा तस्य ग्रहस्यायनांशसंस्कृतस्य भुजज्यातः परमापक्रमज्येत्यादिना क्रान्तिरयनांशसंस्कृतग्रहगोलदिक्का ज्ञेया। तस्य विक्षेपोऽपि पूर्वोक्तप्रकारेण पातोनगोलदिक्को ज्ञेयः। गोलस्तु मेषादिषट्कमुत्तरस्तुलादिषट्कं दक्षिणः। अथ शरक्रान्त्योरेकदिक्त्वेन क्रान्तिः कलाद्या कलात्मकविक्षेपेण युता तयोर्दिगन्यत्वे क्रान्तिर्विक्षेपेण वियुतान्तरिता शेषदिक्का स्पष्टा क्रान्तिः स्यात्। ननु सूर्य्यस्य विक्षेपाभावात् कथं स्पष्टा क्रान्तिर्ज्ञेयेत्यत आह भास्करस्येति। सूर्य्यस्य यथागता पूर्वागता क्रान्तिरेव स्पष्टा क्रान्तिः। अत्रोपपत्तिः। विषुवद्वृत्ताद्ग्रहावस्थकेन्द्रपर्य्यन्तं याम्यमुत्तरं वान्तरं स्पष्टक्रान्तिरिति तयोरेकदिक्त्वे तद्योगतुल्यमन्तरं, भिन्नदिक्त्वे तदन्तरमितमन्तरमिति। अत्र शरस्य क्रान्तिसंस्कारयोग्यत्वसम्पादिका क्रिया लोकभ्रमभयात् स्वल्पान्तरत्वाच्चोपेक्षिता भगवता कृपावता। अन्यथा शरस्य ध्रुवाभिमुखत्वे भगवदुक्तमायनदृक्कर्म्म कथमव्याहतं स्यादित्यलम्। अथ दिनरात्रिमानज्ञानार्थमहोरात्रासून् साधयति" र° ना°।

"ग्रहोदयप्राणहता खखाष्टैकोद्धृता गतिः। चक्रासवो लब्धयुताः स्वाहोरात्रासवः स्मृताः" सू°।

"ग्रहस्य येऽयनांशसंस्कृतराशेर्वक्ष्यमाणनिरक्षोदयासवस्तैर्गुणिता निजस्फुटगतिः कलाद्याष्टादशशतभक्ता फलेन युताश्चक्रासवः षष्टिघटिकानामसवः षट्शतयुतैकविंशतिसहस्रमिताः स्वस्वग्रहस्याहोरात्रासवः कालतत्त्वज्ञैः कथिताः। अत्रोपपत्तिः। ग्रहः पूर्व्वगत्या लम्बितः प्रवहेण गतिभोगकालेन भचक्रपरिवर्त्तनान्तरमुदेत्यतो भचक्रपरिवर्त्तकालः षष्टिघटिकासुमितो ग्रहगतिकलासम्बन्ध्यस्वात्मककालेनाधिको ग्रहाहोरात्रमस्वात्मकं नाक्षत्रप्रमाणेन भवति। तत्रैकराशिकलाभिर्यदि ग्रहसम्बन्धिराश्युदयप्राणास्तदा गतिकलाभिः क इत्यनुपातेन गत्यसव इत्युपपन्नं ग्रहोदयेत्यादि। अनेनैव श्लोकेन ग्रहाणामुदयान्तरकर्म्मापीत्युक्तं भगवता। तथाहि। अनुपातानीतमध्यग्रहाणां नियताहोरात्रमानान्तरकाले प्रचाराणां सिद्धिः रविमध्यगत्यसूनां प्रतिराशौ भिन्नत्वेन मध्यमसूर्य्याहोरात्रमानस्य नियतत्वाभावादतस्त्रैराशिकावगतग्रहा अनियतमध्यार्काहोरात्रकालान्तरेणार्धरात्रे यत्संस्कारेण भवन्ति तदेवोदयान्तरं तत्साधनं भगवता स्वल्पान्तरत्वादुपेक्षितम्। कथमन्यथा गतिकलासूनां समत्वमुपेक्ष्य गतिकलानामसवो भगवदुक्ताः सङ्गच्छन्ते उदयान्तरस्य गतिकलासुभेदोत्पन्नत्वात्

अथ चरोपयुक्तां क्रान्तिज्यां द्युज्यां चाह" र° ना°।

"क्रान्तेः क्रमोत्क्रमज्ये द्वे कृत्वा तत्रोत्क्रमज्यया। हीना त्रिज्या दिनव्यासदलं तद्दक्षिणोत्तरम्" सू°।

"स्पष्टक्रान्तेः क्रमोत्क्रमज्ये क्रमज्योत्क्रमज्ये द्वे अपि प्रसाध्य तत्र तन्मध्ये क्रान्त्युत्क्रमज्यया त्रिज्या हीना दिनव्यासदलमहोरात्रवृत्तस्य व्यासार्धं द्युज्येत्यर्थः। तद्दिनव्यासार्धं दक्षिणोत्तरं दक्षिणगोल उत्तरगोले च स्यात् क्रान्तेर्गोलद्वयेऽपि सत्त्वात्। अपरा क्रान्तिज्यैव। अत्रोपपत्तिः। क्रान्त्यंशानां क्रमज्या क्रान्तिज्या भुजो विषुवद्वृत्तानुकाराण्यहोरात्रवृत्तान्युभयगोले तदुभयतस्तद्व्यासार्धं द्युज्या कोटिस्त्रिज्या कर्ण इति गोले प्रत्यक्षम्। त्रिज्यावृत्त उन्मण्डले याम्योत्तरवृत्ते वा प्रत्यक्षम्। तत्र भुजकर्णयोर्वर्गान्तरपदं कोटिरिति क्रान्तिज्यावर्गोनात्त्रिज्यावर्गान्मूलं द्युज्या। तत्रापि भुजोत्क्रमज्यया हीना त्रिज्या कोटिक्रमज्या स्यादिति वृत्ते प्रत्यक्षदर्शनात् क्रान्त्युत्क्रमज्ययोना त्रिज्या द्युज्या स्यादिति लाघवेन वर्गमूलनिरासेनोक्तं भगवता क्रान्तेरित्यादि। अथ चरानयनपूर्वकदिनरात्रिमानसाधनं श्लोकत्रयेणाह" र° ना°।

"क्रान्तिज्या विषुवद्भाघ्नी क्षितिज्या द्वादशोद्धृता।
त्रिज्यागुणाहोरात्रार्धकर्णाप्ता चरजासवः।
तत्कार्मुकमुदक्क्रान्तौ धनहानी पृथक्स्थिते। स्वाहोरात्रचतुर्भागे दिनरात्रिदले स्मृते।
याम्यक्रान्तौ विपर्य्यस्ते द्विगुणे तु दिनक्षपे। विक्षेपयुक्तोनितया क्रान्त्या भानामपि स्वके" सू°।

"क्रान्तिज्या विषुवद्दिनीयमध्याह्ने द्वादशाङ्गुलशङ्कोश्छायया गुण्या द्वादशभक्ता फलं कुज्या स्यात्। सा त्रिज्यया गुणिताहोरात्रार्धकर्णाप्ताहोरात्रवृत्तस्यार्धकर्णेन व्यासदलेन द्युज्यया भक्ता फलं चरजा ज्या चरज्येत्यर्थः। अस्याश्चरज्याया धनुरसवश्चरासवो भवन्ति स्वाहोरात्रचतुर्भागे स्वस्य चरसम्बन्धिनो ग्रहस्य प्रागुक्ताहोरात्रासवस्तेषां चतुर्थांशे पृथक्स्थिते स्थानद्वयस्थे उत्त-

रक्रान्तौ सत्यां चरार्द्धं धनह्रानी यत्र हीनौ कार्यौ तौ क्रमेण दिनरात्रिदले दिनार्धरात्र्यर्धे कालविद्भिरुक्तो। दक्षिणक्रान्तौ सत्यां विपर्यस्ते दिनरात्रिदले यत्र हीनं तद्दिनार्धं, यत्र युतं तद्रात्र्यर्धमित्यर्थः। तुकारात् ते दिनरात्र्यर्धे द्विगुणे दिनक्षये दिनमानरात्रिमाने ग्रहस्य स्तः। उक्तरीत्या नक्षत्राणामपि दिनरात्रिमाने साध्ये इत्याह। विक्षेपेत्यादि। नक्षत्रध्रुवाणामानीतया क्रान्त्या नक्षत्रविक्षेपेणैकभिन्नदिक्क्रमेण युक्तयान्तरितयोक्तप्रकारेण सिद्धया स्वके नक्षत्रदिनरात्रिमाने साध्ये इत्यर्थः। अत्रोपपत्तिः। द्वादशाङ्गुलशङ्कुः कोटिः पलभा भुजोऽक्षकर्णः कर्णः, क्रान्तिज्या कोटिः, कुज्या भुजोऽग्रा कर्ण इत्यक्षक्षेत्रद्वयं प्रसिद्धम्। तत्र यदि द्वादशकोटौ पलभा भुजः, तदा क्रान्तिज्याकोटौ को भुज इत्यनुपातेन कुज्या। तत्स्वरूपं तु निरक्षदेशक्षितिजस्वदेशक्षितिजान्तरालस्थिताहोरात्रवृत्तप्रदेशस्य द्युज्याप्रमाणेन ज्येति त्रिज्याप्रमाणेन तज्ज्या चरज्येति द्युज्याप्रमाणेन कुज्या त्रिज्याप्रमाणेन केत्यनुपातेन चरज्या तद्धनुश्चरासवोऽहोरात्रवृत्तखण्डप्रदेशे निरक्षस्वक्षितिजान्तराल उत्तरगोले स्वक्षितिजस्य निरक्षक्षितिजादधःस्थत्वान्निरक्षक्षितिजयाम्योत्तरवृत्तान्तरालेऽहोरात्रवृत्तचतुर्थांशत्वादहोरात्रासुचतुर्थांशे चरासवो युता दिनार्धं हीना रात्र्यर्धं दक्षिणगोले स्वक्षितिजस्य निरक्षक्षितिजादूर्ध्वस्थत्वाद्धीना दिनार्धं, युता रात्र्यर्द्धमित्युपपन्नं सर्वं क्रान्तिज्येत्यादि"।

तत्र प्रणिधौ। "राजन्यकान्युपायज्ञैरेकार्थानि चरैस्तव" माघः। "तेषां वृत्तं परिणयेत् सम्यग्राष्ट्रेषु तच्चरैः" मनुः। चले "तस्य सर्वाणि भूतानि स्थावराणि चराणि च" "देवेभ्यश्च जगत्सर्वं चरं स्थाण्वनुपूर्वशः" मनुः। सुपि कर्म्मण्युपपदे "चरेष्टः" पा० ट चरणकर्त्तरि त्रि०। भूचरः खचरः। "शठोमिथ्याविनीतश्च बकव्रतचरो द्विजः" मनुः। मेषादौ "चरलग्ने चरांशे वा स्थापनं च विसर्ज्जनम्" ति० त०। स्वार्थे अण्। चार प्रणिधौ

चरक पु० चर एव स्वार्थे क संज्ञायां कन् वा। १चरे दूतभेदे। २आयुर्वेदकारकमुनिभेदे पु०। "देवाकर्णय सुश्रुतेन चरकस्योक्तेन जानेऽखिलं स्यादस्या नलदं विना न दलने तापस्य कोऽपि क्षमः" नैष०। मन्त्रिवैद्ययोरेकरूपोक्तौ। चरकनामनिरुक्तिः आयुर्वेदशब्दे ७८० पृ० दर्शिता। ३तत्कृते ग्रन्थे च भावप्रका० तत्र च ग्रन्थे सूत्रस्थानं निदानस्थानं विमानस्थानं शारीरस्थानम् इन्द्रियस्थानं चिकित्सितस्थानं कल्पस्थानं सिद्धिस्थानम् इत्यष्टौ स्थानानि। ४पर्पटे राजनि०। ५चक्रकरे ६भिक्षौ शब्दार्थचि०।

चरकाल पु० "निरक्षदेशक्षितिजाख्यवृत्तमुन्मण्डलं तज्जगुरन्यदेशे। स्वे स्वे कुजेऽर्कस्य समुद्गमोऽस्माच्चरार्धमर्कोदययोस्तु मध्ये" सि० शि०। "आदौ स्वदेशेऽथ निरक्षदेशे सूर्योदयो ह्यस्तमयोऽन्यथातः। ऊनं महोऽस्मादुदये समस्ते फलं चरोत्थं रविसौम्यगोले। याम्ये विलोमं खलु तत्र यस्मादुन्मण्डलं स्वक्षितिजादधस्तात्। नात्याह्वयादुत्तरयाम्यभागौ गोलस्य तावुत्तरयाम्यगोलौ" सि० शि० उक्ते दिनमानज्ञानोपाये कालभेदे।

चरगेह न० चररूपं गेहम्। मेषकर्कतुलामकररूपेषु राशिषु। चरगेहादयोऽप्यत्र। [जातित्वात् ङीष्।

चरट पुंस्त्री चर—वा० अटच्। खञ्जनखगे शब्दमा० स्त्रियां

चरण पु० चर—करणे ल्युट्। १देहावयवभेदे पादे "सुतेन धातोश्चरणौ भुवस्तले" माघः "द्वितीये हस्तचरणौ तृतीये वधमर्हति" मनुः। २वेदैकदेशे शाखापरपर्याये "गोत्रं च चरणैः सह" महाभाष्यका०। चरणव्यूहः। ३अर्कादेः किरणे। ४श्लोकानां चतुर्थभागे पादे च। "प्रथमाद्धिसमो यस्य तृतीयश्चरणो भवेत्" छन्दोम०। "५चतुर्थभागमात्रे। "पश्यन्ति खेटाश्चरणाभिवृद्धितः" ज्योति०। ६एकदेशमात्रे "ज्योतिश्चरणाभिधानात्" शा० सू०। भावे ल्युट्। ७अनुष्ठाने "अकृत्वा भैक्ष्यचरणम्" "तपश्चरणैश्चोग्रैः" मनुः। "रमणीयचरणा अभ्यासो ह रमणीयां योनिमापद्येरन्" श्रुतिः चरणशब्दस्य आचारार्थकत्वेऽपि कर्म्ममात्रपरत्वमुक्तं शा० सू० भा०। तच्चानुशयशब्दे १८६ पृ० उक्तम् चरण+चतुरर्थ्यां टणा० स। चरणस तन्निर्वृत्तादौ त्रि०

चरणग्रन्थि पु० ६त०। गुल्फे हेमच०।

चरणपर्व्वन् न० ६त०। गुल्फे त्रिका०।

चरणव्यूह पु० चरणानां वेदशाखानां व्यूहोऽत्र। वेदशाखाविभाजके ग्रन्थभेदे।

चरणायुध पुंस्त्री० चरण आयुधं यस्य। कुक्कुटे अमरः "आकर्ण्य सम्प्रति रुतं चरणायुधानाम्" सा० द०। स्त्रियां जातित्वात् ङीष्।

चरणि पु० चर—अनि। मनुष्ये "सुविद्वांसं च सत्यं चरणीनाम्" ऋ० ८।२४।२३। "चरणीनां मनुष्याणाम्" भा०।

चरणिल त्रि॰ चरणेन निर्वृत्तादि काशादि॰ चतुरर्थ्याम् इल। चरणनिर्वृत्तादौ [हेमच॰।

चरिण्टी स्त्री चिरिण्टी+पृषो॰। चिरिण्ट्यां सुवासिन्यां

चरण्य पु॰ चरण इव शाखा॰ यत्। चरणतुल्ये पा॰।

चरण्य चरण्य-गतौ कण्ड्वा॰ सक॰ पर॰ सेट्। चरण्यति अचरण्यीत्। वरणगतौ इति पाठान्तरम्

चरण्यु त्रि॰ क॰चरण्य-उण् “चरणशीले ‘चक्षुर्न यन्त्यिनी चरण्युः” ऋ॰ १०।६५।६ “चरण्युश्चरणशीला” भा॰।

चरथ त्रि॰ चर-गतौ अथ। जङ्गमे। “स्थातुश्चरथमक्तून्व्यूर्णोत्” ऋ॰ १।६८।१। “चरथं जङ्गमम्” भा॰।

चरभ न॰ कर्म्म॰। मेषकर्कटतुलामकरराशिषु चरराशिषु चरलग्नादयोऽप्यत्र।

चरम त्रि॰ चर-अमच्। १अन्त्ये २पश्चिमे ३शेषभवे “अब्रवीत् क्रियतामेषा सुतानां चरमा क्रिया” भा॰ वि॰ २४अ॰। चरमक्ष्माभृत्। जसि सर्वनामत्वात् वा जसः शीभावः चरमे चरमाः। ४अन्ते न॰। “उत्तिष्ठेत् प्रथमं चैव चरमं चैव संविशेत्” मनुः।

चरमक्ष्माभृत् पु॰ कर्म्म॰। अस्ताचले पश्चिमस्थे अचले। अमरः चरमाचलचरमगिर्य्यादयोऽप्यत्र।

चरव्य त्रि॰ चरवे हितः उदन्तत्वात् यत्। चरुहिते तण्डुलादौ सि॰ कौ॰।

चराचर त्रि॰ चर-अच् नि॰। १जङ्गमे। २आकाशे धरणिः। चरश्चाचरश्च समाहारद्व॰। ३स्थावरजङ्गमरूपे जगति न॰ मेदि॰। “त्वया विसृज्यते विश्वं जगदेतच्चराचरम्” देवीमा॰। “एवं स जाग्रत्स्वप्नाभ्यामिदं विश्वं चराचरम्” मनुः। इतरेतरद्व॰। ४चरे अचरे च त्रि॰। “सर्वे भावाश्चराचराः” रामा॰ कि॰ ४२।४४ श्लो॰

चरि पु॰ चर इन्। पशौ उणादिकोषः।

चरित त्रि॰चर-कर्म्मणि क्त। १अनुष्ठिते। भावे क्त। २चरित्रे ३स्वभावे। “सर्वं खलस्य चरितं मशकः करोति” हितो॰ “उत्तरं रामचरितं तत्प्रणीतं प्रयोक्ष्यते”। उत्तररामच॰। वीरचरितम्। चण्डीशब्दे प्रथमादिचरितादि बहुशत्वः उदा॰। “वाग्देवताचरितचित्रितचित्तसद्मा” गीतगो॰कर्म्मणि क्त। ४गते ५प्राप्ते ६ज्ञाते च।

चरितार्थ त्रि॰ चरितः कृतः प्राप्तोऽर्थः प्रयोजनं येन। १कृतार्थे कृतप्रयोजने २प्राप्तफले सफले। “बभव कृतसंस्कारा चरितार्थेव भारती” “रामरावणयोर्युद्धं चरितार्थमिवाभवत्” इति च रघुः “प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी” “आश्वासयत् सुचरितार्थपदैर्वचोभिः” इति च कुमा॰ “अन्योन्याभावतो नास्य चरितार्थत्वमुच्यते” भाषा॰।

चरित्र न॰ चर-इत्र। १अनुष्ठाने २व्रतकर्म्माद्यनुष्ठाने ३स्वभावे ४चेष्टिते ५लीलादौ च शब्दरत्ना॰। ६तिन्तिडीवृक्षे स्त्री शब्दर॰।
“एतद्देशप्रसूतानां सकाशादग्रजन्मनाम्। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः” “स्वां प्रसूतिं चरित्रं च कुलमात्मानमेव” मनुः। “चरित्रबन्धककृतम्” याज्ञ॰। स्वार्थे अण्। चारित्र तत्रार्थे न॰” पृषो॰ दीर्घः चरीत्रमप्यत्र न॰ शब्दरत्ना॰।

चरिष्णु त्रि॰ चर-इष्णुच्। चरणशीले “यदाणुमात्रिको भूत्वा बीजं स्थास्नु चरिष्णु च” मनुः।

चरु पु॰ चरति होमादिकमस्मात् भीमा॰ अपादाने चर-उन्। हव्यान्ने होमार्थं पाच्यान्ने, “अनवस्रावितान्तरुष्मपाकओदनश्चरुरिति याज्ञिकाः। चरन्त्यापोऽत्र आधारे उन्। २मेघे निघ॰। ३चरुपाकपात्रे भाण्डे विश्वः चरुलक्षणमुक्तं कर्म्मप्रदीपे
“स्वशाखोक्तः प्रसुस्विन्नो ह्यदग्धोऽकठिनः शुभः। न चातिशिथिलः पाच्यो स चरुःस्यान्न चारसः” चरुपाकप्रकारः कातीये ४।१।५। सूत्रभाष्ययोर्दर्शितो यथा “अपरेण गार्हपत्यं चरुमपूर्णं स्रुचं वा तूष्णीं गृहीत्वोत्तरेण दक्षिणाग्निमवहन्ति तिष्ठन्” ५सू॰। “गार्हपत्यादपरस्यां दिशि अपूर्णं चरुं चरुस्थालीम् तूष्णीं मन्त्रस्याविधानाल्लौकिकवाग्व्यापारवर्जम् व्रीहीचतुरञ्जेन मुष्टिना प्राचीनावीती दक्षिणामुखोऽध्वर्युर्गृह्णीयात् अथ वा अपूर्णं स्रुचम् एवं गृहीत्वा दक्षिणाग्नेरुत्तरतो गार्हपत्यस्य पुरस्ताद्दक्षिणाभिमुखस्तिष्ठन्नवहन्ति अत्र शाखान्तराद्दक्षिणाग्नेरुत्तरत उदग्ग्रीवं कृष्णाजिनमास्तीर्य्य तत्रोलूखलं निधाय तस्मिन् व्रीहीणां प्रक्षेपं कृत्वा मुसलमादाय दक्षिणाभिमुखस्तिष्ठन्नवहननं कण्डनं व्रीहीणां करोति ततः शूर्पमादायोलूखलाद्व्रीहीन् निष्काश्य निष्पवनेन तुषान्निष्काशयेन्” कर्कः “सकृत् फलीकरोति” ६सू॰ “लोके तस्य पुनःपुनः क्रियमाणत्वात् सकृदित्युच्यते, कर्कः “सारतण्डुलमपूर्णं श्रपयित्वाभिघार्य्योद्वास्य मेक्षणेन जुहोत्यग्नय इति सोमायेति च” ७सू॰ “इममेव चरु

सारतण्डुलमीषत्स्विन्नतण्डुलम् अपूर्णं यथा इतेन चरुणा स्थाल्याः पूरणं न भवति तथा श्रपयित्वा आसादितेनाज्येनाभिघार्य्य दक्षिणत उद्वास्य दक्षिणाग्नेः पूर्वभागे आमदक्षिणमुत्तरत आनीय सव्यं कृत्वा तिष्ठं स्निग्धः समिधं आधायोपविश्य प्राङ्मुखो मेक्षणेन चरुं जुहोति" कर्कः।

शाखान्तरे, चरुपाकप्रकारो भवदेवपद्धत्यादौ ज्ञेयः। "यवमयश्चरुर्भवति" श्रुतिः। "श्यामाकगावेधुकनैवारयवमयः" तै॰ स॰ "चरुर्वै देवानामन्नमोदनो हि चरुः" शत॰ ब्रा॰ ४।४।२।१। "ये पूष्णो चरुं कुर्व्वन्ति प्रपिष्टानामेव कुर्व्वन्ति यथा दन्तकायैवम्" १।७।४।७। "यद्यप्यदन्तकः पूषा पैष्टमश्नाति सदा चरुम्। अग्नीन्द्रेश्वरसाधर्म्यात्तण्डुलोऽत्र विधीयते" छन्दो॰। "हेमपात्रगतं दोर्भ्याम् आदधानः पयश्चरुम्" "स तेजो वैष्णवं पत्न्योः विभेजे चरुसंज्ञितम्" "चरोरर्द्धार्द्धभागाभ्यां तामयोजयतामुभे" इति च रघुः।

चरुचेलिन् चरुश्चेलमिवास्यस्य इनि। महादेवे। "चरुचेली मिलीमिली" भा॰ शा॰ २८६ अ॰ शिवनामोक्तौ

चरुव्रण पु॰ चरोर्व्रण इव। पिष्टपूपे (पिठाइपिटा) त्रिका॰।

चरुस्थाली स्त्री ६त॰। चरुपाकार्थस्थाल्याम् "तिर्य्यगूर्द्ध्वसमिन्मात्रा दृढा नातिबृहन्मुखी। मृण्मय्यौडुम्बरी वापि चरुस्थाली प्रशस्यते" कर्म्मप्रदीपे तल्लक्षणमुक्तम्।

चर्च्च अध्ययने चुरा॰ उभ॰ सक॰ सेट्। चर्च्चयति-ते अचचर्च्चत्-त। चर्च्चितः चर्च्चा।

चर्च्च उक्तौ भर्त्सने च तु॰पर॰सक॰सेट्। चर्च्चति अचर्च्चीत्। उक्तिरत्र विचारार्थपरिभाषणम्।

चर्च्चरी स्त्री चर्च्च-बा॰ अरन् गौरा॰ ङीष्। १गीतिभेदे। २अन्टुकेशे ३करध्वनौ च। "चर्च्चरी गीतिभेदे च केशभित्करशब्दयोः" रुद्रः। ४हर्षक्रीडायां सुभूतिः। ५कार्पटिकानां सादरवचने ६तौर्य्यत्रिके ७वसन्तसमयक्रीडायाम् ८चर्मर्याम्। ९साटोपवाक्ये शब्दार्थचि॰ १०वर्णवृत्तविशेषे। यथा "हारयुक्तसुवर्णकङ्कणपाणिशङ्खविराजिता पादनूपुरसङ्गता सुपयोधरद्वयभूषिता। शोभिता वलयेन पिङ्गलपन्नगाधिपवर्णिता चर्च्चरी तरुणीव चेतसि चाकशीति सुसङ्गता" "अनन्तरे चर्च्चरी" "जलहर! संहर एह कोवमइ आढत्तओ, अविरल धारासाराक्रान्तदिशामुहओ। ए! मज्जि पुहमि भमन्ते जइ पिअ पेक्खिहिमि, तवेअ जं जु करीहिहि, तंतु सहीहिमि" "अनन्तरे चर्च्चरी "गन्धमाइअ-महुअर-गीएहिं वज्जन्तेहिं परहुअ अदूरेहिम्। पसरिअ-पवणुवेवल्लिअ-पल्लव-णिअरु सुललिअ-विविहपआरेहिं णच्चइ कप्पअरु' इति च विक्रमोर्व॰।

स्वार्थे क अत इत्त्वम्। चर्च्चरिकाप्यत्रार्थे

चर्च्चरीक पु॰ चर्च्च-ईकन् फर्फरी॰ नि॰। १महाकालभैरवे २केशविन्यासे ३शाके च मेदि॰।

चर्च्चस् पु॰ चर्च्च-असुन्। १निधिभेदे त्रिका॰ निधिशब्दे दृश्यम्

चर्च्चा स्त्री चर्च्च-अच्। १दुर्गायाम्। चु॰ चर्च्च-भावे अङ्। २विचारणायां ३चिन्तायां ४चार्च्चिक्ये चन्दनादिना देहलेपने च मेदि॰। स्वार्थे क। चर्च्चिका तेष्वर्थेषु चर्च्चां वेत्ति तत्परं ग्रन्थं वाऽधीते उक्था॰ ठक्। चार्च्चिक विचारणाभिज्ञे तत्परग्रन्थाध्येतरि च त्रि॰

चर्च्चि स्त्री चर्च्च-भावे इन्। विचारणायाम् "द्वे चर्च्चीअतिरिच्येते एकया गौरतिरिक्तः एकयायुरूनः" तै॰ ब्रा॰ १।२।२।२।

चर्च्चिक्य न॰ चार्च्चिक्य पृषो॰ ह्रस्वः। चार्च्चिक्ये हेम॰

चर्च्चित त्रि॰ चर्च्च-कर्म्मणि क्त। १चन्दनादिना कृतलेपे देहादौ। "पयोधराश्चन्दनपङ्कचर्च्चिताः" ऋतुस॰। "भुजं चन्दनचर्च्चितम्" भा॰ स॰ २३७२ श्लो॰। भावे क्त २तथालेपने न॰।

चर्त्त्य त्रि॰ चृत-कर्म्मणि यत्। हननीये।

चर्प्पट पु॰ सौ॰ चृप-दीप्तौ अटन्। १स्फारे २विपुले ३चपेटे ४पर्पटे च मेदि॰। ५भाद्रशुक्ल[illegible] षष्ठ्याम् स्त्री शब्दार्थचि॰। ६पिष्टकभेदे [illegible] स्त्री गौरा॰ ङीष्। त्रिका॰।

चर्व्व गतौ भक्षणे च भ्वा॰ पर॰ सक॰ सेट्। चर्व्वति अचर्व्वीत्। चचर्व्व।

चर्भट पु॰ चर-क्विप् भट-अच् कर्म्मधा॰। १इर्व्वारौ कर्कट्यां हला॰ गौरा॰ ङीष् २हर्षक्रीडायां ३साटोपवाक्ये ४चर्च्चर्य्याम् हेम॰।

चर्म्म न॰ चर्म्म बाहुलकतया अस्त्रत्वे अच् टिलोपः। चर्म्मनिर्म्मिते फलके (ढाल) भरतः।

चर्म्मकषा(सा) स्त्री चर्म्म कष(स)ति कष-अच्। पश्चिमदेशप्रसिद्धे गन्धद्रव्यभेदे (चामरकषा) २सप्तलालतायां चर्म्मकसाप्यत्र भरतः

चर्म्मकार त्रि॰ चर्म्म तन्निर्म्मितं पादुकादि करोति कृ-अण् उप॰ स॰। १पादुकादिकारके "चाण्डाल्यां वैश्य-

सञ्जातश्चर्म्मकार इति श्रुतः” पराशरोक्ते २चर्म्मकारजातिभेदे पुंस्त्री स्त्रियां जातित्वात् ङीप्। “चर्म्मकारस्य द्वौ पुत्रौ गायकोवाद्यपूरकः”। ‘मनुना तु वैदेह्यां निषादाज्जातस्य कारावराख्यचर्म्मकारत्वमुक्तं यथा “कारावरो निषादात्तु चर्म्मकारः प्रसूयते” उत्तरत्र वैदेह्यामेवेत्युक्तेः अत्रापि तस्यामेवेत्यन्वयः। उशनसा तु “सूताद्विप्रप्रसूतायां सूतो वेणुक उच्यते। नृपायामेव तस्यैव जातीयश्चर्म्मकारकः” इत्युक्तम्। एवञ्च मुनित्रयप्रामाण्यात् त्रिविधैव चर्म्मकारजातिः। “धिग्वणानां चर्म्मकार्य्यम्” मनुना तेषां वृत्तिरुक्ता। चर्म्म करोति कृ-अण् चर्म्मच्छेदयत्र। ण्वुल् चर्म्मकारक तत्रार्थे [षष्ठी मेदि० २चर्म्मकारजातिस्त्रियां च

चर्म्मकारी स्त्री चर्म्म किरति कॄ-अण्। १चर्म्मकषायामे-

चर्म्मकील पु० चर्म्मणि कील इव। गुह्यजाते रोगभेदे (वारिय) ख्याते रोगे “व्यानो गृहीत्वा श्लेष्माणम्। करोत्यर्शसस्त्वचो बहिः। कीलोपमं स्थिरखरं चर्म्मकीलन्तु तद्विदुः। वातेन तोदपारुष्यं पित्तादसितरक्तता। श्लेष्मणा स्निग्धता तस्य ग्रथितत्वमवर्णता” माधवक० तच्चिदानाद्युक्तम्। “चर्म्मकीलं जतुमणिं मशकान् तिलकालकान्। उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामशेषतः” भावप्र०। [पत्नायां हेमच०

चर्म्मचटका स्त्री चर्म्मणा चटकेव। (चामचिका) अजिन

चर्म्मचटी स्त्री चर्म्म चटति भिनत्ति चट-भेदे अच् गौरा० ङीष्। (चामचिका) अजिनपत्रायां शब्दरत्ना०। स्वार्थे क। चर्म्मचटिकाप्यत्र। [रोगे राजनि०।

चर्म्मचित्रक न० चर्म्म चित्रयति चित्र-ण्वुल्। श्वेतकुष्ठ-

चर्म्मज न० चर्म्मणि जायते जन-ड। १रोमणि। २रुधिरे च राजनि०।

चर्म्मण्य त्रि० चर्म्मणि भवः शरीरावयवत्वात् यत्। चर्म्मभवे। “स ग्रथा चर्म्मण्यं वान्यद्वा विशिष्टं संश्लेषयेत्” ऐत० ब्रा० ५।१२।

चर्म्मण्वती स्त्री चर्म्मन्+अस्त्यर्थे मतुप् मस्य वः संज्ञायां आसन्दीवदित्यादिना नि०। नदीभेदे। सा च रन्तिदेवस्य यज्ञोपकल्पितगोराशिचर्म्मत उत्पन्ना यथाह “महानदी चर्म्मराशेरुत्क्लेदात् सुस्रुवे यतः। ततश्चर्म्मण्वतीत्येवं विख्याता सा महानदी” भा० शा० २९अ०। “रन्तिदेवस्य यज्ञे ताः पशुत्वेनोपकल्पिताः। अतश्चर्म्मण्वती राजन्! गोचर्म्मभ्यः प्रवर्त्तिता” भा० अनु० ६६अ० नर्मदाफलं दक्षिणसिन्धुफलञ्चोक्ता भा० व० ८२अ० तन्माहात्म्य यथा “चर्म्मण्वतीं समासाद्य नियतो नियताशनः। रन्तिदेवाभ्यनुज्ञातो अग्निष्टोमफलं लभेत्”। अतस्तस्या दक्षिणदेशस्थत्वम्। असंज्ञायां तु चर्म्मवत् इत्येव। चर्म्मयुक्ते त्रि० स्त्रियां ङीप्। [राजनि०।

चर्म्मतरङ्ग पु० चर्म्मणि तरङ्ग इव। जरया पलिते वलौ।

चर्म्मतिल त्रि० चर्म्मणि तिला अस्य। चर्म्मोपरिजातकृष्णतिलके (तिल) युक्तदेहादौ [हेम०।

चर्म्मदण्ड पु० चर्म्मणा क्षतोदण्डः। कषायाम् (कोड़ा)

चर्म्मदल न० चर्म्म दलयति दल-अण्। स्वल्पकुष्ठभेदे। “स्फोटैः सकण्डूव्यथनौषचोषास्तलेषु तच्चर्म्मदलं वदन्ति” सुश्रुतः। “चर्म्मदलाजगल्लीमशकाभिधाना” सुश्रुतः।

चर्म्मदूषिका स्त्री चर्म्म दूषयति दूषि-ण्वुल्। कोठरोगे राजनि०।

चर्म्मद्रुम पु० चर्म्म चर्म्माकारवल्कलं तत्प्रधानो द्रुमः। भूर्जवृक्षे राजनि०। तस्य चर्म्माकारवल्कलत्वात् तथात्वम्।

चर्म्मन् न० चर-मनिन्। १देहावरिकायां त्वचि, २इन्द्रियभेदे येन स्पर्श उपलभ्यते तस्मिन् ३फलके (ढाल) च। “त्वगिन्द्रियन्तु वायवीयं यथाह “देहव्यापि त्वगिन्द्रियम्” भाषा०। तस्य तथात्वं सि० मु० समर्थितं यथा “शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैव व्यञ्जकत्वात् अङ्गसङ्गिसलिलशैत्यव्यञ्जकव्यजनवातवत्”। मनसा त्वग्योगो ज्ञानसामान्ये कारणं यथाह तत्रैव “त्वचोयोगो मनसा ज्ञानकारणम्” “त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणमित्यर्थः किं तत्र प्रमाणं सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्त्तमानेन मनसा ज्ञानाजननमिति। ननु सुषुप्तिकाले किं ज्ञानं भविष्यति अनुभवरूपं स्मरणरूपं वा। नाद्यः अनुभवसामग्र्यभावात्तथाहि चाक्षुषादिप्रत्यक्षे चक्षुरादिना सह मनःसंयोगस्य हेतुत्वात् तदभावादेव न चाक्षुषादिप्रत्यक्षं, ज्ञानादेरभावादेव न मानसप्रत्यक्षं, ज्ञानाद्यभावे च नात्मनोऽपि प्रत्यक्षमिति। व्याप्तिज्ञानाभावात् नानुमितिः, सादृश्यज्ञानाभावात् नोपमितिः, पदज्ञानाभावात् न शाब्दबोधः, इत्यनुभवसामग्र्यभावात् नानुभवः। उद्बोधकाभावाच्च न स्मरणम्। नैवं सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेस्तत्सम्बन्धेनात्मनश्च प्रत्यक्षप्रसङ्गात् तदतीन्द्रियत्वे मानाभावात् सुषुप्तिप्राक्काले निर्विकल्पमेकं जायत

इत्यत्रापि प्रमाणाभावात्। अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादिप्रत्यक्षकाले स्पार्शनप्रत्यक्षं स्यात् विषयेन्द्रियसंयोगस्य विषयत्वक्संयोगस्य च तदा सत्त्वात् परस्परप्रतिबन्धादेकमपि वा न स्यादिति। अत्र केचित् पूर्व्वोक्तयुक्त्या त्वङ्मनोयोगस्य हेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबन्धकत्वमनुभवानुरोधात् कल्प्यते इति। अन्ये तु सुषुप्त्यनुरोधात् चर्म्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यं चाक्षुषादिप्रत्यक्षकाले त्वचि मनःसंयोगाभावाच्च स्पार्शनप्रत्यक्षमिति वदन्ति"। चर्म्मत्वचोर्भेद इति तु रहस्यम्। त्वचश्च सप्तविधा यथाह सुश्रुतः "तस्य खल्वेवम्प्रवृत्तस्य शुक्रशोणितस्याभिपच्यमानस्य क्षीरस्येव सन्तानिकाः सप्त त्वचो भवन्ति। तासां प्रथमावभासिनी नाम या सर्व्ववर्णानवभासयति पञ्चविधाञ्च छायां प्रकाशयति सा व्रीहेरष्टादशभागप्रमाणा सिध्मपद्मकण्टकाधिष्ठाना, द्वितीया लोहिता नाम षोडशभागप्रमाणा तिलकालकन्यच्छव्यङ्गाधिष्ठाना, तृतीया श्वेता नाम द्वादशभागप्रमाणा चर्म्मदलाजगल्लीमशकाधिष्ठाना, चतुर्थी ताम्रा नामाष्टभागप्रमाणा विविधकिलासकुष्ठाधिष्ठाना, पञ्चमी वेदिनी नाम व्रीहिपञ्चभागप्रमाणा कुष्ठविसर्पाधिष्ठाना, षष्ठी रोहिणी नाम व्रीहिप्रमाणा ग्रन्थ्यपच्यर्व्वुदश्लीपदगलगण्डाधिष्ठाना, सप्तमी मांसधरा नाम व्रीहिद्वयप्रमाणा भगन्दरविद्रध्यर्शोऽधिष्ठाना" यदेतत्प्रमाणं निर्द्दिष्टं तन्मांसलेष्ववकाशेषु न ललाटसूक्ष्माङ्गुल्यादिषु। यतो वक्ष्यत्युदरेषु व्रीहिमुखेनाङ्गुष्ठोदरप्रमाणमवगाढं विध्येदिति"।

फलकविवृतिषु युक्तिकल्पतरौ यथा
"शरीरावरकं यत्तु चर्म्म इत्यभिधीयते। तत्पुनर्द्विविधं काष्ठचर्म्मसम्भवभेदतः। शरीरावरकत्वञ्च लघुता दृढता तथा। दुर्भेद्यतेति कथितश्चर्म्मणां गुणसंग्रहः। सितो रक्तस्तथा पीतः कृष्ण इत्यभिशब्दितः। ब्रह्मादिजातिभेदेन चर्म्मणां वर्णनिर्णयः। चित्रवर्णस्तु सर्व्वेषां सर्व्वदैवोपपद्यते" इति भोजदेवः।

चर्म्मनालिका स्त्री चर्म्मनिर्म्मिता नालिकेव। कशायां ताड़न्यां (कोड़ा) शब्दार्थचि०।

चर्म्मपट्टिका स्त्री चर्म्मनिर्म्मिता पट्टिका। (चामाटी) चर्म्ममयपट्टिकायाम् शब्दार्थचि०। [चपलायां जटा०।

चर्म्मपत्रा स्त्री चर्म्मेव पत्रं पक्षोऽस्याः। (चामचिका) अजि-

चर्म्मपादुका स्त्री चर्म्ममयी पादुका। चर्म्मकृतपादत्राणे। "ततो ब्रह्मचारी अनेन मन्त्रेण चर्म्मपादुके पादयोर्निदध्यात्" भवदेवः। [मयपात्रभेदे (कुपा) मेदि०।

चर्म्मपुट(क) पु० चर्म्ममयं पुटमत्र वा कप्। दृतिसंज्ञके चर्म्म-

चर्म्मप्रभेदिका स्त्री चर्म्म प्रभिनत्ति प्र+भिद–ण्वुल् टापि अत इत्त्वम् ६त०। चर्म्मभेदनेऽस्त्रभेदे अमरः

चर्म्मप्रसेविका स्त्री चर्म्मणा प्रसीव्यते प्र+सिव–बा० कर्म्मणि–वुन् टापि अत इत्त्वम्। भस्त्रायाम् अग्निसन्दीपनार्थे चर्म्ममये यन्त्रभेदे अमरः।

चर्म्ममण्डल पु० ब० व०। देशभेदे "अपरान्ताः परान्ताश्च पङ्कवाश्चर्म्ममण्डलाः" भा० भी० ९अ० देशोक्तौ।

चर्म्ममय त्रि० चर्म्मणो विकारः मयट्। चर्म्मनिर्म्मिते पात्रादौ स्त्रियां ङीप्। "द्वीपिचर्म्मावनद्धैश्च व्याघ्रचर्म्ममयैरपि" भा० भी० ४६अ०। "यथा काष्ठमयो हस्ती यथा चर्म्ममयो मृगः" मनुः।

चर्म्ममुण्डा स्त्री चामुण्डा+पृषो०। दुर्गायां हेमच०।

चर्म्ममुद्रा स्त्री "वामहस्तं तथा तिर्य्यक् कृत्वा चैव प्रसार्य्य च। आकुञ्चिताङ्गुलीः कुर्य्यात् चर्म्ममुद्रेयमीरिता" तन्त्रसारोक्ते देवपूजाङ्गे मुद्राभेदे।

चर्म्मम्ना त्रि० चर्म्ममये कवचादौ मनति अभ्यस्यति म्ना–क। चर्म्ममयकवचादौ कृताभ्यासे। "कृष्टयश्चर्म्मम्ना अभितो जनाः" ऋ० ८।५।३८। "साध्येभ्यश्चर्म्मम्नम्" यजु० ३०।१५। पुरुषमेधे देवभेदोद्देशेनालभ्यपुरुषभेदोक्तौ।

चर्म्मयष्टि स्त्री चर्म्ममयी यष्टिरिव। अश्वादेस्ताड़न्यां (कोड़ा)। शब्दार्थचि०।

चर्म्मरङ्गा स्त्री चर्म्मणो रङ्गोऽस्याः। १आवर्त्तकीलतायां विभाण्ड्याम् राजनि०। २देशभेदे पु० स च देशः बृ०सं० कूर्म्मविभागे १४अ० पश्चिमोत्तरदिशि उक्तः। "दिशि पश्चिमोत्तरस्याम्" इत्युपक्रमे "गुरुहामककच्छचर्म्मरङ्गाख्याः"।

चर्म्मरी स्त्री चर्म्म–राति रा–क गौरा० ङीष्। स्थावरविषान्तर्गते फलविषे लताभेदे। "कुमुद्वतीरेणुकाकरम्भकर्कोटकरेणुकखद्योतकचर्म्मरीत्युपक्रमे फलविषाः" सुश्रु०।

चर्म्मरु पु० चर्म्म–राति रा–बा० कु। चर्म्मकारे त्रिका०।

चर्म्मवत् त्रि० चर्म्मन्+अस्त्यर्थे मतुप् मस्य वः असंज्ञात्वात् न नि०। १चर्म्मयुक्ते स्त्रियां ङीप्। "लोहचर्म्मवती चापि साग्निः सगुडशृङ्गिका" भा० व० १५अ०। २सुबलात्मजभेदे पु०। "गजो गवाक्षो वृषभश्चर्म्मवानार्जवः शुकः। षडेते बलसम्पन्ना निर्य्ययुर्म्महतो बलात्" इत्युप-

क्रमे “अश्वत्थमाखास्ते सर्वे सुवर्णमालजारवे” भा० भी० ९१अ० इत्युक्तम् ।

चर्म्मवसन पु० चर्म गजासुरचर्म वसनमस्य । कृत्तिवाससि शिवे कृत्तिवासस्शब्दे २१८८ पृ० दृश्यम् ।

चर्म्मवृक्ष पु० चर्मप्रधानः चर्मतुल्यवल्कप्रधानो वृक्षः । भूर्जवृक्षे । “खर्ज्जूरा नारिकेलाश्च चर्मवृक्षो हरितकी” हरिवं० । ११अ० ।

चर्म्मसम्भवा स्त्री चर्मणि त्वचि सम्भवति सम्+भू–अच् । स्थूलैलायां हारा० । तत्फलस्य त्वङ्मध्ये सम्भवात्तस्यास्तथात्वम् ।

चर्म्मसार पु० चर्मणः सारः । रसे राजनि० । भुक्ताहारः रसस्य त्वङ्मध्ये जायमानत्वात् तस्य तथात्वम् ।

चर्म्माम्भस् पु० चर्मणोऽम्भः । चर्मान्तरस्थे रसे राजनि० । भुक्ताहारादिरसस्य चर्माभ्यन्तरस्थत्वात्तस्य तथात्वम् ।

चर्म्मार पु० चर्म शिल्पसाधनतया ऋच्छति ऋ–अण् । उप० स० । चर्मकारे जटा० ।

चर्म्मावकर्त्तिन् पु० चर्म अवकृन्तति स्वशिल्पनिर्वाहाय अव+कृती छेदे णिनि । चर्मकारे । तदन्नभक्षणं मनुना निषिद्धं यथा “आयुः सुवर्णकाराणां यशश्चर्मावकर्त्तिनाम्” ।

चर्म्मिक त्रि० चर्मं चर्ममयं फलकं (ढाल) । युद्धसाधनतयाऽस्त्यस्य व्रीह्या० वा ठन् । चर्ममयफलकेन योद्धरि (ढाली) तस्य भावः कर्म वा पुरोहिता० यक् । चार्मिक्य तद्भावे न० ।

चर्म्मिन् त्रि० चर्म देहावरकं (ढाल) फलकं वा अस्त्यस्य वा इनि टिलोपः । चर्मयुक्ते (ढाली) ख्याते चर्मिके । “नागे नागे दश रथा शतमश्वा रथे रथे । अश्वेऽश्वे दश धानुष्का धानुष्के दश चर्मिणः” भा० भी० २० अ० । चर्माणि वल्कलान्यस्य सन्ति वा इनि । २भूर्जवृक्षे अमरः । ३कदल्यां ४भृङ्गरीटे च पु० शब्दर० ।

चर्य्या स्त्री चर–“परिचर्यापरिसर्य्येत्यादि” पा० परीत्यस्याविवक्षातः भावे क्यप् । १आचारमात्रे “वनवासस्य शूरस्य मम चर्या हि रोचते” रामा० अ० २९।१५। २गतौ “चर्यायां हयसत्तमम्” भा० आ० ६२७ श्लो० । ३ईर्यापथस्थितौ परिव्राजकादीनां व्रतानुष्ठाने नियमापरित्यागे । “गदमदचरेत्यादि” पा० कर्मणि यत् । ४कर्त्तव्ये आचरणीये त्रि० “षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम्” मनुः भावे यत् । ५अवश्यचरणे न० ।

चर्व भक्षणे दन्तैश्चूर्णने (चिवान) वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् । चर्वयति-ते चर्वति अचचर्वत्-त अचर्वीत् चर्वयां बभूव आस चक्रे चचर्व । चर्वणं चर्वणा चर्वितः । रसास्वादव्यापारे चर्वणाशब्दे दृश्यम् ।

चर्व्वण न० चर्व–भावे ल्युट् । १दन्तैश्चूर्णने (चिवान) २रसास्वादव्यापारभेदे च सा० द० । युच् चर्वणाप्यत्र स्त्री । “प्रमाणं चर्वणैवात्र स्वाभिन्ने विदुषां मतम्” चर्वणाऽऽस्वादनम् । तत्र “स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः । “निष्पत्त्या चर्वणस्यास्य निष्पत्तिरुपचारतः” “यद्यपि रसाभिन्नतया चर्वणस्यापि न कार्यत्वं तथापि तस्य कादाचित्कतया उपचरितेन कार्यत्वेन कार्यत्वमुपचर्यते” इति च सा० द० ।

चर्व्वा स्त्री चर्व–अङ् । १चर्वणे २तत्प्रहारे शब्दार्थचि० ।

चर्व्वित त्रि० चर्व–कर्मणि क्त । १भक्षिते दन्तैश्चूर्णिते २आस्वादिते च ।

चर्व्वितपात्र न० ६त० । चर्वितस्य ताम्बूलादेस्त्यागार्थम् पात्रम् (पिकदानी) ख्याते पतद्ग्रहे । “ताम्बूलं दर्पणं पानपात्रं चर्वितपात्रकम्” पद्मपु० पा० ख० ।

चर्व्य त्रि० चर्व–कर्मणि ण्यत् यत् वा । दन्तैश्चूर्णनीये भक्ष्यभेदे आहारशब्दे ८९९ पृ० आवश्यका०वाक्यम् यथा “भोज्यं भक्ष्यं तथा चर्व्यं गुरु विद्यात् यथोत्तरम् । चर्व्यं च चिपिटकचणकादि” । “षट्कोटिं ब्राह्मणानाञ्च भोजयामास नित्यशः । चूष्यपेयलेह्यचर्व्यै रतिरम्यैर्दिने दिने” ब्र० वै० पु० ।

चर्षणि पु० कृष-अनि “आदेश्च चः” उणा० । मनुष्ये निघ० । “य एकश्चर्षणीनां वसूनाम्” ऋ० १।७।९ ‘अर्य्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः । यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता” भाग० ६।६।२१ श्लोकः, तद्व्याख्यायां चर्षणयः कृताकृतज्ञानवन्तः” श्रीधरः । विचर्षणिविश्वचर्षणीत्यादिना निघण्टौ चर्षतेः पश्यतिकर्मसूक्तत्वेन तथार्थत्वम् । अस्यायमभिप्रायः “कृषेरादेश्च चः” उणा० २।१०२। सूत्रे उज्ज्वलदत्तेन “आदेश्च घः” इति पठित्वा चर्षणिः बन्धकीत्युदाहृतम् । अतश्चर्षणिनिष्पत्तिर्निघण्टूक्तचर्षधातोरेव । सि०का० तु “आदेश्च चः” इति पाठात् कृषधातोरेव तच्छब्दनिष्पत्तिरिति भेदः । तयोर्युक्तायुक्तत्वे सुधीभिर्भाव्यं । आद्युदात्तत्वात् स्त्रियां वा ङीप् । २पुंश्चल्यां स्त्री स चर्षणीनामुदगाच्छुचो मृजन्” भाग० १०।२९।२। वाक्यस्य चर्षणीनां पुंश्चलीनाम्

इत्यर्थपरत्वं युक्तम्। मनुष्यजातिपरत्वे स्त्रियां वा ङीप्। "इदमुक्ता चर्षणीधृता" ऋ० ८।९०।५। चर्षणीधृताऽसुरहननद्वारेण मनुष्यजातिधारकवज्रेण" भा०

चल गतौ भ्वा०पर० सक० सेट्। चलति अचालीत्। चचाल। चेलतुः। चलन् चलितः ज्वलादि० णवः पचा०चलः। "कृष्णेन निहते चैद्ये चचाल च वसुन्धरा" भा० स० ४४अ०। "चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान्" चाण०। "तिलमात्रमपि चलितुं न शक्नोति" पञ्चत०। आर्षे आत्म०। "न धर्माच्चलते बुद्धिर्धर्मराजस्य धीमतः" भा०स० ७८अ०। णिचि। चलयति चालयति। "चालयन् वसुधां चेमां बलेन चतुरङ्गिणा" भा० आ० ९४अ० कम्पने अक० मित्। चलयति ते। अचीचलत् "चलयन् भृङ्गरुचस्तवालकान्" रघुः "तां प्राविशत् कपिव्याघ्रस्तरूनचलयन् शनैः" भट्टिः। "यूनां मनश्चलयति प्रसभं नभस्वान्" ऋ० स० गत्यर्थस्य न मित्त्वम् "मिञ्चले" इति कविकल्पद्रुमे कम्पार्थएव तस्य मित्त्वोक्तेः "आचालयेयुः शैलांस्ते क्षुब्धाभिन्द्युर्महीतले" हरिव० ५४अ०। पर्वतानाञ्च शिखराण्याचालयति वेगवान्" भा० शा० १५४अ०।

उद्+ऊर्द्ध्वगमने उत्क्रम्य गतौ "पुष्पोच्चलितषट्पदम्" रघुः उत्थाय गतौ च। "उच्चलितः प्रयाताम्" रघुः।

वि+विशेषेण चलने। "व्यचालीदम्भसां पतिः" भट्टिः।

चल विलासे तु० प० अ० सेट्। चलति अचालीत् चचाल।

चल भृतौ पोषणे चु० सक० उभ० सेट्। चालयति ते अचीचलत्।

चल त्रि० चल वा पचा० अच्। १तरले, चञ्चले, २कम्पयुक्ते अमरः। ३परमेश्वरे पु०। "धृताधीरचलश्चलः" विष्णु स०। "न स्वरूपान्न सामर्थ्यात् नच ज्ञानादिकात् गुणात्। चलनं विद्यते यस्मादचलः कीर्त्तितोऽच्युतः" स्मृतेः। वायुरूपेण चलतीति चलः" भा०। कम्पार्थकचलतेः स्वार्थे णिचि भावे अच्। ४कम्पने मेदि०। "णिच्चले" कविकल्प०। चलनं च रजसः कार्य्यं यथाह सा० का० "सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः"।

"सत्त्वतमसी स्वयमक्रियतया स्वस्वकार्य्यप्रवृत्तिं प्रत्यवसीदन्ती रजसोपष्टभ्येते अवसादात् प्रच्याव्य स्वकार्य्ये ते उत्साह्य प्रयत्नं कार्य्येते। तदिदमुक्तमुपष्टम्भकम् इति। कस्मादित्यत उक्तं चलमिति। तदनेन रजसः प्रवृत्त्यर्थत्वं दर्शितम्। रजस्तु चलत्वात् परितस्त्रैगुण्यं चालयद्गुरुणाऽऽवृण्वता च तमसा तत्र तत्र प्रवृत्तिप्रतिबन्धेन क्वचिदेव प्रवर्त्त्यते"। सा०त०कौ०।

"भ्मौनजौ भ्यौ चेच्चलमिदमुदितं मुनीशैर्भिभिः स्वरैः" वृ० र० उक्ते अष्टादशाक्षरपादके ५वर्णवृत्तभेदे न० "स वृत्तचूलश्चलकाकपक्षकैः" रघुः। "यथाभ्रमा प्रचलता सर्वोऽपि दशा इव" भाग० ७।१।२३। न खलु प्रेम चलं सुहृज्जने" "प्रायश्चलं गौरवमाश्रितेषु" कुमा०

चलकेतु पु० कर्म०। केतुभेदे स च "अपरस्यां चलकेतुः शिखया याम्याग्रयाङ्गुलोच्छ्रितया। गच्छेत् यथा यथोदक् तथा तथा दैर्घ्यमायाति" वृ० स० ११अ०। उक्तः

चलचञ्चु पुंस्त्री चला चञ्चुरस्य। चकोरखगे हेम०।

चलत्पूर्णिमा स्त्री चलन्ती पूर्णिमा तदुपलक्षितः चन्द्र इव। (चाँदा) चन्द्रकमीने त्रिका०।

चलदङ्ग पुंस्त्री चलन्ति अङ्गान्यस्य। (चेङ्‌ना) मत्स्यभेदे राजनि०। वा कप्। चलदङ्गक तत्रार्थे जटा०।

चलदल पु० चलानि चञ्चलानि दलान्यस्य। अश्वत्थवृक्षे अमरः। चलपत्रादयोऽप्यत्र। "अङ्केन (स्त्रीचिह्नभेदेन) केनापि विजेतुमस्या गवेष्यते किं ? चलपत्रपत्रम्। न चेद्विशेषादितरच्छदेभ्यस्तस्यास्तु कम्पस्तु कुतोभयेन" नैष०। तस्य कम्पयुक्तपत्रता वर्णिता।

चलन न० चल–भावे ल्युट्। १कम्पे २गतौ च। कर्त्तरि ल्यु। ३कम्पयुक्ते त्रि० मेदि०। ४हरिणे पुंस्त्री जटा० जातित्वात् स्त्रियां ङीप्। करणे ल्युट्। ५चरणे हेमच०।

चलनक न० चलन+संज्ञायां कन्। चण्डातके हेमच०।

चलनी स्त्री चलत्यत्र चल–आधारे ल्युट् ङीप्। १गजबन्धन्यां शाय्याम् २घर्व्याख्ये (घाघरा) वस्त्रभेदे हेमच०।

चलसंक्रान्ति स्त्री कर्म०। अयनांशचलनभेदात् तत्तद्राशिविशेषांशे रव्यादेः प्रभासुञ्चसञ्चारे अयन संक्रान्तिशब्दे ३२८पृ० विवृतिः। [द्रव्यभेदे च रत्नमा०।

चला स्त्री चल–अच्। १लक्ष्म्यां मेदि० २सिह्लके गन्ध-

चलाचल त्रि० चल–अच् नि०। १चञ्चले अमरः २काके पुंस्त्री राजनि० स्त्रियां जातित्वात् ङीष्। "चलाचलैरनुपदमाहताः खुरैः" माघः। "जन्मिनोऽस्य स्थितिं विद्वान् लक्ष्मीमिव चलाचलाम्" किरा०।

चलातङ्क पु० चलस्य चलनस्यातङ्कोभयमस्मात्। वातामयभेदे राजनि०।

चलित त्रि० चल–कर्त्तरि क्त । १कम्पिते अमरः । २गते "चलितदुर्बलपक्षपरिग्रहः" "चलितः शूरः प्रतिसमेतमात्मजम्" माघः । २प्राप्ते ३ज्ञाते च त्रि० । भावे क्त । ४चलने ५गतौ" च न० ।

चलु पु० चल–उन् । गण्डूषे हेमच० । [मेदि० ।

चलुक पु० चलुना मीयते कन् । १प्रसृतौ २भाण्डभेदे च

चलेषु पु० चलो लक्ष्यमप्राप्य इषुर्यस्य । लक्ष्यमप्राप्यपातके मन्दधानुष्के । अत्र "उदराश्वेषु क्षेपे" पा० इषु शब्दे परे क्षेपे पूर्वपूर्वपदस्यान्तोदात्तताविधानात् पूर्वपदमन्तोदात्तम् ।

चवर्ग पु० च+प्रातिशाख्योक्तः वर्गप्रत्ययः ६त० वा । तालुस्थानोच्चारितानां स्पृष्टवर्णानां वर्गे (च छ ज झ ञ) वर्णेषु । ततः "वर्गान्ताच्च" पा० छ । चवर्गीय तदर्थ-भवे त्रि० ।

चवल पु० चर्व–वा० अलच् पृषो० । राजमाषे कलायभेदे शब्दार्थचि० । [ङीप् । तत्रार्थे शब्दर०

चवि स्त्री चर्व–इन् पृषो० । चव्ये (चइ) शब्दर० । वा

चविका स्त्री चवि+स्वार्थे क । चव्ये अस्य स्त्रीत्वमाह रत्नः "कटूष्णा चविका लघ्वी रोचनी दीपनी मता । कण्डूश्वासकासघ्नरोगविमर्द्दिनी" राजनि० । "भेदिनी कफनाशिनी" इत्यधिकं राजवल्लभेनोक्तम् ।

चव्य न० चर्व–कर्म्मणि यत् पृषो० । १चविकायाम् तस्य क्लीवत्वमाह भरतः । स्वार्थे क चव्यका तत्रार्थे राजनि० । सा च २वचायां मेदि० । [राजनि० ।

चव्यजा स्त्री चव्यमिव जायते जन–ड । गजपिप्पल्याम्

चव्यफल न० चव्यमिव फलति फल–अच् । गजपिप्पल्याम् राजनि० ।

चव्यादि न० "चव्यं त्रिकटुकं पाठा क्षारं कुस्तुम्बुरूणि च । यवानी पिप्पलीमूलमुभे च विडसैन्धवे । चित्रकं बिल्वमभयां पिष्ट्वा सर्पिर्विपाचयेत् । शकृद्वातानुलोम्यार्थं जाते दध्नि चतुर्गुणे । प्रवाहिकां गुदभ्रंशं मूत्रकृच्छ्रं परिस्रवम् । गुदवङ्क्षणशूलञ्च घृतमेतद्व्यपोहति" चक्रदत्तोक्ते घृतभेदे ।

चष भक्षे भ्वा० उभ० सक० सेट् । चषति ते अचषीत् अचाषीत् अचषिष्ट दन्त्याद्य चेषतुः चेषे ।

चष वधे भ्वा० प० सक० सेट् । चषति अच–(चा)षीत् ।

चषक पु०न० चष–करणे कुन् अर्द्धर्चादि । १मद्यपानपात्रे अमरः । सप्तवरादिकं शुक्तिकल्पतरावुक्तम् यथा "यत् पानपात्रं भूपानां तज्ज्ञेयं चषकं बुधैः । काञ्चनं राजतं चैव स्फाटिकं काचमेव च । इमं सरावादिकं च चतुर्णां पृथिवीभुजाम् । इत्यन्यसम्मतं तेषां निर्णयः पाठसम्मतः । स्वमतिसम्मितं रत्नैश्चतुर्वर्ग्यैः समन्वितम् । मार्त्तिकं वाथ फालं वा सर्वैश्चाप्युपयुज्यते । काष्ठजं धातुजं शैलं जाङ्गलादिमहीभुजाम् । यदन्यत्तोयपानादिपात्रं पृथ्वीभुजां भवेत् । एवं तत्रापि नियम इति भोजस्य सम्मतः" "आननैः परिहृतं चषकान्तः" माघः । कर्म्मणि कुन् । २मधुनि, ३मद्यभेदे [च स्त्रि० कौ० । च न० मेदि०

चषति पु० चष–भक्षे वधे वा भावे क्तिन् । १भक्षे २वधे

चषाल पु०न० चष–आलच् अर्द्धर्चादि । यूपकटके यज्ञियपशुबन्धनार्थे यूपमध्यदेये वलयाकारे काष्ठमये लौहमये वा पदार्थे अमरः । तद्वचादिकमुक्तं का० श्रौ० ६।१।२८ । सूत्रादौ "अपाश्रचषालं पृथमात्रमष्टाश्रि मध्यसंगृहीतम्" २८सू० "यूप परिवासनानन्तरं यदवशिष्टं पृथक्कृतमग्रम् ततश्चषालं कर्त्तव्यम् प्रसारिताङ्गुलिः पाणिरामणिबन्धनात् पृथक् इत्युच्यते चषालमिति संज्ञा सं व्यवहारार्था "का चषालेषणात्" इत्यादौ । अष्टाश्रि अष्टकोणम् तदपि तक्षणेनाष्टकोणं कुर्य्यात् तच्चैव । उलूखलवन्मध्ये संकुचितम्" कर्कः । "अर्द्धं मध्ये प्रतिमुञ्चति" २९सू० "तच्चषालं यूपस्याग्रे अर्द्धं प्रतिमुञ्चति अतएवोर्द्धप्रतिमोकविधानाच्चषालस्य तथा वेध्यः कार्यः । प्रतिमुञ्चतीति वचनाच्च चूड़ाग्रो यूपः चषालं च सुषिरमिति गम्यत इति हरिस्वामिनः तथा चाहापस्तम्बः "मूलतोऽतष्टमपरम् अष्टाश्रिरनु पूर्वोऽग्रतोऽणीयान् प्रज्ञाताष्टाश्रिरिति" कर्क० "द्व्यङ्गुलं त्र्यङ्गुलं वा तद्ध्यतिक्रान्तं यूपस्य" ३० सू० "यूपस्य यूपाग्रस्य द्व्यङ्गुलं त्र्यङ्गुलं वा चषालं तद्ध्यतिक्रान्तं चषालच्छिद्रप्रवेशादतिक्रान्तं भवति अतिक्रम्योर्द्धं निःसृतं भवति तथा चषालस्योर्द्धं प्रवयणं कर्त्तव्यम् यथा चषालो यूपाग्रादधो द्व्यङ्गुले त्र्यङ्गुले वा तिष्ठतीत्यर्थः" कर्कः "भूषणालतुलिताङ्गुलीयकम्" माघः ।

चह कल्कने (प्रतारणे) भ्वा० पर० सक० सेट् । चहति अचहीत् । चचाह चेहतुः ।

चह कल्कने (प्रतारणे) अद० चुरा० उभ० सक० सेट् । चहयति–ते अचचहत् त । चहयां, बभूव आस–चकार चक्रे ।

चह कल्के प्रतारणे चुरा० उभ० सक० सेट् । चटा० चहयति ते अचीचहत्–त ।

चाकचक्य न० चक–अच् चकः प्रकारे द्वित्वं चकचकस्तस्य भावः ष्यञ् । उज्ज्वलतायाम् । "नहि लोकसिद्धसामग्री प्रातिभासिकरजतोत्पादिका किन्तु विलक्षणैव । तथाहि । काचादिदोषदूषितलोचनस्य पुरोवर्त्तिद्रव्यसंयोगादिदमाकारा चाकचक्याकारा च काचिदन्तःकरणवृत्तिरुदेतीति" "चाकचक्यसंदर्शनसमुद्बुद्धरजतत्वसंस्कारसध्रीचीना" इति च वेदान्त० प० । पृषो० । चाकचिक्यमप्यत्र शब्दार्थचि० ।

चाकचिच्चा स्त्री चक–घञ् चाकं दीप्तिं चिनोति चि–क्विप् तथाभूतो चीयते चि–बा० ड । श्वेतगुञ्जायां रत्नमा० ।

चाक्र त्रि० चक्रेण निर्वृत्तम् अण् । चक्रनिर्वृत्ते "चाक्रमौषलमित्येवं संग्रामं रणवृत्तयः" हरिवं० १०० अ० ।

चाक्रवर्मण पु० चक्रवर्मणोऽपत्यम् अण् न टिलोपः । चक्रवर्मणोऽपत्ये व्याकरणाचार्य्यभेदे । "कपश्चाक्रवर्मणस्य" उणा० २।१।२सू० । "ईश्चाक्रवर्मणस्य" पा० ६।१।२ सू० । [ढञ् । चक्रवाकसमीपादौ ।

चाक्रवाकेय त्रि० चक्रवाकस्यादूरदेशादि चतुरर्थ्यां सख्या०

चाक्रायण पु० चक्रस्यर्षेर्गोत्रापत्यम् अश्वादि० फञ् । चक्रर्षेर्गोत्रापत्ये उषस्तौ "मटचीहतेषु कुरुषु उषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राण उवास" छा० उ० ।

चाक्रिक त्रि० चक्रेण समूहेन यन्त्रभेदेन चक्रयुक्तशकटेन वा चरति ठक् । संघीभूय मिलित्वा स्तुतिपाठके १घाण्टिके अमरः "पिशुनानृतिनां चैव तथा चाक्रिकबन्दिनाम्" याज्ञ० । "चाक्रिको घोषयामास पुरुषो मृष्टकुण्डलः" हरिवं० १५९ अ० । २तैलकारे हेमच० ३शाकटिके (गाडोयान) ख्याते च शब्दार्थचि० "भिक्षुकांश्चाक्रिकांश्चैव क्लीबोन्मत्तान् कुशीलवान् । वाह्यान् कुर्य्यान्नरश्रेष्ठो दोषाय ते स्युरन्यथा" भा० शा० ६९ अ० । [ढञ् । चक्रनिर्वृत्तादौ ।

चाक्रेय त्रि० चक्रेण निर्वृत्तादि चक्र+सख्या० चतुरर्थ्यां

चाक्षुष न० चक्षुषा ख्यायते चक्षुस्+चैविकोऽण् । चक्षुर्ग्राह्ये १रूपादौ २तद्वति त्रि० । तद्ग्राह्यविषयाश्च चक्षुर्विषयशब्दे २८४२ पृ० दृश्याः । चक्षुषा निर्वृत्तः अण् । ३प्रत्यक्षे न० । तज्ज्ञाने चक्षुषः करणत्वेऽपि विषयभेदेन तस्य व्यापारभेदा भाषा० उक्ता यथा "द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः । द्रव्येषु समवेतानां तथा तत्समवायतः । तत्रापि समवेतानां शब्दस्य समवायतः । तद्वृत्तीनां समवेतसमवायेन तु ग्रहः" । द्रव्यचाक्षुषं प्रति चक्षुःसंयोगो व्यापारः । द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः । द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः" । चक्षुषोऽपत्यम् । ४चक्षुर्नामकस्य रिपुञ्जयनृपस्य पुत्रे षष्ठे मनुभेदे तत्कथा यथा "चक्षुषा ब्रह्मदौहित्र्यां वीरिण्यां स रिपुञ्जयः । वीरणस्यात्मजायान्तु चक्षुर्मनुमजीजनत् । मनुर्वै राजकन्यायां नड्वलायां स चाक्षुषः । जनयामास तनयान्दश शूरानकल्मषान् । ऊरुः पूरुः शतद्युम्नस्तपस्वी सत्यवाक् कविः । अग्निष्टुदतिरात्रश्च सुद्युम्नश्चापराजितः । अभिमन्युस्तु दशमो नड्वलायामजायत" मत्स्यपु० ४अ० । "षष्ठं ते सम्प्रवक्ष्यामि तन्निबोध नराधिप ! । भृगुर्नभो विवस्वांश्च सुधामा विरजास्तथा । अतिनामा सहिष्णुश्च सप्तैते तु महर्षयः । चाक्षुषस्यान्तरे तात ! मनोर्देवानिमान् शृणु । आप्याः प्रभूता ऋभवः पृथुकाश्च दिवौकसः । लेखा नाम महाराज ! पञ्च देवगणाः स्मृताः । ऋषेरङ्गिरसः पुत्रा महात्मानो महौजसः । नाड्वलेया महाराज ! दश पुत्रास्तु विश्रुताः । ऊरुप्रभृतयो राजन् ! षष्ठं मन्वन्तरं स्मृतम्" हरि० ७अ० ।

चाक्ष्म त्रि० चक्ष–बा० म पृषो० । द्रष्टरि "चाक्ष्मो यद्वाचं भरते मती" ऋ० २।२४।९ । "चाक्ष्मः सर्वस्य द्रष्टा" भा० ।

चाङ्ग पु० चीयते चि–ड चमङ्गमस्य । १चाङ्गेर्य्यां रायमु० । चमङ्गं तदवयवो दन्तोऽस्मात् । दन्तपटुत्वे शब्दार्थचि० ।

चाङ्गेरी स्त्री चाङ्गं दन्तपटुत्वमीरयति ईर–अण् उप० स० गौरा० ङीष् । अम्ललोणिकायाम् (आमरुल) अमरः । "चाङ्गेरी दीपनी रुच्या लघूष्णा कफवातनुत् । पित्तलाम्ला ग्रहण्यर्शःकुष्ठातीसारनाशिनी" भावप्र० ।

चाङ्गेरीघृत न० चक्रदत्तोक्ते चाङ्गेरीपक्वे घृतभेदे तत्पाकविधिर्यथा "नागरं पिप्पलीमूलं चित्रकं हस्तिपिप्पली । श्वदंष्ट्रा पिप्पली धान्यं बिल्वं पाठा यमानिका । चाङ्गेरीस्वरसे सर्पिः कल्कैरेतैर्विपाचितम् । चतुर्गुणेन दध्ना च तद्घृतं कफवातनुत् । अर्शांसि ग्रहणीदोषं मूत्रकृच्छ्रं प्रवाहिकाम् । गुदभ्रंशार्त्तिमानाहं घृतमेतद् व्यपोहति" चक्रदत्तः

चाट पु० चट–भेदे अच्। आदौ विश्वासमुत्पाद्य पश्चात् धनापहर्त्तरि चौरे "चाटचारभटादिषु दत्तं भवति निष्फलम्" स्मृतिः। "चाटतस्करदुर्वृत्तमहासाहसिकादिभिः। पीड्यमानाः प्रजारक्ष्यात् कायस्थैश्च विशेषतः" याज्ञ०। "चाटाः प्रतारकाः विश्वास्य ये परधनमपहरन्ति" मिताक्षरा

चाटपुट पु० "गुरुर्लघु गुरुश्चैव भवेच्चाटपुटाभिधः" सङ्गीतदामोदरोक्ते तालभेदे।

चाटु पु०न० चट–उण्। १प्रियवाक्ये २मिथ्याप्रियवाक्ये (खोसामुदेरकथा) च। "कुर्वन् चाटुसहस्राणि अच्युतकथया गिरा" हरिवं०२०। "नो चाटुश्रवणं कृतं न च दृशा हारोऽन्तिके वीक्षितः" सा० द०। स्वार्थे क। अत्रार्थे "विस्रब्धचाटुकशतानि रतान्तरेषु" सा० द०

चाटुकार त्रि० चाटुं करोति। हेत्वादौ प्राप्तस्य टस्यापवादेन "न शब्दश्लोकेत्यादिना" पा० अण्। सतत चाटुवाक्यकर्त्तरि। "चाटुकारमपि प्राणनाथं रोषादपास्य या" सा० द०।

चाटुपटु पु० ७त०। भण्डे (भाँड़) हारा०।

चाटु(टू)लोल त्रि० चाटुषु लोलः (चञ्चलः। (खोसामुदे) चाटुकारे हारा०।

चाटुवटु पु० ७त०। विदूषके क्रीडासहचरे भण्डे।

चाटूक्ति स्त्री ६त०। प्रियकथने। चाटुवाक्यश्रोत्रियम्। [कच्छाले। २सेवायाम् हारा०।

चाणक पुंस्त्री चाणक्यस्य छात्रः अण् यलोपः। चाण-

चाणकीन न० चणकस्य भवनं क्षेत्रं खञ्। चणकोत्पत्तियोग्यक्षेत्रे।

चाणक्य पु० चणकस्य मुनेर्गोत्रापत्यम् गर्गा० यञ्। १वात्स्यायने चन्द्रगुप्तमन्त्रिणि कौटिल्ये "नव नन्दा भविष्यन्ति चाणक्योयान् हनिष्यति" विष्णु पु०। चन्द्रगुप्तशब्दे दृश्यम् तर्हि नन्दवंशोत्खातेन मौर्य्यं चन्द्रगुप्तं राज्येऽभिषिक्तवान्। वृहत् कथायां तद्वृत्तिः। चाणक्येन प्रोक्तम् अण्। तत्कृतग्रन्थे २नीतिशास्त्रभेदे च। "चाणक्यं सारसंग्रहम्" चाणक्यम्। चणक+स्वार्थे ष्यञ्। ३चणकशब्दार्थे।

चाणक्यमूलक न० चणक एव चाणक्यम् तदिव मूलमस्य। (चणकमूली) ख्याते मूलकभेदे। शब्दार्थचि०

चाणू(नू)र पु० कंसानुचरे मल्लयुद्धाभिज्ञेऽसुरभेदे। "नागं कुवलयापीडं चाणू(नू)रं मुष्टिकं तथा" हरिवं०४२अ०। "वराहव किशोरव मत्तौ दानवसत्तमौ। मल्लौ रङ्गगतौ तत्र यातौ चाणू(नू)रमुष्टिकौ" हरिवं०५५अ०। अस्य दन्त्यनकारमध्यतेति केचित्।

चाणू(नू)रसूदन पु० चाणू(नू)रं सूदयति सूदि–ल्यु। वासुदेवे कृष्णे तद्वधकथा हरिवं० ८७अ०। "ततः क्रोधाभिताम्राक्षः कंसः परमकोपनः। चाणू(नू)रमादिशद्युद्धे कृष्णस्य सुमहाबलम्" इत्युपक्रमे "दोर्भ्यामानस्य कृष्णस्तु चाणू(नू)रं पूर्वजीविनम्। प्राहरन्मुष्टिना मूर्द्ध्नि वक्षस्याहत्य जानुना निःसृते सास्तुरुधिरे तस्य नेत्रे सबन्धने। तापनीये यथा घण्टे कक्षोपरि विलम्बिते। पपात स तुरङ्गस्य मध्ये निःसृतलोचनः। चाणू(नू)रो विगतप्राणो जीवितान्ते महीतले"। चाणू(नू)रमर्दनादयोऽप्यत्र।

चाण्ड पुंस्त्री चण्डस्यापत्यं शिवा० अण्। १चण्डस्यापत्ये। चण्डस्य भावो युवा० अण्। २चण्डतायाम् न०।

चाण्डाल पुंस्त्री चण्डाल एव स्वार्थे अण्। चण्डालशब्दार्थे अमरः। स्त्रियां जातित्वात् ङीष्।

चाण्डालकि पु० स्त्री चाण्डालस्यापत्यम् इञ् "व्यासवरुडनिषादचाण्डालेत्यादि" पा० अकङ्। चण्डालापत्ये।

चाण्डालिका स्त्री चण्डालेन निर्वृत्ता ठक्। वीणाभेदे अमरः। चण्डालेन कृता कुला० अण्। २चण्डालकृतवस्तुमात्रे त्रि०

चाण्डालिकाश्रम न० भारतप्रसिद्धे तीर्थभेदे "कोकामुखे विगाह्याथ गत्वा चाण्डालिकाश्रमे" भा०आनु०२५अ०।

चाण्डाली स्त्री चाण्डमालाति आ+ला–क गौरा० ङीष्। १लिङ्गिनीलतायां राजनि० जातौ ङीष्। २चाण्डालजातिस्त्रियाञ्च।

चातक पुंस्त्री चत–याचने कर्त्तरि ण्वुल्। सारङ्गे स्तनास ख्याते खगभेदे स्त्रियां जातित्वात् ङीष्। अयञ्च पक्षी लघ्वाहारेषु सुश्रुते पठितः। "लघ्वाहारा विकिराश्चेत्युक्त्वा "मधुराः कषायो दोषशमनाश्चेति" सामान्यतस्तद्गुणास्तत्रोक्ताः। "स्थगयन्त्यमूः शमितचातकार्त्तस्वराः" माघः। "किं चातकः फलमपेक्ष्य सवज्रपाताम्" उद्भटः।

चातकानन्दन पु० चातकमानन्दयति आ+नन्द–णिच्–ल्यु। १वर्षाकाले राजनि०। २मेघे। वृष्टिजलपानस्य चातकव्रतत्वेन मेघस्य तथात्वम्।

चातकाष्टक न० काव्यभेदे काव्यसंग्रहे दृश्यम्।

चातन न० चत–णिच्–ल्युट्। १अर्द्दने २पीडने च।

चातुर त्रि० चतुर एव स्वार्थे अण्। १चतुरे २नियन्तरि ३नेत्रगोचरे मेदि०। चतुर्भिरुह्यते शैषिकोऽण्। "चतुश्चक्रयुक्ते २शकटे न० सि० कौ०

चातुरक्ष न० चतुर्भिरक्षैर्निष्पाद्यते अण्। १क्रीडाभेदे २उपधानभेदे (गालवालिश) पु० मेदि०।

चातुरर्थिक पु० चतुर्षु अर्थेषु विहितः ठक्। "तदस्मिन्नस्तीति देशे तन्नाम्नि" ०४।२।६७। "तेन निर्वृत्तम्" ६८। "तस्य निवासः" ६९। "अदूरभवश्च" ७० पा० सूत्रचतुष्कोक्तार्थेषु विहिते प्रत्ययभेदे। "जनपदे लुप्" पा०। जनपदे वाच्ये चातुरर्थिकस्य लुप् स्यात्" सि० कौ०।

चातुराश्रमिक त्रि० चतुर्षु आश्रमेषु विहितः ठक्। ब्रह्मचर्याद्याश्रमविहिते धर्मे। "चातुर्विद्यं यथावच्च चातुराश्रमिकान् परम्। तानहं संप्रवक्ष्यामि शाश्वतान् लोकभावनान्" भा० आ० ३५ अ०।

चातुराश्रम्य न० चत्वार आश्रमाः संज्ञात्वात् कर्म० ततः ब्राह्मणा० स्वार्थे ष्यञ्। ब्रह्मचारिगृहस्थवानप्रस्थभिक्षुकरूपेषु आश्रमेषु "चातुर्विद्यं चातुर्होत्रं चातुराश्रम्यमेव च" भा० शा० ४६अ०।

चातुरिक पु० चातुरीं वेत्ति ठक्। सारथौ जटाधरः।

चातुरी स्त्री चतुरस्य भावः ष्यञ् षित्त्वात् ङीष्यलोपौ। चतुरतायां "तन्नटचातुरीतुरी" नैष०

चातुर्जातक न० चतुर्जातकमेव स्वार्थेऽण्। गुडत्वगेला नागकेशररूपे गन्धचतुष्टये राजनि०।

चातुर्दश न० चतुर्दश्यां दृश्यते शैषिकोऽण्। १रक्षसि सि० कौ०। चतुर्दश्यां भवः सन्धिवेला० अण्। २चतुर्दशीभवे त्रि०

चातुर्दशिक पु० चतुर्दशीम् अनध्यायेऽधीते ठक्। चतुर्दश्यामध्येतरि। "शिष्यं हन्ति चतुर्दशी" मनुना तस्या अनध्यायतोक्तेस्तथात्वम्।

चातुर्भद्र न० चतुर्भद्रमेव स्वार्थे अण्। नागरातिविषामुस्तागुडूचीरूपे द्रव्यचतुष्टये राजनि०।

चातु(र्थ)र्थिक पु० चतुर्थे चतुर्थेऽह्नि भवः ठक् वुञ् वा। चतुर्थचतुर्थदिनजाते ज्वरभेदे "चातुर्थ(र्थि)कोज्वरोरुद्रो ह्यन्ये चैव ज्वरास्ततः। जम्बूफलं हरिद्रा च सर्पस्यैव च कञ्चुकम्। सर्वज्वराणां धूपोऽयं हरचातुर्थ(र्थि)कस्य च" गारुडे १८७अ०।

चातुर्वर्ण्य न० चत्वारो वर्णा एव चतुर्वर्णा० स्वार्थे ष्यञ्। ब्राह्मणादिषु चतुर्षु वर्णेषु "चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः" गीता।

चातुर्भद्रावलेह पु० चतुर्भिर्भद्रैर्निर्वृत्तः अण् कर्म०। "कट्फलं पौष्करं शृङ्गी कृष्णा च मधुना सह। कासश्वासज्वरहरः श्रेष्ठो लेहः कफान्तकृत्" चक्रदत्तोक्ते अवलेहभेदे।

चातुर्भौतिक त्रि० चतुर्भिः पृथिव्यप्तेजोवायुभिर्निर्वृत्तः ठक् अनुश०·द्विपदवृद्धिः। चतुर्भिर्भूतैर्निष्पादिते देहादौ नैयायिकादिमते आकाशस्यारम्भकत्वाभावात् चार्वाकमते आकाशस्याभावात् भौतिकानां चतुर्भूतारब्धता। वेदान्त्यादिमते देहस्य पाञ्चभौतिकत्वमिति भेदः। यद्यपि मनुष्यदेहस्य पार्थिवत्वं नैयायिकैरङ्गीकृतं तथापि अन्यभूतानां तत्रोपष्टम्भकत्वात् चातुर्भौतिकत्वम् इति विवेकः।

चातुर्महाराजिक पु० चत्वारो महाराजिकाः स्वाकार स्वेनास्त्यस्य प्रज्ञा० अण्। परमेश्वरे "महाराजिक चातुर्महाराजिक" भा० शा० ३४० अ० नारदकृतविष्णुस्तुतौ। महाराजिकानां च चतुःसंख्यकगणदेवतात्वात् तस्य तदात्मकत्वेन तथात्वम्।

चातुर्मास त्रि० चतुर्षु मासेषु भवः असंज्ञायाम् अण्। चतुर्षु मासेषु भवे। १इष्टौ २पौर्णमास्यां च स्त्री ङीप्। संज्ञायान्तु यसे ण्यः। चातुर्मास्य इत्येव तत्कृत्ये दृश्यम्

चातुर्मासिक त्रि० चतुरो मासान् व्याप्य ब्रह्मचर्यमस्य ठक्। चतुर्मासव्यापकब्रह्मचर्ययुक्ते कर्मणि। यज्ञे तु "चतुर्मासान् ण्योयज्ञे" वार्त्ति० ण्य चातुर्मास्य इत्येव।

चातुर्मास्य त्रि० चतुर्षु मासेषु भवो यज्ञः "चतुर्मासान् ण्यो यज्ञे" वार्त्ति० ण्य। चतुर्माससाध्ये यज्ञभेदे। चातुर्मास्ये च चत्वारि पर्वाणि वैश्वदेववरुणप्रघासशाकमेधशुनाशीरीयसंज्ञानि। तत्कर्त्तव्यप्रयोगाद् का० श्रौ० ५अध्यायादौ दृश्यम्। तदारम्भकालश्च फाल्गुनीपूर्णिमोत्तरं प्रतिपदि तत्रोक्तः। २वार्षिकचातुर्मास्यकर्त्तव्ये व्रते च यथाह वराहपु० "आषाढशुक्लद्वादश्यां पौर्णमास्यामथापि वा। चातुर्मास्यव्रतारम्भं कुर्यात् कर्कटसंक्रमे। अभावे तु तुलार्केऽपि मन्त्रेण नियमं व्रती। कार्त्तिके शुक्लद्वादश्यां विधिवत् तत् समापयेत्। चतुर्ष्वपि हि तन्मीर्ष्वं चातुर्मास्यं व्रतं नरः। कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत्समापयेत्"। मात्स्ये "चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि। मधुस्वरोभवेन्नित्यं नरो गु

विवर्जनात्। तैलस्य वर्जनादेव सुन्दराङ्गः प्रजायते। कटुतैलपरित्यागात् शत्रुनाशः प्रजायते। लभते सन्ततिं दीर्घां स्थालीपाकमभक्षयन्। सदा मुनिः सदा योगी मधुमांसस्य वर्जनात्। निराधिर्नीरुगोजस्वी विष्णुभक्तश्च जायते। एकान्तरोपवासेन विष्णुलोकमवाप्नुयात्। धारणान्नखलोम्नाञ्च गङ्गास्नानं दिने दिने। ताम्बूलवर्जनाद्भोगी रक्तकण्ठश्च जायते। घृतत्यागात् सुलावण्यं सर्वस्निग्धवपुर्भवेत्। फलत्यागेन मतिमान् बहुपुत्रश्च जायते। नमोनारायणायेति नक्ताऽनशनजं फलम्। पादाभिवन्दनाद्विष्णोर्लभेद्गोदानजं फलम्। एवमादिव्रतैः पार्थ! तुष्टिमायाति केशवः। “अत्र च यतिमधिकृत्य काठकगृह्यम्। “एकरात्रं वसेत् ग्रामे नगरे पञ्चरात्रकम्। वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत्”। एतद्यतिविषयम्। “ऊर्द्धं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासी” इति शङ्खोक्तेः। “चातुर्मास्यगते या (द्वितीया) तु” ति०त० धनञ्जयोक्तौ

चातुर्मास्यद्वितीया स्त्री “आषाढे फाल्गुनोर्ज्जे वा द्वितीया विधुक्षये। चातुर्मास्यद्वितीयास्ताः प्रवदन्ति महर्षयः” इति कृत्यत० उक्ते आषाढादिद्वितीयाचतुष्के

चातुर्य्य न० चतुरस्य भावः ष्यञ्। चतुरतायां दक्षतायाम् “चातुर्य्यमुद्वहमनोभवया रतेषु” सा० द० “संभोगस्नेह चातुर्य्यैर्हाववाक्यमनोहरैः” भा० आ० १९०५।

चातुर्वर्ण्य न० चत्वारो ब्राह्मणादयो वर्णा एव स्वार्थे ष्यञ्। ब्राह्मणादिषु चतुर्षु १वर्णेषु “चातुर्वर्ण्यं मया सृष्टमिति” गीता। भावे—ष्यञ्। २चतुर्वर्णधर्म्मे। वर्णभेदेन धर्म्मभेदाः शङ्खेन दर्शिताः यथा।

“चातुर्वर्ण्यं हितार्थाय शङ्खः शास्त्रमथाकरोत्। यजनं याजनं दानं तथैवाध्यापनक्रियाम्। प्रतिग्रहञ्चाध्ययनं विप्रः कर्म्माणि कारयेत्। दानमध्ययनञ्चैव यजनञ्च यथाविधि। क्षत्रियस्य तु वैश्यस्य कर्म्मेदं परिकीर्त्तितम्। क्षत्रियस्य विशेषेण प्रजानां परिपालनम्। कृषिगोरक्षवाणिज्यं वैश्यस्य परिकीर्त्तितम्। शूद्रस्य द्विजशुश्रूषा सर्व्वशिल्पानि चाप्यथ। क्षमा सत्यं दमः शौचं सर्व्वेषामविशेषतः। ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः। तेषां जन्म द्वितीयन्तु विज्ञेयं मौञ्जिबन्धनम्। आचार्य्यस्तु पिता प्रोक्तः सावित्री जननी तथा। ब्रह्मक्षत्रविशाञ्चैव मौञ्जीबन्धनजन्मनि। विप्रः शूद्रसमास्तावद्विज्ञेयास्तु विचक्षणैः। यावद्वेदे न जायन्ते द्विजा ज्ञेया स्तु तत्परम्”। “ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति वर्णाश्चत्वारः। तेषामाद्या द्विजातयः। तेषां निषेकाद्यः श्मशानान्तो मन्त्रवत् क्रियासमूहः। तेषाञ्च धर्म्माः, ब्राह्मणस्याध्यापनं क्षत्रियस्य शस्त्रनिष्ठता वैश्यस्य पशुपालनं शूद्रस्य द्विजातिशुश्रूषा। द्विजानां यजनाध्ययने। अथैतेषां वृत्तयः ब्राह्मणस्य याजनप्रतिग्रहौ, क्षत्रियस्य क्षितित्राणं, कृषिगोरक्षवाणिज्यकुसीदयोनिपोषणानि वैश्यस्य, शूद्रस्य सर्वशिल्पानि। आपद्यनन्तरा वृत्तिः” विष्णु स०।

चातुर्होतृक पु० चतुर्होतृप्रतिपादकग्रन्थस्य व्याख्यानः क्रतुत्वात् ठक्। चतुर्होतृप्रतिपादकग्रन्थव्याख्याने। चतुर्होतृणां कर्म्म अण्। चातुर्होत्र चतुर्णां होतॄणां कर्म्मणि। चतुर्होतृशब्दे उदा०।

चातुष्टय पु० चतुष्टयं कलापस्तदर्थं वेत्ति अधीते वा अण्। “सूत्राच्च कोपधात्” पा० कोपधात् प्रत्ययस्य लुको-विधानात् अस्य च कोपधत्वाभावात् न लुक्। चतुष्टय इत्यभिज्ञे

चातुष्प्राश्य न० चतुर्भिरध्वर्य्युब्रह्मादिभिर्ऋत्विग्भिः प्राश्यम् ततः स्वार्थे ष्यञ्। चतुःसंख्यर्त्विजां भोजनपर्य्याप्ते ओदने। “चातुष्प्राश्यमोदनं पचन्ति” शत०ब्रा०२।१।४।४। “दर्शपौर्णमासानीजानोऽदक्षिणाग्निपक्वं चातुष्प्राश्यं ब्राह्मणान् भोजयेत्” का० श्रौ० ४।६।१०।

चात्र न० चाय—करणे ष्ट्रन्। अग्निमन्थनयन्त्रावयवभेदे। अग्न्युत्पादशब्दे ६२ पृष्ठे दर्शितम्। तत्र च पृष्ठे चत्रमिति पाठः प्राचीनमुद्रितग्रन्थपाठानुसारेण प्रमादात् मुद्रितः सर्व्वत्र चात्रमित्येव पाठः साधुः का० श्रौ० ४।८।२६ सूत्रभाष्ये तत्स्वरूपादिकम् उक्तं यथा।

“अग्नेः पुरस्तात् प्रत्यङ्मुखे स्थिते मन्थनं कुर्य्यात्। तत्र च प्रथममधरारणिमुत्तराग्रां निधाय उत्तरारण्या ईशानदिग्भागाद्दशाङ्गुलदीर्घं द्व्यङ्गुलविपुलं प्रमन्थं छित्त्वा तस्य मूलं चात्रबुध्ने प्रवेश्य अधरारण्या मूलाद्दशाङ्गुलं त्यक्त्वा अग्राच्च द्वादशाङ्गुलं त्यक्त्वा तदन्तराले अङ्गुलचतुष्टयपरिमिते पूर्वारण्यन्ते अष्टयामं कृत्वा चात्रबुध्नप्रोतस्य प्रमन्थस्याग्रं तत्र निधाय चात्राग्रकीलकाग्रप्रोतेषु दशापवीर्णीं निधाय रज्ज्वा धारयित्वा चात्रं नेत्रेण प्रदक्षिणं निर्वेष्टयित्वा तथा मन्थनं कुर्य्यात् यथा जातोऽग्निः प्राच्यां पतति तत्र यजमानः प्राङ्मुखो मन्थधारणं करोति पत्नी चात्रं

नेत्रेण निवेंष्टयित्वा मन्थनं करोति तथा शाखान्तराद्ध्वर्युश्च तस्माद्ध्वर्युः प्रत्यङ्मुखोऽभिमन्थतीति"। चात्रं च खादिरं द्वादशाङ्गुलदीर्घं वर्त्तुलम् अग्रे लोहकीलयुक्तम् मूले प्रमन्थाप्रवेशनार्थगर्त्तयुक्तम् मूलेऽग्रे च लोहपट्टिकया संयुक्तं कार्यम्"। "ओवीली च खादिरी द्वादशाङ्गुलदीर्घा चतुरङ्गुलविपुलाधोभागे समा चात्राग्रस्थितकीलकोपरिस्थापनार्थं लोहपट्टिकायुक्ता उपरिभागे वर्त्तुला च कार्या। नेत्रं च गोवालशणसूत्रैस्त्रिवृत् व्याममात्रं कार्यम्। केचित् प्रमन्थाग्रेण मन्थन्ति, अपरे तु मूलेन"

चात्वाल पु० चत–वालञ्। १यज्ञकुण्डे २दर्भे ३उत्ताने ४उत्कटे च विश्वः ४उत्तरवेद्यङ्गे गर्त्तरूपे ५तद्गतावटे च "चात्वालोत्करावन्तरेण सञ्चरः" का० श्रौ० १।२।४२। "चात्वालश्च उत्करश्च चात्वालोत्करौ तौ अन्तरेण तयोरन्तरालेन सर्वेषां विहितकार्याणां संचरः गमनागमनमार्गो भवति। अयं च सोत्तरवेदिकेषु वरुणप्रघासमहाहविःपशुसोमेषु ज्ञेयः चात्वालस्यैष्वेव सत्त्वात् सोत्तरवेदिकेषु सर्वेष्वनेनैव मार्गेण गमनागमने कार्ये" कर्कः। "तच्चात्वालं परिलिखति सा चात्वालस्य मात्रा मात्र मात्रास्ति यत्रैव स्वयं मनसा मन्येतापरेणोत्करं तच्चात्वालं परिलिखेत्" शत० ब्रा० ३।५।१।२६। "सा चात्वालस्य मात्रा यैवोत्तरवेदेरुक्ता सैवेत्यर्थः चात्वालखननोत्पन्नयैव मृदोत्तरवेदिकरणात्" भा०।

"चात्वालं चात्वालवत्सु" आश्व० श्रौ० १।१।६। "चात्वालोनामावटः पशुसोमादिष्वस्ति येषु उत्तरवेद्यर्थं यत्र मृत् खात्वाह्रियते तद्वत्सु" ना० रा०। उक्तेः उत्तरावेद्यर्थमृदाहरणखातावटएव चात्वाल इति गम्यते।

चानराट न० चनराटस्येदम् अण्। चनराटस्यपत्याख्याने तस्मिन्नुपबन्धे परे द्विकृत्का अन्तोदात्ताः। "पूर्वचानराटम्" सि० कौ०।

चान्दनिक त्रि० चन्दनेन सम्पद्यते ठक्। चन्दनेन कृतशोभे "वपुश्चान्दनिकं यस्य कार्णवेष्टनिकं मुखम्" भट्टिः।

चान्द्र त्रि० चन्द्रस्येदम् अण्। १चन्द्रसम्बन्धिनि दिनमासादौ २तन्माने च। "अर्काद्विनिःसृतः प्राचीं यद्यात्यहरहः शशी। तच्चान्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिः" सू० सि०

"अर्कात् समागमं त्यक्त्वा विनिःसृतः पृथग्भूतः सन्चन्द्रोऽहरहः प्रतिदिनं यत् यत्सङ्ख्यामितं प्राचीं पूर्वां दिशं गच्छति तत् प्रतिदिनं चान्द्रमानं तत्तु सान्तरांशमितम्। ननु सौरदिनं सूर्यांशेन यथा भवति तथैतद्रूपैर्भागैः कियद्भिः पूर्णं चान्द्रं दिनं भवतीत्यत आह। अंशैरिति। भागैस्तुकारात् सूर्यचन्द्रान्तरोत्पन्नैस्तस्य तद्रूपत्वात्। द्वादशभिर्द्वादशसङ्ख्याकैस्तिथिर्ज्ञेया। एकं चान्द्रदिनं ज्ञेयमित्यर्थः। एतदुक्तं भवति सूर्यचन्द्रयोगाच्चान्द्रदिनप्रवृत्तेः पुनर्योगे भगणभोगे भगणान्तरेण चान्द्रो मासस्त्रिंशच्चान्द्रदिनात्मकः। अतस्त्रिंशद्भिर्यदि भगणांशान्तरं तदैकेन किमिति। द्वादशभागैरेकं चान्द्रदिनम्। "दर्शः सूर्येन्दुसङ्गमः" इत्यभिधानाद्दर्शावधिकमासस्य त्रिंशत्तिथ्यात्मकत्वात् तिथिश्चान्द्रदिनरूपेति। अथ चान्द्रव्यवहारमाह" र०म०। "तिथिः करणमुद्वाहः क्षौरं सर्वक्रियास्तथा। व्रतोपवासयात्राणां क्रिया चान्द्रेण गृह्यते" सू० सि०।

"तिथिः प्रतिपदाद्या करणं बवादिकमुद्वाहो विवाहः क्षौरं क्षौरकर्म। एतदाद्याः सर्वक्रिया मङ्गल्याद्युक्तरूपा व्रतोपवासयात्राणां नियमोपवासगमनानां क्रिया करणम्। तथा समुच्चयार्थकः। चान्द्रमानेन गृह्यते अङ्गीक्रियते। अथ चान्द्रमासं प्रसङ्गात् पित्र्यमानं चाह" र०ना०।

"त्रिंशता तिथिभिर्मासश्चान्द्रः पित्र्यमहः स्मृतम्" सू०सि० "कालेन येनेति पुनः शशीनं क्रामन् भचक्रं विवरेण गत्वा। मासः सचान्द्रोऽप्युदिताः कुरामाः खेषवः। २९।३१।५०। स्वत्कुदिनप्रमाणम्" सि०शि० "दर्शान्ते किल शशी रविणा युक्तो भवति। ततोद्वावपि पूर्व्वतो गच्छतः। तयोः शशी शीघ्रगत्वात् प्रत्यहं गत्यन्तरेणाग्रतो याति। एवं गच्छन् चक्रकला २१६०० तुल्यमन्तरं यदाग्रतो याति तदा रविणा योगमेति। तयोः कालयोरन्तरालं चन्द्रमासः। तत्प्रमाणमनुपातेन। चन्द्रार्कयोर्मध्यगती आदौ सम्यक् सावयवे कृत्वा यदि गत्यन्तरेणैकं कुदिनं लभ्यते तदा चक्रकलातुल्येनान्तरेण कियन्तीत्यनुपातेन चान्द्रमासे कुदिनानि लभ्यन्ते। २९।३१।५०। प्रमिता०। अधिकं गौणचान्द्रशब्दे २७१५ पृ० दृश्यम्। आपस्तम्बः "चन्द्रमाः कृष्णपक्षान्ते सूर्येण सह युज्यते। अभिकर्मादयस्तस्य अभिकर्मावधिः परम्। चन्द्रार्कयोः रवेर्मासश्चान्द्र इत्यभिधीयते" विष्णु स०। २चान्द्रायणव्रते न०। "चान्द्रं [illegible] तदर्द्धं च महाव्रतविधां विधिः" प्रा० त०। "चान्द्र

चान्द्रायणम्" रघु०। ३चन्द्रकान्तमणौ पु० हेमच०। ४चन्द्रसम्बन्धिमात्रे त्रि० स्त्रियां ङीप् "गुरुकाश्यपानुगां बिभ्रत् चान्द्रीमभिनभः श्रियम्" माघः। सा च ५श्वेतकण्टकार्य्यां राजनि०। ६आर्द्रके न० राजनि०। ७मृगशीर्षनक्षत्रे न० तस्य तद्देवताकत्वात्तथात्वम् मृगशिरःशब्दे ४९७ पृ० उक्तम् [राजनि०।

चान्द्रक न० चान्द्रमार्द्रकमिव कायति कै—क। शुण्ठ्याम्

चान्द्रपुर पु० १पूर्व्वदेशस्थे देशभेदे २तद्देशवासिषु ब० व०। स च देशः "अथ पूर्व्वस्याम्" इत्युपक्रमे "चान्द्रपुराः शूर्पकर्णाश्च" वृ० स० १४अ० कूर्म्मविभागे उक्तः।

चान्द्रभागा स्त्री चान्द्रो भागोऽंशोऽस्याम्। चन्द्रभागानद्याम् चन्द्रभागाशब्दे दृश्यम्।

चान्द्रमस त्रि० चन्द्रमस इदम् अण्। १चन्द्रसम्बन्धिनि दिनमासादौ। "तिथिश्चान्द्रमसं दिनम्" ति० त० सूर्य्यसिद्धान्तीयवाक्यत्वेन पठितम्। २मृगशिरोनक्षत्रे न० तस्य तद्देवकत्वात्तथात्वम्। ३चन्द्रसम्बन्धिमात्रे त्रि० स्त्रियां ङीप् "लब्धोदया चान्द्रमसीव लेखा"। "पक्षाश्रिता चान्द्रमसीमभिख्याम्" कुमा०। "सुरद्विपश्चान्द्रमसी सुधेव" रघुः।

चान्द्रमसायनि पु० चन्द्रमसोऽपत्यम् तिका० फिञ्। बुधग्रहे हला०। पृषो०। चान्द्रमसायनोऽप्यत्र।

चान्द्रमास पु० कर्म्म०। चन्द्रसम्बन्धिमासे चान्द्रशब्दे दृश्यम्

चान्द्रव्रतिक पु० चान्द्रव्रतं चान्द्रायणं वा व्रतमस्त्यस्य ठन्। १चन्द्रतुल्यव्रताचारिणि नृपे। "परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवाः। तथा प्रकृतयो यस्मिन् स चान्द्रव्रतिको नृपः" मनुः। २चान्द्रायणव्रताचारिणि च

चान्द्रायण न० चन्द्रस्यायनमिवायनमत्र पूर्वपदात् संज्ञायां णत्वम्। संज्ञायां दीर्घः स्वार्थेऽण् वा। व्रतभेदे तद्भेदादिकं मिता० उक्तं यथा। "तिथिवृद्ध्या चरेत्पिण्डान् शुक्ले शिख्यण्डसंमितान्। एकैकं ह्रासयेत् कृष्णे, पिण्डञ्चान्द्रायणञ्चरन्" या०। "चान्द्रायणाख्यङ्कर्म कुर्व्वन्मयूराण्डपरिमितान् पिण्डान् शुक्ले आपूर्य्यमाणपक्षे तिथिवृद्ध्या चरेद्भक्षयेत् यथा प्रतिपत्प्रभृतिषु तिथिषु चन्द्रकलानामेकैकशोवृद्धिरर्द्धमासे। तद्वत्पिण्डान् प्रतिपद्येको द्वितीयायां द्वावित्येवमेकैकशोवर्द्धयन् भक्षयेद् यावत्पौर्णमासी ततः पञ्चदश्यां पञ्चदश ग्रासान् भुक्त्वा ततः कृष्णपक्षे प्रतिपदि, चतुर्दश द्वितीयायां त्रयोदशेत्येवमेकैकशो ग्रासान् ह्रासयन्नमावास्यायां यावच्चतुर्दशी। ततश्चतुर्दश्यामेकं ग्रासं ग्रसित्वेन्दुक्षयेऽप्युपवसेत्। तथा च वसिष्ठः। "एकैकं वर्द्धयेत्पिण्डं शुक्ले कृष्णे च ह्रासयेत्। इन्दुक्षये न भुञ्जीत एष चान्द्रायणो विधिरिति"। चन्द्रस्यायनमिवायनं चरणं यस्मिन् कर्म्मणि ह्रासवृद्धिभ्यां तच्चान्द्रायणम् संज्ञायान्दीर्घः (णत्वञ्च) इदञ्च यववत्प्रान्तयोरणीयो मध्ये स्थवीय इति यवमध्यमिति कथ्यते। एतदेव व्रतं यदा कृष्णपक्षप्रतिपदि प्रक्रम्य पूर्व्वोक्तक्रमेणानुष्ठीयते तदा पिपीलिकामध्यमिव ह्रसिष्ठम्भवतीति पिपीलिकातनुमध्यमिति कथ्यते तथाहि। पूर्व्वोक्तक्रमेण कृष्णप्रतिपदि चतुर्दश ग्रासान्भुक्त्वैकैकग्रासापचयेन चतुर्दशीं यावद्भुञ्जीत ततश्चतुर्दश्यामेकं ग्रासं ग्रसित्वामावास्यायामुपोष्य शुक्लप्रतिपद्येकमेव ग्रासमश्नीयात्तत एकैकोपचयभोजनेन पक्षशेषे निर्वर्त्तमाने पौर्णमास्याम्पञ्चदश ग्रासाः सम्पद्यन्त इति युक्तैव पिपीलिकामध्यता। तथाच वशिष्ठः। "मासस्य कृष्णपक्षादौ ग्रासानद्याच्चतुर्दश। ग्रासापचयभोजी सन् पक्षशेषं समापयेत्। तथैव शुक्लपक्षादौ ग्रासम्भुञ्जीत चापरम्। ग्रासोपचयभोजी सन् पक्षशेषं समापयेदिति" यदा त्वेकस्मिन् पक्षे तिथिवृद्धिह्रासवशात् षोडश दिनानि भवन्ति चतुर्दश वा तदा ग्रासानामपि वृद्धिह्रासौ वेदितव्यौ 'तिथिवृद्ध्या पिण्डांश्चरेदिति नियमात्। गौतमेन त्वत्र विशेषो दर्शितः "अथातश्चान्द्रायणन्तस्योक्तो विधिः। कृच्छ्रे वपनं व्रतञ्चरेत्। श्वोभूतां पौर्णमासीमुपवसेत्। आप्यायस्व" (ऋ०१।९१।१६।) "सन्ते पयांसि (१७) नवोनवः" (ऋ० १०।८५।१९।) इति चैताभिस्तर्पणमाज्यहोमो हविषश्चानुमन्त्रणमुपस्थानञ्चन्द्रमसः। "यद्देवा देवहेडनम्" इति चतसृभिराज्यं जुहुयात्। देवकृतस्येति चान्ते समिद्भिस्तिसृभिः। ओं भूर्भुवःस्वः महः जनः तपः सत्यं यशः श्रीः ऊर्क् इट् ओजः तेजः पुरुषः धर्म्मः शिवः इत्येतैर्ग्रासानुमन्त्रणम्। प्रतिमन्त्रं मनसा नमःस्वाहेति वा सर्व्वान् एतैरेव ग्रासान्भुञ्जीत ग्रासप्रमाणमास्याविकारेण चरुभैक्ष्यसक्तुकणयावकपयोदधिघृतमूलफलोदकानि हवींषि उत्तरोत्तरप्रशस्तानि पौर्णमास्यां पञ्चदश ग्रासान् भुक्त्वैकैकापचयेनापरपक्षमश्नीयात्। अमावास्यायामुपोष्यैकैकोपचयेन पूर्व्वपक्षं विपरीतमेकेषाम् एष चान्द्रायणो मासः" इति। अत्र

ग्रासप्रमाणमास्याविकारेणेति यदुक्तं तद्बालाभिप्रायम् तेषां शिख्यण्डपरिमितपञ्चदशग्रासभोजनाशक्तेः । क्षीरादिद्रवद्रव्यहविषां शिखण्डपरिमितत्वन्तु पर्णपुटिकादिना सम्पादनीयम् । तथा कुक्कुटाण्डार्द्रामलकादीनि तु ग्रासपरिमाणानि स्मृत्यन्तरोक्तानि अशक्तविषयाणि शिखण्डपरिमाणाल्लघुत्वात्तेषां, यत्तु नरत्न 'श्वोभूतां पौर्णमासीमुपवसेदिति" चतुर्दश्यामुपवासमभिधाय पौर्णमास्याम्पञ्चदश ग्रासान् भुङ्क्ते इत्यादिना द्वात्रिंशदहरात्मकत्वं चान्द्रायणस्योक्तम् तत्पक्षान्तरप्रदर्शनार्थम् न सार्वत्रिकम् । योगीश्वरादिवचनानुरोधेन त्रिंशदहरात्मकस्य दर्शितत्वात् । यद्येतत्सार्वत्रिकं स्यात्तदा नैरन्तर्य्येण संवत्सरे चान्द्रायणानुष्ठानानुपपत्तिः स्यात् चन्द्रगत्यनुसरणानुपपत्तिश्च । चान्द्रायणान्तरमाह" मिता० । "यथा कथञ्चित् पिण्डानाञ्चत्वारिंशच्छतद्वयम् । मासेनैवोपभुञ्जीत चान्द्रायणमथापरम्" या० । "पिण्डानाञ्चत्वारिंशदधिकं शतद्वयं मासेन भुञ्जीत यथाकथञ्चित् प्रतिदिनं मध्याह्नेऽष्टौ ग्रासान् तथा नक्तन्दिवसयोश्चतुरश्चतुरो वा । अथवैकस्मिंश्चतुरोऽपरस्मिन् द्वादश वा तथैकरात्रमुपोष्यापरस्मिन् षोडशेत्यादि प्रकाराणामन्यतमेन यथारुच्या भुञ्जीतेत्येतत् पूर्वोक्ताच्चान्द्रायणद्वयादपरं चान्द्रायणम् । एतत्तयोर्नैव ग्राससंख्यानियमः । किन्तु तत्र पञ्चाशत्यधिकशतद्वयसंख्यैव । मनुना चैते प्रकारा दर्शिताः "अष्टावष्टौ समश्नीयात् पिण्डान्मध्यन्दिने स्थिते । नियतात्मा हविष्यस्य यतिचान्द्रायणञ्चरन् । चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः । चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणञ्चरन् । यथाकथञ्चित् पिण्डानान्तिस्रोऽशीतीः समाहितः । मासेनाश्नन् हविष्यस्य चन्द्रस्यैति सलोकतामिति । "तथा चत्वारिंशच्छतद्वयान्नसंख्यकग्राससम्पादनस्यापि संग्रहार्थमपरग्रहणम् । यथाह यमः "त्रींस्त्रीन् पिण्डान् समश्नीयान्नियतात्मा दृढव्रतः । हविष्यान्नस्य वै मासमृषिचान्द्रायणं स्मृतमिति" । एतच्च यतिचान्द्रायणप्रभृतिषु न चन्द्रगत्यनुसरणमपेक्षितमतस्त्रिंशदहात्मकमासत्रयकालेन नैरन्तर्य्येण चान्द्रायणानुष्ठाने यदि कथञ्चित्तिथिह्रासवशेन पञ्चम्यादिष्वारम्भो भवति तथापि न दोषः । यदपि सोमायनाख्यं मासव्रतं मार्कण्डेयेनोक्तम् "गोक्षीरं सप्तरात्रन्तु पिबेत् स्तनचतुष्टयात् । स्तनत्रयात्सप्तरात्रं सप्तरात्रं स्तनद्वयात् । स्तनेनैकेन षड्रात्रं त्रिरात्रं वायुभुग्भवेत् । एतत्सोमायनं नाम व्रतं कल्मषनाशनमिति" । तदपि चान्द्रायणधर्म्मकमेव । हारीतेनापि "अथातश्चान्द्रायणमनुक्रमिष्याम इत्यादिना सेतिकर्त्तव्यताकञ्चान्द्रायणमभिधाय" एवं सोमायनमप्यतिदेशस्याभिधानात् । यत्तु नन्दनेन कृष्णचतुर्थीमारभ्य शुक्लद्वादशीपर्य्यन्तं सोमायनमुक्तम् "चतुर्थीप्रभृति चतुःस्तनेन त्रिरात्रं त्रिस्तनेन त्रिरात्रं, द्विस्तनेन त्रिरात्रमेकस्तनेन त्रिरात्रमेवमेकस्तनप्रभृति पुनश्चतुःस्तनान्तं या ते सोम ! चतुर्थी तनूस्तया नः पाहि तस्यै स्वाहा या ते सोम ! पञ्चमी इत्येवं यथार्थमिति होमाः एकमप्याप्तवान् पूतश्चन्द्रमसः सामान्यतां समानलोकतां सायुज्यञ्च गच्छतीति" । चतुर्विंशतिदिनात्मकसोमायनमभिहितन्तदशक्तविषयम्" मिता० ।

प्रायश्चित्तविवेकेऽत्र विशेषोऽभिहितो यथा

"तत्र मनुः । "एकैकं ह्रासयेत् पिण्डं कृष्णे, शुक्ले च वर्द्धयेत् । उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम् । एवमेव विधिं कृत्स्नमाचरेद्यवमध्यमे । शुक्लपक्षादिनियतश्चरेच्चान्द्रायणं व्रतम् । अष्टावष्टौ समश्नीयात् पिण्डान्मध्यन्दिने स्थिते । नियतात्मा हविष्याशी यतिचान्द्रायणञ्चरन् । चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः । चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं स्मृतम् । यथा कथञ्चित् पिण्डानां तिस्रोऽशीतीः समाहितः । मासेनाश्नन् हविष्यस्य चन्द्रस्यैति सलोकताम्" । एतत्पञ्चविधं चान्द्रायणं पिपीलिकातनुमध्यं यवमध्यं यतिचान्द्रायणं सर्व्वतोमुखं शिशुचान्द्रञ्च । अत्राह जावालः । "पिपीलिकं यवमध्यं यतिचान्द्रायणन्तथा । चान्द्रायणं तथा ज्ञेयं चतुर्थं सर्व्वतोमुखम् । पञ्चमं शिशुचान्द्रञ्च तत्त्वं पुण्यफलोदयम्" । कृष्णप्रतिपदमारभ्य मासमेकं यदा क्रियते तदा पिपीलिकामध्यं भवति । शुक्लप्रतिपदारम्भे यवमध्यम् । उभयत्रामावास्यायामभोजनम् । कृष्णप्रतिपदि चतुर्द्दशग्रासभोजनारम्भे ह्रासक्रमेण चतुर्द्दश्यामेकोग्रासः अमावास्यायामभोजनमेव प्राप्नोति । तथाच वशिष्ठः "मासस्य कृष्णपक्षादौ ग्रासानद्याच्चतुर्द्दश" । नन्वेवं क्रमेण पञ्चविंशत्युत्तरग्रासशतद्वयं स्यात् । न चत्वारिंशदुग्रासाधिकशतद्वयं तच्च याज्ञवल्क्येनोक्तम् "यथा कथञ्चित् पिण्डानां चत्वारिंशच्छतद्वयम्" । इति "यथा कथञ्चित् पिण्डानां तिस्रोऽशीतीः समाहितः" इति मनुनाप्युक्तम् । उच्यते । संयमदिवसे पौर्णमास्याममावास्यायां वा पञ्चदशग्रासभोजनेन संख्यापूरणसम्भवात् । अथ वा पञ्चदश्यादिकमेवेदं व्रतं न प्रति-

पदादिकं चतुर्द्दश्यामेव व्रतसङ्कल्पः यथाह गौतमः "पौर्णमास्यां पञ्चदश ग्रासान् भुक्त्वा एकैकापचयेनापरपक्षमश्नीयात् अमावास्यायामुपोष्य एकैकोपचयेन पूर्व्वपक्षं विपरीतमेकेषाम्"। शङ्खलिखितौ "अमावास्यां व्रतोपायनं यवमध्यम्। अमावास्यायां पञ्चदश पिण्डानश्नीयात्"। उपायनमारम्भः। युक्तञ्चेदम् "अमावास्यामुपोष्य पञ्चदशकलात्मकस्य चन्द्रमसः सूर्य्यप्रविष्टत्वात् अत एकैककलानिर्गमस्य प्रतिपदादिषु वृद्धिशब्दवाच्यत्वात्। जाबालः "एकैकं वर्द्धयेद्ग्रासं शुक्ले कृष्णे च ह्रासयेत्। अमावास्यां न भुञ्जीत यवमध्यं चरन् द्विजः। एकैकं ह्रासयेत् पिण्डं कृष्णे, शुक्ले च वर्द्धयेत्। पौर्णमास्यां न भुञ्जीत पिपीलितनुमध्यमम्"। अत्र कल्पतरुव्याख्यानम् "एकैकं ह्रासयेदिति कृष्णप्रतिपदि पञ्चदश ग्रासानारभ्य एकैकापचयेनामावास्यायामेकोग्रासः तदनन्तरं शुक्लप्रतिपदि द्वौ ग्रासावेवं वृद्धिक्रमेण चतुर्दश्यां पञ्चदश ग्रासाः सम्पद्यन्ते पौर्णमास्यां चोपवासइति पिपीलिकतनुमध्यं चान्द्रायणम्। एवं यवमध्ये शुक्लप्रतिपदि एकोग्रासः एवमेकैकोपचयने पूर्णिमायां पञ्चदश ग्रासाः कृष्णप्रतिपदि चतुर्द्दश ग्रासा एवमेकैकापचयेन अमावस्यायामुपवासः"। कश्चिच्चान्द्रायणमाह यमः "त्रींस्त्रीन् पिण्डान् समश्नीयान्नियतात्मा दृढव्रतः। हविष्यान्नस्य वै मासमृषिचान्द्रायणं स्मृतम्"। अत्र चत्वारिंशच्छतद्वयसंख्या नास्ति। ग्रासपरिमाणमाह पराशरः। "कुक्कुटाण्डप्रमाणन्तु यावान् वा प्रविशेन्मुखम्। एतं ग्रासं विजानीयाच्छुद्ध्यर्थं कायशोधनम्"। सकलचान्द्रायण एव चतुर्दश्यामुपवासं कृत्वा अपरदिने पञ्चदश्यां संयमः कार्य्यः तत्फलमाह। बौधायनः। "शुक्लाञ्चैव चतुर्दशीमुपवसेत् कृष्णां चतुर्दशीं वा केशश्मश्रुनखरोमाणि वापयित्वा" इत्यभिधाय त्रिषवणस्नानादिहोमं प्रत्यहमुक्तवान् विस्तरभयान्न लिखितम्"।

"एकमाप्त्वा विपापोविपाप्मा सर्व्वमेनोहन्ति द्वितीयमाप्त्वा सपूर्व्वान् दशापरानात्मानञ्चैकविंशं पङ्क्तिञ्च पुनाति संवत्सरञ्चाप्त्वा चन्द्रमसः सलोकतामाप्नोतीति" गौतमः। एवञ्च सर्वविधचान्द्रायणे चान्द्रस्य चन्द्रसम्बन्धिनो लोकस्यायनं यस्मादिति व्युत्पत्तिरभिधेयम्। अस्य पुंस्त्वमपि "एष चान्द्रायणोविधिः" प्रायुक्तश्रुतेः अत्र तस्येदमित्यर्थेऽपि तत्र चान्द्रायणशब्दस्य तत्सम्बन्धिवाचकत्वात् पुंस्त्वमित्यन्ये। चान्द्रायणव्रताशक्तौ तत्प्रत्याम्नायधेनुमूल्याद्युक्तं प्रा० वि० आपस्तम्बः "कापालिकान्नभोक्तॄणां तन्नारीगामिनां तथा। ज्ञानात् कृच्छ्राब्दमुद्दिष्टमज्ञानादैन्दवद्वयम्" तथा रजकाद्यन्त्यजाधिकारे यमः "भुक्त्वा चैषां स्त्रियो गत्वा पीत्वापः प्रतिगृह्य च। कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम्"। ज्ञानतः कृच्छ्राब्दं त्रिंशद्धेनुदानसमानं विधायाज्ञाने तदर्द्धं चान्द्रायणद्वयं विदधाति। तेन चान्द्रायणद्वये पञ्चदश धेनवः अर्थादेकस्मिंश्चान्द्रायणे सार्द्धसप्तधेनवः। यत्रैकमेव चान्द्रायणं तत्रार्द्धधेनोरसम्भवार्द्धेन्वष्टकं देयम्। शिशुचान्द्रायणे तु पादोनधेनुचतुष्टयम्। यतोऽत्र प्रात्यहिकाष्टग्रासपरिमाणेन मासैकेन चत्वारिंशदुत्तरग्रासशतद्वयेन द्वात्रिंशद्गृहस्थस्येति व्यवस्थया सार्द्धसप्तदिनभोजनं पर्य्यवस्यति सार्द्धद्वाविंशतिश्चोपवासाः पर्य्यवस्यन्ति। अतः सङ्कलनया पादोनप्राजापत्यचतुष्टयं स्यात्। यद्यपि यवमध्यपिपीलिकतनुमध्यचान्द्रायणयोरप्येतावन्त एव ग्रासास्तथापि वचनात् तुष्टिवृद्ध्युपवासैः क्लेशातिशयाच्च सार्द्धसप्त धेनवः। अत्र तु तदभावान्न्यायाच्च पादोनधेनुचतुष्टयमेव। एवं यतिचान्द्रायणसर्व्वतोमुखचान्द्रायणर्षिचान्द्रायणेषु बोध्यम्" प्रा० वि०।

मिताक्षरायां विशेष उक्तो यथा

"चान्द्रायणविषयभूतेषु पुनरुपपातकेषु प्राजापत्यत्रयं तदशक्तस्य प्रत्याम्नायस्तावानेव। यत्तु नवचतुर्विंशति मतेऽभिहितम् "अष्टौ चान्द्रायणे देयाः प्रत्याम्नाय विधौ सदेति" तदतिधनिनः पिपीलिकामध्यादिचान्द्रायणप्रत्याम्नायविषयम्। मासातिकृच्छ्रविषयभूते पुनरुपपातके सार्द्धसप्तप्राजापत्याः प्रत्याम्नायाश्च धेन्वादयस्तावन्त एव। यच्च चान्द्रायणस्यापि तत्रैव प्रत्याम्नानमुक्तम्। "चान्द्रायणं मृगारेष्टिः पवित्रेष्टिस्तथैव च। मित्रविन्दापशुश्चैव कृच्छ्रमासव्रतस्तथा। नित्यनैमित्तिकानाञ्च काम्यानाञ्चैव कर्म्मणाम्। इष्टीनामपशुबन्धानामभावे चरवः स्मृताः" इति। तदपि चान्द्रायणाशक्तस्य। यत्तु कृच्छ्रमासव्रतस्तथेति कृच्छ्राष्टकप्रत्याम्नानम्। तदतिजठरमूर्खविषयम्। "चान्द्रायणस्त्रिभिः कृच्छ्रैरिति दर्शितत्वादित्यलमतिप्रपञ्चेन।" ऐन्दवादयोऽप्यत्र।

चान्द्रायणिक त्रि० चान्द्रायणमावर्त्तयति ठञ्। चान्द्रायणव्रतानुष्ठायिनि राजनि०।

चान्द्री स्त्री चन्द्रस्येयम् अण् । १चन्द्रपत्न्यां २ज्योत्स्नायाञ्च । तत्तुल्यशुभ्रत्वात् ३श्वेतकण्टकार्य्याञ्च राजनि० । ४चन्द्रसम्बन्धिन्यां स्त्रियां चान्द्रशब्दे उदा० ।

चाप पु० चपस्य वंशभेदस्य विकारः अण् । १धनुषि, अमरः मेषावधिके २नवमे राशौ च "वृक्षगुल्मावृते चापैरसिचर्मायुधैः स्थले" मनुः । "स चापमुत्सृज्य विवृद्धमत्सरः" रघुः । "कश्चायमसितश्चापः पञ्चशार्दूललक्षणः" भा० वि० ४२अ० । ३वृत्तक्षेत्रार्द्धे "दलीकृतं चक्रमुशन्ति चापम् कोदण्डखण्डं खलु तूर्य्यगोलम्" सि० शि० । ज्याभेदेन चापभेदानयनं च लीला० दर्शित० तच्च वाक्यं क्षेत्रशब्दे २४०४ दर्शितम् । [शब्दार्थचि० ।

चापपट पु० चापस्यावयवइव पटः पत्नमस्य । पियालवृक्षे

चापल न० चपलस्य भावः कर्म्म वा अण् । अविमृष्यकारितारूपे प्रयोजनं विनाऽपि पाण्यादेश्चालनरूपे वा १चपलकर्म्मणि चपलशब्दे उदा० "मात्सर्य्यद्वेषरागादेश्चापलं त्वनवस्थितिः" सा०द० २उक्तलक्षणे नवस्थाने च । ष्यञ् । चापल्यमप्यत्र ।

चापिन् पु० चापोऽस्त्यस्य इनि । १धनुर्द्धारिणि योधभेदे । २शिवे पु० । "त्वं गदी त्वं शरी चापी खट्वाङ्गी झर्झरी तथा" भा०शा०२८६अ० । दक्षकृतशिवस्तुतौ ३धनूराशौ च । "चापी नरोऽश्वजनो मकरो मृगास्यः" ज्यो०त०

चाफट्टि पुंस्त्री चफट्टेरपत्यम् इञ् । चफट्टेरपत्ये स्त्रियां ङीप् । यूनि—तौल्वला० फक् तस्य न लुक् । चाफट्टायनि यूनि तदपत्ये स्त्रियां ङीप् ।

चामर पुंन० चमर्य्याः विकारः तत्पुच्छनिर्म्मितत्वात् । चमरीपुच्छकृतव्यजने अमरः । चामरलक्षणादिकमुक्तं युक्तिकल्पतरौ यथा

"अथ चामरोद्देशः । "हस्तद्वयोन्नतः शुक्लः सुवर्णवलिभूषितः । हीरेणालङ्कृतो राज्ञां भव्यमानसुखप्रदः । वलेश्चामरदैर्घ्याद्वा आयामत्वं प्रकाशितम् । भव्यो भद्रो जयः शीलः सुखः सिद्धवलः स्थिरः । वितस्त्येकैकसंवृद्ध्या दिनेशादिदिशां भुवाम् । सौवर्णं राजतं युग्मं त्वैशाना महीभुजाम् । योजयेदिति निश्चित्य बलिकम्पनकर्म्मणि । स्थलजं जाङ्गलो राजा आनूपो जलजं वहेत् । हीरस्य पद्मरागस्य वैदूर्य्यं नीलएव च । मणिर्वलिषु योक्तव्यो ब्रह्मादीनां यथाक्रमम् । शुक्लो रक्तोऽथ पीतश्च नानावर्णो यथाक्रमम् । चामरो राजकेशस्य न सामान्यस्य भूपतेः । न भव्यमानतो नूनं चामरं शुभमावहेत्" । अथ चामरपरीक्षा । "स्थलजं जलजं चेति चामरं द्विविधं विदुः । मेरौ हिमालये विन्ध्ये कैलासे मलये तथा । उदयेऽस्तगिरौ चैव गन्धमादनपर्व्वते । एवमेतेषु शैलेषु याश्चमर्य्यो भवन्ति हि । तासां बालस्य जायेत चामरेत्यभिधा भुवि । आपीताः कनकाद्रिजा हिमगिरेः शुभ्रा मता विन्ध्यजाः कैलासादसिताः सिता मलयजाः शुक्लास्तथा पिङ्गलाः । आरक्ता उदयोद्भवाश्चमरजा आनीलशुक्लत्विषः कृष्णाः केचन गन्धमादनभवाः पाण्डुत्विषश्चामराः । अन्येषु प्रायशः कृष्णाश्चामराः सम्भवन्ति हि । ब्रह्मक्षत्रियविट्शूद्रजातय स्ताश्चतुर्व्विधाः । चमर्य्यः पर्व्वतोद्भूता यथापूर्व्वं गुणावहाः । दीर्घबालाः सुलघवः स्निग्धाङ्गाश्चापि कोमलाः । विरलास्तनुपर्व्वाणश्चमर्य्यो ब्रह्मजातयः । विना संस्कारमप्यासां चामरं विमलं भवेत् । दीर्घबालाः सुगुरवः क्षत्रियास्तु भृशं घनाः । विज्ञेया स्थूलपर्व्वाणश्चमर्य्यो वैश्यजातयः । संस्कारे चाप्यसंस्कारे न स्वभावं त्यजेदिदम् । खर्व्वबालाः सुलघवः कोमलाङ्गाः भृशं घनाः । चमर्य्यस्तनुपर्व्वाणो विज्ञेयाः शूद्रजातयः । संस्कारेणापि मलिनमासां चामरमिष्यते । दीर्घता लघुता चैव स्वच्छता घनता तथा । गुणाश्चत्वार इत्येते चामराणां प्रकीर्त्तिताः । खर्व्वता गुरुता चैव वैवर्ण्यं मलिनाङ्गता । दोषाश्चत्वार इत्येते चामराणां प्रकीर्त्तिताः । दीर्घे दीर्घायुराप्नोति लघौ भीतिविनाशनम् । स्वच्छे स्याद्धनकीर्त्तिभ्यां घने स्युः स्थिरसम्पदः । खर्वे खर्वायुरुद्दिष्टं गुरुर्गुरुभयप्रदः । विरले रोगशोकाभ्यां मलिने मृत्युमादिशेत्" । इति स्थलजम् । अथ जलजम् । "लवणेक्षुसुरासर्पिर्दधितोयपयोऽब्धिषु । यथोत्तरं गुणवहाश्चमर्य्यः सप्त सप्तसु । पुच्छानि तासां कृत्तानि जन्तुभिर्मकरादिभिः । कदाचिदुपलभ्यन्ते तत्तीरे पुण्यशालिभिः । लवणाब्धिसमुद्भूतं पीतं गुरु तथा लघु । वह्नौ क्षिप्तश्च वालश्चेत् किञ्चित् चटचटायते । इक्षुसिन्धूद्भवं ताम्रं चामरं विमलं लघु । मक्षिका मशकाश्चैव तस्मिन् व्यजति चामरे । सुराब्धिजातं कलुषं कर्बूरं पुरुकर्कशम् । तद्गन्धेनैव माद्यन्ति अपि दृष्ट्वा मतङ्गजाः । सर्पिःसिन्धुभवं स्निग्धं श्वेतापीतं घनं लघु । वायुरोगाः प्रशाम्यन्ति तस्य वीजनवायुना । जल-

सिन्धूद्भवं पाण्डु दीर्घं लघु घनं महत्। अस्य वातेन नश्यन्तु तृष्णामूर्च्छामदोभ्रमः। नारिष्टं न भयं तस्य यस्येदं चामरं गृहे। क्षीरोदसम्भवं श्वेतं दीर्घं लघु घनं महत्। अस्य चामरवातस्य विज्ञेयो गुणविस्तरः। नाल्पेन तपसा लभ्यो देवानामपि जायते। ह्रियतेऽभ्यन्तरे सिन्धोर्नागैः सम्पत्तिलोलुपैः। एषां पूर्ववदुन्नेयं जातिदोषगुणादिकम्। स्थलजे जलजे चैव भाव्यमेतद्विशेषणम्। स्थलजं सुखदं ह्यत्र हि दाहे मिषमिषायते। जलजं वह्निदं ह्यत्र महान्तं धूममुद्गिरेत्। चामराणां समुद्दिष्टमित्येवं लक्षणद्वयम्। एवं विस्तृत्य यो धत्ते स राजा सुखमश्नुते। जलजं चामरं राजा यो धत्ते जाङ्गलेश्वरः। तस्याचिरात् कुलं वीर्यं लक्ष्मीरायुश्च नश्यति। आनूपाधीश्वरो राजा यो वहेत् स्थलजं तथा। तस्य तानि विनश्यन्ति लक्ष्मीरायुर्यशो बलम्। नालं वर्णद्वये तेषां विधेयं शिल्पिना क्रमात्। संस्कारो वालुकायन्त्रे मस्तुरसलिलादिभिः। तदुष्णसलिलक्वाथात् कलिमत्वं विपद्यते"।

"सचामारे देवमसेविषाताम्" कुमा०। "गच्छन्तमुच्चलितचामरचारुमश्वम्" माघः। "शशिप्रभं छत्रमुभे च चामरे" रघुः। अस्य स्त्रीत्वमपि वा ङीप्। तत्रार्थे भरतः।

चामरग्राह त्रि० चामरं गृह्णाति ग्रह–अण् उप० स०। चामरेण वीजनकर्त्तरि स्त्रियां टाप् मुग्धबोधमते षण् ङीप् इति भेदः। ततः रेवत्या० अपत्ये ठक्। चामरग्राहिक तदपत्ये पुंस्त्री। णिनि चामरग्राहिन् तत्रार्थे त्रि० स्त्रियां ङीप्।

चामरपुष्प(क) पु० चामरमिव पुष्पमस्य। १क्रमुके, २काशे, ३केतके ४आम्रे च मेदि० एषां चामरतुल्यगुच्छवत्त्वात् तथात्वम्। वा कप्। तत्रार्थे जटा०।

चामरिन् पुंस्त्री चामरमिव केशरोऽस्त्यस्य इनि। १घोटके जटाध०। २चामरयुक्तमात्रे त्रि० स्त्रियां ङीप्।

चामीकर न० चमीकरे स्वर्णाकरभेदे भवम् अण्। १स्वर्णे २धूस्तूरे च अमरः। "जगतीरिह स्फुरितचारुचामीकराः" माघः। तस्य विकारः अण्। ३स्वर्णमये त्रि० "सशब्दचामीकरकिङ्किणीकः" कुमा०। अस्योत्पत्त्यादिकं कनकशब्दे १६४४ पृ० उक्तम्।

चामुण्डा स्त्री "यस्माच्चण्डं च मुण्डञ्च गृहीत्वा त्वमुपागता। चामुण्डेति ततो लोके ख्याता देवी भविष्यसि" देवीमा० निरुक्तनामके देवीभेदे। २परब्रह्मणः समष्टिरूपशक्तिभेदे ३ब्रह्मविद्यायाञ्च गुप्तवती। तत्र (ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे) इति चण्डिकानवार्णार्थनिर्णये उक्तं यथा।

"निर्धूतनिखिलध्वान्ते! नित्यमुक्ते। परात्परे!। अखण्डब्रह्मविद्यायै चित्सदानन्दरूपिणि!। अनुसन्दध्महे नित्यं वयं त्वां हृदयाम्बुजे। इत्थं विज्ञापयत्येषा या कल्याणी नवाक्षरी। अस्या महिमलेशोऽपि गदितुं केन शक्यते। बहूनां जन्मनामन्ते प्राप्यते भाग्यगौरवात्। एनमर्थं गुरोर्लब्ध्वा तस्मै दत्त्वा च दक्षिणाम्। आशिषञ्च परां लब्ध्वा मन्त्रसिद्धिमवाप्नुयादित्यादि"। अत्र प्रथमश्लोके संबुद्धित्रयं ततश्चतुर्थ्यन्तं ततः पुनः संबुद्धित्रयमिति सप्तभिः पदैः क्रमेण मन्त्रे सप्तधा परिच्छेदः। पदानां तत्तद्विभक्त्यन्तता तत्तदर्थस्येति कथितं तदुत्तरपद्यार्द्धेनाकाङ्क्षितपदानामध्याहार उक्तः। इतरत् स्पष्टम्। सच्चिदानन्दात्मकपरब्रह्मधर्म्मत्वाद्देवशक्तेरपि त्रिरूपत्वम्। तत्र ज्ञानेचिद्रूपा महासरस्वती वाग्वीजेन (ऐँ) सम्बोध्यते। ज्ञानैवाज्ञाननाशात् निर्धूतनिखिलध्वान्तपदेन तद्विवरणम् युक्तमेव। नित्यत्वं त्रिकालाबाध्यत्वम्। अतएव मुक्तत्वं कल्पितवियदादिप्रपञ्चनिरासाधिष्ठानत्वम्। एतेन सद्रूपात्मकलक्ष्मीरूपस्य हृल्लेखया (ह्रीँ) सम्बोधनमिति व्याख्यातम्। पर उत्कृष्टः सर्वानुभवसंवेद्य आनन्द एव तस्यैव पुरुषार्थत्वात्। "आत्मनः कामाय सर्वं प्रियं भवतीति" श्रुत्या तदितरेषामपि तदर्थत्वेनानन्दस्यैव सर्वशेषितया परत्वात्। स च मानुषानन्दमारभ्योत्तरोत्तरं शतगुणाधिक्येन श्रुतौ बहुशो वर्णितः "तेषु परमातिशायी स एको ब्रह्मण आनन्द" इति परमावधित्वेनाम्नातएव परात्परः "स्वात्मानन्दलवीभूतब्रह्माद्यानन्दसन्ततिः" इति पुराणं च तेन आनन्दप्रधानमहाकालीस्वरूपस्य कामवीजेन (क्लीँ) सम्बोधनमुक्तम्। चामुण्डाशब्दो हि मोक्षकारणीभूतनिर्विकल्पकवृत्तिविशेषपरः तादर्थ्ये चतुर्थी चमूं सेनां वियदादिसमूहरूपां लाति लडयोरैक्यात्मानि आदत्ते स्वात्मसाक्षात्कारेण नाशयतीति व्युत्पत्तेः। पृषोदरादित्वात्सर्वं साधु" इत्याहुः। "मया तवात्रोपहृतौ चण्डमुण्डौ महासुरौ" इति पद्ये द्विवचनयोः स्वारस्येन तूलमूलभेदेनाज्ञानद्वयपरत्वम् "यस्माच्चण्डं च मुण्डञ्च गृहीत्वा त्वमुपागता।

चामुण्डेति ततो लोके ख्याता देवी भविष्यतीति" पद्योऽपि तत्तन्मूलाविद्यापरताऽवसेया इति रहस्यम्। विच्चे इति। वित् च, इ, इति पदत्रयात्मकं बीजक्रमेणोक्तानाञ्चित्सदानन्दानां वाचकं सम्बुध्यन्तं अस्य स्त्री ई इत्यस्य ह्रस्वे इ इति हे आनन्दमयब्रह्ममहिषि इत्यर्थः। चित्पदं ज्ञानपरम्प्रसिद्धमेव चकारोऽपि नपुंसकः सन् सत्यपर इति योज्यम् अनुसन्दध्महइत्यादिः शेषः। इत्यञ्च महासरस्वत्यादिरूपेण चिदादिरूपे! चण्डिके त्वाम्ब्रह्मविद्याप्राप्त्यर्थं वयं सर्व्वदा ध्यायेम इतिमन्त्रार्थः फलितः। तस्यायं सङ्ग्रहः "महासरस्वति चिंते! महालक्ष्मि! सदात्मिके!। महाकालि आनन्दरूपे! तत्त्वज्ञानप्रसिद्धये। अनुसन्दध्महे चण्डि! वयन्त्वां हृदयाम्बुजे" इति। यद्यपि श्रीमत्येव बीजम्महालक्ष्म्याःप्रसिद्धम्। न ह्सौः खा (ह्रां)। तथापि हकारशकारयोरूष्मवर्णत्वेन साजात्यान्नातीव भेदः। अतएव "श्रीश्च ते लक्ष्मीश्च ते पत्न्याविति" श्रुतौ शाखान्तरे श्रीपदस्थाने ह्रीपदपाठः। एवं कामबीज एव लकारस्य स्थाने रेफयोजनेन कालीबीजता रलयोश्चान्त्यस्थत्वेनैक्यान्नात्यन्तं भेदः। तन्त्रान्तरेषु तु कालीसरस्वत्योर्वास्तविकभेदमभिप्रेत्य बीजयोर्वैपरीत्यव्यवहारोऽपि दृश्यत इति द्रष्टव्यम्। अयं चार्थः प्राचीनैर्वर्णितप्राय एव सम्यक्परिष्कृत्योक्तः। वस्तुतस्तु लक्षणविरोधस्य छान्दसत्वेन पृषोदरादिपाठकल्पनया च समाधानस्याविवादादन्योऽपि प्रकारः सुवचः। चमु अदने इति धातोः उण् चामुरदनीयः पदार्थः स च ब्रह्मातिरिक्तः सर्वोऽपि "अत्ता चराचरग्रहणात्" इत्यधिकरणे तथा निर्णयात् तण्डापयति उड्डापयति न विषयीकुरुते ब्रह्ममात्रविषयिणीति यावत्। अथवा चकार एकाक्षरनिघण्टुरीत्या चन्द्रवाचक आह्लादप्रकाशगुणयोगादिह ज्ञानपर आनन्दपरो वा सन् ब्रह्मैव वक्ति। तत् आसमन्तान्मुण्डयतीति चामुण्डा मुण्डनं नामाधारापेक्षया न्यूनसत्ताकवस्तुनिरासः शिरस्सापेक्षया न्यूनसत्तावतामेव केशानां वपने प्रयोगात्। गौड़पादीयभाष्ये तु शरीरराहित्यलक्षणम् मुण्डनं मुण्डकोपनिषदि प्रोक्तं अथवा। चानाम्बुद्धानां सुखानां वा मुण्डमिव शीर्षमिव स्थिता सर्वोत्तमा चरमवृत्तिरूपा ब्रह्मविद्येति यावत्। अथ चण्डिकारूपदेवतापरएव चामुण्डाशब्दः। अत एव मन्त्रान्ते वह्निजाया योजनेन होमे चामुण्डाया इदमित्येव त्यागो विधिशब्दस्य मन्त्रत्वे इत्यधिकरणन्यायसिद्धो युज्यते। चतुर्थीवलाच्च नमःशब्दस्यैवाध्याहारः। बीजत्रयमव्ययरूपं चतुर्थ्यन्तमेव व्यष्टिदेवतात्रयवाचकमभेदद्योतकं तद्विशेषणम् विच्चे इत्यपखण्डमव्ययं स्वरादेराकृतिगणत्वात्। मन्त्रस्य पदखण्डशो न्यासप्रकरणेऽस्य युगलस्य विभजनं विनैव न्यासविधानात्। भगमालिनीनित्यामन्त्रादिषु बहुषु तस्य प्रयोगसत्त्वेन तत्रोक्तार्थरीत्या निर्वाहाभावाच्च ततश्च हे अम्ब बन्धनकरणीभूतामिमां रज्जुं ग्रन्थिविसर्जनादिना मोचयेति। स्त्रीसम्बोध्यकमोक्षप्रार्थनारूपो विशिष्टस्तदर्थः। यदापि दक्षिणामूर्त्तिसंहितायां भगमालिनीमन्त्रस्य देवतागणनावसरे "अमोघां चैव विच्चाञ्च तथेशीं क्लिन्नदेवतामिति" पाठाद्विच्चानामिका काचिद्देवतैवेत्यालोच्यते तदापि परिकरालङ्कारेण साभिप्रायं चामुण्डाविशेषणम्"।

चाम्पिला स्त्री चपि—भावे अङ् चम्पैव चाम्पा ततः अस्त्यर्थे इलच्। चम्पानद्याम् त्रिका०।

चाम्पेय न० चम्पायां नद्यां जम्बुनद्यां भवं ढक्। १स्वर्णे २धुस्तूरे च अमरः। ३चम्पके ४नागकेशरे च पु० किञ्जल्के न० स्वार्थे क तत्रार्थे राजनि०। तत्र स्वर्णे "मणिमाणिक्यचाम्पेयदुकूलेभाश्वगोधनम्" काशी० ख० २४अ०। ५चम्पायां भवे त्रि०। ६विश्वामित्रात्मजभेदे पु० "अवालिनीचिकस्यैव चाम्पेयोज्जयनौ तथा" भा० आ० ४अ०। विश्वामित्रात्मजोक्तौ।

चाय निशाने (चाक्षुषज्ञाने) पूजने च सक० उभ० सेट्। चायति ते आचायीत् अचासीत् अचायिष्ट अचास्त [illegible]दित्। अचचायत् त। "तं पर्व्वतीया प्रमदाश्चचायिरे" माघः। "अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते" कठोप०। यङि चेकीयते। चायश्चिभावः। अपचितिः अपचितः।

चाय त्रि० चयस्य विकारः ताला० अण्। चयमये स्त्रियां ङीप्।

चायनीय त्रि० चाय—कर्मणि अनीयर्। पूजनीये "उपस्तच्चित्रमा भरास्मभ्यम्" इत्यस्यामृचि चित्रशब्दनिरुक्तौ "चित्रं चायनीयं महनीयमिति" निरुक्तकारः १२।६।

चायमान पु० चयमानस्य राज्ञोऽपत्यम् शिवा० अण्। १चयमानन्नृपापत्ये। "अभ्यावर्त्ती चायमानो ददाति" ऋ० ६।२८।८। "चायमानश्चयमानस्य नृपस्य पुत्रः" भा०। चाय—शानच्। २पूजयति ३पश्यति च त्रि०

चायु त्रि० चाय–उण् । पूजके । "यज्ञेषु यत्र चायवः" ऋ० १।२४।४। "चायवः पूजकाः" भा० ।

चार पु० चरएव अण् । १प्रणिधौ गुप्तचरे "चारैश्चानेकसंस्थानैः प्रोत्साद्य वशमानयेत्" "तस्करप्रतिषेधार्थं चारैश्चाप्यनुचारयेत्" "उपगृह्यास्पदञ्चैव चारान् सम्यग्विधाय च"—इति च मनुः । २प्रियालवृक्षे (पियाशाल) मेदि० ३कारागारे हेम० चर–भावे घञ् ४गतौ गोप्रचारः ग्रहचारः "चारोदयाः प्रशस्ताः श्रवणमघादित्यमूलहस्तेषु" वृ० स० ६अ० "भगणार्धेमान्तरितो गृह्णाति कथं नियतचारः" ५अ० । कार्य्यभेदे दूतनियोगादिकं कालिकापु० ८५अ० उक्तं यथा । "कृषिर्गोरक्ष वाणिज्यं खल्यानां करसाधनम् । आदानं सैन्यकरयोर्बन्धनं गजवाजिनोः । शून्यशप्रसुखामाञ्च भोजनं सततं जनैः । प्रजानां सारसेतूनां बन्धनं चेति चाष्टमम् । एतदष्टासु वर्गेषु चारान् सम्यक् प्रयोजयेत् । कार्य्याकार्य्यविभागाय चाष्टवर्गाधिकारिणाम् । अष्टौ चारान् नियुञ्जीयादष्टवर्गेषु पार्थिवः । दशस्वन्येषु युञ्जीत क्रमशः शृणु तानि मे । स्वामी सचिवराष्ट्राणि मित्रं कोषो बलं तथा । दुर्गन्तु सप्तमं ज्ञेयं राज्याङ्गं गुरुभाषितम् । दुर्गयुक्तं ष्टवर्गे चारं नात्मनि योजयेत् । तस्मादिमानि शेषाणि पञ्च चारपदानि तु । शुद्धान्तेष्वेव पुत्रेषु स्वक्पूपादौ महानसे । शत्रूदासीनयोश्चैव बलाबलविनिश्चये । आदौ दशसु चैतेषु चारान् राजा प्रयोजयेत् । न यत् प्रकाशं जानीयात् तत्तु चारैर्निरूपयेत् । निरूप्य तत्प्रतीकारमथवात्र क्षिप्रतश्चरेत् । यथानियोगमेतेषां यो यो यत्नान्यथा चरेत् । ज्ञात्वा तत्र नृपश्चारैर्दण्डयेद्वा नियोजयेत् । चारांस्तु मन्त्रिणा सार्द्धं रहस्ये संस्थितो नृपः । प्रदोषसमये पृच्छेत्तदानीमेव साधयेत् । स्वपुत्रे चाथ शुद्धान्ते ये तु चारा महानसे । नियुक्तांस्तान् मध्यरात्रे पृच्छेत् यश्चापि मन्त्रिणि । एतान् चारान् स्वयं पश्येत् नृपतिर्मन्त्रिणा विना । अन्यांश्च मन्त्रिणा सार्द्धं निरूप्य प्रदिशेत् फलम् । नैकवेशधरश्चारो नैको नोत्साहवर्ज्जितः । संस्तुतो नहि सर्वत्र नातिदीर्घो न वामनः । सततं न स्त्रीचारी न रोगी नाप्यबुद्धिमान् । न वित्तविभवैर्हीनो न भार्य्यापुत्रवर्ज्जितः । कार्य्यश्चारो नृपतिना सुहृत्तत्त्वविनिर्णये । अनेकवेशग्रहणक्षमं भार्य्यासुतैर्युतम् । बहुदेशवचोभिज्ञं पराभिप्रायवेदकम् । दृढभक्तं प्रकुर्वीत चारं शक्तमसाध्वसम् । अधितिष्ठेत् स्वयं राजा कृषिमात्मसमैस्तथा । वणिक्पथे च दुर्गादौ तेषु शक्तान्नियोजयेत् । अन्तःपुरे पितृस्तुल्यान् धीरान् वृद्धान् नियोजयेत् । षण्डान् षण्डान् तथा वृद्धान् स्त्रियो या बुद्धितत्पराः । शुद्धान्तद्वारि युञ्जीयात् स्त्रियो बुद्धिमनीषिणीः" । चरेण चरणेन निर्वृत्तम् अण् । ५कृत्रिमविषे—न० हेमच० ।

चारक त्रि० चारयति चर–णिच्–ण्वुल् । गवादीनां तृणादिषु गमयितरि १पशुपालके मेदि० चार–स्वार्थे क । २बन्धे ३गतौ च । ४प्रियालवृक्षे राजनि० । ५कारागारे । हेम० । "निगडितचरणा चारके निरोद्धव्या" दशकु० ।

चारकीण त्रि० चरकाय हितम् खञ् । चरकहिते ।

चारचक्षुस् पु० चारश्चक्षुरस्य । नृपे । "यस्मात् पश्यन्ति दूरस्थाः सर्वानर्थान्नराधिपाः । चारेण तस्मादुच्यन्ते राजानश्चारचक्षुषः,, रामा० २ । २७ । "प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः" मनुः "गावः पश्यन्ति गन्धेन वेदैः पश्यन्ति च द्विजाः । चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः" नीतिसा० । "स्वपरमण्डलकार्य्यावलोकने चाराश्चक्षूंषि क्षितिपालानामिति" नीतिवाक्यामृतम् ।

चारटिका स्त्री चर–णिच् शकादि० अट् संज्ञायां कन् अतइत्त्वम् । नलीनामगन्धद्रव्ये राजनि० ।

चारटी स्त्री चर–णिच्–शकादि० अटन् गौरा० ङीष् । १पद्मचारिणीवृक्षे अमरः । २भूम्यालक्यां राजनि० ।

चारण पु० चारयति कीर्त्तिं चर–णिच्–ल्यु । कीर्त्तिसञ्चारके नटे अमरः । "चाटचारणदासेषु दत्तं भवति निष्फलम्" स्मृतिः । "गन्धर्वाणां ततो लोकः परतः शतयोजनात् । देवानां गायनास्ते च चारणाः स्तुतिपाठकाः" पद्म० पु० स्व० ख० । [राजपथे हेम० ।

चारपथ पु० चारार्थः बहुजनगत्यर्थः पन्थाः अच् समा० ।

चारभट पु० चारे बुद्धिसञ्चारे भटः । धीरे हेम० ।

चारमिक त्रि० चरममधीते वसन्ता० ठक् । ग्रन्थसमाप्तिपर्य्यन्ताध्यायिनि । [पञ्जे वायौ त्रिका० ।

चारवायु पु० चारेण रवेरुदग्गतिभेदेन कृतो वायुः । निदा-

चारायण पुंस्त्री चरस्य गोत्रापत्यम् नडा० फक् । चरगोत्रापत्ये । तेषां छात्रः अण् "वृद्धाच्छः" पा० छ ।

चारायणीय तच्छात्रे। चारायणेभ्य आगतः वुञ्। चारायणक तत आगते त्रि०।

चारिणी स्त्री चर–णिनि ङीप्। करुणीवृक्षे राजनि०।

चारित्र न० चर–"चरेर्वृत्ते" उणा० णित्रन् चरित्रमेव स्वार्थे अण् वा। १चरित्रे २स्वभावे हेम०। ३कुलक्रमागताचारे शब्दार्थचि०। "चारित्रं येन नो लोके दूषितं दूषितात्मना" हरिवं० १७०। ४तिन्तिड़ीवृक्षे स्त्री शब्दरत्ना० ५मरुत्सनन्दपपुत्रभेदे पु० "मरुत्वतो मरुत्वन्तो देवानजनयत् सुतान्" इत्युपक्रमे "नहुषं चाकुतिञ्चैव चारित्रं ब्रह्मपन्नगम्" हरिवं० २०४ अ०।

चारित्र्य न० चरित्रमेव स्वार्थे ष्यञ्। चरित्रशब्दार्थे।

चारिन् त्रि० चर–णिनि। सञ्चारकारिणि गन्तरि "सङ्गमाय निशि गूढ़चारिणम्" रघुः "प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ" गीता स्त्रियां ङीप् स्वैरचारिणी।

चारी स्त्री चारो गतिभेदोऽस्त्यस्या अच् गौरा० ङीष्। गतिभेदयुक्तनृत्यक्रीडायां सङ्गी० दा० तच्च लक्षणादिकमुक्तं यथा

"न हि चारीं विना नृत्ये नृत्यस्याङ्गं प्रवर्त्तते। शृङ्गारादिरसानान्तु भावोद्दीपनकारिकाम्। माधुर्य्योद्वर्त्तना नृत्ये चारी चारुगतिर्मता"। अन्ये तु "एकपादप्रचारो यः सा चारी न निगद्यते। पादयोश्चारणं यत्र सा चारीति निगद्यते। करणानां समायोगः खण्डकः परिकीर्त्तितः। त्रिभिः खण्डैश्चतुर्भिर्व्वा मण्डलं समुदाहृतम्। समनखा नूपुरविद्धा तिर्य्यङ्मुखी सरला च। कातरा च कुवीरा च विश्लिष्टा रथचक्रिका। पार्ष्णिरेचितका तलदर्शिनी गजहस्तिका। परावृत्ततला चारुताड़िताप्यर्द्धमण्डला। समक्रीड़निका लगलासिका चारुरोचिका। तलोद्वृत्ता सञ्चरिता स्फुरिकापि तथैव च। लङ्घितजङ्घा सङ्कुटिता स्यादथैव मदालसा। उत्कुञ्चिता तिर्य्यगूर्द्धं कुञ्चिता चापकुञ्चिता। षड्विंशतिर्भौमचार्य्य इत्याख्याता मनीषिभिः"। अन्ये तु। "समपादस्थिता विद्धा शकटस्यार्द्धिकापि च। विध्याघाताड़िताऽऽबद्धा एकैका क्रीड़िता तथा। ऊरुद्वृत्ता छन्दिता च जनिता स्यन्दिता तथा। स्यन्दितावत् समन्वी समोत्सारितचट्टिता। उत्स्पन्दिता च विज्ञेयाश्चार्य्यः षोड़श भूमिगाः। इति भूमिचारी। आकाशचारी यथा "चारीश्चाकाशगा नृत्ये विक्षेपा स्वधरी तथा। अङ्घ्रिताड़िता भ्रमरी पुरःक्षेपा च सूचिका। अपक्षेपा जङ्घावर्त्ता विद्धा च हरिणप्लुता "उरुजङ्घान्दोलिता च जङ्घाजङ्घालिका तथा। विद्युत्क्रान्ता भ्रमरिका दण्डपार्श्वेति षोड़श"। अन्ये तु। "विभ्रान्तातिक्रान्ताऽपक्रान्ता च पार्श्वक्रान्तिका। ऊर्द्धजानुर्दोलपादोद्वृत्ता नूपुरपादिका। भुजङ्गत्रासिका क्षिप्ताऽऽविद्धा ताला च सूचिका। विद्युत्क्रान्ता भ्रमरिका दण्डपादा तथैव च। आकाशचारिका एताः षोड़शैव निरूपिताः"। एतास्वेव भूमिचारीष्वप्यन्तरभेदोऽस्ति। "तिर्य्यक्चारी ऊर्द्धचारी अधश्चारीति ता ऊहनीयाः। "तैलाभ्यङ्गेन गात्रेण लब्धाहारो जितश्रमः। स्तम्भे वा भित्तिदेशे वा प्रथमं ताः प्रयोजयेत्। कृत्वाहारं तथाभ्यस्य भुक्त्वा तां न समाचरेत्। नृत्ये पादस्य विन्याससञ्चारी सैवाभिधीयते। शृङ्गारादिरसानान्तु भवेद्दीपनकारणम्। माधुर्य्यमूलका नृत्ये मृदुतालमयान्विताः। नियतार्द्ध विशेषाच्च चारी सञ्चारतो भवेत्" सं० दामो०।

चारु पु० चरति चित्ते–उण्। १वृहस्पतौ २मनोज्ञे त्रि० मेदि० "चकासतं चारुचमूरुचर्म्मणा" "अङ्कप्रसारिमसुराधिपचापचारु" माघः। गुणवचनत्वेन स्त्रियां वा ङीष् चार्व्वी चारुः। ३कुङ्कुमे न० शब्दार्थचि०। ४रुक्मिणीतनयभेदे पु० "चारुगर्भशब्दे दृश्यम्।

चारुक पु० चारु+संज्ञायां कन्। शरवीजतुल्ये क्षुद्रधान्यभेदे भावप्र० तद्गुणा उक्ता यथा "चारुकः शरवीजं स्यात् कथ्यन्ते तद्गुणा अथ। चारुको मधुरो रूक्षो रक्तपित्तकफापहः। शीतलो लघुश्चग्राही कषायो वातकोपनः"।

चारुकेशरा स्त्री चारूणि केशराण्यस्याः। नागरमुस्तायाम् राजनि०।

चारुगर्भ पु० श्रीकृष्णस्य रुक्मिणीगर्भजाते तनयभेदे यथा "तस्याम् (रुक्मिण्याम्) उत्पादयामास पुत्रान् दश महारथान्। चारुदेष्णं सुदेष्णञ्च प्रद्युम्नञ्च महाबलम्। सुषेणं चारुगुप्तञ्च चारुभानुञ्च वीर्य्यवान्। चारुविन्दं सुचारुञ्च भद्रचारुन्तथैव च। चारुञ्च बलिनां श्रेष्ठं सुतां चारुमतीं तथा" हरिवं० ११८अ०। चारुगुप्तादयोऽप्यत्रोक्ताः तत्पुत्रभेदे।

चारुचित्र पु० धृतराष्ट्रपुत्रभेदे "चित्रोपचित्रौ चित्राक्षश्चारुचित्रः शरासनः" भा० आ० ११७अ०।

चारुधारा स्त्री चारु चारुतां धारयति धारि–अण् चार्व्वी धाराऽस्या वा। इन्द्रपत्न्यां शच्याम् त्रिका०।

चारुनेत्र त्रि० चारु मनोज्ञं नेत्रमस्य। १सुलोचने

२हरिणे पुंस्त्री त्रिका०। ३अप्सरोभेदे स्त्री “चारुनेत्रा घृताची च मेनका पुञ्जिकास्थली” काशीख० १०अ०।

चारुपर्णी स्त्री० चारूणि पर्णान्यस्याः ङीप्। (गन्धभादाल) प्रसारिण्याम् राजनि०।

चारुपुट पु० चारु–पुटमत्र। तालभेदे संगीतदा०।

चारुफला स्त्री चारु फलमस्याः। द्राक्षायाम् राजनि०।

चारुयशस् पु० श्रीकृष्णपुत्रभेदे “तथा द्वादश वर्षाणि व्रतीभूतेन शुष्यता। आराध्य पशुभर्त्तारं रुक्मिण्यां जनिताः सुताः। चारुदेष्णः सुचारुश्च चारुवेशो यशोधरः। चारुश्रवा चारुयशाः प्रद्युम्नः शम्भुरेव च। यथा ते जनिताः पुत्रा रुक्मिण्यां चारुविक्रमाः” भा० अनु० १४अ०। चारुगर्भशब्दानुक्ताः अत्रोक्ताश्च चारुश्रवस् इत्यादयोऽपि तत्पुत्रभेदे।

चारुलोचन त्रि० चारु लोचनमस्य। १सुन्दरनेत्रयुक्ते २हरिणे पुं०स्त्री० स्त्रियां जातित्वात् ङीष् शब्दार्थचि०।

चारुवक्त्र त्रि० चारु वक्त्रमस्य। १सुमुखे २कुमारानुचरभेदे पु० “श्वेतवक्त्रः सुवक्त्रश्च चारुवक्त्रश्च पाण्डुरः” भा० श० ४६अ० कुमारानुचरोक्तौ

चारुवर्द्धना स्त्री चारु चारुतां वर्द्धयति वृध–णिच्–ल्यु। १नार्य्यां राजनि०। २मनोहरतावर्द्धकमात्रे त्रि०।

चारुव्रता स्त्री चारु व्रतमस्याः। १मासोपवासिन्यां स्त्रियां त्रिका० २तादृशव्रतयुक्ते पुरुषे पु०।

चारुशिला स्त्री नित्यकर्म्म०। १मणिमात्रे त्रिका०। कर्म्मधा०। २मनोहरशिलामात्रे स्त्री “कुट्टिमाश्चारुशिलोपवेशम्” भट्टिः।

चारुशीर्ष त्रि० चारु शीर्षमस्य। १मनोज्ञमस्तके २शक्रसखे आलम्बायने पु०। “चारुशीर्षस्तु तं प्राह शक्रस्य दयितः सखा। आलम्बायन इत्येव विश्रुतः करुणात्मकः” भा० अनु० १८अ०। स च आलम्बर्षेरपत्यम्।

चारुहासिन् त्रि० चारु हसति हस–णिनि। १मनोहरहासिनि स्त्रियां ङीप्। सा च “अयुग्भवा चारुहासिनी” वृ० र० उक्ते २वैतालीयभेदे छन्दसि।

चार्च्चिक्य न० चर्च्च–धात्वर्थे ण्वुल् चर्च्चिकैव स्वार्थे ष्यञ्। चन्दनादिना गात्रलेपने अमरः। [वेष्टिते रथे।

[illegible] पु० चर्म्मणा परिवृतो रथः अण्। चर्म्मणा सर्व्वतो

चार्म्मण न० चर्म्मणां समूहः अण्। चर्म्मसमुदाये।

चार्म्मिक त्रि० चर्म्मणा निर्वृत्तः ठक्। चर्म्मनिर्म्मिते भाण्डादौ। “चर्म्मचार्म्मिकभाण्डेषु” मनुः। ततः पुरोहिता० भावे यक्। चार्म्मिक्य तद्भावे न०।

चार्म्मिकायणि पुंस्त्री चर्म्मिणोऽपत्यम् वाकिना०फिञ् कुक् नलोपश्च। चर्म्मिणो (ढाली) नामकयोधस्यापत्ये।

चार्म्मिण न० चर्म्मिणां समूहः अण्। चर्म्मिणां समूहे।

चार्व्वाक पु० चारुः लोकसम्मतोवाकोवाक्य यस्य पृषो०। बृहस्पतिशिष्ये लोकायते नास्तिकभेदे तन्मतसिद्धपदार्थादि सर्व्वद० सं० दर्शितं यथा।

“अथ कथं परमेश्वरस्य निःश्रेयसपदत्वमभिधीयते बृहस्पतिमतानुसारिणा नास्तिकशिरोमणिना चार्वाकेण दूरोत्सारितत्वात्। दुरुच्छेदं हि चार्वाकस्य चेष्टितम्। प्रायेण सर्व्वप्राणिनस्तावत् “यावज्जीवं सुखं जीवेन्नास्ति मृत्योरगोचरः। भस्मीभूतस्य देहस्य पुनरागमनं कुतः” इति लोकगाथामनुरुन्धाना नीतिकामशास्त्रानुसारेणार्थकामावेव पुरुषार्थौ मन्यमानाः पारलौकिकमर्थमपह्नुवानाश्चार्वाकमतमनुवर्त्तमाना एवानुभूयन्ते। अत एव तस्य चार्व्वाकमतस्य लोकायतमित्यन्वर्थमपरं नामधेयम्। तत्र पृथिव्यादीनि भूतानि चत्वारि तत्त्वानि तेभ्य एव देहाकारपरिणतेभ्यः किण्वादिभ्यो मदशक्तिवत् चैतन्यमुपजायते, तेषु विनष्टेषु सत्सु, स्वयं विनश्यति। “तदिह विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति”। तत्र चैतन्यविशिष्टदेह एवात्मा देहातिरिक्त आत्मनि प्रमाणाभावात् प्रत्यक्षैकप्रमाणवादितया अनुमानादेरनङ्गीकारेण प्रामाण्याभावात्। अङ्गनालिङ्गनादिजन्यं सुखमेव पुरुषार्थः। न चास्य दुःखसंभिन्नतया पुरुषार्थत्वमेव नास्तीति मन्तव्यम् अवर्जनीयतया प्राप्तस्य दुःखस्य परिहारेण सुखमात्रस्यैव भोक्तव्यत्वात्। तद्यथा मत्स्यार्थी सशल्कान् सकण्टकान् मत्स्यानुपादत्ते स यावदादेयं तावदादाय निवर्त्तते। यथा वा धान्यार्थी सपलालानि धान्यान्याहरति यावदादेयं तावदादाय निवर्त्तते। तस्माद्दुःखभयान्नानुकूलवेदनीयं सुखं त्यक्तुमुचितम्। न हि मृगाः सन्तीति शालयो नोप्यन्ते। न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते। यदि कश्चिद् भीरुर्दृष्टं सुखं त्यजेत् तर्हि स पशुवन्मूर्खो भवेत्। तदुक्तम् ‘‘त्याज्यं सुखं विषयसङ्गमजन्म पुंसां दुःखोपसृष्टमिति-मूर्खविचारणैषा। व्रीहीन् जिहासति सितोत्तमतण्डुलाढ्यान् को नाम भोस्तुषकणोपहितान् हितार्थी”। ननु पारलौकिकसुखाभावे बहुवित्तव्ययशरीरायाससाध्ये अग्निहोत्रादौ

विद्याहृद्धाः कथं प्रवर्त्तिष्यन्ते इति चेत् तदपि न प्रमाणकोटिं प्रवेष्टुमीष्टे अनृतव्याघातपुनरुक्तदोषैर्दूषिततया वैदिकम्मन्यैरेव धूर्त्तवकैः परस्परं कर्म्मकाण्डप्रामाण्यवादिभिर्ज्ञानकाण्डस्य, ज्ञानकाण्डप्रामाण्यवादिभिश्च कर्म्मकाण्डस्य प्रतिक्षिप्तत्वेन त्रय्या धूर्त्तप्रलापमात्रत्वेन अग्निहोत्रादेर्जीविकामात्रप्रयोजनत्वात् तथा चाभाणकः 'अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्। बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः'॥ अत एव कण्टकादिजन्यं दुःखमेव नरकं लोकसिद्धो राजा परमेश्वरः देहोच्छेदो मोक्षः। देहात्मवादे च कृशोऽहं कृष्णोऽहमित्यादिसामानाधिकरण्योपपत्तिः। मम शरीरमिति व्यवहारो राहोः शिर इत्यादिवदौपचारिकः। तदेतत् सर्व्वं समग्राहि। "अत्र चत्वारि भूतानि भूमिवार्य्यनलानिलाः। चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायते। किण्वादिभ्यः समेतेभ्यो द्रव्येभ्यो मदशक्तिवत्॥ अहं स्थूलः कृशोऽस्मीति सामानाधिकरण्यतः। देहः स्थौल्यादियोगाच्च स एवात्मा न चापरः॥ मम देहोऽयमित्युक्तिः सम्भवेदौपचारिकीति"॥ स्यादेतत् स्यादेष मनोरथो यद्यनुमानादेः प्रामाण्यं न स्यात् अस्ति च प्रामाण्यं कथमन्यथा धूमोपलम्भानन्तरं धूमध्वजे प्रेक्षावतां प्रवृत्तिरुपपद्येत। नद्यास्तीरे फलानि सन्तीति वचनश्रवणसमनन्तरं फलार्थिनां नदीतीरे प्रवृत्तिरिति। तदेतन्मनोराज्यविजृम्भणम्। व्याप्तिपक्षधर्म्मताशालि हि लिङ्गं गमकमभ्युपगतमनुमानप्रामाण्यवादिभिः व्याप्तिश्चोभयविधोपाधिविधुरः सम्बन्धः स च सत्तया चक्षुरादिवन्नाङ्गभावं भजते किन्तु ज्ञाततया। कः खलु ज्ञानोपायो भवेत्। न तावत् प्रत्यक्षं तच्च बाह्यमान्तरं वाऽभिमतम्। न प्रथमः तस्य सम्प्रयुक्तविषयज्ञानजनकत्वेन भवति (वर्त्तमाने) प्रसरसम्भवेऽपि भूतभविष्यतोस्तदसम्भवेन सर्व्वोपसंहारवत्या व्याप्तेर्दुर्ज्ञानत्वात्। न च व्याप्तिज्ञानं सामान्यगोचरमिति मन्तव्यं व्यक्त्योरविनाभावाभावप्रसङ्गात्। नापि चरमः अन्तःकरणस्य बहिरिन्द्रियतन्त्रत्वेन बाह्येऽर्थे स्वातन्त्र्येण प्रवृत्त्यनुपपत्तेः। तदुक्तम् "चक्षुराद्युक्तविषयं परतन्त्रं बहिर्मनः इति। नाप्यनुमानं व्याप्तिज्ञानोपायः तत्र तत्राप्येवमिति अनवस्थादौस्थ्यप्रसङ्गात्। नापि शब्दस्तदुपायः काणादमतानुसारेणानुमानएवान्तर्भावात् अनन्तर्भावे वा वृद्धव्यवहाररूपलिङ्गावगतिसापेक्षतया प्रागुक्तदूषणलङ्घालत्वात् धूमध्वजयोरविनाभावोऽस्तीति वचनमात्रे मन्वादिवद् विश्वासाभावाच्च। अनुपदिष्टाविनाभावस्य पुरुषस्यार्थान्तरदर्शनेनार्थान्तरानुमित्यभावे स्वार्थानुमानकथायाः कथाशेषत्वप्रसङ्गाच्च। उपमानादिकन्तु दूरापास्तं तेषां संज्ञासंज्ञिसम्बन्धादिबोधकत्वेनानौपाधिकसम्बन्धबोधकत्वासम्भवात् ; किञ्च उपाध्यभावोऽपि दुरवगमः उपाधीनां प्रत्यक्षत्वनियमासम्भवेन प्रत्यक्षाणामभावस्य प्रत्यक्षत्वेऽपि अप्रत्यक्षाणामभावस्याप्रत्यक्षतया अनुमानाद्यपेक्षायामुक्तदूषणानतिवृत्तेः। अपि च साधनाव्यापकत्वे सति साध्यसमव्याप्तिरिति तल्लक्षणं कक्षीकर्त्तव्यम्। तदुक्तम् "अव्याप्तसाधनो यः साध्यसमव्याप्तिरुच्यते स उपाधिरिति" शब्देऽनित्यत्वे साध्ये सकर्त्तृकत्वं घटत्वमश्रावणत्वं च व्यावर्त्तयितुमुपात्तान्यत्र क्रमतो विशेषणानि त्रीणि। तस्मादिदमनवद्यं समासमेत्यादिनोक्तमाचार्य्यैरिति। तत्र विध्यध्यवसायपूर्व्वकत्वान्निषेधाध्यवसायस्योपाधिज्ञाने जाते तदभावविशिष्टसम्बन्धरूपं व्याप्तिज्ञानं व्याप्तिज्ञानाधीनं चोपाधिज्ञानमिति परस्पराश्रयवज्रप्रहारदोषो वज्रलेपायते ; तस्मादविनाभावस्य दुर्बोधतया नानुमानाद्यवकाशः। धूमादिज्ञानानन्तरमग्न्यादिज्ञाने प्रवृत्तिः प्रत्यक्षमूलतया भ्रान्त्या वा युज्यते। क्वचित् फलप्रतिलम्भस्तु मणिमन्त्रौषधादिवत् यादृच्छिकः। अतस्तत्साध्यमदृष्टादिकमपि नास्ति। नन्वदृष्टानिष्टौ जगद्वैचित्र्यमाकस्मिकं स्यादिति चेत् न तद्भद्रं स्वभावादेव तदुपपत्तेः। तदुक्तम् "अग्निरुष्णो जलं शीतं शीतस्पर्शस्तथानिलः। केनेदं चित्रितं तस्मात् स्वभावात्तद्व्यवस्थितिरिति"। तदेतत् सर्व्वं बृहस्पतिनाप्युक्तम्। "न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः। नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः। अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्। बुद्धिपौरुषहीनानां जीविका धातृनिर्म्मिता। पशुश्चेन्निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति। स्वपिता यजमानेन तत्र कस्मान्न हिंस्यते। मृतानामपि जन्तूनां श्राद्धं चेत्तृप्तिकारणम्। गच्छतामिह जन्तूनां व्यर्थं पाथेयकल्पनम्। स्वर्गस्थिता यदा तृप्तिं गच्छेयुस्तत्र दानतः। प्रासादस्योपरिस्थानामत्र कस्मान्न दीयते?। यावज्जीवेत् सुखं जीवेदृणं कृत्वा घृतं पिबेत्। भस्मीभूतस्य देहस्य पुनरागमनं कुतः। यदि गच्छेत् परं लोकं देहादेष विनिर्गतः। कस्माद्भूयो न चायाति ? बन्धुस्नेहसमाकुलः। ततश्च जीवनोपायो ब्राह्मणैर्विहितस्त्विह।

मृतानां प्रेतकार्य्याणि न त्वन्यद्विद्यते क्वचित्। त्रयो वेदस्य कर्त्तारो भण्डधूर्त्तनिशाचराः। जर्फरीतुर्फरीत्यादि पण्डितानां वचः स्मृतम्। अश्वस्यात्र हि शिश्नन्तु पत्नीग्राह्यं प्रकीर्त्तितम्। भण्डैस्तद्वत् परञ्चैव ग्राह्यजातं प्रकीर्त्तितम्। मांसानां खादनं तद्वन्निशाचरसमीरितमिति"। तस्माद्बहूनां प्राणिनामनुग्रहार्थं चार्व्वाकमतमाश्रयणीयमिति रमणीयम्"। नैषधे च तन्मतं भङ्ग्या वर्णितं यथा

"पाकोम्भज्जनवद्युग्मफलेऽपि स्तुतिसत्यता। का श्रद्धा तत्र धीवृद्धाः! कामान्धा यत् किलीकृतः। केनापि बोधिसत्त्वेन जातं सत्त्वेन हेतुना। यद्वेदमर्म्मभेदाय जगदे जगदस्थिरम्। अग्निहोत्रं त्रयीतन्त्रं त्रिदण्डं भस्मगुण्ठनम्। प्रज्ञापौरुषनिःस्वानां जीवो जल्पति जीविकाः। शुद्धिर्वंश्यद्वयीशुद्धौ पित्रोः पित्रोर्यदेकशः। तदनन्तकुलादोषाददोषा जातिरस्ति का। कामिनीवर्गसंसर्गैर्न कः सङ्क्रान्तपातकः। नाश्नाति स्नाति हा मोहात् कामक्षाममिदं जगत्। ईर्ष्यया रक्षतो नारीर्धिक् कुलस्थितिदाम्भिकान्। स्मरान्धत्वाविशेषेऽपि तथा नरमरक्षतः। परदारनिवृत्तिर्या सोऽयं स्वयमनादृतः। अहल्याकेलिलोलेन दम्भो दम्भोलिपाणिना। गुरुतल्पगतौ पापकल्पनां त्यजत द्विजाः!। येषां वः पत्युरत्युच्चैर्गुरुदारग्रहे ग्रहः। पापात्तापा, मुदः पुण्यात्, परासोः स्युरिति श्रुतिः। वैपरीत्यं ध्रुवं साक्षात्तदाख्यात बलाबले। सन्देहेऽप्यन्यदेहाप्तेर्विस्रब्धं वृजिनं यदि। त्यजत श्रोत्रियाः! सत्रं हिंसादूषणसंशयात्। यस्त्रिवेदिविदां वन्द्यः स व्यासोऽपि जजल्प वः। रामाया जातकामायाः प्रशस्ता हस्तधारणा। सुरते यः कथं श्रद्धा सुरते च कथं न सा?। तत्कर्म्म पुरुषः कुर्य्याद्येनान्ते सुखमेधते। बलात् कुरुत पापानि सन्तु तान्यकृतानि वः। सर्व्वान् बलकृतानर्थानकृतान् मनुरब्रवीत्। स्वागमार्थेऽपि माऽस्मिंस्वतीर्थिका! विचिकित्सत। तं तमाचरतानन्दं स्वच्छन्दं यं यमिच्छथ। श्रुतिस्मृत्यर्थबोधेषु कैकमत्यं मन्दाधियाम्। व्याख्या बुद्धिबलापेक्षा सा नोपेक्ष्या सुखोन्मुखी। अग्निमस्तीति धीर्द्वे तद्वाच्चे वः किमेनसा। क्वापि किन्तु फलं न स्यादात्मेति परसाक्षिके। स्वतः करोति कर्म्माणि स्वते कर्म्मफलोर्मयः। अन्यभुक्तैर्न्नते तृप्तिरित्यलं धूर्त्तवार्त्तया! एवं सन्दिग्धयोस्तावत् भावि तत्रेष्टजन्मनि। हेतमाङ्गः स्वमन्त्रादीनसाङ्गानन्यथा विटाः। जनेन जानतास्मीति कायं नायं स्वमित्यसौ। त्याज्यते ग्राह्यते चान्यदहो निसश्रुत्याऽतिधूर्त्तया। एकस्य विश्वपापेन तापेऽनन्ते निमज्जनः। कः श्रौतस्यात्मनो भीरो! भरः स्याद् दुरितेन ते। किन्ते हन्ताहृतात् पुण्यात् तन्मात्रे हि फलत्यदः। न्यास्यं तनूभूर्न्यन्यस्य न्यास्यमेवात्मनो यदि। तृणानीव दयावादान् विधूनय मधूरस्तु। तथापि ताहृशस्यैव का चिरं जनवञ्चना। कुरुध्वं कामदेवाज्ञां ब्रह्माद्यैरप्यलङ्घिताम्। वेदोऽपि देवकीयाज्ञा तत्राज्ञा काधिकार्हणा। प्रज्ञापनमपि वेदस्य भागं मन्यध्वमेव चेत्। क्रमाभाष्येण दुःखाय विधीनपि तथेच्छथ। श्रुतिं श्रद्धत्थ विक्षिप्ताः। प्रक्षिप्तां ब्रूथ च स्वयम्। मीमांमांसलमहा! त्वां यूपद्विपदायिनीम्। को हि वेदह्यमुष्मिन् वा लोक इत्याह या श्रुतिः। तत्प्रामाण्यादमुं लोकं लोकः प्रत्येतु वा कथम्। धर्म्माधर्म्मौ मनुष्यैर्लस्वयकार्जनवर्जनौ। व्याजात्मखण्डकदण्डार्थी मदर्थापि सुधा बुधैः। व्यासस्यैव गिरा तस्मिन् श्रद्धाश्रद्धा स्थ वान्धिकाः। सत्यस्याप्युपदेष्टारं यः कोमलस्यानपि भाषताम्। पण्डितः पाण्डवानां स व्यासश्चाटुपटुः कविः। निनिन्द तेषु निन्दत्सु स्तुवत्सु स्तुतवान् किम्?। न भ्रातुः किल देव्यां स व्यासः कामात् समासजत्। दासीरतस्तदासीद्यन्मात्रा तत्राप्यदेशि किम्?। देवैर्द्विजैः कृता पन्थाः पन्था येषां तदाहृतौ। गांव्रतैः किं न तैर्य्यक्षं तनोऽप्यात्माऽपरीक्षितः। साधु कामुकता मुक्ता शान्तस्वान्तैर्मखोन्मुखैः। सारङ्गलोचनासारां दिवं प्रेत्यापि लिप्सुभिः। उभयी प्रकृतिः कामे सज्जेदिति मुनेर्मतम्। अपवर्गे तृतीयेति भणतः पाणिनेरपि। बिभ्रत्युपरि यानाय जना जनितमज्जनाः। विधुच्छायाप्यतः पश्चाद्गत्वरोरभ्रविभ्रमम्। कः शमः क्रियतां प्राज्ञाः! प्रियाप्रीतौ परिश्रमः। भस्मीभूतस्य भूतस्य पुनरागमनं भ्रमः। एनसानेन तिर्य्यक् स्यादित्यादिः का विभीषिका। राजिलोऽपि हि राजेव स्वैः सुखी सुखहेतुभिः। हताश्चेद्दिवि दीव्यन्ति दैत्या दैत्यारिणा रणे। तत्रापि तेन युद्धान्ता हता अपि तथैव ते। स्वस्थ मद्य च संसारे मुक्तौ तु ब्रह्म केवलम्। इति स्वोच्छित्तिमुक्त्युक्तिर्वैदग्धी वेदवादिनाम्। मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम्। गोतमं तमवेतैव यथा वित्थ तथैव सः। दारा हरिहरादीनां तन्मग्नमनसो भृशम्। किं न मुक्ताः पुनः सन्ति कारा

गारे मनोभुवः। देवश्चेदस्ति सर्वज्ञः करुणाभागवन्ध्यवाक्। तत्किं वाग्व्ययमात्रान्नः कृतार्थयति नार्थिनः। भविनां भावयन् दुःखं स्वकर्मजमपीश्वरः। स्यादकारणवैरी नः कारणादपरे परे। तर्काप्रतिष्ठया साम्यादन्योन्यस्य व्यतिघ्नताम्। नाप्रामाण्यं मतानां स्यात् केषां सत्प्रतिपक्षवत्। अक्रोधं शिक्षयन्त्यन्यान् क्रोधना ये तपोधनाः। निर्धनास्ते धनायैव धातुवादोपदेशिनः। किं वित्तं दत्त तुष्टेयमदातरि हरिप्रिया। दत्त्वा सर्वं धनं मुग्धो बन्धनं लब्धवान् बलिः। दोग्धा द्रोग्धा च सर्वोऽयं धनिकस्येतरो जनः। शिक्षध्वं लोमसंक्षोभमेकहा यदुदासते। दैन्यस्यायुष्यमस्तैन्यमभक्ष्यं कुक्षिवञ्चना। स्वाच्छन्द्यस्वच्छतानन्दकन्दलीकन्दमेककम्” २दुर्योधनसखे राक्षसभेदे चार्वाकवधपर्वशब्दे विवृतिः

चार्वाकवधपर्वन् न० भा० शान्तिपर्वान्तर्गते अवान्तरपर्वभेदे तद्वधकथा च तत्र ३८अ० यथा।

“निःशब्दे च स्थिते तत्र ततो विप्रजने पुनः। राजानं ब्राह्मणच्छद्मा चार्वाको राक्षसोऽब्रवीत्। तत्र दुर्योधनसखो भिक्षुरूपेण संवृतः। साक्षः शिखी त्रिदण्डी च धृष्टो विगतसाध्वसः। वृतः सर्वैस्तथा विप्रैराशीर्वादविवक्षुभिः। परःसहस्रै राजेन्द्र! तपोनियमसंस्थितैः। स दुष्टः पापमाशंसुः पाण्डवानां महात्मनाम्। अनामन्त्र्यैव तान् विप्रांस्तमुवाच महीपतिम्। चार्वाक उवाच। इमे प्राहुर्द्विजाः सर्वे समारोप्य वचो मयि। धिग्भवन्तं कुनृपतिं ज्ञातिघातिनमस्तु वै। किं तेन स्याद्धि कौन्तेय! कृत्वेमं ज्ञातिसंक्षयम्। घातयित्वा गुरूंश्चैव मृतं श्रेयो न जीवितम्। इति ते वै द्विजाः श्रुत्वा तस्य दुष्टस्य रक्षसः। विव्यथुश्चुक्रुशुश्चैव तस्य वाक्यप्रधर्षिताः। ततस्ते ब्राह्मणाः सर्वे स च राजा युधिष्ठिरः। व्रीडिताः परमोद्विग्नास्तूष्णीमासन् विशाम्पते!। युधिष्ठिर उवाच। प्रसीदन्तु भवन्तो मे प्रणतस्याभियाचतः। प्रत्यासन्नव्यसनिनं न मां धिक्कर्त्तुमर्हथ। वैशम्पायन उवाच। ततो राजन्! ब्राह्मणास्ते सर्व एव विशाम्पते!। ऊचुर्न तद्वचोऽस्माकं श्रीरस्तु तव पार्थिव!। जज्ञुश्चैव महात्मानस्ततस्तं ज्ञानचक्षुषा। ब्राह्मणा वेदविद्वांसस्तपोभिर्विमलीकृताः। ब्राह्मणा ऊचुः। एष दुर्योधनसखा चार्वाको नाम राक्षसः। परिव्राजकरूपेण हितं तस्य चिकीर्षति। न वयं ब्रूम धर्मात्मन् व्येतु ते भयमीदृशम्। उपतिष्ठतु कल्याणं भवन्तं भ्रातृभिः सह। वैशम्पायन उवाच। ततस्ते ब्राह्मणाः सर्वे हुङ्कारैः क्रोधमूर्च्छिताः। निर्भर्त्सयन्तः शुचयो निजघ्नुः पापराक्षसम्”। मुद्रितपुस्तके शान्तिपर्वणि एतत्पर्व दृश्यते किन्तु भा० आदिपर्वणि उपक्रमणिकाध्याये स्त्रीपर्वान्तर्गतपर्वोक्तौ “चार्वाकस्य वधः पर्व रक्षसो ब्रह्मरूपिणः। आभिषेचनिकं पर्व धर्मराजस्य धीमतः। प्रविभागो गृहाणाञ्च पर्वोक्तं तदनन्तरम्। शान्तिपर्व ततो यत्र राजधर्मानुशासनम्”। इत्यनेन स्त्रीपर्वविभागेऽप्यस्य स्त्रीपर्वत्वेन तथोक्तिः। तच्च पर्व मुद्रितपुस्तके शान्तिपर्वणि ४४अध्यायपर्यन्तम्। अतस्तत्पूर्वमेव स्त्रीपर्वत्वमनुमीयते अन्यथा प्रतिज्ञाविरोधः स्यात् यदि च स्त्रीपर्वणि सप्तविंशतिरध्याया एव आदिपर्वोपक्रमणिकाध्याये प्रतिज्ञाताः प्रतिज्ञातास्च शान्तिपर्वणि ३१८ अध्यायाः मुद्रितपुस्तके च स्त्रीपर्वणि २७अध्याया एव दृश्यन्ते मुद्रितपुस्तके शान्तिपर्वणि च ४४अध्याये इद्विभागो दृश्यते इत्यध्यायाधिक्यं तथापि शान्तिपर्वणि ३२८अध्यायानामेव पञ्चत्वेन प्रतिज्ञातत्वात् मुद्रितपुस्तके च ३६७ अध्यायानां दर्शनात् अध्यायाधिक्यस्य लिपिकरप्रमादकृतत्वस्येव स्त्रीपर्वण्यपि सप्तविंशतिसंख्याधिक्यस्य लिपिकरप्रमादकृतत्वस्यापि वक्तुं शक्यत्वात्। वस्तुतस्तु उपक्रमणिकाध्याये चार्वाकस्य वधः पर्व इत्यतः पूर्वमेव “शान्तिपर्व ततः प्रोक्तम् इत्यादि पद्यं मूलग्रन्थे स्थितम्। लिपिकरप्रमादात् उत्तरत्र लिखितमित्येव कल्पयितुमुचितम् एतस्य शान्तिपर्वान्तर्गतत्वेऽपि न विरोधः। अध्यायन्यूनाधिक्यस्य तु लिपिकरप्रमादकृतत्वकल्पनमेव न्याय्यः। अतएव उपक्रमणिकायां स्त्रीपर्वप्रतिपाद्यविषयकथने “तोयकर्म्मणि चारब्धे राज्ञामुदकदानिके। गूढोत्पन्नस्य चाख्यानं कर्णस्य पृथयात्मनः” इत्यन्तेन स्त्रीपर्वकथान्तोक्तिः सङ्गच्छते।

चार्व्वाघाट (त) पु० चारु आहन्ति आ+हन् द्वारायाकर्म्मोऽण् अन्त्यस्य च टः संज्ञायाम्, चारौ वा” वार्त्ति० घञ् वा टान्तादेशः। शब्दरत्नावली खगभेदे

चार्वादि पु० नञः परतः अन्तोदात्ततानिमित्ते पा० ग० सूत्रोक्ते शब्दगणे स च गणः “चारु, साधु यौधकि अनङ्गमेजय वदान्य (अकस्मात्) वर्त्तमान वर्धमान त्वरमाण ध्रियमाण क्रीयमाण रोचमान शोभमाना) संज्ञायाम्। विकारः (सदृशे) व्यस्तसमस्ते। गृहपति गृहपतिक।

(राजाङ्गोऽस्कन्दति)"। "कल्योऽक्षिणुचार्व्वाटस्य" पा० अवाहः।

चार्व्वी स्त्री चारु+गुणवचनत्वात् स्त्रियां ङीष्। १चारुत्वयुक्तायां स्त्रियां २ज्योत्स्नायाम् ३बुद्धौ ४कुबेरपत्न्याम् च मेदि० ५दीप्तौ शब्दर०।

चाल पु० चल–ण। छर्दिस १पटले स्वनामख्याते गृहाच्छादने तृणादौ त्रिका०। भावे घञ्। २चलने पु० चल–णिच् भावे अच्। ३चालने पु०। [मले पु० त्रिका०।

चालक त्रि० चल+ण्वुल्। १स्थानान्तरप्रापके २अङ्कुशदुष्टे ग-

चालन न० चल–णिच्–भावे ल्युट्। १स्थानान्तरनयने २कम्पने च। "घोषणं नागरद्वारे पर्वतस्य च चालनम्" मार्क०८८अ०। करणे ल्युट् ३चालन्यां न०। "क्षुद्रच्छिद्रसमोपेतं चालनं तितउः स्मृतः" इति कर्म्मप्रदीपः।

चालनी स्त्री चल–णिच् करणे ल्युट्। ततः गौरादेः क्षुद्रांशापसारणार्थे वंशखण्डादिनिर्म्मिते पात्रभेदे तितउनि (चालुनी) अमरः।

चाष पुंस्त्री चष–भक्षणे स्वार्थे णिच्–अच्। १नीलकण्ठे खगे अमरः स्त्रियां जातित्वात् ङीष्। "केयूरखण्डलीलां प्रभासन्नाबेन क्वचिद्विकीर्य्यमाणचाषः" काद०। "अशोकश्च वियोगश्च चन्दनः सुदिवर्द्धनः। हेमकुण्डो मणिग्रीवः स्वस्तिकश्चापराजितः। अष्टौ चाषस्य नामानि चाषं दृष्ट्वा तु यः पठेत्। अथ भिन्नैर्भवेत्तस्य मिष्टमन्नं वराङ्गने!" इति पठन्ति। "मार्जारनकुलौ हत्वा चाषं मण्डूकमेव च। श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत्" मनुना तद्वधे शूद्रहत्याव्रतमुक्तम् यात्रायां तस्य पूर्वदिगादिभेदेन स्थित्या शुभाशुभम् वृ०स० ८६अ० उक्तं यथा। "चाषशल्यकपुण्याहघण्टाशङ्खरवा उदक्"। "धन्या जम्बुकचाषौ च सरटः पापदोऽपरः"। "अष्टस्य प्रथमे भागे चाषश्च कुक्कुटाः"। तस्य केतुस्थितौ युवराजभयमुक्तं तत्रैव ४१अ० यथा "कक्षादकौशिककपोतककाककङ्कैः केतुस्थितैर्महदुशन्ति भयं नृपस्य। चाषेण चापि युवराजभयं वदन्ति श्येनो विलोचनभयं निपतन् करोति"। "कृकवाकुजीवजीवकशुकशिखिखञ्जनकपोतचाषहारीतैः। क्रकरचकीरपि शस्तमशुभं पारावतमोकैः" ४८अ०।

चास पु० चष–हिंसायाम् णिच्–अच् पृषो०। १इक्षुभेदे २चाषखगे पुंस्त्री मेदि० स्त्रियां जातित्वात् ङीष्।

चि आकर्षणेनादाने विभागपूर्व्वकादाने च उभ० द्विक० स्वा० अनिट्। चिनोति चिनुते। चिनोतु चिनु। अचैषीत् अचेष्ट। चिकाय चिचाय चिक्ये चिच्ये। कर्म्मणि चीयते अचायि। चिकीषति ते चिचीषति ते। चयनीयम् चेतव्यम् चेयम्। चिन्वन् चिन्वानः। चितः चितिः। कायः चायः चयनम्। अग्निचित् चित्वा आचित्य [स्वादिवत्
णिचि चाययति चापयति।

चि चयने विभागपूर्व्वकादाने भ्वा० उभ० अनिट्। चयति ते

चि चयने विभागपूर्व्वकादाने चा० चु० उभ० पक्षे भ्वा० द्विक० अनिट् वा घटादि। चाययतिते चापयतिते चयति इत्येके अचीचयत् त अचीचपत्। "दुहियाचिरुधिप्रच्छिभिक्षिचिञामिति" भाष्योक्तेरस्य द्विकर्म्मकत्वम् "अचैषुर्श्रीनरोत्तमाः" भट्टिः। "चिचीषयन्तोऽध्वरपात्रजातम्" भट्टिः "अन्तरीक्षे नाग्निश्चेतव्यः" श्रुतिः। "राजहंस! तव सैव शुभ्रता चीयते न च न चापचीयते" काव्यप्र०।

अधि+आधिक्येन चयने। "यएव तपस्तेतस्मादेवाध्यचीयतेतस्मिन्नध्यचीयत" शत० ब्रा० १०।४।

अनु+पश्चाच्चयने "आ मूलात् शाखाभिरनुचितः" ऐतरे०ब्रा०

अप+हीनतासम्पादने सक०। "यशाश्चुरपचीयते" भा० व० १२७८। कर्म्मकर्त्तरि प्रयोगः।

अव+अधःस्थित्वा चयने। "फलान्यवाचिनोद्वृक्षात्" मुग्ध०।

अव+आ सम्यगाचयने "पुष्पाण्यवाचिन्वतीम्" भा०व०१२६५

आ+सम्यक् चयने। "कर्म्माण्याचिनुतेऽसकृत्" भाग० ४। २६।७८। "आचिक्याते च भूयोऽपि राघवौ तेन पन्नगैः" भा० व० १२ व्याप्तौ च "कचाचितौ विष्वगिवागजौ गजौ" किरा०

अनु+आ अन्वाचये अन्वाचयशब्दे दृश्यम्

सम्+आ+समाहारे "यदा तु वाससां राशिः सभामध्ये समाचितः" भा० स० २१०४। [भट्टिः।

उद् ऊर्द्ध्वचयने उत्तोल्यादाने "उच्चिक्यिरे पुष्पफलं वनानि"

अभि+उद्+समुच्चये अभ्युच्चयशब्दे दृश्यम्

सम्+उद्+समुच्चये समाहारे सक० एकजातीयक्रियान्वयादौ "अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चये" मुग्ध० "अपियत्नेन संयोगाभावादिः समुच्चीयते" काव्यप्र०।

उप+वृद्धौ अक० वर्द्धने सक०। "यानि घर्मे कपालान्युपचिन्वन्ति वेधसः" तै०सं०१।१।७।२। "अथ मौलिगतस्येन्दोर्विशदैर्दशनांशुभिः। उपचिन्वन् प्रभां तन्वीम्" कुमा०।

नि+निविडेन चयने व्याप्तौ च "रथः शरैर्निचितः" भा० ७।१४। "स्वदेशे निचिता दोषाः अस्मात् कोप-

मामताः" सुश्रुतः "त्रयः परार्थे क्लिश्यन्ति साक्षिणः प्रतिभूः कुलम्। चत्वारस्तूपचीयन्ते विप्र आढ्यो वणिङ्नृपः" मनुः

परि+परिचये पुनः पुनरनुशीलने। "चरणारविन्दस्य ध्यानपरिचितभक्तियोगः" भाग० ५।७।१। "मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या" मेघः। "हेतुः परिचयस्थैर्ये वक्तुर्गुणनिकैव सा" माघः।

प्र+प्रकर्षेण चयने समाहारे च सक० "कर्णिकारान् प्रचिन्वती" भा० आ० ७७

वि+विशेषेण चयने। "पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत्। मालाकार इवारामे न यथाङ्गारकारकः" भा० उ० १११ श्लो०

सम्+ सम्यक् चयने समाहारे "संचिन्वन्ति सदा युक्ता जातरूपञ्च मौक्तिकम्" हरिवं०५२२६

चिकित त्रि० जु० चि—ज्ञाने कर्मणि क्त "छन्दस्युभयथा" पा० निष्ठायाः सार्वधातुकसंज्ञायां शप् जुहोत्यादित्वात् तस्य श्लुः द्वित्वम्, कित—ज्ञाने यङ् लुक् पचाद्यच्। संज्ञापूर्व्वकत्वात् अभ्यासगुणाभावः इति माधवः। १ज्ञाते २अतिशयज्ञातरि च "त्वं सोम! प्रचिकितो मनीषा" ऋ० १।९१।१। अस्य भाष्ये उक्ता व्युत्पत्तिर्दृश्या। ३ऋषिभेदे। तस्यापत्यम् इञ् इञन्तत्वात् यूनि फक्। चैकितायन तस्य यून्यपत्ये पुंस्त्री। "त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः" छा० उ०।

चिकितान त्रि०कित—ज्ञाने कानच्। १अभिज्ञे "तपोवसो! चिकितानो अचित्तान्" ऋ० ३।१८।२। "चिकितानः कर्म्माभिज्ञः" भा०। २ऋषिभेदे पु०। तस्यापत्यमण् ततः यूनि वा० ढक्। चैकितानेय तस्य यून्यपत्ये। "तद्धापि ब्रह्मदत्तश्चैकितानेयो राजानं भक्षयन्नुवाच" छा०उ०।

चिकितु त्रि० कित—ज्ञाने उन् वेदे द्वित्वम्। अभिज्ञे "अचेत्यग्निश्चिकितुर्हव्यवाड्सुमद्रथः" ऋ० ८।५६।५।

चिकित्वन् त्रि०कित—ज्ञाने ङ्वनिप् वेदे नि०द्वित्वम्। ज्ञातरि। "कैतेन शर्मन्त्सचते सुषामण्यग्ने! तुभ्यं चिकित्वना" ऋ० ८।६०।१८।

चिकित्वित् त्रि० कित—ज्ञाने बा० किति वेदे नि० द्वित्वम्। अभिज्ञे "यवयद्द्वेषसं त्वा चिकित्वित्सूनृतावरि" ऋ० ४।५२।४। "चिकित्विन् मनसं त्वा देवं मर्त्तास ऊतये" ऋ० ५।२२।३।

चिकित्सक पु० कित—रोगापनयने स्वार्थे सन्—ण्वुल्। रोगापनयनकर्त्तरि वैद्ये अमरः। "पूयं चिकित्सकस्यान्नम्" मनुः। तल्लक्षणादि चिकित्साशब्दे दृश्यम्

चिकित्सा स्त्री कित—स्वार्थे सन्—भावे अ। रोगप्रतीकारे रोगनिवारणोपाये अमरः। अस्य लक्षणभेदाज्ञादिकम् भावप्र० उक्तं यथा

"या क्रिया व्याधिहरणी सा चिकित्सा निगद्यते।
दोषधातुमलानां या साम्यकृत् सैव रोगहृत्"।

क्रियात्र कर्म्म व्याधिर्हन्यतेऽनयेति व्याधिहरणी "करणाधिकरणयोश्चेति" पा०सूत्रेण करणार्थे ल्युट् तथाच

"याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः। सा चिकित्सा विकाराणां कर्म तद्भिषजाम्मतम्"। "या ह्युदीर्णं शमयति नान्यं व्याधिं करोति च। सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत्"। क्रियात्र चिकित्सा। तथा चामरसिंहः "आरम्भो निष्कृतिः शिक्षा पूजनं सम्प्रधारणम्। उपायः कर्म चेष्टा च चिकित्सा च नवक्रिया इति। अथ चिकित्साविध्युपदेशः। "जातमात्रश्चिकित्स्यः स्यान्नोपेक्ष्योऽल्पतया गदः। वह्निशत्रुविषैस्तुल्यः स्वल्पोऽपि विकरोत्यसौ। रोगमादौ परीक्षेत ततोऽनन्तरमौषधम्। ततः कर्म्म भिषक् पश्चात् ज्ञानपूर्वं समाचरेत्"। अयमर्थः भिषक् आदौ रोगं परीक्षेत विचारयेत्। ततः पश्चाद्रोगौषधविचारानन्तरं ज्ञानपूर्वं सावधानो न त्वज्ञाय कर्म चिकित्सामौषधदानादिरूपां समाचरेदित्यर्थः।

रोगाज्ञानेन चिकित्साकरणे दोषमाह

"यस्तु रोगमविज्ञाय कर्माण्यारभते भिषक्। अप्यौषधविधानज्ञस्तस्य सिद्धिर्यदृच्छया"। स्वैरितया सिद्धिर्भवति नापि भवतीत्यर्थः। अन्यच्च

"भेषजं केवलं कर्त्तुं यो जानाति न चामयम्।
वैद्यकर्म स चेत् कुर्य्याद्वधमर्हति राजतः"।

रोगज्ञाने भेषजाज्ञाने दोषमाह।

"यस्तु केवलरोगज्ञो भेषजेष्वविचक्षणः। तं वैद्यं प्राप्य रोगी स्याद्यथा नौर्नाविकं विना"। नाविकं कर्णधारं विना यथा नौः सङ्कटे पतति तथा स रोगीत्यर्थः। अन्यच्च

"यस्तु केवलशास्त्रज्ञः क्रियास्वकुशलो भिषक्। स मुह्यत्यातुरं प्राप्य यथा भीरुरिवाहवम्"।

रोगौषधयोर्ज्ञाने गुणमाह।

"यस्तु रोगविशेषज्ञः सर्वभैषज्यकोविदः। देशकालविभा-

गच्छस्तस्य सिद्धिर्न संशयः। आदावन्ते रुजां ज्ञाने प्रयतेत चिकित्सकः। भेषजानां विधानेन ततः कुर्य्याच्चिकित्सितम्"। चिकित्सितमित्यत्र भावे क्तः। "विकाराणामकुशलो न जिह्रीयात् कदाचन। न हि सर्व्वविकाराणां नामतोऽस्ति ध्रुवा स्थितिः"। न जिह्रीयात् न लज्जेत। ध्रुवा नियता। "नास्ति रोगो विना दोषैर्यस्मात्तस्माच्चिकित्सकः। अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत्। येन कुर्व्वन्त्यसाध्यानां चिकित्सां ते भिषग्वराः। अतो वैद्यैः श्रमः कार्य्यः साध्यासाध्यपरीक्षणे"। रोगस्थानोपाया अग्रे वक्ष्यन्ते। "शीते शीतप्रतीकारमुष्णे उष्णनिवारणम्। कृत्वा कुर्य्यात् क्रियां प्राप्तां क्रियाकालं न हापयेत्। अप्राप्ते वा क्रियाकाले प्राप्ते वा न क्रिया कृता। क्रिया हीनातिरिक्ता च साध्येष्वपि न सिद्ध्यति"। अयमर्थः। काले चिकित्साऽवसरे अप्राप्तेऽनागते। या क्रिया चिकित्सा। यथा ज्वरे जीर्णतामप्राप्ते तरुणएव कषायदानक्रिया न सिद्ध्यति। या च क्रिया चिकित्सावसरे प्राप्ते न कृता अर्थात् पश्चात् कृता। यथा दाहे कथञ्चित्क्रान्ते पश्चाच्छीतलानुलेपनादिक्रिया। तथा हीनातिरिक्ता च क्रिया साध्येष्वपि न सिद्ध्यति। अतिरिक्तां हीनां च क्रियां वर्ज्जयन्नाह। "विकारेऽल्पे महत् कर्म्म क्रिया लघ्वी गरीयसि। द्वयमेतदकौशल्यं कौशल्यं युक्तकर्म्मता। क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत्। पूर्व्वस्यां शान्तवेगायां न क्रियासङ्करो हितः"। भिन्नरूपाभिस्तु क्रियाभिः साङ्कर्य्यमपि न दोषाय। यतआह "क्रियाभिस्तुल्यरूपाभिर्न क्रियासङ्करो हितः। ताभिस्तु भिन्नरूपाभिः साङ्कर्य्यं नैव दुष्यति"। अतएवोक्तम् "लङ्घनं वालुकास्वेदो नस्यं निष्ठीवनं तथा। अवलेहोऽञ्जनञ्चापि प्राक् प्रयोज्यं त्रिदोषजे"। ज्वर इति शेषः। "नचैकान्तेन निर्द्दिष्टे शास्त्रे निविशते बुधः। स्वयमप्यत्र भिषजा तर्कणीयं चिकित्सता"। यतआह "उत्पद्यते च सावस्था दोषकालबलम्प्रति। यस्य कार्य्यमकार्य्यं स्यात् कर्म्म कार्य्यं विवर्ज्जितम्"। विवर्ज्जितं कर्म्म कर्त्तव्यं भवतीत्यर्थः। अथ चिकित्सायां फलमाह। "क्वचिदर्थः क्वचिन्मैत्री क्वचिद्धर्म्मः क्वचिद्यशः। कर्म्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निःफला। आयुर्व्वेदोदितां युक्तिं कुर्व्वाणा विहितां च ये। पुण्यायुर्द्धिसंयुक्ता निरोगाश्च भवन्ति ते। नैव कुर्व्वीत लोभेन चिकित्सां पुण्यविक्रियाम्। ईश्वराणां वसुमतां लिप्सेतार्थन्तु वृत्तये। चिकित्सितं शरीरं यो न निष्क्रीणाति दुर्म्मतिः। स यत्करोति सुकृतं सर्व्वं तद्भिषगश्नुते। न देशो मनुजैर्हीनो न मनुष्या निरामयाः। ततः सर्व्वत्र वैद्यानां सुसिद्धा एव वृत्तयः"। अथ चिकित्साया अङ्गानि। "रोगी दूतो भिषग्दीर्घमायुर्द्रव्यं सुसेवकः। सदौषधं चिकित्सायाम् इत्यङ्गानि बुधा जगुः"। तत्र रोगिणो लक्षणमाह। "रोगो यस्यास्ति रोगी स स चिकित्स्यस्तु यादृशः। यादृशश्चाचिकित्स्योऽपि वक्ष्यमाणो निशम्यताम्"। तत्र चिकित्स्यः। "निजप्रकृतिवर्णाभ्यां युक्तः सत्त्वेन चक्षुषा। चिकित्स्यो भिषजां रोगी वैद्यभक्तो जितेन्द्रियः"। सत्त्वं व्यसनाभ्युदयक्रियादिष्वविह्वलताकरं तेन युक्तः। चक्षुषा चक्षुरुपलक्षितेन। ततोऽन्येनापीन्द्रियेण चिकित्स्यः रोगान्मोचयितव्यः। अन्यच्च "आयुष्मान् सत्त्ववान् साध्यो द्रव्यवान् मित्रवानपि। चिकित्स्यो भिषजा रोगी वैद्यवाक्यकृदास्तिकः"। आयुर्व्वेदोऽस्तीति मतिर्यस्य आस्तिकः। अथाचिकित्स्यः "चण्डः साहसिको भीरुः कृतघ्नो व्यग्र एव च। शोकाकुलो मुमूर्षुश्च विहीनः करणैश्च यः। वैरी वैद्यविदग्धश्च श्रद्धाहीनश्च शङ्कितः। भिषजामविधेयाःस्युर्नोपक्रम्या भिषग्विधाः। एतानुपाचरन्वैद्यो बहून् दोषानवाप्नुयात्"। चण्डोऽत्यन्त क्रोधशीलः। कृतघ्नो वैद्यकृतोपकारलोपकः। व्यग्रो व्याकुलः। विहीनः करणैश्च यः निजेन्द्रियशक्तिरहितः। वैरी न चिकित्स्यः कदाचिद्रोगोद्रेके अपवादभयात्। वैद्यविदग्धो वैद्यधूर्त्तः। तथा च सुश्रुतः। "स न सिध्यति वैद्यस्तु गृहे यस्य न पूज्यते"। शङ्कितो वैद्यविश्वासरहितः। भिषजामविधेयाः वैद्यवचनाविधायिनः। भिषग्विधाः वैद्यतुल्याः एते नोपक्रम्याः न चिकित्स्याः। अथ दूतस्य लक्षणम्। "यश्चिकित्सकमानेतुं याति दूतः स कथ्यते। स च यादृक् समुचितस्तादृगत्र निगद्यते। दूताःसुजातयो व्यङ्गाः पटवो निर्म्मलाम्बराः। सुखिनोऽश्ववृषारूढ़ाः शुक्लपुष्पफलैर्युताः। सजातयः सुचेष्टाश्च सजीवदिशि सङ्गता। भिषजां समये प्राप्ता रोगिणः सुखहेतवे"। सजातयः रोगिसमानजातयः। "यस्यां प्राणमरुद्वाति सा नाड़ी जीवसंज्ञिता"। अथ दूतस्य यात्रायां शकुनविचारः। "वैद्याह्वानाय दूतस्य

गच्छतो रोगिणः क्षते । न शुभं सौम्यशकुनं प्रदीप्तस्तु सुखावहः” । प्रदीप्तोऽग्निः । दूतो रोगी च रिक्तहस्तो वैद्यं न पश्येत् । तथाच “रिक्तहस्तो न पश्येत्तु राजानं भिषजं गुरुमिति” । अथ वैद्यस्य लक्षणम् । “चिकित्सां कुरुते यस्तु स चिकित्सक उच्यते । स च यादृक् समीचीनस्तादृशोऽपि निगद्यते । तत्त्वाधिगतशास्त्रार्थो दृष्टकर्मा स्वयङ्कृती । लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः । प्रत्युत्पन्नमतिर्धीमान् व्यवसायी प्रियंवदः । सत्यधर्म्मपरो यश्च वैद्य ईदृक् प्रशस्यते” । दृष्टकर्म्मा दृष्टा परेण कृता चिकित्सा येन सः स्वयङ्कृती स्वयं चिकित्साकुशलः । लघुहस्तः सिद्धहस्तः । अथ निषिद्धो वैद्यः । “कुचेलः कर्कशः स्तब्धो ग्रामीणः स्वयमागतः । पञ्च वैद्या न पूज्यन्ते धन्वन्तरिसमा यदि । कर्कशः अप्रियवादी स्तब्धः साभिमानः । ग्रामीणः व्यवहाराचतुरः । अथ वैद्यस्य कर्माह । “व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः । एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः” । अस्यायमर्थः व्याधेः सम्यक्परिचयो व्यथाशान्तिकरणं वैद्यस्य कर्म नतु वैद्य आयुषः प्रभुरित्यर्थः । अपरे त्वेवं व्याचक्षते व्याधेस्तत्त्वतः परिचयो वेदनाया शान्तिकरणं । एतदेव वैद्यस्य वैद्यत्वं किन्तु वैद्य आयुषः प्रभुः आगन्तु मृत्युशतहरणात् । तथा च सुश्रुते धन्वन्तरिः “एकोत्तरं मृत्युशतमथर्वाणः प्रचक्षते । तत्रैकः कालसंयुक्तः शेषास्त्वागन्तवः स्मृताः” । अयमर्थः अथर्वाणः अथर्वतत्त्वज्ञत्वेनाथर्वतुल्याः मृत्युमेकोत्तरं शतं प्रचक्षते । तत्रैको मृत्युः कालसंयुक्तः । काल आयुषोऽन्ते शरीरिणामवश्यं संहर्त्ता । सर्वैरुपायैर्निवारयितुमशक्यः । स ब्रह्मादीनायुषोऽन्ते संहरति । यत आह लिङ्गपुराणे कार्त्तिकेयं प्रति महादेवः “ममायुर्भक्षते कालः कुतः पुत्र !। रसायनमिति” । तेन कालेन संयुक्तः । संहाराय नियुक्तः सोऽवश्यं भावी शेषाः शतं मृत्यवः आगन्तवः आगन्तुरूपहेतुजन्मानः कार्य्यकारणयोरभेदोपचारात् । आगन्तवो हेतवः यथा। “विषभक्षणमजीर्णेऽत्यन्नभोजनञ्च दुर्दैवजलपानम् । तथाऽतिबलैरिव्याघ्रयवनमहिषमत्तमातङ्गादिभिर्युद्धम् । दन्दशूकेन क्रीड़नमत्युच्चपादपारोहणञ्च बाहुभ्याम् महासरित्तरणमेकाकिनो रात्रौ दुर्गे मार्गे गमनम् इत्यादि । आगन्तुहेतुजा मृत्यवो दुश्चिकित्स्या भाविभावनबलवत्त्वादायुषि सत्यपि मारयन्ति । यथा तैलवर्त्तिवह्निषु विद्यमानेषु वात्या दीपं नाशयति । तथाच “यथा सत्यपि तैलादौ दीपं निर्वापयेन्मरुत् । एवमायुष्यहीनेऽपि हिंसन्त्यागन्तुमृत्यवः” । किन्तु आगन्तुनिमित्तानि निवारयितुञ्च शक्यन्ते । यत आह सुश्रुते धन्वन्तरिः “दोषागन्तुनिमित्तेभ्यः रसमन्त्रविशारदौ । रक्षेतां नृपतिं नित्यं यत्नाद्वैद्यपुरोहितौ” । वैद्यमन्त्रिणौ नृपतिं नित्यं यत्नाद्रक्षेताम् । कुतः दोषागन्तुनिमित्तेभ्यः दोषा निषिद्धाहारविहारदूषिता वातपित्तकफरोगोत्पादकाः । आगन्तवः निषिद्धविहारा अतिबलवैरिविग्रहादयः ते निमित्तानि येषान्तेभ्यः शतमृत्युभ्यः । वैद्यपुरोहितौ कथं मृत्युशतं निवारयितुं शक्तौ तत्राह । यतस्तौ रसमन्त्रविशारदौ प्रथमं वैद्येन दिनचर्य्यारात्रिचर्य्यर्त्तुचर्य्योक्ताहारविहाराभ्यां वातपित्तकफधातुमलान् समानेव रक्षति ततो रसशस्त्रादृष्टैः तन्त्राश्रयादिभिर्निषिद्धाहारविहारदूषितदोषजनितान् विकारान्मृत्युहेतून् पहरति । मन्त्री च सद्बुद्धिदानेन मृत्युहेतुभ्यो निषिद्धविहारेभ्यो नृपतिं निवारयति । तत आगन्तु मृत्यवो निवारयितुं शक्या नत्ववश्यम्भाविनः । अथायुर्विचारः ।“भिषगादौ परीक्षेत रुग्णस्यायुः प्रयत्नतः । तत आयुषि विस्तीर्णे चिकित्सा सफला भवेत्” । सा च त्रिधा “आसुरी मानुषी दैवी चिकित्सा सा त्रिधा मता । सूत (पारद) प्रधाना दैवी स्यात् छेदभेदात्मिका ऽऽसुरी । मानुषी षड्रसा ज्ञेया जपहोमादिसत्कृता । कलौ चाल्पबले लोके मानुषी तत्र पूजिता” वैद्यकम् ।

चिकित्सित त्रि० कित–स्वार्थे सन् कर्मणि क्त । १कृतरोगप्रतीकारे । भावे क्त । २चिकित्सायां न० अमरः । “सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सितम्” मनुना अम्बष्ठानां चिकित्सितवृत्तिरुक्ता । चिकित्सा जाताऽस्य तारका० इतच् । ३जातचिकित्से त्रि० । ४ऋषिभेदे पु० तस्यापत्यं गर्गा० यञ् । चैकित्सित्य तदपत्ये पुंसि स्त्रियां ङीप् यलोपश्च चैकित्सिती ।

चिकित्स्य त्रि० कित–स्वार्थे सन् कर्मणि यत् । प्रतीकार्य्ये चिकित्साशब्दे उदा० । “क्षेत्रियच् परक्षेत्रे चिकित्स्यः” पा० । “भेषजैः स चिकित्स्यः स्यात् य उन्मार्गेण गच्छति” भा० शा० १४अ० । “अन्धोऽचिकित्स्यरोगाद्या भर्त्तव्यास्ते निरंशकाः” या० ।

चिकिन त्रि० निम्नता नासिका इनच् "पिटच्चिकचि च" वार्त्ति० इनच् प्रकृतेश्च चिक्यादेशः। निम्ननासिके (खाँदा)

चिक्किल पु० चि–वा० इलच् कुक् च। पङ्के हेम०।

चिकीर्षक त्रि० कृ–सन–ण्वुल्। कर्त्तुमिच्छौ अत्र ण्वुलो लित्त्वात् "लिति" पा० प्रत्ययात् पूर्व्वस्योदात्तता। अत्र "न पदान्तद्विर्वचनवरेयलोपस्वरेत्यादि" पा०। करोतेः सन्नन्तात् ण्वुल् अतोलोपः स च लितीति स्वरे कर्त्तव्ये न स्थानिवत्। इति मनोरमोक्तेः स्वरे कर्त्तव्ये अल्लोपस्य न स्थानिवत्त्वम्।

चिकीर्ष्य त्रि० कर्त्तुमेष्यम् कृ–सन् कर्म्मणि यत्। कर्त्तुमेष्ये अत्र यतस्तित्त्वात् "तित्स्वरितम्" पा० स्वरितस्वरः

चिकुर पु० चि इत्यव्यक्तं शब्दं कुरति कुर–क। १केशे, अमरः "चिकुरप्रकराः जयन्ति ते" नैष०। २पक्षिभेदे, ३पर्वते, ४सरीसृपे च। ५चपले, तरले, ६चञ्चले च त्रि० मेदिनी। चपलस्य दोषमनिसित्य वधबन्धनादिकारी। अत्र सर्पः सर्पभेदः सुमुखपिता यथाह" भा० उ० १०२अ० "ऐरावतकुले जातः सुमुखोनाम नागराट्। आर्य्यकस्य मतः पौत्रो दौहित्रो वामनस्य च। एतस्य हि पिता नागश्चिकुरोनाम मातले!। नचिराद्वैनतेयेन पञ्चत्वमुपपादितः। ततोऽब्रवीत् प्रीतमना मातलिर्नारदं वचः। एष मे रुचितस्तात। जामाता भुजगोत्तमः। क्रियतामत्र यत्नो हि प्रीतिमानस्म्यनेन वै। अस्मै नागाय वै दातुं प्रियां दुहितरं मुने!"। कचार्थकात् अस्मात् समूहार्थे पक्ष पाश हस्त प्रत्ययाः। चिकुरपक्ष चिकुरपाश चिकुरहस्त केशसमूहे पु०। चिकुर+अतौ णिच् कर्म्मणि क्त। चिकुरित चञ्चलीकृते त्रि०। "आरक्तचिकुरितच्छदाम्" काद०।

चिकूर पु० चिकुर+पृषो०। केशे शब्दभेदप्रकाशः।

चिक्क पीडने चु० उभ० सक० सेट्। चिक्कयति ते अचिचिक्कत् त।

[र्य्याम्। (छुँछो) त्रिका०

चिक्क पु० चिक् इत्यव्यक्तेन शब्देन कायति कै–क। छुछुन्द-

चिक्कण पु० चिक्क–क्विप् चिक् तं कणति कण–शब्दे अच्। १गुवाकवृक्षे। २तत्फले न० राजनि०। ३मसृणे स्निग्धे (चिकण) त्रि० शब्दमा०। ४चिक्कणगुणवत्याम् उत्तमायां गवि स्त्री। अमरः "कठिनश्चिक्कणः श्लक्ष्णः पिच्छिलो मृदु दारुणः" भा० शा० १८४अ०। गौरा० ङीष्। पूगवृक्षे हरीतक्यां० तत्फले च स्त्री राजनि०। कस्य कन्थान्ते तत्पुरुषे क्लीवता चिहणा० आद्युदात्तता च चिक्कणकन्थम्।

चिक्कस पु० चिक्क–असच्। यवचूर्णे हेमच०।

चिक्का स्त्री चिक्क–अच्। १पूगवृक्षे राजनि०। २तत्फलेऽपि स्त्री

चिक्किर पु० चिक्क–बा इरच्। मूषिकभेदे। उन्दुरशब्दे ११८८पृ० दृश्यम्। "लालनः पुत्रकः कृष्णोहंसिरश्चिक्किरस्तथा" सुश्रुत०।

चिक्लिद त्रि० क्लिद–यङ् लुक् अच् नि०। अतिशयक्लेदयुक्ते।

चिङ्गट पु० चिङ्गड+पृषो०। मत्स्यभेदे हारा०। "चिङ्गटस्तु गुरुर्ग्राही मधुरो बलवर्द्धनः। मेदःपित्तास्त्रनाशी तु वृष्योरोचनकृत्तथा। कफवातकरो ज्ञेयः" राजवल्ल०। अल्पार्थे ङीप्। (घुषाचिङ्गड़ी) क्षुद्रचिङ्गटे "चिङ्गटी मधुरा हृद्या कफवातविनाशिनी गुर्वी श्लेष्मकरी ज्ञेया" राजव०।

चिङ्गड पु० चिमित्यव्यक्तशब्देन गल्यते भक्ष्यते गल भक्ष–कर्म्मणि घञर्थे संज्ञायाम् क लस्य डः। (चिङ्ड़ी) मत्स्यभेदे शब्दमाला

चिञ्चिण्ड पु० चि–वा० इण्डच् चुक् च। फलप्रधाने वृक्षे भावप्र०। "चिञ्चिण्डो वातपित्तघ्नः पथ्यो बलरुचिप्रदः। शोषिणोऽतिहितोज्ञेयः पटोलात् किञ्चिदूनकः" तद्गुणा उक्ताः।

चिच्चिटिङ्ग पु० चीयते चि–कर्म्मणि क्विप् चिदग्निः तत्र चिटिं प्रेषणं गच्छति गम–ड पृषो० मुम्। कीटभेदे कीटशब्दे २०५८पृ० सुश्रुतवाक्यं दृश्यम्।

चिच्छक्ति चिदेव शक्तिः। चैतन्ये संक्षेपशारीरकम् "चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यते"। "चिच्छक्तिरस्ति परमात्मनि तेन सोऽपि व्यक्तो जगत्सु विदितोभवकृत्यकर्त्ता। कोऽन्यस्त्वया विरहितः प्रभवत्यमुष्मिन् कर्त्तुं विहर्त्तुमपि सञ्चलितुं स्वशक्त्या" देवीभागवतम्। "मायाश्रयस्य चिच्छक्त्या चैतन्यं स्थितमात्मनि" भाग० १।७।२४।

चिच्छायापत्ति स्त्री चिति बुद्ध्यादेः, बुद्ध्यादौ वा चितेः छाया प्रतिबिम्बः तस्या आपत्तिः। सांख्यमते १चितौ बुद्ध्यादेः प्रतिबिम्बप्राप्तौ वेदान्तिमते २बुद्ध्यादौ चितः प्रतिबिम्बनप्राप्तौ च। चित्प्रतिबिम्बस्वीकारस्य सोपपत्तिकः "अन्तःकरणस्य तदुज्ज्वलितत्वाल्लोहवदधिष्ठातृत्वम्" सां० सू० भाष्ये समर्थितस्तच्च वाक्यं १८५। ८६पृ० उक्तम् ततः शेषन्तु "ननु प्रतिबिम्बहेतुतया

संयोगविशेषावश्यकत्वे प्रतिविम्बकल्पना व्यर्था प्रतिविम्बकार्य्यस्यार्थज्ञानादेः संयोगविशेषादेव सम्भवादिति । मैवम् । बुद्धौ चैतन्यप्रतिविम्बश्चैतन्यदर्शनार्थं कल्प्यते दर्पणे मुखप्रतिविम्बवत् । अन्यथा कर्म्मकर्त्तृविरोधेन स्वस्य साक्षात् स्वदर्शनानुपपत्तेः । अयमेव च चित्प्रतिविम्बो बुद्धौ चिच्छायापत्तिरिति चैतन्याध्यास इति चिदावेश इति चोच्यते । यश्च चैतन्ये बुद्धेः प्रतिविम्बः स चारूढ़विषयैः सह बुद्धेर्भानार्थमिष्यते । अर्थाकारतयैवार्थग्रहणस्य बुद्धेरन्यत्र स्थले दृष्टत्वेन तां विना संयोगविशेषमात्रेणार्थभानस्य पुरुषेऽप्यनौचित्यात् अर्थाकारस्यैवार्थग्रहणशब्दार्थत्वाच्चेति । स चार्थाकारः पुरुषे परिणामो न सम्भवतीत्यर्थात् प्रतिविम्बरूप एव पर्य्यवस्यतीति दिक् । स चायमन्योऽन्यप्रतिविम्बो योगभाष्ये व्यासदेवैः सिद्धान्तितः । "चितिशक्तिरपरिणामिन्यप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रान्तेव तद्वृत्तिमनुपतति तस्याश्च प्राप्तचैतन्योपग्रहरूपाया बुद्धिवृत्तेरनुकारिमात्रतया बुद्धिवृत्त्यविशिष्टा हि ज्ञानवृत्तिरित्याख्यायते" इत्यादिना ।

अन्तःकरणस्यैकत्वेऽपि वृत्तिभेदाद्भेदः सा० प्र० भाष्ये समर्थितस्तद्वाक्यञ्च अन्तःकरणशब्दे १९५ पृ० उक्तम्

चिच्छिल पु० १देशभेदे २तद्वासिषु ब० व० । "मेलकैश्चपुरेश्चैव चिच्छिलैश्च समन्वितः" भा०भी० ८८अ० ।

चिञ्चा स्त्री चिमित्यव्यक्तं शब्दं चिनोति चि–ड । १तिन्तिडीवृक्षे अमरः । तत्फले अण् हरितक्या० लुपि व्यक्तिवचनत्वात् स्त्री । स्वार्थे क । २गुञ्जायां चिञ्चिकाप्यत्र गौरा० ङीष् । चिञ्चीत्यप्यत्र केचित्

चिञ्चिड पु० चिमित्यव्यक्तशब्देन चिडति चिड–वादे । चिञ्चिण्डवृक्षे भावप्र० । चिञ्चिण्ड इत्यत्र चिञ्चिड इति पाठः गुणास्तु चिञ्चिण्डशब्दोक्ताः

चिञ्चाटक पु० चिञ्चेवाटति अट–ण्वुल् । (चेँचको) तृणभेदे रत्नमा० । चिञ्चोटक इत्यपि पाठः तत्रार्थे पृषो०

चिञ्चाम्ल न० चिञ्चेवाम्लम् । अम्लशाके । (आमरुल) राजनि० ।

चिञ्चासार पु० चिञ्चाया इव सारोऽस्य । अम्लशाके (आमरुल) राजनि० । [चिचेट–चेटः चेटी ।

चिट प्रेषणे भ्वा० पर० सक० सेट् । चेटति अचेटीत् ।

चिट प्रेषणे चु०उभ० सक० सेट् । चेटयति ते अचीचिटत् त

चिटी स्त्री चिट–क गौरा० ङीष् । चण्डालवेशधारिण्यां योगिन्याम् तन्मन्त्रप्रयोगः तन्त्रसारे उक्तो यथा । "तारं चिटिद्वयं ब्रूयाच्चाण्डालि च ततः परम् । महदाद्यं ततो ब्रूयादमुकं मे ततः परम् । वशमानय ठ–द्वन्द्वं चिटिमन्त्र उदाहृतः (ओं चिटि ! चिटि ! महाचाण्डालि अमुकं मे वशमानाय स्वाहा) सप्तभिर्दिवसैर्भूपान् वशयेद्विधिना जनः" । विधि माह । "विलिख्य तालपत्रे तं साध्यनाम्नाधिगर्भितम् । निःक्षिप्य क्षीरसंमिश्रे जले तत्क्वाथयेन्निशि । वश्यो भवति साध्योऽस्य नात्र कार्य्या विचारणा । तालपत्रे लिखित्वैनं भद्रकालीगृहे खनेत् । वश्याय सर्व्वजन्तूनां प्रयोगोऽयमुदाहृतः" ।

चित ज्ञाने भ्वा०पर० सक० सेट् । चेतति अचेतीत् । चिचेत ईदित् चित्तः । "य इन्द्र ! सोमपातमो मदः शविष्ठ चेतति" ऋ० ८।१२।१ । "एवं तेऽचेतिषुः सर्व्वे" भट्टिः । "कृतानीदस्य कर्त्त्वा चेतन्ते दस्युतर्हणाम्" ऋ० ९।४७।२ । अ० वेदे पदव्यत्ययः । चेतः चेतनः चित् । "क्लमरहितमचेतन्नीरजीकारितक्ष्माम्" भट्टिः ।

चित ज्ञाने चु० आत्म०सक०सेट् । चेतयति ते अचीचितत् त चेतना चेतितः । "पूर्व्वं चेतयते जन्तुरिन्द्रियैर्विषयान् पृथक्" भा० शा० ९८९० "किन्नु सुप्तोऽस्मि जागर्म्मि चेतयामि न चेतये" भा० स्वर्गा० २अ० "राक्षसाश्चेतचेतयन्ति न" भट्टिः । अस्य अदन्तत्वमपि । तस्य चितयतीत्यादिरूपम् "इन्द्र न यज्ञैश्चितयन्त आयवः" ऋ० १।१३१।२

चित स्मृतौ चु० उभ० सक० सेट् इदित् । चिन्तयति ते अचिचिन्तत् त चिन्तितः चिन्तनम् चिन्तना चिन्ता । "यद्यहं नैषधादन्यं मनसापि न चिन्तये" भा० व० ६२अ० "तस्मादस्य वधं राजा मनसाऽपि न चिन्तयेत्" मनुः ।

चित् स्त्री चित–संम्पदा० भावे क्विप् । १ज्ञाने चेतनायाम् अमरः । २चैतन्ये । "सच्चिदानन्दविग्रहम्" वे० सा० ३चित्तवृत्तिभेदे । "चिदसि मनासि धीरसि" यजु० ४।१९। "अचेतनदेहादिसंघातस्य चेतनत्वं संपादयन्ती वाह्यवस्तुषु निर्व्विकल्पकं सामान्यज्ञानं जनयन्ती वृत्तिविशेषः तदेवात्र चिदित्युच्यते" वेदा० ४निर्विशेषस्वरूपमात्रे सर्व्वावभासचेतने स्वतएव प्रकाशमाने ब्रह्मणि "निर्विकल्पकं सर्व्वावभासकं ज्ञानं प्रत्यगात्मस्वरूपं चिदिति" व्याख्यातारः "चिदिहास्तीति चिन्मात्रमिदं चिन्मयमेव च । चित्त्वं चिदहमेते च लोकाश्चिदिति भावयेत्" वेदान्तप० चित्त्वः

चिद्रूपः “चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां सिद्ध्यर्थं ब्रह्मणो रूपकल्पना” । “तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः । इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः” योगवासिष्ठः

चिनोति चि—कर्त्तरि क्विप् । ५चयनकर्त्तरि त्रि० अग्निचित् । कर्म्मणि क्विप् । ६अग्नौ । ७असाकल्ये अव्य० अमरः । कश्चित् कथञ्चित् जातुचित् । ८अव्यक्तानुकरणे च अव्य० चित्कारः “नहि करिणि दृष्टे चित्कारेण तमनुमिमतेऽनुमातारः” वाचस्पतिमिश्रः । मुग्धबोधे विभक्त्यन्तात् किमः चिच्चनौ प्रत्ययौ विहितौ इति भेदः । तच्चिन्त्यं चनशब्दे तद्धेतुरुक्तः जातुचित् इत्यादिप्रयोगासिद्धिश्च तस्य किमः प्रकृतिकत्वाभावात् ।

चित त्रि० चि—कर्म्मणि क्त । १छन्ने मेदि० २कृतचयने “अवचितबलिपुष्पा वेदिसम्मार्गदक्षा” कुमा० । ३संचिते ४सम्पादिते च “तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितः क्षीयते” श्रुतिः ५शवदाहाधारचुल्लीभेदे स्त्री अमरः । “प्रणिपाताञ्जलियाचितां चिताम्” कुमा० “वद वामोरु ! चिताधिरोहणम्” रघुः “त्वया न पठिता चण्डी मया नापि चिकित्सितम् । अकस्मान्नगरोपान्ते कथं धूमायते चिता” हास्यार्णवः । “चिताग्नेरुद्वहनाज्यम्” भा० व० २१४अ० । “सगोत्रजैर्गृहीत्वा तु चितामारोप्यते शवः । अधोमुखो दक्षिणादिक्चरणस्तु पुमानिति । उत्तानदेहा नारी तु सपिण्डैरपि बन्धुभिः । चाण्डालाग्नेरमेध्याग्नेः सूतिकाग्नेश्च कर्हिचित् । पतिताग्नेश्चिताग्नेश्च न शिष्टैर्ग्रहणं स्मृतम्” शु०त० । अधिकं चितिशब्दे दृश्यम् । मन्त्रसाधनाङ्गचितालक्षणं तन्त्रसारे उक्तं यथा “असंस्कृता चिता ग्राह्या न तु संस्कारसंस्कृता । चाण्डालादिषु संप्राप्ता केवलं शीघ्रसिद्धिदा” । चितासाधनप्रकारः वीरतन्त्रे “अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि । कृष्णपक्षे विशेषेण साधयेद्वीरसाधनम् । तत्सार्द्धप्रहरे यामे गते च सुरसुन्दरि ! । शवं वापि चितां वापि नीत्वा गत्वा यथासुखम् । साधयेत् स्वहितं मन्त्री मन्त्रध्यानपरायणः । भयं नैव तु कर्त्तव्यं हास्यन्तत्र विवर्जयेत् । चतुर्दिशं न वीक्षेत मन्त्रमेव समभ्यसेत्” । तत्र पूजाद्रव्यम् “सामिषान्नं गुडं छागं सुरापायसपिष्टकम् । नानाफलञ्च नैवेद्यं स्वस्वकल्पोक्तसाधितम् । चितास्थानं समानीय सुहृद्भिः शस्त्रपाणिभिः । समानगुणसम्पन्नैः साधयेत् वीतभीः स्वयम्” । [त्रिका० ।

चिताचूडक न० चितैव चूडकं चूलकम् लस्य डः । चितायां

चिति स्त्री चि+आधारे क्तिन् । १चितायाम् तत्करणदेशादिः का० श्रौ० २५।७।१५। सूत्रोक्तो यथा “वितानं साधयित्वा समे बहुतृणेऽन्तराग्नी चितिं चिनोति” १५सू० वितानसाधनमग्नीनां यथादेशस्थापनं कृत्वा समे तृणबहुले देशेऽन्तराग्नी काष्ठैः चितिं चिनोति” कर्कः “पूर्वतरम् उद्धृत्य क्षीरिणीः पुरुषाहुतीः” १६सू० “पुरुषव्याह्वानं यासामोषधीनाम् ता उद्धृत्य” देव० “क्षीरयुक्ताः पुरुषाहुतीः पुरुषनाम्नीः पुंलिङ्गशब्दाभिधेयाः अर्कादयाः” कर्कः । “विशाखाशराङ्कगन्धापृश्निपर्ण्यध्यण्डाश्च” १७सू० “उद्धृत्येति वर्त्तते विशाखा दूर्वा शरोऽङ्कः पृश्निपर्णी माषपर्णी अध्यण्डा ढण्ढणिका” देव० “अश्वगन्धा आसन्धिः पृश्निपर्णी लक्ष्मणेत्यपरे अध्यण्डा च ब्रह्ममाण्डूकीति निगमे” कर्कः “चितिवच्च” कात्या० श्रौ० २१।३।२१ “देशो भवति तद्गुणयुक्त इत्यर्थः । स चितिवत् मृतस्य दाहार्थं यादृशैः काष्ठैश्चितिर्विहिता तादृशे देशे” कर्कः । भावे क्तिन् । २समूहे मेदि० । अग्न्यादेः ३चयने संस्कारभेदे । अग्निचयनप्रकारः शत० ब्रा० ७।१।१।१। “गार्हपत्यं चेष्यन् पलाशशाखया व्युदूहति अवस्यति ह्येतद्गार्हपत्यं चिनोति इत्यादिके” विस्तरेणोक्तः । चीयतेऽस्याम् आधारे क्तिन् अग्निचयनाधारे ४इष्टकाभेदे तासामुपधानादि संस्काराः शत० ब्रा० ८।१।१।१। “प्राणभृत उपदधाति । प्राणा वै प्राणभृतः प्राणानेवैतदुपदधाति ताः प्रथमायां चितावुपदधाति” “एषोऽग्नेर्यत् प्रथमा चितिः पुरस्तात्तत् प्राणानुपादधाति तस्मादिमे पुरस्तात् प्राणाः इत्यादिके उक्ता दृश्याः” । “प्रथमोत्तमयोः पादमात्रीरतिरिक्ताः” कात्या० श्रौ० १७।७।२६। “प्रथमोत्तमयोश्चित्योरतिरिक्ता या पादमात्री भवति मात्रोऽतिरिक्ता चेति” कर्कः प्रथमापञ्चम्योः अतिरिक्ता या महत्य इष्टकास्ताः पादमात्रीरुपदधाति” सं०व्या० । ५कुड्यस्येष्टकादीनां समूहविशेषे । इष्टकामानेन चितिमानज्ञानोपयोगिव्यवहारः चितिव्यवहारः । स च लीला० दर्शितो यथा चितौ करणसूत्रं सार्द्धवृत्तम् । “उच्छ्रयेण गुणितं चितेः किल क्षेत्रसम्भवफलं घनं भवेत् । इष्टिकाघनहृते घने चितेरिष्टिकापरिमितिश्च लभ्यते । इष्टिकोच्छ्रयहृदुच्छ्रितिश्चितेः स्युः स्तराश्च दृषदां चितेरपि ।

उदाहरणम्। अष्टादशाङ्गुलं दैर्घ्यं विस्तारो द्वादशाङ्गुलः। उच्छ्रितिस्त्र्यङ्गुला यासामिष्टिकास्ताश्चितौ किल। यद्विस्तृतिः पञ्चकराष्टहस्तं दैर्घ्यं च यस्यां त्रिकरोच्छ्रितिश्च। तस्यां चितौ किं फलमिष्टिकानां सङ्ख्या च का ब्रूहि कति स्तराश्च। न्यासः।



इष्टिकायाः घनहस्तमानं ३/६४ चितेः क्षेत्रफलम् ४०। उच्छ्रयेण गुणितं चितेर्घनफलम् १२०। लब्धा इष्टिकासङ्ख्या २५६०। स्तरसङ्ख्या २४। एवं पाषाणचयेऽपि। "चितेः कपि" पा० कपि परे दीर्घः एकचितीकः "पञ्चचितिकोऽग्निः" इत्यादौ छन्दसि न दीर्घः। चाय—दीप्तौ क्तिन् चिभावः। ६चैतन्ये स्वयंप्रकाशे चिच्छब्दार्थे स्त्री "आश्रयत्वविषयत्वभागिनी निर्विशेषचितिरेव केवला" संक्षे० शारी०। ७दुर्गायाम्। "चितिश्चैतन्यभावाद्वा चेतना वा चितिः स्मृता। महान् व्याप्य स्थिता सर्वान् महा वा प्रकृतिर्मता" देवीभाग०पु० ४५अ०।

चितिका स्त्री० चितिरिव कायति कै—क। १कटिस्थशृङ्खलायाम् हारा०। चिति+स्वार्थे क। २चितिशब्दार्थे चिता+स्वार्थे क अतद्रूपम्। ३चितायाम्।

चित्कण पु० त्रि० चिदित्यव्यक्तशब्दं कणति कण—अच्। चित्शब्दकारके। क्लीवकन्यशब्दे परे तत्पुरुषे चित्कणादि० आद्युदात्तता। चित्कणकन्यम्।

चि(ची)त्कार पु० चित्+कृ—भावे घञ् पृषो० वा दीर्घः। चिदित्यव्यक्तशब्दकरणे। "न हि करिणि दृष्टे चि(ची)त्कारेण तमनुमिमतेऽनुमातारः" वाचस्पतिमिश्रः। "स विषीदति चित्कारात् ताडितो गर्दभो यथा" हितो०।

चित्त न० चिती—ज्ञाने भा० करणे क्त। १अन्तःकरणभेदे "मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्। संशयोनिश्चयोगर्वः स्मरणं विषया इमे" वेदा०प०। तस्य च स्मरणम् अनुसन्धानात्मकवृत्तिभेदः। चिच्छब्दे दृश्यम्। २अन्तःकरणमात्रे अमरः "योगश्चित्तवृत्तिनिरोधः" पात० सू०। "जनस्य चित्तेन भृशं वशात्मना" नैष०। "चन्द्रचतुर्मुखशङ्कराच्युतैः क्रमान्नियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताभिधानैरिन्द्रियचतुष्केण क्रमात् संशयनिश्चयाहङ्कार्यचैत्यांश्च सर्वानेतान् स्थूलविषयाननुभवतः" वे० सा० उक्तेः अस्याधिष्ठाता अच्युतः। कर्म्मणि कर्त्तरि वा क्त। ३ज्ञाते ४ज्ञातरि च। चित्तं च सांख्यमते त्रिगुणप्रकृतिकार्य्यम्। तदेतद्योगसूत्रभाष्यादौ दर्शितम्। "योगश्चित्तवृत्तिनिरोधः" पात० १।१।सू०

"चित्तं हि प्रख्याप्रवृत्तिस्थितिशीलत्वात् त्रिगुणम्। प्रख्यारूपं हि चित्तं सत्त्वम्। रजस्तमोभ्यां संसृष्टम् ऐश्वर्य्यविषयप्रियं भवति। तदेव तमसानुविद्धमधर्म्माज्ञानावैराग्यानैश्वर्य्योपगं भवति। तदेव प्रक्षीणमोहावरणं सर्व्वतः प्रद्योतमानमनुविद्धं रजोमात्रया धर्म्मज्ञानवैराग्यैश्वर्य्योपगं भवति तदेव रजोलेशमलापेतं स्वरूपप्रतिष्ठं सत्त्वपुरुषान्यताख्यातिमात्रं धर्म्ममेघध्यानोपगं भवति। तत्परं प्रसङ्ख्यानमित्याचक्षते ध्यायिनः। चितिशक्तिरपरिणामिन्यप्रतिसङ्क्रमा दर्शितविषया शुद्धा चानन्ता च सत्त्वगुणात्मिका चेयम्। अतो विपरीता विवेकख्यातिरित्यतस्तस्यां विरक्तं चित्तं तामपि ख्यातिं निरुणद्धि। तदवस्थं चित्तं संस्कारोपगं भवति। स निर्वीजः समाधिः, न तत्र किञ्चित् सम्प्रज्ञायत इत्यसम्प्रज्ञातः द्विविधः स योगश्चित्तवृत्तिनिरोध" इति भा०। "कुतः पुनरेकस्य क्षिप्तादिभूमिसम्बन्धः किमर्थं चैवमस्य चित्तस्य वृत्तयो निरोद्धव्या इत्याशङ्क्य प्रथमं तावदस्याः सम्बन्धहेतुमुपन्यस्यति। चित्तं हीति। प्रख्याशीलत्वात् सत्त्वगुणम्। प्रवृत्तिशीलत्वाद्रजोगुणम् स्थितिशीलत्वात् तमोगुणम्। प्रख्याग्रहणमुपलक्षणार्थं तेनान्येऽपि सात्त्विकाः प्रसादलाघवप्रीत्यादयः सूच्यन्ते। प्रवृत्त्या च परितापशोकादयो राजसाः। स्थितिः प्रवृत्तिविरोधी तमोवृत्तिधर्म्मः स्थितिग्रहणाद् गौरवावरणदैन्यादय उपलक्ष्यन्ते। एतदुक्तं भवति एकमपि चित्तं त्रिगुणनिर्म्मिततया गुणानाञ्च वैषम्येण परस्परविमर्द्दवैचित्र्याद्विचित्रपरिणामं सदनेकावस्थमुपपद्यत इति। क्षिप्ताद्या एव चित्तस्य भूमयः यथासम्भवमवान्तरावस्थाभेदवत्यस्ता दर्शयति। प्रख्यारूपं हीति चित्तरूपेण परिणतं सत्त्वं चित्तसत्त्वं, तदेवं प्रख्यारूपतया सत्त्वप्राधान्यं चित्तस्य दर्शितम्। यत्र चित्ते सत्त्वात् किञ्चिदूने

रजस्तमसी यदा मिथःसमे भवतः तदैश्वर्य्यञ्च विषयाश्च शब्दादयस्तान्येव प्रियाणि यस्य तत्तथोक्तं सत्त्वप्राधान्यात् खलु चित्तं तत्त्वे प्रणिधित्सदपि तत्त्वस्य तमसा पिहितत्वादणिमादिकमेव तत्त्वमभिमन्यमानं तत्प्रणिधित्सति प्रणिधत्ते च क्षणम् अथ रजसा क्षिप्यमाणम्। तत्राप्यलब्धस्थिति सत् प्रियमात्रं भवति। शब्दादिषु पुनरस्य सरसवाही प्रेमा निरूढ एव। तदनेन विक्षिप्तं चित्तमुक्तम् क्षिप्तं दर्शयन् मूढमपि सूचयति तदेव तमसेति। यदा हि तमो रजो विजित्य प्रवृत्तं तदा चित्तसत्त्वावरकतमःसमुत्सारणेऽशक्तत्वात् रजस्तमस्थगितं चित्तमधर्म्माद्युपगच्छति। अज्ञानञ्च विपर्य्ययज्ञानमभावप्रत्ययालम्बनञ्च निद्राज्ञानमुक्तम्। ततश्च मूढावस्थापि सूचितेति। अनैश्वर्य्यं सर्व्वत्रेच्छाप्रतिघातः। अधर्म्मादिव्याप्तं चित्तं भवतीत्यर्थः। यदा तु तदेव चित्तसत्त्वमाविर्भूतसत्त्वमपगततमःपटलं सरजस्कं भवति तदा धर्म्मज्ञानवैराग्यैश्वर्य्याण्युपगच्छतीत्याह प्रक्षीणेत्यादि। मोहस्तमस्तदेव चावरणं प्रकर्षेण क्षीणं यस्य तत्तथोक्तम्। अतएव सर्वतो विशेषाविशेषलिङ्गमात्राऽलिङ्गपुरुषेषु प्रद्योतमानं तथापि न धर्म्मायैश्वर्य्याय च कल्पते प्रवृत्त्यभावादित्यत आह। अनुविद्धं रजोमात्रया रजसः प्रवर्त्तकत्वादस्ति धर्म्मादिरित्यर्थः। तदनेन संप्रज्ञातसमाधिसम्पन्नयोर्मधुभूमिकप्रज्ञाज्योतिषोर्म्मध्याधमयोर्योगिनोश्चित्तसत्त्वं संगृहीतम् संप्रत्यतिक्रान्तभावनीयस्य ध्यायिनश्चतुर्थीं चित्तावस्थामाह तदेव चित्तं रजोलेशान्मलादपेतम् अतएव स्वरूपप्रतिष्ठमभ्यासवैराग्यपुटपाकप्रबन्धविधूतरजस्तमोमयस्य हि बुद्धिसत्त्वतपनीयस्य स्वरूपप्रतिष्ठस्य विषयेन्द्रियप्रत्याहृतस्यानवसिताधिकारतया च कार्य्यकारिणो विवेकख्यातिः परं कार्य्यमवशिष्यत इत्याह सत्त्वपुरुषान्यताख्यातिमात्रं चित्तं धर्म्ममेघध्यानोपगं भवति। धर्म्ममेघस्य वक्ष्यते। अत्रैव योगिजनप्रसिद्धिमाह तदिति। सत्त्वपुरुषान्यताख्यातिमात्रं चित्तं धर्म्ममेघपर्य्यन्तं परं प्रसंख्यानमित्याचक्षते ध्यायिनः। चित्तसामान्याधिकरण्यं च धर्म्मधर्म्मिणोरभेदविवक्षया द्रष्टव्यम्। विवेकख्यातेर्हानहेतुं चितिशक्तेश्चोपादानहेतुं निरोधसमाधिमवतारयितुं चितिशक्तेः साधुतामसाधुताञ्च विवेकख्यातेर्दर्शयति चितिशक्तिरित्यादि। सुखदुःखमोहात्मकत्वमशुद्धिः। सुखमोहावपि विवेकिनं दुःखाकुरुतः। अतो दुःखवर्ज्जयौ तथाचातिसुन्दरमप्यन्तवत् दुनोति। तेन तदपि हेयमेव विवेकिनः। सेयमविशुद्धिरन्तश्च चितिशक्तौ पुरुषे न स्त इत्युक्तं शुद्धा चानन्ता चेति। ननु सुखदुःखमोहात्मकशब्दादीन् इय चेतयमाना तदाकारापन्ना कथं विशुद्धा तदाकारपरिग्रहपरिवर्जने च कुर्वती कथमनन्तेत्यत उक्तं दर्शितविषयेति। दर्शितो विषयः शब्दादिर्यस्यै सा तथोक्ता। भवेदेतदेवं यदि बुद्धिवच्चितिशक्तिर्विषयाकारतामापद्येत। किन्तु बुद्धिरेव विषयाकारेण परिणता सती अतदाकारायै चितिशक्त्यै विषयमादर्शयति ततः पुरुषश्चेतयत इत्युच्यते। ननु विषयाकारां बुद्धिमानारूढाया चितिशक्तेः कथं विषयवेदनं! विषयारोहे वा कथं न तदाकारापत्तिरिति अतः उक्तम् अप्रतिसंक्रमेति। प्रतिसंक्रमः सञ्चारः स चितेर्नास्तीत्यर्थः। स एव कुतोऽस्यां नास्तीत्यत उक्तम् अपरिणामिनीति। न चितेस्त्रिविधोऽपि धर्म्मधर्म्माऽवस्थालक्षणः परिणामोऽस्ति येन त्रितयरूपेण परिणता सती बुद्धिसंयोगेन परिणमेत। चितिशक्तेरसंक्रान्ताया अपि विषयसंवेदनमुपपादयिष्यते। तत्सिद्धं चितिशक्तिः शोभनेति, विवेकख्यातिस्तु बुद्धिसत्त्वात्मिका अशोभनेत्युक्तम्। अतश्चितिशक्तेर्विपरीततेति। यदा च विवेकख्यातिरपि हेया तदा कैव कथा वृत्त्यन्तराणां दोषबहुलानामिति भावः। ततस्तद्वतो निरोधसमाधेरवतारो युज्यते इत्याह अतस्तस्यामिति। ज्ञानप्रसादमात्रेण हि परेण वैराग्येण विवेकख्यातिमपि निरुणद्धीत्यर्थः। अथ निरुद्धाऽशेषवृत्ति चित्तं कीदृशमित्यत आह तदवस्थमित्यादि। स निरोधः अवस्था यस्य तत्तथोक्तम्। निरोधस्य स्वरूपमाह स निर्वीज इति। क्लेशसहितः कर्म्माशयो जात्यायुर्भोगबीजं तस्मान्निर्गतः निर्वीजः। अस्यैव योगिजनप्रसिद्धामन्वर्थसंज्ञामादर्शयति। न तत्रेति। उपसंहरति। द्विविधः स योगश्चित्तवृत्तिनिरोध इति" विवरणम्।

“तदवस्थे चेतसि विषयाभावात् बुद्धिबोधात्मा पुरुषः किंस्वभावः? इति—भा०

“तदा द्रष्टुः स्वरूपेऽवस्थानम्” ३सू०।

“स्वरूपप्रतिष्ठा तदानीं चितिशक्तिर्यथा कैवल्ये व्युत्थानचित्ते तु सति तथापि भवन्ती न तथा” भा०।

“संप्रत्युत्तरसूत्रमवतारयञ्चोदयति। तदवस्थे चेतसीति

क्रियाक्षेपे तत्तदाकारपरिणतबुद्धिबोधात्मा स्वयं पुरुषः सदानुभूयते न तु बुद्धिबोधरहितोऽतोऽस्य पुरुषस्य बुद्धिबोधस्वभावः सवितुरिव प्रकाशः। नच संस्कारशेषे चेतसि सोऽस्ति, न च स्वभावमपहाय भावो वर्त्तितुमर्हति इति भावः। स्यादेतत् संस्कारशेषामपि बुद्धिं कस्मात् पुरुषो न बुध्यते? इत्यत आह विषयाभावादिति। न बुद्धिमात्रं पुरुषस्य विषयोऽपि तु पुरुषार्थवती बुद्धिः। विवेकख्यातिविषयभोगौ च पुरुषार्थौ तौ च निरुद्धावस्थायां न स्त इति सिद्धो विषयाभाव इत्यर्थः। सूत्रेण परिहरति "तदा द्रष्टुः स्वरूपेऽवस्थानम्" सू०। "स्वरूप इत्यारोपितम् शान्तघोरमूढस्वरूपं निवर्त्तयति पुरुषस्य हि चैतन्यं स्वरूपमनौपाधिकम् नतु बुद्धिबोधः शान्तादिरूप औपाधिको हि सः स्फटिकस्येव स्वभावतः स्वच्छधवलस्य जपाकुसुमसन्निधानोपाधिररुणिमा. नचोपाधिनिवृत्तावुपहितनिवृत्तिरतिप्रसङ्गादिति भावः। स्वरूपस्य चाभेदेऽपि भेदं विकल्प्य अधिकरणभाव उक्त इति। अयमेवार्थो भाष्यकृता द्योत्यते। स्वरूपप्रतिष्ठेति। तदानीं निरोधावस्थायां न व्युत्थानावस्थायामिति भावः। स्यादेतत् व्युत्थानावस्थायामप्रतिष्ठिता, स्वरूपे चितिशक्तिः, निरोधावस्थायां प्रतितिष्ठन्ती परिणामिनी स्यात् व्युत्थाने वा स्वरूपप्रतिष्ठाने सति व्युत्थान निरोधयोरविशेष इत्यत आह व्युत्थानचित्ते त्विति न जातु कूटस्थनित्या चितिशक्तिः स्वरूपात् च्यवते। तेन यथा निरोधे तथैव व्युत्थानेऽपि। न खलु शुक्तिकायाः प्रमाणविपर्य्ययज्ञानगोचरत्वेऽपि स्वरूपोदयव्ययौ भवतः प्रतिपत्ता त्वतथाभूतमपि तथात्वेनाभिमन्यते। निरोधसमाधिमपेक्ष्य सम्प्रज्ञातोऽपि व्युत्थानमेवेति" विवरणम्।

"कथन्तर्हि दर्शितविषयत्वात्"—भा०

"वृत्तिसारूप्यमितरत्र" ४सू०

"व्युत्थाने याः चित्तवृत्तयः तदविशिष्टवृत्तिः पुरुषः। तथा च सूत्रं "एकमेव दर्शनं" "ख्यातिरेव दर्शनमिति" "चित्तम् अयस्कान्तमणिकल्पं सन्निधिमात्रोपकारि दृश्यत्वेन स्वं भवति पुरुषस्य स्वामिनः। तस्माच्चित्तवृत्तिबोधे पुरुषस्यानादिसम्बन्धो हेतुः" भाष्यम्।

"सूत्रान्तरमवतारयितुं पृच्छति कथन्तर्हि इति। यदि भवति न तथा केन तर्हि प्रकारेण प्रकाशत इत्यर्थः। हेतुपदमध्याहृत्य सूत्रं पठति। दर्शित विषयत्वात्। वृत्तिसारूप्यमितरत्र। इतरत्र व्युत्थाने याश्चित्तवृत्तयः शान्तघोरमूढास्ता एव अविशिष्टा अभिन्ना वृत्तयो यस्य पुरुषस्य स तथोक्तः सारूप्यमित्यत्र सशब्द एकपर्य्यायः। एतदुक्तं भवति जपाकुसुमस्फटिकयोरिव बुद्धिपुरुषयोः सन्निधानादभेदग्रहे बुद्धिवृत्तीः पुरुषे समारोप्य शान्तोऽस्मि दुःखितोऽस्मि मूढोऽस्मीति अध्यवस्यति। यथा मलिने दर्पणतले प्रतिबिम्बितं मुखं मलिनतामारोप्य शोचत्यात्मानं मलिनोऽस्मीति। यद्यपि पुरुषसमारोपोऽपि शब्दादिविज्ञानवत् बुद्धिवृत्तिः यद्यपि च प्राकृतत्वेनाचिद्रूपतयानुभाव्यस्तथापि बुद्धेः पुरुषत्वमापादयन् पुरुषवृत्तिरिवानुभव इवावभासते। तथा चायमविपर्य्ययोऽप्यात्मा विपर्य्ययवानिवाऽभोक्तापि भोक्तेव विवेकख्यातिरहितोऽपि तत्सहित इवाविवेकख्यातेः प्रकाशते। एतच्च चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनमित्यत्र सत्त्वपुरुषयोरत्यन्तासङ्कीर्णयोः प्रत्ययाविशेषो भोग इत्यत्र चोपपादयिष्यते। एतच्च मतान्तरेऽपि सिद्धमित्याह तथा चेति। पञ्चशिखाचार्य्यस्य सूत्रम् "एकमेव दर्शनमिति"। ननु कथमेकं दर्शनं यावता बुद्धेः शब्दादिविषया विवेकविषया च वृत्तिः प्राकृततया जडत्वेनानुभाव्या, दर्शनं मतोऽन्यत् पुरुषस्य, चैतन्यमनुभवो दर्शनमित्यत आह "ख्यातिरेव दर्शनमिति" उदयव्ययधर्म्मिणीं वृत्तिं ख्यातिं लौकिकीमभिप्रेत्यैतदुक्तमेवेति चैकमेव चैतन्यन्तु पुरुषस्य स्वभावो न ख्यातिः। तत्तु न लोकप्रत्यक्षगोचरोऽपि त्वागमानुमानगोचर इत्यर्थः। तदनेन व्युत्थानावस्थायां मूलकारणमविद्यां दर्शयता तद्धेतुकसंयोगो भोगहेतुः स्वस्वामिभावोऽपि सूचित इति तमुपपादयन्नाह। चित्तं स्वं भवति। पुरुषस्य स्वामिन इति सम्बन्धः। ननु चित्तजनितमुपकारं भजमानो हि चेतनश्चित्तस्येशिता न चास्य तज्जनितोपकारसम्भवस्तदसम्बन्धादनुपकार्य्यत्वात् तत्संयोगतदुपकारभागित्वे परिणामप्रसङ्गादित्यत आह अयस्कान्तमणिकल्पं चित्तं सन्निधिमात्रोपकारि दृश्यत्वेनेति। न पुरुषसंयुक्तं चित्तमपि तु तत्सन्निहितं सन्निधिश्च पुरुषस्य न देशतः कालतो वा तदसंयोगात् किन्तु योग्यतालक्षणोऽस्ति च पुरुषस्य भोक्तृशक्तिश्चित्तस्य भोग्यशक्तिः। तदुक्तम् दृश्यत्वेनेति। शब्दाद्याकारपरिणतस्य भोग्यत्वेनेत्यर्थः। भोगस्य यद्यपि शब्दाद्याकारवृत्तिश्चित्तस्य धर्म्मस्तथापि चित्तचैतन्ययोरभेदसमारोपाद्वृत्तिसारूप्याद्वा पुरुषस्येत्युक्तम्। तस्माच्चित्तेनासंयोगेऽपि तज्जनितोपकारभागितः

पुरुषस्यापरिणामिता चेति सिद्धम्। ननु स्वस्वामिसम्बन्धो भोगहेतुरविद्यानिमित्तोऽविद्या तु किन्निमित्ता न खलु निर्निमित्तं कार्य्यमुत्पद्यते। यथाहुः "स्वप्नादिवदविद्यायाः प्रवृत्तिः कस्य किंकृता" इति शङ्कामुपसंहारव्याजेनोद्धरति। तस्मात् चित्तवृत्तिबोधे शान्तघोरमूढाकारचित्तवृत्त्युपभोगे अनाद्यविद्यानिमित्तत्वादनादिसंयोगः हेतुः अविद्यावासनयोश्च सन्तानौ बीजाङ्कुरसन्तानवदनादिरिति भावः" विवरणम्।

अन्तःकरणशब्दे १९५ पृ० अधिकमुक्तम्।

कैवल्यपादे च ज्ञानज्ञेययोर्भेदव्यवस्थापनेन तद्विशेष उक्तो यथा "कुतश्चैतदन्याय्यम्" भा० "वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः" सू०। "बहुचित्तावलम्बनीभूतमेकं वस्तु साधारणं तत् खलु नैकचित्तपरिकल्पितं नाप्यनेकचित्तपरिकल्पितं किन्तु स्वप्रतिष्ठितं कथं? वस्तुसाम्ये चित्तभेदात्, धर्म्मापेक्षं चित्तस्य वस्तुसाम्येऽपि सुखज्ञानं भवति, अधर्मापेक्षं तत एव दुःखज्ञानम्, अविद्यापेक्षं तत एव मूढज्ञानं सम्यग्दर्शनापेक्षं तत एव माध्यस्थ्यज्ञानमिति। कस्य तच्चित्तेन परिकल्पितं? नचान्यचित्तपरिकल्पितेनार्थेनान्यस्य चित्तोपरागो युक्तः तस्माद्वस्तुज्ञानयोर्ग्राह्यग्रहणभेदभिन्नयोर्विभक्तः पन्था नानयोः सङ्करगन्धोऽप्यस्तीति साङ्ख्यपक्षे पुनर्वस्तु त्रिगुणं चलञ्च गुणवृत्तमिति धर्मादिनिमित्तापेक्षं चित्तैरभिसंबध्यते निमित्तानुरूपस्य च प्रत्ययस्योत्पद्यमानस्य तेन तेनात्मना हेतुर्भवति। केचिदाहुर्ज्ञानसहभूरेवार्थो भोग्यत्वात् सुखादिवदिति तत्र तया द्वारा साधारणत्वं बाधमानाः पूर्वोत्तरेषु क्षणेषु वस्तुरूपमेवापह्नुवते" भा० तदेवमुत्सूत्रं भाष्यकृद्विज्ञानातिरिक्तस्थापने युक्तिमुक्त्वा सौत्रीं युक्तिमवतारयति कुतश्चैतदिति। वस्तुसाम्ये इति यज्ज्ञाननानात्वे यस्यैकत्वं तत्ततोऽत्यन्तं भिद्यते यथा चैत्रस्य ज्ञानमेकं भिन्नेभ्यो देवदत्तविष्णुमित्रमैत्रप्रत्ययेभ्यो भिद्यते ज्ञाननानात्वेऽपि चार्थो न भिद्यते इति भवति विज्ञानेभ्योऽन्यः अभेदश्चार्थस्य ज्ञानभेदेऽपि प्रमातॄणां परस्परप्रतिसन्धानादवसीयते। अस्ति हि रक्तद्विष्टविमूढमध्यस्थानामेकस्यां योषिति प्रतीयमानायां प्रतिसन्धानं या त्वया दृश्यते सैव मयापीति। तस्माद्वस्तुसाम्ये चित्तभेदात् ज्ञानभेदात्तयोरर्थज्ञानयोर्विभक्तः पन्थाः स्वरूपभेदोपायः सुखज्ञानं कान्तायाः कान्तस्य सपत्नीनां दुःखज्ञानं तामविन्दतो विषादः। स्यादेतत् यत्रैकस्य चित्तेन परिकल्पितः कामिनीलक्षणोऽर्थः तैनेवान्येषामपि चित्तमुपरज्यते इति साधारणमुपपद्यते इत्यत आह नचान्येति तथा सत्येकस्मिन्नीलज्ञानवति सर्व एव नीलज्ञानवन्तः स्युरिति नन्वर्थवादिनामप्येकोऽर्थः कथं सुखादिभेदाद्भिन्नविज्ञानहेतुर्न ह्यविलक्षणात् कारणात् कार्यभेदो युक्त इत्यत आह साङ्ख्यपक्ष इति एकस्यैव बाह्यस्य वस्तुनस्त्रैगुण्यपरिणामस्य त्रैरूप्यमुपपन्नम्।

एवमपि सर्वेषामविशेषेण सुखदुःखमोहात्मकं विज्ञानं स्यादित्यत आह धर्मादिनिमित्तापेक्षं रजःसहितं सत्वं धर्मापेक्षं सुखज्ञानं जनयति। एवमधर्मापेक्षं रजो दुःखं, तमस्तु तथाभूतं मूढज्ञानम्। सत्वमेव तु विगतरजस्कं विद्यापेक्षं माध्यस्थ्यज्ञानमिति ते च धर्मादयो न सर्वे सर्वत्र पुरुषे सन्ति। किन्तु कश्चित् कचिदिति अभ्युपपन्ना व्यवस्थेति। अत्र केचिदाहुः प्रवादुकाः ज्ञानसहभूरेवार्थो भोग्यत्वात् सुखादिवदिति एतदुक्तं भवति भवत्यर्थो ज्ञानात् व्यतिरिक्तः तथाप्यसौ जड़त्वात् न ज्ञानमन्तरेण शक्यः प्रतिपत्तुं ज्ञानेन तु भासनीयः तथाच ज्ञानसमय एवास्ति नान्यदा प्रमाणाभावादिति तदेतन्मतं तावत् दूषयति भाष्यकारः तत्र तया द्वारेति वस्तु खलु सर्वचित्तसाधारणमनेकक्षणपरम्परोह्यमानं परिणामात्मकमनुभूयते लौकिकपरीक्षकैः तच्चेद्विज्ञानेन सह भवेत् नूनमेवंविधमेव चेदिदमंशस्योपरि कोऽयमनुरोधः येन सोऽपि नापह्नूयेतेत्यर्थः" विव०।

"नचैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात्" सू०।

"एकचित्ततन्त्रं चेद्वस्तु स्यात्तदा चित्ते व्यग्रे निरुद्धे वा स्वरूपमेव तेनापरामृष्टमन्यस्याविषयीभूतमप्रमाणकमगृहीतस्वभावकं केनचित्तदानीं किं तत्स्यात्? सम्बध्यमानं वा पुनश्चित्तेन कुत उत्पद्येत ये चास्यानुपस्थिताभागास्ते चास्य न स्युरेवं नास्ति पृष्ठमित्युदरमपि न गृह्येत तस्मात् स्वतन्त्रोऽर्थः सर्वपुरुषसाधारणः स्वतन्त्राणि च चित्तानि प्रतिपुरुषं प्रवर्त्तन्ते तयोः सम्बन्धादुपलब्धिः पुरुषस्य भोग इति" भा०।

"मा वा भूदिदमंशस्यापह्नवो ज्ञानसहभूरेवास्त्वर्थः तत्राप्याह नचैकं किं स्यात् यद्धि घटग्राहि चित्तं तद् यदा पटद्रव्यव्यग्रतया न घटे वर्त्तते यद् वा विवेकविषयमासीत् तदेव च निरोधं समापद्यते तदा घटज्ञानस्य वा विवेकज्ञानभेदमात्रजीवनस्तज्ज्ञानाभावान्नष्ट एव स्यादित्याह एकचित्तेति किं तत् स्यात् न स्यादित्यर्थः। संबध्यमानञ्च चित्तेन तद्

वस्तु विवेकोवा घटो वा कुत उत्पद्यते नियतकारणान्वयव्यतिरेकानुविधायिभावानि हि कार्य्याणि न स्वकारणमतिवर्त्य कारणान्तराद्भवितुमीशते, मा भूदकारणत्वे तेषां कादाचित्कत्वव्याघातः न च तज्ज्ञानकारणत्वमेव तत्कारणत्वमिति युक्तम्। आशाभोदकस्य उपार्ज्जितमोदकस्य वोपयुज्यमानस्य रसवीर्य्यविपाकादिसाम्यप्रसङ्गात् तस्मात् साधूक्तं सम्बध्यमानं वा पुनश्चित्तेनेति। अपि च योयोऽर्वाग्भागः स सर्वोमध्यपरभागव्याप्तः ज्ञानाधीने सद्भावे त्वस्याननुभूयमानत्वान्मध्यपरभागौ न स्त इतिव्यापकाभावादर्वाग्भागोऽपि न स्यात् इत्यर्थाभावात् कुतो ज्ञानसहभूरर्थ इत्याह। ये चास्येति अनुपस्थिता अज्ञाताः, उपसंहरति तस्मादिति सुगमं शेषम्" विवरणम्।

"तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताज्ञातम्" सू०।

"अयस्कान्तमणिकल्पा विषयाः। अयःसधर्म्मकं चित्तमभिसम्बध्योपरञ्जयन्ति येन च विषयेणोपरक्तं चित्तं स विषयोज्ञातस्ततोऽन्यः पुनरज्ञातोवस्तुनोज्ञाताज्ञातस्वरूपत्वात् परिणामि चित्तम्" भा०।

"स्यादेतत् अर्थश्चेत् स्वतन्त्रः स च जड़स्वभाव इति न कदाचित् प्रकाशेत प्रकाशने वा जड़त्वमप्यस्यापगतमिति भावोऽप्यपगच्छेत् न जातु स्वभावमपहाय भावोवर्त्तितुमर्हति न चेन्द्रियाद्याधेयो जड़स्वभावस्यार्थस्य धर्म्मःप्रकाश इति साम्प्रतम् अर्थधर्म्मत्वे नीलत्वादिवत् सर्वपुरुषसाधारण इत्येकः शास्त्रार्थस्य इति सर्व एव विद्वांसः प्रसज्येरन् न जाल्मःकश्चिदस्ति। न चातीतानागतयोः धर्म्म प्रत्युत्पन्नयुक्तः तस्मात् स्वतन्त्रोऽर्थउपलम्भविषय इति मनोरथमात्रमेतदित्यत आह तदुपरागेति। जड़स्वभावोऽप्यर्थ इन्द्रियप्रणाड़िकया चित्तमुपरञ्जयति तदेवंभूतं चित्तदर्पणमुपसंक्रान्तप्रतिबिम्बा चितिशक्तिश्चित्तमर्थोपरक्तं चेतयमानार्थमनुभवति नत्वर्थे किञ्चित् प्राकट्यादिकमाधत्ते नाप्यसंबद्धा चित्तेन, तत् प्रतिबिम्बसंक्रान्ते रुक्तत्वादिति। यद्यपि च सर्वगतत्वाच्चित्तस्य चेन्द्रियस्य चाहङ्कारिकस्य विषये नास्ति सम्बन्धः तथापि यत्र शरीरे वृत्तिमच्चित्तं तेन सह सम्बन्धो विषयाणामित्ययस्कान्तमणिकल्प इत्युक्तम् अयःसधर्मकं चित्तमिति। इन्द्रियप्रणालिकयाभिसंबध्योपरञ्जयन्ति अतएव चित्तं परिणामीत्याह वस्तुन इति" विव०।

"यस्य तु तदेव चित्तं विषयस्तस्य सदाऽपरिणामित्वात्" भा०।

"सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात्" सू०।

"यदि चित्तवत् प्रभुरपि पुरुषः परिणमेत् ततस्तद्विषयाश्चित्तवृत्तयः शब्दादिविषयवत् ज्ञाताज्ञाताः स्युः सदाज्ञातत्वन्तु मनसस्तत्प्रभोः पुरुषस्यापरिणामित्वमनुमापयति" भा०।

"तदेवं चित्तव्यतिरेकेणार्थमवस्थाप्य तेभ्यः परिणतिधर्मकेभ्यो व्यतिरिक्तमात्मानमादर्शयितुं तद्धर्म्ममपरिणामित्वमस्य वक्तुं पूरयित्वा सूत्रं पठति "यस्य तु तदेव चित्तं विषयस्तस्य सदाऽपरिणामित्वात्"। क्षिप्तमूढविक्षिप्तैकाग्रतावस्थितं चित्तमानिरोधात् सर्वदा पुरुषेणानुभूयते वृत्तिमत् तत् कस्य हेतोः? यतः पुरुषोऽपरिणामी परिणामित्वे चित्तवत् पुरुषोऽपि ज्ञाताज्ञातविषयो भवेत्। ज्ञातविषय एव त्वयं तस्मादपरिणामी ततश्च परिणामिभ्योऽतिरिच्यते इति सदेतदाह यदि चित्तवदिति। सदा ज्ञातत्वं तु मनसः सवृत्तिकस्य तस्य यः प्रभुः स्वामी भोक्तेति यावत् तस्य प्रभोः पुरुषस्यापरिणामित्वमनुमापयति तथाचापरिणामिनस्तस्य परिणामिनश्चित्तात् पुरुषस्य भेद इति भावः" विव०।

"स्यादाशङ्का चित्तमेव स्वाभासं विषयाभासञ्च वैशेषिकाणां चित्तात्मवादिनाञ्च भविष्यत्यग्निवत्" भा०।

"न तत्स्वाभासं दृश्यत्वात्" सू०।

"यथेतराणीन्द्रियाणि शब्दादयश्च दृश्यत्वान्न स्वाभासानि तथा मनोऽपि प्रत्येतव्यम्। न चाग्निरत्र दृष्टान्तः न ह्यग्निरात्मरूपमप्रकाशं प्रकाशयति। प्रकाशश्चायं प्रकाश्यप्रकाशकसंयोगे दृष्टः न च स्वरूपमात्रेऽस्ति संयोगः किञ्च स्वाभासं चित्तमित्यग्राह्यमेव कस्यचिदिति शब्दार्थः। तद्यथा स्वात्मप्रतिष्ठमाकाशमित्यप्रतिष्ठमित्यर्थः स्वबुद्धिप्रचारप्रतिसंवेदनात् सत्त्वानां प्रवृत्तिर्दृश्यते। क्रुद्धोऽहम्भीतोऽहममुत्र मे रागोऽमुत्र मे क्रोध इत्येतत् स्वबुद्धेरग्रहणे न युक्तमिति" भा०।

"अत्र वैनाशिकमुत्थापयति स्यादाशङ्केति अयमर्थः स्यादेतदेवं यदि चित्तमात्मनो विषयः स्यात् अपि तु स्वप्रकाशनं तत् विषयाभासं पूर्वचित्तं प्रतीत्य समुत्पन्नं तत्कुतः पुरुषस्य सदा ज्ञानविषयत्वं कुतस्तरां चाऽपरिणामतया परिणामिनश्चित्ताद्भेद इति भवेदेतदेवं यदि स्वसंवेदनं चित्तं स्यान्नत्वेतदस्ति तद्धि परिणामितया नीलादिवदनुभवव्याप्यम्। यस्मादनुभव-

व्याप्यं न तत् स्वाभासं भवितुमर्हति स्वात्मनि वृत्तिविरोधात् नहि तदेव क्रिया च कर्म च कारकञ्च न हि पाकः पच्यते छिदा वा छिद्यते पुरुषस्त्वपरिणामी नानुभवकर्मेति नास्मिन् स्वयंप्रकाशता न युज्यते अपराधीनप्रकाशता ह्यस्य स्वयंप्रकाशता नानुभवकर्मता तस्मात् दृश्यत्वात् दर्शनकर्म चित्तं न स्वाभासम् आत्मप्रकाशप्रतिबिम्बितस्यैव चित्तस्य तावद्वृत्तिविषयाः प्रकाशन्त इति भावः। ननु दृश्योऽग्निः स्वयं प्रकाशश्च न हि यथा घटादयोऽग्निना व्यज्यन्ते एवमग्निरग्न्यन्तरेणेत्यत आह। नचाग्निरत्रेति कस्मात्? न हीति मा नामाग्निरग्न्यन्तरात् प्रकाशिष्ट विज्ञानात् तु प्रकाशत इति न स्वयं प्रकाशत इति न व्यभिचार इत्यर्थः। प्रकाशाद्यवच्छिनत्ति। क्रियारूपः प्रकाश इति यावत् एतदुक्तं भवति या या क्रिया सा सा सर्वा कर्तृकरणकर्मसम्बन्धेन दृष्टा यथा पाको दृष्टस्तैलाग्नितण्डुलसम्बन्धेन, तथा प्रकाशोऽपि क्रियेति तयापि तथा भवितव्यं सम्बन्धस्य भेदाश्रयो नाभेदे सम्भवति इत्यर्थः। किञ्च स्वाभासं चित्तमित्यग्राह्यमेव कस्यचिदिति शब्दार्थः। स्यादेतत् मा भूत् ग्राह्यं चित्तं न हि ग्रहणस्य कारणस्याव्यापकस्य च निवृत्तौ चित्तनिवृत्तिः इत्यत आह स्वबुद्धीति बुद्धिश्चित्तं प्रचारा व्यापाराः सत्त्वाः प्राणिनश्चित्तस्य वृत्तिभेदाः क्रोधलोभादयः स्वाश्रयेण च सह प्रत्यात्ममनुभूयमानाश्चित्तस्याग्राह्यतां विघटयन्तीत्यर्थः। स्वबुद्धिप्रचारप्रतिसंवेदनमेव विशदयति क्रुद्धोऽहमिति" विवरणम्।

"एकसमये च भयानवधारणम्"। सू०।

"न चैकस्मिन् क्षणे स्वपररूपावधारणं युक्तं क्षणिकवादिनां यद्भवनं सैव क्रिया तदेव च कारकमित्यभ्युपगमः"। भा०।

"स्वाभासं विषयाभासं चित्तमिति ब्रुवाणो न तावत् येनैव व्यापारेणात्मानमवधारयति तेनैव विषयमपीति वक्तुमर्हति नह्यविलक्षणो व्यापारः कार्य्यभेदाय पर्याप्तः, तस्माद्व्यापारभेदोऽङ्गीकर्त्तव्यः न च वैनाशिकानामुत्पत्तिभेदातिरिक्तः अस्ति व्यापारः न चैकस्या एवोत्पत्तेरविलक्षणायाः कार्य्यवैलक्षण्यसम्भवः तस्याकस्मिकत्वप्रसङ्गात्। न चैकस्योत्पत्तिद्वयसम्भवः तस्मादर्थस्य च ज्ञानरूपस्य चावधारणं नैकस्मिन् समये इति तदेतद्भाष्येणोच्यते न चैकस्मिन् क्षणे इति तथाचोक्तं वैनाशिकैः 'भूतिर्यैषा क्रिया सैव कारकं सैव चोच्यते" इति तस्मादृश्यत्वमेतच्चित्तस्य सदातनं स्वाभासत्वमुपनयत् द्रष्टारञ्च द्रष्टुरपरिणामित्वं च दर्शयतीति सिद्धम्" विवरणम्।

"चित्तान्तरे दृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसङ्करश्च" सू०।

"स्यान्मतिः स्वरसनिरुद्धं चित्तं चित्तान्तरेण समनन्तरेण गृह्यत" इति। अथ चित्तं चेच्चित्तान्तरेण गृह्येत बुद्धिः केन गृह्यते साप्यन्यया साप्यन्ययेत्यतिप्रसङ्गः स्मृतिसङ्करश्च यावन्तो बुद्धिवृत्तीनामनुभवास्तावत्यः स्मृतयः प्राप्नुवन्ति तत्सङ्कराच्चैकस्मृत्यनवधारणञ्च स्यादित्येवं बुद्धिप्रतिसंवेदिनं पुरुषमपलपद्भिः वैनाशिकैः सर्वमेवाकुलीकृतं, ते तु भोक्तृस्वरूपं यत्र क्वचन कल्पयन्तो न न्यायेन संगच्छन्ते। केचित् सत्त्वमात्रमपि परिकल्प्यास्ति स सत्त्वो य एतान् स्कन्धान् निक्षिप्यान्यांश्च प्रतिसन्दधातीत्युक्त्वा तत एव पुनस्त्रस्यन्ति तथा स्कन्धानां पुनर्निर्वेदाय विरागायानुत्पादाय प्रशान्तये गुरोरन्तिके ब्रह्मचर्यं चरिष्यामीत्युक्त्वा सत्त्वस्य पुनः सत्त्वमेवापह्नुवते "साङ्ख्ययोगादयस्तु प्रवादाः स्वशब्देन पुरुषमेव स्वामिनं चित्तस्य भोक्तारमुपयन्तीति" भा०।

"पुनर्वैनाशिकमुत्थापयति। स्यान्मतिः मा भूत् दृश्यत्वेन स्वसंवेदनम् एवमप्यात्मा न सिध्यति। स्वसन्तानवर्त्तिना चरमचित्तक्षणेन स्वरसनिरुद्धस्वजनकचित्तक्षणग्रहणादित्यर्थः। समञ्च तज्ज्ञानत्वेनानन्तरञ्च व्यवहितत्वेन समनन्तरं तेन। चित्तवृत्तयश्च। बुद्धिरिति चित्तमित्यर्थः मागृहीता चरमा बुद्धिः पूर्व्वबुद्धिग्रहणसमर्था ह्यनवबुद्धबुद्धा संबद्धा पूर्व्वा बुद्धिर्बुद्धा भवितुमर्हति। नह्यगृहीतदण्डो दण्डिनमवगन्तुमर्हति तस्मादनवस्थेति विज्ञानवेदनसंज्ञारूपसंस्काराः स्कन्धाः। साङ्ख्ययोगादयः प्रवादाः साङ्ख्याश्च योगाश्च तएवादयो येषां वैशेषिकादिप्रवादानान्ते साङ्ख्ययोगादयः प्रवादाः सुगममन्यत्" विवरणम्।

"कथं?" भा० "चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम्" सू०।

"अपरिणामिनी हि भोक्तृशक्तिरप्रतिसंक्रमा च परिणामिन्यर्थे प्रतिसंक्रान्तेव तद्वृत्तिमनुपतति तस्याश्च प्राप्तचैतन्योपग्रहरूपाया बुद्धिवृत्तेरनुकारिमात्रतया बुद्धिवृत्त्यविशिष्टा हि ज्ञानवृत्तिराख्यायते तथाचोक्तं "न पातालं न च विवरं गिरीणां नैवान्धकारं कुक्षयो नोदधीनाम्। गुहा यस्यां निहितं ब्रह्म शाश्वतं बुद्धिवृत्तिविशिष्टं कवयो वेदयन्ते इति" भा०।

“स्यादेतत् यदि चित्तं न स्वाभासं नापि चित्तान्तरवेद्यं त्वात्मनापि कथं भोक्ष्यते चित्तं? न खल्वात्मन स्वयंप्रकाशस्याप्यस्ति काचित् क्रिया न तामन्तरेण कर्त्ता न चासम्बद्धश्चित्तेन कर्म्मणा तस्य भोक्ता व्यतिप्रसङ्गादित्याशयवान् पृच्छति कथमिति। तत्रोत्तरमाह चितेरिति। यत् तदवोचत् वृत्तिसारूप्यमितरत्रेति तदितः समुत्थितचित्तेः स्वबुद्धिसंवेदनं बुद्धेस्तदाकारापत्तौ चितिप्रतिबिम्बाधारतया तद्रूपतापत्तौ सत्यां यथाहि चन्द्रमसः क्रियामन्तरेणापि संक्रान्तचन्द्रप्रतिबिम्बममलं जलमचलं चलमिव चन्द्रमसमवभासयति एवं विनापि चितिव्यापारम् उपसंक्रान्तचितिप्रतिबिम्बं चित्तं स्वगतया क्रियया क्रियावतीमसङ्गतामपि सङ्गतां चितिशक्तिमवभासयत् भोग्यभावनाकादयत् भोक्तृभावमापादयति तस्या इति सूत्रार्थः भाष्यमप्येतदर्थमस्तत्तत्र तत्र व्याख्यातम् इति न व्याख्यातमत्र बुद्धिवृत्त्यविशिष्टत्वे ज्ञानवृत्तेरागममुदाहरति तथाचोक्तं न पातालमिति शाश्वतस्य शिवस्य ब्रह्मणो विशुद्धस्वभावस्य चितिच्छायापन्नां मनोवृत्तिमेव चितिच्छायापन्नत्वाच्चितेरप्यविशिष्टां गुहां वेदयन्ते तस्यामेव गुहायां तद् गुह्यं ब्रह्म तदवनयितुं स्वयंप्रकाशमनावरणमनुपसर्गं प्रद्योतते परमदेहस्य भगवत इति तदेवं दृश्यत्वेन चित्तस्य परिणामिन स्तदतिरिक्तः पुमान परिणतिधर्म्माप्युपादितः” विव०।

“कथ चैतदभ्युपगम्यते” भा०।

“द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम्” सू०।

“मनोहि मन्तव्येनार्थेनोपरक्तं तत् स्वयञ्च विषयत्वाद्विषयिणा पुरुषेणात्मीयया वृत्त्याभिसम्बद्धं तदेतच्चित्तमेव द्रष्टृदृश्योपरक्तं विषयविषयिनिर्भासं चेतनाचेतनस्वरूपापन्नं विषयात्मकमप्यविषयात्मकमिवाचेतनं चेतनमिव स्फटिकमणिकल्पं सर्व्वार्थमित्युच्यते। तदनेन चित्तसारूप्येण भ्रान्ताः केचित्तदेव चेतनमित्याहुः अपरे चित्तमात्रमेवेदं सर्वं, नास्ति खल्वयं गवादिर्घटादिश्च सकारणो लोक इति, अनुकम्पनीयास्ते कस्मात्? अस्ति हि तेषां भ्रान्तिबीजं सर्वरूपाकारनिर्भासं चित्तमिति समाधिप्रज्ञायां प्रज्ञेयोऽर्थः प्रतिबिम्बीभूतस्तस्यालम्बनीभूतत्वादन्यः स चेदर्थश्चित्तमात्रं स्यात् कथं प्रज्ञयैव प्रज्ञारूपमवधार्य्येत तस्मात् प्रतिबिम्बीभूतोऽर्थः प्रज्ञायां येनावधार्य्यते स पुरुष इति एवं ग्रहीतृग्रहणग्राह्यस्वरूपचित्तभेदात्त्रयमप्येतज्जातितः प्रविभजन्ते सम्यग्दर्शिनस्तैरधिगतः पुरुषः” वेदव्यासभाष्यम्

“संप्रति लोकप्रत्यक्षमप्यत्र प्रमाणयति। अत चैतदिति अवश्यं चैतदित्यर्थः। द्रष्ट्रित्यादि यथा हि नीलाद्यनुरक्तं चित्तं नीलाद्यर्थं प्रत्यक्षेणैवावस्थापयति एवं द्रष्टृच्छायापत्त्या तदनुरक्तं चित्तं द्रष्टारमपि प्रत्यक्षेणावस्थापयति अस्ति हि इदाकारं ज्ञानं नीलमहं सम्वेद्मि” इति तस्मात् ज्ञेयवत् ज्ञातापि प्रत्यक्षसिद्धोऽपि न विविच्यावस्थापितो यथा जले चन्द्रमसो बिम्बं नत्वेतावता तदप्रत्यक्षं न चास्य जलगतत्वे तदप्रमाणमिति चन्द्ररूपेण प्रमाणं भवितुमर्हति तस्माच्चित्ते प्रतिबिम्बिततया चैतन्यगोचरापि चित्तवृत्तिर्न चैतन्यागोचरेति तदिदं सर्व्वार्थत्वं चित्तस्येति तदेतदाह मनोहीति न केवलः तदाकारापत्त्या मन्तव्येनार्थेनोपरक्तं मनः अपितु स्वयं चेति चकारो भिन्नक्रमः पुरुषेणेत्यस्यानन्तरं द्रष्टव्यः तच्छायापत्तिः पुरुषस्य वृत्तिः इयञ्च चैतन्यच्छायपत्तिश्चित्तस्य वैनाशिकैरभ्युपेतव्या कथमन्यथा चित्ते चैतन्यमेते आरोपयाम्बभूवुरित्याह तदनेनेति केचिद्वैनाशिका बाह्यार्थवादिनः। अपरे विज्ञानमात्रवादिनः। ननु यदि चित्तमेव द्रष्ट्राकारं दृश्याकारं चानुभूयते हन्त चित्तादभिन्नावेव तु द्रष्टृदृश्यौ यथाहुः। “अभिन्नोऽपि हि बुद्ध्यात्मा विपर्य्यासितदर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते” इति तत्कथमेतेऽनुकम्पनीया इत्यत आह। समाधिप्रज्ञायामिति ते खलूक्ताभिरुपपत्तिभिश्चित्तातिरिक्तं पुरुषमभ्युपगमय्याष्टाङ्गयोगोपदेशेन समाधिप्रज्ञायामात्मगोचरायामवतार्य्य बोधयितव्याः। तद्यथा समाधिप्रज्ञायां प्रज्ञेयोऽर्थः आत्मप्रतिबिम्बीभूतोऽन्यः कस्मात्? तस्यात्मनः आलम्बनीभूतत्वात् अथ चित्तादभिन्नमेव कस्मान्नालम्बनं भवतीति यदि युक्तिबोधितापि वैजात्याद्वदेत् तत्र हेतुमाह स चेदात्मरूपोऽर्थः चित्तमात्रं स्यात् न तु ततो व्यतिरिक्तः ततः कथं प्रज्ञयैव प्रज्ञारूपमवधार्य्येत स्वात्मनि वृत्तिविरोधात्। उपसंहरति तस्मादिति। समीचीनोपदेशेनानुकम्पिता भवन्तीति आह। एवमेतदिति जातितः स्वभावतः इत्यर्थः” वि०

“इतश्चैतत्—तदसङ्ख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात्” सू०।

“तदेतच्चित्तमसङ्ख्येयाभिर्वासनाभिरेव चित्रीकृतमपि परार्थं परस्य भोगापवर्गार्थं न स्वार्थं संहत्यकारित्वाद्-

गृहवत् संहत्यकारिणा चित्तेन न स्वार्थेन भवितव्यं न सुखचित्तं सुखार्थं न ज्ञानं ज्ञानार्थमुभयमप्येतत् परार्थं यश्च भोगेनापवर्गेण चार्थेनार्थवान् पुरुषः स एव परो, न परः सामान्यमात्रम् यत्तु किञ्चित्परं सामान्यमात्रं स्वरूपेणोदाहरेद्वैनाशिकस्तत् सर्वं संहत्यकारित्वात् परार्थमेव स्यात् । यस्त्वसौ परो विशेषः स न संहत्यकारी पुरुष इति" भा० ।

"चित्तातिरिक्तात्मसद्भावे हेत्वन्तरमवतारयति इतश्चेति । यद्यप्यसङ्ख्येयाः कर्म्मवासनाः क्लेशवासनाश्च चित्तमेवाधिशेरते न तु पुरुषं, तथाच वासनाधीना विपाकाश्चित्तमाश्रयन्तश्चित्तस्य भोक्तृतामावहन्ति । भोक्तुरर्थं च भोग्यमिति सर्वं चित्तार्थं प्राप्तं तथापि तच्चित्तमसङ्ख्येयवासनाविचित्रमपि परार्थं, कस्मात् ? संहत्यकारित्वादिति सूत्रार्थः । व्याचष्टे तदेतदिति । स्यादेतच्चित्तं संहत्यापि करिष्यति स्वार्थं च भविष्यति कः खलु विरोध इति यदि कश्चिद् ब्रूयात् तं प्रत्याह । संहत्यकारिणेति सुखचित्तमिति भोगमुपलक्षयति तेन दुःखचित्तमपि द्रष्टव्यं ज्ञानमित्यपवर्गं लक्षः । एतदुक्तं भवति सुखदुःखचित्ते प्रतिकूलात्मके आत्मनि सम्भवतः स्वात्मनि वृत्तिविरोधात् न चान्योऽपि संहत्यकारी साक्षात् परम्परया वा सुखदुःखे विदधानस्ताभ्यामनुकूलनीयः प्रतिकूलनीयो वा तस्मादयं साक्षात् परम्परया वा न सुखदुःखयोराश्रियते स एवायमनुकूलनीयः प्रतिकूलनीयो वा, स च नित्योदासीनः पुरुषः एवमपहस्यते येन ज्ञानेन तस्यापि ज्ञेयतन्त्रत्वात् स्वात्मनि च वृत्तिविरोधात्र ज्ञानार्थत्वं न चान्यविषयादस्मादपवर्गसम्भवो विदेहप्रकृतिलयानामपवर्गासम्भवात् तस्मात्तज्ज्ञानमपि पुरुषार्थमेव न तत् स्वार्थं संहतपरार्थत्वे चानवस्थाप्रसङ्गादसंहतपरार्थसिद्धिरिति" विव० ।

"विशेषदर्शिन आत्मभावभावनानिवृत्तिः" सू० ।

"यथा प्रावृषि तृणाङ्कुरस्योद्भेदेन तद्बीजसत्तानुमीयते तथा मोक्षमार्गश्रवणेन यस्य रोमहर्षाश्रुपातौ दृश्येते तत्राप्यस्ति विशेषदर्शनबीजमपवर्गभागीयं कर्माभिनिर्वर्त्तितमित्यनुमीयते तस्यात्मभावभावना स्वाभाविकी प्रवर्त्तते यस्याभावादिदमुक्तं स्वभावमुक्त्वा दोषाद् येषां पूर्वपक्षे रुचिर्भवत्यरुचिश्च निर्णये भवति । तत्रात्मभावभावना कोऽहमासं कथमहमासं किं स्विदिदं ? कथं ? स्विदिदं के भविष्यामः कथं भविष्यामः ? इति । सा तु विशेषदर्शिनो निवर्त्तते कुतः चित्तस्यैवैष विचित्रः परिणामः पुरुषस्त्वसत्यामविद्यायां शुद्धश्चित्तधर्मैरपरामृष्ट इति ततोऽस्यात्मभावभावना कुशलस्य निवर्त्तत इति" भा० ।

"तदेवं कैवल्यमूलबीजमनात्मदर्शनमुक्त्वा तदुपदेशाधिकृतं पुरुषमनधिकृतपुरुषान्तराद्व्यावृत्तमाह । विशेषेत्यादि यस्यात्मभावे भावनास्ति तस्याष्टाङ्गयोगोपदेशादनुतिष्ठतो युञ्जानस्य तत्परिपाकात् चित्तसत्त्वपुरुषयोर्विशेषदर्शनादात्मभावभावना निवर्त्तते । यस्यात्मभावभावनैव नास्ति नास्तिकस्य, तस्योपदेशानधिकृतस्यापरिनिश्चितात्मतत्परलोकभावस्य नोपदेशो न विशेषदर्शनं नात्मभावभावनानिवृत्तिरिति सूत्रार्थः नन्वात्मभावभावनायाः चित्तवर्त्तिन्याः कुतोऽवगमः ? इत्यत आह यथा प्रावृषीति प्राग्भवीयं तत्त्वदर्शनबीजमपवर्गभागीयं यत्कर्माष्टाङ्गयोगानुष्ठानं तदेकदेशानुष्ठानं वा तदभिनिर्वर्त्तितमस्तीत्यनुमीयते तस्य चात्मभावभावनाऽभ्यासमेव स्वाभाविकी यत्नाभ्यासं विनापि प्रवर्त्तते अनधिकारिणमागमिनां वचनेन दर्शयति यस्याभावादिदमिति पूर्वपक्षो नास्ति कर्मफलं, परलोकिनोऽभावात् परलोकाभाव इति तत्र रुचिः, अरुचिश्च निर्णये पञ्चविंशतितत्त्वविषये । आत्मभावभावना प्राग्व्याख्याता । विशेषदर्शिनः परामर्शमाह चित्तस्यैवेति तस्य विशेषदर्शनकुशलस्यात्मभावभावना विनिवर्त्तते इति" विवरणम् ।

चित्तस्य च बाह्येन्द्रियव्यापारं विना बाह्यार्थग्रहसामर्थ्यं, गुणभेदेन विकारभेदाश्च पञ्चदशधा उक्ता यथा "मनोदर्शेन्द्रियाध्यक्षं हृत्पद्मगोलके स्थितम् । तच्चान्तःकरणं बाह्येष्वस्वातन्त्र्याद्विनेन्द्रियैः । अक्षेष्वर्पितेष्वेतद्गुणदोषविचारकम् । सत्त्वं रजस्तमश्चास्य गुणा विक्रियते हि तैः । वैराग्यं क्षान्तिरौदार्य्यमित्याद्याः सत्त्वसम्भवाः । कामक्रोधौ लोभयत्नावित्याद्या रजसोत्थिताः । आलस्यभ्रान्तितन्द्राद्या विकारास्तमसोत्थिताः । सात्त्विकैः पुण्यनिष्पत्तिः पापोत्पत्तिश्च राजसैः । तामसैर्नोभयं किन्तु वृथायुःक्षपणं भवेत्"। पातञ्जलमते तस्य वृत्तयः पञ्चविधास्तासां स्वरूपादिकं समाधिपादे सूत्रभाष्यविवरणादौ दर्शितं तच्च क्लिष्टाशब्दे २१४४ पृ० दर्शितम्

चित्तज पु० चित्ते जायते जन–ड । मनोभवे कामदेवे चित्तजन्मभूचित्तयोनिप्रभृतयोऽप्यत्र "चित्तयोनिरभवत् पुनर्नवः" रघुः ।

चित्तज्ञ त्रि० चित्तं चित्तवृत्तिं जानाति ज्ञा–क। आशयाभिज्ञे। "कलाकौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृता" सा० द०

[शून्यत्वे दोषे।

चित्तदोष पु० ६त०। चित्तस्य विषयाग्रहणासामर्थ्यरूपे

चित्तनदी स्त्री चित्तवृत्तिरूपा नदी। पुण्यपापरूपोभयस्रोतोवाहिन्याम् चित्तवृत्तौ तत्र "विवेकनिम्ना कैवल्य प्राग्भारा पुण्यवाहिनी। अविवेकनिम्ना संसारप्राग्भारा पापवाहिनी" इति भेदः।

चित्तपरिकर्म्मन् न० ६त०। पातञ्जलोक्ते चित्तप्रसादनाख्ये मैत्र्यादिभावनाभेदे चित्तप्रसादनशब्दे दृश्यम्

चित्तप्रसन्नता स्त्री ६त०। हर्षे हेम०।

चित्तप्रसादन न० चित्तस्य प्रसादनं प्रसन्नताकरणम्। पातञ्जलोक्ते चित्तप्रसन्नतासम्पादके मैत्र्यादिभावनाजन्ये चित्तसंस्कारभेदे मैत्र्यादिभावनानां च तथात्वं पात० सूत्रभाष्यादावुक्तं यथा

"यस्य चित्तस्यावस्थितस्येदं शास्त्रेण परिकर्म्म निर्द्दिश्यते, तत्कथं ?— भा०

"मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्" सू०।

"तत्र सर्व्वप्राणिषु सुखसम्भोगापन्नेषु मैत्रीं भावयेत्, दुःखितेषु करुणाम्, पुण्यात्मकेषु मुदिताम्। अपुण्यशीलेषूपेक्षाम्।—एवमस्य भावयतः शुक्लोधर्म्म उपजायते— ततश्चित्तं प्रसीदति प्रसन्नमेकाग्रं स्थितिपदं लभते" भा०।

"अपरिकर्म्मितमनसोऽसूयादिमतः समाधितदुपायसम्पत्त्यनुत्पादात् चित्तप्रसादनोपायानसूयादिविरोधिनः प्रतिपादयितुमुपक्रमते यस्य चित्तस्यावस्थितस्येदमिति। मैत्रीकरुणेत्यादि प्रसादनान्तम्। सुखितेषु मैत्री सौहार्द्दं भावयत ईर्ष्याकालुष्यं निवर्त्तते चित्तस्य। दुःखितेषु च करुणामात्मनीव परस्मिन् दुःखप्रहाणेच्छां भावयतः परापकारचिकीर्षाकालुष्यं चेतसो निवर्त्तते। पुण्यशीलेषु प्राणिषु मुदितां हर्षं भावयतः असूयाकालुष्यं चेतसो निवर्त्तते। अपुण्यशीलेषु चोपेक्षां माध्यस्थ्यं भावयतोऽमर्षकालुष्यं चेतसो निवर्त्तते। ततश्चास्य राजसतामसधर्म्मनिवृत्तौ सात्त्विकः शुक्लो धर्म्म उपजायते। सत्त्वोत्कर्षसम्पन्नः सम्भवति। वृत्ति निरोधपक्षे तस्य प्रसादस्वाभाव्याच्चित्तं प्रसीदति प्रसन्नञ्च वक्ष्यमाणेभ्य उपायेभ्यः एकाग्रं स्थितिपदं लभते। असत्यां पुनर्मैत्र्यादिभावनायां न ते उपायाः स्थित्यै कल्पन्ते" विव०।

करणे ल्युट् ङीप्। चित्तप्रसादनी मैत्र्यादिभावनायाम्। "तत् प्रचितु चित्तप्रसादनीस्ततो मैत्र्यादिभावनाः" वीरच०।

[दयोऽप्यत्र।

चित्तभू पु० चित्ते भवति भू–क्विप् ७त०। कामे चित्तभवा-

चित्तभूमि स्त्री चित्तस्य भूमिरवस्था। पातञ्जलप्रसिद्धे चित्तस्यावस्थाभेदे तद्भूमयश्च नानाविधाः तत्र चित्तशब्दे दर्शिता क्षिप्तमूढविक्षिप्तैकाग्रताः चतस्रः उक्ताः। मधुमती ज्योतिष्मती विशोका ऋतम्भरा च समाधिभूमयश्चान्यास्ताश्च चित्तनिक्षेपशब्दे तत्तच्छब्दे च दृश्याः। साधनपादे च सूत्रभाष्यादौ सप्तान्या अप्युक्ताः यथा "सप्तधा प्रान्तभूमिः प्रज्ञा" सू०।

"तस्येति। प्रत्युदितख्यातेः प्रत्याम्नायः सप्तधेति अशुद्ध्यावरणमलापगमाच्चित्तस्य प्रत्ययान्तरानुत्पादे सति सप्तप्रकारैव प्रज्ञा विवेकिनो भवति। तद्यथा परिज्ञातं हेयं, नास्य पुनः परिज्ञेयमस्ति क्षीणा हेयहेतवो न पुनरेतेषु क्षेतव्यमस्ति, साक्षात्कृतं निरोधसमाधिना हानम्। भावितो विवेकख्यातिरूपो हानोपाय इत्येषा चतुष्टयी कार्य्याविमुक्तिः प्रज्ञायाः। चित्तविमुक्तिस्तु त्रयी चरिताधिकारा बुद्धिगुणा गिरिशिखरकूटच्युता इव ग्रावाणो निरवस्थानाः स्वकारणे प्रलयाभिमुखाः सह तेनास्तं गच्छन्ति। न चैषां विलीनानां पुनरस्त्युत्पादः प्रयोजनाभावादिति एतस्यामवस्थायां गुणसम्बन्धातीतः स्वरूपमात्रज्योतिरमलः केवली पुरुष इत्येतां सप्तविधां प्रान्तभूमिप्रज्ञामनुपश्यन् पुरुषः कुशल इत्याख्यायते प्रतिप्रसवेऽपि चित्तस्य मुक्तः कुशल इत्येव भवति गुणातीतत्वादिति सिद्धा भवति विवेकख्यातिर्हानोपायः इति" भा०।

"विवेकख्यातिनिष्ठायाः स्वरूपमाह सूत्रेण तस्येत्यादि। व्याचष्टे तस्येति प्रत्युदितख्यातेर्वर्त्तमानख्यातेर्योगिनः प्रत्याम्नायः परामर्शः अशुद्धिरेवावरणं चित्तसत्त्वस्य तदेव मलं तस्यापगमात् चित्तस्य प्रत्ययान्तरानुत्पादे तामसराजसव्युत्थानप्रत्ययानुत्पादे निर्विप्लवविवेकख्यातिनिष्ठामापन्नस्य सप्तप्रकारैव प्रज्ञा विवेकिनो भवति विषयभेदात् प्रज्ञाभेदः। प्रकृष्टोऽन्तो यासां भूमीनामवस्थानां तास्तथोक्ताः यतः परं नास्ति संप्रकर्षः प्रान्ता भूमयः यस्याः प्रज्ञाया विवेकख्यातेः सा तथोक्ता ता एव सप्त प्रकाराः प्रज्ञाभूमीरुदाहरति तद्यथेति। तत्र पुरुषप्रयत्ननिष्पाद्यासु चतसृषु भूमिषु प्रथमामुदाहरति परिज्ञातं हेयं यावत् किल प्राधानिकं तत्सर्व्वं परिणामतापसं-

स्कारैर्गुणवृत्तिविरोधात् दुःखमेवेति, हेयं तत्परिज्ञातम्। प्रान्ततां दर्शयति नास्य पुनः किञ्चिदपरिज्ञेयमस्ति। द्वितीयामाह क्षीणा इति। प्रान्ततामाह न पुनरिति। तृतीयामाह साक्षात्कृतं प्रत्यक्षेण निश्चितं यथा संप्रज्ञातावस्थायामेव निरोधसमाधिसाध्यं हानं न पुनरस्मात् परं निरोद्धव्यमस्तीति शेषः। चतुर्थीमाह भावितो निष्पादितः विवेकख्यातिरूपो हानोपायः, नास्याः परं भावनीयमस्ति इति शेषः। एषा चतुष्टयी कार्य्याविमुक्तिः, समाप्तिकार्य्यतया प्रयत्ननिष्पाद्या दर्शिता। क्वचित् पाठः कार्य्यविमुक्तिरिति कार्य्यान्तरेभ्य विमुक्तिः प्रज्ञाया इत्यर्थः। प्रयत्ननिष्पाद्यामुक्त्वा तद्निष्पादनीयामप्रयत्नसाध्यां चित्तविमुक्तिमाह चित्तविमुक्तिस्तु त्रयी इति। प्रथमामाह चरिताधिकारा बुद्धिकृतभोगापवर्गकार्य्येत्यर्थः। द्वितीयामाह गुणा इति प्रान्ततामाह न चैषामिति। तृतीयामाह एतस्यामवस्थायामिति एतस्यामवस्थायां जीवन्नेव पुरुषः कुशलोमुक्त इत्युच्यते चरमदेहत्वादित्याह एतमिति। अनौपचारिकं मुक्तमाह प्रतिप्रसवे प्रधानलयेऽपि चित्तस्य मुक्तः कुशल इत्येव भवति गुणातीतत्वादिति" विवरणम्। चित्तमेव भूमिः क्षेत्रम्। २चित्तरूपक्षेत्रे तस्मिंश्च मैत्रीकरुणामुदितोपेक्षारूपैः संस्कारैः संस्कृते समाधिलाभः इति योगशास्त्रे प्रसिद्धम्।

चित्तविक्षेप पु० ६त०। पात० सूत्रभाष्ययोक्तेषु योगान्तरायभूतेषु व्याध्यादिषु नवसु। ते च यथा "व्याधिस्त्यानसंशयप्रमादालस्याऽविरतिभ्रान्तिदर्शनाऽलब्धभूमिकत्वाऽनवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः" सू०। अथ केऽन्तरायाः? ये चित्तस्य विक्षेपकाः के पुनस्ते? कियन्तोवेति? भवन्ति नवान्तरायाश्चित्तविक्षेपाः सहैते चित्तवृत्तिभिः, एतेषामभावे न भवन्ति पूर्व्वोक्ताश्चित्तवृत्तयः। व्याधिर्धातुरसकरणवैषम्यम्। स्त्यानम् अकर्म्मण्यता चित्तस्य। संशयः उभयकोटिस्पृग्विज्ञानं स्यादिदमेवं, नैवं स्यादिति। प्रमादः समाधिसाधनानामभावनम्। आलस्यं—कायस्य चित्तस्य च गुरुत्वादप्रवृत्तिः। अविरतिः—चित्तस्य विषयसंप्रयोगात्मा गर्द्धः। भ्रान्तिदर्शनं विपर्य्ययज्ञानम्। अलब्धभूमिकत्वं समाधिभूमेरलाभः। अनवस्थितत्वं—प्राग्लब्धायां भूमौ चित्तस्याप्रतिष्ठा। समाधिप्रतिलम्भे हि सति तदवस्थितं स्यादिति एते चित्तविक्षेपाः नव योगमला योगप्रतिपक्षा योगान्तराया इत्यभिधीयन्ते" महर्षिवेदव्यास भाष्यम्। "पृच्छति—अथ के इति। सामान्योत्तरं—ये इति। विशेषसंख्ये पृच्छति—के इति। उत्तरं—व्याधीत्यादिसूत्रम्। अन्तरायाः नव, एताश्चित्तवृत्तयोयोगान्तरायाः = योगविरोधिनश्चित्तस्य विक्षेपकाः। चित्तं खल्वमी व्याध्यादयोयोगाद्विक्षिपन्ति अपनयन्तीति विक्षेपाः। योगप्रतिपक्षत्वे हेतुमाह,—सहैत इति। संशयभ्रान्तिदर्शने तावद्वृत्तितया वृत्तिनिरोधप्रतिपक्षौ, येऽपि न वृत्तयोव्याधिप्रभृतयस्तेऽपि वृत्तिसाहचर्य्यात्तत्प्रतिपक्षा इत्यर्थः। पदार्थान् व्याचष्टे,—व्याधिरिति। धातवोवातपित्तश्लेष्माणः शरीरधारणात्, अशितपीताहारपरिणामविशेषोरसः करणानीन्द्रियाणि तेषां वैषम्यं न्यूनाधिकभावः। अकर्म्मण्यता कर्म्मानर्हता। संशय उभयकोटिस्पृग्विज्ञानं सत्यप्यतद्रूपप्रतिष्ठत्वेन संशयविपर्य्यासयोरभेदे उभयकोटिस्पर्शास्पर्शरूपाऽवान्तरविशेषविवक्षयाऽस्य भेदेनोपन्यासः। अभावनमकरणं तत्राप्रयत्न इति यावत्। कायस्य गुरुत्वं कफादिना, चित्तस्य गुरुत्वं तमसा। गर्द्धः तृष्णा। मधुमत्यादयः समाधिभूमयः लब्धभूमेर्यदि तावतैव सुस्थितम्मन्यस्य समाधिभ्रेषः स्यात्ततस्तस्या अपि भूमेरपायः स्यात्। यस्मात् समाधिप्रतिलम्भे तदवस्थितं स्यात्तस्मात्तत्र प्रयतितव्यमिति" विवरणम्।

चित्तविद् पु० चित्तमात्मत्वेन वेत्ति विद—क्विप्। बौद्धभेदे। आशयाभिज्ञे त्रि० [उन्मादरोगे हेमच०।

चित्तविप्लव पु० चित्तस्य विप्लवोऽनवस्थानं यस्मात् ५ब०।

चित्तविभ्रम पु० चित्तस्य विभ्रमो विशेषेण भ्रमणमनवस्थानं यस्मात् ५ब०। उन्मादरोगे अमरः। "अहो चित्तविकारोऽयं स्याद्वा मे चित्तविभ्रमः" भा० स्वर्गा० २अ०

चित्तल पुंस्त्री चित्तं लाति मनोहरत्वात् ला—क। मृगभेदे। "असिततिलोद्भवतैलविपक्वं लवणयुतं नवहिङ्गुरसाढ्यम्। त्रिकटुकयुक्तनिशार्द्रकमिश्रं बहुगुणचित्तलमांसमनर्घम्। रसे पाके च मधुरं रक्तपित्तविनाशनम्" शब्दार्थचि० धृतवाक्यम्।

चित्तवृत्ति स्त्री ६त०। चित्तस्य विषयाकारपरिणामभेदे "योगश्चित्तवृत्तिनिरोधः" पा०। तद्भेदाश्च पञ्चधा क्लिष्टाशब्दे १२४४पृ० उक्ताः।

चित्तसमुन्नति स्त्री सम्+उद् नम—क्तिन् ६त०। १चित्तस्य सम्यगुन्नमने तद्धेतौ २गर्व्वे अमरः।

चित्तहारिन् त्रि॰ चित्तं हरति हृ–णिनि। मनोहरे स्त्रियां ङीप् अण्। चित्तहार ण्वुल्। चित्तहारक तत्रार्थे ताच्छील्ये ट। चित्तहर मनोहरणशीले त्रि॰ स्त्रियां ङीप्। [एकविषये स्थिरचित्ततायाम् अमरः।

चित्ताभोग पु॰ सम्यग् भोग आभोग एकविषयता ६त॰।

चित्ति स्त्री चित–ज्ञाने भावे क्तिन्। १प्रज्ञायाम् “उदु त्या विश्वे देवा अग्ने! भवन्तु चित्तिभिः” यजु॰ १२३। २चिन्तने च “चित्तिं जुहोमि मनसा घृतेन” १७।७८। “चित्तिं चिन्तनम्” वेददी॰। ३कर्म्मणि। “या चित्तिभिर्निचकार, इति ऋचमधिकृत्य “चित्तिभिः कर्म्मभिः” निरु॰ उक्तम् कर्त्तरि क्तिच्। ४ज्ञापयितरि ५ज्ञापके च त्रि॰ “चित्तिरपां दमे विश्वायुः” ऋ॰ १।६७।५। “चित्तिश्चेतयिता ज्ञापयिता वा” भा॰। भावे क्तिन्। ६ख्यातौ स्त्री। “चित्तिं दक्षस्य सुभगत्वमस्मे” ऋ॰ २। २१।६। चित्तिं ख्यातिम् भा॰। [हेमच॰।

चित्तोन्नति स्त्री ६त॰। १चित्तस्योन्नतौ तद्धेतुत्वात् २मद्ये

चित्पति पु॰ ६त॰। चितःज्ञानस्य पतिः। मनोभिमानिनि जीवे। अस्य “न भूवाक्चिदित्यादि” पा॰ न पूर्वपद प्रकृतिस्वरः। “चित्पतिर्मा पुनातु” यजु॰ ४।४।

चित्य न॰ चि–क्यप्। १चितायां शवदाहचुल्याम् त्रिका॰ स्त्रीत्वं तत्रार्थे अमरः। २चयनीये त्रि॰। भावे क्यप्। ३चयने स्त्री

चित्र चित्रणे–लेख्ये अद्भुते च अद॰ चु॰ उभ॰ सक॰ सेट्। चित्रयति ते अचिचित्रत् त। चित्रितः चित्रः।

चित्र न॰ चित्र–भावे अच् चि–ष्ट्रन् वा। १तिलके। २आलेख्ये ३अद्भुते ४कर्वुरवर्णे ५तद्युक्ते त्रि॰ मेदि॰। ६आकाशे ७कुष्ठभेदे हेम॰। ८यमभेदे पु॰ “वृकोदराय चित्राय” यमतर्पणमन्त्रः। ९एरण्डवृक्षे १०अशोकवृक्षे ११चित्रकवृक्षे राजनि॰ १२चित्रगुप्ते चित्रगुप्तशब्दे दृश्यम् १३शब्दालङ्कारभेदे न॰ अलङ्कारशब्दे ३९०पृ॰ दृश्यम्। “चित्रसंज्ञमीरितं प्रकाशिकापदद्वयम्” वृ॰ र॰ उक्ते १५षोडशाक्षरपादके छन्दोभेदे। “निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा” “चित्रं चकार पदमर्द्धपुलायितेन” “रुचिरचित्रतनूरुहशालिभिः” इति च माघः।

चित्रक न॰ चित्रमिव कायति कै–क चित्र–स्वार्थे क वा। १तिलके मेदि॰ चित्रेण कायति कै–क। २व्याघ्रे ३व्याघ्रभेदे (चितावाघ)। पुंस्त्री हेमच॰ स्त्रियां जातित्वात् ङीष्। (चिराता)ख्याते ४ओषधिभेदे पु॰“चित्रकः कटुकः पाके वह्निकृत् पाचनो लघुः। रूक्षोष्णो ग्रहणीकुष्ठशोथार्शःकृमिकासनुत्। वातश्लेष्महरो ग्राही वातार्शःश्लेष्मपित्तहृत्। विचित्रं चैत्रकं शाकं कासमर्द्दविमर्द्दितम्। तप्ततैले सवाह्लीके पाचितं तक्रसम्भृतम्” भावप्र॰ तद्गुणादि। चित्र–कुन्। ५चित्रकरे त्रि॰ ६शूरे ७मृगान्तके शब्दार्थचि॰ ८एरण्डवृक्षे पु॰अमरः।

चित्रकण्ठ पु॰ चित्रः कण्ठोऽस्य। १पारावते २तद्भेदे वनकपोते च (घुघु)। जटाधरः। स्त्रियां जातित्वात् ङीष्।

चित्रकगुटिका स्त्री चक्रदत्तोक्ते गुटिकाभेदे यथा “चित्रकः पिप्पलीमूलं द्वौ क्षारौ लवणानि च। व्योषहिङ्ग्वजमोदाश्च चव्यञ्चैकत्र चूर्णयेत्। गुटिका मातुलुङ्गस्य दाडिमाम्लरसेन वा। कृत्वा विपाचयेदामं दीपयत्याशु चानलम्। सौवर्चलं सैन्धवञ्च विड़मौद्भिदमेव च। सामुद्रेण समं पञ्च लवणान्यत्र योजयेत्”।

चित्रकघृत न॰ “चित्रकक्वाथकल्काभ्यां ग्रहणीघ्नं शुभं हविः। गुल्मशोथोदरप्लीहाम्लशूलार्शोघ्नं दीपनं परम्” इति चक्रदत्तोक्ते घृतभेदे।

चित्रकतैल न॰ “चित्रकं चविकं दीप्यं निदिग्धिकाकरञ्जबीजलवणार्कैः। गोमूत्रयुक्तं सिद्धं तैलं नाशार्शसां विहितम्” चक्रदत्तोक्ते तैलभेदे

चित्रकम्बल पु॰ कर्म्म॰। कम्बलभेदे। (गालिचा)

चित्रकर त्रि॰ चित्रं लेख्यभेदम् आश्चर्यं वा करोति ताच्छील्यादौ ट। लेख्यादौ १चित्रशिल्पकरे। विश्वकर्म्मणः शूद्रागर्भजाते वर्णसङ्करभेदे २रङ्गाजीवे पुंस्त्री अमरः।

चित्रकर्म्मन् त्रि॰ चित्रं कर्म्मास्य। १चित्रकरे २आश्चर्यकारके च ३तिनिशवृक्षे पु॰ शब्दच॰। ६त॰। ४चित्रलेखक्रियारूपे शिल्पे न॰।

चित्रकहरीतकी स्त्री चित्रकपक्वा हरीतकी। चक्रदत्तोक्ते औषधभेदे “चित्रकस्यामलक्याश्च गुडूच्या दशमूलजम्। शतं शतं रसं दत्त्वा पथ्याचूर्णाढकं गुडात्। शतं पचेद् घनीभूते पलं द्वादशकं क्षिपेत्। व्योषत्रिजातयोः क्षारात् पलार्द्धमपरेऽहनि। प्रस्थार्द्धं मधुनो दत्त्वा यथाग्न्यद्यादतन्द्रितः। वृद्धयेऽग्नेः क्षयं कासं पीनसं दुस्तरं क्रिमीन्। गुल्मोदावर्त्तदुर्नामश्वासान् हन्ति रसायनम्”।

चित्रकाय पु॰ चित्रः कायोऽस्य। १व्याघ्रे हेमच॰ (चितावाघ) २व्याघ्रभेदे राजनि॰।

चित्रकार त्रि॰ चित्रं करोति कृ–अण् उप॰स॰। १चित्रकर्म्मकारके। "स्वपतेरपि गान्धिक्यां चित्रकारोऽभ्यजायत" पराशरोक्ते २सङ्कीर्णजातिभेदे पु॰ स्त्री॰।

चित्रकुण्डल पु॰ धृतराष्ट्रपुत्रभेदे। "चित्रवाणश्चित्रवर्मा सुवर्मा दुर्व्विमोचनः। अयोबाहुर्महाबाहुश्चित्राङ्गश्चित्रकुण्डलः" भा॰आ॰११७अ॰। चित्रवाण, चित्रवर्म्मन् चित्रमण्डन चित्राङ्ग तत्पुत्रभेदे। तत्राध्याये दृश्यम्।

चित्रकूट पु॰ चित्रं कूटं शृङ्गमस्य। पर्व्वतभेदे स च पर्वतः प्रयागक्षेत्रनिकटस्थभरद्वाजाश्रमात् अर्द्धतृतीययोजनाद्दक्षिणतस्तिष्ठति यथा रामा॰ अयोध्याकाण्डे ९२अ॰ भरतं प्रति भरद्वाजवाक्यम् "भरतार्द्धतृतीयेषु योजनेष्वजने वने। चित्रकूटो गिरिस्तत्र रम्यनिर्झरकाननः। उत्तरं पार्श्वमासाद्य तस्य मन्दाकिनी नदी। पुष्पितद्रुमसंछन्ना रम्यपुष्पितकानना। अनन्तरं तत्सरितश्चित्रकूटञ्च पर्वतम्। तयोः पर्णकुटीं तात! तत्र तौ वसतोध्रुवम्"! "ददर्श चित्रकूटस्थं सरामं सलक्ष्मणम्। तापसानामलङ्कारं धारयन्तं धनुर्द्धरम्" भा॰व॰२७६अ॰। "ततो गिरिवरश्रेष्ठे चित्रकूटे विशाम्पते!" ८५अ॰। "मथुरायाः पूर्व्वभागे हिमवद्गोमन्तचित्रकूटस्थाः" बृ॰ स॰ १६अ॰। "चित्रकूटवनस्थस्य कथिता स्वर्गतिर्गुरोः"। "हृष्टः ककुद्मानिव चित्रकूटः" इति च रघुः।

चित्रकृत् त्रि॰ चित्रं करोति कृ–क्विप्। १चित्रलेख्यकारके २आश्चर्य्यकारके च। ३चित्रकरे पु॰ हला॰ ४तिनिशवृक्षे पु॰ अमरः। तस्य भावः त्व। चित्रकृत्त्व चित्रकारित्वे अद्भुतत्वे च हेमच॰।

चित्रकेतु पु॰ १गरुड़पुत्रभेदे। "सुमुखश्चित्रकेतुश्च चित्रवर्हस्तथाऽनलः" भा॰ उद्यो॰ ९९अ॰। गरुड़पुत्रोक्तौ। २लक्ष्मणपुत्रभेदे "अङ्गदश्चित्रकेतुश्च लक्ष्मणस्यात्मजौ स्मृतौ" भाग॰ ९।११।७। वशिष्ठस्य ऊर्जायां जाते ३पुत्रभेदे "ऊर्ज्जायां जज्ञिरे पुत्रा वशिष्ठस्य परन्तप!। चित्रकेतुप्रधानास्ते सप्त सप्तर्षयोऽमलाः। चित्रकेतुः सुरोचिश्च विरजा मित्र एव च। उल्वणो वसुभृद्यानो द्युमान् शक्त्याद्योऽपरे" भाग॰ ४।१।२१।२४। "देवभागस्य कंसायां चित्रकेतुबृहद्बलौ" भाग॰११।२४।२। उक्ते ४यदुवंश्ये देवभागपुत्रभेदे। ५शूरसेननृपभेदे "आसीद्राजा सार्व्वभौमः शूरसेनेषु वै नृप!। चित्रकेतुरिति ख्यातो यस्यासीत् कामधुङ्मही" भाग॰ ६।१४।६। तस्मै च पुत्रशोकतप्ताय नारदः तत्त्वज्ञानार्थं वासुदेवमन्त्रादिकमुपदिष्टवान् तत्कथा ततः परेऽध्यायद्वये दृश्या। ६चित्रपताके त्रि॰।

चित्रकोण पु॰ चित्रः कोणोऽस्य। १अञ्जनिकायाम् (अञ्जनी) [ख्याते कीटभेदे २ज्येष्ठ्यां शब्दर॰।

चित्रगन्ध न॰ चित्रो गन्धोऽस्य। १हरिताले राजनि॰। २आश्चर्य्यगन्धयुक्ते त्रि॰।

चित्रगत त्रि॰ चित्रे गतः। १लेख्यलिखिते चित्रार्पिते "शुशुभाते रथेऽतीव पटे चित्रगते इव" भा॰ भी॰ ४४अ॰।

चित्रगुप्त पु॰ यमभेदे "चित्रगुप्ताय वै नमः" यमतर्पणमन्त्रः। कायस्थशब्दे १९२१पृ॰ तदुत्पत्त्यादिकं दृश्यम्। यमनियुक्तस्यैव तस्य यातनाधिकारित्वं शा॰ सू॰ भा॰ व्यवस्थापितं यथा

"ननु विरुद्धमिदं यमायत्ता यातनाः पापकर्म्मिणोऽनुभवन्तीति, यावता तेषु रौरवादिषु अन्ये चित्रगुप्तादयो नानाधिष्ठातारः स्मर्य्यन्ते इति, नेत्याह" भा॰। "तत्रापि च तद्व्यापारादविरोधः" शा॰सू॰ "तेष्वपि सप्तसु नरकेषु तस्यैव यमस्याधिष्ठातृत्वव्यापाराभ्युपगमादविरोधः। यमप्रयुक्ता एव हि ते चित्रगुप्तादयोऽधिष्ठातारः स्मर्य्यन्ते"।

तस्य च संयमन्यां पापिनां प्रबोधनप्रकारः पुराणसर्वस्वे शिवधर्म्मोत्तरे उक्तो यथा

"निर्भर्त्सयति चात्यर्थं यमस्तान् पापकर्म्मिणः। चित्रगुप्तश्च भगवान् धर्म्मवाक्यैः प्रबोधयेत्। भो भो दुष्कृतकर्म्माणः! परद्रव्यापहारिणः!। गर्व्विता रूपवीर्य्यैश्च परदारविमर्द्दकाः!। यत् स्वयं क्रियते कर्म तत् स्वयं भुञ्जते पुनः। तत् किमात्ममतापार्थं भवद्भिर्दुष्कृतं कृतम्। इदानीं किं प्रतप्यध्वं पीड्यमानाः स्वकर्म्मभिः। भुञ्जध्वं स्वानि कर्म्माणि नात्र दोषोऽस्ति कस्यचित्। एते ते पृथिवीपालाः संप्राप्ता मत्समीपतः। स्वकीयैः कर्म्मभिर्घोरैर्दुष्प्रज्ञा बलदर्पिताः। भो भो नृपा! दुराचाराः! प्रजाविध्वंसकारिणः!। अल्पकालस्य राज्यस्य कृते किं दुष्कृतं कृतम्?। राज्यलोभेन मोहेन बलादन्यायतः प्रजाः। विध्वंसिताः फलं तस्य भुङ्ग्ध्वमधुना नृपाः!। क्व तद्राज्यं कलत्रञ्च यदर्थमशुभं कृतम्। तत्सर्वं संपरित्यज्य यूयमेकाकिनः स्थिताः। पश्यामस्तद्बलं लब्धं येन त्वद्दण्डिताः प्रजाः। यमदूतैस्ताड्यमाना अधुना कीदृशं भवेत्"। अस्य यमलेखकत्वकथा स्क॰पु॰प्रभा॰ यथा "एवन्तु स्तुवतस्तस्य चित्रस्य विमलात्मनः। तथा तुष्टः

सहस्रांशुः कालेन महता विभुः। अब्रवीद्वत्स! भद्रं ते वरं वरय सुव्रत!। सोऽब्रवीद्यदि मे तुष्टो भगवांस्तीक्ष्णदीधिते!। प्रौढ़त्वं सर्वकार्य्येषु जायतां सन्मतिस्तथा। तत् तथेति प्रतिज्ञातं सूर्य्येण वरवर्णिनि!। ततः सर्वज्ञतां प्राप्तश्चित्रोमित्रकुलोद्भवः। तं ज्ञात्वा धर्म्मराजस्तु बुद्ध्या परमया युतः। चिन्तयामास मेधावी लेखकोऽयं भवेद्यदि। जाता मे सर्वसिद्धिश्च निर्वृतिश्च परा भवेत्। एवं चिन्तयतस्तस्य धर्म्मराजस्य भामिनि!। अग्नितीर्थं गतश्चित्रः स्नानार्थं लवणाम्भसि। स तत्र प्रविशन्नेव नीतस्तु यमकिङ्करैः। सशरीरो महादेवि! यमादेशपरायणैः। स चित्रगुप्तनामाभूत् विश्वचारित्रलेखकः। चित्रादित्येति नामास्य ततो लोके वरानने!। सप्तम्यां नियताहारोयस्तं पूजयते नरः। सप्त जन्मानि दारिद्र्यं न दुःखं तस्य जायते"।

चित्रघण्टा स्त्री चित्रा घण्टाऽस्याः। काशीस्थे देवीभेदे "विश्वे! विधे! विश्वभुजे। नमोऽस्तु ते श्रीचित्रघण्टे! विकटे सुदर्शिके!" काशी० ५अ०।

चित्रघण्टेशी स्त्री काशीस्थे देवीभेदे। "इयञ्च चित्रघण्टेशी घण्टाकर्णस्त्वयं ह्रदः" काशीख० ३३अ०।

चित्रचाप पु० धृतराष्ट्रपुत्रभेदे "अयोबाहुर्महाबाहुश्चित्रचापसुकुण्डलौ" भा० आ० ६७अ०।

चित्रजल्प पु० उज्ज्वलमण्युक्ते वाक्यभेदे तल्लक्षणभेदादिकं तत्रोक्तं यथा

"प्रेष्ठस्य सुहृदा लोके गूढ़रोषाभिजृम्भितः। भूरिभावमयोजल्पो यस्तीव्रोत्कण्ठतान्वितः। चित्रजल्पो दशाङ्गोऽयं प्रजल्पः परिजल्पितम्। विजल्पोज्जल्पसंजल्पा अवजल्पोऽभिजल्पितम्। आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्त्तिताः। एष भ्रमरगीताख्योदशमे प्रकटीकृतः। असंख्यभाववैचित्रीचमत्कृतिसुदुस्तरः। अपि चेच्चित्रजल्पोऽयं मनाक् तदपि कथ्यते। तत्र प्रजल्पः १। असूयेर्ष्यामदयुजा योऽवधीरणमुद्रया। प्रियस्य कौशलोद्गारः प्रजल्पः स तु कीर्त्त्यते१। यथा मधुप! कितवबन्धो! मा स्पृशाङ्घ्रिं सपत्न्याः कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः। वहतु मधुपतिस्तन्मानिनीनां प्रसादं यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक्।१। अथ परिजल्पितम् २। प्रभोर्निर्दयताशाठ्यचापलाद्युपपादनात्। स्वविचक्षणताव्यक्तिर्भङ्ग्या स्यात् परिजल्पितम् २। यथा मकरन्दवरसुधां त्वां मोहिनीं पाययित्वा सुमनस इव सद्यो दुस्त्यजेऽस्मान् भवादृक्। परिचरति कथं तत् पादपद्मं तु पद्मा अपि वत हृतचेता ह्युत्तमश्लोकजल्पैः२। अथ विजल्पः ३। "व्यक्तयाऽसूयया गूढ़मानमुद्रान्तरालया। अघद्विषि कटाक्षोक्तिर्विजल्पो विदुषां मतः ३। यथा किमिह बहु षडङ्घ्रे! गायसि त्वं यदूनामधिपतिमगृहाणामग्रतो नः पुराणम्। विजयसखसखीनां गीयतां तत्प्रसङ्गः क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टाः।३। अथोज्जल्पः ४। हरेः कुहककताख्यानं गर्व्वगर्भितयेर्ष्यया। सासूयश्च तदाक्षेपो धीरैरुज्जल्प ईर्य्यते ४। यथा दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः। चरणरज उपास्ते यस्य भूतिर्व्वयं का अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः।४। अथ संजल्पः ५। सोल्लुण्ठया गहनया कयाप्याक्षेपमुद्रया। तस्याकृतज्ञतादुक्तिः संजल्पः कथितो बुधैः ५। यथा विसृज शिरसि पादं वेद्म्यहं चाटुकारैरनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात्। स्वकृत इह विसृष्टापत्यपत्यन्यलोका व्यसृजदकृतचेताः किन्नु सन्धेयमस्मिन् ५। अथ अवजल्पः ६। हरौ काठिन्यकामित्वधौर्त्त्यादासक्त्ययोग्यता। यत्र सेर्ष्या भियेवोक्ता सोऽवजल्पः सतां मतः ६। यथा मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्म्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम्। बलिमपि बलिमत्त्वा वेष्टयद्ध्वाङ्क्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः६। अथाभिजल्पितम् ७। भङ्ग्या त्यागौचितं तस्य खगानामपि खेदनात्। यत्र सानुशयं प्रोक्तं तद्भवेदभिजल्पितम्। यथा यदनुचरितलीला कर्णपीयूषविप्रुट् सकृददनविधूतद्वन्द्वधर्म्मा विनष्टाः। सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना बहव इव विहङ्गा भिक्षुचर्य्यां चरन्ति। ७। अथ आजल्पः ८। जैह्म्यं तस्यार्त्तिदत्वञ्च निर्वेदाद्यत्र कीर्त्तितम्। भङ्ग्यान्यसुखदत्वञ्च स आजल्प उदीरितः। यथा वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः कुलिकरुतमिवाज्ञाः कृष्णवध्वो हरिण्यः। ददृशुरसकृदेतत्तन्नखस्पर्शतीव्रस्मररुज उपमन्त्रिन्! भण्यतामन्यवार्त्ता। ८। अथ प्रतिजल्पः ९। दुस्त्यजद्वन्द्वभावेऽस्मिन् प्राप्तिर्नार्हेत्यनुद्धतम्। दूतसंमाननेनोक्तं यत्र स प्रतिजल्पकः। प्रियसख! पुनः

रागाः प्रेयसा प्रेषितः किं वरय किमनुरुन्धे माननीयोऽसि मेऽत्र । नयसि कथमिहास्मान् दुस्त्यज त्वत्पार्श्वं सततमुरसि सौम्य ! श्रीवधूः साकमास्ते । ९ । अथ सुजल्पः १०। यत्रार्जवात् सगाम्भीर्य्यं सदैन्यं सह चापलम् । सोत्कण्ठञ्च हरिः पृष्टः स सुजल्पो निगद्यते। यथा—अपि बत मधुपुर्य्यामार्य्यपुत्रोऽधुनास्ते स्मरति स पितृगेहान् सौम्य ! बन्धूंश्च गोपान् । क्वचिदपि स कथां नः किङ्करीणां गृणीते भुजमगुरुसुगन्धं मूर्ध्न्यधास्यत् कदा नु" १० ।

चित्रतण्डुल न० चित्रस्तण्डुलोऽस्य । विडङ्गे रत्नमाला । तदर्थे स्त्री अमरः ।

चित्रत्वच् पु० चित्रा त्वक् यस्य । भूर्जत्वचे । राजनि० ।

चित्रदण्डक पु० चित्रो दण्डः काण्डो यस्य कप् । (ओल) शूरणे रत्नमाला ।

चित्रदीप पु० पञ्चदशीप्रकरणान्तर्गते दीपभेदे "यथा चित्रपटे दृष्टमवस्थानां चतुष्टयम् । परमात्मनि विज्ञेयं तथावस्थाचतुष्टयम् । यथा धौतो घट्टितश्च लाञ्छितो रञ्जितः पटः । चिदन्तर्यामिसूत्राणि विराडात्मा तथेर्यते । स्वतः शुभ्रोऽत्र धौतः स्याद्घट्टितोऽन्नविलेपनात् । मस्याकारैर्लाञ्छितः स्याद् रञ्जितो वर्णपूरणात् । स्वतश्चिदन्तर्यामी तु मायावी सूक्ष्मसृष्टितः । सूत्रात्मा स्थूलसृष्ट्यैष विराडित्युच्यते परः । ब्रह्माद्याः स्तम्बपर्य्यन्ताः प्राणिनोऽत्र जडा अपि । उत्तमाधमभावेन वर्त्तन्ते पटचित्रवत् । चित्रार्पितमनुष्याणां वस्त्राभासाः पृथक् पृथक् । चित्राधारेण वस्त्रेण सदृशा इव कल्पिताः । पृथक् पृथक् चिदाभासाश्चैतन्याध्यस्तदेहिनाम् । कल्पान्तजीवनामानो बहुधा संसरन्त्यमी । वस्त्राभासा स्थितान् वर्णान् यद्वदाधारवस्त्रगान् । विदन्त्यज्ञास्तथा जीवं संसारं चिद्गतं विदुः" इत्युपक्रमे । "जगच्चित्रं स्वचैतन्ये पटे चित्रमिवार्पितम् । मायया तदुपेक्ष्यैव चैतन्यम् परिशिष्यताम् । चित्रदीपमिमं नित्यं ये तु संदधते बुधाः । पश्यन्तोऽपि जगच्चित्रं ते मुह्यन्ति न पूर्ववत्" पञ्चदशी ।

चित्रदेवी स्त्री चित्रं दीव्यति दिव—अच् गौरा० ङीष् । १महेन्द्रवारुण्यां राजनि० । २कुमारानुचरभेदे पु० "वहरश्च तुहारश्च चित्रदेवश्च वीर्य्यवान्" भा० शल्य० ४६अ० । कुमारानुचरोक्तौ

चित्रधर्म्मन् पु० भारतप्रसिद्धे नृपभेदे "विरूपाक्षस्तु दैतेयश्चित्रयोधी महासुरः । चित्रधर्म्मेति विख्यातः क्षितावासीत् स पार्थिवः" भा० आ० ६७अ० ।

चित्रनेत्रा स्त्री चित्रं नेत्रं यस्याः । शारिकायां हारा० ।

चित्रपक्ष पुंस्त्री चित्रौ पक्षावस्य । तित्तिरिखगे जटाधरः । स्त्रियां ङीष् । "चित्रपक्षः कफहरः वातघ्नो ग्रहणीप्रणुत्" भावप्र० तन्मांसगुणा उक्ताः ।

चित्रपट पु० कर्म्म० । (छिट) प्रभृतौ १वस्त्रे शब्दार्थचि० । २चित्राधारपटे पु० चित्रदीपशब्दे उदा० "निःशेषं वृष्णिसैन्यं तु स्थितं चित्रपटे यथा" हरिवं० ३१७अ० ।

चित्रपत्र पु० चित्रं पत्रं पक्षोऽस्य । चित्रपक्षे खगमात्रे "चित्रपत्रशकुनिनीडद्योतितेत्यादि" काद० ।

चित्रपत्रिका स्त्री चित्रं पत्रं पर्णं यस्याः कप् कापि अतइत्त्वम् । १चित्रपर्ण्योषधौ रत्नमाला २द्रोणपुष्प्यां राजनि० कबभावे गौरा० ङीष् । चित्रपत्री जलपिप्पल्यां स्त्री राजनि० ।

चित्रपथा स्त्री प्रभासतीर्थस्थचित्रानद्याम् तत्कथा स्क० पु० प्रभा० यथा
"ततो गच्छेन्महादेवि ! नदीं चित्रपथां शुभाम् । ब्रह्मकुण्डसमीपस्थां चित्रादित्यस्य मध्यतः । यदा चित्रस्तु संनीतो यमदूतैः सुरप्रिये ! । सशरीरः महाप्राज्ञो यमादेशपरायणैः । एवं ज्ञात्वा तु तत्स्था भगिनी तस्य दुःखिता । चित्रा, नदी ततोभूत्वा तथा तस्य महात्मनः । प्रविष्टा सागरे देवि ! अन्विषन्तीव बान्धवम् । ततश्चित्रपथानाम तस्याश्चक्रुर्द्विजातयः । एवं तत् समुत्पन्ना सा नदी वरवर्णिनि ! । तस्यां स्नात्वा नरोयस्तु चित्रादित्यं प्रपश्यति । स याति परमं स्थानं यत्र देवो दिवाकरः । अस्मिन् कलियुगे देवि ! अन्तर्द्धानं गता नदी । प्रावृट्कालेऽथ दृश्येत दुर्लभं तत्र दर्शनम् । स्नानं दानं विशेषेण सर्वपातकनाशनम् । भक्तोवाप्यथ वाऽभक्तो रात्रौ वा यदि वा दिवा । पर्वकालेऽथवाऽकाले प्रविष्टोह्यथ वाऽशुचिः । यदैव दृश्यते तत्र नदी चित्रपथा प्रिये ! । प्रमाणं दर्शनं तस्या न कालस्तत्र कारणम् । दृष्ट्वा नदीं महादेवि ! पितरः स्वर्गसंस्थिताः । गायन्ति तत्र वाञ्छन्ति नृत्यन्ति च हसन्ति च । अस्माकं वंशजः कश्चित् श्राद्धमत्र करिष्यति । यावत् कल्पं तथास्माकं प्रीतिमुत्पादयिष्यति । एवं ज्ञात्वा नरस्तत्र स्नानं श्राद्धञ्च कारयेत् । सर्वपापविनाशार्थं पितृणां प्रीतये तथा ।

इत्येतत् कथितं देवि ! यथा चित्रपथा नदी । प्रभासक्षेत्रमासाद्य संस्थिता पापनाशिनी" ।

चित्रपदा स्त्री चित्रं पदं स्वाधिष्ठानस्थानं यस्याः । १गोधालतायां शब्दमा० अष्टाक्षरपादके २छन्दोभेदे च । तल्लक्षणं "चित्रपदा यदि भौ गौ" छन्दोम० । आश्चर्यं पदं शब्दभेदोऽत्र । ३चित्रपदयुक्ते वाक्यादौ त्रि० । "वल्गु चित्रपदं श्लक्ष्णं याज्ञसेनी तथा वचः" भा०व० ३१अ० । "सप्त यदा भगणाः परतो गुरुरन्तगतो लघुकोजितदेश ! चित्रपदेति तदा युधि विक्रमतो धृतवैरिधराधिपकेश ! । सा कथिताधिकमङ्गल ! पिङ्गलनागवरेण दयाभिनिवेश ! गौडकुलोज्ज्वल ! धारय चेतसि हे यशवन्त ! नरेश !" वृत्तरत्नोक्ते ३छन्दोभेदे च

चित्रपर्णी स्त्री चित्राणि पर्णान्यस्याः ! (चाकलिया) ख्याते पृश्निपर्ण्याम् अमरः । २जलपिप्पल्यां ३द्रोणपुष्प्यां च राजनि० । ४मञ्जिष्ठायां रत्नमाला । स्वार्थे क । चित्रपर्णिका चित्रपर्णीभेदे रत्नमाला ।

चित्रपादा स्त्री चित्रौ पादौ यस्याः । शारिकायां हारा० ।

चित्रपिच्छक पुंस्त्री चित्रं पिच्छमस्य । मयूरे राजनि० स्त्रियां ङीष् ।

चित्रपुङ्ख पु० चित्रः पुङ्खोऽस्य । शरभेदे राजनि० ।

चित्रपुष्पी स्त्री चित्राणि पुष्पाण्यस्याः ङीप् । अम्बष्ठालतायाम् राजनि० ।

चित्रपृष्ठ पुंस्त्री० चित्रं पृष्ठमस्य । कलविङ्कपक्षिणि । हारावली स्त्रियां ङीष् ।

चित्रफल पु० चित्रं फलं फलकमिवाकरोऽस्यस्य अच् । (चितल) मत्स्ये राजनि० । स्वार्थे क । चित्रफलक तत्रार्थे ।

चित्रफला स्त्री चित्रं फलं यस्याः अजा० टाप् । १चिर्भट्यां २मृगेर्वारौ ३लिङ्गिन्यां ४महेन्द्रवारुण्याम् ५वार्त्ताक्यां ६कण्टकार्य्याञ्च राजनि० । एतासां चित्रफलत्वात्तथात्वम्" ।

चित्रबर्ह पुंस्त्री चित्रा वर्हा यस्य । १मयूरे स्त्रियां जातित्वात् ङीष् । "काकैनेमांश्चित्रवर्हान् शार्द्दूलान् क्रोष्टुकेन च । क्रीणीष्व पाण्डवान् राजन् ! मा मज्जीः शोकसागरे" भा०स०६०अ० । २गरुडात्मजभेदे । "सुमुखश्चित्रकेतुश्च चित्रवर्हस्तथाऽनलः" भा० उ० १००अ० । गरुडात्मजोक्तौ ।

चित्रबाहु पु० धृतराष्ट्रपुत्रभेदे । चित्रबाहुश्चित्रवर्म्मा" भा० आ० ६७अ० । तदुत्तरोक्तौ ।

चित्रभानु पु० चित्रा भानवो यस्य । १अग्नौ २सूर्य्ये, ३चित्रकवृक्षे, ४अर्कवृक्षे च मेदिनिः । ५भैरवे शब्दरत्ना० । तत्राग्नौ "पुच्छैः शिरोभिश्च भृशं चित्रभानुं प्रपेदिरे" भा० आ० ५२अ० सर्पसत्रे । "किन्त्विमे मानवाः सर्वे दह्यन्ते चित्रभानुना" भा०शा० २२६अ० । ६अश्विनीकुमारयोः द्वि० व० । तयोश्चित्रभानुसूर्य्यजातत्वात् तथात्वम् "प्रपूर्वगापूर्वजौ चित्रभानू" भा० आ० ३०अ० अश्विनोःस्तुतौ । प्रभवादिषष्टिवर्षेषु ७षोड़शे वर्षे "चणका मुद्गमाषाश्च अन्यच्च द्विदलं प्रिये ! । महार्घं जायते सर्वं चित्रभानौ वरानने !" । "श्रेष्ठं चतुर्थस्य (हौताशस्य) युगस्य पूर्वं यच्चित्रभानुं कथयन्ति वर्षम्" वृ० स० ८अ० ।

चित्रभेषजा स्त्री चित्रमाश्चर्यं भेषजं यस्याः ५व० । काकोडुम्बरिकायाम् राजनि० ।

चित्रमण्डल पुंस्त्री० चित्रं मण्डलमस्य । मण्डलिनि सर्पभेदे सुश्रुतः सर्पशब्दे ५८१पृ० दृश्यम् ।

चित्रमृग पु० चित्रवर्णो मृगः । पृषते मृगभेदे शब्दार्थचिन्ता० । "षण्मासांश्छागमांसेन पार्षतेन च सप्त वै" मनुव्या० "पृषतश्चित्रमृगः" कुल्लू० ।

चित्रमेखल पुंस्त्री चित्रा मेखलास्य । मयूरे त्रिका० ।

चित्रयोधिन् त्रि० चित्रं युध्यति युध–णिनि । १आश्चर्ययुद्धकारके स्त्रियां ङीप् । "यदा द्रोणोविविधानस्त्रमार्गान् निदर्शयन् समरे चित्रयोधी" भा० आ० १अ० । "विरूपाक्षश्च दैतेयश्चित्रयोधी महासुरः" भा० आ० ६७अ० । २अर्ज्जुने तन्नामनामके ३अर्ज्जुनवृक्षे पु० राजनि० ।

चित्ररथ पु० चित्रोरथोऽस्य । १सूर्य्ये २गन्धर्वभेदे च मेदि० । स च गन्धर्वः कश्यपात् मुनिनाम्न्यां दक्षकन्यायां बभूव यथाह "भीमोग्रसेनौ चेत्युपक्रमे "भीमश्चित्ररथश्चैव विख्यातः सर्वविद्वशी" इत्युपक्रमे "इत्येते देवगन्धर्वा मौनेयाः परिकीर्त्तिताः" भा० आ० ६५अ० । इत्युक्तम् स च अङ्गारपर्णनामा अर्ज्जुनेन च तस्य दग्धरथत्वात् दग्धरथनामा बभूव यथाह भा० आ० १७०अ० । "गन्धर्व उवाच, "जितोऽहं पूर्वकं नाम मुञ्चाम्यङ्गारपर्णताम् । न च श्लाघ्ये बलेनाङ्ग नाम्नाद्य जनसंसदि । साध्विमं लब्धवाँल्लाभोयोऽहं दिव्यास्त्रधारिणम् । अस्त्रा गान्धर्व्या मायये च्छामि संयोजयितुमर्ज्जुन ! । सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम्" ।

"गन्धर्वाणां चित्ररथः" गीता। "सागराणां नदीनाञ्च मेघानां वर्षितस्य च। गन्धर्वाणामधिपतिं चक्रे चित्ररथं विभुः" हरिवं० ४अ०। तस्य गन्धर्वाधिपत्य मुक्तम्। २नदीभेदे स्त्री ३उभयोः पुत्रे पु० चैत्ररथिशब्दे दृश्यम्। चित्ररथमधिकृत्य कृतो ग्रन्थः अण्। चैत्ररथ भारतस्यादिपर्वान्तर्गतेऽवान्तरपर्वणि। तच्च पर्व आदिपर्वणि १६५ अवधि १८२ अध्यायपर्य्यन्तम्।

चित्ररश्मि त्रि० चित्रा रश्मयोऽस्य। १नानावर्णरश्मियुक्ते २मरुद्गणभेदे पुं हरिवं० २०४अ० "अग्निस्तु हविर्ज्योतिः सावित्रं मित्रमेव च। अमरं शरदृष्टिञ्च सङ्कयञ्च महाभुजम्। विरजञ्चैव शुक्रञ्च विश्वावसुविभावसू। अश्मन्तञ्चित्ररश्मिञ्च तथा निष्कुषितं नृपम्। नहुषञ्चाकृतिञ्चैव चारित्रं अञ्जपन्नगम्। बृहत्तञ्च बृहद्रूपं तथैव परतापनम्। मरुत्वती तथा यज्ञे एतं वै मरुतां गणम्"।

चित्ररेफ पु० शाकद्वीपाधिपस्य प्रैयव्रतस्य मेधातिथेः १पुत्रभेदे तन्नामके तत्रत्ये २वर्षभेदे च। शाकद्वीपोपक्रमे "तस्यापि प्रैयव्रत एवाधिपतिः नाम्ना मेधातिथिः। सोऽपि विभज्य सप्त वर्षाणि पुत्रनामाङ्कितेषु स्वात्मजान् पुरोजवमनोजव पवमान धूम्रानीक चित्ररेफ बहुरूप विश्वाधार संज्ञान् निधाप्याधिपतीन् स्वयं भगवत्यनन्तआवेशितमतिस्तपोवनं प्रविवेश" भाग० ५।१२।१९।

चित्रल पु० चित्रमाश्चर्य्यं लाति ला—क। १कर्बूरवर्णे २तद्वति त्रि०शब्दरत्ना०। ३गोरक्षीवृक्षे स्त्री राजनि०।

चित्रलता स्त्री० नित्यकर्म्म०। मञ्जिष्ठायां राजनि०।

चित्रलेखनी स्त्री चित्रं लिख्यतेऽनया लिख ल्युट् करणे ङीप्। (तुली) कूर्च्याम्। उज्ज्वलद०।

चित्रलेखा स्त्री चित्रं लेखयति लिख—अण् उप०स०। १बाणासुरमन्त्रिणः कुम्भाण्डस्य कन्यायाम् २अप्सरोभेदे च। तस्याश्च चित्रलेखनदक्षता हरिवं० १७६अ० वर्णिता यथा "ऊषायावचनं श्रुत्वा रामा वाक्यमिदं पुनः। उवाच रुदतीञ्चैव कुम्भाण्डतनया सखी। कुशला ते विशालाक्षि! सर्व्वथा सन्धिविग्रहे। अप्सरा चित्रलेखा मे क्षिप्रं विज्ञाप्यतां सखि!। अस्याः सर्व्वमशेषं मे त्रैलोक्यं विदितं सदा। एवमुक्ता तदैवोषा हर्षेणागतविस्मया। तामप्सरसमानाय्य चित्रलेखां सखीं प्रियाम्। कृताञ्जलिपुटा दीना ऊषा वचनमब्रवीत्। परमं शृणु मे कार्य्यं श्रेयं वक्ष्यामि भाविनि!। भर्त्तारं यदि मेऽद्य त्वं मानयिष्यसि मत्प्रियम्। कान्तं पद्मपलाशाक्षं मत्तमातङ्गविक्रमम्। त्वय्यास्यहं प्रियान् प्राणांस्ततः कमललोचने!। चित्रलेखाऽब्रवीद्वाक्यमूषां हर्षवती शनैः। नैषोऽर्थः शक्यतेऽस्माभिर्वेत्तुं भाविनि! शुभ्रते!। न कुलेन न वर्णेन न शीलेन न रूपतः। न देशतश्च विज्ञातः स हि चौरो मया सखि!। किन्तु शक्यं यथा कर्त्तुं बुद्धिपूर्व्वं मया सखि!। प्राप्तुञ्च शृणु मे वाक्यं यथाकाममवाप्स्यसि। देवदानवयक्षाणां गन्धर्व्वोरगरक्षसाम्। ये विशिष्टाः प्रभावेण रूपेणाभिजनेन च। यथाप्रधानतः सर्व्वांनालिखिष्याम्यहं सखि!। मनुष्यलोके ये चापि प्रवरा लोकविश्रुताः। सप्तरात्रेण ते भीरु। दर्शयिष्यामि तानहम्। ततो विज्ञाय पट्टस्थं भर्त्तारं प्रतिलप्स्यसे। सा चित्रलेखया प्रोक्ता ऊषा हितचिकीर्षया। क्रियतामेवमित्याह चित्रलेखां सखीं प्रियाम्। ततः कुशलहस्तत्वाद्यथालेख्यं समन्ततः। इत्युक्त्वा सप्तरात्रेण कृत्वा लेख्यगतांस्तु तान्। चित्रपट्टगतान् मुख्यानानयामास शोभना। ततः प्रस्तीर्य्य पट्टं सा चित्रलेखा स्वयंकृतम्। ऊषायै दर्शयामास सखीनाञ्च विशेषतः"। "ततस्तु देव्या रूपेण चित्रलेखा वराप्सराः" तत्राध्यायादौ। भाग० १०।६२ अ०। कुम्भाण्डकन्यया चित्रलेखयैव तथा चित्रं लिखितमित्युक्तं यथा "बाणस्य मन्त्री कुम्भाण्डश्चित्रलेखा च तत्सुता। सख्यपृच्छत् सखीमूषां कौतूहलसमन्विता" इत्युपक्रमे। "चित्रलेखोवाच व्यसनं तेऽपकर्षामि त्रिलोक्यां यदि भाव्यते। तमानेष्ये वरं यस्ते मनोहर्त्ता तमादिश। इत्युक्त्वा देवगन्धर्व्वसिद्धचारणपन्नगान्। दैत्यविद्याधरान् यक्षान् शूरमानकदुन्दुभिम्। व्यलिखत् रामकृष्णौ च प्रद्युम्नं वीक्ष्य लज्जिता। अनिरुद्धं विलिखितं वीक्ष्यैषाऽवाङ्मुखी ह्रिया। सोऽसावसाविति प्राह स्मयमाना महीपते!। चित्रलेखा तमाज्ञाय शौर्य्यं कृष्णस्य योगिनी। ययौ विहायसा राजन्! द्वारकां कृष्णपालिताम्" "मन्दाक्रान्ता नपरलघुयुता चित्रलेखा" छन्दोम० उक्ते ३अष्टादशाक्षरपादके "रुद्राश्वैर्म्ननततमकैः कीर्त्तिता चित्रलेखेयम्" वृ०र०टी०उक्ते च ४छन्दोभेदे। "ससमा मजगा गु दिक्स्वरैर्भवति चित्रलेखा" वृ०र०टी० उक्ते ५छन्दोभेदे। ६प्रजाङ्गनाभेदे। "शङ्केऽमुष्मिन् जगति मृगदृशां साररूपं यदासीदाकृष्येदं प्रजयुवतिसभा वेधसा

सा व्यधायि । नैतादृक् चेत् कथमुदधिसुताभन्तरेणाच्युतस्य प्रीतं तस्यां नयनयुगमभूत् चित्रलेखाङ्कितायाम्" उज्ज्वलमणिः कर्म्म० । ७चित्रायां रेखायाम् स्त्री रलयोरैक्यात् ६त० । ७चित्रस्य लेखने पु० । "अथाऽनिरुद्धसमागममिव, चित्रलेखादर्शितविचित्रसकलभुवनाकारम् । (राजकुलम्) काद० ।

चित्रलोचना स्त्री चित्रं लोचनमस्याः । शारिकाखगे [जटाधरः ।

चित्रवदाल पु० चित्रवत् आ समन्तात् चलति आ+चल—अच् । पाठीनमत्स्ये (बोयाडल) जटाधरः ।

चित्रवर्म्मन् पु० १धृतराष्ट्रपुत्रभेदे "चित्रवाहुश्चित्रवर्म्मा" भा० आ० ६७अ० । चित्रं वर्म्मास्य । २चित्रकवचयुक्ते त्रि० ।

चित्रवल्लिक पु० वल्लीव कायति कै—क पृषो० ह्रस्वः कर्म्म० । पाठीनमत्स्ये हेमच० ।

चित्रवल्ली स्त्री० नित्यकर्म्म० । १मृगेर्वारौ २महेन्द्रवारुण्यां च राजनि० कर्म्म० । ३चित्रायां लतायाम् ।

चित्रवहा स्त्री चित्रं वहति वह—अच् । भारतप्रसिद्धे नदीभेदे "करीषिणीं चित्रवहां चित्रसेनां च निम्नगाम्" भा०भी० ९अ० । नानानद्युक्तौ "ऋषिकुल्या तथा मेध्या नदी चित्रवहा तथा" भा० आनु०१६५अ० तीर्थोक्तौ ।

चित्रवाण पु० १धृतराष्ट्रपुत्रभेदे "चित्रवाणश्चित्रवर्म्मा सुवर्म्मा दुर्विमोचनः" भा० आ० ११०अ० । २चित्रशरयुक्ते त्रि० ।

चित्रवाहन पु० मणिपूरेश्वरे नागभेदे । "मणिपूरेश्वरं राजन् ! धर्म्मज्ञं चित्रवाहनम्" भा०आ० २१५अ० ।

चित्रवीर्य्य पु० चित्रमाश्चर्यं वीर्य्यमस्य । रक्तैरण्डे । राजनि० ।

चित्रवेगिक पु० चित्रवेगोऽस्त्यस्य ठन् । नागभेदे "वराहको वीरणकः सुचित्रश्चित्रवेगिकः" भा० आ० ५७अ० । नागोक्तौ ।

चित्रशाला स्त्री चित्रलेखननिर्म्माणार्थां शाला । चित्रलेखननिर्म्माणार्थायाम् शालायाम्, जालिन्याम् हेम० ।

चित्रशिखण्डिज पु० चित्रशिखण्डिनोऽङ्गिरसो जायते जन-ड । बृहस्पतौ अमरः । चित्रशिखण्डिप्रसूतादयोऽप्यत्र ।

चित्रशिखण्डिन् पु० चित्राः शिखण्डाः अस्त्यस्य इनि । "मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः । वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः" इत्युक्तेषु सप्तसु मुनिषु अमरः । "ये हि ते ऋषयः ख्याताः सप्त चित्रशिखण्डिनः । तैरेकमतिभिर्भूत्वा यत्प्रोक्तं शास्त्रमुत्तमम्" । "मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः । वशिष्ठश्च महातेजास्ते हि चित्रशिखण्डिनः । सप्त प्रकृतयो ह्येतास्तथा स्वायम्भवोऽष्टमः । एताभिर्धार्य्यते लोकास्ताभ्यः शास्त्रं विनिःसृतम्" भा० शा० १२७अ० ।

चित्रशिरस् पु० चित्रं शिरोऽस्य । १गन्धर्व्वभेदे "महाद्युतिश्चित्रशिरा अर्थायुरनघस्तथा" हरिवं० २६१अ० गन्धर्व्वभेदोक्तौ । २मूत्रपुरीषविषे सत्वभेदे सुश्रु० "चित्रशिरःसरावकुर्दिशतदारुकारिमेदकशारिकामुखास्तु सप्तदश विवर्द्धिता मूत्रपुरीषविषाः" सुश्रुतः ।

चित्रशीर्षक पु० चित्रं शीर्षमस्य कप् । कीटभेदे सुश्रुतः । कीटशब्दे २०५८पृ० दृश्यम् ।

चित्रसर्प पु० नित्यकर्म्म० । मालुधानसर्पे शब्दर० ।

चित्रसेन पु० धृतराष्ट्रपुत्रभेदे "तेषां धृतराष्ट्रस्य पुत्राणां चत्वारः प्रधाना बभूवुः । दुर्य्योधनो दुःशासनो विकर्णश्चित्रसेनश्चेति" भा०आ० ९५अ० । २गन्धर्व्वभेदे । "चित्रसेनश्च शीतोष्णस्तथा चित्ररथोऽपि च । एते चान्ये च गन्धर्वा धनेश्वरमुपासते" भा० स० १०अ० । "ततस्ते खेचराः सर्वे चित्रसेने न्यवेदयन् । गन्धर्व्वराजस्तान् सर्वानब्रवीत् कौरवान् प्रति" भा० व० २४०अ० । अर्जुनेन तत्पराजयकथा तत्रैव दृश्यम् । "क्रुद्धो गन्धर्व्वराजानं चित्रसेनमरिन्दमम् । विजिग्ये तरसा संख्ये सेनां प्राप्य सुदुर्जयाम्" भा० वि० ४९अ० । चित्रगुप्तादित्रयान्तर्गते मर्त्यलोकविवेचके ब्रह्मपादजक्षत्रियभेदे कायस्थशब्दे १९२२पृ० दृश्यम् । ५नदीभेदे स्त्री चित्रवहाशब्दे दृश्यम् ।

चित्रहस्त पु० चित्र आश्चर्य्यो हस्तः हस्तक्रिया यत्र । मल्लयुद्धाङ्गहस्तक्रियाभेदे "चित्रहस्तादिकं कृत्वा कक्षाबन्धं च चक्रतुः" भा० स० २२अ० । भीमजरासन्धयोर्मल्लयुद्धवर्णने ।

चित्रा स्त्री चित्र—अच् । १मूषिकपर्ण्यां २गोडुम्बायां ३सुभद्रायां ४दन्तिकायां ५मायायां ६सर्पभेदे ७नदीभेदे च मेदि० । ८चित्रगुप्तस्य भगिन्यां सा च नदी भूत्वा चित्रपथा नदी जाता सैव चित्रा नदी । चित्रपथाशब्दे दृश्यम् । ९अप्सरोभेदे हेमच० । १०व्रजाङ्गनाभेदे उज्ज्वलमणिः । "परमप्रेष्ठमध्ये तु ललिता सविशाखिका । सचित्रा चम्पकलता तुङ्गविद्येन्दुलेखिका । रङ्गदेवी सुदेवी । चेत्यष्टौ सर्वगुणाः प्रिया" "चित्रानाम यच्छन्दोऽस्मिन् तु खयो माक्रान्तौ यौ" वृ० टी० उक्ते पञ्चदशाक्षरपादके वर्णवृत्तभेदे । राशिचक्रस्थे १२नक्षत्रभेदे । सा च

राशिचक्रस्य १७३।२० अवधि १८६।४० पर्य्यन्तं १३।२० अंशाद्यात्मिका तत्स्वरूपादिकम् अश्लेषाशब्दे ४९७पृ० उक्तम्। "हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव" रघुः। चित्रानामके चन्द्रकलत्रे १२दक्षकन्याभेदे च। १४मृगेर्वारौ १५श्वेतदूर्व्वायां १६मञ्जिष्ठायां राजनि०। चित्रायां जाता अण् "चित्रारोहिणी कलिकारोहिणीभ्यः स्त्रियामुपसंख्यानम्" वार्त्ति० जातार्थाणो लुक्। १७चित्राजातायां स्त्रियां स्त्रीभिन्ने तु न लुक् चैत्रः इत्येव।

चित्राक्ष त्रि० चित्रमक्षि यस्य षच् समा०। चित्रनेत्रयुक्ते स्त्रियां षित्त्वात् ङीष्। सा च २शारिकाखगे त्रिका० ३धृतराष्ट्रपुत्रभेदे पु० "चित्रोपचित्रौ चित्राक्षश्चारुचित्राङ्गदश्च ह" भा०आ० ६७अ०।

चित्राक्षुप पु० नित्यक० पृषो० द्रोणपुष्प्याम् शब्दार्थ चि०।

चित्राङ्ग पु० १धृतराष्ट्रपुत्रभेदे। "अयोबाहुर्महाबाहुश्चित्राङ्गश्चित्रकुण्डलः" भा०११७अ० मतुप्लोपौ। २चित्राङ्गयुक्तमात्रे त्रि०। ३रक्तचित्रके ४सर्पभेदे ५चित्रके (चिते) राजनि०। चित्रमङ्गं यस्मात्। ६हरिताले ७मञ्जिष्ठायां ८हिङ्गुले च न० राजनि०।

चित्राङ्गद पु० शान्तनोः सत्यवत्यां जाते पुत्रभेदे। "भीष्मः खलु पितुः प्रियचिकीर्षया सत्यवतीं मातरमुदवाहयत् यामाहुर्गन्धकालीमिति तस्यां पूर्व्वं कानीनो गर्भः पराशराद् द्वैपायनोऽभवत्। तस्यामेव शान्तनोरन्यौ द्वौ पुत्रौ बभूवतुः। विचित्रवीर्य्यश्चित्राङ्गदश्च तयोरप्राप्तयौवन एव चित्राङ्गदो गन्धर्वेण हतः विचित्रवीर्य्यस्तु राजासीत्" भा० आ० ९५अ०। ब्रह्मपादजचित्रगुप्तादित्रितयान्तर्गते अधोलोकविचारके २यमभेदे च। कायस्थभेदे चित्राङ्गदसपकस्य "कलेर्दश सहस्राणि नागलोकेश्वरो भव। ततस्त्रिलोकनाथस्त्वमिन्द्रतुल्यो भविष्यसि" इति प्रति तं ब्राह्मणशापदत्ता। "गत आनन्दमनसा गतश्चित्राङ्गदस्तलम्" इत्युक्तम् आचार निर्णयतन्त्रे। ४गन्धर्वभेदे। हरिवं० १०८अ० द्रष्टव्यम्। ५अप्सरोभेदे स्त्री। "अलम्बुषा घृताची च चित्रा चित्राङ्गदा रुचिः" भा० आनु० १९०। मणिपूरेश्वरचित्रवाहनस्य कन्यायाम् ६अर्जुनकलत्रभेदे च स्त्री "अभिगम्य महाबाहुरभ्यगच्छन्महीपतिम्। मणिपूरेश्वरं राजन्! धर्म्मज्ञं चित्रवाहनम्। तस्य चित्राङ्गदा नाम दुहिता चारुदर्शना। तां ददर्श पुरे तस्मिन् विचरन्तीं यदृच्छया। दृष्ट्वा च तां वरारोहां चकमे चैत्रवाहिनीम्" भा० आ० २१५अ० "चित्राङ्गदा वरारोहा नापराध्यति किञ्चन" भा० आश्व० ८१अ०।

चित्राङ्गदसू स्त्री चित्राङ्गदं सूते सू-क्विप् ६त०। सत्यवत्यां शान्तनुनृपकलत्रभेदे राजनि०।

चित्राटीर पु० चित्रां नक्षत्रमटति चित्रं वा अटति अट-वा० ईरच्। १चन्द्रे २घण्टाकर्णे शिवानुचरभेदे ३अलिच्छागरक्ताङ्कितभाले च मेदि०।

चित्रादित्य पु० चित्रस्य चित्रगुप्तस्य आदित्यः तत्पूजितत्वात्। प्रभासतीर्थस्थे चित्रगुप्तस्थापिते आदित्यमूर्त्तिभेदे चित्रपथाशब्दे दृश्यम्।

चित्रान्न न० नित्यकर्म०। चित्रौदने "दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च" याज्ञ० तल्लक्षणन्तु "अन्नाक्षीरेण संसिक्ता यवास्तिलतण्डुलाः। अजाकर्णस्य रक्तेन रक्ताश्चित्रान्नसंज्ञिताः" दीपिकोक्तम्।

चित्रापूप पु० नित्यकर्म०। पिष्टकभेदे त्रिका०।

चित्रामघा स्त्री० ऋषभि निघण्टुः।

चित्रायस न० कर्म० अच् समा०। तीक्ष्णलौहे (इस्पात) राजनि०।

चित्रायुध त्रि० चित्राण्यायुधान्यस्य। १आश्चर्य्यायुधयुक्ते २धृतराष्ट्रपुत्रभेदे पु० "चित्रायुधो निषङ्गी च पाशी वृन्दारकस्तथा" भा० आ० ११७अ०। "कार्य्यैश्चित्रानराश्रिता चित्रायुधमुदावहन्" भा० द्रो० २३अ०। कर्म०। आश्चर्य्यायुधे न० "चित्रायुधधरश्चितम्" भा० क० १६अ०।

चित्रारम्भ पु० आरभ्यते आ+रभ कर्मणि घञ् ७त०। चित्रलिखितपुत्तलिकादौ।

चित्रार्पितारम्भ त्रि० चित्रेऽर्पित आरम्भोऽस्य। चित्रलिखिते "तच्चासनात् काननमेव सर्वं चित्रार्पितारम्भमिवावतस्थे" कुमा०।

चित्रावसु पु० चित्राणि विविधानि चन्द्रार्कर्क्षाणि वसन्ति यस्यां वस उ-पृ० दीर्घः। रात्रौ "रात्रिर्वै चित्रावसुः सा चित्राणि संस्तृत्य वसतीति" शत० ब्रा० २।३।४।१२। "चित्राणि ग्रहनक्षत्रादीनि" भा०। "चित्रावसो! स्वस्ति ते पारमशीय" यजु० ३।१८।

चित्रिक पु० चैत्रिक+पृषो०। चैत्रमासे शब्दरत्ना० चित्रा स्वार्थे क। चित्राशब्दे स्त्री।

चित्रिन् त्रि० चित्र-णिनि चित्र+अस्त्यर्थे इनि वा। १आश्चर्य्यकारके २चित्रयुक्ते च। स्त्रियां ङीप्। "भ्रञ्जिसिद्धुषाणि तलुणिरा चित्रिणीष्वा" ऋ० ४।३२।२।

"चित्रिणीषु चित्रकर्मयुक्तासु" भा०। ३नायिकाभेदे स्त्री रतिमञ्जरी। "भवति रतिरसज्ञा नातिदीर्घा न खर्व्वा तिलकुसुमसुनासा स्निग्धदेहोत्पलाक्षी। कठिनघनकुचाढ्या सुन्दरी सा सुशीला सकलगुणविचित्रा चित्रिणी चित्रवक्त्रा। पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा। शशो मृगो वृषोऽश्वश्च स्त्रीपुंसोर्जातिलक्षणम्। शशके पद्मिनी तुष्टा चित्रिणी रमते मृगम्। वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हयम्। पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी। शङ्खिनी क्षारगन्धा च मन्दगन्धा च हस्तिनी"।

चित्रेश पु० ६त०। १चन्द्रे शब्दच०। २चित्रेश्वरशिवलिङ्गे न०

चित्रेश्वर न० प्रभासक्षेत्रस्थे चित्रगुप्तस्थापिते शिवलिङ्गभेदे यथा "ततो गच्छेन्महादेवि! चित्रेश्वरमनुत्तमम्। धनुषां सप्तके तस्य स्थितमाग्नेयदिग्विभे। लिङ्गं महाप्रभावं हि सर्वपातकनाशनम्। तत्र चित्रेश्वरं पूज्य नरकात् न भवेद्भयम्। यत्तदस्थिगतं पापं चित्रोमार्जयति प्रिये! तस्मात् सर्वप्रयत्नेन चित्रेशं पूजयेत् सदा। तस्मात् पापयुतोवापि नरकं नैव पश्यति"।

चित्रोक्ति स्त्री चित्रा आश्चर्य्यकरी उक्तिः। आकाशवाण्यां त्रिका०। २चित्रकथने च।

चित्रोपला स्त्री ६त०। चित्र उपलोयस्याम्। १नदीभेदे। "चित्रोपलां चित्रपथां मञ्जुलाम् मञ्जुवाहिनीम्" भा० स्वोप० ६अ०। नदीकथने। इयं चित्रोत्पलेति पुरुषोत्तमतत्त्वे उक्ता। "नदी तत्र महापुण्या विष्णुपादविनिर्गता। चित्रोत्पलेति विख्याता सर्वपापहरा शुभा" "चित्रोत्पला महानदी" रघुनन्दनः।

चित्रौदन पु० नित्यकर्म०। केतुबलिरूपे चित्रान्ने चित्रान्नशब्दे लक्षणमुक्तम्। "चित्रौदनञ्च केतुभ्यः सर्वभक्ष्यैः समर्चयेत्" संस्का० त०।

चित्र्य त्रि० चित्र—कर्मणि यत्। पूज्ये "स्वयं मा यस्योदिवि चित्र्यं रथम्" ऋ०५।६१।७। "चित्र्यं पूज्यम्" भा०।

चिद् अव्य०। चित्+प्रो०। १असाकल्ये किञ्चिदर्थे। तस्य असाकल्यार्थत्वेऽपि "अथ निपाता उच्चावचेष्वर्थेषु निपतन्त्युपमार्थेऽपि" निरुक्तोक्तेः अव्ययानामनेकार्थत्वात् वा २उपमायाम्। "दधि चिदित्युपमार्थे" निरु०। ३निन्दायाम् "कुल्माषांश्चिदाहरेदिति कुत्सिते" निरु०। "चनचिदिवगोत्रादितद्धिताम्रेडितेषु गतेः" पा० षट्सु परेषु तिङन्तं नानुदात्तम्। देवः पचति चित्" सि० कौ० "किंवृत्तं च चिदुत्तरम्" पा०। "अविद्यमानपूर्वं चिदुत्तरं यत् किंवृत्तं तद्युक्तं तिङन्तं नानुदात्तम्"। "विभक्त्यन्तं उतरडतमान्तं किमोरूपं किं वृत्तम्" सि० कौ०।

चिदाकाश पु० न०। चिद् आकाशमिव निर्लेपत्वात् सर्व्वाधारत्वाच्च। आकाशवन्निर्लेपे शुद्धे ब्रह्मणि।

चिदात्मन् पु० चित् चैतन्यमात्मा स्वरूपमस्य। चैतन्यस्वरूपे परात्मनि प्रत्यगात्मनि परपुरुषे। "एतद्रूपं भगवतोह्यरूपस्य चिदात्मनः" भाग० १।३।३५। श्लोकः

चिदाभास पु० चित आभासः प्रतिबिम्बः। बुद्धावात्मप्रतिबिम्बे जीवे "बुद्धिवृत्तिचिदाभासाविति वेदान्तका०। चित्रदीपशब्दे दृश्यम्। [२हृदयालौ हेमच०।

चिद्रूप पु० चिदेव रूपमस्य। १आत्मनि, २स्फूर्त्तिमति च।

चिन्तन न० चिति—भावे ल्युट्। अनुध्याने "परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम्" मनुः। युच्। चिन्तनाप्यत्र स्त्री।

चिन्ता स्त्री चिति—भावे अ। १अनुध्याने सा० द० उक्ते २व्यभिचारिगुणभेदे च तत्र "धृतिचपलताग्लानिश्चिन्ता वितर्काः" व्यभिचारिणो विभज्य "ध्यानं चिन्ता हितानाप्तेः शून्यताश्वासतापकृत्" सा० द० लक्षितम्। "चिन्ता ज्वरो मनुष्याणां वस्त्राणामातपो ज्वरः" चाणक्यम्। "चिन्तामपरिमेयाञ्च प्रलयान्तामुपाश्रिताः" गीता। "धर्मक्रियात्मचिन्ता च सात्त्विकगुणलक्षणम्" मनुः। ३दर्शनसंभोगभावनाभेदे रसमञ्ज०।

चिन्तामणि पु० चिन्तायां सर्वकामदो मणिः शा० त०। १चिन्तितार्थप्रदे मणिभेदे। "चिन्तामणीनुदारांश्च चिन्तिते सर्वकामदान्" हरिवं० १५२अ०। "सामर्थ्यसम्पादितशङ्कितार्थचिन्तामणिः स्यान्न कथं हनूमान्" भट्टिः। २सर्वकामदे परमेश्वरे च "आयुरारोग्यमर्थञ्च भोगांश्चैवानुषङ्गिकान्। ददाति ध्यायतां नित्यम् सर्वकामप्रदो हरिः" इत्युक्तेस्तस्य तथात्वम्। ३मन्त्रविशेषे "ब्रह्मजस्थानगो भौमो भाग्यस्थश्च बृहस्पतिः! चिन्तामणिसमाख्योऽयं यातुः संकल्पपूरकः" ज्यो० उक्ते ४यात्रायोगभेदे ५बुद्धभेदे त्रिका०। ६स्पर्शमणौ "यथा चिन्तामणिं स्पृष्ट्वा लौहं काञ्चनतां व्रजेत्"। पद्मोत्त०ख० कपिलगृहप्रादुर्भूते तदीयचिन्तामणिहारकगणदैत्यनाशके ७गणेशभेदे तत्कथा "गणं हत्वा महावीर्यं चिन्तामणिस्तया-

ऽप्युक्तः चिन्तामणिरिति ख्यातं तव नाम भविष्यति । अमुश्चिन्तामणिं नाथ ! त्वमेव स्वीकुरु प्रभो ! । "मुनिना कपिलेनासौ प्रार्थितोऽभिजिताऽपि च । मणिश्चिन्तामणिन्धृत्वा शुशुभे स विनायकः । चिन्तामणिरिति ख्यातिन्ततोऽपि परमां दधौ । कपिलस्य गृहे जातः कपिलाख्यामतो ययौ" स्क० पु० गणपतिकल्पे

चिन्तामणिविनायक पु० काशीस्थे गणपतिमूर्तिभेदे "चतुर्थावरणे काश्यां भक्तविघ्नविनायकाः । द्रष्टव्या हृष्टचेतोभिः स्पष्टमष्टौ विनायकाः" इत्युपक्रमे "हेरम्बाद्दक्षिदिग्भागे चिन्तामणिविनायकः । भक्तचिन्तामणिः साक्षात् चिन्तितार्थसमर्पकः" काशी० ५७ अ० ।

चिन्तावेश्मन् न० ६त० । मन्त्रणागृहे ।

चिन्ति पु० चिति–इन् । देशभेदे तस्य सुराष्ट्रेण सह द्वन्द्वे कार्त्तकौजपा० पूर्वपदप्रकृतिस्वरः चिन्तिसुराष्ट्राः ।

चिन्तिडी स्त्री तिन्तिडी+पृषो० । तिन्तिडीवृक्षे द्विरूपको० ।

चिन्तित त्रि० चिति–कर्म्मणि क्त । चिन्ताकर्म्मणि "सख्या दुःखं समुपयास्यसि चिन्तितानि" किरा० । कर्त्तरि क्त । २चिन्तायुक्ते ३तन्नामिकायां स्त्रियां स्त्री । भावे क्त । ४चिन्तायाम् न० ।

चिन्तिति स्त्री० चिति–क्तिन् वा० इट् णिलोपश्च । चिन्तायाम् शब्दरत्ना० ।

चिन्तिया स्त्री० चिन्ता+स्वार्थे वा० घ । चिन्तायां [त्रिका० ।

चिन्त्य त्रि० चिति–कर्म्मणि यत् । चिन्तनीये "केषु केषु च भावेषु चिन्त्योऽसि भगवन् ! मया" गीता । "अयं हि सर्वधर्म्माणां धर्म्मश्चिन्त्यतमो मतः" भा० आनु० ४४ अ० ।

चिन्त्यद्योत पु० चिन्त्यःसन् द्योतते द्युत–अच् । देवभेदे । "गणा देवानामूष्मपाः सोमपाश्च लोकाः सुयामास्तुषिता अश्मकायाः । आभासुरा गन्धपा दृष्टिपाश्च वाचा विरुद्धाश्च मनोविरुद्धाः । शुद्धाश्च निर्म्माणरताश्च देवाः स्पर्शाधना दर्शपा आज्यपाश्च । चिन्त्यद्योता ये च देवेषु मुख्यास्तथाप्यन्यादेवताश्चाजमीढ ! । सुपर्णगन्धर्वपिशाचदानवा यक्षास्तथा चारणपन्नगाश्च" भा० अनु० १८ अ० ।

चिपिट पु० चि–पिटच् किच्च । (चिड़ा) ख्याते पृथुके हेमच० । तत्करणप्रकारादि भावप्र० उक्तं यथा "शालयः सतुषा आर्द्रा भृष्टा अस्फुटितास्ततः । कुट्टिताश्चिपिटाः प्रोक्तास्ते स्मृताः पृथुका अपि । शालयो यवनालाद्याश्चिपिटा पुष्टिवर्द्धनाः" । अस्य भक्ष्याभक्ष्यत्वं यथा "हविः सिद्धमन्नं पृथुकं शुद्धं देशविशेषके । नात्यन्तशस्तं विप्राणां भोजने च निवेदने । अभक्ष्यं तत् यतीनाञ्च विधवाब्रह्मचारिणाम्" ब्रह्मवै० पु० । "नासिकाया नते इनच् पिटच् चिकचि च" पा० वार्त्ति० पिटच् प्रकृतेश्चिः । २नतनासिकायां (खांदा) ३तद्वति त्रि० (चेपटा) ४ख्याते पदार्थे "करतलपीडनचिपिटीकृतश्रवणपुटेन" काद० । "उन्नतो मांसलोऽङ्गुष्ठो वर्त्तुलोऽतुलभोगदः । वक्रो ह्रस्वश्च चिपिटः सुखसौभाग्यभञ्जकः । चिपिटीभिर्भवेद्दासी" इति काशी० ख० २७ । प्रान्ते अङ्गुल्यानिपीडनेन ५नेत्रस्याकुलतायाम् । "अस्ति द्विचन्द्रमतिरस्ति जनस्य तत्र भ्रान्तौ दृगन्तचिपिटीकरणादिरादिः" नैष० । "दृगन्तचिपिटीकरणं नेत्रान्ताकुलीकरणम्" मल्लि० । अङ्गुल्या चि नेत्रप्रान्तनिपीडने एकपदार्थस्य द्विधा भानं लोकप्रसिद्धम् । ६गुणाभिनीतये स्त्री राजनि० । पृषो० चिपटोऽपि पृथुके हेमच० । स्वार्थे क । चिपिटक पृथुके अमरः ।

चिपिटनासिक पु० चिपिटा नासिका यत्र । १देशभेदे स च देशः "उत्तरतः कैलासः" इत्युपक्रमे "केशधरचिपिट नासिकदासेरकवाटधानाः" वृ० स० १४ अ० कूर्मविभागे उत्तरस्यामुक्तः । सोऽभिजनोऽस्य अणः तद्राजत्वात् बहुत्वे लुक् । २तद्देशवासिषु ३तन्नृपेषु च ब० व० ।

चिपुट पु० चिपिट+पृषो० । पृथुके रुद्रः ।

चिप्प पु० "नखमांसमधिष्ठाय वातं पित्तं च देहिनाम् । करोति दाहपाकौ च तं व्याधिं चिप्पमादिशेत्" भाव० उक्ते नखरोगभेदे । (आङ्गुल हाडा)

चि(छि)प्पिका पु० रात्रिचरजन्तुभेदे "लोमाशिकापिङ्गलचि(छि)प्पिकाख्यौ वल्गुल्युलूकौ शशकस्य रात्रौ" वृ० स० ८८ अ० । "सर्वे स्वकालोत्क्रमचारिणः स्युर्देशस्य नाशाय नृपान्तदा वा" तस्य दिवाचारेऽनिष्टफलकत्वम् "नानाविधानि विरुतानि हि चि(छि)प्पिकायास्तस्याः शुभः कुलुकुलुर्न शुभास्तु शेषाः" वृ० स० ८८ अ० ।

चिप्य पु० सुश्रुतोक्ते कृमिभेदे कृमिशब्दे दृश्यम् ।

चिर्भि पु० चि–बा० भिक् । १शुक्लखगे शब्दरत्ना० । २पट्टकष्टने (पाटशाक) शब्दमाला । स्वार्थे क तत्रार्थे ।

चिर न० चि–रक् । १दीर्घकाले । २तद्वर्त्तिनि पदार्थे त्रि० । लघादौ (।ऽ) त्रिकले गणे शब्दार्थचि० "दीर्घसूत्री चिरक्रियः" अमरः । चिरजीवी चिरकारी चिरकालादि ।

चिरकारिन् त्रि० चिरेण करोति कृ–णिनि । १चिरेण कार्य्यकर्त्तरि दीर्घसूत्रे । २गौतमस्य पुत्रभेदे पु० ।

"चिरकारी महाप्राज्ञो गौतमस्याभवत् सुतः । चिरेण सर्वकार्य्याणि विमृश्यार्थान् प्रपद्यते । चिरं सञ्चिन्तयन्नर्थांश्चिरं जाग्रत् चिरं स्वपन् । चिरं कार्य्याभिपत्तिश्च चिरकारी तथोच्यते" भा॰ शा॰ २६७अ॰ । तस्य चिरकारिताफलं तत्राध्याये वर्णितम् । स्वार्थे क, चिरःकारः क्रियाऽस्त्यस्य ठन् वा । चिरकारिकोऽप्यत्र तत्रैवोदा॰

चिरकाल पु॰ कर्म॰ । दीर्घकाले । [क्रियाकारके अमरः ।

चिरक्रिय त्रि॰ चिरा क्रिया यस्य । दीर्घसूत्रे विलम्बेन

चिरजात त्रि॰ चिरं दीर्घकालं जातः । दीर्घकालजाते । इन्द्रद्युम्नशब्दे ९४५पृ॰ उक्ते भा॰ व॰ वाक्ये उदा॰

चिरजीवक पु॰ चिरं जीवति जीव–ण्वुल् । १जीवकवृक्षे । जटाधरः । २चिरजीवनयुते त्रि॰

चिरजीविका स्त्री कर्म॰ । दीर्घकालवृत्तौ "वृणीष्व वित्तं चिरजीविकाञ्च कठ॰ उ॰

चिरजीविन् त्रि॰ चिरं जीवति जीव–णिनि । १दीर्घकालजीवनयुक्ते २विष्णौ ३काके च पु॰ मेदि॰ ४जीवकवृक्षे ५शाल्मलिवृक्षे पु॰ राजनि॰ । ६मार्कण्डेये "अश्वत्थामा बलिर्व्यासो हनुमांश्च विभीषणः । कृपः परशुरामश्च सप्तैते चिरजीविनः" ति॰ त॰ उक्तेषु ७अश्वत्थामादिषु "चिरजीवी यथा त्वं भोः" ति॰त॰ । मार्कण्डेयपूजामन्त्रः । अथ रात्रावभूवैव वृद्धस्य चिरजीविनः" (दशरथस्य) रामा॰ अयो॰ १।२६। स्लोकः । [दार्थे ।

चिरञ्जीविन् पु॰ चिरं जीवति जीव–णिनि । चिरजीविप-

चिरण्टी स्त्री चिरेण अटति पितृगेहात् भर्तृगेहम् अट–अच् पृषो॰ । १यौवनवत्यां पितृगेहस्थायां स्त्रियाम् । अमरः २युवत्यां रुद्रः । [शब्दरत्ना॰ ।

चिरतिक्त पु॰ चिरस्तिक्तो रसो यत्र । (चिराता) भूनिम्बे

चिरत्न त्रि॰ चिरे भवः चिर+त्न । चिरन्तने पुरातने जटा॰ ।

चिरन्तन त्रि॰ चिरम्+भवार्थे ट्युल् तुट् च । पुरातने अमरः । "खड्गस्तदृत्ते मुनिमासने मुनिश्चिरन्तनस्तावदभिन्यवीविशत्" माघः । स्त्रियां ङीप् ।

चिरपाकिन् पु॰ चिरेण पाकोऽस्त्यस्य दुर्ज्जरत्वात् इनि । कपित्थे राजनि॰ ।

चिरपुष्प पु॰ चिराणि पुष्पाण्यस्य । बकुलवृक्षे राजनि॰ ।

चिरम् अव्य॰ चि–बा॰ रमुक् । बहुकालार्थे हेम॰ । "चिरं चकोरस्य भवन्तु खस्पृशी" नैष॰ । "ततः प्रजानां चिरमात्मना धृताम्" । "विपन्नभावे चिरमस्य तस्थुषः" रघुः । एषु क्रियाविशेषणत्वात् चिरशब्दात् द्वितीयेत्यपि भवितुमर्हति । चिरन्तनः चिरञ्जीवन इत्याद्येवात्र उदा॰

चिरमेहिन् पु॰ चिरेण मेहति मिह–णिनि । दीर्घकालेन प्रस्रावकारिणि गर्द्दभे हेमच॰ ।

चिरम्मण पुंस्त्री॰ चिरं भणति भण–अच् । चिल्ले त्रिका॰ । तस्य दीर्घकालरावात्तथात्वम् ।

चिररात्र न॰ चिरा रात्रिः योगविभागात् अच् समा॰ । दीर्घकाले "चिररात्रोषिता स्मेह ब्राह्मणस्य निवेशने" भा॰ आ॰ १६८अ॰ । "चिररात्रेप्सितं कर्म तद्भवान् कर्तुमर्हति" भा॰उ॰ ६३अ॰ ।

चिररात्राय अव्य॰ चिररात्रमयते अय–अण् उप॰ स॰ । दीर्घकाले । "हविर्यद्दु चिररात्राय तच्चानन्त्याय कल्पते" मनुः "शक्यते दुस्त्यजेऽप्यर्थे चिररात्राय जीवितुम्" भा॰ व॰ १२१अ॰ ।

चिरलोक पु॰ चिरः चिरकालस्थायी लोकोयेषाम् । प्राप्तपितृलोकेषु पितृषु "स एकः पितृणां चिरलोकलोकानामानन्दः" तैत्ति॰ उ॰ । "चिरकालस्थायी लोको येषां पितृणां चिरलोकाः पितरः" भा॰ ।

चिरबिल्व पु॰ चिरं बिलति बिल–भेदने व । करञ्जवृक्षे अमरः । "चिरबिल्वयुतं पुण्यं पनसार्जुनसंकुलम्" भा॰ श॰ ५५अ॰ । [अमरः । स्वार्थे क अत्रार्थे ।

चिरसूता स्त्री चिरं सूता । बहुकालप्रसववत्यां गवादौ ।

चिरस्थ त्रि॰ चिरं तिष्ठति स्था–क । १चिरस्थायिनि २नायके पु॰ त्रिका॰ । स्था–णिनि । चिरस्थायिन् दीर्घकालस्थायिनि त्रि॰ स्त्रियां ङीप् ।

चिरस्य अव्य॰ चिरमस्यते अस–यत् शक॰ । दीर्घकाले । अमरः । "चिरस्य दृष्टेव मृतोत्थितेव" कुमा॰ ।

चिराटिका स्त्री चिरमटति अट–ण्वुल् कापि अतइत्वम् । १श्वेतपुनर्णवायां रत्नमा॰ । २चटिकालतायाञ्च (पाताडी) वैद्यकम् । "गोमूत्रशुद्धस्य पुरातनस्य यद्वायसस्थानि चिराटिकायाः" वैद्यकम् ।

चिरात् अव्य॰ चिरमतति अत–क्विप् । १दीर्घकाले, "तथा "चिराहारैः समागतम्" रामा॰ ४।२७।१७। चिरान्महताक्लेशेन मयकाको निवसतः" हितो॰ । २गरुडे पु॰ त्रिका॰ । ३चिरतिक्ते (चिराता) शब्दर॰ ।

चिराय अव्य॰ चिरमयते अय–अण् । चिरकाले दीर्घकाले । "चिराय यदि ते सौम्य ! चिरमस्मि न दुःखितः" भा॰ शा॰ २६७अ॰ । "चिराय नाम्नः प्रथमाभिधेय-

तास्”। “अभीष्टमासाद्य चिराय काम्यः” माघः।

चिरायुस् पु० चिरमायुर्यस्य । १देवे । २चिरजीविनि त्रि० त्रिका० “लब्धदौर्हृदा च वीर्यवन्तं चिरायुषं च पुत्रं जनयति” सुश्रुतः । [अचिरायीत् । वैदिकोऽयम् ।

चिरि हिंसे स्वादि० पर० सक० सेट् । चिरिणोति

चिरि पु० चि-बा० रिक् । शुकखगे त्रिका० । स्वार्थे क । तत्रार्थे हेमच० ।

चिरिण्टी स्त्री चिरण्टी+पृषो० । स्ववासिन्यां पितृगेहस्थायां कन्यायाम् अमरे रिमध्यपाठान्तरम् ।

चिरिविल्व पु० चिरविल्व+पृषो० । करञ्जवृक्षे भावप्र० ।

चिरु न० चीयते चि-बा० रुक् । बाहुसन्धौ शब्दच० ।

चिरे अव्य० चिरमेति इ-विच् । दीर्घकाले । “चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः” अमरटीकायाम् आद्यशब्देन चिरे चिरेण चिरात् इति व्याख्याने” भानुजदीक्षितः ।

चिरेण अव्य० चिर+बा० एनप् । दीर्घकाले “निद्रा चिरेण नयनाभिमुखी बभूव” रघुः । “चिरेण मित्रं बध्नीयात् चिरेण च कृतं त्यजेत् । चिरेण च कृतं मित्रं चिरं धारणमर्हति” भा० शा० २६७अ० । [हेम० ।

चिर्भटी स्त्री चिरेण भटति भट-अच् गौ० ङीष् पृषो० । कर्कट्याम्

चिर्भिट पु० चिर्भटी+पृषो० । १कर्कटीभेदे गोरक्षकर्कट्याम् (गोमुख) राजनि० । फले न० “चिर्भिटं मधुरं रूक्षं गुरु पित्तकफापहम् । अत्युष्णं ग्राहि विष्टम्भि पक्वं तृष्णाघ्नं पित्तलम्” भावप्र० तत्फलगुणोक्तिः । [चिचेल ।

चिल वासे आच्छादने तु० पर० अक० सेट् । चिलति अचेलीत् ।

चिल(मि)मीलिका स्त्री चिरं मिलति मीलति वा ण्वुल् रस्य लः १कण्ठीभेदे २खद्योते ३विद्युति च मेदि० ।

चिलिचिम पु० चिल-इन् चिलिं वासं चिनोति चि-मक् । (बेलेगुड़गुडिया) मत्स्यभेदे अमरः । अस्य पृषो० चिलिचीम चिलीचिम चिलीचिमि चिलीचीम चेलिचीम चेलिम चिल्लिम चिलीचीमि इति रूपान्तराणि । (चेङ्ग) ख्याते मत्स्ये भरतः ।

चिलमीनक पु० चिल-क कर्म० संज्ञायां कन् । (चेङ्गो) मत्स्ये भरतः । [अचिल्लीत् । चिचिल्ल ।

चिल्ल शैथिल्ये भावकृतौ च भ्वा० पर० अक० सेट् । चिल्लति

चिल्ल पु० चिल्ल-अच् । १पक्षिभेदे (चिल) अमरः । क्लिन्न+पृषो० । २क्लिन्ने त्रि० मेदि० ।

चिल्लक पुंस्त्री चिल्ल इव कायति शब्दायते कै-क । झिल्लिकायां शब्दरत्ना० चिल्ल+स्वार्थे क चिल्लशब्दार्थे पु० । “खरोष्ट्रमहिषा व्याघ्रा । सिंहा सृमरचिल्लकाः” भा० द्रो० अ० ।

चिल्लभक्ष्या स्त्री ६त० । छत्रविलासिन्यां शब्दच० ।

चिल्लाभ पु० चिल्ल इव प्रसह्यहारित्वादाभाति आ+भा-क । ग्रन्थिभेदके चौरे त्रिका० ।

चिल्लि पु० चिल्ल-इन् । भ्रूमध्ये शब्दार्थचि० । स्वार्थे क तत्रार्थे । “सलिलचरकेतनशरासनानतां चिल्लिकालताम्” काद०

चिल्ली स्त्री चिल्ल-बा० ई । क्षुद्रवास्तुकशाके राजनि० । “तण्डुलीयकोपोदकाऽश्ववलाचिल्लीपालङ्क्यावास्तूकप्रभृतीनि । सृष्टमूत्रपुरीषाणि सक्षारमधुराणि च । मन्दवातकफान्याहू रक्तपित्तहराणि च । कटुर्विपाके क्रमिहा मेधाग्निबलवर्द्धनः । सक्षारः सर्वदोषघ्नो वास्तूको रोचकः सरः । चिल्ली वास्तूकवत् ज्ञेया पालङ्क्या तण्डुलीयवत्” सुश्रु० । २झिल्लिकायां शब्दर० । स्वार्थे क । चिल्लिकाप्यत्र ।

चिवि स्त्री चीव-इण् पृषो० । चिवुके जटाधरः ।

चिविट पु० चिपिट+पृषो० । चिपिटे त्रिका० ।

चिविल्लिका स्त्री रक्तदलायां क्षुद्रक्षुपभेदे राजनि० ।

चिवु(क) न० चीव-संवरणे उ पृषो० ह्रस्वः । ओष्ठाधोभागे अमरः । “वक्ति तालूदरं शीर्षं चिवुके मलशुक्तिके” याज्ञ० । स्वार्थे क तत्रैवार्थे । २मुचकुन्दवृक्षे पु० राजनि० ।

चिश्चा अव्य० इषुधिशब्दविशेषानुकरणे । “चिश्चा कृणोति समनावगत्य” ऋ० ६।७५।५। “चिश्चेति शब्दानुकरणे इषुधिर्यमाणेभ्यश्चिश्चाशब्दं करोति” भा० ।

चिहण त्रि० चिक्कण+पृषो० । चिक्कणे “आदिश्चिहणादीनाम्” पा० अस्य क्लीवकन्थशब्दे परे आद्युदात्तता । चिहणकन्थम् सि० कौ० ।

चिहणादि पु० क्लीवकन्थशब्दे परे आद्युदात्ततानिमित्ते शब्दगणे स च गणः पा० ग० सूत्रे उक्तो यथा “चिहण मडर मद्रुमर वैतुल पटत्क वैडालिकर्णक वैडालिकर्णि कुक्कुट चिक्कण चित्कण चिहणादिः ।

चिहुर पु० चिकुर+पृषो० । चिकुरे शब्दार्थचिन्तामणिः ।

चिह्न लक्षणे अद० चु० उभ० सक० सेट् । चिह्नयति ते अचिचिह्नत् त । सौत्रोऽयमिति वृद्धाः ।

चिह्न न० चिह्न-अच्, चह-न उपधाया इत्त्वम् वा ।

लघ्वादिके (ऽ) १त्रिकले गणे शब्दार्थचि० । २लक्षणे च "चक्रे प्रजाः स्वाः सनिमेषचिह्नाः" "स्वनामचिह्नं निचखान सायकम्" रघुः ।

चिह्नकारिन् त्रि० चिह्नं करोति कृ–णिनि । १चिह्नकर्त्तरि २घोरदर्शने विश्वः स्त्रियां ङीप् ।

चिह्नधारिन् त्रि० चिह्नं धारयति धारि–णिनि । १चिह्नयुक्ते स्त्रियां ङीप् सा च २यत्राभावतायां शब्दच० ।

चिह्नित त्रि० चिह्न–कर्म्मणि क्त । १अङ्किते २लाञ्छिते । "दिवा चरेयुः कार्य्यार्थं चिह्निताः राजशासनैः" मनुः ।

चिह्ल पु० चिह्न+पृषो० (गान्धारी) पर्व्वतप्रसिद्धे वृक्षभेदे शब्दार्थचि० । स्वार्थे क । तत्रार्थे "चिह्लकोवातनिर्हारी श्लेष्मशोषातुपुष्टिकृत् । आग्नेयो विषहृत्तस्य फलं मत्स्यनिषूदनम्" भावप्र० ।

चीक मर्षणे वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । चीकयति ते चीकति अचीचिकत् त अचीकीत् ।

चीचीकुटि अव्य० शारिकादिशब्दानुकरणे "चीचीकूटीति वाशन्ते सारिका वृष्णिवेश्मसु" भा० मौ० २अ० । "चीचीकूटीति वाशन्तं त्वामद्य न शृणोमि किम्" हरिव० २०अ० ।

चीडा स्त्री चिड–पृषो० । स्वनामख्याते गन्धद्रव्ये । [राजनि० ।

चीन पु० चि-नक् पृषो० दीर्घः । "कश्मीरं तु समारभ्य कामरूपात्तु पश्चिमे । भोटान्तदेशोदेशिशि ! मानसेशाच्च दक्षिणे । मानसेशादक्षपूर्व्वे चीनदेशः प्रकीर्त्तितः" शक्तिसङ्गमतन्त्रोक्ते १देशभेदे । सोऽभिजनोऽस्य अण् तद्राजाणो वा बहुत्वे लुक् । २तद्देशवासिषु तन्नृपेषु च ब० व० । "वाजिनां च सहस्राणि चीनदेशोद्भवानि च" भा० उ० २७अ० । अयञ्च देशः वृ० सं० १४अ० कूर्म्मविभागे ऐशान्यामुक्तः । ऐशान्यामित्युपक्रमे "वनराजकिरातचीनकौलिन्दाः" "यवनाश्चीनकाम्बोजा दारुणा म्लेच्छजातयः" भा० भी० ९अ० जनपदोक्तौ । तद्देशनृपाश्च क्रियालोपात् शनैर्वृषलत्वं गताः यथाह मनुः "शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः । वृषलत्वं गता लोके ब्राह्मणादर्शनेन च । पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजाः यवनाः शकाः पारदाः पह्लवाश्चीनाः किरातादरदाःखशाः" । ४तद्देशजे वस्त्रभेदे च "काशाटीचीनचीनस्तनवसनदशान्दोलनस्पन्दमन्दः" उद्भटः । ५व्रीहिभेदे कृष्टादिशधान्यशब्दे ५२४पृ० दृश्यम् । "चीनकः कङ्गुभेदोऽस्ति स ज्ञेयः कङ्गुवद्गुणैः" भावप्र० । ६सूते ७मृगभेदे च मेदि० । ८पताकायां न० त्रिका० । ९सीसके न० रत्नमाला तन्त्रोक्ते १०तद्देशवासिजनानामाचारभेदे पु० पृषो० अस्य णत्वमपि वदन्ति । ११चीनकर्पूरे राजनि० ।

चीनकर्पूर पु० चीनोपपदः कर्पूरः । कर्पूरभेदे राजनि० ।

चीनज न० चीने तद्देशे जायते जन–ड । १तीक्ष्णलौहे राजनि० । २चीनजातमात्रे त्रि०

चीनपिष्ट न० चीनस्य सीसकस्य पिष्टं चूर्णं ६त० (चीनेर सिन्दुर) १सिन्दूरभेदे हेमच० । चीनं पिष्टमिव । २सीसके राजनि० ।

चीनवङ्ग न० चीनभवं वङ्गम् । सीसके राजनि० ।

चीनांशुक न० कर्म्म० । चीनाख्ये पट्टवस्त्रभेदे "चीनांशुककेतुसालम्" कुमा० । "चीनांशुकमिव पीनस्तनजघनायाः कुलीनायाः" उद्भटः ।

चीनाक पु० चीनं तदाकारं म कति अक–अण् । (चीनिया) कर्पूरभेदे । "चीनाकसंज्ञः कर्पूरःकफक्षयकरः स्मृतः । कुष्ठकृमिविषहरस्तथा तिक्तरसश्च सः" भावप्र० ।

चीनाककर्कटी स्त्री चीनमिव स्वादुः कर्कटी पृषो० दीर्घः । १राजकर्कट्यां चित्रकूटप्रसिद्धकर्कटीभेदे राजनि० ।

चीभ प्रशंसायां भ्वा० आत्म० सक० सेट् । चीभते अचीभिष्ट चिचीभे ऌदित् अचिचीभत् त ।

चीर न० चि–क्रन् दीर्घश्च । १वस्त्रखण्डे मेदि० । (कानि) "चीराणि किं पथि न सन्ति दिशन्ति भिक्षाम्" शान्तिश० । २वृक्षत्वचि सुभूतिः । ३गोस्तने ४वस्त्रभेदे ५रेखा लक्षणभेदे मेदि० । ६वस्त्रमात्रे ७चूडायां ८सीसके हेमच० । ९लिखनभेदे १०वल्कले च शब्दार्थचि० "तं कदाचित् तपस्यन्तमार्द्रचीरजटाधरम्" भा० व० १८७अ० । "चेरुश्चीरपरिग्रहाः" कुमा० । [स्वार्थे क । चीरशब्दार्थे

चीरक न० चीर+संज्ञायाम् कन् । विकारलेखने विश्वः ।

चीरपत्रिका स्त्री चीरमिव पत्रमस्याः कप् अत इत्त्वम् । चञ्चुशाके राजनि० ।

चीरपर्ण पु० चीरमिव पर्णमस्य । शालवृक्षे राजनि० ।

चीरनिवसन पु० चीरं निवसनं वस्त्रं यत्र । "ऐशान्यामित्युपक्रमे "पौरवचीरनिवेशनत्रिनेत्रमुञ्जाद्रिगन्धर्वाः" वृ०सं०१४ उक्ते १देशभेदे २तद्देशवासिषु ३तन्नृपेषु ब०व० । ४चीरधारिणि त्रि० [सर्पजाः" सुश्रुतः ।

चीरल्लि पु० । पक्षिभेदे "धारयेदपि जिह्वाञ्च चाषचीरल्लि

चीरि स्त्री चि–बा० क्रि दीर्घश्च । १नेत्रांशुके शब्दरत्ना० । २झिल्लिकायां ३कच्छटिकायां शब्दार्थचि०

चीरिका स्त्री चीरीति कायति कै—क। झिल्लिकायां हेमच०।

चीरिणी स्त्री वैवस्वतमनोस्तपस्यास्थानसमीपस्थे वदरीक्षेत्रस्थे नदीभेदे। "ऊर्द्ध्वबाहुर्विशालायां वदर्य्यां स (वैवस्वतः) नराधिपः। इत्युपक्रमे "स कदाचित् तपस्यन्तमार्द्रचीरजटाधरम्। चीरिणीतीरमागम्य मत्स्यो वचनमब्रवीत्" भा० व० १८७अ०। [पालङ्क्यशाके भावप्र०।

चीरितच्छदा स्त्री चीरवदाचरितः छदो दलं यस्याः।

चीरीवाक पु० चीरीतिशब्दोवाकः वाचकोऽस्य। कीटभेदे "चीरिवाकस्तु लवणं वलाका शकुनिर्दधि" मनुना लवणहरणकर्म्मविपाके तद्योनिरुक्ता "श्विती वस्त्रं श्वा रसन्तु चीरी लवणहारकः" याज्ञ०। ऐकवाक्यात् अस्य चीरीसमानार्थकताऽवसेया।

चीरुक स्त्री चीति—रौति—रु शब्दे बा० क। १झिल्लिकायां शब्दार्थचि०। सा स्वाद्यत्वेनास्त्यस्य अच्। २फलप्रधानवृक्षभेदे न०।

चीर्ण त्रि० चर क्त पृषो० अत ईत्त्वम्। १कृते २शीलिते, ३सम्पादिते "चीर्णव्रतानपि सदा कृतघ्नसंहितानिमान्" याज्ञ०। ४विदारिते च। [म्बवृक्षे च मेदि०।

चीर्णपर्ण त्रि० चीर्णं विदारितं पर्णमस्य। १खर्ज्जूरवृक्षे २नि-

चीलिका स्त्री चीति शब्दं लाति ला—क टापि अत इत्त्वम् चीरिका+रस्य लोवा। झिल्लिकायां शब्दरत्ना०।

चील्लक पु० चीदिति शब्दं लक्कति लक्क—अच् पृषो०। झिल्लिकायां शब्दर०।

चीव ग्रहणे संवृतौ च भ्वा० उभ० सक० सेट्। चीवति ते अचीवीत् अचीविष्ट। चिचीव चिचीवे ऋदित्। अचिचीवत् त।

चीव दीप्तौ चुरा०उभ०सक०सेट्। चीवयति ते अचीचिवत् त

चीवर न० चि—वरच् नि० दीर्घः चीव—अच् वा। भिक्षुप्रावरणे उज्ज्वलद०। "कौपिनाच्छादनं यावत्तावदिच्छेच्च चीवरम्" भा० आ० ६१अ०। "प्रेतचीवरवसा स्वनोग्रया" रघुः। "पुच्छभाण्डचीवराण्णिङ्" पा० "चीवरादर्ज्जने परिधाने च" वार्त्ति० चीवराणि अर्जयति परिधत्ते वा संचीवरयते भिक्षुः सि० कौ०। [त्रिका०।

चीवरिन् पु० चीवरमस्त्यस्य इनि। १भिक्षुके बुद्धभिक्षुके

चुक्क पीडने चु० उभ०सक० सेट्। चुक्कयति ते अचुचुक्कत् त।

चुक्कार पु० चुक्क—भावे—अच् चुक्कं पीडनमाराति सम्यक् ददाति आ+रा—क। सिंहनादे त्रिका०।

चुक्र न० चक-रक् अत उत्त्वञ्च। १अम्लरसे २अम्लवेतसे पु० विश्वः ३शाकभेदे, (चुकापालङ्) ४शुक्तभेदे च शब्दार्थचि०। "चुक्रमत्यम्लमुष्णञ्च दीपनं पाचनं परम्। शूलगुल्मविबन्धामवातश्लेष्महरम् परम्। वमिहृष्णास्यवैरस्यहृत् पीडावह्निमान्द्यहृत्" भावप्र०। ५काञ्जिकभेदे। ६रसाम्ले ७सन्धानविशेषे शब्दार्थचि० "यन्मस्त्वादि शुचौ भाण्डे सगुडं क्षौद्रकाञ्जिकम्। धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते। द्विगुणं गुडमध्वारनालमस्तुक्रमादिह" वैद्यकपरिभाषा। ततः दृढा० भावे इमनिच्। चुक्रिमन् अम्लत्वे पु०। स्वार्थे क संज्ञायां वा कन्। चुक्रक तत्रार्थे। (चुकपालङ्) शाके न०।

चुक्रफल न० चुक्रं फलति फल—अच्। वृक्षाम्ले राजनि०।

चुक्रवास्तुक न० चुक्रं वास्तुकमिव। (चुकपालङ्) शाकभेदे राजनि०। [राजनि०।

चुक्रवेधक न० चुक्रमिव विध्यति विध—ण्वुल्। काञ्जिकभेदे

चुक्रा स्त्री चक—रक् अत उत्त्वम्। १चाङ्गेर्य्याम् (आमरुल) मेदि०। २तिन्तिड्यां शब्दर०। स्वार्थे क चुक्रिका। अम्ललोणिकायाम् (आमरुल) अमरः।

चुक्राम्ल न० चुक्रमिवाम्लम्। १वृक्षाम्ले (चुकापालङ्) २शाके ३अम्ललोणिकायां (आमरुल) स्त्री राजनि०।

चुक्री स्त्री चुक्र+गौरा० ङीष्। चाङ्गेर्य्याम् "चुक्री त्वम्लतरा स्वाद्वी वातघ्नी कफपित्तकृत्। रुच्या लघुतरा पाके वृन्ताकेनातिरोचनी" भावप्र०।

चुच्चा स्त्री चष वधे बा० स पृषो०। १हिंसायां चुच्चा शीलमस्य छत्रा० ण। चौच्च हिंसाशीले त्रि०। "शिलाकीर्णं स्वयं श्वभ्रं नीलाञ्जनसमोदकम्। लतावितानसंछन्नं चौच्च(ण्ड)ण्डमित्यभिधीयते। अश्मादिभिरवबद्धं यत् चु(ण्डे)च्चेति च परे जगुः। तत्रत्यमुदकं चौच्च(ण्डम्)च्चं मुनिभिःसमुदाहृतम्" भावप्र० उक्ते जलाधारभेदे। सुश्रुतेन तज्जलस्य चौण्टसंज्ञोक्ता "अचौण्टसलिलक्षालित योनिम्" इति सुश्रुते निदानस्थाने चौच्चेति पाठास्तु लिपिकरप्रमादकृतः भावप्र० बहुषु पुस्तकेषु चौण्डमिति पाठः युक्तएव त्रिकाण्डे चुण्टाशब्दस्य उपकूलजलाशयार्थकत्वात् तत्रत्यजलस्यैव चौण्डसंज्ञौचित्यात्

चुचु(चू)क पु० न० चुचु इत्यव्यक्तशब्दं कायति पीयमानं कै—क। १कुचस्याग्रे अमरः तत्र चूचुकमिति। दीर्घः

ह्यमिति भरतः पृषो०। २दक्षिणदेशभेदे ३तद्देशवासिषु "गुहाः पुलिन्दाः शबराश्चुचुका मद्रकैः सह" भा० शा० २०७अ०। [(सुषुणि) त्रिका०।

चुचू पु० चु० चूञ् बा० ऊ पृषो०। सुनिषण्णके शाकभेदे

चुचुपा पु० १देशभेदे २तद्देशवासिषु ब० व०। "अम्बष्ठाश्च चराश्चैव चुचुपा वेणुपास्तथा" भा० उ० १३९अ०।

चचूक पु० चुचुक+पृषो०। कुचाग्रे "चुचूको वा कुचस्याग्रमिति रत्नकोषात् पुंस्त्वम्।

चु(चू)च्चू पु० शाकभेदे। "चुच्चूपूतिका तरुणीजीवन्ती बिम्बीतिक्तानन्दीभल्लातकच्छगलान्त्री स ह्लादनीफञ्जीशाल्मलीशेलु वनस्पतिप्रसवशणकर्बुदारकोविदारप्रभृतीनि। कषायस्वादुतिक्तानि रक्तपित्तहराणि च। कफघ्नान्यनिलं कुर्युः संग्राहीणि लघूनि च। लघुः पाके च जन्तुघ्नः पिच्छिलोव्रणिनां हितः। कषाय मधुरो ग्राही चु(च्चू)च्चूस्तेषां त्रिदोषहा। "सतीनोवास्तुकचुच्चु(च्चु)चिल्लीमूलकपोतिकाः। मण्डूकपर्णी जीवन्ती शाकवर्गे प्रशस्यते" सुश्रु०। "चुच्चू(च्चू) प्रभृतीनां लोभासवः" सुश्रुते तस्यानुपानमुक्तम्।

चुच्य स्नाने मन्थने पीडने सुरादिसन्धाने च भ्वा० पर० सक० चुच्यति अचुच्यीत् ईदित् चुक्तः।

चुञ्चु पु० १छुछुन्दर्यां हारा०। "चुञ्चुर्मद्गुश्च वैदेह वन्दिस्त्रियोर्ब्राह्मणेन जातौ बौधायनोक्ते २सङ्कीर्णजातिभेदे। "मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम्" मनुना तद्वृत्तिरुक्ता। [तत्रार्थे हारा०।

चुञ्चुरी(ली) स्त्री तिन्तिडीबीजद्यूते त्रिका०। वा रस्य लः

चुञ्चुल पु० गोत्रप्रवर्तके विश्वामित्रपुत्रभेदे "औदुम्बराह्यभिष्णातास्तारकायणचुञ्चुलाः" हरिवं०२७अ०।

चुट अल्पीभावे भ्वा० पर० अक० सेट्। चोटति अचोटीत् चुचोट। [चुण्टीत् ।चुचुण्ट।

चुट अल्पीभावे भ्वा० पर०अक०सेट् इदित्। चुण्टति अचु-

चुट छेदने चुरा० उभ० सक० सेट् इदित्। चुण्टयति-ते अचुचुण्टत् त।

चुट छेदने वा चु० उभ० पक्षे तुदा० कुटा० पर० सक० सेट्। चोटयति-ते अचूचुटत्-त पक्षे चुटति अचुटीत् चुचोट।

चुट्ट अल्पीभावे चुरा० उभ० अक० सेट्। चुट्टयति-ते अचुचुट्टत्-त। [अचुचुण्डत्-त।

चुड छेदने चुरा० उभ० सक० सेट् इदित्। चुण्डयति-ते

चुड अल्पीभावे भ्वा० पर० अक० सेट् इदित्। चुण्डति अचुण्डीत्।

चुड्ड(ड्ड) हतौ हावे च भ्वा० पर० सक० सेट्। चुड्डति अचुड्डीत्। क्विपि दोपधस्य चुद् डोपधस्य चुड्।

चुण छेदने तु० कु० पर० सक० सेट्। चुणति अचुणीत् चुचोण।

चुण्डा स्त्री चुडि-अच्। कूपे त्रिका०। गौरा० ङीष्। उपकूपस्थजलाशये। तत्र भवः अण्। चौण्ड तत्रत्यजले सुश्रुतः। चुचाशब्दे दृश्यम्।

चुत क्षरणे भ्वा० प० अक० सेट्। चोतति इरित् अचुतत् अचोतीत् चुचोत [शब्दरत्ना०।

चुत पु० चोतति शोणितमस्मात् बा० घञर्थे क। गुदद्वारे

चुद नोदने चु० उ०सक० सेट्। चोदयति-ते अचूचुदत्-त चोदितः चोदना। "धियो योनः प्रचोदयात्" "चोदनालक्षणोऽर्थोधर्मः" जैमि०।

चुद्री स्त्री चुद-बा० क्री। कुट्टिन्यां हेमच०।

चुप मन्दगतौ भ्वा० पर० सक० सेट्। चोपति अचोपीत् चुचोप। "किं स्वित् स्वप्नङ् न निमिषति किं स्विज्जातं न चोपति" भा० व० १३३अ० अष्टावक्रं प्रति प्रश्नः।

चुपुनीका स्त्री चुप-बा० उनङ् ततः स्वार्थे ईकक्। अग्निचयनार्थे इष्टकाभेदे "इष्टका चुपुनीका" तैत्ति० ४।४।५।१।

चुप्य त्रि० चुप-क्यप्। १शनैर्गन्तरि गोत्रप्रवर्त्तके २ऋषिभेदे पु०तस्य गोत्रापत्यम् अश्वा० फञ्। चौप्याय न तद्गोत्रापत्ये पुंस्त्री०।

चुब चुम्बने मुखसंयोगभेदे वा चु० उभ० पक्षे भ्वा० पर० सक०सेट् इदित्। चुम्बयति ते चुम्बति अचुचुम्बत् त अचुम्बीत् चुचुम्ब। "धूर्त्तोऽपरां चुम्बति" सा०द० "प्रियामुखं किं पुरुषश्चुचुम्ब" कुमा०। "दशनच्छद एव चुम्बयितुम्" दशकुमा०।

चुबुक चिबुक+पृषो०। चुवि उकक् पृषो० नलोपो वा। चिबुकार्थे" "औदुम्बरं मैत्रावरुणदण्डमास्यदघ्नं चुबुकदघ्नं वा" आपस्तम्बसूत्रम्।

चुरू पु० चु ऊ नि०। मुखे उज्ज्वलदत्तः।

चुमुरि पु० ऋग्वेदप्रसिद्धे असुरभेदे "धुनी चुमुरी या ह स्विष्वप्" ऋ० ६।२०।१३। "धूनिश्च चुमुरिश्चेत्येतन्नामकावसुरौ" भा०।

चुम्ब पु० चुबि-भावे घञ् अच् वा। १चुम्बने भावे अ।

२चुम्बने स्त्री "खेदोऽस्य चुम्बा प्रथमाऽभियोगः" "चुम्बाविरामे वदनं प्रमार्ष्टि" हृ० स० ७८अ० ।

चुम्बक पु चुम्बति लौहम् चुबि-ण्वुल् । स्वनामख्याते अयस्कान्ते मणिभेदे "चुम्बको लेखनः शीतोमेदोविषगरापहः" भावप्र० । २घटस्योपर्य्यावलम्बने ३बहुग्रन्थैकदेशे । ४चुम्बनकर्त्तरि ५कामुके ६चुम्बनपरे ७धूर्त्ते च त्रि० शब्दार्थचि० ।

चुम्बन न० चुबि-भावे ल्युट् । सुखसंयोगविशेषे । "समाश्लिष्टाः समाश्लेषैश्चुम्बिताश्चुम्बनैरपि । दष्टाश्च दंशनैः कान्तं दासीकुर्वन्ति योषितः" सा० द० । चुम्बनस्थानमाह कामशास्त्रे "मुखे स्तने ललाटे च कण्ठे च नेत्रयोरपि । जघने कर्णयोश्चैव कक्षोरुभगमूर्द्धसु । चुम्बनस्थानमित्युक्तम् विज्ञेयं कामुकैरिह" । चु० चबि-भावे सुच् । चुम्बनाय्यत्व स्त्री

चुर स्तेये (परद्रव्यापहरणे) वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । चोरयति-ते चोरति अचूचुरत्-त अचोरीत् "यस्याग्निं चोरयेत् गृहात्" याज्ञ० । "अचूचुरत् चन्द्रमसोऽभिरामताम्" माघः ।

चुर त्रि० चुर-क । चौर्य्यकर्त्तरि [अचुरणीत् ।

चुरण चौर्य्ये कण्ड्वा० पर० सक० सेट् ।। चुरण्यति

चुरा स्त्री चुर-बा० भावे अ । चौर्य्ये शब्दरत्ना० । चुराशीलमस्य छत्रा० ण । चौर चुराशीले त्रि० ।

चुरि(री) स्त्री चुर बा०कि वा ङीप् । उपकूपे कूपसमीपस्थे जलाधारे हेम० ।

चुरुचुर पु० त्रि० चुर-कु चुर-क कर्म० । पिशुने अस्य कर्णे उपपदे पात्रसमि० स० । कर्णेचुरुचुर कर्णेपिशुने युक्तारो आद्युदात्तताऽस्य । [त पा०

चुल समुच्छ्राये वा चुरा०उभ०सक०सेट् । चोलयति-ते अचूचुलत्

चुल त्रि० चुर-क रस्य लः । चोरे ततः चतुरर्थ्यां बला० य च । चुल्य तन्निर्वृत्तादौ त्रि० ।

चुलका स्त्री नदीभेदे "कावेरीं चुलकां चापि वेणां शतबलामपि" भा० भी० ९अ० । नद्युक्तौ

चुलुक पु० चुल-उकञ् । १प्रसृतौ २निविडपङ्के, ३भाण्डभेदे च त्रिका० ४आषमात्रमज्जनयोग्ये जले न० हेमच० । "काश्यामुत्तरवाहिन्या एकेन चुलुकेन तत्" काशी० २९अ० । ६गोत्रप्रवर्त्तके ऋषिभेदे पु० ततः गर्गा० गोत्रे यञ् । चौलक्य चुलुकगोत्रापत्ये पुंस्त्री० । स्त्रियां ङीप् यलोपश्च चौलुकी ।

चुलुकिन् पु० चुलुक+अस्त्यर्थे इनि । शिशुमाराकारे मत्स्यभेदे शब्दरत्ना० । चुलकशालिनि त्रि० स्त्रियां ङीप् ।

चुलु(नुप)म्प लौल्ये भ्वा० पर० अक० सेट् । चुलुम्पति अचुलुम्पीत् "अम्भोधेर्नालिकेलीरसमिव चुलुकैरुच्चुलुम्पन्त्यपो ये" महावी० । अस्य नोपधत्वे क्विपि चुलुन् मोपधत्वे चुलुम् । [२काग्यां स्त्री त्रिका० ।

चुलुम्प पु० चुलुम्प-भावे घञ् । १बाललालने जटा० ।

चुलुम्पिन् पु० चुलुम्प-णिनि । शिशुमाराकृतिमत्स्ये शब्दर० ।

चुल्ल भाव कृतौ भ्वा० पर० अक० सेट् । चुल्लति अचुल्लीत् चुचुल्ल । [२तद्युक्ते जने त्रि० मेदि० ।

चुल्ल न० क्लिन्नस्य चुलादेशः लच्प्रत्ययः । १क्लिन्ननेत्रे

चुल्लकी स्त्री० चुल्ल-ण्वुल् गौरा० ङीष् । शिशुमारे कुम्भीरभेदे मेदि० ।

चुल्ली(ल्लि) स्त्री चुल्ल-इन् वा ङीप् । चुल-वा०लिक् वा । पाकार्थमग्निस्थापनस्थाने (चुला) अमरः । "चुल्ली चिरं रोदिति" उद्भटः । "पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्कारः" मनुः । अच् । चुल्लाप्यत्र । दीर्घान्तः चितायां मेदि

चुस्त पुंन० चु-क्त वा० सुट् । १वुस्ते मांसपिण्डभेदे २स्थालीभ्रष्टमांसे च शब्दार्थचि० । पनसफलान्तर्गते (भुति) इति ख्याते पदार्थे भरतः ।

चूचुक न० चूष्यते चूष-बा० उकः पृषो० षस्य च । कुचाग्रे भरतः २चूषणशक्तिरहिते त्रि० "पादयोर्निं समापन्नाश्चाण्डालामूकचूचुकाः" भा० आश्व० २९ अ० ।

चूडक पु० चूडास्त्यस्य बा० कन् । कूपे त्रिका० ।

चूडा स्त्री चुल-अङ् चुल-समुच्छ्राये अङ् डस्य लः नि०, दीर्घः । १मयूरशिखायां २शिरोमध्यस्थशिखामात्रे, जुटिकायाम् अमरः । ३वड्भ्यां ४बाहुभूषणे, मेदि० । ५अग्रे हेमच० । ६कूपे त्रिका० । ७संस्कारभेदे तद्विहितनक्षत्रादि मुहू० पी० धा० उक्तं यथा ।

"चूडा वर्षात्तृतीयात् प्रभवति विषमेऽष्टार्करिक्ताद्यषष्ठी-
पर्वोनाहे विचैत्रोदगयनसमये ज्ञेन्दुशुक्रेज्यकानाम् ।
वारे, लग्नांशयोश्चास्वभनिधनतनौ नैधने शुद्धियुक्ते
शाक्रोपेतैर्विमैत्रैर्मृदुचरलघुभैरायषट्त्रिस्थपापैः (१)
क्षीणचन्द्रकुजसौरिभास्करैर्मृत्युशस्त्रहतिमङ्गुताज्वराः ।
स्युः क्रमेण बुधजीवभार्गवैः केन्द्रगैश्च शुभमिष्टतारया (२)
पञ्चमासाधिके मातु र्गर्भे चौलं शिशोर्न सत् । पञ्च-
वर्षाधिकस्येष्टं गर्भिण्यामपि मातरि । (३)

ताराद्दौष्ट्येऽब्जे त्रिकोणोच्चगे वा क्षौरं सत् स्यात्सौम्यमित्रस्ववर्गे। सौम्ये भेऽब्जे शोभने दुष्टतारा शस्ता ज्ञेया क्षौरयात्रादिकृत्ये (४)। ऋतुमत्याः सूतिकायाः सूनोश्चौलादि नाचरेत्। ज्येष्ठापत्यस्य न ज्यैष्ठे कैश्चिन्मार्गेऽपि नेष्यते" (५)। मुहूर्त्तचिन्तामणिः

"चूडा वर्षादिति। तृतीयाद्वर्षादिति ल्यब्लोपे पञ्चमी। तेन गर्भाधानकालाज्जन्मकालाद्वा तृतीये विषमे वर्षे पञ्चमे सप्तमे वा चूडाकरणं प्रभवति कृतं सच्छुभोदर्कं भवतीत्यर्थः। यदाह वशिष्ठः "तृतीये पञ्चमेऽब्दे वा स्वकुलाचारतोहितम्। चौलं शिशूनां यत्नेन स्वगृह्योक्तविधानतः। आधानतोजन्मतो वा सप्तमाब्देऽपि कारयेत्"। स्वकुलाचारत इत्यनेन येषां कुले पार्थक्येन चूडाकरणं तत्र मुहूर्त्तविचारः। येषामुपनीत्या सहेष्यत इति पक्षस्तेषामुपनयनमुहूर्त्तेन सिद्धत्वान्न पृथक् मुहूर्त्तविचारानुरोधः। अतएवोक्तं याज्ञवल्क्येन "चूडा कार्या यथाकुलमिति"। मनुना प्रथमवर्षे उक्तम्। "चूडाकर्म्म द्विजातीनां सर्व्वेषामेव धर्मतः। प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात्" एवं बहुकालोक्तौ यथागृह्यं व्यवस्था द्रष्टव्या। स्वगृह्ये विशेषकालानुक्तौ तु समबलत्वात्सर्वेषां विकल्पः। विशेषमाह गुरुः "तृतीयेऽब्दे शिशोर्गर्भाज्जन्मतो वा विशेषतः। पञ्चमे सप्तमे वापि स्त्रियाः पुंसोऽथवा सममिति"। अष्टेति अष्टमी अर्काः द्वादशी रिक्ताः प्रसिद्धाः आद्या प्रतिपत् षष्ठी प्रसिद्धा पर्वाणि अष्टमीचतुर्दशीपूर्णिमामावास्यासंक्रान्तयः। एतैरूने रहितेऽहनि। अत्र तत्पुरुषसमासे "राजाहःसखिभ्यष्टजिति" पा॰ टच् "नस्तद्धित" इति टिलोपः। अष्टम्यादितिथीस्त्यक्त्वा शेषासु तिथिषु चूडा स्यादित्यर्थः। यदाह गुरुः "द्वादशीं चाष्टमीं रिक्तां षष्ठीं प्रतिपदन्तथा। हित्वा शेषासु तिथिषु क्षौरकर्म शुभावहम्" कश्यपः "पञ्चपर्वतिथिं रिक्तां त्यक्त्वान्यदिवसे शुभमिति"। अतएवाह वशिष्ठः "पञ्चमी सप्तमी चैव दशम्येकादशी तथा। त्रयोदशी तृतीया च क्षुरकर्म शुभावहा" इति। चकाराद्द्वितीयाऽपि। ननु सप्तमी त्रयोदश्योर्गलग्रहत्वात्कथं तयोर्ग्रहणम्, यदाह गुरुः "विद्यारम्भोव्रतादेशः क्षौरस्यैव विशेषतः। गलग्रहे न कर्त्तव्यं यदीच्छेद्दीर्घजीवितमिति" चेत् उच्यते वैदिकं मुण्डनञ्चौलमित्युच्यते तद्विषयको विधिः। अवैदिकं मुण्डनं सुखार्थं यत् क्षौरमुच्यते क्षुरस्य कर्म्म क्षौरमिति सामान्यव्युत्पत्तेरतस्तद्विषयको निषेध इति वयं ब्रूमः। अन्ये देशाचारतो व्यवस्थामाहुस्तदयुक्तं विरोधाभावात्। विचित्रेति। चैत्ररहिते उत्तरायणे चूडा स्यात्। शुभाशुभप्रकरणाभिहितो जन्ममासनिषेधोऽत्रापि ध्येयः। तदाह राजमार्त्तण्डः "उत्तरवर्त्मनि सवितरि चूडाकरणं जगुर्बुधा यवनाः। चैत्रं हित्वा पापग्रहदिवसं जन्ममासञ्च"। तथा शेन्दुशुक्रेज्यकानां वारे लग्नांशयोश्चेति सौम्यग्रहवारे सौम्यग्रहाणां लग्ने कर्कमिथुनवृषकन्यातुलाधनुर्मीनानामन्यतमे लग्ने तेषामेव च नवांशे चूडा स्यात्। "चन्द्रज्ञगुरुशुक्राणां वारलग्नांशकेषु चेति" काश्यपोक्तेः। विशेषमाह पराशरः "सितेज्यसौम्यवारेषु क्षौरं पक्षद्वये हितम्। इन्दुवारः सिते पक्षे वाराः शेषा न शोभनाः"। प्रयोगपारिजाते पापवाराणामप्यपवादः पठितः "पापग्रहाणां वारेऽपि विप्राणां तु शुभो रविः। क्षत्रियाणां तु भूसूनुर्विट्शूद्राणां शनिः शुभः।" इति। तथा अस्वभनिधनतनौ भं लग्नं राशिश्च स्वस्य भे स्वभे ताभ्यां निधनमष्टमलग्नं तच्च विद्यते यस्मिन् तनौ स्वजन्मजन्मलग्नराशिभ्यामष्टमलग्नरहिते लग्ने चूडा स्यादित्यर्थः। तथा नैधनेऽष्टमस्थाने शुद्धियुक्ते शुद्धिः शुक्रव्यतिरिक्तसर्वग्रहराहित्यं तद्युक्ते सति चूडा स्यात्। उक्तञ्च कश्यपेन "नैधने शुद्धिसंयुक्ते लग्नराशौ न नैधने" इति। पराशरः "अष्टमस्था ग्रहाःसर्व्वे नेष्टाः शुक्रविवर्ज्जिताः। शुक्रश्च निधने क्षौरे सर्व्वसंपत्करः शिशोरिति"। शाक्रोपेतैरिति। शाक्रोपेतैर्ज्येष्ठायुक्तैर्विमैत्रैरनुराधारहितैर्मृदुचरलघुभिर्द्वादशभिर्नक्षत्रैरुपलक्षिते काले चूडा स्यात्। यदाह वशिष्ठः "अदितिद्वितये पौष्णद्वितये श्रवणत्रये। हस्तात्त्रितये शाक्रे सैन्दवे चौलमीरितम्"। कश्यपोऽपि "दास्रेन्द्वदितिपुष्येन्द्रभेषु हस्तत्रयेऽपि च। विष्णुत्रये च पौष्णर्क्षे चौलकर्म शुभप्रदमिति" अविहितनक्षत्रेषु चौले जन्मनक्षत्रम्प्रशस्तमित्याह कश्यपः "नवान्नप्राशने चौले व्रतबन्धेऽभिषेचने। शुभदञ्जन्मनक्षत्रमशुभं त्वन्यकर्म्मणीति" नारदादिवाक्यान्यन्नप्राशनेऽभिहितानि अत्र केचित् जन्मनक्षत्रपदन्तारापरं ज्ञेयमित्याहुः तथाचोक्तं लल्लेन "हित्वैकं जन्मर्क्षन्तु तारे जन्मसंज्ञिते शुभदे। उद्वाहे चोपनये यात्रायामन्नभोजने "जन्मक्षुरे कार्ये" इति। तत्र अवैदिकक्षुरविषयकत्वात्

र्णे कर्म्म न चान्ते" इति गुरुवचनमपि तद्विषयमेव वैदिकक्षुरपरञ्चैतत्कश्यपादिवाक्यमिति समञ्जसम् । अथ लग्नबलमाह । आयेति । एकादशषष्ठतृतीयस्थानस्थितैः पापग्रहैरुपलक्षिते काले चूडा स्यात् । "आयषष्ठान्त्यारिगे चन्द्रे पापैरायारिसंस्थितैः" इति काश्यपोक्तेः । (१) क्षीणेति । तथा क्षीणचन्द्रः । कुजो मङ्गलः सौरिः शनिः भास्करः सूर्यः एतैः केन्द्रस्थैः क्रमेण यथासङ्ख्यं मृत्युः मरणं, शस्त्रहतिः शस्त्रानुहतिः, पङ्गुता खञ्जता ज्वरः प्रसिद्धः एतानि फलानि स्युर्भवेयुः । बुधजीवभार्गवैस्तु केन्द्रस्थैः शुभकल्याणकारि फलं चूडाकर्त्तुः स्यात् तदुक्तं रत्नमालायां "क्षौरर्क्षेषु स्वकुलविधिना चौलमाहुर्मुनीन्द्राः केन्द्रं याते शुक्रगुरुबुधैस्तत्र सूर्ये ज्वरः स्यात् । शस्त्राद्वाशो धरणितनये पङ्गुता चार्क्किपुत्रे शीतज्योतिष्यपचिततनौ निश्चितं नाशमेति" । केन्द्रव्यतिरिक्तस्थानफलमपि तत्रैव "धनव्ययत्रिकोणगैरसद्ग्रहैर्गतावपि । क्षुरक्रिया न शोभना शुभैस्तु पुष्टिकारिणीति" अतौ तु शुक्र एव शस्तो नान्ये शुभग्रहाः प्रागुक्तपराशरवाक्यस्वरसात् । क्षुरक्रिया चौलम् इष्टतारयेति च पुनरिष्टतारया गोचरप्रकरणोक्तया शुभफलदतारया चूडा स्यात् । उक्तञ्च राजमार्त्तण्डेन "रविशुद्धौ ग्रहकरणं रविगुरुशुद्धौ व्रतोद्वाहौ । क्षौरन्ताराशुद्धौ शेषञ्चन्द्राश्रितं कर्म्मेति" । ज्योतिर्निबन्धे "विवाहे सविता, शस्तो व्रतबन्धे बृहस्पतिः । क्षौरे ताराविशुद्धिश्च, शेषे चन्द्रबलम्बलमिति" । चौलप्रयोजनमाह वशिष्ठः "सर्व्वेषामेव वर्णानां चूडाकर्म्मविधिः स्मृतः । केशमूलं पिता ध्येयः, केशाग्रं जननी तथा । चौलेनैवायुषो वृद्धिश्चौलेनैवायुषः क्षयः । तस्माच्चौलं प्रयत्नेन कारयेद्बुद्धिमान्नरः" व्यवहारनिबन्धे चौलारम्भे विशेषमाह श्रीपतिः "कौशम्बमानर्त्तपुरं पाटलिपुत्रम्पुरीमहिच्छत्राम् । दितिनदितिञ्च स्मरतां क्षौरविधौ भवति कल्याणमिति" । यत्तु कैश्चिदुक्तम् "चन्द्रशुद्धिर्यत्र नास्ति तारायाश्च विशेषतः । अक्षौरभेऽपि कर्त्तव्यं वारेण बुधसोमयोः" इति तत्सामान्यक्षौरविषयम् (२) । पीयूषधारा

अथ सगर्भायां स्वमातरि सत्यां शिशोश्चौलार्थंकालमनुष्टुभाह । पञ्चेति चौलाधिकारिणः शिशोः मातुर्गर्भे पञ्चमासेभ्योऽधिके सति चौलं न सत् शुभफलदात् नैव स्यात् । अतः पञ्चमासेभ्यः पूर्व्वञ्चौलकृतं सच्छुभफलमित्यर्थः तदुक्तं गृह्यपरिशिष्टे "चूडाकर्म्म न कर्त्तव्यं यस्य मातास्ति गर्भिणी । करोति यदि मन्दात्मा तदा गर्भस्य नाशनम् । पित्रोर्म्मृतिं वदन्त्येके चतुरब्दोत्तरे स्फुटम्" इति । वशिष्ठः "पुत्रचूडाकृतौ माता गर्भिणी यदि वा भवेत् । विपद्यते गुरुश्चैव दम्पती शिशुरब्दतः । गर्भे मातुः कुमारस्य न कुर्य्याच्चौलकर्म्म च । पञ्चमासादधः कुर्य्यादतऊर्द्ध्वं न कारयेत्" इति । अस्यापवादमाह । पञ्चेति पञ्चवर्षाधिकस्योल्लङ्घितपञ्चमवर्षस्य शिशोर्मातरि गर्भिण्यामपि सत्यां पञ्चमासादप्यूर्द्ध्वं विहितकाले चौलमिष्टकल्याणकारि भवेत् । अतो बालो यावत्पञ्चवर्षो न भवति तावत्पर्य्यन्तं निषेध इत्यर्थः । तदाह नारदः "सूनोर्मातरि गर्भिण्यां चूडाकर्म्म न कारयेत् । पञ्चमाब्दात् प्रागथोर्द्ध्वं गर्भिण्यामपि कारयेत्" । यदा तूपनयनेन सह चौलञ्चिकीर्षितं तदा विशेषमाह ज्योतिर्नारदः "सहोपनीत्या कुर्य्याच्चेत्तदा दोषो न विद्यते" इति । अत्र तु पञ्चवर्षाणां न्यूनाधिकभावो नापेक्षितः सर्व्वापवादकत्वादस्य । एवं पार्थक्येन मौञ्ज्यपि सगर्भायां संस्कार्य्यमातरि सत्यां न भवति । तदुक्तम् "सूनोर्मातरि गर्भिण्यां मौञ्जीचूडे न कारयेत् । गते तु पञ्चमे मासे गर्भादीनां मृतिर्भवेत् (३) ।

अथ चौले ताराबलमावश्यकमित्युक्तं तत्र दुष्टायां तारायां सत्यामपवादं शालिन्याह तारादौष्ट्ये इति । ताराणां दुष्टत्वं गोचरप्रकरणेऽभिहितं तत्तत एवावधार्य्यम् । तस्मात्तारादौष्ट्ये सत्यपि क्षौरञ्चौलं सच्छोभनं स्यात् । कस्मिन् सति ? अब्जे चन्द्रे त्रिकोणगे नवपञ्चमस्थानस्थिते, अथ वोच्चगे वृषराशिस्थे । अथ वा सौम्यानां बुधगुरुशुक्राणां वर्गे षड्वर्गे अथ वा स्वस्यैव षड्वर्गे सति । उक्तञ्च ज्योतिस्तत्त्वे "सौम्यग्रहस्य च षड्वर्गे चन्द्रे तुङ्गे त्रिकोणगे वापि । क्षौरादिकोपकरणे तारादोषो न दोषाय" । आदिशब्देन यात्रा । "विपत्तारे गुडं दद्यात्" इत्यादयोऽपि तारादौष्ट्यापवादाः प्रागुक्तास्तेऽप्यत्रोह्याः । अथ शुभतारायाङ्गुणमाह सौम्ये भे विहिते नक्षत्रे सति अब्जे शोभने चन्द्रे गोचरोक्ताष्टस्थानस्थे सति दुष्टताराऽसमीचीनताराऽपि चेत् स्यात्तदा क्षौरयात्रादि मङ्गलकृत्येषु प्रशस्ताऽतिप्रशस्ता निखिलदोषापवादिका स्यादित्यर्थः । तदप्युक्तं ज्योतिस्तत्त्वे "कृष्णचन्द्रदग्धतिथी रिक्ता चन्द्रश्चाष्टमकस्तथा ।

तत्सर्वं नाशयेत्तारा षट्पञ्च नवमी तथा। जन्माख्यद्यष्टमी तारा न शुभा नापि निन्दितेति। (४) पी॰धा॰ "अथ चौलादिकृत्ये कालविशेषनिषेधमाह ऋतुमत्या इति। ऋतुः स्त्रीधर्मः स यस्या अस्तीति ऋतुमती तस्यास्तथा सूतिकाया जातापत्यायाः सूनोः पुत्रस्योपलक्षणत्वात्कन्याया वा चौलोपनयनविवाहाद्युक्तवक्ष्यमाणकृत्यं नाचरेत् न कारयेत्। उक्तं च प्रचेतसा "यस्य माङ्गलिकं कृत्यन्तस्य माता रजस्वला। वैधव्यं जायते तत्र नृनार्योः पाणिपीडने"। पाणिपीडने वैधव्यमन्यत्र मृत्युरित्यर्थः। सूतिकाया अपि कर्मानर्हकाल उक्तोविष्णुस्मृतौ। "सूतिकाम्पुत्रवतीं विंशतिरात्रेण कर्म्माणि कारयेत् मासेन स्त्रीजननीमिति"।

अतएव सूतिकाया उक्तकालपर्य्यन्तं कर्मानर्हत्वात्तदपत्यस्यापि मङ्गलकृत्ये निषेधः। ज्येष्ठेति ज्येष्ठापत्यस्याद्यगर्भस्य पुत्रस्य कन्याया वा व्रतबन्धविवाहादि शुभकृत्यं ज्यैष्ठमासे न भवति उक्तञ्च रत्नमालायाम् "आद्यगर्भदुहितुः सुतस्य वा ज्यैष्ठमासि न च जातु मङ्गलमिति" कैश्चिदिति। मार्गेऽपि मार्गशीर्षमासेऽपि कैश्चिदाचार्य्यैराद्यगर्भसुतकन्ययोर्मङ्गलकृत्यं नेष्यते तदाह वात्स्यः "मार्गे मासि तथा ज्यैष्ठे विवाहं चौलमेव च। ज्येष्ठपुत्रदुहित्रोश्च न कुर्वीत व्रतं तथा"। भरद्वाजोऽपि "मार्गशीर्षे तथा ज्यैष्ठे क्षौरं परिणयं व्रतम्। आद्यपुत्रदुहित्रोश्च यत्नतः परिवर्जयेत्"। अस्मादेव ज्ञापकात् द्वितीयादिगर्भपुत्रदुहित्रोर्ज्यैष्ठे मार्गशीर्षे च न मङ्गलकृत्यानां निषेधः किं तु विधिरिति प्रतिभाति" पी॰ धा॰।

चूडामणि पु॰ चूडास्थितोमणिः शा॰ त॰। १शिरःस्थे रत्ने अमरः। "चूडामणीकृतविधुर्वलयीकृतवासुकिः" सि॰ मु॰। "चूडामणिभिरुद्घृष्टपादपीठं महीक्षिताम्" रघुः। चूडायां मणिरिवास्य। २काकमाचिकाफले मेदि॰। ३ग्रहणविशेषे यथा गारुडे। "सूर्य्यग्रहः सूर्य्यवारे सोमे सोमग्रहस्तथा। चूडामणिरयं योगस्तत्रानन्तं फलं स्मृतम्। अन्यस्माद् ग्रहणात् कोटिगुणमत्र फलं लभेत्"

चूडाम्ल न॰ चूडायामप्यम्लम्। वृक्षाम्ले राजनि॰।

चूडार त्रि॰ चूडामृच्छति ऋ-अण्। चूडामते ततः। प्रगद्या॰ चतुरर्थ्यां ञ्य। चौडार्य्य तन्निर्वृत्तादौ त्रि॰।

चूडारक त्रि॰ चूडामृच्छति ऋ-ण्वुल्, चूडा+आ॰आरक वा। १चूडायुक्ते २ऋषिभेदे पु॰ तस्य गोत्रापत्यम् इञ्। चौडारकि तद्गोत्रापत्ये पुंस्त्री। बहुत्वे तु द्वन्द्वे अद्वन्द्वे च इञो लुक्। चूडारकाः तद्गोत्रापत्येषु ब॰व॰।

चूडारत्न न॰ चूडाया रत्नम्। चूडामणौ हेमच॰।

चूडाल त्रि॰ चूडा अस्त्यस्य प्राणिस्थत्वात् ल। चूडायुक्ते "चूडालाः कर्णिकालाश्च अहाश्च पिठरोदराः" भा॰ सौ॰ ७अ॰। २मस्तके न॰ शब्दरत्ना॰। ३उच्चटातृणे स्त्री अमरः ४श्वेतगुञ्जायां ५नागरमुस्तायां च राजनि॰।

चूडावत् त्रि॰ चूडा अस्त्यर्थे पक्षे बला॰ मतुप् मस्य वः। चूडाविशिष्टे पक्षे इनि। चूडिन् तत्रार्थे पुरोहितादिगणे चूडिक इति निर्द्देशात् पक्षे ठनपि। चूडिक उक्तार्थे। ततः पुरोहिता॰ भावादौ यक्। चौडिक्य चूडाविशिष्टत्वे न॰।

चूण सङ्कोचे चुरा॰ उभ॰ सक॰ सेट्। चूणयति ते अचु[चूणत् त।

चूत पु॰ चूष-क्त चोतति रसम् चुत-अच् वा पृषो॰। १आम्रे, अमरः "नवचूतप्रसवोगमिष्यति" "चूताङ्कुरास्वादकषायकण्ठः"। "सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः" कुमारः। च्यु-क्त पृषो॰। २गुदद्वारे न॰। स्वार्थे क। चूतक आम्रे कूपके च।

चूर दाहे दिवा॰ आत्म॰ सक॰ सेट्। चूर्य्यते अचूरिष्ट। चुचूरे ईदित् चूर्णः। [इश्यम्।

चूरु पु॰ चूर-उण्। कृमिभेदे सुश्रु॰ कृमिशब्दे २१८४पृ॰

चूर्ण पेषे चु॰ उभ॰ सक॰ सेट्। चूर्णयति-ते अचुचूर्णत् त। चूर्णः चूर्णितः

चूर्ण न॰ चूर्ण-कर्म्मणि अच्। १पेषणजाते क्षोदे (मयदा) प्रभृतौ राजनि॰ "अन्नादष्टगुणं चूर्णं चूर्णादष्टगुणं पयः" वैद्य॰। तल्लक्षणमुक्तं भावप्र॰ "अत्यन्तशुष्कं तद्द्रव्यं सुपिष्टं वस्त्रगालितम्। तत् स्याच्चूर्णं रजः क्षोदस्तन्मात्रा कर्षसम्मिता। चूर्णे गुडः समो देयः शर्करा द्विगुणा मता। चूर्णे तु भर्जितं हिङ्गु देयं नोत्क्लेदकृद्भवेत्। लिहेच्चूर्णं द्रवैः सर्वैर्घृताद्यैर्द्विगुणोन्मितैः। पिबेच्चतुर्गुणैरेव चूर्णमालोडितं द्रवैः। चूर्णावलेहगुटिका कल्कानामनुपानकम्। पित्तवातकफातङ्के त्रिद्व्येकपलमाहरेदिति" (आवीर) २ख्याते। क्षोदे "अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः" रघुः। ४धूलौ तस्य लोपकरणे ५क्षारे (चूण) मेदि॰। "चूर्णमानीयतां तूर्णं पूर्णचन्द्रनिभानने!। पर्णानि स्वर्णवर्णानि सीदन्त्याकर्णलोचने" उद्भटः। भावे अच् ६पेषणे पु॰

चूर्णक न० चूर्ण+स्वार्थे क। १चूर्णने २चूर्णशब्दार्थे ३पद्यभेदे न० तल्लक्षणादिकं छन्दो॰उक्तं यथा "अपादः पदसन्तानो गद्यं तत्तु त्रिधा मतम्। चूर्णकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः" "अकठोराक्षरं स्वल्पसमासं चूर्णकं विदुः। तत्तु वैदर्भीरीतिस्थं गद्यं हृद्यतरम् भवेत्" ३सक्तौ (छातु) पु० त्रिका०।

चूर्णकार त्रि० चूर्णं करोति कृ—अण् उप० स०। पेषणकारके। (चूण) इति पदार्थनिष्पादके (चूनारी) इति ख्याते २सङ्कीर्णजातिभेदे पुंस्त्री०। सच नटकन्यायां पुण्ड्रकाज्जात इत्याह पराशरः।

चूर्णकुन्तल पु० चूर्ण्यते इति चूर्णः कर्म०। शिरःस्थे क्षुद्रकेशे अलके अमरः।

चूर्णखण्ड न० चूर्णस्य तदर्थं खण्डम्। (काँकरघूटिङ्) [ख्याते कर्करे हारा०।

चूर्णपारद पु० चूर्णं पारदस्य एकदेशिस०। पारदहेतुभूते चूर्णरूपे हिङ्गुले राजनि०।

चूर्णशाकाङ्क पु० चूर्णं इव शाकः अङ्को यस्य। गौरसुवर्ण- [शाके राजनि०।

चूर्णादि न० अप्राणिषष्ठ्यन्तात् परस्यस्य आद्युदात्ततानिमित्ते शब्दगणे स च पा० ग० सू० उक्तो यथा "चूर्ण करिव करिप शाकिन शाकट द्राक्षा तूस्त कुन्दम दलप चमसी चक्कन चौल। "चूर्णादीनामप्राणिषष्ठ्याः" पा०। सूक्ष्मचूर्णम्।

चूर्णि(र्णी) स्त्री अशेषविदुषां तर्कं चूर्णयति चूर्ण–इन्। पतञ्जलिकृते महाभाष्ये "चूर्णिभागुरिवाभटाः" व्या० का०। २कपर्दकशते सि० कौ० ३कार्षापणे पुराणपरिमितकपर्दके "अशीत्युत्तरपरिमितधेनुशतं देयं तदशक्तौ चत्वारिंशत्पुराणोत्तरचूर्णीशतपञ्चकम्" प्रा० वि०। भावे इन्। ४चूर्णने स्त्री वा ङीप्।

चूर्णिदासी स्त्री चूर्णौ चूर्णने नियुक्ता दासी शा० त०। पेषणनियुक्तायां दास्यां शब्दार्थचि०।

चूर्णिका स्त्री चूर्णश्चूर्णनमस्त्यस्याः ठन्। सक्तुषु शब्दार्थचि०

चूर्णिकृत् पु० चूर्णिं महाभाष्यं करोति कृ–क्विप्। महाभाष्यकारके पतञ्जलिमुनौ।

चूर्णिन् त्रि० चूर्णैः संसृष्टः इनि। चूर्णसंसृष्टे अपूपादौ [सि० कौ०।

चूर्त्ति स्त्री चर–भावे क्तिन् अत उत्त्वम्। चरणे

चूल पु० चुल–क पृषो० दीर्घः। केशे अमरः। "हतावेशाश्च चूलिनः" लिङ्गपु०। "शिखिनं चूलिनश्चैव तमञ्जालकलभूषणम्" हरिवं० ४५ अ०। "गृहीतचूलको विमोक्तव्येन रजकादिना" मत्स्यसू०।

चूला स्त्री चूला+डस्य लः। गृहोपरिगृहे चन्द्रशालायां (चिलेघर) शब्दार्थचि०२चूडायाञ्च। तस्या इदम् अण्। चौल चूडासम्बन्धिनि संस्कारभेदे चूडाशब्दे दृश्यम्।

चूलिक न० घृतभृष्टसमितायाम् (लुचि) शब्दार्थ०।

चूलिका स्त्री चुल–समुच्छ्राये ण्वुल् पृषो० दीर्घः। १हस्तिकर्णमूले, २नाटकाङ्गभेदे च "अर्थोपक्षेपकाः पञ्च विष्कम्भकप्रवेशकौ। चूलिकाङ्कावतारोऽथ स्यादङ्कमुखमित्यपि" सा० द०। अर्थोपक्षेप नाटकाङ्गानि विभज्य "अन्तर्जवनिकासंस्थैः सूचनाऽर्थस्य चूलिका" इति लक्षितम्। यथा वीरचरिते चतुर्थाङ्कस्यादौ "भो भो वैमानिकाः प्रवर्त्तन्तां रङ्गमङ्गलानीत्यादि" रामेण परशुरामोजितः इति नेपथ्ये पात्रैः सूचितम्। "अंशुलताजालजटिलचूलिकानाम्" काद०।

चूष पाने (चोषा) भ्वा० पर० सक० सेट्। चूषति। अचूषीत्। चुचूष। चूषणम्

चूषा स्त्री चूष्यते पीयते पृष्ठमांसेनाऽदृश्यतां नीयते चूष–घञर्थे क। १हस्तिमध्यबन्धनरज्ज्वाम् कक्षायाम् अमरः भावे अङ्। २चूषणे स्त्री

चूष्य त्रि० चूष–कर्म्मणि ण्यत्। जिह्वौष्ठाभ्यां, संयोगभेदेन पेये आहारशब्दे चर्व्यशब्दे च दृश्यम्। "प्राग्भिर्भक्ष्यभोज्यलेह्यपेयचूष्याभ्यवहार्य्याणाम्" भा० श० १६१अ०।

चृत हिंसे ग्रन्थने च तुदा० सक० सेट्। चृतति अचर्तीत् चचर्त्त। चर्त्तिष्यति चर्त्स्यति।

चृत(प) संदीपने वा चु० उभ० पक्षे भ्वा० पर० सक० सेट्। चर्त्त(र्प)यति-ते। अचीचृत(प)त्-त अचचर्त्त(र्प)त् त। पक्षे चर्त्त(र्प)ति अचर्त्ती(र्पी)त्।

चेकित त्रि० कित–यङ्लुकि अच्। १अतिशयज्ञानाभ्यां युक्ते। २ऋषिभेदे पुं तस्य गोत्रापत्यं गर्गा० यञ्। चैकित्य तद्गोत्रापत्ये पुंस्त्री०।

चेकितान त्रि० कित–यङ्लुकि ताच्छील्ये चानश्। १अत्यन्तज्ञानयुक्ते २महादेवे पु० "रुद्रमीशानमृषभं जिष्णुं शम्भुं कपर्द्दिनम्। चेकितानं परं योनिं तिष्ठतो गच्छतश्च ह" भा० द्रो० २०१अ०। ३नृपभेदे। "धृष्टद्युम्नश्चेकितानः काशीराजश्च वीर्य्यवान्" गीता।

चेट(ड) पु० चिट–परप्रैष्ये अच् वा टस्य डः। १दासे हेमच०। स्त्रियाम् उभयत्र ङीप्। २दास्याम्। ण्वुल्। चेटक १दासे अमरः। उपपतिनायके २सन्धानदक्षे रसम०। स्त्रियां चेटि(डि)का। "शृङ्गारस्य

सहाया विटचेटविदूषकाद्याः स्युः"। "उत्तमाः पीठमर्द्दाद्याः मध्यौ विटविदूषकौ तथा। शकारचेटाद्या अधमाः परिकीर्त्तिता" सा० द०:। "ताम्बूलाक्तं दशनमसकृत् दर्शयन्तीह चेटी" सा० द०।

चेत् अव्य० चित–विच्। १यद्यर्थे २पक्षान्तरे, अमरः ३असन्देहेऽपि सन्दिग्धतया कथने च शब्दार्थचि०। "सत्यं चेत् गुरुवाक्यमेव पितरोदेवाश्च चेत् योगिनी प्रीता चेत् परदेवता च यदि चेत् वेदाः प्रमाणं हि चेत्। शाक्तीयं यदि दर्शनं भवति चेदाज्ञाप्यमोघास्ति चेत् स्वातन्त्वा अपि कौलिकाश्च यदि चेत् स्यान्मे जयः सर्वदा" तन्त्रम्। "चेत्कण्टके पणफरे तु ग्रहाः समस्ता" नील० ता०। अधिकं (चेट्) शब्दे दृश्यम्

चेतकी स्त्री चेतयति उन्मीलयति बुद्धिबलेन्द्रियाणि चित–णिच्–ण्वुल् गौरा० ङीष्। १हरीतक्याम् अमरः। तस्या उत्पत्तिभेदादिकं भावप्र० उक्तं यथा "पपात बिन्दुर्मेदिन्यां शक्रस्य पिबतोऽमृतम्। ततो दिव्या समुत्पन्ना सप्तजातिर्हरीतकी। हरीतक्यभया पथ्या कायस्था पूतनाऽमृता। हैमवत्यव्यथा चापि चेतकी श्रेयसी शिवा। वयस्था विजया चापि जीवन्ती रोहिणीति च। विजया रोहिणी चैव पूतना चामृताऽभया। जीवन्ती चेति पथ्याया विज्ञेयाः सप्त जातयः। अलाबुवृत्ता विजया १वृत्ता सा रोहिणी २स्मृता। ३पूतनाऽस्थिमती सूक्ष्मा कथिता मांसलाऽमृता४। पञ्चरेखाऽभया५ प्रोक्ता जीवन्ती स्वर्णवर्णिनी६। त्रिरेखा चेतकी७ ज्ञेया सप्तानामियमाकृतिः। विजया सर्वरोगेषु रोहिणी व्रणरोहिणी। प्रलेपे पूतना योज्या शोधनार्थेऽमृता हिता। अक्षिरोगेऽभया शस्ता जीवन्ती सर्वरोगहृत्। चूर्णार्थे चेतकी शस्ता यथायोगं प्रयोजयेत्। चेतकी द्विविधा प्रोक्ता श्वेता कृष्णा च वर्णतः। षडङ्गुलायता शुक्ला, कृष्णा त्वेकाङ्गुला स्मृता। काचिदास्वादमात्रेण काचिद् गन्धेन भेदयेत्। काचित् स्पर्शेन दृष्ट्यान्या चतुर्द्धा भेदयेच्छिवा। चेतकी पादपच्छायामुपसर्पन्ति ये नराः। भिद्यन्ते तत्क्षणादेव पशुपक्षिमृगादयः। चेतकी तु धृता हस्ते यावत्तिष्ठति देहिनः। तावद्भिद्येत रोगैस्तु प्रभावान्नात्र संशयः। न धार्य्या सुकुमाराणां कृशानां भेषजद्विषाम्। चेतकी परमा शस्ता हिता सुखविरेचनी। सप्तानामपि जातीनां प्रधानं विजया स्मृता। सुखप्रयोगा सुलभा सर्वरोगेषु शस्यते। हरीतकी पञ्चरसा लवणा तुवरा परम्। रूक्षोष्णा दीपनी मेध्या स्वादुपाका रसायनी। चक्षुष्या लघुरायुष्या वृंहणी चानुलोमिनी। श्वासकासप्रमेहार्शःकुष्ठशोथोदरक्रमीन्। वैस्वर्य्यग्रहणीरोगविबन्धविषमज्वरान्। गुल्माध्मानतृषाच्छर्दिहिक्काकण्डूहृदामयान्। कामलां शूलमानाहं प्लीहानञ्च यकृत्तथा। अश्मरीं मूत्रकृच्छ्रञ्च मूत्राघातञ्च नाशयेत्। स्वादुतिक्तकषायत्वात्पित्तहृत्कफहृत् तु सा। कटुतिक्तकषायत्वादम्लत्वाद्वातहृच्छिवा। पित्तकृत्कटुकाम्लत्वाद्वातकृन्न कथं शिवा। प्रभावाद्दोषहन्तृत्वं सिद्धं यत्तत् प्रकाश्यते। हेतुभिः शिष्यबोधार्थं न पूर्वं क्रियतेऽधुना। कर्म्मान्यत्वं गुणैः साम्यं दृष्टमाश्रयभेदतः। यतस्ततो नेति चिन्त्यं धात्रीलकुचयोर्यथा। पथ्याया मज्जनि स्वादुः स्नाय्वामम्लो व्यवस्थितः। वृन्ते तिक्तस्त्वचि कटुरस्थनि तुवरो रसः। नवा स्निग्धा घनावृत्ता गुर्वी क्षिप्ता च याम्भसि। निमज्जेत् सा प्रशस्ता च कथितातिगुणप्रदा। नवादिगुणयुक्तत्वं तथैकत्र द्विकर्षता। हरीतक्याः फले यत्र द्वयं तच्छ्रेष्ठमुच्यते। चर्विता वर्द्धयत्यग्निं पेषिता मलशोधिनी। स्विन्ना संग्राहिणी पथ्या भृष्टा प्रोक्ता त्रिदोषनुत्। उन्मीलिनी बुद्धिबलेन्द्रियाणां निर्मूलिनी पित्तकफानिलानाम्। विस्रंसिनी मूत्रशकृन्मलानां हरीतकी स्यात् सह भोजनेन। अन्नपानकृतान् दोषान् वातपित्तकफोद्भवान्। हरीतकी हरत्याशु भुक्तस्य परियोजिता। लवणेन कफं हन्ति पित्तं हन्ति सशर्करा। घृतेन वातजान् रोगान् सर्वरोगान् गुडान्विता। सिन्धूत्थशर्कराशुण्ठीकणामधुगुडैः क्रमात्। वर्षादिष्वभया प्राश्या रसायनगुणैषिणा। अध्वातिखिन्नो बलवर्जितश्च रूक्षः कृशो लङ्घनकर्षितश्च। पित्ताधिको गर्भवती च नारी विमुक्तरक्तस्त्वभयां न खादेत्"। तस्याः फलम् अण् हरीतक्या० तस्य लुप् लुपि व्यक्तिवचनत्वम्। २तत्फलेऽपि स्त्री। ३जातिपुष्पे राजनि०।

चेतन पु० चित–ल्यु। १आत्मनि जीवे २परमेश्वरे हेमच०। ३मनुष्ये राजनि०। ४प्राणिमात्रे अमरः। ५प्राणयुक्ते त्रि० मेदि०। "उन्मादस्यापरिच्छेदश्चेतनाचेतनेषु" च शा० द०। "चेतनं पुष्करं कोशैः क्षुधाध्मातैः समन्ततः" हरिवं० ६७अ०। तस्य भावः ष्यञ् चैतन्य न०। त्व चेतनत्व न० तल् चेतनता स्त्री चेतनायाम् "शरीरस्य न चैतन्यम्" भाषा० "चैतन्यमात्मनोविद्यात्" श्रुतिः।

चेतनकी पु॰ चेतनं करोति कृ-ड गौ॰ ङीष्। हरीतक्याम् राजनि॰।

चेतना स्त्री चु॰ चित-युच्। १बुद्धौ २ज्ञाने ३चैतन्ये चितिस्वरूपज्ञानव्यञ्जिकायां प्रमाणासाधारणकारणिकायां ४चित्तवृत्तौ "चेतनानामधिष्ठानं मनोदेहश्च सेन्द्रियः। केशलोमनखाद्यान्तमूलद्रव्यगुणैर्विना" शब्दार्थचि॰ धृतवाक्ये केशादिव्यतिरिक्तस्यैव देहस्य चेतनाव्यञ्जकत्वमुक्तम्। गर्भस्थस्य सप्तमे मासि चैतन्ययोगः यथाह याज्ञ॰ "मनश्चैतन्ययुक्तोऽसौ नाडीस्नायुसिरायुतः। सप्तमे, चाष्टमे चैव त्वङ्मांसस्मृतिमानपि" असौ पूर्वोक्तो गर्भः सप्तमे मासि मनसा चेतनया च युक्तः" मिता॰। "निमेषश्चेतना यत्न आदानं पाञ्चभौतिकम्" याज्ञ॰ "षष्ठस्तु चेतना धातुर्मन इत्यभिधीयते" भा॰ व॰ २०९ अ॰। [जनि॰। २ज्ञेये त्रि॰।

चेतनीया स्त्री चेतनायै हिता छ। १ऋद्धिनामौषधे रा-

चेतस् न॰ चित-करणे असुन्। १चित्ते अमरः "चेतो नलं कामयते मदीयम्" "चेतोजन्मशरप्रसूनमधुभिर्व्यामिश्रतामाश्रयत्" नैष॰ "गच्छति पुरः शरीरं धावति पश्चादसंस्थितं चेतः" शकु॰। २चित्तवृत्तौ निघ॰। चित्तवृत्तेः सांख्यमते पौरुषेयबोधकरणत्वात् तथात्वम्। ३कर्त्तरि असुन्। ३ज्ञातरि त्रि॰। भावेऽसुन्। ४चैतन्ये ५प्रज्ञायाम् न॰।

चेतिष्ठ त्रि॰ अतिशयेन चेतयिता इष्ठन् तृणो लोपे तन्निमित्तकेटो निवृत्तिः णिलोपश्च। अतिशयचेतयितरि "क्रत्वा चेतिष्ठो विशामुषर्भुत्" ऋ॰ १।६५।५। "चेतिष्ठोऽतिशयेन चेतयिता" भा॰। "वसुश्चेतिष्ठो वसुधातमश्च" यजु॰ २७।१५।

चेतोंऽशु पु॰ चेतसश्चैतन्यस्यांशुरिव जीवे रवेरिव चिदात्मकस्य पुरुषस्य चेतोरूपा जलार्कसमाः प्राज्ञतैजसविश्वभेदेन देवतिर्य्यगादिदेहभेदेषु विभाव्यमाना इति वेदान्तप्रकरणोक्तेस्तस्य तथात्वम्

चेतोजन्मन् पु॰ चेतसि जन्मास्य। मनोभवे कन्दर्पे "चेतोजन्मशरप्रसूनमधुभिर्व्यामिश्रतामाश्रयत्" नैष॰। चेतोभवादयोऽप्यत्र।

चेतोमत् त्रि॰ चेतस्+अस्त्यर्थे मतुप् वा॰ न मस्य वः। १चेतोयुक्ते २चैतन्ययुक्ते। "चेतोमन्ति च सामानि धनुर्वेदश्च भारत!" भा॰ व॰।

चेतोमुख पु॰ चेतोमुखं द्वारं यस्य। चैतन्यदीप्तेऽज्ञानवृत्तिप्रधाने प्राज्ञे" "आनन्दभुक् चोतोमुखः प्राज्ञः" इति श्रुतिः। चेतसो मुखत्वञ्च चेतःकारणाज्ञानवृत्तिमुखत्वात्।

चेत्तृ त्रि॰ चित-अन्तर्भूतण्यर्थे ताच्छील्ये तृन् वेदे नि॰ इड्भावः। ज्ञापयितरि। "स चेत्ता देवता पदम्" ऋ॰ १।२२।५। "चेत्ता ज्ञापयिता" भा॰ प्रक्रिया उक्तरूपैव

चेत्य त्रि॰ चित-कर्म्मणि ण्यत्। ज्ञेये। "तं त्वाता चरणे चेत्यः" ऋ॰ ६।१।५। "चेत्येन हृदयं चैत्तः क्षेत्रज्ञः प्राविशद् यदा" भाग॰ ३।२६।५अ॰।

चेदि पु॰ देशभेदे सोऽभिजनोऽस्य अण्, तद्राजाणश्च बहुत्वे लुक्। २तद्देशवासिषु ३तन्नृपेषु च ब॰ व॰। "चेदिमत्स्यकरूषाश्च भोजाः सिन्धुकुलिन्दकाः" भा॰ भी॰ ९अ॰ जनपदोक्तौ। स च देशः शुक्तिमतीनदीतीरस्थः उपरिचरशब्दे ११२०पृ॰। दृश्यम्। चेदि+स्वार्थे क। चेदिदेशे वृ॰ स॰ १४अ॰ कूर्म्मविभागे अथ पूर्वस्यामित्युपक्रमे "शौलिकविदर्भवत्साऽन्ध्र चेदिकाश्चोर्द्ध्वकण्ठाश्च"।

चेदिपति पु॰ ६त॰। १उपरिचरनामके वसुभेदे उपरिचरशब्दे १२१९पृ॰ दृश्यम्। २दमघोषसुते शिशुपाले च। "एवं तेषु निवृत्तेषु क्षत्रियेषु समन्ततः। चेदीनामधिपोऽधावत् बलवानन्तकोपमः। दमघोषसुतो वीरः शिशुपालो महीपतिः" भा॰ आ॰ १८७अ॰। चेदिपादयोऽप्यत्र "वसुपूर्णां च वसुधां वस चेदिषु चेदिप!" भा॰ आ॰ १०६अ॰।

चेदिराज् पु॰ चेदिषु राजते राज-क्विप्। चेदिपतौ १उपरिचरवसौ २शिशुपाले च त्रिका॰। "मा वेदि यदसावेको जेतव्यश्चेदिराडिति" माघः।

चेदिराज पु॰ चेदीनां राजा टच् समा॰। उपरिचराख्ये वसौ। तस्य भूमिविवरगतिकथादि भा॰ शा॰ ३३८अ॰। "अजेन यष्टव्यमिति प्राहुर्देवा द्विजोत्तमान्। स च छागोऽप्यजो ज्ञेयो नान्यः पशुरिति स्थितिः। ऋषय ऊचुः। बीजैर्यज्ञेषु यष्टव्यमिति वै वैदिकी श्रुतिः। अजसंज्ञानि बीजानि छागं नो हन्तुमर्हथ। नैष धर्मः सतां देवा! यत्र बध्येत वै पशुः। इदं कृतयुगं श्रेष्ठं कथं वध्येत वै पशुः। भीष्म उवाच। तेषां संवदतामेवमृषीणाम् विबुधैः सह। मार्गागतो नृपश्रेष्ठस्तं देशं प्राप्तवान् वसुः। अन्तरीक्षचरः श्रीमान् समग्रबलवाहनः। तं दृष्ट्वा सहसा यान्तं वसुं ते त्वन्तरीक्षगम्।

ऊचुर्द्विजातयोदेवानेष च्छेत्स्यति संशयम्। यज्वा दानपतिः श्रेष्ठः सर्व्वभूतहितप्रियः। कथं स्विदन्यथा ब्रूयादेष वाक्यं महान् वसुः। एवं ते संविदं कृत्वा विबुधा ऋषयस्तथा। अपृच्छन् सहसाभ्येत्य वसुं राजानमन्तिकात्। भो राजन्! केन यष्टव्यमजेनाहोस्विदौषधैः। एतं न संशयं छिन्दि प्रमाणं नो भवान्मतः। स तान् कृताञ्जलिर्भूत्वा परिपप्रच्छ वै वसुः। कस्य वैकोमतः कामो ब्रूत सत्यं द्विजोत्तमाः!। ऋषय ऊचुः। धान्यैर्यष्टव्यमित्येव पक्षोऽस्माकं नराधिप!। देवानान्तु पशुः पक्षो मतो राजन्! वदस्व नः। भीष्म उवाच। देवानान्तु मतं ज्ञात्वा वसुना पक्षसंश्रयात्। छागेनाजेन यष्टव्यमेवमुक्तं वचस्तदा। कुपितास्ते ततः सर्वे मुनयः सूर्य्यवर्च्चसः। ऊचुर्वसुं विमानस्थं देवपक्षार्थवादिनम्। सुरपक्षो गृहीतस्ते यस्मात्तस्माद्दिवः पत। अद्य प्रभृति ते राजन्नाकाशे विहता गतिः। अस्मच्छापाभिघातेन महीं भित्त्वा प्रवेक्ष्यसि। ततस्तस्मिन्मुहूर्त्तेऽथ राजोपरिचरस्तदा। अधो वै सम्बभूवाशु भूमेर्विवरगो नृपः। स्मृतिस्त्वेनं न विजहौ तदा नारायणाज्ञया। देवास्तु सहिताः सर्व्वे वसोः शापविमोक्षणे। चिन्तयामासुरव्यग्राः सुकृतं हि नृपस्य तत्। अनेनास्मत्कृते राज्ञा शापः प्राप्तो महात्मना। अस्य प्रतिप्रियं कार्य्यं सहितैर्नो दिवौकसाम्। इति बुद्ध्या व्यवसाय्य गत्वा निश्चयमीश्वराः। ऊचुः संहृष्टमनसो राजोपरिचरन्तदा। ब्रह्मण्यदेवभक्तस्त्वं सुरासुरगुरुर्हरिः। कामं स तव तुष्टात्मा कुर्य्याच्छापविमोक्षणम्। मानना तु द्विजातीनां कर्त्तव्या वै महात्मनाम्। अवश्यं तपसा तेषां फलितव्यं नृपोत्तम!। यतस्त्वं सहसा भ्रष्ट आकाशान्मेदिनीतलम्। एकन्त्वनुग्रहं तुभ्यं दद्मो वै नृपसत्तम!। यावत्त्वं शापदोषेण कालमासिष्यसेऽनघ!। भूमेर्विवरगो भूत्वा तावत्त्वं कालमाप्स्यसि। यज्ञेषु सुहुतं विप्रैर्वसोर्धारां समाहितैः। प्राप्स्यसेऽस्मदनुध्यानान्मा च त्वां ग्लानिरस्पृशत्। न क्षुत्पिपासे राजेन्द्र! भूमेश्छिद्रे भविष्यतः। वसोर्धाराभिपीतत्वात्तेजसाप्यायितेन च। स देवोऽस्मद्वरात् प्रीतो ब्रह्मलोकं हि नेष्यति"।

चेबी(वी) स्त्री रागिणीभेदे हला०।

चेय त्रि० चि-कर्म्मणि यत्। १चेतव्ये चयनीये २आधानाङ्गसंस्कारसंस्कार्य्ये वह्नौ च "अग्निश्चेयो बहुभिर्यज्ञैः" भा०शा०२९२अ०। ३चेतुं योग्ये। हस्तचेयम् अङ्कुशचेयं पुष्पम्। [भगं वसुत्तये" ऋ० ८।६१।७।

चेरु पु० चि-बा० रु। चयनशीले "त्वं ह्योहि चेरवे विदा

चेल लौल्ये अक०गतौ सक०भ्वा०प०सेट्। चेलति अचेलीत् चिचेल ऋदित् अचिचेलत् त।

चेल न० चिल-आच्छादने कर्म्मणि घञ्। १वस्त्रे। चेल-लौल्ये अच्। २अधमे त्रि० अमरः। "चेलचर्म्मविपाकेषु त्रिरात्रं स्यादभोजनम्" मनुना तस्य हरणे त्रिरात्रोपवासो विहितः "मा स्मातिचेलं भुवि कश्चिद् भूः" भट्टिः स्मातिचेलमित्यत्र "कुत्सितानि कुत्सनैः" पा० समासे परनिपातः। "चेलखेटकटुकाण्ड गर्हायाम्" पा० निन्दायां चेलादीनाम् आद्युदात्तता। पुत्रश्चेलमिव चेलसादृश्येन पुत्रस्य निन्दा गम्यते सि०कौ० "घरूपचेलड्ब्रुवेत्यादि पा० चेलडादीनि वृत्तिविषये कुत्सनवाचीनि" सि० कौ० तेषु परेषु ङ्यन्तस्य ह्रस्वः पचादिषु टित्करणसामर्थ्यात् ङीप् "ब्राह्मणिचेली" सि० कौ०। "चेले क्नोपेः" पा० अस्मिन् उपपदे क्नोपेर्णमुल् चेलक्नोपम्।

चेलगङ्गा स्त्री चेलमिव गङ्गा। गोकर्णसमीपस्थे नदीभेदे। "गोकर्णस्योपरिष्टात्तु ध्वंसितः स महासुरः। पपात चेलगङ्गायाः पुलिने सह कन्यया" हरिवं० १४९अ०। "गङ्गा सरस्वती चैव चेलगङ्गा च निम्नगा" १२६अ०।

चेलान पु० चेल-बा० आनच्। फलप्रधाने लताभेदे (फेलन) रत्नमा०।

चेलाल पु० चेलमिवालति अल-अच्। लतापनसे त्रिका०।

चे(चै)लाशक पु० चेलं तत्स्थयूकामश्नाति अश-ण्वुल्। प्रेतभेदे। "चे(चै)लाशकस्तु भवति शूद्रो धर्म्मात् प्रेतो स्वकात् च्युतः" मनुः। "चेलः कीटभेदस्तद्भक्षकः प्रेतो भवति" गोविन्दराजः। "चेलसम्बन्धिनी यूका चैलकस्तद्भक्षकः" इति कुल्लूकभट्टः।

चेलिका स्त्री चेल-ण्वुल्। पट्टवस्त्रे (चेलिर कापड़) "इयं कण्वस्य वनिता पीतशाटीपरिच्छदा। रक्तचेलिकया रुद्धा शातकुम्भनिभस्तनी" पद्मपु०।

चेलुक पु० चेल-उक। बुद्धभिक्षुशिष्ये त्रिका०।

चेल्ल चालने गतौ च भ्वा० पर० सक० सेट्। चेल्लति अचेल्लीत् चिचेल्ल ऋदित् अचिचेल्लत् त।

चेष्ट ईहायां भ्वा० आ० सक० सेट्। चेष्टते अचेष्टिष्ट। चिचेष्टे। अचचेष्टत अचिचेष्टत् न। चेष्टितः चेष्टा चेष्ट-

मानः। "गङ्गायां हि न शक्नोमि इहत्यागश्चेष्टितं चिरम्" मत्स्यपु०। "अतत्वरञ्च तान् योद्धुमभिचेष्टश्च राघवौ" भट्टिः "रुरुचेष्टितमभिषु" रघुः। "आस्ते शेते चेष्टतेऽवतिष्ठति परिधावति" भाग० ५।२६। "यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्" मनुः। "चेष्टनस्पर्शनेऽनिलम्" मनुः। "तद्वेव विहितं यन्त्र तथा चेष्टयितुर्वशे' भा० शा० ११अ०।

चेष्टक त्रि० चेष्ट—ण्वुल्। १चेष्टान्विते। २रतिबन्धभेदे पु०। "पादमेकं हृदि न्यस्य इतरेणैव चेष्टयेत्। कान्तक्रोडे स्थिता नारी बन्धोऽयं चेष्टकोमतः" स्मरदीपिका।

चेष्टा स्त्री चेष्ट-अङ्। "आत्मजन्या भवेदिच्छा इच्छाजन्या भवेत् कृतिः। कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत्क्रिया" इत्युक्ते कृतिजन्ये क्रियासाधने कायिके व्यापारे। "चेष्टावदन्त्यावयवित्वं शरीरत्वम्" सि०मु०। "बाह्यैर्विभावयेल्लिङ्गैर्भावैरन्तर्गतं नृणाम्। स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च। आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च। नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः" मनुः "चेष्टा हस्तास्फालनादि" कुल्लू०। 'चेष्टाभोजनवाग्रोधे नेत्रादिप्रतिभेदने" याज्ञ०। "वायोस्तु स्पर्शनं चेष्टां व्यूहनं रौक्ष्यमेव च" याज्ञवल्क्येन तस्य वायुकार्यत्वमुक्तम्।

चेष्टानाश पु० चेष्टाया नाशोऽत्र। प्रलयकाले राजनि०।

चेष्टाबल न० ज्योतिषोक्ते ग्रहाणां बलभेदे तच्च बृहज्जा० उक्तं यथा

"उदगयने रविशीतमयूखौ वक्रसमागमगाः परिशेषाः। विपुलकरा युधि चोत्तरसंस्थाश्चेष्टितवीर्ययुताः परिकल्प्याः" बृ० जा०।

"अधुना चेष्टाबलं दोधकेनाह उदगयने इति मकरादिराशिषट्कमुत्तरमयनं कर्कटादिषट्कं दक्षिणमयनमिति। उदगयने उत्तरायणे रविशीतमयूखौ सूर्य्यचन्द्रमसौ बलिनौ भवतः। परिशेषाः भौमबुधगुरुसितसौराः वक्रगाः विपरीतगतयो बलिनो भवन्ति तथा समागमगाश्चन्द्रेण सहिताः बलिन एव चन्द्रेण संयोगो ग्रहाणां समागमशब्दवाच्यः रविणा सहास्तमयो भौमादीनां परस्परं युद्धम्। उक्तञ्चाचार्य्यविष्णुचन्द्रेण "दिवसकरेणास्तमयः समागमः शीतरश्मिसहितानाम्। कुसुतादीनां युद्धम् निगद्यतेऽन्योन्ययुक्तानामिति" विपुलकरा इति विपुलाः करा येषां ते विपुलकराः विस्तीर्णरश्मयो बलिनो भवन्ति शीघ्रकेन्द्रे द्वितीयतृतीयपदस्थे ग्रहस्य विपुलकरत्वं प्रायः संभवति वक्रासन्नत्वात् युधि संग्रामे चोत्तरसंस्था बलिन एव। कुसुतादीनां युद्धमित्युक्तम् तत्र यः उत्तरदिग्भागसंस्थितो जयी स च बलवान् उत्तरसंस्थत्वमत्रोपलक्षणार्थम्। यस्तेजस्वी स एव बलवान्। तत्रैतज्जयलक्षणम् "दक्षिणदिक्स्थः परुषोवेपथुरप्राप्य सन्निकृष्टतनुः। अधिरूढोविकृतोनिःप्रभो विवर्णश्च यः स जितः। उक्तविपरीतलक्षणसम्पन्नो जयगतो विनिर्द्दिष्टः। विपुलः स्निग्धोद्युतिमान् दक्षिणदिक्स्थोऽपि जययुक्तः" इति एतच्छुक्रस्य प्रायः सम्भवति यस्मात्पुलिशाचार्यः "सर्वे जयिन उदक्स्था दक्षिणदिक्स्थो जयी शुक्रः" इति एतच्चेष्टाबलम्। एषामन्यतमेन संयुक्तश्चेष्टाबलसंयुक्तो भवति" भट्टोत्पलः।

चेष्टित त्रि० चेष्ट—कर्त्तरि क्त। १चेष्टायुक्ते। भावे क्त २गतौ ३कायादिव्यापारे च न० मेदि० चेष्टाशब्दे उदा०।

चैकितय्य पुंस्त्री चेकितस्य गोत्रापत्यम्। गर्गा० यञ्। चैकितय्ये गोत्रापत्ये तस्य छात्त्रः कण्वा० अण् यलोपः। चैकित तच्छात्त्रे।

चैकित्सितय्य पुंस्त्री चिकित्सितर्षेरपत्यम् गर्गा० यञ्। चैकित्सितय्येऽपत्ये ततः कण्वा० छात्त्रे अण्। चैकित्सित। तच्छात्त्रे। [स्त्रियां अणन्तत्वात् ङीप्।

चैकीर्षित त्रि० चिकीर्षित एव प्रज्ञा० अण्। चिकीर्षिते

चैटयत त्रि० चेट इव यतते यत—अच् ततः स्वार्थे अण्। चेटतुल्ययत्नशीले तस्यापत्यं तिका० फिञ्। चैटयतायनि तदपत्ये पुंस्त्री। स्त्रियां क्रौड्या० ष्यङ्। चैटयत्या। चैटयतानां विषयः भौरिक्या० विधल्। चैटयतविध तद्विषये न०।

चैतन्य न० चेतन एव, चेतनस्य भावो वा ष्यञ्। वेदान्तिमते चित्स्वरूपे १परमात्मनि न्यायादिमते २आत्मधर्म्मे चेतनायाम्। "चैतन्यमात्मनोविद्यान्न बिभेति कुतश्चन" श्रुतिः वेदान्तिमते राहोः शिर इतिवद् अभेदे षष्ठी, अन्यमते भेदे। "शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः" भाषा० ३प्रकृतौ मेदि०। "प्रकृतिश्च दृष्टान्तानुपरोधात्" शा० सू० चैतन्यस्य जगत्प्रकृतित्वाङ्गीकारेण तथात्वम्। "चैतन्यं परमाणूनां प्रधानस्यापि नेष्यते। ज्ञानक्रिये जगत्कर्त्त्र्यौ दृश्येते चेतनाश्रये" वेदान्तका०। चेतन एव स्वार्थे ष्यञ्। ४क्षत्त्रीगर्भजाते

कलौ कृष्णावतारभेदे अनन्तसंहिता। तस्या न प्रामाणिकत्वमिति स्मार्त्तानुयायिनः। वैष्णवास्तु तन्मूलतयैव चैतन्यदेवस्य कृष्णावतारत्वमिच्छन्ति। वयं तु तस्याः प्रामाणिकत्वे संवादिमूलग्रन्थान्तरस्यादर्शनात् उदासीना इत्यतः न किञ्चित् ब्रूमहे। यदि चासौ अवतारः यदि वा न, तथापि तस्य वैष्णवसम्प्रदायगुरुत्वात् पूज्यत्वं मन्यामहे चैतन्यचन्द्रोदयः चैतन्यचरितामृतं चैतन्यभागवतम् इत्यादयो ग्रन्थाः तन्माहात्म्यावेदका वैष्णवसम्प्रदायप्रसिद्धाः सन्ति।

चैतन्यभैरवी स्त्री तन्त्रसारोक्ते भैरवीभेदे तत्र तन्मन्त्रादिकं दृश्यम्।

चैत्त न० चित्तस्येदम् अण्। चित्तसम्बन्धिनि १स्मरणादौ। "चन्द्रचतुर्मुखशङ्कराच्युतैः क्रमान्नियन्त्रितेन मनोबुद्ध्यहङ्कारचित्ताख्येनान्तरिन्द्रियचतुष्केण क्रमात् संशयनिश्चयाहङ्कार्य्यचैत्तांश्च सर्व्वानेतान् स्थूलविषयानुभवतः" वेदान्तसा०। २चित्ताभिमानिके क्षेत्रज्ञे "चैत्येन हृदयं चैत्तः क्षेत्रज्ञः प्राविशद्यदा। विराट् तदैव पुरुषः सलिलादुदतिष्ठत" भाग० ।३।२६।५८। बौद्धमते विज्ञानस्कन्धातिरिक्ते ४स्कन्धमात्रे। तैस्तु चित्तं चैत्तमिति द्विविधस्यैव पदार्थस्याङ्गीकारेण विज्ञानातिरिक्तस्य चैत्तत्वात्। बुद्धशब्दे तद्भेदो दृश्यः।

चैत्य न० चित्याया इदमण्। १आयतने अमरः। २सुखरहिते सचित्ये अचित्ये वा यज्ञायतने भरतः। ३देवायतनमात्रे ४देवकुले (देउल) च। ५बुद्धे ६बिम्बे ७उद्देश्यवृक्षे मेदि०। ८ग्रामादिप्रसिद्धमहावृक्षे। ९देवावासे १०जिनतरौ पु० मेदि०। "सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षिता। चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये" याज्ञ०। "चैत्ये भयं महत्कृतम्" वृ० सं० ५२अ०। "चैत्यस्थाने स्थितं वृक्षे फलवन्तमिव द्विजाः" भा० अनु० १६६अ०। चैत्ये भवः अण् चैत्यस्थे देवभेदे चैत्यमखभेदे शब्दे दृश्यम्।

चैत्यक पु० चैत्य इव कायति कै-क। अश्वत्थवृक्षे त्रिका०। गिरिव्रजपुरवेष्टकपञ्चगिरिमध्ये २पर्वतभेदे "वैहारो विपुलः शैलो वराहो वृषभस्तथा। तथा ऋषिगिरिस्तात! शुभाश्चैत्यकपञ्चमाः। एते पञ्च महाशृङ्गाः पर्वताः शीतलद्रुमाः। रक्षन्तीवाभिसंहत्य संहताङ्गा गिरिव्रजम्"। "मागधानान्तु रुचिरं चैत्यकान्तरमाप्रवान्" "भङ्क्त्वा भेरीत्रयं तेऽपि चैत्यप्रकारमाद्रवन्"। "मागधानां सुरुचिरं चैत्यकान्तं समाद्रवन्"। "चैत्यकस्य गिरेः शृङ्गं भित्त्वा किमिह छद्मना" भा० स० २०अ०।

चैत्यगृह न० चैत्यस्य समीपे गृहम्। चतुष्पथस्थे चैत्यसन्निहिते गृहे शब्दार्थचि०।

चैत्यतरु पु० कर्म०। ग्रामादौ १प्रसिद्धवृक्षे २अश्वत्थवृक्षे रत्नमाला। चैत्यवृक्षादयोऽप्यत्र। "चैत्यतरौ सा पतिता सत्कृतपीडां करोत्युल्का" वृ० स० २२अ०। "चैत्यद्रुमश्मशानेषु" मनुः।

चैत्यमुख पु० चैत्यस्य देवकुलस्येव मुखमस्य। कमण्डलौ त्रिका०।

चैत्ययज्ञ पु० आश्व० गृह्योक्ते यज्ञभेदे तस्य विधानादि यथा "चैत्ययज्ञे प्राक् स्विष्टकृतश्चैत्याय बलिं हरेत्" सू०। चैत्ये भवाश्चैत्याः। शङ्करः पशुपतिः आर्या ज्येष्ठा इत्येवमादयः। यदि कस्यैचिद्देवतायै प्रतिशृणोति यदि आत्मनोऽभिप्रेतं वस्तु लब्धं ततस्त्वा महमाज्येन स्थालीपाकेन पशुना वा यक्ष्यामीति ततो लब्धे वस्तुनि तस्य तेन यागं कुर्यात् स चैत्ययज्ञः। तत्र स्विष्टकृतः प्राक् चैत्याय बलिं हरेत् नमस्कारान्तेन नामधेयेन पुनश्चैत्यस्य ग्रहणं प्रत्यक्षहरणार्थम्। तेन चैत्यायतने एवोपलेपनादि कुर्य्यात्" ना० वृ०। "यद्यु वै विदेशस्थं पलाशदूतेन यत्र वेच्छा वनस्पते इत्येतयर्चा द्वौ पिण्डौ कृत्वा वीवधेऽभ्याधाय दूताय प्रयच्छेदिमन्तस्मै बलिं हरेति चैनं ब्रूयादयं तुभ्यमिति यो दूताय" सू०। "यदि विदेशस्थं चैत्यं यजेत् तदा पलाशदूतेन बलिं हरेत्। पलाशेन दूतं कृत्वा वीवधञ्च कुर्यात्। यत्र वेच्छेत्यृचा द्वौ पिण्डौ कृत्वा वीवधेऽभ्याधाय दूताय प्रयच्छेत्। तयोरेकं पिण्डं निर्दिश्य दूतं वदति इमं तस्मै बलिं हरेति। अपरं दूताय प्रयच्छति अयं तुभ्यमिति। एतयर्चेति वचनम् अन्यत्र पादग्रहणेऽपि क्वचित् सूक्तं भवतीत्येवमर्थम्। तेन "आत्वाहार्षमन्तरेभीति ऋषभं मा समानानामिति" च सूक्तं सिद्धम्। अन्ये पुनरभ्यासार्थं मन्यन्ते पिण्डकरणे वीवधाभ्याधाने दूताय प्रदाने इति ना० वृ०। "प्रति भयं चेदन्तरा शस्त्रमपि किञ्चित्" सू०। "कर्त्तुश्चैत्यस्य च मध्ये भयमस्ति चेत् शस्त्रमपि किञ्चित् दद्यात् दूताय" ना० वृ०। "नाव्या चेत् नद्यन्तरा प्लवरूपमपि किञ्चिदनेन तरितव्यमिति" सू०। "उभयोर्मध्ये यदि नावा तार्या नदी स्यात् तदा प्लवरूपमपि किञ्चित् दद्यात् अनेनेति मन्त्रेण" ना०वृ०। "धन्वन्तरियज्ञे ब्रह्माणमग्निं चान्तरा दुरी-

हितायाग्रे बलिं हरेत्" सु० । "यदि धन्वन्तरिश्चैत्यो भवति तदा मध्यादग्निं चान्तरा पुरोहितायाग्रे बलिं हरेत् पुरोहिताय नम इति ततो धन्वन्तरये नम इति । धन्वन्तरौ विदेशस्थे स्वयं विशेषः धन्वन्तरेश्च पुरोहितस्य चैकः पिण्डः द्वितीयो दूतस्य" । ना० ह० ।

चैत्यविहार पु० चैत्यस्येव विहारोऽत्र । जिनसद्मनि हेम० ।

चैत्र न० चि—ष्ट्रन् चित्रमेव स्वार्थे अण् वा । १देवकुले (देउल) २मृते मेदि० ३बुद्धभिक्षुके पु० ४वर्षाचलभेदे पु० त्रिका० कुलपर्व्वतशब्दे २१२१पृ० दर्शिते विष्णु पु०वाक्ये "गोमेदश्चैव चन्द्रश्चेत्यत्र चैत्र इति पाठान्तरदर्शनात् त्रिकाण्डोक्तिः समञ्जसा । चित्रायां भवः अण् । बुधस्य कलत्रभेदचित्रायागर्भजे ५बुधपुत्रभेदे पु० ब्रह्मवै० पा० ख० । चित्रानक्षत्रयुक्ता पौर्णमासी अण् ङीप् चैत्री सास्मिन् मासे पुनरण् । चित्रानक्षत्रयुक्तपौर्णमासीयुक्ते तदुपलक्षिते वा ६चान्द्रे मासि बार्हस्पत्ये ७वर्षभेदे ८तथाभूते अर्द्धमासे मीनस्थरविके ९सौरचैत्रे च कार्त्तिकशब्दे १९४८पृ० दृश्यम् । चित्रायां भवः अण् । १०चित्रानक्षत्रजाते त्रि० स्त्रियान्तु तस्याणो लुक् । चित्रा चित्राजातायां स्त्रियां स्त्री चित्राशब्दे दृश्यम् । स्वार्थे क तत्रार्थे शब्दरत्ना० । "फाल्गुनं वाथ चैत्रं वा मासं प्रति यथाबलम्" मनुः । "मीनादिस्थो रविर्येषामारम्भः प्रथमक्षणे । भवेत् तेऽब्दे चान्द्रमासाश्चैत्राद्या द्वादशः स्मृताः" व्यासः "चैत्रे मदोन्मादिनी" उद्भा० त० ।

चैत्ररथ न० चित्ररथेन गन्धर्वेण निर्वृत्तम् अण् । १कुबेरस्योद्याने अमरः । "वभौ वल्गुजनाकीर्णं वनं चैत्ररथं यथा" हरिव० २२४अ० । "एकोययौ चैत्ररथप्रदेशान्" रघुः २मुनिभेदे पु० "आविक्षितमभिष्यन्तं तथा चैत्ररथं मुनिम्" भा० आ० ६४अ० । चैत्ररथः शशविन्दोरपत्यम् स्त्री अण् ङीप् । ११शशविन्दोःसुतायां स्त्री "मान्धातुर्युवनाश्वस्य त्रिलोकीविजयी सुतः । तस्य चैत्ररथी भार्य्या शशविन्दोःसुताऽभवत्" हरिव० १२अ० । चित्ररथं गन्धर्वमधिकृत्य कृतो ग्रन्थः अण् । १२भारतपर्व्वान्तर्गतेऽवान्तरपर्वभेदे न० चित्ररथशब्दे दृश्यम् । "तथा चैत्ररथं देव्याः पाञ्चाल्याश्च स्वयंवरम्" भा० आ० १अ० अवान्तरपर्वोक्तौ ।

चैत्ररथि पु० चित्ररथस्य उषङ्गुपुत्रस्यापत्यम् अण् । उषङ्गुपुत्र चित्ररथस्यापत्ये शशविन्दौ नृपे "ततः प्रकृतिमिच्छन्वै उषङ्गुःसोऽप्यग्रमात्मजम् । तस्य चित्ररथस्तस्य पुत्रः कर्मभिरन्वितः । आसीत् चैत्ररथिर्वीरो यज्वा विपुलदक्षिणः । शशविन्दुः परं वृत्तं राजर्षीणां समन्वितः" हरिव० ३७अ० ।

चैत्ररथ्य न० चैत्ररथमेव स्वार्थे ष्यञ् । चैत्ररथवने "मानसे चैत्ररथ्ये च स रेमे रामया रतः" भाग० ३।१३।२८अ० ।

चैत्रमख पु० चैत्रे कर्त्तव्यो मख इव महोत्सवः । चैत्रमासे मदनत्रयोदश्यादिकर्त्तव्ये वसन्तोत्सवे हेमच० ।

चैत्रायण पुंस्त्री चित्रस्य गोत्रापत्यम् नडा० फक् । १चित्रस्य गोत्रापत्ये । चित्रेण निर्वृत्तादि पक्षा० फक् । २चित्रनिर्वृत्तादौ त्रि० ।

चैत्रावली स्त्री चैत्रे आवलिः सम्यक् वलिरत्र ङीप् । चैत्रपौर्णमास्यां त्रिका० । "चैत्रावल्याः परेऽपि या" ति० त० । "चैत्रावली मदनत्रयोदशीत्यपरे तस्यामेव मदनपूजाविधानात्तस्यास्तथात्वम् ।

चैत्रिक पु० चित्रानक्षत्रयुक्ता पौर्णमासी साऽस्मिन् मासे पक्षे ठक् । चैत्रमासे अमरः ।

चैत्रिन् पु० चैत्री विद्यतेऽस्मिन् व्रीह्या० इनि । चैत्रमासे राजनि० । तत्र चैत्रिरित्यपि तत्र वा० इञ् ।

चैत्री स्त्री चित्रानक्षत्रयुक्ता पौर्णमासी अण् ङीप् । चित्रानक्षत्रयुक्तायां पौर्णमास्यां सा हि चैत्रमासे एव भवति योग्यत्वात् कार्त्तिकशब्दे १९४८ पृ० दृश्यम् "चैत्र्यां हि पौर्णमास्यां तु तव दीक्षा भविष्यति" भा० आश्व० ७२अ० । "चैत्र्यां वा मार्गशीर्ष्यां वा सेनायोगः प्रशस्यते" भा० शा० १००अ० ।

चैदिक पुं त्रि० चेदिदेशे भवः काश्या० ठञ् ञिठ् वा इदित् । चेदिदेशभवे स्त्रियां तु ठञि ङीप् ञिठि—टाप् ।

चैद्य पु० चेदीनां जनपदानां राजा ष्यञ् । १शिशुपाले । "क्रुद्धस्य चैद्यं प्रति" "त्वया विप्रकृतश्चैद्यः" माघः ।

चैन्तित पुंस्त्री० चिन्तितायाः तन्नामिकायाः स्त्रिया अपत्यम् "अव्यङ्गाभ्यो नदीमानुषीभ्यस्तन्नामिकाभ्यः" पा० अण् । चिन्तितानामिकायाः स्त्रिया अपत्ये । चिन्तायुक्तायाः स्त्रिया अपत्ये तु ढक् । चैन्तितेय इत्येव ।

चैल त्रि० चेलस्येदम् अण् १वस्त्रसम्बन्धिनि स्वार्थे अण् । २चेले वस्त्रे चे(चै)लाशकशब्दे दृश्यम् । "चैलकम्बलवेश्मानि विचित्राणि महान्ति च" भा० आ० १२८अ० । "प्रदीप्तमिव चैलान्तं कस्तं देशं न सन्त्यजेत्" भा० शा० २८९अ० ।

चैलकि पु० चेलकस्यर्षेरपत्यम् इञ् । जीवलनामर्षौ "तद्ध-

होवाच जीवलश्चैलकिः" शत० ब्रा० २।३।१।३४। चैलकर्षिश्च "चैलक उन्माद शाण्डिल्यायन" इति शत० ब्रा० १०।४।५।२०। शाण्डिल्यगोत्रे उक्तः।

चैलधाव त्रि० चैलं वस्त्रं धावति मार्ष्टि धाव–मृजि अण् उप० स०। वस्त्रक्षालके रजके (धोपा) "चैलधावसुराजीविसहोपपतिवेश्मनाम्" याज्ञ० तदन्नभोजनं निषिद्धम्।

चोकुटि पु० गोत्रप्रवरभेदे हेमा० प्रवरा०।

चोक्ष पु० १स्वभावसिद्धशुचिषु वनप्रदेशेषु। "अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि" मनुव्या० कुल्लू०। तत्र भवं यत्। चौक्ष्य तत्रभवे उदके "अचौक्ष्यसलिलक्षालितयोनिम्" सुश्रुतः। "शुचौ दक्षे च चोक्षःस्यात्" त्रिका० उक्ते २दक्षे। "श्रद्धावन्तो दयावन्तश्चोक्षाश्चोक्षजनप्रियाः" भा० अनु० १४४अ०।

चोच न० चु–बा० च। १वल्कले २चर्म्मणि धरणिः। प्रशस्तं चोचमस्यास्ति अच्। ३त्वक्पत्रे पु० अमरः ४गुड़त्वचि शब्दार्थ०। स्वार्थे क। तत्रार्थे "दद्याच्चात्र पिप्पलीमूलतण्डुलीयकवराङ्गचोचकेत्यादि" सुश्रु०।

चोड पु० चुल–समुच्छ्राये अच् लस्य डः। १प्रावरणे २देशभेदे ब० व० मेदि०। चोलशब्दे दृश्यम्।

चोडी स्त्री चुल–अच् गौरा० ङीष् लस्य डः। शाट्यां हेमच०।

चोद पु० चोदयति चुद–अच्। अश्वादेः प्रेरके १कशादौ। "जघने चोद एषां वि सक्थानि नरो यमुः" ऋ०४।६१।२। "चोदः प्रेरिका कशा अराग्रकाष्ठविशेषो वा" २प्रेरकमात्रे त्रि० "चोदः कुवित्तुज्यात् जातमेषितः" ऋ० १।१४३।७। "चोदः प्रेरकः" भा०।

चोदक पु० चुद–ण्वुल्। १प्रवर्त्तके विधिवाक्ये "वर्त्तमानोपदेशाच्चोदनाशब्दाच्छ्रुत्यर्थाभावात्तवैचेति वचनाभिनिर्देशात् कर्मचोदकः" कात्या० श्रौ० १।१०।१ "अग्नीदग्नीनित्यादिः कर्मचोदकः कर्मविधायकः विधिवाक्यमित्यर्थः न तु मन्त्रः। कुतः वर्त्तमानोपदेशात् एवमादयो वर्त्तमानमर्थमनुष्ठेयत्वेन यत उपदिशन्ति अग्निविहरणं कर्त्तव्यं स्तरणं च कर्त्तव्यमित्येवमुपदिश्यते किं च चोदनाशब्दात् अपि च एषु मन्त्रेषु चोदनाशब्दो विधिशब्दोऽस्ति विधौ हि लोट् स्मर्यते। लोट् चेति" पा०। लोटो मध्यमपुरुषवचनानि चैतानि विहरस्व, प्रोहि आसादयेत्यादीनि तस्मादपि कर्मचोदका एते" कर्कः। २प्रेरकमात्रे त्रि०

चोदन न० चुद–भावे ल्युट्। १प्रवर्त्तने चोदनाशब्दार्थे। "प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात्" मनुः। २प्रेरणमात्रे च "कार्य्यकारणसन्देहे भवत्यन्योन्यचोदनात्" भा० अनु० १अ०। कर्त्तरि ल्यु। ३चोदके त्रि०। "अपिप्रयं चोदना वा मिमाना" यजु० २९।७। "चोदना चोदनानि कर्म्माणि" वेददी०।

चोदना स्त्री चु० चुद-युच्। "चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः" इति भट्टोक्ते प्रवर्त्तनावाक्ये "चोदनालक्षणोऽर्थो धर्म्मः" इति मीमांसासूत्रम्। २प्रेरणायां, ३प्रवर्त्तनायाञ्च। चोद्यतेऽनया करणे बा० युच् ४प्रवृत्तिहेतौ च "ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्म्मचोदना" गीता। "ज्ञानमिष्टसाधनमिति बोधः, ज्ञेयमिष्टसाधनं कर्म्म। परिज्ञाता एतज्ज्ञानाश्रयः, कर्म्मचोदना कर्म्म चोद्यते प्रवर्त्त्यतेऽनया चोदना ज्ञानादित्रितयं प्रवृत्तिहेतुरित्यर्थः" श्रीधरः। ५अज्ञातार्थज्ञापके शब्दमात्रे—"चोदनाप्रवृत्तिभेदाच्च" "या हि चोदना धर्म्मस्य लक्षणं सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलम्, अवबोधस्य चोदनाजन्यत्वात् न पुरुषोऽवबोधे नियुज्यते यथाऽक्षसन्निकर्षेणार्थावबोधे तद्वत्" शा० सू० शाङ्करभाष्यम्। "अज्ञातज्ञापकः शब्दः चोदना तस्याः प्रवृत्तिबोधकत्वं तद्वैलक्षण्याच्च जिज्ञास्यभेद इत्यर्थः। संग्रहवाक्यं विवृणोति या हीति लक्षणं प्रमाणं "स्वर्गकामोयजेत" इत्यादि वाक्यं हि स्वविषये धर्मे यागादिके स्वर्गभावनारूपे फलहेतुयागादिगोचरनियोगे वा हितसाधने यागादौ वा, पुरुषं प्रवर्त्तयदेवावबोधयति "अहमात्मा ब्रह्म" इत्यादि वाक्यं तु पुरुषं केवलमप्रपञ्चं ब्रह्म बोधयत्येव न प्रवर्त्तयति विषयाभावात् नन्ववबोध एव विषयोऽस्तु तत्राह न पुरुष इति ब्रह्मचोदनया पुरुषोऽवबोधे न प्रवर्त्त्यते इत्यत्र हेतुं पूर्ववाक्यमाह अवबोधस्येति। स्वजन्यज्ञाने स्वयं प्रमाणं न प्रवर्त्तकमित्यत्र दृष्टान्तमाह यथेति मानादेव बोधस्य जातत्वात् जाते च तस्मिन् विध्ययोगात् न वाक्यार्थज्ञाने पुरुषप्रवृत्तिः। तथाच प्रवर्त्तकमानमेयो धर्मः, उदासीनमानमेयं ब्रह्मेति" रत्नप्रभा। लौगाक्षिभास्करेणापि "वेदप्रतिपाद्यप्रयोजनवदर्थो धर्म्मः" इति धर्मलक्षणमुक्त्वा "चोदनालक्षणोऽर्थो धर्म्मः" जै० सूत्रस्य चोदनापदस्य वेदमात्रपरत्वमुररीकृतम्। तल्लक्षणे चार्थपदस्य इष्यमाणपरत्वेन

शिष्टे इच्छाभावात् अशक्यः शिष्टत्वेन इष्यमाणत्वाभावात् वेदप्रतिपाद्यत्वेऽपि नातिव्याप्तिरिति बोध्यम्। ५चोदनाविषये यागादिप्रयत्ने च। "एकं वा संयोगरूपचोदनाऽऽख्याऽविशेषात्" जै॰ सू॰। "कर्म्मैक्यप्रतिपादका संयोगरूपचोदनासंज्ञारूपाः पदार्थास्तेषामविशेषादैक्यम्। "तत्र चोदना प्रवर्त्तकः शब्दः चोदितप्रयत्नो वा" रत्नप्रभा।

चोदनागुड पु॰ चोदनया नोदनया गुर्य्यते गुर–क रस्य डः। कन्दुके त्रिका॰।

चोद्य न॰ चुद–ण्यत्। १प्रश्ने २पूर्वपक्षे च अमरः ताभ्यां हि उत्तरदानाय प्रवर्त्तनात् तयोस्तथात्वम्। "चोद्यं वा परिहारो वा क्रियतां द्वैतभाषया। अद्वैतभाषया चोद्यं नास्ति नापि तदुत्तरम्" वेदान्तका॰। ३आश्चर्य्ये च "चपलाजनं प्रति न चोद्यमदः" माघः। "चोद्यं चोदनीयम् कथमित्याक्षेप्यम्" मल्लि॰ "सत्यं ध्यानं समाधानं चोद्यं वैराग्यमेव च" भा॰ उ॰ ४२अ॰। ४अद्भुते ५प्रेरणार्हे त्रि॰। "नित्योत्थिता गुरुकर्म्मस्वचोद्याः" भा॰ अनु॰ १०२अ॰।

चोपन न॰ चुप–ल्युट्। १मन्दगमने, २तूष्णीम्भवने, ३मौने च।

चोर पु॰ चुर–अच्। १स्तेयकर्त्तरि परद्रव्यापहारके शब्दर॰। २गन्धद्रव्यभेदे, हेमच॰ ३कृष्णशठ्याञ्च हड्डचन्द्रः। ब्राह्मणा॰ कर्म्मणि ष्यञ्। चौर्य्यं तत्कर्म्मणि परद्रव्यापहरणे। "सा च द्रव्यवशा कुतस्तव धनं द्यूतेन चौर्य्येण वा चौर्य्यं द्यूतपरिग्रहोऽपि भवतो नष्टस्य काऽन्या गतिः" उद्भटः। चोरस्य भावः मनोज्ञा॰ वुञ्। चौरिका चोरभावे स्त्री। ४कविभेदे पु॰ कविरमरः कवी चोरमयूरकौ" उद्भटः। तत्कृतग्रन्थस्य चोरपञ्चाशिका"। तत्र चौर्य्यपदार्थो निर्णीय प्रदर्श्यते। परमात्मस्वत्ववद्द्रव्यहरणमेव चौर्य्यं तेन साधारणधनापहारे न चौर्य्यम्। यथाह दायभागे "य एव हि परस्वेदमिति विशेषं जानानः परस्वे स्वत्वहेतुमन्तरेणैव स्वत्वमारोपयति स स्तेन इति लोकप्रसिद्धोऽर्थः न चात्रेदं परकीयम् इदं वा ममेति विवेक्तुं शक्नोति द्रव्यस्याविभक्तत्वात्। यथा यदेव हि ममेदमिति विशेषं जानानः परस्वत्वापत्तये स्वामी त्यजति, परश्च विशेषेणेदं ममेति स्वत्वं मन्यते तत्रैव दाननिष्पत्तिः। न च साधारणधने तथा सम्भवतीति साधारणधनमदेयमुक्तं तथा स्तेयमपि नैतन्मम धनं परस्येदमिति जानत एव भवतीति न साधारणधनापहारे स्तेयनिष्पत्तिः"। "परद्रव्यहरणं स्तेयमिति परशब्दात् आत्मीयत्वव्यवच्छेदेनैव परकीयत्वस्यावगमात् साधारणासाधारणयोश्चासाधारणस्यैव शीघ्रप्रतीतेः। चोरचौर्य्यभेदलक्षणदण्डभेदादिकं च वीरमित्रोदये दर्शितं यथा।

"मनुः स्यात्साहसं त्वन्वयवत् प्रसभं कर्म्म यत् कृतम्। निरन्वयम्भवेत् स्तेयं हृत्वापह्नूयते च यदिति" अस्यार्थः। अन्वयवद्द्रव्यरक्षकराजाद्यध्यक्षादिसमक्षं बलावष्टम्भेन यत्परधनापहरणादिकं क्रियते तत् साहसम्। स्तेयं पुनर्निरन्वयं स्वाम्याद्यसमक्षं यद्वञ्चयित्वा परधनाद्यपहरणं तदुच्यते। यच्च राजाद्यध्यक्षादि समक्षमपहृत्य न मयेदं कृतमिति भयान्निह्नूयते तदपि स्तेयमिति। अतएव नारदः "उपायैर्विविधैरेषां छलयित्वाऽपकर्षणम्। सुप्तमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनीषिणः" इति॥ एषामित्येतत् क्षुद्रादिनिर्देशात्तान्याह स एव "मृद्भाण्डासनखट्वास्थिदारुचर्म्मतृणादि यत्। शमीधान्यं कृतान्नञ्च क्षुद्रं द्रव्यमुदाहृतम्। वासः कौषेयवर्ज्जञ्च गोवर्जं पशवस्तथा। हिरण्यवर्ज्जं लोहञ्च मध्यं व्रीहियवादि च। हिरण्यरत्नकौषेयस्त्रीपुङ्गोगजवाजिनः। देवब्राह्मणराज्ञाञ्च विज्ञेयन्द्रव्यमुत्तममिति"। बलात्कारकृतमपहरणं साहसान्तर्गतं स्तेयमित्याह स एव "तस्यैव भेदः स्तेयः स्याद्विशेषस्तत्र तूच्यते। आधिः साहसमाक्रम्य स्तेयमाधिश्छलेन तु" इति। तस्यैव साहसस्यैव। आधिः पीड़ा धनापहरणादिद्वारा आक्रम्य प्रसह्य परस्य क्रियमाणः क्षोभः साहसरूपं स्तेयम्। छलेन क्रियमाण आधिः केवलस्तेयमित्यर्थः। तस्करज्ञानोपायमाह याज्ञवल्क्यः "ग्राहकैर्गृह्यते चौरो लोप्त्रेणाथ पदेन वा। पूर्वकर्म्मापराधी च तथा चाशुद्धवासकः। अन्येऽपि शङ्कया ग्राह्या जातिनामादिनिह्नवैः। द्यूतस्त्रीपानसक्ताश्च शुष्कभिन्नमुखस्वराः। परद्रव्यगृहाणाञ्च पृच्छका गूढचारिणः। निराया व्ययवन्तश्च विनष्टद्रव्यविक्रयाः" इति। ग्राहकैराजपुरुषैर्लोप्त्रेणापहृतभाजनादिना, अशुद्धवासः अप्रज्ञातस्थानवासी। जातिनिह्नवो नाहं शूद्र इत्येवंरूपः। नामनिह्नवो नाहं डित्थ इत्येवं रूपः। आदिग्रहणात् स्वदेशग्रामकुलाद्यपलापेन च लक्षिता ग्राह्याः। द्यूतपण्याङ्गनामद्यपानादिष्वतिप्रसक्ताः तथा कुतोऽसि त्वमिति चोरग्राहिभिः पृष्टो यदि शुष्कमुखोभिन्नस्वरो

वा भवति । बहुवचनात् स्विन्नललाटादीनां ग्रहणम् । तथा ये निष्कारणङ्कियदस्य द्रव्यं किं वास्य गृहमित्येवं पृच्छन्ति ये चाकारणेनात्मानङ्गूहयित्वा चरन्ति । ये चायाभावेऽपि बहुव्ययकारिणः । ये च विनष्टद्रव्याणाञ्जीर्णवस्त्रभिन्नभाजनादीनामनिर्ज्ञातस्वामिकानां विक्रयकारिणः, ते सर्व्वेऽपि चौर्य्यसम्भावनया ग्राह्या इत्यर्थः ।एवंविधलिङ्गयुक्तान् पुरुषान् गृहीत्वैते चौरा भवन्ति नवेति सम्यक् परीक्षेत न तावन्मात्रेण निश्चिनुयात् अचौरस्यापि लिङ्गसम्बन्धसम्भवात् । अतएव नारदः "अन्यहस्तात्परिभ्रष्टमकामादुत्थितं भुवि । चोरेण वा परिक्षिप्तं लोप्त्रं यत्नात् परीक्षयेत् । असत्याः सत्यसङ्काशाः सत्याश्चासत्यसन्निभाः । दृश्यन्ते विविधा भावास्तस्माद्युक्तं परीक्षणमिति" । स्तेयस्य त्रैविध्यमाह स एव "तदपि त्रिविधं ज्ञेयं द्रव्यापेक्षम्मनीषिभिः । क्षुद्रमध्योत्तमानां तु द्रव्याणामपकर्षणादिति" । चौरस्य द्वैविध्यमाह बृहस्पतिः "प्रकाशाश्चाप्रकाशाश्च तस्करा द्विविधाः स्मृताः । प्रज्ञासामर्थ्यमायाभिः प्रभिन्नास्ते सहस्रधेति" । प्रकाशतस्करानाह स एव । "नैगमा वैद्यकितवाः सभ्योत्कोचकवञ्चकाः । दैवोत्पातविदो भद्राः शिल्पज्ञाः प्रतिरूपकाः । अक्रियाकारिणश्चैव मध्यस्थाः कूटसाक्षिणः । प्रकाशतस्करा ह्येते तथा कुहकजीविनः" इति प्रतिरूपकाः प्रतिरूपकराः । अतएव नारदः "प्रकाशवञ्चकास्तत्र कूटमानतुलाश्रिताः । उत्कोचकाः सोपधिका वञ्चकाः परयोषितः । प्रतिरूपकराश्चैव मङ्गलादेशवृत्तयः । इत्येवमादयो ज्ञेयाः प्रकाशतस्करा भुवीति" । नैगमादिव्याजेन ये परद्रव्यापहारकास्ते नैगमाद्याः । अप्रकाशतस्करस्वरूपभेदानाह व्यासः "साधनाङ्कान्विता रात्रौ विचरन्त्यविभाविताः । अविज्ञातनिवासाश्च ज्ञेयाः प्रच्छन्नतस्कराः । उत्क्षेपकः सन्धिभेत्ता पान्थमुड्ग्रन्थिभेदकः । स्त्रीपुङ्घ्नश्च पशुस्तेयी चौरो नवविधः स्मृतः" इति । रात्राविति प्रायिकम् अरण्यादौ दिवापि सम्भवात् । उत्क्षेपकः धनिनामनवधानतां निश्चित्य तत्समीपस्थं धनमुत्कृत्य ग्राहकः । सन्धिभेत्ता गृहयोः सन्धौ स्थित्वा तत्तद्भित्तिभेत्ता । पान्थमुट् कान्तारादौ पथिकानामध्वमध्यस्थापहारकः । ग्रन्थिभेदकः परिधानीयादिग्रथितं धनं गृहीतुं तद्ग्रन्थिमोचक इति । प्रकाशतस्कराणां दण्डमाह स एव "स्त्रीपुंसौ वञ्चयन्तीह मङ्गलादेशवृत्तयः । गृह्णन्ति छद्मना चर्य्य मनार्य्यास्त्वार्य्यलिङ्गिनः । नैगमाद्या भूरिधना दण्ड्या दोषानुरूपतः । यथा तेन निवर्त्तन्ते तिष्ठन्ति सत्पथे तथेति" । दोषानुरूपतो दण्ड्या नतु धनानुरूपत इत्यभिप्रायः । केषाञ्चित् प्रकाशतस्कराणां दण्डमाह बृहस्पतिः "प्रच्छाद्य दोषं व्यामिश्र्य पुनः संस्कृत्य विक्रयी । पण्यं तद्द्विगुणं दाप्यो वणिग् दण्डं च तत्समम् । अज्ञातौषधिमन्त्रस्तु यश्च व्याधेरतत्त्ववित् । रोगिभ्योऽर्थं समादत्ते स दण्ड्यश्चोरवद्भिषक् । कूटाक्षदेविनः क्षुद्रा राजलभ्यहराश्च ये । गणका वञ्चकाश्चैव दण्ड्यास्ते कितवाः स्मृताः । अन्यायवादिनः सभ्यास्तथैवोत्कोचजीविनः । विश्वस्तवञ्चकाश्चैव निर्वास्याः सर्व्वएव ते । ज्योतिर्ज्ञानन्तथोत्पातमविदित्वा तु ये नृणाम् । श्रावयन्त्यर्थलोभेन विनेयास्ते प्रयत्नतः । दण्डाजिनादिभिर्युक्तमात्मानं दर्शयन्ति ये । हिंसन्ति छद्मना नृणां वध्यास्ते राजपूरुषैः । अल्पमूल्यञ्च वस्तुसंस्कृत्य नयन्ति बहुमूल्यताम् । स्त्रीबालकान् वञ्चयन्ति दण्ड्यास्तेऽर्थानुसारतः । हेमरत्नप्रवालाद्यान् कृत्रिमान् कुर्व्वते तु ये । क्रेतुर्मूल्यं प्रदाप्यास्ते राज्ञा तद्द्विगुणं दमम् । मध्यस्थं वञ्चयन्त्येकं स्नेहलोभादिना यदा । साक्षिणश्चान्यथा ब्रूयुर्दाप्यास्ते द्विगुणन्दममिति" । राजलभ्यः करविशेषः । मनुरपि "सर्व्वकण्टकपापिष्ठं हेमकारन्तु पार्थिवः । प्रवर्त्तमानमन्याये छेदयेल्लवशः क्षुरैरिति ।" विष्णुरपि "द्यूते च कूटाक्षदेविनां करच्छेदः" इति । अप्रकाशतस्कराणां दण्डमाह स एव "उत्क्षेपकस्य सन्दंशच्छेत्तव्यो राजपुरुषैः" । सन्दंशोऽत्र करः तथा च याज्ञवल्क्यः "उत्क्षेपकग्रन्थिभेदौ करसन्दंशहीनकौ । कार्य्यौ द्वितीयापराधे करपादैकहीनकाविति" । अङ्गुष्ठतर्ज्जन्योर्ग्रन्थिमोचने साधकतमत्वेनास्य सन्दंशशब्देन तयोर्ग्रहणम् । प्रथमापराधे तौ क्रमेण पाणिसन्दंशाभाववन्तौ कर्त्तव्यौ, द्वितीयापराधे उभावप्येकपाणिपादाभावावेतौ कर्त्तव्यावित्यर्थः । सन्धिभेत्तॄणां दण्डमाह मनुः "सन्धिं भित्त्वा तु ये चौर्य्यं रात्रौ कुर्व्वन्ति तस्कराः । तेषां छित्त्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेदिति" । तानिति शेषः । बृहस्पतिरपि "सन्धिच्छेदकृतो ज्ञात्वा शूलमाग्राहयेत् प्रभुरिति" । आग्राहयेत् आरोपयेदित्यर्थः । पान्थमुषि दण्डमाह स एव "तथा

पान्थमुषं कृत्वा गले बद्ध्वावलम्बयेदिति"। पान्थमुषं पथिलुण्ठकम्। ग्रन्थिभेदकस्य दण्डमाह मनुः "अङ्गुली ग्रन्थिभेदस्य छेदयेत् प्रथमे ग्रहे। द्वितीये हस्तचरणौ तृतीये वधमर्हतीति"। अङ्गुली तर्जन्यङ्गुष्ठौ। द्वितीये हस्तस्य चरणस्य च छेदः तृतीये वध इत्यर्थः। अतएव नारद आह" "प्रथमे ग्रन्थिभेदानामङ्गुष्ठहस्तयोर्बधः" इति। स्त्रीहर्त्तुर्द्दण्डमाह व्यासः "स्त्रीहर्त्ता लोहशयने दग्धव्यो वै कटाग्निनेति"। पुंहर्त्तुर्दण्डमाह स एव "नरहर्त्तुर्हस्तपादौ च्छित्त्वा स्थाप्यश्चतुष्पथे" इति। गोहर्त्तुर्दण्डमाह वृहस्पतिः "गोहर्त्तुर्नासिकां छित्त्वा बद्ध्वाम्भसि निमज्जयेदिति"। नारदः "सर्वस्वं हरतो नारीं, कन्यां तु हरतो वधः। वाजिवारणलोहानां चाददीत वृहस्पतिरिति"। सर्वस्वमित्यनुषङ्गः। पशुहर्त्तुर्दण्डमाह व्यासः" "पशुहर्त्तुस्त्वर्द्धपादं तीक्ष्णशस्त्रेण कर्त्तयेदिति"। पशुहर्त्ता पश्वनुसारेण दण्डनीय इत्याह नारदः "महापशून् स्तेनयतो दण्डस्तूत्तमसाहसम्। मध्यमपशून् पूर्वन्तु क्षुद्रपशून् तथा हृतः इति। हृत इति षष्ठी। वन्दीग्रहादीनां दण्डमाह याज्ञवल्क्यः "वन्दिग्रहांस्तथा वाजि कुञ्जराणां च हारिणः। प्रसह्यघातिनश्चैव शूलमारोपयेन्नृपः"इति। अङ्गच्छेदादयः उत्तमसाहसत्वाद् ब्राह्मणव्यतिरिक्तेषूत्तमद्रव्यापहारविषयाः "साहसेषु य एवोक्तास्त्रिषु दण्डोमनीषिभिः। स एव दण्डः स्तेयेऽपि द्रव्येषु त्रिष्वनुक्रमादिति" नारदेनोत्तमसाहसस्योत्तमद्रव्यविषयत्वेन व्यवस्थापनात्तेन क्षुद्रमध्यमद्रव्याचोपकादीनां तदनुरूपो न करच्छेदादिः। तस्करस्यापहृतं धनन्तत्स्वामिने दापयित्वा दण्डः कर्त्तव्य इत्याह याज्ञवल्क्यः "चौरं प्रदाप्यापहृतं घातयेद्विविधैर्वधैरिति" धान्याद्यपहरणे दण्डमाह मनुः "धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं बधः। शेषे त्वेकादशगुणं दाप्यस्तस्य च तद्धनमिति"। कुम्भो विंशतिप्रस्थाः शेषे दशकुम्भाधिकान्यूने, तस्य धान्यस्वामिनः। रत्नहरणे दण्डमाह स एव "मुख्यानाञ्चैव रत्नानां हरणे बधमर्हतीति"। स एव।"सुवर्णरजतादीनामुत्तमानाञ्च वाससाम्। पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते। शेषे त्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत्। पुरुषाणां कुलीनानां नारीणाञ्च विशेषतः"इति। अत्र सुवर्णादीनां संख्या कर्षमितेत्याद्यूह्याः इति मदनरत्ने। अत्राङ्गच्छेदादिदण्डो ब्राह्मणव्यतिरिक्तविषयः "सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेदिति" याज्ञवल्क्यस्मरणात्। चिह्नं ललाटे श्वपदाकाराङ्कनम्। तथा च मनुः "गुरुतल्पे भगः कार्य्यः सुरापाणे सुराध्वजः। स्तेये च श्वपदं कार्य्यं ब्राह्मणस्य शिरः पुमानिति"। एतच्च प्रायश्चित्तमकुर्वतां दण्डोत्तरकालं न तु प्रायश्चित्तं चिकीर्षताम्। "प्रायश्चित्तञ्च कुर्वाणाः सर्वे वर्णा यथोदितम्। नाङ्क्या राज्ञा ललाटे तु दाप्यस्तूत्तमसाहसमिति" मनुस्मरणात्। जात्यादिभेदेन च दण्डतारतम्यमाह स एव "अष्टापाद्यन्तु शूद्रस्य स्तेये भवति किल्बिषम्। षोडशैवतु वैश्यस्य द्वात्रिंशत् क्षत्रियस्य तु। ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतम्भवेत्। द्विगुणा वा चतुःषष्टिस्तद्दोषगुणवेदिनः" इति। यस्मिन्नपराधे यो दण्ड उक्तः स शूद्रकर्त्तृके तस्मिन्नष्टगुणः दापनीयः वैश्यकर्त्तृके षोडशगुणः, क्षत्रियकर्त्तृके द्वात्रिंशद्गुणः। ब्राह्मणकर्त्तृके चतुःषष्टिगुणः शतगुणो वा अष्टाविंशत्युत्तरशतगुणो वेत्यर्थः। माषान्यूनमूल्यानां क्षुद्राणां मूल्यात् पञ्चगुणोदम इत्याह नारदः "काष्ठभाण्डतृणादीनां मृण्मयानान्तथैव च। वेणुवैणवभाण्डानां तथा स्नाय्वस्थिचर्म्मणाम्। शाकानामार्द्रमूलानां हरणे फलमूलयोः। गोरसेक्षुविकाराणां तथा लवणतैलयोः। पक्वान्नानां कृतान्नानां मत्स्यानामौषधस्य च। सर्वेषामल्पमूल्यानां मूल्यात्पञ्चगुणो दमः" इति। यत्पुनः क्षुद्रद्रव्यविषये द्विगुणदण्डप्रतिपादकं मनुवचनम् "सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च। दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च। वेणुवैणवभाण्डानां लवणानान्तथैव च। मृण्मयानां च हरणे मृदोभस्मन एव च। अजानां पक्षिणाञ्चैव लवणस्य घृतस्य च। मांसस्य मधुनश्चैव यच्चान्यत् पशुसम्भवम्। अन्येषाञ्चैवमादीनां मद्यानामोदनस्य च। पक्वान्नानाञ्च सर्वेषां तन्मूल्याद्द्विगुणोदमः" इति। तदल्पप्रयोजनविषयम्। धान्यादीनामल्पप्रयोजनद्रव्यापहरणे न दण्डः यथाह स एव "द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके। आददानः परक्षेत्रान्न दण्डं दातुमर्हति। चणकव्रीहिगोधूमयवानां मुद्गमाषयोः। अनिषिद्धैर्ग्रहीतव्या मुष्टिरेका पथि स्थितैः। तथैव सप्तमे भक्ते भक्तानि षडनश्नता। अश्वस्तनविधानेन हर्त्तव्यं हीनकर्म्मणः" इति। न केवलं चौरस्यैव दण्डः किन्त्वचौरस्यापि

चौरोपकारिणः इत्याह याज्ञवल्क्यः “भक्तावकाशाग्न्युदकमन्त्रोपकरणव्ययान्। दत्त्वा चौरस्य वा हन्तुर्जानतो दम उत्तम” इति। भक्तम् अशनम्। अवकाशो निवासस्थानम्। अग्निश्चौरस्य शीतापनोदनाद्यर्थः। उदकन्तृषितस्य। मन्त्रः चौर्यप्रकारोपदेशः, उपकरणं चौर्यसाधनम्। व्ययः अपहारार्थन्देशान्तरङ्गच्छतः पाथेयम्। एतानि चौरस्य हन्तुर्वा दुष्टत्वं जानन्नपि यः प्रयच्छति तस्योत्तमसाहसो दण्ड इत्यर्थः। कात्यायनोऽपि “चौराणां भक्तदा ये स्युस्तथाग्न्युदकदायिनः। दातारश्चैव भाण्डानां प्रतिग्राहिण एव च। समदण्डाः स्मृता ह्येते ये च प्रच्छादयन्ति तानिति”। चौरोपेक्षाकारिणं प्रत्याह नारदः “शक्ताश्च य उपेक्षन्ते तेऽपि तद्दोषभागिनः। उत्क्रोशतां जनानान्तु ह्रियमाणे धने तथा। श्रुत्वा ये नाभिधावन्ति तेऽपि तद्दोषभागिनः” इति। द्रव्यभेदेन चौर्यप्रायश्चित्तं प्रायश्चित्तशब्दे दृश्यम्। तत्कर्म्मविपाकश्च कर्म्मविपाकशब्दे १७४२पृ० दृश्यः।

चोरक पु० चोरः स्वनामख्यातद्रव्यइव कायति कै—क। १ग्रन्थिपर्णवृक्षे रत्नमाला। स च “शैलेयकमांसीतगरकुष्ठरससैन्धवानि वल्लीजम्। मधुररसमधूच्छिष्टानि चोरकश्चेति जीवस्य” वृ० स० १६अ० जीवभक्तौ उक्तः

चोरघात पु० चोरं हन्ति हन—अण्। राज्ञां हस्तिभेदे शब्दार्थ०।

चोरपुष्पी स्त्री चोर इव पुष्पमस्याः रात्रिविकाशित्वात्। शङ्खिन्याम्। स्वार्थे क अत इत्त्वम्। चोरपुष्पिकाप्यत्र अमरः।

चोरस्नायु पु० चोरस्य गन्धद्रव्यभेदस्य स्नायुरिव। काक-[नासायाम्” शब्दार्थचि०।

चोरा स्त्री चोरतुल्यं रात्रिविकाशित्वेन पुष्पमस्त्यस्याः अर्श० अच्। शङ्खपुष्पिकायाम् शब्दार्थचि०।

चो(चौ)रिका स्त्री चोरस्य भावः मनोज्ञा० वुञ् ठन् वा। चौर्य्ये रायमुकुटः।

चोल पु० चुल समुच्छ्राये कर्म्मणि घञ्। १स्त्रीणां कञ्चुके २आप्रपदीने वस्त्रे ३कूर्पासके। (चोला) इति ख्याते पुंसां वस्त्रभेदे। “द्रविडलङ्कयोर्मध्ये चोलदेशः प्रकीर्त्तितः। लब्धकर्णाश्च ते प्रोक्तास्तद्देशोऽवान्तरो भवेत्” इत्युक्ते ४देशे “अपरे जनपदा दक्षिणेन” इत्युपक्रमे “कौकुट्टकास्तथा चोलाः कोङ्कणा मालवानकाः” भा० भी० ९अ०। जनपदोक्तौ। स च देशः अधुना (ताञ्जोर) इति ख्यातः। स च वृ०स०१४अ० कूर्म्मविभागे दक्षिणस्यामुक्तो यथा “अथ दक्षिणेन” इत्युपक्रमे “कर्णाटमहाटविचित्रकूटनासिक्यकोल्लगिरिचोलाः”। तस्य राजाऽण्, सोऽभिजनोऽस्य वा अण्। चौल तन्नृपे तद्देशवासिनि च। बहुत्वे तस्य लुक्। चोलाः ५तद्देशवासिषु ६तन्नृपेषु च ब०व०। तन्नृपाश्च क्षत्रिया अपि म्लेच्छतामाप्ताः काम्बोजशब्दे १९०६पृ० दृश्यम्। ७चीनदेशस्यक्षुद्रभेदे शब्दार्थचि०।

चोलक पु० चोल इव कायति कै—क। १वाणवारे कवचे २वल्कले च शब्दर०।

चोलकिन् पु० चोलकमिवास्त्यस्य इनि। १करीरे (बाँशेरकोंड़)। २नागरङ्गे मेदि० ३किष्कुपर्वणि हारा०।

चोरगणेश पु० कर्म्म०। करच्छिद्रयतां जापिनां जपफलहारके तन्त्रोक्ते गणेशभेदे।

चोलण्डुक पु० चोलस्याण्डुक इव शक०। शिरोवेष्टे त्रिका०

चोलन न० चोल इवाचरति क्विप् ततः कर्त्तरि ल्यु। १नागरङ्गे २करीरे ३किष्कुपर्वणि च शब्दार्थचि०।

चोली स्त्री चुल—घञ् गौरा० ङीष्। स्त्रीणां १कञ्चुकाख्ये आप्रपदीने वस्त्रे (चोला) इतिख्याते पुंसां २वस्त्रभेदे च शब्दार्थचि०

चोलोण्डुक पु० चोलण्डक इव। शिरोवेष्टे उष्णीषे [शब्दार्थचि०।

चोष पु० चोयते यः स चासावुषोदाहश्चेति। पार्श्वस्थेनाग्निनेव जनिते सन्तापभेदे। “हृच्छूलपीडनयुतं पवनेन, पित्तात्तृड्दाहचोषबहुलं सकफप्रवेकम्” “चोषः पार्श्वस्थिताग्निनेव सन्तापः” भावप्र०।

चोष्य न० चूष—ण्यत् पृषो० गुणः। चूष्ये चूषणीये। “पचाम्यन्नं चतुर्विधम्” गीताव्याख्यायां “प्राणिभिर्भुक्तं भक्ष्यं भोज्यं लेह्यं चूष्यञ्चेति चतुर्विधमन्नं पचामि। तत्र यद्दन्तैरवखण्ड्यावखण्ड्य भक्ष्यते अपूपादि तद्भक्ष्यं, यत्तु केवलं जिह्वया विलोड्य निगीर्य्यते पायसादि तद्भोज्यम्। यज्जिह्वायां निःक्षिप्य, रसास्वादेन निगीर्य्यते द्रवीभूतं गुडादि तल्लेह्यम्। यत्तु दंष्ट्राभिर्निष्पीड्य रसं निगीर्य्यावशिष्टं त्यज्यते इक्षुदण्डादि तच्चूष्यमिति चतुर्विधस्य भेदः” श्रीधरः। अत्र क्वचित्पुस्तके चूष्यञ्चेत्यत्र चोष्यञ्चेतिपाठदर्शनात् चोष्यशब्दकल्पना केषाञ्चित् प्रामादिकी अनार्षवाक्ये पृषो० कल्पनाया अयुक्तत्वात्। किन्तु “भोजनीयानि पेयानि चोष्याणि विविधानि च। लेह्यान्यमृतकल्पानि भक्ष्याणि च तथाऽर्जुन” भा० आ० १७५अ०। अतार्ष-

त्वात् पृषो० कल्पना युक्तैव। एवं "भक्ष्यं भोज्यञ्च पेयञ्च चोष्यं लेह्यं तथैव च" हरिव० १४५अ०।

चोस्क पु० १हयोत्तमे शब्दार्थचि०। २सिन्धुवारे (सोँदाल) वृक्षे च त्रिका०।

चौड(ल) न० चूडा प्रयोजनमस्य चूडा० अण् वा डस्य लः। चूडाकर्म्मणि चूडाशब्दे २८५७ पृ० दृश्यम् "गार्भैर्होमैर्जातकर्म्मचौडमौञ्जीनिबन्धनैः" मनुः। चूडैव स्वार्थे अण्। चूडायाम्" "लेलिहानैर्महानागैः कृतचौडमभिवहन्"भा० व० १७अ०।

चौडि पुंस्त्री चूडाया इदम् बाह्वा० इञ्। चूडासम्बन्धिनि स्त्रियां वा० ङीप्।

चौणठ्र(णड्र) न० जलभेदे चुलाशब्दे पृ०२८५५ दृश्यम्।

चौदायनि पु० गोत्रप्रवर्त्तके प्रवराध्यायप्रसिद्धे ऋषिभेदे

चौपयत पु० चुप—अच् चोपः सन् यतते यत—अच् ततः स्वार्थे अण्। ऋषिभेदे तस्यापत्यम् तिका० फिञ्। चौपयतायनि तदपत्ये स्त्रियां तु क्रौड्या० ष्यङ्। चौपयत्या। चौपयतानां विषयः भौरि० विधल्। चौपयतविध तद्विषये न०। गोत्रापत्ये अश्वा० फक् चौपयतायन तद्गोत्रापत्ये पुंस्त्री

चौपैया स्त्री मात्रावृत्तभेदे तल्लक्षणं यथा "चौपैयावृत्तं त्रिंशन्मात्रं फणिपतिपिङ्गलभणितं कुरु सप्ततरङ्गममति हृदयङ्गम मन्ते गुरुमुपनीतम्। यदि दशवसुरविभिस्क्रन्दैर्विद्भिः क्रियते यतिरभिरामम् सपदि स्तवसमये नृपतिः कवये वितरति संसदि कामम्"।

चौर पु० चुरा शीलमस्य चूडा० णः चोर एव अण् वा। प्रच्छन्नपरद्रव्याहारके अमरः। "सुवर्णचौरः कौनख्यं सुरापः श्यावदन्तताम्" मनुः २कविभेदे "कवी चौरमयूरकौ" उद्भटः तत्कृतग्रन्थश्चौरपञ्चाशिका।

चौरपुष्पौषधि स्त्री चौरपुष्पिकानामौषधौ मेदि०।

चौरिकाक पु० काकभेदे "लवणं चोरयित्वा तु चौरिकाकः प्रजायते" भा०अनु० १११अ०।

चौलि(डि) पु० चौलस्यापत्यम् इञ्। प्रवराध्यायप्रसिद्धे ऋषिभेदे।

चौलुक्य पुंस्त्री चुलुकस्य गोत्रापत्यं गर्गा० यञ्। चुलुकर्षिगोत्रापत्ये तस्य छात्रः कण्वा० अण् यलोपः। चौलुक चौलुक्यच्छात्रे।

च्यवन पु० च्यु—ल्यु। भार्गवे ऋषिभेदे तस्य नामनिरुक्तिः भा० आ० ६ अ० दर्शिता यथा। "भृगोः सुदयिता भार्य्या पुलोमेत्यभिविश्रुता। तस्यां समभवद्गर्भो भृगुवीर्य्यसमुद्भवः। अस्मिन् गर्भेऽथ सम्भूते पुलोमायां भृगूद्वहात्। समये समशीलिन्यां धर्मपत्न्यां यशस्विनः। अभिषेकाय निष्क्रान्ते भृगौ धर्मभृतां वरे। आश्रमं तस्य रक्षोऽथ पुलोमाऽभ्याजगाम ह। तं प्रविश्याश्रमं दृष्ट्वा भृगोर्भार्य्यामनिन्दिताम्। हृच्छयेन समाविष्टो विचेताः समपद्यत"! ५अ० इत्युपक्रमे "अग्नेरथ वचः श्रुत्वा तद्रक्षः प्रजहार ताम्। ब्रह्मन्! वराहरूपेण मनोमारुतरंहसा। ततः स गर्भो निवसन् कुक्षौ भृगुकुलोद्वहः। रोषान्मातुश्च्युतः कुक्षेश्च्यवनस्तेन सोऽभवत्। तं दृष्ट्वा मातुरुदराच्च्युतमादित्यवर्चसम्। तद्रक्षो भस्मसाद्भूतं पपात परिमुच्य ताम्। सा तमादाय सुश्रोणी ससार भृगुनन्दनम्। च्यवनं भार्गवं पुत्रं पुलोमा दुःखमूर्च्छिता" ६अ०। २चरणयुक्ते त्रि० "यस्तु न च्यवते नित्यं यशसा वर्चसा श्रिया। अग्निर्निश्च्यवनो नाम" भा०व०२१८अ०। भावे ल्युट्। ३चरणे न० दुश्च्यवनः।

च्यवनप्राश पु० च्यवनेन प्राश्यते प्र+अश० कर्मणि घञ्। चक्रदत्तोक्ते औषधभेदे यथा "विल्वाग्निमन्थश्योनाककाश्मर्य्यः पाटली बला। पर्ण्यस्तस्रः पिप्पल्यः श्वदंष्ट्रा बृहतीद्वयम्। शृङ्गी तामलकी द्राक्षा जीवन्ती पुष्करा गुरु। अभया सामृता ऋद्धिर्जीवकर्षभकौ शठी। मुस्तं पुनर्णवा मेदा सूक्ष्मैलोत्पलचन्दने। विदारी वृषमूलानि काकोली काकनासिका। एषां पलोन्मितान् भागान् शतान्यामलकस्य च। पञ्च दद्यात् तदैकध्यं जलद्रोणे विपाचयेत्। ज्ञात्वा गतरसान्येतान्यौषधान्यथ तं रसम्। तच्चामलकमुद्धृत्य निष्कुलं तैलसर्पिषोः। पलद्वादशके भृष्टा दत्त्वा चार्द्धतुलां भिषक्। मत्स्यण्डिकायाः पूताया लेहवत् साधु साधयेत्। षट्पलं मधुनश्चात्र सिद्धशीते प्रदापयेत्। चतुष्पलं तु गाम्भार्य्याः पिप्पल्या द्विपलन्तथा। पलमेकं निदध्याच्च त्वगेलापत्रकेशरात्। इत्ययं च्यवनप्राशः परमुक्तो रसायनः। कासश्वासहरश्चैव विशेषेणोपदिश्यते। क्षीणक्षतानां वृद्धानां बालानाञ्चाङ्गवर्द्धनम्। स्वरक्षयमुरोरोगं हृद्रोगं वातशोणितम्। पिपासां मूत्रशुक्रस्थान् दोषांश्चैवापकर्षति। अस्य मात्रां प्रयुञ्जीत चोपरुन्ध्याच्च भोजनम्। अस्य प्रयोगाच्च्यवनः सुवृद्धोऽभूत् पुनर्युवा। मेधां स्मृतिं कान्तिमनामयत्वं

वपुःप्रकर्षं बलमिन्द्रियाणाम्। स्त्रीषु प्रहर्षं परमग्निवृद्धिं वर्णप्रसादं पवनानुलोम्यम्। रसायनस्यास्य नरः प्रयोगाल्लभेत जीर्णोऽपि कुटीप्रवेशात्। जराकृतं पूर्वमपास्य रूपं बिभर्त्ति रूपं नवयौवनानाम्। सिता मत्स्यण्डिकाऽलाभे धात्र्याश्च मृदु भर्जनम्। चतुर्भागजले प्रायो द्रव्यं गतरसं भवेत्।"

च्यवान पु० च्यवन+पृषो० दीर्घः। च्यवनर्षौ "प्रमुञ्चन्त द्रापिमिव च्यवानात्" ऋ०१।११६।१०। "च्यवानात् च्यवनादृषेः" भा० "युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः" ऋ०१।११७।१३। "हे अश्विनौ युवं युवां शचीभिरात्मीयैः प्रज्ञलक्षणैः कर्मभिः जरन्तं जीर्य्यन्तं च्यवानमेतत्संज्ञमृषिं युवानं पुनर्यौवनोपेतं चक्रथुः" भा० "च्यवानऋषिर्भवति स्तोतॄणां च्यवानमित्यस्य निगमा भवन्ति" इति निरु० ४।१९

च्यावन त्रि० च्यु-णिच्-ल्यु। च्युतिकारके "दुश्च्यावच्यावनो जेता हन्ता ब्रह्मद्विषां हरः" भा० कर्ण० ३४अ०। भावे ल्युट्। २च्युतिसम्पादने "यदिदं च्यावनं स्थानात् प्रतिष्ठायाः शतक्रतोः" हरिवं० २८ अ०।

च्यु गतौ भ्वा० आत्म० सक० अनिट्। च्यवते अच्योष्ट। चुच्युवे। च्युतः। च्युतिः "यस्तु न च्यवते नित्यम् यशसा वर्चसा श्रिया" भा०व० २१८ अ०। "अद्य ते कतिचिद्रात्रयश्च्युतस्यार्य्यकवेश्मनः" रा० अयो० ७२।५। "न च्यवेयं स्वधर्म्मात्" भा०व० २८६ अ०। "अच्योष्ट सत्त्वान्नृपतिश्च्युताशः" "च्युताशनायाः फलवद्विभूत्या" भट्टिः उपसर्गपूर्वकस्य तत्तदुपसर्गद्योतार्थयुक्तगतौ।

च्यु सहने सक० हसने अक० चु० उभ० सेट्। च्यावयति अचि(चु)च्यवत् त। चु(चि)च्यावयिषति

च्युत क्षरणे भ्वा० पर० अक० सेट्। च्योतति इरित् अच्युतत् अच्योतीत्। चुच्योत। च्युतः। "इदं शोणितमभ्यम्यं संप्रहारेऽच्युततयोः" "इदं कवचमच्योतीत्" इति च भट्टिः।

च्युत त्रि० च्यु-क्त च्युत-क वा। १गते २क्षरिते च। अच्युतः। च्युतोपलः।

च्युति स्त्री च्यु-भावे क्तिन्। १गतौ "सत्यात् च्युतिः क्षत्रियस्य न धर्म्मेषु प्रशस्यते" भा० आ०१०२अ०। "कुर्य्यां हरस्यापि पिनाकपाणेर्धैर्य्यच्युतिं के मम धन्विनोऽन्ये" कुमा०। च्यु भावे क्तिन्। ३क्षरणे। मदच्युतिः। च्योतति शोणितमस्मात् अपादाने क्ति। ४गुह्यद्वारे शब्दार्थचि०।

च्युप पु० च्यवन्ते भाषन्तेऽनेन धातूनामनेकार्थत्वात् च्यु-भाषणे प किच्च। वक्त्रे उज्ज्व०। पान्तादुपधत्वात् पुंस्त्वम्।

च्युस हानौ हसने चु० उभ० अक० सेट्। च्योसयति ते अचुच्युसत् त।

च्यूत पु० चूत+पृषो०। आम्रवृक्षे शब्दर० पाठान्तरम्।

च्यौत्न न० च्यु-गतौ करणे त्नण्। १बले निघ०। कर्त्तरि त्नण्। २गन्तरि २अण्डजे-२क्षीणपुण्यजने" सि०कौ०।

इति वाचस्पत्ये चकारादिशब्दार्थनिरूपणम्।

२८९७पृ० चयशब्दपरिशिष्टम्।

भावप्र० उक्ते ८दोषवृद्ध्यादौ "कालस्वभावोऽयमाहारादिवशात् पुनः। चयादीन् यान्ति सद्योऽपि दोषाः काले विशेषतः। चयकोपशमाः पूर्वाह्णे वसन्तस्य लिङ्गं, मध्याह्ने ग्रीष्मस्य, अपराह्णे प्रावृषः, प्रदोषे वार्षिकम् शरदमर्द्धरात्रे प्रत्यूषसि हेमन्तमुपलक्षयेत्। एवमहोरात्रमपि वर्षमिव शीतोष्णवर्षादोषोपचयप्रकोपोपशमान् जानीयादिति। सुश्रुतः। चयकोपशमा दोषा विहाराहारसेवनैः। समानैर्यान्त्यकालेऽपि विपरीतैर्विपर्य्ययम्। समानैः तुल्यैः चयादियोग्यैरिति यावत्। विपर्य्ययं कालेऽपि वैपरीत्यं बोध्यम्। चयलक्षणमाह सुश्रुतः। स्वस्थानस्थस्य दोषस्य वृद्धिः स्याच्छृणु कोष्ठता। पीतावभासता वह्निमन्दता चाङ्गगौरवम्। आलस्यञ्चयहेतौ तु द्वेषश्च चयलक्षणम्। सञ्चयोपहता दोषा लभन्ते नोत्तरां गतिम्। ते तूत्तरासु गतिषु भवन्ति बलवत्तराः"।

२८७२ पृ° चोरगणेशशब्दपरिशिष्टम् ।

चोरगणेशमन्त्रादिकमुक्तं गणेशविमर्षिण्याम् "चक्षुर्द्वयं तथा कर्णद्वयं नासापुटद्वयम् । मुखं नाभिं लिङ्गमूलं गुदस्थानं तथैव च । मनोद्वारं भ्रुवोर्मध्ये दशैव द्वारसंज्ञिताः । अङ्कुशं प्रथमं वीजं हृदये दशधा जपेत् । प्रजपान्ते ततो मातः ! कपाटं निःक्षिपेत्ततः । कर्णयोश्च तथा कूर्च्चं कालीं नासापुटे ततः । मुखे स्त्रीं द्विविधं वीजं नाभौ वाणीं ततो जपेत् । हसौ वीजं लिङ्गमूलेवं गुदे परिकीर्त्तितम् । क्रोंकारञ्च भ्रुवोर्मध्ये मनःस्थाने तथैवच । एतदेकादशं वीजं प्रतिद्वारे कपाटवत् ! चोरगणेशमन्त्र जप्त्वा कर्म्ममात्रं न कुर्य्यात् । यदि कुर्य्यात्तदादोष उक्तो वर्णविलासतन्त्रे । "गणेश उवाच । अधुनाहं प्रवक्ष्यामि चोरमन्त्रमतः शृणु । चोरमन्त्रपरिज्ञानं विना हे ब्राह्मणेश्वरि ! । पुराणं प्रपठेद्यस्तु स एव मूर्त्तिमान् कलिः । परजन्मनि पापिष्ठः स भवेच्चौरकुक्कुरः । शिवपूजा विष्णुपूजा शक्तिपूजा तथैवच । सर्व्वपूजासु यत्तेजो हरते गणपः स्वयम् । पञ्चाशद्गणदेवानां ज्योतींषि मुनिपुङ्गवा ! । प्रतिद्वारपथे गत्वा प्रतिपक्षेषु जृम्भते । हरन्ति जपतेजांसि प्रतिपक्षेषु संस्थिताः । जपपूजासु यत्तेजस्तत्र चौरो गणाधिपः । तस्माच्चौरप्ररोधार्थं चौरमन्त्रं जपेद्दश । ततस्तु पूजयेद्धीमान् यस्य या इष्टदेवताः । ततः फलमवाप्नोति ब्रह्मादित्रिदिवौकसः । चौरचौरमन्त्रं महामन्त्रं पञ्चाशद्गणतोषणम् । चौरमन्त्रं विना भद्रे ! शान्तिस्वस्त्ययनं कुतः । कर्णद्वयं तथा चक्षुर्द्वयं नासा मुखं ततः । नाभिस्थाने लिङ्गमूले गुदस्थाने तथैव च । मनोद्वारं भ्रुवोर्मध्यं दशैकं द्वारमीरितम् । प्रतिद्वारे न्यसेन्मन्त्रं चौराख्यं ब्राह्मणेश्वरि !। चौरमन्त्रञ्चाह भद्रे ! प्रतिद्वारे कपाटवत् । अङ्कुश रहस्यं ते प्रवक्ष्यामि पञ्चाशद्गणतोषणम् । अङ्कुशं पञ्चमं वीजं प्रथमे दशधा जपेत् । प्रजप्य सुभगे ! मातः ! कपाटं निःक्षिपेत्ततः । अन्यथा अङ्कुशैर्वीजैः कपाटं भेदिरे गणाः । चन्द्रिकान्तर्गतानित्यं शङ्करं वरसुन्दरम् । चन्द्रिकासु समालीनः शिञ्जिनी अणिमा गुणः । चन्द्रविन्द्वात्मिका नित्या गणेशपरिपूजिता । ह्रीं ह्रीं वीजद्वयमिति विन्यसेन्नयनद्वये । कर्णयोश्च तथा हौं हौं ङूँ ङूँ नासाद्वये तथा । मुखे स्त्रीं द्विविधं वीजं नाभौ क्लीं सुभगेश्वरि !। हसौ वीजं लिङ्गमूले गुदेवं परिकीर्त्तितम् । ङङ्कारञ्च भ्रुवोर्मध्ये मनःस्थाने तथैव च । एतदेकादशद्वारे चौरमन्त्राणि विन्यसेत् । दशधा चौरमन्त्रञ्च एकधा वापि वीजकम् । अनेनैव जपेनापि प्रतिद्वारे कपाटकम्" । जपकालोऽपि तत्रैव । "शृणु चापि प्रवक्ष्यामि मन्त्रस्य जपनिर्णयम् । प्रातःकाले च शय्यायां मुक्तस्वापः स्वदेहके । पूर्व्ववन्मातृकान्यासं विन्यसेन्मातृकास्थले । तथा एकादशद्वारे चौरमन्त्राणि विन्यसेत् । दशधा चौरमन्त्रञ्च एकधा वापि संजपेत् । चौरमन्त्रजपात् तुष्टिर्गणेशस्य तदा भवेत् । यमस्य नाधिकारोऽपि चौरमन्त्रजपात् प्रिये ! । सर्व्वमन्त्रजपात्तेजः सर्व्वत्र तु समुपस्थितम् । तत्तेजोहरणे शक्तिर्गणेशस्य नचैव हि" चोरगणेशोऽप्यत्र । अयञ्च शब्द उक्तपृष्ठे चोरकशब्दात् परं वोध्यः तत्र च कर छिद्रेत्यत्र करणच्छिद्रेति शुद्धम् करणं च नेत्रादि । छिद्रं द्वारानावरणम् ।

छ

छकारो व्यञ्जनवर्णभेदः स्पर्शसंज्ञस्तस्योच्चारणस्थानं तालु आभ्यन्तरप्रयत्नः जिह्वामध्येन तालुस्पर्शः । बाह्यप्रयत्नाः विवारश्वासाऽघोषा महाप्राणाश्च । मातृकान्यासेऽस्य वामकूर्परे न्यासः । तन्त्रमते अस्य वाचकशब्दाः । "छन्छन्दनं सुषुम्णा च पशुः पशुपतिस्मृतिः । निर्म्मलं तरलं वह्निर्भूतमाता विलासिनी । एकनेत्रश्च वृषली द्विशिरा वामकूर्परः । गोकर्णो लाङ्गली रामः काममाता सदाशिवः । माता निशाचरः पायुर्विचतः स्थितिशब्दकः" वर्णाभिधानम् । "मातृका वर्णात्मिकायास्तस्या ध्यानमुक्तं वर्णोद्धारतन्त्रे "ध्यानमस्याः प्रवक्ष्यामि द्विभुजां तु त्रिलोचनाम् । पीताम्बरधरां नित्यं वरदां भक्तवत्सलाम् । एवं ध्यात्वा छकारन्तु तन्मन्त्रं दशधा जपेत्" । काव्येऽस्य प्रथमनिर्द्देशफलं वृ° र° टी° उक्तं यथा "कः खोमो घस्य लक्ष्मीं वितरति वियशोङस्तथा चः सुखं छः प्रीतिं जोमित्रलाभमित्यादि" ।

छ पुं° १छकारवर्णे । छो—घञर्थे भावे क । २छेदने स्त्री

कर्म्मणि घञर्थे क । ३निर्म्मले त्रि० मेदि० । ४गृहे न० शब्दार्थचि० । छद–बा० भावे ड । ५छादने ।

छग पुंस्त्री छं रोमभिश्छादनं गच्छति गम–ड । अजे छागे हेमच० । स्त्रियां जातित्वात् ङीष् ।

छगण पुंन० । छाय वह्नेश्छादनाय गण्यते गण–कर्मणि अच् । करीषे हेमच०

छगल पुंस्त्री छो–कलच् गुक् ह्रस्वश्च । १छागे स्त्रियां जातित्वात् ङीष् । २नीलवस्त्रे न० । ३वृद्धदारकवृक्षे पु० हेमच० । ४छगलप्रधानदेशे पु० सोऽभिजनोऽस्य तक्षशिला० अञ् । ५तद्देशवासिनि त्रि० । ६मुनिपत्नीभेदे स्त्री छागली ७ऋषिभेदे पु० । ततो बाह्वा० अपत्ये इञ् । छागलि तदपत्ये पुंस्त्री । आत्रेये तु अण् । छागल आत्रेये छागलापत्ये । तद्भिन्ने छागल्या अपत्ये च ढक् । छागलेय ऋषिभेदे स च स्मृतिकर्त्ता ।

छगलक पुंस्त्री छगल+स्वार्थे क । छागे अमरः ।

छगलण्ड पु० दक्षिणदेशे समुद्रसन्निधौ प्रचण्डादेव्याःस्थाने शब्दार्थचि० ।

छगलाङ्घ्रि(न्त्री) स्त्री छगलस्येवान्त्रम् अङ्घ्रिर्मूलं वा यस्याः अदन्तात् गौरा० ङीष् । १वृद्धदारकौषधे अमरः २वृकी शब्दर० । स्वार्थे क । अत्रैवार्थे ।

छगलिन् पु० ऋषिभेदे । स च कलाप्यन्तेवासी । "हरिद्रुश्छगली तुम्बुरुरुलपश्चत्वारः कलाप्यन्तेवासिनः" मनो० तत्र कलाप्यन्तेवासित्वात् अणि प्राप्ते विशेषविधिना तेन प्रोक्तमधीयते इत्यर्थे ढिनुक् । छागलेयिन् तदुक्ताध्येतृषु ब० व० ।

छच्छिका स्त्री "छच्छिका शरहीनं स्यादच्छा प्रचुरवारिका । छच्छिका शीतला लघ्वी पित्तश्रमतृषाहरी । वातनुत् कफकृत् सा तु दीपनी लवणान्विता" इत्युक्ते तक्रभेदे । भावप्र० । सरहीनं दधीति शेषः ।

छटा स्त्री छो–अटन् किच्च । १दीप्तौ, २परम्परायाञ्च शब्दार्थचि० "यस्याश्चलद्वारिधिवारिवीचिच्छटोच्छलच्छङ्खकुलाकुलेन" "सटाच्छटाभिन्नघनेन बिभ्रता" माघः । "स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा" काव्यप्र० । "स्मेरेन्दीवरदामसुन्दरवपुस्तस्याः कटाक्षच्छटा" सा० द० ।

छटाफल पु० छटेव परम्परान्वितं फलं यस्य । गुवाके । त्रिका० ।

छटाभा स्त्री छटया दीप्त्या भाति भा०–क । विद्युति हारा० ।

छत्त्र पु० छद–णिच् ष्ट्रन् ह्रस्वः अर्द्धर्चा० । छत्राकारपत्रे (छातारिया) १क्षुपभेदे रत्नमाला । २आतपत्रे न० । मेदि० । ३अतिच्छत्रायां (छत्ता) वृक्षे स्त्री । ४भूतृणे राजनि० । तत्र आतपत्रशब्दे ६२८पृ० उष्णवारणशब्दे १३८०पृष्ठे च विवृतिः । "रथाश्वं हस्तिनं छत्त्रं धनं धान्यं पशून् स्त्रियः" । "अभ्यङ्गमञ्जनञ्चाक्ष्णोरुपानच्छत्त्रधारणम्" मनुः । "शशिप्रभं छत्त्रमुभे च चामरे" रघुः । ५आवरणमात्रे च । छत्त्रं गुरोर्वैगुण्याच्छादनं शीलं यस्य छत्त्रा० ण । छात्त्र शिष्ये ।

छत्त्रक पु० छत्रमिव कायति कै–क । (राङ्गाकुलेखाडा) १वृक्षे, २मत्स्यरङ्के पक्षिणि च रत्नमाला । स्वार्थे क ३छत्रे न० । ४ईश्वरगृहभेदे शब्दार्थचि० ।

छत्त्रगुच्छ पु० छत्त्रमिव गुच्छोऽस्य । गुण्डतृणे राजनि० ।

छत्त्रध(धा)र पु० छत्त्रं धरति धारयति वा अच् अण् वा । छायाकरणाय नियुक्ते दासभेदे तत्र अणन्तस्य "अणि नियुक्ते" पा० पूर्व्वपदमाद्युदात्तम् ।

छत्त्रपत्त्र पु० छत्त्रमिव पत्त्रमस्य । १स्थलपद्मे, रत्नमाला २भूर्जपत्रवृक्षे च त्रिका० ।

छत्त्रपुष्प(क) पु० छत्त्रमिव पुष्पमस्य वा कप् । तिलकवृक्षे शब्दार्थचि० ।

छत्त्रभङ्ग पु० छत्त्रस्य भङ्गो यत्र । १नृपनाशे २वैधव्ये ३अस्वातन्त्र्ये च मेदि० ।

छत्त्रा स्त्री छद–त्रण् टाप् । (मौरि) वृक्षे मेदि० २अतिच्छत्रे (सुलफा) ३कुस्तुम्बुरौ (धनिया) ४शिलीन्ध्रे च मेदि० । ५मञ्जिष्ठायां राजनि० ।

छत्त्राक न० छत्त्रा अतिच्छत्त्रेव कायति कै–क । १शिलीन्ध्रे "छत्त्राकं विड्वराहञ्चेति" मनुः । "पलाण्डुं विड्वराहञ्च छत्त्राकं ग्रामकुक्कुटम्" याज्ञ० । २जालवर्वुरवृक्षे पु० राजनि० गौरा० ङीष् । ३रास्नायां स्त्री अमरः ।

छत्त्रातिच्छत्र पु० छत्त्रमतिक्रम्य छत्त्रमावरणमत्रास्य अच् । छत्राकारे जलोद्भवे सुगन्धितृणभेदे शब्दरत्ना० ।

छत्त्रादि पु० "छत्त्रादिभ्यो णः" पा० शीलार्थे णप्रत्ययनिमित्ते पा० ग० सू० उक्ते गणभेदे स च गणो यथा "छत्त्र शिक्षा प्ररोह स्था बुभुक्षा चुरा तितिक्षा उपस्थान कृषि कर्मन् विश्वधा तपस् सत्य अनृत विशिखा विशिका भक्षा उदस्थान पुरोडाश विक्षा चुक्षा मन्त्र" छात्त्रः चौर इत्यादि

छत्त्राधान्य न० छत्त्रा धान्यमिव । कुस्तुम्बुरौ धन्याके राजनि० ।

छत्रिका स्त्री छत्रं तदाकारं पुष्पं याऽस्त्यस्य ठन्। १शिलीन्ध्रे स्वेदजे शाकभेदे हारा० तस्या उत्पत्तिस्थानादिकं भावप्र० उक्तं यथा "उक्तं संस्वेदजं शाकं भूमिच्छत्रं शिलीन्ध्रकम्। क्षिति गोमयकाष्ठेषु वृक्षादिषु तदुद्भवेत्। सर्वे संस्वेदजाः शाकादोषलाः पिच्छलाश्च ते। गुरवश्छर्द्यतीसारज्वरश्लेष्मामयप्रदाः। श्वेतशुभ्रस्थलीकाष्ठवंशगोमयसम्भवाः। नातिदोषकरास्ते स्युः शेषास्तेभ्योविगर्हिताः"। २छत्रविशिष्टे त्रि० ततः पुरोहिता० भावे यक्। छात्त्रिक्य छत्रयुक्तत्वे न०

छत्रिन् त्रि० छत्रमस्त्यस्य। १आतपत्रयुक्ते। "छत्रिणो गच्छन्ति" सा० द०। "वर्षातपे च छत्री दण्डी रात्र्यटवीषु च" भावप्र० "मौञ्जी यज्ञोपवीती च छत्री दण्डाजिनी तथा" (वामनः) हरिवं० ७६२अ०। २नापिते पु० शब्दरत्ना०

छत्वर पु० छद-ष्वरच् नि० दस्य तः। १गृहे २कुञ्जे च [सि० कौ०

छद संवृतौ अद०चु०उभ०सक०सेट्। छदयति ते अचिच्छदत् त

छद संवृतौ वा चु० पक्षे भ्वा० उभ० सक० सेट्। छादयति ते छदति ते अचिच्छदत् त अच्छादीत्-अच्छदीत् अच्छदिष्ट। ऊर्ज्जने बलाधाने जीवने चायं मित्। छदयति ते इति भेदः। छन्नः-छादितः। घे ह्रस्वः छदः। "अग्निमन्तश्छादयसि" अथ० ९,२.१४, "अन्तं छादयेदाज्येन" कात्या० श्रौ० ४,६,१, "छादयन्निषुजालेन" भा० आ० १२८३अ०। उपसर्गपूर्व्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्तसंवरणे "आच्छाद्य चार्च्चयित्वा च" मनुः।

छद संवृतौ चु० उभ० सक० सेट् इदित् पाणि०। छन्दयति ते अचिच्छन्दत् त। छन्दः।

छद पु० छद-पुंसि संज्ञायां घः ह्रस्वः। १वृक्षादिपत्त्रे २खगपक्षे अमरः ३ग्रन्थिपर्णवृक्षे ४तमालवृक्षे च मेदि० "कृतां विन्दुसरोरत्नैर्मयेन स्फाटिकच्छदाम्" (नलिनीम्) भा० स० ४९अ०। "नित्यपुष्पफलास्तत्र पादपाः हरितच्छदाः" भा० व० ८९अ०

छदन न० छद-ल्युट्। १पत्त्रे, २पक्षे मेदिनिः (तेजपात) ३त्वचे राजनि०। भावे ल्युट्। ४पिधाने न०। "विमलस्फाटिकाभानि पाण्डरच्छदनानि" हरिवं० २२९अ०। "विमलस्फाटिकाभानि पाण्डुरच्छदनैर्द्विजैः" भा० व० १५८अ०।

छदपत्त्र पु० छदार्थं पत्त्रमस्य। भूर्जपत्त्रे रत्नमाला।

छदि स्त्री छद-कि। छदिषि पटले (चाल) अमरः "छदिः स्त्रियाम्" पा० उक्तेरिदन्तताऽस्य।

छदिस् न० छद-इसि। पटले सान्तं क्लीवं रायमुकुटः। "इन्द्रस्य छदिरसि" यजु० ४।२८।२ गृहे निघण्टुः

छद्मतापस पु० छद्मना छलेन तापसः। लोकप्रतारणार्थं तापसताख्यापनाय तापसलिङ्गधारिणि तत्कर्माननुष्ठायिनि वैडालव्रतिके शब्दार्थचि०

छद्मन् न० छाद्यते स्वरूपमनेन छद-मनिन्। १कपटे २छले। ३स्वरूपाच्छादने मेदि०। "जगाद मदनच्छद्मपद्मपर्य्यन्तपातिना" माघः। "छद्मना चरितं च यत्" मनुः "शकांश्च यवनांश्चैव अजयच्छद्मपूर्वकम्" भा०स० २९अ०

छद्मिका स्त्री छद्म अस्त्यस्याः व्रीह्या० इनि संज्ञायां कन्। गुडूच्यां राजनि०।

छद्मिन् त्रि० छद्म अस्त्यर्थे व्रीह्या० इनि। छद्मयुक्ते "ब्राह्मणच्छद्मिने देवलोके गत्वा परां गतिम्" भा०व०२९९अ०। "बाहुकच्छद्मिनं नलम्" ७७अ०। स्त्रियां ङीप्।

छन्द पु० छदि-संवरणे धातोरनेकार्थत्वात् इह इच्छायाम् अच्। १अभिलाषे, २वशतायाम्, "स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा" काव्यप्र०। ३विषभेदे च अमरः ४विषे शब्दच०। ५रहसि त्रि० अमरटीका। "छन्दानुवृत्तिदुःसाधाः सुहृदोविमनीकृताः" माघः। "वरदानात् पितुः कामं छन्दमृत्युरसि प्रभो!" भा० शा० ५१अ०।

छन्दक त्रि० छन्दयति संवृणोति रक्षति छदि-ण्वुल्। १रक्षके २वासुदेवे पु०। "वासुदेव! सर्वच्छन्दक! हरिहय! हरिमेध! महायज्ञ"। भा०शा०३४०अ० नारदकृतनारायणस्तवे।

छन्दःपर्ण पु० छन्दांसि वेदविहितकर्म्माणि पर्णानीव यस्य। मायामये संसारे। "छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्" गीता छन्दांसि छादनात् तत्त्ववस्तुप्रावरणात् संसारवन्धनादीनि कर्म्माणि ऋग्यजुःसामवेदविहितानि पर्णानीव यस्य यथा वृक्षस्य छादनार्थानि रक्षणार्थानि च पर्णानि एवं धर्म्माधर्म्मोपार्ज्जनेन कर्म्मभिः संसारवृक्षोरक्ष्यते इति तस्य तथात्वम्।

छन्दश्चिति स्त्री ६त० छन्दसां समूहे। तत्र छन्दोभेदे एकादिगुरुज्ञानाय करणसूत्रं लीला० उक्तं यथा "छन्दश्चित्यादौ करणसूत्रं श्लोकत्रयम् 'एकाद्येकोत्तरा अङ्का व्यस्ता भाज्याः क्रमस्थितैः। परः पूर्वेण सङ्गु-

णप्रस्तत्परस्तत्परेण च ॥ एकद्वित्र्यादिभेदाः स्युरिदं साधारणं स्मृतम् । छन्दश्चित्युत्तरे छन्दस्युपयोगोऽस्य तद्विदाम् ॥ भूषावहनभेदादौ खण्डमेरौ च शिल्पके । वैद्यके रसभेदोवे तन्नोक्तं विस्तृतेर्भयात् । तत्र छन्दश्चित्युत्तरे किञ्चिदुदाहरणम् । "प्रस्तारे मित्र ! गायत्र्याः स्युः पादे व्यक्तयः कति । एकादिगुरवश्चाशु कथ्यतां तत्पृथक् पृथक् । इह हि षडक्षरगायत्रीचरणः अतः षडन्तानां एकाद्येकोत्तराङ्काणां व्यस्तानां क्रमस्थानाञ्च न्यासः

६ ५ ४ ३ २ १

१ २ ३ ४ ५ ६

६ १५ २० १५ ६ १ यथोक्तकरणेन लब्धाः एकगुरुव्यक्तयः । ६ । द्विगुरवः । १५ । त्रिगुरवः । २० । चतुर्गुरवः । १५ । पञ्चगुरवः । ६ । षड्गुरवः । १ । तथैका सर्व्वलघुः । १ । एवमासामैक्यां पादव्यक्तिमितिः । ६४ । एवञ्चतुश्चरणाक्षरसङ्ख्याङ्कान् यथोक्तं विन्यस्य एकादिगुरुभेदानानीय तान् सैकानेकीकृत्य जाता गायत्रीवृत्तव्यक्तिसङ्ख्या । १६७७७२१६ । एवमुक्थाद्युत्कृतिपर्य्यन्तं छन्दसां व्यक्तिमितिर्ज्ञातव्या" ।

अधिकं प्रस्तारशब्दे मर्कटीजालशब्दे मेरुशब्दे पताकाशब्दे च दृश्यम् ।

छन्दस् न० छन्दयति असुन् । १वेदे भावे असुन् । २स्वैराचारे ३अभिलाषे च मेदि० । ४कपटे । नियताक्षरवर्णमात्रादिसन्निवेशवशात् ५चतुश्चरणादौ पद्ये । लौकिकतत्संज्ञाभेदाश्च वृत्तरत्नाकरादौ सलक्षणा उक्तास्ते तु तत्तच्छब्दे उक्ता वक्तव्याश्च । वैदिकच्छन्दांसि तु सर्वानुक्रमिकायां कात्यायनेन दर्शितानि यथा

"अथ छन्दांसि गायत्र्युपङ्क्तिष्णिगनुष्टुब्बृहतीत्रिष्टुब्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्ट्यत्यष्टिधृत्यतिधृतयः कृतिप्रकृत्याकृतिविकृतिसंकृत्यतिकृत्युत्कृतयः चतुर्विंशत्यक्षरादीनि चतुरुत्तराणि । ऊनाधिकेनैकेन निचृद्भुरिजौ द्वाभ्यां विराट्स्वराजौ । पादपूरणार्थं तु क्षैप्रसंयोगैकाक्षरीभावान् व्यूहेत् । आद्ये तु सप्तवर्गे पादविशेषात् संज्ञाविशेषास्ताननुक्रामन्त एवोदाहरिष्यामो विराड्रूपा विराट्स्थानाश्च बहुला अपि त्रिष्टुभ एवेत्यूह्यः । तत्र दशैकादशद्वादशाक्षराणां वैराजत्रैष्टुभजागता इति संज्ञा अनादेशेऽष्टाक्षराः पादाश्चतुष्पादाश्चचेः । प्रथमं छन्दस्त्रिपदा गायत्री । पञ्चकाश्चत्वारः षट्कश्चैकस्तुर्थश्चतुष्को वा पदपङ्क्तिः । षट्सप्तैकादशा उष्णिग्गर्भा । त्रयः सप्तकाः पादनिचृन्मध्यमः षट्कश्चेदतिनिचृद्गकश्चेद्यवमध्या । यस्यास्तु षट्सप्तकाष्टकाः सा वर्धमाना विपरीता प्रतिष्ठा । द्वौ षट्कौ सप्तकश्चेति ह्रसीयसी ।१

द्वितीयमुष्णिक् त्रिपदान्त्यो द्वादशकः । आद्यश्चेत् पुर उष्णिङ्मध्यमश्चेत्ककुप् । त्रैष्टुभजागतचतुष्काः ककुम्न्यङ्कुशिरैकादशिनोः परः षट्कस्तनुशिरा मध्ये चेत्पिपीलिकमध्याद्यपञ्चकास्त्रयोऽष्टका अनुष्टुब्गर्भा । चतुःसप्तकोष्णिगेव ।२

तृतीयमनुष्टुप् । पञ्चपञ्चकाः षट्कश्चैको महापदपङ्क्तिः । जागतावष्टकश्च कृतिः । मध्ये चेदष्टकः पिपीलिकमध्या । नवकयोर्मध्ये जागतः काविराट् । नववैराजत्रयोदशैर्नष्टरूपा । दशकास्त्रयो विराडैकादशका वा ।४

चतुर्थं बृहती तृतीयो द्वादशकः । आद्यश्चेत् पुरस्ताद्बृहती । द्वितीयश्चेन्न्यङ्कुसारिण्युरोबृहती स्कन्धोग्रीवी वा । अन्त्यश्चेदुपरिष्टाद्बृहती । अष्टिनोर्मध्ये दशकौ विष्टारबृहती । त्रिजागतोर्ध्वबृहती । त्रयोदशिनोर्मध्येऽष्टकः पिपीलिकमध्या । नवकाष्टकैकादशाष्टिनो विषमपदा । चतुर्नवका बृहत्येव ।५

पञ्चमं पङ्क्तिः पञ्चपदा । अथ चतुष्पदा विराड् दशकाः । अयुजौ जागतौ सतोबृहती युजौ चेद्विपरीताऽऽद्यौ चेत् प्रस्तारपङ्क्तिरन्त्यौ चेदास्तारपङ्क्तिराद्यन्त्यौ चेत् संस्तारपङ्क्तिर्मध्यमौ चेद्विष्टारपङ्क्तिः ।६

षष्ठं त्रिष्टुप् त्रैष्टुभपदा । द्वौ तु जागतौ यस्याः सा जागते जगती त्रैष्टुभे त्रिष्टुप् । वैराजौ जागतौ चाभिसारिणी । नवकौ वैराजस्त्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्स्थानैकादशिनस्त्रयोऽष्टकश्च विराड्रूपा । द्वादशिनस्त्रयोऽष्टकश्च ज्योतिष्मती । यतोऽष्टकस्ततोज्योतिः । चत्वारोऽष्टका जागतश्च महाबृहती । मध्ये जागतश्चेद्यवमध्या आद्यौ दशकावष्टकास्त्रयः पङ्क्त्युत्तरा विराट् पूर्वा वा ।७

सप्तमं जगती जागतपदा । अष्टिनस्त्रयः स्तौ च द्वौ महासतोबृहती । अष्टकौ सप्तकः षट्कौ दशकौ नवकश्च षडष्टका वा महापङ्क्तिः" ।

तत् प्रतिपादकग्रन्थस्य वेदाङ्गत्वं यथोक्तं शिक्षायाम्

२१।७। "छन्दःपादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते। शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते" इति।

छन्दोग्रन्थस्य वेदोपयोगिता ऋग्वेदभाष्ये दर्शिता यथा छन्दोग्रन्थोऽप्युपयुज्यते छन्दोविशेषाणां तत्र तत्र विहितत्वात्। "तस्मात् सप्त चतुरुत्तराणि छन्दांसि प्रातरनुवाकेऽनूच्यन्ते" इति ह्याम्नातम्। गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीत्येतानि सप्त छन्दांसि। चतुर्विंशत्यक्षरा गायत्री। ततोऽपि चतुर्भिरक्षरैरधिकाष्टाविंशत्यक्षरोष्णिक्। एवमुत्तरोत्तराधिका अनुष्टुबादयोऽवगन्तव्याः। तथान्यत्रापि श्रूयते। "गायत्रीभिर्ब्राह्मणस्य दध्यात्, त्रिष्टुब्भीराजन्यस्य, जगतीभिर्वैश्यस्येति"। तत्र मगणयगणादिसाध्यो गायत्र्यादिविवेकश्छन्दोग्रन्थमन्तरेण न सुविज्ञेयः। किञ्च "यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति। गर्त्तं वा पद्यते। प्र वा मीयते पापीयान् भवति तस्मादेतानि मन्त्रे मन्त्रे विद्यादिति" श्रूयते। तस्मात्तावद्वेदनाय छन्दोग्रन्थ उपयुज्यते।

६ सामभेदे "छन्दांसि जज्ञिरे तस्मात् यजुस्तस्मादजायत" श्रुतिः छन्दोगः।

छन्दोऽधीते "श्रोत्रियँश्छन्दोऽधीते" पा० अण् वा श्रोत्रियच्चादेशः। श्रोत्रिय छन्दोऽध्येतरि पक्षे अण्मात्रम्। छान्दस तत्रार्थे "श्रोत्रियच्छान्दसौ समौ" अमरः। छन्दसा इच्छया निर्म्मितम् यत्। छन्दस्य इच्छया निर्म्मिते त्रि०। छन्दसो व्याख्यानो ग्रन्थः यत् अण् वा। छन्दस्य छान्दस वेदव्याख्यानग्रन्थे। तत्र गायत्र्यादौ छन्दसि "सप्त छन्दांसि क्रतुमेकं तन्वन्ति" भा० व० १२४अ०। "गायत्री छन्दसामहम्" गीता। "छन्दोभिरच्छादयन् यदेभिरच्छादयन् तच्छन्दसां छन्दस्त्वम्" छा० उ०। वेदे "छन्दसि बहुलम्" पा०। "युक्तश्छन्दांस्यधीयीत" मनुः "हिरण्यगर्भो भगवान् यएष छन्दसा स्तुतः" हरिवं० २२६अ०। "आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव" रघुः। इच्छायाम् छन्दसः। छन्दस इदम् अण्। छान्दस वेदसम्बन्धिनि त्रि०। सर्वैश्छन्दसि समार्द्धसमविषमभेदादिज्ञानाय लीला० उक्तं यथा "समादिवृत्तज्ञानाय करणसूत्रं सार्द्धार्य्या। पादाक्षरमितगच्छे गुणवर्गे फलञ्चये द्विगुणे॥ समवृत्तानां सङ्ख्या तद्वर्गो वर्गवर्गश्च। स्वस्वपदोनौ स्यातामर्द्धसमानाञ्च विषमाणाम्॥ उदाहरणम्। समानामर्द्धतुल्यानां विषमाणां पृथक् पृथक्। वृत्तानां वद मे सङ्ख्यामनुष्टुप्छन्दसि द्रुतम्॥ न्यासः। उत्तरगुणः।२। गच्छः।८। लब्धाः समवृत्तानां सङ्ख्याः।२५६। तथार्द्धसमानाम्।६५२८०। विषमाणाञ्च।४२९४९०१७६०। "अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः। तच्छन्दःशास्त्रतत्त्वज्ञाः समवृत्तं प्रचक्षते॥ प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत्। द्वितीयस्तुर्य्यवद्वृत्तं तदर्द्धसममुच्यते॥ यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम्। तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः"॥

छन्दस्तुभ् पु० छन्दसा पक्षेण स्तुभ्नाति सूर्य्यम् स्तुभ–क्विप्। गरुडाग्रजेऽरुणे तस्य तत्कथा "पितामह उवाच। एष लोकविनाशाय रविरुद्यन्तुमुद्यतः। पश्यन्नेव हि लोकान् स भस्मराशीकरिष्यति। तस्य प्रतिविधानञ्च विहितं पूर्व्वमेव हि। कश्यपस्य सुतोधीमानरुणेत्यभिविश्रुतः। महाकायो महातेजाः स स्थास्यति पुरोरवेः। करिष्यति च सारथ्यं तेजश्चास्य हरिष्यति। लोकानां स्वस्ति चैवं स्यादृषीणाञ्च दिवौकसाम्। प्रमतिरुवाच। ततः पितामहाज्ञप्तः सर्वं चक्रे तदाऽरुणः। उदितश्चैव सविताप्यरुणेन समावृतः" भा० आ० २४अ०।

छन्दु त्रि० छदि–उण्। उपच्छन्दयितरि। "कथा छन्दुर्भवति हर्य्यतः" ऋ० १८५४,४। "छन्दु रुपच्छन्दयिता" भा०।

छन्दोग पु० छन्दः सामवेदं गायति गै–क। "सामवेदज्ञे "यत्नेन भोजयेत् श्राद्धे बह्वृचं वेदपारगम्। शाखान्तगमथाध्वर्य्युं छन्दोगन्तु समाप्तिकम्" मनुः। "छन्दोगैर्विविधैः पृथक्" गीता। छन्दोगपरिशिष्टम्।

छन्दोदेव पु० ब्राह्मण्यां नापितेन जाते मतङ्गनामके चण्डालभेदे तपस्यया इन्द्रदत्तवरेण छन्दोदेवनामतां प्राप्ते स्त्रीणां पूज्ये देवभेदे तत्कथा भा० आनु० २७अ०। "ब्राह्मण्यां वृषलेन त्वं मत्तायां नापितेन ह। जातस्त्वमसि चण्डालो ब्राह्मण्यं तेन तेऽनशत्" २७अ० इत्युपक्रमे तेन निर्व्विद्य तपश्चरन्तं तं प्रति इन्द्रस्य वरदानादि "नूनं दैवं न शक्यं हि पौरुषेणातिवर्त्तितुम्। तदर्थं यत्नवानेवं न लभे विप्रतां विभो!। एवं गते तु धर्म्मज्ञ। दातुमर्हसि मे वरम्। यदि तेऽहमनुग्राह्यः किञ्चिद्वा

सुकृतं मम । वैशम्पायन उवाच । इत्युक्तेति तदा प्राह मतङ्गं बलवृत्रहा । चोदितस्तु महेन्द्रेण मतङ्गः प्राब्रवीदिदम् । यथा कामविहारी स्यां कामरूपी विहङ्गमः । ब्रह्मक्षत्राविरोधेन पूजाञ्च प्राप्नुयामहम् । यथा ममाक्षया कीर्त्तिर्भवेच्चापि पुरन्दर ! । कर्त्तुमर्हसि तद्देव ! शिरसा त्वां प्रसादये । शक्र उवाच । छन्दोदेव इति ख्यातः स्त्रीणां पूज्यो भविष्यसि । कीर्त्तिश्च तेऽतुला वत्स ! त्रिषु लोकेषु यास्यति । एवं तस्मै वरं दत्त्वा वासवोऽन्तरधीयत । प्राणांस्त्यक्त्वा मतङ्गोऽपि संप्राप्तः स्थानमुत्तमम्” भा॰अनु॰ २९अ॰ ।

छन्दोभाषा स्त्री छन्दसा भाषा । १छन्दसा कथने ततोभवे तद्व्याख्याने ग्रन्थेऽर्थे ऋगयनादि॰ अण् । छान्दोभाष तत्रभवे तद्व्याख्याने ग्रन्थे च । २उपाङ्गशास्त्रभेदे “उपाङ्गानि शृणु प्रभो !” इत्युपक्रमे “प्रतिपदमनुपदं छन्दोभाषासमन्वितम् । मीमांसान्यायतर्काश्च उपाङ्गं परिकीर्त्तितम्” हेमा॰ दा॰ ख॰ देवीपु॰ ।

छन्दोम पु॰ त्रिसुत्ये अहीने यागभेदे “त्र्यहाः पञ्च गर्गवैद छन्दोमान्तवैसुपराकाः” कात्या॰ श्रौ॰ २२।२।८। त्र्यहास्त्रिसुत्याः पञ्च अहीनाः “द्वितीये त्रिवृतोऽतिरात्राः सर्वे राज्यकामस्य” ६।१०। सू॰ । “त्रिवृतस्त्रिवृत्स्तोमयुक्ताः अतिरात्राः (सर्वे गर्गादयः) पञ्च राज्यकामस्य क्रतवो भवन्ति” कर्कः ।

छन्दोमदशाह पु॰ दशाहसाध्ये यागभेदे “छन्दोमदशाहः पशुकामस्य” कात्या॰ श्रौ॰ । २३।५।२८। छन्दोमदशाह इति संज्ञा स पशुकामस्य भवति” कर्कः। तत्राहान्याह । “पृष्ठ्यावलम्बाच्चत्वारश्छन्दोमाः” २९सू॰ । “चतुर्थे दशरात्रे पृष्ठ्यावलम्बादूर्द्ध्वं द्वादशाहिकाश्चत्वारश्छन्दोमा भवन्ति तत्र पूर्वं बृहद्रथन्तरपृष्ठाःपञ्चाहाः ततश्चत्वारश्छन्दोमाः ततोदशमोविश्वजिदतिरात्रः” स॰ व्या॰ ।

छन्दोमान न॰ ६त॰ । छन्दसां माने ततो भवे व्याख्याने च ऋगयनादि॰ अण् । छान्दोमान तत्र भवे तद्व्याख्याने च ।

छन्दोविचिति स्त्री ६त॰। छन्दसां गायत्र्यादीनां १समुदाये । छन्दसां विचितिर्विचयोयत्र । छन्दःशास्त्रे च । “छन्दोविचितिरित्येवं षडङ्गोवेदउच्यते” ततः ऋगयना॰ भवे व्याख्याने चार्थे अण् । छान्दोविचित तद्भवे तद्व्याख्याने च ।

छन्न त्रि॰ चु॰ छद-क्त नि॰ । १आच्छादिते । २निर्जने ३रहसि न॰ “छन्नेष्वपि स्पष्टतरेषु यत्र” माघः । पक्षे छादित तत्रार्थे त्रि॰ ।

छप गतौ वा चुरा॰ उभ॰ पक्षे भ्वा॰ पर॰ सक॰ सेट् इदित् । छम्पयति ते छम्पति अचच्छम्पत् त अच्छम्पीत् । चच्छम्प ।

छम भक्षणे भ्वा॰ पर॰ सक॰ सेट् । छमति अच्छमीत् । उदित् छमित्वा—छान्त्वा छान्तः । छमण्डः [द्विकोषः ।

छमण्ड पु॰ छम—अण्डच् । मातापितृविहीने (छौँड) उणा॰

छर्द्द वमने चुरा॰ उभ॰ सक॰ सेट् । छर्दयति ते अचच्छर्दत् त । छर्दितः । छर्द्दिः ।

छर्द्द न॰ छर्द्द—भावे अच् । वमने हेम॰ । क्लीवत्वमभिधानात् ।

छर्द्दन न॰ छर्द्द—भावे ल्युट् । १वमने । हेमच॰ । “छर्द्दनं दध्युदश्विद्भ्यामथ वा तण्डुलाम्बुना” सुश्रु॰ । कर्त्तरि ल्यु । २वमनकर्त्तरि त्रि॰ । ३अलम्बुषराक्षसे पु॰ । हेतौ णिच्—ल्यु । ४निम्बवृक्षे पु॰ हेमच॰ ५मदनवृक्षे भावप्र॰ ।

छर्द्दापनिका स्त्री छर्द्दं वमनमापयति आपि—ल्यु स्वार्थे क अत इत्त्वम् । कर्कट्याम् राजनि॰ ।

छर्द्दि स्त्री छर्दयति छर्द्द—हेतौ णिच्—इन् । वमनरोगे तन्निरुक्तिनिदानादि च सुश्रुते उक्तं यथा । “अथातश्छर्द्दिप्रतिषेधमध्यायं व्याख्यास्यामः । अतिद्रवैरतिस्निग्धैरहृद्यैर्लवणैरपि । अकाले चातिमात्रैश्च तथाऽसात्म्यैश्च भोजनैः। श्रमात् भयात्तथोद्वेगादजीर्णात् क्रिमिदोषतः। नार्य्याश्चापन्नसत्त्वायास्तथाऽतिद्रुतमश्नतः । बीभत्सैर्हेतुभिश्चान्यैर्द्रुतमुत्क्लेशितो बलात् । छादयन्नाननं वेगैरर्द्दयन्नङ्गभञ्जनैः । निरुच्यते छर्द्दिरिति दोषो वक्त्रं प्रधावितः । दोषानुदीरयन् वृद्धानुदानो व्यानसङ्गतः। ऊर्द्ध्वमागच्छति भृशं विरुद्धाहारसेविनाम् । हृल्लासोद्गाररोधौ च प्रसेको लवणस्तनुः । द्वेषोऽन्नपाने च भृशं वमीनां पूर्वलक्षणम् । प्रच्छर्द्दयेत् फेनिलमल्पमल्पं शूलार्द्दितोऽभ्यर्द्दितपार्श्वपृष्ठः । श्रान्तः सघोषं बहुशः कषायं जीर्णेऽधिकं साऽनिलजा वमिस्तु । योऽम्लं भृशं वा कटुतिक्तवक्त्रः पीतं सरक्तं हरितं वमेद्वा । सदाहचोषज्वरवक्त्रशोषमूर्च्छान्विता पित्तनिमित्तजा सा । यो हृष्टरोमा मधुरं प्रभूतं शुक्लं हिमं सान्द्रकफानुविद्धम् । अभक्तरुग्गौरवसादयुक्तो वमेद्धि सा कफकोपजा स्यात् । सर्वाणि रूपाणि भवन्ति यस्यां सा सर्वदोषप्रभवा मता तु । बीभत्सजा दौर्हृदजाऽऽमजा च याऽसात्म्यतो वा क्रिमिजा च या हि । सा पञ्चमी ताश्च विभावयेत्तु दोषोच्छ्रयेणैव यथोक्तमादौ !

आमाशयोत्क्लेशभवाश्च सर्व्वास्तस्माद्धितं लङ्घनमेव तासु। मूत्रहृल्लासबहुला क्रिमिजा च विशेषतः। क्रिमिहृद्रोगतुल्येन लक्षणेन च लक्षिता। क्षीणस्योपद्रवैर्युक्तां सास्रक्पूयां सतन्द्रिकाम्। छर्दिं प्रसक्तां कुशलो नारभेत चिकित्सितुम्। वमीषु बहुदोषासु छर्दनं हितमुच्यते। विरेचनं वा कुर्व्वीत यथादोषोच्छ्रयं भिषक्। संसर्गीश्चानुपूर्व्वेण यथास्वं भेषजाय तान्। लघूनि परिशुष्काणि सात्म्यान्यन्नानि वाऽऽचरेत्। यथास्वञ्च कषायाणि ज्वरघ्नानि प्रयोजयेत्"।

"कासः श्वासो ज्वरो हिक्का तृष्णा वैचित्त्यमेव च। हृद्रोगस्तमकश्चैव ज्ञेयाश्छर्द्देरुपद्रवाः" इति माधवकरः। वा ङीप्। तत्रार्थे "आमाशयोत्क्लेशभवा हि सर्व्वाश्छर्द्यो मता लङ्घनमेव तस्मात्" सुश्रुतः।

छर्दिका स्त्री छर्द्द-णिच्-ण्वुल्। १उत्कासिकायां, २विष्णुक्रान्तायाञ्च। धात्वर्थे ण्वुल्। ३वमने। राजनि०। स्वार्थे क पृषो०। छर्दीकाप्यत्र। [च शब्दच०।

छर्दिकारिपु स्त्री पु० ६त०। १क्षुद्रैलायाम्। २छर्दिनाशके

छर्दिघ्न पु० छर्दिं हन्ति-हन-टक्। १निम्बभेदे। २छर्दिनाशके त्रि० रत्नमाला स्त्रियां ङीप्।

छर्दिस् स्त्री छर्द्द-भावे इसि। १वमने. २कर्त्तरि इसि। २वमिरोगे ३उद्गारे च। छर्द्द-कर्म्मणि इसि। ४गृहे निघ०। "यातं छर्दिष्पा उत नः परस्याः" ऋ०८।९।११। "छर्दिरिति गृहनाम तस्य पालकाः" भा०। "अग्निष्ट्वाभिपातु मह्या स्वस्त्या छर्दिषा" यजु० १३।१९। "छर्दिषा गृहेण" वेददी०। छृद-दीप्तौ इसि। ४तेजसि "वायुष्ट्वाभिपातु मह्या स्वस्त्या छर्दिषा" यजु० १४।१२। "छर्दिषा तेजोविशेषेण" वेददी०।

छल न० छल-अच्। १स्वरूपाच्छादने २व्याजे ३यथार्थगूहने ४कूटयुद्धादिना तन्मर्य्यादायाश्चलने ५शाठ्ये ६कापट्ये न्यायमतसिद्धे कार्य्यान्तरेण प्रयुक्तस्य वाद्युक्तशब्दस्यार्थान्तरकल्पनया प्रतिवादिना दत्ते ७दूषणभेदे तल्लक्षणभेदादिकं गौ० सू० वृत्तौ दर्शितम्। यथा "विघातोऽर्थविकल्पोपपत्त्या छलम्। १। तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलञ्चेति। २। अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम्। ३। सम्भवतो ऽर्थस्यातिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम्। ४। धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम्। ५। वाक्छलमेवोपचारच्छलं तदविशेषात्। ६। न तदर्थान्तरभावात्। ७। अविशेषे वा किञ्चित्साधर्म्यादेकच्छलप्रसङ्गः। ८। गौ० सू०

"क्रमप्राप्तं छलं लक्षयति। अर्थस्य वाद्यभिमतस्य यो विकल्पो विरुद्धः कल्पो अर्थान्तरकल्पनेति यावत् तदुपपत्त्या युक्तिविशेषेण यो वचनस्य वाद्युक्तस्य विघातो दूषणं तच्छलमित्यर्थः वक्तृतात्पर्य्याविषयार्थकल्पनेन दूषणाभिधानमिति फलितं तात्पर्य्याविषयत्वं विशेष्ये विशेषणे संसर्गे वा यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्यत्र नवसङ्ख्यापरत्वकल्पनयाऽसिद्ध्यभिधानं, प्रमेयं धर्मत्वादित्यत्र पुण्यार्थकल्पनया भागासिद्ध्यभिधानम् वह्निमान् धूमादित्यत्र धूमावयवे व्यभिचाराभिधानम्। १ सू० लक्षितं छलं विभजते। २। तत्र वाक्छलं लक्षयति। यत्र शक्यार्थद्वये सम्भवति एकार्थनिर्णायकविशेषाभावादनभिप्रेतशक्यार्थकल्पनेन दूषणाभिधानं तद्वाक्छलं, लक्षणान्तु शक्त्या एकार्थशाब्दबोधतात्पर्य्यकशब्दस्य शक्यार्थान्तरतात्पर्य्यकत्वकल्पनया दूषणाभिधानं यथा नेपालादागतोऽयं नवकम्बलवत्त्वादित्युक्ते कुतोऽस्य नवसङ्ख्यकाः कम्बला इति एवं गौर्विषाणीत्युक्ते कुतो गजस्य शृङ्गं श्वेतोधावतीति श्वेतरूपवदभिप्रायेणोक्ते श्वेतो न धावतीत्यभिधानमित्यादिकमूह्यम् ॥ ३ सू०। सामान्यच्छलं लक्षयति। सामान्यविशिष्टसम्भवदर्थाभिप्रायेणोक्तस्य अतिसामान्ययोगादसम्भवदर्थकत्वकल्पनया दूषणाभिधानं सामान्यच्छलम्। यथा ब्राह्मणोऽयं विद्याचरणसम्पन्न इत्युक्ते ब्राह्मणत्वेन विद्याचरणसम्पदं साधयतीति कल्पयित्वा परो वदति कुतो ब्राह्मणत्वेन विद्याचरणसम्पद्व्रात्ये व्यभिचारात् ॥ ४ सू०। उपचारच्छलं लक्षयति। धर्मशब्दस्यार्थेन विकल्पो विविधः कल्पः शक्तिलक्षणान्यतररूपस्तया शक्तिलक्षणयोरेकतरवृत्त्या प्रयुक्ते शब्दे तदपरवृत्त्या यः प्रतिषेधः स उपचारच्छलं यथा मञ्चाः क्रोशन्ति नीलो घट इत्यादौ मञ्चस्था एव क्रोशन्ति न तु मञ्चाः एवं घटस्य कथं नीलरूपाभेदः। एवम् अहं नित्य इति शक्त्या प्रयुक्ते अमुकस्मादुत्पन्नस्त्वं कथं नित्य इति प्रतिषेधोऽप्युपचारच्छलम् वाद्यभिप्रेतार्थस्यादूषणेन छलस्यासदुत्तरत्वम्। न च क्लिष्टलाक्षणिकप्रयोगाद्वादिन एवापराधः स्यादिति वाच्यं तत्तदर्थबोधकतया प्रसिद्धस्य शब्दस्य प्रयोगे वादिनोऽनपराधात् अन्यथा पर्वतो वह्निमानित्युक्ते पर्वतोऽयं कथमवह्निमानित्यादिदूषणेनानुमानादुच्छेदः स्यात् ॥ ५ सू०। प्रसङ्गाच्छलं

परीक्षितुं पूर्वपक्षयति । शब्दस्यार्थान्तरकल्पनाऽविशेषाद्वाक्छलमेवोपचारच्छलं स्यादिति द्वित्वमेव न तु त्रित्वमिति शङ्कार्थः ॥ ६ सू० ॥ समाधत्ते । उपचारच्छलस्य वाक्छलाभेदो न, तयोरर्थान्तरभावात् भिन्नत्वात् भिन्नतया प्रमाणसिद्धत्वादिति फलितार्थः। पूर्व्वोक्तभेदकधर्म्मेण भेदसम्भवेऽपि यत्किञ्चिद्धर्म्मेणाभेदे सामान्यधर्म्मेणाभेदस्य सर्व्वत्र सम्भवाद्विभागः कुत्रापि न स्यादिति । ७ सू० । विपक्षे बाधकमभिप्रेत्याह यत्किञ्चिद्धर्मादविशेषे किञ्चित्साधर्म्याच्छलत्वादिरूपाच्छलस्यैक्यं स्यान्न तु त्वदभिमतं द्वित्वमपीति भावः" ॥ ८ वृत्तिः

"आक्षिप्तकेतुक्रथसैन्यगजच्छलेन" माघः । "धर्म्मेण व्यवहारेण छलेनाचरितेन च । प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च" मनुः । "भुवनहितच्छलेन यम्" भट्टिः "अध्यारुरोहेव रजश्छलेन" रघुः । "छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः" याज्ञ० । "भूतं तत्त्वार्थसम्बद्धं प्रमादाभिहितं छलम्" नारदोक्ते ८प्रमादाभिहिते च ९छलकारिणि त्रि० । स्वार्थे क । तत्रार्थे "आवाभ्यां (मधुकैटभाभ्याम्)छाद्यते विश्वं रजसा तमसा तथा । रजस्तमोमयावावां यतीनां दुःखलक्षणौ । छलकौ धर्म्मशीलानां दुस्तरौ सर्वदेहिनाम्" हरिवं०२०३अ० । १०नाटकप्रभेदवीथ्यङ्गभेदे न० "वीथ्यामेको भवेदङ्कः" इत्युपक्रमे "अस्यास्त्रयोदशाङ्गानि निर्दिशन्ति मनीषिणः । उद्घात्यकावलगितेत्यादिना विभज्य सा० द० लक्षितं यथा "प्रियाभैरप्रियैर्वाक्यैर्विलोभ्य छलना छलम्" "यथा वेण्यां भीमार्ज्जुनौ" "कर्त्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रम् । कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः कास्ते ? दुर्य्योधनोऽसौ कथयतु न रुषा द्रष्टुमभ्यागतौ स्वः" ।

छल नामधातुः छल+कृतौ-णिच् सक० सेट् । छलयति "छलयति विक्रमणे बद्भुत वामनः" गीतगो० "द्यूतं छलयतामस्मि" गीता ।

छलन न० छल+कृतौ णिच्–भावे ल्युट् । १प्रतारणे "यथापदं यथायोगं न च स्यात् छलनं पुनः" भा० शी० १अ० । युच् । २वञ्चनायां स्त्री शब्दार्थचि० । "छलना छलम्" सा०द० ।

छलिक न० नाटकभेदे अलङ्कारशब्दे २८२पृ० उक्ते दृश्यकाव्यभेदे दृश्यम् । "देवि ! शर्म्मिष्ठायाः कृतिं चतुष्पदीम् छलिकं दुष्प्रयोज्यमुदाहरन्ति" मालविका० ।

छलित छल+नामधा० कर्म्मणि क्त । १प्रतारिते "छलितरामं नाटकम् । भावे क्त । २प्रतारणे न० ।

छल्ली स्त्री छद–क्विप् तां लाति ला–क गौरा०ङीष् । १वल्कले (छाल) शब्दरत्ना० २लतायाम् ३सन्ततौ च । मेदि० ला–बा० कि । छल्लिरपि तत्रार्थे ।

छवि (वी) स्त्री छ्यति असारं छिनत्ति तमो वा छो–वि–क्विन् वा ङीप् । १शोभायां २कान्तौ च अमरः । "आपाण्डुरसुखच्छविः" रघुः । "आपाण्डुरीभूतमुखच्छवीनाम् कुमा० ।

छष वधे भ्वा० उभ० सक० सेट् । छषति ते अच्छा(च्छ)षीत् अच्छषिष्ट । चच्छाष चच्छषे । [त्रि० ।

छा पु० छो–क्विप् । १पारदे एकाक्षरको० २छेदनकर्त्तरि

छाग पुंस्त्री छो–गन् स्वनामख्याते पशुभेदे अमरः । जातित्वात् स्त्रियां ङीष् । २पुरोडाशे न० शब्दार्थचि० । छाग्या दुग्धम् अण् । २छाग्या दुग्धे न० छागस्येदमण् । ४छागसम्बन्धिनि त्रि० स्त्रियां ङीप् । छागस्य लक्षणादिकं वृ० सं० दर्शितं यथा "छागशुभाशुभलक्षणमभिधास्ये नवदशाष्टदन्तास्ते । धन्याः स्थाप्या वेश्मनि सन्त्याज्याः सप्तदन्ता ये । दक्षिणपार्श्वे मण्डलमसितं शुक्लस्य शुभफलं भवति । ऋष्यनिभकृष्णलोहितवर्णानां श्वेतमपि शुभदम् । स्तनवदवलम्बते यः कण्ठेऽजानां मणिः स विज्ञेयः । एकमणिः शुभफलकृदन्यतमा द्वित्रिमणयो ये । मुण्डाः सर्वे शुभदाः सर्वसिताः सर्वकृष्णदेहाश्च । अर्द्धासिताः सितार्द्धा धन्याः कपिलार्द्धकृष्णाश्च । विचरति यूथस्याग्रे प्रथमं चाम्भोऽवगाहते योऽजः । स शुभः सितमूर्द्धा वा मूर्द्धनि वा टिक्किका यस्य । स पृषतकण्ठशिरा वा तिलपिष्टनिभश्च ताम्रदृक् शस्तः । कृष्णचरणः सितो वा कृष्णो वा श्वेतचरणो यः । यः कृष्णाण्डः श्वेतो मध्ये कृष्णेन भवति पट्टेन । यो वा चरति सशब्दं मन्दं च स शोभनश्छागः । ऋष्यशिरोरुहपादो यो वा प्राक्पाण्डुरोऽपरे नीलः । स भवति शुभकृच्छागः श्लोकश्चाप्यत्र गर्गोक्तः । कुट्टकः कुटिलश्चैव जटिलो वामनस्तथा । ते चत्वारः श्रियः पुत्रा नालक्ष्मीके वसन्ति ते । अथाप्रशस्ताः खरतुल्यनादाः प्रदीप्तपुच्छाः कुनखा विवर्णाः । निकृत्तकर्णा द्विपमस्तकाश्च

भवन्ति ये चासिततालुजिह्वाः । वर्णैः प्रशस्तैर्मणिभिश्च युक्ता मुण्डाश्च ये ताम्रविलोचनाश्च । ते पूजिता वेश्मसु मानवानां सौख्यानि कुर्वन्ति यशः श्रियं च" । बलौ तस्य शुभाशुभत्वं युक्तिकल्पतरौ दर्शितं यथा "तेषां शुभाय निर्दिष्टं पशुस्तुत्रयं बलौ । ये कृष्णाः शुचयश्छागाः पशवोऽन्ये तथैव च । देवजातिभिरुत्सृज्यास्ते सर्वार्थोपसिद्धये । ये पीता हरिता वापि नरजातेरुदीरिताः । ये शुक्लाश्च महान्तो वा रक्षो जातेः शुभप्रदाः । यो मोहादथ वाऽज्ञानाद्बलिमन्यं प्रयच्छति । बध एव फलं तस्य नान्यत् किञ्चित् फलं भवेदिति" । तन्मांसगुणा भावप्र० उक्ता यथा "छागलो बर्करश्छागो वस्तोऽजः छेलकः स्तुभः । अजा छागी स्तुभा चापि छेलिका च गलस्तनी । छागमांसं लघु स्निग्धं स्वादुपाकं त्रिदोषनुत् । नातिशीतमदाहि स्यात् स्वादु पीनसनाशनम् । परं बलकरं रुच्यं वृंहणं वीर्य्यवर्द्धनम् । अजाया अप्रसूताया मांसं पीनसनाशनम् । शुष्ककासेऽरुचौ शोषे हितमग्नेश्च दीपनम् । अजासुतस्य बालस्य मांसं लघुतरं स्मृतम् । हृद्यं ज्वरहरं श्रेष्ठं सुखदं बलदं भृशम् । मांसं निष्कुषिताण्डस्य (खासि) छागस्य कफकृद्गुरु । स्रोतःशुद्धिकरं बल्यं मांसदं वातपित्तनुत् । वृद्धस्य वातलं रूक्षं तथा व्याधिहतस्य च । ऊर्द्धजत्रुविकारघ्नं छागमुण्डं रुचिप्रदम् ।" तद्दुग्धादिगुणास्तत्रोक्ता यथा "छागं कषायं मधुरं शीतं ग्राहि पयो लघु । रक्तपित्तातिसारघ्नं क्षयकासज्वरापहम् । अजानां लघुकायत्वान्नानाद्रव्यनिषेवणात् । नात्यम्बुपानाद् व्यायामात् सर्वव्याधिहरं पयः । आजं दध्युत्तमं ग्राहि लघु दोषत्रयापहम् । शस्यते श्वासकासार्शःक्षयकासेषु दीपनम् । तद्घृतगुणा घृतशब्दे २७९८ पृ० द्रष्टव्याः । तन्मूत्रगुणाः "गोजाविमहिषीणां तु स्त्रीणां मूत्रं प्रशस्यते । खरोष्ट्रेभनराश्वानां पुंसां मूत्रं हितं स्मृतम् ।" "अनादेशे पशुश्छागः" ति० त० "मात्स्यहारिणकौरभ्रशाकुनच्छागलार्षभैः" याज्ञ० । "षण्मासांश्छागमांसेन" मनुः "अनादेशे यज्ञे स एव पशुशब्दवाच्यः यथाह कात्या० श्रौ० ६।१।२०। "छागं मन्त्राम्नानात्" सू० । "अजं पशुमुपाकरोति होता यज्ञदश्विनौ छागस्येत्यादिषु मन्त्रेषु छागस्याम्नानात् तथा "अग्नीषोमाभ्यां छागस्य वपायै मेदसोऽनुब्रूहीति" यदि च छागो यागसाधनं भवति तदा अयं मन्त्रः संगतार्थो भवति नान्यथा । पुनः कीदृशम् । "पन्नदम्" सू० । "पन्नदो जातदन्त इति निगमेषूक्तम्" । "अव्यङ्गम्" सू० । विगतमङ्गं चक्षुःकर्णादिकं यस्मासौ व्यङ्गः अन्यूनाङ्गम् शाखान्तरात्" कर्कः "वायव्यं श्वेतमालभेत" श्रुतौ छाग एवालभ्यः "छागो वा मन्त्रवर्णात्" जै० सू० तथा निर्णयात् ।

छागण पु० छया छादनेन गण्यते गण–कर्म्मणि अच् । छगण+स्वार्थे अण्–वा । करीषाग्नौ त्रिका० ।

छागभोजिन् पु० छागं भुङ्क्ते भुज–णिनि । १वृके राजनि० । २छागमांसभक्षके त्रि० स्त्रियां ङीप् ।

छागमय न० छाग+मयट् । स्कन्दस्य षष्ठे वक्त्रे "षष्ठं छागमयं वक्त्रं स्कन्दस्यैवेति विद्धि तत् । षट्शिरोऽभ्यन्तरं राजन् ! नित्यं मातृगणार्चितम् । "षण्णान्तु प्रवरं तस्य शीर्षाणामिह शब्द्यते । शक्तिं येनासृजद्दिव्याम् भद्रशाख इति स्म ह" भा० व० २२७अ०

छागमुख पु० छागस्य मुखमिव मुखमस्य । १कुमारानुचरभेदे २कुमारे कार्त्तिकेये च तस्य षष्ठशिरसश्छागतुल्याकारत्वात् तथात्वम् "कुमारास्तु विशाखश्च पितृत्वे समकल्पयन् । स भूत्वा भगवान् संख्ये रक्षंश्छागमुखस्तदा" भा० व० २२७अ० ।

छागमित्र पु० छागस्य मित्रम् । देशभेदे तत्र भवः काश्या० ठञ् ञिठ् वा इदित् । छागमित्रक तद्भवे त्रि० स्त्रियां ढञि ङीप् ञिठि टाप् ।

छागरथ पु० छागो रथोऽस्य । छागवाहने वह्नौ हेमच० ।

छागल पुंस्त्री छगल एव प्रज्ञा० अण् । १छागे पशुभेदे । २आत्रेये ऋषिभेदे आछगलस्यार्षे गोत्रापत्यम् अण् । त्रेयमिन्ने तु छागलिरित्येव छगलशब्दे दृश्यम् । स्वार्थे क । तत्रार्थे संज्ञायां कन् । "श्वेतं सुपाकं समदीर्घवृत्तं निःशल्कलं छागलकं वदन्ति । गले द्विकण्टः किल तस्य पृष्ठे कण्टः सुपथ्यो रुचिदो बलप्रदः" राजनि० उक्ते ४मत्स्यभेदे

छागलाद्यघृत न० चक्रदत्तोक्ते छागमांसपक्वे घृतभेदे यथा "छागमांसतुलां गृह्य साधयेन्नल्वणाम्भसि । पादशेषेण तेनैव घृतप्रस्थं विपाचयेत् । ऋद्धिवृद्धी च मेदे द्वे जीवकर्षभकौ तथा । काकोली क्षीरकाकोली पृथक् कल्कैः पलोन्मितैः । सम्यक् सिद्धे त्ववतार्य्य शीते तस्मिन् प्रदापयेत् । शर्करायाः पलान्यष्टौ मधुनः कुडवं क्षिपेत् । पलं पलं पिबेत् प्रातर्यक्ष्माणं हन्ति

दुर्ज्जयम्। क्षतक्षयञ्च कासञ्च पार्श्वशूलमरोचकम्। स्वरक्षयमुरोरोगं श्वासं हन्यात् सुदारुणम्"।

"तोयद्रोणद्वितये मांसं छागलस्य पलशतं पक्त्वा। जलमष्टांशं शृतं तस्मिन् विपचेद् घृतं प्रस्थम्। कल्केन जीवनीयानां कुडवेन तु मांससर्पिरिदम्। पित्तानिलं निहन्यात् तज्जानपि रसकयोजितं पीतम्। श्वासकासावुग्रौ यक्ष्माणं पार्श्वहृद्रुजां घोराम्। अध्वव्यवायशोषं शमयति चैवापरं किञ्चित्। छागशकृद्रसमूत्रक्षीरैर्दध्ना च साधितं सर्पिः। सक्षारं यक्ष्महरं कासश्वासोपशान्तये परमम्"। भैषज्यरत्नावल्यां विशेषो यथा "आजं चर्म्मविनिर्मुक्तं त्यक्तशृङ्गनखादिकम्। पञ्चमूलीद्वयञ्चैव जलद्रोणे विपाचयेत्। तेन पादावशेषेण घृतप्रस्थं विपाचयेत्। जीवनीयैः सयष्ट्याह्वैः क्षीरञ्चैव शतावरी। छागलाद्यमिदं नाम्ना सर्ववातविकारनुत्। अर्दिते कर्णशूले च बाधिर्य्ये मूकमिन्मिने। जडगद्गदपङ्गूनां खञ्जे गृध्रसिकुब्जयोः। अपतानेऽपतन्त्रे च सर्पिरेतत् प्रशस्यते। पृथगर्द्धं तुलां पञ्चमूलद्वन्द्वाजमांसयोः। निःक्वाथ्य सलिलद्रोणे क्वाथे पादावशेषिते"। "छागमांसतुलां गृह्य दशमूल्याः पलं शतम्। अश्वगन्धपलशतं वाट्यालकशतं तथा। घृताढकं पचेत्तोयैस्तुर्भागावशेषितैः। क्षीरं स्नेहसमं दद्यात् शतावर्य्या रसं तथा। ताम्रपात्रे दृढे चैव शनैर्मृद्वग्निना पचेत्। अस्यौषधस्य कल्कस्य प्रत्येकं शुक्तिसम्मितम्। जीवन्ती मधुकं द्राक्षा काकोल्यौ नीलमुत्पलम्। मुस्तं सचन्दनं रास्ना पर्णिनीद्वयं शारिवे। मेदे द्वे च तथा कुष्ठं जीवकर्षभकौ शटी। दार्व्वी प्रियङ्गुः त्रिफला नतं तालीशपद्मकौ। एलापत्रं वरी नागजातीकुसुमधान्यकम्। मञ्जिष्ठा दाडिमं दारु रेणुकं शैलबालुकम्। विडङ्गं जीरकञ्चैव पेषयित्वा विनिःक्षिपेत्। वस्त्रपूते च शीते च शर्कराप्रस्थसंयुतम्। निधापयेत् स्निग्धभाण्डे आद्रे वा भाजने शुभे। अस्यौषधस्य सिद्धस्य शृणु वीर्य्यमतःपरम्। देवदेवं नमस्कृत्य संपूज्य गणनायकम्। पिबेत् पाणितलं तस्य व्याधिं वीक्ष्यानुपानतः। सर्व्ववातविकारेषु अपस्मारे विशेषतः। उन्मादे पक्षघाते च आध्माने कोष्ठनिग्रहे। शिरोरोगे बाधिर्य्ये चापतन्त्रके। भूतोन्मादे च गृध्रसी खोङ्कारे चाक्षिपातजे। पार्श्वशूले च हृच्छूले बाह्यायामार्द्दिते तथा। वातकण्टकहृद्रोगमूत्रकृच्छ्रे सपङ्गुले। क्रोष्टुशीर्षे तथा खञ्जे कुब्जे चाध्मानमिन्मिने। अपतानेऽन्तरायामे रक्तपित्ते तथोर्द्ध्वगे। ध्यानाद्येऽर्शोविकारेषु चातुर्थकज्वरेऽपि च। हनुग्रहे तथा शोषे क्षीणे चैवापबाहुके। दन्तापतानके भग्ने दाहे चाक्षेपके तथा। जीर्णज्वरे विषे कुष्ठे शेफस्तम्भे मदात्यये। आद्यवातेऽग्निमान्द्ये च वातरक्तमदेषु च। एकाङ्गरोगिणे चैव तथा सर्वाङ्गरोगिणे। हस्तकम्पे शिरःकम्पे जिह्वाकम्पे जड़े भ्रमे। क्षीणेन्द्रिये नष्टशुक्रे शुक्रनिःसरणे तथा। स्त्रीणां वातास्रपाते च पटले चाक्षिस्यन्दने। एकाङ्गस्पन्दने चैव सर्वाङ्गस्पन्दने तथा। नागादिजनिते वाते स्त्रीणामप्राप्तिहेतुके। आभिचारिकदोषे च धनसन्तापसम्भवे। ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः। शिरोमध्यगता ये च जङ्घापार्श्वादिसंस्थिताः। मातृग्रहाभिभूतश्च शिशुर्यश्च विशुष्यति। प्रक्षीणबलमांसश्च न वर्त्मगमनक्षमः। घृतेनानेन सिध्यन्ति वज्रमुक्तिरिवासुरान्। निहन्ति सकलान् रोगान् घृतं परमदुर्लभम्। रसायनं वह्निबलप्रदञ्च वपुःप्रकर्षं विदधाति रूपम्। दन्ताबलेन्द्रेण समानतेजा दीर्घायुषं पुत्रशतं करोति। स्त्रीणां शतं गच्छति वातिरेकं न याति तृप्तिं स्मरसमाङ्गः। अपुत्रिणी पुत्रशतं करोति शतायुषं कामसमं बलिष्ठम्। महत् घृतं नाम तु छागलाद्यं विनिर्मितं वातनिसूदनञ्च। शिवं शुभं रोगभयापहञ्च चकार हारीतमुनिर्विशिष्टः। शृगालवर्हिणः पाके पुमांसं तत्र दापयेत्। मयूरी जम्बुकी छागी वीर्य्यहीनाः स्वभावतः। भाषितं काशिराजेन छागमेव नपुंसकम्"।

छागवाहन पु० छागो वाहनमस्य। वह्नौ त्रिका०।

छात त्रि० छो–क्त। १छिन्ने २दुर्बले अमरः। "छातेतराम्बुच्छटा" काव्यप्र०।

छात्त्र पु० छत्त्रं गुरोर्वैगुण्यावरणं शीलमस्य छत्त्रा० ण। १अन्तेवासिनि शिष्ये २मधुभेदे न "वरटाः कपिलाः पीताः प्रायो हिमवतो वने। कुर्वन्ति छत्त्राकारं तु तज्जं छात्त्रं मधु स्मृतम्। छात्त्रं कपिलपीतं स्यात् पिच्छिलं शीतलं गुरु। स्वादुपाकं क्रिमिघ्नं च रक्तपित्तप्रमेहजित्। भ्रमतृष्णामोहविषहृत् तर्पणञ्च गुणाधिकम्" भावप्र०। [अल्पज्ञे मन्दे शिष्ये हारा०।

छात्त्रगण्ड पु० छात्त्रो गण्ड इव। पद्यस्य पादमात्रवेत्तरि

छात्त्रदर्शन न० छात्त्रं मधुभेद इव दृश्यते दृश्–कर्म्मणि

ल्युट्। १मधुतुल्यास्वादे हैयङ्गवीने शब्दच०। ६त० २शिषत्रस्य दर्शने च।

छात्त्रव्यंसक पु० छात्रो व्यंसकः मयू० परनि०। मन्दशिष्ये

छात्त्रि स्त्री चु० छद–क्तिन्। छादने। कर्त्तरि क्तिच्। २छादके अस्य शालाशब्दे परे "छात्त्र्यादयः शालायाम्" पा०। आद्युदात्तता। छात्त्रिशाला "यद्यपि शालान्ततत्पुरुषे नपुंसकलिङ्गोभवति तदापि "तत्पुरुषे शालायां नपुंसके" पा० इत्येतस्मात् पूर्वविप्रतिषेधेनायमेव स्वरः छात्त्रिशालम्" सि० कौ०

छात्त्र्यादि पु० "छात्त्र्यादयः शालायाम्" पा० शालान्ततत्पुरुषे आद्युदात्ततानिमित्ते शब्दगणे स च गण छात्त्रि पेलि भाण्डि व्याडि आखण्डि आटि गोमि" छात्त्रिशाला छात्त्रिशालम्।

छाद न० छादयति चु० छद–अच्। पटले (छात्) चाल इतिख्याते पदार्थे जटाधरः।

छादन पु० चु०–छद–ल्यु। १नीलाम्लानवृक्षे। भावे ल्युट्। २छादने। "छादनार्थं प्रकीर्णाश्च कटैश्च तृणसङ्गतैः" हरिवं० ६६अ०। करणे ल्युट्। ३पत्रे न० राजनि०। "छादने वक्त्रदारुणि" अमरनिर्देशात् कर्त्तरि ल्यु। ४छादके त्रि०। "फणाभृतां छादनमेकमोकसाम्" माघः।

छादित त्रि० छद–क्त "वादान्तत्यादिना पक्षे णिलोपाभावः। आच्छादिते छन्ने। [ढक्। हृणे।

छादिषेय न० छदिषे हितम् "छदिरुपधिबलेर्ढक्" पा०।

छाद्मिक त्रि० छद्मना चरति व्यवहरति ठक्। १कापटिके कपटव्यवहारिणि "धर्म्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भकः" मनुः।

छान्दड पु० ऋषिभेदे

छान्दस पु० छन्दोऽधीते वेत्ति वा पक्षे अण्। वेदाध्येतरि १श्रोत्रिये अमरः। छन्दसो व्याख्यानो ग्रन्थः तत्रभवो वा अण्। २वेदव्याख्याने ग्रन्थे ३वेदभवे च त्रि०। तस्येदम् अण्। ४वेदसम्बन्धिनि त्रि० स्त्रियां सर्व्वत्र ङीप्। "छान्दसीभिरुदाराभिः स्तुतिभिः (ऋग्भिः) समलङ्कृतः (वराहः)" हरिवं० २२३अ०। छान्दसः प्रयोगः। ततो मनोज्ञा० भावे वुञ्। छान्दसिका छान्दसभावे स्त्री।

छान्दोग्य न० छन्दोगानां धर्म्मः आम्नायः समूहो वा "चरणेभ्यो धर्म्मवत् पा० छन्दोगोक्थेभ्योञ्य" पा० ञ्य। छन्दोगानामाम्नायभेदे उपनिषद्रूपे। उपनिषच्छब्दे १२२२पृ० दृश्यम्। तेषां २धर्म्मे ३समूहे च।

छान्दोमिक त्रि० छन्दोमस्येदम् ठक्। यज्ञभेदसम्बन्धिनि १सूक्ते २अहनि च "छान्दोमिकं सूक्तम्" निरु० ७।२१। "अहनी च्छान्दोमिके" २२।६।२२ कात्या० श्रौ०कर्कः

छाया स्त्री छो–ण। १आतपाभावे २प्रतिबिम्बे ३सूर्य्यपत्नीभेदे संज्ञाप्रतिकृतौ ४कान्तौ च अमरः ५पालने ६उत्कोचे ७पङ्क्तौ मेदि०। ८कात्यायन्यां शब्दरत्ना०। ९तमसि हेमच०। तत्र अनातपे "छायामिव सानुगतां निषेव्य" कुमा०। "छायामच्छामृच्छति सलिलस्य" माघः "छायेव तस्यानुगतिस्म पश्चात्" नैष०। "स्वं रागादुपरि वितन्वतोत्तरीयम्। कान्तेन प्रतिपदवारितातपायाः। स च्छत्रादपरविलासिनीसमूहाच्छायासीदधिकतरा तदा परस्याः" माघः। "गुहां प्रविष्टौ सुकृतस्य लोके छायातपौ ब्रह्मविदो वदन्ति" श्रुतिः संज्ञाप्रतिकृतिछायाकथा हरिवं०८अ०। "स वै विवस्वतः पूर्व्वं श्राद्धदेवः प्रजापतिः। यमश्च यमुना चैव यमजौ संबभूवतुः। श्यामवर्णं च तद्रूपं संज्ञा दृष्ट्वा विवस्वतः। असहन्ती तु स्वां छायां सवर्णां निर्ममे ततः। मायामयी तु सा संज्ञा तस्याश्छायासमुत्थिता। प्राञ्जलिः प्रणता भूत्वा छाया संज्ञां नरेश्वर!। उवाच किं मया कार्य्यं कथयस्व शुचिस्मिते!। स्थिताऽस्मि तव निर्देशे शाधि मां वरवर्णिनि!। संज्ञोवाच अहं यास्यामि भद्रन्ते स्वमेव भवनं पितुः। त्वयेह भवने मह्यं वस्तव्यं निर्व्विकारया। इमौ च बालकौ मह्यं कन्या चेयं सुमध्यमा। संभाव्यास्ते न चाख्येयमिदं भगवते क्वचित्। छायोवाच। आ कचग्रहणाद्देवि! आ शापान्नैव कर्हिचित्। आख्यास्यामि मतं तुभ्यं गच्छ देवि! यथासुखम्। वैशम्पायन उवाच। समादिश्य सवर्णान्तु तथेत्युक्ता तया च सा। त्वष्टुः समीपमगमद्व्रीडितेव तपस्विनी। पितुः समीपगा सा तु पित्रा निर्भर्त्सिता तदा। भर्त्तुः समीपं गच्छेति नियुक्ता च पुनः पुनः। अगच्छद्वडवा भूत्वाऽऽच्छाद्य रूपमनिन्दिता। कुरूनथोत्तरान् गत्वा तृणान्यथ चचार ह। द्वितीयायान्तु संज्ञायां संज्ञेयमिति चिन्तयन्। आदित्यो जनयामास पुत्रमात्मसमं तदा। पूर्वजस्य मनोस्तात सदृशोऽयमिति प्रभुः। मनुरेवाभवन्नाम्ना सावर्ण इति चोच्यते। द्वितीयोयः सुतस्तस्याः स विज्ञेयः शनैश्चरः। सततं पार्थिवी तात! स्वस्य पुत्रस्य वै तदा। चकाराभ्यधिकं स्नेहं न तथा पूर्व्वजेषु वै। मनुस्तस्याक्ष

मत्तत्तु यमस्तस्या न चक्षमे । तां स रोषाच्च बाल्याच्च भाविनोऽर्थस्य गौरवात् । पदा सन्तर्जयामास छायां वैवस्वतो यमः । तं शशाप ततः क्रोधात् सावर्णजननी नृपः । चरणः पततामेष तवेति भृशदुखिता" ।

छाया च तमोरूपद्रव्यान्तरमिति मीमांसकाः । तेन "त्वं दूरमपि गच्छन्ती हृदयं न जहासि मे । दिवावसानच्छायेव पुरोमूलं वनस्पतेः" शकु० । छायागतिरुक्ता सङ्गच्छते" नैयायिकास्तु तेजःसामान्याभाव एव तमश्छायादिकमङ्गीचक्रुः तत्र गत्यादिकमौपचारिकम्" "अत्र च तेजःसामान्याभावप्रयोजकस्य छायासम्बन्धित्वम् यथा वृक्षस्यातपसम्बन्धप्रतिरोधात् छायासम्बन्धित्वं तथा च वृक्षप्रयुक्तातपाभावः" इति बोधः "छाया बाहुल्ये" पा० । छायान्तस्तत्पुरुषो नपुंसकं स्यात् पूर्वपदार्थबाहुल्ये" इक्षूणां छाया इक्षुच्छायम् सि० कौ० । कस्य बाहुल्यमित्यपेक्षायां छायायानिमित्तभूतावरकद्रव्याणामेव बाहुल्यमर्थाच्चिम्नं तच्च षष्ठीतत्पुरुषे पूर्वपदार्थगतमित्याशयेन पूर्वपदार्थेत्युक्तम् । "इक्षुच्छायानिषादिन्य" इत्यत्र आङ्प्रश्लेषः" सि०कौ० । "आवरकद्रव्यस्यैकत्वे तु "विभाषा सेनासुराच्छायेत्यादि" पा० वा क्लीवत्वम् कुड्यछाया कुड्यच्छायम् ।

आतपाभावस्य तेजःसामान्यप्रभासञ्चाराभावः तेन प्रदीपप्रभावरकपदार्थस्य प्रभानिरोधसम्बन्धित्वात् शङ्कुच्छाया नरच्छाया इत्यादि । दीपादिच्छायामानज्ञानार्थो व्यवहारःछायाव्यवहारः तत्र करणसूत्रं लीला०उक्तं यथा । "अथ छायाव्यवहारे करणसूत्रं वृत्तम् । छाययोः कर्णयोरन्तरे ये तयोर्गविश्लेषभक्तारसाद्रीषवः । सैकलब्धेः पदघ्नन्तु कर्णान्तरं भान्तरेणोनयुक्तं दले स्तः प्रभे । उदाहरणम् । नन्दचन्द्रैर्मितं छाययोरन्तरं कर्णयोरन्तरं विश्वतुल्यं ययोः । ते प्रभे वक्ति योयुक्तिमान् वेत्त्यसौ व्यक्तमव्यक्तयुक्तं हि मन्येऽखिलम् । न्यासः



छायान्तरं । १९ । कर्णान्तरम् । १३ । अनयोर्वर्गान्तरेण । १९२ । भक्ता रसाद्रीषवः ।५७६। लब्धं ३। सैकस्यास्य । ४ । मूलम् । २ । अनेन कर्णान्तरं ।१३। गुणितं । २६ । द्विस्थं । २६ । भान्तरेण । १९ । ऊनयुतं ।७। ४५ । तदर्द्धे लब्धे छाये ७/२।४५/२ तत्कृत्योर्योगपदमित्यादिना जातौ कर्णौ २५/२।५१/२ । छायान्तरे करणसूत्रं वृत्तार्द्धम् । शङ्कुः प्रदीपतलशङ्कुतलान्तरघ्नश्छाया भवेद्विनरदीपशिखौच्च्यभक्तः ।

उदाहरणम् । शङ्कुप्रदीपान्तरभूस्त्रिहस्ता दीपोच्छ्रितिः सार्द्धकरत्रया चेत् । शङ्कोस्तदा काङ्गुलसम्मितस्य तत्र प्रभा स्यात्कियती वदाशु । न्यासः



शङ्कुः १/२ प्रदीपशङ्कुतलान्तरं ३ अनयोर्घातः ३/२ विनरदीपशिखौच्च्येन । ३ । भक्तो लब्धानि छायाङ्गुलानि । १२ ।अथ दीपोच्छ्रित्यानयनाय करणसूत्रं वृत्तार्द्धम् । छायाहृते तु नरदीपतलान्तरघ्ने शङ्कौ भवेन्नरयुते खलु दीपकौच्च्यम् ।

उदाहरणम् । प्रदीपशङ्क्वन्तरभूस्त्रिहस्ता छायाङ्गुलैः षोडशभिः समा चेत् । दीपोच्छ्रितिः स्यात्कियती वदाशु प्रदीपशङ्क्वन्तरमुच्यतां मे । न्यासः



शङ्कुः । १२ । छायाङ्गुलानि । १६ । शङ्कुप्रदीपान्तर

हस्ताः । ३ । लब्धं दीपकौच्चं हस्ताः ११/४ । प्रदीपशङ्क्वन्तरभूमानानयनाय करणसूत्रं वृत्तार्द्धम् । विशङ्कुदीपोच्छ्रयसङ्गुणा भा शङ्कूद्धृता दीपनरान्तरं स्यात् । उदाहरणम् । पूर्व्वोक्तएव दीपोच्छ्रायः ११/४ शङ्क्वङ्गुलानि । १२ । छाया । १७ । लब्धाः शङ्कुप्रदीपान्तरहस्ताः । ३ ।

छायाप्रदीपान्तरदीपौच्चानयनाय करणसूत्रं सार्द्धवृत्तम् । छायाग्रयोरन्तरसङ्गुणा भा छायाप्रमाणान्तरहृद्भवेद्भूः । भूशङ्कुघातः प्रभया विभक्तः प्रजायते दीपशिखौच्चमेवम् । त्रैराशिकेनैव यदेतदुक्तं व्याप्तं स्वभेदैर्हरिणेव विश्वम् । उदाहरणम् । शङ्कोर्भार्कमिताङ्गुलस्य सुमते ! दृष्टा किलाष्टाङ्गुला छायाग्राभिमुखे करद्वयमिते न्यस्तस्य देशे पुनः । तस्यैवार्कमिताङ्गुला यदि तदा छाया प्रदीपान्तरं दीपौच्चञ्च कियद्वद व्यवहृतिं छायाभिधां वेत्सि चेत् । न्यासः



अत्र छायाग्रयोरन्तरमङ्गुलात्मकं । ५२ । छाये च । ८ । १२ । अनयोराद्या । ८ । इयमनेन । ५२ । गुणिता । ४१६ । छायाप्रमाणान्तरेण । ४ । भक्ता लब्धं भूमानम् ।१०४। इदं प्रथमच्छायाप्रदीपतलयोरन्तरमित्यर्थः। एवं द्वितीयच्छायाप्रमानं । १५६ । भूशङ्कुघातः प्रभया विभक्तइति जातमुभयतोऽपि दीपौच्चं सममेव हस्ताः ६/१/२ एवमित्यत्र छायाव्यवहारे त्रैराशिककल्पनयाऽऽनयनं वर्त्तते तद्यथा । प्रथमच्छायातोद्वितीयच्छाया । १२ । यावताधिका तावता छायावयवेन यदि छायामान्तरतुल्या भूर्लभ्यते तदा छायया किमिति एवं पृथक् पृथक् छायाप्रदीपतलान्तरप्रमाणं लभ्यते । ततोद्वितीयं त्रैराशिकं यदि छायातुल्ये भुजे शङ्कुः कोटिस्तदा भूतुल्ये भुजे किमिति लब्धं दीपकौच्चमुभयतोऽपि तुल्यमेव । एवं पञ्चराशिकादिकमखिलं त्रैराशिककल्पनयैव सिद्धम् ।

“भवेत्सैव (मेघविस्फूर्जितैव) च्छाया तयुगगयुता स्याद्द्वादशान्ते यदा” इत्युक्ते ऊनविंशत्यक्षरपादके १० छन्दोभेदे च ।

शङ्कुछाया हि दिग्देशकालज्ञानोपायः यथोक्तं त्रिप्रश्नाधिकारे सूर्य्यसिद्धान्तरङ्गनाथाभ्याम् । तत्र च त्रयाणां दिग्देशकालानां प्रश्नाः त्रिप्रश्नाः तेषामधिकार इति त्रिप्रश्नशब्दार्थः । तत्रादौ दिग्ज्ञानमाह ।

“शिलातलेऽम्बुसंशुद्धे वज्रलेपेऽपिवा समे । तत्र शङ्क्वङ्गुलैरिष्टैः समं मण्डलमालिखेत् । तन्मध्ये स्थापयेच्छङ्कुं कल्पनाद्वादशाङ्गुलम् । तच्छायाग्रं स्पृशेद्यत्र वृत्ते पूर्वापरार्धयोः । तत्र विन्दू विधायोभौ वृत्ते पूर्वापराभिधौ । तन्मध्ये तिमिना रेखा कर्त्तव्या दक्षिणोत्तरा । याम्योत्तरादिशोर्मध्ये तिमिना पूर्वपश्चिमा । दिङ्मध्यमत्स्यैः संसाध्या विदिशस्तद्वदेव हि” । सू॰ सि॰

“तत्र दिक्साधनोपक्रमे प्रथमम् अम्बुसंशुद्धे जलवत्समीकृते शिलाप्रदेशे । अपि वाथ वा तदभावेऽन्यत्र वज्रलेपे कृते चत्वरादौ घर्षणादिना समस्थाने कृते शङ्क्वङ्गुलैः शङ्कुस्याङ्गुलविभागमानगृहीतैरभीष्टसङ्ख्याकाङ्गुलैर्व्यासार्द्धरूपैर्वृत्तमवक्रमालिखेत् । सर्वतः केन्द्राद्वृत्तपरिधिरेखा तुल्या यथा स्यात् तथेत्यर्थः । ततस्तन्मध्ये तस्य वृत्तस्य केन्द्ररूपमध्ये कल्पनया द्वादशसङ्ख्याकाङ्गुलानि तुल्यानि यस्मिंस्तं द्वादशविभागाङ्कितमित्यर्थः । शङ्कुं समतलमस्तकपरिधिकाष्ठदण्डं स्थापयेत् । ततः पूर्वापरार्धयोर्दिनस्य प्रथमद्वितीयभागयोस्तच्छायाग्रं स्थापितशङ्कोश्छायाग्रप्रदेशो मण्डलपरिधौ यस्मिन् विभागे स्पृशेत् । दिनस्य प्रथमविभागेऽनुक्षणं छायाह्रासाद्वृत्ते यत्र प्रविशति, दिनस्यापरार्धे छायानुक्षणवृद्धेर्वृत्ते यत्र निर्गच्छतीत्यर्थः । तत्र निर्गमनप्रवेशस्थानयोरुभौ द्वौ विन्दू पूर्वापरसञ्ज्ञौ क्रमेण वृत्ते परिधिरेखायां कृत्वा तन्मध्ये पूर्वापरविन्द्वन्तरमध्ये तिमिना मत्स्येन रेखा कार्या सा दक्षिणोत्तररेखा भवति । मत्स्यस्तु विन्द्वन्तरालसूत्रमितेन व्यासार्धेन विन्दुद्वयकेन्द्रकल्पनेन वृत्तद्वयं निष्पाद्य वृत्तद्वयसंयोगाभ्यां वृत्तद्वयपरिधिविभागाभ्यामन्तर्गतं मत्स्याकारं स्थानं भवति । तत्रैकः संयोगो मुखं बाह्यवृत्तभागसम्मार्जनेन, अपरसंयोगस्तु पुच्छमितरवृत्तभागद्वयसम्मार्जनेन । मुखपुच्छावध्यृज्वी रेखा दक्षिणोत्तररेखा । तत्र पूर्व्वविन्दोः सव्यं रेखाग्रं दक्षिणा दिक् । पश्चिमविन्दोः सव्यं रेखाग्रमुत्तरा दिक् ।

अनन्तरं पूर्ववृत्तं मत्स्यस्य सम्मार्जनीयः। शङ्कुरपि तत्स्थानान्निष्काश्यः इति केवला दक्षिणोत्तररेखा स्थितेति तात्पर्य्यम्। दक्षिणोत्तरदिशोर्मध्यस्थाने तिमिना दक्षिणोत्तररेखामितेन व्यासार्द्धेन दक्षिणोत्तरस्थानाभ्यां पूर्ववत् प्रत्येकं वृत्तं विधाय पूर्ववत् सिद्धेन मत्स्येनेत्यर्थः। पूर्वपश्चिमा रेखा कार्या। तत्र पूर्वविन्दोरासन्नं रेखाग्रं पूर्वा, पश्चिमविन्दोरासन्नं रेखाग्रं पश्चिमेति मत्स्यसम्मार्जनेन केवला पूर्वापररेखापि सिद्धा। अथ रेखासंयोगस्थानाद्दिक्साधनोपक्रमोक्तं पूर्ववृत्तमुल्लिखेत् तद्वृत्तपरिधौ यत्र रेखा लग्ना तत्र दिगिति तद्वृत्तमध्यस्य दिक्चतुष्टयं वृत्ते सिद्धम्। तद्वत् यथा दक्षिणोत्तराभ्यां पूर्वापरा साधिता तत्प्रकारेणेत्यर्थः। एवकारोऽन्यप्रकारनिरासार्थकः। हि निश्चयेन। विदिशः कोणदिशो दिशां पूर्वादिसिद्धदिशां ये मध्यमत्स्या अव्यवहितदिग्द्वयान्तरोत्पन्ना लववस्तैः संसाध्याः सम्यक्प्रकारेण साध्याः। रेखावृत्तसंयोगस्थत्वेन ज्ञेयाः। अत्रोपपत्तिः। क्षितिजपूर्वापरवृत्तसंयोगौ पूर्वापरविभागस्थौ पूर्वापरदिशे तत्र पूर्वापरविभागज्ञानं सूर्य्योदयास्ताभ्यां तत्र क्षितिजे पूर्वापरवृत्तं कुत्र लग्नमिति ज्ञानं तु विषुवद्वृत्तक्रान्तिवृत्तसम्पातस्थसूर्य्यस्योदयास्तस्थलज्ञानेन विषुवद्वृत्तस्य पूर्वापरक्षितिजवृत्तसम्पातयोः सम्बद्धत्वात्। अथान्यस्मिन् दिने सूर्य्यस्योदयास्तावग्रांशान्तरेण याम्योत्तरे भवत इति सूर्य्योदयास्तस्थानाभ्यामग्रांशान्तरेणोत्तरयाम्ये पूर्वापरस्थानं भवतीति क्षितिजस्य महत्त्वाद्दूरत्वाच्च तद्दानेन पूर्वापरज्ञानमशक्यमतस्तत्सूत्रेण स्वाभीष्टप्रदेशे तज्ज्ञानार्थमभीष्टसमस्थले क्षितिजानुकारं वृत्तं कृतम्। तत्रापि सूर्य्योदयास्तसमसूत्रेण स्थलज्ञानस्य दुःशकत्वात् छायार्थं शङ्कुः स्थाप्यः। तथापि सूर्य्योदये छायानन्त्याद्वृत्तपरिधौ तदग्रस्पर्शाभावः। परन्तु यथा यथा सूर्य्य ऊर्द्ध्वं भवति तथा तथा छायाह्रासादत्र छाया वृत्तपरिधौ यदा प्रविशति तत्स्थानात् तात्कालिको वक्ष्यमाणभुजो व्यस्तोऽर्द्धज्याकारेण देयस्तदुत्क्रमज्या यत्र परिधिप्रदेशे लगति तत्र शङ्कुस्थानस्य पश्चिमा। छायाग्रस्य पूर्वापरसूत्राङ्गुलान्तरेण याम्योत्तरपतनात् सूर्य्यापरदिशि छायापतनाच्च। एवं दिनापरार्द्धे सूर्य्यो यथा यथाधः सञ्चरति तथा तथा छायावृद्धेः शङ्कुच्छायावृत्तपरिधौ यत्र यदा निर्गच्छति तात्कालिको वक्ष्यमाणभुजो व्यस्तोऽर्द्धज्याकारेण तत्स्थाने देयस्तदुत्क्रमज्या यत्र परिधिप्रदेशे लगति तत्र शङ्कुस्थानस्य पूर्वा। तत्सूत्रं पूर्वापरसूत्रम्। इदं शङ्कोरुपलक्षणत्वेन ज्ञानं तथा छायोपलक्षणेनापि प्रदेशस्य पूर्वापरसूत्रज्ञानम्। तथा हि। यत्र छायाग्रं विशति तत्रापरा, छायाग्रं यतो निर्गच्छति तत्र पूर्वा। तत्रापि प्रवेशनिर्गमयोरेककालत्वासम्भवाद्यत्कालिकः प्रवेशस्तत्काले छायायाः पश्चिमत्वं तत्र वस्तुभूतं तत्काले निर्गमनस्य पूर्वत्वासम्भवः। एवं निर्गमकाले निर्गमस्थानस्य पूर्वत्वं वस्तुभूतं तत्काले प्रवेशस्य पश्चिमत्वासम्भवः। एककालिकत्वसिद्ध्यर्थमुभयोरेकतरं चिह्नं चाल्यं तात्कालिकभुजयोरन्तरेण तत्र पूर्वचिह्नं भुजान्तराङ्गुलैरयनदिशि चाल्यम्। पश्चिमचिह्नं वा व्यस्तायनदिशि चाल्यम्। तत्सूत्रं सूत्रमध्यदेशस्य पूर्वापरसूत्रम्। एतन्मध्ये स्थापितशङ्कोश्छायाग्रप्रवेशनिर्गमचिह्नाभ्यां यथोक्तरीत्या भुजदानेन सिद्धपूर्वापरसूत्रेणाभिन्नत्वात्। तदुक्तं सिद्धान्तशिरोमणौ "तत्कालापमजीवयोस्तु विवराद्भाकर्णमित्या हृतात् लम्बज्याप्तमिताङ्गुलैरयनदिश्यैन्द्री स्फुटा चालिता" इति। तदेतद्भगवता लोकानुकम्पया स्वल्पान्तरत्वादेकतरविन्दुचालनं नोक्तं सुखार्थं किञ्चित्स्थूलावेव निर्गमप्रवेशविन्दू पूर्वापराभिधावुक्तौ। एवञ्चाभीष्टस्थानं प्रवेशनिर्गमसूत्रमध्ये यथा भवति तथानेन प्रकारेण मण्डलकेन्द्रशङ्कुस्थापनादिनाऽभीष्टप्रदेशे पूर्वापरदिशे साध्ये इति। तन्मध्ये दक्षिणोत्तररेखाविन्दुद्वयोत्पन्नमध्यमत्स्यरेखैवेति। याम्योत्तरमध्ये पूर्वापरा रेखा तर्हि तन्मध्यमत्स्येनेति याम्योत्तरदिशोरित्यादि सम्यगुक्तम्। ननु पूर्वापरविन्दुभ्यां मत्स्येन या दक्षिणोत्तररेखा तदग्राभ्यां मत्स्येन रेखा पूर्वापरविन्दुस्पृष्टैवेति पूर्वं तस्या एव विन्द्वन्तरत्वेन सिद्धत्वात् पुनः साधनं व्यर्थमन्यथा दक्षिणोत्तररेखाया अप्यसङ्गतत्वापत्तेरिति चेत् सत्यम्। दक्षिणोत्तररेखाशुद्ध्यर्थमेव पूर्वापरविन्दुस्पृष्टरेखायाः पुनः साधनमिति केचित्। वस्तुतस्तु दक्षिणोत्तरपूर्वापरसूत्रसम्पातरूपाभीष्टस्थानात् केन्द्रात् प्रागुक्तवृत्तस्य वक्ष्यमाणोपयोगित्वेनावश्यकत्वात् तस्य च पूर्वापरविन्द्वन्तरसूत्राधिकव्याससूत्रत्वाद्विन्द्वन्तररेखा मूलाग्रयोर्वर्धनीया सा तत्र वृत्ते पूर्वापररेखा भवति। तस्या विन्द्वोरुपर्यधस्थ वक्रत्वं कदाचित् स्यादतः प्रथममेव पूर्वरेखासिद्ध्यर्थं विन्द्वन्तरसिद्धमत्स्यमुखपुच्छगत-

रेखाया चिह्नान्तराधिकत्वेन तदुत्पन्नमत्स्यरेखाया ऋज्व्याः सुतरामधिकत्वेन पुनः पूर्वापररेखासाधनं युक्ततरमिति तत्त्वम्। एवमेवाव्यवहितदिग्द्वयान्तरोत्पन्नलघुमत्स्यैश्चतुर्भिः सूत्रैर्वृत्ते कोणदिशः। तदिदमभीष्टस्थानकेन्द्रकमण्डले दिगष्टकं सिद्धम्॥ अथ दिक्सूत्रसम्पातरूपाभीष्टस्थानात् तात्कालिकच्छायाग्रस्थानमाह” र०ना०

“चतुरस्रं बहिः कुर्य्यात् सूत्रैर्मध्याद्विनिर्गतैः। भुजसूत्राङ्गुलैस्तत्र दत्तैरिष्टप्रभा स्मृता” सू० सि०।

‘मध्यादभीष्टस्थानाद्दिग्रेखा सम्पातरूपाद्विनिर्गतैर्निःसृतैरष्टदिग्रेखारूपैः। बहिर्दिक्सूत्रसम्पातकेन्द्रवृत्ताद्बहिः। अनेनैव वृत्तकरणं पूर्वमनुक्तं द्योतितम्। अन्यथा बहिरित्यस्यानुपपत्तेः। पूर्ववृत्तग्रहणे तु दिग्रेखासम्पातस्य मध्यत्वानुपपत्तेः। चतुरस्रं कोणरेखाधिकसूत्रकर्णद्वयतुल्यं समचतुर्भुजं कुर्य्यात्। यथा च तद्दर्शनम्। तत्र चतुरस्रे भुजसूत्राङ्गुलैर्वक्ष्यमाणभुजमितसूत्रसाङ्गुलैर्निर्गमप्रवेशकालिकैर्दत्तैः पूर्वापरसूत्रतदर्धज्यामुद्दीयमानैस्तत्र वृत्ते यस्मिन् प्रदेशे भुजाग्रं तत्प्रदेशे इष्टप्रभा निर्गमप्रवेशान्यतरकालिकच्छायाग्रमुक्तम्। प्रतीतिस्तु दिक्सूत्रसम्पातस्थशङ्कुना ज्ञेया। अत्रोपपत्तिः। वक्ष्यमाणभुजस्य छायाग्रपूर्वापरसूत्रान्तरत्वेन प्रतिपादितत्वादिष्टच्छायाग्रमुक्तदिशा ज्ञातं सम्यक्। चतुरस्रकरणं वक्ष्यमाणाग्रसाधकप्राच्यपररेखानुकाररेखाया वृत्तान्तस्सद्बहिर्या ऋजुत्वसिद्ध्यर्थमिति। अथ पूर्वापररेखायाः सञ्ज्ञान्तरमाह” र० ना०।

“प्राक्पश्चिमाश्रिता रेखा प्रोच्यते सममण्डलम्। उन्मण्डलं च विषुवन्मण्डलं परिकीर्त्यते” सू० सि०।

“प्राक्पश्चिमाश्रिता पूर्वपश्चिमसम्बद्धा साधिता रेखा सममण्डलमुच्यते। सैव रेखोन्मण्डलं विषुवन्मण्डलम्। चः समुच्चये। उभयसञ्ज्ञकं कथ्यते। अत्रोपपत्तिः। क्षितिजपूर्वापरवृत्तसंयोगौ पूर्वापरे तत्सूत्रं पूर्वापरसूत्रमिति। पूर्वापरवृत्तस्य भूमावूर्ध्वाधरानुकारिवृत्तत्वेनादर्शनाद्रेखाकारतयैव दर्शनाच्च पूर्वापरवृत्तमपि तत्सूत्रम्। पूर्वापरवृत्तस्य सममण्डलत्वेनाभिधानात् तद्रेखासममण्डलसञ्ज्ञोक्ता। अथ स्वनिरक्षदेशक्षितिजवृत्तस्योन्मण्डलाख्यस्य तत्संयोगयोः संलग्नत्वात् तन्मध्यसूत्रत्वेन पूर्वापरसूत्रस्यापि सत्त्वात् पूर्वापरसूत्रमुन्मण्डलसञ्ज्ञम्। एतेनान्यदेशक्षितिजसञ्ज्ञया स्वदेशक्षितिजसञ्ज्ञा सुतरां सिद्धेति पूर्वापरसूत्रस्य क्षितिजवृत्तसञ्ज्ञा द्योतिता। पूर्वापरस्थानयोः क्षितिजवृत्तस्य संलग्नत्वादुल्लिखितवृत्तस्य क्षितिजानुकारित्वाच्च। एवं निरक्षदेशपूर्वापरवृत्तं विषुवन्मण्डलाख्यं पूर्वापरस्थानयोः संलग्नमिति तन्मध्यसूत्रत्वेनापि पूर्वापरसूत्रस्य सिद्धत्वात् पूर्वापरसूत्रं विषुवन्मण्डलसञ्ज्ञं क्रान्तिवृत्तस्य द्युवृत्तस्य च चलत्वात् कादाचित्कत्वेन पूर्वापरस्थानसंलग्नत्वात् तत्सञ्ज्ञा नोक्तेति ध्येयम् अथाग्राज्ञानमाह” र०ना०।

“रेखा प्राच्यपरा साध्या विषुवद्भाग्रगा तथा। इष्टच्छायाविषुवतोर्मध्यमग्राऽभिधीयते” सू०सि०।

“तस्मिंश्चतुरस्रे पूर्वापररेखातः उत्तरभागे विषुवद्भाग्रगाऽक्षभाग्रप्रदेशस्थाक्षभाङ्गुलान्तरितेत्यर्थः। प्राच्यपरा रेखा पूर्वापररेखानुकारा रेखा तथा सर्वतस्तुल्यान्तरेण यथेष्टच्छायाग्ररेखाभुजान्तरेण तथाक्षभान्तरेण कार्या। अनन्तरमिष्टच्छायाविषुवतोरिष्टच्छायाग्ररेखाक्षभाग्ररेखयोरित्यर्थः। मध्यं चतुरस्रेऽङ्गुलात्मकमन्तरालं सर्वतस्तुल्यम्। अग्रा कर्णवृत्ताग्रोच्यते। अत्रोपपत्तिः। भुजस्य कर्णवृत्ताग्रा पलभासंस्कारेणाग्रे उक्तत्वाद्दक्षिणगोले पलभाधिकोत्तरभुजसद्भावेन पलभोनो भुजोऽग्रेति, प्राच्यपरसूत्रादुत्तरभागेऽक्षभाग्ररेखा भुजमध्ये भवतीति द्वयो रेखयोरन्तरमग्रा पलभोनभुजरूपा। एवमुत्तरगोले उत्तरभुजस्य पलभाल्पत्वाद्भुजोनपलभाग्रेति पलभारेखा प्राच्यपरसूत्रादुत्तरभागस्था भुजरेखातोऽप्यग्रान्तरेणोत्तरदिशीति द्वयो रेखयोरन्तरं भुजोनपलभारूपं कर्णवृत्ताग्रा। एवं दक्षिणभुजस्य पलभोनाग्रत्वात् पलभायुतो भुजोऽग्रेति प्राच्यपरसूत्राद्भुजाग्रपलभाग्ररेखयोः क्रमेण याम्योत्तरत्वात् तयोरन्तरालं पलभाभुजैक्यरूपमग्रा, पलभायाः शङ्कुतलानुकल्पत्वात् सदोत्तरत्वं छाया सम्बन्धाद्युक्तम् गोले शङ्कुतलस्य दक्षिणत्वादुपहापरदिशि छायासद्भावाच्च। अतएव प्राच्यपरसूत्राद्दक्षिणभागे दक्षिणभुजवशादक्षभाग्ररेखाकल्पने उक्तानुपपत्त्या अस्य उत्तरभागे पूर्वापरसूत्रादिति विषुवद्भाग्रगेत्यस्य व्याख्यातम्” अथ प्रकृताच्छायातः कर्णज्ञानं तच्छुद्धिं चाह र० ना०।

“शङ्कुच्छायाकृतियुतेर्मूलं कर्णोऽस्य वर्गतः। प्रोज्झ्य शङ्कुकृतिं मूलं छाया शङ्कुर्विपर्ययात्” सू० सि०

“द्वादशाङ्गुलशङ्कुच्छाययोर्वर्गयोगात् पदं छायाकर्णः स्यात्। अथास्य शुद्धिरूपं छायासाधनमाह। अस्येति। छायाकर्णस्य वर्गात् शङ्कुवर्गं चतुश्चत्वारिंश-

दधिकं शतं विशोध्य मूलं छाया। प्रकारान्तरेण छायाकर्णशुद्धिमाह। शङ्कुरिति। विपर्ययाच्छायासाधनवैपरीत्याच्छायाकर्णवर्गाच्छायावर्गं विशोध्य मूलमित्यर्थः। शङ्कुर्द्वादशाङ्गुलमितः स्यात्। अत्रोपपत्तिः। द्वादशाङ्गुलशङ्कुः कोटिश्छभा भुजस्तत्कृत्योर्योगपदं कर्ण इत्यत्र कर्णः कर्ण इत्याद्यत्रत्रैवाद्युक्तरीत्योपपन्नम्। ननु दिक्साधनोत्तरमिष्टप्रभाग्राकर्णसाधनं भगवता सर्वज्ञेन किमर्थमुक्तमग्रेऽग्रादीनां स्वतन्त्रतयोक्तत्वात्। न च विना गणितश्रममग्राज्ञानार्थमिदं युक्तमुक्तमिति वाच्यम्। वक्ष्यमाणभुजज्ञानस्याग्रोपजीव्यत्वेन तस्याश्च भुजोपजीव्यत्वेनान्योन्याश्रयात् गणितज्ञाताग्रायाः पुनः साधनस्य व्यर्थत्वाच्च। न च भुजसूत्राङ्गुलैर्दत्तैरित्यनेनेष्टच्छायाग्रं ज्ञातमिति न, किन्त्वेतदुक्त्या दिक्सूत्रसम्पातस्थशङ्कोर्वृत्तपरिधौ छायाग्रज्ञानात् तत्पूर्वापरसूत्रान्तरे भुजसद्भावाद्विना गणितं भुजोऽपि ज्ञात इति नान्योन्याश्रय इति वाच्यम्। तथापि भगवतः सर्वज्ञस्य निष्प्रयोजनत्वोक्तेरनुचितत्वात्। विना प्रयोजनं मन्दोक्तेरप्यभावाच्च। न हि दिक्साधनेऽग्राभुजादिकमावश्यकं येन तदुक्तिर्युक्ता। किञ्च कर्णसाधनस्य गणितोक्त्या वक्ष्यमाणकर्णसाधनतुल्यत्वेनात्र कथनमनुचितम्। न हि दिक्साधनार्थं "भाकर्णमित्या हृतादिति" सिद्धान्तशिरोमण्युक्तिवदत्र छायाकर्ण उपयुक्तो येन तदुक्तिर्युक्तेति चतुरस्रमित्यादिश्लोकचतुष्टयमन्येन मन्दबुद्धिना क्षिप्तं न भगवतोक्तमिति चेन्मैवम्। भुजसाधनोपजीव्याग्राया एतदुक्तप्रकारेण सिद्धौ दिशः सम्यक् सिद्धा इति दिक्साधनशुद्ध्यग्रमग्रासाधनम्। प्रकारान्तरेणापि वक्ष्यमाणत्रिज्यावृत्तीयाग्रया त्रिज्या लभ्यते तदानयागतया केल्यनुपातेन साधितकर्णसंवादेन शुद्ध्यग्रगमार्थं कर्णसाधनं चोक्तम्। अनयाग्रया कर्णस्तदा त्रिज्यावृत्तीयाग्रया क इति फलस्य त्रिज्यातुल्यस्यानयनार्थं वा कर्णसाधनमिति केचित्। वस्तुतस्तु मण्डले छायाप्रवेशनिर्गमस्थानस्थितपूर्वापरबिन्द्वोः प्रत्येकं रेखेति रेखाद्वयं सर्वतस्तुल्यान्तरं कार्यं तेनान्तरेणान्यतरो बिन्दुस्थानस्थौ पूर्वापरबिन्दू तद्रेखामध्यस्थानस्य पूर्वापररेखेति। तत्रोभयबिन्दुरेखयोरन्तराङ्गुलमानं स्वल्पत्वाद्गणयितुमशक्यमतः प्रत्येकं रेखे प्राच्यपररेखे प्रकल्प्य तन्मध्यकेन्द्रात् पूर्ववृत्तं प्रत्येकमिति वृत्तद्वयं कुर्यात्। तत्र स्वस्ववृत्ते स्वस्वप्राच्यपररेखास्पृष्टा कार्यौ ताभ्यां स्वस्वकालिकौ भुजौ स्वस्ववृत्ते देयौ तदग्रे छायाग्ररेखे स्वस्ववृत्ते कार्ये स्वस्वप्राच्यपरसूत्रात् स्वस्ववृत्ते उत्तरभागेऽग्रभाङ्गुलान्तरेण रेखे कार्ये ततः स्वस्ववृत्ते स्वस्वतद्रेखयोरन्तरं स्वस्ववृत्ते उभयकालिककर्णवृत्ताग्रे बहुत्वेन गणयितुं शक्यं तदनन्तरं पूर्वबिन्द्वोर्याम्योत्तरमन्तरं कर्णवृत्ताग्रासाधनकथनेनानीतं भुजान्तरस्य बिन्द्वन्तरत्वात् तस्य चाग्रान्तरत्वेन फलितत्वात्। विषुवद्दिने गोलभेदे तु भुजान्तरमग्रायोग इति बिन्द्वोर्याम्योत्तरमग्रायोग इति। तेनोक्तरीत्या बिन्दुस्थाल्यस्तत्सूत्रं पूर्वापरसूत्रं स्फुटमित्याशयेन भगवताग्रा निरूपिता तस्याः शुद्ध्यर्थं कर्णोऽपि साधित इति तत्त्वम्" र० ना०। अतः परं "त्रिंशत्कृत्यो युगे भानामित्यादिः" ग्रन्थः। स च अयनशब्दे २३६।२३७ पृ० दर्शितः। सोऽत्रानुसन्धेयः।

"स्फुटं दृक्तुल्यतां गच्छेदयने विषुवद्वये। प्राक् चक्रं चलितं हीने छायार्कात् करणागते। अन्तरांशैरथावृत्य पश्चाच्छेषैस्तथाधिके" सू० सि०।

"अयने दक्षिणोत्तरायणसन्धौ विषुवद्वये गोलसन्धौ चलितं चक्रं दृक्तुल्यतां दृष्टिगोचरतां स्फुटमनायासं गच्छेत्। तत्र प्रत्यक्षतस्तन्निश्चितमन्तरं दृश्यत इत्यर्थः। तथा च सृष्ट्यादिकाले रेवतीयोगतारासन्नावधि मेषतुलाद्योः कर्कमकराद्योर्विषुवदायनप्रवृत्तेरिदानीं त्वन्यत्र, तत्स्वरूपे प्रत्यक्षे इति क्रान्तिवृत्तं चलितमन्यथा तदनुपपत्तेरिति भावः। ननु पूर्वतोऽपरत्र वा चलितमिति कथं ज्ञेयमित्यत आह। प्रागिति। छायार्काद्यद्दिने सूर्यस्यायनदिक्परावर्त्तनमुदये प्राच्यपरसूत्रस्थत्वं वा तस्मिन् दिनेऽन्यस्मिन् दिने वा मध्याह्नच्छायातो वक्ष्यमाणप्रकारेण सूर्यः साध्यस्तस्मादित्यर्थः। करणागते प्रागुक्तप्रकारेणानीतः स्पष्टः सूर्यस्तस्मिन्नित्यर्थः। न्यूने सति। अन्तरांशैः सूर्ययोरन्तरांशैश्चक्रं क्रान्तिवृत्तं प्राक् पूर्वस्मिन् चलितमिति ज्ञेयम्। अथ यद्यधिके सति शेषैः सूर्ययोरन्तरांशैश्चक्रमावृत्य परिवृत्य पश्चात् पश्चिमाभिमुखं तथा चलितमिति ज्ञेयम्। अत्रोपपत्तिः। छायातो वक्ष्यमाणप्रकारेण सूर्यो वर्त्तमानसम्पाताङ्कितागतस्तु रेवतीयोगतारासन्नाद्यवधितोऽतस्तयोरन्तरमयनांशास्तत्र क्रान्तिवृत्तस्य पूर्वचलने गणितागतार्काच्छायार्कोऽधिको भवति। पश्चिमचलने तु न्यूनो भवतीति सम्यगुपपन्नम्। अथ चराद्युपजीव्यां पलभामाह" र० ना०।

एवं विषुवती छाया स्वदेशे या दिनार्धजा। “दक्षिणोत्तररेखायां सा तत्र विषुवत्प्रभा” सू० सि०।

“स्वाभीष्टदेशे एवं विषुवती चलितविषुवद्दिनसम्बद्धा रेवत्यासन्नस्थाप्युपचाराद्विषुवत्सञ्ज्ञा तदग्रावर्तकमेवमिति। दिनार्धजा माध्याह्निकी या यन्मिता द्वादशाङ्गुलशङ्कोश्छाया दक्षिणोत्तररेखायां निरक्षोत्तरदक्षिणदेशक्रमेणोत्तरस्थां दक्षिणस्थां प्रभायाः दक्षिणोत्तररेखास्थत्वं विना मध्याह्नासम्भवात् सा तन्मिता तत्र तस्मिन्नभीष्टदेशे विषुवत्प्रभाऽक्षभा भवति। एतेन द्वादशाङ्गुलशङ्कुः कोटिः पलभा भुजस्तत्कृत्योर्योगपदं कर्ण इत्यक्षकर्णः कर्ण इत्यक्षक्षेत्रं वक्ष्यमाणोपयुक्तं प्रदर्शितम्। तदा सूर्यस्य विषुवद्वृत्तस्थत्वाद्विषुवत्प्रभेति सञ्ज्ञोक्ता। अथ लम्बाक्षयोरानयनमाह” र० ना०।

“शङ्कुच्छायाहते त्रिज्ये विषुवत्कर्णभाजिते। लम्बाक्षज्ये तयोश्चापे लम्बाक्षौ दक्षिणौ सदा” सू० सि०।

“त्रिज्ये द्विस्थानस्थे शङ्कुच्छायाहते एकत्र द्वादशगुणितापरत्र प्रागुक्तया विषुवत्प्रभया गुणिता विषुवत्कर्णभाजितोभयत्राक्षकर्णेन भक्ता फले क्रमेण लम्बज्याक्षज्ये तयोर्ज्ययोर्धनुषी क्रमेण लम्बाक्षौ सदोभयगोले दक्षिणदिक्स्थौ भवतः। अत्रोपपत्तिः। याम्योत्तरवृत्ते निरक्षस्वदेशपूर्वापरवृत्तयोर्यदन्तरं तदक्षः। याम्योत्तरवृत्ते दक्षिणक्षितिजप्रदेशाद्विषुवद्वृत्तस्य यदन्तरं तल्लम्बः। उभावूर्द्धगोले स्वपूर्वापरवृत्ताद्दक्षिणौ तज्ज्ये अक्षलम्बज्ये भुजकोटी त्रिज्याकर्णे इत्यक्षक्षेत्रादक्षकर्णकर्णे द्वादशपलभे कोटिभुजौ तदा त्रिज्याकर्णे कावित्यनुपाताभ्यां लम्बाक्षज्ये तद्धनुषी लम्बाक्षावित्युपपन्नम्। अथ मध्याह्नच्छायातोऽक्षानयनं श्लोकाभ्यामाह” र० ना०।

“मध्यच्छाया भुजस्तेन गुणिता त्रिभमौर्विका। स्वकर्णाप्ता धनुर्लिप्ता नतास्ता दक्षिणे भुजे। उत्तराश्चोत्तरे याम्यास्ताः सूर्यक्रान्तिलिप्तिकाः। दिग्भेदे मिश्रिताः साम्ये विश्लिष्टाश्चाक्षलिप्तिकाः” सू० सि०।

“अभीष्टदिने माध्याह्निकी छाया भुजसञ्ज्ञा ज्ञेया। तेन भुजेन त्रिज्या गुणिता मध्याह्नच्छायाकर्णेन भक्ता फलस्य धनुःकला नता नतसञ्ज्ञास्ता नतकला दक्षिणे भुजे मध्याह्नच्छायारूपभुजे प्राच्यपरस्वस्तिकमध्याद्दक्षिणदिक्स्थे सति, उत्तरदिक्का उत्तरे भुजे दक्षिणाः। चो विषयव्यवस्थार्थकः। ता नतकलाः सूर्यक्रान्तिकलाः प्रागुक्ताः। दिग्भेदे स्वदिशोर्भिन्नत्वे मिश्रिताः संयुक्ताः साम्येऽभिन्नदिक्त्वे विश्लिष्टा अन्तरिताः। चो विषयव्यवस्थार्थकः। अक्षकला भवन्ति। अत्रानावश्यकभुजसञ्ज्ञया भगवतोपपत्तिरुक्ता। तथाहि। द्वादशाङ्गुलशङ्कुकोटौ मध्याह्नच्छायाकर्णे वा मध्यच्छायाभुजस्तथा खस्वस्तिकान्मध्याह्नकाले सूर्यस्य याम्योत्तरवृत्ते यदन्तरेण नतत्वं ता नतकलास्तज्ज्या नतांशज्या मध्याह्नोनतांशज्यारूपशङ्कौ त्रिज्याकर्णे वा भुज इति मध्याह्नच्छायाकर्णे कर्णे मध्याह्नच्छाया भुजस्तदा त्रिज्याकर्णे को भुज इत्यनुपातेन नतज्या तद्धनुरत्र कलात्मकत्वान्नतकलास्ता ग्रहसम्बद्धा इति छायादिग्विपरीतदिक्काः। अथ क्रान्त्यंशाक्षांशयोरेकदिक्त्वे योगेन नतांशा इति दक्षिणा नतकला दक्षिणक्रान्तिकलाभिर्हीना अक्षांशा भवन्ति। क्रान्त्यंशाक्षांशयोर्भिन्नदिक्त्वेऽन्तरेण नतांशा यदि दक्षिणास्तदा क्रान्त्यूनाक्षांशस्य नतत्वादुत्तरक्रान्तियुता अक्षांशाः। यदि तूत्तरास्तदाक्षोनक्रान्तेर्नतत्वान्नतोनोत्तरक्रान्तिरक्ष इति सम्यगुपपन्नम्। अथाक्षात् पलमानयनमाह” र० ना०।

“ताभ्योऽक्षज्या च तद्वर्गं प्रोज्झ्य त्रिज्याकृतेः पदम्। लम्बज्यार्कगुणाक्षज्या विषुवद्भा च लम्बया” सू० सि०।

“ताभ्योऽक्षकलाभ्योऽक्षज्या भवति। चः समुच्चये। अक्षज्यावर्गं त्रिज्यावर्गात् त्यक्त्वा शेषान्मूलं लम्बज्या। अनन्तरमक्षज्या द्वादशगुणा लम्बया लम्बज्यया गुणनस्य भजनसम्बन्धाद्भक्तेत्यर्थसिद्धम्। अक्षभा स्यात्। अत्रोपपत्तिः। अक्षकलानां याक्षज्या तस्यास्त्रिज्याकर्णे भुजत्वात् तद्वर्गोनात् त्रिज्यावर्गान्मूलं लम्बज्या कोटिः। तयाक्षज्या भुजस्तदा द्वादशकोटौ को भुज इत्यनुपातेन विषुवच्छायेति। अथाक्षज्ञाने नतभागेभ्यः क्रान्तिद्वारा सूर्यसाधनं सार्धश्लोकाभ्यामाह” र० ना०।

“स्वाक्षार्कनतभागानां दिक्साम्येऽन्तरमन्यथा। दिग्भेदेऽपक्रमः शेषस्तस्य ज्या त्रिज्यया हता। परमापक्रमज्याप्ता चापं मेषादिगो रविः। कर्कादौ प्रोज्झ्य चक्रार्धात् तुलादौ भार्धसंयुतात्। मृगादौ प्रोज्झ्य भगणान्मध्याह्नेऽर्कः स्फुटो भवेत्” सू० सि०।

“स्वदेशाक्षांशेष्टदिनीयमध्याह्नसूर्यनतांशयोर्भागानां बहुत्वाद्बहुवचनम्। एकदिक्त्वेऽन्तरमन्यदिक्त्वेऽन्यथा योगः कार्यः। शेष उक्तसंस्कारसिद्धोऽङ्कः क्रान्तिः स्यात्। तस्यापक्रमस्य ज्या त्रिज्यया गुण्या परमक्रान्तिज्यया प्रागुक्तया भक्ता फलस्य धनुर्भागादिकं मेषादिगो मेषादि-

राशित्रितयान्तर्गतोऽर्कः स्यात्। कर्कादित्रयेऽर्के चक्रार्धात् षड्राशित आगतार्कं त्यक्त्वा शेषं मध्याह्नकाले स्फुटोऽर्कः स्यात्। तुलादित्रितये षड्भयुतादागतार्कात् स्फुटोऽर्को ज्ञेयः। आगतोऽर्कः षड्भयुतः स्फुटोऽर्कः स्यादित्यर्थः। मकरादित्रयेऽर्के द्वादशराशिभ्य आगतार्कं त्यक्त्वा शेषमयनांशसंस्कृतः स्फुटोऽर्कः स्यात्। करणागतज्ञानार्थं व्यस्तायनांशसंस्कृत इत्यर्थसिद्धम्। पूर्वं तत्संस्कृतग्रहात् क्रान्तिः साध्येत्यर्थस्योक्तेः। अत्रोपपत्तिः। एकदिशि क्रान्त्यक्षयोगान्नतं दक्षिणमतोऽक्षोनं क्रान्तिर्दक्षिणा। भिन्नदिशि क्रान्त्यूनाक्षो नतं दक्षिणमनेनाक्षो हीनः क्रान्तिरुत्तरा। अक्षोनक्रान्तिर्नतं तूत्तरमतोऽक्षयुतं क्रान्तिरुत्तरा। अस्या ज्या क्रान्तिरर्कज्या। यदि परमक्रान्तिज्यया त्रिज्याभुजः स्यात् तदानया केतीष्टा सायनार्कभुजज्या तद्धनुः सायनार्कभुजः। भुजस्य चतुर्षु पदेषु तुल्यत्वात् प्रथमपदे मेषादित्रये सूर्य्यस्यैव भुजत्वाद्भुज एव सूर्य्यः। कर्कादित्रये द्वितीयपदे षड्भादूनस्यार्कस्य भुजत्वाद्भुजोनषड्भमर्कः। एवं तृतीयपदे तुलादित्रये षड्भेन हीनार्कस्य भुजत्वात् षड्युतो भुजोऽर्कः। चतुर्थपदे मकरादित्रये सूर्य्योनभगणस्य भुजत्वात् सर्य्योनभगणोऽर्क इति सर्वं वैपरीत्यात् सुगमतरम्। अथागतस्फुटसूर्य्यस्य करणागतस्फुटतुल्यत्वज्ञानमागतस्फुटसूर्य्यान्मध्यमस्य करणागतमध्यमार्कतुल्यत्वेन विशेषं वक्तुं श्लोकार्धेनाह र० ना०।

"तन्मान्दमसकृद्वामं फलं मध्यो दिवाकरः"। सू० सि०।

"तस्मादागतस्फुटसूर्य्यान्मान्दं फलं मन्दफलमसकृदनेकवारं वामं व्यस्तं संस्कृतं स्फुटसूर्य्योऽहर्गणानीतः स्फुटसूर्य्यः स्यात्। अयमर्थः। स्फुटसूर्य्यं मध्यमं प्रकल्प्य पूर्व्वमन्दोच्चात् प्रागुक्तरीत्या मन्दफलं धनमृणमानीय स्फुटसूर्य्ये ऋणं धनं कार्य्यं मध्यमसूर्य्यः। अस्मादपि मन्दफलं स्पष्टसूर्य्ये व्यस्तं संस्कृतं मध्यमोऽस्मादपि मन्दफलं स्पष्टे व्यस्तं मध्यमार्क इति यावदविशेषस्तावदसकृत् साध्योऽर्को मध्योऽहर्गणानीतो भवतीति। तथा च मध्यमार्कात् स्फुटार्कसाधनमेकवारं मन्दफलसंस्कारः स्फुटार्कान्मध्यार्कसाधने त्वनेकवारं मन्दफलव्यस्तसंस्कार इति विशेषोऽभिहितः। अत्रोपपत्तिः। मध्यमसूर्य्यादानीतमन्दफलेन संस्कृतो मध्यः स्फुटोऽर्को भवति। अयं वा तेनैव मन्दफलेन व्यस्तं संस्कृतो मध्यो भवति। अत्र स्फुटार्कान्मध्यार्कसाधने मध्यमज्ञानाभावात् तदानीतमन्दफलज्ञानमशक्यमतः स्फुटसूर्य्यं मध्यमं प्रकल्प्यानीतमन्दफलेनाभिमतासन्नेन स्फुटोऽर्को व्यस्तं संस्कृतो मध्यमासन्नः। अस्मादपि मन्दफलमभिमतासन्नमपि पूर्व्वस्मात् सूक्ष्ममिति यावदविशेषे मध्यार्कसाधितं मन्दफलं भवतीति निरवद्यं सर्वमुक्तम्। अथ मध्याह्ने छायाकर्णयोरानयनं विवक्षुः प्रथमं तात्कालिकनतांशज्ञानं कथयंस्तद्भुजकोटिज्ये कार्य्ये इत्याह" र० ना०।

"स्वाक्षार्कापक्रमयुतिर्दिक्साम्येऽन्तरमन्यथा। शेषं नतांशाः सूर्य्यस्य तद्बाहुज्या च कोटिजा" सू० सि०।

"दिक्साम्ये एकदिक्त्वे स्वदेशाक्षांशमध्याह्नकालिकसूर्य्यक्रान्त्यंशयोर्योगः। अन्यथा अत उक्तादेकदिक्त्वाद्वैपरीत्ये भिन्नदिक्त्वे इत्यर्थः अक्षांशक्रान्त्यंशयोरन्तरं कार्य्यं शेषं संस्कारोत्पन्नं सूर्य्यस्य मध्याह्ने नतांशास्तेषां नतांशानां भुजरूपाणां ज्या कोटिजा तदंशा भवति। भुजाः कोटिस्तत उत्पन्ना ज्या। चः समुच्चये। बाध्या। अत्रोपपत्तिः। याम्योत्तरवृत्ते सूर्य्यस्य मध्याह्ने खस्वस्तिकादनन्तरं नतांशा विषुवद्वृत्तपर्य्यन्तमक्षांशाः। विषुवद्वृत्तसूर्य्ययोरन्तरं क्रान्त्यंशाः। अतो दक्षिणक्रान्तौ क्रान्त्यक्षयोगो नतांशा उत्तरक्रान्तौ क्रान्त्यूनाक्षोऽक्षोनक्रान्तिर्वा दक्षिणोत्तरनतांशास्तेषां ज्या दृग्ज्या भुजस्तत्कोटिजज्या महाशङ्कुः कोटिस्त्रिज्या कर्ण इति छायाक्षेत्रे तदंशानां भुजत्वात्" अथ छायाकर्णयोरानयनमाह। र० ना०।

"शङ्कुमानाङ्गुलाभ्यस्ते भुजत्रिज्ये यथाक्रमम्। कोटिज्यया विभज्याप्ते छायाकर्णावहर्दले" सू० सि०।

"भुजत्रिज्ये नतांशज्यात्रिज्ये इत्यर्थः। शङ्कोः प्रमाणाङ्गुलानि द्वादश तैर्गुणिते कार्य्ये। उभयत्र कोटिज्यया नतांशोननवत्यंशानां ज्ययेत्यर्थः। भक्ते लब्धे द्वे यथाक्रमं भुजज्यात्रिज्यास्थानीयफलक्रमेण मध्याह्ने छायातत्कर्णौ भवतः। अत्रोपपत्तिः। द्वादशाङ्गुलशङ्कोः कोटिरिष्टच्छायाभुजस्तत्कृत्योर्योगपदं कर्ण इति छायाकर्णः कर्ण इति छायाक्षेत्रे। महाशङ्कुकोटौ दृग्ज्यात्रिज्ये भुजकर्णौ तदा द्वादशाङ्गुलशङ्कुकोटौ कावित्यनुपातेन मध्याह्नकाले छायातत्कर्णौ भवतः। साधकयोस्तात्कालिकत्वादित्युपपन्नम्" र० ना०।

अथ भुजसाधनं विवक्षुः प्रथममग्रा कर्णाग्रे आनयति।

"क्रान्तिज्या विषुवत्कर्णगुणाप्ता शङ्कुजीवया। अर्काग्रा स्वेष्टकर्णघ्नी मध्यकर्णोद्धृता स्वका" सू० सि०।

सूर्यक्रान्तिज्या अक्षकर्णगुणिता शङ्कुजीवया शङ्कुर्द्वादशाङ्गुलस्तद्रूपा ज्या तयेत्यर्थः । द्वादशभिरिति फलितम् । भक्ता फलं सूर्यस्याग्रा । उपलक्षणाद्ग्रहस्यापि । इयमग्रा स्वाभिमतकालिकच्छायाकर्णेन गुणिता मध्यकर्णोद्धृता कर्णस्य व्यासस्य मध्यमर्धमिति मध्यकर्णो व्यासार्धं त्रिज्या तयेत्यर्थः । भक्ता फलं स्वका स्वकर्णाग्रा स्यात् । अत्रोपपत्तिः । क्रान्तिज्योन्मण्डले कोटिरग्रा क्षितिजे कर्णः कुज्या भुज इत्यक्षक्षेत्रे द्वादशकोटावक्षकर्णः कर्णस्तदा क्रान्तिज्याकोटौ कः कर्ण इत्यनुपातेनाग्रा । त्रिज्यावृत्ते इयं कर्णवृत्ते केत्यनुपातेन कर्णवृत्ताग्रेत्युपपन्नम् । अथ भुजानयनं श्लोकाभ्यामाह" र० ना० ।

"विषुवच्छायुतार्काग्रा याम्ये स्यादुत्तरो भुजः । विषुवत्यां विशोध्योदग्गोले स्याद् बाहुरुत्तरः ॥ विपर्ययाद्भुजो याम्यो भवेत् प्राच्यपरान्तरे । माध्याह्निको भुजो नित्यं छाया माध्याह्निकी स्मृता" सू० सि० ।

"अर्काग्रा सूर्यस्याभीष्टकालिककर्णाग्रा याम्ये दक्षिणगोले विषुवच्छायुताक्षच्छायया युक्तोत्तरदिक्को भुजः स्यात् । उत्तरगोले विषुवत्यां पलभायां कर्णाग्रां विशोध्य न्यूनीकृत्य शेषमुत्तरदिक्को भुजः स्यात् । ननु कर्णाग्रा पलभायां यदा न शुध्यति तदा कथं भुजः साध्य इत्यत आह । विपर्ययादिति । अक्षभां कर्णाग्रायां विशोध्य शेषं दक्षिणो भुजः स्यात् । ननु भुजस्य याम्यत्वमुत्तरत्वं वा कस्मादित्यत आह प्राच्यपरान्तरे इति । पूर्वापरसूत्रादन्तरालप्रदेशे याम्ये उत्तरो वा भुजः स्यादित्यर्थः । ननु तथापि द्वितीयावधेरुक्तत्वादन्तरस्याप्रसिद्धेः पूर्वापरसूत्रात् कस्मान्तरं भुज इत्याशङ्कायामुत्तरं मध्याह्नच्छायास्वरूपकथनच्छलेनाह माध्याह्निक इति मध्याह्नकालिको भुजः सदा माध्याह्निकी मध्याह्नकालिकी छायोक्ता । तथा च छायाग्रं प्राच्यपरसूत्राद्याम्यमुत्तरं वा यदन्तरेण स भुज इति व्यक्तीकृतम् । अत्रोपपत्तिः । शङ्कुमूलं प्राच्यपरसूत्राद्याम्यमुत्तरं वा यदन्तरेण स याम्योत्तरो भुजोऽवश्यम् । शङ्कुस्तु पश्चादवलम्बसूत्रं क्षितिजसमसूत्रावधि तत्रायं भुजः शङ्कुतलाग्रयोः संस्कारः । शङ्कुतलं तु स्वाहोरात्रवृत्तस्थितोदयास्तसूत्राच्छङ्कुमूलं यदन्तरेण तद्दक्षिणम् । अग्रा तु पूर्वापरसूत्रादुदयास्तसूत्रावध्यन्तरमुत्तरदक्षिणगोलक्रमेणोत्तरदक्षिणा । तत्र महापरदिशि षड्भान्तरेऽस्ताद्ग्रक्तमिति शङ्कुतलमुत्तरमथापि व्यस्तदिक्केति तत्संस्कारो भुजो गोले सत्यतः । स महाशङ्कोरिति यदि महाशङ्कोरयं तदा द्वादशाङ्गुलशङ्कोः क इत्यनुपातेन भुजः पूर्वापरसूत्राच्छायाग्रावधिः । तत्र शङ्कुतलाग्रे द्वादशाङ्गुलशङ्कोः साधिते तत्संस्कारेण भुजः स एव । तत्राप्यग्रा पूर्वं साधिता शङ्कुतलं तु द्वादशाङ्गुलशङ्कोः पलभा महाशङ्कुः कोटिः शङ्कुतलं भुजो हृतिः कर्ण इत्यक्षक्षेत्रे द्वादशकोटौ पलभा भुजस्तदा महाशङ्कुकोटौ को भुज इत्यनुपातेन शङ्कुतलमानीय महाशङ्कोरियं द्वादशाङ्गुलशङ्कोः किमित्यनुपातेन गुणहरयोस्तुल्यत्वान्नाशेन पलभाया एवावशिष्टत्वात् । सा तूत्तरा दक्षिणगोलेऽग्राया उत्तरत्वादेकदिक्त्वेन पलभाग्रयोर्योगे उत्तरो भुजः । उत्तरगोलेऽग्राया दक्षिणत्वेन भिन्नदिक्त्वात् पलभाग्रयोरन्तरं भुजस्तत्र पलभायाः शेषमुत्तरो भुजोऽग्रायाः शेषं दक्षिणो भुजः । मध्याह्ने छायाया भुजरूपत्वान्मध्याह्नकालिको भुजो मध्याह्नच्छायेति सर्वं युक्तम् । अथ याम्योत्तरवृत्तस्थच्छायाकर्णमुक्त्वा पूर्वापरवृत्तस्थच्छायाकर्णं प्रकारद्वयेनाह" र० ना० ।

"लम्बाक्षजीवे विषुवच्छायाद्वादशसङ्गुणे । क्रान्तिज्याप्ते तु तौ कर्णौ सममण्डलगे रवौ" सू० सि० ।

"लम्बज्याक्षज्ये क्रमेणाक्षभाद्वादशभ्यां गुणिते उभयत्र क्रान्तिज्यया भक्ते तुकारात् फले, समवृत्तस्थेऽर्के तौ द्वयोश्छायासम्बद्धौ कर्णौ भवतः उभयत्र छायाकर्णः स्यात् । अत्रोपपत्तिः । स्वमस्तकोपरि पूर्वापरानुकारेण यद्वृत्तं तत्सममण्डलसञ्ज्ञम् । तत्रस्थस्य छायाकर्णानयनम् । पलभाभुजेऽक्षकर्णः कर्णस्तदा क्रान्तिज्याभुजे कः कर्ण इति समशङ्कुः क्रान्तिज्याभुजे समशङ्कुकुज्योनतज्ज्योः क्रमेण कर्णकोटित्वात् । अस्माच्छङ्कुमानाङ्गुलाभ्यस्ते इत्यादिना त्रिज्यया द्वादशगुणितानेन भक्ता तत्र ।

"छेदं लवं च परिवर्त्य हरस्य शेषः कार्योऽत्र भागहरणे गुणनाविधिश्च" इत्युक्तेः । पलभयापि गुण्या क्रान्तिज्याक्षकर्णाभ्यां भक्ता । तत्र त्रिज्या द्वादशगुणिता अक्षकर्णभक्ता लम्बज्यैव सिद्धातो लम्बज्या पलभागुणिता क्रान्तिज्याभक्ता फलं समवृत्तगतच्छायाकर्णः । अथात्रैव पलभाभुजे द्वादशकोटिरग्राज्याभुजे का कोटिरिति लम्बज्याग्रहणे पलभयोस्तुल्यत्वान्नाशादक्षज्या द्वादशगुणा

क्रान्तिज्या भक्ता छायाकर्णः सममण्डलगतः । क्रान्तिज्यायाः सदायं कर्णः सिद्ध्येन्न हि सर्वदा समवृत्तगतो ग्रह इति समवृत्तगतग्रहस्यैव कर्णः साध्यो नान्यदेति सूचनार्थं सममण्डलगे रवावित्युक्तम्" ।

ननु ग्रहाधिष्ठिताहोरात्रपूर्वापरवृत्तसम्पातादवलम्बरूपसमशङ्कोर्गोले प्रत्यक्षसिद्धस्य साधनार्थं समवृत्तस्थत्वाभावेऽपि छायाकर्णः साध्यः । सममण्डलगे रवावित्युक्तिस्तु स्वाधिष्ठिताहोरात्रवृत्तपरा न त्वन्यदा न साध्योऽन्यथालक्ष्यत्वेन प्रकारस्यातिप्रसङ्गापत्तेः । न हि प्रकारे तद्व्यावर्तकं विशेषणं प्रसिद्धं येन नातिप्रसङ्गः । परन्तु यदा सममण्डलेऽक्षांशाधिकक्रान्त्या ग्रहाधिष्ठितद्युरात्रवृत्तानामसम्बन्धस्तदा गोले समशङ्कोरदर्शनात् तत्र कथं तत्साधनमनिवारितमित्यतः सममण्डलगे रवावित्यस्य पूर्वोक्त एवार्थ इत्यभिप्रायं सममण्डलकर्णानयनप्रकारान्तरकथनच्छलेनाह" र० ना० ।

"सौम्याक्षोना यदा क्रान्तिः स्यात्तदा द्युदलश्रवः ।
विषुवच्छाययाभ्यस्तः कर्णो मध्याग्रयोद्धृतः" सू० सि०

"यदोत्तरा क्रान्तिरक्षादल्पा स्यात् तदा द्युदलश्रवः समवृत्तस्थार्ककान्तिसाधितमध्याह्नकर्णः । न तु मध्याह्नकालिकः । अक्षभया गुणितो मध्याग्रया गृहीतमध्याह्नकर्णाग्रया भक्तः फलं सममण्डलगतग्रहबिम्बस्य छायाकर्णः स्यात् । अत्र सौम्येत्यनेन दक्षिणक्रान्तौ तदसाधनं सममण्डलगतग्रहबिम्बस्यादर्शनादिति स्फुटमुक्तम् । अन्यथाक्षाल्पक्रान्तौ दक्षिणगोले समशङ्कोः प्रत्यक्षत्वात् तन्निवारणानुपपत्तेः । अत्रोपपत्तिः । सममण्डलप्रवेशकालिकमध्याह्नच्छायाकर्णादवस्तुभूतात् कर्णेन द्वादशाङ्गुलशङ्कुस्तदा त्रिज्याकर्णेन क इति मध्यशङ्कुस्तात्कालिकः । द्वादशकोटावक्षभा भुजस्तदा महाशङ्कुकोटौ क इति शङ्कुतलम् । द्वादशनाशात् पलभात्रिज्याघातो मध्यकर्णभक्त इति । अनेन भुजेन मध्यशङ्कुस्तदाऽग्राभुजेन क इति समशङ्कुर्द्वादशाग्रामध्यकर्णघातो मध्यकर्णपलभाभ्यां भक्तोऽग्राभुजे समशङ्कुतद्दृष्ट्योः कोटिकर्णत्वात् । अस्मात् पूर्वप्रकारेण छायाकर्णानयने द्वादशनाशान्मध्यकर्णपलभात्रिज्याघातोऽग्रामध्यकर्णाभ्यां भक्त इति तुल्ययोर्मध्यकर्णमितगुणहरयोर्नाशाकरणेन सिद्धम् स्वतन्त्रेच्छस्य नियोक्तुमशक्यत्वात् । तत्रापि भाज्यहरौ त्रिज्ययाऽपवर्त्य हरस्थाने मध्यकर्णगुणिताग्रा त्रिज्याभक्तेति मध्यकर्णाग्रा सिद्धातो मध्याग्रयोद्धृत इत्युक्तम् । भाज्यस्थाने तु मध्यकर्णपलभाघात इति दक्षिणगोले ग्रहादर्शनान्न साधितः । उत्तरगोलेऽपि क्रान्तिरक्षाधिका तदा सममण्डलप्रवेशासम्भवान्न साधितः सममण्डलावध्यक्षांशत्वात् । अल्पक्रान्तौ तत्सम्भवात् साधितः । नह्यसिद्धं गोले गणितसाध्यं मानाभावादित्युपपन्नं सौम्येत्यादि । भास्कराचार्यैस्तु "मार्तण्डः सममण्डलं प्रविशति स्वल्पेऽपमे स्यात् पलात् इशग्रो ह्युत्तरगोल एव स विशन् साध्या तदैवास्य भा । अप्राप्तेऽपि समाख्यमण्डलमिने यः शङ्कुरुत्पद्यते नूनं सोऽपि परानुपातविधये नैवं क्वचिद्दुष्यति" इत्यनेन तत्रापि साधितः । अथ स्वाभिमतकर्णेन स्वस्वकाले भुजार्थं कर्णवृत्ताग्रा साध्येति सूचनार्थं कर्णाग्रामुक्तप्रकारेण पुनरपि मध्यकर्ण इति प्रागुक्तस्य स्फुटीकरणार्थं चाह" र० ना० ।

"स्वक्रान्तिज्यात्रिजीवाघ्नी लम्बज्याप्ताऽग्रा मौर्विका ।
स्वेष्टकर्णहता भक्ता त्रिज्ययाग्राङ्गुलादिका" सू० सि०

"स्वाभिमतकालिकक्रान्तिज्या त्रिज्यया गुणिता लम्बज्यया भक्ता फलमग्रा ज्यारूपा । लम्बज्याकोटौ त्रिज्या कर्णः क्रान्तिज्याकोटौ कः कर्ण इत्यग्रेत्युपपत्तिः । उत्तरार्धं पुनरुक्तं व्याख्यातप्रायम् । यदि तु पूर्वोक्तकर्णवृत्ताग्रानयनश्लोके शङ्कुजीवयेत्यस्य शङ्कोः कोटिरूपत्वात् पूर्वसाधितनतांशभुजकोटिज्ययेत्यर्थो मध्यकर्ण इत्यस्य च तात्कालिकमध्याह्नच्छायायाः कर्णस्तदा न पुनरुक्तम् । परन्त्वर्काग्रेत्यस्य तात्कालिकमध्याह्नकालिककर्णाग्रार्थः स्वकेत्यस्य च स्वाभीष्टकालिककर्णाग्रार्थो बोध्यः । एतदुपपत्तिस्तु द्वादशकोटावक्षकर्णः कर्णस्तदा क्रान्तिज्याकोटौ कः कर्ण इति स्वकालिकाग्रा । त्रिज्यावृत्ते इयं तदा तात्कालिकमध्याह्नकालिकच्छायाकर्णेन नतांशकोटिज्याभक्तद्वादशत्रिज्याघातात्मकेन केति द्वादशत्रिज्याघातयोर्गुणहरत्वेन तुल्ययोर्नाशादक्षकर्णगुणितक्रान्तिज्या तात्कालिकमध्याह्ननतांशकोटिज्यया भक्तेति तात्कालिकमध्याह्नच्छायाकर्णेनेयं कर्णाग्रा तदा स्वाभीष्टकालिकच्छायाकर्णेन केति स्वकालिकी कर्णाग्रेत्युपपन्ना । सूर्याधिष्ठिताहोरात्रवृत्तयाम्योत्तरवृत्तोर्ध्वसम्पातस्तात्कालिकमध्याह्न परानुपातार्थं बोध्यम् । अथ कोणच्छायाकर्णसाधनार्थं कोणशङ्कुदृग्ज्ये श्लोकपञ्चकेनाह" र० ना० ।

"त्रिज्यावर्गार्धतोऽग्रज्या वर्गोनाद्द्वादशाहतात्। पुनर्द्वादशनिघ्नाच्च लभ्यते यत् फलं बुधैः। शङ्कुवर्गार्धसंयुक्तविषुवद्वर्गभाजितात्। तदेव करणीनाम तां पृथक् स्थापयेद्बुधः। अर्कघ्नी विषुवच्छायाऽग्रज्यया गुणिता तथा। भक्ता फलाख्यं तद्वर्गसंयुक्तकरणीपदम्। फलेन हीनसंयुक्तं दक्षिणोत्तरगोलयोः। याम्ययोर्विदिशोः शङ्कुरेवं याम्योत्तरे रवौ। परिभ्रमति शङ्कोस्तु शङ्कुरुत्तरयोस्तु सः। तत्त्रिज्यावर्गविश्लेषान्मूलं दृग्ज्याभिधीयते" सू॰ सि॰।

"पूर्वप्रकारानीतैस्तात्कालिकाग्रज्याया न तु कर्णाग्रायाः पूर्वं कर्णस्यैवासिद्धेः। वर्गेण हीनात् त्रिज्यावर्गार्धाद्द्वादशगुणात् पुनर्द्वितीयवारं द्वादशगुणात्। चः समुच्चये। तेन द्वादशगुणितस्य द्विधा स्थापननिरासाच्चतुश्चत्वारिंशदधिकशतगुणितादित्यर्थः। पृथक् गुणकोक्तिस्तु गुणनसुखार्थम्। शङ्कोर्द्वादशाङ्गुलात्मकस्य वर्गार्धेन द्विसप्तत्या युक्तेन पलभावर्गेण भाजिताद्बुधैर्गणितकर्तृभिर्यत्सङ्ख्यामितं फलं प्राप्यते तत्सङ्ख्यामितं करणीनामसञ्ज्ञया करणी। तां करणीं बुधो गणकः पृथगेकत्र स्थाने स्थापयेत्। ततो द्वादशगुणिता पलभाग्रज्यया पूर्वगृहीतया गुणिता तथा द्विसप्ततियुतेन पलभावर्गेण भक्ता लब्धं फलसञ्ज्ञं तस्य फलस्य वर्गेण युतायाः करण्या मूलं दक्षिणोत्तरगोलयोः क्रमेण फलेनोनयुतम्। एवमुक्तप्रकारेण सिद्धः शङ्कुः, शङ्कोर्गणितकर्तुः सकाशाद्दक्षिणोत्तरे सूर्ये परिभ्रमति सति तुकारः क्रमार्थे क्रमेण याम्ययोरुत्तरयोर्विदिशोराग्नेयनैरृत्योरैशानीवायव्योः कोणयोरित्यर्थः। द्वितीयतुकारः पूर्वापरदिने विभागक्रमार्थकत्वेन विदिशोरित्यत्रान्वेति तेन दिनपूर्वार्धे आग्नेयैशान्योर्दक्षिणोत्तरक्रमेण, दिनापरार्धे नैरृत्यवायव्योर्दक्षिणोत्तरक्रमेणेति फलितार्थः। स कोणसञ्ज्ञः शङ्कुः स्यात्। कोणशङ्कुत्रिज्ययोर्वर्गान्तरान्मूलं दृग्ज्योच्यते" र॰ ना॰।

अथैतच्छायाच्छायाकर्णयोरानयनमाह।

"स्वशङ्कुना विभज्याप्ते दृक्त्रिज्ये द्वादशाहते। छायाकर्णौ तु कोणेषु यथास्वं देशकालयोः" सू॰ सि॰।

"कोणीयदृग्ज्यात्रिज्ये द्वादशगुणे दृग्ज्यासम्बन्धिकोणशङ्कुना भक्ते लब्धे दृग्ज्यात्रिज्याक्रमेण छायाच्छायाकर्णौ स्तः। तुकारादेवं कोणेषु चतुर्षु देशकालयोः यथास्वं स्वमनतिक्रम्येति यथास्वं यथादेशं यथाकालं छायाच्छायाकर्णौ साध्यौ। अयमर्थः। क्वचिद्देशे चतुर्षु कोणेषु क्वचिच्च कोणद्वये क्वचिच्च दिनार्ध एव कोणद्वय इत्यादि देशकालानुरोधेन यथायोग्यमिति। अत्रोपपत्तिः प्रागुक्ता स्पष्टा च"। अथ दिक्प्रदेशसम्बन्धेन च्छायाकर्णावुक्त्वा कालसम्बन्धेन सार्धश्लोकाभ्यामाह" र॰ ना॰।

"त्रिज्योदक्चरजायुक्ता याम्यायां तद्विवर्जिता। अन्त्या नतोत्क्रमज्योना स्वाहोरात्रार्धसङ्गुणा। त्रिज्याभक्ता भवेच्छेदो लम्बज्याघ्नोऽथ भाजितः। त्रिभज्यया भवेच्छङ्कुस्तद्वर्गं परिशोधयेत्। त्रिज्यावर्गात् पदं दृग्ज्या छायाकर्णौ तु पूर्ववत्"। सू॰ सि॰

"उत्तरगोले चरोत्पन्नया ज्यया चरज्ययेत्यर्थः। पूर्वं चरानयने चरज्यायाश्चरजेति सञ्ज्ञोक्तेः। युक्ता त्रिज्याऽन्त्या स्यात्। याम्यगोले तया चरज्ययोना त्रिज्याऽन्त्या स्यात्। नतोत्क्रमज्योना सूर्योदयाद्दिनगतघट्यो दिनशेषघट्यो वा दिनार्धान्तर्गता उन्नतसञ्ज्ञास्ताभिरूनं दिनार्धं नतकालो घट्यात्मकस्तस्मादसवो लिप्तास्तत्त्वयमैरित्यादिविधिना, सुनयो रन्ध्रयमला इत्याद्युक्तोत्क्रमज्यापिण्डैर्ज्योत्क्रमज्या। पञ्चदशघट्यधिकनते तु पञ्चदशघट्यूननतस्य क्रमज्याखण्डैः क्रमज्या तया युक्ता त्रिज्योत्क्रमज्या भवति। तया हीनेत्यर्थः। स्वाहोरात्रार्धसङ्गुणा। स्वगृहीतचरज्यासम्बन्ध्यहोरात्रवृत्तव्यासार्धं द्युज्या तया गुणिता त्रिज्यया भक्ता फलं छेदसञ्ज्ञं स्यात्। अथानन्तरं छेदो लम्बज्यया गुणितस्त्रिज्यया भाज्यः फलमिष्टकाले शङ्कुः स्यात्। तस्य शङ्कोर्वर्गं त्रिज्यावर्गाच्छोधयेत्। शेषस्य मूलं दृग्ज्या। आभ्यां छायाकर्णौ तु पूर्ववत्। पूर्वोक्तरीत्या भवतः। अत्र च्छायाकर्णौ त्विति कोणच्छायाकर्णसाधनश्लोकान्तभागस्य ग्रहणात् तच्छ्लोकोक्तरीत्याऽभीष्टशङ्कुदृग्ज्याभ्यां छायाकर्णौ साध्यावित्युक्तम्। अत्रोपपत्तिः। याम्योत्तरवृत्तोर्ध्वभागग्रहाधिष्ठितद्युरात्रवृत्तसम्पातात् क्षितिजद्युरात्रवृत्तसम्पातद्वयबद्धोदयास्तसूत्रं क्षितिजसम्बद्धयाम्योत्तरवृत्तसूत्रसम्पातपर्यन्तमहोरात्रवृत्ते सूत्रं त्रिज्यानुरुद्धमन्त्या। सा तूत्तरगोले चरज्यायुता त्रिज्या दक्षिणगोले चरज्ययोना त्रिज्या। उन्मण्डलयाम्योत्तरसूत्रावध्यहोरात्रवृत्तव्यासार्धं त्रिज्यात्वात् उन्मण्डलस्योत्तरदक्षिणक्रमेण क्षितिजादूर्ध्वाधःस्थत्वेन तद्याम्योत्तरसूत्रयोर्मध्ये चरज्यात्वात्।

ग्रहाहोरात्रवृत्ते याम्योत्तराऽहोरात्रवृत्तसम्पातादुभयत्र नतघट्यन्तरस्थाने तत्सूत्रं नतकालस्य सम्पूर्णज्या। तन्मध्यादूर्ध्वसूत्रं शररूपं नतोत्क्रमज्या। तया हीनान्त्या ग्रहस्थानादहोरात्रवृत्ते उदयास्तसूत्रपर्यन्तमृजुसूत्रं त्रिज्यानुरूद्धमिष्टान्त्या। तत्तुल्या याम्योत्तरोर्ध्वव्याससूत्रान्तर्गता सा द्युज्याप्रमाणसाधितेष्टहृतिः। द्युज्यागुणा त्रिज्याभक्ता फलं छेदः। यदि तस्मात् त्रिज्याकर्णे लम्बज्या कोटिस्तदेष्टहृतिकर्णे का कोटिरित्यनुपातेनेष्टशङ्कुः। अस्माद्दृग्ज्या छाया तत्कर्णा उक्तरीत्या सिद्धान्तीत्युक्तमुपपन्नम्। अथ श्लोकत्रयेण छायाकर्णाभ्यां नतकालानयनमाह" र० ना०।

"अभीष्टच्छाययाभ्यस्ता त्रिज्या तत्कर्णभाजिता। दृग्ज्या तद्वर्गसंशुद्धात् त्रिज्यावर्गाच्च यत् पदम्। शङ्कुः सत्रिभजीवाघ्नः स्वलम्बज्याविभाजितः। छेदः स त्रिज्ययाभ्यस्तः स्वाहोरात्रार्द्धभाजितः। उन्नतज्या तया हीना स्वान्त्या शेषस्य कार्मुकम्। उत्क्रमज्याभिरेवं स्युः प्राक्पश्चार्धनतासवः"। सू० सि०

"अभीष्टकालिकच्छायया गुणिता त्रिज्या गृहीतच्छायायाश्छायाकर्णेन भक्ता फलं दृग्ज्या दृग्ज्याया वर्गेण हीनात् त्रिज्यावर्गाद्यत्संख्यामितं मूलम्। चकारोयत्तदोर्नित्यसम्बन्धात् तच्छब्दपरः। अभीष्टशङ्कुः। स इष्टशङ्कुस्त्रिज्यया गुणितः स्वदेशीयलम्बज्यया भक्तः फलं छेदः। स छेदस्त्रिज्यया गुणितो द्युज्यया भक्त उन्नतकालस्य ज्या विलक्षणा। यद्यनुरुन्नतकालो न भवति। तयानीतयोन्नतज्यया हीना स्वान्त्या स्वद्युज्यासम्बद्धचरज्यावगतान्त्या। अवशेषस्योत्क्रमज्याभिः "मुनयोरन्ध्रयमलाः" इत्याद्युक्तोत्क्रमज्यापिण्डैर्धनुः। अवशेषस्य त्रिज्याधिकत्वे तु यदधिकं तस्य क्रमज्यापिण्डैर्धनुस्ततःपञ्चाशद्युक्तमुत्क्रमधनुर्भवति। एवं प्रकारेण सिद्धाङ्का दिनस्य पूर्वापरार्धयोर्नतकालासवो भवन्ति। अत्रोपपत्तिः। पूर्वोक्तव्यत्यासात् सुगमा। तत्र छेदस्त्रिज्यापरिणत इष्टान्त्या तस्या ज्यात्वासम्भवः। अवध्युदयास्तसूत्रस्याहोरात्रवृत्तव्याससूत्रत्वाभावादित्युन्नतज्याकारेण सूत्रान्तरत्वेन दर्शनादुन्नतज्येत्युक्तम्। अत एव भास्कराचार्यैः "इष्टान्त्यकमुन्नकालमौर्वीतुल्यां प्रकल्प्य" इत्याद्युक्तम्। तदनुरूनामुन्नतकालत्वापत्त्या तया हीनेत्यादिभागस्य व्यर्थत्वापत्तेरिति दिक्" र० ना०।

"इति त्रिप्रश्नाधिकारः" सू० सि०।

"दिग्देशकालानां प्रतिपादनमिदं परिपूर्तिमाप्तमित्यर्थः। तत्र दिशां साधनं शिलातल इत्यादि नियतं, तत्सम्बन्धेन समकोणयाम्योत्तरशङ्कूनां साधनान्यपि दिगन्तर्गतान्यनियतानि। पलभालम्बाक्षादिसाधनं देशनिरूपणं नियतम्। अपाचरादिसाधनमनियतम्। कालसाधनं तद्वशाच्छायादिसाधनं च कालनिरूपणमिति विवेकः" र० ना०।

एवं शङ्कुच्छायया देशभेदेन सूक्ष्मे कालसाधने स्थिते वक्ष्यमाणच्छायापादेन कालज्ञानं स्थूलं किञ्चिद्देशविषयश्चेत्यवधेयम् छायाकर्णादिकं प्रसङ्गादत्रोक्तम्। तत्तदर्थे अतस्तद् विशिष्य नोक्तम्।

छायाकर त्रि० छायां करोति छत्रेण कृ—ट ६त०। [छत्रधरे हेमच०।

छायाङ्क पु० छाया सूर्य्यप्रतिविम्बः अङ्कोऽस्य। चन्द्रे हेमच०। तस्य सूर्य्यकिरणप्रतिविम्बेनैव प्रकाशः इन्दुशब्दे ९३१पृ० दृ० स० उक्तदिशा दर्शितः "छाया मृगाङ्क छायाभृदादयोऽपि चन्द्रे।

छायातनय पु० ६त०। शनैश्चरे हला०। छायाशब्दे तस्य तत् पुत्रकथा दृश्या। छायासुतादयोऽप्यत्र। "सूर्य्यपुत्र महाबाहुं छायागर्भसमुद्भवम्" शनिप्रणाममन्त्रः।

छायातरु पु० छायाप्रधानस्तरुः शा० त०। "पूर्व्वाह्णे च पराह्णे च तलं यस्य न मुञ्चति। अत्यन्तशीतला छाया स छायातरुरुच्यते" इत्युक्ते छायाप्रधाने वृक्षे। "स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु" मेघः। छायावृक्षोऽप्यत्र स च नमेरुवृक्षे शब्दार्थचि०।

छायापथ छायायुक्तः पन्थाः। आकाशस्थे ज्योतिश्चक्रमध्यवर्त्तिनि दक्षिणोत्तरायते तिरश्चीने आकाशस्थानभेदे। "छायापथेनेव शरत्प्रसन्नम्" रघुः।

छायापाद पु० छायायाः शङ्कुच्छायायाः पाद इव। द्वादशाङ्गुलशङ्कोश्छायापादमाने। मासभेदे मध्याह्ने तत्संख्याभेदः तेन च दिनमानज्ञानं चाह" ज्यो० त० "अर्काङ्गुला तु सप्तपदा काष्ठी द्व्यङ्गुलमूलिका। शङ्कुसंज्ञा भवेच्चैव तच्छायां परिकल्पयेत्। मध्याह्नहीनैः षट्पूरितद्विवादण्डरादित्ययुक्तैश्छायाङ्गुलैर्हरेत्। लब्धं दण्डादिकं भवेत्। पूर्व्वाह्णच्छाययातीतं पराह्णेच्छायर्व्यक्रम्। शून्यकराश्ववाणाक्षदिशोरुद्राः।१। २।५।८।१०।११। क्रमोत्क्रमैः। आषाढ़ादिषु माघेषु छाया माध्याह्निकी मता। अयनांशक्रमान्ते व्युत्-

क्रमेणादितो बुधैः। संख्योक्तान्यदिने भागहारे हृतीतरे तथा"। प्रकारान्तरन्तु, "पञ्चाब्धिरामयुग्मैकशून्यैकयुग्मरामाब्धयः। चतुःपञ्चर्त्तवो) ५,४,३,२,१,०।१,२,३,४,५,६, मासात् छायापादा दिनार्द्धके। अयनांशजमासान्ते विप्रादगणनक्रमात्। दिने दिने भागहारो मध्यच्छायापदे मतः। कङ्कुः षष्ट्यंशको व्यङ्घ्रिरङ्गुलैर्व्यङ्गुलिस्तथा। सद्रूनं द्विशतं हीनं मध्यपादैश्च षड्गुणैः। छायापादैश्च मध्योनैः षड्युतैर्द्विगुणैर्हरेत्। प्राग्भ्रमादिपदार्द्धं तु लब्धा दण्डा गतैष्यकाः। प्राक् पश्चिमदिनार्द्धात्तु शेषात् षष्टिगुणात्पलम्"। इदञ्च देशभेदविषयं स्थूलं च सूक्ष्मन्तु सू॰ सि॰ उक्तं तच्च छायाशब्दे द्रष्टव्यम्।

छायापुरुष पु॰ छायायां दृश्यः पुरुषः पुरुषाकृतिः। आकाशे द्रष्टव्ये निजच्छायानुरूपे पुरुषाकृतियुक्ते पदार्थे। तद्दर्शनोपायमाह योगप्रदीपिकायाम् ५ पटले शिव उवाच। निरभ्रं गगनं देवि ! यदा भवति निर्म्मलम्। तदा छायासुखो भूत्वा निश्चलः प्रयतो धिया। स्वच्छायाकल्पमालोक्य स्वगुरूक्तक्रमेण वै। सम्मुखं गगनं पश्येन्निर्निमेषस्तथैकधीः। शुद्धस्फटिकसङ्काशः पुरुषस्तत्र दृश्यते। न दृश्यते यदा तत्र पुनस्तद्वत् परीक्षयेत्। बहुधा दर्शनेनैव साक्षात्कारो भवेत् ध्रुवम्। कस्यचित् भाग्यतो दृश्येत् यदि विम्बोऽक्षिगोचरः। भवत्येव न सन्देहो गुरुविश्वासतः शिवे !। गुरुं सम्यक् पूजयित्वा पश्येच्छायां समाहितः। तथा षण्मासपर्य्यन्तं मृत्युस्तस्य न विद्यते। शिरोहीनं यदा पश्येत् षण्मासाभ्यन्तरे मृतिः। यदा पादौ न दृश्येते भार्य्याहानिर्न संशयः। न दृश्येते यदा पाणी भ्रातृहानिर्न संशयः। एतज् ज्ञात्वा सुधीः सम्यक् गङ्गातीरं समाश्रयेत्। योगाभ्यासेन सततं प्राणायामेन संस्कृतः। यथा वा तत्समीपस्थो लक्षं मृत्युञ्जयं जपेत्। योद्य भुक्तो हविष्याशी यतवाग् यतमानसः। मृत्युञ्जयेन्न सन्देहो अन्यथा मृत्युमृच्छति। यदा तु मलिनं पश्येत् ज्वरपीडा भवेत्तदा। तस्य शान्तिं प्रकुर्व्वीत शिवसेवां समाहितः। रक्तवर्णं यदा पश्येदैश्वर्य्यं भवति ध्रुवम्। मध्यच्छिद्रं यदा पश्येत् शत्रुघातो भवेत्तदा। एवं सन्दर्शनं देवि ! ज्ञानवान् भवति ध्रुवम्। नारदाय पुरा प्रोक्तं मया पुरुषदर्शनम्। तत्प्रसादान्महायोगी भूत्वा लोकांश्चरत्यसौ। स्वच्छायादर्शनं देवि ! कलौ पुरुषलक्षणम्। दीर्घायुः समवाप्नोति ज्ञानञ्चापि सुनिर्म्मलम्"।

छायायन्त्र न॰ छायया कालज्ञानसाधकं यन्त्रम्। कालज्ञानसाधकेषु शङ्कुयष्टिचक्रप्रभृतिषु यन्त्रभेदे। "शङ्कुयष्टिधनुश्चक्रैश्छायायन्त्रैरनेकधा। गुरूपदेशाद्विज्ञेयं कालज्ञानमतन्द्रितैः" सू॰ सि॰।

छायामान पु॰ छायया सूर्य्यप्रतिविम्बेन मीयते मा-कर्म्मणि ल्युट्। १ चन्द्रे हेमच॰ ६ त॰। २ छायायाः प्रमाणे न॰।

छायामित्र न॰ छायाया मित्रमिव। आतपत्रे शब्दरत्ना॰।

छायामृगधर पु॰ छायारूपं मृगं धरति धृ-अच्। चन्द्रे त्रिका॰। छायाशशधरादयोऽप्यत्र।

छायाविप्रतिपत्ति स्त्री छायानां देहकान्तीनां नखप्रभृतीनां विप्रतिपत्तिर्विरुद्धा प्रतिपत्तिः। सुश्रुतोक्ते मरणसूचके देहकान्त्यादीनामन्यथाभावे यथाह सुश्रुतः। "अथातश्छायाविप्रतिपत्तिमध्यायं व्याख्यास्यामः। श्यावा लोहितिका नीला पीतिका वापि मानवम्। अभिद्रवति यं छाया स परासुरसंशयम्। ह्रीश्रियौ नश्यतो यस्य तेज ओजः स्मृतिः प्रभा। अकस्माद्यं भजन्ते नो स परासुरसंशयम्। यस्याधरौष्ठः पतितः क्षिप्तश्चोर्द्धं तथोत्तरः। उभौ वा जाम्बवाभासौ दुर्लभं तस्य जीवितम्। आरक्ता दशना यस्य श्यावा वा स्युः पतन्ति च। खञ्जनप्रतिमा वापि तं गतायुषमादिशेत्। कृष्णा स्तब्धावलिप्ता वा जिह्वा शूना च यस्य वै। कर्कशा वा भवेद्यस्य सोऽचिराद्विजहात्यसून्। कुटिला स्फुटिता वापि शुष्का वा यस्य नासिका। अवस्फूर्जति मग्ना वा न स जीवति मानवः। सङ्क्षिप्ते विषमे स्तब्धे रक्ते स्रस्ते च लोचने। स्यातां वा प्रस्रुते यस्य स गतायुर्नरो ध्रुवम्। केशाः सीमन्तिनो यस्य संक्षिप्ते विनते भ्रुवौ। लुनन्ति चाक्षिपक्ष्माणि सोऽचिराद्याति मृत्यवे। नाहरत्यन्नमास्यस्थं न धारयति यः शिरः। एकाग्रदृष्टिर्मूढात्मा सद्यः प्राणान् जहाति सः। बलवान् दुर्ब्बलो वापि सम्मोहं योऽधिगच्छति। उत्थाप्यमानो बहुशस्तं धीरः परिवर्जयेत्। उत्तानः सर्व्वदा शेते पादौ विकुरुते च यः। विप्रसारणशीलो वा न स जीवति मानवः। शीतपादकरोच्छ्वासश्छिन्नश्वासश्च यो भवेत्। काकोच्छ्वासश्च यो मर्त्त्यस्तं धीरः परिवर्जयेत्। निद्रा न छिद्यते यस्य यो वा जागर्त्ति सर्व्वदा। मुह्येद्वा वक्तुकामश्च प्रत्याख्येयः

स जानता। उत्तरौष्ठञ्च यो लिह्यादुद्गारांश्च करोति यः। प्रेतैर्व्वा भाषते सार्द्धं प्रेतरूपं तमादिशेत्। खेभ्यः सरोमकूपेभ्यो यस्य रक्तं प्रवर्त्तते। पुरुषस्याविषार्त्तस्य सद्यो जह्यात्स जीवितम्। वाताष्ठीला तु हृदये यस्योर्द्ध्वमनुयायिनी। रुजान्नविद्वेषकरी स परासुरसंशयम्। अनन्योपद्रवकृतः शोफः पादसमुत्थितः। पुरुषं हन्ति नारीन्तु मुखजो गुह्यजो द्वयम्। अतिसारो ज्वरो हिक्का छर्द्दिः शूनाण्डमेढ्रता। श्वासिनः कासिनो वापि यस्य तं परिवर्जयेत्। स्वेदो दाहश्च बलवान् हिक्का श्वासश्च मानवम्। बलवन्तमपि प्राणैर्व्वियुञ्जन्ति न संशयः। श्यावा जिह्वा भवेद्यस्य सव्यं चाक्षि निमज्जति। मुखञ्च जायते पूति यस्य तं परिवर्जयेत्। वक्त्रमापूर्य्यतेऽश्रूणां स्विद्यतश्चरणावुभौ। चक्षुश्चाकुलतां याति यमराष्ट्रं गमिष्यतः। अतिमात्रं लघूनि स्युर्गात्राणि गुरुकाणि च। यस्याकस्मात्स विज्ञेयो गन्ता वैवस्वतालयम्। पङ्कमत्स्यवसातैलघृतगन्धांश्च ये नराः। मृष्टगन्धांश्च ये वान्ति गन्तारस्ते यमालयम्। यूका ललाटमायान्ति बलिं नाश्नन्ति वायसाः। येषां वापि रतिर्नास्ति यातारस्ते यमालयम्। ज्वरातिसारशोफाः स्युर्यस्यान्योन्यावसादिनः। प्रक्षीणबलमांसस्य नासौ शक्यश्चिकित्सितुम्। क्षीणस्य यस्य क्षुत्तृष्णे हृद्यैर्मिष्टैर्हितैस्तथा। न शाम्यतोऽन्नपानैश्च तस्य मृत्युरुपस्थितः। प्रवाहिका शिरःशूलं कोष्ठशूलञ्च दारुणम्। पिपासा बलहानिश्च तस्य मृत्युरुपस्थितः। विषमेणोपचारेण कर्म्मभिश्च पुराकृतैः। अनित्यत्वाच्च जन्तूनां जीवितं निधनं व्रजेत्। प्रेतभूतपिशाचाश्च रक्षांसि विविधानि च। मरणाभिमुखं नित्यमुपसर्पन्ति मानवम्। तानि भेषजवीर्य्याणि प्रतिघ्नन्ति जिघांसया। तस्मान्मोघाः क्रियाः सर्व्वा भवन्त्येव गतायुषः”।

छाल पु०न० छो० वा०, अलच् अर्द्धर्चा०। वल्कले।

छालिक्य पु० छलिके रूपकभेदे भवः ष्यञ्। गानभेदे। तच्च गानं देवलोके स्थितं वासुदेवेन तत आनीय नरलोके प्रचारितं यथाह हरिवं० १४८ अ०।

“छालिक्यगानं बहु संविधानं यद्देवगान्धर्व्वमुदाहरन्ति। जग्राह वीणामथ नारदस्तु षड्ग्रामरागादिसमाधियुक्ताम्। हल्लीषकन्तु स्वयमेव कृष्णः सवंशघोषं नरपप्रियार्थम्। मृदङ्गवाद्यानपरांश्च वाद्यान् वराप्सरास्ता जगदुः प्रतीताः। आसारितान्ते च ततः प्रतीता रम्भोत्थिता स्वाभिनयाय तज्ज्ञा। तयाभिनीते वरगात्रयष्ट्या तुतोष रामश्च जनार्द्दनश्च। अथोर्वशी चारु विशालनेत्रा हेमा च राजन्नथ मिश्रकेशी। तिलोत्तमा चाप्यथ मेनका च एतास्तथाऽन्याश्च हरिप्रियार्थम्। जगुस्तथैवाभिनयञ्च चक्रुरिष्टैश्च कामैर्म्मनसोऽनुकूलैः। ता वासुदेवोऽप्यनुरक्तचित्तः संनृत्यगीताभिनयैरुदारैः। नरेन्द्रसूनो! परितोषितेन ताम्बूलयोगेन वराप्सरोभिः। तदागताभिर्न्नवराहृतास्तु कृष्णप्रसया मानमयास्तथैव। फलानि गन्धोत्तमवन्ति वीराश्छालिक्यमान्धर्व्वमथाहृतञ्च। कृष्णेच्छया च त्रिदिवान्न देव! अनुग्रहार्थं भुवि मानुषाणाम्। स्थितञ्च रम्यं हरितेजसैव प्रयोजयामास स रौक्मिणेयः। छालिक्यगान्धर्व्वमुदारबुद्धिस्तेनैव ताम्बूलमथ प्रयुक्तम्। प्रयोजितं षड्भिरिन्द्रतुल्यैश्छालिक्यमिष्टं सततं नराणाम्। शुभावहं वृद्धिकरं प्रशस्तं मङ्गल्यमेवाथ तथा यशस्यम्। पुण्यञ्च पुष्ट्यभ्युदयावहञ्च नारायणस्येष्टमुदारकीर्त्तेः। जयावहं धर्म्मधुरावहञ्च दुःस्वप्ननाशं परिकीर्त्त्यमानम्। करोति पापञ्च तथा विहन्ति शृण्वन् सुरावासगतो नरेन्द्रः। छालिक्यगन्धर्व्वमुदारकीर्त्तिर्म्मेने किलैकं दिवसं सहस्रम्। चतुर्युगानान्त्वपरेवतोऽथ ततः प्रवृत्ता सुकुमारजातिः। गान्धर्व्वजातिश्च तथा पराणि दीपादाथा दीपशतानि राजन्!। विवेद कृष्णश्च सनारदश्च प्रद्युम्नमुख्यैर्नृपभैममुख्यैः। विज्ञातमेतद्धि परं यथावद्देशमात्राणि जनैस्तु लोके। जानन्ति छालिक्यगुणोदयानां तोयं नदीनामथ वा समुद्रे। ज्ञातुं हि शक्यं हिमवान् गिरिर्व्वा पलायतो वा गुणतोऽथ वापि। शक्यं न छालिक्यमृते तपोभिस्ताले विधानान्यथ मूर्च्छनासु। षड्ग्रामरागेषु च तत्र कार्य्यं तस्यैकदेशावयवेन राजन्!। लेशाभिधानसुकुमारजातिं निष्ठां सुदुःखेन नराः प्रयान्ति। छालिक्यगान्धर्व्वगुणोदयेषु ये देवगन्धर्व्वमहर्षिसंघाः। निष्ठां प्रयान्तीत्यवगच्छ बुद्ध्या छालिक्यमेवं मधुसूदनेन। भैमोत्तमानां नरदेव! दत्तं लोकस्य चानुग्रहकाम्ययैव”।

छि स्त्री छो—वा० कि। गर्हायाम् एकाक्षरकोषः।

छिक्कनी स्त्री छिक् इत्यव्यक्तं नासिकाशब्दं कनति शब्दायते कन—अच् गौरा० ङीष्। (नाकछिकनी) वृक्षभेदे। “चिक्कनी कटुका रुच्या तीक्ष्णोष्णा वह्निपित्तकृत्। वात-

रक्तहरी कुष्ठकृमिवातकफापहा" भावप्र० तद्गुणोक्तिः।

छिक्कर पु० छिक् इत्यव्यक्तं शब्दं करोति कृ-ट। हे० स० ८६अ० उक्ते छिक्कारे मृगभेदे "कुक्कुटेभपिरीलश्च शिखिकञ्जलछिक्कराः" "स्त्रीसंज्ञा भाषभषककपिस्त्रीकर्णछिक्कराः" "छिक्करः कटपूरी च पिरीली चाङ्गिदर्विणाः"। [शब्दरत्ना०।

छिक्का स्त्री छिक् इत्यव्यक्तं शब्दं करोति कृ-ड। क्षुते।

छिक्कार पु० छिगित्यव्यक्तं शब्दं करोति कृ-अण्। मृगभेदे। "छिक्कारो मृगजातिः चक्रवाकः कुक्कुटः प्रोक्तः" हे० स० ८६अ०।

छिक्किका स्त्री छिक्का क्षुतं साध्यत्वेनास्त्यस्याः बा० ठन्। छिक्कन्यां (नाकछिकनी) भावप्र०। छात तत्रार्थे।

छित त्रि० छो-क्त वा इत्। छिन्ने अमरः इत्वाभावपक्षे

छित्ति स्त्री छिद-क्तिन्। १छेदने कर्त्तरि क्तिच्। २करञ्जवृक्षे शब्दर०।

छित्वर त्रि० छिद-ष्वरप् पृ० दस्य तः। १वैरिणि, २धूर्त्ते ३छेदके च उणादिको०। षित्त्वात् स्त्रियां ङीष्।

छिद द्वैधीकरणे रुधा० उभ० सक० अनिट्। छिनत्ति छिन्ते इरित्। अच्छिदत्, अच्छैत्सीत् अच्छित्त। "न छिन्द्यान्नखलोमानि" "न च्छिन्द्यात् करजैर्नखम्" मनुः "अच्छिन्दच्च तमाङ्गानि" भा० व० १२।६२अ०। भिदादित्वात् अङ् छिदा। "कर्म्मस्थः पचतेर्भावः कर्म्मस्थाश्च भिदादयः" इत्युक्तेः ततः कर्म्मकर्त्तरि प्रत्ययः छिद्यते कटःस्वयमेव। छिदुरः स्वयंछिन्नः।

अप+अपकृष्य छेदने "एतस्मै वा एषापच्छिद्यैवैव पुनर्भवत्यपि" शत० ब्रा० ५।१।४।८। [४२० पृ० दृश्यम्।

अव+ विभागभेदे। स च दैशिकः कालिकश्च अवच्छेदशब्दे

वि+अव+व्यावर्त्तने निरासने व्यवच्छेदः।

आ+आकृष्य हरणे। (काड़ियालओया) अपहरणे "आच्छिन्द्युरितरास्तु च" नारदः। "मिषतामाच्छिनत्ति नः" कुमा०। सस्यकच्छेदे च। "आच्छेत्स्याम्यहमेतस्य धनुर्ज्यामपि चाहवे" भा० व० १८६स्लो०।

उद्+समूलनाशने। "किं वा रिपूंस्तव गुरुः स्वयमुच्छिनत्ति" रघुः "उच्छेत्तुं प्रभवति यन्न सप्तसप्तिः" शकु०।

परि+इयत्तया विभागे। परिच्छेदः। "यशःपरिच्छेत्तुमियत्तयालम्" रघुः। "परिच्छिन्नप्रभावर्द्धिर्न मया न च विष्णुना" कुमा०।

वि+ विभागे भेदे च "विच्छिद्य तौ शरैर्वीरौ" हरिवं० ८५३०स्लो०। "यदर्द्धं विच्छिन्नं भवति कृतसन्धानमिव तत्" शकु०। [च्छिदः" रामा० सु० ३७।१०।

छिद् त्रि० छिद-क्विप्। छेदनकर्त्तरि। "रामस्य हृदय-

छिदक न० छिद-क्वुन्। वज्रे उणादिको०।

छिदा स्त्री छिद-भावे भिदा० अङ्। छेदने।

छिदि स्त्री छिद्-इन् किच्च। १परशौ २वज्रे उज्ज्वल०। ३छेत्तरि त्रि०। [४करवाले च मेदि० ५असौ उज्ज्वल०।

छिदिर पु० छिद-किरच्। १कुठारे २पावके, ३रज्जुभेदे,

छिदुर त्रि० छिद-कुरच्। १वैरिणि, २धूर्त्ते ३छेदके, ४छेदनद्रव्ये च मेदि०। कर्म्मकर्त्तरि कुरच्। ५स्वयंछिन्ने त्रि०। "संलक्ष्यते न च्छिदुरोऽपि हारः" रघुः।

छिद्र भेदने अद० चुरा० उभ० सक० सेट्। छिद्रयति ते अचिच्छिद्रत् त। छिद्रितः छिद्रम्।

छिद्र न० छिद-रक् छिद्र-अच् वा। १दूषणे, २गर्त्ते, ३अवकाशे ४ज्योतिषोक्ते लग्नतोऽष्टमस्थाने। "छिद्राख्यमष्टमं स्थानम्" ज्यो० त०। "छिद्रं निवारयेत् सर्वं श्वशूकरमुखानुगम्" मनुः। "छिद्रेष्वनर्था बहुलीभवन्ति" शकु० "नास्य च्छिद्रं परोविद्यात् विद्याच्छिद्रं परस्य तु" मनुः। देहे छिद्रसंख्यामाह याज्ञ० मिताक्षरयोः "रोम्णां कोट्यस्तु पञ्चाशच्चतस्रः कोट्य एव च। सप्तषष्टिस्तथा लक्षाः सार्द्धाः स्वेदायनैः सह। वायवीयैर्विगण्यन्ते विभक्ताः परमाणवः" याज्ञ०। "पूर्वोदितसिराकेशादिसहितानां रोम्णाम्परमाणवः सूक्ष्मसूक्ष्मतररूपा भागाः स्वेदस्रवणशुषिरैः सह चतुःपञ्चाशत्कोट्यः तथा सप्तोत्तरषष्टिलक्षाः सार्द्धाः पञ्चाशत्सहस्रसहिताः वायवीयैर्विभक्ताः पवनपरमाणुभिः पृथक्कृता विगण्यन्ते" मिता०। एता सूक्ष्मच्छिद्रसंख्याः स्थूलच्छिद्रसंख्या तु नव मुखनेत्रकर्णनासाद्वयपायूपस्थस्थानभेदात् तत्संख्याः तुल्यत्वेन ५नव संख्यायां च

छिद्रकर्ण त्रि० छिद्रयुक्तः कर्णोऽस्य। दुर्लक्षणरूपच्छिद्रयुक्तकर्णविशिष्टे छिन्नकर्णशब्दे दृश्यम्।

छिद्रदर्शिन् त्रि० छिद्रं पश्यति दृश-णिनि। १रन्ध्रान्वेषिणि रिपौ। कण्डरीकशब्दे १६२१ पृ० दर्शिते योगभ्रष्टे बाभ्रव्यपुत्रे २विप्रभेदे च "छिद्रदर्शी सुनेत्रश्च तथा बाभ्रव्यवत्सयोः। जातौ श्रोत्रियदायादौ वेदवेदाङ्गपारगौ" हरिवं० २१अ०। [राजनि०

छिद्रवैदेही स्त्री छिद्रप्रधाना वैदेही। गजपिप्पल्याम्

छिद्रान्तर् पु० छिद्रमन्तर्मध्ये यस्य। नले। राजनि०।

छिद्राफल न० छिद्रं दूषणमाफलति आ+फल–अच् । कपटहेतौ मायारूपे फले राजनि० ।

छिद्रित त्रि० छिद्र–कर्म्मणि क्त । १क्षतवेधे विद्धे हेमच० । छिद्र+तारका० इतच् । २जातच्छिद्रे । [विश्वः ।

छिद्वर त्रि० छिद–ष्वरच् वा दस्य न तः । छित्वरशब्दार्थे

छिन्न त्रि० छिद–क्त । १कृतच्छेदने लूने अमरः । "सच्छिन्नधन्वा विरथः" देवीमा० । २विभक्ते च "छिन्नाभ्रमिव नश्यति" गीता । ३मन्त्रभेदे कुमारशब्दे २१६० पृ० दृश्यम् । ततः "अनत्यन्तगतौ क्तात्" पा० कन् । छिन्नक ईषच्छिन्ने । "अनत्यन्तगतिः साकल्येन सम्बन्धाभावः प्रकृतिवाच्यया छिदाक्रियया क्तार्थस्य कर्म्मण एकदेशप्रतीत्या साकल्येन सम्बन्धाभावो गम्यते" सि० कौ० । आगन्तुषु षट्सु व्रणेषु ४व्रणभेदे । "अनेकाकृतिरागन्तुः स भिषग्भिः पुरातनैः । समासतो लक्षणतः षड्विधः परिकीर्त्तितः । छिन्नं भिन्नं तथा विद्धं क्षतं पिच्चितमेव च । घृष्टमाहुस्तथा षष्ठं तेषां वक्ष्यामि लक्षणम् । तिरश्चीन ऋजुर्वापि यो व्रणश्चायतो भवेत् । गात्रस्य पातनं चापि छिन्नमित्युपदिश्यते" ।

छिन्नकर्ण त्रि० छिन्नः कर्णोऽस्य "कर्णे लक्षणस्य" पा० पूर्वस्य दीर्घे प्राप्ते विष्टादित्वात् न दीर्घः । छिन्नकर्णरूप दुर्लक्षणयुक्ते । छिन्नकर्णकर्म्मविपाकस्तु भृगुभारते ६अ० दृश्यः । [लतायाम् । राजनि० ।

छिन्नग्रन्थिनी छिन्ना ग्रन्थिनो संज्ञायां कन् । त्रिपर्णिका-

छिन्नद्वैध त्रि० छिन्नं द्वैधं संशयोऽस्य । वेदान्तादिश्रवणपरिपाकेण निवृत्तसंशये । छिन्नसंशयादयोऽप्यत्र

छिन्ननास त्रि० छिन्ना नासाऽस्य । द्विधा भूतनासिके तस्य रोगस्य कर्म्मविपाको भृगुभारते ८अ० दृश्यः । [नाडी) राजनि० ।

छिन्नपत्री स्त्री छिन्नं पत्रं यस्याः ङीप् । अम्बष्ठायाम् । (आक-

छिन्नमस्ता स्त्री छिन्नं मस्तं यस्याः । दशमहाविद्यान्तर्गते देवीभेदे । "भैरवी छिन्नमस्ता च विद्या धूमावती तथा" तन्त्रसारः ।

छिन्नरुह पु० छिन्नः सन् रोहति रुह–क । १तिलकवृक्षे राजनि० २गुडूच्याम् स्त्री अमरः ३स्वर्णकेतक्यां ४शल्लक्याञ्च स्त्री राजनि० ।

छिन्नवेशिका स्त्री छिन्नो वेशो यस्याः संज्ञायां कन्–टापि अतइत्त्वम् । पाठायाम् (आकनादी) शब्दच० ।

छिन्नश्वास पु० कर्म्म० । क्षुद्रश्वासशब्दे २२८२पृष्ठे दर्शित सुश्रुतवाक्योक्ते श्वासभेदे ।

छिन्ना स्त्री छिद–क्त । १गुडूच्यां २पुंश्चल्याञ्च विश्वः ।

छिन्नोद्भवा स्त्री छिन्नाप्युद्भवति उद्+भू–अच् । गुडूच्याम् राजनि० ।

छिलिहिण्ड पु० पातालगरुडवृक्षे "छिलिहिण्डः परो वृष्यः कफघ्नः पवनापहः" भावप्र० तद्गुणोक्तिः ।

छुछुका स्त्री छुछु इत्यव्यक्तशब्दं कायति कै–क पृषो० । छुछुन्दर्य्याम् (छुँचो) शब्दार्थचि० ।

छुछुन्दर पुंस्त्री छछु इत्यव्यक्तः शब्दोदीर्य्यतेऽस्मात् दॄ–अपादाने अप् पृषो० । (छुँचो) इति ख्याते मूषिकभेदे उन्दुरशब्दे ११८८पृ० सुश्रुतवाक्ये दृश्यम् । "छुछुन्दरेण विड्भङ्गो ग्रीवास्तम्भोविजृम्भणम्" सुश्रु० । स्त्रियां जातित्वात् ङीष् । पृषो० छुछुन्दरिरप्यत्र "मत्स्यछुछुन्दरिमत्कुणगन्धो यथा" सुश्रुतः । "छुच्छुन्दरिः शुभान् गन्धान् (हृत्वा) पत्रशाकन्तु बर्हिणः" मनुः । "पत्रशाकं शिखी हृत्वा गन्धांश्छुछुन्दरिः शुभान्" याज्ञ० ।

छुच्छु स्त्री छुछुकायाम् "शिवा श्यामा रला छुच्छुः पिङ्गला गृहगोधिका । सूकरी परपुष्टा च पुन्नामानश्च वामतः" वृ० सं० ८६अ० यात्रायां तस्या वामतः शुभदत्वमुक्तम् ।

छुट छेदने वा चुरा०उभ० पक्षे तु० कुटा० पर० सक० सेट् । छोटयति ते छुटति । अचुच्छुटत् त अच्छुटीत् ।

छुड छादने तु० कु० पर० सक० सेट् । छुडति अच्छुडीत् [च्छोड ।
चुच्छोड

छुड पिधाने भ्वा० प० सक० सेट् । छोडति अच्छोडीत् चु-

छुद्र न० छद–रक् पृषो० । १प्रतीकारे २रश्मौ च उणा- [चुच्छोप ।
दिको० ।

छुप स्पर्शे तु० पर० सक० अनिट् । छुपति अच्छौप्सीत्

छुप पु० छुप–कर्त्तरि क, घञर्थे क वा । क्षुपे ह्रस्वशाखे वृक्षे २स्पर्शने मेदि० । ३चपले त्रि० आधारे क । ४युद्धे पु० विश्वः ।

छुबुक न० चुबुक+पृषो० । चुबुके ओष्ठाधरप्रदेशे । "कक्षाभ्यां छुबुकादधि" ऋ० १०।१६३।१। "छुबुकं अपदिशन्नुवा चैष वै प्रतिष्ठा वैश्वानरः" शत० ब्रा० १०।६।१।११।

छुर छेदे भ्वा०पर०सक० सेट् । छोरति अच्छोरीत् । चुच्छोर

छुर लेपने तु० कु० पर० सक० सेट् । छुरति अच्छुरीत् । चुच्छोर छुरितः । "छुरितमिव वियद्घनैर्विचित्रैः" ह० स० २४०अ० । "कुसुमलवच्छुरितपर्य्यन्ते पर्य्यङ्कतले" दश० कु० । "मनःशिलाविच्छुरिता निषेदुः" कुमा०

छुरा स्त्री छुर–क । सौधलेपनद्रव्ये सुधायां चूर्णे (कलिचुन्)हारा० ।

छुरिका स्त्री छुर–छेदे क स्वार्थे क टापि अत इत्त्वम् छुर–वा० कुन् वा । स्वनामख्याते अस्त्रभेदे ।

छुरिकापत्री स्त्री छुरिकेव पत्रमस्याः ङीष् । श्वेतालतायाम् राजनि० ।

छुरित त्रि० छुर–क्त । १खचिते जटाधरः । २लिप्ते ३छिन्ने च त्रि० "परस्परेण च्छुरितामलच्छवी" माघः ।

छुरी स्त्री छुर–क गौरा० ङीष् । छुरिकायाम् असिधेनौ भरतः ।

छूरिका स्त्री छुरिका+पृषो० । १छुरिकार्थे २वन्ध्यायां गवि "गोषु ब्राह्मणसंस्थासु छूरिकायाश्च भेदने" छूरिकाया वन्ध्याया गोर्वाहनार्थं नासाभेदने" कुल्लू० ।

छूरी स्त्री छुरी–पृषो० । छुरिकायां हेम० ।

छृद सन्दीपने वा चु० उभ० पक्षे भ्वा० पर० सक० सेट् । छर्दयति ते छर्दति अचिच्छृदत्–त अचच्छर्दत् त अच्छर्दीत् ।

छृद देवने दीप्तौ च अक० वमने सक० रुधा० उभ० सेट् । छृणत्ति छृन्ते इरित् । अच्छृदत् अच्छर्दीत् । अच्छर्दिष्ट छर्दिष्यति–छर्त्स्यति उदित् छर्दित्वा छृत्त्वा छृन्नः

छृप याचने द्विक० शब्दे अक० वा चुरा० उभ० पक्षे भ्वा० पर० सेट् । छर्पयति ते छर्पति । अचिच्छृपत् त-अचच्छर्पत् त । अच्छर्पीत्

छेक पु० छो–वा० डेकन् । १गृहासक्ते मृगपक्ष्यादौ २नागरे विदग्धे त्रि० मेदि० । विदग्धप्रिये शब्दालङ्काररूपे ३अनुप्रासभेदे अनुप्रासशब्दे १७८पृ० दृश्यम् । ४मत्तायां स्त्रियां स्त्री शब्दार्थचि० ।

छेकापह्नुति स्त्री अर्थालङ्कारभेदे । अलङ्कारशब्दे पृ० ३९८ [दृश्यम्

छेद छेदने अद० चु० उभ० सक० सेट् । छेदयति ते अचिच्छेदत् त ।

छेद पु० छिद–भावे घञ् अच् वा । १छेदने "अभिज्ञाश्छेदपातानां क्रियन्ते नन्दनद्रुमाः" कुमा० । कर्त्तरि अच् । २छेदके, भाजके "छेदं गुणं गुणं छेदमिति" लीलावती । कर्म्मणि घञ् । ३खण्डे, त्रि० "वलाहकच्छेदविभक्तरागाम्" कुमा० । "विषकिसलयच्छेदपाथेयवन्तः" मेघः । खण्डार्थस्य तु त्रिलिङ्गत्वेन स्त्रियां गौरा० ङीष् । ततोनित्यमर्हति ठञ् । छैदिक नित्यच्छेदार्हे वेतसादौ ।

छेदन न० छिद–भावे ल्युट् । १द्विधाकरणे "करपाददतोभङ्गे छेदने कर्णनासयोः" याज्ञ० । करणे ल्युट् । २छेदनसाधने "तद्धै शस्त्रं शस्त्रविदां न शस्त्रं छेदनं स्मृतम्" भा० स० ५४अ० । कर्त्तरि ल्यु । ३छेदके त्रि० ।

छेदनीय पु० छेदनाय जलकालुष्यभेदनाय हित–छ । १कतकवृक्षे राजनि० । छिद–कर्म्मणि अनीयर् । २छेद्ये त्रि० ।

छेदादि पु० नित्यमर्हतीत्यर्थे ठञ्प्रत्ययनिमित्ते शब्दगणे स च गणः "छेद भेद द्रोह दोह नर्त्त कर्ष तीर्थ संप्रयोग विप्रयोग प्रयोग विप्रकर्ष प्रेषण संप्रश्न विप्रश्न विकर्ष प्रकर्ष (विराग विरङ्ग च)" पा०ग०सू० । छैदिकः

छेदि पु० छिद–इन् । १वज्रे उज्ज्व० । २छेत्तरि त्रि० । [हेमच० ।
३वर्त्तकौ पु० धरणिः ।

छेदित त्रि० छेदो जातोऽस्य तारका० इतच् । द्विधाकृते

छेद्य त्रि० छेत्तुं योग्यः कर्म्मणि योग्यार्थे ण्यत् । भेत्तुं योग्ये "शीर्षच्छेद्यमतोऽहं त्वाम्" भट्टिः ।

छेद्याक्षिरोगप्रतिषेधोपायाः सुश्रुतोक्ता यथा "अथातच्छेद्यरोगप्रतिषेधं व्याख्यास्यामः । स्निग्धं भुक्तवतो ह्यस्य उपविष्टस्य यन्त्रतः । संरोषयेत् नयनं भिषक्चूर्णैस्तु लावणैः । ततः संरोषितं तूर्णं सुस्विन्नं परिघट्टितम् । अर्म्म यत्र वलीजातं तत्रैतल्लगयेद्भिषक् । अपाङ्गं प्रेक्षमाणस्य वडिशेन समाहितः । मुचुण्ड्याग्रहस्य मेधावी सूचीसूत्रेण वा पुनः । नचोत्तापयता क्षिप्रं कार्य्यमभ्युन्नतं तु तत् । शस्त्रपातभयाच्चास्य वर्त्मनी ग्राहयेद्दृढम् । ततः प्रशिथिलीभूतं त्रिभिरेव विलम्बितम् । उल्लिखन्मण्डलाग्रेण तीक्ष्णेन परिशोधयेत् । विमुक्तं सर्वतश्चापि कृष्णाच्छुक्लाच्च मण्डलात् । नीत्वा कनीनकोपान्तं छिन्द्यान्नातिकनीनकम् । चतुर्भागस्थिते मांसे नाक्षि व्यापत्तिमर्च्छति । कनीनकवधादस्रं नाडी चाप्युपजायते । हीनच्छेदात्पुनर्वृद्धिं शीघ्रमेवाधिगच्छति । अर्म्म यज्जालवद्यापि तदप्युन्माज्ज्य लम्बितम् । छिन्द्याद्वक्रेण शस्त्रेण वर्त्मशुक्लान्तमाश्रितम् । प्रतिसारणमक्ष्णोस्तु ततः कार्य्यमनन्तरम् । यवनालस्य चूर्णेन त्रिकटोर्लवणस्य च । स्वेदयित्वा ततः पश्चाद्बध्नीयात् कुशलो भिषक् । देशर्त्तुबलकालज्ञः स्नेहं दत्त्वा यथाहितम् । व्रणवत् संविधानन्तु तस्य कुर्य्यादतःपरम् । त्र्यहान्मुक्त्वा करस्वेदं दत्त्वा शोधनमाचरेत् । करञ्जबीजामलकमधुकैः साधितं पयः । हितमाश्च्योतने मूले द्विरक्षः क्षौद्रसंयुतम् । मधुकोत्पलकिञ्जल्कदूर्वा-

कल्कैश्च मूर्द्धनि। प्रलेपः सततः शीतः क्षीरपिष्टः प्रशस्यते। लेख्याञ्जनैरपहरेदर्म्मशेषं भवेद्यदि। अर्म्म चाल्पन्दधिनिभं नीलं रक्तमथापि वा। धूसरन्तनु यच्चापि शुक्रवत्तदुपाचरेत्। चर्म्माभम्बहलं यत्तु स्नायुमांसघनावृतम्। छेद्यमेव तदर्म्म स्यात्कृष्णमण्डलगञ्च यत्। विशुद्धवर्णमक्लिष्टं क्रियास्वक्षिगतक्लमम्। छिन्नेऽर्म्मणि भवेत्सम्यग्यथास्वमनुपद्रवम्। सिराजाले सिरायास्तु कठिनास्ताश्च बुद्धिमान्। उल्लिखेन्मण्डलाग्रेण वडिशेनावलम्बिताः। सिरासु पिडका जाता या न सिध्यन्ति भेषजैः। अर्म्मवन्मण्डलाग्रेण तासाञ्छेदनमिष्यते। रोगयोश्चैतयोः कार्य्यमर्म्मोक्तं प्रतिसारणम्। विधिश्चापि यथादोषं लेखनद्रव्यसम्भृतः। सन्धौ संस्वेद्य शस्त्रेण पर्वणीकां विचक्षणः। उत्तरे च त्रिभागे च वडिशेनावलम्बिताम्। छिन्द्यात्ततोऽर्द्धमध्ये स्यादश्रुनाडी हतोऽन्यथा। प्रतिसारणमत्रापि सैन्धवक्षौद्रमिष्यते। लेखनीयानि चूर्णानि व्याधिशेषस्य भेषजम्। शङ्खं समुद्रफेनञ्च मण्डूकीञ्च समुद्रजाम्। स्फटिकं कुरुविन्दञ्च प्रवालाश्मन्तकन्तथा। वैदूर्य्योपलकं मुक्तामयस्ताम्ररजांसि च। समभागानि सम्पिष्य सार्द्धं स्रोतोऽञ्जनेन तु। चूर्णाञ्जनं कारयित्वा भाजने मेषशृङ्गजे। संस्थाप्योभयतः कालमञ्जयेत्सततं बुधः। अर्म्माणि पिडकां हन्यात्सिराजालानि तेन वै। अर्शस्तथा यच्च नाम्ना शुष्कार्शोऽर्बुदमेव च। अभ्यन्तरं वर्त्म यथा विधानं तेषु वक्ष्यते। वर्त्मोपस्वेद्य निर्भुज्य सूच्योत्क्षिप्य प्रयत्नतः। मण्डलाग्रेण तीक्ष्णेन मूले छिन्द्याद्भिषग्वरः। ततः सैन्धवकासीसकृष्णाभिः प्रतिसारयेत्। स्थिते च रुधिरे वर्त्म दहेत्सम्यक्शलाकया। क्षारेणावलिखेच्चापि व्याधिशेषो भवेद्यदि। तीक्ष्णैरुभयतो भागैस्ततो दोषमधिक्षिपेत्। वितरेच्च यथादोषमभिष्यन्दक्रियाविधिम्। शस्त्रकर्म्मण्युपरते मासञ्च स्यात्सुयन्त्रितः"।

छेमण्ड पु॰ छमण्ड+पृषो॰ अत एत्वम्। मातृपितृहीने बालके (छाँड) उज्ज्वलदत्तः।

छेलक पुंस्त्री छो-कर्म्मणि वा॰ डेलकन्। १छागे २छाग्यां स्त्री टाप्। भावप्र॰ छागशब्दे दृश्यम्।

छेलु पु॰ छो-वा॰ डेलु। सोमराज्याम् शब्दच॰

छैदिक त्रि॰ छेदं नित्यमर्हति ठञ्। नित्यछेदार्हे वेतसे पु॰ शि॰ कौ॰।

छो छेदने दि॰ पर॰ सक॰ अनिट्। छ्यति अच्छात्-अच्छासीत्। चच्छौ। छातः-छितः। (देयोया)।

छोटिका स्त्री छुट-ण्वुल्। तर्ज्जन्यङ्गुष्ठध्वनौ (तुड़ी·

छोटिन् पु॰ छुट-णिनि। कैवर्त्ते त्रिका॰।

छोरण न॰ छुर-भावे ल्युट्। १परित्यागे त्रिका॰।

छोलङ्ग पु॰ छुर-वा॰ अङ्गच् रस्य लः। मातुलुङ्गे (टावालेबु) शब्दरत्ना॰।

छोहारा स्त्री द्वीपान्तरखर्जूरिकायाम्। "खर्जूरी गोस्तनाकारा परद्वीपादिहागता। जायते पश्चिमे देशे सा छोहारेति कीर्त्यते" भावप्र॰ खर्जूरशब्दे २४६८पृ॰ तद्गुणा दृश्याः।

छ्यु गतौ भ्वा॰ आत्म॰ सक॰ अनिट्। छ्यवते अच्छ्योष्ट णौ सङि अचि(चु)च्छ्यवत् त। णौ सनि चु(चि)च्छ्यावयिषति ते।

इति वाचस्पत्ये छकारादिशब्दार्थनिरूपणम्।

ज

जकारो व्यञ्जनवर्णभेदः स्पर्शसंज्ञस्तस्योच्चारणस्थानं तालु, आभ्यन्तरप्रयत्नः जिह्वामध्यभागेन तालुस्पर्शः बाह्यप्रयत्नाश्च घोषसंवारनादाः अल्पप्राणश्च। मातृकान्यासेऽस्य वाममणिबन्धे न्यासः। तन्त्रोक्ता अस्य वाचकशब्दा यथा "जश्चतुराननः शूली भोगी च विजया स्थिरा। बलदेवो जयो जेता धातकी सुमुखो विभुः। लम्बोदरी स्मृतिः शाखा सुप्रभा कर्तृकाधरा। दीर्घबाहूरुचिर्द्दीर्घो नन्दी तेजाः सुरान्तिपः। जवनो वेगितो वाममणिबन्धपदात्मकः। हुतारुतेश्वरो वेधो चामोदो मदविह्वलः" वर्णोद्धारतन्त्रम्। अस्य ध्येयरूपं यथा "जकारं परमेशानि! या स्वयं मध्यकुण्डली। शरच्चन्द्रप्रतीकाशं सदा त्रिगुणसंयुतम्। पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा। त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं प्रिये!" कामधेनुतन्त्रम्। काव्येऽस्य प्रथमविन्यासफलं वृत्त० र० टी० उक्तं "जोमित्रलाभमित्यादि"।

ज पु० जि-जन-जु-वा ड। १मृत्युञ्जये २जन्मनि ३पितरि ४जनार्द्दने त्रि० मेदि० ५विषे ६मुक्तौ ७तेजसि ८पिशाचे च। शब्दरत्ना०। ९वेगे एकाक्षरकोषः "जो गुरुमध्यगतः" इत्युक्ते गुरुमध्ये प्रान्तयोर्लघुद्वययुक्ते छन्दःशास्त्रप्रसिद्धे (।ऽ।) त्रिवर्णे १० गणे तस्य काव्यप्रथमविन्यासे। "भुजगोरुजं ज" इत्युक्तेः रोगःफलम् सर्पोऽस्य देवः" ११जाते त्रि० "प्रावृट्शरत्कालदिवां जे" पा० अलुक् स०। प्रावृषिजः शरदिजः कालेजः दिविजः। "विभाषा वर्षखरशरेत्यादि" पा०। वर्षेज वर्षज इत्यादि। "तत्पुरुषे कृति बहुलम्" पा०। मनसिजः मनोजः सरसिजं सरोजमित्यादि। जरायुजः अण्डजः स्वेदजः उद्भिज्जः"। १२वेगिते १३जेतरि त्रि० शब्दरत्ना०।

जकुट पु० जं जातं कुटति कुट-क। १मलयाचले २वार्त्ताकुपुष्पे न० मेदि०।

जक्ष भक्षे सक० हासे अक० जक्षा० स्वपादि० प० सेट्। स्वपादित्व रुदाद्यन्तर्गणस्तेन झलादेः सार्वधातुकस्य इट्। जक्षिति जक्षितः अभ्यस्तसंज्ञः तेन जक्षति। अजक्षीत् "उतेव स्त्रीभिः सह मोदमानो जक्षदुते वापि भयानि पश्यन्" शत०ब्रा० १४।७।१।१४। "अश्नत्यां कश्चिदश्नाति जक्षत्यां सह जक्षिति" भाग० ४।२५।५७। "हविर्जक्षिति निःशङ्कोमखेषु मघवानसौ" जक्षिमोऽनपराधेऽपि" भट्टिः। अस्यान्तःस्थादितां केचित् मन्यन्ते। "यक्ष्यतामिति येऽप्युक्तास्ते वै यक्षास्तु यक्षणात्" विष्णुपु० यक्षनामनिरुक्तौ तथादर्शनात्।

जक्ष दाने भ्वा० इदित् आ०सक०सेट्। इदित्करणसामर्थ्यात् अनुपधस्यापि नुम्। जङ्क्षते अजङ्क्षिष्ट। मित्। अजङ्क्षि अजाङ्क्षि (जा) जङ्क्षम्। इदित्करणात् जङ्क्ष्यते।

जक्षण न० जक्ष-भावे ल्युट्। भक्षणे हेमच०।

जगच्चक्षुस् पु० जगतां चक्षुरिव प्रकाशकत्वात्। सूर्य्ये हेमच०

जक्षादि पु० "जक्ष जागृ दरिद्रा च चकास्तिः शास्तिरेव च। दीधी वेवी च विज्ञेयो जक्षादिः पञ्चकोगणः" इत्युक्ते अभ्यस्तसंज्ञे धातुपञ्चके "नाभ्यस्ताच्छतुः" पा० जक्षत् जाग्रत् इत्यादि।

जगत् पु०गम-क्विप् नि०द्वित्वम् तुक् च। १वायौ २जङ्गमे त्रि० मेदि०। ३विश्वे न० अमरः। ४लोके सचराचरे प्रपञ्चभूते भोगोपयोगिपरिकरसहिते मायामये संसारचक्रे यथोक्तमभियुक्तैः "न निरूपयितुं शक्या विस्पष्टं भासते च या। सा मायेतीन्द्रजालादौ लोकाः संप्रतिपेदिरे। स्पष्टं यथा जगच्चेदमशक्यं तन्निरूपणम्। मायामयं जगत् भाति वीक्ष्यतापक्षपाततः"। "जगद्योनिरयोनिस्त्वं जगदन्तोनिरन्तकः। जगदादिरनादिस्त्वं जगदीशोनिरीश्वरः" कुमा०। "जगतः पितरौ वन्दे पार्व्वतीपरमेश्वरौ" रघुः। "यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्"मनुः। लोके "जगत्प्रपर्य्याप्तसहस्रभानुना" "युगान्तकालप्रतिसंहृतात्मनोजगन्ति यस्यां सविकाशमासत"माघः। जङ्गमे "जगतां तस्थुषश्च" सन्ध्यामन्त्रः। क्विबन्तत्वात् जगत् जगतौ इत्यादिरूपम् "पृषन्महद्बृहज्जगच्छतृवच्च" पा० निपातनपक्षे जगन् जगन्तौ इत्यादिरूपमिति केचिदाहुस्तच्चिन्त्यम् तस्य शतृतुल्यत्वेऽपि "नाभ्यस्ताच्छतुरिति" पा० निषेधात् न नुम्। शतृतुल्यत्वप्रयोजनं तु स्त्रियां ङीप् जगती

जगत्कर्त्तृ पु० ६त०। १ईश्वरे तदभेदात् २चतुर्मुखादौ हेमच०।

जगच्छन्द पु० जगती छन्दोऽस्य वेदे नि० पुंवद्भावः। जगत्या छन्दसा स्तुत्ये। "स्वरोऽसि गयोऽसि जगच्छन्दाः" ता० ब्रा० १।५।१५।

जगत्पति पु० ६त०। १परमेश्वरे तदभेदात् २हरिहरादौ "यदा च तस्याधिगमे जगत्पते" कुमा० जगदीशादयोऽप्यत्र। "जगदीशो निरीश्वरः" कुमा०

जगत्प्राण पु० जगत् प्राणित्यस्मात् प्र+अन्—अपादाने घञ् ६त०। वायौ अमरः "जगत्प्राण ! प्राणानपहरसि किन्ते व्यवसितम्" सा० द०।

जगत्साक्षिन् पु० ६त०। १ईश्वरे २सूर्य्ये च हेमच०।

जगत्सेतु पु० जगतः सेतुरिव सर्वमर्य्यादाकारकत्वात्। परमेश्वरे जगतां सन्तारणहेतुत्वादसंभेदकरत्वाच्च वर्णाश्रमादीनां, "एष सेतुर्विधरणो लोकानामसंभेदाय" श्रुतेस्तस्य तथात्वम्। अलुक् समा०। जगतः सेतुरप्यत्र "औषधं जगतः सेतुः" विष्णु स०।

जगती स्त्री गम—क्विप् "दृषन्महज्जगच्छतृवत्" पा० शतृतुल्यत्वात् ङीप्। १भुवने। २पृथिव्यां "आर्य्यभट्टमते भूमेश्चलत्वात् गतिमत्त्वेन तथात्वम्। अन्यमते जगदाधारत्वात् तस्यास्तथात्वमिति भेदः। ३द्वादशाक्षरपादके छन्दोभेदे छन्दःशब्दे दृश्यम्। ४जम्बुक्षेत्रे हेमच०। ततोभवादौ उत्सा० अञ्। जागत जगतीभवादौ। स्त्रियां टाप्। छन्दःशब्दे उदा०।

जगदम्बा स्त्री ६त०। दुर्गायां स्वार्थे क। जगदम्बिकाप्यत्र। "सृष्टिस्थितिविनाशानां विधात्री जगदम्बिका" देवीगीता। जगद्धात्रीशब्दे उदा०

जगदादि पु० ६त०। १परमेश्वरे। २तदभेदाच्चतुराननादौ "जगदादिरनादिस्त्वम्" कुमा०

जगदादिज पु० हिरण्यगर्भरूपेण जगतामादौ जायते जन—ड। परमेश्वरे। "भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः" विष्णु स०।

जगदाधारः पु० ६त०। १वायौ शब्दच०। २जगदाश्रये काले च "कालोहि जगदाधारः" ति० त०। जगदाश्रयादयोऽप्यत्र "जन्यानां जनकः कालो जगतामाश्रयोमतः" भाषा०।

जगदायु(युस्) पु० जगतामायुःसाधनत्वात् आयुः पृषो० वा सलोपः। वायौ। "अहं केशरिणः क्षेत्रे वायुना जगदायुना" भा०व० १४७अ०। "वायुना द्विपदां श्रेष्ठः कथितो जगदायुषा" भा० शा० २४०अ०।

जगद्गुरु पु० ६त०। १परमेश्वरे। "सहि पूर्व्वेषामपि गुरुः कालेनानवच्छेदात्" पात० सू० तस्य सर्वगुरुत्वमुक्तम् तदभेदात् २शिवादौ "अथ ते मुनयः सर्वे मानयित्वा जगद्गुरुम्" (शिवम्) कुमा०। "मेने परार्द्ध्यमात्मानं गुरुत्वेन जगद्गुरोः" रघुः। ३जगतामुपदेष्टरि नारदादौ। "नारदस्तु जगतोगुरुरुच्चैर्विस्मयाय गगनं विललङ्घे" नैष० जगद्गुरोगुरुः पञ्चमीत०। ४जगद्गुरो गुरुद्रव्ये च।

जगद्गौरी स्त्री जगत्सु मध्ये गौरी। मनसादेव्यां शब्दर०।

जगद्दीप पु० जगतोदीपइव प्रकाशकत्वात्। परमेश्वरे "तस्य भासा सर्वमिदं विभाति" श्रुतिः तदभेदात् २शिवादौ "जगद्योनिं जगद्दीपं जयिनं जगतोगतिम्" भा० द्रो० २०३ शिवस्तवः।

जगद्धातृ पु० ६त०। १परमेश्वरे। दुर्गामूर्त्तिभेदे स्त्री ङीप्। तस्याः पूजाकालव्यवस्था।

निगमकल्पसारे ज्ञानसारस्वते ग्रन्थे च दुर्गाकल्पे "श्रीशिव उवाच। प्रसीद जगतां मातर्ज्जगन्निस्तारकारिणि!। अतएव महेशानि! तवाहं शरणागतः। जगत्त्वया यत् कथितं पूर्वं तत्सर्वञ्च श्रुतं मया। जगद्धात्री महादुर्गा चतुर्वर्गफलप्रदा। तस्याः पूजाविधिर्दिनं कालस्तच्च प्रकाशितम्। तदेव कथयेशानि! श्रोतुमिच्छामि साम्प्रतम्। श्रीदेव्युवाच। कथयामि महेशान! सावधानावधारय। तस्याः पूजाविधिर्दिनं समयं भावभेदतः। कार्त्तिके शुक्लपक्षे च या दुर्गानवमी तिथिः। सा प्रशस्ता महादेव! महादुर्गाप्रपूजने। प्रातश्च सात्त्विकी पूजा मध्याह्ने राजसी मता। सायाह्ने तामसी पूजा त्रिविधा परिकीर्त्तिता। जपयज्ञादिभिर्देव! इति त्रैकालिकी मता। अथान्यत् संप्रवक्ष्यामि शृणुष्व परमेश्वर!। सप्तम्यादि नवम्यान्तं पूजाकाल इतीरितः। त्रिदिने त्रिविधा पूजा दशम्याञ्च विसर्ज्जयेत्। पूजा परेऽह्नि देवेश! तत्राप्यत्र विसर्जनम्। वेधितायाः प्रकारेण तत्र पूजा प्रकीर्त्तिता। शिव उवाच, त्रिसन्ध्याऽव्यापिनी सा तु यदि स्यान्नवमी तिथिः। त्रिकाले त्रिविधा पूजा कथं देव्या जगन्मयि!। कथयस्व महेशानि! इति मे संशयोहृदि। श्रीदेव्युवाच। सा प्रातर्व्यापिनी यत्र वासरे नवमी तिथिः। त्रिसन्ध्यं पूजयेत्तत्र वासरे जगदम्बिकाम्। मुहूर्त्तव्यापिनी चापि तत्र ग्राह्या महेश्वर!। एककाले त्रिधा पूजां साधकोनैव कारयेत्"।

तत्पूजायां दशम्यां बलिदाननिषेधः तन्त्रान्तरे "श्रीपार्वत्युवाच। दशम्यां बलिदानन्तु निषिद्धं जगदीश्वर!। कथं त्रिकालं पूजा सा सम्भवेत् परमेश्वर!। शिव उवाच "नवमीतिथिमाश्रित्य यत्र पूजाविधिर्भवेत्। निषिद्धं बलिदानन्तु दशम्यां तत्र सुन्दरि!। दशम्यां नवमीदिनमाश्रित्य पूजाविधिरिहोदितः।

बलिदानन्तु निषिद्धं नात्र पार्व्वति”। ज्ञानामृतसारे पूर्व्वं प्रकारमुक्त्वा “मुहूर्त्तव्यापिनी चापि प्रातश्चेन्नवमी तिथिः। तद्दिने पूजनं कार्य्यं त्रिसन्ध्यं वरवर्णिनि!। त्रिकालं पूजयेत्तत्र नैककाले कदाचन”। कात्यायनीतन्त्रे ७पटले। “कुम्भराशिगते चन्द्रे नवम्यां कार्त्तिकस्य च। उचथ्यश्चोदितो भ्रातुर्दुर्गामाराध्य यत्नवान्। पुत्रारोग्यं बलं लेभे लोकसाक्षित्वमेव च। तां तिथिं प्राप्य मनुजः शनिभौमदिने यदि। प्रपूजयेन्महादुर्गां धर्म्मकामार्थमोक्षदाम्”। शक्तिसङ्गमतन्त्रे “कार्त्तिकस्य सिते पक्षे नवम्यां जगदीश्वरीम्। त्रिकालमेककालं वा वर्षे वर्षे प्रपूजयेत्। स्वर्णमयीं प्रतिमां भक्त्या जगद्धात्र्या विधानतः। पूजयित्वा परदिने प्रतिमां तां विसर्ज्जयेत्। पुत्रपौत्रधनैश्वर्य्यं संयुताऽस्य भवेत् पुरी”। तन्त्रान्तरे। “कुजवारे युगाद्यायां नवम्यान्तु जगत्प्रसूः। प्रादुर्भूता महेशानी तत्र तां परिपूजयेत्”तन्त्रान्तरे।“त्रिकालं पूजयेद्दुर्गां मूलेनैकाक्षरेण च(दूँ)। नानारत्नविधानेन गीतवाद्यपुरःसरम्। कार्तिकस्य सिते पक्षे नवम्याञ्च विशेषतः। कृत्वैवं साधकश्रेष्ठो लभेद्राज्यमकण्टकम्”। योगिनीतन्त्रे “कार्त्तिकेऽमलपक्षे तु नवम्याञ्च विशेषतः। उद्बुद्धान्तु जगद्धात्रीं पूजयेद्दीपमालया” आगमतत्त्वसारे “कार्त्तिकेऽमलपक्षे तु नवम्यां भौमवासरे। आविर्भूता जगद्धात्री युगादौ दैत्यनाशिनी”। उत्तरकामाख्यातन्त्रे “कार्त्तिके शुक्लपक्षे तु त्रेतायां प्रथमेऽहनि। त्रिसन्ध्यं पूजयेद्देवीं दुर्गां सम्पत्प्रवृद्धये”। कुब्जिकातन्त्रे “कार्त्तिके शुक्लपक्षे तु नवम्यां जगदम्बिकाम्। दुर्गां प्रपूजयेद्भक्त्या धर्म्मकामार्थसिद्धये। दुर्गाकल्पे विद्योत्पत्तौ “कार्त्तिके शुक्लपक्षेऽह्नि भौमवारे जगत्प्रसूः। सर्व्वदेवहितार्थाय दुष्टर्त्तशमनाय च। आविरासीत् जगच्छान्त्यै युगादौ परमेश्वरी”। व्रतकालविवेकधृतवचनम् “कार्त्तिकेऽमलपक्षस्य त्रेतायां नवमेऽहनि। पूजयेत्तां जगद्धात्रीं सिंहपृष्ठे निषेदुषीम्”। स्मृतिः। “युगाद्या वर्षवृद्धिश्च सप्तमी पार्व्वतीप्रिया। रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता”। कृत्यतत्त्वार्णवे “कार्त्तिकेऽमलपक्षे तु युगाद्या नवमी स्मृता। पूर्व्वाह्णसमये तत्र पूजाविधिरिहोदितः”। कृत्यतत्त्वार्णवे भविष्यपुराणम् “कार्त्तिके शुक्लपक्षे तु युगाद्या नवमी स्मृता। पूर्व्वाह्णसमये काष्ठात्मिका परदिने यदि। तत्र पूजादिकं कुर्य्यात् पिण्डनिर्वपणादृते”। स्मृतिसागरे “कार्त्तिकस्य युगाद्यायामृद्धिकामोऽर्च्चयेदुमाम्”। ततश्च उक्तवचनेषु तत्तिथेर्युगादित्वेन कीर्त्तनात् तत्पूजायाश्च युगाद्यदिनकर्त्तव्यत्वेन विधानात् पूर्व्वापरदिनयोस्तस्याः सम्बन्धे परदिन एव कर्त्तव्यता न तु युग्मशास्त्रेण अष्टमीविद्धाया ग्राह्यता युगाद्या वर्षवृद्धिश्चेत्यादि वचनात् यत्तु “श्रावणी दौर्गनवमी दूर्वा चैव हुताशिनी। पूर्व्वविद्धैव कर्त्तव्येत्यादि” वचनं तत् एतद्भिन्ननवमीकर्त्तव्यदुर्गाव्रतपरम् तच्च व्रतं व्रतशब्दे वक्ष्यमाणं द्रष्टव्यम्। जगद्धात्रीविद्योत्पत्तिमाह कात्यायनीतन्त्रे ७६पट०। “पार्व्वत्युवाच। भगवन्! प्राणनाथेश! सर्व्वतत्त्वविशारद!। श्रुता कात्यायनीविद्यासमुत्पत्तिस्त्रिलोचन!। महादुर्गाजगद्धात्रीविद्योत्पत्तिर्भवेद्यतः। तत् सर्व्वं ब्रूहि भगवन्! कृपया परमेश्वर!। इति देवीप्रश्ने “श्रीशिव उवाच। शृणु पार्व्वति! वक्ष्यामि रहस्यं परमाद्भुतम्। यत् श्रुत्वा लभते देवि! सौभाग्यसुखमुत्तमम्। पुरा पुरन्दरमुखाः स्वेश्वरत्वाभिमानिनः। प्राहुः किमीश्वरोऽस्त्यस्मानतिरिच्य सुरानिति। अथ दुर्गा जगन्माता नित्या चैतन्यरूपिणी। एतेषां धर्मसेतूनामिन्द्रादीनां नियन्त्रणम्। करिष्यामीति निश्चित्य ज्योतीरूपं दधावलम्। तेषामाविरभूद्दुर्गा जगद्धात्री जगन्मयी। कोटिसूर्य्यप्रतीकाशं चन्द्रकोटिसमप्रभाम्। ज्वलन्तं पर्व्वतमिव सर्व्वलोकभयङ्करम्। तद्ददृशुः सुराः सर्व्वे भयमापुर्महौजसः। किमेतन्न विनिश्चेतुं शक्तास्ते ह्यभवन् सुराः। वायुमाहुः समाहूय किमेतत् परमाद्भुतम्। विजानीहि मरुद्वीर मातरिश्वन्! दिशां पते!। ततो वायुर्द्रुतं तत्र गतस्तेजोऽन्तिकं ततः। तमन्तिकमुपायातं प्राह तेजोमयी ततः। बलवन्! कस्त्वमायातो वीर्य्यं किञ्चास्ति वा त्वयि। आदातुं शक्यते सर्व्वं पृथिवीतलसम्भवम्। इति प्रत्युक्तवान् वायुः क्षणं तत्रैव तिष्ठति। आदत्स्वैतत् तृणमिति निदधौ वायवे तृणम्। वायुः सर्व्वप्रयत्नेन नादातुं तत्क्षमोऽभवत्। ततो देवाः प्राहुरग्निं भीता उद्विग्नमानसाः। अग्ने! एतद्विजानीहि किमेतत् कर्म ह्यद्भुतम्। इत्युक्तो देवतावृन्दैरग्निस्तेजोऽन्तिकं गतः। अमरो जातवेदा वा तेजोवागित्युवाच तम्। स प्रोक्तवानग्निरस्मि सर्व्वदाहकशक्तिकः। दहैतत् तृणमत्युक्तमिति तस्मै तृणं ददौ। अग्निः सर्व्वप्रयत्नेन दग्धुं नैतत्तत्क्षमोऽभवत्। ततो निवृत्ते वह्निर्भूत्वा सोऽपत्र-

पान्वितः। एकतस्याः सुराः सर्वे मन्त्रयामासुरुत्तमम्। इयमेवेश्वरी नूनं स्तोषग्रामोनेश्वरावयम्। इति निश्चित्य सुधियस्तुष्टुवुः परमेश्वरीम्। प्राङ्दैवगणाः सर्वे त्वमीशा नेश्वरा वयम्। ईश्वरत्वाभिमानेन यदस्माकं सुदुष्कृतम्। क्षन्तुमर्हसि तत् सर्वं कृपया जगदम्बिके। तत्रूपं सुगोप्यं यन्मङ्गल्यं सर्वमङ्गलम्। तद्द्रष्टुं वयमिच्छामो देहि दर्शनमुत्तमम्। इत्युक्तानां सुवुद्धीनामाविरासीच्छिवाम्बरे। तेजस्यन्तर्हिते तस्मिन् चमत्कारि कलेवरे। मृगेन्द्रोपरि सुस्मेरा सर्वालङ्कारभूषिता। चतुर्भुजा महादेवी रक्ताम्बरधरा शुभा। बालार्कसदृशी देहे नागयज्ञोपवीतिनी। त्रिनेत्रा कोटिचन्द्राभा देवर्षिगणसेविता। दर्शयामास देवानामेवं रूपं जगन्मयी। ततस्तां तुष्टुवुर्देवा जगद्धात्रीं महेश्वरीम्। वरं प्रापुः सुरगणायथेष्टं त्रिदशालये। तत्रैवान्तर्हिता देवी महादुर्गा जगन्मयी"। इयमेव कथा प्रायशः केनोपनिषदि स्थिता तद्वाक्यञ्च इन्द्रशब्दे ९४२ पृ० दर्शितम्। इयांस्तु विशेषः तत्र इन्द्रादिप्रबोधनाय प्रादुर्भूतया ब्रह्मशक्त्या हैमवत्या ब्रह्ममहात्म्येनैव इन्द्रादीनामसुरजयशक्तिरुक्ता अत्र तु शक्तिशक्तिमतोरभेदेन जगद्धात्रीरूपेणाविर्भूताया देव्या माहात्म्योक्तिरिति।

जगद्बल पु० जगतां बलमस्मात्। वायौ त्रिका०। तस्यैव व्यानरूपस्ववृत्तिभेदात् सर्वबलजक्रियाहेतुत्वस्य भङ्ग्या छान्दोग्ये उक्तत्वात् तस्य तथात्वम् यथा "अथोयान्यन्यानि वीर्य्यवन्ति कर्म्माणि यथाग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्ननपानंस्तानि करोत्येतस्य हेतोर्व्यानमेवोद्गीथमुपासीत"। बलस्य च सर्वक्रिया हेतुत्वं छान्दोग्ये भूमविद्यायामुक्तं यथा "बलं वाव विज्ञानाद्भूयोऽपि ह शतं विज्ञानवतामेको बलवानाकम्पयते स यदा बली भवत्यथोत्थाता भवत्युत्तिष्ठन् परिचरिता भवति परिचरन्नुपसत्ता भवत्युपसीदन्द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्त्ता भवति विज्ञाता भवति बलेन वै पृथिवी तिष्ठति बलेनान्तरिक्षं बलेन द्यौर्बलेन पर्वता बलेन देवमनुष्या बलेन पशवश्च वयांसि च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपीलकं बलेन लोकस्तिष्ठति बलमुपास्स्वेति"। सर्वक्रियाणां वायुकार्य्यत्वं च सुश्रुते दर्शितं यथा "वायव्याः स्पर्शः स्पर्शेन्द्रियं सर्वचेष्टादयः सर्वशरीरस्पन्दनं लघुता च" तेन सर्वचेष्टानां वायुकार्य्यत्वोक्त्या बलस्य च तत्र हेतुत्वोक्त्या च वायोरेव बलहेतुत्वमवसीयते।

जगद्योनि स्त्री जगतां योनिरिवोत्पत्तिस्थानत्वात्। १परमेश्वरे तस्य जन्मादिहेतुत्वात् तथात्वम्। २शिवे ३विष्णौ ४चतुर्मुखे तु तदभेदोपचारात् "जगद्योनिरयोनिस्त्वम्" कुमा० ब्रह्मस्तवे। "जगद्योनिं जगद्दीपं जयिनं जगतोगतिम्" भा० भी० २०अ० शिवस्तवे। "नारायणं जगद्योनिं पुराणं पुरुषं प्रभुम्" हरिव० १०७अ०। विष्णुस्तवे। ५पृथिव्यां शब्दच० तस्याः भूतचतुष्टयोत्पत्तिस्थानत्वात् तथात्वम्।

जगद्वहा स्त्री जगन्ति वहति धारयति वह—अच्। सर्वधरायां मेदिन्याम् त्रिका०।

जगद्विनाश पु० जगतोऽखिलकर्म्मवतो विनाशोऽत्र। कल्पान्ते प्रलयकाले। प्रलये च सर्व्वक्रियाशून्यत्वं यथाह मनुः। "यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति। तस्मिन् स्वपिति तु स्वस्थे कर्मात्मानः शरीरिणः। स्वकर्म्मभ्योनिवर्त्तन्ते मनश्च ग्लानिमृच्छति। युगपत्तु प्रलीयन्ते यदा तस्मिन् महात्मनि। तदायं सर्वभूतात्मा सुखं स्वपिति निर्वृतः। तमोऽयन्तु समाश्रित्य चिरन्तिष्ठति सेन्द्रियः। न च स्वं कुरुते कर्म्म तदोत्क्रामति मूर्त्तितः"।

जगनु(नू) पु० जगता नम्यते नम—बा० कर्म्मणि डु वा पृषो०तनोपः। १जन्तौ वैश्वानरे २वह्नौ च मेदि०। विश्वे जगनु रिति पाठस्तत्रार्थे। तत्र जन्तोश्चेतनत्वेन जगतां नम्यमानत्वात् वह्नेस्तु सर्वैर्नम्यमानत्वात् तथात्वम्

जगन्नाथ पु० ६त०। १परमेश्वरे "एष सर्वेश्वरः" इत्यादिश्रुतेस्तस्य सर्वेश्वरत्वात् तथात्वम्। तदभेदात् २विष्णौ। अर्श०अच्। ३तदीयक्षेत्रभेदे न० तत्क्षेत्रस्य तन्नामताकारणं स्कन्दपु० उत्कलखण्डे यथा "एतत्क्षेत्रवरं चास्य वपुर्भूतं महात्मनः। स्वयम् वपुष्मान् यत्रास्ते स्वनाम्ना ख्यापितं हि तत्"। तत्स्थानसीमातीर्थभेदादि पुरुषोत्तमतत्त्वे उक्तं यथा

ब्रह्मपुराणे "पृथिव्यां भारतं वर्षं कर्म्मभूमिरुदाहृता। न खल्वन्यत्र मर्त्यानां भूमौ कर्म्म विधीयते। तत्रास्ते भारते वर्षे दक्षिणोदधिसंस्थितः। ओड्रदेश इति ख्यातः स्वर्गमोक्षप्रदायकः। समुद्रादुत्तरे तीरे यावद्विरजमण्डलम्"। तीर्थकाण्डकल्पतरौ वामनपुराणम् "उपोष्य रजनीमेकां विरजां स नदीं ययौ। स्नात्वा

वैरजसे तीर्थे दत्त्वा पिण्डं पितुस्तथा। दर्शनार्थं ययौ धीमानजितं पुरुषोत्तमम्। तं दृष्ट्वा पुण्डरीकाक्षमक्षरं परमं शुचिः। उपोष्य स तिलान् दत्त्वा महेन्द्र! दक्षिणं ययौ"। उपोष्य स्थित्वा। तथा "आदौ यद्दारु प्लवते सिन्धोः पारे अपूरुषम्। तदालभस्व दुर्द्दनो! तेन याहि परं स्थलम्" तैत्ति०श्रुतिः। अस्य व्याख्या सांख्यायनभाष्ये "आदौ विप्रकृष्टे देशे वर्त्तमानं यद्दारु दारुमयं पुरुषोत्तमाख्यदेवताशरीरं प्लवते जलस्योपरि वर्त्तते अपूरुषं निर्म्मातृरहितत्वेन अपूरुषं तत् आलभस्व दुर्द्दनो! हे! होतः, तेन दारुमयेन देवेन उपास्यमानेन परं स्थलं वैष्णवं लोकं गच्छेत्यर्थः। अथर्ववेदेऽपि "आदौ यद्दारु प्लवते सिन्धोर्म्मध्ये अपूरुषम्। तदालभस्व दुर्द्दनो तेन याहि परं स्थलम्"। अत्रापि तथैवार्थः मध्ये नीरे। स्कन्दपुराणम् "इन्द्रद्युम्न! प्रसन्नस्ते भक्त्या निष्कामकर्म्मभिः। उत्सृज्य वित्तकोटीस्तु यन्ममायतनं कृतम्। भङ्गेऽप्येतस्य राजेन्द्र! स्थानं न त्यक्ष्यते मया"। ब्रह्मपुराणे "विरजे विरजा नाम ब्रह्मणा संप्रतिष्ठिता। तस्याः सन्दर्शने मर्त्यः पुनात्यासप्तमं कुलम्। स्नात्वा दृष्ट्वा तु तां देवीं भक्त्याऽऽपूज्य प्रणम्य च। नरः स्ववंशमुद्धृत्य मम लोकं स गच्छति। आस्ते वैतरणी नाम सर्वपापहरा नदी। तस्यां स्नात्वा नरश्रेष्ठ। सर्वपापैः प्रमुच्यते"। वैतरणीमधिकृत्य महाभारते "आयातभागं सर्व्वेभ्यो भागेभ्यो भागमुत्तमम्। देवाः सङ्कल्पयामासुर्भयाद्रुद्रस्य शाश्वतीम्। इमां गाथां समुद्धृत्य मम लोकं स गच्छति। देवायनं तस्य पन्थाः शक्रस्येव विराजते"। ब्रह्मपुराणे "आस्ते स्वयम्भूस्तत्रैव क्रोड़रूपी हरिः स्वयम्। दृष्ट्वा प्रणम्य तं भक्त्या नरो विष्णुपुरं व्रजेत्"। तथा "विरजायां मम क्षेत्रे पिण्डदानं करोति यः। स करोत्यक्षयां तृप्तिं पितॄणां नात्र संशयः। मम क्षेत्रे मुनिश्रेष्ठ! विरजे ये कलेवरम्। परित्यक्ष्यन्ति पुरुषास्ते मोक्षं प्राप्नुवन्ति वै। नदी तत्र महापुण्या विन्ध्यपादविनिर्गता। चित्रोत्पलेति विख्याता सर्वपापहरा शुभा"। चित्रोत्पला महानदी। तथा "सत्यं सत्यं पुनः सत्यं क्षेत्रं तत् परमं महत्। पुरुषाख्यं सकृद्दृष्ट्वा सागराम्भःसकृन्मृतः। ब्रह्मविद्यां सकृज्ज्ञात्वा गर्भवासो न विद्यते"। पुरुषोत्तमक्षेत्रदर्शनसागरमरणब्रह्मविद्याजपानां प्रत्येकं गर्भवासाजनकत्वम्। कूर्म्मपुराणे "तीर्थं नारायणस्यास्य स्नात्वा तु पुरुषोत्तमम्। अत्र नारायणः श्रीमानास्ते परमपूरुषः। पूजयित्वा परं विष्णुं तत्र स्नात्वा द्विजोत्तमाः!। ब्राह्मणान् भोजयित्वा तु विष्णुलोकमवाप्नुयात्"। श्राद्धकल्पतरौ वायुपुराणे "धूतपापं तथा तीर्थं सुभद्रादक्षिणस्तथा। गोकर्णो गजकर्णश्च तथा च पुरुषोत्तमः। एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते"। ब्रह्मपुराणे "चक्रं दृष्ट्वा हरेर्दूरात् प्रासादोपरिसंस्थितम्। सहसा मुच्यते पापात् सर्वस्मादिति मे मतिः"। तथा "मार्कण्डेयह्रदे गत्वा स्नात्वा चोदङ्मुखः शुचिः। निमज्जेत्त्रींश्च वारांश्च इमं मन्त्रमुदीरयन्"। "मार्कण्डेयह्रदे त्वेवं स्नात्वा दृष्ट्वा तु शङ्करम्। दशानामश्वमेधानां फलं प्राप्नोति मानवः। पापैः सर्वैर्विनिर्मुक्तः शिवलोकं स गच्छति। तत्र भुक्त्वा वरान् भोगान् यावदाहूतसंप्लवम्। इह लोकं समासाद्य ततो मोक्षमवाप्नुयात्। कल्पवृक्षं ततो गत्वा कृत्वा तं त्रिःप्रदक्षिणम्। पूजयेत् परया भक्त्या मन्त्रेणानेन तं वटम्"। "भक्त्या प्रदक्षिणं कृत्वा महाकल्पवटं नरः। सहसा मुच्यते पापात् जीर्णत्वच इवोरगः। छायां तस्य समासाद्य कल्पवृक्षस्य भो द्विजाः!। ब्रह्महत्यां नरो दह्यात् पापेष्वन्येषु का कथा। दृष्ट्वा कृष्णाङ्गसम्भूतं ब्रह्मतेजोमयं वटम्। न्यग्रोधाकृतिनं विष्णुं प्रणिपत्य च भो द्विजाः!। राजसूयाश्वमेधाभ्यां फलं प्राप्नोति चाधिकम्। तथा स्ववंशमुद्धृत्य विष्णुलोकं स गच्छति। वैनतेयं नमस्कृत्य कृष्णस्य पुरतः स्थितम्। सर्वपापविनिर्मुक्तस्ततो विष्णुपुरं व्रजेत्। दृष्ट्वा वटं वैनतेयं यः पश्येत् पुरुषोत्तमम्। सङ्कर्षणं सुभद्राञ्च स याति परमां गतिम्। प्रविश्यायतनं विष्णोः कृत्वा तं त्रिःप्रदक्षिणम्। सङ्कर्षणं स्वमन्त्रेण भक्त्याऽऽपूज्य प्रसादयेत्"। "एवं प्रसाद्य चानन्तमजेयं त्रिदशार्च्चितम्। कैलासशिखराकारं चन्द्रात् कान्ततराननम्। नीलवस्त्रधरं देवं फणाविकलमस्तकम्। महाबलं हलधरं कुण्डलैकविभूषणम्! रौहिणेयं नरो भक्त्या लभेताभिमतं फलम्। सर्व्वपापविनिर्म्मुक्तो विष्णुलोकं स गच्छति। आहूतसंप्लवं यावत् भुक्त्वा तत्र सुखं नरः। पुण्यक्षयादिहागत्य प्रवरे योगिनां कुले। ब्राह्मणप्रवरो भूत्वा सर्व्वशास्त्रार्थपारगः। ज्ञानं तत्र समासाद्य मुक्तिं प्राप्नोति दुर्लभाम्। एवमभ्यर्च्य हलिनं ततः

कृष्णं विचक्षणः । द्वादशाक्षरमन्त्रेण पूजयेत् सुसमाहितः” । आभूतसंप्लवं यावत् भूतसंप्लवं यावत् आप्रलयकालम् इति यावत् छान्दसोभकारस्य हकारः । द्वादशाक्षरमन्त्रेण ओँ नमोभगवते वासुदेवाय इत्यनेन । “द्विषट्कवर्णमन्त्रेण भक्त्या ये पुरुषोत्तमम् । पूजयन्ति सदा धीरास्ते मोक्षं प्राप्नुवन्ति वै । तस्मात्तेनैव मन्त्रेण भक्त्या कृष्णं जगद्गुरुम् । संपूज्य गन्धमाल्याद्यैः प्रणिपत्य प्रसादयेत्” एवं प्रसाद्य देवेशं वरदं भक्तवत्सलम् । सर्वपापहरं देवं सर्वकामफलप्रदम् । घ्रानदं द्विभुजं देवं पद्मपत्रायतेक्षणम् । महोरस्कं महाबाहुं पीतवस्त्रं शुभाननम् । शङ्खचक्रगदापाणिं मुकुटाङ्गदभूषणम् । सर्वलक्षणसंयुक्तं वनमालाविभूषितम् । दृष्ट्वा नरोऽञ्जलिं बद्ध्वा दण्डवत् प्रणिपत्य च । अश्वमेधसहस्राणां फलं प्राप्नोति भोद्विजाः ! । यत् फलं सर्वतीर्थेषु स्नानदाने प्रकीर्त्तितम् । नरस्तत् फलमाप्नोति दृष्ट्वा कृष्णं प्रणम्य च” । अत्र यद्यपि दृष्ट्वा प्रणम्येति श्रवणात् समुच्चितएव फलान्वयोऽन्यथा वाक्यभेदः स्यात् तथापि शेषे दर्शनमात्र एव फलोपसंहारात् प्रत्येकं फलान्वयइति वदन्ति । ब्रह्मपुराणे “ततः पूज्य स्वमन्त्रेण सुभद्रां भक्तवत्सलाम् । प्रसादयेत्ततोविप्राः ! प्रणिपत्य कृताञ्जलिः” । स्वमन्त्रेण प्रणवादिनमोन्तेन नाम्ना । यथा गारुड़े “प्रणवादिनमोऽन्तेन चतुर्थ्यन्तेन सत्तमाः ! । देवतायाः स्वकं नाम मूलमन्त्रः प्रकीर्त्तितः” । “एवं प्रसाद्य तां देवीं जगद्धात्रीं जगद्धिताम् । बलदेवस्य भगिनीं सुभद्रां वरदां शिवाम् । कामगेन विमानेन नरोविष्णुपुरं व्रजेत् । निष्क्रम्य देवतागारात् कृतकृत्योभवेन्नरः । प्रणम्यायतनं पश्चात् व्रजेत्तत्र च भोद्विजाः ! । भक्त्या दृष्ट्वा च तं देवं प्रणम्य नरकेशरिम् । मुच्यते पातकैर्म्मर्त्यः समस्तैर्नात्र संशयः” । नरकेशरिं नरकेशरिणम् । तथा ‘अनन्ताख्यं वासुदेवं दृष्ट्वा भक्त्या प्रणम्य च । सर्वपापविनिर्मुक्तोनरोयाति परं पदम्’ । तथा “श्वेतगङ्गां नरः स्नात्वा यः पश्येत् श्वेतमाधवम्” । तथा “कुशाग्रेणापि राजेन्द्र ! श्वेतगाङ्गेयमम्बु च । स्पृष्ट्वा स्वर्गं गमिष्यन्ति मद्भक्ता ये समाहिताः । यस्त्विमां प्रतिमां लोके माधवाख्यां शशिप्रभाम् । विहाय सर्वलोकान् वै मम लोके महीयते” । तथा ‘श्वेतमाधवमालोक्य समीपे मत्स्यमाधवम् । एकार्णवजले मग्नं रोहितं रूपमास्थितम् । वेदानां तारणार्थाय रसातलतले स्थितम्” । तथा “आद्यावतारणं रूपं माधवं मत्स्यरूपिणम् । प्रणम्य प्रयतोभूत्वा सर्व्वदुःखाद्विमुच्यते” । तथा “पूर्व्वोक्तेन तु मन्त्रेण नमस्कृत्य तु तं वटम् । दक्षिणाभिमुखो गच्छेत् धन्वन्तरशतत्रयम्” । धनुःशतत्रयम् । तथा “उग्रसेनं पुरा दृष्ट्वा स्वर्गद्वारेण सागरम् । गत्वाचम्य शुचिस्तत्र ध्यात्वा नारायणं परम् । न्यसेदष्टाक्षरं मन्त्रं पश्चाद्धस्तशरीरयोः” । “समुद्रोदकेन नाचामेत्” तस्यापेयत्वस्य तैत्तिरीयश्रुतावुक्तत्वात् । “यैः कृतः सर्वभक्षोऽग्निरपेयश्च महोदधिः । क्षयी चाप्यायितश्चन्द्रः कोन नश्येत् प्रकोप्य तान्” इति मनुनाभिहितत्वाच्च” तस्यास्पृश्यत्वेऽपि विधिभेदेनैव तस्य स्पृश्यता यथाह ब्रह्मपुराणम्

“एवमुच्चार्य्य विधिवत्ततःस्नानं समाचरेत् । अन्यथा भोद्विजश्रेष्ठाः ! स्नानं तत्र न शस्यते” । वनपर्वणि “अग्निश्च तेजो वड़वा च देहोरेतोधाविष्णोरमृतस्य नाभिः । एवं ब्रुवन् पाण्डव ! सत्यवाक्यमतोऽवगाहेत पतिं नदीनाम् । अन्यथा हि कुरुश्रेष्ठ ! स्पृष्टव्योन महोदधिः । कुशाग्रेणापि कौन्तेय ! देवयोनिरपांपतिः । देवान् पितॄंस्तथा चान्यान् सन्तर्प्याचम्य वाग्यतः” (अन्यान् ऋषीन्) ब्रह्मपु० । “कृत्वा त्वाब्दैवतैर्मन्त्रैरभिषेकञ्च मार्ज्जनम् । अन्तर्जले जपेत् पश्चात् त्रिरावृत्त्यघमर्षणम्” । अब्दैवतैः “आपोहिष्ठा” इत्यादिभिः । अघमर्षणम् ऋतञ्च सत्यञ्चेत्यादि । “हस्तमात्रं चतुःकोणं चतुर्द्वारं सुशोभनम् । पुरं विलिख्य भो विप्रास्तीरे तस्य महोदधेः । एवं मण्डलमालिख्य पूजयेत्तत्र भोद्विजाः ! । अष्टाक्षरविधानेन नारायणमजं विभुम् । ओँनमो नारायणाय” इत्यष्टाक्षरमन्त्रः । ब्रह्मपुराणे “तीर्थे चाभ्यर्च्च्य विधिवत् नारायणमनामयम् । रामं कृष्णं सुभद्राञ्च प्रणिपत्य च सागरम् । दशानामश्वमेधानां फलं प्राप्नोति मानवः ! सर्वपापविनिर्मुक्तः सर्वदुःखविवर्ज्जितः । कुलैकविंशमुद्धृत्य विष्णुलोकञ्च गच्छति । पितॄणां ये प्रयच्छन्ति पिण्डं तत्र विधानतः । अक्षयां पितरस्तेषां तृप्तिं संप्राप्नुवन्ति वै” । तथा “कोट्यो नव नवत्यश्च तत्र तीर्थानि सन्ति वै । तस्मात् स्नानञ्च दानञ्च होमं जप्यसुरार्च्चनम् । यत् किञ्चित् क्रियते तत्र चाक्षयं भवति द्विजाः ! । ततोगच्छेत् द्विजश्रेष्ठाः ! तीर्थं यज्ञाङ्गसम्भवम् ।

इन्द्रद्युम्नसरोनाम यत्रास्ते पावनं शुभम्। गत्वा
तत्र शुचिः श्रीमानाचम्य मनसा हरिम्। ध्यात्वो-
पस्थाय च जपंश्चेदं मन्त्रमुदीरयेत्”। “एवमुच्चार्य
विधिवत् स्नात्वा देवानृषीन् पितॄन्। तिलोदकेन
चान्यांश्च सन्तर्प्याचम्य वाग्यतः। दत्त्वा पितॄणां
पिण्डांश्च संपूज्य पुरुषोत्तमम्। दशाश्वमेधिकं सम्यक्
फलं प्राप्नोति मानवः”। तथा “नाना नद्यः समुद्राश्च
सप्ताहं पुरुषोत्तमे। ज्येष्ठशुक्लदशम्यादि प्रत्यक्षं यान्ति
सर्वदा। स्नानदानादिकं तस्मात् देवताप्रेक्षणादिकम्।
यत् किञ्चित् क्रियते तात! तस्मिन्। कालेऽक्षयं भवेत्।
एवं कृत्वा पञ्चतीर्थमेकादश्यामुपोषितः”। “ज्यैष्ठे शुक्ल
दशम्यान्तु पश्येत् श्रीपुरुषोत्तमम्। स पूर्वोक्तं फलं
प्राप्य क्रीडित्वा चाच्युतालये। प्रयाति परमं स्थानं
यस्मान्न विनिवर्त्तते”। तीर्थभेदेन स्नानान्तरावृत्तिमाह
निगमः। “नावर्त्तयेत् पुनः कर्म्म तर्पणादिकम-
न्वहम्। काम्यनैमित्तिके हित्वा एकं ह्येकत्र वासरे।
व्यपोह्य चाष्टमं भागमुदयाद्यत्र कुत्रचित्। तिथ्यो-
र्युग्मेऽप्ययुग्मे वा यद्यदाह्निकमाचरेत्”। ब्रह्मपु०
“मार्कण्डेयावटः कृष्णो रौहिणेयो महोदधिः। इन्द्र-
द्युम्नसरश्चैव पञ्चतीर्थी विधिः स्मृतः”। मार्कण्डेया-
वटोमार्कण्डेयह्रदः। कृष्णोऽक्षयवटः “न्यग्रोधाकृतिनं
विष्णुमिति” पूर्वोक्तात्। वराहपुराणे “यस्तिष्ठेदेक-
पादेन कुरुक्षेत्रे नराधिप!। वर्षाणामयुतं सप्त वायु-
भक्षो जितेन्द्रियः। ज्यैष्ठे मासि सिते पक्षे द्वादश्यान्तु
विशेषतः। पुरुषोत्तममासाद्य ततोऽधिकफलं लभेत्।
अग्निपुराणे “वैशाखस्य सिते पक्षे तृतीयाक्षयसंज्ञिता।
तत्र मां लेपयेद्गन्धलेपनैरतिशोभनम्”। तथा “ज्यै-
ष्ठ्यामहञ्चावतीर्णस्तत् पुण्यं जन्मवासरम्। तस्यां मे
स्नपनं कुर्य्यात् महास्नानविधानतः। ज्यैष्ठे प्रातस्तने
काले ब्रह्मणा सहितस्य माम्। रामं सुभद्रां संस्नाप्य
मम लोकमवाप्नुयात्”। तथा “आषाढस्य सिते पक्षे
द्वितीया पुष्यसंयुता। तस्यां रथे समारोप्य रामं मां
भद्रया सह। यात्रोत्सवं प्रवर्त्त्याथ प्रीणयेच्च द्विजान्
बहून्”। तथा “पुष्याभावात्तथा कार्य्या सदा सा
प्रीतये मम”। स्कान्दपुराणे “फाल्गुन्यां क्रीडनं
कुर्य्यात् दोलायां मम भूमिप!”। ब्रह्मपुराणे “उत्तरे
दक्षिणे विप्रास्त्वयने पुरुषोत्तमे। दृष्ट्वा रामं सुभद्राञ्च विष्णु
लोकं व्रजेन्नरः। नरोदोलागतं दृष्ट्वा गोविन्दं पुरु-

षोत्तमम्। फाल्गुन्यां संयतोभूत्वा गोविन्दस्य पुरं
व्रजेत्। विषुवद्दिवसे प्राप्ते पञ्चतीर्थीविधानतः।
कृत्वा मञ्चगतं कृष्णं दृष्ट्वा तत्राथ भोद्विजाः। नरः
समस्तयज्ञानां फलं प्राप्नोति दुर्लभम्। विमुक्तः सर्व-
पापेभ्योविष्णुलोकञ्च गच्छति। यः पश्यति तृती-
यायां कृष्णं चन्दनरूषितम्। वैशाखस्य सिते पक्षे स
यात्यच्युतमन्दिरम्”। तथा “मासि ज्यैष्ठे तु संप्राप्ते
नक्षत्रे शक्रदैवते। पौर्णमास्यां तथा स्नानं सर्वकालं
हरेर्द्विजाः। तस्मिन् काले तु ये मर्त्याः पश्यन्ति पुरु-
षोत्तमम्। बलभद्रं सुभद्राञ्च ते यान्ति पदमव्ययम्।
तथा “स्नातः पश्यति यः कृष्णं व्रजन्तं दक्षिणामुखम्।
गुण्डिकामण्डपं यान्तं ये पश्यन्ति तथास्थितम्। कृष्णं
बलं सुभद्राञ्च ते यान्ति भवनं हरेः। ये पश्यन्ति तदा
कृष्णं सप्ताहं मण्डपे स्थितम्। हरिं रामं सुभद्राञ्च
विष्णुलोकं व्रजन्ति ते”। तथा, सम्वत्सरमुपोषित्वा मास-
त्रयमथापि वा। तेन जप्तं हुतं तेन तेन तप्तं तपोम-
हत्। स याति परमं स्थानं यत्र योगेश्वरोहरिः”।
तथा “दृष्ट्वा रामं महाज्यैष्ठ्यां कृष्णं सह सुभद्रया। वि-
ष्णुलोकं नरो याति समुद्धृत्य शतं कुलम्”। तथा “वार्षि
कांश्चतुरो मासान् यावत् स पुरुषोत्तमे। काशीवासयुगा-
न्यष्टौ दिनेनैकेन लभ्यते”। मत्स्यपुराणे “कोटिजन्मकृतं
पापं पुरुषोत्तमसन्निधौ। कृत्वा सूर्य्यग्रहे स्नानं विमु-
च्यति महोदधौ”। ब्रह्मपुराणे “पथि श्मशाने गृहम-
ण्डपे वा रथ्याप्रदेशेऽपि च यत्र तत्र। इच्छन्ननिच्छन्-
पि यत्र तत्र संत्यज्य देहं लभते च मोक्षम्। देहं त्य-
जन्ति पुरुषाः ये तत्र पुरुषोत्तमे। कल्पवृक्षं समासाद्य
मुक्तास्तेनात्र संशयः। वटसागरयोर्मध्ये ये त्यजन्ति
कलेवरम्। ते दुर्लभं परं मोक्षमाप्नुवन्ति न संशयः”।
तत्रैव “तथा चैवोत्कले देशे कीर्त्तिवासा महेश्वरः। सर्व-
पापहरं तस्य क्षेत्रं परमदुर्लभम्। लिङ्गकोटिसमायुक्तं
वाराणस्या समं शुभम्। एकाम्रकेति विख्यातं तीर्थं
ष्टकसमस्थितम्। तीर्थं विन्दुसरोनाम तस्मिन् क्षेत्रे द्विजो
त्तमाः!। देवानृषीन् मनुष्यांश्च पितॄन् सन्तर्पयेत्ततः।
तिलोदकेन विधिना नामगोत्रविधानवित्। स्नात्वैवं वि-
धिवत्तत्र सोऽश्वमेधफलं लभेत्। पिण्डं ये संप्रयच्छन्ति
पितृभ्यः सरसस्तटे। पितॄणामक्षयां तृप्तिं ते कुर्व्वन्ति
न संशयः। ततः शम्भोर्गृहं गच्छेद्दागत्य तः संयते-
न्द्रियः। प्रविश्य पूजयेत् पूर्वं कृत्वा तत्र प्रदक्षिणम्।

आगमोक्तेन मन्त्रेण वेदोक्तेन च शङ्करम् । अदीक्षितस्तु वा देवान् मूलमन्त्रेण चार्च्चयेत् । तथा सर्व्वपापविनिर्म्मुक्तो रूपयौवनगर्वितः । कुलैकविंशमुद्धृत्य शिवलोकं स गच्छति’ । ‘पश्येद्देवं विरूपाक्षं देवीञ्च शारदां शिवाम् । गणचण्डं कार्त्तिकेयं गणेशं वृषभं तथा । कल्पद्रुमञ्च सावित्रीं शिवलोकं स गच्छति । एतन्मया मुनिश्रेष्ठाः । क्षेत्रं प्रोक्तं सुदुर्लभम् । कोणार्कस्योदधेस्तीरं भक्तिमुक्तिफलप्रदम् । स्नात्वैव सागरे दत्त्वा सूर्य्यायार्घ्यं प्रणम्य च । नरो वा यदि वा नारी सर्व्वकामफलं लभेत् । ततः सूर्य्यालयं गच्छेत् पुष्पमादाय वाग्यतः । प्रविश्य पूजयद्भानुं कुर्य्यात्त त्रिःप्रदक्षिणम् । दशानामश्वमेधानां फलं प्राप्नोति मानवः” स्कान्दपु० उत्कलखण्डे ।

“तथा चानुदिनं देव्याः सिद्धाः ब्रह्मर्षयस्तथा । समर्च्चितुमिहायान्ति देवेशं न तथान्यतः । अहो तत्परमं क्षेत्रं विस्तृतं दशयोजनैः । तीर्थराजस्य सलिलादुत्थितं वालुकाचितम् । नीलाचलेन महता मध्यस्थेन विराजितम् । एकं स्तनमिव पृथ्व्याः सुदूरात् परिभावितम्” । ब्रह्माणं प्रति विष्णुवाक्यम् । “सागरस्योत्तरे तीरे महानद्यास्तु दक्षिणे । स प्रदेशः पृथिव्यां हि सर्व्वतीर्थफलप्रदम् । एकाम्रकाननाद् यावद् दक्षिणोदधितीरभूः । पदात् पदात् श्रेष्ठतमः क्रमेण परिकीर्त्तितः ! सिन्धुतीरे च यो ब्रह्मन् राजते नीलपर्व्वतः । पृथिव्यां गोपितं स्थानं तव चापि सुदुर्लभम् । सुरासुराणां दुर्ज्ञेयं माययाच्छादितं मम । सर्व्वसङ्गपरित्यक्तस्तत्र तिष्ठामि देहभृत् । सृष्ट्या लयेन नाक्रान्तं क्षेत्रं मे पुरुषोत्तमम् । नीलाद्रेरन्तरभुवि कल्पन्यग्रोधमूलतः । वारुण्यां दिशि यत् कुण्डं रोहिणं नाम विश्रुतम् । तत्तीरे निवसन्तो मां पश्यन्तश्चर्म्मचक्षुषा । तदम्भसा क्षीणपापा मम सायुज्यमाप्नुयुः । व्रतेषु तीर्थेषु च यज्ञदानयोः पुण्यं यदुक्तं विमलात्मनां हि । अहर्निवासाल्लभते च सर्व्वं निमेषवासात् खलु चाश्वमेधिकम्” “जैमिनिरुवाच । उदकार्थी समागत्य कुतश्चिद्वायसोत्तमः । कारणोदकसंपूर्णे तस्मिन् कुण्डे निमज्जितः । विलोक्य माधवं नीलरत्नकान्तिं कृपानिधिम् । काकदेहं समुत्सृज्य लुठमानं मुहुः क्षितौ । शङ्खचक्रगदापाणिस्तस्य पार्श्वे व्यवस्थितः” । यमं प्रति लक्ष्मीवाक्यम् । “पञ्चक्रोशमिदं क्षेत्रं समुद्रान्तर्व्यवस्थितम् । त्रिकोणं तीर्थराजस्य तटभूमौ सुनिर्म्मलम् । सुवर्णवालुकाकीर्णं नीलपर्व्वतशोभितम् । योऽसौ विश्वेश्वरो देवः साक्षान्नारायणात्मकः । संयम्य विषयग्रामं समुद्रतटमास्थितः । उपासितुं जगन्नाथं चतुःषष्ठ्युत्तमः प्रभुः । यमेश्वर इतिख्यातो यमसंयमनागतः । तं दृष्ट्वा पूजयित्वा तु कोटिलिङ्गफलं लभेत् । सीमा प्रतीचि क्षेत्रस्य शङ्खाकारस्य मूर्द्धनि । शङ्खाग्रे नीलकण्ठः स्यादेतत् क्षेत्रं सुदुर्लभम् । परमं पावनं क्षेत्रं साक्षान्नारायणस्य वै । शङ्खस्योत्तरभागस्तु समुद्रोदकसंप्लुतः । यत्सम्पर्कात् समुद्रोऽत्र तीर्थराजत्वमागतः । यथाऽयं भगवान् मुक्तिप्रदो दृष्टिपथं गतः । तथेदं मरणात् क्षेत्रं सिन्धुस्नानादिमुक्तिदम् । चिच्छेद ब्रह्मणः पूर्व्वं रुद्रः क्रोधात्तु पञ्चमम् । तच्छिरो दुस्त्यजं ब्रह्मन् । ब्रह्माण्डं परिबभ्रमे । तत्रागतो यदा ब्रह्म कपालं परिमुक्तवान् । कपालमोचनं तीर्थं द्वितीयावर्त्तसंस्थितम् । तस्य दक्षिणपार्श्वे तु मरणं भवमोचनम् । तृतीयावर्त्तसीमायां शक्तिं मे विमलाह्वयाम् । जानीहि धर्म्मराज ! त्वं भुक्तिमुक्तिफलप्रदाम् । नाभिदेशे स्थितं ह्येतत् त्रयं कुण्डं वटो विभुः । कपालमोचनं यावदर्द्धाशनी प्रतिष्ठिता । मध्यं शङ्खस्य जानीयात् सुगुप्तं चक्रपाणिना । तां दृष्ट्वा प्रणमेद् यस्तु भोगान् सोऽश्नाति शाश्वतान् । सिन्धुराजस्य सलिलात् यावन्मूलं वटस्य वै । कीटपक्षिमनुष्याणां मरणात् मुक्तिदो मतः । अन्तर्वेदीतीयं पुण्या वाञ्छ्यते त्रिदशैरपि । अत्र स्थितान् हि पश्यन्ति सर्व्वां शङ्खचक्रधारिणः । कामाख्या क्षेत्रपालश्च विमलां चान्तरा स्थिता । साक्षाद्ब्रह्मस्वरूपोऽसौ नृसिंहो दक्षिणे विभोः । अन्तर्वेद्या रक्षणार्थं शक्तयोऽष्टौ प्रकल्पिताः । उग्रेण तपसा पूर्व्वमहं सर्व्वेण भाविता । पत्न्यर्थं सा मया दृष्टा गौरी तत्राथ भाविनी । सर्व्वसौन्दर्य्यवसतिर्व्वपुषो मे विनिर्गता । तदा दृष्टा मया भद्रे वचनं मे प्रियं कुरु । अन्तर्वेदीं रक्ष मम परितस्त्वं स्वमूर्त्तिभिः । साऽत्र तिष्ठति मत्प्रीत्या अष्टधा दिक्षु संस्थिता । मङ्गला वटमूले तु पश्चिमे विमला तथा । शङ्खस्य पूर्व्वभागे तु संस्थिता सर्व्वमङ्गला । अर्द्धाशनी तथा लम्बा कुवेरदिशि संस्थिता । कालरात्रिर्दक्षिणस्यां पूर्व्वस्यान्तु मरीचिका । कालरामग्रास्तथा पश्चात् चण्डरूपा व्यवस्थिता । रुद्राण्याः साष्टधा भेदं दृष्ट्वा रुद्रोऽपि शङ्करः । कामानमष्टधा भित्त्वा उपास्ते परमेश्वरम् । कपालमोचनं नाम क्षेत्रपालं यमेश्वरम् । मार्कण्डेयं तथेशानं विश्वं प

नीलकण्ठकम्। वटमूले वटेशञ्च लिङ्गान्यष्टौ महेशितुः। यानि दृष्ट्वा तथा स्पृष्ट्वा पूजयित्वा विमुच्यते"। तन्नैवेद्यान्नस्य चण्डालादिस्पर्शे स्थानभेदे भोज्यता। कैश्चिदपि निबन्धृभिः तन्नैवेद्यान्नस्य चण्डालादिना स्पर्शे भोज्यताया अनुक्तेः तन्मूलीभूतवचनानाम मूलकत्वं निबन्धृभिरदृष्टत्वात् समूलकत्वे तत्क्षेत्रमध्ये एव भक्ष्यता तथाहि "प्रविशन्तस्तु तत्क्षेत्रं सर्वे स्युर्विष्णुमूर्त्तयः। यत्रान्नपाचिका लक्ष्मीर्भोक्ता यत्र जनार्दनः। चण्डालेनापि संस्पृष्टं ग्राह्यं तत्रान्नमग्रजैः" ब्रह्मवैवर्त्तपुराणवचनस्य समूलत्वे तत्क्षेत्रप्रवेशमात्रेण सर्वेषाम् विष्णुमूर्त्तित्वनिर्देशेन तत्क्षेत्रस्थे एवान्त्यजादिस्पर्शे न दुष्टत्वं नान्यत्र। "विष्ण्वालयगतं तद्धि निर्माल्यं पतितादयः। स्पृशन्ति चेन्न दुष्टं हि यथा विष्णुस्तथैव ते" इति उत्कलखण्डीयवाक्यस्य समूलत्वे विष्ण्वालयगतमिति विशेषणात् तत्रैव तस्य स्पर्शदोषराहित्यं नेतरत्र। यत्तु "चिरस्थमपि संशुष्कं नीतं वाऽदूरदेशतः। यथा तथोपयुक्तं तु सर्वपापापनोदनम्" तत्रत्यवाक्यान्तरम् तत्र नीतं वाऽदूरदेशत इत्यकारप्रश्लेषः बोध्यः वा एवार्थे अदूरत एव निकटेस्थितमेव नीतं केनापि दुष्टतामिति व्याख्येयम् पूर्वोक्तवचनद्वयैकवाक्यत्वात्। वैष्णवास्तु तस्य मन्यन्ते। ते हि सर्वत्र तदन्नस्योपयोगं कुर्वन्ति। वङ्गदेशीयानां स्मार्त्तानां तु अन्यस्थानगतस्य पावनत्वेऽपि न भक्षणाचरणम्। "शालग्रामो हरेर्मूर्त्तिर्जगन्नाथस्य भारत!। कलेर्दशसहस्रान्ते त्यक्त्वा यायात् हरेः पदम्" ब्रह्मवै० पु०। "कलेर्दश सहस्राणि विष्णुस्तिष्ठति मेदिनीम्। तदर्द्धं जाह्नवीतोयं तदर्द्धं ग्राम्यदेवता" इति च पठन्ति। "विमला तत्र देवः स्यात् जगन्नाथस्तु भैरवः" इति तन्त्रोक्ते तत्क्षेत्रस्थे पीठरक्षके ३भैरवभेदे पु०। भामिनीविलासरसगङ्गाधरादिग्रन्थकारके ४द्विजभेदे। "जगन्नाथस्यायं सुरधुनि! समुद्धारसमयः" तत्कृतगङ्गालहरी

जगन्निवास पु० ६त०। १परमेश्वरे तदभेदात् २विष्णौ च "जगन्निवासो वसुदेवसद्मनि" माघः। ईश्वरस्य प्रलये सर्वभूताधारत्वात् तथात्वम्।

जगन्मङ्गल न० जगतां मङ्गलं यस्मात्। कालीकवचभेदे "श्रीजगन्मङ्गलं नाम कवचं पूर्वसूचितम्" भैरवीत०।

जगन्मोहिनी स्त्री जगन्ति मोहयति मुह–णिच्–णिनि ६त०। १महामायायां २तदभिमानिन्यां दुर्गायां च।

जगर पु० जागर्त्ति युद्धेऽनेन जागृ–अच् पृषो०। कवचे हेम०।

जगल पु० जन–ड गल–अच् कर्म्मधा०। १सुराकल्के (मेदोया) अमरः २मदनवृक्षे ३पिष्टमद्ये ४धूर्त्ते त्रि० मेदि० कवचे न० हेम०। गोमये न० रत्नमाला। तत्र सुराकल्कगुणाः भावप्र० उक्ता यथा "पाद्युष्णोऽजगलः पक्ता हृल्लट्कफशोफहृत्"।

जग्ध त्रि० अद–कर्म्मणि क्त। १भुक्ते अमरः भावे क्त। २भोजने न०। ["गर्हितान्नाद्ययोर्जग्धिः" स्मृतिः।

जग्धि स्त्री अद–क्तिन्। १भोजने, २सहभोजने च अमरः।

जग्मि पु० गम–किन् द्वित्वम् १वायौ तस्य सततगतित्वात् तथात्वम्। २गन्तरि त्रि० स्त्रियां वा ङीप्।

जगुरि त्रि० गृ–निगरणे किन् द्वित्वं वेदे उत्वम्। १उद्गूर्णे। "दूरे ह्यध्वा जगुरिः पराचैः" ऋ०१०।१०८।१। २जङ्गमे च "इमामृचमधिलक्ष्य जगुरिः जङ्गम्यतेः" ११।२५। निरुक्ते उक्तेस्तथात्वम्

जघन न० वक्रं हन्ति हन–यङ् अच् पृषो०। स्त्रीणां १श्रोणिपुरोभागे, २श्रोण्यौ च। "चीनांशुकमिव पीनस्तनजघनायाः कुलीनायाः" उद्भटः। "जघनेन घनेन वा" भट्टिः। "गङ्गायमुनयोर्मध्ये पृथिव्या जघनं स्मृतम्। प्रयागं जघनस्थानम्" भा० व० ८५ अ०। [कुकुन्दरयोः हला०।

जघनकूपक पु० द्वि०व० जघनस्य कूप इव कायतः कै–क।

जघनचपला स्त्री "प्राक्प्रतिपादितमर्द्धे प्रथमे प्रथमेतरे तु चपलायाः। लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला" वृ० र० उक्ते मात्रावृत्तभेदे।

जघनेफला स्त्री० जघने इव मध्यभागे फलमस्याः अलुक्स०। काकोडुम्बरिकायाम् अमरः।

जघन्य त्रि० जघनमिव शाखा० यत् जघने भवः दिगा० यत् वा। १चरमे २गर्हिते "धर्म्मार्थकामाः सममेव सेव्या योह्येकसक्तः स जनोजघन्यः" ३लक्षणयुक्ते नरे ४अल्पे ५शूद्रे च शब्दर०। "जघन्यं सेवमानान्तु संयतं वासयेद्गृहे। उत्तमां सेवमानस्तु जघन्योवधमर्हति" मनुः वर्ग्यादि० अकर्म्मधारये तत्पुरुषे अग्रात् उत्तरपदस्याद्युदात्तता। ६राजानुचरभेदे तल्लक्षणादि वृ०स०६८अ० उक्तं यथा "पश्चापरे वामनको जघन्यः" इत्यादिना। विभज्य "मालव्यसेवी तु जघन्यनामा खण्डेन्दुतुल्यश्रवणः सुगन्धिः। शुक्रैणसारः पिशुनः कविश्च रूक्षाक्षि

-स्थूलकराङ्गुलीकः। क्रूरो धनी स्थूलमतिः प्रतीतस्ताम्रच्छविः स्यात् परिहासशीलः, ऊरोऽङ्घ्रिहस्तेष्वसिशक्तिपाशपरश्वधाङ्कश्च जघन्यनामा"। "जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः" गीता।

जघन्यज पु० जघन्ये चरमे जायते जन–ड। १शूद्रे, २कनिष्ठे त्रि० मेदि०। "ततोविष्णुरजघन्यो जघन्यजः" हरिवं० ९अ०। "जघन्यजस्तत्त्वकस्य श्रुतसेनेति यः श्रुतः" भा० आ० ३अ०। जघन्यप्रभवादयोऽप्यत्र। "जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः" मनुः।

जघन्यभ न० कर्म०। "आर्द्राश्लेषा तथा स्वातिर्ज्येष्ठा च भरणी तथा। शततारा जघन्यानि तारासु कथितानि वै" ज्यो० उक्तेषु षट्सु नक्षत्रेषु।

जघ्नि पु० हन–किन् द्वित्वञ्च। हननसाधनास्त्रादौ।

जघ्नु त्रि० हन–कु द्वित्वञ्च। घातके उणा०।

जघ्रि त्रि० घ्रा–किन् द्वित्वम्। घ्राणकर्त्तरि "भ्राजन्त्यभिविक्त जघ्रिः" ऋ० १। १६२ १५।

जङ्गम त्रि० गम–यङ्–अच्। सततगतियुते। "शरीरिणां स्थावरजङ्गमानाम" कुमा० "गुल्मैः स्थावरजङ्गमैः" मनुः

जङ्गमकुटी स्त्री जङ्गमा कुटीव। छत्रे त्रिका०।

जङ्गमगुल्म पु० कर्म०। रक्षके पदातिसमूहे "एवंविधान्नृपो देशान् गुल्मैः स्थावरजङ्गमैः। तस्करप्रतिषेधार्थं चारैश्चाप्यनुचारयेत्" मनुः।

जङ्गमविष न० सुश्रुतोक्ते विषभेदे तत्स्थानादि तत्रोक्तं यथा "अथातो जङ्गमविषविज्ञानीयमध्यायं व्याख्यास्यामः। जङ्गमस्य विषस्योक्तान्यधिष्ठानानि षोड़श। समासेन मया यानि विस्तरस्तेषु वक्ष्यते। तत्र दृष्टिनिःश्वासदंष्ट्रानखमूत्रपुरीषशुक्रलालार्त्तवमुखसन्दंशविशर्द्धितगुदास्थिपित्तशूकशवानीति। तत्र दृष्टिनिःश्वासविषास्तु दिव्याः सर्पाः। भौमास्तु दंष्ट्राविषाः। मार्जारश्ववानरमण्डूकपाकमत्स्यगोधाशम्बूकप्रचलाक (सौम्यकीटभेदः) गृहगोधिका कृकलासचतुष्पादकीटास्तथान्ये दंष्ट्रानखविषाः। चिपिटपिच्चटककषायवासिकसर्षपवासिकतोटकवर्च्चःकीटकौण्डिल्यकाः शकृन्मूत्रविषाः। मूषिकाः शुक्रविषाः। लूताश्च लालामूत्रपुरीषमुखसन्दंशनखशुक्रार्त्तवविषाः। वृश्चिकविश्वम्भरराजीवमत्स्योच्चिटिङ्गाः समुद्रवृश्चिकाश्चालविषाः (अन्तःपुच्छाग्रवर्त्तिकण्टकः) (हुल) इति। चित्रशिरःसरावकुर्दिशतदारुकारिमेदकसारिकामुखाः मुखसन्दंशविशर्द्धितमूत्रपुरीषविषाः। मक्षिकाकणभजलायुका मुखसन्दंशविषाः। विषहतास्थिसर्पकण्टकवरटीमत्स्यास्थिकेत्यस्थिविषाणि। शकुलीमत्स्यरक्तराजीवरकमत्स्याश्च पित्तविषाः। सूक्ष्मतुण्डोच्चिटिङ्गवरटाशतपदीशूकवलभिकाशृङ्गीभ्रमराः शूकतुण्डविषाः। कीटसर्पदेहा गतासवः शवविषाः शेषास्त्वनुक्ता मुखसन्दंशविषेष्वेव गणयितव्याः। राज्ञोऽरिदेशे रिपवस्तृणाम्बुमार्गान्नधूमश्वसनान् विषेण। संदूषयन्त्येभिरतिप्रदुष्टान् विज्ञाय लिङ्गैरभिशोधयेच्च। दुष्टं जलं पिच्छिलमुग्रगन्धि फेनान्वितं राजिभिरावृतञ्च। मण्डूकमत्स्यं म्रियते विहङ्गा मत्ताश्च सानूपचरा भ्रमन्ति। मज्जन्ति ये चात्र नराश्वनागास्ते च्छर्द्दिमोहज्वरदाहशोफान्। गच्छन्ति तेषामपहृत्य दोषान् दुष्टं जलं शोधयितुं यतेत"।

जङ्गल न० गल–यङ्–अच् पृषो०। १वने, २रहसि शब्दार्थचि० ३मांसे स्त्री मेदि० ४निर्वारिदेशे शब्दर०।

जङ्गाल पु० गम–यङ् लुक् बा० ड जङ्गं कुटिलगतिम् अलति वारयति अल–अण्। जलगतिवारणार्थं सेतौ (जाङ्गाल) जटाधरः।

जङ्गिड पु० राक्षसादिभयनिवारके मणिभेदे। "मणिं विष्कन्धदूषणं जङ्गिडं बिभृमो वयम्" "अयं नोविश्वभेषजं जङ्गिडः पात्वंहसः" "देवैर्दत्तेन मणिना जङ्गिडेन मयोभुवा" अथ० २।४।१।३।४।

जङ्गुल न० गम–यङ् लुक् बा० उल। विषे त्रिका०।

जङ्घा स्त्री जंघन्यते कुटिलं गच्छति गत्यर्थकस्य हन्तेः कौटिल्ये यङ् लुकि अच् पृषो०। गुल्फजान्वोरन्तराले अवयवे अमरः। "पादजङ्घयोः सन्धाने गुल्फः" "जङ्घयोः सन्धाने जानु नाम" सुश्रु०। "चत्वार्य्यरत्निकास्थीनि जङ्घयोस्तावदेव च" याज्ञ०।

जङ्घाकर त्रि० जङ्घां तत्साध्यगतिं करोति कृ–"दिवाविभेत्यादिना" पाट०। जङ्घाकरिके धावके जङ्घाकर+स्वार्थे क। तत्रार्थे

जङ्घाकरिक त्रि० कृ–अप् करः विक्षेपः ६त० ततः अस्त्यर्थे ठन्। जङ्घाचालनेनाजीविनि धावके (धाउडे) अमरः।

जङ्घात्राण न० त्रायतेऽनेन त्रै–करणे ल्युट् ६त०। जङ्घासन्नाहे त्रिका०।

जङ्घाप्रहत त्रि० जङ्घा तद्गतिः प्रहतास्य निष्ठान्तत्वात् परनि० जङ्घागतिशून्ये मन्दगतिके। ततः अक्षद्यूता० निर्वृत्तेऽर्थे ठञ्। जाङ्घाप्रहतिक तन्निर्वृत्ते त्रि०।

जङ्घाप्रहृत त्रि० जङ्घा प्रहृताऽस्य। प्रहृतजङ्घाव्यापारे। ततः अक्षद्यूता० निर्वृत्तेऽर्थे ठञ्। जाङ्घाप्रहृतिक तन्निर्वृत्ते त्रि०। [स्तथा भृगुः" भा० स० ४अ०।

जङ्घाबन्धु पु० ऋषिभेदे। "जङ्घाबन्धु स रैभ्यस्य कोपवेग-

जङ्घारथ पु० जङ्घा रथ इव यस्य। ऋषिभेदे। तस्य गोत्रापत्यम् इञ्। जाङ्घारथि तद्गोत्रापत्ये बहुत्वे तु यस्का० गोत्रप्रत्ययस्य लुक्। जङ्घारथास्तद्गोत्रापत्येषु

जङ्घारि पु० विश्वामित्रभेदे। "मार्गमर्षिर्हिरण्याक्षो जङ्घारि र्बाभ्रवायणिः" भा० अनु० ४अ०। विश्वामित्रपुत्रोक्तौ।

जङ्घाल त्रि०जङ्घा वेगवती अस्त्यस्य लच्। धावके जङ्घाजीविनि। "हरिणैणकुरङ्गर्क्ष्यपृषतन्यङ्कुशम्बराः। राजीवश्च, तथा मुण्डी जङ्घालाः परिकीर्त्तिता" भावप्र० उक्तेषु मृगेषु पु० स्त्री। "जङ्घालाः प्रायशः सर्व्वे पित्तश्लेष्महराः स्मृताः। किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः भावप्र० तन्मांसगुणोक्तिः।

जङ्घाशूल न० जङ्घायाः शूलमिव। जङ्घायां व्यथाकारके शूलरोगभेदे। "जङ्घाशूलक्षुरुस्तम्भं सप्तरात्रेण नाशयेत्" गरुडपु०।

जङ्घिल त्रि० अतिशयवेगवती जङ्घास्त्यस्य पिच्छा० इलच्। वेगवज्जङ्घाविशिष्टे धावके। [जजाज जेजतुः

जज युद्धे भ्वा०पर०अक०सेट्। जजति अजाजीत्-अजजीत्

जञ्ज युद्धे भ्वा० प० अक सेट् इदित्। जञ्जति अजञ्जीत् जजञ्ज "पृथुज्रयी असुर्य्येव जञ्जती" ऋ० १।१६८।७। कर्म्मणि जञ्ज्यते

जज्झ शब्दकरणे भ्वा० अक० सेट् निरु०। जज्झति अजज्झीत्" "मरुतो जज्झतीरिव" ऋ० ५।५२।६। "जज्झतीः शब्दकारिण्यः "जज्झतीरापो भवन्ति शब्दकारिण्यः" निरु० ६।१६।

जज्ञि त्रि० ज्ञा-जन-वा किन् द्वित्वञ्च। ज्ञातरि २जाते च।

जञ्ज त्रि० जजि-अच्। १योद्धरि भावे घञ्। २योधने। उञ्छादि० घञन्तत्वेन अन्तोदात्तता।

जञ्जन त्रि० जन-घङ् लुक्-अच्। पृषो० पुनः १पुनर्जन्मवति ततोऽभूततद्भावे च्वि भूवोऽनुप्रयोगः पृषो० णत्वदी जञ्जणाभूतद्भावे "जिह्वाभिरहन्नमदर्चिषा जञ्जणाभवन्" ऋ० ८।४३।८। २ज्वलति निरु०।

जञ्जपूक त्रि० जप+यङ्-ऊक। अतिशय जपशीले।

जञ्जभ्यमान त्रि० जभ-यङ्-शानच्। गात्रविनामेन विदारितमुखे पूर्व्वमीमांसा।

जट संहतौ भ्वा० पर० अक० सेट्। जटति अजाटीत्-अजटीत्। जजाट जटतुः जटा।

जटा स्त्री जट-अच् जन-उणा० टन् अन्त्यलोपश्च। १केशविकारे अन्योन्यसंलग्नकेशे २व्रतिनः ३शिखायां ४शठायाम् अमरः। ५मूले ६शाखायां मेदि०। ७कपिकच्छ्वाम् राजनि०। ८जटामांस्यां ९रुद्रजटायां १०शतावर्य्यां रत्नमाला० ११वेदपाठभेदे ऋग्वेदशब्दे १४११।१२पृ० दृश्यम्

जटाचीर पु० जटासहितं चीरं वसनमस्य। शिवे त्रिका०।

जटाजूट पु० जटानां जूटोबन्धः। जटासमूहे। (झुँटि) "जटाजूट समायुक्तामर्द्धेन्दुकृतशेखराम्" दुर्गाध्यानम् "शम्भोर्जटाजूटतटादिवापः" माघः।

जटाज्वाल पु० जटेव ज्वालास्य। प्रदीपे हारा०।

जटाटङ्क पु० जटा टङ्क इवास्य। शिवे महादेवे त्रिका०।

जटाटीर पु० जटामटति अट-ईरन्। महादेवे त्रिका०

जटाधर पु० ६त०। शिवे १महादेवे शङ्कर०। २बुद्धभेदे त्रिका०। ३दाक्षिणात्ये देशभेदे स च देशः "कौञ्चद्वीपजटाधर कावेर्य्योरिष्यमूकश्च" वृ० स० १४अ० दक्षिणस्यामुक्तः ४कोषकारभेदे च ५जटाधारके त्रि०।

जटामांसी स्त्री जटां मन्यते मन-स दीर्घश्च। स्वनामख्याते गन्धद्रव्यभेदे। "जटामांसी भूतजटा जटिला च तपस्विनी। मांसी तिक्ता कषाया च मेध्या कान्तिबलप्रदा। स्वाद्वी हिमा त्रिदोषास्रदाहवीसर्पकुष्ठनुत्" भावप्र०।

जटायु (स्) पु० जटां याति या-कु जटा+उणा० युच् वा जट-संहतौ अच् जटं संहतमायुरस्य वा। १स्वनामख्याते खगभेदे, २गुग्गुलौ च मेदि० "द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च। तस्माज्जातोऽहमरुणात् संपातिश्च ममाग्रजः।जटायुरिति मां विद्धि श्येनीपुत्रमरिन्दम!। सोऽहं राम! सहायस्ते भविष्यामि यदीच्छसि। सीतां च तात रक्षिष्ये त्वयि याते सलक्ष्मणे "जटायुषं तु प्रतिपूज्य राघवो मुदा परिष्वज्य च सन्नतोऽभवत्। पितुर्हि शुश्राव सखित्वमात्मवान् जटायुषा संकथितं पुनः पुनः" रामा० आर० १४अ० "सखा दशरथस्यासीज्जटायुररुणात्मजः। गृध्रराजो महावीरः सम्पातिर्यस्य सोदरः। स ददर्श तदा सीतां रावणाङ्कगतां स्नुषाम्। सक्रोधोऽभ्यद्रवत् पक्षी रावणं राक्षसेश्वरम्। अथैनमब्रवीद्गृध्रो मुञ्च मुञ्चस्व मैथिलीम्। म्रियमाणे मयि कथं हरिष्यसि निशाचर!। न हि मे मोक्ष्यसे जीवन् यदि नोत्सृजसे वधूम्

उक्त्वैवं राक्षसेन्द्रं तं चकर्त्त नखरैर्भृशम्। पक्षतुण्डप्रहारैश्च बहुशो जर्जरीकृतम्। चक्षार रुधिरं भूरि गिरिप्रस्रवणैरिव। स वध्यमानोगृध्रेण रामप्रियहितैषिणा। खड्गमादाय चिच्छेद भुजौ तस्य पतत्रिणः। निहत्य गृध्रराजं स भिन्नाभ्रशिखरोपमम्। ऊर्द्ध्वमाचक्रमे सीतां गृहीत्वाङ्केन राक्षसः" भा० व० २७८ अ० तत्कथा दृश्या।

जटाल पु० जटा—अस्त्यर्थे सिध्मा० लच्। १वटवृक्षे २कच्चुरे ३मुष्कके ४गुग्गुलौ च राजनि० ५जटायुक्ते त्रि० "चीरिणः शिखिनश्चान्ये जटालोर्द्ध्वशिरोरुहाः" हरिवं० १८३ अ०। ६जटामांस्यां स्त्री राजनि०।

जटावत् त्रि० जटा—अस्त्यर्थे मतुप् मस्य वः। १जटायुक्ते स्त्रियां ङीप् सा च २जटामांस्यां राजनि०।

जटावल्ली स्त्री जटेव वल्ली। रुद्रजटायाम् राजनि०।

जटासुर पु०जटायुक्तोऽसुरः। १असुरभेदे। स च ब्राह्मणरूपच्छद्मना वनगतयुधिष्ठिरावासे स्थित्वा भीमे वनान्तरंगते युधिष्ठिरादित्रय सहितां द्रौपदीं जहार ततोयदृच्छागामिना भीमेन हतः। तत्कथा वनपर्वणि जटासुरवधपर्वणि दृश्या। २तदधिष्ठाने देशभेदे स च देशः वृ० स० १४अ० कूर्मविभागे ऐशान्यामुक्तः। "भल्लापलोलजटासुरकुनटखसघोषकुचिकाख्याः"।

जटासुरवध पु० जटासुरस्य वधमधिकृत्य कृतो ग्रन्थः अण् आख्यायिकायां लुप् लुपि व्यक्तिवचनत्वात् पुंस्त्वम्। भारतवनपर्वान्तर्गतेऽवान्तरपर्वभेदे। "जटासुरवधः पर्व यक्षयुद्धमतः परम्" भा० आ० अ० वनपर्वणि अवान्तरपर्वोक्तौ।

जटि (टी) पु० जट—इन्। १वटवृक्षे, शब्दरत्ना० २जटायां ३समूहे उणादिको० ४जटामांस्यां स्त्री वा ङीप् अमरः। ङीबन्तः ५पर्कटीवृक्षे शब्दर०।

जटिन् पु०जटा अस्त्यस्य इनि। १प्लक्षे (पाकुड़) अश्वत्थतुल्यपत्रयुक्ते वृक्षभेदे। २जटावति त्रि०। "सुरापानापनुत्त्यर्थं चीरवासा जटी ध्वजी" मनुः।

जटिल पुंस्त्री जटा—अस्त्यर्थे पिच्छा० इलच्। १सिंहे शब्दच० स्त्रियां जातित्वात् ङीष्। २जटायुक्ते त्रि०। "विवेश कश्चिज्जटिलस्तपोवनम्" कुमा० "मुण्डो वा जटिलो वा स्यात् अथ वा स्यात् शिखाजटः" मनुः। ३ब्रह्मचारिणि च। "जटिलञ्चानधीयानं दुर्बलं कितवं तथा" मनुः। स्त्रियां टाप् ४जटावत्यां स्त्रियां। ५जटामांस्यां अमरः ६पिप्पल्यां मेदि०। ७वचायाम् ८उच्चटायां रत्नमाला ९दमनकवृक्षे राजनि०।

जट(ड)ल पु० जट—उलच् पृषो० टस्य डो वा। देहस्थ कृष्णचिह्नभेदे पिप्लौ (जड़ुल) अमरः।

जठर पुंन०जायते जन्तुर्गर्भो वास्मिन् जन—अर—ठान्तादेशः। १कुक्षौ। २बद्धे, ३कठिने च त्रि० मेदि०। ४देशभेदे "अतऊर्द्ध्वं जनपदान्" इत्युपक्रमे "जठराः कुकुराश्चैव सदशार्णाश्च भारत!" भा० भी० ६अ०। "आस्तेऽस्याः जठरे वीर्यमविषह्यम् सुरद्विषाम्" भाग० ७।७।८। "वायुवेगसमौ वीरौ जठरौ तुरगोत्तमौ" रामा० अयो० १०७।१२। "यः कदाचित् सम्यक् पचति कदाचिदाध्मानशूलोदावर्त्तातिसारजठरगौरवान्त्रकूजनप्रवाहणानि कृत्वा स विषमः" सुश्रु०। जठरयन्त्रणा जठरव्यथा जठरामयः।

जठरनुद् पु० जठरं नुदति रेचनाय नुद—क्विप् ६त०। आरग्वधे (साँदाल) शब्दच० तस्य सेवने हि उदरभङ्गात्तस्य तथात्वम्।

जठराग्नि पु० जठरस्थितोऽग्निः। कौक्षेये अन्नादिपाचके वह्नौ "अन्नरसोजठराग्निना पच्यमानोरक्ततां प्रतिपद्यते" मिताक्षरा जठरानलादयोऽप्यत्र "जठराग्निर्हि वायुना संधुक्ष्यमाणोऽन्नं पचति तत्प्रकारो योगार्णवे उक्तो यथा "आयुपंत्र भुक्तमाहारं स वायुः कुरुते द्विधा। संप्रविश्यान्नमध्यं तु पृथक् किट्टं पृथक् मलम्। अग्नेरूर्द्ध्वं जलं स्थाप्य तदन्नञ्च जलोपरि। जलस्याधः स्वयं प्राणः स्थित्वाग्निं धमते शनैः। वायुनाध्मायमानोऽग्निरत्युष्णं कुरुत जलम्। अन्नं तदुष्णतोयेन समन्तात् पच्यते पुनः। द्विधा भवति तत् पक्वं पृथक् किट्टं पृथग् रसम्। रसेन तेन ता नाड्यः संपूर्यन्ते क्रमेण च। प्रतर्पयन्ति सम्पूर्णास्ताश्च देहं समन्ततः"।

जठरामय पु० ६त०। उदररोगे राजनि० अतिसारशब्दे १०६पृ० दृश्यम्। जठरगदादयोऽप्यत्र। "भवति धरणिजे चतुर्थगे ज्वरजठरगदासृगुद्भवः" वृ० स०१०४अ०।

जठल न० जठरं सादृश्येनास्त्यस्य अर्श० अच् रस्य लः। जठरवदुदकाधारे "चतस्रो नावो जठलस्य जुष्टाः" ऋ० १।१८२।६। जठलस्य जठरवदुदकाधारस्य" भा०।

जड त्रि० जलति घनीभवति जल—अच् डस्य लः। "इष्टं वानिष्टं वा न वेत्ति योमोहात्। परवशगः स भवेदिह नाम्ना जडसंज्ञकः पुरुषः" उक्तलक्षणे १मन्दबुद्धौ २मूर्खे

३वेदग्रहणासमर्थे "अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा । उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः" मनुः "वेदाग्रहणसमर्थो जडः" इति दायभागः ४हिमग्रस्ते हिमेन मन्दक्रिये ५मूके ६अप्रज्ञे च मेदि० । ७जले न० रायमुकुटः । ८सीसके न० राजनि० । ९चेतनभिन्ने अज्ञानादिसमूहे वेदान्तः । तन्मते हि पदार्थो द्विधा जडोऽजडश्च तत्र जडोऽज्ञानतत्कार्य्यसंघः । अजडश्चेतनः इति भेदः । "अज्ञानादिसकलजडसमूहोऽवस्तु" वेदान्तसा० "वेदास्ते किं वा जननि! वयमुच्चैर्जडधियः" कालीस्तवः "नापृष्टः कस्यचिद् ब्रूयात् नचान्यायेन पृच्छतः । जानन्नपि हि मेधावी जडवत् लोक आचरेत्" मनुः । तस्य भावः ष्यञ् जाड्य न० तल् जडता स्त्री त्व

जड़त्व न० इमनिच् जडिमन् पु० जडभावे । [हलायुधः

जड़क्रिय त्रि० जड़स्य हिमक्लिष्टस्येव क्रियास्य । चिरक्रिये ।

जड़ता स्त्री जड़+भावे तल् । अपाटवे शीतलत्वे "उदञ्चद्रोमाञ्चं व्रजति जड़तामङ्गमखिलम्" सा० द० "भुजलता जड़तामबलाजनः" रघुः । "अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः । अनिमिषनयननिरीक्षणतूष्णीम्भावादयस्तत्र" सा०द० उक्ते व्यभिचारिगुणभेदे । ष्यञ् जाड्य त्व जड़त्व तत्रार्थे न० ।

जड़भरत पु० जडो मूक इव भरतः। आङ्गिरसप्रवरसुते योगिभेदे स हि पूर्व्वतरजन्मनि भरतनामा नृपतिरासीत् स च वानप्रस्थाश्रमे हरिणशिशुपालनेन तत्स्नेहवशात् मृत्युकाले तमनुस्मरन् मृगत्वमाप्तो कर्म्मवशात् तद्देहं त्यक्त्वा पुनः आङ्गिरसप्रवरस्य पुत्रतामासाद्य स्नेहदोषेण पुनस्तिर्य्यग्योनिप्राप्तिशङ्कया ज्ञानवानपि जडत्वमिव व्यञ्जयन्नासीत् । तत्कथा च भाग० ५स्क० स्थिता दिङ्मात्रमत्र प्रदर्श्यते ।

"अथ कस्यचिद्द्विजवरस्याङ्गिरःप्रवरस्य शमदमतपःस्वाध्यायाध्ययनत्यागसन्तोषतितिक्षाप्रश्रयविद्यानसूयात्मज्ञानानन्दयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्य्यगुणा नव सोदार्य्या अङ्गजा बभूवुः । मिथुनञ्च यवीयस्यां भार्य्यायाम् । यस्तु तत्र पुमांस्तं परमभागवतं राजर्षिप्रवरभरतमुत्सृष्टमृगशरीरम् चरमशरीरेण विप्रत्वं गतमाहुः । तत्रापि स्वजनसङ्गाच्च भगवतः कर्म्मबन्धविध्वंसनश्रवणस्मरणगुणविवरणचरणारविन्दयुगलं मनसा विदधदात्मनः प्रतीघातमाशङ्कमानो भगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमुन्मत्तजडान्धबधिरस्वरूपेण दर्शयामास लोकस्य । तस्यापि ह वा आत्मजस्य स विप्रः पुत्रस्नेहानुबद्धमना आसमावर्त्तनात् संस्कारान् यथोपदेशं विदधान उपनीतस्य च पुनः शौचाचमनादीन् कर्म्मनियमाननभिप्रेतानपि समशिक्षयत् । "अनुशिष्टेन हि भाव्यं पितुः पुत्रेण" इति । स चापि तदु ह पितृसन्निधावेवासध्रीचीनमिव स्म करोति । छन्दांस्यध्यापयिष्यन् सह व्याहृतिभिः सप्रणवशिरस्त्रिपदां सावित्रीं ग्रैष्मवासन्तिकान्मासानधीयानमप्यसमवेतरूपं ग्राहयामास । एवं स्वतनुज आत्मन्यनुरागावेशितचित्तः शौचाध्ययनव्रतनियमगुर्व्वनलशुश्रूषणाद्यौपकुर्व्वाणकर्म्माण्यनभियुक्तान्यपि स्वयमनुशिष्टेन भाव्यमित्यसदाग्रहः पुत्रमनुशास्य स्वयं तावदनधिगतमनोरथः कालेनाप्रमत्तेन स्वयं गृह एव प्रमत्त उपसंहृतः । अथ यवीयसी द्विजसती स्वगर्भजातं मिथुनं सपत्न्या उपन्यस्य स्वयमनुसंस्थया पतिलोकमगात् । पितर्य्युपरते भ्रातर एनमतत्प्रभावविदस्त्रय्यां विद्यायामेव पर्य्यवसितमतयो न परविद्यायां जडमतिरिति भ्रातुरनुशासननिर्ब्बन्धान्न्यवृत्सन् ।

स च प्राकृतैर्द्विपदपशुभिरुन्मत्तजड़बधिरमूकेत्यभिभाष्यमाणो यदा तदनुरूपाणि प्रभाषते कर्म्माणि च कार्य्यमाणः परेच्छया करोति । विष्टितो वेतनतो वा याच्ञया यदृच्छया वोपसादितमल्पं बहुमिष्टं कदन्नं वाभ्यवहरति परं नेन्द्रियप्रीतिनिमित्तम् । नित्यनिवृत्तनिमित्तस्वसिद्धविशुद्धानुभवानन्दस्वात्मलाभाधिगमः सुखदुःखयोर्द्वन्द्वनिमित्तयोरसम्भावितदेहाभिमानः । शीतोष्णवातवर्षेषु वृष इवापावृताङ्गः पीनसंहननाङ्गः स्थण्डिलसंवेशनानुमर्द्दनामज्जनरजसा महामणिरिवानभिव्यक्तब्रह्मवर्च्चसः कुपटावृतकटिरुपवीतेनोरुमषिणा द्विजातिरिति ब्रह्मबन्धुरिति संज्ञयाऽतज्ज्ञजनावमतो विचचार । यदा तु परत आहारङ्कर्म्म वेतनत ईहमानः स्वभ्रातृभिरपि केदारकर्म्मणि निरूपितस्तदपि करोति । किन्तु न समं विषमं न्यूनमधिकमिति वेद । कणपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीन्यप्यमृतवदभ्यवहरति । अथ कदाचित् कश्चिद् वृषलपतिर्भद्रकाल्यै पुरुषपशुमालभतापत्यकामः । तस्य ह दैवविमुक्तस्य पशोः पदवीं तदनुचराः परिधावन्तो निशि निशीथसमये तमसावृतायामनधिगतपशव आकस्मिकेन विधिना केदारान् वीरासनेन मृगवराहादिभ्यः संरक्ष-

माणमङ्गिरःप्रवरसुतमपश्यन्। अथ तएनमनवद्यलक्षणमवमृश्य भर्त्तृकर्म्मनिष्पत्तिं मन्यमानावद्धा रशनया चण्डिकागृहमुपनिन्युर्मुदा विकसितवदनाः। अथ पणयस्तं स्वविधिनाभिषिच्याहतेन वाससाच्छाद्य भूषणानुलेपस्रक्ताम्बूलादितिलकादिभिरुपस्कृतं भुक्तवन्तं धूपदीपमाल्यलाजकिसलयाङ्कुरफलोपहारोपेतया वैशससंस्थया महता गीतस्तुतिमृदङ्गपणवघोषेण च पुरुषपशुं भद्रकाल्याः पुरत उपवेशयामासुः। अथ वृषलराजपतिः पुरुषपशोरसृगासवेन देवीं भद्रकालीं यक्ष्यमाणस्तदभिमन्त्रितमसिमतिकरालनिशितमुपाददे। इति तेषां वृषलानां रजस्तमःप्रकृतीनां धनमदरजउत्सिक्तमनसां भगवत्कलावीरकुलं कदर्थीकृत्योत्पथेन स्वैरं विहरतां हिंसाविहाराणां कर्म्मातिदारुणं यद्ब्रह्मभूतस्य साक्षाद्ब्रह्मर्षिसुतस्य निर्व्वैरस्य सर्व्वभूतसुहृदः सूनायामप्यननुमतमालभनं तदुपलभ्य ब्रह्मतेजसाऽतिदुर्व्विषहेण दन्दह्यमानेन वपुषा सहसोच्चचाट सैव देवी भद्रकाली। भृशममर्षरोषावेशरभसविलसितभ्रुकुटिविटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवदना हन्तुकामेवेदं महाट्टहासमतिसंरम्भेण विमुञ्चन्ती तत उत्पत्य पापीयसां दुष्टानां तेनैवासिना विवृक्णशीर्ष्णां गलात् स्रवन्तमसृगासवमत्युष्णं सह गणेन निपीयातिपानमदविह्वलोच्चैस्तरां स्वपार्षदैः सह जगौ ननर्त्त च विजहार च शिरःकन्दुकलीलया। एवमेव खलु महदभिचारातिक्रमः कार्त्स्न्येनात्मने फलति। न वा एतद्विष्णुदत्त! महदद्भुतं यदसंभ्रमः स्वशिरश्छेदे आपतितेऽपि विमुक्तदेहाद्यात्मभावसुदृढहृदयग्रन्थीनां सर्व्वसत्त्वसुहृदात्मनां निर्व्वैराणां साक्षाद्भगवताऽनिमिषारिवरायुधेनाप्रमत्तेन तैस्तैर्भावैरभिरक्ष्यमाणानां तत्पदमूलमकुतश्चिद्भयमुपसृतानां भागवतपरमहंसानाम्”। ९ अ० “अथ सिन्धुसौवीरपतेरहूगणस्य व्रजत इक्षुमत्यास्तटे तत्कुलपतिना शिविकावाहपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्धः। एष पीवानसंहननाङ्गो गोखरवद्धुरं वोढुमलमिति पूर्व्वविष्टिगृहीतैः सह गृहीतः प्रसभमतदर्ह उवाह शिविकां स महानुभावः। यदा हि द्विजवरस्येषुमात्रावलोकानुगतेर्न समाहिता पुरुषगतिस्तदा विषमगतां स्वशिविकां रहूगण उपधार्य्य पुरुषानधिवहत आह। हे वोढारः साध्वतिक्रामत किमिति विषममुह्यते यानमिति?। अथ त ईश्वरवचः सोपालम्भमुपाकर्ण्य उपायातुरीयाच्छङ्कितमनसस्तं विज्ञापयां बभूवुः। न वयं नरदेव! प्रमत्ता भवन्नियमानुपथाः साध्वेव वहामः। अयमधुनैव नियुक्तोऽपि न द्रुतं व्रजति नानेन सह वोढुमु ह वयं पारयाम इति। सांसर्गिकोदोष एव नूनमेकस्यापि सर्व्वेषां संसर्गिणां भवितुमर्हतीति निश्चित्य निशम्य कृपणवचो राजा रहूगण उपासितवृद्धोऽपि निसर्गेण बलात्कृत ईषदुत्थितमन्युरविस्पष्टब्रह्मतेजसं जातवेदसमिव रजसावृतमतिराह अहो कष्टं भ्रातर्व्यक्तमुरुपरिश्रान्तो दीर्घमध्वानमेक ऊहिवान् सुचिरं नातिपीवानसंहननाङ्गो जरसा चोपद्रुतो भवान् सखे! नो वा परएते संघट्टिन इति बहुविप्रलब्धोऽप्यविद्यया विहितद्रव्यगुणकर्म्माशये स्वचरमकलेवरेऽवस्तुनि संस्थानविशेषे अहं ममेत्यनध्यारोपितमिथ्याप्रत्ययो ब्रह्मभूतस्तूष्णीं शिविकां पूर्व्ववदुवाह। अथ पुनः स्वशिविकायां विषमगतायां प्रकुपित उवाच रहूगणः। किमिदमरे त्वं जीवन्मृतोमां कदर्थीकृत्य भर्त्तृशासनमतिचरसि। प्रमत्तस्य च ते करोमि चिकित्सां दण्डपाणिरिव जनतायाः यथा प्रकृतिं स्वां भजिष्यसीति। एवं बह्वबद्धमभिभाषमाणं नरदेवाभिमानं रजसा तमसानुविद्धेन मदेन तिरस्कृताशेषभगवत्प्रियनिकेतं पण्डितमानिनं स भगवान् ब्राह्मणो ब्रह्मभूतः सर्व्वभूतसुहृदात्मा योगेश्वरचर्य्यायां नातिव्युत्पन्नमतिं स्मयमान इव विगतस्मय इदमाह। श्रीब्राह्मण उवाच। त्वयोदितं व्यक्तमविप्रलब्धं भर्त्तुः स मे स्याद्यदि वीर! भावः। गन्तुर्यदि स्यादधिगम्यमध्वा पीवेति राशौ न विदां प्रवादः। स्थौल्यं कार्श्यं व्याधय आधयश्च क्षुत्तृड्भयं कलिरिच्छा जरा च। निद्रा रतिर्म्मन्युरहं मदः शुचो देहेन जातस्य हि मे न सन्ति। जीवन्मृतत्वं नियमेन राजन्नाद्यन्तवद्यद्विकृतस्य दृष्टम्। स्वस्वाम्यभावो ध्रुवईड्य! यत्र तर्ह्युच्यतेऽसौ विधिकृत्ययोगः। विशेषबुद्धेर्व्विवरं मनाक् च पश्यामि यन्न व्यवहारतोऽन्यत्। क ईश्वरस्तत्र किमीशितव्यं तथापि राजन्! करवाम किन्ते। उन्मत्तमत्तजडवत् स्वसंस्थां गतस्य मे वीर! चिकित्सितेन। अर्थः कियान् भवता शिक्षितेन स्तब्धप्रमत्तस्य च पिष्टपेषः। श्रीशुक उवाच। एतावदनुवादपरिभाषया प्रत्युदीर्य्य स मुनिवर उपशमशील उपरतानात्म्यनिमित्त उपभोगेन कर्म्मारब्धं व्यपनयन् राजयानमपि तथैवोवाह। स

चापि पाण्डवेय ! सिन्धुसौवीरपतिस्तत्त्वजिज्ञासायां सम्यक्श्रद्धयाधिकृताधिकारस्तद्धृदयग्रन्थिविमोचनं द्विजवच आकर्ण्य बहुयोगग्रन्थसम्मतं त्वरयाऽवरुह्य शिरसा तत्पादमूलमुपसृतः क्षमापयन् विगतनृपदेवस्मय उवाच । कस्त्वं निगूढश्चरसि द्विजानां बिभर्षि सूत्रं कतमोऽवधूतः । कस्यासि कुत्रत्य इहापि कस्मात् क्षेमाय नश्चेदसि नोत शुक्लः । नाहं विशङ्के सुरराजवज्रान्न त्र्यक्षशूलान्न यमस्य दण्डात् । नाग्न्यर्कसोमानिलवित्तपास्त्राच्छङ्के भृशं ब्रह्मकुलावमानात् । तद् ब्रूह्यसङ्गो जड़वन्निगूढविज्ञानवीर्यो विचरस्यपारः । वचांसि योगग्रथितानि साधो ! न नः क्षमन्ते मनसापि भेत्तुम् । अहञ्च योगेश्वरमात्मतत्त्वविदां मुनीनां प्रवरं गुरुं वै ! प्रष्टुं प्रवृत्तः किमिहारणं यत्साक्षाद्धरिं ज्ञानकलावतीर्णम् । स वै भवान् लोकनिरीक्षणार्थमव्यक्तलिङ्गो विचरत्यपि स्वित् । योगेश्वराणां गतिमन्धबुद्धिः कथं विचक्षीत गृहानुबद्धः" १०अ० ।

ततः तेन रहूगणनृपाय योगमुक्ता प्रारब्धावसाने मुक्तो बभूवेति कथा तदुत्तराध्यायादौ स्थिता ।

जडा स्त्री जड़ं करोति जड+णिच्–अच्–टाप् । १भूकशिम्ब्याम् अमरः २भूम्यामलक्याम् रत्नमा० ।

जड़िमन् पु० जड़स्य भावः दृढा० इमनिच् । जाड्ये । "जनित जड़िम व्याकुलं व्याहरन्ती" "इष्टानिष्टापरिज्ञानं यत्र प्रश्नेष्वनुत्तरम् । दर्शनश्रवणाभावो जड़िमा सोऽभिधीयते" इत्युज्ज्वलमण्युक्ते अवस्थाभेदे ।

जतविल त्रि० जतुना निर्वृत्तादि काशा० इल । जतुद्रव्यनिर्वृत्तादौ १कलकद्रव्ये २वङ्केरुद्दीपने द्रव्यभेदे ।

जतु न० जन–उ तोऽन्तादेशः । १अलक्ते, २लाक्षायाञ्च । स्वार्थे क । तत्रार्थे मेदि० । "शणं तैलं घृतञ्चैव जतुदारूणि चैव हि" भा० आ० १४४अ० । "अप्राज्ञमधिकं पापं श्लिष्यते जतुकाष्ठवत्" भा०शा० २००अ० । ३चर्म्मचटिकायां स्त्री "सन्धिभ्यो जतूः" यजु० २४।२५। "जतूः पत्राख्याः पक्षिणीः" मेदि० । तस्य विकारः "त्रपुजतुनोः षुक् च" पा० अण् षुक् च । जातुषं तद्विकारे (काड़ चुडि) प्रभृतौ आभरणे ।

जतुक न० जतु इव कायति कै–क । १हिङ्गौ मेदि० । २जनीनामगन्धद्रव्ये स्त्री भरतः । ३चर्म्मचटिकायां स्त्री (चामचिका) शब्दरत्ना० । ४पर्पट्यां मालवदेशप्रसिद्धलतायां स्त्रीभावप्र० "पर्पटी रञ्जनी कृष्णा जतुका जननी जनी । जतुकृष्णाग्निसंस्पर्शा जतुका चक्रवर्त्तिनी । पर्पटी तुवरा तिक्ता शिशिरा वर्णकृल्लघुः । विषव्रणहरी कण्डूकफपित्तास्रकुष्ठनुत्" भावप्र० तद्गुणोक्तिः ।

जतुकारी स्त्री जतुकवत् संश्लेषमृच्छति ऋ+अण् उप० स० गौरा० ङीष् । जतुकालतायां राजनि० ।

जतुकृत् स्त्री जतुवत्संश्लेषं करोति कृ–क्विप् ६त० । जतुकालतायाम् अमरः ।

जतुकृष्णा स्त्री जत्विव कृष्णा । जतुकालतायाम् भावप्र० ।

जतुनी स्त्री० जतु संश्लेषेण तद्रूपं नयति स्वसंश्लिष्टद्रव्यम् नी–क्विप् ६त० । चर्म्मचटिकायां त्रिका० तस्य संश्लेषात् द्रव्यस्य जतुवद्रूपापत्तिर्लोकसिद्धा ।

जतुपुत्रक पु० जतुनिर्म्मितः पुत्र इवा (पुत्तली) । पाशकगुटियां तस्य जतुनिर्म्मितत्वेन तथात्वम् । काष्ठादिरचितस्य तु उपचारात् तन्नामता ।

जतुमणि पु० "समुत्सन्नमरुजं मण्डलं कफरक्तजम् । सहजं लक्ष्म चैकेषां लक्ष्योजतुमणिश्च सः" इति माधवकरोक्ते रोगभेदे ।

जतुमुख पु० जतुनेव संश्लिष्टं मुखमस्य शा० त० । व्रीहिभेदे "कृष्णव्रीहिशालामुखजतुमुखनन्दीमुखनाराचकत्वरितककुक्कुटाण्डकपारावतकपाटलप्रभृतयो व्रीहयः" सुश्रु० ।

जतुरसः पु० ६त० । अलक्तके राजनि० ।

जतू स्त्री जतुः चर्म्मचटिका प्राणिजातित्वेऽपि वेदे नि० ऊङ् । पक्षिभेदस्त्रियाम् "ऋक्षो जतूः सुषीलिका ते इतरजनानाम्" यजु० २४।२६। जतूः सुषीलिका एतौ पक्षिविशेषौ" वेददी० ।

जतूकर्ण पु० ऋषिभेदे । तस्य गोत्रापत्यम् गर्गा० यञ् । जातूकर्ण्यः तद्गोत्रापत्ये तस्य छात्त्रः कण्वा० अण् यञो लोपश्च । जातूकर्णः तच्छात्त्रे । जातूकर्ण्यश्च उपस्मृतिकर्त्ता यथाह हेमा० दा० अङ्गिराः "जाबालिर्नाचिकेतश्च स्कन्दो लौगाक्षिकश्यपौ । व्यासः सनत्कुमारश्च शतद्रुर्जनकस्तथा । व्याघ्रः कात्यायनश्चैव जातूकर्ण्यः कपिञ्जलः । बौधायनः कणादश्च विश्वामित्रस्तथैव च । उपस्मृतिकृतएतान् प्रवदन्ति मनीषिणः" । जातुकर्ण्य इत्यत्र जातूकर्ण इति पाठः लिपिकरप्रमादात् तच्छात्त्रस्य उपस्मृतिकर्त्तृत्वमभिप्रेत्य वा तथा पाठ इत्यन्ये ।

जतूका स्त्री जन–ऊक० नि० । १चर्म्मचटिकायां अमरः । २जनीनामगन्धद्रव्ये शब्दर० ।

जत्रु न० जन–रु तोऽन्तादेशः । स्कन्धवक्षःसन्धौ "ग्रीवा पञ्च-

दशास्थि स्यात् जत्रुकैकं तथा हनु" याज्ञ० वक्षोंऽसयोः सन्धिः जत्रु:" मिता० "ऊर्द्ध्वजत्रुगतान् करोति च विशेषतः" सुश्रु० "जत्रुदेशे भग्नं वीरो व्यशासीदद्रथे तदा" भा० व० १७अ०। स्वार्थे-क तत्रार्थे शब्दरत्ना०।

जत्वश्मक न० जतुरूपमश्मकम्। शिलाजतुनि राजनि०।

जन जनने जुहो० पर० अक० सेट् घटा०। जजन्ति। अजनीत् अजानीत् घटा०। जनयति जनितः

वि-अति परस्परजनने आत्म०। व्यतिजजन्ते। सार्वधातुकसधोरिट् व्यतिजज्ञिषे व्यतिजज्ञिध्वे

जन जनने दि० आ० अक० सेट् जायते अजनि अजनिष्ट। जजान जज्ञतुः ईदित्। जातः। घटा०। जनयति। उभयोरपि उपसर्गात् परयोस्तत्तदुपसर्गद्योत्यार्थयुक्तजनने नत्र।

अति-अतिक्रम्य जनने सक०।

अधि+आधिक्येन जनने। आधिपत्येन जनने च "तेजस एव तदध्यापोजायन्ते। "ब्राह्मणोजायमानोऽपि पृथिव्यामधिजायते" मनुः।

अनु+ पश्चाज्जनने अक०। "पुत्रिकायां कृतायां च यदि पुत्रोऽनुजायते" मनुः। पश्चादुत्पत्त्या सादृश्य करणे सक०। "असौ कुमारस्तमतोऽनुजातस्त्रिविष्टपस्येव पतिं जयन्तः" रघु०।

सम्+अनु+सम्यगनुजनने सक० "पितॄन् समनुजायन्ते नरा मातरमङ्गनाः" रामा० अयो० ३५।२६।

अभि+अभिलक्ष्यीकृत्य जनने सक०"भवन्ति सम्पदं दैवीमभिजातस्य भारत!"। "अज्ञानञ्चाभिजातस्य पार्थ! सम्पदमासुरीम्" गीता। सम्यग्जनने आभिमुख्येन जनने अक० "शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते" "कामात् क्रोधोऽभिजायते" गीता।

प्रति+प्रतिरूपजनने अक०। "प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायसे" प्रश्नो०।

वि+विशेषेण जनने विरुद्धजनने विकारे च "पतिना रहिता तस्मात् पुत्रं देवी व्यजायत" रामा० आदि० ७०अ०। गर्भमोचने सक० "यूनां मत्ता प्रथमं विजज्ञतुः" ऋ० ८।६८।५। "पशुस्तिष्ठन् गर्भं छत्वानुप विश्य विजायते" शत० ब्रा० ७।४।१।१। "काममाविजनितोः सम्भवेम" तै० स० २।५।१।५ "तस्मात् व्यजायत" रामा० बा० १।७०। "शची पुत्रं व्यजायत" बा २७।८।

जन पु० जन-अच्। १लोके "जनस्तुषाराञ्जनपर्वताविव" भावः २महर्लोकादूर्द्ध्वलोके ३असुरभेदे च जनार्दनः। तल्लोकप्राप्तिहेतुकथनं भूमेरूर्द्ध्वतोक्तिश्च "इत्थं कथां कथयतोर्भगवद्गणयोः प्रिये!। क्षणार्द्धेन विमानं तज्जनलोकं निनाय तान्। निवसन्त्यमलायत्र मानसाः ब्रह्मणः सुताः। सनन्दनाद्या योगीन्द्रा सर्वे तेह्यूर्द्ध्वरेतसः। अन्ये तु योगिनोये वै ह्यप्रस्खलद्ब्रह्मचारिणः। सर्व्वद्वन्द्वविनिर्मुक्तास्ते वसन्त्यत्र निर्मलाः। महर्लोकः स्थितेरूर्द्ध्वमेककोटिप्रमाणतः। कोटिद्वये तु संख्यातो जनो भूलोकतोजनैः" काशी० ख०।

जनक पु० जन-णिच्-ण्वुल्। १पितरि अमरः "शुध्येन्तु जनकस्त्रिभिः" शु० त०। २उत्पादके त्रि० "जन्यानां जनकः कालो जगतामाश्रयोमतः" भाषा० "३उपसृतिकारके ३ऋषिभेदे जतूकर्णशब्दे दृश्यम् निमिवंशजाते ४ विदेहनृपभेदे। इक्ष्वाकुवंश्यनिमिवशिष्ठयोरन्योन्यशापात् विदेहताप्राप्तौ वशिष्ठस्य देहप्राप्तिरुक्ता रामा० उत्त० ५६ अ०। निमेर्जनकोत्पत्तिकथोक्ता यथा "दृष्ट्वा विदेहं राजानमृषयः सर्व एव ते। तञ्च ते याजयामासुर्यज्ञदीक्षां मनीषिणः। तञ्च देहं नरेन्द्रस्य रक्षन्ति स्म द्विजोत्तमाः। गन्धैर्माल्यैश्च वस्त्रैश्च पौरभृत्यसमन्विताः। ततो यज्ञे समाप्ते तु भृगुस्तत्रेदमब्रवीत्। आनयिष्यामि ते चेतस्तुष्टोऽस्मि तव पार्थिव!। सुप्रीताश्च सुराः सर्वे निमेश्चेतस्तदाऽब्रुवन्। वरं वरय राजर्षे क्व ते चेतोनिरूप्यताम्। एवमुक्तः सुरैः सर्वैर्निमेश्चेतस्तदाऽब्रवीत्। नेत्रेषु सर्वभूतानां वसेयं सुरसत्तमाः!। बाढमित्येव विबुधानिमेश्चेतस्तदाब्रुवन्। नेत्रेषु सर्वभूतानां वायुभूतश्चरिष्यसि। त्वत्कृते निमिषिष्यन्ति चक्षूंषि पृथिवीपते!। वायुभूतेन चरता विश्रामार्थं मुहुर्मुहुः। एवमुक्त्वा तु विबुधाः सर्वे जग्मुर्यथागतम्। ऋषयोऽपि महात्मानो निमेर्देहं समाहरन्। अरणिन्तत्र निक्षिप्य मथनञ्चक्रु रोजसा। मन्त्रहोमैर्महात्मानः पुत्रहेतोर्निमेस्तदा। अरण्यां मथ्यमानायां प्रादुर्भूतो महातपाः। मथनान्मिथिरित्याहुर्जननाज्जनकोऽभवत्। यस्माद्विदेहात्सम्भूतो वैदेहस्तु ततः स्मृतः। एवं विदेहराजश्च जनकः पूर्वकोऽभवत्। मिथिर्नाम महातेजास्तेनायं मैथिलोऽभवत्। इति सर्वमशेषतो मया कथितं संभवकारणन्तु सौम्य। नृपपुङ्गवः शापजं द्विजस्य द्विजशापाच्च यदद्भुतं नृपस्य"।

५शम्बरासुरपुत्रभेदे। "हेनस्कन्धोऽतिसेनश्च शनको जन-

कस्तत:" हरिवं० १६१अ०। "तद्धैतज्जनको वैदेहो याज्ञवल्क्यं प्रपच्छ" शत० ब्रा० ११।३।१।२। "सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्तीति" १४।५।१।१।

जनकतनया स्त्री जनकस्य तनयेव तत्पाल्यत्वात्। रामकलत्रे जनकयज्ञे वेद्यां हलाकर्षणजातायां सीतायां सा हि सत्ययुगे वृहस्पतिसुतकुशध्वजकन्या वेदवती नामासीत् त्रेतायां सीताजातत्वात् सीतानामा बभूव रामा० उत्त० १७अ० तत्कथा यथा।

"कुशध्वजो नाम पिता ब्रह्मर्षिरमितप्रभः। वृहस्पतिसुतः श्रीमान् बुद्ध्या तुल्यो वृहस्पतेः। तस्याहं कुर्वतो नित्यं वेदाभ्यासं महात्मनः। सम्भूता वाङ्मयी कन्या नाम्ना वेदवती स्मृता। ततो देवाः सगन्धर्वायक्षराक्षसपन्नगाः। ते चापि गत्वा पितरं वरणं रोचयन्ति मे। न च मां स पिता तेभ्यो दत्तवान् राक्षसेश्वर!। कारणं तद्वदिष्यामि निशामय महाभुज!। पितुस्तु मम जामाता विष्णुः किल सुरेश्वरः। अभिप्रेतस्त्रिलोकेशस्तस्मान्नान्यस्य मे पिता। दातुमिच्छति तस्मै तु तच्छ्रुत्वा बलदर्पितः। शम्भुर्नाम ततो राजा दैत्यानां कुपितोऽभवत्। तेन रात्रौ शयानो मे पिता पापेन हिंसितः। ततो मे जननी दीना तच्छरीरं पितुर्मम। परिष्वज्य महाभागा प्रविष्टा हव्यवाहनम्। ततो मनोरथं सत्यं पितुर्नारायणं प्रति। करोमीति तमेवाहं हृदयेन समुद्वहे। इति प्रतिज्ञामारुह्य चरामि विपुलं तपः। एतत्ते सर्वमाख्यातं मया राक्षसपुङ्गव!। नारायणो मम पतिर्न त्वन्यः पुरुषोत्तमात्। आश्रये नियमं घोरं नारायणपरीप्सया। विज्ञातस्त्वं हि मे राजन्! गच्छ पौलस्त्यनन्दन!। जानामि तपसा सर्वं त्रैलोक्ये यद्धि वर्त्तते।" ततस्तां कामयमानेन रावणेन सा धर्षिता तस्मै शापं दत्त्वा ममार तत्कथा

"एवमुक्तस्तया तत्र वेदवत्या निशाचरः। मूर्द्धजेषु तदा कन्यां कराग्रेण परामृशत्। ततो वेदवती क्रुद्धा केशान् हस्तेन साऽच्छिनत्। असिर्भूत्वा करस्तस्याः केशांश्छिन्नांस्तदाऽकरोत्। सा ज्वलन्तीव रोषेण दहन्तीव निशाचरम्। उवाचाग्निं समाधाय मरणाय कृतत्वरा। धर्षितायास्त्वयाऽनार्य! न मे जीवितमिष्यते। रक्षस्तस्मात् प्रवेक्ष्यामि पश्यतस्ते हुताशनम्। यस्मात्तु धर्षिता चाहं त्वया पापात्मना वने। तस्मात्तव बधार्थं हि समुत्पत्स्याम्यहं पुनः। न हि शक्यः स्त्रिया हन्तुं पुरुषः पापनिश्चय!। शापे त्वयि मयोत्सृष्टे तपसश्च व्ययो भवेत्। यदि त्वस्ति मया किञ्चित्कृतं दत्तं हुतं तथा। तस्मात् त्वयोनिजा साध्वी भवेयं धर्मिणः सुता। एवमुक्त्वा प्रविष्टा सा ज्वलितं जातवेदसम्। पपात च दिवो दिव्या पुष्पवृष्टिः समन्ततः। सैषा जनकराजस्य प्रसूता तनया प्रभो!। तव भार्या महाबाहो! विष्णुस्त्वं हि सनातनः। पूर्वं क्रोधहतः शत्रुर्ययासौ निहतस्तथा। उपाश्रयित्वा शैलाभस्तव वीर्यममानुषम्। एवमेषा महाभागा मर्त्येषूत्पत्स्यते पुनः। क्षेत्रे हलमुखोत्कृष्टेवेद्यामग्निशिखोपमा। एषा वेदवती नाम पूर्वमासीत् कृते युगे। त्रेतायुगमनुप्राप्य बधार्थं तस्य रक्षसः। उत्पन्ना मैथिलकुले जनकस्य महात्मनः"। कालिकापु० ३७अ० तस्याः पृथिव्या उत्पत्तिरुक्ता। कल्पभेदादविरोधः। जनकात्मजाजनकतनयादयोऽप्यत्र।

जनकराजकूप पु० तीर्थभेदे।

जनकसप्तरात्र पु० सप्तभिः रात्रिभिःसाध्यः अण् तस्य लुक् अच् समा० जनकेन दृष्टः सप्तरात्रः। जनकदृष्टे सप्तरात्रसाध्ये यागभेदे। "जनकसप्तरात्रमृद्धिकामः अभिप्लव चतुरहो विश्वजिन्महाव्रतं ज्योतिष्टोमः" आश्व० श्रौ० १०।२।१४। "जनकसप्तरात्रस्याहःकॢप्तिरुच्यते। अभिप्लव चतुरहो विश्वजिन्महाव्रतं ज्योतिष्टोम इति" नारा० "जनक सप्तरात्रः चतुर्भ्यो विश्वजिन्महाव्रतम्"। कात्या० श्रौ० २३।५।८ "चतुर्भ्यः पार्ष्टिकेभ्यः परो विश्वजिन्महाव्रतं च"।

जनकारिन् पु० जनैः कीर्य्यते कॄ—बा० कर्म्मणि णिनि। अलक्तके राजनि०। [शिवलिङ्गरूपे तीर्थभेदे शिवपु०।

जनकेश्वर पु० जनकेन स्थापितः ईश्वरः। जनकस्थापिते

जनङ्गम पुंस्त्री जनेभ्योगच्छति वहिः गम—खच् मुम् च। चण्डाले स्त्रियां जातित्वात् ङीष्। "अवधीत्। जनङ्गम इवैष यदि हतदृपो दृपन्नत्। स्पर्शमशुचिवपुरर्हति प्रतिमाननान्तु नितरां नृपोचिताम्" माघः।

जनचक्षुस् न० जनस्य चक्षुरिव। लोकचक्षुर्वत्प्रकाशके सूर्य्ये "मुहूर्त्ताभ्युदिते सूर्य्ये जनचक्षुषि निर्म्मले" हरिवं० १४२। लोकचक्षुःप्रभृतयोऽप्यत्र। "लोकचक्षुर्दिवाकरः" आदित्यहृदयम्।

जनजन्मादि पु० जनस्य जनिमतो जन्मन आदिः। परमेश्वरे। "जननो जनजन्मादिः" विष्णुस०।

जनत् पु० जन–भावे अति। जनने जनद्वच्छब्दे दृश्यम्।

जनता स्त्री जनानां समूहः तल्। जनसमूहे अमरः। "आगामिनीं गृहिरे जनतास्तरूणाम्"। "विहिताञ्जलिर्जनतया दधती" माघः।

जनत्रा स्त्री जनान् त्रायते त्रै–क। जङ्गमकुट्याम्" हारा०।

जनदेव पु० जनो देव इव उपमितस०। नरदेवे नरश्रेष्ठे राजनि "जनको जनदेवस्तु मिथिलायां जनाधिपः" भा० शा० २१८अ०।

जनद्वत् पु० जनत् जननमस्त्यस्य मतुप् मस्य वः। जननगुणयोगिनि वह्नौ "अग्नये तपस्वते जनद्वते पावकवते स्वाहा" ऐत० ब्रा० ७।८।

जनधा पु० जनं दधाति धा–क्विप्। जनपोषके वह्नौ स हि जनानां जठरस्थितान्नादेः पाचनेन रसवीर्य्यसम्पादनद्वारा पोषकः इति तस्य तथात्वम्" तैत्ति० ब्रा० ४१।१।१।१।१। उदा०।

जनन न० जन–भावे ल्युट्। १उद्भवे २जन्मनि (स्वादृष्टोपनिबद्धशरीरग्रहणे) ३आविर्भावे च "यदैव पूर्वं जनने शरीरम्" कुमार०। दीक्षितस्य यज्ञादिषु ४दीक्षादिसंस्कारभेदे दीक्षितस्य दीक्षारूपजन्मवत्त्वात् तथात्वम् "पुनर्वा एतमृत्विजो गर्भं कुर्वन्ति ये दीक्षयन्तीत्यादि" श्रुतेः। "मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने। तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनादिति" मनुः। आधारे ल्युट्। ५वंशे। जन–णिच्–भावे ल्युट्। ६उत्पादने। "अन्योऽन्यशोभाजननाद्बभूव" कुमार०। कर्त्तरि ल्यु। ७उत्पादके त्रि० "सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः" ऋ० २।४०।१। ८परमेश्वरे पु० "जननो जनजन्मादिः" विष्णुस०।

जननाशौच न० जननिमित्तमशौचम्। प्रसवनिमित्ताशौचे अशौचशब्दे ४८६पृ० दृश्यम्।

जननि स्त्री–जन अनि। जनीनामगन्धद्रव्ये शब्दरत्ना०।

जननी स्त्री जनयति जन–णिच्–अनि जन–अपादाने अनि वा, ङीप्। १मातरि "जनन्यां संस्थितायान्तु समं सर्वे सहोदराः। भजेरन् मातृकं रिक्थं भगिन्यश्च सनाभयः" मनुः। २दयायां मेदि० ३जनीनामगन्धद्रव्ये ४चर्मचटिकायां शब्दर० ५यूथिकायां शब्दच० ६कटुकायां ७मञ्जिष्ठायाम् ८अलक्तके च राजनि०। ९उत्पादकस्त्रीमात्रे "वदामस्ते किं वा जननि! वयमुच्चैर्जडधियः" कालीस्तवः "वीजप्ररोहजननीं ज्वलनः करोति" रघुः। "मासेन स्त्रीजननी" विष्णुस्मृ०। १०जटामांस्यां राजनि०।

जनपद पु० जनाः पद्यन्ते गच्छन्ति यत्र पद–आधारे घ। देशे। अमरः। "कुलानि जातीः श्रेणीश्च गणान् जनपदानपि" याज्ञव०। जनपदभेदाश्च भा० भी० ९अ० दर्शिता यथा

"अत ऊर्द्ध्वं जनपदान्निबोध गदतो मम। तत्रेमे कुरुपाञ्चालाः शाल्वा माद्रेयजाङ्गलाः। शूरसेनाः पुलिन्दाश्च बोधा मालास्तथैव च। मत्स्याः कुशट्टाः कौशल्याः कुन्तयः काशिकोशलाः। चेदिमत्स्यकरूषाश्च भोजाः सिन्धुपुलिन्दकाः। उत्तमार्णा दशार्णाश्च मेकलाश्चोत्कलैः सह। पाञ्चालाः कोशलाश्चैव नैकपृष्ठा युगन्धराः। बोधा मद्राः कलिङ्गाश्च काशयोऽपरकाशयः। जठराः कुकुराश्चैव सदशार्णाश्च भारत"। कुन्तयोऽवन्तयश्चैव तथैवापरकुन्तयः। गोमन्ता मल्लकाः पाण्ड्राः विदर्भानूपवाहिकाः। अश्मकाः पांशुराष्ट्राश्च गोपराष्ट्राः करीतयः। अधिराज्यं कुशट्टाश्च मल्लराष्ट्रञ्च केरलाः। वारवास्यापवाहाश्च वक्रा वक्रातयः शकाः। विदेहा मगधाः कच्छा मलया विजयास्तथा। अङ्गा वङ्गाः कलिङ्गाश्च यकृल्लोमान एव च। मल्लाः सुदेष्णाः प्रह्लादा माहिषाः शशकास्तथा। वाह्लीका वाटधानाश्च आभीराः कालतोयकाः। अपरान्ताः परान्ताश्च पञ्चालाश्चर्म्मचण्डकाः। अटवीशिखराश्चैव मेरुभूताश्च मारिष!। उपावृत्तानुपावृत्ताश्च सुराष्ट्राः केकयास्तथा। कुट्टाः परान्ता माहेयाः कच्छाः सामुद्रनिष्कुटाः। अन्ध्राश्च बहवो राजन्नन्तर्गिर्य्यास्तथैव च। बहिर्गिर्य्याङ्गमलदा मागधा मालवाकृटाः। मह्युत्तराः प्रावृषेया भार्गवाश्च जनाधिप!। पुण्ड्रा भार्गाः किराताश्च सुदेष्णा यामुनास्तथा। शका निषादनिषधास्तथैवानर्त्तनैर्ऋताः। दुर्गलाः पूतिमत्स्याश्च कुन्तलाः कुशलास्तथा। तीरग्रहाः स्सूरसेना ईजिकाः कन्यकागणाः। तिलभारा मसीराश्च मधुमन्ताः सुकन्दुकाः। काश्मीराः सिन्धुसौवीरा गान्धारा दर्शकास्तथा। अभीसारा उलूताश्च शैवाला वाह्लिकास्तथा। दर्व्वीचरा नवादर्व्वा वातजामरथोरगाः। बहुवद्याश्च कौरव्य! सुदामानः सुमल्लिकाः। वध्राः करीषका-

श्चापि कुलिन्दोपत्यकास्तथा । वानायवो दशाः पार्श्वा रोमाणः कुशविन्दवः । कच्छा गोपालकच्छाश्च जाङ्गलाः कुरुवर्णकाः । किराता वर्व्वराः सिद्धा वैदेहास्ताम्रलिप्तकाः । ओड्रा म्लेच्छाः ससैरिन्ध्राः पार्व्वतीयाश्च मारिष ! । अथापरे जनपदा दक्षिणा भरतर्षभ ! । द्रविड़ाः केरलाः प्राच्या मूषिका वनवासिकाः । कर्णाटका माहिषका विकल्पा मूषकास्तथा । झिल्लिकाः कुन्तलाश्चैव सौहृदा नलकाननाः । कोकुट्टकास्तथा चोलाः कोङ्कणा मालवा नराः । समङ्गाः कनकाश्चैव कुकुराङ्गारमारिषाः । ध्वजिन्युत्सवसंकेतास्त्रिगर्त्ताः शाल्वसेनयः । व्यूढ़काः कोरकाः प्रोष्ठा समवेगवशास्तथा । तथैव विन्ध्यपुलिकाः पुलिन्दा वल्कलैः सह । मालवा वल्लवाश्चैव तथैवापरवर्त्तकाः । कुलिन्दाः कालदाश्चैव दण्डकाः करटास्तथा । मूषकास्तनवालाश्च सनीमा वटसृञ्जयाः । अलिदायाः शिवाटाश्च स्तनपाः सुनयास्तथा । ऋषिका विदर्भाः काकास्तङ्गनाः परतङ्गनाः । उत्तराश्चापरे म्लेच्छा जना भरतसत्तम ! । यवनाश्च सकाम्बोजा दारुणा म्लेच्छजातयः । सक्षद्द्रुहाः कुलत्थाश्च हूणाः पारसिकैः सह । तथैव रमणाश्चीनास्तथा च दशमालिकाः । क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च । शूद्राभीराश्च दरदाः काश्मीराः पशुभिः सह । खाशीकाश्चान्तचाराश्च पह्लवा गिरिगह्वराः । आत्रेयाः सभरद्वाजास्तथैव स्तनपोषकाः । द्रोषकाश्च कलिङ्गाश्च किरातानाञ्च जातयः । तोमरा हन्यमानाश्च तथैव करभञ्जकाः । एते चान्ये जनपदाः प्राच्योदीच्यास्तथैव च" ।

इ०स० १४अ० कूर्मविभागे तु तेषां मध्ये केषाञ्चिद् दिग्भेदेन स्थितिर्दर्शिता ते च कूर्म्मविभागशब्दे द्र० उक्ता देशानां सीमादि तत्तच्छब्दे उक्तं वक्ष्यमाणञ्च केचिद्भेदास्तु पु० मध्यादिदेशभेदेन उक्ता यथा

"तदिमे कुरुपाञ्चालाः शाल्वाश्चैव सजाङ्गलाः । शूरसेना भद्रकारा बोधकाः सपटच्चराः । मत्स्याः किराताः कुल्याश्च कुन्तयः कुन्तिकोशलाः । आवन्ताश्च कुलिङ्गाश्च कोलाश्चैवान्ध्रकैः सह । मध्यदेश्या जनपदाः प्रायशः परिकीर्त्तिताः । वाह्लिका वाटधानाश्च आभीराः कालतोयकाः । परन्ध्राश्चैव शूद्राश्च पह्लवाश्चात्तखण्डिकाः । गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः । शका द्रुह्याः पुलिन्दाश्च पारदा हारमूर्त्तिकाः । रामठाः कण्ठकाराश्च केकयादेशमानिकाः । क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च । आत्रेयोऽथ भरद्वाजः प्रस्थलाः सदशेरकाः । लम्बकास्तनपानाश्च सैनिकाः सह साङ्गजैः । एते देशा उदीच्यास्तु प्राच्यान्देशान्निबोधत । अङ्गावङ्गामद्गुरका अन्तर्गिरिबहिर्गिराः । ततः प्रवङ्गा मातङ्गा मलया मलवर्त्तकाः । सुह्मोत्तराः प्रविजया भार्गवाङ्गेयमालवाः । प्राग्ज्योतिषाश्च पुण्ड्राश्च विदेहास्ताम्रलिप्तकाः । शाल्वमागधगोनर्द्दाः प्राच्या जनपदाः स्मृताः । तथाऽपरे जनपदा दक्षिणापथवासिनः । पाण्ड्याश्च केरलाश्चैव चोलाः कुल्यास्तथैव च । सेतुकामुख्यकाश्चैव कुपथाचारवासिकाः । नवराष्ट्राः माहिषकाः कलिङ्गाश्चैव सर्वशः । कावेराश्च सहैषीकैराटव्याः शवरास्तथा । पुलिन्द्राविन्ध्यमूषीका वैदर्भा दण्डकैः सह । कुलीयाश्च शिरालाश्च रूपसास्तामसैःसह । तथा तैत्तिरकाश्चैव सर्वे कारस्करास्तथा । नासिकाद्याश्च ये चान्ये ये चैवान्तरनर्मदाः । भानुकच्छाः समाहेयाः सह सारस्वतैस्तथा । काच्छीयाश्च सुराष्ट्राश्च आनर्त्तांश्चार्बुदैः सह । इत्येते अपरान्ताश्च शृणु ये विन्ध्यवासिनः । मालवाश्च करूषाश्च मेकलाश्चोत्कलैःसह । उत्तमार्णाः दशार्णाश्च भोजाः किष्किन्धकैः सह । तोषलाःकोशलाश्चैव त्रैपुरा वैदिकास्तथा । तुमुरास्तुम्बुराश्चैव पटुमान्निषधैः सह । अनूपास्तुण्डिकेराश्च वीतिहोत्रा अवन्तयः । एते जनपदाः ख्याता विन्ध्यपृष्ठनिवासिनः । अतो देशान् प्रवक्ष्यामि पर्वताश्रयिणश्च ये । निदीरा हंसवर्णाश्च कुपथा अपथाः खशाः । कुथप्रावरणाश्चैव ऊर्णादर्भाः समुद्रकाः । त्रिगर्त्ता मण्डलाश्चैव किराताश्चामरैः सह" । शक्तिसङ्गमतन्त्रे देशभेदसीमाद्युक्तं यथा "देशव्यवस्था देवेशि ! कथ्यते शृणु तत्परा । वैद्यनाथं समारभ्य भुवनेशान्तगं शिवे !। तावदङ्गाभिधो देशो यात्रायां नहि दुष्यति । रत्नाकरं समारभ्य ब्रह्मपुत्रान्तगं शिवे! । वङ्गदेशो मया प्रोक्तः सर्वसिद्धिप्रदर्शकः । जगन्नाथात् पूर्वभागात् कृष्णातीरान्तगं शिवे !। कलिङ्गदेशः संप्रोक्तो वाममार्गपरायणः । कलिङ्गदेशमारभ्य पञ्चाशद्योजनं शिवे !। दक्षिणस्यां महेशानि ! कालिङ्गः परिकीर्त्तितः । सुब्रह्मण्यं समारभ्य यावद्देवो जनार्द्दनः । तावत् केरलदेशः स्यात् तन्मध्ये सिद्धकेरलः । रामेश्वरात् व्यङ्कटेशात् हंसकेरलनामकः । अनन्तशैलमारभ्य यावत्तत्राद्व्ययं

परे। तावत् सर्वेशनामा तु केरलः परिकीर्त्तितः। शारदामठमारभ्य कुङ्कुमाद्रितटान्तकम्। तावत्काश्मीरदेशः स्यात् पञ्चाशद्योजनान्तकः। कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्वतम्। कामरूपाभिधो देशो गणेशगिरिमूर्द्धनि। त्रिपञ्चकं समारभ्य मध्ये चोज्जयिनी शिवे। मार्ज्जारतीर्थं राजेन्द्र! कोलापुरनिवासिनी। तावद्देशो महाराष्ट्रः कर्णाटस्वामिगोचरः। जगन्नाथादूर्द्ध्वभागादर्वाक् श्रीभ्रमरान्तिकात्। तावदन्ध्राभिधो देशः सौराष्ट्रं शृणु सादरम्। कोङ्कणात् पश्चिमं तीर्थं समुद्रप्रान्तगोचरम्। हिङ्गुलाटान्तको देवि! दशयोजनदेशतः। सौराष्ट्रदेशो देवेशि! तस्मात्तु गुर्ज्जराभिधः। श्रीशैलन्तु समारभ्य चोलेशान्मध्यभागतः। तैलङ्गदेशो देवेशि! ध्यानाध्ययनतत्परः। सुराम्बिकां समारभ्य मलयाद्र्यन्तगं शिवे!। मलयालाभिधोदेशो मन्त्रसिद्धिप्रवर्त्तकः। रामनाथं समारभ्य श्रीरङ्गान्तं किलेश्वरि!। कर्णाटदेशो देवेशि! साम्राज्यभोगदायकः। ताम्रपर्णीं समारभ्य शैलार्द्धशिखरोर्द्धतः। अवन्तीसंज्ञको देशः कालिका तत्र तिष्ठति। भद्रकाली महापूर्वं रामदुर्गाच्च पश्चिमे। श्रीविदर्भाभिधो देशो वैदर्भी तत्र तिष्ठति। गुर्ज्जरात् पूर्वभागे तु द्वारकातो हि दक्षिणे। मरुदेशो महेशानि! उष्ट्रोत्पत्तिपरायणः। श्रीकोङ्कणादधोभागे तापीतः पश्चिमे परे। आभीरदेशो देवेशि! विन्ध्यशैले व्यवस्थितः। अवन्तीतः पूर्वभागे गोदावर्य्यास्तथोत्तरे। मालवाख्यो महादेशो! धनधान्यपरायणः। द्रविड़तैलङ्गमध्ये चोलदेशः प्रकीर्त्तितः। लम्बकर्णाश्च ते प्रोक्तास्तङ्गदोवान्तरो भवेत्। कुरुक्षेत्रात् पश्चिमे तु तथा चोत्तरभागतः। इन्द्रप्रस्थान्महेशानि! दशयोजनकद्वये। पाञ्चालदेशो देवेशि! सौन्दर्य्यगर्वभूषितः। पाञ्चालदेशमारभ्य म्लेच्छाद्दक्षिणपूर्वतः। काम्बोजदेशो देवेशि! वाजिराजिपरायणः। वैदर्भदेशादूर्द्ध्वञ्च इन्द्रप्रस्थाच्च दक्षिणे। मरुदेशात् पूर्वभागे वैराटः परिकीर्त्तितः। काम्बोजाद्दक्षभागे तु इन्द्रप्रस्थाच्च पश्चिमे। पाण्ड्यदेशो महेशानि! महाशूरत्वकारकः। गण्डकीतीरमारभ्य चम्पारण्यान्तकं शिवे!। विदेहभूः समाख्याता तैरभुक्ताभिधः स तु। काम्बोजदेशमारभ्य महाम्लेच्छात्तु पूर्व्वके। वाह्लीकदेशो देवेशि! अश्वोत्पत्तिपरायणः। तप्तकुण्डं समारभ्य रामक्षेत्रान्तकं शिवे!। किरातदेशो देवेशि! विन्ध्यशैलेऽवतिष्ठति। करतोयां समारभ्य हिङ्गुलाटान्तगः शिवे! सुलतानदेशोदेवेशि! महाम्लेच्छपरायणः। हिङ्गुपीठं समारभ्य मक्केशान्तं महेश्वरि!। खुरसानाभिधो देशो म्लेच्छमार्गपरायणः। तन्मध्ये चोत्तरे देवि! ऐराकः परिकीर्त्तितः। काश्मीरन्तु समारभ्य कामरूपात्तु पश्चिमे। भोटान्तदेशो देवेशि! मानसेशाच्च दक्षिणे। मानसेशाद्दक्षपूर्वे चीनदेशः प्रकीर्त्तितः। कैलानीरं समारभ्य सरयूं परितः परे। आमरगान् महेशानि! महाचीनाभिधो भवेत्। जटेश्वरं समारभ्य योगिन्यन्तं महेश्वरि। नेपालदेशोदेवेशि! शिलहट्टं शृणु प्रिये। गणेश्वरं समारभ्य महोदध्यन्तगं शिवे!। शिलहट्टाभिधो देशः पर्वते तिष्ठति प्रिये!। वङ्गदेशं समारभ्य भुवनेशान्तगं शिवे। गौड़देशः समाख्यातः सर्वविद्याविशारदः। गोकर्णात् पूर्व्वभागे आर्य्यावर्त्तात्तु चोत्तरे। तैरभुक्तात् पश्चिमे तु महापुर्य्याश्च सर्व्वतः। महाकोशलदेशश्च सूर्य्यवंशपरायणः। व्यासेश्वरं समारभ्य तप्तकुण्डान्तकं शिवे!। मगधाख्यो महादेशो यात्रायां न हि दुष्यति। दक्षोत्तरक्रमेणैव क्रमात् कीकटमागधौ। चरणाद्रिं समारभ्य गृध्रकूटान्तकः शिवे!। तावत् कीकटदेशः स्यात्तदन्तर्मागधो भवेत्। जगन्नाथप्रान्तदेशश्चोत्कलः परिकीर्त्तितः। कामगिरिं समारभ्य द्वारकान्तं महेश्वरि!। श्रीकुन्तलाभिधो देशो हूणं शृणु महेश्वरि!। कामगिरेर्द्दक्षभागे मरुदेशात्तथोत्तरे। हूणदेशः समाख्यातः शूरास्तत्र रमन्ति च। अयाप्यङ्गं समारभ्य कोटिदेशस्य मध्यगे। ब्रह्मसमुद्रप्रान्तदेशो हि कोङ्कणः परिकीर्त्तितः। मागधाद्दक्षपुत्रात् कामरूपात् मध्यभागे तु कैकयः। शौरसेनाभिधो भागे तु विन्ध्यरात् पश्चिमतः शिवे!। देशः सूर्य्यवंशप्रकाशकः। हस्तिनापुरमारभ्य कुरुक्षेत्राच्च दक्षिणे। पाञ्चालपूर्व्वभागे तु कुरुदेशः प्रकीर्त्तितः। कुरुदेशात् पूर्वभागे कामाद्रेर्दक्षिणे शिवे!। सिंहलाख्यो महादेशः सर्वदेशोत्तमोत्तमः। शिलहट्टात् पूर्व्वभागे कामरूपात्तथोत्तरे। पुलिन्ददेशोदेवेशि! नरनारायणपरः। गणेश्वरात् पूर्व्वभागे समुद्रादुत्तरे शिवे!। कच्छदेशः समाख्यातः सुदेवं शृणु सादरम्। पुलिन्दादुत्तरे भागे कच्छाच्च पश्चिमे शिवे!। मत्स्यदेशः समाख्यातो मत्स्यवाहुल्यकारकः। वैराटपाण्ड्ययोर्मध्ये पूर्वदक्षक्रमेण तु। मद्रदेशः समाख्यातो माद्रीह तत्र तिष्ठति। शूरसेनात् पूर्व्वभागे गण्डक्याः पश्चिमे! शिवे!।

सौवीरदेशो देवेशि ! सर्व्वदेशाधमाधमः । अवन्तीतः पश्चिमे तु वैदर्भाद्दक्षिणोत्तरे । लाटदेशः समाख्यातो वर्व्वरं शृणु पार्वति ! । मायापुरं समारभ्य सप्तशृङ्गान्तयोत्तरे । वर्व्वराख्यो महादेशः सैन्धवं शृणु सादरम् । लङ्कापदेशमारभ्य मक्कान्तं परमेश्वरि ! । सैन्धवाख्यो महादेशः पर्व्वते तिष्ठति प्रिये ! । एते षट् पञ्चाशद्देशा मया प्रोक्ता महेश्वरि ! । एतन्मध्येऽपि देवेशि! देशभेदा ह्यनेकशः । कोटिशः सन्ति देवेशि ! एते मुख्याः प्रकीर्त्तिताः । रहस्यातिरहस्यञ्च गोप्तव्यं पशुसङ्कटे । इति संक्षेपतः प्रोक्तं किमन्यत् श्रोतुमिच्छसि" ।

तत्र भवः उत्सा० अञ् । जनपदादागत अण् तस्येदम् अण् वा । जानपद तत्र भवे तत आगते तत्सम्बन्धिनि च । "नीवारपाकादिकडङ्करीयैरामृश्यते जानपदैर्न्नकच्चित् । "देयं चौरहृतं द्रव्यं राज्ञाजानपदाय तु" याज्ञ० स्त्रियां तु वृत्तौ जानपदेत्यादि पा० ङीप् । वृत्तावेव ङीषो नियमात् अन्यत्र जानपदा अञन्तस्य ङीपि जानपदी तत्रभवस्त्रियां पित्त्वात् आद्युदात्तता । "त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्" नीतिसारः ।

जनपदिन् त्रि० जनपदाः सन्त्यस्य स्वत्वेन इनि । जनपदस्वामिनि । "जनपदिनां जनपदेन समानशब्दानाम्" पा० "जनपदिनां जनपदस्वामिनाम्" सि० कौ० । स्त्रियां ङीप् ।

जनप्रवाद पु० जनेषु प्रवादः ७त० । जनापवादे वचनीयतायां हेमच० ।

जनप्रिय पु० ६त० । १ शोभाञ्जनवृक्षे २धन्याके च राजनि० । ३लोकप्रियमात्रे त्रि० ।

जनभक्ष पु० जनानां भक्षः भज-बा० कर्म्मणि स । १यजमानानां कामदानेन भजनीये । "सत्रासाहो जनभक्षो जनं सहः" ऋ०२।२।१।३। २जनानां भक्षणे च ।

जनमेजय पु० जनमेजयति एज-णिच्-खश् । १परीक्षितो नृपतेः पुत्रे २कुरुनामभूपपुत्रभेदे च । "ततः संवरणात्सौरी तपती सुषुवे कुरुम् । राजत्वे तं प्रजाः सर्व्वा धर्म्मज्ञ इति वव्रिरे । तस्य नाम्नाऽभिविख्यातं पृथिव्यां कुरुजाङ्गलम् । कुरुक्षेत्रं स तपसा पुण्यं चक्रे महातपाः । अविक्षितमभिष्यन्तं तथा चैत्ररथं मुनिम् । जनमेजयञ्च विख्यातं पुत्रांश्चास्यानुशुश्रुमः । पञ्चैतान् वाहिनी पुत्रान् व्यजायत मनस्विनी । जनमेजयस्य तनया भुवि ख्याता महाबलाः" भा०आ०९४अ० । ३पुरुनृपपुत्रे च "पुरोः पुत्रो महावीर्य्यो राजासीज्जनमेजयः" हरिव० ३१अ० । तत्र परीक्षितःपुत्रो जनमेजयः सर्पसत्त्रे भारतं श्रुतवान् तत्कथा भा० आ० ५०अ० ।

"मन्त्रिणाञ्च वचः श्रुत्वा स राजा जनमेजयः । पर्य्यतप्यत दुःखार्त्तः प्रत्यपिंषत् करं करे । निःश्वासमुष्णमसकृद्दीर्घं राजीवलोचनः । मुमोचाश्रूणि च तदा नेत्राभ्यां प्ररुदन्नृपः । दुर्द्धरं वाष्पमुत्सृज्य स्पृष्ट्वा चापो यथाविधि । मुहूर्त्तमिव च ध्यात्वा निश्चित्य मनसा नृपः । अमर्षी मन्त्रिणः सर्व्वानिदं वचनमब्रवीत् । जनमेजय उवाच । श्रुत्वैतद्भवतां वाक्यं पितुर्मे स्वर्गतिं प्रति । निश्चितेयं मम मतिर्या च तां मे निबोधत । अनन्तरञ्च मन्येऽहं तक्षकाय दुरात्मने । प्रतिकर्त्तव्यमित्येवं येन मे हिंसितः पिता । ऋषेर्हि शृङ्गिणो वाक्यं कृत्वा दग्ध्वा च पार्थिवम् । इयं दुरात्मता तस्य काश्यपं यो न्यवर्त्तयत् । यद्यागच्छेत् स वै विप्रो ननु जीवेत् पिता मम । परिहीयेत किं तस्य यदि जीवेत् स पार्थिवः । काश्यपस्य प्रसादेन मन्त्रिणां विनयेन च । स तु वारितवान्मोहात् काश्यपं द्विजसत्तमम् । सञ्जिजीवयिषुं प्राप्तं राजानमपराजितम् ! महानतिक्रमो ह्येष तक्षकस्य दुरात्मनः । द्विजस्य योऽददद्द्रव्यं मा नृपं जीवयेदिति । उत्तङ्कस्य प्रियं कुर्य्यामात्मनश्च महत् प्रियम् । भवताञ्चैव सर्व्वेषां गच्छाम्यपचितिं पितुः" । "सौतिरुवाच । एवमुक्त्वा ततः श्रीमान्मन्त्रिभिश्चानुमोदितः । आरुरोह प्रतिज्ञां स सर्पसत्राय पार्थिवः । ब्रह्मन् ! भरतशार्दूलो राजा पारीक्षितस्तदा । पुरोहितमथाहूय ऋत्विजो वसुधाधिपः । अब्रवीद्वाक्यसम्पन्नः कार्य्यसम्पत्करं वचः । यो मे हिंसितवांस्तातं तक्षकः स दुरात्मवान् । प्रतिकुर्य्यां यथा तस्य तद्भवन्तो ब्रुवन्तु मे । अपि तत्कर्म्म विदितं भवतां येन पन्नगम् । तक्षकं तु प्रदीप्तेऽग्नौ प्रक्षिपेयं सबान्धवम् । यथा तेन पिता मह्यं पूर्व्वं दग्धो विषाग्निना । तथाहमपि तं पापं दग्धुमिच्छामि पन्नगम् । ऋत्विज ऊचुः । अस्ति राजन्महत् सत्रं त्वदर्थं देवनिर्मितम् । सर्पसत्रमिति ख्यातं पुराणे परिपठ्यते । आहर्त्ता तस्य सत्रस्य त्वन्नान्योऽस्ति नराधिप ! । इति पौराणिकाः प्राहुरस्माकं चास्ति स क्रतुः । सौतिरुवाच । एवमुक्तः स राजर्षिर्मेने दग्धं हि तक्षकम् । हुताशनमुखे दीप्ते प्रविष्टमिति सत्तम ! । ततोऽब्रवीन्मन्त्रविदस्तान्राजा ब्राह्मणा आ०५१ ।

आहरिष्यामि तत् सत्रं सम्भाराः सम्भ्रियन्तु मे" ५१ अ०। "श्रुत्वा ते सर्पसत्राय दीक्षितं जनमेजयम्। अभ्यागच्छदृषिर्विद्वान् कृष्णद्वैपायनस्तदा"। इत्युपक्रमे "इदं पश्चाद्द्विजश्रेष्ठं पर्य्यपृच्छत् कृताञ्जलिः। जनमेजय उवाच। कुरूणां पाण्डवानाञ्च भवान् प्रत्यक्षदर्शिवान्। तेषां चरितमिच्छामि कथ्यमानं त्वया द्विज!। कथं समभवद्भेदस्तेषामक्लिष्टकर्म्मणाम्। तच्च युद्धं कथं वृत्तं भूतान्तकरणं महत्। पितामहानां सर्वेषां दैवेनाविष्टचेतसाम्। कार्त्स्न्येनैतत्समाचक्ष्व यथावृत्तं द्विजोत्तम!। सौतिरुवाच। तस्य तद्वचनं श्रुत्वा कृष्णद्वैपायनस्तदा। शशास शिष्यमासीनं वैशम्पायनमन्तिके। व्यास उवाच। कुरूणां पाण्डवानाञ्च यथा भेदोऽभवत्पुरा। तदस्मै सर्वमाचक्ष्व यन्मत्तः श्रुतवानसि। गुरोर्वचनमाज्ञाय स तु विप्रर्षभस्तदा। आचचक्षे ततः सर्वमितिहासं पुरातनम्। राज्ञे तस्मै सदस्येभ्यः पार्थिवेभ्यश्च सर्वशः। भेदं सर्वविनाशञ्च कुरुपाण्डवयोस्तदा"। ६० अ० "वैशम्पायन उवाच। गुरवे प्राङ्नमस्कृत्य मनोबुद्धिसमाधिभिः। संपूज्य च द्विजान् सर्वांस्तथाऽन्यान् विदुषो जनान्। महर्षेर्विश्रुतस्येह सर्वलोकेषु धीमतः। प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यास्य महात्मनः। श्रोतुं पात्रञ्च राजंस्त्वं प्राप्येमां भारतीं कथाम्। गुरोर्वक्त्रपरिस्पन्दो मनः प्रोत्साहतीव मे। शृणु राजन्! यथा भेदः कुरुपाण्डवयोरभूत्। राज्यार्थे द्यूतसम्भूतो वनवासस्तथैव च"। ६१ अ०। "स कदाचिन्मृगयां गतः पारीक्षितो जनमेजयः कञ्चित् स्वविषये ब्राह्मणमपश्यत्" भा० आ० ३ अ०। ३"परीक्षितस्तु दायादो धार्म्मिको जनमेजयः। जनमेजयस्य दायादास्त्रय एव महारथाः। श्रुतसेनोग्रसेनौ च भीमसेनश्च नामतः"। "द्वावन्यौ तव वंशेऽस्मिन् द्वावेव च परीक्षितौ। भीमसेनास्त्रयो राजन् द्वौ चापि जनमेजयौ"। "कुरुस्य च द्वितीयस्य भीमसेनोऽभवत् सुतः।" "अभिमन्योः परीक्षित्तु पिता तव जनेश्वर!" भा०आ०९२अ०। ४पुरञ्जयनृपपुत्रे "जनमेजयो महाराज! पुरञ्जयसुतोऽभवत्। जनमेजयस्य राजर्षेर्महाशालोऽभवत्सुतः" हरिवं० ३१अ०।

जनयति स्त्री जन-णिच्-वा० भावे क्ति वेदे नि० णि० लोपाभावः। उत्पादने "जनयत्यै त्वा संयौमि" यजु०। १।२२।

जनयितृ पु० जन-णिच्-तृच्। १पितरि २उत्पादके त्रि० ३मातरि स्त्री ङीप्।

जनरव पु० ६त०। लोकापवादे। "परीवादस्तथ्यो भवति वितथोवाऽपि महतां तथाप्युच्चैर्धाम्नो हरति महिमानं जनरवः" उद्भटः।

जनराज पु० जनेषु राजते राज-क्विप् ७त०। जनाधिपे "जनराडसि रक्षोहा" यजु० ५।२४। जनराजादयोऽप्यत्र।

[प्रिये त्रि०।

जनवल्लभ पु० ६त०। १श्वेतरोहितवृक्षे राजनि० २लोक-

जनवाद पु० ७त०। लोकापवादे। "द्यूतं च जनवादञ्च परीवादं तथानृतम्" मनुः। तत्र साधु कथा० ठक्। जानवादिक जनप्रवादसाधौ त्रि०। अलुक्स०। जनेवादोऽप्यत्र ततः साध्वर्थे कथादि० ठक्। जानेवादिक तत्साधौ त्रि०।

जनश्रुत त्रि० जने श्रुतः विख्यातः। १लोकविख्याते २राजभेदे पु० तस्यापत्यम् इञ्। जानश्रुति तदपत्ये पौत्रायणे "जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी आस" छा०उ०।

जनश्रुति स्त्री जनेभ्यः श्रूयते श्रु-क्तिन्। सत्यासत्यसाधारणलोकप्रसिद्धायां किंवदन्त्याम् अमर०।

जनस् स्त्री द्वि०व०। जनयतः जन-णिच्-असुन्। सर्वभूतजनयित्र्योः द्यावापृथिव्योः। "पातु जनसी उभे अनु" ऋ० २।२।४।२ २जनलोके न० "जनस्तपःसत्यनिवासिनो जनाः" भाग० ३।१२।२५।

जनस्थान न० १दण्डकारण्ये जटाधरः। २तत्रत्यस्थानभेदे तच्च स्थानं पूर्वम् इक्ष्वाकुराजपुत्रदण्डस्य राजधानी आसीत् दण्डेन च शुक्राचार्य्यकन्या बलात्कारेणाक्रम्याधर्षिता तेन कुपितेन वशिष्ठेन शप्तोदण्डकस्तत्कथा रामा० उत्त० यथा "सप्तरात्रेण राजासौ सभृत्यबलवाहनः। पापकर्म्मसमाचारो वधं प्राप्स्यति दुर्मतिः। सर्वसत्त्वानि यानीह जङ्गमानि स्थिराणि च। सर्वेषां पांशुवर्षेण क्षयः क्षिप्रं भविष्यति। दण्डस्य विषयो यावत् तावत् स वनमाश्रमम्। पांशुभूतमिवाकस्मात् सप्तरात्रात् भविष्यति। इत्युक्त्वा क्रोधसन्तप्तस्तदाश्रमनिवासिनम्। जनं जनपदस्यान्ते स्थीयतामित्यबोधत। सप्ताहात् भस्मसाद्भूतः स चापि ब्रह्मतेजसा। तस्य दण्डस्य विषयोविन्ध्यशैलस्य सानुषु। तपस्विनः स्थिता यत्र तज्जनस्थानमुच्यते" "प्राप्य चाशु जनस्थानं खरादिभ्यस्तथाविधम्" "अमी जनस्थानमपोढ़

विन्नम्" रघुः। "जनस्थाने चिरम्बिव राक्षसस्य दुरात्मनः"। भा० व० ४०अ० "खरेणासीत् महद्वैरं जनस्थाननिवासिना" भा० आ०२७६ अ०। २जनानां स्थाने च "जनस्थाने भ्रान्त्वं कनकमृगतृष्णान्वितधिया" सा० द०।

जना स्त्री जन–वा० अङ्। उत्पत्तौ।

जनातिग त्रि जनमतीत्य गच्छति अति+गम–ड। लोकातीते।

जनाधिनाथ पु० ६त०। लोकाधिपे राजनि०। "जनाधिनाथो न ययौ विशेषणताम्" माघः जनाधिपादयोऽप्यत्र

जनान्त पु०६त०। १जनसमीपे २जनैर्मर्य्यादायाञ्च। (सेला) ख्याते ३सीमाभेदान्विते देशभेदे धनञ्जयः।

जनान्तिक न० "त्रिपताककरेणान्यानपवार्य्यान्तरा कथा। अन्योन्यामन्त्रणं यत् स्यात्जनान्ते तज्जनान्तिकम्" सा० द० उक्ते १अप्रकाशकथने नाटकेऽस्य भूरिप्रयोगः। ६त०। २जनसमीपे च।

जनार्द्दन पु० जनैरर्द्यते याच्यते पुरुषार्थलाभाय अर्द्द–याचने कर्म्मणि ल्युट्। जनं जननमर्द्दति हिनस्ति ताडयति जनान् समुद्रवासिनोऽसुरभेदान् अर्द्दयति वा कर्त्तरि ल्यु। "१विष्णौ परमेश्वरे "सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्द्दनः" विष्णु स० २जनपीडके त्रि०। "जनायनायोद्यमिनं जनार्द्दनम् जये जगज्जीवपिवं वदन् शिवम्" नैष० गयातीर्थस्थे ३विष्णुमूर्त्तिभेदे तद्धस्ते जीवत्पुरुषस्य स्वपिण्डस्य दानविधिः वायु पु० गयामाहात्म्ये यथा

"जनार्द्दनो भस्मकूटे तस्य हस्ते तु पिण्डदः। आत्मनोऽप्यथ वान्येषां सव्येनापि तिलैर्विना। जीवता दधिसंमिश्रं सर्वे ते विष्णुलोकगाः। यस्तु पिण्डो मया दत्तस्तव हस्ते जनार्द्दन!। मामुद्दिश्य त्वया देव! तस्मिन् पिण्डे मृते प्रभो!। एष पिण्डो मया दत्तस्तव हस्ते जनार्द्दन! अन्तकाले गते मह्यं त्वया देयो गयाशिरे। जनार्द्दन! नमस्तुभ्यं नमस्ते पितृमोक्षद!। पितृमात्रे नमस्तुभ्यं नमस्ते पितृरूपिणे। गयायां पितृरूपेण स्वयमेव जनार्द्दनः। त्वां दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात्"। ४शालग्रामभेदे शालग्रामशब्दे दृश्यम्। तन्नाम्ना भोजनकाले हरेः स्मरणीयता "भोजने च जनार्द्दनम्" इत्युक्तेः "आसन्नतामासाद्य जनार्द्दनस्य" माघः

जनाशन पु०जनानश्नाति अश–भोजने ल्यु। १वृके राजनि०। २लोकभोजिनि त्रि०। भावे ल्युट् ६त०।३लोकभक्षणे न०।

जनाश्रय पु० जनानां लोकानामाश्रयः। मण्डपे अमरः।

जनासाह् पु०जनान् सहते सह–ण्वि पूर्वदीर्घः। लोकसहिष्णौ "चनं जनाषाडिन्द्र! तव्यम्" ऋ० १।५४।११। "सहेः साडः" पा० अत्र षत्वम्।

जनि(नी) स्त्री जन–भावे इन् वा ङीप्। १उत्पत्तौ "जनिकर्त्तुः प्रकृतिः" पा० २अभूतप्रादुर्भावे। जायते स्वयं गर्भो वाऽस्याम्, आधारे इ। २नार्य्याम् ।३मातरि ४स्नुषायां च अमरः ५जायायाम्। जायते आरोग्यमनया ।६ओषधिभेदे ७जतुकायाञ्च शब्दर०। ८जनीनामगन्धद्रव्ये रायमुकुटः।"उदीर्य्य सुर्य्यं कपटाज्जनीं जनः" नैष०।

जनिका स्त्री जनि(नी)+स्वार्थे क। १जनिशब्दार्थे। जनयति जन–णिच्–ण्वुल् कापि अत इत्त्वम्। २उत्पादिकायां स्त्रियां स्त्री।

जनित त्रि० जन–णिच्–क्त। उत्पादिते "सेनाचरीभवदिभाननदानवारिवासेन यस्य जनिता सुरभीरणश्रीः" नैष०। "शमितजनजनितनामपदाम्" माघः।

जनितृ पु० जन–अन्तर्भूतण्यर्थे तृच्। १पितरि शब्दरत्ना०। २मातरि स्त्री ङीप् शब्दच०।

जनित्व पु० जन–णिच्–इत्वन्। १पितरि २मातरि स्त्री उज्ज्वल०। जन–भविष्यति इत्वन् ।२जनिष्यमाणे "अदितिर्जातमदितिर्जनित्वम्" यजु० २५।२३। "जनित्वं जनिष्यमाणम्" वेददी०।

जनित्वन न० जन–भावे वा० इत्वन। जनने। "जनित्वनाय मीमहे" ऋ० ८।२।४२। 'जनित्वनाय जननाय' भा०।

जनिनीलिका स्त्री जन्या नीलिका।१महानीलीवृक्षे राजनि०

जनिमत् त्रि० जनिर्जन्मास्त्यस्य मतुप्। जन्मयुक्ते स्त्रियां ङीप् वेदे मस्य वः। जायायुक्ते "अब्रदस्युमेनांसिञ्जनिवतश्चकर्थ" ऋ० ५।३१।२ जनिवतोजायावतः" भा०।

जनिमन् पु० जन–भावे मनिन्। जन्मनि उज्ज्व०।

जनिष्य त्रि० जन–वा० भविष्यति–स्य। जनिष्यमाणे "कुतएव जनिष्यांस्तु श्मशानादपरायणः" भा० शा० १९९अ०। "जातो वापि जनिष्यो वा" रामा० आर० ६६।१४।

जनेष्ट पु० ६त०। १बदरवृक्षे राजनि० २जतुकायां ३वृद्धिनामौषधौ ४हरिद्रायां ५जातीपुष्पवृक्षे स्त्री राजनि० ६जनाभिमते त्रि०।

जनोदाहरण न० जनैरुदाह्रियते उद्+आ+हृ–कर्म्मणि ल्युट्। यशसि धनञ्जयः।

जनी त्रि० जनानवति अव–क्विप् ऊठि वृद्धिः। जनरक्षके।

जन्तु पु० जन–तुन्। १जननशीले प्राणिनि अमरः अविद्यादोषात् देहात्माभिमानिनि २जीवे। "एतेषामेव जन्तूनां भार्य्यात्वमुपयान्ति ताः" मनुः। "ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे" देवीमा० "स्वेदजाः कृमयः प्रोक्ता जन्तवश्च यथाक्रमम्" भा० आश्व० ११२६श्लो०। सोमकस्य नृपस्य भार्य्याशते जायमाने पुत्रभेदे "युधिष्ठिरासीन्नृपतिः सोमको नाम धार्म्मिकः" इत्युपक्रमे "कदाचित्तस्य वृद्धस्य घटमानस्य यत्नतः। जन्तुर्नाम सुतस्तस्मिन् स्त्रीशते समजायत" इत्युक्ता "तस्य राज्ञ एकपुत्रत्वदुःखनिवारणाय सोमकेन वह्नौ जन्तुवपाया हवने कृते जन्तुपूर्वकं पुत्रशतं स्त्रीशते तस्याजायत इत्युक्तम् भा० व० १२७। २२८अ०। जन्तूपाख्याने दृश्यम्। ४मनुष्ये च व०व०" निघण्टुः।

जन्तुक पु० जन्तु+स्वार्थे क। जन्तुशब्दार्थे जन्तुनृपस्य गोत्रापत्यम् इञ्। जान्तुकि तद्गोत्रापत्ये उपका०बहुत्वे तस्य इञो लुक् द्वन्द्वे अद्वन्द्वे च। जन्तुक २तद्गोत्रापत्येषु ब० व०।

जन्तुकम्बु पु० जन्तुरूपः कम्बुः। कृमिशङ्खे राजनि०।

जन्तुका स्त्री जन्तुभिः कायति प्रकाशते कै–क।१लाक्षायां, तस्या हि कीटैः प्रकाशः। २नाभीहिङ्गुनि च राजनि०।

जन्तुघ्न पु० जन्तून् कृमीन् हन्ति हन–क। १वीजपूरे। राजनि० २प्राणिघातके त्रि०। ३विडङ्गे,४हिङ्गुनि च न०। शब्दमा० ५विडङ्गे स्त्री ङीप् राजनि०। [राजनि०।

जन्तुनाशन न० जन्तून् नाशयति नश–णिच्–ल्यु। हिङ्गुनि

जन्तुपादप पु० जन्तुप्रधानः पादपः। कोषाम्रवृक्षे राजनि०।

जन्तुफल पु० जन्तवः फलेऽस्य। उडुम्बरे अमरः। [क्षितौ।

जन्तुमती स्त्री जन्तवः सन्त्यस्यां बाहुल्येन मतुप् ङीप्।

जन्तुमारी स्त्री जन्तून् कृमीन् मारयति मृ–णिच्–अण् उप०गौ०ङीष्। निम्बूके (निमकी)। राजनि०। [त्रिका०।

जन्तुला स्त्री जन्तून् कीटान् लाति ला–क। काशतृणे

जन्तुहन्त्री स्त्री जन्तून् हन्ति हन–तृच् ङीप्। १विडङ्गे राजनि० २जन्तुनाशके त्रि०।

जन्त्व त्रि० जन–कृत्यार्थे त्वन्। जनितव्ये "यज्जातं यच्च जन्त्वम्" ऋ० ८।८६।६। "जन्त्वम् जनितव्यम्" भा०

जन्म न० जन–भा० मन्। जन्मनि भरतः।

जन्मकील न० जन्मनः कील इव रोधकत्वात्। विष्णौ त्रिका०

जन्मतिथि पु०स्त्री जन्मनस्तिथिः। जन्मकालिकतिथिसजातीयतिथौ स्त्रीत्वे वा ङीप् तत्र कृत्यानां गौणचान्द्रेणैव कर्त्तव्यता। तद्विधानादि नि० त० दर्शितं यथा

"तत्र मलमासे न कर्त्तव्यं चान्द्रमासीयत्वेन मानकाशत्वात्। नच तस्य सौरमासीयत्वं तथात्वे तन्मासे तन्निषेधः कदाचिदप्राप्तौ तद्वर्षे तत्कृत्यलोपापत्तेः नचेष्टापत्तिः प्रतिसंवत्सरन्तद्विधानात् यथा ब्रह्मपुराणं गर्गश्च "सर्वैश्च जन्मदिवसे स्नातैर्मङ्गलपाणिभिः। गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः। स्वनक्षत्रञ्च पितरौ तथा देवः प्रजापतिः। प्रतिसंवत्सरञ्चैव कर्त्तव्यश्च महोत्सवः"। स्नातैस्तिलस्नातैः तथाच तत्तिथिमधिकृत्य 'तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलप्रदः। तिलभुक् तिलवापी च षट्तिली नावसीदति।' प्रजापतिर्ब्रह्मा। मङ्गलपाणिभिः अभिप्रेतार्थसिद्धिर्मङ्गलं तद्धेतुतया गोरोचनादिकमपि मङ्गलं तेन गुग्गुल्वादिपाणिभिरित्यर्थः। तथाच कृत्यचिन्तामणौ 'गुडदुग्धतिलान्वाज्जन्मग्रन्थेश्च बन्धनम्। गुग्गुलुं निम्बसिद्धार्थं दूर्वागोरोचनायुतम्। संपूज्य भानुविघ्नेशौ महर्षिं प्रार्थयेदिदम्। चिरजीवी यथा त्वं भो भविष्यामि तथा मुने!। रूपवान् वित्तवांश्चैव श्रियायुक्तश्च सर्वदा। मार्कण्डेय! महाभाग! सप्तकल्पान्तजीवन!। आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदो भव"। स्वनक्षत्रमिति स्वनक्षत्रं अश्विन्याद्यन्तर्गतजन्मकालीननक्षत्रं नामकरणे तथादर्शनात् वक्ष्यमाणब्रह्मपुराणोक्तप्रणवादिनमोऽन्तेन नाम्नैव पूजाविधानाच्च तद्ध्याने स्वनक्षत्राय नम इत्युल्लेख्यम्। पूजायामर्घ्यानन्तरं पाद्यमाह मत्स्यपुराणम् "अर्घ्यं पाद्यादिकन्तत्र मधुपर्कं प्रयोजयेत्।' पाद्यानन्तरमर्घ्यमाह नरसिंहपुराणम्। 'पाद्यं चैव तृतीयया चतुर्थ्यार्घ्यं प्रदापयेत्।' तृतीयया पुरुषसूक्तीयतृतीयया ऋचा उभयक्रमदर्शनादिच्छाविकल्पः इति श्रीदत्तः। श्रीपतिव्यवहारनिर्णये 'नवाम्बरधरो भूत्वा पूजयेच्च चिरायुषम्।' तथा 'द्विभुजं जटिलं सौम्यं सुवृद्धं चिरजीविनम्। मार्कण्डेयं नरो भक्त्या पूजयेत् प्रयतस्तथा। ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिम्। प्रह्लादञ्च हनूमन्तं विभीषणमथार्चयेत्।' रामोऽत्र परशुरामः चिरजीविसाहचर्य्यात् द्रौणिरश्वत्थामा। तथा 'स्वनक्षत्रं जन्मतिथिं प्राप्य सम्पूजयेन्नरः। षष्ठीञ्च दधिभक्तेन वर्षे वर्षे पुनः पुनः'। 'एकैकां देवतां राम! समुद्दिश्य यथाविधि। चतुर्थ्यन्तेन धर्मज्ञ! नाम्ना च प्रणवादिना। होमद्रव्यमथैकैकं

शतसंख्यन्तु होमयेत्" इति विष्णुधर्म्मोत्तरदर्शनात्। एवं होमे स्वाहान्तता च मन्त्रस्य "स्वाहावसाने जुहुयात् ध्यायन् वै मन्त्रदेवताम्" इति स्मृतेः। अशक्तौ तु देवीपुराणम् "होमग्रहादिपूजायां शतमष्टोत्तरं भवेत्। अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते"। स्कान्दे "खण्डनं नखकेशानां मैथुनाध्वानमेव च। आमिषं कलहं हिंसां वर्षवृद्धौ विवर्जयेत्"। अध्वानम् अध्वगमनं कलहमित्यत्र सङ्गरमिति क्वचित् पाठः सङ्गरं युद्धम्। वर्षवृद्धौ जन्मदिने। वृद्धमनुः "मृते जन्मनि संक्रान्तौ श्राद्धे जन्मदिने तथा। अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा"। जन्मनि पुत्रजन्मनि। ज्योतिषे "स्नात्वा जन्मदिने स्त्रियं परिहरन् प्राप्नोत्यभीष्टां श्रियम् मत्स्यान्मोचयतो द्विजाय ददतोऽप्यायुश्चिरं वर्द्धते। सक्तून् खादति यस्तु तस्य रिपवो नाशं प्रयान्ति ध्रुवं भुङ्क्ते यस्तु निरामिषं स हि भवेत् जन्मान्तरे पण्डितः"। दीपिकायाम् "जन्मर्क्षयुक्ता यदि जन्ममासे यस्य ध्रुवं जन्मतिथिर्भवेच्च। भवन्ति तद्वत्सरमेव यावन्नैरुज्यसम्मानसुखानि तस्य। कृतान्तकुजयोर्वारे यस्य जन्मदिनं भवेत्। अरिष्टयोगसंप्राप्तौ विघ्नस्तस्य पदे पदे"। कृतान्तकुजयोः शनिमङ्गलयोः। "तस्य सर्व्वौषधिस्नानं ग्रहविप्रसुरार्च्चनम्। ग्रहानुद्दिश्य होमो वा ग्रहाणां प्रीतिमिच्छता। सौरारयोर्दिने मुक्ता देया द्विजे तु काञ्चनम्। मुरा मांसी वचा कुष्ठं शैलेयं रजनीद्वयम्। शठीचम्पकमुस्तञ्च सर्व्वौषधिगणः स्मृतः"॥ सौरारयोः शनिभौमयोः। रजनीद्वयं हरिद्रादारुहरिद्रे। एषां पत्रादीनामपि ग्रहणम्। कषायावयवग्रहणमाह मत्स्यपुराणम् "एषां पत्राणि साराणि मूलानि कुसुमानि च। एवमादीनि चान्यानि कषायाख्योगणः स्मृतः"। तत्र क्रमः। तिलोद्वर्त्तनं तिलयुक्तजलेन स्नानं नववस्त्रपरिधानं गुग्गुलुनिम्बश्वेतसर्षपदूर्वागोरोचनात्मकजन्मग्रन्थिं दक्षिणपाणौ बध्नीयात्। गुरुदेवाग्निविप्राः पूजनीयाः स्वनक्षत्रमपि पूजनीयम्। अत्र च "हस्तास्वाती श्रवणा अक्लीबे मृगशिरोनपुंसि स्यात्। पुंसि पुनर्वसुपुष्यौ मूलं पुंस्त्री स्त्रियः शेषाः" इत्यनेन लिङ्गनिर्णयः। जन्मपत्रादीनां गोपनमाह विष्णुधर्म्मोत्तरे "गोपयेज्जन्मनक्षत्रं धनसारं गृहे मलम्। प्रभोरप्यपमानञ्च तस्य दुश्चरितञ्च यत्"। धनसारं धनश्रेष्ठं मलं छिद्रम्। पितरौ प्रजापतिः सूर्यो गणपतिर्मार्कण्डेयश्च पूजनीयः। "सतिलं गुडसंयुक्तमञ्जल्यर्द्धमितं पयः। मार्कण्डेयवरं लब्धा पिबाम्यायुष्यहेतवे" इति गुडतिलदुग्धपानमन्त्रः। ततः प्रार्थनामन्त्रौ। "चिरजीवी यथा त्वं भो भविष्यामि तथा मुने!। रूपवान् वित्तवांश्चैव श्रिया युक्तश्च सर्वदा। मार्कण्डेय! महाभाग! सप्तकल्पान्तजीवन!। आयुरिष्टार्थसिद्ध्यर्थमस्माकं वरदो भव"। ततो व्यासपरशुरामाश्वत्थामकृपबलिप्रह्लादहनूमद्विभीषणाः पूजनीयाः। षष्ठ्यपि। "त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च। ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्व्वन्तु तानि मे"। इति मत्स्यपुराणीयं पठेत्। पितृमातृपादग्रहणक्रमस्तु विष्णुपुराणादुन्नेयः यथा "कृष्णोऽपि वसुदेवस्य पादौ जग्राह सत्वरः। देवक्याश्च महाबाहुर्ब्बलदेवसहायवान्"। एवञ्च "सहस्रन्तु पितृन्माता गौरवेणातिरिच्यते" इति मनुवचने सहस्रं पितॄनपेक्ष्य यद्गौरवमुक्तं तत्पोषणरक्षार्थम्। अतएव मनुः "मृते भर्त्तरि पुत्रस्तु वाच्यो मातुररक्षिता"। वाच्यो गर्हणीयः। अत्र वैदिकेतरमन्त्रपाठे शूद्रादेरप्यधिकारः "वेदमन्त्रवर्जं शूद्रस्य" इति छन्दोगाह्निकाचारचिन्तामणिधृतस्मृतौ वेदेति विशेषणात्। एवञ्च पुराणमधिकृत्य "अध्येतव्यं न चान्येन ब्राह्मणं क्षत्रियं विना। श्रोतव्यमिह शूद्रेण नाध्येतव्यं कदाचन" इति भविष्यपुराणवचनं पुराणमन्त्रेतरपरम्। पञ्चयज्ञस्नानश्राद्धेषु पौराणिकमन्त्रोऽपि निषिद्धः। शूद्रमधिकृत्य "नमस्कारेण मन्त्रेण पञ्चयज्ञान् न हापयेत्" इति याज्ञवल्क्येन "ब्रह्मक्षत्रविशामेव मन्त्रवत् स्नानमिष्यते। तूष्णीमेव हि शूद्रस्य स नमस्कारकं मतम्" इति योगियाज्ञवल्क्येन श्राद्धमधिकृत्य "अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्जितः। अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते" इति वराहपुराणेन च नमस्कारेणेति तूष्णीमिति मन्त्रवर्जित इति चाभिधानादेतत्परं वैदिकपरञ्च शूद्राधिकारे गौतमवचनं "अनुमतोऽस्य नमस्कारो मन्त्रः" इति। अनुपनीतस्यापि शूद्रसमत्वेन श्राद्धातिरिक्तवेदपाठनिषेधमाह मनुः "नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते। शूद्रेण हि समस्तावत् यावद्वेदे न जायते"। स्त्रीणामपि वैदिकमन्त्रनिषेधमाह नृसिंहतापनीयम् "सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री शूद्रो यदि जानीयात् स मृतोऽधोगच्छति" इति नेच्छन्तीतिपर्य्यन्तं पराशरभाष्येऽपि लिखितम्।

जन्मतिथेः प्रागुक्तब्रह्मपुराणीयत्वात् पौर्णमास्यन्तमासादरः। गृह्यपरिशिष्टम् "उपाकर्म्म तथोत्सर्गः प्रसवाहोऽष्टकादयः। मासवृद्धौ पराः कार्य्या वर्जयित्वा तु पैतृकम्"। अत्राष्टकासाहचर्य्याज्जन्माष्टम्यां तथा दर्शनाच्च प्रसवाहो जन्मदिनम्।"द्वादश मासाः संवत्सरः कचित्त्रयोदश मासाः संवत्सरः" इति श्रुत्या वर्षे मासवृद्धिरूपा मानवृद्धिरुक्ता सैवात्र ग्राह्या न तु सौरे मासि तिथिद्वयलाभान्मानवृद्धिर्जीमूतवाहनोक्ता ग्राह्या तिथिद्वयलाभस्य मानवृद्धित्वे प्रमाणाभावात्। मानवृद्धावित्यत्र मासवृद्धाविति हेमाद्रिणा धृतम्। पैतृकं सपिण्डीकरणं मलमासस्तस्य प्रत्याब्दिकञ्च तयोर्मलमासेऽपि विधानात्। ज्योतिः पराशरोऽपि "उपाकर्म्म तथोत्सर्गः प्रसवाहोऽष्टकादयः। मासवृद्धौ पराः कार्य्या वर्जयित्वा तु पैतृकम्"। जन्मतिथेरुभयदिनलाभे तु देवीपुराणम् "युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया। रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता। पक्षद्वये जन्मतिथिर्यदि स्यात् पूज्या तदा जन्मभसंयुतैव। भसङ्गता भेन दिनद्वयेऽपि पूज्या परा या भवतीह यत्नात्"। भं नक्षत्रं परवचनं वृहद्राजमार्त्तण्डेऽपि। पूर्व्वाह्णे तिथिनक्षत्रलाभ एवेदं वक्ष्यते "नक्षत्रे खण्डिते येन प्राप्तः कालस्तु कर्म्मणः। नक्षत्रकर्म्मण्यत्रैव तिथिकर्म्म तथैव च" इति वृहस्पतिवचनात्। खण्डिते खण्डद्वययुक्ते येन नक्षत्रखण्डेन विहितकालः प्राप्तः। नक्षत्रद्वैधे तु बौधायनमार्कण्डेयौ "तन्नक्षत्रमहोरात्रं यस्मिन्नस्तं गतो रविः। यस्मिन्नुदेति सविता तन्नक्षत्रं दिनं स्मृतम्"। पूर्व्वार्द्धमहोरात्रसाध्योपवासनक्तैकभक्तेषु "तत्रैवोपवसेदृक्षे यन्निशीथादधोभवेत्। उपवासे यदृक्षं स्यात् तद्धि नक्तैकभक्तयोः" इति स्कान्दपुराणात् निशीथादध इत्यनेन अर्द्धरात्रपूर्व्वकालत्वेन सूर्य्यास्तमयकालस्यापि लाभात्। "उपोषितव्यं नक्षत्रं येनास्तं याति भास्करः। यत्र वा युज्यते राम! निशीथे शशिना सह" इति विष्णुधर्म्मोत्तराच्च। उपवासवच्चव्रतादीनामहोरात्रसाध्यता अहोरात्रसाध्यभोजनद्वयस्यैकतरपरित्यागगर्भितकालविशेषनियामकत्वात्। यस्मिन्नुदेतीति तु दिवसकर्त्तव्यस्नानदानादाविति बोध्यम्। पितृकार्य्येऽपि शुक्लकृष्णपक्षाभ्यां व्यवस्थामाह बौधायनः "सा तिथिस्तच्च नक्षत्रं यस्मिन्नभ्युदितो रविः। वर्द्धमानस्य पक्षस्य हीने त्वस्तमयं प्रति"। हीने चन्द्रस्य हीनत्वात् कृष्णपक्षे, वर्द्धमानस्य चन्द्रस्य वर्द्धमानत्वेन शुक्लपक्षस्य। कालमाधवीयोऽप्येवम्। भोजराजः "योजन्ममासे क्षुरकर्म्मयात्रां कर्णस्य वेधं कुरुते च मोहात्। नूनं स रोगं धनपुत्रनाशं प्राप्नोति मूढो वधबन्धनानि। जातं दिनं दूषयते वशिष्ठस्त्वष्टौ च गर्गो यवनो दशाहम्। जन्माख्यमासं किल भागुरिश्च चूडे विवाहे क्षुरकर्णवेधे"। एतद्विषयभेदस्तु राजमार्त्तण्डे "उक्तानि प्रतिषिद्धानि पुनः सम्भावितानि च। सापेक्षनिरपेक्षाणि श्रुतिवाक्यानि कोविदैः"। सापेक्षनिरपेक्षाणि समर्थासमर्थविषयकाणि। क्षुरेति क्षुरिकर्म्म। राजमार्त्तण्डे "देवकार्य्ये पितृश्राद्धे रवेरंशपरिक्षये क्षुरिकर्म्म न कुर्व्वीत जन्ममासेऽथ जन्मभे"। एवञ्च चूड़े इति चूड़ाकरणे अधिकदोषाय। गार्ग्यस्तु जन्ममासे विवाहमाह श्रीपतिव्यवहारसमुच्चये "स्नानं दानं तपो विद्या सर्व्वमङ्गल्यवर्द्धनम्। उद्वाहश्च कुमारीणां जन्ममासे प्रशस्यते"। एवं "जन्मोदये जन्मसु तारकासु मासेऽथ वा जन्मनि जन्मभे वा। व्रतेन विप्रो नबहुश्रुतोऽपि विद्याविशेषैः प्रथितः पृथिव्याम्" इति व्यासवचनेन जन्ममासे उपनयनविधानात्तदङ्गसशिखवपनेऽपि न दोषः। उदये लग्ने भे राशौ नबहुश्रुतोऽपि स्वल्पविद्योऽपि। अत्र जन्ममासकृत्याकृत्ये सौरादरो यात्रादिसाहचर्य्यात् व्यवहारोऽपि तथा। प्रतिमासे जन्मनक्षत्रकृत्यमाह विष्णुधर्म्मोत्तरम् "जन्मनक्षत्रगे सोमे शिरःस्नानेन यत्नतः। पूजा सोमस्य कर्त्तव्या नक्षत्रस्य तथात्मनः। श्राद्धं कुर्य्यात् प्रयत्नेन वह्निब्राह्मणपूजने। साधनायुधरत्नाद्यं पूजनीयं प्रयत्नतः। सुराणामर्च्चनं कार्य्यं केशवस्य विशेषतः"।

जन्मद पु० जन्म ददाति दा–क। पितरि शब्दच०।

जन्मदिन न० जन्मनो दिनम्। जन्मदिवसे तत्र तिथिरूपं जन्मतिथिशब्दे दृश्य०।

जन्मन् न० जन–भावे मनिन्। १उत्पत्तौ, २आद्यक्षणसम्बन्धे, ३गर्भवासतोयोनिद्वारानिःसरणे ४न्यायाद्युक्ते अपूर्वदेहग्रहणे, अपूर्वदेहादिभिरात्मनः सम्बन्धे ज्योतिषोक्ते ५जन्मनक्षत्रे, तदवधिके ६दशमे ७ऊनविंशे च नक्षत्रे। तत्र मनुष्याणां जन्मप्रकारस्तु गर्भशब्दे २५४८ पृ० उक्तप्रायोऽपि अत्र विशेषः कश्चित् प्रदर्श्यते। "ऋतौ विकाशा भवति योनिः कमलवत् सदा। गर्भाशयकसः शुक्रं धत्ते रक्तसमन्वितम्। अन्यत्र काले सङ्कुला

योनिर्भवति योषिताम्। सृष्टं शुक्रमतो योनौ नैति गर्भाशयं शनैः। ऋतावपि तु योनिश्चेद्वातपित्तकफावृता। भवेत्तदा विकारत्वं नैव तस्यां प्रजायते। ऋतुकाले यदा शुक्रं निर्दोषं योनिसंस्थितम्। तदा तद्वायुना सृष्टं स्त्रीरक्तेनैकतां व्रजेत्। निषेकमानवं स्त्रीणां बीजं मात्रं रजस्तथ। युक्तमात्रोऽपि नरकात् स्वर्गाद्वापि प्रपद्यते। विसर्गकाले शुक्रस्य जीवः कारणसंवृतः। छत्वा प्रविशते योनिं कर्म्मभिः स्वैर्नियोजितः। तच्छुक्ररक्तमेकस्थमेकाहात् पललं भवेत्। पञ्चरात्रेण कललं बुद्बुदाकारतां व्रजेत्। बुद्बुदः सप्तरात्रेण मांसपेशी भवेत्ततः। द्विसप्ताहाद्भवेत् पेशी रक्तमांसाचिता दृढा। बीजस्यैवाङ्कुराः पेश्यः पञ्चविंशतिरात्रतः। भवन्ति मासमात्रेण पञ्चधा जायते पुनः। ग्रीवा शिरश्च स्कन्धश्च पृष्ठवंशस्तथोदरम्! पाणिपादं तथा पार्श्वं कटिगात्रं तथैव च। मासद्वयेन सर्व्वाणि क्रमशः सम्भवन्ति हि। त्रिभिर्मासैः प्रजायन्ते सर्वाङ्गाङ्कुरसन्धयः। मासैश्चतुर्भिरङ्गुल्यः प्रजायन्ते यथाक्रमम्। स्थैर्यं चतुर्थे चाङ्गानां पञ्चमे शोणितोद्भवः। षष्ठे बलस्य वर्णस्य नखलोम्नाञ्च सम्भवः। दन्तपङ्क्तिस्तथा गुह्यं जायन्ते च नखाः पुनः। कर्णयोश्च भवेच्छिद्रं षण्मासाभ्यन्तरेण च। पायुर्मेढ्रमुपस्थञ्च नाभिश्चैवोपजायते। सन्धयो ये च गात्रेषु जायन्ते मासि सप्तमे। मनस्तु चेतनायुक्ता नाभीस्नायुसिरास्ततः। सप्तमे चाष्टमे चैव त्वङ्मांसस्मृतिमानपि। अङ्गप्रत्यङ्गसम्पूर्णः शिरःकेशसमन्वितः। विभक्तावयवः स्पष्टः पुनर्मासाष्टमेन च। नवमे दशमे मासि प्रबलैः सूतिमारुतैः। निःसार्य्यते बाणइव जन्तुश्छिद्रेण सज्वरः। मनसश्चलत्वेन यदा गर्भस्थितिर्भवेत्। तदा विकृतरूपेण पापात्मा हि प्रजायते। पुटद्वयं समासाद्य यदा वहति मारुतः। तदा सूते पापिष्ठान् षण्डान् कर्म्मबहिष्कृतान्। मातुरक्तोत्तरा नारी पितुः शुक्रोत्तरो नरः। उभयोर्बीजसामान्ये जायते वै नपुंसकम्। विषमायां तिथौ क्षिप्रं कुर्य्याद्वै बीजन्तु कन्यकाम्। समायां पुरुषं नूनं केचिदाहुर्मनीषिणः। वामाङ्गेन भवेन्नारी दक्षिणेन पुमान् भवेत्। रक्ताधिक्ये मातृरूपं शुक्राधिक्ये तु पैतृकम्। शुक्रशोणितसंघाते वायुना च द्विधा कृते। यमौ स्यातां त्रिधा चेति चतुर्धा बहुधापि वा। ततो हीनाधिकव्यङ्गाङ्गवामनकादयः। जायन्ते सर्पकुण्डाण्डा विकृतान्याश्च योनयः"। "गर्भात् कोटिगुणं दुःखं योनियन्त्रनिपीडने। संमूर्च्छा तस्य जठराज्जायमानस्य देहिनः। जायमानः पुरीषासृङ्मूत्रशुक्राविलाननः। प्राजापत्येन वातेन पीड्यमानास्थिबन्धनः। अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः। क्लेशात् निष्क्रान्तिमायाति जठरान्मातुरातुरः। ततस्तं वैष्णवी माया समास्कन्दति मोहिनी। तया विमोहितात्मासौ ज्ञानभ्रंशमवाप्नुयात्। स्पृष्टमात्रस्य घोरस्य ज्वरः समुपजायते। तेन ज्वरेण महता महामोहः प्रजायते। कण्टकैरिव भिन्नाङ्गः क्रकचैरिव दारितः। पूतिव्रणान्निपतितो धरण्यां क्रिमिको यथा। तद्बुभुक्षापरीताङ्गः क्वचित्तिष्ठति वा रटन्। विण्मूत्रभक्षणाद्यश्च गतस्नानः समाचरेत्। कण्डूयनेऽपि चाशक्तः परिवर्त्तेऽप्यनीश्वरः। स्नानपानादिकाहारमवाप्नोति परेच्छया। अशुचौ संस्तरे सुप्तकीटदंशादिभिस्तथा। भक्ष्यमाणोऽपि नैवैषां समर्थो विनिवारणे। केन बन्धेन बद्धोऽहं कारणं किमकारणम्। किं कार्य्यं किमकार्य्यं वा किं वाच्यं किञ्च नोच्यते। कोऽधर्म्मः कश्च वै धर्म्मः कस्मिन् वा वर्त्तते कथम्। किं कर्त्तव्यमकर्त्तव्यं किं वा किं गुणदोषवत्। संमूढस्य स्मृतिभ्रंशः शीघ्रं संजायते पुनः। मतिः संजायते तूर्णं जन्तोस्तत्रैव जन्मनि। रक्तो मूढश्च लोकोऽयमकार्य्ये सम्प्रवर्त्तते। देही देहं परित्यज्य नेन्द्रस्थानमपीच्छति। तस्मात् कीटोऽपि जन्तूनां सुमूढो जायते भृशम्। न चात्मानं विजानाति न परं न च दैवतम्। न शृणोति परं श्रेयः सति चक्षुषि नेक्षते। बुद्धौ सत्यां न जानाति बोध्यमानो बुधैरपि। संसारे क्लिश्यते तेन रागलोभवशानुगः" सुखबोधः।

जन्म च "जायतेऽस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यति" यास्कोक्तेषु षट्सु भावविकारेषु आद्यो भावविकारः। "जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च" गीता। "जन्मसम्पद्विपत्क्षेमं प्रत्यरिः साधको वधः। मित्रं परममित्रञ्च त्रिरावृत्त्या पुनः पुनः" ज्यो० त०। "श्राद्धं दद्यात् त्रिजन्मनि"। "जन्मर्क्षे निधनेऽपि च" ज्यो०त०। कर्त्तरि मनिन्। ८जने निरु०। आधारे मनिन्। ९जन्मलग्ने १०जन्मराशौ च "जन्मनीत्य विधिन्त्यजान्" "जन्मनीचितयुक् ग्रहैः" नी०क०ता०।

जन्मप पु॰ जन्म जन्मलग्नं पाति पा—क । १जन्मलग्नपतौ २जन्मराशिपतौ च जन्मपत्यादयोऽप्यत्र । "जन्मपः क्रूरितोऽशुभैः" नी॰ ता॰ ।

जन्मभ न॰ ६त॰ । १जन्मनक्षत्रे २जन्मलग्ने ३ जन्मराशौ च ४जन्मनक्षत्रादिसजातीये नक्षत्रादौ जन्मर्क्षादयोऽप्यत्र । "जन्मर्क्षे निधनेऽपि च" ज्यो॰त॰ ।

जन्मभूमि स्त्री ६त॰ । जन्मस्थाने । "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" उद्भटः ।

"वर्ज्जनीया वयं नूनं त्वया यादवनन्दन ! । अथ वा प्राणिनस्तात ! रमन्ते जन्मभूमिषु" हरिवं॰१०२ अ॰ ।

जन्ममास पु॰ ६त॰ । १जन्माधारमासे २तत्सजातीये मासे च "न जन्ममासे न च चैत्रपौषे क्षौरं विवाहो न च कर्णवेधः" ज्यो॰त॰ "जन्मर्क्षे जन्ममासे वा तारायामथ जन्मनि । जन्मलग्ने भवेदूढ़ा धनाढ्या जन्मभोदये" चण्डेश्वरः । जन्ममासश्च यस्मिन् चान्द्रे मासे जन्म स मासः इत्येके जन्मतिथिमारभ्य त्रिंशत्तिथ्यात्मको मासो जन्ममास इति पक्षान्तरं यथाह मु॰ चि॰ व्याख्यायां पी॰ धा॰ "जन्मर्क्षमासतिथयो व्यतिपातभद्रावैधृत्यमापितृदिनानि तिथिक्षयर्द्धी । न्यूनाधिमासकुलिकप्रहरार्द्धपातविष्कम्भवज्रघटिकात्रयमेव वर्ज्ज्यम्" मु॰ चि॰ । जन्मर्क्षमासतिथिप्रभृतयः पदार्थाः सर्वेषु कर्मसु वर्ज्ज्या इति द्वितीयश्लोकेनान्वयः तान् पदार्थानाह जन्मर्क्षेति यस्मिन्नक्षत्रे जन्म भवेत् तज्जन्मर्क्षं यस्मिन् मासे जन्म भवेत् स जन्ममासः यस्यां तिथौ जन्म भवेत् सा जन्मतिथिः एते वर्ज्ज्याः यदाह वसिष्ठः "स्वजन्ममासर्क्षतिथिक्षणेषु वैनाशिकाद्यृक्षगणेषु भेषु । नोद्वाहयात्राभ्युदयाभिलाषी नैवाद्यगर्भद्वितयं कदाचित्" । अयं च जन्मनक्षत्रमासतिथिनिषेधः आद्यगर्भस्यैव यदाह नारदः "जन्ममासे न जन्मर्क्षे न जन्मदिवसेऽपि वा । आद्यगर्भसुतस्यापि दुहितुर्वा करग्रहः" इति अनेनाद्यगर्भव्यतिरिक्तकन्यायास्तादृशवरस्य जन्मर्क्षमासतिथिषु शुभफलत्वमुक्तं भवति अतएवाह च्यवनः "जन्मर्क्षे जन्ममासे वा तारायामथ जन्मनि । जन्मलग्ने भवेदूढ़ा पुत्राढ्या पतिवल्लभा" । अथ जन्ममासलक्षणं जगन्मोहने वृद्धगर्गः "आरभ्य जन्मदिवसं यावत्त्रिंशद्दिनं भवेत् । स जन्ममासो विज्ञेयो गर्हितः सर्वकर्मसु" इति अस्यापि विशेषस्तत्रैव "जातं दिनं दूषयते वसिष्ठः पञ्चैव गर्गस्त्रिदिनं तथात्रिः । तज्जन्मपक्षं किल भागुरिश्च व्रते विवाहे गमने क्षुरे चेति" । वस्तुतस्तु यस्मिंश्चान्द्रमासे चैत्रादौ जन्माभूत् स चान्द्रमासो जन्ममासतया त्याज्य इति युक्तमुत्पश्यामः "इन्द्राग्नी यत्र हूयेते मासादिः स प्रकीर्त्तितः । अग्नीषोमौ स्थितौ मध्ये समाप्तौ पितृसोमकाविति" हारीतवचनात् "उपवासव्रतोद्वाहा यात्रा क्षौरोपनायनम् । तिथिवर्षादिनिखिलं चान्द्रमानेन गृह्यते" इति कश्यपोक्तेश्च । अत चान्द्रमासस्यैव चूड़ादौ निषेध इति स्थितम् । जन्ममासस्य जन्मतिथिकृत्ये चान्द्रपरता क्षौरादिनिषेधे सौरपरतेति म॰ त॰ रघु॰ । "विवाहादौ स्मृतः सौरः" इति तद्धृतवचनात् । आचारभेदात् देशभेदाच्च व्यवस्था । उपयमशब्दे १२४४ पृ॰ अधिकं दृश्यम् ।

जन्मराशि पु॰ ६त॰ । जन्मकालिकराशिसजातीये राशौ ।

जन्मवर्त्मन् न॰ ६त॰ । योनौ त्रिका॰ । "योनेः शरीरम्" शा॰सू॰ तस्याः शरीरोत्पत्तिस्थानत्वकीर्त्तनात् तथात्वम् ।

जन्मशय्या स्त्री जन्मनिमित्तं शय्या । प्रसवार्थशय्यायाम् । "स ददर्श महात्मानं शरतल्पगतं प्रभो ! । जन्मशय्यागतं वीरं कार्त्तिकेयमिव प्रभुम्" भा॰ भी॰ १२५ अ॰ ।

जन्मान्तर न॰ अन्यत् जन्म मयू॰स॰ । भवान्तरे परलोके । ततः गहा॰भवार्थे छ । जन्मान्तरीय परजन्मभवे त्रि॰ "जन्मान्तरीयतत्पापवतः सहमरणेनोद्धारः" शु॰त॰रघु॰ ।

जन्माष्टमी स्त्री कृष्णस्य जन्माधारोऽष्टमी । कृष्णजन्माष्टम्याम् कृष्णाष्टमी शब्दे २२२०पृ॰ विवृतिः । हरिभक्तिविलासमते तु तत्तद्व्रतकालव्यवस्था यथा "जन्माष्टमी पूर्वविद्धा न कर्त्तव्या कदाचन । पलवेधे तु विप्रेन्द्र ! सप्तम्या चाष्टमीं त्यजेत् । सुराया विन्दुना स्पृष्टं गङ्गाम्भःकलसं यथा । विना ऋक्षेण कर्त्तव्या नवमी संयुताष्टमी । सऋक्षापि न कर्त्तव्या सप्तमीसंयुताष्टमी । तस्मात् सर्वप्रयत्नेन त्याज्यमेवाशुभं बुधैः । यत्र वह्निवेधे पुण्यक्षयं याति तमः सूर्य्योदये यथा । अवैष्णवपरं तत्र पुराणादौ प्रोक्तं विद्धाष्टमीव्रतम् । कृतं वा देवमायया" ।

जन्मिन् त्रि॰ जन्मास्त्यस्य व्रीह्यादि॰ इनि । प्राणिनि [जीवे अमरः ।

जन्मेजय पु॰ जनमेजय+पृषो॰ । जनमेजयनृपे हारा॰ ।

जन्य त्रि॰ जन-"भव्यगयेत्यादि" पा॰ कर्त्तरि यत् । १जायमाने । जन-णिच्-कर्म्मणि यत् । २उत्पाद्ये "जन्यानां जनकः कालः" भाषा॰ । कर्त्तरि यत् । ३जनके च मेदि॰ । जनीं वधूं वहति नयति वा यत् । ४नवोढाज्ञातिभृत्य-

स्निग्धे पु त्रि० मेदि०। ५हृष्टे, ६परीवादे, ७युद्धे च न० मेदि० "तत्र जन्यं रघोर्घोरं पार्वतीयगणैरभूत्" रघुः ८देहे पु० शब्दचि०। भावे यत्। ९जनने न०। १०मातृवयस्यायां स्त्री मेदि०। जनाय हितं यत्। ११जनहिते त्रि०। "तुष्टाव जन्यं शिशुवत् जनार्द्दनम्" भाग० १।८।२ जन्यशब्दात् उत्करा० चतुरर्थ्यां छ। जन्यीय तन्निर्वृत्ते त्रि०। "याहीति जन्यामवदत् कुमारी" रघुः। १२प्रीतौ स्त्री हेम०। जनस्य जल्पः जन+जल्पेऽर्थे यत्। १३जनस्य जल्पे पु०।

जन्यु पु० जन—युच् बा०—न अनादेशः। १धातरि २वह्नौ ३प्राणिनि च मेदि०। भावे युच्। जनने पु० "असंहताया-द्वितीयोऽयं जन्युर्हि मम सर्वथा" हरिवं० १२५ अ०।

जप उच्चारणे वाचि च भ्वा० पर० सक० सेट्। जपति अजापीत्-अजपीत्। जजाप जेपतुः। जप्ता। "एतदक्षरमेतां च जपन् व्याहृतिपूर्विकाम्" मनुः। "ततः सप्रणवां सव्याहृतिकां गायत्रीं जपेत्" गोभि० "जपेत् सप्तशतीं सध्ये" चण्डीशब्दे दृश्यम्।

अभि+आभिमुख्येन जपे "चकार रक्षां कौशल्या मन्त्रैरभिजजाप च" रामा० अयो० २५।२०। अस्यककथने च

उप+भेदने। (कानफुसलानि देओया) "चतारं कुरुराजस्तु शनैः कर्णमुपाजपत्" भा० वि० २२१६ "उपजप्याननुजपेत्" मनुः "उपजापः कृतस्तेन" माघः।

जप त्रि० जप—कर्त्तरि अच्। १जपकारके। "कर्णे जपै राहितराज्यलोभा" भट्टिः। ततस्तु "त्रिगते काले लभते जपतामपि" भा० आनु० २८अ०। काण्डपृष्ठशब्दे १८६० पृ० दृश्यम्। भावे अप्। २मन्त्रादेरावृत्तौ चण्डीशब्दे दर्शित सप्तशत्याः ३पाठे च। तत्प्रकारो यथा तन्त्रसा० "मनः संहृत्य विषयान्मन्त्रार्थगतमानसः। न द्रुतं न विलम्बञ्च जपेन्मौक्तिकपङ्क्तिवत्। जपः स्यादक्षरावृत्तिर्मानसोपांशुवाचिकैः। धिया यदक्षरश्रेणीं वर्णस्वरपदात्मिकाम्। उच्चरेदर्थमुद्दिश्य मानसः स जपः स्मृतः। जिह्वौष्ठौ चालयेत् किञ्चिद्देवतागतमानसः। किञ्चिच्छ्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः। मन्त्रमुच्चारयेद्वाचा वाचिकः स जपः स्मृतः। उच्चैर्जपाद्विशिष्टः स्यादुपांशु र्दशभिर्गुणैः। जिह्वाजपः शतगुणः साहस्रो मानसः स्मृतः। जिह्वाजपः स विज्ञेयः केवलम् जिह्वया बुधैः"। तत्र वर्ज्यानि "विण्मूत्रोत्सर्गशङ्कादियुक्तः कर्म करोति च। जपार्चनादिकं सर्वमपवित्रं भवेत् प्रिये!। मलिनाम्बरकेशादिमुखदौर्गन्ध्यसंयुतः। यो जपेत्तं दहत्याशु देवता गुप्तिसंस्थिता। आलस्यं जृम्भणं निद्रां क्षुतं निष्ठीवनं भयम्। नीचाङ्गस्पर्शनं कोपं जपकाले विवर्जयेत्"। देवताभेदे करमालाविशेषनियमो यथा

"तर्जनीमध्यमानामा कनिष्ठा चेति ताः क्रमात्। तिस्रोऽङ्गुल्यस्त्रिपर्वाणो मध्यमा चैकपर्विका। पर्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत्। अनामामध्यमारभ्य कनिष्ठादित एव च। तर्ज्जनीमूलपर्य्यन्तं दश पर्वसु संजपेत्। अनामामूलमारभ्य कनिष्ठादित एव च। तर्जनीमध्यपर्य्यन्तमष्टपर्वसु संजपेत्"। एतद्वचनन्तु अष्टोत्तरशतादिविषयम्। शक्तिविषये पुनः। "अनामिकात्रयं पर्व कनिष्ठादित्रिपर्विका। मध्यमायाश्च त्रितयं तर्जनीमूलपर्वणि। तर्जन्यग्रे तथा मध्ये यो जपेत् स तु पापकृत्। अनामामूलमारभ्य प्रादक्षिण्यक्रमेण च। मध्यादिमूलपर्य्यन्तमष्टपर्वसु संजपेत्"। श्रीविद्याविषये तु। "अनामामध्यमयोश्च मूलाग्रञ्च द्वयं द्वयम्। कनिष्ठायाश्च तर्ज्जन्यास्त्रयं पर्व सुरेश्वरि!। अनामामध्यमयोश्च मेरुः स्यात् द्वितयं शुभम्। प्रदक्षिणक्रमाद्देवि! जपेत् त्रिपुरसुन्दरीम्। कनिष्ठामूलमारभ्य प्रादक्षिण्यक्रमेण च। तर्जनीमूलपर्य्यन्तमष्टपर्वसु संजपेत्। इदमपि अष्टोत्तरशतादिविषयम्। "अङ्गुलीर्न वियुञ्जीत किञ्चिदाकुञ्चिते तले। अङ्गुलीनां वियोगाच्च छिद्रे च स्रवते जपः। अङ्गुल्यग्रे च यज्जप्तं यज्जप्तं मेरुलङ्घने। पर्वसन्धिषु यज्जप्तं तत्सर्वं निष्फलं भवेत्। गणनाविधिमुल्लङ्घ्य योजपेत्तज्जपं यतः। गृह्णन्ति राक्षसास्तेन गणयेत् सर्वथा बुधः। हृदये हस्तमारोप्य तिर्य्यक् कृत्वा कराङ्गुलीः। आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत्"। जपसंख्यासाधने द्रव्यभेदनिषेधो यथा। "नाक्षतैर्हस्तपर्वैर्वा न धान्यैर्न च पुष्पकैः। न चन्दनैर्मृत्तिकया जपसंख्याञ्च कारयेत्"। तत्र विहितद्रव्याणि "लाक्षा कुशीदसिन्दूरं गोमयञ्च करीषकम्। एभिर्निर्माय वटिकां जपसंख्यान्तु कारयेत्"। वर्णमाला जपनियमो यथा। "सविन्दुं वर्णमुच्चार्य्य पश्चान्मन्त्रं जपेद्बुधः। अकारादिलकारान्तं विन्दुयुक्तं विभाव्य च। वर्णमाला समाख्याता अनुलोमविलोमतः। पञ्चाशल्लिपिभिर्माला विहिता सर्वकर्मसु। अका-

रादिलकारान्ता वर्णमाला प्रकीर्त्तिता । क्षार्णं मेरुमुखं तत्र कल्पयेन्मुनिसत्तम ! । अनया सर्व्वमन्त्राणां जपः सर्व्वसमृद्धिदः” । जपफलञ्च “जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत् । सर्व्वेषामेव यज्ञानां जायतेऽसौ महाफलः जपेन देवता नित्यं स्तूयमाना प्रसीदति । प्रसन्ना विपुलान् भोगान् दद्यान्मुक्तिञ्च शाश्वतीम् । यक्षरक्षःपिशाचाश्च ग्रहाः सर्पाश्च भीषणाः । जपिनं नोपसर्पन्ति भयभीताः समन्ततः । यावन्तः कर्म्मयज्ञाः स्युः प्रदिष्टानि तपांसि च । सर्व्वे ते जपयज्ञस्य कलां नार्हन्ति षोड़शीम् । माहात्म्यं वाचिकस्यैतत् जपयज्ञस्य कीर्त्तितम् । तस्माच्छतगुणोपांशुः साहस्रो मानसः स्मृतः” तन्त्रसा० । “नोच्चैर्जपञ्च संकुर्यात् रहः कुर्य्यादतन्द्रितः । समाहितमनास्तूष्णीं मनसा वापि चिन्तयेत् । विधियज्ञात् जपयज्ञो विशिष्टो दशभिर्गुणैः । उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः । विना दर्भैस्तु यत् स्नानं यच्च दानं विनोदकम् । असंख्यातन्तु यज्जप्तं सर्व्वं तदफलं स्मृतम् । मुक्ताफलैर्विद्रुमेण रुद्राक्षैः स्फाटिकेन वा । गणना सर्व्वथा कार्य्या सम्यगङ्गुलिपर्व्वभिः । हिरण्यरत्नमणिभिर्जप्तं शतगुणं भवेत् । सहस्रगुणमिन्द्राक्षैः पद्माक्षैरयुतं भवेत् । नियुतं वापि रुद्राक्षैर्भद्राक्षैस्तु न संशयः । पुत्रजीवकजप्यस्य परिसंख्या न विद्यते । दशभिर्जन्मजनितं शतेन च पुराकृतम् । नियुतं तु सहस्रेण गायत्री हन्ति दुष्कृतम् । प्राङ्मुखो वर्त्तयेत् मालां सहस्रं शतमेव वा” अग्निपु० ।

जपाङ्गमन्त्रचैतन्यादिज्ञानमावश्यकं तत्र मन्त्रचैतन्यं यथा कुब्जिकातन्त्रे पञ्चमपटले । “श्रीपार्व्वत्युवाच । भगवन् ! सर्व्वदेवेश ! लोकानां हितकारक । चतुर्व्वर्गप्रदं देव ! चैतन्यं मे प्रकाशय । शङ्कर उवाच । शृणु देवि ! प्रवक्ष्यामि चैतन्यं परमाद्भुतम् । रहस्यं परमं पुण्यं गोपनीयं त्वया पुनः । चिच्चक्राध्वनितं देवि ! परिणामक्रमेण तु । वर्णभावं समासाद्य निर्म्मलं विमलात्मकम् । षट्चक्रञ्च तथा भित्त्वा शब्दरूपं सनातनम् । नादबिन्दुसमायुक्तं चैतन्यं परिकीर्त्तितम् । अथ वान्यप्रकारेण श्रूयतां पद्मलोचने ! । विना येन न सिध्यन्ति जपपूजादिकञ्चन । अनाहतस्य मध्ये तु कथितं वर्णमुत्तमम् । सुषुम्णावर्त्मना देवि ! कण्ठदेशाद्विनिर्गतम् । चैतन्यञ्च महेशानि ! योगिनां योगरूपकम् । सहस्रारे वर्णरूपं परिणामक्रमेण तु । कर्णिकामध्यसंस्थे तु नादबिन्दुसमन्वितम् । एवं संचिन्तयेद्देवीं चैतन्यस्य पुनः पुनः । मन्त्राक्षराणि चिच्छक्तौ ग्रथितानि महेश्वरि ! । तानि सञ्चिन्तयेद्देवि ! सहस्रारदले तथा । चैतन्यमन्त्ररूपा च चैतन्यानन्ददायिनी । चैतन्यनादशक्तिश्च चैतन्यवर्णरूपकम् । मणिपूरे सदा चिन्त्यं मन्त्राणां प्राणरूपकम् । अथवान्यप्रकारेण श्रूयतां वरवर्णिनि ! । कामबीजं (क्लीं) रमाबीजं (श्रीं) शक्तिबीजं (ह्रीं) सुरेश्वरि ! । एतानि पूर्व्वमुच्चार्य्य मातृकां तदनन्तरम् । पुटितं मूलमन्त्रञ्च शतमष्टोत्तरं जपेत् । कोटिकोटिगुणञ्चैव लभते नात्र संशयः । अथवान्यप्रकारेण चैतन्यं शृणु पार्व्वति ! । येन विज्ञातमात्रेण परमं पश्यति ध्रुवम् । सूर्य्यमण्डलमध्यस्थं चिन्तयेन्मूलमन्त्रकम् । अष्टोत्तरशतं जप्यं मूलविद्यास्वरूपकम् । गुरुं सञ्चिन्तयेत्तत्र शिवरूपं सनातनम् । शक्तिञ्च चिन्तयेत्तत्र ब्रह्मरूपां सनातनीम् । एवं सञ्चिन्तयेद्यस्तु जपेद्वा सुरसुन्दरि ! । नासाध्यं तस्य लोकेऽस्मिन् सिद्धिर्देवि ! करे स्थिता” । तथा प्रथमपटले “मन्त्रार्थं मन्त्रचैतन्यं योनिमुद्रां न वेत्ति यः । न सिद्ध्यति वरारोहे ! कल्पकोटिशतैरपि । शतकोटिजपेनापि तस्य विद्या न सिद्ध्यतीति” । सरस्वतीतन्त्रे “कथयामि महामन्त्रं मन्त्रार्थञ्च महेश्वरि ! । येन विज्ञातमात्रेण सर्व्वसिद्धीश्वरो भवेत् । केवलं भावशुद्ध्या च मन्त्रार्थं प्राणवल्लभे ! । केवलं ज्ञानयोगेन जीवन्मुक्तो भवेद्ध्रुवम् । काली तारा महाविद्या षोड़शी भुवनेश्वरी । भैरवी छिन्नमस्ता च विद्या धूमावती प्रिये ! । बगला चैव मातङ्गी कमला च प्रकीर्त्तिता । ब्रह्मविष्णुमहेशाद्यैश्चतुर्व्वेदैर्नमस्कृता । भोगदा मोक्षदा देवी कोटिब्रह्माण्डगोपिता । अस्याः स्मरणमात्रेण जीवन्मुक्तस्तु साधकः” । वरदातन्त्रे षष्ठपटले “शिव उवाच । मन्त्रार्थं कथयाम्यद्य शृणुष्व परमेश्वरि ! । विना येन न सिध्यन्ति साधनैः कोटिभिः शिवे ! । आदौ प्रसादबीजस्य मन्त्रार्थं शृणु पार्व्वति ! । शिववाची हकारस्तु औकारः स्यात् सदाशिवः । शून्यं दुःखहरन्तु स्यात् तस्मात्तेन शिवं यजेत् । ह्रौँ । दं दुर्गावाचकं देवि ! उकारश्चापि रक्षणे । विश्वमाता नादरूपा । कुर्व्वार्थो बिन्दुरूपकः । तस्मात्तेनैव बीजेन दुर्गामाराधयेत् शिवे ! । दुँ । “क काली ब्रह्म र प्रोक्तं महामायार्थकश्च ई । विश्वमातार्थकोनादो बिन्दुर्दुःखहरार्थकः । तेनैव कालिका

देवीं पूजयेद्दुःखशान्तये । क्रीम् । ककारः शिववाची स्यात् रेफः प्रकृतिरुच्यते । महामायार्थ ईशब्दो नादोविश्वप्रसूः स्मृतः । दुःखहरार्थकोविन्दुर्भुवनां तेन पूजयेत् ह्रीम् । महालक्ष्म्यर्थकः शः स्याद्धनार्थो रेफ उच्यते । ई तुष्ट्यर्थोऽपरो नादो विन्दुर्दुःखहरार्थकः । लक्ष्मीदेव्या वीजमेतत्तेन देवीं प्रपूजयेत् । श्रीँ । सरस्वत्यर्थ ऐशब्दो विन्दुर्दुःखहरार्थकः । सरस्वत्यावीजमेतत्तेन वाणीं प्रपूजयेत् । ऐँ । कः कामदेव उद्दिष्टोऽप्यथवा कृष्ण उच्यते । लइन्द्रई तुष्टिवाची सुखदुःखप्रदश्च अम् । कामवीजार्थ उक्तस्ते तव स्नेहान् महेश्वरि । क्लीँ । हः शिवः कथितो देवि ! ऊ भैरव इहोच्यते । परार्थो नादशब्दस्तु विन्दुर्दुःखहरार्थकः । वर्म्मवीजत्रयोह्यत्र कथितस्तव यत्नतः । हूँ । गणेशार्थे ग उक्तस्ते विन्दुर्दुःखहरार्थकः । गंवीजार्थस्तु कथितस्तव स्नेहान् महेश्वरि ! । गँ । ग गणेशो व्यापकार्थो लकारस्तेज औमतः । दुःखहरार्थकोविन्दु र्गणेशं तेन पूजयेत् । ग्लौँ । क्षौं नृसिंहो ब्रह्म रश्च ऊर्द्ध्वदन्तार्थकश्च औः । दुःखहरार्थको विन्दुर्नृसिंहं तेन पूजयेत् । क्ष्रौँ । नामादिवर्णाः सर्व्वेषां नाम उक्तं स्वयम्भुवा । तेनैवार्थन्तु जानीयादर्थलभ्यन्तु चिन्तयेत् । यथायथं विभक्ताश्च मन्त्रार्थो चिन्तयेच्छिवे ! । तत्तद्वर्णादियोगेन संक्षेपात् कथितं त्वयि । दुर्गोत्तारणवाचीत्तारकार्थस्तकारकः । मुक्त्यर्थौ रेफ उक्तोऽत्र महामायार्थकश्च ई । विश्वमातार्थकोनादो विन्दुर्दुःखहरार्थकः । वधूवीजार्थ उक्तोऽत्र तव स्नेहान् महेश्वरि ! । स्त्रीँ । यत्र विन्दुद्वयं मन्त्रे एकं दुःखहरार्थकम् । अन्यत् सुखप्रदं देवि ! ज्ञात्वा चार्थं विचिन्तयेत् । यत्र विन्दुद्वयं मन्त्रे अन्यत् पूर्णार्थकं मतम् । स्वाहामातार्थका देवी परार्था वा प्रकीर्त्तिता । वक्रमाता वषट्प्रोक्ता हरिप्रियार्थका गिरा । सुरार्था फट्हुंयपीवे विद्धि वीजं विनिर्दिशेत् । यंवीजं वायुवाचि स्यात् लमैन्द्रं परिकीर्त्तितम् । अनेकाक्षरवीजे च स्वस्ववीजं स्वनामकम् । एवं ज्ञात्वा महेशानि ! मन्त्रार्थं परिचिन्तयेत् । एकवीजद्वयं यत्र पृथगर्थं प्रकल्पयेत् । वीप्सार्थं वा महेशानि ज्ञात्वा मन्त्रं जपेत्प्रिया । इति ते कथितो देवि मन्त्रार्थः परमेश्वरि ! ईंवीजेनैव पुटितं मूलमन्त्रं जपेद्यदि । तदैव मन्त्रचैतन्यं भवत्येव सुनिश्चितम्" । सरस्वतीतन्त्रे प्रथमपटले "ईश्वर उवाच । मन्त्रार्थं परमेशानि ! सावधानावधारय । मूलाधारे मूलविद्यां भावयेदिष्टदेवताम् । शुद्धस्फटिकसङ्काशां भावयेत् परमेश्वरीम् । भावयेदक्षरश्रेणीमिष्टविद्यां सनातनीम् । सकृत्तां विभाव्यैतां पश्चाद्ध्यानपरो भवेत् । ध्यानं कृत्वा महेशानि ! मुहूर्त्तार्द्धं ततः परम् । ततोजीवो महेशानि ! मनसा कमलेक्षणे ! । स्वाधिष्ठानं ततोगत्वा भावयेदिष्टदेवताम् । वन्धूकारुणसङ्काशां जवासिन्दूरसन्निभाम् । विभाव्य अक्षरश्रेणीं पद्ममध्यगतां पराम् । ततो जीवः प्रसन्नात्मा पक्षिणा सह सुन्दरि ! । मणिपूरं ततो गत्वा भावयेदिष्टदेवताम् । विभाव्य अक्षरश्रेणीं पद्ममध्यगतां पराम् । शुद्धस्फटिकसङ्काशां शिरःपद्मोपरिस्थिताम् । ततोजीवो महेशानि ! पक्षिणा सह पार्व्वति ! । हृत्पद्मं प्रययौ शीघ्रं नीरजायतलोचने ! । इष्टविद्यां महेशानि ! भावयेत् कमलोपरि । विभाव्य अक्षरश्रेणीं महामरकतप्रभाम् । ततोजीवो वरारोहे ! विशुद्धं प्रययौ प्रिये ! । तत्पद्मगह्वरं गत्वा पक्षिणा सह पार्व्वति ! । इष्टविद्यां महेशानि ! आज्ञाये परिचिन्तयेत् । पक्षिणा सह देवेशि ! खञ्जनाक्षि ! शुचिस्मिते ! । इष्टविद्यां महेशानि ! साक्षाद्ब्रह्मस्वरूपिणीम् । विभाव्य अक्षरश्रेणीं हरिद्वर्णां वरानने ! । आज्ञाचक्रे महेशानि ! षट्चक्रे ध्यानमाचरेत् । षट्चक्रे परमेशानि ! ध्यानं कृत्वा शुचिस्मिते ! । ध्यानेन परमेशानि ! यद्रूपं समुपस्थितम् । तदेव परमेशानि ! मन्त्रार्थं विद्धि पार्व्वति" अथ कुल्लुकादि । सरस्वतीतन्त्रे तृतीयपटले "तारायाः कुल्लुका देवि ! महानीलसरस्वती । पञ्चाक्षरी कालिकायाः कुल्लुका परिकीर्त्तिता । कालीकूर्च्चं वधूमाया फट्कारान्ता महेश्वरि ! । छिन्नायास्तु महेशानि ! कुल्लुकाष्टाक्षरी भवेत् । वज्रवैरोचनीये च अन्ते वर्म्म च पूरयेत् । सम्पत्प्रदायाः प्रथमं भैरव्याः कुल्लुका भवेत् । श्रीमत्त्रिपुरसुन्दर्य्याः कुल्लुका द्वादशाक्षरी । वाग्भवं प्रथमं वीजं कामवीजमनन्तरम् । लज्जावीजं ततः पश्चात् त्रिपुरेति ततःपरम् । भगवतीति ततः पश्चादन्ते ठद्वयमुद्धरेत् । अथ कामवीजञ्च कुल्लुका परिकीर्त्तिता । प्रासादवीजं शम्भोश्च मञ्जुघोषे षडक्षरम् । एकाक्षरी भुवनेश्वर्य्याः विष्णोः स्यादष्टवर्णकम् । नमोनारायणायेति प्रणवाद्यश्च कुल्लुका । मातङ्ग्याः प्रथमं वीजं माया धूमावतीं प्रति । वालायाश्च वधूवीजं लक्ष्म्याश्च निजवीजकम् । सरस्वत्या वाग्भवश्च अन्नदाया अनङ्गकम् ! । अपरेषाञ्च

देवानां मन्त्रमात्रं प्रकीर्त्तितम् । इयन्ते कथिता देवि ! संक्षेपात् कुल्लुका मया । अज्ञात्वा कुल्लुकामेतां योऽजपेदधमः प्रिये ! । पञ्चत्वमाशु लभते सिद्धिहानिस्तु जायते । तथा जपादिकं सर्व्वं निष्फलं नात्र संशयः । तस्मात् सर्व्वप्रयत्नेन धारयेन्मूर्द्ध्नि कुल्लुकाम्" । तथा "विप्राणां प्रणवः सेतुः क्षत्त्रियाणां तथैव च । वैश्यानाञ्चैव फट्कारो माया शूद्रस्य कथ्यते । अजत्वा हृदि देवेशि ! यो वै मन्त्रं समुच्चरेत् । सर्व्वेषामेव मन्त्राणामधिकारो न तस्य हि । महासेतुश्च देवेशि ! सुन्दर्य्या भुवनेश्वरी । कालिकायाः स्वबीजञ्च तारायाः कूर्च्चबीजकम् । अन्यासान्तु वधूबीजं महासेतुर्व्वरानने ! । आदौ कृत्वा महासेतुं जपेन्मन्त्रमनन्यधीः । धने धनेशतुल्योऽसौ वाग्मितया वागीश्वरोपमः । युद्धे कृतान्तसदृशो नारीणां मदनोपमः । जपकालो भवेत्तस्य सर्व्वः कालो न संशयः । अथ वक्ष्यामि निर्व्वाणं शृणुष्वावहितानघे ! । प्रणवं पूर्व्वमुच्चार्य्य मातृकाद्यं समुच्चरेत् । ततो मूलं महेशानि ! ततो वाग्भवमुच्चरेत् । मातृकान्तु समस्तान्तु पुनः प्रणवमुच्चरेत् । एवं पुटितमूलन्तु प्रजपेन्मणिपूरके । एवं निर्व्वाणमीशानि ! यो न जानाति पामरः । कल्पकोटिसहस्रेण तस्य सिद्धिर्न जायते" । अथ मुखशोधनम् । पञ्चमपटले "ईश्वर उवाच । अपरैकं प्रवक्ष्यामि मुखशोधनमुत्तमम् । यन्न कृत्वा महादेवि ! जपपूजा वृथा भवेत् । अशुद्धजिह्वया देवि ! यो जपेत् स तु पापकृत् । तस्मात् सर्व्वप्रयत्नेन जिह्वाशोधनमाचरेत् । महात्रिपुरसुन्दर्य्या मुखस्य शोधनं शुभे ! । श्रीबीजं प्रणवो लक्ष्मीकारः श्रीः प्रणवकस्तथा । इमं षडक्षरं मन्त्रं सुन्दर्य्या दशधा जपेत् । शृणु सुन्दरि ! श्यामाया मुखशोधनमुत्तमम् । निजबीजत्रयं देवि ! प्रणवत्रितयं पुनः । कामत्रयं वह्निबिन्दुरतिचन्द्रयुतं पृथक् । एषा नवाक्षरी विद्या मुखशोधनकारिणी । तारायाः शृणु चार्व्वङ्गि ! अपूर्व्वमुखशोधनम् । जीवनं मध्यमं लज्जां भुवनेशीं ततः प्रिये ! । त्र्यक्षरीयं महाविद्या विज्ञेयाऽमृतवर्षिणी । दुर्गायाः शृणु चार्व्वङ्गि ! मुखशोधनमुत्तमम् ; द्वादशस्वरमुद्धृत्य बिन्दुयुक्तं त्रयं तथा । अपरैकं प्रवक्ष्यामि बगलामुखशोधनम् । वाग्भवं भुवनेशीञ्च वाग्बीजं सुरवन्दिते ! । मातङ्ग्याः शोधनं देवि ! अङ्कुशं वाग्भवन्तथा । बीजञ्चाङ्कुशमेतद्धि विज्ञेयं त्र्यक्षरीयकम् । लक्ष्म्याश्च शोधनं देवि ! श्रीबीजं कमलानने ! । दुर्गायाः शोधनं माया वाग्बीजपुटिता भवेत् । दुर्गे स्वाहा पुनर्माया वाग्बीजञ्च पुनश्च वाक् । प्रणवं दान्तमुद्धृत्य वामकर्णविभूषितम् । पुनः प्रणवमुद्धृत्य धनदामुखशोधनम् । एवं मन्त्रं महेशानि ! धूमावत्याभवेदपि । प्रणवो बिन्दुमान् देवि ! पश्चान्नकौ गणेशितुः । वेदादिगगनं वह्निमनुयुग्मन्तु चन्द्रवत् । त्र्यक्षरः परमेशानि ! । विष्णोश्च मुखशोधनम् । अन्यासां प्रणवं देवि ! बालादीनां प्रकीर्त्तितम् । स्त्रीणाञ्च शूद्रतुल्यं हि मुखशोधनमीरितम् । मुखशोधनमात्रेण जिह्वाऽमृतमयी भवेत् । अन्यथा मुखविड्युक्ता जिह्वा भवति सर्व्वदा । भक्ष्यैर्दूषिता जिह्वा मिथ्यावाक्येन दूषिता । कलहैर्दूषिता जिह्वा तत्कथं प्रजपेन्मनुम् । तच्छोधनमनाचर्य्य न जपेत् पामरः क्वचित् । शैवशाक्तवैष्णवादेः सर्व्वस्यावश्यमेव वा । अन्यथा प्रजपेन्मन्त्रं मोहेन यदि भाविनि ! । सर्व्वं तस्य वृथा देवि ! मन्त्रसिद्धिर्न जायते । अन्ते नरकगामी च भवेत् सोऽपि न चान्यथा । देवो यदि जपेन्मन्त्रमकृत्वा मुखशोधनम् । तपनं तस्य देवेशि ! किं पुनर्म्मर्त्यवासिनाम्" । सप्तपटले "ईश्वर उवाच । अथ वक्ष्यामि देवेशि ! प्राणयोगं शृणुष्व मे । विना प्राणं यथा देहः सर्व्वकर्म्मसु न क्षमः । विना प्राणं तथा मन्त्रः पुरश्चर्य्याशतैरपि । मायया पुटितो मन्त्रः सप्तधा जपतः पुनः । सप्राणो जायते देवि ! सर्व्वत्रायं विधिः स्मृतः । तथैव दीपनीं वक्ष्ये सर्व्वमन्त्रे च भाविनि ! । अन्धकारे गृहे यद्वत् किञ्चित् न प्रतिभासते । दीपनीरहितो मन्त्रस्तथैव परिकीर्त्तितः । वेदादिपुटितं मन्त्रं सप्तवारं जपेत्पुनः । दीपनीयं समाख्याता सर्व्वत्र परमेश्वरि ! । दशधा प्रजपेन्मन्त्रं सूतकद्वयमुक्तये । अथोच्यते जपस्यात क्रमः स परमाद्भुतः । यं कृत्वा सिद्धिसंघानामधिपो जायते नरः । नतिर्गुर्व्वादिनामादौ ततो मन्त्रशिखां भजेत् । ततोऽपि मन्त्रचैतन्यं मन्त्रार्थभावना ततः । गुरुध्यानं शिरःपद्मे हृदीष्टध्यानमाचरेत् । कुल्लुकाञ्च ततः सेतुं महासेतुमनन्तरम् । निर्व्वाणञ्च ततो देवि ! योनिमुद्राविभावना । अङ्गन्यासं प्राणायामं जिह्वाशोधनमेव च । प्राणयोगं दीपनीञ्च अशौचभङ्गमेव च । भ्रूमध्ये वा नसोरग्रे दृष्टौ सेतुं जपेत् पुनः । सेतुमशौचभङ्गञ्च प्राणायाममिति क्रमः" । चतुर्थपटले । "कुल्लुकां मूर्द्ध्नि संजप्य हृदि सेतुं विचिन्तयेत् । महासेतुं विशुद्धौ

च कण्ठदेशं समुद्धरेत् । मणिपूरे तु निर्वाणं महाकुण्डलिनीमधः । स्वाधिष्ठाने कामबीजं राकिणीमूर्द्धि संस्थितम् । विचिन्त्य विधिवद्देवि ! मूलाधारान्तिके शिवे ! । विशुद्धान्तं स्मरेद्देवि ! बिसतन्तुतनीयसीम् । वेदिस्थानं हि जीवान्तं मूलमन्त्रावृतं मुहुः" ।

जपन न० जप—भावे ल्युट् । जपे । "सन्न्यास एव वेदान्ते वर्त्तते जपनं प्रति" भा० शा० १०१६ अ० ।

जपमाला स्त्री० जपस्य जपार्था माला । जपसाधने मालायां तद्विधानादि अक्षमालाशब्दे ४२ पृ० उक्तप्रायमधिकमत्र प्रदर्श्यते ।

नित्यातन्त्रे नवमपटले "ईश्वर उवाच । अक्षमालां समाश्रित्य मातृकावर्णरूपिणीम् । अथ मुक्ताफलमयी भोगमोक्षप्रदायिनी । राजवश्यकरी सर्वसिद्धिदा नात्र संशयः । यथा मुक्ताफलमयी तथा स्फाटिकनिर्मिता । रुद्राक्षमाला गिरिजे ! मोक्षदा च सुसिद्धिदा । प्रवालघटिता माला वश्यदा कर्मसाधिनी । माणिक्यरचिता माला साम्राज्यफलदायिनी । पुत्रजीवकमाला तु विद्यालक्ष्मीप्रदायिनी । पद्मबीजाक्षमाला तु महालक्ष्मीप्रदायिनी । रक्तचन्दनबीजाक्षमालावश्यफलप्रदा" । मुण्डमालातन्त्रे द्वितीयपटले "स्फाटिकैर्मोक्षलाभः स्यात् रुद्राक्षैर्बहुपुत्रदा । जीवपुत्रैश्च धनदा पाषाणैर्भोगमोक्षदा । शुद्धस्फटिकमाला तु महासम्पत्प्रदा प्रिये ! । श्मशानधूस्तुरैर्माला एका धूमावतीविधौ" । तथा । "मणिरत्नप्रवालैश्च हेमराजतसम्भवा । माला कार्य्या कुशग्रन्थ्या सर्वभोगफलप्रदा" । समायाचारतन्त्रे द्वितीयपटले "पूर्व्वाम्नायादि सर्वेषां मालां शृणु यथाक्रमम् । जप्त्वा येनाशु लभते फलं देवैश्च दुर्लभम् । अक्षमाला प्रथमतो मातृकार्णस्वरूपिणी । अथ मुक्तामयी माला रतिमोक्षफलदा । सर्वसिद्धिकरी माला सर्वराजवशङ्करी । प्रवालमालावश्यार्थं सर्वकार्यफलप्रदा । माणिक्यरचिता माला साम्राज्यफलदायिनी । पद्माक्षरचिता माला यशोलक्ष्मीप्रदा सदा । सुवर्णरचिता माला सर्वकामफलप्रदा । रक्तचन्दनमाला च भोगदा मोक्षदा भवेत् । रुद्राक्षरचिता माला सर्वकामफलप्रदा । सर्वमालां प्रपूज्याथ चन्दनेन विलेपिताम् । समाश्रित्य जपेन्नित्यं यथोक्तफलमाप्नुयात् । एता मालाश्च सुभगे ! येषु पूजिताः" मुण्डमालातन्त्रे "देव्युवाच अक्षमाला तु कथिता यत्नतो न प्रकाशिता । अक्षमालेति किं नाम फलं वा किं वदस्व मे । ईश्वर उवाच अक्षमाला तु देवेशि ! काम्यभेदादनेकधा । भवति शृणु तत् प्राज्ञे ! विस्तरादुच्यते मया । अनुलोमविलोमेन क्लृप्तया वर्णमालया । आदिलान्तलादिआन्तक्रमेण परमेश्वरि ! । क्षकारं मेरुरूपञ्च लङ्घयेन्न कदाचन" । मेरुलङ्घनदोषस्तु तत्रैव "मेरुहीना च या माला मेरुलङ्घा च या भवेत् । अशुद्धप्रतिकाशा च सा माला निष्फला भवेत् । चित्रिणी बिसतन्त्वाभा ब्रह्मनाडीगतान्तरा । तया संग्रथिता माला सर्वकामफलप्रदा । अष्टोत्तरशतं जप्त्वा आदिक्लीवं समाचरेत् । ऋॠलृॡद्वयं यत्तु तद्धि क्लीवं प्रचक्षते । वर्गाणामष्टभिर्वापि काम्यभेदात् क्रमेण तु अकचटतपयशा अष्टौ वर्गाः प्रकीर्त्तिताः" । मालयाजपविशेषस्तु नित्यातन्त्रे "अक्षमालां प्रपूज्याथ चन्दनेन सुलोचने ! । समाश्रित्य जपेद्विद्वान् लक्षमात्रमनन्यधीः । योषितः सकला वश्याः सप्तद्वीपस्य पार्वति ! । ततो द्वितीयलक्षञ्च प्रजपेद्वीरवन्दिते ! । पातालतलनागेन्द्रकन्या वश्या भवन्ति हि । ततो लक्षत्रयं भद्रे ! प्रजपेत् साधकोत्तमः । देवाङ्गना भवन्त्येव वश्यास्तस्य महेश्वरि ! । महापातककोटीश्च नाशयेत् कमलेक्षणे ! । अभिमानेन सौभाग्यं सौख्यं सौन्दर्यमाप्नुयात् । चतुर्लक्षं प्रजप्याथ महायोगीश्वरो भवेत् ! पञ्चलक्षजपाद्देवि ! कुबेरपदवीं व्रजेत् । षड्लक्षं तु प्रजप्याथ देवपूज्यो भवेन्नरः । अणिमाद्यष्टसिद्धीनां नायको नात्र संशयः । राजानोवशगास्तस्य योषितश्च विशेषतः । नवलक्षं महादेवि ! योजपेत् साधकोत्तमः । रुद्रमूर्त्तिः स्वयं साक्षात् कर्त्ता हर्त्ता न संशयः" । समयाचारतन्त्रे "उत्तराम्नाये या माला भूयः शृणु वदामि ते । अथ वर्णमयी माला सर्व्वोत्कृष्टा च सा मता । महाशङ्खमयी माला वाञ्छितार्थफलप्रदा । उडुम्बरफलस्याथ रुद्राक्षस्याथ कृता मता" । योगिनीतन्त्रे पूर्वखण्डे द्वितीय पटले "ईश्वर उवाच । वर्णमाला शुभा प्रोक्ता सर्वमन्त्रप्रदीपनी । तस्याः प्रतिनिधिर्देवि ! महाशङ्खमयी शुभा । महाशङ्खः करे यस्य तस्य सिद्धिरदूरतः । तदभावे वीरवन्द्ये ! स्फाटिकी सर्वसिद्धिदा" । मणिभेदेन फलभेदमाह मुण्डमालातन्त्रे "त्रिंशतैश्वर्य्यफलदा पञ्चविंशैस्तु मोक्षदा । चतुर्दशमयी मोक्षदायिनी भोगवर्द्धिनी । दशपञ्चात्मिका माला मारणोच्चाटने स्थिता । स्तम्भने मोहने

वशेत्र रोधने अञ्जने तनोः। पादुकासिद्धिसंघे च शतसंख्या प्रकीर्त्तिता। अष्टोत्तरशतं कुर्य्यादथवा सर्व्वकामदम्”। योगिनीतन्त्रे “मणिसंख्या महादेवि! मालायाः कथयामि ते। पञ्चविंशतिभिर्म्मोक्षं पुष्ट्यै तु सप्तविंशतिः। त्रिंशद्भिर्धनसिद्धिः स्यात् पञ्चाशन्मन्त्रसिद्धये। अष्टोत्तरशतैः सर्व्वसिद्धिरेव महेश्वरि!। एतत्साधारणं प्रोक्तं विशेषं कामिनां वदे। शिव उवाच। दन्तमाला जपे कार्य्या गले धार्य्या नृणां शुभा। दशनैर्यदि कर्त्तव्या संख्यादन्तस्य ते प्रिये!। सर्व्वसिद्धिप्रदा माला राजदन्तेन मेरुणा। अन्यत्रापि महेशानि! मेरुत्वेनैव मादिशेत्। नित्यं जपं करे कुर्य्यान्न काम्यमवरोधनात्। काम्यमपि करे कुर्य्यान्मालाऽभावे प्रियंवदे!। अत्राङ्गुल्या जपं कुर्य्यात् अङ्गुष्ठाङ्गुलिभिर्जपेत्। अङ्गुष्ठेन विना कर्म्म कृतं तन्निष्फलं भवेत्”। उत्पत्तितन्त्रे प्रथमपटले “नित्यं नैमित्तिकं काम्यं करे कुर्य्याद्विचक्षणः। करमाला महादेवि! सर्व्वदोषविवर्जिता। छिन्नभिन्नादिदोषोऽपि करे नास्ति कदाचन। अक्षयस्तु करो देवि! माला भवति तादृशी। ग्रन्थिः सा कुण्डलीशक्तिः पञ्चाशद्वर्णरूपिणी। अतएव महेशानि! करमाला महाफला”। योगिनीतन्त्रे “तथातथातो ग्रथनं मालानां तत्र शोधनम्। पूजां विधाय भक्त्या तु शुचिः पूर्व्वमुपोषितः। विजने ग्रथयेन्मौनी स्वयं मालाञ्च साधकः। कृतनित्यक्रियः शुद्धः शुद्धर्क्षेषु च मन्त्रवित्। यथाकालं यथाकाममक्षाण्यानीय यत्नतः। अन्योऽन्यसमरूपाणि नातिस्थूलकृशानि च। कीटादिभिरदुष्टानि न जीर्णानि नवानि च। गव्यैस्तु पञ्चभिस्तानि प्रक्षाल्य च पृथक् पृथक्। पृथ्वीदेवेन्द्रपुत्रास्त्रीनिर्म्मितं ग्रन्थिवर्जितम्। त्रिगुणं त्रिगुणीकृत्य पट्टसूत्रमथापि वा। शुक्लं रक्तं तथा कृष्णं शान्तिवश्याभिचारके। सूत्रं संपातयेद्विद्वान् तत्प्रक्षाल्य च पूर्व्ववत्। मालामेकैकमादाय सूत्रे संपातयेत् सुधीः। मुखे मुखन्तु संयोज्य पुच्छे पुच्छन्तु योजयेत्। गोपुच्छसदृशी कार्य्याथ वा सर्पाकृतिर्भवेत्। तत्सजातीयमेकाक्षं मेरुत्वेनाग्रतोन्यसेत्। एकैकमालामध्ये तु ब्रह्मग्रन्थिं प्रकल्पयेत्”। उत्पत्तितन्त्रे षष्टिपटले “क्रमोत्क्रमात्कृतावृत्त्या पञ्चाशद्वर्णमालया। योजपः स तु विज्ञेय उत्तमः परिकीर्त्तितः। अकारादि चकारान्ता वर्णमाला प्रपीर्त्तिता”। अधिकं जपशब्दे द्रष्टव्यम्। तद्ग्रथनप्रकारादि तन्त्रसारे दर्शितं यथा सनत्कुमारीये “कार्पाससम्भवं सूत्रं धर्म्मकामार्थमोक्षदम्। तच्च विप्रेन्द्रकन्याभिर्निर्म्मितञ्च सुशोभनम्। शुक्लं रक्तं तथा कृष्णं पट्टसूत्रमथापि वा। शान्तिवश्याभिचारेषु मोक्षैश्वर्य्यजयेषु च। शुक्लं रक्तं तथा पीतं कृष्णं वर्णेषु च क्रमात्। सर्व्वेषामेव वर्णानां रक्तं सर्व्वेप्सितप्रदम्। त्रिगुणं त्रिगुणीकृत्य ग्रथयेत् शिल्पशास्त्रतः। एकैकं मातृकावर्णं सतारं प्रजपन् सुधीः। मणिमादाय सूत्रेण ग्रथयेन्मध्यभागतः। ब्रह्मग्रन्थिं विधायेत्थं मेरुञ्च ग्रन्थिसंयुतम्। ग्रथयित्वा पुरोमालां तत्संस्कारं समाचरेत्। कस्यचिचिन्मते मूलविद्यया ग्रथयेत् तथा च एकवीराकल्पे “मातृका वर्णतो ग्रन्थिं विद्यया वाथ कारयेत्”। सुवर्णादिगुणैर्वापि ग्रथयेत् साधकोत्तमः। ब्रह्मग्रन्थिं ततो दद्यात् नागपाशमथापि वा। कवचेनावबध्नीयान्मालां ध्यानपरायणः। सर्व्वशेषे ततो मेरुं सूत्रद्वयसमन्वितम्। ग्रथयेत्तारयोगेन बध्नीयात् साधकोत्तमः। एवं निष्पाद्य देवेशि! प्रतिष्ठाञ्च समाचरेत्”। गौतमीये “मुखे मुखन्तु संयोज्य पुच्छे पुच्छन्तु योजयेत्। गोपुच्छसदृशी माला यद्वा सर्पाकृतिः शुभा”। मुखपुच्छनियमस्तु स्वच्छन्दमाहेश्वरे “रुद्राक्षस्योन्नतं प्रोक्तं मुखं पुच्छञ्च निम्नगम्। कमलाक्षस्य सूक्ष्मांशं सविन्दुद्वितयं मुखम्। सविन्दु कस्य स्थूलांशं दृढं लक्षणमिति स्थितम्। एवं ज्ञात्वा मुखं पुच्छं रुद्राक्षाम्भोरुहाक्षयोः। तत्सजातीयमेकाक्षं मेरुत्वेनाग्रतोन्यसेत्। एकैकं मणिमादाय ब्रह्मग्रन्थिं प्रकल्पयेत्। एकैकमातृकावर्णान् ग्रथनादौ तु संजपेत्”। ग्रन्थिनियमस्तु स्वच्छन्दमाहेश्वरे “त्रिवृत्तिग्रन्थिनैकेन तथाङ्गेन विधीयते”। अथ वा “नवभिस्तन्तुभिस्त्वाथ रज्जुं कृत्वोपवीतवत्। सार्द्धद्वयावर्त्तनेन ग्रन्थिं कुर्य्याद्यथा दृढम्”। इत्येताभ्यामिच्छाविकल्पः। तथा “द्वादश्यां वैष्णवी माला कर्त्तव्या सोपवासतः। सप्तम्यां विष्णुमन्त्रेण दिवाभागे प्रयत्नतः। शक्तीनामपि कर्त्तव्या रात्रिन्यक्ता यथाविधि। अष्टम्याञ्च नवम्याञ्च चतुर्दश्यां तथैव च। त्रयोदश्यान्तथा कुर्य्याच्छिवस्याथ सुरेश्वरि! शुभे लग्ने शुभे वारे शुभर्क्षे च शुभे तिथौ। प्रतिष्ठां कारयेन्मन्त्री स्वयं वा गुरुणापि वा। एवं निर्माय मालां वै शोधयेन्मुनिसत्तम!। कालिकापुराणे “ब्रह्मग्रन्थियुतं कुर्य्यात् प्रतिबीजं यथास्थितम्। अथ वा ग्रन्थिरहितं दृढ-

रज्जुसमन्विताम्। अश्वत्थपत्रनवकैः पद्माकारन्तु कल्पयेत्। तन्मध्ये स्थापयेन्मालां मातृकां मूलमुच्चरन्। क्षालयेत् पञ्चगव्यैस्तु सद्योजातेन सज्जलैः"। इत्यादि। मालासंस्कारस्य नित्यतामाह रुद्रयामले "अप्रतिष्ठितमालाभिर्मन्त्रं जपति यो नरः। सर्वं तद्विफलं विद्यात् क्रुद्धा भवति देवता"। स्वच्छन्दसारे "मध्यमायां न्यसेत् मालां ज्येष्ठेनावर्त्तयेत सुधीः। कामभुक्तिमुक्तिप्रदा सेयं किञ्चाथ मातृकाक्रमात्। कामनाभेदे अङ्गुलीनियमो यथा "तर्ज्जन्यङ्गुष्ठयोगेन शत्रूणां नाशने जपेत्। अङ्गुष्ठमध्यमायोगात् मन्त्रसिद्धिः सुनिश्चिता। अङ्गुष्ठानामिकायोगाच्चोच्चाटनं मतम्। ज्येष्ठाकनिष्ठायोगेन शत्रूणां शासनं मतम्"। "वैशम्पायनसंहितायाम् अङ्गुष्ठमध्यमानाञ्च गणेयं मध्यमागतः। तर्ज्जन्या न स्पृशेदेनां मुक्तिदो गणनक्रमः। जीर्णे सूत्रे पुनः सूत्रं ग्रथयित्वा शतं जपेत्। प्रमादात् पतिता हस्तात् शतमष्टोत्तरं जपेत्। जपेच्छिद्रसंस्पर्शे क्षालयित्वाऽक्षमालिकाम्"। करभ्रष्टच्छिन्नयोस्तु छिन्नेऽप्यष्टोत्तरशतजपः कार्य्यः करभ्रष्टच्छिन्नयोस्तुल्यत्वात्" तन्त्रसारः।

जपयज्ञ पुं० जपएव यज्ञः। जपरूपे यज्ञे तद्भेदादिकं हारीतेनोक्तं यथा "त्रिविधो जपयज्ञः स्यात्तस्य तत्त्वं निबोधत। वाचिकश्च उपांशुश्च मानसश्च त्रिधाकृतिः। त्रयाणामपि यज्ञानां श्रेष्ठः स्यादुत्तरोत्तरः। यदुच्चनीचोच्चरितैः शब्दैः स्पष्टपदाक्षरैः। मन्त्रमुच्चारयन् वाचा जपयज्ञः स वाचिकः। शनैरुच्चारयन् मन्त्रं किञ्चिदोष्ठौ प्रचालयेत्। किञ्चित् श्रवणयोग्यः स्यात् स उपांशुर्जपः स्मृतः। धिया पदाक्षरश्रेण्या अवर्णमपदाक्षरम्। मन्त्रार्थचिन्तनाभ्यान्तु तदुक्तं मानसं स्मृतम्। जपेन देवता नित्यं स्तूयमाना प्रसीदति। प्रसन्ने विपुलान् भोगान् प्राप्नुवन्ति मनीषिणः। राक्षसाश्च पिशाचाश्च महासर्पाश्च भीषणाः। जपितान्नोपसर्पन्ति दूरादेव प्रयान्ति ते। छन्दऋष्यादि विज्ञाय जपेन्मन्त्रमतन्त्रितः"। "विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः। उपांशुः स्यात् शतगुणः साहस्रो मानसः स्मृतः"। "ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः। सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम्" मनुः। "जपयज्ञप्रसिद्ध्यर्थं विद्याञ्चाध्यात्मिकीं जपेत्" याज्ञ०। "यज्ञानां जपयज्ञोऽस्मि" गीता।

जपस्थान न० ६त०। नानातन्त्रोक्ते जपसाधनस्थानभेदे। तानि च नानातन्त्रोक्तानि प्रदर्श्यन्ते।

"शारदायां द्वितीयपटले "पुण्यक्षेत्रं नदीतीरं गुहा पर्वतमस्तकम्। तीर्थप्रदेशाः सिन्धूनां सङ्गमः पावनं सरः। उद्यानानि विविक्तानि विल्वमूलं तटं गिरेः। देवाद्यायतनं कूलं समुद्रस्य निजं गृहम्। साधनेषु प्रशस्यन्ते स्थानान्येतानि मन्त्रिणाम्। नदीतीरं पुण्यनदीतीरं सामान्यनदीतीरस्य निषिद्धत्वात्। विविक्तानि विजनानि। राघवभट्टधृतम् "प्रत्यङ्मुखशिवस्थाने वृषभादिविवर्ज्जिते। अश्वत्थविल्वतुलसीवपुष्पान्तरावृते। गवां गोष्ठेऽश्वत्थमूले पुण्यक्षेत्रेषु शस्यते"। गोष्ठ इत्यनेनैव गोस्थाने लब्धे गवामिति यदुक्तं तत्तात्कालिकगोसम्बन्धज्ञापनाय तेन गोसमीपे जपादिकर्म्म प्रशस्तमतएव गवां समीप इत्युक्तम्। वायवीयसंहितायाम् "सूर्य्यस्याग्ने गुरोरिन्दोर्दीपस्य च जलस्य च। विप्राणाञ्च गवाञ्चैव सन्निधौ शस्यते जपः। अथ वा प्रजपेत्तत्र यत्र चित्तं प्रसीदति"। मुण्डमालातन्त्रे तृतीयपटले च "नदीतीरे विल्वमूले श्मशाने शून्यवेश्मनि। एकलिङ्गे पर्वते वा देवागारे चतुष्पथे। शवस्योपरि मुण्डे वा जले वाऽऽकण्ठपूरिते। संग्रामभूमौ योनौ वा स्थाने वा विजने वने। यत्र कुत्र स्थले रम्ये यत्र वा स्यान्मनोलयः" बृहन्नीलतन्त्रे द्वितीयपटले "एकलिङ्गे श्मशाने वा शून्यागारे चतुष्पथे। हर्म्ये वा साधयेद्देवीं सर्व्वाभीष्टप्रदायिनीम्" "पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्ष्यते। तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा" इति श्यामारहस्यधृतेनैकलिङ्गं ज्ञातव्यम्। तथा "उज्जटे पर्वते वापि निर्जने वा चतुष्पथे। देवागारे देवशून्ये विल्वमूले नदीतटे। स्वगृहे निर्जनेऽरण्ये तथा चाश्वत्थसन्निधौ" इत्यपि श्यामारहस्ये। नित्यातन्त्रे प्रथमपटले च "एकलिङ्गे श्मशाने वा शून्यागारे नदीतटे पातालभवने वापि गिरौ वा दीर्घिकातटे। शक्तिक्षेत्रे महापीठे विल्वमूले शिवालये। धात्रीवटतलेऽश्वत्थमूले चैव तरोस्तले"। पातालभवने भूमिमध्ये। समयाचारतन्त्रे द्वितीयपटलेऽपि "जपस्थानानि देवेशि! सिद्धपीठानि यानि च। सिद्धपीठे च शय्यायां खट्वा शय्या विशेषतः। चतुष्पथे सिद्धलिङ्गे गुरुदेवालये तथा। वटाश्वत्थविल्वमूले रम्भाया विपिने तथा। नदीतीरे शिवागारे गुहापर्वतमस्तके। जपस्थानानि देवेशि!

कथितानि नगात्मजे ! ॥ शृणु देवि ! विशेषेण उत्तराम्नायहेतवे ! ॥ वेश्यागृहे श्मशाने वा गत्वा मैथुनमाचरेत् । ततो जपादिकं देवि ! कृत्वा च लभते फलम् । अथ वा स्वगृहे रात्रौ भक्तिमान् सुसमाचरेत् । स प्राप्नोति फलं सर्वं चिन्तादिभयवर्जितः” पुरश्चरणरसोल्लासतन्त्रे चतुर्थपटले “गोष्ठं चतुष्पथञ्चैव त्रिपथञ्च वरानने ! ॥ निर्जनञ्च तथारण्यं शून्यगेहं तथैव च । पर्वतञ्च नदीतीरं तथैव दीर्घिकातटम् । अश्वत्थवृक्षमूले च वटवृक्षतले तथा । धात्रीवृक्षतले देवि ! तथैव बकुलस्य च । यत्र पद्मवनं भद्रे ! शुक्लं रक्तं वरानने ! ॥ द्रोणपुष्पस्य चार्वङ्गि ! यदि भाग्येन लभ्यते । अरुणादित्यसङ्काशं जपकालं परात् परम्” फलविशेषस्तु राघवभट्टेनोक्तो यथा । “गृहे जपः समः प्रोक्तो गोष्ठे शतगुणस्तु सः । आरामे च तथारण्ये सहस्रगुण उच्यते । अयुतः पर्वते पुण्ये नद्यां लक्षगुणस्तु सः । कोटिर्देवालये प्राहुरनन्तं शिवसन्निधौ” तत्र सिद्धपीठानि कुब्जिकातन्त्रे ७म पटले । “शिव उवाच । श्रूयतां सावधानेन सिद्धपीठं पतिव्रते ! ॥ यस्मिन् साधनमात्रेण सर्वसिद्धीश्वरो भवेत् । मायावती मधुपुरी काशी गोरक्षकारिणी । हिङ्गुला च महापीठं तथा जालन्धरं पुनः । ज्वालामुखीमहापीठं पीठं नगरसम्भवम् । रामगिरिर्महापीठं तथा गोदावरी प्रिये ! ॥ नेपालं कर्णस्थलञ्च महाकर्णं तथा प्रिये ! । अयोध्याञ्च कुरुक्षेत्रं सिंहनादं मनोरमम् । मणिपूरं हृषीकेशं प्रयागञ्च तपोवनम् । बदरीञ्च महापीठं अम्बिकामर्द्दनालकम् । त्रिवेणीं च महापीठं गङ्गासागरसङ्गमम् । नारिकेलञ्च विरजा उड्डीयानं महेश्वरि ! ॥ कमला विमला चैव तथा माहेश्मती पुरी । वाराही त्रिपुरा चैव वाङ्मती नीलवाहिनी । गोवर्द्धनं विन्ध्यगिरिः कामरूपं कलौ युगे । घण्टाकर्णोऽहयग्रीवो माधवश्च सुरेश्वरि ! ॥ क्षीरग्रामं वैद्यनाथं जानीयाद्वामलोचने ! ॥ कामरूपं महापीठं सर्वकामफलप्रदम् । कलौ शीघ्रफलो देवि ! कामरूपे जपः स्मृतः” अन्यत्र जपेऽपि कामाख्यावस्त्रयोगेन फलमुक्तं तत्रैव “कामाख्यावस्त्रमादाय जपपूजाः समाचरेत् । पूर्णकामं लभेद्देवि ! सत्यं सत्यं न संशयः” तन्त्रचूडामणौ महापीठान्युक्तानि यथा । “ईश्वर उवाच । मातः ! परात्परे ! देवि ! सर्वज्ञानमयीश्वरि ! ॥ कथ्यतां मे सर्वपीठं शक्तिभैरवदेवताः” देव्युवाच । “शृणु वत्स ! प्रवक्ष्यामि दयालो ! भक्तवत्सल ! ॥ याभिर्विना न सिध्यन्ति जपसाधनसत्क्रियाः । एकपञ्चाशतं पीठं शक्तिभैरवदेवताः । अङ्गप्रत्यङ्गपातेन विष्णुचक्रक्षतेन च । ममास्य वपुषो देव ! हिताय त्वयि कथ्यते । ब्रह्मरन्ध्रं १हिङ्गुलायां भैरवो भीमलोचनः । कोट्टरीशा महादेव ! त्रिगुणा सा दिगम्बरी । २करवीरे त्रिनेत्रं मे देवी महिषमर्द्दिनी । क्रोधीशो भैरवस्तत्र ३सुगन्धायाञ्च नासिका देवस्त्र्यम्बकनामा च सुनन्दा तत्र देवता । ४काश्मीरे कण्ठदेशश्च त्रिसन्ध्येश्वरभैरवः । महामाया भगवती गुणातीता वरप्रदा । ५ज्वालामुख्यां महाजिह्वा देव उन्मत्तभैरवः । अम्बिका सिद्धिदानाम्नी स्तनं ६ जालन्धरे मम । भीषणो भैरवस्तत्र देवी त्रिपुरमालिनी । हृत्पीठं ७वैद्यनाथे वैद्यनाथस्तु भैरवः । देवता जयदुर्गाख्या । ८नेपाले जानु मे शिव ! कपाली भैरवः श्रीमान् महामाया च देवता । ९मालवे दक्षहस्तं मे देवी दाक्षायणी हर ! ॥ अमरो भैरवस्तत्र सर्वसिद्धिप्रदायकः । १०उत्कले नाभिदेशन्तु विरजाक्षेत्रमुच्यते । विमला सा महादेवी जगन्नाथस्तु भैरवः । ११गण्डक्यां गण्डपातश्च तत्र सिद्धिर्न संशयः । तत्र सा गण्डकी चण्डी चक्रपाणिस्तु भैरवः । १२बहुलायां वामबाहुर्बहुलाख्या च देवता । भीरुको भैरवस्तत्र सर्वसिद्धिप्रदायक । १३उज्जयिन्यां कूर्परञ्च माङ्गल्यः कपिलाम्बरः । भैरवः सिद्धिदः साक्षाद्देवी मङ्गलचण्डिका । १४चट्टले दक्षबाहुर्मे भैरवश्चन्द्रशेखरः । व्यक्तरूपा भगवती भवानी तत्र देवता । विशेषतः कलियुगे वसामि चन्द्रशेखरे । १५त्रिपुरायां दक्षपादो देवी त्रिपुरसुन्दरी । भैरवस्त्रिपुरेशश्च सर्वाभीष्टप्रदायकः । १६त्रिस्रोतायां वामपादो भ्रामरी भैरवेश्वरः । योनिपीठं कामगिरौ १७ कामाख्या तत्र देवता । यत्रास्ते त्रिगुणातीता रक्तपाषाणरूपिणी । यत्रास्ते माधवः साक्षादुमानन्दोऽथ भैरवः । सर्वदा विहरेद्देवी तत्र मुक्तिर्न संशयः । तत्र श्रीभैरवी देवी तत्र च क्षेत्रदेवता । प्रचण्डचण्डिका तत्र मातङ्गी त्रिपुरात्मिका । वगला कमला तत्र भुवनेशी सधूमिनी । एतानि नव पीठानि शंसन्ति वरभैरवाः । अङ्गुलीवृन्दं हस्तस्य १८प्रयागे ललिता भवः । १९जयन्त्यां वामजङ्घा च जयन्ती क्रमदीश्वरः । सर्वत्र विरला चाहं कामरूपे गृहे गृहे । २०गौरीशिखरमारुह्य पुनर्जन्म न विद्यते । भूतधात्री महामाया भैरवः क्षीरकण्ठकः । युगाद्या सा म-

हामाया दक्षाङ्गुष्ठपदो मम । नकुलीशः कालीपीठे दक्षपादाङ्गुली मम । करतोयां समारभ्य यावच्छिकरवासिनी । शतयोजनविस्तारं त्रिकोणं सर्व्वसिद्धिदम् । देवा मरणमिच्छन्ति किं पुनर्मानवादयः । भुवनेशी सिद्धिरूपा किरीटस्था २१किरीटतः । देवता विमलानाम्नी संवर्त्तो भैरवस्तथा । २२ वाराणस्यां विशालाक्षी देवता कालभैरवः । मणिकर्णीति विख्याता कुण्डलञ्च मम श्रुतेः । २३ काल्याश्रमे च पृष्ठं मेऽनिमिषो भैरवस्तथा । सर्व्वाणि देवता तत्र, २४ कुरुक्षेत्रे च गुल्फतः । स्थाणुनाम्नो च सावित्री अश्वनाथस्तु भैरवः । २५ मणिवन्धे च गायत्री सर्व्वानन्दस्तु भैरवः । २६ श्रीशैले च मम ग्रीवा महालक्ष्मीस्तु देवता । भैरवः शम्बरानन्दो देशे देशे व्यवस्थितः । २७काञ्चीदेशे च कङ्कालो भैरवो रुरुनामकः । देवता देवगर्भाख्या नितम्बः २८कालमाधवे । भैरवश्चासिताङ्गश्च देवी काली सुसिद्धिदा । दृष्ट्वा दृष्ट्वा नमस्कृत्य मन्त्रसिद्धिमवाप्नुयात् । २९ शोणाख्ये भद्रसेनस्तु नर्म्मदाख्या नितम्बके । ३० रामगिरौ तथा नासा शिवानी चण्डभैरवः । ३१ वृन्दावने केशजालमुमानाम्नी च देवता । भूतेशो भैरवस्तत्र सर्व्वसिद्धिप्रदायकः । संहाराख्य ऊर्द्ध्वदन्ते देवी नारायणी ३२ शुचौ । अधोदन्ते महारुद्रो वाराही ३३ पञ्चसागरे । ३४ करतोयातटे तल्पं वामे वामनभैरवः । अपर्णा देवता तत्र ब्रह्मरूपाकरोद्भवा । ३५श्रीपर्व्वते दक्षगुल्फं तत्र श्रीसुन्दरी परा । सर्व्वसिद्धीश्वरी सर्व्वा सुनन्दाऽऽनन्दभैरवः । ३६कपालिनी भीमरूपा वामगुल्फविभागके । भैरवश्च महादेवः सर्व्वानन्दशुभप्रदः । उदरञ्च ३७ प्रभासे मे चन्द्रभागा यशस्विनी । वक्रतुण्डो भैरवश्चोर्द्ध्वोष्ठे भैरवपर्व्वते । ३८ अवन्त्याञ्च महादेवी लम्बकर्णस्तु भैरवः । ३९चित्रके भ्रामरी देवी किकुभाख्यजले स्थले । भैरवः सर्व्वसिद्धीशस्तत्र सिद्धिरनुत्तमा । ४० गण्डो गोदावरीतीरे विश्वेशी विश्वमातृका । दण्डपाणिर्भैरवस्तु ४१वामे गण्डे तु राकिणी । भैरवोवत्सनाभस्तु तत्र सिद्धिर्न संशयः । ४२ रत्नावल्यां दक्षस्कन्धे कुमारी भैरवः शिवः । ४३ मिथिलायां महादेवी वामस्कन्धे महोदरः । ४४ नलाहाट्यां नलापातो योगीशो भैरवस्तथा । तत्र सा कालिका देवी सर्व्वसिद्धिप्रदायिका । ४५ कालीघट्टे मुण्डपातः क्रोधीशो भैरवस्तथा । देवता जयदुर्गाख्या नानाभोगप्रदायिनी । ४६ वक्रेश्वरे मनःपातो वक्रनाथस्तु भैरवः । नदी पापहरा तत्र देवी महिषमर्द्दिनी । ४७ यशोरे पाणिपद्मञ्च देवता यशोरेश्वरी । चण्डश्च भैरवस्तत्र यत्र सिद्धिमवाप्नुयात् । ४८अट्टहासे चौष्ठपातो देवी सा फुल्लरा स्मृता । विश्वेशो भैरवस्तत्र सर्व्वाभीष्टप्रदायकः । हारपातो ४९ नन्दिपुरे भैरवो नन्दिकेश्वरः । नन्दिनी सा महादेवी तत्र सिद्धिर्न संशयः । ५०लङ्कायां नूपुरश्चैव भैरवो राक्षसेश्वरः । इन्द्राक्षी देवता तत्र इन्द्रेणोपासिता पुरा । ५१विराटदेशमध्ये तु पादाङ्गुलिनिपातनम् । भैरवश्चामृताख्यश्च देवी तत्राम्बिका स्मृता । एतास्ताः कथिताः पुत्त्र ! पीठनाथाधिदेवताः । क्षेत्राधीशं विना देव ! पूजयेद्यान्यदेवताम् । भैरवैर्ह्रियते सर्व्वं जपपूजादिसाधनम् । अज्ञात्वा भैरवं पीठं पीठशक्तिञ्च शङ्कर ! । प्राणनाथ ! न सिध्येत्तु कल्पकोटिजपादिभिः । न देयं परशिष्येभ्यो निन्दकाय दुरात्मने । शठाय क्रूरकार्य्याय दत्त्वा मृत्युमवाप्नुयात् । दद्यात् शान्ताय शिष्याय मन्त्री मन्त्रार्थसिद्धये” । महानीलतन्त्रे पञ्चमपटले “पीठार्च्चनं महादेवि ! तत्र सिद्धिरनुत्तमा । पीठानां परमं पीठं कामरूपं महाफलम् । तत्र या क्रियते पूजा सहस्रापि महेश्वरि ! । विहाय सर्व्वपीठानि तस्य देहे वसाम्यहम् । तस्माच्छतगुणं प्रोक्तं कामाख्यायोनिमण्डलम् । तेषां फलं महेशानि ! वक्तुं किं शक्यते मया । तत्र कोटिगुणैः सार्द्धमाद्या वसति तारिणी । यत् पीठं ब्रह्मणा गुप्तं वक्तुं सर्व्वसुखावहम् । यतो देवाश्च वेदाश्च मुनयश्चैव भावजाः । सर्व्वेऽप्याविर्भवन्त्येते तेन गुप्तं सदा कुरु । द्विविधञ्चैव यत् पीठं गोप्तव्यं तन्महेश्वरि ! । गुप्ताद्गुप्तं महापुण्यं दुरापं साधकाधमैः । व्यक्तं सर्व्वत्र देवेशि ! लभ्यते कुलसुन्दरि ! । पीठप्रसङ्गाद्देवेशि पीठानि शृणु भैरवि ! । शृणु तानि महाप्राज्ञे ! श्रेष्ठस्थानानि यानि च । सिद्धिप्रदानि साधूनां महद्भिः सेवितानि च । पुष्करञ्च गयाक्षेत्रम् अक्षयाख्यवटस्तथा । वराहपर्व्वतश्चैव तीर्थञ्चामरकण्टकम् । नर्म्मदा यमुना सिन्धु गङ्गाद्वारं तथा प्रिये ! । गङ्गासागरसङ्गञ्च कुशावर्त्तञ्च विल्वकम् । श्रीनीलपर्व्वतश्चैव कलम्बकुण्डके तथा । भृगुतुङ्गञ्च केदारं सर्व्वप्रियमहावनम् । ललिता च सुगन्धा च शाकम्भरी सुरप्रियम् । कण्वतीर्थं महागङ्गा मण्डलिकाश्रमएव च । कुमाराख्यप्रभासौ च तथा गङ्गा सरस्वती ।

अगस्त्याश्रममिष्टं मे कण्वाश्रममतःपरम्। कौशिकीसरयूःशोणो ज्योतिःसरःपुरःसरम्। कालोदकं प्रियं श्रीमत् प्रियमुत्तरकामाख्यम्। मतङ्गवापी सप्तर्षिर्महाविष्णुपदं महत्। वैद्यनाथं महातीर्थं प्रियःकालाञ्जरोगिरिः। शालोच्छेदं गर्गोच्छेदं हरोच्छेदं महावनम्। भद्रेश्वरं महातीर्थं कच्छलगच्छेदमेव च। जानीहि प्रियम्बेशा च कावेरी कपिलोदका। सोमेश्वरं शुक्लतीर्थं कृष्णवेणाप्रभेदकम्। पाटला च महावोधिर्नगतीर्थं मदन्तिके। पुण्यं रामेश्वरं देवि! तथा मेघवनं हरेः। ऐलं वनफलञ्चैव गोवर्द्धनमजप्रियम्। हरिश्चन्द्रं पुरश्चन्द्रं पृथूदकमपि प्रियम्। इन्द्रनीलं महानादं तथैव प्रियमैनकम्। पञ्चाप्सरं पञ्चवटी वटीपर्वटिका तथा। गङ्गाविल्वप्रसङ्गश्च प्रियनादवटं तथा। गङ्गारामाचलञ्चैव तथैव ऋणमोचनम्। गौतमेश्वरतीर्थञ्च वशिष्ठतीर्थमेव च। हारीतञ्च तथा देवि! ब्रह्मावर्त्तं शिवप्रियम्। कुशावर्त्तमभिश्रेष्ठं हंसतीर्थं तथैव च। पिण्डारकवनं ख्यातं हरिद्वारं तथैव च। तथैव वदरीतीर्थं रामतीर्थं तथैव च। जयन्ती विजयन्तञ्च सर्व्वकल्याणदं प्रिये!। विजया सारदातीर्थं भद्रकालेश्वरं तथा। अश्वतीर्थं सुविख्यातं तथा देवशिवप्रियम्। ओघवती नदी चैव तीर्थमन्नप्रदं तथा। छागलिङ्गं माल्टगवं करवीरपुरं तथा। सप्तगोदावरं तीर्थं लिङ्गाख्यं सर्व्वमोहनम्। किरीटमुत्तरे तीर्थं दक्षिणे तीर्थमुत्तमम्। विशालतीर्थं काल्याश्च वनं वृन्दावनं तथा। ज्वालामुखी हिङ्गुला च महातीर्थं गणेश्वरम्। जानीहि सर्वतीर्थानां हेतुस्थानानि सुन्दरि!। अत्र सन्निहिता नित्यं सर्वे देवा महर्षयः। पितरो योगिनश्चैव ये ये सिद्धिपरायणाः। आशु सिध्यन्ति कर्म्माणि श्रद्धाभक्तिमतां प्रिये!। पुण्यकाले पठेत् यस्तु तत्पुण्यमक्षयं भवेत्। श्राद्धकाले पठेत् यस्तु जुहुयाद्वापि भक्तितः। अक्षयं तद्भवेत् कव्यं पितृणां परमं सुखम्। तस्मिन् स्थाने पठेद् यस्तु सिद्धिर्भवति तत्क्षणात्। अथ वक्ष्ये महेशानि! यत्र या देवता शृणु। यत्र ते यानि नामानि कथयिष्यामि तत् शृणु। मग्नोऽहं परमानन्दे तत्कथामृतवारिधौ! पुष्करे कमलाक्षी च गयायाञ्च गयेश्वरी। अक्षया अक्षयवटेऽमरेशोऽमरकण्टके। वराहपर्वते च त्वं वाराही धरणीप्रिया। नर्म्मदा नर्म्मदायाञ्च कालिन्दी यमुनाजले। शिवामृता च गङ्गायां स्वधा देहलिकाश्रमे। शारदा सरयूतीरे शोणे च कमलेश्वरी। अप्रकाशा सदा देवी ज्योतिर्म्मय्यब्धिसङ्गमे। श्रीरङ्गं श्रीगिरौ चैव काली कालोदके तथा। महोदरी महातीर्थे नीला चोत्तरमानसे। मातङ्गिनी मतङ्गे च गुप्ताशिर्विष्णुपादुके। स्वर्गदा स्वर्गमार्गे च गोदावर्य्यां गवेश्वरी। विमुक्तिश्चैव गोमत्यां विपाशायां महाबला। शतद्र्वां शतरूपा च चन्द्रभागा च तत्र वै। ऐरावत्याञ्च ईनीम सिद्धिदा सिद्धतीरके। दक्षपञ्चनदे चैव दक्षिणाहं प्रकीर्त्तिता। औजसे वीर्य्यदा च त्वं सङ्गमा तीर्थसङ्गमे। बाहुदायामनन्ताहं कुरुक्षेत्रे रणोक्षणा। तपस्विनी पुण्यतमा भारती भारताश्रमे। सुकथा नैमिषारण्ये पाण्डौ च पाण्डुरानना। विशालायां विशालाक्षी कुण्डपृष्ठे शिवात्मिका। श्रद्धा कनखले तीर्थे शुद्धबुद्धिर्धनीश्वरी। सुवेशा सुमना गौरी मानसे च सरोवरे। नन्दापुरे महानन्दा ललिता ललितापुरे। ब्रह्माणी ब्रह्मशिरसि महापातकनाशिनी। पूर्णिमा चेन्दुमत्याञ्च सिद्धमतिप्रिया सदा। जाह्नवीसङ्गमे तुष्टिः स्वधा च पितृतुष्टिदा। पुण्याहं बाहुदायाञ्च प्रपायां पापनाशिनी। शत्रुसंहारिणी चैव घोररूपा महोदरी। स्वर्गोच्छेदे महामारिप्रवला च महावने। भद्रा च भद्रकाली च भद्रेश्वरी शिवप्रिय!। भद्रेश्वरेश्वरमा विष्णुप्रिया विष्णुपदे तथा। दारुणा नर्म्मदाच्छेदे कावेर्य्यां कपिलेश्वरी। भेदिनी कृष्णवेण्णायां संभेदे शुभवासिनी। श्रद्धा च शुक्लतीर्थे च प्रभासे चेश्वरी तथा। महावोधौ महावुद्धिः पाटले पाटलेश्वरी। सुवला नागतीर्थे च नागेशी नागनन्दिता। मदन्तौ च मदन्ती च प्रमदा च मदन्तिका। मेघस्वना मेघवासे विद्युत्सौदामनीच्छदा। प्रिया च रामेश्वरे महावुद्धिर्वीरा चेलापुरे सती। भार्गवे दुर्गा सुवेशा सुरसुन्दरी। कात्यायनी महादेवी गोवर्द्धनेऽखिलात्मिका। शुभेश्वरी हरिश्चन्द्रे पुरचन्द्रे पुरेश्वरी। पृथूदके महावेगा मैनाकेऽखिलवर्द्धिनी। इन्द्रनीले महाकान्ता रत्नवेशा सुशोभना। माहेश्वरी महानादे महातेजा महावने। पत्यक्सरसि सारङ्गा पञ्चवट्यां तपस्विनी। वटीशा वटिकायाञ्च सर्व्ववर्णा सुरङ्गिणी। सङ्गमे विन्ध्यगङ्गायां विन्ध्ये श्रीविन्ध्यवासिनी। महानन्दा नन्दतटे गङ्गारामाचले शिवा। आर्य्यावर्त्ते महार्य्या त्वं विमुक्तिर्ऋणमोचने। अट्टहासे च चामुण्डा तन्त्रे श्रीगौतमेश्वरी। वेदमयी ब्रह्मविद्या

वाशिष्ठे त्वमरुन्धती। हरिते हरिणाक्षी च ब्रह्मावर्त्ते व्रजेश्वरी। गायत्री चैव सावित्री कुशावर्त्ते कुशप्रिया। हंसेश्वरी महातीर्थे परहंसेश्वरेश्वरी। पिण्डारकवने धन्या सुरसा सुखदायिनी। नारायणी वैष्णवी च गङ्गाद्वारे विमुक्तिदा। श्रीविद्या वदरीतीर्थे रामतीर्थे महाधृतिः। जयन्ती च जयन्ते त्वं विजयन्तेऽपराजिता। विजया च महाशुद्धिः शारदायाञ्च शारदा। सुभद्रे भद्रदा भव्या भद्रकालेश्वरे तथा। महाभद्रा महाकाली हयतीर्थे गवीश्वरी। वेददा वेदमाता च विदेहे वेदमस्तके। युवत्याञ्च महाविद्या महानद्यां महोदया। चण्डा च त्रिपदे चैव छागलिङ्गे वलिप्रिया। मातृदेशे जगन्माता करवीरपुरे सती। नलिनीरङ्गिणी रामा परमा परमेश्वरी। सप्तगोदावरे तीर्थे देवर्षिरखिलेश्वरी। अयोध्यायां भवानी च जयदा जयमङ्गला। माधवी मथुरायाञ्च देवकी यादवेश्वरी। वृन्दागोमेश्वरी राधा रासवृन्दावने रमा। कात्यायनी महामाया भद्रकाली कलावती। चन्द्रमाला महायोगी महायोगिन्यधीश्वरी व्रजेश्वरी यशोदेति व्रजे श्रीगोकुलेश्वरी। काञ्च्यां कनककाञ्ची स्यादवन्त्यामभिपावनी। विद्या विद्यापुरे चैव विमला नीलपर्वते। रामेश्वरी सेतुबन्धे विमला पुरुषोत्तमे। विरजा यागपुर्य्याञ्च भद्रेऽपि भद्रकर्णिका। तमोलिप्ते तमोघ्नी च स्वाहा सागरसङ्गमे। कुलश्रीर्वंशवृद्धिश्च माधवी माधवप्रिया। मङ्गले! मङ्गले कोटे राढ़े मङ्गलचण्डिका। ज्वालामुखी शिवापीठे मन्दरे भुवनेश्वरी। कालीघट्टे गुह्यकाली किरीटे च महेश्वरी। किरीटेश्वरी महादेवी लिङ्गाख्ये लिङ्गवाहिनी। साक्षी सर्व्वत्र भक्तानामभक्तानां कुतोऽपि न। अथान्यत् सम्प्रवक्ष्यामि सिद्धस्थानानि सुन्दरि!। सर्व्वपापविनाशार्थं सर्व्वसिद्धिप्रदं नृणाम्। निर्म्मितानि शिवेनेह सिद्धस्थानानि यानि च। श्रुत्वा मनसि भव्यानि प्रकाश्यान्यधिकारिषु। अमरेशमहापीठे कुशतुङ्कारसंज्ञकः। तत्र दुर्गाह्वयं नाम चण्डिका च महेश्वरी। प्रभासे सोमनाथोऽसौ देवी च पुष्करेक्षणा। देवदेवाधिपः शम्भुर्नैमिषे च महेश्वरः। तत्र प्रज्ञा च देवी च शिवानी लिङ्गधारिणी। पुष्करे च राजगन्धिः पुरस्ता महेश्वरी। श्रीपर्वते श्रिया नाम शङ्करस्त्रिपुरान्तकः। मायावी शङ्करी तत्र भक्तानामखिलार्थदा। जल्पेश्वरे महास्थाने शङ्करी च त्रिशूलिनी। त्रिशूली शङ्करस्तत्र सर्व्वपापविमोचकः। आम्रातकेश्वरे सूक्ष्मा सूक्ष्माख्या परमेश्वरी। गयाक्षेत्रे मङ्गलाख्या शिवोयः प्रपितामहः। कुरुक्षेत्रे शिवः स्थाणुः शिवा स्थाणुप्रिया परा। इष्टनाभे स्वयम्भुश्च देवी स्वायम्भुवा मता। उग्रः कनखले प्रोक्तः शिवोग्रे शिववल्लभा। विमलेश्वरे विश्वशम्भु विश्वाविश्वप्रिया सदा। अट्टहासे महानन्दो महानन्दा महेश्वरी। महान्तको महेन्द्रश्च पार्वती च महान्तका। भीमेश्वरो भीमपीठे शिवा भीमेश्वरी तथा। वस्त्रापदे भवो नाम भवानी भुवनेश्वरी। अद्रिकूटे महायोगा रुद्राणी परमेश्वरी। अविमुक्ते महादेवो विशालाक्षी शिवा परा। महालये हरो रुद्रो महाभागा शिवा तथा। महाबलश्च गोकर्णे शिवभद्रा च चण्डिका। भद्रकर्णे महादेवो भद्रा च कर्णिका तथा। सुपर्णाख्ये सहस्राक्ष उत्पला परमेश्वरी। स्थाणुसंज्ञे शिवस्था श्रीः खरस्था श्रीधरा शिवा। कमलालये महास्थाने कमलाख्यो महेश्वरः। कमलाक्षी महेशानी। सकलार्थप्रदायिनी। छागला तु कपर्दी च प्रसभा च महेश्वरी। ऊर्द्ध्वरेतामहारण्ये सन्ध्याख्या परमेश्वरी। माकोटाख्या महाकोटे शिवा च मुण्डकेश्वरी। मातुलेश्वरपीठे च करवीरार्च्यशेखरा। श्रीमद्ग्रामपुरे साक्षाज्जरनामा सभापतिः। शिवः सभापतिर्नाम यत्र नृत्यति शङ्करः। आत्मानन्दमहानादपूर्णानन्दमहार्णवम्। नृत्यन्तं यत्र देवेशं देवेशी परिपश्यति। यत्र चाशु महादेवो भक्तानां वरदो भवेत्। नृत्यन्तं यत्र सर्व्वेशं वीक्ष्य लोको विमुच्यते। पुण्यस्थानेषु सर्व्वेषु स्थानमेतदनुत्तमम्। यद्यत्कर्म्माणि सर्व्वाणि अक्षयाणि भवन्ति वै। तस्मिन् महोत्तमे स्थाने शिवगङ्गाख्यमद्भुतम्। तड़ागमस्ति तत्तीरे दक्षिणे नृत्यतीश्वरः। तड़ागेऽस्मिन् वसन् स्नात्वा सभानाथं समीक्ष्य तु। अष्टोत्तरसहस्रं तु जपेच्छुद्धो मुदान्वितः। यानि ते कथितान्यत्र सदा तिष्ठन्ति देवताः। भवन्ति सिद्धगन्धर्व्वाः सिद्धयः सर्व्वसिद्धिदाः। अत्र दत्तं हुतं जप्तं स्नानमक्षयपुण्यदम्। यद्यत् प्रकीर्त्तितं नाम भैरवं परिपूज्य च। प्रणवादिहृदन्तेन लभतेऽभीष्टमुत्तमम्। भोजयेद्ब्राह्मणान् योऽत्र अक्षयं फलमश्नुते। इह नानासुखं भुक्त्वा हरगौरीपुरं व्रजेत्। शोकदुःखविनाशोऽयं करुणानिधिरीश्वरः। निर्म्मे सर्व्वसत्त्वै पुण्यक्षेत्राणि भूतले। आकाशे पुण्यशुद्धानामनेकपुण्य-

साधनैः। आस्तिकानां भवेदत्र निवासः साधनं प्रति। तस्माद् यत्नेन कर्त्तव्यमत्र साधनमुत्तमैः। इदानीं शृणु चार्वङ्गि! पीठं सर्वाङ्गसुन्दरम्। अक्षमालामयं पीठं ब्रूहि मे परमेश्वरि!। यत्र सिद्ध्यन्ति कार्य्याणि स्थितिस्ते शङ्करस्य च। विष्णोरगाधबोधस्य तत्प्रियाया महेश्वरि!। अन्येषाञ्चैव देवानां युष्मत्पदनिवासिनाम्। प्रसादो हि भवत्याश्च तत्र प्रीतिरनुत्तमा"।

जपा स्त्री जप–अच् टाप्। जवावृक्षे हेमच०। तत्पुष्पेऽपि स्त्री। "ओड्रपुष्पं जपा चाथ त्रिसन्ध्या साऽरुणासिता। जपा संग्राहिणी केश्या त्रिसन्ध्या कफवातजित्" भावप्र० तद्गुणोक्तिः। "सान्ध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः" मेघ०।

जप्य त्रि० जप–कर्म्मणि यत्। १जपनीये अघमर्षणादौ। "फलदानान्तु वृक्षाणां छेदने जप्यमृक्शतम्" मनुः। भावे यत्। २जपे। "जप्येनैव तु संसिद्ध्येत् ब्राह्मणो नात्र संशयः" मनुः।

जप्येश्वर पु० सिद्धस्थानभेदे। "जप्येश्वरे महास्थाने शङ्करी च त्रिशूलिनी। त्रिशूली शङ्करस्तत्र सर्व्वपापविमोचकः" तन्त्रवाक्यम्। जपस्थानशब्दे दृश्यम्।

जबारु न० जवमान् (जरमाण)–रोहिन्+पृषो०। १जवमानरोहिणि २जरमाणरोहिणि च। "वृष्णे रपे रुप आरुपितं जबारु" ऋ० ४,५,७। "जबारु जवमानरोहि जरमाणरोहि वा" भा०। "जबारु जवमानरोहि जरमाणरोहि" निरु०। ६।१७।

जबाला स्त्री सत्यकामस्यर्षेः मातरि। जबालायां भवः अण्। जाबाल सत्यकामाख्ये ऋषौ तत्कथा यथा

"सत्यकामो ह जाबालो जबालां मातरमामन्त्रयाञ्चक्रे ब्रह्मचर्य्यं भवति। विवत्स्यामि किं गोत्रोऽन्वहमस्मीति। सा हैनमुवाच नाहमेतद्वेद तात! यद्गोत्रस्त्वमसि बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि स सत्यकाम एव जाबालो ब्रवीथा इति। स ह हारिद्रुमतं गौतममेत्योवाच ब्रह्मचर्य्यं भगवति वत्स्याम्युपेयां भगवन्तमिति। तं होवाच किं गोत्रोनुसोम्यासीति स होवाच नाहमेतद्वेद भो यद्गोत्रोऽपृच्छं मातरं सा मां प्रत्यब्रवीद्बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाऽहमस्मि सत्यकामो नाम त्वमसीति सोऽहं सत्यकामो जबालोऽस्मि भोः इति। तं होवाच नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहरोपत्वा नेष्ये न सत्यादगाः" इति।

जभ मैथुने भ्वा० पर० सक० सेट्। जभति अजम्भीत्। जजम्भ जजम्भतुः जंजभतुः। जभितः। मैथुनस्य मैथुनेन घर्षणम्। ता इमा जभितुं पापा उपक्रामन्ति मां प्रभो!" भाग० ३।२०।२७। "जभितुं मैथुनेन घर्षयितुम्" श्रीधरः।

जभ मैथुने भ्वा० पर० अक० सेट् इदित्। जम्भति धातूनामनेकार्थत्वात् भक्षणेऽपि "श्वा त्वस्य जम्भिषदपि" ऋ० १०।८६।४। "जम्भिषत् भक्षयतु" भा०।

जभ जृम्भे चुरा० उभ० सक० इदित्। जम्भयति ते अजजम्भत् त। "जम्भयतमभितो रायतः शुनो" ऋ०१।१८२।४ "हनु वृकस्य जम्भया" अथ०१९।४७।९।

जभ जृम्भे वा० भ्वा० आत्म० सेट्। जभते अजम्भिष्ट जजम्भे [जेभे।

जम भक्षे भ्वा० पर० सक० सेट्। जमति अजमीत् उदित् जमित्वा जान्त्वा। अयञ्च धातुः नैगमे २।१४ गत्यर्थकत्वेन। १।१७ जमदिति ज्वलत्यर्थत्वेन चोक्तः। जामिशब्दनिरुक्तौ च ३।६ जमतेर्वा स्याद्गतिकर्म्मणो निर्गमनप्राया भवति" जमदग्निशब्दनिरुक्तौ च १।२४। "जमदग्नयः प्रजमिताग्नयो वा प्रज्वलिताग्नयो वा" इत्युक्तम्।

जमज त्रि० द्वि०व० यमज+पृषो०। यमजातयोः द्विरूपको०।

जमदग्नि पु० जमन् प्रज्वलितोऽग्निरिव। भृगुवंश्ये ऋषिभेदे। तन्निरुक्तिः जमधातौ दर्शिता। भा० आ० ९२ अनु० अन्या निरुक्तिर्दर्शिता यथा "जाजमद्यजजानेऽहं जीजाहीह जिजायिषि। जमदग्निरिति ख्यातमतो मां विद्धि शोभने!"। तदुत्पत्तिकथा "और्वस्तस्यां समभवदूरुं भित्त्वा महायशाः। महातेजा महावीर्य्यो बाल एव गुणैर्युतः। ऋचीकस्तस्य पुत्रस्तु जमदग्निस्ततोऽभवत्। जमदग्नेस्तु चत्वार आसन् पुत्रा महात्मनः। रामस्तेषां जघन्योऽभूदजघन्यैर्गुणैर्युतः" भा० आ० ६६ अ०। अस्योत्पत्तिकथा ऋचीकशब्दे १४१४ पृ० दर्शिता। स च एतन्मन्वन्तरे सप्तर्षिमध्यगतः यथा हरिवं० ७अ० "गौतमश्च भरद्वाजो विश्वामित्रस्तथैव च। तथैव पुत्रो भगवानृचीकस्य महात्मनः। सप्तमो जमदग्निश्च ऋषयः साम्प्रतं दिवि। साध्या रुद्राश्च विश्वे च वसवो मरुतस्तथा"।

अयञ्च गोत्रकारकः तद्विवृतिः गोत्रशब्दे २७६६पृ० दृश्या। जमदग्नेरपत्यम् गर्गा० यञ्। जामदग्न्य तद-

पत्ये पुंस्त्री। बहुत्वे अस्त्रियाम् यञो लुक्। जमदग्नयः तदपत्येषु स्त्रियां तु न लुक्। जामदग्न्यः स्त्रियः।

जमन न० जम–भावे ल्युट्। भक्षणे अमरकोषे "जेमनं लेप आहार" इत्यत्र जमनमिति पाठान्तरम्।

जम्पती पु० द्वि० व०। जाया च पतिश्च द्व०जायाया जम्। दम्पत्योः स्त्रीपुरुषयोः अमरः। पक्षे जायापती तत्रार्थे।

जम्बाल पु० जम्ब–घञ् जम्बमाज्ञाति आदत्ते आ+ला–क। १पङ्के, अमरः। २शैवाले, मेदि०। ३केतक्यां शब्दच०। "जम्बूवज्जलविम्बवज्जलजवज्जम्बालवज्जालवत्" उद्भटः "चणं मौलिजजम्बालजटीकृत्य प्रभुर्ययौ" काशी०ख० १९ अ०।

जम्बालिनी स्त्री जम्बाल+अस्त्यर्थे इनि। नद्याम् हेमच०।

जम्बीर पु० जम–गम्भीरा० नि० ईरन् बुक् च। (जामीर नेबु) ख्याते वृक्षभेदे। "जम्बीरमुष्णं गुर्वम्लं वातश्लेष्मविबन्धनुत्। शूलकासकफोत्क्लेशच्छर्दितृष्णामदोषजित्। आस्यवैरस्यहृत्पीडावह्निमान्द्यकृमीन् हरेत्। स्वल्पजम्बीरिका तद्वत् तृष्णाच्छर्दिनिवारिणी" भावप्र०। २मरुवके. ३अर्जके, ४सितार्जके, राजनि०पृषो० ह्रस्वः जम्बिर तत्रार्थे पु० शब्दर०।

जम्बु(म्बू) स्त्री जम–अदने कु नि० बुक् पृषो० वा ह्रस्वः। (जाम) १वृक्षे अमरः तत्र ह्रस्वान्ते। "तस्या जम्बोः फलरसो नदीभूय प्रवर्त्तते" विक्रमादित्यः। दीर्घान्ते। "तस्याः जम्बूफलोपभोगहृष्टाः" किरा०। "जम्ब्वाः फलरसो नदी भूत्वा जलाधिपः" भा०भी०७अ०। २जम्बुनामके द्वीपे च जम्बुद्वीपशब्दे दृश्यम्। जम्ब्वाः फलम् अण् पक्षे अञ्। जाम्बव तत्फले न०। तस्या वा लुक् लुप् वा लुपि व्यक्तिवचनत्वात्। जम्बु न० जम्बू स्त्री।

जम्बुक पु० जम्बु इव कायति कै-क। (गोलायजाम) इति ख्याते १वृक्षे। २नीचे त्रि० ३श्योनाके राजनि०। स्वार्थे क। ४जम्बुशब्दार्थे। ५शृगाले पुंस्त्री०। "गृध्राः कङ्का बलाः श्येनावायसा जम्बुकास्तथा" भा० द्रो० ९७ अ०। स्त्रियां जातित्वात् ङीष्। "मत्स्यमांसपरिभ्रष्टा किं जम्बुकि! निरीक्षसे" उद्भटः। ५कुमारानुचरभेदे। "शृणु नामानि चाप्येषां येऽन्ये स्कन्दस्य सैनिकाः" इत्युपक्रमे "सञ्चारकः कोकनदो गृध्रपत्रश्च जम्बुकः" भा० श० ४६ अ०। दीर्घमध्येऽपि तदनुचरे तत्रैवाध्याये "वक्त्रश्च जम्बूकः शाकवक्त्रश्च कच्छलः"।

जम्बुकेश्वर पु० तीर्थभेदे शिवपु०।

जम्बु(म्बू)खण्ड पु०जम्बुद्वीपे "मेरोस्तु पश्चिमे पार्श्वे केतुमालो महीपते!। जम्बूखण्डे च तत्रैव महाजनपदो नृप!" भा० भी० ७ अ०।

जम्बु(म्बू)खण्डविनिर्म्माण न० जम्बुखण्डस्य विनिर्म्माणं निरूपणं यत्र। भा० भीष्मपर्वान्तर्गते अवान्तरपर्वभेदे। "जम्बूखण्डविनिर्म्माणं पर्वोक्तं तदनन्तरम्" भा० आ० १अ० अवान्तरपर्वोक्तौ।

जम्बु(म्बू)द्वीप पुंन० जम्बु(म्बू)वृक्षयुक्तो द्वीपः भूमेः सप्तद्वीपान्तर्गते द्वीपभेदे। तत्सीमाविभागादि विष्णुपु० उक्तं यथा।

"जम्बुप्लक्षाह्वयौ द्वीपौ शाल्मलिश्चापरो द्विज!। कुशः क्रौञ्चस्तथाशाकः पुष्करश्चैव सप्तमः। एते द्वीपाः समुद्रैस्तु सप्त सप्तभिरावृताः। लवणेक्षुसुरासर्पिर्दधिदुग्धजलैः समम्। जम्बूद्वीपः समस्तानामेतेषां मध्यसंस्थितः। तस्यापि मेरुर्मैत्रेय! मध्ये कनकपर्वतः। चतुरशीतिसाहस्रो योजनैरस्य चोच्छ्रयः। प्रविष्टः षोड़शाधस्ताद्द्वात्रिंशन्मूर्ध्नि विस्तृतः। मूले षोड़शसाहस्रो विस्तारस्तस्य भूभृतः। भूपद्मस्यास्य शैलोऽसौ कर्णिकासंस्थितिः स्थितः। हिमवान् हेमकूटश्च निषधस्तस्य दक्षिणे। नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः। लक्षप्रमाणौ द्वौ मध्यौ दशहीनास्तथा परे। सहस्रद्वितयोच्छ्रायास्तावद्विस्तारिणश्च ते। नाभिश्च प्रथमं वर्षं ततः किंपुरुषं स्मृतम्। हरिवर्षं तथैवान्यत् मेरोर्दक्षिणतो द्विज!। रम्यकञ्चोत्तरं वर्षं तथैवानु हिरण्मयम्। उत्तराः कुरवश्चैव यथा वै भारतं तथा। नवसाहस्रमेकैकमेतेषां द्विजसत्तम!। इलावृतञ्च तन्मध्ये सौवर्णो मेरुरुच्छ्रितः। मेरोश्चतुर्दिशं तत्र नवसाहस्रविस्तरः। इलावृतं महाभाग! चत्वार उपपर्वताः। विष्कम्भा रचिता मेरोर्योजनायुतमुच्छ्रिताः। पूर्वेण मन्दरो नाम दक्षिणे गन्धमादनः। विपुलः पश्चिमे भागे सुपार्श्वश्चोत्तरे स्मृतः। कदम्बस्तेषु जम्बूश्च पिप्पलो वट एव च। एकादशशतायामाः पादपा गिरिकेतवः। जम्बूद्वीपस्य सा जम्बूर्नामहेतुर्महामुने!। महागजप्रमाणानि जम्ब्वास्तस्याः फलानि वै। पतन्ति भूभृतः पृष्ठे शीर्य्यमाणानि सर्वतः। रसेन तेषां प्रख्याता तत्र जम्बूनदीति वै। सरित् प्रवर्त्तते सा च पीयते तन्निवासिभिः। न स्वेदो न च दौर्गन्ध्यं न जरा नेन्द्रियक्षयः। तत्-

पानात्स्वस्थमनसां जनानां तत्र जायते। तीरमृत्तत्र संप्राप्य सुखवायुविशोषिता। जाम्बूनदाख्यं भवति सुवर्णं सिद्धभूषणम्। भद्राश्वं पूर्वतो मेरोः केतुमालञ्च पश्चिमे। वर्षे द्वे तु मुनिश्रेष्ठ ! तयोर्मध्यमिलावृतम्। वनं चैत्ररथं पूर्वे दक्षिणे गन्धमादनम्। वैभ्राजं पश्चिमे तद्वदुत्तरे नन्दनं स्मृतम्। अरुणोदं महाभद्रं संसितोदं समानसम्। सरांस्येतानि चत्वारि देवभोग्यानि सर्वदा। शीतान्तश्चैव मुञ्जश्च कुररी माल्यवांस्तथा। वैकङ्कप्रमुखा मेरोः पूर्वतः केशराचलाः। त्रिकूटः शिशिरश्चैव पतङ्गो रुचकस्तथा। निषधाद्या दक्षिणतस्तस्य केशरपर्वताः। शिखिवासाः सवैदूर्यः कपिलो गन्धमादनः। जारुधिप्रमुखास्तद्वत् पश्चिमे केशराचलाः। मेरोरनन्तराङ्गेषु जठरादिष्ववस्थिताः। शङ्खकूटोऽथ ऋषभो हंसो नागस्तथापरः। कालञ्जराद्याश्च तथा उत्तरे केशराचलाः। चतुर्दशसहस्राणि योजनानां महापुरी। मेरोरुपरि मैत्रेय ! ब्रह्मणः प्रथिता पुरी। तस्याः समन्ततश्चाष्टौ दिशासु विदिशासु च। इन्द्रादिलोकपालानां प्रख्याताः प्रवराः पुरः। विष्णुपादाद्विनिष्क्रान्ता पूरयित्वेन्दुमण्डलम्। समन्ताद्ब्रह्मणः पुर्य्यां गङ्गा पतति वै दिवः। सा तत्र पतिता दिक्षु चतुर्द्धा प्रत्यपद्यत। सीता चालकनन्दा च वंक्षुर्भद्रा च वै क्रमात्। पूर्वेण शैलात् सीता तु शैलं यात्यन्तरीक्षगा। ततश्च पूर्ववर्षेण भद्राश्वेनैति सार्णवम्। भद्रा तथोत्तरगिरीनुत्तरांश्च तथा कुरून्। अतीत्योत्तरमम्भोधिं समभ्येति महामुने !। वङ्क्षुश्च पश्चिमगिरीनतीत्य सकलांस्ततः। पश्चिमं केतुमालाख्यं वर्षमभ्येति सार्णवम्। तथा चालकनन्दापि दक्षिणेनेत्य भारतम्। प्रयाति सागरं भूत्वा सप्तभेदा महामुने !। आनीलनिषधायामौ माल्यवद्गन्धमादनौ। तयोर्मध्ये गतो मेरुः कर्णिकाकारसंस्थितः। भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा। पत्त्राणि लोकपद्मस्य। मर्य्यादाशैलबाह्यतः। जठरो देवकूटश्च मर्य्यादापर्वतावुभौ। तौ दक्षिणोत्तरायामावानीलनिषधायतौ। मेरोः पश्चिमदिग्भागे यथा पूर्वौ तथा स्थितौ। त्रिशृङ्गो जारुधिश्चैव उत्तरे वर्षपर्वतौ। पूर्वपश्चायतावेतावर्णवान्तव्यवस्थितौ। इत्येते मुनिवर्य्योक्ता मर्य्यादापर्वतास्तव। जठराद्याः स्थिता मेरोर्येषां द्वौ द्वौ चतुर्दिशम्। मेरोश्चतुर्दिशं ये तु प्रोक्ताः केशरपर्वताः। शीतान्ताद्या मुने ! तेषामतीव हि मनोरमाः। शैलानामन्तरद्रोण्यः सिद्धचारणसेविताः। सुरम्याणि तथा तेषु काननानि पुराणि च। लक्ष्मीविष्ण्वग्निसूर्य्यादिदेवानां मुनिसत्तम !। तान्यायतनवर्य्याणि जुष्टानि वरकिन्नरैः। गन्धर्व्वयक्षरक्षांसि तथा दैतेयदानवाः। क्रीड़न्ति तासु रम्यासु शैलद्रोणीष्वहर्निशम्। भौमा ह्येते स्मृताः स्वर्गा धर्म्मिणामालया मुने !। नैतेषु पापकर्म्माणो यान्ति जन्मशतैरपि। भद्राश्वे भगवान् विष्णुरास्ते हयशिरा द्विज !। वराहः केतुमाले तु भारते कूर्म्मरूपधृक्। मत्स्यरूपश्च गोविन्दः कुरुष्वास्ते सनातनः। विश्वरूपेण सर्व्वत्र सर्व्वः सर्व्वेश्वरो हरिः। सर्व्वस्याधारभूतोऽसौ मैत्रेयास्तेऽखिलात्मकः। यानि किंपुरुषाद्यानि वर्षाण्यष्टौ महामुने। न तेषु शोकोनायासो नोद्वेगः क्षुद्भयादिकम्। सुस्थाः प्रजा निरातङ्काः सर्व्वदुःखविवर्जिताः। दशद्वादशवर्षाणां सहस्राणि स्थिरायुषः। न तेषु वर्षवर्य्येषु भौमान्यम्भांसि तेषु वै। कृतत्रेतादिका नैव तेषु स्थानेषु कल्पना। सर्व्वेष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः। नद्यश्च शतशस्तेभ्यः प्रसूता या द्विजोत्तम !"।"पराशर उवाच। उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्। वर्षं तद्भारतं नाम भारती यत्र सन्ततिः। नवयोजनसाहस्रो विस्तारोऽस्य महामुने। कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम्। महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः। विन्ध्यश्च पारिपात्रश्च सप्तात्र कुलपर्वताः। अतः संप्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति च। तिर्य्यक्त्वं नरकञ्च यान्त्यतः पुरुषा मुने !। इतः स्वर्गश्च मोक्षश्च मध्यश्चान्तश्च गम्यते। न खल्वन्यत्र मर्त्त्यानां कर्म्मभूमौ विधीयते। भारतस्यास्य वर्षस्य नव भेदान्निशामय। इन्द्रद्वीपः कशेरुमांस्ताम्रवर्णो गभस्तिमान्। नागद्वीपस्तथा सौम्यो गान्धर्व्वस्त्वथ वारुणः। अयन्तु नवमस्तेषां द्वीपः सागरसंवृतः। योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात्। पूर्व्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः। ब्राह्मणाः क्षत्त्रिया वैश्या मध्ये शूद्राश्च भागशः। इज्यायुद्धवणिज्याद्यैर्वर्त्तयन्तो व्यवस्थिताः। वेदस्मृतिमुखाश्चान्या नद्यः पारिपात्रोद्भवा मुने !। नर्म्मदा सुरसाद्याश्च नद्यो विन्ध्यविनिर्गताः। तापीपयोष्णीनिर्विन्ध्याकावेरीप्रमुखा नदी। गोदावरीभीमरथीकृष्णवेण्यादिकास्तथा। सह्यपादोद्भवा नद्यः स्मृताः पापभयापहाः। त्रिसामा कृतामलाताम्रपर्णीप्रमुखा मलयोद्भवाः।

ऋषिकुल्याद्याः शुक्तिमत्पादसम्भवाः । शतद्रुचन्द्रभागाद्या हिमवत्पादनिःसृताः । आसां नद्युपनद्यश्च सन्त्यन्यास्तु सहस्रशः । पश्चिमे कुरुपञ्चालमध्यदेशादयो जनाः । पूर्व्वदेशादिकाश्चैव कामरूपनिवासिनः । ओड्राः कलिङ्गामगधा दाक्षिणात्याश्च सर्व्वशः । तथापरान्ताः सौराष्ट्राः शूद्राभीरास्तथार्व्वुदाः । मारुका मालवाश्चैव पारिपात्रनिवासिनः । सौवीराः सैन्धवाहूणाः शाल्वाः शाकलवासिनः । मद्रारामास्तथाम्बष्ठाः पारसीकादयस्तथा । आसां पिबन्तः सलिलं वसन्ति सरितां सदा । चत्वारि भारते वर्षे युगान्यत्र महामुने ! । कृतं त्रेता द्वापरश्च कलिश्चान्यत्र न क्वचित् । तपस्तप्यन्ति मुनयो जुह्वते चात्र यज्विनः । दानानि चात्र दीयन्ते परलोकार्थमादरात् । पुरुषैर्यज्ञपुरुषो जम्बूद्वीपे सदेज्यते । तत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने ! । यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः । अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ! । कदाचिल्लभते जन्तुर्म्मानुष्यं पुण्यसञ्चयात् । गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे । स्वर्गापवर्गास्पदहेतुभूते भवन्ति भूयः पुरुषाः सुरत्वात् । कर्म्माण्यसंकल्पिततत्फलानि सन्न्यस्य विष्णौ परमात्मरूपे । अवाप्य तां कर्म्ममहीमनन्ते तस्मिँल्लयं ये त्वमलाः प्रयान्ति । जानीम नैतत् क्व वयं विलीने स्वर्गप्रदे कर्म्मणि देहबन्धम् । प्राप्स्यामो धन्याः खलु ते मनुष्या ये भारते नेन्द्रियविप्रहीणाः । नववर्षन्तु मैत्रेय ! जम्बूद्वीपमिदं मया । लक्षयोजनविस्तारं संक्षेपात् कथितं तव ! जम्बूद्वीपं समावृत्य लक्षयोजनविस्तृतः । मैत्रेय ! वलयाकारः स्थितः क्षारोदधिर्ब्बहिः"।

भाग० ५ । १६ अ० तद्वर्णनमन्यथोक्तम् यथा

"यो वा अयं द्वीपः कुवलयकमलाभ्यन्तरकोषो नियुतयोजनविशालः समवर्त्तुलो यथा पुष्करपत्रम् ॥ ६ ॥ यस्मिन्नव वर्षाणि नवयोजनसहस्रायामानि अष्टभिर्म्मर्य्यादागिरिभिः सुविभक्तानि ॥ ७ ॥ "एषां मध्ये इलावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्व्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसाहस्रं तावतान्तर्भूम्यां प्रविष्टः ॥ ८ ॥ उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृङ्गवानिति त्रयोरम्यकहिरण्मयकुरूणां मर्य्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसाहस्रपृथव एकैकशः पूर्व्वस्मात् पूर्व्वस्मादुत्तरेण दशांशाधिकांशेन दैर्घ्य एव ह्रसन्ति ॥ ९ ॥ एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः । अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासङ्ख्यम् ॥ १० ॥ तथैवेलावृतमपरेण पूर्व्वेण च माल्यवद्गन्धमादनावानीलनिषधायतौ द्विसहस्रं पप्रथतुः केतुमालभद्राश्वयोः सीमानं विदधाते ॥ ११ ॥ मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नाहा मेरोश्चतुर्द्दिशमवष्टम्भगिरय उपक्लृप्ताः ॥ १२ ॥ चतुर्ष्वेतेषु चूतजम्बूकदम्बन्यग्रोधाश्चत्वारः पादपप्रवराः पर्व्वतकेतव इवाधिसहस्रयोजनोन्नाहास्तावद्विटपविततयः शतयोजनपरिणाहाः ॥ १३ ॥ ह्रदाश्चत्वारः पयोमध्विक्षुरसमृष्टजलाः । यदुपस्पर्शिन उपदेवगणा योगैश्वर्य्याणि स्वाभाविकानि भरतर्षभ ! धारयन्ति । देवोद्यानानि च भवन्ति चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्व्वतोभद्रमिति ॥ १४ ॥ येष्वमरपरिवृढ़ाः सह सुरललनाललामयूथपतय उपदेवगणैरुपगीयमानमहिमानः किल विहरन्ति ॥ १५ ॥ मन्दरोत्सङ्ग एकादशशतयोजनोत्तुङ्गदेवचूतशिरसो गिरिशिखरस्थूलानि फलान्यमृतकल्पानि पतन्ति ॥ १६ ॥ तेषां विशीर्य्यमाणानामतिमधुरसुरभिसुगन्धिबहुलारुणरसोदेनारुणोदा नाम नदी मन्दरगिरिशिखरान्निपतन्ती पूर्व्वेणेलावृतमुपप्लावयति ॥ १७ ॥ यदुपजोषणाद्भवान्या अनुचरीणां पुण्यजनवधूनामवयवस्पर्शसुगन्धवातो दशयोजनं समन्तादनुवासयति ॥ १८ ॥ एवं जम्बूफलानामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानां रसेन नदी जम्बू नाम नदी मेरुमन्दरशिखरादयुतयोजनादवनितले निपतन्ती दक्षिणेनात्मानं यावदिलावृतमुपस्यन्दति ॥ १९ ॥ तावदुभयोरपि रोधसोर्या मृत्तिका तद्रसेनानुविध्यमाना वाय्वर्कसंयोगविपाकेन सदामरलोकाभरणं जाम्बूनदं नाम सुवर्णं भवति ॥ २० ॥ यदु ह वाव विबुधादयः सह युवतिभिर्मुकुटकटककटिसूत्रकुण्डलाद्याभरणरूपेण खलु धारयन्ति ॥ २१ ॥ यस्तु महाकदम्बः सुपार्श्वपार्श्वनिरूढ़स्तस्य कोटरेभ्यो विनिःसृताः पञ्चायामपरिणाहाः पञ्च मधुधाराः सुपार्श्वशिखरात् पतन्त्योऽपरेणात्मानमिलावृतमनुमोदयन्ति । या ह्युपयुञ्जानानां मुखनिर्व्वासितो वायुः समन्ताच्छतयोजनमनुवासयति ॥ २२ ॥ एवं कुमुदनिरूढ़ो यः शतवल्शो नाम वटस्तस्य स्कन्धेभ्यो नीचीनाः पयोदधिमधुघृतगुड़ान्न-

द्याम्बरशय्यासनाभरणादयः सर्व एव कामदुघा नदाः कुमुदाग्रात् पतन्तस्तमुत्तरेणेलावृतमुपयोजयन्ति । यानुपजुषाणानां न कदाचिदपि प्रजानां वलीपलितक्लमस्वेददौर्गन्ध्यजरामयापमृत्युशीतोष्णवैवर्ण्योपसर्गादयस्तापविशेषा भवन्ति । यावज्जीवं सुखं निरतिशयमेव कुरङ्गकुररकुसुम्भवैकङ्कत्रिकूटशिखरपतङ्गरुचकनिषधशितिवासःकपिलशङ्खवैदूर्य्यजारुधिहंसर्षभनागकुञ्जरनीरदादयो गिरयो मेरोः कर्णिकाया इव केशरभूतामूलदेशे परित उपक्लृप्ताः ॥ २३ ॥ जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रपृथुतुङ्गौ भवतः । एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ । एवमुत्तरतः त्रिशृङ्गमकरौ अष्टाभिरेभिः परिसृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः । मेरोर्मूर्द्धनि भगवत आत्मयोनेर्मध्यत उपक्लृप्तां पुरीमयुतयोजनसाहस्रीं समचतुरस्रां शातकौम्भीं वदन्ति ॥ २४ ॥ तामनुपरितो लोकपालानामष्टानां यथादिशं यथारूपं तुरीयमानेन पुरोऽष्टावुपक्लृप्ताः” ॥ २५ ॥ १६अ०

“तत्र चतुर्द्धा विभज्यमाना चतसृभिर्नामभिश्चतुर्दिशमभिस्पन्दन्ती नदनदीपतिमेवाभिनिविशति । सीताऽलकनन्दा चक्षुर्भद्रेति ॥७॥ सीता तु ब्रह्मसदनात् केशराचलादिशिखरेभ्योऽधोऽधः प्रस्रवन्ती गन्धमादनमूर्द्धसु पतित्वान्तरेण भद्राश्वं वर्षं प्राच्यां दिशि क्षारसमुद्रमभिप्रविशति ॥८॥ एवं माल्यवच्छिखरान्निष्पतन्ती तत उपरतवेगा केतुमालमभि वङ्क्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति ॥९॥ भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरिशिखराद्गिरिशिखरमतिहाय शृङ्गवतः शृङ्गादवस्यन्दमाना उत्तरांस्तु कुरूनभित उदीच्यां दिशि लवणार्णवं प्रविशति ॥१०॥ तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटानि अतिक्रम्य हेमकूटहिमकूटान्यतिरभसतररंहसा लुठन्ती भारतमभि वर्षं दक्षिणस्यां दिशि लवणजलधिमभिप्रविशति ॥११॥ अन्ये च नदानद्यश्च वर्षे वर्षे सन्ति बहुशो मेर्वादिगिरिदुहितरः शतशः । “अत्रापि भारतमेव वर्षं कर्म्मक्षेत्रम् ॥१२॥ अन्यान्यष्टवर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमस्वर्गपदानि व्यपदिशन्ति” ॥ १३ ॥ १७अ०

“भारतेऽप्यस्मिन्वर्षे सरिच्छैलाः सन्ति बहवः ॥ १६ ॥ मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लः सह्यो देवगिरिरृष्यमूकः श्रीशैलो वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्द्धनो रैवतः ककुभो नीलो गोकामुख इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसंख्याताः ॥१७॥ एतासामपो भारत्यः प्रजा नामभिरेव पुनन्तीनामात्मानं चोपस्पृशन्ति । चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेण्णा पयस्विनी शर्करावर्त्ताऽङ्गभद्रा कृष्णवेण्णा भीमरथी गोदावरी निर्व्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्म्मदा चर्म्मण्वती अन्धः शोणश्च नदौ महानदी वेदस्मृतिः ऋषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती गोमती सरयूरोघवती सप्तवती सुषमा शतद्रूश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः ॥१८॥ अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव सर्वेषां विधीयन्ते । यथावर्णविधानमपवर्गश्च भवति” ॥२०॥ १९अ०

“जम्बुद्वीपस्य च राजन्नुपद्वीपानष्टौ ह्येक उपदिशन्ति । सगरात्मजाश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान् । तद्यथा स्वर्णप्रस्थश्चन्द्रशुक्ल आवर्त्तनो रमणको मन्दहरिणः पाञ्चजन्यः सिंहलो लङ्केति” २०अ०। अत्रत्य जनपदाश्च जनपदशब्दे उक्ताः । भा० भी० ९ अ० । जम्बुद्वीपस्य नदीभेदा उक्ता यथा ।

“आर्य्या म्लेच्छाश्च कौरव्य ! तैर्मिश्राः पुरुषा विभो ! । नदीं पिबन्ति विपुलां गङ्गां सिन्धुं सरस्वतीम् । गोदावरीं नर्मदाञ्च बाहुदां च महानदीम् । शतद्रूं चन्द्रभागाञ्च यमुनाञ्च महानदीम् । दृषद्वतीं विपाशाञ्च विपापां स्थूलबालुकाम् । नदीं वेत्रवतीञ्चैव कृष्णवेण्णाञ्च निम्नगाम् । इरावतीं वितस्ताञ्च पयोष्णीं देविकामपि । वेदस्मृतां वेदवतीं त्रिदिवामिक्षुमालवीम् । करीषिणीं चित्रवहां चित्रसेनाञ्च निम्नगाम् । गोमतीं धूतपापाञ्च गण्डकीञ्च महानदीम् । कौशिकीं निश्चितां कृत्यां निचितां लोहतारिणीम् । सरयूञ्च रहस्यां च शतकुम्भां तथैव च । चर्मण्वतीं चन्द्रभागां हस्तिसोमां दिशं तथा । शरावतीं पयोष्णीञ्च परां भीमरथीमपि । कावेरीं चुलकाञ्चापि वेणां शतबलामपि । नीवारां महिताञ्चापि सुप्रयोगां जनाधिप ! । पवित्रां कुण्डलां सिन्धुं राजनीं पुरमालिनीम् । पूर्वाभिरामां वीराञ्च भीमामोघवतीं तथा । पलाशिनीं पापहरां महेन्द्रां पाट-

वाशतीम् । करीषिणीमसिक्नीञ्च कुशचीरां महानदीम् । मकरीं प्रवरां मेनां हेमां घृतवतीं तथा । पुरावतीमनुष्णाञ्च शैव्यां तापीञ्च भारत ! । सदानीरामधृष्याञ्च कुशधारां महानदीम् । सदाकान्तां शिवाञ्चैव तथा वीरवतीमपि । वास्तुं सुवास्तुं गौरीञ्च कम्पनां सहिरण्वतीम् । वरां वीरङ्कराञ्चापि पञ्चमीञ्च महानदीम् । रथचित्रां ज्योतिरथां विश्वामित्रां कपिञ्जलाम् । उपेन्द्रां बहुलाञ्चैव कुचीरां मधुवाहिनीम् । विनदीं पिञ्जलां वेणां तुङ्गवेणां महानदीम् । विदिशां कृष्णवेणाञ्च ताम्राञ्च कपिलामपि । शेलुं सुवामां वेदाश्वां हरिदश्वां महोपमाम् । शीघ्राञ्च पिच्छलाञ्चैव भारद्वाजीञ्च निम्नगाम् । कौशिकीं निम्नगां शोणां बाहुदामथ चन्द्रमाम् । दुर्गामन्त्रशिलाञ्चैव ब्रह्मबोध्यां बृहद्वतीम् । यवक्षामथ रोहीञ्च तथा जाम्बूनदीमपि । मनसां तमसां दासीं वसाञ्च वरणामसीम् । नालां धृतिमतीञ्चैव पूर्णाशाञ्च महानदीम् । तामसीं वृषाभाञ्चैव ब्रह्ममेध्यां बृहद्वतीम् । एताश्चान्याश्च बहुधा महानद्यो जनाधिप ! । सदानिरामयां कृष्णां मन्दगां मन्दवाहिनीम् । ब्रह्माणीञ्च महागौरीं दुर्गामपि च भारत ! । चित्रोपलां चित्ररथां मञ्जुलां वाहिनीं तथा । मन्दाकिनीं वैतरणीं कोशां चापि महानदीम् । शुक्तिमतीं सलिङ्गाञ्च पुष्पवेणूत्पलावतीम् । लोहित्यां करतोयाञ्च तथैव वृषकाह्वयाम् । कुमारीमृषिकुल्याञ्च मारिषाञ्च सरस्वतीम् । मन्दाकिनीन्तु पुण्याञ्च सर्वगङ्गाञ्च भारत ! । विश्वस्य मातरः सर्वाः सर्वाश्चैव महाफलाः । तथा नद्यस्त्वप्रकाशाः शतशोऽथ सहस्रशः । इत्येताः सरितो राजन् ! समाख्याता यथास्मृति" । अन्याः काश्चित् नद्यः कालिकापुराणोक्तास्तच्छब्दे २०१२ पृ० दर्शिताः । जम्बुद्वीपस्था जनपदाश्च भा०भी०७अ० उक्ताः जनपदशब्दे २०२०पृ०दर्शिताः । कूर्म्मविभागशब्दे च तत्स्थानञ्चोक्तम् ।

२जम्बु(म्बू)द्वीपाकारसंनिवेशयुक्ते दातव्यद्रव्यभेदे तद्विधानादि हेमा० दा० ख० ब्रह्माण्डपु०

"शृणु देवि ! महादानं जम्बु(म्बू)द्वीपाह्वयन्तु तत् । यथाह भगवानद्य पद्मयोनिर्जनार्दनः । पुण्येऽह्नि पुण्यनक्षत्रे पुण्यकाले तु सर्वतः । विषुवत्ययनादौ च ग्रहणे चन्द्रसूर्य्ययोः । व्यतीपातेऽथ वा कुर्य्याज्जन्मर्क्षे वा विशेषतः । अष्टम्यां पञ्चदश्यां वा नित्यं वा दानमाचरेत् । पुण्यदेशेषु सर्वेषु नदीदेवालयादिषु । दानं गृहे वा दातव्यं श्रद्धा वा यत्र जायते । विप्रन्तु वेदविद्वांसं गुरुं सम्पूज्य यत्नतः । भूलेपनादि यत्कार्य्यं सर्वं विप्रेण कारयेत् । विलेपयेत्सर्वभूमिं गोमयेन सवारिणा । तत्र विंशतिहस्तन्तु लेपयेत्परिमण्डलम् । लवणेनोदधिं तत्र परितः परिकल्पयेत् । प्रादेशमात्रं विस्तारादष्टद्रोणेन पार्व्वति ! । तत्राक्षतान्विकिरेत् श्वेतपुष्पैः समन्ततः । तन्मध्ये कारयेन्मेरुं धान्यभारत्रयेण वै । मेरुर्महाव्रीहिमयस्तु मध्ये सुवर्णकल्पद्रुमसंयुतः स्यात् । पूर्वेण मुक्ताफलवज्रयुक्तो याम्येन गोमेदकपुष्परागैः । पश्चाच्च गारुत्मतनीलरत्नैः सौम्येन वैदूर्य्यसरोजरागैः । श्रीखण्डखण्डैरभितः प्रवाललतान्वितः शुक्तिशिलातलः स्यात् । शुक्लाम्बराण्यम्बुधरावली स्यात् पूर्वेण पीतानि च दक्षिणे तु । वासांसि पश्चादथ कर्बुराणि रक्तानि चैवोत्तरतोघनाली । ब्रह्मा तु मध्ये कमलासनस्थश्चतुर्मुखः काञ्चननिर्म्मिताङ्गः । चतुर्भुजश्चात्र निवेशनीयो दधत् स्रुचं चात्र कमण्डलुञ्च । तथाक्षसूत्रं जपसाधनञ्च कृष्णाजिनं चोपवीतं च बिभ्रत् । गङ्गां चतुर्द्धा पतितां निधाय चतुर्दिशं चोदकपूर्णरूपाम् । रौप्यान्महेन्द्रप्रभृतीनथाष्टौ संस्थाप्य लोकाधिपतीन् क्रमेण । नानाद्विजौघानि च राजतानि मृगाश्च सर्वत्र निवेशनीयाः । पूर्वेण मन्दरगिरिर्यवतण्डुलाभ्याम् शुक्लाम्बरेण परितः परिवेष्टितान्तः । वृक्षेण काञ्चनमयेन वृषेण तद्वद्रौप्येण वृक्षमृगपक्षियुतो विधेयः । याम्येन गन्धमदनोऽत्र गिरिस्तु कार्य्यो मुद्गैश्च जम्बुतरुणा च हिरण्मयेन । हैमेन यक्षपतिना च विराजमानः पीताम्बरेण परितः परिवेष्टितश्च । पश्चात्तिलाचलमथोपरि कर्बुराभम् वासः सपिप्पलहिरण्मयहंसयुक्तम् । आकारयेद्विपुलमत्र सुगन्धपुष्पम् रौप्येण शक्तिघटितेन विराजमानम् । संस्थाप्य तं विपुलशैलमथोत्तरेण शैलं सुपार्श्वमपि माषमयं सुवस्त्रम् । न्यग्रोधवृक्षमपि हेममयं सधेनुम् रौप्यैश्च शक्तिघटितैश्च शुभं विधाय । मेरोश्च पुष्पाभरणञ्च कार्य्यम् घृतोदकं प्रस्रवणञ्च दिक्षु । क्षीराज्यदध्ना मधुना सरांसि प्रागादि तेषां च यथाक्रमेण । हेमाद्रिकूटनिषधौ क्रमशश्च याम्ये सौम्ये च नीलसितशृङ्गयुतौ क्रमेण । प्रादेशमात्रं परिनिःसृतास्ते प्रागायताश्च परिवस्त्रयुताश्च सर्वे । प्रत्येकमत्र वसनच्छदपर्वतानाम् भारेण धान्यपरिमाणमुशन्ति सन्तः । शक्राग्रा च रौप्यमृगपक्षियुताश्च सर्वे सौगन्धिपुष्पफलवस्त्रयुगा विधेयाः ।

ऽऽनीलनिषधायामौ माल्यवद्गन्धमादनौ । तेषां मध्यगतो मेरुस्तौ च धान्यविनिर्मित । निषधः पारिपात्रश्च मर्य्यादापर्वताविमौ । मेरोः पञ्चमभागेन यथा तौ गन्धमादनौ । गन्धमादनशैलोऽसौ पूर्वपश्चाद्यथाविधौ । श्वेततण्डुलनिर्माणौ दक्षिणोत्तरतः स्थितौ । सितान्तःप्रमुखाः सर्वे दक्षिणे ककुभादयः । शङ्खकूटादयश्चैव उत्तरे परिकीर्त्तिताः । तांस्तीन् केशरशैलांश्च कृत्वा धान्यमयान् शुभान् । वस्त्रैरावेष्ट्य शैलेन्द्रं मेरुमन्यांश्च वेष्टयेत् । दक्षिणं भारतं वर्षं तत् किंपुरुषसंष्टतम् । हरिवर्षं ततः प्रोक्तं मेरोर्दक्षिणतस्ततः । इलावृतं वृतं मेरोश्चतुर्थं वृषभं तथा । रम्यं हिरण्मयं तस्मात् कुरवश्चेति चोत्तराः । भद्राश्वः केतुमालश्च पूर्वपश्चिमतः स्थितौ । प्रोक्तानि नव वर्षाणि जम्बुद्वीपे तु नामतः । हिमाद्रिमध्ये देवेशं श्रियञ्च विनिवेशयेत् । प्रसादाभिमुखावेतौ काञ्चनेन विनिर्मितौ । शङ्ख-चक्र-गदापाणिं पीतवाससमच्युतम् । किरीट-केयूर-धरं श्रीवत्साङ्कितवक्षसम् । पद्मासने समासीनां पद्महस्तां सुलोचनाम् । प्रसन्नवदनां देवीं तस्य दक्षिणतोन्यसेत् । कैलासमध्यतो माञ्च त्वां चैव विनिवेशयेत् । मां च शङ्करनामानं त्वां च गौरीं वरानने ! । चतुर्भुजं वृषस्थञ्च जटिलं चन्द्रमौलिनम् । खट्टाङ्गशूल-वरदाभय-हस्तञ्च मां न्यसेत् । मदुत्सङ्गगतां त्वां च दर्पणेन्दीवरान्विताम् । भद्रासने भगवन्तं हयरूपमुखं हरिम् । सौवर्णं स्थापयेद्देवं भारते कूर्म्मरूपिणम् । वाराहं केतुमाले वै मत्स्यं कुरुषु चोत्तरे । सौवर्णानथ वा रौप्यान् स्थापयेत्तु यथाक्रमम् । एवं जम्बाह्वयं द्वीपं कृत्वा चैव यथाविधि । अर्घपाद्यासनं स्नानं यथावत् स्थापनं क्रमात् । ब्रह्मादयस्तथा देवाः शैलाः कल्पद्रुमास्तथा । स्वनाममन्त्रैः पूजार्हा नमस्कारान्तदीपितैः । गन्ध-पुष्प-नमस्कार-धूप दीप-फलै-स्तथा । अथोपहरणाद्यैश्च पूजयित्वा प्रयत्नतः । भद्राश्ववर्षे होमन्तु सर्पिषा च समाचरेत् । स्वनाममन्त्रैर्होतव्यं स्वाहाकारसमायुतैः । दशोत्तरशतं हुत्वा ब्रह्मणे मेरवे तथा । इतरेषाञ्च सर्व्वेषामष्टोत्तरशताहुतीः । स्नानार्थं यजमानस्य पुरतः कलशन्न्यसेत् । आढ़कोदरपूर्णन्तु सकूर्चं वस्त्रवेष्टितम् । गन्धाः सुमनसस्तस्य कुशाग्राण्विनिवेशयेत् । याश्च श्रेयो विधास्यन्ति ताश्चात्रावाहयेत्ततः । गङ्गाद्याः सरितः [illegible] समुद्राश्च सरांसि च । आयान्तु यजमानस्य दुरितक्षयकारकाः । इत्यावाह्य ततस्तस्य कलशं विमलोदकम् । अभ्यर्च्य गन्धपुष्पाद्यैः स्थापयेत् प्रीतिपूर्वकम् । स्नापयेत् प्राङ्मुखं तत्र दातारं कलशोदकैः । ऋग्भिर्वरुणदेवीभिः पावमानीभिरेव च । दानकाले च सम्प्राप्ते दाता नारी नरोऽथवा । स्नापितो गुरुणा तेन सार्द्धं दानं समाचरेत् । त्रिः प्रदक्षिणमावृत्य गृहीतकुसुमाञ्जलिः । प्रत्येकं पर्व्वतान् सर्व्वान् प्रणिपातपुरःसरम् । मध्यमं गुरवे दद्यादिमं मन्त्रमुदीरयेत् । अन्यश्चै वा प्रदातव्यं तस्यानुज्ञामवाप्य च । यथा च भूरादिसमस्तलोकास्त्वयि स्थिता भूधरराज ! नित्यम् । अमी सुरासुरा लोकनाथा ब्रह्मादयो देवगणाश्च नित्यम् । त्वत्सम्प्रदानादहमप्यशेषैः पापैर्विमुक्तस्तु यथा भवेयम् । श्रेयस्तथा पर्वतराज ! मह्यं कुरु प्रभो ! देववरैश्च सार्द्धम् । इतीदमुक्त्वा प्रददेत्तु मेरुं सकाञ्चनं राजतवस्त्रयुग्मम् । प्रत्येकमेकं द्विजपुङ्गवानाम् प्रागादि दद्यादितरान् क्रमेण । सुरासुराणामस्तार्थकृत्यैः त्वया कृतं मन्दरशैल ! सत्य ! । तथा च मां रक्ष च सर्वतस्त्वं तव प्रसादाद्विरजा यथाहम् । गन्धाद्रिमादन इतीरितभूवरेन्द्र ! वेदोदितस्य गरुड़ाय नमोऽस्तु तुभ्यम् । त्वत्सम्प्रदानहतपापसमस्तदोषं छायाधिशैलवर रक्ष च मामजस्रम् । देवालयाय विपुलाय नमोऽचलाय हंसाय वेदपुरुषाय नमोऽच्युताय । युष्मत्प्रदाननिहताखिलपापराशिं हंसेन सार्द्धममराचल ! पाहि मां त्वम् । वन्दे सुपार्श्वममराचलमप्रमेयन्धेनुञ्च देवसुरभिं प्रणतोऽस्मि नित्यम् । त्वद्दानभक्तियुतसत्क्रिययाहमद्य त्वामेव यामि शरणार्थमवेहि मां त्वम् । श्रीवत्सवक्ष-मनादिमजं समस्तलोकाधिपं सकलकारणमच्युतञ्च । नारायणं शरणमेमि धराधरेन्द्रैः सार्द्धं श्रिया हिमवतः स्थितिमादिमीड़े । देवाय देवगणपूजितपादपद्मयुग्माय भक्तजनदुःखविनाशनाय । कैलासशैलनिलयाय भवाय नित्यं गौरीप्रियाय वरदाय नमः शिवाय । चक्री त्वनादिनिधनः शरणागतं माम् भद्राश्वनामनि गतो हरिरच्युतोऽसौ । आस्ते घनाघनवपुः सनकादियोगिपूगैरभिष्टुतपुरातनकीर्त्तियुक्तः । मध्ये महार्णवहिमाचलयोर्निषण्णं कूर्माकृतिं शरणमेमि भवाभवाय । पारावरं मथितमत्र सदा दधाति यस्तं नमामि हरपूजितमप्रमेयम् । वाराहरूपिणमनन्तमनन्तकेठम् लोकस्वरूपिणमनेकशिरोऽक्षिपादम् । वन्दे महीधरमनेव-

मपारकीर्त्तिं यश्चेश्वमेभि शरणं हरमीशितारम्। देयस्तथोत्तरकुरुष्वपि नित्यमास्ते भक्तः सुरेन्द्रगणपूजितपादपद्मः। रक्षस्वशेषजगतां पतिरच्युतोऽसौ संसारदुःखचलितं शरणागतं माम्। उक्त्वैवमात्मधननाशनदानमन्त्रं प्रत्येकमेकं द्विजपुङ्गवानाम्। भुक्त्वा शुभानि मनसेच्छति यानि वासौ गच्छेद्व यत्र न निवर्त्तयतीह मर्त्त्यः। गुरवे दक्षिणां दद्यात् सुवर्णञ्चैव वाससी। यानोपकरणं सर्वं गुरवे विनिवेदयेत्। इत्याह भगवान् प्रीतः पार्व्वत्याः परमेश्वरः। अहमप्यनुवं सर्वं युष्माकं मुनिसत्तमाः!।"

जम्बूनदी स्त्री जम्बूफलरसजाता नदी। १जम्बूफलरसजाते नदीभेदे जम्बूद्वीपशब्दे ३०४२ पृ० विवृतिः। २ब्रह्मलोकात् प्रवर्त्तमानासु सप्तसु नदीषु मध्ये नदीभेदे च "ब्रह्मलोकादपक्रान्ता सप्तधा प्रतिपद्यते। वस्वोकसारा१ नलिनी२ पावनी च सरस्वती३। जम्बूनदी४ च सीता५ च गङ्गा६ सिन्धुश्च७ सप्तमी" भा० भी० ६अ०।

जम्बूमार्ग न० पुष्करस्थे तीर्थभेदे पुष्करोपक्रमे "प्रदक्षिणमुपावृत्य जम्बूमार्गं समाविशेत्। जम्बूमार्गं समाविश्य देवर्षिपितृसेवितम्। अश्वमेधमवाप्नोति सर्व्वकामसमन्वितः। तत्रोष्य रजनीः पञ्च पूतात्मा जायते नरः। न दुर्गतिमवाप्नोति सिद्धिं प्राप्नोति चोत्तमाम्। जम्बूमार्गादुपावृत्य गच्छेत्तण्डुलिकाश्रमम्" भा० व० ८२ अ०। "जम्बूमार्गं त्रिभिर्मासैः संयतः सुसमाहितः" भा०अनु० २५अ०। "जम्बूमार्गं गमिष्यामि जम्बूमार्गे वसाम्यहम्। एवं सङ्कल्पयानोऽपि ब्रह्मलोके महीयते" हरिव० १४१अ०।

जम्बूल पु० जम्बूं तन्नामफलं लाति ला—क। १जम्बूवृक्षे २केतकवृक्षे च मेदि०। "जम्बूजम्बूलवृक्षाद्यं कदुकन्दरभूषितम्" हरिवं० ९७अ०। ३वरकन्यापक्षयोः परिहासवचने न० नीलकण्ठः।

जम्बूलमालिका स्त्री ६त०। १वरकन्यापक्षयोः परिहासवचनसमूहे। "आशीभिर्वर्द्धयित्वा च देवर्षिः कन्यामब्रवीत्। अनिरुद्धस्य वीर्य्याढ्यो विवाहः क्रियतां विभो!। जम्बूलमालिकां द्रष्टुं श्रद्धा हि मम जायते। ततः प्रहसिताः सर्वे नारदस्य वचःश्रवात्" हरिव० १८८अ०। "जम्बूलमालिका कन्यावरयोर्हासचन्द्रिका" हारावल्युक्तार्थकतया जटा०त०व्याख्यानात् २तदर्थे च।

जम्बू(म्बु)वनज न० जम्बुवन इव जायते जन—ड ७त०। श्वेतजवापुष्पे। "पारिभद्रं पाटला च मल्लिका गिरिशालिनी। तिलकं जम्बुवनजं पीतकं तगरन्त्वपि। एतानि हि प्रशस्तानि कुसुमान्यच्युतार्च्चने" वामन पु०

जम्बूवृक्ष पु० कर्म्म०। जम्बूनामके (जामगाछ) वृक्षे स च वृहत्क्षुद्रभेदेन द्विविधः यथाह भाव०प्र०

"फलेन्द्रा कथिता नन्दी राजजम्बूर्महाफला। तथा सुरभिपत्रा च महाजम्बूरपि स्मृता। राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम्। क्षुद्रजम्बूः सूक्ष्मपत्रा नादेयी जलजम्बुका। जम्बूः संग्राहिणी रूक्षा कफपित्तास्रदाहजित्"।

जम्भ पु० जम—अच्—नुम्। १दैत्यभेदे। करणे घञ्। २दन्ते कर्म्मणि घञ्। ३जम्बीरे। भावे घञ्। ४भक्षणे मेदि०। कर्म्मणि घञ्। ५अंशे। करणे घञ्। तूणे ६हनौ च हेमच०। जम्भदैत्यश्च महिषासुरपिता। स च इन्द्रात् पराजयमासाद्य महादेवं प्रसाद्य त्रैलोक्यविजयिपुत्ररूपवरप्राप्तौ स्वगृहे गमनात् प्रागेव नारदोपदेशात् इन्द्रेण युद्धायाहूतः स्नानच्छलेन सरोऽवगाहकाले महिषीं दृष्ट्वा तस्यां गर्भमाधाय इन्द्रेण युद्धं कृतवान् तेन निपातितश्च तत्कथा मार्क० पु० दृश्या। कालिकापु० ६१अ० तस्य रम्भेतिनामेति भेदः। अन्योऽपि तन्नामाऽसुरो विष्णुनाहतो यथोक्तं भा० व० १०२ अ०। "असुरश्च महेष्वासो जम्भ इत्यभिविश्रुतः। यज्ञच्छिद्रकरः क्रूरस्त्वयैव विनिपातितः" हरिं प्रति देवानामुक्तिः। ७राक्षसचरभेदे "पर्वणः पतनो जम्भः खरः क्रोधवशो हरिः। प्ररुजश्चारुजश्चैव प्रघसश्चैवमादयः। ततोऽभिपततां तेषामदृश्यानां दुरात्मनाम्। अन्तर्धानवधं तज्ज्ञश्चकार स विभीषणः" भा०व० २८४ अ०। ८भक्ष्ये सि०कौ०। तत्र भक्षणे "इति ते कथयन्ति स्म ब्राह्मणा जम्भसाधकाः" भा०उ०६२अ०। दन्ते "इमं जम्भसुतं पिबः" ऋ० ८।९१।२। "जम्भसुतं दन्तैरभिषुतम्" भा०। सुजम्भा हरितजम्भा। जभि—जृम्भायां भावे घञ्। ९जृम्भायाञ्च। "जम्भा सुहरिततृणसोमेभ्यः" पा० बहुव्रीहौ अनिच् समा०। सुजम्भा हरितजम्भा तृणं जम्भो भक्ष्यं यस्य तृणजम्भा सोमजम्भा। स्वार्थे क। जम्भक तत्रार्थे जभ—ण्वुल्। जम्भक भक्षके त्रि०। [जम्भिकाप्यत्र।

जम्भका स्त्री जम्भैव स्वार्थे क। जृम्भायां राजनि०। पक्षे

जम्भग पु० जम्भाय भक्षणाय गच्छति गम—ड। राक्षसभेदे। "देवा यक्षास्तथा नागा गन्धर्वोरगराक्षसाः। क्रूराः

सर्पाः सुपर्णाश्च तरवो जम्भगाः खगाः” तर्पणमन्त्रः ।

जम्भद्विष् पु० जम्भमसुरं द्वेष्टि द्विष–क्विप् । इन्द्रे हेमच० ।

जम्भभेदिन् पु० जम्भमसुरं भिनत्ति भिद–णिनि ६त० । इन्द्रे अमरः जम्भरिपुप्रभृतयोऽप्यत्र । मार्क० पु० तन्मूलं दृश्यम् ।

जम्भर पु० जम्भं भक्षणरुचिं राति ददाति रा–क । १जम्बीरे शब्दच० । वा रस्य नः । जम्भल १तदर्थे २बुद्धभेदे च मेदि० । ३राक्षसीभेदे स्त्री । “समुद्रस्योत्तरे तीरे जम्भला नाम राक्षसी । तस्याः स्मरणमात्रेण विशल्या गर्भिणी भवेत्” ज्यो० त० ।

जम्भा स्त्री जभि–जृम्भायां भावे अ । जृम्भायां राजनि० ।

जम्भारि पु० जम्भस्य भक्ष्यस्य असुरभेदस्य वा अरिः । १वह्नौ २वज्रे च विश्वः ३इन्द्रे च । “जम्भारिदम्भोलयः” नैष० ।

जम्भिन् पु० जभ–णिनि नुम् । १जम्बीरे शब्दच० तदर्थे न० हेमच० । २जृम्भायुक्ते त्रि० । [२मरुवके भरतः ।

जम्भीर पु० जभ–गम्भीरा०ईरन् नुम् च । १जम्बीरे अमरः

जम्भ्य पु० जम्भ एव स्वार्थे यत् जभ–कर्म्मणि ण्यत् वा दन्ते । “यस्तद्दर्शपूर्णमासयोर्विद्यस्मादिमाः प्रजा अदन्तका जायन्ते यस्मादासां जायन्ते यस्मादासां प्रभिद्यन्ते यस्मादासां संतिष्ठन्ते यस्मादासां पुनरुत्तमे वयसि सर्व एव प्रभिद्यन्ते यस्मादधर एकाग्रे जायन्तेऽथोत्तरे यस्मादणीयांस एवाधरे प्रथीयांस उत्तरे यस्माद्दंष्ट्रा वर्षीयसी यस्मात् समा एव जम्भ्याः” शत०ब्रा०११।४।१।५। “दंष्ट्राभ्यां मलिम्लून् जम्भ्यैस्तस्करान्” यजु०११।७८ “दन्ता जम्भ्याः जम्भावर्तिमाश्रिता जम्भ्याः” २वेददीपोक्तार्थे च ।

जय पु० जि–भावे अच् । परापेक्षया १उत्कर्षलाभे (जित हओया) २वशीकरणे इन्द्रियजयः । “मौनं सदासनजयः स्थैर्य्यं प्राणजयः शनैः” भाग०३२८।६ । ३शत्रुपराङ्मुखीकरणे ४संग्रामादिजये । “सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः । विभागः संप्रयोगश्च सत्प्रतिग्रह एव च” मनुना तस्य धर्म्यस्वत्वहेतुत्वमुक्तं तच्च क्षत्रियस्यैव “स्वामी ऋक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोरिति” गौतमस्मृतेः । “जयो रन्ध्रप्रहारिणाम्” रघुः । “समदुःखसुखे कृत्वा लाभालाभौ जयाजयौ” गीता । जि–कर्त्तरि अच् । ५परमेश्वरे पु० तस्य सर्वभूतजयित्वात् तथात्वं “नयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः” विष्णुस० । ६जयन्ते इन्द्रपुत्रे असुरजयात्तस्य तथात्वम् ७युधिष्ठिरे क्रोधजयात् गुह्यतन्नामकत्वाद्वा तस्य तथात्वम् । विराटनगरे छद्मवेशेन स्थायिनः युधिष्ठिरस्य यथा गुह्यं तन्नाम तथोक्तं “जयोजयन्तो विजयो जयत्सेनो जयद्बलः । इति गुह्यानि नामानि तेषां चक्रे युधिष्ठिरः” भा०वि०५अ० । ८अग्निमन्थवृक्षे रोगजयात्तस्य तथात्वम् । ९दानवभेदे “जयो निकुम्भः कुपथश्च दानवो ररक्षुरेते दशदानवाधिपम्” हरिवं० २४२अ० । १०विश्वामित्रसुतभेदे । “मधुच्छन्दा जयश्चैव देवलश्च तथाष्टकः । कच्छपो हारितश्चैव विश्वामित्रस्य ते सुताः” २७अ० । ११सोमवंश्ये सृञ्जयनृपपुत्रभेदे “ऐलपुत्रा बभूवुस्ते सप्त देवसुतोपमाः । दिविजाता महात्मान आयुर्धीमानमावसुः” इत्युपक्रमे “आयोः स्वर्भानुतनयापुत्रास्तथा पञ्च सर्वे वीरा महारथाः । नहुषः प्रथमं यज्ञे वृद्धशर्म्मा ततः परम् । रम्भो रजिरनेनाश्च त्रिषु लोकेषु विश्रुतः” इति आयुपुत्रभेदानुक्त्वा “अनेनसः सुतो राजा प्रतिक्षत्रो महायशाः । प्रतिक्षत्रसुतश्चापि सृञ्जयो नाम विश्रुतः । सृञ्जयस्य जयः पुत्रो विजयस्तस्य चात्मजः” हरिवं०२९अ० । ऐलस्योर्वशीगर्भजाते १२सुतभेदे । “ऐलस्य चोर्वशीगर्भात् षडासन्नात्मजा नृप ! । आयुः श्रुतायुः सत्यायू रयो ह विजयो जयः” भाग० ९।१५।१ । दशमे ब्रह्मसावर्णिमन्वन्तरे १३द्विजभेदे “दशमो ब्रह्मसावर्णिरुपश्लोकसुतो महान् । तत्सुता भूरिसेनाद्या हविष्मत्प्रमुखा द्विजाः । हविष्मान् सुकृतः सत्यो जयो मूर्त्तिस्तदा द्विजाः” भाग० ८।१३।१० । १४जनकवंश्ये मैथिले नृपभेदे । “जन्मना जनकः सोऽभूत् वैदेहस्तु विदेहजः । मिथिलो मथनाज्जातो मिथिला येन निर्म्मिता” इत्युपक्रमे “श्रुतस्ततो जयस्तस्माद्विजयोऽस्मादृतः सुतः” भाग०९।१३।१६ । सोमवंश्ये १५सृञ्जयसुते १६सङ्कृतिनृपसुते च । “कुशात् प्रतिक्षत्रवृद्धात् सृञ्जयस्तत्सुतो जयः ; ततः सुतः कृतस्यापि जज्ञे हर्य्यश्ववान् नृपः । सहदेवस्ततोऽहीनो जयत्सेनस्तु तत्सुतः । सङ्कृतिस्तस्य च जयः क्षत्रधर्म्मा महारथः” भाग० ९।१७।१० । अत्र जयस्य द्विधा कीर्त्तनात् तद्वंशे द्वौ जयौ ।१७इक्ष्वाकुवंश्ये विजननन्दननृपभेदे हेम० । १८विष्णुदौवारिकभेदे । जयविजयौ हि विष्णुद्वारपौ भगवद्दिदृक्षया वैकुण्ठगतान् नग्नान् सनकादीन् भगवदभ्यन्तरे गमनाय निवार्य्य वेत्रेण ताडयन्तौ तैरभिशप्तौ हिरण्याक्षाद्यसुरभावेन जातौ तत्कथा भाग० ३।१६ अ० ।

“मानसात्मसुता युष्मत्पूर्वजाः सनकादयः। चेरुर्विहा-
यसा लोकान् लोकेषु विगतस्पृहाः। त एकदा भगवतो
वैकुण्ठस्यामलात्मनः। ययुर्वैकुण्ठनिलयं सर्वलोकनमस्कृतम्”
इत्युपक्रमे।

“तस्मिन्नतीत्य मुनयः षडसज्जमानाः कक्षाः समान-
वयसावथ सप्तमायाम्। देवावचक्षत गृहीतगदौ
परार्द्ध्य केयूरकुण्डलकिरीटविटङ्कवेशौ। मत्तद्विरेफ
वनमालिकया निवीतौ विन्यस्तया सितचतुष्टयबाहु-
मध्ये। वक्त्रं भ्रुवा कुटिलया स्फुटनिर्गमाभ्यां रक्ते-
क्षणेन च मनाग्रभसं दधानौ। द्वार्य्येतयोर्निविविशु-
र्मिषतोरपृष्ट्वा पूर्वा यथा पुरटवज्रकपाटिकायाः। सर्वत्र
तेऽविषमया मुनयः स्वदृष्ट्या ये संचरन्त्यविहता
विगताभिशङ्काः। तान् वीक्ष्य वातरशनांश्चतुरः कुमा-
रान् वृद्धान् दशार्द्धवयसो विदितात्मतत्त्वान्। वेत्रेण
चास्खलयतामदतर्हणांस्तौ तेजो विहस्य भगवत्प्रति-
कूलशीलौ। ताभ्यां मिषत्स्वनिमिषेषु निषिध्यमानाः
स्वर्हत्तमा अपि हरेः प्रतिहारपाभ्याम्। ऊचुः
सुहृत्तमदिदृक्षितभङ्ग ईषत्कामानुजेन सहसा त
उपप्लुताक्षाः। श्रीमुनय ऊचुः। कोयाविहैत्य भगवत्-
परिचर्य्ययोच्चैस्तद्धर्मिणां निवसतां विषमस्वभावः।
तस्मिन् प्रशान्तपुरुषे गतविग्रहे वां कोवात्मवत्कुह-
कयोः परिशङ्कनीयः। नह्यन्तरं भगवतीह समस्तकुक्षा-
वात्मानमात्मनि नभो नभसीव धीराः। पश्यन्ति यत्र
युवयोः सुरलिङ्गिनोः किं व्युत्पादितं ह्युदरभेदि भयं
यतोऽस्य। यद्वा मनुष्यपरमस्य विकुण्ठभर्त्तुः कर्त्तुं
प्रकृष्टमिह धीमहि मन्दधीभ्याम्। लोकानितो व्रजत
मन्तरभावदृष्ट्या पापीयसस्त्रय इमे रिपवोऽस्य यत्र।
तेषामितीरितमुभाववधार्य्य घोरं तं ब्रह्मदण्डमनि-
वारणमस्त्रपूगैः। सद्यो हरेरनुचरावुरु बिभ्यतस्तत्-
पादग्रहावपततामतिकातरेण। भूयादघोनि भगवद्भि-
रकारि दण्डो यो नौ हरेत सुरहेलनमप्यशेषम्।
माधोऽनुतापकलया भगवत्स्मृतिघ्नो मोहो भवेदिह
तु नौ व्रजतोरधोधः। एवं तदैव भगवानरविन्द-
नाभः स्वानां विबुध्य सदतिक्रममार्य्यहृद्यः। तस्मिन्
ययौ परमहंसमहामुनीनामन्वेषणीयचरणौ चलयन्
सहश्रीः”। ततः कुमारैः भगवन्तं दृष्ट्वा कृतां तत्-
स्तुतिमुपवर्ण्योक्तम्।

“इति तद्गृणतां तेषां मुनीनां योगधर्मिणाम्। प्रति-
नन्द्य जगादेदं वैकुण्ठनिलयो विभुः। श्रीभगवानुवाच।
एतौ द्वौ पार्षदौ मह्यं जयो विजय एव च। कदर्थी-
कृत्य मां यद्वो बह्वक्रातामतिक्रमम्। यस्त्वेतयोर्धृतो
दण्डो भवद्भिर्मामनुव्रतैः। स एवानुमतोऽस्माभिर्मुनयो!
देवहेलनात्”। ततः कथाशेषो यथा

“श्रीभगवानुवाच। एतौ सुरेतरगतिं प्रतिपद्य सद्यः
संरम्भसम्भृतसमाध्यनुबद्धयोगौ। भूयः सकाशमुपया-
स्यत आशु यो वः शापो मयैव निमितस्तदवैत विप्राः!।
श्रीब्रह्मोवाच। अथ ते मुनयो दृष्ट्वा नयनानन्द-
भाजनम्। वैकुण्ठं तदधिष्ठानं विकुण्ठञ्च स्वयं-
प्रभम्। भगवन्तं परिक्रम्य प्रणिपत्यानुमान्य च।
प्रतिजग्मुः प्रमुदिताः शंसन्तो वैष्णवीं श्रियम्। भग-
वाननुगावाह यातं मा भैष्टमस्तुताम्। ब्रह्मतेजः सम-
र्थोऽपि हन्तुं नेच्छे मतन्तु मे। मयि संरम्भयोगेन
निस्तीर्य्य ब्रह्महेलनम्। प्रत्येष्यतं निकाशं मे कालेना-
ल्पीयसा पुनः। द्वाःस्थावादिश्य भगवान् विमान
श्रेणिभूषणम्। सर्वातिशयया लक्ष्म्या जुष्टं स्वन्धिष्ण्य-
माविशत्। तौ तु गीर्वाणऋषभौ दुस्तराद्धरिलोकतः।
हतश्रियौ ब्रह्मशापादभूतां विगतस्मयौ। तदा विकुण्ठ-
धिषणात्तयोर्निपतमानयोः। हाहाकारो महानासी-
द्विमानाग्र्येषु पुत्रकाः!। तावेव ह्यधुना प्राप्तौ पार्षद-
प्रवरौ हरेः। दितेर्जठरनिर्विष्टं काश्यपं तेज उल्व-
णम्। तयोरसुरयोरद्य तेजसा यमयोर्हि वः।
आक्षिप्तं तेज एतर्हि भगवांस्तद्विधित्सति”।
भाग० ३।१२ अ०—१६ अ०। जयति संसारमनेन। जि-
करणे अच्। १८भारतादौ ग्रन्थभेदे। “ब्रह्मचारिकाण्डे
भविष्यपुराणम् “अष्टादश पुराणानि रामस्य चरितं तथा।
विष्णुधर्म्मादिशास्त्राणि शिवधर्म्माश्च भारत!। कार्ष्णा-
ख्यं पञ्चमो वेदो यन्महाभारतं स्मृतम्। सौराश्च
धर्म्मा राजेन्द्र! मानवोक्ता महीपते!। जयेति नाम
एतेषां प्रवदन्ति मनीषिणः” इति “नारायणं नम-
स्कृत्य नरञ्चैव नरोत्तमम्। देवीं सरस्वतीञ्चैव ततो
जयमुदीरयेत्”सर्वपुराणारम्भे पाठ्यश्लोकः। २०दपणद्वारे
महे शब्दार्थचि०। षष्टिवर्षमध्ये अष्टाविंशतितमे २१वत्सरे।
तत्फलं यथा“क्षत्रियाश्च तथा वैश्याः शूद्राश्च नटनर्त्तकाः।
पीड़िताश्च वरारोहे! जये सर्वे न संशयः” ज्यो०त०।
जये कुशलः आकर्षा० कन्। जयक जयकुशले त्रि०।
२२कुमारानुचरनागभेदे। “प्रह्रादवह्निपुत्रस्य महापारि-

षदाशुभौ। जयं महाजयश्चैव नागौ ज्वलनसूनवे" भा०श०४६अ०। २३द्रुपदराजपुत्रभेदे "जघान सुरथं नाम द्रुपदस्य सुतं विभुः। पुनः शत्रुञ्जयं नाम सुरथस्यानुजं रणे। रथानीकं जयानीकं जयञ्चात्र निजघ्निवान्" भा० द्रो० १५६ अ०। २४अर्जुने "यदि नोत्तिष्ठति जयः पिता मे नरसत्तमः। अस्मिन्नेव रणोद्देशे शोषयिष्ये कलेवरम्" भा०आश्व० ८०अ०। मातरं प्रति बभ्रुवाहनोक्तिः। "इत्युक्त्वा सोऽब्रवीत् पुत्रं मणिपूरपतिं जयः" ८१अ०। २५धृतराष्ट्रपुत्रभेदे। "दुर्योधनप्रभृतयो युयुत्सुः करणास्तथा। ततो दुःशासनश्चैव दुःसहश्चैव भारत!। दुर्मर्षणो विकर्णश्च चित्रसेनोविविंशतिः। जयः सत्यव्रतश्चैव पुरुमित्रश्च भारत!। वैश्यापुत्रो युयुत्सुश्च एकादश महारथाः" भा० आ० ६३ अ०।

जयकोलाहल पु० जयस्य कोलाहलो यस्मिन्। १पाशकक्रीड़ाभेदे शब्दच०। ६त०। २जयध्वनौ।

जयढक्का स्त्री जयसूचिका ढक्का। वाद्यभेदे।

जयतीर्थ न० तीर्थभेदे शिवपु०।

जयत्सेन पु० १विराटनगरे छद्मवेशिनि नकुले पाण्डवे। जयशब्दे दृश्यम्। जयन्ती सेनाऽस्य। २विक्रान्तसैन्यके नृपे। ३मागधनृपभेदे। "मगधेषु जयत्सेनस्तेषामासीत् स पार्थिवः। अष्टानां प्रवरास्तेषां कालेयानां महासुराः" भा० आ० ६७ अ०। ४पुरुवंश्ये सार्वभौमाख्यनृपपुत्रे। "अहंयातिः खलु कृतवीर्य्यदुहितरमुपयेमे भानुमतीं नाम तस्यामस्य जज्ञे सार्वभौमः। सार्वभौमः खलु जित्वा जहार कैकेयीं सुनन्दां नाम तामुपयेमे तस्यामस्य जज्ञे जयत्सेनो नाम। जयत्सेनः खलु वैदर्भीमुपयेमे सुश्रुतां नाम तस्यामस्य जज्ञे अवाचीनः" भा० आ० ९५ अ०। ५सोमवंश्ये अहीननृपपुत्रे च। जयशब्दे मूलं दृश्यम्।

जयदत्त पु० इन्द्रपुत्रे जयन्ते हेमच०।

जयदुर्गा स्त्री दुर्गामूर्त्तिभेदे तन्मूर्त्तिलक्षणं तन्त्रसारे "कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां शङ्खं चक्रं कृपाणं त्रिशिखमपि (त्रिशूलम्) करैरुद्वहन्तीं त्रिनेत्राम्। सिंहस्कन्धाधिरूढ़ां त्रिभुवनमखिलं तेजसा पूरयन्तीं ध्यायेद् दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः"। अस्याः मन्त्रप्रयोगादिकं तत्रैव दृश्यम्।

जयदेव पु० गीतगोविन्दकाव्यकारके केन्दुविल्वग्रामवासिनि कविभेदे "भावं शृङ्गारसारस्वतमयजयदेवस्य विष्वग्वचांसि" गीतगो०

जयद्वल पु० विराटावासे छद्मवेशिनि पाण्डवे सहदेवे जयशब्दे दृश्यम्।

जयद्रथ पु० १पौरवे वृहन्मनसो नृपस्य यशोदेव्यां जाते पुत्रभेदे। तदुत्पत्तिकथा "वृहद्दर्भसुतो यस्तु राजा नाम्ना वृहन्मनाः। तस्य पत्नीद्वयञ्चासीद्वैनतेयसुते शुभे। यशोदेवी च सत्या च ताभ्यां वंशस्तु भिद्यते। जयद्रथस्तु राजेन्द्र! यशोदेव्यां व्यजायत" हरिवं० ३१अ०। सिन्धुदेशाधिपवृद्धक्षत्रसुते २राजभेदे। स च धृतराष्ट्रकन्यां दुःशलामुपयेमे। स च सौवीरदेशाधिपः "जयद्रथो नाम यदि श्रुतस्ते सौवीरराजः सुभगे! स एषः" भा०व०२६४ स च द्रौपदीं हृत्वा पलायमानो विजित्य भीमेन गृहीतो युधिष्ठिराज्ञया मुक्तश्च। ततो निर्वेदमासाद्य तपसा तोषितात् रुद्रतो वरं लेभे तत्कथा यथा

"जयद्रथस्तु संप्रेक्ष्य भ्रातरावुद्यतायुधौ। प्राधावत्तूर्णमव्यग्रो जीवितेप्सुः सुदुःखितः। तं भीमसेनो धावन्तमवतीर्य्य रथाद्बली। अभिद्रुत्य निजग्राह केशपक्षे ह्यमर्षणः। समुद्यम्य च तं भीमो निष्पिपेष महीतले। शिरो गृहीत्वा राजानं ताडयामास चैव ह। पुनः सञ्जीवमानस्य तस्योत्पतितुमिच्छतः। पदा मूर्द्ध्नि महाबाहुः प्राहरद्विलपिष्यतः। तस्य जानु ददौ भीमो जघ्ने चैनमरत्निना। स मोहमगमद्राजा प्रहारवरपीडितः। सरोषं भीमसेनं तु वारयामास फाल्गुनः। दुःशलायाः कृते राजा यत्तदाहेति कौरवः। भीम उवाच। नायं पापसमाचारो मत्तो जीवितुमर्हति। कृष्णायास्तदनर्हायाः परिक्लेष्टा नराधमः। किन्नु शक्यं मया कर्त्तुं यद्राजा सततं घृणी। त्वञ्च बालिशया बुद्ध्या सदैवास्मान् प्रबाधसे। एवमुक्त्वा सटास्तस्य पञ्च चक्रे वृकोदरः। अर्द्धचन्द्रेण बाणेन किञ्चिदब्रुवतस्तदा। विकत्थयित्वा राजानं ततः प्राह वृकोदरः। जीवितुञ्चेच्छसे मूढ़! हेतुं मे गदतः शृणु। दासोऽस्मीति त्वया वाच्यं संसत्सु च सभासु च। एवं ते जीवितं दद्यामेष युद्धजितो विधिः। एवमस्त्विति तं राजा कथ्यमाणो जयद्रथः। प्रोवाच पुरुषव्याघ्रं भीममाहवशोभिनम्। तत एनं विचेष्टन्तं बद्ध्वा पार्थो वृकोदरः। रथमारोपयामास विसंज्ञं पांशुगुण्ठितम्। ततस्तं रथमास्थाय भीमः पार्थानुगस्तदा। अभ्येत्याश्रममध्यस्थमभ्यगच्छद्युधिष्ठिरम्। दर्शयामास भीमस्तु तदवस्थं जयद्रथम्।

तं राजा प्राहसद्दृष्ट्वा मुच्यतामिति चाब्रवीत्। राजानञ्चाब्रवीद्भीमो द्रौपद्याः कथ्यतामिति। दासभावं गतो ह्येष पाण्डूनां पापचेतनः। तमुवाच ततो ज्येष्ठो भ्राता सप्रणयं वचः। मुञ्चेममधमाचारं प्रमाणं यदि ते वयम्। द्रौपदी चाब्रवीद्भीममभिवीक्ष्य युधिष्ठिरम्। दासोऽयं मुच्यतां राजंस्त्वया पञ्चसटः कृतः। स मुक्तोऽभ्येत्य राजानमभिवाद्य युधिष्ठिरम्। ववन्दे विह्वलो राजंस्तांश्च दृष्ट्वा मुनींस्तदा। तमुवाच घृणी राजा धर्म्मपुत्त्रो युधिष्ठिरः। तथा जयद्रथं दृष्ट्वा गृहीतं सव्यसाचिना। अदासो गच्छ मुक्तोऽसि मैवं कार्षीः पुनः पुनः। स्त्रीकामश्च धिगस्तु त्वां क्षुद्रः क्षुद्रसहायवान्। एवंविधं हि कः कुर्य्यात्त्वदन्यः पुरुषाधमः। गतसत्त्वमिव ज्ञात्वा कर्त्तारमशुभस्य तम्। संप्रेक्ष्य भरतश्रेष्ठः कृपाञ्चक्रे नराधिपः। धर्म्मे ते वर्द्धतां बुद्धिर्मा चाधर्म्मे मनः कृथाः। साश्वः सरथपादातः स्वस्ति गच्छ जयद्रथ!। एवमुक्तस्तु सव्रीडस्तूष्णीं किञ्चिदवाङ्मुखः। जगाम राजा दुःखार्त्तो गङ्गाद्वाराय भारत। स देवं शरणं गत्वा विरूपाक्षमुमापतिम्। तपश्चचार विपुलं तस्य प्रीतो वृषध्वजः। बलिं स्वयं प्रत्यगृह्णात् प्रीयमाणस्त्रिलोचनः। वरञ्चास्मै ददौ देवः स जग्राह च तच्छृणु। जयद्रथ उवाच। समस्तान् सरथान् पञ्च जयेयं युधि पाण्डवान्। इति राजाब्रवीद्देवं नेति देवस्तमब्रवीत्। महेश्वर उवाच। अजय्यांश्चाप्यबध्यांश्च वारयिष्यसि तान् युधि। ऋतेऽर्जुनं महाबाहुं नरं नाम सुरेश्वरम्। बदर्य्यां तप्ततपसं नारायणसहायकम्। अजितं सर्वलोकानां देवैरपि दुरासदम्। मया दत्तं पाशुपतम् दिव्यमप्रतिमं शरम्। अवाप लोकपालेभ्यो वज्रादीन् स महाशरान्”।

“प्रधानं शस्त्रविदुषां तेन कृष्णेन रक्ष्यते। सहायः पुण्डरीकाक्षः श्रीमानतुलविक्रमः। समानस्यन्दने पार्थमास्थाय परवीरहा। न शक्यते तेन जेतुं त्रिदशैरपि दुःसहः। कः पुनर्मानुषो भावो रणे पार्थं विजेष्यते। तमेकं वर्ज्जयित्वा तु सर्वं यौधिष्ठिरं बलम्। चतुरः पाण्डवान्राजन्! दिनैकं जेष्यसि रिपून्”। स च भारतयुद्धकाले द्रोणरचितचक्रव्यूहद्वारे स्थित्वाऽर्जुनमृते युधिष्ठिरादीन् चतुरो भ्रातॄन् जिगाय। अभिमन्युञ्च जघान। तत्रच कुपितेनार्ज्जुनेन सः सूर्य्यास्तमयात् प्रागेव त्वां हत्वा तथा त्वामहत्वा स्वयं वा मर्त्तेति प्रतिज्ञाय स निहतः तच्छिरश्च अन्यत्र तपस्यतस्तत्पितुर्हस्तेऽखचितं शरपरम्परया पातितं तेन च तस्य शिरसो भूमौ पातनेन स्वशिरः शतधाभूतं तत्कथा यथा भा० द्रो० १४४ अ०।

“एतस्मिन्नेव काले तु द्रुतं गच्छति भास्करे। अब्रवीत् पाण्डवं राजंस्त्वरमाणो जनार्द्दनः। एष मध्ये कृतः षड्भिः पार्थ! वीरैर्महारथैः। जीवितेप्सुर्महाबाहो! भीतस्तिष्ठति सैन्धवः। एताननिर्ज्जित्य रणे षड्रथान् पुरुषर्षभ!। न शक्यः सैन्धवो हन्तुं यत्तो निर्व्याजमर्जुन। योगमत्र विधास्यामि सूर्य्यस्यावरणं प्रति। अस्तं गत इति व्यक्तं प्रेक्ष्यत्येकः स सिन्धुराट्। हर्षेण जीविताकाङ्क्षी विनाशार्थं तव प्रभो!। न गोपस्यति दुराचारः स आत्मानं कथञ्चन। तत्र छिद्रे प्रहर्त्तव्यं त्वयास्य कुरुसत्तम। व्यपेक्षा नैव कर्त्तव्या गतोऽस्तमिति भास्करः। एवमस्त्विति बीभत्सुः केशवं प्रत्यभाषत। ततोऽसृजत्तमः कृष्णः सूर्य्यस्यावरणं प्रति। योगी योगेन संयुक्तो योगिनामीश्वरो हरिः। सृष्टे तमसि कृष्णेन गतोऽस्तमिति भास्करः। त्वदीया जहृषुर्योधाः पार्थनाशान्नराधिप!। ते प्रहृष्टा रणे राजन्नापश्यन् सैनिका रविम्। उन्नाम्य वक्त्राणि तदा स च राजा जयद्रथः। वीक्षमाणे ततस्तस्मिन् सिन्धुराजे दिवाकरम्। पुनरेवाब्रवीत् कृष्णो धनञ्जयमिदं वचः। पश्य सिन्धुपतिं वीरं प्रेक्षमाणं दिवाकरम्। भयं विपुलमुत्सृज्य त्वत्तो भरतसत्तम। अयं कालो महाबाहो! बधायास्य दुरात्मनः। इत्येवं केशवेनोक्तः पाण्डुपुत्त्रः प्रतापवान्। न्यवधीत्तावकं सैन्यं शरैरर्काग्निसन्निभैः”।

“एवं तान् व्याकुलीकृत्य त्वदीयान् स महारथान्। उज्जहार शरं घोरं पाण्डवोऽनलसन्निभम्। इन्द्राशनिसमप्रख्यं दिव्यमन्त्राभिमन्त्रितम्। सर्व्वभारसहं शश्वद्गन्धमाल्यार्च्चितं महत्। वज्रेणास्त्रेण संयोज्य विधिवत् कुरुनन्दनः। समादधन्महाबाहुर्गाण्डीवे क्षिप्रमर्जुनः। तस्मिन् सन्धीयमाने तु शरे ज्वलनतेजसि। अन्तरीक्षे महानादो भूतानामभवन्नृपः। अब्रवीच्च पुनस्तत्र त्वरमाणो जनार्द्दनः। धनञ्जय! शिरश्छिन्धि सैन्धवस्य दुरात्मनः। अस्तं महीधरश्रेष्ठं यियासति दिवाकरः। शृणुष्वैतच्च कार्य्यं मे

जयद्रथवधं प्रति। वृद्धक्षत्रः सैन्धवस्य पिता जगति विश्रुतः। स कालेनेह महता सैन्धवं प्राप्तवान् सुतम्। जयद्रथममित्रघ्न! तञ्चोवाच तदा नृपम्। अन्तर्हिता पुरा वाणी मेघदुन्दुभिनिस्वना। तवात्मजो मनुष्येन्द्र! कुलशीलदमादिभिः। गुणैर्भविष्यति विभो! सदृशो वंशयोर्द्वयोः। क्षत्रियप्रवरो लोके नित्यं शूराभिसत्कृतः। शत्रुभिर्युध्यमानस्य संग्रामे त्वस्य धन्विनः। शिरश्छेत्स्यति संक्रुद्धः शत्रुरालक्षितो भुवि। तच्छ्रुत्वा सिन्धुराजश्च ध्यात्वा चिरमरिन्दमः। ज्ञातीन् सर्व्वानुवाचेदं पुत्रस्नेहाभिनोदितः। संग्रामे युध्यमानस्य वहतो महतीं धुरम्। धरण्यां मम पुत्रस्य पातयिष्यति यः शिरः। तस्यापि शतधा मूर्द्धा फलिष्यति न संशयः। एवमुक्त्वा ततो राज्ये स्थापयित्वा जयद्रथम्। वृद्धक्षत्रो वनं यातस्तपश्चोग्रं समास्थितः। स तप्यते च तेजस्वी तपो घोरं दुरासदम्। समन्तपञ्चकादस्माद्बहिर्वानरकेतन!। तस्माज्जयद्रथस्य त्वं शिरश्छित्त्वा महामृधे। दिव्येनास्त्रेण रिपुहन्! घोरेणाद्भुतकर्मणा। सकुण्डलं सिन्धुपतेः प्रभञ्जनसुतानुज!। उत्सङ्गे पातयाश्वाशु वृद्धक्षत्रस्य भारत!। अथ त्वमस्य मूर्द्धानं पातयिष्यसि भूतले। तवापि शतधा मूर्द्धा फलिष्यति न संशयः। यथा चेदं न जानीयात् स राजा तपसि स्थितः। तथा कुरु कुरुश्रेष्ठ! दिव्यमस्त्रमुपाश्रितः। न ह्यसाध्यमकार्य्यं वा विद्यते तव किञ्चन। समस्तेष्वपि लोकेषु त्रिषु वासवनन्दन!। एतच्छ्रुत्वा तु वचनं सृक्किणी परिसंलिहन्। इन्द्राशनिसमस्पर्शं दिव्यमन्त्राभिमन्त्रितम्। सर्वभारसहं शश्वद्गन्धमाल्यार्च्चितं शरम्। विससर्ज्जार्जुनस्तूर्णं सैन्धवस्य वधे वृतम्। ततो धनञ्जयः शीघ्रं शरं तं भास्करत्विषम्। उज्जिहीर्षुः शिरः कायात् सैन्धवस्य महात्मनः। स पार्थभुजनिर्मुक्तः शरः श्येन इवाशुगः। छित्त्वा शिरः सिन्धुपतेरुत्पपात विहायसि। तच्छिरः सिन्धुराजस्य शरैरूर्द्ध्वमवाहयत्। दुर्हृदामप्रहर्षाय सुहृदां हर्षणाय च। शरैः कदम्बकीकृत्य काले तस्मिंश्च पाण्डवः। योधयामास तांश्चैव पाण्डवः षण्महारथान्। ततः सुमहदाश्चर्य्यं तत्रापश्याम भारत। समन्तपञ्चकाद्बाह्यं शिरो यद्व्यहरत्ततः। एतस्मिन्नेव काले तु वृद्धक्षत्रो महीपतिः। सन्ध्यामुपास्ते तेजस्वी सम्बन्धी तव मारिष!। उपासीनस्य तस्याथ कृष्णकेशं सकुण्डलम्। सिन्धुराजस्य मूर्द्धानमुत्सङ्गे समपातयत्। तस्योत्सङ्गे निपतितम् शिरस्तच्चारुकुण्डलम्। वृद्धक्षत्रस्य नृपतेरलक्षितमरिन्दम!। ततोभीतस्य तस्याथ वृद्धक्षत्रस्य भारत! उत्तिष्ठतस्तत् सहसा शिरोऽगच्छद्धरातलम्। ततस्तस्य नरेन्द्रस्य पुत्रमूर्द्धनि भूतलम्। गते तस्यापि शतधा मूर्द्धागच्छदरिन्दम! ततः सर्व्वाणि सैन्यानि विस्मयं जग्मुरुत्तमम्। वासुदेवं सबीभत्सुं प्रशशंसुर्महारथम्। ततो विनिहते राजन्! सिन्धुराजे किरीटिना। तमस्तद्वासुदेवेन संहृतं भरतर्षभ!। पश्चाज्ज्ञातं महीपाल! तव पुत्रैः सहानुगैः। वासुदेवप्रयुक्तेयं मायेति नृपसत्तम!।”

“जयद्रथवधे राजन्! दुर्य्योधनधनञ्जयौ। सवितारं निरीक्षेते प्रौढ़ा बाला वधूरिव” उद्भटः।

जयद्रथवध पु० जयद्रथस्य वधमधिकृत्य कृतो ग्रन्थः अण् तस्य आख्यायिकायां लुपि व्यक्तिवचनत्वात् पुंस्त्वम्। भारतद्रोणपर्वान्तगते अवान्तरपर्वभेदे तच्च द्रोणपर्वणि ८५ अध्यायावधि १५२ अध्यायपर्य्यन्तम् “जयद्रथवधः पर्व घटोत्कचवधस्ततः” भा० आ० १ अ० अवान्तरपर्वोक्तौ।

जयद्रथविमोक्षण न० नयद्रथस्य विमोक्षणमधिकृत्य कृतो ग्रन्थः अण् तस्य आख्यायिकायां लुपि व्यक्तिवचनत्वात् क्लीवता। भारतवनपर्वान्तर्गते अवान्तरपर्वभेदे तच्च पर्व वनपर्वणि २७ अध्यायात्मकम्। “द्रौपदीहरणं तत्र जयद्रथविमोक्षणम्” भा० आ० १ अ० अवान्तरपर्वोक्तौ।

जयधर्म्मन् पु० कुरुसेनानीभेदे। “कमलाक्षः परक्राथी जयधर्म्मा सुदर्शनः। एते त्वामनुयास्यन्ति पत्तीनामयुतानि षट्” भा० द्रो० १५६ अ०।

जयध्वज पु० कार्त्तवीर्य्यार्ज्जुनस्य तनये आवन्त्ये नृपभेदे “शूरसेनश्च शूरश्च धृष्णोक्तः कृष्ण एव च। जयध्वजश्च नाम्नासीदावन्त्यो नृपतिर्महान्। कार्त्तवीर्य्यस्य तनया वीर्य्यवन्तो महाबलाः। जयध्वजस्य पुत्रस्तु तालजङ्घो महाबलः” हरिवं० ३४ अ०।

जयन न० जि—करणे ल्युट्। १हयादिसन्नाहे “तुरङ्गिणो जयनयुजश्च वाजिनः” माघः। भावे ल्युट्। २जये मेदि०।

जयनी स्त्री इन्द्रकन्यायाम् त्रिका०।

जयन्त पु० जि—झ। १इन्द्रपुत्रे अमरः २शिवे ३चन्द्रे च त्रिका०। विराटावासे छद्मवेशिनि ४भीमे तस्य तथायुद्धनामता जयशब्दे दृश्या। ५विष्णौ “जयन्तः सर्वविज्जयी” विष्णुस०। ६रुद्रभेदे “अजैकपादहिर्बुध्न्यो विरूपाक्षोऽथ रैवतः। हरश्च बहुरूपश्च त्र्यम्बकश्च

सुरेश्वरः। सावित्रश्च जयन्तश्च पिनाकी चापराजितः" भा० शा० २०८ अ०। रुद्रोक्तौ "अजैकपादहिर्बुध्नो विरूपाक्षश्च रैवतः। हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः। रुद्रा एकादश प्रोक्ता जयन्तश्चापराजितः" विष्णुध० "यथा जयन्तेन शचीपुरन्दरौ" "त्रिविष्टपस्येव पतिं जयन्तः" इति च रघुः। ७तालभेदे "आदिताले जयन्तः स्यात् शृङ्गाररससंयुतः। रुद्रसंख्याक्षरपदश्चायुर्वृद्धिकरः परः" सङ्गीतदामोदरः।

जयन्ती स्त्री जि—झ गौरा० ङीष्। १दुर्गाशक्तिभेदे "जयन्ती मङ्गला काली भद्रकाली कपालिनी। दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोऽस्तु ते" कालिपु०। २जयन्तभगिन्यां शक्रपुत्र्यां ३पताकायां च मेदि०। ४स्वनामख्याते वृक्षभेदे सा च नवपत्रिकान्तर्गता "कदली दाडिमी धान्यं हरिद्रा मानकं कचुः। बिल्वोऽशोको जयन्ती च विज्ञेया नव पत्रिकाः" दुर्गार्च्चापद्धत्युक्तेः। तदधिष्ठात्री देवता च कार्त्तिकी मूलं तत्रैव दृश्यम्। "जयन्ती मदगन्धाढ्या तिक्ता चैव कटूष्णका। कृमिमूत्रामजित् ख्याता कण्ठशोषणकृन्मता। कृष्णा रसायनी तत्र सैव सर्वत्र पूज्यते" राजनि०। "तच्छाकं विषदोषघ्नं चक्षुष्यं मधुरं हिमम्" राजव०। "जयं पुण्यञ्च कुरुते जयन्तीमिति तां विदुः। रोहिणीसहिता कृष्णा मासे च श्रावणेऽष्टमी। अर्द्धरात्रादधश्चोर्द्ध्वं कलयापि यदा भवेत्। जयन्ती नाम सा प्रोक्ता सर्वपापप्रणाशिनी" ति० त० स्कान्दोक्तेः ५श्रावणकृष्णाष्टमी रोहिणीयोगे कृष्णाष्टमीशब्दे २२२१ पृ० विवृतिः। "अभिजिन्नाम नक्षत्रं जयन्ती नाम शर्वरी। मुहूर्त्तो विजयो नाम यत्र जातो जनार्द्दनः" हरिवं० ६० अ०। "यत्र स्वोच्चगतश्चन्द्रो लग्नादेकादशे स्थितः। जयन्तो नाम योगोऽयं शत्रुपक्षविनाशकृत्" ज्योतिषोक्ते ६यात्रायोगविशेषे पु०। "प्रभावनीके तनवै जयन्तीः" माघः। स्वार्थे क। जयन्तिका तत्रार्थे संज्ञायां कन्। हरिद्रायां राजनि०। दुर्गासखीभेदे च। तद्भेदाश्च काशी० ४७ अ० दर्शिता यथा। "यथा जया च विजया यथा चैव जयन्तिका। शुभानन्दा सुनन्दा च कौमुदी च यथोर्मिला। यथा चम्पकमाला च यथा मलयवासिनी। कर्पूरलतिका यद्वत्स्रग्धारा यथा शुभा। अशोका च विशोका च यथा कमलगन्धिनी। यथा च मन्दनिःश्वासा यथा मृगमदोत्तमा। यथा च कोकिलालापा यथा मयूरभाषिणी। गन्धपद्मनिधिर्यद्वदनुत्तमा यथा च सा। दृगञ्चलेङ्गितज्ञा च यथा कृतमनोरथा। पानचित्तहरा यद्वत्तथा स्वेषा सुलक्षणा"।

जयपत्र न० जयसूचकं पत्रम्। राज्ञा दत्ते जयसूचके पत्ररूपे राजकीयलेख्यभेदे। राजलेख्यं पत्रं च चतुर्विधं यथाह वशिष्ठः "राज्ञः स्वहस्तसंयुक्तं समुद्राचिह्नितं तथा। राजकीयं स्मृतं लेख्यं सर्वेष्वर्थेषु साक्षिमत्। शासनं प्रथमं ज्ञेयं जयपत्रं तथाऽपरम्। आज्ञाप्रज्ञापनापत्रं राजकीयं चतुर्विधम्"। जयपत्रलक्षणभेदादिकं वीरमि० दर्शितं तत्राह व्यासः

"व्यवहारान् स्वयं दृष्ट्वा श्रुत्वा वा प्राड्विवाकतः। जयपत्रन्ततो दद्यात् परिज्ञानाय पार्थिवः। जङ्गमं स्थावरं येन प्रमाणेनात्मसात्कृतम्। भागाभिशापसन्दिग्धे यः सम्यग्विजयी भवेत्। तस्मै राज्ञा प्रदातव्यं जयपत्रं सुनिश्चितम्। पूर्व्वोत्तरक्रियापादं तत्प्रमाणपरीक्षणम्। निगदस्मृतिवाक्यञ्च यथासम्यं विनिश्चितम्। एतत्सर्वं समासेन जयपत्रेऽभिलेखयेदिति"। प्रमाणस्य पृथग्ग्रहणात् क्रियापादेन प्रत्याकलितमत्र गृह्यते। परिज्ञानाय प्राङ्न्यायस्य बोधनाय। भागेऽभिशापे वा सन्दिग्धे। विवादपदमत्रोपलक्षणम्। तेन विवादविषयो यो यत्र विवादे स तत्र लेखनीयः। जयपत्रं राजमुद्राङ्कितं कार्य्यमित्याह वृद्धवशिष्ठः "यथोपन्यस्तसाध्यार्थं संयुक्तं सोत्तरक्रियम्। सावधारणकञ्चैव जयपत्रकमुच्यते। प्राड्विवाकादिहस्ताङ्कं मुद्रितं राजमुद्रया"। अत्र च राज्ञः सभ्यानाञ्च स्वहस्तोऽप्यपेक्षितः इत्याह कात्यायनः "सिद्धेनार्थेन संयोज्यो वादी सत्कारपूर्वकम्। लेख्यं स्वहस्तसंयुक्तं तस्मै दद्यात्तु पार्थिवः। सभासदश्च ये तत्र स्मृतिशास्त्रविदः स्थिताः। यथा लेख्यविधौ तत्र स्वहस्तन्दद्युरेव ते"। कश्चित्पश्चात्काराख्योऽपि जयपत्रभेद उक्तस्तेनैव "अनेन विधिना लेख्यं पश्चात्कारं विदुर्बुधाः। निरस्ता तु क्रिया यत्र प्रमाणेनैव वादिना। पश्चात्कारो भवेत्तत्र न सर्वासु विधीयते। अन्यवादादिहीनेभ्य इतरेषां प्रदीयते। वृत्तानुवादसंसिद्धन्तच्च स्याज्जयपत्रकमिति।"

जयपाल पु० जय पालयति पालि—अण् उप० स०। १विधौ २विष्णौ ३भूपाले च शब्दच० (जमालगाटा) ४स्वनामख्याते वृक्षभेदे। "जयपालः कटुः पाके उष्णश्चैव विरेचनः। कृमिश्लेष्मामजठरामयहृत् दीपनो मतः" राजनि०

जयपुत्रक पु॰ पुत्र इव पुत्रकः जयसूचकः पुत्रकः। पाशकभेदे शब्दर॰।

जयप्रिय पु॰ विराटनृपभ्रातृभेदे। "गजानीकः श्रुतानीको वीरभद्रः सुदर्शनः। श्रुतध्वजो बलानीको जयानीको जयप्रियः। विजयो लब्धलक्ष्यश्च जयाश्वो रथवाहनः। चन्द्रोदयः कामरूपो विराटभ्रातरः शुभाः" भा॰ द्रो॰ १५८ अ॰। २कुमारानुचरमातृभेदे स्त्री "ऋचाऽम्बिका निष्कुटिका वामा चत्वरवासिनी। सुमङ्गला स्वस्तिमती वृद्धिकामा जयप्रिया" भा॰ शल्य॰ ४७ अ॰।

जयमङ्गल पु॰ जयेन मङ्गलमस्मात्। १राजवाह्ये हस्तिभेदे शब्दरत्ना॰। "चतुर्विंशतिवर्णाङ्घ्रिः कथितो जयमङ्गलः। शृङ्गारवीरयोरेव ताले चाँचपुटे च सः" सङ्गीतदा॰ उक्ते २ध्रुवकभेदे च।

जयमङ्गलरस पु॰ जयेन रोगजयेन मङ्गलं यस्मात् तादृशो रसः। वैद्यकोक्ते सर्वज्वरनाशके औषधभेदे। "हिङ्गूलसम्भवं सूतं गन्धकं टङ्कणं तथा। ताम्रं वङ्गं माक्षिकञ्च सैन्धवं मरिचं तथा। समं सर्वं समाहृत्य द्विगुणं स्वर्णभस्मकम्। तदर्द्धं कान्तलौहस्य रूप्यभस्मापि तत्समम्। एतत् सर्वं विचूर्ण्याथ भावयेत् कनकद्रवैः। शेफालीदलजैश्चापि दशमूलरसेन च। किराततिक्तकक्काथैस्त्रिवारं भावयेत् सुधीः। भावयित्वा तु तत्कार्य्या गुञ्जाद्वयमिता वटी। अनुपानं प्रयोक्तव्यं जीरकं मधुसंयुतम्। जीर्णं ज्वरं महाघोरं चिरकालसमुद्भवम्। ज्वरमष्टविधं हन्ति साध्यासाध्यमथापि वा। पृथग्दोषांश्च विविधान् समस्तान् विषमज्वरान्। १मेदोगतं २मांसगतमस्थि३मज्जा४गतं तथा। ५अन्तर्गतं महाघोरं ६वहिःस्थञ्च विशेषतः। ७नानादोषोद्भवञ्चैव ज्वरं ८शुक्रगतं तथा। निखिलं ज्वरनामानं हन्ति श्रीशिवशासनात्। जयमङ्गलनामायं रसः श्रीशिवनिर्म्मितः। बलपुष्टिकरश्चैव सर्वरोगनिवर्हणः" भैषज्यरत्नावली। अत्र द्विगुणं स्वर्णभस्मकमित्यत्र सर्वेषां समस्तानां यन्मानं ततो द्विगुणं स्वर्णमिति मुख्यः कल्पः। प्रत्येकापेक्षया द्विगुणमिति कनिष्ठः कल्पः।

जयरात पु॰ कलिङ्गराजसुतभेदे। कलिङ्गसुतयुद्धोपक्रमे "जयरातरथम्प्राप्य मुक्तः सिंह इवानदत्। जयरातमथाक्षिप्यानदत् सव्येन पाणिना" भा॰ द्रो॰१५५ अ॰।

जयवाराहतीर्थ न॰ तीर्थभेदे शिवपु॰।

जयवाहिनी स्त्री जयस्य जयन्तस्य वाहिनी। १शच्याम् २इन्द्राण्याम् हेमच॰। "चारुधारा महेन्द्राणी चेन्द्राणी जयवादिनीति" पाठान्तरम्। कल्प॰। २जययुक्तसैन्ये स्त्री शब्दार्थचि॰।

जयशब्द पु॰ जयसूचकः शब्दः शाक॰त॰। १जयध्वनौ। "उद्घुष्टनैकजयशब्दविराविताशाम्" हरि॰ १० अ॰।

जयसिंह पु॰ जयपुराधीश्वरे जयसिंहकल्पद्रुमाख्यस्मृतिनिबन्धकारके नृपभेदे।

जयसेन पु॰ जययुक्ता सेनाऽस्य। १मागधे नृपभेदे "श्रुतायुधश्च कालिङ्गो जयसेनश्च मागधः" भा॰ स॰ ४अ॰। आयुनृपवंश्ये २अहीनसुते नृपभेदे। "सहदेवस्ततोऽहीनो जयसेनस्तु तत्सुतः" भाग॰ ९।१७।१०।

जयस्तम्भ पु॰ जयसूचकः स्तम्भः। देशान्तरजयानन्तरं स्वकीर्त्तिख्यापनाय राज्ञा खाते जयसूचके स्तम्भे। "त्रिकूटमेव तत्रोच्चैर्जयस्तम्भं चकार सः" "निचखान जयस्तम्भान् गङ्गास्रोतोऽन्तरेषु सः" रघुः।

जयस्वामिन् पु॰ कात्यायनकल्पसूत्रव्याख्यातृभेदे। "तत्र शिरः कर्णौ चाप्राप्तौ तद्व्यतिरिक्तं सर्वं शरीरमाच्छादनीयमिति जयस्वामिनः" कात्या॰ श्रौ॰ १०।६।२ सूत्रभाष्ये कर्कः।

जया स्त्री जि—अच्। १जयन्तीवृक्षे अमरः। रोगजयात् तस्यास्तथात्वम्। २दुर्गासहचरीभेदे। जयन्तिकाशब्दे दृश्यम्। "नन्दा भद्रा जया रिक्ता पूर्णा च प्रतिपत्क्रमात्" ज्यो॰उक्ते उभयपक्षीयतृतीयाष्टमीत्रयोदशीरूपे ३तिथिभेदे ४हरीतक्यां मेदि॰। ५विजयायां (भाङ्ग) ६नीलदूर्वायाम्। ७अग्निमन्थवृक्षे राजनि॰। ८पताकाभेदे युक्तिकल्पतरुः। "जयः कल्याणवचन आकारो दातृवाचकः। जयं ददाति सा नित्यं सा जया परिकीर्त्तिता" ब्रह्मवै॰ उक्तनिरुक्तियुक्तायां ९दुर्गायाम्। "जया त्वं विजया चैव संग्रामे च जयप्रदा। ममापि विजयं देहि वरदा त्वञ्च साम्प्रतम्" भा॰वि॰६अ॰ दुर्गास्तुतिः। सा च गौर्य्यादिषु षोड़शसु मातृषु अन्यतमा। यथाह गृह्यपरिशिष्टम् "गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः। शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह। आदौ विनायकः पूज्यो ह्यन्ते च कुलदेवता"।

जयादित्य पु॰ व्याकरणग्रन्थकारके विद्वद्भेदे।

जयानीक पु॰ १द्रुपदपुत्रभेदे जयशब्दे दृश्यम्। २विराटभ्रातृभेदे जयप्रियशब्दे दृश्यम्।

जयावती स्त्री जय—अस्त्यर्थे मतुप् मस्य वः संज्ञायां दीर्घः

ङीप् । कुमारानुचरमातृभेदे । "जयावती मालतिका ध्रुवरत्ना भयङ्करी" भा० श० ४७ अ० । कुमारानुचरमातृगणोक्तौ ।

जयावहा स्त्री जयं रोगजयमावहति आ+वह–अच् । भद्रदन्तीवृक्षे राजनि० ।

जयाश्रया स्त्री जयमाश्रयति आ+श्रि–अच् । जरडीतृणे [राजनि० ।

जयाश्वः पु० विराटभ्रातरि जयप्रियशब्दे दृश्यम् ।

जयाह्वा स्त्री जयस्याह्वा आह्वा यस्याः । भद्रदन्तीवृक्षे राजनि०

जयिन् त्रि० जि–शीलार्थे इनि । जयशीले । "उद्यता जयिनि कामिनीमुखे तेन साहसमनुष्ठितं पुनः" काव्यप्र० "जगति जयिनस्ते ते भावा नवेन्दुकलादयः" सा० द० । "पौरस्त्यानेवमाक्रामन् तांस्तान् जनपदान् जयी" रघुः स्त्रियां ङीप् ।

जयिष्णु त्रि० जि–बा० इष्णुच् । १जयशीले । "आरुरुक्षन् यथा वीरा दुरावाराजयिष्णवः" भा० द्रो० २२ अ० ।

जयुस् त्रि० जि–उसि । जयशीले । "वि जयुषा रथ्या यातमद्रिम्" ऋ० ६।६२।७ "वि जयुषा ययथुः सान्वद्रेः" १।११७।१६ "जयुषा जयशीलेन" भा० ।

जय्य त्रि० जेतुं शक्यः जि–यत् "क्षय्यजय्यौ" तदर्थे पा० नि० । जेतुं शक्ये अमरः । "सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्म्मणा" शत० ब्रा० १४।४।३।२४ ।

जर पु० जॄ–भावे अप् । १जरायां वयोहानौ "द्वादशारं नहि तज्जराय वर्वर्त्ति चक्रम्" ऋ० १।१६४।११ २विनाशने च । "त्रितं जराय जुरतामदाभ्याः" ऋ० २।३४।१० "जराय विनाशनाय" भा० ।

जरठ त्रि० जॄ–बा० अठ । १कर्कशे कठिने २पाण्डुवर्णे पु० मेदि० । ३जीर्णे त्रि० हेम० ४जरायां विश्वः । "नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदानलग्रन्थयः" सा० द० । "अयमतिजरठाः प्रकामगुर्व्वीः" माघः । ५परिणते च । "जरठकमलकन्दच्छेदगौरैर्मयूखैः" माघः ।

जरडी स्त्री जॄ–बा अड गौरा० ङीष् । गर्म्मोटिकायां तृणभेदे राजनि० । "जरडी मधुरा शीता सारिका रुचिकारिणी । दाहरक्तदोषहृत् सा पशूनां दुग्धदायिनी" राजनि० ।

जरण त्रि० जॄ–ल्यु । १जीर्णे २जीरके ३कृष्णजीरके ४सौवर्चलवणे च पु० शब्दर० । ५हिङ्गुनि ६कुष्ठौषधौ न० । ७कासमर्दे पु० राजनि० । ८कृष्णजीरके स्त्री राजनि० । "भद्रं जीवन्तो जरणामशीमहि" ऋ० १०।३७।६ । ९जरायां स्त्री "विप्रस्य जरणामुपेयुषः" १०।३९।८ "प्रातर्जरेथे जरणेव कापया" १०।४०।३ । स्तुत्यर्थक–जरते–युच् । १०स्तुतौ "वक्ता जरणा अनाकृतः" ऋ० १।१४१।७। "जरणा स्तुतिः" भा० ।

जरणद्रुम पु० नित्यक० । अश्वकर्णवृक्षे ।

जरणि त्रि० जॄ–अनि । स्तोतरि । "सन्ति स्पृशो जरणिप्रा अधृष्याः" ऋ० १०।१०।१२ । "जरणिप्राः स्तोतॄणां पूरयितारः"

जरण्या स्त्री जरणमर्हति "अन्त्यावस्था छन्दसि च" पा० यत् । जरायाम् । "युवं वन्दनं निरृतं जरण्यया" ऋ० १।११९।७। "जरण्यया जरया" भा० तत्र उक्तैव व्युत्पत्तिर्दर्शिता । जरण्ययेति शब्दकल्पनं प्रामादिकमेव ।

जरण्यु त्रि० जरणं स्तुतिमिच्छति क्यच्–उन् । आत्मनः स्तवनेच्छौ "सरत्सरण्युः कारवे जरण्युः" ऋ० १०।६१।२१ "जरण्युः स्तुतिमिच्छन्" भा० ।

जरत् त्रि० जॄ–अतृ । १जीर्णे २वृद्धे जरन्नैयायिकः जरन्मीमांसकः जरद्गवः । स्त्रियां ङीप् जरती अर्द्धजरती ।

जरत्कर्ण पु० ऋषिभेदे "अग्निहृत्यं जरतः कर्णमावाग्निः" ऋ० १०।८०।३। "जरतः कर्णं जरत्कर्णनामानमृषिम्" भा० ।

जरत्कारु पु० १मुनिभेदे तत्पत्न्यां २मनसादेव्यामास्तीकमातरि च । तत्कथा "सौतिरुवाच । एतत्श्रुत्वा जरत्कारुर्भृशं शोकपरायणः । उवाच तान् पितॄन् दुःखाद्वाष्पसन्दिग्धया गिरा । जरत्कारुरुवाच । मम पूर्वे भवन्तो वै पितरः सपितामहाः । तद्ब्रूत यन्मया कार्य्यं भवतां प्रियकाम्यया । अयमेव जरत्कारुः किल्बिषी भवतां सुतः । ते दण्डं धारयत मे दुष्कृतेरकृतात्मनः । पितर ऊचुः । पुत्र ! दिष्ट्यासि संप्राप्त इमं देशं यदृच्छया । किमर्थञ्च त्वया ब्रह्मन् ! न कृतो दारसंग्रहः । जरत्कारुरुवाच । ममायं पितरो ! नित्यं हृद्यर्थः परिवर्त्तते । ऊर्द्ध्वरेताः शरीरं वै प्रापयेयममुत्र वै । न दारान् वै करिष्येऽहमिति मे भावितं मनः । एवं दृष्ट्वा तु भवतः शकुन्तानिव लम्बतः । मया निवर्त्तिता बुद्धिर्ब्रह्मचर्य्यात् पितामहाः ! । करिष्ये वः प्रियं कामं निर्वेक्ष्येऽहमसंशयम् । सनाम्नीं यद्यहं कन्यामुपलप्स्ये कदाचन । भविष्यति च या काचित् भैक्षवत् स्वयमुद्यता । प्रतीग्रहीता तामस्मि न भरेयञ्च यामहम् । एवंविधमहं कुर्य्यां निवेशं प्राप्नुयां यदि । अन्यथा न करिष्येऽहं सत्यमेतत् पितामहाः ! । तत्र चोत्पत्स्यते जन्तुर्भवतां तारणाय वै । शाश्वता स्थाव-

याश्चैव तिष्ठन्तु पितरो मम। सूत उवाच। एवमुक्त्वा तु स पितॄंश्चचार पृथिवीं मुनिः। न च स्म लभते भार्य्यां वृद्धोऽयमिति शौनक!। यदा निर्वेदमापन्नः पितृभिश्चोदितस्तथा। तदाऽरण्यं स गत्वोच्चैश्चुक्रोश भृशदुःखितः। स त्वरण्यगतः प्राज्ञः पितॄणां हितकाम्यया। उवाच कन्यां याचामि तिस्रोवाचः शनैरिमाः। यानि भूतानि सन्तीह स्थावराणि चराणि च। अन्तर्हितानि वा यानि तानि शृण्वन्तु मे वचः। उग्रे तपसि वर्त्तन्तं पितरश्चोदयन्ति माम्। निर्विशस्वेति दुःखार्त्ताः सन्तानस्य चिकीर्षया। निर्वेशायाखिलां भूमिं कन्याभैक्ष्यं चरामि भोः। दरिद्रो दुःखशीलश्च पितृभिः सन्नियोजितः। यस्य कन्यास्ति भूतस्य ये मयेह प्रकीर्त्तिताः। ते मे कन्यां प्रयच्छन्तु चरतः सर्वतो दिशम्। मम कन्या सनाम्नी या भैक्ष्यवच्चोद्यता भवेत्। भरेयञ्चैव यां नाहं तां मे कन्यां प्रयच्छत। ततस्ते पन्नगा ये वै जरत्कारौ समाहिताः। तामादाय प्रवृत्तिन्ते वासुकेः प्रत्यवेदयन्। तेषां श्रुत्वा स नागेन्द्रस्तां कन्यां समलङ्कृताम्। प्रगृह्यारण्यमगमत् समीपं तत्र पन्नगः"। भा०आ० ४६ अ० इतः परमास्तीकशब्दे ८९२ पृ०दृश्यम्। "यो जरत्कारुणा जातो जरत्कारौ महायशाः" तत्रैव। [शब्दर०।

जरत्कारुप्रिया स्त्री ६त०। मनसादेव्यामास्तीकमातरि

जरतिन् जॄ-अतच् जरतः दतः अस्त्यर्थे इनि। जरायुक्ते ततः शुभ्रा०अपत्ये ढक्। जारतिनेय तदपत्ये पुंस्त्री०।

जरद्गव पु० कर्म० टच् समा०। १वृद्धवृषे अमरः जरन् गौरिव टच्समा०।२गृध्रविशेषे "अज्ञातकुलशीलस्य वासो देयो न कस्यचित्। मार्ज्जारस्य हि दोषेण हतो वृद्धो जरद्गवः" हितो०। जरन् क्षीयमाणो गौर्धर्मवृषः। शास्त्रप्रतिपादिते क्षीयमाणे २धर्मरूपवृषे। "नैतस्येह यथास्माकं शश्वच्छास्त्रं जरद्गवः। अलसः क्षुत्परो मूर्खस्तेन पीवान् शुना सह" भा० अनु० १२ अ०। "शास्त्रं तत्प्रतिपादितः जरन् क्षीयमाणो धर्म्मः" नीलक०। आकाशस्थे ४वीथिभेदे स्त्री ङीप्। "नागगजैरावतवृषभगोजरद्गवमृगाजदहनाख्या" इत्युपक्रमे "जरद्गव्यां श्रवणात् त्रिभं मृगाख्या त्रिभञ्च मैत्राद्यम्" वृ०स०९अ०।

जरद्विष् त्रि० जरतो वृक्षान् वेवेष्टि विष-क ६त०। जरत् विषं जलं यस्माद्वा। १जीर्णशुष्कवृक्षव्यापके २जीर्णोदकके वह्नौ। "त्वामग्ने अतिथिं पूर्व्यम् सुशर्म्माणं स्वरसं जरद्विषम्" ऋ०५।८।२ "जरद्विषं जरतां वृक्षाणां विषं व्यापकं जीर्णोदकं वा" भा०। [त्रिका०।

जरन्त पुंस्त्री जॄ-झच् १महिषे स्त्रियां ङीष्। २वृद्धे त्रि०

जरमान पु० ऋषिभेदे ततो गर्गा० गोत्रे यञ्। जारमान्य तद्गोत्रापत्ये पुंस्त्री स्त्रियां ङीप् यलोपः। जारमानी।

जरसान पु० जॄ-असानच्। पुरुषे उज्ज्वलदत्तः।

जरा स्त्री जॄ-अङ् गुणः। १वयःकृतश्लथमांसाद्यवस्थाविशेषे "कृष्णवर्त्मनि गुणान् गणयन्ती जीवनेषु लघयन्त्यनुरागम्। आगता वत जरेव हिमानी सेव्यतां सुरतरङ्गिणी" उद्भटः "मदेकपुत्रा जननी जरातुरा" नैष०। २जराहेतौ "या हृष्टमनसा नित्यं स्थानमानविचक्षणा। भर्त्तुः प्रीतिकरी नित्यं सा भार्य्या हीतरा जरा" ३जराधिष्ठातृदेवताभेदे। सा तु कालकन्या। यथा "कालकन्या जरा साक्षात् लोकस्तां नाभिनन्दति। स्वसारं जगृहे मृत्युः क्षयाय जगतामिह" भागवतम्। जरातिक्रमोपायाश्च दर्शिता यथा "मृत्यू रोगाः सुताश्चैव जरा तस्य च कन्यका। जरा च भ्रातृभिः सार्द्धं शश्वद्भ्रमति भूतलम्। एते चोपायवेत्तारं न गच्छन्ति च सम्मतम्। पलायन्ते च तं दृष्ट्वा वैनतेयमिवोरगाः। चक्षुर्जलञ्च व्यायामः पादाधस्तैलसेवनम्। कर्णे तैलं मूर्द्ध्नि तैलं जराव्याधिविनाशनम्। वसन्ते भ्रमणं वह्निसेवाऽस्वप्नं करोति यः। बालाश्च सेवते काले जरा तं नोपगच्छति। स्नातशीतोदकस्नायी सेवते चन्दनद्रवम्। नोपयाति जरा तञ्च निदाघेऽनिलसेविनम्। प्रावृडुष्णोदकस्नायी घनतोयं न सेवते। समये च समाहारी जरा तं नोपगच्छति। शरद्रौद्रं न गृह्णाति भ्रमणं तत्र वर्जयेत्। खातस्नायी समाहारी जरा तं नोपतिष्ठते। खातस्नायी च हेमन्ते काले वह्निं निषेवते। भुङ्क्ते नवान्नमुष्णञ्च जरा तं नोपगच्छति। शिशिरेंऽशुकवह्निं च नवोष्णान्नञ्च सेवते। य एवोष्णोदकस्नायी जरा तं नोपगच्छति। सद्योमांसं नवान्नञ्च बालस्त्रीं क्षीरभोजनम्। घृतञ्च सेवते यो हि जरा तं नोपगच्छति। भुङ्क्ते सदन्नं क्षुत्काले तृष्णायां पीयते जलम्। नित्यं भुङ्क्ते च ताम्बूलं जरा तं नोपगच्छति। दधि हैयङ्गवीनञ्च नवनीतं तथा शुभम्। नित्यं भुङ्क्ते संयमी यो जरा तं नैव गच्छति। शुष्कमांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि। तं सेवन्ते

जरा याति गृहीत्वा भ्रातृभिः सह। रात्रौ ये दधि सेवन्ते पुंश्चलीञ्च रजस्वलाम्। तानुपैति जरा हृष्टा भ्रातृभिः सह सुन्दरि! इति ब्रह्मवै० पु० ब्रह्मख०। ४राक्षसीभेदे जरासन्धशब्दे दृश्यम्। ५क्षीरिणीवृक्षे शब्दच०।६स्तुतौ निरु०। "जराबोध! तद्विविड्ढि" ऋ०१।२७।१० इत्यस्यामृचि निरुक्ते ४।८।२। "जरा स्तुतिर्जरतेः स्तुतिकर्मणः" इत्युक्तम्।

अजादौ प्रत्यये परे मुख्ये गौणे च वा जराया जरस्। जरसौ जरे जरया जरसा। "न ह्यस्या अपरं चन जरसा मरते पतिः" निरु०११।२८ "धृता स्रक्" "वृद्धत्वं जरसा विना" "मृगैरजर्य्यं जरसोपदिष्टम्" रघुः गौणे "वीतजन्म जरसं परं शुचिः" किरा० निर्जरसम् निर्जरम्। "अजरांसि च वस्त्राणि धारयन्ति गतक्लमाः" भा०अनु० १२३अ०। अव्ययीभावसमासे नित्यम् अच् जरस् च मा० जरायाः अभावः अजरसम्। सह जरया सजरसम्। ७निषादभेदे। "जरानामनिषादानां प्रभुः सर्वधनुष्मताम्" हरिवं० १६२ अ०। जरेति नाम येषां तेषां निषादानाम् इत्यर्थः। तत्र स्तुतौ "तासां जरां प्रमुञ्चन्नेति"। ऋ० १।१४०।८ "अच्छावदा तना गिरा जरायै ब्रह्मणस्पतिम्"। १।३८।१३।

जरातुर त्रि० ३त०। १जीर्णे २जराग्रस्ते शब्दर० "जननी जरातुरा" नैष०।

जरापुष्ट पु० ३त०। जरासन्धे नृपे शब्दर०।

जराबोध पु० जरया स्तुत्या बुध्यति बुध-क्वच्। स्तुत्याबोधमानाग्नौ "जराबोध तद्विविड्ढि विशे यज्ञियाय" ऋ० १।२७।५। "जरया स्तुत्या बोधमानाग्ने" भा० तत्र जराबोधेत्यस्यामृचि भवः छ। जराबोधीय जराबोधेत्यस्यामृचि गीयमाने सामभेदे "अग्नेः शुड्ढ्या ह्रियेत चेति जराबोधीयमग्निष्टोमसाम कार्य्यम्" ताण्ड्य० ४।२।१५।

जराभीरु पु० जरातो भीरुः ५त०। १कामदेवे हेमच०। तस्य जीर्णवयसि हीयमानत्वात् तथात्वम्। २जरातो भयशीले त्रि०।

जरायणि पु० जराया राक्षस्या अपत्यं तया पाल्यत्वात् वा० फि। जरासन्धे मागधे नृपे शब्दर०।

जरायु पु० जरामेति इ-ञुण्। १गर्भावरणचर्मणि २गर्भाशये, "जरायुणा मुखे च्छन्ने कण्ठे च कफवेष्टिते। वायोर्मार्गनिरोधाच्च न गर्भस्थः प्ररोदिति" सुश्रु०। "या तु चर्म्माकृतिः सूक्ष्मा जरायुः सा निगद्यते" देवीभाग०। ३जटायौ पक्षिणि च मेदि०। ४अग्निजारवृक्षे राजनि०। ५कुमारानुचरमातृभेदे। "पञ्चालिका मत्कुणिका जरायुर्ज्जर्ज्जरानना" भा० श० ४७ अ०।

जरायुज त्रि० जरायौ जायते जन-ड ७त०। जरायुमध्यजाते मनुष्यादौ अमरः। जरायुजभेदाश्च मनुना दर्शिता यथा "पशवश्च मृगाश्चैव व्यालाश्चोभयतोदतः। रक्षांसि च पिशाचाश्च मनुष्याश्च जरायुजाः" "पशवः गवाद्याः मृगा हरिणाद्या व्यालाः सिंहाद्याः" कुल्लू०। "त्रीणि स्थानानि भूतानां चतुर्थं नोपपद्यते। स्थलमापस्तथाकाशं जन्म चापि चतुर्विधम्। अण्डजोद्भिज्जसंस्वेदजरायुजमथापि वा। चतुर्द्धा जन्म इत्येतद्भूतग्रामस्य लक्षणम्" इत्युपक्रमे "द्विपादबहुपादानि तिर्य्यग्गतियुतानि च। जरायुजानि भूतानि" भा० आनु०४२अ०। संक्षेपेणोक्ताः। "या तु चर्म्माकृतिः सूक्ष्मा जरायुः सा निगद्यते। शुक्रशोणितयोर्योगस्तस्मिन् संजायते यतः। तत्र गर्भो भवेद्यस्मात्तेन प्रोक्तो जरायुजः" इति देवीभाग०।

जरासन्ध पु० जरया राक्षस्या सन्धा देहयोजनमस्य। बृहद्रथभूपसुते मागधे नृपे तस्योत्पत्तिकथा यथा। "राजा बृहद्रथो नाम मगधाधिपतिर्बली" इत्युपक्रमे।

"नाससाद नृपश्रेष्ठः पुत्रं कुलविवर्द्धनम्। अथ काक्षीवतः पुत्रं गौतमस्य महात्मनः। शुश्राव तपसि श्रान्तमुदारं चण्डकौशिकम्। यदृच्छयागतं तन्तु वृक्षमूलमुपाश्रितम्। पत्नीभ्यां सहितो राजा स च रत्नैरतोषयत्। तमब्रवीत्सत्यधृतिः सत्यवागृषिसत्तमः। परितुष्टोऽस्मि राजेन्द्र! वरं वरय सुव्रत!। ततः सभार्य्यः प्रणतस्तमुवाच बृहद्रथः। पुत्रदर्शननैराश्याद्वाष्पसंदिग्धया गिरा। राजोवाच। भगवन्राज्यमुत्सृज्य प्रस्थितोऽहं तपोवनम्। किं वरेणाल्पभाग्यस्य किं राज्येनाप्रजस्य मे। कृष्ण उवाच। एतत् श्रुत्वा मुनिर्ध्यानमगमत् क्षुभितेन्द्रियः। तस्यैव चाम्रवृक्षस्य छायायां समुपाविशत्। तस्योपविष्टस्य मुनेरुत्सङ्गे निपपात ह। अवातमशुकादष्टमेकमाम्रफलं किल। तत् प्रगृह्य मुनिश्रेष्ठो हृदयेनाभिमन्त्र्य च। राज्ञे ददावप्रतिमं पुत्रसंप्राप्तिकारणम्। उवाच च महाप्राज्ञस्तं राजानं महामुनिः। गच्छ राजन्! कृतार्थोऽसि निवर्त्तस्व नराधिप!। एतत् श्रुत्वा मुनेर्वाक्यं शिरसा प्रणिपत्य च। मुनेः पादौ महाप्राज्ञः स नृपः स्वगृहं गतः। यथासमयमाज्ञाय तदा स

ततस्तमजितं जेतुं जरासन्धं वृकोदरः। संरब्धं बलिनां श्रेष्ठो जग्राह कुरुनन्दनः। भीमसेनस्ततः कृष्णमुवाच यदुनन्दनम्। बुद्धिमास्थाय विपुलां जरासन्धवधेप्सया। नायं पापो मया कृष्ण! युक्तः स्यादनुरोद्धुम्। प्राणेन यदुशार्दूल! बद्धकक्षेण वाससा। एवमुक्तस्ततः कृष्णः प्रत्युवाच वृकोदरम्। त्वरयन् पुरुषव्याघ्र! जरासन्धवधेप्सया। यत्ते दैवं परं सत्त्वं यच्च ते मातरिश्वनः। बलं भीम! जरासन्धे दर्शयाशु तदद्य वै। एवमुक्तस्तदा भीमो जरासन्धमरिन्दमः। उत्क्षिप्य भ्रामयामास बलवन्तं महाबलः। भ्रामयित्वा शतगुणं जानुभ्यां भरतर्षभ!। बभञ्ज पृष्ठं संक्षिप्य निष्पिष्य विननाद च। करे गृहीत्वा चरणं द्वेधा चक्रे महाबलः। तस्य निष्पिष्यमाणस्य पाण्डवस्य च गर्जतः। अभवत्तुमुलो नादः सर्वप्राणिभयङ्करः। वित्रेसुर्मागधाः सर्वे स्त्रीणां गर्भाश्च सुस्रुवुः। भीमसेनस्य नादेन जरासन्धस्य चैव ह। किं नु स्याद्धिमवान् भिन्नः किं नु स्विद्दीर्यते मही। इति वै मागधा जज्ञुर्भीमसेनस्य निःस्वनात्। ततो राज्ञः कुलद्वारि प्रसुप्तमिव तं नृपम्। रात्रौ गतासुमुत्सृज्य निश्चक्रमुररिन्दमाः। जरासन्धरथं कृष्णो योजयित्वा पताकिनम्। आरोप्य भ्रातरौ चैव मोचयामास बान्धवान्।"

जरित त्रि० जरा जाताऽस्य तारका० इतच्। १जातजरे वृद्धे मन्दपालर्षिकलत्रे २पक्षिणीभेदे तत्कथा

"तच्छ्रुत्वा मन्दपालस्तु वचस्तेषां दिवौकसाम्। क्व नु शीघ्रमपत्यं स्याद्बहुलं चेत्यचिन्तयत्। स चिन्तयन्नभ्यगच्छत् सुबहुप्रसवान् खगान्। शार्ङ्गिकां शार्ङ्गको भूत्वा जरितां समुपेयिवान्। तस्यां पुत्रानजनयच्चतुरो ब्रह्मवादिनः। तानपास्य स तत्रैव जगाम लपितां प्रति। बालान् सुतानण्डगतान् सह मात्रा मुनिर्वने। तस्मिन् गते महाभागे लपितां प्रति भारत!। अपत्यस्नेहसंयुक्ता जरिता बह्वचिन्तयत्" "तेन त्यक्तानसन्त्याज्यानृषीनण्डगतान्वने। न जहौ पुत्रशोकार्त्ता जरिता खाण्डवे सुतान्" भा० आ० १२८ अ०।

जरितृ त्रि० जॄ–तृच्। "स्तोतरि निघण्टुः "इमा ब्रह्माणि जरिता वो अर्च्चत्" ऋ० १।१६५।१४ "अभीषु णः सखीनामविता जरितॄणाम्" ४।३१। २जीर्णे च स्त्रियां ङीप्।

जरितारि पु०१जरितायां जाते मन्दपालर्षेः ज्येष्ठपुत्रे "जरितारौ कुलं ह्येतत् ज्येष्ठत्वेन प्रतिष्ठितम्" भा०आ०२६ ।

जरिन् त्रि० जराऽस्त्यस्य इनि। १वृद्धे जरायुक्ते हेमच० स्त्रियां ङीप्।

जरिमन् पु० जॄ–भावे इमनिच्। जरायाम् "नभो न रूपं जरिमा मिनाति" ऋ० १।७१।१०। "अस्तमिवेत् जरिमाणं जगम्याम्" १।११६।२५।

जरूथ पु० जॄ–ऊथन्। १मांसे त्रिका०। २जरणीये च। गॄ–वा० ऊथन् पृषो०। ३परुषभाषिणि। "जरूथं हन्यक्षि राये पुरन्धिम्" ऋ० ७।९।६। "जरूथं परुषभाषिणं जरणीयं वा रक्षोगणम्" भा०। इमामृचमधिकृत्य निरु० ६।१७। उक्तं "जरूथं गरूथं गृणातेः"। "विश्वा अग्नेऽपदहारातीर्येभिस्तपोभिरदहो जरूथम्" ऋ०७।१।७ "येभिर्यैस्तपोभिर्जरूथं परुषशब्दकारिणं राक्षसम्" भा०

जर्च(र्छ) उक्तौ तु० प० सक० सेट्। जर्च(र्छ)ति अजर्ची(र्छी)त्। जजर्च(र्छ)। [जजर्ज जर्जरः।

जर्ज उक्तौ भर्त्सने च तु० प०सक० सेट्। जर्जति अजर्जीत्

जर्जर पु० जर्ज–बा० अर। १शैलजे २शक्रध्वजे ३जीर्णे त्रि० मेदि०। "जर्जरं चास्य विषयं कुर्वन्ति प्रतिरूपकाः" भा० शा० ५६ अ०। "लघु जर्जरं दधिनिभं वृहद्विषं स्यानमपि हैमम्" वृ० ८अ०। ४खण्डिते च "कृत्वा पुंवत् पातमुच्चैर्भृगुभ्यो मूर्द्ध्नि ग्राव्णां जर्जरा निर्झरौघाः" माघः।

जर्जरानना स्त्री कुमारानुचरमातृभेदे। "पृथुवक्त्रा मधुलिका मधुकुम्भा तथैव च। पक्षालिका मत्कुणिका जरायुर्जर्जरानना" भा० श० ४७ अ०।

जर्जरित त्रि० जर्जरं करोति जर्ज+णिच्–कर्मणि क्त। १जीर्णीकृते २शकलीकृते। "कृष्णो जर्जरिताङ्गस्य कुम्भरस्यार्त्तचेतसः" हरि० ८६ अ०। "जराजर्जरितं पतिम्" भा०व० १२१ अ०। [२जराठरे च मेदि०

जर्जरीक त्रि० जर्ज–ईक फर्फरीका० नि०। १बहुच्छिद्रद्रव्ये

जर्भ उक्तौ भर्त्सने च तु० पर० सक० सेट्। जर्भति [हेमच० अजर्भीत् जजर्भ।

जर्ण पु० जॄ–नन्। १चन्द्रे २वृक्षे च मेदि०। ३जीर्णे त्रि०

जर्त्तिक जॄ–बा०तिक। १वाहीकदेशे। सोऽभिजनोऽस्य अण् बहुषु जनपदे लुप्। २तद्देशवासिषु ब० व०। "जर्त्तिका नाम वाहीकास्तेषां वृत्तं सुनिन्दितम्" भा०क०४४अ०।

जर्त्तिल पु० जॄ–विच् नित्यक०। १आरण्यतिले "जर्त्तिलः कथ्यते सद्भिररण्यप्रभवस्तिलः" शब्दार्थचि०। "जर्त्तिलैर्जुहोति" शत० ब्रा० ९।१।१।२। "जर्त्तिला अरण्यतिलाः" भा० "जर्त्तिलमिश्रान् गवेधुकासक्तून् अजा-

नृपसत्तमः । ताभ्यामेकं फलं प्रादात् पत्नीभ्यां भरतर्षभ ! । ते तदाम्रं द्विधा कृत्वा भक्षयामासतुः शुभे । भावित्वादपि चार्थस्य सत्यवाक्यतया मुनेः । तयोः समभवद्गर्भः फलप्राशनसम्भवः । ते च दृष्ट्वा स नृपतिः परां मुदमवाप ह । अथ काले महाप्राज्ञ ! यथा समयमागते । प्राजायेतामुभे राजन् ! शरीरशकले तदा एकाक्षिबाहुचरणे अर्द्धोदरमुखस्फिचे । दृष्ट्वा शरीरशकले प्रवेपतुरुभे भृशम् । उद्विग्ने सहसंमन्त्र्य ते भगिन्यौ तदाऽबले । सजीवे प्राणिशकले तत्यजाते सुदुःखिते । तयोर्धात्र्यौ सुसंवीते ते कृत्वा गर्भसंप्लवे । निर्गम्यान्तःपुरद्वारात् समुत्सृज्याभिजग्मतुः । ते चतुष्पथनिःक्षिप्ते जरा नामाथ राक्षसी । जग्राह मनुजव्याघ्र ! मांसशोणितभोजना । कर्त्तुकामा सुखवहे शकले सा तु राक्षसी । संयोजयामास तदा विधानबलनोदिता । ते समानीतमात्रे तु शकले पुरुषर्षभ ! । एकमूर्त्तिधरो वीरः कुमारः समपद्यत । ततः सा राक्षसी राजन् ! विस्मयोत्फुल्ललोचना । न शशाक समुद्वोढुं वज्रसारमयं शिशुम् । बालस्ताम्रतलं मुष्टिं कृत्वा चास्ये निधाय सः । प्राक्रोशदतिसंरब्धः सतोय इव तोयदः । तेन शब्देन सम्भ्रान्तः सहसान्तःपुरे जनः । निर्जगाम नरव्याघ्र ! राज्ञा सह परन्तप ! । ते चाबले परिम्लाने पयःपूर्णपयोधरे । निराशे पुत्रलाभाय सहसैवाभ्यगच्छताम् । ते तु दृष्ट्वा तथाभूते राजानञ्चेष्टसन्ततिम् । तञ्च बालं प्रबलिनं चिन्तयामास राक्षसी । नार्हामि विषये राज्ञो वसन्ती पुत्रगृद्धिनः । बालं पुत्रमिमं हन्तुं धार्म्मिकस्य महात्मनः । सा तं बालमुपादाय मेघलेखेव भास्करम् । कृत्वा च मानुषं रूपमुवाच वसुधाधिपम् । राक्षस्युवाच । बृहद्रथ ! सुतस्तेऽयं मया दत्तः प्रगृह्यताम् । तव पत्नीद्वये जातो द्विजातिवरशासनात् । धात्रीजनपरित्यक्तो मयायं परिरक्षितः । कृष्ण उवाच । ततस्ते भरतश्रेष्ठ ! काशिराजसुते शुभे । तं बालमभिपद्याशु प्रस्रवैरभ्यषिञ्चताम् । ततः स राजा संहृष्टः सर्वं तदुपलभ्य च । अपृच्छद्धेमगर्भाभां राक्षसीं तामराक्षसीम् । राजोवाच । का त्वं कमलगर्भाभे ! मम पुत्रप्रदायिनी । काम्यया ब्रूहि कल्याणि ! देवता प्रतिभासि मे ।"

राक्षस्युवाच । जरा नामास्मि भद्रं ते राक्षसी कामरूपिणी । तव वेश्मनि राजेन्द्र ! पूजिता न्यवसं सुखम् । गृहे गृहे मनुष्याणां नित्यं तिष्ठामि राक्षसी । गृहदेवीति नाम्ना वै पुरा सृष्टा स्वयम्भुवा । दानवानां विनाशाय स्थापिता दिव्यरूपिणी । यो मां भक्त्या लिखेत् कुड्ये सपुत्रां यौवनान्विताम् । गृहे तस्य भवेद्वृद्धिरन्यथा क्षयमाप्नुयात् । त्वद्गृहे तिष्ठमाना तु पूजिताहं सदा विभो ! । लिखिता चैव कुड्येषु पुत्रैर्बहुभिरावृता । गन्धपुष्पैस्तथा धूपैर्भक्ष्यभोज्यैः सुपूजिता । साहं प्रत्युपकारार्थं चिन्तयाम्यनिशं तव । तवेमे पुत्रशकले दृष्टवत्यस्मि धार्म्मिक ! । संश्लेषिते मया दैवात् कुमारः समपद्यत । तव भाग्यान्महाराज ! हेतुमात्रमहं त्विह । मेरुं वा खादितुं शक्ता किं पुनस्तव बालकम् । गृहे सम्पूजनात् तुष्ट्या मया प्रत्यर्पितस्तव । कृष्ण उवाच । एवमुक्त्वा तु सा राजंस्तत्रैवान्तरधीयत । स संगृह्य कुमारं तं प्रविवेश गृहं नृपः । तस्य बालस्य यत् कृत्यं तच्चकार नृपस्तदा । आज्ञापयच्च राक्षस्या मगधेषु महोत्सवः । तस्य नामाकरोच्चैव पितामहसमः पिता । जरया सन्धितो यस्माज्जरासन्धो भवत्वयम् । सोऽवर्द्धत महातेजा मगधाधिपतेः सुतः । प्रमाणबलसम्पन्नो हुताहुतिरिवानलः। मातापित्रोर्नन्दिकरः शुक्लपक्षे यथा शशी" भा० स० १७।१८ अ० ।

जरासन्धवध पु० जरासन्धस्य बधमधिकृत्य कृतो ग्रन्थः अण् आख्यायिकायां तस्य लुपि व्यक्तिवचनत्वात् पुंस्त्वम् । भारतसभापर्वान्तर्गते अवान्तरपर्वभेदे तच्च पर्व सभापर्वणि १८अध्यायावधि २७अध्यायपर्य्यन्तम् । "जरासन्धवधः पर्व तथा दिग्विजयस्ततः" भा० आ० १ अ०

जरासन्धजित् पु० जरासन्धं जितवान् जि—क्विप् ६त० । भीमे पाण्डवे तज्जयकथा भा० स० २३अ०

"कार्त्तिकस्य तु मासस्य प्रवृत्तं प्रथमेऽहनि । अनाहारं दिवारात्रमविश्रान्तमवर्त्तत । तद्वृत्तं तु त्रयोदश्यां समवेतं महात्मनोः । चतुर्द्दश्यां निशायान्तु निवृत्तो मागधः क्लमात् । तं राजानं तथा क्लान्तं दृष्ट्वा राजन् ! जनार्द्दनः । उवाच भीमकर्माणं भीमं सम्बोधयन्निव । क्लान्तः शत्रुर्न कौन्तेय ! लभ्यः पीड़यितुं रणे । पीड्यमानो हि कार्त्स्न्येन जह्याज्जीवितमात्मनः। तस्मात्ते नैव कौन्तेय ! पीड़नीयो जनाधिपः । सममेतेन युध्यस्व बाहुभ्यां भरतर्षभ ! । एवमुक्तः स कृष्णेन पाण्डवः परवीरहा । जरासन्धस्य तद्रूपं ज्ञात्वा चक्रे मतिं बधे ।

चीरमेके" कात्या० श्रौ० १८।१।१। कर्केण तदर्थकतया व्याख्यातम्।

जर्त्तु पु० जन—"जनेस्तु रश्च" उणा०५।४६ सू० तु रश्चान्तादेशः। १योनौ तस्यां देहस्य जायमानत्वात् तथात्वम्। २हस्तिनि च उणादिकोषः अत्र शब्दकल्पद्रुमे जर्त्तेति अकारान्तशब्दकल्पनं प्रामादिकमेव। संक्षिप्तसारे च लिपिकरप्रमादकृतमेवाकारान्तत्वम्। [अजर्त्सीत्। जजर्त्स।

जर्त्स भर्त्सने उक्तौ रक्षणे च भ्वा०पर० सक० सेट्। जर्त्सति

जर्भरि त्रि० जृभ—गात्रविनाशे अरि, भृ—यङ्लुक् इः पृषो० बस्य जः। १गात्रविनाशकर्त्तरि २भर्त्तरि च। स्त्रियां वा ङीप्। "सृण्येव जर्भरी तुर्फरी तु" ऋ० १०।१०६।६। भाष्ये तथैव व्युत्पादितम् निरु० परि०१।५ "इमामृचमधिकृत्य"द्विविधा सृणिः जर्भरि भर्त्ता च हन्ता च तथाश्विनौ चापि भर्त्तारौ जर्भरी भर्त्तारौ" १। इमामृचमधिकृत्य चार्वाकैरुपहसितम् "त्रयोवेदस्य कर्त्तारो भण्डधूर्त्तनिशाचराः जर्भरीतुर्फरीत्यादि पण्डितानां वचः स्मृतम्" सर्वद० चार्व्वाकदर्शने। स्त्रियां वा ङीप्।

जर्हिल पु०जर्त्तिल+पृषो०। जर्त्तिले आरण्यतिले राजनि०।

जल आच्छादने चुरा० उभ० सक० सेट्। जालयति ते अजीजलत् त।

जल तीक्ष्णीभवने जीवनोपयोगिक्रियायां च अक०भ्वा०पर०सेट्। जलति अजालीत् जजाल जेलतुः। ज्वलादि जलः जालः।

जल त्रि० जल—अच् डस्य लो वा। १जडे। २उदके, ३ह्रीवेरे गन्धद्रव्ये, ज्योतिषोक्ते लग्नावधिके ४चतुर्थस्थाने, ५पूर्वाषाढ़ानक्षत्रे च न०शब्दार्थचि०। जलञ्च पञ्चभूतान्तर्गतभूतभेदः तद्भेदगुणादिकं सुश्रुतोक्तं अम्बुशब्दे २२८३० पृष्ठे दर्शितम् घनशब्दे २७८६ पृष्ठे च तस्य विवृतिः। "अपां शैत्यं तथा क्लेदो द्रवत्वं स्नेहसौम्यता। जिह्वाभिष्यन्दनञ्चापि भौमानां श्रपणं तथा। चतुर्थमापो विज्ञेयं जिह्वाध्यात्मं प्रचक्षते। अधिभूतं रसास्तत्र सोमस्तत्राधिदैवतम्" भा० आश्व०अ०। "तदङ्गनिष्यन्दजलेन लोचने" "जलाभिलाषी जलमाददानाम्" रघुः। "न तज्जलं यन्न सुचारुपङ्कजम्" भट्टिः।

"तृषिताय रोगिणेऽपि जलं देयं तथा च "पानीयं प्राणिनां प्राणास्तदायत्तं हि जीवनम्। तस्मात् सर्वास्ववस्थासु न क्वचित् वारि वार्य्यते। अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम्। तोयाभावे पिपासार्त्तः क्षणात् प्राणैर्विमुच्यते। तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति। तस्माज्जलमवश्यं हि दातव्यं भेषजैः सममिति" राजवल्लभः। "पादेन घटमुत्थाप्य भाजने पूरयेज्जलम्। तज्जलं मदिरातुल्यं भाण्डस्थं सुरया समम्" इति कर्मलोचनः तस्य दानमाहात्म्यं यथा। "अन्ने दत्ते नरेणेह प्राणा दत्ता भवन्त्युत। प्राणदानाद्धि परमं न दानमिह विद्यते। अन्नं चापि प्रभवति पानीयात् कुरुसत्तम!। नीरजातेन हि विना न किञ्चित् संप्रवर्त्तते। अन्नौषध्यो महाराज! वीरुधश्च जलोद्भवाः। यतः प्राणभृतां प्राणाः सम्भवन्ति विशाम्पते!। तस्मात् पानीयदानाद्धि न परं विद्यते क्वचित्। तच्च दद्यान्नरो नित्यं यदीच्छेद्भूतिमात्मनः। धन्यं यशस्यमायुष्यं जलदानमिहोच्यते। शत्रूंश्चाप्यधि कौन्तेय! सदा तिष्ठति तोयदः। सर्वकामानवाप्नोति कीर्त्तिञ्चैवेह शाश्वतीम्। प्रेत्य चानन्त्यमश्नाति पापेभ्यश्च प्रमुच्यते। तोयदो मनुजव्याघ्र! स्वर्गं गत्वा महाद्युते!। अक्षयान् समवाप्नोति लोकानित्यब्रवीन्मनुः" भा० शा० दा० अ० हेमाद्रौ दा० खण्डे विशेषो दृश्यः "पानीयं प्राणिनः प्राणाः पानीयं पावनं महत्। पानीयस्य प्रदानेन तृप्तिर्भवति शाश्वती" जलदानमन्त्रः जलवर्षणज्ञानाय वर्षाद्यधिपराजाद्यानयनं तत्फलञ्च कृषिसंग्रहे दर्शितं यथा

"वृष्टिमूला कृषिः सर्व्वा वृष्टिमूलञ्च जीवनम्। तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरेत्। ततो वर्षस्य राजानं मन्त्रिणं मेघमेव च। आढ़कं सलिलञ्चापि वृष्टिज्ञानाय शोधयेत्। शाकं त्रिगुणितं कृत्वा द्वियुतं मुनिना (७) हरेत्। भागशिष्टो नृपोज्ञेयो नृपान्मन्त्री चतुर्थकः।" अथ नृपादिफलम्। "चित्तलाऽर्के नृपे चन्द्रजे वृष्टिर्विरुग्रा निशापतौ। वृष्टिर्मन्दा सदा भौमे वृष्टिरुत्तमा। गुरौ च शोभना वृष्टिर्भार्गवे वृष्टिरुत्तमा। पृथिवी धूलिसम्पूर्णा वृष्टिहीना शनौ नृपे। यस्मिन् संवत्सरे चैव अर्को राजा भविष्यति। शस्यहानिर्भवेत्तत्र नित्यं रोगश्च जायते। यस्मिन्नब्दे विधूराजा शस्यपूर्णा च मेदिनी। नैरुज्यञ्च सुवृष्टिश्च सुभिक्षं क्षितिमण्डले। यस्मिन्नब्दे कुजो राजा शस्यशून्या च मेदिनी। नैरुज्य विनिर्दिष्टस्य दुर्भिक्षं क्षितिमण्डले। यत्राब्दे चन्द्रजो राजा सर्वशस्या च भूर्भवेत्। धर्म्मे स्थितिर्जनस्यैव वृष्टिकारणमुत्तमम्। यत्राब्दे च गुरूराजा सर्व्वा रत्नवती मही। नृपाणां वर्द्धनं नित्यं धनधान्यादिकं

फलम् । राजा दैत्यगुरुः कुर्य्यात् सर्व्वशस्यं धरातलम् । संग्रामो वातवृष्टिश्च रोगोपद्रव एव च । मन्दा वृष्टिः सदा वातो राजा संवत्सरे शनिः । शाकस्य कालं त्रिगुणीकृतञ्च द्विबाणवस्वब्धिसमन्वितञ्च । राजा च मन्त्री च जलाधिपश्च शस्याधिपः स्यान्मुनिभाजितेन । (शाकस्य कालं त्रिगुणीकृतञ्च पक्षेण युक्तं मुनिना हरेच्च । सूर्य्यादि वर्षाधिपतिश्च शेषो मन्त्री चतुर्थो भवति प्रसिद्धः ।) पाठान्तरम् । यथा वृष्टिफलं प्रोक्तं वत्सरे पञ्चभूपतौ । तथा वृष्टिफलं ज्ञेयं विज्ञैर्वत्सरमन्त्रिणि ।” अथ मेघानयनम् । “शाकं वह्निसमायुक्तं वेदेन भागमाहरेत् । शेषं मेघं विजानीयादावर्त्तादि यथाक्रमम् । आवर्त्तश्चैव संवर्त्तः पुष्करो द्रोण एव च । चत्वारो जलदाः प्रोक्ता आवर्त्ताद्या मनीषिभिः । एकदेशेन चावर्त्ते संवर्त्ते सर्व्वतो जलम् । पुष्करे दुष्करं वारि द्रोणे बहुजला मही ।” अथ जलाढ़कनिर्णयः । “शतयोजनविस्तीर्णं त्रिंशद्योजनमुच्छ्रितम् । आढ़कस्य भवेन्मानं मुनिभिः परिकीर्त्तितम् । युग्माऽजगोमीनगते शशाङ्के रविर्यदा कर्कटकं प्रयाति । शताढ़कं कं हरिकार्म्मुकेऽर्द्धं वदन्ति कन्यामृगयोरशीतिम् । कुलीरकुम्भालितुलाभिधाने जलाढ़कं षण्णवतिं वदन्ति । अनेन मानेन तु वत्सरस्य निरूप्य नीरं कृषिकर्म्म कार्य्यम्” । एतत्सर्व्वं विंशत्या हरणीयम् । समुद्रे दश भागांश्च षड्भागानपि पर्व्वते । पृथिव्यां चतुरोभागान् सदा वर्षति वासवः ।” अथ पौषादिमासीयवृष्टिलक्षणम् । “सार्द्धं दिनद्वयं मानं कृत्वा पौषादिना बुधः । गणयेन्मासिकीं वृष्टिमवृष्टिं वानिलक्रमात् । सौम्यवारुणयोर्वृष्टिरवृष्टिः पूर्व्वयाम्ययोः । निर्व्वाते वृष्टिहानिः स्यात् सङ्कुले सङ्कुलं जलम् । एकैकं पञ्चदण्डेन मासस्य दिवसो मतः । पूर्व्वार्द्धे वासरी वृष्टिरुत्तरार्द्धे च नैशिकी । दत्त्वा दण्डे पताकान्तु वातस्यानुक्रमेण च । विज्ञेया मासिकी वृष्टिर्दृष्ट्वा वातं दिवानिशम् । धूलीभिरेव शवलीकृतमन्तरीक्षं विद्युत्कटाक्षस्फुरितवारुणदिग्विभागम् । पौषे यदा भवति मासि सिते च पक्षे तोयेन तत्र सकला प्लवते धरित्री । पौषे मासि यदा वृष्टिः कुज्झटिर्व्वा यदा भवेत् । तदादौ सप्तमे मासि तां तिथिं प्लाव्यते मही । अथ माघादिफलम् ।

माघस्य सितसप्तम्यां दृष्ट्वा मेघदर्शनम् । तदा संवत्सरो धन्यः सर्व्वशस्यफलप्रदः । सप्तम्यां स्वातियोगे यदि पतति जलं माघपक्षेऽन्धकारे वायुर्व्वा चण्डवेगः सजलजलधरो गर्ज्जितो वासरे वा । विद्युन्मालाकुलं वा यदि भवति नभो नष्टचन्द्रार्कतारं तावद्वर्षन्ति मेघाः प्लुतधरणितले यावदाकार्त्तिकान्तम् । माघे बहुलसप्तम्यां तथैव फाल्गुनस्य च । चैत्र शुक्लतृतीयायां वैशाखे प्रथमेऽहनि । एतासु चण्डवातो वा तड़िद्वृष्टिरथापि वा । तदा स्यात् शोभना प्रावृट् भवेत् शस्यवती क्षितिः । धनुर्मकरकुम्भेषु यदा वर्षति वासवः । तदादि सप्तमे मासि वारिपूर्णा भवेन्मही ।”

अथ चैत्रलक्षणम् । प्रतिपदि मधुमासे भानुवारः सितायां यदि भवति तदा स्याच्चित्तला वृष्टिरब्दे । अविरलपृथुधारासान्द्रवृष्टिप्रवाहैर्धरणितलमशेषं प्लाव्यते सोमवारे । अवनितनयवारे नास्ति वृष्टिर्न शस्यं कविगुरुभृगुजानां वासरे शस्यपूर्त्तिः । जलनिधिरपि शोषं याति वारेण शौरेर्भवति खलु धरित्री धूलिजालैरदृश्या । चैत्राद्यभागे चित्रायां भवेच्चित्तला क्षितिः । शेषेऽपि चैत्र चात्यर्थं क्ष्मा मध्ये बहुवर्षिणी ।

अथ वैशाखलक्षणम् । प्रवाहयुक्तनद्यान्तु दण्डं न्यस्य जले निशि । वैशाखशुक्लप्रतिपन्निशौ वृष्टिं निरूपयेत् । ओं सिद्धिरिति मन्त्रेण मन्त्रयित्वा शतद्वयम् । अङ्कयित्वा तु तं दण्डमङ्कतुल्ये जले क्षिपेत् । प्रातरुत्थाय सहसा तदङ्कन्तु निरूपयेत् । समं चैवाधिकं न्यूनं भविष्यज्जलकाङ्क्षया । गतवत्सरवद्वारि वन्या चैव समे भवेत् । हीने हीनं भवेद्वारि भवेद्वन्या च तादृशी । अङ्काधिक्ये च द्विगुणा वृष्टिर्वन्या च जायते । इदं पराशरेणोक्तं भविष्यद्वृष्टिलक्षणम् । सूर्य्योदये विषुवतो जगतां विपत्तिर्मध्यं गते दिनकरे बहुशस्यहानिः । अस्तं गते दिनकरे तु तदर्द्धशस्यमैश्वर्य्यभोगमतुलं खलु चार्द्धरात्रौ । तदा संवत्सरो धन्यो बहुशस्यफलप्रदः ।

अथ ज्यैष्ठलक्षणम् । ज्यैष्ठादौ च सिते पक्षे आर्द्रादौ दशऋक्षके । सजला निर्ज्जला यान्ति निर्ज्जलाः सजला इव । रेखात्रयं समुल्लिख्य ताभिस्ताश्च विवर्द्धयेत् । त्रिशृङ्गं सर्व्वकोणेषु पर्व्वतं तत्र दापयेत् । ईशानादि दक्षिणाङ्कान् संलिखेदनलादितः । येन येनाजसंक्रान्तिस्तेन प्रावृट्फलं भवेत् । अतिवृष्टिः समुद्रे स्यादनावृष्टिस्तु पर्व्वते । कक्षयोश्चित्तला वृष्टिः सुवृष्टिः शैलसन्धिषु । (मतान्तरे । रेखाद्वयं समुल्लिख्य ताड़ितं वेदसम्भवैः । ईशानदक्षिणे शृङ्गं लिखेदनलभादितः । येन

येनाजसंक्रान्तिस्तेन प्रावृट्फलं वदेत् । कश्चिन्त्यादौ समुद्रेषु नक्षत्रञ्च द्वयं द्वयम् । कक्षपर्वततीरेषु एकैकं परिकीर्त्तितम् ।") "चित्रास्वातिविशाखासु ज्यैष्ठे मासि निरभ्रता । तास्वेव श्रावणे मासि यदि वर्षति, वर्षति ।" अथ आषाढ़लक्षणम् । "आषाढ्यां पौर्णमास्यां सुरपतिककुभं वाति वातः, सुवृष्टिः, शस्यध्वंसं प्रकुर्य्याद्दहनदिशि गते, मन्दवृष्टिर्यमेन । नैरृत्यां शस्यहानि, वरुणदिशि जलं, वायुना वायुकोपः, कौवेर्य्यां शस्यपूर्णां प्रथयति नियतं मेदिनीं, शस्यमीशे । आषाढ़स्य सिते पक्षे नवम्यां यदि वर्षति । वर्षत्येव तदा देवस्तत्राऽवृष्टौ कुतो जलम् । शुक्लाषाढ़ीनवम्यामुदयगिरितटीनिर्मलत्वं प्रयाते स्वीयं कालं विधत्ते खरतरकिरणो मण्डलाकारमस्थम् । जीमूतैर्वेष्टितोऽसौ यदि भवति रविर्गम्यमानेऽस्तशैले तावत् पर्य्यन्तमेव प्रपदति जलदो यावदस्तं तुलायाः ।"

अथ श्रावणलक्षणम् । "रोहिण्यां श्रावणे मासि यदि वर्षति वासवः । तदा वृष्टिर्भवेत्तावद्यावज्जोत्तिष्ठते हरिः । कर्कटे रोहिणीऋक्षे यदि वृष्टिर्न जायते । तदा पराशरः प्राह हाहा लोकस्य का गतिः । श्रावणे मासि रोहिण्यां न भवेद्वर्षणं यदि । विफलारम्भसंक्लेशास्तदा स्युः कृषिवृत्तयः ।"
अथ भाद्रलक्षणम् । सिंहे च भौमवारे च पूर्वफल्गुनिऋक्षके । व्यतीपाते च नन्दायां तुलायां वर्षयेद्रविः ।"
अथ सद्योवृष्टिज्ञानम् । जलहस्तो जलस्थो वा निकटेऽथ जलस्य वा । हद्दा पृच्छति वृष्ट्यर्थं वृष्टिः संजायतेऽचिरात् । अकस्मादण्डमादाय उत्तिष्ठति पिपीलिका । भेकः शब्दायतेऽकस्मात्तदा वृष्टिर्भवेद्ध्रुवम् । विड़ाला नकुलाः सर्पा ये चान्ये वा बिलेशयाः । धावन्ति शरभा मत्ताः सद्यो वृष्टिर्भवेद्ध्रुवम् । कुर्वन्ति बालका मार्गे धूलीभिः सेतुबन्धनम् । मयूराश्चैव नृत्यन्ति सद्यो वृष्टिः प्रजायते । अवातवातदुष्टानां नृणामङ्गव्यथा यदि । वृक्षाद्यारोहणश्चाहेः सद्यो वर्षणलक्षणम् । पक्षयोः शोषणं रौद्रे खगानामम्बुचारिणाम् । झिल्लीरवस्तथाकाशे सद्यो वृष्टिः प्रजायते ।"

अथ ग्रहसञ्चारे वृष्टिलक्षणम् । "चलत्यङ्गारके वृष्टिर्भुवा वृष्टिः शनैश्चरे । वारिपूर्णां महीं कृत्वा पश्चात् सञ्चरते गुरुः । ग्रहाणामुदये चास्ते तथा वक्रातिचारयोः । प्रायो वर्षन्ति जलदा नृपाणामुद्यमेऽपि च । चित्रामध्यगते जीवे भिन्नभाण्डमिव स्रवेत् । ततः स्वातीं समासाद्य महामेघान् विसृजति । प्रावेणोपचितान्मेघान् स्वातिरेकाऽप्यपोहति । श्रवणे अनितं वर्षं रेवत्याञ्च विसृजति ।"
अथ अनावृष्टिलक्षणम् । "ध्रुवे च वैष्णवे हस्ते मूले शाक्रे चरन् कुजः । सद्यः करोत्यनावृष्टिं कृत्तिकासु मघासु च । कुजपृष्ठगतो भानुर्भानुपृष्ठगतः कुजः । सूर्य्येण च युतो भौमः समुद्रमपि शोषयेत् । सद्यो निकृन्तयेद्वृष्टिं चित्रामध्यगतो भृगुः । अङ्गारको यदा सिंहे तदङ्गारमयी मही । स एव रविणा युक्तः समुद्रमपि शोषयेत् ।"
ज्यो० त० कश्चिद्विशेष उक्तो यथा
"भुजबलभीमे" व्रजति यदि कुजः पतङ्गमार्गे घट इव भिन्नतलो जलं ददाति । अथ भवति दिवाकराग्रतश्चेत् प्रलयघनानपि शोषयत्यवश्यम् । यावन्मासं खण्डहनुश्चरति धनुरथो मन्मथं मीनकन्ये तावद्भिक्षापीड़ा भवति च मरणं क्षुत्पिपासादिघोरम् । उर्व्वीं निस्तूय शब्दा शवशिरपटलैर्नर्त्तयन्ते पिशाचाः ग्रामाः शून्या भवेयुर्नरपतिरहिता हास्ति कङ्कालमाला । वक्रं करोति रविजो धरणीसुतो वा मूलर्क्षहस्तमघरेवतिमैत्रभेषु । कलोपमङ्गपतनादि च सैनिकानां सर्वत्र लोकमरणं जलधौतदेशः । यदा च सौरिः सुरराजमन्त्रिणा समेत्य तिष्ठेत् क्वचिदृक्षमण्डले । तदाङ्गवङ्गान्ध्रककोशलेषु त्रिभागशेषां कुरुते वसुन्धराम् । तिष्ठेतां यावदेकर्क्षे वाक्पत्यर्यनिजौ । मदे तावत् सुरोगसंग्रामात् प्रजानां क्षयमादिशेत्" । "आरभ्य शुक्लप्रतिपत्तिथिं मार्गात् चैत्रकं गर्भनीहारैर्जलदैरिति प्रावृट्परीक्षणम् । यन्नक्षत्रं गतवति विधौ जायते तत्र गर्भः पश्चादस्मान्नवतिशतके १९चाह्नि तस्य प्रसूतिः" । गर्भशब्दे च २५५१ अस्य गर्भोवृहत्संहितोक्तो दर्शितः । वर्षणसूचकनिमित्तानि वृ० सं० २४ अ० उक्तानि यथा "ज्यैष्ठ्यां समतीतायां पूर्वाषाढ़ादिसम्प्रवृष्टेन । शुभमशुभं वा वाच्यं परिमाणं चाम्भसस्तज्ज्ञैः । हस्तविशालं कुण्डकमधिकृत्याम्बुप्रमाणनिर्देशः । पञ्चाशत्पलमाढ़कमनेन मिनुयाज्जलं पतितम् । येन धरित्री मुद्रा जनिता वा विन्दवस्तृणाग्रेषु । वृष्टेन तेन वाच्यं परिमाणं वारिणः प्रथमम् । केचिद्यथाभिवृष्टं दशयोजनमण्डलं वदन्त्यन्ये । गर्गवशिष्ठपराशरमतमेतद्वादशाच्च परम् । येषु च भेष्वभिवृष्टं भूयस्तेष्वेव वर्षति प्रायः । यदि माप्या(२०)दिषु वृष्टं सर्वेषु तदा त्वनावृष्टिः ।

हस्ताप्य२०सौम्य५चित्रापौष्ण१७धनिष्ठासु षोड़श द्रोणाः। शतभिषगैन्द्र१८स्वातिषु चत्वारः कृत्तिकासु दश। श्रवणे मघानुराधाभरणीमूलेषु दश चतुर्युक्ताः। फल्गुन्यां पञ्चकृतिः २५पुनर्वसौ विंशतिर्द्रोणाः। ऐन्द्राग्न्याख्ये१६ वैश्वे२१ च विंशतिः सार्प६भे दश त्र्यधिकाः। २५अहिर्बुध्न्यार्यम्ण१४प्राजापत्येषु पञ्चकृतिः२५। पञ्चदशाजे४ पुष्ये च कीर्त्तिता वाजिभे दश द्वौ च। रौद्रे६ऽष्टादश कथिता द्रोणा निरुपद्रवेष्वेषु। रविरविसुतकेतुपीडिते भे क्षितितनयत्रिविधाद्भुताहते च। भवति हि न शिवं न चापि वृष्टिः शुभसहिते निरुपद्रुते शिवं च।”

“वर्षाप्रश्ने जलवर्षणनिर्णयः तत्रैव २८ अ० यथा “वर्षाप्रश्ने सलिलनिलयं राशिमाश्रित्य चन्द्रो लग्नं यातो भवति यदि वा केन्द्रगः शुक्लपक्षे। सौम्यैर्दृष्टः प्रचुरमुदकं पापदृष्टोऽल्पमम्भः प्रावृट्काले सृजति न चिराच्चन्द्रवद्भार्गवोऽपि। आर्द्रं द्रव्यं स्पृशति यदि वा वारि तत्सञ्ज्ञकं वा तोयासन्नो भवति यदि वा तोयकार्योन्मुखो वा। प्रष्टा, वाच्यं सलिलमचिरादस्ति निःसंशयेन पृच्छाकाले सलिलमिति वा श्रूयते यत्र शब्दः”। अथ सद्योवृष्टिनिमित्तम् “उदयशिखरिसंस्थो दुर्निरीक्ष्योऽतिदीप्त्या द्रुतकनकनिकाशः स्निग्धवैदूर्यकान्तिः। तदहनि कुरुतेऽम्भस्तोयकाले विवस्वान् प्रतपति यदि वोच्चैः खं गतोऽतीव तीक्ष्णम्। विरसमुदकं गोनेत्राभं वियद्विमला दिशो लवणविकृतिः काकाण्डाभं यदा च भवेन्नभः। पवननिगमः पोप्लूयन्ते झषाः स्थलगामिनो रसनमसकृन्मण्डूकानां जलागमहेतवः। मार्जारा भृशमवनिं नखैर्लिखन्तो लोहानां मलनिचयः सविस्रगन्धः। रथ्यायां शिशुनिचिताश्च सेतुबन्धाः सम्प्राप्तं जलमचिरान्निवेदयन्ति। गिरयोऽञ्जनपुञ्जसन्निभा यदि वा बाष्पनिरुद्धकन्दराः। कृकवाकुविलोचनोपमाः परिवेषाः शशिनश्च वृष्टिदाः। विनोपघातेन पिपीलिकानामण्डोपसंक्रान्तिरहिव्यवायः। द्रुमाधिरोहश्च भुजङ्गमानां वृष्टेर्निमित्तानि गवां प्लुतं च। तरुशिखरोपगताः कृकलासा गगनतलस्थितदृष्टिनिपाताः। यदि च गवां रविवीक्षणमूर्द्ध्वं निपतति वारि तदा नचिरेण। नेच्छन्ति विनिर्गमं गृहाद्धुन्वन्ति श्रवणान् खुरानपि। पशवः पशुवच्च कुक्कुरा यदि चाम्भः पततीति निर्दिशेत्। यदा स्थिता गृहपटलेषु कुक्कुरा भवन्ति वा यदि विततं दिवोन्मुखाः। दिवा तडिद्यदि च पिनाकिदिक्प्रभवा तदा क्षमा भवति समातिवारिणा। शुककपोतविलोचनसन्निभो मधुनिभश्च यदा हिमदीधितिः। प्रतिशशी च यदा दिवि राजते पतति वारि तदा नचिराद्दिवः। स्तनितं निशि विद्युतो दिवा, रुधिरनिभा यदि दण्डवत् स्थिताः। पवनः पुरतश्च शीतलो यदि सलिलस्य तदागमो भवेत्। वल्लीनां गगनतलोन्मुखाः प्रवालाः स्नायन्ते यदि जलपांशुभिर्विहङ्गाः। सेवन्ते यदि च सरीसृपास्तृणाग्राण्यासन्नो भवति तदा जलस्य पातः। मयूरशुकचाषचातकसमानवर्णा यदा, जपाकुसुमपङ्कजद्युतिमुषश्च सन्ध्याघनाः। जलोर्मिनगनक्रकच्छपवराहमीनोपमाः प्रभूतपटसञ्चया न तु चिरेण यच्छन्त्यपः। पर्यन्तेषु सुधाशशाङ्कधवला मध्येऽञ्जनालित्विषः स्निग्धा नैकपुटाः क्षरज्जलकणाः सोपानविच्छेदिनः। माहेन्द्रीप्रभवाः प्रयान्त्यपरतः प्राक् चाम्बुपाशोद्भवा ये ते वारिमुचस्त्यजन्ति नचिरादम्भः प्रभूतं भुवि। शक्रचापपरिघप्रतिसूर्या रोहितोऽथ तडितः परिवेषाः। उद्गमास्तसमये यदि भानोरादिशेत् प्रचुरमम्बु तदाशु। यदि तित्तिरिपत्रनिभं गगनं मुदिताः प्रवदन्ति च पक्षिगणाः। उदयास्तमये सवितुर्द्युनिशं विसृजन्ति घना नचिरेण जलम्। यद्यमोघकिरणाः सहस्रगोरस्तभूधरकरा इवोच्छ्रिताः। भूसमं च रसते यदाम्बुदस्तन्महद्भवति वृष्टिलक्षणम्। प्रावृषि शीतकरो भृगुपुत्रात् सप्तमराशिगतः शुभदृष्टः। सूर्यसुतान्नवपञ्चमगो वा सप्तमगश्च जलागमनाय। प्रायो ग्रहाणामुदयास्तकाले समागमे मण्डलसंक्रमे च। पक्षक्षये तीक्ष्णकरायनान्ते वृष्टिर्गतेऽर्के नियमेन चार्द्राम्। समागमे पतति जलं ज्ञशुक्रयोर्ज्ञजीवयोर्गुरुसितयोश्च सङ्गमे। यमारयोः पवनहुताशजं भयं न दृष्टयोरसहितयोश्च सद्ग्रहैः। अग्रतः पृष्ठतो वापि ग्रहाः सूर्यावलम्बिनः। यदा तदा प्रकुर्वन्ति महीमेकार्णवामिव”

कृषौ केदाराज्जलमोचनकाल उक्तो यथा “नैरुज्यार्थं हि धान्यानां जलं भाद्रे विमोचयेत्। मूलमात्रन्तु संस्थाप्य कारयेज्जलमोक्षणम्। भाद्रे च जलसम्पूर्णं धान्यं विविधबाधकैः। प्रपीडितं कृषाणानां न धत्ते फलमुत्तमम्”। कृषिपराशरः। [हारा०।

जलकण्टक पु० जले कण्टक इव। १शृङ्गाटके २कुम्भीरे च

जलकपि पु० जले कपिरिव। शिशुमारे जलजन्तुभेदे (शोषक) हारा०।

जलकपोत पु० जलजातः कपोतः । जलपारावते राजनि०।

जलकरङ्क पु० जलस्य करङ्क इवाधारः । १नारिकेले, २मेघे च । जलस्य करङ्क इव ।३पद्मे च मेदि० ।

जलकल्क पु० जलेन कल्क इव । जम्बाले हारा० ।

जलकाक पुंस्त्री जले काक इव कृष्णत्वात् । (पानकौडी) पक्षिभेदे । राजनि० । स्त्रियां जातित्वात् ङीष् ।

जलकाङ्क्ष पुंस्त्री जलं काङ्क्षति काङ्क्ष–अण् उप० स० । १हस्तिनि त्रिका० स्त्रियां जातित्वात् ङीष् । २जलाभिलाषिणि त्रि० । पा० स्त्रियां टाप् मुग्धबो० मते ईप् ।

जलकाङ्क्षिन् पु० जलं काङ्क्षति काङ्क्ष–णिनि । १हस्तिनि हारा० । २जलाभिलाषिणि त्रि० । स्त्रियां ङीप् ।

जलकान्तार पु० जलमेव कान्तारो दुर्गमवर्त्म यस्य । वरुणे हेमच० ।

[भिलाषुके त्रि० ।

जलकामुक पु० ६त० । १कुटुम्बिनीवृक्षे राजनि० । १जला-

जलकिराट पुंस्त्री जले किराट इव । ग्राहे (हाङ्गोर) । हारा० । स्त्रियां जातित्वात् ङीष् ।

जलकुक्कुट पुंस्त्री जले कुक्कुट इव । (गाङ्गचिल) पक्षिभेदे हारा० । "भृङ्गराजैस्तथा हंसैर्दात्यूहैर्जलकुक्कुटैः" भा० व० १०८ अ०"कादम्बैश्चक्रवाकैश्च कुररैर्जलकुक्कुटैः। १५८ अ० स्त्रियां जातित्वात् ङीष् ।

जलकुक्कुभ पुंस्त्री जले कुक्कुभ इव । कोयष्टिखगे (कोडापाखि) हेम० स्त्रियां जातित्वात् ङीष् । [शब्दार्थचि०।

जलकुन्तल पु० जलस्य कुन्तलः केश इव । जलकेशे शैवाले ।

जलकुब्जक पु० जले कुब्ज इव कायति कै–क । पङ्कारे शब्दार्थचि० ।

[मेदि० ।

जलकूपी स्त्री जलेन कूपीव । १कूपगर्त्ते २पुष्करिण्यां च

जलकूर्म पुंस्त्री जले कूर्म इव । शिशुमारे त्रिका० । स्त्रियां जातित्वात् ङीष् ।

जलकेश पु० जलस्य केश इव । शैवाले हारा० ।

जलकेतु पु० "जलकेतुरपि पश्चात् स्निग्धं शिखया परेण चोन्नतया" वृ०स० ११ अ०उक्ते केतुभेदे ।

जलक्रिया स्त्री जलसाध्या क्रिया । पित्रादीनां तर्पणे "कालिन्द्यां विधिवत् स्नात्वा कृतपुण्यजलक्रियः" भाग० ६।१६।१४ "कृत्वा वर्ज्या जलक्रिया" स्मा० त० ।

जलक्रीड़ा स्त्री ३त० । नद्यादौ सखिभिः परस्परं जलसेचनरूपक्रीड़ायाम् । "सहिताः भ्रातरः सर्वे जलक्रीड़ामवाप्नुमः" । "ततस्ते सहिताः सर्वे जलक्रीड़ामकुर्वत" भा० आ० १२८ अ० ।

जलखग पुंस्त्री० ६त० । जलचरविहगे स्त्रियां जातित्वात् ङीष् । "ह्रदिनी विलासिनीनां जलखगनखविक्षतेषु रम्येषु" वृ० स० ४८ अ० ।

जलगर्भ पु० जलसूचको गर्भः । वृ० सं० उक्ते मेघनिःश्वसजलसूचके निमित्तभेदे गर्भशब्दे २५५१ पृ०विवृतिः ।

जलगुल्म पु० जलस्य गुल्म इव । १जलावर्त्ते (घुरणो) २कमठे ३जलचत्वरे च (चातर जल) मेदि० ।

जलङ्ग पु०जलं गच्छति गम–ड नि० मुम् । महाकाले ओषधिभेदे राजनि० ।

[भरतः ।

जलङ्गम पु० जलं गमयति स्पर्शात् गमि–बा० ख । चण्डाले

जलचत्वर न० जलेन चत्वरम् । (चातरजल) स्वल्पसलिलयुक्ते देशे मेदि० ।

जलचर त्रि०जले चरति चर–टक् ७त० । ग्राहादिषु जलजन्तुषु ।"अशीतास्तरवो माघे—चैत्रे जलचराः सर्वे" चाणक्य० । "यास्येन वीजजलचरकाननहा वह्निभयदश्च" वृ० स० ४अ० "गोवृषजलचरकर्षकशिलोच्चयैश्वर्यसम्पन्नाः" १५ अ० ।

जलचारिन् पु० जले चरति चर–णिनि ७त० । १मत्स्ये २जलचरमात्रे त्रि०स्त्रियां ङीप् ।"सरांसि च मनोज्ञानि समन्तात्"जलचारिभिः" भा०व०१६८अ० ।

जलज न० जले जायते जन–ड । १पद्मे २शङ्खे च मेदि० । ३क्षारभेदे राजनि० । ४मत्स्ये पुंस्त्री० शब्दच० । ५हिज्जलवृक्षे पु० (जलवेत) ६वानीरवेते ७शैवाले च पु० राजनि० । ८कुपीलौ भावप्र० ९जलजौ कर्कटमीनौ मकरान्त्यार्द्धश्च शिवमते कुम्भः" ज्यो० उक्तेषु १०कर्कटादिराशिषु । ११जलजातमात्रे कुम्भीरादौ त्रि० "जलजानां पद्मानां स्थलानाञ्चैव सर्वशः" भा० स० ३अ० । "जलजैः प्राणिभिः कीर्णाम्" "जलजैर्भूषितां गुणैः" । "जलजैः कुसुमैश्चित्राम्" "जलजैर्हरितोदकाम्" हरिवं० ६८अ० तत्र पद्मे "वाचस्पतिरुवाचेदं प्राञ्जलिर्जलजासनम्" कुमा० । शङ्खे "निवेश्य दध्मौ जलजं कुमारः" "जलजासिगदाशार्ङ्गचक्रलाञ्छितमूर्त्तिभिः" रघुः। मत्स्यादौ "न तथा बलवन्तः स्युर्जलजा वा स्थलाहृताः । स्वदेशे निचिता दोषा अन्यस्मिन् कोपमागताः" सुश्रु० । "निषेव्यमाणो जलजैश्च सत्त्वैः" हरिवं०२४२अ०। ११अब्जे चन्द्रे च तस्य सलिलमयत्वात् समुद्रजातत्वाद्वा तथात्वम् ।

[अमरः ।

जलजन्तु पु० जलजातो जन्तुः । यादसि जलजाते प्राणिनि

जलजन्तुका स्त्री जलजन्तु+संज्ञायां कन्। जलौकायां भरतः।

जलजन्मन् न० जले जन्म यस्य। पद्मे हेमच०। "निलयः श्रियः सततमेतदिति प्रथितं यदेव जलजन्मतया" माघः।

जलजम्बूका स्त्री जलजाता जम्बूका। क्षुद्रजाम्ब्वाम् शब्दचि०

जलजाजीव पु० जलं जलजमत्स्यवधविक्रयादिकमाजीवति आ+जीव–अण्। जलचरघातके (जेले) शब्दार्थचि०। [हारा०।

जलजिह्व पु० जला जड़ा स्वादे असमर्था जिह्वाऽस्य। नक्रे

जलजीविन् पु० जलेन तज्जातमत्स्यादिना जीवति जीव–णिनि। (जेले) मत्स्योपजीविनि। "स्थलजालैर्यथा मत्स्यान् बध्नन्ति जलजीविनः" भा० शा० २०२अ०।

जलडिम्ब पु० जले डिम्ब इव। शम्बूके। (शामुक) हारा०

जलतण्डुलीय पु० जलजातस्तण्डुलीयः। कञ्चटे शाकभेदे शब्दार्थचि०।

जलतापिन् पु० जलतां स्वेदरूपस्नेहजलमयतामाप्नोति पाककाले आप+णिनि। (इलिश) मत्स्यभेदे शब्दर०। स्वार्थे क। जलतापिक तत्रार्थे। संज्ञायां कन्। काकमाचीवृक्षे च शब्दर०। [(इलिश) मत्स्यभेदे शब्दर०।

जलताल पु० जलतायै अलति पर्य्याप्नोति अल–अच्।

जलतिक्तिका स्त्री स्वल्पं तिक्ता कन्। तिक्तिका जलप्रधाना तिक्तिका। शल्लकीवृक्षे राजनि०।

जलत्रा स्त्री जलात् त्रायते त्रै–क। १छत्रे २जङ्गमकुट्याञ्च हारा०।

जलत्रास पु० जलात् तद्दर्शनात् त्रासः, सोऽस्य वा। दंष्ट्रिणा दंशनोत्तरं जलं दृष्ट्वा १त्रासे २तद्युक्ते त्रि०। "येन चापि भवेद्दष्टस्तस्य चेष्टारुतं नरः। बहुशः प्रतिकुर्वाणः क्रियाहीनो विनश्यति। दंष्ट्रिणा येन दष्टश्च तद्रूपं यदि पश्यति। अप्सु वा यदि वाऽऽदर्शे रिष्टं तस्य विनिर्द्दिशेत्। त्रस्यत्यकस्माद्योऽभीक्ष्णं श्रुत्वा दृष्ट्वापि वा जलम्। जलत्रासस्तु विद्यात्तं रिष्टं तदपि कीर्त्तितम्। अदष्टो वा जलत्रासी न कथञ्चन सिध्यति। प्रसुप्तोऽथोत्थितो वापि स्वस्थोऽस्वस्थो न सिध्यति" सुश्रु०।

जलद पु० जलं ददाति दा–क। १मेघे, २कर्पूरे च ३जलदातरि त्रि० मेदि०। "अनतिचिरोज्झितस्य जलदेन चिरस्थितबहुबुद्बुदस्य पयसोऽनुकृतिम्"। "प्रौढ़ध्वान्तं दिनमिह जलदाः" माघः "सन्देशं मे तदनु जलद! श्रोष्यसि श्रोत्रपेयम्" मेघ०।

जलदकाल पु० ६त०। वर्षाकाले "जलदकालसबोधकृतं दिशाम्" माघः।

जलदक्षय पु० जलदानां क्षयोऽत्र। १शरत्काले "सर्वाणि तनुतां यान्ति जलानि जलदक्षये" हरिवं० ७३अ०।

जलदर्दुर पु० जलं दर्दुर इव। जलरूपे दर्दुरवाद्यभेदे (तालिदिया जलबाजान) "अवादयंस्ता जलदर्दुरांश्च वाद्यानुरूपं जगुरेव हृष्टाः" हरिवं० १४८ अ०।

जलदागम पु० जलदानां मेघानामागमो यत्र। वर्षाकाले।

जलदाशन पु० जलदैरश्यते अश–भोजने कर्म्मणि ल्युट्। शालवृक्षे शब्दच०। तत्पत्राणां मेघैर्भोजनस्य लोकप्रसिद्धेस्तस्य तथात्वम्।

जलदुर्ग न० जलवेष्टितं दुर्गम्। दुर्गभेदे। दुर्गशब्दे विवृतिः।

जलदेव पु० जलं देवः अधिष्ठात्री देवता अस्य। १पूर्वाषाढ़ानक्षत्रे तस्य जलदैवतत्वम् अश्लेषाशब्दे ४९७ पृ० दृश्यम्। "मूलेऽम्बुसद्रकपतिर्जलदेवे काशिपोमरणमेति" वृ० ११अ० केतुपहाक्रान्तनक्षत्रभेदे फलोक्तौ। "दृष्टानन्दकलत्रो वीरो दृढ़सौहृदश्च जलदेवे" वृ० स० १०१ अ० वैवाहिकनक्षत्रफलोक्तौ। ७त०। २जलस्थिते देवे च। जलदेवताप्यत्र "अन्वीयमानो जलदेवताभिर्निषेव्यमाणो जलजैश्च सत्त्वैः" हरिवं० २४३ अ०।

जलद्राक्षा स्त्री जले द्राक्षेव। शालिञ्चीशाके शब्दार्थचि०।

जलद्रोणी स्त्री जलस्य जलसेचनार्थं द्रोणीव। नौकाया जलसेचनपात्रे शब्दार्थचि०।

जलद्वीप पु० जलप्रधानो द्वीपः। द्वीपभेदे। "गिरिभिर्ये च गम्यन्ते प्लवनेन प्लवेन च। यत्नवन्तो जलद्वीपं सप्तराज्योपशोभितम्। सुवर्णरूप्यकद्वीपं सुवर्णाकरमण्डितम्। जलद्वीपमतिक्रम्य शिशिरो नाम पर्वतः। दिवं स्पृशति शृङ्गेण देवदानवसेवितः। एतेषां गिरिदुर्गेषु प्रपातेषु वनेषु च। मार्गध्वं सहिताः सर्वे रामपत्नीं यशस्विनीम्" रामा० कि० ४० अ०। क्वचित् पुस्तके यवद्वीप इति पाठः।

जलधर पु० जलं धरति धृ–अच्। १मेघे २मुस्तके च अमरः ३समुद्रे हेमच०। ४तिनिशवृक्षे राजनि०। तस्य रसरूपजलाधिक्यात्तथात्वम् ४जलधारकमात्रे त्रि०। "नभो जलधरैर्हीनं साङ्गारक इवांशुमान्" भा० व० १२४अ०। "अप्यन्यस्मिन् जलधर! महाकालमासाद्य काले" मेघ०।

जलधरमाला न० ६त०। १मेघपङ्क्तौ द्वादशाक्षरपादके २छन्दोभेदे च। "अब्ध्यष्टाभिर्जलधरमाला म्भौ स्मौ" वृ०

र० "या भक्तानां कञ्चिदुरितोत्तप्तानां तापच्छेदे जलधरमाला नव्या। भव्याकारा दिनकरपुत्रीकूले केलिलोला हरितनुरव्यात् सा वः" छन्दोम०।

जलधार पु०जलं धारयति धारि—अण् उप०स०। १शाकद्वीपस्थे गिरिभेदे। शाकद्वीपोपक्रमे "तथैव पर्वता राजन्! सप्तात्र मणिभूषिताः। रत्नाकरास्तथा नद्यस्तेषां नामानि मे शृणु। अतीव गुणवत् सर्वं तत्र पुण्यं जनाधिप!। देवर्षिगन्धर्वयुतः प्रथमो मेरुरुच्यते। प्रागायतो महाराज! मलयो नाम पर्वतः। यतो मेघाः प्रवर्त्तन्ते प्रभवन्ति च सर्वशः। ततः पूर्वेण कौरव्य! जलधारो महागिरिः। यत्र नित्यमुपादत्ते वासवः परमं जलम्" भा०भी०११अ०। २जलधारके त्रि०। ६त०। ३जलसन्ततौ स्त्री।

जलधि पु० जलं धीयतेऽत्र धा—आधारे कि उप० स०। अब्धौ समुद्रे "छायेव या स्वर्जलधेर्जलेषु" "आत्मानमेव जलधेः प्रतिबिम्बिताङ्गः" माघः। "एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः अर्बुदमब्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात्। जलधिश्चान्त्यं मध्यं परार्द्धमिति दशगुणोत्तराः संख्या" लीलावत्युक्ते २संख्याभेदे। ४ चतुःसंख्यायां च।

जलधिगा स्त्री जलधिं गच्छति गम—ड। १नदीमात्रे हेमच०। सर्वासां नदीनां साक्षात् परम्परया समुद्रगामित्वात्तथात्वम् अतएवोक्तं "सर्वा नद्यः समुद्रगाः" इति साक्षात् समुद्रगामिन्यां २गङ्गादिनद्याञ्च। समुद्रगादयोऽप्यत्र।

जलधिज पु० जलधौ जायते जन—ड। १चन्द्रे। २लक्ष्म्यां स्त्री त्रिका०। ३समुद्रजातमात्रे त्रि०।

जलधेनु स्त्री दानार्थकल्पितायां जलादिनिर्मितायां धेन्वां सा च नानाविधा तद्विधिः हेमा० दा० उक्तो यथा

"जलधेनुं प्रवक्ष्यामि प्रीयते दत्तया यया। देवदेवो हृषीकेशः सर्वगः सर्वभावनः। जलकुम्भं नरव्याघ्र! सुवर्णरजतान्वितम्। रत्नगर्भमशेषैस्तु ग्राम्यैर्धान्यैः समन्वितम्। सितवस्त्रयुगच्छन्नं दूर्वापल्लवशोभितम्। कुष्ठमांसीमुशीरबालकामलकैर्युतम्। प्रियङ्गुपत्रसहितं सितवस्त्रोपवीतिनम्। सच्छत्रं सोपानत्कं च दर्भविष्टरसंस्थितम्। चतुर्भिः संवृतं भूप! तिलपात्रैश्चतुर्दिशम्। स्थापितं दधिपात्रेण घृतक्षौद्रवता मुखे। उपोषितः समभ्यर्च्य वासुदेवं जलेश्वरम्। पुष्पधूपोपहारैस्तु यथाविभवमाहतः। सङ्कल्प्य जलधेनुञ्च कुम्भं तमभिपूज्य च। पूजयेद्वत्सकन्तद्वत् कुम्भं जलमयं बुधः। एवं संपूज्य गोविन्दं जलधेनुं सवत्सिकाम्। सितवस्त्रधरः शान्तो वीतरागो विमत्सरः। दद्यात् द्विजाय राजेन्द्र! प्रीत्यर्थं जलशायिनः। जलशायी जगद्योनिः प्रीयतां मम केशवः। इति चोच्चार्य्य भूनाथ! विप्राय प्रतिपाद्य ताम्। अपक्वान्नाशिना स्थेयमहोरात्रमतः परम्"। जलकुम्भमित्यादि, कुम्भोऽत्र कलसः। सुवर्णरजतयोरनियतपरिमाणतया यथाशक्ति विधानं पञ्चरत्नानि धान्यानि च परिभाषायामुक्तानि अत्र यद्यपि सामान्येनोपदेशः तथापि तत्सामान्यादितरेषु तथात्वमितिन्यायादितरधेनुवदविरुद्धधर्म्मानुष्ठानं वेदितव्यं ततश्च सुवर्णस्य शृङ्गाकृतित्वं रजतस्य खुराकृतित्वं, तिलपात्राणां ताम्रपात्रमयत्वं, दधिपात्रस्य कांस्यपात्रमयत्वं, चानुसन्धेयं तथा धान्यानि पार्श्वद्वये, कुष्ठादीनि घ्राणदेशे, प्रियङ्गुपत्रं श्रवणे, यज्ञोपवीतं शिरःस्थाने स्थापयेत्। वत्सोऽपि चतुर्थांशेन धेनुवत् कार्य्यः। क्वचित्तु "पूजयेद्वत्सकं तद्वत् कृतं घृतमयं बुधः" इति पाठात् घृतजलयोर्विकल्पोऽवगम्यते, दानवाक्यन्तु पूर्ववद् दक्षिणा चात्र यथाशक्ति सुवर्णमिति। "अनेन विधिना दत्त्वा जलधेनुं नराधिप!। सर्व्वान् कामानवाप्नोति ये दिव्या ये च मानुषाः। शरीरारोग्यमाबाधोपशमः सार्वकामिकः। नृणां भवति दत्तायां जलधेन्वां न संशयः"। इति विष्णुधर्म्मोक्तो जलधेनुदानविधिः।

"भानुरुवाच। जलधेनुं प्रवक्ष्यामि प्रीयते दत्तया यया। देवदेवो मयूखेशः सर्वगः सर्वभावनः"। जलकुम्भं समानीयेत्यादि विष्णुधर्मतुल्यार्थं, विशेषस्तु "ततः संपूज्य चादित्यं जलधेनुं सवत्सिकाम्। दद्याद्विप्राय देवाग्रे प्रीत्यर्थं मिहिरस्य तु। आदित्यः स जगद्योनिः प्रीयतां मिहिरः सदा। इति चोच्चार्य्य तां शान्तु विप्राय प्रतिपादयेत्। अनेन विधिना यस्तु जलधेनुं महामुने!। सर्व्वाह्लादानवाप्नोति यांश्च ध्यायति मानवः। सर्वपापविनिर्मुक्तः पितरं सपितामहम्। प्रपितामहं यथा पूर्वपुरुषाणां चतुष्टयम्। आत्मानं ससुतं पौत्रं तदधस्ताच्चतुष्टयम्। तारयेत् स मुनीन्द्रेह जलधेनुप्रदो नरः। यश्च गृह्णाति विधिवत् तस्याप्येवंविधाः कुले। चतुर्द्दश तथा चैव ददतश्चानुमोदतः। दीयमानां प्रपश्यन्ति जलधेनुं च ये नराः। तेऽप्यशेषाघनिर्मुक्ताः प्रयान्ति परमां गतिम्"। इति आदित्यपुराणोक्तो जलधेनुदानविधिः। तोयधेनुरप्यत्र।

"अगस्त्य उवाच। तोयधेनुं शृणु वत्स! यथा देवी प्रसीदति। कुम्भं तोयस्य संपूर्णं रत्नवस्त्रयुगान्वितम्। समस्तवीजसंयुक्तं दूर्वापल्लवशोभितम्"। समस्तवीजानि, सर्वधान्यानि। "दूर्वाक्षतदधिशङ्खकुष्ठामलकचन्दनैः। माल्यच्छत्रसमायुक्तं तिलपात्रैश्च संयुतम्। दधिक्षीरघृतं पात्रं विधानेनोपकल्पयेत्। देवीमभ्यर्च्य वत्सकं कल्पयेत्तस्यास्तत्तुरीयमयं बुधः। देवीमभ्यर्च्य विधिवत् सोपवासोऽथ नक्तवान्। देवीभक्तो प्रदद्याद्यः सर्वान् कामानवाप्नुयात्। जये! ऽरिसूदनि! देवि! देवानां भयनाशिनि! वेदमातर्वरे! दुर्गे! सर्वगे! सुभगे! नमः। अनेन वत्स! मन्त्रेण नन्दानाम्नाभिमन्त्रयेत्। देवी मे प्रीयतां नित्यं यथोदितफला शिवा" इति देवीपुराणोक्तो तोयधेनुदानविधिः।

जलनकुल पु० जले नकुल इव। उद्रे (धाड़िया) (उद्बिड़ाल) ख्याते जलजन्तुभेदे त्रिका०।

जलनिधि पु० निधीयतेऽस्मिन् नि+धा+आधारे कि उप० स०। समुद्रे अमरः। "तत्रासौ भगवान् देवः स्वपन् जलनिधौ तदा" भा० व० २७१अ०। २चतुःसंख्यायाम् "वारे १शीतकरं तिथौ जलनिधिं४ भेऽम्निश्च२ योगे द्वयम्" सत्कृत्यमुक्तावली "जलनिधिरशनायाः स्वामितां याति भूमेः" वृ० सं० १२अ०।

जलनिर्गम पु०जलानां निर्गमः। १नद्यादेर्जलस्रवणे,अधःस्थितस्य २जलस्योर्द्ध्वगतौ, जलनिःसरणे च अमरभरतौ।

जलनीली स्त्री० जलं नीलयति नील+तत्करोति णिच्-अण् उप०स० गौरा ङीष्। शैवाले अमरः स्वार्थे क। जलनीलिकाप्यत्र।

जलन्धम पु० जलं धमति ध्मा-खश्। दानवभेदे "अष्टदंष्ट्रश्चतुर्दंष्ट्रो मेघनादो जलन्धमः" हरिवं० २४० अ०। सत्यभामायां कृष्णाज्जाते २कन्याभेदे स्त्री "जज्ञिरे सत्यभामायां भानुर्भीमरथः क्षुपः। रोहितो दीप्तिमांश्चैव ताम्रजाक्षो जलान्तकः। भानुर्भीमरिका चैव ताम्रपक्षा जलन्धमा। चतस्रो जज्ञिरे तेषां स्वसारो गरुडध्वजात्" हरिवं०१६२ अ०।

जलन्धर पु०जलं धरति धा०ख मुम्। १ऋषिभेदे तस्य गोत्रापत्यं नडा०फक्। जालन्धरायण तद्गोत्रापत्ये पुंस्त्री। २असुरभेदे तस्योत्पत्तिकथा पाद्मोत्तरखण्डे दृश्या। २योगाङ्गे बन्धभेदे तल्लक्षणादिकं काशीख० ४१ अ० उक्तं यथा "बध्नाति च सिराजालमधोगामि न भोजनम्। एष जलन्धरो बन्धः कण्ठे दुःखौघनाशनः। जलन्धरे कृते बन्धे कण्ठसङ्कोचलक्षणे। न पीयूषं पतत्यग्नौ न च वायुः प्रधावति" "महामुद्रां नभोमुद्रामुड्डीयानं जलन्धरम्। मूलबन्धञ्च यो वेत्ति स योगी योगसिद्धिभाक्" तत्रैवाध्याये।

जलपक्षिन् पु० जलस्थितः पक्षी। जलचरखगे।

जलपति पु० ६त०। १वरुणे। हेमच०। तस्य जलपतित्वकथा काशीख० १२ अ० यथा

"ततस्तं तनयः दृष्ट्वा पितरं प्रणिपत्य च। जगाम तूर्णं तपसे श्रीमद्वाराणसीं पुरीम्। तत्र तप्त्वा तपो घोरं लिङ्गं संस्थाप्य शाम्भवम्। पञ्च वर्षसहस्राणि स्थितः पाषाणनिश्चलः। आविरासीन्महादेवस्तुष्टस्तु तपसा ततः। उवाच कार्द्दमे! ब्रूहि कं ददामि वरोत्तमम्। कार्द्दमिरुवाच। यदि नाथ! प्रसन्नोऽसि भक्तानामनुकम्पन!। सर्वासामाधिपत्यं मे देह्यपां यादसामपि। इति श्रुत्वा महेशानः सर्वचिन्तितदः प्रभुः। अभ्यषिञ्चत् ततस्तत्र वारुणे परमे पदे। रत्नानामब्धिजातानामब्धीनां सरितामपि। सरसां पल्वलानाञ्च वाप्यम्बुस्रोतसां पुनः। जलाशयानां सर्वेषां प्रतीच्याश्चैव वै दिशः। अधीश्वरः पाशपाणिर्भव सर्वामरप्रियः" २समुद्रे जलं पतिरस्य। ३पूर्वाषाढ़ानक्षत्रे च जलनाथादयोऽप्यत्र।

जलपथ पु० जलमेव पन्थाः अच् समा०। १जलमार्गे "यादोनाथः शिवजलपथा कर्म्मणे नौचराणाम्" रघुः। ६त०। २प्रणाल्यां जलनिर्गममार्गे च।

जलपारावत पुंस्त्री जले पारावत इव। जलकपोते (पानकौड़ि) पक्षिभेदे राजनि०। स्त्रियां ङीष्।

जलपित्त न० जलस्य पित्तमिव। १अप्पित्ते अग्नौ शब्दर० तस्य जलहेतुत्वात् तथात्वम्।

जलपिप्पली स्त्री जलजाता पिप्पली। (जलपिपुली) पिप्पलीभेदे। "जलपिप्पल्यभिहिता शारदी शकुलादनी। मत्स्यादनी मत्स्यगन्धा लाङ्गलीत्यपि कीर्त्तिता। जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघुः। संग्राहिणी हिमा रूक्षा रक्तदाहव्रणापहा। कटुपाका रसा रुच्या कषाया वह्निवर्द्धिनी" भावप्र०।

जलपुष्प न० जलजातं पुष्पम्। कमलादौ।

जलपूर पु० ६त०। जलसमूहे। "वृन्दावनविपिने परिसरपरिगतयमुनाजलपूरे विहरति" गीत०।

जलपृष्ठजा स्त्री जलस्य पृष्ठे उपरि जायते जन–ड ७त०। शैवाले शब्दच०। [जलदाने तर्पणे।

जलप्रदान न० प्रेतादिभ्यः जलस्य प्रदानम्। प्रेताद्युद्देशेन

जलप्रदानिक न० जलप्रदानं युद्धहतानां प्रेतानामुद्देशेन जलप्रदानं प्रतिपाद्यतयाऽस्त्यस्य ठन्। भारतस्त्रीपर्व्वान्तर्गते अवान्तरपर्वणि तत्र स्त्रीपर्वणि प्रथमावधि १५ अध्यायपर्य्यन्तं "जलप्रदानिकं पर्व स्त्रीविलापस्ततः परम्" भा० आ० २अ०।

जलप्रपा स्त्री जलस्य जलदानार्थं प्रपा। जलदानार्थं शालायाम् (जलसत्र)। "यात्रोद्वाहजलप्रपाशिशुसंस्कारव्रतश्राष्टका" मु०चि० टी० धृतवाक्यम्।

जलप्रान्त पु० ६त०। जलसमीपस्थाने। [अमरः।

जलप्राय न० जलं प्रायं यत्र। जलबहुले देशे अनूपदेशे

जलप्रिय पुंस्त्री ६त०। १चातकखगे शब्दर०। २मत्स्ये शब्दच० स्त्रियां जातित्वेऽपि योपधत्वात् टाप्। ३जलप्रियमात्रे त्रि०। [जन्तुभेदे। स्त्रियां जातित्वात् ङीष्।

जलप्लव पुंस्त्री जले प्लवते प्लु–अच्। (उद्विड़ाल) जल-

जलफल न० जलजातं फलम्। शृङ्गाटके भावप्र०।

"शृङ्गाटकं जलफलं त्रिकोणफलमित्यपि। शृङ्गाटकं हिमं स्वादु गुरु वृष्यं कषायकम्। ग्राहिशुक्रानिलश्लेष्मप्रदं पित्तप्रदाहनुत्"।

जलबन्ध पु० जलं बध्नाति बन्ध–ण्वुल्। जलस्रोतोनिरोधके दारुशिलामये १सेतौ शब्दर०। भावे घञ् ६त०। २जलस्य बन्धे च। [विना तस्य जीवनाभावेन तथात्वम्।

जलबन्धु पु० जलं बन्धुर्यस्य। मत्स्ये शब्दर० जलं

जलबालक पु० जलं बाल इव यस्य कप्। विन्ध्यपर्वते हेम०। जलस्य बालिकेव। १विद्युति स्त्री हेम०।

जलबिम्ब पुंन० ६त०। जलस्य बुद्बुदे मध्यावकाशयुक्ते शिथिलसंयोगेन छत्राकारे तोयांशभेदे मेदि०। "जम्बूवज्जलविम्बवज्जलजवज्जम्बालवज्जालवत्" उद्भटः।

जलबि(वि)ल्व पु० जलप्रधानो बिल्व इव। १कर्कटे। बिल–भेदने क।२जलचत्वरे(चातरजल)३स्वल्पजलदेशे हारा०।

जलबुद्बुद न० ६त०। जलविम्बे। "मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम्। यः करोति स वै मूढो जलबुद्बुदसन्निभे" शब्दार्थचि०धृतवाक्यम्।

जलब्राह्मी स्त्री जले ब्राह्मीव। हिलमोच्यां त्रिका०।

जलभू पु० भवत्यस्मात् भू–अपादाने क्विप् ६त०। १मेघे २तन्नामनामके कर्पूरे च जलं भूरुत्पत्तिस्थानमस्य। ३कञ्झटे शब्दच०। ६त०। ४जलाधारभूमौ स्त्री।

जलभृत् पु० जलं बिभर्त्ति भृ–क्विप् ६त०। १मेघे २तन्नामनामके कर्पूरे च ३तोयधारकमात्रे घटादौ त्रि०।

जलमक्षिका स्त्री जलजाता मक्षिका। तोयजकृमौ त्रिका०

जलमण्डुक न० जलं मण्डुकमिव। मण्डूकवाद्यतुल्ये करताडनेन तद्वद्ध्वनिकारके जलदर्दुरे "जग्मुर्जलानि जलमण्डुकवाद्यवल्गु" माघः। "जलमेव पाणिना व्यापितमपरेण ताडितं मण्डुकवत् ध्वनतीति लोकप्रसिद्धम्" मल्लि०। [मत्स्यरङ्कविहगे हारा०।

जलमद्गु पु०जले मद्गुरिव निरन्तरमज्जनोन्मज्जनकारित्वात्।

जलमधूक पु० जलसन्निकृष्टजातो मधूकः। जलान्तिकजाते मधूकभेदे मधूलके भावप्र०।

"मधुको गुडपुष्पः स्यात् मधुवृक्षो मधुस्रवः। वानप्रस्थो मधुष्ठीलो जलजोऽत्र मधूलकः।" "मधूकपुष्पं मधुरं शीतलं गुरु वृंहणम्। फलं शीतं गुरु स्वादु शुक्रलं वातपित्तनुत्। अहृद्यं हन्ति तृष्णास्रदाहश्वासक्षतक्षयान्"।

जलमय त्रि० जलात्मकः जल+मयट्। १जलात्मके चन्द्रादौ "सलिलमये शशिनि रवेर्दीधितयः" वृ०स० तस्य तथात्वश्रुतम्। २तल्लोकस्थे कर्म्मिणामम्मये देहे च। स्त्रियां ङीप्। "उभे एव क्षमे वोढुमुभयोर्बीजमाहितम्। सा वा शम्भोस्तदीया वा मूर्त्तिर्जलमयी मम" कुमा० शम्भोः क्षित्याद्यष्टमूर्त्तिकत्वेन तन्मूर्त्तेर्जलमयत्वम्। जलस्य ब्रह्मबीजाधारत्वं च मनुनोक्तं यथा "अप एव ससर्जादौ तासु बीजमवासृजत्"।

जलमसि पु० जलं स्वस्थितं तोयं मस्यति छिनत्ति सूक्ष्मांशतया भिनत्ति मस–इन् ६त०। १मेघे हारा०। २तन्नामनामके कर्पूरे च।

जलमार्ग पु०जलस्य तद्वाहस्य मार्गः।१प्रणाल्याम् (पयनाला) हेम०। जलमेव मार्गः। २जलस्थे मार्गे च (जलपथ)।

जलमार्ज्जार पुंस्त्री जलनकुले त्रिका०स्त्रियां जातित्वात् ङीष्।

जलमातृका स्त्री जलस्थिता मातृका। जलस्थिते मातृकाभेदे तद्भेदाः सप्त विधानपा० उक्ता यथा "मत्सी कूर्मी वराही च दर्दुरी मकरी तथा। जलूका जन्तुका चैव सप्तैता जलमातृकाः"।

जलमुच् पु० जलानि मुञ्चति मुच–क्विप्। १मेघे अमरः तन्नामनामके २कर्पूरे च। "शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यत्र जालैः" मेघ०। ३जलमोचनकर्त्तरि त्रि० "नात्युदा जलमुचोऽचलसन्निकाशाः वृ०१८।

जलमूर्त्ति पु॰ जलं मूर्त्तिरस्य । शिवे । अष्टमूर्त्तिशब्दे ५२० पृ॰ द्रष्टव्यम् ।

जलमूर्त्तिका पु॰ जलस्य मूर्त्तिः घनीभावो यत्र कप् । करकायाम् उष्णवातसंयोगजाते घनीभूते जले शब्दच॰ । तस्य च तथात्वम् करकशब्दे १६८७ पृ॰ द्रष्टव्यम् ।

जलमोद न॰ जलेन जलयोगेन मोदयति सेविनं मुद-णिच्-अण् उप॰ स॰ । उशीरे (वेणारमूल) राजनि॰ ।

जलयन्त्र न॰ जलानामुत्क्षेपणार्थं यन्त्रम् । (फोहारा) ख्याते १धारायन्त्रे २कूपादितस्तोयोत्थापकयन्त्रभेदे "विलिप्तगात्रा जलयन्त्रहस्ताः" हरिवं॰ १४८ अ॰ । ३कालज्ञापके जलेन तदाकर्षणेन यन्त्रं घटीयन्त्रम् । घटीयन्त्रभेदे घटीयन्त्रशब्दे २७८१ द्रष्टव्यम् । स्वार्थे क । तत्रार्थे "हस्तप्रमुक्तैर्जलयन्त्रकैश्च प्रहृष्टरूपाः सिषिचुस्तदानीम्" हरिवं॰ १४८ अ॰ ।

जलयन्त्रगृह न॰ जलयन्त्रं तन्मध्य इव स्थितम् गृहम् । १जलचतुःपार्श्वे जलयुक्ते जलमध्ये निर्म्मितगृहे (जलटुङ्गि) जलयन्त्रमन्दिरादयोऽप्यत्र हारा॰।६त॰। (फोहाराघर) २जलयन्त्रयुक्ते गृहे ।

जलयात्रा स्त्री जलस्य तदाहरणार्थं यात्रा । शुभकर्मसम्पादनाय जलाहरणाय यात्रायाम् । तद्विधानादिकमाह वि॰पा॰ वशिष्ठः "शान्तिकं पौष्टिकं वापि जलयात्रां विना बुधः । कुरुते यदि वा मोहात् कर्म तस्य च निष्फलम् । तड़ागादिप्रतिष्ठासु देवतायतनादिषु । लक्षहोमेकोटिहोमेऽयुतहोमे तथैव च । व्रतोत्सर्गमहादाने यज्ञे वा वितते शुभे" । व्रतोत्सर्गे व्रतोद्यापने इत्यर्थः । "जलयात्रां पुरा कृत्वा श्रेष्ठं कर्म समाचरेत् । अथातः संप्रवक्ष्यामि जलयात्राविधिं शुभम् । यज्ञशालामतिक्रम्य ऋत्विग्भिर्ब्राह्मणैः सह । यजमानः सपत्नीकः सुहृद्बन्धुजनैर्युतः । अश्वारूढो गजारूढो वस्त्रालङ्कारभूषितः । गृहीत्वोपस्करं सर्वं गन्धपुष्पाक्षतादिकम् । जलाशयन्ततो गच्छेद्गीतवादित्रनिस्वनैः । अगाधं च ह्रदं गच्छेन्नदीं वाथ समुद्रगाम् । सुवासिन्योऽप्यतः कार्य्याः सर्वालङ्कारभूषिताः । हैमराजतताम्रान् वा मृण्मयान् कलशाञ्छुभान् । गृहीत्वा गन्धपुष्पाद्यैरर्च्चितान् सुदृढान् नवान् । जलाशयं समासाद्य तीरे गोमयलेपिते । चतुरस्रीकृते क्षेत्रे तत्र स्वस्तिकमालिखेत् । यवैर्वा तण्डुलैर्वापि पद्ममष्टदलं लिखेदित्यादि" । विस्तरस्तत्र द्रष्टव्यः ।

जलयान न॰ जले यायते गम्यतेऽनेन या-करणे ल्युट् ७त॰ । जलेगमनसाधने नौकादौ । "व्यसनार्णवमभ्येति जलयानैर्यथार्णवम्" भाग॰ ३।१४।१६ ।

जलरङ्क पुंस्त्री जले रङ्क इव । वकपक्षिणि हेमच॰ स्त्रियां जातित्वात् ङीष् ।

जलरङ्कु पु॰ जले रङ्कुरिव । दात्यूहखगे हारा॰ ।

जलरञ्ज पुंस्त्री जले रजति रन्ज-अच् । वकखगे हेमच॰ स्त्रियां जतित्वात् ङीष् ।

जलर(रु)ण्ड पु॰ जलस्य र(रु)ण्ड इव ।१जलावर्त्ते २तोयरेणौ ३भुजङ्गमे पुंस्त्री हेमच॰स्त्रियां जातित्वात् ङीष् उकारयुक्तमध्यः मेदि॰ ।

जलरस पु॰ जलप्रधानो रसोऽस्य जलजातो वा रसः । १लवणे हारा॰ लवणस्य जलविशेषपाकेन जातत्वात् तथात्वम् । अतएव तस्य जलमध्ये निक्षेपे स्वप्रकृतिजलरूपत्वं भवतीति लोकवेदयोः प्रसिद्धम् ।६त॰। २तोयस्य रसे च ।

जलराक्षसी स्त्री जलस्थिता राक्षसी । सिंहिकानाम्न्यां छायां गृहीत्वाऽऽकर्षिण्यां लवणाम्भसि स्थितायां राक्षस्याम् "शतयोजनविस्तीर्णं निहत्य जलराक्षसीम्" भा॰ व॰ २८१अ॰ । सा हि हनूमता यथा हता तथा रामा॰ सु॰ १अ॰ उक्तम् ।

"प्लवमानन्तु तं दृष्ट्वा सिंहिका नाम राक्षसी । मनसा चिन्तयामास प्रवृद्धा कामरूपिणी । अद्य दीर्घस्य कालस्य भविष्याम्यहमाशिता । इदं मम महासत्त्वं चिरस्य वशमागतम् । इति संचिन्त्य मनसा छायामस्य समाक्षिपत् । छायायां गृह्यमाणायां चिन्तयामास वानरः । समाक्षिप्तोऽस्मि सहसा पङ्गूकृतपराक्रमः । प्रतिलोमेन वातेन महानौरिव सागरे । तिर्य्यगूर्द्ध्वमधश्चैव वीक्षमाणस्तदा कपिः । ददर्श स महासत्त्वमुत्थितं लवणाम्भसि । तद्दृष्ट्वा चिन्तयामास मारुतिर्विकृताननम् । कपिराज्ञा यथाख्यातं सत्त्वमद्भुतदर्शनम् । छायाग्राहि महावीर्य्यं तदिदन्नात्र संशयः । स तां बुद्ध्वार्थतत्त्वेन सिंहिकां मतिमान् कपिः । व्यवर्द्धत महाकायः प्रावृषीव वलाहकः । तस्य सा कायमुद्वीक्ष्य वर्द्धमानं महाकपेः । वक्त्रं प्रसारयामास पातालाम्बरसन्निभम् । घनराजीव गर्ज्जन्ती वानरं समभिद्रवत् । स ददर्श ततस्तस्या विकृतं सुमहन्मुखम् । कायमात्रञ्च मेधावी मर्म्माणि च महाकपिः । स तस्या विकृते वक्त्रे वज्रसंहननः कपिः । संक्षिप्य मुहुरात्मानं निपपात महाकपिः । आस्ये तस्यानिमज्ज

न्तन्ददृशुः सिद्धचारणाः। ग्रस्यमानं यथा चन्द्रं पूर्वं पर्वणि राहुणा। ततस्तस्या नखैस्तीक्ष्णैर्मर्माण्युत्कृत्य वानरः। उत्पपाताथ वेगेन मनःसम्पातविक्रमः"।

जलराशि पु० ६त०। १जलसमूहे जलानां राशिरत्र। २समुद्रे च "क्षमातलं बलजलराशिरानशे" माघः।

जलरुह् न० जले रोहति रुह–क्विप् ७त०। १पद्मे हेमच०। क। जलरुहमप्यत्र हेमच०। "जलं तच्छुशुभे छन्नं फुल्लैर्जलरुहैस्तथा" भा०आ०१२८अ०। २तोयरोहिमात्रे त्रि०।

जलरूप पुंस्त्री जलस्य रूपमिव रूपमस्य शुभ्रत्वात्। १मकरे त्रि० स्त्रियां जातित्वात् ङीष्। ६त०।२तोयस्य रूपे न०।

जललता स्त्री जलस्य लतेव सन्ततिमत्त्वात्। तरङ्गलेखायां हारा०।

जलवरण्ट पु० जलप्रधानो वरण्टः। (पानिबसन्त) वसन्त-
[व्रणभेदे। हारा०।

जलवल्कल पु० जलानां वल्कल इव। कुम्भिकायाम्। (पाना) हारा०।

जलवल्ली स्त्री जलजाता वल्ली। शृङ्गाटकलतायां राजनि०।

जलवाद्य न० जलं वाद्यमिव। पाणिताड़ने वाद्यतुल्यध्वनियुक्ते जले "आकाशगङ्गाजलवाद्यतज्ज्ञाः" हरिवं० २४८अ०।

जलवानीर पु० जलजातो वानीरः। अम्बुवेतसे शब्दार्थचि०

जलवायस पुंस्त्री जले वायस इव कृष्णत्वात्। (पानिकौड़ी) मद्गुखगे। स्त्रियां जातित्वात् ङीष्।

जलवास न० जलेन वास्यते सुरभीक्रियते वासि–कर्म्मणि अच्। १उशीरे राजनि०। तस्य जलसेचनेन सौरभोत्पादात्तथात्वम्। ७त०। २तोये वासे। "स चिन्तयामास मुनिर्ज्जलवासे कदाचन" भा० शा० २६२ अ०। जलं वासयति सुरभीकरोति वासि अण् उप० स०। ३विष्णुकन्दे राजनि०।

जलवाह पु० जलं वहति वह–अण् उप०स०। १वारिवाहे मेघे हेमच० तन्नामनायके २कर्पूरे च "वाद्रिजलधिजलवाहपथम्" किरा०। ३जलवाहकमात्रे त्रि० "जलवाहास्तथा मेघाः वायवस्तनयित्नवः" भा० स० ७अ०।

जलविड़ाल पुंस्त्री जले विड़ाल इव। (उद्विड़ाल) जलनकुले हारा०। स्त्रियां जामित्वात् ङीष्।

जलविन्दुजा स्त्री जलविन्दुभ्यो जायते जन–ड। यावनालीशर्कराभेदे राजनि०। २तोयविन्दुजातमात्रे त्रि०।

जलविषुव(त्) न० जलप्रधानं विषुवं(त्)। राशिचक्रस्थे तुलाराशिरूपे स्थानभेदे "भचक्रनाभौ विषुवद्द्वितयं समसूत्रगम्" सू० सि० "भचक्रनाभौ भगोलस्य ध्रुवद्वयाभ्यां तुल्यान्तरेण मध्यभागे विषुवद्द्वितयं विषुवद्द्वयं समसूत्रगं परस्परं व्याससूत्रान्तरितं ध्रुवमध्ये विषुववृत्तस्थानात् तद्वृत्ते क्रान्तिवृत्तभागौ यौ लग्नौ तौ क्रमेण पूर्वापरौ विषुवत्संज्ञौ मेषतुलाख्यौ चेत्यर्थः" रङ्ग०। २विषुवन्तु समाख्यातं तुलामेषभयोस्तथा" ज्यो० उक्ते २तत्र रवेः संक्रमे च। संक्रान्तिश्च चलस्थिरभेदाभ्यां द्विविधा अयनसंक्रान्तिशब्दे ३२९ दर्शिता। जलविषुवसंक्रान्तिनक्षत्रतः स्थानविशेषे स्वनक्षत्रपाते तत्फलज्ञानार्थं जलविषुवचक्रं ज्यो० उक्तं यथा। "षड्मूर्ध्नि, वदने पञ्च, चत्वारि, हृदये, तथा। त्रितयं करपादेषु" पयोविषुवभक्रमात्" त्रितयं त्रितयमिति करपादेषु द्वादश इति २७ नक्षत्राणि स्थाप्यानि तत्र स्थानभेदे फलञ्चोक्तं "मानं वैरं बहुसुखलाभं भोगं त्रासं जलविषुवेषु" ज्यो०। पयोविषुवादयोऽप्यत्र।

जलवृश्चिक पु० जले वृश्चिक इव। (चिङ्गड़ि) मत्स्ये त्रिका०।

जलवेतस पु० जलजातो वेतसः। अम्बुवेतसे वेतसभेदे राजनि०

जलवैकृत न० विकृतस्य भावः अण् ६त०। दुर्निमित्तसूचके नद्यादीनां जलविकारभेदे तत्फलादिकमुक्तं वृ० स० ४६अ० यथा।

"अपसर्पणं नदीनां नगरादचिरेण शून्यतां कुरुते। शोषश्चाशोष्याणामन्येषां वा ह्रदादीनाम्। स्नेहासृङ्मांसवहाः सङ्कुलकलुषाः प्रतीपगाश्चापि। परचक्रस्यागमनं सद्यः कथयन्ति षण्मासात्। ज्वालाधूमक्वाथा रुदितोत्क्रुष्टानि चैव कूपानाम्। गीतप्रजल्पितानि च जनमरकाय प्रदिष्टानि। तोयोत्पत्तिरखाते गन्धरसविपर्य्यये च तोयानाम्। सलिलाशयविकृतौ वा महद्भयं तत्र शान्तिरियम्। सलिलविकारे कुर्य्यात् पूजां वरुणस्य वारुणैर्मन्त्रैः। तैरेव च जपहोमं शममेवं पापमुपयाति"।

जलव्यध पु० जलं विध्यति व्यध–अच्। कङ्कतोटमत्स्ये
[त्रिका०।

जलव्याल पु० जलस्थो व्यालो हिंस्रः। (ढोड़ा) १सर्पभेदे, अमरः। स्त्रियां जातित्वात् ङीष्। क्रूरकर्म्मणि २जन्तौ च।

जलशय पु० जले शेते शी–अच् ७त०। विष्णौ हेमच० सप्तम्या वा अलुकि। जलेशयोऽप्यत्र।

जलशयन पु० जलं शयनमस्य। विष्णौ हला०।

जलशायिन् पु० जले समुद्रजले शेते शी–णिनि। नारायणे। "एकार्णवेऽहिशयने योगनिद्रामुपागतः। शार्ङ्गी

र्य्यशेषमभजत् कल्पान्ते भगवान् प्रभुः" देवीभा॰ ।

जलशुक्ति स्त्री जलस्य शुक्तिरिव । शम्बूके अमरः ।

जलशूक न॰ जलस्य शूकमग्रमिव । शैवाले हेमच॰ । "क्षीरशुक्लाजलशूकमधुरवर्गं प्रतिवापं तैलं वा पाचयित्वा स्वनुगुप्तं निदध्यात्" सुश्रुतः ।

जलशूकर पु॰ जलस्य शूकर इव । कुम्भीरे हेमच॰ ।

जलसन्ध पु॰ धृतराष्ट्रभेदे । "विविंशतिर्विकर्णश्च जलसन्धः सुलोचनः" भा॰ आ॰ ६७० । तत्पुत्रोक्तौ ।

जलसमुद्र पु॰ जलमयः समुद्रः । लवणादिषु सप्तसु समुद्रेषु शेषसमुद्रे "लवणजलधिरादौ दुग्धसिन्धुश्च तस्मात्" इत्युपक्रमे दध्नो घृतस्येक्षुरसस्य तस्मात् मद्यस्य च स्वादुजलस्य चान्त्यः" सि॰ शि॰ । [सरोभेदे ।

जलसरस न॰ नित्यस॰ सरस्+संज्ञायाम् अच् समा॰ ।

जलसर्पिणी स्त्री जले सर्पति सृप–णिनि । जलौकायाम् (जोंक) हेमच॰ ।

जलसूचि स्त्री जलस्या सूचिरिव । १कङ्कत्रोटमत्स्ये २शृङ्गाटके ३शिशुमारे ४जलौकायां च मेदि॰ ५काके पुंस्त्री हेमच॰ ।

जलस्तम्भ न॰ जलं स्तभ्यतेऽनेन स्तन्भ–करणे ल्युट् । १जलस्तम्भनसाधने मन्त्रादौ । भावे ल्युट् । जलस्य २स्तम्भने च जलस्तम्भनविद्या च दुर्य्योधनविदिता तया द्वैपायनह्रदजलं संस्तभ्य स सुष्वाप तत्कथा भा॰ शा॰ १० अ॰ । "एवमुक्त्वा महाराज ! प्राविशत्तं महाह्रदम् । अस्तम्भयत तोयञ्च मायया मनुजाधिपः" इत्यादिका ।

जलस्था स्त्री जले तत्समीपे तिष्ठति स्था–क । १गण्डदूर्वायां राजनि॰ २जलस्थितमात्रे त्रि॰ । [त्रिका॰ ।

जलह न॰ जलेन हन्यते–हन–बा॰ ड ३त॰ । स्वल्पजलयन्त्रगृहे

जलहरण न॰ ६त॰ । तोयस्य स्थानान्तरनयने "लघुगुरुकनियमगतमिह फणिपतिमतमवगतमतिसुखनिगदपदम् दशवसुभुवनैर्यतिरिह यदि भवति हि रसिकजनहृदयविहितमदम् । वसुविमलचतुष्कलगणकृतगुणिगणचरणविरामाहितसगणम् क्वचिदपि गुरुसहितं भवति कविहितं छन्दः सुन्दरि ! जलहरणम्" इत्युक्तलक्षणे २मात्रावृत्तभेदे । [भेदे । हेमच॰ ।

जलहस्तिन् पु॰ जले हस्तीव ७त॰ । जलस्थे हस्तिरूपे जन्तु-

जलहार त्रि॰ जलं हरति हृ–अण् उप॰ स॰ । जलहारके जलवाहके (भारि) प्रभृतौ स्त्रियां टाप् पा॰ मुग्धबो॰ मते ङीप् । "शिरसा धृतकुम्भाभिर्बद्धैरग्रस्तनाम्बरैः । यमुनातीरमार्गेण जलहारीभिरावृतम्" हरिवं॰ ६१ अ॰ । अत्र पा॰ गौरा॰ ङीष् ।

जलहारिन् त्रि॰ जलं हरति हृ–णिनि । जलवाहके । स्त्रियां ङीप् । "याभिरिदं शरीरमाराम इव जलहारिणीभिः केदार इव च कुल्याभिरुपस्निह्यतेऽनुगृह्यते च" सुश्रुतः । [फेने च । त्रिका॰ ।

जलहास पु॰ जलानां हास इव शुभ्रत्वात् । १फेने, २समुद्र-

जलहोम पु॰ जले क्षिप्तः होमः ७त॰ । जले चोप्तव्ये वैश्वदेवादिहोमभेदे तद्विधिः सं॰ त॰ दर्शितो यथा "लौकिके वैदिके चैव हुतोच्छिष्टं जले क्षितौ । वैश्वदेवश्च कर्त्तव्यः पञ्चसूनापनुत्तये" ।

जलह्रद पु॰ जलप्रचुरो ह्रदः शा॰ त॰ । जलबहुले ह्रदे जलह्रदस्येदं तत्र भवो वा शिवा॰ अण् । जालह्रद तत्सम्बन्धिनि तत्र भवे च त्रि॰ स्त्रियां ङीप् ।

जलाका स्त्री जले आकायति प्रकाशते आ+कै–क । जलौकायां शब्दर॰ ।

जलाकाश पु॰ जलप्रतिबिम्बितः जलावच्छिन्नो वा आकाशः शा॰ त॰ । जलप्रतिबिम्बिते २जलावच्छिन्ने वा आकाशे "जलावच्छिन्नखे नीरं यत्, तत्र प्रतिबिम्बितः । साभ्रनक्षत्रआकाशो जलाकाश उदीर्य्यते" शब्दार्थचि॰ । नीरूपस्याकाशस्य प्रतिबिम्बासम्भवेन साभ्रनक्षत्रेति विशेषणम् । एतच्च प्रतिबिम्बवादे नीरूपस्य प्रतिबिम्बासम्भवमभिप्रेत्य विवरणाचार्य्यैरवच्छिन्नवादोऽङ्गीकृतः । तन्मते जलावच्छिन्नआकाश एव जलाकाश इति भेदः । अवच्छिन्नवादशब्दे ४२० पृ॰ दृश्यम् ।

जलाची स्त्री जलमञ्चति व्याप्नोति कारणतया अञ्च–अण् गौरा॰ ङीष् । जलपिप्पल्यां शब्दर॰ ।

जलाखु पु॰ जले आखुरिव । जलनकुले त्रिका॰ ।

जलाञ्चल न॰ जलमञ्चति अन्च–बा॰ अलच् ६त॰ । १शैवाले जलस्याञ्चलमिव । २स्रोतो वारिनिर्गमे (स्रोतो निर्गच्छद्वारिणि) मेदि॰ ।

जलाञ्जलि पु॰ जलपूर्णोऽञ्जलिः । १जलपूर्णाञ्जलौ अञ्जलिपूर्णवारिणि उपचारात् २तद्दानरूपायां पितॄणां तर्पणक्रियायाम् । "कुपत्रमासाद्य कुतो जलाञ्जलिः" चाण॰ ।

जलाटन पुंस्त्री जले अटति अट–ल्यु । १कङ्कपक्षिणि स्त्रियां जातित्वात् ङीष् । २जलौकायां स्त्री मेदि॰ तत्र गौरा॰ ङीष् । [हारा॰ स्त्रियां जातित्वात् ङीष् ।

जलाटक पुंस्त्री जले अटति अट–ण्वुल् पृषो॰ । नक्रराजे

जलाण्डक न॰ जले अण्ड इव कायति कै—क । प्रोताधाने क्षुद्रे मत्स्याण्डसंघाते जले अणुरिव कायति कै: क । जलाणुक इति पाठान्तरम् तत्रार्थे हेमच॰ ।

जलात्मक त्रि॰ जलमेवात्माऽस्य कप् । १जलमये । २जलौकायां स्त्री शब्दरत्ना॰ कापि अत इत्त्वम् ।

जलात्यय पु॰ जलस्यात्ययोः यत्र । १शरत्काले ६त॰ । २जलानामपगमे च ।

जलाधार पु॰ ६त॰ । जलानामाधारे तडागादौ अमरः । "आकाशमेकं हि यथा घटादिषु पृथक् भवेत् । तथात्मैकोऽप्यनेकस्तु जलाधारेष्विवांशुमान्" याज्ञ॰ ।

जलाधिदैवत पुंन॰ ६त॰ । १वरुणे हलायुधः लिपिकरप्रमादकृतपाठदर्शनात् पुंस्त्वोक्तिः प्रमादिकी शरवल्लिङ्गं द्वन्द्वतत्पुरुषयोः पा॰ तत्पुरुषे परलिङ्गस्यैव विधानेन पुंक्लीवत्वस्यैवौचित्यात् । जलमधिदैवतमस्य । २पूर्वाषाढानक्षत्रे न॰ ।

जलाधिप पु॰ ६त॰ । १वरुणे । "नागक्षोदयतः स्यात्तु विप्रचित्तेर्जलाधिपः" हरिवं॰ २५२अ॰ । जलाधीशादयोऽप्यत्र । वत्सरभेदे २जलपतौ रव्यादिग्रहे च जलशब्दे कृषिपराशरवाक्यम् दृश्यम् वत्सरभेदेन जलाधिपतिभेदानयनं तत्फलञ्च ज्यो॰ त॰ उक्तं यथा "जीवार्कबुधमन्दारकाव्यचन्द्रमसः क्रमात् । राजा मन्त्री जलाधीशः शस्यपोऽद्रि-७हृतात् शकात्" । सप्तहृतशकाङ्के एकशेषे जीवो राजा अर्को मन्त्री बुधो जलाधिपः शनिः शस्याधिपः । द्व्यवशेषे रव्यादिः । त्र्यवशेषे बुधादिः । चतुरवशेषे मन्दादि । पञ्चावशेषे भौमादि । षडवशेषे काव्यादि । सप्तावशेषे चन्द्रादि । मालान्यायेन पुनः जीवादीनां ग्रहणम् ।

जलान्तक पु॰ जलमेवान्तो भूमण्डलस्य सीमा यत्र कप् । सप्तसमुद्रान्तर्गते स्वादूदके समुद्रे तदुत्तरं द्वीपान्तराभावेन तस्य भूमण्डलस्यान्तसीमात्वम् । "लवणेक्षुसुरासर्पिर्दधिदुग्धजलान्तकाः" त्रिका॰ । वासुदेवस्य सत्यभामायां पत्न्यां जाते २पुत्रभेदे "जज्ञिरे सत्यभामायामित्युपक्रमे "रोहितो दीप्तिमांश्चैव ताम्रजाक्षो जलान्तकः" हरिवं॰ १६२ अ॰ ।

जलाम्बिका स्त्री जलस्याम्बिकेव । कूपे हारा॰ ।

जलायुका स्त्री जलमायुरस्याः कप् टघो॰ । जलौकायां (जोंक) शब्दरत्ना॰ तद्भेदलक्षणादिकं सुश्रुते उक्तं यथा । "अथ जलायुका वक्ष्यन्ते । जलमासामायुरिति जलायुका जलमासामोक इति जलौकसः । ता द्वादश तासां सविषाः षट्, तावत्य एव निर्विषाः । तत्र सविषाः कृष्णा कर्बुरा अलगर्द्दी इन्द्रायुधा सामुद्रिका गोचन्दना चेति । तास्वञ्जनचूर्णवर्णा पृथुशिराः कृष्णा । वर्म्मिमत्स्यवदायता छिन्नोन्नतकुक्षिः कर्बुरा । रोमशा महापार्श्वा कृष्णमुख्यलगर्द्दी । इन्द्रायुधवदूर्द्ध्वराजिभिश्चित्रिता इन्द्रायुधा । ईषदसितपीतिका विचित्रपुष्पाकृतिचित्रा सामुद्रिका । गोवृषणवदधोभागे द्विधाभूताकृतिरणुमुखी गोचन्दनेति । ताभिर्दष्टे पुरुषे दंशे श्वयथुरतिमात्रं कण्डूर्मूर्च्छा ज्वरोदाहश्छर्द्दिर्मदः सदनमिति लिङ्गानि भवन्ति । तत्र महागदः पानालेपननस्यकर्म्मादिषूपयोज्यः । इन्द्रायुधादष्टमसाध्यमित्येताः सविषाः सचिकित्सिता व्याख्याताः । अथ निर्विषाः । कपिला पिङ्गला शङ्कुमुखी मूषिका पुण्डरीकमुखी सावरिका चेति । तत्र मनःशिलारञ्जिताभ्यामिव पार्श्वाभ्यां पृष्ठे स्निग्धमुद्गवर्णा कपिला । किञ्चिद्रक्ता वृत्तकाया पिङ्गाऽऽशुगा च पिङ्गला । यकृद्वर्णा शीघ्रपायिनी दीर्घतीक्ष्णमुखी शङ्कुमुखी । मूषिकाकृतिवर्णाऽनिष्टगन्धा च मूषिका । मुद्गवर्णा पुण्डरीकतुल्यवक्त्रा पुण्डरीकमुखी । स्निग्धा पद्मपत्रवर्णाऽष्टादशाङ्गुलप्रमाणा सावरिका सा च पश्वर्थे इत्येता अविषा व्याख्याताः । तासां यवनपाण्ड्रसह्यपौतनादीनि क्षेत्राणि । तेषु महाशरीरा बलवत्यः शीघ्रपायिन्यो महाशना निर्विषाश्च विशेषेण भवन्ति । तत्र सविषमत्स्यकीटदर्द्दुरमूत्रपुरीषकोथजाताः कलुषेष्वम्भःसु च सविषाः । पद्मोत्पलनलिनकुमुदसौगन्धिककुवलयपुण्डरीकशैवालकोथजाता विमलेष्वम्भःसु च निर्विषाः । भवति चात्र । क्षेत्रेषु विचरन्त्येताः सलिलेषु सुगन्धिषु । न च सङ्कीर्णचारिण्यो न च पङ्कशयाः सुखाः । तासां ग्रहणमार्द्रचर्म्मणान्यैर्वा प्रयोगैर्गृह्णीयात् । अथैनां नवे महति घटे सरस्तडागोदकपङ्कमावाप्य निदध्यात् भक्ष्यार्थे चासामुपहरेच्छैवलं वल्लूरमौदकांश्च कन्दांश्चूर्णीकृत्य शय्यार्थं तृणमौदकानि च पत्राणि । त्र्यहात्त्र्यहाच्चान्यज्जलं भक्ष्यं च दद्यात् सप्तरात्रात्सप्तरात्राच्च घटमन्यं संक्रामयेत् । भवति चात्र । स्थूलमध्याः परिक्लिष्टाः पृथ्व्योपा मन्दचेष्टिताः । अग्राहिण्योऽल्पपायिन्यः सविषाश्च न पूजिताः । अथ जलौकोऽवसेकसाध्यव्याधितमुपवेश्य संवेश्य वा विरूक्ष्य चास्य तमवकाशं मृद्गोमयचूर्णैर्यद्यरुजः स्यात् । गृहीताश्च ताः सर्षपरजनीकल्कोदकप्रदिग्धगात्रीः सलिलसरक-

मध्ये मुहूर्त्तस्थिता विगतक्लमा स्नात्वा ताभीरोगं ग्राहयेत्। श्लक्ष्णशुक्लार्द्रपिचुप्रोतावच्छन्नां कृत्वा मुखमपावृणुयादगृह्णत्यै क्षीरविन्दुं वा दद्याच्छस्त्रपदानि वा कुर्वीत यद्येवमपि न गृह्णीयात्तदान्यां ग्राहयेत्। यदा च निविशतेऽश्वखुरवदाननं कृत्वोन्नम्य च स्कन्धं तदा जानीयाद्गृह्णातीति गृह्णतीं चार्द्रवस्त्रावच्छन्नां धारयेत्सेचयेच्च। दंशे तोदकण्डूप्रादुर्भावैर्जानीयाच्छुद्धमियमादत्त इति शुद्धमाददानामपनयेत्। अथ शोणितगन्धेन न मुञ्चेन्मुखमस्याः सैन्धवचूर्णेनावकिरेत्। अथ पतितां तण्डुलकण्डनप्रदिग्धगात्रीं तैललवणाभ्यक्तमुखीं वामहस्ताङ्गुष्ठाङ्गुलीभ्यां गृहीतपुच्छां दक्षिणहस्ताङ्गुष्ठाङ्गुलिभ्यां शनैरनुलोममनुमार्जयेदामुखाद्वामयेत्तावद्यावत्सम्यग्वान्तलिङ्गानीति। सम्यग् वान्ता सलिलसरकन्यस्ता भोक्तुकामा सती चरेत्। या सीदति न चेष्टते सा दुर्वान्ता तां पुनः सम्यग्वामयेत्। दुर्वान्ताया व्याधिरसाध्य इन्द्रमदो नाम भवति। अथ सुवान्तां पूर्ववत्सन्निदध्यात् शोणितस्य च योगायोगानवेक्ष्य जलौकोव्रणान्मधुनावघट्टयेच्छीताभिरद्भिश्च परिषेचयेद्बध्नीत वा व्रणं कषायमधुरस्निग्धशीतैश्च प्रदेहैः प्रदिह्यादिति। भवति चात्र। क्षेत्राणि ग्रहणं जातीः पोषणं सावचारणम्। जलौकसाञ्च यो वेत्ति तत्साध्यान् स जयेद्गदान्"।

जलार्क पुं० जलप्रतिविम्बितोऽर्कः। जलप्रतिविम्बितसूर्य्ये। "प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः। अविकारादकर्त्तृत्वात् निर्गुणत्वात् जलार्कवत्" भाग० ३।२।१।

जलार्णव पु० जलमयः अर्णवः। अन्त्ये स्वादूदके समुद्रे।

जलार्द्रा स्त्री जलेनार्द्रा। आर्द्रतालवृन्ते "धुवित्रं तालवृन्तं स्यात् तद्वदुत्क्षेपणञ्च तत्। जलेनार्द्रं जलार्द्रा स्यात्" वैज०। २जलार्द्रवस्त्रे न० हारा०। ३जलेनार्द्रे च त्रि०। "पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः" मेघ०।

जलालु पु० जलजात आलुः शा०त०। (पाणिया आलु) आलुकभेदे राजनि०। [शालूके राजनि०।

जलालुक न० जलस्यालुरिव कायति कै-क। पद्मकन्दे

जलालुका स्त्री जले अलति गच्छति अल-गत्यादौ बा० उक। जलौकायां शब्दर०। [जलौकायां भरतः।

जलालोका स्त्री जले आलोक्यते आ+लोक-कर्म्मणि घञ्।

जलावर्त्त पु० आ+वृत-णिच्-भावे अच् ६त०। जलस्य सतो भ्रमणे जटाधरः।

जलाशय पु० जले तत्समीपे आशेते आ+शी-अच्। १उशीरे अमरः २नामज्जके गन्धद्रव्यभेदे राजनि०। आ+शी-आधारे अच् ६त०। ३समुद्रे हेमच०। ४जलाधारे तड़ागादौ "कुशेशयैरत्र जलाशयोषिताः" माघः। "न वासोभिः सहाजस्रं नाविशाते जलाशये" "तेनैव सार्द्धं प्रास्येयुः स्नात्वा पुण्यजलाशये" मनुः। तद्भेदादि जलाशयोत्सर्गशब्दे दृश्यम्। जलमाशय आधारो यस्य। ५शृङ्गाटके राजनि०। ६गुण्डालीवृक्षे स्त्री राजनि०।

जलाशयोत्सर्ग पु० ६त०। कूपादेर्जलाशयस्य प्रतिष्ठारूपे उत्सर्गे जलाशयोत्सर्गतत्त्वे तस्य भेदलक्षणादिकमुक्तं यथा "अथ जलाशयाः। ते च खननसाध्याश्चत्वारः। कूपवापीपुष्करिणीतड़ागरूपाः। तथाच मत्स्यपुराणम्। "एवमेव पुराणेषु तड़ागविधिरुच्यते। कूपवापीतड़ागेषु तथा पुष्करिणीषु च"। कूपोऽद्वारकोगर्त्तविशेषः बद्धसोपानकोऽयं वापीति द्वैतनिर्णयः। वस्तुतो वापीलक्षणं वक्ष्यते। पुष्करिणीतड़ागावाह वशिष्ठसंहितायाम् "चतुर्विंशाङ्गुलो हस्तो धनुस्तच्चतुरुत्तरः। शतधन्वन्तरश्चैव तावत् पुष्करिणी मता। एतत्पञ्चगुणः प्रोक्तस्तड़ाग इति निश्चयः"। धनुर्हस्तचतुष्टयं चतुरुत्तरश्चतुर्गुणहस्तोयस्तत्तुः तथाच विष्णुधर्मोत्तरे प्रथमकाण्डम् "द्वादशाङ्गुलिकः शङ्कुस्तद्द्वयञ्च शतः स्मृतः। तच्चतुष्कं धनुः प्रोक्तं क्रोशोधनुःसहस्रकः"। कापिले "चतुर्विंशाङ्गुलोहस्तश्चतुर्भिश्च करैर्धनुः"। शयोहस्तस्तेन खातचतुर्दिक्षु विंशतिहस्तान्यूनतायां चतुःशतहस्तान्यूनान्तरत्वेन पुष्करिणी। चतुर्दिक्षु पञ्चचत्वारिंशद्धस्तान्यूनतायां सहस्रद्वितयहस्तान्यूनान्तरत्वेन तड़ागः। एतच्च जलाधारपरं नतूपरितटपरम्। नव्यवर्द्धमानधृततोयशिष्ठः "शतेन धनुर्भिः पुष्करिणी त्रिभिः शतैर्दीर्घिका। चतुर्भिर्द्रोणः पञ्चभिस्तडागः। द्रोणाद्दशगुणा वापी" इति संहितायामन्तरपदश्रुतेरत्रापि तथावगम्यते। तेन चतुर्दिक्षु पञ्चत्रिंशद्धस्तान्यूनतायां द्वादशशतहस्तान्तरान्यूनत्वे स दीर्घिका। चतुर्दिक्षु चत्वारिंशद्धस्तान्यूनतायां षोडशशतहस्तान्तरान्यूनत्वे द्रोणः। चतुर्दिक्षु त्रिंशदधिकशतहस्तान्यूनतायां षोडशसहस्रहस्तान्तरान्यूनत्वेन वापी। करोऽत्र कफोण्युपक्रममध्यमाङ्गुल्यग्रपर्य्यन्तः तथाच कल्पतरुरत्नाकरयोः "मध्याङ्गुलिकूर्परयोर्मध्यः प्रामाणिकः करः"। तत्करणफलमाहादित्यपुराणम् "पितृमन्दरता ये च तीर्थ-

शौचरताश्च ये। तडागकूपकर्त्तारोमुच्यन्ते ते तथा भयात्"। सेतुर्जलधारणहेतुर्बन्धः। तीर्थशौचं घट्टकपरिष्कारः: तेन सेतुबन्धघट्टपरिष्कारतडागादीनां करणे प्रत्येकं तद्भयमोचनं फलम्। विष्णुः "अथ कूपकर्त्तुस्तत्प्रवृत्ते पानीये दुष्कृतार्द्धं विनश्यतीति"। तत्प्रवृत्ते कूपादुत्थिते। विष्णुधर्म्मोत्तरे "तडागकूपकर्त्तारस्तथा कन्याप्रदायिनः। छत्रोपानहदातारस्ते नराः स्वर्गगामिनः"। तोयं विना सङ्कुचितप्राणिदेशे तु नन्दिपुराणम् "योवापीमथवा कूपं देशे तोयविवर्ज्जिते। खानयेत् स दिवं याति विन्दौ विन्दौ शतं समाः"। ततश्च वाप्यादिखनने प्रत्येकजलविन्दुसमसंख्यशतवर्षावच्छिन्नस्वर्गप्राप्तिः फलम्। एतत्सङ्कल्पानन्तरं वास्तुयागसङ्कल्पः कार्य्यः। विष्णुः "कूपारामतड़ागेषु देवतायतनेषु च। पुनः संस्कारकर्त्ता तु लभते मौलिकं फलम्"। संस्कारविधौ तु "अजले जलमुत्पाद्य" इति वक्ष्यमाणवचनात् जलशून्यदेशखनन एव प्रतिष्ठा नतु पङ्कोद्धारमात्रे। मत्स्यपुराणे "प्रासादभवनादीनां विशेषं विस्तराद्वद। कुर्य्यात् केन विधानेन कश्च वास्तुरुदाहृतः" इत्युपक्रम्य वाप्यादीनामनभिधानात् आदिपदात् कूपादेर्ग्रहणम्। "प्रासादेऽप्येवमेव स्यात् कूपवापीषु शस्यते" इत्यभिधानाच्च, तेन वाप्यादिकरणेऽपि वास्तुयागः। महाकपिलपञ्चरात्रे "जलाधारगृहार्थञ्च यजेद्वास्तुम् विशेषतः। ब्रह्माद्यदितिपर्य्यन्ताः पञ्चाशत्त्रयसंयुताः! सर्व्वेषां कुलवास्तूनां नायकाः परिकीर्त्तिताः। असंपूज्य हि तान् सर्व्वान् प्रासादादींश्च कारयेत्। अनिष्पत्तिर्विनाशः स्यादुभयो धर्म्मधर्म्मिणोः"। ब्रह्माद्यदितिपर्य्यन्ता इति कल्पान्तरम्। देवीपुराणोक्तशारदिकल्पो व्यवह्रियते। धर्म्मधर्म्मिणोस्तड़ागादितत्कर्त्तोः। तद्दिने तदकरणे उत्सर्गदिनेऽपि वाप्यादौ तत्करणम्। "प्रासादभवनोद्यानप्रारम्भपरिवर्त्तने। पुरवेश्मप्रवेशे च सर्व्वदोषापनुत्तये। इति वास्तूपशमनं कृत्वा सूत्रेण वेष्टयेत्। वास्तुयागमकुर्व्वाणस्तवाहारो भविष्यति"। इति मत्स्यपुराणवचने पुरवेश्मप्रवेशे वास्तुयागप्राप्तेः पूर्व्वोक्तवचनेन प्रासादधर्म्मातिदेशादत्रापि प्रासादप्रतिष्ठावत् वाप्यादिप्रतिष्ठादिने वास्तुयागकरणम्। तदारम्भकालो दीपिकायामुक्तो यथा "पुष्यामैत्रकरोत्तराश्विवरुणब्रह्माम्बुपित्रेन्दुभैः शस्तेऽर्के शुभयोगवारतिथिषु क्रूरेष्ववीर्य्येषु च। पुष्टेन्दौ जलराशिगे दशमगे शुक्रे शुभांशोदये प्रारम्भः सलिलाशयस्य शुभदो जीवेन्दुपुत्रोदये"। पुष्यानुराधाहस्तोत्तरात्रयाश्विनीशतभिषारोहिणीपूर्व्वाषाढ़ामघामृगशिरोभिः। मात्स्ये "चन्द्रादित्यबलं लब्ध्वा लग्नं शुभनिरीक्षितम्। स्तम्भोच्छ्रायादि कर्त्तव्यमन्यत्र परिवर्ज्जयेत्। अश्विनीरोहिणीमूलमुत्तरात्रयमैन्द्रवम्। स्वाती हस्तानुराधा च गृहारम्भे प्रशस्यते। वज्रव्याघातशूले च व्यतीपातातिगण्डयोः। विष्कुम्भगण्डपरिघवर्ज्जं योगेषु कारयेत्। आदित्यभौमवर्ज्जन्तु सर्व्वे वाराः शुभावहाः। प्रासादेऽप्येवमेव स्यात् कूपवापीषु चैव हि"। तदुत्सर्गफलम्।

"संक्षेपात्तु प्रवक्ष्यामि जलदानफलं शृणु। पुष्करिण्यादिदानेन विष्णुः प्रीणाति विश्वधृक्"। जलाशयकरणार्थं भूमिदाने फलमाह चित्रगुप्तः "जलाशयार्थं यो दद्यात् वारुणं लोकमाप्नुयात्"। भूमिमिति शेषः। कालमाह मत्स्यपुराणे "शृणु राजन्! प्रवक्ष्यामि तड़ागादिषु यो विधिः। चैत्रे वा फाल्गुने वापि ज्यैष्ठे वा माधवे तथा। माघे वा सर्व्वदेवानां प्रतिष्ठा शुभदा भवेत्। प्राप्य पक्षं शुभं शुक्लमतीते चोत्तरायणे। पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम्"। अतीते प्रवृत्ते तथा च प्रतिष्ठासमुच्चये "माघे च फाल्गुने चैव चैत्रवैशाखयोरपि। ज्यैष्ठाषाढ़कयोर्व्वापि प्रवृत्ते चोत्तरायणे"। पुण्येऽह्नि अष्टमचन्द्रादिशून्ये ब्राह्मणवाचनं पुण्याहस्वस्त्यृद्धिवाचनम्। "पञ्चमी च द्वितीया च तृतीया सप्तमी तथा। दशमी पौर्णमासी च तथा श्रेष्ठा त्रयोदशी। आसु प्रतिष्ठा विधिवत् कृता शुभफला भवेत्"। मात्स्ये "आषाढ़े द्वे तथा मूलमुत्तरात्रयमेव च। ज्येष्ठाश्रवणरोहिण्यः पूर्व्वभाद्रपदा तथा। हस्ताश्विनी रेवती च पुष्यो मृगशिरस्तथा। अनुराधा तथा स्वाती प्रतिष्ठादिषु शस्यते। बुधो बृहस्पतिः शुक्रस्त्रय एते शुभावहाः। एतन्निरीक्षितं लग्नं नक्षत्रञ्च प्रशस्यते। ग्रहताराबलं लब्ध्वा ग्रहपूजां विधाय च। निमित्तं शकुनं ज्ञात्वा वर्जयित्वा तथाऽशुभम्। शुभयोगे शुभे लग्ने क्रूरग्रहविवर्जिते। लग्ने चन्द्रे च कुर्व्वीत प्रतिष्ठादिकमुत्तमम्। अयने विषुवे तद्वत् षड़शीतिमुखे तथा। "सुराणां स्थापनं कार्य्यं विधिदृष्टेन कर्म्मणा"। भविष्ये "प्रतिपच्च द्वितीया च तृतीया पञ्चमी तथा। दशमी त्रयोदशी चैव पौर्णमासी च कीर्त्तिता। सोमो बृहस्पतिश्चैव शुक्रश्चैव तथा बुधः। एते सौम्यग्रहाः

प्रोक्ताः प्रतिष्ठायागकर्म्मणि"। प्रतिष्ठाधिकारे व्यवहारसमुच्चयः "कृष्णपक्षे च पञ्चम्यामष्टम्यामपि शस्यते"। दीपिकायां "पुष्याश्विशक्रभगदैवतवासवेषु सौम्यानिलेशमघरोहिणिमूलहस्तम्। पौष्णानुराधहरिभेषु पुनर्वसौ च कार्य्याभिषेकतरुकूपरथप्रतिष्ठा"। वसवो धनिष्ठा ईश आर्द्रा। "आर्द्रायाञ्चैव सौभाग्यमिति" प्रतिष्ठासमुच्चयात्। वापीदानादीनां पूर्त्तत्वात् स्त्रीशूद्राधिकारे जातूकर्णः "वापीकूपतडागादिदेवतायतनेषु च। अन्नप्रदानमारामाःपूर्त्त इत्यभिधीयते। अग्निहोत्रं तपः सत्यं वेदानामनुपालनम्। आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते। ग्रहोपरागे यद्दानं पूर्त्तमित्यभिधीयते। इष्टापूर्त्तं द्विजातीनां धर्म्मः सामान्य उच्यते। अधिकारी भवेच्छूद्रः पूर्त्तधर्म्मे न वैदिके"। वैदिके वेदाध्ययनसाध्येऽग्निहोत्रादाविति रत्नाकरः। एवं स्त्रीणामपि पूर्त्ताधिकारः। यथा नारीत्यनुवृत्तौ वृहस्पतिः "पितृव्यगुरुदौहित्रान् भर्त्तुः स्वस्रीयमातुलान्। पूजयेत् कव्यपूर्त्ताभ्यां वृद्धानाथातिथीन् स्त्रियः"। एतेन जलाशयोत्सर्गादौ गोरवतारणानुमन्त्रणयोर्यजमानकर्त्तृकोमन्त्रपाठः। तत्रामन्त्रकतया स्त्रीशूद्रयोरनधिकारेण तद्वति त्यागेऽप्यनधिकारः विशेषोपदेशविरहादिति द्वैतनिर्णयोक्तं निरस्तम्। मन्त्रपाठस्तु ब्राह्मणद्वारा "अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते" इति वराहपुराणात्। अमन्त्रस्येति परिभाषया स्त्रीणामप्यधिकारः। अस्य पूर्त्तत्वाद्वृद्धिश्राद्धमप्यादौ कर्त्तव्यम्। यथा गोभिलः "वृद्धिः पूर्त्तेषु युग्मानाशयेत् प्रदक्षिणमुपचारः यवैस्तिलार्थ इति"। हयशीर्षपञ्चरात्रे "वापीकूपतड़ागानां पश्चिमे यागमण्डपम्। कुर्य्याद्यथाक्रमेणैव कन्यसं मध्यमोत्तमम्। कन्यसं दशहस्तन्तु कूपे शस्तं तथा नव। द्विषट्कं कारयेद्वाप्यां पुष्करिण्यां चतुर्द्दश। द्विरष्टहस्तं कुर्वीत तड़ागमण्डपं शुभम्"। कन्यसङ्कनीयांसम्। सङ्कल्पविधिस्तु भविष्ये "गृहीत्वौदुम्बरं पात्रं वारिपूर्णमुदङ्मुखः। दर्भत्रयं साग्रमूलं फलपुष्पतिलान्वितम्। जलाशयारामकूपे सङ्कल्पे पूर्व्वदिङ्मुखः साधारणे। चोत्तरास्य ऐशान्यां तज्जलं क्षिपेत्। मत्स्यपुराणे "प्रागुदक्प्लवने देशे तड़ागस्य समीपतः। चतुर्हस्तां शुभां वेदीं चतुरस्रां चतुर्म्मुखीम्"। कारयेदिति शेषः। तथा "सर्व्वतः समवर्णाः स्युः पताकाध्वजसंयुताः"। समवर्णा वक्ष्यमाणलोकपालवर्णाः। "अश्वत्थोडुम्बरप्लक्षवटशाखाकृतानि च। मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत्"। तथा "कुलशीलसमापन्नः स्थापकः स्याद्द्विजोत्तमः"। स्थापक आचार्य्य इति रत्नाकरः। तथा "सौवर्णौ कूर्म्ममकरौ राजतौ मत्स्यडुण्डुभौ। ताम्रौ कुलीरमण्डूकावायसः शिशुमारकः। एवमासाद्य तान् सर्व्वानादौ चैव विशाम्पते!। शुक्लमाल्याम्बरधरः शुक्लगन्धानुलेपनः। सर्व्वौषध्युदकस्नानस्नापितो वेदपुङ्गवैः। यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः। पश्चिमं द्वारमाश्रित्य प्रविशेद्यागमण्डपम्। ततोमङ्गलशब्देन भेरीणाञ्च स्वनेन च। रजसा मण्डलं कुर्यात् पञ्चवर्णेन तत्त्ववित्। षोड़शारं भवेच्चक्रं पद्मगर्भं चतुर्म्मुखम्। चतुरस्रन्तु परितोवृत्तं मध्ये गुणोत्तरम्। वेद्याश्चोपरि तत्कृत्वा ग्रहाँल्लोकपतींस्तथा। विन्यसेन्मन्त्रतः सर्व्वान् प्रतिदिक्षु विचक्षणः। झषादीन् स्थापयेन्मध्ये वारुणं मन्त्रमाश्रितः" झषादीन्। कूर्मादीन्। "ब्रह्माणञ्च शिवं विष्णुं तत्रैव स्थापयेद्बुधः। विनायकन्तु विन्यस्य कमलामम्बिकान्तथा"। पूजयेदिति शेषः। मत्स्यपुराणम् "नवग्रहमखं कृत्वा ततः कर्म्म समारभेत्। अन्यथा फलदं पुंसां न काम्यं प्राप्यते क्वचित्"। ततः कर्म्मशेषस्तत्रैव द्रष्टव्यः।

"जलाशयोत्सर्गस्य सर्व्वभूतोद्देशकत्वेन प्रकृष्टचेतनोद्देशकत्ववदप्रकृष्टचेतनोद्देशकत्यागत्वमपि ततश्च कीटादेर्ममेदमिति स्वीकारयोग्यत्वेन वेदमेयोद्देश्यगतस्वत्वाजनकत्यागरूपत्वादस्य यागत्वम्। अतएव जलाशयोत्सर्गमुपक्रम्य मत्स्यपुराणेऽपि "प्राप्नोति तद्यागफलेन भूय" इति यागत्वेनाभिहितं ततश्च तज्जलं स्वस्वत्वदूरीकरणेन नद्यादिवत् साधारणीकरणम् अतएव 'सामान्यं सर्व्वभूतेभ्यो मया दत्तमिदं जलम्। रमन्तु सर्व्वभूतानि स्नानपानावगाहनैः' इति मन्त्रलिङ्गेनोपादानं विना कस्यापि स्वत्वमिति। ततश्चान्ययागवदुत्तरप्रतिपत्तेरश्रुतत्वात् साधारणजलस्य परिग्रहमात्रेण गोतमोक्तेन दातुः स्वामित्वश्रुतेर्यजमानस्यापि तथात्वेन स्वामित्वात्तत्र स्नानादावदोषः। तथाच गोतमः 'स्वामी ऋक्थक्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोः" इति परिग्रहोऽनन्यपूर्व्वस्य जलतृणकाष्ठादेः स्वीकार इति मिताक्षरा'।

जलाश्रय पुं० जलमाश्रयोऽस्य। वृत्तगुण्डातृणे राजनि०। २वलाकायां ३शूलीतृणे स्त्री हारा०।

जलाष न० आषते जल–ड जः लाषोऽभिलाषो यत्र। १सुखे निघ०। अन्येच्छानधीनेच्छाविषयत्वात् तस्य तथात्वम्। मत्वर्थे अर्श०अच्। २तद्वति त्रि०। "यो अस्ति भेषजो जलाषः" ऋ०२।३३।७ "जलाषः सर्वेषां सुखकरः" भा०। "गतिमेधपतिं रुद्रं जलाषभेषजम्" ऋ० ४३।४। ३जले निघ०।

जलाषाह् त्रि०जलं सहते सह–ण्वि–पूर्वपददीर्घः सुषामादि० षत्वम्। जलषोढ़ारि। सुषामादिगणे अमन्ततयैव पाठादन्यत्र न षत्वम्। जलाषाहौ। खादौ झलि तु "षाड़ेः सः" साड्रूपत्वे षत्वम् जलाषाट् जलाषाड्भ्यामित्यादि।

जलाष्ठीला स्त्री जलेनाष्ठीला। पुष्करिण्याम् हारा०।

जलासुका स्त्री जलमेवासवोऽस्याः कप्। १जलौकायाम् अमरः भरतः।

जलाह्वय पु० जले आह्वयः शोभमानतया कीर्त्तनमस्य। उत्पले राजनि०।

जलिका स्त्री जलमुद्भवस्थानत्वेनास्त्यस्याः ठन्। जलौकायां

जलुका स्त्री जल–उक। जलौकायां शब्दर०।

जलूका स्त्री जलमोको यस्याः पृषो०। १जलौकायाम् हेमच०। "न जलूकादिवत् संक्रमणमिहोपदिश्यते" तैत्ति० भा०।

जलेचर पुंस्त्री जले चरति चर–ट वा अलुक् स०। हंसादौ स्त्रियां टित्वात् ङीप्। "यक्षोऽहमस्मि भद्रं ते नास्मि पक्षी जलेचरः" भा० व० २१३अ०। "स समादाय कौन्तेयो विस्फुरन्तं जलेचरम्" भा० आ० २१अ०

जलेच्छया स्त्री जलमेति इ–क्विप् जलेति शेते शी–अच्। जलोपेतस्थानरोहिण्यां हस्तिशुण्डाख्ये शब्दर०।

जलेज न० जले जायते जन–ड वा अलुक् समा०। वारिज १पद्मे। "उद्भासीनि जलेजानि दुन्वन्त्यदयितं जनम्" भट्टिः। २जले जातमात्रे त्रि०।

जलेजात न० ७त०। १पद्मे शब्दरत्ना०। २वारिजातमात्रे त्रि०।

जलेन्द्र पु० ६त०। १वरुणे २महादेवे जम्भलाख्ये ३पूर्व्वयक्षे मेदि०।

जलेन्धन पु०जलान्येवेन्धनानि यस्य। १वाड़वानले वाड़वानलशब्दे दृश्यम्। २सौरविद्युदादितेजसि शब्दार्थचि०।

जलेभ पुंस्त्री जलजात इभः। जलहस्तिनि स्त्रियां जातित्वात् ङीष्। "प्रस्फुरत्तिमिजलेभजिह्मगः" ह०१२स०।

जलेयु पु० पूरुवंश्ये रौद्राश्वन्तपस्याप्सरोजाते पुत्रभेदे "रौद्राश्वस्य महेष्वासा दशाप्सरसि सूनवः" इत्युपक्रमे "स्थण्डिलेयुर्वनेयुश्च जलेयुश्च महायशाः" भा० आ० ६४ अ०।

जलेरुहा स्त्री जले रोहति–रुह–क–अलुक् स०। १कुटुम्बिनीवृक्षे राजनि०। २जलरोहिणि पद्मादौ त्रि०।

जलेला स्त्री कुमारानुचरमातृभेदे "उत्क्राथिनी जलेला च महावेगाथ कङ्कणा" भा० स० ४७ अ०।

जलेवाह पु० जले तोयाभ्यन्तरे वाहो गतिरस्य। (डुबारि) ख्याते जलमज्जनेन तत्स्थपदार्थोत्तोलके पुरुषभेदे। "जलेवाहानथाहूय बहूंस्तत्र न्ययोजयत्। ते कृत्वा परमं यत्नमापुराभरणं न तत्" पाद्मे पा० ख०।

जलेश पु० ६त०। १वरुणे २समुद्रे च "कालं गतिं तेऽखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशम्" भाग० ८।७।२० विराड्रूपोक्तौ "पातयामास सेनायां जलेशस्य स भीमो दानवः" हरिवं० २५२अ०। जलेश्वरादयोऽप्यत्र। क्षयां प्रति नले च जलेश्वरे च" नैष०। "यमकुवेरजलेश्वरवज्रिणाम्" रघुः। २वर्षभेदे जलाधिपे रव्यादौ च।

जलेशय पु० जले शेते शी–अच् अलुक् समा०। १विष्णौ तस्य "सप्तसामोपगीतं त्वां सप्तार्णवजलेशयम्" रघुः। तथात्वं जलशायिशब्दे दृश्यम्। २जलस्थायिमात्रे त्रि० "यस्य हुंहितशब्देन कूर्म्मोऽप्यन्तर्जलेशयः" भा० आ० २८ अ०। ३मत्स्ये पुंस्त्री त्रिका०। योपधत्वात् स्त्रियां टाप्।

जलो(लौ)का स्त्री जलमोकोऽस्य पृषो०। (जोंक) १जलस्थे सरीसृपभेदे भरतोऽस्य द्विधा पपाठ।

जलोच्छ्वास पु०जलान्युच्छ्वसन्त्येभिः उद्+श्वस–घञ्। १प्रवृद्धजलस्य निर्गममार्गे २परीवाहे अमरः। भावे घञ् ६त०। ३अधिकजलस्य सर्वतोवहने च। (छयलापि)।

जलोदर न०जलप्रधानमुदरं यस्मात् ५ब०। उदरामयरोगभेदे। "यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽप्यथ वा निरूढः। पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दुष्यन्ति हि तद्वहानि। स्नेहोपलिप्तेष्वथ वापि तेषु दकोदरम् पूर्ववदभ्युपैति। स्निग्धं महत्तत् परिवृत्तनाभि समाततं पूर्णमिवाम्बुना च। यथा दृतिः क्षुभ्यति कम्पते च शब्दायते चापि दकोदरन्तत्। जन्मनैवोदरं सर्वं प्रायः कृच्छ्रतमं मतम्। बलिनस्तदजाताम्बु यत्नसाध्यं नवोत्थितम्" माधवकरनिदानाद्यारम्भ।

जलोद्धतगति स्त्री "रसैर्जसजसा जलोद्धतगतिः" छ०र०उक्ते द्वादशाक्षरपादके १छन्दोभेदे। जलेन उद्धता गतिरस्य। २जलेनोद्धतगतिके त्रि० "यदीयहृदतो विलोक्य विपदं कलिन्दतनया जलोद्धतगतिः" छन्दोम०।

जलोद्भव त्रि० जले उद्भवोऽस्य। १जलजाते २गुडूकालाबुनी ३लघुब्राह्मीभेदे स्त्री राजनि०। जलमुद्भवत्यस्मात् भू अपादाने

अच्। १हिमालयस्थे देशभेदे। "ततो हिमवतः पार्श्वं समभ्येत्य जलोद्भवम्। सर्वमल्पेन कालेन देशं चक्रे वशं बली" भा० स० २८अ०। २जलजाते त्रि० "गण्डकीन्तु समासाद्य सर्वतीर्थजलोद्भवाम्" भा०व० ८४अ०। ३लघुब्राह्म्याम् राजनि०।

जलोद्भूत त्रि० जले उद्भूतः। १जलभवे २क्षुपभेदे स्त्री राजनि०

जलोरगा स्त्री जले उरगीव दीर्घत्वात् विषवत्त्वाच्च पृषो०। जलोकायां सारसुन्दरी।

जलौकस् स्त्री ब०व० जलमोको वसतिरासाम्। (जोंक) ख्यातायां रक्तपायाम् अमरः। अस्य बहुवचनत्वं प्रायिकम्। "जलोरगा जलौका तु जलोका च जलौकसीति" संसारावर्त्तोक्तेः। "अभिहितो जलौकसः" इति सुश्रुतोक्तेश्च।२जलस्थानके जन्तुमात्रे त्रि० "जलौकसां स सत्वानां बभूव प्रियदर्शनः" भा० अनु० ५०अ०।

जलौकस पुंस्त्री जलमोकः स्थानमस्यस्याः-अच्। जलौकायां रायमुकुटः।

जल्प वाग्विशेषे उक्तौ च भ्वा०पर०सक०सेट्। जल्पति अजल्पीत्। जजल्प तत्र कथाभेदे "मयि जल्पति कल्पनाधिनाथे रघुनाथे मनुतां तदन्यथैव" इति अनुमानशिरोमणिः। कथामात्रे "अनागसः प्रजानाञ्च प्रमादादिव जल्पतः" भा०स०२१अ० "हसते जल्पते वैरी एकपात्रे च भुञ्जते" हरिवं०२०अ० अत्र आर्षत्वात् पदव्यत्ययः, भुञ्जते इत्यत्र गणव्यत्ययश्च। अनु+कथनोत्तरकथने पश्चात् कथने तुल्यरूपकथने च "जल्पन्त्यामनुजल्पति" भाग० ४।२५।५८। [आर० १अ०। अभि+आभिमुख्येन कथने "अन्योन्यमभिजल्पन्तः" रामा० प्रति+प्रत्युत्तरकथने प्रतिरूपकथने च। "न चैवोक्ता नवाऽनुक्ता हीनतः परुषा गिरः। भारत! प्रतिजल्पन्ति सदा तूत्तमपूरुषाः" भा० स० ७०अ०। वि+अति+अन्योन्यकथने शब्दकर्मकत्वात् व्यतिहारे न तङ्। "व्यतिजल्पति" सि० कौ०।

जल्प पु० जल्प-भावे घञ्। १कथने। "इति प्रियां वल्गुविचित्रजल्पैः" भाग० १।७।१८। आर्षेऽस्य क्लीवतापि। "तूष्णींभव न ते जल्पमिदं कार्यं कथञ्चन" भा० आ० १२९अ०। "कैकेयीं संश्रितं जल्पं नेदानीं प्रतिभाति मे" रामा०अयो०६०अ०। उभयत्र जल्पत्रमिति पाठस्तु सम्यक्। परमतनिराकरणपूर्वकस्वमतस्थापनरूपे विजिगीषोः २कथाभेदे च। तल्लक्षणं गौतमेनोक्तं यथा "यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः" गौत० सू०। व्याख्यातश्चैतत् विश्वनाथेन।

"यथोक्तेषु यदुपपन्नं तेनोपपन्न इत्यर्थः। मध्यपदलोपी समासः। तथा च प्रमाणतर्कसाधनोपालम्भः पक्षप्रतिपक्षपरिग्रह इत्यस्य योग्यतया परामर्शः अन्यथा जल्पस्य वादविशेषत्वापत्तिः प्रमाणतर्काभ्यां तद्रूपेण ज्ञाताभ्यां न तु ज्ञानेऽनाहार्यत्वं विवक्षितम् आरोपितप्रमाणभावेनाभासेऽपि जल्पनिर्वाहात्। यद्यपि छलादिभिरुपालम्भ एव न तु साधनं तथापि साधनस्य परकीयानुमानस्योपालम्भो यत्रेत्यर्थान्न दोषः। परपक्षदूषणे सति स्वपक्षसिद्धिरित्यतः साधने तदुपयोग इत्यन्ये। उभयपक्षस्थापनावत्त्वेन च विशेषणीयमतो वितण्डायां नातिव्याप्तिः "स प्रतिपक्षस्थापनाहीनः" इत्युत्तरसूत्रात् प्रकृते उभयपक्षस्थापनावत्त्वादेव च पञ्चावयवनियमोऽपि लभ्यत इति वदन्ति। अत्र च छलादिभिः सर्वैरुपालम्भो न विशेषेण व्याप्तिरपि तु तद्योग्यतयैव, योग्यतावच्छेदकन्तु वादभिन्नकथात्वमेव तत्र चोक्तवादत्वावच्छिन्नभेदस्तद्वाद्भेदो वा विशेषणमिति छलेत्यादिना विजिगीषुकथात्वं बोध्यते विजिगीषुर्हि छलादिकं करोति तथाचोभयपक्षस्थापनावती विजिगीषुकथा जल्प इत्यर्थः इत्यपि वदन्ति। अत्र चायं क्रमः वादिना स्वपक्षसाधनं प्रयुज्य नायं हेत्वाभासस्तल्लक्षणायोगादिति सामान्यतो न्यायसिद्ध इत्यादि विशेषतो वा। प्रतिवादिना स्वस्याज्ञानादिनिरासाय परोक्तसम्भवादेव लाभे उच्यमानग्राह्याणामप्राप्तकालार्थान्तरनिरर्थकानामलाभे उक्तग्राह्याणां प्रतिज्ञाहानिप्रतिज्ञान्तरप्रतिज्ञाविरोधप्रतिज्ञासंन्यासहेत्वन्तराविज्ञातार्थविक्षेपमतानुज्ञान्यूनाधिकपुनरुक्तनिरनुयोज्यानुयोगापसिद्धान्तानामलाभे पर्य्यनुयोज्योपेक्षणस्य मध्यस्थोद्भाव्यत्वाद्द्वेवानुपन्यासार्हतया यथासम्भवहेत्वाभासेन परोक्तं दूषयित्वा स्वपक्ष उपन्यसनीयः। ततो वादिना तृतीयकक्षाश्रितेन परोक्तमनूद्य स्वपक्षदूषणमुद्धृत्यानुक्तग्राह्योच्यमानग्राह्यहेत्वाभासातिरिक्तोक्तग्राह्याणामलाभे हेत्वाभासेन यथासम्भवं प्रतिपक्षवादिनः स्थापना दूषणीया। अन्यथा क्रमविपर्य्यासेऽप्राप्तकालं चानवसरे दूषणीयेन च निरनुयोज्यानुयोगः यथा त्यक्ष्यसि चेत् प्रतिज्ञाहानिं विशेषयसि चेद्धेत्वन्तरमित्यादिप्रतिज्ञाहान्यादिवद्धेत्वाभासानामुक्तग्राह्यत्वाविशेषेऽपि अर्थदोषत्वेनाप्रधानत्वाच्चरमसन्धानमिति"। उञ्छादि०अस्यान्तोदात्तता।

जल्पन त्रि० जल्प-नन्द्या० ल्यु। १कथके। भावे ल्युट्।

२कथने न० । अनिमित्तभङ्गमलनस्वेदाम्बुनिपातजल्पनाद्यानिः” वृ० सं० ४६ अ० ।

जल्पाक त्रि० जल्प–षाक । १वाचाले बहुकुत्सितवादिनि अमरः। २कथकमात्रे च स्त्रियां षित्वात् ङीष् । “जल्पाकीभिः सहासीनः स्त्रीभिः प्रजविना त्वया” भट्टिः ।

जल्पित त्रि० जल्प–कर्म्मणि क्त । १कथिते अमरः भावे क्त । २कथने न० ।

जल्हु पु०दह–वा० ड पृषो०। १अग्नौ “न पापासो मनामहे नारायासो न जल्हवः” ऋ० ८।५१।११। “न जल्हवः अनग्नयः” भा० ।

जव पु० सौ० जु–भावे अप् । १वेगे । “जवेन पीठादुदतिष्ठदच्युतः” “जवेन कण्ठं सभयाः प्रपेदिरे” माघः । “जवेऽपि मानेऽपि च पौरुषाधिकम्” नैष० । कर्त्तरि अच् । २तद्वति त्रि० अमरः ।

जवन न०जु–भावे ल्युट् । १वेगे अमरः। “तं मन्ये मेघपुष्पस्य जवने सदृशं हयम्” भा०वि०४५अ०। कर्त्तरि ल्यु । २जवयुक्ते त्रि० “आरुह्य जवनानश्वान् नियन्तुमुपचक्रमे” हरिवं०११७अ०। ततः दृढा०भावे इमनिच् । ३जवनिमन् जवे पु० । ४वेगयुक्ते देशभेदे पारस्यदेशे च हेमच०। सोऽभिजनोऽस्य अण् । ५जावन तद्देशवासिनि त्रि० बहुत्वे अणो लुक् । ६तद्देशवासिषु ब० व० । ७स्वीकारीमृगे ८घोटकमात्रे च पुंस्त्री राजनि०।९म्लेच्छजातिभेदे यवनजातौ पुंस्त्री स्त्रियां जातित्वात् ङीष् ।“जवनी नवनीत कोमलाङ्गी शयनीये यदि नीयते कथञ्चित्” उद्भटः । रघुनन्दनमतेऽयं तालव्यादिः । जवनदेशभवत्वादस्य तथात्वम् ।

जवनाल न० जवनायालति पर्य्याप्नोति अल–अच् । (जनार) फलभेदे । “जवमालं स्मृतं स्वादु शीतं वायुकरं मतम् । कफपित्तविनाशि स्यात्” राजवल्लभः ।

जवनिका स्त्री सौ०जु–करणे ल्युट् संज्ञायां कन् । (कानात्) (चिक) प्रभृतौ व्यवधायकवस्त्रादौ अमरः । “रेजुर्जवनिकाक्षेपैः सपक्षा इव खे नगाः” हरिवं० ८६अ० । “सतां जवनिकानिकामसुखिनाम्” माघः ।

जवनी स्त्री जु–करणे ल्युट् ङीप् । (कानात) १जवनिकायाम् २ओषधिभेदे च हेमच० ।३जवनजातिस्त्रियाञ्च ।

जवस् पु० सौ० जु–असुन् । १वेगे । “आ श्येनस्य जवसा” ऋ०११८।११ । “जवसा वेगेन” भा० ।

जवस न० सौ० जु–कर्म्मणि असच् । घासे शब्दरत्ना० ।

जवा स्त्री सौ० जु–अच् । १स्वनामख्याते वृक्षे अमरः। “जवा कटूष्णेन्द्रलुप्तनाशकृत् भिषजां मता । विच्छर्द्दिकृद्रेचनिका सूर्य्यस्याराधने हिता” राजव० । पाटला० पुष्पेऽपि स्त्री “अरुणो गरुड़भ्राता जवापुष्पसमप्रभः” हरिवं० २२७ अ० । “जवाकुसुमसङ्काशं काश्यपेयं महाद्युतिम्” सूर्य्यनतिमन्त्रः । “पारिजातवनैश्चैव जवाशोकवनैस्तथा भा० व० २३० अ० ।

जवादि न० “जवादि नीरसं स्निग्धमीषत् पिङ्गं सुगन्धिदम् । आतपे बहुलामोदं राज्ञां योग्यञ्च तन्मतम्” इत्युक्तलक्षणे मृगधर्म्मजाते कृत्रिमे गन्धद्रव्यभेदे राजनि० ।

जवाधिक पु० जवेनाधिकः । १अधिकजवयुक्तेऽश्वे अमरः । २अधिकवेगयुक्ते त्रि० ।

जविन् त्रि० जव+अस्त्यर्थे इनि । १वेगयुक्ते हेमच० “श्रमकालमिषुं क्षिप्रमानीयान्यो जवी नरः” याज्ञ० । स्त्रियां ङीप् । “अजवसो जविनीभिर्विवृश्चन्” ऋ० २।१५।६ ।

जविन पु० जव–वा० इनन् । कोकड़वृक्षे राजनि० ।

जवीयस् त्रि०अतिशयेन जववान् ईयसुन् वतोर्लुक् । अतिशयितवेगयुक्ते “अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् मार्षत्”यजु०४०।४। स्त्रियां ङीप् । इष्ठन् जविष्ठोऽप्यत्र । “ऋतस्य न्समन्ये मनसा जविष्ठा” ऋ० ४।२।३।

जष वधे भ्वा० उभ० सक० सेट् । जषति ते अजाषीत् अजषीत् अजषिष्ट । जजाष जेषतुः जेषे ।

जस मोक्षणे दिवा० पर० सक० सेट् । जस्यति इरित् अजसत् अजासीत् अजसीत् जजास जेसतुः अजजसम् । उदित् जसित्वा जस्त्वा । जस्तः ।

जस वधे अनादरे च चुरा० उभ० सक० सेट् । जासयति [ते अजीजसत् त । उद्+हिंसने । एतद्योगे कर्म्मणि षष्ठी । “निजौजसोज्जासयितुं जगद्द्रुहाम्” माघः । “हत्या नाथस्य वैदेहि ! मन्योरुज्जासयात्मनः” भट्टिः ।

जस गतौ निघण्टुः भ्वा० पर० सक० सेट् । जसति अजा(ज)सीत् । जसिस्ताड़ने उपक्षये च माधवः। जसुरिः ।

जस रक्षणे चु० उभ० सक० सेट् इदित् । जंसयति ते अजजंसत् त ।

जसु पु० जस–उन् । आयुधे “यदा बलस्य पीयतो जसुम्” ऋ० १०।६८।६ । “जसुमायुधम्” भा० ।

जसुरि पु०जस–उरिन् ।१वज्रे उज्ज्वलदत्तः २व्यथिते त्रि० “वि या जानाति जसुरिम्” ऋ०५।६१।७। “जसुरिं व्यथितम्” “जसिस्ताड़नकर्म्मोपक्षयकर्म्मा वा” भा०।३उपक्षययुक्ते च।

जस्वन् त्रि० जस—उपक्षये वनिप्। उपक्षयकर्त्तरि "मा जस्वने वृषभ !" ऋ० ६।४०।११। "जस्वने उपक्षयित्रे" भा०।

जहक त्रि० हा—कुन् द्वित्वञ्च। १बाले २त्यागिनि च उज्ज्वल०। ३काले त्रिका०। ४निर्मोके संक्षिप्तसा०। तस्य त्याज्यत्वात् तथात्वम्। ५गात्रसङ्कोचन्यां स्त्री। "इतरजनाय जहका वैष्णवी" यजु० २४।२६। "जहका गात्रसङ्कोचनी" वेददी०।

जहत्स्वार्था स्त्री जहत् स्वार्थो यस्याम्। १लक्षणाभेदे, यथा आयुर्घृतम् आयुर्घृतमित्यत्र आयुःसाधनस्य बोधनात् स्वार्थस्यायुषस्त्यागात् तथात्वम्। "जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा" हरिका०। वैयाकरणभूषणे तु जहति पदानि स्वार्थं यस्यामिति विग्रहो दर्शितः।

जहदजहल्लक्षणा स्त्री जहच्च अजहच्च स्वार्थौ यां तादृशी लक्षणा। वाच्यार्थैकदेशत्यागेनैकदेशवृत्तौ लक्षणायाम् यथा सोऽयं देवदत्त इत्यत्र तत्कालैतत्कालरूपार्थत्यागेन केवलदेवदत्तमात्रार्थबोधनात् वाच्यार्थैकदेशवृत्तिता। एवं "तत्त्वमसि श्वेतकेतो !" छा०उ०वाक्ये विरुद्ध सर्वज्ञत्वाल्पज्ञत्वार्थत्यागेन चैतन्यमात्रबोधनात् तथात्वम्।

जहल्लक्षणा स्त्री जहत् स्वार्थो यस्याम् उत्तरपदलोपे कर्म०। जहत्स्वार्थायां लक्षणायाम्। यथा आयुर्घृतम्। लक्षणाभेदोदाहरणादिकं वेदान्तपरिभाषायां दर्शितं यथा

"प्रकारान्तरेण लक्षणा त्रिधा जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति तत्र शक्यार्थमन्तर्भाव्य यत्रार्थान्तरस्य प्रतीतिस्तत्र जहल्लक्षणा यथा विषं भुङ्क्ष्वेत्यत्र स्वार्थं विहाय शत्रुगृहे भोजननिवृत्तिर्लक्ष्यते। यत्र शक्यार्थमन्तर्भाव्यैव अर्थान्तरप्रतीतिः तत्राजहल्लक्षणा यथा शुक्लः पट इति अत्र हि शुक्लशब्दः स्वार्थं शुक्लगुणमन्तर्भाव्यैव तद्वति द्रव्ये लक्षणया वर्त्तते। यत्र हि विशिष्टवाचकः शब्दः एकदेशं विहाय एकदेशे वर्त्तते तत्र जहदजहल्लक्षणा यथा सोऽयं देवदत्त इति अत्र हि पदद्वयवाच्ययोर्विशिष्टयोरैक्यानुपपत्त्या पदद्वयस्य विशेष्यमात्रपरत्वं यथा वा तत्त्वमसीत्यादौ तत्पदवाच्यसर्वज्ञत्वादिविशिष्टस्य त्वंपदवाच्येनान्तःकरणविशिष्टेनैक्यायोगात् ऐक्यसिद्ध्यर्थं स्वरूपे लक्षणेति साम्प्रदायिकाः। वयन्तु ब्रूमः सोऽयं देवदत्तः तत्त्वमसीत्यादौ विशिष्टवाचकानां पदानामेकदेशपरत्वेऽपि न लक्षणा शक्त्युपस्थितविशिष्टयोरभेदान्वयानुपपत्तावपि विशेष्ययोः शक्त्युपस्थितयोरेवान्वयबोधाविरोधात् यथा घटोऽनित्य इत्यत्र घटपदवाच्यैकदेशघटत्वस्यानित्यत्वायोग्यत्वेऽपि योग्यघटव्यक्त्या सहानित्यत्वान्वयः। यत्र पदार्थैकदेशस्य विशेषणतयैवोपस्थितिस्तत्रैव स्वातन्त्र्येणोपस्थितये लक्षणाभ्युपगमः यथा नित्यो घट इत्यत्र घटपदाद्घटत्वस्य शक्त्या स्वातन्त्र्येणानुपस्थित्या तादृशोपस्थित्यर्थं घटपदस्य घटत्वे लक्षणा एवमेव तत्त्वमस्यादिवाक्येऽपि न लक्षणा शक्त्या स्वातन्त्र्येणोपस्थितयोस्तत्त्वंपदार्थयोरभेदान्वये बाधकाभावात्। अन्यथा गेहे घटः घटे रूपं घटमानय इत्यादौ घटत्वगेहत्वादेरभिमतान्वयबोधायोग्यतया तत्रापि घटादिपदानां विशेष्यमात्रपरत्वे लक्षणा च स्यात्। तस्मात्तत्त्वमस्यादिवाक्येषु आचार्य्याणां लक्षणोक्तिरभ्युपगमवादेन बोध्या। जहदजहल्लक्षणोदाहरणन्तु काकेभ्यो दधि रक्ष्यतामित्यादिकमेव। तत्र शक्यकाकत्वपरित्यागेनाशक्यदध्युपघातकत्वपुरस्कारेण काके काकशब्दप्रवृत्तेः"।

जहा स्त्री जहाति हा—बा०श। मुण्डितिकायां (मुण्डिरी) [हेमच०। शब्दच०।

जहानक पु० हा—शीलार्थे शानच् संज्ञायां कन्। प्रलये

जहिजोड़ अव्य० जहि जोड़ इत्युच्यते यस्यां क्रियायाम् मयूर०स०। त्यागजोड़ार्थनियोगक्रियायाम्।

जहिस्तम्ब अव्य० जहि स्तम्ब इत्युच्यते यस्यां क्रियायाम् मयू० स०। त्यागस्तम्बनियोगक्रियायाम्।

जहु पु० हा+उन् नि० द्वित्वम्। १अपत्ये "ललितानुषङ्ग आसनशयनाटनस्नानाशनादिषु सह मृगजहुना" भाग० ५।८।१२। "मृगजहुना मृगापत्येन" श्रीधरः। २कुरुवंश्ये पुष्पवतोऽपत्ये राजभेदे "जहुः सत्यवतोऽपत्यं पुष्पवांस्तत्सुतो जहुः" भाग० ९।२२।५।

जह्नु पु० भरतवंश्ये आजमीढ़नृपपुत्रे १नृपभेदे। "भरतस्यान्वये चैवाजमीढ़ो नाम पार्थिवः। तस्य पुत्रो महानासीज्जह्नुर्नाम नरेश्वरः। दुहितृत्वमनुप्राप्ता गङ्गा यस्य महात्मनः" भा०अनु० ४अ०। गङ्गायास्तद्दुहितृत्वकथा रामा० आदि० ४३ स०।

"यतो भगीरथो राजा ततो गङ्गा यशस्विनी। जगाम सरितां श्रेष्ठा सर्वपापप्रणाशिनी। यतो हि यजमानस्य जह्नोरद्भुतकर्म्मणः। गङ्गा संप्लावयामास यज्ञवाटं महात्मनः। तस्यावलेपनं ज्ञात्वा क्रुद्धो जह्नुश्च राघव !। अपिबत्तु जलं सर्वं गङ्गायाः परमाद्भुतम्। ततो देवाः सगन्धर्वा ऋषयश्च सुविस्मिताः। पूजयन्ति महात्मानं जह्नुं पुरुषसत्तमम्। गङ्गां चापि नयन्ति स्म

दुहितृत्वे महात्मनः। ततस्तुष्टो महातेजाः श्रोत्राभ्यामसृजत् प्रभुः। तस्माज्जह्नुसुता गङ्गा प्रोच्यते जाह्नवीति च"। जह्नोरपत्यमण् ङीप्। जाह्नवी गङ्गायाम्। "जाह्नवीतीरसम्भूतां मृदं मूर्द्ध्नि बिभर्त्ति यः" प्रा० त०। जह्नोरिय अण् वेदे पृषो० ह्रस्वाकारविपर्य्ययौ। जह्नावी जह्नुसम्बन्धिन्यां प्रजायाम्। "आ जह्नावीं सुमनसो पराजैः" ऋ० १।११६।१८। "जह्नावी जह्नोर्महर्षेः सम्बन्धिनी प्रजा" भा०।२विष्णौ च "सत्कर्त्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः" विष्णुस०। "जनान् संसारादपह्नुते अपनयतीति जह्नुः जहात्य विदुषः स्वभक्तान्नयति परं पदमिति वा" भा० तद्व्युत्पत्तिर्दर्शिता पृषो० साधु।

जह्नुकन्या स्त्री ६त०।१गङ्गायाम्। "जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम्" मेघ० "जलनिधिमनुरूपं जह्नुकन्यावतीर्णा" रघुः। जह्नुतनयादयोऽप्यत्र।

जह्नुसप्तमी स्त्री वैशाखशुक्लसप्तम्याम्। "वैशाखशुक्लसप्तम्यां जह्नुना मुनिना पुरा। क्रोधात् पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणात्। तस्यां समर्चयेद्देवीं गङ्गां भुवनमेखलाम्। स्नात्वा सम्यग् विधानेन स धन्यः सुकृती नरः। तस्यां सन्तर्पयेत् देवान् पितॄन् मर्त्यांश् यथाविधि। साक्षात् पश्यन्ति ते गङ्गास्नातकं गतपातकम्" वराहपु०।

जह्मन् न० हा—मनिन् पृषो० द्वित्वान्त्यलोपौ। उदके निघ० उदकनामसु तत्र जह्मेति पाठान्तरम्।

जा स्त्री जन—बा०ड।१मातरि २देवरपत्न्याम् एकाक्षरको०। ४जननकर्त्तरि त्रि० गवादौ उपपदे जन—विट् ङा। गोजा गविजाते त्रि०।

जागत त्रि० जगती छन्दोऽस्य अण्। जगतीच्छन्दस्के मन्त्रादौ। जगत्यां भवः उत्सा०अञ्। २जगतीच्छन्दसि भवे सामभेदे न०। २ जगत्यां पृथिव्यां भवे च त्रि०।

जागर पु० जागृ—भावे घञ् गुणः। १निद्राक्षये (जागा) अमरः "त्रयोदशसमास्तीर्णा जागरेण सुदुःखिताः" भा० क० ८६ अ०। "रात्रिजागरपरो दिवाशयः" रघुः। २अन्तःकरणस्य सत्त्ववस्तुप्रकाशात्मके वृत्तिभेदे।

जागरक त्रि० जागृ—ण्वुल् गुणः। निद्रारहिते।

जागरण न० जागृ—भावे ल्युट्। १निद्राराहित्ये।

जागरित न० जागृ—भावे क्त गुणः। १जागरणे निद्राभावे २इन्द्रियैरर्थज्ञाने स्वप्नदर्शनहेतुकर्मक्षये च जागरितमागच्छन् स्वोपाध्यन्तःकरणेन्द्रियसन्निवेशस्तदिन्द्रियविषयाननुमेयांश्च स्थूलान् व्यवहारिकान् सर्वाननुभवति यत्रावस्थायां तत् जागरितमित्युच्यते वेदान्तमतम्

जागरितस्थान पु० जागरितं स्थानमस्य। वेदान्तिमतसिद्धे वैश्वानरे आत्मनि। तत्स्वरूपादिकं मुण्डकोपनिषदि तद्भाष्ये च दर्शितम्।

"जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः" मुण्डकोप०

"जागरितं स्थानमस्येति जागरितस्थानः। बहिः स्वात्मव्यतिरिक्ते विषये प्रज्ञा यस्य स बहिःप्रज्ञो बहिर्विषयेषु प्रज्ञाऽविद्याकृताऽवभासत इत्यर्थः। तथा सप्ताङ्गान्यस्य "तस्य ह वैतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो बस्तिरेव रयिः पृथिव्येव पादौ" अग्निहोत्रकल्पनाशेषत्वेनाग्निर्मुखत्वेनाहवनीय उक्त इत्येवं सप्ताङ्गानि यस्य स सप्ताङ्गः। तथैकोनविंशतिर्मुखान्यस्य बुद्धीन्द्रियाणि च दश वायवश्च प्राणादयः पञ्च मनो बुद्धिरहङ्कारश्चित्तमिति मुखानीव मुखानि तान्युपलब्धिद्वाराणीत्यर्थः। स एवं विशिष्टो वैश्वानरो यथोक्तैर्द्वारैः शब्दादीन् स्थूलान् विषयान् भुङ्क्त इति स्थूलभुक्। विश्वेषां नराणामनेकधा नयनाद्विश्वानरः। यद्वा विश्वश्चासौ नरश्चेति विश्वानरः विश्वानर एव वैश्वानरः। सर्वपिण्डात्मानन्यत्वात् स प्रथमः पादः" भा०।

जागरितान्त पु०जागरितस्थान्तः तत्र विज्ञेयः। जागरितमध्ये तत्र विज्ञेये "स्वप्नान्तं जागरितान्तञ्चोभौ येनानुपश्यति" कठोप० "स्वप्नान्तं स्वप्नमध्यं स्वप्नविज्ञेयमित्यर्थः। तथा जागरितान्तं जागरितमध्यं जागरितविज्ञेयं चोभौ स्वप्नजागरितान्तौ येनात्मनानुपश्यति लोकः" भा०।

जागरितृ त्रि०जागृ—शीलार्थे तृच्। जागरणशीले अमरः।

जागरिन् त्रि० जागृ—शीलार्थे णिनि गुणः। जागरणशीले हेमच० स्त्रियां ङीप्।

जागरूक त्रि० जागृ—ऊक। जागरणशीले अमरः "स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव" रघुः। २स्वकर्त्तव्ये सावधाने अप्रमत्ते च "वर्णाश्रमावेक्षणजागरूकः" रघुः।

जागर्त्ति स्त्री जागृ—भावे क्तिन्। जागरणे रायमु०।

जागर्य्या स्त्री जागृ—भावे क्यप् गुणः। जागरणे। अ। जागराप्यत्र स्त्री अमरः।

जागुड़ पु०१देशभेदे सोऽभिजनोऽस्य अण्। २तद्देशवासिनि त्रि०

"जागुडान् रामठान् हूणान् स्त्रीराज्यानथ तङ्गणान्" भा० । व० प० । तत्र भवः अण् । १तद्देशभवे त्रि० । ४कुङ्कुमे न० । "अवनिं जागुडकुङ्कुमाभिताम्राम्" माघः ।

जागृ निद्राभावे अदा० पर० अक० सेट् जक्षा० । जागर्त्ति जाग्रति अजागरीत् । जागराम्–बभूव आस चकार जजागार । अस्य णपि वृद्धिः तद्भिन्ने ञिति णिति च गुणः विन्भिन्ने सर्वत्र आर्द्धधातुके गुणः । जागर्य्यते अजागरि जागरयति कर्म्मणि अजागरि अजागारि इति भेदः "कुसुमशरः सु जागरयति" उद्भटः । जागरूकः । जागृविः "जागर्त्ति लोको ज्वलति प्रदीपः" उद्भटः । इन्द्रियादिना बोधे प्रबोधे च । "या निशा सर्वभूतानां तस्यां जागर्त्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः" गीता । "पन्नगगवीगुम्फेषु चाजागरीत्" मल्लि० ।

जागृवि पु० जागृ–क्विन् न गुणः । १नृपे उज्ज्वल० तस्य स्वकार्य्येऽप्रमत्तत्वात् तथात्वम् । २अग्नौ हेम० ३जागरणशीले त्रि० "समानमज्मन् पर्य्येति जागृविः" ताण्ड्य० ब्रा० १।७।६ । "जागृविः जागरूकः" भा० । "विभीदको जागृविर्मह्यमच्छान्" ऋ० १०।३४।१ । "जनस्य गोपा अजनिष्ट जागृविरग्निः" ऋ० ५।११।१ ।

जाग्रत् त्रि० जागृ–शतृ । १जागरणकर्त्तरि २सावधाने अप्रमत्ते ३प्रकाशमाने च । "जाग्रत्कलङ्कैरवध्वंसं हस्तयते च या सुमनसामुल्लासिनी मानसे" चन्द्रालोकः । स्त्रियां ङीप् । जीवानां श्रोत्रादिभिः ४शब्दादिविषयज्ञानावस्थाभेदे सा च त्रिधा "प्रमितिर्जागरे जाग्रद्भ्रमः स्वप्नोऽथ मूढता । पानादिजन्या सुप्तिः स्यादेवं जागरणं त्रिधा" शब्दार्थचि०धृतवाक्यम् । "एवं स जाग्रत्स्वप्नाभ्यामिदं सर्वं चराचरम्" मनुः । "जाग्रत्स्वप्नः सङ्कल्पः पापः" ऋ० १०।१६४।५ । "जाग्रत्स्वप्नावस्थयोः सम्बन्धी पापः" भा० । "जाग्रत् स्वप्नसुषुप्तिधामरहितः [रायमुकुटः । प्राप्तः प्रबोधोदयः" प्रबो० ।

जाग्रिया स्त्री जागृ–भावे पक्षे शः रिङादेशः । जागरणे

जाघनी स्त्री जघनस्य समीपं शैषिकोऽण् ङीप् । १ऊरौ त्रिका० जघनस्यार्द्धे जघनैकदेशे भवः अण् ङीप् । २पुच्छकाण्डे "अथ जाघन्या पत्नीः संयाजयन्ति जघनार्द्धे जाघनी जघनार्द्धाद्वै योषायै प्रजाः प्रजायन्ते" शत० ब्रा० १।८।५।६ । "जाघनी वालदण्डः" भा० । "वनिष्ठु जाघनि शास्यति" कात्या० श्रौ० ६।७।१० तत्र जाघनीशब्दस्य मतभेदेन कर्केण नानार्थतोक्ता यथा "जाघनी जघनप्रदेशे भवा पुच्छदण्ड इत्यर्थः जाघनी पशोः पुच्छमिति हरिस्वामिना । जाघनी वालदण्ड इति माधवाचार्य्याः । "जाघनी येन मशकानपनयतीति धूर्त्तस्वामिनः । जाघनी वालधिरुच्यत इति ज्ञानदीपिकाकारः । क्षुधार्त्तश्चात्तुमभ्यगाद्विश्वामित्रः श्वजाघनीम् । चण्डालहस्तादादाय धर्म्माधर्म्मविचक्षणः" (मनुः) इत्यत्र श्वजाघनीम् श्वपुच्छमिति स्मृतिचन्द्रिकाकारो व्याख्यातवान् । जाघनी पशोः पुच्छमित्यधिकरणमालायाम् तृतीयेऽध्याये । जाघनी चैकदेशत्वादित्यधिकरणे जाघनी कटी इति पितृभूतिहरिहरौ तदयुक्तम् कटिशब्दस्य श्रोणिपर्य्यायत्वात् श्रोण्योश्च प्रागुक्तत्वादिति अतः पुच्छकाण्डमेव जाघनीशब्देनोच्यते इति । विश्वामित्रस्य जाघनीहरणकथा प्रसङ्गादुच्यते ।

"विश्वामित्रोऽथ भगवान् महर्षिरनिकेतनः । क्षुधापरिगतो धीमान् समन्तात् पर्य्यधावत । त्यक्त्वा दारांश्च पुत्रांश्च कस्यांचित् जनसंसदि । भक्ष्याभक्ष्यसमो भूत्वा निरग्निरनिकेतनः" इत्युपक्रमे "स ददर्श श्वमांसस्य कुतन्त्रीं विततां मुनिः । चाण्डालस्य गृहे राजन् ! सद्यः शस्त्रहतस्य वै । स चिन्तयामास तदा स्तैन्यं कार्य्यमितो मया । न हीदानीमुपायो मे विद्यते प्राणधारणे । आपत्सु विहितं स्तैन्यं विशिष्टस्य महीयसः । विप्रेण प्राणरक्षार्थं कर्त्तव्यमिति निश्चयः । हीनादादेयमादौ स्यात् समानात्तदनन्तरम् । असम्भवे वाददीत विशिष्टादपि धार्म्मिकात् । सोऽहमन्त्यावसानाय हराम्येनां प्रतिग्रहात् । न स्तैन्यदोषं पश्यामि हरिष्यामि श्वजाघनीम्" । इति निश्चित्य तां हर्त्तुमुपक्रान्तस्य चण्डालेन सह संवादो यथा "विश्वामित्रस्तु मातङ्गमुवाच परिसान्त्वयन् । क्षुधितोऽहं गतप्राणो हरिष्यामि श्वजाघनीम् । क्षुधितः कलुषं यातो नास्ति ह्रीरशनार्थिनः । क्षुच्च मां दूषयत्यत्र हरिष्यामि श्वजाघनीम् । अवसीदन्ति मे प्राणाः श्रुतिर्मे नश्यति क्षुधा । दुर्बलो नष्टसंज्ञश्च भक्ष्याभक्ष्यविवर्जितः । सोऽधर्म्मं बुध्यमानोऽपि हरिष्यामि श्वजाघनीम् । अटन् भैक्ष्यं न विन्दामि यदा युष्माकमालये । तदा बुद्धिः कृता पापे हरिष्यामि श्वजाघनीम्" भा० शा० १४१ अ० । कथाशेषस्तत्र दृश्यः

जाङ्गल पु० जङ्गले भवः जङ्गलप्रायो वा अण् । १वनप्राये २जङ्गलस्थपशुमांसे तत्रत्ये ३उदके च शब्दार्थचि० । "अल्पोदकतृणो यस्तु प्रवातः प्रचुरातपः । स ज्ञेयो

जाङ्गलो देशो बहुधान्यादिसंयुतः” कुल्लू० धृतशाक्योक्तलक्षणे ४देशभेदे पु०। भावप्र० अन्यथा तल्लक्षणमुक्तं यथा “आकाशशुभ्र उच्चश्च स्वल्पपानीयपादपः। शमीकरीरविल्वार्कपीलुकर्कन्धुसङ्कुलः। हरिणैणर्ष्यपृषतगोकर्णखरसङ्कुलः। सुस्वादुफलवान् देशो वातलो जाङ्गलः स्मृतः”।

“बहूदकनगोऽनूपः कफमारुतरोगवान्। जाङ्गलोऽल्पाम्बुशाखी च पित्तासृङ्मारुतोत्तरः” तद्देशगुणास्तत्रोक्ता जाङ्गलानां पशूनां विशेषः तन्मांसगुणाश्च तत्रैवोक्ता यथा “हरिणैणकुरङ्गर्ष्यपृषतन्यङ्कुशंवराः। राजीवोऽपि च मुण्डी चेत्याद्याः जाङ्गलसंज्ञकाः। हरिणस्ताम्रवर्णः स्यादेणः कृष्णः प्रकीर्त्तितः। कुरङ्ग ईषत्ताम्रः स्यादेणतुल्याकृतिर्महान्। ऋष्यो नीलाङ्गको लोके मारोह इति कीर्त्तितः। पृषतश्चन्द्रविन्दुः स्याद् हरिणात् किञ्चिदल्पकः। न्यङ्कुर्बहुविषाणोऽथ शंवरो गवयो महान्। राजीवस्तु मृगो ज्ञेयो राजिभिः परितोवृतः। यो मृगः शृङ्गहीनः स्यात् स मुण्डीति निगद्यते। जाङ्गलाः प्रायशः सर्वे पित्तश्लेष्महराः स्मृताः। किञ्चिद्वातकराश्चापि लघवो बलवर्द्धनाः”। “तत्रेमे कुरुपाञ्चालाः शाल्वा माद्रेयजाङ्गलाः” भा० भी० ६अ०। ५कपिञ्जलखगे पु०स्त्री मेदि० स्त्रियां जातित्वात् ङीष्।

जाङ्गलपथिक त्रि० जङ्गलस्यः पन्थाः अच् समा०। तेनाहृतं तेन गच्छति वा ठञ्। १जङ्गलपथेनाहृते २तेन गन्तरि च।

जाङ्गुल न० गम–यङ् लुक् बा० उुल पृषो० दीर्घः। १विषे तस्य कुटिलगतित्वात् तथात्वं २जालिनीफले शब्दरत्ना०।

जाङ्गुलि पु० गम–यङ् लुक् बा० उलि। १विषवैद्ये शब्दरत्ना०। “परीक्षितं समश्नीयात् जाङ्गुलिभिर्भिषग्वृतः” वैद्यकम्।

जाङ्गुलिक पु० जाङ्गुली विषविद्या तामधीते वेद वा तया दीव्यति वा ठञ्। विषवैद्ये अमरः। [हेमच०।

जाङ्गुली स्त्री जाङ्गुलस्य विषस्येयम् अण्। विषविद्यायाम्

जाङ्घि त्रि० जङ्घायां भवः तस्या इदं वा बाह्वादेराकृतिगणत्वात् इञ्। १जङ्घाभवे २तत्सम्बन्धिनि च।

जाङ्घिक त्रि० जङ्घाभ्यां जीवति वेतना० ठञ्। १धावके (धाओड़े) २उष्ट्रे पुंस्त्री० ३मोकारीवृक्षे पु० राजनि०।

जाजलि पु० ऋषिभेदे तस्य तपश्चरणकथादिकं भा० शा० २६२अ० दृश्यम् “वने वनचरः कश्चिज्जाजलिर्नाम वै द्विजः” इत्यादि। स च प्रवरप्रवर्त्तकः हेमा० व्र० दृश्यम्।

जाजिन् त्रि० जज–योधे–ताच्छील्ये णिनि। योधशीले। “जजौजाजाजिजिज्जाजी” माघः।

जाझ्झा(ट)लि पु० ज(झ)ट–संघाते घञ्। तं लाति ला–बा० डि। वृक्षभेदे अमरः।

जाटालिका स्त्री कुमारानुचरमातृभेदे “जाटालिका कामचरी दीर्घजिह्वा बलोत्कटा” भा० शा० ४७ अ०।

जाटासुरि पु० जटासुरस्यापत्यम् इञ्। जटासुरापत्ये “जाटासुरिर्भीमसेनिं नानाशस्त्रैरवाकिरत्” भा० द्रो० १७५ अ०।

जाटिलिक पुंस्त्री जटिलिकाया अपत्यं शिवा० अण्। जटिलिकाया अपत्ये स्त्रियां ङीप्।

जाठर पु० जठरे भवः अण्। जठरस्थिते १वह्नौ “जाठरो भगवानग्निरीश्वरोऽन्नस्य पाचकः” सुश्रु०। २कुमारानुचरभेदे “विद्युताक्षो धनुर्वक्त्रो जाठरो मारुताशनः” भा० श० ४६अ०। तस्येदमण्। ३जठरसम्बन्धिनि त्रि० स्त्रियां ङीप्। “नानाशनः स्यान्न महाशनः स्यादलोलुपः साधुभिरागतः स्यात्। यात्रार्थमाहारमिहाददीत तथास्य स्याज्जाठरी द्वारगुप्तिः” भा० शा० २७० अ०।

जाठर्य्य त्रि० जठरे भवः बा० ञ्य। जठरभवे रोगादौ “एतन्नवायसमेतेन जाठर्य्यं न भवति सद्योऽग्निरामायते” सुश्रु०।

जाडार पुंस्त्री जडस्यापत्यम् वा आरक्। जडस्यापत्ये।

जाड्य न० जडस्य भावः ष्यञ्। १जडतायां २मौर्ख्ये च हेमच०। “आलस्यभ्रमभीद्यैर्जाड्यं जृम्भासितादिकृत्” सा० द०। “इदं जाड्यमिदं मौढ्यमिदमत्यद्भुतं वचः” हरिवं० २०८अ०।

जाड्यारि पु० ६त०। जम्बीरे राजनि०।

जात त्रि० जन–कर्त्तरि क्त। १उत्पन्ने २व्यक्ते च भावे क्त। ४जन्मनि ५समूहे च मेदि० तत्र उत्पन्ने “तस्मात् कुमारं जातं घृतं वैवाग्रे प्रतिलेहयन्ति स्तनं वानुधापयन्ति” शत० ब्रा० १४।४।२।४ “सुवीजं चैव सुक्षेत्रे जातं संपद्यते यथा” मनुः संघे “निःशेषविश्राणितकोशजातम्” रघुः। “चतुर्विधस्थूलशरीरजातम्” वेदान्तः। “सर्व्वेषां धनजातानामाददीताग्र्यमग्रजः” मनुः।

जातक त्रि० जात+स्वार्थे क। १उत्पन्ने “उभौ तौ नार्हतो भागं जारजातककामजौ” मनुः। जातं जन्म तदधिकृत्य कृतो ग्रन्थः अण् संज्ञायां कन्। २होरातन्त्रे। तच्च नानाज्योतिर्विद्भिर्नानाविधं रचितं तत्र वृहज्जातकस्यैव अतिप्रामाणिकत्वात् तच्छास्त्रप्रतिपाद्यविषया ग्रन्थकृता

२५अ०वराहमिहिरेणोक्ताः प्रदर्श्यन्ते। "राशिप्रभेदो ग्रहयोनिभेदो वियोनिजन्माथ निषेककालः। जन्माथ सद्योमरणं तथायुर्दशाविपाकोऽष्टकवर्गसंज्ञः। कर्माजीवो राजयोगाः खयोगाश्चान्द्रा योगाद्विग्रहाद्याश्च योगाः। प्रव्रज्याथो राशिशीलानि दृष्टिर्भावस्तस्मादाश्रयोऽथ प्रकीर्णः। नेष्टायोगा जातकं कामिनीनां निर्याणं स्यान्नष्टजन्मद्रिकाणः। अत्राध्याया विंशतिः पञ्चयुक्ता जन्मन्येतद्यात्रिकं चाभिधास्ये"।

"राशिप्रभेदः प्रथमेऽध्याये। ग्रहयोनिभेदः द्वितीये वियोनिजन्म तृतीये। निषेककालश्चतुर्थे। जन्मविधिः पञ्चमे। सद्योमरणं षष्ठे। आयुर्विभागः सप्तमे। दशाविभागोऽष्टमे। अष्टकवर्गो नवमे। कर्माजीवो दशमे। राजयोगा एकादशे। खयोगाः (नाभसयोगाः) द्वादशे। चान्द्रयोगाः सुनफाद्याश्चन्द्रयोगास्त्रयोदशे द्विग्रहत्रिग्रहयोगाश्चतुर्दशे। प्रव्रज्यायोगा पञ्चदशे। राशिशीलम् षोडशे। दृष्टिफलं सप्तदशे। भावफलमष्टादशे। आश्रय एकोनविंशतितमे। प्रकीर्णफलम् विंशतितमे। अनिष्टयोगा एकविंशे। कामिनीनां (स्त्रीणां) जातकं द्वाविंशे। निर्याणं (मरणं) तन्निरूपणं त्रयोविंशे। नष्टजातकं चतुर्विंशे। द्रेष्काणस्वरूपादि पञ्चविंशे। एवं पञ्चयुक्ताध्यायानां विंशतिर्जन्मनि जातके कथिता एतज्जातके उक्ताः।

जन्मफलं पञ्चमे उक्तं यथा

"पितुर्जातः परोक्षस्य लग्नमिन्दावपश्यति। विदेशस्थस्य चरभे मध्याद्भ्रष्टे दिवाकरे। उदयस्थेऽपि वा मन्दे कुजे वास्तं ७ समागते। स्थिते वान्तःक्षपानाथे शशाङ्कसुतशुक्रयोः। शशाङ्के पापलग्ने वा वृश्चिकेऽंशत्रिभागगे। शुभैः स्वायस्थितैर्जातः सर्पस्तद्वेष्टितोऽपि वा। चतुष्पदगते भानौ शेषैर्वीर्यसमन्वितैः। द्वितनुस्थैश्च यमलौ भवतः कोशवेष्टितौ। छगसिंहवृषैर्लग्ने तत्स्थे सौरेऽथवा कुजे। राश्यंशसदृशं गात्रं जायते नालवेष्टितः। न लग्नमिन्दुञ्च गुरुर्निरीक्षते न वा शशाङ्कं रविणा समागतम्। सपापकोऽर्केण युतोऽथवा शशी परेण जातं प्रवदन्ति निश्चयात्। क्रूरर्क्षगतावशोभनौ सूर्याद्द्यूननवात्मजस्थितौ। बद्धस्तु पिता विदेशगः स्वे वा राशिवशादथो पथि। पूर्णे शशिनि स्वराशिगे सौम्ये लग्नगते शुभे सुखे ४। लग्ने जलजेऽस्तगेऽपि वा चन्द्रे पोतगता प्रसूयते। आप्योदयमाप्यगः शशी संपूर्णः समवेक्षतेऽथ वा। मेषूरणबन्धुलग्नगः स्यात् सूतिः सलिले न संशयः। उदयोडुपयोर्व्ययस्थिते गुप्त्यां पापनिरीक्षिते यमे। अलिकर्कियुते विलग्नगे सौरे शीतकरेक्षितेऽवटे। मन्देऽब्जगते विलग्नगे बुधसूर्येन्दुनिरीक्षिते क्रमात्। क्रीडाभवने सुरालये सोषरभूमिषु च प्रसूयते। नृलग्नगं प्रेक्ष्य कुजः श्मशाने रम्ये सितेन्दू गुरुरग्निहोत्रे। रविर्नरेन्द्रामरगोकुलेषु शिल्पालये ज्ञः प्रसवं करोति। राश्यंशसमानगोचरे मार्गे जन्मचरे स्थिरे गृहे। स्वर्क्षांशगते स्वमन्दिरे बलयोगात् फलमंशकर्क्षयोः। आरार्कजयोस्त्रिकोणगे चन्द्रेऽस्ते च विसृज्यतेऽम्बया। दृष्टेऽमरराजमन्त्रिणा दीर्घायुः सुखभाक् च स स्मृतः। पापेक्षिते तुहिनगावुदये कुजेऽस्ते त्यक्तो विनश्यति कुजार्कजयोस्तथाये सौम्येऽपि पश्यति तथाविधहस्तमेति सौम्येतरेषु परहस्तगतोऽप्यनायुः। पितृमातृगृहेषु तद्बलात्तरुशालादिषु नीचगैः शुभैः। यदि नैकगतौ तु वीक्षितौ लग्नेन्दू विजने प्रसूयते। मन्दर्क्षांशे शशिनि हिबुके मन्ददृष्टेऽब्जगे वा तद्युक्ते वा तमसि शयने नीचसंस्थैश्च भूमौ। यद्वद्राशिं व्रजति हरिजं गर्भमोक्षस्तु तद्वत् पापैश्चन्द्रात् स्मरसुखगतैः क्लेशमाहुर्जनन्याः। स्नेहः शशाङ्कादुदयाच्च वर्तिर्दीपोऽर्कयुक्तर्क्षवशाच्चराद्यः। द्वारं च तद्वास्तुनि केन्द्रसंस्थैर्ज्ञेयं ग्रहैर्वीर्यसमन्वितैर्वा। जीर्णं संस्कृतमर्कजे क्षितिसुते दग्धं नवं शीतगौ काष्ठाढ्यं न दृढं रवौ शशिसुते तच्चैकशिल्प्युद्भवम्। रम्यं चित्रयुतं नवं च भृगुजे जीवे दृढं मन्दिरं चक्रस्थैश्च यथोपदेशरचनां सामन्तपूर्वां वदेत्। मेषकुलीरतुलालिघटैः प्रागुत्तरतो गुरुसौम्यगृहेषु। पश्चिमतश्च वृषेण निवासो दक्षिणभागकरौ मृगसिंहौ। प्राच्यादिगृहे क्रियादयो द्वौ द्वौ कोणगता द्विमूर्त्तयः। शय्यास्वपि वास्तुवद्वदेत् पादैः षट्त्रिनवान्त्यसंस्थितैः। चन्द्रलग्नान्तरगतैर्ग्रहैः स्युरुपसूतिकाः। बहिरन्तश्च चक्रार्द्धे दृश्यादृश्येऽन्यथा परे। लग्ननवांशपतुल्यतनुः स्याद्वीर्ययुतग्रहतुल्यतनुर्वा। चन्द्रसमेतनवांशपवर्णः कादिविलग्नविभक्तभगात्रः। कं दृक् श्रोत्रनसाकपोलहनवो वक्त्रञ्च होरादयस्ते कण्ठांसकबाहुपार्श्वहृदयं क्रोडानि नाभिस्ततः। वस्तिः शिश्नगुदे ततश्च वृषणावूरू ततो जानुनी। जङ्घाङ्घ्री ह्युभयत्र वाममुदितैर्द्रेक्काणभागैस्त्रिधा। तस्मिन् पापयुते व्रणं शुभयुते दृष्टे च लक्ष्मादिशेत् स्वर्क्षांशे स्थिरसंयुते च सहजः स्यादन्यथाऽऽगन्तुकः। मन्देऽश्मानिलजोऽग्निशस्त्रविषजो भौमे बुधे भूभवः सूर्ये काष्ठचतुष्पदेषु हिमगौ

श्चक्रजजोन्यैः शुभम्। समनुपतिता यस्मिन् भागे त्रयः सबुधा ग्रहा भवति नियमात्तस्यावाप्तिः शुभेष्वशुभेषु वा। व्रणकृदशुभः षष्ठे देहे तनोर्भसमाश्रिते तिलकमशकदृष्टः सौम्यैर्युतश्च स लक्ष्मवान्” ८अ० अष्टवर्गफलमुक्तं तच्चाष्टवर्गशब्दे ५२०पृ०दर्शितम्। नाभसादियोगास्तच्छब्दे वक्ष्यन्ते।

त्र्योनविंशोरिष्टाध्यायो यथा

“लग्नात्पुत्रकलत्रभे शुभपतिप्राप्तेऽथ वाऽऽलोकिते चन्द्राद्वा यदि सम्पदस्ति हि तयोर्ज्ञेयोऽन्यथासम्भवः। पाथेनोदयगे रवौ रविसुतो मीनस्थितोदारहा पुत्रस्थानगतश्च पुत्रमरणं पुत्रोऽवनेर्यच्छति। उग्रग्रहैः सितचतुरस्रसंस्थितैर्मध्यस्थिते भृगुतनयेऽथवोग्रयोः। सौम्यग्रहैरसहितसंनिरीक्षिते जायावधोदहननिपातपाशजः। लग्नाद्व्ययारिगतयोः शशितिग्मरश्म्योः पत्न्या सहैकनयनस्य वदन्ति जन्म। द्यूनस्थयोर्नवमपञ्चमसंस्थयोर्वा शुक्रार्कयोर्विकलदारमुशन्ति जातम्। कोणोदये भृगुतनयेऽस्तचक्रसन्धौ वन्ध्यापतिर्यदि न सुतर्क्षमिष्टयुक्तम्। पापग्रहैर्व्ययमदलग्नराशिसंस्थैः क्षीणे शशिन्यसुतकलत्रजन्मधीस्थे। असितकुजयोर्वर्गेऽस्तस्थे सिते तदवेक्षिते परयुवतिगस्तौ चेत् सेन्दू स्त्रिया सह पुंश्चलः। भृगुजशशिनोरस्तेऽभार्यो नरो विसुतोऽपि वा परिणततनू नृस्त्रीदृष्टौ शुभैः प्रमदापती। वंशच्छेत्ता खमदसुखगैश्चन्द्रदैत्येज्यपापैः शिल्पी त्र्यंशे शशिसुतयुते केन्द्रसंस्थार्कदृष्टे। दास्यां जातो दितिसुतगुरौ रिष्फगे सौरभागे नीचेऽर्केन्द्वोर्मदनगतयोर्दृष्टयोः सूर्यजेन। पापाऽऽलोकितयोः सितावनिजयोरस्तस्थयोर्वाध्यरुक् चन्द्रे कर्कटवृश्चिकांशकगते पापैर्युते गुह्यरुक्। श्वित्री रिष्फधनस्थयोरशुभयोश्चन्द्रोदयेऽस्ते रवौ चन्द्रे खेऽवनिजेऽस्तगे च विकलो यद्यर्कजो वेशिगः। अन्तःशशिन्यशुभयोर्मृगगे पतङ्गे श्वासक्षयप्लिहकविद्रधिगुल्मभाजः। शोषी परस्परगृहांशगयो रवीन्द्वोः क्षेत्रेऽथवा युगपदेकगयोः कृशो वा। चन्द्रेऽश्विमध्यभगकर्किमृगाजभागे कुष्ठी समन्दरुधिरे तदवेक्षिते वा। यातैस्त्रिकोणमलिकर्किवृषैर्मृगे च कुष्ठी च पापसहितैरवलोकितैर्वा। निधनारिधनव्ययस्थिता रविचन्द्रारयमा यथा तथा। बलवद्ग्रहदोषकारणैर्मनुजानां जनयन्त्यनेत्रताम्। नवमायतृतीयधीयुता न च सौम्यैरशुभा निरीक्षिताः। नियमाच्छ्रवणोपघातदा रदवैकृत्यकराश्च सप्तमे। उदयत्युडुपे सुरास्यगे सपिशाचोऽशुभयोस्त्रिकोणयोः। तमसोपप्लवमण्डले रवावुदयस्थे नयनोपवर्जितः। संसृष्टः पवनेन मन्दगयुते द्यूने विलग्ने गुरौ सोन्मादोऽवनिजे स्थितेऽस्तभवने जीवे विलग्नाश्रिते। तद्वत्सूर्यसुतोदयेऽवनिसुते धर्मात्मजद्यूनगे जाते वा सहस्ररश्मितनये क्षीणे व्यये शीतगौ। राश्यंशपोष्णकरशीतकरामरेज्यैर्नीचाधिपांशकगतैररिभागगैर्वा। एभ्योऽल्पमध्यबहुभिः क्रमशः प्रसूताश्चेयाः स्युरभ्युपगमक्रयगर्भदासाः। विकृतदशनः पापैर्दृष्टे वृषाजहयोदये खलतिरशुभक्षेत्रे लग्ने हये वृषभेऽपि वा। नवमसुतगे पापैर्दृष्टे रवावदृढ़क्षणो दिनकरसुतेऽनेकव्याधिः कुजे विकलः पुमान्। व्ययसुतधनधर्मगैरसौम्यैर्भवनसमाननिबन्धनं विकल्प्यम्। भुजगनिगड़पाशभृद्दृकाणैर्बलवदसौम्यनिरीक्षितैश्च तद्वत्। परुषवचनोऽपस्मारार्त्तः क्षयी च निशापतौ सरवितनये वक्रालोकं गते परिवेषगे। रवियमकुजैः सौम्यादृष्टैर्नभःस्थलमाश्रितैर्भृतकमनुजः पूर्वोद्दिष्टैर्वराधममध्यमाः।”

चान्द्रयोगास्तु १३अ० उक्ता यथा।

“अधमसमवरिष्ठान्यर्ककेन्द्रादिसंस्थे शशिनि विनयवित्तज्ञानधीनैपुणानि। अहनि निशि च चन्द्रे स्वाधिमित्रांशके वा सुरगुरुसितदृष्टे वित्तवान् स्यात् सुखी च। सौम्यैः स्मरारिनिधनेष्वधियोग इन्दोस्तस्मिंश्चमूपसचिवक्षितिपालजन्मा सम्पन्नसौख्यविभवा हतशत्रवश्च दीर्घायुषो विगतरोगभयाश्च जाताः। हित्वार्कं सुनफाऽनफा दुरुधुरा स्वान्त्योभयस्थैर्ग्रहैः शीतांशोः कथितोऽन्यथा तु बहुभिः केमद्रुमोऽन्यैस्त्वसौ। केन्द्रे शीतकरेऽथवा ग्रहयुते केमद्रुमो नेष्यते केचित् केन्द्रनवांशकेषु च वदन्त्युक्तिः प्रसिद्धा न तु। त्रिंशत्सरूपाः सुनफाऽनफाख्याः षष्टित्रयन्दौरुधुरे प्रभेदाः। इच्छाविकल्पैः क्रमशोऽभिनीय नीते निवृत्तिः पुनरन्यनीतिः। स्वयमधिगतवित्तः पार्थिवस्तत्समो वा भवति हि सुनफायान्धीधनख्यातिमांश्च। प्रभुरगदशरीरः शीलवान् ख्यातकीर्तिर्विषयसुखसुवेषो निर्वृतश्चानफायाम्। उत्पन्नभोगसुखभुग्धनवाहनाढ्यस्त्यागान्वितो दुरुधुराप्रभवः सुभृत्यः। केमद्रुमे मलिनदुःखितनीचनिःस्वाः प्रेष्याः खलाश्च नृपतेरपि वंशजाताः। उत्साहशौर्यधनसाहसवान् महीजः सौम्यः पटुः सुवचनो निपुणः कलासु। जीवोऽर्थधर्मसुखभुग्नृपपूजितश्च कामी भृगुर्बहुधनो विषयोपभोक्ता। परविभवपरिच्छदोपभोक्ता रवितनयो बहुकार्य्यकृद्गणेशः। अशुभकृदुडुपोऽह्नि दृश्यमूर्त्तिर्गलिततनुश्च शुभोऽन्यथान्यदूह्यम्।

लग्नादतीव वसुमान् वसुमांश्च शशाङ्कात्सौम्यग्रहैरुपचयोपगतैः समस्तैः। द्वाभ्यां समोऽल्पवसुमांश्च तदूनतायामन्येष्वसत्स्वपि फलेष्विदमुत्कटेन"।

द्विग्रहादियोगास्तु १२ अ० उक्ता यथा

"तिग्मांशुर्जनयत्युषेशसहितो यन्त्राश्मकारं नरं भौमेनाघरतं बुधेन निपुणं धीकीर्त्तिसौख्यान्वितम्। क्रूरं वाक्पतिनान्यकार्यनिरतं शुक्रेण रङ्गायुधैर्लब्धस्वम् रविजेन धातुकुशलं भाण्डप्रकारेषु वा। कूटस्त्र्यासवकुम्भपण्यमशिवं मातुः सवक्रः शशी सज्ञः प्रश्रितवाक्यमर्थनिपुणं सौभाग्यकीर्त्यान्वितम्। विक्रान्तं कुलमुख्यमस्थिरमतिं वित्तेश्वरं साङ्गिरा वस्त्राणां ससितः क्रयादिकुशलं सार्किः पुनर्भूसुतम्। मूलादिस्नेहकूटैर्व्यवहरति वणिग्बाहुयोद्धा ससौम्ये पुर्य्यध्यक्षः सजीवे भवति नरपतिः प्राप्तवित्तो द्विजो वा। गोपो मल्लोऽथ दक्षः परयुवतिरतो द्यूतकृत् सासुरेज्ये दुःखार्त्तोऽसत्यसन्धः ससवितृतनये भूमिजे निन्दितश्च। सौम्ये रङ्गचरो बृहस्पतियुते गीतप्रियो नृत्यविद्वाग्मी भूगणपः सितेन मृदुना मायापटुर्लङ्घकः। सद्विद्यो धनदारवान् बहुगुणः शुक्रेण युक्ते गुरौ। ज्ञेयः श्मश्रुकरोऽसितेन घटकृज्जातोऽन्नकारोऽपि वा। असितसितसमागमेऽल्पचक्षुर्युवतिसमाश्रयसंप्रवृद्धवित्तः। भवति च लिपिपुस्तचित्रवेत्ता कथितफलैः परतो विकल्पनीयाः"।

अथ नक्षत्रभेदे जन्मफलम् बृहज्जातके १६ अ०।

"प्रियभूषणः सुरूपः सुभगो दक्षोऽश्विनीषु मतिमांश्च। कृतनिश्चयः सत्यवाग् दक्षः सुखितश्च भरणीषु। बहुभुक्परदाररतस्तेजस्वी कृत्तिकासु विख्यातः। रोहिण्यां सत्यशुचिः प्रियंवदः स्थिरमतिः सुरूपश्च। चपलश्चतुरो भीरुः पटुरुत्साही धनी मृगे भोगी। शठगर्वितः कृतघ्नो हिंस्रः पापश्च रौद्रर्क्षे ६। दान्तः सुखी सुशीलो दुर्मेधो रोगभाक् पिपासुश्च। अल्पेन च सन्तुष्टः पुनर्वसौ जायते मनुजः। शान्तात्मा सुभगः पण्डितो धनी धर्मसंश्रितः पुष्ये। शठसर्वभक्षः पापः कृतघ्नधूर्त्तश्च भौजङ्गे ९। बहुभृत्यधनोभोगी पितृभक्तो महोद्यमः पित्र्ये १०। प्रियवाग् दाता द्युतिमानटनो नृपसेवको भाग्ये ११। सुभगो विद्याप्तधनो भोगी सुखभाग् द्वितीयफाल्गुन्याम्। उत्साही धृष्टः पानपोऽघृणी तस्करो हस्ते। चित्राम्बरमाल्यधरः सुलोचनाङ्गश्च भवति चित्रायाम्। दान्तो वणिक् कृपालुः प्रियवाग् धर्माश्रितः स्वातौ। ईर्ष्युर्लुब्धो द्युतिमान् वचनपटुः कलहकृद्विशाखासु। आढ्यो विदेशवासी क्षुधालुरटनोऽनुराधासु। ज्येष्ठासु न बहुमित्रः सन्तुष्टो धर्मकृत् प्रचुरकोपः। मूले मानी धनवान् सुखी न हिंस्रः स्थिरो भोगी। इष्टानन्दकलत्रो मानी दृढः सौहृदश्च जलदैवे२०। वैश्वे २१ विनीतधार्मिकबहुमित्रः कृतज्ञसुभगश्च। श्रीमान् श्रवणे श्रुतवानुदारो धनान्वितः ख्यातः। दाताऽऽढ्यः शूरः गीतप्रियो धनिष्ठासु धनलुब्धः। स्फुटवाग् व्यसनी रिपुहा साहसिकः शतभिषजि दुर्ग्राह्यः। भाद्रपदासूद्विग्नः स्त्रीजितधनी पटुरदाता च। वक्ता सुखी प्रजावान् जितशत्रुर्धार्मिको द्वितीयासु। सम्पूर्णाङ्गः सुभगः शूरः शुचिरर्थवान् पौष्णे" २७।

जन्मराशिफलम् तत्रैव १७ अ०।

"वृत्तातामदृगुष्णशाकलघुभुक् क्षिप्रप्रसादोऽटनः कामी दुर्बलजानुरस्थिरधनः शूरोऽङ्गनावल्लभः। सेवाज्ञः कुनखी व्रणाङ्कितशिरोमानी सहोत्थाग्रजः शक्त्या पाणितलेऽङ्कितोऽतिचपलस्तोये च भीरुः क्रिये१। कान्तः खेलगतिः पृथूरुवदनः पृष्ठास्यपार्श्वेऽङ्कितस्त्यागी क्लेशसहः प्रभुः ककुद्वान् कन्याप्रजः श्लेष्मजः। पूर्वैर्बन्धुधनात्मजैर्विरहितः सौभाग्ययुक्तः क्षमी दीप्ताग्निः प्रमदाप्रियः स्थिरसुहृन्मध्यान्त्यसौख्ये गवि २। स्त्रीलोलः सुरतोपचारकुशलस्ताम्रेक्षणः शास्त्रविद्दूतः कुञ्चितमूर्द्धजः पटुमतिर्हास्येङ्गितद्यूतवित्। चार्वङ्गः प्रियवाक् प्रभक्षणरुचिर्गीतिप्रियो नृत्यवित् क्लीवैर्याति रतिं समुन्नतनसश्चन्द्रे तृतीयर्क्षगे ३। आवक्रद्रुतगः समुन्नतकटिः स्त्रीनिर्जितः सत्सुहृद्दैवज्ञः प्रचुरालयः क्षयधनैः संयुज्यते चन्द्रवत्। ह्रस्वः पीनगलः समेति च वशं साम्ना सुहृद्वत्सलस्तोयोद्यानरतः स्ववेश्म४सहिते जातः शशाङ्के नरः। तीक्ष्णः स्थूलहनुर्विशालवदनः पिङ्गेक्षणोऽल्पात्मजः स्त्रीद्वेषी प्रियमांसकाननगः कुप्यत्यकार्ये चिरम्। क्षुत्तृष्णोदरदन्तमानसरुजासंपीडितस्त्यागवान् विक्रान्तः स्थिरधीः सुगर्वितमना मातुर्विधेयोऽर्कभे५। व्रीडामन्थरचारुवीक्षणगतिः स्रस्तांसबाहुः सुखी श्लक्ष्णः सत्यरतः कलासु निपुणः शास्त्रार्थविद्धार्मिकः। मेधावी सुरतप्रियः परगृहैर्वित्तैश्च संयुज्यते कन्यायां ६ परदेशगः प्रियवचाः कन्याप्रजोऽल्पात्मजः। देवब्राह्मणसाधुपूजनरतः प्राज्ञः शुचिः स्त्रीजितः प्रांशुश्चोन्नतनासिकः कृशचलद्गात्रोऽटनोऽर्थान्वितः। हीनाङ्गः क्रयविक्रयेषु कुशलो देवद्वि-

भामा सरुग्बन्धूनामुपकारकृद्विरूपितस्त्यक्तस्तु तैः सप्तमे७। पृथुलनयनवक्षावृत्तजङ्घोरुजानुर्जनकगुरुवियुक्तः शैशवे व्याधितश्च। नरपतिकुलपूज्यः पिङ्गलः क्रूरचेष्टो झषकुलिशखगाङ्कश्छन्नपापोऽलिजातः ८। व्यादीर्घास्यशिरोधरः पितृधनत्यागी कविर्वीर्यवान् वक्ता स्थूलरदस्त्रपोऽधरनसः कर्मोद्यतः शिल्पवित्। कुब्जांसः कुनखी समांसलभुजः प्रागल्भ्यवान् धर्मविद्बन्धुद्विट् न बलात् समेति च वशं साम्नैकसाध्योऽश्वजः९। नित्यं लालयति स्वदारतनयान् धर्मध्वजोऽधःकृशः स्वक्षः क्षामकटिर्गृहीतवचनः सौभाग्ययुक्तोऽलसः। शीतालुर्मनुजोऽटनश्च मकरे १० सत्वाधिकः काव्यकृल्लुब्धो गम्यजराङ्गनासु निरतः संत्यक्तलज्जोऽघृणश्च। करभगलशिरालुः खरलोमशदीर्घतनुः पृथुचरणोरुपृष्ठजघनास्यकटीजठरः। परवनितार्थपापनिरतः क्षयवृद्धियुतः प्रियकुसुमानुलेपनसुहृत् घटजो११ऽध्वसहः। परजनधनभोक्ता दारवासोऽनुरक्तः समरुचिरशरीरस्तुङ्गनासो वृहत्कः। अभिभवति सपत्नान् स्त्रीजितश्चारुदृष्टिर्द्युतिनिधिधनभोगी पण्डितश्चान्त्यराशौ१२। बलवति राशौ तदधिपतौ च स्वबलयुतः स्याद्यदि तु हिमांशुः। कथितफलानामविकलदाता शशिवदतोऽन्ये त्वनुपरिचिन्त्याः"।

सूर्य्यादिग्रहस्थितराशिफलम् तत्रैव १८अ० उक्तं यथा "प्रथितश्चतुरोऽटनोऽल्पवित्तः क्रियगे१त्वायुधभृद्विलग्नभागे। गवि२ वस्त्रसुगन्धपण्यजीवी वनिताद्विट् कुशलश्च गेयवाद्ये। विद्याज्योतिषवित्तवान् मिथुनगे३ भानौ कुलीरे४ स्थिते तीक्ष्णोऽस्वः परकार्य्यकृच्छ्रमपरः क्लेशैश्च संयुज्यते। सिंहस्थे५ वनशैलगोकुलरतिर्वीर्यान्वितोऽज्ञः पुमान्, कन्यास्थे६ लिपिलेख्यकाव्यगणितज्ञानान्वितः स्त्रीवपुः। जातस्तौलिनि ७शौण्डिकोऽध्वनिरतो हैरण्यको नीचकृत् क्रूरः साहसिको विषार्जितधनः शस्त्रान्तगोऽलिस्थिते८। सत्पूज्यो धनवान् धनुर्धरगते९ तीक्ष्णो भिषक्कारुको नीचोऽज्ञः कुवणिङ्मृगे१०ऽल्पधनवाँल्लुब्धोऽन्यभाग्ये रतः। नीचो घटे११ तनयभाग्यपरिच्युतोऽस्वस्तोयोत्थपण्यविभवो वनितादृतोऽन्त्ये१२। सू०। नक्षत्रमानवतनुप्रतिमे विभागे लक्ष्मादिशेत्तुहिनरश्मिदिनेशयुक्ते। नरपतिसत्कृतोऽटनश्चमूपवणिक्सधनाः क्षतवपुषोरभूरिविषयांश्च कुजः स्वगृहे १।८। युवतिजितान् सुहृत्सु विषमान् परदाररतान् कुहकसुवेषभीरुपरुषान् सितभे२।७ जनयेत्। बौधे३।६ऽसहस्तनयवान् विसुहृत् कृतज्ञो गान्धर्वयुद्धकुशलः कृपणो-ऽभयोऽर्थी। चान्द्रे४ऽर्थवान् सलिलयानसमर्जितस्वः प्राज्ञश्च भूमितनये विकलः खलश्च। निस्वः क्लेशसहो वनान्तरचरः सिंहे५ऽल्पदारात्मजो जैवे९।१२ऽनैकरिपुर्नरेन्द्रसचिवः ख्यातोऽभयोऽल्पात्मजः। दुःखार्तो विधनोऽटनोऽनृतरतस्तीक्ष्णश्च कुम्भे ११ स्थिते भौमे भूरिधनात्मजो मृग १० गते भूपोऽथवा तत्समः। म०। द्यूतर्णपानरतनास्तिकचौरनिःस्वाः कुस्त्रीककूटकृदसत्यरताः कुजर्क्षे १।८। आचार्यभूरिसुतदारधनार्जनेष्टाः शौक्रे २।७वदान्यगुरुभक्तिरताश्च सौम्ये। विकत्थनः शास्त्रकलाविदग्धः प्रियंवदः सौख्यरतस्तृतीये३ जलार्जितस्वः स्वजनस्य शत्रुः शशाङ्कजे शीतकरर्क्ष४युक्ते। स्त्रीद्वेष्यो विधनसुखात्मजोऽटनोऽज्ञः स्त्रीलोलः स्वपरिभवोऽर्क५राशिगे ज्ञे। त्यागी ज्ञः प्रचुरगुणः सुखी क्षमावान् युक्तिज्ञो विगतभयश्च षष्ठराशौ ६। परकर्मकृदस्वः शिल्पबुद्धिर्धनवान् विष्टिकरो बुधेऽर्कजर्क्षे १०।११। नृपसत्कृतपण्डिताप्तवाक्यो नवमे९।१२ऽन्त्ये जितसेवकोऽन्त्यशिल्पः" बु०। सेनानीर्बहुवित्तदारतनयो दाता सुभृत्यः क्षमी तेजोदारगुणान्वितः सुरगुरौ ख्यातः पुमान् कौजभे१।८। कल्याङ्गः ससुखोऽर्थमित्रतनयस्त्यागी प्रियः शौक्रभे २।७। बौधे ३।६ भूरिपरिच्छदात्मजसुहृत्साचिव्ययुक्तः सुखी। चान्द्रे ४ रत्नसुतस्वदारविभवप्रज्ञासुखैरन्वितः सिंहे स्याद् बलनायकः सुरगुरौ प्रोक्तश्च यच्चन्द्रभे। स्वर्क्षे ९।१२ माण्डलिको नरेन्द्रसचिवः सेनापतिर्वा धनी कुम्भे ११ कर्कटवत् फलानि मकरे १० नीचोऽल्पवित्तोऽसुखी। बृ०। परयुवतिरतस्तदर्थवादैर्हृतविभवः कुलपांसनः कुजर्क्षे १।८। स्वबलमतिधनो नरेन्द्रपूज्यः स्वजनविभुः प्रथितोऽभयः सिते स्वे २।७। नृपकृत्यकरोऽर्थवान् कलाविन्मिथुने ३ षष्ठगते६ऽतिनीचकर्मा। रविजर्क्षे१०।११ गतेऽमरारिपूज्ये सुभगः स्त्रीविजितो रतः कुनार्याम्। द्विभार्य्योऽर्थी भीरुः प्रबलमदशोकश्च शशिभे ४ हरौ योषाप्तार्थः प्रवरयुवतिर्मन्दतनयः। गुणैः पूज्यः सस्वस्तुरग९सहिते दानवगुरौ झषे १२ विद्वानाढ्यो नृपजनितपूजोऽतिसुभगः। शु०। मूर्खोऽटनः कपटवान् विसुहृद्यमेऽजे१ कीटे ८ तु बन्धवधभाक् चपलोऽघृणश्च। निर्ह्रीसुखार्थतनयः स्खलितश्च लेख्ये रक्षापतिर्भवति मुख्यपतिश्च बौधे३।६। वर्ज्यस्त्रीष्टो नवस्त्रविभवो भूरिभार्य्यो वृषस्थे२ ख्यातः स्वोच्चे७ गणपुरबलग्रामपूज्योऽर्थवांश्च। ४कर्किवृद्ध स्त्री-

ऽविकलदशनो मातृहीनोऽसुतोऽज्ञः सिंहे५ऽनाढ्यो विसुखतनयो विष्टिकृत् सूर्य्यपुत्रे। स्वनाःप्रत्ययितो नरेन्द्रभवने सत्पुत्रजायाधनो जीवक्षेत्र९।१२गतेऽर्कजे पुरबलग्रामाग्रनेताऽथ वा। अन्यस्त्रीधनसंवृतः पुरबलग्रामाग्रणीर्मन्ददृक्स्वक्षेत्रे१० ११। मलिनस्थिरार्थविभवो भोक्ता च जातः पुमान्। श०। शिशिरकरसमानमीक्षणानां सदृशफलं प्रवदन्ति लग्नजातम्। फलमधिकमिदं यदत्र तत्तद्भवनभनाथगुणैर्विचिन्तनीयम्”।

लग्नतदंशयोर्ग्रहदृष्टिफलम् १९अ० तत्रैवोक्तं यथा

“चन्द्रे भूपबुधौ नृपोपमगुणी स्तेनोऽधनश्चा१जगे निःस्वः स्तेन नृमान्यभूपधनिनः प्रेष्यः कुजाद्यैर्गवि२। नृस्थे३ऽयोव्यवहारिपार्थिवबुधाभीस्तन्तुवायो धनी स्वर्क्षे४ योद्धृकविज्ञभूमिपतयोऽयोजीविदृग्रोगिणौ। ज्योतिर्ज्ञाढ्यनरेन्द्रनापितनृपक्ष्मेशा बुधाद्यैर्हरौ५ तद्वद्भूपचमूपनैपुणयुताः षष्ठे६ शुभैस्त्र्याश्रयः। जूके७ भूपसुवर्णकारवणिजः शेषेक्षिते नैकृती, कीटे८ युग्मपिता नतश्च रजकोऽव्यङ्गोऽधनो भूपतिः। ख्यात्युर्वीशजनाश्रयश्च तुरगे९ पापैः सदम्भः मठस्वाम्युर्वीशनरेन्द्रपण्डितधनी द्रव्योनभूपो मृगे१०। भूपो भूपसमोऽन्यदारनिरतः शेषैश्च कुम्भस्थिते११ हास्यज्ञो नृपतिर्बुधश्च झषगे१२ पापश्च पापेक्षिते। होरेशर्क्षदलाश्रितैः शुभकरो दृष्टः शशी तद्गतस्त्र्यंशे तत्पतिभिः सुहृद्भवनगैर्वा वीक्षितः शस्यते। यत् प्रोक्तं प्रतिराशिवीक्षणफलं तद्द्वादशांशे स्फुटं सूर्य्याद्यैरवलोकितेऽपि शशिनि ज्ञेयं नवांशेष्वतः। आरक्षिको वधरुचिः कुशलो नियुद्धे भूपोऽर्थवान् कलहकृत् क्षितिजांशसंस्थे। मूर्खोऽन्यदारनिरतः सुकविः सितांशे सत्काव्यकृत् सुखपरोऽन्यकलत्रगश्च। बौधे हि रङ्गचरचौरकवीन्द्रमन्त्री गेयज्ञशिल्पनिपुणः शशिनि स्थितेऽंशे। स्वांशेऽल्पगात्रधनलुब्धतपस्विमुख्यः स्त्रीपोष्यकृत्यनिरतश्च निरीक्ष्यमाणे। सक्रोधो नरपतिसंमतो निधीशः सिंहांशे प्रभुरसुतोऽतिहिंस्रकर्मा। जीवांशे प्रथितबलो रणोपदेष्टा हास्यज्ञसचिवविकामवृद्धशीलः। अल्पापत्यो दुःखितः सत्यपि स्वे मानासक्तः कर्म्मणि स्वेऽनुरक्तः। दुष्टस्त्रीष्टः कार्पण्यश्चार्किभागे चन्द्रे मानी तद्वदिन्द्वादिदृष्टे। वर्गोत्तमस्वपरगेषु शुभं यदुक्तं तत्पुष्टमध्यलघुताशुभमुत्क्रमेण। वीर्यान्वितोऽंशकपतिर्निरुणद्धि पूर्वं राशीक्षणस्य फलमंशफलं ददाति”।

जन्मादिद्वादशभावस्थसूर्य्यादिग्रहफलम् तत्रैव२०अ० उक्तं यथा

“शूरस्तब्धो विकलनयनो निर्घृणोऽर्के तनुस्थे मेषे सस्वस्तिमिरनयनः सिंह५संस्थे निशान्धः। नीचे७ऽन्धोऽस्वः शशिगृह४गते बुद्बुदाक्षः पतङ्गे भूरिद्रव्यो नृपहृतधनो वक्त्ररोगी द्वितीये२। मतिविक्रमवान् तृतीय३गेऽर्के विसुखपीडितमानसश्चतुर्थे४। असुतो धनवर्जितस्त्रिकोणे५ बलवाञ्छत्रुजितश्च शत्रु६याते। स्त्रीभिर्गतः परिभवं मदगे७ पतङ्गे स्वल्पात्मजो निधनगे८ विकलेक्षणश्च। धर्मे९ सुखार्थसुखभाक् सुतशौर्यभाक् खे१० लाभे११ प्रभूतधनवान् पतितस्तु रिप्फे१२। सू०। मूकोन्मत्तजडान्धहीनबधिरप्रेष्याः शशाङ्कोदये१ स्वर्क्षाजोक्षगते धनी बहुसुतः सस्वः कुटुम्बी धने२। हिंस्रो भ्रातृ३गते सुखे, सतनये५ तत्प्रोक्तभावान्वितो नैकारिर्मृदुकायवह्निमदनस्तीक्ष्णोऽलसश्चारिगे६। ईर्ष्युस्तीव्रमदो मदे७ बहुमतिर्व्याध्यर्दितश्चाष्टमे८ सौभाग्यात्मजमित्रबन्धुधनभाक् धर्मे९स्थिते शीतगौ। निष्पत्तिं समुपैति धर्म्मधनधीशौर्य्यैर्युतः कर्मगे१० ख्यातो भावगुणान्विते भय११गते क्षुद्रोऽङ्गहीनो व्यये१२। च०। “लग्ने१ कुजे क्षततनुर्धनगे२ कदन्नो धर्मे९ऽघवान् खरकरप्रतिमोऽन्यसंस्थः। म०। विद्वान् धनी प्रखलपण्डितमन्त्रिशत्रुधर्म्मज्ञविश्रुतगुणः परतोऽर्कवज्ज्ञे। बु०। विद्वान् सुवाक्यः कृपणः सुखी च धीमानशत्रुः पितृतोऽधिकश्च। नीचस्तपस्वी सधनः सलाभः खलश्च जीवे क्रमशो विलग्नात्। वृ०। स्मरनिपुणः सुखितश्च विलग्ने प्रियकलहोऽस्त७गते सुरतेप्सुः। तनय५गते सुखितो भृगुपुत्रे गुरुवदतोऽन्यगृहे द्रविणी स्यात्। शु०। अदृष्टार्थो रोगी मदनवशगोऽत्यन्तमलिनः शिशुत्वे पीडार्त्तः सवितृसुतलग्नेऽत्यलसवाक्। गुरु९।१२स्व१०।११चोच्च७स्थे नृपतिसदृशो ग्रामपुरपः सुविद्वांश्चार्वङ्गो दिनकरसमोऽन्यत्र कथितः। श०। सुहृदरिपरकीयस्वर्क्षतुङ्गस्थितानां फलमनु परिचिन्त्य लग्नदेहादिभावैः। समुपचयविपत्ती सौम्यपापेषु सत्यः कथयति विपरीतं रिप्फषष्ठाष्टमेषु। उच्चत्रिकोणस्वसुहृच्छत्रुनीचगृहार्कगैः शुभं संपूर्णपादोनदलपादाल्पनिःफलम्”।

आश्रयफलं तत्रैव २१अ० उक्तं यथा।

“कुलसमकुलमुख्यबन्धुपूज्या धनिसुखिभोगिनृपाः स्वभैकवृद्ध्या। परविभवसुहृत्स्वबन्धुपोष्या गणपबलेशनृपाश्च मित्रभेषु। जनयति नृपमेकोऽप्युच्चगो मित्रदृष्टः प्रचुरधनसमेतं मित्रयोगाच्च सिद्धम्। विधनविसुखमूढव्याधितो बन्धतप्तो वधदुरितसमेतः शत्रुनीचर्क्षगेषु। न

कुम्भलग्नं शुभमाह सत्यो न भागभेदाद् यवना वदन्ति। कस्यांशभेदो न तथास्ति राशेरतिप्रसङ्गस्त्विति विष्णुगुप्तः। यातेष्वसत्स्वसमभेषु दिनेशहोरां ख्यातो महोद्यमबलार्थयुतोऽतितेजाः। चान्द्रीं शुभेषु युजि मार्दवकान्तिसौख्यसौभाग्यधीमधुरवाक्ययुतः प्रजातः। तास्वेव होरास्वपरर्क्षगेषु ज्ञेया नराः पूर्वगुणेषु मध्याः। व्यत्यस्तहोराभवनस्थितेषु मर्त्या भवन्त्युक्तगुणैर्विहीनाः। कल्याणरूपगुणमात्मसुहृद्दृक्काणे चन्द्रोऽन्यगस्तदधिनाथगुणं करोति। व्यालोद्यतायुधचतुश्चरणाण्डजेषु तीक्ष्णोऽतिहिंस्रगुरुतल्परतोऽटनश्च। स्तेनो भोक्ता पण्डिताढ्यो नरेन्द्रः क्लीवः शूरो विष्टिकृद्दासवृत्तिः। पापो हिंस्रोऽभीश्च वर्गोत्तमांशेष्वेषामीशा राशिवद्द्वादशांशैः। जायान्वितो बलविभूषणसत्त्वयुक्तस्तेजोऽतिसाहसयुतश्च कुजे स्वभागे। रोगी मृतस्वयुवतिर्विषमोऽन्यदारो दुःखी परिच्छदयुतो मलिनोऽर्कपुत्रे। स्वांशे गुरौ धनयशःसुखबुद्धियुक्तास्तेजस्विपूज्यनिरुगुद्यमभोगवन्तः। मेधाकलाकपटकाव्यविवादशिल्पशास्त्रार्थसाहसयुताः शशिजेऽतिमान्याः। स्वे त्रिंशांशे बहुसुतसुखारोग्यभाग्यार्थरूपः, शुक्रे तीक्ष्णः सुललितवपुः सुप्रकीर्णेन्द्रियश्च। शूरस्तब्धौ विषमवधकौ सद्गुणाढ्यौ सुखिज्ञौ चार्वङ्गेष्टौ रविशशियुतेष्वारपूर्वांशकेषु”

प्रकीर्णकफलं तत्रैव २३अ॰ उक्तं यथा

“स्वर्क्षतुङ्गमूलत्रिकोणगाः कण्टकेषु यावन्त आश्रिताः। सर्व एव तेऽन्योन्यकारकाः कर्मगस्तु तेषां विशेषतः। कर्कटोदयगते यथोडुपे स्वोच्चगाः कुजयमार्कसूरयः। कारका निगदिताः परस्परं लग्नगस्य सकलोऽम्बराम्बुगः। स्वत्रिकोणोच्चगो हेतुरन्योन्यं यदि कर्मगः। सुहृत्तद्गुणसम्पन्नः कारकश्चापि स स्मृतः। शुभं वर्गोत्तमे जन्म वेशिस्थाने च सद्ग्रहे। अशून्येषु च केन्द्रेषु कारकाख्यग्रहेषु च। मध्ये वयसः सुखप्रदाः केन्द्रस्था गुरुजन्मलग्नपाः। पृष्ठोभयकोदयर्क्षगास्त्वन्तेऽन्तःप्रथमेषु पाकदाः। दिनकररुधिरौ प्रवेशकाले गुरुभृगुजौ भवनस्य मध्ययातौ। रविसुतशशिनौ विनिर्गमस्थौ शशितनयः फलदस्तु सवकालम्”।

स्त्रीजन्मनि विशेषस्तत्रैवोक्तः २४ अ॰ यथा

“यद्यत्फलं नरभवेऽक्षममङ्गनानां तत्तद्वदेत् पतिषु वा सकलं विधेयम्। तासां तु भर्तृमरणं निधने वपुस्तु लग्नेन्दुगे सुभगताऽस्तमये पतिश्च। युग्मेषु लग्नशशिनोः प्रकृतिस्थिता स्त्री सच्छीलभूषणयुता शुभदृष्टयोश्च। ओजस्थयोश्च पुरुषाकृतिशीलयुक्ता पापा च पापयुतवीक्षितयोर्गुणोना। कन्यैव दुष्टा व्रजतीह दास्यं साध्वी समाया कुचरित्रयुक्ता। भूम्यात्मज१।८र्क्षे क्रमशोऽंशकेषु वक्रार्किजीवेन्दुजभार्गवाणाम्। दुष्टा पुनर्भूः सगुणा कलाज्ञा ख्याता गुणैश्चासुरपूजितर्क्षे। स्यात् कापटी क्लीवसमा सती च बौधे३।६गुणाढ्या प्रविकीर्णकामा। स्वच्छन्दा पतिघातिनी बहुगुणा शिल्पिन्यसाध्वीन्दुभे४ऽनाचारा कुलटार्कभे५ नृपवधूः पुंश्चेष्टिताऽगम्यगा। जैवे(९।१२)नैकगुणाल्परत्यतिगुणा विज्ञानयुक्ता सती। दासी नीचरतार्किभे(१०।११)पतिरता दुष्टप्रजा स्वांशकैः। शशिलग्नसमायुक्तैः फलं त्रिंशांशकैरिदम्। बलाबलविकल्पेन तयोरुक्तं विचिन्तयेत्। दृक्संस्थावसितसितौ परस्परांशे शौक्रे वा यदि घटराशिसम्भवोऽंशः। स्त्रीभिः स्त्री मदनविषानलं प्रदीप्तं संशान्तिं नयति नराकृतिस्थिताभिः। शून्ये कापुरुषोऽबलेऽस्तभवने सौम्यग्रहावीक्षिते क्लीवोऽस्ते बुधमन्दयोश्चरगृहे नित्यं प्रवासान्वितः। उत्सृष्टा रविणा कुजेन विधवा बाल्येऽस्तराशिस्थिते कन्यैवाशुभवीक्षितेऽर्कतनये द्यूने जरां गच्छति। आग्नेयैर्विधवाऽस्तराशिसहितैर्मिश्रैः पुनर्भूर्भवेत् क्रूरे हीनबलेऽस्तगे स्वपतिना सौम्ये स्थिते प्रोज्झिता। अन्योन्यांशगयोः सितावनिजयोरन्यप्रसक्ताङ्गना द्यूने वा यदि शीतरश्मिसहितौ भर्तुस्तदानुज्ञया। सौरारर्क्षे लग्नगे सेन्दुशुक्रे मात्रा सार्द्धं बन्धकी पापदृष्टे। कौजेऽस्तांशे सौरिणा व्याधियोनिश्चारुश्रोणी वल्लभा सद्ग्रहांशे। वृद्धो मूर्खः सूर्यजर्क्षेऽंशके वा स्त्रीलोलः स्यात् क्रोधनश्चावनेये। शौक्रे कान्तोऽतीव सौभाग्ययुक्तो विद्वान् भर्त्ता नैपुणज्ञश्च बौधे। मदनवशगतो मृदुश्च चान्द्रे त्रिदशगुरौ गुणवान् जितेन्द्रियश्च। अतिमृदुरतिकर्मकृच्च सौर्ये भवति गृहेऽस्तमयस्थितेऽंशके वा। ईर्ष्यान्विता सुखपरा शशिशुक्रलग्ने ज्ञेन्द्वोः कलासु निपुणा सुखिता गुणाढ्या। शुक्रज्ञयोस्तु रुचिरा सुभगा कलाज्ञा त्रिष्वप्यनेकवसुसौख्यगुणा शुभेषु। क्रूरेऽष्टमे विधवता निधनेश्वरोऽंशे यस्य स्थितो वयसि तस्य समे प्रदिष्टा। सत्स्वर्थगेषु मरणं स्वयमेव तस्याः कन्यालिगोहरिषु चाल्पसुतत्वमिन्दौ। सौरे मध्यबले बलेन रहितैः शीतांशुशुक्रेन्दुजैः शेषैर्वीर्यसमन्वितैः पुरुषिणी यद्योजराश्युद्भवः। जीवारास्फुजिदैन्दवेषु बलिषु प्राग्लग्नराशौ समे विख्याता भुवि नैकशास्त्र-

निपुणा स्त्री ब्रह्मवादिन्यपि। पापेऽस्ते नवमगतग्रहस्य तस्यां प्रव्रज्यां युवतिरुपैत्यसंशयेन। उद्वाहे वरणविधौ प्रदानकाले चिन्तायामपि सकलं विधेयमेतत्"। जातकपद्धत्यादौ विस्तरो दृश्यः। ५सुन्दरे त्रि० चतुर्जातकम्।

जातकचक्रम् ज्यो० उक्ते जातस्य शुभाशुभसूचके चक्रभेदे तच्च चक्रं ज्यो० त० उक्तं यथा

"युद्धजयार्णवे यस्मिन् चे स्थितोभानुस्तदादित्रीणि मस्तके। मुखे त्रीणि तथा द्वे भे स्कन्धयोर्भुजयोरुभे। द्वे हस्तयोः पञ्च हृदि नाभावेकं तथा गुदे। तथा जानुयुगे द्वे द्वे पादयोर्जलधिं४ न्यसेत्। चरणर्क्षेषु यो जातः सोऽल्पायुर्भवति प्रिये!। जानुनोर्भ्रमणाशक्तो गुह्ये स्यात् पारदारिकः। नाभौ स्वल्पधनो देवि! हृदये स्यान्महाधनः। पाण्योर्जातो भवेच्चौरो भुजयोर्दुःखभाजनम्। स्कन्धयोर्भोगभोगी च मुखे धर्मरतो धनी। मूर्द्ध्नि राजा भवेद्देवि! बालानां जन्मतोवदेत्"। स्वरोदये। "मुखे शीर्षे शतं वर्षं नवतिः स्कन्धयोर्द्वयोः। पञ्चाशीतिर्हृदि प्रोक्ता हस्तयोः सप्ततिः क्रमात्। बाह्वोः षट्षष्टिवर्षाणि गुह्ये षट्षष्टिका क्रमात्। पञ्चाशत् जङ्घयोः पादे निर्द्धनस्याल्पजीवनः"।

जातकर्म्मन् न० जाते कर्म। पुत्रजन्मनिमित्ते पितृकर्त्तव्ये पुत्रसंस्कारभेदे। तच्च आश्व० गृ० १।१५।१ दर्शितं यथा।

"कुमारं जातं पुराऽन्यैरालम्भात् सर्पिर्मधुनी हिरण्यनिकाषं हिरण्येन प्राशयेत् "प्र ते ददामि मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोनाम्। आयुष्मान् गुप्तो देवताभिः शतं जीव शरदो लोके अस्मिन्निति"। सू०। "इदं जातकर्म। कुमारग्रहणं कुमारीनिवृत्त्यर्थम्। ननु कुमार्य्या अपि भवत्येव जातकर्म। कुतः। वक्ष्यति "आवृतैव कुमार्याः" इति, उच्यते। प्रवासादागतस्य विहितं कर्मावृता भवति न जातकर्मानन्तरत्वात्। एवमेके अन्ये पुनरावृतैव कुमार्या इत्येतदुभयार्थमिति वदन्ति। तेन कुमार्या अपि "अमन्त्रिका जातकर्म भवति। मनुनाप्युक्तम् तु कार्य्येयं स्त्रीणामावृदशेषतः" इति। तर्हि कुमारग्रहणं किमर्थम्? अधिकारार्थम्। "अष्टमे वर्षे ब्राह्मणमुपनयेदित्युपनयनं कुमारस्यैव यथा स्यात् न कुमार्या इति। ननु ब्राह्मणमिति पुंलिङ्गनिर्देशादेव न भविष्यति। न जातिनिर्देशे लिङ्गमविवक्षितम्। यथा ब्राह्मणो न हन्तव्य इति ब्राह्मण्यपि न हन्यते एवमत्रापि स्त्रियाः प्रसज्यते तन्निवृत्त्यर्थं कुमारग्रहणमिति। जातग्रहणमप्यधिकारार्थम्। "गोदानं षोडशे वर्षे" इति जन्मतः प्रभृतिषोडशो यथा स्यात् उपनयनप्रभृति मा भूदिति। पुरा पूर्वमित्यर्थः अन्यग्रहणमनभिज्ञतालम्भनात् प्राक् कर्म कर्त्तव्यमित्येवमर्थम्। सर्पिर्मधुनी हिरण्येन निकाषयति। ते हिरण्यसंसृष्टे हिरण्येन प्राशयेत् मातुरुपस्थ आसीनं "प्र ते ददामीति" मन्त्रेण नारा० वृ०।

"कर्णयोरुपनिधाय मेधाजननं जपति। "मेधान्ते देवः सविता मेधां देवी सरस्वती। मेधान्ते अश्विनौ देवावाधत्तां पुष्करस्रजौ"। सू०। "अस्य कर्णयोः हिरण्यं निधाय मेधाजननं जपति मेधान्त इति। उपग्रहणं तस्य मुखसमीपे आत्मनोमुखं निधाय जपार्थं मेधाजननमित्यस्य मन्त्रस्याख्या सकलमन्त्रः। पर्यायेणोपनिधानमित्येके। अन्ये मन्त्रावृत्तिमिच्छन्ति" नारा०। "गार्भैर्होमैर्जातकर्म्मचौड़मौञ्जीनिबन्धनैः।" प्राङ् नाभिवर्द्धनात् पुंसो जातकर्म्म विधीयते" मनुः। "नाभिवर्द्धनात् नाभिसम्बन्धात् नाड़ीच्छेदनात्। वैजवापिः "जन्मनोऽनन्तरं कार्य्यं जातकर्म यथाविधि। दैवादतीतः कालश्चेत् अतीते सूतके भवेत्"। एवञ्च, "मृदुध्रुवचरक्षिप्रभेष्वेषामुदयेऽपि वा। गुरौ शुक्रेऽथ वा केन्द्रे जातकर्म्म च नाम च" इति ज्योतिःशास्त्रोक्तं दैवात् कालोत्कर्षे वेदितव्यम्। अनुत्कर्षेऽपि नक्षत्रादिनियमो न, नैमित्तिकस्य निमित्तानन्तरभावित्वेन निरवकाशत्वात् ज्यो० त०।

जातमात्र त्रि० जात एव। सद्योजाते। "जातमात्रं न यः शत्रुं रोगं च प्रशमं नयेत्" पञ्चत०।

जातरूप न० जातं प्रशस्तं जात+प्राशस्त्ये रूपप्। १स्वर्णे २धूस्तूरवृक्षे पु० अमरः। ३उत्पन्नरूपे त्रि०। "न जातरूपच्छदजातरूपता" नैष०। "कमण्डलुमुपादाय जातरूपमयान् शुभान्" भा० स० ४७ अ०।

जातविद्या स्त्री जाते निष्पन्ने होमादौ विद्या विद्यतेऽनया विद्या प्रायश्चित्तज्ञापिका वाक्। होमादिनिष्पत्त्यनन्तरं प्रायश्चित्तबोधके वाक्यभेदे "ब्रह्मा त्वो वदति जातविद्याम्" ऋ० १०।७१।१२। "जाते जाते कर्त्तव्ये प्रायश्चित्तादौ विद्यां वेदयित्रीं वाचं वदति ब्रह्मा हि सर्वं वेदितुं योग्यो भवति खलु" भा०।

जातवेदस् पु० जातं सद्योजातं विन्दति प्राप्नोति विद्—

लाभे असुन्। १वह्नौ अमरः तस्य तथात्वञ्च ऋ० ३।१।२० उक्तं "जन्मन् जन्मन् निहितो जातवेदाः" "जन्मन् जन्मन् सर्वेषु मनुष्येषु निहितो जातवेदाः" भा०। जातमात्रस्य जठरानलसम्पर्कात्तस्य तथात्वम्। २जातानां वेत्तरि च "आदाव जातवेदः" ऋ० १।४४।१ "हे जातवेदः जातानां वेदितः" भा० निरुक्ते ७।१९। तस्य बहुधा व्युत्पत्तिर्दर्शिता यथा

"जातवेदाः कस्माज्जातानि वेद जानाति वैनं विदुर्जाते जाते विद्यत इति वा जातवित्तो वा जातधनो जातविद्यो वा जातप्रज्ञानो यत्तज्जातः पशूनविन्दतेति तज्जातवेदसो जातवेदस्त्वमिति ब्राह्मणम्। तस्मात् सर्वानृतून् पशवोऽग्निमभिसर्पन्तीति च" ३जातप्रज्ञे ४जातधने ५सूर्य्ये च "उदु त्यं जातवेदसं देवं वहन्ति केतवः" ऋ० १।५०।१। "जातवेदसः जातानां प्राणिनां वेदितारं जातप्रज्ञं जातधनं वा" भा० "पञ्चमः पञ्चतपसां तपनो जातवेदसाम्" "विद्युते वाडवजातवेदसाम्" माघः। जातवेदस इदं स देवताऽस्य वा अण्। जातवेदस तत्सम्बन्धिनि त्रि०। "प्र नूनं जातवेदसमश्वम्" निरु० ७।२० धृता ऋक्। तद्देवताके सामभेदे मन्त्रे तृचे च तत्रैव निरुक्ते "तदेकमेव जातवेदसं गायत्रं तृचं दशतयीषु विद्यते यत्तु किञ्चिदाग्नेयं तज्जातवेदसां स्थाने युज्यते" इत्युपक्रमे "उत्तरे ज्योतिषी जातवेदसी उच्येते" भा०।

जातायन पुंस्त्री जातस्य गोत्रापत्यम् अश्वा० फञ्। जातस्य गोत्रापत्ये स्त्रियास्तु जातायाः अपत्यम् ढक्। जातेय जाताया अपत्ये पुंस्त्री।

जाति स्त्री जन–क्तिन्। १जन्मनि, २अनुगतैकाकारबुद्धिजननसमर्थे, अवयवव्यङ्ग्ये सकृदुपदेशव्यङ्ग्ये च ३धर्मभेदे, व्याकरणोक्ते पौत्राद्यपत्यात्मके ४गोत्रे, ५वेदशाखाभेदे च। न्यायोक्ते साधर्म्यवैधर्म्याभ्यां व्याप्तिनिरपेक्षाभ्यां वादिवाक्येषु ६दूषणदानरूपे वाक्ये, ७षड्जादिषु सप्तसु स्वरेषु, ८अलङ्कारभेदे, ९चुल्ल्याम्, शब्दार्थचि०। आमलक्यां, १०जातिफले, ११मालत्यां, (चामेली) पुष्पप्रधानवृक्षे च मेदि० १२काम्पिल्ले विश्वः।

तत्र व्याकरणोक्तं जातिलक्षणं यथा

"आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्वभाक्। सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह" भा०। अस्यार्थः। आक्रियते व्यज्यतेऽनयेति आकृतिः संस्थानम्। गृह्यते इति ग्रहणं ज्ञानम्। आकृत्या ग्रहणं यस्याः सा आकृतिग्रहणा। जातिराकृतिग्रहणा संस्थानव्यङ्ग्येत्यर्थः। तेन मनुष्यगोमृगहंसादीनां पृथक् पृथक्संस्थानैर्व्यज्यमानत्वात् मनुष्यत्वगोत्वमृगत्वहंसत्वादिर्जातिः। एवं ब्राह्मणक्षत्त्रियवैश्यशूद्राणां पृथक् संस्थानाभावात् ब्राह्मणत्वादेर्जातित्वं न स्यादिति लक्षणान्तरमाह लिङ्गानाञ्च न सर्वभागिति। या सर्वाणि लिङ्गानि न भजते सा च जातिरित्यर्थः। स्त्रीपुंसयोरपत्यन्ताद्विचतुःषट्पदोरगाः। जातिभेदाः पुमानाख्या" इत्यमरसिंहेन जातिभेदानां स्त्रीपुंसयोरेवेति नियमेन ब्राह्मणादीनां सर्वलिङ्गभागित्वाभावाज्जातित्वम्। किन्तु अज्ञातहंसस्य जनस्य हंसं दृष्टवतोऽपि तस्य संस्थानेन हंसत्वं व्यञ्जितुं न शक्यते इति हंसत्वस्यापि जातित्वं न स्यादिति पूर्वलक्षणस्य दोषः। एवं देवदत्तादिसंज्ञाशब्दस्यापि सर्वलिङ्गभागित्वाभावाज्जातित्वापत्तिरिति द्वितीयलक्षणस्य दोषः इति दोषद्वयमपाकर्त्तुं द्वयोर्लक्षणयोर्विशेषणमाह सकृदाख्यातनिर्ग्राह्येति। सकृदेकवारमाख्यातेन उपदेशेन निर्ग्राह्या ग्रहीतुं शक्या इत्यर्थः। तेन ईदृशो हंस इत्युपदेशे हंसं दृष्टवतस्तस्य संस्थानेन हंसत्वं व्यञ्जितुं शक्यत एवेति पूर्वलक्षणस्य न दोषः। एवं देवदत्तादिसंज्ञाशब्दस्यैकस्मिन्नुपदेशेऽपि अन्यस्मिन् ज्ञानाभावात् जातित्वं न स्यादिति परलक्षणस्यापि न दोषः। गार्ग्यः पुरुषः गार्गी स्त्री गार्ग्यं कुलमिति सर्वलिङ्गभागित्वात् संस्थानव्यङ्ग्यत्वाभावाच्च गार्ग्यादीनां जातित्वानुपपत्तौ तृतीयलक्षणमाह। गोत्रञ्चेति। पुत्रपौत्रप्रभृतिकमपत्यं गोत्रमिति पूर्वाचार्य्यपरिभाषितं गोत्रमिह गृह्यते गार्गी वात्सीत्यादि। चतुर्थलक्षणमाह चरणैः सहेति चरणञ्च जातिरित्यर्थः। चरणशब्दो वेदैकदेशप्रवक्तृवाची कठादिरूपः स च अध्ययनक्रियासम्बन्धेन प्रवृत्तत्वात् क्रियावाचक एव न तु जातिवाचकः। तेनास्य जातिसंज्ञार्थं चरणैः सहेत्युक्तम्। गार्ग्यादीनां यञश्चेति ङीपि सिद्धेऽपि जातिसंज्ञाफलन्तु स्वरार्थम् तथा गार्गी भार्य्या यस्यासौ गार्गीभार्य्य इत्यादौ "जातेश्चेति" पुंवद्भावनिषेधः। गार्गी चासौ भार्य्या चेति गार्ग्यभार्य्या इत्यादौ "पुंवत् कर्मधारयेति" पुनः पुंवद्भावः" "प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः। असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः" इति महाभाष्ये लक्षणान्तरमुक्तम्।

ईदृशान्यतमार्थकशब्दानां जातिशब्दत्वेन व्याकरणे व्यवह्रियते उदा० दृश्यते चोपरिष्टात् ।

अनुगतधर्मरूपजातेर्न्न स्वरूपत्वम् । हरिणोक्तं यथा "सम्बन्धिभेदात् सत्तैव भिद्यमाना गवादिषु । जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः । तां प्रातिपदिकार्थञ्च धात्वर्थञ्च प्रचक्षते । सा नित्या सा महानात्मा तामाहुस्त्वतलादयः" इति । प्रतिपादिता च तेनैव अनेकव्यक्तीनामनित्यतया जातेरैकरूप्यात् स्फोटात्मशब्दवाच्यता यथा "अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता । कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः" इति । अत्र च जातिस्फोटयोः सामानाधिकरण्यनिर्द्देशात् वाच्यवाचकयोरभेद इति बोध्यम् । वैशेषिकमतसिद्धेषु षट्सु भावेषु मध्ये अनुगतबुद्धिनियामकधर्मभेदरूपभावपदार्थसामान्यलक्षणभेदादिकं कणा० सू० वृत्तौ दर्शितं यथा

"सामान्यं विशेष इति बुद्ध्यपेक्षम्" । सू०

"पदार्थत्रयोद्देशलक्षणानन्तरमिदानीमुद्दिष्टस्य सामान्यपदार्थस्य लक्षणमाह सामान्यं द्विविधं परमपरञ्च परं सत्ता अपरं सत्ताव्याप्यं द्रव्यत्वादि तत्र सामान्यस्य तद्विशेषस्य च लक्षणं बुद्धिरेव । अनुवृत्तबुद्धिः सामान्यस्य, व्यावृत्तबुद्धिर्विशेषस्य इतिना द्वयमवच्छिद्य परामृश्यते तेन बुद्ध्यपेक्षमिति नपुंसकनिर्द्देशः । वृत्तिकारस्तु विशेषान्वयमाह परन्तु "नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्" पा० इत्यनेनैकवद्भावो नपुंसकता चेत्याह । बुद्धिरपेक्षा लिङ्गं लक्षणं वा यस्य तद्बुद्ध्यपेक्षं तत्र नित्यमनेकव्यक्तिवृत्ति सामान्यं नित्यत्वे सति स्वाश्रयान्योन्याभावसमानाधिकरणं वा परमपि सामान्यमपरमपि तथा । परन्तु सामान्यं विशेषसंज्ञामपि लभते तथा द्रव्यमिदं द्रव्यमिदमित्यनुवृत्तप्रत्यये सत्येव नायं गुणो नेदं कर्मेति विशेषप्रत्ययः । तथा च द्रव्यत्वादीनां सामान्यानामेव विशेषत्वम् । ननु विधिरूपं सामान्यं नास्त्येव अनुगतमतेरतद्व्यावृत्त्यैवोपपत्तेः भवति हि गौरयमिति-प्रतीतेरगोव्यावृत्तोऽयमिति विषयः जातिवादिनाऽपि गोत्वादिविशिष्टप्रत्ययस्य तद्विषयत्वाभ्युपगमात् नहि कैश्चिदतद्व्यावृत्तेरन्यत्, गवादिपदप्रवृत्तिनिमित्तमप्यगोव्यावृत्त्यादिरेव । किञ्च गोत्वं कुत्र वर्त्तते न तावद्गवि गोत्ववृत्तेः पूर्वं तस्याभावात् नाप्यगवि, विरोधात् यत्र गोपिण्ड उत्पद्यते तत्र कुत आगत्य गोत्वं वर्त्तते न तावत्तत्रैवासीत् देशस्यापि तस्य गोत्वापत्तेः नापि गोत्वमपि तदानीमेवोत्पन्नं नित्यत्वाभ्युपगमात् नाप्यन्यत आगतं निष्क्रियत्वाभ्युपगमात् नच एकस्यैव नित्यस्य नानाव्यक्तिवृत्तित्वं कार्त्स्न्यैकदेशविकल्पानुपपत्तेः । नहि कृत्स्नमेकत्रैव वर्त्तते अन्यत्र तद्विशिष्टप्रत्ययानुदयप्रसङ्गात् । नाप्येकदेशेन जातेरेकदेशस्याभावात् । तदुक्तं "न याति नच तत्रासीन्नचोत्पन्नं नचांशवत् । जहाति पूर्वं नाधारमहो व्यसनसन्ततिः" इति । सामान्यमस्ति तच्च संस्थानमात्रव्यङ्ग्यं गोत्वघटत्वादिवत् न तु गुणकर्मगतमपीति सगोत्रकलहः । अत्रोच्यते सामान्यं नित्यं व्यापकञ्च व्यापकत्वमपि स्वरूपतः सर्वदेशसम्बद्धत्वं न देशानां गोव्यवहारापत्तिः समवायेन तद्व्यवहारस्याभ्युपगमात् काले रूपादिमत्त्वेऽपि कालो रूपवानित्यप्रतीतिव्यवहारवत् नच कालो नास्त्येव पञ्चस्कन्धसंज्ञाभेदमात्रमित्यभ्युपगमादिति वाच्यं कालस्य साधयिष्यमाणत्वात् । तथाच यत्र पिण्ड उत्पद्यते तत्रस्थमेव गोत्वं तेन सम्बध्यते जातः सम्बद्धश्चेत्येकः काल इत्यभ्युपगमात् । एतेन कीदृश्याश्रये वर्त्तते इत्यत्र यत्र प्रतीयते इत्युत्तरम्, कुत्र प्रतीयते इत्यत्र यत्र वर्त्तते इत्युत्तरम् । गोत्ववृत्तेः पूर्वं स पिण्डः कीदृगासीदित्यत्र नासीदित्येवोत्तरम् । एतच्च "न याति नच तत्रासीत् इत्यादिकं परिदेवनमात्रम्, अतद्व्यावृत्तिरेव गोत्वमित्यस्य गौरयमिति विधिमुखः प्रत्यय एव बाधकः । नह्यनुभवोऽपि व्याख्यायते तदुक्तं "विधिजः प्रत्ययोऽन्योऽयं व्यतिरेकासमर्थकः" इति न हि गौरयमिति प्रत्ययेऽगोव्यावृत्तिरपि भासते । कार्त्स्न्यैकदेशविकल्पस्तदाभवेत् यद्येकस्य सामानस्य कार्त्स्न्यं भवेदेकदेशो वा कृत्स्नता ह्यनेकाशेषता । सा चैकस्मिन्नोपपन्ना गौरयमित्यनुभव एवासद्विषयो न वस्तुव्यवस्थापनक्षम इत्यत्रोत्तरं वक्ष्यते । प्राभाकरास्तु संस्थानमात्रव्यङ्ग्यं सामान्यमाचक्षते तद्यद्यनुगतप्रतीतिसाक्षिकं तदा किमपराद्धं गुणकर्मगतैः सामान्यैः, भवति हि रूपरसाद्यनुगतधीः सा च जातिव्यवस्थापिकैव बाधकाभावात् रूपत्वादिजातिषु न तद्व्यक्त्यभेदो बाधकः आकाशत्वादिवत्, रूपरसादिव्यक्तीनामनेकत्वात् नापि बुद्धित्वज्ञानत्वादिवत् घटत्वकलशत्वादिवद्वा तुल्यत्वं बाधकं तच्चान्यूनानतिरिक्तव्यक्तिकत्वं गुणत्वापेक्षया न्यूनव्यक्तिकत्वात् नीलत्वाद्यपेक्षया चाधिकव्यक्तिकत्वात् अतएव न सङ्करः भूतत्वमूर्त्त-

त्ववत्, परस्परात्यन्ताभावसामानाधिकरण्ये सति जात्यन्तरेण सामानाधिकरण्याभावात् नाप्यनवस्था रूपत्वादिगतसामान्यान्तरानभ्युपगमात् नापि रूपहानिर्विशेषत्ववत् यदि विशेषाः द्रव्याश्रितत्वे सति जातिमन्तः स्युः गुणाः कर्माणि वा स्युः विभुवृत्तित्वे सति यदि जातिमन्तः स्युर्गुणाः स्युरिति यथा विशेषपदार्थस्वरूपहानिस्तथा प्रकृतेऽभावात् नापि समवायत्ववदसम्बन्धः समवाये समवायाभ्युपगमेऽनवस्थाभयात्तथास्तु, प्रकृते तु समवायस्यैव सम्बन्धस्याभ्युपगमात्। यद्यपि समवायत्वजातिबाधकोव्यक्त्यभेदएव तथापि यन्मते उत्पादविनाशशीलाः बहवः समवायास्तन्मते द्रष्टव्यम्। अभावत्वादिजात्यभ्युपगमे वा बाधकमेतत्, (व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः। रूपहानिरसम्बन्धो जातिबाधकसंग्रहः)। विवादपदमनुगतबुद्धिः अनुगतनिमित्तसाध्या अबाधितानुगतमतित्वात् दामकुसुमबुद्धिवत् इति जातौ मानमिति वृत्तिकारास्तच्चिन्त्यम्”। उप० वृत्तिः।

“भावोऽनुवृत्तेरेव हेतुत्वात् सामान्यमेव”। सू०

“सामान्यं विशेष इति द्वैविध्यं तदुपपादयन्नाह। भावः सत्ता अनुवृत्तेरेव हेतुः न तु व्यावृत्तेरपि हेतुः तथा च विशेषसंज्ञां लभते”। उप० वृत्तिः

“द्रव्यत्वं गुणत्वं कर्मत्वञ्च सामान्यानि विशेषाश्च”। सू०

“केषां सामान्यानां विशेषसंज्ञेत्यपेक्षायामाह। चकारः पृथिवीत्वादीनि द्रव्यगतजातीः रूपत्वादीनि गुणगतजातीः उत्क्षेपणत्वादीनि कर्मगतजातीः समुच्चिनोति। द्रव्यत्वमित्यादावसमासः परस्परं व्याप्यव्यापकभावाभावसूचनार्थम् सामान्यानि विशेषाश्चेत्यत्रासमासः सामान्यत्वे सत्येव विशेषत्वं यथा ज्ञायेत तदर्थम्, अन्यथा सामान्यविशेषा इति षष्ठीसमासभ्रमः स्यात् तथाच सामान्यत्वे सति विशेषत्वं न प्रतीयते। ननु द्रव्याकारानुगतमतिसाक्षिकं न द्रव्यत्वम्, पृथिव्यादौ कथञ्चित्, तत्सत्त्वेऽपि वाय्वाकाशादौ तदसम्भवात् नच गुणत्वावच्छिन्नकार्य्यसमवायिकारणतावच्छेदकतया तत्सिद्धिः नित्यानित्यवृत्तितया गुणत्वस्य कार्य्यतानवच्छेदकत्वात् गुणत्वार्थमपि पर्य्यनुयोगस्य तादवस्थ्यात्, मैवं संयोगत्वावच्छिन्नकार्य्यसमवायिकारणतावच्छेदकतया द्रव्यत्वसिद्धेः सा हि न पृथिवीत्वाद्यवच्छेद्या न्यूनवृत्तित्वात् नापि सत्तावच्छेद्याऽधिकवृत्तित्वात् अवश्यं ह्यवच्छेदकेन भवितव्यम्, अन्यथाकस्मिकतापत्तेः तत्र परमाणुषु द्व्यणुकासमवायिकारणवत्तया द्व्यणुकेषु त्र्यणुकासमवायिकारणवत्तया विभुचतुष्टयस्य सर्वमूर्त्तसंयोगितयैव सिद्धेः मनसि इन्द्रियमनःसंयोगाधारतया वायौ तृणादिनोदनाश्रयतया प्रत्यक्षद्रव्येषु प्रत्यक्षतयैव संयोगाभ्युपगमस्यावश्यकत्वात् अजस्तु संयोगो नास्त्येव येन संयोगत्वस्यापि कार्य्याकार्य्यवृत्तितया कार्य्यतावच्छेदकता न स्यात् एवं विभागसमवायिकारणतावच्छेदकतयाऽपि द्रव्यत्वसिद्धेः सुप्रतिपदत्वात्। गुणत्वन्तु संयोगविभागसमवायिकारणत्वासमवायिकारणत्वशून्ये सामान्यवति यत्कारणत्वं तदवच्छेदकतयैव सिद्धमित्युक्तत्वात् कर्मत्वमपि प्रत्यक्षद्रव्येषु चलतीति-प्रत्ययसाक्षिकम्, अन्यत्र तु संयोगविभागानुमेयं संयोगविभागोभयासमवायिकारणतावच्छेदकतयाऽपि कर्मत्वसिद्धेरावश्यकत्वात्”। उप० वृत्तिः

१२ब्राह्मणादिवर्णे वर्णरूपजातिश्च द्विविधा शुद्धा सङ्कीर्णा च तत्र शुद्धाजातयः ब्राह्मणादयः। सङ्कीर्णजातयश्च मूर्द्धावसिक्तादयः नाना तदेतत् मनुना १०अ० उक्तं यथा

“ब्राह्मणः क्षत्त्रियोवैश्यस्त्रयो वर्णा द्विजातयः। चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः। सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु। आनुलोम्येन सम्भूता जात्या ज्ञेयास्त एव ते। स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान् सुतान्। सदृशानेव तानाहुर्मातृदोषविगर्हितान्। अनन्तरासु जातानां विधिरेव सनातनः। द्व्येकान्तरासु जातानां धर्म्यं विद्यादिमं विधिम्। ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते। निषादः शूद्रकन्यायां यः पारशव उच्यते। क्षत्त्रियाच्छूद्रकन्यायां क्रूराचारविहारवान्। क्षत्त्रशूद्रवपुर्जन्तुरुग्रो नाम प्रजायते। विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः। वैश्यस्य वर्णे चैकस्मिन् षडेतेऽपसदाः स्मृताः। क्षत्त्रियाद्विप्रकन्यायां सूतो भवति जातितः। वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ। शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणाम्। वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः। एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ यथा स्मृतौ। क्षत्तृवैदेहकौ तद्वत्प्रातिलोम्येऽपि जन्मनि। पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम्। ताननन्तरनाम्नस्तु मातृदोषात् प्रचक्षते। ब्राह्मणादुग्रकन्यायामावृतो नाम जायते। आभीरोऽम्बष्ठकन्यायामायोगव्यान्तु धिग्वणः। प्राति- आयोगवश्च क्षत्ता च चाण्डालश्चाधमो नृणाम्।

लोम्येन जायन्ते शूद्रादपसदास्त्रयः। वैश्यान्मागधवैदेहौ क्षत्त्रियात्सूत एव तु। प्रतीपमेते जायन्ते परेऽप्यपसदास्त्रयः। जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः। शूद्राज्जातो निषाद्यान्तु स वै कुक्कुटकः स्मृतः। क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्त्यते। वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते। द्विजातयः सवर्णासु जनयन्त्यव्रतांस्तु यान्। तान् सावित्रीपरिभ्रष्टान् व्रात्या इति विनिर्दिशेत्। व्रात्यात्तु जायते विप्रात् पापात्मा भूर्जकण्टकः। आवन्त्यवाटधानौ च पुष्पधः शैखएव च। झल्लो मल्लश्च राजन्याद्व्रात्यान्निच्छिविरेव च। नटश्च करणश्चैव खसो द्रविडएव च। वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्यएव च। कारूषश्च विजन्मा च मैत्रः सात्वतएव च। व्यभिचारेण वर्णानामवेद्यावेदनेन च। स्वकर्मणाञ्च त्यागेन जायन्ते वर्णसङ्कराः। सङ्कीर्णयोनयो ये तु प्रतिलोमानुलोमजाः। अन्योन्यव्यतिषक्ताश्च तान् प्रवक्ष्याम्यशेषतः। सूतोवैदेहकश्चैव चण्डालश्च नराधमः। मागधः क्षत्तृजातिश्च तथाऽयोगवएव च। एते षट् सदृशान् वर्णान् जनयन्ति स्वयोनिषु। मातृजात्यां प्रसूयन्ते प्रवरासु च योनिषु। यथा त्रयाणां वर्णानां द्वयोरात्मास्य जायते। आनन्तर्य्यात् स्वयोन्यान्तु तथा बाह्येष्वपि क्रमात्। ते चापि बाह्यान् सुबहूंस्ततोऽप्यधिकदूषितान्। परस्परस्य दारेषु जनयन्ति विगर्हितान्। यथैव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते। तथा बाह्यतरं बाह्यश्चातुर्वर्ण्ये प्रसूयते। प्रतिकूलं वर्त्तमाना बाह्या बाह्यतरान् पुनः। हीना हीनात् प्रसूयन्ते वर्णान् पञ्चदशैव तु। प्रसाधनोपचारज्ञमदासं दासजीवनम्। सैरिन्ध्रं वागुरावृत्तिं सूते दस्युरयोगवे। मैत्रेयकन्तु वैदेहो माधुकं सम्प्रसूयते। नॄन् प्रशंसत्यजस्रं यो घण्टाताडोऽरुणोदये। निषादो मार्गवं सूते दाशं नौकर्म्मजीविनम्। कैवर्त्तमिति यं प्राहुरार्य्यावर्त्तनिवासिनः। मृतवस्त्रभृन्नारीषु गर्हितान्नाशनासु च। भवन्त्यायोगवीष्वेते जातिहीनाः पृथक् त्रयः। कारावरोनिषादात्तु चर्म्मकारः प्रसूयते। वैदेहकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ। चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान्। आहिण्डिको निषादेन वैदेह्यामेव जायते। चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान्। पुक्कस्यां जायते पापः सदा सज्जनगर्हितः। निषादस्त्री तु चण्डालात् पुत्रमन्त्यावसायिनम्। श्मशानगोचरं सूते बाह्यानामपि गर्हितम्। सङ्करे जातयस्त्वेताः पितृमातृप्रदर्शिताः। प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्मभिः। सजातिजानन्तरजाः षट् सुता द्विजधर्म्मिणः। शूद्राणान्तु सधर्म्माणः सर्वेऽपध्वंसजाः स्मृताः। तपोवीजप्रभावैस्तु ते गच्छन्ति युगे युगे। उत्कर्षञ्चापकर्षञ्च मनुष्येष्विह जन्मनः। शनकैस्तु क्रियालोपादिमाः क्षत्त्रियजातयः। वृषलत्वं गता लोके ब्राह्मणादर्शनेन च। पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा जवनाः शकाः। पारदाः पह्लवाश्चीनाः किराता दरदाः खसाः। मुखबाहूरुपज्जानां या लोके जातयो बहिः। म्लेच्छवाचश्चार्य्यवाचः सर्वे ते दस्यवः स्मृताः। ये द्विजानामपसदा ये चापध्वंसजाः स्मृताः। ते निन्दितैर्वर्त्तयेयुर्द्विजानामेव कर्मभिः। सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सितम्। वैदेहकानां स्त्रीकार्य्यं मागधानां वणिक्पथः। मत्स्यघातो निषादानां तष्टिस्त्वायोगवस्य च। मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम्। क्षत्त्रुग्रपुक्कसानान्तु बिलौकोबधबन्धनम्। धिग्वणानां चर्म्मकार्य्यं वेणानां भाण्डवादनम्। चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च। वसेयुरेते विज्ञाता वर्त्तयन्तः स्वकर्मभिः। चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः। अपपात्राश्च कर्त्तव्या धनमेषां श्वगर्दभम्। वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम्। कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः। न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन्। व्यवहारो मिथस्तेषां विवाहः सदृशैः सह। अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने। रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च। दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः। अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः। बध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया। बध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च। वर्णापेतमविज्ञातं नरं कलुषयोनिजम्। आर्य्यरूपमिवानार्य्यं कर्म्मभिः स्वैर्विभावयेत्। अनार्य्यता निष्ठुरता क्रूरता निष्क्रियात्मता। पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम्। पित्र्यं वा भजते शीलं मातुर्वोभयमेव वा। न कथञ्चन दुर्य्योनिः प्रकृतिं स्वां नियच्छति। कुले मुख्येऽपि जातस्य यस्य स्याद्योनिसङ्करः। संश्रयत्येव तच्छीलं नरोऽल्पमपि वा बहु। यत्र त्वेते परिध्वंसा जायन्ते वर्णदूषकाः। राष्ट्रिकैः सह तद्राष्ट्रं क्षिप्रमेव विनश्यति। ब्राह्मणार्थे गवार्थे वा देहत्यागोऽनुपस्कृतः।

स्त्रीबालाभ्युपपत्तौ च बाह्यानां सिद्धिकारणम्। अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः। एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः। शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत् प्रजायते। अश्रेयान् श्रेयसीं जातिं गच्छत्यासप्तमाद्युगात्। शूद्रो ब्राह्मणतामेति ब्राह्मणश्चैति शूद्रताम्। क्षत्रियाज्जातमेवन्तु विद्याद्वैश्यात्तथैव च। अनार्य्यायां समुत्पन्नो ब्राह्मणात्तु यदृच्छया। ब्राह्मण्यामप्यनार्य्यात्तु श्रेयस्त्वं क्वेति चेद्भवेत्। जातो नार्य्यामनार्य्यायामार्य्यादार्य्यो भवेद्गुणैः। जातोऽप्यनार्य्यादार्य्यायामनार्य्य इति निश्चयः। तावुभावप्यसंस्कार्य्याविति धर्मो व्यवस्थितः। वैगुण्याज्जन्मनः पूर्व उत्तरः प्रतिलोमतः। सुबीजञ्चैव सुक्षेत्रे जातं सम्पद्यते यथा। तथार्य्याज्जात आर्य्यायां सर्वं संस्कारमर्हति। वीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः। वीजक्षेत्रे तथैवान्ये तत्रेयन्तु व्यवस्थितिः। अक्षेत्रे वीजमुत्सृष्टमन्तरैव विनश्यति। अवीजकमपि क्षेत्रं केवलं स्थण्डिलं भवेत्। यस्माद्वीजप्रभावेण तिर्य्यग्जा ऋषयोऽभवन्। पूजिताश्च प्रशस्ताश्च तस्माद्वीजं प्रशस्यते। अनार्य्यमार्य्यकर्म्माणमार्य्यं चानार्य्यकर्म्मिणम्। सम्प्रधार्य्याब्रवीद्धाता न समौ नासमाविति।”

जातिभेदा वृद्धहारीतेनाप्युक्ता यथा

“ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णा यथाक्रमम्। आद्यास्त्रयो द्विजाः प्रोक्तास्तेषां वै मन्त्रसत्क्रियाः। सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः। तेषां सङ्करयोगाच्च प्रतिलोमानुलोमजाः। विप्रान् मूर्द्धावसिक्तस्तु क्षत्रियायामजायत। वैश्यायान्तु तथाम्बष्ठो निषादः शूद्रया तथा। राजन्याद्वैश्याशूद्र्योस्तु माहिष्योग्रौ तु तौ स्मृतौ। शूद्र्यां वैश्यात्तु करणस्त्विधैवतेऽनुलोमजाः। विप्रायां क्षत्रियात् सूतः वैश्याद्वैदेहकस्तथा। चण्डालस्तु तथा शूद्रात्सर्वकर्मसु गर्हितः। मागधः क्षत्रियायां वै वैश्यात्, क्षत्ता शूद्रतः। शूद्रादयोगवं वैश्या जनयामास वै सुतम्। रथकारः करण्यान्तु माहिष्येण प्रजायते। असत्सन्ततयो ज्ञेयाः प्रतिलोमानुलोमजाः। प्रतिलोमासु वै जाता गर्हिताः सर्वकर्मसु।

उशन साऽप्युक्ता यथा

“अतः परं प्रवक्ष्यामि जातिवृत्तिविधानकम्। अनुलोमविधानञ्च प्रतिलोमविधिं तथा। सान्तरालकसंयुक्तं सर्वं संक्षिप्य प्रोच्यते। नृपाद् ब्राह्मणकन्यायां विवाहेषु समन्वयात्। जातः सुतोऽत्र निर्दिष्टः प्रतिलोमविधिर्द्विजः। वेदानर्हस्तथा चैषां धर्माणामनुबोधकः। सूताद्विप्रप्रसूतायां सूतो वेणुक उच्यते। नृपायामेव तस्यैव जातो यश्चर्मकारकः। ब्राह्मण्यां क्षत्रियाच्चौर्य्याद्रथकारः प्रजायते। वृत्तञ्च शूद्रवत्तस्य द्विजत्वं प्रतिषिध्यते। यानानां ये च वोढारस्तेषाञ्च परिचारकाः। शूद्रवृत्त्या तु जीवन्ति न क्षात्रं धर्ममाचरेत्। ब्राह्मण्यां वैश्यसंसर्गाज्जातो मागध उच्यते। वन्दित्वं ब्राह्मणानाञ्च क्षत्रियाणां विशेषतः। प्रशंसावृत्तिको जीवेद्वैश्यप्रेष्यकरस्तथा। ब्राह्मण्यां शूद्रसंसर्गाज्जातश्चाण्डाल उच्यते। सीसमाभरणं तस्य कार्ष्णायसमथापि वा। वध्रीं कण्ठे समाबध्य झल्लरीं कक्षतोऽपि वा। मलापकर्षणं ग्रामे पूर्व्वाह्णे परिशुद्धिकम्। नापराह्णे प्रविष्टोऽपि बहिर्ग्रामाच्च नैर्ऋते। पिण्डीभूता भवन्त्यत्र नो चेद्वध्या विशेषतः। चाण्डालाद्वैश्यकन्यायां जातः श्वपच उच्यते। श्वमांसभक्षणं तेषां श्वान एव च तद्बलम्। नृपायां वैश्यसंसर्गादायोगव इति स्मृतः। तन्तुवाया भवन्त्येव वसुकांस्योपजीविनः। शीलिकाः केचिदत्रैव जीवनं वस्त्रनिर्मिते। आयोगवेन विप्रायां जातास्ताम्रोपजीविनः। तस्यैव नृपकन्यायां जातः सूनिक उच्यते। सूनिकस्य नृपायान्तु जाता उद्बन्धकाः स्मृताः। निर्णेजयेयुर्वस्त्राणि अस्पृश्याश्च भवन्त्यतः। नृपायां वैश्यतश्चौर्य्यात् पुलिन्दः परिकीर्त्तितः। पशुवृत्तिर्भवेत्तस्य हन्युस्तान् दुष्टसत्त्वकान्। नृपायां शूद्रसंसर्गाज्जातः पुक्कश उच्यते। सुरावृत्तिं समारुह्य मधुविक्रयकर्म्मणा। कृतकानां सुराणाञ्च विक्रेता पाचको भवेत्। पुक्कशाद्वैश्यकन्यायां जातो रजक उच्यते। नृपायां शूद्रतश्चौर्य्याज्जातो रञ्जक उच्यते। वैश्यायां रञ्जकाज्जातो नर्त्तको गायको भवेत्। वैश्यायां शूद्रसंसर्गाज्जातो वैदेहकः स्मृतः। अजानां पालनं कुर्य्यान्महिषीणां गवामपि। दधिक्षीराज्यतक्राणां विक्रयाज्जीवनं भवेत्। वैदेहकात्तु विप्रायां जाताश्चर्म्मोपजीविनः। नृपायामेव तस्यैव कुचिकः पाचकः स्मृतः। वैश्यायां शूद्रतश्चौर्य्याज्जातश्चक्री स उच्यते। तैलपिष्टकजीवी तु लवणं भावयन् पुनः। विधिना ब्राह्मणः प्राप्य नृपायान्तु समन्त्रकम्। जातः सुवर्ण इत्युक्तः सानुलोमद्विजः स्मृतः। अथ वर्णक्रियां कुर्व-

श्चित्यनैमित्तिकीं क्रियाम्। अश्वं रथं हस्तिनं वा वाहयेद्वा नृपाज्ञया। सैनापत्यञ्च भैषज्यं कुर्य्याज्जीवेत्तु वृत्तिषु। नृपायां विप्रतश्चौर्य्यात् संजातो यो भिषक् स्मृतः। अभिषिक्तनृपस्याज्ञां परिपाल्य स वैद्यकम्। आयुर्वेदमथाष्टाङ्गं तन्त्रोक्तं धर्म्ममाचरेत्। ज्योतिषं गणितं वापि कायिकीं वृत्तिमाचरेत्। नृपायां विधिना विप्राज्जातो नृप इति स्मृतः। नृपायां नृपसंसर्गात् प्रमादाद्गूढजातकः। सोऽपि क्षत्रिय एव स्यादभिषेकं च वर्जितः। अभिषेकं विना प्राप्तो गोज इत्यभिधानकम्। सर्वन्तु राजवत्तस्य शस्यते पदवन्दनम्। पुनर्भूकरणे राज्ञां नृपकालीन एव च। वैश्यायां विधिना विप्राज्जातो ह्यम्बष्ठ उच्यते। कृष्याजीवो भवेत्तस्य तथैवाग्नेयवृत्तिकः। ध्वजिनी जीविका वापि अम्बष्ठाः शस्त्रजीविनः। वैश्यायां विप्रतश्चौर्य्यात् कुम्भकारः स उच्यते। कुलालवृत्त्या जीवेत्तु नापिता वा भवन्त्यतः। सूतके प्रेतके वापि दीक्षाकालेऽथ वापनम्। नाभेरूर्द्ध्वन्तु वपनं तस्मान्नापित उच्यते। कायस्थ इति जीवेत्तु विचरेच्च इतस्ततः। काकाल्लौल्यं यमात् क्रौर्य्यं स्थपतेरथ कृन्तनम्। आद्याक्षराणि संगृह्य कायस्थ इति कीर्त्तितः। शूद्रायां विधिना विप्राज्जातः पारशवो मतः। शिवाभद्रकादीन् समाश्रित्य जीवेयुः पूजकाः स्मृताः। शिवागमविद्याद्यैस्तथामण्डलवृत्तिभिः। तस्यां वै चौरिकावृत्त्या निषादो जात उच्यते। वने दुष्टमृगान् हत्वा जीवनं मांसविक्रयम्। नृपाज्जातोऽथ वैश्यायां गृह्यायां विधिना सुतः। वैश्यवृत्त्या तु जीवेत्तु क्षात्रधर्मं न चाचरेत्। तस्यां तस्यैव चौरेण मणिकारः प्रजायते। मणीनां रचनां कुर्य्यान्मुक्तानां वेधनक्रियाम्। प्रवालानाञ्च सूत्रित्वं शाखानां वलयक्रियाम्। शूद्रायां विप्रसंसर्गाज्जात उग्र इति स्मृतः। नृपस्य दण्डधारः स्याद्दण्डं दण्ड्येषु सञ्चरेत्। तस्यैव चौरसंवृत्त्या जातः शुण्डिक उच्यते। जातिदुष्टान् समारोप्य शुण्डाकर्म्मणि योजयेत्। शूद्रायां वैश्यसंसर्गाद्विधिना सूचकः स्मृतः। सूचकाद्विप्रकन्यायां जातस्तक्षक उच्यते। शिल्पकर्म्माणि चान्यानि प्रासादलक्षणं तथा। नृपायामेव तस्यैव जातो यो मत्स्यबन्धकः। शूद्रायां वैश्यतश्चौर्य्यात् कटकार इति स्मृतः। वशिष्ठशापात्त्रेतायां केचित् पारशवास्तथा। वैखानसेन केचित्तु केचिद्भागवतेन च। वेदशास्त्रावलम्बास्ते भविष्यन्ति कलौ युगे। कटकारास्ततः पश्चान्नारायणगणाः स्मृताः। शाखा वैखानसेनोक्ता तन्त्रमार्गविधिक्रियाः। निषेकाद्याः श्मशानान्ताः क्रियाः पूजाङ्गसूचिकाः। पञ्चरात्रेण वा प्राप्तं प्रोक्तं धर्मं समाचरेत्। शूद्रादेव तु शूद्रायां जातः शूद्र इति स्मृतः। द्विजशुश्रूषणपरः पाकयज्ञपरान्वितः। सच्छूद्रं तं विजानीयादसच्छूद्रस्ततोऽन्यथा। चौर्य्यात् काकवचोज्ञेयश्चाश्वानां तृणवाहकः। एतत् संक्षेपतः प्रोक्तं जातिवृत्तिविभागशः। जात्यन्तराणि दृश्यन्ते संकल्पादित एव तु।” पराशरोक्तादाषादिजातयस्तत्तच्छब्दे दृश्याः अन्या अपि जातयो ब्रह्मवै० ब्र०ख०१०अ०दर्शिता यथा

“बभूवुर्ब्राह्मणो वक्त्रादन्या ब्राह्मणजातयः। ब्रह्मणो बाहुदेशाच्च जाताः क्षत्रियजातयः। ऊरुदेशाच्च वैश्याश्च पादतः शूद्रजातयः। तासां सङ्करजातेन बभूवुर्वर्णसङ्कराः। गोपनापितलोबाश्च तथा मोदकमूलवौ। ताम्बूलिपर्णकारौ च तथा वणिजजातयः। इत्येवमाद्या विप्रेन्द्र! सच्छूद्राः परिकीर्त्तिताः। शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्विजन्मनोः। विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः। ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः। मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः। कुम्भकारः कंसकारः षडेते शिल्पिनां वराः। सूत्रधारश्चित्रकरः स्वर्णकारस्तथैव च। पतितास्ते ब्रह्मशापादयाज्या वर्णसङ्कराः। स्वर्णकारः स्वर्णचौर्य्यात् ब्राह्मणानां द्विजोत्तम!। बभूव सद्यः पतितो ब्रह्मशापेन कर्म्मणा। सूत्रधारो द्विजातीनां शापेन पतितो भुवि। शीघ्रञ्च यज्ञकाष्ठञ्च न ददौ तेन हेतुना। व्यतिक्रमेण चित्राणां सद्यश्चित्रकरस्तथा। पतितो ब्रह्मशापेन ब्राह्मणानाञ्च कोपतः। कश्चिद् वणिक्विशेषश्च संसर्गात् स्वर्णकारिणः। स्वर्णचौर्य्यादिदोषेण पतितो ब्रह्मशापतः। कुलटायाञ्च शूद्रायां चित्रकारस्य वीर्य्यतः। बभूवाट्टालिकाकारः पतितो जारदोषतः। अट्टालिकाकारवीर्य्यात् कुम्भकारस्य योषिति। बभूव कोटिकः सद्यः पतितो गृहकारकः। कुम्भकारस्य वीर्य्येण सद्यः कोटिकयोषिति। बभूव तैलकारश्च कुटिलः पतितो भुवि। सद्यः क्षत्रियवीर्य्येण राजपुत्रस्य योषिति। बभूव तीवरश्चैव पतितो जारदोषतः। तीवरस्य तु वीर्य्येण तैलकारस्य योषिति। बभूव पतितो दस्युर्लेटश्च परिकीर्त्तितः। लेटस्तीवरकन्यायां जनयामास षण्नरान्। भल्लं मल्लं माठरञ्च भड़ं कोलञ्च कन्दरम्। ब्राह्मण्यां शूद्रवीर्य्येण पतितो

जारदोषतः। सद्यो बभूव चाण्डालः सर्व्वस्मादधमोऽशुचिः। तीवरेणैव चाण्डाल्यां चर्मकारो बभूव ह। चर्मकार्य्याञ्च चाण्डालात् मांसच्छेदी बभूव ह। मांसच्छेद्यां तीवरेण कोँचश्च परिकीर्त्तितः। कोँचस्त्रियान्तु कैवर्त्तात् कार्ण्डारः परिकीर्त्तितः। सद्यश्चाण्डालकन्यायां लेटवीर्य्येण शौनक!। बभूवतुस्तु द्वौ पुत्रौ हड्डिकशौण्डिकौ तथा। क्रमेण हड्डिकन्यायां सद्यश्चाण्डालवीर्य्यतः। बभूवुः पञ्च पुत्राश्च भ्रष्टा वनचराश्च ते। लेटात्तीवरकन्यायां गङ्गातीरे च शौनक!। बभूव सद्योयो बालो गङ्गापुत्रः प्रकीर्त्तितः। गङ्गापुत्रस्य कन्यायां वीर्य्येण वेशधारिणः। बभूव वेशधारी च पुत्रो युङ्गी प्रकीर्त्तितः। वैश्यात्तीवरकन्यायां सद्यः शुण्डी बभूव ह। शुण्डीयोषिति वैश्यात्तु पौण्ड्रकश्च प्रकीर्त्तितः। क्षत्रात् करणकन्यायां राजपुत्रो बभूव ह। राजपुत्र्यान्तु करणादागरीति प्रकीर्त्तितः। क्षत्रवीर्य्येण वैश्यायां कैवर्त्तः परिकीर्त्तितः। कलौ तीवरसंसर्गाद्धीवरश्च प्रकीर्त्तितः। तीवर्य्यां धीवरात् पुत्रो बभूव रजकः स्मृतः। रजक्यां तीवराच्चापि कोदाली च बभूव ह। नापिताद्गोपकन्यायां सर्वस्वी तस्य योषिति। क्षत्राद्बभूव व्याधश्च बलवान् मृगहिंसकः। तीवरात् शुण्डिकन्यायां बभूवुः सप्तपुत्रकाः। ते कलौ हड्डिसंसर्गाद्बभूवुर्दस्यवः सदा। ब्राह्मण्यामृषिवीर्य्येण ऋतोः प्रथमवासरे। कुत्सितश्चोदरे जातः कूदरस्तेन कीर्त्तितः। तदशौचं विप्रतुल्यं पतितोह्यृतुदोषतः। सद्यः कोटिकसंसर्गादधमो जगतीतले। क्षत्रवीर्य्येण वैश्यायामृतोः प्रथमवासरे। जातः पुत्रो महादस्युर्बलवांश्च धनुर्द्धरः। चकार बागतीतञ्च क्षत्रियो वारितस्तया। तेन जात्या स पुत्रश्च बागतीतः प्रकीर्त्तितः। क्षत्रवीर्य्येण शूद्रायामृतुदोषेण पापतः। बलवत्यो दुरन्ताश्च बभूवुर्म्लेच्छजातयः। अविद्धकर्णाः क्रूरा निर्भया रणदुर्जयाः। शौचाचारविहीनाश्च दुर्द्धर्षा धर्मवर्ज्जिताः। म्लेच्छात् कुविन्दकन्यायां शराकः परिकीर्त्तितः। वर्णसङ्करदोषेण बह्व्यश्च शठजातयः। तासां नामानि संख्याश्च को वा वक्तुं द्विज! क्षमः। वैद्योऽश्विनीकुमारेण जातश्च विप्रयोषिति। वैद्यवीर्य्येण शूद्रायां बभूवुर्बहवो जनाः। ते च ग्राम्यगुणज्ञाश्च मन्त्रौषधिपरायणाः। तेभ्यश्च जाताः शूद्रायां ते व्यालग्राहिणो भुवि”।

षोड़शपदार्थमध्ये जातिरूपपदार्थभेदश्च गौ॰सू॰उक्तो यथा “साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः” सू०। विवृतञ्चैतत् विश्वनाथेन। “क्रमप्राप्तां जातिं लक्षयति। साधर्म्यवैधर्म्याभ्यामिति सावधारणोनिर्देशस्तेन व्याप्तिनिरपेक्षाभ्यां साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं दूषणाभिधानं जातिरित्यर्थः यद्यप्युभाभ्यां प्रत्यवस्थानस्य प्रत्येकप्रत्यवस्थानेऽव्याप्तिरेकप्रत्यवस्थानस्य लक्षणत्वे परप्रत्यवस्थानेऽव्याप्तिर्नवान्यतरप्रत्यवस्थानं नियतं सर्वत्र जातावभावात्तथापि व्याप्तिनिरपेक्षतया दूषणाभिधानमित्येव वाच्यं तेन च सन्दर्भेण दूषणासमर्थत्वं स्वव्याघातकत्वं वा दर्शितं तथा च छलादिभिन्नदूषणासमर्थमुत्तरं स्वव्याघातकमुत्तरं वा जातिरिति सूचितं साधर्म्यसमादिचतुर्विंशत्यन्यान्यत्वं तदर्थ इत्यपि वदन्ति”।

तद्भेदाश्चतुर्विंशतिस्ते च गौतमेन दर्शिता यथा

“साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्य्यसमाः” सू०

“तत्र च विशेषलक्षणार्थं जातिं विभजते” सू०।

अत्र च साधर्म्यादीनां कार्य्यान्तानां द्वन्द्वे तैः समा इत्यर्थात् साधर्म्यसमादयश्चतुर्विंशतिर्जातय इत्यर्थः अत्र च जातेर्विशेष्यत्वात् समाशब्दं मन्यन्ते भाष्यवार्त्तिकादौ समाशब्दः अग्रिमसूत्रेषु तु समशब्दो निर्विवाद एव तत्र जातिशब्दस्य स्त्रीलिङ्गतया यद्यपि नान्वयस्तथापि प्रतिषेधो विशेष्य इति भाष्यादयः। वयन्तु तद्विकल्पादिति सूत्रस्थविकल्पस्यैव विशेष्यत्वं विविधः कल्पः प्रकारो विकल्पः तथा चैते साधर्म्यसमादयोजातिविकल्पा एवमग्रिमसूत्रेष्वपि। इत्थञ्च जातेर्विशेषणत्वे साधर्म्यसमेत्यपीति ब्रूमः समीकरणार्थं प्रयोगः समइति वार्त्तिकं यद्यपि नैतावता समीकरणं तथापि समीकरणोद्देश्यकत्वमस्त्येव अथ वा साधर्म्यमेव समं यत्र स साधर्म्यसमः एकत्र व्याप्तेराधिक्येऽपि साधर्म्यं सममेवेति भावः” वृत्तिः

“साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्य्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ” १।२ सू०।

“साधर्म्यवैधर्म्यसमौ लक्षयति। उपसंहारे साध्यस्योपसंहरणे वादिना कृते तद्धर्मस्य साध्यरूपधर्मस्य यो विपर्य्ययो व्यतिरेकस्तस्य साधर्म्यवैधर्म्याभ्यां केवलाभ्यां व्याप्त्यनपेक्षाभ्यां यदुपपादनं ततो हेतोः साधर्म्यवैधर्म्यसमावुच्येते तदयमर्थः वादिना अन्वयेन व्यतिरेकेण वा साध्ये साधिते प्रतिवादिनः साधर्म्यमात्रप्रवृत्तहेतुन

तदभावापादनं साधर्म्यसमा१ वैधर्म्यमात्रप्रवृत्तहेतुना तदभावापादनं वैधर्म्यसमा२। तत्र साधर्म्यसमा यथा शब्दोऽनित्यः कृतकत्वाद्घटवत् व्यतिरेकेण वा व्योमवदित्युपसंहृते नैतदेवं यद्यनित्यघटसाधर्म्यान्नित्याकाशवैधर्म्याद्वाऽनित्यः स्यान्नित्याकाशसाधर्म्यादमूर्त्तत्वान्नित्यः स्याद्विशेषो वा वक्तव्यः वैधर्म्यसमा यथा शब्दोऽनित्यः कृतकत्वाद्घटवत् आकाशवद्वेति स्थापनायाम् अनित्यघटवैधर्म्यादमूर्त्तत्वान्नित्यः स्यादविशेषो वा वक्तव्य इति अत्र साधर्म्यमात्रं वैधर्म्यमात्रं वा गमकतौपयिकमित्यभिमानात् सत्प्रतिपक्षदेशनाभासे चेमे अनैकान्तिकदेशनाभासे इति वार्त्तिके त्वनैकान्तिकपदं योगात्सत्प्रतिपक्षपरं एकान्ततः साध्यसाधकत्वाभावात्" वृत्तिः।

"गोत्वाद्गोसिद्धिवत् तत्सिद्धिः" सू०।

"अनयोरसदुत्तरत्वे वीजमाह। गोत्वात् गोसिद्धिर्गौव्यवहार इति सम्प्रदायः वयन्तु गोत्वाद्वेतरासमवेतत्वे सति गोसमवेतत्वात्सास्नादितः, एतेन व्याप्तिपक्षधर्म्मत्वे दर्शिते गोर्गोत्वस्य तादात्म्येन गोरेव वा सिद्धिर्यथा तथैव कृतकत्वादपि व्याप्तिपक्षधर्म्मतासहितादनित्यत्वसिद्धिर्नतु व्याप्तिपक्षधर्मतारहितात् साधर्म्यमात्रात्, तथा सति अदूषकसाधर्म्यात्प्रमेयत्वादितस्तद्वचनमप्यदूषकं स्यादित्ययं विशेषः" वृत्तिः।

"साध्यदृष्टान्तयोर्धर्म्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यसमाः" ३।४।५।६।७।८ सू०

"क्रमप्राप्तं जातिषट्कं निरूपयति। उत्कर्षेण सम उत्कर्षसमः३ एवमपकर्षसमोऽपि४ वर्ण्यावर्ण्ये साध्येति भावप्रधानो निर्द्देशः वर्ण्यत्वादिना समो वर्ण्यसमादिः ५।६।७।८। अविद्यमानधर्म्मारोप उत्कर्षः विद्यमानधर्म्मापचयोऽपकर्षः वर्ण्यत्वं वर्णनीयत्वं तच्च सन्दिग्धसाध्यकत्वादि तदभावोऽवर्ण्यत्वं विकल्पो द्वैविध्यं साध्यत्वं पञ्चावयवसाधनीयत्वं साध्यदृष्टान्तयोर्धर्मविकल्पादिति पञ्चानामुत्थानवीजम् उभयसाध्यत्वादिति षष्ठस्य। तदयमर्थः साध्यतेऽत्रेति साध्यं पक्षः तथा च साध्यदृष्टान्तयोरित्यस्य पक्षदृष्टान्तयोरन्यतरस्मिन्नित्यर्थः धर्मविकल्पो धर्म्मस्य वैचित्र्यं तच्च क्वचित्सत्त्वं क्वचिदसत्त्वं प्रकृते साध्यसाधनान्यतररूपस्य धर्मस्य विकल्पात्सत्त्वाद्योऽविद्यमानधर्म्मारोपः स उत्कर्षसमः व्याप्तिमपुरस्कृत्य पक्षदृष्टान्तान्यतरस्मिन् साध्यसाधनान्यतरेणाविद्यमानधर्म्मप्रसञ्जनं उत्कर्षसमः२ इति फलितार्थः। यथा शब्दोऽनित्यः कृतकत्वादिति स्थापनायाम् अनित्यत्वं कृतकत्वं घटे रूपसहचरितमतः शब्दोऽपि रूपवान् स्यात् तथा च विवक्षितविपरीतसाधनाद्विशेषविरुद्धो हेतुस्तद्देशनाभासा चेयम्। एवं श्रावणशब्दसाधर्म्यात् कृतकत्वाद्घटोऽपि श्रावणः स्यादविशेषात्। वस्तुतस्तु घटे श्रावणत्वापादनेऽर्थान्तरमत उक्तलक्षणे दृष्टान्तपदं साध्यपदञ्च न देयम्। अपकर्षसमायान्तु धर्म्मविकल्पः धर्म्मस्य सहचरितधर्म्मस्य विकल्पोऽसत्त्वं ततः अपकर्षः साध्यसाधनान्यतरस्याभावप्रसञ्जनं तथा च पक्षदृष्टान्तान्यतरस्मिन् व्याप्तिमपुरस्कृत्य सहचरितधर्म्माभावेन हेतुसाध्यान्यतराभावप्रसञ्जनमपकर्षसमः४ यथा शब्दोऽनित्यः कृतकत्वादित्यत्र यद्यनित्यसहचरितघटधर्म्मात् कृतकत्वादनित्यः शब्दस्तदा कृतकत्वानित्यत्वसहचरितघटधर्म्मरूपवत्त्वव्यावृत्त्या शब्दे कृतकत्वस्यानित्यत्वस्य च व्यावृत्तिः स्यात्। आद्येऽसिद्धिदेशना द्वितीये बाधदेशना, एवं शब्दे कृतकत्वसहचरितश्रावणत्वस्य संयोगादावनित्यत्वकृतकत्वसहचरितगुणत्वस्य च व्यावृत्त्या घटेऽनित्यत्वं कृतकत्वञ्च व्यावर्त्तेतेति दृष्टान्ते साध्यसाधनवैकल्यदेशनाभासाऽपीयम्। यत्तु वार्त्तिके शब्दो नीरूप इति घटोऽपि नीरूपः स्यादित्यपकर्ष इति. तदसत् घटे नीरूपत्वापादनस्यार्थान्तरत्वात् आचार्य्यस्वरसोऽप्येवं यत्तु वैधर्म्यसमाया अत्रैवान्तर्भावः स्यादिति तन्न उपधेयसङ्करेऽप्युपाधेरसङ्करात् वर्ण्यसमायान्तु साध्यः सिद्ध्यभाववान् सन्दिग्धसाध्यकादिर्वा तस्य धर्म्मः सन्दिग्धसाध्यकादिवृत्तिहेतुस्तस्य विकल्पात्सत्त्वात् दृष्टान्ते वर्ण्यत्वस्य सन्दिग्धसाध्यकत्वस्यापादनं वर्ण्यसमः५। तदयमर्थः पक्षवृत्तिहेतुर्हि गमकः पक्षश्च सन्दिग्धसाध्यकस्तथा च सन्दिग्धसाध्यकवृत्तिर्हेतुस्तथा दृष्टान्तेऽपि स्वीकार्य्यः तथा च दृष्टान्तस्यापि सन्दिग्धसाध्यकत्वात् सपक्षवृत्तित्वानिश्चयादसाधारणो हेतुस्तद्देशनाभासा चेयम्। हेतुः सन्दिग्धसाध्यकवृत्तिर्यदि न दृष्टान्ते तदा गमकहेत्वभावात् साधनविकल्पो दृष्टान्तः स्यादिति भावः। अवर्ण्यसमायान्तु दृष्टान्ते सिद्धसाध्यके यो धर्म्मो हेतुस्तस्य सत्त्वात् पक्षे शब्दादावसन्दिग्धसाध्यकत्वापादनमवर्ण्यसमः६ दृष्टान्ते हेतोर्यादृशत्वं तादृशो हेतुरेव गमक इत्यभिमानेन एवमापादनं दृष्टान्ते यो हेतुः सिद्धसाध्यकवृत्तिः स चेन्न पक्षे तदा गमकहेत्वभावात् स्वरूपासिद्धिः स्यादतस्तादृशो हेतुरवश्यं पक्षत्वाभिमते स्वीकार्य्यः तथा च सन्दिग्धसाध्यकत्वलक्षणपक्षत्वाभावा-

दाश्रयासिद्धिः असिद्धिदेशनाभासा चेयम्। विकल्पसमायान्तु पक्षे दृष्टान्ते च योधर्म्मस्तस्य विकल्पोविरुद्धः कल्पो व्यभिचारित्वम् उपलक्षणं चैतत् अन्यवृत्तिधर्म्मस्यापि बोध्यं व्यभिचारोऽपि हेतोर्धर्म्मान्तरं प्रति धर्म्मान्तरस्य साध्यं प्रति धर्म्मान्तरस्य धर्म्मान्तरं प्रति वा तथा च कस्यचिद्धर्मस्य क्वचिद्व्यभिचारदर्शनेन धर्मत्वाविशेषात् प्रकृतहेतोः प्रकृतसाध्यं प्रति व्यभिचारापादनं विकल्पसमा७ यथा शब्दोऽनित्यः कृतकत्वादित्यत्र कृतकत्वस्य गुरुत्वव्यभिचारदर्शनाद्गुरुत्वस्यानित्यत्वव्यभिचारदर्शनादनित्यत्वस्य मूर्त्तत्वव्यभिचारदर्शनाद्धर्मत्वाविशेषात् कृतकत्वमप्यनित्यत्वं व्यभिचरेदित्यनैकान्तिकदेशनाभासा चेयम्। पक्षदृष्टान्तादेः प्रकृतसाध्यतुल्यतापादनं स साध्यसमा८ तत्रायमाशयः एतत्प्रयोगसाध्यस्यैवानुमितिविषयत्वं तथा च पक्षादेरनुमितिविषयत्वात् साध्यवदेतत्प्रयोगसाध्यत्वम् अतः साध्यसमा। तथा हि पक्षादेः पूर्वं सिद्धत्वे एतत् प्रयोगसाध्यत्वाभावान्नानुमितिविषयत्वं पूर्वमसिद्धत्वे पक्षादेरज्ञानादाश्रयासिद्ध्यादयस्तद्देशनाभासा चेयम्। सूत्रार्थस्तु उभयसाध्यत्वात् उभयं पक्षदृष्टान्तौ तद्धर्म्मौ हेत्वादिः तत्साध्यत्वं तदधीनानुमितिविषयत्वं साध्यस्येव पक्षादेरपीति तुल्यतापादनमिति लिङ्गोपहितभानमते लिङ्गस्याप्यनुमितिविषयत्वात् साध्यसमत्वं हेतोश्च साध्यत्वे हेतुमान्दृष्टान्तोऽपि साध्य इत्याशयः" वृत्तिः।

"किञ्चित्साधर्म्म्यादुपसंहारसिद्धेर्वैधर्म्म्यादप्रतिषेधः" सू०।

"एतासामसदुत्तरत्वे बीजमाह किञ्चित्साधर्म्म्यात् साधर्म्म्यविशेषात् व्याप्तिसहितात् उपसंहारसिद्धेः साध्यसिद्धेः वैधर्म्म्यात्तद्विपरीतात् व्याप्तिनिरपेक्षात् साधर्म्म्यमात्रात् भवता कृतः प्रतिषेधो न सम्भवतीत्यर्थः। अन्यथा प्रमेयत्वरूपासाधकसाधर्म्म्यात् तद्दूषणमप्यसम्यक् स्यादिति भावः। तथा चायं क्रमः अनित्यत्वव्याप्यात् कृतकत्वात् शब्देऽनित्यत्वमुपसंह्रियते न तु कृतकत्वं रूपस्यापि व्याप्यं येन ततो रूपमप्यापादनीयं शब्दे, एवं अनित्यत्वं न रूपव्याप्यं येन रूपाभावादनित्यत्वाभावः शब्दे स्यात् एवं वर्ण्यसमेऽपि किञ्चित्साधर्म्म्यात् व्याप्यतावच्छेदकावच्छिन्नाद्धेतोः साध्यसिद्धिः तादृशहेतुमत्त्वञ्च दृष्टान्तताप्रयोजकं न तु पक्षे यावद्विशेषणावच्छिन्नो हेतुस्तावदवच्छिन्नहेतुमत्त्वम् अन्यथा त्वयाऽपि दूषणीयो दृष्टान्तो कर्त्तव्यः सोऽपि न स्यात् एवमवर्ण्यसमेऽपि व्याप्यतावच्छेदकावच्छिन्नस्य दृष्टान्तदृष्टस्य पक्षे सत्त्वात्साध्यसिद्धिर्न तु दृष्टान्तवृत्तियावद्धर्म्मावच्छिन्नस्य पक्षे सत्त्वम्। एवं विकल्पसमेऽपि प्रकृतसाध्यव्याप्यात् प्रकृतहेतोः साध्यसिद्धिस्तद्वैधर्म्म्यात् यत्किञ्चिद्व्यभिचारात् कृतः प्रतिषेधो न सम्भवति नहि यत्किञ्चिद्व्यभिचारादेव प्रकृतहेतोः प्रकृतसाध्यासाधकत्वमतिप्रसङ्गात्। एवं साध्यसमेऽपि व्याप्याद्धेतोः सिद्धे पक्षे साध्यसिद्धिर्न तु पक्षदृष्टान्तादयोऽप्यनेन साध्यन्ते तथा सति क्वचिदपि साध्यसिद्धिर्न स्यात् त्वदीयदूषणमपि विलीयेत" वृत्तिः।

"साध्यातिदेशाच्च दृष्टान्तोपपत्तेः" सू०।

"वर्ण्यावर्ण्यसाध्यसमासु समाध्यन्तरमप्याह दृष्टान्तोपपत्तिर्दृष्टान्तत्वोपपत्तिः साध्यातिदेशात् दृष्टान्ते हि साध्यमतिदिश्यते तावतैव दृष्टान्तत्वमुपपद्यते नत्वशेषो धर्मः पक्षदृष्टान्तयोरभेदापत्तेः पक्षादेरपि साध्यसमत्वमतेन प्रत्युक्तं दृष्टोऽन्तो दृष्टान्तः पक्षः तस्माद्वह्निमानित्यतः पक्षोत्कीर्त्तनात्तथा च साध्यस्यातिदेशात् साधनात् पक्ष इत्युच्यते न तु पक्षोऽपि साध्यतेऽतिप्रसङ्गादिति भावः" वृत्तिः।

"प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्या अविशिष्टत्वादप्राप्त्या असाधकत्वाच्च प्राप्त्यप्राप्तिसमौ" ९।१० सू०।

"क्रमप्राप्तौ प्राप्त्यप्राप्तिसमौ लक्षयति। हेतोरिति साधकत्वमिति शेषः प्राप्तिपक्षे दूषणमाह प्राप्त्या अविशिष्टत्वादिति द्वयोरपि प्राप्तत्वाविशेषात् किं कस्य साधकं अप्राप्तिपक्षे दोषमाह अप्राप्त्या इति अप्राप्तस्य साधकत्वेऽतिप्रसङ्गात् साधकत्वञ्चात्र कारकज्ञापकसाधारणम् एवञ्च कारकज्ञापकलक्षणं साधनं कार्य्यज्ञाप्यलक्षणेन साध्येन सम्बद्धं सत्साधकं चेत्तदा सत्त्वाविशेषाच्च कार्य्यकारणभावः सत्सम्बन्धस्य प्रागेव ज्ञातत्वाच्च ज्ञाप्यज्ञापकभावः प्राप्तयोर्न जन्यजनकभावः प्राप्तत्वेन पयोदकयोरिवाभेदादित्याशय इत्यन्ये। तथा च प्राप्त्याऽविशेषादनिष्टापादनेन प्रत्यवस्थानं प्राप्तिसमा९। यदि चाप्राप्तं लिङ्गं साध्यबुद्धिं जनयति साध्याभावबुद्धिमेव किन्तेन न जनयेत् अप्राप्तत्वाविशेषात् तथा चाप्राप्त्याऽसाधकत्वादनिष्टापादनमप्राप्तिसमा१०। प्रतिकूलतर्कदेशनाभासे चेमे" वृत्तिः।

"घटादिनिष्पत्तिदर्शनात् पीड़ने चाभिचारादप्रतिषेधः" सू०।

"अनयोरसदुत्तरत्वे बीजमाह। दण्डादितो घटादिनिष्पत्तेर्दर्शनात् सर्वलोकप्रत्यक्षसिद्धत्वादभिचाराच्च श्येनादितः शत्रुपीड़ने च व्यभिचाराच्च त्वदुक्तः प्रतिषेधः

सम्भवति न हि कारणं दण्डादि प्रागेव घटादिना सम्बद्धमपि तु मृदादिना, श्येनादिरप्युद्देश्यतया पीडां जनयति अन्यथा लोकवेदसिद्धकार्य्यकारणभावोच्छेदे त्वदुक्तो हेतुरप्यसाधकः स्यादिति" वृत्तिः।

"दृष्टान्तस्य कारणानपदेशात् प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ" ११।१२ सू०।

"क्रमप्राप्ते प्रसङ्गप्रतिदृष्टान्तसमे जाती लक्षयति। दृष्टान्तस्य कारणं प्रमाणं तदनपदेशोऽनभिधानम् अभिधानं चानतिप्रयोजनकं तथा च दृष्टान्तस्य साध्यकत्वे प्रमाणाभावात् प्रत्यवस्थानमर्थः यद्यपीदं सदुत्तरमेव तथापि दृष्टान्ते प्रमाणं वाच्य तत्रापि प्रमाणान्तरमित्यनवस्थायाः प्रत्यवस्थाने तात्पर्य्यं तदुक्तमाचार्य्यैः "नवस्थाभासप्रसङ्गः प्रसङ्गसमः" इति एतन्मते हेतोर्हेत्वन्तरमित्यनवस्थाऽपि प्रसङ्गसमा एव। पूर्वमते तु हेत्वनवस्थादिकं वक्ष्यमाणजातिगणेष्वन्तर्भूतमिति विशेषः। अनवस्थादेशनाभासा चेयम्। प्रतिदृष्टान्तसमः प्रत्येतव्यः प्रतिदृष्टान्तेन प्रत्यवस्थानात् प्रतिदृष्टान्तसमः१२ एतच्च सावधारणं तेन प्रतिदृष्टान्तमात्रबलेन प्रत्यवस्थानमर्थः तेन साधर्म्यसमाव्युदासः यदि घटदृष्टान्तबलेनानित्यः शब्दः तदाकाशदृष्टान्तबलेन नित्य एव स्यात् नित्यः किं न स्यादिति बाधः प्रतिरोधापादनीयः हेतुरनङ्गं दृष्टान्तसाम्यबलादेव साध्यसिद्धिरित्यभिमानः बाधप्रतिरोधान्यतरदेशनाभासा चेयम्" वृत्तिः।

"प्रदीपादानप्रसङ्गनिवृत्तिवत्तद्विनिवृत्तिः" सू०।

"प्रसङ्गसमे प्रत्युत्तरमाह। दृष्टान्तो हि निदर्शनस्थानत्वेन साध्यनिश्चयार्थमपेक्ष्यते न तु दृष्टान्तदृष्टान्ताद्यनवस्थितपरम्परा लोकसिद्धा युक्तिसिद्धा वा। अन्यथा घटादिप्रत्यक्षाय प्रदीप इव प्रादीपप्रत्ययार्थमनवस्थितप्रदीपपरम्परा प्रसज्येत त्वदीयसाधनमपि व्याहन्येत" वृत्तिः।

"प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः" सू०।

"प्रतिदृष्टान्तसमे प्रत्युत्तरमाह। अत्रायमुत्तरक्रमः प्रतिदृष्टान्तस्त्वया किमर्थमुपादीयते मदीयहेतोर्बाधार्थं सत्प्रतिपक्षितत्वार्थं वा नाद्यः यतः प्रतिदृष्टान्तस्य हेतुत्वे स्वार्थसाधकत्वे मदीयो दृष्टान्तो नाहेतुः नासाधकस्तथा चातुल्यबलत्वान्न बाधः न वा द्वितीयोऽपि यतः प्रतिदृष्टान्तस्य स्वार्थसाधकत्वे उच्यमाने नाहेतुर्दृष्टान्तः मदीयो दृष्टान्तस्तु सहेतुकत्वादधिकबलः वस्तुतो हेतुं विना दृष्टान्तमात्रेण न सत्प्रतिपक्षसम्भावना तदभावव्याप्यवत्ताज्ञानाभावात् हेतूपादाने तु सदुत्तरत्वमेवेति भावः इति" वृत्तिः।

"प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः" १२ सू०।

"क्रमप्राप्तमनुत्पत्तिसमं लक्षयति। प्रागुत्पत्तेरिति साधनाङ्गस्येति शेषः कारणाभावात् हेत्वभावात् तथा च साधनाङ्गपक्षहेतुदृष्टान्तानामुत्पत्तेः प्राक् हेत्वभाव इत्यनुत्पत्त्या प्रत्यवस्थानमनुत्पत्तिसमः१२ यथा घटो रूपवान् गन्धात् पटवदित्युक्ते घटोत्पत्तेर्गन्धोत्पत्तेश्च पूर्वं हेत्वभावादसिद्धिः पटे च गन्धोत्पत्तेः पूर्वं हेत्वभावेन दृष्टान्तासिद्धिः एवं आद्यक्षणे रूपाभावाद्बाधश्च अनुत्पत्त्या प्रत्यवस्थानस्य तत्रापि सत्त्वात् उत्पत्तेः पूर्वं हेत्वाद्यभावेन प्रत्यवस्थानस्यैव लक्षणत्वात् जातित्वे सतीति च विशेषणीयं तेनोत्पत्तिकालावच्छिन्नो घटो गन्धवानित्यत्र बाधेन प्रत्यवस्थाने नातिव्याप्तिः असिद्ध्यादिदेशनाभासा चेयम्" वृत्तिः।

"तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः" सू०

"अत्रोत्तरमाह। उत्पन्नस्य तथाभावात् घटाद्यात्मकत्वात् तत्र कारणस्य हेतोरुपपत्तेः सत्त्वात् कथं कारणप्रतिषेधः। अयमाशयः पक्षे हेत्वभावाऽसिद्धिः नत्वनुत्पन्ने हेत्वभावः सम्भवति अधिकरणाभावात् न हि हेत्वभावमात्रासिद्धिः त्वदीयहेतोरपि क्वचिदभावसत्त्वात् एतेन दृष्टान्तासिद्धिर्व्याख्याता यदा कदाचिद्धेतुसत्त्वेनैव दृष्टान्तत्वोपपत्तेः एवं हेत्वादीनां यदा कदाचित्पक्षे सत्त्वादेव हेत्वादिभावो न तु सार्वत्रिकी तदपेक्षेति" वृत्तिः।

"सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः" १४ सू०।

"क्रमप्राप्तं संशयसमं लक्षयति। नित्यानित्यसाधर्म्यादिति संशयकारणोपलक्षणं तेन समानधर्मदर्शनादियत्किञ्चित्संशयकारणबलात् संशयेन प्रत्यवस्थानं संशयसमः१४ अधिकन्तूदाहरणपरं तथा हि शब्दोऽनित्यः कार्य्यत्वाद्घटवदित्युक्ते सामान्ये गोत्वादौ दृष्टान्ते घटे ऐन्द्रियकत्वं तुल्यं यथा कार्य्यत्वान्निर्णायकादनित्यत्वं निर्णीयते तथा ऐन्द्रियकत्वात् संशयकारणादनित्यत्वं सन्दिह्यताम् एवं शब्दत्वाद्यसाधर्म्यदर्शनादपि संशयो बोध्यः तथा च हेतुज्ञानेऽप्रामाण्यशङ्काधानद्वारा साध्यसंशयात् सत्प्रतिपक्षदेशनाभासेयम्" वृत्तिः।

"साधर्म्यात् संशये न संशयो वैधर्म्यादुभयथा वा संशयोऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्या-

प्रतिषेधः” गौतमसूत्रस्य पञ्चमाध्याये आह्निकस्यसूत्रम् ।

“अत्रोत्तरम् । साधर्म्यात्साधर्म्यदर्शनात् संशय आपाद्यमानेऽपि न संशयो वैधर्म्याद्वैधर्म्यदर्शनात् यदि च कार्य्यत्वरूपविशेषदर्शनेऽपि संशयस्तदाऽत्यन्तसंशयप्रसङ्गः संशयानुच्छेदप्रसङ्गः न च तथाऽभ्युपगन्तुं शक्यमित्याह नित्यत्वेति समान्यस्य सामानधर्मदर्शनस्य नित्यत्वानभ्युपगमात् नित्यसंशयजनकत्वानभ्युपगमात्तथा सति त्वदीयहेतुरपि न परपक्षप्रतिषेधकः स्यादिति भावः । सामान्यस्य गोत्वादेर्नित्यत्वानभ्युपगमात् नित्यत्वानभ्युपगमप्रसङ्गात् तत्रापि साधारणधर्मप्रमेयत्वादिना संशय एव स्यादिति केचित्” वृत्तिः ।

“उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः १५” सू० ।

“क्रमप्राप्तं प्रकरणसमं लक्षयति । उभयसाधर्म्यात् प्रकर्षेण क्रिया अन्वयसहचाराद्व्यतिरेकसहचाराद्वा प्रक्रिया तत्साधनं विपरीतसाधनमिति फलितार्थः तत्सिद्धेस्तस्य पूर्वमेव सिद्धेः तथाचाधिकबलत्वेनारोपितप्रमाणान्तरेण बाधेन प्रत्यवस्थानं प्रकरणसमः १५ यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते नैतदेवं श्रावणत्वेन नित्यत्वसाधकेन बाधात् बाधदेशनाभासा चेयम्” वृत्तिः ।

“प्रतिपक्षात् प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः” सू०।

“अत्रोत्तरमाह । प्रतिपक्षाद्विपरीतसाध्यसाधकत्वेनाभिमताच्छ्रावणत्वादितः प्रकरणसिद्धिद्वारा मदीयसाध्यस्य यः प्रतिषेधः त्वया क्रियते तस्यानुपपत्तिः कुतः प्रतिपक्षोपपत्तेः त्वत्पक्षापेक्षया प्रतिपक्षस्य मदीयपक्षस्योपपत्तेः साधनात् । अयमाशयः श्रावणत्वेन पूर्वं नित्यत्वस्य साधनाद्यो बाध उच्यते स नोपपद्यते पूर्वं साधितस्य बलवत्त्वाभावात् कदाचित्कृतकत्वेनानित्यत्वस्यापि पूर्वं साधनादिति त्वत्पक्षप्रतिषेधोऽपि स्यात्” वृत्तिः ।

“त्रैकाल्यासिद्धेर्हेतोरहेतुसमः १६” सू० ।

“क्रमप्राप्तमहेतुसमं लक्षयति । त्रैकाल्यं कार्य्यकालतत्पूर्वापरकालाः तेन हेतोरसिद्धेः हेतुत्वासिद्धेः । अयमर्थः दण्डादिकं घटादेर्न पूर्ववर्त्तितया कारणं तदानीं घटादेरभावात् कस्य कारणं स्यात् अतएव न घटाद्युत्तरकालवर्त्तितयाऽपि नवा समानकालवर्त्तितया तुल्यकालवर्त्तिनोः सव्येतरविषाणयोरिवाविनिगमनापत्तेः तथा च कालसम्बन्धखण्डनेनाहेतुतया प्रत्यवस्थानमहेतुसमः १६ कारणमात्रखण्डनेन स्वमिहेतोरपि खण्डनान्न तदसंग्रहं प्रतिकूलतर्कदेशनाभासा चेयम्” वृत्तिः ।

“न हेतुतः साध्यसिद्धेस्त्रैकाल्यासिद्धिः” सू० ।

“अत्रोत्तरमाह । त्रैकाल्यासिद्धिस्त्रैकाल्येन याऽसिद्धिरुक्ता सा न, कुतः हेतुतः साध्यसिद्धेः त्वयाऽभ्युपगमात्” वृत्तिः ।

“प्रतिषेधानुपपत्तेः प्रतिषेद्धव्याप्रतिषेधः” सू० ।

“पूर्ववर्त्तितामात्रेणैव हेतुतासम्भवात् अन्यथा त्वदीयहेतोरपि साध्यं न सिध्येदित्याह हेतुफलभावखण्डने प्रतिषेधस्याप्यनुपपत्तेः प्रतिषेद्धव्यस्य परकीयहेतोर्न प्रतिषेध इत्यर्थः” वृत्तिः ।

“अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः १७” सू० ।

“क्रमप्राप्तमर्थापत्तिसमं लक्षयति । अर्थापत्तिरर्थापत्त्याभासः तथा चार्थापत्त्याभासेन प्रतिपक्षसाधनाय प्रत्यवस्थानमर्थापत्तिसमः १७ । अयमाशयः अर्थापत्तिर्हि उक्तेनानुक्तमाक्षिपति यथा शब्दोऽनित्य इत्युक्तेऽर्थादापाद्यतेऽन्यत् नित्यं तथा च दृष्टान्तासिद्धिः विरोधश्च कृतकत्वादनित्य इत्युक्तेऽर्थादापन्नम् अन्यस्माद्धेतोर्बाधः सत्प्रतिपक्षो वा अनुमानादनित्य इत्युक्ते प्रत्यक्षान्नित्य इति च बाधः विशेषविधेः शेषनिषेधफलकत्वमित्यभिमानः सर्वदेशनाभासा चेयम्” वृत्तिः ।

“अनुक्तस्यार्थापत्तेः पक्षहानेरुपपत्तिरनुक्तत्वादनैकान्तिकत्वाच्चार्थापत्तेः” सू० ।

“अत्रोत्तरम् । किमुक्तेन अनुक्तं यत्किञ्चिदेवार्थादापाद्यते उक्तोपपादकं वा आद्ये त्वत्पक्षहानिरप्यापाद्यतां त्वयानुक्तत्वात् अन्त्ये अस्या अर्थापत्तेरनैकान्तिकत्वम् ऐकान्तिकत्वम् एकपक्षसाधकत्वं बलं तन्नास्ति न हि अनित्य इत्यस्योपपादकं नित्यत्वमिति न हि विशेषविधिमात्रं शेषनिषेधफलकम्, अपि तु सति तात्पर्य्ये क्वचित् न हि नीलो घट इत्युक्ते सर्वमन्यदनीलमिति क्वचित्प्रतिपद्यते” वृत्तिः ।

“एकधर्म्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात् सद्भावोपपत्तेरविशेषसमः” १८ सू० ।

“अविशेषसमं लक्षयति । एकस्य धर्मस्य कृतकत्वादेः शब्दे घटे चोपपत्तेः सत्त्वात् यदि शब्दघटयोरनित्यत्वेनाविशेषः उच्यते तदा सर्वेषामविशेषप्रसङ्गः, कुतः सद्भावोपपत्तेः सतः सन्मात्रस्य ये भावाधर्माः सत्त्वप्रमे-

यत्वादयस्तेषामुपपत्तेः सत्त्वात् तथा च सर्वेषामभेदे पक्षाद्यविभागः सर्वेषामेकजातीयत्वेऽवान्तरजात्युच्छेदः सर्वेषामनित्यत्वे जात्यादिविलयइत्यादि तथा च सन्मात्रवृत्तिधर्मेणाविशेषापादनमविशेषसमेति १८ फलितम् अत्र चाविशेषसम इति लक्ष्यनिर्देशः सद्भावोपपत्तेः सर्वाविशेषप्रसङ्गादिति लक्षणं शेषं व्युत्पादकम्। प्रतिकूलतर्कदेशनाभासा चेयम्”वृत्तिः।

“क्वचिद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभावः” सू०

“अत्रोत्तरमाह। तद्धर्मस्तस्य हेतोर्धर्मोव्याप्त्यादिस्तस्य क्वचित् कृतकत्वादौ उपपत्तेः सत्त्वात् क्वचित्सत्त्वादौ अनुपपत्तेः अभावात् त्वदुक्तस्य प्रतिषेधस्याभावोऽसम्भव इत्यर्थः” वृत्तिः।

“उभयकारणोपपत्तेरुपपत्तिसमः” १९सू०।

“उपपत्तिसमं लक्षयति। उभयं पक्षप्रतिपक्षौ तयोः कारणस्य प्रमाणस्य उपपत्तेः सत्त्वात् तथा च व्याप्तिमपुरस्कृत्य यत्किञ्चिद्धर्मेण परपक्षदृष्टान्तेन स्वपक्षसाधनेन प्रत्यवस्थानम् उपपत्तिसमः१९ यथा शब्दोऽनित्यः कृतकत्वादित्युक्ते यथा त्वत्पक्षेऽनित्यत्वे प्रमाणमस्ति तथा मत्पक्षोऽपि सप्रमाणकः त्वत्पक्षमत्पक्षान्यतरत्वात् तथाच बाधः प्रतिरोधो वा। तद्देशनाभासा चेयम्”वृ०।

“उपपत्तिकारणाभ्यनुज्ञानादप्रतिषेधः” सू०।

अत्रोत्तरमाह। अयं त्वदुक्तप्रतिषेधो न सम्भवति कुतः मत्पक्षे उपपत्तिकारणस्य मत्पक्षसाधकप्रमाणस्य त्वयाऽभ्यनुज्ञानात् त्वया हि मत्पक्षस्य दृष्टान्तीकरणेन सप्रमाणकत्वमनुज्ञातमतः कथं तत्प्रतिषेधः शक्यते कर्त्तुम् अनुज्ञातस्यापि प्रतिषेधे स्वपक्ष एव किं न प्रतिषिध्यते” वृत्तिः।

“निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः”२०सू०।

“उपलब्धिसमं लक्षयति। वादिना निर्दिष्टस्य कारणस्य साधनस्याभावेऽपि साध्यस्योपलम्भात् प्रत्यवस्थानमनुपलब्धिसमः२० इत्यर्थः। तथा हि पर्वतो वह्निमान् धूमादित्यादिकं वह्न्यवधारणार्थमुच्यते न च तत्सम्भवति धूमं विना आलोकादितोऽपि वह्निसिद्धेः तथा च न तस्य साधकत्वमिति प्रतिकूलतर्कः न वा धूमाद्वह्निमानेवेत्यवधारणं द्रव्यत्वादेरपि धूमेन साधनात् न वा पर्वत एव वह्निमानेवेत्यादिकम् अवधारयितुं शक्यते महानसादेरपि वह्निमत्त्वादन्यथा दृष्टान्तासिद्धिः स्यात् एवं वह्निशून्यपर्वतस्यापि सत्त्वाद्बाध इत्यादि तद्देशनाभासा चेयम्” अस्य विश्वनाथविरचिता वृत्तिः।

“कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः” सू०।

“अत्रोत्तरमाह। कारणान्तरात् साधनान्तरादालोकादितोऽपि तस्य धर्मस्य साध्यस्योपलब्धेस्त्वदुक्तः प्रतिषेधो न सम्भवति। अयमाशयः न हि वयमवधारणार्थं वह्निमान् धूमादित्यादिकं प्रयुञ्ज्महे अपि तु सन्दिग्धस्य वह्नेः सिद्ध्यर्थम् अन्यथा त्वदुक्तमसाधकतासाधनमपि न स्यादसाधकतासाधकान्तरस्यापि सत्त्वात्” वृत्तिः।

“तदनुपलब्धेरनुपलम्भादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः २१”सू०।

“अनुपलब्धिसमं लक्षयति। यद्यपि चेयं द्वितीयाध्याये दर्शिता दूषिता च तथाप्यनुपलब्धिसमा२१जातिरेवमिति तत्रानुक्तेरत्र क्रमप्राप्तोऽभिधीयते तत्रायं क्रमः नैयायिकैस्तावच्छब्दा नित्यत्वमेव साध्यते यदि शब्दो नित्यः स्यादुच्चारणात् प्राक् कुतोनोपलभ्यते न हि घटाद्यावरणकुड्यादिवच्छब्दस्यावरणमस्ति तदनुपलब्धेरिति तत्रैवं जातिवादी प्रत्यवतिष्ठते यद्यावरणानुपलब्धेरावरणाभावः सिध्यति तदा आवरणानुपलब्धेरप्यनुपलम्भादावरणानुपलब्धेरप्यभावः सिध्येत् तथाचावरणानुपलब्धिप्रमाणक आवरणाभावो न स्यादपि त्वावरणोपपत्तिरेव स्यादिति शब्दनित्यत्वे नोक्तं बाधकं युक्तं नन्वनुपलब्धेरनुपलब्ध्यन्तरानपेक्षणात् कथमेवमिति चेत् इत्यम् अनुपलब्धेरनुपलब्ध्यन्तरानपेक्षणे स्वयमेव स्वस्मिन्ननुपलब्धिरूपेति वाच्यं तथा च तयैवानुपलब्ध्यानुपलब्धत्वसम्भवात्तदभावासिद्धेः स्वात्मन्यनुपलब्धिरूपत्वाभावेऽनुपलब्धित्वमेव न स्यात् अनुपलब्धेरनुपलब्ध्यन्तरापेक्षणेऽनवस्था स्पष्टैव इत्यञ्चैवंरूपेण प्रत्यवस्थानमनुपलब्धिसमः२१ इत्यर्थः प्रतिकूलतर्कदेशनाभासा चेयम्” वृत्तिः।

“अनुपलम्भात्मकत्वादनुपलब्धेरहेतुः” सू०।

“अत्रोत्तरमाह। अनुपलब्धिः आत्मन्यनुपलब्धिरिति कोऽर्थः स्वयमनुपलब्धिरूपेति चेद्भवत्येव स्वविषयिणा-नुपलब्धिरिति चेन्नेदं प्रसक्तं अनुपलब्धेरनुपलम्भात्मकत्वात् उपलम्भाभावात्मकत्वात् अभावस्य च निर्विषयकत्वात् स्वात्मन्यनुपलब्धित्वाभावेऽनुपलब्धित्वमेव कथमस्या इति चेत् कुतो विरोधः नहि घटः स्वविषयो न भवतीति नायं घटः स्वविषयो न भवतीति। नायं घटः आवरणाभावः कथमनुपलब्धिविषय इति चेत् क एव-

माह किन्त्वनुपलब्धिग्रहकतेन्द्रियग्राह्यत्वादनुपलब्धिग्राह्य इत्युपचर्य्यते अतस्तदनुपलब्धेरनुपलम्भादित्यादिकमहेतुः अन्यथा, त्वत्साधनमपि दोषानुपलब्धेरनुपलम्भात् सदोषमेव स्यादिति” वृत्तिः।

“ज्ञानविकल्पानाञ्च भावाभावसंवेदनादध्यात्मम्” सू०।

“नन्वुपलब्धेः स्वस्मिन्ननुपलब्धित्वाभावेऽनुपलब्धिरपि केन सिध्येदत आह अध्यात्मम् आत्मन्यधि ज्ञानविकल्पानां ज्ञानविशेषाणां भावाभावयोर्मनसा संवेदनात् घटं साक्षात्करोमि वह्निमनुमिनोमि नानुमिनोमीत्येवं ज्ञानविशेषतदभावानां मनसैव सुग्रहत्वादिति भावः” वृत्तिः।

“साधर्म्यात्तुल्यधर्म्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः २२” सू०

“अनित्यसमं लक्षयति। यदि दृष्टान्तघटसाधर्म्यात् कृतकत्वात्तेन सह तुल्यधर्मतोपपद्यते शब्देऽनित्यत्वं साध्यते तदा सर्वस्यैवानित्यत्वं स्यात् सत्त्वादिरूपसाधर्म्यसम्भवात् नचेदमर्थान्तरग्रस्तमिति वाच्यं सर्वस्यानित्यत्वे व्यतिरेकाग्रहादनुमानदूषणे तात्पर्य्यात् परस्यान्वयव्यतिरेकिण एवानुमानत्वादित्याशयः तथा च व्याप्तिमपुरस्कृत्य यत्किञ्चिद्दृष्टान्तसाधर्म्येण सर्वस्य साध्यवत्त्वापादनमनित्यसमा २२ साध्यभेदादविशेषसमातोव्यवच्छेदस्तत्र सर्वाविशेष एवापाद्यते नतु सर्वस्य साध्यवत्त्वम्। यत्तु अनित्यत्वेन समाऽनित्यसमेति भावप्रधानो निर्द्देशस्तथा च अन्वर्थलब्धमेव लक्षणमिति तन्न वह्निमान् धूमादित्यादौ महानससाधर्म्यस्य सत्त्वात्सर्वस्य वह्निमत्त्वं स्यादित्यस्य जात्यन्तरत्वापत्तेः। आचार्य्यास्तु साधर्म्यं वैधर्म्यस्याप्युपलक्षकं यथाकाशवैधर्म्यात् कृतकत्वाच्छब्दोऽनित्यस्तथाकाशवैधर्म्यादाकाशभिन्नत्वादितः सर्वमेवानित्यं स्यादित्यञ्च लक्षणे यत्किञ्चिद्धर्मेणेत्येव वाच्यमित्याहुः। अत्र च वैधर्म्यस्य विपक्षावृत्तित्वान्न सर्वस्य साध्यवत्त्वापादनं किन्त्वात्मादीनामप्यनित्यत्वं स्यादिति तत्र चार्थान्तरमित्यवधेयं प्रतिकूलतर्कदेशनाभासा चेयम्” वृत्तिः।

“साधर्म्यादसिद्धे प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्याच्च” सू०

“अत्रोत्तरमाह। यदि यत्किञ्चित्साधर्म्यात्सर्वस्य साध्यवत्तामापादयतस्तव साधर्म्यस्यासाधकत्वमभिमतं तदा त्वत्कृतप्रतिषेधस्याप्यसिद्धिः तस्यापि प्रतिषेध्यसाधर्म्येण प्रवृत्तत्वात्त्वया ह्येवं साध्यते कृतकत्वं न साधकं दृष्टान्तसाधर्म्यरूपत्वात्सत्त्वादिवत् अत्र च त्वदीयहेतुस्त्वत्प्रतिषेध्येन मदीयहेतुना कृतकत्वेन सत्त्वेन च सह साधर्म्यरूपस्तथा चायमपि न साधकः स्यात्” वृत्तिः।

“दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य हेतुत्वात्तस्य चोभयथाभावान्नाविशेषः” सू०

“यदि च साधर्म्यमात्रं न साधकमपि तु व्याप्तिसहितमित्यभिमतं तदा कृतकत्वे तदस्ति नतु सत्त्व इति विशेष इत्याह। साध्यसाधनभावेन व्याप्यव्यापकभावेन दृष्टान्ते प्रज्ञातस्य प्रमितस्य तस्य हेतुत्वात् साधकत्वात् तत्र हेतुत्वस्य उभयथा अन्वयेन व्यतिरेकेण च भावात् मदीयहेतौ सत्त्वात्साधने सत्त्वादिति नाऽविशेष इति यदुक्तं तन्न भवति” वृत्तिः।

“नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः २३” सू०

“नित्यसमं लक्षयति। अनित्यस्य भावः अनित्यत्वं तस्य नित्यं सर्वकालं स्वीकारे अनित्ये शब्दे नित्यत्वं स्यादित्यापादनं नित्यसमा २३। अयमाशयः अनित्यत्वस्य नित्यमस्वीकारेऽनित्यत्वाभावदशायां तस्यानित्यत्वं न, तस्यापि नित्यत्वापत्तिः नहि दण्डाभावदशायां दण्डीत्युच्यते अतोऽनित्यत्वस्य नित्यमेव स्वीकार इत्यभ्युपगन्तव्यं तथा च शब्दस्यापि नित्यत्वापत्तिः तेन बाधः सत्प्रतिपक्षो वा तद्देशनाभासा चेयम्। एवमनित्यत्वं यदि नित्यं कथं शब्दस्यानित्यतां कुर्यात् नहि रक्तं महारजनं परस्य नीलतां सम्पादयति अथाऽनित्यं तदा तदभावदशायां अनित्यत्वं न स्यादित्यादिकमूह्यम्। एतदनुसारेण लक्षणमपि कार्य्यमित्याचार्य्याः। वयन्तु अनित्यस्य भावो धर्मस्तस्य नित्यमभ्युपगमेऽनित्यत्वेनाभ्युपगतस्य नित्यत्वं स्यात् यथा क्षितिः सकर्तृकेत्यत्र अनित्यक्षितेर्धर्मः सकर्तृकत्वं त्वया क्षितौ नित्यमुपेयते न वा न चेत् तदा साध्याभावादंशतोबाधः अथ क्षितौ नित्यमेव सकर्तृकत्वं विरुद्धं तद्देशनाभासा चेयमिति ब्रूमः” वृत्तिः।

“प्रतिषेध्ये नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेः प्रतिषेधाभावः” सू०

“अत्रोत्तरमाह। प्रतिषेध्ये मत्पक्षे शब्दे सर्वदा अनित्यभावात् अनित्यत्वात् अनित्ये शब्दे अनित्यत्वमुपपद्यते न हि सम्भवति अनित्यत्वं नित्यमस्ति अथ च तन्नित्यमिति व्याघातात् नच नित्यमिति सर्वकालमित्यर्थः तथा च शब्दस्यानित्यत्वे कथं सर्वकालमनित्यत्वसम्बन्ध

इति वाच्यं सर्वकालमित्यस्य यावत्सत्त्वमित्यर्थात् अतः त्वत्कृतः प्रतिषेधो न सम्भवति मतान्तरे तु अनित्येऽनित्यत्वोपपन्ने हेतोस्त्वपायः प्रतिषेधः कृतः स च सम्भवतीत्यर्थः'' वृत्तिः ।

"प्रयत्नकार्य्यानेकत्वात् कार्य्यसमः२४" सू० ।

''कार्य्यसमं लक्षयति । प्रयत्नकार्य्यस्य प्रयत्नसम्पादनीयस्यानेकत्वात् अनेकविषयत्वात् । अयमर्थः शब्दोऽनित्यः प्रयत्नानन्तरीयकत्वादित्युक्ते प्रयत्नानन्तरीयकत्वं प्रयत्नकार्ये घटादौ प्रयत्नानन्तरोपलभ्यमाने कीलकादावपि दृष्टन्तत्र द्वितीयं न तज्जन्यत्वसाधकं आद्ये तु असिद्धं तथा च सामान्यत उक्ते हेतोरनभिमतविशिष्टनिराकरणेन प्रत्यवस्थानं कार्य्यसमा२४ असिद्धदेशनाभासा चेयम् । अथ वा प्रयत्नकार्य्याणां प्रयत्नकर्त्तव्यानां कर्त्तव्यप्रयत्नानामिति यावत् तादृशानां अनेकविधत्वात् युक्तान्यस्य व्याघातकमुत्तरं कार्य्यसमा तथा चास्या आकृतिगणत्वात् सूत्रानुपदर्शितानामपि परिग्रहः यथा त्वत्पक्षे किञ्चिद्दूषणं भविष्यतीति शङ्काऽपि शङ्कासमा कार्य्यकारणभावस्योपकारनियतत्वेऽनवस्थेत्यनुपकारसमा इत्यादिः'' वृत्तिः ।

''कार्य्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः'' सू० ।

''अत्रोत्तरम् । शब्दस्य कार्य्यान्यत्वेऽकार्य्यत्वे प्रयत्नस्य वक्तृप्रयत्नस्य अहेतुत्वम् अकारणत्वम् इदञ्च तदा स्यात् यद्यनुपलब्धिकारणमावरणादिकमुपपद्यते न च तच्छब्देऽस्तीत्यर्थः । आकृतिगणपक्षे तु कार्य्याणां जातीनामन्यत्वे नानाविधत्वे इदमुत्तरं प्रयत्नस्य त्वदीयदूषणप्रयत्नस्य अहेतुत्वं असाधकत्वाभावः उपलब्धेः कारणस्य प्रमाणस्य निर्दोषवाक्यस्य या उपपत्तिः निर्दोषवाक्याधीनोपपादनं तदभावात् तद्वाक्यस्य स्वव्याघातकत्वादित्यर्थः'' वृत्तिः ।

१४स्वभावे जातिवैरम् जातिसुन्दरम् । जातिश्च प्रकारविशेष्यतया वा शब्दशक्तिज्ञानविषयः । तत्र प्राभाकरमते आकृतिव्यङ्ग्याया एव जातित्वं न गुणत्वादीनां नैयायिकमते तु अनुगतैकबुद्धिनियामकत्वात् नित्यत्वे सति अनेकसमवेतत्वरूपलक्षणयोगाच्च गुणत्वादीनामपि जातित्वमस्त्येव । ''समानप्रसवात्मिका जाति गौ०सूत्रभाष्ययोस्तथैवोक्तेश्च । जातिशक्तिवादशब्दे च तद्बाधग्रं द्रष्टव्यम् । अतएव ''द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते । परभिन्ना तु या जातिः सैवापरतयोच्यते । द्रव्यत्वादिकजातिस्तु परापरतयोच्यते'' भाषायामुक्तम् । छन्दोभेदश्च । "पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा । वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत्" छन्दोमञ्जर्य्युक्तेः मात्राकृतं छन्दः । "इयमच्युतलीलाढ्या सद्वृत्ता जातिशालिनी" छन्दोम० । दृष्टजातिशेषजातिविशेषजातिप्रभृतयश्च प्राचीनानामिष्टकर्मसंज्ञाभेदा लीलावत्यादौ इष्टकर्मप्रकरणे दृश्याः । "सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च" काव्यप्र० । ''असम्पादयतः कञ्चिदर्थं जातिक्रियागुणैः'' माघः । ब्राह्मणादिजातौ ''जात्या कामभवध्योऽसि चरणं त्विदमुद्धृतम्'' वेणीसं० "ब्राह्मणस्य ब्राह्मणयोर्ब्राह्मणानाञ्च संबधे । प्रायश्चित्तस्य चैकत्वं जातिश्चाश्रित्य लक्ष्यते'' प्रा०त० । जन्मनि "आचार्य्यस्त्वस्य यां जातिं विधिवद्वेदपारगः । उत्पादयति सावित्र्या सा नित्या साऽजराऽमरा:" मनुः । आकारव्यङ्ग्ये "सूक्ष्मं मणिसूत्रायःकाष्ठवल्कलवाससाम् । अजातौ जातिकरणे विक्रेयाष्टगुणो दमः" याज्ञ० । १५जातिवाचकशब्दे च "पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्वष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्त्तैर्जातिः" "कृत्यतुल्याख्या अजात्या" "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्"(ब्राह्मणाः पूज्याः ब्राह्मणः पूज्यः) ''जातेरस्त्रीविषयादयोपधात्" इति च पा० ।

जातिकोश(ष) पु० न० जातेः जातीफलस्य कोशमिव । (जायफल) जातीफले भावप्र० ''जातीफलं जातिकोशः मालतीफलमित्यपि । जातिफलं रसे तिक्तं तीक्ष्णोष्णं रोचनं लघु । कटुकं दीपनं ग्राहि स्वर्यं श्लेष्मानिलापहम् । निहन्ति मुखवैरस्यमलदौर्गन्ध्यकृष्णताः । कृमिकासवमिश्वासशोषपीनसहृद्रुजः'' भावप्र० । हेमचन्द्रे अयं मूर्द्धन्यवान् दीर्घमध्यश्च पठितः ।

जाति(ती)कोषी स्त्री जातिं जातिफलं कुष्णाति कुष–निष्कर्षे–अण् उप०स०गौरा० ङीष् । जातीफले राजनि० ।

जातिधर्म्म पु० ६त० । ब्राह्मणादीनां धर्मभेदे । स च भा० शा० ६० अ० दर्शितो यथा

"ब्राह्मणस्य तु यो धर्मस्तन्ते वक्ष्यामि केवलम् । दममेव महाराज ! धर्ममाहुः पुरातनम् । स्वाध्यायाभ्यसनञ्चैव तत्र कर्म समाप्यते । तञ्चेद्वित्तमुपागच्छेद्वर्त्तमानं स्वकर्मणि । अकुर्व्वाणं विकर्म्माणि शान्तं प्रज्ञानतर्पितम् । कुर्व्वीतापत्यसन्तानमथो दद्याद्यजेत च । संविभज्य हि भोक्तव्यं धनं सद्भिरितीर्य्यते । परिनिष्ठितकार्य्यस्तु

स्वाध्यायेनैव ब्राह्मणः। कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो ब्राह्मण उच्यते। क्षत्त्रियस्यापि यो धर्मस्तन्ते वक्ष्यामि भारत!। दद्याद्राजन्न याचेत यजेत न च याजयेत्। नाध्यापयेदधीयीत प्रजाश्च परिपालयेत्। नित्योद्युक्तो दस्युबधे रणे कुर्य्यात् पराक्रमम्। ये तु क्रतुभिरीजानाः श्रुतवन्तश्च भूमिपाः। य एवाहवजेतारस्त एषां लोकजित्तमाः। अविक्षतेन देहेन समराद्यो निवर्त्तते। क्षत्त्रियो नास्य तत् कर्म प्रशंसन्ति पुराविदः। एवं हि क्षत्त्रबन्धूनां मार्गमाहुः प्रधानतः। नास्य कृत्यतमं किञ्चिदन्यद्दस्युनिवर्हणात्। दानमध्ययनं यज्ञो राज्ञां क्षेमं विधीयते। तस्माद्राज्ञा विशेषेण योद्धव्यं धर्ममीप्सता। स्वेषु धर्म्मेष्ववस्थाप्य प्रजाः सर्व्वा महीपतिः। धर्मेण सर्वकृत्यानि शमनिष्ठानि कारयेत्। परिनिष्ठितकार्य्यस्तु नृपतिः परिपालनात्। कुर्य्यादन्यन्न वा कुर्य्यादैन्द्रो राजन्य उच्यते। वैश्यस्यापि हि यो धर्मस्तन्ते वक्ष्यामि शाश्वतम्। दानमध्ययनं यज्ञः शौचेन धनसञ्चयः। पितृवत् पालयेद्वैश्यो युक्तः सर्व्वान् पशूनिह। विकर्म तद्भवेदन्यत् कर्म यत् स समाचरेत्। रक्षया स हि तेषां वै महत् सुखमवाप्नुयात्। प्रजापतिर्हि वैश्याय सृष्ट्वा परिददौ पशून्। ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः। तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम्। षण्णामेकां पिबेद्धेनुं शताच्च मिथुनं हरेत्। लब्धाच्च सप्तमं भागं तथाऽशृङ्गे कलाऽखुरे। शस्यानि सर्ववीजानामेषा सांवत्सरी भृतिः। न च वैश्यस्य कामः स्यान्न रक्षेयं पशूनिति। वैश्ये चेच्छति नान्येन रक्षितव्याः कथञ्चन। शूद्रस्यापि हि यो धर्मस्तन्ते वक्ष्यामि भारत!। प्रजापतिर्हि वर्णानां दासं शूद्रमकल्पयत्। तस्माच्छूद्रस्य वर्णानां परिचर्य्या विधीयते। तेषां शुश्रूषणाच्चैव महत् सुखमवाप्नुयात्। शूद्र एतान् परिचरेत्त्रीन् वर्णाननुपूर्वशः। सञ्चयांश्च न कुर्व्वीत जातु शूद्रः कथञ्चन। पापीयान् हि धनं लब्ध्वा वशे कुर्य्याद्गरीयसः। राज्ञा वा समनुज्ञातः कामं कुर्वीत धार्मिकः। तस्य वृत्तिं प्रवक्ष्यामि यच्च तस्योपजीवनम्। अवश्यभरणीयो हि वर्णानां शूद्र उच्यते। छत्रं वेष्टनमौशीरमुपानद्व्यजनानि च। यातयामानि देयानि शूद्राय परिचारिणे। अधार्य्याणि विशीर्णानि वसनानि द्विजातिभिः। शूद्रायैव प्रदेयानि तस्य धर्मधनं हि तत्। यश्च किञ्चिद्द्विजातीनां शूद्रः शुश्रूषुराव्रजेत्। कल्प्यां तस्य तु तेनाहुर्वृत्तिं धर्मविदो जनाः। देयः पिण्डोऽनपत्याय भर्त्तव्यौ वृद्धदुर्वलौ। शूद्रेण तु न हातव्यो भर्त्ता कस्याञ्चिदापदि। अतिरेकेण भर्त्तव्यो भर्त्ता द्रव्यपरिक्षये। न हि स्वमस्ति शूद्रस्य भर्तृहार्य्यधनो हि सः। उक्तस्त्रयाणां वर्णानां यज्ञस्तस्य च भारत!। स्वाहाकारवषट्कारौ मन्त्रः शूद्रे न विद्यते। तस्माच्छूद्रः पाकयज्ञैर्यजेताव्रतवान् स्वयम्। पूर्णपात्रमयीमाहुः पाकयज्ञस्य दक्षिणाम्। शूद्रः पैजवनो नाम सहस्राणां शतं ददौ। ऐन्द्राग्न्येन विधानेन दक्षिणामिति नः श्रुतम्। यथा हि सर्ववर्णानां यज्ञस्तस्यैव भारत!। अग्र्यः सर्वेषु यज्ञेषु श्रद्धायज्ञो विधीयते। दैवतं हि महच्छ्रद्धा पवित्रं यजताञ्च यत्। दैवतं हि परं विप्राः स्वेन स्वेन परस्परम्। अयजन्निह सत्रैस्ते तैस्तैः कामैः समाहितैः। संसृष्टा ब्राह्मणैरेव त्रिषु वर्णेषु सृष्टयः। देवानामपि ये देवा यद्ब्रुयुस्ते परं हितम्। तस्माद्वर्णैः सर्वयज्ञाः संसृज्यन्ते न काम्यया। ऋग्यजुःसामवित्पूज्यो नित्यं स्याद्देववद्द्विजः।"

सङ्कीर्णजातिधर्म्मास्तु मन्वाद्युक्तो जातिशब्दे दर्शितः "उत्साद्यन्ते जातिधर्म्माः कुलधर्म्माश्च शाश्वताः" गीता।

जाति(ती)पत्री स्त्री जातेः(त्याः) जातीफलस्य पत्री गौरा॰ ङीष्। (जायत्री) ख्याते गन्धद्रव्यभेदे "जातीफलस्य त्वक् प्रोक्ता जाति(ती) पत्री भिषग् वरैः। जाति(ती) पत्री लघुः स्वादुः कटूष्णा रुचिवर्णकृत्। कफकासवमिश्वासतृष्णाकृमिविषापहा" भावप्र॰।

जाति(ती)फल न॰ जातिः(ती) तन्नामकं फलं, ६त॰ वा। (जायफल) गन्धद्रव्यभेदे हेमच॰।

जातिबाधक त्रि॰ ६त॰। जातेर्बाधके प्राचीननैयायिकोक्ते व्यक्तेरभेदादौ स च जातिशब्दे दर्शितः।

जातिब्राह्मण पु॰ जात्या जन्मना ब्राह्मणः। तपःस्वाध्यायरहिते ब्राह्मणे। "तपः श्रुतञ्च योनिश्च त्रयं ब्राह्मण्यकारणम्। तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः" शब्दार्थचि॰ धृतवाक्यम्।

जातिभ्रंश न॰ पापभेदे। तत्स्वरूपप्रायश्चित्ते मनुनोक्ते प्रा॰ वि॰ व्यवस्थापिते च यथा।

"तत्र मनुः 'ब्राह्मणस्य रुजः कृत्या घ्रातिरघ्रेयमद्ययोः। जैह्म्यञ्च मैथुनं पुंसि जातिभ्रंशकरं स्मृतम्'।" "जातिभ्रंशकरं कर्म्म कृत्वान्यतममिच्छया। चरेत् सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छया"। रुजः कृत्या पीड़ाकरणम्। घ्रेयं

लशुनादि जैह्म्यमिति कुटिलत्वं पुंसि मैथुनं पुरुषे ग्राम्यधर्मकरणम्। अत्र कामतः सान्तपनं तत्र धेनुद्वयम्। अकामतः प्राजापत्यं तत्र धेनुरेका। एतच्चाभ्यासे बोद्धव्यम्। रुजः कृत्वेत्यत्र विशेषमाह मनुः "अवगुर्य चरेत् कृच्छ्रमतिकृच्छ्रं निपातने। कृच्छ्रातिकृच्छ्रं कुर्वीत विप्रस्योत्पाद्य शोणितम्"। तथा याज्ञवल्क्यः "विप्रदण्डोद्यमे कृच्छ्रमतिकृच्छ्रं निपातने। कृच्छ्रातिकृच्छ्रोऽसृक्पाते कार्य्योऽभ्यन्तरशोणिते"। अत्र दण्डशब्दः शस्त्रमपि लक्षयति। अतिकृच्छ्रे धेनुत्रयं कृच्छ्रातिकृच्छ्रे धेनुपञ्चकम्। यमः "कृच्छ्रातिकृच्छ्रं कुर्वीत चान्द्रायणमथाचरेत्। दश संख्याश्च गा दद्यादङ्गच्छेदो यदा भवेत्"। अत्र द्विजाङ्गच्छेदे व्रतद्वयस्य गोदानानाञ्च समुच्चयः। विशेषमाह बृहस्पतिः, "काष्ठादिना ताड़यित्वा त्वग्भेदे कृच्छ्रमाचरेत्। अस्थिभेदेऽतिकृच्छ्रन्तु पराकं चाङ्गकर्त्तने"।

जातिमात्र न० जातिरेव जाति+एवार्थे मात्रच्। स्वाध्यायादिहीने जन्ममात्रे "जातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित्" हितो०। "जातिमात्रोपजीवी वा कामं स्यात् ब्राह्मणब्रुवः"। "अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम्। नैषां प्रतिग्रहो देयो न शिला तारयेच्छिलाम्" मनुः।

जातिमाला जातिविशेषज्ञापके ग्रन्थभेदे।

जातिवैर न० जात्या स्वभावेन वैरम्। स्वभाववैरे यथा अहिनकुलयोः उपयमशब्दे योनिकूटप्रकरणे १२५० पृ० दृश्यम्।

जातिशक्तिवाद पु० जातौ शक्तेर्वादः। शब्दानां जातौ शक्तिसमर्थके कथाभेदे स च वादः शब्दशक्तिप्र० पूर्वपक्षविधया दर्शितो यथा

"ननु गामानयेत्यादौ गोत्वादिकर्मताकत्वेनैवानयनादेरन्वयधीर्गोत्वादिशक्तत्वेन पदज्ञानस्य गोत्वाद्यन्वयबुद्धिं प्रत्येव हेतुत्वात् सुवर्थकर्मत्वादौ स्वाश्रयवृत्तित्वसम्बन्धेनैव प्रकृत्यर्थस्य गोत्वादेः साकाङ्क्षत्वात् गवादिकर्मताकत्वेन बोधस्तूत्तरकालमाक्षेपात् कर्मत्वं गोवृत्ति गोत्वनिष्ठकर्मतात्वात्, आनयनं गोवृत्तिकर्मताकं गोत्ववृत्तिकर्मताकत्वादित्याद्यनुमानसाम्राज्यात्। न च वस्तुगत्या यद्गोत्वशक्तत्वं तज्ज्ञानस्य हेतुत्वे गोपदं जातिशक्तमित्येवंग्रहादपि शुद्धगोत्वस्यान्वयबोधापत्तिः गोत्वत्वावच्छिन्नशक्तत्वप्रकारकज्ञानत्वेन तथात्वे च लाघवाद्गोत्वावच्छिन्नशक्तताप्रकारकज्ञानत्वेनैव हेतुत्वं गोत्वत्वाद्यप्रवेशादिति वाच्यं गोपदं गोत्वशक्तमित्याकारकज्ञानत्वेन हेतुतायां शुद्धस्यैव गोत्वस्य विषयतासम्बन्धेन शक्त्यंशे विशेषणत्वेन गोत्वत्वादिप्रवेशगौरवस्यायोगात्। न हि समवायान्यसम्बन्धेन जातेः प्रकारतायां धर्म्मावच्छिन्नत्वनियमो मानाभावात् अयं गौरित्यादिव्यवसायोत्तरमिमं गोत्वेन जानामीत्याकारे तस्य ज्ञाततालिङ्गकानुमानेऽनुव्यवसाये वा व्यभिचाराच्च प्रागनुपस्थित्या गोत्वत्वादेस्तत्रोपनयायोगात्। एतेन जातेर्निरवच्छिन्नप्रकारत्वस्य समवायसंसर्गावच्छिन्नत्वनियमात् केवलस्य गोत्वादेः शक्त्यंशे विषयतया सुवर्थकर्मत्वांशे च परम्परया प्रकारत्वायोग इत्यपि प्रत्युक्तम्, उक्तस्थल एव व्यभिचारात्। न चैवं कालोगौः पदं गौरित्यादिप्रत्ययोऽपि प्रमा स्यात् कालिकादिसम्बन्धेन गोत्वादिमति तत्प्रकारकत्वादिति वाच्यं कालिकादिसम्बन्धेन गोत्वादेः प्रामाण्यस्य गोत्वत्वाद्यवच्छिन्नप्रकारतागर्भत्वेन तादृशमतेः प्रमात्वायोगात् अन्यथा घटत्वादिजातेः संस्थानसमवेतत्वमते संयोगो घट इत्यादिप्रतीतेः समवायेन प्रमात्वस्य दुर्वारतापत्तेः शाब्दस्येव प्रत्यक्षस्यापि कालोगौरित्यादिबोधस्य नियमतोगवाद्यभेदावगाहित्वेनैवाप्रमात्वसम्भवाच्चेति भट्टमतानुवर्त्तिनः।"

जातिशक्तिवादिप्रभाकरमतं च तत्रैवोक्तं यथा

"प्राभाकरास्तु गोत्वशक्तत्वेन ज्ञातं पदं तादूप्येण गोशाब्दत्वावच्छिन्नं प्रत्येव हेतुरतोगोत्वशक्तिग्रहाच्च गोत्वेन गवयादेः न वा द्रव्यत्वादिना गोरन्वयधियोऽतिप्रसङ्गः। नचैवं जातेरिव व्यक्तेरपि शक्यत्वमावश्यकं न हि गवादिपदस्य शक्यत्वं जन्यत्वमपि तु जन्यशाब्दधीविषयत्वं तच्च गोत्वस्येव गोरप्यविशिष्टमिति वाच्यं गवादिपदधर्मिकस्वशक्तताज्ञानत्वावच्छिन्नशाब्दधीजनकतावच्छेदकत्वेन गोत्वादेरेव गवादिपदशक्यत्वात् गोत्वशक्ततापेक्षया गोशक्तत्वस्य गुरुतया तज्ज्ञानत्वस्य गोशाब्दं प्रति जनकतानवच्छेदकत्वात्। अतएवान्वयबुद्धेरात्मत्वाद्यवगाहित्वेऽपि न तेषां पदशक्यत्वम्। अस्तु वा गोत्वादिशक्तत्वेन ज्ञातं पदं गोत्वादिशाब्दत्वावच्छिन्नं प्रत्येव हेतुर्विशेष्यतया तादृशशाब्दं प्रति समवायेन गोत्वस्य नियामकत्वकल्पनाच्च नातिप्रसङ्गः गोत्वादिना गवादेरिव गवादेर्गोत्वादिनान्वयबोधत्वावच्छिन्नं प्रत्यपि विनिगमकाभावेन गोत्वादिशक्तिज्ञानत्वेन हेतुत्वमपेक्ष्य गोत्वशाब्दत्वावच्छिन्नं प्रत्येव गोत्वस्य तच्छक्तत्वज्ञानस्य च द्वयोः कारणतायामेव लाघवात्, वस्तुतोगोत्वशाब्दं प्रति गोत्वशक्तिज्ञानमेव हेतुर्न तु गोत्वमपि जातिव्यक्त्योस्तुल्य-

वित्तिवेद्यत्वनियमादेव गोव्यक्तीनामन्तद्विषयत्वसिद्धेः प्रमाणविरहादेव गोत्वादिना गवयादिविषयत्वस्य तत्रासिद्धेश्च । यद्यपि जातेर्विषयत्वं तत्समवायिव्यक्तिविषयतानिरूपितमिति न व्याप्तिर्गोत्वाद्यालोचने कालोगोत्ववानित्यादिबोधे च व्यभिचारात् नापि जातेर्निरवच्छिन्नप्रकारतायास्तथात्वनियमः गौरयमित्यादिज्ञानस्य प्रत्यक्षे गोत्वेनेमं जानामीत्याकारे तथात्वात् तथाप्यन्वयबोधस्य निरवच्छिन्नगोत्वादिप्रकारत्वं गवादिविशेष्यतानिरूपितमेवेति व्याप्तिस्तादृशविशेष्यताकत्वं विना शुद्धस्य गोत्वादेरन्वयबोधेनास्पर्शनात् गुरूणां गोत्वेन गवयादिबोधस्यालीकत्वात् । अत एव गवाद्यंशे गोत्वादिप्रकारकोबोधः समवायेनेव सम्बन्धान्तरेणापि तत्प्रकारकः स्याद्गोत्वशक्तिज्ञानस्य तदीयसम्बन्धभानं प्रत्युदासीनत्वादित्यपि प्रत्युक्तं शाब्दमतेः शुद्धगोत्वप्रकारतायां गोविशेष्यताकत्वस्येव समवायावच्छिन्नत्वस्यापि व्याप्तित्वेन सिद्धावपि सम्बन्धान्तरावच्छिन्नत्वस्य प्रमाणविरहेणासिद्धेः । एवञ्च गोत्वादिशक्तिज्ञानत्वेन जनकतायां विषयतयावच्छेदकत्वाद्गोत्वादिरेव गवादिपदस्यार्थः गवादौ तद्व्यवहारस्तु तादृशावच्छेदकधर्मवत्त्वप्रयुक्तो गौणः । नचैवं मन्यादिधातोरपि गत्यादौ शक्तिर्न स्याद्गतित्वादिशक्तिज्ञानादेव ताद्रूप्येण गत्यादेर्गम्यादिधातुतोबोधसम्भवादिति वाच्यं गुरूणां मतित्वादेः संस्थानाव्यङ्ग्यत्वेन जातित्वासम्भवात् उत्तरसंयोगाद्यवच्छिन्नक्रियात्वाद्युपाधिरूपे च तत्र स्वरूपतः शक्तिग्रहायोगात् सखण्डस्य निरवच्छिन्नप्रकारत्वाभावात् निरुक्तक्रियात्वतावच्छिन्नशक्तताज्ञानत्वेन हेतुतामपेक्ष्य लघुतया तादृशक्रियात्वावच्छिन्नशक्तिमत्त्वज्ञानत्वेनैव तथात्वौचित्यात् गुरुत्वादिप्रयोज्यस्य पतनत्वादेरखण्डत्वे पत्यादिधातूनान्तत्र शक्तत्वेऽपि क्षत्यभावाच्च । पश्वादिपदानामपि लोमवल्लाङ्गूलादिपर्य्यवसिते पशुत्वादिमात्रे न शक्तिस्तत्र शक्तिग्रहोत्तरं तन्मात्रस्यैवानुभवेन तदाश्रयस्यालाभात् लोमादीनां स्वाश्रयतुल्यवित्तिवेद्यत्वस्य लोमवल्लाङ्गूलवान् देश इत्याद्यनुभवे व्यभिचारादित्याहुः ।"

नैयायिकास्तु तदेतन्मतं पूर्वपक्षविधया व्यक्त्यादीनां केवलानां शब्दवाचतां निराकृत्य जातिविशिष्टस्यैव शक्यत्वं व्यवस्थापितं यथा गौ० सूत्रे तद्भाष्ये च ।

"तदर्थे व्यक्त्याकृतिजातिसन्निधावुपचारात् संशयः ।" सू०

"अविनाभाववृत्तिः सन्निधिः अविनाभावेन वर्त्तमानासु व्यक्त्याकृतिजातिषु गौरिति प्रयुज्यते तत्र न ज्ञायते किमन्यतमः पदार्थः उत सर्वं इति । शब्दस्य प्रयोगसामर्थ्यात्पदार्थावधारणम् न स्यात्" भाष्यम् ।

"याशब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्यपचयवर्णसमासानुबन्धानां व्यक्तावुपचाराद्व्यक्तिः" सू०

"व्यक्तिः पदार्थः कस्मात् याशब्दप्रभृतीनां व्यक्तावुपचारादुपचारः प्रयोगः । या गौस्तिष्ठति या गौर्निषण्णेति नेदं वाक्यं जातेरभिधायकमभेदात् द्रव्याभिधायकम्, गवां समूह इत्यभेदात् द्रव्याभिधानं न जातेरभेदात्, वैद्याय गां ददातीति द्रव्यस्य त्यागो न जातेरमूर्त्तत्वात् प्रतिक्रमानुक्रमानुपपत्तेश्च । परिग्रहः स्वत्वेनाभिसम्बन्धः, कौण्डिन्यस्य गौर्ब्राह्मणस्य गौरिति द्रव्याभिधाने द्रव्यभेदात् सम्बन्धभेद इति उपपन्नमभिन्ना तु जातिरिति, सङ्ख्या दश गावो विंशतिर्गाव इति भिन्नं द्रव्यं सङ्ख्यायते न जातिरभेदादिति, वृद्धिः कारणवतो द्रव्यस्यावयवोपचयः अवर्द्धत गौरिति निरवयवा तु जातिरिति, एतेनापचयो व्याख्यातः। वर्णः शुक्ला गौः कपिला गौरिति द्रव्यस्य शुक्लादियोगो न सामान्यस्य, समासः गोहितं गोसुखमिति द्रव्यस्य सुखादियोगो न जातेरिति। अनुबन्धः सरूपप्रजननसन्तानो गौर्गां जनयतीति तदुत्पत्तिधर्मत्वाद्द्रव्ये युक्तं न जातौ विपर्य्ययादिति। द्रव्यं व्यक्तिरिति हि नार्थान्तरम्, अस्य प्रतिषेधः।" भा० "न तदनवस्थानात्" सू०

"न व्यक्तिः पदार्थः । कस्मादनवस्थानात् याशब्दप्रभृतिभिर्यो विशेष्यते स गोशब्दार्थो या गौस्तिष्ठति या गौर्निषण्णेति न द्रव्यमात्रमविशिष्टं जात्या विनाऽभिधीयते, किन्तर्हि जातिविशिष्टं, तस्मान्न व्यक्तिः पदार्थः एवं समूहादिषु द्रष्टव्यम् । यदि न व्यक्तिः पदार्थः कथं तर्हि व्यक्तावुपचार इति । निमित्तादतद्भावेऽपि तदुपचारो दृश्यते खलु" भा० ।

"सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावेऽपि तदुपचारः" सू०

"अतद्भावेऽपि तदुपचार इत्यतच्छब्दस्य तेन शब्देनाभिधानमिति, सहचरणात् यष्टिकां भोजयेति यष्टिकासहचरितो ब्राह्मणोऽभिधीयेत इति, स्थानात् मञ्चाः क्रोशन्तीति मञ्चस्थाः पुरुषा अभिधीयन्ते, तादर्थ्यात् कटार्थेषु वीरणेषु व्यूह्यमानेषु कटङ्करोतीति, वृत्तात् यमो राजा कुबेरो राजेति तद्वद्वर्त्तत इति, मानात् आढ़केन मिताः सक्तवः आढ़कसक्तव इति धारणात् तुलया धृतं चन्दनं

तुलाचन्दनमिति, सामीप्यात् गङ्गायां गावश्चरन्तीति सन्निकृष्टोदेशोऽभिधीयते योगात् कृष्णेन रागेण युक्तः शाटकः कृष्ण इत्यभिधीयते, साधनात् अन्नं प्राणा इति। आधिपत्यात् अयं पुरुषः कुलं अयं गोत्रमिति तत्रायं सहचरणाद्योगाद्वा जातिशब्दो व्यक्तौ प्रयुज्यत इति यदि गौरित्यस्य पदस्य न व्यक्तिरर्थोऽस्तु तर्हि।" भा०

"आकृतिस्तदपेक्षत्वात् सत्वव्यवस्थानसिद्धेः" सू०

"आकृतिः पदार्थः कस्मात् तदपेक्षत्वात् सत्वव्यवस्थानसिद्धेः। सत्वावयवानां तदवयवानाञ्च नियतो व्यूह आकृतिः तस्यां गृह्यमाणायां सत्वव्यवस्थानं सिध्यति अयं गौरयमश्व इति नागृह्यमाणायाम्, यस्य ग्रहणात् सत्वव्यवस्थानं सिध्यति तं शब्दोऽभिधातुमर्हति सोऽस्यार्थ इति नैतदुपपद्यते तस्य जात्या योगस्तदत्र जातिविशिष्टमभिधीयते गौरिति। न चावयवव्यूहस्य जात्या योगः, कस्य तर्हि नियतावयवव्यूहस्य द्रव्यस्य, तस्मान्नाकृतिः पदार्थः। अस्तु तर्हि जातिः पदार्थः" भा०

"व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात्प्रोक्षणादीनां मृद्गवके जातिः" सू०

"जातिः पदार्थः, कस्मात् व्यक्त्याकृतियुक्तेऽपि मृद्गवके प्रोक्षणादीनामप्रसङ्गादिति। गां प्रोक्षय गामानय गां देहीति नैतानि मृद्गवके प्रयुज्यन्ते कस्मात् जातेरभावात्। अस्ति हि तत्र व्यक्तिरस्त्याकृतिः यदभावात् तत्रासम्प्रत्ययः स पदार्थ इति।" भा०

"नाकृतिव्यक्त्यपेक्षत्वाज्जात्यभिव्यक्तेः" सू०

"जातेरभिव्यक्तिराकृतिव्यक्ती अपेक्षते नागृह्यमाणायामाकृतौ व्यक्तौ जातिमात्रं शुद्धं गृह्यते तस्मान्न जातिः पदार्थः इति। न वै पदार्थेन न भवितुं शक्यम् कः खल्विदानीं पदार्थ इति" भा०

"व्यक्त्याकृतिजातयस्तु पदार्थः" सू०

"तुशब्दो विशेषणार्थः। किं विशिष्यं प्रधानाङ्गभावस्यानियमेन पदार्थत्वमिति। यदा हि भेदविवक्षा विशेषगतिश्च तदा व्यक्तिः प्रधानमङ्गन्तु जात्याकृती। यदा तु भेदोऽविवक्षितः सामान्यगतिस्तदा जातिः प्रधानमङ्गन्तु व्यक्त्याकृती स्वीकृते तदेतद्बहुलं प्रयोगेष्वाकृतेस्तु प्रधानभाव उत्प्रेक्षितव्यः। कथं पुनर्ज्ञायन्ते नानाव्यक्त्याकृतिजातय इति लक्षणभेदात् तत्र तावत्" भा०

"व्यक्तिर्गुणविशेषाश्रयो मूर्त्तिः" सू०

"व्यज्यत इति व्यक्तिरिन्द्रियग्राह्येति न सर्वं द्रव्यं व्यक्तिः। यो गुणविशेषाणां स्पर्शान्तानां गुरुत्वघनत्वद्रव्यत्वसंस्काराणामव्यापिनः परिमाणस्याश्रयो यथासम्भवं तद्द्रव्यम्, मूर्त्तिः मूर्च्छितावयवत्वादि" भा०

"आकृतिर्जातिलिङ्गाख्या" सू०

"यया जातिर्जातिलिङ्गानि च प्रख्यायन्ते तामाकृतिं विद्यात्। सा च नाना सत्वानां तदवयवानाञ्च नियत व्यूहादिति नियतावयवव्यूहाः खलु सत्वावयवा जाति लिङ्गं शिरसा पादेन न गामनुमिन्वन्ति। नियते तु सत्वावयवानां व्यूहे सति गोत्वं प्रख्यायत इति। अनाकृतिव्यक्तिकायां जातौ मृत्सुवर्णं रजतमित्येवमादिष्वाकृतिर्निवर्त्तते जहाति पदार्थत्वमिति" भ०

"समानप्रसवात्मिका जातिः" सू०

"या समानां बुद्धिं प्रसूते भिन्नेष्वधिकरणेषु यथा बहूनीतरेतरतो न व्यावर्त्तन्ते योऽर्थोऽनेकत्र प्रत्ययानुवृत्तिनिमित्तं तत् सामान्यम्। यच्च केषाञ्चिद्भेदं कुतश्चिद्भेदं करोति तत् सामान्यविशेषो जातिरिति" भा०

शब्दशक्तिप्रकाशिकायामपि तदेतन्मतं समर्थितं यथा "जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मता। जातिमात्रे हि सङ्केताद्व्यक्तेर्भानं सुदुष्करम्" "यन्नाम जात्यवच्छिन्नसङ्केतवत् सा नैमित्तिकी संज्ञा यथा गोचैत्राः सा हि गोत्वचैत्रत्वादिजात्यवच्छिन्नमेव गवादिकमभिधत्ते न तु गोत्वादिजातिमात्रं गोपदं गोत्वे सङ्केतितमित्याकारकग्रहाद्गामानयेत्यादौ गोत्वादिना गवादेरन्वयानुपपत्तेः एकशक्तत्वग्रहस्यान्यानुभावकत्वेऽतिप्रसङ्गात्" ततःपरं प्राक्दर्शितं भट्टमतं प्रदर्श्य दूषितं यथा "विनाप्याक्षेपं गामानयेत्यादितो गवादिकर्मताकत्वेनानयनादेरन्वयबोधस्यानुभविकत्वात् गौर्गच्छतीत्यादौ शुद्धगोत्वे गतिमत्त्वाद्यन्वयस्यानुभवेनास्पर्शनात् गोत्वत्वाद्यनुपस्थित्या च गोत्वं गच्छतीत्याद्यनुभवस्यासम्भवात् स्वाश्रयवृत्तित्वसम्बन्धेन गतिमत्त्वादिहेतुना गवादौ साक्षात्सम्बन्धेन गतिमत्त्वाद्याक्षेपस्य व्यभिचारादिदोषेण दुःशकत्वाच्च। एतेन कर्मत्वादौ गोत्वादेः स्वाश्रयवृत्तित्वसम्बन्धेनान्वयबोधोत्तरं कर्मत्वस्य गोत्ववृत्तित्वं गोवृत्तित्वं विनानुपपन्नमित्यनुपपत्तिधीसहकृतेन गामित्यादिवाक्येनैव कर्मत्वं गवीयमित्यौपादानिको गवादिव्यक्तेर्बोध इति श्रीकरमतमप्यनादेयं मिथोविरुद्धाभ्यां शाब्दत्वार्थापत्तित्वाभ्यामवच्छिन्नबोधस्यालीकत्वेन शब्दानुपपत्तिभ्यां सम्भूय तथाविधौपादानिकबोधस्य जनना-

योगाच्च। यत्तु गौर्ज्ञायते गौर्नश्यति सर्वत्र गोत्वादिजातिशक्तेनैव गवादिपदेन लक्षणया गोत्वादिविशिष्टा व्यक्तिर्बोध्यते व्यक्तीनां बहुत्वेनानन्यलभ्यत्वेन च तत्र शक्तेरकल्पनात् तात्पर्य्यानुपपत्तेरपि लक्षणाया वीजत्वात् यदाहुर्मण्डनाचार्य्याः "जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति। नित्यत्वाल्लक्षणीयाया व्यक्तेस्ते हि विशेषणे" इति तदपि तुच्छं व्यक्तिविनाकृतायां गोत्वादिजातौ गवादिपदस्य मुख्यप्रयोगाभावेन तन्मात्रस्याशक्यत्वे तद्वति गवादौ लक्षणाया वक्तुमशक्यत्वात् शक्यसम्बन्धस्यैव लक्षणात्वात्। न च गोरन्यो महिष इत्यादौ पञ्चम्यर्थेऽवधित्वे प्रतियोगित्वे वा स्वावच्छेद्यत्वसम्बन्धेन शुद्धस्य गोत्वादेरन्वयात्तथाविधस्थल एव जातौ मुख्यप्रयोगः तत्र पञ्चम्याः स्वार्थेऽवधित्वादौ स्वनिष्ठगोत्वावच्छेद्यत्वसंसर्गेण प्रकृत्यर्थस्य गवादेरन्वयबोधकत्वात् अन्यथा गोगोत्वयोर्भिन्नशक्तिभ्यां गोपदेन बोधने वृत्तिद्वययौगपद्यापत्तेः वस्तुतः शुद्धस्य गोत्वादेः शाब्दधीप्रकारतायाः समवायावच्छिन्नत्वनियमात्तस्यावधित्वादौ स्वावच्छेद्यत्वादिसम्बन्धेनान्वयोदुर्घटः एव द्रव्यं घट इत्यादिप्रतीतेः समवायेन प्रमात्वानुरोधाद्घटत्वजातेर्नानात्वोपगमादिति"।

ततः परं प्रागुपदर्शितं प्राभाकरमतमुत्थाप्य दूषितं यथा

"शाब्दमतेर्गवादिव्यक्त्यवगाहित्वमवश्यङ्कारणप्रयोज्यं जन्यधीविषयतायास्तत्प्रयोज्यत्वनियमादन्यथा पक्षधर्मिकसाध्यावगाहितादेरपि परामर्शादिप्रयोज्यता न स्यादनुमित्यादि सामान्यं प्रत्येव ज्ञानत्वादिना हेतुत्वस्य लाघवेनौचित्यात् पक्षतादिसहकृतपरामर्शाद्युत्तरज्ञानस्य तत्प्रकाशस्यैव वा पक्षे साध्यावगाहित्वनियमादेवानुमित्यादेः प्रतिनियतपक्षाद्यवगाहित्वसिद्धेः। किञ्च गोत्वशक्यत्वं न गोत्वसमर्थत्वं यस्य धीरन्वयधीहेतुरप्रसिद्धत्वात् नापि तद्गोचरमभिधानात्मकं पदार्थान्तरं तत्र मानाभावात् न वा गोत्वानुभवजनकत्वं पटादिपदस्यापि गोत्वशक्यत्वापत्तेस्तस्यापि गवादिपदाकाङ्क्षादिसाचिव्येन गोत्वानुभवजनकत्वात् न च गोत्वानुभवसामान्यं प्रति हेतुत्वन्तथा गवादिपदेऽप्यसत्त्वात् नापि गोत्वानुभवजनकत्वप्रकारकनित्यसङ्केतवत्त्वं तादृशसङ्केतवत्त्वमात्रं वा गोत्वशक्तत्वमिति साम्प्रतं, गोपदं गोत्वेन गवानुभवस्य जनकतया न सङ्केतितमित्यादिग्रहेऽपि तस्य ग्रहाद्गोत्वेन गोरन्वयधीप्रसङ्गात् किन्तु गोत्वेन गवानुभवस्य जनकतया सङ्केतितत्वं तथा, तथा च पदधर्मिकतज्ज्ञानत्वेन गोत्वप्रकारकशाब्दं प्रति हेतुतायां गोत्वस्यैव तद्विशिष्टस्य गोरपि विषयविधयावच्छेदकत्वादवश्यं गोत्वादिविशिष्टो गवादिर्गवादिपदस्यार्थः"।

जातिशब्द पु॰ जातिवाचकः शब्दः। प्रकारविधया विशेष्यविषया वा जातिवाचके शब्दे हंसमृगादिशब्दादौ। "चिह्नैर्व्यक्तैर्भवेद्व्यक्तो जातिशब्दोऽपि वाचकः" हेमच॰।

जातिशस्य न॰ ६त॰। (जायफल) सुगन्धद्रव्यभेदे शब्दार्थचि॰

जातिसङ्कर पु॰ जात्योर्विरुद्धयोः सङ्करः। परस्परविरुद्धयोः (परस्पराभावसमानाधिकरणयोः) १जात्योरेकत्र समावेशे स च जातिशब्दे जातिबाधकतया वैशेषिकसूत्रोपस्कारे प्रदर्शितः। २वर्णसङ्करे विभिन्नजातिकाभ्यां मातापितृभ्यां सङ्कीर्णवर्णे च यथा मूर्द्धाभिषिक्ताम्बष्ठादि।

जातिसार न॰ ६त॰। (जायफल) ख्याते पदार्थे राजनि॰।

जातिस्फोट पु॰ व्याकरणमतसिद्धे स्फोटभेदे वैयाकरणभूषणसारे हि वर्णस्फोटः पदस्फोटः वाक्यस्फोटः अखण्डपदवाक्यस्फोटौ इति व्यक्तिस्फोटाः पञ्च वर्णपदवाक्यभेदेन जातिस्फोटास्त्रय इत्यष्टौ स्फोटा उक्ताः। तत्र जातिस्फोटत्रयं क्रमेण हरिणा दर्शितं यथा

"शक्यत्व इव शक्तत्वे जातेर्लाघवमीक्ष्यताम्। औपाधिको वा भेदोऽस्तु वर्णानां तारमन्दवत्" अयं भावः। वर्णास्तावदावश्यकाः उक्तरीत्या च सोऽयं गकार इति वद् योऽयं गकारः स्मृतः सोऽयं हकार इत्यपि स्यात् स्फोटस्यैकत्वात् गकारोऽयं न हकार इत्यनापत्तेश्च। किञ्च स्फोटे गत्वाद्यभ्युपेयं न वा आद्ये तदेव गकारोऽस्तु वर्णनित्यतावादिभिरतिरिक्तगत्वानङ्गीकारात्। तथा चातिरिक्तस्फोटकल्पन एव गौरवम्। अन्त्ये गकारादिप्रतीतिविरोधः। वायुसंयोगवृत्ति ध्वनिवृत्ति वा वैजात्यमारोप्य तथा प्रत्यय इति चेन्न प्रतीतेर्विना बाधकं भ्रमत्वासम्भवात् अस्तु वा वायुसंयोग एव गकारोऽपि तस्यातीन्द्रियत्वं दोष इति चेद्धर्मवदुपपत्तेरिति कृतं स्फोटेन। तस्मात्सन्त्येव वर्णाः। परन्तु न वाचकाः गौरवात्। आकृत्यधिकरणन्यायेन जातेरेव वाच्यत्ववद्वाचकत्वस्यापि युक्तत्वाच्च। इदं हरिपदमित्यनुगतप्रतीत्या हर्य्युपस्थितित्वावच्छेदेन हरिपदज्ञानत्वेन हेतुत्वात्तदवच्छेदकतया च जातिविशेषस्यावश्यकल्प्यत्वात्। न च वर्णानुपूर्व्यैव प्रतीत्यवच्छेदकत्वयोर्निर्वाहः घटघटत्वादेरपि संयोगविशिष्ट-

स्यदा आकारादिभिश्चान्यथासिद्ध्यापत्तेः । तस्मात्सा जातिरेव वाचिका तादात्म्येनावच्छेदिका चेति । ननु सरोरस इत्यादौ जात्योः सत्त्वादर्थभेदबोधो न स्यादित्यत आह औपाधिको वेति । वा त्वर्थे उपाधिरानुपूर्व्वी सैव जातिविशेषाभिव्यञ्जिकेति भेदः कारणीभूतज्ञानस्येति नातिप्रसङ्ग इति भावः । उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टान्तमाह वर्णानामिति । ननु जातेः प्रत्येकं वर्णेष्वपि सत्त्वात् प्रत्येकादर्थबोधः स्यादित्यत आह । "अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता । कैश्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिताः ।" अनेकाभिर्वर्णव्यक्तिभिरभिव्यङ्ग्यैव जातिः स्फोट इति स्मृता योगार्थतया बोधिकेति यावत् । एतेन स्फोटस्य नित्यत्वात्सर्वार्थबोधापत्तिरित्यपास्तम् । अयं भावः यद्यपि वर्णस्फोटपक्षे कथितदोषोऽस्ति तथापि पदवाक्यपक्षयोर्न, तत्र तस्या व्यासज्यवृत्तित्वस्य धर्मिग्राहकमानसिद्धत्वादिति । कैश्चिद्व्यक्तयोध्वनय एव ध्वनिवर्णयोर्भेदाभावादित्यभ्युपेयन्त इति शेषार्थः । उक्तं हि काव्यप्रकाशे "बुधैर्वैयाकरणैः प्रधानीभूतस्फोटरूपव्यङ्ग्यव्यञ्जकशब्दस्य ध्वनिरिति व्यवहारः कृतः" इति ।

ननु का सा जातिस्तत्राह । "सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ । सत्यं यत्तत्र सा जातिरसत्या व्यक्तयोमताः ।" प्रतिभावम् प्रतिपदार्थम् । सत्यांशो जातिः असत्या व्यक्तयः । तत्तद्व्यक्तिविशिष्टं ब्रह्मैव जातिरिति भावः । उक्तञ्च कैयटेन "असत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थ इति" । "ब्रह्मतत्त्वमेव शब्दस्वरूपतया भातीति" च । कथं तर्हि ब्रह्मदर्शने च गोत्वादिजातेरप्यसत्त्वादनित्यत्वम्, आत्मैवेदं सर्वमिति श्रुतिवचनादिति कैयटः सङ्गच्छताम् अविद्या आविद्यिको धर्मविशेषोवेति पक्षान्तरमादायेति द्रष्टव्यम्" ।

जातिस्मर पु० जातिः स्मर्य्यतेऽत्र स्नानादिना स्मृ—आधारे बा० अप् । १तीर्थभेदे "ततो देवह्रदेऽरण्ये कृष्णवेनाजलोद्भवे । जातिस्मरह्रदे स्नात्वा भवेज्जातिस्मरो नरः" भा० व० ८५ अ० । जातिं पूर्वजन्मवृत्तान्तं स्मरति स्मृ—अच् । २पूर्वजन्मवृत्तान्तस्मारके त्रि० । तत् स्मरणहेतुकर्म च मनुनोक्तं यथा "वेदाभ्यासेन सततं शौचेन तपसैव च । अद्रोहेण च भूतानां जातिं स्मरति पौर्विकीम्" । "शुभेन कर्मणा तेन जाता जातिस्मरा मृगाः । त्रासानुत्पादय संविग्नारम्ये कालञ्जरे गिरौ" हरिवं २१ अ० ।

जाती स्त्री जन—क्तिच् वा ङीप् । मालत्यां पुष्पप्रधानवृक्षे अमरः । पुष्पेऽपि स्त्री "पुष्पे जातीप्रभृतयः स्वलिङ्गाः" इत्यमरोक्तेः । "जातिर्जाती च सुमना मालती राजपुत्रिका । चेतिका हृद्यगन्धा च सा पीता स्वर्णजातिका । जातीयुगं च तिक्तोष्णं तुवरं लघु दोषजित् । शिरोक्षिमुखदन्तार्त्तिविषकुष्ठानिलास्रजित्" भावप्र० । "तत् कुड्मलं नेत्ररोगव्रणविस्फोटकुष्ठहृत्" राजनि० ।

जातीय त्रि० जातौ भवः छ । जातिभवे । अस्य किञ्चिदुपदादेव प्रयोगः सजातीयः विजातीयः तुल्यजातीयः ।

जातु अव्य० जै—क्षये जन—वा बा० क्तुन् । १कदाचिदित्यर्थे अमरः । "मनस्तु यं नोज्झति जातु यातु मनोरथः कण्ठपथं कथं सः" नैष० । "न जातु वैनायकमेकमुद्धृतम्" माघः । "न जातु कामः कामानामुपभोगेन शाम्यति" मनुः २सम्भावनायां ३गर्हायाञ्च शब्दर० । गर्हार्थकेन जातुशब्देन योगे अन्यलकारबाधेन सर्वत्र लट् । "जातु निन्दसि गोविन्दमपि निन्दसि शङ्करम्" मुग्ध० । "जातु तत्रभवान् वृषलं याजयति" ।

जातुक न० जातु गर्हितं कं जलमस्मात् । हिङ्गुनि शब्दच० ।

जातुधान न० जातु गर्हितं धानमभिधानमस्य । यातुधाने राक्षसे अमरटीकायां रमानाथः ।

जातुष त्रि० जतुनो विकारः अण् षुक् च । जतुनिर्मिते । "यदाऽश्रौषं जातुषाद्वेश्मनस्तान्" भा: आ० १२ अ० ।

जातू पु० जन-ड जान् तूर्वति हिनस्ति तूर्व—क्विप् पूर्वपददीर्घः । वज्रे । "स जातूभर्मा श्रद्दधानः" ऋ० १।१०३।२ । "जातू इत्यशनिमाचक्षते" भा० । व्युत्पत्तिस्तथैवोक्ता ।

जातूकर्ण पु० ऋषिभेदे । स च अष्टाविंशतितमे द्वापरयुगे जातः यथोक्तं हरिवं० ४२अ० "नवमे द्वापरे विष्णोरष्टाविंशे पुराऽभवत् । वेदव्यासस्तथा जज्ञे जातूकर्ण्यः पुरःसरः" स च उपस्मृतिकर्त्ता यथोक्तं हेमा० दा० ख० "जाबालिर्नाचिकेतश्च स्कन्दो लौगाक्षि अङ्गिरसा कश्यपो । व्यासः सनत्कुमारश्च शतगुर्जनकस्तथा । व्याघ्रः कात्यायनश्चैव जातूकर्ण्यः कपिञ्जलः । बौधायनः कणादश्च विश्वामित्रस्तथैव च । उपस्मृतय इत्येताः प्रवदन्ति मनीषिणः" । ततो गर्गा० अपत्ये यञ् । जातूकर्ण्य तदपत्ये पुंस्त्री । स्त्रियां ङीष् यलोपौ । जातूकर्णी ।

जातूष्ठिर त्रि० जातु कदाचित् स्थिरः वेदे बा० षत्वं पृषो० दीर्घश्च । सर्वदास्थिरे । "जातूष्ठिरस्य प्रवयः सहस्वतः"

ऋ० २।१३।११। "जातूष्ठिरस्य सर्वदास्थिरस्य" भा०।

जातेष्टि स्त्री जाते पुत्रजनने इष्टिः। पुत्रजन्मोत्तरं श्रुतिविहिते वैश्वानराख्ये इष्टिभेदे।

जातेष्टिन्याय पु० जैमिनिप्रदर्शिते पितृकृतेष्ट्या पुत्रगतफलसूचके एकस्य काम्यत्वनैमित्तिकत्वसूचके न्यायभेदे स च न्यायो जै० प्रथमस्य चतुर्थे पादे यथा।

काम्येष्टिकाण्डे श्रूयते। "वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं, यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियमादधाति यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति यस्मिन् जाते एतामिष्टिं निर्वपति स एव पूतो बलवान् तेजस्वी अन्नाद इन्द्रियावी पशुमान् भवतीति"। अत्राष्टादिसंख्यासामान्यात् पुरोडाशादीनां गायत्र्यादिरूपताकल्पना कृता द्वादशकपालेषु या संख्या तस्यामष्टत्वादिसंख्यानामन्तर्भावात् संख्यां निमित्तीकृत्याग्निहोत्रादिशब्दवत् अष्टाकपालादिशब्दाः कर्मनामधेयानीत्येकः पक्षः।

अयमनुपपन्नः तथा हि द्वादशकपालादिशब्दा न संख्यापराः किन्तु पुरडाशद्रव्यपराः द्वादशकपालेषु संस्कृत इति व्युत्पत्तेः एवमष्टाकपालादिशब्दादयोऽपि तथा सति नामधेयस्य निमित्तत्वं नास्तीति चेत् पुरोडाशद्रव्यरूपगुणो विधीयतां न च द्वादशकपालं निर्वपेदित्युत्पत्तिविधिशिष्टद्वादशपुरोडाशविरुद्धत्वादष्टाकपालादेरनवकाश इति वाच्यं ब्रह्मवर्चसादिविशेषफलाय तद्विधीनामुपपत्तेरित्यपरः पक्षः।

अयमपि पक्षोऽनुपपन्नः अनेकगुणविधौ वाक्यभेदापत्तेः न च भिन्नान्येव वाक्यानि, द्वादशकपालं निर्वपेदिति विहितयागस्य यस्मिन् जाते एतामित्युपसंहारेण एकवाक्यत्वावगमात् द्वादशकपाल इतीष्टेर्नामधेयमिष्टिरंशी अष्टाकपालादिभिरंशैः स्तूयत इति सिद्धान्तः पक्षः। अत्र च पुत्रजन्मनिश्चयः, पुत्रस्य पूतत्वादिफलकामना चेति संवलिताधिकारः काम्यनैमित्तिकत्वात् अतः केवलपुत्रजन्मरूपनिमित्तनिश्चयवतः केवलपुत्रपूतत्वादिकामनावतो वा नाधिकार इति सुधीभिर्विभावनीयम्" तत्त्वबो०।

अनेन न्यायेन अन्यकृतकर्मणा अन्यस्य फलसाधनताऽपि सूचिता यथा पुत्रकृतश्राद्धेन पितुः स्वर्गादि फलं जन्यते एवं पितृकृतेष्ट्या पुत्रगतपूतत्वादिफलसिद्धिः। अतएव हेमाद्रिणा श्राद्धकल्पे अयमेव न्यायः पुत्रकृतश्राद्धेन पितुरुपकारकत्वे दृष्टान्ततयोक्तः।

जातोक्ष पु० जातः प्राप्तदम्यावस्थः उक्षा टच्समा०। युवदृषे इह जातत्वं प्राप्तबलीवर्द्दभावत्वं प्राप्तदम्यावस्थत्वमिति यावत्

जात्य त्रि० जातौ भवः यत्। १कुलीने, २श्रेष्ठे, ३कान्ते च मेदि०। ४सुन्दरे जटाधरः "किं वा जात्याः स्वामिनो ह्रेपयन्ति" माघः। "जात्यस्तेनाभिजातेन शूरः शौर्यवता कुशः" रघुः। "सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु। आनुलोम्येन संभूता जात्या जातास्त एव ते" मनुः।

जात्यन्ध त्रि० जातौ जन्मन्येवान्धः। जन्मान्धे "अनंशौ क्लीवपतितौ जात्यन्धबधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः" मनुः।

जात्यासन न० "अथ जात्यासनं वक्ष्ये येन जातिस्मरो भवेत्। हस्ताङ्घ्रियुग्मं भूमौ च गमनागमनं ततः" रुद्रयामलोक्ते आसनभेदे।

जात्युत्तर न० जात्या व्याप्तिविधुरसाधर्म्यवैधर्म्यादिना उत्तरम्। न्यायोक्ते असदुत्तरे तच्च चतुर्विंशतिविधं जातिशब्दे दर्शितम्।

जान पु० जन–भावे घञ् वेदे वृद्धिः। १उत्पत्तौ "को वेद जानमेषाम्" ५।५३।१। "जानमुत्पत्तिम्" भा०। जनस्येदमण्। २जनसम्बन्धिनि त्रि०। "महते जानराज्यायेन्द्रस्येन्द्रियाय" यजु० ९।४०। स्त्रियां ङीप्।

जानक त्रि० जनकस्य पितुः तन्नामनृपस्येदं वा अण्। १पितृसम्बन्धिनि २जनकनृपसम्बन्धिनि च स्त्रियां ङीप्। सा च ३रामपत्न्यां सीतायाम् "मुमोच जानन्नपि जानकीं न यः" माघः।

जानकि पु० जनकस्यापत्यम् इञ्। भारतप्रसिद्धे नृपभेदे। "विनाशनस्तु चन्द्रस्य य आख्यातो महासुरः। जानकिर्नाम विख्यातः सोऽभवन्मनुजाधिपः" भा० आ० ६७अ०। "जानकिश्च सुशर्मा च मणिमान् पोतिमत्सकः" भा० उ० ३अ०।

जानन्ति पु० ऋग्वेदिभिस्तर्पणीये ऋषिभेदे। "जानन्तिबाहविगार्ग्यगौतमशाकल्यबाभ्रव्यमाण्डव्यमार्कण्डेयाः" इत्युपक्रमे "ते सर्वे तृप्यन्त्विति" आश्व० गृ० ३।४।४।

जानपद पु० जानेन उत्पत्त्या पद्यते पद–अप्। १जने लोकमात्रे "कृतप्रज्ञश्च मेधावी बुधो जानपदः शुचिः" भा० शा० ८३अ०। जनपद एव स्वार्थे अण्। २देशे च मेदि०। जनपदादागतः जनपदे भवो वा अण्। जनपदादागते ३करादौ "स यथा महाराजो जान-

पदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्त्तते" शत० ब्रा० १४।५।१।२०। ४देशभवे च "देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु" याज्ञ०। ५वृत्तौ स्त्री ङीष् जानपदी अन्यत्र ङीप्। स्वरे भेदः। नियतपक्षे टाप् इति भेदः। वरणा० बहुत्वे अणो लुक्। जनपदाः।

जानश्रुतेय पु० जनश्रुतेः ऋषेरपत्यम् "इतश्चानिञः" पा० ढक्। जनश्रुतेरपत्ये औपविनामके राजर्षिभेदे "औपविनैव जानश्रुतेयेन प्रत्यवरोढम्" शत०ब्रा० ५।५।१।१।५।

जानायन पुंस्त्री जनस्य तन्नामकर्षेः गोत्रापत्यम् अश्वा० फञ्। जननामकर्षेर्गोत्रापत्ये।

जानु न० जन—ञुण्। ऊरुजङ्घयोर्मध्यभागे (आंटु) स्वार्थे क अत्रैवार्थे अमरः। "निम्नहा पारीमुभयेन जानुनोः" माघः। "ऊरू अरत्नीं जानुनीं विशोमेऽङ्गानि सर्वतः" यजु० २७८ "जानुकपिच्छे चतुरङ्गुले च" वृ०स०५८अ०

जानुकारक पु० रविपार्श्वगभेदे शब्दार्थचि०।

जानुजङ्घ पु० नृपभेदे। "अनरण्यो नरपतिर्जानुजङ्घस्तथैव च" भा० अनु० १६५ अ०।

जानुप्रहृतिक न० जानुना प्रहृतं प्रहारस्तेन निर्वृत्तम् अक्षद्यूता० ठक्। जानुप्रहारनिर्वृत्ते मल्लयुद्धभेदे।

जानुविजानु न० खड्गयुद्धप्रकारभेदे तत्प्रकाराश्च द्वात्रिंशत् हरिवं० २१६ दर्शिता यथा

तत्र तावसिना युद्धं चक्रतुर्बलालसौ। भ्रान्तमुद्भ्रान्तमाविद्धं प्रविद्धं बहुनिःसृतम्। आकरं विकरं भिन्नं निर्म्मर्य्यादमसानुषम्। सङ्कुचितं कुलचितं सव्यं जानुविजानु च। आह्रित चित्रकं चिप्तं कुद्रवं लवणं हतम्। सर्ववाहुर्विनिवाहुः सव्येतरमथोत्तरम्। त्रिवाहुत्तुङ्गवाहु च सव्योन्नतमुदासि च। पृष्ठतः पृथितञ्चैव यौधिकं पृथितं तथा। इति प्रकारान् द्वात्रिंशच्चक्रतुः खड्गयोधिनौ"।

जानुहित त्रि० जनैः हितं परिकल्पितम् पृषो०। जनपरिकल्पिते। "एतद्धि वा अस्य जानुहितं प्रज्ञातमवसानं यज्ञतुपथम्" शत० ब्रा० २।६।२।७। "जानुहितं जनैः परिकल्पितम्" भा०। [एव च" हरिवं २६ अ०।

जान्ध पु० ऋषिभेदे। गार्ग्यः पृथुस्तथैवाग्रे जान्धो वामन

जाप पु० जप—घञ्। जपे मन्त्रोच्चारणे कर्म्मण्युपपदे अण्। मन्त्रजापादयः मन्त्रादिजपकर्त्तरि त्रि०। [धरणिः।

जापन न०। चु० जप—भावे ल्युट्। १निरसने २निवर्त्तने च

जाबाल पु० जबालाया अपत्यम् अण्। सत्यकामे ऋषिभेदे जबालशब्दे उदा०। तेन दृष्टं साम अण्। २सामवेदीये उपनिषद्भेदे च उपनिषच्छब्दे १२२२ पृ० दृश्यम्। एतस्मिन् परे कर्मधारये महच्छब्दस्य प्रकृतिस्वरः महाजाबालः। महच्छब्दश्चान्तोदात्तः। तदीयस्वर एव न समासस्वरः।

जाबालि पु० जबालस्यापत्यम् इञ्। ऋषिभेदे स च उपस्मृतिकर्त्ता। जातूकर्णशब्दे प्रमाणं दृश्यम्।

जामदग्न्य पु० जमदग्नेरपत्यम् गर्गा० यञ्। जमदग्नेऋषेरपत्ये परशुरामादौ। "तेजोभिर्गतवीर्य्यत्वात् जामदग्न्यो जडीकृतः" रामा० बा० ७७।१२। कण्वा० ततोऽण् यलोपः। जामदग्न तच्छात्रे।

जामदग्नेय पु० जमदग्नेरपत्यं प्रत्ययविधौ तदन्तग्रहणस्य प्रतिषेधेऽपि आर्षत्वात् "अग्निकलिभ्याम्" पा० ढक्। परशुरामे "भार्गवं जामदग्नेयं राजा राजविमर्द्दनम्" रामा० बा० ७४ अ०। [दृश्यम्।

जामल न० आगमशास्त्रभेदे। तस्य वर्ग्यादित्वमपि रुद्रजामले

जामा स्त्री जम—अदने बा० अण् स्त्रीत्वम्। दुहितरि। "अन्यत्र जामया सार्द्धं प्रजानां पुत्र ईहते। दुहितान्यत्र जातेन पुत्रेणापि विशिष्यते" भा० अनु०४५ अ०। "जामया कन्यया सार्द्धं पुत्रः पित्र्यं धनमीहते" इत्यर्थः नीलक०।

जामातृ पु० जायां माति मिनोति मिमीते वा निपा० १दुहितृपतौ, अमरः। २सूर्य्यावर्त्ते, स्वामिनि च मेदि० उणादिषु निपातनसिद्धत्वेन तृणन्तत्वाभावात् सर्वनामस्थाने परे न वृद्धिः। जामातरौ जामातरः इत्यादिः "ऋत्विकस्वस्रियजामातृयाज्यश्वशुरमातुलाः" याज्ञ०। "विष्णुं जामातरं मन्ये"।

जामि(मी) स्त्री जम-इन् नि० वृद्धिः। १भगिन्यां २कुलस्त्रियां, अमरः ३दुहितरि, ४स्नुषायां, ५सन्निहितसपिण्डस्त्रियाम्, शब्दार्थचि०। "जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः" "शोचन्ति जामयो यत्र विनश्यन्त्याशु तत्कुलम्। शोचन्ति तु न यत्रैता वर्द्धते तद्धि सर्वदेति" मनुः। "गृहपतिसंवर्द्धनीयसन्निहितसपिण्डस्त्रियो जामय इति" कुल्लू०। वा ङीप्। तत्रार्थे शब्दर०। "मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्य्यया। दुहित्रा दासवर्गेण विवादं न समाचरेत्" भा० शा० २४३अ०। स्त्री ब० व०। ६उदके ७अङ्गुलौ निघण्टुः।

जा(या)मित्र न० "जा(या)मित्रं सप्तमं स्थानम्" ज्योतिषपरिभाषिते लग्नात् सप्तमे स्थाने। "तिथौ च जा(या)

मित्रगुणान्वितायाम्" कुमा०। उपचारात् तिथेस्तत्साहित्यम्

जा(या)मित्रवेध पापात् सप्तमस्थानस्थचन्द्ररूपे योगभेदे। उपयमशब्दे दृश्यम्। "मूलत्रिकोणनिजमन्दिरगोऽथ पूर्णो मित्रर्क्षसौम्यगृहगोऽथ तदोच्चितो वा जा(या)मित्रवेधविहितानपहृत्य दोषान् दोषाकरः शुभमनेकविधं विधत्ते" ज्यो० त०।

जामिवत् व० उदके निघण्टुः जामीत्यत्र पाठान्तरम्।

जामिय त्रि० जाम्या भगिन्या अपत्यम् ढक्। भागिनेये हेम०।

जाम्बव न० जम्ब्वाः फलं अण् तस्य वा न लुप्। जम्ब्वाः फले जाम्बवेन निर्वृत्तम् अरीहणा० वुञ्। जाम्बवक तन्निर्वृत्ते त्रि०।

जाम्बवत् पु० रामायणप्रसिद्धे ऋक्षराजभेदे। तस्यापत्यं स्त्री अण् ङीप्। २तद्दुहितरि श्रीकृष्णपत्नीभेदे "वासुदेवस्तु निर्जित्य जाम्बवन्तं महाबलम्। लेभे जाम्बवतीं कन्यामृक्षराजस्य सम्मताम्" हरिवं० ३८ अ० "जाम्बवतीसहितं चारुसङ्गावमब्रवीत्" भट्टिः।
"ऋक्षराजस्य पुत्रोऽत्र महाप्रज्ञः सुदुर्जयः। पितामहसुतश्चापि जाम्बवानिति दुर्जयः" रामा०। जाम्बवं तदाकारोऽस्त्यस्याः मतुप् मस्य वः पृषो० वलोपः ङीप्। ३नागदमन्यां स्त्री राजनि०। [नागदमन्याम् राजनि०।

जाम्बवी स्त्री जाम्बवं तदाकारोऽस्त्यस्याः अण् ङीप्।

जाम्बवौष्ठ न० जाम्बवमिव ओष्ठोऽस्य। सुश्रुतोक्ते व्रणादिदहनोपकरणभेदे "अथेमानि दहनोपकरणानि तद्यथा पिप्पल्यजाशकृद्गोदन्तशरशलाकाजाम्बवौष्ठेतरलोहाः, क्षौद्रगुडस्नेहाश्च। तत्र पिप्पल्यजाशकृद्गोदन्तशरशलाकास्त्वग्गतानाम्। जाम्बवौष्ठेतरलोहानि मांसगतानाम्। जम्ब्वोष्ठमप्यत्र "जम्ब्वोष्ठेनाग्निवर्णेन तप्तया वा शलाकया" "जम्ब्वोष्ठेनाग्निवर्णेन पश्चाच्छेद्यं दहेद् भिषक्" सुश्रु०।

जाम्बीर(ल) न० जम्बीरस्य फलं अण् वेदे रस्य वा लः। १जम्बीरफले तदाकारे २जानुमध्यभागे च। "जाम्बीलेनारण्यम्" यजु० २५।२। "जाम्बीरं जम्बीरतरोः फलं रलयोरभेदः। तदाकारेण जानुमध्यभागो जाम्बीलस्तेनारण्यदेवं प्रीणामीति" वेददी०।

जाम्बुवत् पु० जाम्बवत्+पृषो०। ऋक्षराजे द्विरूपको०।

जाम्बूनद न० जम्बूनद्यां भवम् अण्। १स्वर्णे तन्नामनामके २कनकाह्वये धूस्तुरे च राजनि०। जम्बूनद्यां तदुत्पत्तिकथा जम्बूद्वीपशब्दे ३०४५ पृ० भाग० व दृश्यम्। "दक्षिणेन तु नीलस्य निषधस्योत्तरेण तु। सुदर्शनो नाम महान् जम्बूवृक्षः सनातनः। सर्वकामफलः पुण्यः सिद्धचारणसेवितः। तस्य नाम्ना समाख्यातो जम्बूद्वीपः सनातनः। योजनानां सहस्रञ्च शतञ्च भरतर्षभ!। उत्सेधो वृक्षराजस्य दिवस्पृक् मनुजेश्वर!। अरत्नीनां सहस्रञ्च शतानि दश पञ्च च। परिणाहस्तु वृक्षस्य फलानां रसभेदिनाम्। पतमानानि तान्युर्व्यां कुर्वन्ति विपुलं स्वनम्। मुञ्चन्ति च रसं राजन्! तस्मिन्रजतसन्निभम्। तस्या जम्ब्वाः फलरसो नदी भूत्वा जनाधिप!। मेरुं प्रदक्षिणं कृत्वा सम्प्रयात्युत्तरान् कुरून्। तत्र तेषां मनः शान्तिर्न पिपासा जनाधिप!। तस्मिन् फलरसे पीते न जरा बाधते च तान्। तत्र जाम्बूनदं नाम कनकं देवभूषणम्" भा० भी० ७ अ०। "दधद्भिरभितस्तटौ विकचवारिजाम्बूनदैर्विनोदितदिनक्लमाः कृतरुचश्च जाम्बूनदैः" माघः "यदिदं निर्गतं तस्मात्तप्तजाम्बूनदप्रभम्। काञ्चनं धरणीं प्राप्तं हिरण्यमभवत्तदा" रामा० बा० ३८ अ०।

जाम्बूनदेश्वरी स्त्री १देवीभेदे २तदीयस्थाने च शब्दार्थचि०

जायक न० जयति गन्धान्तरं जि—ण्वुल्। पीतवर्णे सुगन्धिकाष्ठरूपे गन्धद्रव्यभेदे अमरः।

जाया स्त्री जायतेऽस्यां जनेर्यक् आत्वञ्च। १पत्न्यां विधिनोढायाम् अमरः। "पतिर्भार्य्यां संप्रविश्य गर्भो भूत्वेह जायते। जायायास्तद्धि जायात्वं यदस्यां जायते पुनः" मनुः "पतिः शुक्ररूपेण भार्य्यां संप्रविश्य गर्भतामापद्य तस्यां भार्य्यायां पुत्ररूपेण जायते। तथा च श्रुतिः "आत्मा वै पुत्रनामासीति। जायायास्तदेव जायात्व यतोऽस्यां पतिः पुनर्जायते। तथाच बह्वृचब्राह्मणम्, "पतिर्जायां प्रविशति गर्भो भूत्वेह मातरम्। तस्यां पुनर्नवो भूत्वा दशमे मासि जायते। तज्जाया भवति यदस्यां जायते पुनः। ततस्त्वासौ रक्षणीयेत्येतदर्थं नाम निर्वचनम्" कुल्लू०। "अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम्" रघु। "कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायाम्" मेघः। २ज्योतिषोक्ते लग्नावधिकसप्तमस्थाने। तत्र स्थाने जायायाः शुभाशुभचिन्तनीयत्वात् तथात्वम्। बहुव्री० जायाशब्दस्य निङ्। युवती जायास्य युवजानिः "युवजानिर्धनुष्पाणिः" भट्टिः। पतिशब्देन द्वन्द्वे तस्याः जम् दम वा भवति। जम्पती दम्पती वा पक्षे जायापती।

जायाघ्न पु॰ जायां हन्ति "लक्षणे जायापत्योष्टक्" पा॰ लक्षणवति हन्-टक्। जायाहननसूचकलक्षणयुक्ते भर्त्तरि। "अमनुष्यकर्तृके च" पा॰ टक्। २तिलकालके सि॰ कौ॰। तस्य जायाहननसूचकत्वात् तथात्वम्। एवं ज्योतिषोक्ते ३योगभेदे च "यावन्तः पापखेटामदनसदनगास्तावतीनां विरामः" इत्युक्तयोगस्य जायानाशसूचकत्वात् तथात्वम्।

जायाजीव पु॰ जायया तन्नर्त्तनवृत्त्या जीवति-अच्। नटे अमरः। [१नटे २बकखगे च मेदि॰।

जायानुजीविन् पु॰ जायया अनुजीवति अनु+जीव-णिनि।

जायिन् त्रि॰ जि-णिनि। १जययुक्ते "अफलं जन्म तस्याहं मन्ये दुर्जातजायिनः" भा॰व॰ २५अ॰ "जायीतिनाम्ना ध्रुवको द्वाविंशत्यक्षरान्वितः। सन्निपातेन तालेन शृङ्गारेऽभीष्टदो रसे" सङ्गीतदा॰ उक्ते २ध्रुवकभेदे पु॰। तत्र जायीति पाठान्तरम्। शीलार्थे तु इनि जयीत्येव।

जायु पु॰ जयति रोगान् जि-उण्। १औषधे अमरः। २जयशीले त्रि॰। "मखाअमितो जायवोरणे" ऋ॰ १।११८।२। "वनेषु जायुर्मर्त्तेषु" ऋ॰ १।६७।१।

जाये(या)न्य पु॰ जि-बा॰ ए (आ) न्यण्। जयशीले। "यो हरिमा जायान्योऽङ्गभेदो विशल्यकः" अथ॰१८।४४।२। तैत्तिरीये तु जायेन्य इति पाठः।

जार पु॰ जीर्य्यत्यनेन जॄ-करणे घञ्। १उपपतौ अमरः। "शूद्रो यदर्य्यायै जारो न पोषमनुमन्यते" यजु॰२३।३१। "जारं चौरेत्यभिवदन् दाप्यः पञ्चशतं दमम्" याज्ञ॰। बा॰ कर्त्तरि घञ्। २जारके च। "स्वसारं जारो अभ्येति पश्चात्" ऋ॰१०।३।३। "जारो जरयिता" भा॰।

जारज पुंस्त्री जारात् उपपतेर्जायते जन-ड। अनियुक्तायां स्त्रियां १उपपतिजाते (वेजन्मा) पुत्रे २तथाभूतकन्यायां स्त्री "अमृते जारजः कुण्डः मृते भर्त्तरि गोलकः" अमरः। जन-क्त ५त॰। जारजातादयोऽप्यत्र। "अनियुक्तासुतश्चैव पुत्रिण्याप्तश्च देवरात्। उभौ तौ नार्हतो भागं जारजातककामजौ" मनुः।

जारजयोग पु॰ जारजस्य सूचको योगः। ज्योतिषोक्ते योगभेदे। "न लग्नमिन्दुञ्च गुरुर्निरीक्षते न वा शशाङ्कं रविणा समायुतम्। सपापकोऽर्केण युतोऽथवा शशी परेण जातं प्रवदन्ति निश्चयात्। भग्नपादर्क्षसंयोगात् द्वितीया द्वादशी यदि। सप्तमो वार्कमन्दारे जायते जारजो ध्रुवम्"। अन्योऽपि योगः बृहज्जातकोक्तः जातकशब्दे ३०८६ पृ॰ दृश्यः।

जारण पु॰ जारयति जॄ-णि-ल्यु। जारके १द्रव्यभेदे। जार्य्यतेऽनेन जॄ-णिच् करणे ल्युट्। २जारणसाधने द्रव्यभेदे। कर्त्तरि ल्यु। ३जीरके स्त्री ङीप् राजनि॰। भावे-ल्युट्। ४जीर्णतासम्पादने न॰।

जारतिनेय पुंस्त्री जरत्या अपत्यम् ढक् कल्याण्या॰ इनङ्। १जरत्या अपत्ये। जरतिनोऽपत्यं शुभ्रा॰ ढक्। २जरतिनोऽपत्ये च।

जारभर पु॰ जारं बिभर्त्ति पोषयति भृ-पचा॰ अच्। जारपोषके।

जारित त्रि॰ जॄ-णिच्-क्त। १शोधिते २मारिते धात्वादौ।

जारी स्त्री जॄ-णिच्-अच् गौरा॰ ङीष्। (जाड़ी) ख्याते औषधभेदे मेदि॰।

जारु पु॰ जॄ-उण्। १जरायौ। "बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि च चोद्भिज्जानि" ऐत॰ उ॰। "जारुजानि जरायुजानि मनुष्यादीनि" भाष्यम्। २जारके त्रि॰।

जारुधि पु॰ जारुर्जारको द्रव्यभेदो धीयतेऽस्मिन् धा-आधारे कि उप॰स॰। सुमेरोः कर्णिकाकेशरभूते पर्वतभेदे। "कुरङ्ग कुरर कुसुम्भ वैकङ्क त्रिकूट शिखर पतङ्ग रुचक निषध शिनिवास कपिल शङ्ख वैदूर्य्य जारुधि हंसर्षभ नाग कालञ्जर नीरदादयो गिरयो मेरोः कर्णिकाया इव केशरभूता मूलदेशे परित उपक्लृप्ताः" भाग॰५।१६।२२।

जारूथी स्त्री जरूथेन असुरविशेषेण निर्वृत्ता अण् ङीप्। नगरीभेदे "जारूथ्यामाहुतिः क्राथः शिशुपालो जनैः सह" भा॰व॰२२अ॰। "जारूथ्यां नगर्य्याम्" नीलक॰ "जारूथ्यामाहुतिः क्राथः शिशुपालश्च निर्जितः" हरिवं॰१६ अ॰।

जारूथ्य त्रि॰ जरूथं मांसं स्तोत्रं वा तदर्हति यत्। १मांसदानपुष्टे २स्तोत्रार्हे च "दशाश्वमेधानाजह्रे जारूथ्यान् स निरर्गलान्" भा॰व॰१८अ॰। "जारूथ्यान् त्रिगुणदक्षिणानित्यर्जुनमिश्रः" तच्चिन्त्यं जॄवृभ्यामूथन्नित्युणादिसूत्रे ऊथनि जरूथं मांसमिति शाब्दिकाः तथा च मांसमयान् मांसादिदानप्रधानान् पुष्टानित्यर्थः। जरूथोऽसुरविशेषः इति वेदभाष्यम्। अत्र जरतेः स्तुत्यर्थस्य शब्दसारूप्यादर्थो विरोधाच्च जरूथं स्तोत्रमुच्यत इति जारूथ्यान् स्तोत्रार्हानित्यर्थः" नीलक॰। जारूथ्यशब्दकल्पनं प्रामादिकमेव।

जाल पुं न॰ जल-घाते ज्वला॰ ण, पु॰ जल-संवरणे कर्त्तरि अच् वा। १शणसूत्रनिर्मिते स्वनामख्याते पदार्थे अमरः "अभ्याययुश्च तं देशं निश्चिता जालकर्मणि। जालं ते

योजयामास दुर्नीतैः शेषैश्च सनराधिप!" भा० अनु० ५०अ०। २गवाक्षे ३समूहे च अस्फुटफलादौ ४क्षारके (जालि)। ५दम्भे मेदि०। गवाक्षो गवाक्षच्छिद्रं तत्र "गवाक्षजालैरभिनिष्पतन्त्यः" भट्टिः समूहे "नीहारजालमलिनः पुनरुक्तमन्द्राः" "करजालमस्तसमयेऽपि सताम्" माघः "गवाक्षमौघजालपतितां रविभासः" किरा० ६इन्द्रजाले हेम०।७कदम्बवृक्षे पुं० मेदिनिः।

जालक पुं० जालमिव कायति कै-क। १गवाक्षे हेमच०। स्वार्थे क।२जालशब्दार्थे। "मक्षिकाः मशकान् कीटान् जालकानिव पश्यति" सुश्रु० ३क्षारके पुं०स्त्री स्त्रियां ङीप् शब्दार्थचि०। ४जालतुल्ये मेषलोम्नि च।

जालकारक पुं० कृ-ण्वुल् ६त०। जालस्य मक्षिकादिपातनाय जालाकारस्य कारके-मर्कटे (माकड़सा) हेमच० प्राधान्येन कर्त्तृत्वमस्य २कर्त्तरि त्रि०। प्राधान्येन कृतपदार्थस्य स्वच्छाच्छदकत्वेन जालतुल्यकरणात्तस्य तथात्वम्।

जालकि पुं० त्रिगर्त्तषष्ठान्तर्गते आयुधजीविभेदे। "आहुस्त्रिगर्त्तषष्ठांस्तु कौण्डोपरथदाण्डकिः। क्रौष्टुकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जालकिः"। सि०कौ० ततः स्वार्थे छ। जालकीय तदर्थे। बहुषु लुक्। जालकय इत्येव।

जालकिनी जालमिव कं यति कै-क जालकं देहलोमतदस्त्यस्याः इनि ङीप्। १मेष्यां त्रिका० २मेषे पुं०।

जालकीट पुं० जाले पतितः कीटोऽस्य। मर्कटे लूतायां (माकड़सा) तदीयजाले मशकादीनां पतनात्तस्य तथात्वम्। जालकीटे भवः पलद्या० अण्। २तद्भवे त्रि०।

जालचौर्य्य न० जाले जालके चौरं तत्र साधु यत्। चौरविषे वृक्षभेदे। स्थावरविषोपक्रमे "कुमुदघ्नी स्नुही जालचौर्य्याणि त्रीणि चौरविषाणि" सुश्रुतः।

जालगर्द्दभ पुं० क्षुद्ररोगभेदे। क्षुद्ररोगशब्दे २८२२पृ० दृश्यम्।

जालगोणिका जालमिव गोणी यत्र कप् ह्रस्वः। दधिमन्थनभाण्डे त्रिका०।

जालन्धर पुं० दैत्यभेदे "पुरा जालन्धरं दैत्यं शम्भुरपि परिकम्पनम्। पादाङ्गुष्ठस्य रेखातश्चक्रं कृत्वा हरोऽहरत्। तच्च चक्रं मया लब्धं नेत्रपद्मार्चनात् विभोः। सुदर्शनाख्यं तच्चक्रं दैत्यचक्रविमर्द्दनम्" काशी० २१अ० ध्रुवं प्रति विष्णोरुक्तिः। २त्रिगर्त्तदेशे पुं० तद्देशस्य तेन कृतत्वात् तथात्वम्। सोऽभिजनोऽस्य अण्। पित्रादिपरम्परया ३तद्देशवासिनि। बहुषु तस्य लुक्।४ऋषिभेदे पुं० ततः नडा० गोत्रापत्ये फक्। जालन्धरायण तद्गोत्रापत्ये पुंस्त्री०। जालन्धरायणस्य विषयो देशः राजन्या० वुञ्। जालन्धरायणक तस्य परिपालिते देशे पुं०।

जालपाद् पुं० जालमिव पादोऽस्य हस्त्यादि० नान्त्यलोपः। १हंसे। "जालपादभुजौ तौ तु पादयोश्चक्रलक्षणौ" (नरनारायणौ) भा० शा० ३४५ अ०। "प्रतुदान् जालपादांश्च कोयष्टिनखविष्किरान्" मनुः "जालपादान् खञ्जरीटानज्ञातांश्च मृगद्विजान्" याज्ञ० तन्मांसभक्षणं निषिद्धवान्। स्त्रियां कुम्भपद्या० अन्त्यलोपे ङीप् पादः पत्। जालपदी हंस्याम् वरणादिगणे जालपदीत्यत्र जालपदीति पाठान्तरे जालपद्या अदूरभवो देशः वरणा० अण्। जालपद तस्या अदूरभवदेशे त्रि०। पृषो० अन्त्य लोपः। जालपात् हंसे त्रिका०।

जालप्राया स्त्री जालस्य प्रायो बाहुल्यं यस्याम्। लौहमयाङ्गरक्षिण्यां (साजोया) हेमच०।

जालमालि पुं० आयुधजीविभेदे। ततः स्वार्थे छ। तदर्थे जालकिशब्दे दृश्यम्।

जालवर्वुरक पुं० जालाकारो वर्वुरकः। (काँटावावला) वृक्षभेदे। "जालवर्वुरको रूक्षो वातरोगकफापहः। पित्तदाहकरश्चोष्णः कषायश्च प्रकीर्त्तितः" राजनि०।

जालसरस न० नित्यक० अच् समा०। सरोवरभेदे।

जालह्रद त्रि० जलप्रचुरो ह्रदः तत्र भवः तस्येदं वा शिवा० अण्।१जलप्रचुरह्रदभवे २तत्सम्बन्धिनि च स्त्रियां ङीप्।

जालाक्ष पुं०जालमिवाक्षि षच् समा०। गवाक्षे "हेमजालाक्षनिर्गच्छद्धूमेनागुरुगन्धिना" भाग० ८।१५।१९।

जालाष न० भेषजभेदे "जालाषेणाभिषिञ्चत जालाषेणोपसिञ्चत। जालाषमुग्रं भेषजं तेन नो मृड जीवसे" अथ० ६।५७।२।

जालिक पुं० जालेन चरति पर्प्या० ष्ठन्। जालेन जीवति वेतना० ठञ् वा। १जालजीविनि जालेन २चारिणि वा ३कैवर्त्ते त्रिका० ४मर्कटे हेमच०। ५जालजीविनि वागुरिके मृगबन्धनार्थं जालपातिनि मृगयुभेदे अमरः। ष्ठनि स्त्रियां ङीष् इति भेदः। जालमस्त्यस्य ठन्। ६जालोपजीविनि ग्रामजालिनि च त्रि० हेमच०।

जालिका स्त्री जाल+अस्त्यर्थे ठन्। १वस्त्रभेदे स्त्रीणां मुखावरणवस्त्रे २गिरिसारे ३जलौकायां ४विधवायां योधानामङ्गरक्षिताङ्गरक्षण्यां (साजोया) च मेदि०। (जालि) ५जालशब्दार्थे०।

जालिनी स्त्री जाल+अस्त्यर्थे इनि।१चित्रशालायां हेमच०

२कोषातकीवृक्षे राजनि०। घोषातक्यां रत्नमा०। ४प्रमेहरोगिणां पिड़काभेदे सुश्रु०। "तत्र वसामेदोभ्यामभिपन्नशरीरस्य त्रिभिर्दोषैरनुगतधातोः प्रमेहिणो दश पिड़का जायन्ते। तद्यथा शराविका सर्षपिका कच्छपिका जालिनी विनता पुत्रिणी मसूरिका अलजी विदारिका विद्रधिका चेति। शरावमाना तद्रूपा निम्नमध्या शराविका१। गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी२। सदाहा कूर्म्मसंस्थाना ज्ञेया कच्छपिका३ बुधैः। जालिनी४ तीव्रदाहा तु मांसजालसमावृता। महती पीड़का नीला पिड़का विनता५ स्मृता। महत्यल्पाचिता ज्ञेया पिड़का सा तु पुत्रिणी६। मसूरसमसंस्थाना ज्ञेया सा तु मसूरिका७। रक्ता सिता स्फोटवती दारुणा त्वलजी८ भवेत्। विदारीकन्दवद्वृत्ता कठिना च विदारिका९। विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका१० बुधैः" सुश्रुतः।

जाली स्त्री जालमस्त्यस्याः अच् गौरा० ङीष्। १ज्योत्स्न्यां (झिङ्गा) अमरः २पटोले राजनि०। (जालि) ३चारके च।

जाल्म त्रि० दु० जल-बा० म। १पामरे २क्रूरे ३असमीक्ष्यकारिणि च मेदि०। "त्वयि पूजनं जगति जाल्म!" माघः "त्वयं विश्राम्यतां जाल्म! स्कन्धस्ते यदि बाधति। न तथा बाधते स्कन्धो यथा बाधति बाधते" उद्भटः। "जनान् योऽभिभवत्यन्यान् कर्मणा हि स वै पुमान्। नत्वेव जाल्मीं कापालीं वृत्तिमेष्टुमर्हसि" भा०शा०१२२अ०। स्वार्थे क। तत्रार्थे "मित्रब्रह्मगुरुद्वेषी जाल्मकः सुविगर्हितः" भा० द्रो० १८६ अ०।

जाल्य पु० जल-ण्यत्। शिवे "मत्स्यो जलचरो जाल्योऽकलः केलिकलः कलिः" भा०शा०२८६अ० शिवस्तुतौ।

जावन्य न० जवनस्य भावः दृढा० वा ष्यञ्। वेगे। पक्षे इमनिच् जविमन् पु०, तल् जवनता स्त्री, त्व जवनत्व न० तत्रार्थे। [दृढादौ।

जावायनि त्रि० जव+चतुरर्थ्यां कर्णा० फिञ्। जवयुक्त

जाषक न० जाषक+पृषो०। जाषके कालीयनामगन्धद्रव्ये अमरटीकायां संसारसुन्दरी।

जाष्कमद पुंस्त्री पक्षिभेदे। "अनिलाय जाष्कमदा ऽभ्राः श्येनाः पतत्त्रिणः" अथ०११।९।१।

जास्पति पु० जायते जन-ड+जायाः दुहितुः पतिः वेदे नि०। जामातरि "सदभिज्ञास्पतिं वा" ऋ०१।१८५।८। "जाः पुत्रः तासां पतिं जामातरम्" भा०।

जास्पत्य न० जाया च पतिश्च जायापती तयोर्भावः कर्म वा ष्यञ् पृषो०। जायापत्योः १कर्म्मणि "सं जास्पत्यं सुयमम्" ऋ०५.२८.३ "जास्पत्यं जायापत्योः कर्म" भा०। २तद्भावे च।

जाहक पु० दह-ण्वुल् पृषो०। (घोङ्ग) इति ख्याते १खगे, २मार्ज्जारे, ३खट्टायां ४कारुण्डिकायां मेदि०। ५विलेशये जन्तुभेदे राजनि० "जाहकाहिशशक्रोड़गोधानां कीर्त्तनं शुभम्" वृहत्सं० ८५ अ०।

जाहुष पु० राजभेदे "परिविष्टं जाहुषं विश्वतः" ऋ० १।११६।२०। "जाहुषः कश्चित् राजा" भा०।

जाह्नवी स्त्री जह्नु+अण् ङीप्। "जानुद्वारा पुरादानीं जह्नुः संपीय कोपतः। तस्य कन्यास्वरूपा च जाह्नवी तेन कीर्त्तिता" इत्युक्तनिर्वचनायां गङ्गायाम्। जह्नुशब्दे ३०८१पृ० दृश्यम् "ज्यैष्ठे मासि क्षितिसुतदिने शुक्लपक्षे दशम्यां हस्ते शैलान्निरगमदियं जाह्नवी मर्त्त्यलोकम्" ति०त० शङ्खः तस्यां तिथियोगे स्नानफलं यथा "सामान्यदिवसस्नानसङ्कल्पं शृणु सुन्दरि!। पुण्यं दशगुणञ्चैव सोमस्नानतः परम्। ततस्त्रिंशद्गुणं पुण्यं रविसंक्रमणे दिने। अमायाञ्चापि तत्तुल्यं द्विगुणं दक्षिणायने। ततो दशगुणं पुण्यं नराणाञ्चोत्तरायणे। चातुर्मास्यां पौर्णमास्यामनन्तं पुण्यमेव च। अक्षयायाञ्च तत्तुल्यमेतद्वेदनिरूपितम्। असंख्य पुण्यफलदमेतेषु स्नानदानकम्। सामान्यदिवसस्नानात् दानात् शतगुणं भवेत्। मन्वन्तरायां देवेशि! युगाद्यायां तथैव च। माघस्य सितसप्तम्यां भीष्माष्टम्यां तथैव च। ततोऽपि द्विगुणं पुण्यं नन्दायां भयदुर्लभे!। दशहरादशम्याञ्च युगाद्यादिसमं फलम्। नन्दासमञ्च वारुण्यां महत्पूर्वे चतुर्गुणम्। ततश्चतुर्गुणं पुण्यं विमहत्पूर्वके सति!। पुण्यं कोटिगुणञ्चैव सामान्यस्नानतो हि यत्। चन्द्रोपरागसमये सूर्य्ये दशगुणं ततः। पुण्यं ऽप्यर्द्धोदये काले ततः शतगुणं फलम्। सर्वेषामेव सङ्कल्पं वैष्णवानां विपर्य्ययः" इति ब्रह्मवै० प्रकृतिख०। "अपूरयत्सा जलधिञ्च जाह्नवी" माघः।

जि जये अभिभवे भ्वा० पर० सक० अनिट्। जयति अजैषीत् जिगाय जिग्यतुः जिगयिथ जिगेथ। जेता जीयात् जेष्यति। जापयति-ते अजीजपत्-त। जिगीषति। जेता जयी जितः जयः। "जयत्यतिबलो रामो लक्ष्मणश्च महाबलः। राजा जयति सुग्रीवो राघवेणानुपालितः" रामा० बहुलतः प्रयोगः। "सर्वद्रव्याणि कुप्यञ्च यो यज्जयति तस्य तत्" मनुः। "दुर्य्योधनो द्रौपदि! त्वामजै-

षीत्" मा० स० ६५ अ० । "जिगाय तस्य हन्तारं स रामः सार्व्वलौकिकः" भट्टिः "गर्जितानन्तरां दृष्टिं सौभाग्येन जिगाय सा" कुमा० । "जीयात् पण्डितगर्व्वपर्व्वतपविः श्रीवोपदेवकविः" मुग्धबो० अस्य तुबन्तस्थाने तिबन्तौ । जयति जयन्ति । "जयति जयति देवः" नाटकेषु बहुस्थाने कञ्चुक्याद्युक्तिः । "नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति" काव्यप्र० । जयश्च सर्व्वोत्कर्षस्तेन स्वापेक्षयाप्युत्कर्षबोधनात् तस्य नमस्कारव्यञ्जकता यथाह काव्या० "जयत्यर्थेन च नमस्कार आक्षिप्यते इति तामसि प्रयात इति" । अभिभवपूर्व्वकग्रहणे अर्थे द्विक० । दुहाच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमन्थमुषाम् । कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्" इत्युक्तेः । शतं जयति देवदत्तम्" सि० कौ० "इन्द्रं वाजं जापयत" यजु० ९।११। "यदि त्वाध्वर्य्यव आजिं जापयेयुः" आश्व० ९।८। "इमाञ्च पृथिवीं कृत्स्नामेकाह्ना स व्यजीजयत्" भा० द्रो० ६२ अ० स्वार्थे णिच् । व्यजीजयत् इति पाठे पुगभाव आर्षः। "गतं जिगीषतः मादौ करुडातेऽपि कामिकाम्" भाग० २।१०।२५ । "अगाहताष्टादशतां जिगीषया" नैष० । जेगीयते । कर्मणि अजीयत अजायि । "प्रागजीयत घृणा ततो मही" रघुः।

अति+अतिशयेन जये "विराडियं सुराजा अत्यजैषीत्" अथ० १४।२।७४ ।

वि+अति परस्परजये आत्म० । "व्यतिजिग्ये समुद्रोऽपि न धैर्य्यं तस्य गच्छतः" भट्टिः

अधि+आधिक्येन जये "सपत्नांश्चाधिजीयास्म" भट्टिः ।

अनु+अनुरूपजये पश्चाज्जये च । "कौशल्योऽन्वजयत् महीम्" भा० शा० ३।२४ अ० ।

अभि+आभिमुख्येन जये । "ते चान्द्रमसमेव लोकमभिजयन्ति" प्रश्नो पु० १अधिगमे च "वेदश्रुतिभिराख्यानैरर्थोऽभिजिगीषित" भा० शा० ८४६५ ।

अव+अधरीकृत्य जये । "शरैर्विध्वस्य तांश्चैरानवजित्य च तद्धनम्" भा० आ० ७७६ । "अवजित्य सुधर्म्माणं धनं चादाय सर्व्वशः" भा० वि० २ अ० ।

परा+पराक्रमपूर्व्वकजये आत्म० । पराजयते । "स्वं पराजयमानोऽसावुन्नत्या पवनात्मजम्" भट्टिः। "पराजितेनापि कृतौ हरस्य" कुमा०। ग्लानौ अक० तत्र "पराजेरसोढः" पा० सहार्थस्यापादानता। "अध्ययनात् पराजयते ग्लायतीत्यर्थः सि० कौ० "तां पराजयमानां स प्रीतेरस्यां दशाननात्" भट्टिः ।

प्रति+प्रतिरूपजये । "कृतास्त्रिकं मायया प्रत्यजैषीत्" भा० द्रो० १३५७ श्लो० । "वयं प्रतिजिगीषन्तस्तत्र तान् समभिद्रुताः" ४२७६ श्लो० ।

वि+विशेषेण जये आत्म० विजयते । "येन देवान् मनुष्यांश्च पार्थो विजयते मृधे" भा० वि० १३४५ श्लो० । "जगदाद्रिर्विजेषीष्ठाः । "दैत्यं कुलं विजिग्य" भट्टिः ।

जि त्रि० ज्या+वा० कि । १जयशीले २पिशाचे पु० एकाक्षरको० ।

जिकन पु० स्मृतिनिबन्धकारके विद्वद्भेदे ।

जिगत् पु० गम–क्विप् सन्वच्च । प्राणवायौ उज्ज्वलद० ।

जिगर्त्ति पु० गॄ–वा० ति द्वित्वञ्च । आच्छादके । "जिगर्त्तिमिन्द्रो अपजर्गुराणः" ऋ० ५।२९।४ "जिगर्त्तिं गरन्तमाच्छादयन्तम्" भा० ।

जिगीषा स्त्री जि–सन् भावे अ । १जयेच्छायां २प्रकर्षे, ३उद्यमे च मेदि० । "वैवस्वतं जिगीषया" रघुः । "अगाहताष्टादशतां जिगीषया" नैष० ।

जिघत्नु पु० जिघांसु+पृषो० । जिघांसौ । "यो नः सनुत्य उत वा जिघत्नुः" ऋ० २।३०।९। "जिघत्नुर्जिघांसुः" भा० ।

जिघत्सा स्त्री अत्तुमिच्छा अद–सन् घस्रादेशः भावे अ । १भोजनेच्छायां २क्षुधायां हेमच० ।

जिघत्सु त्रि० अत्तुमिच्छति अद–सन्–घस्रादेशे उ । क्षुधिते अमरः ।

जिघांसु त्रि० हन–सन्–उ । हननेच्छौ "प्रशान्तचेष्टं हरिणं जिघांसुः" भा० २रिपौ पु० हेमच० ।

जिघृक्षा स्त्री ग्रह–सन् भावे अ । ग्रहणेच्छायां "पटुरपि प्रियकण्ठजिघृक्षया" रघुः ।

जिघ्र त्रि० घ्रा–कर्त्तरि श जिघ्रादेशः । घ्राणकर्त्तरि "स्वामी निश्वसितेऽप्यसूयति मनोजिघ्रः सपत्नीजनः" सा० द० "आजिघ्रैः पुष्पगन्धानां पतङ्गैर्ग्लपिता वयम्" भट्टिः ।

जिङ्गिनी स्त्री जिगि–गतौ णिनि । (झिङ्गी) लतायां भावप्र० "जिङ्गिनी मधुरोष्णा च कषाया योनिशोधिनी । कटुका व्रणहृद्रोगवातातीसारहृत् पटुः" भावप्र० ।

जिङ्गी स्त्री जिगि–गतौ अच् गौरा० ङीष् । मञ्जिष्ठायाम् अमरः ।

जिज्ञासा स्त्री ज्ञा–भावे अ । १ज्ञातुमिच्छायां २तदर्थविचारे च । "अथातो धर्म्मजिज्ञासा" जै० सू० । "अथातो ब्रह्मजिज्ञासा" शा० सू० । उभयत्र विचारार्थकताकरे दृश्या "दुःखत्रयाभिघातात् जिज्ञासा तदपघातके हेतौ" सां० का० ।

जिज्ञासु त्रि० ज्ञातुमिच्छुः ज्ञा–सन्–उ । १ज्ञातुमिच्छौ २मुमुक्षौ च "चतुर्विधा भजन्ते माम्–"आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ !" गीता ।

जिज्ञास्थि न० अस्थ्नः जिज्ञासा राजद० परनि० सात्वोपश्च। अस्थिजिज्ञासायाम्।

जित् त्रि० जि—क्विप्। जेतरि। "मारजित् लोकजिज्जिनः" अमरः "स्वर्जिता यजेत" "विश्वजिता यजेत" श्रुतिः। "यजेत वाश्वमेधेन स्वर्जिता गोषवेन वा" मनुः

जित त्रि०जि—कर्म्मणि क्त। १पराजिते २पराभूते। भावे क्त। ३जये न०। तदस्यास्ति अच्। ४अर्हदुपासकभेदे पु० हेमच०।

जितकाशि पु० जितः अभ्यासपटुतया दृढीकृतः काशिः मुष्टिर्येन। दृढमुष्टौ योधभेदे नीलकण्ठः।

जितकाशिन् त्रि० जितेन जयेन काशते प्रकाशते काश—णिनि। १जिताहवे, जयिनि हेमच०। "अनिरुद्धो रणे बाणो जितकाशी महाबलैः" हरिवं० १७७ अ०।

जितक्रोध त्रि० जितः क्रोधो येन। १क्रोधशून्ये २विष्णौ पु०। "मनोहरो जितक्रोधो वीरबाहुर्विदारणः" विष्णु सं० "वेदमर्य्यादां स्थापयन् असुरान् हन्ति न तु कोपवशात्" भाष्योक्तेः तस्यासुरहननाय न कोपः किन्तु वेदमर्य्यादारक्षार्थ एवेति न तस्य कोपशालितेति बोध्यम्। जितमन्युरप्युभयत्र। "अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः" विष्णुस०।

जितनेमि पु० जिता नेमिरत्र। आश्वत्थदण्डे हेमच०

जितलोक त्रि० जितः आयत्तीकृतः कर्म्मादिद्वारा लोकः स्वर्गादिर्येन। इष्टापूर्त्तादिकर्म्मभिः आयत्तीकृतस्वर्गादिलोके धार्म्मिके "स एकः पितृणां जितलोकानामानन्दः अथ ये शतं पितृणां जितलोकानामानन्दः शत० ब्रा० १४।७.१।३३। "पितृणां दक्षिणमार्गानुयायिनाम् श्राद्धपिण्डपितृयज्ञादिकर्मभिः पितृतोषणद्वारा जितो लोको यैस्ते यद्वा जिता लोका येषामिति जितलोकाः" भा०। २अभिभूतलोके त्रि०।

जितवत् त्रि० जि+क्तवतु। १कृतजये स्त्रियां ङीप् सा च उशीनरनृपस्य २कन्यायाम्। "अस्ति मे मानुषे लोके नरदेवात्मजा सखी। नाम्ना जितवती नाम रूपयौवनशालिनी। उशीनरस्य राजर्षेः सत्यसन्धस्य धीमतः। दुहिता कथिता लोके मानुषे रूपसम्पदा" भा०आ०९९अ०

जितव्रत त्रि० जितमायत्तीकृतं व्रतं येन। १आयत्तीकृतव्रते पृथुवंश्ये २हविर्द्धानपुत्रभेदे पु० "हविर्धानाद्धविर्धानी विदूरास्त षट् सुतान्। बर्हिषदं गयं शुक्लं कृष्णं सत्यं जितव्रतम्" भाग० ४।२३।८।

जितशत्रु पु० जितः शत्रुर्येन। १पराजितरिपुके रिपुजयकर्त्तरि। २अर्हतां पितृभेदे पु० हेमच०।

जिताक्षर त्रि० जितानि आयत्तीकृतानि अक्षराणि शीघ्रं तद्वाचनपाटवादि येन। दृष्टिमात्रेण अक्षरवाचनशक्तियुक्ते।

जितात्मन् त्रि०जितो वशीकृत आत्मा इन्द्रियं मनो वा येन। १जितेन्द्रिये। २श्राद्धभागार्हे देवभेदे पु० कीर्त्तिमच्छब्दे २०६१पृ० दृश्यम्।

जितामित्र त्रि० जितः अमित्रो येन। १शत्रुपराजयकर्त्तरि २जितकामादिरिपुके च। ३विष्णौ पु०शब्दरत्ना० "अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः" विष्णु स० "जिता अमित्रा आभ्यन्तरा रागद्वेषादयो बाह्या रावणादयश्च येनासौ जितामित्रः" भा०

जितारि पु० जिता अरयो आभ्यन्तरा रागादयो बाह्याश्च रिपवो येन। १बुद्धे त्रिका० २इत्तार्हत्पितरि हेमच० ३जितशत्रौ शत्रुजयकारिणि ४कामादिरिपुजयकर्त्तरि च त्रि० ५अविक्षितो नृपस्य पुत्रभेदे पु० "अविक्षितः परीक्षित्तु शबलाश्वश्च वीर्य्यवान्। आदिराजो विराजश्च शाल्मलिश्च महाबलः। उच्चैःश्रवा भङ्गकारो जितारिश्चाष्टमः स्मृतः" भा० आ० ९४ अ०।

जिताष्टमी स्त्री आश्विनकृष्णाष्टम्यां जीमूतवाहनपूजाद्यङ्गभूतायां जीमूताष्टम्यां तत्र कर्त्तव्यमुक्तं चमत्कारचि० भविष्योत्तरे "इषेमास्यसिते पक्षे अष्टमी या तिथिर्भवेत्। पुत्रसौभाग्यदा स्त्रीणां ख्याता सा जीवपुत्रिका। शालिवाहनराजस्य पुत्रो जीमूतवाहनः। तस्यां पूज्यः स नारीभिः पुत्रसौभाग्यलिप्सया। प्रदोषसमये स्त्रीभिः पूज्यो जीमूतवाहनः। पुष्करिणीं विधायाथ प्राङ्गणे चतुरस्रिकाम्"। विष्णुधर्म्मोत्तरे "पूर्वेद्युरपरेद्युर्वा प्रदोषे यत्र चाष्टमी। तत्र पूज्यः सदा स्त्रीभिः राजा जीमूतवाहनः"। तथा च यद्दिने प्रदोषव्यापिनी अष्टमी तत्रैव व्रतम्। उभयदिने चेत् परदिने त्रिसन्ध्यव्यापित्वात्। उभयदिने प्रदोषाव्याप्तौ उदयगामिन्यां तदुक्तं निर्णयामृतसिन्धौ "लक्ष्मी व्रतं चाभ्युदिते शशाङ्के यत्राष्टमी चाश्विनकृष्णपक्षे। तत्रोदयं वै कुरुते दिनेश! तदा भवेज्जीवितपुत्रिका सा" इति अस्यामष्टम्यां स्त्रीभिर्न भोक्तव्यम् "आश्विनस्यासिताष्टम्यां याः स्त्रियोऽन्नं हि भुञ्जते। मृतवत्सा भवेत्तास्ता वैधव्यञ्च भवेद्ध्रुवम्" वचनात्।

जिताहव पु० जितः शत्रुराहवे येन । जितकाशिनि हेम० ।

जितेन्द्रिय त्रि० जितानि वशीकृतानीन्द्रियाणि येन । यथेष्टमिन्द्रियप्रचारप्रतिरोधिनि १वशीकृतेन्द्रिये "श्रुत्वा स्पृष्ट्वाथ दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः । न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः" मनूक्ते हर्षविषादशून्ये २शान्ते जने । इन्द्रियजयश्च शौचकार्य्यः आत्मदर्शनयोग्यत्वे च हेतुः । यथोक्तं पात० सू० भा० "सत्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च" पात० सू० । "भवन्तीति वाक्यशेषः शुचेः सत्वशुद्धिस्ततः सौमनस्यं तत ऐकाग्र्यं तत इन्द्रियजयस्ततश्चात्मदर्शनयोग्यत्वं बुद्धिसत्वस्य भवतीति । एतच्छौचस्थैर्य्यादधिगम्यत इति" भा० । २कामवृद्धिवृक्षे पु० शब्दार्थचि० ।

जितु(त्त)म मिथुनराशौ "क्रियतावुरि जितु(त्त)म कुलीरलेय-पाथेय-यूककौर्पाख्याः । तौक्षिकआकोकेरो हृद्रोगश्चान्त्यभं चेत्थम्" ज्यो० त० मेषादिसंज्ञोक्तौ । अतिशयेन जित् जित्तम २अतिशयजययुक्ते त्रि० ।

जित्या स्त्री जि—क्यप् । हृहले कृष्टभूमिसमीकरणार्थं [काष्ठमयपदार्थभेदे

जित्वन् त्रि० जि—क्वनिप् । जयशीले । ततः कर्णा० चतुरर्थ्यां फिञ् । जैत्वनायनि जित्वनोऽदूरदेशादौ ।

जित्वर त्रि० जि—क्वरप् । जयशीले "सुराध्वरे घस्मरजित्वरेण" "शस्त्राण्युपायंसत जित्वराणि" भट्टिः "करदीकृतभूपालो भ्रातृभिर्जित्वरैर्दिशाम्" माघः । क्वरपः टिड्ढाणञित्यादि" पा० सूत्रे पाठात् स्त्रियां ङीप् । मुग्ध० मते ष्वरप् षित्त्वात् ङीप् इति भेदः । सा च २काशीपूर्य्यां त्रिका० ।

जिन पु० जि—नक् । १बुद्धे अमरः २अर्हन्नामबौद्धभेदे ३विष्णौ च हेमच० । ४अतिवृद्धे उणा० । ५जित्वरे त्रि० मेदि० । तस्येदमण् । जैन जिनसम्बन्धिनि त्रि० "हस्तिना पीड्यमानोऽपि न गच्छेज्जैनमन्दिरम्" । तदीयमते च तच्च अर्हच्छब्दे ३८२ पृ० दर्शितम् ।

जिनसद्मन् न० ६त० । जिनगृहे चैत्ये विहारे हेमच० ।

जिनेन्द्र पु० जिनानामिन्द्रः जिन इन्द्र इव वा । १बुद्धे हला० २व्याकरणकारके विद्वद्भेदे च । स्वार्थे अण् । तत्रार्थे "पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः" कविकल्पद्रुमः ।

जिनेश्वर पु० ६त० । बुद्धे हेमच० ।

जिम भक्षे भ्वा० पर० सक० सेट् । जेमति अजेमीत् । उदित् जेमित्वा जान्त्वा जितः । "जेमनं लेप आहारः" अमरः

जिरि हिंसायां स्वा० पर० सक० सेट् । जिरिणोति अजिरायीत् । अयं वैदिकः ।

जिल्लिक पु० दक्षिणस्थे देशभेदे, सोऽभिजनोऽस्य अण् । तस्य राजा वा अण् । जैल्लिक पित्रादिक्रमेण तद्देशवासिनि तन्नृपे च बहुषु तस्य लुक् । तद्देशवासिषु तन्नृपेषु च ब० व० । "जिल्लिकाः कुन्तलाश्चैव सौहृदाननकाननाः" भा० स० ९अ० ।

जिव प्रीणने भ्वा० पर० सक० सेट् इदित् । जिन्वति अजिन्वीत् जिजिन्व इदित्त्वात् नोपधालोपः जिन्व्यते । "भूमिं पर्ज्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः" ऋ० १।१६४।५१ । "इन्द्रेण जिन्वितो मणिरागमन्" अथ० ९।३१।७ । "रश्मिरसि क्षयस्य क्षयं जिन्व सवितृप्रसूती" ताण्ड्य० ब्रा० १।९ । "अपां रेतांसि जिन्वति" ऋ० ८।४४।१६ । "यदा त्वं प्राण ! जिन्वसि" ११।४।१४ । वृद्धौ च अक० । वेदे अत्र क्वचित् आत्म० "स जिन्वते जठरेषु प्रजज्ञीरन्" ऋ० ३।२।११ । "जिन्वते वर्द्धते" भा० । वेदे नमध्यस्यैव प्रयोगात् शब्दकल्पद्रुमे अन्त्यस्थवान्तस्थले तस्य निवेशनात् जिम्वतीति प्रयोगदर्शनाच्च ओष्ठ्यत्वभ्रान्त्या मत्कृतशब्दस्तोममहानिधौ जिम्वतीति ओष्ठ्यान्ततया रूपप्रदर्शनं प्रामादिकमेव । कविकल्पद्रुमे अन्तःस्थवान्तमध्ये पाठात् धिविवातोरिव न मध्यत्वस्योचितत्वात् ।

जिवाजिव पुंस्त्री जीवञ्जीव+पृषो० । चकोरखगे शब्दर० जातित्वात् स्त्रियां ङीष् ।

जिव्रि पु० जॄ—रिक् रस्य वः । १समये २खगे च सि० कौ० ।

जिष सेके भ्वा० पर० सक० सेट् । जेषति अजेषीत् । उदित् जेषित्वा जिष्ट्वा । जिष्टः ।

जिष्णु पु० जिष—ग्स्नु । १विष्णौ हेमच० २इन्द्रे २अर्ज्जुने च ३जेतरि त्रि० मेदि० । तत्रार्ज्जुने जयशीले च । "यमुनाह्रदोपरिगहं समखण्डलद्युतिजिष्णु जिष्णुरच्युतोष्णवारणम्" "भूभुजश्च परलोकजिष्णवः" माघः "अहं दुरापो दुर्द्धर्षो दमनः पाकशासनिः । तेन देवमनुष्येषु जिष्णुर्नामाऽस्मि विश्रुतः" भा० वि० ४४अ० । इन्द्रे "जयंश्च जिष्णुश्चामित्र ! जयतामिन्द्रमेदिनौ" अथ० ११।९।१८ । विष्णौ "विष्णुर्विक्रमणाद्देवो जयनात् जिष्णुरुच्यते" भा० उ० ६९ अ० । जिष्णुनामनिरुक्तौ ।

जिह्म त्रि० हा—मन् सन्वत् आलोपश्च । १कुटिले २मन्दे ३तगरवृक्षे न० मेदि० । "असिताजिह्मवीक्षितैः" ऋतुसं० ।

"जिह्मं त्यजेयुर्निर्लोभमशक्तोऽन्येन कारयेत्" याज्ञ०। "सुहृदर्थमाहितमजिह्मधियाम्" माघः ४कपटे न०। "तदाशु कर्त्तुं त्वयि जिह्ममुद्यते" किरा० "जिह्मं कपटम्" मल्लि०। ५पिहिते त्रि० "जिह्मवारमपोर्णुत" ऋ०८।४।५। "जिह्मवारं पिहितद्वारम्" भा०। ६अधस्ताद्वर्त्तमाने च। "उच्चाबुघ्नं चक्रतुर्जिह्मवारम्" ऋ० १।११६।११। "जिह्ममधस्ताद्वर्त्तमानम्" भा०। ७अप्रसन्ने च। "विधिसमयनियोगाद्दीप्तिसंहारजिह्मम्" किरा० "जिह्ममप्रसन्नम्" मल्लि०।

जिह्मग पुंस्त्री जिह्मं कुटिलं मन्दं वा गच्छति गम–ड। १सर्पे स्त्रियां जातित्वात् ङीष्। २मन्दगे त्रि० मेदि० स्त्रियां टाप्। "व्रतं चक्रे विनाशाय जिह्मगानां धृतव्रतः" "स दृष्ट्वा जिह्मगान् सर्वांस्तीव्रकोपसमन्वितः" भा० आ० ८ अ०। [शब्दर० स्त्रियां जातित्वात् ङीष्।

जिह्ममेहन पुंस्त्री जिह्मं मन्दं मेहति मिह–ल्यु। भेके

जिह्मशल्य पु० जिह्मं कुटिलं शल्यमस्मात्। खदिरवृक्षे जटा०

जिह्माशिन् त्रि० जिह्मं मन्दमश्नाति अश–णिनि। मन्दभोजिनि ततः अपत्ये शुभ्रा० ढक्। जैह्माशिनेय तदपत्ये पु० स्त्री।

जिह्वल त्रि० ह्वल–अच् बा० सन्वच्च जिह्वं जिह्वाव्यापारं लाति ला–क वा। भोजनलोलुपे। "श्राद्धं कृत्वा परश्राद्धे भुञ्जते ये च जिह्वलाः। पतन्ति नरके घोरे लुप्तपिण्डोदकक्रियाः" श्रा० त०।

जिह्वा स्त्री लेढ्यनया लिह–स्वादे व "शेवयह्वजिह्वेत्यादिना" नि०। १रसास्वादकरणे इन्द्रियभेदे २तदधिष्ठाने गोलके (जिव) ख्याते पदार्थे च। तदिन्द्रियस्य जलीयत्वं सि० मु० समर्थितं यथा "रसनं जलीयं गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् सक्तुरसव्यञ्जकोदकवत् रसनसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वे सतीति विशेषणीयम्। तस्याधिष्ठातृदेवता च प्रचेताः "दिग्वातार्कप्रचेतोऽश्वीत्यादि" शा० ति० उक्तेः। अग्नेर्जिह्वाश्च सप्त तन्नामानि "काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा। स्फुलिङ्गिनी विश्वरूपी च देवी लोलायमाना इति सप्त जिह्वाः" मुण्डकोप०।"तस्याः कफादिदोषात् लक्षणादिकं भाव०प्र० दर्शितं यथा "शाकपत्रप्रभा रूक्षा स्फुटिता रसनाऽनिलात्। रक्ता श्यामा भवेत् पित्तात् लिप्ताऽऽर्द्रा धवला कफात्। परिदग्धा खरस्पर्शा कृष्णा दोषत्रयेऽधिके। सैव दोषद्वयाधिक्ये दोषद्वितयलक्षणा" वस्य क्लीवत्वं भरत आह स्म। जिह्वलः। इन्द्रियपरत्वे तथात्वमिति तु युक्तम्। ३वाक्ये निघण्टुः

जिह्वाजप पु० जिह्वया जपः। "जिह्वाजपः स विज्ञेयो केवलं जिह्वया बुधैः" तन्त्रसारोक्ते जपभेदे। "उच्चैर्जपाद्विशिष्टः स्यादुपांशुर्दशभिर्गुणैः। जिह्वाजपः शतगुणः साहस्रो मानसः स्मृतः" तन्त्रसा० तत्फलमुक्तम्।

जिह्वानिर्लेखन न० जिह्वा निर्लिख्यतेऽनेन निर्+लिख–करणे ल्युट्। (जिव छाचड़ान) द्रव्यभेदे तल्लक्षणं यथा

"जिह्वानिर्लेखनं हैमं राजतं ताम्रजं तथा। पाटितं मृदु तत्काष्ठं मृदुपत्रमयं तथा। तत्काष्ठं दन्तधावनयोग्यकाष्ठम्। दशाङ्गुलं मृदु स्निग्धं तेन जिह्वां लिखेत् सुखम्। तज्जिह्वामलवैरस्यदौर्गन्ध्यजड़ताहरम्" भाव० प्र०।

जिह्वाप पुंस्त्री जिह्वया पिबति पा–क। १कुक्कुरे २व्याघ्रे ३विड़ाले ४भल्लूके च शब्दरत्नावली ५चित्रकव्याघ्रे विश्वः। स्त्रियां जातित्वात् सर्वत्र ङीष्।

जिह्वामल ६त०। जिह्वास्थितमले कुलुके त्रिका०।

जिह्वामूल न० ६त०। जिह्वाया मूले। तत्र भवः छ। जिह्वामूलीय अयोगवाहान्तर्गतवर्णभेदे। "जिह्वामूलीयस्य जिह्वामूलम्" सि०कौ०। स च कखयोः परयोः विसर्गस्थाने जातः। कवर्गे च "जिह्वामूले तु कुः प्रोक्तः" शिक्षायां कवर्गस्य जिह्वामूलस्थानत्वोक्तेस्तथात्वम्।

जिह्वारद पुंस्त्री० जिह्वा रद इव यस्य। पक्षिणि हारा०। तस्य जिह्वाया एव दन्तकार्य्यकारित्वात्तथात्वम्। स्त्रियां जातित्वात् ङीष्।

जिह्वारोग पु० मुखरोगान्तर्गतजिह्वागतरोगभेदे। तल्लक्षणादि भावप्र० उक्तं यथा।

"वातजः पित्तजश्चापि कफजोऽलाससंज्ञकः। उपजिह्विका च गदा जिह्वायां पञ्च कीर्त्तिताः। तत्र वातजस्य लक्षणमाह। जिह्वाऽनिलेन स्फुटिता प्रसुप्ता भवेच्च शाकच्छदनप्रकाशा। स्फुटिता मनाग्विदीर्णा। प्रसुप्ता रसानभिज्ञतया सुप्तेव। शाकच्छदनप्रकाशा शाको मरुभूमिजातो द्रुमः तद्वत् कण्टकाचिता। पित्तजमाह। पित्तात् सदाहैरुपचीयते च दीर्घैः सरक्तैरपि कण्टकैश्च। कफजमाह। कफेन गुर्वी बहुलाचिता च मांसोच्छ्रयैः शाल्मलिकण्टकाभैः। बहुला स्थूला। मांसोच्छ्रयैः मांसजकण्टकैः। अलासमाह। जिह्वास्थले यः श्वयथुः प्रगाढ़ः सोऽलाससंज्ञः कफरक्तमूर्त्तिः। जिह्वां सरुक

स्तम्भयति प्रवृद्धो मूले च जिह्वा भृशमेति पाकम्। प्रगाढः प्रकर्षेण गाढो दारुणः। कफरक्तमूर्त्तिः कफरक्ताभ्यां मूर्त्तिर्यस्य स कफरक्तज इत्यर्थः। जिह्वास्तम्भेन वायुरत्र बोद्धव्यः। भृशं पाकेनेति पित्तस्य अतस्त्रिदोषजोऽयम्। असाध्यत्वञ्चास्य। उपजिह्विकामाह। जिह्वाग्ररूपः श्वयथुश्च जिह्वामुन्नाम्य जातः कफरक्तयोनिः। प्रसेककण्डूपरिदाहयुक्तः प्रकथ्यतेऽसावुपजिह्विकेति। जिह्वाग्ररूपः जिह्वाग्राकृतिः" भावप्र०। "पक्वान्नहरणाच्चैव जिह्वारोगः प्रजायते" शातात०।

जिह्वाशल्य पु० जिह्वायाः शल्यमिवास्त्यस्य अच्। खदिरवृक्षे राजनि०।

जिह्वावत् पु० यजुर्वेदीयवंशान्तगतर्षिभेदे। "अथ वंश" इत्युपक्रमे। "जिह्वावतो बाध्योगाज्जिह्वावाँ बाध्योगः" शत०ब्रा०१४।९।४।३३। २जिह्वायुक्ते त्रि०। स्त्रियां ङीप्।

जिह्वास्वाद पु० जिह्वया स्वादः। लेहने (चाटा) हेमच०।

जीति स्त्री जि—क्तिन् वेदे दीर्घः। जये "अजीतयेऽहतये परस्य स्वस्तये" ऋ० ९।९६।४। "अजीतये अजयाय" भा०। लोके तु ज्या—क्तिन् सम्प्रसारणे "अचः" इति पा० सम्प्रसारणस्य दीर्घः। २हानौ स्त्री।

जीन त्रि० ज्या—क्त सम्प्रसा० दीर्घः। जीर्णे अमरः "जीनकार्मुकवस्त्रादीन् पृथक् दद्यात् विशुद्धये" मनुः।

जीमूत पु० जयति नभः, जीयतेऽनिलेन वा। जि—क्त। "जेर्मुट् चोदात्तः दीर्घश्च"। जीवनस्योदकस्य मूतं बन्धो यस्येति वा जीवनं जलं मूतं बद्धमनेन। मूङ् बन्धने कर्म्मणि क्तः पृषोदरादित्वात् साधु। ज्यानं जीर्णं ज्या—सं० क्विप्, जिया वयोहान्या मूतो बद्ध इति वा जीवनं मुञ्चति वा पृषो०। १पर्वते २मेघे ३मुस्तायां ४देवताड़वृक्षे च अमरः ५इन्द्रे ६भृतिकरे ७घोषकलतायां च हेम०। मेघे "यथा जीमूतशब्देन स्त्रीणां त्रासोऽभिजायते" दुन्दुभिपूजामन्त्रः। "जीमूतैरपिहितसानुरिन्द्रकीलः" किरा०। "जीमूतस्येव भवति प्रतीकम्" ऋ० ६।७५।१ "प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयः" वृ० र० उक्ते दण्डकभेदे तथा च एकादशभीरगणैः रचितो जीमूताख्यो दण्डकः। स्वार्थे क। जीमूतक तेष्वर्थेषु।

जीमूतकूट पु० जीमूतो मेघः कूटेऽस्य। पर्वते हारा०।

जीमूतकेतु पु० विद्याधरपतौ राजभेदे जीमूतवाहनपितरि। नागानन्दे दृश्यम्।

जीमूतमूल पु० जीमूतस्य मुस्तकस्य मूलमिव मूलमस्य। शट्यां शब्दरत्ना०।

जीमूतवाहन पु० जीमूतो मेघो वाहनमस्य। मेघवाहने १इन्द्रे शालिवाहनपुत्रे २नृपभेदे जिताष्टमीशब्दे दृश्यम्। जीमूतकेतोः विद्याधरस्य ३पुत्रे च तत्कथा नागानन्दे दृश्या।

जीमूतवाहिन् पु० जीमूतं मेघमुद्दिश्य वहति ऊर्द्ध्वं गच्छति वह—णिनि। धूमे हेमच०। मेघानां धूमादेवाविर्भावात् तस्य तथात्वम्।

जीर पु० ज्या—रक् संप्र०दीर्घः। १जीरके, २खड्गे, ३अणौ च। मेदि० "जोरी रक् च" उणा० सौ० जु—रप्रत्ययः ईश्वान्तादेशः। ४जवशीले ५क्षिप्रे च उज्ज्वल० जीरदानुः। "उत नः सुद्योत्मा जीराश्वः" ऋ० १।१४१।१२। "जीराश्वः क्षिप्राश्वः" भा०। संज्ञायां कन्। (जीर) ख्याते पदार्थे मेदिनि०। मदनपालनिघण्टौ तस्य त्रीवता तद्भेदा गुणाश्चोक्ता यथा "जीरकं दीर्घकं शुक्लमजाजीकणजीरकम्। जीरकं जरणं कृष्णं वर्षकाली सुगन्धिकम्। कालिका वाष्पिका कुञ्चिकारवी चोपकुञ्चिका। पृथ्वीका सुखवी पृथ्वी स्थूलजाप्युपकालिका। जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु। संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत्। चक्षुष्यं पवनाध्मानगुल्मच्छर्द्दिबलासजित्" मदनपालः।

जीरण पु० जीरक+पृषो०। जीरके राजनि०।

जीरदानु पु० जीरं क्षिप्रं जवशीलं वा ददाति दा—नु। १जवशीलदाने, २क्षिप्रदातरि च "विद्यामेषं वृजनं जीरदानुम्" ऋ० १।१६६।१५ "जीरदानुं जपशीलदानम्" भा० "जीरदानूरेतो दधात्योषधीषु गर्भम्" ५।८३।१ "जीरदानुः क्षिप्रदानः" भा०।

जीरि पु० जीर्य्यति जॄ—बा० रिक्। १मनुष्ये "रक्षन्ति जीरयो वनानि" ऋ० ४।५१।६ "जीर्य्यन्ति इति जीरयो मनुष्याः" भा० जॄ—अन्तर्भूतण्यर्थे रिक्। २जारके ३अभिभावके च त्रि० "प्रजीरयः सिस्रते सध्र्यक् पृथक्" ऋ० २।१७।३ "जीरयो जरयितारः" भा०।

जीर्ण त्रि० जॄ—क्त। १जरायुक्ते २पुरातने च अमरः "वासांसि जीर्णानि यथा विहाय" गीता। "जीर्णमन्नं प्रशंसीयात् शस्यञ्च गृहमागतम्" चाणक्यः। २शैलजे न० राजनि०। ३उदराग्निना कृतपाके त्रि०। "अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम्" वैद्यकम्।

द्रव्यभेदे जीर्णतासाधनद्रव्यभेदा जीर्णमञ्जर्य्यामुक्ता यथा “नारीकेलफलेषु तण्डुलमथ क्षीरं रसाले हितं जम्बीरोत्थरसो घृते समुचितः सर्पिस्तु मोचाफले। गोधूमेषु च कर्कटी हिततमा मांसात्यये काञ्जिकं नारङ्गे गुडभक्षणञ्च कथितं पिण्डारके कोद्रवः। पिष्टान्ने सलिलं पियालफलजे पथ्या सिता माषजे खण्डं क्षीरभवे तु तक्रमुचितं कोष्णाम्बु कोलम्बजे। मत्स्ये चूतफलं त्वजीर्णशमनं मध्वम्बुपानात्यये तैलं पौष्करजे कटूप्रशमनं शेषांस्तु बुद्ध्या जयेत्। पनसे कदलं कदले च घृतं घृतपाकविधावपि जम्बुरसः। तदुपद्रवशान्तिकरं लवणं लवणेषु च तण्डुलवारि वरम्। नारिकेलफलतालबीजयोः पाचनं य इह तण्डुलं विदुः। ते वदन्ति सुनयोऽथ तण्डुलान् क्षीरवारि परिपाचयत्यपि। दाडिमामलकतालतिन्दुकीबीजपूरलवलीफलान्यपि। बाकुलेन च फलेन पाचयेत् पाकमेति बकुलं स्वमूलतः। मधूकमालूरन्टपादनानां परूषखर्ज्जूरकपित्थकानाम्। पाकाय पेयं पिचुमर्द्दबीजं घृतेऽपि तक्रं प्रवदन्ति पथ्यम्। गोधूममाषहरिमन्थसतीनमुद्गपाको भवेदिति च मातुलपत्रकेण। खर्ज्जूरिका बिसकशेरुसिताश्च शस्तं शृङ्गाटके मधुफलेष्वपि भद्रमुस्तम्। पिशितपनसयोः स्यादाम्रबीजेन पाकः कशरमहिषयोषित्क्षीरयोः सैन्धवेन। चिपिटपरिणतिः स्यात् पिप्पलीदीपिकाभ्यामपहरति तुषाम्भो वैदलानामजीर्णम्। कर्पूरपूगीफलनागवल्लीकाश्मीरजातीफलजातिकोषम्। कस्तूरिका सिह्लकनारिकेलजलं पचत्याशु समुद्रफेनः। श्यामाकनीवारकुलत्थषष्टिनिष्पावकङ्गू दधिमस्तकस्तु। चिञ्चाकुलत्थौ तिलतैलयोगात् जटाब्दनादस्य निहन्त्यथाम्लम्। कशेरुशृङ्गाटमृणालमृद्वी खर्ज्जूरखण्डा अपि नागरेण। पलाशभस्माम्बु तथार्द्रजो वा रसो निहन्याद्रसमिक्षुजातम्। अम्लेन केनाप्यथ व्योषकेन कोष्णाम्बुना वा द्रुतमेति पाकम्। तिलादितैलान्यपि काञ्जिकेन सर्ज्जस्य मज्जा पनसामलक्यौ। किमत्र चित्रं बहुमांसमत्स्यभोजी सुखी स्यात् परिपीय शुक्तम्। इत्यद्भुतं केवलवह्निपक्कमांसेन मत्स्यं परिपाकमेति। कपोतपारावतनीलकण्ठकपिञ्जलानां पिशितानि जग्ध्वा। काशस्य मूलं परिपेयमुष्णं सुखी भवेद्वा बहुशो न भक्तम्। व्योषैः रसाला सुरभीयवस्तुमण्डेन कोष्णेन विपाकमेति। शङ्खस्य चूर्णेन हयारिगारीपयोदधिक्षीरमुपैति पाकम्। घटो वेसवाराल्लवङ्गेन फेनी शमं पर्पटः शिग्रुबीजेन याति। कणामूलतो लड्डुका पूपकादेर्विपाको भवेच्छष्कुलीमण्डयोश्च। श्वाविद्गोधागण्डकाश्चित्रतैलाद् यावत् क्षारात् कोलकूर्मादयोऽपि। जीर्य्यन्त्येवं पायसो मुद्गयूषात् मासुद्राद्यारनालं सुखाय। तप्तं तप्तं हेम वा तारमग्नौ तोये क्षिप्तं सप्तकृत्वस्तदम्भः। पीत्वावश्यं दीर्घकालोपपन्नमम्भो जीर्णं शीघ्रमेव जहाति। पालङ्किकाकेसुककारवेल्ली वार्त्ताकुवंशाङ्कुरमूलकानाम्। उपोदकालाबुपटोलकानां सिद्धार्थको मेघवरस्य पक्ता। शुण्ठीसतीनस्य च नागरङ्गजम्बीरयोः कोद्रवको निहन्ता। जराभिरागैरिकचन्दनाभ्यामस्येति शीघ्रं बहुशो न भूतम्। पटोलवंशाङ्कुरकारवेल्लीफलान्यलाबूनि बहूनि जग्ध्वा। क्षारोदकं ब्रह्मतरोर्निपीय भोक्तुं पुनर्वाञ्छति तावदेव। विपच्यते शूरणको गुडेन तथालुकं तण्डुलतोयपानात्। जम्बीरनीरेण निशारसोनं मुस्तेन तूर्णं परिपाकमेति। चञ्चूकसिद्धार्थकवास्तुकानां गायत्रिसारकथितेन पाकः। शाकानि सर्व्वाण्युपयान्ति पाकं क्षारेण सद्यस्तिलनालजेन। आम्रातकोदुम्बरपिप्पलीनां फलानि च प्लक्षवटादिकानाम्। स्युः, शामनं पर्य्युषितोदकेन पियालमज्जा च कदुष्णकेन। स्नेहाजीर्णं रोगिणां मुद्गचूर्णं ज्वालां मुस्तो हन्ति वैरेचकानाम्। माषो भूयान्निम्बमूलेन पाकश्चिञ्चा सञ्चत्यम्लतां चूर्णयोगात्। उष्णेन शीतं शिशिरेण चोष्णमम्लेन च क्षारगणो गुणाय। स्नेहेन तीक्ष्णं वमनातियोगे सिता हिता स्यादिति काशिराजः। ताम्बूलमध्यस्थितचूर्णकेन संदह्यते यस्य मुखं नरस्य। सुखाय गण्डूषमसौ विदध्यात् तैलेन वा केवलकाञ्जिकेन। शीतोदकं नस्यजरोगहारि नारीपयश्चाञ्जनरुग्विनाशि। एलोदकं धूमगदे प्रशस्तं धात्रीप्रलेपोऽतिविरेचनेषु। मृगस्य मांसं श्रमजेऽनुकूलं प्रवातसुप्तिः सुरतावसाने। क्षीरोषणा सैन्धवसाधितन्तु छागाण्डमुक्तं सुरतातिरेके। श्रवणपूरणजे तिलतैलतः श्रवणपूरणमेव सुखं विदुः। कवलजेषु गदेष्वपि कारयेत् कवलमार्द्रकजद्रवजं पुनः”।

जीर्णक त्रि० जीर्णप्रकारः स्थूला० कन्। जीर्णप्रकारे।

जीर्णज्वर पु० कर्म्मधा०। द्वादशाहाधिककालोत्पन्ने ज्वरे तल्लक्षणादिकं भावप्रका० उक्तं यथा।

"यो द्वादशभ्यो दिवसेभ्यः ऊर्द्ध्वं दोषत्रयेभ्यो द्विगुणेभ्य ऊर्द्ध्वम् । नृणां तनौ तिष्ठति मन्दवेगो भिषग्भिरुक्तो ज्वर एष जीर्णः" । जीर्णज्वरस्यैव विशेषं वातबलासकमाह । नित्यं मन्दज्वरो रूक्षः शूनः कृच्छ्रेण सिध्यति । स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी । वातबलासकी नर ईदृग्भवेत् । शूनः शोथी । श्लेष्मभूयिष्ठो बहुश्लेष्मकः । जीर्णज्वरी नरः कुर्य्यान्नोपवासं कदाचन । लङ्घनात् स भवेत् क्षीणो ज्वरस्तु स्याद्बली यतः । पुराणेऽपि ज्वरे दोषा यद्यपथ्यैः पुनस्तथा । लङ्घयेत् तत्र तत्पश्चात् पूर्व्वमिवाचरेत् क्रियाम्" तथा पूर्व्ववत् ।

जीर्णदारु पुं॰ नित्यक॰ । वृद्धदारकवृक्षे (बिधारा) राजनि॰

जीर्णपत्रः पुं॰ जीर्णं पत्रमस्य । पट्टिकालोध्रे शब्दार्थ॰ । २जीर्णपत्रयुक्ते त्रि॰ । बहु॰ कप् कापि अत इत्त्वम् । जीर्णपत्रिका २वंशपत्रीतृणे स्त्री राजनि॰ ।

जीर्णपर्ण पुं॰ जीर्णानि पर्णान्यस्य । १कदम्बे । २पुरातनपत्रयुक्ते त्रि॰ । कर्म्म॰ । २पुरातनपत्रे न॰ । ४पुरातनताम्बूले च । "पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसम्भवः । जीर्णपर्णं हरेदायुः सिरा बुद्धिविनाशिनी" वैद्यकम् ।

जीर्णफञ्जी स्त्री नित्यक॰ । वृद्धदारके वृक्षे (बिधारा) राजनि॰ ।

जीर्णबुध्न पुं॰ जीर्णं बुध्नं मूलमस्य । पट्टिकालोध्रे राजनि॰ तदिव कायति कै–क । जीर्णबुध्नक । (केओटा मुथा) ख्याते मुस्तकभेदे । [राजनि॰ ।

जीर्णवज्र न॰ जीर्णं पुरातनं वज्रं हीरकमिव । वैक्रान्तमणौ

जीर्णवस्त्र न॰ कर्म॰ । पुरातनवस्त्रे पटच्चरे अमरः ।

जीर्णा स्त्री जॄ–क्त । स्थूलजीरके राजनि॰ ।

जीर्णास्थिस्फटिका स्त्री । कृत्रिमस्फटिकाभेदे ।

"अथ वक्ष्ये तु जीर्णास्थिस्फटिकाकरणं प्रिये ! । शिलाजतुस्थले कुर्य्याद्दीर्घं गर्त्तं मनोहरम् । निःक्षिपेत् तत्र नानास्थिसञ्चयं द्विचतुष्पदाम् । सर्जिक्षारं महाक्षारं स्फटक्षारं लवणानि च । गन्धकोष्णजलं क्षेप्यं नानामूत्राणि तत्र च । एवं कृत्वा मासषट्कं दद्यात् पाषाणस्फटिकाम् । कङ्कणस्योर्द्ध्वं तदूर्द्ध्वन्तु कुर्य्याद्दक्षीष्टकां शुभाम् । त्रिवर्षाज्जायते सर्व्वमेकीभूतं दृषत्समम् । ततो निष्काश्य तच्चूर्णं कृत्वा पात्राणि निर्म्मेत् । प्रशस्तं भोजनं तत्र सूचयेदन्नदूषणम् । महाविषस्य संयोगात् तस्य भङ्गः प्रजायते । दूषीविषादिसंयोगात् पात्रे स्फोटा भवन्ति हि । तत्र क्षिप्तं क्षुद्रविषं पात्रं कृष्णं प्रजायते । एवं ज्ञात्वा तत्र दद्याद्न कदाचिद्विषादिकमिति रावणः" शब्दार्थचिन्तामणिः ।

जीर्णि स्त्री जॄ–क्तिन् । जीर्णतायाम् । अमरः ।

जीर्णोद्धार पुं॰ जीर्णस्य पूर्व्वप्रतिष्ठापितलिङ्गादेरुद्धारः । १पूर्व्वप्रतिष्ठापितलिङ्गादेः भग्नतादौ स्वस्थानादुद्धारे तद्विधानम् अग्निपु॰ ६७ अ॰ उक्तं यथा ।

"भगवान् उवाच । जीर्णोद्धारविधिं वक्ष्ये भूषितां स्नापयेद्गुरुः । अचलां विन्यसेद्गेहे अतिजीर्णां परित्यजेत् । व्यङ्गां भग्नां च शैलाढ्यां न्यसेदन्यां च पूर्व्ववत् । संहारविधिना तत्र तत्त्वान् संहृत्य देशिकः । सहस्रं नरसिंहेन हुत्वा तामुद्धरेद्गुरुः । दारवीं दाहयेद्वह्नौ शैलजां प्रक्षिपेज्जले । धातुजां रत्नजां वापि अगाधे वा जलेऽम्बुधौ । यानमारोप्य जीर्णाङ्गं छाद्य वस्त्रादिना नयेत् । वादित्रैः प्रक्षिपेत्तोये गुरवे दक्षिणां ददेत् । यत्प्रमाणा च यद्द्रव्या तन्मानां स्थापयेत् पुनः । कूपवापीतडागादेर्जीर्णोद्धारे महाफलम्" नि॰सि॰विशेषो यथा "अथ जीर्णोद्धारः स च लिङ्गादौ दग्धे भग्ने चलिते वा कार्य्यः । अयं चाजादिसिद्धप्रतिष्ठितलिङ्गादौ भङ्गादिदुष्टेऽपि न कार्य्यः । तत्र तु महाभिषेकं कुर्य्यादिति त्रिविक्रमः । कर्त्ताऽमुकदेवस्य जीर्णोद्धारं करिष्ये इत्युक्त्वा पुण्याहं वाचयित्वा आचार्य्यमृत्विजश्च वृत्वा लिङ्गे ओं व्यापकेश्वरहृदयाय नमः ओं व्यापकेश्वरशिरसे स्वाहेत्येवं षडङ्गं कृत्वाऽघोरमन्त्रं शतं जप्त्वाऽग्निं प्रतिष्ठाप्याघोरेण घृतसर्षपैः सहस्रं हुत्वा इन्द्रादिभ्यो नाम्ना बलिं दत्त्वा जीर्णदेवं प्रणवेन संपूज्य ब्रह्मादिमण्डलदेवतानां होमं पूर्व्वोक्तं कृत्वा देवं प्रार्थयेत । "जीर्णभग्नमिदं चैव सर्व्वदोषावहं नृणाम् । अस्योद्धारे कृते शान्तिः शास्त्रेऽस्मिन् कथिता त्वया । जीर्णोद्धारविधानञ्च नृपराष्ट्रहितावहम् । तदधस्तिष्ठतां देव ! प्रहराणि तवाज्ञयेति" । ततः क्षीराज्यमधुदूर्व्वाभिः समिद्भिश्चाष्टोत्तरसहस्रं शतं वा देवमन्त्रेण हुत्वाऽङ्गानां दशांशेन लिङ्गचालनार्थं सहस्रं शतं वा पायसेन हुत्वा लिङ्गं प्रार्थयेत । "लिङ्गरूपं समागत्य येनेदं समधिष्ठितम् । यायास्त्वं संमितं स्थानं सन्त्यज्यैव शिवाज्ञया । अत्र स्थाने च या विद्या सर्व्वविद्येश्वरैर्युता । शिवेन सह संतिष्ठेति" मन्त्रितजलेनाभिषिच्य विसर्जयेत् । ततोऽस्त्रमन्त्रितेन खनित्रेण खात्वा लिङ्गमानीय नद्यादौ वामदेवेन लिङ्गं प्रणवेन मूर्त्तिं क्षिपेत् । दारुजन्तु मधुनाऽभ्यज्याघोरेण दहेत् । हेमरत्नादिमयन्तु दग्धं चलितं

वा पुनस्तत्रैव स्थापयेत। ततः शान्त्यै अघोरेण तिलैः सहस्रं हुत्वा प्रार्थयेत। "भगवान् भूतभव्येश! लोकनाथ! जगत्पते!। जीर्णलिङ्गसमुद्धारः कृतस्त्वाज्ञया मया। अग्निना दारुजं दग्धं क्षिप्तं शैलादिकं जले। प्रायश्चित्ताय देवेश! अघोरास्त्रेण तर्पितम्। ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं यदि। तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वरेति"। ततो यजमानः प्रार्थयेत। "गोभिर्विप्रैः शिल्पिभूतानामाचार्य्यस्य च यज्वनः। शान्तिर्भवतु देवेश! काञ्चिद्रं जायतामिदम्"। मूर्त्तौ तु विशेषः। "त्वत्प्रसादेन निर्विघ्नं देहं निर्मापयत्यसौ। वासं कुरु सुरश्रेष्ठ! तावत्त्वं चाल्पके गृहे। यमनु लोभं सहित्वेह मूर्त्तिं वै तव पूर्ववत्। यावत् कारयेत् भक्तः कुरु तस्य च वाञ्छितमिति"। ततो नवां मूर्त्तिं लिङ्गं वा कल्पोक्तविधिना स्थापयेत्।

भग्नमन्दिरादेः २संस्कारे च स च विष्णुधर्मोत्तरे तृतीयकाण्डे उक्तो यथा "यस्य राज्ञस्तु विषये देववेश्म विशीर्य्यते। तस्य सीदति तद्राष्ट्रं देववेश्म यथा तथा। कृत्वा जीर्णस्य संस्कारं तथा देवनिवेशने। द्विगुणं फलमाप्नोति नात्र कार्य्या विचारणा"। विष्णुरहस्ये "पतितस्य च यः कर्त्ता पतमानस्य रक्षिता। विष्णोरायतनस्येह स नरो विष्णुलोकभाक्" अग्निपुराणे "पतितं पतमानन्तु तदार्द्धस्फुटितं नरः। समुद्धृत्य हरेर्धाम द्विगुणं फलमाप्नुयात्" देवीपुराणे "मूलाच्छतगुणं पुण्यं प्राप्नुयाज्जीर्णकारकः। तस्मात् सर्वप्रयत्नेन जीर्णस्योद्धारमाचरेत्"। हयशीर्षपञ्चरात्रे "वापीकूपतड़ागानां सुरधाम्नां तथानघ!। प्रतिमानां सभानाञ्च संस्कर्त्ता यो नरो भुवि। पुण्यं शतगुणं तस्य भवेन्मूलान्न संशयः। प्रतिष्ठाया विधिः कार्य्यस्तथा मन्दिरनिर्मिते। प्रायः श्रीहयशीर्षोक्तेरनुसारेण वैष्णवैः। देवालयप्रतिष्ठा च ख्याता तल्लिखनेन किम्। श्रीमूर्त्तिस्थापने। संपूर्णा सा विशेषतः। देवगृहं देवतायाः प्रतिष्ठविधिना सदा। संस्कार्य्यं मनुजानान्तु समुदायोऽस्य कर्म्मणा" हरिभक्ति०२० विलासः।

जीर्वि पु० जॄ—क्विन्। कुठारे उज्ज्वलदत्तः।

जीव प्राणने अनुधारणे भ्वा०अक०प०सेट्। जीवति अजीवीत् जिजीव। क्तिदित् अजिजीवत् न जीवितं जीवनम् जीवः जीविका। "संशयं पुनरारुह्य यदि जीवति पश्यति" हितो० "यातः परमपि जीवेज्जीवितनाथो भवेत्तस्याः" सा०द० "ज्योग् जीवति" ऋ० उ०। "शतं जीवन्तु शरदः" ऋ०१०।१८।१। प्राणधारणञ्च प्राणधारणोपयोगिवृत्तिधारणमपि "नक्षत्रैर्यश्च जीवति" मनुः। करणे सक०। "जीवेद्वैश्यस्य जीविकाम्" मनुः। जीवेत् क्षात्र्यात् रघुः।

अति+अतिक्रम्य जीवने सक०। "अत्यजीवदमरालकेश्वरौ"

अनु+पश्चाज्जीवने अनुरूपजीवने च सक०। "जीवन्तं त्वानुजीवन्तु प्रजाः सर्वा युधिष्ठिर!" भा० उ० ४५.२५ श्लो० "यां तां श्रियमसूयामः पुरा दृष्ट्वा युधिष्ठिरे। अद्य तामनुजीवामः" भा० द्रो० ४११ श्लो०।

आ+वृत्तिकरणे उपभोगे च सक०। "आजीवन् स्वेच्छया दण्ड्यो दासस्तत्रापि सोदयम्" याज्ञ०। "आजीवन्नुपभुञ्जानः" मिता०। "यथाजीवन्ति पुरुषं सर्वभूतानि सञ्जय!" भा०उ०१२२अ०।

उद्+उत्थापने अक०। "उदजीवत् सुमित्राभूर्मूर्च्छिताऽलिप्यत मायतम्" भट्टिः।

प्रति+उद्+प्रतिरूपोज्जीवने।

उप+आश्रित्य वर्त्तने सक०। "पूर्ववयसे पुत्राः पितरमुपजीवन्ति उत्तरवयसे पुत्रान् पिता" श० ब्रा० १२।२। "शेषास्तमुपजीवेयुर्यथैव पितरं तथा" मनुः। २।१। उपजीवी उपजीव्यः।

जीव पु० जीव—कर्त्तरि क। १प्राणिनि २जीवन्तीवृक्षे ३वृहस्पतौ च मेदि०। ४कर्णे ५चेतने त्रिका०। भावे घञ्। ६प्राणधारणे अमरः करणे घञ्। ७वृत्तौ आजीविकायां मेदि०। मनुष्यादिकीटपर्यन्ते ८प्राणिमात्रे ९कार्य्यकारणसङ्घाते। अनेकान्तवादिनां जीवास्तिकायसंज्ञया परिभाषिते १०पदार्थभेदे। त्रिविधस्यासौ अनादिसिद्धमुक्तबद्धभेदात्। अत्रानादिसिद्धोऽर्हन् जीवास्तिकायाख्यः। व्यपेतमोहादिबन्धो मुक्तः। मोहाद्यावृतस्तु बद्ध इति। ११उपाधिप्रविष्टे वाङ्मनःप्राणकरणग्रामानुप्रविष्टे घटावच्छिन्नाकाशवत्शरीरत्रितयावच्छिन्ने ब्रह्मणि। १२चैतन्ये। दर्पणस्थमुखप्रतिबिम्बवद् बुद्धिस्थे १३चैतन्यप्रतिबिम्बे। १४साभासाहङ्कारे चित्प्रतिबिम्बे। प्राणादिकलापस्य १५धारयितरि "प्राणान् चेतनरूपेण धारयन् जीव उच्यते" इत्यभियुक्तोक्तेः १६लिङ्गदेहे। "एवं पञ्चविधं लिङ्गं त्रिवृत् षोड़श विस्तृतम्। एष चेतनया युक्तो जीव इत्यभिधीयते" इति श्रीभागवतम्। पञ्चविधं पञ्चतन्मात्रात्मकम्। त्रिवृत् त्रिगुणम्। षोड़शविकारात्मना विस्तृतमित्यनाद्यभिमानित्वेन इहलोक

परलोकगामी व्यवहारिको जीव उच्यते। "वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते" श्रुतिः। "वालाग्रशतशोभागः कल्पितस्तु सहस्रधा। तस्यापि शतशोभागो जीवः सूक्ष्म उदाहृतः" शङ्खः। "जीवो नाम देहादिव्यतिरिक्तस्तत्साक्षी त्वम्पदार्थो योऽयं विज्ञानमयः योऽयं संसरति योऽयं संसारी नतु देहादिर्जीवः तस्य दृश्यस्य द्रष्टृत्वानुपपत्तेः। "अस्ति देवि! परं ब्रह्मस्वरूपी निष्कलः शिवः। सर्वज्ञः सर्वकर्त्ता च सर्वेशो निर्मलोऽव्ययः। स्वयं ज्योतिरनाद्यन्तो निर्विकारः परात्परः। निर्गुणः सच्चिदानन्दस्तदंशा जीवसंज्ञकाः। अनाद्यविद्योपहिता यथाग्नौ विस्फुलिङ्गकाः। देहाद्युपाधिसम्भिन्नास्ते कर्मभिरनादिभिः। सुखदुःखप्रदैः पुण्यपापरूपैर्नियन्त्रिताः। तत्तज्जातियुतं देहमायुर्भोगञ्च कर्मजम्। प्रतिजन्म प्रपद्यन्ते तेषामप्यपरं पुनः। सूक्ष्मं लिङ्गशरीरं तदामोक्षादक्षयं प्रिये!" कुलार्ण०। १७विष्णौ, "जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः" विष्णु० सह०। तत्र वृहस्पतौ

"जीवः सप्तनवद्विपञ्चसगतः" "जीवार्किभानुज्ये ज्यानां क्षेत्राणि सुरजादयः" ज्योति०। १८पुष्यनक्षत्रे च। तस्य जीवाधिष्ठातृकत्वात् तथात्वम् अश्लेषाशब्दे ४६८ पृ० दृश्यम्। "घटसंवृत आकाशे नीयमाने यथा घटे। घटो नीयेत नाकाशं तद्वत् जीवो नभोपमः"। आर्हतमतसिद्धजीवभेदाश्च अर्हच्छब्दे ३८४ पृ० दृश्याः। स च जीवो विभुरिति साङ्ख्यनैयायिकवैशेषिकपातञ्जलवेदान्तिनः। अणुपरिमाण इति रामानुजादयः। मध्यमपरिमाणः इति माध्यमिकाः। आत्मन्शब्दे ६७२पृ०दृश्यम् "हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" छा० उ०। "भावनाख्यस्तु संस्कारो जीववृत्ती त्विमौ गुणौ" भाषा० जीव—क १६जीवनयुक्ते त्रि०। "कर्षन्तो लाङ्गलैः पुंसो घ्नन्ति भूमिशयान् बहून्। जीवानन्यांश्च सुबहूंस्तत्र किं प्रतिभाति ते। धान्यबीजानि यान्याहुर्व्रीह्यादीनि द्विजोत्तम!। सर्व्वाण्येतानि जीवानि तत्र किं प्रतिभाति ते। अध्याक्रम्य पशूंश्चापि घ्नन्ति वै भक्षयन्ति च। वृक्षांस्तथौषधीश्चापि छिन्दन्ति पुरुषा द्विज!। जीवा हि बहवो ब्रह्मन्! वृक्षेषु च फलेषु च। उदके बहवश्चापि तत्र किं प्रतिभाति ते। सत्त्वैः सत्त्वानि जीवन्ति बहुधा द्विजसत्तम!। प्राणिनोऽन्योन्यभक्षाश्च तत्र किं प्रतिभाति ते। चंक्रम्यमाणा जीवांश्च धरणीसंश्रितात् बहून्। पद्भ्यां घ्नन्ति नरा विप्र! तत्र किं प्रतिभाति ते। उपविष्टाः शयानाश्च घ्नन्ति जीवाननेकशः। ज्ञानविज्ञानवन्तश्च तत्र किं प्रतिभाति ते। जीवैर्ग्रस्तमिदं सर्वमाकाशं पृथिवी तथा। अविज्ञानाच्च हिंसन्ति तत्र किं प्रतिभाति ते। अहिंसेति यदुक्तं हि पुरुषैर्विस्मितैः पुरा। के न हिंसन्ति। जीवान् वै लोकेऽस्मिन् द्विजसत्तम!।" भा० व० २०७अ०। अत्र जीवस्य हिंसा देहवियोजनम्।

जीवक पु० जीवयति जीव+णिच्—ण्वुल्। १अष्टवर्गान्तर्गते १ओषधिभेदे "जीवकर्षभकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ। रसोनकन्दवत्कन्दौ निःसारौ सूक्ष्मपत्रकौ। जीवकः कूर्चकाकार ऋषभो वृषशृङ्गवत्" तदभावे विदारीमूलं प्रतिनिधितया देयमिति"। "जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ। मधुरौ पित्तदाहार्शःकार्श्यवातक्षयापहौ" भावप्र० २पीतसालवृक्षे ३क्षपणके च पु०। जीव—ण्वुल्। ४प्राणधारके त्रि० मेदि०। ५सेवके ६वृद्ध्याजीविनि त्रि० ७अहितुण्डिके पु० मेदि०।

जीवकाद्यतैल न० चक्रदत्तोक्ते तैलभेदे। तच्च तैलं द्विविधं लघुवृहद्भेदात् यदाह तत्रैव "जीवकर्षभकौ द्राक्षा सिता यष्टी बलोत्पलैः। तैलं नस्यं पयः पक्वं वातपित्तशिरोगदे"। लघु। "जीवकर्षभकौ द्राक्षा मधूकं मधुकं बला। नीलोत्पलं चन्दनञ्च विदारी शर्करा तथा। तैलप्रस्थं पचेदेभिः शनैः पयसि षड्गुणैः। जाङ्गलस्य तु मांसस्य तुलार्द्धस्य रसेन तु। सिद्धमेतद्भवेन्नस्यं तैलमर्द्धावभेदकम्। बाधिर्यं कर्णशूलञ्च तिमिरं गलशुण्डिकाम्। वातिकं पैत्तिकञ्चैव शीर्षरोगं नियच्छति। दन्तचालं शिरःशूलमर्द्दितञ्चापकर्षति" वृहत्। चक्रद०।

जीवघन पु० जीव एव घनो मूर्त्तिरस्य। हिरण्यगर्भे तस्य सर्वजीवसमष्टिरूपत्वात् तथात्वं यथाह प्रश्नोप०भा०। ओम्शब्दे २५६० पृ० तद्वाक्यम् दृश्यम्। "स एतस्माज्जीवघनात् परात् परम्"।

जीवजीव पुंस्त्री जीवञ्जीव+पृषो०। चकोरखगे शब्दर०। स्त्रियां जातित्वात् ङीष्। स्वार्थे क। तत्रार्थे। "हृत्वा रक्तानि वासांसि जायते जीवजीवकः" मनुः।

जीवञ्जीव पुंस्त्री जीवं जीवयति विषनाशकत्वात् जीव—बा० खच्। चकोरपक्षिणि अमरः स्त्रियां जातित्वात् ङीष्। "जीवञ्जीविकसङ्घाश्चाप्यनुगच्छन्ति पाण्डवान्" भा० उ०

जीवत्तोका स्त्री जीवत् तोकं यस्याः । जीवत्पुत्रिकायां स्त्रियां । (जेयाँत् पोयाती) हेमच० ।

जीवत्पति स्त्री जीवन् पतिर्यस्याः सपूर्वत्वात् वा न ङीपौ । सधवायां स्त्रियाम् । हेमच० ।

जीवत्पितृक पु० जीवन् पिता यस्य कप् । विद्यमानपितृके जने । "अमास्नानं गयाश्राद्धं दक्षिणामुखभोजनम् । न जीवत्पितृकः कुर्य्यात् कृते तु पितृहा भवेत्" ति० त० । तत्र जीवत्पितृकस्य श्राद्धविशेषेऽधिकारः निर्णयसिन्धौ व्यवस्थापितो यथा ।

"जीवत्पितृकस्य साग्नेरेव वृद्धिश्राद्धेऽधिकारः न तु निरग्नेः "न जीवत्पितृकः कुर्य्याच्छ्राद्धमग्निमृते द्विजः । येभ्य एव पिता दद्यात्तेभ्यः कुर्वीत साग्निकः । पितामहेऽप्येवमेव कुर्य्याज्जीवति साग्निकः । साग्निकोऽपि न कुर्व्वीत जीवति प्रपितामहे"इति चन्द्रिकायां सुमन्तूक्तेरित्याहुः प्रयोगपारिजातेऽप्यनाहिताग्निर्न कुर्य्यादितीदं व्याख्यातम् तन्न "अनग्निकोऽपि कुर्वीत जन्मादौ वृद्धिकर्म्मणि । येभ्य एव पिता दद्यात्तानेवोद्दिश्य तर्पयेदिति" हारीतोक्तेः सौमन्तवन्तु वृद्धिश्राद्धभिन्नश्राद्धपरमित्युक्तं मदनरत्ने । श्राद्धपदं पिण्डपितृयज्ञपरमिति पृथ्वीचन्द्रोदयः । निर्णयामृते तु हारीतीयेऽनग्निकोनाहिताग्निरभिप्रेतः पूर्ववचने तु साग्निः श्रौताग्निः स्मार्त्ताग्निश्चोच्यते । तेनोभयाग्निहीनस्य नेत्युक्तं तन्न पूर्वोक्तदिशा गतिसम्भवेनाग्निपदस्य स्मार्त्ताग्निपरत्वे मानाभावात् वक्ष्यमाणनित्यानित्यसंयोगविरोधात् "पितरो जनकस्येज्या यावद्व्रतमनाहितम् । समाहितव्रतः पश्चात् स्वान् यजेत पितामहानिति, पृथ्वीचन्द्रोदये यमवचोविरोधाच्च । अपरार्केऽपि समावर्त्तने ब्रह्मचारी स्वयमेव नान्दीश्राद्धं कुर्य्यादित्याहुः अतः पूर्वमेव साधु वोपदेवोऽप्येवमाह । यत्तु मतं जीवत्पितृकस्य पुत्रनामकर्म्मादौ न वृद्धिश्राद्धम् हारीतीये जन्मादावित्यादिशब्देन तत्प्राप्तावपि "उद्वाहे पुत्रजनने पुत्रेष्ट्यां सौमिके मखे । तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुरिति" मैत्रपरिशिष्टे उद्वाह एव तस्योपसंहारात् एवं यत्र तु संस्कारादिपदं तदप्युद्वाहादिपरमेवेति तन्न उद्वाहपदस्य स्वविवाहपरत्वस्यापि सम्भवात् पुत्रविवाहपरत्वे मानाभावात् "नामकर्म्मणि बालानां चूड़ाकर्म्मादिके तथा" इत्यादिभिर्नित्यश्राद्धस्य चौलाद्यङ्गत्वावगतौ नित्यानित्यसंयोगविरोधाच्च अतो जन्मादाविति सर्वसंस्कारसंग्रहः ।

तथा च कात्यायनः "स्वपितृभ्यः पिता दद्यात् सुतसंस्कार-
कर्मसु । पिण्डानोद्वाहनात्तेषां तस्याभावे तु तत्क्रमात्" ।
सुतानां चौलादिसंस्कारेषु पिता स्वपितृभ्यः पिण्डान्
श्राद्धम् । "पिण्डदोऽंशहरश्चैषामिति" दर्शनात् औद्वहना-
द्विवाहपर्य्यन्तं दद्यात् विवाहश्च प्रथमः "नान्दीश्राद्धं
पिता कुर्य्यादाद्ये पाणिग्रहे बुधः । अत ऊर्द्धं प्रकुर्व्वीत
स्वयमेव तु नान्दिकमिति" स्मृतेः तस्य पितुरभावे तत्क्र-
मात् "असंस्कृतास्तु संस्कार्य्या भ्रातृभिः पूर्वसंस्कृतैरिति"
यः कर्तृक्रमः तेन क्रमेण ज्येष्ठभ्रात्रादिर्दद्यादिति
चन्द्रिकादयः । हेमाद्रिस्तु तस्य पितुरभावे यः पितृव्य
मातुलादिः संस्कुर्य्यात् स तत्क्रमात् संस्कार्य्यपितृ-
क्रमाद्दद्यान्नतु स्वपितृभ्य इति व्याचख्यौ । समावर्तनस्यापि
विवाहप्राचीनसुतसंस्कारत्वात्पितैव नान्दीश्राद्धं कुर्य्यात्
तदभावे ज्येष्ठभ्रात्रादिः तदभावे स्वयमेव कुर्य्यात् ।
उपनयनेन कर्म्माधिकारस्य जातत्वात् एवमाद्यविवाहे-
ऽपीति पृथ्वीचन्द्रोदयचन्द्रिकादयः । मदनरत्नेऽप्येवम् ।
यदा तु पितरि संन्यस्ते प्रोषिते पतिते वा धर्म्मार्थं तत्पुत्र-
मन्यः संस्कुर्य्यात्तदा संस्कार्य्यपितुः पित्रादिभ्यो दद्यात्
"पितरो जनकस्येज्या यावद्व्रतमनाहितम् । समाहित-
व्रतः पश्चात्स्वान् यजेत पितामहानिति" पृथ्वीचन्द्रोदये
यमोक्तेः जीवत्पितृकस्य विशेषमाह कात्यायनः "वृद्धौ
तीर्थे च संन्यस्ते ताते च पतिते सति । येभ्य एव पिता
दद्यात्तेभ्यो दद्यात्स्वयं सुतः" इति । तीर्थ इव प्राय-
श्चित्ताङ्गश्राद्धेऽपि तस्याधिकारः ।
"पितरि जीवति यः श्राद्धं कुर्य्यात् स येषां पिता-
कुर्य्यात्तेषां कुर्य्यात् । पितरि पितामहे च जीवति येषां
पितामहः कुर्य्यात् तेषां कुर्य्यात् त्रिषु जीवत्सु नैव कुर्य्यात्"
विष्णु०स० "जीवत्पितृकोऽपि" कात्या० श्रौ० सू०
पिण्डपितृयज्ञेऽधिक्रियते च । "जीवान्तर्हितेऽपि" कर्क स्मृ०
"जीवपितृकस्य जीवेन पित्रादिना अन्तर्हितेऽपि व्यवहि-
तेऽपि पितामहादेः पिण्डदानं भवति सोमादाविव "येभ्य
एव पिता दद्यात्तेभ्यो दद्यात्तथा सुतः" इति कर्कस्मृतेः ।
"जीवपितृकस्य होमान्तमनारम्भो वा" सू० ।
"जीवपितृकस्य यजमानस्य होमान्तमेव पिण्डपितृयज्ञ-
संज्ञं कर्म भवति अथवाऽनारम्भ एव पिण्डपितृयज्ञस्य
वाशब्दः पूर्वपक्षनिरासार्थः । अत्रानारम्भपक्ष एव युक्तः
यतः पिण्डदानं प्रधानम् । तदभावे होमस्याङ्गभूतस्या-
नुष्ठानं न घटते । एवं जीवान्तर्हितेऽपीति पक्षं दूष-

पित्रा जीवत्पितृकस्य होमान्तमित्यत्रोपपत्तिमाह" कर्कः। "न व्यवेते जातूकर्ण्यो न जीवन्तमति ददातीति" सू०। "जीवत्पितृकस्य होमान्तकर्म्म कुर्वतः यतोजातूकर्ण्य आचार्यो न व्यवेते जीवता पित्रा व्यवहिते पितामहादौ पिण्डदानं न भवतीत्याह कुतो न भवतीत्यत्र हेतुः "न जीवन्तमति ददातीति" शाखान्तरे श्रवणात् अतःप्रधाने पिण्डदाने जीवत्पितृकस्य निषिद्धे अनारम्भ एव घटते न होमान्तता। आपस्तम्बः "यदि जीवत्पिता न दद्यादा होमात् कृत्वा विरमेदिति" मानवे च "यदि दद्याद्येभ्य एव पिता दद्यात्तेभ्यो दद्यादिति" काठके "पितापुत्रौ चेदाहिताग्नी स्यातां येभ्यः पिता तेभ्यः पुत्रो दद्यात् पिता प्रेतः स्यात् पितामहो जीवेत् पित्रे पिण्डं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यादिति" कर्क० जीवपुत्रोऽप्यत्र। समासान्तविधेरनित्यत्वात् न कप्। जीवपितृ इत्यपि तत्रार्थे।

जीवथ पु० जीव–अथ। १कूर्मे २प्राणे ३मयूरे ४मेघे च ५चिरायुष्के ६धार्मिके च ७जीवयितरि त्रि०। उणादिको०

जीवद पु० जीवं जीवनं ददाति द्यति वा दा–दो–वा क। १वैद्ये २रिपौ ३ग्रन्थिपर्णवृक्षे च मेदि० ४जीवनदातरि त्रि०। ५जीवन्तीवृक्षे स्त्री राजनि०।

जीवदातृ त्रि० जीवं ददाति दा–तृच्। १जीवनदायिनि स्त्रियां ङीप्। सा च २ऋद्धिनामौषधौ ३जीवन्तीवृक्षे च राजनि०।

जीवदानु त्रि० जीवं ददाति दा–ना० नु। १जीवनदातरि "विरप्शिन्नुदादाय पृथिवीं जीवदानुम्" यजु० १।२८।

जीवद्दष्टा स्त्री जीवाय जीवनाय इष्टा। जीवन्तीवृक्षे राजनि०

जीवधन न० जीव एव धनम्। गवादिजन्तुरूपे धने त्रिका०

जीवधानी स्त्री जीवा धीयन्तेऽस्याम् धा+अधि–करणे ल्युट् ङीप्। पृथिव्याम्। "ददर्श गां तत्र सुषुप्सुरग्रे यां जीवधानीं स्वयमभ्यधत्त।" भाग० २।१३।२। "जीवधानीं सर्वजीवाधारभूतां महीम्" श्रीधरः।

जीवन न० जीव–भावे ल्युट्। १वृत्तौ २प्राणधारणे। करणे ल्युट्। ३जले मेदि०। जलं विना प्राणधारणासम्भवात्तस्य जीवनकारणत्वम् अत एव "अन्नमयं हि सौम्य! मन आपोमयः प्राणः" छान्दोग्ये प्राणानां जलमयत्वमुक्त्वा तस्य तथात्वं समर्थितं यथा।

"आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः" "अपां सौम्य! पीयमानानां योऽणिमा स ऊर्द्ध्वः समुदीषति स प्राणो भवति" "षोड़शकलः सौम्य! पुरुषः पञ्चदशाहानि माशीः काममपः पिबापोमयः प्राणो, न पिबतो विच्छेत्स्यते" इति छा०उ०। ४जीवनसाधने त्रि० "सर्वोऽर्च्यो जीवनः पाता" ऋग्वचो०। ५हैयङ्गवीने शब्दच०। सद्योघृतस्यायुर्वृद्धिकरत्वेन जीवनहेतुत्वात् तथात्वम्। ६मज्जनि राजनि० ७वाते ८जीवकौषधौ च पु० राजनि०। ९क्षुद्रफलवृक्षे पु० शब्दच०। १०पुत्रे पु० हेमच०। जीवयति जीव–णिच्–कर्त्तरि–ल्यु। ११परमेश्वरे पु० "वीरहा रक्षणः सन्तो जीवनः पर्य्यवस्थितः" विष्णुस०। "सर्वाः प्रजाः प्राणरूपेण जीवयन् जीवनः" भा०। "प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम्" भाषा० "जीवनं जीवनं हन्ति प्राणान् हन्ति समीरणः। किमाश्चर्य्यं चारदेशे प्राणदा यमदूतिका" उद्भटः। वृत्तौ १२जीविकायाम्। "कृषिः शिल्पं भृतिर्विद्या कुसीदं शकटं गिरिः। सेवानूपं नृपो भैक्ष्यमापत्तौ जीवनानि तु" याज्ञ० "विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः। धृतिर्भैक्ष्यं कुसीदञ्च दश जीवनहेतवः" मनुः। १३जीवदातरि "शीतस्तत्र ववौ वायुः सुगन्धिं जीवनः शुचिः" भा० व० १६८ अ०।

जीवनक न० जीवन+संज्ञायां कन्। अन्ने हेमच०। कलौ प्राणस्यान्नगतत्वोक्त्या तस्य तथात्वम्।

जीवनयोनि स्त्री ६त०। न्यायोक्ते देहे प्राणसञ्चारकारणे अतीन्द्रिये १यत्नभेदे। "यत्नो जीवनयोनिस्तु सर्वदातीन्द्रियो भवेत्। शरीरे प्राणसञ्चारकारणं परिकीर्त्तितम्" भाषापरि०। "जीवनयोनिर्यत्नो यावज्जीवनमनुवर्त्तते स चातीन्द्रियः। तत्र प्रमाणमाह शरीरे प्राणसञ्चारकारणं परिकीर्त्तितमिति। प्राणसञ्चारो हि अधिकः श्वासादिः प्रयत्नतः साध्यः। इत्यञ्च प्राणसञ्चारस्य यत्नसाध्यत्वानुमानात् प्रत्यक्षयत्नस्य बाधाच्चातीन्द्रिययत्नसिद्धिः। स एव जीवनयोनिप्रयत्नः" मुक्ता०

जीवना स्त्री जीवयति जीव–णिच्–ल्यु। १मेदौषधौ मेदि०।

जीवनाघात न० जीवनस्याघातो यस्मात्। विषे शब्दच०।

जीवनावास पु० जीवनं जलमावासोऽस्य। वरुणे शब्दच०। ६त०। २प्राणायतने देहे च।

जीवनी स्त्री जीव्यतेऽनेन जीव–करणे ल्युट् ङीप्। १काकोल्यां २डोड्यां ३मेदायां ४महामेदायां ५जीवन्त्याञ्च

राजनि०। ६यूथ्यां शब्दच०। संज्ञायां कन्। जीवनिका हरितक्याम् राजनि०।

जीवनीय न० जीव–वा० करणे अनीयर्। १जले हेमच०। २जीवन्तीवृक्षे स्त्री अमरः। कर्मणि अनीयर्। ३उपजीव्ये त्रि०। भावे अनीयर्। वर्त्तनीये। ४विद्याशिल्पमित्यादिमनुव्याख्यायाम्। "एभिर्दशभिरापदि जीवनीयम्" कुल्लूक०।

जीवनीयगण पु० औषधभेदे "अष्टवर्गश्च पर्ण्यौ जीवन्ती मधुकं तथा। जीवनीयगणः प्रोक्तो जीवनन्तु पुनस्तथा" वैद्यकम्। [राजनि०

जीवनेत्री स्त्री जीवं नयति नी–तृच् ङीप्। सैंहल्याम्।

जीवनौषध न० जीवनस्य म्रियमाणप्राणस्य रक्षणार्थमौषधम्। जीवातौ म्रियमाणस्य प्राणरक्षके औषधे अमरः।

जीवन्त पु० जीव–कर्त्तरि झ। १प्राणे, २आयुर्विशिष्टे त्रि०। जीव–णिच्–झ। ३औषधे च उणा०।

जीवन्तिका स्त्री जीव–जीव–णिच्–वा झ–संज्ञायां कन्। १वन्दायां वृक्षोपरिजातलतायां २गुडूच्यां ३जीवाख्यशाके मेदि० ४जीवन्त्यां ६हरीतक्यां च राजनि०।

जीवन्ती स्त्री जीव–झ गौरा० ङीष्। (जीवइ) ख्याते (जियाता) ख्याते १वृक्षे। "जीवन्ती शीतला स्वादुः स्निग्धा दोषत्रयापहा। रसायना बलकरी चक्षुष्या ग्राहिणी लघुः। जीवन्त्याः कोमलं पत्रं स्विन्नं तक्रसुभर्ज्जितम्। हिङ्गुना संयुते तैले तक्रं क्षिप्त्वा प्रलेहयेत्" भावप्र०। "क्षयरेणाय जीवन्त्या हविष्येण च सर्वशः" भा० स० ४अ०। (चोड़ी) ख्याते गुर्जरदेशप्रसिद्धे २लताभेदे ३शट्यां ४गुड़ूच्यां ५वन्दायां ६डोड्यां ७हरितक्याम् राजनि०। सा च "हरितकी जीवन्ती स्वर्णवर्णिनी" इत्युक्तलक्षणा।

जीवन्त्याद्यघृत न० चक्रदत्तोक्ते पक्वघृतभेदे "जीवन्तीं मधुकं द्राक्षां फलानि कुटजस्य च। शठीं पुष्करमूलञ्च व्याघ्रीं गोक्षुरकं बलाम्। नीलोत्पलं चामलकीं त्रायमाणां दुरालभाम्। पिप्पलीञ्च समं पिष्ट्वा घृतं वैद्यो विपाचयेत्। एतद्व्याधिसमूहस्य रोगे शस्तसमुत्थितम्। रूपमेकादशविधं सर्पिरग्र्यं व्यपोहति"।

जीवन्मुक्त त्रि० जीवन्नेव मुक्तः जीवत्येवात्मज्ञानेन बन्धरहिते "जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृते अज्ञानकार्यसञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठ" इति वेदान्तसा०। ननु जीवन्मुक्तो व्यवहरति न वा। आद्ये तस्य ब्रह्मविलक्षणता, द्वितीये देहस्यानुपयोगात् सद्यः पातप्रसङ्ग इत्यत आह। "अयन्तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेण आन्ध्यमान्द्यपटुत्वादिभाजनेनेन्द्रियग्रामेण अशनायापिपासाशोकमोहादिभाजनेन चान्तःकरणेन पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धान्यारब्धफलानि च पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यतीति" वे० सा०। दृष्टान्तेनोक्तमर्थं स्पष्टयति। "यथेन्द्रजालमिति ज्ञानवान् तदिदमिन्द्रजालं पश्यन्नपि परमार्थमिदमिति" न पश्यति। उक्तञ्च "सुषुप्तिवज्जाग्रति यो न पश्यति द्वयन्तु पश्यन्नपि चाऽद्वयत्वतः। तथा च कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः" इति वेदान्तसा०। "वेदविद्याकृतं ज्ञानं देशिकस्य मुखात् स्वयम्। गृहीत्वाष्टोत्तरशतं ये पठन्ति द्विजोत्तमाः। प्रारब्धक्षयपर्य्यन्तं जीवन्मुक्ता भवन्ति ते" तन्त्रम्। अष्टोत्तरशतमुपनिषदाम्। २कौलिके च "धन्या माहेश्वराः स्वार्थप्रत्यभिज्ञानशालिनः। स्वपरिज्ञानमात्रेण जीवन्मुक्ता भवन्ति हि। महामन्त्रप्रभावेण कुलाचारप्रभावतः। स्वेच्छाचारा निर्विकल्पा जीवन्मुक्ता हि कौलिकाः" तन्त्रशास्त्रम् "योऽन्तर्व्योमवदत्यच्छः स जीवन्मुक्त उच्यते" कुलार्णवे।

वेदान्तपरिभाषायां विशेष उक्तो यथा। "निर्गुणब्रह्मसाक्षात्कारवतस्तु न लोकान्तरगमनं "न तस्य प्राणा उत्क्रामन्तीति श्रुतेः किन्तु यावत्प्रारब्धकर्मक्षयं सुखदुःखे अनुभूय पश्चादपवृज्यते। ननु "क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे" इत्यादिश्रुत्या "ज्ञानाग्निः सर्वकर्म्माणि भस्मसात् कुरुतेऽर्जुनेत्यादि" स्मृत्या च ज्ञानस्य सकलकर्मक्षयहेतुत्वनिश्चये सति प्रारब्धकर्म्मावस्थानमनुपपन्नमिति चेन्न तस्य "तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये कैवल्येनेत्यादि" श्रुत्या "नाभुक्तं क्षीयते कर्मकल्पकोटिशतैरपीत्यादि" स्मृत्या च उत्पादितकार्य्यककर्मव्यतिरिक्तानां सञ्चितकर्म्मणामेव ज्ञानविनाश्यत्वावगमात्। सञ्चितं द्विविधं सुकृतं दुष्कृतञ्च। तथाच श्रुतिः "तस्य पुत्रादायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति"। ननु ब्रह्मज्ञानान्मूलाज्ञाननिवृत्तौ तत्कार्य्यप्रारब्धकर्म्मणोऽपि निवृत्तेः कथं ज्ञानिनां देहधारणमुपपद्यत इति चेन्न अप्रतिबद्धज्ञानस्यैवाज्ञाननिवर्त्तकतया प्रारब्धकर्म्मरूपप्रतिबन्धकदशायामज्ञाननिवृत्ते-

रनङ्गीकारात्। "नन्वेवमपि तत्त्वज्ञानादेकमुक्तौ सर्व्वमुक्तिः स्यात् अविद्याया एकत्वेनैतन्निवृत्तौ क्वचिदपि संसारायोगादिति चेन्न इष्टापत्तेरित्येके। अपरे त्वेतद्दोषपरीहारायैव "इन्द्रोमायाभिरिति" बहुवचनश्रुत्यनुगृहीतमविद्यानानात्वमङ्गीकर्त्तव्यमित्याहुः। अन्ये त्वेकैवाविद्या तस्यास्त्वविद्याया जीवभेदेन ब्रह्मस्वरूपावरणशक्तयो नाना तथा च यस्य ब्रह्मज्ञानं तस्य ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाशः नत्वन्यं प्रति ब्रह्मस्वरूपावरणशक्तिविशिष्टाविद्यानाश इत्यभ्युपगमान्नैकमुक्तौ सर्वमुक्तिः। अतएव "यावदधिकारमवस्थितिराधिकारिकाणाम् इत्यस्मिन्नधिकरणे अधिकारिपुरुषाणामुत्पन्नतत्त्वज्ञानानामिन्द्रादीनां देहधारणानुपपत्तिमाशङ्क्य अधिकारापादकप्रारब्धकर्म्मसमाप्त्यनन्तरं विदेहकैवल्यमिति सिद्धान्तितम्। तदुक्तमाचार्य्यवाचस्पतिमिश्रैः "उपासनादिसंसिद्धितोषितेश्वरचोदितम्। अधिकारं समाप्यैते प्रविशन्ति परम्पदमिति"। एतच्चैकमुक्तौ सर्व्वमुक्तिरिति पक्षे नोपपद्यते। तस्मादेकाविद्यापक्षेऽपि प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया"।

शा॰ सू॰ भाष्ययोश्च जाततत्त्वज्ञानानामपि यावत् प्रारब्धकर्मसमाप्तिस्तावद्देहादिसम्बन्धः समर्थितो यथा "यावदधिकारमवस्थितिराधिकारिकाणाम्" ३।३।३२ सू॰। "विदुषो वर्त्तमानदेहपातानन्तरं देहान्तरमुत्पद्यते न वेति चिन्त्यते। ननु विद्यायाः साधनभूतायाः सम्पत्तौ कैवल्यनिर्वृत्तिः स्यान्न वेति नेयं चिन्तोपपद्यते। न हि पाकसाधनसम्पत्तावोदनो भवेत् न वेति चिन्ता सम्भवति, नापि भुञ्जानस्तृप्येत् न वेति चिन्त्यते। उपपन्ना त्वियं चिन्ता, ब्रह्मविदामपि केषाञ्चित् इतिहासपुराणयोर्देहान्तरोत्पत्तिदर्शनात्। तथा ह्यपान्तरतमा नाम वेदाचार्यः पुराणर्षिर्विष्णुनियोगात् कलिद्वापरयोः सन्धौ कृष्णद्वैपायनः सम्बभूवेति स्मरणं, वसिष्ठश्च ब्रह्मणो मानसः पुत्रः सन्निमिशापादपगतपूर्वदेहः पुनर्ब्रह्मादेशात् मित्रावरुणाभ्यां सम्बभूवेति। भृग्वादीनामपि ब्रह्मण एव मानसानां पुत्राणां वरुणे यज्ञे पुनरुत्पत्तिः स्मर्यते। सनत्कुमारोऽपि ब्रह्मण एव मानसः पुत्रः स्वयं रुद्राय वरप्रदानात् स्कन्दत्वेन प्रादुर्बभूव। एवमेव दक्षनारदप्रभृतीनामपि भूयसी देहान्तरोत्पत्तिकथा तेन तेन निमित्तेन भवति स्मृतौ श्रुतावपि मन्त्रार्थवादयोः प्रायेणोपलक्ष्यते। ते च केचित् पतिते पूर्वदेहे देहान्तरमाददते केचित्तु स्थित एव तस्मिन् योगैश्वर्यवशादनेकदेहागमन्यायेन, सर्वे चैते समधिगतसकलवेदार्थाः स्मर्यन्ते। तदेतेषां देहान्तरोत्पत्तिदर्शनात् प्राप्तं ब्रह्मविद्यायाः पाक्षिकं मोक्षहेतुत्वमहेतुत्वं वेत्यत उत्तरमुच्यते। न, तेषामपान्तरतमःप्रभृतीनां वेदप्रवर्त्तनादिषु लोकस्थितिहेतुष्वधिकारेषु नियुक्तानां अधिकारतन्त्रत्वात् स्थितेः। यथासौ भगवान् सविता सहस्रयुगपर्यन्तं जगतोऽधिकारं चरित्वा तदवसाने उदयास्तमयवर्जितं कैवल्यमनुभवति, "अथ तत ऊर्द्ध्व उदेत्य नैवोदेता नास्तमेतैकल एव मध्ये स्थाता" इति श्रुतेः। यथा च वर्त्तमाना ब्रह्मविदः प्रारब्धभोगक्षये कैवल्यमनुभवन्ति "तस्य तावदेव चिरं यावत् न विमोक्ष्येऽथ सम्पत्स्ये" इति श्रुतेः। एवमपान्तरतमःप्रभृतयोऽपीश्वराः परमेश्वरेण तेषु तेष्वधिकारेषु नियुक्ताः सन्तः सत्यपि सम्यग्दर्शने कैवल्यहेतावक्षीणकर्माणो यावदधिकारमवतिष्ठन्ते तदवसाने चापवृज्यन्त इत्यविरुद्धम्। सकृत्प्रवृत्तमेव हि तेऽधिकारफलदानाय कर्माशयमतिवाहयन्तः स्वातन्त्र्येण गृहादिव गृहान्तरमन्यमन्यं देहं सञ्चरन्तः स्वाधिकारनिर्वर्त्तनायापरिमुषितस्मृतय एव देहेन्द्रियप्रकृतिवशित्वात् निर्म्माय देहान् युगपत्क्रमेण वाधितिष्ठन्ति। न चैते जातिस्मरा इत्युच्यते, तएव ते, इति स्मृतिप्रसिद्धेः। यथा "सुलभा ब्रह्मवादिनी जनकेन विवदितुकामा व्युदस्य स्वं देहं जानकं देहमाविश्य व्युद्य तेन पश्चात् स्वमाविवेश" इति स्मर्यते। यदि ह्युपयुक्ते सकृत्प्रवृत्ते कर्मणि कर्म्मान्तरं देहान्तरारम्भकारणमाविर्भवेत् ततोऽन्यदप्यदग्धबीजं कर्म्मान्तरं तद्वदेव प्रसज्येतेति ब्रह्मविद्यायाः पाक्षिकं मोक्षहेतुत्वमहेतुत्वं वा शङ्क्येत, न त्वियमाशङ्का युक्ता ज्ञानात् कर्मबीजदाहस्य श्रुतिस्मृतिप्रसिद्धत्वात्। तथा च श्रुतिः— "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे" इति "स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः। इति चैवमाद्या। स्मृतिरपि "यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन!। ज्ञानाग्निः सर्वकर्म्माणि भस्मसात् कुरुते तथा"। इति- "वीजान्यग्न्युपदग्धानि न रोहन्ति यथा पुनः। ज्ञानदग्धैस्तथा क्लेशैर्नात्मा सम्पद्यते पुनः" इति—चैवमाद्या। न चाविद्यादिक्लेशदाहे सति क्लेशवीजस्य कर्म्माशयस्यैकदेशदाह एकदेशप्ररोहश्चेत्युपपद्यते, न

ह्यग्निदग्धस्य शालिबीजस्यैकदेशप्ररोहो दृश्यते। प्रवृत्तफलस्य तु कर्माशयस्य मुक्तेषोरिव वेगक्षयात् निवृत्तिः "तस्य तावदेव चिरम्" इति शरीरपातक्षेपकरणात्। तस्मादुपपन्ना यावदधिकारमाधिकारिकाणामवस्थितिः,न च ज्ञानफलस्यानैकान्तिकता। तथा च श्रुतिरविशेषेणैव सर्वेषां ज्ञानान्मोक्षं दर्शयति 'तद्यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्' इति। ज्ञानान्तरेषु चैश्वर्यादिफलेष्वासक्ताः स्युर्महर्षयः ते पश्चादैश्वर्यक्षयदर्शनेन निर्विण्णाः परमात्मज्ञाने परिनिष्ठाय कैवल्यं ययुरित्युपपद्यते। 'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्" इति स्मरणात्। प्रत्यक्षफलत्वाच्च ज्ञानस्य फलविरहाशङ्कानुपपत्तिः। कर्मफले हि स्वर्गादावनुभवानारूढे स्यादपि कदाचिदाशङ्का भवेद्वा न वेति, अनुभवारूढन्तु ज्ञानफलं "यत्साक्षादपरोक्षाद्ब्रह्म" इति श्रुतेः,"तत्त्वमसि" इति च सिद्धवदुपदेशात्। न हि "तत्त्वमसि" इत्यस्य वाक्यस्यार्थः तत्त्वं मृतो भविष्यसि इत्येवं शक्यः परिणेतुम्। "तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च" इति सम्यग्दर्शनकालमेव तत्फलं सर्वात्मत्वं दर्शयति। तस्मादैकान्तिकी विदुषः कैवल्यसिद्धिः"भा०।४।१पादे च।

"तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्"१२सू०।

"गतस्तृतीयशेषः, अथेदानीं ब्रह्मविद्याफलं प्रति चिन्ता प्रजायते, ब्रह्माधिगमे सति तद्विपरीतफलं दुरितं क्षीयते न वा क्षीयत इति संशयः। किं तावत् प्राप्तं फलार्थत्वात् कर्मणः फलमदत्त्वा न सम्भाव्यते क्षयः। फलदायिनी ह्यस्य शक्तिः श्रुत्या समधिगता। यदि तदन्तरेणैव फलोपभोगमुपनश्येत श्रुतिः कदर्थिता स्यात्। स्मरन्ति च 'न हि कर्माणि क्षीयन्ते' [म०भा०] इति। नन्वेवं सति प्रायश्चित्तोपदेशोऽनर्थकः प्राप्नोति। नैष दोषः, प्रायश्चित्तानां नैमित्तिकत्वोपपत्तेर्गृहदाहेष्ट्यादिवत्। अपि च प्रायश्चित्तानां दोषसंयोगेन विधानात् भवेदपि दोषक्षपणार्थता, नत्वेवं ब्रह्मविद्याया विधानमस्ति। नन्वनभ्युपगम्यमाने ब्रह्मविदः कर्मक्षये तत्फलस्यावश्यभोक्तव्यत्वादनिर्मोक्षः स्यात्। नेत्युच्यते देशकालनिमित्तापेक्षो मोक्षः कर्मफलवद्भविष्यति। तस्मात् न ब्रह्मविद्याधिगमे दुरितनिवृत्तिरित्येवं प्राप्ते ब्रूमः तदधिगमे ब्रह्माधिगमे सत्युत्तरपूर्वाघयोरश्लेषविनाशौ भवतः, उत्तरस्याश्लेषः, पूर्वस्य विनाशः। कस्मात्, तद्व्यपदेशात् तथा हि ब्रह्मविद्याप्रक्रियायां सम्भाव्यमानसम्बन्धस्यागामिनो दुरितस्यानभिसम्बन्धं विदुषो व्यपदिशति "यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते" इति। तथा विनाशमपि पूर्वोपचितस्य दुरितस्य व्यपदिशति "तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते" इति। अयमपरः कर्मक्षयव्यपदेशो भवति। "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति। यदुक्तमनुपभुक्तफलस्य कर्मणः क्षयकल्पनायां शास्त्रकदर्थनं स्यादिति। नैष दोषः, न हि वयं कर्मणः फलदायिनीं शक्तिमवजानीमहे, विद्यत एव सा, सा तु विद्यादिना कारणान्तरेण प्रतिबध्यत इति वदामः। शक्तिसद्भावमात्रे च शास्त्रं व्याप्रियते न प्रतिबन्धाप्रतिबन्धयोरपि। न हि कर्म क्षीयत इत्येतदपि स्मरणमौत्सर्गिकं न हि भोगादृते कर्म क्षीयते तदर्थत्वादिति, इष्यत एव प्रायश्चित्तादिना दुरितस्य क्षयः'सर्वं पाप्मानं तरति''तरति ब्रह्महत्यां योऽश्वमेधेन यजते"। य उचैनमेवं वेद" इत्यादि श्रुतिस्मृतिभ्यः। यत्तूक्तं नैमित्तिकानि प्रायश्चित्तानि भविष्यन्ति इति। तदसत्, दोषसंयोगेन चोद्यमानानामेषां दोषनिर्घातफलसम्भवे फलान्तरकल्पनानुपपत्तेः। यत् पुनरेतदुक्तं न प्रायश्चित्तवद्दोषक्षयोद्देशेन विद्याविधानमस्तीति अत्र ब्रूमः। सगुणासु तावद्विद्यासु विद्यत एव विधानं, तासु च वाक्यशेषे ऐश्वर्यप्राप्तिः पापनिवृत्तिश्च विद्यावत उच्यते, तयोश्चाविवक्षाकारणं नास्तीत्यतः पाप्मप्रहाणपूर्वकैश्वर्यप्राप्तिस्तासां फलमिति निश्चीयते। निर्गुणायान्तु विद्यायां यद्यपि विधानं नास्ति तथाप्यकर्त्रात्मत्वबोधात् कर्मप्रदाहसिद्धिः। अश्लेष इति चागामिषु कर्मसु कर्तृत्वमेव न प्रतिपद्यते ब्रह्मविदिति दर्शयति। अतिक्रान्तेषु तु यद्यपि मिथ्याज्ञानात् कर्तृत्वं प्रतिपेदे इव तथापि विद्यासामर्थ्यात् मिथ्याज्ञाननिवृत्तेस्तान्यपि प्रलीयन्त इत्याह विनाश इति। पूर्वप्रसिद्धकर्तृत्वभोक्तृत्वस्वरूपविपरीतं हि त्रिष्वपि कालेष्वकर्तृत्वाभोक्तृत्वस्वरूपं ब्रह्माहमस्मि नेतः पूर्वमपि कर्त्ता भोक्ता वाऽहमासं नेदानीं नापि भविष्यति काले इति ब्रह्मविदवगच्छति। एवमेव च मोक्ष उपपद्यते, अन्यथा

ह्यनादिकालप्रवृत्तानां कर्मणां क्षयाभावे मोक्षाभावः स्यात्। न च देशकालनिमित्तापेक्षो मोक्षः कर्मफलवत् भवितुमर्हति, अनित्यत्वप्रसङ्गात् परोक्षत्वानुपपत्तेश्च ज्ञानफलस्य। तस्मात् ब्रह्माधिगमे दुरितक्षय इति स्थितम्"। भा॰

"इतरस्याप्येवमसंश्लेषः पाते तु" ४।१।१४ सू॰

"पूर्वस्मिन्नधिकरणे बन्धहेतोरघस्य स्वाभाविकस्याश्लेषविनाशौ ज्ञाननिमित्तौ शास्त्रव्यपदेशान्निरूपितौ, धर्मस्य पुनः शास्त्रीयत्वात् शास्त्रीयेण ज्ञानेनाविरोध इत्याशङ्क्य तन्निराकरणाय पूर्वाधिकरणन्यायातिदेशः क्रियते। इतरस्यापि पुण्यस्य कर्मण एवमघवदसंश्लेषो विनाशश्च ज्ञानवतो भवतः। कुतः, तस्यापि स्वफलहेतुत्वेन ज्ञानफलप्रतिबन्धित्वप्रसङ्गात्। "उभे उ हैवैष एतेन तरति' इत्यादिश्रुतिषु दुष्कृतवत् सुकृतस्यापि प्रणाशव्यपदेशात् अकर्त्रात्मबोधनिमित्तस्य च कर्मक्षयस्य सुकृतदुष्कृतयोस्तुल्यत्वात् "क्षीयन्ते चास्य कर्माणि" इति चाविशेषश्रुतेः। यत्रापि केवल एव पाप्मशब्दः पठ्यते तत्रापि तेनैव पुण्यमप्याकलितमिति द्रष्टव्यं, ज्ञानापेक्षया निकृष्टफलत्वात्। अस्ति च श्रुतौ पुण्येऽपि पाप्मशब्दः 'नैनं सेतुमहोरात्रे तरतः' इत्यत्र सह दुष्कृतेन सुकृतमप्यनुक्रम्य "सर्वे पाप्मानोऽतो निवर्तन्त"इत्यविशेषेणैव प्रकृतेषु पाप्मशब्दप्रयोगात्। पाते त्विति। तुशब्दोऽवधारणार्थः। एवं धर्माधर्मयोर्बन्धहेत्वोर्विद्यासामर्थ्यादश्लेषविनाशसिद्धेरवश्यम्भाविनी विदुषः शरीरपाते मुक्तिरित्यवधारयति।" भा॰

"अनारब्धकार्ये एव तु पूर्वे तदवधेः।" ४।१।१५ सू॰

"पूर्वयोरधिकरणयोर्ज्ञाननिमित्तः सुकृतदुष्कृतयोर्विनाशोऽवधारितः, स किमविशेषेणारब्धकार्ययोरनारब्धकार्ययोश्च भवत्युत विशेषेणानारब्धकार्ययोरेवेति विचार्यते। तत्र "उभे उ हैवैष एतेन तरति" इत्येवमादिश्रुतिष्वविशेषश्रवणादविशेषेणैव क्षय इत्येवं प्राप्ते प्रत्याह अनारब्धकार्ये एव त्विति। अप्रवृत्ते फले एव पूर्वे जन्मान्तरसञ्चिते अस्मिन्नपि च जन्मनि प्राक् ज्ञानोत्पत्तेः सञ्चिते सुकृतदुष्कृते ज्ञानाधिगमात् क्षीयेते नत्वारब्धकार्ये सामिभुक्तफले याभ्यामेतत् ब्रह्मज्ञानायतनं जन्म निर्मितम्। कुत एतत्, "तस्य तावदेव चिरं यावन्न विमोक्ष्ये" इति शरीरपातावधिकरणात् क्षेमप्राप्तेः; इतरथा हि ज्ञानादशेषकर्मक्षये सति स्थितिहेत्वभावात् ज्ञानप्राप्त्यनन्तरमेव क्षेममश्नुवीत तत्र शरीरपातप्रतीक्षां नाचक्षीत। ननु वस्तुबलेनैवायमकर्त्रात्मत्वबोधः कर्माणि क्षपयन् कथं कानिचित् क्षपयेत् कानिचिच्चोपेक्षेत, न हि समानेऽग्निवीजसम्पर्के केषाञ्चिद्वीजशक्तिः क्षीयते केषाञ्चिन्न क्षीयते इति शक्यमङ्गीकर्त्तुमिति। उच्यते, न तावदनाश्रित्यारब्धकार्यं कर्माशयं ज्ञानोत्पत्तिरुपपद्यते, आश्रिते च तस्मिन् कुलालचक्रवत् प्रवृत्तवेगस्यान्तराले प्रतिबन्धासम्भवाद्भवति वेगक्षयप्रतिपालनम्, अकर्त्रात्मत्वबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्माण्युच्छिनत्ति, बाधितमपि मिथ्याज्ञानं द्विचन्द्रादिज्ञानवत् संस्कारवशात् कञ्चित् कालमनुवर्त्तत एव। अपि च नैवात्र विवदितव्यं ब्रह्मविदः कञ्चित् कालं शरीरं ध्रियते न ध्रियत इति। कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणञ्चापरेण प्रतिक्षेप्तुं शक्येत। श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्देशेनैतदेव निरुच्यते। तस्मादनारब्धकार्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात् क्षय इति निर्णयः।" भा॰

"भोगेन त्वितरे क्षपयित्वा सम्पद्यते" ४।१।१९ सू॰

"अनारब्धकार्ययोः पुण्यपापयोर्विद्यासामर्थ्यात् क्षय उक्तः, इतरे त्वारब्धकार्ये पुण्यपापे उपभोगेन क्षपयित्वा ब्रह्म सम्पद्यते "तस्य तावदेव चिरं यावन्न विमोक्ष्य अथ सम्पत्स्ये" इति "ब्रह्मैव सन् ब्रह्माप्येति" इति चैवमादिश्रुतिभ्यः। ननु सत्यपि सम्यग्दर्शने यथा प्राग्देहपाताद्भेददर्शनं द्विचन्द्रदर्शनन्यायेनानुवृत्तमेवं पश्चादप्यनुवर्त्तेत। न, निमित्ताभावात्। उपभोगशेषक्षपणं हि तत्रानुवृत्तिनिमित्तं, न च तादृशमत्र किञ्चिदस्ति। ननु अपरः कर्माशयोऽभिनवमुपभोगमारप्स्यते। न, तस्य दग्धवीजत्वात्। मिथ्याज्ञानावष्टम्भं हि कर्मान्तरं देहपाते उपभोगान्तरमारभते, तच्च मिथ्याज्ञानं सम्यग्ज्ञानेन दग्धमित्यतः साध्वेतदारब्धकार्यक्षये विदुषः कैवल्यमवश्यम्भावीति।" ४।१। भा॰

"यत्तु सञ्चितं कर्मान्तरं तस्य निमित्तं फलस्य दग्धमूलत्वात्। अविद्यादयो हि क्लेशाः कर्मणस्तत्फलस्य च मूलम्। तदुक्तं योगशास्त्रे "क्लेशमूलः कर्माशयः सति मूले तद्विपाकः" इति तच्च मूलं ज्ञानाग्निना दग्धमिति कुतः पुनः संसारः तस्माद्देहपाते कैवल्यमिति सिद्धम्" आ॰गि॰ सांख्यकारिकायां तत्त्वकौमुद्यामत्र विशेषो उक्तो यथा

"सम्यग्ज्ञानाधिगमाद्धर्मादीनामकारणप्राप्तौ। तिष्ठति

संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः।" साङ्ख्यकारिका। "तत्त्वसाक्षात्कारोदयादेवानादिरप्यनियतविपाककालोऽपि कर्म्माशयप्रचयो दग्धबीजभावतया न जात्याद्युपभोगलक्षणाय फलाय कल्पते। क्लेशसलिलावसिक्तायां हि बुद्धिभूमौ कर्मबीजान्यङ्कुरं प्रसुवते तत्त्वज्ञाननिदाघनिपीतसकलक्लेशसलिलायामूषरायां कुतः कर्मबीजानामङ्कुरप्रसवः। तदिदमुक्तं धर्म्मादीनामकारणप्राप्ताविति अकारणत्वप्राप्तावित्यर्थः। उत्पन्नतत्त्वज्ञानेऽपि च संस्कारवशात्तिष्ठति। यथोपरतेऽपि कुलालव्यापारे चक्रं वेगाख्यसंस्कारवशाद्भ्रमत्तिष्ठति। कालपरिपाकवशात्तूपरते संस्कारे निष्क्रियं भवति। शरीरस्थितौ च प्रारब्धपरिपाकौ धर्म्माधर्म्मौ संस्कारौ। तथाच श्रूयते "भोगेन त्वितरे क्षपयित्वाथ सम्पद्यत" इति "तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इति। प्रक्षीयमाणाविद्याविशेषस्य संस्कारस्तद्वशात्तत्सामर्थ्याद्धृतशरीरस्तिष्ठति" तत्त्वकौ०।

सा०सू० भाष्येऽप्युक्तं यथा

"बाधितानुवृत्त्या मध्यविवेकतोऽप्युपभोगः" सू०। "सकृत् सम्प्रज्ञातयोगेनात्मसाक्षात्कारोत्तरं मध्यविवेकावस्थो मध्यमविवेकेऽपि सति पुरुषे बाधितानामपि दुःखादीनां प्रारब्धवशात् प्रतिबिम्बरूपेण पुरुषेऽनुवृत्त्या भोगो भवतीत्यर्थः। विवेकनिष्पत्तिश्चापुनरुत्थानादसम्प्रज्ञातादेव भवतीत्यतस्तस्यां सत्यां न भोगोऽस्तीति प्रतिपादयितुं मध्यविवेकत इत्युक्तम्। मन्दविवेकस्तु साक्षात्कारात् पूर्वं श्रवणमननध्यानमात्ररूप इति विभागः" भा०।

जीवन्मुक्तश्च सू०।

"जीवन्मुक्तोऽपि मध्यविवेकावस्थ एव भवतीत्यर्थः। जीवन्मुक्ते प्रमाणमाह" भा०।

"उपदेश्योपदेष्टृत्वात् तत्सिद्धिः" सू०।

"शास्त्रेषु विवेकविषये गुरुशिष्यभावश्रवणाज्जीवन्मुक्तसिद्धिरित्यर्थः। जीवन्मुक्तस्यैवोपदेष्टृत्वसम्भवादिति" भा०।

"श्रुतिश्च" सू०।

"श्रुतिश्च जीवन्मुक्तेऽस्ति "दीक्षयैव नरो मुच्येत् तिष्ठेन्मुक्तोऽपि विग्रहे। कुलालचक्रमध्यस्थो विच्छिन्नोऽपि भ्रमेद्घटः"। "ब्रह्मैव सन् ब्रह्माप्येतीत्यादि" रिति। नारदीयस्मृतिरपि "पूर्वाभ्यासबलात् कार्य्यं न लोको न च वैदिकः। अपुण्यपापः सर्वात्मा जीवन्मुक्तः स उच्यते"। इति। ननु श्रवणमात्रेणाप्युपदेष्टृत्वं स्यात् तत्राह" साङ्ख्यप्रवचनभाष्यम्।

"इतरथान्धपरम्परा"। सू०।

"इतरथा मन्दविवेकस्याप्युपदेष्टृत्वेऽन्धपरम्परापत्तिरित्यर्थः। सामग्र्येणात्मतत्त्वमज्ञात्वा चेदुपदिशेत् कस्मिंश्चिदंशे स्वभ्रमेण शिष्यमपि भ्रान्तीकुर्य्यात् सोऽप्यन्यं सोऽप्यन्यमित्येवमन्धपरम्परेति। ननु ज्ञानेन कर्मक्षये सति कथं जीवनं स्यात् तत्राह" भा०

"चक्रभ्रमणवद्धृतशरीरः"। सू०

"कुलालकर्मनिवृत्तावपि पूर्वकर्मवेगात् स्वयमेव यथा कियत्कालं चक्रं भ्रमति। एवं ज्ञानोत्तरं कर्मानुत्पत्तावपि प्रारब्धकर्मवेगेन चेष्टमानं शरीरं धृत्वा जीवन्मुक्तस्तिष्ठतीत्यर्थः। ननु ज्ञानहेतुसम्प्रज्ञातयोगेन भोगादिवासनाक्षये कथं शरीरधारणम्। न च योगस्य संस्काराभिभावकत्वे किं मानमिति वाच्यम्। "व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधपरिणाम" इति योगसूत्रतस्तत्सिद्धेः। चिरकालीनस्य विषयान्तरावेशस्य विषयान्तरसंस्काराभिभावकतया लोकेऽप्यनुभवाच्चेति तत्राह।" भा०

"संस्कारलेशतस्तत्सिद्धिः।" सू०

"शरीरधारणहेतवो ये विषयसंस्कारास्तेषामल्पावशेषात् तस्य शरीरधारणस्य सिद्धिरित्यर्थः। अत्र चाविद्यासंस्कारलेशस्य सत्ता नापेक्ष्यते अविद्याया जन्मादिरूपकर्मविपाकारम्भमात्रे हेतुत्वात्। योगभाष्ये व्यासैस्तथा व्याख्यातत्वात्। "वीतरागजन्मादर्शनादिति" न्यायाच्च। न तु प्रारब्धफलककर्मभोगेऽपीति। यत्र च नियमेनाविद्यापेक्ष्यते स प्रयासविशेषरूपो भोगो मूढेष्वेवास्ति जीवन्मुक्तानां तु भोगाभास एवेति प्रागुक्तम्। यत् तु कश्चिदविद्यासंस्कारलेशोऽपि जीवन्मुक्तस्य तिष्ठतीत्याह तन्न धर्म्माधर्म्मोत्पत्तिप्रसङ्गात्। अन्धपरम्पराप्रसङ्गात्। अविद्यासंस्कारलेशसत्ताकल्पने प्रयोजनाभावाच्च। एतच्च ब्रह्ममीमांसाभाष्ये प्रपञ्चितमिति" भा०।

जीवन्मुक्ति स्त्री जीवतो मुक्तिः। जीवतो बन्धनिवृत्तौ जीवतः पुरुषस्य कर्त्तृत्वभोक्तृत्वनिबन्धनसुखदुःखविशेषक्लेशादिरूपस्य निवृत्तौ। तस्या उपायास्तु श्रवणमननयोगाभ्यासादयः तन्त्रोक्तकुलाचाराश्च। "जीवन्मुक्त्युपायस्तु कुलमार्गो हि नापरः" इति तन्त्रोक्तेः।

जीवन्मृत त्रि० जीवन्नेव मृतः मृततुल्यः। जीवता कर्त्तव्यकार्य्यस्याकरणात् मृतसमे आत्मम्भरौ स हि जीवन्नपि वैश्वदेवातिथिभोजनाद्यन्तरेण आत्मनः पोषणेन नित्यका-

यौकरणात् मृतसमः। अतएवाह दक्षः "जीवन्तो मृतकास्त्वन्ये य आत्मम्भरयो नराः"।

जीवपति स्त्री जीवः जीवन् पतिरस्याः सपूर्वत्वात् वा न न ङीपौ जीवद्भर्तृकायां सधवायां "स्त्रीचैतदास्थाय लभेत सौभगं श्रियं प्रजां जीवपतिर्यशोगुणम्" भाग० ६।१९।२० वा कप् जीवपतिकाद्योऽप्यत्र।

जीवपत्नी स्त्री जीवः जीवन् पतिर्यस्याः सपूर्वत्वात् नः ङीप् च। जीवत्पतिकायां सधवायाम् "ब्राह्मण्याश्च वृद्धायाः जीवपत्न्याः जीवप्रजाया अगारे एतां रात्रिं वसेत्"। "वाचं विसृजेत् जीवपत्नीं प्रजां विन्देयेति" आश्व० गृ० १।७।२१।२१। "तमेतमवेक्षितक्षरं वीरसूर्जीवसूः जीवपत्नीति ब्राह्मण्यो मङ्गल्यादिभिर्वाग्भिरुपासीरन्" सं०त० गोभिलः।

जीवपत्रप्रचायिका न० जीवस्य जीवपुत्रकस्य पत्राणि प्रचीयन्तेऽस्याम् "नित्यं क्रीड़ाजीविकयोः" पा० स०। क्रीड़ायां प्र+चि–भावे ण्वुल्। उदीचां क्रीड़ाभेदे। "जीवपत्रप्रचायिका उदीचां क्रीड़ा" सि०कौ०। प्राचां क्रीड़ायां तु पा०सूत्रे प्राचामिति विशेषणात् न पूर्वपदस्याद्युदात्तता किन्तु तत्पुरुषे प्रकृतिस्वरः।

जीवपुत्र पु०जीवः जीवकः पुत्र इव हर्षहेतुत्वात्।(जियाँपोती) १वृक्षभेदे। जीवः जीवन् पुत्रो यस्याः। २जीवत्सुतायां स्त्रियां "सा जीवपुत्रा सुभगा भवत्यमरवर्णिनी" हरिवं० १२८अ०। जीववत्सादयोऽप्यत्र। "काकवन्ध्या च या नारी मृतवत्सा च या भवेत्। बहुपत्या जीववत्सा सा भवेन्नात्र संशयः" कालीस्तवः। "मृतप्रजा जीवपुत्रा धनेश्वरी" भाग० ६।१९।२१। ३तादृशपुरुषे पु० "कच्चित् पुत्रा जीवपुत्राः सुसस्यक" भाग० उ० २९।

जीवपुत्रक पु० जीवयतीति जीव–क जीवः पुत्र इव हर्षहेतुत्वात् इवार्थे कन्।(जिँआपोती) वृक्षभेदे। शब्दर०।

जीवपुष्पा स्त्री जीवयतीति जीव–णिच् अच्–जीवं जीवकं पुष्पं यस्याः। बृहज्जीवन्तीवृक्षे राजनि०। जीवः जन्तुः पुष्पमिव।२जन्तुरूपपुष्पे न०। "अस्माकं शिविरे तावन्निशिताः शस्त्रपाणयः। शत्रूणां जीवपुष्पाणि विचिन्वन्तु नगेष्विव" रामा० सु०४२अ०।

जीवप्रिया स्त्री जीवं प्रीणाति प्री–क ६त०।१हरीतक्याम्। राजनि०। ६त०। २जीववल्लभे त्रि०।

जीवभद्र स्त्री जीवानां भद्रं यस्याः ५ब०। जीवन्तीलतायां राजनि०। ६त०। जीवकुशले न०।

जीवमन्दिर न० ६त०। शरीरे राजनि० तस्य जीवभोगायतनत्वात्तथात्वं जीवगृहादयोऽप्यत्र।

जीवमातृका स्त्री ६त०। "कुमारी धनदा नन्दा विमला मङ्गला बला। पद्मा चेति च विख्याताः सप्तैता जीवमातृकाः" विधानपारिजातोक्ते कुमार्य्यादौ मातृकासप्तके।

जीवयाज पु० जीवैः पशुभिर्याजः याजनम् यज–णिच् भावे अच्। पशुभिर्याजने। "जीवयाजं यजते सोमपादिवः" ऋ०१।२१।१५। अस्य भाष्ये "याजयतेर्घञ् णेरनिटीति णिलोपस्याचः परस्मिन्निति स्थानिवद्भावात् चजोः कुघिण्ण्यतोरिति कुत्वाभाव इति" यदुक्तं तत् प्रामादिकं याजयतेर्हलन्तत्वाभावात् घञोऽप्रसक्तेः "एरच्" पा० इवर्णान्तादचः एव प्रसक्तेश्च।

जीवयोनि स्त्री जीवा जीवनवती योनिः। सजीवजन्तौ "तिर्यङ्मनुष्यविबुधादिषु जीवयोनिषु" भाग०१।९।२०

जीवरक्त न०जीवोत्पादकं रक्तम् शाक०त०। स्त्रीणामार्त्तवे शोणिते तस्य गर्भोत्पादकत्वेन तत्रस्थजीवोत्पादकत्वं यथाह सुश्रुतः "आर्त्तवं शोणितं त्वाग्नेयमग्नीषोमीयत्वाद्गर्भस्य, पाञ्चभौतिकञ्चापि जीवरक्तमाहुराचार्य्याः विस्रता द्रवता रागः स्पन्दनं लघुता तथा। भूम्यादीनां गुणाह्येते दृश्यन्ते चात्र शोणिते"।

जीवला स्त्री जीवं जीवनं लाति सेवनात् ला–क। सैंहलीलतायां राजनि०।

जीवलोक पु० जीवानां लोकः भोगसाधनम्। १संसारे "माता पिता गुरुजनः स्वजनो ममेति मायोपमे जगति कस्य भवेत् प्रतिष्ठा। एको यतो व्रजति कर्म पुरःसरोऽयं विश्रामवृक्षसदृशः खलु जीवलोकः। सायं सायं वासवृक्षं समेताः प्रातः प्रातस्तेन तेन प्रयान्ति। त्यक्त्वान्योन्यं तञ्च वृक्षं विहङ्गास्तद्वत् तद्वज्ज्ञातयो ज्ञातयश्चेति"। "ममैवांशो जीवलोके जीवभूतः सनातनः" गीता। "जीवलोके संसारोपभोगार्थम्" श्रीधरः। कर्म०। २जीवरूपे जने च "महागुणं हरति हि पौरुषेण तदा वीरोजीवति जीवलोके" भा०व०२४अ०। "आलोकमर्कादिव जीवलोकः" रघुः।

जीववल्ली स्त्री जीवयतीति जीव–णिच्–अच् कर्म०। क्षीरकाकोल्याम् राजनि०।

जीववृत्ति स्त्री जीव एव वृत्तिः। पाशुपाल्ये हेमच०। तत्र जीवरक्षादिना वैश्यादेर्वृत्तिरिति तस्य तथात्वम्। जीवे वृत्तिः स्थितिरस्य। २जीवनिष्ठे गुणादौ त्रि०

"जीवद्वृत्ती त्विमौ गुणौ" भाषापरिच्छेदकारिका ।

जीवशाक पु॰ कर्म्म॰। मालवदेशप्रसिद्धे शाकभेदे । "जीवशाकः सुमधुरः बृंहणो वस्तिशोधकः । दीपनः पाचनो बल्यो हृद्यः पित्तापहारकः" राजनि॰ ।

जीवशुक्ला स्त्री जीवतीति जीवा जीवन्त्येव शुक्ला क्षीरकाकोल्याम् राजनि॰। अन्यस्य पक्वतायामेव शुक्लत्वमस्याः पुनर्जीवन्त्या एव तथात्वमिति तन्नामता । [राजनि॰ ।

जीवश्रेष्ठा स्त्री जीवाय जीवनाय श्रेष्ठा । ऋद्धिनामौषधौ

जीवसंज्ञ पु॰जीव इति संज्ञाऽस्य । कामवृद्धिवृक्षे राजनि॰

जीवसाधन न॰जीवस्य जीवनस्य साधनम् । धान्ये राजनि॰

जीवसू स्त्री जीवं जीवन्तं सूते सू–क्विप् । जीवत्पुत्रिकायां स्त्रियां हेमच॰। "जीवस्वर्वीरसूर्भद्रे ! बहुसौख्यसमन्विता" भा॰ आ॰ १८८ अ॰ ।

जीवस्थान न॰ ६त॰ । मर्म्मणि हला॰।

जीवहीन पु॰ "षड्क्षरो जीवहीनः" विश्वसारतन्त्रोक्ते षड्क्षरे मन्त्रे कुमारशब्दे २१०६ पृ॰ दृश्यम् ।

जीवा स्त्री जीव–अच् जीवयतेरच् वा टाप् ज्या–क्विप् संप्रसारणे दीर्घः सा अस्त्यस्य व । १धनुषो गुणे ज्यायां २जीवन्तिकायामौषधौ, ३वचायां, ४शिञ्जिते, ५भूमौ ६जीवनोपाये च मेदि॰ जीव–भावे अ टाप् । ७जीवने जटा॰ । धनुराकारक्षेत्रस्य वृत्तस्योभयरेखावृत्तसंलग्ने क्षेत्रभेदे तन्मानानयनादिकं लीला॰ दर्शितं तच्च क्षेत्रशब्दे २४०२ पृ॰ दर्शितम् । ग्रहस्पष्टगत्याद्युपयोगिनी राशिरूपक्षेत्रस्य जीवा तु क्रमज्याशब्दे २२०२पृ॰उक्ता अधिकं ज्याशब्दे वक्ष्यते ज्योत्पत्तिप्रकारः शि॰ शि॰ उक्तो यथा

"दृष्टाङ्गुलव्यासदलेन वृत्तं कार्य्यं दिगङ्कं भलवाङ्कितं च । ज्यासंख्ययाप्ता नवतेर्लवा ये तदाद्यजीवा धनुरेतदेव । द्वित्र्यादिनिघ्नं तदनन्तराणां चापे तु दत्त्वोभयतो दिगङ्कात् । क्षेयं तदग्रद्वयबद्धरज्जोरर्धं ज्यकार्धं निखिलानि चैवम् । अथान्यथा वा गणितेन वच्मि ज्यार्धानि तान्येव परिस्फुटानि । त्रिज्याकृतिर्दोर्गुणवर्गहीना मूलं तदीयं खलु कोटिजीवा । दोःकोटिजीवारहिते त्रिभज्ये तच्छेषके कोटिभुजोत्क्रमज्ये । ज्याचापमध्ये खलु योऽत्र बाणः सैवोत्क्रमज्या सुधियात्र वेद्या । त्रिज्यार्धं राशिज्या तत्कोटिज्या च षष्टिभागानाम् । त्रिज्यावर्गार्धपदं शरवेदांशज्यका भवति । त्रिज्याकृतीषुघातात् त्रिज्याकृतिवर्गपञ्चघातस्य । मूलोनादष्टहृतान्मूलं षट्त्रिंशदंशज्या । गजहयगजेषु ५८७८ निघ्नी त्रिभजीवा वाऽयुतेन१००००संभक्ता । षट्त्रिंशदंशजीवा तत्कोटिज्याकृतेषूणाम् । त्रिज्याकृतीषुघातान्मूलं त्रिज्योनितं चतुर्भक्तम् । अष्टादशभागानां जीवा स्पष्टा भवत्येवम् । क्रमोत्क्रमज्याकृतियोगमूलाद्दलं तदर्धांशकशिञ्जिनी स्यात् । त्रिज्योत्क्रमज्यानिहतेर्दलस्य मूलं तदर्धांशकशिञ्जिनी वा । तस्याः पुनस्तद्दलभागकानां कोटेश्च कोट्यंशदलस्य चैवम् । अन्यज्ज्यकासाधनमुक्तमेवं पूर्वैः प्रवक्ष्येऽथ विशिष्टमस्मात् । त्रिज्याभुजज्याहतिहीनयुक्ते त्रिज्याकृती तद्दलयोः पदे स्तः । भुजोनयुक्तत्रिभखण्डयोर्ज्ये कोटिं भुजज्यां परिकल्प्य चैवम् । यद्दोर्ज्ययोरन्तरमिष्टयोर्यत्कोटिज्ययोस्तद्युतियोगमूलम् । दलीकृतं स्याद्भुजयोर्वियोगखण्डस्य जीवैवमनेकधा वा । दोःकोटिजीवाविवरस्य वर्गो दलीकृतस्तस्य पदेन तुल्या । स्यात् कोटिबाह्वोर्विवरार्धजीवा वक्ष्येऽथ मूलग्रहणं विनापि । दोर्ज्याकृतिर्व्यासदलार्धभक्ता लब्धत्रिमौर्व्योर्विवरेण तुल्या । दोःकोटिभागान्तरशिञ्जिनी स्याज्ज्यार्धानि वा कानिचिदेवमत्र । खगोऽङ्केषुषड्ंशेन(६५६८) वर्जिता भुजशिञ्जिनी । कोटिज्या दशभिः क्षुण्णा त्रिसप्तेषु(५७२)विभाजिता । तदैक्यमग्रजीवा स्यादन्तरं पूर्वशिञ्जिनी । प्रथमज्या भवेदेवं षष्टिरन्यास्ततस्ततः । कोटिव्यासार्धेऽष्टगुणाब्ध्यग्नितुल्ये स्युर्नवतिर्ज्यकाः । कोटिजीवा शताभ्यस्ता गोदस्रतिथि(१५२९)भाजिता । दोर्ज्या स्याऽद्व्यङ्गवेदांश(४६७)हीना तद्योगसंमिता । तदग्रज्या तयोश्चापि विवरं पूर्वशिञ्जिनी । तत्त्वदस्रा २२५ नगांशोना एवमत्राद्यशिञ्जिनी । ज्यापरम्परयैवं वा चतुर्विंशतिमौर्विकाः । चापयोरिष्टयोर्दोर्ज्ये मिथः-कोटिज्यकाहते । त्रिज्याभक्ते तयोरैक्यं स्याच्चापैक्यस्य दोर्ज्यका । चापान्तरस्य जीवा स्यात् तयोरन्तरसंमिता । अन्यज्ज्यासाधने सम्यगियं ज्याभावनोदिता । समासभावना चैका तथान्यान्तरभावना । आद्यज्याचापभागानां प्रतिभागज्यकाविधिः । या ज्यानुपाततः सेष्टव्यासार्धे परिणाम्यते । आद्यदोःकोटिजीवाभ्यामेव कार्य्या ततो [illegible] । भावना स्युस्तदग्रज्या इष्टे व्यासदले स्फुटाः । स्थूलं ज्यानयनं पाठ्यामिह तन्नोदितं मया । उक्ता संक्षेपतः पूर्वं ज्योत्पत्तिः सुगमा च सा । सविशेषाधुना तत्र विशेषाद्दिष्टसोष्यतः"। तत्र तावदाचार्य्याणां पदवीमित्यादि श्लोकपञ्चकं

समम्। अत्र गणितेन ज्याज्ञानार्थं मूलभूतज्याचतुष्कसिद्धप्रकारमेवाह। तत्प्रकारो हि बीजगणितक्रियया। त्रिज्यार्धं राशिज्येत्यादि। त्रिज्यार्धेन १७१९ तुल्या त्रिंशदंशानां ज्या भवति। तस्याः कोटिज्या षष्टिभागानाम्। त्रिज्यावर्गार्धपदं पञ्चचत्वारिंशदंशानां ज्या भवति। अथ त्रिज्यावर्गात् पञ्चगुणात् त्रिज्याकृतिवर्गपञ्चघातस्य मूलेन हीनादष्ट हृतात् पदं षट्त्रिंशदंशानां ज्या। अथ वा गजहयगजेषु ५८७८ निघ्नी त्रिज्याऽयुतेन १००००भक्ता षट्त्रिंशदंशानां ज्या स्यात्। इति गणितलाघवम्। तत्कोटिज्यार्द्धाच्चतुष्पञ्चाशदंशानां ज्या। तथा त्रिज्यावर्गस्य पञ्चगुणस्य मूलं त्रिज्याहीनं चतुर्भक्तं सदष्टादशभागानां ज्या भवति। तत्कोटिज्यार्द्धात् द्विसप्ततिभागानाम्। अतोऽन्यथा साधनमाह। क्रमोत्क्रमज्येत्यादि। कोटिज्योना त्रिज्याभुजस्योत्क्रमज्या स्यात्। भुजज्योना त्रिज्याकोट्युत्क्रमज्या स्यात्। भुजक्रमज्योत्क्रमज्ययोश्च वर्गयोगपददलं भुजांशानामर्धस्य ज्या स्यात्। अथवा त्रिज्योत्क्रमज्याघातदलस्य मूलं तदर्धांशकशिञ्जिनी स्यादिति क्रियालाघवम्। एवमुत्पन्नज्याया अपि कोटिज्या सा तत्कोटिभागानाम्। ततः पुनरेवमन्यास्तदर्धांशकज्याः साध्याः। कोटेश्चैवमन्याः। तद्यथा। यत्र चतुर्विंशतिज्यास्तत्र त्रिज्यार्धमष्टमं ज्यार्धम्। तत्कोटिज्या तु षोड़शम्। शरवेदांशज्या द्वादशम्। अथाष्टमात् तदर्धांशप्रकारेण चतुर्थम्। ४। तत्कोटिज्या विंशम्। २०। एवं चतुर्थात् द्वितीयं २ द्वाविंशं च। २२। द्वितीयादाद्यं १ त्रयोविंशं च २३। विंशतितमाद्दशमं १० चतुर्दशं च १४। दशमात् पञ्चमम् ५ एकोनविंशं च १९। द्वाविंशादेकादशं ११ त्रयोदशं च १३। चतुर्दशात् सप्तमं ७ सप्तदशं च १७। अथ द्वादशात् षष्ठं ६ अष्टादशं च १८। षष्ठात् तृतीयं ३ मेकविंशं च २१। अष्टादशान्नवमं ९ पञ्चदशं च १५। त्रिज्या चतुर्विंशमिति। एवं किल पूर्वैरन्यज्यासाधनमुक्तम्! इदानीं विनाप्युत्क्रमज्ययाभिनवप्रकारेणाह। त्रिज्याभुजज्याहतीत्यादि। त्रिज्याभुजज्याघातेन त्रिज्यार्द्धनिरे[illegible] युता। द्वे स्थापिते। तयोर्मूले। आद्यं भुजोनखाङ्कांशानां दलस्य ज्या। द्वितीयं भुजाढ्यखाङ्कांशानां दलस्य। एवमतोऽप्यन्याः। तद्यथा। अष्टमात् षोड़शं १६ ज्यार्धम्। षोड़शाच्चतुर्थं ४ विंशं च २०। चतुर्थाद्दशमं १०। चतुर्दशं च १४। एवं सर्वाण्यपि। प्रकारान्तरमाह। यद्दोर्ज्ययोरन्तरमित्यादि। इष्टदोर्ज्ययोर्यदन्तरं कोटिज्ययोश्च यत् तयोर्वर्गैक्यमूलस्य दलं भुजयोरन्तरार्धस्य ज्या भवति। एवमन्ययोरन्याः। यथैका किल चतुर्थी ४। अन्याष्टमी ८ दोर्ज्या। ताभ्यां द्वितीया सिध्यति! द्वितीयाचतुर्थीभ्यां प्रथमेत्यादि। तथा दोःकोटिज्ययोरन्तरवर्गदलस्य मूलं दोःकोटिभागान्तरार्धस्य ज्या स्यात्। तथाष्टमी ८ दोर्ज्या। षोड़शी १६ कोटिज्या। ताभ्यां चतुर्थी ४ स्यादित्यादि। अथ मूलग्रहणक्रियया विनापि दोःकोटिभागान्तरज्यानयनमाह। दोर्ज्याकृतिरित्यादि। दोर्ज्यावर्गस्त्रिज्यार्धेन भक्तः। तस्य त्रिज्यायाश्च विवरं दोःकोट्यन्तरस्य ज्या स्यात्। कानिचिदेवमत्र ज्यार्धानि साध्यानि। तद्यथा। यत्र किल त्रिंशज्ज्यार्धानि तत्र त्रिज्यार्धं दशमम्। १०। तत्कोटिज्या विंशतितमम्। शरवेदांशज्या पञ्चदशम्। षट्त्रिंशज्ज्या द्वादशम्। तत्कोटिज्याष्टादशं ज्यार्धम्। अष्टादशभागानां ज्या षष्ठम्। ६। तत्कोटिज्या चतुर्विंशमिति। क्रमोत्क्रमज्याकृतियोगमूलादित्यादिना पूर्वोक्तप्रकारेण दशमात् पञ्चमम्। तत्कोटिज्या पञ्चविंशम्। एवं द्वादशात् षष्ठं चतुर्विंशं च। षष्ठात् तृतीयं सप्तविंशं च। अष्टादशान्नवममेकविंशं च। एतान्येवानेन प्रकारेण सिध्यन्ति नान्यानि। अत उक्तं कानिचिदेवमत्रेति। यद्दोर्ज्ययोरन्तरमित्यादिप्रकारेण। अतोऽत्र पञ्चममेका दोर्ज्या। नवममन्या। आभ्यां यद्दोर्ज्ययोरन्तरमित्यादिना प्रकारेण भुजयोरन्तरार्धस्य ज्योत्पद्यते। तच्च द्वितीयं ज्यार्धम्। तत्कोटिज्याष्टाविंशम्। आभ्यां क्रमोत्क्रमज्याकृतियोगमूलाद्दलमित्यादिप्रकारेणाद्यं चतुर्दशं च। एवमन्याश्चतुर्दश सिध्यन्ति। अथ ज्याभावना। सा च द्वेधा। एका समासभावना। अन्यान्तरभावना। तदर्थमाह। खगोङ्कपुषडंशेनेत्यादि। यत्र किल वसुत्रिवेदाश्वि २४३८ तुल्या त्रिज्या नवतिश्च ज्यार्धानि तत्र तावदुच्यते। तत्र मूलभूतज्यानां मध्ये काचनेष्टा भुजज्या तत्कोटिज्या च पृथक् स्थाप्या। भुजज्या खनवषड्गुरस ६५६९ विभागेन रहिता कार्या। कोटिज्या तु दशगुणा त्रिसप्तपञ्चभिर्भाज्या। तयोरैक्यं तदग्रज्या। अन्तरं पूर्वज्या स्यात्। यथा त्रिज्यार्धं त्रिंशत्संख्याकं ३० ज्यार्धम्। ततः समासभावनयैकत्रिंशत्संख्यम्।

तस्माद्द्वात्रिंशत्संख्यमित्यादि। अन्तरभावनया स्वेकोनत्रिंशमष्टाविंशमित्यादि। पूर्णं दोर्ज्यां कोटिज्यां त्रिज्यां च प्रकल्प्य प्रथमं खण्डमेवं षष्टिः ६० स्यात्। अथ यदि सैव त्रिज्या चतुर्विंशतिज्यार्धानि तदर्थमाह। कोटिजीवाशताभ्यस्तेत्यादि। अत्रापि त्रिज्यार्धमष्टमं ज्यार्धं सा भुजज्या। षोड़शं कोटिज्या सा कोटिज्या शतगुणा गोदस्रतिथि(१५२९) भाजिता। या तु दोर्ज्या सा तु निजेन सप्ताङ्कवेदांशेन४६७हीना कार्य्या। यदि तयोरैक्यं क्रियते तदा नवमं ज्यार्धं भवति। यद्यन्तरं तदा सप्तमं स्यात्। एवं समासभावनया नवमाद्दशमं दशमादेकादशमित्यादि। तथान्तरभावनया सप्तमात् षष्ठं षष्ठात् पञ्चममित्यादि। एवं प्रथमं सप्तांशोनं तत्त्वदस्र२२५मितं भवति। अथवा पूर्णं॰ दोर्ज्यां त्रिज्यां च कोटिज्यां प्रकल्प्य साध्यते तथापि तदेव। ततः समासभावनया द्वितीयादीन्यखिलानि भवन्ति। अथ वा त्रिज्यां दोर्ज्यां प्रकल्प्य पूर्णां कोटिज्यां च प्रकल्प्य साध्यते तदा त्रयोविंशस्तुत्पद्यते तस्मादन्तरभावनया द्वाविंशम् २२। ततोऽप्येकविंशम् २१। एवमखिलान्यपि निष्पद्यन्ते। अथ भावनामाह। चापयोरिष्टयोरित्यादि। इष्टयोश्चापयोर्ये दोर्ज्ये ते कर्णभूमौ स्थाप्ये। तयोरधस्तात् कोटिज्ये च। ततः प्रथमकोटिज्या द्वितीयदोर्ज्यया गुण्या। ततो द्वितीयकोटिज्या प्रथमदोर्ज्यया गुण्या। द्वे अपि त्रिज्यया भाज्ये। फलयोः समासश्चापैक्यभुजस्य ज्या भवति। अन्तरं चापान्तरस्य ज्या भवति। इयं सिद्धज्यातोऽन्यज्यासाधने भावना। तद्यथा। तुल्यभावनया प्रथमज्यार्धस्य प्रथमज्यार्धेन सह समासभावनया द्वितीयं, द्वितीयस्य द्वितीयेनैवं चतुर्थमित्यादि। अथातुल्यभावनया द्वितीयतृतीययोः समासभावनया पञ्चमम्। अन्तरभावनया प्रथमं स्यादित्यादि। अथेष्टव्यासार्धे ज्याज्ञानार्थमाह। आद्यज्याचापभागानामित्यादि। यावद्भिरंशैरेका ज्या लभ्यते ते आद्यज्याचापांशाः। प्रतिभागज्यकाविधिरिति। त्रिसप्तपक्षभि ५७३ र्भक्तेत्यादिना प्रागुक्तप्रकारेणैकभागस्य ज्यामानीय तद्भावनातो भागद्वयस्यैवं तेषां भागानां ज्या साध्या साभीष्टत्रिज्यया हता वसुनगाब्धिवह्निभि २४७८ र्भक्ता प्रथमज्या स्यात्। तस्यास्तयैव सह भावनया द्वितीयाद्याः सिध्यन्ति" प्रमिताक्षरा।

जीवातु पु॰ जीवयति जीव–णिच्–कर्त्तरि आतु, जीवत्यनेन जीव–करणे वा आतु। १अन्ने २जीवनौषधे ३मृतसंजीवनौषधे च भावे आतु।४जीवने। मेदि॰"रे हस्त! दक्षिण! मृतस्य शिशोर्द्विजस्य जीवातवे विसृज शूद्रमुनौ कृपाणम्" उत्तरच॰। "आर्त्तया पुनर्जीवातवे न मर्त्तवे" ताण्ड्य॰ ब्रा॰१।५।१८। जीवितुमिति भाष्योक्तेः तवेप्रत्ययान्तमित्यन्ये तथा च जीव–तुमर्थे तवे सा॰ दीर्घः। न मर्त्तवे इति साहचर्य्यात् जीवितुमित्यर्थकता तस्य तवेप्रत्ययान्ततयैव सिध्यतीति बोध्यम्।

जीवातुमत् पु॰ जीवातु+मतुप्। आयुष्कामेष्टौ देवताभेदे "आयुष्कामेष्ट्यां जीवातुमन्तौ" आश्व॰श्रौ॰ २।१०।२। "जीवातुमन्तौ सव्योपर्य्युपस्था" २।१८।१६।

जीवात्मन् पु॰ जीवति जीव–अच् कर्म्म॰। प्राणसञ्चारयुक्ते आत्मनि प्राणिनि। "संयोगो योग इत्युक्तो जीवात्मपरात्मनोः" योगशा॰। "जीवात्मन्! पश्य भद्रं ते मातरं पितरञ्च ते" भाग॰ ६।१६।२।

जीवादान न॰ ६त॰। "अयोगस्तूभयोराध्मानं परिकर्त्तिका परिस्रावाः प्रवाहिका हृदयोपसरणमप्रग्रहोऽभियोगो जीवादानमिति नव व्यापदो वैद्यनिमित्ता भवन्तीति" सुश्रुतोक्ते वैद्यनिमित्ते व्यापद्भेदे तच्च वमनविरेचनव्यापद्भेदः यथोक्तं तत्रैव

"अथातो वमनविरेचनव्यापच्चिकित्सितं व्याख्यास्यामः। वैद्यातुरनिमित्तं वमनं च पञ्चदशधा व्यापद्यते तत्र वमनस्याधोगतिरूर्द्ध्वं विरेचनस्येति पृथक्। सामान्यमुभयोः सावशेषौषधत्वं जीर्णौषधत्वं हीनाधिदोषापहृतत्वं वातशूलनयोगातियोगौ जीवादानमाध्मानं परिकर्त्तिका परिस्रावः प्रवाहिकाहृदयोपसरणं विबन्ध"इति।

जीवाधार पु॰ ६त॰। हृदये हेमच॰। "हृदयं तस्माद्हृदयम्" छा॰ उ॰ जीवस्य हृदयाधारत्वोक्तेस्तथात्वम्।

जीवान्तक पु॰जीवमन्तयति अन्ति–नामधा॰ण्वुल्। जीवनाशे १प्राणिनाशके शाकुनिके अमरः२प्राणिनाशकमात्रे त्रि॰।

जीवार्द्धपिण्डक पु॰सूर्य्यसि॰परिभाषिते चक्रस्यराशिकलानां १८०० शतानामष्टमे भागे २२५ यथाह सू॰ सि॰ "राशिलिप्ताष्टमो भागः प्रथमं ज्यार्द्धमुच्यते" तत्तद्विभक्तो लब्धोनमिश्रितं तद् द्वितीयकम्। आद्येनैवं क्रमात् पिण्डान् भक्त्वा लब्धोनसंयुताः। खण्डकाः स्युश्चतुर्विंशज्ज्यार्द्धपिण्डाः क्रमादमी"। "एकराशिकलानामष्टादशशतानामष्टमोऽंशस्तत्त्वाश्विमितः२२५प्रथममाद्यं ज्यार्द्धं सम्पूर्णजीवार्द्धपिण्डकः कथ्यते तदभिज्ञैः" रङ्ग॰। अत्र

चक्रार्द्धस्य धनुराकृतित्वात् तत्रोभयपार्श्वस्थरेखासंलग्नसरलरेखायाः ज्यारूपत्वात् तस्यार्द्धस्यैव लाघवेन शास्त्रकारैर्ग्रहणेन तदीयार्द्धस्य पिण्डसंज्ञा कृतेति बोध्यम्। जयार्द्धपिण्डोऽप्यत्र। [राजनि०।

जीवाला स्त्री जीवमालाति आ+ला–क। सैंहल्यां लतायां

जीवास्तिकाय पु० अर्हन्मतसिद्धे जीवपदार्थे अर्हच्छब्दे दृश्यम्। जीवशब्दे चोक्तप्रायः।

जीविका स्त्री जीव–अ कन् अत इत्वम्। १जीवनोपाये आजीवने। २जीवन्तीवृक्षे मेदि०।

जीवित न०जीव–भावे क्त। १जीवने प्राणधारणे “जीवितनाशो भवेत्तस्याः” श्रा० त० “नाभिनन्देत मरणं नाभिनन्देत जीवितम्” “जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः” मनुः। कर्त्तरि क्त। २जीवनयुक्ते त्रि०। “प्राङ्मत्वा सत्यमस्यान्तं जीवितास्मीति लज्जिता” रघुः।

जीवितकाल पु० ६त०। आयुषि प्राणधारणसमये अमरः।

जीवितज्ञा स्त्री जीवितस्य जीवनस्य ज्ञा–ज्ञानं यस्याः। नाड्याम्। राजनि०। तस्याश्चलने हि नरस्य जीवनज्ञानात् तथात्वम्।

जीवितेश पु० ६त०। १प्राणनाथे यमे २चन्द्रे ३सूर्य्ये च शब्दरत्ना०। ४जीवातौ हेमच०। ५जीवितेश्वरे त्रि० मेदि०। “राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी। गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा” रघुः। चन्द्रसूर्य्ययोश्च देहमध्यस्थेडापिङ्गलानाड्योः स्थित्या प्राणसञ्चारणहेतुत्वात् तथात्वम्। “इडायां सञ्चरेच्चन्द्रः पिङ्गलायां दिवाकरः” शा० ति० २५ पटले उक्तम्। इडाशब्दे ९२०पृ० दृश्यम् इडाशब्देऽनुक्तत्वात् प्रसङ्गात् इडापिङ्गलयोः स्वरूपादिकमत्रोच्यते “इडा वामे तयोर्मध्ये सुषुम्णा पिङ्गलापरे” शा० ति० “या वामशुक्रसंबद्धा ना श्लिष्यति सुषुम्णया। दक्षिणं मुष्कमाश्रित्य धनुर्वक्रा हृदिस्थिता। वामांसजत्रन्तरगा दक्षिणनासिकाभियात्”। तथा दक्षिणमुष्कस्था नासयोर्वामरन्ध्रगा” पदार्थादर्शधृतवाक्यम्। तन्त्रान्तरेऽपि “सुषुम्णाकक्षितापीडामुष्कं दक्षिणमाश्रिता। हृद्गता दक्षभागस्य जत्रुमध्यसमाश्रिता। दक्षिणानासिकाद्वारं प्राप्नोति गिरिजात्मजे!। वाममुष्कसमुद्भूता तयाप्ता सव्यनासिकामिति” अनयोः स्वरूपमुक्तं योगार्णवे “इडा च शङ्खकुन्दाभा तस्याः सव्ये व्यवस्थिता। पिङ्गलाऽसितरक्ताभा दक्षिणं पार्श्वमाश्रितेति” “अनेन पिङ्गलेडायोः क्रमेण सूर्य्याचन्द्रमसोः स्थितिरुक्ता भवति” पदार्थादर्शः।

जीविन् त्रि० जीव–णिनि। १प्राणधारके प्राणिमात्रे २जीवनोपाययुक्ते च। “जीविनां दारुणो रोगः कर्म्मभोगः शुभाशुभः। भक्तो वेदास्तु निहन्ति हरिभक्तिरसायनात्” ब्र०वै०गणे०ख०। तत्र कालेन जायन्ते मानवा दीर्घजीविनः”। “शक्तः परजने दाता स्वजने दुःखजीविनः” मनुः। “पश्चात् शूद्राः कृषिजीविनश्च” भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः” मनुः स्त्रियां ङीप्। “पुरुषायुषजीविन्यो निरातङ्का निरीतयः। यन्मदीयाः प्रजास्तस्य” रघुः।

जीवेष्टि स्त्री जीवोद्देशिका इष्टिः। बृहस्पतिसवे शब्दार्थचि०।

जीवोत्पत्तिवाद पु० जीवस्य सङ्कर्षणाभिधस्योत्पत्तिवादः। पाञ्चरात्रवैष्णवसिद्धान्ते जीवस्योत्पत्तिसाधने वादे तत्र हि “ब्रह्मणो वासुदेवाख्याज्जीवः सङ्कर्षणाभिधः। जायते च मनस्तस्मात् प्रद्युम्नाख्यं ततः पुनः। अहङ्कारोऽनिरुद्धाख्यश्चत्वारो विश्वरूपकाः। वासुदेवाराधनाद्धि जायते बन्धमोक्षणमिति”। तदेतन्मतं शा०सू०भा० निराकृतं यथा

“उत्पत्त्यसम्भवात्” सू०।

“येषामप्रकृतिरधिष्ठाता केवलनिमित्तकारणमीश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्यातः, येषां पुनः प्रकृतिश्चाधिष्ठाता चोभयात्मकं कारणमीश्वरोऽभिमतस्तेषां पक्षः प्रत्याख्यायते। ननु श्रुतिसमाश्रयणेनाप्येवंरूप एवेश्वरः प्राक् निर्द्धारितः प्रकृतिश्चाधिष्ठाता चेति श्रुत्यनुसारिणी च स्मृतिः प्रमाणमिति स्थितिः, तत् कस्य हेतोरेष पक्षः प्रत्याचिख्यासित इति। उच्यते! यद्यप्येवंजातीयकोऽंशः समानत्वान्न विसंवादगोचरो भवत्यस्ति त्वंशान्तरं विसंवादस्थानमिति, अतस्तत्प्रत्याख्यानायारम्भः। तत्र भागवता मन्यन्ते भगवानेवैको वासुदेवः निरञ्जनज्ञानस्वरूपः परमार्थतत्त्वं, स चतुर्धाऽऽत्मानं प्रविभज्य प्रतिष्ठितो वासुदेवव्यूहरूपेण सङ्कर्षणव्यूहरूपेण प्रद्युम्नव्यूहरूपेण अनिरुद्धव्यूहरूपेण च वासुदेवो नाम परमात्मोच्यते, सङ्कर्षणो नाम जीवः, प्रद्युम्नो नाम मनः, अनिरुद्धो नामाहङ्कारः, तेषां वासुदेवः परा प्रकृतिः, इतरे सङ्कर्षणादयः कार्य्यं, तमित्थम्भूतं भगवन्तमभिगमनोपादानेज्यास्वाध्याययोगैर्वर्षशतमिष्ट्वा क्षीणक्लेशो भगवन्तमेव प्रतिपद्यत इति। तत्र यत्तावदुच्यते योऽसौ नारायणः परोऽव्यक्तात् प्रसिद्धः परमात्मा

सर्वात्मा स आत्मनाऽऽत्मानमनेकधा व्यूह्यावस्थित इति, तन्न निराक्रियते, "स एकधा भवति त्रिधा भवति" इत्यादिश्रुतिभ्यः परमात्मनोऽनेकधा भवस्याधिगतत्वात्। यदपि भगवतोऽभिगमनादिलक्षणमाराधनम् अजस्रमनन्यचित्ततयाऽभिप्रेयते तदपि न प्रतिषिध्यते श्रुतिस्मृत्योरीश्वरप्रणिधानस्य प्रसिद्धत्वात्। यत् पुनरिदमुच्यते वासुदेवात् सङ्कर्षण उत्पद्यते सङ्कर्षणाच्च प्रद्युम्नः,प्रद्युम्नाच्चानिरुद्ध इति। अत्र ब्रूमः, न वासुदेवसंज्ञकात् परमात्मनः सङ्कर्षणसंज्ञस्य जीवस्योत्पत्तिः सम्भवति, अनित्यत्वादिदोषप्रसङ्गात् उत्पत्तिमत्त्वे हि जीवस्यानित्यत्वादयो दोषाः प्रसज्येरन्, ततश्च नैवास्य भगवत्प्राप्तिर्मोक्षः स्यात्,कारणप्राप्तौ कार्यस्य प्रविलयप्रसङ्गात्। प्रतिषेधिष्यति चाचार्यो जीवस्योत्पत्तिं "नात्माश्रुतेर्नित्यत्वाच्च" तस्मादसङ्गतैषा कल्पना" भा०।

"न च कर्त्तुः करणम्" सू०।

"इतश्चासङ्गतैषा कल्पना, कस्मान्न हि लोके कर्त्तुर्देवदत्तादेः करणं परश्वाद्युत्पद्यमानं दृश्यते। वर्णयन्ति च भागवताः 'कर्त्तुर्जीवात् सङ्कर्षणसंज्ञकात् करणं मनः प्रद्युम्नसंज्ञकमुत्पद्यते कर्तृजाच्च तस्मादनिरुद्धसंज्ञकोऽहङ्कार उत्पद्यते" इति। न चैतद्दृष्टान्तमन्तरेणाध्यवसातुं शक्नुमः। न चैवम्भूतां श्रुतिमुपलभामहे" भा०।

"विज्ञानादिभावे वा तदप्रतिषेधः" सू०।

"अथापि स्यान्न चैते सङ्कर्षणादयो जीवादिभावेनाभिप्रेयन्ते किं तर्हि ईश्वरा एवैते सर्वे ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिरैश्वर्यधर्मैरन्विता अभ्युपगम्यन्ते वासुदेवा एवैते सर्वे निर्दोषा निरधिष्ठाना निरवद्याश्चेति, तस्मान्नायं यथावर्णित उत्पत्त्यसम्भवो दोषः प्राप्नोतीति। अत्रोच्यते, एवमपि तदप्रतिषेध उत्पत्त्यसम्भवस्याप्रतिषेधः प्राप्नोत्येव, अयमुत्पत्त्यसम्भवो दोषः प्रकारान्तरेणेत्यभिप्रायः, कथं यदि तावदयमभिप्रायः परस्परभिन्ना एवैते वासुदेवादयश्चत्वार ईश्वरास्तुल्यधर्माणो नैषामेकात्मकत्वमस्तीति, ततोऽनेकेश्वरकल्पनानर्थक्यम्, एकेनैवेश्वरेणेश्वरकार्यसिद्धेः। सिद्धान्तहानिश्च भगवानेको वासुदेवः परमार्थतत्त्वमित्यभ्युपगमात्। अथायमभिप्रायः एकस्यैव भगवत एते चत्वारो व्यूहास्तुल्यधर्माण इति, तथापि तदवस्थ एवोत्पत्त्यसम्भवः। न हि वासुदेवात् सङ्कर्षणस्योत्पत्तिः सम्भवति सङ्कर्षणाच्च प्रद्युम्नस्य, प्रद्युम्नाच्चानिरुद्धस्य, अतिशयाभावात्। भवितव्यं हि कार्यकारणयोरतिशयेन यथा मृद्घटयोः। न ह्यसत्यतिशये कार्यं कारणमित्यवकल्पते न च पञ्चरात्रसिद्धान्तिभिर्वासुदेवादिषु एकैकस्मिन् सर्वेषु वा ज्ञानैश्वर्यादितारतम्यकृतः कश्चिद्भेदोऽभ्युपगम्यते, वासुदेवा एव हि सर्वे व्यूहा निर्विशेषा इष्यन्ते। न चैते भगवद्व्यूहाश्चतुःसङ्ख्या, ब्रह्मादिस्तम्बपर्यन्तस्य समस्तस्यैव जगतो भगवद्व्यूहत्वावगमात्"भा०।

"विप्रतिषेधाच्च" सू०।

"विप्रतिषेधश्चास्मिन् शास्त्रे बहुविध उपलभ्यते गुणगुणित्वकल्पनादिलक्षणः। ज्ञानैश्वर्यशक्तिबलवीर्यतेजांसि गुणाः आत्मान एवैते भगवन्तो वासुदेवा इत्यादिदर्शनात्। वेदविप्रतिषेधश्च भवति,चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रम् अधिगतवान् इत्यादिवेदनिन्दादर्शनात्, तस्मादसङ्गतैषा कल्पनेति सिद्धम्"भा०

जीवस्य वास्तविकोत्पत्तिनिराकरणेन तस्य भाक्तोत्पत्तिमत्त्वं तत्रैव २अ०। ३ पादे समर्थितं यथा

"चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्" सू०

"स्तो जीवस्याप्युत्पत्तिप्रलयौ जातो देवदत्तो मृतो देवदत्त इत्येवं जातीयकाल्लौकिकव्यपदेशाज्जातकर्मादिसंस्कारविधानाच्चेति स्यात् कस्यचिद्भ्रान्तिः, तामपनुदामः, न जीवस्योत्पत्तिप्रलयौ स्तः शास्त्रफलसम्बन्धोपपत्तेः। शरीरानुविनाशिनि हि जीवे शरीरान्तरगतेष्टानिष्टप्राप्तिपरिहारार्थौ विधिप्रतिषेधावनर्थकौ स्याताम्। श्रूयते च "जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते" इति। ननु लौकिकजन्ममरणव्यपदेशो जीवस्य दर्शितः सत्यं दर्शितं, भाक्तस्त्वेष जीवस्य जन्ममरणव्यपदेशः, किमाश्रयः पुनरयं मुख्यो यदपेक्षया भाक्त इति, उच्यते। चराचरव्यपाश्रयः। स्थावरजङ्गमशरीरविषयौ जन्ममरणशब्दौ, स्थावरजङ्गमानि हि भूतानि जायन्ते च म्रियन्ते चातस्तद्विषयौ जन्ममरणशब्दौ मुख्यौ सन्तौ तत्स्थे जीवात्मन्युपचर्य्येते तद्भावभावित्वात्। शरीरप्रादुर्भावतिरोभावयोर्हि सतोर्जन्ममरणशब्दौ भवतः नासतोः। नहि शरीरसम्बन्धादन्यत्र जीवो जातो मृतो वा केनचिदुपलक्ष्यते। "स वा अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः स उत्क्रामन् म्रियमाण" इति च शरीरसंयोगवियोगनिमित्तावेव

जन्ममरणशब्दौ दर्शयति। जातकर्मादिविधानमपि देहप्रादुर्भावापेक्षमेव द्रष्टव्यम्, अभावाज्जीवप्रादुर्भावस्य। जीवस्य परस्मादात्मनः उत्पत्तिर्वियदादीनामिवास्ति नास्ति वेत्येतदुत्तरेण सूत्रेण वक्ष्यति। देहाश्रयौ तावज्जीवस्य स्थूलावुत्पत्तिप्रलयौ न स्तः इत्येतदनेन सूत्रेणावोच्यते" भा०।

"नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः" सू०।

"अस्त्यात्मा जीवाख्यः शरीरेन्द्रियपञ्जराध्यक्षः कर्मफलसम्बन्धी, स किं व्योमादिवदेवोत्पद्यते ब्रह्मण आहोस्विद्ब्रह्मवदेव नोत्पद्यते इति श्रुतिविप्रतिपत्तेर्विशयः कासुचिच्छ्रुतिष्वग्निविस्फुलिङ्गादिनिदर्शनैर्जीवात्मनः परस्मात् ब्रह्मण उत्पत्तिराम्नायते कासुचित्त्वविकृतस्यैव परस्य ब्रह्मणः कार्यप्रवेशेन जीवभावो विज्ञायते न चोत्पत्तिराम्नायत इति। तत्र प्राप्तं तावदुत्पद्यते जीव इति, कुतः प्रतिज्ञानुपरोधात्। (एकस्मिन् विदिते सर्वमिदं विदितम्) इतीयं प्रतिज्ञा सर्वस्य वस्तुजातस्य ब्रह्मप्रभवत्वे सति नोपरुध्येत, तत्त्वान्तरत्वे तु जीवस्य प्रतिज्ञेयमुपरुध्येत। न चाविकृतः परमात्मैव जीव इति शक्यते विज्ञातुं, लक्षणभेदात्। अपहतपाप्मत्वादिधर्मको हि परमात्मा, तद्विपरीतो हि जीवः, विभागाच्चास्य विकारात्मसिद्धिः। यावान् हि आकाशादिः प्रविभक्तः सर्वो विकारः, तस्य चाकाशादेरुत्पत्तिः समधिगता जीवात्मापि पुण्यापुण्यकर्मा सुखदुःखभाक् प्रतिशरीरं विभक्त इति तस्यापि प्रपञ्चोत्पत्त्यवसरे उत्पत्तिर्भवितुमर्हति" भा०।

अपि च "यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः" इति प्राणादेर्भोग्यजातस्य सृष्टिं शिष्ट्वा सर्वे एते आत्मानो व्युच्चरन्तीति भोक्तॄणामात्मनां पृथक् सृष्टिं शास्ति। "यथा सुदीप्तात् पावकात् विस्फुलिङ्गाः सहस्रशः प्रभवन्ति सरूपास्तथाक्षराद्विविधाः सोम्य! भावाः प्रजायन्ते तत्र चैवापियन्ति" इति च जीवात्मनामुत्पत्तिप्रलयावुच्येते सरूपवचनात्। जीवात्मानो हि परमात्मना सरूपा भवन्ति चैतन्ययोगात्। न च क्वचिदश्रवणमन्यत्र श्रुतं वारयितुमर्हति, श्रुत्यन्तरगतस्यापि अविरुद्धस्याधिकस्यार्थस्य सर्वत्रोपसंहर्त्तव्यत्वात्। प्रवेशश्रुतिरप्येवं सति विकारभावापत्त्यैव व्याख्यातव्या "तदात्मानं स्वयमकुरुत" इत्यादिवत् तस्मादुत्पद्यते जीव इत्येवं प्राप्ते ब्रूमः, नात्मा जीव उत्पद्यत इति कस्मादश्रुतेः, न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति भूयस्सु प्रदेशेषु। ननु क्वचिदश्रवणमन्यत्र श्रुतं न वारयतीत्युक्तं, सत्यमुक्तं उत्पत्तिरेव त्वस्य न सम्भवतीति वदामः। कस्मात् नित्यत्वाच्च ताभ्यः। चशब्दादजत्वादिभ्यश्च। नित्यत्वं ह्यस्य श्रुतिभ्योऽधिगम्यते, तथाजत्वमविकारित्वमविकृतस्यैव ब्रह्मणो जीवात्मनावस्थानं ब्रह्मात्मता चेति। न चैवंरूपस्योत्पत्तिरुपपद्यते, ताः काः श्रुतयः "न जीवो म्रियते" "स वा एष महानजः" "आत्माऽजरोऽमृतोऽभयो ब्रह्म" "न जायते म्रियते वा विपश्चित्" "अजो नित्यः शाश्वतोऽयं पुराणः" "तत् सृष्ट्वा तदेवानुप्राविशत्" "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" "स एष इह प्रविष्ट आनखाग्रेभ्य" "तत्त्वमसि" "अहं ब्रह्मास्मि" "अयमात्मा ब्रह्म सर्वानुभूः" इत्येवमाद्या नित्यत्ववादिन्यः सत्यो जीवस्योत्पत्तिं प्रतिबध्नन्ति। ननु प्रविभक्तत्वाद्विकारो विकारत्वाच्चोत्पद्यते इत्युक्तं अत्रोच्यते, नास्य प्रविभागः स्वतोऽस्ति, "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा" इति श्रुतेः, बुद्ध्याद्युपाधिनिमित्तं त्वस्य प्रविभागप्रतिभानमाकाशस्येव घटादिसम्बन्धनिमित्तम्। तथा च शास्त्रम् "स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः" इत्येवमादि ब्रह्मण एवाविकृतस्य सतोऽस्यैकानेकबुद्ध्यादिमयत्वं दर्शयति। तन्मयत्वञ्चास्य तद्विविक्तस्वरूपानभिव्यक्त्या तदुपरक्तस्वरूपत्वं स्त्रीमयो जाल्म इत्यादिवद्द्रष्टव्यं। यदपि क्वचिदस्योत्पत्तिप्रलयश्रवणं तदप्यत एवोपाधिसम्बन्धान्नेतव्यम्, उपाध्युत्पत्त्या चास्योत्पत्तिस्तत्प्रलये च प्रलय इति। तथा च दर्शयति "प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति" इति। तथोपाधिप्रलय एवायं नात्मप्रलय इत्येतदपि, अत्रैव "मा भगवान्मोहमापीपदन्न वा अहमिमं विजानामि न प्रेत्य संज्ञास्ति" इति प्रश्नपूर्वकं प्रतिपादयति, "न वा अरे अहं ब्रवीम्यविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवति" इति। प्रतिज्ञानुपरोधोऽप्यविकृतस्यैव ब्रह्मणो जीवभावाभ्युपगमात्। लक्षणभेदोऽप्यनयोरुपाधिनिमित्त एव। अत ऊर्द्ध्वं विमोक्षायैव ब्रूहीति च प्रकृतस्यैव विज्ञानमयस्यात्मनः सर्वसंसारधर्मप्रत्याख्यानेन परमात्मभावप्रतिपादनात्। यस्माच्चैवात्मद्यते प्रवि-

लीयते वेति" शारीरकसूत्रभाष्ये शङ्कराचार्य्यः।

जीवोपाधि पु० ६त०। १स्वप्नसुषुप्तिजाग्रदवस्थासु। त्रयो हि जीवस्योपाधयः। तत्र सुषुप्तौ बुद्ध्यादिसंस्कारवासितमज्ञानमात्रमुपाधिः। स्वप्ने जाग्रद्वासनामयं लिङ्गशरीरमुपाधिः। जाग्रदवस्थायां सूक्ष्मशरीरसंसृष्टं स्थूलशरीरमुपाधिरिति तत्तदुपाध्युपलक्षितसुषुप्त्यादेरप्युपाधित्वम्। "कार्य्योपाधिरयं जीवः कारणोपाधिरीश्वर" इत्युक्तेः अज्ञानस्य २व्यष्टिशक्तिभेदे च तस्यास्तु समष्ट्यज्ञानकार्य्यत्वात् तदभिप्रायेणैव "मायोपाधिरयं जीवोऽविद्योपाधिरीश्वरः" इत्यादौ मायाविद्ययोरभेदेऽपि भेदनिर्द्देशः।

जीवोर्णा स्त्री ६त०। जीवतो मेषादेरोमणि "पवित्रमस्मिन् करोति शुक्लं जीवोर्णानाम्" कात्या० श्रौ० ८।२।१६। "जीवन्मेषरोमनिर्म्मितसूत्रनिर्म्मितम्" कर्कः।

जीव्या स्त्री जीवाय हिता यत्। १हरीतक्याम् २जीवन्त्यां ३गोक्षुरदुग्धायाञ्च राजनि० ४जीवनोपाये त्रि० "जीव्योपायं तु भगवान् मम किञ्चित् करोतु सः" हरिवं० २६३अ०।

जु रंहसि भ्वा० पर० अक० अनिट्। जवति। अजौषीत्। जुजाव। जवः जवनः। णिचि जावयति ते अजीजवत् त ततः सनि० जिजावयिषति। अस्य परस्मैपदित्वं गतिकर्म्मत्वञ्च निघण्टुक्तम् "जयति जवति" इत्युपक्रमे इत्येते गतिकर्माण इत्युक्तेः। वेदे गणव्यत्यासः "वृष्टिं ये विश्वे मरुतो जुनन्ति" ऋ० ५।५८।३। "येन नपातमपां जुनाम" १।१८६।५। अयं धातुः ऋ० भाष्ये सौत्र इति माधवः। दीर्घान्तोऽपि। "वातो न जूतः स्तनयद्भि रभ्रैः" ऋ०४।१७।१२।

जु गतौ सौ० आत्म० सक० अनिट्। जवते। अजोष्ट। जुजुवे। "यद्धि मनसा जवते तद्वाचा वदति" तैत्ति० सं० ६।१।७।२।

जुग त्यागे भ्वा०पर० सक० सेट् इदित्। जुङ्गति। अजुङ्गीत् जुजुङ्ग। कर्म्मणि इदित्त्वात् जुङ्ग्यते।

जुगुप्सन न० गुप–निन्दायां स्वार्थे सन्–भावे ल्युट्। १निन्दने अमरः। कर्त्तरि युच्। २निन्दाशीले त्रि०।

जुगुप्सा स्त्री गुप–निन्दायां स्वार्थे सन्–भावे अ टाप्। निन्दायाम् अमरः। सा च वीभत्सरसस्य स्थायिभावः शान्तरसव्यभिचारिभावश्च। यथोक्तं सा० द० "अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः। आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति सम्मतः। रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च" रसभेदे स्थायिभावभेदानुक्त्वा "दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा" तां लक्षयित्वा "शृङ्गारवीरयोर्हासो वीरे क्रोधस्तथा मतः। शान्ते जुगुप्सा कथिता व्यभिचारितया पुनः" देहजुगुप्सा च शौचकार्य्यं यथोक्तं पात० सू० भा० "शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः" सू० "स्वाङ्गे जुगुप्सायां शौचमारभमाणः कायावद्यदर्शी कायानभिष्वङ्गी भवति किञ्च परैरसंसर्गः कायस्वभावावलोकी स्वमपि कायं जिहासुर्मृज्जलादिभिराक्षालयन्नपि कायशुद्धिमपश्यन् कथं परकायैरत्यन्तमेवाप्रयतैः संसृज्यते" भा०। देहे जुगुप्सायां वैराग्यं भवति। तस्य निन्दनीयत्वे हेतुः विवेकचूड़ामणावुक्तो यथा "मज्जास्थिमेदःपलरक्तचर्मत्वगाह्वयैर्धातुभिरेभिरन्वितम्। पादोरुवक्षोभुजपृष्ठमस्तकैरङ्गैरुपाङ्गैरुपयुक्तमेतत्"। याज्ञवल्क्येन तु देहसंस्थितिमुपवर्ण्य "इत्येतदस्थिरं वर्ष्म यस्य मोक्षाय कृत्यसौ" इत्युक्तं व्याख्यातं च मिता० "इतीदृशमस्थिस्नाय्वाद्यारब्धमेतदशुचिनिधानं वर्ष्मास्थिरमिति यस्य बुद्धिरसौ कृती पण्डितो मोक्षाय समर्थो भवति वैराग्यस्य नित्यानित्यविवेकवन्मोक्षोपायत्वात् अस्थिमूत्रपुरीषादिप्राचुर्य्यज्ञानस्य वैराग्यहेतुत्वात् अत एव व्यासः "सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः। शरीरकस्यापि कृते मूढाः पापानि कुर्वते। यदि नामास्य कायस्य यदन्तस्तद्बहिर्भवेत्। दण्डमादाय लोकोऽयं शुनः काकांश्च वारयेदिति"। तस्मादीदृशकुत्सितशरीरस्यात्यन्तिकविनिवृत्त्यर्थमात्मोपासने प्रयतितव्यम्"।

जुगुर्वणि त्रि० गॄ–स्तुतौ यङ्लुकि क्विपि वेदे नि० वन–संभक्तौ इन्–णत्वम् ६त०। स्तोतॄणां संभक्तरि। "मन्द्रजिह्वा जुगुर्वणी" ऋ० १।१४२।८। [तत्वार्थे पु०।राजनि०।

जुङ्ग पु० जुगि–अच्। वृद्धदारकवृक्षे अमरः। ण्वुल्। जुङ्गक

जुङ्गा स्त्री जुगि–अच्। वृद्धदारकवृक्षे रमानाथः।

जुटक न० जट–संहतौ अच् संज्ञायां कन् पृषो०। जटायां
शब्दर०। [ख्याते शिखाभेदे शब्दर०।

जुटिका स्त्री जट–संहतौ बा० कुन् पृषो०। (झुँटी)

जुड प्रेरणे चु० उभ० सक० सेट्। जोडयति ते अजूजुडत् त।

जुड बन्धे (जोड़ादेओया)। तुदा० कुटा० पर० सेट्। जुड़ति

अजुड़ीत् जुजोड। घञि जुडः। [घञि जोडः।

जुड गतौ तु॰ पर॰ सक॰ सेट्। जुडति अजोडीत्। जुजोट।

जुत दीप्तौ भ्वा॰ आत्म॰ अक॰ सेट्। जोतते अजोतिष्ट। जुजुते। ऋदित् अजुजोतत्।

जुन गतौ तु॰ पर॰ सक॰ सेट्। जुनति अजोनीत्। जुजोन।

जुम्बक पु॰ वरुणे "पृथिवीं त्वचा जुम्बकाय स्वाहा" यजु॰ २५।९। "जुम्बकाय वरुणाय" वेददी॰ "प्रत्येव तिष्ठति जुम्बकाय स्वाहेत्यवभृथ उत्तमामाहुतिं जुहोति वरुणो वै जुम्बकः" शत॰ ब्रा॰ १२।३।६।५।

जुर्व पु॰ वधे भ्वा॰ पर॰ सक॰ सेट्। जुर्वति अजूर्वीत्। जूर्त्तः जूर्त्तिः। क्विपि जूः।

जुल पेषणे चु॰ उभ॰ सक॰ सेट्। जोलयति ते अजूजुलत् त

जुवस त्रि॰ सौ॰ जु–बा॰ असच् किच्च। वेगवति। "आ नः सोमः सहो जुवो रूपम्" ऋ॰ ८।६५।१८।

जुष तृप्तौ अक॰ तर्के सक॰ वा चु॰ उभ॰ पक्षे भ्वा॰ पर॰ सेट्। जोषयति ते जोषति अजूजुषत् त अजोषीत्।

जुष हर्षे अक॰ सेवायां सक॰ तुदा॰ आ॰ सेट्। जुषते अजोषिष्ट जुजुषे जुषमाणः। ईदित्। जुष्टः। ञीत् वर्त्तमाने क्त। जुष्टः। "पौलस्त्योऽजुषत शुचं विपन्नबन्धुः" भट्टिः "यत्र देवासो अजुषन्त विश्वे" यजु॰ ४।१। "इन्द्र! जुषस्व प्रवह" अथ॰ २।५।१। "अजामेकाम्–अजो ह्येको जुषमाणोऽनुशेते" श्वेताश्वतरोप॰। "एषैव बुद्धिर्जुषतां सदात्मनाम्" भा॰ व॰१२५९६ श्लो॰। "सत्त्वं जुषाणाय भवाय देहिनाम्" भाग॰ ८।५।२२। "परजुष्टनयान्निवर्त्तमानः" दीधितिः। आर्षे गणव्यत्ययात् अदादित्वम्। "देवा नास्मद्दशानाद्धि हविर्जुषन्ति" भा॰व॰१२७३। आर्षत्वात् पदव्यत्ययः। "पारिजातगुणान् मर्त्या जुषन्ति यदि नारद!। देवानां मानुषाणां च न विशेषो भविष्यति" हरिवं॰ ७२७२। लेटि जोजिषत् "सुपेशसस्करति जोजिषद्धि" ऋ॰ २।२५।१ "जुषी प्रीतिसेवनयोः लेट्यडागमः। विकरणः सिप्। इडागमश्च" भा॰। प्राद्युपसर्गपूर्वकस्य प्रादिद्योत्यतत्तदर्थयुक्ते सेवनादौ।

जुष्कक पु॰ जुष्–कक् ततः संज्ञायां कन्। यूषे शब्दच॰।

जुष्ट न॰ जुष–कर्म्मणि क्त। १उच्छिष्टे। २सेविते त्रि॰ मेदि॰ "परजुष्टनयान्निवर्त्तमानः" दीधितिः। "पुण्यो महाब्रह्मसमूहजुष्टः" भट्टिः। [सेवने न॰।

जुष्य त्रि॰ जुष–कर्म्मणि क्यप्। १सेव्ये भावे क्यप्। २अवश्य-

जुहुराण पु॰। ह्वर्छ–सन्–आनच् सनो लुक् छलोपश्च। १चन्द्रे पु॰ उज्ज्वल॰। २कौटिल्यकारिणि त्रि॰। "युयोध्यस्मज्जुहुराणमेनः" ईश॰ उ॰। "जुहुराणं कुटिलकारिणम्" भाष्यम्।

जुहुवान पु॰ हु–कर्म्मणि कानच्। १अग्नौ २वृक्षे च। संक्षिप्तसारे कठिनहृदये इत्युक्तिः रभसस्यैव तदर्थता ह्वर्छेस्तद्रूपसिद्धेस्तदर्थतौचित्यात् अतस्तत्र लिपिकरप्रमादात् जुहुवान इत्यपपाठः जुहुराण इत्येव पाठः समुचितः।

जुहू स्त्री जुहोत्यनया हु–क्विप् नि॰ द्वित्वं दीर्घश्च। यज्ञिये स्रुगाख्ये पात्रभेदे सा च पलाशघटिता" "पालाशी जुहूः" कात्या॰ श्रौ॰ १।३।२४। "जुहोत्यनया जुहूः स्रुक् सा च पालाशी पलाशवृक्षकाष्ठनिर्म्मिता" कर्कः। "यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति" श्रुतिः। "पर्णमयी पलाशकाष्ठमयीत्यर्थः"। एषा चानारभ्याधीताऽपि प्रकृत्यर्था यथोक्तं ताण्ड्य॰ ब्रा॰।

'अनारभ्याधीतानां प्रकृतिगामित्वमिति न्यायेन क्रत्वङ्गत्वावगमात्। स च न्यायस्तृतीयाध्याये षष्ठपादस्य प्रथमाधिकरणे पर्णवाक्यमुदाहृत्याभिहितः। "प्रकृतौ विकृतौ वा साध्यस्य पर्णोऽयमसौ विधिः। प्रकृतेरेव वा तुल्याद्वचनादुभयोरसौ। जुहूमाश्रित्य पर्णत्वविधिः प्रकृतिमात्रगः। चोदकेनोभयप्राप्तेर्विकृतौ विधिनात्र किम्"; अनारभ्य श्रूयते "यस्य पर्णमयी जुहूर्भवति न स पापश्लोकं शृणोतीति"। तत्राव्यभिचरितक्रतुसम्बन्धवतीं जुहूमाश्रित्य तद्धेतुः पर्णत्वं वाक्येन विधीयते। या जुहूः सा पर्णमयीति वाक्यार्थः प्रकृतिविकृत्योस्तुल्यमेव प्रवर्त्तते उभयत्राश्रयभूताया जुह्वाः सत्त्वात्। तस्मात् प्रकृतिविकृत्योरुभयोरप्ययं विधिरिति प्राप्ते, ब्रूमः किमयं विधिर्विकृतौ चोदकात् पूर्वन्निविशते चोदकमन्तरं पश्चाद्वा। नाद्यः, आश्रयभूताया जुह्वाः चोदकमन्तरेणासम्भवात्। द्वितीये तु पर्णत्वमपि जुह्वा सहैव चोदकेनातिदिश्यते, तत्र पुनर्विधिवैयर्थ्यादयं विधिः प्रकृतिमात्रगः"। जुहोत्यस्यां दिशि–आधारे क्विप्। २प्राग्देशे प्राङ्मुखतयैव होमकरणात् तस्यास्तथात्वम्।

जुह्वरा(वा)ण पु॰ जुहूं र(व)णति र(वण–अण्)। १अध्वर्यौ। २अग्नौ। ३चन्द्रे विश्वः। [वः। अग्नौ शब्दर॰।

जुह्वत् पु॰ जुहूपात्रं होमोद्देश्यतयास्त्यस्य मतुप् वा॰ मस्य

जुहोति स्त्री जु–धात्वर्थनिर्देशे श्तिप्। होमभेदे "यजति

जुहोतीनां कोविशेषः" कात्या० श्रौ० १।२।५। इति प्रश्ने यजतिलक्षणमुक्ता "उपविष्टहोमाः स्वाहाकारप्रदाना जुहोतयः" १।२।७इति लक्षितम्। "उपविष्टेन कर्त्रा होमो येषु त उपविष्टहोमाः स्वाहाकारेण प्रदानं येषु ते स्वाहाकारप्रदानाः य उपविष्टहोमाः स्वाहाकारप्रदानाश्च ते जुहोतयः इत्युच्यन्ते" कर्कः अतोऽस्य पुंस्त्वमेव स्त्रीत्वोक्तिः प्रामादिकी। "क्षरन्ति सर्वा वैदिक्यो जुहोतियजतिक्रियाः" मनुः।

जुह्वास्य पु० जुहूरास्यमिवास्य। होमीयवह्नौ। "हव्यवाहो जुह्वास्यः" ऋ० १।१२।६। [जूतः।

जू गतौ सौत्र० सक० प० सेट्। जवति अजावीत् जुजाव।

जू स्त्री सौ०जू-गतौ यथायथं कर्त्तृ भावादौ क्विप्। १आकाशे २सरस्वत्यां ३पिशाच्यां च ४जवने शब्दरत्ना० ५जवयुक्ते त्रि० विश्वः। ६त्वरागमने ७गमने च स्त्री मेदि०।

जूट पु०जट-संहतौ अच्-पृषो०।१जटासंहतौ बन्धे २जटायाम् शब्दार्थचि०। "जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम्" दुर्गाध्यानम्। "भूतेशस्य भुजङ्गवल्लिवलयस्रङ्नद्धजूटाजटाः" मालतीमा०। स्वार्थे क तत्रार्थे।

जूत त्रि० सौ०जू-क्त। १गते २आकृष्टे च। "रथो ह वा ऋतजात्यभिजूतः" ऋ० ३।५८।८। "अभिजूतः स्तोतृभिराकृष्टः" भा०। ३दत्ते च "युवं श्वेतं पेदव इन्द्रजूतम्" ऋ०१।११८।९। "इन्द्रजूतं इन्द्रेण जूतं दत्तम्" भा०।

जूति स्त्री जु-रंहसि भावे क्तिन् सातिहेतीत्यादिना नि०। १वेगे अमरः। "उत स्मास्य पलयन्ति जना जूतिं कृष्टिप्रो अभिभूतिमाशाः" ऋ० ४।३८।९ "मनो जूतिर्जुषतामाज्यस्य" यजु०२।१६। "जूतिः जवतेर्गतिकर्मणः" वेददी०। अत्र मनो ज्योतिः इति पाठः प्रामादिकः। मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः" ऐ० उ० "जूतिश्चेतसो रुजादिदुःखित्वाभावः" २भाष्योक्ताऽर्थे च।

जूतिका स्त्री जूत्या कायति कै-क। कर्पूरभेदे राजनि०।

जूर वयोहानौ अक० वधे सक० दिवा० आत्म० सेट्। जूर्य्यते अजूरिष्ट। ईदित्। जूर्णः। कोपे च "इच्छाविभङ्गाकुलमानसत्वात् भर्त्त्रे नखेभ्यश्च चिरं जुजूरे" भट्टिः।

जूर्ण पु० जूर-क्त। (उलुखड़) तृणभेदे रत्नमालायां जूर्णाख्येति तत्पर्य्याये निर्द्देशात् तस्य तथात्वम्। जूर्णेति आख्या यस्य जूर्णाख्योऽप्यत्र।

जूर्णाह्वय पु० जूर्णमाह्वयते काण्डेन स्पर्द्धते आ+ह्वे-वा० श। देवधान्ये (देधान) हेमच०।

जूर्णि स्त्री ज्वर-रोगे नि०ऊठ् जूर-वेगे वा नि०।१स्त्रीरोगे २वेगे।३आदित्ये ४देहे ५ब्रह्मणि च संक्षि०उणा०। जूर कोपे नि०। ६क्रोधे निघण्टुः निरुक्ते ६।४।२। "अस्यानिरुक्तिरन्या दर्शिता "जूर्णिर्जवतेर्वा द्रवतेर्वा दुनोतेर्वा" तत्र पृषो०। तेन ७वेगयुते ८द्रवयुते ९तापके च। "क्षिप्रा जूर्णिर्न वक्षति" ऋ०१।१२९।८। "जूर्णिर्वेगवती सेना" भा०। १०स्तुतिकुशले च। "ऋभुणां जूर्णिर्होत ऋषूणाम्" ऋ०१।१२७।१०। "जूर्णिः स्तुतिकुशलः" भा०।

जूर्त्ति स्त्री ज्वर-भावे क्तिन् ऊठ्। ज्वरे।

जूर्य्य त्रि० जूर-कर्त्तरि बा०ण्यत्। १जीर्णे "रथः पुरीव जूर्य्यः" ऋ० ६।२।७। "जूर्य्यः जीर्णः" भा० २वृद्धे च।

जूष वधे भ्वा० उभ०सक०सेट्। जूषति ते अजूषीत् अजूषिष्ट जुजूष से। जूषः।

जूष पुंन० यूष+पृषो०। मुद्गादिक्वाथे भरतः।

जूषण न० जूष-ल्यु। वृक्षभेदे (धाइफुल) शब्दच०।

जृ न्यक्कारे भ्वा० पर० सक० अनिट्। जरति अजार्षीत् जजार।

जृभ जृम्भे (हाइतोला) गात्रशैथिल्ये च भ्वा० आत्म०अक० सेट् इदित्। जृम्भते अजृम्भिष्ट। जजृम्भे। "आत्मानमाधाय मधुर्जजृम्भे" कुमा० जृम्भा जृम्भः। जृम्भितः। "जृम्भते मुहुरासीना बाला गर्भभरालसा" सा० द०।

जृभ जृम्भणे भ्वा० आ० अक० सेट्। जृभते अजृभिष्ट जजृभे। ईदित्। जृब्धः।

जृम्भ पुंन०जृभि-भावे घञ् अर्द्धर्चा०(हाइतोला)१गात्रशैथिल्यापादके २मुखविकाशकारके च व्यापारभेदे। भावे अ। तत्रार्थे स्त्री। जृम्भा च श्रमगर्भादिजनितजाड्यकायत्री यथाह सा०द०"आलस्यश्रमगर्भाद्यैर्जाड्यं जृम्भासितादिकृत्" तत्कारकवायुश्च देवदत्तः। "विजृम्भणे देवदत्तः शुद्धस्फटिकसन्निभः" पदार्थादर्शे योगार्णवः। "क्षुतोत्पन्नजृम्भासु जीवोच्छिष्टः सुधीर्ध्वनिः। गुरोरपि च कर्त्तव्यमन्यथा ब्रह्महा भवेत्" तिथित०। ३विकाशे ४विस्फारे च पु० शब्दच०। "पीत्वैकं श्वाससंनिजः पुनस्त्यजति वेगवान्। आलस्यनिद्रायुक्तस्य स जृम्भ इति कथ्यते" "जृम्भात्यर्थं समीरणात्। जृम्भावेगे प्रसुप्तन्तं शोभने शयने नरम्। स्नापयेत् तेन नियमात् जृम्भावेगः प्रशाम्यति। जृम्भावेगजयं याति कटुतैलेन मर्द्दनात्। भोजमात् स्वादुभोज्यानां तथा ताम्बूलचर्वणात्" वैद्यकम्।

जृम्भक त्रि० जृम्भ-ण्वुल्। १जृम्भाकारके २रुद्रगणभेदे पु०

"पृष्ठतोऽनुययौ यान्तं वरदं वृषभध्वजम्। जृम्भकैर्यक्षरक्षोभिः स्रग्विभिः समलक्षणैः। याम्यसौम्यो महायक्षौ दक्षिणं पक्षमाश्रितः" भा० व० २३०अ०। जृम्भयति जृम्भि–ण्वुल्। ३कृशाश्वमुनितनये ४तदधिष्ठिते अस्त्रभेदे च "कृशाश्वतनयरूपाण्यस्त्राणि विश्वामित्रेण रामाय दत्तानि तत्कथा रामा० बा० २८अ०।

"संहारान् व्याजहाराथ धृतिमान् सुव्रतः शुचिः। सत्यवन्तं सत्यकीर्त्तिं धृष्टं रभसमेव च। प्रतिहारतरं नाम पराङ्मुखमवाङ्मुखम्। लक्ष्यालक्ष्याविमौ चैव दृढनाभसुनाभकौ। दशाक्षशतवक्त्रौ च दशशीर्षशतोदरौ। पद्मनाभौ महानाभौ दुन्दुनाभसुनाभकौ। ज्योतिषं शकुनञ्चैव नैरास्यविमलावुभौ। यौगन्धरविनिद्रौ च दैत्यप्रमथनौ तथा। शुचिबाहुर्महाबाहुर्निष्कलिर्विरुचस्तथा। सार्चिमाली धृतिमाली वृत्तिमान् रुचिरस्तथा। पित्र्यः सौमनसश्चैव विधूतमकरावुभौ। करवीरं रतिश्चैव धनधान्यौ च राघव!। कामरूपं कामरुचिं मोहमावरणं तथा। जृम्भकं सर्पनाथं च पन्थानवरुणौ तथा। कृशाश्वतनयान् राम! भास्वरान् कामरूपिणः। प्रतीच्छ मम भद्रन्ते पात्रभूतोऽसि राघव!। बाढमित्येव काकुत्स्थः प्रहृष्टेनान्तरात्मना। दिव्यभास्वरदेहाश्च मूर्त्तिमन्तः सुखप्रदाः। केचिदङ्गारसदृशाः केचिद्धूमोपमास्तथा। चन्द्रार्कसदृशाः केचित् प्रह्वाञ्जलिपुटास्तथा। रामं प्राञ्जलयो भूत्वाऽब्रुवन् मधुरभाषिणः। इमे स्म नरशार्दूल! शाधि किङ्करवाम ते। गम्यतामिति तानाह यथेष्टं रघुनन्दनः। मनसा कार्यकालेषु साहाय्यं मे करिष्यथ। अथ ते राममामन्त्र्य कृत्वा चापि प्रदक्षिणम्। एवमस्त्विति काकुत्स्थमुक्त्वा जग्मुर्यथागतम्" २८अ०। स्वार्थे क अत इत्त्वम्। ४जृम्भायां स्त्री (हाइतोला) सा च इन्द्रवृत्रयोर्युद्धे इन्द्रे वृत्रग्रस्ते देवैः सृष्टा ततः प्रभृति लोकप्राणवायुसंस्था तथाह भा०उ० ८अ० "ततो जग्राह देवेन्द्रं वृत्रो वीरः शतक्रतुम्। अपावृत्याक्षिपद्वक्त्रे शक्रं कोपसमन्वितः। ग्रस्ते वृत्रेण शक्रे तु सम्भ्रान्तास्त्रिदिवेश्वराः। असृजंस्ते महासत्त्वा जृम्भिकां वृत्रनाशिनीम्। विजृम्भमाणस्य ततो वृत्रस्यास्यादपावृतात्। स्वान्यङ्गान्यभिसङ्क्षिप्य निष्क्रान्तो बलनाशनः। ततः प्रभृति लोकस्य जृम्भिका प्राणसंश्रिता"।

जृम्भण न० जृम्भि–भावे ल्युट्। (हाइतोला) १गात्रवैधिल्यापादके २सुखविकाशकारके च व्यापारभेदे। "मुहुर्जृम्भणतत्पराणि—"अङ्गान्यनङ्गः प्रमदाजनस्य करोति लावण्यरसोत्सुकानि" ऋतुसं०। "जगद्गुरुविसृष्टां तां जृम्भणाख्यां तनुं प्रभोः" भाग०३।२०।४२। जृम्भि–णिच्–ल्यु। २जृम्भणकारिणि ३जृम्भकास्त्रे च "जृम्भणं नाम सोऽप्यस्त्रं जग्राह पुरुषोत्तमः। हरं स जृम्भयामास क्षिप्रकारी महाबलः" हरिवं०१८४ अ०। "जृम्भणं पातनञ्चैव त्वाष्ट्रञ्चापि सुदारुणम्" २३४ अ०।

जृम्भिणी स्त्री जृम्भि–णिनि। एलापर्ण्याम् शब्दच०।

जृम्भित त्रि०जृम्भि–क्त।१चेष्टिते२प्रवृद्धे च भावे क्त।३जृम्भायां ४स्फुटने हेमच० स्त्रीणां ५करणभेदे न० मेदि०।

जॄ जरायां दिवा० पर० अक० सेट् जीर्य्यति इरित्। अजरत् अजारीत्। जीर्णः। षित्। जरा। घटादि०। जरयति। "या न जीर्य्यति जीर्य्यतः" नीतिमा० जीर्य्यते रहम्। जरन्। जजार। जरीता जीर्णः। "नरितॄणां सनां भुवः स्तुतये" वामदेव्यगानमन्त्रः।

जॄ जरायां वा चुरा० उभ० पक्षे क्र्यादि० प्वादि० अक० सेट्। घटा०। जरयति ते अजीजरत् त। जृणाति। इरित् अजरत्-अजारीत्।

जेतृ त्रि० जि–तृच्। जयशीले। "जेता नृभिः इन्द्रः पुत्रम्" ऋ० १।१७८।२। "जेतारं लोकपालानां स्वमुखैरर्चितेश्वरम्" रघुः। स्त्रियां ङीप्। २विष्णौ पु०। "अनघो विजयो जेता" विष्णुस०। जयत्यतिशेते सर्वभूतानि" इति जेता" भा०।

जेतव्य त्रि०जि–कर्मणि तव्य। जेये "जय्यो यः शक्यते जेतुं जेयो जेतव्यमात्रके" अमरः।

जेत्व त्रि० जि–वनिप् वेदे नि० दीर्घस्यापि तुक्। जेतव्ये। "अस्थामाते जयत जेत्वानि" ऋ०।४७।२६। "जेत्वानि जेतव्यानि" भा०।

जेन्ताक न०स्वेदसेवनार्थं गृहभेदे (भापरालओयार घर) तन्निर्मितिप्रकारोऽभिहितश्चरके यथा

"अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत। तत्र पूर्वस्यां दिश्युत्तरस्यां वा गुणवति प्रशस्ते भूमिभागे कृष्णमृत्तिके सुवर्णमृत्तिके वा परीवापपुष्करिण्यादीनां जलाशयानामन्यतमस्य कूले दक्षिणे पश्चिमे वा सूपतीर्थे समसुविभक्तभूमिभागे सप्ताष्टौ वा अरत्नीरुपक्रम्योदकात् प्राङ्मुखमुदङ्मुखं वाभिमुखतीर्थं कूटागारं कारयेत्। उत्सेधविस्तारतः परमरत्नीः षोडश समन्तात् सुवृत्तं मृत्-

कर्म्म सम्पन्नमनेकवातायनम् । अस्य कूटागारस्यान्तः समन्ततो भित्तिमरत्निविस्तारोत्सेधां पिण्डिकां कारयेत् कपाटवर्जम् । मध्ये चास्य कूटागारस्य चतुष्किष्कुमात्रपुरुषप्रमाणं मृण्मयं कन्दुसंस्थानं बहुसूक्ष्मच्छिद्रमङ्गारकोष्ठकस्तम्भं सपिधानं कारयेत् । तत्र खादिराश्वकर्णादीनां वा काष्ठानां पूरयित्वा प्रदीपयेत् । स यदा जानीयात् साधुदग्धानि काष्ठानि गतधूमानि अवतप्तञ्च केवलमग्निना तदग्निगृहं स्वेदयोग्येन चोष्मणा युक्तमिति तत्रैनं पुरुषं वातहराभ्यक्तगात्रं वस्त्रावच्छन्नं प्रवेशयेत् प्रवेशयंश्चैनमनुशिष्यात् । सौम्य! प्रविश कल्याणायारोग्याय चेति । प्रविश्य चैनां पिण्डिकामधिरुह्य पार्श्वापरपार्श्वाभ्यां यथासुखं शयीथाः न च त्वया स्वेदमूर्च्छापरीतेनापि सता पिण्डिकैषा विमोक्तव्या आ प्राणोच्छ्वासात् । भ्रश्यमाने ह्यतः पिण्डिकावकाशात् द्वारमनधिगच्छन् स्वेदमूर्च्छापरीततया सद्यः प्राणान् जह्याः तस्मात् पिण्डिकामेनां न कथञ्चन मुञ्चेथाः त्वं यदा जानीयाः विगताभिष्यन्दमात्मानं सम्यक्प्रस्रुतस्वेदपिच्छं सर्वस्रोतोविमुक्तं लघुभूतमपगतविबन्धस्तम्भसुप्तिवेदनागौरवमिति । ततस्तां पिण्डिकामनुसरन् द्वारं प्रपद्येथाः । निष्क्रम्य च न सहसा चक्षुषोः परिपालनार्थं शीतोदकमुपस्पृशेथाः । अपगतसन्तापक्लमस्तु मुहूर्त्तात् सुखोष्णेन वारिणा यथान्यायं परिषिक्तोऽश्नीयाः" अस्य स्वेदार्थकता शब्दकल्पद्रुमे उक्ता चिन्त्या "भूगृहेषु च जेन्ताके कुप्णगर्भगृहेषु च । विधूमाङ्गारतप्तेष्वभ्यक्तः स्विद्यति ना सुखम्" इति आधाररूपगृहादिसाहचर्य्यात् गृहभेदस्यैवोपक्रमात् । उपसंहारे च इति जेन्ताकस्वेद इति कीर्त्तनं सप्तमीतत्पुरुषपरम् । इति जेन्ताकः स्वेद इति सविसर्गपाठोऽनाकरः ।

जेन्य त्रि॰ जि—जन+णिच्—वा बा॰ डेन्य । १जयशीले "अग्निर्यज्ञेषु जेन्यो न विश्पतिः" ऋ॰ १।१२८।७ । "जेन्यः जयशीलः" भा॰ । २उत्पाद्ये च "जनिष्ट हि जेन्यो अग्रे अह्नाम्" ऋ॰ ५।१।५ । "जेन्य उत्पाद्यः" भा॰ ३जेतव्ये च "दुग्धं पयो वृषणा जेन्यावसू" ऋ॰ ७।७४।२ । "जेन्यं वसु धनं ययोः । वेदे पूर्वपददीर्घः । "जेन्यावसू जेतव्यधनौ" भा॰ । "गन्तं देवेभिर्जेन्यावसू" ऋ॰ ८।१८।७ ।

जेमन् त्रि॰ जि—मनिन् । १जयशीले "उदन्यजेव जेमना मदेरू" ऋ॰ १०।१०६।६ । "जेमना जयशीलौ" औस्थाने आच् छान्दसो दीर्घाभावः । लोके तु जेमा जेमानौ इत्येव । जेतृभावः इमनिच् तृणो लोपः । २जेतृभावे जये च ३जयसामर्थ्ये पु॰ । "जेमा च महिमा च मे" यजु॰ १८।४ ।

जेमन न॰ जिम—भावे ल्युट् । भक्षणे अमरः ।

जेय त्रि॰ जि—कर्म्मणि यत् । जेतव्यमात्रे अमरः । "दैवैरजेया निर्ज्जितास्त्वार्जुनेन । तदा नाशंसे विजयाय सञ्जय !" भा॰ आ॰ १अ॰ "विष्टभ्य शत्रून् कौन्तेय ! जेयः क्षितिपतिस्तदा" भा॰ आश्र॰ ६अ॰ ।

जेष गतौ भ्वा॰ आत्म॰ सक॰ सेट् । जेषते अजेषिष्ट ऋदित् अजिजेषत् त । "अपां तोकस्य तनयस्य जेषे" ऋ॰ १।११०।११ ।

जेह यत्ने भ्वा॰ आत्म॰ अक॰ सेट् । जेहते अजेहिष्ट । ऋदित् अजिजेहत् त । "पात्रमृभवो जेहमानम्" ऋ॰ १।११०।५ "जेहमानं प्रयतमानम्" भा॰ । निरुक्ते अस्य गतिकर्म्मतोक्ता "दृढशानपवैर्जेहमानस्य" ऋ॰ १०।३।६ । क्वचित् व्याप्त्यर्थताऽपि "सुगेभिरेणुभिर्जेहमानं पतत्त्रि" ऋ॰ १।१६३।६ । "जेहमानं यत्नदेशं व्याप्नुवत्" भा॰ । गत्यर्थकधातोः प्राप्त्यर्थकत्वात् प्राप्त्यर्थतापि । "ये तातृषुर्देवत्रा जेहमानाः" ऋ॰ १०।१५।८ । "जेहमानाः प्राप्ताः" भा॰ ।

जै क्षये भ्वा॰ पर॰ अक॰ अनिट् । जयति । अजासीत् । ओदित् जानः ।

जैगीषव्य पु॰ जिगीषोरपत्यं गर्गा॰ यञ् । योगविदि मुनिभेदे तत्कथा भा॰ श॰ ५१ अध्याये शा॰ पर्व्वणि च २३५ अ॰ दृश्या । "असितो देवलश्चैव जैगीषव्यश्च तत्त्ववित्" भा॰ शा॰ ११ अ॰ । स्त्रियां लोहिता॰ नित्यं ष्फ षित्त्वात् ङीष् । जैगीषव्यायणी ।

जैत्र त्रि॰ जेतैव जेतृ+प्रज्ञादि॰ अण् । १जयशीले अमरः । २पारदे पु॰ ३औषधे न॰ राजनि॰ । "रणाय जैत्रः प्रदिशन्निव त्वराम्" किरा॰ "शरीरिणा जैत्रशरेण यत्र" माघः । "देवस्तुतभुजालम्बी जैत्रमध्यास्त राघवः" रघुः । ततश्चतुरर्थ्यां कर्णा॰ फञ् । जैत्रायणि जैत्रादूरदेशादौ त्रि॰ ।

जैत्ररथ त्रि॰ जैत्रो रथोऽस्य । जयशीले हला॰ ।

जैत्री स्त्री जेत्र्येव जेतृ+स्वार्थे अण् ङीप् । जयन्तीवृक्षे । शब्दर॰ ।

जैन पु॰ जिन एव, जिनो देवतास्य वा अण् । १अर्हति २अर्हदुपासके च ।

जैपाल पु॰ जयपाल+पृषो॰ । जयपालवृक्षे हिक्रपकोषः

जैमिनि पु॰ मुनिभेदे स च सामवेदे वेदव्यासशिष्यः यथाह भाग॰ १२।६।८ । "साम्नां जैमिनये प्राह तथा छन्दो-

गसंहिताम्” स च धर्म्ममीमांसां प्रणीतवान्। तच्च शास्त्रं द्वादशाध्यायात्मकम्। तत्प्रतिपाद्यविषयाश्चाधिकरणमालायां माधवाचार्य्येण संगृहीता यथा

“धर्म्मो द्वादशलक्षण्या व्युत्पाद्यस्तत्र लक्षणैः। प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः। अधिकारोऽतिदेशश्च सामान्येन विशेषतः। ऊहोऽबाधश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात्”। “लक्षणान्यध्यायाः। द्वादशानां लक्षणानां समाहारो द्वादशलक्षणी। तादृशस्य द्वादशाध्यायोपेतस्य शास्त्रस्य धर्म्मो विषयः। प्रमाणादयः प्रसङ्गान्ता द्वादश पदार्थाः क्रमाद्द्वादशानामध्यायानां विषयाः। तत्र प्रथमेऽध्याये विध्यर्थवादादिरूपं धर्म्मे प्रमाणं निरूपितम्। द्वितीये यागदानादिकर्म्मभेदः। तृतीये प्रयाजादीनां दर्शपूर्णमासाद्यर्थत्वेन तच्छेषत्वम्। चतुर्थे गोदोहनस्य पुरुषार्थत्वप्रयुक्तत्वानुष्ठानम् न तु क्रत्वर्थत्वप्रयुक्तत्वेत्येवमादयः। पञ्चमे क्रमनियतिविधेयत्वादयः। षष्ठे कर्त्तुरधिकारो नान्धादेरित्यादयः। सप्तमे समानमितरच्छ्येनेनेत्यादिप्रत्यक्षवचनेनाग्निहोत्रादिनाम्नानुमितवचनेन च सामान्यतोऽतिदेशः। अष्टमे सौर्य्यं चरुं निर्व्वपेदित्यत्र निर्वापस्तद्धितेन देवतानिर्देश एकदेवतात्वमौषधद्रव्यकत्वमित्यादिलिङ्गेनाग्नेयपुरोडाशेतिकर्त्तव्यतैव नान्यस्येत्येवमादिर्विशेषतोऽतिदेशः। नवमे प्रकृतावग्नये जुष्टं निर्व्वपामीति पठिते मन्त्रे विकृतौ सौर्य्यचरावग्निपदपरित्यागेन सूर्य्यपदप्रक्षेपेण च सूर्याय त्वा जुष्टं निर्व्वपामीत्येवमाद्यूहः। दशमे कृष्णलेषु चोदकप्राप्तस्यावघातस्य वितुषीकरणासम्भवेन लोप इत्येवमादिर्बाधः। एकादशे बहूनामाग्नेयादीनां प्रधानानां सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकार इत्यादि तन्त्रम्। द्वादशे प्रधानस्य पशोरुपकारायानुष्ठितेन प्रयाजाद्यङ्गेन पश्वङ्गपुरोडाशेऽप्युपकार इत्यादिप्रसङ्गः। पादानामसाधारणं विषयं दर्शयति” “विध्यर्थवादस्तुतयोनाम चेति चतुर्विधम्। प्रथमाध्यायगैः पादैश्चतुर्भिस्तन्नमीरितम्” “प्रथमे पादे विधिरूपं मानमीरितम्। द्वितीयेऽर्थवादरूपम्। अर्थवादो मन्त्रस्याप्युपलक्षणम्। तृतीये स्मृतिरूपम्। स्मृतिराचारमप्युपलक्षयति। चतुर्थे उद्भिच्चित्रादिनामरूपम्” “उपोद्घातः कर्म्मभेदमानं तस्यापवादगीः। प्रयोगभेद इत्येते द्वितीयाध्यायपादगाः”।

द्वितीयाध्यायस्य प्रथमे पादे आख्यातमेवापूर्व्वबोधकमार्थकत्वात इत्यादिकः कर्म्मभेदचिन्तोपयुक्त उपोद्घातो वर्णितः। द्वितीये धातुभेदपुनरुक्त्यादिभिः कर्म्मभेदः। तृतीये रथन्तरादीनां कर्म्मभेदप्रामाण्यापवादः। चतुर्थे नित्यकाम्ययोः प्रयोगयोर्भेदः”। “श्रुतिर्लिङ्गं च वाक्यादि विरोधप्रतिपत्तयः। अनारभ्योक्तिबह्वर्थस्वाम्यर्थौ अष्टपादगाः”। “तृतीयाध्यायस्य प्रथमे पादे शेषत्वबोधकानां श्रुतिलिङ्गादीनां मध्ये श्रुतिर्विचारिता। द्वितीये लिङ्गम्। तृतीये वाक्यप्रकरणादि। चतुर्थे निवीतोपवीतादिष्वर्थवादत्वविधित्वादिनिर्णयहेतुः श्रुत्यादेः परस्परविरोधसदसद्भावः। पञ्चमे प्रतिपत्तिकर्म्माणि। षष्ठेऽनारभ्याधीतानि। सप्तमे बहुप्रधानोपकारकप्रयाजादीनि। अष्टमे याजमानानि”। “प्रधानस्य प्रयोक्तृत्वमप्रधानप्रयोक्तृता। फलचिन्ता जघन्याङ्गचिन्तेत्येते चतुर्थगाः”। चतुर्थाध्यायस्य प्रथमे पादे प्रधानभूतामिक्षा दध्यानयनस्य प्रयोजिकेत्यादिप्रधानप्रयोक्तृत्वं विचारितम्। द्वितीये त्वप्रधानं वत्सापाकरणं शाखाच्छेदप्रयोजकमित्याद्यप्रधानप्रयोक्तृत्वम्। तृतीये जुहूपर्णमयीत्वादेरपापश्लोकश्रवणादिफलभावाभावचिन्ता। चतुर्थे राजसूयगतजघन्याङ्गाक्षद्यूतादिचिन्ता”। “श्रुत्यादिभिः क्रमस्तस्य विशेषो वृद्ध्यवर्धने। श्रुत्यादेर्बलता चेति पञ्चमाध्यायपादगाः”। “पञ्चमाध्यायस्य प्रथमे पादे श्रुत्यर्थपाठादिभिः क्रमो निरूपितः। द्वितीये वाजपेयगतेषु सप्तदशसु पशुष्वेकैकधर्म्मसमापनमित्यादि क्रमविशेषः। तृतीये पञ्चप्रयाजादीनामावर्त्तनेनैकैकस्यमित्यादिवृद्धिः। अदाभ्यग्रहचित्रिण्योरनावृत्तिरित्यादि वृद्ध्यभावः। चतुर्थे क्रमनियामकानां श्रुत्यर्थपाठादीनां प्रबलदुर्बलभावः। “अधिकारी तस्य धर्माः प्रतिनिध्यर्थलोपने। दीक्षा सत्त्रं देयवह्नी षष्ठे पादेष्वमी स्थिताः”। षष्ठाध्यायस्य प्रथमे पादे कर्माधिकारः कर्त्तुरस्त्यन्धादेर्नास्ति स्त्रिया अस्ति योऽस्ति स च पत्या सहेत्येवमादिनाधिकारी निरूपितः। द्वितीये सत्त्राधिकारिणां प्रत्येकं कृत्स्नं फलम्। दर्शपूर्णमासयोः कर्त्तैक्यनियमः। काम्यकर्म समापनीयमित्येवमादयोऽधिकारिधर्मा उक्ताः। तृतीये द्रव्यस्य प्रतिनिधिरस्ति। देवादीनामग्न्यादीनामधिकारिणश्च स नास्तीत्यादिना निरूपणम्। चतुर्थे पदार्थलोपनं विचारितम्। अवत्तनाशे सत्याज्येन यजेत। इडादधिनाशे सति [illegible] ग्राह्यमित्यादिकम्। पञ्चमे कालापराधेन चन्द्रोदये सत्यभ्युदयेष्टिः प्रायश्चित्तम्।

ज्योतिष्टोमस्यैकादयो दीक्षाः। द्वादशाहस्य द्वादशदीक्षा इत्यादि निरूपितम्। षष्ठे सत्राधिकारिणस्तुल्यकल्पा एव। सत्त्रं विप्रस्यैवेत्येवमादिकं चिन्तितम्। सप्तमे पुत्रादिकं न देयम् महाभूमिर्न देयेत्येवमादिदेयविचारः। अष्टमे लौकिकाग्नावुपनयनहोमः, स्थपतीष्टिस्तथैवेत्येवमाद्यग्निविचारः कृतः"। "प्रत्यक्षोक्तप्रतिदेशोऽस्य शेषः सामनिरूपणम्। नामलिङ्गातिदेशौ द्वौ सप्तमाध्यायपादगाः"। "सप्तमाध्यायस्य प्रथमे पादे समानमितरच्छ्येनेनेत्यादि प्रत्यक्षवचनातिदेशः। द्वितीये रथन्तरशब्देन गानमात्राभिधायिना गानस्यैवातिदेश्यत्वमित्येतादृशः पूर्वोक्तातिदेशस्य शेषो विचारितः। तृतीयेऽग्निहोत्रनामातिदेशः। चतुर्थे निर्वापौषधद्रव्यादिलिङ्गातिदेशः"। "स्पष्टलिङ्गादथास्पष्टात् प्रबलादपवादतः। अतिदेशविशेषाः स्युरष्टमाध्यायपादगाः"। "अष्टमाध्यायस्य प्रथमे पादे स्पष्टेन लिङ्गेनातिदेशविशेषः। तद्यथा सौर्यचरावतिदेशकानि निर्वापस्तद्धितेन देवतानिर्देश एकदेवतात्वमौषधद्रव्यकत्वमित्यादीनि स्पष्टान्याग्नेयलिङ्गानि। द्वितीये त्वस्पष्टैर्लिङ्गैरतिदेशः। तद्यथा वाजिने हविःसामान्येन लिङ्गेन पयोविध्यन्तोऽतिदिश्यते। तत्र लिङ्गमस्पष्टम् शीघ्रं तद्बुद्ध्यनुत्पादनात्। तृतीये प्रबलेन लिङ्गेनातिदेशः। तद्यथा आभिचारिकेष्टावाग्नावैष्णवसारस्वतवार्हस्पत्येषु हविःषु त्रित्वेन लिङ्गेन यथाक्रममाग्नेयादिविध्यन्ते प्राप्ते द्विदैवत्यत्वेन लिङ्गेन प्रथम आग्नावैष्णवे तृतीयस्याग्नीषोमीयस्य विध्यन्तोऽतिदिष्टः। प्रबलं च द्विदैवत्यत्वम् शब्दोच्चारणमात्रेण सहसा प्रतिभासात् क्रमस्तु विलम्बितप्रतीत्या दुर्बलः चतुर्थे दर्विहोमेष्वतिदेशोऽपोद्यते"।

"ऊहारम्भोऽथ सामोहो मन्त्रोहस्तत्प्रसङ्गतः। नवमाध्यायपादेषु चतुर्ष्वेते प्रकीर्त्तिताः"। "नवमाध्यायस्य प्रथमे पादे उपोद्घातपूर्वकमूहविचारप्रारम्भः। तत्र प्रयाजादयो धर्मा अपूर्वप्रयुक्ताः। अवघातमन्त्रादिष्वविवक्षितं व्रीह्यग्न्यादिस्वरूपं साधनविशेषत्वमात्रं विवक्षितमित्यादिरुपोद्घातः। सवितृश्विपूषशब्दानां विकृतिषु नास्त्यूहः। अग्निशब्दस्यास्त्यूह इत्यादिकमूहविचारारम्भः। द्वितीये सपरिकरः सामोहः। तृतीये मन्त्रोहः। चतुर्थे मन्त्रोहप्रसङ्गापतितो विचारः"। "द्वारलोपोऽस्य विस्तारः कार्यैकत्वं समुच्चयः। ग्रहसामप्रकीर्णानि नञर्थश्चाष्टपादगाः" "दशमाध्यायस्य प्रथमे पादे बाधहेतुर्द्वारलोपो निरूपितः। तद्यथा स्वयंकृता वेदिर्भवतीत्यत्र वेदिनिष्पादनरूपस्य द्वारस्य लोपेन निष्पादकानामुद्धननादीनां बाधः। कृष्णलेषु वितुषीकरणरूपस्य द्वारस्य लोपेनावघातस्य बाधः। द्वितीये संक्षेपेणोक्तस्य द्वारलोपस्य बहुभिरुदाहरणैर्विस्तारः। तृतीये बाधकारणं कार्यैकत्वम्। तद्यथा प्रकृतौ गवाश्वादि दक्षिणाया ऋत्विक्परिक्रयः कार्यः। तथा विकृतिरूपे भूनाम्न्येकाहे धेनुरूपायास्तदेव कार्य्यम्। ततो धेन्वा गवाश्वादि दक्षिणा विकृतौ चोदकप्राप्ता बाध्यते। चतुर्थे नक्षत्रेष्टिविहिता उपहोमाश्चोदकप्राप्तैर्नारिष्टहोमैः सह समुच्चीयन्त इत्यादि समुच्चयः। पञ्चमे षोड़शिग्रहः प्रकृतिगामी। स चाग्रयणपात्रादेव ग्रहीतव्य इत्यादिर्बाधप्रसङ्गागतो ग्रहादिविचारः। षष्ठे साम तृचे गेयमित्यादिर्बाधप्रसङ्गागतः सामविचारः। सप्तमे पश्वङ्गेषु हविर्भेदः। गृहमेधीयमपूर्वकर्मेत्यादिर्बाधप्रसङ्गागतः प्रकीर्णविचारः। अष्टमे नानुयाजेष्विति पर्युदासो न सोम इत्यर्थवादो नातिरात्र इति प्रतिषेध इत्यादिर्बाधोपयुक्तो नञर्थविचारः"।

"उपोद्घातस्तथा तन्त्रावापौ तन्त्रस्य विस्तृतिः। आवापविस्तृतिश्चैकादशाध्यायस्य पादगाः"। एकादशाध्यायस्य प्रथमे पादे तन्त्रस्योपोद्घातो वर्णितः। द्वितीये तन्त्रावापौ संक्षेपेणोक्तौ। तृतीये तन्त्रमुदाहरणबाहुल्येन प्रपञ्चितम्। चतुर्थे तथैवावापः प्रपञ्चितः"। "प्रसङ्गस्तन्त्रिनिर्णीतिः समुच्चयविकल्पने। द्वादशाध्यायपादार्था इति पादार्थसंग्रहः"। द्वादशाध्यायस्य प्रथमे पादे पशुधर्माणां पशुपुरोडाशे प्रसङ्गः सौमिकवेदेरुत्तरकालीनकर्मसु प्रसङ्ग इत्यादि विचारः। द्वितीये सवनीयपशोस्तन्त्रित्वम् न तु सवनीयपुरोडाशानाम्। विकृतिस्तन्त्रिणी न प्रकृतिः अन्वारम्भणीया विकृतिष्वपि स्यात् न तु प्रकृतावेवेत्यादिविचारः। तृतीये त्वग्वाससोः समुच्चयः। आघारगतर्जुत्वसन्ततत्वादीनां समुच्चय इत्यादिकं प्राधान्येन यवव्रीह्योर्विकल्प इत्यादिकं समुच्चयापवादत्वेनोभयं चिन्तितम्। चतुर्थे चैन्द्रावार्हस्पत्ययाज्यानुवाक्ययुगलयोर्विकल्प इत्यादिकं प्राधान्येन याज्यानुवाक्ययोः समु-

ष्वय इत्यादिकं विकल्पापवादत्वेनेत्युभयं चिन्तितम् । तदेवं द्वादशाध्यायगतेषु षष्टिसंख्यकेषु पादेषु प्रतिपाद्या अर्थाः संगृहीताः । ननु यथोक्तेभ्यः पादार्थेभ्योऽन्येऽप्यर्था बहवस्तत्तत्पादेषु विचार्यन्ते तेषां कथं तत्तत्पादान्तर्भाव इत्याशङ्क्याह" । "उपोद्घातापवादाभ्यां प्रसङ्गादनुप्रसङ्गतः । तत्तत्पादगतत्वेन विचारान्तरमुन्नयेत्" "यथोक्तपादप्रतिपाद्यादन्येष्वर्थेषु यथोचितं कश्चिदुपोद्घातः कश्चिदपवादः कश्चित् प्रसङ्गपतितः कश्चिदनुप्रसङ्गपतित इत्येवं पादान्तर्भाव उन्नेयः" । जैमिनिश्च भारतान्तरं चकार तस्य जैमिनिभारतेति संज्ञा तन्नामस्मरणे च वज्रपातभयवारणं यथा "जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च । पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः" शब्दकल्पद्रुमधृतपुराणवाक्यात् "मुनेः कल्याणमित्रस्य जैमिनेश्चापि कीर्त्तनात् । विद्युदग्निभयं नास्ति पठिते च गृहोदरे" इत्युक्तेरपि तत्कीर्त्तनस्य विद्युदग्निभयनिवारकता । तत इदमर्थे छ । जैमिनीय जैमिनिप्रणीतशास्त्रादौ । "जैमिनीये च वैयासे विरुद्धार्थो न कश्चन" सांख्यप्रवचनभाष्यधृतपराशरोपपु० । "जैमिनीयन्यायमाला श्लोकैः संगृह्यते स्फुटम्" माधवः ।

जैव त्रि० जीवस्येदम् अण् । १आत्मसम्बन्धिनि २बृहस्पतिसम्बन्धिनि ३तत्क्षेत्रे धनूराशौ मीनराशौ तदधिदेवताके ४पुष्यनक्षत्रे । ५तदीये पाते च "शताद्रिचन्द्राः जैवस्य त्रिखाङ्काश्च भृगोस्तथा" सू० सि० ।

जैवन्तायन पुंस्त्री जीवन्तस्य गोत्रापत्यं वा फञ् । जीवन्तर्षेः गोत्रापत्ये । स च यजुर्वेदप्रचारकवंशान्तर्गतः । यथाह "जैवयन्तायनाच्च रैभ्याच्च रैभ्यः" शत० ब्रा० १४।७।३।२६ पक्षे इञ् । जैवन्ति तत्रार्थे स्त्रियां ङीप् ।

जैवन्तायनि त्रि० जीवन्तस्यादूरदेशादि कर्णा० चतुरर्थ्यां फिञ् । जीवन्तस्यादूरदेशादौ ।

जैवलि पु० जीवलस्य राज्ञोऽपत्यम् इञ् । जीवलन्नृपापत्ये प्रवाहणे "तं ह प्रवाहणो जैवलिरुवाचान्तवद्वै किल ते शालावत्य ! साम" छा० उ० ।

जैवातृक पु० जीवयत्यनेन लोकं जीवति वा आतृ-कन्-इद्धिश्च । १चन्द्रे २कर्पूरे अमरः । ३पुत्रे संक्षिप्तसा० । ४औषधे हेम० ५दीर्घायुष्के त्रि० मेदि० । "जैवातृक ! ननु श्रूयते पतिरस्याः मिथिलायां प्रहारवर्मासीत्" दशकु० । [जीवस्यादूरदेशादौ ।

जैवि त्रि० जीवस्यादूरदेशादि सुतङ्गमा० चतुरर्थ्यां इञ् ।

जैवेय पुंस्त्री जीवस्य गुरोरपत्यं शुभ्रा० ढक् । जीवस्यापत्ये कचनामके मुनौ । जीवाया मौर्व्या इदम् स्त्रीत्वात् ढक् । २ज्यासम्बन्धिनि त्रि० ।

जैह्माशिनेय पु० जिह्माशिनोऽपत्यं शुभ्रा० ढक् दाण्डिना० नि० टिलोपः । जिह्माशिनोऽपत्ये ।

जैह्म्य न० जिह्मस्य भावः ष्यञ् । कौटिल्ये । "जैह्म्यञ्च मैथुनं पुंसि जातिभ्रंशकरं स्मृतम्" मनुः । "निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतम् । रजस्वलामुखास्वादः सुरापानसमानि तु" याज्ञ० ।

जोङ्ग न० जुङ्ग्यते वर्ज्यते जुगि-वर्जने कर्मणि अच् पृषो० । कालीयके गन्धद्रव्यभेदे हारा० ।

जोङ्गक न० जुगि-ण्वुल् पृषो० । अगुरुचन्दने अमरः ।

जोङ्गट पु० जुगि-अटन् पृषो० । गर्भिण्या अभिलाषे दोहदे (साद) हारा० ।

जोटिङ्ग पु० जट-इन् जोटिं गच्छति वा० ड खिच्च । १महादेवे २महाव्रतिनि च त्रिका० । [शि० कौ० ।

जोड पु० जुड-बन्धने घञ् । बन्धने । अङ्घ्रिजोडम्

जोन्ताला स्त्री जु-विच् तस्यान्तमालाति आ+ला-क । देवधान्ये हेमच० ।

जोष पु० जुष-भावे घञ् । १प्रीतौ २सेवने च "को वां जोष उभयोः" ऋ० १।१२०।१ । ३सुखे न० शब्दर० ।

जोषण न० जुषी-प्रीतिसेवनयोः भावे ल्युट् । १प्रीतौ २सेवने च । स्वार्थे णिच्-भावे युच् । तत्रार्थे स्त्री "उत्तरे निगमाः यथेष्टं जोषणा स्तुतेः" कात्या०श्रौ०५।१२।१६ ।

जोषम् अव्य० जुष-बा० अमु । १तूष्णीमित्यर्थे "इति जोषमवस्थितं द्विषः" माघः । २सुखे च अमरः ।

जोषा स्त्री जोषयति जुष-णिच्-अच् । १योषिति शब्दर० "चन्द्रेण जुधातोः समप्रययान्तयाऽयं व्युत्पादितः" [२योषिति च । उज्ज्वलदत्तः ।

जोषिका स्त्री जुष-स संज्ञायां कन् । १जालिकायां शब्दर० ।

जोषित् स्त्री जुष "हृसृरुहियु(षि)युषिभ्यः" उणा० इति । स्त्रीभावे शब्दर० । हलन्तत्वात् वा टाप् । जोषिताऽपि तत्रार्थे शब्दर० ।

जोष्टृ त्रि० जुष-तृच् वेदे बा० इडभावः । सेवके । "उपेनमस्य जोष्टारः" ऋ० ४।४१।८ । "जोष्टारः सेवकाः" भा० । लोके तु जोषितृ इत्येव ।

जौमर न० जुमरेण निर्वृत्तः अण् । १जुमरनन्दिकृते संक्षिप्तसाराख्ये व्याकरणे २तदध्येतरि त्रि० ।

जौलायन पु० जुलस्यापत्यम् इञ् तत्र इञन्तत्वात् यूनि फञ्। जुलस्य यून्यपत्ये। ततः ऐषुकार्य्या० विषयार्थे भक्तल्। जौलायनभक्त तदीयविषये त्रि०।

जौहव त्रि० जुह्वामवदाने योग्यम् जुहू–अण्। जुहूपदार्थेऽवदानयोग्येषु हृदयादिषु "हृदयं जिह्वां क्रोडं सव्यसक्थिपूर्वनडकं पार्श्वे यकृद्वृक्कौ गुदमध्यं दक्षिणा श्रोणिरिति जौहवानि" कात्या० श्रौ० ६।७।६। "जुह्वामवदानयोग्यानि प्रधानयागसाधनानि" कर्कः।

ज्ञ पु० ज्ञा–क। १बुधग्रहे "युगे सूर्य्यज्ञशुक्राणां खचतुष्करदार्णवाः" सू०सि०। २पण्डिते "क्रियासु बाह्यान्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः" प्रश्नो०। ३ब्रह्मणि ४मङ्गलग्रहे च धरणिः। सुपि उपपदे तत्तत्पदार्थज्ञातरि त्रि०। "आदेशं देशकालज्ञः" रघुः "विधिज्ञो विधिमास्थाय" ति० त०। स्वार्थे कः। ज्ञक ज्ञातरि त्रि० स्त्रियां वा अत इत्त्वम् ज्ञका ज्ञिका।

ज्ञप मारणे, आलोके, निशाने, तोषणे स्तुतौ च चुरा० उभ० सक० सेट् घटा०। ज्ञपयति-ते अजिज्ञपत्-त। ज्ञाक्म इत्यनेनैवेष्टसिद्धौ ज्ञपपाठश्चुरादिरुभयपदीति मते फलवत्कर्त्तरि परस्मैपदार्थः इति धातुप्रदीपः। वस्तुतस्तु ज्ञप्तिपदमनेनैव निष्पादितम्। तेन अनिर्दिष्टार्थतया ज्ञप्तिरिह ज्ञानम्। अतएव प्रच्छौ श ज्ञीप्से इत्यत्र अस्यैव सनन्तस्य निष्पादितेन ज्ञीप्सशब्देन ज्ञातुमिच्छा प्रतिपाद्यते। एवं ज्ञानपर्य्याये "प्रतिपज्ज्ञप्तिचेतना इत्यमरः" इति दुर्गादासः। ज्ञप ज्ञाने च इति पाणिनिः। अधिकं ज्ञाधातौ वक्ष्यते।

ज्ञपित त्रि० ज्ञप–ज्ञाने क्त नि० वा इट्। ज्ञाते अमरः। इड़भावे। ज्ञप्तोऽप्यत्र।

ज्ञप्ति स्त्री ज्ञप–भावे क्तिन्। १बुद्धौ अमरः २मारणे ३तोषणे ४तीक्ष्णीकरणे ५स्तुतौ च।

ज्ञा बोधे क्र्या० पर० सक० अनिट्। जानाति अज्ञासीत्। जज्ञौ। ज्ञाता ज्ञानं ज्ञातिः ज्ञातः जज्ञिवान्।

अनु+अनुमतौ अनुमतिश्च स्वयंप्रवृत्तस्य निषेधनाभावेन स्वाभिमतत्वज्ञापनेन प्रवर्त्तनम्। "तं देवासो अनुजानन्तु कालम्" तैत्ति० ब्रा०। "अनुप्रवेशे यद्वीर कृतवांस्त्वं ममाप्रियम्। सर्वं तदनुजानामि" भा०आ०२१२अ०

अप+निह्नवे आत्म०। "आत्मानमपजानानः शशमात्रोऽनयद्दिनम्" भट्टिः।

अभि+सम्यग्ज्ञाने "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः" गीता। "अभिज्ञाश्छेदपातानाम्" कुमा० अभिज्ञा च आद्यज्ञानम् अनुभवात्मकम्।

प्रति+अभि+पूर्वदृष्टस्य वस्तुनः चक्षुरादिसन्निकर्षजे पूर्वसंस्कारोत्पन्ने स्मृतिभिन्ने ज्ञानभेदे यथा सोऽयं देवदत्तः इत्यादि ज्ञानम्। "तं त्वं प्रत्यभिजानीहि स्वप्ने यं दृष्टवत्यसि" हरिवं० १७६ अ०।

सम्+अभि+प्रत्यभिज्ञाने "इन्द्रसेनां सह भ्रात्रा समभिज्ञाय वाहुकः" भा० व० ७५ अ०।

अव+अनादरे हीनत्वेन ज्ञाने च। "अवजानासि मां यस्मात् ततस्ते न भविष्यति" रघुः। "अदेशकाले यद्दानमपात्रेभ्यश्च दीयते। असत्कृतमवज्ञातं तत्तामसमुदाहृतम्" गीता। "वहूनि देशांश्च विर्त्तयिष्यन् रामं नृपः संगिरमाण एव। तयावजज्ञे" भट्टिः।

आ+सम्यग्ज्ञाने नियोगे च "न हि मनसा ध्यायतः कश्चनाजानाति" शत० ब्रा० ४।६।७।५। "नियोगश्च निकृष्टस्य भृत्यादेः प्रवर्त्तनम्। स्वार्थे णिच तदर्थे। "आज्ञापय ज्ञातविशेष! पुंसाम्" कुमा०। ज्ञा–प्रेरणे चौरादिकस्येदं रूपमित्यन्ये।

उप+आद्यज्ञाने "उप तज्जानीत यथा वयमिहाप्यसामेति" शत० ब्रा० ६।२।३।७। "उपज्ञा ज्ञानमाद्यं स्यात्" अमरः।

निस्+निर्+निश्चयात्मके ज्ञाने। "विद्युद्वै विद्युत्य वृष्टिमनुप्रविशति सान्तर्धीयते तां न निर्जानन्ति" ऐत० ब्रा०।

परि+परितो ज्ञाने "इन्द्रो दक्षं परिजानादहीनम्" ऋ०१०।१३८।६। "अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः" मनुः।

प्र+प्रकृष्टज्ञाने। "यया धर्ममधर्मञ्च कार्य्यञ्चाकार्य्यमेव च। अयथावत् प्रजानाति" "तस्य प्रज्ञा प्रतिष्ठिता" गीता।

प्रति+प्रतिज्ञायां साध्यत्वेन पक्षनिर्द्देशे आत्मकर्त्तव्यत्वेन कथनभेदे च आत्म०। "साध्यनिर्द्देशः प्रतिज्ञा" गौत०सू०। साध्यवत्त्वेन पक्षनिर्द्देशः प्रतिज्ञेति तदर्थः। "प्रतिजज्ञे वधं चापि सर्वक्षत्रस्य भारत!" भा०म०११७ अ०।। "प्रतिज्ञाय वनवासमिमं गुरोः" रामा० २।१०९ अ०। "तस्मै निशाचरैश्वर्य्यं प्रतिजज्ञे रघूत्तमः" रघुः। "कच्चिन्न पाने द्यूते वा क्रीड़ासु प्रमदासु च। प्रतिजानन्ति पूर्वाह्णे व्ययं व्यसनजं तव" भा० स० ५ अ०। आर्षत्वात् पर०।

वि+विशेषेण ज्ञाने "ज्योतिर्वृणीत तमसो विजानन्" ऋ० ३।३९।७। "आत्मानं चेद्विजानीयादयमस्मीति पूरुषः" शत० ब्रा० १४।७।२।१६। "कथमेतद्विजानीयां त्व-

मादौ प्रोक्तवानिति" गीता। शिल्पशास्त्रविषयके ज्ञाने च "मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः" अमरः। ज्ञानमात्रे क्षणिकविज्ञानमिति बौद्धाः।

सम्+सम्यग् ज्ञाने संज्ञायां चैतन्ये च आत्म०। संजानानान् परिहरन् रावणानुचरान् बहून्" भट्टिः। "रविस्तु संज्ञापयते लोकान् रश्मिभिरुल्बणैः" भा० शा०१२७६७। प्रतिज्ञायाम् आत्म०। "संजानीष्व क्षमीशा" च मुग्धबोधम्। [अजिज्ञपत् त।

ज्ञा ज्ञपधात्वर्थे चुरा० उभ० सक० सेट् घटा०। ज्ञपयति ते

ज्ञा प्रेरणे चुरा०उभ०सक०सेट्। ज्ञापयति ते अजिज्ञपत् त। अस्यैव रूपम् आज्ञापयतीत्यादि। "आज्ञापय ज्ञातविशेष! पुंसाम्" कुमा०।

ज्ञात त्रि० ज्ञा—कर्म्मणि क्त। विदिते "ज्ञाततत्त्वोऽपि "खल्वेकः सन्दिग्धे कार्य्यवस्तुनि" माघः। 'ज्ञाताज्ञाताः कुले मम" वायुपु०। भावे क्त। २ज्ञाने न०। यावा० स्वार्थे कन्। ज्ञातक विदितार्थे। [अर्हद्भेदे हेम०।

ज्ञातनन्दन पु० ज्ञातेन ज्ञानेन नन्दति नन्द—ल्यु ३त०।

ज्ञातल त्रि० ज्ञातं ज्ञानं लाति ला—क। ज्ञानयुक्ते तस्यापत्यं शुभ्रा०ग्रतलेत्यत्र ज्ञातलेति पाठान्तरात् ढक्। ज्ञातलेय तदपत्ये पुंस्त्री०। [न्तज्ञे अमरः।

ज्ञातसिद्धान्त पु० ज्ञातः सिद्धान्तः तत्त्वार्थो येन। सिद्धा-

ज्ञाति पु० जानाति छिद्रं कुलस्थितिं वा संज्ञायां क्तिच्। ज्ञा—कर्त्तरि करणे वा क्तिच्। १पितरि २पितृवंश्ये सपिण्डसकुल्यसमानोदकसगोत्रजरूपे एकगोत्रोत्पन्ने पितृव्यादौ अमरः। "ज्ञातिभेदो न नः कार्य्यः ज्ञाती त्वं मम नारद!" हरिवं०१२८अ०। ज्ञातिश्च चतुर्विधः "सप्तमपुरुषपर्य्यन्तं सपिण्डः। ततस्त्रिपुरुषपर्य्यन्तं सकुल्यः। ततश्चतुर्थपुरुषपर्य्यन्तं समानोदकाः। जन्मनामस्मृतिपर्य्यन्तमपि समानोदकः। ततः परं सगोत्रजः। ज्ञातिद्रोहे दोषो यथा "यानि कानि च पापानि ब्रह्महत्यादिकानि च। ज्ञातिद्रोहस्य पापस्य कलां नार्हन्ति षोड़शीम्। "भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः"। "ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा" इति च याज्ञ०। "ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः" मनुः। ततः परस्य पुत्रशब्दस्य समासे नाद्युदात्तता।

ज्ञातृ त्रि० ज्ञा—तृन्। १ज्ञानशीले २वेत्तरि च ज्ञातुर्भावः अण्। ज्ञात्र ज्ञातृत्वे न० "संविच्च मे ज्ञात्रं च मे" यजु० ८।७। "ज्ञात्रं विज्ञानसामर्थ्यम्" वेददी०।

ज्ञातेय न० ज्ञातेर्भावः कर्म वा ढक्। १ज्ञातित्वे २ज्ञातिकर्म्मणि च। "ज्ञातेयं कुरु सौमित्रे! भयात्त्रायस्व राघवम्" भट्टिः

ज्ञान पु० विषयान् जानाति ज्ञः अनिति अनः कर्म्म०। १जीवे। भावे ल्युट्। २बोधे न०। ३विशेषेण सामान्येन चाववोधे। वेदान्तिमते ४पदार्थव्याहिकायां मनोवृत्तौ, तत्र ज्ञानं नानाविधं यथा ज्ञानं द्विधा वस्तुमात्रद्योतकं निर्विकल्पकम्। सविकल्पन्तु संज्ञादिद्योतकत्वादनेकधा। संकल्पसंशयभ्रान्तिस्मृतिसादृश्यनिश्चयाः। ऊहोऽनध्यवसायश्च तथान्येऽनुभवा अपि"। इत्यादिभेदैर्नानेकविधा भवन्तीत्यर्थः। ५शास्त्रजबोधे। न्यायमते ६बुद्धिमात्रे "बुद्धिस्तु द्विविधा मता। अनुभूतिः स्मृतिश्चैव" भाषा० तत्र प्रकारान्तरेण द्विविधं यथा "अप्रमा च प्रमा चेति ज्ञानं द्विविधमुच्यते, तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता। तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः। आद्यो देहे आत्मबुद्धिः शङ्खादौ पीततामतिः। भवेन्निश्चयरूपा सा संशयोऽथ प्रदर्श्यते। किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः। तदभावाऽप्रकारा धीस्तत्प्रकारा तु निश्चयः। स संशयो भवेद्या धीरेकत्राभावभावयोः। साधारणादिधर्मस्य ज्ञानं संशयकारणम्। दोषोऽप्रमायाजनकः प्रमायास्तु गुणो भवेत्। पित्तदूरत्वादिरूपो दोषो नानाविधो मतः। प्रत्यक्षे तु विशेष्येण विशेषणवता समम्। सन्निकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः। पक्षे साध्यविशिष्टे च परामर्शो गुणो भवेत्। शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः। शाब्दबोधे योग्यतायास्तात्पर्य्यस्याथवा प्रमा। गुणः स्याद्, भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा। अथ वा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम्। ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते। तत् प्रमा नाऽप्रमा नापि ज्ञानं यन्निर्विकल्पकम्। प्रकारत्वादिशून्यं हि सम्बन्धानवगाहि तत्" इति भाषा०। ७बुद्धिवृत्तिनिरोधरूपे योगे "एकत्वं बुद्धिमनसोरिन्द्रियाणाञ्च सर्वशः। आत्मनो व्यापिनस्तात! ज्ञानमेतदनुत्तमम्" इति भा०शा०मोक्षधर्मः। एकत्वं बुद्धिमात्रेणावस्थानम् बुद्धिवृत्तिनिरोध इति यावत्। ८देवताध्यानादौ ९विवेकविज्ञाने शास्त्राचार्य्योपदेशजे परमात्मविषये साक्षान्मोक्षफले १०आत्मनिश्चये तत्त्वज्ञाने वेदान्तिमते ११जीवेश्वरजगद्भेदभ्रमाधिष्ठानभूते नित्ये स्वप्रकाशे सच्चिदानन्दरूपाद्वितीये परमार्थसत्ये, चैतन्ये। करणे ल्युट्। १२आत्मानात्मसर्वपदार्थाव-

बोधने विवेकसामर्थ्ये । १२अहंब्रह्मेत्युपासने । ब्रह्मोपासनम् "ब्रह्मैवाहं समः शान्तः सच्चिदानन्दलक्षणः । नाहं देहोह्यसद्रूपो ज्ञानमित्युच्यते बुधैः । निर्विकारो निराकारो निरवद्योऽहमव्ययः । नाहं देह इत्यादि । निरामयो निराभासो निर्विकल्पोऽहमाततः । नाहमित्यादि । निर्गुणो निष्क्रियो नित्यो नित्यमुक्तोऽहमच्युतः । नाहमित्यादि । निर्मलो निश्चलोऽनन्तः शुद्धोऽहमजरोऽमरः । नाहमित्यादि । वेदान्तशास्त्रोक्तं बोध्यम् । १४शब्दयुक्तिभ्यामात्मनिश्चये । "अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् । आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः । इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च । जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् । असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु । नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु । मयि चानन्ययोगेन भक्तिरव्यभिचारिणी । विविक्तदेशसेवित्वमरतिर्जनसंसदि । अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् । एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा" इति गीतोक्तार्थेषु १५ज्ञानसाधनेषु । तच्च सात्त्विकादिभेदात् त्रिविधम् । यथा "सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्" । (सात्त्विकं सर्वसंसारोच्छित्तिकारणम्) । "पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् । वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् । यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम् । अतत्त्वार्थवदल्पञ्च तत् तामसमुदाहृतम्" । (राजसं तामसञ्च संसारकारणम्) । आत्मनः श्रवणमननाभ्यां परिनिष्पन्ने प्रमाणजन्यचेतोवृत्त्यभिव्यक्तसच्चिद्रूपे १६परमात्मज्ञानसाधनशास्त्रादात्मतत्त्वावगमे आत्मसाक्षात्कारे "लोकवासनया जन्तोः शास्त्रवासनयापि च । देहवासनया ज्ञानं यथावन्नैव जायते । ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्म्मणः" "यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि" इति ब्रह्मसाक्षात्काररूपज्ञानहेतुरुक्तः । १७साङ्गवेदतदर्थविषयेऽवबोधे । महावाक्यजन्याखण्डाकारायां १८बुद्धिवृत्तौ १९स्वस्वरूपस्फुरणे । सांख्यमते गुणपुरुषान्यताख्यातिरूपे २०अध्यवसाये । २१वेदे २२शास्त्रादौ च । ज्ञायतेऽनेन । ज्ञा-करणे ल्युट् । तत्र प्रत्यक्षज्ञानोत्पत्तिप्रकारो मतभेदेन निरूप्यते । तत्र नैयायिकैः "आत्मा मनसा युज्यते मन इन्द्रियेण इन्द्रियं विषयेण तस्मादध्यक्षम्" इत्युक्तदिशा प्रत्यक्षं जायते । व्याप्तिज्ञानपरामर्शोत्तरमनुमितिर्जायते । वृत्तिज्ञानसहकृतपदज्ञानजन्यपदार्थोपस्थितौ शाब्दबोधो जायते । गवादौ गोसादृश्यज्ञानेन गोसदृशो गवय इत्यादिना अतिदिष्टवाक्यार्थस्य स्मृतौ गवयो गवयवाच्य इत्यादि रीत्या उपमितिज्ञानं जायते इत्यङ्गीकृतम् । केचित् बौद्धभेदाः बाह्यार्थाभावेन बुद्धेरेव तत्तदर्थाकारतयावभास इत्यङ्गीचक्रुः" यथोक्तं सर्वद० सं०

"बाह्यं ग्राह्यं नोपपद्यत एव विकल्पानुपपत्तेः । अर्थो ज्ञानग्राह्यो भावादुत्पन्नो भवति अनुत्पन्नो वा, न पूर्वः उत्पन्नस्य स्थित्यभावात् नापरः अनुत्पन्नस्यासत्त्वात् । अथ मन्येथाः अतीत एवार्थो ज्ञानग्राह्यः तज्जनकत्वादिति तदपि बालभाषितं वर्त्तमानतावभासविरोधात् इन्द्रियादेरपि ग्राह्यत्वप्रसङ्गाच्च । किञ्च ग्राह्यः किं परमाणुरूपोऽर्थः अवयविरूपो वा । न चरमः कृत्स्नैकदेशविकल्पादिना तन्निराकरणात् । न प्रथमः अतीन्द्रियत्वात् षट्केन युगपद्योगस्य बाधकत्वाच्च । यथोक्तम् "षट्केन युगपद्योगात् परमाणोः षडंशता । तेषामप्येकदेशत्वे पिण्डः स्यादणुमात्रकः" इति । तस्मात् स्वव्यतिरिक्तग्राह्यविरहात् तदात्मिका बुद्धिः स्वयमेव स्वात्मरूपप्रकाशिका प्रकाशवदिति सिद्धम् । तदुक्तम् "नान्योऽनुभाव्यो बुद्ध्यास्ति तस्या नानुभवोऽपरः । ग्राह्यग्राहकवैधुर्य्यात् स्वयं सैव प्रकाशते" इति । ग्राह्यग्राहकयोरभेदश्चानुमातव्यः यद्वेद्यते येन वेदनेन, तत्ततो न भिद्यते यथा ज्ञानेनात्मा, वेद्यन्ते चैते नीलादयः । भेदे हि सत्यधुना अनेनार्थस्य सम्बन्धित्वं न स्यात् तादात्म्यस्य नियमहेतोरभावात् तदुत्पत्तेरनियामकत्वात् यश्चायं ग्राह्यग्राहकसंवित्तीनां पृथगवभासः स एकस्मिंश्चन्द्रमसि द्वित्वावभास इव भ्रमः । अत्राप्यनादिरविच्छिन्नप्रवाहा भेदवासनैव निमित्तम् । यथोक्तम् "सहोपलम्भनियमादभेदो नीलतद्धियोः । भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वय" इति । "अविभागोऽपि बुद्ध्यात्मा विपर्य्यासितदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते" न च रसवीर्य्यविपाकादिसमानमाशामोदकोपार्जितमोदकानां स्यादिति वेदितव्यं वस्तुतो वेद्यवेदकाकारविधुराया अपि बुद्धेर्व्यवहर्तृपरिज्ञानानुरोधेन विभिन्नग्राह्यग्राहकाकाररूपवत्तया तिमिराद्युपहताक्ष्णां केशेन्द्रनाडीज्ञानाभेदवदनाद्युपप्लववासनासामर्थ्याद्द्वयस्योपपत्तेः पर्य्यनुयोगायोगात् । यथोक्तम् "अवेद्यवेदकाकारा यथा भ्रान्तैर्निरीक्ष्यते । विभक्तलक्षणग्राह्य-

ग्राहकाकारविप्लवा । तथा क्षतव्ययस्येयं केशादिज्ञानभेदवत् । यदा तदा न सञ्चोद्या ग्राह्यग्राहकलक्षणेति"। तस्माद्बुद्धिरेवानादिवासनावशादनेकाकारावभासत इति" सिद्धम् ।"

तदेतन्मतं बौद्धविशेषैर्निराकृतं तदपि तत्रैवोक्तं यथा । "अन्ये तु मन्यन्ते यथोक्तं बाह्यं वस्तुजातं नास्तीति तदयुक्तं प्रमाणाभावात् । न च सहोपलम्भनियमः प्रमाणमिति वक्तव्यं वेद्यवेदकयोरभेदसाधकत्वेनाभिमतस्य तस्याप्रयोजकत्वेन सन्दिग्धविपक्षव्यावृत्तिकत्वात् । ननु भेदे सहोपलम्भनियमात्मकं साधनं न स्यादिति चेन्न ज्ञानस्यान्तर्मुखतया भेदेन प्रतिभासमानतया एकदेशत्वैककालत्वलक्षणसहत्वनियमासम्भवाच्च नीलाद्यर्थस्य ज्ञानाकारत्वे अहमिति प्रतिभासः स्यात् नत्विदमिति प्रतिपत्तिः प्रत्ययादव्यतिरेकात् । अथोच्यते ज्ञानस्वरूपोऽपि नीलाकारो भ्रान्त्या बहिर्वद्भेदेन प्रतिभासत इति न च तत्राहमुल्लेख इति । यथोक्तम्"परिच्छेदान्तराद्योऽयं भागो बहिरिव स्थितः । ज्ञानस्याभेदिनो भेदप्रतिभासोऽप्युपप्लवः"इति "यदन्तर्ज्ञेयतत्त्वं तद्बहिर्वदवभासत"इति च । तदयुक्तं बाह्यार्थाभावे तदुत्पत्तिरहिततया बहिर्वदित्युपमानोक्तेरयुक्तेः न हि वसुमित्रो बन्ध्यापुत्रवदवभासत इति प्रेक्षावानाचक्षीत । भेदप्रतिभासस्य भ्रान्तत्वे अभेदप्रतिभासस्य प्रामाण्यं, तत्प्रामाण्ये च भेदप्रतिभासस्य भ्रान्तत्वमिति परस्पराश्रयप्रसङ्गाच्च । अविसंवादान्नीलतादिकमेव संविदाना बाह्यमेवोपाददते जगत्युपेक्षन्तेऽवान्तरमिति व्यवस्थादर्शनाच्च । एवञ्चायमभेदबाधको हेतुर्गोमयपायसीयन्यायवदाभासतां भजेत् अतोबहिर्वदिति वदता बाह्यं ग्राह्यमेवेति भावनीयमिति भवदीय एव बाणो भवन्तं प्रहरेत् ।"

"ननु ज्ञानाभिन्नकालस्यार्थस्य बाह्यत्वमनुपपन्नमिति चेत् तदनुपपन्नम् इन्द्रियसन्निकृष्टस्य विषयस्योत्पाद्ये ज्ञाने स्वाकारसमर्पकतया समर्पितेन चाकारेण तस्यार्थस्यानुमेयतोपपत्तेः अतएव पर्य्यनुयोगपरिहारौ समग्राहिषाताम् "भिन्नकालं कथं ग्राह्यमिति चेत् ग्राह्यतां विदुः । हेतुत्वमेव च व्यक्तेर्ज्ञानाकारार्पणक्षममिति" । तथा च यथा पुष्ट्या भोजनमनुमीयते यथा च भाषया देशः, यथा वा सम्भ्रमेण स्नेहः,तथा ज्ञानाकारेण ज्ञेयमनुमेयम् । तदुक्तम्· "अर्थेन घटयत्येनां न हि मुक्त्वार्थरूपताम् । तस्मात् प्रमेयाधिगतेः प्रमाणं मेयरूपतेति" । न हि वित्तिसत्तैव तद्वेदना युक्ता तस्याः सर्वत्राविशेषात् तान्तु सारूप्यमाविशत् सरूपयित्तं घटयेदिति च । तथाच बाह्यार्थसद्भावे प्रयोगः ये यस्मिन् सत्यपि कादाचित्काः ते सर्वे तदतिरिक्तसापेक्षाः यथा अविवक्षति, अजिगमिषति मयि वचनगमनप्रतिभासा विवक्षुजिगमिषुपुरुषान्तरसन्तानसापेक्षाः तथा च विवादाध्यासिताः प्रवृत्तिप्रत्ययाः सत्यप्यालयविज्ञाने कदाचिदेव नीलाद्युल्लेखना इति । तत्रालयविज्ञानं नामाहमास्पदं विज्ञानं नीलाद्युल्लेखि च प्रवृत्तिविज्ञानम् । यथोक्तम् "तत् स्यादालयविज्ञानं यद्भवेदहमास्पदम् । तत् स्यात् प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेदिति"। तस्मादालयविज्ञानसन्तानातिरिक्तः कादाचित्कः प्रवृत्तिविज्ञानहेतुर्बाह्योऽर्थो ग्राह्य एव न वासनापरिपाकप्रत्ययः कादाचित्कत्वात् कदाचिदुत्पाद इति वेदितव्यम् ।"

वेदान्तिमते । "बुद्धिवृत्तिचिदाभासौ द्वावेतौ व्याप्नुतो घटम् । तत्राज्ञानं धिया नश्येदाभासात्तु घटः स्फुरेत्" इत्युक्तरीत्या प्रत्यक्षस्थले इन्द्रियादिप्रणाल्या अन्तःकरणस्य विषयदेशगत्या तदाकारेण परिणामरूपवृत्तौ सत्यां विषयगताज्ञाननाशे अन्तःकरणवृत्त्यवच्छिन्नचैतन्येन विषयस्फुरणरूपं पौरुषेयज्ञानं जायते । वृत्तिरूपज्ञानन्तु मनोधर्म इति भेदः । यथोक्तं वेदा० प० १परिच्छेदे

"यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा घटादिविषयाकारेण परिणमते । स एव परिणामो वृत्तिरित्युच्यते । अनुमित्यादिस्थले तु अन्तःकरणस्य न वह्न्यादिदेशगमनं वह्न्यादेश्चक्षुराद्यसन्निकर्षात् तथा चायं घट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे समवस्थानात् तदुभयावच्छिन्नं चैतन्यमेकमेव विभाजकयोरप्यन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थितत्वेन भेदाजनकत्वात् ।" प्रत्यक्षेऽन्तःकरणवृत्तेः फलभेदस्तत्रैव७परि०दर्शितो यथा

"सा चान्तःकरणवृत्तिरावरणाभिभवार्थेत्येकं मतम् । तथाहि अविद्योपहितचैतन्यस्य जीवत्वपक्षे घटाद्यधिष्ठानचैतन्यस्य जीवरूपतया जीवस्य सर्वदा घटादिभानप्रसक्तौ घटाद्यवच्छिन्नचैतन्यावरकमज्ञानं मूलाविद्यापरतन्त्रमवस्थापदवाच्यमभ्युपगन्तव्यम् । एवं सति न सर्वदा घटादेर्भानप्रसङ्गः अनावृतचैतन्यसम्बन्धस्यैव भानप्रयोजकत्वात् । तस्य चावरणस्य सदातनत्वे कदाचिदपि

घटभानं न स्यादिति तद्भङ्गे वक्तव्ये तद्भङ्गजनकं न चैतन्यमात्रं तद्भासकस्य तदनिवर्त्तकत्वात् नापि वृत्त्युपहितचैतन्यं परोक्षस्थलेऽपि तन्निवृत्त्यापत्तेरिति परोक्षव्यावृत्तवृत्तिविशेषस्य तदुपहितचैतन्यस्य वा आवरणभञ्जकत्वमित्यावरणाभिभवार्था वृत्तिरुच्यते। सम्बन्धार्था वृत्तिरित्यपरं मतम्। तत्राविद्योपाधिकोजीवोऽपरिच्छिन्नः स च घटादिप्रदेशे विद्यमानोऽपि घटाद्याकारापरोक्षवृत्तिविरहदशायां न घटादिकमवभासयति घटादिना समं सम्बन्धाभावात् तत्तदाकारवृत्तिदशायां तु भासयति तदा सम्बन्धसत्त्वात्। ननु अविद्योपाधिकस्य जीवस्यापरिच्छिन्नस्य स्वतएव समस्तवस्तुसम्बद्धस्य वृत्तिविरहदशायां सम्बन्धाभावाभिधानमसङ्गतम्, असङ्गतत्वश्रुत्या सम्बन्धाभावाभिधाने च वृत्त्यनन्तरमपि सम्बन्धो न स्यादिति चेत् उच्यते न हि वृत्तिविरहदशायां जीवस्य घटादिना सह सम्बन्धसामान्यं निषेधामः किन्तर्हि घटादिभानप्रयोजकं सम्बन्धविशेषम्। स च सम्बन्धविशेषो विषयस्य जीवचैतन्यस्य च व्यङ्ग्यव्यञ्जकतालक्षणः कादाचित्कस्तत्तदाकारवृत्तिनिबन्धनः। तथा हि तैजसमन्तःकरणं स्वच्छद्रव्यत्वात् स्वतएव जीवचैतन्याभिव्यञ्जनसमर्थं, घटादिकन्तु न तथा अस्वच्छद्रव्यत्वात्। स्वाकारवृत्तिसंयोगदशायान्तु वृत्त्यभिभूतजाड्यधर्मकतया वृत्त्युत्पादितचैतन्याभिव्यञ्जनयोग्यताश्रयतया च वृत्त्युदयानन्तरं चैतन्यमभिव्यनक्ति। तदुक्तं विवरणे "अन्तःकरणं हि स्वस्मिन्निव स्वसंसर्गिण्यपि घटादौ चैतन्याभिव्यक्तियोग्यतामापादयतीति"। दृष्टञ्चास्वच्छद्रव्यस्यापि स्वच्छद्रव्यसम्बन्धदशायां प्रतिविम्बग्राहित्वं यथा कुड्यादेर्जलादिसंयोगदशायां मुखादिप्रतिविम्बग्राहिता। घटादेरभिव्यञ्जकत्वञ्च तत्प्रतिविम्बग्राहित्वं चैतन्यस्याभिव्यक्तत्वञ्च तत्र प्रतिविम्बितत्वम्। एवंविधाभिव्यञ्जकत्वसिद्ध्यर्थमेतद्वृत्तेरपरोक्षस्थले वहिर्निर्गमनाङ्गीकारः। परोक्षस्थले तु वह्न्यादेर्वृत्तिसंयोगाभावेन चैतन्यानभिव्यञ्जकतया नापरोक्षत्वम्।"

सांख्यादिमते अर्थाकारेण परिणताया बुद्धिवृत्तेश्चेतने प्रतिविम्बनात् विषयप्रकाशरूपं ज्ञानम्। तत्र पौरुषेयबोधे वृत्तिः करणं, वृत्तिरूपज्ञाने च इन्द्रियादिकरणमिति भेदः। यथोक्तं सा०प्र०सू० भाष्ययोः। "द्वयोरेकतरस्य वाप्यसन्निकृष्टार्थपरिच्छित्तिः प्रमा तत्साधकतमं यत् तत् त्रिविधं प्रमाणम्।" सू० "असन्निकृष्टः प्रमातर्य्यनारूढोऽनधिगत इति यावत्। एवंभूतस्यार्थस्य वस्तुनः परिच्छित्तिरवधारणं प्रमा सा च द्वयोर्बुद्धिपुरुषयोरुभयोरेव धर्मो भवतु। किं वैकतरमात्रस्योभयथैव तस्याः प्रमाया यत् साधकतमं फलायोगव्यवच्छिन्नं कारणं तत्प्रमाणं तच्च त्रिविधं वक्ष्यमाणरूपेणेत्यर्थः। स्मृतिव्यावर्त्तनायानधिगतेति। भ्रमव्यावर्त्तनाय वस्त्विति। संशयव्यावर्त्तनाय त्ववधारणमिति। अत्र यदि प्रमारूपं फलं पुरुषनिष्ठमात्रमुच्यते तदा बुद्धिवृत्तिरेव प्रमाणम्। यदि च बुद्धिनिष्ठमात्रमुच्यते तदा तूक्तेन्द्रियसन्निकर्षादिरेव प्रमाणम्। पुरुषस्तु प्रमासाक्ष्येव न प्रमातेति। यदि च पौरुषेयबोधो बुद्धिवृत्तिश्चोभयमपि प्रमोच्यते तदा तूक्तमुभयमेव प्रमाभेदेन प्रमाणं भवति। चक्षुरादिषु तु प्रमाणव्यवहारः परम्परयैव सर्वथेति भावः। पातञ्जलभाष्ये तु व्यासदेवैः पुरुषनिष्ठो बोधः प्रमेत्युक्तः पुरुषार्थमेव करणानां प्रवृत्त्या फलस्य पुरुषनिष्ठताया एवौचित्यात्। अतोऽत्रापि स एव मुख्यः सिद्धान्तः। न च पुरुषबोधस्वरूपस्य नित्यतया कथं फलत्वमिति वाच्यम् केवलस्य नित्यत्वेऽप्यर्थोपरागस्यैव फलत्वादिति। अत्रेयं प्रक्रिया। इन्द्रियप्रणालिकयार्थसन्निकर्षेण लिङ्गज्ञानादिना वादौ बुद्धेरर्थाकारा वृत्तिर्जायते तत्र चेन्द्रियसन्निकर्षजा प्रत्यक्षा वृत्तिरिन्द्रियविशिष्टबुद्ध्याश्रिता नयनादिगतपित्तादिदोषैः पित्ताद्याकारवृत्त्युदयादिति विशेषः। सा च वृत्तिरर्थोपरक्ता प्रतिविम्बरूपेण पुरुषारूढा सती भासते पुरुषस्यापरिणामितया बुद्धिवत् स्वतोऽर्थाकारत्वासम्भवात्। अर्थाकारताया एव चार्थग्रहणत्वात् अन्यस्य दुर्वचत्वादिति। तदेतद्वक्ष्यति "कुसुमवच्च मणिः" जपास्फटिकयोरिव नोपरागः किन्त्वभिमान इति। योगसूत्रं च "वृत्तिसारूप्यमितरत्रेति"। स्मृतिरपि। "तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः। इमास्ताः प्रतिविम्बन्ति सरसीव तटद्रुमाः" इति। योगभाष्यञ्च "बुद्धेः प्रतिसंवेदी पुरुष" इति प्रतिध्वनिवत् प्रतिसंवेदः संवेदनप्रतिविम्बस्तस्याश्रय इत्यर्थः। एतेन पुरुषाणां कूटस्थविभुचिद्रूपत्वेऽपि न सर्वदा सर्वाभासनप्रसङ्गः असङ्गतस्य स्वतोऽर्थाकारत्वाभावात्। अर्थाकारतां विना च संयोगमात्रेणार्थग्रहणस्यातीन्द्रियादिस्थले बुद्धावदृष्टत्वादिति। पुरुषे च स्वस्वबुद्धिवृत्तीनामेव प्रतिविम्बार्पणसामर्थ्यमिति फलबलात् कल्प्यते। यथा रूपवतामेव जलादिषु प्रतिविम्बनसामर्थ्यं नेतरस्येति।

रूपवत्त्वं च न सामान्यतः प्रतिबिम्बप्रयोजकं शब्दस्यापि प्रतिध्वनिरूपप्रतिबिम्बदर्शनात् । न च शब्दजन्यं शब्दान्तरमेव प्रतिध्वनिरिति वाच्यं स्फटिकलौहित्यादेरपि जपासन्निकर्षजन्यतापत्त्या प्रतिबिम्बमिथ्यात्वसिद्धान्तक्षतेरिति । प्रतिबिम्बश्च बुद्धेरेव परिणामविशेषो बिम्बाकारो जलादिगत इति मन्तव्यम् । केचित् तु वृत्तौ प्रतिबिम्बितं सदेव चैतन्यं वृत्तिं प्रकाशयति तथा वृत्तिगतप्रतिबिम्ब एव वृत्तौ चैतन्यविषयता न तु चैतन्ये वृत्तिप्रतिबिम्बोऽस्तीत्याहुः । तदसत् उपदर्शितशास्त्रविरोधेन केवलतर्कस्याप्रयोजकत्वात् विनिगमनाविरहेण वृत्तिचैतन्ययोरन्योन्यविषयताख्यसम्बन्धरूपतयान्योन्यस्मिन्नन्योन्यप्रतिबिम्बसिद्धेश्च । बाह्यस्थलेऽर्थाकारतया एव विषयतारूपत्वं तद्वदाऽन्तरेऽपि तत्तदर्थाकारतया एव विषयतौचित्याच्चेति । ये तु तार्किका ज्ञानस्य विषयतां नेच्छन्ति तन्मते ज्ञानव्यक्तीनामनुगमकधर्माभावेन घटविषयकं पटविषयकं ज्ञानमित्याद्यनुगतव्यवहारानुपपत्तिः । केचित् तु तार्किका अनयैवानुपपत्त्या विषयतामतिरिक्तपदार्थमाहुः । तदप्यसत् अनुभूयमानानामर्थाकारतां विहाय विषयतान्तरकल्पने गौरवादिति । ननु तथापि स्वस्योपाधिवृत्तिरूपैव वृत्तिचैतन्ययोरन्योन्यविषयतास्तु स्वोपाधिवृत्तित्वेनैवानुगमादर्थाकाराख्यप्रतिबिम्बरूपेणेति चेन्न प्रतिबिम्बं विना स्वत्वस्यापि दुर्वचत्वात् । स्वत्वं हि स्वभुक्तवृत्तिवासनावत्त्वम् । भोगश्च ज्ञानम् । तथा च विषयतालक्षणस्य विषयतासम्बन्धघटितत्वेनात्माश्रयः । तस्माच्चैतन्यचैतन्ययोरन्योन्यविषयतारूपोऽन्योन्यस्मिन्नन्योन्यप्रतिबिम्बः सिद्धः । अधिकन्तु योगवार्त्तिके द्रष्टव्यमिति दिक् । अत्रायं प्रमात्रादिविभागः । 'प्रमाता चेतनः शुद्धः प्रमाणं वृत्तिरेव नः । प्रमार्थाकारवृत्तीनां चेतने प्रतिबिम्बनम् । प्रतिबिम्बितवृत्तीनां विषयो मेय उच्यते । साक्षाद्दर्शनरूपं च साक्षित्वं वक्ष्यति स्वयम् । अतः स्यात् कारणाभावाद्दृशेः साक्ष्येव चेतनः । विषयादेः सर्वसाक्षित्वं गौणं लिङ्गाद्यभावतः ।'' ''ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे'' देवीमा० । "कषाये कर्मभिः पक्वे ततो ज्ञानं प्रजायते" वेदा० । २४परब्रह्मणि च ''सत्यं ज्ञानमानन्दं ब्रह्म" श्रुतिः । २५विष्णौ "सर्वज्ञः ज्ञानमुत्तमम्" विष्णुस० ।

ज्ञानकृत त्रि० ज्ञानेन कृतम् । बुद्धिपूर्वकृते तत्र पापस्य बुद्धिपूर्वकृतत्वे विशेषः प्रा० त० उक्तो यथा ''गोवधस्य बुद्धिपूर्वकत्वं तदा भवति यदि गां ज्ञात्वा एनां हन्मीतीच्छया हन्ति तदा कामनाद्वारैव ज्ञानस्य प्रवृत्त्यङ्गत्वात्" ''इत्थञ्च गवयादिभ्रमेण यो गोवधस्तत्र गोवधस्य न ज्ञानकृतत्वम् गोत्वेनाज्ञानात् यदि गोत्वेन ज्ञानवत्यन्योद्देशेन क्षिप्तनाराचादिना गां हन्ति तदापि न ज्ञानकृतत्वं तद्विषयत्वेनेच्छारूपद्वाराभावात्" ।

ज्ञानगम्य पु० ज्ञानेनैव गम्यः न कर्मणा न वा ज्ञानकर्मभ्याम् । ज्ञानमात्रगम्ये परमेश्वरे । '"उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः" विष्णुस० ।

ज्ञानचक्षुस् पु० ज्ञानं ज्ञानसाधनं वेदादिशास्त्रं चक्षुरिवास्य । विदुषि २शास्त्ररूपे शास्त्रावबोधेन सर्वार्थप्रकाशयुक्ते कर्म० । नेत्रे च "सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा" मनुः ।

ज्ञानदग्धदेह पु० ज्ञानेनैव दग्धो देहोऽस्य । चतुर्थाश्रमिणि भिक्षौ तस्य ज्ञानेनैव जीवतोऽपि दग्धदेहत्वात् मृतस्य न दाहान्तरं कार्य्यं यथोक्तं शौनकेन "सर्वसङ्गनिवृत्तस्य ध्यानयोगरतस्य च । न तस्य दहनं कार्य्यं नैव पिण्डोदकक्रिया । निदध्यात् प्रणवेनैव बिले भिक्षोः कलेवरम् । प्रोक्षणं खननञ्चापि सर्वं तेनैव कारयेत्" । [त्रिका० ।

ज्ञानदर्पण पु० ज्ञानं दर्पण इवास्य । पूर्वजिने मञ्जुघोषे

ज्ञानद त्रि० ज्ञानं ददाति दा—क । १गुरौ २उपदेष्टरि च ३सरस्वत्यां स्त्री ।

ज्ञानदातृ त्रि० ज्ञानस्य दाता । उपदेष्टरि गुरौ "पितुर्दश गुणा माता गौरवेणेति निश्चितम् । मातुः शतगुणः पूज्यो ज्ञानदाता गुरुः प्रभो !" तन्त्र० । २ज्ञानस्य दायकमात्रे त्रि० स्त्रियां ङीप् ।

ज्ञाननिष्ठ त्रि० ज्ञाने निष्ठाऽस्य । ज्ञानसाधनयुते तत्त्वविदुषि ।

ज्ञानपति पु० ६त० । ज्ञानस्योपदेष्टृत्वात् स्वामिनि गुरौ २परमेश्वरे च । ततः अश्वपत्या० अपत्यादौ अण् । ज्ञानपत तदपत्ये पुंस्त्री स्त्रियां ङीप् ।

ज्ञानपावन न० ज्ञानमिव पावनम् । तीर्थभेदे ''ततो गच्छेत राजेन्द्र ! ज्ञानपावनमुत्तमम् । अग्निष्टोममवाप्नोति मुनिलोकञ्च गच्छति" भा० व० ८४ अ० ।

ज्ञानमय पु० ज्ञान+मयट् । १परमेश्वरे परब्रह्मणि २शिवे च ।

ज्ञानमुद्रा स्त्री ''तर्ज्जन्यङ्गुष्ठकौ सततावयतो विन्यसेद्धृदि । वामहस्ताम्बुजं वामजानुमूर्द्धनि विन्यसेत् । ज्ञानमुद्रा भवेदेषा रामचन्द्रस्य प्रेयसी" तन्त्रसारोक्ते रामार्चनाङ्गे मुद्राभेदे ।

ज्ञानयज्ञ पु० ज्ञानं यज्ञ इवास्य। तत्त्वज्ञे। "ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति" इति वाक्येन तत्त्वज्ञानस्य यज्ञरूपत्वमुक्तम्। अस्यार्थः। अपरे कर्मयोगिनो विलक्षणा संन्यासिनः ब्रह्म तत्पदार्थः अग्निरिव होमाधारत्वात् तस्मिन् यज्ञं प्रत्यगात्मानं त्वंपदार्थं यज्ञेनात्मनैव उपजुह्वति त्वंपदार्थाभेदेनैव तत्स्वरूपतया पश्यन्तीत्यर्थः। "महापापवतां नृणां ज्ञानयज्ञो न रोचते। प्रत्युत ज्ञानयज्ञे तु प्रद्वेषो जायते स्वतः" शब्दार्थचि० धृतवाक्यम्।

ज्ञानयोग पु० युज्यते ब्रह्मणाऽनेन युज–करणे घञ् ज्ञानमेव योगः। ब्रह्मप्राप्तिसाधने ज्ञानार्थनिष्ठाभेदे। "लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ!। ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्" गीता।

ज्ञानलक्षणा स्त्री ज्ञानं ज्ञानभेदो लक्षणं स्वरूपं यस्याः। न्यायमते अलौकिकप्रत्यक्षसाधने सन्निकर्षभेदे उपनयशब्दे १२१५ पृ० विवृतिः। मथुरानाथेन तु अन्यथैव सामान्यलक्षणाज्ञानलक्षणयोर्भेदो दर्शितः यथा

"न च सामान्यप्रकारकज्ञानस्यैव सामान्यलक्षणात्वे ज्ञानलक्षणासामान्यलक्षणयोः कार्य्यकारणभावे को भेदः इति वाच्यं कारणतावच्छेदकभेदेन कार्य्यतावच्छेदकभेदेन च भेदात्। सामान्यलक्षणायाः कार्य्यकारणभावस्तु तत्तत्सम्बन्धावच्छिन्नघटत्वादिप्रकारिताशालिज्ञानत्वेन, स्वरूपतस्तत्तत्सम्बन्धावच्छिन्नघटत्वादिप्रकारिताकतत्तत्सम्बन्धावच्छिन्नघटत्वाद्याश्रयताशालिमुख्यविशेष्यकप्रत्यक्षत्वेन, यावत्त्वस्य कार्य्यतावच्छेदकावटकत्वेऽपि विनिगमनाविरहेण सकलघटभानम्। समवायसम्बन्धेन घटत्वप्रकारकज्ञानानन्तरं कालिकादिसम्बन्धेन घटत्वादिप्रकारकनिखिलघटविषयकप्रत्यक्षस्य समवायसम्बन्धेन घटत्वप्रकारेण घटत्ववतः कालादेः प्रत्यक्षस्य च वारणाय सम्बन्धान्तर्भावः। घटत्वादिप्रकारकज्ञानं विनापि द्रव्यत्वादिसामान्यलक्षणया जायमाने द्रव्यत्वादिप्रकारकघटादिमुख्यविशेष्यकप्रत्यक्षे व्यभिचारवारणाय कार्य्यतावच्छेदके घटत्वादिप्रकारिताकेति। प्रकारित्वञ्चालौकिकं ग्राह्यं तेन घटत्वादिप्रकारकज्ञानं विनापि द्रव्यत्वादिविशिष्टबुद्ध्यात्मकघटत्वादिनिर्विकल्पकोत्तरं द्रव्यत्वसामान्यलक्षणया जायमाने यावद्घटविशेष्यकप्रत्यक्षेऽलौकिकसन्निकर्षमर्य्यादया घटत्वप्रकारके न व्यभिचारः। न च तथापि कालिकादिसम्बन्धेन स्वरूपतो घटत्वादिप्रकारकबुद्ध्यात्मकगवादिविशेष्यकसमवायसंसर्गकद्रव्यत्वप्रकारकस्मरणोत्तरं द्रव्यत्वसामान्यलक्षणया जायमाने यावद्घटमुख्यविशेष्यकप्रत्यक्षे उपनयमर्य्यादया समवायसम्बन्धेन स्वरूपतो घटत्वप्रकारके व्यभिचार इति वाच्यम्। यथोक्तकार्य्यकारणभावस्यैव बाधकत्वेन तत्र समवायसम्बन्धेन घटत्वस्याप्रकारत्वात्। घटत्वप्रकारकज्ञानं विनाऽपि जातित्वरूपेण गोत्वादिजात्यन्तरप्रकारकज्ञानाद् जायमाने जातिस्वरूपेण घटत्वादिनिखिलजातिप्रकारकनिखिलजात्याश्रयप्रत्यक्षे व्यभिचारवारणाय स्वरूपत इति घटत्वादिप्रकारिताविशेषणं, यथोक्तकार्यकारणभावस्यैव बाधकत्वेन तत्र कथञ्चिदपि स्वरूपतो घटत्वादेरप्रकारत्वात्। कालिकसम्बन्धेन स्वरूपतो घटत्वादिप्रकारकस्मरणादितो जायमाने विशेष्ये विशेषणमिति रीत्या समवायसम्बन्धेन घटादिप्रकारकघटवदित्याद्युपनीतभाने व्यभिचारवारणाय मुख्यविशेष्यत्वप्रवेशः। उपनीतभाने च घटो न मुख्यविशेष्यः बहिरिन्द्रियस्थले उपनीतं विशेषणतया भासते इति नियमात्। मुख्यविशेष्यत्वमप्यलौकिकं ग्राह्यं तेन कालिकसम्बन्धेन स्वरूपतो घटत्वादिस्मरणलौकिकसन्निकर्षाभ्यां जायमाने लौकिकालौकिकोभयघटत्वप्रकारिताशाल्ययं घट इति घटमुख्यविशेष्यकलौकिकप्रत्यक्षे न व्यभिचारः। अथ तथापि कालिकसम्बन्धेन स्वरूपतो घटत्वप्रकारकस्मरणाज्जायमाने समवायसम्बन्धेन घटत्वप्रकारकमुख्यविशेष्यकमानसोपनीतभाने व्यभिचारो मानसोपनीतं विशेषणतयैव भासत इति नियमाभावात् तत्र कालिकसम्बन्धेन घटत्वप्रकारेण प्रत्यक्षं न तु समवायसम्बन्धेन घटत्वप्रकारकमित्युक्तावपि घटवदिति घटादिस्मरणोत्तरं जायमाने परम्परासम्बन्धेन घटत्वप्रकारकमानसोपनीतभाने व्यभिचारो दुर्वारः तदनभ्युपगमे तादृशस्मरणोत्तरं निखिलघटाश्रयसाक्षात्कारानुपपत्तेः द्रव्यत्वप्रकारकज्ञानस्याऽप्रत्यासत्तित्वात् इति चेन्न लाघवात् यथोक्तरूपेण कार्य्यकारणभावकल्पने यथोक्तमानसे घटादिर्न मुख्यविशेष्यः किन्तु चक्रव्यूहवत् घटत्वपुटितो भवन्नेव भासत इत्येव कल्प्यते यथोक्तकार्य्यकारणभावस्यैव बाधकत्वात् तत्तदुपनीतभानान्यत्वप्रवेशे गौरवात् सर्वत्रैव मानसोपनीतभाने उपनीतं अवश्यं मुख्यविशेष्यतया भासते इति नियमाभावात्। असति बाधक एव मानसोपनीतस्य प्रकारत्वविशेष्यत्वलक्षणद्विविधविषयत्वाभ्युपगमात्। एवं खण्डशो दण्डपुरुषोभयविषयकसमूहालम्बनस्मरणानन्तरं जा-

यमाने दण्डप्रकारकदण्डाश्रयप्रत्यक्षेऽपि पुरुषो न दण्डांशे मुख्यविशेष्यतया भासते अपि तु चक्षुर्व्यूहवत् दण्डपुटितः पुरुषः पुरुषपुटितश्च दण्डो भासते इति कल्प्यते। न च तथापि योगजधर्माधीनविशिष्टज्ञानं प्रति विशेषणज्ञानस्य हेतुत्वनये सामान्यज्ञानं विनाऽपि जायमाने सामान्यप्रकारकसामान्याश्रयमुख्यविशेष्यकप्रत्यक्षे व्यभिचारः। योगजविशिष्टज्ञानं प्रति विशेषणज्ञानस्य हेतुत्वनयेऽपि योगजधर्मेण सामान्यतदाश्रये उभयविषयकनिर्विकल्पकं जनयित्वा जनिते सामान्यप्रकारकसामान्याश्रयमुख्यविशेष्यकप्रत्यक्षे व्यभिचार इति वाच्यं योगजधर्मजन्यतावच्छेदकतज्जात्यवच्छिन्नान्यत्वेन प्रत्यक्षविशेषणात्। तादृशयोगजज्ञाने सामान्याश्रयमुख्यविशेष्यतया भाने मानाभावाच्च। अपि च चक्षुर्व्यूहवत् स्वप्रकारीभूतसामान्ये प्रकारीभूयैव भासते लाघवात्तथैव कल्पनात्। अत एव कालिकादिसम्बन्धेन स्वरूपतो घटत्वस्मरणानन्तरं विशेष्ये विशेषणमिति रीत्या कालिकादिसम्बन्धेनैव घटत्वप्रकारकं घटवदित्याकारकोपनीतभानं जायते न तु समवायसम्बन्धेन घटत्वप्रकारकमित्युक्तावेव व्यभिचारवारणसम्भवात् किं जात्यादिसामान्यलक्षणायाः कार्यतावच्छेदके स्वरूपतः प्रकारताघटितमुख्यविशेष्यत्वप्रवेशेन। न च तथाप्यत्र घटत्वमिति घटत्वविशेष्यकस्मरणोत्तरं जायमाने विशेष्ये विशेषणमिति रीत्या घटवदिदमित्याद्युपनीतभाने व्यभिचारवारणाय तदवश्यं निवेशनीयमिति वाच्यं स्वरूपतो घटत्वविशिष्टबुद्धिं प्रति स्वरूपतो विशेषणीभूतघटत्वविषयकज्ञानस्य हेतुतया तादृशस्मरणोत्तरं तादृशोपनीतभानासम्भवात् घटत्वत्वघटकतयैव स्वरूपतो घटत्वज्ञानाभ्युपगमेन व्यभिचारस्यापि विरहादित्यस्मत्कृतपूर्वपक्षोऽपि निरस्तः। घटवदिति स्मरणोत्तरं जायमाने परम्परासम्बन्धेन घटत्वप्रकारकमानसोपनीतभाने यथोक्तरीत्या योगजधर्मजन्ये घटत्वप्रकारकघटविशेष्यकप्रत्यक्षे च व्यभिचारवारणाय तत्प्रवेशस्यावश्यकत्वात्। एतेनाभावत्वाद्यखण्डोपाधिरूपसामान्यलक्षणाया अपि कार्यकारणभावो व्याख्यातः जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानस्य न प्रत्यासत्तिरिति सामान्यपदार्थनिर्वचनावसर एव प्रतिपादितं नन्वेवंरूपेण कार्यकारणभावे जातित्वरूपेणैकजातिमात्रप्रकारकज्ञानानन्तरं जातित्वावच्छिन्नजातिप्रकारकनिखिलजात्या एव प्रत्यक्षं कथं स्याज्जात्यन्तराश्रयस्य ज्ञातप्रकारीभूतजातिव्यक्तेराश्रयत्वाभावात् स्वरूपतो घटत्वादिप्रकारकत्वस्य कार्यतावच्छेदकत्वाच्चेति चेन्न जातित्वरूपेण जातिप्रकारकलौकिकप्रत्यक्षदशायामनन्तो निर्धर्मितावच्छेदकस्यापि परम्परासम्बन्धेन जातित्वघटकनित्यत्वादिघटकीभूताभावत्वाद्यखण्डोपाधिप्रकारकज्ञानस्यावश्यकत्वात् तत एव सामान्यज्ञानात् जातित्वावच्छिन्नजातिमत्त्वरूपेण निखिलजात्याश्रयस्य साक्षात्कारः जात्यन्तराश्रयस्यापि परम्परासम्बन्धेन तदाश्रयत्वात्। यत्र जातित्वरूपेण यत्किञ्चित्जातिप्रकारकमानसत्वादिधीस्तत्रापि मध्ये परम्परासम्बन्धेन ध्वंसत्वादिप्रकारकमानसोपनीतभानानन्तरमेव जातिमतः सर्वस्य प्रत्यक्षाभ्युपगमात् क्षणविलम्बे क्षतिविरहात्। न च परम्परासम्बन्धेन ध्वंसत्वादिज्ञानस्यैव तत्प्रत्यासत्तित्वे ध्वंसत्ववदित्येव तज्ज्ञानं स्यात् न तु जातिमदिति सामान्यप्रकारज्ञानस्य मुख्यविशेष्ये सामान्यप्रकारकज्ञानकत्वनियमादिति वाच्यं विशेषणज्ञानार्थं जातित्वघटकसामान्यलक्षणायाः मध्ये सकलजातिविशेष्यकज्ञानस्यावश्यकत्वात् ज्ञानलक्षणयैव जातिमदिति फलस्यापि सम्भवात् द्विविधविषयस्यैवेष्टत्वात्। एवं तद्व्यक्तित्वादिरूपेण घटत्वादिज्ञानानन्तरं जायमाने तत्तद्व्यक्तित्वरूपेण घटत्वादिप्रकारकतदाश्रयप्रत्यक्षेऽपि परम्परासम्बन्धेन तद्व्यक्तित्वप्रकारकज्ञानमेव प्रत्यासत्तिरतो न घटत्वादिसामान्यलक्षणायाः कार्यदिशि तदसंग्रहो दोषाय इति भट्टाचार्यानुयायिनः”।

“ज्ञानलक्षणायाः कारणतावच्छेदकन्तु सामान्यतः संसर्गावच्छिन्नघटत्वादिविषयताशालिज्ञानत्वं घटत्वादिप्रकारकज्ञानादिव घटत्वादिविषयकज्ञानादपि घटत्वादिप्रकारकोपनीतभानोदयात्। विनश्यदवस्थलौकिकसन्निकर्षजन्यघटघटत्वादिनिर्विकल्पकानन्तरमपि घटत्वादिप्रकारकप्रत्यक्षापत्तिवारणाय संसर्गावच्छिन्नेति विषयताविशेषणम्। केचित्तु ज्ञानलक्षणायाः सप्रकारकघटघटत्वादिज्ञानत्वं कारणतावच्छेदकं न चैवं विनश्यदवस्थलौकिकसन्निकर्षजन्यद्रव्यत्वादिविशिष्टबुद्ध्यात्मकघटत्वादिनिर्विकल्पकादपि प्रत्यक्षापत्तिरिति वाच्यम् इष्टत्वात् सर्वांशे निर्विकल्पकस्यैव प्रत्यासत्तित्वानभ्युपगमादित्याहुस्तदसत् तथापि सर्वांशे निर्विकल्पकादपि इष्टापत्तेः सुकरतया कारणतावच्छेदके सप्रकारकत्वस्य उपादानस्य वैयर्थ्यात्। सविशेष्यकत्वसंसर्गाकविषयतताशालित्वमादाय विनिगमनाविरहेण कार्यकारणभावद्वयापत्तेः। ज्ञानलक्षणायाः कार्यतावच्छेद-

ननु घटत्वादिप्रकारकप्रत्यक्षत्वं घटत्वादिज्ञानं विनापि जायमाने सामान्यलक्षणाजन्यघटादिमुख्यविशेष्यकप्रत्यक्षे व्यभिचारवारणाय विषयत्वमपहाय प्रकारिताप्रवेशः। प्रकारिता चालौकिकी ग्राह्या तेन निर्विकल्पकजन्यप्राथमिकतद्विशिष्टलौकिकप्रत्यक्षे न व्यभिचारः। न चैवं ज्ञानलक्षणासन्निकर्षो लौकिकसन्निकर्षद्वयमेव यत्र वर्त्तते तत्र सौरभ ज्ञानं स्यादिति वाच्यं तत्र लौकिकालौकिकोभयतत्प्रकारिताकज्ञानस्यैव उत्पत्तेः विषयतायाः साङ्कर्य्यस्यादोषत्वात्। न च तत्प्रकारकज्ञानं विनापि जायमाने योगजधर्मजतत्प्रकारकप्रत्यक्षे व्यभिचार इति वाच्यं योगजधर्मजन्यतदवच्छेदकसज्जात्यवच्छिन्नान्यत्वेन प्रत्यक्षविशेषणात् तत्प्रकारकज्ञानं विना योगजधर्मेणापि तत्प्रकारकप्रत्यक्षजननात् योगजधर्मस्य निर्विकल्पकाजनकत्वात्। न च चक्षुःसंयोगजन्यनिर्विकल्पकसहकारेण योगजधर्मजनिते तत्प्रकारकप्रत्यक्षे व्यभिचार इति वाच्यम् तत्र निर्विकल्पकजनकीभूतचक्षुःसंयोगादिसत्त्वे तत्प्रकारकलौकिकप्रत्यक्षस्यैव उत्पत्तेः अलौकिकप्रत्यक्षजनकयोगजधर्मसत्त्वेऽपि यथोक्तकार्य्यकारणभावस्यैव बाधकत्वेनालौकिकप्रत्यक्षस्यानुत्पत्तेः। न चैवं निर्विकल्पकोत्पत्तिकाले चक्षुःसंयोगादिनाशे तन्निर्विकल्पकसहकारेण योगजधर्म्मात्तत्प्रकारकसाक्षात्कारो न स्यादिति वाच्यम् इष्टापत्तेः। न चैवं तत्प्रकारकप्रत्यक्ष एव तज्ज्ञानस्य हेतुतया इदं रजतमिति शुक्तिविशेष्यकमानसभ्रमे शुक्तिज्ञानस्याहेतुतया शुक्तिज्ञानं विनापि तादृशभ्रमापत्तिरिति वाच्यं इदं रजतमिति शुक्तिविशेष्यकमानसभ्रमस्यापि शुक्तिज्ञानात्मकशुक्तिविशिष्टधीकारणसत्त्वेन यत्र कुत्रचिदपि शुक्तिप्रकारकत्वनियमात्। शुक्तिज्ञानविरहस्थले शुक्तिप्रकारकज्ञानसामान्यकारणविरहादेव तदभावात् विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः फलोपधायकत्वात्। न चेदं रजतमिति शुक्तिविशेष्यकमानसभ्रमस्य न शुक्तिप्रकारकत्वनियमः शुक्तिप्रकारकज्ञानप्रतिबन्धकदोषसत्त्वे तत्र तस्याः योगाप्रकारत्वादिति वाच्यं शुक्तिमुख्यविशेष्यकतादृशमानसभ्रमस्थले तादृशदोषे मानाभावात् लाघवाद्यथोक्तरूपेण ज्ञानलक्षणायाः कार्य्यकारणभावकल्पने फलबलेन तथैव कल्पनात्। न चैवं मानसोपनीतभाने उपनीतस्य मुख्यविशेष्यतया भाने मानाभावः। मुख्यविशेष्यकत्वस्य कार्य्यतानवच्छेदकतया सामग्र्यास्तत मानसत्वासम्भवात् इति वाच्यं मुख्यविशेष्यत्वस्य कारणानियम्यतया बाधकासत्त्व एव मुख्यविशेष्यतया भानसम्भवात्, न चैवं मानसोपनीतभानवत् बहिरिन्द्रियजोपनीतभानेऽप्युपनीतस्य प्रकारत्वमुख्यविशेष्यत्वलक्षणद्विविधविषयतापत्तिरिति वाच्यं सामान्यलक्षणालौकिकसन्निकर्षजन्यातिरिक्तस्य बहिरिन्द्रियजतत्तन्मुख्यविशेष्यकप्रत्यक्षस्यानुभवासिद्धतया अलीकतया यावद्विशेषसामग्रीबाधादेव तद्बाधात् मानसस्य तत्तदतिरिक्तस्यापि इदं रजतमित्याद्युपनीतविशेष्यकभ्रमस्य उपनीतशुक्त्यादिमुख्यविशेष्यकत्वमनुभवसिद्धमतोनालीकत्वं न च तथापि घटघटत्वादिनिर्विकल्पकोत्तरं जायमानेऽयं घट इत्यादिविशिष्टप्रत्यक्षे घटत्वादेर्मुख्यविशेष्यत्वापत्तिः लौकिकसन्निकर्षरूपविशेषसामग्रीसत्त्वादिति वाच्यम् तथाप्यसतिबाधके घटाद्यंशे घटत्वादेः प्रकारत्ववन्मुख्यविशेष्यत्वस्यापीष्टत्वादिति। केचित्तु संसर्गावच्छिन्नतद्विषयताशालिज्ञानत्वेन कारणता योगजधर्म्माजन्यसामान्यलक्षणाप्रत्यासत्त्यजन्यतद्विषयकप्रत्यक्षत्वेन कार्य्यता तद्विषयता। चालौकिकी ग्राह्या तेन तल्लौकिकप्रत्यक्षे न व्यभिचारः॥ एवञ्च तद्विषयकप्रत्यक्षत्वमात्रस्य कार्य्यतावच्छेदकतया इदं रजतमिति शुक्तिमुख्यविशेष्यकमानसभ्रमोऽपि न शुक्तिज्ञानं विना बहिरिन्द्रियजोपनीतभाने उपनीतस्य मुख्यविशेष्यत्वनिरासश्चोक्तक्रमेणेत्याहुरिति संक्षेपः।”

मीमांसकवेदान्तिभिस्तु अस्याः प्रत्यासत्तित्वं नाङ्गीकृतम्। यथोक्तं वेदा०प०। “न च ज्ञानं प्रत्यासत्तिः ज्ञानस्य प्रत्यासत्तित्वे अनुमानमात्रोच्छेदप्रसङ्गः” इति। अस्यायमाशयः वह्निव्याप्यधूमवान् पर्वत इति परामर्शात्मकज्ञानस्य अनुमितिहेतुतायाः सर्वैः स्वीकारात् तज्ज्ञानस्य च वह्निविषयकत्वेन तदुत्तरं जायमानं वह्निमान् पर्वत इति ज्ञानमलौकिकप्रत्यक्षमेव स्यान्नानुमितिः न च समानविषयस्थले अनुमितिसामग्र्याः अलौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वेन नालौकिकप्रत्यक्षमपि तु अनुमितिर्भविष्यतीति चेन्न तादृशप्रतिबध्यप्रतिबन्धकभावकल्पनस्याप्रामाणिकत्वात्। अतएव इदं रजतमिति ज्ञानमनिर्वचनीयरजतविषयकं न देशान्तरस्यानुभूतरजतविषयकमुपनयमर्य्यादया ज्ञानमिति स्थितम्।

ज्ञानवापी स्त्री काशीस्थे वापीरूपे तीर्थभेदे तदाविर्भावादिकथा काशी० ३३ अ०।

“घटोद्भव !, महाप्राज्ञ ! शृणु पापापनोदिनीम्।

ज्ञानवाप्याः समुत्पत्तिं कथ्यमानां मयाऽधुना । अनादिसिद्धे संसारे पुरा देवयुगे मुने ! ॥ प्राप्तः कुतश्चिदीशानश्चरन् स्वैरमितस्ततः । न वर्षन्ति यदाऽभ्राणि न प्रावर्त्तन्त निम्नगाः ॥ जलाभिलाषो न यदा स्नानपानादिकर्म्मणि । क्षीरस्वादूदयोरेव यदासीज्जलदर्शनम् ॥ पृथिव्यां नरसञ्चारे वर्त्तमाने क्वचित् क्वचित् । निर्व्वाणकमलक्षेत्रं श्रीमदानन्दकाननम् ॥ महाश्मशानं सर्व्वेषां वीजानां परमूषरम् । महाशयनसुप्तानां जन्तूनां प्रतिबोधकम् ॥ संसारसागरावर्त्तपतज्जन्तुतरण्डकम् । यातायातातिसंखिन्नजन्तुविश्राममण्डपम् ॥ अनेकजन्मगुणितकर्म्मसूत्रच्छिदक्षरम् । सच्चिदानन्दनिलयं परं ब्रह्म रसायनम् ॥ सुखसन्तानजनकं मोक्षसाधनसिद्धिदम् । प्रविश्य क्षेत्रमेतत् स ईशानो जटिलस्तदा ॥ लसत्त्रिशूलविमलरश्मिजालसमाकुलः । आलुलोके महालिङ्गं वैकुण्ठपरमेष्ठिनोः ॥ महाहमहमिकायां प्रादुरास यदादितः । ज्योतिर्मयीभिर्मालाभिः परितः परिवेष्टितम् ॥ वृन्दैर्वृन्दारकर्षीणां गणानाञ्च निरन्तरम् । सिद्धानां योगिनां स्तोमैरर्च्यमानं निरन्तरम् ॥ गीयमानञ्च गन्धर्वैः स्तूयमानञ्च चारणैः । अङ्गहारैरप्सरोभिः सेव्यमानमनेकधा ॥ नीराज्यमानं सततं नागीभिर्मणिदीपकैः । विद्याधरीकिन्नरीभिस्त्रिकालं कृतमण्डनम् ॥ अमरीचमरीराजिवीज्यमानमितस्ततः । तस्येशानस्य तल्लिङ्गं दृष्ट्वेच्छा ह्यभवत्तदा ॥ स्नपयामि महालिङ्गं कलसैः शीतलैर्जलैः । चखान च त्रिशूलेन दक्षिणाशोपकण्ठतः ॥ कुण्डं प्रचण्डवेगेन रुद्रो रुद्रवपुर्धरः । पृथिव्यावरणाम्भांसि निष्क्रान्तानि तदा मुने ! ॥ भूप्रमाणाद्दशगुणैर्यैरियं वसुधा वृता । तैर्जलैः स्नपयाञ्चक्रे दुष्पृष्टैरन्यदेहिभिः ॥ तुषारैर्जाड्यविनुदैर्जनपूकौघहारिभिः । सन्मनोभिरिवात्यच्छैरनच्छैर्व्योमवर्त्मवत् ॥ ज्योत्स्नावदुज्ज्वलच्छायैः पावनैः शम्भुनामवत् । पीयूषवत् स्वादुतरैः सुखस्पर्शैर्गवाङ्गवत् ॥ निष्पापधीरकुम्भीरैस्तरलैः पापिशर्म्मवत् । विजिताब्जमहागन्धैः पाटलामोदमोदिभिः ॥ अदृष्टपूर्व्वलोकानां मनोनयनहारिभिः । अज्ञानतापसन्तप्तप्राणिप्राणैकरक्षिभिः ॥ पञ्चामृतानां कलसैः स्नपनातिफलप्रदैः । श्रद्धोपस्पर्शिहृदयलिङ्गत्रितयहेतुभिः ॥ अज्ञानतिमिराकौमैर्ज्ञानदाननिदानकैः । विश्वभर्त्तुरुमास्पर्शसुखातिसुखकारिभिः ॥ महावभृथसुस्नातमहाशुचिविधायिभिः । सहस्रधारकलसैः स ईशानो घटोद्भव ! ॥ सहस्रकलसैः स्नपयामास संहृष्टमानसः । ततः प्रसन्नो भगवान् विश्वात्मा विश्वलोचनः ॥ तमुवाच तदेशानं रुद्रं रुद्रवपुर्धरम् । तव प्रसन्नोऽस्मीशान ! कर्म्मणानेन सुव्रत ! ॥ गुरुणानन्यपूर्व्वेण ममातिप्रीतिकारिणा । ततस्त्वं जटिलेशान वरं ब्रूहि तपोधन ! ॥ 'अदेयं न तवास्त्यत्र महोद्यमपरायण । ईशान उवाच । यदि प्रसन्नो देवेश ! वरयोग्योऽस्म्यहं यदि । तदेतदतुलं तीर्थं तव नाम्नास्तु शङ्कर ! ॥ श्रीविश्वेश्वर उवाच । त्रैलोक्यां यानि तीर्थानि भूर्भुवःस्वःस्थितान्यपि । तेभ्योऽखिलेभ्यस्तीर्थेभ्यः शिवतीर्थमिदं परम् ॥ शिवं ज्ञानमिति ब्रूयुः शिवशब्दार्थचिन्तकाः । तच्च ज्ञानं द्रवीभूतमिह मे महिमोदयात् ॥ अतो ज्ञानोदनामैतत्तीर्थं त्रैलोक्यविश्रुतम् । अस्य दर्शनमात्रेण सर्व्वपापैः प्रमुच्यते ॥ ज्ञानोदतीर्थसंस्पर्शादश्वमेधफलं लभेत् । स्पर्शनाचमनाभ्याञ्च राजसूयाश्वमेधयोः ॥ फल्गुतीर्थे नरः स्नात्वा सन्तर्प्य च पितामहान् । यत् फलं समवाप्नोति तदत्र श्राद्धकर्म्मणा ॥ गुरुपुष्यसिताष्टम्यां व्यतीपातो यदा भवेत् । तदात्र श्राद्धकरणाद्गयाकोटिफलं भवेत् ॥ यत् फलं समवाप्नोति पितॄन् सन्तर्प्य पुष्करे । तत्फलं कोटिगुणितं ज्ञानतीर्थे तिलोदकैः ॥ सन्निहत्यां कुरुक्षेत्रे तमोग्रस्ते विवस्वति । यत्फलं पिण्डदानेन तज्ज्ञानोदे दिने दिने ॥ पिण्डनिर्वपनं येषां ज्ञानतीर्थे सुतैः कृतम् । मोदन्ते शिवलोके ते यावदाभूतसंप्लवम् ॥ अष्टम्याञ्च चतुर्द्दश्यामुपवासी नरोत्तमः । प्रातः स्नात्वाऽथ पीत्वाम्बस्त्वन्तर्लिङ्गमयो भवेत् ॥ एकादश्यामुपोष्याथ प्राशेद्यश्चुलुकत्रयम् । हृदये तस्य जायन्ते त्रीणि लिङ्गान्यसंशयम् ॥ ईशानतीर्थे यः स्नायाद्विशेषात् सोमवासरे । सन्तर्प्य देवर्षिपितॄन् दत्त्वा दानं स्वशक्तितः ॥ ततः समर्च्य श्रीलिङ्गं महासम्भारविस्तरैः । तत्रापि दत्त्वा नानार्थान् कृतकृत्यो भवेन्नरः ॥ उपास्य सन्ध्यां ज्ञानोदे यत् पापं काललोपजम् । क्षणेन तदपाकृत्य ज्ञानवान् जायते नरः ॥ शिवतीर्थमिदं प्रोक्तं ज्ञानतीर्थमिदं शुभम् । तारकाख्यमिदं तीर्थं मोक्षतीर्थमिदं स्मृतम् ॥ स्मरणादपि पापौघो ज्ञानोदे क्षीयते ध्रुवम् । दर्शनात् स्पर्शनात् स्नानात् पानाद्धर्म्मादिसम्भवः ॥ डाकिनीशाकिनीभूतप्रेतवेतालराक्षसाः । ग्रहकुष्माण्डझोटाङ्गाः

कालकर्णी शशुग्रहाः । ज्वरापस्मारविस्फोटतृतीयकचतुर्थकाः । सर्वे प्रशममायान्ति शिवतीर्थजलोक्षणात् । ज्ञानोदतीर्थपानीयैर्लिङ्गं यः स्नपयेत् सुधीः । सर्वतीर्थोदकैस्तेन ध्रुवं संस्नापितं भवेत् । ज्ञानरूपोऽहमेवात्र द्रवमूर्त्तिं विधाय च । जाड्यविध्वंसनं कुर्य्यां कुर्य्यां ज्ञानोपदेशनम्” “इति दत्त्वा वरान् शम्भुस्तत्रैवान्तरधीयत । कृतकृत्यमिवात्मानं सोऽप्यमंस्त त्रिशूलभृत् । ईशानो जटिलो रुद्रस्तत्पीत्वा परमोदकम् । अवाप्तवान् परं ज्ञानं येन निर्वृतिमाप्तवान्” ।

ज्ञानसाधन न० ६त० । १इन्द्रिये २तत्त्वज्ञानसाधने श्रवणमनननिदिध्यासनादौ च ।

ज्ञानापोह पु० ६त० । ज्ञानजसंस्कारनाशजे विस्मरणे ।

ज्ञानाभ्यास पु० ६त० । १ज्ञानसाधनश्रवणाद्यावृत्तौ “तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनम् । एतदेकपरत्वञ्च ज्ञानाभ्यासं विदुर्बुधाः” इत्युक्तलक्षणे २मननादौ च । बोधाभ्यासादयोऽप्यत्र । “सर्गादावेव नोत्पन्नं दृश्यं नास्त्येव तत्सदा । इदं जगदहञ्चेति बोधाभ्यासं विदुः परम्” वेदान्तशा० ।

ज्ञानासन न० “अथान्यदासनं कृत्वा सर्वव्याधिविनाशनम् । योगाभ्यासी भवेत् क्षिप्रं ज्ञानासनप्रसादतः । दक्षपादोरुमूले तु वामपादतलं तथा । दक्षपादतलं दक्षपार्श्वे संयोज्य धारयेत् । एतज्ज्ञानासनं नाम ज्ञानविद्याप्रकाशकम् । निरन्तरं यः करोति तस्य ग्रन्थिः श्लथा भवेत्” इति रुद्रयामलोक्ते आसनभेदे ।

ज्ञानिन् त्रि० ज्ञानमस्त्यस्य इनि । १ज्ञानयुक्ते ब्रह्मसाक्षात्कारयुक्ते “चतुर्विधा भजन्ते माम्—आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ !” । “ज्ञानिनामपि सर्वेषां मद्गतेनान्तरात्मना” गीता २बोधयुक्तमात्रे त्रि० ज्ञानिनो मनुजाः सत्यं किन्तु ते न हि केवलम् । यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः”देवीमा० । ज्ञान+अस्त्यर्थे मतुप् मस्य वः । ज्ञानवदप्यत्रार्थे “बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते”गीता । उभयत्र स्त्रियां ङीप् ।

ज्ञानेन्द्रिय न० ज्ञायतेऽनेन ज्ञा—करणे ल्युट् ज्ञानसाधनमिन्द्रियम् कर्म० । १ज्ञानसाधने इन्द्रिये श्रोत्रादौ “ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाश्च नासिका । ज्ञानेन्द्रियार्था विषयाः”शा० ति० । इन्द्रियशब्दे विवृतिः । “एतान्याकाशादीनां सात्त्विकांशेभ्यो व्यस्तेभ्यः पृथक्२ क्रमेणोत्पन्नानि यथोक्तं देवीभागवते । “पञ्चभूतस्थसत्त्वांशैः श्रोत्रादीनां समुद्भवः । ज्ञानेन्द्रियाणां राजेन्द्र ! प्रत्येकमिति निश्चितम्” । क्रमशो दिग्वातार्कप्रचेतोऽश्विनो ज्ञानेन्द्रियाणां देवताः । शब्दस्पर्शरूपरसगन्धाश्च क्रमशो ज्ञानेन्द्रियाणां विषयाः ।

ज्ञापक त्रि० ज्ञा—णिच ल्यु । बोधके ।

ज्ञापन न० ज्ञा—णिच्—ल्युट् । बोधने ।

ज्ञीप्सा स्त्री ज्ञप—सन्—भावे अ । ज्ञातुमिच्छायाम् ।

ज्ञीप्समान त्रि० ज्ञप—सन्—कर्मणि शानच । ज्ञातुमिष्यमाणे । “श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः”पा० ।

ज्ञेय त्रि० ज्ञा—कर्म्मणि यत् । बोद्धव्ये । यथा व्याकरणादि पाणिन्यादेर्ज्ञेयैकदेशार्थमपि” शा० भा० । २ज्ञातुं योग्ये ब्रह्मणि च । “ज्ञेयं यत् तत् प्रवक्ष्यामि यद् ज्ञात्वाऽमृतमश्नुते । अनादिमत् परं ब्रह्म न सत् तन्नासदुच्यते । सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम् । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति । सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् । असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च । बहिरन्तश्च भूतानामचरं चरमेव च । सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिके च तत् । अविभक्तं विभक्तेषु विभक्तमिव च स्थितम् । भूतभर्त्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च । ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते” । “ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम्” गीता ।

ज्या जरायां क्र्या० प्वा० पर० अक० अनिट् । जिनाति अज्यासीत् । जिज्यौ जिज्यतुः । जिनः ।

ज्या स्त्री ज्या—अङ्गा० यक् नि० । १धनुर्गुणे अमरः तस्य निरन्तराकर्षणेन धनुषो जराकरणात्तथात्वम् । २वसुधायां तस्याः प्रतिक्षणं क्षीयमाणत्वात् तथात्वं ३मातरि स्वप्रसवेन तस्याः वयोहानेस्तथात्वम् मेदि० । गोलक्षेत्रान्तर्गते धनुराकारक्षेत्रस्य केन्द्रस्थानात् उभयपार्श्वसंलग्ने ४सरलरेखाभेदे । क्रमज्याशब्दे २२०२ पृ० जीवाशब्दे ३१२५ पृ० दृश्यम् । ताश्च चतुर्विंशतिसंख्याकास्तत्र क्रमज्याशब्दे उक्तावशिष्टा उत्क्रमज्यामानसंख्याकाश्च सू० सि० उक्ता यथा “सुनयोरन्ध्रयमलारसषट्का मुनीश्वराः । द्व्यष्टैकारूपषड्दस्राः सागरार्थहुताशनाः । खर्त्तुवेदानवाद्र्यर्थादिङ्नगाश्वत्र्यर्थकुञ्जराः । नगाम्बरवियच्चन्द्रारूपभूधरशङ्कराः । शरार्णवहुताशैकाभुजङ्गाक्षिशरेन्दवः । नवरूपमहीध्रैकागजैकाङ्कनिशाकराः । गुणाश्विरूपनेत्राक्षि पावकाग्निगुणाश्विनः । वस्वर्णवार्थय-

मलास्तुरङ्गर्त्तुनगाश्विनः । नवाष्टनवनेत्राणि पावकैकयमाग्नयः । गजाग्निसागरगुणा उत्क्रमज्यार्द्धपिण्डकाः”

ज्याघातवारण न० ज्याया आघातं वारयत्यनेन वारि-करणे ल्यु । गोधायां ज्याघातवारणार्थे धान्विनां हस्तनिबद्धे चर्म्मभेदे अमरः । [त्रि०मेदि० ।

ज्यानि स्त्री ज्या–नि । १वयोहानौ २तटिन्याम् ३जीर्णे

ज्यायस् त्रि० अतिशयेन प्रशस्यो वृद्धो वा प्रशस्य+वृद्ध+वा ईयसुन् ज्यादेशः ईयसुनि आदेरात्त्वम् । १अतिवृद्धे २जीर्णे ३प्रशस्ते च । “ज्यायान् पृथिव्या ज्यायानन्तरीक्षाज्ज्यायानेभ्यो लोकेभ्यः” छा०उ०। स्त्रियां ङीप् । “ज्यायसी चेत् कर्म्मणस्ते मता बुद्धिर्जनार्द्दन !”गीता

ज्यु गतौ भ्वा० आत्म० सक० अनिट् । ज्यवते अज्योष्ट जुज्युवे । [अज्युतत् अज्योतीत् । जुज्योत ।

ज्युत दीप्तौ भ्वा० पर० सक० सेट् । ज्योतति इरित् ।

ज्युत दीप्तौ भ्वा०आत्म० अक०सेट् । ज्योतते अज्योतिष्ट । जुज्युते । ऋदित् । अजुज्योतत् त । ज्योतिः ।

ज्येष्ठ त्रि०अतिशयेन वृद्धः प्रशस्यो वा वृद्ध+प्रशस्य+वा इष्ठन् ज्यादेशः ।१अतिवृद्धे २प्रशस्ये ३अग्रजे भ्रातरि ४अग्रजभगिन्यां स्त्री ।५अश्विन्यादिनक्षत्रेषु अष्टादशे नक्षत्रे स्त्री तद्रूपादि अश्लेषाशब्दे ४९७ पृ० दृश्यम् । ज्येष्ठानक्षत्रयुक्ता पौर्णमासी अण् ज्यैष्ठी साऽस्मिन् मासे पुनरण् संज्ञात्वात् ह्रस्वः । ६ज्येष्ठ ज्यैष्ठमासे मेदि० । गौरा० ङीष् । ७गृहगोधिकायां स्त्री शब्दरत्ना० ।
तस्याः दिग्भेदे रुतफलं ति० त० उक्तं यथा
“वित्तं ब्रह्मणि कार्यसिद्धिरतुला शक्रे हुताशे भयं याम्यामग्निभयं सुरद्विषि कलिर्लाभः समुद्रालये । वायव्यां वरवस्त्रगन्धसलिलं दिव्याङ्गना चोत्तरे ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने । ज्येष्ठीरुते रुतेऽप्येवमूचुः केचिच्च कोविदाः” अधिकं गृहगोधिकाशब्दे २६५७पृ०दृश्यम् । ८मध्यमाङ्गुलौ स्त्री हेमच०।९गङ्गायां स्त्री राजनि०तस्याः पार्वत्याः प्रथमं हिमालयाज्जातत्वात् तथात्वम् । १०परिणीते भर्त्तुरधिकस्नेहभाजने नायिकाभेदे रतिमञ्जरी । लक्ष्म्याः प्रथमोत्पन्नायां ज्येष्ठभगिन्याम् ११अलक्ष्मीदेव्यां स्त्री । तदुत्पत्त्यादिकथा पद्मपु० उत्त०ख०उक्ता यथा “मां प्रणम्य पुनर्देवा ममन्थुः क्षीरसागरम् । तस्मिन् प्रमथ्यमाने तु मया देवैश्च भाविनि ! । ज्येष्ठा देवी समुत्पन्ना रक्तस्रग्वाससावृता । उत्पन्ना साऽब्रवीद्देवान् किं कर्त्तव्यं मयेति वै । तामब्रुवंस्तदा देवीं सर्वे देवगणा भृशम् । येषां गृहान्तरे नित्यं कलहं संप्रवर्त्तते । तत्ते स्थानं प्रयच्छामो वासस्तत्र शुभानने ! । यस्य गेहं कपालास्थिभस्मकेशादिचिह्नितम् । भाषन्ते परुषं नित्यं चसन्त्यनृतवादिनः । सन्ध्याकाले च ये पापाः स्वपन्ति मलचेतसः । तेषां वेश्मनि संतिष्ठ दुःखदारिद्र्यदायिनी । कपालकेशभस्मास्थितुषाङ्गाराणि यत्र तु । तत्र ते वसतिस्थानं भविष्यति न संशयः । अकृत्वा पादयोः शौचं यस्त्वाचामति दुर्मतिः । तं भजस्व सदा देवि ! कलुषेणावृता भृशम् । तुषाङ्गारकपालाश्मवालुकायसचर्मभिः । दन्तधावनकर्त्तारो भविष्यन्ति नराधमाः । रमस्व मलिना देवि ! तेषां वेश्मसु नित्यशः । तिलपिष्टञ्च नक्तञ्च कालिङ्गशिग्रुगृञ्जनम् । छत्राकं विड्वराहञ्च विल्वकोषातकीफलम् । अलावुं श्रीफलं ये वै खादयन्ति नराधमाः । तेषां गृहे तव स्थानं देवि ! दारिद्र्यदे ! सदा । इत्यादिश्य सुराः सर्वे ते ज्येष्ठां कलिवल्लभाम् । पुनश्च मन्थनं चक्रुः क्षीराब्धिं सुसमाहिताः” । १२नादजातायां ब्रह्मप्रकृतिभूतायां देव्यां स्त्री “रौद्री विन्दोस्ततो नादाज्ज्येष्ठा वीजादजायत । वामा, ताभ्यः समुत्पन्ना रुद्रब्रह्मरमाधिपाः” शा० ति०। १३परमेश्वरे पुं० “ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः” विष्णुस० । १४प्राणे “प्राणो वा ज्येष्ठश्च श्रेष्ठश्च” छा० उ० । काशीस्थे १५ गौरीभेदे स्त्री ज्येष्ठस्थानशब्दे विवृतिः ।

ज्येष्ठतात पु० तातस्य ज्येष्ठः राज० पूर्वनि० । पितुरग्रजे [राजनि०। भ्रातरि (जेठा) ।

ज्येष्ठबला स्त्री ज्येष्ठं बलं यस्याः । सहदेव्यां लतायां

ज्येष्ठवर्ण पु० वर्णानां ज्येष्ठः राजद० पूर्वनि० कर्म० वा । ब्राह्मणे तस्य सर्ववर्णश्रेष्ठत्वात् तथात्वं । २श्रेष्ठे वर्णे च । [स्थानशब्दे विवृतिः ।

ज्येष्ठवापी स्त्री काशीस्थज्येष्ठस्थानस्थे वापीभेदे ज्येष्ठ-

ज्येष्ठश्वश्रू स्त्री ज्येष्ठा मान्या श्वश्रूरिव संज्ञात्वात् पुंवद्भावः । पत्न्याः ज्येष्ठभगिन्यां (बड़शाली) हेमच० ।

ज्येष्ठसामन् न० नित्यकर्म० । साममेदे । तच्च साम “मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निम् । कविं सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः” सामार्चि० १प्र० १अ० २द० ५क० । इत्यस्यां गीयमानम् “वामदेव्यं बृहत्साम ज्येष्ठसामरथन्तरम् । तथा पुरुषसूक्तं च रुद्रसूक्तं ततः परम् ।

आज्यदोहानि सामानि शान्तिकं भारुण्डानि च। पश्चिमे द्वारपालौ तु पठेतां सामगौ तथा"। इति दानपारिजातधृतवाक्यम्।

ज्येष्ठस्थान न०। काशीस्थे तीर्थभेदे तत्स्थानमाहात्म्यादि कथा काशीख० ६३ अ०।

"यमनेहसमारभ्य मन्दराद्रौ विनिर्ययौ। अद्रीन्द्रसुतया सार्द्धं रुद्रेणोक्षेन्द्रगामिना। तं वासरं पुरस्कृत्य जग्राह नियमं दृढम्। जैगीषव्या महामेधाः कुम्भयोने! महाव्रती। विषमेक्षणपादाब्जं समीक्षिष्ये यदा पुनः। तदाम्बुविप्रुषमपि भक्षयिष्यामि चेत्यहो। कुतश्चिद्धारणायोगादथ वा शम्भ्वनुग्रहात्। अनश्नन्नपिबन् योगी जैगीषव्यः स्थितो मुने!। तं शम्भुरेव जानाति नान्यो जानाति कश्चन। अतएव ततः प्राप्तः प्रथमं प्रमथाधिपः। ज्यैष्ठशुक्लचतुर्दश्यां सोमवारानुराधयोः। तत्पर्वणि महायात्रा कर्त्तव्या तत्र मानवैः। ज्येष्ठस्थानं ततः काश्यां तदाभूदतिपुण्यदम्। तत्र लिङ्गं समभवत् स्वयं ज्येष्ठेश्वराभिधम्। तल्लिङ्गदर्शनात् पुंसां पापं जन्मशतार्ज्जितम्। तमोऽर्कोदयमाप्येव तत्क्षणादेव नश्यति। ज्येष्ठवाप्यां नरः स्नात्वा तर्पयित्वा पितामहान्। ज्येष्ठेश्वरं समालोक्य न भूयो जायते भुवि। आविरासीत् स्वयं तत्र ज्येष्ठेश्वरसमीपतः। सर्वसिद्धिप्रदा गौरी ज्येष्ठा नाम समन्ततः। ज्यैष्ठे मासि सिताष्टम्यां तत्र कार्य्यो महोत्सवः। रात्रौ जागरणं कार्य्यं सर्वसम्पत्समृद्धये। ज्येष्ठां गौरीं नमस्कृत्य ज्येष्ठवापीपरिप्लुता। सौभाग्यभाजनं भूयाद् योषा सौभाग्यभागपि। निवासं कृतवान् शम्भुस्तस्मिन् स्थाने यतः स्वयम्। निवासेश इति ख्यातं लिङ्गं तत्र परं तपः। निवासेश्वरलिङ्गस्य सेवनात् सर्वसम्पदः। निवसन्ति गृहे नित्यं नित्यं प्रैति पदं पुनः। कृत्वा श्राद्धं विधानेन ज्येष्ठस्थाने नरोत्तमः। ज्येष्ठां तृप्तिं ददात्येव पितृभ्यो मधुसर्पिषा। ज्येष्ठतीर्थेश्वरे काश्यां दत्त्वा दानानि शक्तितः। ज्येष्ठान् स्वर्गानवाप्नोति नरो मोक्षञ्च गच्छति। ज्येष्ठेश्वरोऽर्च्यः प्रथमं काश्यां श्रेयोऽर्थिभिर्नरैः। ज्येष्ठा गौरी ततोऽभ्यर्च्या सर्वज्येष्ठसमीप्सुभिः"।

तत्रत्यं ज्योतिःस्वरूपलिङ्गन्तु ज्येष्ठेश्वराभिधं महादेवस्य नितम्बभूतम् यथोक्तं काशीख० ३३ अ०।

"सर्वेषामपि लिङ्गानां मौलित्वं कृत्तिवाससः। ओङ्कारेशः शिखा ज्ञेया लोचनानि त्रिलोचनः। गोकर्णभारभूतेशौ तत्कर्णौ परिकीर्त्तितौ। विश्वेश्वराविमुक्तौ च द्वावेतौ दक्षिणौ करौ। कर्णेशमणिकर्णीशौ द्वौ करौ दक्षिणेतरौ। कालेश्वरकपर्द्दीशौ चरणावतिनिर्मलौ। ज्येष्ठेश्वरो नितम्बश्च नाभिर्वै मध्यमेश्वरः। कपर्दोऽस्य महादेवः शिरोभूषा श्रुतीश्वरः। चन्द्रेशो हृदयन्तस्य आत्मा वीरेश्वरः परः। लिङ्गं तस्य तु केदारः शुक्रं शुक्रेश्वरं विदुः। अन्यानि यानि लिङ्गानि परःकोटिमितानि च। ज्ञेयानि नखलोमानि वपुषो भूषणान्यपि। यावेतौ दक्षिणौ हस्तौ नित्यं निर्वाणदौ हि तौ। जन्तूनामभयं दत्त्वा पततां मोहसागरे"।

ज्येष्ठामूलीय पु० ज्येष्ठां मूलं वा नक्षत्रमर्हति पौर्णमास्याम् छ। ज्यैष्ठे मासि तन्मासीयपौर्णमास्यां हि ज्येष्ठामूलयोरन्यतरस्य योगसम्भवात्तस्य तथात्वम्। यथा च तस्य तथात्वं तथा कार्त्तिकशब्दे १९४८ पृ० दर्शितम्।

ज्येष्ठाम्बु न० नि० कर्म्म०। तण्डुलप्रक्षालने जले वैद्यकप० तस्यातीव श्रेष्ठगुणत्वात्तथात्वम्।

ज्येष्ठाश्रम पु० ज्येष्ठ आश्रमो यस्य। "यस्मात् त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्। गृहस्थेनैव धार्य्यन्ते तस्मात् ज्येष्ठाश्रमो गृही" मनूक्ते १गार्हस्थ्याश्रमयुक्ते कर्म०। २गृहस्थाश्रमे च "गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः। चत्वार आश्रमाः प्रोक्ताः सर्वे गार्हस्थ्यमूलकाः" इत्युक्तेस्तस्य सर्वाश्रमपोषकत्वेन श्रेष्ठत्वात्तथात्वम्। ततः इनि। गृहस्थाश्रमीत्यप्यत्र।

ज्यैष्ठ पु० ज्यैष्ठी पूर्णिमास्मिन् मासे अण्। ज्येष्ठानक्षत्रयुक्तयोगार्हपौर्णमासीघटिते वृषस्थरव्यारब्धे शुक्लप्रतिपदादिदर्शान्तरूपे १चान्द्रे मासे "ज्यैष्ठे मासि क्षितिसुतदिने जाह्नवी मर्त्यलोके" ति०त०। तथाभूतेऽर्द्धमासात्मके २पक्षे। ज्येष्ठामूलानक्षत्रयोरन्यतरनक्षत्रे पर्वान्तकाले गुरोरुदयास्तोपलक्षिते ३बार्हस्पत्ये वर्षभेदे च कार्त्तिकशब्दे १९४९ पृ० विवृतिः। "ज्यैष्ठे संवत्सरे चैव ज्यैष्ठमासस्य पूर्णिमा। ज्येष्ठाभेन समायुक्ता महाज्यैष्ठी प्रकीर्त्तिता" राजमार्त्त०। ज्यैष्ठसंवत्सरस्य। "ज्येष्ठामूलोपगे जीवे वर्षं स्यात् शाक्रदैवतम्" विष्णुधर्म्मोत्तरोक्तः प्राद्यः" ति०त०। वृषस्थरविके सौरे ४मासभेदे च।

ज्यैष्ठी स्त्री ज्येष्ठानक्षत्रेण तत्समीपस्थमूलानक्षत्रेण वा युक्ता पौर्णमासी अण् ङीप्। १ज्येष्ठामूलानक्षत्रान्य-

तरनक्षत्रयुक्तपौर्णमास्याम् ज्येष्ठेव स्वार्थे अण् ङीप्। २गृहगोधिकायाञ्च। वल्लीशब्दे दृश्यम्।

ज्यैष्ठिनेय पुंस्त्री ज्येष्ठायाः स्त्रियाः अपत्यम् ढक् इनङ्। ज्येष्ठाया अपत्ये। "ज्येष्ठो ज्यैष्ठिनेयः स्तुवीत" ता० ब्रा०२।१।२। "कृते कानिष्ठिनेयस्य ज्यैष्ठिनेयो विनाशितः" भट्टिः।

ज्यैष्ठ्य न० ज्येष्ठस्य भावः ष्यञ्। १श्रेष्ठत्वे २वयसा अग्रजत्वे च। "विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणान्तु वीर्य्यतः। वैश्यानां धान्यधनतः शूद्राणामेव जन्मतः" मनुः

ज्यो नियमे उपनये व्रतोपदेशे च भ्वा० आत्म०सक० अनिट्। ज्यवते अज्यास्त। जुज्ये।

ज्योक् अव्य०ज्यो—बा० उकन्। १कालभूयस्त्वे २प्रश्ने ३शीघ्रार्थे ४सम्प्रत्यर्थे शब्दार्थचि०५उज्ज्वलत्वे च "सर्व्वमायुरेति ज्योग् जीवति महान् प्रजया पशुभिर्भवति" छा० उ० "ज्योगुज्ज्वलं जीवति" भा०।

ज्योतिरात्मन् पु० ज्योतिरात्माऽस्य। सूर्य्यादौ "यथाह्ययं ज्योतिरात्मा विवस्वान्" श्रुतिः।

ज्योतिरादित्य पु० ज्योतिषि सावित्रे मण्डले आदित्यः। परमेश्वरे "आदित्यो ज्योतिरादित्यः" विष्णुस०

ज्योतिरिङ्ग पु० ज्योतिरिव इङ्गति इगि–गतौ अच्। खद्योते शब्दरत्ना०युच्। ज्योतिरिङ्गणोऽप्यत्र अमरः।

ज्योतिर्गणेश्वर पु० ज्योतिर्गणानामीश्वरः। १परमेश्वरे "स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः" विष्णुसं०। "तमेव भान्तमनुभाति सर्व्वम् तस्य भासा सर्व्वमिदं विभाति" इति श्रुत्या तस्यैव सर्व्वज्योतिर्गणानामवभासनस्य प्रतिपादनात्तथात्वम्। [ग्रन्थः। ज्योतिःशास्त्रे।

ज्योतिर्ग्रन्थ पु० ज्योतिषां ग्रहनक्षत्रादीनां गत्यादिसाधनं

ज्योतिर्म्मय त्रि० ज्योतिरात्मकः प्राचुर्य्ये वा मयट्। १ज्योतिरात्मके ज्योतिःस्वरूपे २ज्योतिःप्रचुरे च। "ऋषीन् ज्योतिर्म्मयान् सप्त सस्मार स्मरशासनः" कुमा० "न भौमान्येव धिष्ण्यानि हित्वा ज्योतिर्म्मयान्यपि" रघुः।

ज्योतिर्विद् पु०ज्योतिषां सूर्य्यादीनां गत्यादिकं वेत्ति विद्-क्विप्। ज्योतिःशास्त्राभिज्ञे। "दृष्ट्वा ज्योतिर्विदो वैद्यान् दद्याद्गां काञ्चनं महीम्" याज्ञ०। ज्योतिर्विदाभरणम्।

ज्योतिर्विद्या स्त्री ज्योतिषां सूर्य्यादीनां गत्यादिज्ञानसाधनं विद्या। ज्योतिःशास्त्रे। [१खद्योते त्रिका०।

ज्योतिर्वीज न० ज्योतिषो गगने प्रकाशस्य वीजमिव।

ज्योतिर्लोक पु० ज्योतिषां लोकः आश्रयः। १कालचक्रप्रवर्त्तकध्रुवलोके २तदधिपे परमेश्वरे च तल्लोकस्थितिवर्णनं भाग०५।२३ अ०।

"अथ तस्मात् परतस्त्रयोदशलक्षयोजनान्तरतो यत्तद्विष्णोः परमं पदमभिवदन्ति। यत्र महाभागवतो ध्रुव औत्तानपादिरग्निनेन्द्रेण प्रजापतिना कश्यपेन धर्म्मेण च समकालयुग्भिः सहबहुमानं दक्षिणतः क्रियमाण इदानीमपि कल्पजीविनामाजीव्य उपास्ते तस्य महानुभाव उपवर्णितः। स हि सर्व्वेषां ज्योतिर्गणानां ग्रहनक्षत्रादीनाम् अनिमिषेणाव्यक्तरंहसा भगवता कालेन भ्राम्यमाणानां स्थाणुरिवावष्टम्भ ईश्वरेण विहितः शश्वदवभासते। यथा मेधीस्तम्भ आक्रमणपशवः संयोजितास्त्रिभिः सवनैर्यथास्थानं मण्डलानि चरन्ति। एवं भगणा ग्रहादय एतस्मिन्नन्तर्बहिर्योगेन कालचक्र आयोजिता ध्रुवमेवालम्ब्य वायुनोदीर्य्यमाणा आकल्पान्तं परितः क्रामन्ति। नभसि यथा मेघाः श्येनादयो वायुवशाः कर्म्मसारथयः परिवर्त्तन्ते। एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानुगृहीताः कर्म्मनिर्म्मितगतयो भुवि न पतन्ति। केचिदेतत् ज्योतिरनीकं शिशुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयन्ति। यस्य पुच्छाग्रेऽवाक्शिरसः कुण्डलीभूतदेहस्य ध्रुव उपकल्पितः पुच्छे तस्य लाङ्गूले प्रजापतिरग्निरिन्द्रो धर्म इति। पुच्छमूले धाता विधाता च कट्यां सप्तर्षयः। यस्य दक्षिणावर्त्तकुण्डलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे नक्षत्राणि उपकल्पयन्ति। दक्षिणानि तु सव्ये यथा शिशुमारस्य कुण्डलाभोगसन्निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवन्ति। पृष्ठे त्वजवीथी आकाशगङ्गा चोदरतः। पुनर्वसुपुष्यौ दक्षिणवामयोः श्रोण्योरार्द्राश्लेषा च दक्षिणवामयोः पादयोरभिजिदुत्तराषाढे दक्षिणवामपार्श्ववङ्क्रिषु युञ्जीत। तथैव मृगशीर्षादीन्युदगयनानि दक्षिणपार्श्वे प्रातिलोम्येन प्रतियुञ्जीत। शतभिषाज्येष्ठे स्कन्धयोर्दक्षिणवामयोर्न्यसेत्। उत्तराहनावगस्त्यः अधराहनौ यमः मुखे चाङ्गारकः शनैश्चर उपस्थे बृहस्पतिः ककुदि वक्षस्यादित्यो हृदये नारायणो मनसि चन्द्रो नाभ्यामुशना स्तनयोरश्विनौ बुधः प्राणापानयोराहुर्गले, केतवः सर्वाङ्गेषु, रोमसु सर्वे तारागणाः। एतदु हैव भगवतो विष्णोः सर्वदेवता-

मयं रूपम् अहरहः सन्ध्यायां प्रयतो वाग्यतो निरीक्षमाण उपतिष्ठेत्। नमो ज्योतिर्लोकाय कालायनाय अनिमिषां पतये महापुरुषाभिधीमहीति"।

ज्योतिर्हस्ता स्त्री "हस्तं शरीरमित्याहुर्हस्तञ्च गगनं तथा। ज्योतिश्च महत्तत्त्व ज्योतिर्हस्ता ततः स्मृता" देवीपु० ४५ अ० उक्तनिरुक्तियुक्तायां दुर्गायाम्।

ज्योतिश्चक्र न० ज्योतिर्भिर्नक्षत्रैर्घटितं चक्रम्। १भचक्रे "सप्तविंशतिभैर्ज्योतिश्चक्रं स्तिमितवायुगम्। तदर्कांशो भवेद्राशिर्नवर्क्षचरणाङ्कितः" ति० त०। उक्ते अश्विन्यादिभिर्नक्षत्रैर्घटिते मण्डलाकारे राशिचक्रे। स्तिमितवायुगमित्यनेन तस्य नाधःपतनमात्रं विवक्षितं न गत्यभावः प्रवहवायुना तस्य प्रतिदिनं प्रत्यग्गतेः सूर्य्यसिद्धान्तादावुक्तत्वात् खगोलशब्दे २४१६ पृष्ठादौ दृश्यम्।

ज्योतिः(श्शा)शास्त्र न० ज्योतिषां सूर्य्यादीनां गत्यादिज्ञापकं शास्त्रम् वा शस्त्रम्। सूर्य्यादिग्रहगत्यादिबोधके कालज्ञाने वेदाङ्गे शास्त्रभेदे। "वेदास्तावद्यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण। शास्त्रादस्मात् कालबोधो यतः स्याद् वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात्। शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी श्रोत्रमुक्तं निरुक्तं च कल्पः करौ। या तु शिक्षास्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः। वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते। संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाङ्गेन हीनो न किञ्चित्करः। तस्माद्द्विजैरध्ययनीयमेतत् पुण्यं रहस्यं परमं च तत्त्वम्। यो ज्योतिषं वेत्ति नरः स सम्यग् धर्मार्थकामान् लभते यशश्च"। "ज्योतिःशास्त्रमनेकभेदविषयम्" बृ०स० १अ०। अस्य भेदादि अङ्गशब्दे ७२ पृ० दृश्यम्।

ज्योतिष न० ज्योतिः सूर्य्यादिग्रहादिकं प्रतिपाद्यतयाऽस्त्यस्य अच्। १ज्योतिःशास्त्रे "ज्योतिषं नयनं विदुः" शिक्षा। ज्योतिःशास्त्रशब्दे उदा०। "ज्योतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकम्" बृ०स० ७अ०। २तारायां स्त्री गौरा० ङीष्। ज्योतिषं ज्ञेयत्वेनास्त्यस्य इनि। ज्योतिषिन्। ज्योतिःशास्त्राभिज्ञे त्रि० स्त्रियां ङीप्।

ज्योतिषिक त्रि० ज्योतिरधीते उक्थादि० ठक् संज्ञापूर्वकविधेरनित्यात् न वृद्धिः। ज्योतिःशास्त्राध्येतरि।

ज्योतिष्क पु० ज्योतिरिव कायति कै–क। १चित्रकवृक्षे "एतान्येवावाप्य क्षारकल्पेन निस्रुते पालाशे क्षारे ततो विपाच्य फाणितमिव सञ्जातमवतार्य्य लेपयेत्। ज्योतिष्क फललाक्षामरिचपिप्पलीसुमनःपत्रैर्वा" सुश्रु०। २मेथिकाबीजे च राजनि०। ३गणकारिकावृक्षे रत्नमा०। ४ग्रहतारानक्षत्रादौ ब०व० "तदीशभागे तस्याद्रेः शृङ्गमादित्यसन्निभम्। यत्तत् ज्योतिष्कमित्याहुः सदा पशुपतेः प्रियम्" इत्युक्ते ५मेरोः शृङ्गभेदे न०।

ज्योतिष्टोम पु० ज्योतींषि त्रिवृदादयः स्तोमा यस्य यत्वम्। १स्वनामख्याते अग्निष्टोमसंस्थारूपे यज्ञभेदे तद्विधानादि ताण्ड्य० ब्रा० ४।३।३।

"यज्ज्योतिष्टोमो भवति यज्ञमुखन्तदाप्नुवन्ति यदुक्थ्यो यज्ञक्रतोरनन्तरयाय यदतिरात्रः सर्वस्याप्त्यै" सू०

"अथ षोड़शिकोऽयमतिरात्र इत्युक्तं, क्लृप्तो ज्योतिष्टोमोऽतिरात्रः स षोड़शिक इति। अथ तद्व्यतिरिक्ताभिस्तिसृभिः संस्थाभिरवयुज्य स्तूयते। यद्यपि सर्वेषामपि ज्योतिष्टोमत्वमस्ति तथापि उक्थ्यातिरात्रसंस्थयोः पृथग्वक्ष्यमाणत्वात् अग्निष्टोमसंस्थैव ज्योतिष्टोमशब्देनोच्यते। ज्योतींषि त्रिवृदादयः स्तोमा यस्य स ज्योतिष्टोमः। तथा च तैत्तिरीयकं त्रिवृत्पञ्चदश सप्तदश एकविंश एतानि ज्योतींषि य एतस्य स्तोमा इति। यज्ज्योतिष्टोमोऽग्निष्टोमो द्वादशस्तोत्रात्मको भवति ज्योतिष्टोमस्य हि अग्निष्टोमसंस्था मुख्या, "एष वाव प्रथमो यज्ञानामिति" श्रुतेः। तेन यज्ञमुखं यज्ञानां मुखभूतमग्निष्टोमं प्राप्य आप्नुवन्ति सत्रिणः समृद्धा भवन्ति तथा तस्मिन्नतिरात्रे उक्थ्यः पञ्चदशस्तुतशस्त्रसाध्यः क्रतुरनन्तरं भवतीति यत् तत् यज्ञक्रतोः संपूर्णस्य दशस्य अनन्तराय अपरित्यागाय भवति उक्थसंस्थायां हि क्रतुः संपूर्णो भवति यथा पूर्वयोः सवनयोः पञ्चदश पञ्चदश स्तोत्राणि तथा तृतीयेऽपि स्तोत्रपञ्चकसद्भावात्। अग्निष्टोमस्त्वसंपूर्णः क्रतुः उक्तहेतोरभावात्" भा०।

तस्य च अग्निष्टोमसंस्थत्वेन ज्योतिष्टोमनामकत्वहेतुरुक्तो यथा "यदेतानि सर्वाणि सह दुरुपापानि केतेषामुपाप्तिरिति ज्योतिष्टोम एवाग्निष्टोमेनैषाग्निष्टोमेन यजेत। तस्य वा एतस्य ज्योतिष्टोमस्याग्निष्टोमस्य त्रिवृद्बहिष्पवमानं तद्व्रतस्य शिरः, पञ्चदशसप्तदशा उत्तरौ पवमानौ तौ पक्षौ, पञ्चदशं होतुराज्यं सप्तदशं पृष्ठमेकविंशं यज्ञायज्ञियं तत् पुच्छम्" शत० ब्रा० १०।१।२।७। "अधुना प्रथमसंस्थारूपज्योतिष्टोमाग्निष्टोमं महाव्रतयज्ञात्मना स्तोतुं तत्रैवाग्निचयनादित्रयस्योपादानाद् ब्रह्मवादिप्रश्नोत्तराभ्यां दर्शयति।

सह युगपत् दुरुपपादानि आप्नुमशक्यानि सर्वेषां महाव्रतयज्ञानुष्ठाने प्रयोगबाहुल्येन ऋत्विक्सम्पादनादेः दुष्करत्वेन चानधिकारात् तत्राग्निष्टोम इति पदेनाग्निस्तवनोक्तेरग्निचयनमुक्तमिति मन्तव्यम्। पक्ष्याकारस्य महाव्रतसाम्नो हि शिरःपक्षमध्यपुच्छात्मकाः पञ्चावयवाः शिरो गायत्रं, रथन्तरं दक्षिणः पक्षः बृहदुत्तरः पक्षः भद्रमस्य पुच्छं राजनसाम आत्मेति तत्सर्वमग्निष्टोमे सम्पादयति तस्य वा इति ऋक्त्रयात्मकमेकं सूक्तं तादृशानि त्रीणि सूक्तानि त्रिवृतोऽवयवायस्य स्तोमस्य तदिदं त्रिवृद् बहिष्पवमानम् प्रातःसवनिकं तृचं सूक्तत्रयात्मकं बहिष्पवमानं महाव्रतस्य शिरो भवति बहिष्पवमानमपि गायत्रीच्छन्दस्कैस्तृचैर्गातव्यम् माध्यन्दिनः पञ्चदश स्तोत्रियात्मकः पवमानः, तृतीयसवने सप्तदशस्तोत्रियात्मकः आर्भवः पवमानः पक्षस्थानीयौ होत्रानुशंसनीयं प्रथममाज्यस्तोत्रं सप्तदशस्तोत्रियात्मकं पृष्ठनामकं होतुः प्रथमं स्तोत्रम् तदुभयं मध्यात्मरूपम्। एकविंशत्यावृत्तिरूपं "यज्ञायज्ञा वो अग्नयः" इत्यत्रोत्पन्नं साम पुच्छस्थानीयम्" भा० २सोमयागे च "ज्योतिष्टोमधर्मा एकाहद्वादशाहयोस्तद्गुणदर्शनात्" कात्या० श्रौ० १२।१।१ "ज्योतिष्टोमशब्देन उपांश्वादिहारियोजनपर्यन्तो ग्रहयज्ञाभ्यासोऽभिधीयते ज्योतींषि यस्य स्तोमाः स ज्योतिष्टोमः स्तोमैर्ह्यसौ द्योत्यत इति ते च सोमयागस्य स्तोमाः तस्मात् ज्योतिष्टोमशब्देन सोमयागोऽभिधीयते" कर्कः।

ज्योतिष्मत् त्रि० ज्योतिरस्त्यत्र मतुप्। १ज्योतिर्युक्ते २प्रकाशयुक्ते ३लताभेदे स्त्री। सा च (मालकाङ्गनी) इति ख्याता लता। "ज्योतिष्मती कटुस्तिक्ता सरा कफसमीरजित्। अत्युष्णा वामनी तीक्ष्णा वह्निबुद्धिस्मृतिप्रदा" राजनि० ४रात्रौ राजनि०। ५योगशास्त्रोक्ते सत्त्वप्रधाने चित्तवृत्तिभेदे च। "विशोका वा ज्योतिष्मती" पात०सू०। "प्रवृत्तिरुत्पन्ना चित्तस्य स्थिति-निबन्धिनीति वाक्यशेषः। ज्योतिःशब्देन सात्त्विकः परिणाम उच्यते स प्रशस्तो भूयानतिशयश्च विद्यते यस्याम्" भोजवृत्तिः "प्रसीदत ते विशोका ज्योतिष्मती नाम चित्तवृत्तिः" महावी० "ज्योतिष्मतः पथो रक्ष धिया कृतान्" ऋ० १०।५३।६ "ज्योतिष्मतो दीप्तिमतः" भा० ६अग्निपुर्य्याम् अर्चिष्मत्यां तत्कथा अग्निलोकशब्दे ५८ पृ० दृश्यम्। "योऽयमस्य यथाऽनेन प्रापि ज्योतिष्मती पुरी" काशी०। ७सूर्य्ये शाकद्वीपस्थे पर्वतभेदे च शब्दार्थचिन्तामणिः।

ज्योतिस् पु० द्योतते द्युत्यतेऽनेन वा द्युत—इसुन् आदेर्दस्य जः ज्युत—दीप्तौ वा इसुन्। १सूर्य्ये २अग्नौ, मेदि० ३मेथिकावृक्षे राजनि० च। नेत्रकनीनिकामध्यस्थे ४दर्शनसाधने, पदार्थे, शब्दार्थचि० ५नक्षत्रे, ६प्रकाशे, शब्दच० ७स्वयंप्रकाशे, सर्वावभासके चैतन्ये च न०। ८अग्निष्टोमयागस्य संस्थाभेदे यथोक्तं ताण्ड्य०ब्रा०४।१।७

"स एतान् स्तोमानपश्यत् ज्योतिर्गौरायुरितीमे वै लोका एते स्तोमा अयमेव ज्योतिरयं मध्यमो गौरसावुत्तम आयुः" सू०।

"स पूर्वोक्तः प्रजापतिः एतान् स्तोमान् स्तोमशब्देन त्रिवृदादिस्तोमवन्त्यहानि लक्ष्यन्ते। तानि ज्योतिर्गौरायुरिति एतन्नामकान्यपश्यत्। तत्र ज्योतिरग्निष्टोमसंस्थः गौरायुषी उक्थसंस्थे ज्योतिष इयं स्तोमक्लृप्तिः। त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि पञ्चदशो माध्यन्दिनः पवमानः सप्तदशानि पृष्ठानि सप्तदश आर्भव एकविंशोऽग्नीष्टोमसामेति। अथ गोष्टोमस्य पञ्चदशो बहिष्पवमानः त्रिवृदाज्यानि सप्तदशं माध्यन्दिनं सवनमेकविंशं तृतीयसवनम्। अथायुष्टोमस्य त्रिवृद्बहिष्पवमानं पञ्चदशान्याज्यानि सप्तदशं माध्यन्दिनं सवनमेकविंशं तृतीयसवनमिति। एते उक्ताः स्तोमा इमे लोका वै भूरादिकाः खलु कः कतमो लोक इति बुभुत्सायामाह अयमेव लोको ज्योतिः। अयमध्यमः अन्तरीक्षलोको गौः असावुत्तमस्तृतीयः स्वर्लोक आयुः। स्तोमत्रयस्य लोकत्रयेण सह संख्यासाम्यात् तच्छब्दता एतैः त्रिभिः स्तोमैः साधनैस्त्रीन् लोकान् प्राजनयदिति शेषः" भा०। ९विष्णौ "विहायसगतिर्ज्योतिः सर्वविद् हुतभुग् विभुः" विष्णुस० स्वयंद्योतनात् तस्य तथात्वम्। "अथ यदतः परो दिवो ज्योतिर्दीप्यते। विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु। इदं वाव तद्यदिदमन्तःपुरुषे ज्योतिः" छा० उ०। एतामधिकृत्य "ज्योतिःशब्दस्य परब्रह्मपरत्वं शा०सू० भा० व्यवस्थापितं यथा 'ज्योतिश्चरणाभिधानात्'" १।१।२४सूत्रभाष्यादौ दृश्यम्। "चक्षुर्वृत्तेर्निरोधकं शार्वरादिकं तमः। तस्या एवानुग्राहकमादित्यादिकं ज्योतिरिति" शा० भा०। १०तेजोद्रव्यमात्रे तस्य प्रकाशवत्त्वात्तथात्वं तदपि तत्रैव भाष्ये दृश्यम्। "ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते"। "ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम्। योऽन्तःसुखो-

ऽन्तरारामस्तथान्तर्ज्योतिरेव यः। स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति” गीता। “हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः” “स हि देवः परं ज्योतिस्तमःपारे प्रतिष्ठितम्” कुमा०। ज्योतिःसारः ज्योतिस्तत्त्वम् ज्योतिःसिद्धान्तः।

ज्योतीरथ पु ज्योतिषां सूर्यादीनां रथ इवाधारत्वात्। ध्रुवनक्षत्रे त्रिका० तदाधारतयैव ज्योतिश्चक्रस्य समवस्थानात् तस्य तद्रथत्वम्।

ज्योत्स्ना स्त्री ज्योतिरस्त्यस्याम् न उपधालोपश्च। १कौमुद्याम् चन्द्रकिरणे अमरः २रेणुकानामगन्धद्रव्ये रत्नमा०। ३दुर्गायां “प्रभा प्रसादशीलत्वात् ज्योत्स्ना चन्द्रार्कमालिनी” देवी० पु० ४५ अ०। “रौद्रायै नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः। ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः” देवीमा०। ततः मत्वर्थे अण् ज्यौत्स्न तद्युक्ते त्रि० स्त्रियां ङीप् ज्यौत्स्नी।

ज्योत्स्नाकाली स्त्री सोमस्य कन्यायां वरुणात्मजपुष्करपत्न्याम् “एषोऽस्य पुत्रोऽभिमतः पुष्करः पुष्करेक्षणः। रूपवान् दर्शनीयश्च सोमपुत्र्या वृतः पतिः। ज्योत्स्नाकालीति यामाहुर्द्वितीयां रूपतः श्रियम्” भा० उ० ९७ अ०।

ज्योत्स्नादि पु० मत्वर्थे अण्प्रत्ययप्रकृतिभूते पा० ग० सू० पठिते शब्दगणे स च गणः “ज्योत्स्ना तमिस्रा कुण्डल कुतप विसर्प विपादिका”।

ज्योत्स्नाप्रिय पुंस्त्री ज्योत्स्ना प्रियास्य। चकोरे स्त्रियां जातित्वेऽपि योपधत्वात् टाप्।

ज्योत्स्नावृक्ष पु० ज्योत्स्नाया दीपप्रकाशस्याधारः वृक्षः। दीपाधारे (पिलसुच) त्रिका०।

ज्योत्स्नी स्त्री ज्योत्स्नाऽस्त्यस्य अण् संज्ञापूर्वकत्वेऽनित्यत्वात् न वृद्धिः ङीप्। १ज्योत्स्नायुक्तरात्रौ (झिङ्गा) २पटोलिकायाञ्च अमरः। ३रेणुकानामगन्धद्रव्ये शब्दच०। स्वार्थे क। ज्योत्स्निका तत्रार्थे।

ज्यौतिषिक त्रि० ज्योतिषमधीते वेद वा उक्थादि० ठक्। १ज्योतिषशास्त्राभिज्ञे २तदध्येतरि च अमरः।

ज्यौत्स्न त्रि० ज्योत्स्ना अस्त्यस्य अण्। १ज्योत्स्नायुक्ते स्त्रियां ङीप् सा च २चन्द्रिकायुक्तरात्रौ रायमुकुटः।

ज्रि अभिभवे भ्वा० पर० सक० अनिट्। ज्रयति अज्रैषीत्। जिज्राय जिज्रियतुः “आ भानुना पार्थिवानि ज्रयांसि महस्तोदस्य धृषता ततन्थ” ऋ० ६।६।६। “जिगादुपज्रयति गोरपीच्यं पदं यदस्य मतुथा अजीजनन्” ६।७१।५।

ज्री वयोहानौ या चुरा० उभ० पक्षे क्र्या० प्वा० प० अक० अनिट्। ज्राययति ते ज्रिणाति अजिज्रयत् त अज्रैषीत्।

ज्वर रोगे भ्वा० पर० अक० सेट्। ज्वरति अज्वारीत्। मित्। ज्वरयति ते।

ज्वर पु० ज्वर+भावे घ। स्वनामख्याते रोगभेदे। ज्वरस्योद्भवनिदानादि भावप्र० उक्तं यथा।
“दक्षापमानसंक्रुद्धरुद्रनिःश्वाससम्भवः। ज्वरोऽष्टधा पृथग्द्वन्द्वसङ्घातागन्तुजः स्मृतः। अस्यायमर्थः। दक्षकर्तृको योऽपमानस्तेन संक्रुद्धो यो रुद्रस्तस्य यो निःश्वासस्तस्मात्सम्भव उत्पत्तिर्यस्य स ज्वरः। क्रुद्धरुद्रनिःश्वाससम्भूतत्वेन ज्वरः स्वभावात्पैत्तिक इति बोध्यते। यत उक्तं चरकेण, क्रोधात्पित्तमित्यादि तेन सर्वज्वरेषु पित्तोपशमकारिणी चिकित्सा कर्तव्या अतएव वाग्भटः “उष्मा पित्तादृते नास्ति ज्वरो नास्त्यूष्मणा विना। तस्मात्पित्तविरुद्धानि त्यजेत्पित्ताधिकेऽधिकम्” रुद्रसम्भूतत्वेन ज्वरस्य देवतात्मकत्वात् पूजार्हत्वं चोपदर्शितम् अतएव वैदेहः “ज्वरः संपूजनैर्वापि सहसैवोपशाम्यतीति”। मूर्त्तिरप्यस्योक्ता सुश्रुतेन “रुद्रकोपाग्निसंभूतः सर्वभूतप्रतापनः। त्रिपाद्भस्मप्रहरणस्त्रिशिराः सुमहोदरः। वैयाघ्रचर्मवसनः कपिलो माल्यविग्रहः। पिङ्गेक्षणो ह्रस्वजङ्घो बीभत्सो बलवान्महान्। पुरुषो लोकनाशार्थमसौ ज्वर इति स्थितः। तैस्तैर्नामभिरन्येषां सत्वानां परिकीर्त्त्यते। जन्मादौ निधने चैव प्रायोविशति देहिनम्। सहते देवमनुष्याभ्यां नान्यो विषहते हि तम्” तस्य ज्वरस्य संख्यारूपां संप्राप्तिमाह ज्वरोऽष्टधेति। अष्टत्वं विवृणोति पृथगिति वातिकः पैत्तिकः श्लैष्मिकश्चेति त्रयः। द्वन्द्वजाश्च त्रयः वातपैत्तिकः वातश्लैष्मिकः पित्तश्लैष्मिकश्चेति। सङ्घातजः सान्निपातिक एकः। “द्व्युल्वणैकोल्वणैः षट् स्युर्हीनमध्याधिकैश्च षट्। समश्चैको विकारास्ते सन्निपातास्त्रयोदश” इति चरके त्रयोदश सन्निपाता उक्तास्ते यथा। वातोल्वणः पित्तोल्वणः। कफोल्वणः। वातपित्तोल्वणः। वातश्लेष्मोल्वणः पित्तश्लेष्मोल्वणः। एवं षट्। अधिकवातो मध्यपित्तो हीनकफः। अधिकवातो मध्यकफो हीनपित्तः। अधिककफो मध्यपित्तो हीनवातश्चेति षट्। त्र्युल्वण एकः एवं त्रयोदश। अत्र तु त्रिदोषजत्वेन साम्यात्सान्निपातिक एक एव गणितः। आगन्तुज इति। अत्रागन्तुशब्देनाभिघातादयो हेतव उच्यन्ते।

क्वचिद्द्राश्रयः कार्य्यकारणयोरभेदोपचारात् आगन्तुजा अभिघाताद्यनेककारणयोगादनेके भवन्ति । तथाप्यागन्तुजत्वेन साम्यादागन्तुजोऽप्यत्रैक एव भणितः । नन्वागन्तुजेऽपि ज्वरे वातादिलक्षणदर्शनादागन्तुजः कथं दोषजाद्भिन्नः उच्यते, उत्तरकालं दोषोत्पत्तेः । तथा च चरके "आगन्तुजो हि व्यथापूर्व्वं जायते पश्चाद्भिन्नैर्दोषैरनुबध्यते" इति । अथ ज्वरस्य विप्रकृष्टकारणकथनपूर्व्विकां सम्प्राप्तिमाह "मिथ्याहारविहाराभ्यां दोषा ह्यामाशयाश्रयाः। बहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यू रसानुगाः" । मिथ्याहारविहाराभ्याम् अनुचिताहारचेष्टाभ्यां हेतुभूताभ्यां दोषाः वातपित्तकफाः आमाशयाश्रयाः आमाशयं गता रसानुगाः रसदूषकाः बहिर्निरस्य कोष्ठाग्निं कोष्ठगताग्नेरूष्माणम् न तु समस्तमग्निं तदा दोषपाकासम्भवः स्यात् । बहिः प्रक्षिप्य ज्वरदाः स्युर्ज्वरकारिणो भवेयुरित्यर्थः । अथ ज्वरस्य सामान्यं विशिष्टञ्च पूर्व्वरूपमाह "श्रमोऽरतिर्व्विवर्णत्वं वैरस्यं नयनप्लवः । इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु । जृम्भाऽङ्गमर्द्दो गुरुता रोमहर्षोऽरुचिस्तमः । अप्रहर्षश्च शीतञ्च भवन्त्युत्पत्स्यति ज्वरे । सामान्यतो विशेषात्तु जृम्भात्यर्थं समीरणात् । पित्तान्नयनयोर्द्दाहः कफान्नान्नाभिनन्दनम् !" श्रमो व्यापारं विनैव, अरतिरस्वस्थचित्तत्वम् विवर्णत्वं म्लानगात्रता । वैरस्यं मुखस्याप्रकृतरसता । नयनप्लवः नयनयोरश्रुपूर्णत्वम् । शीतवातातपादिषु मुहुरिच्छाद्वेषौ । आदिशब्दाज्ज्वलने जले च । यत उक्तं चरकेण "ज्वलनातपवातेषु भक्तिद्वेषावनिश्चिताविति"। शयनादिष्वित्यन्ये । अङ्गमर्द्दोऽङ्गमोटनम् । गुरुता गात्रस्य । रोमहर्षः रोमाञ्चता । अरुचिर्भोजने, तमः तमोमग्नस्येव ज्ञानम् । अप्रहर्षः हर्षाभावः । शीतं लगति चकाराद्बलहानिः उपदेशद्वेषादयोऽपि भवन्ति । तृतीयश्लोकस्थम् सामान्यत इति पूर्व्वश्लोकाभ्यां सम्बन्धनीयम् । तेन सामान्यतो ज्वर उत्पत्स्यति भविष्यति श्रमादयः पूर्व्वमेव भवन्तीत्यर्थः । उत्पत्स्यतीत्यात्मनेपदिनोऽपि तङभाव आर्षत्वात् । विशेषात् उच्यते । समीरणात् ज्वरे उत्पत्स्यति अतिशयेन जृम्भा भवति । पित्तज्वरे उत्पत्स्यति अत्यर्थं नयनयोर्दाहो भवति । कफज्वरे उत्पत्स्यति अत्यर्थेन नान्नाभिनन्दनम् अन्नाकाङ्क्षा न भवति । जृम्भादयो भवन्ति यतः सामान्यधर्म्माक्रान्तो विशिष्टोधर्म्मोभवति । द्वन्द्वजपूर्व्वरूपमाह, "रूपैरन्यतराभ्यां तु संसृष्टैर्द्वन्द्वजं विदुः । अन्यतराभ्यां जृम्भानेत्रदाहाभ्याम् । जृम्भान्नारुचिभ्यां नेत्रदाहान्नारुचिभ्यां वा संसृष्टैरूपैः श्रमादिभिः द्वन्द्वजं द्विदोषजं पूर्व्वरूपं विदुः । त्रिदोषजपूर्व्वरूपमाह, "सर्व्वलिङ्गसमवायः सर्व्वदोषप्रकोपजे । सर्व्वरूपजे सर्व्वरूपे सर्व्वलिङ्गसमवायः । अतिशयितजृम्भानेत्रदाहान्नारुचिसहितानां श्रमादीनां समवायो भवति । अथ ज्वरस्य सामान्यलक्षणमाह, "स्वेदावरोधः सन्तापः सर्व्वाङ्गग्रहणं तथा । युगपद्यत्र रोगे तु स ज्वरो व्यपदिश्यते । ताप इति वक्तव्ये सन्तापाभिधानं देहेन्द्रियमनसां सन्तापबोधनार्थम् । यत उक्तं चरकेण ज्वरविशेषणम् । "देहेन्द्रियमनस्तापीति"। तत्र देहसन्तापो देहेन्द्रियोष्णता । इन्द्रियसन्ताप इन्द्रियवैकल्यम् । यत उक्तम् "इन्द्रियाणां तु वैकल्यं यत्र सन्तापलक्षणम् । वैचित्त्यमरतिर्ग्लानिर्म्मनःसन्तापलक्षणम् इति"। सर्व्वाङ्गग्रहणम् सर्व्वेषामङ्गानां वेदनया ग्रहणं सर्व्वाण्यङ्गानि स्तम्भनगृहीतानीव वा भवन्ति । युगपदिति । मिलितमेतल्लक्षणम् । प्रत्येकस्य व्यभिचारात् । यथा स्वेदावरोधः कुष्ठपूर्व्वरूपे । तथा सन्तापो दाहव्याधौ । तथा सर्व्वाङ्गग्रहणं सर्व्वाङ्गरोगाख्यवातव्याधौ । प्रस्वेदानिर्गमनपक्षे कारणमाह । "रुणद्धि चाप्यपां धातुं यस्मात्तस्माज्ज्वरातुरः । भवत्यत्युष्णगात्रश्च स्विद्यते न च सर्व्वशः । तस्माज्ज्वरोऽत्र भवति सर्व्वशः स्विद्यते न च" ।

सुश्रुते उत्तरतन्त्रे च तत्र विशेष उक्तो यथा "ऋते देवमनुष्येभ्यो नान्यो विषहते तु तम् । कर्म्मणा लभते यस्माद्देवत्वं मानुषादपि । पुनस्तैव च्युतः स्वर्गान्मानुष्यमनुवर्त्तते । तस्मात्ते देवभावेन सहन्ते मानुषा ज्वरम् । शेषाः सर्व्वे विपद्यन्ते तैर्य्यग्योना ज्वरार्दिताः । स्वेदावरोधः सन्तापः सर्व्वाङ्गग्रहणं तथा । विकारा युगपद्यस्मिन् ज्वरः स परिकीर्त्तितः । दोषैः पृथक् समस्तैश्च द्वन्द्वैरागन्तुरेव च । अनेककारणोत्पन्नः स्मृतस्त्वष्टविधो ज्वरः । दोषाः प्रकुपिताः स्वेषु कालेषु स्वैः प्रकोपनैः । व्याप्य देहमशेषेण ज्वरमापादयन्ति हि । दुष्टाः स्वहेतुभिर्द्दोषाः प्राप्यामाशयमूष्मणा । सहिता रसमागत्य रसस्वेदप्रवाहिणाम् । स्रोतसां मार्गमावृत्त्य मन्दीकृत्य हुताशनम् । निरस्य वहिरूष्माणं पक्तिस्थानाच्च केवलम् । शरीरं समभिव्याप्य स्वकालेषु ज्वरागमम् । जनयन्त्यथ वृद्धिञ्च स्ववर्णञ्च त्वगादिषु । मिथ्यातियुक्तैरपि च

द्रोहाद्यैः कर्म्मभिर्नृणाम्। विविधादभिघाताच्च रोगोत्थानात् प्रपाकतः। श्रमात् क्षयादजीर्णाच्च विषात् सात्म्यर्त्तुपर्य्ययात्। ओषधीपुष्पगन्धाच्च शोकान्नक्षत्रपीड़नात्। अभिचाराभिशापाभ्यां मनोभूताभिशङ्कया। स्त्रीणामपप्रजातानां प्रजातानां तथाऽहितैः। स्तन्यावतरणे चैव ज्वरो दोषैः प्रवर्त्तते। तैर्वेगवद्भिर्बहुधा समुद्भ्रान्तैर्विमार्गगैः। विक्षिप्यमाणोऽन्तरग्निर्भवत्याशु बहिश्चरः। रुणद्धि चाप्यपान्धातुं यस्मात्तस्माज्ज्वरातुरः। भवत्यत्युष्णगात्रश्च न च स्विद्यति सर्व्वशः। श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनप्लवः। इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु। जृम्भाङ्गमर्दौ गुरुता रोमहर्षोऽरुचिस्तमः। अप्रहर्षश्च शीतञ्च भवत्युत्पत्स्यति ज्वरे। सामान्यतो विशेषात्तु जृम्भात्यर्थं समीरणात्। पित्तान्नयनयोर्दाहः कफान्नान्नाभिनन्दनम्। सर्व्वलिङ्गसमावायः सर्व्वदोषप्रकोपजे। द्वयोर्द्वयोस्तु रूपेण संसृष्टं द्वन्द्वजं विदुः। वेपथुर्विषमो वेगः कण्ठौष्ठमुखशोषणम्। निद्रानाशः क्षवः स्तम्भो गात्राणां रौक्ष्यमेव च। शिरोहृद्गात्ररुग्वक्त्रवैरस्यं बद्धविट्‌कता। जृम्भाध्मानं तथा शूलं भवत्यनिलजे ज्वरे। वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः। कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते। प्रलापः कटुता वक्त्रे मूर्च्छा दाहो मदस्तृषा। पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च। गौरवं शीतमुत्क्लेशो रोमहर्षोऽतिनिद्रता। स्रोतोरोधो रुगल्पत्वं प्रसेको मधुरास्यता। नात्युष्णगात्रता छर्द्दिरङ्गसादोऽविपाकता। प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोश्च शुक्लता। निद्रानाशो भ्रमः श्वासस्तन्द्रा सुप्ताङ्गताऽरुचिः। तृष्णा मोहो मदः स्तम्भो दाहः शीतं हृदि व्यथा। पक्तिश्चिरेण दोषाणामुन्मादः श्यावदन्तता। रसना परुषा कृष्णा सन्धिमूर्द्धास्थिजा रुजः। निर्भुग्नकलुषे नेत्रे कर्णौ शब्दरुगन्वितौ। प्रलापः स्रोतसां पाकः कूजनं चेतनाच्युतिः। स्वेदमूत्रपुरीषाणामल्पशः सुचिरात् स्रुतिः। सर्व्वजे सर्व्वलिङ्गानि विशेषश्चात्र मे शृणु। नात्युष्णशीतोऽल्पसंज्ञो भ्रान्तप्रेक्षी हतस्वरः। खरजिह्वः शुष्ककण्ठः स्वेदविण्मूत्रवर्जितः। सास्रनिर्भुग्नहृदयो भक्तद्वेषी हतप्रभः। श्वसन् निपतितः शेते प्रलापोपद्रवैर्युतः। तमभिन्यासमित्याहुर्हतौजसमथापरे। सन्निपातज्वरं कृच्छ्रमसाध्यमपरे विदुः। निद्रोपेतमभिन्यासं क्षीणमेनं हतौजसम्। संन्यस्तगात्रं संन्यासं विद्यात्सर्व्वात्मके ज्वरे। ओजोविस्रंसते यस्य पित्तानिलसमुच्छ्रयात्। स गात्रस्तम्भशीताभ्यां शयने स्यादचेतनः। अपि जाग्रत् स्वपन् जन्तुस्तन्द्रालुश्च प्रलापवान्। संहृष्टरोमा स्रस्ताङ्गो मन्दसन्तापवेदनः। ओजोनिरोधजं तस्य जानीयात् कुशलो भिषक्। सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा। पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा। द्विदोषोच्छ्रायलिङ्गास्तु द्वन्द्वजास्त्रिविधाः स्मृताः। जृम्भाध्मानमदोत्कम्पपर्व्वभेदपरिक्षयाः। तृट्प्रलापाभितापाः स्युर्ज्वरे मारुतपैत्तिके। शूलकासकफोत्क्लेशशीतवेपथुपीनसाः। गौरवारुचिविष्टम्भा वातश्लेष्मसमुद्भवे। शीतदाहारुचिस्तम्भस्वेदमोहमदभ्रमाः। कासाङ्गसादहृल्लासा भवन्ति कफपैत्तिके। क्षामाणां ज्वरमुक्तानां मिथ्याहारविहारिणाम्। दोषः स्वल्पोऽपि संवृद्धो देहिनामनिलेरितः। सततान्येद्युष्कत्र्याख्यचातुर्थान् सप्रलेपकान्। कफस्थानविभागेन यथासङ्ख्यं करोति हि। अहोरात्रादहोरात्रात् स्थानात् स्थानं प्रपद्यते। ततश्चामाशयं प्राप्य घोरं कुर्य्याज्ज्वरं नृणाम्। तथा प्रलेपको ज्ञेयः शोषिणां प्राणनाशनः। दुश्चिकित्स्यतमो मन्दः सुकष्टो धातुशोषकृत्। कफस्थानेषु वा दोषस्तिष्ठन् द्वित्रिचतुर्षु वा। विपर्य्ययाख्यान् कुरुते विषमान् कृच्छ्रसाधनान्। परो हेतुः स्वभावो वा विषमे कैश्चिदीरितः। आगन्तुश्चानुबन्धो हि प्रायशो विषमज्वरे। वाताधिकत्वात् प्रवदन्ति तज्ज्ञास्तृतीयकञ्चापि चतुर्थकञ्च। औपत्यके मद्यसमुद्भवे च हेतुं ज्वरे पित्तकृतं वदन्ति। प्रलेपकं वातबलासकञ्च कफाधिकत्वेन वदन्ति तज्ज्ञाः। मूर्च्छानुबन्धा विषमज्वरा ये प्रायेण ते द्वन्द्वसमुत्थितास्तु। त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे। तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च। करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च। तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः। द्वावेतौ दाहशीतादौ ज्वरौ संसर्गजौ स्मृतौ। दाहपूर्व्वस्तयोः कष्टः कृच्छ्रसाध्यतमः स्मृतः। प्रसक्तश्चाभिघातोत्थश्चेतनाप्रभवस्तु यः। रात्र्यह्नोः षट्सु कालेषु कीर्त्तितेषु यथा पुरा। प्रसह्य विषमोऽभ्येति मानवं बहुधा ज्वरः। स चापि विषमो देहं न कदाचिद्विमुञ्चति। ग्लानिगौरवकार्श्येभ्यः स यस्मान्न प्रमुच्यते। वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते। धात्वन्तरस्थो लीनत्वान्न सौक्ष्म्यादुपलभ्यते।

अल्पदोषेन्धनः क्षीणः क्षीणेन्धन इवानलः। दोषोऽल्पोऽनिलसंभूतो ज्वरोत्सृष्टस्य वा पुनः। धातुमन्यतमं प्राप्य करोति विषमज्वरम्। सन्ततं रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः। मेदोगतस्तृतीयेऽह्नि त्वस्थिमज्जगतः पुनः। कुर्य्याच्चातुर्थकं घोरमन्तकं रोगसङ्करम्। केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम्। सप्ताहं वा दशाहं वा द्वादशाहमथापि वा। सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते। अहोरात्रे सन्ततको द्वौ कालावनुवर्त्तते। अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्त्तते। तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः। वातेनोद्धूयमानस्तु यथा पूर्य्येत सागरः। वातेनोदीरितास्तद्वद्दोषाः कुर्व्वन्ति वै ज्वरान्। यथा वेगागमे वेलां छादयित्वा महोदधेः। वेगहानौ तदेवाम्भस्तत्रैवान्तर्निधीयते। दोषवेगोदये तद्वदुदीर्य्येत ज्वरोऽस्य वै। वेगहानौ प्रशाम्येत यथाम्भः सागरे तथा। विविधेनाभिघातेन ज्वरो यः संप्रवर्त्तते। यथा दोषप्रकोपन्तु तथा मन्येत तं ज्वरम्। श्यावास्यता विषकृते दाहातीसारहृद्ग्रहाः। अभक्तरुक्पिपासा च तोदो मूर्च्छा बलक्षयः। ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुस्तथा। कामजे चित्तविभ्रंशस्तन्द्रालस्यमभक्तरुक्। हृदये वेदना चास्य गात्रञ्च परिशुष्यति। भयात् प्रलापः शोकाच्च भवेत्कोपाच्च वेपथुः। अभिचाराभिशापाभ्यां मोहस्तृष्णाभिजायते। भूताभिषङ्गादुद्वेगहास्यकम्पनरोदनम्। श्रमक्षयाभिघातेभ्यो देहिनां कुपितोऽनिलः। पूरयित्वाखिलं देहं ज्वरमापादयेद्भृशम्। रोगाणां तु समुत्थानाद्विदाहागन्तुतस्तथा। ज्वरोऽपरः सम्भवति तैस्तैरन्यैश्च हेतुभिः। दोषाणां स तु लिङ्गानि कदाचिन्नातिवर्त्तते। गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया। आनद्धत्वेन चात्यर्थं श्वासकासोद्गमेन च। हतप्रभेन्द्रियं क्षामं दुरात्मानमुपद्रुतम्। गम्भीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्जयेत्। हीनमध्याधिकैर्दोषैस्त्रिसप्तद्वादशाहिकः। ज्वरवेगो भवेत्तीव्रो यथापूर्व्वं सुखक्रियः। इति ज्वराः समाख्याता कर्मेदानीं प्रवक्ष्यते"।

ज्वरभेदे क्रियाभेदः सुश्रु० उ० त० उक्तो यथा

"ज्वरस्य पूर्वरूपेषु वर्त्तमानेषु बुद्धिमान्। पाययेत घृतं स्वच्छं ततः स लभते सुखम्। विधिर्मारुतजेष्वेष पैत्तिकेषु विरेचनम्। मृदु प्रच्छर्द्दनं तद्वत्कफजेषु विधीयते। सर्वं द्विदोषजेषूक्तं यथादोषं विकल्पयेत्। स्नेहनीयोऽशोध्यश्च संयोज्यो लङ्घनादिना। रूपप्राग्रूपयोर्विद्यान्नानात्वं वह्निधूमवत्। प्रव्यक्तरूपेषु हितमेकान्तेनापतर्पणम्। आमाशयस्थे दोषे तु सोत्क्लेशे वमनं परम्। आनद्धः स्तिमितैर्दोषैर्य्यावन्तं कालमातुरः। कुर्य्यादनशनं तावत्ततः संसर्गमाचरेत्। न लङ्घयेन्मारुतजे क्षयजे मानसे तथा। अलङ्घ्याश्चापि ये पूर्वं द्विव्रणीये प्रकीर्त्तिताः। अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम्। ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम्। सृष्टमारुतविण्मूत्रं क्षुत्पिपासाऽसहं लघुम्। प्रसन्नात्मेन्द्रियं क्षामं नरं विद्यात् सुलङ्घितम्। बलक्षयस्तृषा शोषस्तन्द्रानिद्राभ्रमक्लमाः। उपद्रवाश्च श्वासाद्याः सम्भवन्त्यतिलङ्घनात्। दीपनं कफविच्छेदि पित्तवातानुलोमनम्। कफवातज्वरार्त्तेभ्यो हितमुष्णाम्बु तृट्छिदम्। तद्धि मार्दवकृद्दोषस्रोतसां शीतमन्यथा। सेव्यमानेन तोयेन ज्वरः शीतेन वर्द्धते। पित्तमद्यविषोत्थेषु शीतलं तिक्तकैः शृतम्। गाङ्गेयनागरोशीरपर्पटोदीच्यचन्दनैः। दीपनी पाचनी लघ्वी ज्वरार्त्तानां ज्वरापहा। अन्नकाले हिता पेया यथास्वं पाचनैः कृता। बहुदोषस्य मन्दाग्नेः सप्तरात्रात्परं ज्वरे। लङ्घनान्तं यवागूभिर्यदा दोषो न पच्यते। तदा तं मुखवैरस्यतृष्णारोचकनाशनैः। कषायैः पाचनैर्हृद्यैर्ज्वरघ्नैः समुपाचरेत्। पञ्चमूलीकषायन्तु पाचनं पवनज्वरे। सक्षौद्रं पैत्तिके मुस्तकटुकेन्द्रयवैः कृतम्। पिप्पल्यादिकषायन्तु कफजे परिपाचनम्। द्वन्द्वजेषु तु संसृष्टं दद्यादथ विवर्जयेत्। पीताम्बुर्लङ्घितो भुक्तो जीर्णी क्षीणः पिपासितः। मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च। पक्वं दोषं विजानीयाज्ज्वरे देयं तदौषधम्। हृदयोद्वेष्टनं दोषप्रकृतिवैकृत्यादेकेषां पक्वलक्षणम्। दोषाप्रवृत्तिरालस्यं तन्द्रालालास्रुतिररोचकम्। विवन्धो बहुमूत्रता। गुरूदरत्वमस्वेदो न पक्तिः शकृतोऽरतिः। स्वापः स्तम्भो गुरुत्वञ्च गात्राणां वह्निमार्दवम्। मुखस्याशुद्धिरग्लानिः प्रसङ्गी बलवान् ज्वरः। लिङ्गैरेभिर्विजानीयाज्ज्वरमामं विचक्षणः। सप्तरात्रात्परं केचिन्मन्यन्ते देयमौषधम्। दशरात्रात्परं केचिद्दातव्यमिति निश्चिताः। पैत्तिके वा ज्वरे देयमल्पकालसमुत्थिते। अचिरज्वरितस्यापि देयं स्याद्दोषपाकतः। भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम्। शोधनं शमनीयन्तु करोति विषमज्वरम्। च्यवमानं ज्वरोत्क्लिष्टमुपेक्षेत मलं

सदा। अतिप्रवर्त्तमानञ्च स्तम्भयेदतिसारवत्। यदा कोष्ठानुगाः पक्वा विबद्धाः स्रोतसां मलाः। अचिरज्वरितस्यापि तदा दद्याद्विरेचनम्। पक्वोह्यनिर्हृतो दोषो देहे तिष्ठन् महात्ययम्। विषमं वा ज्वरं कुर्य्याद्बलव्यापदमेव च। तस्मान्निर्हरणं कार्य्यं दोषाणां वमनादिभिः। प्राक्कर्म्म वमनं चास्य कार्य्यमास्थापनं तथा। विरेचनं तथा कुर्य्याच्छिरसश्च विरेचनम्। क्रमेण बलिने देयं वमनं श्लैष्मिके ज्वरे। पित्तप्राये विरेकस्तु कार्य्यः प्रशिथिलाशये। सरुजेऽनिलजे कार्य्यं सोदावर्त्ते निरूहणम्। कटीपृष्ठग्रहार्त्तस्य दीप्ताग्नेरनुवासनम्। शिरोगौरवशूलघ्नमिन्द्रियप्रतिबोधनम्। कफाभिपन्ने शिरसि कार्य्यं मूर्द्ध विरेचनम्। दुर्बलस्य समाध्मातमुदरं सरुजं दिहेत्। दारुहैमवतीकुष्ठशताह्वाहिङ्गुसैन्धवैः। अम्लपिष्टैः सुखोष्णैश्च पवने तूर्द्धमागते। बद्धमूत्रपुरीषाय गुदे वर्त्तिं निधापयेत्। पिप्पलीपिप्पलीमूलयवानीचव्यसाधिताम्। पाययेत यवागूं वा मारुतादनुलोमनीम्। शुद्धस्योभयतो यस्य ज्वरः शान्तिं न गच्छति। सशेषदोषरूक्षस्य तस्य तं सर्पिषा जयेत्। कृशञ्चैवाल्पदोषञ्च शमनीयैरुपाचरेत्। उपवासैर्बलस्यन्तु ज्वरे सन्तर्पणोत्थिते। क्षिप्रां यवागूं मन्दाग्निं तृषार्त्तं पाययेन्नरम्। तृट्छर्द्दिदाहघर्मार्त्तं मद्यपं लाजतर्पणम्। सक्षौद्रमम्भसा पश्चाज्जीर्णे यूषरसौदनम्। उपवासश्रमकृते क्षीणे वाताधिके ज्वरे। दीप्ताग्निं भोजयेत् प्राज्ञो नरं मांसरसौदनम्। मुद्गयूषौदनश्चापि हितं कफसमुत्थिते। स एव सितया युक्तः शीतः पित्तज्वरे हितः। दाडिमामलमुद्गानां यूषश्चानिलपैत्तिके। ह्रस्वमूलकयूषेण भोजयेत्कफवातिके। पटोलनिम्बयूषस्तु पथ्यः पित्तकफात्मके। दाहच्छर्द्दियुतं क्षामं निरन्नं तृष्णयार्दितम्। सिताक्षौद्रयुतं लाजतर्पणं पाययेत च। कफपित्तपरीतस्य ग्रीष्मेऽस्रक्पित्तिनस्तथा। मद्यनित्यस्य न हिता यवागूस्तमुपाचरेत्। यूषैरम्लैरनम्लैर्वा जाङ्गलैर्वा रसैर्हितैः। मद्यं पुराणं मन्दाग्नेर्यवान्नोपहितं हितम्। सव्योषं वितरेत्तक्रं कफारोचकपीड़िते। क्षीणोऽल्पदोषो दीनश्च नरो जीर्णज्वरार्दितः। विबद्धः सृष्टदोषश्च रूक्षः पित्तानिलज्वरी। पिपासार्त्तः सदाहो वा पयसा स सुखी भवेत्। तदेव तु पयः पीतं तरुणे हन्ति मानवम्। सर्वज्वरेषु सम्प्राहुं मात्रावद्भोजनं हितम्। वेगापायेऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम्। ज्वरितो हितमश्नीयाद्यद्यप्यस्यारुचिर्भवेत्। अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽथ वा। गुर्व्वभिष्यन्द्यकाले च ज्वरी नाद्यात्कथञ्चन। न तु तस्याहितं भुक्तमायुषे वा सुखाय वा। सततं विषमं वापि क्षीणस्य सुचिरोत्थितम्। ज्वरं संभोजनैः पथ्यैर्लघुभिः समुपाचरेत्। मुद्गान्मसूरांश्चणकान् कुलत्थान् समकुष्ठकान्। आहारकाले यूषार्थं ज्वरिताय प्रदापयेत्। लावान् कपिञ्जलानेणान् पृषतान् शरभान् शशान्। कालपुच्छान् कुरङ्गांश्च तथैव मृगमातृकाम्। मांसार्थं मांससात्म्यानां ज्वरितानां प्रदापयेत्। सारसक्रौञ्चशिखिनः कुक्कुटांस्तित्तिरींस्तथा। गुरूष्णत्वान्न शंसन्ति ज्वरे केचिच्चिकित्सकाः। ज्वरितानां प्रकोपन्तु यदा याति समीरणः। तदैतेऽपि हि शस्यन्ते मात्राकालोपपादिताः। परिषेकावगाहांश्च स्नेहान् संशोधनानि च। स्नानाभ्यङ्गदिवास्वप्नशीतव्यायामयोषितः। न भजेत ज्वरोत्सृष्टो यावन्न बलवान् भवेत्। त्यक्तस्यापि ज्वरेणाशु दुर्बलस्याहितैर्ज्वरः। प्रत्यापन्नो दहेद्देहं शुष्कं वृक्षमिवानलः। तस्मात्कार्य्यः परीहारो ज्वरमुक्तेन जन्तुना। यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा। ज्वरे प्रमोहो भवति स्वल्पैरप्यवचेष्टितैः। निषण्णं भोजयेत्तस्मान्मूत्रोच्चारौ च कारयेत्। अरोचके गात्रसादे वैवर्ण्येऽङ्गमलादिषु। शान्तज्वरोऽपि शोध्यः स्यादनुबन्धभयान्नरः। न जातु तर्पयेत् प्राज्ञः सहसा ज्वरकर्षितम्। तेन सन्दूषितो ह्यस्य पुनरेव भवेज्ज्वरः। चिकित्सेच्च ज्वरान् सर्वान्निमित्तानां विपर्य्ययैः। श्रमक्षयाभिघातोत्थे मूलव्याधिमुपाचरेत्। स्त्रीणामपप्रजातानां स्तन्यावतरणे च यः। तत्र संशमनं कुर्य्याद्यथादोषं विधानवित्”।

अत्र विशेषो गरुड़ पुरा० १५२ अ० उक्तो यथा।

“ज्वरोरोगपतिः पाप्मा मृत्युराजोऽशनोऽन्तकः। क्रोधाद्दक्षाध्वरध्वंसी रुद्रोर्द्धनयनोद्भवः। तत्सन्तापो मोहमयः सन्तापात्माऽपचारजः। विविधैर्नामभिः क्रूरो नानायोनिषु वर्त्तते। पाकलो गजेष्वभितापो वाजिष्वलर्कः कुक्कुरेषु। इन्द्रमदो जलदेऽप्सु नीलिका ज्योतिरौषधिषु भूम्यामूषरो नाम। हृल्लासश्छर्द्दनं कासः स्तम्भः शैत्यं त्वगादिषु। अङ्गेषु शीतपिड़कामालो दर्दः कफोद्भवे। काले यथास्वं सर्वेषां प्रवृत्तिर्वृद्धिरेव वा। निदानोक्तानुपशयो विपरीतोपशायिता। अरुचिश्चाविपाकश्च स्तम्भमालस्यमेव च। हृद्दाहश्च विपा-

कश्च तन्द्राङ्गालस्यमेव च । वस्तिर्विसर्गविलया दोषाणामप्रवर्त्तनम् । लालाप्रसेको हृल्लासः क्षुन्नाशो रसदं मुखम् । यच्च सुप्त गुरुत्वञ्च गात्राणां बहुमूत्रता । न विजीर्णा न वा ग्लानिर्ज्वरस्यामस्य लक्षणम् । क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्दवम् । दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम् । यथास्वलिङ्गं संसर्गे ज्वरसंसर्गजोऽपि वा । शिरोऽर्त्तिमूर्च्छावमिदेहदाहकण्ठास्यशोषारुचिपर्व्वभेदाः । उन्निद्रता संभ्रमरोमहर्षा जृम्भातिवाक्त्वं पवनात् स पित्तात् । तापहान्यरुचिपर्व्वशिरोरुक् पीनसश्वसनकासविबन्धाः । शीतजाड्यतिमिरभ्रमितन्द्राः श्लेष्मवातजनितज्वरलिङ्गम् । शीतस्तम्भस्वेददाहव्यवस्था तृष्णाकासः श्लेष्मपित्तप्रवृत्तिः । मोहस्तन्द्रालिप्ततिक्तास्यता च ज्ञेयं रूपं श्लेष्मपित्तज्वरस्य । सर्व्वजो लक्षणैः सर्व्वैर्द्दाहोऽत्र च मुहुर्मुहुः । तद्वच्छीतं महानिद्रा दिवा जागरणं निशि । सदा वा नैव वा निद्रा महास्वेदोऽति नैव वा । गीतनर्त्तनहास्यादिप्रकृतेहाप्रवर्त्तनम् । साश्रुणी कलुषे रक्ते भग्ने लुलितपक्ष्मणी । अक्षिणी पिण्डिका पार्श्वमूर्द्धपर्व्वास्थिरुग्भ्रमः । सस्वनौ सरुजौ कर्णौ महास्वेदोऽति नैव वा । परिदग्धा खरा जिह्वा गुरुस्रस्ताङ्गसन्निभा । रक्तपित्तकफे जिह्वा लोचने शिरसोऽतिरुट् । कीटानां श्यावरक्तानां मण्डलानाञ्च दर्शनम् । हृद्व्यथा मलसंसर्गः प्रवृत्तिरल्पशोऽति वा । स्निग्धास्यता बलभ्रंशः स्वरसादः प्रलापिता । दोषपाकश्चिरात्तन्द्रा प्रततं कण्ठकूजनम् । सन्निपातमभिन्यासं तं ब्रूयाच्च हृतौजसम् । वायुना कफरुद्धेन पित्तमन्तः सुपीड़ितम् । व्यवायित्वाच्च सौक्ष्म्याच्च बहिर्मार्गं प्रपद्यते । तेन हारिद्रनेत्रत्वं सन्निपातोद्भवे ज्वरे । दोषे विबद्धे नष्टेऽग्नौ सर्व्वसंपूर्णलक्षणः । असाध्यः सोऽन्यथा कृच्छ्रो भवेद्वैकल्यदोऽपि वा । अन्यश्च सन्निपातोत्थो यत्र पित्तं पृथक् स्थितम् । त्वचि कोष्ठे च वा दाहं विदधाति पुरोऽनु वा । तद्वद्वातकफौ शीतं दाहादिर्दुस्तरस्तयोः । शीतादौ तत्र पित्तेन कफे स्यन्दितशोषिते । शीते शान्तेऽष्टके मूर्च्छा मदस्तृष्णा च जायते । दाहादौ पुनरन्ते स्युस्तन्द्रास्वेदवमिक्लमाः । आगन्तुरभिघाताभिषङ्गशापाभिचारतः । चतुर्द्धा तु क्षतच्छेदो दाहाद्यैरभिघातजः । श्रमाच्च तस्मिन् पवनः प्रायो रक्तं प्रदूषयन् । सव्यथाशोकवैवर्ण्यं सरुजं कुरुते ज्वरम् । ग्रहावेशौषधिविषक्रोधभीशोककामजः । अभिषङ्गाद् ग्रहेणास्मिन्नकस्मात्त्रासरोदने । औषधीगन्धजे मूर्च्छा शिरोरुग्वमथुः क्षवः । विषात् मूर्च्छातिसारास्यश्यावता दाहतृड्भ्रमः । क्रोधात् कम्पः शिरोरुक् च प्रलापो भयशोकजे । कामाद्भ्रमोऽरुचिर्द्दाहो ह्रीनिद्राधीधृतिक्षयः । ग्रहादौ सन्निपातस्य रूपादौ मरुतस्तयोः । कोपः कोपेऽपि पित्तस्य यौ तु शापाभिचारजौ । सन्निपातज्वरौ घोरौ तावसह्यतमौ मतौ । तत्राभिचारिकैर्मन्त्रैर्हूयमानस्य तप्यते । पूर्व्वञ्चेतस्ततो देहस्ततो विस्फोटतृड्भ्रमैः । सदाहमूर्च्छैर्ग्रस्तस्य प्रत्यहं वर्द्धते ज्वरः । इति ज्वरोऽष्टधा दृष्टः समासाद्द्विविधस्तु सः । शारीरो मानसः सौम्यस्तीक्ष्णोऽन्तर्बहिराश्रयः । प्राकृतो वैकृतः साध्योऽसाध्यः सामो निरामकः । पूर्व्वं शरीरे शारीरे तापो मनसि मानसे । पवने योगवाहित्वाच्छीतं श्लेष्मयुते भवेत् । दाहः पित्तयुते मिश्रं मिश्रेऽन्तःसंश्रये पुनः । ज्वरोऽधिकं विकाराः स्युरन्तःक्षोभो मलग्रहः । बहिरेव बहिर्वेगे तापोऽपि च सुसाधितः । वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात् । वैकृतोऽन्यः सदुः साध्यः प्रायश्च प्राकृतोऽनिलात् । वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम् । कुर्य्यात् पित्तञ्च शरदि तस्य चानुबलः कफः । तत् प्रकृत्या निसर्गाच्च तत्र नानशनाद्भयम् । कफो वसन्ते तमपि वातपित्तं भवेदनु । बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः । सर्व्वथा विकृतिज्ञाने प्रागसाध्य उदाहृतः । ज्वरोपद्रवतीक्ष्णत्वमग्लानिर्बहुमूत्रता । न प्रवृत्तिर्न विजीर्णा न क्षुत् सामज्वराकृतिः । ज्वरवेगेऽधिका तृष्णा प्रलापः श्वसनं भ्रमः । मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् । जीर्णतामविपर्य्यासात् सप्तरात्रञ्च लङ्घनात् । ज्वरः पञ्चविधः प्रोक्तो मलकालबलाबलात् । प्रायशः सन्निपातेन भूयसाऽप्युपदृश्यते । सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ । धातुमूत्रशकृद्वाहिस्रोतसां व्यापिनो मलाः । तापयन्तस्तनूं सर्व्वां तुल्यदृष्यादिवर्द्धिताः । बलिनो गुरवस्तद्वद्विशेषेण रसान्विताः । सततं निष्प्रतिद्वन्द्वा ज्वरं कुर्य्युः सुदुःसहम् । मलं ज्वरोष्मा धातून् वा स शीघ्रं क्षपयेत्ततः । सर्व्वाकाररसादीनां शुद्ध्याऽशुद्ध्यापि वा क्रमात् । वातपित्तकफैः सप्तदशद्वादशवासरान् । प्रायोऽनुयाति मर्य्यादां मोक्षाय च बधाय च । इत्यग्निवेशस्य मतं

हारीतस्य पुनः स्मृतिः। द्विगुणा सप्तमी (चतुर्दशी) या च नवम्येकादशी तथा। एषा त्रिदोषमर्य्यादा मोक्षाय च वधाय च। शुक्लशुक्लौ ज्वरः कालं दीर्घमप्यत्र वर्तते। कृशानां व्याधियुक्तानां मिथ्याहारादिसेविनाम्। अल्पोऽपि दोषो दुष्ट्यादेर्लब्ध्वान्यतमतो बलम्। स प्रत्यनीको विषमं यस्माद्वृद्धिक्षयान्वितः। सोऽरिपक्षो ज्वरं कुर्य्याद्विषमक्षयवृद्धिभाग्। दोषः प्रवर्तते तेषां स्वे काले ज्वरयन् बली। निवर्तते पुनश्चैव प्रत्यनीकबलाबलः। क्षीणदोषे ज्वरः सूक्ष्मो रसादिष्वेव लीयते। लीनत्वात् कार्श्यवैवर्ण्यजाड्यादीनादधाति सः। आसन्नविवृतास्यत्वात् स्रोतसां रसवाहिनाम्। आशु सर्वस्य वपुषो व्याप्तिर्दोषेण जायते। सन्ततः सततस्तेन विपरीतो विपर्य्ययात्। विषमो विषमारम्भः क्षपाकालेन सङ्गवान्। दोषो रक्ताशयः प्रायः करोति सन्ततं ज्वरम्। अहोरात्रस्य संधिः स्यात् सकृदन्येद्युराश्रितः। तस्मिन्मांसवहा नाड़ी मेदोनाड़ी तृतीयके। ग्राही पित्तानिलान् मूर्द्ध्नस्त्रिकस्य कफपित्ततः। स पृष्ठस्यानिलकफात् स चैकाहान्तरः स्मृतः। चतुर्थको मलैर्मेदोमज्जास्थ्यन्यतरस्थिते। मज्जास्थितैरत्यपरः प्रभावमनुदर्शयेत्। द्विविधं कफेन जङ्घाभ्यां सपूर्वं शिरसोऽनिलात्। अस्थिमज्जोरुपगते चातुर्थकविपर्य्ययः। त्रिधा त्र्यहं ज्वरयति दिनमेकन्तु मुञ्चति। बलाबलेन दोषाणामनुचेष्टादिजन्मनाम्। पक्वानामविपर्य्यासात् सप्तरात्रन्तु लङ्घयेत्। ज्वरः स्यात् मनसस्तद्वत् कर्मणश्च तदा तदा। गम्भीरधातुचारित्वात् सन्निपातेन सम्भवात्। तुल्यो भूयिष्ठदोषाणां दुश्चिकित्स्यश्चतुर्थकः। सूक्ष्मात् सूक्ष्मतरास्वेषु दूराद्दूरतरेषु च। दोषो रक्तादिमार्गेषु शनैरल्पश्चिरेण यत्। याति देहञ्च नाशेषं सन्तापादीन् करोत्यतः। क्रमो यत्नेन विच्छिन्नः सन्तापो लक्ष्यते ज्वरः। विषमो विषमारम्भः क्षपाकालानुसारवान्। यथोत्तरं मन्दमतिर्मन्दशक्तिर्यथायथम्। कालेनाप्नोति सदृशान् स रसादींस्तथा तथा। दोषो ज्वरयति क्रुद्धश्चिराच्चिरतरेण च। भूमौ स्थितं जलैः सिक्तं कालमेव प्रतीक्षते। अङ्कुराय यथा वीजं दोषवीजं भवेत्तथा। वेगं कृत्वा विषं यद्वदाशये नीयते बलम्। कुप्यत्याप्तबलं भूयः काले दोषविषं तथा। एवं ज्वराः प्रवर्त्तन्ते विषमाः सन्ततादयः। उत्क्लेशो गौरवं दैन्यं भङ्गोऽङ्गानां विजृम्भणम्। अरोचको वमिः श्वासः सर्वक्लिन्नसगे ज्वरे। रक्तनिष्ठीवनं तृष्णा अक्ष्णोस्तु पिड़कोद्गमः। दाहरागभ्रममदप्रलापो रक्तसंश्रिते। तृड्ग्लानिः सृष्टवर्च्चस्कमन्तर्दाहो भ्रमस्तथा। दौर्बल्यं गात्रविक्षेपो मांसस्थे मेदसि स्थिते। स्वेदोऽतितृष्णा वमनं दौर्गन्ध्यञ्चासहिष्णुता। प्रलापो ग्लानिररुचिरस्थिगे त्वस्थिभेदनम्। दोषप्रवृत्तिरूर्द्ध्वाधःश्वासाङ्गक्षेपकूजनम्। अन्तर्दाहो वहिःशैत्यं श्वासो हिक्का च मज्जगे। तमसो दर्शनं मर्म्मच्छेदनं स्तब्धमेढ़ता। शुक्रप्रवृत्तिर्मृत्युश्च जायते शुक्रसंश्रये। उत्तरोत्तरदुःसाध्याः पश्चान्ये ते विपर्य्यये। प्रलिम्पन्निव गात्राणि श्लेष्मणा गौरवेण च। मन्दज्वरः प्रलापस्तु स शीतः स्यात् प्रलेपकः। नित्यं मन्दज्वरो रूक्षः शीतः कृच्छ्रेण गच्छति। स्तब्धाङ्गः श्लेष्मभूयिष्ठो भवेद्वातबलासकः। हरिद्राभेदवर्णाभस्तद्वल्लेपः प्रमेहति। स वै हारिद्रको नाम ज्वरभेदोऽन्तकः स्मृतः। कफवातौ समौ यत्र हीनपित्तस्य देहिनः। तीक्ष्णोऽथ वा दिवा मन्दो जायते रात्रिजो ज्वरः। दिवाकरापीतबले व्यायामाच्च विशोषिते। शरीरे नियतस्थाता ज्वरः स्यात् पौर्वरात्रिकः। आमाशये यदा दुष्टे श्लेष्मपित्ते ह्यधःस्थिते। तदार्द्धं शीतलं देहे त्वर्द्धं चोष्णं प्रजायते। काये पित्तं यदा दुष्टं श्लेष्मा चान्ते व्यवस्थितः। उष्णत्वं तेन देहस्य शीतत्वं करपादयोः। रसरक्ताश्रयः साध्यो मांसमेदोगतश्च यः। अस्थिमज्जागतः कृच्छ्रस्तैस्तैः साङ्गैर्हतप्रभः। विसंज्ञो ज्वरवेगार्त्तः सक्रोध इव वीक्ष्यते। सदोषशब्दञ्च शकृद्द्रवं मुञ्चति वेगवत्। देहो लघुर्व्यपगतक्लममोहतापः पाको मुखे करणसौष्ठवमव्यथत्वम्। स्वेदः क्षवः प्रकृतिगामिमनोऽन्नलिप्सा कण्डूश्च मूर्ध्नि विगतज्वरलक्षणानि”।

माधवकरनिदाने वातिकादीनां लक्षणभेद उक्तस्तत्र

वातिकस्य लक्षणं यथा

“वेपथुर्विषमो वेगः कण्ठौष्ठपरिशोषणम्। निद्रानाशः क्षवः स्तम्भो गात्राणां रौक्ष्यमेव च। शिरोहृद्गात्ररुग्वक्त्रवैरस्यं गाढ़विट्कता। शूलाध्माने जृम्भणञ्च भवत्यनिलजे ज्वरे।

पैत्तिकस्य लक्षणं यथा

“वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः। कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते। प्रलापो वक्त्रकटुता मूर्च्छा दाहो मदस्तृषा। पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च”।

कफनिमित्तजस्य माधवकरनिदानोक्तं लक्षणं यथा

"स्तैमित्यं स्तिमितो वेग आलस्यं मधुरास्यता। शुक्लमूत्रपुरीषत्वं स्तम्भस्तृप्तिरथापि च। गौरवं शीतमुत्क्लेदो रोमहर्षोऽतिनिद्रता। प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोश्च शुक्लता"।

वातपैत्तिकस्य लक्षणं यथा "तृष्णा मूर्च्छा भ्रमो दाहः स्वप्ननाशः शिरोरुजा। कण्ठास्यशोषो वमथूरोमहर्षोऽरुचिस्तमः। पर्वभेदश्च जृम्भा च वातपित्तज्वराकृतिः।

वातश्लैष्मिकस्य लक्षणं यथा

"स्तैमित्यं पर्वणां भेदो निद्रा गौरवमेव च। शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्त्तनम्। सन्तापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः"।

पित्तश्लैष्मिकस्य लक्षणंयथा

"लिप्ततिक्तास्यता तन्द्रा मोहः कासोऽरुचिस्तृषा। मुहुर्दाहो मुहुःशीतं पित्तश्लेष्मज्वराकृतिः"।

सान्निपातिकस्य लक्षणं यथा

"क्षणे दाहः क्षणे शीतमस्थिसन्धिशिरोरुजा। सास्रावे कलुषे रक्ते निमग्ने चापि लोचने। सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवावृतः। तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः। परिदग्धा खरस्पर्शा जिह्वा स्रस्ताङ्गता परम्। ष्ठीवनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च। शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा। स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः। कृशत्वं नातिगात्राणां सततं कण्ठकूजनम्। कोटानां श्यावरक्तानां मण्डलानाञ्च दर्शनम्। मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च। चिरात् पाकश्च दोषाणां सन्निपातज्वराकृतिः"।

असाध्यस्य सान्निपातिकस्य तस्य लक्षणं यथा

"दोषे विरुद्धे नष्टेऽग्नौ सर्व्वसम्पूर्णलक्षणः। सन्निपातज्वरोऽसाध्यः कृच्छ्रसाध्यस्ततोऽन्यथा। सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा। पुनर्घोरतरोभूत्वा प्रशमं याति हन्ति वा। सप्तमी द्विगुणा (चतुर्द्दशी) चैव नवम्येकादशी तथा। एषा त्रिदोषमर्य्यादा मोक्षाय च वधाय च। सन्निपातज्वरस्यान्ते कर्णमूले सुदारुणः। शोथः संजायते तेन कश्चिदेव प्रमुच्यते"।

जीर्णस्य लक्षणं यथा

"त्रिसप्ताहव्यतीतस्तु ज्वरोयस्तनुतां गतः। प्लीहाग्निसादं कुरुते स जीर्ण इति उच्यते"।

आगन्तोर्लक्षणं यथा "अभिघाताभिचाराभ्यामभिषङ्गाभिशापतः। आगन्तुर्जायते दोषैर्यथास्वं तं विभावयेत्"।

विषभक्षणजागन्तुकस्य तस्य लक्षणं यथा

"श्यावास्यता विषकृते तथातीसार एव च। भक्तारुचिः पिपासा च तोदश्च सह मूर्च्छया"।

औषधीगन्धजस्य कामजस्य च तस्य लक्षणं यथा।

"औषधीगन्धजे मूर्च्छा शिरोरुग्वमथुस्तथा। कामजे चित्तविभ्रंशस्तन्द्रालस्यमभोजनम्"।

भयादिजस्य लक्षणं यथा "भयात् प्रलापः शोकाच्च भवेत् कोपाच्च वेपथुः। अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते। भूताभिषङ्गादुद्वेगो हास्यरोदनकम्पनम्। कामशोकभयाद्वायुः क्रोधात् पित्तं त्रयोमलाः। भूताभिषङ्गात् कुप्यन्ति भूतसामान्यलक्षणाः"।

विषमज्वरस्य संप्राप्तिर्यथा

"दोषोऽल्पोऽहितसम्भूतो ज्वरोत्सृष्टस्य वा पुनः। धातुमन्यतमं प्राप्य करोति विषमज्वरम्"।

सन्ततादिज्वराणां प्रतिनियतं धातवो दूष्यास्तथा हि

"सन्ततो रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः। मेदोगतस्तृतीयेऽह्नि त्वस्थिमज्जगतः पुनः। कुर्य्याच्चातुर्थकं घोरमन्तकं रोगसङ्करम्। सप्ताहं वा दशाहं वा द्वादशाहमथापि वा। सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते। अहोरात्रे सन्ततको द्वौ कालावनुवर्त्तते। अन्येद्युष्कस्त्वहोरात्र एककालं प्रवर्त्तते। तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः। केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम्। कफपित्तात् एकग्राही पृष्ठाद्वातकफात्मकः। वातपित्ताच्छिरोग्राही त्रिविधः स्यात् तृतीयकः। चतुर्थको दर्शयति प्रभावं द्विविधं ज्वरः। जङ्घाभ्यां श्लैष्मिकः पूर्व्वं शिरस्तोऽनिलसम्भवः। विषमज्वर एवान्यश्चातुर्थकविपर्य्ययः। मध्ये अह्नी ज्वरयत्यादावन्ते च मुञ्चति"।

वातबलासकलक्षणं

"नित्यं मन्दज्वरो रूक्षः शूनकस्तेन सीदति। स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी"।

प्रलेपकलक्षणं यथा

"प्रलिम्पन्निव गात्राणि घर्मेण गौरवेण वा। मन्दज्वरो विलेपी च सशीतः स्यात् प्रलेपकः"।

विषमज्वरविशेषाः।

"विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते। तेनार्द्ध

शीतलं देहे चान्तश्चोष्णं प्रजायते। काये दुष्टं यदा पित्तं श्लेष्मा चान्ते व्यवस्थितः। तेनोष्णत्वं शरीरस्य शीतत्वं हस्तपादयोः" अत्र मतान्तरम्। "काये श्लेष्मा यदा दुष्टः पित्तञ्चान्ते व्यवस्थितम्। शीतत्वं तेन गात्राणामुष्णत्वं हस्तपादयोः"।

शीतपूर्वोज्वरो यथा।

"त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे। तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च"।

दाहपूर्वो ज्वरो यथा

"करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च। तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः। द्वावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ। दाहपूर्वस्तयोः कष्टः कृच्छ्रसाध्यतमश्च सः"।

वातादिज्वराणां धातुविशेषदुष्टतया रसादिगतदोषजज्वराणां लक्षणानि

"गुरुता हृदयोत्क्लेशः सदनं छर्द्यरोचकौ। रसस्थे न्यज्ज्वरे लिङ्गं दैन्यञ्चास्योपजायते"१। रक्तनिष्ठीवनं दाहो मोहश्छर्दनविभ्रमौ। प्रलापः पिड़का तृष्णा रक्तप्राप्ते ज्वरे नृणाम् २। पिण्डिकोद्वेष्टनं तृष्णा दुष्टमूत्रपुरीषता। ऊष्मान्तर्दाहविक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे३। भृशं स्वेदस्तृषा मूर्च्छा प्रलापश्छर्दिरेव च। दौर्गन्ध्यारोचकौ ग्लानिर्मेदःस्थे चासहिष्णुता ४। भेदोऽस्थ्नां कूजनं श्वासो विरेकश्छर्दिरेव च। विक्षेपणञ्च गात्राणामेतदस्थिगते ज्वरे ५। तमः प्रवेशनं हिक्का कासः शैत्यं वमिस्तथा। अन्तर्दाहो महाश्वासो मर्मच्छेदश्च मज्जगे ६। मरणं प्राप्नुयात् तत्र शुक्रस्थानगते ज्वरे ७। शेफसः स्तब्धता मोक्षः शुक्रस्य तु विशेषतः"।

ऋतुभेदे प्राकृतादिज्वरविशेषो यथा

"वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात्। वैकृतोऽन्यः स दुःसाध्यः प्राकृतश्चानिलोद्भवः। वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम्। कुर्य्यात् पित्तञ्च शरदि तस्य चानुबलः कफः। तत् प्रकृत्या विदध्याञ्च तत्र नानशनाद्भयम्। कफो वसन्ते तमपि वातपित्तं भवेदनु। काले यथास्वं सर्वेषां प्रवृत्तिर्वृद्धिरेव वा।

अन्तर्वेगज्वरलक्षणम्

"अन्तर्दाहोऽधिकस्तृष्णा प्रलापः श्वसन भ्रमः। सन्ध्यस्थिशूलमस्वेदो दोषवर्च्चो विनिग्रहः। अन्तर्वेगस्य लिङ्गानि ज्वरस्यैतानि लक्षयेत्"।

बहिर्वेगज्वरलक्षणम् "सन्तापोऽभ्यधिको बाह्यस्तृष्णादीनाञ्च मार्दवम्। बहिर्वेगस्य लिङ्गानि सुखसाध्यत्वमेव च"।

आमज्वरलक्षणम्

"लालाप्रसेको हृल्लासहृदयाशुद्ध्यरोचकाः। तन्द्रालस्याविपाकास्यवैरस्यं गुरुगात्रता। क्षुन्नाशो बहुमूत्रत्वं स्तब्धता बलवान् ज्वरः। आमज्वरस्य लिङ्गानि न दद्यात् तत्र भेषजम्। भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम्।

पच्यमानज्वरस्य लक्षणं यथा

"ज्वरवेगोऽधिकस्तृष्णा प्रलापः श्वसनं भ्रमः। मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम्"।

पक्वज्वरस्य लक्षणम्

"क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्दवम्। दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम्"।

साध्यज्वरस्य लक्षणं यथा

"बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः"।

असाध्यज्वरलक्षणं यथा।

"हेतुभिर्बहुभिर्जातो बलिभिर्बहुलक्षणः। ज्वरः प्राणान्तकृद्यश्च शीघ्रमिन्द्रियनाशनः। ज्वरक्षीणस्य शूनस्य गम्भीरो दैर्घ्यरात्रिकः। असाध्यो बलवान् यश्च केशसीमन्तकृज्ज्वरः"।

गम्भीरस्य लक्षणं यथा "गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहो न तृष्णया। आनद्धत्वेन चात्यर्थं श्वासकासोद्गमेन च। आरम्भाद्विषमो यस्तु यश्च वा दैर्घ्यरात्रिकः। क्षीणस्य चातिरूक्षस्य गम्भीरो यस्य हन्ति तम्। विसंज्ञस्ताम्यते यस्तु शेते निपतितोऽपि वा। शीतार्दितोऽन्तरुष्णश्च ज्वरेण म्रियते नरः। यो हृष्टरोमा रक्ताक्षो हृदि संघातशूलवान्। वक्त्रेण चैवोच्छ्वसिति तं ज्वरो हन्ति मानवम्। हिक्काश्वासतृषायुक्तं मूढविभ्रान्तलोचनम्। सन्ततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः। हतप्रभेन्द्रियक्षाममरोचकनिपीडितम्। गम्भीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्जयेत्"।

ज्वरस्योपद्रवा रक्षितोक्ताः यथा

"श्वासो मूर्च्छाऽरुचिश्छर्दिस्तृष्णातीसारविड्ग्रहाः। हिक्काकासोऽङ्गभेदश्च ज्वरस्योपद्रवा दश"।

ज्वरमुक्तिपूर्वरूपम्। "दाहः स्वेदो भ्रमस्तृष्णा कम्पविड्भिसंज्ञिता। कूजनञ्चास्यवैगन्ध्यमाकृतिर्ज्वरमोक्षणे"। "ज्वरमुक्तलक्षणं "स्वेदो लघुत्वं शिरसः कण्डूः पाको मुखस्य च। क्षवथुश्चान्नलिप्सा च ज्वरमुक्तस्य लक्षणम्"। सुश्रुतगारुड़ाद्युक्ताद् विशेषज्ञापनाय पृथगुपन्यासः।

ज्वरितस्य वर्ज्यावर्ज्यानि भावप्र० उक्तानि यथा "सामान्यतो ज्वरी पूर्वं निर्वाते निलये वसेत् । निर्वातमायुषो वृद्धिमारोग्यं कुरुते यतः । व्यजनस्यानिलस्तृष्णास्वेदमूर्च्छाश्रमापहः । तालवेत्रभवो वातस्त्रिदोषशमनो मतः । वंशव्यजनजः सोष्णो रक्तपित्तप्रकोपनः । चामरो वस्त्रसंभूतो मायूरो वेत्रजस्तथा । एते दोषजिता वाताः स्निग्धा हृद्याः सुपूजिताः । नवज्वरी भवेद्यत्नाद्गुरूष्णवसनावृतः । यथतु पक्वपानीयं पिबेत् किञ्चिन्निवारयन् । विनापि भेषजैर्व्याधिः पथ्यादेव निवर्तते । न तु पथ्यविहीनस्य भेषजानां शतैरपि । ततो ज्वरे वर्जनीयान्याह सुश्रुतः "परिषेकान् प्रदेहांश्च स्नेहान् संशोधनानि च । दिवास्वप्नं व्यवायञ्च व्यायामं शिशिरं जलम् । क्रोधप्रवातभोज्यांश्च वर्जयेत्तरुणज्वरी" । परिषेकः स्नानादिः, प्रदेहोऽनुलेपनाभ्यङ्गादिः । परिषेकादिसेवने दोषमाह तत्रैव

"शोषं छर्द्दिं मदं मूर्च्छां भ्रमं तृष्णामरोचकम् । प्राप्नोत्युपद्रवानेतान् परिषेकादिसेवनात्" । आदिशब्देन प्रदेहादयो गृह्यन्ते । हारीतेन प्रत्येकं सेवने फलमुक्तञ्च "व्यायामज्वरसंवृद्धिर्व्यवायात् स्तम्भमूर्च्छनम् । स्मृतिश्च स्नेहपानाद्यैर्मूर्च्छा छर्द्दिर्मदोऽरुचिः । गुर्वन्नभोजनात् स्वप्नाद्विष्टम्भो दोषकोपनम् । अग्निसादः खरत्वञ्च स्रोतसां च प्रवर्तनम्" । स्मृतिरिति व्यवायादित्यत्र संबध्यते । स्वप्नात् दिवास्वापात्, ज्वरमुक्तावपि वर्ज्यमाह । "सज्वरो ज्वरमुक्तो वा विदाहीनि गुरूणि च । असात्म्यान्नानि पानानि विरुद्धाध्यशनानि च । व्यायाममतिचेष्टां वाऽभ्यङ्गं स्नानञ्च वर्जयेत् । तेन ज्वरः शमं याति शान्तश्च न पुनर्भवेत्" । ज्वरी लङ्घनं कुर्य्यादित्याह चरको वाग्भटश्च "आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन् । विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत्" । तथा "ज्वरादौ लङ्घनं प्रोक्तं ज्वरमध्ये तु पाचनम् । ज्वरान्ते भेषजं दद्याज्ज्वरमुक्ते विरेचनम् । त्रिविधं त्रिविधे दोषे तत्समीक्ष्य प्रयोजयेत् । दोषेऽपि लङ्घनं पथ्यं मध्ये लङ्घनपाचनम् । प्रभूते शोभनं तच्च मूलादुन्मूलयेन्मलान्" । चक्रदत्तश्च "तरुणं तु ज्वरं पूर्वं लङ्घनेन क्षयं नयेत् । आमदोषमलिङ्गाद्वा लङ्घयेत्तं यथाविधि, । अन्यच्च "वातः पचति सप्ताहात् पित्तं तु दशभिर्दिनैः । श्लेष्मा द्वादशभिर्घस्रैः पच्यते वदतां वर ! ।"लङ्घनं लङ्घनीयस्तु कुर्य्याद्दोषानुरूपतः । त्रिरात्रमेकरात्रं वाऽहोरात्रमथ वा ज्वरे । निर्वातसेवनात् स्वेदाल्लङ्घनादुष्णवारिणः । पानादामज्वरे क्षीणे पश्चादौषधमाचरेत्" । आत्रेयेणोक्तम् "ज्वरादौ लङ्घनं प्रोक्तं ज्वरमध्ये तु पाचनम् । ज्वरान्ते भेषजं दद्याज्ज्वरमुक्ते विरेचनम् । दोषशेषस्य पाकार्थमग्नेः सन्धुक्षणाय च । लङ्घितश्चाल्पदोषश्चेत् यवागूपानमाचरेत् । शालिषष्टिकमुद्गानां यूषं वा भक्तमाचरेत् । पञ्चकोलेन संसिद्धां यवागूं मध्यलङ्घने । अत्यर्थं लङ्घितं दृष्ट्वा तस्य सन्तर्पणं हितम् । द्राक्षादाड़िमखर्ज्जूरपियालैः सपरूषकैः । तर्पणार्हस्य कर्तव्यन्तर्पणं ज्वरशान्तये" । अत्र लङ्घनशब्देनानशनमुच्यते । यत आह सुश्रुतः "आनद्धःस्तिमितैर्दोषैर्यावन्तं कालमातुरः । तावत्त्वनशनं कुर्य्यात्ततः संसर्गमाचरेत्" । आनद्धःस्तिमितैर्दोषैः सम्बद्धः । संसर्गं औषधान्नादिप्रसङ्गम् । यत आह चरकः "चतुःप्रकारा संशुद्धिः पिपासारोधमारुतौ । पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् । चतुःप्रकारा संशुद्धिर्वमनञ्च विरेचनम् । निरूहणं च वस्तिश्च शिरोविरेचनं तथा । नत्वनुवासनं कार्य्यं तस्य बृंहणत्वात् । अत्र लङ्घनं कर्षणमित्यर्थः । तथा च सुश्रुतः "शरीरलाघवकरं यद्द्रव्यं कर्म वा पुनः । तं लङ्घनमिति ज्ञेयं बृंहणं तु पृथग्विधम्" । लङ्घनात्कर्षणादन्यत् शरीरपोषकमित्यर्थः । ननु "आनद्धः स्तिमितैर्दोषैरित्यादि पूर्वोक्तसुश्रुतवचनात्सामान्यतो ज्वरिणा यथाऽनशनरूपं लङ्घनं क्रियते । तथा चतुःप्रकारा संशुद्धिः इत्यादि चरकवचनाद्वमनादिरूपं लङ्घनं सर्वैर्ज्वरिभिः कथं न क्रियते । तत्रोच्यते वमनादिकमवस्थाविशेषेषु क्रियते न तु सर्वज्वरेषु तथा च सुश्रुतः "सोत्क्लेशे बलिने देयं वमनं श्लैष्मिकज्वरे । पित्तप्राये विरेकस्तु कार्यः प्रशिथिलाशये । सरुजे नीरुजे कार्य्यं सोदावर्ते निरूहणम् । कफाभिपन्ने शिरसि कार्य्यं मूर्द्धविरेचनम्" । अपिच सर्वज्वरिभिः पिपासानिग्रहो न कार्य्यः । यत आह हारीतः । "तृष्णा गरीयसी घोरा सद्यः प्राणविनाशिनी । तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम्" । अतोऽवस्थाविशेष एव पिपासासहनं ज्वरिभिर्मारुतसेवनं न कार्य्यम् सुश्रुतेन प्रवातसेवनस्य सर्वथा निषिद्धत्वात् । अतो मारुतसेवनमप्यवस्थाविशेष एव युक्तम् । लङ्घनाम्बुयवागूभिर्यदा दोषो न पच्यते । तदा तु सुखवैरस्यतृष्णारोचकनाशनैः । ज्वरघ्नैः पाचनैर्हृद्यैः

कषायैः समुपाचरेत्” इत्यत्र लङ्घनपाचनयोः स्फुट एव भेदः। व्यायामोऽपि न कार्य्यस्तस्यातिनिषिद्धत्वात् अवस्थाविशेषे पुनः पार्श्वपरिवर्त्तनादिरूपः सोऽपि कर्त्तव्यः तस्माच्चतुःप्रकारा संशुद्धिरित्यादिश्लोके लङ्घनपदं कर्षणपर्य्यायमिति निर्णीतम्। अनशनरूपस्य लङ्घनस्य फलमाह “लङ्घनेन क्षयं नीते दोषे सन्धुक्षितेऽनले। विज्वरत्वं लघुत्वं च क्षुच्चैवास्योपजायते”। लङ्घनेन अनशनेन प्रवृद्धे दोषे क्षयन्नीते। यत आह “आहारं पचति शिखी दोषानाहारवर्जितः”। पचतीति सन्धुक्षितेऽनले आच्छादकदोषे क्षीणेऽग्नौ प्रदीप्ते यथोक्तसंप्राप्तिसामग्रीविघटनात् विज्वरत्वं शरीरस्य गौरवाभावेन लघुत्वम्। क्षुत् बुभुक्षा च जायते इत्यर्थः। अन्यच्चाह सुश्रुतः “अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम्। ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारणम्”। अनवस्थितदोषाग्नेः स्वस्थानादितो गतो दोषोऽग्निश्च यस्य तस्य ज्वरिणः काङ्क्षा अन्नाभिलाषः, रुचिः लङ्घनेनामपाकान्मुखशोषादिनाशे मुखस्य यत्प्रकृतत्वं सैव रुचिः शोभा। “रुचिः स्त्री दीप्तिशोभायामभीष्टार्थाभिलाषयोरिति” मेदिनीकारः” सम्यक्कृतस्य लङ्घनस्य लक्षणमाह “वातमूत्रपुरीषाणां विसर्गे गात्रलाघवे। हृदयोद्गारकण्ठास्यशुद्धौ तन्द्राक्लमे गते। स्वेदे जातेऽरुचौ चापि क्षुत्पिपासासहोदये। कृतं लङ्घनमादेश्यं निर्व्यथे चान्तरात्मनि”। हृदयस्य शुद्धिरनवरोधः उद्गारशुद्धिः सधूमाम्लोद्गाराभावः। कण्ठस्य शुद्धिः कफानवलिप्तत्वम्। आस्यशुद्धिः मुखस्य प्रकृतरसत्वम्। तन्द्राक्लमे तन्द्रा च क्लमश्च तस्मिंस्तन्द्रा निद्रा क्लमोऽत्र ग्लानिः। क्षुत्पिपासासहोदये क्षुत्पिपासयोः सह युगपदुदये, अन्तरात्मनि मनसि। एतानि लक्षणानि मिलितान्येव सम्यक्कृतं लङ्घनं बोधयन्ति न तु प्रत्येकम्। हीनस्य लङ्घनस्य लक्षणमाह “कफोत्क्लेशः सहृल्लासष्ठीवनं च मुहुर्मुहुः। कण्ठस्य हृदयाशुद्धिस्तन्द्रा स्याद्धीन लङ्घने”। उपस्थितवमनत्वमिव कफोत्क्लेशः कफस्य वमनायोपस्थितिः। हृल्लासष्ठीवनं हृदयात्कफनिर्गमः। अतिशयितस्य लङ्घनस्य लक्षणमाह “पर्वभेदोऽङ्गमर्दश्च कासः शोषो मुखस्य च। क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्बल्यं श्रोत्रनेत्रयोः। मनसः संभ्रमोऽभीक्ष्णमूर्द्ध्ववातस्तमो हृदि। देहाग्निर्बलहानिश्च लङ्घनेऽतिकृते भवेत्। अरतिर्बलहानिश्च लङ्घनेऽतिकृते भवेत्” । कर्णनेत्रयोः दौर्बल्यं स्वविषयग्रहणासामर्थ्यम्। मनसः संभ्रमः भ्रान्तिः। ऊर्द्ध्ववातः उद्गारबाहुल्यम्। हृदि तमः अन्धकारप्रविष्टस्येवाज्ञानम्। बलरक्षणेन लङ्घनं कारयेदित्याह “बलाविरोधिना चैनं लङ्घनेनोपपादयेत्। बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः”। अयमर्थः। एनं रोगिणं बलाविरोधिना अनतिबलक्षयकारिणा लङ्घनेन उपपादयेत् कुत इति चेत्तत्राह। यदर्थं यस्मै आरोग्याय अयं क्रियाक्रमः चिकित्सोपक्रमः। तत आरोग्यं बलाधिष्ठानं बलाश्रयमित्यर्थः। केषाञ्चिदनशनस्य निषेधमाह सुश्रुतः” “तद्धि मारुततृष्णाक्षुत्मुखशोषभ्रमान्वितैः। न कार्य्यं गुर्विणीबालवृद्धदुर्बलभीरुभिः। न क्षयाध्वश्रमक्रोधकामशोषचिरज्वरी”। तत् अनशनम् उल्बणमारुतयुक्तेन ज्वरिणा न कार्य्यं मारुतोऽत्र निरामो बोद्धव्यः। सामे मारुते लङ्घनं कार्य्यमेव यत आह तन्त्रान्तरे “अवश्यमेव कुर्वीत ज्वरी सामे समीरणे। लङ्घनं ह्यामपाकार्थं न तदूर्द्ध्वं यथा कफे”। तदूर्द्ध्वं आमपाकादूर्द्ध्वम्। अत एवोक्तम् “कफपित्ते द्रुतौ धातू सहेते लङ्घनं बहु। आमक्षयादूर्द्ध्वमपि वायुर्न सहते क्षणम्”। आमस्य लक्षणमाह “आहारस्य रसः सारो यो न पक्वोऽग्निलाघवात्। आमसंज्ञाञ्च लभते बहुव्याधिसमाश्रयः”। तन्त्रान्तरे तु “आममन्नरसं केचित् केचित्तु मलसञ्चयम्। प्रथमं दोषदुष्टिं वा केचिदामं प्रचक्षते। अविपक्वमसंसक्तं दुर्गन्धं बहुपिच्छिलम्। सादनं सर्वगात्राणामामइत्यामशब्दितः। तेनामेन समायुक्ताः दोषा दूष्याश्च तादृशाः। तदुद्भवा आमयाश्च साम इति बुधैः स्मृताः”। तत्र सामस्य वातस्य लक्षणमाह, “वायुः सामो विबद्धाग्निः सादतन्द्रान्त्रकूजनैः। वेदनाशोथनिस्तोदैः क्रमशोऽङ्गानि पीड़येत्। विचरेद्युगपच्चापि गृह्णाति कुपितो भृशम्। स्नेहाद्यैर्वृद्धिमायाति मेघः सूर्य्योदये निशि”। विचरेद् युगपत् वायुरामश्चैककालं विचरेत् कुपितः सामो वायुः भृशमतिशयेन गृह्णात्यङ्गानीत्यर्थः। वातस्य तथैव निरामस्य लक्षणमाह “निरामो विशदो रूक्षो निर्गन्धोऽत्यल्पवेदनः। विपरीतगुणैः शान्तिः स्निग्धैर्जातिविशेषतः”।

अथ प्रसङ्गात्सामस्य पित्तस्य लक्षणमाह “पित्तं सामं भवेदम्लं दुर्गन्धं हरितं गुरु। अम्लिकाकण्ठहृद्दाहकरं श्यावं तथा स्थिरम्”। अम्लिका अम्लिलता (चुक्रीति)

श्लोके। पित्तस्य तस्य निरामस्य लक्षणमाह। "निरामं पित्तमाताम्रमत्युष्णं कटुकं सरम्। दुर्गन्धि रुचिकृद्वह्निबलवर्द्धनमीरितम्"।

अथ सामकफस्य लक्षणमाह "आलस्यतन्द्राहृदयाविशुद्धिर्दोषाप्रवृत्त्या विड्मूत्रताभिः। गुरूदरत्वारुचिसुप्रताभिरामान्वितं व्याधिमुदाहरन्ति। आमक्षयेल्लङ्घनकोष्णपेयालघ्वन्नरूक्षौदनतिक्तयूषैः। विरूक्षणस्वेदनपाचनैश्च संशोधनैरूर्द्ध्वमधस्तथैव। तद्धि मारुततृष्णायां लङ्घनं कार्य्यमेव च"। तथा सुखशोषश्रमावपि निरामयोरेव विवक्षितौ सामयोस्तु तयोर्ल्लङ्घनं कार्य्यमेव, गुर्व्विणीबालवृद्धादिभिरपि निरामैरेव नैव लङ्घनं कार्य्यं सामैः पुनस्तैरपि लङ्घनं कार्य्यमेव। "क्षये धातुक्षये राजयक्ष्मणि च वातजे ज्वरे लङ्घनं न कार्य्यम्। ज्वरी लङ्घनेऽपि जलं पिबेदित्याह सुश्रुतः। "तृषितो मोहमायाति मोहात् प्राणान्विमुञ्चति। अतः सर्व्वास्ववस्थासु न क्वचिद्वारि वर्ज्जयेत्"। हारीतेनोक्तम् "तृष्णा गरीयसी घोरा सद्यःप्राणविनाशिनी। तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम्"। अवश्यं पेयमपि जलं ज्वरी किञ्चिद्वारयन् पिबेत्। यत आह सुश्रुत एव। "जीविनां जीवनं जीवो जगत्सर्व्वं तु तन्मयम्। अतोऽत्यन्तनिषेधेन न क्वचिद्वारि वारयेत्"। जीवनं जलं क्वचिन्न वारयेदेव तथा च, "ज्वरे नेत्रामये कुष्ठे मन्देऽग्नावुदरे तथा। अरोचके प्रतिश्याये प्रसेके श्वयथौ क्षये। व्रणे च मधुमेहे च पानीयं मन्दमाचरेत्"। मुखप्रसेके अल्पं पिबेत् मन्दमाचरेत् पिबेत्। यत आह "अतियोगेन सलिलं तृष्यतोऽपि प्रयोजितम्। प्रयाति श्लेष्मपित्तत्वं ज्वरितस्य विशेषतः"। तच्च जलं नवज्वरी शीतलं न पिबेदित्याह सुश्रुतः "नवज्वरे प्रतिश्याये पार्श्वशूले गलग्रहे। सद्यःशुद्धौ तथाऽऽध्माने व्याधौ वातकफोद्भवे। अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ। हिक्कायां स्नेहपाने च शीतं वारि विवर्ज्जयेत्"। अन्यच्च वर्ज्यमाह स एव "सेव्यमानेन शीतेन ज्वरस्तोयेन वर्द्धते"। अत्र शीतं जलं अक्वथितं निषिद्धम्। तथा सति क्वथितमायातम्। तत्र क्वथितस्य विधिर्गुणाश्च "क्वाथ्यमानं तु निर्व्वेगं निष्फेनं निर्म्मलं च यत्। तत्तोयं क्वथितं श्रेयं दोषघ्नं पाचनं लघु"। शनैः क्वथितस्य विधानमाह सुश्रुतः "वातश्लेष्मज्वरार्त्ताय हितमुष्णाम्बु तृष्यते। दीपनं स्यात् कफजे वातप्र-न्तानुलोमनम्। तद्धि मार्दवकृद्दोषस्रोतसां शीतमन्यथा"। वाग्भटश्च "तृष्णायां प्राप्तमुष्णाम्बु पिबेद्वातकफज्वरे। तत्कफं विलयं नीत्वा तृष्णामाशु निवर्त्तयेत्। उदीर्य्य चाग्निं स्रोतांसि मृदूकृत्य विशोधयेत्। वातपित्तकफस्वेदशकृन्मूत्राणि सारयेत्"। अर्द्धोष्णोदकस्य लक्षणं गुणाश्च "क्वाथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलं तथा। अर्द्धावशिष्टं यत्तोयं तदुष्णोदकमुच्यते। ज्वरकासकफश्वासपित्तवातामभेदसाम्। नाशनं पाचनञ्चैव पथ्यमुष्णोदकं सदा"। ऋतुभेदे जलस्य पाकभेदः। "त्रिपादशेषं सलिलं ग्रीष्मे शरदि शस्यते"। "अन्ये तु निदाघे त्वर्द्धपादोनं पादहीनन्तु शारदम्। हिमेऽर्द्धशेषं शिशिरे तथा वर्षावसन्तयोः। शिशिरे च वसन्ते च हिमे चार्द्धावशेषितम्। अष्टमांशावशेषन्तु वारि वर्षासु शस्यते।" ज्वरविषये कश्चिदस्यावर्ज्यादिभेदः चक्रदत्त उक्तो यथा

"ज्वरितं ज्वरमुक्तं वा दिनान्ते भोजयेल्लघु। श्लेष्मक्षये विवृद्धोष्मा बलवाननलस्तदा। गुर्व्वभिष्यन्द्यकाले च ज्वरी नाद्यात् कथञ्चन। न हि तस्याहितं भुक्तमायुषे वा सुखाय वा। लङ्घनं स्वेदनं काले यवाग्वस्तिक्तको रसः। पाचनान्यविपक्वानां दोषाणां तरुणे ज्वरे। आसप्तरात्रं तरुणं ज्वरमाहुर्मनीषिणः। मध्यं द्वादशरात्रन्तु पुराणमत उत्तरम्। पाचनीयं शमनीयं कषायं पाययेत्तु तम्। ज्वरितं षडहेऽतीते लघ्वन्नं प्रतिभोजयेत्। सप्ताहात् परतोऽस्तब्धे सामे स्यात् पाचनं ज्वरे। निरामे शमनं स्तब्धे सामे नौषधमाचरेत्। लालाप्रसेको हृल्लासहृदयाशुद्ध्यरोचकाः। तन्द्रालस्याविपाकास्यवैरस्यं गुरुगात्रता। क्षुन्नाशो बहुमूत्रं च स्तब्धता बलवान् ज्वरः। आमज्वरस्य लिङ्गानि न दद्यात् तत्र भेषजम्। भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम्। मृदौ ज्वरे लघौ देहे प्रचलेषु मलेषु च। पक्वं दोषं विजानीयाज्ज्वरे देयं तदौषधम्"। जीर्णतेन ज्वरो नानाविधः ऐकाहिकादिः नवज्वरः जीर्णज्वरः विषमज्वरादिश्च उक्तवाक्येभ्यो ज्ञेयः। नक्षत्रभेदे ज्वरोत्पत्तौ मृत्युतद्भोगकालभेदाः मुहूर्त्तचि॰ पी॰ धा॰ उक्ता यथा

"स्वातीन्द्रपूर्व्वाशिवसार्पभे मृतिर्ज्वरेऽन्यभे स्थिरता भवेद्रुजः। याम्यश्रवोवारुणतक्षभे शिवाघस्रा हि पक्षो द्वाधिपार्कवासवे। मूलाग्निदास्रे नव पितृभे नखा वुभत्रा-

र्य्यमेज्याऽदितिधातृभे नगाः" मासोऽजवैश्वेऽथ यमाहि मूलभे मिश्रेशपित्र्ये फणिदंशने मृतिः। मु० चि०

"स्वातीति। इन्द्रो ज्येष्ठा पूर्वास्तिस्रः शिव आर्द्रा सार्पभम् अश्लेषा। एषु भेषु ज्वरे पुंसः स्त्रियो वा ज्वरोत्पत्तौ मृतिरेव स्यात् उक्तञ्च वसिष्ठेन" "पूर्वात्रयस्वातिभुजङ्गरौद्रसुरेश्वरर्क्षेषु च यस्य रोगः। स्याद्रक्षितुं देवचिकित्सकोऽपि क्षितावशक्तः खलु रोगिणं तम्" देवचिकित्सको देववैद्यो धन्वन्तरिः। अथान्त्यमैत्रे रेवत्यनुराधयोर्ज्वरोत्पत्तौ रुजो रोगस्य स्थिरता भवेत् बहुकालेन रोगनिवृत्तिः स्यादित्यर्थः। तथा भरण्यादिनक्षत्रचतुष्के शिवा एकादश घस्रादिवसाः रोगस्थैर्य्यं स्यात्तदनन्तरं रोगमुक्तिरिति सर्व्वत्र व्याख्येयम्। इन्द्राधिपं विशाखा अर्क्कौ हस्तः वासवं धनिष्ठा एषु त्रिषु भेषु पक्षः पञ्चदश दिवसा रोगस्थैर्य्यस्य। मूलाग्निदास्रे मूलकृत्तिकाश्विनीषु त्रिषु नव दिवसाः पित्र्यभे मघायां नखा विंशतिर्दिवसाः नामैकदेशे नामग्रहणमिति न्यायेन बुध्न्योऽहिर्बुध्न्य उत्तराभाद्रपदा अर्य्यमोत्तराफाल्गुनी। ईज्याऽदितिधातृभानि प्रसिद्धानि एषु पञ्चसु भेषु नगाः सप्त दिवसाः। अजवैश्वे मृगोत्तराषाढ़योर्द्वयोर्मासस्त्रिंशद्दिनानि रोगस्थैर्य्यं ततो रोगनिवृत्तिः यदाह "कृच्छ्रात् स्फुटं प्राणिति मित्रपौष्णे धिष्ण्ये च मासाच्छशिविश्वधिष्ण्ये। रोगस्य मुक्तिः पितृदेवधिष्ण्ये वारैर्भवेद्विंशतिभिश्च नूनम्" प्राणिति जीवतीत्यर्थः। "पक्षाद्वसुद्वीशकरेषु भेषु मूलाश्विनाग्नित्रितये नवाहात्। तोयेशचित्रान्तकविष्णुभेषु नैरुज्यमेकादशभिर्दिनैश्च। पुष्ये त्वहिर्बुध्न्य पुनर्वसौ च भाग्यार्यमर्क्षेषु च सप्तरात्रात्।

अत्र शीघ्रं रोगविमुक्तये संक्षिप्ता शान्तिरप्यभिहिता वसिष्ठेन "ऋक्षेशरूपं कनकेन कृत्वा तल्लिङ्गमन्त्रैश्च सुगन्धिपुष्पैः। वस्त्राक्षतैर्गुग्गुलुधूपदीपनैवेद्यताम्बूलफलैश्च सम्यक्। पूजां च कृत्वाऽमयनाशनाय द्विजाय दद्यादतुलं शिवाय" आमयो रोगः। अतुलमपरिमितद्रव्यम् प्रत्येकनक्षत्रशान्तिर्विशदा नक्षत्रशान्त्यध्याये वसिष्ठेनोक्ता सा तत एव समवधार्य्या"।

भैषज्यर० अन्यथा तद्रोगकाल उक्तो यथा

"कृत्तिकायां यदा व्याधिरुत्पन्नो भवति स्वयम्। नवरात्रं भवेत् पीड़ा त्रिरात्रं रोहिणीषु च। मृगशीर्षे पञ्चरात्रमार्द्रायां मुच्यतेऽसुभिः। पुनर्वसौ तथा पुष्ये सप्तरात्रेण मोचनम्। नवरात्रं तथाऽश्लेषे श्मशानान्तं मघासु च। द्वौ मासौ पूर्वफल्गुन्यामुत्तरासु त्रिपञ्चकम्। हस्ते च सप्तमे मोक्षश्चित्रायामर्द्धमासकम्। मासद्वयं तथा स्वात्यां विशाखे दिनविंशतिः। मित्रे चैव दशाहानि ज्येष्ठायामर्द्धमासकम्। मूलेन जायते मोक्षः पूर्वाषाढ़े त्रिपञ्चकम्। उत्तरे दिनविंशत्या द्वौ मासौ श्रवणे तथा। धनिष्ठायामर्द्धमासो वारुणे च दशाहकम्। पूर्वभाद्रपदे देवि! ऊनविंशतिवासरान्। त्रिपक्षञ्चाहिर्बुध्न्ये च रेवत्यां दशरात्रकम्। अहोरात्रं तथाश्विन्यां भरण्यान्तु गतायुषः। एवं क्रमेण जानीयान्नक्षत्रेषु यथोचितम्"।

रोगिणस्ताराशुद्धिग्रहशुद्धिभ्यां भोगकालभेदव्यवस्था।

तिथिनक्षत्रवारयोगभेदे ज्वरोत्पत्तौ मु० चि मृत्युरुक्तो यथा।

"रौद्राहिशाक्राम्बुपयाम्यपूर्वाद्विदैववस्वग्निषु पापवारे। रिक्ताहरिस्कन्ददिने च रोगे शीघ्रं भवेद्रोगिजनस्य मृत्युः" मु० चि०।

"रौद्रादीनि भानि प्रसिद्धानि पापवाराः सूर्य्यभौमशनयः रिक्ताः प्रसिद्धाः हरिर्द्वादशी स्कन्ददिनं षष्ठी एतास्तिथयः एवंविधे विशिष्टयोगे यस्य रोगोत्पत्तिर्भवेत्तस्य रोगिजनस्य शीघ्रं मृत्युर्भवेत्। उक्तं च दैवज्ञमनोहरे "उरगवरुणरुद्रावासवेन्द्रत्रिपूर्वायमदहनविशाखाः पापवारेण युक्ताः। तिथिषु नवमिषष्ठीद्वादशीवा चतुर्थी सहजमरणयोगो रोगिणां कालहेतुः" इति चतुर्थीग्रहणं चतुर्दश्युपलक्षकं मत्वा मूले रिक्ताग्रहणं कृतम् अतएवाह वसिष्ठः "अश्लेषार्द्रात्रिपूर्वायमवरुणमरुच्छक्रताराऽनलाः स्युर्द्वादश्यां स्कन्दरिक्तातिथिषु च रविजाऽऽर्कारवारेषु येषाम्। रोगः संजायते ते यमपुरमचिरात् प्राप्नुवन्त्येव चन्द्रे जन्मन्यष्टाख्यबन्धुव्ययभवनगते मृत्युलग्ने च राशाविति" पी० धा०।

अस्य प्रतिप्रसवः "यद्यत्र चन्द्रस्तस्यैव गोचरे चाशुभप्रदः। तदा नूनं भवेन्मृत्युः सुधासंसिक्तदेहिन"। इति दीपिकाटीकाधृतवाक्यम्।

२ ज्वराधिष्ठातृदेवभेदे च रौद्रज्वरदेवस्य वैष्णवज्वरदेवेन युद्धादिकथा हरिवं० १८१ अ०

"भज्यमानेष्वनीकेषु त्रातुकामः समभ्ययात्। ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः। भस्मप्रहरणो रौद्रः कालान्तकयमोपमः। नदन्मेघसहस्रस्य तुल्यो निर्घातनिस्वनः। निश्वसन् जृम्भमाणश्च निद्रान्विततनुर्भ-

शम् । नेत्राभ्यामाकुलं वक्त्रं मुहुः कुर्वन् भ्रमन्मुहुः । संहृष्टरोमा ग्लानाक्षः क्षिप्तचित्त इव श्वसन् । हलायुधमभिक्रुद्धः साक्षेपमिदमब्रवीत्" । तेन बलरामस्याभिभवे ततस्तस्य कृष्णेन सह युद्धे पराजयकथा १८२ अ०

"ज्ञात इत्यभिविज्ञाय ज्वरं शत्रुनिसूदनः । कृष्णो भुजबलात्तन्तु चिक्षेपाथ महीतले । मुक्तमात्रस्तु बाहुभ्यां कृष्णदेहं विवेश सः । अमुक्त्वा विग्रहन्तस्य कृष्णस्याप्रतिमौजसः । स ह्याविष्टस्तदा तेन ज्वरेणाप्रतिमौजसा । कृष्णः स्खलन्निव मुहुः क्षितौ गाढं व्यवर्त्तत । जृम्भते क्षुवते चैव स्खलते च पुनः पुनः । रोमाञ्चोत्थितगात्रस्तु निद्रया चाभिभूयते । ततः स्थैर्यं समालम्ब्य कृष्णः परपुरञ्जयः । विकुर्वाणो महायोगी जृम्भमाणः पुनः पुनः । ज्वराभिभूतमात्मानं विज्ञाय पुरुषोत्तमः । सोऽसृजज्ज्वरमन्यं तु पूर्वज्वरविनाशनम् । घोरं वैष्णवमत्युग्रं सर्वप्राणिभयङ्करम् । स सृष्टमात्रस्तेजस्वी बलवान् भीमविक्रमः । कृष्णज्वरो ज्वरं पूर्वं गृहीत्वा स्वेन तेजसा । कृष्णाय हृष्टः प्रायच्छत्तं जग्राह ततो हरिः । ततस्तं परमक्रुद्धो वासुदेवो महाबलः । स्वगात्रात् स्वज्वरेणैव निरक्रामयत् वीर्य्यवान् । आविध्य भूतले चैनं शतधा कर्त्तुमुद्यतः । व्याघोषयज्ज्वरस्तत्र भोः परित्रातुमर्हसि । आविध्यमाने तस्मिंस्तु कृष्णेनामिततेजसा । अशरीरा ततो वाणी तमुवाचान्तरीक्षगा । कृष्ण ! कृष्ण ! महाबाहो ! यदूनां नन्दिवर्द्धन ! । मा वधीर्ज्वरमेतं तु रक्षणीयस्त्वयाऽनघ ! । इत्येवमुक्ते वचने तं मुमोच हरिः स्वयम् । भूतभव्यभविष्यस्य जगतः परमो गुरुः । कृष्णस्य पादयोर्मूर्ध्ना शरण्यं स गतो ज्वरः । प्रणम्य च हृषीकेशं ज्वरो वाक्यमथाब्रवीत् । शृणुष्व मम गोविन्द ! विज्ञाप्यं यदुनन्दन ! । यो मे मनोरथो देव ! तं त्वं कुरु महाभुज ! । अहमेको ज्वरस्तात ! नान्यो लोके ज्वरो भवेत् । त्वत्प्रसादाद्धि देवेश ! वरमेतं वृणोम्यहम् । देव उवाच । एवम्भवतु भद्रं ते यथा त्वं ज्वर ! काङ्क्षसे । वरार्थिनां वरो देयो भवांश्च शरणागतः । एक एव ज्वरो लोके भवानस्तु यथा पुरा । योऽयं मया ज्वरः सृष्टो मय्येवैष प्रलीयताम् । वैशम्पायन उवाच । एवमुक्ते तु वचने ज्वरं प्रति महायशाः । कृष्णः प्रहरतां श्रेष्ठः पुनर्वाक्यमुवाच ह । कृष्ण उवाच । शृणुष्व ज्वर ! सन्देशं यथा लोके चरिष्यसि । सर्वजातिषु विन्यस्तस्तथा स्थावरजङ्गमे । त्रिधा विभजस्व चात्मानं मत्प्रियं यदि काङ्क्षसे । चतुष्पदान् भजैकेन द्वितीयेन च स्थावरान् । तृतीयो यश्च ते भागो मानुषेषूपपत्स्यते । त्रिधाभूतं वपुः कृत्वा पक्षिषु त्वं भव ज्वर ! । चतुर्थो यस्तृतीयस्य भविष्यति च ते ध्रुवम् । एकान्ततश्चतुर्भागः खोरकश्च चतुर्थकः । मानुषेष्वेकपादेन वस त्वं प्रविभजस्व वै । जातिष्वथावशेषेषु निवस त्वं शृणुष्व मे । वृक्षेषु कीटरूपेण तथा सङ्कोचपत्रकः । पाण्डुपत्रश्च विख्यातः फलेष्वातुर्य्यमेव च । पद्मिनीषु हिमं भूत्वा पृथिव्यामपि चोषरः । अपान्तु नीलिका भूयाः शिखोद्भेदश्च बर्हिणाम् । गैरिकः पर्वतेष्वेव मत्प्रसादाद्भविष्यसि । गोष्वपस्मारको भूत्वा खोरकश्च भविष्यसि । एवं विविधरूपेण भविष्यसि महीतले । दर्शनात् स्पर्शनाच्चैव प्राणिनां वधमेष्यसि । ऋते देवमनुष्यांश्च नान्यस्त्वां विषहिष्यते" ।

ज्वराश्च नानादेवसृष्टा यथोक्तं हरिवं० १६८अ० "पितामहमुखोद्भूता रौद्रा रुद्राङ्गसम्भवाः । कुमारस्कन्दनाम्नैव ज्वरा वै वैष्णवादयः" "स्वेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति" माघः ।

ज्वरकालकेतुरस पु० ज्वरस्य कालकेतुरिव कर्म्म० । "रसं विषं गन्धकताम्रकञ्च मनःशिलाटङ्करतालकञ्च । विमर्द्य वज्रीपयसा समांशं गजाह्वयं तत्र पुटं विदध्यात् । द्विगुञ्जमस्यैव मधुप्रयुक्तं ज्वरं निहन्त्यष्टविधं महोग्रम् । पुरा भवान्यै कथितो भवेन नृणां हिताय ज्वरकालकेतुः" भैषज्यर० उक्ते औषधभेदे ।

ज्वरकुञ्जरपारीन्द्ररस पु० ज्वर एव कुञ्जरस्तस्य पारीन्द्रः सिंह इव हिंसकत्वात् तादृशो रसः । भैषज्यर० उक्ते ज्वरनाशके औषधभेदे । तल्लक्षणं तत्रोक्तं यथा "मूर्च्छितं रसकर्षैकं तदर्द्धं जारिताभ्रकम् । तारं ताम्रञ्च रसजं रसकं ताप्यकं तथा । मौक्तिकं विद्रुमं लौहं गिरिजं गैरिकं शिला । गन्धकं हेमसारञ्च पलार्द्धञ्च पृथक् पृथक् । चीराग्नी सुरवल्ली च शोथघ्नी प्रविकारिका । भाटामला जग्रोत्पलिका च सतिक्ता तु सुदर्शना । अग्निजिह्वा पूतितैला शूर्पपर्णी प्रसारिणी । प्रत्येकस्वरसं दत्त्वा मर्दयेत् त्रिदिनावधि । भक्षयेत् पर्णखण्डेन चतुर्गुञ्जाप्रमाणतः । महाग्निकारको रोग सङ्करघ्नः प्रयोगराट् । ज्वरान् सर्वान् सततं सन्ततान्येद्युस्तृतीयकचतुर्थकान् । निहन्त्याशु भास्करस्तिमिरं तथा । कासं श्वासं प्रमेहञ्च सशोथं पाण्डुकामलाम् । ग्रहणीं क्षयरोगञ्च सर्वोपद्रवसंयुतम् । ज्वरकुञ्जरपारीन्द्रः प्रथितः पृथिवीतले"

ज्वरकेशरिन् पु० ज्वरस्य तद्रूपगजस्य केशरीव हन्तृत्वात्। "शुद्धसूतं विषं व्योषं गन्धं त्रिफलमेव च। जयपालसमं कृत्वा भृङ्गतोयेन मर्द्दयेत्। गुञ्जामात्रा वटी कार्य्या बालानां सर्षपाकृतिः। सितया च समं पीता पित्तज्वरविनाशिनी। मरिचेन प्रयुक्ता सा सन्निपातज्वरापहा। पिप्पलीजीरकाभ्याञ्च दाहज्वरविनाशिनी। ज्वरकेशरिनामायं रसो ज्वरविनाशनः" भैषज्यर० उक्ते औषधभेदे।

ज्वरघ्न पु० ज्वरं हन्ति हन–अमनुष्यकर्त्तरि टक्। १गुडूच्याम्, २वास्तूके ३ज्वरनाशके त्रि० शब्दार्थ०। ४मञ्जिष्ठायां स्त्री ङीप्। राजनि०।

ज्वरधूमकेतुरस पु० ज्वरस्य धूमकेतुरग्निरिव दाहकत्वात् कर्म०। "भवेत् समं सूतसमुद्रफेनं हिङ्गूलगन्धं परिमर्द्य यत्नात्। नवज्वरे यल्लमितं त्रिषत्तमार्द्राम्बुनाऽयं ज्वरधूमकेतुः" भैषज्यर० उक्ते औषधभेदे।

ज्वरनागमयूरचूर्ण न० ज्वर एव नागः सर्पस्तस्य मयूर इव हिंसकत्वात् कर्म०।

"लौहाभ्रटङ्कनं ताम्रं तालकं वङ्गमेव च। शुद्धसूतं गन्धकञ्च शिग्रुबीजं फलत्रिकम्। चन्दनातिविषा पाठा वचा च रजनीद्वयम्। उशीरं चित्रकं देवकाष्ठञ्च सपटोलकम्। जीवकर्षभकाजाजग्रस्तालीशं वंशलोचना। कण्टकारीफलं मूलं शटीपत्रं कटुत्रयम्। गुडूचीसत्वधन्याकं कटुका क्षेत्रपर्पटी। मुस्तकं बालकं विल्वं यष्टीमधुसमं समम्। भागाच्चतुर्गुणं देयं कृष्णजीरस्य चूर्णकम्। तत्समं तालपुष्पञ्च चूर्णं दण्डोत्पलाभवम्। कैरातं तत्समं देयं तत्समं चपलाभवम्। एतच्चूर्णं समाख्यातं ज्वरनागमयूरकम्। प्रतिकर्षमितं खाद्यं युक्त्या वा रुचिवर्द्धनम्। सन्ततादिज्वरं हन्ति साध्यासाध्यं न संशयः। चयोद्भवञ्च धातुस्थं कामशोकोद्भवं ज्वरम्। भूतावेशज्वरञ्चैवमभिचारसमुद्भवम्। दाहशीतज्वरं घोरं चातुर्थ्यादिविपर्य्ययम्। जीर्णञ्च विषमं सर्वं प्लीहानमुदरं तथा। कामलां पाण्डुरोगञ्च शोथं हन्ति न संशयः। भ्रमं तृष्णाञ्च कासञ्च शूलानाहौ क्षयं तथा। यकृतं गुल्मशूलञ्च आमवातं निहन्ति च। त्रिकपृष्ठकटीजानुपार्श्वानां शूलनाशनम्। अनुपानं शीतजलं न देयमुष्णवारिणा" भैषजर० उक्ते औषधभेदे।

ज्वरवलि पु० ज्वरशान्त्यै देयो बलिः शाक०। भैषज्यर० उक्ते ज्वरनाशके बलिभेदे तत्प्रकारो यथा "ज्वरामयगृहीतस्य मुष्टिभिर्नवभिः कृतम्। तण्डुलैरोदनं तेन कुर्य्यात् पुत्तलकं शुभम्। तं हरिद्रावलिप्ताङ्गं चतुःपीतध्वजान्वितम्। हरिद्रारसपूर्णाभिः पुटिकाभिश्चतसृभिः। मण्डितं गन्धपुष्पाद्यैरवकीर्य्य विसर्जयेत्। एवं दिनत्रयं कुर्य्यात् ज्वररोगोपशान्तये" (ओदनेन पुत्तलं निर्माय वीरणचाचिकायां संस्थाप्य हरिद्राभिरवलिप्य चतुःपीतपताकाभिरलङ्कृत्य गन्धपुष्पाद्यैरवकीर्य्य हरिद्रारसपूर्णाश्चतस्रः पुटिकाश्चतुःकोणे संस्थाप्याः)। पुटिका अश्वत्थपत्ररचितठोङ्गा। अन्योऽपि प्रकारो विधानपारिजातादौ दृश्यः।

ज्वरभैरवचूर्ण न० ज्वरस्य भैरव इव विनाशकत्वात् कर्म०।

"नागरं त्रायमाणा च पिचुमर्द्दो दुरालभा। पथ्या मुस्तं वचा दारु व्याघ्री शृङ्गी शतावरी। पर्पटं पिप्पलीमूलं विशाला पुष्करं शटी। मूर्वा कृष्णा हरिद्रे द्वे लोध्रचन्दनशुष्ककम्। कुटजस्य फलं वल्कं यष्टीमधुकचित्रकम्। शोभाञ्जनं बला चातिविषा च कटुरोहिणी। मुषली पद्मकाष्ठञ्च यमानी माषपर्णिका। मरिचं चामृता विल्वं वालं पङ्कस्य भार्गी। तेजपत्रं त्वचं धात्री पृश्निपर्णी पटोलकम्। गन्धकं पारदं लौहमभ्रकञ्च मनःशिला। एतेषां समभागेन चूर्णमेव विनिर्दिशेत्। तदर्द्धं प्रक्षिपेत्तत्र चूर्णं भूनिम्बसम्भवम्। मात्रामस्य प्रयुञ्जीत दृष्ट्वा दोषबलाबलम्। चूर्णं भैरवसंज्ञन्तु ज्वरान् हन्ति न संशयः। पृथग्दोषांश्च विविधान् समस्तान् विषमज्वरान्। द्वन्द्वजान् सन्निपातोत्थान् मानसानपि नाशयेत्। प्राकृतं वैकृतञ्चैव सौम्यं तीक्ष्णमथापि वा। अन्तर्गतं बहिःस्थञ्च निरामं साममेव च। ज्वरमष्टविधं हन्ति साध्यासाध्यं न संशयः। नानादेशोद्भवञ्चैव वारिदोषभवं तथा। विरुद्धभेषजभवं ज्वरमाशु व्यपोहति। अग्निमान्द्यं यकृत् प्लीहा पाण्डुरोगमरोचकम्। उदराण्यन्त्रवृद्धिञ्च रक्तपित्तं त्वगामयम्। श्वयथुञ्च शिरःशूलं वातामयरुजां जयेत्। ज्वरभैरवसंज्ञन्तु भैरवेण कृतं शुभम्" भैषज्यर० उक्ते औषधभेदे।

ज्वरभैरवरस पु० ज्वरे भैरव इव नाशकत्वात् कर्म०। "त्रिकटु त्रिफला टङ्कविषगन्धकपारदम्। जैपालञ्च समं मर्द्यं द्रोणपुष्पीरसैर्दिनम्। ताम्बूलेन समं खादेदर्द्धगुञ्जामितां वटीम्। मुद्गयूषं शिखरिणी पथ्यं देयं प्रयत्नतः। नवज्वरं त्रिदोषोत्थं जीर्णञ्च विषमज्वरम्। दिनैकेन निहन्त्याशु रसोऽयं ज्वरभैरवः" भैषज्यर० उक्ते औषधभेदे।

ज्वरमातङ्गकेशरिरस पु० ज्वर एव मातङ्गो गजस्तस्य केशरीव कर्म्म०।

"पारदं गन्धकं चैव हरितालं समाक्षिकम्। कटुत्रयं तथा पथ्या क्षारौ द्वौ सैन्धवं तथा। निम्बस्य विषमुष्टेश्च वीजं चित्रकमेव च। एषां माषमितं भागं ग्राह्यं प्रति सुसंस्कृतम्। द्विमाषं कानकफलं विषस्यापि द्विमाषिकम्। निर्गुण्डीस्वरसेनैव शोषयेत्तत् प्रयत्नतः। सार्द्धरक्तिप्रमाणेन वटी कार्य्या सुशोभना। सर्वज्वरहरी चैषा भेदिनी दोषनाशिनी। आमाजीर्णप्रशमनी कामलापाण्डुरोगहा। वह्निदीप्तिकरी चैषा जठरामयनाशिनी। उष्णोदकानुपानेन दातव्या हितकारिणी। भाषितो लोकनाथेन ज्वरमातङ्गकेशरी" भैषज्यर० उक्ते औषधभेदे।

ज्वरमुरारिरस पु० ज्वरो मुर इवासुरभेदस्तस्यारिः कर्म्म०।

"शुद्धसूतं शुद्धगन्धं विषञ्च दरदं पृथक्। कर्षप्रमाणं कर्षार्द्धं लवङ्गं मरिचं पलम्। शुद्धं कनकवीजञ्च पलद्वयमितं तथा। त्रिवृता कर्षमेकञ्च भावयेद्दन्तिकाद्रवैः। सप्तधा च ततः कार्य्या गुडीगुञ्जामिता शुभा। ज्वरमुरारिनामायं रसोज्वरकुलान्तकः। अत्यन्ताजीर्णपूर्णे च ज्वरे विष्टम्भसंयुते। सर्वाङ्गग्रहणीगुल्मे चामवातेऽम्लपित्तके। कासश्वासे यक्ष्मरोगेऽप्युदरे सर्वसम्भवे। गृध्रस्यां सन्धिमज्जस्थे वाते शोथे च दुस्तरे। [illegible] प्लीहरोगे च वातरोगे चिरोत्थिते। अष्टादश कुष्ठरोगे सिद्धो गुरुविनिर्म्मितः" भैषज्यर० उक्ते औषधभेदे।

ज्वरशूलहररस पु० ज्वरस्य शूलं वेदनां हरति हृ—अच् कर्म०।

"रसगन्धकयोः कृत्वा कज्जलीं भाण्डमध्यगाम्। तदधोवदनां ताम्रपात्रीं संरुध्य शोषयेत्। पादाङ्गुष्ठप्रमाणेन चुल्ल्यां ज्वालेन तां दहेत्। यामद्वयं ततस्तत्स्थं रसपात्रं समाहरेत्। चूर्णयेद्रक्तियुगलं तृतीयं वा विचक्षणः। ताम्बूलीदलयोगेन दद्यात् सर्वज्वरेष्वमुम्। जीरसैन्धवसंमिश्रक्वाथ ज्वारको हितम्। स्वेदोद्गमो भवत्येव देवि! सर्वेषु पापसु। चातुर्थकादीन् विषमान् नवमागामिनं ज्वरम्। साधारणं सन्निपातं जयत्येव न संशयः। ज्वरशूलहरो नाम रसोऽयं समुदाहृतः" भैषज्यर० उक्ते औषधभेदे।

ज्वरसिंहरस पु० ज्वरस्य तद्रूपगजस्य सिंह इव हन्तृत्वात् कर्म०। भैषज्यरत्नावल्युक्ते औषधभेदे। तल्लक्षणं यथा

"पारदं गन्धकं तालं भल्लातकमथैव च। वज्रीक्षीरसमायुक्तमेकत्र च विमर्दयेत्। मृत्तिकाभाजने स्थाप्य मुद्रितव्यं विचक्षणैः। अग्निं प्रज्वालयेत्तत्र प्रहरद्वयसंख्यया। शीतलं खलयेत्तत्र भावना च प्रदीयते। भृङ्गराजरसैरत्र गण्डदूर्वाभवै रसैः। चित्रकस्य रसेनापि भावना दीयते पुनः। पश्चात्तच्चूर्णयेद् यत्नात् कूपिकायाञ्च धारयेत्। ज्वर उत्पद्यते यस्य चतुर्थे चापरे पुनः। माषैकञ्च रसं देयं तत्क्षणान्नाशयेज्ज्वरम्। ज्वरशान्तेः परं पथ्यं देयं मुद्गौदनः पयः। ज्वरसिंहरसो नाम सर्वज्वरविनाशनः"।

ज्वरहन्तृ त्रि० ज्वरं हन्ति हन्—तृच्। ज्वरनाशके स्त्रियां ङीप्। सा च २मञ्जिष्ठायां राजनि०। [हारा०।

ज्वराग्नि पु० ज्वरः अग्निरिव सन्तापकत्वात्। आधिमन्यौ

ज्वराङ्कुशरस पु० ज्वरस्य गजरूपस्य अङ्कुश इव प्रतिरोधकत्वात् कर्म्म०। भैषज्यर० उक्ते औषधभेदे स च नानाविधो यथा

"शुद्धं सूतं विषं गन्धं धूर्त्तवीजं त्रिभिः समम्। चतुर्णां द्विगुणं व्योषं चूर्णं गुञ्जाद्वयं हितम्। जम्बीरस्य च मज्जाभिरार्द्रकस्य रसैर्युतम्। ज्वराङ्कुशो रसो नाम्ना ज्वरान् सर्वान् निहन्ति वै। (व्योषं मिलित्वा द्विगुणम्।)(अयं भेदि ज्वराङ्कुशो नाम्ना ख्यातः।) अन्योऽपि तत्रैव उक्तो यथा "रसस्य द्विगुणं गन्धं गन्धतुल्यञ्च टङ्कनम्। रसतुल्यं विषं योज्यं मरिचं पञ्चधा विषात्। कटफलं दन्तिवीजञ्च प्रत्येकं मरिचोन्मितम्। ज्वराङ्कुशो रसोह्येष चूर्णयेदतिचिक्कणम्। माषैकेन निहन्त्याशु ज्वरं जीर्णं त्रिदोषजम्"। अत्रानुरूपमात्रां शर्करादीनां निपीय गिलित्वा किञ्चिज्जलं पिबेत्। अन्यविधोऽपि तत्रैवोक्तो यथा

"ताम्रकाद् द्विगुणं तालं मर्दयेत् सुषवीद्रवैः। प्रपुटेद् भूधरे शीते वज्रीक्षीरेण मर्दयेत्। प्रपुटेत् भूधरे पश्चात् पञ्चगुञ्जामितं भवेत्। आर्द्रकस्य रसेनैव सर्वज्वरनिकृन्तनः। ऐकाहिकम् द्व्याहिकञ्च त्र्याहिकं चातुराह्निकम्। विषमञ्चापि शीताद्यं ज्वरं हन्ति ज्वराङ्कुशः" अन्यविधोऽपि तत्रैव "शुद्धसूतं तथा गन्धं कर्षमानं नयेद् बुधः। महौषधं टङ्कनञ्च हरितालं तथा विषम्। रसार्द्धं मर्दयेत् खल्ले भृङ्गराजरसेन तु। त्रिदिनं भावनां दत्त्वा चतुर्थे वटिकां ततः। कुर्य्याच्चणकमात्राञ्च पिप्पलीमधुसंयुताम्। एष ज्वराङ्कुशो नाम विषम-

ज्वरनाशनः" महौषधादीनां चतुर्णां प्रत्येकं रसार्द्धम्। अन्यविधोऽपि "मरिचं टङ्कनं शङ्खचूर्णं पारदगन्धकम्। शोधितं ब्रह्मपुत्रस्य भागमेकं विनिःक्षिपेत्। गुञ्जामात्रा प्रदातव्या नागवल्लीदलैः सह। ज्वराङ्कुशो रसोह्येष ज्वरमष्टविधं जयेत्" अन्यविधोऽपि "त्रिभागतालेन हतस्य ताम्रं रसस्य गन्धस्य समीनमायुः। विषं समं तद्द्विगुणस्य ताम्रं त्रिसप्तवारस्य दिवाकरातपे। संमर्द्य निम्बुस्वरसेन चूर्णं गुञ्जाप्रमाणं सितया समेतम्। ज्वराङ्कुशोऽयं त्रिविधप्रभावो ज्वरं निहन्त्यष्टविधं समग्रम्" मीनमायुः मत्स्यपित्तम्। [राजनि०।

ज्वराङ्गी स्त्री ज्वरस्तद्बाधनमङ्गमस्याः ङीप्। भद्रदन्तिकायां

ज्वरातिसार पु०। ज्वरयुक्तोऽतिसारः। ज्वरयुक्ते अतिसाररोगे तत्स्वरूपादि भैषज्यर० उक्तौ यथा। "पित्तज्वरे पित्तभवोऽतिसारस्तथातिसारे यदि वा ज्वरः स्यात्। दोषस्य दुष्टस्य समानभावाज्ज्वरातिसारः कथितो भिषग्भिः"। "ज्वरातिसारयोरुक्तमन्योन्यं भेषजं पृथक्। न तन्मिलितयोः कुर्यादन्योन्यं वर्द्धयेद्यतः। प्रायोज्वरहरं भेदि, स्तम्भनन्त्वतिसारनुत्। अतोऽन्योन्यविरुद्धत्वाद् वर्द्धनं तत्परस्परम्। ज्वरातिसारिणामादौ कुर्यात् लङ्घनपाचने। प्रायस्तावामसम्बन्धं विना न भवतो यतः। ज्वरातिसारे पेयादिक्रमः स्याल्लङ्घिते हितः। ज्वरातिसारी पेयां वा पिवेत् साम्लां शृतां नरः"।

ज्वरान्तक पु० ज्वरस्यान्तक इव ज्वरमन्तयति वा अन्ति-ण्वुल् वा इत०कर्म०। आरग्वधे नेपालनिम्बे (सोंदाल) राजनि०। ज्वरान्तकरसः।

ज्वरान्तकरस पु० ज्वरस्यान्तकः कर्म०।

"भास्करोगन्धकः सर्जो देवी विहङ्गतीक्ष्णकम्। भूनिशोणितं गगनञ्चैव पुष्करञ्च महेश्वरम्। भूनिम्बादिगणैर्भाव्यं मधुना गुडिका दृढा। चातुर्थकं तृतीयञ्च ज्वरं सन्ततकं तथा। आमज्वरं भूतकृतं सर्वं ज्वरमपोहति" भैषज्यर० उक्ते औषधभेदे। अत्र सर्जोरसः, देवी सौराष्ट्रमृत्तिका, विहङ्गं स्वर्णमाक्षिकं, पुष्करं रसाञ्जनं, महेश्वरं सुवर्णम् अन्यत् सुगमम्। ताम्रादीनां समभागचूर्णं भूनिम्बादिक्वाथेन भावयेत्। भूनिम्बाद्यष्टादशद्रव्याणि सर्वद्रव्यतुल्यानि अष्टावशिष्टं क्वाथं कृत्वा दिनत्रयं त्रिभाव्य विशोष्य मधुना विमर्द्य अनुरूपं लिहेत्"

ज्वरापहा स्त्री०ज्वरमपहन्ति अप+हन–ड इत०। (वेलशुँठ) १बिल्वशुण्ठ्याम्, २बिल्वपत्र्याञ्च। ३ज्वरनाशके त्रि०। शब्दच०।

ज्वरार्य्यभ्र पु० ज्वरस्यारिः कर्म०।

"अभ्रं ताम्रं रसं गन्धं विषञ्चेति समं समम्। द्विगुणं धूर्त्तबीजञ्च व्योषं पञ्चगुणं मतम्। जलेन वटिकां कुर्य्याद् यथा दोषानुसारतः। अभ्रं ज्वरारिनामेदं सर्वज्वरविनाशनम्। वातिकान् पैत्तिकांश्चैव श्लैष्मिकान् सान्निपातिकान्। विषमाख्यान् द्वन्द्वजांश्च धातुस्थान् विषमज्वरान्। नाशयेन्नात्र सन्देहो वृक्षमिन्द्राशनिर्यथा। प्लीहानं यकृतं गुल्ममग्निमान्द्यं सशोथकम्। कासं श्वासं तृषां छर्द्दिं दाहं शीतं वमिं भ्रमिम्" भैषज्यर० उक्ते औषधभेदे।

ज्वरारिरस न० ज्वरस्यारिः कर्म०।

"दरदबलिरसानां शुल्वनागाभ्रकाणाम् शुभविटकशिलानां सर्वमेकत्र योज्यम्। त्रिदिनमपदलोत्थैर्भावितं शोषयेत्तम् त्रिमरिचमगधाभ्यां रक्तिकैकाञ्च कुर्य्यात्। एकैकां भक्षयेदस्य चार्द्रकस्य रसैर्युताम्। दत्तमात्रं ज्वरं हन्ति ज्वरारिः स निगद्यते। सर्वशूलविनाशी च कफपित्तविनाशनः"। भैषज्यर० उक्ते औषधभेदे। सर्वं (सोँदाली) पत्ररसेन दशदिनं भावयित्वा गुञ्जाप्रमाणमार्द्रकरसेन देयम्"।

ज्वराशनिरस पु० ज्वरस्याशनिरिव नाशकत्वात् कर्म०।

"रसं गन्धं केशरञ्च विषं ताम्रं समं भजेत्। सर्वचूर्णसमं लौहं तत्समं चूर्णमभ्रकम्। लौहे च लौहदण्डे च निर्गुण्ड्याः स्वरसेन च। मर्दयेद् यत्नतः पश्चान्मरिचं सूततुल्यकम्। पर्णेन सह दातव्यो रसो रक्तिकसम्मितः। कासं श्वासं महाघोरं विभ्रमाख्यं ज्वरं वमिम्। धातुस्थं प्रबलं दाहं ज्वरदोषं चिरोद्भवम्। यकृद्गुल्मोदरप्लीहश्वयथुञ्च विनाशयेत्" भैषज्यर०उक्ते औषधभेदे। [ज्वरशब्दे उदा०।

ज्वरित त्रि०ज्वरः संजातोऽस्य तारका० इतच्। १ज्वरयुक्ते

ज्वरिन् त्रि० ज्वरोऽस्त्यस्य इनि। ज्वरयुक्ते स्त्रियां ङीप्।

ज्वल दीप्तौ चलने च भ्वा० पर० अक० सेट्। ज्वलति अज्वालीत्। घटा० ज्वलयति। ज्वला० ज्वलः ज्वालः। "अज्वाल लोकस्थितये स राजा" भट्टिः। "जागर्त्ति लोको ज्वलति प्रदीपः सखीगणः पश्यति कौतुकेन। हस्तसमात्रं कुरु नाथ! धैर्य्यं बुभुक्षितः किं द्विकरेण भुङ्क्ते" उद्भटः।

उदादिपूर्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्तदीप्तौ । उज्ज्वलः ।

ज्वल त्रि० ज्वल–दीप्तौ वा अच् । दीप्तिविशिष्टे । हेम० ।

ज्वलका स्त्री ज्वलतीति ज्वल–वा० वुन् । अग्निशिखायां

ज्वलति पु० ज्वल–भावे श्तिप् । ज्वलनक्रियायाम् । "भ्राजते" इत्याद्युपक्रम्य एकादश ज्वलतिकर्माणः निघ० २।१६। उक्तम् ।

ज्वलन त्रि० ज्वल–ताच्छील्यादौ युच् । १दीप्तिशीले, २वह्नौ ३चित्रकवृक्षे च पु० अमरः ।

ज्वलनाश्मन् पु० नित्यकर्म० । सूर्य्यकान्तमणौ राजनि० ।

ज्वलित त्रि० ज्वल–क्त । १दग्धे २दीप्ते च ।

ज्वलिनी स्त्री ज्वल–वा० इनि ङीप् । मूर्वालतायां राजनि०

ज्वाल पुंस्त्री ज्वल–ण । १अग्निशिखायाम् अमरः । २दीप्तियुक्ते त्रि० । ३दग्धान्ने स्त्री शब्दच० । भावे घञ् । ४ दीप्तौ पु० ।

ज्वालखरगद पु० ज्वालगर्दभाख्ये रोगे राजनि० । जालगर्दभशब्दे दृश्यम् ज्वालागर्दभामयोऽप्यत्र राजनि० ।

ज्वालाजिह्व पु० ज्वाला शिखैव जिह्वा यस्य दाह्यवस्तुलेहनसाधनत्वात् । १वह्नौ हेम० तन्नामनामके चित्रके च ।

ज्वालामालिनी स्त्री ज्वालानां शिखानां मालाऽस्त्यस्य इनि ङीप् । देवीभेदे । तन्मन्त्रादिकं तन्त्रसारे उक्तं यथा "ओं नमो भगवति ! ज्वालामालिनि ! गृध्रगणपरिवृते ! हुं फट् स्वाहा" । तत्राङ्गन्यासः । "ओं नमो हृदयं प्रोक्तं भगवतीति शिरः स्मृतम् । ज्वालामालिनीति च शिखा गृध्रगणपरिवृते ततः । वर्म स्वाहास्त्रमित्युक्तं जातियुक्तं न्यसेत्तनौ । प्रयोगस्तु ओं नमो हृदयाय नम इत्यादि "अभुक्तो नियतश्चैव जपेन्मन्त्रं जपाज्जयी । जपेदष्टसहस्रन्तु त्रयोविंशतिवासरान् । प्रत्यहं साधने सिद्धिमाददाति न संशयः । स्तुतिमात्रेण वै मन्त्री रिपून् सर्वान् विनाशयेत्" ।

ज्वालामुखी स्त्री पीठस्थानभेदे । "ज्वालामुख्यां महाजिह्वा देव ! उन्मत्तभैरवः । अम्बिका सिद्धिदानाम्नी स्तनौ जालन्धरे ममेति" तन्त्रम् । २विद्याभेदे "ज्वालामुखीक्रमं वक्ष्ये सा पूजया मध्यतः शुभे । नित्यारुणा मदनान्तरा मदमोहापक्षग्रभिः । कमला श्रीभारती च आकर्षणी महेन्द्रापि । ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा । वाराही चैव माहेन्द्री चामुण्डेति च पूजयेत् । विजया चाजिता चैव मोहिनी चापराजिता । स्तम्भनी जयनी पूजया कालिका पश्चवाह्यतः । ज्वालामुखी च संपूजया विषादिहरणं भवेत्' । गारुड० पु । २०४ अ०

ज्वालावक्त्र पु० ज्वालेव वक्त्रमस्य । शिवे मत्स्यपु० ।

ज्वालिन् पु० ज्वल–णिनि । १शिवे "शिखी मुण्डी जटी ज्वाली मूर्त्तिजोमूर्द्धगो बली" भा० अनु० १७ अ० । २शिखायुक्तमात्रे ३दीप्तियुक्ते च त्रि० स्त्रियां ङीप् ।

ज्वालेश्वर पु० मत्स्यपु० उक्ते तीर्थभेदे ।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यनिर्म्मिते
वाचस्पत्ये जकारादिशब्दार्थसङ्कलनम् ।

झ

झकारो व्यञ्जनवर्णभेदोऽर्द्धमात्राकालोच्चार्य्यस्तस्योच्चारणस्थानं तालु आभ्यन्तरप्रयत्नः जिह्वामध्येन तालुनः स्पर्शः। बाह्यप्रयत्नाः संवारनादघोषमहाप्राणाश्च। मातृकान्यासेऽस्य वामकराङ्गुलीमूले न्यस्यता। अस्य ध्येयरूपं कामधेनुतन्त्रे उक्तं यथा "झकारं परमेशानि! कुण्डलीं मोक्षरूपिणीम्। रक्तविद्युल्लताकारं सदा त्रिगुणसंयुतम्। पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा। त्रिबिन्दुसहितं वर्णं त्रिशक्तिसहितं तथा" वर्णोद्धारतन्त्रे तदधिष्ठातृदेवतारूपं यथा "ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने!। तप्तहेमवर्णाभां रक्ताम्बरविभूषिताम्। रक्तचन्दनलिप्ताङ्गीं रक्तमाल्यविभूषिताम्। चतुर्द्दशभुजां देवीं रत्नहारोज्ज्वलां पराम्। ध्यात्वा ब्रह्मस्वरूपां तां तन्मन्त्रं दशधा जपेत्"। तस्य वाचकशब्दाः वर्णाभिधानतन्त्रे उक्ता यथा "झो झङ्कारी गुहो भार्गी झर्झरो वायुः सस्वनः। अजेशो द्राविणी नादः पाशी जिह्वा जलं स्थितिः। विराजेन्द्रो धनुर्हस्तः कर्कशः नादजः कुहः(कुजः)। दीर्घबाहुरसो रूपं ह्याकम्पितशुचञ्चलम्। दुर्मुखो नष्ट आत्मवान् विकटा कुचमण्ड(ण्ठ)लः। कलहंसप्रिया वामा वामाङ्गुलमुपर्वकः। दक्षहासोऽट्टहासश्च पाणात्मा व्यञ्जनस्वरः" मात्राहत्ते तस्य प्रथमविन्यासे फलमुक्तं वृ०र०टी० "प्रीतिं जो मित्रलाभं भयमरणकरौ झञौ ठठौ खेददुःखे"।

झ पु० झट-संहतौ ड। १झञ्झावाते २नष्टे ३जलवर्षणे ४झिण्टीशे ५देवगुरौ ६दैत्यराजे ७ध्वनिभेदे शब्दर० ८उञ्चवाते च मेदि०। [परमेशानि!"कामधेनुत०।

झकार पु० झ+स्वार्थे कारप्रत्ययः। झस्वरूपे वर्णे "झकारं

झगझगायमान त्रि० झगझग+अभूततद्भावे भृशा० क्यङ् शानच्। देदीप्यमाने। "मयूरवरगामिनीं स्फुरदशुद्धवर्णोत्कटां रणत्कणितघण्टिकां निशितशक्तिहस्तोद्यताम्। प्रभानिकररश्मिभिर्झगझगायमानांशुकां नमामि गुहसम्भवां त्रिदशशत्रुनिर्णाशिनीम्" देवी० पु०।

झगति अव्य० झटिति+पृषो०। शीघ्रार्थे शब्दार्थचि०।

झङ्कार पु० झमित्यव्यक्तशब्दस्य कारः कृ-घञ्। १भ्रमरादिशब्दे। "मन्दं मुद्रितपांशुलः परिपतन् झङ्कारझञ्झामरुत्" अमरुश०। ततः तार० इतच्। झङ्कारित तच्छब्दयुक्ते त्रि०। २जलकणवर्षणे च शब्दर०।

झङ्कारिणी स्त्री ६त०। गङ्गायां झिण्टीशशब्दे उदा०।

झङ्कृता स्त्री तारादेवतायां "झर्झरी झङ्कृता झिल्ली झरी झर्झरिका तथा" तारासहस्रनाम।

झङ्कृति स्त्री झम् इत्यव्यक्तशब्दस्य कृतिः कृ-क्तिन्। कांस्यादेर्ध्वनौ शब्दार्थचि०।

झञ्झा स्त्री झमिति कृत्वा झटति झट-ड। १ध्वनिभेदे, तथाध्वनियुक्ते २प्रचण्डानिले च शब्दर०।

झञ्झानिल पु० झञ्झायुक्तोऽनिलः। प्रावृषिजातवाते त्रिका० झञ्झामरुदादयोऽप्यत्र झङ्कारशब्दे उदा०।

झट संहतौ भ्वा० पर० अक० सेट्। झटति अझाटीत्-अझटीत्। जझाट।

झटा स्त्री झट-अच्। १शीघ्रे। २भूम्यामलक्यां शब्दार्थचि०

झटि पु० झट-इन्। क्षुद्रतृणभेदे। (झाँटि) शब्दार्थर०।

झटिति अव्य० झट क्विप् झट् इण-क्तिन् ६त० स्वरादि। १शीघ्रे अमरः। "त्यक्त्वा गेहं झटिति यमुनामञ्जुकुञ्जं जगाम" पदाङ्कदूतम्। "झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते" "मनःसान्द्रानन्दं स्पृशति झटिति ब्रह्म परमम्" सा० द०।

झडक पुंस्त्री अन्त्यजवर्णभेदे "प्रपास्वरण्ये झड़कस्य कूपे द्रोण्यां जलं कोशविनिर्गतञ्च" अत्रिसं०।

झणझणा अव्य० झणत् डाच् द्वित्व पूर्वपदटिलोपः। १अव्यक्तशब्दभेदे २तच्छब्दयुक्ते "सर्वं झणझणाभूतमासीत्तालवनेष्विव" भा०भी०१९अ०।३झणत्कारशब्दभेदे च।

झण(न)त्कार पु० झन(ण)दित्यव्यक्तशब्दस्य कारः कृ-घञ्। कङ्कणादिध्वनौ। "उद्वेलद्भुजवल्लिकङ्कणझण(न)त्कारः क्षणं वार्य्यताम्" कालिदासः। "उद्वेजयति दरिद्रं परमुद्रागणनझणत्कारः" उद्भटः।

झम भक्षे भ्वा० पर० सक० सेट्। झमति अझमीत्। जझाम। उदित् झमित्वा-झान्त्वा। झान्तः।

झम्प पु० लम्फ+पृषो०। (झाँपदिया पड़ा) लम्फे स्वेच्छाधीने संपातपतने जटाधरः। भावे अ। तत्रार्थे स्त्री "पुच्छास्फोटदलत्समुद्रविवरैः पातालझम्पाश्च ताः" महावीर०।

झम्पाक पुंस्त्री झम्पेन आकायति आ+कै+क। १वानरे शब्दच०। स्त्रियां जातित्वात् ङीष्।

झम्पाशिन् पु० झम्पेन जले स्वेच्छया पतनेनाश्नाति अश-णिनि। मत्स्यरङ्कपक्षिणि जटाधरः स्त्रियां ङीप्।

झम्पिन् पु० झम्प+अस्त्यर्थे इनि । वानरे शब्दर० ।

झर पु० झॄ–अच् । निर्झरे उत्सान्निर्गते जलप्रवाहे । “स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रमिमातनोति यत्” नैष० । तस्य स्त्रीत्वं भरत आह ततः टाप् गौरा० ङीष् वा । “विपुलपुलिनाः कल्लोलिन्यो नितान्तपतज्झरास्फालितशिलाः शैलाः सान्द्रद्रुमा वनराजयः” प्रबोधच० ।२तारिण्यां स्त्री ङीष् झङ्कृताशब्दे उदा० ।

झर्च उक्तौ भर्त्सने च तुदा० पर० सक० सेट् । झर्चति अझर्चीत् । जझर्च ।

झर्छ उक्तौ भर्त्सने च तुदा० पर० सक० सेट् । झर्छति अझर्छीत् । जझर्छ ।

झर्झ उक्तौ भर्त्सने च तुदा० पर० सक० सेट् । झर्झति अझर्झीत् । जझर्झ ।

झर्झर पु० झर्झ–करच् । (झाँज) इति ख्याते १वाद्यभेदे २पटहे, ३कलियुगे, ४नदभेदे च । ५वाद्यभेदे स्त्री ङीप् मेदि० । ६वेत्रनिर्मितदण्डभेदे पु० “काञ्चनोष्णीषिणस्तत्र वेत्रझर्झरपाणयः” भा०भी०६८ अ० । ७वेश्यायां स्त्री त्रिका०टाप् । ८तारादेव्यां स्त्री झङ्कृताशब्दे उदा० । ९वाद्यभेदे स्त्रीशब्दर०गौरा०ङीष् ।१०पाकसाधने लौहमये (झाझरा) इति ख्याते पदार्थे पु० रत्नमा० । झर्झरः तद्वाद्यं शिल्पमस्य वा ठक् । झार्झरिक तद्वादनशीले त्रि० पक्षे अण् । झार्झर तत्रार्थे त्रि०स्वार्थे क । झर्झरिका तारिण्यां झङ्कृताशब्दे उदा० ।

झर्झरक पु० झर्झर+संज्ञायां कन् । कलियुगे त्रिका० ।

झर्झरावती स्त्री झर्झरः शब्दभेदोऽस्त्यस्य मतुप् मस्य वः संज्ञायां पूर्वपददीर्घः । गङ्गायां झिण्टीशशब्दे उदा० ।

झर्झरिन् पु० झर्झरोऽस्त्यस्य इनि । शिवे “त्वं गदी त्वं शरी चापी खट्वाङ्गी झर्झरी तथा” भा० शा०२८६अ०।

झर्झरीक पु० झर्झ–ईकन् फर्फरीका० नि० । शरीरे उज्ज्वलद० ।

झलज्झला स्त्री ज्वलन्तं ज्वलति अच् पृषो० । हस्तिकर्णास्फालने शब्दार्थचि०

झला स्त्री झरा–पृषो० ।१कन्यायाम् २आतपोर्म्मौ च मेदि०

झल्ल पुंस्त्री झर्छ क्विप् तं लाति ला–क रस्य लः । “झल्लो मल्लश्च राजन्याद् व्रात्याल्लिच्छिविरेव च” मनूक्ते सवर्णायां व्रात्यक्षत्रियाज्जाते जातिभेदे । “झल्लामल्लानटास्चैव पुरुषा शस्त्रवृत्तयः । द्यूतपानप्रसक्ताश्च जघन्या राजसी गतिः” । मनुना तस्य शस्त्रवृत्तित्व (नेटाली) युक्तम् “तत्र झल्ला यष्टिप्रहरणाः” कुल्लू० । “तत्र मल्लानटा झल्लाः सूता वैतालिकास्तथा” भा०स०४अ०।

झल्लक न० झर्छ–क्विप् तं लाति ला–क संज्ञायां रस्य लः । वाद्यभेदे कांस्यनिर्मितकरताले “शिवागारे झल्लकञ्च सूर्यागारे च शङ्खकम् । दुर्गागारे वंशिवाद्यं मधुरीं च न वादयेत्” ति० त० । तत्रार्थे स्त्री शब्दार्थचि० । गौरा० ङीष् ।

झल्लकण्ठ पु०स्त्री झल्लस्तत्स्वरः इव कण्ठः कण्ठस्वरोऽस्य । पारावते हारा० स्त्रियां जातित्वात् ङीष् ।

झल्लरा स्त्री झर्झति झर्ज–अरन् पृषो० । १झर्झरवाद्ये वाद्यभेदे २हुडुक्के ३बालककेशे मेदि०४शुद्धे, ५क्लेदे च अजयपालः । गौरा०ङीष् । झल्लरीत्यप्यत्रार्थे ।

झल्लिका स्त्री झर्झ–ण्वुल् पृषो०१उद्वर्त्तनमले २द्योते ३दीप्तौ च शब्दार्थचि० ।

झल्लीषक न० हल्लीषक+पृषो०। नृत्यभेदे “झल्लीषकन्तु स्वयमेव कृष्णः सुवंशघोषं नरदेव! पार्थ!” हरिवं०१४८अ०।

झल्लोल पु० झर्छ–क्विप् तथा सन् लोलः पृषो०। तर्कुलासके (टेकुयार वाँटुल) हारा० ।

झष वधे भ्वा०पर० सक० सेट् । झषति अझाषीत् अझषीत् । जझाष झषः ।

झष ग्रहणे पिधाने च भ्वा० उभ० सक० सेट् । झषति–ते अझाषीत् अझषीत् अझषिष्ट । जझाष जझषे ।

झष पुं०स्त्री झष–कर्मणि घ । मत्स्ये, अमरः स्त्रियां जातित्वात् ङीष् “वंशीकलेन वडिशेन झषीरिवाखान्” आनन्दवृन्दावनचम्पूः २मकरे जलजन्तुभेदे “झषाणां मकरश्चास्मि” गीता ३मीनराशौ च “कार्मुकतौलिककन्यायुग्मलवे झषगे वा” सु०चि० । ४मकरराशौ “कार्मुकं तु परित्यज्य झषं संक्रमते रविः” मल०त० । भावे क ।५तापे । कर्त्तरि अच् । ६खिले, ७वने च न० । ८नागबलायां स्त्री शब्दार्थचि० ।

झषकेतु पु० झषो मीनो मकरो वा केतुर्यस्य । मदने शब्दार्थचि० झषकेतनादयोऽप्यत्र ।

झषाङ्क पु० झषोऽङ्कोऽस्य । १कन्दर्पे उपचारात् २तत्पुत्रे अनिरुद्धे च हेम० ।

झषाशन पुंस्त्री० झषमश्नाति अश–ल्यु । शिशुमारे त्रिका० स्त्रियां जातित्वात् ङीष् ।

झषोदरी स्त्री झषस्योदरं जन्मस्थानतयाऽस्त्यस्या अच् गौरा० ङीष् । मत्स्यगन्धायां व्यासमातरि सत्यवत्याम् त्रिकाण्डशेषः । सा च उपरिचरन्नृपस्य शुक्रेण ब्रह्मशापेन मत्स्ययोनिमाप्तायामद्रिकायाप्सरोभेदस्य गर्भाज्जाता तत्कथा भा० आ० ६३ अ० । “मत्प्रियार्थमिदं सौम्य ! शुक्रं मम गृहं नय । गिरिकायाः प्रयच्छाशु तस्या ह्यार्त्तवमद्य वै” । “गृहीत्वा त्व

तदा श्येनस्तमुत्पत्य वेगवान् । जवं परममास्थाय प्रदुद्राव विहङ्गमः । तमपश्यदथायान्तं श्येनं श्येनस्तथापरः । अभ्यद्रवच्च तं सद्यो दृष्ट्वैवामिषशङ्कया । तुण्डयुद्धमथाकाशे तावुभौ संप्रचक्रतुः । युध्यतोरपतद्रेतस्तच्चापि यमुनाम्भसि । तत्राद्रिकेति विख्याता ब्रह्मशापाद्वराप्सराः । मीनभावमनुप्राप्ता बभूव यमुनाचरी । श्येनपादपरिभ्रष्टं तद्वीर्य्यमथ वासवम् । जग्राह तरसोत्पत्य साद्रिका मत्स्यरूपिणी । कदाचिदथ मत्सीं तां बबन्धुर्मत्स्यजीविनः । मासे च दशमे प्राप्ते तदा भरतसत्तम ! । उज्जह्रुरुदरात्तस्याः स्त्रीं पुमांसञ्च मानुषौ । आश्चर्य्यभूतं तज्ज्ञात्वा राज्ञोऽथ प्रत्यवेदयन् । काये मत्स्या इमौ राजन् ! संभूतौ मानुषाविति । तयोः पुमांसं जग्राह राजोपरिचरस्तदा । स मत्स्यो नाम राजासीद्धार्म्मिकः सत्यसङ्गरः । साप्सरा मुक्तशापा च क्षणेन समपद्यत । पुरोक्ता सा भगवता तिर्य्यग्योनिगता शुभे ! । मानुषौ जनयित्वा त्वं शापमोक्षमवाप्स्यसि । ततः सा जनयित्वा तौ विशस्ता मत्स्यघातिना । सन्त्यज्य मत्स्यरूपं तत् दिव्यरूपमवाप्य च । सिद्धर्षिचारणपथं जगामाथ वराप्सराः । या कन्या दुहिता तस्या मत्स्या मत्स्यसगन्धिनी । राज्ञा दत्ता च दाशाय कन्येयन्ते भवत्विति । रूपसत्त्वसमायुक्ता सर्वैः समुदिता गुणैः । सा तु सत्यवती नाम मत्स्यघात्यभिसंश्रयात् । आसीत् सा मत्स्यगन्धैव किञ्चित्कालं शुचिस्मिता" ।

झाङ्कृत पु० झामित्यव्यक्तशब्दः कृतो येन । वारभेदे धरणिः । तत्रार्थे झाङ्कित इति पाठः प्रामादिकः ।

झाट पु० झट-णिच्-अच् । १निकुञ्जे, २कान्तारे, ३व्रणादीनां मार्जने च मेदि० ३भूम्यामलक्याम् स्त्री अमरः ४यूथिकायाञ्च शब्दच० ।

झाटल पु० झट-णिच् अलच् । घण्टापारुलौ अमरः ।

झाटामला स्त्री झट-अच् न मला अमला कर्म० । भूम्यामलक्याम् "झ(झा)टामला झटा ताली" इत्यत्र झाटामलेत्येकपदमिति केचित् अतएव "झाटामला ज्योत्स्निका च सतिक्ता तु सुदर्शना" भैषज्यर० उक्तम् ।

झाटिका स्त्री झाटा स्वार्थे क । भूम्यामलक्याम् शब्दच० ।

झामक न० झम-कर्मणि ण्वुल् । (झामा) अतिशयपक्केष्टकायाम् शब्दार्थचि० । [शब्दर० ।

झामर पु० झम-भावे घञ् तं राति रा-क । तर्कुशाणे ।

झालि पु० "आम्रमामफलं पिष्टं राजिकालवणान्वितम् । भृष्टं हिङ्गुयुतं पूतं घोलितं झालिरुच्यते । झालिर्हरति जिह्वायाः कुण्ठत्वं कण्ठशोधिनी । मन्दं मन्दं निपीता सा रोचनी वह्निरोधिनी" भावप्र० उक्ते पदार्थे

झावु पु० झा-इति वाति गच्छति वा-डु । (झाउ) वृक्षभेदे अमरः स्वार्थे क । तत्रार्थे शब्दर० । [शब्दार्थचि०

झिङ्गाक न० लिगि-आकन् पृषो० । (झिङ्गा) फलभेदे ।

झिङ्गिनी स्त्री लिगि-णिनि पृषो० । १जिङ्गिनीवृक्षे भावप्र० २उल्कायाञ्च शब्दर० । [भावप्र०

झिङ्गी स्त्री० लिगि-अच् गौरा० ङीष् । जिङ्गिनीवृक्षे (झिङ्गा)

झिञ्झी स्त्री० झिञ्झा अस्त्यस्याः अच् गौरा० ङीष् । झिल्ल्याम् (झिँझिपोँका) शब्दार्थचि० ।

झिण्टी स्त्री झिमिति रटति अच् पृषो० गौ० ङीष् । (झाँटि) पुष्पप्रधानवृक्षे अमरः ।

झिण्टीश पु० शिवे "झिण्टीशवन्द्या झङ्कारकारिणी झर्झरावती" काशीपु० गङ्गास्तवः ।

झिरि स्त्री झिरित्यव्यक्तशब्दोऽस्त्यस्याः बा० इन् । चिल्ल्यां वा ङीप् । तत्रार्थे शब्दर० । [झिल्ल्याम् शब्दर० ।

झिरिका स्त्री० झिरीति कायति शब्दायते कै-क ।

झिल्लि पु० झिरितिशब्दं लिशति बा० डि । वाद्यभेदे "घण्टाशब्दस्तथा भेरी मृदङ्गो झिल्लिरेव च । पञ्चानां पूज्यते वाद्यं देवताराधनेषु च" शब्दार्थचि० धृतवाक्यम् ।

झिल्ली स्त्री० चिल्लति चिल-अच् पृषो० गौरा० ङीष् । (झिँझिपोँका) कीटभेदे । संज्ञायां क । २आतपरुचौ ३वर्त्त्याञ्च मेदि० ।४तारिण्यां च झङ्कृताशब्दे उदा० ।

झिल्लीकण्ठ पु०स्त्री झिल्ली तद्रव इव कण्ठः कण्ठस्वरोऽस्य । गृहकपोते त्रिका० स्त्रियां जातित्वात् ङीष् ।

झीरुका स्त्री झिरित्यव्यक्तं रौति बा० रु-कक् । झिल्ल्याम् [च शब्दक० । शब्दरत्ना० ।

झुण्ट पु० लुण्ट-अच्-पृषो० । अकाण्डे १द्रुमे, २स्तम्बे, ३गुल्मे

झुमरि स्त्री रागिणीभेदे "प्रायः शृङ्गारबहुला माध्वीकमधुरा मृदुः । एकैव झुमरिर्लोके वर्णादिनियमोज्झिता । अतो लक्षणमेतस्या नोदाहारि विशेषतः । इदं हि शालिगं स्तुतं प्रसिद्धं नृपरञ्जनम्" सङ्गीत०दा०

झूलि पु० १क्रमुकभेदे २दुष्टदैवस्तुतौ च मेदि० । [जझार झरः ।

झॄ वयोहानौ दिवा० पर० अक० सेट् । झीर्य्यति अझारीत्

झोड पु० गुवाकभेदे भूरिप्र० । [जुझुवे ।

झ्यु गतौ भ्वा० आत्म० सक० अनिट् । झ्यवते अझ्योष्ट ।

इति वाचस्पत्ये झकारादिशब्दार्थसङ्कलनम् ।

ञ

"ञकारो व्यञ्जनवर्णभेदः अर्द्धमात्राकालेनोच्चार्य्यः तस्योत्पत्तिस्थानं नासिकानुगततालुस्थानम् तस्योच्चारणे जिह्वामध्येन तालुमध्यस्य स्पर्शः आभ्यन्तरप्रयत्नः। संवारनादघोषा अल्पप्राणश्च वाह्यप्रयत्नाः। मातृकान्यासेऽस्य वामहस्ताङ्गुल्यग्रे न्यास्यता। वर्णाभिधानेऽस्य वाचकशब्दा उक्ता यथा

"ञकारो वोधनी विश्वा कुण्डली मखदोषियत्। कौमारी नागविज्ञानी सव्याङ्गुलनखो वकः। सर्वेशश्चूर्णितोवुद्धिः स्वर्गात्मा घर्घरध्वनिः। धर्मैकपादः सुमुखो विरजा चन्दनेश्वरी। गायनः पुष्पधन्वा च वागात्मा च विरञ्चिणी"। एतदधिष्ठातृदेवीध्येयरूपं यथा "चतुर्भुजां धूम्रवर्णां कृष्णाम्बरविभूषिताम्। नानालङ्कारसंयुक्तां जटामुकुटराजिताम्। ईषद्धास्यमुखीं नित्यां वरदां भक्तवत्सलाम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम्। अस्यस्वरूपं यथा "सदा ईश्वर संयुक्तं ञकारं शृणु सुन्दरि! रक्तविद्युल्लताकारं या स्वयं परकुण्डली। पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा। त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं सदा" कामधेनुतन्त्रम्। तस्य मातृवृत्ते प्रथमोपन्यासे मरणं फलम् झशब्दे प्रमाणं दृश्यम्। [५वाममतौ च मेदि०।

ञ पु० १ गायने २ घर्घरध्वनौ एकाक्षरको०। ३वृषे ४शुक्रे

ञकार पु० ञ+स्वरूपे कारप्रत्ययः। ञस्वरूपे वर्णे "ञकारो बोधनी विश्वा" वर्णाभिधानम्।

इति वाचस्पत्ये ञकारादिशब्दार्थसङ्कलनम्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यविरचिते
वाचस्पत्ये चवर्गादिशब्दार्थ-
सङ्कलनं समाप्तम्।

ट

टकारो व्यञ्जनवर्णभेदः अर्द्धमात्राकालेनोच्चार्य्यः अस्योच्चारणस्थानं मूर्द्धा। अस्योच्चारणे मूर्द्धस्थानेन जिह्वामध्यस्य स्पर्शः आभ्यन्तरप्रयत्नः। विवारश्वासाघोषा वाह्यप्रयत्नाः। मातृकान्यासेऽस्य दक्षिणस्फिचि न्यास्यता वर्णाभिधाने अस्य वाचकशब्दा उक्ता यथा "टकारस्य कपाली च सोमेशः खेचरी ध्वनिः। मुकुन्दो विनदा पृथ्वी वैष्णवी वारुणी नरः। दक्षस्फिगर्द्धचन्द्रश्च जवा भूतिः पुनर्भवः। वृहस्पतिर्धनुर्हस्तः प्रमोदा विमला कटिः। राजगिरिर्महाधनुर्प्राणात्मा सुमुखी मरुत्"। अस्य स्वरूपं यथा "टकारं चञ्चलापाङ्गि! स्वयं परमकुण्डली। कोटिविद्युल्लताकारं पञ्चदेवमयं सदा। पञ्चप्राणयुतं वर्णं गुणत्रयसमन्वितम्। त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं वरं सदा" कामधेनुतन्त्रम्। एतदधिष्ठातृदेवतारूपं यथा "ध्यानमस्य प्रवक्ष्यामि शृणुष्व वरवर्णिनि!। मालतीपुष्पवर्णाभां पूर्णचन्द्रनिभेक्षणाम्। दशवाहुसमायुक्तां सर्वालङ्कारसंयुताम्। परमोक्षपदां नित्यं सदा स्मेरमुखीं पराम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम्। मातृवृत्तेऽस्य प्रथमोपन्यासे खेदः फलम्। झशब्दे प्रमाणं दृश्यम्।

ट पु० टल—ड। १वामने २पादे ३निःस्वने च मेदि०।

टक बन्धे चु० उभ० सक० सेट् इदित्। टङ्कयति—ते अटटङ्कत्—त। "टङ्कितेनोऽतिपाटने" काशी० गङ्गास्तवः। "नाकृष्टं न च टङ्कितम् न नमितम् नोत्थापितम् स्थानतः" महाना०। उद्+उल्लेखे। उट्टङ्कितम्।

टकार पु० ट+स्वरूपे कारप्रत्ययः। टस्वरूपे वर्णे टकारस्य कपाली च" वर्णाभिधानम्।

टक्क पु० टकि—वा० कक् पृषो० उपधालोपश्च। देशभेदे। त्रिका०।

टक्कदेशीय पु० टक्कदेशे भवः छ। १वास्तूकशाके त्रिका०। २तद्देशभवमात्रे त्रि०।

टगण पु० मात्रावृत्ते षाण्मात्रिकप्रस्तावे त्रयोदशभेदात्मके गणभेदे तेषामाकाराधिदेवाश्च छन्दोग्रन्थोक्ता यथा "(ऽऽऽ) १ शिवः ||ऽऽ शशी २ (|ऽ|ऽ दिनपतिः) ३ (ऽ||ऽ सुरपतिः) ४ (||||ऽ शेषः) ५ (|ऽऽ| अहिः) ६ (ऽ|ऽ| सरोजम्) ७ (||ऽ| धाता) ८ (ऽऽ||कविः)

(।।ऽ।। चन्द्रः) १० (।ऽ।। ध्रुवः) ११ (ऽ।। ।। धर्मः) १२ (।।।।। शालिकरः) १३ ।

टगर पु० टः टङ्कनो गर इव । टङ्कनक्षारे (सोहागा) २हेलाविलासविषये ३केकराक्षे च त्रि० मेदि० ।

टङ्क पु० टकि–घञ्–अच् वा । १कोपे, २कोषे, ३खड्गे ४पाषाणभेदनेऽस्त्रे च ।५जङ्घायां मेदि० । ६चतुर्माषकरूपे परिमाणे वैद्य० ७नीलकपित्थे, ८खनित्रे, ९दर्पे च पु०न० हेमच० १०परशौ ११राजाम्रे च शब्दार्थचि० "दार्यन्तां चैव टङ्कौघैः खनित्रैश्च पुरी द्रुतम्" हरिवं० ९२अ० । "टङ्कैर्मनःशिलगुहेव विदार्यमाणा" मृच्छ० । "हिमाद्रिटङ्कादिव भान्ति यस्याम्" भट्टिः । "रुरोध रामं शृङ्गीव टङ्कच्छिन्नमनःशिलः" रघुः । [सारसुन्दरी ।

टङ्कक पु० टङ्क्यते घञ् संज्ञायां क । (तङ्का) रजतमुद्रायाम्

टङ्कपति पु० ६त० । रूप्याध्यक्षे (टाँकशालेर अध्यक्ष) सारसुन्दरी । [टङ्के सारसुन्दरी ।

टङ्कशाला स्त्री ६त० । (टाँकशाल) ख्याते रूप्यकनिर्माण

टङ्कटीक पु० टङ्क इव टीकते टीक–क । शिवे त्रिका० ।

टङ्कण(न) न० टकि–ल्यु पृषो० वा णत्वम् । (सोहोगा) ख्याते स्वर्णद्रावके १उपरसभेदे । उपरसभेदाश्च भाव०प्र० उक्ता यथा "गन्धो हिङ्गुलमभ्रतालकशिलाः स्रोतोऽञ्जनं टङ्क(न)णम् । राजावर्त्तकचुम्बकौ स्फटिकया शङ्खः खटी गैरिकम् । कासीसं रसकं कपर्दसिकतावोलाश्च कङ्कुष्ठकम् सौराष्ट्री च मता अमी उपरसाः सूतस्य किञ्चिद्गुणैः" । "तद्यथा लवणेन सुवर्णम्" छा० उ० भाष्ये "लवणेन क्षारेण टङ्कनादिना, खरे मृदुत्वकरं हि तत्" भा० । "टङ्कणं वह्निकृद्रूक्षं कफवातिकपित्तहृत्" भावप्र० । भावे ल्युट् । (टाँकादेओया पानिदिया भाला)२धातूनां योजनभेदे । दन्त्यान्तः ३अश्वभेदे पु०स्त्री "टङ्कनखरनखरखण्डितहरितालपांशुलेन" काद० मूर्द्धन्यान्तः ४देशभेदे स च देशः बृ०सं० १४अ० । कूर्मविभागे दक्षिणस्यामुक्तः । "अथ दक्षिणेन लङ्का" इत्युपक्रमे "कङ्कटटङ्कणवनवासिशिविकफणिकारकोङ्कणाभीराः" इत्युक्तेः ।

टङ्कवत् पु० टङ्क+अस्त्यर्थे मतुप् मस्य वः । १पर्वतभेदे "टङ्कवन्तं शिखरिणं वन्दे प्रस्रवणं गिरिम्" रामा०२।५५अ०

टङ्का स्त्री टकि–अच् । १जङ्घायां मेदि० । २तारादेव्यां टङ्कारकारिणीशब्दे दृश्यम् ।

टङ्कानक पु० टङ्कं कोपमानयति उद्दीपयति आन–णिच् ण्वुल् । १ब्रह्मदारुवृक्षे (वामनगाछ) शब्दच० ।

टङ्कार पु० टमित्यव्यक्तशब्दस्य कारः कृ–घञ् । १ध्वनिभेदे धनुर्ज्याकर्षणजे शब्दे २विस्मयहेतुके शब्दे च ।३शिञ्जिनीध्वनौ प्रसिद्धे च मेदि० । कृ–णिनि । टङ्कारिन् १टङ्कारयुक्ते त्रि० स्त्रियां ङीप् सा च २तारादेव्याम् टङ्कारकारिणीशब्दे दृश्यम् ।

टङ्कारकारिणी स्त्री०कृ–णिनि ङीप् ६त० । तारादेव्याम् "टङ्कारकारिणी टीका टङ्का टङ्कारिणी तथा तारासहस्रनाम ।

टङ्कारी इ० स्त्री टङ्कमृच्छति ऋ–अण् गौरा० । (टेकारी) वृक्षभेदे "टङ्कारी वातश्लेष्मघ्नी शोफोदररुजापहा । तिक्ता च दीपनी लघ्वी भिषग्भिः परिकीर्त्तिता" राजनि० ।

टङ्ग पु०न० टङ्क+पृषो० । १खनित्रे (टाँगि) २परशुभेदे च ३जङ्घायां मेदि० । (सोहागा) ४टङ्कने शब्दच० ।५चतुर्माषकमाने वैद्य० ।

टङ्गण पु०न० टङ्कण+पृषो० (सोहागा) टङ्कणे ।

टङ्गिनी स्त्री टकि–णिनि पृषो० । (आकनादी) पाठायाम् । शब्दच० । [ज्येष्ठ्याम् त्रिका० ।

टट्टनी स्त्री टट्टेति शब्दं नयति नी–ड गौरा० ङीप् ।

टट्टरी स्त्री टट्टेति शब्दं राति रा–क गौरा० ङीप् ।१पटहवाद्ये २लम्पावाद्ये ३मृषावादे च मेदि० ।

टट्टर पु० भेरीशब्दे हेमच० ।

टल विप्लवे (टला) भ्वा० पर० अक० सेट् । टलति अटालीत् टटाल टेलतुः । ज्वला० टलः टालः ।

टवर्ग पु० ट+प्रातिशाख्योक्तः वर्गप्रत्ययः । ट ठ ड ढ ण रूपेषु वर्णेषु । ततो भवार्थे छ । टवर्गीय टादौ वर्णे ।

टा स्त्री टल–ड । पृथिव्याम् एकाक्षरकोषः ।

टाङ्क न० टङ्केन तद्रसेन निर्वृत्तम् । टङ्करूपनीलकपित्थरसेन निर्वृत्ते मद्यभेदे । "पानसं द्राक्षमाधूकं खार्जुरं तालमैक्षवम् । माध्वीकं टाङ्कं मार्द्वीकमैरेयं नारिकेलजम् । सामान्यानि द्विजातीनां मद्यान्येकादशैव च । द्वादशन्तु सुरा मद्यं सर्वेषामधमं स्मृतम्" । पुलस्त्येन तत्पानं निषिद्धम् । असूयत इति आसवो मद्यानामवस्थाविशेषः सद्यःकृतसन्धानेन सञ्जातमद्यभावः यमधिकृत्य इदं पुलस्त्योक्तं प्रायश्चित्तम् । "द्राक्षेक्षुटङ्कखर्जूरपनसादेश्च यो रसः । सद्योजातन्तु पीत्वा तं त्र्यहाच्छुध्येद् द्विजोत्तमः" । [नागवीटे वृक्षभेदे त्रिका० ।

टाङ्कर पु० टाङ्कं तत्तुल्यरसं राति रा–क टाङ्क+कृशा० र वा ।

टार पुंस्त्री० टां पृथ्वीमृच्छति ऋ–अण् उप० स० । घोटके

स्त्रियां जातित्वात् ङीष् । २टङ्के ३खड्गे च हेमच० ।

टिक गतौ भ्वा० आ० सक० सेट् । टेकते अटेकिष्ट टिटिके । ऋदित् अटिटेकत् त ।

टिटिभ पुंस्त्री० टिटीति अव्यक्तशब्दं भणति भण–ड । कोयष्टिके (टिटिरि) स्त्रियां ङीष् स्वार्थे क तत्रार्थे अमरः ।

टिट्टिभ पुंस्त्री० टिट्टीत्यव्यक्तं शब्दं भणति भण–ड । (टिटिरि) कोयष्टिके खगे अमरः स्त्रियां ङीष् । "अनिर्दिष्टांश्चैकशफांष्टिट्टिभांश्च विवर्जयेत्" मनुना तन्मांसभक्षणं निषिद्धम् । "टिट्टिभं तदुपेत राज्यध्यानमिवातुरः" भा० शा० १११अ० । कोयष्टिकशब्दे २२६६ पृ० तन्मांसगुणा उक्ताः । टिट्टिभक स्वार्थे क । तत्रार्थे पुंस्त्री० ।

टिण्टिनिका स्त्री अम्बुशिरीषिकायां (जेँाक) भावप्र० ।

टिण्डिश पु० रोमशफले (ढाँडश) ख्याते वृक्षभेदे राजनि० । "टिण्डिशो रुचिकृत् भेदी पित्तश्लेष्माश्मरीप्रणुत् । सुशीता वातला रूक्षा मूत्रला च प्रकीर्त्तिता" भावप्र० ।

टिप नोदने चुरा० उभ० सक० सेट् । टेपयति-ते अटीटिपत्-त ।

टिप्पनी स्त्री टिप-क्विप् टिपा पन्यते स्तूयते पन–घञर्थे क गौरा० ङीष् । टीकायाम् । सा च टीकाव्याख्यारूपतयैव व्यवह्रियते यथा चिन्तामणिटीकाया दीधितिव्याख्यायाः टीका जगदीशकृता गदाधरकृता च । यथा शारीरिकसूत्रभाष्यव्याख्या पञ्चपादिका भामती च । महाभाष्यव्याख्या कैयटकृता इत्यादि । प्रथमव्याख्यायामपि क्वचित् प्रयुज्यते यथा "श्रीमतङ्गाननं नत्वा लीलावत्याः सुटिप्पनी । भवेशेन सुबोधार्थं क्रियते यद्गुरोः श्रुतम्" "टिप्पनी दायभागस्य श्रीनाथेन विधीयते" । [ऋदित् । अटिटीकत् त ।

टीक गतौ भ्वा० आत्म० सक० सेट् । टीकते अटीकिष्ट ।

टीका स्त्री टीक्यते गम्यते ग्रन्थार्थोऽनया । टीक–करणे घञ् घञर्थे क वा । विषमपदव्याख्यारूपे ग्रन्थभेदे । "अपटीको जडो माघे भृशं जाड्येन ताड्यते । स च किञ्चित्तरत्येव कण्ठसंलग्नवल्लभः" उद्भटः । "नत्वा भगवतीं दुर्गां टीकां दुर्गार्थबुद्धये । कुरुते दायभागस्य भट्टाचार्यमहेश्वरः" "करोति टीकामिह दायभागग्रन्थावबोधाय सदेकरम्याम्" श्रीकृष्णतर्का० ।

टुण्टुक पु० स्त्री टुण्टु इत्यव्यक्तं कायति कै–क । (टुण्टुनि) १पक्षिभेदे शब्दर० । स्त्रियां जातित्वात् ङीष् । २शोणाकवृक्षे अमरः । ३कृष्णखदिरे शब्दच० । तयोः तत्खगप्रियत्वात् तथात्वम् । ४अल्पे त्रि० मेदि० । ५क्रूरे त्रि० विश्वः । ६टङ्किनीवृक्षे स्त्री शब्दच० ।

टुनाका स्त्री तालमूलीवृक्षे शब्दच० ।

टेरक त्रि० केकर+पृषो० । (टेँरा) केकरनेत्रे । शब्दार्थचि० ।

टोट त्रि० स्तोट+पृषो० । १अल्पे २हीने च । स्त्रियां गौरादिपाठात् ङीष् ।

टोड़लतन्त्र न० तन्त्रभेदे । [ट्वलः ट्वालः ।

ट्वल विप्लवे भ्वा० पर० अक० सेट् । ट्वलति अट्वालीत् ज्वला०

इति वाचस्पत्ये टकारादिशब्दार्थसङ्कलनम् ।

ठ

ठकारो व्यञ्जनवर्णभेदः । टवर्गीयः मूर्द्धन्यः अर्द्धमात्राकालोच्चार्यः । तस्योच्चारणे जिह्वामध्येन मूर्द्धस्थानस्य स्पर्शः आभ्यन्तरप्रयत्नः । विवारश्वासाघोषा महाप्राणश्च बाह्यप्रयत्नाः । मातृकान्यासेऽस्य दक्षजानुनि न्यस्यता वर्णाभिधानेऽस्य वाचकशब्दा उक्ता यथा "ठः शून्यो मञ्जरी जीवः पाशिनी लाङ्गलं क्षमा । वनजो नन्दनो जिह्वा सुनन्दाघूर्णकः सदा । वर्त्तुलः कुण्डलो वह्निरमृतं चन्द्रमण्डलः । दक्षजानुश्चभावश्च देवभक्षो वृहद्ध्वनिः । एकपादो विभूतिश्च ललाटं सर्वमित्रकः । वृषघ्नो नलिनी विष्णुर्महेशो ग्रामणीः शशी" । एतदधिष्ठातृदेवताध्यानं यथा "ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने ! । सुन्दरीं पूर्णचन्द्रप्रभां देवीं विकसत्पङ्कजेक्षणाम् । षोड़शभुजां धर्मकामार्थमोक्षदाम् । एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्" वर्णोद्धारतन्त्रम् । अस्य ध्येयरूपं यथा "ठकारं चञ्चलापाङ्गि, कुण्डली मोक्षरूपिणी । पीतविद्युल्लताकारं सदा त्रिगुणसंयुतम् । पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा । त्रिबिन्दुसहितं वर्णं त्रिशक्तिसहितं सदा" इति कामधेनुतन्त्रम् । मात्रावृत्तेऽस्य प्रथमोपन्यासे दुःखं फलम् कशब्दे प्रमाणं दृश्यम् ।

ठ पु० ट+पृषो०। १शिवे २महाध्वनौ ३चन्द्रमण्डले एकाक्षरकोषः। ४मण्डले ५शून्ये ६लोकगोचरे च मेदि०। शून्यज्ञात बिन्दुरूपवर्णभेदः। "स्मितमुखि ! तदधद्वयम् योजयित्वा"कर्पूरस्तवः(ठद्वयं स्वाहा)। "द्विठमेव चेत्यस्य व्याख्यायां द्विठं विसर्गस्तस्य बिन्दुद्वयात्मकत्वात् विसर्गशब्देन च लक्षितलक्षणया स्वाहाकारो लक्ष्यते स्वाहाशब्देनैव वह्नौ त्यागात् त्यागस्य च विसर्गपर्य्यायत्वात्"इत्येवं रघुनन्दनादिसम्प्रदायविदः। [कामधेनुत०।

ठकार पु०ठ+कार। ठस्वरूपे वर्णे "ठकारं चञ्चलापाङ्गि !"

ठक्कुर पु०१देवप्रतिमायां,२द्विजोपाधिभेदे च। यथा गोविन्दठक्कुरः काव्यप्रदीपकर्त्ता। ३देवतायाञ्च। "सुदामा नाम गोपालः श्रीमान् सुन्दरठक्कुरः" अनन्तसंहिता।

इति वाचस्पत्ये ठकारादिशब्दार्थसङ्कलनम्।

ड

डकारो व्यञ्जनवर्णभेदः मूर्द्धन्यः अर्द्धमात्राकालोच्चार्य्यः टवर्गीयः। तस्योच्चारणे जिह्वामध्येन मूर्द्धस्थानस्य स्पर्शश्चाभ्यन्तरयत्नः। संवारनादघोषा अल्पप्राणश्च बाह्यप्रयत्नाः। मातृकान्यासेऽस्य दक्षपादगुल्फे न्यस्यता। अस्य वाचकशब्दा यथा "डः स्मृतिर्दारुका नन्दिरूपिणी योगिनीप्रियः। कौमारी शङ्करस्त्रासस्त्रिवक्रो व्यापकोध्वनिः। दुरूहो जटिली भीमा द्विजिह्वः पृथिवी सती। कोलगिरिः क्षमा शान्तिर्नाभिः स्वाती च लोचनम्" वर्णाभिधानम्। तदधिष्ठातृदेवतारूपं यथा "ध्यानमस्य प्रवक्ष्यामि शृणु ष्वावहिता मम। जवासिन्दूरसङ्काशां वराभयकरापराम्। त्रिनेत्रां वरदां नित्यां परमोक्षप्रदायिनीम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्"इति वर्णोद्धारतन्त्रम्। अस्य ध्येयरूपं यथा "डकारं चञ्चलापाङ्गि ! सदा त्रिगुणसंयुतम्। पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा। त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा। चतुर्ज्ञानमयं वर्णमात्मादितत्त्वसंयुतम्। पीतविद्युल्लताकारं डकारं प्रणमाम्यहम्" इति कामधेनुतन्त्रम्। तस्य मात्रावृत्ते प्रथमोपन्यासे शोभा फलम् "डः शोभां ढो विशोभां भ्रमणमथ च णस्तु खं थस्तु युद्धम्" इ० र० टी०धृतवाक्योक्तेः।

ड पु० डी–ड। १शिवे २शब्दे ३त्रासे च एका० को०। ४वाडवाग्नौ ५डाकिन्यां स्त्री मेदि०।

डकार पु० ड+कारप्रत्ययः। डस्वरूपे वर्णे।

डगण पु० छन्दोग्रन्थोक्ते चतुर्मात्रकप्रस्तावे पञ्चभेदभिन्ने गणभेदे तत्स्वरूपादिकं यथा (ऽऽ गजः१) (।।ऽ रथः२) (।ऽ।तुरङ्गमः ३) (ऽ।।पदातिः ४) (।।।।पत्तिः ५) इति।

डङ्गरी स्त्री डं त्रासं गिरति गॄ–अच् पृषो० गौरा०ङीष्। दीर्घकर्कट्याम्(काँकड़ी)राजनि०अण्। डाङ्गरीत्यप्यत्रार्थे।

डप संघाते (राशीकरणे) चु०आत्म०अक०सक०सेट्। डापयते अडीडपत। चुरादित्वेऽपि ञित्करणादफलवत्कर्त्तर्य्यपि आत्म०। तेनास्य ञित्करणसामर्थ्यात् पाक्षिकचुरादित्वम् पक्षे भ्वादित्वम्। डपते अडपिष्ट।

डप संहतौ उक्तौ डपवत् इदित्। डम्पयते अडिडम्पत। पक्षे भ्वा० डम्पते अडम्पिष्ट।

डब लोकने चुरा० उभ० सक० सेट्। डम्बयति अडडम्बत् शब्दस्तोमे अस्य वा चुरादित्वोक्तिः प्रामादिकी। [स।

डभ संघे चुरा०इदित् उभ० सेट्। डम्भयति ते अडडम्भत्

डम पु० डं त्रासं माति मा–क। चाण्डाल्यां नेटाज्जाते सङ्कीर्णजातिभेदे (डोम) ब्रह्मपु०। स्त्रियां–जातित्वात् ङीष्। [पलायने हारा०।

डमर पु० डमेति शब्दं राति रा–घञर्थे क। भीत्या

डमरु पु०डमिति शब्दमृच्छति ऋ–मृगया० कु०नि०।१वाद्यभेदे क्षीणमध्ये प्रान्ते दीर्घे, पुटिकाद्वयलम्बिते कापालिकयोगिवाद्ये अमरः। तत्रार्थे हारा०न०। "दत्त्वा डमरुडमरुडाङ्कृतिभूतवर्गान्तु भर्गस्ट्हिर्णी रुधिरैर्धिनोमि" प्रबोधच०। (डमत् डमेति शब्दं कुर्वत्)।

डमरुका स्त्री "मुष्टिञ्च शिथिलां बद्धा ईषदुच्छितमध्यमम्। दक्षिणां तूर्द्ध्वमुन्नम्य कर्णदेशे प्रधारयेत्। यथा मुद्रा डमरुका सर्वविघ्नविनाशिनी" तन्त्र० उक्ते मुद्राभेदे।

डम्बर पु०डपि–संहतौ वा०अरन्।१समूहे आडम्बरे २आयोजने "अजायुद्धे ऋषिश्राद्धे प्रभाते मेघडम्बरः"चाणक्यः।

३धातृदत्ते कुमारानुचरभेदे। "डम्बराडम्बरौ चैव ददौ धाता महात्मने" भा० श० ४७ अ०।

डयन न० डी-भावे ल्युट्। खगानां नभोगतौ (चोड़ा) करणे ल्युट्। २कर्णीरथे हेमच०।

डल्लक न० वंशनिर्मितपात्रभेदे (डाला) "त्रिशतञ्च षट्त्र्यधिकं डल्लकं वस्त्रसंयुतम्। सभोज्यं सोपवीतञ्च सोपहारं मनोहरम्" ब्रह्मवै०।

डवित्थ पु० "डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृगः"। सुपद्मोक्ते काष्ठमये १मृगे २द्रव्यवाचिसंज्ञाशब्दभेदे च "द्रव्यशब्दाः एकव्यक्तिवाचिनो हरिहरडित्थडवित्थादयः" सा०द०। शब्दकल्पद्रुमेऽयं वर्ग्यमध्यतया निवेशितस्तन्मूलं चिन्त्यम्।

डहु(हू) पु० दह उ वा ऊङ् मृगय्वादि० नि०। नकुचे (मान्दार) "डहुर्गुरुस्त विष्टम्भी त्रिदोषशुक्रदोषहृत्" भावप्र० तद्रूपोक्तिः शब्दरत्नावलप्रामयं दीर्घान्ततया तदर्थे पठितः।

डाकिनी स्त्री डस्य त्रासार्थम् अकति अक-वक्रगतौ णिनि ङीप्। १देव्या अनुचरीभेदे। "सार्द्धञ्च डाकिनीनां च विकटानां त्रिकोटिभिः" ब्रह्मपु०। (डान) इति ख्याते दर्शनमात्रेण २उपद्रवकारिस्त्रीजनभेदे। "डाकिनी शाकिनी भूतप्रेतवेतालराक्षसाः काशीख० ३० अ०।

डाङ्करी स्त्री डङ्करी पृषो०। दीर्घकर्कट्याम् (काँकड़ी) राजनि०

डामर पु० शिवप्रोक्ते तन्त्रशास्त्रविशेषे तच्च षड्विधं तेषां मानादिकं वाराहीतन्त्रे उक्तं यथा

"डामरः षड्विधो ज्ञेयः प्रथमो योगडामरः१। श्लोकास्तत्र त्रयस्त्रिंशत् तथा पञ्च शतानि च। त्रिविंशतिःसहस्राणि श्लोकास्त्वैव हि संख्यया। एकादशसहस्राणि सङ्ख्याताः शिवडामरे२। श्लोकाः सप्तैव निश्चित्य ईश्वरेणैव भाषिताः। तावच्छ्लोकसहस्राणि पञ्च श्लोकशतानि च। गुणोत्तराणि दुर्गाया डामरे३ कथितानि च। नव श्लोकसहस्राणि नव श्लोकशतानि च। सारस्वते४ तथा श्लोकाः पञ्चैव परिकीर्त्तिताः। शरसंख्यसहस्राणि श्लोकानां ब्रह्मडामरे५। पञ्चोत्तरशतान्यत्र संख्यानि शिवेन तु षष्टिः। श्लोकसहस्राणि गान्धर्वे६ डामरोत्तमे। श्लोकाश्च षष्टिसंख्याता ब्रह्मणाऽव्यक्तयोनिनेति"।

डालिम पु० दाडिम्ब+पृषो०। स्वनामख्याते फलप्रधाने वृक्षे भरतः।

डाहल पु० त्रिपुरदेशे त्रिका०।

डाहूक पुंस्त्री० डेति हूयते ह्वे-बा० ऊक पृषो०। दात्यूहखगे जटा०। स्त्रियां जातित्वात् ङीष्।

डिङ्गर पु० डङ्गर+पृषो०। १डङ्गरशब्दार्थे २क्षेपे ३वने ४धूर्त्ते ५सेवके च शब्दर०।

डिडिका स्त्री यौवनकालजाते पलिततासूचके रोगभेदे। "यौवने डिडिकास्वेव विशेषाच्छर्दनम् हितम्" सुश्रु०।

डिडिमा पु० स्त्री सुश्रुतोक्ते प्रतुदे खगभेदे स्त्रियां जातित्वात् ङीष्। प्रतुदशब्दे तद्भेदा दृश्याः।

डिण्डिम पु० डिण्डि इति शब्दं माति। १वाद्यभेदे (ढेँडरा) अमरः। "आर्य्यबालचरितप्रस्तावनाडिण्डिमः" वीरच० "भेरीश्चाभ्यहनन् हृष्टा डिण्डिमांश्च सहस्रशः" भा०द्रो० १९६ अ०। २कृष्णपाकफले पानीयामलके शब्दच०।

डिण्डिमेश्वर पु० शिवपु० उक्ते तीर्थभेदे।

डिण्डिर पु० हिडि-बा० किरच् आदेर्हस्य डः। समुद्रफेने [हेमच०।

डिण्डिरमोदक न० डिण्डिर इव मोदकः मोदयति मोदि-ण्वुल्। गृञ्जने (गाँजा) ख्याते मादकद्रव्यभेदे राजनि०।

डिण्डिश पु० डिण्डिक+पृषो०। (ढाँडश) इति ख्याते रोमशफले वृक्षभेदे। "डिण्डिशो रुचिकृद्भेदी पित्तश्लेष्माश्मरीहरः। सुशीतो वातलो रूक्षो मूत्रलश्चाश्मरीहरः। निःशेषबीजं स्विन्नत्तखण्डं सहिङ्गुकम् प्रोज्झितचखण्डशकलम्। स्नेहप्रतप्तं चलदवैदग्ध्यं रुचिप्रदं डिण्डिशकं सपिण्डम्" वैद्यक०।

डिण्डीर पु० हिडि-ईरच् आदेर्हस्य डः। समुद्रफेने हेमच०।

डित्थ पु० डवित्थशब्दोक्ते काष्ठमये १हस्तिनि एकव्यक्तिमात्रबोधके २संज्ञाशब्दभेदे तत्प्रतिपाद्ये ३अर्थभेदे च।

डिप संहतौ वा चुरा० उभ० पक्षे भ्वा० आत्म० अक० सेट्। डेपयति-ते डेपते ऋदित् अडिडेपत् त।

डिप प्रेरणे वा चु० उभ० पक्षे तुदा० पर० सक० सेट्। डेपयति-ते अडीडिपत्-त कुटा० डिपति अडिपीत्। दिवादित्वमपीच्छन्ति डिप्यति इरित् अडिपत् अडेपीत्।

डिम्प संहतौ वा चुरा०उ०पक्षे भ्वा०आत्म०अक०सेट् इदित्। डिम्पयति-ते डिम्पते। अडिडिम्पत्-त अडिम्पिष्ट।

डिम्ब संघे प्रेरणे च वा चु० उभ० पक्षे भ्वा०पर० सक० सेट् इदित्। डिम्बयति-ते अडिडिम्बत् डिम्बति अडिम्बीत्।

डिम्भ हिंसे संहतौ वा चुरा०उभ०पक्षे भ्वा०पर०सक० सेट् इदित्। डिम्भयति-ते अडिडिम्भत्-त डिम्भति अडिम्भीत्।

डिम हिंसने सौ० पर० सक० सेट्। डेमति अडेमीत्।

डिम पु० डिम-क। दृश्यकाव्यरूपनाटकभेदे। "मायेन्द्रजालसंग्रामक्रोधोद्भ्रान्तादिचेष्टितैः। उपरागैश्च भूयिष्ठो डिमः ख्यातोऽतिवृत्तकः" सा० द० तल्लक्षणमुक्तम्।

डिम्ब पु० डिबि-घञ् अच् वा। १भये, २कलहे, ३फुप्फुसे च हारा० ४डमरे, अमरः ५भयध्वनौ ६अण्डे, ७प्लीहनि, ८विप्लवे च मेदि०।

डिम्बाहव न० डिम्बं भयध्वनियुक्तमाहवम् युद्धम्। युद्धभेदे तस्य नृपतिशून्यतया भययुक्तध्वनिमत्त्वात् तथात्वम्। "डिम्बाहवहतानां च विहितं पार्थिवेन च" मनुना तद्युद्धहतस्य सद्यःशौचमुक्तम्। जटाधरे पुंस्त्वपाठः प्रामादिकः आहवशब्दान्तत्वात् द्वन्द्वतत्पुरुषयोः परवल्लिङ्गताविधानात् क्लीवत्वौचित्यात्। "डिम्बाहवार्दितानाञ्च असुराणां परायणम्" भा० आ० २१ अ०।

डिम्बिका स्त्री डिबि-ण्वुल्। १कामुक्यां २जलबिम्बे ३शोणाकवृक्षे च शब्दरत्ना०। अच् गौरा० ङीष्। डिम्बीत्यप्यत्र।

डिम्भ त्रि० डिभि-अच्। १शिशौ अमरः २मूर्खे मेदि०।

डिम्भक पु० डिम्भ+स्वार्थे क। १बालके शब्दर० २शाल्वदेशपति ब्रह्मदत्तसुतभेदे। तत्कथा हरिवं० २९५ अध्यायादौ दृश्या "हंसो ज्येष्ठो नृपसुतो डिम्भकोऽनन्तरोऽभवत्" "हंसश्च डिम्भकश्चैव तपश्चतुं महामते!"।

डिम्भचक्र न० स्वरोदयोक्ते शुभाशुभसूचके चक्रभेदे चक्रशब्दे २८३० पृ० दृश्यम्।

डी नभोगतौ (ओड़ा) भ्वा० आ० अक० सेट्। डयते अडयिष्ट डिड्ये डीनः। प्राद्युपसर्गभेदे खगगतिभेदाः खगगतिशब्दे २४१४ पृ० दृश्याः।

गतौ दिवा० आ० सक० निधराट्ः। डीयते।

डीतर त्रि० डी-क्विप् ततस्तरप्। नभोगतियुक्ततरे "तस्मादिमा अजा अरा डीतरा आक्रममाणा इव यन्ति" शत० ब्रा० ४।५।५।५।

डीन न० डी-भावे क्त। पक्षिगतिभेदे जटा०। खगगतिशब्दे २४१४ पृ० दृश्यम्। २आगमशास्त्रविशेषे च यथा "डामरं डमरं डीनं श्रुतं कालीविलासकम्। सप्तकोटिमिता ग्रन्था मम वक्त्राद् विनिर्गताः" मुण्ड० त०।

डीनडीनक न० पक्षिगतिभेदे खगगतिशब्दे २४१४ पृ० दृश्यम्।

डीनावडीनक न० खगगतिभेदे खगगतिशब्दे २४१४ पृ० [दृश्यम्।

डुण्डुभ पुंस्त्री० डण्डु इत्यनुकरणशब्दं भणति तेन भाति वा भण-भा-वा ड। (ढोँड़ा) इति ख्याते सर्पभेदे अमरः। स्त्रियां जातित्वात् ङीष्। "शयान तत्र चापश्यत् डुण्डुभं वयसान्वितम्" भा० आ० ९अ०। पृषो० अन्त्यलोपे डुण्डुरपि तत्रार्थे पुंस्त्री० त्रिका०।

डुण्डुल पुंस्त्री डुण्डु इति शब्दं लाति ला-क। क्षुद्रपेचके राजनि० स्त्रियां जातित्वात् ङीष्।

डुल पु० डु इति शब्दं लाति ला-क। पेचकभेदे ततः वरणा० चतुरर्थ्यां य। डुल्य तत्सन्निकृष्टदेशादौ त्रि०।

डुलि स्त्री दुलि+पृषो०। कमठ्याम् दुलौ रायमुकुटः।

डुलिका स्त्री डुलिरिव कायति कै-क। खञ्जनाकारे खगभेदे जटाधरः।

डोडिका स्त्री (करेला) इति प्रसिद्धे फलशाकविशेषे। "डोडिका पुष्टिदा वृष्या रुच्या वह्निप्रदा लघुः। हन्ति पित्तकफार्शांसि क्रमिगुल्मविषामयान्"। "बल्यं डोडीफलमविकलं खिन्नमीषच्च तोये स्नेहे हिङ्गुप्रणयिनि ततो वेसवारेण सिद्धम्। गव्यं तक्रं कथितनिहितं साधितं रामठेन खादन् खादन् निभृतममृतं निन्दितं भोक्तुमिच्छत्। सन्धूय शुष्कं तरणेः प्रतापात् प्रतप्तमाज्येन च डोडिशाकम्। ससैन्धवं रामठदत्तवासं खादन्नरो निन्दति व्यञ्जनानि। डोडिका वातला रुच्या शीता गुर्वी विषापहा। सुखिन्ना रोचना हृद्या असिन्ना कण्ठकर्षरी" शब्दार्थचि० धृतवाक्यम्।

डोडी स्त्री डोडिकायां क्षुपभेदे राजनि०। डोडिकाशब्दे [दृश्यम्।

डोम पु० स्त्री स्वनामख्याते सङ्कीर्णजातिभेदे स्त्रियां ङीष्। तस्यास्पृश्यत्वमुक्तं मत्स्यसूक्ततन्त्रे २९ पटले "चाण्डालस्यैव डोमस्य स्वानकस्य तथा यतिः। दण्डीरस्यैव भण्डीरो भूपुण्ड्रस्य तथाश्रमी। तथा मुण्डी लिङ्गधारी समा एते यशस्विनि!। स्पृष्ट्वा प्रमादतः स्नात्वा गायत्र्यष्टशतं जपेदिति"।

डोर न० दोष्+रा-ड पृषो०। हस्तबाह्वादौ बन्धनसूत्रे "कोऽनन्त इत्युदीर्य्याथ धृत्वा तत्करपल्लवम्। हस्तादाक्षस्य तड्डोरं चिक्षिपवान् पावकोपरि" भविष्य० पु० स्वार्थे क तत्रार्थे न०। तत्रैव "चतुर्दशग्रन्थियुक्तं कुङ्कुमाक्तं सुडोरकम्। स्त्रियश्च पुरुषस्यैव बध्नीयात् वामदक्षिणे"।

डोरडी स्त्री डोरमिव डयते डी-ड गौरा० ङीष्। वृहत्याम् [राजनि०।

डूल मिश्रीकरणे चु० उभ० सक० सेट्। डूलयति ते अडि-

डुलव् त। कात्या० श्रौ० १६।२२० सूत्रभाष्ये "मिश्रयति आड्वालयतीत्यर्थः" कर्कः। "मेचयतिराड्वालनार्थः" कात्या० श्रौ०१०।४।७। कर्कः "पार्श्वेनाज्यं वसां च मिश्रयत्याड्वालयति" ५।८।१८। कर्कः।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यप्रविरचिते वाचस्पत्ये डकारादिशब्दार्थसङ्कलनम्।

ढ

ढकारो व्यञ्जनवर्णभेदोऽर्द्धमात्राकालोच्चार्य्यः मूर्द्धन्यः टवर्गीयः। तस्योच्चारणे जिह्वामध्यभागेन मूर्द्ध्नः स्पर्शः आभ्यन्तरप्रयत्नः। संवारनादघोषा महाप्राणश्च बाह्यप्रयत्नाः। मातृकान्यासेऽस्य दक्षपादाङ्गुलिमूले न्यस्तता। वर्णाभिधाने अस्य वाचकशब्दा उक्ता यथा "ढो ढक्का निर्णयः स्थूरो यक्षेशो धनदेश्वरः। अर्द्धनारीश्वरस्तोयमोश्वरस्त्रिशिखो नरः। दक्षपादाङ्गुलीमूलं सिद्धिदण्डो विनायकः। प्रहासस्त्रिपुरा सन्धिर्निर्गुणो निधनो धनी। विघ्नेशः पाशिनी तङ्कधारिणी क्रोडपुच्छकः। एलापुरं च दुर्गात्मा विशाखा भ्रामणोरतिः"। एतदधिष्ठातृदेवतारूपं वर्णोद्धारतन्त्रे उक्तं यथा। "रक्तोत्पलनिभां रम्यां रक्तपङ्कजलोचनाम्। अष्टादशभुजां भीमां महामोक्षप्रदायिनीम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्"। अस्य स्वरूपं कामधेनुतन्त्रे उक्तं यथा

"ढकारः परमाराध्यो या स्वयं कुण्डली परा। पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा। सदा त्रिगुणसंयुक्तं आत्मादितत्त्वसंयुतम्। रक्तविद्युल्लताकारं ढकारं प्रणमाम्यहम्"। मात्रावृत्तेऽस्य प्रथमोपन्यासे विशोभा फलम् डशब्दे प्रमाणं दृश्यम्।

ढ पु० १ढक्कायां २शुनि ३श्वलाङ्गूले च मेदि०। तस्य तदाकृतित्वात् तथात्वम्। ४निर्गुणे ५ध्वनौ च एकाक्षरको०

ढकार पु० ढ+स्वरूपे कारप्रत्ययः। ढस्वरूपे वर्णे "ढकारं प्रणमाम्यहम्" कामधेनुत० "ढकारस्य ढकारे परे लोपः" सि० कौ०।

ढक्का स्त्री ढगिति कायति कै—क। यशःपटहे (ढाक) ख्याते वाद्यभेदे अमरः। "न ते डुडुक्केन न सोऽपि ढक्कया न मर्द्दलैः सापि न तेऽपि ढक्कया" नैषधम्।

ढक्कानादचलज्जला स्त्री ढक्काया नाद इव चलज्जलं तद्रवो यस्याः। गङ्गायाम्। "ढक्कानादचलज्जला" काशी० गङ्गास्तवः।

ढक्कारवा स्त्री ढक्काया रव इव रवो यस्याः। तारिणीदेव्याम् "ढक्कारवा च ढक्कारी" तारसहस्रनाम।

ढक्कारी स्त्री ढगिति शब्दं करोति कृ—अण् उपप०स० गौरा० ङीष्। तारिणीदेव्याम् "ढक्कारवा च ढक्कारी ढक्कारवरवाद्यका" तारासहस्रनाम।

ढगण पु० मात्रावृत्ते त्रिमात्रिकप्रस्तारभेदे तद्भेदाश्च त्रयः "तत्स्वरूपादिकं यथा (ऽ।) १ ध्वजः। (।ऽ) २तालः। (।।।) ३ ताण्डवम्।

ढण्टी स्त्री वाक्यभेदे "ढण्टीवाक्यस्वरूपा च ढकाराक्षररूपिणी" रुद्रया० अन्नपूर्णासहस्रनाम।

ढामरा स्त्री हंस्याम् शब्दार्थचि०।

ढाल न० स्वनामख्याते चर्म्ममयादौ फलके तद्विद्यतेऽस्य इनि ढालिन् तद्युक्ते त्रि०। "ढालिपक्षजयकरी ढकारवर्णरूपिणी" अन्नपूर्णास्तवः। स्त्रियां ङीप्।

ढुण्ढ अन्वेषणे भ्वा० सक० पर० सेट्। ढुण्ढति अढुण्ढीत् डुढुण्ढ। ढुण्ढिः।

ढुण्ढि पु० ढुण्ढ—इन्। काशीस्थे गणेशभेदे तन्नामनिरुक्त्यादिकं काशीख० ५७अ० उक्तं यथा "अन्वेषणे ढुण्ढिरयं प्रथितोऽस्ति धातुः सर्वार्थढुण्ढिततया भव ढुण्ढिनामा। काशीप्रवेशमपि को लभतेऽत्र देही तोषं विना तव विनायक! ढुण्ढिराज!" तन्माहात्म्यं तत्रैव यथा "ढुण्ढे प्रणम्य पुरतस्तव पादपद्मं यो मां नमस्यति पुमानिह काशिवासी। तत्कर्णमूलमधिगम्य पुरा दिशामि तत्किञ्चिदत्र न पुनर्भवतास्ति येन। यः प्रत्यहं नमति ढुण्ढिविनायकं त्वां काश्यां प्रगे प्रतिहताखिलविघ्नसंघः। नो तस्य जातु जगतीतलवर्त्तिनस्तु दुष्प्रापमत्र च परत्र च किञ्चनापि। प्रथमं ढुण्ढिराजोऽस्मि मम दक्षिणतो मनाक्। आढुण्ढ्य सर्वभक्तेभ्यः सर्वार्थान् संप्रयच्छति"। तस्य यात्राविधानमुक्तं तत्रैव यथा "माघशुक्लचतुर्थ्यान्तु नक्तव्रतपरायणाः। ये त्वां ढुण्ढेऽर्चयिष्यन्ति तेऽर्च्याः सुरसुरद्विषाम्। विधाय वार्षिकीं यात्रां चतुर्थ्यां माघतापसीम्। शुक्लां शुक्लतिलैर्लड्डुकान्

श्रुती। कार्य्या यात्रा प्रयत्नेन चैत्रविधिमभीप्सुभिः। तस्यां चतुर्थ्यां त्वत्प्रीत्यै ढुण्ढे! सर्वोपसर्गहृत्। तां यात्रां नात्र यः कुर्य्यान्निवेद्य तिलड्डुकान्। उपवाससहस्रन्तु स हन्तास्मिन् ममाज्ञया। होमं तिलाज्यद्रव्येण यः करिष्यति भक्तितः। तस्यां चतुर्थ्यां मन्त्रज्ञस्तस्य मन्त्रः प्रसेत्स्यति"।

ढोल पु० गले दोलायमानतया वादनीये स्वनामख्याते वाद्यभेदे। "ढक्काढोलप्रिया नित्या ढोलवाद्यप्रमोदिनी। ढोलरूपा ढोलधरा ढोलशब्दस्वरूपिणी" इति रुद्रयामले अन्नपूर्णासहस्रनामस्तोत्रम्।

ढक्काढोलप्रिया स्त्री ढक्काढोलौ तच्छब्दः प्रियोऽस्याः। अन्नपूर्णायाम् ढोलशब्दे दृश्यम् ढोलरूपादयोऽप्यत्र।

ढौक प्रेरणे गत्याञ्च भ्वा० आत्म० सक० सेट्। ढौकते अढौकिष्ट डुढौके। "तं विप्रदर्श कृतघातयत्ना यान्तं वने रात्रिचरी डुढौके" भट्टिः। "शकुन्तला यत्नौ ढौकते" शकु०। णिचि ढौकयति ते "राक्षसोऽतर्जयत् सूतं पुनश्चाढौकयद्रथम्" भट्टिः। ऋदित् अडुढौकत् त।

इति वाचस्पत्ये ढकारादिशब्दार्थसङ्कलनम्।

ण

णकारो व्यञ्जनवर्णभेदोऽर्द्धमात्राकालोच्चार्य्यः मूर्द्धन्यः टवर्गीयः। अस्योच्चारणे जिह्वामध्येन मूर्द्ध्नः स्पर्शः नासिकायत्नप्रभेदश्च आभ्यन्तरप्रयत्नः। संवारनादघोषाः अल्पप्राणश्च बाह्यप्रयत्नाः। मातृकान्यासेऽस्य दक्षपादाङ्गुल्यग्रे न्यस्यता। अस्य वाचकशब्दावर्णाभिधाने उक्ता यथा "णो निर्गुणं रतिर्ज्ञानं जम्भलः पक्षिवाहनः। जया जम्भो नरकजित् निष्कलो योगिनीप्रियः। द्विमुखं कोटवी श्रोत्रं समृद्धिबोधनी मता। त्रिनेत्रो मानुषी व्योम दक्षपादाङ्गुलीमुखम्। माधवः शङ्खिनी वीरो नारायणस्य निर्णयः"। एतदधिष्ठातृदेवतारूपं वर्णोद्धारतन्त्रोक्तं यथा "ध्यानमस्य णकारस्य प्रवक्ष्यामि च तत् शृणु। द्विभुजां वरदां रम्यां भक्ताभीष्टप्रदायिनीम्। राजीवलोचनां नित्यां धर्मकामार्थमोक्षदाम्। एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत्"। एतत्स्वरूपं कामधेनुतन्त्रोक्तं यथा "णकारः परमेशानि! या स्वयं परकुण्डली। पीतविद्युल्लताकारः पञ्चदेवमयः सदा। पञ्चप्राणमयं देवि! सदा त्रिगुणसंयुतम्। आत्मादितत्त्वसंयुक्तं। महामोहप्रदायकम्"। मात्राद्यन्तेऽस्य प्रथमोपन्यासे मरणं फलम् मूलं डशब्दे दृश्यम्।

ण पु० णल–गतौ ड पृषो० णत्वम्। १विन्दुदेवे, २भूषणे, ३गुणवर्ज्जिते, ४पानीयनिलये मेदि०। ५निर्णये, ६ज्ञाने च न० एकाक्षरको०।

णख गतौ भ्वा०पर०सक०सेट्। णोपदेशत्वात् सति निमित्ते णत्वम्। नखति प्रणखति। अनखीत्–अनाखीत्। ननाख नेखतुः। एवं णादिधातूनां गणपाठे णादित्वं प्रयोगे नादित्वं सति निमित्ते णत्वमिति बोध्यम्।

णट नृत्ये साभिनये नटकार्य्ये हिंसायामयं न णोपदेशी भ्वा० पर० अक० सेट्। नटति प्रणटति अनाटीत् अनटीत्। ननाट नेटतुः। हिंसायात् प्रनटति। नटः नाट्यम्।

णट नटकृत्ये भ्वा०पर०अक०सेट्। नटति प्रणटति अनाटीत्-अनटीत् ननाट नेटतुः घटा०। नटयति अनीनटत्। "णट नृत्ये। इत्थमेव पूर्वमपि पठितम्। तत्रायं विवेकः। पूर्वपठितस्य नाट्यमर्थो यत्कारिषु नटव्यपदेशो वाक्यार्थाभिनयो नाट्यम्। घटादौ तु नृत्तं नृत्यं चार्थो यत्कारिषु नर्त्तकव्यपदेशः पदार्थाभिनयो नृत्यम् गात्रविक्षेपमात्रं नृत्तम्। केचित्तु घटादौ णट नताविति पठन्ति। शतावित्यन्ये। णोपदेशपर्युदासवाक्ये भाष्यकृता नाटीति दीर्घपाठात् घटादिर्णोपदेश एव" सि०कौ०

णद अव्यक्तशब्दे भ्वा० पर० अक० सेट्। नदति प्रणदति अनादीत् अनदीत्। ननाद नेदतुः नदः। नादः नदन् नदितम्। सति निमित्ते एतत्पूर्ववर्त्तिनः न्युपसर्गस्य णत्वम्। प्रणिनदति परिणिनदति।

"वासवस्यानदद्घोरम् रुधिरञ्चाभ्यवर्षत" हरिवं०१८२अ०। "नदति मही गम्भीरम्" वृ०स० ५४अ०। "शब्दं घोरं नदन्ति" भा०व०२६७अ०"शिवाश्चैवाशिवान्नादान्नदन्ते" हरिवं०१८२अ०। आर्षस्तङ्। णिचि नादयति "नदय-

न्नेति पृथिवीमुत द्याम्" ऋ०८।६७।१२। "आ सानुशुष्मैर्नदयन् पृथिव्याः" ऋ०७।७।२। छान्दसो ह्रस्वः। लोके तु न ह्रस्वः। "नादयन्नुग्रघोषेण सर्वाः सविदिशो दिशः" भा०व० २५२३ श्लो०। अन्तर्भूतण्यर्थे तु अस्य सकर्मकता "नृत्यावसाने नटराजराजो ननाद ढक्कां नव पञ्च वारान्" शब्देन्दुशेखरधृतवाक्यम्।

अनु+नादेनानुकरणे सक०। "तथा च तेषां रुदतां महात्मनां दिशं च खञ्चानुननाद निस्वनः" रामा०२।१११अ०।

अभि+आभिमुख्येन शब्दकरणे। "पुत्रेति तन्मयतया तरवोऽभिनेदुः" भाग० १।२।२।

उद्+उच्चैःशब्दकरणे। "कालमेघइवोन्नदन्" भा०द्रो०६८१४

प्रति+प्रतिशब्देन अनुकरणे सक०। "वयं प्रति नदन्तस्तान्" भा० भी०४५।१८।

णद भाषे चु० उभ० सक० सेट्। नादयति ते प्रणादयति अनीनदत्-त। ननाद नेदतुः।

णभ हिंसे भ्वा० आत्म० सक० सेट्। नभते प्रणभते लृदित् अनभत् अनभिष्ट। नेभे। "नभन्तामन्यकेषां ज्याका अधिधन्वसु" ऋ०१०।१६३। १। "नभन्तां हिंसयन्ताम्" भा० आर्षस्तङ् "नाभाकस्य प्रशस्तिभिः" निरुक्तधृता ऋक्। वेदेऽस्य कचित् नुम्।"उन्नम्भय पृथिवीं भिन्धीदं दिव्यं नभः" तैत्ति०स०२।४।८।२।

णभ हिंसे दिवा० क्र्या० च पर० सक० सेट्। नभ्यति प्रणभ्यति नभ्नाति। अनाभीत्-अनभीत्। ननाभ नेभतुः।

णम शब्दे अक० नतौ सक० भ्वा० पर० अनिट्। नमति प्रणमति अनंसीत्। ननाम नेमतुः नेमिथ ननन्थ। नतः नतिः नामः नत्वा नन्ता नम्यः आनाम्यः। अस्य अमन्तत्वेन घटादित्वे प्राप्तेऽपि अनुपसर्गाद्वेति नियमात् वा तथात्वम्। नमयति नामयति उपसर्गात्तु उन्नमयतीत्येव। नतिश्च स्वाकर्षबोधकव्यापारभेदः स च करशिरःसंयोगादिः स्वापकर्षबोधशालिनः कर्मता। नमति गुरुम् दुर्गादासधृतोदा०। न्यग्भावे (नोया) अकर्म०। ततः कर्मकर्त्तरि न यक्चिणौ नमते अनंस्त। "सुम्नेभिरस्मे वसवो नमध्वम्" ऋ० ७।५६।१७। "एते द्यूने युवतयोऽनमन्त"१०।३०।६। न्यग्भावे "अनंसीद्भूर्भरेणास्य" भट्टिः। "उन्नमति नमति वर्षति गर्ज्जति मेघः करोति तिमिरौघम्। प्रथमश्रीरिव पुरुषः करोति रूपाण्यनेकानि" ऋच्छ०"नतभ्रुवो नव्यजनापनेयः" उद्भटः "पुष्पभारनता लता" रामा० २।८६ अ०। "नवाभिधानाद् व्यथते नताननः" किरा०। यङि नंनम्यते। "नंनम्यमाना फलदित्सयेव" भट्टिः।

अभि+आभिमुख्येन नमने। "देवान् वै यज्ञो नाभ्यनमत्"

अव+न्यग्भावे अधोभवने (नीचे नोओया) अक०। "त्वय्यादातुं जलमवनते" मेघ०। णिच् अवनमयति "अवनामितमेढ्रस्य मेढ्रे" सुश्रु०। "शिरः सुलक्ष्णौ जग्राह स्वहस्तेनावनाम्य च" हरिवं० ९९ अ०। केचिच्छराक्षेपभयाच्छिरांस्यवननामिरे" भा०आ०१२४अ०। आर्षो न ह्रस्वः आत्मभावस्त्वार्षः।

उद्+ऊर्द्ध्वगतौ उच्चभवने उत्थाने च अक०। "उन्नम्योन्नम्य तत्रैव दरिद्राणां मनोरथाः। हृदयेषु विलीयन्ते विधवास्त्रीस्तनाविव" पञ्चत०। "स्थितः सर्वोन्नतेनोर्वीम्" रघुः

अभि+उद्+आभिमुख्येनोन्नतौ अक०। "अभ्युन्नताङ्गुष्ठनखप्रभाभिः" कुमा०। "अभ्युन्नता पुरस्तादवगाढ़ा जघनगौरवात् पश्चात्" शकु०।

उप+प्राप्तौ सक० स्वयमुपस्थितौ अक०। "यं क्षत्रिया दीक्षोपनमेत"। "अभ्याशो ह यदेनं साधवो धर्मा आ च गच्छेयुरुप च नमेयुः"छा०उ०। "यदा तु परबाधयान्ध आत्मने नोपनमति" भाग० ५।१४।१४ श्लो०। "मत्संयोगः कथमुपनमेत् स्वप्नजोऽपि प्रियायाः" मेघ०। "परलोकोपनतं जलाञ्जलिम्" कुमा०।

परि+तुल्यरूपसत्तया वस्तुनोऽन्यथाभवने अक० आत्म०। यथा दुग्धपरिणामः दधि मृत्परिणामः घटादिः। "तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते" "समसत्ताककार्य्योत्पादः परिणामः इति" वेदा०प०। कर्मकर्त्तरि आत्मनेपदमित्यन्ये "परिणामस्वभावा हि गुणा नापरिणम्य क्षणमवतिष्ठन्ते"सा०त०कौ०। गजानां तिर्य्यग्दन्तप्रहारे सक०।"विष्को नागः पर्य्यणंसीत् स एव"माघः। पर्य्यणंसीत् तिर्य्यक् प्रजहारेत्यर्थः। "तिर्य्यग्दन्तप्रहारेषु गजः परिणतो मतः" वैजयन्ती। शेषतापाप्तौ अक०। "दिवसाः परिणामरमणीयाः" शकु०। "ता एवौषधयः कालपरिणामात् परिणतवीर्य्या भवन्ति" सुश्रु०। परिपाके च "आहारस्य सम्यक्परिणतस्य" सुश्रु० सम्यक्नमते सक०। "यस्तं परिणमेच्च तत्" भा० उ० ११०७।

प्र+प्रकर्षेण नतौ। "प्रणमेद्दण्डवद्भूमौ" भाग० ६।१६।८। "प्रणेमुर्भुवि मूर्द्धभिः" भाग० ३। २।२८। "उरसा शिरसा दृष्ट्या वचसा मनसा तथा। पद्भ्यां कराभ्यां

आनुश्यां प्रणामोऽष्टाङ्ग इष्यते" नृसिंह पु० उक्ते नतिभेदे च ।

प्रति+प्रतीपनतौ ।

वि+विशेषेण नतौ ।

वि+परि+भावस्य विकारभेदे अक० आत्म० "षड्भावविकारा भवन्तीति वार्ष्यायणिः । जायतेऽस्ति विपरिणमते वर्द्धते अपक्षीयते नश्यतीति, जायत इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे नो प्रतिषेधति । अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणं, विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारं, वर्द्धत इति स्वाङ्गाभ्युच्चयं,सांयौगिकानां वाङ्गानां, वर्द्धते विजयेनेति वा, वर्द्धते शरीरेणेति वा । अपक्षीयत इत्येतेनैव व्याख्यातः प्रतिलोमं, विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति" निरु०१।२।

अन्यविभक्त्यन्ततया श्रुतस्य शब्दस्य अन्यविभक्त्यन्ततया परिकल्पने "कर्त्तरि शबित्यतः कर्तृग्रहणमनुवर्तते । तच्च प्रथमया विपरिणम्यते" पा० सू० व्याख्या । "अर्थवशात् विभक्तेर्विपरिणामः" परिभाषा ।

सम्+सम्यग्नतौ । "धीरः संनमेत बलीयसे" भा० उ० ११२० । "संनताः फलभारेण पुष्पभारेण च द्रुमाः" रामा०आ०२।१६अ०। [अनयीत् । ननाय नेयतुः ।

णय गतौ रक्षणे च भ्वा० पर० सक० सेट् । नयति प्रणयति

णर्द शब्दे भ्वा० पर० अक० सेट् । नर्दति अनर्दीत । ननर्द प्रणर्दति । नर्दनम् नर्दितः ।

"दुःशासनस्य रुधिरं यदा पास्यति पाण्डवः । आनर्द नर्दितः सम्यक् तदा कृत्यं भविष्यति" भा० उ० १४०अ०। "उदपानाश्च नर्दन्ति यथा गोवृषभास्तथा" १४२ अ० । "नर्दमानो महानादं प्रावृषीव बलाहकः" भा० भी० १०१ अ० । "मत्ता नर्दन्तु कुञ्जराः" रामा० २।१०५ अ०।

णल बन्धे भ्वा० पर० सक० सेट् । नलति प्रणलति । अनालीत् । ज्वला० नलः णालः ।

णश अदर्शने ध्वंसे च दिवा०पर०अक०सेट् । नश्यति प्रणश्यति अनेशत् पा० अन्यमते नशत् अशान्तत्वे न णत्वम् प्रनष्टः । "फलभोग्यो न नश्यति" "प्रनष्टस्वामिकं द्रव्यम्" याज्ञ०। "चेष्टा व्यनेशन्निखिलास्तदास्याः स्मरेषुपातैरिवता विधूताः" नैषध० "एतेन लुङुत्तमपुरुष एव नेशादेशोक्तिश्चिन्त्या "ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च" हितो० "आ पाप ! स्वयं नष्टः परानपि नाशयितुमिच्छसि" प्रबो० च० ।

णस कौटिल्ये भ्वा० आत्म० अक० सेट् । नसते प्रणसते । अनसिष्ट । नेसे

णह बन्धने दिवा० उभ० सक० अनिट् । नह्यति-ते प्रणह्यति-ते । अनात्सीत् अनद्ध ननाह नेहे । नद्धा नद्धः नद्ध्री ।

"यथा युगं वरत्रया नह्यन्ति" ऋ० १०।६०।८ "खर्जूरीस्कन्धनद्धानाम्" रघुः । "अमृतोत्पादने नद्धो भुजगेनेव मन्दरः" रामा० सुन्द० २४ अ० ।

अपि+धारणे वा आदेरल्लोपः । पिनह्यति अपिनह्यति । "वितत्य शार्ङ्गं कवचं पिनह्य" भट्टिः । "आमुच्य कम्बुपरिहाटके शुभे विमुच्य वेणीमपिनह्य कुण्डले" भा० वि० ११ अ० । विशेषेण बन्धने निबन्धने च । "पिनद्धां धूमजालेन प्रभामिव विभावसोः" भा०व०६८अ० "बहुधा तु पिनद्धाङ्गैर्हिमवच्छिखरैरिव" भा० आ० १८५ अ० ।

अव+समन्ताद्बन्धने । "चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः" मनुः ।

आ+सम्यग्बन्धने "वरत्रायां दार्व्यानद्ध मानः" ऋ०१०।१०२।८ "आनद्धावरणैः कामैः" भा० भी० ११८ अ०। "आनह्यते यस्य विधूयते च पापच्यते क्लिद्यति चापि नाभा" सुश्रु०

परि+आ+परितो बन्धे सक० । "सोमपर्याणहनेन पर्याणह्यति" शत० ब्रा० ३।३।४।६

उद्+उत्तोल्य बन्धने । "अस्थ्यवयवोऽस्थिमध्यमनुप्रविश्य मज्जानमुन्नह्यति" "मांसावमुन्नह्यति मांसपिण्डम्" सुश्रु० अतिबन्धने च । "ते नेह शक्याः सहसा विजेतुं वीर्योन्नद्धाः कृतवैरास्त्वया ते" भा० भी० ८१ अ० ।

सम्+उद्+समुग्बन्धने । "वल्मीकवत् समुन्नद्धमन्तः कुर्वन्ति विद्रधिम्" सुश्रु० । पाण्डित्याभिमाने गर्वे च "अतस्त्विषु समुन्नद्धौ पण्डितम्मन्यगर्वितौ" अमरः । तत्र पाण्डित्यमाने "अश्रुतश्च समुन्नद्धो दरिद्रश्च महामनाः" भा०उ०३२अ० । गर्वे "अर्थं महान्तमासाद्य विद्यामैश्वर्य्यमेव वा । विचरत्यसमुन्नद्धो यः स पण्डित उच्यते" भा० उ० ३२अ० । समुद्भवे च "परोक्षेण समुन्नद्धप्रणयौत्कण्ठ्यकातरः" भाग० १।१५।४

उप+उपरिबन्धने । "विस्रावयेत् स्विन्नमतन्द्रितश्च शुद्धं व्रणं चाप्युपनाहयेत्तु" सुश्रु० । उपानह् क्विपि पूर्वस्वरदीर्घः ।

नि+निबन्धने । "इषुधिः पृष्ठे निनद्धः" ऋ० ६।७५।५

परि+परितो बन्धने । "न तां बभौ परिणहेच्छतचर्मा महातनुम्" भा० आ० २८ अ० । विस्तारे "परिणाहो

विशाखता" अमरः। "कपाटवक्षाः परिणद्धकन्धरः" रघुः। क्विपि घञि परे वा दीर्घः परी(रि)णाहः।

सम्+सम्यग्बन्धने कवचादिधारणे च।

"स्रयद्दुकूलं कबरीं च विच्युतां संनह्यतीं वामकरेण वल्गुना" भाग० ८।१२।१६। "कवचेन महार्हेण समनद्धदृढवलाम्" भा० वि० ३७ अ०।

णास ध्वनौ भ्वा० आत्म० अक० सेट्। नासते प्रणासते अनासिष्ट ननासे। ऋदित् अननासत्-त।

णिक्ष चुम्बने भ्वा० पर० सक० सेट्। निक्षति प्रणिक्षति। क्वचित्तु वा णत्वमिति पाणिनिः। सर्वत्र वा णत्वम् मुग्ध० "निक्ष दर्भ सपत्नान् मे" अथ० १९।२९।१ आर्षगणपदयोर्वात्यागः। "याः पार्श्वे उपर्षन्त्यनुनिक्षन्ति पृष्टीः" अथ० ९।८।१५ "प्रणिक्षिष्यति नो भूयः प्रनिन्द्राक्षान् मधून्ययम्" भट्टिः। "किमीदिनं प्रत्यञ्चमर्चिषा जातवेदो विनिक्ष" अथ० ८।३।२५

वि+नाशने "शिशीते शृङ्गे रक्षसे विनिक्षे" ऋ० ५।२।९ "विनिक्षे नाशाय" भा० आर्षस्तङ्।

णिज शोधने अदा० आत्म० सक० सेट् इदित्। निङ्क्ते प्रणिङ्क्ते अनिञ्जिष्ट निनिञ्जे। शुद्धौ अक०। "अहं राष्ट्रस्याभीवर्गे निजो भूयासमुत्तमः" अथ० ३।५।२ (निजः शुद्धः) "यस्य नास्ति निजा प्रज्ञा केवलं तु बहुश्रुतः" भा० स० ५४ अ०। "बुद्धिः सततमन्वेति छायेव पुरुषं निजा" भा० व० ३० अ०। "भुजङ्मनस्तस्य निजेन तेजसा" रघुः। निजेन शुद्धेन।

णिज शोधने सक० शुद्धौ अक० जु० उभ० अनिट्। नेनेक्ति प्रणेनेक्ति। नेनिजानि नेनिक्ते अनेनेक् अनेनिजम् अनेनिक्त इरित् अनिजत् अनैक्षीत् अनिक्त।

"शाल्मली फलके श्लक्ष्णे नेनिज्यान्नेजकः शनैः" मनुः "सूरो निनिक्त रश्मिभिः ऋ० १०।१२२।६

अव+समन्तात् जलप्रोक्षणेन शोधने। "यज्ञस्वै क्रूरमभूत् तद्ब्रह्मा एतद्दाधीत्तस्मात् पाणी अवनेनिक्ते"। शत० ब्रा० १।२।५।२३।

"अथोदपात्रमादायावनेजयति। असाववनेनिक्ष्वेत्येव यजमानस्य पितरमसाववनेनिक्ष्वेति पितामहमसाववनेनिक्ष्वेति प्रपितामहं तद्यथा शिष्यतेऽभिषिञ्चेदेवं तत्" शत० ब्रा० २।४।२।१६।"अवनेनिक्ष्व दास्यमानं पिण्डं भोक्तुमात्मीयौ पाणी शोधयेति" भा०। पिण्डदानार्थमास्तृतकुशे जलप्रोक्षणे तत्प्रकारः श्रा० त० उक्तो यथा "प्रागग्रेष्वथ दर्भेषु आद्यमामन्त्र्य पूर्ववत्। अपः क्षिपेन् मूलदेशेऽवनेनिक्ष्वेति निस्तिलाः। द्वितीयञ्च तृतीयञ्च मध्यदेशाग्रदेशयोः" इत्याभ्युदयिकप्रकरणीयछन्दोगपरिशिष्टवचनेन आभ्युदयिके निस्तिलत्वाभिधानेनान्यत्र सतिलत्वप्रतीतेः पुष्पयुक्तत्वञ्च। "सपुष्पं जलमादाय तेषां पृष्ठे पृथक् पृथक्। अप्रदक्षिणं नेनिज्याद्गोत्रनामानुमन्त्रितम्" इति ब्रह्मपुराणवचनात् "अपसलवि पितृतीर्थेन प्रदेशिन्यङ्गुष्ठयोरन्तरा अपसलवि "अपसव्यं वा तेन पितृभ्यो निदधातीति" भट्टभाष्यधृतगृह्यान्तरात् अपसव्यशब्देन पितृतीर्थमुच्यते अस्मादेव वचनात् तथा च मनुः प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा" इत्यादि तत्र तु मण्डलोपरि असाविति सम्बोधनविभक्त्या सर्वत्र नामनिर्देश इति भट्टभाष्यम् अतएव प्रागुक्तछन्दोगपरिशिष्टे आद्यमामन्त्र्य पूर्ववदित्युक्तं आद्यं पितरं पूर्ववत् "गोत्रनामभिरामन्त्र्य पितॄनर्घ्यं प्रदापयेत्" इतिवत्। पितुरवनेजनं मूलदेशे पितामहप्रपितामहयोस्तु अवनेजनमध्यदेशाग्रदेशयोः "द्वितीयञ्च तृतीयञ्च मध्यदेशाग्रदेशयोः" इति छन्दोगपरिशिष्टात् मातामहादीनामप्येवम्। "मातामहप्रभृतींस्तु एतेषामेव वामतः" इति छन्दोगपरिशिष्टात्। एतेषां पितॄणां वामत इत्याभ्युदयिकपरम्। अन्यत्र तु दक्षिणतः कर्तुर्वामोपचारत्वात्। अतएव पार्वणे प्रागुक्तब्रह्मपुराणे "अप्रदक्षिणं नेनिज्यादित्युक्तम्। तेन सतिलपुष्पोदकपात्रं वामहस्ताद्दक्षिणहस्तेन वामान्वारब्धेन गृहीत्वा अमुकगोत्र! पितरमुकदेवशर्मन्नवनेनिक्ष्व ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा" इति पितृतीर्थेनावनेजयेत्। "अप उपस्पृश्य जलं स्पृष्ट्वा एवं पूर्वोक्तरीत्या पितामहाय प्रपितामहाय पिण्डदानस्थलं जलस्पर्शनस्थलञ्च पूर्ववत् व्याख्येयम्"। पिण्डपितृयज्ञे तत्प्रकारः कात्या० श्रौ० ४।१।१०। उक्तो यथा "उदपात्रेणावनेजयत्यपसव्यं सव्येन वोत्तरणसामर्थ्यादसाववनेनिक्ष्वेति यजमानस्य पितृप्रभृति त्रीन्" सू०। "उदकस्य पात्रमुदपात्रं पूर्णपात्रादि तेनाध्वर्युः यजमानस्य पितृप्रभृति पितुरारभ्य त्रीन् पुरुषान् पितृपितामहप्रपितामहान् अपसव्यं यथा हस्तस्य सव्यप्रदेशाद्दक्षिणैकदेशेनोदकनिनयनं यथा स्यात् तथाङ्गुष्ठप्रदेशिन्योरन्तरालेन अवनेजयति अवनिक्तान् शुचीन् करोति पिण्डदानाय। असाविति

स्मृत्युक्तगोत्रनामादेशपूर्वकम् अमुकगोत्र ! यजमानस्य पितरमुकशर्मन्नवनेनिक्ष्वेति रेखायामूलमध्यायप्रदेशेषु दक्षिणसंस्थमवनेजनं कार्य्यम्। अग्रेण देवानां होमः कनिष्ठिकाप्रदेशेन मनुष्याणाम्, उद्धरणं परिवेषणापरपर्य्यायम् अङ्गुष्ठप्रदेशिन्योरन्तरालमेव पितृणां परिशिष्यते अत इदमाह अपसव्यमिति" कर्कः। "अवनेज्य पूर्ववन्नीविं विस्रंस्य नमो व इत्यञ्जलिं करोति" कात्या° श्रौ° १५। निजेः शुद्ध्यर्थकस्य णिचि अवनेजयतीति। अवनेज्येति प्रयोग इति बोध्यम्। शोधनपरत्वे नेनिज्यादिति अवनेजने च न तन्त्रता यथाह छन्दोगप° "अर्घ्ये ऽक्षय्योदके चैव पिण्डदानेऽवनेजने। तन्त्रस्य विनिवृत्तिः स्यात् स्वधावाचन एव च" अवनेजनशब्दे ४२९ पृ° कृत्य प्रदीपोक्तं मातृपक्षीयावनेजनविधानं छन्दोगेतरविषयम् अन्यवेदिनामाभ्युदयिकादिविषयञ्चेति बोध्यम्।

निर्+निःशेषेण क्षालनेन शोधने "पात्राणि निर्णेनिजानि" शत° ब्रा° १।३।१।२ "पात्राणि निर्णेनिक्तो" तैत्ति° स°। "अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते" मनुः "तोयनिर्णिक्तपाणिः" रघुः "तेषामपेततृष्णानां निर्णिक्तानां शुभात्मनाम्" भा° शा° २७१ अ°।

णिद सन्निधाने अक° निन्दने सक° भ्वा° उभ° सेट्। नेदति-ते प्रणेदति-ते। अनेदीत् अनेदिष्ट निनेद निनिदे।

णिदि कुत्सने भ्वा° पर° सक° सेट् इदित्। निन्दति प्रणिन्दति अनिन्दीत्। णत्वं वा णत्वमिति प्राणिनिः। सर्वत्र वा णत्वम् मुग्ध°

"निनिन्द रूपं हृदयेन पार्वती" कुमा°। "निन्दन्तस्तव सामर्थ्यम्" गीता। "अनिन्द्यं निन्दते यो हि" भा° व° २५२ अ°। आर्षस्तङ्। "न निन्दा निन्द्यं निन्दति किन्तु विधेयं स्तौति" मीमांसा।

णिल दुर्बोधे तुदा° पर° सक° सेट्। निलति प्रणिलति। अनेलीत् निनेल।

णिव सेके भ्वा° पर° सक° सेट्। इदित्। निन्वति। अनिन्वीत्। निनिन्व। [अनेशीत् निनेश।

णिश समाधौ भ्वा° पर° सक° सेट्। नेशति प्रणेशति

णिष सेके भ्वा° पर° सक° सेट्। नेषति प्रणेषति अनेषीत्। निनेष।

णिस चुम्बने अदा° आत्म° सक° सेट् इदित्। निंस्ते प्रणिंस्ते अनिंसिष्ट निनिंसे। णत्वं वा णत्वमिति पाणिनिः। सर्वत्र वा णत्वम् मुग्ध°। निंस्ते दन्तच्छदं न च" भट्टिः। "अभि स्रुचः क्रमते दक्षिणावृतो या अस्य धाम प्रथमं ह निंसते" ऋ° १।१४४।१ "अभि स्वरन्ति बहवो मनीषिणो राजानमस्य भुवनस्य निंसते" ९।८५।३

णी प्रापणे भ्वा° उभ° द्विक° अनिट्। नयति प्रणयति अनैषीत्। प्रधाने कर्म्मणि लादयः। अजा ग्रामं नीयते। अनेष्ट निनाय निनयिथ निनेथ निन्ये नेता नेष्यति ते नेतव्यः। नेयः नीतः नीतिः नीत्वा विनीय।

"सर्वान्नेष्यामि वः सदा। वृजिनात्तारयिष्यामि" भा° आ° ६०५२ श्लो° "गमनाय मतिं चक्रे तास्वेनं निन्युरङ्गनाः" रामा° बा° ९ अ°। "नयिष्यामि च वाहिनीम्" रामा° ५।९१ अ°। आर्षं इट्। "दैवेन किलयस्यार्थः स नीतोऽपि विपद्यते" भा° वि° २० अ°। यापने च "निनाय सात्यर्थहिमोत्किरानिलाः। सहस्यरात्रीरुदवासतत्पराः" कुमा°।

सम्मानने आत्म° "शास्त्रे नयते शास्त्रस्थं सिद्धान्तं शिष्येभ्यः प्रापयतीत्यर्थः तेन च सम्मानं फलितम्" सि°कौ°। ज्ञाने निश्चये आत्म°। "तत्त्वं नयते निश्चिनोति" सि°कौ°

अति+अतिक्रम्य नयने। "न स्वर्गं लोकमतिनयेत्" छा°उ°

वि+अति अपवाहने सक°। "व्यतिनीय कालमुपसदां चतुर्थम्" आश्वा° श्रौ° १२।८।२५। "व्यतिनीय क्षपोस्य" नारा°

अनु+स्वाभीष्टप्रवेशनाय सान्त्ववाक्यादिप्रयोगे सक°। "भवतोऽनुनयाम्येवं पुरुराज्येऽभिषिच्यताम्" भा° आ° ८४ अ°। "प्रणिपातेन सान्त्वेन दानेन च महायशाः। ऋत्विजोऽनुनयामास" भा° आ° २२३ अ°। आर्ष आमः। "अनुनीता त्वमस्माभिश्चिरं सान्त्वेन मैथिलि!" रामा° सु° २५ अ°।

अप+अपहरणे अन्यत्रनयने "यत्र संसप्तकाः पार्थमपनिन्यू रणाजिरात्" भा° आ° ५३० श्लो°।

अभि+२९२ पृ° अभिनयशब्दोक्तार्थे सक°। "गीतानि रम्याणि जगुः प्रहृष्टा कान्ताभिनीतानि मनोहराणि" हरि° ८४४८ श्लो°। "तदुक्तमभिनीयाभियुक्तैः" वेदा°सा° आभिमुख्येन नयने च। "दृष्ट्वा शरं ज्यामभिनीयमानम्" भा° व° ७६९ श्लो°। प्रधाने कर्म्मणि शानच्।

अव+अधोनयने। "मन्ये सम्पातमवनयेत्" छा° उ°। "ऋबीसे अत्रिमवनीतमुन्निन्यथुः" ऋ° १।११६।८।

आ+दूरस्थस्यान्तिकप्रापणे। "दूरादिन्द्रमनयन्ना सुतेन" ऋ° ७।३३।२ "रथमन्वानयत्तस्मै सुपर्णोच्छ्रितकेतनम्" भा° द्रो° १४७ अ°। "पुत्रीयता तेन वराङ्गनाभिरानायि विद्वान्

क्रतुषु क्रियावान्" (पुरीष्यश्रृङ्गः) संयाजने च "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति" श्रुतिः

अभि+आ+आभिमुख्येन नयने "दधिमधुसर्पिरातपवर्षा आपोऽभ्यानीय" ऐत० ब्रा०

परि+आ+परित आनयने। "पाञ्चालराजं द्रुपदं गृहीत्वा रणमूर्द्धनि। पर्य्यानयत भद्रं वः सा स्यात् परमदक्षिणा" भा० आ० १२८ अ०।

प्रति+आ+प्रतिकूलतया आनयने गतस्य पुनरानयने "प्रत्यानेष्यति शत्रुभ्यो वन्दीमिव जयश्रियम्" कुमा०

उद्+ऊर्द्ध्वं नयने "किं स्विदादित्यमुन्नयति" भा० व० १७२ अ०। "रेतोधाः पुत्र उन्नयति नरदेव! यमक्षयात्" भा० आ० ७४ अ०। उद्भावने लिङ्गदर्शनेनानुमाने च "नीचासन्तमुदनयः परावृजम्" ऋ० २।१२।१२। उत्सञ्जने उत्क्षेपे आत्म०। "दण्डमुन्नयते उत्क्षिपतीत्यर्थः" सि० कौ०।

उप+उपस्थापने "उपनिन्युर्महाभागं दुहितृत्वेन जाह्नवीम्" हरिवं० १४२१। "महत्या सेनया राजा दमयन्तीमुपानयत्" भा० व० ३०६३ श्लो०। द्विजानामसाधारणे संस्कारभेदे आत्म०। आचार्य्यः शिष्यमुपनयते। "गर्भाष्टमेऽष्टमे वाऽब्दे ब्राह्मणस्योपनायनम्" "उपनीय ददद्वेदानाचार्य्यः स उदाहृतः" मनुः। "आचार्य्य उपनयमानो ब्रह्मचारिणम्" अथ० ११।५।३ "तथेति तं होपनिन्ये" शत० ब्रा० ११।५।३।१३। "समिधमाहर उप त्वा नेष्ये" छा० उ०। स च संस्कारः वेदार्हता प्रयोजकः। तस्य परगामिफलकत्वात् परस्मैपदे प्राप्ते सम्माननोत्सञ्जनाचार्य्यकरणेत्यादिना पा० तङ् विहितः। "न हि उपनयनमात्रेणाचार्य्यत्वं किन्तु तत्पूर्वकाध्यापनेन "उपनीय ददद्वेदान् आचार्य्यः स उदाहृतः इति स्मृतेः" इत्याशयेन उपनयनपूर्वकेनाध्यापनेन हि उपनेतरि आचार्य्यत्वं क्रियते इति" सि०कौ० उक्तम्। "यस्य प्रपितामहादेर्नानुस्मर्य्यते उपनयनम्" आपस्तम्बः भृतिदानेन समीपप्रापणे आत्म०। "कर्म्मकरानुपनयते भृतिदानेन स्वसमीपं प्रापयतीत्यर्थः" सि० कौ०।

नि+उत्सर्जने। "उदकं निनयेच्छेषं शनैः पिण्डान्तिके पुनः" मनुः। "निनयेत् उत्सृजेत्" कुल्लू०। "ओषधिभ्यो हविर्निनयति" तैत्ति० २।४।९२१। नितरां नयने च "पूर्णपात्रमन्तर्वेदि निनयति" तैत्ति० १।७।५।२ "दासी कुम्भं बहिर्ग्रामान्निनयेयुः स्वबान्धवाः। पतितस्य बहिः कुर्य्युः सर्वकार्य्येषु चैव तम्" "चरितव्रत आयाते निनयेरन्नवं घटम्" याज्ञ०।

निर्+निश्चये अवधारणे तदभावाप्रकारकत्वे सति तत्प्रकारके ज्ञानभेदे। "देवःपतिर्विदुषि! नैषधराजगत्या निर्णीयते न किम्,न व्रियते भवत्या" नैष० "पुरावृत्तकथोद्गारैः कथं निर्णीयते परः" हितो०।

परा+पुनरानयने गतस्य पुनः स्वस्थानप्रापणे "पुनः कृत्यां कृत्याकृते हस्तगृह्य पराणय" अथ० ५।१४।४।

परि+परितो नयने "तेषां वृत्तं परिणयेत् सम्यग्राष्ट्रेषु तच्चरैः" मनुः। प्रदक्षिणीकरणे "तौ दम्पती त्रिः परिणीय वह्निम्" कुमा०। "अगृह्णां यच्च ते पाणिमग्निं पर्य्यणयं च यत्" रामा० अयो० ४२ अ०। विवाहरूपसंस्कारभेदे च "वरयित्वा यथान्यायं मन्त्रवत् परिणीय च" भा० आ० ६१२४ श्लो०। "सर्वाः परिणयेद्विप्रः" स्मृतिः "परिणेष्यति पार्वतीं यदा" कुमा०।

प्र+क्षेपे उपसम्पत्तौ प्रवेशने विधाने च "प्रणीतः संस्कृताग्नौ ना यज्ञपात्रान्तरे स्त्रियाम्। त्रिषु क्षिप्रोपसम्पन्नविहितेषु प्रवेशिते" मेदि०। तत्र क्षेपे "तेन सम्यक् प्रणीतानि शरजालानि भागशः" भा० भी० ८७ अ०। विधाने "प्रणीय दारिद्र्यदरिद्रतां नृपः" नैष०। "स एव "मुकुन्दं सच्चिदानन्दं प्रणिपत्य प्रणीयते" मुग्ध० "धर्मो मनुना प्रणीतः" रघुः "यदि न प्रणयेद्दण्डं राजा दण्ड्येष्वतन्द्रितः" मनुः। अग्निसंस्कारभेदे। "अग्निप्रणयनं कृत्वा" स्मृतिः। अग्न्याधेय शब्दे दृश्यम्' "महाध्वरे वह्निरभिप्रणीतः" भट्टिः। उपसम्पत्तिः स्नेहभेदः। प्रणयः। प्रणयिजनः। "प्रणयस्य यथाश्रद्धं राजन्! किं कारवाणि ते" भा० व० २१६ श्लो०। "संयोगे "सञ्चये च विनाशान्ते मरणान्ते च जीविते। च वियोगान्ते को नु विप्रणयेन् मनः" भा० शा० १८८१ श्लो० "भक्तिप्रीतिप्रणयसहितं मानदम्याद्युपेतम्" उद्ध०दू०

प्रति+पुनः प्रापणे यतो गतस्तत्रैव पुनर्नयने। "तेभ्यः "प्रतिनेतुमयोध्याम्" रामा० २।९० अ०। "भद्रं न सर्व- एनान् प्रतिनयामि बद्धा" अ० ८।८।१० मेतद्वित्तं गृहं प्रतिनेतुं युज्यते" पञ्चत०।

वि+अपसारणे "अहं हि ते विनेष्यामि युद्धश्रद्धामितः परम्" भा० उ० १४७५ श्लो०। भारमेनं विनेष्यामि पाण्डवानां महात्मनाम्" भा० भी० ५० अ०। शिक्षाविशेषैः "नाविनितैर्व्रजेद्धुर्य्यैः" "विनितैस्तु व्रजेन्नित्यमाशुगैः"

मनुः। "तपस्विसंसर्गविनीतसत्त्वे" (तपोवने) "वध्यान् विनेष्यन्निव दुष्टसत्त्वान्" रघुः। "स्वधर्माच्चलितान् राजा विनीय स्थापयेत् पथि" याज्ञ०। आनुकूल्यार्थमनुनये विनयः। ऋणादेर्निर्यातने आत्म०। "करं विनयते राज्ञे देयं भागं परिशोधयतीत्यर्थः" सि० कौ०। व्यये विनियोगे आत्म०। "शतं विनयते धर्मार्थं विनियुङ्क्ते इत्यर्थः सि० कौ०। अपनयने कर्तृशरीरभिन्ने कर्मणि कर्तृस्थे क्रियाफले आत्म०। क्रोधं विनयते अपगमयति क्रोधापसारणफलस्य चित्तप्रसादस्य कर्तृस्थत्वात् "स्वरितञितः" इत्येव सिद्धे नियमार्थमिदं तेनेह न गण्डं विनयति, गण्डस्य शरीरावयवत्वात् कर्तृस्थत्वेऽपि न तङ्। कर्तृस्थे इत्युक्तेः गुरोः क्रोधं विनयतीत्येव।

सम्+संयोजने। "ब्रह्मण्यात्मानं संनयन्" भाग० ६।१०।१ "ओषधिभ्योऽध्यात्मन् समनयन्" तैत्ति०ब्रा०२।५।२।३ स्थापने च "कंसे पृषदाज्यं संनीय" बृह०उ०६।४।२४ मिश्रणे "दधिमधुहविषा घृतं संनीय" बृह० उ० वैदिकहविः संस्कारभेदे सांनाय्यं हविः "नासोमया संनयेत्" तैत्ति० स०२।५।५।१।

णील नीलताकरणे भ्वा० पर० सक० सेट्। नीलति प्रणीलति अनीलीत्। निनील

णीव स्थौल्ये भ्वा० पर० सक० सेट्। नीवति प्रणीवति अनीवीत् निनीव।

णु स्तुतौ अदा० पर० सक० वेट्। नौति प्रणौति अनावीत् अनौषीत् नुनाव नुनुविथ नुनुविव। नोता नविता नविष्यति नोष्यति नोतव्यं नवितव्यं नुतः। नुतिः नुत्वा प्रणुत्य। "येन नुवन्तमहिंसं पिणक्" ऋ० ६।१७।१०। "द्विधाप्रयुक्तेन च वाङ्मयेन सरस्वती तन्मिथुनं नुनाव" कुमा०। "सादरं नौमि तं भक्त्या श्रीगोपीजनवल्लभम्" स्क० पु०। "सैन्यं नीलं नुनाव च" भट्टिः। णिच् नावयति णिच् सन्। नुनावयिषति सन् नुनूषते यङ् नोनूयते।

आ+सम्यक्स्तवने आत्म०। "पतत्त्रिणः शुभामन्द्रमानुशांनास्त्वजिह्लदन्" भट्टिः।

प्र+प्रकर्षेण स्तवने "एददेवं विद्वानचरं प्रणौति" छा०उ०।

णु गतौ भ्वा० आत्म० सक० अनिट् निघण्टुः। गवते नवते इत्यादि गतिकर्मसु निरुक्तोक्तेः नवते। "अभीनवन्ते अद्रुहः 'प्रियमिन्द्रस्य काम्यम्" ऋ० ८।१०।१। "अभीनवन्ते अभिगच्छन्ति" भा०। "हरिं नवन्ते अवता उदन्यवः" ऋ० ८।८६।२७ "नवन्ते गच्छन्ति" भा०। "गावो न धेनवोऽनवन्त" १०।९५।६

णुद प्रेरणे तुदा० उभ० सक० अनिट्। नुदति-ते प्रणुदति अनौत्सीत् अनुत्त। नुनोद नुनुदे नोत्ता नोत्स्यति-ते नोदनम् नोत्तुम्। नुन्नः नुत्तः। "मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वाम्" मेघ०। खण्डने अपसारणे च नुनुदे तनुकण्डु पण्डितः" नैष०। "अदस्त्वया नुन्नमनुत्तमं तमः" माघः। "प्रणुद्यान्मे वृजिनं देवदेवः" हरिवं १२१ अ०। "विधिना संप्रणुदितः" भा० व० १ अ०। अनुदात्तत्वेऽपि इट् आर्षः। नोदं करोतीति णिच्। नोदयति नोदितः नोद्यमानः। "ते नोद्यमाना विधिवत् वाडकेन हयोत्तमाः" भा० व० ७१ अ०। "अङ्कुशाङ्गुष्ठनोदिताः" भा० १९ अ०। धातुपाठे स्वरितत्त्व णुद प्रेरणे इति पाठेऽपि पुनस्तथैवोत्तरत्र पाठः कर्त्रभिप्राये क्रियाफलेऽपि परस्मैपदार्थः" सि० कौ०।

अप+अपसारणे "जरां रोगमपनुद्य शरीरात्" साङ्ख्या०गृ० "आच्छाद्य च महाबाहुर्वलात्तृणानपानुदत्" भा० आश्व० ६२अ०। "अलक्ष्मीं व्यपनोत्स्यथ" भा० व० ११५ अ०। "अभिद्रवार्जुन! क्षिप्रं कुरून् द्रोणादपानुद" भा० द्रो० १९० अ०।

परा+अपसारणे "तन्न पराणुद विभो! कश्मलं मानसं महत्" भाग० ३।७।७ श्लो०।

प्र+प्रकर्षेण नोदने चालने च। "स शत्रुसेनां तरसा प्रणुद्य" भा० वि० ६४ अ०। अपसारणे "ततोऽन्धकारं प्रणुदन्नुदतिष्ठत चन्द्रमाः" भा० व० २१ अ०।

वि+विशेषेण नोदने। "चोदयामास तानश्वान् विनुन्नाङ्गीश्च सायकैः" भा० भी० ४८४६ श्लो०। णिजन्तश्च दुःखाद्यपसारणे "लक्ष्मीर्विनोदयति येन दिगन्तलक्ष्मी" रघुः मल्लिनाथस्तु तत्करोतीत्यर्थे नामधातुरयमित्याह। "पुष्पं फलं चार्त्तवमाहरस्व। विनोदयिष्यन्ति नवाभिषङ्गाद्" रघुः। "कथं वा देवी सरुजत्वात् विनोद्यते" मालविकाग्नि०। "लोलं विनोदय मनः सुमनोलतासु"। सा० द०।

णू स्तुतौ तु०कु०सक०प०सेट्। नुवति प्रणुवति अनुवीत् नुनाव "समिन्द्रगर्दभं मृण नुवन्तं पापयामुया" ऋ० १।२९।५ "महामनूषत श्रुतम्" ऋ०१।६।६ "अनूषत स्तुनवन्तः आर्षः इडभावः। अयं ह्रस्वान्त इति वररुचिः। ह्रस्व

मानाश्च भर्त्ताः" ऋ० १।१६०।१ नवमानास्तुवानाः' भा० वेदे आत्म० गणव्यात्यासश्च ।

णेद् सन्निधाने उभ० सक० सेट् । नेदति-ते प्रणेदति-ते । अनेदीत् अनेदिष्ट निनेद निनेदे ।

णेष्ट गतौ भ्वा० आत्म० सेट् । नेषते प्रणेषते । अनेषिष्ट ऋदित् अनिनेषत् त ।

एते धातवः नादिका अपि सति हेतौ णत्वार्थं गणे णोपदेशितया पठिताः प्रयोगे तु दन्त्यनादय एव पुनः प्रादियोगे णत्वमुपयान्ति । नन्दनाथनाधनक्ष न्टनाटिधातवस्तु णोपदेशत्वाभावात् निमित्तेऽपि न णत्वमुपयान्तीति भेदः

ण्य पु० ब्रह्मलोकस्थे सरोवरभेदे "अथ यदरण्यायनमित्याचक्षते ब्रह्मचर्य्यमेव तदरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि तदैरम्मदीयम्" छा० उ०। "तत्र हि ब्रह्मलोके अरश्च ह वै प्रसिद्धो ण्यश्चार्णवौ समुद्रौ । समुद्रावपामेव सरसी तृतीयस्याम् भुवमन्तरिक्षञ्चापेक्ष्य तृतीया द्यौस्तस्यां तृतीयस्यामितोऽस्माल्लोकादारभ्य गण्यमानायां दिवि । तत्रैव चैरं इराऽन्नं तन्मय ऐरो मण्डस्तेन पूर्णमैरं मदीयं तदुपयोगिनां मदकरं हर्षोत्पादकं सरः" शाङ्करभा० ।

इति वाचस्पत्ये णकारादिशब्दार्थसंकलनम् ।

त

तकारो व्यञ्जनवर्णभेदः दन्त्यः अर्द्धमात्राकालेनोच्चार्य्यः अस्योच्चारणे दन्तमूलेन जिह्वाग्रस्य स्पर्श आभ्यन्तरप्रयत्नः । विवारश्वासाघोषा वाह्यप्रयत्नाः । मातृकान्यासेऽस्य वामस्फिचि न्यस्यता । अस्य वाचकशब्दा वर्णाभिधाने उक्ता यथा "तः पूतना हरिः शुद्धिःशक्तिः शुक्लिर्जटी ध्वजी । वामस्फिग्वामकञ्ची च कामिनी मध्यकर्णकः । आषाटी तण्डतुम्बश्च कामिकाष्टपुच्छकः । रत्नकश्च श्यामसुखी वाराही मकरोऽरुणा । सुगतोर्द्ध्वस्थाबद्धजानुश्च क्रोष्टुपुच्छकः । गन्धो विश्वा महच्छत्रश्चानुराधा च सौरकः । जयन्ती पुलको भ्रान्तिरनङ्गमदनातुरा" । तदधिष्ठातृदेवताध्यानं वर्णोद्धारतन्त्रोक्तं यथा "ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने ! । चतुर्भुजां महाशान्तां महामोक्षप्रदायिनीम् । सदा षोडशवर्षीयां रक्ताम्बरधरां पराम् । नानालङ्कारभूषाढ्यां सर्वसिद्धिप्रदायिनीम् । एवं ध्यात्वा तकारन्तु तन्मन्त्रं दशधा जपेत्" । कामधेनुतन्त्रे अस्य स्वरूपमुक्तं यथा "तकारं चञ्चलापाङ्गि ! स्वयं परमकुण्डली । पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा । त्रिशक्तिसहितं वर्णम् आत्मादितत्त्वसंयुतम् । त्रिविन्दुसहितं वर्णं पीतविद्युत्समप्रभम्" "तो व्योमान्तलघुर्धनापहरणम्" इति वृ० र० टी० तस्य व्योमदेशत्वं मात्रावृत्ते प्रथमोपन्यासे धनापहारः फलञ्चोक्तम् ।

त पु० तक—हसने सहने वा ड । १चौरे २अमृते ३पुच्छे ४क्रोड़े ५म्लेच्छे च मेदि० । ६गर्भे ७शठे शब्दच० ८रत्ने ९सुगते देवे १० गौरविवर्ज्जिते ११क्रोष्टुपुच्छे च एका० को० । १२तरुणे १४पुण्ये स्त्री०स्त्री० मेदि० । त्रिवर्णप्रस्तावे आद्यगुरुद्वयके अन्त्यलघुके (ऽऽ।) १२ गणभेदे "सोऽन्तगुरुः कथितोऽन्त्यलघुस्तः" छन्दोम० ।

तंसु पु० तसि—उन् । पौरवे मतिनारसुते नृपभेदे "मतिनारसुता राजंश्चत्वारोऽमितविक्रमाः । तंसुर्महानतिरथो द्रुह्युश्चाप्रतिमद्युतिः । तेषां तंसुर्महावीर्य्यः पौरवं वंशमुद्वहन् । आजहार यशो दीप्तं जिगाय च वसुन्धराम्" । भा० आ० ६४ अ० । स च सरस्वतीपुत्रः यथा तत्रैवोक्तम् ६५ अ० । "तंसुं सरस्वती पुत्रं मतिनारादजायत । ईलिनं जनयामास कालिङ्ग्यां तंसुरात्मजम्" ।

तक हासे अक० सहने सक० भ्वा० पर० सेट् । तकति अताकीत्—अतकीत् । तताक तेकतुः । निरुक्ते अयं गतिकर्म्मसु पठितः । कर्म्मणि भावे च । यत् न गयत् । तक्यं सहनीयम् ।

तक दौस्थ्ये कृच्छ्रजीवने पा० इदित् प० भ्वा० सेट् । तङ्कति अतङ्कीत् ततङ्क तङ्का आतङ्का ।

तक त्रि० तं गौरववर्ज्जितं यथा तथा कायति कै—क । १निन्दिते । "इयत्तकः कुम्भकस्तकं भिनद्म्यश्मातनी" ऋ० १।१९१।१५ । "तकं कुत्सितम्" भा० । तक—अच् । २सहनशीले च । "तका वयं प्लवामहे इदं मधु" कात्या० श्रौ० १३।३।२१सू० । ३स्खलिते च । "श्रुतं गायत्रं तकवानस्य" ऋ० १।१२०।६ । "तकवानस्य स्खलितगतेः" कर्कः ।

तकत् अव्य० तक–वा० अति। अत्यन्ते। २तत्सुते मनायति तकत्सुते मनायति" ऋ० १।१३३।४। "तकदिति मनायति अत्यन्तमिदमिति सुष्ठु मन्यते" भा०। तद्–टेर कच्। २तच्छब्दार्थे त्रि० सकः तकौ तके इत्यादि रूपम्

तकरी स्त्री तं कुत्सितं करोति कृ–ट ङीप्। कुत्सितकारिण्यां स्त्रियां "ते भिनद्मि तकरीम्" तैत्ति० स० ३।३।१०।१

तकार पु० त+कार। तस्वरूपे वर्णे "एवं ध्यात्वा तकारन्तु" कामधेनुत०। [१धूर्त्ते २औषधे च ३ओषधौ स्त्री उज्ज्व०।

तकिल पु० तकि–कृच्छ्रजीवने उणादि० इलच् नलोपश्च

तकु त्रि० तक–गतौ निरु० उन्। गामुके "पुरुमेधश्चित् तकवे नवं ददत्" ऋ० ८।५७।५ "तकवे तकतिर्गतिकर्मा औणादिक उन्प्रत्ययः सोममभिगच्छते" भा०।

तक्कन् न० तक–कनिन् न कित्। अपत्ये निघण्टुः।

तक्र न० तन्च–रक् न्यङ्क्वा० कुत्वम्। चतुर्थांशजलयोगेन दधिमन्थनजाते दधिविकारभेदे (घोल) अमरः। तद्भेदादिकं भावप्रका० उक्तं यथा

"घोलन्तु मथितं तक्रमुदश्विच्छच्छिकापि च। ससरं निर्जलं घोलं मथितन्त्वसरोदकम्। तक्रं पादजलं प्रोक्तमुदश्विदर्द्धवारिकम्। छच्छिका सारहीना स्यात् स्वच्छा प्रचुरवारिका। घोलं तु शर्करायुक्तं गुणैर्ज्ञेयं रसालवत्"। मथितं (मट्ठया) इति लोके। छच्छिका (छाछ) इति लोके। "वातपित्तहरं ह्लादि मथितं कफपित्तनुत्। तक्रं ग्राहि कषायाम्लं स्वादुपाकरसं लघु। वीर्य्योष्णं दीपनं वृष्यं प्रीणनं वातनाशनम्। ग्रहण्यादिमतां पथ्यं भवेत्सङ्ग्राहि लाघवात्। किञ्च स्वादुविपाकित्वाच्च पित्तप्रकोपणम्। कषायं दीपनं वृष्यं प्रीणनं वातनाशनम्। कषायोष्णविपाकित्वाद्रौक्ष्याच्चापि कफापहम्। न तक्रसेवी व्यथते कदाचित् न तक्रदग्धाः प्रभवन्ति रोगाः। यथा सुराणाममृतं सुखाय तथा नराणां भुवि तक्रमाहुः। उदश्वित्कफकृद्बल्यमामघ्नं परमं मतम्। छच्छिका शीतला लघ्वी पित्तश्रमतृषाहरी। वातनुत् कफकृत्सा तु दीपनी लवणान्विता।

अथोद्धृतघृतस्तोकोद्धृतानुद्धृतघृतानां तक्राणां गुणाः

"समुद्धृतघृतं तक्रं पथ्यं लघु विशेषतः। स्तोकोद्धृतघृतं तस्माद्गुरु वृष्यं कफापहम्। अनुद्धृतघृतं सान्द्रं गुरु पुष्टिकफप्रदम्"

अथ दोषविशेषे व्याधिविशेषे तक्रविशेषाः।

"वातेऽम्लं शस्यते तक्रं शुण्ठीसैन्धवसंयुतम्। पित्ते स्वादुसितायुक्तं सव्योषमधिके कफे। हिङ्गुजीरयुतं घोलं सैन्धवेन च संयुतम्। भवेदतीव वातघ्नमर्शोऽतीसारहृत्परम्। रुचिदं पुष्टिदं बल्यं वस्तिशूलविनाशनम्। मूत्रकृच्छ्रे तु सगुडं पाण्डुरोगे सचित्रकम्"।

अथामपक्वतक्रगुणाः

"तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च। पीनसश्वासकासादौ पक्वमेव प्रशस्यते"।

अथ तक्रसेवननिमित्तानि।

"शीतकालेऽग्निमान्द्ये च तथा वातामयेषु च। अरुचौ स्रोतसां रोधे तक्रं स्यादमृतोपमम्। तत्तु हन्ति गरच्छर्दिप्रसेकविषमज्वरान्। पाण्डुमेदोग्रहण्यर्शोमूत्रग्रहभगन्दरान्। मेहं गुल्ममतीसारं शूलप्लीहोदरारुचीः। श्वित्रकोष्ठगतव्याधीन् कुष्ठशोथतृषाकृमीन्"।

तक्रस्याविषयाः "नैव तक्रं क्षते दद्यात् नोष्णकाले न दुर्बले। न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपित्तजे"।

अथ गव्यादीनां विशिष्टाः गुणाः "यान्युक्तानि दधन्यष्टौ तद्गुणं तक्रमादिशेत्"। भावप्र०।

अधिकं कृतान्नशब्दे २१८५ पृ० दृश्यम्। "मन्थनादिपृथग्भूतस्नेहमर्धोदकं तु यत्। नातिसान्द्रद्रवं तक्रं स्वाद्वम्लं तुवरं रसे" सुश्रु०। "सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च। दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च" मनुः। "तक्रनिस्रावबहुलं दधिमण्डार्द्रमृत्तिकम्" हरिवं० ६१ अ०। [पदार्थे।

तक्रकूर्चिका स्त्री २१६७ पृ० कूर्चिकाशब्दोक्ते तक्रजाते

तक्रपिण्ड पु० "दध्ना तक्रेण वा दुष्टं दुग्धं बद्धं सुवाससा। द्रवभागेन हीनं यत् तक्रपिण्डः स उच्यते" इत्युक्ते (छाना) ख्याते पदार्थे। [विशेषयुक्ते मांसभेदे।

तक्रमांस न० कृतान्नशब्दे २१८२ पृ० उक्ते तक्रेण पाक-

तक्रवामन पु० तक्रं वामयति अत्यम्लत्वात् वाम+णिच्–ल्यु ६त०। नागरङ्गे शब्दार्थचिन्ता०।

तक्राट पु० तक्रार्थं तक्रोत्पादनार्थमटति अट–अच्। मन्थानदण्डे हारा०।

तक्रारिष्ट पु० "यमान्यामलकं पथ्या मरिचं त्रिपलांशकम्। लवणानि पलांशानि पञ्च चैकत्र चूर्णयेत्। तत्र कंसाप्लुतं जातं तक्रारिष्टं पिबेन्नरः। दीपनं शोथगुल्मार्शःक्रिमिमेहोदरापहम्" चक्र० उक्ते औषधभेदे।

तक्व त्रि० तक–गतौ बा० व। गमनशीले। "तक्वो नेता तदिद्वपुः" ऋ० ८।६९।१२ "तक्वो गमनशीलः" भा०।

तक्वन् त्रि० तक–गतौ वनिप्। १गतिशीले "तक्वा न भूर्णिर्वना सिषक्ति" ऋ० १।६६।१ तक–सहने वनिप्। २चौरे च। "निम्नु च उग्रसस्तक्ववीरिव" ऋ० १।१५१।५ "तक्ववीः तक्वा स्तेनस्तस्य वीः गतिः" भा०।

तक्ववी त्रि० तक्वानां चौराणाम् वीः। चौराणां गतौ। "भगमीट्टे तक्ववीये" ऋ० १।१३४।५। "तक्ववीये तस्कराणां यज्ञविघातिनामन्यत्र गमनाय" भा० छान्दस इयङ् दीर्घश्च।

तक्ष कार्श्ये तनूकरणे (चाँचा छोला) व्यापारे वा भ्वा० पक्षे स्वा० प० सक० वेट्। तक्षति तक्ष्णोति तक्षन्ति तक्ष्णुवन्ति अतक्षीत् अताक्षीत् ततक्ष। तक्षिष्यति तक्ष्यति। तष्टा तक्षणम् तष्टः तक्ष्य तष्ट्वा प्रकाष्ठतट्। "दारवाणाञ्च तक्षणम्" मनुः "चषालं ये अश्वयूपाय तक्षति" ऋ०।१।१६२।६ "बाहुभ्यां शकलमपतक्ष्णुवन्ति" शत० ब्रा० ३।७।१।८।

तक्ष त्वचो ग्रहणे संवरणे भ्वा० पं० सक० सेट्। तक्षति कायं वर्म्मणा योधा। अतक्षीत् ततक्ष।

तक्ष पु० रामानुजस्य भरतस्य १पुत्रभेदे। "तक्षः पुष्कर इत्यास्तां भरतस्य महीपते!" भाग० ९।११।७। "स (भरतः) तक्षपुष्कलौ पुत्रौ राजधान्योस्तदाख्ययोः। अभिषेच्याभिषेकार्हौ रामान्तिकमगात् पुनः" रघुः। २तन्नामके राजधानीभेदे च। तक्ष भावे घञ्। ३तनूकरणे कवचादि संवरणे। "उभौ कक्ष्यां सुपार्श्वं तु तक्षवन्तौ च शिक्षितौ" भा० स० २२ अ०

तक्षक पु० तक्ष–ण्वुल्। १विश्वकर्मणि शब्दर०। २द्रुमभेदे हेमच०। "सूचकात् विप्रकन्यायां जातस्तक्षक उच्यते। उशनसोक्ते सङ्कीर्णजातिभेदे (छुतार) ३सूत्रधारे कद्रूगर्भे कश्यपात् जाते अष्टनागान्तर्गते ४नागभेदे "अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षकः। कुलीरः कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्त्तिताः" ति०त०। "काद्रवेयाश्च बलिनः सहस्रममितौजसः। सुपर्णवशगा नागा जज्ञिरेऽनेकमस्तकाः। तेषां प्रधानाः सततं शेषवासुकितक्षकाः" हरिवं० ३अ०। "योऽसौ वृद्धस्य तातस्य तथा कृच्छ्रगतस्य ह। स्कन्धे मृतं समासाक्षीत् पन्नगं राजकिल्विषी। तं पापमतिसंक्रुद्धस्तक्षकः पन्नगेश्वरः। आशीविषस्तिग्मतेजा मद्वाक्यबलचोदितः। सप्तरात्रादितो नेता यमस्य सदनं प्रति। द्विजानामवमन्तारं कुरूणामयशस्करम्" भा० आ० ४१। तेन च परीक्षितोदंशनकथा भा०आ० ४३अ० इत्यत्र यथा "अथ शुश्राव गच्छन् स तक्षको जगतीपतिम्। मन्त्रैर्गदैर्विषहरैरक्ष्यमाणं प्रयत्नतः। सूत उवाच। स चिन्तयामास तदा मायायोगेन पार्थिव!। मया वञ्चयितव्योऽसौ क उपायो भवेदिति। ततस्तापसरूपेण प्राहिणोत् स भुजङ्गमान्। फलदर्भोदकं गृह्य राज्ञे नागोऽथ तक्षकः। तक्षक उवाच। गच्छध्वं यूयमव्यग्रा राजानं कार्य्यवत्तया। फलपुष्पोदकं नाम प्रतिग्राहयितुं नृपम्। सौतिरुवाच। ते तक्षकसमादिष्टास्तथा चक्रुर्भुजङ्गमाः। उपनिन्युस्तथा राज्ञे दर्भानपः फलानि च। तच्च सर्वं स राजेन्द्रः प्रतिजग्राह वीर्य्यवान्। कृत्वा तेषाञ्च कार्य्याणि गम्यतामित्युवाच तान्। गतेषु तेषु नागेषु तापसच्छद्मरूपिषु। अमात्यान् सुहृदश्चैव प्रोवाच स नराधिपः। भक्षयन्तु भवन्तो वै स्वादूनीमानि सर्वशः। तापसैरुपनीतानि फलानि सहिता मया। ततो राजा ससचिवः फलान्यादातुमेच्छत। विधिना सम्प्रयुक्तो वै ऋषिवाक्येन तेन तु। यस्मिन्नेव फले नागस्तमेवाभक्षयत् स्वयम्। ततो भक्षयतस्तस्य फलात् कृमिरभूदणुः। ह्रस्वकः कृष्णनयनस्ताम्रवर्णोऽथ शौनक!। स तं गृह्य नृपश्रेष्ठः सचिवानिदमब्रवीत्। अस्तमभ्येति सविता विषादद्य न मे भयम्। सत्यवागस्तु स मुनिः कृमिर्मां दशतामयम्। तक्षको नाम भूत्वा वै तथा परिहृतं भवेत्। ते चैनमन्ववर्त्तन्त मन्त्रिणः कालचोदिताः। एवमुक्त्वा स राजेन्द्रो ग्रीवायां संनिवेश्य ह। कृमिकं प्राहसत् तूर्णं मुमूर्षुर्नष्टचेतनः। प्रहसन्नेव भोगेन तक्षकेणाभ्यवेष्ट्यत। तस्मात् फलाद्विनिष्क्रम्य यद्राज्ञे विनिवेदितम्। वेष्टयित्वा च वेगेन विनद्य च महास्वनम्। अदशत् पृथिवीपालं तक्षकः पन्नगेश्वरः" अधिकं कश्यपशब्दे उक्तम्। "मसूरं निम्बपत्रञ्च योऽत्ति मेषगते रवौ। अतिरोषान्वितस्तस्य तक्षकः किं करिष्यति" ति० त०। तक्षकनागश्चेन्द्रस्य सखा खाण्डववनवासी अर्ज्जुनेन खाण्डववनस्य दाहकाले न तस्य दाहः तत्कथा "निवृत्तेष्वथ देवेषु वागुवाचाशरीरिणी। शतक्रतुं समाभाष्य महागम्भीरनिस्वना। न ते सखा स निहतस्तक्षको भुजगोत्तमः। दाहकाले खाण्डवस्य कुरुक्षेत्रं गतो ह्यसौ" भा० आ० २२८ अ०। ५काष्ठादितक्षणकर्त्तृमात्रे त्रि०।

तक्षकीय त्रि० तक्षा अस्त्यत्र नडा० छ-कुक् च । तक्षविशिष्टे तस्मिन् भवः अण् विल्वका० छस्य तस्य लुक् न कुको लुक् । ताक्षक तत्र भवे त्रि० ।

तक्षण न० तक्ष भावे-ल्युट् । (चाँचा) (छोला) व्यापारे "तक्षणं दारुशृङ्गास्थ्नां गोबालफलसम्भवाम्" या० "दारवाणाञ्च तक्षणम्" मनुः ।

तक्षणी स्त्री तक्ष्यतेऽनया तक्ष-करणे ल्युट् ङीप् । वाश्याम् (वाइस) काष्ठतक्षणसाधने अस्त्रभेदे शब्दर० ।

तक्षन् पु० तक्ष-कनिन् । १तष्टरि, वर्द्धकौ, "आप्तेन तक्ष्णा भिषजेव तक्षणम्" माघः । "तक्षोभयथा" शा० सू० । २विश्वकर्मणि, च अमरः । ३चित्रानक्षत्रे तस्य त्वष्टृदेवताकत्वात् तथात्वम् ४तक्षणकर्त्तृमात्रे त्रि० स्त्रियां ङीप् उपधालोपे तक्ष्णी । ततः शिवा० अपत्ये अण् वलन्तत्वादुपधालोपः । ताक्ष्ण तक्ष्णोऽपत्ये पुंस्त्री० ।

तक्षशिला स्त्री भरतपुत्रतक्षनृपस्य राजधान्यां तक्षशिलानगरी अभिजनोऽस्य तक्षशि० अञ् । ताक्षशिल पित्रादिक्रमेण तन्नगरवासिनि त्रि० तक्षशिलाया अदूरभवादिः वरणा० चतुरर्थ्यां० अञो लुक् । तक्षशिला तन्नगर्य्या अदूरभवादौ ब० व० । अनद्यान्तु चतुरर्थ्यां० मध्वा० मतुप् मस्य वः । तक्षशिलावत् तत्पुरस्यादूरभवादौ नदीभिन्ने देशादौ त्रि० स्त्रियां ङीप् ।

तक्षशिलादि पु० सोऽस्याभिजन इत्यर्थे विहिताञ्प्रत्ययनिमित्ते पा० ग० सू० उक्ते शब्दगणे स च गणः "तक्षशिला वत्सोद्धरण कैर्मेदुरक ग्रामणी छगल क्रौष्टुकर्ण सिंहकर्ण संकुचित किन्नर काण्डधार पर्वत अवसान वर्वर कंस" ।

तग स्खलने कम्पे च अक० गतौ सक० भ्वा० सक० सेट् इदित् । तङ्गति अतङ्गीत् ततङ्ग तङ्गनम् तङ्गा ताङ्गतः ।

तगण पु० छन्दोग्रन्थप्रसिद्धे अन्तलघुके आदिगुरुद्वयके त्रिवर्णात्मके गणभेदे । "सोऽन्तगुरुः कथितोऽन्तलघुस्तः" छन्दोम० ।

तगर पु० तस्य क्रोड़स्य गरः गृ-अच् । (टगर) इति १वृक्षे शब्दर० । २मदनवृक्षे राजनि० । कोङ्कणप्रसिद्धे (पिण्डतगर) ख्याते, ३वृक्षे न० रत्नमा० ४तगरमूलजाते गन्धद्रव्ये न० । "कालानुसार्य्यं तगरं कठिनं लघु तन्मतम् । अपरं पिण्डतगरं दण्डहस्ति च वर्हणम् । तगरद्वयमुष्णं स्यात् स्वादु स्निग्धं लघु स्मृतम् । विषापस्मारशूलाक्षिरोगदोषत्रयापहम्" भावप्र० "प्रियङ्गुचन्दनाभ्याञ्च विल्वेन तगरेण च" भा० अनु० १०४ अ० । "तुल्यैः पत्रतुरुष्कवालतगरैर्गन्धः स्मरोद्दीपनः" वृ० स० ७७ अ० । तगरं पण्यमस्य कुसरा० ठन् । तागरिक तद्गन्धद्रव्यविक्रेतरि त्रि० । ४आङ्कल्यकवृक्षे राजनि० ।

तगरपादिक न० तगरस्य पादो मूलमस्त्यत्र गन्धद्रव्ये ठन् । नन्द्यावर्त्ते गन्धद्रव्यभेदे शब्दार्थचि० ।

तगरपादी स्त्री तगरं गन्धद्रव्यभेदः पादेऽमूलेऽस्याः जातित्वात् ङीष् । तगरवृक्षे शब्दार्थचि० ।

तङ्क पु० तकि-भावे घञ् । १कृच्छ्रेण जीवने २प्रियविच्छे ३तापे ४भये भरतः ! । कर्मणि-घञ् । ५परिधानवसने रमानाथः ।

तङ्कन न० तकि-भावे ल्युट् । कृच्छ्रेण जीवने ।

तच्छील त्रि० तत् शीलं यस्य । स्वभावतः फलनिरपेक्षतया प्रवर्त्तमाने तत्स्वभावे जने । तदर्थे विहितः ठञ् । ताच्छीलिक तच्छीलार्थे पा० विहितप्रत्यये । "आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु" पा० ।

तज्ज त्रि० ततो जायते जन-ड । तस्मात् जाते ।

तज्जलान् त्रि० ततो जायते जन-ड तस्मिन् लीयते ली-ड तेनानिति अन-विच् द्वन्द्वात् पूर्वं श्रुतस्य तच्छब्दस्य प्रत्येकसम्बन्धेन यथायथं विभक्त्यन्ततयान्वयः । तस्माज्जाते तस्मिन् लीने तेन स्थिते पदार्थे च । "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत" छा० उ० । तज्जलान्, तज्जत्वात् तल्लत्वात् तदनत्वाच्चेति" शाङ्करभा० ।

तज्वी स्त्री तं निन्दितं जवते जु-क्विप् गौरा० ङीष् । छिद्रपत्र्यां राजनि० । [टीत् । तताट तेटतुः । तटम् ।

तट उच्छ्राये भ्वा० पर० सक० सेट् । तटति अताटीत् अत-

तट आहतौ चु० उभ० सक० सेट् । ताटयति-ते अतीतटत् त ।

तट त्रि० तट-अच् । १कूले नद्यादेस्तीरे अमरः । तीरभूमेश्च नद्याःप्रवाहात् उच्छ्रितत्वात् तथात्वम् । "सिन्धोस्तटावोघ इव प्रवृद्धः" कुमा० । स्त्रियां ङीप् । "मालञ्च श्मशानञ्च नद्यादीनां तटी तथा" सा० द० । २उच्चक्षेत्रे न० मेदि० । "निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरः" सा० द० । स्तनः तटमिव उप० स० । ३शिवे पु० तस्य सर्वोच्छ्रितत्वात् तथात्वम् "नमस्तटाय तट्याय तटानां पतये नमः" भा० शा० २८५ अ० । ४उच्छ्रिते त्रि० ।

तटग पु० तड़ाग+पृषो० तडागे द्विरूपको० ।

तटस्थ त्रि० तटे समीपे तिष्ठति स्था-क । १समीपस्थे २वादिप्रतिवादिभावानापन्ने उदासीने च "तटस्थः शङ्कते" जागदीश्यादौ भूरिप्रयोगः । ३लक्षणविशेषे यावल्लक्ष्य-

कालमनवस्थितत्वे सति इतरव्यावर्त्तके विशेषणे यथा पृथिव्या गन्धवत्त्वं तटस्थलक्षणम् उत्पत्तिकाले प्रलये च लक्ष्यस्थितावपि तत्काले गन्धस्यानवस्थानात् तथात्वम्। यथा वा ब्रह्मणो जगत्कर्तृत्वादिकम् तस्य प्रलयादौ लक्ष्यकाले अनवस्थानात् तथात्वम्। “स्वरूपं तटस्थं द्विधा लक्षणाभ्याम्। स्वरूपेऽप्रविष्टात् स्वरूपे प्रविष्टात्। यथा काकवन्तो गृहाः खं विलञ्च” वेदान्तका०।

वेदा० प० अस्य विवृतिर्यथा

“तत्र लक्षणं द्विविधम् स्वरूपलक्षणं तटस्थलक्षणञ्चेति। तत्र स्वरूपमेव लक्षणं स्वरूपलक्षणम् यथा सत्यं ज्ञानमनन्तं ब्रह्मणः स्वरूपलक्षणम्। ननु स्वस्य स्ववृत्तित्वाभावेन कथं लक्षणत्वमिति चेन्न स्वस्यैव स्वापेक्षया धर्मधर्मिभावकल्पनया लक्षणत्वसम्भवात्। तदुक्तं विवरणे “आनन्दो विषयानुभवो नित्यत्वञ्चेति सन्ति धर्माः अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते इति”। तटस्थलक्षणं नाम यावल्लक्ष्यकालमनवस्थितत्वे सति यद्व्यावर्त्तकं तदेव यथा गन्धवत्त्वं पृथिवीलक्षणम्। महाप्रलये परमाणुषु उत्पत्तिकाले घटादिषु च गन्धाभावात्। प्रकृते च जगज्जन्मादिकारणत्वम्। अत्र जगत्पदेन कार्य्यजातं विवक्षितम्। कारणत्वञ्च कर्त्तृत्वम् अतोऽविद्यादौ नातिव्याप्तिः। कर्तृत्वञ्च तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्। ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञानसद्भावे च “यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायते” इत्यादिश्रुतिर्मानम्। तादृशचिकीर्षासद्भावे च “सोऽकामयत बहु स्यां प्रजायेयेति” श्रुतिर्मानम्। तादृशकृतौ च “तन्मनोऽकुरुतेत्यादि” वाक्यम्। ज्ञानेच्छाकृतीनामन्यतमगर्भं लक्षणत्रितयं विवक्षितम् अन्यथा व्यर्थविशेषणत्वापत्तेः। अतएव जन्मस्थितिध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः। एवञ्च लक्षणानि नव सम्पद्यन्ते। ब्रह्मणो जगज्जन्मादिकारणत्वे च “यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्तीत्यादि” श्रुतिर्मानम्। यद्वा निखिलजगदुपादानत्वं ब्रह्मणो लक्षणम्। उपादानत्वञ्च जगदध्यासाधिष्ठानत्वं जगदाकारेण परिणममानमायाधिष्ठानत्वं वा। एतादृशमेवोपादानत्वमभिप्रेत्य “इदं सर्वं यदयमात्मा सच्चासच्चाभवत् बहु स्यां प्रजायेयेत्यादि श्रुतिषु ब्रह्मप्रपञ्चयोस्तादात्म्यव्यपदेशः” तटस्थिते त्रि०। [शब्दर०।

तटाक पु० तट—बा० आकन्। तड़ागे पद्मादियुक्तसरसि

तटाघात पु० तटे आघातः। वृषादिभिः शृङ्गादिभिर्भूभागोत्खननरूपवप्रक्रीड़ायाम् शब्दार्णवः। “अभ्यस्यन्ति तटाघातं निर्जितैरावताः गजाः” कुमा०। “कैलासतटाघातधातुधूलिपटलमिव हरवृषभम्” काद०।

तटिनी स्त्री तटमस्त्यस्या इनि ङीप्। नद्याम् अमरः।

तट्य पु० तटमुच्छ्रायमर्हति यत्। शिवे “नमस्तटाय तट्याय” भा० शा० २८६ अ० शिवसहस्रनाम।

तड दीप्तौ अक० आहतौ सक० चु० उभ० सेट्। ताडयति ते अतीतडत् त। “लालयेत् पञ्च वर्षाणि दश वर्षाणि ताड़येत्” चाणक्यः “शिष्ट्यर्थं ताड़येत्ततः” मनुः ताड़ना। ताड़नम् ताड़ितः। “स्रोतुर्वितन्त्रीरिव ताड्यमाना” कुमा०। “दुन्दुभिस्ताड़ितोऽसौ” वेणीसं०।

तड आहतौ भ्वा० आत्म० सक० सेट् इदित्। तण्डते अततण्डिष्ट। ततण्डे।

तड़ाक पु० तड़—आहतौ पिनाकादयश्च” उणा० आक। १तड़ागे। तड—दीप्तौ आक। २दीप्तौ स्त्री उज्ज्वलद०।

तड़ाग पु० जलैराहन्यते तड—आघाते “तड़ागादयश्च” उणा०नि० आग १यन्त्रकूटके शब्दार्थचि० २जलाधारभेदे पद्माकरे अमरः। अर्द्धचि० “प्रशस्तभूमिभागस्थो बहुसंवत्सरोषितः। जलाशयस्तड़ागः स्यादित्याहुः शास्त्रकोविदाः” शब्दार्थचि०। ३पञ्चशतधनुःपरिमिते जलाशये च यथा “चतुर्विंशाङ्गुलो हस्तो धनुस्तच्चतुरुत्तरम्। शतधन्वन्तरश्चैव तावत् पुष्करिणी शुभा। एतत् पञ्चगुणः प्रोक्तस्तड़ाग इति निर्णयः” नव्यवर्द्धमानधृतो वशिष्ठः। तदुत्सर्गविधिः मत्स्यपु० ५८अ० उक्तो यथा “प्राप्य पक्षं शुभं शुक्लमतीते (प्राप्ते) चोत्तरायणे। पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम्। प्रागुदक्प्रवणे देशे तड़ागस्य समीपतः। चतुर्हस्तां शुभां वेदिं चतुरस्रां चतुर्मुखाम्। तथा षोड़शहस्तः स्यान्मण्डपश्च चतुर्मुखः। वेद्याश्च परितो गर्त्तारत्निमात्रास्त्रिमेखलाः। नव सप्ताथ वा पञ्च नातिरिक्ता नृपात्मज!। वितस्तिमात्रा योनिः स्यात् षट्सप्ताङ्गुलिविस्तृता। गर्त्ताश्चतस्रः शस्ताः स्युस्त्रिपर्वोच्छ्रितमेखलाः। सर्वतस्तु सवर्णाः (लोकपालसवर्णाः) स्युः पताका ध्वजसंयुताः। अश्वत्थोदुम्बरप्लक्षवटशाखाकृतानि तु। मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत्। शुभास्तत्राष्ट होतारो द्वारपालास्तथाष्ट वै। अष्टौ तु जापकाः कार्य्याः ब्राह्मणा वेदपारगाः। सर्वलक्षणसम्पूर्णो मन्त्रविद्विजितेन्द्रियः। कुलशील-

समायुक्तः पुरोधाः स्याद्द्विजोत्तमः । प्रतिगर्त्तेषु कलशा यज्ञोपकरणानि च । व्यजनञ्चामरे शुभ्रे ताम्रपात्रे सुविस्तृते । ततस्त्वनेकवर्णाः स्युश्चरवः प्रतिदैवतम् । आचार्य्यः प्रक्षिपेद्भूमावनुमन्त्र्य विचक्षणः । त्र्यरत्निमात्रो यूपः स्यात् क्षीरवृक्षविनिर्म्मितः । यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता । हेमालङ्कारिणः कार्य्याः पञ्चविंशति ऋत्विजः । कुण्डलानि च हैमानि केयूरकटकानि च । अङ्गुलीयं पवित्राणि वासांसि विविधानि च । पूजयेत्तु समं सर्वान् आचार्यं द्विगुणैः पुनः । दद्याच्छयनसंयुक्तमात्मनश्चापि यत् प्रियम् । सौवर्णौ कूर्म्ममकरौ राजतौ मत्स्यडुण्डुभौ । ताम्रौ कुलीरमण्डूकावायसः शिशुमारकः । एवमासाद्य तत्सर्वमादावेव विशाम्पते ! । शुक्लमाल्याम्बरधरः सर्वौषध्युदकैस्ततः । संपूर्णैः कलसैस्तत्र स्नापितो वेदपारगैः । यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः । पश्चिमं द्वारमासाद्य प्रविशेद्यागमण्डपम् । ततो मङ्गलशब्देन भेरीणां निस्वनेन च । रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन तत्त्ववित् । षोड़शारन्ततश्चक्रं पद्मगर्भं चतुर्म्मुखम् । चतुरस्रञ्च परितो वृत्तं मध्ये सुशोभनम् । वेद्याश्चोपरि तत् कृत्वा ग्रहान् लोकपतींस्ततः । संन्यसेन्मन्त्रतः सर्वान् प्रतिदिक्षु विचक्षणः । कूर्म्मादि स्थापयेन्मध्ये वारुणं मन्त्रमाश्रितः । ब्रह्माणञ्च शिवं विष्णुं तत्रैव स्थापयेद्बुधः । विनायकञ्च विन्यस्य कमलामम्बिकां तथा । शान्त्यर्थं सर्व्वलोकानां भूतग्रामं न्यसेत्ततः । पुष्पभक्ष्यफलैर्युक्तमेवं कृत्वाधिवासनम् । कुम्भान् सजलगर्भांस्तान् वासोभिः परिवेष्टयेत् । पुष्पगन्धैरलङ्कृत्य द्वारपालान् समन्ततः । पठध्वमिति तान् ब्रूयादाचार्य्यस्त्वभिपूजयेत् । बह्वृचौ पूर्व्वतः स्थाप्यौ दक्षिणेन यजुर्विदौ । सामगौ पश्चिमे तद्वदुत्तरेण त्वथर्व्वणौ । उदङ्मुखो दक्षिणतो यजमान उपाविशेत् । यजध्वमिति तान् ब्रूयाद्धौत्रिकान् पुनरेव तु । उत्कृष्टान् मन्त्रजापेन तिष्ठध्वमिति जापकान् । एवमादिश्य तान् सर्वान् पर्य्युक्ष्याग्निं स मन्त्रवित् । जुहुयाद्वारुणैर्मन्त्रैराज्यं च समिधस्तथा । ऋत्विग्भिश्चाथ होतव्यं वारुणैरेव सर्व्वतः । ग्रहेभ्यो विधिवद्धुत्वा तथेन्द्रायेश्वराय च । मरुद्भ्यो लोकपालेभ्यो विधिवद्विश्वकर्म्मणे । रात्रिसूक्तञ्च रौद्रञ्च पावमानं सुमङ्गलम् । जपेयुः पौरुषं सूक्तं पूर्व्वतो बह्वृचाः पृथक् । शाक्रं रौद्रञ्च सौम्यञ्च कूष्माण्डं जातवेदसम् । सौरसूक्तं जपेन्मन्त्रं दक्षिणेन यजुर्विदः । वैराज्यं पौरुषं सूक्तं सौपर्णं रुद्रसंहिताम् । शैशवं पञ्चनिधनं गायत्रं ज्येष्ठसाम च । वामदेव्यं बृहत्साम रौरवं सरथन्तरम् । गवां व्रतं च काण्वञ्च रक्षोघ्नं वयसस्तथा । गायेयुः सामगा राजन् ! पश्चिमं द्वारमाश्रिताः । आथर्व्वणाश्चोत्तरतः शान्तिकं पौष्टिकं तथा । जपेयुर्मनसा देवमाश्रित्य वरुणं प्रभुम् । पूर्व्वेद्युरभितो रात्रावेवं कृत्वाधिवासनम् । गजाश्वरथ्यावल्मीकात् सङ्गमाद्ध्रदगोकुलात् । मृदमादाय कुम्भेषु प्रक्षिपेच्चत्वरात्तथा । रोचनाञ्च ससिद्धार्थां गन्धं गुग्गुलमेव च । स्नपनं तस्य कर्त्तव्यं पञ्चभङ्ग(पल्लव) समन्वितम् । प्रत्येकन्तु महामन्त्रैरेवं कृत्वा विधानतः । एवं क्षपामतिवाह्य विधियुक्तेन कर्म्मणा । ततः प्रभाते विमले सञ्जातेऽथ शतं गवाम् । ब्राह्मणेभ्यः प्रदातव्यमष्टषष्टिश्च वा पुनः । पञ्चाशद्वाथ षट्त्रिंशत् पञ्चविंशतिरप्यथ । ततः सांवत्सरप्रोक्ते शुभे लग्ने सुशोभने । वेदशब्दैश्च गान्धर्वैर्वाद्यैश्च विविधैः पुनः । कनकालङ्कृतां कृत्वा जले गामवतारयेत् । सामगाय च सा देया ब्राह्मणाय विशाम्पते ! । पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम् । ततो निःक्षिप्य मकरमत्स्यादींश्चैव सर्व्वशः । धृतां चतुर्विधैर्विप्रैर्वेदवेदाङ्गपारगैः । महानदीजलोपेतां दध्यक्षतसमन्विताम् । उत्तराभिमुखीं धेनुं जलमध्ये तु तारयेत् । आथर्व्वणेन स्नातां पुनर्मामेत्यृचेति च । आपो हि ष्ठेति मन्त्रेण क्षित्वागत्य च मण्डपम् । पूजयित्वा सदस्तत्र बलिं दद्यात् समन्ततः । पुनर्दिनानि होतव्यं चत्वारि मुनिसत्तमाः ! । चतुर्थीकर्म्म कर्त्तव्यं देया तत्रापि शक्तितः । दक्षिणा राजशार्दूल ! वरुणक्षमापणं ततः । कृत्वा तु यज्ञपात्राणि यज्ञोपकरणानि च । ऋत्विग्भ्यस्तु समं दत्त्वा मण्डपं विभजेत् पुनः । हेमपात्रीञ्च शय्याञ्च स्थापकाय निवेदयेत् । ततः सहस्रं विप्राणामथ वाष्टशतं तथा । भोजनीयं यथाशक्ति पञ्चाशद्वाथ विंशतिः । एवमेष पुराणेषु तड़ागविधिरुच्यते । कूपवापीषु सर्व्वासु तथा पुष्करिणीषु च । एष एव विधिर्दृष्टः प्रतिष्ठासु तथैव च । मन्त्रतस्तु विशेषः स्यात् प्रसादोद्यानभूमिषु । अयन्त्वशक्तावर्द्धेन विधिर्दृष्टः स्वयम्भुवा । अल्पेष्वेकाग्निवत् कृत्वा वित्तशाठ्याद्दृते नृणाम् । प्रावृट्काले स्थिते तोये अग्निष्टोमफलं स्मृतम् । शरत्काले स्थितं यत् स्यात् तदुक्तफलदायकम् ।

कम्। वाजपेयातिरात्राभ्यां हेमन्ते शिशिरे स्थितम्। अश्वमेधसमं प्राह वसन्तसमये स्थितम्। ग्रीष्मेऽपि तत् स्थितं तोयं राजसूयाद्विशिष्यते। एतान् महाराज! विशेषधर्मान् करोति योऽप्यागमशुद्धबुद्धिः। स याति रुद्रालयमाशु पूतः कल्पाननेकान् दिवि मोदते च। अनेकलोकान् समहस्तपादीन् भुक्त्वा परार्द्धद्वयमङ्गनाभिः। सहैव विष्णोः परमम्पदं यत् प्राप्नोति तद्यागफलेन भूयः"।

जलाशयखननारम्भनक्षत्रादि मु° चि° पी° उक्तं यथा "मित्रार्कध्रुववासवाम्बुपमघातोयान्त्यपुष्येन्दुभिः पापैर्हीनबलैस्तनौ सुरगुरौ ज्ञे वा भृगौ खे विधौ। आप्ये सर्वजलाशयस्य खननम्" मु° चि°।

"मित्रोऽनुराधा अर्को हस्तः ध्रुवं रोहिण्युत्तरात्रयं वासवं धनिष्ठा अम्बुपः शततारका तोयं पूर्वाषाढ़ा अन्त्यं रेवती पुष्यः इन्दुर्मृगः एतैर्नक्षत्रैस्त्रयोदशभिः सर्वेषां जलाशयानां वापीकूपतड़ागनाम्नां तोयाधाराणां खननं शुभमुक्तम् उक्तञ्च व्यवहारतत्त्वे "आप्याम्बुपान्त्यपितृमित्रवसूत्तरार्कशक्रेन्दीज्यभेषु खननं सलिलाश्रयाणामिति"। कः ब्रह्मा तद्देवताकत्वेनाभेदात् रोहिणी। अथ जलाशयखनने लग्नविचारः पापैः पापखगैर्बलरहितैः सद्भिः, तनौ लग्ने सुरगुरौ बृहस्पतौ ज्ञे बुधे स्थिते सतीत्यर्थः लग्नात् खे दशमस्थाने भृगौ शुक्रे,आप्ये जलचरराशौ विधौ सति जलाशयखननं हितं उक्तञ्च रत्नमालायाम् "लग्ने जीवे ज्ञेऽथ वा दुर्बलैश्च क्रूरैः शुक्रे चापि मेषूरणस्थे। आप्ये चन्द्रे सर्वतोयाश्रयाणामारम्भाः स्युःसिद्धये निर्विकल्पम्"। कश्यपेनाप्युक्तम् "गुरौ ज्ञे वा लग्नगते शुक्रे कर्मगते, विधौ। आप्यभे जलकार्य्याणामारम्भः सिद्धिदः स्मृतः" इति। दीपिकायान्तु विशेषः "पुष्ये मित्रकरोत्तरस्ववरुणब्रह्माम्बुपित्र्येन्दुभिःशस्तेऽर्के शुभवारयोगतिथिषु क्रूरेष्ववीर्य्येषु च। पुष्टेन्दौ जलराशिगे दशमगे शुक्रे शुभांशोदये प्रारम्भः सलिलाशयस्य शुभदो जीवेन्दुपुत्रोदये। स्वं धनिष्ठा। अन्ये तु वापीकूपतड़ागानामाकृतिभेदात्प्रत्येकं भिन्नानि नक्षत्राण्युक्तानि। तत्र वापीखननमाह रत्नोच्चयः "स्वात्यश्विपुष्यहस्तेषु सर्वदा च पुनर्वसौ। रेवत्यां वारुणे चैव वापीकर्म प्रशस्यते"। कूपारम्भमाह श्रीपतिः "हस्तः पुष्यो वासवं वारुणञ्च मैत्रं पित्र्यं त्रीणि चैवोत्तराणि। प्राजापत्यञ्चापि नक्षत्रमाहुः कूपारम्भे श्रेष्ठमाद्या मुनीन्द्राः"। तड़ागारम्भमाह वशिष्ठः "मैत्रेन्दुपौष्णोत्तररोहिणीषु देवेज्यवारीश्वरवारिभेषु। प्रारम्भणं सर्वजलाशयानां कार्यं सितेन्द्वंशकवारलग्ने"। अत्र वापीकूपनक्षत्राणां पार्थक्येनाभिधानात् तड़ागारम्भार्थमिदं वचनमवसीयते बहुवचनमाश्रयाभिप्रायेण सर्वशब्दोपादानं छन्दःपरिपूरणार्थं तत्र कूपतड़ागनक्षत्रेषु सप्तदशनक्षत्रत्यागावशिष्टानां मेलने त्रयोदश नक्षत्राणि भवन्ति तत्र संक्षेप्तुकामेन व्यवहारतत्वकर्त्रा सर्वजलाशयानामारम्भे सामान्यतो जलाशयत्वसाधर्म्यादेतानि त्रयोदश भान्युक्तानि तान्येव च ग्रन्थकर्त्रोक्तानि। तत्र वापीकूपतड़ागानां भेदो लोकप्रसिद्ध एव यत्तु पुनर्वशिष्ठेनोक्तं "शशाङ्कतोयेशकरार्यमित्रध्रुवाम्बुपित्र्ये वसु रेवतीषु। उद्यानवाप्यादितड़ागकूपकार्याणि सिद्ध्यन्ति जलं ध्रुवं स्यात्"। तज्जीर्णोद्धारविषयं प्रागुक्तवाक्ये प्रारम्भणपदोपादानाच्च नूतनखननविषयमिति पुनरुक्तिपरिहारः।" पी° धा°।

अधिकं जलाशयोत्सर्गशब्दे ३०७८ पृष्ठादावुक्तम्। अत्र राहुमास्यनिषेधः मु° चि° पी° उक्तो यथा "देवालये गेहविधौ जलाशये राहोर्मुखं शम्भुदिशो विलोमतः। मीनार्कसिंहार्कमृगार्कतस्त्रिभे खाते मुखात् पृष्ठविदिक् शुभा भवेत्"। मु° चि°।

"देवालये इति। अत्र यथासंख्यं सम्बन्धः। देवालयप्रारम्भे राहोर्मुखं मीनार्कतस्त्रिराश्यवस्थिते सूर्ये ऐशानीतो विलोमतो विपरीतं विदिक्षु वायव्यादिषु राहोर्मुखं स्यात् यथा मीनमेषवृषराश्यवस्थिते सूर्ये राहोर्मुखम् ऐशान्याम्। मिथुनकर्कटसिंहराश्यवस्थिते सूर्ये वायव्यां राहुमुखम्। कन्यातुलावृश्चिकस्थे सूर्ये नैर्ऋत्यां राहुमुखम्। धनुर्मकरकुम्भराश्यवस्थे सूर्ये आग्नेय्यां राहोर्मुखम् इत्यर्थः। एवं गृहारम्भेऽपि सिंहार्कतस्त्रिराश्यवस्थितेऽर्के विलोमतः ऐशान्यां राहुमुखम्। वृश्चिकादित्रये वायव्यां कुम्भादित्रये नैर्ऋत्याम्। वृषादित्रये आग्नेय्यां राहुमुखं स्यात्। जलाशयारम्भेऽपि मकरार्कतस्त्रिराश्यवस्थेऽर्के विलोमतः ऐशान्यां राहुमुखं स्यात्। मेषादितः त्रिभिर्वायव्याम्। कर्कादितस्त्रिभिर्नैर्ऋत्याम्। तुलादितस्त्रिभिः आग्नेय्यां राहुमुखं स्यादित्यर्थः। फलमाह खात इति। देवालयादिविषयके खाते भूमिशोधने कर्तव्ये सति राहुमुखात् क्रान्तदिशः सकाशात् पृष्ठवर्त्तिनी दिक् शुभा भवेत् यथा

देवालयविषये मीनादित्रिराशिस्थितसूर्य्यत्वेन ऐशान्यां राहुमुखम्। तत्पृष्ठविदिक् आग्नेयी तस्यां प्रथमखातप्रारम्भः शुभद इत्यर्थः। मिथुनादिराशित्रयस्थे सूर्ये राहुमुखं वायव्यां तत्पृष्ठविदिगैशानी तस्यां खातारम्भः शुभः। एवं सर्वत्र। तथैव गृहविधौ अपि राहुमुखं कस्यां दिश्यस्ति इत्यवधार्य तत्पृष्ठविदिशि खातः शुभफल इत्यर्थः। यतः। सर्पेण विदिक् व्याप्ता। यथा। ऐशान्यां मुखम्। वायव्यामुदरम्। नैरृत्यां पुच्छम् आग्नेय्यां पृष्ठम्। अतः खाते आग्नेयी सम्यक्। एवमन्यत्राप्यूहनीयम् यदाह विश्वकर्मा "ईशानतः सर्पति कालसर्पो विहाय सृष्टिं गणयेद्विदिक्षु। शेषस्य वास्तोर्मुखमध्यपुच्छं त्रयं परित्यज्य खनेच्चतुर्थम्" इति। ज्योतिश्चिन्तामणौ "वृषार्कादित्रिकं वेद्यां सिंहादि गणयेद्गृहे। देवालये च मीनादि तड़ागे मकरादिषु"। तदारम्भतदुत्सर्गौ च समयाशुद्धौ न कार्य्यौ कालाशुद्धिशब्दे तत्प्रमाणं दृश्यम् "एतेनाखानि शाखानवनिषह हरित्पर्णपूर्णद्रुमाली व्यालीढोपान्तशान्तव्यथपथिकदृशां दत्तरागस्तड़ागः" नैष०।

तड़ाघात पु० "उच्चैः करिकराच्छेपे तड़ाघातं विदुर्बुधाः" इत्युक्ते तटाघाते वप्रक्रीड़ायाम् शब्दकल्पद्रुमः। तच्चिन्त्यं तत्र वाक्ये तटाघातमित्येव पाठः तड़ेति पाठः
[त्रि०।
लिपिकरप्रमादकृतः।

तड़ि पु० तड–आघाते भावादौ इन्। १आघाते २तत्कर्त्तरि

तड़ित् स्त्री ताड़यत्यभ्रम् चुरा० तड़–इति लि० ह्रस्वः। १विद्युति अमरः। "जलदास्तड़ित्तुलितकान्तकार्त्तस्वराः" "घनं घनान्ते तड़ितां गुणैरिव" माघः। "योगस्तड़ित्तोयदयोरिवास्तु" रघुः।

तड़ित्सम्भवादिस्तु "सुजलजलधिमध्ये वाड़वोऽग्निः स्थितोऽस्मात् सलिलभरनिमग्नादुत्थिता धूममालाः। वियति पवननीताः सर्वतस्ता द्रवन्ति द्युमणिकिरणदीप्ता विद्युतस्तत्स्फुलिङ्गाः"। "अकस्माद्दैद्युतं तेजः पार्थिवांशकमिश्रितम्। वात्यावद्भ्रमदावाते प्रतिकूलानुकूलयोः। वायोस्तत् पतति प्रायो ह्यकालप्राज्यवर्षणे। यतः प्रावृषि नैवेते पांसवः प्रसरन्ति हि। तत् त्रेधा पार्थिवं चाप्यं तैजसं तड़िदुत्थितम्। ततो निर्भरदाहैस्तु भूमिस्थैरनुभूयते" सि० शि० टीका। २अन्तिके निघण्टुः ३हिंसायां निघण्टुः "तड़ित् आखण्डनेत्युपक्रमे "त्रयस्त्रिंशत्वधकर्माणः" इति तदुक्तेः

तड़ित्प्रभा स्त्री तड़ितः प्रभेव प्रभा यस्याः। कुमारानुचरमातृभेदे। "केशयन्त्री त्रुटिनामा क्रोशनाऽथ तड़ित्प्रभा" भा० शल्य० ४७अ० कुमारानुचरमातृगणोक्तौ। २तड़ित्तुल्यदीप्तियुते त्रि०।

तड़ित्वत् पु० तड़ित् विद्यतेऽस्य मतुप् मस्य वः तान्तत्वेन अपदान्तत्वात् न तस्य दः। १मेघे "चलिताचलवर्षमाणा गम्भीरविराविणस्तड़ित्वन्तः" वृ० स० २२ अ० २मुस्तके च अमरः। ३तड़िद्विशिष्टे त्रि० स्त्रियां ङीप् "समुदितन्निचयेन तड़ित्वतीम्। लघयता शरदम्बुदसंहतिम्" किरा०।

तड़िद्गर्भ पु० तड़ितो गर्भेऽस्य। मेघे "तड़िद्गर्भं ऋतवः समुद्राः" श्वेताश्व० उप० ४ अ०।

तड़िन्मय त्रि तड़िदात्मकः तड़ित्+मयट्। तड़ित्स्वरूपे "तड़िन्मयैरुन्मिषितैर्विलोचनैः" कुमा०।

तण्ड पु० तडि–अच्। १ऋषिभेदे तस्य गोत्रापत्यम् गर्गा० यञ्। ताण्ड्य तद्गोत्रापत्ये पुंस्त्री०। यूनि फक्। ताण्ड्यायन तदीये यून्यपत्ये पुंस्त्री०। तण्डशब्दस्य वतण्डशब्देन समं द्वन्द्वे कीर्त्तकौजपा० पूर्वपदप्रकृतिस्वरः। भावे अ। २आहतौ स्त्री।

तण्डक पुंस्त्री० तडि–ण्वुल्। १खञ्जने, स्त्रियां ङीष्। २फेने, ३समासप्राये वाक्ये, ४गृहदारुणि, ५तरुस्कन्धे च न० मेदि० ६मायाबहुले, उपघातके त्रि० परिष्कारे पुंन० शब्दार्थचि०।

तण्डि पु० कृतयुगोत्पन्ने ऋषिभेदे तत्कथा भा० आनु० १५ अ०। "ऋषिरासीत् कृते तात! तण्डिरित्येव विश्रुतः। दश वर्षसहस्राणि तेन देवः समाधिना। आराधितोभूद्भक्तेन तस्योदर्कं निशामय" इत्यादिका। महादेववराच्च तत्सुतस्य यजुर्वेदीयताण्डिनशाखाभेदे कल्पसूत्रकर्तृतेति तत्रैव १६ अ० उक्तं यथा "अजयश्चाव्ययश्चैव भविता दम्भवर्ज्जितः। यशस्वी तेजसा युक्तो दिव्यज्ञानसमन्वितः। ऋषीणामभिगम्यश्च सूत्रकर्त्ता सुतस्तव। मत्प्रसादाद्द्विजश्रेष्ठ! भविष्यति न संशयः" "सूत्रकर्त्ता ताण्डिन इति यजुर्वेदे शाखाविशेषस्तत्र कल्पसूत्रकर्त्तेति" नीलकण्ठः। [नन्दिनौ नन्दिकेश्वरः" मल्लिनाथधृतकोषः।

तण्डु पु० शिवद्वारपालभेदे नन्दिकेश्वरे "नन्दी भृङ्गिरिटस्तण्डु

तण्डुरीण पु० तण्डुरा+अस्त्यर्थे उरच् तत्र भवः ख। १कीटमात्रे २वर्वरे त्रि० तण्डुले भवः ख रस्य लः। ३तण्डुलोदके न० मेदि०।

तण्डुल पुंन० तडि—उलच्। निस्तुषधान्ये। "शस्यं क्षेत्रगतं प्रोक्तं सतुषं धान्यमुच्यते। निस्तुषस्तण्डुलः प्रोक्तः स्विन्नमन्नमुदाहृतम्" आ०त०। "शालितण्डुलप्रस्थस्य कुर्य्यादन्नं सुसंस्कृतम्। सूर्य्याय चरुकं दत्त्वा सप्तम्याञ्च विशेषतः। यावन्तस्तण्डुलास्तस्मिन्नैवेद्ये परिसंख्यया। तावद्वर्षसहस्राणि सूर्य्यलोके महीयते" ति० त०। "तण्डुलो मेह जन्तुघ्नः स नवस्त्वतिदुर्जरः"। वैद्य० "भृष्टस्तु तण्डुलो रूक्षो सुगन्धिः कफनाशनः। पित्तकारी स विज्ञेयः" राजव०। तस्य किण्वशब्देन समा० राजद० पूर्वनि०। हीरकस्य २मानभेदे "सितसर्षपाष्टकं तण्डुलो भवेत् तण्डुलैस्तु विंशत्या" वृ० स० ८० अ०।

तण्डुलपरीक्षा स्त्री तण्डुलेन परीक्षा। दिव्यभेदे तद्विधानं वीरमि० उक्तं यथा पितामहः

"तण्डुलानां प्रवक्ष्यामि विधिम्भक्षणचोदितम्। चौर्य्ये तु तण्डुला देया नान्यत्रेति विनिश्चयः" इति। चौर्य्यग्रहणमर्थविवादप्रदर्शनार्थम् "तदर्थार्थस्य तण्डुलाः" इति धनविवादे कात्यायनेनोक्तत्वात्। पूर्वेद्युर्यत्कर्त्तव्यं तत् सएवाह "तण्डुलान् कारयेच्छुक्लान् शालेर्नान्यस्य कस्यचित्। मृण्मये भाजने कृत्वा आदित्यस्याग्रतः शुचिः। स्नानोदकेन सम्मिश्रान् रात्रौ तत्रैव वासयेत्। आवाहनादिपूर्वन्तु कृत्वा रात्रौ विधानतः" इति। शुचिः प्राड्विपाकः सूर्य्यस्थाने धर्म्मावाहनादिहोमान्तं सर्वदिव्यसाधारणविधिं कृत्वा आदित्यस्नानोदकेन शुक्लान् शालितण्डुलानाप्लाव्य रात्रावेवं कृत्वा तथैव प्रातःकालपर्य्यन्तं स्थापयेदित्यर्थः। स्नानोदकं देवताया इत्याह कात्यायनः "देवतास्नानपानीयं दिव्यतण्डुलभक्षणे" इति। प्रातः कर्त्तव्यमपि स एवाह "प्रभाते कारिणे देया आदित्याभिमुखाय त्विति"। कारिणे शोध्याय। देयाः तण्डुला इत्यनुषङ्गः। भक्षणञ्च सोपवासेन सूर्य्यालयमध्य एव कर्त्तव्यमित्याह बृहस्पतिः "सोपवासः सूर्य्यगेहे तण्डुलान् भक्षयेच्छुचिरिति"। शोध्यानुष्ठेयमनुवादव्याजेन दर्शयति पितामहः "प्राङ्मुखोपोषितं स्नातं शिरोरोपितपत्रकम्। तण्डुलान् भक्षयित्वा तु पत्रे निष्ठीवयेत्ततः" इति। भक्षयित्वा भक्षणं कारयित्वा हेतुमतोणिजन्तस्य भक्षेरयं प्रयोगः। पत्रे विशेषं स एवाह "भूर्जस्यैव तु नान्यस्य अभावे पिप्पलस्य त्विति"। शुद्ध्यशुद्ध्यवधारणोपायं स एवाह "शोणितं दृश्यते यस्य हनुस्तालु च शीर्यते। गात्रञ्च कम्पते यस्य तमशुद्धं विनिर्दिशेत्" इति। बृहस्पतिरपि "शुद्धः स्याच्छुक्लनिष्ठीवी रक्तमिश्रे तु दोषभागिति"। कात्यायनोऽपि "शुक्लनिष्ठीवनाच्छुद्धो नियम्योऽशुचिरन्यथेति"। "अपोग्निरुदकञ्चैव विषङ्कोषस्तथैव च। तण्डुलाश्चैव दिव्यानि सप्तमस्तप्तमाषकः।" इति पितामहस्मृतिः। "तण्डुलाश्चैव कोषश्च शङ्कास्वेव न संशयः" इति मिताक्षराधृतस्मृतिः।

तण्डुला स्त्री ताडि—उलच् नि० नुट् ह्रस्वश्च। १महासमङ्गायाम् २विडङ्गे च राजनि०। ३तण्डुलीयशाके यवतिक्तायां स्त्री ४शशाण्डुल्याम् स्त्री राजनि० गौरा० ङीष्।

तण्डुलाम्बु न० तण्डुलक्षालितमम्बु—शा० त०। तण्डुलक्षालनोदके (चेलुनि) तण्डुलोदकादयोऽप्यत्र। भाव० "जलमष्टगुणं दत्त्वा दत्त्वा पलं कण्डिततण्डुलात्। भावयित्वा ततो देयं तण्डुलोदककर्म्मणि" वैद्यकपरिभाषा।

तण्डुलिकाश्रम पु० न० तीर्थभेदे "जम्बूमार्गादुपावृत्य गच्छेत्तण्डुलिकाश्रमम्। न दुर्गतिमवाप्नोति ब्रह्मलोकं च गच्छति" भा० व० ८२ अ०। तण्डूलिकाश्रममिति दीर्घपाठः क्वाचित्कः, स च लिपिकरप्रमादकृत इत्यन्ये।

तण्डुलीक पु० तण्डुलीयक+पृषो० यलोपः। तण्डुलीयकशाके शब्दरत्ना०।

तण्डुलीय पु० तण्डुलाय तद्भक्षणाय हितं छ। (खुड्मटे) (चाँपानटे) १शाकभेदे २विडङ्गे च। स्वार्थे क। तण्डुलीयक उक्तशाके अमरः। भावप्र० "तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः। भाण्डीरस्तण्डुलीबीजो विषघ्नश्चाल्पमारिषः। तण्डुलीयो लघुः शीतो रूक्षः पित्तकफास्रजित्। सृष्टमूत्रमलो रुच्यो दीपनो विषहारकः"। तद्भेदः जलतण्डुलीयं शाके कञ्चटमिति प्रसिद्धम्। "पानीयतण्डुलीयं यत्तत्कञ्चटमुदाहृतम्। कञ्चटं तिक्तकं रक्तपित्तानिलहरं लघु" भावप्र० स्वार्थे के कापि अत इत्त्वम्। तण्डुलीयिका विडङ्गे स्त्री राजनि०। तण्डुलीबीजोऽप्युक्तशाके पु० भावप्र०।

तण्डुलु पु० तण्डुल+पृषो०। विडङ्गे शब्दर०। [हेमच०।

तण्डुलेर पु० तण्डुल+स्वार्थे बा० ढ। तण्डुलीयकशाके

तण्डुलोत्थ तण्डुलात् तत्क्षालनादुत्तिष्ठति उद्+स्था—क। (चेलुनि) तण्डुलाम्बुनि राजनि०। तण्डुलाम्बुशब्दे दृश्यम्।

तण्डुलौघ पु० तण्डुलानांमोघ इव। (वेडवाँस) १वेणुवंशे शब्दच० ६त०। २तण्डुलसमुदाये च। [परीतत् मुग्ध०।

तत् त्रि० तन+क्विप् अन्त्यलोपे तुक्। विस्तारके अमरः।

तत न० तन–क्त। १वीणादिवाद्ये अमरः २विस्तारिते ३व्याप्ते च त्रि०। ४वायौ पु० मेदि०। भावे क्त। ५विस्तारे ६सन्ताने च न०। तन्यते अन्वयोऽस्मात् तन-नाम्नि अपादाने कर्मणि वा क्त तक् वा। ७पितरि ८पुत्र च पु०। "कारुरहं ततो भिषक्" ऋ० ९।११२।३ तत इति सन्ताननाम तन्यतेऽस्मात् ततः पिता तन्यतेऽसौ ततः पुत्रो वा" भा० इमामृचमधिकृत्य। तत इति सन्तानस्य नाम पितुर्वा पुत्रस्य वा" निरु०। "सततमृषभहीनं भिन्नकीकृत्य षड्जम्" माघः। "सततं वीणादिवाद्य सहितम्" मल्लि०। "सहोवाच पितरं तत! कस्मै मां दास्यसीति" कठो०। "हे तत! हे तात!" भा० "यस्य निश्वसितं वेदा येन सर्वमिदं ततम्" माधवः। ततं विस्तारितं व्याप्तं वेत्यर्थः।

ततनुष्टि पु० ततं धर्मसन्ततिं नुदति वष्टि कामयते कामान् वा नुद-ड वश-क्विप् कर्म० शक०। १धर्मसन्ततिनोदकधर्मसन्ततिकामुके। "अपाप शक्रस्ततनुष्टिमूहति" ऋ० ५।३४।२ ततं धर्मसन्ततिं नुदति वष्टि कामयते कामान् ततनुष्टिः" भा० निरुक्ते अन्यथा निरुक्तं यथा "शक्तिं तनिषु धर्मसन्तानादपेतमलङ्करिष्णुम् ६।१९। तेन २तदर्थे च। [कदल्याम् शब्दच०।

ततपत्री स्त्री ततं पत्रं यस्याः जातित्वात् ङीष्।

ततम त्रि० तेषां मध्ये एकस्य निर्द्धारणे तद्+डमच्। तेषां मध्ये निर्द्धारिते एकस्मिन् "एतमेव पुरुषं ततममपश्यत्" ऐत० उ०। [मध्ये निर्द्धारिते एकस्मिन्।

ततर त्रि० तयोर्मध्ये एकस्य निर्द्धारणे तद्+डतरच्। तयो-

ततस् अव्य० तद्+सार्वविभक्तिकस्तसिल्। तस्मादित्याद्यर्थे "ततस्ततस्त्या विनियन्तुमक्षमाः" माघः। प्रथमार्थे ततो भवान्। द्वितीयार्थे तत्रभवन्तम्। सप्तम्यर्थे ततस्त्या तृतीयार्थे "यतोयतः षट्चरणोऽभिवर्त्तते ततस्ततः प्रेरितवामलोचना" शकु०। हेतुभूतयो र्द्वयोर्मध्ये एकस्यातिशये आमु तरप् च। ततस्तराम् विग्रहोक्तार्थे हेतुभूतानां बहूनां मध्ये एकस्यातिशये आमु तमप् च" ततस्तमाम् विग्रहोक्तार्थे अव्य०। [विनियन्तुमक्षमाः" माघः।

ततस्त्य त्रि० ततस्तत्र भवः त्यप्। तत्र भवे "ततस्ततस्त्या

ततामह पु० ततस्य पितुः पिता "पितरि डामहः" इत्यत्र पितृशब्दस्यार्थपरत्वं न स्वरूपपरत्वम्। पितामहे "अस्माकं तावकानमवनतानां ततामह। तव चरणयुगलध्यानबद्ध हृदयनिगडानाम्" भाग० ६।८।२९ क्वचित् पुस्तके ततामहेत्यत्र तततत इत्येव पाठः। सोऽपि तदर्थे एव।

तति स्त्री तन-क्तिन्। १श्रेणौ हेमच०। २समूहे च। "विस्रब्धं क्रियतां वराहततिभिः मुस्ताक्षतिः पल्वले" शकु०। "बिभर्त्ति जनयन्नयमुदमपामपायधवला वलाहकततीः" माघः। "तत्र हेतिततिहतिश्रान्ता अमात्याः" दशकुमा० तत् परिमाणं येषां डति। २तत्परिमाणे त्रि० ब० व० अयञ्च षट्संज्ञकत्वात् त्रिषु समः। "ष्णान्ताः षट्" "डति च" पा० तस्य षट्संज्ञा विहिता "षट्संज्ञकास्त्रिषु समा युष्मदस्मत्तिङव्ययाः" अमरः। "बहुगणवतु डति च संख्या" पा० अस्य संख्याकार्यातिदेशः। ततः जसः शसश्च लुक् तति पुरुषाः सन्ति तति पुरुषान् पश्य। ततः प्रकारे धाच्। ततिधा ततिप्रकारे अव्य० "तावत्तेजस्ततिधा वाजिमानि" अथ० १२।२।३।२।

ततिथी स्त्री तावतीनां पूरणी तावत्+डट् तिथुडागमः ङीप् वेदे अवशब्दलोपः। तावतीनां पूरणीभूतस्त्रियाम् "स यतिथीं तत्समां परिदिदेश ततिथीं समां नावसुपकल्प्योपासाञ्चक्रे" शत० ब्रा० १।८।१।५। यावतिथीं तावतिथीमिति प्राप्ते छान्दसोऽवशब्दलोपः" भा०।

ततुरि त्रि० तुर्व–हिंसायाम् कि द्वित्वं पृषो०। १हिंसके "सद्यो द्युम्ना तिरते ततुरिः" ऋ० ६।६८।७। "ततुरि हिंसकः। तॄ–कि द्वित्वं पृषो०। २तारके च "ददथुर्मित्रा वरुणा ततुरिम्" ४।२९।२। "ततुरिं तारकम्" भा०

तत्कर त्रि० तत् करोति तद्+अहेत्वादावपि कृञः टः। तत्पदार्थकारके।

तत्काल पु० कर्मधा०। वर्त्तमानकाले १तदात्वे अमरः। २तस्मिन् काले च। स कालो यस्य। ३तत्कालदृष्टौ त्रि०। "शुचिस्तत्कालजीवी कर्म कुर्यात्" स्मृतिनिबन्धेषु कल्पत्रा श्रुतिः। "प्रतिनिधौ तत्कालात्" कात्या० श्रौ० १।४।१५। स कालो यस्यासौ तत्कालः भावप्रधानो निर्देशः प्रतिनिधेस्तत्कालत्वादित्यर्थः। यतः प्रतिनिधेः स एव कालो यो मुख्यद्रव्यस्याभावः" कर्कः। "प्रायश्चित्तं तत्कालम्" कात्या० श्रौ० १।१।२२।

तत्कालधी त्रि० तस्मिन् उचिते काले धीर्बुद्धिर्यस्य। अनिष्टादि निवारणाय झटिति प्रत्युत्पन्नबुद्धौ जने हेमच०।

तत्क्रिय त्रि० वेतनं विना स्वभावतः सा क्रिया कर्म यस्य।

कर्मकरणशीले, वेतनं विना स्वभावतः कर्मकरे अमरः।

तत्क्षण पु० स चासौ क्षणः कालः। सद्योऽर्थे हेमच०। "विवक्षितामर्थविदस्तत्क्षणप्रतिसंहृताम्" "आप्तेन तक्ष्णा भिषजेव तत्क्षणम्" माघः "सैकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम्" रघुः।

तत्त्व(त्व) न० तस्य भावः, तन-क्विप् तुक् ततो भावो वा त्व वा तलोपः। १याथार्थ्ये, २स्वरूपे, ३ब्रह्मणि च अमरः ४अनारोपितस्वरूपे, परमात्मनि, "तदिति सर्वनाम सर्वं च ब्रह्म तस्य नाम सर्वनाम तस्य भावः। सर्वस्मिन् दृश्ये बाध्यमानेऽपि तद्बाधाधिष्ठानत्वेन स्वयमबाध्यमानमनारोपितं स्वरूपं तत्त्वमिति विवरणकाराः। ५विलम्बिते नृत्यवाद्यादौ, ६चेतसि, ७वस्तुनि, ८साङ्ख्योक्तेषु प्रकृत्यादिषु पञ्चविंशतौ पदार्थेषु त्रिका०। "वेदान्ता बहुतर्ककर्कशमतिग्रस्ताः परं मायया भाट्टाः कर्मफलाकुला हतधियो ह्येते हि वैशेषिकाः। अन्ये भेदरता विवादकलहास्ते तत्त्वतो वञ्चितास्तस्मात् सिद्धमतं स्वभावकसृतं धीरः परं संश्रयेत्"। ९सत्त्वरजस्तमःसु। तत्र याथार्थ्ये इत्यष्टाविंशतिस्थाने तत्त्वं वक्ष्यामि यत्नतः" रघु०। श्रीतत्त्वचिन्तामणिः तत्त्वविवेकः। तत्त्वचूडामणिः तत्त्वदीपिका। प्रमाणप्रमेयेत्याद्युपक्रमे "तत्त्वज्ञानान्निःश्रेयसाधिगमः" गौ०सू० "कार्य्यं सोऽवेक्ष्य शक्तिञ्च देशकालौ च तत्त्वतः" मनुः। "सतश्च सद्भावोऽसतश्चासद्भावः। सत् 'सत्' इति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति। असच्च 'असत्' इति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति"। वात्स्या० प्रस्तावना। प्रकृत्यादिपदार्थे। "एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्" सां० कौ०। "तत्प्रतिषेधार्थं तत्त्वाभ्यासात्" पात० सू०। १०स्वभावे निस्तत्त्वाः निःस्वभावा इत्यर्थः प्रकृत्यादौ पुंन०केचित्। "यस्यापि देवस्य गुणान् समग्रांस्तत्त्वांश्चतुर्विंशतिमाहुरेके" हरिवं० २७६ अ०। ब्रह्मणि "वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्। ब्रह्मेति परमात्मेति भगवानिति शब्द्यते" भाग०१।२।११ अनारोपितं तत्त्वमिति वेदान्तिनो वदन्ति। पदार्थे। "शून्यं तत्त्वं भावो विनश्यति वस्तुधर्मत्वाद्विनाशस्य" सा० सू०। मतभेदे पदार्थभेदा यथा "सदसदुभयानुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव तत्त्वमिति शून्यवादिनो बौद्धाः। पृथिव्यादीनि चत्वारि भूतानि तत्त्वानीति चार्वाका आहुः। जीवाजीवाख्ये द्वे तत्त्वे इत्यार्हताः। जीवाकाशधर्माधर्मपुद्गलास्तिकायाः पञ्चतत्त्वानीत्यार्हतैकदेशिनः। जीवाजीवास्रवबन्धसंवरनिर्जरमोक्षाः सप्त तत्त्वानीत्यपरे आर्हतैकदेशिनः। स्वतन्त्रास्वतन्त्रभेदेन द्विविधं तत्त्वमिति द्वैतवादिनः श्रीपूर्णप्रज्ञाचार्य्याः। चिदचिदीश्वरभेदेन त्रिविधं तत्त्वमिति रामानुजीयाः पतिपशुपाशभेदेन त्रिविधं तत्त्वमिति पाशुपतशास्त्रकोविदाः नकुलीशाचार्य्याः शैवाश्च। महदादीनि पञ्चविंशतिस्तत्त्वानीति सांख्याः। ईश्वराधिकानि तानि चेति, षड्विंशतिस्तत्त्वानीति पातञ्जलाः। ब्रह्मैकमेव परमार्थतत्त्वं तद्भिन्नाः मायाकल्पिता इति मायावादिनो वेदान्तिनः।

तत्त्वज्ञान न० ६त०। १याथार्थ्यज्ञाने, २ब्रह्मज्ञाने च। "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" इति गौ० सू०। ३अनारोपितवस्तुप्रत्यये। इदं सर्वं द्वैतजातमद्वितीये चिदानन्दात्मनि मायया कल्पितत्वात् मृषैव आत्मैवैकः परमार्थसत्यः सच्चिदानन्दाद्वयोऽहमस्मीति ४परिज्ञाने। ५यथार्थ्यज्ञाने। यथा सति घटादिवस्तुनि सदिति ज्ञानम् असति च शशशृङ्गादावसदिति ज्ञानम्। "निखिललोकविमोक्षमुख्योपायं मननोपायमात्मनस्तत्त्वज्ञानमामनन्ति"। यथा आत्मा शरीरादिभ्यो भिन्न इत्याकारं ज्ञानमिति। नैयायिकाः। इतरनिवृत्तिपूर्वको ब्रह्मात्मावगम इति मायावादिनो वदन्ति। भगवद्विषयकमपरोक्षज्ञानमिति द्वैतवादिवेदान्तिन आहुः

तत्त्वज्ञानार्थदर्शनम् न०। तत्त्वज्ञानस्याहं ब्रह्मास्मीति साक्षात्कारस्य वेदान्तवाक्यकरणकस्यामानित्वादिसर्वसाधनपरिपाकफलस्य अर्थः प्रयोजनमविद्यातत्कार्य्यात्मकनिखिलदुःखनिवृत्तिरूपः परमानन्दावाप्तिरूपश्च मोक्षः तस्य दर्शनम् आलोचनम्। तत्त्वज्ञानार्थे आलोचने तत्त्वज्ञानफलालोचने हि तत्र साधने प्रवृत्तिः स्यात् इति तदालोचनं मोक्षार्थतत्त्वज्ञानसाधनम्।

तत्त्वन्यास पु० तन्त्रोक्ते विष्णुपूजाङ्गे न्यासभेदे तत्प्रकारस्तन्त्रसारे यथा "मादिकान्तानथार्णांश्च जीवाद्यैकैकशो वदेत्। नमः परायेत्युच्चार्य्य ततस्तत्त्वात्मने नमः" इति गौतमीयवचनात् सर्वत्र तत्त्वपदप्रयोगः। यथा मं नमः पराय

जीवतत्त्वात्मने नमः। भं नमः पराय प्राणतत्वात्मने नमः। एतदुभयं सर्वगात्रे। तथा च गौतमीये "जीवं प्राणं द्वयञ्चोक्त्वा सर्वाङ्गेषु प्रविन्यसेत्। ततो हृदयमध्ये च तत्वत्रयञ्च विन्यसेत्"। बं नमः पराय मतितत्वात्मने नमः। फं नमः परायाहङ्कारतत्वात्मने नमः। पं नमः पराय मनस्तत्वात्मने नमः। इति त्रयं हृदि। मं नमः पराय शब्दतत्वात्मने नमः मस्तके। धं नमः पराय स्पर्शतत्वात्मने, नमः मुखे। दं नमः पराय रूपतत्वात्मने नमः हृदि। थं नमः पराय रसतत्वात्मने नमः गुह्ये, तं नमः पराय गन्धतत्वात्मने नमः पादयोः। णं नमः पराय श्रोत्रतत्वात्मने नमः कर्णयोः। ढं नमः पराय त्वक्तत्वात्मने नमः त्वचि। डं नमः पराय नेत्रतत्वात्मने नमः नेत्रयोः। ठं नमः पराय जिह्वातत्वात्मने नमः जिह्वायाम्। टं नमः पराय घ्राणतत्वात्मने नमः घ्राणयोः। ञं नमः पराय वाक्तत्वात्मने नमः वाचि। झं नमः पराय पाणितत्वात्मने नमः पाण्योः। ज नमः पराय पादतत्वात्मने नमः पादयोः। छं नमः पराय पायुतत्वात्मने नमः गुह्ये। चं नमः पराय उपस्थतत्वात्मने नमः लिङ्गे। ङं नमः पराय आकाशतत्वात्मने नमः मूर्ध्नि। घं नमः पराय वायुतत्वात्मने नमः मुखे। गं नमः पराय तेजस्तत्वात्मने नमः हृदि। खं नमः पराय जलतत्वात्मने नमः लिङ्गे। कं नमः पराय पृथिवीतत्वात्मने नमः पादयोः। तथा न्यासोऽभिहितः क्रमदीपिकायाम्। "इत्यच्युतीकृततनुर्विदधीत तत्वन्यासं मपूर्वकपराक्षरनत्युपेतम्। भूयः पराय च तदाह्वयमात्मने च नत्यन्तमुद्धरतु तत्वमनून् क्रमेण। सकलवपुषि जीवं प्राणमायोज्य मध्ये न्यसतु मतिमहङ्कारतत्त्वं मनश्च। कमुखहृदयगुह्याङ्घ्रिष्वथो शब्दपूर्वं गुणगणमथ कर्णादिस्थितम् श्रोत्रपूर्वम्। वागादीन्द्रियवर्गमात्मनि नभेदाकाशपूर्वं गणं मूर्द्धास्ये हृदये शिवे (लिङ्गे) चरणयोः हृत्पुण्डरीके हृदि। शं नमः पराय द्वादशहृत्पुण्डरीकतत्वात्मने नमः हृदि। हं नमः पराय द्वादशकलाव्याप्तसूर्यमण्डलतत्वात्मने नमः हृदि। सं नमः पराय षोडशकलाव्याप्तसोममण्डलतत्वात्मने नमः हृदि। रं नमः पराय दशकलाव्याप्तवह्निमण्डलतत्वात्मने नमः हृदि। षं नमः पराय परमेष्ठितत्वात्मने वासुदेवाय नमो मस्तके। यं नमः पराय पुरुषतत्वात्मने सङ्कर्षणाय नमो मुखे। लं नमः पराय विश्वतत्वात्मने प्रद्युम्नाय नमो हृदि। वं नमः पराय निवृत्तितत्वात्मनेऽनिरुद्धाय नमो लिङ्गे। लं नमः पराय सर्वतत्वात्मने नारायणाय नमः पादयोः। क्षं नमः पराय कोपतत्वात्मने नृसिंहाय नमः सर्वगात्रे। हृत्पुण्डरीकतत्वादीनां न्यास प्रमाणमाह तथा विन्त्वानि द्विषड्ष्टकयुगयुगदशकलाव्याप्नोति,। गौतमीये "शं बीजं हृत्पुण्डरीके च तत्वं हृदि प्रविन्यसेत्। हं बीजं सूर्यमण्डलतत्वं हृदि प्रविन्यसेत्। सं बीजं चन्द्रमण्डलतत्वं तत्र प्रविन्यसेत्। रं बीजं वह्निमण्डलतत्वं तत्र प्रविन्यसेत्। षं बीजं परमेष्ठितत्वं वासुदेवञ्च मूर्द्धनि। यं बीजमथ पुंस्तत्वं सङ्कर्षणमथो मुखे। लं बीजं विश्वतत्वञ्च प्रद्युम्नञ्च हृदि न्यसेत्। वं बीज निवृत्तितत्वञ्च अनिरुद्धमुपन्यसेत्। लं बीजं सर्वतत्वञ्च पादे नारायणं न्यसेत्। क्षं बीजं कोपतत्वञ्च नृसिंहं सर्वगात्रके। एवं तत्वानि विन्यस्य प्राणायामं समाचरेत्" अन्योऽपि तत्त्वन्यासः श्रीविद्याताराकालीनामपि पूजाङ्गं तन्त्रसारोक्तो दृश्यः

तत्त्वरश्मि पु० तन्त्रोक्ते (स्त्रीँ) वधूबीजे "नादविन्दुसमाक्रान्तस्तत्त्वरश्मिसमन्वितः" इत्यस्य व्याख्यायां "तत्त्वरश्मिर्वधूबीजमिति" तन्त्रसा०

तत्त्वविद् त्रि० तत्त्वं वेत्ति विद्-क्विप। पदार्थानां याथार्थ्यज्ञातरि "तत्त्ववित्तु महाबाहो! गुणकर्मविभागयोः" गीता। २परमेश्वरे पु० "तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः" विष्णुस०। "तत्त्वं स्वरूपं यथावद्वेत्तीति तत्त्वविद्" भा०। [हिङ्गुपत्र्यां शब्दार्थचि०।

तत्पत्री स्त्री तन-क्विप् तत् पत्रमस्याः ङीष्।

तत्पद न० तदिति पदम्। तच्छब्दे "तत्त्वमसि श्वेतकेतो इत्यादिवाक्यस्थं तत्सत्यं स आत्मेत्यादि" श्रुतिस्थञ्च तत्पदं ग्राह्यम्।

तत्पदलक्ष्यार्थः पु० तत्पदस्य लक्ष्योऽर्थः अज्ञानादिसमष्ट्युपाध्युपहिताधारभूतेऽनुपहितचैतन्ये चिदेकरसरूपिणि। [पदाभिधेये।

तत्पदवाच्यः त्रि० ६त०। तत्त्वमस्यादिवाक्यस्थतत्पदार्थे तत्

तत्पदवाच्यार्थ पु० ६त०। तत्त्वमस्यादि वाक्यस्थ तत्पदस्य वाच्यार्थे अज्ञानादिसमष्टिः एतदुपहितसर्वज्ञत्वादिविशिष्टचैतन्यम् एतदनुपहितचैतन्यञ्च तत् त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानं तत्पदवाच्यार्थो भवतीति व्युत्पादितेऽर्थे।

तत्पदार्थः पु० तत्त्वमस्यादिवाक्यस्थस्य तत्पदस्यार्थः। जगत्

कारणे परमात्मनि। "यत् जगत्कारणं तत्त्वं तत्पदार्थः स उच्यते"। एवं तत्पदार्थो निरूपितः इदानीं त्वंपदार्थो निरूप्यते" वेदान्तसा०। तत्पदत्वंपदवाच्ययोर्विरोधेनाभेदाभावेऽपि लक्ष्यार्थयोर्यथाऽभेदस्तथा विवेकचू० न्यरूपि यथा

"तत्त्वम्पदाभ्यामभिधीयमानयोर्ब्रह्मात्मनोः शोधितयोर्यदीत्थम्। श्रुत्या तयोस्तत्त्वमसीति सम्यक् एकत्वमेव प्रतिपाद्यते मुहुः। ऐक्यं तयोर्लक्षितयोर्न वाच्ययोर्निगद्यतेऽन्योऽन्यविरुद्धधर्मिणोः। खद्योतभान्वोरिव राजभृत्ययोः कूपाम्बुराश्योः परमाणुमेर्व्वोः। तयोर्विरोधोऽयमुपाधिकल्पितो न वास्तवः कश्चिदुपाधिरेषः। ईशस्य माया महदादिकारणं जीवस्य कार्य्यं शृणु पञ्चकोषम्। एतावुपाधी परजीवयोस्तयोः सम्यग्निरासे न परो न जीवः। राज्यं नरेन्द्रस्य भटस्य खेटकस्तयोरपोहे न भटो न राजा। अथात आदेश इति श्रुतिः स्वयं निषेधति ब्रह्मणि कल्पितद्वयम्। श्रुतिप्रमाणानुगृहीतबोधात्तयोर्निरासः करणीय एवम्। नेदं नेदं कल्पितत्वान्न सत्यं रज्जुदृष्टव्यालवत् स्वप्नवच्च। इत्थं दृश्यं साधुयुक्त्या व्यपोह्य ज्ञेयः पश्चादेकभावस्तयोर्यः। ततस्तु तौ लक्षणया सुलक्ष्यौ तयोरखण्डैकरसत्वसिद्धये। नालं जहत्या, न तथाऽजहत्या, किन्तूभयार्थात्मिकयैव भाव्यम्। स देवदत्तोऽयमितीह चैकता विरुद्धधर्मांशमपास्य कथ्यते। यथा, तथा तत्त्वमसीतिवाक्ये विरुद्धधर्मानुभयत्र हित्वा। संलक्ष्यचिन्मात्रतया सदात्मनोरखण्डभावः परिचीयते बुधैः"।

तत्पदाभिध त्रि० तत्त्वमस्यादिवाक्यस्थतत्पदस्याभिधा यत्र। तत्पदवाच्ये। "मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः। परोक्षशबलः सत्याद्यात्मकस्तत्पदाभिधः"। वेदान्तकारिका।

तत्पर त्रि० तत्परमुत्तमं यस्य। १सक्ते, २तदासक्ते च अमरः। ५त०। तस्मात् परे ३वस्तुनि च। परता च कालिकी दैशिकी च। तत्र कालिकी "परश्वस्तत्परेऽहनि" अमरः दैशिकी। "गण्डौ कपोलौ तत्परे हनू" अमरः। "परः पूर्वेण सम्बन्धस्तत्परस्तेन तेन च" लीला०। "अक्ष्णोर्निमेषस्य खराम(३०)भागः स तत्परस्तच्छतभाग उक्तः" सि० शि० निमेषस्य त्रिंशद्भागात्मके ४सूक्ष्मकालभेदे पु०।

तत्परायण त्रि० तदेव परमयनं यस्य णत्वम्। तदासक्ते।

तत्पुरुष "तत्पुरुषः" इत्यधिकृत्य पा० विहिते १समासभेदे "उत्तरपदार्थप्रधानस्तत्पुरुष इति तस्य लक्षणं प्रायिकम् अर्द्धपिप्पल्यादि तत्पुरुषे उत्तरपदार्थप्राधान्याभावात् अव्याप्तिः पूर्वपदप्राधान्याच्चाव्ययीभावत्वापत्तेरतिव्याप्तिश्च यथोक्तं वाक्यपदीये "समासस्तु चतुर्द्धेति प्रायोवादस्तथाऽपरः। योऽयं पूर्वपदार्थादिप्राधान्यविषयः स च" "अयमर्थः समासः अव्ययीभावतत्पुरुषद्वन्द्वबहुब्रीहिभेदात् चतुर्द्धा। तत्र पूर्वपदार्थप्रधानोऽव्ययीभावः। उत्तरपदार्थप्रधानस्तत्पुरुषः उभयपदार्थप्रधानो द्वन्द्वः। अन्यपदार्थप्रधानो बहुब्रीहिः इत्यादिलक्षणमपि प्रायिकम्। उन्मत्तगङ्गं सूपप्रति अर्द्धपिप्पली द्वित्राः कृशपलाशमित्यादौ परस्परव्यभिचारात्। तथाहि उन्मत्तगङ्गमित्यव्ययीभावे पूर्वपदार्थप्राधान्याभावादव्याप्तिः अन्यपदार्थप्राधान्याद्बहुब्रीहिलक्षणातिव्याप्तिश्च "अन्यपदार्थे च संज्ञायामिति" (अव्य०) समासात्। सूपप्रतीत्यव्ययीभावे उत्तरपदार्थप्राधान्यात्तत्पुरुषलक्षणातिव्याप्तिरव्ययीभावाव्याप्तिश्च। "सुपः प्रतिना मात्रार्थे" इति (अव्य०) समासात्। अर्द्धपिप्पलीति तत्पुरुषे पूर्वपदार्थप्राधान्यसत्त्वादव्ययीभावातिव्याप्तिस्तत्पुरुषाव्याप्तिश्च "अर्द्धं नपुंसकमिति" (तत्पु०) समासात्। एवं पूर्वकाय इत्यादावपि द्रष्टव्यम्। द्वित्रा इति बहुब्रीहावुभयपदार्थप्राधान्यात् द्वन्द्वातिव्याप्तिर्बहुब्रीह्यव्याप्तिश्च। कृशपलाशमित्यादिद्वन्द्वे समाहारान्यपदार्थप्राधान्याद्बहुब्रीह्यतिव्याप्तिर्द्वन्द्वाव्याप्तिश्च स्यादिति भावः। सिद्धान्ते त्वव्ययीभावाधिकारपठितत्वमव्ययीभावत्वमित्यादि लक्षणं द्रष्टव्यम्" वै० भू० सा०। शब्दशक्तिप्रकाशिकायान्तु अन्यथा तल्लक्षणमुक्त्वा तत्र पदार्थयोरन्वयबोधप्रकारो दर्शितो यथा

"यदीयेन सुबर्थेन युतयद्बोधनक्षमः। यः समासस्तत्र स तत्पुरुषः उच्यते"। यदर्थगतेन सुबर्थेन विशिष्टस्य यदर्थस्यान्वयबोधं प्रति यः समासः स्वरूपयोग्यः स तदर्थस्य तदर्थे तत्पुरुषः। न तु यत्समासोत्तरं यन्नामयदर्थगतसुबर्थावच्छिन्नस्य यत्स्वार्थस्य बोधकं तदुत्तरं तत्समासैव तदर्थयोस्तत्पुरुषः पूर्वकायोऽर्द्धपिप्पलीत्यादावव्याप्तेः। लोकपक्त्यादौ क्रियाविशेषणैः कर्मधारय एव महाकविर्महाविप्र इत्यादौ कवित्वादाविव प्रकृतेऽप्येकनामार्थैकदेशे पचनादावपरनामार्थस्याभेदान्वयबोधकतया तथात्वसम्भवात्। लोकं पक्त्यादौ अमस्तादात्म्य-

सार्चित्वे तु तत्पुरुषः सम्भवत्येव क्रियाविशेषणैः समास एवाव्युत्पन्न इति तु न देश्यं "स्तोकनम्रा स्तनाभ्यामित्यादेः कालिदासाद्यैः प्रयुक्तत्वात् द्विगौ कर्मधारये च शाब्दिकानां तत्पुरुषत्वव्यपदेशः पदसंस्कारार्थो गौणः। विभजते। "द्वितीयादिसुवर्थस्य भेदादेष च षड्विधः। क्रियान्वयी द्वितीयादेरर्थः प्रायोऽत्र योजितः" "ग्रामगतः चैत्रनीतः ब्राह्मणदत्तः वृक्षपतितः चैत्रधनं मैत्रगतिः गृहस्थित इत्यादौ द्वितीयादिसुवर्थस्य कर्मत्वकर्तृत्वादेर्बोधभेदादेतस्य द्वितीयातृतीयादितत्पुरुषत्वेन षड्भेदाः स्वघटकैकपदार्थनिष्ठद्वितीयाद्यर्थावच्छिन्नापरपदार्थबोधकसमासत्वादेर्धर्मषट्कस्य सुवचत्वात्। इयांस्तु विशेषो यदेतेषु धात्वर्थान्वय्येव द्वितीयादेरर्थः प्रायो घटकः पीठं परितः पुरुषेण सुखं ग्रामाय विद्या दण्डाद्भटः गवां कृष्णा सम्पन्नक्षीरा तिलेषु तैलमित्यादिविग्रहे तत्पुरुषस्यासाधुत्वात् वर्षसुखी गिरिकाणः कुण्डलहिरण्यं घटान्यः कुवेरबलिः कर्मकुशल इत्यादौ तु तत्तद्विशेषविधेर्द्वितीयादितत्पुरुषः। ननु ग्रामगत इत्यत्र गतौ ग्रामकर्मकत्वस्य राजपुरुष इत्यत्र च पुरुषे राजसम्बन्धस्यावगमो न ग्रामादिपदेभ्यो लुप्तसुपः स्मरणात्, तल्लोपमजानतोऽप्यन्वयबोधात् सक्तं ग्रामगत इत्यादितः सक्तुग्रामयोरभेदान्वयधीप्रसङ्गाच्च सम्पन्नं दधि पश्येत्यादाविव तत्रापि नामार्थयोरभेदान्वयबोधोपयुक्तस्य नाम्नोः समानविभक्तिप्रतिसन्धानस्याविशिष्टत्वात्। नापि ग्रामादिपदस्य ग्रामकर्मकत्वादिलक्षकत्वात् अभेदान्यसम्बन्धेन नामार्थस्यान्वयबोधं प्रत्यनुकूलस्य नामोत्तरविभक्त्युपस्थाप्यत्वस्य तादृशप्रत्ययोपस्थाप्यत्वस्य वा गत्यादावसत्त्वात्। नच ग्रामादिपदलक्षितस्य ग्रामकर्मकादेरेव तत्र गत्यादौ तादात्म्येनान्वय इति साम्प्रदायिकानाम्मतमेव साम्प्रतं तत्पुरुषस्यापि समस्यमानपदार्थयोरभेदान्वयबोधकत्वे कर्मधारयत्वापत्तेः ग्रामं गतः राज्ञः पुरुष इत्यादिविग्रहस्य समासतुल्यार्थकत्वहान्यापत्तेश्चेति चेन्न प्रत्ययान्ततत्तन्नामार्थस्यैव भेदेनान्वयबोधं प्रति तत्तन्नामोत्तरप्रत्ययोपस्थाप्यतायास्तन्त्रत्वेन ग्रामगत इत्यादौ ग्रामादिपदलक्षितग्रामकर्मत्वादेर्गत्यादौ भेदेनान्वये बाधकाभावात्। नचैवं गतो ग्राम इत्यत्रापि ग्रामपदलक्षितस्य ग्रामकर्मत्वादेर्गत्यादौ भेदेनान्वयबोधप्रसङ्गः प्रत्ययान्तान्यतत्तन्नामोपस्थाप्यार्थस्यान्वयबोधसामान्यं प्रत्येवोत्सर्गतस्तादृशतत्तन्नामोत्तरनामोपस्थाप्यत्वस्य हेतुत्वेन तदसम्भवात्। अतएवार्द्धपिप्पलीच्छेद इत्यादौ पूर्वपदप्रधानत्वेनानुशिष्टस्य तत्पुरुषादेरन्त्यपदार्थानां पिप्पलीप्रभृतीनाम् अर्द्धाद्यर्थे घटपटमठानामित्यादौ च सर्वपदप्रधानत्वेन द्वन्द्वस्यानन्त्यपदार्थानां घटादीनां सुबर्थेऽन्वयः तथा बहुगुडो द्राक्षेत्यादौ गुडादीनामपि बहुजर्थे प्रकृत्यर्थस्यैकपदसमाप्तौ नाम्नः प्रागबहुचि विधानादिति। ननु यदि नामार्थयोरपि भेदेनान्वयो व्युत्पन्नस्तर्हि ग्रामगत इत्यादौ कर्मत्वादिसंसर्गेण ग्रामादेरेव गत्यादावन्वयोऽस्तु कृतं ग्रामादिशब्दस्य ग्रामकर्मकत्वादिलक्षणयेति चेत् सत्यं विग्रहवाक्यानां समाससमानार्थकत्वरक्षणाय तत्र लक्षणास्वीकारात्। माऽस्तु वा ग्रामादिपदस्य तत्कर्मकत्वादौ लक्षणा कर्मत्वादिसंसर्गेणैव ग्रामादेर्गत्यादावन्वयसम्भवात्तथापि न क्षतिः ग्रामं गत इत्यादिविग्रहस्यापि कर्मत्वार्थकद्वितीयाद्युपसन्धानवशादेव कर्मत्वादिसंसर्गेण गत्यादौ ग्रामाद्यन्वयबोधकतया समाससमानार्थकत्वसम्भवात् ग्राममित्यादौ कर्मत्वादिधर्मिकान्वयबोधानुरोधेन द्वितीयादेः कर्मत्वाद्यर्थकत्वात्। अतएवाघटः पट इत्यादावन्यस्य असुरो दैत्य इत्यादौ विरोधिनः, अनिक्षुः शर इत्यादौ सदृशस्य, अब्राह्मणो वार्द्धुषिक इत्यादावपकृष्टस्य, अनुदरमुदरन्तरुण्या इत्यादौ स्वल्पस्य, वाचकेन नञ्निपातेन स्वार्थे प्रतियोगित्वादिसम्बन्धेनैव घटादेरनुभावनेऽपि तत्रत्यतत्पुरुषे नाव्याप्तिः। पटस्याभाव इत्यर्थे प्रसज्यनञा अव्ययीभाव एव समासः प्रश्नान्ते नापटं वर्त्तते इत्याद्येव तत्र प्रयोगस्तत्पुरुषस्योत्तरपदलिङ्गकत्वनियमात् इति वृद्धाः। प्रसज्यनञाप्यपटइत्यादिस्तत्पुरुष एव साधुर्नाव्ययीभावः नञ्तत्पुरुषविधेस्तदपवादकत्वात् अतएव वादिनामविवाद इत्यादिकः किरणावल्यादौ पुंसि प्रयोग इति तु पक्षधरमिश्राः। युज्यते चोत्तरः कल्पो नचेदेवं "दृश्यैते राजमातङ्गास्तस्यैवामी तुरङ्गमाः। चैत्रो ग्रामगतस्तत्र मैत्रः किं कुरुतेऽधुना" इत्यादौ राजसम्बन्धादे राजादिपदलक्ष्यत्वे तदेकदेशस्य राजादेस्तदा परामर्शो न स्यात् विशेषणविधया वृत्त्या पूर्वोपस्थापितस्यैवार्थस्य परामर्शकत्वात् तदादिशब्दानाम् "नहि प्रजावतीयं मे त्वं तस्मै देहि कम्बलम्। नीलो मणिर्गुणः सोऽत्र भासादिर्बोध्यते सदा"। नन्वेवम् "अनयैव ऋचा निषादस्थपतिं याजयेदिति" श्रुतौ निषादानां स्थपतिरिति व्युत्पत्त्या न तत्पुरुषः परन्तु निषादः स्थपतिरित्यर्थे कर्मधारय एवेति सिद्धान्तो

व्याहन्येत तत्पुरुषे भक्तिभिया हि तत्र कर्मधारयस्वीकारस्तन्मूलके निषादस्थाधानेऽपूर्वविद्याप्रयुक्तिश्च कल्प्यते कल्प्यते च निषादीयतत्तदध्ययने निषेधविधिबाधात् "स्त्रीशूद्रौ नाधीयेतामिति" श्रुतौ तत्तदध्ययनेतराध्ययनपरत्वं धातोः, शूद्रपदस्य त्रैवर्णिकान्योपलक्षकत्वात्। यदि च कर्मधारय इव तत्पुरुषेऽपि न लक्षणा तदा तत्पुरुष एव तत्रोचितस्त्रैवर्णिकस्यैव निषादीयस्थपतित्वेन प्राप्तावपूर्वविद्याप्रयुक्तेस्तन्मूलकनिषेधविधिसङ्कोचस्य चाकल्प्यत्वादिति चेत् तत्पुरुषे लक्षणापत्तेऽपि किमिति कर्मधारय एव तत्राभ्युपेयते न तु तत्पुरुषः निषादानां स्थपतिरिति व्युत्पत्त्या निषादस्थपतिपदान्निषादसम्बन्धवत्त्वेन स्थपत्यनुभवसहस्रस्य सर्वसिद्धत्वेन तदनुरोधाल्लक्षणायाः क्लृप्तत्वेन तत्कल्पनाभयस्यासम्भवात् न हि निषादस्थपत्यादिपदं निषादादिसम्बन्धवत्तया स्थपत्यादिबोधने निराकाङ्क्षं तथा सति निराकाङ्क्षत्वादेव तत्पुरुषत्वासम्भवेन लक्षणापत्तेस्तद्बाधकतयोपन्यासानौचित्यात्। अथ बाधकं विना मुख्यार्थ एवं श्रुतीनां प्रामाण्यं न तु प्रमाणान्तरविषयेऽपि लक्ष्यार्थे मुख्ये शब्दस्वरस इत्यादिमीमांसया तथैव सम्प्रतिपत्तेरिति चेत्तर्हि बाधकासत्त्वे कर्मधारयविधयैव वेदानां प्रामाण्यं न तु प्रमाणान्तरविषयेऽपि तत्पुरुषविधया कर्मधारयात् समासान्तरस्य दौर्बल्यमित्यादिमीमांसया तथैव प्रतिपत्तेरित्यपि किन्न रोचयेः। तत्पुरुषाद्बहुव्रीहेर्जघन्यत्वमित्यत्राप्युक्तैव रीतिरनुसर्त्तव्या न हि बहुव्रीहौ समस्तपदानां लाक्षणिकत्वादेव ततो दुर्बलत्वम्। एकपदमात्रलक्षणयापि बहुव्रीहेर्व्यवस्थाप्यत्वादित्यास्तां विस्तरः"।

स च तत्पुरुषस्त्रिविधः व्यधिकरणपदघटित समानाधिकरणपदघटित संज्ञानबोधकसंख्यावाचकपदघटितभेदात्। तत्र संज्ञानबोधकसंख्यापूर्वकसमानाधिकरणपदघटितस्तत्पुरुषो द्विगुः "दिक्संख्ये संज्ञायामिति सूत्रेण विहितपञ्चाम्रादिकर्मधारयादिष्वतिप्रसङ्गवारणाय संज्ञानबोधकेति "संख्यापूर्वो द्विगुरिति सूत्राच्च संख्यापूर्वकेति। द्विमूर्द्धाद्यन्यपदार्थे तथात्ववारणाय तत्पुरुषेति। द्विगुविषयपरिहारेण समानाधिकरणपदघटिततत्पुरुषः कर्मधारयः "तत्पुरुषः समानाधिकरणः कर्मधारयः" इति सूत्रात्। इति तद्भिन्नो व्यधिकरणपदघटितस्तत्पुरुषः यथा राजपुरुष इतीत्यादि। "द्वन्द्वो द्विगुरपि चाहं सततं मद्गृहे व्ययीभावः। तत्पुरुष कर्मधारय येन स्यां मदा बहुव्रीहिः" उद्भटः

स प्रसिद्धः पुरुषः। २रुद्रभेदे धरणिः तस्य पुरुषः। ३तदधिष्ठातृदेवे च। "तत्पुरुषाय विद्महे" इति गायत्री

तत्फल पु० तनोति क्विप् तत् विस्तीर्णं फलति विकाशते अच्। पुष्पमात्रविकाशिनि १कुवलये, २कुष्ठौषधौ ३चोरणामौषधौ च शब्दार्थ०।

तत्र धारणे चु० आत्म० सक० सेट् इदित्। तन्त्रयते अतितन्त्रत इदित्करणं वेदे स्वरविशेषार्थम्।

तत्र कुटुम्बधारणे भ्वा० प० अक० सेट् चान्द्राः। तन्त्रति अतन्त्रीत् ततन्त्र। "इतराभ्योऽपि दृश्यन्ते" पा० इत्युक्तेः प्रथमाद्यर्थे त्रल्। तत्र भवान् तत्र भवन्तमित्यादि।

तत्र अव्य० तस्मिन् त्रल्। तस्मिन्नित्यर्थे "तत्रापि तत्रभवती भृशसंशयालोः" नैष०। "कथं तत्र विभागः स्यादिति चेत् संशयो भवेत्" मनुः।

तत्रत्य त्रि० तत्र भवः अव्ययात् त्यप्। तत्र भवे त्रि०। "मूर्च्छामाप्नोत्युरुक्लेशस्तत्रत्यैः क्षुधितैर्जनै" भाग० १।२१

तत्रभवत् त्रि० पूज्यार्थे नित्य० स०। पूज्ये तत्रशब्दे उदा० "अद्य तत्रभवांस्त्वं च पितरं रक्ष किल्बिषात्" रामा० अयो० ११२ अ०।

ततसाधुकारिन् तत्साधु यथा तथा करोति कृ-णिनि सह सुपेति समासः। तस्य साधुकारिणि "आकेस्तच्छील तद्धर्मतत्साधुकारिषु" पा०।

तथा अव्य० तेन प्रकारेण तद्+प्रकारे थाल् विभक्तित्वात्। १तेन प्रकारेणेत्यर्थे २साम्ये च अमरः। ३अभ्युपगमे ४पूर्वप्रतिवचने ५समुच्चये, ६निश्चये च मेदि०। तत्र साम्ये "यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम्। तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्" मनुः। समुच्चये। "विघसो भुक्तशेषं तु यज्ञशेषं तथामृतम्" मनुः। "ज्ञाननिष्ठा द्विजाः केचित्तपोनिष्ठास्तथा परे" मनुः। तेन प्रकारेणेत्यर्थे "कथमुक्त्वा तथा सत्यं सुप्तामुत्सृज्य मां गतः" भा०व०११ नलोपाख्यानम्। "यथा क्रतुरस्मिन् लोके भवति तथेत्य भवति" छा० उप०। "यथा कामो भवति तथा क्रतुर्भवति" शत० ब्रा० १४।७।२।७ ७सत्ये च।

तथाकारम् अव्य० तथा+कृ-निन्दितप्रतिवचने णमुल्। कथञ्चित् उक्तप्रकारेण कृत्वेत्यर्थे। "तथाकारमहं भोक्ष्ये" सि० कौ०।

गत पु॰तथा सत्यं गतं ज्ञानं यस्य यथा न पुनरावृत्तिर्भवति तथा तेन प्रकारेण गत इति वा तथा गतः सुप्सुपेति समासः। १बुद्धमुनौ सुगते अमरः। “यथा गतास्ते मुनयः शिवां गतिं तथागतिं सोऽपि गतस्तथागतः” सर्वद॰वौद्धागमः। २पूर्वोक्तप्रकारेण गते त्रि॰। “नलं दृष्ट्वा तथागतम्” भा॰ व॰ ७७ अ॰। “श्रियं तथागतां दृष्ट्वा ज्वलन्तीमिव पाण्डवे” भा॰ स॰ १६ अ॰।

तथाच अव्य॰ तथा च च च द्वन्द्वः। उक्तस्य दृढीकरणार्थे “निरिन्द्रियाह्यमन्त्राश्च स्त्रियोऽनृतमिति स्थितिः। तथा च श्रुतयो बह्व्यो निगीता निगमेष्वपि” मनुः। “एतावानेव पुरुषो यज्जायात्मा प्रजेति ह। विप्राः प्राहुस्तथाचैतद्यो भर्त्ता सा स्मृताऽङ्गना” हितो॰।

तथात्व न॰ तथा+भावे त्व। तथाभूतत्वे। “तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः” भाषाप॰। “स्वरूपानन्दस्य तथात्वम्” सांख्य॰सू॰।

तथापि अव्य॰ तथा च अपि च द्वन्द्वः। यद्यपीत्यनेनाक्षिप्तस्य समाधानार्थे “तथापि मम सर्वस्वं रामः कमललोचनः” उद्भटः। “यद्यपि का नो हानिः परस्य द्राक्षां रासभश्चरति। असमञ्जसमिति मत्वा तथापि तरलायते चेतः” उद्भटः। “सा चैवास्मि तथापि सुरतव्यापारलीलाविधौ” काव्यप्र॰।

तथाभूत त्रि॰ तेन प्रकारेण भूतः भू—कर्त्तरि क्त। तादृशेन रूपेण भूते। “तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयाम्” वेणी॰। “स्मरस्तथाभूतमयुग्मनेत्रम्” कुमा॰।

तथाराज पु॰ तथेति राजते राज—अच्। बुद्धदेवे शब्दार्थचि॰

तथाविध त्रि॰ तथा विधा यस्य। तथाप्रकारे “तथाविधस्तावदशेषमस्तु सः” कुमा॰ “अतोऽभिलाषे प्रथमं तथाविधे”। “श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः”। “प्राप्य चाशु जनस्थानं खरादिभ्यस्तथाविधम्” इति च रघुः “तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः” मनुः

तथाहि अव्य॰ तथा च हि च द्व॰। १निदर्शने २प्रसिद्धमेवेत्यर्थे शब्दार्थचि॰। २उक्तार्थे दृढीकरणे।

तथैव अव्य॰ तथा+सादृश्ये समुच्चये वा तस्यावधारणम्। तद्वदेवेत्यर्थे तत्समुच्चयावधारणे च शब्दार्थचि॰ “अस्ति पुत्रो वशे यस्य भार्य्या भर्त्तुस्तथैव च” चाणक्यः। “यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम्। तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्” मनुः।

तथ्य न॰ तथा+साधु यत्। १यद्वस्तु यथाभूतं तथारूपावस्थाने सत्ये २तद्युते त्रि॰ अमरः। “काणं वाप्यथ वा खञ्जमन्यं वापि तथाविधम्। तथ्येनापि ब्रुवन् दाप्योदण्डं कार्षापणावरम्” मनुः। “अनन्यभाजं पतिमाप्नुहीति सा तथ्यमेवाभिहिता भवेन” कुमा॰। “भय एव तु मां तथ्यैर्वचोभिरुपहंहय” भा॰ द्रो॰ ५५ अ॰। “यदर्जुनगुणांस्तथ्यान् कीर्त्तयानं नराधम!” भा॰ द्रो॰ १५९ अ॰।

तद् त्रि॰ तन-अदि डिच्च। १पूर्वोक्ते बुद्धिस्थे,२परामर्शयोग्ये ३विप्रकृष्टविषये। ४ब्रह्मणि न॰। ‘ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः” इति गीता। “अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्” इत्युक्तेरस्य परोक्षवाचित्वम्। बुद्धिस्थत्वोपलक्षितधर्मावच्छिन्नेऽस्य शक्तिः। बुद्धिस्थत्वं च पूर्वानुभूतसंस्कारवत्तया, तेन स्मृतिविषयत्वेन तथात्वं बोध्यम्। तदर्थ एवास्य सर्वनामता शब्दपरत्वे न तथात्वम्। अतएव“एतत्तदोः सुलोपोऽकोरनञ्समासे हलि” पा॰ न सर्वनामकार्य्यमन्यथा एतत्तदोरिति स्यात्। सर्वनामकार्यञ्च त्यदादीनामः जसादौ शीभावादि वृत्तिमात्रे पुंवद्भावादिश्च। स तौ ते तस्मै तस्मात् तेषां तस्मिन् इत्यादि। तस्य च टेरकच् सकः तकौ इत्यादि च। “स किं सखा साधु न शास्ति योऽधिपम्” किरा॰। “तौ गुरुर्गुरुपत्नी च” रघुः। “ते त्र्यहादूर्द्ध्वमाख्याय चेरुश्चीरपरिग्रहाः” “ते हिमालयमामन्त्र्य” कुमा॰। “तस्मै शशंस प्रणिपत्य नन्दी” कुमा॰। “तस्मिन् मघोनस्त्रिदशान् विहाय” कुमा॰। तस्मात्तान्यत्र वापयेत्” स्मृतिः। वृद्धसंज्ञत्वात् छ ‘तदीयमातङ्गघटाविघट्टितैः” माघः। ततः तत्र तर्हि तदा इत्यादि। ५हेतौ अव्य॰ स्वरादेराकृतिगणत्वात् स्वरादि। “सन्तप्तानां त्वमसि शरणं तत् पयोदः प्रियायाः” मेघ॰। “तदङ्गमग्र्यं मघवन्! महाक्रतोः” रघुः। अहेतावपि ६सर्वनामसमानार्थे न॰। “इन्द्रियदोषात् संस्काराच्चाविद्या” “तद् दुष्टज्ञानम्” का॰सू॰ “तदित्यव्ययपदं सर्वनामसमानार्थकमविद्यां परामृशति साऽविद्या दुष्टज्ञानं व्यभिचारिज्ञानमतस्मिंस्तदभिज्ञानं व्यधिकरणप्रकारावच्छिन्नविशेष्यकम्” उप॰ वृत्तिः। ८ तदेत्यर्थे च “ज्यायसी चेत् कर्म्मणस्ते मता बुद्धिर्जनार्द्दन! तत् कर्म्मणि घोरे माम्। गीता ९ प्रसिद्धे त्रि॰ सर्वनामकार्य्यञ्च। “तं केशपाशं प्रसमीक्ष्य कुर्य्युः” कुमा॰। तत्र ब्रह्मणि “तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः। दान

क्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिरिति" गीता। तदिति ब्रह्माभिधानमुच्चार्य्य अनभिसन्धाय च कर्मणः फलमित्यर्थः "तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" छा० उ०। तत्पदवाच्यार्थस्य तत्पदवाच्यार्थशब्दे उक्तः शरदा० अव्ययी० अच् समासान्तः। तस्य समीपम् उपतदम्।

तदर्थ त्रि० स अर्थो यस्य, तस्मै इदं वा "अर्थेन सह नित्यसमासो विशेष्यनिघ्नता चेति" वार्त्ति० समासो वा। १तत्प्रयोजनके २तदुद्देश्यके "अन्तेवासी वार्थांस्तदर्थेषु धर्मकृत्येषु योजयेद्दुहिता वा" दाय० त० आपस्तम्बः। ३तस्याभिधेये ४तत्प्रयोजने च ततो भावे ष्यञ्। तादर्थ्य तत्प्रयोजनकत्वे। "तादर्थ्ये चतुर्थी" मुग्ध बो०।

तदनन्यत्व न० तयोरनन्यत्वम्। तयोर्भेदाभावे "तदनन्यत्वमारम्भणशब्दादिभ्यः" शा० सू०।

तदन्यबाधितार्थप्रसङ्ग पु० तदन्यः बाधितार्थस्य प्रसङ्गः। प्रमाणबाधितार्थस्य प्रसङ्गरूपे प्रमाणबाधितार्थप्रसङ्गापरपर्य्याये तर्कभेदे। तत्स्वरूपादि "स चायं तर्कः पञ्चविधः आत्माश्रयान्योन्याश्रयचक्रकानवस्थाप्रमाणबाधितार्थप्रसङ्गभेदात् इति" विभज्य आत्माश्रयादीन् लक्षयित्वा जगदीशेनोक्तं यथा उक्तचतुष्कान्यः प्रसङ्गः प्रमाणबाधितार्थप्रसङ्गः। सोऽपि द्विविधो व्याप्तिग्राहको विषयपरिशोधकश्च तत्राद्यो यथा धूमो यदि वह्निव्यभिचारी स्यात्तदा जन्यो न स्यादिति। द्वितीयस्तु पर्वतो यदि निर्वह्निः स्यान्निर्धूमः स्यादित्यादि"। विषयस्य व्यभिचारशङ्कानिवृत्तिद्वारा निश्चायकत्वेन परिशोधकत्वम्।

तदर्पण न० तस्य स्वस्मिन् निक्षिप्तस्यार्पणं प्रत्यर्पणम्। निक्षिप्तद्रव्यस्य निक्षेप्तुरर्पणे। ६ त०। तस्यार्पणे च।

तदा अव्य० तस्मिन् काले तद्+दाच् विभक्तित्वात् अ। तस्मिन् काले इत्यर्थे। "तदा विधिः कुण्डलनां विधोरपि" नैष०।

तदात्मन् पु० स आत्मा यस्य। १तत्स्वरूपे २तदभिन्ने च। तस्य भावः ष्यञ्। तादात्म्य अभेदे "क्रमिकं यन्नामयुगमेकार्थेऽन्यार्थबोधकम्। तादात्म्येन भवेदेषः समासः कर्मधारयः" शब्द० प्र०।

"अभेदस्तादात्म्यं तच्च स्ववृत्त्यसाधारणो धर्मः। असाधारणत्वं चैकमात्रवृत्तित्वम्। एकमात्रवृत्तित्वञ्च स्वसामानाधिकरण्यस्वप्रतियोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टं यत्तदन्यत्वम्। इत्येकमात्रवृत्तिधर्म एव विशेषणविभक्त्यर्थः। वृत्तिश्च तत्र प्रकृत्यर्थस्य संसर्गमर्य्यादया

आघारादीनां मुख्यकालीनत्वं स्यात् एवमनुयाजमात्रस्योत्कर्षे तदूर्द्ध्वभाविनां सूक्तवाकसंवाकादीनां मुख्यकालीधर्मत्वादिना सामान्यप्रत्यासत्त्या सुज्ञेयत्वमेव। अभेदस्य संसर्गतामतेऽप्येतादृशानुगतभेदस्यैव तथात्वमुचितम्। तत्तद्व्यक्तित्वावच्छिन्नभेदाभावकूटस्य विशेष्य तथात्वे घटो न नील इत्यादि वाक्यजन्यबोधे प्रतियोग्यभावान्वयी-तुल्ययोगक्षेमाविति न्यायेन तादृशानुगतसम्बन्धावच्छिन्नप्रतियोगिताकाभावा एव भासेरन् नीलादिवृत्तिप्रतियोगिताकैकैकाभावः। तथा सति तादृशैकैकाभावतात्पर्य्येण प्रयुक्तस्य नीलोऽपि न नील इति वाक्यस्य प्रामाण्यं स्यात्" व्युत्प० गदा० "सत्यैक्ये मिथोभेदस्तादात्म्यम् तच्च तत्सत्तातिरिक्तसत्ताकत्वाभावः" वेदा० प० "तदात्मनोऽपि निषिध्यमानत्वे तन्निषेधात्मके तदात्मनि जगत्प्रवेशात्। न हि घटः पटात्मेत्यनेन घटस्वरूपादन्यस्तदात्मा विहितः स्यात् यदि तु तादात्म्यं नाम भेदाख्यो धर्मः कश्चिदिष्यते स घटपटाद्यधिकरणतया निषिध्यते तदा संसर्गाभाव एव स्यात्। तस्मान्निर्विशेषणतदात्मान्तर्भूतं जगदिति कोऽप्यन्तराभाव इति"। श्रीहर्षखण्डने अन्योन्याभावखण्डने उक्तम्।

तदात्व न० तदेत्यस्य भावः तदा+त्व। तत्काले अमरः। "तदात्वायतिसंयुक्तः सन्धिर्ज्ञेयो द्विलक्षणः। "तदात्वे चाल्पिकां पीड़ां तदा सन्धिं समाश्रयेत्" "आयत्यां गुणदोषज्ञस्तदात्वे क्षिप्रनिश्चयः" इति च मनुः।

तदादितदन्तन्याय पु० न्यायभेदे अन्तभूतस्य कर्त्तव्यत्वे शास्त्रतः प्राप्ते आदिभूतस्योत्कर्षेण विधानबोधके न्यायभेदे। स च न्यायः जैमि० पञ्चमस्य प्रथमे पादे दर्शितो यथा। अग्नीषोमीयपशौ श्रूयते "तिष्ठन्तं पशुं प्रयजन्तीति"। अत्र प्रकृतौ पशुमारणानन्तरं हविष्यासादिते पश्चात् प्रयाजादय इज्यन्ते इति विकृताविहापि पशुमारणानन्तरं हविष्यासादिते प्रयाजाः प्राप्ताः ते च तिष्ठन्तमिति वचनात् जीवत्येव पशौ अपकृष्यन्ते। तथा सवनीयपशौ अनुयाजानामुत्कर्षः श्रूयते यथा अग्निमारुतादूर्द्ध्वमनुयाजैश्चरन्तीति। अत्र संशयः। प्रयाजमात्रस्योत्कर्षः प्रयाजाद्यङ्गकलापस्यापकर्षः अनुयाजाद्यङ्गकलापस्योत्कर्षो वा इति। श्रुतयोरेव प्रयाजानुयाजयोरपकर्षोत्कर्षौ न तु तदाद्यन्तकलापयोस्तदङ्गप्रयाजपूर्वभाविनामाघारसामिधेन्यादीनां तदाद्यपकर्षेऽत्यन्तव्यवहितत्वेन प्रधानकालीनत्वं न स्यात् प्रयाजमात्रापकर्षे इ

भासते। तादृशस्य धर्मस्तद्व्यक्तित्वादिरूप एव। अपूर्वव्यक्तिनिष्ठ तादृशधर्मस्य विशेष्य ज्ञातुमशक्यत्वेऽपि एकमात्रवृत्तिमत्वं स्यात् एवमनुयाजमात्रोत्कर्षे तदूर्द्ध्वभाविनां सूक्तवाकशम्य्वाकादीनामुत्कर्षात् प्रधानसन्निधिर्न विलुप्यते तस्मात् प्रयाजमात्रस्योत्कर्षः तथा च सूत्रम् "अङ्गानां मुख्यकालत्वाद् यथोक्तमुत्कर्षः स्यात्"। अङ्गानां मुख्यकालकर्त्तव्यत्वानुरोधात् यथोक्तस्यानुयाजमात्रस्योत्कर्ष इति प्राप्ते ब्रूमः। प्रकृतियागे सकलपदार्थानुष्ठानस्य क्लृप्तत्वात् विकृतावपि सक्रमाणां पदार्थानामतिदेशात् क्रमरूपाङ्गत्वावस्थान्याय्यत्वात् उत्तरकालकर्त्तव्यकर्मपदार्थस्यानुपस्थित्यानुष्ठानविलोपापत्तेः तदुक्तम् पूर्वेणोपस्थितं कार्य्यमुत्तरं कर्मचोदनात्। प्राप्तं तदन्यथा भावे क्रमलोपाद्विलुप्यते"। तस्मात् प्रयाजापकर्षे तदङ्गकलापस्यापकर्षः, अनुयाजोत्कर्षे तदाद्यङ्गकलापस्योत्कर्ष", इति तत्त्वबो०। अनया दिशा मासिकानां सक्रमाणां करणे उत्कर्षापकर्षौ कल्पनीयौ।

तदानीम् अव्य० तस्मिन् काले-तद्+दानीम् विभक्तित्वात् च्च। तदेत्यर्थे। "तदानीमपि पार्श्ववर्त्तिनाम्" भाग० ५।८।२१। तत्र भवः ट्युल् तुट् च। तदानीन्तन तत्र भवे त्रि० स्त्रियां ङीप्।

तदाप्रभृति त्रि० तदा तत्कालः प्रभृतिरादिर्यस्य तदाशब्दस्य सप्तम्यर्थवृत्तेरपि कथञ्चित् प्रथमार्थवृत्तिता। तत्कालादिके "तदाप्रभृत्येव विमुक्तसङ्गः" कुमा०।

तदामुख त्रि० तदा मुखं यस्य। प्रारब्धे।

तदित् त्रि० तदेति इण-क्विप् तुक्। तद्विषयके स्तोमे। "वयमु त्वा तदिदर्थाः" ऋ० ८।२।१६ यद्विषयकं स्तोमं तदित् तदेवार्थः प्रयोजनं येषाम्" भा०।

तद्गत त्रि० तत् गतः। १तत्परे २तदासक्ते च। तद्गतेनैव मनसा" रामा० वा० २अ०। "शुचिस्तद्गतमानसः" गीता

तद्गुण त्रि० तस्य गुण इव गुणोऽस्य। १तत्तुल्यगुणके २अर्थालङ्कारभेदे पु० २६८ पृ० लक्षणादि दृश्यम्। ६त०। ३तस्य गुणे पु०। "तद्गुणसारत्वात्" शा० सू०। तत्र प्रधाने गुणः विशेषणम्। ४प्रधानविशेषणे तद्गुणसंविज्ञानः।

तद्गुणसंविज्ञान पु० तत्र बहुव्रीहौ गुणस्य गुणीभूतस्य विशेषणस्य संविज्ञानं विशेष्यपारतन्त्र्येण बोधनं यत्र। व्याकरणोक्ते बहुव्रीहिसमासभेदे। भवति च लम्बकर्णमानयेत्यादौ गुणीभूतस्य कर्णस्याप्यानयने पारतन्त्र्येणान्वयबोधः। शब्द० प्र० स्वमते लक्षणादिकमुक्त्वा प्राचीनमतसिद्धमप्युक्तं यथा "तदतद्गुणसंविज्ञानौ द्वौ भेदौ तदादिमः। विग्रहस्य विशेष्यो यस्तद्विशेष्यकबोधकृत्"। तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्च बहुव्रीहेर्द्वौ भेदौ। तत्र विग्रहवाक्यस्य विशेष्यविधया प्रत्याय्योयोऽर्थस्तद्विशेष्यकबोधकृद्बहुव्रीहिः तयोरादिमस्तद्गुणसंविज्ञानस्तस्य स्वार्थगुणीभूतस्य सम्यग्विशेष्यविधया विज्ञानं यस्मादिति व्युत्पत्त्या सान्वयसंज्ञकत्वात्। तद्भिन्नश्चातद्गुणसंविज्ञानश्चरमः इत्यर्थोऽवगम्यते। घटस्वरूपः पदार्थः इत्यादितो हि घटः स्वरूपं यस्येति विग्रहस्थले स्वस्वरूपाभिन्नघटसम्बन्धित्वेन घटाभिन्नस्वस्वरूपसम्बन्धित्वेन वा विग्रहविशेष्यं कलसमेव विशेष्यविधया बोध्यते घटस्य स्वरूपं यस्मादिति विग्रहे च विग्रहस्य यद्विशेष्यं ततोऽन्यदेव स्वजन्यस्वरूपाभिन्नघटसम्बन्धित्वेन। कुटादिर्गण इत्यादिरपि कुट आदिर्यस्येति व्युत्पत्त्या कुटाभिन्नस्य स्वधर्मिकत्वस्याधर्मिणः सम्बन्धित्वेन धात्वन्तरमिव कुटमपि बोधयंस्तद्गुणसंविज्ञान एव बहुव्रीहिः। प्राचां मतेन तद्गुणसंविज्ञानबहुव्रीहिमन्यथा निर्वक्ति। "यः स्वार्थघटकार्थस्य स्वार्थान्वयिनि बोधने। अनुकूलो बहुव्रीहिः स तयोरथवादिमः"। यो बहुव्रीहिः स्वार्थस्यान्वयिनि स्वार्थघटकस्याप्यर्थस्यान्वयबोधने समर्थः स तयोस्तदतद्गुणसंविज्ञानयोरादिमः। लम्बकर्णमानय हारग्रीवं पश्येत्यादौ हि बहुव्रीहिर्लम्बस्वकर्णसम्बन्धिनः स्वग्रीवावृत्तिहारसम्बन्धिनश्च स्वार्थस्यान्वयिनि कर्मत्वादौ स्वार्थघटकीभूतस्य तादृशकर्णहारादेरपि व्युत्पत्तिवैचित्र्येणान्वयबोधने समर्थ इत्येवंविध एव तद्गुणसंविज्ञानस्तद्भिन्न एव चार्थादतद्गुणसंविज्ञानः। यथा दृष्टसागरमानय इत्यादाविति

तद्दिन न० कर्म०। "तस्मिन् दिने। तद्दिनं स्यादनध्यायं व्रतं तत्र न कारयेत्" मल० त०। १दिनमध्ये २प्रतिदिने च मान्तम् अव्य० शब्दार्थ चि०।

तद्धन त्रि० तदेव धनं यस्य। १कृपणे हेमच० स हि सर्वमेव धनमपर्य्याप्ततयावधार्य्य आत्मनि तद्धनत्वमेवाभिमन्यते कर्म०। २तस्मिन् धने न०।

तद्धर्म्मन् त्रि० स धर्म्मो यस्य अनिच् समा०। तथाभूतधर्म्मयुक्ते। "आक्वेस्तच्छीलतद्धर्म्म तत्साधुकारिषु" पा०

तद्धित त्रि० तस्मै हितम्। १तस्मै हिते। २व्याकरणोक्ते प्रत्ययभेदे पुंन०। "तद्धिताः ४।१।७६ पा० सूत्रेणाधिकृत्य "यूनस्तिः" इत्यादिना पञ्चमाध्यायसमाप्तिं यावद्ये प्रत्यया विहितास्ते तद्धितसंज्ञकाः।

शब्द० प्रका० तल्लक्षणादिकमुक्तं यथा "विभक्त्यादित्रिकादन्यः प्रत्ययस्तद्धितं मतम्। नामप्रकृतिको नैवमतिव्याप्त्यादिदोषतः"। "विभक्तिधात्वंशकृद्भ्योऽन्यः प्रत्ययस्तद्धितः। इचक इत्यादौ ह्रस्वाद्यर्थकः कादिरपि तद्धितमेवेति। तदन्यत्वेनापि प्रत्ययं विशेषयन्त्यन्ये। नामप्रकृतिकप्रत्ययत्वन्तु न तद्धितस्य लक्षणं विभक्तौ क्यजादौ चातिव्याप्तेः पचतितरामित्यादौ तरामाद्यव्याप्तेश्च"। विभजते। "तस्यापत्यं तद्विशेषस्तद्दृष्टेन युतेन्दुमान्। कालस्तथा तेन रक्तं तस्य व्यूहोऽथ वेत्ति तत्। अधीते वा देवताऽस्य सैवमादीन् यथायथम्। बोधयद्विविधानर्थांस्तद्धितं स्यादनेकधा" तेनास्य क्लीबत्वमपि "तद्धितस्याचामादेः"। "तद्धितश्चासर्वविभक्तिः" पा०। "समासतद्धितकृतां यत्किञ्चिदुपदर्शकम्। गुणप्रधानभावे च तस्य दृष्टो विपर्य्ययः" हरिकारिका। स च तद्धितो द्विविधः- प्रकृत्यर्थभिन्नार्थकः स्वार्थिकश्चेति भेदात्।

तद्वल पु० तस्मिन् वलं यस्मात्। १वाणभेदे "क्षुरप्रतद्वलार्द्धेन्दुताराङ्कुख्याश्च तद्भिदः" हेम०। अस्य क्लीबोक्तिः प्रामादिकी "पुमान्" इत्यधिकारे "देवासुरात्मस्वर्गगिरिसमुद्रनख केश दन्त स्तन भुज कण्ठ खड्ग शरपङ्काभिधानानि" पा० "पुंस्त्वे सभेदानुचराः सपर्य्यायाः सुरासुराः। स्वर्गयागाद्रिमेघाब्धिद्रुकालासिशरारयः" अम०च पुंस्त्वोक्तेः

तद्भाव पु० तस्य भावः असाधारणधर्मः प्राप्तिर्वा। १तस्यासाधारणे धर्मे यथा घटे घटत्वम्। गोर्गोत्वम्। २तद्रूपप्राप्तौ च "अभूततद्भावे च्विः" "पयसस्तद्भावात्" कात्या० श्रौ० ४।३।२३ सू०। ७त० तस्मिन् भावः तद्विषयकचिन्तने "सदा तद्भावभावितः" गीता।

तद्राज पु० तस्य राजा टच्। १तस्य नृपतौ २तदर्थविहिते तद्धितप्रत्ययभेदे च। "ते तद्राजाः" पा० ते अञादयस्तद्राजसंज्ञकाः स्युः "अञादयस्तद्राजाः" पा० "पूगात् ञ्य इत्यारभ्य उक्ताः तद्राजसंज्ञका स्युः" सि० कौ०। तद्राजस्य बहुषु अस्त्रियाम् लुक्।

तद्र अवसादे मोहे च सौ० पर० अक० सेट् इदित्। तन्द्रति अतन्द्रीत्। तन्द्रा

तद्र्यञ्च(च्) त्रि० तदञ्चति गच्छति पूजयति वा—अनूच्—गतौ पूजायां वा क्विप् टेरद्र्यादेशः पूजार्थत्वे न नलोपः। १तद्गामिनि २तत्पूजके च।

तद्वत् अव्य० तेन तुल्यं या तुल्या सा चेत् क्रियेत्यर्थे वति। १तत्सदृशक्रियावति। तस्येव तत्रेव वा इत्यर्थे वति। २तत्तुल्येऽर्थे यथा तद्वत् शिवस्य विभुता, तद्वत् शिवे भक्तिरित्यादि। "तद्वत्ताद्दृशि च स्थितम्" स्वाङ्गलक्षणम्। "चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथा छाया। तद्वद्विना विशेषैर्न तिष्ठते निराश्रयं लिङ्गम्" "पुरुषस्य मोक्षार्थं प्रवर्त्तते तद्वदव्यक्तम्" सा० का०। "क्षत्तृवैदेहकौ तद्वत् प्रातिलोम्येऽपि जन्मनि" मनुः। तद् अस्त्यर्थे मतुप् मस्य वः। ३तद्विशिष्टे त्रि० "तद्वानपोह्यो वा शब्दार्थः" काव्य० प्र० "द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये"। "अथ वा तत्प्रकारं यज्ज्ञानं तद्विशेष्यकम्" भाषाप० स्त्रियां ङीप्। तस्य भावः तल्। तद्वत्ता तद्विशिष्टत्वे स्त्री "पदार्थे तत्र तद्वत्ता योग्यता परिकीर्त्तिता" भाषा०।

तद्विध त्रि० सा विधा प्रकारो यस्य। तत्प्रकारे "धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा" मनुः। "क्व तद्विधात्वं क्व च पुण्यलक्षणा" कुमा०।

तन विस्तृतौ तना० उभ० सक० सेट्। तनोति तनुते अतानीत् अतनीत् अतत-अतनिष्ट ततान तेनतुः तेने। उदित् तनित्वा तान्त्वा। ततः वितानः। "तनोति भानोः परिवेषकैतवात्" नैष०। "आचार्य्यस्तनुते विवृतिमिमां दायभागस्य"। दायभागटीका "ततान सोपानपरम्परामिव" रघुः। "यस्य तस्य विना षष्ठीं तेनेति करणं विना" उद्भटः। "तेनिरेऽभिरुचितेषु तरुण्यः" माघः "तन्वता "स तर्षीं तमोभिरभिगम्य तताम्" माघः प्रथमताद्दृशि रागम्" माघः।

अति+अतिशयविस्तारे। अतितत्। "तन्ततोऽतिततातिलत्" माघः।

वि+अति+व्यतिहारेण विस्तारे आत्म० "वियति व्यत्यतन्वातां मूर्त्ती हरिपयोनिधी" भट्टिः। [५।३।५।७ अ०।

अधि+आरोप्य विस्तारे। "धनुरधितनोति" शत० ब्रा०

अनु+सन्ततविस्तारे पश्चाद्विस्तारे च "परिपाल्यानुतनुयादेष धर्मः सनातनः" भा० शा० ११२ अ०।

अप+अधोविस्तारे। अपतानकः।

अव+सन्ततविस्तारे "विशालमूलावततं पवनामोदधारिणम्" हरिवं० ८८ अ०।

आ+दीर्घतया विस्तारे। आतानः (टाना देओया) सम्यग्

विस्तारे च "मौर्वीं धनुषि चातता" रघुः। यत्तु पुनरात्मानुस्मृतिमोषणं मायामयभोगैश्वर्य्यमेवातनुत" भाग० ५।२४।२२ "इदं ते लोभान्धस्य चेष्टितं चेतसि चमत्कारमातनोति" प्रबोध० च०।

वि+आ+विशेषेण विस्तारे। "व्यातेने किरणावलीमुदयनः" [किरणावली।

उद्+ऊर्द्ध्वतो विस्तारे उत्तानः।

प्र+प्रकर्षेण विस्तारे। "फलं प्रकल्प्य पूर्वं हि ततो यत्नः प्रतायते" भा० शा० ८६।२ श्लो०। "तदुरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते" माघः। पक्षे प्रतन्यते।

वि+विशेषेण विस्तारे वितानः (पड़ाल देचोया) "यथा लूता आतानवितानाभ्यामिति" वेदान्तप०।

सम्+सम्यग्विस्तारे सन्तानः सन्ततिः सन्ततम् "सन्तता शुशुभे भूमिः" रामा० स० १४ अ०।

तन उपकारे श्रद्धायां आघाते च वा० चुरा० उभ० पक्षे भ्वा० सक० शब्दे अक० सेट्। तानयति ते तनति अतीतनत् त अतानीत् अतनीत्। व्युपसर्गात् दैर्घ्ये अक० दीर्घीकरणे सक०। वितानयति दीर्घो भवति दीर्घं करोति वा। "वितानयति यः कीर्त्तिं वितनत्यमलं यशः" कविरहस्यम्। "अयं वेदे गणव्याख्यानात् दिवा०" "घोषा घोषादिन्द्राय तन्यति ब्रुवाणः" ऋ० ६।१८।२। "तन्यति शब्दं करोति" भा०। चौरादिकस्य अदन्तत्वमिति तनयित्नुशब्दार्थे माधवः तनयित्नुशब्दे दृश्यम्।

तनय पुंस्त्री० तनोति कुलम् तन–कयन्। १पुत्रे। २दुहितरि, ३चक्रकुल्यायां, (चाकुलिया) लतायां, ४दृतकुमार्य्याञ्च स्त्री टाप्। "अथैनमद्रेस्तनया शुशोच" कुमा०। तनयाशब्दस्य प्रियादिषु पाठात् पूर्वपदस्य न पुंवत्। तनया जाता अस्य तनयाजातः इत्यादिः।

५लग्नावधिकपञ्चमस्थाने पु०। "जनयति तनयभयमुपगतः" वृ० स०।

तनयित्नु पु० चु० स्तन–शब्दे इत्नु पृषो० सलोपः अदन्तचुरा० तन–शब्दे इत्नु माधवः। १अशनौ "अग्निं पुरा तनयित्नोरचित्तात्" ऋ० ४।३।१ "तनयित्नुरशनिः" भा० २मेघे च "एकपात्तनयित्नुरर्णवः" ऋ० १०।६६।११। "तनयित्नुर्मेघः" भा०।

तनस् पु० तनोति वंशम् तन–असुन्। पौत्रादौ "मा शेषसा मा तनसा" ऋ० ५।७०।४। "तनसा पौत्रादिना" भा०

तना स्त्री तन–अच् टाप्। धने निघण्टुः।

तनादि पु० पा० धातुपाठोक्ते धातुगणे। स च धातुपाठे बोपदेवेन तत्सूचकं द इत्यनुबन्धयुक्ततया पठितः। "तनादिकृञ्भ्य उः"। "तनादिभ्यस्तथासोः" पा०। तनादौ गणे पठितः ठक्। तानादिक तद्गुणपठिते धातौ।

तनिका स्त्री तन्यते धातूनामनेकार्थत्वात् बध्यते अनया करणे इन् संज्ञायां कन् कापि अतइत्त्वम्। बन्धनरज्जौ शब्दार्थचि०।

तनिमन् पु० तनोर्भावः तनु+इमनिच्। १तनुत्वे, २कार्श्ये च। "विरलातपस्तनिमानमभजत" काद०। तनयति तनुं करोति तनु+णिच् इमनिच् णिवद्भावे टिलोपः। ३यकृति। "अथ पार्श्वयोरथ तनिम्नोऽथ वृक्कयोः" शत० ब्रा० ३।८।३।१७। "तनिम्नः यकृतः" भा० तस्य तनूकरणात् तथात्वम्।

तनिष्ठ त्रि० अयमनयोरतिशयेन तनुः तनु+इष्ठन् डिद्भावः। द्वयोर्मध्ये एकस्मिन् अतिशयेन तनौ। वेदे बहुभ्यो निर्द्धारणेऽपि इष्ठन्। २बहूनां मध्ये एकस्मिन्, अतिशयेन तनौ च "एतेषां लोकानां अन्तरिक्षलोकस्तनिष्ठः" शत० ब्रा० ७।१।२।२०। लोके तु तदर्थे ईयसुन् तनीयानित्येव।

तनीयस् त्रि० बहूनां मध्येऽयमतिशयेन तनुः ईयसुन् डिद्वत्। बहूनां मध्ये एकस्मिन् अतिशयेन तनौ "पञ्चपुच्छानि तनीयांसीव" शत० ब्रा० ८।७।२।१ स्त्रियां ङीप्।

तनु स्त्री तनोति कर्म्म कार्य्यं वा तन–उन्। शरीरे अमरः २त्वचि राजनि०। "तनुभिरवतु वस्ताभिरष्टाभिरीशः" शकु०। "तनौ ममुस्तत्र न कैटभद्विषः" "बभार वाष्पैर्द्विगुणीकृतं तनुः" माघः। वा ऊङ्। तनूः इत्यपि तत्रार्थे तनूजः। ३कृशे ४अल्पे ५विरले च त्रि० मेदि०। "तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत् स्त्रियम्" मनुः। स्त्रियां वा ङीप् तन्वी। "तव तन्वि! कुचावेतौ नियतं चक्रवर्त्तिनौ" उद्भटः। सा च ६कृष्णभार्य्याभेदे "शैव्यस्य च सुतां तन्वीं रूपेणाप्सरसां समाम्" हरिवं० ११८ अ०। "भूतमुनीनैर्यतिरिह भतनाभतभौ भतनास्य यदि भवति तन्वी" वृ० र० उक्ते चतुर्विंशत्यक्षरपादके ७छन्दोभेदे च तनोर्भावः तल् तनुता कार्श्ये स्त्री "तनुतां दुःखमनङ्ग मोचयति" कुमा० "सर्वाणि तनुतां यान्ति जलानि जलदक्षये" हरिवं० १८२५। त्व तनुत्व तत्रार्थे न०। योगशास्त्रोक्तेषु दग्धबीजभावेषु अप्ररोहापन्नेषु दक्षभितादिषु "अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम्" पात० सू०। "दग्धबी-

जानासग्रवरोहस्तनुत्वमुच्यते प्रतिपक्षभावनोपहताः क्लेशास्तनवो भवन्ति" भा०। तेन प्रतिपक्षभावनया अस्मितादिक्लेशानां तनुत्वात् तनुसंज्ञेति तदर्थः। ज्योतिषोक्ते स्त्री ८लग्नस्थाने स्त्री०। "तनुनिधनखभेशाः केन्द्रकोणे त्रिलाभे" जातकाल०। स्वार्थे क। तनुक तनुशब्दार्थे।

तनुक्षीर पु० तनु अल्पं क्षीरं निर्यासोऽस्य। आम्रातके राजनि०

तनुच्छद पु० तनुं देहं छादयति छादि॰ह्रस्वश्च। १कवचे वर्मणि। "तरुपलाशसवर्णतनुच्छदः" "मातलिस्तस्य माहेन्द्रमामुमोच तनुच्छदम्" रघुः।

तनुच्छाय पु० तन्वी स्वल्पा छाया यस्य। १वर्वुरकवृक्षे राजनि०। ६त० २देहच्छायायां स्त्री। तन्वी अल्पा छाया यस्य। ३अल्पच्छायायुक्ते त्रि०। तन्वी छाया कर्म०। ४अल्पच्छायायां स्त्री।

तनुज पुंस्त्री० तनोर्देहात् जायते जन–ड ५त०। पुत्रे हलायुधः २कन्यायां स्त्री ३लग्नावधिकपञ्चमस्थाने ज्यो०

तनुत्र न० तनुं त्रायते त्रै–क। वर्मणि "काण्डीरः खाड्गिकः शार्ङ्गी रचन् विप्रांस्तनुत्रवान्" भट्टिः। "अचिताराशु विव्याध द्विषतः स तनुत्रिणः" माघः।

तनुत्राण न० तनुस्त्रायतेऽनेन त्रै–करणे ल्युट्। वर्मणि हारा०

तनुत्वच् स्त्री तन्वी त्वग् वल्कलं यस्याः। क्षुद्राग्निमन्थे राजनि०। २सूक्ष्मत्वग्युक्ते त्रि०।

तनुपत्र पु० तनूनि कृशानि पत्राणि यस्य। १इङ्गुदीवृक्षे राजनि०। २स्वल्पपत्रयुक्तवृक्षमात्रे त्रि०।

तनुभव पु० तनोर्भवति भू–अच् ५त०। १पुत्रे "दृश्यते तनुभवः शिशिरांशो" वृ०सं० १७ अ०। २दुहितरि स्त्री

तनुभस्त्रा स्त्री तनोर्देहस्य भस्त्रेव। १नासिकायाम् शब्दरत्ना०। कर्म०। क्षुद्रभस्त्रायाम्।

तनुभृत् त्रि० तनुं बिभर्त्ति भृ–क्विप् ६त०। देहधारिणि "छायाफलं तनुभृतां शुभमादधाति" वृ० सं० ६८ अ०।

तनुमध्या स्त्री तनु कृशं मध्यं यस्याः। १कृशमध्यायां स्त्रियां २षडक्षरपादके छन्दोभेदे च। "तौ चेत् तनुमध्या"। "मूर्त्तिर्मुरशत्रोरत्यद्भुतरूपा। आस्तां मम चित्ते नित्यं तनुमध्या" छन्दोम०। ३अल्पमध्यके त्रि०।

तनुरस पु० तनो रस इव। घर्मे हारा०।

तनु(नू)रुह् न० तनौ तन्वां वा रोहति रुह–क्विप् ७त०। लोमनि शब्दर०। [लोमनि शब्दर०।

तनु(नू)रुह न० तनौ तन्वां वा रोहति रुह–क ७त०।

तनुल त्रि० तन–उलच्। विस्तृते संक्षिप्तसा०। [वातस्थाने त्रि०।

तनुवात पु० तनुरल्पो वातोऽत्र। १नरकभेदे हेमच०। २अल्प-

तनुवार न० तनुं देहं वृणोति वृ–अण् उपस०। कवचे सन्नाहे शब्दार्थचि०। [राजनि० २स्वल्पबीजयुक्ते त्रि०।

तनुवीज पु० तनूनि कृशानि वीजानि यस्य। १वीजपूरे।

तनुव्रण पु० तनुरल्पो व्रणो यतः। वल्मीकरोगे शब्दर०।

तनुस् न० तन–उसि। देहे उणादिको०।

तनुसञ्चारिणी स्त्री तनु अल्पं सञ्चरति सम्+चर–णिनि ङीप्। १बालिकायां शब्दार्थचि०। २अल्पसञ्चारयुक्ते त्रि०।

तनुसर पु० तनोः सरति सृ–अच् ५त०। स्वेदे घर्मे शब्दार्थचि०।

तनुह्रद पु० तनो-र्ह्रद इव। पायौ त्रिका०।

तनू पु० तनोति कुलं तन–ऊ। १पुत्रे। "ता वां विश्वको हवते तनूकृथे" ऋ० ८।८६।१॥ "तनोति तनूः पुत्रः" भा० तनोति कर्म ऊन् ऊङ्। २शरीरे अमरः। ३प्रजापतौ ४गवि ५अप्सु च तनूनपाच्छब्दे दृश्यम्।

तनूकृ अतनुं तनुं करोति तनु+अभूततद्भावे च्वि कृञोऽनुप्रयोगः अल्पीकरणे तनूकरोति "लज्जां तनूकृत्य नरेन्द्रकन्या" रघुः। "समाधिभावनार्थः क्लेशतनूकरणार्थश्च" पात०सू०। "तनूकृद्बोधि प्रमतिश्च कारवे" ऋ०१।३१।६

तनूकृत त्रि० तनूकृ–कर्मणि क्त। १तष्टे २अल्पीकृते च अमरः।

तनूज पु० तन्वाः देहात् जायते जन–ड ५त०। १पुत्रे २कन्यायां स्त्री। "समादिदेश प्रयतां तनूजाम्" कुमा० तनूजनि तनूजात तनूजन्मादयोऽप्यत्रार्थे यथायथं पुंस्त्री

तनूद्भव पु० तनोरुद्भवति उद्+भू–अच् ५त०। १पुत्रे २दुहितरि स्त्री। "पञ्चभूतपरित्यक्तं शावं तं स्वतनूद्भवम्" हरिवं० २१ अ०। [तनूनपात्।

तनूनप न० तन्वा ऊनं कृशं पाति–पा–क। घृते शब्दच०

तनूनपात्(द्) पु० तनूं न पातयति पत-णिच्-क्विप् नभ्राडित्यादिना नञोन नलोपः। तनूनं पाति तनूनपं रक्षति पा-शतृ, तनूना ऊनं कृशं पाति तनूनपं घृतं तदत्ति अद-क्विप् वा। अग्नौ, जठरस्थितया भुक्ताद्यादिपाचनादस्य देहापातकत्वम्। शतृपक्षे तनूनपान्तौ इत्यादि क्विप्पक्षे तनूनपादौ इत्यादि भेदः। २घृते न०६त०। ३प्रजापतिपौत्रे। "नराशंसः प्रतिसूरोभितनूनपात् प्रतियज्ञस्य धाम" यजु० २०।२७ तनूनपात् तनोति विस्तारयति सृष्टिं तनूः प्रजापतिर्मरीचिस्तस्य नपात् पौत्रः कश्यपात्मज इत्यर्थः यद्वा तनूं शरीरं न पातयति रक्षति जाठराग्निरूपेणेति

तनूनपात् अग्निः यद्वा तनोति भोगानिति तनूः गौस्तस्या नपात् पौत्रं घृतम् गोः पयो जायते पयस आज्यमिति घृतं तनूनपाद्वा" वेददी० निरुक्ते अस्य निरुक्तिर्दर्शिता यथा "तनूनपादाज्यं भवति नपादित्यनन्तरायाः प्रजाया नामधेयं भवति गौरत्र तनूरुच्यते तता अस्यां भोगास्तस्याः पयो जायते, पयस आज्यं जायते । अग्निरिति शाकपूणिरापोऽत्र तन्व उच्यन्ते तता अन्तरिक्षे, ताभ्य ओषधिवनस्पतयो जायन्त ओषधिवनस्पतिभ्य एष जायते । तस्यैषा भवति । "तनूनपात् पथ ऋतस्य यानान् मध्वासमञ्जन्त्स्वदया सुजिह्व" निरु० ८।६। अग्न्युद्देश्यके प्रयाजभेदे च । तनूनपाद्यागश्च वसिष्ठशुनकात्रिवध्र्यश्वराजन्यभिन्नानां प्रयाजेषु द्वितीयः वसिष्ठादीनां तु नराशंसो द्वितीय इति भेदः यथोक्तं आश्व०श्रौ० १।५।६ "प्रयाजैश्चरन्ति" "पञ्चैते भवन्ति" पञ्चस्थाने नराशंसः तनूनपाद्वा द्व्यामुष्यायणस्यापि पञ्चैव भवन्ति न षडित्येवमर्थम् । एत इति वचनम् अत्र पठिता एवैते तनूनपान्नराशंसयोरन्यतरेण सह पञ्च भवन्ति नापठितेन सहेत्येवमर्थम्" नारा० । ये यजामहे इत्युपक्रमे "समिधः अग्न आज्यस्य व्यन्तु२ वौषडिति वषट्कारः १५ सू० । "इति प्रथमः" १६ सू० । "अयं प्रथमः प्रयाजः" नारा० "तनूनपादग्न आज्यस्य वेत्विति द्वितीयोऽन्यत्र वसिष्ठशुनकात्रिवध्र्यश्वराजन्येभ्यः" । २१ सू० । "नराशंसो अग्न आज्यस्य वेत्विति तेषाम्" २२ सू० "वसिष्ठादीनामयं द्वितीयः" नारा० "इडो अग्न आज्यस्य व्यन्त्विति तृतीयः" । २३ सू० । "सर्वेषामिति शेषः" नारा० "बर्हिरग्न आज्यस्य वेत्विति चतुर्थं आगूर्य पञ्चमे स्वाहाऽसुं स्वाहासुमिति" २४ सू० इत्यादि । वसिष्ठादिभिन्नानां समिद्यागतनूनपाद्यागः इडोयागः बर्हिर्यागः स्वाहाकारयाग इत्येते पञ्चैव प्रयाजा इत्यवधेयम् । वसिष्ठादीनां तनूनपात्स्थाने नराशंस इति भेदः । अतएव श्रुतौ "समिधो यजति तनूनपातं यजति इडो यजति बर्हिर्यजति स्वाहाकारं यजतीत्येव पञ्च पठिताः वसिष्ठादिभिन्नपरतया व्यवस्थाप्याः । "बभार वाष्पैर्द्विगुणीकृतं तनूस्तनूनपाद् धूमवितानमाधिजाः" माघः । "तनूं न पातयति जाठररूपेण धारयतीति" मल्लि० ।

तनूनप्तृ न पातयति नप्ता ६त० । वायौ तनोति तनूः परमात्मा आकाशस्तस्य पुत्रो वायुस्तस्य नप्ता पौत्रः वायुर्हि आत्मजाताकाशजातत्वात् ब्रह्मपौत्रः "तस्माद्वा एतस्मादात्मन आकाशः सम्भूत, आकाशाद्वायुः" इति श्रुतेस्तस्य तथात्वम् । "तनूनप्त्रे शाक्वरस्येति यो वः अयं पवत एष तनूनपाच्छाक्वरः सोऽयं प्रजानामुपद्रष्टा प्रविष्टस्ताविमौ प्राणोदानौ" शत० ब्रा० ३।४।२।५ "तन्वा देहस्य नपातयिता रक्षको देवस्तनूनप्ता अथवा सर्वतनूरात्मा प्रजापतिः तस्याकाशः पुत्रः तत्पुत्रो वायुरिति तनूनप्ता वायुः स च शाक्वरः शक्तः सर्वं कर्तुम्" । भा०

तनूपा पु० तनूं पाति पा–क्विप् । ६त० । जठराग्नौ जठरानले "तनूपा अग्नेऽसि तन्वं मे पाहि" यजु० ३।१७ जठरानलेन भुक्तान्ने जीर्णे रसवीर्य्यादिपाके सति देहपालनं भवतीति तस्य तथात्वम् । तन्वमिति छान्दसः प्रयोगः । २देहपालकमात्रे च "अवद्ध उतोऽविता तनूपाः" ऋ० ४।२६।२० "तनूपाः इन्द्रः" भा०

तनूरुह न० तनौ रोहति रुह–क । १लोमनि २पक्षिणां पक्षे च मेदि० । "तनुसुतफुल्लतनूरुहीकृतामिति" नैषधम् । ३पुत्रे ४गरुति ५लोमनि च पु० हेमच० । "कुवुटस्तनु तनूरुहाङ्गुलिः" ह० व० ६२ अ० । "तस्य तद्वचनं श्रुत्वा सम्प्रहृष्टतनूरुहः" भा० आ० १००अ० । "बलाहकाञ्जननिभं वराहकतनूरुहम्" हरिवं० ४३ अ० ।

तनूज पु० मनुभेदोत्तमपुत्रे नृपभेदे । "औत्तमेयान् महाराज ! दश पुत्रान् मनोरमान् । इष ऊर्जस्तनूजश्च मधुर्माधव एव च" हरिवं० ७अ० ।

तनूहविस् न० वैदिकेषु तनूरूपेषु हविःषु । "द्वादशाहान्ते तनूहवींषि निर्वपति" कात्या० श्रौ० ४।१०।७। "तनूहवींषि अग्नये पवमानायेत्यादीनि निर्वपति" कर्कः तानि च "अग्नये पवमानाय प्रथमा" ८ सू० "अग्नये पावकायाग्नये शुचये च द्वितीया" ९ सू० "अदित्यै चरुस्तृतीया" १० । इत्युक्तानि

तन्च गतौ भ्वा० पर० सक० सेट् । तञ्चति अतञ्चीत् । ततञ्च ततञ्चतुः तक्तः । तच्यते । उदित् । तञ्चित्वा तक्त्वा ।

तन्च सङ्कोचे रुधा० पर० सक० सेट् । पाणिनीयगणे अञ्जसाहचर्य्यादयं वेडेव बोपदेवगणे उदित्करणं प्रामादिकम् किन्तु ऊदिदेव । तनक्ति अतञ्चीत् अताङ्क्षीत् । ततञ्च । "तनच्मि व्योम विस्तृतम्" भट्टिः । आ+आतञ्चनशब्दोक्तार्थेषु (दम्बलदेओया) "इन्द्रस्य त्वा भागं सोमेनातनच्मि" यजु० १।४ । "उद्वास्यातनक्ति भागधत-शेषेणेन्द्रस्य, त्वेति" कात्या०श्रौ० ४।२।२२ "तां दुग्धस्थालीमुत्त-

रत उद्वास्य प्रागुक्तघोषेण पूर्वदिने कृताग्निहोत्रशेषेण दध्ना दुग्धमातनक्ति अवशिष्टं दधि दुग्धमध्ये प्रक्षिपति दधित्वसम्पत्त्यर्थम्" कर्कः। १भयहेतुकसङ्कोचे च न्यङ्क्वा॰ कुत्वम् आतङ्कः। आतङ्क्रम्।

तन्ज सङ्कोचे रुधा॰ पर॰ सक॰। पाणिनीयगणे (तनचू) इत्यत्र तनञ्जू इति पाठान्तरम् अयमूदित्त्वात् वेडेव। तनक्ति अतङ्क्षीत् अताङ्क्षीत्। ततञ्ज ।ङ्क्षीत् अतनन्सीत्।

तन्तस् दुःखे कण्ड्वा॰ अक॰ पर॰ सेट्। तन्तस्यति अतन्त-

तन्ति स्त्री तन–कर्मणि क्तिच् वेदे दीर्घनलोपाभावौ। १दीर्घप्रसारितायां रज्ज्वाम्। "वत्सानां न तन्तयस्त इन्द्र"! ऋ॰ ६।२४।४। "तन्तिर्नाम दीर्घप्रसारिता रज्जुः" भा॰ लोके तु तन्तिः तातिरित्येव कचिदार्षेऽपि तथा। "साऽसज्जत शिचस्तन्त्यां महिषी कालयन्त्रिता" भाग॰ ७।२।५२। २गवां मातरि च तन्तिपालः। वा ङीप् तन्ती गवां मातरि "तन्तीं प्रसार्य मायां वत्सवत्सां चानुमन्त्रयेतेयं तन्ती गवां मातेति गोपथब्रा॰ २।६।७

तन्तिपाल पु॰ तन्तिं गोमातरं पालयति पालि–अण् उप॰ स॰। २गोमातृपालके। अस्य "गोतन्तियवं पाले" पा॰ आद्युदात्तता। २सहदेवे च "तेषां गोसंख्य आसं वै तन्तिपालेति मां विदुः" भा॰ वि॰ १० अ॰। अत्र तन्त्रिपालेति पाठान्तरं तदभिप्रायेण तन्त्रिं वशीभूततां पालयतीति विग्रहेण तन्त्रिपालं वचनकरमिति नीलकण्ठेनोक्तम् "तन्त्रिपाल इति ख्यात नाम्नाऽहं विदितस्तथा" भा॰ वि॰ ३९ अ॰ इत्यत्र तथैव पाठः।

तन्तु पु॰ तन–तुन्। १सूत्रे अमरः तन्तुवायः। तन्तुदामनपर्वणोः" नरसिं॰पु॰ "तस्मिन्नोतमिदं प्रोतं विश्वं शाटीव तन्तुषु" भाग॰ ८।८।७। "तिरश्चि यन्ते क्रमितन्तुजालैः" रघुः। २ग्राहे हेम॰। ३सन्ताने "तेषामुत्पन्नतन्तूनामपत्यं दायमर्हति" मनुः। "संवेष्टमानं बहुभिर्मोहात्तन्तुभिरात्मजैः। कोषकार इवात्मानं वेष्टयन्नावबुध्यसे" भा॰ शा॰२२१अ॰। [गौरा॰ ङीष्।

तन्तुक पु॰ तन्तुनेव कायति कै–क। १सर्षपे २नाड्यां स्त्री

तन्तुकाष्ठ न॰ तन्तुयुक्तं काष्ठम्। (ताँतेर काटि) तन्तुवायोपकरणे तन्त्रकाष्ठभेदे शब्दर॰। [जटाधरः।

तन्तुकीट पु॰ तन्तोः तन्त्वर्थं कीटः। (गुटीपोका) कीटभेदे

तन्तुन पु॰ तन–वा॰ तुनन्। १ग्राहे (हाङोर) ख्याते जलजन्तुभेदे हेम॰।

तन्तुनाग पु॰ तन्तुर्नाग इव। बृहद्ग्राहे त्रिका॰।

तन्तुनाभ पु॰ तन्तुर्नाभावस्य अच् समा॰।(माकड़षा) लूतायाम्

तन्तुनिर्य्यास पु॰ तन्तुरिव निर्य्यासो यस्य। तालवृक्षे। शब्दर॰।

तन्तुपर्वन् न॰ तन्तोः यज्ञोपवीतसूत्रस्य दानरूपं पर्व यत्र। चान्द्रश्रावणपौर्णमास्याम् तद्दिने हि वामनाय यज्ञोपवीतदानोत्सवः स्मृतौ विहितः। राघवभट्टधृतनारसिंहवचनम्। "शिष्यस्वजन्मदिवसे संक्रान्तौ विषुवायने। स्वतीर्थेऽर्कविधुग्रासे तन्तुदामनपर्वणोः। मन्त्रदीक्षां प्रकुर्वाणो मासर्क्षादीन्न शोधयेत्"। तन्तुपर्व परमेश्वरोपवीतदानतिथिः श्रावणी पूर्णिमा" रघुनन्दनः।

इयं तिथिः रक्षासूत्रबन्धरूपोत्सवदिनत्वात्तथोत्वपि तथा च तस्यां रक्षासूत्रबन्धनप्रकारः निर्णयसि॰ दर्शितो यथा "अत्रैव रक्षाबन्धनमुक्तं हेमाद्रौ भविष्ये "संप्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनोदये। स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधानतः। उपाकर्मादिकं प्रोक्तमृषीणां चैव तर्पणम्। शूद्राणां मन्त्ररहितं स्नानं दानं च शस्यते। उपाकर्मणि कर्तव्यमृषीणां चैव पूजनम्। ततोऽपराह्णसमये रक्षापोटलिकां शुभाम्। कारयेदक्षतैः शस्तैः सिद्धार्थैर्हेमभूषितैरिति" अत्रोपाकर्मानन्तर्यस्य पूर्णमासीतिथौ वार्षिकस्यानुवादो न तु विधिः गौरवात् प्रयोगविधिभेदे च क्रमायोगाच्छूद्रादौ तदयोगाच्च। तेन परेद्युरुपाकरणे पूर्वेद्युरपराह्णे तत्करणं सिद्धम्। इदं भद्रायां न कार्यम् "भद्रायां द्वे न कर्त्तव्ये श्रावणी फाल्गुनी तथा। श्रावणी नृपतिं हन्ति ग्रामं दहति फाल्गुनीति" संग्रहोक्तेः तत्सत्त्वे तु रात्रावपि तदन्ते कुर्य्यादिति निर्णयामृते। इदं प्रतिपद्युतायां न कार्यम् "नन्दायादर्शने रक्षाबलिदानं दशासु च। भद्रायां गोकुलक्रीडा देशनाशाय जायते" इति मदनरत्ने ब्रह्मवैवर्तात् भविष्ये "उपलिप्ते गृहमध्ये दत्तचतुष्के न्यसेत् कुम्भम्। पीठे तत्रोपविशेद्राजामात्यैर्युतश्च सुमुहूर्ते। तदनु पुरोधा नृपते रक्षां बध्नीत मन्त्रेण"। इदं रक्षाबन्धनं नियतकालत्वात् भद्रावर्जं ग्रहणदिनेऽपि कार्यं होलिकावत्। ग्रहसंक्रान्त्यादौ रक्षानिषेधाभावात् "सर्वेषामेव वर्णानां सूतकं राहुदर्शने" इति तत्कालीनकर्मपरमेव न त्वन्यत्र। अन्यथा होलिकायां का गतिः। अतएव "नित्ये नैमित्तिके जप्ये होमयज्ञक्रियासु च। उपाकर्मणि चोत्सर्गे ग्रहवेधो न विद्यते" इति नियतकालीने तदभाव इति दिक्। उपाकर्मणीति तद्दिनभिन्नपरं तत् तन्निषेधादित्युक्तं प्राक्। मन्त्रस्तु

"येन बद्धो बलीराजा दानवेन्द्रो महाबलः। तेन त्वामपि बध्नामि रक्षे! मा चल मा चल"। "ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः कर्तव्योरक्षणाचारो द्विजान् संपूज्य शक्तितः" इति।

तन्तुभ पु० तन्तुना सन्तत्या भाति भा—क। १सर्षपे २वत्से च जटाधरः। "मरीचं पिप्पलं कोषं क्षीरकन्तन्तुभं तथा। संस्कारे च समक्षे च महादेव्यै निवेदयेत्" कालि० पु०। "तन्तुभं सर्षपम्" रघुनन्दन।

तन्तुवर्द्धन त्रि० तन्तुं सन्तानं संसारं वा वर्द्धयति छिनत्ति वा वृध—वृद्धौ णिच् ल्यु वर्द्ध छेदने ल्यु वा। १तन्तुवर्द्धके २तन्तुच्छेदके च। ३परमेश्वरे पु०। "शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्द्धनः" विष्णु स०। "तन्तुं सन्ततिं संसारं वर्द्धयति छेदयति वा ज्ञानदानेन" भा०।

तन्तु(र)ल न० तन्तुर्विद्यतेऽस्य र-लच् वा। मृणाले। हेमच०

तन्तुवाप त्रि० तन्तून् वपति वप-अण् उप०स०। (ताँति) तन्तुवाये जटाधरः।

तन्तुवाय त्रि० तन्तून् वयति वे—अण् उप० स०। १तन्तुवयनकर्त्तरि (ताँति) २लूतायां कीटभेदे च अमरः। ३सङ्कीर्णजातिभेदे पुंस्त्री। स्त्रियां जातित्वात् ङीष्। सा च जातिस्तद्वृत्तिश्च मानवोक्ता यथा "नृपायां वैश्यसंसर्गादायोगव इति स्मृतः। तन्तुवाया भवन्त्येव वसुकांस्योपजीविनः। शीलकाः केचिदत्रैव जीवनं वस्त्रनिर्म्मितौ" "तन्तुवायो दशपलं दद्यादेकपलाधिकम्" मनुः।

तन्तुवायदण्ड पु० तन्तोर्वायस्य दण्डः ६त०। वायते अनेन करणे—घञ् वा कर्म्म०। वेमनि तन्तुवायसाधने दण्डे। (नराज)

तन्तुविग्रहा स्त्री तन्तवो विग्रहे यस्याः। कदल्याम् त्रिका०। तत्त्वचि हि बहुसूत्राणि प्रादुर्भवन्ति।

तन्तुशाला स्त्री तन्तूनां वयनाय शाला। (ताँतघर) तन्तुवयनगृहे हेम०। [(सिँओयान) अमरः।

तन्तुसन्तत त्रि० तन्तुभिः सन्ततं व्याप्तम्। स्यूतवस्त्रे।

तन्तुसार पु०तन्तव इव सारो मज्जास्य। गुवाकवृक्षे। त्रिका०

तन्त्र न० तन्यते तनोति वा कर्त्त्रादौ यथायथं ष्ट्रन् तन्त्रि-कुटुम्बभरणे घञ् वा। १कुटुम्बभरणादिकृत्ये २सिद्धान्ते ३औषधे ४प्रधाने ५परिच्छदे ६वेदशाखाभेदे ७हेतौ ८उभयार्थकप्रयोगे। ९इतिकर्त्तव्यतायाञ्च मेदि०। १०तन्तुवाये शब्दमाला ११राष्ट्रे १२परच्छन्दानुगमने १३स्वराष्ट्रचिन्तायाम् हेमच०। १४प्रबन्धे शब्दरत्ना० १५शपथे, धरणिः १६धने १७गृहे १८वयनसाधने (ताँत) १९कुले च नानार्थमञ्जरी। २०शिवाद्युक्तशास्त्रभेदे तल्लक्षणभेदादिकं यथा "सर्गश्च प्रतिसर्गश्च मन्त्रनिर्णय एव च। देवतानाञ्च संस्थानं तीर्थानाञ्चैव वर्णनम्। तथैवाश्रमधर्मश्च विप्रसंस्थानमेव च। संस्थानञ्चैव भूतानां यन्त्राणाञ्चैव निर्णयः। उत्पत्तिर्विबुधानाञ्च तरूणां कल्पसंज्ञितम्। संस्थानं ज्योतिषाञ्चैव पुराणाख्यानमेव च। कोषस्य कथनञ्चैव व्रतानां परिभाषणम्। शौचाशौचस्य चाख्यानं नरकाणाञ्च वर्णनम्। हरचक्रस्य चाख्यानं स्त्रीपुंसोश्चैव लक्षणम्। राजधर्मो दानधर्मो युगधर्मस्तथैव च। व्यवहारः कथ्यते च तथा चाध्यात्मवर्णनम्। इत्यादिलक्षणैर्युक्तं तन्त्रमित्यभिधीयते"। तस्य प्रशंसा। "विष्णुर्वरिष्ठो देवानां ह्रदानामुदधिर्यथा। नदीनाञ्च यथा गङ्गा पर्वतानां हिमालयः। अश्वत्थः सर्ववृक्षाणां राज्ञामिन्द्रो यथा वरः। देवीनाञ्च यथा दुर्गा वर्णानां ब्राह्मणो यथा। तथा समस्तशास्त्राणां तन्त्रशास्त्रमनुत्तमम्। सर्वकामप्रदं पुण्यं तन्त्रं वै वेदसम्मितम्। कीर्त्तनं देवदेवस्य हरस्य मतमेव च। पावनं श्रद्दधानानामिह लोके परत्र च"। तस्य श्लोकसंख्या यथा "न शक्यं विस्तराद्वक्तुमपि वर्षशतैरपि। संक्षेपाद्वै प्रवक्ष्यामि लोककल्योक्तवर्त्मना। दिवि देवि! नवलक्षं पाताले ब्रह्मशासने। लक्षमात्रं भारते च क्षितौ तन्त्राणि यानि च। आगमं त्रिविधं प्रोक्तं चतुर्थमैश्वरं स्मृतम्। कल्पश्चतुर्विधः प्रोक्त आगमो डामरस्तथा। यामलश्च तथा तन्त्रं तेषां भेदाः पृथक् पृथक्। मुक्तकाख्यं सप्रपञ्चम् सारदाख्यञ्च नारदम्। महार्णवश्च कपिलो योगः कल्पः कपिञ्जलः। अमृतशुद्धिर्वीरश्च सिद्धसंवरणस्तथा। प्रथमोऽष्टसहस्रन्तु श्लोका दश प्रकीर्त्तिताः। द्वितीयोमुक्तकस्तत्र षट्सहस्राणि संख्यया। श्लोकाः शतार्द्धसंख्यातास्तृतीयस्त्रिसहस्रकः। शतद्वयं साधिकञ्च श्लोकानां पञ्चविंशतिः। त्रिंशो, त्तरसहस्राणि श्लोकानां भानुसंख्यया। प्रपञ्चः प्रथमे तन्त्रे द्वितीये वसुसंख्यया। सहस्राणि तथा श्लोकाः सप्तविंशतिसंख्यया। भूतनेत्रसहस्राणि तृतीयेऽब्धिसहस्रकम्। शतद्वयं पङ्क्ति १० श्लोकाः प्रपञ्चः कथितस्त्रिधा। कला १६संख्या सहस्राणि सारदायाः प्रकीर्त्तिताः। पञ्चविंशाधिकाः श्लोका वसुश्लोकाश्च नारदे। विंशतिश्च सहस्राणि षट्सहस्राणि संख्यया। वसुश्लोकाश्च कथिताः

कपिलः श्लोकसंख्यया। त्रयोदश सहस्राणि फलोत्तर शतत्रयम्। श्लोकसंख्या समुद्दिष्टा योगे कल्पे च संख्यया। बाणसंख्या सहस्राणि श्लोका नवतिः कीर्त्तिताः। श्लोकानान्तु सहस्राणि अष्टाविंशतिसंख्यया। श्लोकाश्च भानु १२. संख्याता स्तन्त्रेऽपि च कपिञ्जले। अमृतशुद्धौ सहस्राणि पञ्चश्लोकाधिकानि च। पञ्चैव कथिता नेत्र संख्यातानि यथार्थतः। वीरागमे षडधिकानि शतानि परिसंख्यया। सहस्राणि च तावन्ति श्लोकानान्तु यथार्थतः। पञ्चाधिकसहस्राणि श्लोकानामृतुसंख्यया। सिद्धसंवरयोक्तानि ईश्वरेण यथा पुरा। डामरःषड्विधो ज्ञेयः प्रथमो योगडामरः। श्लोकास्तत्र त्रयस्त्रिंशत् तथा पञ्च शतानि च। त्रिविंशतिसहस्राणि श्लोकानि चेह संख्यया। एकादश सहस्राणि संख्यया शिवडामरे। श्लोकाःसप्तैव निश्चित्य ईश्वरेणैव भाषिताः। तावच्छ्लोकसहस्राणि पञ्च श्लोकशतानि च। गुणोत्तराणि दुर्गाया डामरे कथितानि च। नव श्लोकसहस्राणि नव श्लोकशतानि च। सारस्वते तथा श्लोकाः पञ्चैव परिकीर्त्तिताः। स्वर७संख्यसहस्राणि श्लोकानां ब्रह्मडामरे। पञ्चोत्तरशतान्यत्र संख्यातानि शिवेन तु। षष्टिः श्लोकसहस्राणि गन्धर्वडामरोत्तरे। श्लोकाश्च षष्टिसंख्याता ब्रह्मणाऽव्यक्तयोनिना। यामलाः षट् समाख्यातास्तत्रादावादियामले। द्वात्रिंशच्च सहस्राणि त्रयस्त्रिंशत् शतानि च। द्वितीये ब्रह्मसंज्ञे तु द्वाविंशतिश्च संख्यया। सहस्राणि शतान्यत्र तान्येव कथितानि च। तावत्संख्यसहस्राणि शतानि परिसंख्यया। विंशतिश्च तथा संख्या श्लोकाश्च विष्णुयामले। कालसंख्यसहस्राणि वेदसंख्यशतानि च। पञ्चषष्टिस्तथा श्लोका कनिष्ठे रुद्रयामले। नव श्लोकसहस्राणि त्रयोदश शतानि च। द्वात्रिंशतिस्तथा श्लोका गणेशयामलोत्तमे। रविसंख्यसहस्राणि आदित्याख्ये तु यामले। तन्त्रे नीलपताकायां सहस्राणि च पञ्च च। पञ्चविंशतिः श्लोकाश्च कथिता वामकेश्वरे। त्रयोदश सहस्राणि द्वे शते विंशतिस्तथा। श्लोका मृत्युञ्जये तन्त्रे संख्यातास्तन्त्रवेदिभिः। गजसंख्यसहस्राणि त्रिकसंख्याशतानि च। सप्त श्लोकास्तथैवात्र तन्त्रयोगार्णवोत्तमे। दश श्लोकसहस्राणि तावन्त्येव शतानि च। मायाख्ये च महातन्त्रे यथार्थतः प्रकीर्त्तिताः। पञ्च श्लोकसहस्राणि तावन्त्येव शतानि च। शतार्द्धसंख्यया श्लोका दक्षिणामूर्त्तितन्त्रके। दश श्लोकसहस्राणि तावन्त्येव शतानि च। त्रयोदश तथा श्लोकाः कालिकाख्ये च तन्त्रके। कालेश्वर्य्यास्तन्त्रवरे सहस्रतित्रयं महत्। श्लोकानां संख्यया चात्र तन्त्रराजे च संख्यया। नव श्लोकसहस्राणि नव श्लोकशतानि च। द्वाविंशतिः सहस्राणि हरगौर्य्याख्यतन्त्रके। तथा च विंशतिः श्लोकास्तन्त्रेऽस्मिन् परिकीर्त्तिताः। अर्कसंख्यसहस्राणि द्वितीये तन्त्रवेदिभिः। अष्टाविंशतिश्च श्लोकाः संख्यातास्तन्त्रनिर्णये। कुब्जिकाख्ये महातन्त्रे श्लोकाश्च दशसंख्यया। सहस्राणि तथा सप्त संख्यातानि मनीषिभिः। द्वितीये षट्सहस्राणि तदर्द्धञ्च कनिष्ठके। अर्कसंख्यसहस्राणि तथाङ्कशतानि च। तावद्देव्या महातन्त्रे संख्यातानि द्विजोत्तमैः। द्वात्रिंशतिः सहस्राणि द्वाविंशतिः शतानि च। कात्यायन्यास्तु तन्त्रस्य संख्यातानि मनीषिभिः। वसुश्लोकसहस्राणि तावन्त्येव शतानि च। प्रत्यङ्गिरायास्तन्त्रे च निश्चितानि यथार्थतः। भूतसंख्या सहस्राणि तथा तावच्छतानि च। महालक्ष्म्यास्तन्त्रराजे पञ्च श्लोकाश्च कीर्त्तिताः। गजसंख्यसहस्राणि श्लोकका सप्तसंख्यया। त्रिपुरार्णवे महातन्त्रे लिखिताः परमर्षिभिः। सरस्वत्याः सहस्रे द्वे द्वे शते संख्यया स्मृते। पञ्च श्लोकास्तथैवात्र विज्ञातव्या द्विजातिभिः। द्वाविंशतिः सहस्राणि आद्ये मन्त्रोत्तमोत्तरे। अङ्कसंख्या शतान्यत्र श्लोकाः पञ्चदशैव तु। द्वाविंशतिः सहस्राणि तथा नव शतानि च। द्वात्रिंशच्च तथा श्लोका योगिन्यास्तन्त्रराजके। द्वितीये षट् सहस्राणि तथा च त्रिशतानि च। त्रयः श्लोकास्तथैवात्र वाराह्यास्तन्त्र उत्तमे। ऊर्म्मिसंख्यासहस्राणि तत्त्वसंख्यशतानि च। गवाक्षे तन्त्रराजेऽस्मिन् श्लोकाहि तत्त्वसंख्यया। वर्णसंख्यसहस्राणि द्वे शते परिनिश्चिते। श्लोकास्त्रयश्च संख्यातास्तन्त्रे नारायणीयके। वेदसंख्यसहस्राणि तान्येव च शतानि च। श्लोका नवतिःसंख्याता मृडानी तन्त्रराजके। तृतीये त्रिसहस्राणि त्रिशतानि कनिष्ठके। त्रिंशत् श्लोकाश्च संख्याताज्ञातव्यास्तन्त्रवेदिभिः"। वराहीत०

उपतन्त्राणि यथा "सैद्धोक्तान्युपतन्त्राणि कपिलोक्तानि यानि च। अद्भुतानि च एतानि जैमिन्युक्तानि यानि च। वशिष्ठः कपिलश्चैव नारदो गर्ग एव च। पुलस्त्यो भार्गवः सिद्धो याज्ञवल्क्यो भृगुस्तथा। शुक्रो बृहस्पतिश्चैव अन्ये ये मुनिसत्तमाः। एभिः प्रणीतान्यन्यानि उपतन्त्राणि यानि च। विसंख्यातानि तान्यत्र धर्मविद्भि-

महात्मभिः । सारात् सारतराण्येव संख्यातानि निबोधत" । वाराहीत० ।

शिवोक्तं चतुःषष्टिसङ्ख्यकं तन्त्रं यथा "सिद्धीश्वरं महातन्त्रं कालीतन्त्रं कुलार्णवम् । ज्ञानार्णवं नीलतन्त्रं फेत्कारीतन्त्रमुत्तमम् । देव्यागमं उत्तराख्यं श्रीक्रमं सिद्धियामलम् । मत्स्यसूक्तं सिद्धसारं सिद्धिसाराह्वयं तथा वाराहीतन्त्रं देवेशि ! योगिनीतन्त्रमुत्तमम् । गणेशविमर्शिनीतन्त्रं नित्यातन्त्रं शिवागमम् । चामुण्डाख्यं महेशानि ! मुण्डमालाख्यतन्त्रकम् । हंसमाहेश्वरं तन्त्रं निरुत्तरमनुत्तमम् । कुलप्रकाशकं देवि ! कल्पं गाथात्मकं शिवे ! । क्रियासारं निबन्धाख्यं स्वतन्त्रं तन्त्रमुत्तमम् । सम्मोहनं तन्त्रराजं ललिताख्यं तथा शिवे ! । राधाख्यं मालिनीतन्त्रं रुद्रयामलमुत्तमम् । बृहच्च श्रीक्रमं तन्त्रं गवाक्षं सुकुमुदिनि ! । विशुद्धेश्वरतन्त्रञ्च मालिनीविजयं तथा । समयाचारतन्त्रञ्च भैरवीतन्त्रमुत्तमम् । योगिनीहृदयं तन्त्रं भैरवं परमेश्वरि ! । सनत्कुमारकं तन्त्रं योनितन्त्रं प्रकीर्त्तितम् । तन्त्रान्तरञ्च देवेशि ! नवरत्नेश्वरं तथा । कुलचूड़ामणितन्त्रं भावचूड़ामणीयकम् । मन्त्रदेवप्रकाशञ्च कामाख्यानामकं तथा । कामधेनुकुमारी च भूतडामरसंज्ञकम् । मालिनीविजयं तन्त्रं यामलं ब्रह्म यामलम् । विश्वसारं महायन्त्रं महाकालं कुलामृतम् । कुलोड्डीशं कुब्जिकाख्यं यन्त्रचिन्तामणीयकम् । एतानि तन्त्ररत्नानि सकलानि युगे युगे । कालीविलासकादीनि तन्त्राणि परमेश्वरि ! । कालकल्पे सुसिद्धानि अश्वक्रान्तासु भूमिषु । महाचीनादितन्त्राणि अविकल्पे महेश्वरि ! । सुसिद्धानि वरारोहे ! रथक्रान्तासु भूमिषु" इति महासिद्धसारतन्त्रम् । "चतुःषष्टिश्च तन्त्राणि यामलादीनि पार्व्वति । सकलानीह वाराहे विष्णुक्रान्तासु भूमिषु । कल्पभेदेन तन्त्राणि कथितानि च यानि च । पाषण्डमोहनार्थैव विफलानीह सुन्दरि !" विश्वसारतन्त्रम् । अन्यत्र च "दैत्यानां मोहनार्थं तु तन्त्रशास्त्रं शिवोदितम्" तत्र स्वराष्ट्रचिन्तायां औषधे च "तन्त्रावापविदा योगैः" माघः । शास्त्रे "इदानीं तत्प्रवक्ष्यामि तन्त्रमुत्तरमुत्तमम्" सुश्रुतः अनेकोद्देन सकृत्प्रयोगे "द्वौ दैवे प्राक् त्रयः पित्र्ये उदगेकैकमेव वा । मातामहानामप्येवं तन्त्रं वा वैश्वदैविकम्" याज्ञ० । "पितृश्राद्धे मातामहश्राद्धे च वैश्वदैविकं तन्त्रेण कार्य्यमिति" मिता० । २१विध्यन्त अङ्गसमुदाये "दर्शपौर्णमासौ तु पूर्वं व्याख्यास्यामस्तन्त्रस्य तत्राम्नातत्वात्" आश्व० श्रौ० १।१।२। तन्त्रमङ्गसंहतिः 'विध्यन्त' इत्यर्थः स चावस्थानादिसंस्थाजपान्तः प्रधानस्य तन्त्रणात् तन्त्रमित्युच्यते" कर्कः । तन्त्रलक्षणादिकं कात्या० श्रौ० उक्तं यथा "कर्म्मणां युगपद्भावस्तन्त्रम्" कात्या० श्रौ० १।७।१

"यत्र प्रधानकर्म्मणां युगपद्भावः सह प्रयोगः तत्रारादुपकारकाणामङ्गानां तन्त्रं सकृदनुष्ठानं भवति । न प्रतिप्रधानं पृथक् पृथक् यद्धि सकृत् कृतं बहूनामुपकरोति तत्तन्त्रमित्युच्यते यथा बहूनां मध्ये कृतः प्रदीपः । कुतस्तन्त्रमिति हेत्वाकाङ्क्षायां त्रीन् हेतूनाह" कर्कः । "शक्यपुरुषार्थकृतत्वैकार्थसमवायश्रुतिभ्यः" सूत्र० । "प्रधानकर्म्मणां सह प्रयोगे सति तदङ्गानां सकृदनुष्ठानमुक्तम् । तत् कुतः शक्यत्वात् सकृदप्यनुष्ठितैरारादुपकारकैरङ्गैर्बहूनामपि प्रधानानामुपकारः कर्त्तुं शक्यत्वात् शक्नुवन्ति ह्यारादुपकारकाणि बहूनामुपकर्त्तुम्, अदृष्टमात्रविशेषत्वात् प्रदीपवत् यथा एक एव प्रदीपो बहूनां मध्ये कृतः सन् सर्वेषामुपकरोति एवमेतान्यपीति । यद्यप्यङ्गानां प्रत्येकमेव विनियोगस्तथापि विधिना तावदनुष्ठानं सकृदेवोपकारकं भवति यथैव हि षट्सु भावनासु लिङ्पदेनैव कथम्भावसमेतमात्रास्वपि सकृदाम्नाता एवाङ्गविधयः तासामपि प्रत्येकमङ्गानि समर्पयन्ति सत्यपि च कस्यचित् प्रधानोत्पत्तिविधिसन्निधौ प्रकरणवशेन संनिधिर्बाध्यते तथैव संहतानां प्रधानानां फलसाधनत्वात् कर्त्तृदेशकालैक्याच्च युगपत् सर्वेष्वनुष्ठातुं प्रारब्धेषु सकृत्कृतमेवाङ्गं सर्वचिकीर्षया कृतत्वात् सन्तमपि केनचित् संनिधिं बाधित्वा प्रकरणवशेन सर्वार्थं भवति । किं च पौर्णमास्यां यजेतेति त्रयाणां युगपदनुष्ठानमवगतं पृथक् पृथक् साङ्गेष्वनुष्ठीयमानेषु बाध्यते तस्मात् सकृदेवाङ्गानामनुष्ठानम् । तथा पुरुषार्थकृतत्वाच्च यतः सकृदनुष्ठितैरप्यङ्गैः पुरुषार्थः कृत एव भवति पुरुषार्थः पुरुषस्याभीष्टं फलम् तद्धि आग्नेयादिभिरङ्गोपकृतैः क्रियते आरादुपकारकाणि चाङ्गान्यनेकघटादिप्रकाशकप्रदीपवत् सर्वेषां सहैवोपकुर्वन्ति सकृत्कृतैरपि पुरुषार्थः कृतएव भवति । तथा एकार्थसमवायश्रुतेश्चाङ्गानां तन्त्रं भवति एकोऽर्थो यस्य एकार्थ एकफलो यः प्रधानानां समवायः समूहः स एकार्थसमवायः तत्र एकार्थे समवाये एकफले

प्रधानसमूहे अङ्गानां तन्त्रश्रुतेः अङ्गानां सकृदनुष्ठानं श्रूयते यतः। तथाहि “ता एकविंशतिराहुतयो द्वावाघारौ पञ्च प्रयाजा द्वावाज्यभागावाग्नेयः पुरोडाशस्तद्वदाग्नीषोमीय उपांशुयाजोऽग्नीषोमीयः पुरोडाशोऽग्निः स्विष्टकृदिडा त्रयोऽनुयाजाः सूक्तवाकश्च शंय्योर्वाक्श्चाथ यदेवादः पत्नीसंयाजेषु सम्प्रगृह्णाति समिष्टयजुश्चेति तत्राग्नेयोपांशुयाजाग्नीषोमीयलक्षण एकफले प्रधानसमवाय आहुतीनामेकविंशतिसंख्या श्रूयते सा चाङ्गानां सकृत्करणपक्ष एवोपपद्यते न प्रतिप्रधानं पृथगनुष्ठानपक्षे। तस्मात् प्रधानानां सहप्रयोगे सकृदेवारादुपकारिका क्रिया सन्निपत्योपकारकाणां प्रतिप्रधानमावृत्तिरिति तु प्रागुक्तमेव। अथ प्रधानानां सह प्रयोगे कारणान्याह” कर्कः। “फलकर्मदेशकालद्रव्यदेवतागुणसामान्ये” १सू०। यत्रैकेन वाक्येन बहूनि प्रधानकर्माणि एकफलसाधनत्वेन विधीयन्ते तत्र तेषामितरेतरापेक्षाणां साधनत्वेन विधानात् सहप्रयोगः तद्यथा मित्रविन्दाश्रीराष्ट्रमित्रायुष्कामस्येति वैश्वदेवेन प्रजाकामं याजयेदिति अत्र मित्रविन्दाशब्देन समुदायवचनेन दशानां हविषां सहप्रयोगः वैश्वदेवशब्देन च समुदायवचनेनाष्टानां हविषाम्। सूत्रार्थस्तु सामान्यशब्दः प्रत्येकं सम्बध्यते फलसामान्ये कर्मसामान्ये देशसामान्ये कालसामान्ये द्रव्यसामान्ये देवतागुणयोः सामान्य इति एकवाक्येनैकफलसाधनत्वेन विधानेऽपि फलादिसामान्ये सत्येव प्रधानानां सहप्रयोगो भवति फलं स्वर्गादि कर्म पञ्चप्रयाजता त्र्यनुयाजतेत्यादि। देशः समप्राचीनप्रवणादिः। कालः पूर्वाह्णापराह्णादिः। द्रव्यं दक्षिणाद्रव्यम् न तु हविर्द्रव्यम् अनेकेषु प्रधानकर्मसु तद्भेदस्यावश्यम्भावात् देवता प्रजापतीन्द्रादिः। तद्गुण उपांशुत्वाम्नाव्यत्वादिः तस्मिन् सति प्रधानमपि सहैव भवति न पृथक्” कर्कः “तद्भेदे भेदः” ४सू०। तेषां फलादीनां भेदस्तद्भेदः तद्भेदे तेषां फलादीनां सह प्रयोगकारणानां भेदे सति प्रधानानां प्रयोगभेदो भवति तत्र प्रयोगवचनभेदान्मित्रविन्दाप्रीतिकामाग्नेययोर्न सहप्रयोगः फलभेदाच्च श्रीकामराष्ट्रकाममित्रकामायुष्काममित्रविन्दानां पृथक् प्रयोगः। कर्मभेदेऽपि प्रयोगभेदो भवति तद्यथा कस्यचित् पञ्चप्रयाजता कस्यचिन्नवप्रयाजता यथा च कौण्डिनीया महाहविषोस्तन्त्रसहत्वे इतरेतरस्य विगुणत्वं भवति। देशभेदेऽपि तन्त्रभेदो भवति यथा वरुणप्रघासेषु मारुत्याः कौण्डिनीमहाहविषोश्च कौण्डिन्याः समदेशः महाहविषस्तु प्राचीनप्रवणः। कालभेदेऽपि सहप्रयोगो न भवति यथा दर्शस्य पौर्णमासस्य च “पौर्णमास्यां पौर्णमास्या यजेतामावास्यायाममावास्यया यजेतेति वचनेन कालभेदेन तयोर्विधानात्। यथा वा आनीकवतीसान्तपनीययोः पूर्वाह्णमध्याह्नरूपकालभेदात्तन्त्रभेदः। दक्षिणाद्रव्यैक्ये सति सहप्रयोगो यथा राजसूये त्रयाणां त्रिषंयुक्तानां येषां मते च त्रिषंयुक्तानां त्रयाणामप्येकस्मिन्नेवाह्न्यनुष्ठानम् तेषां दक्षिणाद्रव्यभेदेन त्रयाणां त्रयाणां पृथगनुष्ठानम् न सर्वेषां सहप्रयोगः दक्षिणाभेदश्च त्रयाणां वामनः त्रयाणां श्यामः त्रयाणां बभ्रुरिति तत्र दक्षिणाभेदादानतिभेदः तद्भेदात्तत्कृतस्य स्वरूपस्य भेदः वामनानतैर्हि पूर्वं कर्म कर्त्तव्यम् श्यामानतैरुत्तरम् तन्त्रत्वे तूभाभ्यामानता उभयं कुर्य्युः। तत्र दक्षिणाव्यवस्था गम्यमाना बाध्येत। तस्मात् प्रतिदाक्षिण्यं तन्त्रभेदः। अत्र एकवाक्येनैकफलार्थमेव विधाने देशकालकर्मैक्ये सत्यपि दक्षिणाभेदात्तन्त्रभेदः। देवताया देवतागुणस्य च सामान्ये सति उच्चारणमपि तस्या देवताया आवाहनत्यागादौ तन्त्रेण भवति यथा सप्तदशप्राजापत्येषु राजपेये प्रजापतेर्देवतायाः समानत्वाद्गुणस्योपांशुत्वस्य च समानत्वादनुवचनादौ तन्त्रेणोच्चारणं भवति यागोऽपि तन्त्रेणैव भवति। तथा च प्राजापत्यान् प्रकृत्य श्रूयते एकानुवाक्या भवत्येकयाज्यैकदेवत्या हि प्राजापत्या इत्युपांशुत्वाच्च छागानां हविषोऽनुब्रूहीति अत्रानुवाक्याद्यैकत्वे एकदेवतत्वं हेतुं ब्रुवन्ती एकदेवताकानां सिद्धं तन्त्रोच्चारणं दर्शयति। दर्शपूर्णमासयोरेव द्रव्यभेदेऽपि दध्नः पयसश्च समानत्वात्तद्देवताया इन्द्रस्य तद्गुणस्य चाम्नाव्यत्वस्य समानत्वात्तन्त्रेणैव याग उच्चारणं भवति। देवतायां समानायामपि देवतागुणस्योपांशुत्वादेर्भेदे सति सहोच्चारणं न भवति यथा प्रकृतावेवोपांशुजापाग्नीषोमयोः पुरोडाशाग्नीषोमयोश्च। इह देवतातद्गुणयोः सामान्ये यागस्य तन्त्रेणानुष्ठानमुच्यते अत्र सिद्धमेव देवतागुणसामान्ये तन्त्रेण यागानुष्ठानमुपजीव्य भेदो यागस्य भेदेनानुष्ठानपूर्वं निषिद्धः न द्रव्यभेदे गुणयोगादिति सा तस्य इति न पुनरुक्तिदोषादि।” कर्कः।

तल्लक्षणविषयादिकं जैमिनिना एकादशाध्याये न्यरूपि तत एवागन्तव्यं संक्षेपतश्च जैमिनिशब्दे माधवेनोक्तं ३१४१ पृ० दर्शितम्। तत्र शास्त्रे "आसुरिरपि पञ्चशिखाय तेन बहुधा कृतं तन्त्रम्" "सप्तत्यां किल येऽर्थास्तेऽर्थाः षष्टितन्त्रस्य" सा० का०। २२नीत्यवयवे। "तन्त्रैः पञ्चभिरेतच्चकार सुमनोरमं शास्त्रम्" पञ्चत०। तदवयवाश्च सन्धिभेदमित्रसम्प्राप्तिकाकोलूकीयलब्धप्रणाशापरीक्षितकारकाख्याः। तन्त्रं वेत्ति ठक्। तान्त्रिक तन्त्रवेत्तरि त्रि०। तन्त्र विहितः ठक्। तान्त्रिक तन्त्रविहिते त्रि० स्त्रियां ङीप् "वैदिकी तान्त्रिकी सन्ध्या यथानुक्रमयोगतः" तन्त्रसा० तान्त्रिकी दीक्षा २३शे च स्वतन्त्रः परतन्त्रः।

तन्त्रक त्रि० तन्त्रात् अचिरापहृतम् कन्। अभिनवे वस्त्रे अमरः पटे पु० शाट्यां स्त्री इति भेदः। "वसानस्तन्त्रकनिभे सर्वाङ्गीणे तरुत्वचौ" भट्टिः।

तन्त्रकाष्ठ न० तन्त्रस्य काष्ठम्। तन्त्रस्थे काष्ठभेदे (ताँतेर काटि) प्रभृतौ त्रिका०।

तन्त्रता स्त्री तन्त्रस्य भावः तल्। अनेकोद्देशेन सकृत्प्रवृत्तौ यथा तर्पणपूजनाद्यनेककर्मोद्देशेन सकृत्स्नाने कृते सर्वकर्माङ्गस्नानसिद्धिः। तद्विषयोदाहरणं प्रा० त०उक्तं यथा "आग्नेयाष्टकपालैन्द्रदध्यैन्द्रपयोयागानां त्रयाणामाग्नेयाष्टकपालोपांशुयागाग्नीषोमीयैकादशकपालयागानां त्रयाणां सकृत् सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकारः सिद्ध्यति तथा नानाब्रह्मवधसम्बन्धे सर्वोद्देशेन सकृत् प्रायश्चित्ते कृते सर्वब्रह्मवधजन्यपापनाशः। तन्त्रतायाहेतुश्च अदृष्टार्थैकजातीयकर्मणः कालदेशकर्त्रादीनां प्रयोगानुबन्धिवैधहेतुभूतानामभेदे उद्देश्यविशेषाग्रहः" इति। एवञ्च "स्नातोऽधिकारी भवति दैवे पैत्र्ये च कर्मणि। पवित्राणां तथा जाप्ये दाने च विधिदर्शिते" इति विष्णूक्तम् "अस्नात्वा नाचरेत् कर्म जपहोमादि किञ्चनेति" दक्षोक्तञ्च, क्रियाङ्गस्नानं कर्तृसंस्कारद्वारैव तद्दिनकर्त्तव्याशेषकर्मार्थमेकमेव न तु प्रतिकर्म कर्त्तव्यम्" इति रघुनन्दनः अधिकं तन्त्रशब्दे दृश्यम्।

तन्त्रधारक पु० तन्त्रं कर्मज्ञापकपद्धतिग्रन्थं धारयति धारि–ण्वुल् ६त०। "एकस्तत्र नियुक्तः स्यादपरस्तन्त्रधारकः। तृतीयं प्रश्नकं ब्रूयात् ततः कर्म समाचरेत्" छन्दपरिशिष्टोक्ते कर्मस्वरूपज्ञापकपुस्तकवाचके। "तन्त्रधारकः पुस्तकधारकः" सं० त० रघुनन्दनः।

तन्त्रयुक्ति स्त्री तन्त्रोक्ता आयुर्वेदशास्त्रोक्ता युक्तिः। सुश्रुतोक्ते द्वात्रिंशद्भेदके युक्तिभेदे। ताश्च यथा "अथातस्तन्त्रयुक्तिनामाध्यायं व्याख्यास्यामः। द्वात्रिंशत्तन्त्रयुक्तयो भवन्ति। तद्यथा। अधिकरणं योगः पदार्थो हेत्वर्थ उद्देशो निर्देश उपदेशः प्रदेशोऽतिदेशोऽपवर्गो वाक्यशेषोऽर्थापत्तिर्विपर्य्ययः प्रसङ्ग एकान्तोऽनेकान्तः पूर्वपक्षो निर्णयोऽनुमतं विधानमनागतावेक्षणम् अतिक्रान्तावेक्षणम्। संशयो व्याख्यानं स्वसंज्ञा उदाहरणं निर्वचनं निदर्शनं नियोगो विकल्पः समुच्चय ऊह्यमिति अत्राह तन्त्रयुक्तीनां किं प्रयोजनमित्युच्यते। वाक्ययोजनमर्थयोजनञ्च। भवन्ति चात्र श्लोकाः। असद्वादिप्रयुक्तानां वाक्यानां प्रतिषेधनम्। स्ववाक्यानां सिद्धिरपि क्रियते तन्त्रयुक्तितः। व्यक्ता नोक्तास्तु ये ह्यर्था लीना ये चाप्यनिर्मलाः। लेशोक्ता ये क्वचित्तन्त्रे तेषाञ्चापि प्रसाधनम्। यथाम्बुजवनस्यार्कः प्रदीपो वेश्मनो यथा। प्रबोधस्य प्रकाशार्थास्तथा तन्त्रस्य युक्तयः। यमर्थमधिकृत्योच्यते तदधिकरणं १यथा रसं दोषं वा। येन वाक्यं युज्यते स योगः २। यथा तैलं पिबेच्चामृतवल्लिनिम्बहिंस्राभयावृक्षकपिप्पलीभिः। सिद्धं बलाभ्याञ्च सदेवदारु हितञ्च नित्यं गलगण्डरोगी"। सिद्धं पिबेदिति प्रथमं वक्तव्ये तृतीयपादे सिद्धं प्रयुक्तमेवं दूरस्थानामपि पदानामेकीकरणं योगः। योऽर्थोऽभिहितः सूत्रे पदे वा स पदार्थः ३। अपरिमिताश्च पदार्थाः। यथा स्नेहस्वेदाञ्जनेषु निर्दिष्टेषु द्वयोस्त्रयाणामर्थानामुपपत्तिर्दृश्यते तत्र योऽर्थः पूर्वापरयोगसिद्धो भवति स ग्रहीतव्यो यथा। वेदोत्पत्तिं व्याख्यास्याम इत्युक्ते सन्दिह्यते बुद्धिः। कतमस्य वेदस्योत्पत्तिं विवक्षुरिति। ऋग्वेदादयस्त्रयो वेदास्तत्र पूर्वापरयोगमुपलभ्य विद–विचारणे विन्दत्येतयोश्च धात्वोरनेकार्थयोः प्रयोग इति पश्चात् प्रतिपत्तिर्भवति। आयुर्वेदोत्पत्तिमयं विवक्षुरित्येवं पदार्थः। यदन्यदुक्तमन्यार्थसाधकं भवति स हेत्वर्थः४। यथा मृत्पिण्डोऽद्भिः प्रक्लिद्यते यथा माषदुग्धप्रभृतिभिर्व्रणः प्रक्लिद्यत इति। समासकथनमुद्देशः५। यथा शल्यमिति। विस्तरवचनं निर्देशः६। यथा। शारीरमागन्तुकं चेति। एवमित्युपदेशः७। यथा "तथा न जागृयाद्रात्रौ दिवा स्वप्नञ्च वर्जयेत्" अनेन कारणेनेत्युपदेशः। यथोपदिश्यते मधुरेण श्लेष्माभिवर्द्धत इति। प्रकृतस्यातिक्रान्तेन साधनं प्रदेशः८। यथा देवदत्तस्यानेन शल्य-

सद्वृत्तं तस्मादुपद्दत्तस्याप्ययमेवोत्तरविप्रतीति । प्रकृतस्यानागतेन साधनमतिदेशः९ । यथानेनास्य वायुरूर्द्ध्वमुपतिष्ठते तेनोदावर्त्तः स्यादिति । अभिव्याप्यापकर्षणमपवर्गः१० । यथा स्वेद्या विषापसृष्टा अन्यत्र कीटविषादिति । येन पदेनानुक्तेन वाक्यं समाप्यते स वाक्यशेषः११ । यथा शिरःपाणिपादपार्श्वपृष्ठोदरोरसामित्युक्ते पुरुषग्रहणमपि गम्यते पुरुष एवोक्त इति । यदकीर्त्तितमर्थादापद्यते सार्थापत्तिः१२ । यथौदनं भक्ष्ये इत्युक्तेऽर्थादापन्नं भवति नायं पिपासुर्यवागूमिति । यद्यस्याभिहितं तस्य प्रातिलोम्यं विपर्य्ययः१३ । यथा कृशाल्पप्राणभीरवो दुश्चिकित्स्या इत्युक्ते विपरीतं गृह्यते दृढादयः सुचिकित्स्या इति । प्रकरणान्तरेण समापनं प्रसङ्गः१४ । यथा प्रकरणान्तरितोयमर्थोऽसकृदुक्तः समाप्यते स प्रसङ्गः महाभूतशरीरसमवायः पुरुषस्तस्मिन् क्रिया सोऽधिष्ठानमिति वेदोत्पत्तावभिधाय भूतविद्यायां पुनरुक्तं यतोऽभिहितं पञ्चमहाभूतशरीरसमवायः पुरुष इति स खल्वेवं कर्मपुरुषश्चिकित्सायामधिकृतः सर्वत्र । यदवधारणेनोच्यते स एकान्तः१५ । “यथा त्रिवृद्विरेचयति मदनफलं वामयतीति । क्वचित्तथा क्वचिदन्यथेति यः सोऽनेकान्तः१६ । यथा केचिदाचार्य्या ब्रुवते द्रव्यं प्रधानं केचिद्रसं केचिद्वीर्य्यं केचिद्विपाकमिति । आक्षेपपूर्व्वकः प्रश्नः पूर्व्वपक्षः१७ यथा कफवातनिमित्ताश्चत्वारः प्रमेहा असाध्या भवन्तीति । तस्योत्तरं निर्णयः१८ । यथा शरीरं प्रपीड्य पश्चादधोगत्वा वसामेदोमज्जानुविद्धं मूत्रं प्रसृजति वात एवमसाध्या वातजा इति । तथाचोक्तम् “कृत्स्नं शरीरं निष्पीड्य मेदोमज्जवसायुतः । अधः प्रकुप्यते वायुस्तेनासाध्यास्तु वातजाः” । परमतमप्रतिषिद्धमनुमतम्१९ । यथान्यो ब्रूयात्सप्त रसा इति । प्रकरणानुपूर्व्याभिहितं विधानम्२० । यथा सक्थिमर्म्माण्येकादशप्रकरणानुपूर्व्याभिहितानि । एवं वक्ष्यतीत्यनागतावेक्षणम्२१ । यथा श्लोकस्थाने ब्रूयाच्चिकित्सितेषु वक्ष्यामीति । यत्पूर्व्वमुक्तं तदतिक्रान्तावेक्षणम्२२ । यथा चिकित्सितेषु ब्रूयात् श्लोकस्थाने यदीरितमिति । उभयहेतुदर्शनं संशयः२३ । यथा तलहृदयाभिघातः प्राणहरः पाणिपादच्छेदनं प्राणहरमिति । तत्रातिशयोपवर्णनं व्याख्यानम्२४ । यथेह पञ्चविंशतिकः पुरुषोऽत्र व्याख्यायते । अन्ये त्वायुर्वेदतन्त्रेषु भूतादिप्रकारारब्धचिन्ता । अन्यशास्त्रासामान्या स्वसंज्ञा२५ । यथा मिथुनमिति मधुसर्पिषोर्ग्रहणम् । लोके प्रथितमुदाहरणम्२६ । यथोष्णभयाच्छीतमनुधावति । निश्चितं वचनं निर्वचनम्२७ । यथायुर्विद्यतेऽस्मिन्ननेन वायुर्विन्दतीत्यायुर्वेदः । दृष्टान्तेनार्थः प्रसाध्यते यत्र तन्निदर्शनम्२८ । यथाग्निर्वायुना सहितः कोष्ठे वृद्धिं गच्छति तथा वातपित्तकफजो दुष्टव्रण इति । इदमेव कर्त्तव्यमिति नियोगः२९ । यथा पथ्यमेव भोक्तव्यमिति । इदं वेति विकल्पः३० । यथा रसौदनः सघृता यवागूर्व्वा इदञ्चेदञ्चेति समुच्चयः३१ । यथा मांसवर्गे ऐणहारिणलावतित्तिरिसारङ्गाः प्रधानमिति । यदनिर्दिष्टं बुद्धिमता तदूह्यम्३२ । यथाभिहितमन्नपानविधौ चतुर्विधञ्चान्नमुपदिश्यते । भक्ष्यं भोज्यं लेह्यं पेयमेवञ्चतुर्विधे वक्तव्ये द्विविधमतिहितमतोह्यमिति । अन्नपाने विशिष्य द्वयोर्ग्रहणे कृते चतुर्णामपि ग्रहणं भवति किञ्चान्यत् । अन्नेन भक्ष्यमवरुद्धं त्वन्नसाधर्म्यात् । पेयेन लेह्यं द्रवसाधर्म्यात् । चतुर्विधश्चाहारः प्रायेण द्विविधः प्रसिद्ध इति । द्वात्रिंशद्युक्तयो ह्येतास्तन्त्रसारगवेषणे । मया सम्यग्विनिहिताः शब्दन्यायार्थसंयुताः । योह्येता विधिवद्वेत्ति दीपीभूतास्तु बुद्धिमान् । स पूजार्हो भिषक्छ्रेष्ठ इति धन्वन्तरेर्मतम् ।”

तन्त्रवाय(प) पु० तन्यते तन—कर्म्मणि ष्ट्रन् तन्त्रं सूत्रं वयति वपति वा वे-वप-वा अण् उप० स० । (ताँति) ख्याते १सङ्कीर्णजातिभेदे स्त्रियां जातित्वात् ङीष् योपधत्त्वे तु टाप् इति भेदः । तदुत्पत्तिः पराशरपद्धतावुक्ता यथा “ताम्रकुट्याच्छङ्खकार्य्यां मणिकारस्य जायते । मणिकारात् ताम्रकुट्यां मणिबन्धोऽत्र जायते । मणिबन्धान्मणिकार्य्यां तन्त्रवायाश्च जज्ञिरे” । मनकस्त्वचाङ्गिनः । २तन्त्रे (ताँत) आधारे घञ् ६त० । पुंन० शब्दरत्ना० ।

तन्त्रहोम पु० तन्त्रेण होमः । परिसमूहनबर्हिरास्तरणयुक्ते होमे क्षिप्रहोमशब्दे दृश्यम् । तन्त्रमप्यत्र । “अङ्गहोमसमित्तन्त्रशोषन्त्याद्येषु कर्मसु” छन्दोगप० ।

तन्त्रा स्त्री तत्रि—भावे अ । ईषन्निद्रायां तन्द्रायां द्विरूपको० ।

तन्त्रायिन् पु० तन्त्रे कालचक्रे एति गच्छति णिनि ७त० । कालचक्रगामिनि सूर्य्यादौ । “तन्त्रायिणे नमोद्यावापृथिवीभ्याम्” यजु० ३८।१२ तन्यतेऽनेन तन्त्रं पटरचनाय शलाकायुक्तं यन्त्रभेदः तद्वत् भ्रमति कालचक्रमपि तन्त्रमुच्यते” वेददी० ।

तन्त्रिका स्त्री तन्त्र्यते तत्रि-ई ततः स्वार्थे क पूर्वाणो ह्रस्वः। गुडूच्याम्। अमरः।

तन्त्रि स्त्री तत्रि–इ। १तन्त्र्याम् २तन्द्रायां च "अपेततन्त्रिर्धर्म्मात्मा यन्त्रात्मा सत्समयाश्रितः" भा० आनु० १४२अ०।

तन्त्रित त्रि० तन्त्रा तन्द्रा जाताऽस्य तार० इतच्। आलस्ययुक्ते "धार्मिको नित्यभक्तश्च पितुर्नित्यमतन्त्रितः" भा० शा० १२७१२। "गव्यं दीर्घेण कालेन युक्तेनातन्त्रितेन च" भा० आनु० १६२ अ०। "अतन्त्रिता सा स्वयमेव वृक्षकान्" कुमा०।

तन्त्रिपाल पु० सहदेवे तन्तिपालशब्दे दृश्यम्।

तन्त्रिपालक पु० जयद्रथराजे शब्दर०।

तन्त्री स्त्री तत्रि-ई। १वीणागुणे २गुडूच्यां ३देहसिरायां मेदि०। "स ददर्श श्वमांसस्य सुतन्त्रीं विततां मुनिः" भा० शा० १४अ०। ४नदीभेदे ५नाड्यां ६युवतीभेदे शब्दर०। अस्य ङीबन्तत्वाभावेन बहुव्रीहौ स्वाङ्गे नाडीतन्त्र्योः पा० न कप् तदभावेऽपि न ह्रस्वः। बहुतन्त्रीर्ग्रीवा "बहुतन्त्रीर्धमनी" सि०कौ०। स्वाङ्ग इत्युक्तेः बहुतन्त्रीका वीणेत्यादौ कप्। "सप्ततन्त्री प्रथिता सैव वीणा" भा० व० १३४अ०। अस्वाङ्गत्वेऽपि आर्षत्वात् न कप्। ७रज्जौ "न लङ्घयेत् वत्सतन्त्रीम्" मनुः "यस्य वाचा प्रजाः सर्वा गावस्तन्त्येव यन्त्रिताः" भाग० ३।१५।८। ८वीणायाञ्च "कण्डूयमानः सततं लोकानटति चञ्चलः। घट्टयानो नरेन्द्राणां तन्त्रीर्वैराणि चैव ह" हरिवं० ५७अ०।

तन्त्वग्र न० ६त०। तन्तूनामग्रे ततोगह्रा० छ। तन्त्वग्रीय तद्भवादौ त्रि०।

तन्थी(न्थी) अव्य० तम–बा थी। ऊर्य्यादिगणे तन्थीत्यत्र पाठान्तरम् पृषो०। स्वीकारे अभ्युपगमे। गतिसंज्ञकत्वात् समासे तन्थी(न्थी)कृत्य।

तन्द्रा स्त्री तद्रि-भावे अ। १ईषन्निद्रायाम् २आलस्ये च हेमच०। "तमोवातकफात्तन्द्रा" इति वैद्यकम्। तल्लक्षणञ्च "इन्द्रियार्थेष्वसंवित्तिर्गौरवं जृम्भणं क्लमः। निद्रार्त्तस्येव यस्येहा तस्य तन्द्रां विनिर्द्दिशेत्" माधवः "शुचिर्गुरुपचोदक्षस्तन्द्रानिद्राविवर्जितः" "विषयेन्द्रियसंमोषस्तन्द्रालस्यविवर्जनम्" याज्ञ०। निद्रायां प्रबुद्धस्य क्लमाभावः। तन्द्रायां तु प्रबुद्धस्यापि क्लम इत्यनयोर्भेदः। तन्द्रा च दुःखस्य भार्य्या निद्रायाः कन्या प्रीतेर्भगिनी यथाह "निद्राकन्या च तन्द्रा सा प्रीतिस्वसा सुखप्रिये। याभ्यां व्याप्तं जगत्सर्वम्" शब्दार्थचि० धृतवाक्यम् ३पङ्क्तिच्छन्दसि न०। "तन्द्रं छन्दः" यजु० १५।५। तद्रि सादे मोहे च तन्द्रति सीदति स्थानसंकोचेनेति तन्द्रं श्रेणी "पङ्क्तिर्वै तन्द्रं छन्दः" इति श्रुतेः" वेददी०।

तन्द्रयु त्रि० तन्द्रामालस्यं याति या–कु पृषो०। आलस्ययुक्ते "मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानाम्" ऋ० ८।९२।३० "तन्द्रयुरालस्ययुक्तः" भा०।

तन्द्रवाप पु० तन्त्रवाप+पृषो०। तन्त्रवाये शब्दार्थचि०।

तन्द्रालु त्रि० सौ० तद्रि–आलुच्। १ईषन्निद्रायुक्ते २आलस्ययुक्ते च जटाधरः।

तन्द्रि स्त्री सौ० तदि–क्रिन्। १ईषन्निद्रायाम् २आलस्ये च उणादिको० "विभक्तनक्तन्दिवमस्ततन्द्रिणा" किरा०। तद्रि–ई तन्द्रीत्यपि तत्रार्थे अयं न ङीबन्तस्तेन न हल्लोपः। तन्द्रीच अत्यन्तश्रमादिना सर्वाक्षेन्द्रियाप्रभुत्वम्। सर्वाक्षेन्द्रियनिमीलनापादकत्वात् तथात्वम्। "क्षुधा च तन्द्रया च विपन्नतां गतः" रामा० अयो० ८० अ०। "गततन्द्रीक्लमौ वापि व्यपनैतौ महारथौ" २८८अ०। जिततन्द्रीः गततन्द्रीः इत्यादौ ङीबन्तत्वाभावान्न ह्रस्वः न वा कप्।

तन्द्रिज पु० यदुवंश्ये कनवकस्य पुत्रभेदे "तन्द्रिजस्तन्द्रिपालश्च सुतौ कनवकस्य तु" हरिवं ३५ अ०।

तन्द्रित त्रि० तन्द्रा जाताऽस्य तार० इतच्। जातालस्ये "य इदं धारयिष्यन्ति धर्मशास्त्रमतन्द्रिताः" "अतन्द्रिता सा स्वयमेव वृक्षकान्" कुमा०। अतन्त्रितेति पाठान्तरम्।

तन्द्रिपाल पु० यदुवंश्ये कनवकस्य पुत्रभेदे तन्द्रिजशब्दे दृश्यम्

तन्नि स्त्री तन्नयति नी–बा० डि। (चाकुल्या) चक्रकुल्यायां रत्नमाला। तन्विरित्यपि पाठः। पृषो०।

तन्वी स्त्री तनुः कृशा स्त्री गुणवचनोदन्तत्वात् वा ङीष्। १कृशाङ्ग्यां स्त्रियां तनुशब्दे उदा० "अप्रभूतमतनीयसि तन्वी" माघः। २शालपर्ण्यां (शालपान) राजनि०।

तन्मय त्रि० तदात्मकम् तद्+मयट्। तदात्मके "तन्मयं विद्धि मां विप्र! धृतोऽहं येन या च ते" हरिवं १६९ अ०।

तन्मात्र न० तदेव एवार्थे मात्रच् सा मात्रा यस्य वा। सांख्यादिसिद्धेषु शब्दादिषु नत्वेषां शान्तादिविशेषोऽस्ति। यथोक्तं विष्णुपुराणे "तस्मिंस्तस्मिंस्तु तन्मात्रास्तेन तन्मात्रता स्मृता। तन्मात्राण्यविशेषाणि अविशेषास्ततो हि ते। न शान्ता नापि घोरास्ते न मूढाश्चाविशेषिणः" इति। "तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः। एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च" सां० का०।

तन्यतु पु० तनोति शब्दं तमो वा तन-यतुच् । १वायौ २रात्रौ च उज्ज्वल० । स्तन–शब्दे वा० यतुच् सलोपश्च । ३गर्जिते ४अशनौ च माधवः । "न वेपसा न तन्यतेन्द्रम्" ऋ० १।८०।१२ भाष्ये उक्तैव व्युत्पत्तिः । तन्यता गर्जितेन छान्दस उत आच् । "आविष्कृणोमि तन्यतुर्वृष्टिम्" ऋ० उ० । "तन्यतुः पर्जन्यः" भा० ।

तन्यु त्रि० तन+वा० ल्यु न अनादेशः । विस्तृते "रजांसि चित्रा वि चरन्ति तन्यवः" ऋ० १।६४।५ ।

तन्विन् पु० तामसमनोरपत्यभेदे । "तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः" हरिवं० ७ अ० ।

तप उपतापे सक० ऐश्वर्ये अक० दि० आ० अनिट् । तप्यते अतप्त । तेपे तप्ता तप्स्यते तप्तः तप्तिः ।

अव–अधस्तापे । "अवतप्तेनकुलस्थितम्" सि० कौ० ।

आ+सम्यक्तापे । "आतप्तजाम्बूनदभूषिताङ्गः" हरिवं ९अ० ।

अनु+अन्तस्तापे अनुशोचने च । "अनुतप्ये भृशं तात ! तव धीरेण कर्मणा" भा० व० १२७२० श्लो० । "अन्वतप्यत धर्मात्मा पुत्रं संचिन्त्य तापसम्" रामा० अयो० ४ अ० । "वनं प्रस्थाप्य दुष्टात्मा नान्वतप्यत दुर्मतिः" भा० व० २७अ० ।

तप दाहे चु० उभ० सक० सेट् । तापयति-ते अतीतपत्-त । "संप्रत्ययोग्यस्थितिरेष देशः कराहिमांशोरपि तापयन्ति" उद्भटः । "न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया" हितो० "कोऽत्र भूमिवलये जनान् मुधा तापयन् सुचिरमेति सम्पदम्" माघः ।

अव+अधोभागे तापने "अवताप्य पृथिवीं पूषा दिवससंक्षये । जगामास्तं सहस्रांशुः" भा० उ० १८० अ० ।

तप दाहे भ्वा० उभ० सक० सेट् । ज्वलने निरु० तपति-ते अतापीत्-अतपीत् अतपिष्ट । तताप तेपे तपिष्यति ते "वर्षते तपते कोऽन्यो ज्वलते तेजसा च कः" भा० अनु० १४ अ० । "त्वमेकैकस्तपसे जातवेदाः" भा० आ० २२२ अ० "तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च" गीता "तमस्तपति घर्मांशौ" शकु० । तपःकर्मकर्त्तृकेऽस्य कर्त्तर्य्यपि यक् तङ् च तप्यते तपस्तापसः ।

अभि+पर्य्यालोचने "पृथिवीमन्तरिक्षं दिवं ताल्लोँकानभ्यतपत्" ऐत० ब्रा० अभ्यतपत् पर्य्यालोचितवान् ।

उद्+दीप्तौ अक० आत्म० स्वाङ्गकर्मकत्वे सक० आत्म० "उत्तपते दीप्यते इत्यर्थः" सि० कौ० । पाणिमुत्तपते । स्वाङ्गेत्युक्तेः प० मैत्रस्य पाणिमुत्तपति" अन्यकर्मणि तु प० । उत्तपति सुवर्णं विलापयतीत्यर्थः" सि० कौ० ।

"तीव्रमुत्तपमानोऽयमशक्यः सोढुमातपः" भट्टिः । "करणं कुसुमेषुरुत्तपति यद्विशिखः" माघः ।

उप+पीडाजन्यतापे "आहिताग्निश्चेदुपतपेत्" आश्व० श्रौ० ४।१।१। उपतपेत् व्याधिभिरुत्पीड्येतेत्यर्थः ।

नि+नितरां तापे । "तदाहुर्निशोचति नितपति वर्षिष्यति वा" छा० उ० ।

निस्+निःशेषेण तापे पौनः पुन्य न तापे षत्वम् । "दग्धैकदेशा बहवो निष्टप्ताश्च तथापरे" भा० आ० २२६ अ० । निष्टपति सुवर्णम् आसेवने तु न षत्वं निस्तपति सुवर्णं सुवर्णकारः । "यस्तु सूर्य्येण निष्टप्तं गाङ्गेयं पिबते जलम्" भा० आनु० २२६ अ० । षत्वे उभयत्रका ग्रहणम् ।

प्र+प्रकर्षेण तापे विक्रमहेतुके तापे च "भासस्तवोग्राः प्रतपन्ति विष्णो !" गीता "सूर्य्यः प्रतपतां श्रेष्ठः" भा० वि० ४२ श्लो० "भास्करात प्रतपिष्यतः" भा० व० १९० अ० "द्वितीयस्येव सूर्य्यस्य युगान्ते प्रतपिष्यतः" भा० व० २२ अ० ।

वि+उत्तापवत् सर्वम् । "रविर्वितपतेऽत्यर्थम्" भट्टिः दीप्यते इत्यर्थः पाणिं वितपते मैत्रस्य पाणिं वितपति सुवर्णं वितपतीत्यादि । "वितपन्नरातिम्" अथ० १२।२।४५ ।

सम्+सम्यक्तापे । "दृष्ट्वापि च घनं काले सन्तपत्युपकारिणे" भा० शा० १६४ अ० ।

तप पु० तप-अच् । १ग्रीष्मे ज्यैष्ठाषाढात्मके ऋतौ अमरः । "तपेन वर्षाः शरदा हिमागमः" माघः । "तपर्तुपूर्त्तावपि मेदसां भराः" नैष० "तपात्यये वारिभिरुक्षिता नवैः" कुमा० । किञ्चित् कर्म्मोपपदे तापेः खच् मुमश्च २तत्तापके परन्तपः भावे अप् । ३तपसि च "अप्रमृष्टा निरशना दशपञ्चतपा इमे" हरिवं ४६ अ० ।

तपः(स्क)कार त्रि० तपः करोति अच् सा विसर्गस्य सः । १तपःकारके (तपसी) २मत्स्यभेदे पुंस्त्री शब्दरत्ना० । स्त्रियां जातित्वात् ङीष् ।

तपःक्लेशसह त्रि० तपसः क्लेशं सहते सह–अच् । इन्द्रियसंयमादिकारके तपस्विनि अमरः ।

तपःस्थली स्त्री ६त० । १काश्यां त्रिका० । २तपस्यास्थलमात्रे च

तपती स्त्री । सूर्य्यस्य कन्यायां संवरणनृपस्य भार्य्यायां कुरुराजमातरि । "ततः संवरणात् सौरी तपती सुषुवे कुरुम्" भा० आ० ९४ अ० । "संवरणः खलु वैवस्वतीं तपतीं नामोपयेमे तस्यामस्य जज्ञे कुरुः" ९५ अ० । १७१ अ० । तत्कथा "अर्जुन उवाच तापत्य इति यद्वाक्यमुक्तवा-

नहि मामिह । तदहं श्रोतुमिच्छामि तापत्यार्थविनिश्चयम् । तपती नाम का चैषा तापत्या यत्कृते वयम् । कौन्तेया हि वयं साधो ! तत्त्वमिच्छामि वेदितुम् । वैशम्पायन उवाच । एवमुक्तः स गन्धर्वः कुन्तीपुत्रं धनञ्जयम् । विश्रुतां त्रिषु लोकेषु श्रावयामास वै कथाम् । गन्धर्व उवाच । हन्त ते कथयिष्यामि कथामेतां मनोरमाम् । यथावदखिलां पार्थ ! सर्वबुद्धिमतांवर ! । उक्तवानस्मि येन त्वां तापत्या इति यद्वचः” ।

“य एष दिवि धिष्ण्येन नाकं व्याप्नोति तेजसा । एतस्य तपती नाम बभूव सदृशी सुता । विवस्वतो वै देवस्य सावित्र्यवरजा विभोः । विश्रुता त्रिषु लोकेषु तपती तपसा युता । न देवी नासुरी चैव न यक्षी न च राक्षसी । नाप्सरा न च गन्धर्वी तथा रूपेण काचन । सुविभक्तानवद्याङ्गी स्वसितायतलोचना । स्वाचारा चैव साध्वी च सुवेशा चैव भामिनी । न तस्याः सदृशं किञ्चित् त्रिषु लोकेषु भारत ! । भर्त्तारं सविता मेने रूपशीलगुणश्रुतैः । सम्प्राप्तयौवनां पश्यन् देयां दुहितरन्तु ताम् । नोपलेभे ततः शान्तिं सम्प्रदानं विचिन्तयन् । अथर्क्षपुत्रः कौन्तेय ! कुरूणामृषभो बली । सूर्य्यमाराधयामास नृपः संवरणस्तदा । अर्घ्यमाल्योपहारादैर्गन्धैश्च नियतः शुचिः । नियमैरुपवासैश्च तपोभिर्विविधैरपि । शुश्रूषुरनहंवादी शुचिः पौरवनन्दनः । अंशुमन्तं समुद्यन्तं पूजयामास भक्तिमान् । ततः कृतज्ञं धर्मज्ञं रूपेण सदृशं भुवि । तपत्याः सदृशं मेने सूर्य्यः संवरणं पतिम् । दातुमैच्छत्ततः कन्यां तस्मै संवरणाय ताम् । नृपोत्तमाय कौरव्य ! विश्रुताभिजनाय च” । भा० आ० १७१ अ० ।

तपन पु० तप–ल्यु । १सूर्य्ये २भल्लातकवृक्षे । ३अग्न्यादीदाहयुक्ते नरकभेदे ४ग्रीष्मे च हेम० । ५अर्कवृक्षे ६क्षुद्राग्निमन्थवृक्षे ७सूर्य्यकान्तमणौ च राजनि० । “पञ्चमः पञ्चतपसां तपनो जातवेदसाम्” माघः । स्त्रीणां यौवने ८सत्त्वजातालङ्कारभेदे न० सा० द० । अल- ‘‘यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः । अलङ्काराः इत्युपक्रमे ‘‘विहृतं तपनं मौग्ध्यम्” इत्यादिना विभज्य “तपनं प्रियविच्छेदे स्मरावेगोऽथ चेष्टितमिति” लक्षितम् । ९अग्निभेदे पु० “ते जातवेदसः सर्वे कल्माषः कुसुमस्तथा । दहनः शोषणश्चैव तपनश्च महाबलः । स्वाहाकारस्य विषये विख्याताः पञ्च वह्नयः” हरिवं १८० अ० । १०शिवे पु० । ‘‘यज्ञवाहाय दान्ताय तप्याय तपनाय च” भा० शा० २८६ अ० शिवस्तुतिः भावे ल्युट् । ११तापेन० धरणिः ।

तपच्छद पु० तपनप्रियः छदोऽस्य । दमनकवृक्षे राजनि०

तपनतनय पु० ६त० । १यमे २यमुनायां, ३शमीवृक्षे च स्त्री राजनि० । ४कर्णे ५सुग्रीवे च पु० तपनसुतादयोऽप्यत्र ।

तपनमणि पु० तपनतेजस्को मणिः । सूर्य्यकान्तमणौ राजनि०

तपनात्मजा स्त्री ६त० । १गोदावरीनद्यां हेम० । २यमुनायां च । ३यमे ४कर्णे ५सुग्रीवे च पु० । [नद्यां हेमच० ।

तपनी स्त्री तप्यते पापमनया तप–ल्युट् ङीप् । गोदावर्य्यां

तपनीय न० तप–अनीयर् । १स्वर्णे कनकधुस्तूरे च अमरः । ‘‘भस्मानि तु तपनीयसंक्रमस्य” माघः । “असंस्पृशन्तौ तपनीयपीठम्” रघुः । स्वार्थे क । तपनीयक सुवर्णे राजनि० ।

तपनेष्ट न० ६त० । ताम्रे धातौ राजनि० । तद्धातोः सूर्य्यप्रियत्वात् तथात्वम् ।

तपस् न० तप–असुन् । आलोचनात्मके ईश्वरज्ञानभेदे अन्तर्य्यामिब्राह्मणभाष्ये दृश्यम् । २लग्नावधिकनवमस्थाने ज्यो० ३स्वाश्रमविहितकर्म्मणि ४वैधक्लेशजनके कर्म्मणि । “तपोनानशनात्परम्” । ५क्षुत्पिपासाशीतोष्णादिद्वन्द्वसहने । ६चित्तप्रसादहेतुभूते व्रतनियमोपासनादिकर्म्मणि । ७मौनादिव्रते” ८कायेन्द्रियमनसां समाधाने ९शास्त्रीयमार्गेण कायेन्द्रियमनसां शोषणे । १०कृच्छ्रचान्द्रायणप्राजापत्यादिरूपे प्रायश्चित्ते । ११शास्त्रविहिततप्तशिलारोहणादौ । १२वानप्रस्थस्यासाधारणधर्म्मे । तपश्च शारीरादिभेदात् त्रिविधम् यथाह “देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् । ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते । अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत् । स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते । मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः । भावसंशुद्धिरित्येतत् तपोमानसमुच्यते” गीता । तदपि सात्त्विकादि भेदात् त्रिविधम् यथाह “श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः । अफलाकाङ्क्षिभिर्युक्तं सात्त्विकं परिचक्षते । सत्कारमानपूजार्थं तपोदम्भेन चैव यत् । क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम् । मूढ़ग्राहेणात्मनो यत् पीड़या क्रियते तपः । परस्योत्सादनार्थं वा तत् तामसमुदाहृतमिति” गीता । १३मनइन्द्रियाणामैकाग्र्ये “मनसश्चेन्द्रियाणाञ्च ह्यैकाग्र्यं परमन्तपः” इत्युक्तेः १४जनोलोकादूर्द्ध्वस्थे लोकभेदे । “तस्योपरि तपो-

लोकस्तेजोमय उदाहृतः। वैराजा यत्र ते देवा यसैर्युद्धैश्च पूजिताः। वासुदेवे मनो येषां वासुदेवार्पितक्रियाः। तपसा तोष्य गोविन्दमभिलाषविवर्जिताः। ते तपोलोकमासाद्य वसन्ति विजितेन्द्रियाः। शिलोञ्छवृत्तयो ये वै दन्तोलूखलिकाश्च ये। येऽश्मकुट्टाश्च मुनयः शीर्णपर्णाशिनश्च ये। ग्रीष्मे पञ्चाग्नितपसो वर्षासु स्थण्डिलेशयाः। हेमन्ते शिशिरे वा ये शयन्ति सलिले जपाः। कुशाग्रनीरबिन्दूंश्च तर्पिता यतयोऽपिबन्। वाताशिनोऽतिक्षुधिताः पादाङ्गुष्ठाग्रभूस्पृशः। ऊर्द्ध्वहस्ता रविदृशस्त्वेकाचिस्थाननिश्चलाः। ये वै दिवा निरुच्छ्वासा मासोच्छ्वासाश्च ये परे। मासोपवासं कुर्वन्ति चातुर्मास्यव्रताश्च ये। कल्पान्ते सोमपाना ये ये षण्मासोपवासकाः। ये च वर्षनिमेषा वै वर्षधारास्वतर्पकाः। स्थाणुसाम्योदसंप्राप्ता मृगकण्डूतिसौख्यदाः। जटाटवीकोटरान्तःकृतनीडाण्डजाश्च ये। प्ररूढवल्मीकाङ्गाश्च स्नायुनद्धास्थिसञ्चयाः। लताप्रतानैः परितो वेष्टितावयवाश्च ये। शस्यानि च प्ररूढानि यदङ्गेषु महीपते। इत्येतैर्नियमैर्ये तु क्लिष्टात्मानस्तपोधनाः। ब्रह्मायुषस्तपोलोके ते वसन्त्यकुतोभयाः"। १५माघे मासि "तपाश्च तपस्यश्च शैशिरावृतू" यजु० २७।२४ "तपसे त्वा" यजुः ७।३०। तपसे माघाय। तपसि सूर्य्यो यत्र असन् तपाः" वेददी०। तत्र हि उत्तरायणप्रवृत्तौ रवेः प्रखरकरता अतएवाह "मकरे प्रखरो रविः"। १६धर्म्मे "विनाप्यस्मदलं भूष्णुरिज्यायै तपसः सुतः" माघः १७नियमे "समाधिमास्थाय तपोभिरात्मनः" निशम्य चैनां तपसे कृतोद्यमाम्" "तपः क्व वत्से क्व च तावकं वपुः" कुमा० "तपसा किल्विषं हन्ति विद्ययाऽमृतमश्नुते" वेदान्तप०। "तमेतं ब्राह्मणा विविदिषन्ति वेदानुवचनेन यज्ञेन तपसा नाशकेन" श्रुतिः। "ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम्। वैश्यस्य तु तपोवार्त्ता तपः शूद्रस्य सेवनम्" मनुः तपश्च योगसाधनं क्रियायोगभेदः यथोक्तं पात०सू० भाष्यविवरणेषु "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" सू०। "नातपस्विनो योगः सिद्ध्यति अनादिकर्म्मक्लेशवासनाचित्रा प्रत्युपस्थितविषयजाला चाशुद्धिः नान्तरेण तपःसम्भेदमापद्यते इति तपस उपादानं तच्चित्तप्रसादनमबाधमानमनेनासेव्यमिति मन्यते" भा०। "व्यतिरेकमुखेन तपस उपायत्वमाह नातपस्विन इति तपसोऽवान्तरव्यापारमुपायोपयोगिनं दर्शयति अनादिकर्म्मेति। अनादिभ्यां कर्म्मक्लेशवासनाभ्यां चित्रा अतएव प्रत्युपस्थितमुपनतं विषयजालं यस्यां सा तथोक्ता। अशुद्धी रजस्तमःसमुद्रेको नान्तरेण तपःसम्भेदमापद्यते सान्द्रस्य नितान्तविरलता सम्भेदः ननूपादीयमानमपि तपो धातुवैषम्यहेतुतया योगप्रतिपक्ष इति कथं तदुपाय इति। अत आह। तच्चेति तावन्मात्रमेव तपश्चरणीयं न यावता धातुवैषम्यमापद्यत इत्यर्थः" विवरणम्। १८अग्नौ तपोजाः।

तपस पु० तप–असच्। १सूर्य्ये २चन्द्रे त्रिका०। ३खगे शि०को०

तपसोमूर्त्ति पु० चतुर्थमन्वन्तरे आङ्गिरसे सप्तर्षिभेदे तपोधृतिशब्दे दृश्यम्। [तस्य इतरतपस्याद्वेषित्वात् तथात्वम्।

तपस्तक्ष पु० तपस्तक्ष्णोति तक्ष–अण् उप० स०। इन्द्रे हेमच०।

तपस्य तपः करोति तपस्+कृतौ क्यच् अक० सेट्। तपस्यति अतपस्यीत् अतपसीत् तपस्या। "स्थाणुं तपस्यन्तमधित्यकायाम्" कुमा०।

तपस्य पु० तपसि साधु यत्। १फाल्गुने मासि अमरः। "तपाश्च तपस्यश्च शैशिरावृतूः यजु० १५।५७ "तपस्याय त्वा" ७।३०। २अर्जुने तस्य फाल्गुननामकत्वात् तथात्वम्। भावे अ। तपस्या। ३तपश्चर्य्यायां स्त्री। तपसि भवः यत्। ४तपोभवे त्रि० "स्विद्यासेत् तपस्याभ्योऽङ्गाः काष्ठा' कात्या० श्रौ० २५।११।२८। तपस्य–भावे घञ्। ५तपश्चरणे पु०। "अथास्य बुद्धिरभवत्तपस्ये भरतर्षभ"! भा० आनु० ८अ०। तामसस्य मनोः ६पुत्रभेदे पु० "पुत्रांश्चैव प्रवक्ष्यामि तामसस्य मनोर्नृप! कृतिस्तपस्यः सुतपास्तपोमूलस्तपोऽशनः। तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः" हरिवं० ७अ०।

तपस्यामत्स्य पु० स्त्री (तपसी)। मत्स्यभेदे शब्दर०।

तपस्विन् त्रि० तपस्+अस्त्यर्थे विनि। १तापसे, २चान्द्रायणादिव्रतधारिणि, ३अनुकम्प्ये, ४दीने ५प्रशस्ततपोयुक्ते च। स्त्रियां ङीप् "किं किं व्यवस्यति न वेद्मि तपस्विनी सा" सा० द०। "नवप्रसूतिर्वरटा तपस्विनी" नैष०। "कस्तपस्विविशिखेषु चादरः" किरा०। "पूर्य्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः" रघुः "तपस्विभ्योऽधिको योगी" गीता ६नारदे पु० शब्दरत्ना० ७तपस्यामत्स्यभेदे शब्दर०। ८घृतकरञ्जवृक्षे पु० ९चटके पुंस्त्री राजनि० स्त्रियां जातित्वात् ङीष्। १०जटामांस्यां ११कटुरोहिण्यां स्त्री हेमच० गौ० ङीष्। १२महाश्रावणिकायां स्त्री भावप्र० हरिवंशोक्ते चतुर्थमन्वन्तरे काश्यपे १३ऋषिभेदे तपोधृतिशब्दे प्रमाणं दृश्यम्।

भागवतोक्ते द्वादशमन्वन्तरे १४सप्तर्षिभेदे तपोमूर्त्तिशब्दे प्रमाणं दृश्यम् ।

तपस्विपत्र पु० तपस्विप्रियं पत्रमस्य । दमनकवृक्षे राजनि० ।

तपात्यय पु० तपस्य ग्रीष्मस्यात्ययोऽवसानं यत्र काले । १वर्षाकाले "तपात्यये वारिभिरुक्षिता नवैः" । कुमा० । "तपात्यये पुष्पफलैरुपेतं महावनं राष्ट्रपतिर्ददर्श" भा० व० २४ अ० । ६त० । २ग्रीष्मस्यावसाने च ।

तपान्त पु० तपस्यान्तो यत्र । १वर्षाकाले "ववर्ष शरवर्षेण तपान्ते जलदो यथा" भा० भी० ५४ अ० । ६त० । २ग्रीष्मस्यावसाने च ।

तपित त्रि० भ्वा० तप–दाहे क्त । तप्ते द्विरूपकोषः ।

तपिनी स्त्री नदीभेदे शब्दार्थचि० ।

तपिष्ठ त्रि० अतिशयेन तप्ता तप्तृ+इष्ठन् तृणोलोपः । अतिशयेन तापके । "तपिष्ठेन शोचिषा यः सुराधाः" ऋ० ४।५।४।

तपिष्णु त्रि० तप–बा० इष्णुच् । तापकर्त्तरि तपने । "महता तपसा देवस्तपिष्णुः सेवितो मया । प्रीतेन चाहं विभुना स्वयं प्रोक्तस्तथाऽनघ !" भा० शा० ३२० अ० ।

तपीयस् त्रि० अतिशयेन तप्ता तप्तृ+ईयसुन् तृणोलोपः । १भृशं तप्तरि २तपस्याकारके "अतप्यतास्मिन् किल लोकतापनं तपस्तपीयांस्तपतां समाहितः" भाग० २।९।९।

तपु त्रि० तप–उन् । १तापके "तपोष्पवित्रं विततं दिवस्पदे" ऋ० ९।८३।२ "तपोः शत्रूणां तापकस्य" भा० । २तापयुक्ते ३तप्ते च । "तपुर्ययुस्तु चरुरग्निवाँ इव" ऋ० ७।१०४।२ तपुस्तप्तः" भा०

तपुषि त्रि० तप–उसिन् वेदे नेकारस्य इत् । तापके । "ब्रह्मद्विषे तपुषिं हेतिमस्य" ऋ० ३।३०।१७;६।५२।३। "तपुषिस्तपतेर्हेतिर्हन्तेः" निरु० ६।२ स्त्रियां कृदिकारान्तत्वात् वा ङीप् । २क्रोधे स्त्री निघण्टुः । क्रोधस्य चित्ततापकत्वात् तथात्वम् ।

तपुस् पु० तप–उसि । १सूर्य्ये २अग्नौ च उणा० । ३तापयुक्ते ४तापये च त्रि० । "तपुर्जम्भ ! यो अस्मध्रुक्" ऋ० १।३६।१६ हे तपुर्जम्भ ! तप्यमानरश्मियुक्त ! अग्ने !" भा० "तपुरग्राभिरृष्टिभिः । १०।८७।२३। "तपुरग्राभिस्तपनशीलाग्राभिः" भा० "तपूंषि तस्मै वृजिनानि सन्तु" ऋ० ६।५२।२

तपोज त्रि० तपसः तपस्यातः अग्नेर्वा जायते जन–ड । १तपस्याजाते २अग्निजाते अप्सु स्त्री । "ऋषींस्तपस्वतो यम तपोजा अपि गच्छतात्" ऋ० १०।१५४।५ "वाचो बन्धुस्तपोजाः" यजु० १०।६ "वाचो बन्धुः वाचया बन्धुभूताः "यावद्वै प्राणेष्वापो भवन्ति तावद्वाचा वदतीति" श्रुतेः "आपोमयी वागिति" सामश्रुतेश्च । तथा तपोजा तपःशब्देनात्राग्निरुच्यते तपसोऽग्नेर्जातास्तपोजाः "अग्नेर्वै धूमो जायते धूमादभ्रमभ्राद्वृष्टिरग्नेर्वा एता जायन्ते तस्मादाह तपोजाः" इति श्रुतेः "वायोरग्निरग्नेरापः" इति शत०ब्रा० ५।३।५।१७। श्रुत्यन्तरात्" वेददी० ।

तपोदान न० तप इव दानमत्र । तीर्थभेदे । "पुण्यतीर्थेषु कलिङ्गं कुरुक्षेत्रं प्रकीर्त्तितम् । सिन्धूत्तमस्तपोदानं जम्बुमार्गमथापि च" भा० आनु० १६५ अ० ।

तपोधन त्रि० तपोधनं यस्य । तपोमात्रकारके १तपस्विनि । "तपोधनाभ्यागमसम्भवा मुदः" माघः तत्प्रियत्वात् २दमनकवृक्षे पु० राजनि० । ३मुण्डीरीवृक्षे स्त्री मेदि० । तप एव धनम् । ४तपोरूपधने न० । "यत्तु तावदतिक्रान्तं धर्मद्वारं तपोधनम्" । भा०आनु०५२अ० । तपोधनं मूल्यं यस्य । ५तपसा लभ्ये स्वर्गादौ त्रि० "सर्वरत्नवरः स्वर्गे पारिजातस्तपोधनः" हरिवं० १२८ अ० ।

तपोधृति पु० तपसि धृतिःसन्तोषो यस्य । १तपोरते तपस्विनि चतुर्थमन्वन्तरे २भार्गवे सप्तर्षिभेदे "चतुर्थे चैव सावर्णे ऋषीन् सप्त निबोध मे" इत्युपक्रमे "द्युतिर्वसिष्ठपुत्रश्च आत्रेयः सुतपास्तथा । आङ्गिरास्तपसोमूर्त्तिस्तपस्वी काश्यपस्तथा । तपोऽशनश्च पौलस्त्यः पौलहश्च तपोरविः । भार्गवः सप्तमस्तेषां विज्ञेयस्तु तपोधृतिः" हरिवं० ७ अ० ।

तपोनिधि पु० तपो निधीयतेऽस्मिन् नि+धा–आधारे कि उप० स० तपोनिधिरिव यस्य वा । तपोधने तपस्विनि "विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिम्" रघुः । "पतत्पतङ्गप्रतिमस्तपोनिधिः" माघः ।

तपोभृत् त्रि० तपो बिभर्त्ति भृ–क्विप् तुक् च ६त० । तपोधारके "स्वर्गो तपोभृतां राजन् ! फलं पुण्यस्य कर्मणः" हरिवं० ८अ० ।

तपोमय त्रि० तपःप्रचुरः तपःस्रष्टव्यपदार्थालोचनं तदात्मको वा तपस्+मयट् । १तपःप्रचुरे २स्रष्टव्यपदार्थालोचनात्मके परमेश्वरे पु० । "त्रयीमयो धर्ममयस्तपोमयः" भाग० २।४।१९। स्त्रियां ङीप् । "प्रविश्य वदरीं पुण्यां मुनिजुष्टां तपोमयीम्" हरिवं० २६४ अ० । "उपर्युपरि तत्रापि गतिस्तव तपोमयी" ७६ अ० ।

तपोमूर्त्ति पु० तपः आलोचनभेद एव मूर्त्तिरस्य, तपःप्रधाना मूर्त्तिरस्य वा । १परमेश्वरे २तपस्विनि च । रुद्रसावर्णिरूपतामसमन्वन्तरे सप्तर्षिमध्ये ३ऋषिभेदे च "ऋषयस्तु तपोमूर्त्तिस्तपस्व्यग्नीध्रकादयः" भाग०८।१३।१३

तपोमूल त्रि० तपो मूलमस्य । १तपोहेतुके स्वर्गादौ तामसस्य मनोः २पुत्रभेदे पु० तपस्यशब्दे दृश्यम् ।

तपोरति त्रि० तपसि रतिरस्य । १तपःपरायणे तामसमनोः पुत्रभेदे पु० तपस्यशब्दे दृश्यम् ।

तपोरवि पु० तपसा रविरिव । १सूर्यतुल्यतेजोयुक्ततपस्के चतुर्थमन्वन्तरे पौलहे सप्तर्षिभेदे तपोधृतिशब्दे दृश्यम् ।

तपोलोक पु० तपोनाम लोकः । ऊर्द्ध्वस्थेषु सप्तसु लोकेषु भवनभेदे तपःशब्दे दृश्यम् । स च भूमेश्चतुष्कोटि योजनोपरि वर्त्तते । "चतुःकोटिप्रमाणं तु तपोलोकोऽस्ति भूतलात् । उपरिष्टात् क्षितेरष्टौ कोटयः सत्यमीरितम्" काशीख० २३ अ० उक्तेः । स च विराट्पुरुषस्य स्तनद्वयरूपेण कल्पितः यथाह भाग० २।४। ३६। "भूर्लोकः कल्पितः पद्भ्यां भुवोलोकोऽस्य नाभितः । हृदा स्वर्लोक उरसा महर्लोको महात्मनः । ग्रीवायां जनलोकोऽस्य तपोलोकः स्तनद्वयात् । मूर्द्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः" ।

तपोऽवट पु० तपसोऽवट इव । ब्रह्मावर्त्तदेशे त्रिका० ।

तपोवन न० ६त० । १तापससेव्ये वनभेदे, "वधूर्भक्तिमती चैनामर्चितामातपोवनात्" तपोवमावृत्तिपथं गताभ्याम्" रघुः । २तन्नामके तीर्थभेदे च ।

तपोऽशन पु० चतुर्थमन्वन्तरे सप्तर्षिमध्ये पौलस्त्ये १ऋषिभेदे तपोधृतिशब्दे दृश्यम् । २तामसस्य मनोः पुत्रभेदे तपस्यशब्दे दृश्यम् ।

तप्त त्रि० तप—क्त । १दग्धे २तापयुक्ते च हेमच० । "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति" श्रुतिः । "स तप्तकार्त्तस्वरभास्वराम्बरः" माघः ।

तप्तकाञ्चन न० कर्म० । अग्निसंयोगभेदेन विमले काञ्चने । "तप्तकाञ्चनवर्णाभां सुप्रतिष्ठां सुलोचनाम्" दुर्गाध्यानम् ।

तप्तकुम्भ पु० तप्तः कुम्भो यत्र । नरकभेदे तत्स्वरूपं यथा "अतःपरं भीमतरं तप्तकुम्भं निबोध मे । समन्ततस्तप्तकुम्भो वह्निज्वालासमावृतः । ज्वलदग्निचयोद्वृत्त तैलायश्चूर्णपूरितः" मार्क० पु० ।

तप्तकृच्छ्र न० "षट्पलन्तु पिबेदम्भस्त्रिपलन्तु पयः पिबेत् । पलमेकं पिबेत् सर्पिस्तप्तकृच्छ्रं विधीयते" इत्युक्ते व्रतभेदे, "पयोघृतमुदकं वायुं तप्तं प्रतित्र्यहं पिबेत् स तप्तकृच्छ्र इति गौतमोक्तेः पुंस्त्वमपि । "तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान् । प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः" मनुः । तप्तानिलपानन्तु तप्तक्षीरवाष्पपानम् । एतद्द्वादशाहसाध्यम् । जलादिपरिमाणमुक्तं ब्रह्मपुराणे "तप्तकृच्छ्रं व्रतं कुर्वन् त्र्यहं सायं पिबेच्छुचिः । षट्पलानि सुतप्तस्य तोयस्य सुसमाहितः । प्रभाते त्रीणि दुग्धस्य सुतप्तस्य पिबेत् त्र्यहम् । पानं घृतस्य तप्तस्य मध्याह्ने त्रिदिनं पिबेत् । वायुभक्षस्त्र्यहं चान्यं निर्दहेत् पातकं द्विजः" याज्ञवल्क्यः । "तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत् । एकरात्रोपवासस्तु तप्तकृच्छ्रस्य साधनः" एतच्चतुरहसाध्यं तप्तकृच्छ्रम् प्रा० वि० ।

तप्तपाषाणकुण्ड पु० नरकभेदे नरकशब्दे दृश्यम् ।

तप्तमाष पु० तप्तं माषमितं सुवर्णादिकं यत्र । दिव्यभेदे । तद्विधिः वीरमित्रोदये दर्शितो यथा तत्र पितामहः "तप्तमाषस्य वक्ष्यामि विधिमुद्धरणे शुभम् । कारयेदायसम्पात्रं ताम्रं वा षोड़शाङ्गुलम् । चतुरङ्गुलखातन्तु मृण्मयं वापि मण्डलम्" । कर्षषोड़शांशप्रमितं मण्डलं सूर्यमण्डलाकारं वर्त्तुलमिति यावत् । एतादृशं पात्रं घृततैलाभ्यां पूरयेदित्याह स एव "पूरयेद्घृततैलाभ्यां पलैर्विंशतिभिस्तु तत् । सुवर्णं माषकन्तस्मिन् सुतप्ते निःक्षिपेत्ततः । अङ्गुष्ठाङ्गुलिमूलेन तप्तमाषकमुद्धरेत्" इति । सुवर्णमाषकं कर्षषोड़शांशप्रमाणम् । सुवर्णग्रहणं रूप्यमाषनिवृत्त्यर्थम् । तन्माषपरिमितं हिरण्यं ताम्रं वा पिण्डीकृत्य निःक्षिपेत् । अङ्गुष्ठाङ्गुलिमूलेन अङ्गुष्ठतर्जनीमध्यमाभिरित्यर्थः । इदञ्च तप्तमाषोद्धरणम् प्राड्विवाकेन घृततैलयोस्तापे समारब्धे धर्मावाहनादिशोध्यशिरःपत्रारोपणान्तं सर्वसाधारणं कर्म विधाय "त्वमग्ने ! वेदाश्चत्वारः" इत्यादिना अग्निदिव्यप्रकरणोक्तेन मन्त्रेणाभिमन्त्र्य कारयितव्यम् शोध्यस्तु याज्ञवल्क्योक्तेन "त्वमग्ने ! सर्वभूतानामित्यादि" मन्त्रेणाभिमन्त्र्य तप्तमाषमुद्धरेत् । अतएव वृहस्पतिः "समुद्धरेत्तैलघृतात् सुतप्तात्तप्तमाषकमिति" । कल्पान्तरमाह स एव "सौवर्णे राजते ताम्रे वायसे मृण्मयेऽपि वा । गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः । सौवर्णीं राजतीं ताम्रीमायसीं वा सुशोभनाम् । सलिलेन सकृद्धौतां प्रक्षिपे-

स्तत मुद्रिकाम्। भ्रमदोचितरङ्गाद्यो ज्ञानखसर्गगोचरे। परीक्षेदार्द्रपर्णेन चटत्कारसवोषकमिति"। ततः प्राङ्गिराको धर्मोशाह्वनादिपत्रारोपणान्तं साधारणं कर्म कृत्वा घृतमभिमन्त्रयेत्। मन्त्रस्तु तेनैव दर्शितः "ततश्चानेन मन्त्रेण सकृत्तदभिमन्त्रयेत्। परं पवित्रममृतं घृत! त्वं यज्ञकर्मसु। दह पावक! पापं त्वं हिमशीतो भवेति च"। ततः प्राड्विपाकः शोध्येन "त्वमग्ने! सर्वभूतानामित्यादि मन्त्रेणाभिमन्त्रणं कारयित्वा मुद्रिकां ग्राहयेदित्याह स एव "उपोषितस्ततः स्नातमार्द्रवासःसमाहृतम्। ग्राहयेन्मुद्रिकान्तान्तु घृतमध्यगतान्तथा। प्रदेशिनीं च तस्याथ परीक्षेयुः परीक्षकाः" इति। अत्र तर्जन्यैव मुद्रिकोद्धरणं कार्य्यं तस्याः परीक्षाभिधानात् पक्षद्वयेऽपि शुद्ध्यवधारणोपायं बृहस्पतिराह "कराग्रं योन धुनुयात् विस्फोटो वा न जायते। शुद्धो भवति धर्मेण पितामहवचो यथेति"। कालिकापुराणेऽपि "न धुनेयुः करायन्तु यस्य रक्तं न जायते। विस्फोटाद्यैस्तथा दोषैः स शुद्धो यस्य नोद्गतमिति"। रक्तं रक्तवर्णम्। यस्य कराग्रं विस्फोटाद्यैर्नोद्गतमित्यन्वयः। पितामहोऽपि "यस्य विस्फोटका न स्युः शुद्धोऽसावन्यथाऽशुचिरिति"।

तण्डुलपरीक्षाशब्दे अधिकं दृश्यम्।

तप्तमुद्रा स्त्री वैष्णवैः शरीरधार्य्येऽग्नितप्तधातुमयमुद्राङ्कितभगवदायुधचिह्ने तद्विधिः हरिभक्तिविलासे १५ विलासे। "आषाढ़शुक्लद्वादश्यां हरौ शिशयिषौ सति। वैष्णवः पारणं कृत्वा तप्तमुद्राश्च धारयेत्। ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैकान्तितद्धये। कुर्व्वन्नात्मार्पणं तप्तमुद्राभिर्देहमङ्कयेत्"। तप्तमुद्राधारणं साराहे तप्तमुद्राप्रसङ्गे "चक्रादिधारणं पुंसां परं सम्बन्धवेदनम्। पातिव्रत्यनिमित्तं हि वलयादिविभूषणमिति"। तप्तमुद्राधारणफलं वायुपुराणे "अग्निनैव च सन्तप्तं चक्रमादाय वैष्णवः। धारयेत् सर्ववर्णानां हरिसालोक्यसिद्धये"। ब्रह्माण्डे "कृत्वा धातुमयीं मुद्रां तापयित्वा स्विकां तनूम्। चक्रादिचिह्नितां भूप धारयेद्वैष्णवो नरः"। नारदीयपञ्चरात्रे "द्वादशारन्तु षट्कोणं वलयत्रयसंयुतम्। हरेः सुदर्शनं तप्तं धारयेत्तु विचक्षणः। सौपर्णे च श्रीभगवद्गरुड़संवादे तप्तमुद्राप्रकरणे "गरुत्मन्विशेषेण सर्ववर्णेष्वयं विधिः। विप्रो वा क्षत्रियोवापि वैश्यः शूद्रस्तथैव च"। पाद्मे "अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा। ब्राह्मणस्य तथैवेदं तप्तचक्रादिधारणम्"। किञ्च तत्रैवोत्तरखण्डे श्री शिवोमासंवादे "शङ्खचक्राङ्कनं कुर्य्यादुब्राह्मणो बाहुमूलयोः। हुताग्निनैव सन्तप्य सर्वपापापनुत्तये"। "चक्रं वा शङ्खचक्रे वा तथा पञ्चायुधानि वा। धारयित्वैव विधिवद्ब्रह्मकर्म समारभेत्"। तदकरणे निन्दा तत्रैव "अधृत्वा विधिना चक्रं ब्राह्मणः प्राकृतो भवेत्। न तस्य किञ्चिदश्रौषीदपि क्रतुसहस्रिणः। सर्ववेदविदोऽपि सर्वशास्त्रविशारदः। अधृत्वा विधिना चक्रं ब्राह्मणः पतितो भवेत्। तप्तेनैवाङ्कनं कुर्य्यात् ब्राह्मणस्य विधानतः। श्रौतस्मार्त्तादिसिद्ध्यर्थं मन्त्रसिद्ध्यै तथैव च। हरेः पूजाधिकारार्थं चक्रं धार्य्यं विधानतः। वैष्णवत्वस्य सिद्ध्यर्थं भक्तिसिद्ध्यै विशेषतः। उपवीतादिवद्धार्य्याः शङ्खचक्रादयस्तथा। ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः"। श्रुतयश्च "यो हवै सुगुप्तकमौलेर्धर्म्मामनुतिष्ठमानोऽग्निना चक्रं धत्ते। अग्निर्वै सहस्रारः सहस्रारो नेमिर्न्नेमिना तप्ततनुः सायुज्यं सलोकतामाप्नोतीति"। "चक्रं बिभर्त्ति वपुषाभितप्तं बलं देवानाममृतस्य विष्णोः। स एति नाकं दुरितं विधूय विशन्ति यद्यतयो वीतरागाः" इति। ऋक्परिशिष्टे "अतप्ततनुर्नतदामो अश्नुतेऽश्नुता सह ददहनन्तत् समासतेति" यजुषि ऋग्वेदीयाश्वलायनशाखायाञ्च। "प्रतद्विष्णोरङ्गचक्रे सुतप्तं जन्माम्भोधिं वर्त्तते चर्षणीन्द्राः। मूले बाह्वोर्दधतेऽन्ये पुराणालिङ्गान्यन्ये तप्तान्यायुधान्यर्पयन्ते" इति। अत्र ऋक्परिशिष्टे "सहोशा च याज्ञवल्क्यस्तत् पुमानात्महिताय प्रेम्णा हरिं भजेत्। सुगुप्तकमं मौलेर्धर्म्माशयङ्ग्वग्निमाधत्ते" इति। शतपथी श्रुतिः अथर्वपरिशिष्टे तप्तचक्रादिप्रकरणे "देवासो एवैतेन बाहुना सुदर्शनेन प्रयताः स्वर्गमायन्"। "येनाङ्किता मनवो लोकसृष्टिं वितन्वते ब्राह्मणास्तद्वहन्तीति"। पाद्मे तप्तमुद्राप्रसङ्गे "विष्णुचक्राङ्कितं विप्रं पूजयेत् सर्वकर्मणि। विष्णुचक्रविहीनन्तु प्रयत्नेन विवर्जयेत्"। नारदीये "तप्तमुद्राप्रसङ्गे "श्रीकृष्णचक्राङ्कविहीनगात्रः श्मशानतुल्यः पुरुषोऽथ नारी,। दृष्ट्वा नरस्तं नृपते! सवासाः स्नात्वा समर्चेद्धरिमङ्घ्रि सद्यः" इति। वक्षस्त्र वेङ्कटाचार्य पादप्रभृतिभिर्बुधैः। श्रुतयः स्मृतयोऽत्र विख्याता

लिखिताः पराः। अतएव तद्दनादरे दोषाः पाद्मे "तप्तचक्राङ्कितं दृष्ट्वा ये निन्दन्ति नराधमाः। अवलोक्य मुखं तेषां आदित्यमवलोकयेत्"। अग्निपुराणे च दशरथं प्रति हतपुत्रविप्रविलापे। "शिलाबुद्धिः कृता किंवा प्रतिमायां हरेर्मया। किं मया पथि दृष्टस्य विष्णुभक्तस्य कर्हिचित्। तन्मुद्राङ्कितदेहस्य चेतसा नादरः कृतः। येन कर्मविपाकेन पुत्रशोको ममेदृशः"। अथ तप्तमुद्राधारणमाहात्म्यं सौपर्णे "अशुचिर्वाप्यनाचारः सर्वधर्मबहिष्कृतः। तप्तशङ्खचक्राभ्यामङ्कितः पङ्क्तिपावनः"। वाराहे तप्तमुद्राधारणप्रसङ्गे "म्लेच्छदेशे शुभे वापि चक्राङ्को यत्र तिष्ठति। योजनानि तथा त्रीणि मम क्षेत्रं वसुन्धरे!"। ब्रह्माण्डे "आयुधैर्वैष्णवैः सर्वैस्तापितैः स्वतनुं यदि। चिह्नयेद्वैष्णवो यस्तु स याति परमां गतिम्"। पाद्मे च "अग्नितप्तं पवित्रञ्च धृत्वा तु बाहुमूलयोः। त्यक्त्वा यमपुरं घोरं याति विष्णोः परं पदम्। हुताग्नितप्तचक्रेण शरीरं यस्य चिह्नितम्। तेन तीर्थानि यज्ञाश्च लभ्यन्ते नात्र संशयः। अग्नितप्तेन चक्रेण ब्राह्मणो बाहुमूलयोः। अङ्कयित्वा जपन्मन्त्रं संसारान्मोक्षभाग्भवेत्। अग्नितप्तेन चक्रेण बाहुमूलेषु लाञ्छिताः। ते सर्वे पापनिर्मुक्ता यान्ति विष्णोः परं पदम्"।

किञ्च "अप्राकृता महात्मानो विष्णुचक्रेण लाञ्छिताः। विष्णुचिह्नविहीनास्तु प्राकृताः पतिताः स्मृताः। इति अत्र निषेधवचनं निर्मूलं सद्भिरनादृतम्। समूलं यच्च तत् सम्यग्विध्यभावादिना कृततत्परम्। अथ तद्धारणप्रकारः "तप्तमुद्राधारणार्थमुपचारैस्तु पञ्चभिः। कृष्णमभ्यर्च्य संपूज्य चक्रशङ्खौ तथा नमेत्। तत्र मन्त्रः "सुदर्शन! नमस्तेऽस्तु पाञ्चजन्य! नमोऽस्तु ते इति। अग्निमभ्यर्च्य मूलेन हुत्वा चाज्याहुतीः कृती। चक्रशङ्खगदादीनि शस्त्राण्यग्नौ प्रतापयेत्। तत्तन्मन्त्रैर्यथावाह्य तान्यभ्यर्च्य प्रणम्य च। गुरुं कृष्णञ्च संवन्द्य भक्त्या विज्ञापयेदिदम्। उच्छिष्टो भोजकादेव किङ्करः शरणागतः। तप्तचक्रगदादीनि सर्वाङ्गानीश धारये" इति। अथ चक्रादीनामावाहनादिमन्त्रः। ओं नमो भगवते वासुदेवाय निर्वाणितसकलरिपुध्वजाय भगवन्नारायणकराम्भोरुहस्पर्शोल्लसिताय। "एह्येहि त्वं सहस्रार चक्रराज! सुदर्शन!। यज्ञभागं प्रगृह्णीष्व पूजाञ्चैव नमो नमः। ओं नमो भगवते पाञ्चजन्याय विष्णुशङ्खाय गम्भीरघोरध्वन्याकुलीकृतकौरववाहिनीनाथाय त्रिरेखादक्षिणावर्त्ताय त्रिप्रशस्ताय। एह्येहि पाञ्चजन्य! त्वं नारायणकरस्थित!। यज्ञभागं प्रगृह्णीष्व पूजाञ्चैव नमो नमः। ओं रं यं मं नं पाञ्चजन्याय नमः। ओं भगवते खड्गाय नन्दकाय त्रैलोक्यपवित्राय जयिने सकलसुरासुरसुन्दरीनेत्रोत्पलार्च्चिताय। एह्येहि खड्गरत्न! त्वं नन्दकाख्य सुरार्च्चित!। यज्ञभागं प्रगृह्णीष्व पूजाञ्चैव नमो नमः। ओं खड्गाय नमः। ओं नमो भगवत्यै कौमोदक्यै भगवद्भट्टारकवासुदेवलालितायै। एह्येहि त्वं गदे! देवि! कौमोदक्यायुधेश्वरि!। यज्ञभागं प्रगृह्णीष्व पूजाञ्चैव नमोनमः। सशराय शार्ङ्गाय नमः। इति। अथ धारणमन्त्रः। सुदर्शन! महाज्वाल! सूर्य्यकोटिसमप्रभ!। अज्ञानान्धस्य मे नित्यं विष्णोर्मार्गं प्रदर्शय। तथा। पाञ्चजन्य! निजध्वानध्वस्तपातकसञ्चय!। पाहि मां पापिनं घोरं संसारार्णवपातिनम्। इत्युच्चारयन् मन्त्रं दक्षिणादिक्रमेण तु। भुजयोश्चक्रपूर्वाणि कृष्णशस्त्राणि धारयेत्। कलत्रादिपरीवारान् निजान् सर्वांश्च वैष्णवः। भगवत्यर्पयन् तप्तमुद्राभिस्ताभिरङ्कयेत्"। तथा च वाराहे। "अङ्कयेत् तप्तचक्राद्यैरात्मनो बाहुमूलयोः। कलत्रापत्यभृत्येषु पश्वादिषु च सम्पदे" "किञ्च आयसं विधिवत् कृत्वा पञ्चायुधविधानतः। तत्तन्मन्त्रेण मन्त्रज्ञः प्रतिष्ठाप्य पृथक् पृथक्। ललाटे च गदा धार्य्या मूर्ध्नि चापं शरस्तथा। नन्दकञ्चैव हृन्मध्ये शङ्खचक्रे भुजद्वये"। किञ्च। "दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम्। सव्ये च शङ्खं बिभृयादिति ब्रह्मविदो विदुः"। अथ चक्रादिप्रतिकृतिद्रव्यम्। नवप्रश्नपञ्चरात्रे "सौवर्णं राजतं ताम्रं कांस्यमायसमेव वा। चक्रं कृत्वा तु मेधावी धारयेत् सुविचक्षणः इति। तप्तमुद्रा भुवं एवमेव प्रबोधन्यां द्वादश्यां भगवत्परैः। धार्य्या द्वारकायां विशेषतः"

तन्निषेधकवाक्यानि वैष्णवेतरविषयाणीति वैष्णवा मन्यन्ते स्मार्त्तास्तु श्रुतिस्मृतिविरुद्धत्वात् एतत् नानुतिष्ठन्ति विस्तरभयात् तन्निषेधवाक्यानि नोद्धृतानि।

तप्तवालुक पु॰ तप्ता वालुका यत्र नरकभेदे नरकशब्दे दृश्यम्।

तप्तरहस न॰ कर्म॰ अच् समा॰। तप्ते रहःस्थानभेदे।

तप्तरूपक न॰ नित्यकर्म॰ शुद्धरजते राजनि॰।

तप्तसूर्म्मिकुण्ड पु॰ तप्ता सूर्म्मिः लौहप्रतिमा यत्र

तादृशः कुण्डो यत्र। नरकभेदे नरकशब्दे दृश्यम्।

तप्तशूर्मी पु० नरकभेदे तत्प्राप्तिहेतुरुक्तः भाग०५।२६। यथा "यस्त्विह वा अगम्यां स्त्रियं पुरुषोऽगम्यं वा पुरुषं योषिदभिगच्छति। तावमुत्र कशया ताड़यन्तस्तिग्मया सूर्म्या लोहमय्या पुरुषमालिङ्गयन्ति। स्त्रियं च पुरुषरूपया सूर्म्या" २६ तिग्मया तप्तया सूर्म्या प्रतिमया" श्रीधरः

तप्तसुराकुण्ड पु० नरकभेदे ७त०। नरकशब्दे दृश्यम्।

तप्तायनी स्त्री तप्तेन अय्यतेऽत्र अय–आधारे ल्युट् ङीप्। भूमिभेदे "तप्तायनी मेऽसि" यजु०५।६। तप्तं पुरुषमयति प्राप्नोतीति तप्तायनी। यो हि दरिद्रः क्षेमरहितोऽहमिति सन्तप्यते तं तादोपशान्त्यर्थं प्राप्नोषि इत्यर्थः। यद्वा तप्तः सन्नरो यस्यामयति सा तप्तायनी ममासि" वेददी०

तप्यतु त्रि० तप–यतुन्। तापके सूर्यादौ। "सूर्यस्तपति तप्यतुर्वृथा" ऋ० २।२४।६।

तम खेदे अक० इच्छायां सक० दिवा० शमा० पर० सेट्। ताम्यति। इरित् अतमत्–अतमीत्। ततास तेमतुः उदित्। तमित्वा तान्त्वा। तान्तः। "यस्ताम्यति विसृज्य शेते" सुश्रु०। "ताम्येयुः प्रच्युताः पृथ्व्या यथा पूर्णां नदीं नराः। अवगाढ़ा ह्यविद्वांसः" भा० शा० ६०२० श्लो०। "यदा वै तान्तः प्राणं लभतेऽथ संजिहीते" शत० ब्रा० ३।२।२।११। "न मा तमन्न श्रमोन्नत तन्द्रत्" ऋ० २।३०।७ लुङि रूपम्।

उद्+उत्कर्षेण खेदे। "तस्योत्ताम्यतो बाणमुज्जहार बलादहम्" रामा० अयो० ६५ अ०॥

नि+अतिशयार्थे अक०। नितान्तम्। "नितान्तदीर्घैर्जनिता तपोभिः" "गोरोचनाक्षेपनितान्तगौरे" कुमा०।

परि+भृशं खेदे। "संतप्तवर्णाः सोऽत्यर्थं दूयनात् परिताम्यति" सुश्रु०।

तम न० ताम्यत्यनेन तम–करणे घञर्थे संज्ञायां घ। १अन्धकारे शब्दरत्ना०। २पादाग्रे शब्दच०। ३तमोगुणे राजनि०। ४राहौ पु० ज्यो०। ५तमालवृक्षे पु० शब्दच०।

तमक पु० ताम्यत्यत्र तम वा–वुन्। श्वासरोगभेदे "तृट्स्वेदवमथुप्रायः कण्ठघुर्घुरिकान्वितः। विशेषाद्दुर्दिने ताम्येत् श्वासः स्यात्तमको मतः" सुश्रुतः। "क्षुद्रः साध्यतमस्तेषां तमकः कृच्छ्र उच्यते। त्रयः श्वासा न सिध्यन्ति तमको दुर्बलस्य च" सुश्रुतः।

तमत त्रि० तम–काङ्क्षायाम् अतच्। तृष्णापरे उज्ज्वल०।

तमस् न० तम–करणादौ–असुन्। त्रिगुणात्मकप्रधानस्य गुणभेदे "सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैः" भाग० १।४। भा० आश्वमेधिकपर्वणि तस्य कार्य्यभेदादिकमुक्तं यथा "ब्रह्मोवाच। तदव्यक्तमनुद्रिक्तं सर्वव्यापि ध्रुवं स्थिरम्। नवद्वारं पुरं विद्यात् त्रिगुणं पञ्चधातुकम्। एकादशपरिक्षेपं मनोव्याकरणात्मकम्। बुद्धिस्वामिकमित्येतत्पुरमेकादशं भवेत्। त्रीणि स्रोतांसि यान्यस्मिन्नाप्यायन्ते पुनः पुनः। प्राणेभ्यस्तिस्र एवैताः प्रवर्त्तन्ते गुणात्मिकाः। तमो रजस्तथा सत्त्वं गुणानेतान् प्रचक्षते। अन्योन्यमिथुनाः सर्वे तथाऽन्योन्यानुजीविनः। अन्योन्यापाश्रयाश्चापि तथाऽन्योन्यानुवर्त्तिनः। अन्योन्यव्यतिषक्ताश्च त्रिगुणाः पञ्च धातवः। तमसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः। रजसश्चापि सत्त्वं स्यात् सत्त्वस्य मिथुनं तमः। नियम्यते तमो यत्र रजस्तत्र प्रवर्त्तते। नियम्यते रजो यत्र सत्त्वं तत्र प्रवर्तते। नैशात्मकं तमो विद्यात् त्रिगुणं मोहसंज्ञितम्। अधर्मलक्षणञ्चैव नियतं पापकर्मसु। प्रवृत्त्यात्मकमेवाहुः रजः पर्य्यायकारकम्। प्रवृत्तं सर्वभूतेषु दृश्यमुत्पत्तिलक्षणम्। प्रकाशः सर्वभूतेषु लाघवं श्रद्दधानता। सात्त्विकं रूपमेवन्तु लाघवं साधुसम्मितम्। एतेषां गुणतत्त्वानि वक्ष्यन्ते तत्त्वहेतुभिः। समासव्यासयुक्तानि तत्त्वतस्तान्निबोधत। संमोहोऽज्ञानमत्यागः कर्मणामविनिर्णयः। स्वप्नः स्तम्भो भयं लोभः शोकः सुकृतदूषणम्। अस्मृतिश्चाविपाकश्च नास्तिक्यं भिन्नवृत्तिता। निर्विशेषत्वमन्धत्वं जघन्यगुणवृत्तिता। अकृते कृतमानित्वमज्ञाने ज्ञानमानिता। अमैत्री विकृतीभावोह्यश्रद्धा मूढ़भावना। अनार्जवमसंज्ञत्वं कर्म पापमचेतना। गुरुत्वं सन्नभावत्वमवशित्वमधोगतिः। सर्वे एते गुणा दृष्टास्तामसाः संप्रकीर्त्तिताः। ये चान्ये विहिताभावा लोकेऽस्मिन् भावसंज्ञिताः। तत्र तत्र नियम्यन्ते सर्वे ते तामसा गुणाः। परिवादकथा नित्यं नित्यं ब्राह्मणनिन्दकाः। अत्यागश्चाभिमानश्च मोहो मन्युस्तथाऽक्षमा। मत्सरश्चैव भूतेषु तामसं वृत्तमिष्यते। वृथारम्भा हि ये केचिद्वृथादानानि यानि च। वृथा भक्षणमित्येतत् तामसं वृत्तमिष्यते। अतिवादोऽतितिक्षा च मात्सर्य्यमतिमानिता। अश्रद्दधानता चैव तामसं वृत्तमिष्यते। एवंविधास्तु ये केचिल्लोकेऽस्मिन् पापकर्मिणः। मनुष्या भिन्नमर्य्यादास्ते सर्वे

तामसाः स्मृताः । तेषां योनिं प्रवक्ष्यामि नियताः पापकर्म्मिणाम् । अवाङ्निरयभावाय तिर्य्यङ्निरयगामिनः । स्थावराणि च भूतानि पशवो वाहनानि च । क्रव्यादा दन्दशूकाश्च क्रमिकीटविहङ्गमाः । अण्डजा जन्तवश्चैव सर्वे चापि चतुष्पदाः । उन्मत्ता बधिरामूका ये चान्ये पापरोगिणः । मग्नास्तमसि दुर्वृत्ताः स्वकर्म्मकृतलक्षणाः । अवाक्स्रोतस इत्येते मग्नास्तमसि तामसाः । तेषामुत्कर्षमुद्रेकं वक्ष्याम्यहमतः परम् । यथा ते सुकृतान् लोकान् लभन्ते पुण्यकर्म्मिणः । अन्यथा प्रतिपन्नास्तु विवृद्धा ये च कर्म्मिणः । स्वकर्मनिरतानाञ्च ब्राह्मणानां शुभैषिणाम् । संस्कारेणोर्द्ध्वमायान्ति यतमानाः सलोकताम् । स्वर्गं गच्छन्ति देवानामित्येषा वैदिकी श्रुतिः । अन्यथा प्रतिपन्नास्ते विबुद्धाः स्वेषु कर्मसु । पुनरावृत्तिधर्म्माणस्ते भवन्तीह मानुषाः । पापयोनिं समापन्नाश्चाण्डाला मूकचूचुकाः । वर्णान् पर्य्यायशश्चापि प्राप्नुवन्त्युत्तरोत्तरम् । शूद्रयोनिमतिक्रम्य ये चान्ये तामसा गुणाः । स्रोतोमध्ये समागम्य वर्तन्ते तामसे गुणे । अभिष्वङ्गस्तु कामेषु महामोह इति स्मृतः । ऋषयो मुनयो देवा मुह्यन्तेऽत्र सुखेप्सवः । तमो मोहो महामोहस्तामिस्रः क्रोधसंज्ञितः ! मरणं त्वन्धतामिस्रस्तामिस्रः क्रोध उच्यते । वर्णतो गुणतश्चैव योनितश्चैव तत्त्वतः । सर्वमेतत्तमो विप्राः ! कीर्त्तितं वो यथाविधि" ।

सांख्ये अधर्म्माज्ञानावैराग्यानैश्वर्य्याख्यास्तस्य धर्मा उक्ता यथा "अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्य्यम् । सात्त्विकमेतद्रूपं तामसमस्माद् विपर्य्यस्तम्" सां० का० "रजस्तु चलतया परितस्त्रैगुण्यं चालयद् गुरुणा वृण्वता च तमसा तत्र तत्र प्रवृत्तिप्रतिबन्धकेन क्वचिदेव प्रवर्त्त्यते इति ततस्ततो व्यावर्त्त्य तमोनियामकमुक्तं गुरु वरणकमेव तमः" सां० कौ० । अयमर्थः त्रयोगुणास्त्रैगुण्यं सत्वादीनि परितः स्वकर्म्मकरणाय चालयत् प्रवर्त्तयत् रजः गुरुणा गौरवान्वितेन वृण्वता यत्र यत्र कार्य्यजननाय तस्य प्रवृत्तिस्तत्र तत्र प्रतिबन्धकेन तमसा क्वचिदेव कार्य्ये प्रवर्त्त्यते कर्मत्वं क्रियते इति । तथा च तस्मात् तस्मात् कार्य्यात् व्यावर्त्त्य रजसः प्रवृत्तिं रोधयित्वा तमो नियामकमिति । अन्योऽपि विशेषस्तत्रोक्तो यथा "प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः । अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः" "गुणा इति परार्थाः सत्त्वं लघुः प्रकाशकमित्यत्र च सत्त्वादयः क्रमेण निर्द्दिश्यन्ते । तदनागतावेक्षणेन तन्त्रयुक्त्या वा प्रीत्यादीनां यथासंख्यं वेदितव्यम् । एतदुक्तं भवति प्रीतिः सुखं प्रीत्यात्मकः सत्त्वगुणः, अप्रीतिर्दुःखं अप्रीत्यात्मको रजोगुणः, विषादो मोहः विषादात्मकस्तमोगुण इति । ये तु मन्यन्ते न प्रीतिर्दुःखाभावादतिरिच्यते एवं दुःखमपि न प्रीत्यभावादन्यदिति तान् प्रत्यात्मग्रहणम् । नेतरेतराभावाः सुखादयः अपि तु भावाः आत्मशब्दस्य भाववचनत्वात् प्रीतिरात्मा भावो येषां ते प्रीत्यात्मानः एवमन्यदपि व्याख्येयम् । भावरूपता चैषामनुभवसिद्धा परस्पराभावात्मकत्वे तु परस्पराश्रयापत्तेरेकस्याप्यसिद्धेरुभयासिद्धिरिति भावः । स्वरूपमेषामुक्त्वा प्रयोजनमाह प्रकाशप्रवृत्तिनियमार्थाः अत्रापि यथासंख्यमेव । रजः प्रवर्त्तकत्वात्सर्वत्र लघु सत्त्वं प्रवर्त्तयेत् यदि तमसा गुरुणा न नियम्येत । तमोनियतन्तु क्वचिदेव प्रवर्त्तयति इति भवति तमोनियामकम् । प्रयोजनमुक्त्वा क्रियामाह अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च वृत्तिः क्रिया सा च प्रत्येकमभिसम्बध्यते । अन्योन्याभिभववृत्तयः एषामन्यतमेनार्थवशादुद्भूतेनान्यदभिभूयते । तथाहि सत्त्वं रजस्तमसी अभिभूय शान्तामात्मनो वृत्तिं प्रतिलभते एवं रजः सत्त्वतमसी अभिभूय घोराम्, एवं तमः सत्त्वरजसी अभिभूय मूढामिति । अन्योन्याश्रयवृत्तयः । यद्यप्याधाराधेयभावेन नाश्रयार्थो घटते तथापि यदपेक्षया यस्य क्रिया स तस्याश्रयः तथाहि सत्त्वं प्रवृत्तिनियमावाश्रित्य रजस्तमसी प्रकाशेनोपकरोति, रजः प्रकाशनियमावाश्रित्य प्रवृत्तमितरयोः, तमः प्रकाशप्रवृत्ती आश्रित्य नियमेनेतरयोरिति । अन्योन्यजननवृत्तयः अन्यतमोऽन्यतमं जनयति जननञ्च परिणामः स च गुणानां सदृशरूपः अतएव न हेतुमत्त्वं तत्त्वान्तरस्य हेतोरभावात् । नाप्यनित्यत्वं तत्त्वान्तरे लयाभावात् । अन्योन्यमिथुनवृत्तयः अन्योन्यसहचराः अविनाभाववर्त्तिन इति यावत् चः समुच्चये भवति चात्रागमः "अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्र गामिनः । रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः । तमसश्चापि मिथुने ते सत्त्वरजसी उभे । उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते । नैषामादिः संप्रयोगो वियोगो वोपलभ्यत" इति । सां० त० कौ०

"गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः"। "ऊर्द्ध्वं सत्वविशालस्तमोविशालस्च मूलतः सर्गः"। सा० का०। "सत्त्वं ज्ञानं तमोऽज्ञानं रागद्वेषौ रजः स्मृतम्"। मनुः। चक्षुर्वृत्तिनिरोधके शार्वरादिके अन्धकारे "अदस्त्वयानुन्नमनुत्तमं तमः" "आसादितस्य तमसा नियतेर्नियोगात्" माघः। तच्च स्वपरप्रकाशकतेजः सामान्याभावरूपमिति नैयायिकाः अन्धकारशब्दे २०८दृश्यम्। काणादा अपि तथैवाङ्गीचक्रुस्तच्च औलुक्यशब्दे १५८८पृ० दर्शितम्। वेदान्तिनस्तु भावरूपं प्रतिपेदिरे यथा विवरणोपन्यासे। तमः प्रकाशवद्विरुद्धस्वभावयोरिति" शा० भाष्यव्याख्याने "ननु तमः प्रकाशदृष्टान्ते भावाभावरूपत्वमुपाधिः। आलोकाभावस्तम इति नैयायिकाः। रूपदर्शनाभावस्तम इति प्राभाकरा इति चेत् नैवं उपचयाऽपचयाद्यवस्थाभेदवत्त्वेनोपलभ्यमानत्वेनाभावत्वायोगात् नीलरूपवत्त्वेन द्रव्यत्वाच्च। ननु भावत्वपक्षे बहुलालोकवति देशे निमीलितनयनस्य कथं तमःप्रतीतिः बहुलालोकेन निवृत्त्यङ्गीकारात् सूक्ष्मावस्थानं तु मन्दालोकेनैव पूर्वमुक्तमिति चेत् न गोलकान्तर्वर्त्तितमसः प्रतीत्युपपत्तेः नच नेत्रस्थान्तर्वर्त्तिवस्तुग्राहकत्वासम्भवः पिहितकर्णस्यान्तरशब्दग्राहकत्वदर्शनात्। न चैवं गोलकान्तरस्याञ्जनादेरपि निमीलितनयनेन ग्रहणप्रसङ्गः। तमोव्यतिरिक्तरूपिण आलोकसहितचक्षुर्ग्राह्यत्वनियमात्। अथ मतं द्रव्यत्वे सति तमसः आलोकविनाशितस्यालोकापगमे झटिति नोत्पत्तिः कार्य्यद्रव्याणां द्व्यणुकादिक्रमेणैवारम्भादिति तन्न विवर्तवादिनां क्रमानपेक्षणात् कारणं तु मूलाविद्यैव। अथापि तमो न रूपवद् द्रव्यं स्पर्शशून्यत्वादाकाशवदिति चेत् न वायुर्न स्पर्शवान् रूपशून्यत्वादाकाशवदित्याभाससमानयोगक्षेमत्वात् प्रत्यक्षविरोधस्य तुल्यत्वात्। अथालोकाभावे समारोपितं नीलं रूपं गोचरयतीति तमःप्रत्यक्षस्यान्यथा गतिरुच्येत एवमपि हेतुरनैकान्तिकः रूपवद्द्रव्यस्यैव धूमस्य चक्षुःप्रदेशादन्यत्र स्पर्शशून्यत्वात्। तत्र विद्यमान एव धूमस्पर्शोऽनुद्भूत इति चेत् तर्हि तमःस्पर्शोऽपि सत्त्वेव सर्वत्रानुद्भूत इति हेत्वसिद्धिः स्यात्। नच सतः सर्वत्रानुद्भवोऽसम्भावितः। आकरजे सुवर्णादौ सत एव स्वपरप्रकाशकभास्वररूपस्योष्णस्पर्शस्य च सर्वत्रानुद्भवदर्शनात्तदेवं भावरूपतमोवादे न कोऽपि दोषः। नन्वभाववादेऽपि तथा उपचयाऽपचयाद्यवस्थानां प्रतियोग्यालोकोपाधिकत्वात् नीलरूपस्य चारोपितत्वादिति चेत् नैवं दुर्निरूपत्वात् तथाहि किमालोकमात्राभावस्तमः उत त्रैकालिकाऽभावः सर्वालोकाभावो वा प्रथमद्वितीयपक्षयोः प्रागभाव इतरेतराभावः प्रध्वंसाभावो वा तम इति दुर्भणं सविरलकिरणसन्तते देशे प्रदीपजन्मनः प्राग् जाते वा प्रदीपे दीपनाशे वा। तमोबुद्ध्यभावात्। तृतीये सर्वालोकसन्निधानमन्तरेण न निवर्त्तते। रूपदर्शनाभावस्तम इत्यप्ययुक्तं बहुलान्धकारसंवृतापवरकमध्यस्थितस्य वह्निरूपदर्शनात्तमोदर्शनयोर्युगपदेव भावात्। तस्मादभावस्तम इति दृष्टान्ते नास्त्युक्तोपाधिः"। २२तमोवदावरके अज्ञाने अविद्यायां "स हि देवः परं ज्योतिः तमः पारे प्रतिष्ठितम्" कुमा०। "आदित्यवर्णं तमसः परस्तात्" श्रुतिः। "आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्" "महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः" मनुः।

सांख्योक्ते अविद्याया २३अष्टविधे भेदे च। "भेदस्तमसोऽष्टविधः" सां० का०। "तमसोऽविद्याख्याया अष्टविधो भेदः। अष्टासु विधाः अव्यक्तमहदहङ्कारपञ्चतन्मात्रेषु अनात्मसु आत्मबुद्धिरविद्या तस्या अष्टविधविषयत्वादष्टविधत्वम्" सा० तत्त्वकौ०। २४राहौ पु० म०। तस्य भूच्छायारूपत्वात् तथात्वम्। अगुशब्दे दृश्यम्। "तमोह्वे चेत् सुथहा नतुस्था" नील० ता०। २५विशेषदर्शनविरोधिदोषे २६कार्य्याकार्य्याविवेके च न०। शब्दार्थचि०। तमकाण्डः समूहार्थकाण्डशब्दे परे कस्का० विसर्गस्य सः। "क्षपातमस्काण्डमलीमसं नभः" माघः। "अवसमन्धेभ्यस्तमसः" पा० अच् समा०। अवतमसं सन्तमसम् अन्धतमसम्। तृतीयान्तेनानेन क्तान्तस्य समासे तृतीयाया अलुक्। तमसाकृतः तमसाच्छन्न इत्यादि। तमसाकृतस्येदं अण्। तामसाकृत तमःसम्बन्धिनि त्रि० स्त्रियां ङीप्।

तमस पु० तम–असच्। १कूपे २अन्धकारे च संक्षिप्तसारः। ३अन्धकारे ४नगरे न० त्रिका०। ५नदीभेदे स्त्री "संप्राप्य तीरं तमसापगायागङ्गाम्बुसम्पर्कविशुद्धिभाजः"। "विगाहितं यामुनमम्बु पुण्यम्" भट्टिः। "यस्याः स्मरणात् नाश्यति पापं सा तमसा" जयमङ्गलः। गङ्गाम्बुसम्पर्कैर्युक्ताः सा गङ्गासङ्गता यमुना यस्याः धर्मिक-

स्था। सेयं वाल्मीकमुनेराश्रमनिकटस्था यथाह रामा० आदि० २६ अ० "जगाम तमसातीरं जाह्नव्यास्त्वविदूरतः"। "स तु तीरं समासाद्य तमसाया मुनिस्तदा। शिष्यमाह स्थितं पार्श्वे दृष्ट्वा तीर्थमकर्दमम्। अकर्दममिदं तीर्थं भरद्वाज! निशामय। रमणीयं प्रसन्नाम्बु सन्मनुष्य मनो यथा। न्यस्यतां कलसस्तात! दीयतां वल्कलं मम। इदमेवावगाहिष्ये तमसातीर्थमुत्तमम्"। "दृष्ट्वा तमसा तत्र वारयन्तीव राघवम्। ततः सुमन्त्रोऽपि रथाद्विमुच्य श्रान्तान् हयान् संपरिवर्त्त्य शीघ्रम्। पीतोदकांस्तोयपरिप्लुताङ्गानचारयद्वै तमसाविदूरे" रामा० अर० ४५ अ०। "ततस्तु तमसातीरं रम्यमाश्रित्य राघवः" ४६ अ०।

तमस्काण्ड पु० ६त०। कस्का० विसर्गस्य सः। तमःसमूहे "अपास्तमस्काण्डमलीमसं नभः" माघः।

तमस्तति स्त्री ६त०। अन्धकारसमूहे।

तमस्वत् त्रि० तमस्+अस्त्यर्थे मतुप् मस्य वः सान्तत्वात् मत्वर्थे न विसर्गः। तमोयुते स्त्रियां ङीप् सा च २रात्रौ स्त्री निघण्टुः ३हरिद्रायाञ्च।

तमस्विन् त्रि० तमोऽस्तीति विनि सान्तत्वात् मत्वर्थे न विसर्गः। १तमोयुक्ते स्त्रियां ङीप्। सा च २रात्रौ ३हरिद्रायाञ्च अमरः। "अदृश्यमानस्तस्माद्य तमस्विन्यामनिन्दिते"। भा० वि० २२ अ०।

तमाल पु० तम–कालन्। स्वनामख्याते वृक्षभेदे अमरः। "तमालो मधुरो बल्यो वृष्यश्च शिशिरो गुरुः। कफपित्ततृषादाहश्रमभ्रान्तिहरश्च सः" राजनि०। तत्पत्राकृतित्वात् २तिलके ३खड्गभेदे ४वरुणवृक्षे च मेदि०। ५कृष्णखदिरे शब्दच० ६वंशत्वचि भरतः"। ७पत्रके (तेजपात) राजनि०। "यत्तालतमालशालसरलव्यालोलवल्लीलता" गङ्गास्तवः "अनन्तनानेकतमालतालम्" "तेनोपमीयेत तमालनीलम्" माघः। "एकाकिन्यपि यामि सत्वरमतः स्रोतस्तमालाकुलम्" सा० द०। तमालदले तु पर्युषितत्वदोषो नास्ति यथोक्तं आ० त० योगिनीतन्त्रे "बिल्वपत्रं च माध्यञ्च तमालामलकीदलम्। कह्लारं तुलसी चैव पद्मकं मुनिपुष्पकम्। एतत् पर्युषितं न स्यात् यच्चान्यत् कलिकात्मकम्"। स्वार्थे क। तमालक तत्रार्थे वंशत्वचि च तमालवृक्षे पु० न० शब्दरत्ना०।

तमालपत्र न० तमालपत्रस्येवाकारोऽस्त्यस्य अच्। १तिलके अमरः २पत्रके (तेजपात) ३तमालवृक्षे च पु० मेदि०। ६त० ४तमालवृक्षपत्रे न०। "तमालपत्रास्तरणासु रन्तुम्" रघुः।

तमालिका स्त्री तम–कालन् संज्ञायां कन् कापि अत इत्वम्। १ताम्रवल्ल्यां २भूम्यामलक्यां च राजनि०। (तमलुक) ३देशभेदे त्रिका०।

तमालिनी स्त्री तमालवृक्षाः बहवः सन्त्यत्र पुष्करा० देशे इनि ङीप्। १तमोलिप्तदेशे (तमलुक) हेम०। तमालाकृतियुक्तपत्रत्वात् २भूम्यामलक्यां राजनि०।

तमाली स्त्री तम–कालन् गौरा० ङीष्। १ताम्रवल्ल्यां (पान) २वरुणवृक्षे च राजनि०।

तमि(मी) त्रि० तम–इन् वा ङीप्। १रात्रौ अमरः। २मोहे च "स तमीं तमोभिरधिगम्य ततान्" माघः।

तमिषीचि स्त्री तमिं मोहं सिञ्चति सिच–इन् संज्ञायां षत्वं पृषो० दीर्घः। १अप्सरोभेदे। "याः क्लन्दास्तमिषीचयोऽक्षकामा मनोमुहः। ताभ्यो गन्धर्वपत्नीभ्योऽप्सरोभ्योऽकरं नमः" अथ० २।२।५ २बलवति त्रि० "निरत्रसन् तमिषीचीरभैषुः" ऋ० ८।४८।११। "तमिषीचीर्बलवत्यः" भा०। छान्दसः जसः पस्।

तमिस्र न० तमोऽस्त्यत्र ज्योत्स्नेत्यादि० नि० तमिस्रा रात्रिराश्रयत्वेनास्त्यस्य अच् वा। १अन्धकारे २क्रोधे च मेदि०। ३तमःप्रधानरात्रौ स्त्री अमरः ४दर्शरात्रौ वाचस्पतिः। ५अन्धकारततौ स्त्री मेदि०। "सूर्य्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा" रघुः। "अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः" कुमा०। "उज्जृम्भतो शुचमिवाशु तमिस्रा" किरा०।

तमिस्रपक्ष पु० तमिस्राऽस्त्यस्य अच् तादृशः पक्षः। कृष्णपक्षे "तमिस्रपक्षत्रुटिकूटभक्षितम्" नैष०। "तमिस्रपक्षस्य तिथौ भृगोः सुतः" सू० सि० ९अ०। "प्राजेशमासार्क तमिस्रपक्षे अपाकरेणोपगतं समीक्ष्य" २४अ०। [सामभेदे।

तमुष्टुहीय न० तमु ष्टुहि इत्यादिकर्चमधिकृत्य प्रवृत्तः गहा० छ।

तमेरु त्रि० ताम्यति तम–एरु। १ग्लानियुक्ते "अतमेरुर्यज्ञोऽतमेरुर्यजमानस्य प्रजा भूयात्" यजु० १।२३ "यज्ञो यागहेतुः पुरोडाशः अतमेरुर्भूयात्। तस्य ग्लानौ ताम्यतीति तमेरुः औणादिक एरुप्रत्ययः न तमेरुः अतमेरुः। भस्माच्छादनेन ग्लानिरहितो भवतु। यजमानस्य प्रजा पुत्रपौत्रादिः अतमेरुर्ग्लानिरहिता भूयात् यजमानस्य प्रजायाः कदापि दुःखं माभूदित्यर्थः" वेददी०।

तमोघ्न पु० तमोऽन्धकारं मोहमज्ञानं वा हन्ति हन-टक्। १सूर्य्ये, २वह्नौ, ३चन्द्रे, ४बोधे, ५विष्णौ, ६शिवे च मेदि०। मनुष्यकर्त्तृके तु न टक् किन्तु अण्। तमोघात अमनुष्ये तमोनाशके त्रि० तत्र सूर्य्ये "आशुगामी तमोघ्नश्च हरिदश्वश्च कीर्त्त्यसे" भा० व० ३ अ०। "यथा तमांस्यभ्युदितस्तमोघ्नः पूर्वां प्रतिज्ञां समवाप्य वीरः" भा० द्रो० १४६ अ०। [कीटे शब्दरत्ना०।

तमोज्योतिस् पु० तमसि अन्धकारे ज्योतिरस्य। खद्योते

तमोनुद् पु० तमो नुदति खण्डयति नुद-क्विप्। १सूर्य्ये २चन्द्रे ३वह्नौ ४दीपे च शब्दरत्ना०। ५अन्धकारनाशके त्रि० "एवमुक्तस्तदाऽत्रिर्वै तमोनुदभवच्छशी" भा०आ० १५६अ०।

तमोनुद त्रि० तमोऽज्ञानमन्धकारं वा नुदति नुद-क। १अन्धकारनाशके २अज्ञाननाशके ३ईश्वरे पु०। "वायोरपि विकुर्वाणात् विरोचिष्णु तमोनुदम्" महाभूतादि वृत्तौजाः प्रादुरासीत्तमोनुदः" मनुः।

तमोऽपह पु० तमोऽपहन्ति अप+हन-ड। १सूर्य्ये २चन्द्रे ३वह्नौ ४बोधे च मेदि०। ५तमोनाशकमात्रे प्रदीपादौ त्रि० "प्रभवते हि तमोऽपरं सुहृः" माघः। "पुत्रं तमोऽपहं लेभे नक्तं ज्योतिरिवौषधिः" रघुः। ६मोहनाशके "आगमादिव तमोऽपहादितः" किरा०। बुद्धेरज्ञाननाशकत्वात् तथात्वम् "तत्राज्ञानं धिया नश्येत्" वेदान्तका०।

तमोभिद् पु० तमो भिनत्ति भिद-क्विप्। १शार्वरतमोभेदके खद्योते शब्दर०। २तमोभेदकमात्रे त्रि० च। तमोभिदोऽप्युक्तार्थे त्रि०।

तमोमणि पु० तमसि मणिरिव। १खद्योते त्रिका०। २गोमेदके मणौ राजनि०।

तमोमय त्रि० तमआत्मकम् तमःप्रचुरं वा तमस्+मयट्। १अन्धकारात्मके २अज्ञानात्मके ३तमःप्रचुरे च। ४राहौ पु० "तमोमयं सैंहिकेयाख्यम्" वृ० स० ५अ०। राहोश्च यथा तमोरूपत्वं तथा अगुशब्दे ४८पृ० उक्तम्। "विससर्जात्मनः कायं नाभिनन्दंस्तमोमयम्" भाग० ३।२०।२२। तमोमयमन्धकारप्रचुरं रात्रिरूपं कायमित्यर्थः।

तमोऽरि पु० ६त०। १सूर्य्ये २चन्द्रे ३वह्नौ ४ज्ञाने च "तमोऽरिबिम्बप्रतिबिम्बधारी रुराव कान्ते। पवनाशनाशः" सुन्दरसमस्यापूरणम्। तमःशत्रु प्रभृतयोऽप्यत्र।

तमोलिप्ती स्त्री तमसाऽल्पं लिप्यते स्म करणोपपदे लिप-क्त उप० स० ङीप्। देशभेदे। (तमलुक) शब्दरत्ना०।

तमोविकार पु० ६त०। तमसो विकारे निद्रालस्यादौ तमःशब्दे दृश्यम्। तमसैव विकारो यत्र। २रोगे राजनि०। ३तमिस्रारात्रौ शब्दार्थचि०।

तमोवृध् त्रि० तमसि शार्व्वरे, तमसा आवरकेणाज्ञानेन वा वर्द्धते वृध-क्विप् ७त० ३त० वा। १तमसि रात्रौ वर्द्धमाने प्रचुरसञ्चारिणि राक्षसादौ। "न्यर्पयतं वृषणा तमोवृधः" ऋ० ७।१०४।१। २अज्ञानवृद्धे च।

तमोहन् त्रि० तमो हन्ति हन-क्विप्। अज्ञाननाशके "ज्योतीरयं शुक्रवर्णं तमोहनम्" ऋ० १।१४०।१। तमोहन्तरि २सूर्य्ये ३चन्द्रे च "तमोहा यदि पापेन क्षयेणैव हि वीक्षितः" ज्यो० त०।

तमोहर त्रि० तमो हरति हृ-अच् ६त०। १अन्धकारनाशके २अज्ञाननाशके च ३सूर्य्ये ४चन्द्रे च पु० शब्दर०। "निर्गुणं वामभागे च सव्यभागेऽद्भुता निजा। मध्ये नाथ स्वयं ज्योतिस्तज्ज्योतिर्मे तमोहरम्" शब्दार्थचि० धृतवाक्यम्।

तम्पा(म्बा) तम्ब-अच् पृषो० वा। सौरभेय्याम् हेमच०।

तम्ब गतौ भ्वा० पर० सक० सेट्। तम्बति अतम्बीत्। ततम्ब

तम्बिका स्त्री तम्ब-ण्वुल् टाप् कापि अत इत्वम्। सौरभेय्यां हेमच०।

तम्बीर पु० तम्ब-बा० ईरन्। "वक्री राश्यन्तगोऽन्यर्क्षगामी दीप्तांशकैर्युतः। दत्तेऽन्यस्मै कार्य्यं करस्तम्बीरोऽल्पकार्य्ययोः" नी० ता० उक्ते योगभेदे।

तम्र त्रि० ताम्यत्यनेन तम-करणे र। ग्लानिसाधने "प्रतम्रा अवपत्तमांसि" ऋ० १०।७३।५। [तये।

तय गतौ रक्षणे च भ्वा० आ० सक० सेट्। तयते अतयिष्ट-

तर पु० तॄ-भावे अप्। १तरणे "पणं यानं तरे दाप्यं पौरुषोऽर्द्धपणं तरे" "ब्राह्मणा लिङ्गिनश्चैव न दाप्यास्ते पणं तरे" मनुः कर्त्तरि अच्। २अग्नौ पु० मेदि०। तरत्यनेन करणे अप्। २आतरे पण्यादौ। "दीर्घाध्वनि यथादेशं यथाकालं तरो भवेत्" मनुः।

तरक्षु पु० तरं गतिं मार्गं वा क्षिणोति मितद्रु० डु। मृगादने क्षुद्रव्याघ्रे अमरः। "श्वा कृष्णकर्णो गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय" यजु० २४।४०। अश्वमेधे राक्षसेन्द्रदेवताकपशुकथनम्। "तरक्षूनृक्षवानरान्" हरिवं० १६५ अ०।

तरङ्ग पु० तॄ-अङ्गच्। (ढेउ) ऊर्मौ वायुना जलस्य सञ्चालनेन तिर्य्यगूर्द्ध्वादिप्लवने अमरः। "समीरणोत्थेव तरङ्गलेखा" रघुः २वस्त्रे ३हयादीनां सप्लुतफाले उणादि०। ततः तारका० इतच् तरङ्गित जाततरङ्गे त्रि०। "साग-

रप्रतिमं घोरं वाहनोर्मितरङ्गितम्" भा० भी० ८८अ० । पुष्करा० देशे इनि ङीप् तरङ्गिन् तरङ्गयुक्तदेशे त्रि० । नद्यां स्त्री ङीप् ।

तरङ्गिणी स्त्री तरङ्ग+पुष्करा० नदी रूपदेशे इनि ङीप् । नद्याम् अमरः । "तरङ्गिणीवेणिरिवायता भुवः" माघः । "गजवाजिमनुष्याणां शोणितानां तरङ्गिणी" भा० भी० ६४ अ० ।

तरङ्गित त्रि० तरङ्गः संजातोऽस्य तार० इतच् । १जाततरङ्गे २चञ्चले च । तरङ्गशब्दे उदा० दृश्यम् ।

तरण पु० तॄ—करणे कर्मणि भावे वा ल्युट् । १प्लवे (भेला) २स्वर्गे । ३प्लवने ४देशान्तरगमने ५पारगमने च न० शब्दार्थचि० "भवति भवार्णवतरणे नौका" मोहमुद्गरः । "स्वप्ननदीतरणाववर्षणाभिध्यदर्शनप्रयाणेषु तु सकृत्कालद्रव्यैकार्थत्वात्" कात्या० श्रौ० १।७।१२

तरणि पु० तॄ—अनि । १सूर्ये, २भेलके, ३अर्कवृक्षे, च अमरः ४किरणे हेमच० ६ताम्रे च । ७नौकायां, ८घृतकुमार्याम् स्त्री मेदि० । वा ङीप् नौकायां ९तारके १०शीघ्रगन्तरि त्रि० । "येशा पूर्वं तरणीन् यो वहन्ति" ऋ० ७।६७।८। "तरणींस्तारकान् शीघ्रगन्तॄन् वा" भा० ११शम्भुतीर्थे वर्त्तमाने "एतत्तु तरणिनीश" ऋ० ३।४९।२ शम्भुतीर्थे वर्त्तते इति तरणिः" भा० "सोऽयं व्याकरणार्णवैकतरणिः" बोपदेवः ।

तरणिपोत पु० तरणेः पोत इव । काष्ठाम्बुवाहिन्यां जटा० ।

तरणिरत्न न० तरणिप्रियं रत्नम् । सूर्यप्रिये १माणिक्ये राजनि० तरणिमणिप्रभृतयोऽप्यत्र पद्मरागशब्दे २७६२पृ० दृश्यम्

तरणी स्त्री तरत्यनया तॄ-करणे ल्युट् ङीप् । १नौकायां शब्दरत्ना० २पद्मचारिणीलतायां शब्दच० । ३घृतकुमार्यां राजनि० ।

तरण्ड पु०न० । तॄ-अण्डच् । १वडिशीसूत्रबन्धनकाष्ठे, (छिप) २प्लवे पु० । ३नौकायां स्त्री मेदि० स्त्रीत्वपक्षे गौ० ङीष् । ४कुम्भतुम्बीरम्भादिकृतप्लवे शब्दरत्ना० ५देशभेदे पु० शब्दर० ।

तरण्डक न० तरण्ड+संज्ञायां कन् । तीर्थभेदे "ततो गच्छेत राजेन्द्र ! द्वारपालं तरण्डकम् । तस्य तीर्थं सरस्वत्यां यक्षेन्द्रस्य महात्मनः" भा० व० ८३ अ० । २वडिशसूत्रमध्यबद्धलघुकाष्ठभेदे (फाता) न० । "संसारसागरावर्त्तपतज्जन्तुतरण्डकम्" काशीख० ३३ अ० । ३नौकायां स्त्री गौरा० ङीष् शब्दरत्ना० ।

तरण्डपादा स्त्री तरण्ड एव पाद इव तरणहेतुत्वात् यस्याः । नौकाभेदे शब्दरत्ना० ।

तरण्य तरण गतौ कण्ड्वा० यक् भ्वा० प० सक० सेट् । तरण्यति अतरणीत् अतरण्यीत् ।

तरत्सम त्रि० तरत्समेत्यादि ऋचः सन्त्यत्र अच् । पावमानसूक्तान्तर्गते सूक्तभेदे तरत्समन्दीयशब्दे दृश्यम् । "शुद्धवत्योऽथ कुष्माण्ड्यः पावमान्यस्तरत्समाः" हेमाद्रिश्राद्धकल्पधृतवाक्यम् ।

तरत्समन्दीय न० पावमानसूक्तान्तर्गते सूक्तभेदे । "जपंस्तरत्समन्दीयं पूयते मानवस्त्र्यहात्" मनुः । "तरत्समन्दीदीवतीत्येताः चतस्र ऋचोजपन्" कुल्लू० । ताश्च ऋचः ऋ० ९।५८।१ प्रभृतयश्चतस्रः ।

तरतम त्रि० तरेति तमेति प्रत्ययार्थौ बोध्यतयाऽस्त्यत्र अच् । न्यूनानूनाधिकभावेन वर्त्तमाने तरतमौ हि प्रत्ययौ न्यूनाधिकभावबोधकाविति तदर्थकत्वादस्य तथात्वम् । "तरतमयोगयुक्तांश्च भावानतिरूक्षानतिस्निग्धानत्युष्णानतिशीतानित्येवमादीन् विवर्जयेत्" सुश्रु० । तस्य भावः ष्यञ् । तारतम्य न्यूनाधिकभावे न० "तारतम्येन वर्त्तमानः" शा० भा० ।

तरद् स्त्री तॄ—करणे अदि । १प्लवे भेलके । कर्त्तरि अदि । २कारण्डवखगे च मेदि० ।

तरदी स्त्री तरेण तरणेन दीयते खण्ड्यते दो-खण्डने घञर्थे क गौरा० ङीष् । कण्टकयुक्तवृक्षभेदे । राजनि० । "तरदी मधुरा तिक्ता गुर्वी बल्या कफापहा" राजनि० । टाप् तरदाप्यत्र तरटीति पाठान्तरम् ।

तरहटी स्त्री पक्वान्नभेदे "घृतेन मर्दितां दध्ना फेनिकां मेलयेत्ततः । विधाय वटिकास्तस्या घृते मन्दाग्निना पचेत् । तत एताः प्रलिप्ताः खण्डपाकेन कर्पूरेण विमिश्रयेत् । समरिचास्तरहट्यस्तु ताः स्मृताः । बल्या पुष्टीकरी हृद्या दृष्या पित्तानिलापहा । सुस्निग्धा कफदाऽत्यर्थं किञ्चित् सन्धानकृद्भिदा" शब्दार्थचि० वाक्यम् ।

तरन्त पु० तॄ-झच् । १समुद्रे, २प्लवे, ३भर्त्तरि, ४राक्षसे च उणादिको० । ५नौकायां स्त्री गौरा० ङीष् ।

तरन्तुक न० कुरुक्षेत्रस्थानभेदे । "तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानां च मचक्रुकस्य च । एतत् कुरुक्षेत्रसमन्तपञ्चकं पितामहस्योत्तरवेदिरुच्यते" भा० व० ८३ अ० ।

तरपण्य न० तरस्य नद्यादिपारयानस्य पण्यं शुल्कम् । नद्यादेः पारयानार्थं देये शुल्के आतरे (भाड़ा) अमरः ।

तरवालिका स्त्री करपालिका+पृषो॰। खड्गभेदे हेमच॰।

तरम्बुज न॰ मध्यजलके फलभेदे कालिङ्गशब्दे २९७ पृ॰ तद्गुणादि दृश्यम्। "ज्यैष्ठे मासि महेशानि! पौर्णमास्यां निशार्द्धके। तृष्णातुरा महाकाली भ्रमन्ती पितृकानने। तज्ज्ञात्वा ब्रह्मणा तस्यै फलं दत्तं तरम्बुजम्। तत्फलभक्षणातृप्ता वरदापि हरप्रिया। यो मे दद्यात् फलं रम्यं स चिरायुश्चतुर्युगम्"। उत्तरकामाख्यातन्त्रम्।

तरल पु॰ तॄ–अलच्। १हारमध्यस्थे मणौ, अमरः २हारे,। ३तले मेदि॰। ४चपले, ५कामुके, ६विस्तीर्णे, ७भास्वरे, ८मध्यशून्ये-द्रव्ये, ९द्रवीभूते पदार्थे च त्रि॰ हेमच॰। १२हीरके रत्ने १०यवाग्वाम्, ११सुरायाञ्च स्त्री धरणिः तत्र भास्वरे "तारावितानतरला इव यामवत्यः" किरा॰ "व्याधानुसार्य्यमाणतरलतारामृगा" काद॰। "उत्कण्ठितासि! तरले" सा॰ द॰। "तारापतिस्तरलविद्युदिवाभ्रवृन्दम्" रघुः। "वैरायितारस्तरलाः" माघः। हारमध्यमणौ "प्रवालमुक्तास्तरलाश्च हाराः" भा॰ क॰ ९४अ॰ १४ अ॰। "हारांस्तरलविन्यास सूर्य्यभासा विभूषिताः" हरिवं॰ १५२ अ॰। भृशा॰ अभूततद्भावे क्यङ्। तरलायते "तथापि तरलायते चेतः" उद्भटः।

तरललोचना स्त्री तरलं चञ्चलं लोचनं यस्याः। चञ्चलनयनायां स्त्रियां हेमच॰ २चञ्चलनेत्रयुक्तमात्रे त्रि॰ कर्म॰। ३चञ्चले नेत्रे न॰।

तरलित त्रि॰ तरल इवाचरति तरलं करोति तरल+क्विप्-णिच् वा क्त। १आन्दोलिते, २कम्पिते, ३धूते, ४लुलिते च हेम॰।

तरवारि पु॰ तरं शत्रूणां गतिं वारयति वृ-णिच्-इन्। खड्गभेदे। (तरवार) इति भाषा। हेमच॰ असिशब्दे ५५१पृ॰ तल्लक्षणादिकमुक्तं युक्तिकल्पतरौ च विशेष उक्तो यथा "अङ्गं रूपं तथा जातिर्नेत्रारिष्टे च भूमिका। अभिन्ने ध्वनिर्मानमिति प्रोक्तं खड्गज्ञानाष्टकं शुभम्। अभिन्ने दृश्यते यादृक् विभिन्ने घटिते तथा। यदेव दृश्यते चिह्नं तदङ्गं संप्रचक्षते। नीलकृष्णादिकं खड्गे रूपमित्यभिधीयते। तेनैव यत् प्रतीतं स्यात् तज्जातिरिति गद्यते। अङ्गातिरिक्तं यज्जातिस्तन्माहात्म्योपसूचकम्। तन्नेत्रमिति जानीयात् खड्गे खड्गविशारदाः। अङ्गातिरिक्तं खड्गादि यच्छुभत्वोपसूचकम्। तदरिष्टमिति प्राहुर्भूमिरङ्गादिधारणम्। यः खड्गे जायते शब्दो दण्डदन्तादिना हते। स ध्वनिस्तुलना मानं ज्ञानमष्टविधन्त्विदम्। पञ्चाद्या निपुणैः खड्गे सम्भाव्यन्तेऽपि कृत्रिमाः। अन्त्यावकृत्रिमौ ज्ञेयौ तावेव सहजाविति। शतमङ्गानि चत्वारि रूपाणि जातयस्तथा। त्रिंशन्नेत्राणि जानीयादरिष्टानां तथैव च। भूमिश्च द्विविधा ज्ञेया ध्वनिरष्टविधो मतः। मानन्तु द्विविधं प्रोक्तमित्येषां संग्रहो मतः"। खड्गस्य शताङ्गनामानि लौहार्णवे "रूप्यस्वर्णगजोरुवूकद्मनस्यूलाङ्गकृष्णारुणश्वेताम्भोजगदातिलानलकशाग्रन्थिशिरातैत्तिराः। मालाजीवकषट्पदोर्द्ध्वमरिचव्यालाश्वव-हांशनक्षौद्रक्षुद्रकमक्षिकातुषयवव्रीहिक्षुमाषसर्षपाः। सिंहीतण्डुलगोशिराशिवनखश्माहाक्षिकैशोपलद्रोणीकाककपालपललवरीविम्बीफलीसर्षपाः। नीलीरक्तवचारसोनसुमनाजिह्वीशमीरोहितप्रोष्ठीमारिषभार्गवीखुरताड़न्मेघाद्रिगुञ्जाशराः। दूर्व्वाविल्वमसूरटुण्टुकशठीमार्ज्जारिकाकेतकीमूर्व्वावजूकलायचम्पकबलाम्यपोधवंशासनाः। ज्येष्ठीजालपीपिलिकानलरजःशुण्ठाण्डरोमस्नुहीकर्कन्धूवकुलारनालमहिषस्वच्छर्जुयक्ता इति। प्रोक्ता लौहविशारदेन मुनिना खड्गस्य भेदाः क्रमात्"। तस्य चत्वारि रूपाणि। "नीलः कृष्णश्च पिङ्गश्च धूम्रश्चेति चतुर्विधः। वर्णप्रकर्षः खड्गानां कथितो मुनिपुङ्गवैः"। चतस्रो जातयः। "ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति चतुर्विधः। जातिभेदे विनिर्दिष्टः खड्गानां मुनिपुङ्गवैः"। त्रिंशन्नेत्राणि। "चक्रं पद्मं गदा शङ्खो डमरुर्धनुरङ्कुशः। छत्रं पताका वीणा च मत्स्यलिङ्गध्वजेन्दवः। कुम्भः शूलश्च शार्दूलः सिंहः सिंहासनं गजः। हंसो मयूरो जिह्वा च दशनः खड्ग एव च। पुत्रिका चामरं शैलः पुष्पमाला भुजङ्गमः। त्रिंशदेतानि नेत्राणां खड्गानां कथितानि वै"। त्रिंशदरिष्टानि "छिद्रं काकपदं रेखाभिन्नं भेकश्च मूषिकः। विड़ालः शर्करा नीली मशको भृङ्गसूचिके। त्रिविन्दुः कालिका दारी कपोतः काक एव च। खर्परः शकली क्रोड़ी कुशपत्रक जालिके। करालकङ्कखर्ज्जूरशृङ्गपुच्छखनित्रकम्। लाङ्गूलं वड़िशाख्यञ्च मुनिना तत्त्ववेदिना। प्रोक्तान्येतान्यरिष्टानि खड्गानां त्रिंशदेव हि"। द्विविधा भूमिः "दिव्यभौमविभागेन भूमिस्तु द्विविधा भवेत्"। अष्टधा ध्वनिः। "हंसकांस्याभ्रढक्कानां काकतन्त्रीखराश्मनाम्। ध्वनयोऽष्टविधाः प्रोक्ता नागार्जुन

मुनेर्मताः"। द्विविधं मानम्। "उत्तमाधमभेदेन मानं तद्द्विविधं भवेत्। इति प्रोक्तानि सूत्राणि खड्गानां ज्ञानहेतवे। एतानि तत्त्वतो ज्ञात्वा भवेन्नृपतिपूजितः" सूत्राध्यायः। "तत्र प्रथमतोऽङ्गानां लक्षणानि निबोधत"। लौहदीपे "कृष्यपत्रसमा भूमिरङ्गं श्वेतं प्रतीयते। ऊर्द्ध्वं तत्तु महामूल्यं कृष्यवज्रमुशन्ति तम्। एष खड्गवरो दद्यात् लक्ष्मीमायुर्यशो बलम् १। स्वर्णरेखावली तन्वी यद्भूमौ निकषोपमा। स्वर्णवज्रमिति प्राहुरायुर्लक्ष्मीजयप्रदम् २। गजशुण्डाकृतिर्भूमौ कृष्णायामङ्गसम्भवः। गजवज्रमिति प्राहुरक्तस्पर्शे तु तद्विशेत्। ज्वरादिव्याधिशमनं तस्य प्रक्षालनाम्भसा। अपि क्षीणोपि भूपालस्तद्वीर्यात् साधयेन्महीम् ३। एरण्डबीजप्रतिममङ्गं भूमिः सितेतरा। उर्वारुकमिदं नाम्ना शत्रुदर्पक्षयङ्करः। एतस्य स्पर्शमात्रेण नरः सद्यस्त्विमुच्यते। महिषाख्यमिदं वज्रं केचिदाहुर्मनीषिणः ४। अङ्गं दमनपत्राभं खड्गे यस्मिन् प्रतीयते। विद्याद्दमनवज्रञ्च तज्ज्ञेयं द्विविधं बुधैः। नीला शुभ्रा भवेद्भूमिस्तत्र नीला गरीयसी। तस्मिन् पर्युषितं तोयं गन्धे दमनकोपमम्। तत्प्रभावान् महीपालः कृत्स्नां पृथ्वीं हि साधयेत्" ५। शार्ङ्गधरीये "एका स्थूला सिता रेखा भूमिर्नीला दृढा यदि। स्थूलाङ्गमङ्ग वज्रं तद्विद्याल्लक्ष्मीयशःप्रदम्। एतद्धृते भवेच्छ्रेयः स्थूलश्चिरतरस्थितिः। एतं महान्तमपरे वदन्ति खड्गकोविदाः ६। दृष्टायां दृश्यते भूमौ अङ्गञ्च प्रतिविम्बितम्। अङ्गवज्रं भवेत्तस्य द्विधा भूमिः सिताऽसिता ७। लौहप्रदीपे "निरङ्गं कृष्यपत्राभमीषन्मणिनिभञ्च यत्। दुर्लभं तन्महामूल्यं कान्तलौहं प्रचक्षते। कृष्णा भूमिर्भवेत् स्वच्छा पीता वज्राङ्कसंकुला। कृष्णवज्रमिति प्राहुस्तत्क्षते मोह उच्यते। कृष्णा भूमिः सुवर्णाभमीषच्छुक्लाङ्गसङ्गतम्। डाङ्गलीवज्रकं विद्यात् कालसंज्ञमथापरे ८। अरुणं सूक्ष्ममूर्द्धश्चेदङ्गं भूमिः सितेतरा। अरुणाख्यमिदं वज्रं शत्रुदर्पनिसूदनम्। सूर्य्यांशुस्पर्शमात्रेण वह्निरूपां वहेत् शिखाम्। तस्य स्पर्शनमात्रेण पद्मकोषः स्फुटेन्निशि। दुर्लभं तन्मनुष्याणां भाग्यैः कुत्रापि लभ्यते। तद्योजनसहस्रारिष्टं नाशयति ध्रुवम् ९। श्वेतासितो यदा रेखा आमूलादुपलक्षिताः। श्वेताङ्गमिति तद्विद्याद्यशोलक्ष्मीबलप्रदम् १०। अम्भोजदलसङ्काशमङ्गं भूमिः सितेतरा। अम्भोजवज्रं तज्ज्ञेयं कथितं मुनिपुङ्गवैः ११। अङ्गं यस्य गदाकारं भूमिश्चैव सितेतरा। गदावज्रमिदं ब्रूयात् तत्क्षते शूलसम्भवः १२। अङ्गं कृष्णतिलाकारं भूमिश्चैव सिताऽसिता। तिलवज्रमिदं ज्ञेयं लक्ष्मीबलयशःप्रदम्। तत्क्षते तिलतैलाभा वसा प्रश्रवतेऽधिकम् १३। धूम्रवर्णा भवेद्भूमिरङ्गं वह्निशिखोपमम्। अग्निवज्रमिदं ज्ञेयं शत्रूणां दाहकारकम्। अत्र शीतोदकं न्यस्तं तप्तं भवति च क्षणात्। शाणे वह्निं वमेद् यस्तु तथा सूर्य्यांशुसङ्गमात्। तत्क्षते बलवान् दाहो दग्धवच्च व्रणो भवेत्। एतत् परमभाग्येन लभ्यते धरणीतले १४। भूमिः सिताऽसिता वापि अङ्गञ्चेत् पिप्पलीप्रभम्। कणावज्रमिदं ज्ञेयमन्तर्दाहस्तु तत्क्षते १५। कृष्णा भूमिर्यदीयाङ्गे दृश्यते ग्रन्थिसञ्चयः। ग्रन्थिवज्रमिदं ज्ञेयं वैरिपक्षविनाशनम्। तत्क्षते बलवान् दाहस्तृषा च ज्वर एव च १६। शालपर्णीदलाकारमङ्गं कृष्णासिपुत्रिका। स्थिरावज्रमिदं प्राहुस्तत्क्षते वेपथुर्भवेत् १७। यदा तित्तिरिपक्षाभमङ्गं भूमिः सितेतरा। एतत्तित्तिरिवज्रं स्यात् तत्क्षते वह्निधर्म्मकम् १८। वनमालासमा यस्मिन् माला खड्गे प्रदृश्यते। मालाङ्गवज्रं तद्विद्यात्तत्तोयं गन्धवद्भवेत्। अत्र तप्तोदकं न्यस्तं शीतं भवति तत्क्षणात्। एष दाहपरीतानामतिपित्तहतात्मनाम्। भवेत् परमभैषज्यं भाग्येनैतद्धि लभ्यते १९। यदा जीवकसङ्काशमङ्गं भूमिः सिताऽसिता। एतज्जीवकवज्रं स्यात् तत्क्षते तत्क्षणाज्ज्वरः २०। भूमिः सिताऽसिता चेत्स्यादङ्गं भृङ्गाभमिष्यते। तत्र चेन् मधु विन्यस्तं शोभामाप्नोति केवलम्। एतद्भ्रमरवज्रं स्यात्तत्क्षते स्याद्विसूचिका २१। ऊर्द्ध्वगं कपिलाभासमङ्गं यस्मिन् प्रतीयते। ऊर्द्ध्ववज्रमिदं प्राहुर्विषवेगनिसूदनम्"। लौहप्रदीपे "ऊर्द्ध्वगं कपिलाभासमङ्गं यस्मिन् प्रतीयते। लाङ्गलाङ्गन्तु तद्विद्यात् स्पर्शे तस्याऽहिनाशनम् २२। अङ्गं मरीचसङ्काशं भवेद्भूमिः सितेतरा। मरिचाङ्गमिदं वज्रं तत्क्षते कटुरक्तता। तत्प्रक्षालनतोयेन नश्यन्ति पीनसादयः २३। यदा सर्पफणाकारमङ्गं भूमिस्तु निर्मला। भुजङ्गवज्रं तद्विद्यात्तत्क्षते विषवद्रुजा।

तस्य स्पर्शनमात्रेण भेकः प्राणैर्विमुच्यते । एकस्याश्च प्रसादेन कृत्स्नां शास्ति महीं नृपः २४ । यदाऽश्वखुरसङ्काशमङ्कं भूमिस्तु निर्मला । अश्वाङ्कमिति तं विद्यात् खड्गं परमदुर्लभम् । तस्य संयोगमात्रेण वाजी मन्दोऽपि धावति । तस्य क्षालनतोयेन हयानां रोगनाशनम् । एतच्च्युते भयं मूर्च्छा दाहश्च भ्रम एव च २५ । मयूरपिच्छसदृशमङ्कं भूमिः सितेतरा । बर्हाङ्कमिति तं विद्यात्तच्च्युते शान्तिरिष्यते । सर्पाणामिह सर्वेषामस्य स्पर्शासहिष्णुता । एतदेव नृपतिभिर्भाग्यैः कुत्रापि लभ्यते २६ । भूमिरञ्जनसङ्काशा धारा चास्य सिता भवेत् । अञ्जनाख्यमिदं प्रायः सर्वदैवोपलभ्यते" । लौहप्रदीपे "धारा शुभ्रा भवेद्यस्य भूमिः कज्जलसन्निभा । कृष्णमङ्कैः सितं वापि विद्यात् कज्जलवज्रकम् । मधुवर्णसमा भूमिरङ्कं वा मधुबिन्दुवत् । क्षौद्राख्यमिति जानीयात् जयलक्ष्मीयशःप्रदम्" । शार्ङ्गधरीये "निम्नकच्छो भवेद्यत्र रात्रिन्दिवविलेपितः । मधुरो मधुवर्णाभः स खड्गो देववल्लभः । विशेषाच्चात्र रज्यन्ति सततं मक्षिकादयः" । "आसीमकोषिका यस्य क्षुद्राङ्कं कुण्डलीकृतम् । क्षुद्रवज्रकनामानं प्राह नागार्जुनो मुनिः । इदं कुण्डलवज्रञ्च प्राह लौहार्णवे मुनिः । अस्य क्षतेषु बलवान् दाहो मदविशेषितः २८ । यदङ्कं मक्षिकाकारं भूमिस्तैव सिताऽसिता । क्ष्वेडं शुष्यति चैवात्र मक्षिकाङ्कं तमादिशेत् ३० । अङ्कं यदा तुषाकारं या च भूमिः सिताऽसिता । तुषवज्रमिदं ख्यातं प्राह नागार्जुनो मुनिः ३१ । अङ्कं यवफलाकारं भूमिः कृष्णा सिता तथा । यवाङ्कमिति तं विद्यात्तत्स्पर्शे कण्डुसम्भवः । एष खड्गाधमस्त्याज्यो यदीच्छेद्भूतिमात्मनः ३२ । अङ्कं व्रीहिप्रसूनाभं भूमिर्भूम्ना च्युतेऽतिरुक् । तद्व्रीहिवज्रं जानीयाच्छत्रूणां भयवर्द्धनम् ३३ । अतसीफलसङ्काशमङ्कं भूमिः सिताऽसिता । अतसीवज्रमाख्यातं तच्च्युते शिरसो रुजा ३४ । यदा सर्षपबीजाभमङ्कं भूमिः सिताऽसिता । खरधारः खरस्पर्शः सर्षपाङ्कः सुदुर्लभः ३५ । सिंहाकारं भवेद्यस्य भूमिर्यस्य सिताऽसिता । सिंहीवज्रन्तु तद्विद्यात्तच्च्युते प्रलमेश्वरः । एतत्क्षालनतोयेन कासरोगापनाशनम् ३६ । अङ्कं तण्डुलसङ्काशं भूमिर्भूम्ना सिताऽसिता । तण्डुलाङ्कमिमं विद्याद्यशःश्रीबलवर्द्धनम् । एतत्प्रक्षुषितं तोयं तण्डुलोदकसन्निभम् । अस्य प्रभावान्मनुजो भ्रष्टां हि लभते श्रियम् ३७ । अङ्कञ्चेद्गोक्षुराकारं भूमिराघातनिःसहा । खड्गाधममिदं विद्याद्गोवज्रं नाम नामतः ३८ । स्थूला दीर्घाः शिराः कृष्णा भूमिस्तैव सिताऽसिता । शिराङ्कमिति तं ब्रूयादेनं खड्गाधमं बुधाः ३९ । शिवलिङ्गाकृतिश्चाङ्के धारा चैव सिताऽथवा । शिवाङ्कमिति तं ब्रूयाच्छत्रुपक्षनिसूदनम् ४० । यदा व्याघ्रनखाकारमङ्कं भूमिस्तु पिङ्गला । नखवज्रमिदं विद्यात् तच्च्युते श्वयथुर्भवेत् । एतद्दामिषसंस्पर्शात् प्रविशेत् स्वयमेव हि ४१ । दाहपुच्छोपमन्त्वङ्कं भूमिर्भूम्ना खराकृतिः । दाहाङ्कमिति जानीयाच्छत्रुसंशोपनाशनम् । अस्य स्पर्शनमात्रेण जीवन्मत्स्या अहन्यहन् ४२ । यदा मनुजनेत्राभमङ्कं भूमिः सिताऽसिता । नेत्राङ्कमिति जानीयात् संग्रामे विजयप्रदम् । एतत्क्षालनतोयेन नूनमन्धोऽपि पश्यति ४३ । अङ्कं केशसमं यस्य भूमिर्भूम्ना सिताऽसिता । केशाङ्कमिति जानीयात् क्लेशदुःखभयावहम् ४४ । निरङ्कं स्थूलप्रकृतिसपलाङ्कं विदुर्बुधाः । एतद्धि प्रायशो लोके दृश्यते द्विजसत्तम" ! ४५ । पद्मपुराणे "निरङ्का निशिता धारा शाणे वह्निं वमत्यपि । क्रोधीवज्रमिदं ज्ञेयं पृथिव्यां नातिदुर्लभम् ४६ । अङ्कं काकपदाकारं भूमिराघातनिःसहा । एष खड्गाधमस्त्याज्यो काकाख्यो भूतिमिच्छता ४७ । यदा कपालमङ्केषु दृश्यते स्पर्शतः खरम् । एतद्धि दुःखजनकं कपालाङ्कं बुधस्त्यजेत् ४८ । तन्वी पत्रावलीतुल्या सुवर्णाङ्काऽसिपुत्रिका । पत्रवज्रकमाख्यातमायुर्वेदविदो जनाः" । लौहार्णवे "सुपर्णसन्निभा भूमिरङ्कं कालं प्रतीयते । तत् पत्रवज्रं काकस्य सुपर्णसमजायते ४९ । तुवरीदलसङ्काशमङ्कं यस्मिन् प्रतीयते । तुवरीवज्रमाख्यातं तच्च्युते शिरसो भ्रमः । एष खड्गाधमस्त्याज्यो यदीच्छेज्जीवनं निजम् ५० । शिम्बीशिम्बीदलसमा भूमिरङ्कं शिम्बीफलोपमम् । शिम्बीवज्रन्तु तद्विद्यात्तज्जलं तिक्तमुच्यते । पित्तशूलविकाराणां प्रशमाय प्रयुज्यते ५१ । प्रियङ्गुसदृशन्त्वङ्कं भूमिश्च कपिलाकृतिः । फलीवज्रमिदं प्रोक्तं शाणे धूम्रं वमत्यपि ५२ । अङ्कं सर्षपपुष्पाभं भूमिस्तैव सिताऽसिता । एतत् सर्षपवज्रं स्यात् शाणे वह्निं वमत्यपि ।

अपि कुण्डलिकां याति एतदत्यन्तकोमलम्। एतत्प्रसादात् क्षितिपः कृत्स्नां साधयते महीम् ५३। नीलीरससमा भूमिरङ्गं नीलीतरङ्गवत्। नीलीवज्रमिदं दृष्टं शाणे वह्निशिखां वमेत्। एष खड्गवरोऽन्येषामरिष्टभयनाशनः ५४। रक्तास्तिस्रो महारेखा भूमिश्चैव सिताऽसिता। रक्ताङ्गमिति जानीयाद्वैरिपक्षविनाशनम्। शाणेन यस्तु रक्तां वा नीलां वा वमते शिखाम्। रक्तस्पर्शनमात्रेण स्वयमेव निकृन्तति। क्षतेऽस्य रक्तश्वयथुस्तृषा दाहश्च जायते ५५। अङ्गं पद्मादलसमं भूमिश्चैव सिताऽसिता। पद्मावज्रमिदं ज्ञेयं तत्क्षताद्विषनाशनम्। एष खड्गवरो राज्ञा साधनीयः प्रयत्नतः ५६। रसोनाद्युत्तमं ह्यङ्गं भूमिस्तस्य दलोपमा। रसोनवज्रं जानीयात् शाणे वह्निं वमत्यपि। अस्य धावनतोयेन श्वासवातविनाशनम् ५७। निरङ्गा निर्मला भूमिर्धारा तीक्ष्णा खरः स्वरः। सुसमा वज्रमेतत् स्याद्भुवि नात्यन्तदुर्लभम् ५८। जिह्विनी सदृशी दीर्घा यस्या रेखा सुविस्तरा। जिह्वीवज्रमिदं नाम सर्वकामार्थसाधनम् ५९। अङ्गं शमीपत्रसमं भूमिर्धूम्रा सिताऽसिता। शमीवज्रमिदं ज्ञेयं शनैश्चरमुदावहम्। शाणेषु वमते वह्निं सहते वह्निपीडनम् ६०। रोहितशल्कसदृशमङ्गं भूमिः सिताऽसिता वापि। धूम्रा गम्भीरस्वरयुक्ता धारा तीक्ष्णाऽसिता भवेद्रेखा। रोहिताख्यमिदं वज्रं सर्वारिष्टविनाशनम्। वह्निसंस्पर्शमात्रेण किञ्चिच्चिमिचिमायते। इत्ययं दुर्लभः खड्गो देवानामपि कथ्यते ६२। शफरीवल्कलाकारमङ्गं भूमिः सिताऽसिता। प्रोष्ठीवज्रमिदं प्रोक्तं न्यस्तं तरति वारिणि। एष खड्गोत्तमो राज्ञां विपक्षकुलनाशकः। कदाचिल्लभ्यते भाग्यैर्लभ्यते तेन वै मही ६३। अङ्गं मारिषपत्राभं भूमिः स्याद्विषमच्छविः। इत्ययं मारिषाङ्गः स्यात् पृथिव्यां नातिदुर्लभः ६३। भृङ्गराजस्य पुष्पाभमङ्गं भूमिर्दलप्रभा। आघातं सहते नैव एष खड्गाधमो मतः ६४। धारा तीक्ष्णा खुराकारा भूमिरङ्गविवर्जिता। आघातं सहते घोरं शाणे वह्निं वमत्यपि। खुराङ्गमिति जानीयात् पृथिव्यां नातिदुर्लभम् ६५। निर्मला सरला भूमिर्भवेच्चैव कदा कदा। मन्दा तीव्रा भवेद्धारा तड़िद्वज्रस्य लक्षणम् ६६। नीलाञ्जनसमा भूमिरङ्गं जलतरङ्गवत्। मेघाङ्गमिति जानीयाच्छाणे शीतं भवत्यपि। एष खड्गाधमस्त्याज्यो यदीच्छेद्भूतिमात्मनः। भर्त्तुः प्रतापं शमयेद्रविबिम्बं यथा घनः ६७। मन्दा धारा भृशं गाढ़ा भूमिरङ्गविवर्जिता। पर्वताङ्गमिदं नाम सर्वत्रैवोपलभ्यते ६८। अङ्गं गुञ्जाफलसमं भूमिर्मीनदलोपमा। गुञ्जावज्रमिदं घृष्टं तप्तं भवति घर्षणे। शाणे सिन्दूरसङ्काशं रजोवमति चासकृत्। एष खड्गवरो राज्ञा भाग्यादेवोपलभ्यते। अस्य प्रभावात्तन्नास्ति यन्न साधयते नृपः ६९। अङ्गं तनु शराकारं भूमिश्चैव सिताऽसिता। धारा तीक्ष्णा च वमति शाणे वह्निसमाः शिखाः। शरवज्रमिदं ज्ञेयं राज्ञां वाञ्छितसिद्धये ७०। दूर्व्वादलनिभा भूमिर्धारा तीक्ष्णा खरः स्वरः। शाणेन वमते वह्निं दूर्व्वावज्रं सुदुर्लभम् ७१। अङ्गं बिल्वदलाकारं भूमिश्चैव सिताऽसिता। बिल्ववज्रमिदं शाणे नीलपीते वमेच्छिखे। एष खड्गवरः प्रोक्तः शत्रूणां कुलनाशनः ७२। मसूरदलसङ्काशा भूमिरङ्गं मसूरवत्। मसूराङ्गमिदं शाणे रजो वमति चारुणम् ७३। शणपुष्पनिभा रेखा दीर्घा भूमिः सितेतरा। शणाङ्गमिति जानीयात् खड्गं परमदुर्लभम् ७४। शटीदलसमा भूमि रङ्गं तत्कुसुमोपमम्। शटीवज्रमिदं प्रायो लभ्यते गुणवत्तरम् ७५। मार्जाररोमसदृशमङ्गं भूमिः सितेतरा। मार्जाराङ्गमिदं नाम्ना रोगशोकभयावहम्। एष खड्गाधमस्त्याज्यो यदीच्छेद्भूतिमात्मनः ७६। केतकीपत्रसदृशमङ्गं यस्मिन् प्रतीयते। विद्यात् केतकवज्रं तत् वाराणससमुद्भवम्" ७७। लौहप्रदीपे "अङ्गं मूर्वातन्तुनिभं भूमिर्मूर्वादलच्छविः। शाणेन वमते शुक्लां शिखां मौर्वी भवेत्ततः। मौर्व्यङ्गमिदमुत्कृष्टं यशःकीर्त्तिबलावहम् ७८। लिङ्गं तीक्ष्णं खरं गाढ़ं शाणे वह्नेर्वमेत् कणम्। छिनत्त्यन्यविधं लौहं वज्राङ्गमिति तद्वदेत् ७९। कलायपुष्पसदृशमङ्गं भूमिः सिताऽसिता। कलायवज्रं जानीयात् तत्क्षते पाक दृश्यते ८०। अङ्गं चम्पकपुष्पाभं भूमिः कृष्णा तथा सिता। शिखां शाणे वमेच्छीतं तिक्तं तस्य जलं भवेत्। इदं चम्पकवज्रं स्यात् सर्वत्र विजयप्रदम् ८१। अङ्गं बलादलसमं भूमिः शुक्ला तथेतरा। बलावज्रमिदं ज्ञेयं नानाभावं भद्रवेद्रुतम्। इत्ययं वातरोगाणां नाशने परमौषधम् ८२। अङ्गं वटारोहसमं भूमिर्वटदलच्छविः। वटवज्रमिदं ज्ञेयं खरं खड्गाधमं बुधैः।

एतस्य स्पर्शमात्रेण नरो मुच्येत सम्पदा ८३ । वंशनीली समा भूमिः खरधारा सिताकृतिः । वंशाङ्गमिति जानीयाद्वंशवृद्धिकरं परम् ८४ । भूमिःसालदलाकारा ह्यङ्गं लघु सितासितम् । सालाङ्ग एष खड्गः स्यात् पूज्यः सर्व्वार्थदायकः । अयं शाणे वमेद्वह्निं धारा चाप्यथ वा भवेत् ८५ । भूमिः सिताऽसिता वापि ह्यङ्गं ज्येष्ठीसमं लघु । ज्येष्ठीवज्रमिदं निन्द्यं न स्पृश्यं वा हितेच्छुभिः ८६ । पुराणजालसदृशमङ्गं भूमिः सिताऽसिता । जालवज्रमिदं पूज्यं शत्रुसम्पत्तिनाशनम् । यदि शाणे वमेन्नीलां शिखां वह्निं वमेच्च वा । तदैष दुर्लभः खड्गो ह्यन्यथा भयहेतुकः ८७ । ह्यङ्गं पिपीलिकाकारं भूमिर्धूम्रा तथा सिता । पिपीलिकाङ्ग इत्येष तत्क्षते कण्डुसम्भवः । स्वयं यदि भवेद्भग्नः शाणे पूज्यतमस्तदा ८८ । नलपत्रसमा भूमिरङ्गन्तत्कुसुमोपमम् । नलाङ्गमिति जानीयाद्भर्तुः सर्व्वार्थसाधकः ८९ । निरङ्गा निर्म्मला भूमिर्दृष्टं वमेद्रजः । दृढा धारा भृशं स्थूला आघातं सहते न च । रजोवज्रमिदं निन्द्यं शत्रूणां विजयावहम् ९० । कुष्माण्डवीजसदृशमङ्गं भूमिः सिताऽसिता । कुष्माण्डवज्रं जानीयात्तत्क्षते वेगनिग्रहः ९१ । ह्यङ्गं स्वरोमसदृशं भूमिर्धूम्रा सितासिता । रोमाङ्गमिति जानीयात्तत्क्षते पिड़कोद्गमः ९२ । भूमिः स्नुहीदलाकारा ह्यङ्गं तत्कण्टकोपमम् । धारा तीक्ष्णारवस्तीक्ष्णो लघु मानं खरा स्पृशा । स्नुह्यङ्गः खड्ग इत्येष तत्क्षते दाहदृग्भ्रमः । मुखाक्षिकर्णनासानां दाहः पाकश्च जायते । अयं यदि च सर्पाणां फणास्तूपरि विध्यते । फणा विदारमाप्नोति सर्पो लोटयते शिरः । अस्य धावनतोयेन कुष्ठरोगविनाशनम् ९३ । कर्कन्धूदलपृष्ठाभा भूमिरङ्गन्तु तत्समम् । कर्कन्धूवज्रं जानीयात् तत्क्षते दाहनाशनम् । एष खड्गाधमस्त्याज्यो जेतव्या यदि विद्विषः ९४ । ह्यङ्गं बकुलपुष्पाभं भूमिस्तत्फलसन्निभा । बकुलाङ्गमिदं पुण्यं शाणे सुरभिगन्धवत् । तन्नास्ति जगतीमध्ये यदनेन न साध्यते ९५ । ह्यङ्गं सम्मिश्रितं यस्मिन्न किञ्चिद्व्यक्तमीक्ष्यते । सर्व्वेषां दर्शनं वापि तीक्ष्णा धारा खरः स्वरः । एष काञ्जिकवज्रः स्याद्यत्नादेवोपलभ्यते । नैनं प्राप्यापि वर्द्धन्ते शेषास्त्रिवादयोपि च ९६ । भूमिः कृष्णा निरङ्गा चेद्धारा तीक्ष्णा दृढापि च । आघातं सहते घोरं रक्तं स्पर्शेन या विशेत् । शाणेन वह्निं वमति भुवं वाप्यतिघर्षणात् वा महिषाङ्गः स वै खड्गः पृथिव्यां नातिदुर्लभः ९७ । अत्यन्तनिर्म्मला भूमिः शरीरं प्रतिविम्बितम् । धारा तीक्ष्णा खरस्तीक्ष्णः स्वच्छाङ्गं तद्विनिर्दिशेत् ९८ । तस्मिन् यदा भवेद्रेखा ऋज्वी ऋज्वाख्यकं तदा ९९ । अस्मिन्नपि भवेद्वक्रा रेखा वक्राभिधन्तु तत् १०० । एतच्छतकमुद्दिष्टं खड्गानां प्रवरं बुधैः । प्रायशो लभ्यते लोके यदि सर्व्वगुणावहम् । इतीदं निखिलं प्रोक्तं वज्राणां लक्षणं मया । प्रयत्नैर्लिखितं व्यक्तं सर्व्वेषां हितकाम्यया । इतः परन्तु लौहानां लक्षणं यत्र लभ्यते । तस्य दाशो भवाम्येष प्रतिज्ञेति कृता मया । द्विलिङ्गमिश्रमालोक्य मिश्राङ्गमिति निर्द्दिशेत् । सर्व्वेषा मङ्गमालोक्य सर्व्वाङ्गमिति निर्द्दिशेत्" । अङ्गाध्यायः । खड्गस्य रूपाणि यथा । "नीलीकलायकुसुमच्छविरञ्जनाभा या चेन्द्रनीलमणिकाचमणिप्रभा च । भूमिश्च या मरकतप्रतिमावभासा खड्गस्य नीलमिति रूपमिदं वदन्ति । तत्र चेन्निन्दितान्यङ्गान्यरिष्टानि बहून्यपि । दृश्यन्ते बहुदोषाश्च तथापि गुणवत्तरम् १ । या कालकाम्बुदमसीरसकालसर्पगाढान्धकारकचभारसमा विभाति । भूमिश्च या भ्रमरबन्धुसमावभासा खड्गस्य कृष्णमिति रूपमिदं वदन्ति । अत्र नेत्राणि सम्पत्त्यै अरिष्टान्यशुभाय च । साधारणमिदं रूपं प्राह नागार्जुनो मुनिः २ । या माहिषेण्यनवभेकसमानवर्णा गोमेदरत्नसदृशी च तु यस्य भूमिः । खड्गस्य पिङ्गमिति रूपमिदं वदन्ति भर्त्तुर्यशोवलधनक्षयकारणाय ३ । या मन्दधूमसदृशी च शिरीषपुष्पतुल्या विभाति मलिनापि च खड्गभूमिः । नागार्जुनो वदति धूम्रमिदं हि रूपं भर्त्तुर्यशोवलधनावलिमर्द्दनाय ४ । द्विरूपं मिश्रितं कृत्वा सङ्करं प्रवदेद्बुधः । त्रिभीरूपैः समेतन्तु खड्गं त्रिपुरसंज्ञितम् । रूपैश्चतुर्भिः संयुक्तं चतुरं खड्गमुत्तमम्" । रूपाध्यायः । "जातिश्चतुर्विधा प्रोक्ता खड्गानां या पुरा मया । सम्प्रत्यपि प्रयत्नेन तासां लक्षणमुच्यते । शुद्धाङ्गः शुद्धवर्णश्च सुनेत्रः सुस्वरश्च यः । मृदुस्पर्शः सुसन्धेयस्तीक्ष्णधारो महागुणः । खड्गं ब्राह्मणजातिं तं प्राह नागार्जुनो मुनिः । अस्य क्षते भवेच्छोथो घोरः सर्व्वाङ्गगोचरः । मूर्च्छा पिपासा दाहश्च ज्वरो मृत्युश्च जायते । कष्टं त्रिफलाकल्कमर्द्दरात्रिन्दिवोषि-

तम्। मलिनत्वं न सम्प्राप्ते निर्मलं कुरुते परम्। अरुणादित्यकिरणस्पर्शादेव क्षणे स्थितः। दहेत् सर्वं न तु करं पुरुषस्य हि धारिणः। गायत्र्युच्चारमात्रेण खरतां व्रजति स्फुटम्। एष खड्गवरः सर्वमरिष्टं नाशयेद्ध्रुवम्। अस्य प्रसादात् पुरुषस्त्रिलोकमपि साधयेत्। तस्मादेष मनुष्याणां सुलभो न हि भूतले। दृश्यते प्रायशः स्वर्गे कुशद्वीपे हिमालये १। धूम्रवर्णं महाकारं तीक्ष्णधारं खरस्वरम्। सर्वाघातसहं सर्वनेत्रवर्णस्वराकरम्। खड्गं क्षत्रियजातिं तं जानीयात् खड्गकोविदः। अस्य क्षते भवेद्दाहस्तृषा दाहो ज्वरो भ्रमः। मृत्युश्च जायते शाणे वमेद्वह्निकणान् बहून्। संस्कारे चाप्यसंस्कारे नैर्मल्यं तस्य लक्ष्यते। शाणेऽप्यशाणे खरता मूर्द्ध्नि चात्यन्ततीक्ष्णता। रक्तस्पर्शनमात्रेण विशेदन्तरमन्तरम्। अयं खड्गवरः पूज्यो मनुष्यैरपि लभ्यते २। नीलवर्णः कृष्णवर्णः संस्कारे निर्मलो भवेत्। शाणेन खरता चास्य खाततुल्यं निकृन्तति। वैश्यजातिरयं खड्गः क्षते स्वड्मात्रदर्शनम्। नात्युत्कृष्टो नातिहीनः सर्वत्रैवोपलभ्यते ३। सजलाम्भोदसङ्काशः स्थूलधारो मृदुस्वरः। संस्कारे चैव मलिनः शाणे चापि खरेतरः। शूद्रजातिरयं खड्गः क्षते नाल्पाऽपि वेदना। दूरादेषोऽधमस्त्याज्यो यदीच्छेद्धितमात्मनः। प्रायशः सर्वलोकेषु द्वयमेवोपदृश्यते ४। द्वयोर्लक्षणमालोक्य जारजं खड्गमादिशेत्। त्रयाणां लक्षणेनैव त्रिजातिं खड्गमादिशेत्। चतुर्णां लक्षणेनैव जातिसङ्कर उच्यते"। अथ त्रिंशन्नेत्राणां लक्षणानि "चक्राकारं यदा नेत्रं खड्गस्याङ्गे प्रदृश्यते। तं चक्रनेत्रं जानीयात् भर्त्तुः सर्वार्थसाधनम्। अनेनैकेन खड्गेन कृत्स्नां साधयते महीम् १। प्रफुल्लपद्मसङ्काशं नेत्रं पद्मदलोपमम्। यदि वा दृश्यते खड्गे पद्मनेत्रं समादिशेत्। अयं खड्गवरो यत्र तत्रैव कमलालया २। ऊर्द्ध्वा स्थूला यदा रेखा गदाकारा प्रतीयते। गदानेत्रमिदं विद्धि सर्वशत्रुनिसूदनम् ३। शङ्खाकारं यदा नेत्रं खड्गमध्येऽभिदृश्यते। शङ्खनेत्रमिदं सर्वदेवानामपि दुर्लभम् ४। डमरुप्रतिमं नेत्रं यस्य भूमौ प्रतीयते। सर्वार्थसाधकं खड्गं तं विद्यात्विजयप्रदम् ५। धनुःस्वरूपं यन्नेत्रं धनुर्नेत्रमुशन्ति तम्। तस्य स्पर्शनमात्रेण शत्रोऽपि प्रमुखायते। अयं निशीथे विजने खड्गो झनझनायते ६। यन्नेत्रमङ्कुशाकारं तं विद्याद्गुणवत्तरम्। खड्गमङ्कुशनेत्राख्यं भर्त्तुः सर्वार्थसाधकम्। अलक्ष्मीपापरक्षोघ्नं कृत्याग्रहनिवारणम् ७। छत्राकारं यदा नेत्रं छत्रनेत्रं वदन्ति तम्। अस्य प्रभावात् क्षीणोऽपि सार्वभौमो भवेन्नृपः। दीनोऽपि च सुखी भूयात् सुखी भूयान्महेश्वरः। महेश्वरोऽपि सचिवः सचिवो मण्डलेश्वरः। मण्डलेशश्चक्रवर्त्ती भवेदत्र न संशयः ८। पताकाकृति नेत्रञ्चेत् सर्वसम्पत्तिकारकम्। पताकानेत्रमाख्यातं संग्रामविजयप्रदम् ९। नेत्रं वीणाकृति यदा वीणानेत्रमुशन्ति तम्। निशीथे विजने खड्गो वीणावत् स्वनमावहेत्। अस्य प्रभावात् सर्वेशत्र्या अपि वश्या भवन्ति हि १०। मत्स्याकृति यदा नेत्रं मत्स्यनेत्रमिमं विदुः। अस्य प्रभावात् क्षितिपः कृत्स्नां साधयते महीम् ११। शिवलिङ्गसमं नेत्रं लिङ्गनेत्रमिमं विदुः। भर्त्तुः सर्वार्थसंसिद्ध्यै शत्रूणां नाशनाय च। वामपार्श्वे तु यात्रायां धर्त्तव्योऽयं तथा रणे १२। ध्वजाकारं तु यन्नेत्रं ध्वजनेत्रं वदन्ति तम्। अस्य प्रभावात् भूपालः समग्रां लभते श्रियम् १३। यस्यार्द्धचन्द्रप्रतिमं नेत्रं स त्वर्द्धचन्द्रदृक्। तस्य धारणतो भूपो धरां कृत्स्नां लभते वै १४। यन्नेत्रं कलसाकारं कलसाख्यं तमादिशेत्। तस्य प्रभावात् सकलां भूमिं भूपो लभेत वै १५। शूलाकृति यदा नेत्रं शूलनेत्रं वदन्ति तम्। सर्वार्थसाधकः सर्वारिष्टाऽनिष्टप्रणाशनः १६। शार्दूलनेत्रं तं विद्यात् शार्दूलाकृतिनेत्रतः। शत्रुश्रेणीविनाशाय संग्रामे विजयाय च १७। सिंहाकृति यदा नेत्रं सिंहनेत्रमिमं विदुः। अस्य प्रभावात् क्षीणोऽपि कृत्स्नां साधयते महीम् १८। तत् सिंहासननेत्रं स्यात् नेत्रे सिंहासनोपमे। अस्य प्रभावात् क्षितिपः कृत्स्नां साधयते महीम् १९। राजाकृति यदा नेत्रं राजनेत्रं वदन्ति तम्। अस्य प्रभावात् क्षीणोऽपि लभते राजसम्पदम् २०। नेत्रं हंसाकृति यदा हंसनेत्रं वदन्ति तम्। अस्य प्रभावात् भूपालो यशः प्राप्नोत्यनुत्तमम् २१। मयूराकृतिके नेत्रे तन्नेत्रमिति निर्दिशेत्। अस्य प्रभावात् मनुजः सर्पदर्पान्निसूदयेत् २२। जिह्वाकारं यदा नेत्रं जिह्वानेत्रं वदन्ति तम्। संग्रामखर्परेष्वेवं पिबेद्वैरिशिरोरजः २३। दन्ताकारं यदा नेत्रं दन्तनेत्रं वदन्ति तम्। अयं रिपुगणं मूर्द्ध्नि चर्वयत्यति

भैरवम् २४। खड्गाकारं यदा नेत्रं खड्गनेत्रं वदन्ति तम्। अस्य प्रभावान्मनुजस्त्रिलोकीं वशयेदपि २५। मनुष्यपुत्तिकाकारं पुत्तिकानेत्रमुच्यते। अयं सशैलां सद्वीपां कृत्स्नां साधयते क्षितिम्। न चेयं पुत्तिका किन्तु जयलक्ष्मीरिह स्वयम्। तस्मान्नायं मनुष्याणामल्पभाग्येन लभ्यते २६। चामराकृतिनेत्रत्वात्तन्नेत्रमिति निर्दिशेत्। अस्य प्रभावात् जायन्ते चामरोद्धृतसम्पदः २७। एकाऽनेकशिखे शैलनेत्रे तन्नेत्रसंज्ञकम्। अपि राष्ट्रभये युद्धे विषमे वैरिसङ्कटे। स्थिरीकरोति धरणीं धरणौ पर्वतो यथा २८। पुष्पमालासमं नेत्रं पुष्पनेत्रं वदन्ति तम्। अस्य प्रभावात्तुष्यन्ति ग्रहाः सर्वाश्च देवताः २९। भुजङ्गसमे नेत्रे सर्पनेत्रमिदं मतम्। अयं शत्रुगणं हन्ति यथा मर्त्यं भुजङ्गमः ३०। सवर्णमसवर्णञ्च तत् सर्वं द्विविधं भवेत्। सवर्णं शान्तिसम्पत्त्यै रिपुनाशे तथा परम्। द्वयोरेकत्र दृष्टे च तत् पुनः द्विविधं भवेत्। एकं लोके सुखं, नेत्रं ददाति द्विविधं द्वयोः। मूलमध्याग्रसंस्थानात् तत् पुनस्त्रिविधं मतम्। अग्रे चाग्र्यफलं ज्ञेयं मध्ये मध्यफलं मतम्। मूले फलं जघन्यं स्यात् प्राह नागार्जुनो मुनिः। एकं द्वे त्रीणि नेत्राणि नात्र संख्याव्यतिक्रमः। एकं धर्मं, स्वर्गकामौ द्वे, त्रीणि च त्रिवर्गकम्। तत् फलानि प्रयच्छन्ति प्राह नागार्जुनो मुनिः। द्विनेत्रमिति जानीयात् स्वसंज्ञां नेत्रयोर्द्वयोः। त्रिनेत्रञ्च त्रिभिर्ज्ञेयं बहुनेत्रमतः परम्। यथोत्तरं गुणवहं खड्गमाहुरनुत्तमम्। दिङ्मात्रमिति निर्दिष्टं नेत्राणां शुभदायिनाम्। तीव्राणां मङ्गलानाञ्च दर्शनञ्च शुभावहम्। यथा नेत्रस्य संस्थानं तथाऽरिष्टस्य लक्षयेत्। नेत्रेषु स्थाननियमो नारिष्टे स्थाननिर्णयः। प्रशस्ताङ्गोऽपि यः खड्गोऽरिष्टेनैकेन निन्दितः"। अथ त्रिंशदरिष्टानां लक्षणानि "छिद्रवद्दृश्यते खड्गे स्वभावेन च लक्ष्यते। छिद्रारिष्टमिदं विद्धि भर्त्तुर्वीर्य्यबलापहम् १। यदा काकपदाकारमरिष्टं दृश्यते क्वचित्। अयं काकपदारिष्टः सर्व्वाभीष्टविनाशनः २। रेखाकारं यदारिष्टमूर्द्ध्वं वा तिर्य्यगेव वा। रेखारिष्टमिदं विद्धि भर्त्तुर्वीर्य्यबलापहम् ३। भिन्नभ्रान्तिकरं पापं भिन्नारिष्टमिदं विदुः। भर्त्तुः कुलं यशो राष्ट्रं नाहत्वा न भजेत् क्षयम् ४। यदा भेकशिरोरूपमरिष्टं दृश्यते क्वचित्। भेकारिष्टमिदं नाम्ना संग्रामे भयदायकम् ५। अरिष्टे मूषिकाकारे मूषिकारिष्टमुच्यते। अयं खड्गाधमः कुर्य्यात् पत्युः पातालसङ्गमम् ६। विड़ालनयनाकारो विन्दुरेकोऽतिविस्तरः। विड़ालारिष्टमेतत् स्यात् भर्त्तुः सर्वार्थनाशनम् ७। अरिष्टं शर्कराकारं यदा स्पर्शेन बुध्यते। शर्करारिष्टमेतत् स्याद्धनबुद्धिविनाशनम् ८। यदा नीलीरसाभासमरिष्टं दृश्यते क्वचित्। नील्यरिष्टमिदं ज्ञेयं यशोलक्ष्मीविनाशनम् ९। अरिष्टे मशकाकारे मशकारिष्टमुच्यते। भर्त्तुः कुलं यशो बुद्धिं धृतिं प्रीतिञ्च नाशयेत् १०। भृङ्गप्रतिमो विन्दुरेकोऽनेकोऽथ वा यदा। भृङ्गारिष्ट इत्येष धृतिस्मृतिविनाशनः ११। सूचीरूपमरिष्टञ्चेदूर्द्ध्वं वा तिर्य्यगेव वा। सूच्यरिष्टमिदं नाम भर्त्तुः कुलविनाशनम् १२। त्रयश्चेद्विन्दवो राजन्! पङ्क्तयो विषमेण वा। उपर्य्युपरि यातोऽथस्त्रिविन्द्वाख्यमरिष्टकम्। तस्य स्पर्शनमात्रेण सचेलः स्नानमाचरेत् १३। कालिकारिष्टमित्येतद्धि धीधृतिस्मृतिनाशनम् १४। एकत्र यदि नश्येत प्रयत्नेनापि संहृतः। दारीनाममहारिष्टं सर्वाभीष्टविनाशनम्। अनेकगुणसम्पन्नः खड्गो लोकैर्न गृह्यते १५। कपोतपक्षप्रतिममरिष्टञ्चेत्तदाक्षयम्। भर्त्तुः कुलं यशो विद्यां बलं बुद्धिञ्च नाशयेत् १६। काकाकृति यदा रिष्टं काकारिष्टं तदोच्यते। अनेन भर्त्तुः संग्रामे भङ्ग एवोपजायते १७। अरिष्टे खर्पराकारे खर्परारिष्टमुच्यते। भर्त्तुर्यशो बलं वीर्य्यं बुद्धिं प्रीतिञ्च नाशयेत् १८। यदान्यलोहशकलं लग्नं स्यादिव लक्ष्यते। शकलीति स वै खड्गः सर्वाभीष्टनिसूदनः १९। क्रोड़ीमुखसमाकारं यत्रारिष्टं प्रदृश्यते। क्रोड्यरिष्टमिदं नाम भर्त्तुः सर्वार्थनाशनम् २०। कुशपत्रसमाकारं यत्रारिष्टं तु लक्ष्यते। कुशपत्रारिष्टमिदं भर्त्तुर्दुःखाय कीर्त्तितम् २१। यच्छिन्नमिवाभाति मध्ये वा दृश्यते क्वचित्। जलारिष्टमिदं नाम भर्त्तुः कुलधनापहम् २२। एकैकरेखा दीर्घाग्रा यदा पल्लविनी भवेत्। स्पर्शे नश्येत् करेणेदं करालारिष्टमुच्यते। अयं हि क्षितिपालानां दृष्टियोग्यो भवेन्न हि। दर्शनादेव नश्यन्ति यशोलक्ष्मीजयादयः २३। अरिष्टे कङ्कपत्राभे कङ्कारिष्टं तदुच्यते। अस्य स्पर्शनमात्रेण नश्यत्यायुर्यशो बलम् २४। खर्जूरदलप्रतिमं यदाऽरिष्टन्तु लक्ष्यते। खर्जूरारिष्ट-

मेतत् स्याद्भर्त्तुः कुलधनापहम् २५। गोशृङ्गाभमरिष्टञ्चेत् शृङ्गारिष्टं तदोच्यते। अनेन भर्त्तुर्नश्यन्ति लक्ष्मीबलकुलादयः २६। गोपुच्छाकृति चेत् खड्गे अरिष्टं संप्रवीक्ष्यते। पुच्छारिष्टमिदं नाम भर्त्तुः सर्वार्थनाशनम् २७। खनित्राभमरिष्टञ्चेत् खनित्रारिष्टमुच्यते। शूराणामपि संग्रामे भङ्गमेतत् प्रयच्छति २८। अरिष्टे लाङ्गलाकारे लाङ्गलारिष्टमुच्यते। अयं पापात् पापतरः प्रेक्षणीयो न भूभुजा। अयमायुः श्रियं हन्ति विद्यां बलमशेषतः २९। अरिष्टं वड़िशाकारं वड़िशारिष्टमुच्यते। करोति कुटिलं सर्वं भर्त्तुः कुलनिकृन्तनम् ३०। इत्यरिष्टानि प्रोक्तानि नानातन्त्रात् प्रयत्नतः। विचार्य्यैतानि मतिमान् खड्गं कोशे निधापयेत्। दिङ्मात्रमिदमुद्दिष्टमरिष्टानां हितात्मनाम्। अमङ्गलानां मन्दानां दर्शनञ्चाशुभावहम्। अरिष्टमेकमेव स्याद्द्विररिष्टं शुभावहम्। अन्योन्यमशुभं हन्याद्विषस्य हि विषं यथा। एकमारभ्य सप्तान्तमरिष्टं प्राह मान्यथा। यथोत्तरं द्विगुणितं फलमाहुर्मनीषिणः। अरिष्टाध्यायः। अथ द्विविधभूमिः। "दिव्यभौमविभागेन सभूमिर्या द्विविधा मता। दिव्या दिवि समुद्भूता भौमा भूमिसमुद्भवा। तल्लक्षणमशेषेण लिख्यते तन्निबोधत। देवदानवयोर्मध्ये खड्गसृष्टिरभूत् पुरा। ते खड्गाः पुण्यदेशेषु केषु केषु प्रतिष्ठिताः"। दिव्यलक्षणं यथा "ये खड्गाः स्थूलधारा भृशमतिलघवो निर्मलाङ्गाः सुनेत्रा येऽरिष्टान्यस्वरूपाः सुविमलतनवश्चाप्यसंस्कारयोगात्। दुर्भेद्या दुर्घटाश्च ध्वनिगुणगुरवो यत्क्षते दाहपाकौ ते दिव्याः कुर्वतेऽमी कुलधनविजयश्रीयशोवृद्धिमाशु" १। अथ भौमलक्षणम्। वृद्धहारीते "पूर्वं महेशेन विषाणि यानि भुक्तानि तेषां पतितास्तु विन्दवः। पुरामृतं क्षीरसमुद्रमध्यादुत्पाद्य संदृह्य पपुः सुरेन्द्राः। तद्विन्दवो यत्र निपेतुरेव शुद्धायसा साकरतां जगाम। ये विषोत्था भृशं कालाः खराङ्गाः सम्भवन्ति हि। मूर्च्छादाहज्वरानाहशोकहिक्कावमीकराः। येऽमृतोत्थाः कर्बुराङ्गा मन्दाङ्गाः सम्भवन्ति च। वलीपलितमालिन्यजराव्याधिविनाशनाः। यत्रैव पतितं यत्तु तत्तदाकरतां गताः"। तद्यथा "वाराणसीमगधसिंहलभूमिभागे नेपालभूमिषु तथाङ्गकलिङ्गदेशे। सौराष्ट्रकेऽन्यतमधन्यमहीविभागे शुद्धायसां कृतिवराः प्रवदन्ति सन्तः"। तथा। "वाराणसेयाः सुस्निग्धाः तीक्ष्णधाराः सदङ्गिनः। लघवः सुखसम्भेद्याच्छेद्याश्चाभेद्यशालिनः। मागधाः कर्कशाः स्थूलधारा गूढतराङ्गिनः। गुरवो दुःखसम्भेद्याः खड्गा ज्ञेया विचक्षणैः। नेपालदेशप्रभवा निरङ्गा निस्तलाश्च ये। ज्ञेयाः सदङ्गा मलिना लघवः स्थूलधारिणः। कालिङ्गा गुरवः स्वच्छा व्यक्ताङ्गास्तन्तुहेतवः। सौराष्ट्रा निर्मलाः स्निग्धाः सुव्यक्ताङ्गा भृशं खराः। सिंहलद्वीपजातानां चतुर्धा भेद उच्यते। केचित् सदङ्गा गुरवः कर्कशाः स्निग्धधारिणः। केचित् सदङ्गा लघवः सुस्निग्धा स्थूलधारिणः। एषां क्रमेण मिश्रेण ज्ञेया हि द्विजजातयः। सामान्यात् द्विगुणश्चौड्रं कलिर्दशगुणस्ततः। कलेः शतगुणं भद्रं भद्राद्वज्रं सहस्रधा। वज्रात् षष्टिगुणः पाण्डिर्निरविर्दशभिर्गुणैः। ततः कोटिसहस्रेण ह्ययस्कान्तः प्रशस्यते। आसान्तु लौहजातीनां वज्रं खड्गाय युज्यते। ये खड्गास्तीक्ष्णधारा भृशमतिगुरवः षड्गुणाढ्याः सुभेद्याः केचित् साङ्गा निरङ्गाः कतिचन समला निर्मलाः केचिदेव। ते भौमाः कुर्वतेऽमी धनविजयबलं षड्गुणा निर्गुणा ये ते दुःखं शोकमुग्रं दधति बलकुलश्रीयशोनाशनास्ते"। अथाष्टधा ध्वनिः। "ध्वनिरष्टविधः प्रोक्तो यः पूर्वं सूत्रसंग्रहे। तेषामपि लिखाम्यत्र सगुणं लक्षणाष्टकम्"। तद्यथा। "पूर्वे चत्वारः शुभदाः परे निन्द्यास्सदास्तथा। विचार्य्य खड्गमानञ्च कर्त्तव्यं खड्गकोविदैः। धीरस्तार इति ख्यातो द्विविधः खड्गकोविदैः। घोरः स्यात् सुखसम्पत्त्यै तार उच्चाटने मतः। यत्र हंसरवस्येव खड्गे नखहते ध्वनिः। हंसध्वनिरयं खड्गः सकलार्थप्रसाधनः १। कांस्यशब्द इवाभाति यस्मिन् खड्गे हते ध्वनिः। कांस्यध्वनिरयं खड्गः प्राह नागार्जुनो मुनिः २। मेघशब्द इवालक्ष्यो यत्र खड्गे हते ध्वनिः। अभ्रध्वनिरयं खड्गो भर्त्तुः सौभाग्यदायकः। ढक्काशब्द इवाभाति यस्मिन् खड्गे हते ध्वनिः। ढक्काध्वनिरयं खड्गः सर्वशत्रुनिसूदनः ४। काकस्वर इवाभाति यस्मिन् खड्गे हते ध्वनिः। काकस्वरोऽयं खड्गः स्यात् श्रीयशःकुलनाशनः ५। तन्त्रीस्वरसमो यस्मिन् भवेत् खड्गे हते ध्वनिः। तन्त्रीध्वनिरयं खड्गः कुलश्रीधननाशनः ६। खरस्येव ध्वनिर्यत्र

खरध्वनिरयं मतः। श्रीयशोज्ञानविज्ञानजयतेजोविनाशनः ७। प्रस्तरस्येव यस्येह हतस्य ध्वनिरुद्भवेत्। प्रस्तरध्वनिनामायं स निन्द्यः खड्गलक्षणे ८। गभीरतारध्वनिता खड्गस्याशुभलक्षणम्। उत्तानमन्द्रध्वनिता खड्गस्य शुभलक्षणम्। अप्यङ्गनेत्रहीनोऽपि खड्गः सुध्वनिरुत्तमः। अन्धः कुरूपो मनुजो यथा भुवि सुगायनः। सर्वलक्षणसम्पन्नः खड्गो यो ध्वनिवर्जितः। स निन्द्यः सुन्दराङ्गोऽपि यथा वाक्यविवर्जितः। नखेन वाऽथ दन्तेन तथा लौहशलाकया। लोष्टेन शर्कराभिर्वा ध्वनिविज्ञानमुच्यते"। अथ द्विविधमानम्। "यन्मानं द्विविधं प्रोक्तं तस्य लक्षणमुच्यते। उत्तमाधमभेदेन भेदो हि द्विविधो मतः। उत्तमं यद्विशालं स्याल्लघुमानं प्रकीर्त्तितम् १। अधमं तत्र यत् खर्वं गुरुमानं प्रकीर्त्तितम् २। तत् पुनस्त्रिविधं प्रोक्तमादिमध्यान्तभेदतः। यो मुष्टिविंशतिसमायततीव्रधारो भर्त्तुर्भवेत् प्रसरतोऽपि षडङ्गुलीभिः। मानेन चाष्टपलिकः स हि खड्गमध्ये नातिप्रकृष्टमतिकृष्टफलं ददाति। यो द्वादशाष्टनवमुष्टिभिरायतः स्यात् मन्दो भवेत् प्रसरतोऽपि चतुर्थभागः। तावत् पलैः परिमितस्तु ततोऽधिको वा खड्गाधमो धनयशःकुलनाशनाय"। नागार्जुनोऽपि "यावत्यो मुष्टयो दैर्घ्ये तदर्द्धाङ्गुलयो यदा। प्रसरे तच्चतुर्थांशमिति वै मानमुत्तमम्। यावत्यो मुष्टयो दैर्घ्ये प्रसरे तत्त्रिभागिकः। पलैस्तदर्द्धैस्तुलितः स खड्गो मध्य उच्यते। यावत्यो मुष्टयो दैर्घ्ये तुर्य्यांशः प्रसरे तु तत्। अधमः कीर्त्तितः खड्गस्तत्समोऽप्यधिकः पलैः। भौमानामिदमुद्दिष्टं दिव्यास्तु लघवो मताः"। भोजस्तु "दीर्घता लघुता चैव खड्गविस्तीर्णता तथा। दुर्भेद्यता सुघटता खड्गानां गुणसंग्रहः। खर्वता गुरुता चैव मन्दता तनुता तथा। सुभेद्यता दुर्घटता खड्गानां दोषसंग्रहः। इति निखिलमुदारमुक्तमत्र बहुतन्त्रेषु निकषत्र खड्गयष्टेः। नृपतिरिति विचिन्त्य यो विधत्ते स चिरतरां श्रियमुच्छ्रितां लभेत" युक्तिकल्पतरुः।

तरस् न० तॄ-करणादौ यथायथम् असुन्। १बले २वेगे, ३तीरे, ४वानरे च। ५रोगे शब्दार्थचि०। "वव्राय चिच्छिदुरिभास्तरसात्मनैव" "कुचयोर्युगेन तरसा कलिताम्" "तरसाकृष्य करोति कास्वन" इति च माघः। "कैलासनाथं तरसा जिगीषुः" रघुः।

तरस न० तॄ-असच्। मांसे अमरः। "तरसमयाः पूर्वोक्तभागाः" कात्या० श्रौ० २४।५।२०। "तरसमयाः मांसमयाः" कर्कः। तरस्+अस्त्यर्थे अच्। २वेगयुक्ते त्रि०

तरसत् पुंस्त्री० तरस इवाचरति तरस+क्विप् शतृ। मृगभेदे स्त्रियां ङीप्। "अपसमत्तरसन्ती न भुज्युः" ऋ० १०।९५।८। "तरसन्नाममृगस्तस्य पत्नी" भा०।

तरसान पु० तरत्यनेन तॄ-आनच् सुट् च। नौकायां उज्ज्वलद०।

तरस्थान न० ६त०। आतर(पारेर भाड़ा)ग्रहणस्थाने जटा०।

तरस्वत् त्रि० तरोऽस्त्यस्य वा मतुप् मस्य वः मत्वर्थे। सान्तत्वात् १वेगयुक्ते भत्वम् २रोगिणि च। स्त्रियां ङीप्। ३चतुर्थमनोः पुत्रभेदे। "तरङ्गभीरुर्वप्रश्च तरस्वानुग्र एव च" हरिवं० ७अ०।

तरस्विन् पु० तरस्+अस्त्यर्थे विनि सान्तत्वात् भत्वम्। १वायौ २गरुड़े राजनि० ३वेगवति, ४शूरे च त्रि० अमरः। "असकृदेकरथेन तरस्विना" "निर्जितेषु तरसा तरस्विना" रघुः। स्त्रियां ङीप्। "कौमोदकी विष्णुगदा तरस्विनी" भाग० ८।१०।३२। [वहित्रे त्रिका०।

तरान्धु पु० तरे तरणे अम्बुरिव गभीरत्वात्। नौकाभेदे

तरालु पु० तराय तरणाय अलति पर्य्याप्नोति अल-उन्। नौकाभेदे हारा०।

तरि(री) स्त्री तॄ-करणे इ। १नौकायाम्, २वसनपेटके, ३वसनदशायाञ्च हेमच०। "जीर्णा तरिः सरिदतीव गभीरनीरा" उद्भटः। "संसारसागरसमावर्त्ततरिकाष्ठाय विष्णवे" भा० अनु० ४७अ०। वा ङीप्। "तरीषु तत्रत्यमफल्गु भाण्डम्" माघः।

तरिक पु० तराय तरणाय हितः वा० ठन्। १प्लवे त्रिका० २नौकायां स्त्री हारा०। तरे तरणार्थं देयशुल्कग्रहणेऽधिकृतः ठन्। ३तरणशुल्कग्रहणाधिकारिणि। "तरिकः स्थलजं शुल्कं गृह्णन् दाप्यः पणान् दश" याज्ञ०। "तीर्य्यतेऽनेन तरो नावादिस्तज्जन्यम् शुल्कं तद्ग्रहणेऽधिकृतस्तरिकः" मिता०।

तरिणी स्त्री तरस्तरणं कार्य्यं तयास्त्यस्याः इनि ङीप्। नौकायाम् हेमच०।

तरिण्य तरिण+गतौ कण्ड्वा० यक्। प० सक० सेट्। तरिण्यति अतरण्यी(णी)त्।

तरिता स्त्री तरो जातोऽस्याः तारका० इतच्। १तर्जन्यां शब्दच०। २गञ्जने। (गाँजा) तन्त्रम् "संविदा कालकूटञ्च ताम्रकूटञ्च धुस्तुरम्। अहिफेनं खर्ज्जुरसस्ताड़िका तरिता तथा" कुलार्णवतन्त्रम्।

तरित्र न॰ तरत्यनेन तॄ-इत्र । तरणसाधने नौकादौ । "अतरित्रानिव जले बाहुभिर्मामका रणे । पश्यन्तस्ते परांस्तत्र" भा॰ उ॰ ६२ अ॰ ।

तरिरथ पु॰ तरेः रथ इव चालकत्वात् । अरित्रे हारा॰ ।

तरी स्त्री तरि+ङीप् । १तरिशब्दार्थे २धूमे च त्रिका॰ ३द्रोण्यां जटाधरः । ४वस्त्रदशायां मेदि॰ ।

तरीयस् त्रि॰ अतिशयेन तरीता ईयसुन् तृणो लोपः । अतिशयेन तारके "स नभस्तरीयानिषरः परिज्मा" ऋ॰ ५।४१।१२ । स्त्रियां ङीप् इष्ठन् । तरिष्ठोऽप्युक्तार्थे त्रि॰ ।

तरीष पुंन॰ । तॄ-ईषन् ।१शुष्कगोमये २नौकायाञ्च उज्ज्वलद॰ ३शोभनाकारे भेले ४व्यवसाये उणा॰ ५समुद्रे ६समर्थे च संक्षिप्तसा॰ । ७स्वर्गे पु॰ ८इन्द्रकन्यायां स्त्री मेदि॰ ।

तरीषन् पु॰ तॄ-ईषन् छन्दसि नकारस्य नेत्त्वम् । तरणे "विश्वा आशास्तरीषणि" ऋ॰ ५।१०।६ "तरीषणि तरणे" भा॰ "बहुलवचनात्तृनीनोऽल्लोपः" माधवः ।

तरु पु॰ तरन्त्यनेन नरकमारोपकाः तॄ-उन् । १वृक्षे अमरः । "तरवोऽभिनेदुः" भाग॰ १।२।३ "मुनिवनतरुच्छायां देव्या तया सह शिश्रिये" रघुः ।

"तरुषु चुचुवुरुच्चैः पक्षिणश्चानुकूलाः" भट्टिः । "उपरिजतरुजानि याचमानाः" माघः । २तारके त्रि॰ "भूर्भुवःस्वस्तरुस्तारः" विष्णुस॰ भूर्भुवःस्वस्तरुः लोकत्रयतारकः" भा॰ ३तरुविकारे च । "संजर्भुराणस्तरुभिः सुते गृभम्" ऋ॰५।४४।५ "तरुभिस्तरुविकारैर्यज्ञैः" ।

तरुकूणि पु॰ तरौ कूणयति कूणि-इन् ७त॰ । वागुद खगे त्रिका॰ ।

तरुक्ष त्रि॰ तॄ-बा॰उक्षन् । १तारके २गवाश्वादीनां पालनाधिकृते च । "विप्रस्तरुक्ष आददे" ऋ॰८।४६।३२ । "तरुक्षे गवाश्वादीनां तारके गवाद्यधिकृते वा" भा॰ ।

तरु(ष)खण्ड पु॰तरूणां समूहः तरु+ख(ष)ण्ड । वृक्षसमूहे एवं वृक्षख(ष)ण्डादयोऽप्यत्र । "द्रुम(ष)खण्डवनं दृष्ट्वा रामः सुग्रीवमब्रवीत् । एष नेव इवाकाशो वृक्षख(ष)ण्डः प्रकाशते" रामा॰ कि॰ १२ अ॰ । "तरुख(ष)ण्डमध्ये" पञ्चत॰ । कदलीख (ष)ण्डः । भा॰ वा॰

तरुजीवन न॰ जीव्यतेऽनेन जीव-करणे ल्युट् ६त॰ । वृक्षमूले शब्दच॰ ।

तरुण न॰ तॄ-उनन् । १कुब्जपुष्पे (सेओति) मेदि॰ २स्थूलजीरके ३एरण्डवृक्षे पु॰ राजनि॰ । ४यूनि ५नवे च त्रि॰ मेदि॰ "स चचार गदापाणिर्वृद्धोऽपि तरुणो यथा" भा॰वि॰३३अ॰ । "तरुणं सर्षपशाकं नवौदनं पिच्छिलानि च दधीनि" छन्दोम॰ । "वासो वसाना तरुणार्करागम्" कुमा॰ । "स्मृताऽपि तरुणातपं करुणया हरन्ती नृणाम्" रसगङ्गा॰ । "तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः" सरस्वतीध्यानम् । तरुणस्य भावः इमनिच् । तरुणिमन् तरुणभावे पु॰ । "वतेन्दुवदनातनौ तरुणिमोद्गमो मोदते" काव्यप्र॰ । त्व तरुणत्व न॰ । तल् तरुणता स्त्री ष्यञ् तारुण्य न॰ तत्रार्थे । "तारुण्यस्य विलासः" सा॰ द॰ ।

तरुणज्वर पु॰ कर्म॰ । "आसप्तरात्रं तरुणं ज्वरमाहुर्मनीषिणः" इति चक्रद॰ उक्ते सप्तरात्रमध्यजाते ज्वरे ।

तरुणदधि न॰ कर्म॰ । सद्योजाते दधनि । "शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि । प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट्" चाणक्यम् ।

तरुणाय अतरुणस्तरुणो भवति भृशा॰ अभूततद्भावे क्यङ् अतरुणस्य तरुणताप्राप्तौ अक॰ आत्म॰ सेट् । तरुणायते अतरुणायिष्ट । "उडुम्बररसं पीत्वा वृद्धोऽपि तरुणायते" सुश्रुतः । "वसुदेवो जरां त्यक्त्वा वृद्धोऽपि तरुणायते" हरिवं॰ २७ अ॰ ।

तरुणी स्त्री तरुण+मध्यमवयोवाचित्वात् ङीष् । १युवत्यां स्त्रियां "व्याकीर्णमाल्यकबरां कबरीं तरुण्याः" । "स्तनौ तरुण्यः परिवव्रुरेनम्" माघः । २घृतकुमार्यां ३दन्तीवृक्षे ४चिडानामगन्धद्रव्ये ५कुब्जवृक्षे (सेउती) च राजनि॰ ।

तरुणीकटाक्षमाल पु॰ तरुणीनां कटाक्षाणां माला यत्र प्रियत्वात् । १तिलकवृक्षे राजनि॰ । ६त॰ । २तरुणीकटाक्षाणां श्रेणौ च स्त्री ।

तरुतल न॰ ६त॰ । १वृक्षमूले । "नोच्चैर्यदा तरुतलेषु मरुत्सदानीम्" माघः । २तरुस्वरूपे च ।

तरु(रू)त्र त्रि॰ तॄ-त्रच् "ग्रसितस्कभितेत्यादिना" पा॰ नि॰ उट् ऊट् वा । तारके । "सहावानं तरुतारं रथानाम्" "तरुतारं तारयितारम्" निरु॰ १०। ८। "यो विप्रं वाजं तरुता" १।१२६।२ ।

तरुतु(तू)लिका स्त्री तरौ तोलयति दोलयति वा तनुम् तुल-उन्मितौ दुल-उत्क्षेपे वा ण्वुल् टाप् कापि अत इत्त्वम् पृषो॰ । (वादुड) खगभेदे हारा॰ । तस्य वृक्षे स्वदेहस्य तो(दो)लनात् तथात्वम् ।

तरुत्र त्रि॰ तॄ-बा॰ उत्र । तारके । "साह्वांस्तरुतो

अत्यन्निकृष्टीः" ऋ॰ ४।२१।२ "तरुत्रस्तारकः" भा॰ ।

तरुनख पु॰ तरोर्नख इव क्षतसाधनत्वात् । कण्टके हारा॰

तरुभुज् पु॰ तरुं भुङ्क्ते भुज–क्विप् ६त॰ । (परगाछा) वन्दाके राजनि॰ ।

तरुमृग पु॰स्त्री तरौ मृग इव तत्र धावकत्वात् । वानरे शब्दच॰ स्त्रियां जातित्वात् ङीष् । [हारा॰ ।

तरुराग न॰ तरूणां रागो रक्तता यस्मात् ५ब॰ । नवपल्लवे

तरुराज पु॰ तरूणां राजा उच्चत्वात् टच् समा॰ । १तालवृक्षे राजनि॰ । २तरुश्रेष्ठवृक्षमात्रे च । "देवोपभोग्यमेतद्धि तरुराजसमुद्भवम्" हरिवं॰ १२६ अ॰ । आर्षे क्वचित् न टच् । "पारिजातस्य भद्रं ते तरुराज्ञो महात्मनः" हरिवं॰ १२६ अ॰ ।

तरुरुहा स्त्री तरुषु रोहति रुह–क । १वन्दाके (परगाछा) राजनि॰ । २वृक्षरोहिमात्रे त्रि॰ ।

तरुरोहिणी स्त्री तरौ रोहति रुह–णिनि ङीप् । १वन्दाके २वृक्षरोहिमात्रे त्रि॰ । स्त्रियां ङीप् ।

तरुवल्ली स्त्री तरोर्वल्लीव । वन्दाके राजनि॰ । [शब्दार्थचि॰ ।

तरुविलासिनी स्त्री तरोर्विलासिनीव । नवमल्लिकायाम् ।

तरुश त्रि॰ तरवः सन्त्यत्र लोमा॰ श । तरुयुक्ते [स्त्रियां ङीप्

तरुशायिन् त्रि॰ तरौ शेते शी–णिनि । खगमात्रे हारा॰

तरुष त्रि॰ तॄ–बा॰ उषन् । तारके । "भूरर्यः पतस्यान्तरस्य तरुषः" ऋ॰ ६।१५।३ । "तरुषस्तरीता" भा॰ ।

तरुष हिंसायां वधकर्म्मसु "वनुष्यति तरुष्यति" निघण्टूक्तेः दिवा॰ प॰ सक॰ सेट् । तरुष्यति अतरोषीत् । "त्वं तूर्य तरुष्यतः" ८।९९।५ । "तरुष्यतो बाधकान्" भा॰ । "वनुष्यतिः हन्तिकर्मा तरुष्यतिरप्येवंकर्मा" निरु॰ ५।२ "इन्द्रेण युजा तरुषेम वृत्रमित्यपि निगमो भवति" निरुक्तोक्तस्तुतिः वेदे गणव्यत्ययः ।

तरुष् न॰ तरुष्यति हिनस्त्यत्र तरुष–आधारे क्विप् । युद्धे "तनूरुचा तरुषि यत् कृण्वैते" ऋ॰ ६।२५।४ "तरुषि युद्धे" भा॰ । [ऋ॰ ३।२।१ "तरुषस्तारकः" भा॰

तरुस् त्रि॰ तॄ–उसि । तारके । "क्रत्वा दक्षस्य तरुषः"

तरुसार पु॰ ६त॰ । १कर्पूरे हारा॰ । ६त॰ २वृक्षसारमात्रे च । "सुवर्णरजतताम्रायोरीतिदन्तशृङ्गमणितरुसारमयाणि" सुश्रु॰ । [राजनि॰ ।

तरुस्था स्त्री तरौ तिष्ठति स्था–क । वन्दाके (परगाछा)

तरूट पु॰ तरोः ऊट इव । उत्पलकन्दे "तरूटो गुरुविष्टम्भी शीतलश्च मतो बुधैः" राजवल्लभः ।

तरूषस् त्रि॰ तॄ–बा॰ ऊषस् । १तरणकुशले २आपदुद्धारके च । "त्वं न इन्द्र राया तरूषसोग्रम्" ऋ॰ १।१२९।१० "तरूषसा तरणकुशलेनास्मानापद्भ्य उत्तरीतुं शक्तेन" भा॰

तर्क दीप्तौ अक॰ आकाङ्क्षायाञ्च वितर्के सक॰ चुरा॰ उभ॰ सेट् । तर्कयति ते अततर्कत् त "एतत्तर्कय चक्रवाकहृदयाश्वासाय" प्रसन्नरा॰ । "तथा तर्कयामि यथानेनाचिरप्रव्रजितेन भवितव्यम्" मृच्छ॰ । "दक्षिणेनाथ वामेन कतरेण स्विदस्यति । इति मां सङ्गताः सर्वे तर्कयिष्यन्ति शत्रवः" भा॰ वि॰ ६१ अ॰ ।

वि+उत्प्रेक्षायां "तन्नूनं मृत्युमाप्स्यतीति वितर्कयामि" पञ्चत॰ ।

तर्क पु॰ तर्क–भावे अच् । १आकाङ्क्षायां २व्यभिचारशङ्कानिवर्त्तके ऊहभेदे अविज्ञातेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थे ऊहे ३व्याप्यारोपात् व्यापकप्रसञ्जने । ४आगमाविरोधिन्याये ५आगमार्थपरीक्षणे ६मीमांसारूपविचारे । ७मानसज्ञानभेदे । ८स्वबुद्ध्योहमात्रे "अचिन्त्याः खलु ये भावाः न तांस्तर्केण योजयेत् । नाऽप्रतिष्ठिततर्केण गम्भीरार्थस्य निश्चयः" वेदान्तप॰ । "आर्षं धर्मोपदेशञ्च धर्मशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः" मनुः "तर्काप्रतिष्ठानात्" शा॰सू॰ । करणे घञ् । ८न्यायशास्त्रे "प्रायस्तर्कमधीते तनुते कुतर्कान्निबन्धमप्यत्र" दीधितिः "सुहृदस्तर्काः समस्ताः स्थ मे" कुसु॰ । "यत्काव्यं मधु वर्षि धर्षितपरास्तर्केषु यस्योक्तयः" नैष॰ । "तर्के वा भृशकर्कशे मम समं लीलायते भारती" प्रसन्नरा॰ । "गदाधरविनिर्म्मिता विषमदुर्गतर्काटवी" गदा॰ ९मीमांसाशास्त्रे १०अर्थवादे कर्कः । "अक्ताः शर्करा उपदधातीति विधिः श्रूयते । तत्राञ्जनसाधनं घृतं तैलं वा तन्मध्ये केनाक्ता इति संशये तेजो वै घृतमित्यर्थवादात् घृतेनाक्ता इति निर्णीयते । अतस्तर्कोऽर्थवादः । तर्को मीमांसेति कल्पतरुकारः तर्कलक्षणं गौ॰ सू॰ भाष्ये उक्तं यथा "अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः" गौ॰ सू॰ ।

"अविज्ञायमानतत्त्वेऽर्थे जिज्ञासा तावज्जायते जानीयेममर्थमिति, अथ जिज्ञासितस्य वस्तुनो व्याहतौ धर्मौ विभागेन विमृशति किं स्विदित्थमाहो स्विन्नेत्थमिति विमृश्यमानयोर्धर्मयोरेकं कारणोपपत्त्याऽनुजानाति सम्भवत्यस्मिन् कारणं प्रमाणं हेतुरिति, कारणोपपत्त्या स्यादेवमेतन्नेतरदिति तत्र निदर्शनम् योऽयं [illegible]

ज्ञातव्यमर्थं जानीते तच्च भो जानीयेति जिज्ञासा, स किमुत्पत्तिधर्मकोऽनुत्पत्तिधर्मक इति विमर्शः, विमृश्यमानेऽविज्ञाततत्त्वेऽर्थे यस्य धर्मस्याभ्यनुज्ञाकारणमुपपद्यते तमनुजानाति, यद्ययमनुत्पत्तिधर्मकस्ततः स्वकृतस्य कर्मणः फलमनुभवति ज्ञाता, दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरमुत्तरं पूर्वस्य पूर्वस्य कारणमुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति स्यातां संसारापवर्गौ, उत्पत्तिधर्मके ज्ञातरि पुनर्न स्याताम्, उत्पन्नः खलु ज्ञाता देहेन्द्रियबुद्धिवेदनाभिः सम्बध्यत इति नास्येदं स्वकृतस्य कर्मणः फलम् उत्पन्नश्च भूत्वा न भवतीति तस्याविद्यमानस्य निरुद्धस्य वा स्वकृतकर्मणः फलोपभोगो नास्ति, तदेवमेकस्यानेकशरीरयोगः शरीरादिवियोगश्चात्यन्तं न स्यादिति । यत्र कारणमनुपपद्यमानं पश्यति तन्नानुजानाति, सोऽयमेवंलक्षण ऊहस्तर्क इत्युच्यते । कथं पुनरयं तत्त्वज्ञानार्थो न तत्त्वज्ञानमेवेति अनवधारणात् अनुजानात्ययमेकतरं धर्मं कारणोपपत्त्या न त्ववधारयति न व्यवस्यति न निश्चिनोति एवमेवेदमिति । कथं तत्त्वज्ञानार्थ इति, तत्त्वज्ञानविषयाभ्यनुज्ञालक्षणानुग्रहोद्भावितात् प्रसन्नादनन्तरप्रमाणसामर्थ्यात् तत्त्वज्ञानमुत्पद्यत इत्येवं तत्त्वज्ञानार्थ इति । सोऽयं तर्कः प्रमाणानि प्रतिसन्दधानः प्रमाणाभ्यनुज्ञानात् प्रमाणसहितो वादे उपदिष्ट इत्यविज्ञाततत्त्वमनुजानातीति यथा सोऽर्थो भवति तस्य यथाभावस्तत्त्वमविपर्य्यय यथातथ्यम्” वात्स्यायनभाष्यम् ।

विश्वनाथवृत्तौ चान्यथा सूत्रमिदं व्याख्यातं यथा “तर्क इति लक्ष्यनिर्देशः कारणोपपत्तित ऊह इति लक्षणम् अविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थमिति प्रयोजनकथनम् कारणं व्याप्यं तस्योपपत्तिरारोपस्तस्मात् ऊह आरोपः अर्थाद्व्यापकस्य, तथाच व्यापकाभाववत्त्वेन निर्णीते व्याप्यस्याहार्य्यारोपाद्यो व्यापकस्याहार्य्यारोपः स तर्कः । यथा निर्वह्नित्वारोपान्निर्धूमत्वारोपः निर्वह्निः स्यान्निर्धूमः स्यादित्यादिः । ह्रदो निर्वह्निः स्यान्निर्धूमः स्यादित्यादिवारणाय व्यापकाभाववत्त्वेन निर्णीते इति । निर्वह्निः स्यात् अद्रव्यं स्यादित्यादिवारणाय व्याप्यस्येति तद्व्याप्यारोपाधीनस्तदारोप इत्यर्थलाभाय व्यापकेति । न चानुमानादितोऽर्थसिद्धेस्तर्कोव्यर्थ इति वाच्यम् अप्रयोजकत्वादिशङ्काकलङ्कितेन हेतुनार्थस्य साधयितुमशक्यत्वात्तदेतदुक्तमविज्ञाततत्त्वेऽर्थे तत्त्वज्ञानार्थमिति तत्त्वनिर्णयार्थमित्यर्थः । अत्र नाप्रयोजकत्वाद्याशङ्का तत्र नापेक्ष्य एवेति भावः । परे तु ऊह इत्येव लक्षणं ऊहत्वञ्च मानसत्वव्याप्यो जातिविशेषस्तर्कयामीत्यनुभवसिद्धः । तर्कः किं स्वत एव निर्णायकः परम्परया वेत्यत आह कारणेति कारणस्य व्याप्तिज्ञानादेरुपपादनद्वारेणेत्यर्थः तथा च धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादित्यनेन व्यभिचारशङ्कानिरासे निरङ्कुशेन व्याप्तिज्ञानेनानुमितिरिति परम्परयैवास्योपयोग इत्याहुः । स चायं पञ्चविधः आत्माश्रयान्योन्याश्रयचक्रकानवस्थातदन्यबाधितार्थप्रसङ्गभेदात् । स्वस्य स्वापेक्षित्वेऽनिष्टप्रसङ्ग आत्माश्रयः स च उत्पत्तिस्थितिज्ञप्तिद्वारा त्रेधा यथा यद्ययं घट एतद्घटजन्यः स्यात्तदैतद्घटानधिकरणक्षणोत्तरवर्त्ती न स्यात्, यद्ययं घट एतद्घटवृत्तिः स्यात् एतद्घटव्याप्यो न स्यात् यद्ययं घट एतद्घटज्ञानाभिन्नः स्यात् ज्ञानसामग्रीजन्यः स्यात् एतद्घटभिन्नः स्यादिति वा सर्वत्रापाद्यम् तदपेक्षापेक्षित्वनिबन्धनोऽनिष्टप्रसङ्गोऽन्योन्याश्रयः सोऽपि पूर्ववत्त्रेधा । तदपेक्ष्यापेक्ष्यापेक्षित्वनिबन्धनोऽनिष्टप्रसङ्गःचक्रकं चतुःकक्षादावपि स्वस्यापेक्ष्यापेक्ष्यापेक्षित्वसत्त्वान्नाधिक्यम् । अस्यापि पूर्ववत्त्रैविध्यम् । अव्यवस्थितपरम्परारोपाधीनानिष्टप्रसङ्गोऽनवस्था यथा यदि घटत्वं घटजन्यत्वव्याप्यं स्यात् कपालसमवेतत्वव्याप्यं न स्यात् । तदन्यबाधितार्थप्रसङ्गस्तु धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादित्यादिः । प्रथमोपस्थितत्वोत्सर्गविनिगमनाविरहलाघवगौरवादिकन्तु प्रसङ्गानात्मकत्वात् न तर्कः किन्तु प्रमाणसहकारित्वरूपसाधर्म्यात्तथा व्यवहार इति संक्षेपः” ।

तर्कग्रन्थे जगदीशोक्तं तर्कविभागलक्षणादिकं यथा । “स चायं तर्कः पञ्चविधः आत्माश्रयान्योऽन्याश्रयचक्रकानवस्थाप्रमाणबाधितार्थकप्रसङ्गभेदादित्याचार्य्याः । तत्र स्वापेक्षापादकः प्रसङ्ग आत्माश्रयः । अपेक्षा च ज्ञप्तावुत्पत्तौ स्थितौ च ग्राह्या तत्राद्या, यथा एतद्घटज्ञानं यद्येतद्घटज्ञानजन्यं स्यादेतद्घटज्ञानभिन्नं स्यादिति । द्वितीया घटोऽयं यद्येतद्घटजनकः स्यात् एतद्घटभिन्नः स्यादिति तृतीया चायं घटो यद्येतद्घटवृत्तिः स्यात्तथात्वेनोपलभ्येतेति स्वापेक्षापेक्षितत्वनिबन्धनः प्रसङ्गोऽन्योन्याश्रयः यथा चायं घटो यद्येतद्घटजन्यः स्यादेतद्घटभिन्नः स्यात् इति उपत्तौ स्थितौ च स्वयमुदाहार्यम् । स्वापेक्षणीयापेक्षितसापेक्षत्वनिबन्धनः

प्रसङ्गश्चक्रकः पूर्वोक्त एवापादके जन्यपदान्तरमन्तर्भाव्योदाहरणम्। अपेक्षा त्वत्र साक्षात्परम्परासाधारणी ग्राह्या। अनवस्था पुनरप्रामाणिकी न तु प्रवाहमूलकप्रसङ्गः। यथा घटत्वं यदि यावद्घटहेतुवृत्ति स्यात् घटजन्यवृत्ति न स्यादित्यर्थः। उक्तचतुष्कान्यः प्रसङ्गः प्रमाणबाधितार्थकप्रसङ्गः सोऽपि द्विविधो व्याप्तिग्राहको विषयपरिशोधकश्च तत्राद्यो यथा धूमो यदि वह्निव्यभिचारी स्यात्तदा वह्निजन्यो न स्यादिति द्वितीयस्तु पर्वतो यदि निर्वह्निः स्यान्निर्धूमः स्यादित्यादिः।”

धूमादेर्व्यभिचारशङ्कानिवृत्तिद्वारा विषयस्य वह्न्यादेः निश्चायकत्वेन परिशोधकत्वमित्यवधेयम्।

सोऽयं तर्क एकादशविध इति प्राचीननैयायिकाः स्वीचक्रुः तदनुसारेण सर्व॰ सं॰ उक्तम् “स चैकादशविधः व्याघातात्माश्रयेतरेतराश्रयचक्रकानवस्थाप्रतिबन्दिकल्पनालाघवकल्पनागौरवोत्सर्गापवादवैजात्यभेदात्” इति व्याघातादीनामप्रसञ्जनरूपत्वात् न तर्करूपत्वमिति किन्तु पञ्चविधत्वमिति नव्याः। एतन्मतानुसारेणैव वृत्तौ इतरेषां मुख्यतर्कत्वनिरासेन भाक्ततर्कत्वमुक्तम् द्रष्टव्यम्।

तर्कस्य च व्यभिचारशङ्कानिवर्त्तकतयानुमानाङ्गत्वं तच्च खण्डनखण्डखाद्ये निराकृतं यथा

“नापि विपक्षे बाधकस्तर्को वाच्यः तर्कस्य व्याप्तिमूलत्वाभ्युपगमे अनवस्थाप्रसङ्गात्। तदनभ्युपगमे मूलशैथिल्येन तर्काभासत्वापातात्। अथ ब्रूषे न शक्यमिदं वक्तुं तथा ह्यग्निधूमव्यभिचारशङ्कायां बाधकस्तर्कोऽयमभिधीयते यदि धूमोऽग्निं व्यभिचरेदकारणकः सन्नित्यः स्यात् न स्यादेव वा स चायमनुत्तरस्तर्कः तत्र शङ्कायां व्याघातापत्तेः। तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातादयो दोषा नावतरन्तीति लोकमर्यादा एवं सर्वत्रानुत्तरस्तर्को बाधकोऽभिधेय इति चेत् नैवम् किमित्येवं शङ्कितव्यं तद्धेतुफलभाव एव न भविष्यति। एवं तु शङ्कितव्यम् अग्निं विहायान्यस्मादपि हेतोरयमुदेष्यतीति। न च वाच्यमेवं हि सति धूमस्यैकजातित्वं न स्यादिति क्वचिदिन्द्रियजन्यत्वे क्वचिदनुमानादिजन्यत्वेऽपि ज्ञानैकजात्यवत्तदुपपत्तेः। तत्रेन्द्रियादीनामवान्तरसामान्ये साक्षात्कारित्वादौ प्रयोजकत्वं न ज्ञानतायामिति चेन्न ज्ञानत्वस्याकस्मिकत्वपरिहारार्थं तत्कारणस्यानुगतस्य भवतावश्यं वक्तव्यत्वात्। धूमेऽपि वह्नेर्विशेष एव प्रयोजकत्वस्य तद्वच्छङ्कितुं शक्यत्वात्। न दृश्यते तावदग्निप्रयोज्यो धूमे विशेष इति च न वाच्यम् एवं हि सति तददर्शनस्यापाततो हेत्वन्तरप्रयोज्यावान्तरजात्यदर्शनेनायोग्यतया विकल्पत्वादुपपत्तेः। यदा तु हेत्वन्तरप्रयोज्यो धूमस्य विशेषो दृश्यते तदासौ विकल्पिष्यत इति सम्भावनाया दुर्निवारत्वात्। अस्त्यात्ममनोयोगोऽनुगतं कारणं ज्ञानोत्पत्ताविति चेन्न यद्यात्ममनोयोगादुत्पद्यमानं ज्ञानं स्यादिच्छादयोऽपि ज्ञानं प्रसज्येरन्। यदि त्वदृष्टविशेषो वा शक्तिभेदो वा ज्ञानत्वजातिर्वा ज्ञानप्रागभावो वा तत्रानुगतं कारणमुच्यते तदा तदितरत्रापि वह्निव्यभिचारे धूमस्यैकजात्यप्रयोजकतया शक्यत एव शङ्कितुम् दृष्टे व्यभिचारे युक्तमदृष्टादेरैकजात्यपरिकल्पनमिति चेत् अस्तु दृष्टे तन्निश्चयः यत्रापि व्यभिचारो न दृश्यत इत्यत्र नियामकाभावात् शङ्किष्यते एवं शङ्कमानस्य भवतो न क्वचिदनुमानं स्यादिति प्रतिवाद्यात्माद्यनुमानादिव्यतिरेकेण कथायामेव प्रवृत्त्यनुपपत्त्या स्वयं स्वीकर्त्तव्येष्वनुमानेष्वेतादृशशङ्कानुक्रमणात् स एव व्याघात इति चेन्न धूमवद्वह्नेरपि वह्निकारणविशेषानुमानस्यैव सति सदनुमानत्वप्रसङ्गात् सामग्रीसाम्येन प्रमाऽप्रमावैचित्र्यानुपपत्तेः। साधारणधर्मदर्शनविशेषादर्शनानन्तरमपि शङ्कायाश्चानुदये सामग्र्यां सत्यामपि कार्यानुदयात्परप्रतिपत्त्युत्पादनार्थं वचनादिरूपां प्रतिपत्तिसामग्रीमुत्पादयितुं यतमानस्य भवतोऽपि स्वक्रियाव्याघातस्तुल्यः। व्याघातस्यैव विशेषत्वात् तद्दर्शनेन शङ्कासामग्र्येव नास्ति प्रत्यक्षे कुतो व्याघातसाम्यमिति चेन्न तद्धि न तावत् आहार्यादिकारणाज्जायमानमेष्टव्यं कूटविषयस्य तस्यातिप्रसञ्जकत्वात्। कूटभिन्नः प्रसञ्जकः प्रमितस्यैव स्यादिति चेन्न तस्य तर्कावसरे निरस्तत्वात्। तस्माद्यदैतद्व्याघातरूपस्य विशेषस्य दर्शनं शङ्काप्रतिपक्षभूतमुच्यते तत् किं ? प्रमाणात् कुतश्चिदुपजायमानं वक्तव्यम् तर्काद्वा। यदि प्रथमः शङ्कास्तित्वमपि तेनैव प्रमाणेनोपेयं शङ्कायां सत्यां व्याघातात् यदि च शङ्कां विनापि व्याघातः तदा शङ्क्यमानाशङ्क्यमानयोर्व्याघातस्य साम्यं सिद्धमेव। भवतु शङ्कायामपि तत्प्रमाणं किमेतावता प्रथमोपजातशङ्कामवलम्ब्यावस्थितस्य व्याघातरूपस्य विशेषस्य दर्शनात्तु शङ्कान्तरं नोत्पद्यत इति चेन्न व्याघातसत्त्वकाले तदवलम्बिकया शङ्कयैव शङ्क्यमानव्यभिचारतया तस्याः शङ्काया व्युपरमे च तदवलम्बिनो व्याघातरूपस्य

विशेषस्याभावात् कः शङ्कान्तरोत्पत्तेर्वारयितेति वक्तव्यम् सा नामास्तु तदा व्याघातात्मा विशेषस्तदवगमस्तदाहितो वा संस्कारस्तावदस्ति। विशेषावगमतत्संस्कारौ च शङ्काविरोधिनौ। ननु स्वरूपेण क्वचिदपि विशेषस्यावस्थानं तथेति चेन्न अयावदाश्रयभाविनो विशेषस्य पूर्वस्थितस्य यद्दर्शनं तदाहितो वा संस्कारः तस्य कालान्तरे तत्प्रतिधर्मसंशयविरोधित्वे अवयविपाकपक्षे कुम्भस्य परमाणुपाकपक्षे परम्परया तदारम्भकस्य परमाणोः पूर्वं श्यामतया ज्ञातस्य कालान्तरे सम्भवितया कस्य पाकजन्यरूपविशेषवत्तायां संशयो न स्यात्। यदि च शङ्कायां व्याघातस्तदा शङ्काश्रयस्य विशेषरूपस्य व्याघातस्य दर्शनाच्छङ्कायां शङ्कान्तरं मा भूत्। यदि तु व्यभिचाराश्रयस्तदा व्यभिचारः स्यादेव व्याघाताश्रयस्य व्यभिचारस्यापि प्रमित्यापत्तेः। अनादिसिद्धव्याप्तिकास्ते तर्का इति चेन्न तद्बुद्धेः प्रमितित्वासिद्धेः शरीरे स्वात्मप्रत्ययस्य तादृशस्यात्मप्रमात्वोपगमात् अनादित्वासिद्धेश्चोभयत्राविशेषात्। नापि यद्यत्र व्यभिचारः शङ्क्येत तदा व्याघातः स्यादित्येवं रूपात्तर्काद्व्याघातावगमः व्याघातप्रतिपादकस्य तर्कस्य मूलशैथिल्ये तर्काभासत्वापातात् तादृशस्यापि व्याघातोपनायकत्वे व्याघातापत्तेश्च साम्यं शक्यत एव तर्काभासाद्भवतोऽपि व्याघात उपनेतुम्। अथ तर्कस्य व्याप्तिर्मूलभूताभ्युपगम्यते तत्रापि व्यभिचारशङ्कायां पुनरनवस्थैव तत्रापि व्याघातापादने पुनरित्यनवस्थैव। "तस्मादस्माभिरप्यस्मिन्नर्थे न खलु दुष्पठा। त्वद्गाथैवान्यथाकारमक्षराणि कियन्त्यपि। व्याघातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम्। व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुतः।" अव्यभिचारस्यैकपरित्यागव्यवच्छेदेनापरान्वयः समकालदृष्टे नष्टेऽदृष्टः शङ्क्यत इत्याहुः"।

तर्कस्य यथा व्याप्तिनिश्चयोपयोगिता तथा अनु॰ चि॰ पूर्वपक्षीकृत्य न्यरूपि यथा

"अत्रोच्यते व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनं व्याप्तिग्राहकम्, ज्ञानं च निश्चयः शङ्का च सा च क्वचिदुपाधिसन्देहात् क्वचिद्विशेषादर्शनसहितसाधारणधर्मदर्शनात् तद्विरहश्च क्वचिद्विपक्षबाधकतर्कात् क्वचित् स्वतः सिद्ध एव। तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थेति चेत् न यावदाशङ्कं तर्कानुसरणात् यत्र च व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्तिग्रहः तथाहि धूमो यदि वह्निसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यान्नोत्पन्नः स्यादित्यत्र किं धूमोऽवह्नेरेव भविष्यति क्वचिद्वह्निं विनापि भविष्यति अहेतुक एव वोत्पत्स्यत इति शङ्का स्यात् सर्वत्र स्वक्रियाव्याघातः स्यात् यदि हि गृहीतान्वयव्यतिरेकं हेतुं विना कार्य्योत्पत्तिं शङ्केत तदा स्वयमेव धूमार्थं वह्नेः, तृप्त्यर्थं भोजनस्य, परप्रतिपत्त्यर्थं शब्दस्य चोपादानं नियमतः कथं कुर्य्यात् तेन विनापि तत्सम्भवात् तस्मात्तदुपादानमेव तादृशशङ्काप्रतिबन्धकं, शङ्कायां न नियतोपादानं, नियतोपादाने च न शङ्का तदिदमुक्तं "तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातो न भवतीति" नहि सम्भवति स्वयं वह्न्यादिकं धूमादिकार्य्यार्थं नियमत उपादत्ते तत् कारणं तन्नेत्याशङ्क्यते चेति एतेन व्याघातो विरोधः स च सहानवस्थाननियत इति तत्राप्यनवस्थेति निरस्तं स्वक्रियाया एव शङ्काप्रतिबन्धकत्वात् अत एव "व्याघातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम्। व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुतः" इति खण्डनकारमतमप्यपास्तम्। नहि व्याघातः शङ्काश्रितः किन्तु स्वक्रियैव शङ्काप्रतिबन्धिकेति न वा विशेषदर्शनात् क्वचित् शङ्कानिवृत्तिरेव स्यात् न चैतादृशतर्कावतारो भूयोदर्शनं विनेति भूयोदर्शनादरः ननु स स्वत एव प्रयोजकः अत एव न तदाहितसंस्कारो न मानान्तरं तर्कस्याप्रमात्वात् तच्च न प्रत्यक्षं व्याप्तिज्ञाने हेतुः तदभावेऽपि शब्दानुमानाभ्यां तद्ग्रहात्। ननु सहचारदर्शनव्यभिचारादर्शनवद्व्यभिचारशङ्काविरहानुकूलतर्कयोरपि व्यभिचारिसाधारणमिति न ततोऽपि व्याप्तिनिश्चयः इति चेन्न स्वरूपसतोरेव तयोर्व्याप्तिग्राहकत्वात् सत्तर्काद्व्याप्तिप्रमा तदाभासात्तदप्रमा विशेषदर्शनसत्यत्वासत्यत्वाभ्यां पुरुषज्ञानमिव। अपरे तु यत्र तर्के व्याप्त्यनुभवो मूलं तत्र तर्कान्तरापेक्षा यत्र तु व्याप्तिस्मरणं हेतुः तत्र न तर्कान्तरापेक्षेति नानवस्था अस्ति च जातमात्राणामिष्टानिष्टसाधनतानुमितिहेतुव्याप्तिस्मरणं तदानीं व्याप्त्यनुभावकाभावात् तन्मूलानुभवमूला चाद्येऽपि व्याप्तिस्मरणपरम्परेति। यत्त्वनादिसिद्धकार्य्यकारणभावविरोधादिमूलाः केचित्तर्का इति तन्न तत्र प्रमाणानुपयोगेऽनुमान एव पर्य्यवसानात्। न च व्याप्तिग्रहान्यथानुपपत्त्यैव तर्कस्यानादिसिद्धव्याप्तिकत्वज्ञानमिति वाच्यम् अनुपपत्तेरप्यनुमानत्वात्। अन्ये तु विपक्षबाधकतर्कादनौपाधिकत्वग्रह एव तदधीनो

व्याप्तिग्रह इति तदपि न तर्कस्याप्रमाणत्वात्। व्यभिचारादिशङ्कानिरासद्वारा प्रत्यक्षादिसहकारी स इति चेन्न अनवस्थाभयेन तर्कं विना व्याघातात् यत्र शङ्काविरहस्तत्र व्याप्तिग्रहे तर्कस्य व्यभिचारात्। यत्तु योग्यानामुपाधीनां योग्यानुपलब्ध्याभावग्रहः अयोग्यानान्तु साध्याव्याप्यत्वसाधनव्यापकत्वसाधनादभावग्रह इत्यनौपाधिकत्वं सुग्रहमिति तत्तुच्छम् अनुमानेन तत्साधनेऽनवस्थानात् प्रमाणान्तरस्याभावात्। ये चानुकूलतर्कं विनैव सहचारादिदर्शनमात्रेण व्याप्तिग्रहं वदन्ति तेषां पक्षेतरत्वस्य साध्यव्यापकत्वग्रहेऽनुमानमात्रमुच्छिद्येत अनुमानमात्रोच्छेदकत्वादेव पक्षेतरो नोपाधिरिति चेत् भ्रान्तोऽसि नहि वयमुपाधित्वेन तस्य दोषत्वमाचक्ष्महे साध्यव्यापकत्वेन तद्व्यतिरेकात् पक्षे साध्यव्यावर्त्तकतया व्यापकव्यतिरेके व्याप्यव्यतिरेकस्य वज्रलेपाच्च। अपि च करवह्निसंयोगः शक्त्यतिरिक्तातीन्द्रियधर्मसमवायी जनकत्वादित्यत्राप्रयोजकत्वाच्च साधकं तत्र व्याप्तस्य पक्षधर्मत्वे किमप्रयोजकं नाम? तस्माद्विपक्षबाधकतर्काभावाच्च तत्र व्याप्तिग्रह इत्यप्रयोजकत्वमिति"। तर्कं वेत्त्यधीते वा ठञ्। तार्किक तर्कवेत्तरि तर्कशास्त्राध्येतरि च। "तार्किकशिरोमणिस्तनुते" दीधितिः।

तर्कक त्रि० तर्क–ण्वुल्। १तर्ककारके। २याचके हेम०। "कामैः सन्तर्पयामास कृपणांस्तर्ककानपि" भा० शा० ४५ अ०

तर्कग्रन्थ पु० तर्काधिकृतः ग्रन्थः शाक० त० कर्म० वा। तर्कप्रधाने ग्रन्थे "तर्कग्रन्थार्थरहितो नैव शल्याल्यपण्डितः" सुश्रुतः।

तर्कण न० तर्क–भावे ल्युट्। तर्कशब्दार्थोक्ते ऊहभेदे "परकीयात्मदोषाद्यैः शङ्कामर्षस्य तर्कणम्" सा० द०

तर्कमुद्रा स्त्री "तर्जन्यङ्गुष्ठयोरग्रे मिथः संयोज्य चाङ्गुलीः। प्रसार्य्य बन्धनं प्राहुस्तर्कमुद्रेति तान्त्रिकाः" इत्युक्ते मुद्राभेदे "बाहुं प्रकोष्ठेऽक्षमालामासीनं तर्कमुद्रया" भाग० ४।६।२२।

तर्कविद्या स्त्री ६त०। गौतमोक्तानां प्रमाणप्रमेयादीनां षोड़शानां पदार्थानां विद्यायां, कणादोक्तषट्पदार्थ्यादिविद्यायाञ्च। "आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकाम्" भा० अनु० ३७ अ०।

तर्कारी स्त्री तर्कमृच्छति ऋ-अण् ङीप्। जयन्तीवृक्षे। अमरः।

तर्किन(ल) तर्क–बा० इन(ल) वा। चक्रमर्दवृक्षे रत्नमाला

तर्किन् त्रि० तर्क–णिनि। तर्ककारके पण्डितभेदे। "त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः। त्रयश्चाश्रमिणः पूर्वे परिषत् स्याद्दशावरा" मनुः। [स्वार्थे क। तर्कुक तत्रार्थे।

तर्कु पु० कृत-उ नि०। (टेको) इति ख्याते यन्त्रभेदे। त्रिका०।

तर्कुट न० कृत–छेदने बा० भावे उट पृषो०। १(काटनाकाटा) सूत्रकर्त्तनभेदे त्रिका०। करणे उट। २तर्कौ स्त्री हारा० गौरा० ङीष्।

तर्कुपिण्ड पु० ७त०। तर्कुस्थितमृत्पिण्डे (टेकोर वाँटुल) [हारा०। जटाधरः।

तर्कुपीठी स्त्री स्वल्पः पीठः ङीप् पीठी ६त०। तर्कुपिण्डे

तर्कुलासक पु० तर्कुं लासयति चालयति लस-णिच्-ण्वुल्। तर्कुचालके यन्त्रे (चरका)। हारा०।

तर्कुशाण पु० ६त०। (टेकोरशाण) शाणके त्रिका०।

तर्क्षु पु० तरक्षु+पृषो०। मृगादने व्याघ्रभेदे शब्दरत्ना०।

तर्क्ष्य पु० तक्ष–यत् बा० गुणः। यवक्षारे रत्नमा०।

तर्ज भर्त्सने भ्वा० पर० सक० सेट्। तर्जति अतर्जीत् ततर्ज।

तर्ज भर्त्सने चुरा० आ० सक० सेट्। तर्जयते अततर्जत। तर्जी
तर्जना "सीतामभ्यर्थ्य तर्जितः" "तया तु तर्जिताः सर्वा सुखे-
भीमा यथागतम्"। "राक्षसोऽतर्जयद्दूतं पुनश्चाढौक-
यद्रथम्" भट्टिः। बालं पुनर्गात्रसुखं गृह्णीयान्न चैनं तर्ज-
येत्" सुश्रुतः। आर्षत्वात् पदव्यत्ययः।

तर्जन न० तर्ज-भावे ल्युट्। भर्त्सने "तरुणताङ्कुशतर्जन-
विभ्रमाः" माघः। चु० तर्ज–युच्। २भर्त्सने स्त्री
"यन्ता क्रमेण परिसान्त्वनतर्जनाभिः" माघः। "मधुर-
वचनैः सभ्रूभङ्गैः कृताङ्गुलितर्जनैः" सा० द०।

तर्जनी स्त्री तर्ज्यतेऽनया तर्ज–करणे ल्युट् ङीप्। प्रदेशिन्यां वृद्धाङ्गुष्ठसमीपस्थे अङ्गुलिभेदे। "तर्जन्यङ्गुष्ठयोर्मध्यं पितृतीर्थं प्रचक्षते" स्मृतिः। तर्कमुद्राशब्दे उदा०। मुद्राशब्दे भूरि उदा०।

तर्जनीमुद्रा स्त्री "वाममुष्टिं विधायाथ तर्जनीमध्यमे ततः। प्रसार्य्य तर्जनीमुद्रा निर्द्दिष्टा शूलपाणिना" तन्त्रोक्ते मुद्राभेदे।

तर्जिक पु० तर्जस्तर्जनमस्त्यस्य ठन्। देशभेदे हेमच०।

तर्ण पु० तृण-अच्। वत्से। ण्वुल्। तर्णक गोवत्से, अमरः "लण्णासनाथा तर्णकपङ्क्ति" छन्दोम०। सद्योजाते २शिशौ च हेम०। [२प्लवे (भेला) शब्दार्थकल्पतरुः।

तर्णि पु० तरत्याकाशपद्धतिं तॄ–नि करणे नि वा। १सूर्य्ये

तर्त्तरीक न० तॄ–करणे ईक फर्फरीका० नि०। १नौकाभेदे कर्त्तरि ईक। २पारगे त्रि० मेदि०।

तर्द्द हिंसायां भ्वा० पर० सक० सेट्। तर्द्दति अतर्द्दीत्। ततर्द्द। "सेहे कपो रथाश्वांश्च रिपोस्ततर्द्द शाखिना"। "सुग्रीवः प्रवसं नेमे बहूनामस्ततर्द्द च" भट्टिः।

तर्द्दू स्त्री तर्द्द-तृद-वा ऊ। काष्ठनिर्म्मितायाम् दर्व्याम् अमरः।

तर्द्मन् पु० तर्द्द—तृद वा मनिन्। १चषालच्छिद्राग्रवेधे "द्व्यङ्गुलं त्र्यङ्गुलं वा तर्द्मातिक्रान्तं यूपस्य" कात्या० श्रौ० ६।१।३०। "तर्द्मातिक्रान्तं चषालच्छिद्राग्रवेधादतिक्रान्तम्" कर्कः। आधारे मनिन्। २तर्द्दनप्रदेशे च।

"तर्द्मसमूते पश्चाद्वंशतस्मादिमावेव" शत० ब्रा० ३।२।१।२ तर्द्मसमूते इति ययोभयोर्मसप्रदेशयोः सम्बन्धो भवति यथा च तर्द्दनप्रदेशेषु पश्चाद्भागे जाते परस्परं स्यूते भवतः तस्यैकस्योपर्य्यपरमास्तृणुयात्" भा०

तर्पण न० तृप—णिच् वा ल्युट्। १तृप्तौ २प्रीणने च अमरः ३यज्ञकाष्ठे हेमच०। स्नातकादिभिःप्रत्यहं कर्त्तव्ये पञ्चमहायज्ञान्तर्गते ४महायज्ञभेदे स च पितृयज्ञः। पितॄणां तृप्तिहेतुत्वादस्य तथात्वम् तत्प्रकारः आ० त० उक्तो यथा "तद्द्विविधं प्रधानमङ्गञ्च। तत्राद्यमाह शातातपः "तर्पणन्तु शुचिः कुर्य्यात् प्रत्यहं स्नातको द्विजः। देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम्"। विधवामधिकृत्य काशीखण्डम् "तर्पणं प्रत्यहं कार्य्यं भर्त्तुः कुशतिलोदकैः। तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्वकम्"। द्वितीयन्तु ब्रह्माण्डपुराणीयम् "नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमिष्यते। तर्पणन्तु भवेत्तस्य अङ्गत्वेन व्यवस्थितम्"। तर्पणाकरणे दोषमाह योगियाज्ञवल्क्यः "नास्तिक्यभावाद्यश्चापि न तर्पयति वै सुतः। पिबन्ति देहरुधिरं पितरो वै जलार्थिनः"। तर्पणमधिकृत्य ब्रह्मपुराणम् "तस्मात् सदैव कर्त्तव्यमकुर्व्वन् महतैनसा। युज्यते ब्राह्मणः कुर्व्वन् विश्वमेतद्बिभर्त्ति हि"। शङ्खलिखितौ "नेष्टकारचिते स्थाने पितॄंस्तर्पयेत्"। मार्कण्डेयपुराणम् "यश्च सर्व्वोय नोत्सृष्टं यच्चाभोज्यनिपानजम्। तद्वर्ज्यं सलिलं तात! सदैव पितृकर्म्मणि"। विष्णुः "स्नातश्चार्द्रवासा दैवपितृतर्पणमम्भःस्थ एव कुर्य्यात्। परिवर्त्तितवासाश्चेत्तीर्थमुत्तीर्य्य"। अत्रापि तीर्थे विशेषमाह मत्स्यपुराणे "तिलोदकाञ्जलिर्देयो जलस्थैस्तीर्थवासिभिः। सदा न हस्तेनैकेन गृहे श्राद्धमिष्यते"। अत्र जलस्थैरित्यनेन स्थलस्थानामपि जलस्थत्वं नियम्यते। ततश्च "अन्तरुदक आचान्तोऽन्तरेव पूतो भवति। बहिरुदके आचान्तो बहिरेव पूतो भवति तस्मादन्तरेकं बहिरेकञ्च पादं कृत्वा आचामेत् सर्व्वत्र शुद्धो भवति" इति पैठीनसिवचनात् जलस्थैकचरणकृताचमनेनोभयकर्म्मार्हत्वात् तर्पणकाले तीर्थे जलैकचरणेन भवितव्यम् अन्यत्र त्वनियमः। तद्रूपाणां जले तर्पणमनिषिद्धमिति। स्थलस्थतर्पणे आग्नेयपुराणम् "प्रागग्रेषु सुरांस्तृप्येन्मनुष्यांश्चैव मध्यतः। पितॄंश्च दक्षिणाग्रेषु दद्यादिति जलाञ्जलीन्"। अशुचिदेशे तु विष्णुः "यत्राशुचिस्थलं वा स्यादुदके देवतापितॄन्। तर्पयेत्तु यथाकाममप्सु सर्व्वं प्रतिष्ठितम्"। बृहस्पतिः "ब्रह्मयज्ञप्रसिद्ध्यर्थं विद्याञ्चाध्यात्मिकीं जपेत्। जप्ताय प्रणवं वापि ततस्तर्पणमाचरेत्"। एतच्च तर्पणं ब्रह्मयज्ञानन्तरं छन्दोगेतरपरम्। तेषान्तु वैश्वदेवाय चोपनाय इत्यन्तस्यार्थोपस्थानानन्तरं गोभिलेन तर्पणाभिधानात्। "आप्लवने तु संप्राप्ते तर्पणं तदनन्तरम्"। "गायत्रीञ्च जपेत् पश्चात् स्वाध्यायञ्चैव शक्तितः"। आप्लवने तु संप्राप्ते गायत्रीं जपतः पुरा। तर्पणं कुर्व्वतः पश्चात् स्नानमेव वृथा भवेत्" इति गोभिलीयवचनाभ्याञ्च। दक्षः "प्रादेशमात्रमुद्धृत्य सलिलं प्राङ्मुखः सुरान्। उदङ्मनुष्यांस्तृप्येत पितॄन् दक्षिणतस्तथा। अग्र्यैस्तु तर्पयेद्देवान् मनुष्यान् कुशमध्यतः। पितॄंस्तु कुशमूलाग्रे विधिः कौशो यथाक्रमम्"। एवञ्च "गोशृङ्गमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत्" इति यमवचनस्य गोशृङ्गपदं प्रादेशमात्रपरम्। उद्धृतोदके तु हारीतः "पात्राद्वा जलमादाय शुचौ पात्रान्तरे क्षिपेत्। जलपूर्णेऽथ वा गर्त्ते न स्थाने तु विबर्हिषि"। अत्र यद्धि यदुपक्रम्य श्रुतं यच्च येन समं समभिव्याहृतं तदेव तत्रैवाङ्गं नान्यदिति बोध्यं तदङ्गं इतरत्समभिव्याहारप्रकरणाभ्यामिति गोतमसूत्रात् तेन पद्मपुराणीयस्नाने तदुक्तमेव तर्पणम्। "तद्यथा ब्रह्माणं तर्पयेत् पूर्वं विष्णुं रुद्रं प्रजापतिम्। देवा यक्षास्तथा नागा गन्धर्वाप्सरसोऽसुराः। क्रूराः सर्पाः सुपर्णाश्च तरवो जम्भगाः खगाः। विद्याधरा जलाधारास्तथैवाकाशगामिनः निराहाराश्च ये जीवाः पापे धर्म्मेरताश्च ये। तेषामाप्यायनायैतद्दीयते सलिलं मया"। एतेनैकाञ्जलिरिति सर्वेषां मतम्। "कृतोपवीती देवेभ्यो निवीती च भवेत्ततः। मनुष्यांस्तर्पयेद्भक्त्या ऋषिपुत्रानृषींस्तथा। सनकश्च सनन्दश्च

तृतीयश्च सनातनः । कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा । सर्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा । मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् । प्रचेतसं वशिष्ठञ्च भृगुं नारदमेव च । देवान् सर्वानृषीन् सर्वांस्तर्पयेदक्षतोदकैः । अपसव्यं ततः कृत्वा सव्यं जानु च भूतले । अग्निष्वात्तांस्तथा सौम्यान् हविष्मतस्तथोष्मपान् । सुकालिनो बर्हिषद आज्यपांस्तर्पयेत्ततः । तर्पयेच्च पितॄन् भक्त्या सतिलोदकचन्दनैः । दर्भपाणिस्तु विधिना हस्ताभ्यां तर्पयेत्ततः"। अत्र केचित् पितृधर्म्मातिदेशात् दिव्यपितॄणामपि अञ्जलित्रयदानम् । तदसत् "कव्यवालं नलं सौम्यं यममर्य्यमणन्तथा । अग्निष्वात्ताः सोमपाश्च वर्हिषदः सकृत् सकृत्" इति छन्दोगपरिशिष्टेन विशिष्टैकाञ्जलिविधानात् । "पित्रादीन्नामगोत्रेण च तथा मातामहानपि । सन्तर्प्य भक्त्या विधिवदिमं मन्त्रमुदीरयेत् । येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः । ते तृप्तिमखिलां यान्तु ये चास्मत्तोयकाङ्क्षिणः" । अत्र ब्रह्मादिचतुर्षु तर्पणप्रयोगाकाङ्क्षायां गोभिलयाज्ञवल्क्योक्तप्रयोगविधिर्ग्राह्यः । स च "अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु । तृप्यतामिति वक्तव्यं नाम्ना तु प्रणवादिना" । अन्वारब्धेन पश्चाल्लग्नेन अस्मादेव वचनात् तर्पणाभिलापे प्रणवादित्वं तृप्यतामिति च लभ्यते । ततश्च ओं ब्रह्मा तृप्यतामिति प्रयोगः । देवा इत्यादि मयेत्यन्तेन मन्त्रलिङ्गादेकाञ्जलिः । तथा सनक इत्यादि सदा इत्यन्तेनैकाञ्जलिः एवं पुनरपि । "एकैकमञ्जलिं दत्त्वा द्वौ द्वौ तु सनकादयः । अर्हन्ति पितरस्त्रींस्त्रीन् स्त्रियस्त्वेकैकमञ्जलिम्" इति व्यासगोभिलस्मृतवचनात् । नतु द्वौ द्वाविति वीप्साश्रुतेः सनकादिप्रत्येक एव द्व्यञ्जलिरिति वाच्यं प्रत्येकपक्षे द्वौ द्वौ समुदायपक्षे तृप्त्यनुरोधेन तथैव युक्तत्वात् । अत्राञ्जलिपदं प्रागुक्तान्वारब्धेनेति श्रवणात्तथाविधहस्तद्वयपरम् तद्वैकल्पिकाञ्जलिपरं वा देवादिपक्षे । पितृपक्षे तु "तौ युतावञ्जलिः पुमान्" इत्येतत्परं पद्मपुराणीयतर्पणपक्षे तु पितृपक्ष एव हस्ताभ्यामिति श्रुतेस्तथैवाञ्जलिः । अन्यत्र नाञ्जलिरित्यवगम्यते । आचारमाधवीये प्रचेताः "मातृमुख्यास्तु यास्तिस्रस्तासां दद्यात्त्रिरञ्जलीन्" । इति । पराशरभाष्ये सनकादिदिव्यमनुष्याणां तर्पणादिकं सामगेन प्राङ्मुखेन तदितरेणोदङ्मुखेन कर्त्तव्यं तथा च परिशिष्टधृतं सामवेदीयषट्त्रिंशद्ब्राह्मणं "मनुष्याणामेषा दिक् या च प्रतीचीति" । तथाच ज्योतिष्टोमे श्रूयते "प्राचीं देवा अभजन्त, दक्षिणां पितरः, प्रतीचीं मनुष्याः उदीचीमसुराः अपरेषामुदीचीं मनुष्याः" । यत्तु "कृतजप्योऽन्तर्जानुरुदङ्मुखाः । दिव्येन तीर्थेन देवानुदकेन तर्पयेत्" इति शङ्खलिखितस्मृतं देवतर्पणे उदङ्मुखत्वविधायकं तच्छ्रुतिविरोधात् शाखान्तरीयम् अशक्तविषयकम् । उदकेनेतिश्रवणात् यवादीति फलाधिक्यार्थं व्यवहारोऽपि तथा । यत्तु "निवीती हन्तकारेण मनुष्यांस्तर्पयेदथ । कुशस्य मध्यदेशेन नृतीर्थेन उदङ्मुखः" लघुविष्णुनाहन्तप्रयोगेण जलदानमुक्तं तत् सनकादिमनुष्यतर्पणे यथा "सनकस्तृप्यतां तस्मै तदुदकं हन्त" इत्यादौ न तु पद्मपुराणीयमिलिततर्पणे "दत्तेनाम्बुना" अनेन दत्तस्य पुनस्त्यागासम्भवात् । नृतीर्थेन कनिष्ठाङ्गुलिमूलेन "प्राजापत्येन तीर्थेन मनुष्यांस्तर्पयेत् पृथक्" इति विष्णुपुराणीयैकवाक्यत्वात् । मरीच्यादि ऋषितर्पणन्तु अङ्गुल्यग्रेण "अङ्गुल्यग्रमार्षम्" इति यमवचनात् एवञ्चार्षदेवतीर्थयोरङ्गुल्यग्ररूपैकदेशत्वसाधर्म्येण । मरीच्यादितर्पणे तु दिगाद्याकाङ्क्षायां देववदिति । अतएव योगियाज्ञवल्क्यवचने सनकानित्यत्र मनुष्यानिति विशेषणं दत्तम् । ब्रह्माद्यानित्यत्र देवानिति विशेषणं दत्तमिति व्यवहारोऽपि तथा । मरीचिः "सौवर्णेन तु पात्रेण ताम्ररूप्यमयेण वा । औडुम्बरेण खड्गेन पितॄणां दत्तमक्षयम् । विना रूप्यसुवर्णेन विना ताम्रमयेण वा । विना तिलैश्च दर्भैश्च पितॄणां नोपतिष्ठते" । एतच्च समपाभावे बोध्यं नतु एकस्याभावे शङ्खः । "सौवर्णेन तु पात्रेण राजतेनौडुम्बरेण च । खड्गपात्रेण शङ्कुना वाप्युदकं पितृतीर्थं स्पृशन् दद्यात्" । शङ्कुः सुवर्णकीलकः । "अक्षतोदकैर्यवाद्भिस्तर्पयेद्देवान् सतिलाभिः पितॄंस्तथा" इति छन्दोगपरिशिष्टेनापि पितृपक्षे तिलोदकमात्रविधानात् । पद्मपुराणे चन्दनविधानं फलाधिक्यार्थम् । अपसव्यं प्राचीनावीतित्वम् । उपवीतित्वम् प्राचीनावीतित्वञ्चाह गोभिलः "दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय सव्येऽंसे प्रतिष्ठापयति दक्षिणं कक्षमवलम्बनं भवति एवं यज्ञोपवीती भवति । सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेऽंसे प्रतिष्ठापयति सव्यकक्षमवलम्बनं

भवति एवं प्राचीनावीती भवति" इति । प्रतिष्ठापयति यज्ञोपवीतमिति शेषः । तथाचामरसिंहोऽपि "उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे । प्राचीनावीतमन्यस्मिन्निवीतं कण्ठलम्बितम्" इति । "सावित्री ग्रन्थिसंयुक्तं उपवीतं तवाच्युत" इति ब्रह्मपुराणीय पूजादर्शनात् । गायत्त्रीमन्त्रेण उपवीतं कर्त्तव्यमिति प्रतीयते । लौकिकास्तु सावित्त्रीग्रन्थिरिति वदन्ति प्रवरसंख्यया वेष्टितग्रन्थिरिति लौकिकव्यवहारः । विद्याकरधृतं "यथा यज्ञोपवीतम्" । इत्यादिवाक्यात् उत्तरीयमपि यज्ञोपवीतवत् सव्यापसव्यत्वादिना धार्य्यं विवृतं शुद्धितत्त्वे । पित्रादीत्यादिना मातामहादित्रयपरिग्रहः । तथाच विष्णुपुराणे "त्रिरपः प्रीणनार्थाय देवानामपवर्जयेत् । ऋषीणाञ्च यथान्यायं सकृच्चापि प्रजापतेः । पितॄणां प्रीणनार्थाय त्रिरपः पृथिवीपते ! । पितामहेभ्यश्च तथा प्रीणयेत् प्रपितामहान् । मातामहाय तत्पित्रे तत्पित्रे च समाहितः । दद्यात् पित्रेण तीर्थेन काम्यञ्चान्यत् शृणुष्व मे" । स्मृतिसारे धृतम् "वामहस्ते तिलान् दत्त्वा जलमध्ये तु तर्पयेत् । नाभिमात्रजले पात्रे रोमकूपे न कुत्रचित्" । जलतर्पणे रोमरहितप्रदेशे वामबाहौ वस्त्राच्छादिते तिलान् संस्थाप्य मुद्रारहितदक्षिणहस्ततर्ज्जन्यङ्गुष्ठयोरभ्यन्तरेण तिलान् गृहीत्वा वामहस्ततलेन स्थापयित्वा तर्पयेदिति मदनपारिजातः । अतएव मरीचिः "मुक्तहस्तञ्च दातव्यं न मुद्रां दर्शयेत् क्वचित् । वामहस्ते तिला ग्राह्या मुक्तहस्तञ्च दक्षिणम्" । मुक्तहस्तं प्रसारितहस्तं यथा स्यात् । एवं मुद्रा प्रदेशिन्यङ्गुष्ठयोगे सन्दंशरूपः । मुक्तहस्तञ्च दक्षिणम्" इति दक्षिणहस्तं तिलरहितं कुर्य्यात् इति नैयतकालीनकल्पतरुः । तथाच नारदीये "अङ्गुष्ठानामिकाभ्यान्तु दक्षिणस्येतरस्थितान् । तिलान् गृहीत्वा पात्रस्थान् ध्यात्वा संतर्पयेत् पितॄन्" । देवलः । "रोमसंस्थान् तिलान् कृत्वा यस्तु संतर्पयेत् पितॄन् । पितरस्तर्पितास्तेन रुधिरेण मलेन च" । वृष्टिजलसम्पर्के तर्पणनिषेधमाह वायुपुराणम् "मेघे वर्षति यः कुर्य्यात् तर्पणं ज्ञानदुर्बलः । पितॄणां नरके घोरे गतिस्तस्य भवेद्ध्रुवम्" । तथा "शूद्रोदकैर्न्न कुर्वीत तथा मेघादिनिःसृतैः" । इति मेघादि दर्शनादिति कौमुदी । योगियाज्ञवल्क्यः "यद्युद्धृतं जलन्त्वेतु तिलान् संमिश्रयेज्जले । अतोऽन्यथा तु सव्येन तिला ग्राह्या विचक्षणैः" । अत्र शेषार्द्धं मदनपारिजाते लिखितम् । "अन्यथा वामहस्तेन ततस्तर्पणमाचरेदिति" । वायुपुराणम् । "तिलदर्भैस्तु संयुक्तं श्रद्धया यत् प्रदीयते । तत्सर्व्वममृतं भूत्वा पितॄणामुपतिष्ठते" । स्मृतिः "रविशुक्रदिने चैव द्वादश्यां श्राद्धवासरे । सप्तम्यां जन्मदिवसे न कुर्य्यात्तिलतर्पणम्" । मत्स्यपुराणे "संक्रान्त्यां निशि सप्तम्यां रविशुक्रदिने तथा । श्राद्धे जन्मदिने चैव न कुर्य्यात्तिलतर्पणम्" । श्राद्धे अमावास्यातिरिक्तश्राद्धे "नीलषण्डविमोक्षेण अमावास्यां तिलोदकैः । वर्षासु दीपदानेन पितॄणामनृणो भवेत् । अमावास्यान्तु ये मर्त्याः प्रयच्छन्ति तिलोदकम् । पात्रमौडुम्बरं प्राप्य मधुमिश्रं तपोधनाः ! । कृतं भवति तत् श्राद्धं रहस्यञ्च सदा भवेत् । विशेषतश्च जाह्नव्यां सर्व्वदा तर्पयेत् पितॄन् । न कालनियमस्तत्र क्रियते सर्व्वकर्म्मसु" । बौधायनः "न जीवत्पितृकः कृष्णैस्तिलैस्तर्पणमाचरेत् । सप्तम्यां रविवारे च जन्मर्क्षदिवसेषु च" । स्मृतिः "निषिद्धदिनमासाद्य यः कुर्य्यात्तिलतर्पणम् । रुधिरं तद्भवेत्तोयं दाता च नरकं व्रजेत्" । प्रतिप्रसवमाह स्मृतिः "अयने विषुवे चैव संक्रान्त्यां ग्रहणेषु च । उपाकर्म्मणि चोत्सर्गे युगादौ मृतवासरे । सूर्य्यशुक्रादिवारेऽपि न दोषस्तिलतर्पणे । तीर्थे तिथिविशेषे च कार्य्यं प्रेते च सर्व्वदा" । स्कन्दपुराणम् "तीर्थमात्रे तु कर्त्तव्यं तर्पणं सतिलोदकैः । योऽन्यथा तर्पयेन्मूढः स विष्ठायां भवेत् कृमिः । विशेषतस्तु जाह्नव्यां सर्व्वदा तर्पयेत् पितॄन्" । एतत्तु निषिद्धदिनतर्पणविधायकम् । "तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके । निषिद्धेऽपि दिने कुर्य्यात्तर्पणं तिलमिश्रितम्" इति मदनपारिजातविद्याकरवाजपेयिधृतमरीचिवचनात् । तिलाभावे पितृतीर्थेन प्रतिनिधिना तर्पणम् "तिलानामप्यभावे तु सुवर्णरजतान्वितम् । तदभावे निषिञ्चेत्तु दर्भैस्तोयैर्न्न चान्यथा" इति याज्ञवल्क्यात् । सुवर्णरजतान्वितं सुवर्णरजतस्पृष्टम् । अतएव "सुलभं सकलं पुण्यं यज्ञदानादिजं फलम् । गङ्गातोयैश्च सतिलैर्दुर्लभं पितृतर्पणम्" इति भविष्यपुराणे गङ्गातोयस्य दुर्लभत्वमुक्तम् न च तदभावात्तर्पणाभावः शातातपः "पितॄणां पितृतीर्थेन जलं सिञ्चेद्यथो-

विधि। दक्षिणेनाथ गृह्णीयात् पितृतीर्थे समीपतः”। गोभिलः “गोत्रं स्वरान्तं सर्व्वत्र गोत्रस्याक्षय्य कर्म्मणि। गोत्रस्तु तर्पणे प्रोक्तः कर्त्ता एवं न मुह्यति। सर्व्वत्रैव पितः प्रोक्तः पिता तर्पणकर्म्मणि। पितुरक्षय्यकाले तु अक्षयां तृप्तिमिच्छता। शर्म्मन्नर्घ्यादिके कार्य्यं शर्म्मा तर्पणकर्म्मणि। शर्म्मणोऽक्षय्यकाले तु पितृणां दत्तमक्षयम्”। कार्ष्णाजिनिः “नाभिमात्रे जले स्थित्वा चिन्तयेदूर्द्ध्वमानसः। आगच्छन्तु मे पितर इमं गृह्णन्त्वपोऽञ्जलिम्”। योगियाज्ञवल्क्यः “नामगोत्रस्वधाकारैस्तर्प्याः स्युरनुपूर्व्वशः”। तेन अमुकगोत्रः पिता अमुकदेवशर्म्मा तृप्यतामेतत्तिलोदकं तस्मै स्वधेति प्रयोगः सिध्यति। एवं मातामहादौ। एष चासम्बुद्धिप्रयोगो वाजसनेयीतरपरः। तेषान्तु सम्बुद्ध्यन्ततामाह ब्राह्मणसर्व्वस्वे जातूकर्ण्यः “प्रमीतपितृकस्तूशन्तस्त्वेत्यावाह्य नामगोत्रमुदाहृत्य यावता पितृकार्य्यमसावेतत्ते उदकमिति पितॄन् पितामहान् प्रपितामहान्। एकैकस्मै त्रींस्त्रीन्दद्यात्”। अत्र असाविति नाम गृह्णातीति कात्यायनोक्तस्य नाम्नः ते इति युष्मत्प्रयोगात् सम्बुद्ध्यन्तता प्रतीयते तस्य सम्बुद्ध्यन्तमानात्मव्याप्तित्वात्। असम्बुद्धिप्रथमान्तत्वेऽनन्वयापत्तेः। ततश्चामुकगोत्र! पितरमुकदेवशर्म्मन् तृप्यस्वैतत्ते तिलोदकं स्वधेति प्रयोगः सिध्यति। एवं मातामहानामपि। ततो मात्रादीनां षसां तर्पणानि। द्वादशानां मध्ये यो जीवति तं विहाय तत्प्रपितामहादीन् गृहीत्वा पूरयेत्। एवं प्रव्रजितते पतिते च। ततो विमातृज्येष्ठभ्रातृपितृव्यमातुलादींस्तर्पयेत्। शङ्खः “बान्धवानां ततः कृत्वा सुहृदां तर्पयेत्” सुहृदो मित्रादयः। मित्रायाप्यसवर्णाय जलं न देयम्। “सवर्णेभ्यो जलं देयं नान्यवर्णेभ्य एव च” इति याज्ञवल्कीयात्। भीष्मायासवर्णायापि भीष्माष्टम्यां तर्पणं कार्य्यम् “ब्राह्मणाद्यास्तु ये वर्णाद्दद्युर्भीष्माय नो जलम्। संवत्सरकृतं तेषां पुण्यं नश्यति सत्तम!” इत्यादि वचनात्। मन्त्रस्तु “वैयाघ्रपद्यगोत्राय इत्यादि। ब्राह्मणेनैतत् पितृतर्पणानन्तरं कार्य्यम् अन्येन पितृतर्पणात् पूर्व्वम्। अत्र वीजं वर्णज्यैष्ठ्यमिति हलायुधः। अपसव्येन दक्षिणामुखेन सतिलोदकेन सकृत् कर्त्तव्यम्। ततः कृताञ्जलिः” ‘भीष्मः शान्तनवोवीर” इत्यादि पठेत्। ततो येऽबान्धवा बान्धवा वा इत्यादिना एकाञ्जलिर्देयः। योगियाज्ञवल्क्यः “निष्पीड़यति यः पूर्व्वं स्नानवस्त्रञ्च तर्पणात्। निराशाः पितरस्तस्य यान्ति देवाः सहर्षिभिः। तथा “अन्नप्रकरवत्तस्य अपसव्येन पीड़नम्। अन्नप्रकरवत् श्राद्धोच्छिष्टसमीपान्नविकरणवत् तस्याधोवस्त्रस्य “स्नानशाट्यास्तु दातव्या मृदस्तिस्रो विशुद्धये” इति वशिष्ठवचने अधोवस्त्रस्य दुष्टस्यैव शुद्धये स्नानं प्रतीयते। योगियाज्ञवल्क्यः “वस्त्रनिष्पीड़ितं तोयं स्नातस्योच्छिष्टभागिनः। भागधेयं श्रुतिः प्राह तस्मान्निष्पीड़येत् स्थले”। अत्र मन्त्रमाह गोभिलः “ये चास्माकं कुले जाता अपुत्रागोत्रिणो मृताः। ते तृप्यन्तु मया दत्तं वस्त्रनिष्पीड़नोदकम्”। अशक्तौ शङ्खः। “आब्रह्मस्तम्बपर्य्यन्तं जगत्तृप्यत्विति-क्रमात्। अञ्जलित्रितयं दद्यात् एतत्संक्षेपतर्पणम्”। ‘आब्रह्मस्तम्बपर्य्यन्तं देवर्षिपितृमानवाः। तृप्यन्तु सर्व्वे पितरो मातृमातामहादयः। अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्। आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकम्”।

जन्माष्टम्यां तर्पणस्य फलं यथा “तस्यां तिथौ वारिमात्रं पितृणां यः प्रयच्छति। गयाश्राद्धं कृतं तेन शताब्दं नात्र संशयः” ब्रह्म०वै० श्रीकृष्णजन्मखण्डः। तर्पणञ्च देवर्षिपितृमनुष्याणां जलाञ्जलिदानेन तृप्तिसम्पादनम्। यथा “एवं स्नात्वा पितॄन् देवान् मनुष्यांस्तर्पयेन्नरः। नाभिमात्रे जले स्थित्वा चिन्तयेदूर्द्ध्वमानसः। आगच्छन्तु मे पितर इमं गृह्णन्त्वपोऽञ्जलिम्। त्रींस्त्रीञ्जलाञ्जलीन् दद्यादाकाशे दक्षिणे तथा०। वसित्वा वसनं शुक्लं स्थले चास्तीर्णवर्हिषि। विधिज्ञास्तर्पणं कुर्य्युर्न पात्रे तु कदाचन। यदपां क्रूरमध्यं तु यदमेध्यन्तु किञ्चन। अशान्तं मलिनं यच्च तत्सर्व्वमपगच्छतु। गृहीत्वानेन मन्त्रेण तोयं सव्येन पाणिना। प्रक्षिपेद्दिशि नैरृत्यां रक्षोपहतये द्रुतम्। अनाह्निकन्तु यद्भुक्तं पापाद् यच्च प्रतिग्रहम्। दुष्कृतं यच्च मे किञ्चिद्वाङ्मनःकायकर्म्मभिः। पुनातु मे तदिन्द्रस्तु वरुणः स वृहस्पतिः। सविता च भगश्चैव मुनयः सनकादयः। आब्रह्म स्तम्बपर्य्यन्तं जगत् तृप्यत्विति ब्रुवन्। क्षिपेदपोऽञ्जलींस्त्रींस्तु कुर्व्वन् सङ्क्षेपतर्पणम्” गारुड़े २१५ अ०। तर्पणविशेषस्तु गारुड़े २१८ अ० वह्निपुराणे नित्याह्निकस्नानविधाननामाध्याये च द्रष्टव्यः। जीवत्पितृकस्य

तर्पणनिषेधो यथा "दर्शस्नानं गयाश्राद्धं तिलैस्तर्पणमेव च। न जीवत्पितृको भूप! कुर्य्यात् हत्याघमाप्नुयात्" कालिका० पु० ८६ अ०।

कर्त्तरि ल्यु। ५तृप्तिकारके त्रि०। "सुरभिर्घ्राणतर्पणः" अमरः। "सन्तर्पणो नाकसदां वरेण्यः" भट्टिः।

तर्पणी स्त्री तृप-णिच्-करणे ल्युट् ङीप्। गुरुस्कन्दवृक्षे शब्दमा०।

तर्पणेच्छु पु० तर्पणमिच्छति इष उ० नि० २त०। १भीष्मे शब्दर०। २तर्पणेच्छुमात्रे त्रि०।

तर्पिन् त्रि० तृप-णिच्-णिनि। १तर्पके प्रीणयितरि स्त्रियां ङीप् सा च २पद्मचारिणीलतायाम् स्त्री शब्दच०।

तर्पिली स्त्री तृप-बा० इल गौरा० ङीष्। पद्मचारिण्याम्। कपिलका० रस्य वा लः। तल्पिलीतिरूपान्तरं तत्रार्थे। स्वार्थे क। तर्पिलिका तत्रार्थे। तत्रापि वा रस्य लः। तल्पिलिकापि तत्रार्थे।

तर्ब गतौ भ्वा० पर० सक० सेट्। तर्बति अतर्बीत्। ततर्ब।

तर्बट पु० तर्बति सततं गच्छति तर्ब-अटन्। १वत्सरे २चक्रमर्दवृक्षे च राजनि०।

तर्मन् न० तृ-मनिन्। यूपाग्रभागे अमरः।

तर्य पु० ऋषिभेदे। "सदापृणो यजतो वि द्विषो वधीद्वाहुवृक्तः श्रुतवित्तर्य्यः" ऋ० ५।४४।१२ "सदापृणादयः पञ्चर्षयः" इति भाष्योक्तेः।

तर्ष पु० तृष-भावे घञ्। १अभिलाषे २तृष्णायाञ्च अमरः। "निवृत्ततर्षैरुपगीयमानात्" भाग०१।८ तर्षच्छेदो न भवति पुरुषस्येह कल्मषात्। निवर्त्तते तदा तर्षः पापमन्तर्गतं यदा" भा० शा० २०४ अ०। तृ-कर्मणि करणे-वा स। ३समुद्रे ४भेलके च उज्ज्वल०।

तर्षण न० तृष-भावे ल्युट्। पिपासायां जटाधरः। [त्रिका०।

तर्षित त्रि० तर्षो जातोऽस्य तार० इतच्। तृषिते पिपासौ

तर्षुल त्रि० तृष-बा० उलच्। तृष्णायुक्ते "ज्ञानेन्द्रियाणीन्द्रियार्थान् नोपसर्पन्त्यतर्षुलम्" भा० २१३ अ०।

तर्ष्यावत् त्रि० तृषावत् वेदे पृषो०। तृष्णायुक्ते। "निरुद्धचिन्मह्यिषस्तर्ष्यावान् गोधा" १०।२८।१०। "तर्ष्यावान् तृषावान्" भा०।

तर्हि अव्य० तद्+र्हिल्। तस्मिन् काले इत्यर्थे। "रक्षांसि वा एनं तर्ह्यालभन्ते यर्हि न जायते" ऐत० ब्रा०। "यर्हि वाव वो मयार्थो भविता तर्ह्येव वोऽहं पुनरागन्तास्मि" तै० स०।

तल प्रतिष्ठायां वा चुरा० उभ० पक्षे भ्वा० पर० अक० सेट्। तालयति ते तलति। अतीतलत् त अतालीत्। तालयाम् बभूव आस चकार। तताल तेलतुः तलम्।

तल पु०न० तल-अच्। स्वरूपे "शैलेयनद्धेषु शिलातलेषु" कुमा०। "हिमधाम्नि दर्पणतले च सुद्धः" माघः। "विदाङ्कुर्वन्तु महतस्तलं विद्विषदम्भसः" "तलं स्वरूपं प्रमाणं वेति" मल्लिना०। २ज्याघातवारणे। ३कानने ४कार्य्यवीजे न० मेदि०। ५गर्त्ते पु०त्रिका०। ६पादतलस्य मध्ये हेमच०। "इदं रसातलं नाम सप्तमं पृथिवीतलम्" भा० वि० ३६० अ०। "अधस्तलमिव व्योम कुर्वन् व्योमेव भूतलम्" रघुः। ७तालवृक्षे पु० ८चपेटे (चड़) ९त्सरौ १०खड्गमुष्टौ ११सव्यहस्तेन तन्त्रीवादने पु० मेदि०। १२गोधायां पु० हेमच०।

तलक न० तल-बा०वुन्। पुष्करिण्याम् (तलाओ) हारा०।

तलकीट पु० वृक्षभेदे "तलकोटस्य वीजेषु पचेद्वत्कारिकां शुभाम्" सुश्रुते श्वासचिकित्सायाम्।

तलताल पु० तलेन करतलेन ताड्यते ताड-कर्मणि घञ् डस्य लः। करतलेन वादनीये वाद्यभेदे "आस्फोटयन् खेलयँश्च तलतालं च वादयन्" भा० व० १७८ अ०।

तलत्राण न० तलं करतलं त्रायते त्रै-ल्यु करणे ल्युट् वा। करतलत्राणकारके करतलरक्षके चर्ममये गोधाभेदे "यत्रैते सतलत्राणाः सुयोधनपुरोगमाः" भा० द्रो०११९ अ०। "विबद्धासितलत्राणः क्षात्रधर्ममनुव्रतः" भा० व० ६७ अ०।

तलप्रहार पु०तलेन चपेटेन प्रहारः प्र+हृ-घञ् ३त०।(चापड़मारा) चपेटाघाते। "तलप्रहारमशनेः सदृशं भीमनिस्वनम्" रामा० ल० ७६ अ०। [तलमीने अमरे पाठान्तरम्।

तलमीन पु० तले जलनिम्ने स्थितो मीनः। (चिङ्गुड़ि)

तलयुद्ध न० तलस्य चपेटस्याघातेन युद्धम्। चपेटाघातेन युद्धे (चड़ाचड़ि) "बालानां तलयुद्धे संग्रामः सतृयुद्धे वा" ह० म० ४७अ० तलशब्दे इति पाठान्तरम्।

तललोक पु०तलस्थो निम्नस्थः भूमेस्तलस्थो लोकः। पाताले "स्वर्लोकपालान् खगलोकपालांश्च लोकपालांस्तललोकपालान्" भाग० २।४६।४२ अ०।

तलव त्रि० तलं हस्तादितलं वाति निहन्ति ताड़यति वा-गतिहिंसनयोः क। तलवाद्यवादके। "तान्त्, तायानन्दाय तलवम्" यजु० ३०।२०। "तलवं तलवाद्यवादनम्" वेददी०।

तलवकार पु० सामवेदशाखाभेदे "छान्दोग्ये तवल्कारा(तलवकारा) दिशाखाभेदेषु विलक्षणगीतिहेतवोऽक्षरविकारादय आम्नायन्ते" सा० स० भाष्यम् । तस्यैवोपनिषत् "केनेषितं पततीत्यादि" ।

तलवारण न० तले बाहुतले वारयति ज्याघातम् वारि-ल्यु । ज्याघातवारणार्थे हस्ततले बद्धे (चामाटी) चर्मभेदे

तलसारक न० तले वक्षःस्थलाधोभागे सारो बलं यस्मात् कप् । अश्वस्य वक्षोऽधोभागे बद्धरज्जुभेदे (तङ्) हेमच० ।

तलहृदय न० तलस्य हृदयमिव । पादतलस्य मध्यस्थाने हेम०

तला स्त्री तलं ज्याघातवारणार्थत्वेनास्त्यस्याः अच् । १ज्याघातवारणार्थे हस्तबद्धे चर्ममये पदार्थे (चामाटी) अमरे पाठान्तरम् तलाऽस्त्रस्य इति । २गोधायुक्ते त्रि० । "ततः कवचधारी च तली खड्गी शरासनी" भा० उद्यो० १५७ अ० ।

तलाची स्त्री तलमञ्चति अन्च-क्विप् ङीप् अञ्चतेरल्लोपे पूर्वाणो दीर्घः । नलनिर्म्मितकटे (दरमा) हारा० ।

तलातल न० सप्तसु अधोभुवनेषु पातालभेदे "ततोऽधस्तात्तलातले मयोनाम दानवेन्द्रस्त्रिपुराधिपतिर्भगवता पुरारिणा त्रिलोक्याः संचिकीर्षुणा निर्दग्धस्वपुरत्रयस्तत्प्रसादाल्लब्धपदो मायाविनामाचार्य्यो महादेवेन परिरक्षितो विगतसुदर्शनभयो महीयते" भाग० ५।२४।२८ "अतलं वितलं सुतलं तलातलं महातलं रसातलं पातालमिति" भाग० ५।२४।११ । पातालकथने ।

तलिका स्त्री तलं वक्षःस्थलतलं बन्धनस्थानत्वेनास्त्यस्य वा० ठन् । अश्वहृदयस्थरज्जुभेदे (तङ्) हेमच० ।

तलित् स्त्री तडित्+डस्य लः । विद्युति शब्दार्थचि० ।

तलित न० तल+तारका० इतच् । भृष्टमांसभेदे । यथा "शुद्धमांसविधानेन मांसं सम्यक् प्रसाधितम् । पुनस्तदाज्ये संभृष्टं तलितं प्रोच्यते बुधैः । अस्य गुणाः । "तलितं बलमेधाग्निमांसौजःशुक्रवृद्धिकृत् । तर्पणं लघु सुस्निग्धं रोचनं दृढताकरम्" भा०प्र० ।

तलिन न० तल-इनन् । १शय्यायां हारा० । २विरले ३स्तोके ४स्वच्छे त्रि० मेदि० ५दुर्बले त्रि० हेम० ।

तलिम न० तल-बा० इमन् । १कुट्टिमे (छात) २शय्यायां ३खड्गे ५वितानके च मेदि० ।

तलुन पु० तल-उनन् । १वायौ २यूनि त्रि० स्त्रियां ङीप् ।

तलेक्षण पुंस्त्री तले ईक्षणमस्य । शूकरे शब्दार्थकल्प० स्त्रियां जातित्वात् ङीष् ।

तलोदरी स्त्री तलं निम्नमुदरमस्याः बह्वच्कत्वेऽपि नासिकोदरेत्यादिविशेषोक्तेः ङीष् । कृशोदर्य्यां भार्य्यायां शब्दार्थकल्पतरुः । [हारा० ।

तलोदा स्त्री तले उदकं यस्याः उदकस्य उदादेशः । नद्यां

तल्क न० तल-बा० कन् न कित्त्वम् । वने त्रिका० ।

तल्प पुंन० तल-पक् । १शय्यायाम्, २अट्टालिकायां, ३दारेषु च अमरः । "स्रग्विणं तल्प आसीनमर्हयेत् प्रथमं गवा" मनुः । "औदुम्बरस्तल्पो भवति" तैत्ति० १।२।६।५ "सपदि विगतनिद्रस्तल्पमुज्झाञ्चकार" रघुः । "यत्नातपे दारुमिवाधितल्पम्" माघः । "सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुः" । "गुरुतल्पोऽभिभाष्यैनस्तप्ते सुप्यादयोमये" मनुः । "गुरोस्तल्पं तल्पं कलत्रं यस्य" प्राय०वि० । "आचार्य्याणीं स्वां च सुतां गच्छंस्तु गुरुतल्पगः" याज्ञ० । "पितृव्यदारगमने भ्रातृभार्य्यागमे तथा । गुरुतल्पव्रतं कुर्य्यान्नान्या निष्कृतिरुच्यते" संवर्त्तः "स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः" "यस्तल्पजं प्रमीतस्य क्लीबस्य व्याधितस्य वा" मनुः । तल्पे भवः यत् तल्प्य रुद्रभेदे पु० "नमस्तल्प्याय गेह्याय" यजु० १६।४४ । तल्पे साधुः यत् । तल्प्य शय्यासाधौ त्रि० "शतं तल्प्या राजपुत्रा आशापालाः" शत ब्रा० १३।१।६।२ ।

तल्पकीट पु० तल्पे खट्वायां जातः कीटः शा० त० । (छारपोका) कीटभेदे शब्दार्थचि० ।

तल्पक पु० तल्पे तत्संस्कारेऽधिकृतः वा० कन् । शय्यारचनायामधिकृते दासभेदे । "सूपव्यञ्जनकर्त्तारस्तल्पका व्ययकास्तथा । प्रसाधका भोजकाश्च गात्रसंवाहका अपि" कामन्दकीयनीतौ चरभेदकथने ।

तल्पन न० तल्प इवाचरति, तल्प+क्विप्-कर्त्तरि ल्यु । १करिपृष्ठे २पृष्ठवंशस्य मांसे च हारा० ।

तल्पल न० तल्पं तथाकारं लाति ला-क । करिपृष्ठवंशे "सान्द्रत्वक्कास्तल्पलाश्लिष्टकक्षाः" माघः "तल्पलाः पृष्ठवंशाः" मल्लि० हारावल्यां तल्पनेत्यत्र तल्पलेति वा पाठः माघे तल्पनेति वा पाठः । अन्यतरपाठः लिपिकरप्रमादकृत इत्यवधेयम् ।

तल्ल त्रि० तस्मिन् लीयते ली-ड । १तस्मिन् लीने "तज्जलानिति शान्त उपासीत छान्दोग्योप० तज्जलानित्यस्य भाष्ये "तज्जत्वात् तल्लत्वात् तदनत्वाच्चेत्युक्तम् २पल्वले त्रिका० ३जलाधारविशेषे (तलाओ हिन्दिभाषा) मेदि० ।

तल्लज पु० तत् प्रसिद्धं यथा तथा लजति लज-कान्तौ अच् ।

प्रशस्ते अयन्तु उत्तरपदस्थः "प्रशंसावचनैश्च" पा० कष्ण-सर्पन्नित्यं समस्तः अजहल्लिङ्गश्च कुमारीतल्लज इत्यादि ।

तल्लिका स्त्री तस्मिन् लीयते ली—ड संज्ञायां कन् कापि अत इत्त्वम् (ताली) कुञ्चिकायां शब्दार्थचि० ।

तल्ली स्त्री तत् प्रसिद्धं यथा तथा लसति लस—ड गौरा० ङीष् । १तरुण्याम् मेदि० ।

तल्वकार पु० सामवेदस्य शाखाभेदे तलवकारशब्दे दृश्यम् ।

तवक्षीर न० तु—अच् नित्यकर्म्म० । (तिखुर) ख्याते पदार्थे "तवक्षीरन्तु मधुरं शिशिरं दाहपित्तहृत् । क्षयकासकफश्वासास्रदोषं हन्ति सेवनात्" २गन्धलतायां स्त्री राजनि० । [यवासशर्कराभेदे राजनि० ।

तवराज पु० तु—अच् तवः पूर्णः सन् राजते राज—अच् ।

तवराजोद्भव पु० तवराजादुद्भवति उद्+भू—अच् । यवासशर्कराजाते खण्डभेदे । "तवराजोद्भवः खण्डो दाहतृष्णाविनाशनः । मूर्च्छामोहस्य तापस्य श्वासस्य च निवारकः । इन्द्रियतर्पणः शीतः सदा मधुर एव च" राजनि० ।

तवर्ग पु० त+वर्ग । त थ द ध न रूपेषु वर्णेषु । तत्र भवः वर्गान्तत्वात् छ । तवर्गीय तत्र भवे वर्णे ।

तवस् न० तु—असुन् । १वृद्धे २महति ३बले च निघण्टुः । "अस्मादचिन्तं तवसा जवन्यः" ऋ०१।३०।८ "तवसा बलेन" भा० । "तवस्तमस्तवसां वज्रबाहो !" ऋ० २।३३।३ । "प्रवाहिनां तवसं जम्भ्रयाम्" ऋ० १०।२८।७ । तवसे बलाय हितं—यत् । तवस्य बलहिते बलसाधने च त्रि० "तस्मै तवस्यमनुदाति" ऋ०२।२०।८। तवोऽस्त्यस्य मतुप् मस्य वः सान्तत्वात् मत्वर्थे न विसर्गः । तवस्वत् बलयुक्ते त्रि० "वीर उशते तवस्वान्" ऋ० ९। ९७।४६ । पक्षे विनि तवस्विन् तत्रार्थे त्रि० उभयत्र स्त्रियां ङीप् ।

तवागा त्रि० तवसा बलेन गीयते गै—कर्म्मणि क्विप् पृषो० । प्रवृद्धबलयुक्ते "वृष्टिः स युव स्थविरं तवागाम्" ऋ० ४।३८।१० "तवागाम् प्रवृद्धबलम्" भा० ।

तविपुला स्त्री चतुर्थवर्णात् परं तगणपूर्वके विपुलाछन्दोभेदे "तोऽब्धेस्तत्पूर्वान्या भवेत्" वृ०र० । अब्धेश्चतुर्थाक्षरात् परं तगणश्चेत् तपूर्वा तविपुलानाम छन्दः इति तदर्थः ।

तविष पु० सौ० तव—"तवेर्णिद्वा" उणा० टिषच् । १स्वर्गे २समुद्रे च "तविषताविषावब्धिं त्रिदिवं चाहतुः क्वचित्" । "३देवकन्यायां ४भूमौ ५नद्याञ्च स्त्री उज्ज्व० टित्त्वात् ङीप् । ६वृद्धे ७महति त्रि० निघण्टुः । ८शक्तौ ९व्यवसाये पु० सि०कौ० १०बलवति च त्रि० । "घनो वृत्राणां तविषो बभूथ" ऋ०८।९६।१८ "तविषः प्रवृद्धो बलवान्वा" भा० "अहं ह्युग्रस्तविषस्तुविष्मान्" १।१६५।६ मेदिन्यां तवीषेति दीर्घमध्यपाठो लिपिकरप्रमादकृतः ह्रस्वमध्यपाठस्यैव प्रयोगदर्शनात् उणादिसूत्रे तथैव व्युत्पादितत्वाच्च । [४गुणिते च ।

तष्ट त्रि० तक्ष—क्त । १तनूकृते २द्विधाकृते, च । ३ताड़िते

तष्टि स्त्री तक्ष—क्तिन् । तक्षणे ।

तष्टृ पु० तक्ष—तृच् । १त्वष्टरि (छुतार) २जातिभेदे ३विश्वकर्म्मणि ४आदित्यभेदे च रमानाथः ।

तस अलङ्कारे वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् इदित् । तंसयति-ते तंसति अततंसत्-त अतंसीत् । ततंस "प्रतिजानामीति ते पिता गर्भे मुष्टिमतंसयत्" यजु० २३।२४ अवतंसः उत्तंसः । भ्वादित्वपक्षे अस्य आत्मनेपदित्वं केचिदिच्छन्ति तंसते अतंसिष्ट ।

तस उत्क्षेपे दिवा० पर० सक० सेट् । तस्यति इरित् अतसत् अतसीत् अतासीत् । ततास तेसतुः । उदित् तसित्वा तस्त्वा । तस्तः "यस्य तस्य विना षष्ठी तेनेति करणं विना" उद्भटः ।

तसर पु० तन्—क्सरन् । (गुटिपोकार सुता) सूत्रभेदे उणा० ।

तस्कर त्रि० तत् करोति कृ—टच् "तद्बृहतोः करपत्योः" पा० सुट् दलोपश्च । १चौरे २वृक्काशाके (पिड़िङ्) शाकभेदे पु० रत्नमा० । ३मदनवृक्षे पु० जटा० ४श्रवणे "व्यावृत्ता यत् परस्वेभ्यः श्रुतौ तस्करता स्थिता" रघुः "तस्करः कर्णचौरयोरिति" रघुटीकाधृतकोषान्तरं मल्लिनाथेन तु अस्य न कर्णार्थकता स्वीचकार किन्तु तस्य श्लोकस्यार्थान्तरमाह स्म यथा "तस्करता चौर्य्यं परस्वेभ्यः परधनेभ्यः अविषयभूतेभ्यः व्यावृत्ता सती श्रुतौ वाचकशब्दे स्थिता प्रवृत्ता अपहार्य्याभावात् तस्करशब्द एव अपहृतः इत्यर्थः" । ५कोपनायां नार्य्यां स्त्री शब्दार्थकल्प० टित्त्वात् ङीप् ।

तस्करस्नायु पु० तस्करस्य वृक्काशाकस्येव स्नायुरिव नाड़िका अस्याः । काकनासालतायाम् राजनि० ।

तस्थिवस् त्रि० स्था—क्वसु । स्थितवति "स पाटलायां गवि तस्थिवांसम्" "तस्मिन्नात्मचतुर्भागे प्राङ्नाकमधितस्थुषि" रघुः ।

तस्थु त्रि० स्था—बा० कु द्वित्वञ्च । स्थावरे "देहश्च सर्वसंघातो जगत् तस्थुरिति द्विधा" भाग० ७।७।२३ ।

तस्थुस् पु० ब० व० स्था–बा० क्वसि द्वित्वञ्च। मानवे निघण्टुः।

ताक्षण्य पुंस्त्री तक्ष्णोऽपत्यं कारित्वात् ण्य। तक्ष्णोऽपत्ये। पक्षे "तक्ष्णोऽण उपसंख्यानम्" पा० अण् षपूर्वत्वादनोऽल्लोपः। ताक्ष्ण तत्रार्थे पुंस्त्री०।

ताच्छीलिक पु० तच्छीलार्थे विहितः ठञ्। तच्छीलार्थविहिते प्रत्यये। "ताच्छीलिकेषु वा सरूपविधिर्नास्ति" पा० "ताच्छीलिकेणेऽण् कृतानि भवन्ति" व्या०प०। [स्वभावे।

ताच्छील्य न० तत् शीलमस्य तस्य भावः ष्यञ्। नियततत्-

ताज(जि)क न० नीलकण्ठादिप्रणीते वर्षलग्नज्ञानादिनिरूपके ज्योतिषग्रन्थभेदे। "न स्याच्छुभं क्वचन ताज(जि)कशास्त्रगीतम्" नील० ता०। [शीघ्रे निघण्टुः।

ताजत् त्रि० तनूज–सङ्कोचे बा० शदि इडिनलोपौ।

ताट(ड)ङ्क पु० ताड्यते ताडः पृषो० वा डस्य टः तथाभूतोऽङ्कः चिह्नं यस्य शक०। कर्णभूषणभेदे द्विरूपको०।

ताटस्थ्य न० तटस्थस्य भावः ष्यञ्। १औदासीन्ये २नैकट्ये च

ताड पु० चु० तड–भावे अच्। १ताड़ने २गुणने च कर्म्मणि अच्। ३शब्दे ४मुष्टिमेयतृणादौ मेदि० ५पर्वते हेमच०।

ता(ट)ड़का स्त्री। राक्षसीभेदे। तस्या उत्पत्तिकथा रामा० बा० २५ अ०।

"पूर्वमासीन् महायक्षः सुकेतुर्नाम वीर्य्यवान्। अनपत्यः शुभाचारः स च तेपे महत्तपः। पितामहस्तु सुप्रीतस्तस्य यक्षपतेस्तदा। कन्यारत्नं ददौ राम! ताड़(ट)कां नाम नामतः। ददौ नागसहस्रस्य बलं चास्याः पितामहः। न त्वेव पुत्रं यक्षाय ददौ चासौ महायशाः। तान्तु बालां विवर्द्धन्तीं रूपयौवनशालिनीम्। जम्भपुत्राय सुन्दाय ददौ भार्य्यां यशस्विनीम्। कस्यचित्त्वथ कालस्य यक्षी पुत्रं व्यजायत। मारीचं नाम दुर्द्धर्षं यः शापाद्राक्षसोऽभवत्। सुन्दे तु निहते राम! अगस्त्यमृषिसत्तमम्। ता(ट)ड़का सह पुत्रेण प्रधर्षयितुमैच्छत। भक्षार्थं जातसंरम्भा गर्जन्ती साभ्यधावत। आपतन्तीं तु तां दृष्ट्वा अगस्त्यो भगवानृषिः। राक्षसत्वं भजस्वेति मारीचं व्याजहार सः। अगस्त्यः परमामर्षस्ता(ट)ड़कामपि शप्तवान्। पुरुषादी महायक्षी विकृता विकृतानना। इदं रूपं विहायाशु दारुणं रूपमस्तु ते। सैषा शापकृतामर्षा ता(ट)ड़का क्रोधमूर्च्छिता। देशमुत्सादयत्येनमगस्त्याचरितं शुभम्। एनां राघव! दुर्वृत्तां यक्षीं परमदारुणाम्। गोब्राह्मणहितार्थाय जहि दुष्टपराक्रमाम्"। "ताड़का चलकपालकुण्डला" रघुः। "तां ताड़काख्यां निजघान रामः" भट्टिः। [रत्नमा०।

ताड़काफल न० तारकेव फलमस्याः रस्य डः। बृहदेलायां

ताड़कारि पु० ६त०। रामचन्द्रे तस्य ताड़काहननकथा रामा० अयो० २६ अ०। "तामापतन्तीं वेगेन विक्रान्तामशनीमिव। शरेणोरसि विव्याध पपात च ममार च"।

ताड़केय पु० ताड़काया अपत्यम् ढक्। मारीचे "मारीचः सुन्दपुत्रश्च ताड़कायां व्यजायत" हरिवं० २ अ०।

ताड़कायन पु० विश्वामित्रपुत्रभेदे। "महानृषिश्च कपिलस्तथर्षिस्ताड़कायनः" भा० आनु० ४ अ०। विश्वामित्रपुत्रकथने।

ताड़घ पु० तालं हन्ति हन+टक् नि० उप० स०। तालवादके शिल्पिभेदे अशिल्पिनि तु अण्। ताड़घात इत्येव।

ताड़न न० चु० तड–भावे ल्युट्। १आघाते। "लालने बहवो दोषास्ताड़ने बहवो गुणाः" चाणक्यम्। "अवतंसोत्पलताड़नानि वा" कुमा०। २दीक्षाङ्गे दीक्षणीयमन्त्रसंस्कारभेदे च। "मन्त्रवर्णान् समालिख्य ताड़येच्चन्दनाम्भसा। प्रत्येकं वायुना मन्त्री ताड़नं तदुदाहृतम्" शार०ति०। वायुना यंवीजेन। ३गुणने च।

ताड़नी स्त्री ताड्यतेऽनया ताड़ि–करणे ल्युट् ङीप्। अश्वादेस्ताड़नसाधने कशायां (चावुक) अमरः।

ताड़पत्र न० तालस्य पत्रमिव लस्य डः। कर्णभूषणभेदे ताड़ङ्के हेमच०।

ताड़ाग त्रि० तड़ागे भवम् अण्। तड़ागभवे जलादौ अपस्त्री "ताड़ागं वातलं स्वादु कषायं कटुपाकि च। हेमन्ते सारसं ताड़ागं वा सेवेत" सुश्रुतः।

ताड़ि स्त्री चु० तड़ इन्। (ताड़ियात) १पत्रप्रधाने वृक्षे भरतः वा ङीप् तत्रार्थे स्त्री मेदि०। २आभरणभेदे दुर्गसिंहः। "प्रक्रीड़ितचपलकपिलकपिकुलकरतलताड़नतरलितताड़ीपुटैः" काद०।

ताडुल पु० चु०तड़–उल। ताड़के संक्षिप्तसा०।

ताड्यमान त्रि० चु० तड़–कर्मणि शानच्। १ताड़नकर्मणि "श्रोतुर्वितन्त्रीरिव ताड्यमाना" कुमा०। २पटहे पु० त्रिका०। [ताण्डवशब्दे दृश्यम्।

ताण्ड न० तण्डुना मुनिना कृतम् अण्। नृत्यशास्त्रे

ताण्डव न० तण्डुकृतं ताण्डं नृत्यशास्त्रं तत् प्रतिपादकतयास्त्यस्य व, तण्डुना (नन्दिना) प्रोक्तम् अण् इति क्षीरस्वामी। नृत्ये अमरः "पुंनृत्यं ताण्डवं प्रोक्तं"

स्त्रीनृत्यं लास्यमुच्यते" शब्दार्थचि० धृतवाक्योक्ते २पुंनृत्ये च "गण्डोड्डीनालिमालामुखरितककुभस्ताण्डवे शूलपाणेः" मालतीमा०। ३उद्धतनृत्ये ४तृणभेदे च मेदि०।

ताण्डवतालिक पु० ताण्डवे तालस्तद्दानं शिल्पमस्य ठञ्। शिवद्वारपालके नन्दीश्वरे त्रिका०। [प्रियमात्रे त्रि०।

ताण्डवप्रिय पु० ताण्डवं प्रियमस्य। १शिवे शब्दमा० २नृत्य-

ताण्डवित त्रि० ताण्डव+कृतौ णिच् कर्म्मणि क्त। नर्त्तिते। "अतिप्रांशुवंशकाण्डताण्डवितधौतसितसूक्ष्माम्बरसहस्रम्" "विकटललाटतटताण्डवितभ्रूकुटिना क्रुद्धेन महामोहेन" प्रबोधच०।

ताण्डिन् पु० ब० व०। ताण्ड्येन प्रोक्तमधीयते वैशम्पायनान्तेवासित्वात् इनि—यलोपः। तण्डिमुनिपुत्रताण्ड्यप्रोक्तशाखाध्यायिषु। तस्य छात्रः अण् संयोगपूर्व्वकेनो न टिलोपः। ताण्डिन तस्य छात्रे। स च यजुर्वेदस्य कल्पसूत्रकर्त्ता तण्डिशब्दे ३२०७ पृ० दृश्यम्।

ताण्ड्य पु० तण्डिमुनेरपत्यम् गर्गा० यञ्। तण्डिमुनेरपत्ये स्त्रियां ङीप् यलोपः। ताण्डी।

तात पु० तन—क्त दीर्घश्च। पितरि अमरः। "दृषदीपदनधीतविद्यया तातमात्मसदमाविवर्द्धयन्" कुसुमाञ्जलौ हरिदासः "हा तातेति क्रन्दितमाकर्ण्य विषण्णः" रघुः। २अनुकम्प्ये मेदि०। "नाहं म्लेच्छामि वत्सात! दृष्टीर्नाभिकृपान्विताः" भा० आ० १७६ अ०। "स तात इति विप्रर्षिं वशिष्ठं प्रत्यभाषत। मातुः समक्षं कौन्तेय! अदृश्यन्त्याः परन्तप!। तातेति परिपूर्णार्थं तस्य तन्मधुरं वचः। अदृश्यन्त्यश्रुपूर्णाक्षी शृण्वती तमुवाच ह। मा तात! तात! तातेति ब्रूह्येनं पितरं पितुः। रक्षसा भक्षितस्तात! तव तातो वनान्तरे। मन्यसे यन्तु तातेति नैष तातस्तवानघ!। आर्य्य एष पिता तस्य पितुस्तव यशस्विनः" भा० आ०१७८अ०। "ज्येष्ठस्तातो भवति वै ज्येष्ठो मुञ्चति कृच्छ्रतः" भा० आ० २२२ अ०। ३पूज्ये त्रि० शब्दरत्ना०। "तस्मान्मुच्ये यथा तात! संविधातुं तथार्हसि" रघुः। पूज्यं वशिष्ठं प्रति दिलीपसम्बोधनम्।

तातगु पु० तातस्येव गौर्वाचकशब्दो यस्य गवान्तत्वात् गौणत्वे ह्रस्वः। पितृभ्रातरि पितृव्ये। २जनकहिते शब्दार्थचि० त्रि०।

ताततुल्य पु० ६त०। पितृसमाने हेमच०। तातसमादयोऽप्यत्र

तातन पुंस्त्री तातं प्रशस्तं नृत्यति नृत—ड। खञ्जनखगे त्रिकाण्डशेषः स्त्रियां जातित्वात् ङीष् तातनी।

तातल पु० तापं लाति ला—क पृषो०। १रोगे २पाके ३लौहकूटे ४मनोजवे च ०मेदि०। ५तप्तमात्रे त्रि० अजयपालः।

ताति पु० ताय—क्तिच्। १पुत्रे जटाधरः। ताय—भावे क्तिन्। २वृद्धौ स्त्री "तदलभमता निष्पन्नाशिषां काममरिष्टतातिम् आशास्महे" वी० च०। तातिल्प्रत्ययान्तः अरिष्टतातिशब्द इत्यन्ये।

तात्कालिक त्रि० तस्मिन् काले भवः काश्या० आपदादिपूर्वकात् कालान्तात् ठञ् ञिठ् वा। तत्कालभवे तत्र ठञि स्त्रियां ङीप् ञिठि टाप् इति भेदः "कर्त्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः" शु०त० शङ्खः। "भवेत् तात्कालिको ग्रहः" ज्यो०। तात्कालिकस्फुटचक्रम् चक्रशब्दे दृश्यम् "अहर्गणोत्पन्नग्रहस्य तात्कालिकत्वात्" सू० सि० रङ्गना०।

तात्पर्य्य न० तत्परस्य भावः ष्यञ्। १वक्तुरिच्छायाम्, २अभिप्राये ३तत्परतायाञ्च। तात्पर्य्यशब्दार्थनिरूपणेन तात्पर्य्यज्ञानस्य शाब्दबोधजनकत्वमनुमानचि० समर्थितं यथा "तात्पर्य्याधीनं शब्दप्रामाण्यम्। तत्र तत्परत्वं न तत्साध्यकत्वम्। पदार्थतत्संसर्गयोः शब्दासाध्यत्वात्। अथ तद्धीपरप्रवृत्तिनिवृत्तिसाध्यकत्वं तत्परत्वं तच्च भव्यार्थस्य साक्षात्, भूतार्थस्य तु प्रशंसानिन्दावाक्यस्य प्रशस्तनिन्दितस्वार्थप्रतिपादनद्वारा लाक्षणिकस्य लक्षणीयविषयप्रवृत्तिनिवृत्तिजनकत्वेन तत्परत्वमिति चेत् न तत्परत्वेऽङ्गीकृते तज्ज्ञानं जनयित्वा तत्र प्रवर्त्तकत्वं तत्प्रवर्त्तकत्वे च तत्परत्वमिति परस्पराश्रयात् लाक्षणिकस्याननुभावकत्वेऽपि लक्षणीयपरत्वात् काव्यादेः स्वरूपाख्यानमात्रपर्य्यवसानाच्च। ननु तद्बुद्धिजनकत्वं तत्परत्वं प्रशंसानिन्दावाक्यमपि प्रशस्तनिन्दितस्वार्थधीहेतुत्वेन तत्परार्थकं तच्च ज्ञानं प्रशस्ते सर्वः प्रवर्त्तते निन्दिताच्च निवर्त्तत इति स्वविषये प्रवृत्तिनिवृत्ती जनयतीति तत्परमुच्यत इति चेत् न गौणलाक्षणिकयोरननुभावकत्वात्। तद्बुद्धिजनने तत्परत्वमित्यन्योन्याश्रयाच्च तज्जननयोग्यत्वमिति चेत् तथैकत्वोच्चारणेन नानार्थे नानार्थपरत्वं लक्षणायाञ्च तुल्यार्थपरत्वं स्यात् योग्यतासत्त्वात् नापि तत्प्रतिपादकत्वं तात्पर्य्यं विना न घटेतान्योन्याश्रयात् प्रशंसादिवाक्यस्य प्रवृत्त्याद्यप्रतिपादकत्वात् लाक्षणिकस्याप्रतिपादकत्वाच्च। अथ गङ्गापदं स्वार्थाविनाभावे तीरं प्रतिपादयत् तत्पर-

मिति चेत् न मञ्चाः क्रोशन्तीत्यत्र तेन विनापि पुरुषे तात्पर्य्यात् गङ्गादिपदं मत्स्यादिपरं मुख्यतीरपरञ्च स्यात् अविनाभावस्य तदेव स्यात् मुख्ये बाधके सतीति चेत्। तर्हि मुख्यार्थपरतैव न स्यात्। नापि गच्छ गच्छसीत्यत्र गमनाभावपरत्वम्। उच्यते। तत्प्रयोजनकत्वं तत्परत्वं तदर्थप्रतीतिः प्रवृत्तिनिवृत्ती च। प्रयोजनत्वञ्च न साध्यत्वं अन्योन्याश्रयात् नापि प्रतिपाद्यो स्वविषयत्वं यस्य यदिच्छाविषयस्तं प्रति तत्परत्वापत्तेः तदर्थसाध्यसाधनत्वे नेच्छानियम इति चेत्। न इह धूम इत्यत्र जन्यज्ञाप्यभेदेन साध्यस्य वस्तुभेदतया वाक्यभेदप्रसङ्गात् पुंभिच्छायां नियन्तुमशक्यत्वात्। किन्तु प्रतिपादकेच्छाविषयत्वं तत्परत्वं यः शब्दो वक्त्रा यदिच्छया प्रयुक्तः स तत्परः सा च प्रतिपाद्यधीः प्रवृत्तिनिवृत्तिविषययोः तत्परत्वं नानार्थात् श्लिष्टादनेकपदार्थान्वितैकक्रियापरान्मुख्यलाक्षणिकपदादप्यावृत्त्या क्रमेणानेकार्थज्ञानं, न त्वेकदैव सकृदर्थपरत्वनियमेनैकस्योच्चारणेऽनेकपरत्वाभावादिति सकलतान्त्रिकैकवाक्यतया वदन्ति तत्र ब्रूमः। अनेकार्थप्रतीतीच्छयैकमुच्चारणं भवत्येव पुंभिच्छाया नियन्तुमशक्यत्वात् यदि तदुच्चारणमेकार्थपरं तदा आवृत्तेरपि न स्यात् तात्पर्य्यनिर्वाहार्थमावृत्तिकल्पनात्। अन्यथैकपरेऽपि तदापत्तेः। अतएव तदुच्चारणस्योभयपरतायामावृत्तिकल्पनं, तस्मात्तुल्यवदनेकार्थोपस्थितौ तात्पर्य्यादिज्ञाने युगपदनेकान्वयबोधो भवत्येव सामग्र्यास्तुल्यत्वात् प्रथममेकस्यान्वयबोधो न तदन्यस्येति नियन्तुमशक्यत्वाच्च"।

"आकाङ्क्षा वक्तुरिच्छा तु तात्पर्य्यं परिकीर्त्तितम्" भाषा० "तात्पर्य्यं निर्वक्ति वक्तुरिच्छेति। यदि तात्पर्य्यज्ञानं कारणं न स्यात् तदा सैन्धवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोधो न स्यात्। न च तात्पर्य्यग्राहकप्रकरणादीनामेव शाब्दबोधे कारणत्वमस्त्विति। तात्पर्य्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्य्यज्ञानमेव लाघवात् कारणमस्तु। इत्थञ्च वेदस्थलेऽपि तात्पर्य्यज्ञानार्थमीश्वरः कल्प्यते। न च तत्राध्यापकतात्पर्य्यज्ञानं कारणमिति वाच्यम् सर्गादावध्यापकाभावात् न च प्रलय एव नास्तीति कुतः सर्गादिरिति वाच्यम् प्रलयस्यागमप्रतिपाद्यत्वात्। इत्थञ्च शुकवाक्येऽपि ईश्वरीयतात्पर्य्यज्ञानं कारणम्। विसंवादिशुकवाक्ये तु शिक्षयितुरेव तात्पर्य्यस्य ज्ञानं कारणम्। अन्ये तु नानार्थादौ क्वचिदेव तात्पर्य्यज्ञानं कारणम्। तथा च शुकवाक्ये विनैव तात्पर्य्यज्ञानं शाब्दबोधः। वेदे तु अनादिमीमांसापरिशोधिततर्कैरर्थावधारणमित्याहुः। मुक्ता० "ननु माभूदाप्तोक्तत्वस्य निश्चयानुरोधेन सिद्धसाधनं तात्पर्य्यस्य तु स्यात् तद्विषयस्यान्वयधीहेतुत्वात् अन्यथा घटकर्म्मत्वादिपरत्वाभावस्य घटकर्म्मत्वाद्यन्यमात्रपरत्वस्य वा निश्चयेऽपि घटमित्यादिवाक्यात् कर्म्मत्वं घटीयमित्याद्यन्वयबोधापत्तेरिति चेन्न कर्म्मताधर्म्मिकघटाद्यन्वयधीपरत्वाभावनिश्चयदशायां प्रमेयत्वादिप्रकारेण घटकर्म्मत्वादिपरत्वस्य निश्चयेऽपि घटीयं कर्म्मत्वमित्यन्वयमतेरनुत्पत्त्या कर्म्मताधर्म्मिकघटान्वयबोधपरत्वप्रकारकनिश्चयत्वेनैव तात्पर्य्यधियस्तस्यां कारणत्वेन वाक्यार्थस्य तत्रानिवेशात्। वस्तुतः समानानुपूर्व्वीकस्यैव वाक्यान्तरस्य तस्यैव वा कालान्तरमनुभाव्य घटीयकर्म्मत्वादिपरत्वनिश्चयसत्त्वेऽपि श्रूयमाणवाक्यव्यक्ताविदानीमननुभावेन तत्परत्वस्यानिश्चयेऽभावे वा घटीयं कर्म्मत्वमित्याद्यन्वयमतेरनुत्पादाद्विशिष्यैव तत्तद्वाक्यव्यक्तिधर्म्मिकस्य घटकर्म्मत्वादिपरत्वनिश्चयस्य तत्तदन्वयबोधहेतुत्वमुपेयं तथा च तत्तद्धेतुभूतानां प्रकरणज्ञानाभिधानामेव विज्ञानव्यक्तीनान्तथात्वमुचितम् अवश्यं क्लृप्तपूर्व्ववर्त्तिताकत्वात्। अतएव सैन्धवमानय इत्यादावपि लवणपरत्वधीर्न लवणाद्यन्वयबुद्धौ हेतुः किन्तु तदर्जकत्वेनाभिमतं भोजनादिप्रकरणस्य प्रतिसन्धानमिति न्यायसिद्धान्तः" शब्द० प्र०।

तादर्थ्य न० तदर्थ+चतुर्थ० ष्यञ्। तदुद्देश्यकत्वे।

तादात्म्य न० तदात्मनोभावः ष्यञ्। अभेदे तदात्मशब्दे दृश्यम्।

तादीत्ना अव्य० तदानीम्+पृषो०। तदानीमित्यर्थे "आत्सूर्य्यं जनयन् द्यामुषासं तादीत्ना शत्रुम्" ऋ० १।३२।४ "तादीत्ना तदानीमित्यस्य पृषोदरादित्वाद्वर्णविपर्य्ययः।

तादृक्ष त्रि० तस्येव दर्शनमस्य तद्+दृश–क्स सर्वनाम्नष्टेरात्वम् उप० स०। तत्तुल्यदर्शने।

तादृश त्रि० तस्येव दर्शनमस्य तद्+दृश–ट उप० स०। तत्तुल्यदर्शने "क्व तद्विधं प्रेम पतिश्च तादृशः" कुमा० "निजुह्नुवे तादृशमेव इङ्गितम्" माघः। स्त्रियां ङीप्। "यादृशी भावना यस्य सिद्धिर्भवति तादृशी" उद्भटः।

तादृश् त्रि० तस्येव दर्शनमस्य तद्+दृश–क्विप् उप०स०। तत्तुल्ये "तादृग्गुणा सा भवति समुद्रेणेव निम्नगा"

"ताद्दशोऽहति तत्तस्मिन् वीजं स्वैर्व्यञ्जितं गुणैः" मनुः।

तान पु० तन–घञ्। १विस्तारे अवतानः सन्तानः। "सर्वां गुडूचीतानैराकीर्य्येत्" सुश्रुतः। २ज्ञानविषये शब्दार्थकल्प० ३गानाङ्गभेदे। "विस्तार्य्यन्ते प्रयोगा ये मूर्च्छना शेषसंश्रयाः। तानास्तेऽप्यूनपञ्चाशत् सप्तस्वरसमुद्भवाः। तेभ्य एव भवन्त्यन्ये कूटतानाः पृथक् पृथक्। ते स्युः पञ्च सहस्राणि त्रयस्त्रिंशत् शतानि च" सङ्गी० दा० "तानप्रदायित्वमिवोपगन्तुम्" कुमा०। "गाता यं यं स्वरं गच्छेत् तं तं वंशेन तानयेत्" मल्लिनाथधृतम्। "गायन्ति दिव्यतानैस्ते भा०स०४अ०।

तानव न० तनोर्भाव० पृथ्वा० पक्षे अण्। तनुत्वे "तानवं तनुता गात्रे दौर्बल्यभ्रमणादिकृत्" उज्ज्वलमणिः "अङ्गानामतितानवं कथमिदं कम्पश्च कस्मात् कुतः" अमरः।

तानव्य पुंस्त्री तनोरपत्यं गर्गा० यञ्। तनोरपत्ये स्त्रियां लोहि० ष्फ षित्त्वात् ङीष्। तानव्यायनी।

तानूनप्त्र न० तानूनप्त्रा देवताऽस्य अण्। तनूनपात् देवताके पृषदाज्ये "तानूनप्त्रं गृह्णामि कांस्ये चमसे वा" मानवसू०। "तानूनप्त्रमेतत्" कात्या० श्रौ० ८।१।२४। "एतदाज्यं तानूनप्त्रसंज्ञं भवति" कर्कः। "तदेतत्तानूनप्त्रं निदानेन" शत० ब्रा० ३।४।२।८ "तानूनप्त्रा च प्रजापतिः वायुर्वा" तनूनपात्शब्दे दृश्यम्। [त्रिका०।

तानूर पु० तन–ऊं० उरण्। पयसां स्रोतोभ्रमे आवर्त्ते

तान्त त्रि० तम–क्त। १म्लाने २क्लान्ते च। शब्दार्थकल्प०। "मृदुलतान्तलतान्तमलोकयत्" "रतिरभसविलासाभ्यासतान्तं न यावत्" माघः। "अलसतान्ततारकेण" दशकुमा०।

तान्तव न० तन्तोर्विकारः अञ्। वस्त्रे "मणिमुक्ताप्रवालानां लोहानां तान्तवस्य च" "सर्वञ्च तान्तवं रक्तं शाणक्षौमाविकानि च" मनुः।

तान्तव्य पुंस्त्री तन्तोः सन्तानस्यापत्यं गर्गा० यञ्। तन्तोरपत्ये स्त्रियां लोहिता० ष्फ षित्त्वात् ङीष्। तान्तव्यायनी।

तान्तुवायि पुंस्त्री तन्तुवायस्यापत्यं "उदीचामिञ्" पा० इञ्। तन्तुवायस्यापत्ये। अन्यमते सेनान्तलक्षणकारिभ्यः" पा० ण्य। तान्तुवाय्य तदर्थे।

तान्त्रिक त्रि० तन्त्रं सिद्धान्तं वेत्ति शास्त्रमधीते वा उक्था० ठक्। १ज्ञातसिद्धान्ते २शास्त्राभिज्ञे च "एवं प्रयत्नैर्विध्यं तान्त्रिकैः परिकीर्त्तितम्" सुश्रु० तन्त्रे विहिता ठक्। ३तन्त्रविहिते त्रि० स्त्रियां ङीप् "वैदिकी तान्त्रिकी सन्ध्या यथानुक्रमयोगतः" तन्त्रम्। इदमर्थं ठञ्। ४शास्त्रसम्बन्धिनि च। अथातो धर्म्मं व्याख्यास्यामः श्रुतिप्रमाणको धर्म्मः श्रुतिश्च द्विविधा वैदिकी तान्त्रिकी च" हारीतः।

तान्दुर न० तन्दुरेण पाकयन्त्रभेदेन निर्वृत्तम् अण्। तन्दूरपक्वे मांसभेदे तत्पाकविधिः शब्दार्थचि० धृतवाक्यं यथा "अङ्गारपूर्णगर्त्ते यद्लग्नमवलम्बितम्। संस्कृतं पिहितं मांसं पक्वं तान्दुरमुच्यते" सुखादु तान्दूरन्तु। "पचेद्गर्त्तेऽन्तरीक्षस्थं लम्बि सम्भारसम्भृतम्। चतुर्दिङ्मण्डलाकारं पार्श्वप्रज्वलितानले। विपक्वं सुरभि स्वादु तान्दूरमिति कीर्त्तितम्। अन्यच्च। "कोष्ठिकायां सुसम्भारमलग्नमवलम्बितम्। मांसं पिधाय वाह्याग्निज्वालया स्वेदितम् वरम्। तान्दुरं रुचिदं बल्यं मृदु पथ्यतमं स्मृतम्। सद्योहृतं नवं स्थूलमन्यथा दोषकारणमिति"।

तान्व पु० तन्वाः प्राणाधिष्ठितत्वात् प्राणवत्या अयम् "प्राणिरजतादिभ्योऽञ्" पा० अञ् संज्ञापूर्वकविधेरनित्यत्वात् वेदे न गुणः। तनूजे पुत्रे। "न जामये तान्वो रिक्थम्" ऋ० ३।३१।२। तनुनामकस्य ऋषेरपत्यम् प्राणित्वात् अञ् पूर्ववद्गुणाभावः। २ऋषिभेदे। "सद्यो विदिष्ट तान्वः" ऋ० १०।९४।१५। तान्वो नामर्षिः" भा०। तनु दशापवित्रवस्त्रम् तस्येदम् अण् पूर्ववद्गुणाभावः। ३दशापवित्रवस्त्रसम्बन्धिनि "जहद्वर्माणि तान्वा" ऋ० ९।१४।४। "तान्वा तान्वानि छान्दस आच्" भा०। स्वार्थे अण्। ४दशापवित्रवस्त्रे च। "गृभ्णाति रिप्र विरस्य तान्वा" ऋ० ९।७८। "तान्वा स्वकीयेन वस्त्रेण" भा० पूर्ववत् तृतीयास्थाने आच्।

ताप पु० तप–घञ्। क्लेशजनके उष्णादिस्पर्शजन्ये १सन्तापे २कष्टे च मेदि०। "निदाघकालोल्वणतापयेव" कुमा०। "करम्भवालुकातापान् कुम्भीपाकांश्च दारुणान्" मनुः।

तापक त्रि० तापयति तापि–ण्वुल्। १तापकारके २ज्वरे पु० शब्दर०। ३रजोगुणे च तथ्यं सत्त्वं तापकं रजः सां० शास्त्रे प्रसिद्धम्। "सत्त्वं तथ्यं बुद्धिभावेन वृत्तं भावाद्वै च राजसास्तापकास्ते। तथा भेदग्राहिणी तामसी या वृत्तिस्त्वस्यां तथ्य इत्युक्त आप्नोति" सर्वद०।

तापत्य पुंस्त्री तपत्याः सूर्य्यकन्यायाः अपत्यम् क्षत्रियत्वात्

ण्य । कौरवे तपत्यपत्ये तपतीशब्दे दृश्यम् । तपत्या उपाख्यानं षञ् । २तपत्युपाख्याने न० । “तापत्यमथ वाशिष्ठमौर्वं चाख्यानमुत्तमम्” भा० आ० १अ० । तदाख्यानं च भा०आ० चैत्ररथपर्वणि १७२ अध्याये दृश्यम् ।

तापत्रय न० ६त० । आध्यात्मिकाधिदैविकाधिभौतिकरूपे दुःखत्रये । “आध्यात्मिकादि मैत्रेय! ज्ञात्वा तापत्रयं बुधः । उत्पन्नज्ञानवैराग्यः प्राप्नोत्यात्यन्तिकं फलम्” विष्णु पु० ।

तापदुःख न० तापरूपं दुःखम् । “पातञ्जलोक्ते दुःखभेदे “परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः” सू० । “ते जन्मायुर्भोगाः पुण्यहेतुकाः सुखफलाः, अपुण्यहेतुकाः दुःखफला इति । यथा चेदं दुःखं प्रतिकूलात्मकं एवं विषयसुखकालेऽपि दुःखमस्त्येव प्रतिकूलात्मकं योगिनः । कथं तदुपपद्यते” । “अथ का तापदुःखता सर्वस्य द्वेषानुविद्धश्चेतनाचेतनसाधनाधीनस्तापानुभव इति । तत्रास्ति द्वेषजः कर्म्माशयः सुखसाधनानि च प्रार्थयानः कायेन वाचा मनसा च परिस्पन्दते ततः परमनुगृह्णात्युपहन्ति वेति परानुग्रहपीड़ाभ्यां धर्म्माधर्मावुपचिनोति स कर्म्माशयो लोभान्मोहाच्च भवतीत्येषा तापदुःखतोच्यते” भा० । “ते जन्मायुर्भोगा इति यद्यपि जन्मायुषोरेव ह्लादपरितापपूर्वभावितया तत्फलत्वं न तु भोगस्य ह्लादपरितापोदयानन्तरभाविनस्तदनुभवात्मनस्तथाप्यनुभाव्यतया भोग्यतया भोगकर्म्मतामात्रेण भोगफलत्वमिति मन्तव्यं नन्वपुण्यहेतुका जात्यायुर्भोगाः परितापफला भवन्तु हेयाः प्रतिकूलवेदनीयत्वात् । कस्मात् ? पुनः पुण्यहेतवस्त्यज्यन्ते सुखफलाः अनुकूलवेदनीयत्वात्, न चैषां प्रत्यात्मवेदनीयानुकूलता शक्या सहस्रेणाप्यनुमानागमैरपाकर्तुं, न च ह्लादपरितापौ परस्पराविनाभूतौ यतो ह्लाद उपादीयमाने नैव परितापोऽप्यवर्जनीयतयापतेत् तयोर्भिन्नहेतुकत्वाद्भिन्नरूपत्वात् चेत्यत आह यथाचेदमिति” विवरणम् ।

तापन न० तप–णिच्–भावे ल्युट् । (तापान) १तापकरणे हेमच० । तापि–कर्त्तरि ल्यु । २सूर्य्ये ३कामवाणभेदे पु० जटाध० । ४सूर्य्यकान्तमणौ राजनि० । ५अर्कनामनामके अर्कवृक्षे च । ६तापके त्रि० । “ततोऽम्बराच्चिन्तितमात्रमागतं महाप्रभं चक्रममित्रतापनम्” भा० आ० १९अ० । “ततस्तु राजानममित्रतापनं समीक्ष्यते तस्य नृपस्य मन्त्रिणः” ४४ अ० ।

तापनीय न० उपनिषद्भेदे । उपनिषच्छब्दे १२२२पृ० दृश्यम् । गोपालतापनीयः नृसिंहतापनीयः । तपनीयस्य स्वर्णस्य विकारः अण् । २स्वर्णमये त्रि० “तापनीये तथा घण्टे कक्षोपरि विलम्बिते” हरिवं० ८७ अ० । जातरूपेभ्यः परिमाणे अण् । ३स्वर्णनिष्कपरिमाणे सुवर्णे न० ।

तापश्चित न० तपसि चीयते चि–क्त स्वार्थे अण् । सत्रभेदे तद्विधानादि कात्या० श्रौ० २४।५।१ । यथा “तापश्चितम् दीक्षाः संवत्सरमुपसदश्च तथा सुत्याः” सू० “तापश्चितमिति सत्रनाम तत्र दीक्षाः संवत्सरं भवन्ति उपसदः सुत्याश्च” इदानीमहान्याह अत्र सुत्या आह” कर्कः ‘गवामयनेनेयुः” २सू० । गवामयनमेव कर्त्तव्यमित्यर्थः । “अग्निष्टोमेन वा” ३सू० “ईयुः अपूर्वस्यायमग्निष्टोमः नैकाह्निको न द्वादशाह्निकः संस्थामात्रोपदेशात् । अग्निष्टोमसंस्थेन ज्योतिष्टोमेन पूरणं कर्त्तव्यम्” कर्कः । शत०ब्रा०१०।२।५।२ तन्निरुक्तिर्दर्शिता यथा “एतद्वह यज्ञे तपः । यदुपसदस्तपो वा उपसदस्तद्यत्तपसि चीयते तस्मात् तापश्चितस्तद्वै यावदेवोपसद्भिश्चरन्ति तावत् प्रवर्ग्येण संवत्सरमेवोपसद्भिश्चरन्ति संवत्सरप्रवर्ग्येण” “यावतीरुपसदः कुर्य्यात्तावद्भिः प्रवर्ग्यैश्चरितव्यम् उपसदः तापश्चिते चयने संवत्सरसंमिताः” भा० ।

तापस त्रि० तपश्चरणं शीलमस्य छत्रा० ण । १तपश्चरणशीले स्त्रियां टाप् । तपोऽस्त्यस्य “अण् च” पा० अण् । तपोविशिष्टे त्रि० । “तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाचरेत्” मनुः । “सीदन्ति तापसकुलानि सगोकुलानि” ह० स० १९ अ० । स्त्रियां ङीप् “अब्रवीच्च स्मरामीति कस्य त्वं दुष्टतापसि” भा० आ० ७४ अ० ।

तापसतरु पु० तापसहितस्तरुः शा० त० । इङ्गुदीवृक्षे अमरः । तापसद्रुमादयोऽप्यत्र ।

तापसद्रुमसन्निभा स्त्री तापसद्रुमेण तुल्या निभा० नि० सु० । गर्भदात्रीक्षुपभेदे राजनि० ।

तापसपत्री स्त्री तापसप्रियं पत्रमस्याः जातित्वात् ङीष् । दमनकवृक्षे राजनि० ।

तापसप्रिय पु० तापसानां प्रियः छायाप्रदत्वात् । १पियालवृक्षे राजनि० । २तापसप्रियमात्रे त्रि० ।

तापसेष्टा स्त्री तापसेन इष्टा । १द्राक्षायां राजनि० २तापसाभिलषिते त्रि० ।

तापस्य न० तापसस्य धर्म्मः ष्यञ् । तापसधर्म्मे “स्त्रीधर्मयोगं तापस्यं मोक्षं संन्यासमेव च । राज्ञश्च धर्म्मानखिलं

कार्य्याणां च विनिर्णयः" मनुः। "पुरा रामभयादेव तापस्यं समुपाश्रितः" भा० व० २७६ अ०।

तापहर त्रि० तापं हरति हृ-ट। तापनाशके। स्त्रियां ङीप् ङीबन्तः। २व्यञ्जनभेदे (ताहरी) भाव० प्र० "घृते हरिद्रासंयुक्ता मांसानां भर्जयेद्वटीः। तण्डुलांश्चापि निर्द्धौतान् सहैव परिभर्जयेत्। सिद्धियोग्यं जलं तत्र प्रक्षिप्य कुशलः पचेत्। लवणार्द्रकहिङ्गूनि मात्रया तत्र निःक्षिपेत्। एषा सिद्धिं समायाता प्रोक्ता तापहरी बुधैः"। अस्या गुणाः। "भवेत् तापहरी बल्या वृष्या श्लेष्माणमाहरेत्। वृंहणी तर्पणी रुच्या गुर्वी तत्र गुणाः स्मृताः"

तापिक त्रि० तापे तापकाले भवं ठञ्। ग्रीष्मभवे जलादौ न०।

तापिच्छ(ञ्ज) पु० तापिनं छादयति जयति वा छद+जि-वा ड पृषो०। १तमालवृक्षे अमरः। "अक्ष्णोर्निक्षिपदञ्जनं श्रवणयोस्तापिच्छगुच्छावलीम्" गी०गो० "प्रफुल्लतापिञ्छनिभैरभीषुभिः" माघः। २धातुमाक्षिके राजनि०

तापिन् त्रि० तापयति तापि-णिनि। १तापके तप-णिनि। २तापयुक्ते त्रि० स्त्रियां वा ङीप्। ३बुद्धदेवे पु० त्रिका०

तापी स्त्री तापयति अच् गौरा० ङीष्। विन्ध्याचलस्थे पश्चिमवाहिनदीभेदे राजनि०। सा च माक्षिकधातुद्भवस्थानसन्निकृष्टा। २यमुनायां त्रिका०।

तापीज पु० ताप्या नद्याः समीपे आकरभेदे जायते जन-ड। माक्षिकधातौ "एवञ्च माक्षिकं धातुं तापीजममृतोपमम्। मधुरं काञ्चनाभासमम्लं वा रजतप्रभम्। पिबन् हन्ति जराकुष्ठमेहानाहामयक्षयान्" सुश्रुतः तापीसम्भवताप्यताप्युद्भवादयोऽप्यत्र।

तापिश्वर पु० तीर्थभेदे हेम० शि० पु०।

ताम पु० ताम्यत्यनेन तम-करणे घञ्। १भीषणे २दोषे च अजयपालः। ३ग्लानिकारणे त्रि०भावे घञ्। ४ग्लानौ पु०

तामर न० तामं ग्लानिं रवते हिनस्ति रुङ्-बधे वा० ड १जले २घृते च भरतधृतरुद्रः।

तामरस न० तामरे जले सस्ति सस-ड। १पद्मे, ताम्यतेऽनेन रस्यते इति रसम् कर्म०। २स्वर्णे ३ताम्रे च मेदि०। ४धुस्तूरे, अमरः "इह वद तामरसं नजजायः" वृ० र० उक्ते ५द्वादशाक्षरपादके छन्दोभेदे च। "ताम्यतस्तामरसान्तराभाम्" "स्वनवता नवतामरसाननः" "विकचतामरसा गृहदीर्घिकाः" रघुः। "नवरतममन्दरागतामरसदृशः" माघः। ५पद्मिन्यां स्त्री ङीप्। "यथा गजस्तामरसीं मदोत्कटः" भारते विराटपर्वणि ७ अ०।

तामलकी स्त्री तम णिच्-क्विप् ताम् कर्म०। भूम्यामलक्याम् अमरः। "कटुकेन्द्रयवोशीरसिंहीतामलकीघनैः" सुश्रुतः

तामलिप्त पु० (तमलुक्) देशभेदे त्रिका०। स्वार्थे क। तत्रार्थे। स च देशः वृ०स० १४ अ० कूर्मविभागे प्राच्यामुक्तः "अथ पूर्वस्याम्" इत्युपक्रमे "एकपादतामलिप्तककोशलकावर्द्धमानश्च"। गौरा० ङीष् तत्रार्थे स्त्री।

तामस त्रि० तमोऽस्त्यस्य तमः, प्रधानत्वेनास्त्यस्य वा अण्। १तमोगुणयुक्ते २तमःप्रधानगुणके स्त्रियां ङीप्। ३सर्पे पुंस्त्री० जातित्वात् ङीष्। ४खले त्रि० मेदि० ५उलूके पुंस्त्री राजनि० स्त्रियां ङीष्। ६चतुर्थे मनौ पु० "सत्या देवगणाश्चैव तामसस्यान्तरे मनोः। पुत्रांश्चैव प्रवक्ष्यामि तामसस्य मनोर्नृप!। द्युतिस्तपस्यः सुतपास्तपोमूलस्तपोऽशनः। तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः। तामसस्य मनोरेते दश पुत्रा महाबलाः" हरिवं० ७अ०। "चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः। पृथुः ख्यातिर्नरः केतुरित्याद्या दश तत्सुताः। सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः। ज्योतिर्धामादयः सप्त ऋषयस्तामसेऽन्तरे। देवा वैधृतयो नाम विधृतेस्तनया नृप!। नष्टाः कालेन यैर्वेदा विधृताः स्वेन तेजसा। भाग० ८।१।२४। भागवते अन्यथोक्तं कल्पभेदादविरुद्धम्। तमोऽधिकृत्य प्रवृत्तम् अण् तमसा कृता वा अण्। ७तमोगुणाधिकारेण प्रवृत्ते शास्त्रे ८तमसाकृते च स्त्रियां ङीप्। तामसशास्त्राणि च पद्मपुराणे पार्वतीं प्रतीश्वरवाक्येनोक्तानि यथा "शृणु देवि! प्रवक्ष्यामि तामसानि यथाक्रमम्। येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि। प्रथमं हि मयैवोक्तं शैवं पाशुपताभिधम्। मच्छक्त्यावेशितैर्विप्रैः संप्रोक्तानि ततःपरम्। कणादेन तु संप्रोक्तं शास्त्रं वैशेषिकं महत्। गौतमेन तथा न्यायं साङ्ख्यन्तु कपिलेन वै। द्विजन्मना जैमिनिना पूर्वं वेदमपार्थतः। निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम्। धिषणेन च संप्रोक्तं चार्वाकमतिगर्हितम्। दैत्यानां नाशनार्थाय विष्णुना बुद्धरूपिणा। बौद्धशास्त्रमसत् प्रोक्तं नग्ननीलपटादिकम्। मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमेव च। मयैव कथितं देवि! कलौ ब्राह्मणरूपिणा। अपार्थं श्रुतिवाक्यानां दर्शयल्लोकगर्हितम्। कर्मस्वरूपत्याज्यत्वमत्र च प्रतिपाद्यते। सर्वकर्मपरिभ्रंशान्नैष्कर्म्यं तत्र

चोच्यते । परात्मजीवयोरैक्यं मयात्र प्रतिपाद्यते । ब्रह्मणोऽस्य परं रूपं निर्गुणं दर्शितं मया । सर्वस्य जगतोऽप्यस्य नाशनार्थं कलौ युगे । वेदार्थवन्महाशास्त्रं मायावादमवैदिकम् । मयैव कथितं देवि ! जगतां नाशकारणात्"

कूर्मपुराणे केषाञ्चित्तन्त्राणां तामसत्वमुक्तं यथा "यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च । श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां तु तामसी । करालभैरवञ्चापि यामलं वाममाश्रितम् । एवंविधानि चान्यानि मोहनार्थानि तानि तु । मया सृष्टानि चान्यानि मोहायैषां भवार्णवे" । तामस पुराणानि यथा । "मात्स्यं कौर्म्मं तथा लैङ्गं शैवं स्कान्दं तथैव च । आग्नेयञ्च षडेतानि तामसानि निबोधत" । सात्त्विक पुराणानि यथा । "वैष्णवं नारदीयञ्च तथा भागवतं शुभम् । गारुड़ञ्च तथा पाद्मं वाराहं शुभदर्शने ! । सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै" । राजस पुराणानि यथा "ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च । भविष्यं वामनं ब्राह्मं राजसानि शुभानने !" पद्म० उ० ख० ४२ अ० । "सङ्कीर्णेषु सरस्वत्याः पितृणां व्यष्टिरुच्यते । अग्नेः शिवस्य माहात्म्यं तामसेषु दिवाकरे । राजसेषु च माहात्म्यमधिकं ब्रह्मणः स्मृतम् । यस्मिन् कल्पे तु यत् प्रोक्तं पुराणं ब्रह्मणा पुरा । तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते । सात्त्विकेष्वधिकं तद्वद्विष्णोर्माहात्म्यमुत्तमम् । तथैव योगसंसिद्धा गमिष्यन्ति परां गतिम्" मत्स्य पु० ।

तामसमुनयः पद्मपु० उ० उक्ता यथा । "कणादो गौतमः शक्तिरुपमन्युश्च जैमिनिः । दुर्वासाश्च मृकण्डुश्च भार्गवश्च बृहस्पतिः । जमदग्निश्च इत्येते मुनयस्तामसाः स्मृताः" । तामसस्मृतयस्तत्रैवोक्ता यथा "वार्हस्पत्या गौतमी च सांवर्त्ती यमनिर्म्मिता । शाङ्खी चौशनसी चैव तामस्यः स्मृतयः स्मृताः" । तामसश्रद्धादिकं गीतायां १७अ० उक्तं यथा ।

"त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा । सात्त्विकी राजसी चैव तामसी चेति तां शृणु । यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः । प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः" । तामसाहारादिकमपि भा० १७ अ० उक्तं यथा "यातयामं गतरसं पूति पर्य्युषितञ्च यत् । उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्" । "विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् । श्रद्धाविरहितं यज्ञं तामसं परिचक्षते" । "मूढ़ग्राहेणात्मनो यत् पीड़या क्रियते तपः । परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्" । "अदेशकाले यद्दानमपात्रेभ्यश्च दीयते । असत्कृतमवज्ञातं तत्तामसमुदाहृतम्" । किञ्च "नियतस्य तु संन्यासः कर्म्मणो नोपपद्यते । मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः" । "यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहेतुकम् । अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम् । अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् । मोहादारभ्यते कर्म यत्तत्तामसमुच्यते" । "अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः । विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते । अधर्मं धर्म्ममिति या मन्यते तमसावृता । सर्व्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ ! तामसी" । "यया स्वप्नं भयं शोकं विषादं मदमेव च । न विमुञ्चति दुर्म्मेधा धृतिः सा तामसी मता" । "यदग्रे चानुबन्धे च सुखं मोहनमात्मनः । निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम्" १८अ० । राजसतामसकर्म्माणि यथा "यत् शैवं दैवतं पैत्रं वौपदेवं तथाध्वरम् । शाक्तं शैवं गाणपत्यं यागहोमादिकं तथा । पौरहित्यं याजनञ्च दैवल्यं ग्रामयाजनम् । विष्णुसेवापराधश्च तथा नामापराधकः । असत्प्रतिग्रहो देवि ! सङ्कल्प आभिचारिकः । पशुजीवादिहननं पातकञ्चोपपातकम् । अतिपापं महापापमनुपातकमेव च । लोभो मोहो ह्यहङ्कारः कामः क्रोधः मदस्तथा । एतद् यदपरं कर्म गर्हितञ्च वरानने ! । राजसं तामसं प्रोक्तं मया च मुनिभिः सदा" पद्म० उ० ख० ।

हारीतः "तामसेन तु द्रव्येण ऋत्विग्भिस्तामसैस्तथा । तामसं भावमास्थाय तामसो यज्ञ उच्यते । तामसेन तु यज्ञेन दानेन तपसा तथा । निरये जन्म चेदाप्नुर्द्धिं विद्याच्च तामसीम्" । "तामसी बुद्धिस्तेच्छाधिपत्य रूपा" इति रत्नाकरः । तमसो राहोरपत्यम् अण् । ९ राहुसुते तामसकीलः ।

तामसकील पु० तामसः राहुसुतः कील इव । वृ० स० १ अ० उक्ते राहुसुते केतुभेदे । तन्निमित्तोत्पातभेदस्तत्रोक्तो यथा "तामसकीलसञ्ज्ञका राहुसुताः केतवस्त्रयस्त्रिंशत् । वर्णस्थानाकारैस्तान्दृष्ट्वार्के फलं ब्रूयात् । ते चार्कमण्डलगताः पापफलाश्चन्द्रमण्डले सौम्याः । ध्वाङ्क्षाकबन्धप्रहरणरूपाः पापाः शशाङ्केऽपि । तेषामुदये रूपाण्यम्भः कलुषं रजोवृतं व्योम । नगतरुशिख-

रविमर्दी सशर्करो मारुतश्चण्डः। ऋतुविपरीतास्तरवो दीप्ता मृगपक्षिणो दिशां दाहः। निर्घातमहीकम्पादयो भवन्त्यत्र चोत्पाताः। न पृथक् फलानि तेषां शिखिकीलकराहुदर्शनानि यदि। तदुदयकारणमेषां केत्वादीनां फलं ब्रूयात्"। "यस्मिन् यस्मिन् देशे दर्शनमायान्ति सूर्यबिम्बस्थाः। तस्मिंस्तस्मिन् व्यसनं महीपतीनां परिज्ञेयम्। क्षुत्प्रम्लानशरीरा मुनयोऽप्युत्सृष्टधर्मसञ्चरिताः। निर्मांसबालहस्ताः कृच्छ्रेणायान्ति परदेशम्। तस्करविलुप्तवित्ताः प्रदीर्घनिःश्वासाकुलिताक्षिपुटाः। सन्तः सन्नशरीराः शोकोद्भवबाष्परुद्धदृशः। क्षामा जुगुप्समानाः स्वनृपतिपरचक्रपीडिता मनुजाः। स्वनृपतिचरितं कर्म च पराकृतं प्रब्रुवन्त्यन्ये। गर्भेष्वपि निष्पन्ना वारिमुचो न प्रभूतवारिमुचः। सरितो यान्ति तनुत्वं क्वचित् क्वचिज्जायते सस्यम्। दण्डे नरेन्द्रमृत्युर्व्याधिभयं स्यात् कबन्धसंस्थाने। ध्वाङ्क्षे च तस्करभयं दुर्भिक्षं कीलकेऽर्कस्थे। राजोपकरणरूपैश्छत्रध्वजचामरादिभिर्विद्धः। राजान्यत्वकृदर्कः स्फुलिङ्गधूमादिभिर्जनहा। एको दुर्भिक्षकरो ह्याद्याः स्युर्नरपतेर्विनाशाय। सितरक्तपीतकृष्णैस्तैर्विद्धोऽर्कोऽनुवर्णघ्नः। दृश्यन्ते च यतस्ते रविबिम्बस्योत्थिता महोत्पाताः। आगच्छति लोकानां तेनैव भयं प्रदेशेन"।

स्वार्थे क तस्यार्थे। त्रिंशत्त्र्यधिकाराहोस्ते तामसकीलका इति ख्याताः वृ० स० ११ अ०।

तामसध्यान न० वटुकभैरवस्य ध्येयरूपभेदे। "तस्य ध्यानं त्रिधा प्रोक्तं सात्त्विकादिप्रभेदतः" इत्युपक्रमे सात्त्विकराजसे उक्त्वा तामसध्यानमुक्तं तन्त्रसारे यथा

"ध्यायेन्नीलाद्रिकान्तं शशिशकलधरं मुण्डमाल महेशं दिग्वस्त्रं पिङ्गलाभं डमरुमथ सृणिं खड्गशूलाभयानि। नागं घण्टां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किङ्किणीनूपुराढ्यम्" "तामसं शत्रुशमनं कृत्याभूतगदापहम्" तन्त्रसा०।

तामसिक त्रि० तमसा निर्वृत्तं ठञ्। तमोगुणकार्य्ये त्रि०

तामसी स्त्री तमांसि भूम्ना सन्त्यस्यां प्रशा० अण् ङीप्। अन्धकारबहुलायां रात्रौ २महाकाल्यां मेदि०। ३जटामांस्यां राजनि०। ४तमोगुणवत्यां स्त्रियाञ्च।

तामालेय त्रि० तमालवृक्षस्यादूरदेशादि सख्या० ढञ्। तमालवृक्षस्या-दूरदेशादौ।

तामिस्र पु० तमिस्रा तमस्ततिरस्त्यत्र अण्। नरकभेदे। "तामिस्रो ह्यन्धतामिस्र इत्युपक्रमे। तन्निदानरूपादि भाग०। ५।२६ उक्तं यथा "यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते" "स पर्य्यायेण यातीमान् नरकानेकविंशतिम्। तामिस्रमन्धतामिस्रं महारौरवरौरवौ। नरकं कालसूत्रञ्च महानरकमेव च। सञ्जीवनं महावीचिं तपनं सम्प्रतापनम्। संघातञ्च सकाकोलं कुड्मलं पूतिमृत्तिकम्। लोहशङ्कुमृजीषञ्च पन्थानं शाल्मलीं नदीम्। असिपत्रवनञ्चैव लोहदारकमेव च" मनुः अत्रोपक्रमे यातीति क्रियासम्बन्धापेक्षतया पन्थानं शाल्मलीं नदीमित्युत्तरत्र स्पष्टं द्वितीयाश्रवणाच्च तामिस्रादिशब्दानां द्वितीयान्ततैव नरकविशेषवाचित्वात्तस्य पुंस्त्वात्। शब्दकल्पद्रुमे क्लीवतोक्तिः मनुवचने द्वितीयान्ततामिस्रशब्दे प्रथमान्तत्वभ्रान्त्यैवेति बोध्यम्। तमिस्रया साध्यमण्। २ द्वेषे। "भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः। "तामिस्रोऽष्टदशधा" सां० का०। "तामिस्रो द्वेषोऽष्टादशधा शब्दादयो दशविषया रञ्जनीयाः स्वरूपतः, ऐश्वर्य्यन्त्वणिमादिकं न स्वरूपतो रञ्जनं किन्तु रञ्जनीयशब्दाद्युपायाः। ते च शब्दादय उपस्थिताः परस्परेणोपहन्यमानास्तदुपायाश्चाणिमादयः स्वरूपेणैव कोपनीया भवन्तीति। शब्दादिभिर्दशभिः सहाणिमाद्यष्टादशधेति तद्विषयो द्वेषस्तामिस्रोऽष्टादशविषयत्वादष्टादशधेति" तत्त्वकौ० द्वेषमूलत्वात् भोगेच्छाप्रतिघातरूपे ३क्रोधे भाग० टी० श्रीधरः।

तामु त्रि० तम–उण्। स्तोतरि निघण्टुः।

ताम्बली स्त्री ताम्बूली+पृषो०। (पान) ताम्बूल्यां "शुक्काशताम्बल्लारसानाः" गोप० ब्रा० २।१०।७।

ताम्बूल न० तम–ऊलच् वुगागमः दीर्घश्च गौ० ङीष्। तस्याः पत्रम्। (पान) ख्याते १नागवल्लीदले। २क्रमुके च मेदि०। "ताम्बूलं कटुतिक्तमुष्णमधुरं क्षारं कषायान्वितं वातघ्नं कृमिनाशनं कफहरं दुर्गन्धनिर्नाशनम्। वक्त्रस्याभरणं विशुद्धिकरणं कामाग्निसन्दीपनं ताम्बूलस्य सखे! त्रयोदश गुणाः स्वर्गेऽपि ते दुर्लभाः" अपि चाहुः "ताम्बूलं विशदं रुच्यं तीक्ष्णोष्णं तुवरं सरम्। वश्यं तिक्तं कटु क्षारं रक्तपित्तकरं लघु। बल्यं श्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम्" भाव० प्र०। "अभिधाय मुखे पर्णं पूगं

स्वादयते नरः। मतिभ्रंशो दरिद्रः स्यादन्ते न स्मरते हरिम्" राजनि०। भावप्र० दिनचर्य्यायामुक्तं यथा "धूमेनापोह्य हृद्यैर्वा कषायकटुतिक्तकैः। पूगकर्पूरकस्तूरीलवङ्गसुमनःफलैः। फलैः कटुकषायैर्वा मुखवैशद्यकारिभिः। ताम्बूलपत्रसहितैः सुगन्धैर्वा विचक्षणः। धूमेन अगुर्वादिधूमेन। अपोह्य कफं दूरीकृत्य कषायकटुतिक्तकैः फलैः कर्पूरकस्तूरीलवङ्गादिभिः पूगैः क्रमुकैः सुमनःफलैः जातीफलैः एलाहरीतक्यादिफलैः। रात्रौ सुप्तोत्थिते स्नाते भुक्ते वान्ते च सङ्गरे। सभायां विदुषां राज्ञां कुर्य्यात्ताम्बूलचर्वणम्। ताम्बूलमुक्तं तीक्ष्णोष्णं रोचनन्तु परं सरम्। तिक्तं क्षारोषणं कामरक्तपित्तकरं लघु। वश्यं श्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम्। मुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम्। हनुदन्तमलध्वंसि जिह्वेन्द्रियविशोधनम्। मुखप्रसेकशमनं गलामयविनाशनम्। नवं तदेव मधुरं कषायानुरसं गुरु। बलासजननं प्रायः पत्रशाकगुणं स्मृतम्। वङ्गदेशोद्भवं पर्णं परं कटुरसं सरम्। पाचनं पित्तजनकमुष्णं कफहरं स्मृतम्। पर्णं पुराणमकटु खुल्लकन्तु पाण्डुरम्। विशेषाद्गुणवद्वेद्यमन्यद्धीनगुणं स्मृतम्। खदिरः कफपित्तघ्नश्चूर्णं वातबलासहृत्। संयोगतस्त्रिदोषघ्नं सौमनस्यं करोति च। मुखवैशद्यसौगन्ध्यकान्तिसौष्ठवकारकम्। प्रभाते पूगमधिकं मध्याह्ने खदिरं तथा। निशासु चूर्णमधिकं ताम्बूलं भक्षयेत् सदा। आयुरग्रे यशो मूले लक्ष्मीर्मध्ये व्यवस्थिता। तस्मादग्रं तथा मूलं मध्यं पर्णस्य वर्जयेत्। पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसम्भवः। जीर्णं पर्णं हरत्यायुः शिरा बुद्धिविनाशिनी। आद्यं विषोपमं पीतं द्वितीयं भेदि दुर्जरम्। तृतीयादनु पातव्यं सुधातुल्यं रसायनम्। ताम्बूलं नातिसेवेत न विरिक्तो बुभुक्षितः। देहदृक्केशदन्ताग्निश्रोत्रवर्णबलक्षयः। शोषः पित्तानिलास्रं स्यादतिताम्बूलचर्वणात्। विषमूर्च्छामदार्त्तानां क्षयिणां रक्तपित्तिनाम्।

"विना पर्णं मुखे दत्त्वा गुवाकं भक्षयेद्यदि। तावद्भवति चण्डालो यावद्गङ्गां न गच्छति" कर्मलोचनम्! "ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम्। तपस्विनाञ्च विप्रेन्द्र! गोमांससदृशं ध्रुवम्" इति ब्रह्मवै० पु० ख०। मार्कण्डेयः "भूयोऽप्याचम्य कर्त्तव्यं ततस्ताम्बूलभक्षणम्" वशिष्ठः "सुपूगञ्च सुपर्णञ्च सुचूर्णेन समन्वितम्। अदत्त्वा द्विजदेवेभ्यस्ताम्बूलं वर्जयेद्बुधः" "ताम्बूलद्वयमासनञ्च लभते यः कान्यकुब्जेश्वरात्" नैष० "ताम्बूलाक्तं दशनमसकृद्दर्शयन्तीह चेटी" सा० द०। २पर्णवृक्षे स्त्री गौरा० ङीष्। "ताम्बूलीनां दलैस्तत्र रचिताः पानभूमयः" रघुः।

ताम्बूलकरङ्क पु० ६त०। (पानडिपा) ताम्बूलपात्रभेदे [हेमच०।

ताम्बूलद त्रि० ताम्बूलं ददाति दा–क। १राज्ञां ताम्बूलदाने अधिकृते दासभेदे २विप्रादिभ्यो ताम्बूलदातरि च ण्वुल्। ताम्बूलदायकोऽप्युभयत्र "जलताम्बूलकुसुमगन्धमाल्यादिदायकाः" कामन्दकीये।

ताम्बूलपत्र पु० ताम्बूलमिव पत्रमस्य। पिण्डालौ राजनि०। कर्म्म०। ताम्बूलीपत्रे न०।

ताम्बूलपेटिका स्त्री ६त०। ताम्बूलकरङ्के

ताम्बूलराग पु० ताम्बूलकृतो रागः शाक० त०। (पानेर बोल) १ताम्बूलजनिते रागे ताम्बूलस्य राग इव रागो रक्तता यस्य। २मसूरे हारा०।

ताम्बूलवल्ली स्त्री ताम्बूलाख्या वल्ली। (पान) नागवल्ल्याम् अमरः। स्वार्थे क अत्रैवार्थे।

ताम्बूलिक त्रि० ताम्बूलं तद्रचनं शिल्पमस्य। ताम्बूलरचनाधिकृते "आदिशब्दात् मालाकाररजकताम्बूलिकगान्धिकादयः" सा० द०।

ताम्बूलिन् त्रि० ताम्बूलं पण्यतयाऽस्त्यस्य इनि। १ताम्बूलविक्रेतरि (तामुलि) ख्याते २जातिभेदे पुंस्त्री स्त्रियां ङीप्।

ताम्र न० तम–रक् दीर्घः। १धातुभेदे (ताँमा) अमरः २कुष्ठभेदे कर्म्मविपाकः। ३रक्तवर्णे हेमच०। ४तद्वति त्रि०। धातुभेदस्योत्पत्तिकारणगुणादि भावप्र० उक्तं यथा "अथ ताम्रस्य उत्पत्तिर्नामलक्षणगुणाश्च। 'शुक्रं यत् कार्त्तिकेयस्य पतितं धरणीतले। तस्मात्ताम्रं समुत्पन्नमिदमाहुः पुराविदः। ताम्रमौदुम्बरं शुल्वमुदुम्बरमपि स्मृतम्। रविप्रियं म्लेच्छमुखं सूर्य्यपर्य्यायनामकम्। जपाकुसुमसङ्काशं स्निग्धं मृदुघनक्षमम्। लोहनागोज्झितं ताम्रं मारणाय प्रशस्यते। कृष्णं रूक्षमतिस्तब्धं श्वेतञ्चापि घनासहम्। लोहनागयुतञ्चेति शुल्वं दुष्टं प्रकीर्त्तितम्। एको दोषो विषे ताम्रे त्वसम्यङ्मारिते पुनः। दाहः स्वेदो रुचिर्मूर्च्छा क्लेदो रेको वमिर्भ्रमः" (रेकः विरेकः] तस्य मारणविधिस्तत्रोक्तो यथा

"सूक्ष्माणि ताम्रपत्राणि कृत्वा संस्वेदयेद्बुधः। वासरत्रयमम्लेन ततः खाते विनिःक्षिपेत्। पादांशं सूतकं दत्त्वा याममम्लेन मर्द्दयेत्। तत उद्धृत्य पत्राणि लेपयेद्द्विगुणेन च। गन्धकेनाम्लपिष्टेन तस्य कुर्य्याच्च गोलकम्। ततः पिष्ट्वा च मीनाक्षीं चाङ्गेरीं वा पुनर्नवाम् (चाङ्गेरी चतुष्पत्राम्ललोनिकाभेदः।) तत्कल्केन बहिर्गोलं लेपयेद्द्व्यङ्गुलोन्मितम्। धृत्वा तद्गोलकं भाण्डे शरावेण च रोधयेत्। वालुकाभिः प्रपूर्य्याथ विभूतिलवणाम्बुभिः। दत्त्वा भाण्डमुखे मुद्रां ततश्चुल्ल्यां विपाचयेत्। क्रमवृद्ध्याग्निना सम्यग्यावद्यामचतुष्टयम्। स्वाङ्गशीतं समुद्धृत्य मर्द्दयेच्छूरणद्रवैः। यामैकं गोलकं तच्च निःक्षिपेच्छूरणोदरे। मृदा लेपस्तु कर्त्तव्यः सर्वतोऽङ्गुष्ठमात्रकः। पाच्यं गजपुटे क्षिप्रं मृतं भवति निश्चितम्। वमनं च विरेकं च भ्रमं श्वासमथारुचिम्। विदाहं स्वेदमुत्क्लेदं न करोति कदाचन। एवं मारितस्य ताम्रस्य गुणा ताम्रं कषायं मधुरं च तिक्तमम्लञ्च पाके कटु सारकञ्च। पित्तापहं श्लेष्महरञ्च शीतं तद्रोपणं स्याल्लघु लेखनञ्च। पाण्डूदरार्शोज्वरकुष्ठकासश्वासक्षयान् पीनसमम्लपित्तम्। शोथं कृमिं शूलमपाकरोति प्राहुर्बुवा बृंहणमल्पमेतत्"।

"ताम्रमम्लेन शुद्ध्यति" मनुः। ताम्रपत्रशब्दे भोजननिषेधः इतेतरोद्धृतसारगव्यभोजननिषेधश्च वक्ष्यते। रक्तवर्णविशिष्टे "ताम्रौष्ठपर्य्यस्तरुचः स्मितस्य" "तपस्विने ताम्ररुचा करेण" कुमा० "प्रचक्रमे पल्लवरागताम्रा" रघुः। ५ द्वीपभेदे पु०। स्वार्थे क। तत्रार्थे अमरः।

ताम्रकर्ण त्रि० ताम्रौ कर्णौ यस्य। १रक्तकर्णयुक्ते स्त्रियां ङीप्। ङीषन्तः २पश्चिमदिग्हस्तिन्याम् अमरः।

ताम्रकार पुंस्त्री० ताम्रं ताम्रपात्रादिकं करोति कृ–अण् उप० स०। ताम्रोपजीविनि सङ्कीर्णजातिभेदे। "आयोगवेन विप्रायां जातास्ताम्रोपजीविनः" कंसकारशब्दे दृश्यम्। स्त्रियां जातित्वात् ङीष्।

ताम्रकुट्ट पुंस्त्री० ताम्रं कुट्टयति कुट्ट–अण् उप० स०। ताम्रकारे (काँसारि) संकीर्णजातिभेदे। ण्वुल्। ताम्रकुट्टक तत्रार्थे अमरः।

ताम्रकुण्ड न० कुण–ड किच्च ताम्रमयं कुण्डम्। ताम्रमये देवजलाधारे पात्रभेदे "देवतान्यजलाधारः कुण्डं कुण्डमुखा स्मृताः" "शाश्वतः उपचारात् ताम्रकुण्डम्" उज्ज्व०

ताम्रकूट पुंन० ताम्रस्य कूटमिव। रक्तवर्णनिर्यासके (तामाक) क्षुपभेदे "संविदा कालकूटं च ताम्रकूटं च धुस्तुरम्। अहिफेनं खर्जूरसस्ताड़िका तरिता तथा। इत्यष्टौ सिद्धिद्रव्याणि यथा सूर्य्याष्टकं तथा" कुला० त०।

ताम्रकृमि पु० कर्म०। इन्द्रगोपकीटे हारा०।

ताम्रगर्भ न० ताम्रं गर्भ इवोत्पत्तिस्थानमस्य। तुत्थे (तुँते) राजनि०। तस्य ताम्रोद्भवत्वं तुत्थशब्दे दृश्यम्।

ताम्रचूड़ पुंस्त्री० ताम्रा रक्ता चूड़ा यस्य। १कुक्कुटे (कुकड़ा) ख्याते खगे अमरः स्त्रियां ङीष्। तद्रुतविशेषफलं वृ०स० ८८अ० यथा "भीता रुवन्ति कुक्कुकिति ताम्रचूड़ास्त्यक्ता रुतानि भयदान्यपराणि रात्रौ"। कुक्कुटश्च द्विविधः नारिकेलाकृतिः प्राच्यवाटः, बलाकाकृतिश्च प्रतीच्यवाटः। तत्र प्राच्यवाटः बलाधिकः। तथैव वर्णितं दशकुमारे ताम्रचूड़युद्धाधिकारे। "कथमिव नारिकेलजातेः प्राच्यवाटकुक्कुटस्य प्रतीच्यवाटः पुरुषैरसमीक्ष्य बलाकाजातिस्ताम्रचूड़ो बलप्रमाणाधिकस्यैवं प्रति विसृष्ट इति। "प्रायुध्यत चातिसंरब्धमनुप्रहारप्रवृत्तस्वपक्षमुक्तकण्ठीरवरवं विहङ्गमद्वयम्। जितश्चासौ प्रतीच्यवाट कुक्कुटः" दशकु०। २कुक्कुरद्रुमे (कुकसिमा) राजनि०। तस्य रक्तशिखत्वात्तथात्वम्। "द्वाभ्यां गृहीत्वा पाणिभ्यां शक्तिं चान्येन पाणिना। अपरेणाग्निदायादस्ताम्रचूडं भुजेन सः। महाकायमुपश्लिष्टं कुक्कुटं बलिनां वरम्" भा० व० २२४अ० तत्रैव "अरुणस्ताम्रचूड़श्च प्रददौ चरणायुधम्"। ३कुमारानुचरमातृगणभेदे स्त्री "सुभगा लम्बिनी लम्बा ताम्रचूड़ाविकाशिनी" भा० श० ४७ अ०। मातृगणोक्तौ ४रक्तशिखायुक्ते त्रि० ताम्रचूड़भैरवः।

ताम्रजाक्ष पु० सत्यभामायां कृष्णाज्जाते पुत्रभेदे। "जज्ञिरे सत्यभामायां भीमो भीमरथः क्षुपः। रोहितो दीप्तिमांश्चैव ताम्रजाक्षो जलान्तकः। भान्दभीमरिका चैव ताम्रपक्षा जलन्धमा। चतस्रो जज्ञिरे तेषां स्वसारो गरुड़ध्वजात्" हरिवं० १६२ अ०।

ताम्रत्रपुज पु० ताम्रञ्च त्रपु च ताभ्यां जायते जन–ड। कांस्ये भावप्र०। तस्योभयधातुजन्यत्वात् तथात्वम्।

ताम्रदुग्धा स्त्री ताम्रं रक्तं दुग्धं निर्यासोऽस्याः। गोरक्षदुग्धायां राजनि०।

ताम्रद्वीप पुंन०। कर्म०। दक्षिणदेशस्थे द्वीपभेदे। "द्वीपं ताम्राह्वयञ्चैव पर्वतं रामकं तथा। तिमिङ्गिलञ्च स नृपं वशे कृत्वा महामतिः" भा० स० ३० अ०। सहदेवदक्षिणदिग्विजये।

ताम्रपक्षा स्त्री सत्यभामासुतायां ताम्रजाक्षशब्दे दृश्यम् ।

ताम्रपट्ट न० ताम्रनिर्मितं पट्टम् । ताम्रमये लेखनपत्रभेदे "दद्याद्भूमिं निबन्धं वा कृत्वा लेख्यञ्च कारयेत् । आगामिभद्रनृपतिपरिज्ञानाय पार्थिवः । पटे वा ताम्रपट्टे वा स्वमुद्रोपरिचिह्नितम् । अभिलेख्यात्मनो वंश्यानात्मानञ्च महीपतिः । प्रतिग्रहपरीमाणं मानाच्छेदोपवर्णनम् । स्वहस्तकालसम्पन्नं शासनं कारयेत् स्थिरम्" याज्ञ० ।

ताम्रपत्र पु० ताम्रं रक्तं पत्रमस्य । १जीवशाके राजनि० । २रक्तवर्णपत्रके वृक्षमात्रे च । कर्म्म० । ३ताम्रमये लेखनपत्रे । ४रक्ते दले नवपल्लवे च न० ।

ताम्रपर्णी स्त्री दक्षिणदेशस्थे नदीभेदे ।

"ताम्रपर्णीन्तु कौन्तेय ! कीर्त्तयिष्यामि तां शृणु यत्र देवैस्तपस्तप्तं महदिच्छद्भिराश्रमे । गोकर्ण इति विख्यातस्त्रिषु लोकेषु विश्रुतः । शीततोयो बहुजलः पुण्यस्तात ! शिवः शुभः । ह्रदः परमदुष्प्रापो मानुषैरकृतात्मभिः । तत्र वृक्षतृणाद्यैश्च सम्पन्नफलमूलवान् । आश्रमोऽगस्त्यशिष्यस्य पुण्यो देवसमो गिरिः । वैदूर्य्यपर्वतस्तत्र श्रीमान् मणिमयः शिवः । अगस्त्यस्याश्रमश्चैव बहुमूलफलोदकः" भा०व०८८अ० । तस्याः सिन्धुसङ्गमस्थाने मुक्ताजन्म यथोक्तं "ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः । ते निपत्य ददुस्तस्मै यशः स्वमिव सञ्चितम्" रघुः "सिंहलकपारलौकिकसौराष्ट्रकताम्रपर्णीकपारशराः" कौवेरपाण्ड्यवाटकहैमा इत्याकरा ह्यष्टौ" वृ० सं० ८१ अ० मुक्ताकरोक्तौ । २शिलाभेदे च । "ताम्रपर्णी शिला राजन् ! श्रीमान मलयपर्वतः" भा० भी० ६ अ० ।

ताम्रपल्लव पु० ताम्राणि पल्लवानि यस्य । १अशोकवृक्षे राजनि० । २रक्तपल्लवयुक्ते वृक्षमात्रे च । कर्म्म० । ३रक्ते पल्लवे कस्त्री ।

ताम्रपाकिन् पु० पच्यते पाकः फलपुष्पादि ताम्रः पाकः अस्त्यस्य इनि । गर्द्दभाण्डवृक्षे । रत्नमा० ।

ताम्रपात्र न० ताम्रस्य विकारः अण् कर्म० । ताम्रमये पात्रे तत्र तर्पणविधिस्तर्पणशब्दे उक्तः । "गृहीत्वौडुम्बरं पात्रम्" इत्यादि स्मृत्या तस्य संकल्पपात्रतोक्ता तत्र भोजननिषेधो मनुनोक्तो यथा "ताम्रपात्रे न भुञ्जीत भिन्नकांस्ये मलाविले । पलाशपद्मपत्रेषु गृही भुक्त्वैन्दवं चरेत्" । तत्र घृतेतरोद्धृतसारगव्यादिभोजननिषेधमाह स्मृतिसागरे स्मृतिः "नारिकेलजलं कांस्ये ताम्रपात्रे स्थितं मधु । गव्यञ्च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना । ताम्रपात्रघृतं मांसं यच्च गव्यं घृतेतरत् । आमिषन्तु गवां मांसं दधि मद्यं पयो रजः । द्रव्यान्तरयुतं मांसं पयसा संयुतं दधि । पयोऽनुद्धृतसारञ्च ताम्रपात्रे न दुष्यति" उत्तरार्द्धानुसारात् "ततश्च संस्कृते वह्नौ गोक्षीरेण चरुं पचेत् । अस्त्रेण क्षालिते पात्रे नवे ताम्रमयादिके" शारदाति० वाक्यम् अनुद्धृतसारक्षीरविषयम् उद्धृतसारस्यैव तत्र स्थितत्वे निषेधात् पानपात्रं च ताम्रपात्रं प्रशस्तं यथाह सुश्रुतः "दद्यात् ताम्रमये पात्रे सुशीतं सुशृतं पयः" । "जलपात्रं तु ताम्रस्य तदभावे मृदो हितम्" भावप्र० ।

ताम्रपादी स्त्री ताम्रः रक्तः पादो मूलमस्याः ङीष् । हंसपद्याम् राजनि० । तस्या हंसस्येव रक्तमूलत्वात्तथात्वम् ।

ताम्रपुष्प पु० ताम्रं पुष्पं यस्य । १रक्तकाञ्चने जटा० २भूमिचम्पके शब्दच० । ३रक्तपुष्पयुक्तमात्रे त्रि० । "ताम्रपुष्पैश्च शिखरैर्दीप्यमानः सुतेजसा" हरिवं० २१७ अ० । कर्म्म० । ४रक्ते पुष्पे न० ।

ताम्रपुष्पिका स्त्री ताम्रं पुष्पं यस्याः कप् कापि अत इत्त्वम् । रक्तत्रिवृति (लालतेउड़ि) राजनि० ।

ताम्रपुष्पी स्त्री ताम्रं रक्तं पुष्पं यस्याः ङीष् । १धातकीवृक्षे २पाटलावृक्षे च राजनि० ।

ताम्रफल पु० ताम्रं रक्तं फलमस्य । १अक्षोटकवृक्षे । राजनि० । २रक्तफलयुक्ते वृक्षमात्रे त्रि० कर्म्म० । ३रक्ते फले न० ।

ताम्रमूला स्त्री ताम्रं रक्तं मूलं यस्या अजादेराकृतिगणत्वात् टाप् । १दुरालभायां २लज्जालौ च राजनि० । ३कच्छुरावृक्षे (खिराइ) रत्नमाला । ४रक्तमूलके वृक्षमात्रे त्रि० । कर्म्म० । ५रक्ते मूले न० ।

ताम्रयोग पु० चक्रदत्तोक्ते औषधभेदे तद्विधानादि तत्रोक्तं यथा "स्थाल्यां संमर्द्य दातव्यौ माषिकौ रसगन्धकौ । नखचुस्तं तदुपरि तण्डुलीयं द्विमाषिकम् । ततो नैपालताम्रादि पिधाय सुकरालितम् । पांशुना पूरयेदूर्द्ध्वं सर्वां स्थालीं ततोऽनलः । स्थाल्यधो नालिकां यावद्देयस्तेन मृतस्य च । ताम्रो ताम्रस्य रक्त्येका त्रिफलाचूर्णरक्तिका । त्र्यूषणस्य च रक्त्येका विड़ङ्गस्य च तन्मधु । घृतेनालोड्य लेढ्व्यं प्रथमे दिवसे ततः । रक्तिवृद्धिः प्रतिदिनं कार्य्या ताम्रादिषु त्रिषु । स्थिरा विड़ङ्गरक्तिस्तु यदा भेदो विवक्षितः । तदा

विडङ्गन्त्वधिकं दद्याद्वृद्धिद्वयं पुनः। द्वादशाहं योगवृद्धिस्ततो ह्रासक्रमोऽप्ययम्। ग्रहणीमम्लपित्तञ्च क्षयं शूलञ्च सर्वदा। ताम्रयोगो जयत्येष बलवर्णाग्निवर्द्धनः"।

ताम्ररसायनी स्त्री ताम्ररसस्य रक्तनिर्यासस्यायनी। गोरक्षदुग्धायां जटाधरः।

ताम्रलिप्त पु० देशभेदे। सोऽभिजनोऽस्य तस्य राजा वा अण्। तद्देशवासिनि तन्नृपे च बहुषु अणो लुक्। स च देशः प्राचीस्थः। "ताम्रलिप्तञ्च राजानं कर्वटाधिपतिं तथा" भा० स० २९ अ०। भीमप्राचीदिग्विजये। "वङ्गाः कलिङ्गा मगधास्ताम्रलिप्ताः सपुण्ड्रकाः" भा० स० ५१अ०। स्वार्थे क। तत्रार्थे "किराताः कर्वराः सिद्धाः वैदेहास्ताम्रलिप्तकाः" भा० भी० ७ अ०। जनपदोक्तौ।

ताम्रवर्ण पु० ताम्रो रक्तो वर्णोऽस्य। १पल्लिवाहवृक्षे तृणभेदे राजनि०। २जटायां स्त्री शब्दच०। ३ताम्रवर्णयुतमात्रे त्रि०। कर्म्म०। ४रक्ते वर्णे पु०।

ताम्रवल्ली स्त्री कर्म्म०। १मञ्जिष्ठायाम् शब्दच० २चित्रकूटदेशप्रसिद्धे लताभेदे राजनि०। ३रक्तलतामात्रे च।

ताम्रवीज पु० ताम्रं वीजं यस्य। १कुलत्थे राजनि०। २रक्तवीजके वृक्षमात्रे त्रि०। कर्म०। ३रक्ते वीजे न०। ४कुलत्थिकायां स्त्री शब्दार्थचि०। [५रक्तवर्णके वृक्षे पु०।

ताम्रवृक्ष पु० कर्म्म०। १रक्तचन्दनवृक्षे २कुलत्थे च रत्नमा०

ताम्रवृन्त पु० ताम्रं वृन्तमस्य। १कुलत्थे, स्त्रीत्वमपि टाप् त्रिका०। २रक्तवृन्तके वृक्षमात्रे त्रि०। कर्म्म०। ३रक्ते वृन्ते न०।

ताम्रशिखिन् पु० ताम्रा रक्ता शिखास्त्यस्य इनि। कुक्कुटे जटाधरः। ब० व०। ताम्रशिख इत्यपि तत्र। ताम्रशिखायुक्ते च त्रि०।

ताम्रसार न० ताम्रं रक्तं सारमस्य। १रक्तचन्दनवृक्षे। रत्नमाला। २रक्तसारके वृक्षमात्रे त्रि०। कर्म्म०। ३रक्ते सारे पुंन०।

ताम्रसारक पु० ताम्रो रक्तः सारोऽस्य कप्। १खदिरे राजनि०। २रक्तचन्दनवृक्षे च। ३तत्काष्ठे न० शब्दार्थचि०।

ताम्रसारिक पु० ताम्रः सारोऽस्त्यस्य ठन्। १रक्तखदिरे, २रक्तचन्दने च शब्दार्थचि०।

ताम्रा स्त्री ताम्र+टाप्। १सैंहिल्यां २ताम्रवल्ल्यां शब्दमा०।

ताम्राख्य पु० उपद्वीपभेदे शब्दमाला। ताम्रद्वीपे।

ताम्राक्ष पुंस्त्री ताम्रे अक्षिणी यस्य षच् समा०। १कोकिले त्रिका०। स्त्रियां षित्त्वात् जातित्वाच्च ङीष्। २रक्तेक्षणयुक्ते त्रि० स्त्रियां षित्त्वात् ङीष्। ३विशाला यत्र ताम्राक्षैः पूर्णचन्द्रनिभाननैः। वर्षाभूः कीर्त्यते" भा० क० ४६ अ०।

ताम्राभ न० ताम्रस्य आभेवाभा यस्य। १रक्तचन्दने शब्दच०। ताम्रा रक्ता आभा यस्य। २रक्तवर्णाभायुक्ते त्रि० "रुधिरोक्षितसर्वाङ्गैस्तैस्तदायोधनं बभौ। कबन्धैः संवृतं सर्वं ताम्राभैः खमिवावृतम्" भा० द्रो० ११९ अ०।

ताम्रारुण न० तीर्थभेदे "ताम्रारुणं समासाद्य ब्रह्मचारी समाहितः। अश्वमेधमवाप्नोति ब्रह्मलोकञ्च गच्छति" भा० व० ८४ अ०।

ताम्रार्द्ध पु० ताम्रस्यार्द्धोऽंशभेद उत्पादकोऽस्य। कांस्ये त्रिका०

ताम्रावती स्त्री ताम्रमाधेयत्वेनाऽस्त्यस्य मतुप् मस्य वः संज्ञायां दीर्घः। ताम्राकरे नदीभेदे "ताम्रावती वेत्रवती नद्यस्तिस्रोऽथ कौशिकी" भा० व० २२१ अ०।

ताम्राश्मन् पु० नि० कर्म्म०। पद्मरागे "ताम्राश्मरश्मिच्छुरितैर्नखाग्रैः" माघः। "ताम्राश्मनां पद्मरागाणाम्" मल्लिना०।

ताम्रिक त्रि० ताम्रं तत्पात्रादिनिर्माणं शिल्पमस्य ताम्रस्येदं वा ठञ्। १कांस्यकारे २सङ्कीर्णजातिभेदे पुंस्त्री० स्त्रियां ङीष्। ३ताम्रसम्बन्धिनि त्रि०। "कार्षिके ताम्रिके पणः" अमरः। "कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः" मनुः। "निष्काः सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः" याज्ञ०। ४गुञ्जायां स्त्री टाप् राजनि०। ५वाद्यभेदे शब्दार०

ताम्री स्त्री ताम्रस्य विकारः अण् ङीप्। वाद्यभेदे त्रिका०।

ताय पालने विस्तारे च भ्वा० आत्म० सक० सेट्। तायते अतायि-अतायिष्ट। तताये। ऋदित्। णिच् अततायत्-त। तायितः तातिः "उभौ मायां व्यातायेताम्" भट्टिः। "सरसि संताय्यमाने" यजु० ३९।५। घञ्। तायः वृषा० आद्युदात्तः। ल्युट्—तायनम् "वृत्तिसर्गतायनेषु क्रमः" पा०।

तायिक त्रि० ताये वृद्धौ साधु ठञ्। तज्जिकाभिधदेशे हेमच०

तायु पु० ताय-उण्। चौरे स्तेने निघण्टुः "अप त्ये तायवो यथा नक्षत्रा" ऋ० १।५०।२।

तार पु० तारयति स्वजापकान् संसारार्णवात् तॄ-णिच्-अच् तार्य्यतेऽनेन वा तॄ-णिच् करणे अच्, तॄ-णिच्-भावे अच् वा। १प्रणवे ओङ्कारे "तारयेद् यद्भवाम्भोधेः स्वजापकमानसम्। ततस्तार इति ख्यातो यस्तं ब्रह्मा व्यलोकयत्" काशीख० ७२ अ०। २वानरभेदे ३शुद्धमौक्तिके ४मुक्ताविशुद्धौ मेदि० ५देवीप्रणवे कूर्चवीजे (ह्रौँ) तन्त्रसा० ६तारणे विश्वः ७महादेवे "काश्यां विश्वेश्वरोऽहं गिरि-

पतितनयासंयुतो वामभागे शुखडादग्डेन दत्ते त्रिपथगतटिनीतीरशुद्धाम्बुभागे। मायावीजञ्च कर्णौ सुरमुनिसहितो ध्यानयुक्तं वदामि प्रीत्या लोकस्य तस्मात् सुरमुनिगणकैरुच्यते तारनामेति" शब्दार्थचि० धृतवाक्यम् ८रूप्ये न०राजनि०।९नक्षत्रे न०स्त्री०मेदि०"विपत्तारे गुडं दद्यात्" ताराबलादिन्दुरथेन्दुवीर्य्यात्" ज्योति० त०सां० त० उक्ते अध्ययनरूपे प्रथमे १०गौणसिद्धिभेदे। "जहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः। दानञ्च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः" सा० का०। "विहन्यमानस्य दुःखस्य त्रित्वात् तद्विघातास्त्रय इति इमा मुख्याः तिस्रः सिद्धयस्तदुपायतया त्वितरा गौण्यः पञ्च सिद्धयस्तत्रापि हेतुमत्तया तिस्रः हेतुतया पञ्च व्यवस्थिताः। तास्वाद्या अध्ययनादिलक्षणा सिद्धयो हेतवः मुख्यास्तु हेतुमत्यः। विधिवद्गुरुमुखादध्यात्मविद्यानामक्षरस्वरूपग्रहणमध्ययनं प्रथमसिद्धिस्तारमुच्यते" त०कौ० ११विष्णौ पु० "अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः" भा० अनु० १४९अ० सहस्रनामकथने। १२उच्चशब्दे पु०।१३तद्वति त्रि०मेदि०। १४स्फुरितकिरणे १५निर्मले त्रि० धर०। दिक्शब्दात् परम् तीरस्य तारादेशः। १६तीरे। दक्षिणतारं दक्षिणतीरमित्यर्थः १७उच्चैस्तरे त्रि० १८नेत्रकनीनिकायां न० स्त्री० "मत्तयेव घूर्णितमन्दतारया" काद०। "तारैर्बभूवे परभागलाभतः" माघः शुद्धमुक्ताफले। "तारहेममहारत्नविमानशतशोभितम्" भाग० ४।६।२७। प्रणवे "तारो मायारमायोगो मनोर्दीपनमुच्यते"। (ओं श्रीं ह्रीँ) दी० त० "तारं व्योमाग्निमनुयुग्दण्डी ज्योतिर्मनुर्मतः" दी० त०। "हारममलं तरलतारमुरसि दधतम्" जयदेवः। "उरसि निहिततारो हारः" अमरुः। "तारलोलवलयेन करेण" सा०द०।

तारक त्रि० तारयति तॄ-णिच्-ण्वुल्। १तारयितरि। "तत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे" जाबालोप०। स्त्रियां कापि अत इत्त्वम्। २दैत्यभेदे तत्कथा शिवपुराणे दृश्या। ३कर्णे ४भेलके च मेदि०। तारैव स्वार्थे क। "तारका ज्योतिषि" पा० अजादि० टाप् न अत इत्त्वम्। तारका। ५नेत्रकनीनिकायां स्त्री। ६चक्षुषि न०स्त्री० मेदि०। "तस्मिन् विप्रकृताः काले तारकेण दिवौकसः" कुमा०। "अभिभाव्यतारकमदृष्टहिमद्युतिविम्बमस्तमितभानु नभः" माघः "कुमारस्तुतिषु तारकोद्धरणम्" काद०। न दण्ड्यानां नेत्रोत्पाटनमिति ध्वन्यर्थः। "पतनं तारकादीनाम्" सुश्रु० "तनुप्रकाशेन विचेयतारका" रघुः। "तारकावर्षमिव घर्म्मविनाशपिशुनम्" "कापि विहृत्य दिवावसाने लोहिततारका" काद०। "त्र्यधिकदशयतिर्नतौ रौ भवेतां ररौ तारका, वृत्तरत्नाकरोक्ते अष्टादशाक्षरपादके ७छन्दोभेदे च। [तत्कथा शिवपु० दृश्या।

तारकजित् पु० तारकं दैत्यं जयति जि-क्विप्। कार्त्तिकेये

तारकाक्ष पु० तारकासुरस्य ताराक्षापरपर्याये पुत्रभेदे "निर्जितेषु च दैत्येषु तारकस्य सुतास्त्रयः। ताराक्षः कमलाक्षश्च विद्युन्माली च पार्थिव!" इत्युपक्रमे "काञ्चनं तारकाक्षस्य चित्रमासीन्महात्मनः। राजतं कमलाक्षस्य विद्युन्मालिन आयसम्" भा० क० ६त०। २कुमारानुचरभेदे "महाजठरपादाङ्गास्तारकाक्षाश्च भारत!" भा० श० ४६ अ०।

तारकब्रह्म न० कर्म०। रामस्य (ओं रामाय नमः) षडक्षरे मन्त्रे। "षडक्षरं महामन्त्रं तारकब्रह्म उच्यते। रामाय नम इत्येतत् प्रणवादि षडक्षरम्" इति अन्योऽपि मन्त्रः पद्मपुर० उक्तो यथा। "मुमूर्षोर्मणिकर्ण्यान्तु अर्द्धोदकनिवासिनः। अहं दिशामि ते मन्त्रं तारकं ब्रह्मवाचकम्। ओँ श्रीरामरामेत्येतन्मन्त्रं तारकमुच्यते। अतस्त्वं जानकीनाथ! परं ब्रह्म विनिश्चितम्"।

तारकादि संजातार्थे इतच्प्रत्ययनिमित्ते पा० गण सू० उक्ते शब्दगणे स च गणो यथा

"तारका, पुष्प, कर्णक, मञ्जरी, ऋजीष, क्षण, सूत्र मूत्र, निष्क्रमण, पुरीष, उच्चार, प्रचार, विचार, कुड्मल, कण्टक, मुसल, मुकुल, कुसुम, कुतूहल, स्तवक, किसलय, पल्लव, खण्ड, वेग, निद्रा, मुद्रा, बुभुक्षा, धेनुष्या, पिपासा, श्रद्धा, अभ्र, पुलक, अङ्गारक, वर्णक, द्रोह, दोह, सुख, दुःख, उत्कण्ठा, भर, व्याधि, वर्मन्, व्रण, गौरव, शास्त्र, तरङ्ग, तिलक, चन्द्रक, अन्धकार, गर्व, मुकुर, हर्ष, उत्कर्ष, रण, कुवलय, गर्ध, क्षुध्, सीमन्त, ज्वर, गर, रोग, रोमाञ्च, पण्डा, कज्जल, तृष्, कोरक, कल्लोल, स्थपुट, फल, कञ्चुक, शृङ्गार, अङ्कुर, शैवाल, बकुल, श्वभ्र, आराल, कलङ्क, कर्दम, कन्दल, मूर्च्छा, अङ्गार, हस्तक, प्रतिबिम्ब, विघ्न, तन्त्र, प्रत्यय, दीक्षा, गर्ज, (गर्भादप्राणिनि")"सदस्य

संजातं तारकादिभ्य इतच्”पा० इतच् तारकित अत्र आकृतिगणत्वात् अन्येऽपि शब्दा यथाप्रयोगमत्नावसेयाः।

तारकायण पु० विश्वामित्रपुत्रभेदे “औदुम्बरा ह्यविप्लाता-स्तारकायणचञ्चुलाः” हरिवं० २७ अ०। विश्वामित्र-पुत्रकथने। [तयोऽपत्य।

तारकारि पु० ६त०। कार्त्तिकेये हेमच०। तारकशब्दे प्रस्ट-

तारकित न० तारका संजाता अस्य तार० इतच्। नक्षत्रयुक्ते आकाशे “सितनिशादृषदि स्फुटनिष्पतत्कणगणाधिकतारकिताम्बरः” नैष०।

तारकिणी स्त्री तारकाः सन्त्यत्र इनि ङीप्। १नक्षत्रयुक्तायां रात्रौ राजनि० २तारकायुक्ते त्रि० स्त्रियां ङीप्।

तारकोपनिषद् स्त्री तारयति ज्ञानदानेन तारि—ण्वुल्। तारिका उपनिषत्। उपनिषद्भेदे उपनिषच्छब्दे दृश्यम्।

तारक्षिति पु० तारा उच्चा क्षितिर्यत्र। देशभेदे स च देशः वृ० स० १४ अ० प्रतीच्यासुक्तः “अपरस्यां मणिमान्” इत्युपक्रमे “पञ्चनदरमठपारावततारक्षितिशृङ्गवैश्यकनकशकाः” कर्म०। २उच्चभूमौ स्त्री।

तारण पु०तारयत्यनेन ल्युट्। १भेलके रत्ना०। कर्त्तरि ल्यु। २तारयितरि त्रि० ३विष्णौ पु०। “अशोकस्तारणस्तारः” विष्णुस०। ४भावे ल्युट्। ५तारणकरणे ६उद्धारणे च न० “तत्र चोत्पत्स्यते जन्तुर्भवतां तारणाय वै” भा० व० १२अ०। भावे युच्। तारणा ७तरणप्रापणे स्त्री “तारणा पारणं चैव तद्व्रतं सर्वकामिकम्”हरिवं०१४० अ०। षष्टिवर्षमध्ये अष्टादशे दवर्षभेदे। “अतिवृष्टिश्च जायेत धान्यस्याथ प्रपीड़नम्। शस्यं भवति सामान्यं तारणे सुरवन्दिते!” ज्यो० त०। “तारणं तदनु भूरिवारिदं शस्यवृद्धिमुदितञ्च पार्थिवम्” वृ० स० ८अ०

तारणि(णी) स्त्री तार्य्यतेऽनया तृ—णिच्—अनि। १नौकायां हारा० वा ङीप्। ङीबन्तः २काश्यपपत्नीभेदे याजोपयाजयोर्ऋष्योर्मातरि तस्या अपत्यम् ढक्। तारणेय तदपत्ये। “तथैव च महाभागः सोऽपश्यच्छंसितव्रतौ। याजोपयाजौ ब्रह्मर्षी शाम्यन्तौ परमेष्ठिनौ। संहिताध्ययने युक्तौ गोत्रतश्चापि काश्यपौ। तारणेयौ युक्तरूपौ ब्राह्मणावृषिसत्तमौ” भा० आ० १६७ अ०।

तारतण्डुल पु०तारः शुद्धमौक्तिकमिव शुभ्रस्तण्डुलोऽस्य। धवलयवनाले राजनि०।

तारतम्य न० तरतमयोर्भावः ष्यञ्। १न्यूनाधिकत्वे “निर्धनं निधनमेतयोर्द्वयोस्तारतम्यविधिरुक्तचेतसाम्। बोधनाय विधिना विनिर्म्मिता रेफ एव जयवैजयन्तिका” इत्युद्भटः। “अहो तारतम्यं नराणाम्” मुग्ध०। तरतमशब्दे उदा०।

तारतार न० तारयतीति तारं तत्प्रकारः प्रकारे द्वित्वम्। सां० त० उक्ते गौणतृतीयसिद्धिभेदे तारशब्ददर्शिते “ऊहः शब्दोऽध्ययनम्” इत्यादिवाक्ये “ऊहस्तर्कः आगमाविरोधिन्यायेनागमार्थपरीक्षणम् संशयपूर्वपक्षनिराकरणेनोत्तरपक्षव्यवस्थापनं तदिदं मननमाचक्षते आगमिनः। सा तृतीया सिद्धिस्तारतारमुच्यते” त० कौ०।

तारटी स्त्री तरट्येव स्वार्थे अण् ङीप्। तरटीवृक्षे राजनि० तारटीति पाठान्तरं तत्रार्थे। [राजनि०।

तारपुष्प पु० तारं रजतमिव पुष्पमस्य। कुन्दवृक्षे।

तारमाक्षिक न० तारं रूप्यमिव माक्षिकम् उपधातुभेदः। रजततुल्ये उपधातुभेदे। “तारमाक्षिममन्यत्तु तद्भवेद्रजतोपमम्। किञ्चिद्रजतसाहित्यात् तारमाक्षिकमीरितम्। अनुकल्पतया तस्य ततो हीनगुणाः स्मृताः। न केवलं रूप्यगुणावर्त्तन्ते तारमाक्षिके। द्रव्यान्तरस्य संसर्गात् सन्त्यन्येऽपि गुणा यतः। स्यात् तारमाक्षिकं स्वादु तिक्तं वृष्यं रसायनम्। चाक्षुष्यं वस्तिरुक्कुष्ठपाण्डुमेहविषोदरम्। अर्शः शोथं क्षयं कण्डूं त्रिदोषमपि नाशयेत्। मन्दानलत्वं बलहानिमुग्रां विष्टम्भितां नेत्रगदान् सकुष्ठान्। तथैव मालां व्रणपूर्विकाञ्च करोत्यशुद्धं रजताख्यमाक्षिकम्”। शोधनन्तु। “कर्कोटीमेषशृङ्ग्युत्थैर्द्रवैर्जम्बीरजैर्दिनम्। भावयेदातपे तीव्रे विमला शुद्ध्यति ध्रुवम्। विमला तारमाक्षिकम्। मारणन्तु “कुलत्थस्य कषायेण घृष्टा तैलेन वा पुटेत्। तैलेन वाऽजमूत्रेण म्रियते तारमाक्षिकम्” भावप्र०।

तारल पु० तरल एव अण्। १तरले २विटे च शब्दार्थचि०।

तारवायु पु० कर्म०। अत्युच्चशब्दयुक्ते पवने।

तारविमला स्त्री तारोरजतमिव विमला। तारमाक्षिके उपधातुभेदे शब्दार्थचि०।

तारशुद्धिकर न० तारस्य रजतस्य शुद्धिं धात्वन्तरयोगात् जातमलशुद्धिङ्करोति कृ—ट। सीसके तत्सम्पर्काद्धि रजतस्य मलशुद्धिर्लोकसिद्धा राजनि०।

तारसार पु० उपनिषद्भेदे उपनिषच्छब्दे दृश्यम्।

तारहार पु० तारनिर्म्मितो हारः। १स्थूलमुक्ताहारे “हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु। विभूतयस्तदीयानां पर्य्यस्ता यशसामिव।” ... [illegible]

“हंसांसि तोरःस्थलतारहारः” रघुः।

तारा स्त्री तारयति संसारार्णवात् भक्तान् तृ—णिच्—अच्। १दशमहाविद्यान्तर्गते द्वितीयमहाविद्याभेदे। २नक्षत्रे च

तत्र नक्षत्रादीनां लिङ्गभेदा यथा "हस्ता स्वाती श्रवणा अक्लीवे मृगशिरो नपुंसि स्यात्। पुंसि पुनर्वसुपुष्यौ मूलं त्वन्यो स्त्रियः शेषाः" अधिकस्वरशब्दे १४००पृ० दृश्यम्। "काली तारा महाविद्या षोड़शी भुवनेश्वरी" इत्यादि तन्त्रसा० "तारकत्वात् सदा तारा सुखमोक्षप्रदायिनी। उग्रापत्तारिणी यस्मादुग्रतारा ततः स्मृता" तन्त्रसा० तन्नामनिरुक्तिः। ३बुद्धदेवताभेदे ४बृहस्पतिभार्य्यायाम् मेदि०। ५सुषेणवानरकन्यायां वालिभार्य्यायाञ्च ६चिड़ानामगन्धद्रव्ये ७मुक्तायाञ्च राजनि०। "बृहस्पतेः स वै भार्य्यां तारां नाम यशस्विनीम्। जहार तरसा सर्व्वानवमत्याङ्गिरःसुतान्। स (चन्द्रः) याच्यमानो देवैश्च तथा देवर्षिभिः सह। नैव व्यसर्जयत् तारां तस्मायाङ्गिरसे तदा" "ददावङ्गिरसे तारां स्वयमेव पितामहः। तामन्तःप्रसवां दृष्ट्वा तारां प्राह बृहस्पतिः। मदीयायां न ते योनौ गर्भो धार्य्यः कथञ्चन। अयोनावुत्सृजत्तं वै कुमारं दस्युहन्तमम्। ईषीकास्तम्बमासाद्य ज्वलन्तमिव पावकम्। जातमात्रः स भगवान् देवानामक्षिपद्वपुः। ततः संशयमापन्नास्तारामुचुः सुरोत्तमाः। सत्यं ब्रूहि सुतः कस्य सोमस्याथ बृहस्पतेः। पृच्छ्यमाना यदा देवैर्नाह सा साध्वसाधु वा। तदा तां शप्तुमारब्धः कुमारो दस्युहन्तमः। तं निवार्य्य ततो ब्रह्मा तारां पप्रच्छ संशयम्। यदत्र तथ्यं तद् ब्रूहि तारे! कस्य सुतो ह्ययम्। सा प्राञ्जलिरुवाचेदं ब्रह्माणं वरदं शनैः। सोमस्येति महात्मानं कुमारं दस्युहन्तमम्" हरिवं० २५ अ०। "सुषेणदुहिता चेयमर्थसूक्ष्मविनिश्चये। औत्पातिके च विविधे सर्व्वतः परिनिष्ठिता। यदेषा साध्विति ब्रूयात् कार्य्यं तन्मुक्तसंशयम्। न हि तारा मतं किञ्चिदन्यथा परिवर्त्तते" रामा० कि० २२ अ०। सा च पश्चात् वालिनो मरणानन्तरं सुग्रीवभार्य्या "तारया सहितः कामी सक्तः कपिवृषस्तदा" ३१अ० "अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा। पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनम्" तत्र मुक्तायां "तारावलीविकरणैर्व्यरुचत् निवासाः" माघः कनीनिकायां "लुलितनयनताराः क्षामवक्त्रेन्दुबिम्बाः" माघः।

ताराश्च अश्विन्यादयः। ज्यो० त० ताः तद्विशेषादिकञ्चोक्तं यथा "अश्विनी भरणी चैव कृत्तिका रोहिणी तथा। मृगशीर्षं तथा चार्द्रा पुनर्व्वसुकपुष्यकौ। अश्लेषा च मघा पूर्व्वफल्गुन्युत्तरफल्गुनी। हस्ता चित्रा तथा स्वाती विशाखा चानुराधिका। ज्येष्ठा मूलं तथाषाढ़े पूर्व्वोत्तरपदादिके। श्रवणा च धनिष्ठा च शतभिषाद्यभाद्रिका। उत्तरादिभाद्रपदा रेवती भानि च क्रमात्"। "अश्वियमदहनकमलजशशिशूलभृददितिजीवफणिपितरः। योन्यर्य्यमदिनकृत्त्वष्टृपवनशक्राग्निमित्राः। शक्रो निरृतिस्तोयं विश्वविरिञ्ची हरिर्व्वसुर्व्वरुणः। अजपादोऽहिर्बुध्नः पूषा चेतीश्वरा भानाम्" विशाखायाः शक्राग्न्योर्मिलितदैवतत्वम् अभिजितोभिन्नत्वेन अष्टाविंशतिरिति तच्च वक्ष्यते इति नक्षत्राधिपाः "उग्रः पूर्व्वमघान्तका ध्रुवगणस्त्वोग्युत्तराणि स्वभूर्व्वातादित्यहरित्रयं चरगणः पुष्याश्विहस्ता लघुः। चित्रा मित्रमृगान्त्यभं मृदुगणस्तीक्ष्णोऽहिरुद्रेन्द्रयुक्। मिश्रोऽग्निः सविशाखभः शुभकराः एवं स्वकल्पे गणाः।" "शशाङ्कतारयोः शुद्धिर्विचार्य्या सर्व्वकर्म्मसु। ग्रहाणामपि सर्व्वेषां तच्छुद्धौ फलदा स्मृता"। श्रीपतिसमुच्चये "ताराचन्द्रबले प्राप्ते दोषाः स्वान्ये भवन्ति ये। ते सर्व्वे विलयं यान्ति सिंहं दृष्ट्वा गजा इव। जन्मसम्पत् विपत्क्षेमं प्रत्यरिः साधको वधः। मित्रं परममित्रञ्च जन्मभाच्च पुनःपुनः। सर्व्वमङ्गलकार्य्याणि त्रिषु जन्मसु कारयेत्। विवादश्चाङ्गभैषज्ययात्राक्षौरादि वर्जयेत्। यात्रायां पथि बन्धनं क्षयविधौ सर्व्वस्य नाशोभवेत्। भैषज्ये मरणं तथा सुनियत्तं दाहोग्रहारस्मणे। चौरे रोगसमागमो बहुविधः ष्टाङ्केऽर्थनाशस्तथा षाढे बुद्धिविनाशनं युधि भयं प्राप्नोत्ययं जन्मभे। पापाख्या त्रिविधा पञ्चचतुर्दशविंशतिस्त्रियुता। सिद्धिफला वृद्धिकरी विनाशसंज्ञा क्रमात् कथिता"। "जन्माद्यं कर्म्म ततोऽपि दशमं सांघातिकं षोड़शकम्। समुदयमष्टादशभं विनाशसंज्ञं त्रयोविंशम्। आद्यात्तु पञ्चविंशम् मानसमेवं नरः षड्भः स्यात्। नवनक्षत्रोत्पतिः स्वजातिदेशाभिषेकर्क्षैः"। जात्यर्क्षन्तु। "पूर्वात्रयं सानलमग्रजानां राज्ञान्तु पौष्णेन सहोत्तराणि। सपौष्णमित्रं पितृदैवतञ्च प्रजापतेर्भञ्च कृषीवलानाम्। आदित्यहस्ताभिजिदश्विभानि तान्यन्त्यजातेः प्रभविष्णुतायाम्"। (देशभं देशनामर्क्षम्)। नाड़ीनक्षत्राणि। "देहादेहार्थहानिः स्याज्जन्मर्क्षे उपतापिते। कर्म्मर्क्षे कर्म्मणां हानिः पीड़ा मनसि मानसे। मूर्त्तिद्रविणबन्धूनां हानिः सांघातिके तथा। संतप्ते सामुदयिके

मित्रभ्यार्थसंचयः। वैनाशिके विनाशः स्यात् देहद्रविणसम्पदाम्"। नाड़ीनक्षत्रफलम्। "जातिभे कुलनाशः स्याद्बन्धनञ्चाभिषेकभे। देशभे देशभङ्गः स्यात् क्रूरैरेवं शुभैः शुभम्। यस्मिन्राजाभिषिक्तोभवति तदाभिषेचनिकभम् अ इ उ ए कृत्तिका ओ यवि वु रोहिणीत्यादिदेशभम् (चक्रशब्दे १२४८पृ०शतपदचक्रे दृश्यम्)। उग्रादिगणादिकार्य्यभेदः मु० चि० उक्तो यथा "उत्तरात्रयरोहिण्यो भास्करश्च ध्रुवं स्थिरम्। तत्र स्थिरं बीजगेहशान्त्यारामादिसिद्धये। स्वात्यादित्ये श्रुतेस्त्रीणि चन्द्रश्चापि चरं चलम्। तस्मिन् गजादिकारोहो वाटिकागमनादिकम्। पूर्वात्रयं याम्यमघे उग्रं क्रूरं कुजस्तथा। तस्मिन् घाताग्निशाठ्यानि विषशस्त्रादिसिध्यति। विशाखाग्नेयभे सौम्यो मिश्रं साधारणं स्मृतम्। तत्राग्निकार्य्यमिश्रं च वृषोत्सर्गादिसिद्धये। हस्ताश्विपुष्याभिजितः क्षिप्रं लघु गुरुस्तथा। तस्मिन् पण्यरतिज्ञानं भूषाशिल्पकलादिकम्। मृगान्त्यचित्रामित्रर्क्षं मृदु मैत्रं भृगुस्तथा। तत्र गीताम्बरं क्रीड़ा मित्रकार्य्यविभूषणम्। मूलेन्द्रार्द्राहिभं सौरिस्तीक्ष्णं दारुणसंज्ञकम्। तत्राभिचारघातोग्रभेदाः पशुदमादिकम्। मूलाहिमिश्रोग्रमधोमुखं भवेदूर्ध्वास्यमार्द्रेज्यहरित्रयं ध्रुवम्। तिर्य्यङ्मुखं मैत्रकरानिलादितिज्येष्ठाश्विनानीदृशकृत्यमेषु"।

ताराकूट न० दम्पत्योर्विवाहशुभाशुभज्ञापके कूटभेदे उपयमशब्दे १२४८ पृ० दृश्यम्। "वर्णो वश्यस्तथा तारा योनिश्च ग्रहमैत्रकम्। गणमैत्रं भकूटञ्च नाडी चैते गुणाधिकाः" मुहू० चि०।

ताराक्ष पु० तारकाक्षापरपर्य्यायके तारकासुरस्य पुत्रे दैत्य[भेदे तारकाक्षशब्दे दृश्यम्।

ताराचक्र न० तन्त्रोक्ते दीक्षणीयमन्त्रशुभाशुभज्ञानार्थे चक्रभेदे तत्स्वरूपादि चक्रशब्दे २८०९पृ० नक्षत्रचक्रे दृश्यम्।

ताराचमन न० तारायाः पूजाद्यङ्गमाचमनम्" शा० त०। तारादेवीपूजाद्यङ्गे आचमनभेदे तच्च भैरवतन्त्रे उक्तं यथा "ताराभेदैस्त्रिभिः पीत्वा मायया क्षालयेत् करम्। ॐ औष्ठौ तु द्विरुन्मृज्य फट्कारैः क्षालयेत् करम्। आस्यं नासे दृशौ श्रोत्रे नाभिवक्षःशिरोभुजान्। वैरोचनादिभिः स्पृष्ट्वा सर्वपापैः प्रमुच्यते। आचम्य भैरवो भूत्वा वत्सरात्तां प्रपश्यति"। ताराभेदैरिति। उग्रतारैकजटानीलसरस्वतीभेदैः। वैरोचनादयस्तु। वैरोचन, शङ्ख, पाण्डर, पद्मनाभ नामक, मामक, पाण्डव, तारकाऽसिताङ्ग, यमान्तक, विघ्नान्तक, नरान्तकाः, सचतुर्थीप्रणवादिनमोऽन्तकाः" कृष्णानन्दतन्त्रसा०।

ताराधिप पु० ६त०। १ चन्द्रे २ शिवे ३ बृहस्पतौ ४ वालिवानरे ५ सुग्रीवे च। "ततार ताराधिपखण्डधारी" कुमा०। "ताराधिपे बलिनि लग्नगतेऽथ वास्मिन्" ज्यो०त०। तारापतितारानाथादयोऽप्यत्र। "कठोरतारापतिलाञ्छनच्छविः" माघः। ६ नक्षत्राधिपेषु अश्विनीकुमारादिषु ताराशब्दे दृश्यम्।

तारापथ पु० ताराणां पन्थाः अच् समा०। आकाशे हला०।

तारापीड़ पु० ताराणामापीड़ः भूषणमिव। चन्द्रे त्रिका०।

ताराप्रमाण न० अश्विन्यादिनक्षत्राणां स्वरूपावेदकसंख्याविशेषे स च वृ० स० ९८ अ० सप्रयोजनमुक्तो यथा

"शिखिगुणरसेन्द्रियानलशशिविषयगुणर्तुपञ्चवसुपक्षाः। विषयैकचन्द्रभूतार्णवाग्निरुद्राश्विवसुदहनाः। भूतशतपक्षवसवो द्वात्रिंशच्चेति तारकामानम्। क्रमशोऽश्व्यादीनां कालस्ताराप्रमाणेन। नक्षत्रजमुद्वाहे फलमब्दैस्तारकामितैः सदसत्। दिवसैर्ज्वरस्य नाशो व्याधेरन्यस्य वा वाच्यः"।

ताराभूषा स्त्री तारा भूषा यस्याः। रात्रौ राजनि०।

ताराभ्र पु० तारो निर्मलः जलशून्यः अभ्रो मेघ इव शुभ्रत्वात्। कर्पूरे राजनि०।

तारामण्डल न० ताराणां मौक्तिकानां मण्डलं यत्र। ईश्वरमण्डपभेदे शब्दरत्ना०। ६त०। २ नक्षत्रमण्डले च।

तारामृग पु० तारारूपः मृगः मृगशिरः। मृगशिरोनक्षत्रे "अन्वधावन् मृगं रामो रुद्रस्तारामृगं यथा" भा०व०२७७ अ०"तारारूपं मृगम् तारामृगं, प्रजापतिः स्वां दुहितरं मृगो भूत्वा जगाम तस्य रुद्रः शिरोऽच्छिनत् तदेव मृगशिरो नक्षत्रम्" नीलक०। "एष चैव मृगः श्रीमान् यश्च दिव्यो नभश्चरः। उभावेतौ मृगौ दिव्यौ तारामृगमहीमृगौ" रामा० अर० ४३।२।स०।

तारारि पु० ६त०। विटमाक्षिके उपधातुभेदे हेमच०।

तारावती स्त्री ककुत्स्थराजभार्य्यायां मनोन्मथिन्यां जातायां दुर्गावतारभूतायां कन्यायां शिवावतारचन्द्रशेखरपत्न्याम्। तत्कथा कालिकापु० ४७ अ० यथा।

"काकुत्स्थो भार्य्यया सार्द्धमत्यन्तमुदितोऽभवत्। ववृधे
सहजेनाथ हारेण भूषिता सा ककुत्स्थजा। तेनैव हारचिह्नेन
मन्दिरे तस्य वर्षास्विव सुरापगा। यथोक्तं
तस्यास्तारावतीति वै, नामाकरोत् पिता काले
न्नृपसत्तम !"। "पतिं पूर्ववरं पुत्री राज्ञस्तारावती सती।
स्वयं सा पार्वती देवी वव्रे च चन्द्रशेखरम्। वैवाहि-

केन विधिना स राजा चन्द्रशेखरः। तारावतीं तदा
भार्य्यां ककुत्स्थान्वयपतेः सुताम्। संस्कृत्य स्नापयामास
देवेभ्यो वैदिकैर्मखैः”

ताराषोढ़ा स्त्री ६त०। तारापूजाङ्गे षोढ़ान्यासभेदे
तन्त्रसारे ताराप्रक० दृश्यम्। “इति षोढ़ा च कथिता
तारायाः सर्वसिद्धिदा” तन्त्रसा०। [ताड़िकाशब्दे दृश्यम्।

तारिका स्त्री ताड़िका डस्य रः। तालरसजाते मद्यभेदे।

तारिन् त्रि० तारयति तॄ–णिच्–णिनि। १तारके। स्त्रियां
ङीप्। सा च दशसु महाविद्यासु २द्वितीयविद्यायाम्
तद्भेदाः तन्त्रसारे उक्ता यथा “तारा चोग्रा महोग्रा च
वज्रा काली सरस्वती। कामेश्वरी च चामुण्डा इत्यष्टौ
तारिणी गणाः। अथ भेदान् प्रवक्ष्यामि तारिण्याः सर्वसिद्धिदान्। येषां विज्ञानमात्रेण जीवन्मुक्तो हि साधकः”
इत्युपक्रमे तासामभिधानम्। ३वुद्धदेवताभेदे त्रिका०।

तारुक्ष्य पु० तरुक्षस्यर्षेरपत्यं गर्गा० यञ्। तरुक्षर्षेरपत्ये।
स्त्रियां लोहिता० ष्फ। तारुक्ष्यायणी। यूनि तु
तारुक्ष्यायण फक्। यूनि तदपत्ये स च गोत्रप्रव-
[स्त्रियां ङीप्।
रान्तर्गतः।

तारुण पुंस्त्री तरुणस्यापत्यम् उत्सा० अञ्। तरुणस्यापत्ये

तारुण्य न० तरुणस्य भावः ष्यञ्। यौवने अमरः। “स्व-
राज्ञा गाढ़तारुण्याः समस्तरतकोविदाः” सा० द०। “ततः
स राजा तारुण्यादौरसेन बलेन च” भा० शा० १२५ अ०।

तारेय पु० तारायाः अपत्यम् ढक्। अङ्गदे १वालिपुत्रे। “करिष्यत्येष तारेयस्तेजस्वी तरुणोऽङ्गदः” रामा० कि० २२ सर्गः।
२वृहस्पतिभार्य्यायास्तारायाश्चन्द्रजे पुत्रे बुधे च।

तार्कव त्रि० तर्कोर्विकारः कोपधत्वात् अण्। तर्कुविकारे
[२तर्कशास्त्राभिज्ञे च।
सि० कौ०।

तार्किक त्रि० तर्कं वेत्ति तच्छास्त्रमधीते वा ठञ्। १तर्कवेत्तरि

तार्क्ष पु० तृक्ष एव स्वार्थे अण्। कश्यपे ऋषौ। “प्रमथ्य तरसा
राज्ञः शाल्वादींश्चैद्यपक्षगान्। पश्यतां सर्वलोकानां
तार्क्षपुत्रः सुधामिव” भाग०। २ पातालगरुड़लतायां
स्त्री राजनि०। गौरा० ङीष्।

तार्क्ष्य पु० तृक्षस्य गोत्रापत्यं गर्गा० तृक्षेत्यत्र तृक्षेति पाठान्त-
रात् यञ्। १तृक्षमुनेर्गोत्रापत्ये स्त्रियां लोहि० ष्फ।
तार्क्ष्यायणी। २गरुड़ाग्रजे अरुणे ३गरुड़े ४अश्वे ५सर्पे
पुंस्त्री०। ६रसाञ्जने च मेदि०। ७शालवृक्षे ८स्वर्णे च
शब्दर० ९अश्वकर्णवृक्षे १०स्यन्दने हेमच०। ११पर्वतभेदे
१२विहगमात्रे। “अयमुत्तरात् संयद्वसुस्तस्य तार्क्ष्य-
श्चारिष्टनेमिश्च सेनानीग्रामण्यौ” यजु० १५।१८। “तीक्ष्णे-
ऽन्तरीक्षे क्षिपति पक्षौ तार्क्ष्यः” वेददी० पृषो०। तत्र
गरुडे “आरुह्य तार्क्ष्यं नभसीव भूतले” माघः “भवन्ति
निर्विषाः सर्पाः यथा तार्क्ष्यस्य दर्शनात्” पञ्चत०।
“त्रस्तेन तार्क्ष्यात् किल कालियेन” रघुः। “दशरात्र-
मुपयुज्य सर्वं तरति किल्बिषं तार्क्ष्यदर्शनमुपपद्यते”
सुश्रुतः। तार्क्ष्यस्येव दर्शनं दूरात् दर्शनमित्यर्थः।
सर्पे “त्रिपदाः शिखिनस्तार्क्ष्याश्चतुर्दंष्ट्राः विषाणिनः”
[शब्दार्थचि०।
भा० भी० ९ अ०।

तार्क्ष्यज न० तार्क्ष्ये पर्वते जायते जन–ड। रसाञ्जने

तार्क्ष्यध्वज पु० तार्क्ष्यो ध्वजोऽस्य। गरुड़ध्वजे विष्णौ हेमच०
तार्क्ष्यकेतनादयोऽप्यत्र।

तार्क्ष्यनायक पु० ६त०। गरुडे राजनि०। तार्क्ष्यनाथादयोऽप्यत्र

तार्क्ष्यप्रसव पु० तार्क्ष्यः शैलः प्रसवोऽस्य। अश्वकर्णवृक्षे राजनि०

तार्क्ष्यशैल न० तार्क्ष्यशैले भवम् अण्। रसाञ्जने राजनि०
“सिन्धूद्भूतं चक्रमर्दस्य वीजमित्यूद्भूतं केशरं तार्क्ष्यशै-
लम्”। “लौहं चूर्णं मागधी तार्क्ष्यशैलं तुल्याः कार्य्याः
कृष्णवर्णास्तिलाश्च” सुश्रुतः।

तार्क्ष्यसामन् न० सामभेदे लाट्या० १।६।१९।

तार्क्ष्यायण पुंस्त्री० तृक्षस्य ऋषेरपत्यं युवा गर्गा० तृक्षेत्यत्र
तृक्षेति पाठान्तरात् यञ् यूनि फक् अनातीत्युक्तेराप-
त्यस्य यस्य लोपो न। तृक्षर्षेर्यून्यपत्ये। [शब्दरत्ना०।

तार्क्ष्यी स्त्री तार्क्ष्यस्य खगस्य प्रिया अण्। वनलताभेदे

तार्ण त्रि० तृणस्येदं शिवा० अण्। १तृणसम्बन्धिनि २तृण-
जन्ये वह्नौ पु०। “तार्णतार्णाभयं नास्तीत्यत्र
तार्णत्वमतार्णत्वञ्च वह्नित्वव्याप्यो जातिभेदः इति नव्य-
नैयायिकाः। तृणात् तद्विक्रयात् स्थानादागतः आयस्थान-
त्वात् शुण्डिका० अण्। ३तृणविक्रयरूपायस्थानजे करे त्रि०।

तार्णक त्रि० तृणानि सन्त्यस्मिन् वुण् कुक् च तार्णकीयास्तस्मिन्
भवः विल्वका० छस्य लुक्। तृणयुक्तदेशभवे।

तार्णकर्ण पुंस्त्री० तृणकर्णस्यापत्यं शिवा० अण्। तृणकर्ण-
स्यर्षेरपत्ये। [नामकर्षेर्गोत्रापत्ये।

तार्णायन पुंस्त्री तृणस्यर्षेर्गोत्रापत्यम् नडा० फक्। तृण-

तार्त्तीय त्रि० तृतीय एव स्वार्थे अण्। तृतीये “प्रथमस्य
तृत्तरस्याङ्गस्तार्त्तीयं तृतीयं सवनम्” आश्व० श्रौ० १।१।४

तार्त्तीयीक त्रि० तृतीय एव तृतीय+स्वार्थे ईकक्। तृतीये
“तार्त्तीयीकं पुरारेस्तदवतु मदनप्लोषणं लोचनं वः” माल-
तीमाधवम्।

तार्य्य त्रि० तॄ–कर्म्मणि ण्यत्। तरणीये। "नौतार्य्यां तां नदीं तरेत्" भा० शा० १२४६ श्लो०। "नाव्यं त्रिलिङ्गं नौतार्य्यम्" अमरः। तरे देयम् ष्यञ्। २तरणार्थे देये शुल्के च। "भाण्डपूर्णानि यानानि तार्य्यं दाप्यानि सारतः" मनुः।

ताल पु० तल एव अण्। १करतले शब्दार्थचि०। ताड्यते तड–आघाते कर्म्मणि अच् डस्य लः। १हरिताले २तालीशपत्रे न० राजनि० ३दुर्गासिंहासने न० हेमच० तालस्येदम् अण् तस्य लुक्। ४तालफले न०। अङ्गुष्ठमध्यमाभ्यां मिते ५परिमाणे ६करास्फालने ७कांस्यनिर्मितवाद्यभेदे (करताल) ८त्सरौ खड्गमुष्टौ च पु० मेदि० ९स्वनामख्याते वृक्षभेदे भावप्र०।

"पक्वं तालफलं पित्तरक्तश्लेष्मविवर्द्धनम्। दुर्जरं बहुमूत्रञ्च तन्द्राऽभिष्यन्दशुक्रदम्। तालमज्जा तु तरुणः किञ्चिन्मदकरो लघुः। श्लेष्मलो वातपित्तघ्नः सस्नेहो मधुरः सरः। तालमज्जा तालफलबीजमज्जा। तालजं तरुणं तोयमतीव मदकृन्मतम्। अम्लीभूतं तदा तत् स्यात् पित्तकृद्वातदोषहृत्" भावप्र०। "तालो द्वादशभिर्जानुपरिणाहपरिभ्रमैरिति" उक्ते १०मानविशेषे। हस्तेन जानुमण्डलपरिभ्रमणं यावत्याकालमात्रया क्रियते तावतीभिर्द्वादशभिस्तालाख्यः कालांशो ज्ञेयः इत्यर्थः।

११गीतकालक्रियामाने। अयं स्वर इयत्कालं गेयः इयत्कालं विलम्बित इयत्कालं द्रुतम् इयत्कालं मध्यमिति बोधयितुं दैर्घ्यैर्हस्तैरङ्गुल्याकुञ्चनप्रसारणाक्रियाभिर्नर्त्तितव्यं गातव्यञ्चेति कालक्रिययोः प्रमाणं तालः। इदमियत्कालं गेयमिति कालेनाङ्गुल्याद्याकुञ्चनादिक्रियामानं ताल इति यावत्। "कालस्य एकद्वित्रिमात्राद्युच्चारणनियमितस्य क्रियायाः परिस्पन्दात्मिकायाः परिच्छेदहेतुस्तालम्" इति मधुसू०। "कालेन नर्त्तनगलवादनक्रियाणां मानं तालः ताराद्येककालमेषां विरामस्ताल इत्यन्ये" इत्यमरटीकायां भरतः। तन्निरुक्तिस्तु गौरीहरयोर्नृत्येन तालो बभूव। तथा हि। हरनृत्यस्य ताण्डवं गौर्य्यानृत्यस्य लास्यम् इति संज्ञा पुरुषनृत्यस्य ताण्डवं नार्य्यानृत्यस्य लास्यमिति नियमात्। ताण्डवस्याद्याक्षरेण लास्यस्याद्याक्षरेण च मिलित्वा ताल इति संज्ञा जाता इति" संगीतशास्त्रे तस्य भेदा यथा "चर्च्चत्पुट १ चारु पुटः २ ३षट्पितापुत्रकस्तथा। ४उद्घट्टकः ५सन्निपातः ६कङ्कणः ७कोकिलारवः। ८राजकोलाहलो ९रङ्गविद्याधर१०शचीप्रियौ। ११पार्वतीलोचनो १२राजचूडामणि १३जयश्रियौ १४वादकाकल १५कन्दर्प १६नलकूवर १७दर्पणाः। १८रतिलीलो १९मोक्षपतिः २०श्रीरङ्गः २१सिंहविक्रमः। २२दीपको २३मल्लिकामोदो २४गजलीलश्च २५चर्च्चरी। २६कुहक्को २७विजयानन्दो २७वीरविक्रम २८टेङ्किके। २९रङ्गाभरण ३०श्रीकीर्त्ति ३१वननालि३२चतुर्मुखाः। ३३सिंहनन्दन ३४नन्दीश ३५चन्द्रविम्ब ३६द्वितीयकाः। ३७जयमङ्गल ३८गन्धर्व ३९मकरन्द ४०त्रिभङ्गयः। ४१रतितालो ४२वसन्तश्च ४३जगझम्पो ४४ऽथ मारुतिः। ४५ कविशेखर ४६घोषौ च ४७हरवल्लभ४८भैरवौ४९। गतप्रत्यागतो ५०मल्लतालो ५१भैरवमस्तकः ५२। सरस्वतीकण्ठाभरणः ५३क्रीड़ा ५४निःसारुरेव च।५५मुक्तावली ५६रङ्गराज५७भरतानन्दा५८ऽऽदितालकाः५९। सम्पकेष्टक६० इत्यादि ताला भरत संमताः। संक्षेपतो निगदिता अथैषां लक्षणं तथा। अर्द्धमात्रं द्रुतं ज्ञेयमेकमात्रं लघु स्मृतम्। द्विमात्रन्तु गुरु ज्ञेयं त्रिमात्रन्तु प्लुतं मतम्। ताले चर्च्चत्पुटे ज्ञेयं गुरु द्वन्द्वं लघुः प्लुतः १। गुरुर्लघुः प्लुतश्चैव भवेच्चारुपुटाभिधे २। गलागलगलाश्चैव षट्पिता पुत्रके मताः३। उद्घट्टके तु गमनाः४ सन्निपाते गुरुर्मतः५। चतुर्विधः परिज्ञेयस्तालः कङ्कणनामकः ६। पूर्णः खण्डः समश्चैव विषमश्चैव कथ्यते। लचतुष्कं गणौ पूर्णे खण्डे विन्दुद्वयं गुरुः। यगणस्तु समे ज्ञेयस्तगणो विषमे भवेत्। खचतुष्कं सयत्यन्तं गुरुर्विन्दुचतुष्टयम्। सयत्यन्तं लघुश्चैव तालोऽयं कोकिलारवः ७ लचतुष्कं सयत्यन्तं खत्रयं खत्रयं लघुः। लघुर्विन्दुद्वयञ्चेति राजकोलाहलाभिधे ८। खद्वयं द्वौ प्लुतौ यत्र रङ्गविद्याधरः स तु ९। लघूनि त्रीणि यत्र स्युर्गुरूणि त्रीणि यत्र वै। प्लुतद्वयञ्च यत्रास्ति स तालः स्याच्छचीप्रियः १०। खद्वयं गुरुलौ विन्दुर्गौ प्लुतौ गौ प्लुतौ पुनः। यत्र तालः स विज्ञेयः पार्वतीलोचनाभिधः११। राजचूड़ामणौ विन्दुर्लश्च विन्दुर्लगौ मतौ१२। रगणोनो गुरुश्चैव जयश्रीरिति कथ्यते १३। प्लुतौ लघुचतुष्कञ्च मौ नौ द्रुतयुगं लघुः। लचतुष्कं विनाशब्दं तालः स्याद्वादकाकलः १४। द्रुतद्वयं यकारश्च कन्दर्पेऽपि प्रकीर्त्तितः१५। चत्वारो गुरवो यत्र चत्वारः प्लुतका अपि। लघ्वक्षराणि चत्वारि तालोऽयं नलकू

चरः १६। विन्दुद्वयं गुरुश्चैव भवेद्यत्र स दर्पणः १७। रतिलीले विधातव्यं लघुद्वन्द्वं गुरुद्वयम् १८। आदौ षोड़श गुरवो द्वात्रिंशल्लघवस्ततः। चतुःषष्टिर्द्रुता यत्र सोऽयं मोक्षपतिर्मतः १९। श्रीरङ्गसंज्ञके ताले सगणाल्लः प्लुतौ मतौ २०। सिंहविक्रमताले तु भगणो नखगाः खगौ २१। प्लुतो नश्च प्लुतश्चैव ताले दीपकनामनि २२ ताले स्यान्मल्लिकामोदे लद्वयं खचतुष्टयम् २३। लचतुष्कं विरामान्तं गजलीले प्रकीर्त्तितम् २४। अष्टकत्वस्तु चर्च्चर्यां विरामान्तौ द्रुतौ लघुः २५। द्रुतद्वन्द्वं भवेत्ताले कुहक्काख्ये लघुद्वयम् २६। भवेच्च विजयानन्दे लत्रयञ्च लघुत्रयम् २७। वीरविक्रमताले तु द्रुतौ लगौ ततः प्लुतः २८। टेङ्किका रगणेन स्यादेकेनैव कृतास्पदे २९। भगणो गप्लुतौ स्यातां रङ्गाभरणनामके ३०। श्रीकीर्त्तिसंज्ञके ताले गुरुद्वन्द्वं लघुद्वयम् ३१। चतुर्द्रुता लघू द्वौ तु द्रुतो गो वनमालिनि ३२। चतुर्मुखाभिधे ताले यगणानन्तरं प्लुतः। ३३। भश्च प्लुतो लगौ विन्दुद्वयं गौ नः प्लुतस्तथा। लघुः प्लुतो द्रुतश्चैको लघुद्वयमथापि च। निःशब्दं लचतुष्कञ्च ताले स्यात् सिंहनन्दने ३४। गो लघुर्गौ लघुः प्लुतस्ताले नन्दीश्वरे मतः ३५। गो द्रुतौ नौ प्लुतद्वन्द्वं चन्द्रविम्बे प्रकीर्त्तितम् ३६। द्रुतद्वन्द्वं लघुश्चैकस्ताले स्यात्तु द्वितीयके ३७। सकारश्च यकारश्च जयमङ्गलनामनि ३८। चत्वारो गुरवो विन्दवश्चत्वारश्च प्लुता अपि। विन्दवो दश षट् लाश्च ताले गान्धर्वसंज्ञके ३९। मकरन्दे द्रुतद्वन्द्वं लघुद्वन्द्वमथो गुरुः ४०। गुरुर्लघुः प्लुतश्चैव त्रिभङ्गिः परिकीर्त्तिता ४१। गुरुद्वयं लघुद्वन्द्वं रतिताले प्रकीर्त्तितम् ४२। वसन्तताले कर्त्तव्यो नगणो मगणस्तथा ४३। जगझम्पे गुरुश्चैको विरामान्तश्च खद्वयम् ४४। गप्लुतौ लौ द्रुतौ लश्च प्लुतो मारुतिनामनि ४५। कविशेखरे प्लुतः शून्यं नगौ लश्च ततो लघुः ४६। खचतुष्कं विना शब्दं यत्र घोषः स उच्यते ४७। हरवल्लभताले च प्लुतो लो गौ च खद्वयम् ४८। भगणः प्लुतौ गणौ गयौ प्लुतौ लघुश्च भैरवे ४९। गतप्रत्यागते ताले लो मौ गौ नौ प्रकीर्त्तितौ ५०। चतुर्लघु मल्लताले विरामान्तं द्रुतद्वयम् ५१। लगौ गौ मो नगौ गश्च खद्वयं लद्वयं पुनः। नचतुष्कं विना शब्दं ताले भैरवमस्तके ५२। सरस्वतीकण्ठाभरणे गौ लघुश्च द्रुतद्वयम् ५३। एक एव प्लुतो यत्र क्रीड़ातालः स उच्यते ५४। द्रुतद्वयं विरामान्तं ताले निःसारके मतम् ५५। खत्रयं सविरामान्तं नौ पुनः खत्रयन्तथा। प्लुतौ गः खयुगं गश्च यत्र मुक्तावली तु सा ५६। लगौ विन्दुयुगं गौ लौ रङ्गराजे प्रकीर्त्तितः ५७। खद्वयं सविरामान्तं गुरुः प्लुतद्वयं लघुः। यत्र ताले स विज्ञेयो भरतानन्दसंज्ञकः ५८। आदिताले लघुश्चैक इत्याह भरतो मुनिः ५९। भगणश्च प्लुताद्यन्तःसंपकेष्टकतालके ६०। एकाधिकशते ताले षष्टिसंख्यतमा इमे"।

अथ प्लुतादिमात्राभेदेन तालघातनम्। "ताले निष्णातहस्तः प्लुतमनुघटयेद्घातमेकं सशब्दं तत्पश्चात् द्वौ च घातौ निनदविरहितौ दर्शयेदूर्द्ध्वतोऽधः। शून्यत्वात् पक्वतालाविति जगति पुनः ख्यातसंज्ञौ सनन्दा विल्वं घातत्रयं तत् त्रिफलतनुवहिर्वर्ज्जयेद्दुर्लकारम। एको घातः सशब्दो द्विकल इह गुरौ शब्दहीनस्तथान्यः सोऽप्यूर्द्ध्वं याति लीलावलयवलयितोत्तानहस्ताङ्गुलीभिः। किञ्चोच्चैकैकमात्रा समुदयिनि लघौ घात एको निनादी घात्यो मात्रार्द्धभाजि द्रुतवपुषि लघोरर्द्धनादेन घातः"। संगी० दा० ३स्तवकः।

"आदावष्टस्तथा रुद्रो ब्रह्म इन्द्रश्चतुर्दश। दशावतारवन्धादिन्त्यनाट्यं ततः परम्।"

अथाष्टतालभेदाः। "आडः१ दोजः२ ज्योतिः३ चन्द्रशेखर४ गञ्जनं५ पञ्चतालः६ रूपकं७ समतालः८।"

तत्र रुद्रतालस्य भेदाः। वीरविक्रमः१। विषमसमुद्रः२ धरणं३ वीरदशकः४ मण्डूकः५ कन्दर्पः६ डाँशपाहिड़ः७ ध्रुवचरणं८ दशकोषी९ गजेन्द्रगुरुः१० कुटका११।"

अथ ब्रह्मतालभेदाः "ब्रह्मा१ विरामब्रह्मा२ षट्कला३ सप्तमात्रा४"

अथेन्द्रतालभेदाः। "देवसारः१ देवचाली२ मदनदोला३ गुरुगन्धर्वः४ पञ्चाली५ इन्द्रभाषः६।"

अथ चतुर्दशतालभेदाः। "पिङ्गतालः१ चन्द्रमात्रा२ देवमाला३ अर्द्धज्योतिः४ स्वर्गसारः५ क्षमाष्टः६ धराधारा७ वसन्तवाक८ काककला९ कीरशब्दा१० तारावली११ हर्षधारिका१२ भाषा१३ अर्द्धमात्रा१४।"

क्रमेणैषां लक्षणादि तत्रापि अष्टतालभेदस्य लक्षणानि यथा "एकतालस्ततः शून्यं युगलं तालिका परे। सङ्गीते प्रथमः सार आड़तालः प्रकीर्त्तितः१। एकतालश्च शून्यञ्च क्रमेणापि त्रिधा भवेत्। शेषशून्यं कलाभेदे दोजाख्यस्य भवेत् पृथक् २। प्रथमं युगलं तालं एक एकस्तथा परे। कलाभेदे गानमेवं ज्योतिश्च परिकीर्त्तितम् ३। चन्द्रसन्द्रस्तथा युग्मं तथा चन्द्रस्तथा परे। षट् तालानि भवन्त्येवं चन्द्रशेखर-

भाषितः ४। एकतालो भवेत् शेषः क्रमेणापि चतुष्टयम्। शेषशून्यं गञ्जनञ्च सर्वतो मुनिभाषितम्५। प्रथमं युगलञ्चैव तत्परं तालमेककम्। शेषे युग्मं तथा शून्यं पञ्चतालं प्रकीर्त्तितम् ६। युगलं प्रथमं तालं तत्परन्त्वेकशून्यकम्। शेषे च युगलं तालं रूपकं परिकीर्त्तितम्७। एकतालं तथा शून्यं क्रमेण द्विविधं भवेत्। शेषे युगलतालञ्च समतालं भवेत् परम् ८।"

रुद्रतालभेदलक्षणादि "एकतालं तथा शून्यं क्रमेण त्रिविधं भवेत्। तत्परं युगलं ताल इत्येव वीरविक्रमः१। युग्मतालं तथा शून्यं तत्परं हयतालकम्। शेषे च युगलं तालं समुद्रविषमं स्मृतम् २। युग्मतालञ्च शून्यञ्च एकतालञ्च तत्परे। शेषैकत्र त्रिशून्यञ्च विषमं धरणं भवेत् ३। एकतालं तथा शून्यं क्रमेणापि त्रिधा भवेत्। युगलं युगलं पश्चात् स वीरदशकः स्मृतः ४। प्रथममेकतालञ्च तत्परं शून्यमेककम्। शेषैकत्र त्रितालञ्च मण्डूकस्य गतिर्यथा ५। समतालं यथा दृष्टं तथा कन्दर्पसंज्ञितम्। समताले भवेत् शून्यं कन्दर्पे नास्ति, तत्पुनः ६। पञ्चतालात् परं शून्यं डँशपाहिड़सुत्तमम्। चत्यूर्द्धञ्च भवेत् त्रस्तं संग्रामस्य यथा गतिः ७। एकतालं तथा शून्यं क्रमेणापि द्विधा भवेत्। शेषैकत्र त्रितालञ्च प्रभुचरणभाषितम् ८। एकतालं एकशून्यमित्येवञ्च भवेत् क्रमात्। विरामे एकतालञ्च रागभेदे दशकोषिका ९। युगलं युगलं पश्चात् तदन्तेप्येकतालकम्। शेषे च युग्मं शून्यञ्च गजेन्द्रगुरुभाषितम् १० युग्मशून्यं विरामे च एकतालं भवेत् क्रमे। कुटकाख्यानकं धीरं सङ्गीतपरिनिष्ठितम्११।"

ब्रह्मतालभेदलक्षणानि। "युगञ्च त्रस्तं प्रथमैकतालं किञ्चिद्विरामे पुनरेकतालम्। ब्रह्माख्यतालञ्च सुगीतमध्ये यथा कपोती हि करोति शब्दम् १। युग्मतालं भवेद्त्रस्तं एकतालञ्च तत्परे। शेषे द्वितीयशून्ये च विरामब्रह्मतालकम् २। प्रथमञ्चैकतालञ्च युग्मशून्यं तथा परे। शेषैकत्र त्रितालेति षट्कला खलु कथ्यते ३। आदौ युग्मं तथा युग्मं त्रितालञ्च तथा परे। सप्तमात्रा भवत्येषा ब्रह्मतालान्तरे शुभे४।"

इन्द्रतालभेदलक्षणानि "सविरामं त्रितालञ्च एकशून्यन्तथापरे। शेषे त्रस्तं त्रितालञ्च देवसार इतीर्य्यते१। द्वितीयशून्यं विरामे भवति ततश्च त्रितालानि। शेषेण द्विशून्यमित्येवं देवचाली २। प्रथममेव युग्मतालं तत्पश्चादेकशून्यविरामे। शेषे त्रितयतालं भवतीति मदनदोलेति। युग्मतालं समारभ्य पञ्चतालं भवेत्तथा। अन्यूर्द्धञ्च तथा त्रस्तं गुरु गन्धर्व ईरितः ४। श्रावणस्य यथा धारा तथा तालो भवेद्धनः। पञ्चतालान्तराणीति पञ्चालीति प्रकीर्त्तिता ५ सविरामं चतुस्तालं त्रितालं शून्यमन्ततः। मेघारम्भे यथा केका रुवन्ते इन्द्रभाषितः ६।"

चतुर्दशतालभेदलक्षणानि "एकतालञ्च शून्यञ्च क्रमेण त्रितयं ततः। शेषे चतुष्टयं त्रस्तं चिह्नताल इतीर्य्यते१। एकचन्द्रस्तथा युग्मं तालं प्रत्येकतस्त्रयम्। शेषे त्रीणि च शून्यानि चन्द्रमाला भवेत्परा २। प्रथमं षट्कतालञ्च चत्यूर्द्धन्तु भवेत् क्रमात्। शेषे युग्मं तथा शून्यं देवमाला च सोच्यते३। चन्द्रशून्यं त्रितालञ्च विरामेण क्रमेण तु। चत्यूर्द्धन्तु भवत्येषभङ्गज्योतिरिति स्थितिः ४। एकैकतालान्तरयुग्मतालात् शून्यत्रयं तत्परमेकतालम्। कलाभिदा शून्यभिदा समाख्या स स्वर्गसाराख्यनवीनतालः ५। युग्मशून्यं विरामेण देवतालमिति क्रमात्। धमाशाख्योऽन्तरे शून्यमिति सर्वत्र भाषितम् ६। नवाम्बुदे रासिनि शीघ्रयानं तथा सुसंवद्धसुतानमानम्। युग्मं सत्रस्तं क्रमतश्च तालं शेषे त्रितालञ्च धराधराख्या ७। एकतालञ्च शून्यञ्च क्रमेणापि चतुष्टयम्। क्रमात्तालत्रयञ्चैव वसन्तवागुदाहृता ८। सविरामं द्वयं तालं युग्मतालं तथा परे। शेषैकत्र त्रितालञ्च भवेत् काककलेति सा ९। त्रितालञ्च भवेद् त्रस्तं तत्परं त्वेकतालकम्। शेषेऽपि च त्रितालञ्चेत् कोरशब्दा प्रचक्षते१०। युग्मं युग्मं तथा युग्मं तालन्त्वेकं भवेत् क्रमात्। शेषे शून्यं कलाभेदे ताण्डवीति भवेत् पृथक् ११। सविरामं द्वयं तालं युग्मशून्यञ्च तत्परम्। शेषोर्द्धन्तु त्रितालञ्च हर्षधारा प्रकीर्त्तिता १२। चन्द्रशून्यं विरामेण द्वयं तालं भवेत् क्रमात्। चत्यूर्द्धन्तु भवेद् त्रस्तं भाषाख्यं तालसुसमम् १३। अत्यूर्द्धन्तु त्रितालञ्च द्वयं तालं विरामकम्। इत्यर्द्धमाला विज्ञेया सङ्गीता भुवि सर्वतः"१४ सङ्गीतदामोदरे ४स्तवकम्"।

तालस्येदम् उत्सा० अञ्। "पानसं द्राक्षमाधुकं खार्जूरं तालमैक्षवम्" प्रा० त्रि० पुलस्त्योक्ते ११ मद्यभेदे न०

तालक न० चु० तड–घञ् संज्ञायां क डस्य लः। हरिताले राजनि० २द्वारकपाटरोधनयन्त्रे (ताला) हेमच०। ३तुवरिकायां(अरहर)शब्दर०। स्वार्थे क। ४ताले इत्यादौ

ताल(लि)कट पु० देशभेदे स च देशः वृ० स० १४ अ० कूर्म्मविभागे दक्षिणस्यामुक्तः। अथ दक्षिणेनेत्युपक्रमे "कालाजिनसौरिकीर्णताल(लि)कटाः"।

तालकन्द न० तालस्येव कन्दमस्य। तालमूल्याम् "कसेरु कोविदारश्च तालकन्दं तथामिषम्" प्रा० त० वायुपु०। "तालकन्दं तालमूलीति प्रसिद्धम्" रघु०।

तालकाभ पु० तालकस्येवाभा यस्य। १हरितवर्णे हेम० २तद्वति त्रि०।

तालकी स्त्री तालकस्येयम् अण् ङीप्। तालजमद्यभेदे (ताड़ी)

तालकेतु पु० तालस्तालचिह्नितः केतुरस्य। भीष्मे। "तासां प्रमुखतो भीष्मस्तालकेतुर्व्यरोचत" भा० उ० १४९ अ०।

तालक्षीर पु० तालजातं क्षीरमिव शुभ्रत्वात्। (तालेर चिनि) शर्कराभेदे राजनि०। स्वार्थे क। तालक्षीरक। तत्रार्थे।

तालगर्भ पु० ६त०। (तालेर मेति) तालमज्जनि। "अथ पित्तसृगाश्वयस्तदुग्धैः करिहस्तच्छिदये सतालगर्भैः" वृ० स० ५० अ०।

तालङ्क पु० ताड़ङ्क+डस्य लः। ताड़ङ्के भूषणे शब्दार्थचि०।

तालचर पु० १देशभेदे २तद्देशवासिषु ३तन्नृपेषु ब० व०। "अन्ध्रास्तालचराश्चैव चुचुपा वेणुपास्तथा" भा० उ० १२९ अ०।

तालजङ्घ पु० ताल इव जङ्घा यत्र। १देशभेदे २तद्देशवासिषु ३तन्नृपेषु च ब०व०। "स हैहयान् समुत्साद्य तालजङ्घांश्च भारत!" भा० व० १०६ अ०। "हैहयानामुदावर्त्तो नीपानां जनमेजय!। बहुलस्तालजङ्घानां क्रथानामुद्धतो वसुः" भा० उ० ७२ अ०। "तालजङ्घं महाक्षत्रमौर्वेणैकेन नाशितम्" भा० अनु० १५२ अ०। ४ग्रहभेदे "निर्मांसास्तालजङ्घाश्च व्यादितास्याः भयङ्कराः" इत्युपक्रमे "एते ग्रहाश्च सततं रक्षन्तु मम सर्वतः" हरिवं० १६८ अ०। "कण्ठपृष्ठग्रीवाजङ्घञ्च" पा० अस्याद्युदात्तता। [तालप्रलम्बे शब्दार्थचि०।

तालजटा स्त्री तालस्य जटेव। तालवृक्षस्य जटाकारे पदार्थे

तालध्वज पु० तालः ध्वजोऽस्य। बलदेवे "सरस्वत्यास्तटे जातं नगं तालध्वजो बली" भा० श० ३८ अ०। "नातिदूरं ततो गत्वा नगं तालध्वजो बली" ५५ अ०। "अस्ति तालध्वजा नाम नगरी त्रिदशोपमेति" पद्मपु० क्रियायोगसारोक्ते २पुरीभेदे स्त्री।

तालनवमी स्त्री तालोपहारा नवमी शा० त०। भाद्रशुक्लनवम्यां "मासि भाद्रपदे या स्यान्नवमी बहुलेतरा। तस्यां संपूज्य वै दुर्गामश्वमेधफलं लभेत्"। संवत्सरकौ० धृतगरुड़पुराणवचनम् इयमेव तालनवमी ख्याता

तालपत्र न० तालस्य पत्रमिव। १कर्णभूषणभेदे ताड़ङ्के। अमरः। ६त०। २तालस्य पत्रे च। "क्वचित् विधवयेव उन्मुक्ततालपत्रया" काद०।

तालपत्रिका स्त्री तालस्य पत्रमिव पत्रमस्याः ङीप संज्ञायां कन् ह्रस्वः। तालमूलीवृक्षे राजनि०।

तालपत्री स्त्री तालस्य पत्रमिव पत्रमस्याः ङीप्। मूषिकपर्ण्याम् राजनि०। "अपामार्गोऽश्वगन्धा च तालपत्री सुवर्चला" सुश्रु०।

तालपर्णी न०स्त्री० ताल इव खड्गमुष्टिरिव पर्णमस्य। १मुरानामद्रव्ये शब्दच०। स्त्रीत्वपक्षे पाककर्णेति ङीप्। सा च २मधुरिकायां जटाधरः।

तालपुष्पक न० तालःखड्गमुष्टिरिव पुष्पमस्य कप्। १प्रपौण्डरीके शब्दर०। ६त०। २तालवृक्षकुसुमे च।

तालप्रलम्ब न० ताले वृक्षे प्रलम्बते प्र+लम्ब–अच्। तालवृक्षस्य जटायाम् राजनि०। तथा "तालप्रलम्बश्च भङ्गक्षतरुजापहम्" राजनि०। [बलदेवे त्रिका०।

तालभृत् पु० तालं ध्वजरूपेण बिभर्त्ति भृ–क्विप् ६त०।

तालमर्द्दल पु० तालस्य तालार्थं मर्द्दल इव। १वाद्यभेदे हारा०

तालमूली स्त्री० तालस्य मूलमिव मूलमस्याः ङीप्। मुषल्याम्। स्वार्थे क। तालमूलिका २दीर्घकन्दायायाम्। मुसल्याम्। "तालमूली तु विद्वद्भिर्मुषलीति निगद्यते। मुसली मधुरा वृष्या वीर्योष्णा वृंहणी गुरुः। तिक्ता रसायनी हन्ति गुदजान्यनिलं तथा" "क्रौञ्चोद्दरासभास्थीनि श्वदंष्ट्रातालमूलिका। अजमोदा कदम्बस्य मूलं नागरमेव च" सुश्रु०।

तालयन्त्र न० सुश्रुतोक्ते शल्योद्धारणार्थे यन्त्रभेदे। "तालयन्त्रे द्वादशाङ्गुले मत्स्यतालवदेकतालद्वितालके कर्णनासानाड़ीशल्यानामाहरणार्थम्" सुश्रु०।

तालरेचनक पु० तालेन रेचयति चु० रिच–ल्यु स्वार्थे क। नटे शब्दर०। तालवेचनकेति तत्र पाठान्तरम् तत्रार्थे।

ताललक्षण पु० तालो लक्षणं ध्वजोऽस्य। बलरामे हेमच०

तालवन न० ६त०। वृन्दावनस्थे तालप्रचुरे वनभेदे "गोवर्द्धनस्योत्तरतो यमुनातीरमाश्रितम्। ददृशाते ततो वीरौ रम्यं तालवनं महत्" हरिवं० ७०अ०। २तालानां वने च। "सुखण्डतालवनानीव स चकार रथव्रजान्" भा० भी० ११७ अ०।

तालवृन्त न० ताले करतले वृन्तं बन्धनमस्य, तालस्येव वृन्त-

मस्य वा । व्यजने हेमच०(पाखा) "तालवृन्तेन किं कार्य्यं लब्धे मलयमारुते" उद्भटः । अस्य वायोर्गुणा यथा । "त्रिदोषशमनो वायुर्लघुरः प्रकीर्त्तितः" भावप्र० "तालवृन्तभवो वायुस्त्रिदोषजयनो लघुः" राजनि० । "न याति वायुस्तत्पार्श्वे तालवृन्तानिलाधिकम्" कुमा० । स्वार्थे क वा० वा०कप् वा । तालवृन्तक तत्रार्थे अमरः ।

तालव्य त्रि० तालुनि भवः देहावयवत्वात् यत् । तालूच्चार्य्येषु "इचुयशानां तालु" इत्युक्तेषु वर्णभेदेषु ।

तालाकट पु० दक्षिणस्थे देशभेदे । तालाकटस्य राजा अण् सोऽभिजनोऽस्य वाऽण् । २तद्देशवासिजने ३तस्य नृपे च बहुषु अणो लुक् । "ततः शूर्पारकं चैव तालाकटमथापि वा । वशेचक्रे महातेजा दण्डकांश्च महाबलम्" भा० स० ३० । सहदेवदक्षिणदिग्विजये । अयमेव देशः तालकटत्वेन वृ०स० १४ अ० उक्तः तालकटशब्दे दृश्यः ।

तालाख्या स्त्री तालं तत्पत्रमिवाख्यायते आ+ख्या घञर्थे कर्म्मणि क । मुरानामगन्धद्रव्ये शब्दच० । [अमरः ।

तालाङ्क पु० तालस्तालचिह्नितः अङ्कः ध्वजोऽस्य । बलदेवे ।

तालादि पु० "तालादिभ्योऽण् वा" पा० विकारार्थे अण्प्रत्ययनिमित्ते शब्दसमूहे । स च गणः पा०गणसू०उक्तो यथा (तालाद्धनुषि) बार्हिण इन्द्रालिश इन्द्रादृश इन्द्रायुध चय, श्यामाक पीयूक्षा" । तालं धनुः पक्षे अञ्मयटौ । तालं तालमयं वा मद्यम् ।

तालावचर पु०तालेनावचरति अव+चर—अच् । नटे त्रिका० ।

तालि स्त्री तल—प्रतिष्ठायां णिच्—इन् । भूम्यामलक्यां वा ङीप् । तत्रार्थे (ताड़ियात्) २ख्याते वृक्षे भरतः । "वर्म्मभिः पवनोद्धूतराजतालीवनध्वनिः" रघुः ।

तालिक पु० तालेन करतलेन निर्वृत्तः ठक् । चपेटे (चापड़) (हाततालि) । ताली+स्वार्थे क । २तालमूल्याम् स्त्री हेमच० । ३लिखितस्य निबन्धने च शब्दर० । ४चपेटे स्त्री शब्दर० । ५ताम्रवल्ल्यां स्त्री राजनि० । "स्वैरं हसन्त्यदा विधाय तालिकाम्" काशी० ५ अ० । "उद्घाटनीयः करतालिकानां दानादिदानीं भवतीभिरेषः" नैषधम् । [भाण्डे ३गुणे च उज्जयपालः ।

तालित न० चुरा० तड़—क्त डस्य लः । १तुलितपटे २वाद्य-

तालिन् पु० ब० व० । तलेनर्षिणा प्रोक्तमधीयते शौनका० णिनि । तलोक्ताध्येतृषु । ताली वाद्यत्वेनास्त्यस्य इनि । २हस्तताले त्रि० ३शिवे पु० "वैणवी पणवी ताली खली कालकटः कटः" भा० अनु० १७ । शिवनामोक्तौ ।

तालिश न० चु० तल—श न णित्त्वम् । पर्वते उणादिको० ।

ताली स्त्री तालेन तन्निर्यासेन निर्वृत्ता अण् । (ताड़ी) १तालजातसुरायाम् । तल—ण्यन्तात् अच् गौरा०ङीष् । (ताड़ियात्) २वृक्षभेदे, अमरः । ३तालमूल्याम्, (भूइआमला) ४वृक्षभेदे राजनि० । ५आढ़कक्याम्, (अहर) शब्दरत्ना० । ६तालीशपत्राख्ये वृक्षे, रत्नमाला । ७तालकोद्घाटनयन्त्रे (काटि) कुञ्चिकायाञ्च । हेमच० । ८ताम्रवल्ल्यां ९त्र्यक्षरपादके छन्दोभेदे यथा "ताली सा निर्दिष्टा । उद्दिष्टो मो यत्र" यथा "ज्ञानी ते जानीते । सारूप्यं वैरूप्यम्" छन्दोमञ्जर्याम् । अस्य नारीत्यपि संज्ञोक्ता ।

तालीपत्र न० ताल्या इव पत्रमस्य । तालीशपत्रे राजनि० ।

तालीश न० तालीव रोगान् श्यति शो—ड । स्वनामख्याते वृक्षे राजनि० "तालीशं लघु तिक्तोष्णं श्वासकासकफानिलान् । निहन्त्यरुचिगुल्मामवह्निमान्द्यक्षयामयान्" भावप्र० २भूम्यामलक्यां मेदि० ।

तालीशपत्र न०तालीशं रोगनाशकं पत्रं यस्य । १स्वनामख्याते वृक्षे, २भूम्यामलक्याञ्च राजनि० ।

तालीशाद्यमोदक पु०चक्रदत्तोक्ते मोदकभेदे यथा "तालीशपत्रं मरिचं नागरं पिप्पली शुभा । यथोक्तसंभागवृद्धा त्वगेले चार्द्धभागिके । पिप्पल्यष्टगुणा चात्र प्रदेया सितशर्करा । श्वासकासारुचिहरं तर्पणं दीपनं परम् । हृत्पाण्डुग्रहणीरोगप्लीहशोषज्वरापहम् । छर्द्यतीसारकासघ्नं मूढ़वातानुलोमनम् । कल्पयेद् गुड़िकां चैतच्चूर्णं पक्वा सितोपलाम् । गुड़िका ह्यग्निसंयोगाच्चूर्णाल्लघुतरा स्मृता । पैत्तिके चाहयन्त्येके शुभाय वंशलोचनम्" ।

तालु न० तरन्त्यनेन वर्णाः तॄ—ञुण् रस्य लः । जिह्वेन्द्रियाधिष्ठाने (तेलो) स्थानभेदे । "मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते । ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते" भाग० । "निर्भिन्ने तालु वरुणो लोकपालोऽविशद्धरेः । जिह्वयांशेन च रसान् ययासौ प्रतिपद्यते" भाग० ३।६।१४श्लो० । तालुनि चैकमस्थि तच्च कपालाकारं यथोक्तं सुश्रुते अस्थीनीत्युपक्रमे "एतानि पञ्चविधानि भवन्ति । तद्यथा कपालरुचकतरुणवलयनलकसंज्ञानि । तेषां जानुनितम्बांसगण्डतालुशङ्खशिरस्सु कपालानि" अस्थिसंख्याभेदोक्तौ च तत्रैव । तालुनि चैकमित्युक्तम् । "तृषा महत्या परिशुष्कतालवः" ऋतुसं० । स्वार्थे यावा०कन् । तालुकमप्यत्र अमरः ।

तालुक्ष्य पुंस्त्री० तलुक्षस्य गोत्रापत्यं गर्गा० यञ्। तलुक्षस्यापत्ये स्त्रियां लोहि० ष्फ षित्त्वात् ङीष्। तालुक्षायणी।

तालुजिह्व पुंस्त्री तालु एव जिह्वा यस्य। १कुम्भीरे हेम०। तस्य जिह्वाशून्यत्वेऽपि तालुनैव रसास्वादनात्तथात्वम्। स्त्रियां टाप्।

तालुपाक पु० सुश्रुतोक्ते तालुगते रोगभेदे।

तालुगतास्तु गलशुण्डिका तुण्डिकेर्य्यध्रुषो मांसकच्छपोऽर्बुदं मांससङ्घातस्तालुपुप्पुटस्तालुशोषस्तालुपाक इति। "श्लेष्मासृग्भ्यां तालुमूलात्प्रवृद्धो दीर्घः शोफो ध्मातवस्तिप्रकाशः। तृष्णाकासश्वासकृत् सम्प्रदिष्टो व्याधिर्वैद्यैः कण्ठशुण्डीति नाम्ना। शोफः स्थूलस्तोददाहप्रपाकी प्रागुक्ताभ्यां तुण्डिकेरी मता तु। शोफः स्तब्धो लोहितस्तालुदेशे रक्ताज्ज्ञेयः सोऽध्रुषो रुग्ज्वराढ्यः। कूर्म्मोत्सन्नोऽवेदनोऽशीघ्रजन्मा रक्तो ज्ञेयः कच्छपः श्लेष्मणा स्यात्। पद्माकारं तालुमध्ये तु शोफं विद्याद्रक्तादर्बुदं प्रोक्तलिङ्गम्। दुष्टं मांसं श्लेष्मणा नीरुजञ्च ताल्वन्तस्थ मांससङ्घातमाहुः। नीरुक् स्थायी कोलमात्रः कफात्स्यान्मेदोयुक्तात्पुप्पुटस्तालुदेशे। शोषोऽत्यर्थं दीर्य्यते चापि तालु श्वासो वातात्तालुशोषः स पित्तात्। पित्तं कुर्य्यात्पाकमत्यर्थघोरं तालुन्येनं तालुपाकं वदन्ति" तेषां लक्षणान्युक्तानि।

तालुपुप्पुट पु० सुश्रुतोक्ते तालुगतरोगभेदे तालुपाकशब्दे दृश्यम्।

तालुशोष पु० सुश्रुतोक्ते तालुरोगभेदे तालुपाकशब्दे दृश्यम्।

तालूर पु० चु० तल—बा० ऊर। आवर्त्ते हेमच०।

तालूषक न० तल—बा० ऊषक। तालुनि। "अक्षतालूषके शोणीफलके च विनिर्दिशेत्" याज्ञ० "तालूषकं ककुदम्" मिता०।

तावक त्रि० तवेदम् युष्मद्+अण् एकवचने तवकादेशः। त्वत्सम्बन्धिनि स्त्रियां ङीप्। "स्तुगं तत्ते तावकेभ्यो रथेभ्यः" ऋ० १।९४।११। "तपः क्व वत्से! क्व च तावकं वपुः" कुमा०।

तावकीन त्रि० तवेदम् युष्मद्+खञ् एकवचने तवकादेशः। त्वत्सम्बन्धिनि।

तावच्छस् अव्य० तावत्+संख्यासंज्ञत्वात् वीप्सार्थे+शस्। तावत्तावत्प्रकारे "यावच्छो वै रसः स्थितस्य त्वष्टा रूपाणि विकरोति तावच्छो वै तत्प्रजायते" तै० स०।

तावत् अव्य० तद्+बा० डावत्। १साकल्ये २अवधौ ३माने ४अवधारणे अमरः ५प्रशंसायाम् ६पक्षान्तरे शब्दरत्ना० ७संग्रामे ८अधिकारे च मेदि०। ९तदेत्यर्थे शब्दार्थचि०। "भर्त्तापि तावत् क्रथकैशिकानाम्" रघुः तावत् तदेत्यर्थः। साकल्ये "तावत्प्रकीर्णाभिनवोपचारम्" अवधौ "बलं न सम्भावित एव तावत्" रघुः "तावत् आलोकमार्गप्राप्तिपर्य्यन्तम्" मल्लि०। मानार्थे "त्वमेव तावत् परिचिन्तय स्वयम्" कुमा० तावत् इति मानार्थे "यावन्मात्रं विचारणीयं तावन्मात्रमित्यर्थः" मल्लि०। अवधारणे "इन्द्रप्रस्थगमस्तावत् कारि मा सन्तु चेदयः" माघः। "मा कारि तावत् न क्रियतामेवेत्यर्थः" मल्लि०। तत्परिमाणमस्य तद्+वतुप् "आ सर्वनाम्नः" पा०। आ। १०तत्परिमाणविशिष्टे त्रि०। "यावानर्थ उदपाने सर्वतः संप्लुतोदके। तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः" गीता "जम्बुद्वीपोऽयं तावत्प्रमाणविस्तारस्तावता क्षीरोदधिना वेष्टितः" भाग० ५।२०।२। क्रियाविशेषणत्वे न०। "पुरोऽस्य यावन्न भुवि व्यलीयत। गिरेस्तडित्वानिव तावदुच्चकैः" माघः। स्त्रियां ङीप् "यावती संभवेद्वृत्तिस्तावती दातुमर्हति" मनुः। अस्य वत्वन्तत्वात् संख्यावत् कार्य्यं तावच्छः तावत्कः तावतिकः।

तावतिक त्रि० तावता क्रीतः संख्यात्वात् कन् "वतोरिड् वा" पा० वा इट्। तत्परिमाणवता क्रीते। पक्षे इडभावे तावत्क तत्रार्थे।

तावतिथ त्रि० तावतां पूरणः डट्। "वतोरिथुक्" पा० इथुक्। तावतां पूरणे। "यावत् सामिधेनि वेदेदमहं तावतिथेन वज्रेणेति" कात्या० श्रौ० २।१।९।

ताविष पु० "तवेर्णिद्वा" उणा० टिषच्। स्वर्गादौ तविषशब्दार्थे तविषशब्दे दृश्यम्।

तावुरि पु० वृषराशौ कौर्पशब्दे २२७८ पृ० दृश्यम्।

तासुन पु० तस—बा० उनन्। शणवृक्षे। तस्येदम् अण्। तासुन तत्सम्बन्धिनि स्त्रियां ङीप्। "मुञ्जकाशतासुन्यो रसनाः" ज्यो० त० गोभिलः। "मुञ्जः शरः तासुनः शणस्तज्जा रसना मेखला तासुनी"।

ति अव्य० इति+वेदे पृषो०। इतिशब्दार्थे। "स होवाचास्तीह प्रायश्चित्तिरित्यस्तीति का ति पिता ते वेदेति" शत० ब्रा० ११।६।१।१। का प्रायश्चित्तिरस्ति इति प्रश्नः।

तिक गतौ भ्वा० आत्म० सक० सेट्। तेकते अतेकिष्ट ऋदित् णिच् अतितेकत् त। तितेके।

तिक आस्कन्दे वधे च भ्वा० पर० सक० सेट्। तिक्नोति अतेकीत्। तितेक।

तिक पु० तिक–क। ऋषिभेदे। तस्य गोत्रापत्यम् तिका० फिञ्। तैकायनि तद्गोत्रापत्ये पुंस्त्री०। तस्य तिककितवादित्वात् द्वन्द्वे गोत्रप्रत्ययस्य लुक् बहुत्वार्थे। तिककितवाः तिककितवयोर्गोत्रापत्येषु। उत्कर्षा० चतुरर्थ्यां छ। तिकीय तत्सन्निकृष्टदेशादौ त्रि०।

तिककितवादि पु० "तिककितवादिभ्यो द्वन्द्वे" पा० उक्ते द्वन्द्वे बहुत्वे गोत्रप्रत्ययलुग्निमित्ते शब्दगणे। स च गणः पा०गणसू०उक्तो यथा "तिककितवा वङ्खरभण्डीरथाः। उपकलमकाः। पफकनरकाः बकनखगुदपरिणद्धाः उब्जककुभाः लङ्कशान्तमुखाः उत्तरशलङ्कटा कृष्णाजिनकृष्णसुन्दराः भ्राष्टककपिष्टलाः अग्निवेशदशेरुकाः"।

तिकादि पु० गोत्रे फिञ् प्रत्ययनिमित्ते शब्दसमूहे स च गणः पा०ग०सू०उक्तो यथा "तिक, कित, संज्ञा, बाला, शिखा, उरस्, शाट्य, सैन्धव, यमुना, रूप्य, ग्राम्य, नील, अमित्र, गौकक्ष्य, कुरु, देवरथ, तैतल, औरस, कौरव्य, भौरिकि, भौलिकि, चौपयत, चैटयत, शीकयत, चैतयत, पाजवत, चन्द्रमस्, शुभ, गङ्गा, वरेण्य, सुयामन्, आरद्ध, वह्यका, खल्यका, वृष, लोमक, उदन्य, यज्ञ"। "तिकादिभ्यः फिञ्" पा०उक्ते "तिक इत्येवमादिभ्योऽपत्येऽर्थे फिञ् स्यात् तैकायनिः कैतवायनिः।

तिक्त पु० तेजयति तिज–वा० कर्त्तरि क्त। रसभेदे (तेत) अमरः। २पर्पटकौषधौ न० हेमच०। ३सुगन्धे मेदि०। ४कुटजवृक्षे पु० शब्दच०। ५वरुणवृक्षे शब्दमाला। एतेषां तिक्तरसाधिक्यात्तथात्वम्। ६तिक्तरसयुक्ते अमरः। "षड्विधस्तु रसस्तत्र" भाषोक्तेर्यद्यपि तिक्तस्य पार्थिवगुणत्वं तथापि वायोरुपष्टम्भवशादेव पार्थिवे तिक्तरसस्य सम्भवः तदेतत् सुश्रुते न्यहाप यथा "आकाशपवनदहनतोयभूमिषु यथासङ्ख्यमेकोत्तरपरिवृद्धाः शब्दस्पर्शरूपरसगन्धाः तस्मादाप्यो रसः परस्परसंसर्गात्परस्परानुग्रहात् परस्परानुप्रवेशाच्च सर्वेषु सर्वेषां सान्निध्यमस्त्युत्कर्षापकर्षौ तु ग्रहणम्। स खल्वाप्यो रसः शेषभूतसंसर्गाद्विदग्धः षोढा विभज्यते। तद्यथा। मधुरोऽम्लो लवणः कटुकस्तिक्तः कषाय इति। ते च भूयः परस्परसंसर्गात्त्रिषष्टिधा भिद्यन्ते। तत्र भूम्यम्बुगुणबाहुल्यान्मधुरः। भूम्यग्निगुणबाहुल्यादम्लः। तोयाग्निगुणबाहुल्याल्लवणः। वाय्वग्निगुणबाहुल्यात्कटुकः वाय्वाकाशगुणबाहुल्यात्तिक्तः। पृथिव्यनिलगुणबाहुल्यात्कषाय इति। तत्र मधुराम्ललवणा वातघ्नाः। मधुरतिक्तकषायाः पित्तघ्नाः। कटुतिक्तकषायाः श्लेष्मघ्नाः। तत्र वायुरात्मनैवात्मा पित्तमाग्नेयं श्लेष्मा सौम्य इति त एव रसाः स्वयोनिवर्द्धना अन्ययोनिप्रशमनाश्च। केचिदाहुरग्नीषोमीयत्वाज्जगतो रसा द्विविधाः सौम्या आग्नेयाश्च तत्र मधुरतिक्तकषायाः सौम्याः। कट्वम्ललवणा आग्नेयाः। मधुराम्ललवणाः स्निग्धा गुरवश्च। कटुतिक्तकषाया रूक्षा लघवश्च। सौम्याः शीता आग्नेयाश्चोष्णाः"।

"सूक्ष्मरूक्षखरशिशिरलघुविशदं स्पर्शबहुलमीषत्तिक्तं विशेषतः कषायमिति वायवीयं तद्वैशद्यलाघवग्लपनविरूक्षणविचारणकरमिति"।

तिक्तरसलक्षणं तत्रोक्तं यथा ""यो गले चोषमुत्पादयति मुखवैशद्यं जनयति भक्तरुचिं चापादयति हर्षञ्च स तिक्तः। ''तिक्तः शीतस्तृषामूर्च्छाज्वरपित्तकफान् जयेत्। रुच्यः स्वयमरोचिष्णुः कण्ठस्तन्याशयशोधनः। वातलोऽग्निकरो नासाशोषणो रूक्षणो लघुः"। रुच्यः अन्येषु वस्तुषु रुचिमुत्पादयति। स्वयमरोचिष्णुः यथा निम्बः स्वयन्न रोचते। अन्येषु रुचिं करोति (अतियुक्तस्य तिक्तस्य गुणाः) सोऽतियुक्तः शिरः शूलमन्यास्तम्भभ्रमार्त्तिकृत्। कम्पमूर्च्छातृषाकारी बलशुक्रक्षयप्रदः" भावप्र० "तिक्तः पित्तकफच्छेदी विषकुष्ठज्वरापहः। दीपनः पाचनो रुच्यः कण्डुकृमिहरो लघुः" आह्निकत०। "पित्तेन दूने रसने सितापि तिक्तायते हंसकुलावतंस!" नैष०। सुगन्धे। "नादातुमन्यकरिमुक्तमदाम्बुतिक्तम्" रघुः तिक्तं सुरभि "कटुतिक्तकषायाश्च सौरभेऽपि प्रकीर्त्तिताः" केशवः मल्लि० "चूताङ्कुरस्वादकषायकण्ठः" मधुरकण्ठ इत्यर्थः। "तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टिः" मेघ०। "तिक्तैः सुगन्धिभिस्तिक्तारसवद्भिश्च" मल्लि०। "तोयक्रीडानिरतयुवतीस्नानतिक्तैर्मरुद्भिः" मेघ०।

तिक्तक पु० तिक्त+संज्ञायां कन्। १पटोले अमरः २चिरतिक्ते (चिराता) शब्दर०। ३कृष्णखदिरे शब्दमा०। ४इङ्गुदीवृक्षे भावप्र०। एतेषां तिक्तरसत्वात्तथात्वम् स्वार्थे क। तिक्तरसे पु० तद्वति त्रि० स्त्रियां कापि अत इत्त्वम् तिक्तिका

तिक्तकन्दिका स्त्री तिक्तः कन्दोऽस्याः कप् कापि अत इत्त्वम्। गन्धपत्रायां राजनि०। [शब्दार्थचि०।

तिक्तका स्त्री तिक्तेन रसेन कायति कै–क। कटुतुम्ब्यां

तिक्तगन्धिका स्त्री तिक्तो गन्धो लेशोऽपि यस्याः। वराह-

क्रान्तायाम् अमरः। तस्याः सर्वत्र तिक्तत्वात् तथात्वम्

तिक्तगुञ्जा स्त्री गुञ्जेव तिक्ता राजवल्ला॰। करञ्जे हारा॰

तिक्तघृत न॰ सुश्रुतोक्ते घृतभेदे तत्पाकविधिस्तत्रोक्तो यथा "त्रिफलापटोलपिचुमर्द्दाटरूषककटुरोहिणीदुरालभात्रायमाणापर्पटकाश्चैतेषां द्विपलिकान् भागान् जलद्रोणे प्रक्षिप्य पादावशेषं कषायमादाय कल्कपेष्याणीमानि भेषजान्यर्द्धपलिकानि त्रायमाणामुस्तेन्द्रयवचन्दनकिराततिक्तानि पिप्पल्यश्चैतानि घृतप्रस्थे समावाप्य विपचेदेतत्तिक्तकं नाम सर्पिः कुष्ठविषमज्वरगुल्मार्शोग्रहणीदोषशोफपाण्डुरोगविसर्पषाण्ढ्यशमनं चेति। "त्र्यहात् त्र्यहाच्चाप्यपतर्पणान्ते प्रातस्तयोस्तिक्तघृतं प्रशस्तम्" सुश्रु॰। तिक्तसर्पिरादयोऽप्यत्र न॰।

तिक्ततण्डुला स्त्री तिक्तस्तण्डुलोऽन्तःशस्यं यस्याः। पिप्पल्याम् राजनि॰।

तिक्ततुण्डी स्त्री कर्म॰। कटुतुम्बीलतायां राजनि॰।

तिक्ततुम्बी स्त्री कर्म्म॰। कटुतुम्ब्याम् (तितलाउ) रत्नमा॰।

तिक्तदुग्धा स्त्री तिक्तं दुग्धं निर्यासो यस्याः। १क्षीरिण्याम्, राजनि॰। २स्वर्णक्षीर्य्याम् जटा॰।

तिक्तधातु पु॰ कर्म्म॰। पित्ते धातौ राजनि॰।

तिक्तपत्र पु॰ तिक्तं पत्रमस्य। (काकरोल) १कर्कोटके। २तिक्तपत्रके वृक्षमात्रे त्रि॰ कर्म्म॰। ३तिक्ते पत्रे न॰।

तिक्तपर्वन् स्त्री तिक्तं पर्व ग्रन्थिर्यस्याः। १ग्रन्थिदूर्वायाम् जटा॰। २हिलमोच्यां ३गुडूच्यां ४यष्टिमधुलतायाञ्च मेदि॰।

तिक्तपुष्पा स्त्री तिक्तानि पुष्पाण्यस्याः। (आकनादी) १पाठायाम् राजनि॰। २तिक्तपुष्पके वृक्षमात्रे त्रि॰। कर्म्म॰। ३तिक्ते पुष्पे न॰।

तिक्तफल पु॰ तिक्तानि फलानि अस्य। १कतकवृक्षे (निर्मली) राजनि॰। २यवतिक्तायां शब्दार्थचि॰ ३तिक्तफलके वृक्षमात्रे त्रि॰। ४ वार्त्ताक्यां ५षड्भुजायाञ्च स्त्री टाप् राजनि॰। कर्म्म॰। ६तिक्ते फले न॰।

तिक्तभद्रक पु॰ भद्रं करोति णिच्–ण्वुल् तिक्तोऽपि भद्रकः कर्म्म॰। पटोले शब्दच॰।

तिक्तमरिच पु॰ तिक्तः मरिच इव। कतकवृक्षे राजनि॰।

तिक्तयवा स्त्री तिक्तः यव इन्द्रयवरसोऽस्त्यत्र अच्। शङ्खिन्यां पारस्करगृह्यम्।

तिक्तरोहिणी स्त्री तिक्ता सती रोहति रुह–णिनि कर्म॰। कटुकायाम् (कट्की) स्वार्थे क ह्रस्वः। तिक्तरोहिणिका तत्रार्थे राजनि॰।

तिक्तवल्ली स्त्री कर्म्म॰। १मूर्वालतायाम् रत्नमा॰। २तिक्ते लतामात्रे च।

तिक्तवीजा स्त्री तिक्तानि वीजानि यस्याः। १कटुतुम्ब्याम् राजनि॰। २तिक्तवीजके वृक्षमात्रे त्रि॰। कर्म्म॰। ३तिक्ते वीजे न॰।

तिक्तशाक पु॰ तिक्तः शाकोऽस्य। १वरुणद्रुमे, २खदिरवृक्षे ३पत्रसुन्दरवृक्षे च मेदि॰। कर्म्म॰। ४तिक्ते शाके न॰।

तिक्तसार पु॰ तिक्तः सारो निर्यासोऽस्य। १खदिरे रत्नमा॰। २दीर्घरोहिषतृणे न॰ रत्नमा॰। ३तिक्तसारके वृक्षमात्रे त्रि॰। कर्म्म॰। ४तिक्ते सारे अस्त्री।

तिक्ता स्त्री तिक्तो रसोऽस्त्यस्य अच्। १कटुरोहिण्यां मेदि॰ २पाठायां रत्नमा॰ ३यवतिक्तालतायां ४षड्भुजायां राजनि॰ ५छिक्किन्यां भावप्र॰।

तिक्ताख्या स्त्री तिक्तेति आख्या यस्याः। कटुतुम्ब्यां राजनि॰ तिक्ताह्वयेत्यत्र।

तिक्ताङ्गा स्त्री तिक्तमङ्गमस्त्यस्य अच्। पातालगरुड़ीलतायाम् राजनि॰।

तिक्तिका स्त्री तिक्ता स्वार्थे संज्ञायां वा क ह्रस्वे अत इत्त्वम्। कटुतुम्ब्याम् शब्दार्थचि॰।

तिग हिंसायाम् आस्कन्दे च स्वा॰पर॰सक॰ सेट्। तिग्नोति अतेगीत्। तितेग। "अग्निं जम्भैस्तिगितैरत्ति" ऋ॰ १।१४३।५। "तिगितैर्निशितैः" भा॰।

तिग्म न॰ तिज–मक् जस्य गः। १तीक्ष्णे स्पर्शे २तद्वति त्रि॰। अमरः। ३ वज्रे निघण्टुः। "तिग्मवीर्य्यविषाह्येते दन्दशूका महाबलाः" भा॰ आ॰ २० अ॰।

तिग्मकर पु॰ तिग्मः करः किरणो राजग्राह्यो वाऽस्य। २सूर्य्ये त्रिका॰। ३उग्रराजग्राह्यके नृपे च। कर्म्म॰। ४तिग्मे करे पु॰।

तिग्मदीधिति पु॰ तिग्मा दीधितिरस्य। तिग्मांशौ सूर्य्ये।

तिग्ममन्यु त्रि॰ तिग्मो मन्युरस्य। १उग्रक्रोधके। २शिवे पु॰ "अहस्वरो नक्तचरस्तिग्ममन्युः सुवर्चसः" भा॰ अनु॰ १७अ॰।

तिग्मरश्मि पु॰ तिग्मा रश्मयोऽस्य। १सूर्य्ये। २खररश्मिके त्रि॰। कर्म्म॰। ३खरे रश्मौ पु॰।

तिग्मांशु पु॰ तिग्मा अंशवो यस्य। १सूर्य्ये जटाधरः "तिग्मांशुरस्तंगतः" जयदेव॰। "तिग्मांशुरश्मिच्छुरितान्यदूरात्" भट्टिः। २खरकिरणके त्रि॰। कर्म्म॰। ३खरे किरणे पु॰।

तिघ घातने स्वा॰ पर॰ सक॰ सेट्। तिघ्नोति अतेघीत्। तितेघ।

तिज तीक्ष्णीकरणे, चुरा० उभ० सक० सेट् । तेजयति ते अतीतिजत् त । "कुसुमचापमतेजयदंशुभिर्हिमकरः" रघुः "तेजयित्वा तु तत्सैव्यम्" रामा० अर० ३१ स० । "तेजिता बलदर्पाभ्याम्" हरिवं० ५२०८ । "सा मयोक्तेन तेजिता" ९३४४ श्लो० । तेजः ।

तिज क्षान्तौ क्षमायां स्वार्थे सन् निशाने न सन् भ्वा०आत्म० सक० सेट् । तितिक्षते तेजते । अतितितिक्षिष्ट अतेजिष्ट । "आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत!" गीता "हिमं घृणिं तितिक्षिष्यते" शत० ब्रा० ३।१।२।१४ । "अतिवादांस्तितिक्षेत" मनुः "आपस्ते पादं तितिक्षन्नामलमापस्तितिक्षितुम्" भा० शा० ८१७० अ० "तितिक्षन्ते अभिशस्तिं जना नाम" ऋ० ३।३०।१ ।

तिजिन पु० तिज—इनच् किच्च । चन्द्रे उणा० ।

तिणिश पु तिल्वकवृक्षे लोध्रद्रुमे । "न्यग्रोधाश्वत्थतिल्वकहरिद्रुमयोः" कात्या० श्रौ० सूत्रे "तिल्वकस्तिणिशः" कर्कः ।

तिण्टी स्त्री त्रिवृति (तेओड़ी) शब्दच० ।

तितउ पु० तन—डउ सन्वच्च डउ इति निर्देशात् न सन्धिः । १चालन्याम् अमरः । २छत्रे न० उज्ज्वलदत्तः । "क्षुद्रच्छिद्रसमोपेतं चालनं तितउ स्मृतमित्युक्तेरस्य क्लीवत्वमपि । "सक्तुमिव तितउना पुनन्तः" ऋ० १०।७१।२। "इमामृचमधिकृत्य" निरु० ४।९। "तितउ परिपवनं भवति ततवद्वा तुन्नवद्वातिलमात्रतुन्नमिति वा "अन्यथा निरुक्तिरुक्ता क्लीवत्वञ्चोक्तम् ।

तितिक्ष त्रि० तिज—स्वार्थे सन्—अच् । १शीतोष्णादिद्वन्द्वसोढरि २ऋषिभेदे पु० तस्य गोत्रापत्यं गर्गा० यञ् । तैतिक्ष्य तद्गोत्रापत्ये यूव्यपत्ये यञन्तत्वात् फक् । तैतिक्षायण तद्गोत्रजे यून्यपत्ये पुंस्त्री० ।

तितिक्षा स्त्री तिज—स्वार्थे सन् भावे अ । १क्षमायां शीतोष्णादिद्वन्द्वसहने "सहनं सर्वदुःखानामप्रतीकारपूर्वकम् । चिन्ताविलापरहितं सा तितिक्षा निगद्यते" विवेकचू० । सा संजाताऽस्य तार० इतच् । तितिक्षित क्षान्ते सोढरि जटाधरः ।

तितिक्षु त्रि० तिज—स्वार्थे सन्—उ । तितिक्षाशीले । "शान्तो दान्त उपरतस्तितिक्षुः श्रद्धावान् समाहितो भूत्वा आत्मन्यात्मानमवलोकयेत्" वेदा० सा० धृता श्रुतिः । "अक्रोधनः क्रोधनेभ्यो विशिष्टस्तथा तितिक्षुरतितिक्षोर्विशिष्टः" भा० आ० ८७ अ० ।

तितिभ पु० ततीति भणति भण—ड । इन्द्रगोपकीटे खद्योते हेमच० । [स्त्रियां जातित्वात् ङीष् ।

तितिर पुंस्त्री० तित्तिरि+पृषो० । तित्तिरिखगे राजनि०

तितिल न० तिल—क वा० द्वित्वञ्च । १नन्दके (नान्दा) मृण्मये पात्रभेदे २तैतिलकरणे ३तिलपिष्टे च अजयपालः

तित्तिर पुंस्त्री तित्ति इति शब्दं रौति रु—बा० ड । (तितिर) खगभेदे शब्दर० । स्त्रियां जातित्वात् ङीप् । "कपिञ्जलास्तित्तिराश्च कलविङ्काश्च सर्वशः" "तस्माद्वक्त्राद्विनिष्पेतुस्तित्तिरास्तस्य पाण्डव !" भा० उ० ८अ० ।

तित्तिरि पु० तित्ति इति शब्दं रौति रु—बा० डि । (तितिर) खगभेदे अमरः । स्त्रियाममनुष्यजातित्वात् "इतोऽमनुष्यजातेः" पा० ङीप् । तित्तिरिः कृष्णवर्णः स्यात् स तु गौरः कपिञ्जलः । तित्तिरिर्वर्णदो ग्राही हिक्कादोषत्रयापहः । श्वासकासज्वरहरस्तस्माद्गौरोऽधिको गुणैः" भाव०प्र० । तित्तिरिरूपग्रहणेन याज्ञवल्क्यवान्तयजुर्ग्राहिणि मुनिभेदे तत्कथा "वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन् । यच्चेरुर्ब्रह्महत्यांहःक्षपणं स्वगुरोर्व्रतम् । याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवन् ! कियत् । चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम् । इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया । विप्रावमन्त्रा शिष्येण मदधीतं त्यजाश्विति । देवरातसुतः सोऽपि छर्दित्वा यजुषां गणम् । ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान् । यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाऽऽददुः । तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः । भाग० १२।६ ५८।

तित्तिरिणा प्रोक्तमधीयते छण् । तैत्तिरीय तित्तिरिप्रोक्तच्छन्दोब्राह्मणाध्येतृषु ब० व० । तित्तिरिणा अधीता अण्, ङीप् । तैत्तिरी कृष्णयजुःशाखायां स्त्री ।

तित्तिरीक न० तित्तिरेः पक्षदाहेन जातम् वा० ईक । तित्तिरिपक्षदाहेन जाते अञ्जनभेदे । "अञ्जनं तित्तिरीकञ्च नलदं पद्ममुत्पलम्" सुश्रु० । अत्र तिन्तिड़ीकमिति पाठान्तरम् । दग्धतिन्तिड़ीकजातेऽञ्जने इति तदर्थः ।

तिथ पु० तिज—थक् नि० जलोपः । १वह्नौ २कामे च सि०कौ० ३काले त्रिका० । ४प्रावृट्माले संक्षिप्तसा० ।

तिथि(थी) पुंस्त्री० अत—इथिन् पृषो० वा ङीप् । १पञ्चदशसु चन्द्रकलाक्रियारूपासु प्रतिपदादिषु, अमरः २पञ्चदशसङ्ख्यायाञ्च । अस्य निरुक्त्यादिकं कालमाधवीये उक्तं यथा "अथ तिथयो निर्णीयन्ते । तत्र तिथिशब्दस्तनोतेर्औ-

न्निष्पन्नः । तनोति विस्तारयति वर्द्धमानां क्षीयमाणां वा चन्द्रकलामेकां यः कालविशेषः सा तिथिः । यद्वा यथोक्तकलया तन्यत इति तिथिः । तदुक्तं सिद्धान्तशिरोमणौ “तन्यते कलया यस्मात्तस्मात्तास्तिथयः स्मृताः” इति । एतदेवाभिप्रेत्य स्कान्दे पठ्यते “अमा षोड़शभागेन देवि ! प्रोक्ता महाकला । संस्थिता परमा माया देहिनां देहधारिणी । अमादिपौर्णमास्यन्ता या एव शशिनः कलाः । तिथयस्ताः समाख्याताः षोड़शैव वरानने !” इति । अयमर्थः । या महामाया आधाररूपा देहिनां देहधारिणी संस्थिता या सा चन्द्रमण्डलस्य षोड़शभागेन परिमिता चन्द्रदेहधारिण्यमानाम्नी महाकलेति प्रोक्ता क्षयोदयरहिता नित्या तिथिसंज्ञिकैव । इतरा अपि पञ्चदश कला दिवसव्यवहारोपयोगिन्यः क्षयोदयवत्यः पञ्चदश तिथयो भवन्तीति तिथयः षोड़शैवेत्यविरुद्धं वचनमिति । श्रुतिस्त्वस्मिन्नेवार्थे पक्षनिर्णय एवोदाहृतः । “तस्य रात्रयः पञ्चदश कला ध्रुवैवास्य षोड़शी कलेति” । एवं सत्यत्र सामान्यविशेषरूपेण तिथिद्वैविध्यमुक्तं भवति । तत्र येयममेत्युक्ता क्षयोदयवर्जिता ध्रुवा षोड़शी कला तद्युक्तः कालस्तिथिसामान्यम् । यास्त्ववशिष्टा वृद्धिक्षयोपेताः पञ्चदश कलास्ताभिर्विशिष्टाः कालविभागास्तिथिविशेषाः । तासां पञ्चदशानामेकैकां कलां वह्न्यादयः प्रजापत्यन्ताः पञ्चदश देवताः क्रमेण पिबन्ति । तत्र वह्निना कला प्रथमं पीयत इति प्रथमेत्युच्यते । तया युक्तः कालविशेषः प्राथम्यवाचिना प्रतिपच्छब्देनाभिधीयते । एवं द्वितीयादीनां पञ्चदश्यन्तानां तिथीनां नामान्यवगन्तव्यानि । ता एताः कृष्णपक्षतिथयो भवन्ति । पुनश्च ताः पीताः कला अनेनैव क्रमेण तत्तत्पातृवह्न्यादिदेवताभ्यो निर्गत्य चन्द्रमण्डलं पूरयन्ति । ताभिर्युक्ताः कालविशेषाः शुक्लपक्षगताः प्रतिपदाद्यास्तिथयो भवन्ति । वह्न्यादिदेवतानां कलापानं सोमोत्पत्तौ पठ्यते । तथाहि “प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः । विश्वे देवास्तृतीयान्तु चतुर्थीं सलिलाधिपः । पञ्चमीं तु वषट्कारः षष्ठीं पिबति वासवः । सप्तमीमृषयो दिव्या अष्टमीमजएकपात् । नवमीं कृष्णपक्षस्य यमः प्राश्नाति वै कलाम् । दशमीं पिबते वायुः पिबत्येकादशीमुमा । द्वादशीं पितरः सर्वे समं प्राश्नन्ति भागशः । त्रयोदशीं धनाध्यक्षः कुवेरः पिबते कलाम् । चतुर्दशीं पशुपतिः पञ्चदशीं प्रजापतिः । निपीतः कलया शेषश्चन्द्रमा न प्रकाशते । कला षोडशिका या सा त्वपः प्रविशते सदा । अमायान्तु सदा सोम ओषधीः प्रतिपद्यते । तमोषधिगतं गावः पिबन्त्यम्बुगतञ्च यत् । तत्क्षीरममृतं भूत्वा मन्त्रपूतं द्विजातिभिः । हुतमग्निषु यज्ञेषु पुनराप्यायते शशी । दिने दिने कलावृद्धिः पौर्णमास्यान्तु पूर्यते” । ज्योतिःशास्त्रे तु शिद्धान्तशिरोमणिकारेण तिथिरेवं प्रदर्शिता । “अर्काद्विनिसृतः प्राचीं यद्यात्यहरहः शशी । तच्चान्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिरिति” । अयमर्थः । सूर्य्यमण्डलस्य अधःप्रदेशवर्त्ती शीघ्रगामी चन्द्र ऊर्द्ध्वप्रदेशवर्त्ती मन्दगामी सूर्य्यस्तथा सति तयोर्गतिविशेषवशात् दर्शे चन्द्रमण्डलमन्यूनमनतिरिक्तं सूर्य्यमण्डलस्याधोभागे व्यवस्थितं भवति तदा सूर्य्यरश्मिभिः साकल्येनाभिभूतत्वाच्चन्द्रमण्डलमीषदपि न दृश्यते । उपरितने शीघ्रगत्या सूर्य्याद्विनिःसृतः शशी प्राचीं याति । त्रिंशदंशोपेतराशौ द्वादशभिरंशैः सूर्य्यमुल्लङ्घ्य गच्छति । तथा चन्द्रस्य पञ्चदशसु भागेषु प्रथमभागो दर्शनयोग्यो भवति । सोऽयं भागः प्रथमकलेत्यभिधीयते । तत्कलानिष्पत्तिपरिमितः कालः प्रतिपत्तिथिर्भवति । एवं द्वितीयादितिथिष्ववगन्तव्यमिति । तदेतद्विष्णुधर्म्मोत्तरे विस्पष्टमभिहितम् “चन्द्रार्कगत्या कालस्य परिच्छेदो यदा भवेत् । तदा तयोः प्रवक्ष्यामि गतिमाश्रित्य निर्णयम् । भगणेन समग्रेण ज्ञेया द्वादश राशयः । त्रिंशांशश्च तथा राशेर्भाग इत्यभिधीयते । आदित्याद्विप्रकृष्टस्तु भागद्वादशकं यदा । चन्द्रमाः स्यात्तदा राम ! तिथिरित्यभिधीयते” इति । सेयं द्वादशभिर्भागैः सूर्य्यमुल्लङ्घितवती प्रथमा चन्द्रकला शृङ्गद्वयोपेतसूक्ष्मरेखाकारा शौक्ल्यमीषदुपयाति । उत्तरोत्तरदिनेषु सूर्य्यमण्डलविप्रकर्षतारतम्यानुसारेण शौक्ल्यमुपचीयते । अनयैव रीत्या सन्निकर्षतारतम्येन मेचकत्वमुपचीयते । तदेतदुक्तं सिद्धान्तशिरोमणौ “उपचयमुपयाति शौक्ल्यमिन्दोस्त्यजत इनं व्रजतश्च मेचकत्वम् । जलमयमण्डलस्य गोलकत्वात् प्रभवति तीक्ष्णविषाणरूपताऽस्येति” । सूर्य्याचन्द्रमसोर्यौ सन्निकर्षविप्रकर्षौ तयोरवसानं दर्शपूर्णिमयोः सम्पद्यते । तदाह गोभिलः “यः परो विप्रकर्षः सूर्य्याचन्द्रमसोः सा पौर्णमासी । यः परः सन्निकर्षः साऽमावास्येति” नन्वत्र चन्द्रकलानां

सूर्य्यप्रवेशनिर्गमौ प्रतीयेते सोमोत्पत्तौ तु वह्न्यादिदेवतासु । नायं दोषः अश्वसदादिदर्शनापेक्षया ज्योतिःशास्त्रस्य प्रवृत्तत्वात् । सोमोत्पत्तौ तु वह्न्यादिदेवतानां तत्तत्कलाप्रयुक्ता ऋषिभिर्विवक्षिता । यदि सूर्य्ये प्रवेशनिर्गमौ यदि वा वह्न्यादिदेवतासु, सर्व्वथापि कलाप्रयुक्ता एव प्रतिपदादितिथयः । ननु सावनदिनेषु सौरदिवसेषु च निर्णयमुपेक्ष्य चान्द्रतिथिष्वेव कुतो निर्णयोद्यम इति चेत् । सन्देहसद्भावादिति ब्रूमः । न खलु सौरसावनादिदिवसयोः सन्देहसद्भावोऽस्ति नियतपरिमाणत्वात् । तच्च ब्रह्मसिद्धान्तेऽभिहितम् “सावनं स्यादहोरात्रमुदयादोदयाद्रवेः । रवेस्त्रिंशस्तु राश्यंशस्तिथिश्चन्द्रोग ऐन्दवमिति” । एकस्मिन् राशौ यावन्तं कालं रविर्वर्त्तते तावतः कालस्य त्रिंशो योऽयमंशः स सौरो दिवसः तिथिरेका कला तत्सम्भोग इन्दोर्यावता कालेन निष्पद्यते तदैन्दवं दिनम् । न चात्र सौरसावनयोरिव चान्द्रेऽपि दिने सन्देहाभावः शङ्कनीयः ह्रासवृद्धिवशेन सन्देहसद्भावात् । ह्रासवृद्धी च गर्गेण दर्शिते “खर्व्वो दर्पस्तथा हिंस्रस्त्रिविधं तिथिलक्षणम् । धर्म्माधर्म्मवशादेवं तिथिस्त्रेधा विवक्षितेति” । खर्व्वा समतिथिः । दर्पा वृद्धियुक्ता हिंस्रापचययुक्ता । तस्यैतस्य त्रैविध्यस्य विपरिवर्त्तनविशेषेण तिथिः संपूर्णा खण्डा चेति द्वैविध्यमापद्यते । तत्र संपूर्णा स्कन्दपुराणे दर्शिता “प्रतिपत्प्रभृतयः सर्व्वा उदयादोदयाद्रवेः । संपूर्णा इति विख्याता हरिवासरवर्जिताः” इति । हरिवासर एकादशी । या तु नोक्तलक्षणा सा खण्डतिथिः । तत्र संपूर्णायां विधिनिषेधयोर्नास्ति सन्देहः । खण्डतिथौ तु विधिनिषेधव्यवस्थामाह गार्ग्यः । “निमित्तं कालमादाय वृत्तिर्विधिनिषेधयोः । विधिःपूज्यतिथौ तत्र निषेधः कालमात्रके । तिथीनां पूज्यता नाम कर्म्मानुष्ठानयोग्यता । निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते” इति । एवञ्च सति खण्डतिथौ पूज्यत्वं निर्णेतव्यं भवति । तत्र प्रतिपदमारभ्य पञ्चदश्यन्तास्तिथयः क्रमेण निर्णीयन्ते ।”

कालमाधवीयग्रन्थे विस्तरो द्रष्टव्यः । कारिकाभिश्च माधवेन तत्तत्तिथिभेदेषु खण्डविशेषग्राह्यता प्रसङ्गान्मलमासादिनिरूपणपूर्ब्बकं दर्शिता यथा

“व्याख्याय माधवाचार्य्यो धर्म्मान् पाराशरानथ । तदनुष्ठानकालस्य निर्णयं वक्तुमुद्यतः । अथोऽनुक्रम्यते श्लोकैरखिलो निर्णिनीषितः । तावतैवानुतिष्ठासुर्निःसन्देहं प्रवर्त्तताम् । ततो मीमांसुचित्तस्य समाधानाय तत् पुनः । विवरिष्ये यथान्यायं श्रुतिस्मृतिवचोबलात् । पञ्च प्रकरणान्यत्र तेषूपोद्घातवत्सरौ । प्रतिपच्छिष्टतिथयो नक्षत्रादिरिति क्रमः । १उपोद्घाते कालसत्त्वं तस्य निर्णययोग्यता । ईश्वरो नित्यकालात्मा चिन्तनीयः स कर्म्मसु । जन्यकालेऽब्दर्त्वयनमुख्यमेतच्चतुष्टयम् । अब्दायनर्त्तुमासाश्च पक्षः प्रकरणान्तरे २। अब्दः पञ्चविधश्चान्द्रो व्रतादौ तिलकादिके । स्वजन्मादिव्रते सौरो गोसत्रादिषु सावनः । तथोपाचार्य्यसेवादौ विकल्प्यन्ते निजेच्छया । आयुर्दाये तु नाक्षत्रो बार्हस्पत्योऽधिवत्सरः । चान्द्राणां प्रभवादीनां पञ्चके पञ्चके युगम् । संपरीदादन्विदुत्पूर्व्वास्तु वत्सराः । तिलो यवो दक्षधान्ये रजतं दीयतेऽत्र तु । उभे कर्म्मणि शान्ते च सोऽयने दक्षिणोत्तरे । वसन्तादृतवो द्वेधा चान्द्राः सौराश्च चान्द्रकाः । चैत्राद्या अथ मीनाद्या मेषाद्या वा विवस्वतः । तेष्वाधानादयस्तद्वत् पशुमूर्त्तिव्रतपूजनम् । मासास्तु सावनः सौरश्चान्द्रो नाक्षत्र इत्यमी । दर्शान्तः पूर्णिमान्तो वा चान्द्रोऽसौ विप्रवैश्ययोः । सौरो राज्ञः सावनस्तु यज्ञे ज्योतिषिके परः । माघादिमासभेदेषु तिलदानादयः स्मृताः । चान्द्रोऽधिमासोऽसंक्रान्तः सोऽन्तर्भवति चोत्तरे । असंक्रान्तावेकवर्षे द्वौ चेत् संसर्पस्त्वादिमः । क्षयमासो द्विसंक्रान्तः स चांहस्पतिसंज्ञकः । एतौ त्याज्यौ विवाहादौ संसर्पांहस्पती उभौ । शुद्धौ श्रौते तथा स्मार्त्ते मलमासो विविच्यते । काम्यारम्भं तत्समाप्तिं मलमासे विवर्जयेत् । आरब्धं मलमासात् प्राक् कृच्छ्रसत्रादिकं च यत् । तत्समाप्यं सावनस्य मासस्यानतिलङ्घनात् । आरम्भस्य समाप्तेश्च मध्ये चेत् स्यात् मलिम्लुचः । प्रवृत्तमखिलं काम्यं तदानुष्ठेयमेव तु । कारीर्य्यादि तु यत् काम्यं तस्यारम्भसमापने । काम्यकालविलम्बस्य प्रतीक्षाया असम्भवात् । अनन्यगतिकं नित्यमग्निहोत्रादि न त्यजेत् । गत्यन्तरयुतं नित्यं सोमयागादि वर्जयेत् । अगति ग्रहणस्नानं जातेष्टि,गतिसंयुतम् । इयं नैमित्तिकं तस्य व्यवस्था नित्यवन्मता । शुद्धमासमृतानां स्यान्मलिने प्रथमाब्दिकम् । मलमासमृतानान्तु मले स्यादाब्दिकान्तरम् । दैवे मुख्यः शुक्लपक्षः कृष्णः पित्र्ये विधीयते । तृतीये तु ३प्रकरणे

वर्णिता प्रतिपत्तिथिः । प्रतिपन्नाम विज्ञेया चन्द्रस्य प्रथमा कला । शुक्लपक्षे विशेच्चन्द्रं कृष्णपक्षे विनिःसरेत् । शुद्धा विद्धा तिथिः शुद्धा हीनातिथ्यान्ययाहनि । उदये पूर्व्वया तिथ्या विध्यते त्रिमुहूर्त्तकैः । सायन्तूत्तरया तद्वन्न्यूनया तु न विध्यते । वेध्यापि त्रिमुहूर्त्तैव न न्यूना वेधमर्हति । शुद्धायां नास्ति सन्देहो दैवे पित्र्ये च कर्म्मणि । उपवासश्चैकभक्तं नक्तं चायाचितं व्रतम् । दानञ्च षड्विधं दैवं क्रमादत्र विविच्यते । एकोद्दिष्टं पार्व्वणञ्च पित्र्यं द्विविधमीर्य्यते । शुक्लपक्षे दर्शविद्धा कृष्णे विद्धा द्वितीयया । उपोष्या प्रतिपच्छुक्ले मुख्या स्यादापराह्णिकी । तदभावे तु सायाह्नव्यापिनी परिगृह्यताम् । प्रातःसंगवमध्याह्नापराह्णाः सायमित्यमी । अत्राह्नां पञ्चधा भागो मुख्यो द्वित्र्यादिभागतः । अभावेऽपि प्रतिपदः संकल्पः प्रातरिष्यते । तिथिस्त्रियामतोऽर्व्वाक् चेत् तिथ्यन्ते पारणं भवेत् । वह्न्युत्सवं च पूर्व्वेद्युरुपवासवदाचरेत् । मुख्यतिथ्यन्तराये तु तिथिशेषोऽपि गृह्यताम् । शुद्धाऽधिका तु कृष्णापि पूर्व्वा संपूर्त्तिसंभवात् । गृहीतव्या त्वेकभक्ते मध्याह्नव्यापिनी तिथिः । परेद्युरेव पूर्व्वेद्युरेव व्याप्तिर्दिनद्वये । नोभयत्रोभयत्रांशे साम्यं वैषम्यमित्यमी । षट् पक्षास्तेषु चैकैकव्याप्तौ सैवात्र गृह्यताम् । दिनद्वयेऽपि तद्व्याप्तावव्याप्तौ चैकदेशतः । समव्याप्तौ च पूर्व्वैव वैषम्ये त्वधिकैष्यताम् । अन्याह्नस्यैकभक्तस्य कालस्त्वह्न्यनुसारतः । उपवास प्रतिनिधेस्तिथिः स्यादुपवासवत् । प्रदोषव्यापिनी नक्ते तिथिर्व्याप्तिर्दिनद्वये । अव्याप्तिर्वाथवांशेन व्याप्तिः स्यात् सर्व्वथोत्तरा । सौरनक्ते तु सायाह्नव्यापिनी न प्रदोषगा । अयाचिते तु तिथयः स्वीकार्य्याः उपवासवत् । सोदयत्रिमुहूर्त्तीयां कुर्य्याद्दानं व्रतानि च । उभयत्र तथात्वे तु पूर्व्वेद्युस्तदनुष्ठितिः । परत्रैव तथात्वं चेत् पूर्व्वा ग्राह्या तिथिक्षये । तिथेः साम्ये च वृद्धौ च गृह्यतां तिथिरुत्तरा । असमे चैकदेशस्य व्याप्तौ पूर्व्वैव गृह्यताम् । एकोद्दिष्टे तु मध्याह्नयुक्ता स्यादेकभक्तवत् । एकदेशे समव्याप्तौ क्षये पूर्व्वाऽन्यथोत्तरा । कुतपाद्य पराह्णस्य व्याप्तिरावृदिक उत्तमा । तदभावेऽपराह्णस्य व्यापिका गृह्यतां तिथिः । क्षये पूर्व्वोत्तरा वृद्धौ व्याप्तिश्चेदपराह्णयोः । न ग्राह्यातिथिगौ वृद्धिक्षयावूर्द्ध्वं तिथेस्तु तौ । साम्ये त्वर्द्धतिथेर्ग्राह्या परविद्धैव वृद्धिवत् । न वैषम्ये मध्यपराह्णौ चेत् पूर्व्वा स्यात् कुतपो यथा ।

स्ये चैकदेशस्य व्याप्तौ ग्राह्या महत्त्वतः । साम्येन चेत् क्षये पूर्व्वा परा स्याद्वृद्धिसाम्ययोः । वृद्धिसाम्यक्षया ग्राह्या तिथिगा नोर्द्ध्वगा इह । ४द्वितीयाद्यास्तु पर्व्वान्तास्तुर्य्यप्रकरणोदिताः । स्मारणीयः सामान्यतिथिषु प्रतिपन्नयः । क्वचित् क्वचिद्विशेषोऽस्ति सोऽयमत्राभिधीयते । पूर्व्वेद्युरसती प्रातः परेद्युस्त्रिमुहूर्त्तगा । सा द्वितीया परोपोष्या पूर्व्वविद्धा ततोऽन्यथा । रम्भातृतीया पूर्व्वा स्यादुत्तरा स्याद् व्रतान्तरे । परेऽह्नि नास्ति चेत् पूर्व्वविद्धाप्यस्तु व्रतान्तरे । मुहूर्त्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे । शुद्धाधिकायामप्येवं गणयोगप्रशंसनात् । चतुर्थी तु परोपोष्या गणनाथव्रतस्य तु । मध्याह्नव्यापिनी पूज्या तद्वन्नागचतुर्थ्यपि । परेद्युरेव मध्याह्नव्याप्तौ विघ्नस्य सोत्तरा । अन्यथा पूर्व्वविद्धैव मातृयोगप्रशस्तितः । पूर्व्वेद्युरेव तद्व्याप्तौ पूर्व्वा सर्पप्रिया तिथिः । नो चेत् सर्पस्य पञ्चम्या योगेऽत्यन्तं प्रशस्यते । गौर्य्याः शुद्धाजयायुक्ता, नागविद्धा निषिद्ध्यते । सर्व्वत्र पञ्चमी पूर्व्वा ग्राह्या स्कन्दव्रते परा । नागविद्धा स्कन्दषष्ठी सा निषिद्धा व्रतान्तरे । उत्तरस्या अलाभे तु नागविद्धापि गृह्यताम् । विनाशाद्वा परेऽभावात् नागविद्धा न दोषकृत् । सप्तमी पूर्व्वविद्धैव व्रतेषु निखिलेष्वपि । अलाभे पूर्व्वविद्धायाः परविद्धापि गृह्यताम् । व्रतमात्रेऽष्टमी कृष्णा पूर्व्वा शुक्लाष्टमी परा । दूर्व्वाष्टमी तु शुक्लापि पूर्व्वविद्धा विधीयते । पक्षद्वयेऽप्युत्तरैव शिवशक्तिमहोत्सवे । ज्येष्ठर्क्षयोगे पूर्व्वैव ग्राह्या ज्येष्ठाव्रते तिथिः । मध्याह्नादूर्द्ध्वमृक्षं चेत् परेद्युः सा प्रशस्यते । ज्येष्ठर्क्षभानुवारास्यां युक्ताष्टम्यतिदुर्ल्लभा । जयन्त्याख्यं व्रतं भिन्नं कृष्णजन्माष्टमीव्रतात् । शुद्धा च सप्तमी विद्धेत्येवं जन्माष्टमी द्विधा । सप्तमी चेन्निशीथात्प्राग्विद्धा शुद्धान्यथा भवेत् । शुद्धायां नास्ति सन्देहो विद्धा च त्रिविधेष्यते । निशीथयोगः पूर्व्वेद्युः परेद्युर्व्वा द्वयोरुत । पूर्व्वैव प्रथमे पक्षे परैवोत्तरपक्षयोः । अष्टमी रोहिणी शुद्धा जयन्ती सा चतुर्व्विधा । शुद्धा शुद्धाधिकेत्येवं विद्धाविद्धाधिकेति च । शुद्धायामपि विद्धायां न सम्भाव्योत्तरा तिथिः । शुद्धाधिकायां योगः स्यादेकस्मिन्वा दिनद्वये । नैकयोगेऽस्ति सन्देहो द्वियोगे प्रथमं दिनम् । सदा निशीथे पश्चाद्वेत्युत्तमो मध्यमोऽधमः । योगस्त्रिधापि पूर्व्वेद्युः सम्पूर्णत्वादुपोषणम् । विद्धाधिकायामप्येकदिनयोगे स गृह्यताम् । द्वयोर्योगस्त्रिधा भिन्नो निशीथे वृत्तिभेदतः । तद्वृत्ति-

दिने एकस्मिन्नुभयोर्नोभयोरिति । एकस्मिंश्चेत् तद्दिनं स्यात् पक्षयोरन्त्ययोः परा । बुधे सोमे जयन्ती चेद्वारे ख्यातिफलप्रदा । तिथ्यृक्षयोर्द्वयोरन्ते उत्तमं पारणं भवेत् । एकस्यान्ते मध्यमं स्यादुभयान्तेऽधमं स्मृतम् । यस्मिन् वर्षे जयन्त्याख्यो योगो जन्माष्टमी तदा । अन्तर्भूता जयन्त्यां स्यादृक्षयोगप्रशस्तितः ।

नवमी पूर्वविद्धैव पक्षयोरुभयोरपि । मध्याह्ने रामनवमी पुनर्वसुसमन्विता । ग्राह्या नैवाष्टमीयुक्ता सनक्षत्रापि वैष्णवैः । कृष्णा पूर्वोत्तरा शुक्ला दशम्येव व्यवस्थिता । जयन्तीव्रतवन्नित्यं काम्यं चैकादशीव्रतम् । अरुणोदयवेधोऽत्र वेधः सूर्य्योदये तथा । उक्तौ द्वौ दशमीवेधौ वैष्णवस्मार्त्तयोः क्रमात् । कलाकाष्ठादिवेधोऽपि ग्राह्योऽत्र त्रिमुहूर्त्तवत् । वैखानसाद्यागमोक्तदीक्षां प्राप्तो हि वैष्णवः । विद्धा त्याज्या वैष्णवेन शुद्धाप्याधिक्यसम्भवे । एकादशी द्वादशी वाधिका चेत्त्यज्यतां दिनम् । पूर्वं त्याज्यमुत्तरं स्यादिति वैष्णवनिर्णयः । एकादशी द्वादशी चेदुभयं वर्द्धते यदा । तदा पूर्वदिनं त्याज्यं स्मार्त्तैर्ग्राह्यं परं दिनम् । एकादशीमात्रवृद्धौ गृहियत्योर्व्यवस्थितिः । उपोष्या गृहिभिः पूर्वा यतिभिस्तूत्तरा तिथिः । द्वादशीमात्रवृद्धौ तु शुद्धाविद्धे व्यवस्थिते । शुद्धा पूर्वोत्तरा विद्धा स्मार्तनिर्णय ईदृशः । श्रवणेन युता चेत् स्याद्द्वादशी सा हि वैष्णवैः । स्मार्त्तैश्चोपोषणीया स्यात्त्यजेदेकादशीं तदा । उपवासव्रतादन्यव्रते सार्द्धमुहूर्त्तकैः । सप्तभिर्दशमीविद्धामेतामेकादशीं त्यजेत् । द्वादशी पूर्वविद्धैव निखिलेषु व्रतेष्वपि । शुक्लत्रयोदशी पूर्वा परा कृष्णत्रयोदशी । अलाभे सापि पूर्वैव पराऽनङ्गत्रयोदशी । या शुक्ला गृह्यते पूर्वा गृह्यतां सापराह्णिकी । चतुर्दश्युत्तरा शुक्ला पूर्वा कृष्णचतुर्दशी । उदये द्विमुहूर्त्तापि ग्राह्यानन्तव्रते तिथिः । शुक्लापि रात्रियुक्ता स्याच्चैत्रश्रावणमासयोः । शुक्ला सर्वापि पूर्वैव यदि स्यादापराह्णिकी । प्रदोषे वा निशीथे वा द्वयोर्वा यास्ति सा भवेत् । शिवरात्रिव्रते तत्र द्वयोः सत्ता प्रशस्यते । तदभावे निशीथैकव्याप्तापि परिगृह्यताम् । तस्याश्चासम्भवे ग्राह्या प्रदोषव्यापिनी तिथिः । तिथ्यन्ते पारणं यामत्रयादर्वाक् समापने । अन्यथा पारणं प्रातरन्यतिथ्युपवासवत् । पूर्वविद्धैव सावित्रीव्रते पञ्चदशी तिथिः । नाद्योऽष्टादश भूतस्य स्युश्च तत्र परेऽहनि । व्रतान्तराणि सर्वाणि परेऽहन्येव सर्वदा । श्राद्धेऽपराह्णकालीनो दर्शश्चाब्दिकवन्मतः । दिनद्वयेऽप्येकदेशवृत्तौ ग्राह्यो महत्त्वतः । तुल्यत्वं चेदेकदेशक्षये पूर्वोऽन्यथोत्तराः । कृत्स्नव्याप्तौ द्वयोरह्नोरुत्तरस्तिथिवृद्धितः । साग्न्यनग्निव्यवस्था स्यान्न चेत् स्यादपराह्णयोः । पूर्वेद्युः साग्निकः कुर्य्यादुत्तरेद्युर्निरग्निकः । पर्वप्रतिपदोः सन्धिर्मध्याह्ने वा ततः पुरा । अन्वाधानं पूर्वदिने यागः सन्धिदिने भवेत् ।। ऊर्द्धं मध्याह्नतः सन्धावन्वाधानं तु तद्दिने । इष्टिं परदिने कुर्य्यादन्यो वाजसनेयिनः । यस्तु वाजसनेयी स्यात्तस्य सन्धिदिनात् पुरा । न काप्यन्वाहितिः किन्तु सदा सन्धिदिने हि सा । सन्धिश्चेत् सङ्गवादूर्द्धं प्राक्चेदावर्त्तनाद्रवेः। सा पौर्णमासी विज्ञेया सद्यस्कालविधौ तिथिः । वृद्धिः प्रतिपदो यास्ति तद्वृद्धं पर्वणि क्षियेत् । क्षयस्यार्द्धं तथा हित्वा सन्धिर्निश्चीयतां तदा । बौधायनमते दर्शश्राद्धं चेष्टिर्विशिष्यते । द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपच्चापराह्णिकी । अन्वाधानं चतुर्दश्यां दर्शस्यान्तेऽपि वर्त्तयेत् । दर्शश्राद्धं तथा कार्य्यमिति बौधायनोदितम् । इष्ट्यादिविकृतिः सर्वा पर्वण्येवेति निर्णयः'' ५प्रकरणे नक्षत्रनिर्णयो विस्तरभयान्न दर्शितः ।

दर्शादिश्राद्धेऽन्यत्र चोक्तं यथा

"दर्शो यत्रापराह्णं स्पृशति स दिवसः श्राद्धकालोदयोश्चेद्यत्रानल्पो यदासौ यदि भवति समः क्षीयमाणे तु पूर्वः । वृद्धौ साम्ये त्वनग्नेर्युवतिदलयोश्च एवाहिताग्नेः पूर्वो न क्वापराह्णं स्पृशति कृतपसंस्पर्शतोऽयं विधिः स्यात् । सायन्त्यपरत्र चेन्मृततिथिः सैवाब्दिके मासिके ग्राह्या सा द्व्यपराह्णयोर्यदि तदा यत्राधिका सा मता । तुल्या चेदुभयापराह्णसमये पूर्वा न चेत् सङ्क्षये पूर्वैव त्रिमुहूर्त्तगास्तसमये नो चेत् परैवोचिता'' ।

तिथिविशेषकृत्ये खण्डतिथिनिशेषग्रहणं तत्तच्छब्दे उक्तं वक्ष्यते च । तिथितत्त्वादौ दृश्यम् ।

प्रतिपदादितिथिविशेषाणामुभयदिनव्याप्त्यादौ निर्णयः निर्णयसिन्धौ दर्शितो यथा

"शुक्लप्रतिपदपराह्णव्यापित्वे पूर्वा ग्राह्या युग्मवाक्यात् प्रतिपत्सम्मुखी कार्य्या या भवेदापराह्णिकीति" स्कान्दोक्तेः "शुक्ला स्यात् प्रतिपत्तिथिः प्रथमतश्चेत् सापराह्णे भवेदिति" दीपिकोक्तेश्च । अपराह्णश्च पञ्चधा भक्ते दिने चतुर्थो भागः । तदभावे सायाह्नव्या-

पिनी ग्राह्या "तदभावे तु सायाह्नव्यापिनी परिगृह्यतामिति" माधवोक्तेः कृष्णा तु परा "कृष्णा तूत्तरतोऽखिलेति" दीपिकोक्तेः कृष्णापि पूर्वैवेत्यनन्तभट्टाः ।

द्वितीया तु कृष्णा पूर्वा शुक्लोत्तरा इति हेमाद्रिः, कृष्णा द्वितीयादिमा "पूर्वाह्णे यदि सा सिता तु परतः सर्वा" इति दीपिकोक्तेः माधवानन्तभट्टमते तु सर्वापि द्वितीया परा तथा च माधवः "पूर्वेद्युरसती प्रातः परेद्युस्त्रिमुहूर्त्तगा । सा द्वितीया परोपोष्या पूर्वविद्धा ततोऽन्यथा" इति

तृतीया तु सर्वमते रम्भाव्यतिरिक्ता परैव तेन युग्मवाक्यं रम्भाव्रतविषयम् "रम्भाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम ! अन्येषु सर्वकार्य्येषु गणयुक्ता प्रशस्यत इति ब्रह्मवैवर्त्तात् गौरीव्रते तु विशेषमाह माधवः "मुहूर्त्तमात्रसत्त्वेऽपि दिने गौरीव्रतं परे । शुद्धाधिकायामप्येवं गणयोगप्रशंसनादिति" ।

चतुर्थ्यपि सर्वमते गणेशव्रतातिरिक्ता परैव युग्मवाक्यात् "एकादशी तथा षष्ठी अमावास्या चतुर्थिका । उपोष्याः परसंयुक्ताः पराः पूर्व्वेण संयुताः" इति माधवीये वृद्धवसिष्ठोक्तेश्च

नागचतुर्थी तु मध्याह्नव्यापिनी पञ्चमीयुता च ग्राह्या इति निर्णयामृते माधवीये चोक्तम् "युगं मध्यंदिने यत्र तत्रोपोष्य फणीश्वरान् । क्षीरेणाप्याय्य पञ्चम्यां पूजयेत् प्रयतो नरः । विषाणि तस्य नश्यन्ति न तान् हिंसन्ति पन्नगाः" इति माधवीये देवलोक्तेः युगं चतुर्थी । पूर्वत्र मध्याह्नव्याप्तौ पूर्वा अन्यपक्षेषु परैव पञ्चम्यां पूजोक्तेः गणेशव्रते तृतीयायुतैव चतुर्थी "चतुर्थी तु तृतीयायां महापुण्यफलप्रदा । कर्त्तव्या व्रतिभिर्वत्स ! गणनाथसुतोषिणी" इति हेमाद्रौ ब्रह्मवैवर्त्तात् । माधवीये तु गणेशव्रते "मध्याह्नव्यापिनी मुख्या" चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते । मध्याह्नव्यापिनी चेत् स्यात् परतश्चेत् परेऽहनि" इति वृहस्पतिवचनात् "प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप !" इति "तत्कालेऽभिधानाच्च तेन परदिने तथात्वे परा अन्यथा पूर्वेत्युक्तम् वस्तुतस्तु यत्र भाद्रशुक्लचतुर्थ्यादौ गणेशव्रतविशेषे मध्याह्नपूजोक्ता तद्विषयाण्येव प्रागुक्तवचनानि न तु सार्वत्रिकाणि । संकष्टचतुर्थ्यादौ बहूनां कर्मकालानां बाधापत्तेः तेन सर्वत्र गणेशव्रते पूर्वैवेति सिद्धम् । संकष्टचतुर्थी तु चन्द्रोदयव्यापिनी ग्राह्या दिनद्वये तथात्वे मातृयोगस्य सत्त्वात् पूर्वेति केचित् । अन्ये तु मुहूर्त्तत्रयादिरूपस्य तृतीयायोगस्याभावात्परदिने माधवोक्तमध्याह्नव्यापिसत्त्वात् संपूर्णत्वाच्च परेत्याचक्षते । दिनद्वये तदभावे तु परैव । गौरीव्रते तु पूर्वैव । "गणेशगौरीबहुलाव्यतिरिक्ताः प्रकीर्त्तिताः । चतुर्थ्यः पञ्चमीविद्धा देवतान्तरयोगतः" इति मदनरत्ने ब्रह्मवैवर्त्तात्

पञ्चमी तु माधवमते सर्वापि पूर्वा "चतुर्थीसंयुता कार्या पञ्चमी परया न तु । दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथा सितेति" हारीतोक्तेः हेमाद्रिमते तु कृष्णा पूर्वा सिता परा "कृष्णा पूर्वयुता सिता परयुता स्यात् पञ्चमी" इति दीपिकोक्तेः वस्तुतस्तु हारीतोक्तिरुपवासविषया "प्रतिपत्पञ्चमी चैव सावित्री भूतपूर्णिमा । नवमी दशमी चैव नोपोष्याः परसंयुताः" इति ब्रह्मवैवर्त्तात् यत्तु "पञ्चमी तु प्रकर्त्तव्या षष्ठ्या युक्ता तु नारद !" इत्यापस्तम्बीयम् तत् स्कान्दव्रतपरम् "स्कान्दोपवासे स्वीकार्या पञ्चमी परसंयुता" इति वाक्यशेषादिति माधवः तन्नागपूजाविषयमित्यनन्तभट्टनिर्णयामृतादयः । चमत्कारचिन्तामणौ च "पञ्चमी नागपूजायां कार्या षष्ठीसमन्विता । तस्यान्तु तुषिता नागा इतरा सचतुर्थिका" इति तेन नागपूजादौ परैव । यत्तु मदनरत्नदिवोदासीययोः श्रावणपञ्चम्यतिरिक्ता पूर्वेत्युक्तं "श्रावणे पञ्चमी शुक्ला संप्रोक्ता नागपञ्चमी । तां परित्यज्य पञ्चम्यश्चतुर्थीसहिता हिताः" इति संग्रहोक्तेः, "गणेशस्कन्दयोगाभ्यां क्रमाद्भागः शुभाशुभः । मित्रामित्रे तयोः पत्रे नागानामाखुबर्हिणौ" इति षट्त्रिंशन्मताच्च श्रावणपञ्चम्यतिरिक्तायाः नागपञ्चम्याश्चतुर्थीयुतत्वमुक्तं तदुपवासादिविषयम् । पत्रे वाहने ।

षष्ठी सर्वमते स्कन्दव्रतातिरिक्ता परैव युग्मवाक्यात् "नागविद्धा न कर्त्तव्या षष्ठी चैव कदाचन" इति स्कान्दाच्च निर्णयामृते "षष्ठी च सप्तमी चैव वारश्चेदंशुमालिनः । योगोऽयं पद्मको नाम सूर्य्यकोटिग्रहैः समः" ।

सप्तमी पूर्वैव युग्मवाक्यात् "षष्ठ्या युता सप्तमी च कर्त्तव्या तात ! सर्वदा" इति स्कान्दाच्च ।

अष्टमी तु सर्वमते कृष्णा पूर्वा सिता परा "व्रतमात्रेऽष्टमी कृष्णा पूर्वा शुक्लाष्टमी परा" इति माधवोक्तेः "परयुक् शुक्लाष्टमी पूर्वयुक् कृष्णा" इति दीपिकोक्तेश्च शिवशक्त्युत्सवे तु कृष्णाप्युत्तरा "पक्षद्वयेऽप्युत्तरैव शिवशक्तिमहोत्सवः" इति माधवोक्तेः दिवोदासीये भविष्ये "यदा यदा सिताष्टम्या

बुधवारो भवेत् क्वचित्। तदा तदा हि सा ग्राह्या एकभक्ताशने नृप !। सन्ध्याकाले तथा चैत्रे प्रसुप्ते च जनार्दने। बुधाष्टमी न कर्त्तव्या हन्ति पुण्यं पुरातनम्" अन्त्यं पद्यं हेमाद्रौ न धृतम्।

नवमी तु सर्वमते पूर्वा युग्मवाक्यात् "न कुर्य्यान्नवमीं तात ! दशम्या तु कदाचन" इति स्कान्दाच्च।

दशमी पूर्वा परा वेति हेमाद्रिः "कृष्णा पूर्वोत्तरा शुक्ला दशम्येवं व्यवस्थिता" इति माधवः वस्तुतस्तु शुक्ला नवमीयुतैव ग्राह्या "दशमी तु प्रकर्त्तव्या सदुर्गा द्विजसत्तम !" इत्यापस्तम्बोक्तेः यत्तु "संपूर्णा दशमी कार्य्या पूर्वया परयाऽथ वा" इत्यङ्गिरसोक्तं तन्नवमीयुक्ताऽलाभे औदयिकी ग्राह्येत्येवं नेयम्"। एकादशीनिर्णयस्तु कालमाधवीयानुसारेण एकादशीशब्दे १४८८ पृ॰ उक्तः। महाद्वादश्यादिनिर्णयः नि॰ सि॰ यथा "अथाष्टौ महाद्वादश्यः तत्र शुद्धाधिकैकादशीयुक्ता द्वादशी उन्मीलनी१ संज्ञा द्वादश्येव शुद्धाधिका वर्द्धते चेत्सा वञ्जुली२ वासरत्रयस्पर्शिनी त्रिस्पृशा३ अग्रे पर्वणः संपूर्णाधिकत्वे पक्षवर्द्धिनी४। पुष्यर्क्षयुता जया५ श्रवणयुता विजया६ पुनर्वसुयुता जयन्ती७ रोहिणीयुता पापनाशिनी८ एताः पापक्षयमुक्तिकाम उपवसेत्। अत्र मूलं हेमाद्रौ ज्ञेयम्। एकादशीद्वादश्योरैकाहे तन्त्रेणोपवासः, पार्थक्ये तु शक्तस्योपवासद्वयम् "एकादशीमुपोष्यैव द्वादशीं समुपोषयेदिति विष्णुरहस्यात् अशक्तौ तु द्वादश्यामेव "एवमेकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्। पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति" तत्रैवोक्तेः। यदा त्वल्पा द्वादशी तदोक्तं मात्स्ये "यदा भवति स्वल्पापि द्वादशी पारणादिने। उषःकाले द्वयं कुर्य्यात्प्रातर्माध्याह्निकं तदा। नारदीयेऽपि "अल्पायामथ विप्रेन्द्र ! द्वादश्यामरुणोदये। स्नानार्चनक्रियाः कार्य्या दानहोमादिसंयुताः" इति सङ्कटे तु माधवीये देवलः "सङ्कटे विषमे प्राप्ते द्वादश्यां पारयेत्कथम्। अद्भिस्तु पारणात् कुर्य्यात् पुनर्भुक्तं न दोषकृदिति"। सङ्कटे त्रयोदशीश्राद्धप्रदोषादौ। अत्र केचिदाहुः अपकर्षवाक्यान्यनाहिताग्निविषयाणि अग्निहोत्रादीनां श्रौतत्वेनापकर्षायोगादिति। द्वादश्यां च प्रथमपादमतिक्रम्य पारणं कार्य्यम् "द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः। तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः" इति निर्णयामृते मदनरत्ने च विष्णुधर्मोक्तेः। अत्र केचित् सङ्कटे यदा भूयसी द्वादशी तदापि प्रातर्मुहूर्त्तत्रये पारणं कार्य्यम् "सर्वेषामुपवासानां प्रातरेव हि पारणमिति" वचनादिति। अस्मद्गुरवस्तु बहूनां कर्म्मकालानां विना कारणं बाधापत्तेः प्रागुक्तवचनैश्च अल्पद्वादश्यामेवापकर्षविधानादपराह्ण एव कार्य्यम्। प्रातःशब्दस्तु "सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितमिति" वदपराह्णवाचित्वेऽप्युपपन्नः न च वाक्यवैयर्थ्यं पुनर्भोजनसायंपारणनिवृत्त्यर्थत्वात्तस्येत्याहुः। प्रमादेन एकादश्युपवासातिक्रमे अपरार्के वाराहे "एकादशी विलुप्ता चेद्द्वादशीपरतः स्थिता। उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदमिति" केचित्तु वैष्णवं पदमिति पठितम् अत्राविरोधिनो नियमाः सर्वव्रतेषु बोद्धव्याः। अन्ये च नवरात्रे वक्ष्यन्ते इति दिक्।

द्वादशी तु पूर्वैव युग्मवाक्यात् द्वादशी तु प्रकर्त्तव्या एकादश्या युता प्रभो !" इति स्कान्दाच्च।

त्रयोदशी तु सर्वमते शुक्ला पूर्वा, कृष्णोत्तरा "त्रयोदशीतिथिः पूर्वः सितोऽथाऽसितः पश्चादिति" दीपिकोक्तेः "शुक्ला त्रयोदशी पूर्वा परा कृष्णा त्रयोदशीति" माधवीयाच्च

चतुर्दशी सर्वमते कृष्णा पूर्वा, शुक्लोत्तरा, उपवासे तु द्वयपि परेति मदनरत्ने।

पौर्णमास्यमावास्ये तु सावित्रीव्रतं विना परे ग्राह्ये "भूतविद्धे न कर्त्तव्ये दर्शपूर्णे कदाचन। वर्जयित्वा मुनिश्रेष्ठ ! सावित्रीव्रतमुत्तममिति" ब्रह्मवैवर्त्तात् "अमायां योगविशेषमाहाऽपरार्के शातातपः "अमावस्यां भवेद्वारो यदा भूमिसुतस्य वै। जाह्नवीस्नानमात्रेण गोसहस्रफलं लभेत्"।

"अमा वै सोमवारेण रविवारेण सप्तमी। चतुर्थी भौमवारेण विषुवत्सदृशं फलम्" तत्रैव व्यासः "सिनीवाली कुहूर्वापि यदि सोमदिने भवेत्। गोसहस्रफलं दद्यात् स्नानं वै मौनिना कृतम्"। हेमाद्रौ बृहन्मनुः "श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तके। यद्यमा रविवारेण व्यतीपातः स उच्यते"। नागदैवतम् अश्लेषा मस्तको मृगशिरः। प्रथमपाद इत्यन्ये स च सर्वेषाम्"।

सर्वतिथिषु वर्ज्यान्याह मुहूर्त्तदीपिकायाम् "कुष्माण्डं बृहतीफलानि लवणं वर्ज्यं तिलाम्लं तथा तैलं चामलकं दिवं प्रवसता शीर्षं कपालान्त्रकम्। निष्पावांश्च मसूरिकान् फलमथो वृन्ताकसंज्ञं मधु द्यूतं स्त्रीगमनं क्रमात् प्रतिपदादिष्वेवमाषोड़शात्" "शीर्षं नारिकेलम्, कपालम् अलाबु, अन्त्रं पटोलकम्" भूपालः "कुष्माण्ड

वृहतीक्षारं मूलकं पनसं फलम्। धात्री शिरः कपालान्त्र नखचर्मतिलानि च। क्षुरकर्माङ्गनासेवां प्रतिपत्प्रभृति त्यजेत्। नखं शिम्बी चर्म मसूरिका प्रतिपदादितिथिषु कुष्माण्डादिभक्षणफलं चोक्तं तिथितत्त्वे स्मृत्या यथा

“कुष्माण्डे चार्थहानिः स्याद्वृहत्यां न स्मरेद्धरिम्। बहुशत्रुः पटोले स्याद्धनहानिस्तु मूलके। कलङ्की जायते विल्वे तिर्य्यग्योनिश्च निम्बके। ताले शरीरनाशः स्यात् नारिकेले च मूर्खता। तुम्बी गोमांसतुल्या स्यात् कलम्बी गोवधात्मिका। शिम्बी पापकरी प्रोक्ता पूतिका ब्रह्मघातिका। वार्त्ताकौ सुतहानिः स्यात् चिररोगी च माषके। महापापकरं मांसं प्रतिपदादिषु वर्जयेत्”।

प्रसङ्गात्तिथिसाधनप्रकारः सि॰ शि॰ उक्तो दर्श्यते यथा “रवि १२ रसै ६र्विरवीन्दुलवाद्धृताः फलमितास्तिथयः करणानि च। क्रुरहृतानि च तानि बवादितः शकुनितोऽसितभूतदलादनु। ग्रहकलाः सरवीन्दुकला हृताः खखगजै ८०० र्भयोगमितिः क्रमात्। अथ हृता स्वगतैष्यविलिप्तिकाः स्वगतिभिश्च गतागतनाड़िकाः” मू॰। “व्यर्केन्दोर्भागा द्विष्ठाः। एकत्र रवि१२भिर्भाज्यास्तत्र फलं गतास्तिथयः। अन्यत्र रसै६र्भाज्याः। फलं गतकरणानि। तानि त्र्येकोनानि बवादितो भवन्ति। कृष्णचतुर्दश्यर्द्धादुपरि यान्यवशिष्यन्ते त्रीणि चतुर्थं प्रतिपत्प्रथमार्धे च। एतानि चत्वारि शकुनितः। शकुनिचतुष्पादनागकिन्तु(किंस्तु)घ्नानीति शेषः। यस्य ग्रहस्य नक्षत्रं ज्ञातुमिष्यते तस्य कलाः कार्य्याः। तथा चन्द्रार्कयोगस्य कलाः कार्य्याः। उभयत्र शताष्टकेन ८०० हृते प्रथमस्थाने गतभानि द्वितीयस्थाने गतयोगाः। अथ यान्यवशिष्टानि तानि गतानि। तानि स्वस्वहराच्च्युतानि गम्यानि स्युः। तेषां गतानां सम्बन्धिन्यो विकलाः स्वस्वगतिभिर्भाज्याः। यल्लभ्यते ता गतघटिका भवन्ति। यदेष्याणां विकला भक्तास्तदैष्या घटिका भवन्ति। अत्रोपपत्तिः। यदि व्यर्केन्दोश्चक्रांशै ३६० स्त्रिंशत् तिथयो लभ्यन्ते तदैभिः किमिति। अत्र त्रिंशतापवर्त्तिते हरे जातो द्वादश हरः। अथ यदि चक्रांशैः ३६० षष्टिः ६० करणानि लभ्यन्ते तदैभिः किमिति। अत्रापि षष्ट्यापवर्त्तिते जातो हरः षण्मितः। अथ यदि चक्रकलाभिः २१६०० सप्तविंशतिर्भानि लभ्यन्ते योगा वा तदैभिः किमिति। अत्रापि सप्तविंशत्यापवर्त्तने कृते जातोऽष्टशती हर उभयत्र। अथ घटीकरणार्थमनुपातः। यदि गतिकलाभिः षष्टिघटिका लभ्यन्ते तदा गतैष्याभिः कलाभिः किमिति फलं गतैष्या घटिकाः। अथ कलाः षष्ट्या गुणिता विकलाः स्युरित्यतः उक्तम् अथ हृताः स्वगतैष्यविलिप्तिका इति सर्वमुपपन्नम्” प्रमि॰।

सू॰ सि॰ तिथ्याद्यानयनप्रकार उक्तो यथा

“भभोगोऽष्टशतीलिप्ताः खाश्विशैलास्तथा तिथेः। ग्रहलिप्ता भभोगाप्ता भानि भुक्त्या दिनादिकम्” सू॰ सि॰। “अष्टशतमिताः कला नक्षत्रभोगः। प्रसङ्गात् तिथिभोगमाह। खाश्विशैला इति। तिथेः विंशत्यधिकसप्तशतमिताः ७२० कलास्तथा भोग इत्यर्थः। यस्य ग्रहस्य नक्षत्रज्ञानमिष्टं तस्य ग्रहस्य राशयस्त्रिंशद्गुणा भांशा योज्यास्ते षष्टिगुणिताः कला योज्या इति परिभाषया कला नक्षत्रभोगभक्ताः फलं ग्रहस्य गतनक्षत्राणि शेषं वर्त्तमाननक्षत्रस्य गतकलास्तस्मात् तस्य गतदिनाद्यानयनमाह भुक्त्येति। ग्रहस्य कलात्मिकया गत्या शेषाद्दिनादिकं गतं भागहरणेन साध्यमेवं शेषोनाद्भोगाद्गतिकला भागेनैष्यदिनादिकं साध्यम्। अत्रोपपत्तिः। भचक्रभोगेन सप्तविंशतिनक्षत्राण्यश्विन्यादीनि ग्रहो भुनक्त्यतः सप्तविंशतिनक्षत्राणां चक्रकलाः षट्शतयुतैकविंशतिसहस्रमिता २१६०० भोगस्तदैकनक्षत्रस्य क इत्यनुपातेनाष्टशतकलाभोगः। एवं तिथेश्चान्द्रमासत्रिंशांशाच्चान्द्रमासस्य सूर्य्यचन्द्रान्तरैकभगणसिद्धत्वाच्च। त्रिंशत्तिथीनां चक्रकलाभोगस्तदैकतिथेः क इत्यनुपातेन विंशत्यधिकसप्तशतकलाभोगः ७२०। यद्यष्टशतकलाभिरेकं नक्षत्रं तदा ग्रहकलाभिः किमित्यनुपातेन फलमश्विन्यादीनि ग्रहभुक्तानि शेषकला ग्रहाधिष्ठितनक्षत्रस्य गतं भोगाद्धीनं तदैष्यम्। यदि ग्रहगत्यैकं दिनं तदाभीष्टकलाभिः किमित्यनुपातेन तस्य गतैष्यदिवसाद्यं भवति। एवं चन्द्राद्दिननक्षत्रं ज्ञेयम्” रङ्गना॰। “रवीन्दुयोगलिप्ताभ्यो योगा भभोगभाजिताः। गता गम्याश्च षष्टिघ्ना भुक्तियोगाप्तनाड़िकाः” सू॰ सि॰ “सूर्य्यचन्द्रयोगस्य राश्यादिकस्य परिभाषया याः कलास्ताभ्यो योगा विष्कम्भादयो भभोगभाजिता भभोगेन पूर्वोक्तेन विभक्ता भवन्ति। एकैकयोगस्य भभोगमितो भोगः स प्रत्येकं ताभ्योऽपनीय यन्मिताः शुद्धास्तन्मिता योगा गताः। यस्य भोगो

न युज्यते स वर्त्तमान इत्यर्थः। कला भभोगभक्ता गता योगास्तदग्रिमो वर्त्तमान इति तात्पर्य्यम्। तस्य शेषं गतं भोगात् पतितशेषं ताभ्यां घटिकाद्यानयनमाह। गता इति। गता एष्याः। चः समुच्चये। कलाः षष्टिगुणिताः कार्य्यास्ताभ्यो भुक्तियोगाप्तनाड़िका रविचन्द्रकलात्मकगत्योर्योगेन भजनाल्लब्धा घटिका गतैष्या भवन्ति। अत्रोपपत्तिः। सूर्य्यचन्द्रयोगमितस्य ग्रहस्य नक्षत्राणि विष्कम्भादिसंज्ञानि योगोत्पन्नत्वाद्योगा अतस्तदानयनं पूर्वोक्तवत्। अतएव सूर्य्यचन्द्रगतियोगतुल्यतद्गत्या षष्टिसावनघटिकास्तदा गतैष्या कलाभिः का इत्यनुपातेन गतैष्यघटिकानयनं युक्तमुक्तम्" रङ्गना०। "अर्कोनचन्द्रलिप्ताभ्यस्तिथयो भोगभाजिताः। गता गम्याश्च षष्टिघ्ना नाड्यो भुक्त्यन्तरोद्धृताः" सू० सि०। "पूर्वार्धव्याख्यानं पूर्वश्लोकपूर्वार्द्धरीत्या ज्ञेयमुत्तरार्द्धं स्पष्टम्। अत्रोपपत्तिः। "तिथिभोगकलाभिरेका तिथिस्तदा सूर्य्योनचन्द्रकलाभिः का इत्यनुपातेन फलं गततिथयो वर्त्तमानतिथेर्गतैष्ये शेषशेषोनभोगकले ताभ्यां गत्यन्तरकलाभिरनुपातेन गतैष्यघटिकाः पूर्ववत्" रङ्गना०।

कल्पे तिथिमानमुक्तं सि० शि० यथा

"विधिदिने दिनकृद्दिवसाः करेन्द्रियशरेषुभवोऽर्वुद संगुणाः। नयनवाङ्ककराभ्ररसेन्दवः प्रयुतसंगुणिता विधुवासराः" १६०२९९९०००००००। अत्रोपपत्तिः, रविवर्षाणि दिनीकृतानीति सुगमम्। चन्द्रार्कयोर्यावन्तः कल्पे योगास्तावन्तः किल शशिमासाः। ते तु योगा भगणान्तरतुल्याः स्युः। उभयोरपि प्राग्गमनात्। अतो भगणान्तरतुल्याः शशिमासा भवन्ति। ते त्रिंशद्गुणाः शशिदिवसा भवन्तीत्युपपन्नम्।

युगे तिथिसंख्या सू० सि० उक्ता यथा।

युग इत्युपक्रमे चान्द्रदिनप्रमाणमाह

"चान्द्राः खाष्टखखव्योमखाग्निखर्तुनिशाकराः" सू० सि०। "अष्टाश्विगजसप्तभूगोनगसप्तपञ्चभूमिता युगे सूर्य्यसावनदिवनाः। चान्द्रा दिवसा युगतिथय इत्यर्थः। अशीतिशून्यचतुष्कत्रिखनृपा एते त्रिंशद्भक्ताश्चान्द्रमासा उक्तप्रायाः। अनेनैव चान्द्रदिवसानामुपपत्तिः सूर्य्यचन्द्रयोर्भगणयोरन्तररूपचान्द्रमासास्त्रिंशद्गुणिता इति स्पष्टीकृताः" रङ्गना०।

तिथिभेदे देवभेदपूजा पीयू० धा० धृतवाक्येनोक्ता यथा तत्र नारदः "यद्दिनं यस्य देवस्य तद्दिने तस्य संस्थितिः" अग्निपुराणेऽपि "प्रतिपद्यग्निपूजा स्यात् द्वितीयायाश्च वेधसः। दशम्यामन्तकस्यापि षष्ठ्यां पूजा गुहस्य च। चतुर्थ्यां गणनाथस्य गौर्य्यास्तत्पूर्ववासरे। सरस्वत्या नवम्याश्च। सप्तम्यां भास्करस्य च अष्टम्याश्च चतुर्द्दश्यामेकादश्यां शिवस्य च। द्वादश्याश्च त्रयोदश्यां हरेश्च मदनस्य च। शेषादीनां फणीशानां पञ्चम्यां पूजनं भवेत्। पर्वणीन्दोस्तिथिष्वासु पक्षद्वयगतास्वपीति"।

पञ्चदशसंख्यायां सू० सि० उदा०।

स्त्रीत्वे "वैशाखिकीं तिथिं दृष्टास्तत्क्षणं हरबन्धुना" कुमा०। पुंस्त्वे "निखिलान् निशि पूर्णिमा तिथीनुपतस्थेऽतिथिरेकिका तिथिः" नैष०।

तिथिकृत्य न० ७त०। तिथिविहिते कार्य्ये "तिथिकृत्ये च कृष्णादिर्न ते शुक्लादिरेव च। विवाहादौ स्मृतः सौरः शेषेषु सावनो मतः" मल० त०। तिथिविशेषे कृत्यानि च तिथितत्त्वे कालमाधवीयनिर्णयसिन्धुप्रभृतिनिबन्धेषु दृश्यानि।

तिथिभेदेषु कृत्याकृत्यानि पी० धा० वसिष्ठोक्तानि यथा "नोद्वाहयात्रोपनयप्रतिष्ठासीमन्तचौलाखिलवास्तुकर्म्म। गृहप्रवेशाखिलमङ्गलाद्यं कार्य्यं हि मासाद्यतिथौ कदाचित्"। मासाद्यतिथौ शुक्लपक्षप्रतिपदि अतएव कृष्णपक्षप्रतिपद्येतानि कर्म्माणि सुखेन भवन्तीत्यर्थः। यद्येषोऽभिप्रायोऽसम्मतः स्यात्तदा पक्षाद्यतिथावितिब्रूयात्। "सप्ताङ्गचिह्नानि नृपस्य वास्तुव्रतप्रतिष्ठाखिलमङ्गलानि। यात्राविवाहाखिलभूषणाद्यं कार्य्यं द्वितीयादिवसे सदैव। सङ्गीतविद्याखिलशिल्पकर्म्मसीमन्तचौलान्नगृहप्रवेशम्। कार्य्यं द्वितीयादिवसे यदुक्तं सदा तृतीयादिवसेऽपि कार्य्यम्। रिक्तासु विद्युद्वधबन्धशस्त्रविषाग्निघातादि च याति सिद्धिम्। यन्मङ्गलन्तासु कृतं विमूढैर्विनाशमायाति तदाशु नूनम्"। रिक्तासु चतुर्थीनवमीचतुर्दशीषु ४।९।१४। "शुभानि कार्य्याणि चरस्थिराणि चोक्तान्यनुक्तान्यपि यानि तानि। सिद्धिं प्रयान्त्याशु ऋणप्रदानं विनाशदं नागतिथौ विधेयम्। अभ्यङ्गयात्रापितृकर्म्म दन्तकाष्ठं विना पौष्टिकमङ्गलानि। षष्ठ्यां विधेयानि रणोपयोग्यशिल्पानि वस्त्राम्बरभूषणानि। तानि द्वितीयायां तृतीयायां पञ्चम्यां कथितान्यपि। सिध्यन्ति कार्य्याणि सप्तम्यां निखिलान्यपि। संग्रामयोग्याखिलवास्तुशिल्पनृपप्रमोदाखिललेखनानि स्त्रीरत्न

कार्य्याखिलभूषणानि कार्य्याणि कार्य्याणि महेशतिथ्याम्। द्वितीयायां तृतीयायां पञ्चम्यां सप्तमीतिथौ। उक्तानि यानि सिध्यन्ति दशम्यां तानि सर्व्वदा। व्रतोपवासाऽखिलधर्म्मकृत्यं सुरोत्सवाद्याऽखिलवास्तुकर्म्म। संग्रामयोग्याखिलवास्तुकर्म्म विश्वे तिथौ सिध्यति शिल्पकर्म्म। पृथिव्यां यानि कर्म्माणि धर्म्मपुष्टिः शुभानि च। चरस्थिराणि द्वादश्यां यात्रां नवगृहं विना। विधातृगौरीभुजगभान्वन्तकदिनेषु च। उक्तानि तानि सिध्यन्ति त्रयोदश्यां विशेषतः। यज्ञक्रियापौष्टिकमङ्गलानि संग्रामयोग्याखिलवास्तुकर्म्म। उद्वाहशिल्पाऽखिलभूषणाद्यं कार्य्यं प्रतिष्ठा खलु पौर्णमास्याम्। सदैव दर्शे पितृकर्म्म कृत्वा नान्यद्विधेयं शुभपौष्टिकाद्यम्। मूढैः कृतं तत्र शुभोत्सवाद्यं विनाशमायात्यचिराद्ध्रुवं तत्" पी॰धा॰ वसिष्ठवचनम्।

तिथिक्षय पु॰ तिथीनां तिथ्युपलक्षितचन्द्रकलानां क्षयः क्षयारम्भो यस्मिन्। दर्शे अमावास्यायाम् शब्दार्थकल्प॰। ६ त॰। तिथीनां नाशे क्षये क्षयशब्दे ४२१ पृ॰ दृश्यम् दिनक्षयादयोऽप्यत्र। "कौर्मे पाद्मेऽपि "द्वौ तिथ्यन्तावेकवारे यत्र स स्याद्दिनक्षयः" वशिष्ठः "एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा। तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलम्"। साहस्रिकं फलमिति माङ्गल्येतरवैदिककर्मपरम्। "अधिमासे दिनपाते धनुषि रवौ भानुलङ्घिते मासि। चक्रिणि सुप्ते कुर्य्यान्नो माङ्गल्यं विवाहञ्च" इति भीमपराक्रमात् दिनपाते दिनक्षये रघु॰ तिथिक्षयानयनञ्च सू॰ सि॰ उक्तं यथा "सावनाहानि चान्द्रेभ्यो द्युभ्यः प्रोज्झ्य तिथिक्षयाः" सू॰ सि॰। "चान्द्रेभ्यो द्युभ्यो वक्ष्यमाणचान्द्रदिवसेभ्यः सकाशादित्यर्थः। तिथिषु चान्द्रदिनेषु सावनदिनानामवशेषतुल्यः क्षयो न्यूनत्वम्। यद्वा तिथिशब्देन सावनो दिवसस्तस्य चान्द्रदिवसात् क्षय इति स्वरूपमेव वक्ष्यमाणोपयोगात् परिभाषितम्" रङ्गना॰। युगे तत्संख्या सू॰ सि॰ उक्ता यथा युग इत्युपक्रमे "तिथिक्षया यमार्थाश्विद्व्यष्टव्योमशराश्विनः" १५०८२१५२ एतन्मिता इत्यर्थः।

तिथिपति पु॰ तिथिविशेषाणां पतयः। तिथीनामधिपतौ स च सु॰ चि॰ उक्तो यथा "तिथीशा वह्निकौ गौरी गणेशोऽहिर्गुहोरविः। शिवो दुर्गान्तको विश्वे हरिः कामः शिवः शशी" सु॰ चि॰ एतन्मूलं पीयूषधारायां धृतवसिष्ठवचनं यथा "वह्निर्विधाताद्रिसुता गणेशः सर्पो विशाखोऽदितिजो महेशः। दुर्गा यमो विश्वहरिश्च कामः शर्वो निशेशश्च पुराणदृष्टाः इति स्वामिन इति शेषः"। तिथिपतयश्च वृ॰ सं॰ ९९ अ॰ अन्यथोक्ता यथा "कमलजविधातृहरियमशशाङ्कषड्वक्त्रशक्रवसुभुजगाः। धर्म्मेशसवितृमन्मथकलयो विश्वे च तिथिपतयः। पितरोऽमावास्यायां संज्ञासदृशाश्च तैः क्रियाः कार्य्याः। नन्दा भद्रा जया रिक्ता पूर्णा च तास्त्रिविधाः। यत्र कार्य्यं नक्षत्रे तद्दैवत्यासु तिथिषु तत्कार्य्यम्"। वसिष्ठवराहवचनाभ्यामुक्तदेवानां तत्तिथिषु पूजेति न विरोधः।

तिथिप्रणी पु॰ तिथिं प्रणयति प्र+नी—क्विप्। चन्द्रे त्रिका॰

तिथियुग्म न॰ तिथ्योस्तिथिविशेषयोर्युग्मम्। द्वितीयादितिथिसप्तकयोगरूपे युग्मे तानि च सप्त युग्मानि निगमे उक्तानि यथा "युग्माग्नियुगभूतानां षण्मुन्योर्वसुरन्ध्रयोः। रुद्रेण द्वादशीयुक्ता चतुर्दश्या च पूर्णिमा। प्रतिपदाप्यमावास्या तिथ्योर्युग्मं महाफलम्। एतद्व्यस्तं महादोषं हन्ति पुण्यं पुराकृतमिति"। युग्मं द्वितीया। अग्निस्तृतीया। युगं चतुर्थी। भूतं पञ्चमी। षड् षष्ठी। मुनिः सप्तमी। वसुरष्टमी। रन्ध्रं नवमी। रुद्र एकादशी। अत्र युग्माग्न्यादिषु सप्तसु युग्मेषु पूर्वतिथिरुत्तरविद्धा ग्राह्या उत्तरा तु पूर्वविद्धेत्युक्तं भवति। वेधश्चात्र त्रिमूर्त्तयोरेव तदुक्तं कालमा॰ "अत्र तिथीनां वेधः पैठीनसिना दर्शितः। "पक्षद्वयेऽपि तिथयस्तिथिं पूर्वां तथोत्तराम्। त्रिभिर्मुहूर्त्तैर्विध्यन्ति सामान्योऽयं विधिः स्मृतः" इति पूर्वेद्युरुदयानन्तरममावास्या त्रिमुहूर्त्ता चेत् सा प्रतिपदं विध्यति। परेद्युरस्तमयात् प्राक् द्वितीया त्रिमुहूर्त्ता चेत् सापि पूर्वां प्रतिपदं विध्यति त्रिमुहूर्त्तव्याप्तिः स्कन्दपुराणे दर्शिता। "यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीप्रियः। सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्त्ता च या भवेदिति"। शिवरहस्यसौरपुराणयोरपि "या प्राप्यास्तमुपैत्यर्कः सा चेत् स्यात् त्रिमुहूर्त्तिका। धर्म्मकृत्येषु सर्व्वेषु संपूर्णां तां विदुर्बुधाः" इति। वृद्धवसिष्ठोऽपि "यस्यां तिथावस्तमियात् सूर्य्यस्तु त्रिमुहूर्त्तकैः। यागदानजपादिभ्यस्तामेवोपक्रमेत्तिथिमिति"। एवं पैठीनस्यादिवाक्ये त्रिमुहूर्त्तत्वे नैव वेधस्थितेः वङ्गानां योगमात्रेणैव वेधोक्तिः साहसमात्रम्। वेधकतिथेस्त्रिमुहूर्त्तत्वेऽपि विद्धतिथेस्तु हूर्त्ता-

दिव्यापित्वेऽपि ग्राह्यता कालमाधवीये निर्णीता यथा । "देवलः "यां तिथिं समनुप्राप्य उदयं याति भास्करः । सा तिथिः सकला ज्ञेया स्नानदानजपादिष्विति" । व्यासोऽपि "उदयन्नेव सविता यां तिथिं प्रतिपद्यते । सा तिथिः सकला ज्ञेया दानाध्ययनकर्मस्विति" । भविष्योत्तरपुराणेऽपि "व्रतोपवासनियमे घटिकैका यदा भवेत् । सा तिथिः सकला ज्ञेया पित्र्यर्थे चाऽपराह्णिकीति" पद्मपुराणेऽपि "व्रतोपवासनियमे घटिकैका यदा भवेत् । उदये सा तिथिस्तत्र विपरीता तु पैतृके" इति स्कन्दपुराणेऽपि "व्रतोपवासस्नानादौ घटिकैका यदा भवेत् । उदये सा तिथिर्ग्राह्या विपरीता तु पैतृके" इति विष्णुधर्मोत्तरेऽपि "व्रतोपवासस्नानादौ घटिकैका यदा भवेत् । उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनीति" बौधायनोऽपि "आदित्योदयवेलायां याल्पापि च तिथिर्भवेत् । पूर्णा इत्येव मन्तव्या प्रभूता नोदयं विनेति" नन्वस्त्वेवं कृत्स्नदिवसाभ्यनुज्ञा तथाप्युत्तरविद्धायास्तिथेर्ग्रहणे कियत्परिमाणमुदये अपेक्षणीयमिति विवेचनीयम् । तत्र बौधायनेनाल्पापीत्यभिधानात् निमेषमात्रं प्रतिभाति तथा व्यासवाक्येऽपि प्रतिभाति "उदयन्नेवे"त्यभिधानात् । भविष्योत्तरपुराणादिवचनेषु घटिकामात्रं प्रतीयते । वचनान्तरे तु विष्णुधर्मोत्तरबौधायनप्रोक्ते घटिकाचतुष्टयं भासते । तथा च पठ्यते "उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ । द्विमुहूर्त्तं त्रिरह्नश्च सा तिथिर्हव्यकव्ययोरिति" । अस्यार्थः । भानावुदिते सत्युत्तरकालेऽह्नो मुहूर्त्तद्वयं दैवतम् । तस्मिंश्चास्तमिते ततः पूर्वकालीनमह्नो मुहूर्त्तत्रयं पितृदैवत्यम् । अतस्तावत्कालव्यापिनी या तिथिर्भवति सैव क्रमेण हव्यकव्ययोर्ग्राह्या । अत्रोच्यते । पौर्वाह्णिकी इति वचनेन दैवे पूर्वाह्णव्याप्त्यभिधानात् । पूर्वाह्णस्य पञ्चधा विभक्तस्य मुख्यत्वादुदिते भानौ त्रिमुहूर्त्ता तिथिर्ग्रहीतव्या । यत्तु दक्षेणोक्तम् । त्रिमुहूर्त्ता न कर्त्तव्या सा तिथिः क्षयगामिनी "द्विमुहूर्त्तापि कर्त्तव्या या तिथिर्वृद्धिगामिनीति" । तच्च त्रिमुहूर्त्तव्याप्तेर्बाधकं प्रत्युतोपोद्बलकमेव । तथा हि प्रतिषेधः सर्वत्र प्रसक्तिपूर्वकः प्रसक्तिश्चात्र यथोक्तरीत्या पौर्वाह्णिकवाक्यात् त्रिमुहूर्त्तविधायिपैठीनसिवाक्याद्वा भवति । तच्च प्रसक्तं त्रिमुहूर्त्तत्वं समतिथौ बाधकाभावात्तथैव व्यवतिष्ठते । तिथिक्षये त्वधिकव्याप्तिविधित्सया प्रतिषिध्यते । अतस्तत्र चतुर्थमुहूर्त्तस्पर्शिनी तिथिर्ग्राह्या । तिथिसाम्यवृद्ध्योर्द्वयोरपि मुहूर्त्तत्रयमेव मुख्यम् । मुहूर्त्तद्वयं त्वनुकल्पः । अतएव सूचयितुं द्विमुहूर्त्तापीत्यपिशब्दः पठ्यते ।" अत्राप्येकमुहूर्त्तव्याप्तिर्निकृष्टेत्यर्थसिद्धम्

"द्वितीयादिकयुग्मानां पूज्यता नियमादिषु" व्यासः । अत्र प्रतिप्रसवः । "भगवत्याः प्रवेशादिविसर्गान्ताश्च याः क्रियाः । रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता" । "युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया । रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता" ति० त० ।

तिथिसन्धि पु० तिथ्योः सन्धिः । तिथ्योः पूर्वापरयोः सन्धौ तन्मानानयनं सि० शि० यथा "शशितनुविकलाभ्यश्चन्द्रभुक्त्येन्दुभान्वोर्गतिविवरकलाभिर्भूय एताभिरेव । पृथगथ गतियुत्या नाड़िका सन्धिराप्ता तिथिकरणयोगानां फलं तत्र मिश्रम्"।

एवं शशिबिम्बकलाभ्यो या घटिका उत्पद्यन्ते ता भतिथिकरणयोगानां सन्धिघटिकाः स्युः । सन्धौ मिश्रफलमित्यर्थः । अत्र सन्धिरुभयतोऽपि बिम्बस्य स्थितत्वात् । उपपत्तिरप्यत्र सुगमा" । प्रमिता०

तिथ्यर्द्ध न०६त० । करणे । करणशब्दे १६८० पृ० दृश्यम् ।

तिनाशक पु० तिनिश+पृषो० । तिनिशवृक्षे शब्दरत्ना० ।

तिनिश पु० अतिशयेन नेशति अति+निश–क पृषो० अतेरकारलोपः । (सादन) ख्याते वृक्षे अमरः । "तिनिशः श्लेष्मपित्तास्रमेदःकुष्ठप्रमेहजित् । तुवरः श्वित्रदाहघ्नो व्रणपाण्डुकृमिप्रणुत्" भावप्र० । [२दैत्यभेदे पु० हेमच० ।

तिन्तिड़ पु० तिन्तिड़ी+पृषो० । १वृक्षाम्ले (तेँतुल) विश्वः

तिन्तिड़ी स्त्री तिन्तिड़ीक+पृषो० । (तेंतुल) वृक्षभेदे राजनि० स्वार्थे क । तिन्तिड़िका तत्रार्थे शब्दरत्ना० । "अम्लिका चुक्रिकाम्ली च चुक्रा दन्तशठापि च । अम्ला च विचिका चिञ्चा तिन्तिड़ीका च तिन्तिड़ी । अम्लिकाऽम्ला गुरुर्वातहरी पित्तकफास्रकृत् । पक्वा तु दीपनी रूक्षा सरोष्णा कफवातनुत्" भावप्र० । "अम्लिकायाः फलं पक्वं मर्दितं वारिणा दृढम् । शर्करा मरिचोन्मिश्रं लवङ्गेन्दुसुवासितम् । अम्लिकाफलसंभूतं पानकं वातनाशनम् । पित्तश्लेष्मकरं किञ्चित् सुरुच्यं वह्निबोधकम्" भावप्र० । [अमरः ।

तिन्तिड़ीक पु० तिम–ईक अनीका० नि०। (तेँतुल)वृक्षभेदे

तिन्तिड़ीद्यूत न० तिन्तिड्या तद्बीजेन द्यूतम्। तिन्तिड़ीवीजेन क्रीड़ने (काँइवीजेरखेला) त्रिका०।

तिन्तिड़ि(लि)का स्त्री तिन्तिड़ी+स्वार्थे क ह्रस्वः वा डस्य लः। (तेँतुल) तिन्तिड्याम् शब्दमा०। काभावे तिन्तिलीत्यप्यत्र।

तिन्दिश पु० ढिण्डिशवृक्षे (ढाँड़श) राजनि०।

तिन्दु पु० तिज–कु–मृगय्वादि० नि०। (तेँदु)१ख्याते वृक्षे संज्ञायां कन्। तिन्दुक (गाव)इति ख्याते २वृक्षे पुंस्त्री शब्दरत्ना०। स्त्रीत्वे गौ०ङीष्। ३कर्षमाणे वैद्यकपरिभाषा पुंन०। "स्वादाम्लं तिन्दुकं ग्राहि वातलं शीतलं लघु। पक्वं पित्तप्रमेहास्रश्लेष्मघ्नं मधुरं गुरु। तत्सारं तु भवेद् हृद्यं कर्षुलं चिररोगजित्। विश्वतिन्दुकमप्येवं विशेषात् ग्राहि शीतलम्" राजनि०।

तिन्दुकि स्त्री तिन्दुकी+पृषो० ह्रस्वः। तिन्दुके वृक्षे शब्दर०

तिन्दुकिनी स्त्री तिन्दुकस्तदाकारः फलेऽस्त्यस्याः इनि ङीप्। आवर्त्तक्याम् राजनि० ८२८ दृश्यम्।

तिन्दुल पु०तिन्दुक+पृषो० कस्य लः। तिन्दुकवृक्षे शब्दर०

तिप रक्षणे भ्वा० आत्म० सक०सेट्। तेपते अतेपिष्ट अतिप्त। तितेपे। ऋदित् अतितेपत्-त।

तिम आर्द्रीभावे भ्वा० पर० अक० सेट्। तेमति अतेमीत्। तितेम।

तिम आर्द्रीकरणे दिवा०पर० सक० सेट्। तिम्यति अतेमीत्। तितेम। "वानरान् तिम्यतोऽवलोक्य" हितो० "तिमितास्वाभवन् सर्वे तत्र ते हरियूथपाः" रामा० सुन्द० १ स०। "नद्यश्च तिमितोदकाः" रामा० अर० ५४स०। तेमनम्।

तिमि पु० तिम–इन्–तम–इन्–इश्च वा। १समुद्रे त्रिका०। तद्भवे २मत्स्यभेदे पुंस्त्री० स्त्रियां वा ङीप्। "अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तृतः" भरतधृतवाक्यम्। "अस्ति मत्स्यस्तिमिर्नाम तथा चास्ति तिमिङ्गिलः। तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति लक्ष्मणः" शब्दार्थचि०धृतरामा० वाक्यम्। "अमी शिरोभिस्तिमयः सरन्ध्रैरूर्द्ध्वं वितन्वन्ति जलप्रवाहान्" रघुः। "अत्र नानाविधाकारास्तिमयोनैकरूपिणः" भा० उ० ९८ अ०। शब्दकल्पद्रुमेऽस्य स्त्रीत्वोक्तिः प्रामादिकी अमी तिमय इति नैकरूपिण इति पुंस्त्वेव प्रयोगात् कृदिकारान्तत्वात् वा स्त्रियां ङीप्। २तज्जातिस्त्रियां स्त्री भेदः।

तिमिकोष पु० तिमेः कोष इव। समुद्रे त्रिका०।

तिमिङ्गिल पु० गिरति–गॄ–मूलवि० क रस्य लः "गिलेऽगिलस्य" पा०मुम्। महामत्स्यभेदे। तिमिशब्दे उदा०दृश्यम्। "तिमिङ्गिलाः कच्छपाश्च तथा तिमितिमिङ्गिलाः" भा०व० १९६ अ०।

तिमिङ्गिलगिल पु० तिमिङ्गिलं गिलति गॄ–मूल० क रस्य लः अगिलस्येति पर्य्युदासात् न मुम्। अतिवृहन्मत्स्यभेदे तिमिशब्दे उदा०।

तिमिङ्गिलाशन पु०तिमिङ्गिलो मत्स्यः अश्यते यत्र अश–आधारे ल्युट्। दक्षिणस्थे देशभेदे "बलदेवपट्टनं दण्डकावनतिमिङ्गिलाशनाभद्राः" वृ०स० १४अ० कूर्मविभागे दक्षिणस्यदेशोक्तौ। सोऽभिजनोऽस्य तस्य राजा वा अण्। तस्य बहुषु लुक्। २तद्देशवासिषु ३तन्नृपेषु च ब० व०। एकवचने तु तैमिङ्गिलाशन इति भेदः।

तिमिज न० तिमितो जायते जन–ड ५त०। मुक्ताभेदे "तिमिजं मत्स्याक्षिनिभं वृहत्पवित्रं बहुगुणञ्च" वृ०स० ८१ अ०। मुक्ताभेदकथने।

तिमित त्रि० तिम–कर्त्तरि क्त। १निश्चले, धरणी। २क्लिन्ने (भिजे) अमरः। "ह्रद इव तिमिनागसंवृतः स्तिमितजलोर्मिणिशङ्खशर्करः" रामा० अयो० ८१ स०।

तिमिर पुंन०तिम–किरच् अर्द्धर्चा०। १अन्धकारे २नेत्ररोगभेदे च। "तिमिराख्यः स वै दोषश्चतुर्थपटलं गतः। रुणद्धि सर्वतो दृष्टिं लिङ्गनाशमतःपरम्" माधवः अक्षिपटलशब्दे ४२पृ० दृश्यम्। "सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः"। "पतिते घनतिमिरमुषि" माघः।

तिमिरनुद् पु० तिमिरं नुदति खण्डयति नुद–क्विप् ६त०। सूर्य्ये "तिमिरनुदो मण्डलं यदि स लेहः" वृ०स०५अ०। तिमिरभिदादयोऽप्यत्र। २अन्धकारनाशके त्रि०।

तिमिररिपु पु० ६त०। १सूर्य्ये हला०। तिमिरारिप्रभृतयोऽप्यत्र "तिमिरारिस्तमोहन्ति प्रातःस्ववधभीरवः। वयं काका वयं काका इति जल्पन्ति वायसाः" उद्भटः। २अन्धकारनाशके त्रि०।

तिमिरि पु० तिमीति शब्दं वाचकत्वेन राति रा–बा० डि। तिमिमत्स्ये राजनि०।

तिमिष पु०तिम–इसक्। १ग्राम्यकर्कट्याम्, त्रिका० २नाटाम्रे च शब्दार्थचि०।

तिरश्ची स्त्री तिर्य्यक् जातिः स्त्री ङीप्। पशुपक्षिणां स्त्रियाम्।

तिरश्चीन त्रि० तिर्य्यगेव स्वार्थे ख। तिर्य्यग्भूते। "गतं तिरश्चीनमनूरुसारथेः" माघः "तिरश्चीनो विततो

रश्मिरेषामधः” ऋ० १०।१२९।५। २वक्रे च “ईक्षमाणः पादेन तिरश्चीनेन चक्षुषा” भाग० ७।८।४।

तिरस अव्य० तॄ–असुन् स्वरादि। १अन्तर्द्धाने २तिर्य्यगर्थे च अमरः। ३तिरस्कारे चोरस्वामी। अस्य कृञि वा उप० स०। तिरस्कृत्य तिरः कृत्वेति “तिरस्कृत्योच्चरेत् काष्ठे”त्यादि मनुः “तिरस्क्रियन्ते कृमितन्तुजालैः” माघः। तिरस्करोति णिच्–मलोपः। तिरयति आच्छादयतीत्यर्थः। “सुरारिसुखाम्बुजद्युतिरयं तिरयन्नपि वेदनाम्” जयदेवः।

तिरस्कर त्रि० तिरःकरोति कृ–ट। आच्छादके। स्त्रियां ङीप्। “अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः” भाग० १।१०।२८।

तिरस्करिणी स्त्री तिरः करोति कृ–णिनि संज्ञापूर्वकविधेरनित्यत्वात् वृद्ध्यभावः ङीप्। (परदा) (कानात)। पटमये आच्छादकपदार्थे अमरः। “तिरस्करिण्यो जलदा भवन्ति” कुमा०। २आच्छादकमात्रे त्रि० “सोऽत्यासाद्यत तद्वेश्म तिरस्करिणमन्तरा” रामा० अयो० १५ स०।

तिरस्कार पु० तिरस्+कृ–भावे घञ्। १अनादरे हला०। कर्त्तरि अण्। २अवज्ञाकारके त्रि०। “लौहस्तिरस्कार इवात्तमन्युः” किराता०।

तिरस्कारिन् त्रि० तिरः करोति कृ–णिनि ङत०। १आच्छादके (कानात) २पटभेदे स्त्री ङीप्। ३अवज्ञाकारके ति०

तिरस्कृत त्रि० तिरस्+कृ–कर्म्मणि क्त। १अवज्ञाते अनादृते २आच्छादिते च अमरः “अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद् ध्वनौ। अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम्” काव्यप्र०। ४तन्त्रसारोक्ते मन्त्रभेदे पु० “यस्य मध्ये दकारोऽस्ति कवचं मूर्द्धनि द्विधा। अस्त्रं तिष्ठति मन्त्रः स तिरस्कृत उदीर्य्यते”।

तिरस्क्रिया स्त्री तिरस्+कृ–भावे श। १अनादरे २तिरस्कारे अमरः २आच्छादने च “अप्रकटीकृतशक्तिः शक्तोऽपि जनात्तिरस्क्रियां लभते” पञ्चत०। “द्विपद्विषः प्रत्युत सा तिरस्क्रिया” माघ०। [तिरस्यति अतिरस(स्री)त्।

तिरस्य पु० तिरस्+कण्ड्वा० यक् अन्तर्द्धाने सक० सेट्।

तिरिट पु० तॄ–वा० इटक्। इक्षुग्रन्थौ शब्दमा०।

तिरिम पु० तॄ–वा० इमक्। शालिभेदे राजनि०।

तिरिष पु० तॄ–वा० इषक्। शालिभेदे राजनि०।

तिरीट न० तॄ–ईटक्। लोध्रवृक्षे उज्ज्वलद०।

तिरीटक पु० तिरीट+संज्ञायां कन्। लोध्रे अमरः।

तिरोधान न० तिर+धा–भावे ल्युट्। १अन्तर्द्धाने भावे अङ्। तिरोधाप्यत्र स्त्री।

तिरोभाव पु० तिरस्+भू–भावे घञ्। १गुप्तभावे २अन्तर्द्धाने।

तिरोहित त्रि० तिरस्+धा–क्त। १अन्तर्हिते गुप्ते २आच्छादिते च “अतिरोहितमन्यत्” तत्त्वकौ०। “एष ह वै पुरोहितो य एवं वेदाथ स तिरोहितो य एवं न वेद” ऐत०ब्रा० “न चासारं न च न्यूनं न दूरे न तिरोहितम्” मनुः

तिर्य्यक्पातिन् त्रि० तिर्य्यक् पतति पत–णिनि। वक्रप्रसारिते कुटिलवृत्तौ शब्दार्थचि०।

तिर्य्यक्प्रमाण न० कर्म्म०। विस्तारप्रमाणे।

तिर्य्यक्स्रोतस् पु० तिर्य्यक् स्रोतो आहारसञ्चारो यस्य। पशुपक्ष्यादौ तेषामशितान्नस्य तिर्य्यक्तया उदरे सञ्चारात् तथात्वम्। तद्भेदा भाग०। ३।१०।२१

“तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः। अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः। गौरजो महिषः कृष्णः सूकरो गवयो रुरुः। द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम!। खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा। एते चैकशफाः क्षत्तः! शृणु पञ्चनखान् पशून्। श्वा सृगालो वृको व्याघ्रो मार्ज्जारः शशशल्लकौ। सिंहः कपिर्गजः कूर्म्मो गोधा च मकरादयः। कङ्कगृध्रवकश्येनभासभल्लूकबर्हिणः। हंससारसचक्राह्वकाकोलूकादयः खगाः।”

“तिर्य्यक्स्रोतसां सर्गमाह तिरश्चामिति। स चाष्टाविंशतिभेदः। तिरश्चां लक्षणम् अविदः श्वस्तनादिज्ञानशून्याः। भूरितमसः आहारादिमात्रनिष्ठाः। घ्राणज्ञाः घ्राणेनैवेष्टमर्थं जानन्ति हृदि अवेदिनः दीर्घानुसन्धानशून्याः। तथा च श्रुतिः “अथेतरेषां पशूनाम् अशनापिपासे एवाभिविज्ञानं न विज्ञातं वदन्ति न विज्ञातं पश्यन्ति न विदुः श्वस्तनं न लोकालोकाविति”। अष्टाविंशतिभेदानाह गवादय उष्ट्रान्ताः द्विशफाः द्विखुरा नव गवादयः चमर्य्यन्ता एकशफाः षट्। श्वादयो गोधान्ताः पञ्चनखा द्वादश। एवमेते भूचराः सप्तविंशतिः, मकरादयो जलचराः कङ्कादयश्च खगाः। अभूचरत्वेनैकीकृत्य गृहीताः। तदेवमष्टाविंशतिभेदान् वदन्ति। तेषु कृष्णरुरुगौराः मृगविशेषाः अन्येषामपि तिर्य्यक्प्राणिनामेतेष्वेव यथायथमन्तर्भावः।”

तिर्य्यग्योनि स्त्री तिरश्चां योनिः पशुपक्ष्यादिजातौ “स लिङ्गिनां हरत्येनस्तिर्य्यग्योनौ च जायते” मनुः।

"अवध्याश्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतामपि" ति० त० ।

तिल गतौ भ्वा०पर०सक०सेट् । तेलति अतेलीत् । तितेल ।

तिल स्नेहे तु० पर० अक० अनिट् । तिलति अतेलीत् । तितेल । [तिलत् त ।

तिल स्नेहे चुरा० उभ० अक० सेट् । तेलयति ते अती-

तिल पु० तिल–क । स्वनामख्याते शस्यभेदे । भावप्र०तद्गुणाद्युक्तं यथा "तिलः कृष्णः सितो रक्तः सवर्णोऽल्पतिलः स्मृतः। तिलो रसे कटुस्तिक्तो मधुरस्तुवरो गुरुः । विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तनुत् । बल्यः केश्यो हिमस्पर्शस्त्वच्यस्तन्यो व्रणे हितः । दन्त्योऽल्पमूत्रकृद्ग्राही वातघ्नोऽग्निमतिप्रदः । कृष्णः श्रेष्ठतमस्तेषु शुक्लो मध्यमः सितः । अन्ये हीनतराः प्रोक्तास्तज्ज्ञैरक्तादयस्तिलाः" ।

तिलप्रतिग्रहनिषेधमाह ब्रह्मपुराणम् "ब्राह्मणः प्रतिगृह्णीयात् वृत्त्यर्थं साधुतस्तथा । अव्यश्वमपि मातङ्गतिललौहांश्च वर्जयेत्" तिलदाने फलमाह विष्णुः । "तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम्" । महाभारते "कल्यमुत्थाय यो विप्रः स्नातः शुक्लेन वाससा । तिलपात्रं प्रयच्छन् वै सर्वपापैः प्रमुच्यते" । शु० त० स्मृतिः "प्रेतमुद्दिश्य यो दद्यात् हेमगर्भांस्तिलान्नृप ! । यावन्तस्ते तिलाः स्वर्गे तावत्कालं स मोदते" । सप्तम्यादिवर्जं तिलैः सदा स्नानं कर्त्तव्यमाह मार्कण्डेयः "सर्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनिः । श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः । सप्तमीं नवमीं चैव पर्वकालञ्च वर्जयेत्" जन्मतिथौ तिलनिष्पाद्याः षड्व्यापाराः कार्य्याः यथाह ति० त० "तिलोद्वर्त्ती तिलस्नायी तिलहोमी तिलप्रदः । तिलभुक् तिलवापी च षट्तिली नावसीदति" कालविशेषे तिलतर्पणनिषेधः गङ्गादौ च सर्वदा निषिद्धदिनेऽपि तिलतर्पणकार्य्यता च तर्पणशब्दे ३२५८ पृ० उक्ता । रात्रौ तिलसंबद्धवस्तुमात्रस्याभक्ष्यता "सर्वञ्च तिलसंबद्धं नाद्यादस्तमिते रवौ" काशी० "तिलाश्चम्पकसंश्लेषात् प्राप्नुवन्त्यधिवासताम्" कामन्दकी० "विक्रीणाति तिलैस्तिलान्" पञ्चत० । २तिलतुल्ये स्वल्पप्रमाणे च "तिलं तिलं समादाय रत्नानां यद्विनिर्मिता । तिलोत्तमेति तत्तस्या नाम चक्रे पितामहः" भा० आ० ७६८६ श्लो० । ३तिलाकारे देहस्थे (तिल) ख्याते तिलकालके च "देवगुरुप्रसादेन जिह्वाग्रे मे सरस्वती । तेनाहं नृप ! जानामि भानुमत्यास्तिलं यथा" कालिदासः। तिलस्य विकारः अण् । तैल तिलनिर्यासे तिलस्नेहे, तिलसदृशवस्तुजाते स्नेहे च "अदुष्टं सार्षपं तैलं यत्तैलं पुष्पवासितम् । अदुष्टं पक्वतैलञ्च स्नानाभ्यङ्गेषु नित्यशः" तिथित० । पर्व्वणि तन्निषेधमाह "स्त्रीतैलमांससंभोगी-विण्मूत्रनरकं व्रजेत्" ति०त० एवमन्यदिनेऽपि तैलनिषेधः स्मृतौ दृश्यः ।

तिलक न० तिल–क्वुन् तिल+इवार्थे स्वल्पे वा कन् वा । १क्लोमनि २कृष्णसौवर्चले अमरः ३सौवर्चले मेदि० । ४तिलवृक्षे, पु० राजनि० । ५अश्वभेदे, पुंस्त्री० मेदि० । ६रोगभेदे, अमरः। ७मरुवके च हेमच० । स्वनामख्याते नासादौ धार्य्ये ८चन्दनादिविशेषके पुंन० । तस्य धारणप्रकारो यथा "द्वादशाङ्गे ललाटादौ तिलकं हरिमन्दिरम् । स्नानान्ते वैष्णवः कुर्यात् प्रत्येकं कृष्णनामभिः । वामे वक्षसि नेत्रान्ते गण्डेऽंसे शङ्खचिह्नितम् । तथैव दक्षिणे कुर्य्याद्धरेश्चक्राङ्कितं मुने ! । ललाटे केशवं विद्यात् कण्ठे श्रीपुरुषोत्तमम् । वामबाहौ वासुदेवं सव्ये दामोदरन्तथा । नाभौ नारायणञ्चैव माधवं हृदये तथा । गोविन्दं दक्षिणे पार्श्वे वामे चैव त्रिविक्रमम् । विष्णुं सव्ये कर्णमूले दक्षिणे मधुसूदनम् । शिरोमध्ये हृषीकेशं पद्मनाभञ्च पृष्ठतः। हरेर्द्वादशनामानि पठित्वा तिलकानि तु । यः कुर्य्याद्वैष्णवो नित्यं स प्रेमभक्तिमाप्नुयात् । ये कण्ठलग्नतुलसीभवकाष्ठमाला ये द्वादशाङ्गहरिनामकृतोर्द्ध्वपुण्ड्राः। ये कृष्णभक्तिसुदृढा धृतशङ्खचक्रास्ते वैष्णवा भुवनमाशु पवित्रयन्ति । तिलकन्तूर्द्ध्वपुण्ड्राख्यं मध्यच्छिद्रं हि नारद ! । यदि कुर्य्याल्ललाटे तद्विज्ञेयं हरिमन्दिरम् । आनासामूलमाश्रित्य शिरोमध्यगतं मुने ! । हरिपादाकृतं नासामूलमारभ्य यत्नतः । हरिमन्दिरवत् सर्वं तद्राधावल्लभीयकम् । श्रीराधावल्लभीयं यत्तिलकं सुमनोहरम् । यौगलं तत्तु विज्ञेयं यदि मध्यसुरञ्जितम् । यदूर्द्ध्वपुण्ड्रं तिलकं शोभनं तन्मनोहरम्। तन्मध्ये पीतरेखञ्च श्रीमद्रामानुजं विदुः । श्रीरामोपासना यस्य तिलकं तूर्द्ध्वपुण्ड्रकम् । भ्रुवोर्मध्ये सबिन्दु स्याद् यदि विप्र ! मनोहरम् । हरेः सर्वावताराणां मत्स्यादीनां विशेषतः । उपासकानां तिलकं केवलं हरिमन्दिरम् । ऊर्द्ध्वपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियाणां तथैव च । वैश्यानान्तु तथा विप्र ! शूद्रादेर्मण्डलाकृति । अच्छिद्रमूर्द्ध्वपुण्ड्रन्तु ये कुर्वन्ति जनाधमाः । तेषां ललाटे सततं

शुनः पादो न संशयः । इष्टा भाले द्विजातीनामच्छिद्रमूर्द्ध्वपुण्ड्रकम् । कार्ष्णिः कृष्णस्मृतिं कृत्वा वस्त्रेणाच्छादयेन्मुखम् । ललाटदक्षिणे ब्रह्मा वसेद्वामे महेश्वरः । मध्ये विष्णुर्वसेन्नित्यं तस्मान् मध्यं न लेपयेत् । वर्त्तुलं तिर्य्यगच्छिद्रं ह्रस्वं दीर्घं ततं नतम् । षड्लक्षणसंयुक्तं तिलकं यन्निरर्थकम् । खनित्रयष्टिकुकूनत्रिशूलसुकराकृति । त्रिपुण्ड्रमर्द्धचन्द्रञ्च तिलकं यन्निरर्थकम् । प्रमाणमूर्द्ध्वपुण्ड्रस्य दीर्घं स्यात् कलिवर्द्धनम् । आनासामूलमारभ्य ब्रह्मरन्ध्रगतं यदि । शूद्रस्यैकाङ्गुलं प्रोक्तमायतं द्व्यङ्गुलं विशि । क्षत्रिये त्र्यङ्गुलं तद्वद्ब्राह्मणे चतुरङ्गुलम् । नासिकायास्त्रिभागैको भागोमानेन यो भवेत् । भ्रुवोर्मध्यादधः स्थानं मूलमाहुर्मनीषिणः । ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा । कुर्य्यात् यदूर्द्ध्वपुण्ड्रं तद्वैष्णवो हरिमन्दिरम् । वैष्णवा विप्रा भूपाश्चेत् वैश्यशूद्रान्त्यजाश्रमाः । यदूर्द्ध्वपुण्ड्रं विभृयुस्तदेव हरिमन्दिरम् । नरोवाप्यथ वा नारी यदि कृष्णपथं लभेत् । यत्नतस्तुलसीमाला सम्बाय्यौ हरिमन्दिरम् । मध्यच्छिद्रं न कुर्य्यात् यस्तिलकं यदि वैष्णवः । श्वपदं तच्चितातुल्यं भवेन्नारद ! नान्यथा । दण्डाकारं द्विरेखं यत्तिलकं मूलकोणकम् । मध्यच्छिद्रन्तु तत्प्राहुरूर्द्ध्वपुण्ड्रं मनोहरम् । अधोमुखाब्जकलिकाकारं तिलकमुत्तमम् । मध्यच्छिद्रं युग्मरेखमूर्द्ध्वपुण्ड्रं प्रकीर्त्तितम् । तीर्थमृद् यज्ञकाष्ठञ्च विल्वोमलयसम्भवम् । अश्वत्थतुलसीमूलमृत्तिका गोष्पदस्य च । जाह्नवी मृन्महानिम्वतुलसीकाष्ठमेव च । कस्तूरीकुङ्कुमं फल्गुसिन्दूरं रक्तचन्दनम् । गोरोचना गन्धकाष्ठं जलं चागुरु गोमयम् । धात्रीमूलस्य मृद्गन्धो हरिद्रा गोगृहस्य च । स्नानान्ते सर्ववर्णानामाश्रमाणान्तथैव च । एतानि तिलकान्याहुः सन्ध्यादिसर्वकर्म्मसु" । "गङ्गामृत्तुलसीमूलमृत्तिकामलयोद्भवम् । साधोश्चरणसंलग्नं रजोमृद्गोष्पदस्य च । याऽश्वत्थमूलमृद्गोपीचन्दनं तीर्थमृत्तिका । कुङ्कुमं तुलसीकाष्ठं वैष्णवाहृतमृत्तिका । गोरोचना च कस्तूरी हरिद्रागुरुचन्दनम् । वल्मीकमृत्तिकागन्धः पद्मकं हरिचन्दनम् । गन्धकाष्ठं महानिम्वो यमुनातीरमृत्तिका । गुरुपादरजो वारिसुसाध्वङ्घ्रिरजो जले । कृत्वा प्रतिदिनं स्नानमेतैर्गन्धमृदादिभिः । चारु यत्तिलकं ग्राह्यं तन्नाम्ना वैष्णवैर्ध्रुवम् । काम्यं नैमित्तिकं नित्यं यत् किञ्चित् कर्म्म नारद ! । वर्णाश्रमाणां तन्नास्ति स्नानान्ते तिलकं विना । कर्म्म वर्णाश्रमाणां स्यात् दैवं पैत्रं न तत्फलम् । स्नानं सन्ध्यां पञ्च यज्ञान् पैत्रं होमादिकर्म्म यः । विना तिलकदर्भाभ्यां कुर्य्यात्तन्निष्फलं भवेत्" । इति पद्मोत्तरखण्डम् "वीक्ष्यादर्शे जले वापि यो विदध्यात् प्रयत्नतः । ऊर्द्ध्वपुण्ड्रं महाभागः स याति परमाङ्गतिम्" पाद्मे पातालखण्डे "शिवागमे दीक्षितैस्तु धार्य्यं तिर्य्यक् त्रिपुण्ड्रकम् । विष्णागमे दीक्षितस्तु ऊर्द्ध्वपुण्ड्रं विधारयेत्" । इति नागोजीभट्टधृतस्मृतसंहिता । पद्मपुराणे उत्तरखण्डे "ललाटे केशवं ध्यायेन्नारायणमथोदरे । वक्षःस्थले माधवन्तु गोविन्दं कण्ठकूपके । विष्णुञ्च दक्षिणे कुक्षौ वामे च मधुसूदनम् । त्रिविक्रमं कन्धरे तु वामनं वामपार्श्वके । श्रीधरं वामबाहौ तु हृषीकेशन्तु कन्धरे । पृष्ठे तु पद्मनाभञ्च कट्यां दामोदरं न्यसेत् । तत्प्रक्षालनतोयन्तु वासुदेवेति मूर्द्धनि" । किञ्च "ऊर्द्ध्वपुण्ड्रं ललाटे तु सर्वेषां प्रथमं स्मृतम् । ललाटादिक्रमेणैव धारणन्तु विधीयते" इति "एवं न्यासं समाचार्य्य सम्प्रदायानुसारतः । न्यसेत् किरीटमन्त्रञ्च मूर्द्ध्नि सर्वार्थसिद्धये" अथ किरीटमन्त्रः "ओम् श्रीकिरीटकेयूरहारमकरकुण्डलचक्रशङ्खगदापद्महस्तपीताम्बरधरश्रीवत्साङ्कितवक्षःस्थलश्रीभूमिसहितस्वात्मज्योतिर्दीप्तिकराय सहस्रादित्यतेजसे नमो नमः" हरिभक्तिविलासे ४विलासः । ऊर्द्ध्वपुण्ड्रशब्दे अधिकं दृश्यम् । ६ध्रुवकभेदे यथा "पञ्चविंशतिवर्णाङ्घ्रिस्तिलको ध्रुवको भवेत् । दृष्टश्चत्पुटे ताले रसे वीरे अद्भुतेऽपि वा" सङ्गीतदा० । "मुखे मधुश्रीस्तिलकं प्रकाश्य" कुमा० । तिलक इव उत्तरपदस्थः १०श्रेष्ठे "श्रियं त्रिलोकी तिलकः स एव" । "लोध्रचूर्णतिलकाकृतिः" माघः । स्वार्थे क । ११तिलकवृक्षे राजनि० । "न तिलकस्तिलकः प्रमदामिव" रघुः ।

तिलकट न० तिलस्य रजः कटच् । तिलरजसि ।

तिलकल्क पु० तिलस्य कल्कः । १पिण्याके (खलि) अमरः "कषायेण स्रोतेनोदकमादाय तिलकल्कमधुसर्पिःप्रगाढ़ामौषधयुतां वर्त्तिं प्रणिदध्यात्" "तिलकल्कः समधुको घृताक्तो व्रणरोपणः" सुश्रु० ।

तिलका स्त्री तिलं तिलपुष्पमिव कायति कै—क । हारभेदे जटा० "सगणद्वितयं भवतीह यदा रसवर्णपदा तिलकेति तदा" उक्तलक्षणके द्वादशाक्षरपादके २छन्दोभेदे च ।

तिलकालक पु० तिल इव कालकः कृष्णः । १देहस्थे २तिला-

कारे चिह्ने, ३रोगभेदे च अमरः "कृष्णानि तिलमात्राणि नीरुजानि समानि च। वातपित्तकफोद्रेकात् तान् विद्यात् तिलकालकान्" सुश्रु०।

तिलकाश्रय पु० ६त०। ललाटे शब्दार्थक०।

तिलकिट्ट न० ६त०। तिलपिण्याके "तिलकिट्टं तु रूक्षं स्यात् ग्लपनं दृष्टिदोषकृत्। विष्टम्भकारणं तद्धि भिषग्भिः परिकीर्त्तितम्" भावप्र०।

तिलकिन् त्रि० तिलक+अस्त्यर्थे इनि। तिलकधारिणि "शिखी तिलकी कर्म्म कुर्य्यात्" स्मृतिनिबन्धे कल्पश्रुतिः।

तिलचित्रपत्रक पु० तिलस्येव चित्रं पत्रमस्य कप्। तैलकन्दे वृक्षभेदे राजनि०।

तिलचूर्ण न० ६त०। चूर्णीकृततिले (तिलकुटा) १खाद्यभेदे। २तिलकल्के च राजनि०।

तिलतण्डुलक पु० तिलस्य तण्डुल इव कायति कै—क। १आलिङ्गने शब्दमा० आलिङ्गनस्य तिलतण्डुलवत् संश्लेषयुक्तत्वात् तथात्वम्। ६त०। २तिलस्य तण्डुले निस्तुषतिले पु० (माजातिल)।

तिलतेजा स्त्री तिल इव तेजयति चुरा० तिज—अच्। लताभेदे "कफजे तिलतेजाह्वा दन्तीस्वर्जिकचित्रकाः" सुश्रु०

तिलन्तुद त्रि० तिलं तुदति तुद—खश् मुम्। तैलिके तिलपीड़के। [दशीभेदे व्रतशब्दे दृश्यम्।

तिलद्वादशी स्त्री तिलभोजनादिनियमयुक्ता द्वादशी। द्वा-

तिलधेनु स्त्री० तिलनिर्म्मिता धेनुः शा०त०। विधानेन दानार्थं तिलकृतायां धेनौ। तद्विधानं यथा।
"विधानं तिलधेनोस्त्वं ब्रूहि शीघ्रं द्विजोत्तम!। मुनिः प्राह विधानं यत् तच्छृणुष्व नराधिप!। षोड़शाढ़कैर्धेनुश्चतुर्भिर्वत्सको भवेत्। इक्षुदण्डमयाः पादादन्ताः पुष्पमया शुभाः। नासा गन्धमयी तस्या जिह्वा गुड़मयी तथा। स्थितां कृष्णाजिने धेनुं वस्त्रोभिर्वासितां शुभाम्। सूत्रेण वासितां कृत्वा पञ्चरत्नसमन्विताम्। सर्वौषधिसमायुक्तां मन्त्रपूतान्तु दापयेत्। अन्नं मे जायतां सद्यः पानं सप्त रसास्तथा। कामं सन्धापयास्माकं तिलधेनुसुपार्ज्जिताम्। गृह्णामि त्वां देवि! भक्त्या कुटुम्बार्थे विशेषतः। कुटुम्बकामं कुरुतां तिलधेनो! नमोऽस्तु ते। एवंविधां नरोदत्त्वा तिलधेनुं नृपोत्तम!। सर्वकामसमाप्तिं च कुरुते नात्र संशयः" प०पु० स्व०ख०।

तिलपर्ण पु० तिलस्येव पर्णमस्य। १श्रीवेष्टे वृक्षे राजनि०। २चन्दने न० राजनि०। ६त०। तिलवृक्षस्य ३पत्रे न०।

तिलपर्णी स्त्री तिलस्येव पर्णान्यस्याः ङीप्। १रक्तचन्दने। अमरः २नदीभेदे स्त्री शब्दार्थचि०। तिलपर्णीनदी आकरत्वेनास्त्यस्या अच् गौरा० ङीष्। ३शिह्लके गन्धद्रव्यभेदे स्त्री हेमच०। स्वार्थे क। तिलपर्णिका रक्तचन्दने हेमच०।

तिलपिञ्ज पु० पु० निष्फलस्तिलः तिल+पिञ्ज। निष्फलतिले "वस्नोरर्जुनकाण्डस्य यवस्य ते पलाल्या तिलस्य तिलपिञ्ज्या" अथ० २।८।३।

तिलपुष्पक पु० तिलस्येव पुष्पमस्य कप्। विभीतकवृक्षे पारस्करनै०। त०। ६त०। २तिलस्य पुष्पे च तत्सादृश्यात् ३नासिकायाम् तन्त्रसा०।
"पद्मं दृष्ट्वा तथा विम्बं खञ्जनं शिखरन्तथा। चामरं रविविम्बञ्च तिलपुष्पं सरोरुहम्। त्रिशूलं वीक्ष्य जप्त्वा च शतशः शुद्धभावतः।" "पद्मं मुखं विम्बमधरं खञ्जनश्चक्षुः शिखरं मस्तकं चामरं केशं रविविम्बं सिन्दूरं तिलपुष्पं नासिकां सरोरुहम् नाभिं त्रिशूलं त्रिवलीम्"। तन्त्रसारः।

तिलपेज पु० निष्फलस्तिलः तिल+पेज। निस्फले तिले अम०।

तिलभार पु० देशभेदे "तिलभाराः समीराश्च मधुमत्ताः सुकन्दकाः। भा० भी० ९ अ०।

तिलमय त्रि० तिलस्य विकारः तिल+असंज्ञायां मयट्। तिलविकारे संज्ञायां तु अण्। तैलमित्येव।

तिलमयूर पुंस्त्री० तिलपुष्पचिह्नितः मयूरः शा० त०। (तिलेमयूर) मयूरभेदे त्रिका०। स्त्रियां जातित्वात् ङीष्।

तिलरस पु० ६त०। तिलतैले।

तिलशस् अव्य० तिलं तिलं तत्परिमितं करोतीति मानार्थत्वात् वीप्सायां कारकार्थे शस्। तिलं तिलं कृत्वेत्येवमाद्यर्थे। "तिलशस्तद्रथं चक्रे साश्वध्वजपताकिनम्" हरिवं० १८६ अ०।

तिलशैल पु० दानार्थे कल्पिते दशसु अचलेषु अचलभेदे। तिलाचलादयोऽप्यत्र। तिलाचलश्च द्विविधः तिलमयप्रधानमेरुः, धान्यशैलस्य पश्चात् कल्पितः तिलमयविष्कम्भगिरिश्च। तत्र मेरुरूपतिलशैलदानविधिर्यथा
"प्रथमो धान्यशैलः स्यात् द्वितीयो लवणाचलः। गुड़ाचलस्तृतीयस्तु चतुर्थो हेमपर्वतः। पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्वतः। सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः। राजतो नवमस्तद्वद्दशमः शर्कराचलः। वक्ष्ये विधानमेतेषां यथावदनुपूर्वशः। अयने विषुवे पुण्ये

व्यतीपाते दिनक्षये। शुक्लपक्षे तृतीयायामुपरागे शशिक्षये। विवाहोत्सवयज्ञेषु द्वादश्यामथ वा पुनः। शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः। धान्यशैलादयो येऽपि देयाः शास्त्रं विजानता” इत्युपक्रमे। “अतःपरं प्रवक्ष्यामि तिलशैलं विधानतः। यत्प्रदानान्नरो याति विष्णुलोकं सनातनम्। उत्तमो दशभिर्द्रोणैर्मध्यमः पञ्चभिः स्मृतः। त्रिभिः कनिष्ठो विप्रेन्द्र! तिलशैलः प्रकीर्त्तितः। पूर्ववच्चापरान् सर्वान् विष्कम्भानमितोगिरीन्। दानमन्त्रान् प्रवक्ष्यामि यथावन्मुनिपुङ्गव!। यस्मात् मधुवधे विष्णोर्देहस्वेदसमुद्भवाः। तिलाः कुशाश्च माषाश्च तस्माच्छन्नो भवत्विह। हव्ये कव्ये च यस्माच्च तिला एवाभिरक्षणम्। भवादुद्धर शैलेन्द्र! तिलाचल! नमोऽस्तु ते”। इत्यामन्त्र्य च यो दद्यात् तिलाचलमनुत्तमम्। स वैष्णवं पदं याति पुनरावृत्तिदुर्लभम्। दीर्घायुष्यं समाप्नोति पुत्रपौत्रैश्च मोदते। पितृभिर्देवगन्धर्वैः पूज्यमानो दिवं व्रजेत्” मत्स्यपु० ८६ अ०। विष्कम्भरूपतिलाचलस्तु यथा। “पश्चात्तिलाचलमनेकसुगन्धिपुष्पसौवर्णपिप्पलहिरण्मयहंसयुक्तम्। आकारयेद्रजतपुष्पवनेन तद्वद्व्रजान्वितं दधिसितोदसरस्तथाग्रे” मत्०पु० ८२ अ०।

तिलस्नेह पु० ६त०। तैले शब्दार्थक०। [राजनि०।

तिलाङ्कितदल पु० तिलेनाङ्कितं दलमस्य। तैलकन्दे

तिलान्न न० तिलमिश्रितमन्नं शा०त०। तिलमिश्रितेऽन्ने कृशरे हेम०। [जीरके शब्दार्थचि०।

तिलापत्या स्त्री तिलस्येव क्षुद्रः अपत्यं वीजमस्याः। कृष्ण-

तिलित्स पु० तेलनं तिल्निर्गतिस्तं त्सरति छद्मना गच्छति त्सर–ड। अजगरे सर्पभेदे अमरः स्त्रियां जातित्वात् ङीष्

तिलोत्तमा स्त्री अप्सरोभेदे “तिलोत्तमा नाम पुरा ब्रह्मणो योषिदुत्तमा। तिलं तिलं समुद्धृत्य रत्नानां निर्म्मिता शुभा” भा०अनु० १४१अ०। तस्यास्तथानामकरणं यथा “तिलं तिलं समानीय रत्नानां यद्विनिर्म्मिता। तिलोत्तमेति तत्तस्या नाम चक्रे पितामहः” भा० आ० २११ अ०।

तिलोदक न० तिलमिश्रितमुदकम् शा० त०। तिलमिश्रिते उदके “तेषां दत्त्वा तु हस्तेषु सपवित्रं तिलोदकम्” मनुः “बलिं भिक्षां तथाऽर्घ्यञ्च पितृणाञ्च तिलोदकम्” भा० अनु० १२६ अ०। “आवाहयिष्ये तान् सर्वान् दर्भपृष्ठे तिलोदकैः” वायुपु०।

तिलौदन पुंन० तिलमिश्रितः ओदनः। कृशरे हारा०। “दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा” शत०ब्रा० १४।८।४।१६। “तिलमिश्रमोदनं कृशरमित्यर्थः” भा०।

तिल्पिञ्ज पु० तिल+पिञ्ज–वेदे डिच्च। वन्ध्यतिले “इषीकां जरतीमिष्ट्वा तिल्पिञ्जं दण्डनं नडम्” अथ० १२।२।५४।

तिल्य न० तिलानां भवनं क्षेत्रम् यत्। १तिलभवनयोग्ये क्षेत्रे तिलाय हितं यत्। २तिलहिते त्रि०।

तिल्ल गतौ भ्वा०पर०सक०सेट्। तिल्लते अतिल्लीत्। तितिल्ल।

तिल्व पु० तिल–स्नेहे “उल्वादयश्चेति” उणा० नि०। १लोध्रे अमरः २श्वेतलोध्रे सुभूतिः ३रक्तलोध्रे क्षीरस्वामी स्वार्थे क। तत्रार्थे राजनि०। “न्यग्रोधाश्वत्थतिल्वकहरिद्रुस्फूर्जविभीतकपापनासभ्यश्च” कात्या०श्रौ०२१।३।२० “तिल्वकः तिणिशः” कर्कः।

तिल्विल त्रि० तिल–स्नेहे वा० कु तिलुः स्निग्धा इला भूमिर्यस्मिन्। देवयजने स्थाने “भद्रे क्षेत्रे निर्म्मिता तिल्विले वा” ऋ०५।६२।७ “हैव तिष्ठ निर्म्मिता तिल्विलास्तामिरावतीं मध्ये पोषस्य तिष्ठन्तीम्” आ० गृ० २।८८। “तिल्विलायध्वमुषसो विभातीर्यूयं पात स्वस्तिभिः सदा नः” ऋ० ७।७८।५। “तिल्विलायध्वं तिलुरिला भूमिर्यस्य तत् कुरुत” भा०।

तिष्ठद्गु अव्य० तिष्ठन्त्यो गावो यस्मिन् काले तिष्ठद्गुप्रभृतित्वात् नि० अव्ययीभावः। दोहनकाले “आ तिष्ठद्गु जपन् सन्ध्यां प्रक्रान्तामायतीगवम्” भट्टिः।

तिष्ठद्गुप्रभृति न० अव्ययीभावे निपातनाङ्गशब्दसमूहे स च गणः पा० गणसू० उक्तो यथा “तिष्ठद्गु वहद्गु आयतीगवम् खलेयवम् खलेबुसम् लूनयवम् लूयमानयवम् पूतयवम् पूयमानयवम् संहृतयवम् संह्रियमाणयवम्। संहृतबुसम् संह्रियमाणबुसम् समभूमि समपदाति सुषमम् विषमम्। दुःषमम् निषमम् अपसमम् आयतीसमम् प्रौढम् पापसमम् पुण्यसमम् प्राह्णम् प्ररथम् प्रमृगम् प्रदक्षिणम् अपरदक्षिणम् सम्प्रति असम्प्रति इच्प्रत्ययः समासान्तः”।

तिष्ठद्धोम स्त्री तिष्ठता होमो यत्र। यजतिरूपे यागभेदे “यजतिजुहोतीनां को विशेषः” कात्या०श्रौ० १।२।५ “यजतीनां यागानां जुहोतीनां होमानां च परस्परं को विशेषः को भेद इति प्रश्नः। तत्र यजतीनां विशेषमाह” कर्कः “तिष्ठद्धोमा वषट्कारप्रदाना याज्यापुरोऽनुवाक्यावन्तो यजतयः” ६। उच्यन्त इति शेषः। “तिष्ठता

होमो येषु ते तिष्ठद्धोमाः वषट्कारेण प्रदानं येषु ते वषट्कारप्रदानाः तथा याज्यावन्तः पुरोऽनुवाक्यावन्तश्च ये ते यजतय उच्यन्ते” कर्कः ।

तिष्य पु० तुष्यन्त्यस्मिन् तुष–क्यप् नि०। १पुष्यनक्षत्रे । त्विष–दीप्तौ यक् अग्न्यादि०नि०। २कलियुगे न०। तिष्ये नक्षत्रे जातः अण् तस्य लुक् । ३पुष्यनक्षत्रजाते त्रि० ! तिष्यं नक्षत्रमस्त्यत्र पौर्णमास्याम् अच् । ४पौषमासे शब्दरत्ना०। स्वार्थे क । पौषमासे शब्दा० । तत्र पुष्यनक्षत्रे । “यदा सूर्य्यश्च चन्द्रश्च तथा तिष्यबृहस्पती । एकराशौ समेष्यन्ति प्रवत्स्यति तदा कृतम्”। भा० व० १९० ८८ श्लो० कलियुगे “ततस्तिष्येऽथ संप्राप्ते युगे कलिपुरस्कृते । एकपादस्थितो धर्मो यत्र तिष्ये भविष्यति” भा० शा० २४२ अ०। “सत्सम्प्रदायप्रथनाय तिष्ये शिष्यैश्चतुर्भिः सह योऽवतीर्णः। उक्तो बृहत्सङ्गमतन्त्रराजे श्रीशङ्कराचार्य्यगुरुं तमीडे । “तपस्तादृक् क्व वा तिष्ये तिष्ये योगः क्व तादृशः। क्व वा व्रतं क्व वा दानं तिष्ये मोक्षस्ततः कुतः” काशीख० ३५ अ०।५।माङ्गल्ये त्रि०। [शब्दर० ।

तिष्यपुष्पा स्त्री० तिष्यं माङ्गल्यं पुष्पं यस्याः। आमलक्याम्

तिष्यफला स्त्री तिष्यं माङ्गल्यं फलमस्याः । आमलक्याम् अमरः । “नित्यमामलके लक्ष्मीः” स्मृतेस्तत्फलस्य मङ्गलहेतुत्वात् तथात्वम् । [क्याम् शब्दरत्ना०।

तिष्या स्त्री तिष्यं मङ्गलं हेतुत्वेनास्त्यस्या अच्। आमल-

तिसृधन्व न० तिसृभिरिषुभिर्युतं धन्व धनुः वेदे अच् समासान्तः अविभक्तावपि वेदे तिस्रादेशः । तिसृभिरिषुभिर्युक्ते धनुषि “तिसृधन्वं दक्षिणां ददाति” शत० ब्रा० ११।१।५।१० । “स तिसृधन्वमादायापचक्राम” १४।१।१।७ । [४सद्भावे च संक्षिप्तसारः।

तिहन् पु० तुह–अर्द्दने कनिन् नि०। १व्याधौ २व्रीहौ ३धनुषि

तीक गतौ भ्वा० पर० सक० सेट् । तीकते अतीकिष्ट तितीके ऋदित् अतितीकत् त । शब्दस्तोमे याचनार्थतोक्तिः प्रामादिकी पा०गणपाठे तस्य गत्यर्थतयैवोक्तेः !

तीक्ष्ण न० तिज–क्स्न दीर्घश्च । १खरे स्पर्शे २विषे ३लौहभेदे (इस्पात)४युद्धे अमरः ५मरणे ६शस्त्रे ७शीघ्रे इति सारसु० । ८सामुद्रलवणे ९मुष्कके मेदि० १०चव्यके राजनि० । ११मरके हेमच० । १२तीक्ष्णतायुक्ते त्रि० “तीक्ष्णश्चैव मृदुश्च स्यात् कार्य्यं वीक्ष्य महीपतिः” मनुः ।“तीक्ष्णा नारुन्तुदा बुद्धिः कर्म शान्तं प्रतापवत्” माघः “शक्तिं चोभयतस्तीक्ष्णाम्” मनुः । “प्रतिभायां हीरके कटाक्षे दुर्वाक्ये नखे लवणे रविकरे” इति कविकल्पलतायां तीक्ष्णत्वमुक्तम् ।

१३यवक्षारे पु० मेदि० । १४श्वेतकुशे १५ कुन्दुरुके राजनि० । नक्षत्रविशेषगणे न० यथा “शक्राहिशिवमूलाश्च मन्दाहस्तीक्ष्णदारुणे” ज्योतिषम्।१६आत्मत्यागिनि त्रि० मेदि० ।१७निरालस्ये सुबुद्धौ त्रि० धरणी० १८योगिनि पु० अजयपालः। [राजनि० ।

तीक्ष्णक पु० तीक्ष्ण+संज्ञायां कन् । १गौरसर्षपे, २मुष्कके च

तीक्ष्णकण्टक पु० तीक्ष्णः कण्टकोऽस्य । १धुस्तूरे २बर्बुरे, ३इङ्गुदीवृक्षे, ४वंशे च जटाध०।५कन्यारीवृक्षे स्त्री टाप् । राजनि०। ६तीक्ष्णकण्टकयुक्ते त्रि०। कर्म्म० । ७तीक्ष्णे कण्टके पुंन० ।

तीक्ष्णकन्द पु० तीक्ष्णः कन्दो मूलमस्य । पलाण्डौ राजनि०

तीक्ष्णकर्म्मन् त्रि० तीक्ष्णं कर्मास्य । १तीव्रकार्य्यकरे आयःशूलिके त्रिका० । कर्म्म० । २तीव्रे कर्म्मणि न० ।

तीक्ष्णकल्क पु० तीक्ष्णः कल्कोऽस्य । तुम्बुरुवृक्षे राजनि० ।

तीक्ष्णकान्ता स्त्री नि०कर्म्म० । तारादेव्याम् उग्रतारायाम् । “पीठे दिक्करवासिन्या द्विरूपा वसते शिवा । तीक्ष्णकान्ताह्वया त्वेका योग्रतारा प्रकीर्तिता” । “पुरा ललितकान्ताख्या या श्रीमङ्गलचण्डिका । तस्यास्तु सततं रूपं तीक्ष्णकान्ताह्वयं नृप ! । कृष्णा लम्बोदरी या तु सा स्यादेकजटा शिवा । तेन रूपेण तां देवीं सततं परिपूजयेत्” कालि०पु० ८२ अ० ।

तीक्ष्णगन्ध पु० तीक्ष्णः गन्धोऽस्य । १शोभाञ्जनवृक्षे जटा० । वा कप् । अत्रैवार्थे राजनि० । २रक्ततुलस्याम् शब्दा० कुन्दरुनामगन्धद्रव्ये अमरः ।

तीक्ष्णगन्धा स्त्री तीक्ष्णः गन्धोऽस्याः । १वचायां, २राजिकायाम्, ३कन्यार्य्यां, राजनि०। ५जीवन्त्याञ्च शब्दच० । ६श्वेतवचायां मेदि० ७सूक्ष्मैलायाम्,रत्नमा०। [रत्नमा०।

तीक्ष्णतण्डुला स्त्री० तीक्ष्णास्तण्डुला यस्याः । पिप्पल्याम्

तीक्ष्णतैल न० तीक्ष्णस्य स्नेहः तैलच् । १स्नुहीक्षीरे, २सर्जरसे, ३मद्ये च शब्दरत्ना० ।

तीक्ष्णदंष्ट्र पुंस्त्री तीक्ष्णा दंष्ट्रास्य । १व्याघ्रे राजनि० स्त्रियां ङीष् कर्म्म० । तीक्ष्णायां दंष्ट्रायाम् स्त्री । “सुतीक्ष्णदंष्ट्राः समाश्च शुभाः” वृ० स० ६७ अ० ।

तीक्ष्णधार पु० तीक्ष्णा धारास्य । १खड्गे “असिर्विशसनः खड्गस्तीक्ष्णधारो दुरासदः । श्रीगर्भो विजयश्चैव धर्म्मपालो नमोऽस्तु ते । इत्यष्टौ तव नामानि” खड्गपूजा-

मन्त्रः । २तीक्ष्णधारायुक्तमात्रे त्रि० । "नवनीतं हृदयं ब्राह्मणस्य वाचि क्षुरो निशितस्तीक्ष्णधारः । तदुभयमेतद्विपरीतं क्षत्रियस्य वाङ्नवनीतं हृदयं तीक्ष्णधारमिति" भा० आदि० ३ अ० ।

तीक्ष्णपत्र पु० तीक्ष्णानि पत्राण्यस्य । १तुम्बुरुवृक्षे राजनि० । २तीव्रपत्रयुक्ते त्रि० कर्म्म० । ३तीक्ष्णे पत्रे न० ।

तीक्ष्णपुष्प न० तीक्ष्णं पुष्पमस्य । १लवङ्गे । २केतक्यां स्त्री टाप् । राजनि० । ३तिग्मपुष्पयुक्ते त्रि० । कर्म्म० । ४तिग्मे पत्रे न० ।

तीक्ष्णफल पु० तीक्ष्णं फलमस्य । १तुम्बुरुवृक्षे राजनि० । २तिग्मफलयुक्ते त्रि० कर्म्म० । ३तिग्मे फले न० ।

तीक्ष्णमूल पु० तीक्ष्णं मूलमस्य । १शोभाञ्जने २कुलञ्जने च राजनि० । ३तिग्ममूलके त्रि० । कर्म्म० । ४तिग्मे मूले न० ।

तीक्ष्णरश्मि पु० तीक्ष्णा रश्मयोऽस्य । तिग्मांशौ १सूर्य्ये "शरत्प्रज्वलितं तेजस्तीक्ष्णरश्मिर्विशोषयन्" हरिवं० ७३० अ० । २तिग्मरश्मियुक्ते त्रि० । कर्म० । ३तिग्मे रश्मौ पु० ।

तीक्ष्णरस पु० तीक्ष्णो रसोऽस्य । १यवक्षारे रत्नमा० । २तिग्मरसयुक्ते त्रि० । कर्म्म० । ३तिग्मे रसे पु० ।

तीक्ष्णलौह न० नि० कर्म्म० । (इस्पात) लौहभेदे ।

तीक्ष्णशूक पु० तीक्ष्णः शूकोऽग्रं यस्य । १यवे । २खरशूकयुक्ते त्रि० । कर्म्म० । ३खरे शूके पु० न० ।

तीक्ष्णसारा स्त्री तीक्ष्णः कठिनः सारोऽस्याः । १शिंशपायाम् (शिशु) राजनि० । २तिग्मसारयुक्ते त्रि० कर्म्म० । ३खरे सारे पुंन० ।

तीक्ष्णा स्त्री तीक्ष्ण+टाप् । १वचायां २सर्पकङ्कालिकायाम् रत्नमा० ३कपिकच्छ्वां ४महाज्योतिष्मत्याम् ५अत्यम्लपर्ण्याम् जटा० । ६तारादेव्याम् च । उग्रतारोपक्रमे "हे भगवत्येकजटे विद्महे पद्मन्ततः । विकटदंष्ट्रे धीमहि तन्नस्तारा प्रचोदयात् । एषा तु तीक्ष्णा गायत्री पीठदेव्याः प्रकीर्त्तिता" । "पानेषु मदिरा शस्ता नरो बलिश्च पार्थिव ! । मोदको नारिकेलञ्च मांसं व्यञ्जनमैक्षवम् । नैवेद्येषु प्रियकरास्तीक्ष्णायाः परिकीर्त्तिताः" । कालि०पु० ८२ अ० ।

तीक्ष्णायस न० नि० कर्म्म० अच् समा० । लौहभेदे (इस्पात) राजनि० ।

तीम क्लेदने दिवा० पर० अक० सेट् । तीम्यति अतीमीत् । [तितीम ।

तीर पारगतौ कर्म्मसमाप्तौ च अद० चुरा० उभ० अक० सेट् । तीरयति ते अतितीरत् त ।

तीर न० तीर-अच् । नद्यादेः १कूले । २सीसके पु० अमरः । ४वाणे पु० त्रिका० । ५त्रपुणि पु० मेदि० । "सार्द्धहस्तशतं यावत् गर्भतस्तीरमुच्यते ; भाद्रकृष्णचतुर्द्दश्यां यावदाक्रमते जलम् । तावद्गर्भं विजानीयात् तदन्यत्तीरमुच्यते" प्रा० त० उक्ते ६गङ्गाकूलभेदे न० "गङ्गातीरतरङ्गसङ्गतजलैः स्नात्वा हरो नार्चितः" सा० द० । "अशून्यतीरां मुनिसन्निवेशैः" रघुः । "अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि" मनुः ।

तीरग्रह पु० देशभेदे "तीरग्रहाः शूरसेनाः ईजकाः कन्यकागुहाः" भा० भी० ९ अ० जनपदोक्तौ ।

तीरभुक्ति पु० (त्रिहोत) देशभेदे त्रिका० ।

तीरु पु० तॄ-बा० क्रु । शिवे "नमस्तेऽभीषुहस्ताय तीरुभीरुहराय च" हरिवं० २७८ अ० । शिवस्तुतौ ।

तीर्ण त्रि० तॄ-क्त । १उत्तीर्णे, २अभिभूते, ३आप्लुते च । "तीर्णो हि तदा भवति" श्रुतिः "तीर्णाः पूर्णाः कति न सरितो लङ्घिताः के न शैलाः नाक्रान्ता वा कति वनभुवः क्रूरसञ्चारघोराः । पापैरेतैः किमिव दुरितं कारितो नास्मि कष्टं यद्दृष्टास्ते धनमदमसीम्लानवक्त्रा दुरीशाः" ।

तीर्णपदी स्त्री तरतेः कर्त्तरि क्तः । तीर्णः पादो मूलमस्याः अन्त्यलोपः कुम्भपद्या० ङीपि पद्भावः । तालमूल्याम् शब्दच० ।

तीर्णा स्त्री प्रतिष्ठाख्यवृत्तिविशेषे यथा "यस्मिन् वृत्ते कर्णः कर्णः वेदैर्वर्णैः सा स्यात् तीर्णा" अस्याः कन्येत्यपि संज्ञा । "ग्मौ चेत् कन्येति" लक्षणात् ।

तीर्थ न० तॄ-थक् । १शास्त्रे २यज्ञे ३क्षेत्रे ४उपाये ५नारीरजसि ६अवतारे ७ऋषिजुष्टजले ८पात्रे ९उपाध्याये १०मन्त्रिणि च मेदि० । ११योनौ १२दर्शने १३घट्टे हेमच० । १४विप्रे १५ आगमे १६निदाने १७वह्नौ च संक्षिप्तसा० । तीर्थं त्रिविधम् जङ्गमं१ मानसं२ स्थावरं३ च । तथा हि "ब्राह्मणा जङ्गमं तीर्थं निर्मलं सार्वकामिकम् । येषां वाक्योदकेनैव शुद्ध्यन्ति मलिनाजनाः । अगस्तिरुवाच । शृणु तीर्थानि गदतो मानसानि ममानघे ! । येषु सम्यक् नरः स्नात्वा प्रयाति परमां गतिम् । सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः । सर्वभूतदयातीर्थं सर्वत्रार्जवमेव च । दानं तीर्थं दमस्तीर्थं सन्तोषस्तीर्थमुच्यते । ब्रह्मचर्य्यं परं तीर्थं तीर्थञ्च प्रियवादिता । ज्ञानं तीर्थं धृतिस्तीर्थं पुण्यं तीर्थमुदाहृतम् । तीर्थानामपि तत्तीर्थं विशुद्धिर्मनसः परा । एतत्ते कथितं देवि ! मानसं तीर्थलक्षणम् ।

भौमानामपि तीर्थानां पुण्यत्वे कारणं शृणु। यथा शरीरस्योद्देशाः केचिन्मेध्यतमाः स्मृताः। तथा पृथिव्यामुद्देशाः केचित् पुण्यतमाः स्मृताः। प्रभावादद्भुताद्भूमेः सलिलस्य च तेजसा। परिग्रहान् मुनीनाञ्च तीर्थानां पुण्यता स्मृता। तस्माद्भौमेषु तीर्थेषु मानसेषु च नित्यशः। उभयेष्वपि यः स्नाति स याति परमां गतिम्" तीर्थभेदा ब्रह्मपुराणे उक्ता यथा

मुनय ऊचुः। "पृथिव्यां यानि तीर्थानि वनान्यायतनानि च। वक्तुमर्हसि धर्मज्ञ! श्रोतुं नो वर्त्तते मनः। रोमहर्षण उवाच। यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम्। विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते। मनो विशुद्धं पुरुषस्य तीर्थं वाचांयमस्त्विन्द्रियनिग्रहस्तपः। एतानि तीर्थानि शरीरजानि स्वर्गस्य मार्गं प्रतिबोधयन्ति। चित्तमन्तर्गतं दुष्टं तीर्थस्नानं न शुध्यति। शतशोऽथ जलैर्धौतं सुराभाण्डमिवाशुचि। न तीर्थानि न दानानि न व्रतानि न चाश्रमाः। दुष्टाशयं दम्भरुचिं पुनन्ति व्यथितेन्द्रियम्। इन्द्रियाणि वशे कृत्वा यत्र तत्र वसेन्नरः। तत्र तस्य कुरुक्षेत्रं प्रयागं पुष्करं तथा। तस्माच्छृणुध्वं वक्ष्यामि तीर्थान्यायतनानि च। संक्षेपेण मुनिश्रेष्ठाः। पृथिव्यां यानि कानि च। विस्तरेण न शक्यन्ते वक्तुं वर्षशतैरपि। प्रथमं पुष्करं तीर्थं नैमिषारण्यमेव च। प्रयागञ्च प्रवक्ष्यामि धर्मारण्यं द्विजोत्तमाः!। धेनुका चम्पकारण्यं सैन्धवारण्यमेव च। गया प्रयागं श्रीतीर्थं दिव्यं कनखलन्तथा। भृगुतुङ्गं हिरण्याक्षं भीमारण्यं कुशस्थली। लोहार्गलं सकेदारं मन्दरारण्यमेव च। महाप्रभं कुरुक्षेत्रं सर्वपापहरन्तथा। रूपतीर्थं शूकरञ्च चक्रतीर्थं महाफलम्। योगतीर्थं सोमतीर्थं तीर्थं शाखोटकं तथा। तीर्थं कोकामुकं पुण्यं वदरीशैलमेव च। सोमतीर्थं तुङ्गकूटं तीर्थं स्कन्दाश्रमन्तथा। सूर्य्यप्रभं रामतीर्थं सप्तसामुद्रकं तथा। धर्मोद्भवं कोटितीर्थं तीर्थञ्चाघप्रणाशनम्। गङ्गाद्वारं पञ्चकूटं मध्यकेशवमेव च। चक्रप्रभं मतङ्गञ्च कुशदण्डञ्च विश्रुतम्। दंष्ट्राकुण्डं विष्णुतीर्थं सर्वकामिकमेव च। तीर्थं सुमलिनञ्चैव वदरीसुप्रभं तथा। ब्रह्मकुण्डं वह्निकुण्डं तीर्थं सत्यपदन्तथा। चतुःस्रोतश्चतुःशृङ्गं शैलं द्वादशवारकम्। मानसं स्थूलशृङ्गञ्च स्थूलदण्डं तथोर्वशी। लोकपाली मरुवकं सोमाद्रिशैलमेव च। सदाप्रभं मेरुकुण्डं तीर्थं सोमाभिषेचनम्। महाशोभं कोचवकं पञ्चधारं त्रिधारकम्। सप्तधारैकतीर्थञ्च तीर्थञ्चामरकण्टकम्। शालग्रामं चक्रतीर्थं कोटिद्रुममनुत्तमम्। बिन्दुप्रभं देवह्रदं तीर्थं विष्णुप्रभन्तथा। शङ्खप्रभं दारुकुण्डं तीर्थं वज्रायुधं तथा। अग्निप्रभं सुपुन्नागं देवप्रभमनुत्तमम्। विद्याधरं सगन्धर्वं श्रीतीर्थं ब्रह्मणा कृतम्। तीर्थञ्च लोकपालाख्यं पुण्यं पिण्डारकं तथा। वस्त्रापदं दारुवनं छायारोहणमेव च। वटावटं भद्रवटं कोषाम्बी च दिवाकरा। द्वीपं सरस्वती चैव विजयं कामजन्तथा। सारवं गोप्रतारञ्च गोचरं वटमूलकम्। स्नानकुण्डं प्रयागञ्च गुह्यं विष्णुपदन्तथा। कन्याश्रमं विष्णुपदं जम्बुमार्गं तथोत्तमम्। गभस्तितीर्थञ्च तथा ययातिपतनं शुचि। कोटितीर्थं भद्रवटं महाकालवनं तथा। नर्मदातीर्थपरमं तीर्थं वर्षं तथार्बुदम्। पिङ्गुतीर्थं सावशिष्टं तीर्थञ्च प्रियसङ्गमम्। तीर्थं दौर्वासिकं नाम तथा पिञ्जरकं शुभम्। ऋषितीर्थं ब्रह्मकुण्डं वसुतीर्थं कुमारिका। शक्रतीर्थं शापनदं रेणुकातीर्थमेव च। पैतामहञ्च विमलं रुद्रपादं तथोत्तरम्। मणिमन्यञ्च कामाख्यं कृष्णतीर्थं कुमारिणम्। यजनं याजनञ्चैव तथैव ब्रह्मवालकम्। पुष्पाभ्यासं पुण्डरीकं मणिपूरं तथोत्तरम्। दीर्घसत्रं हंसपदं तीर्थञ्चानशनन्तथा। गङ्गोद्भेदं शिवोद्भेदं नर्मदोद्भेदमेव च। वज्रकोटि शङ्कुमानं तीर्थं शक्रावनामितम्। समन्तपञ्चकं तीर्थं ब्रह्मतीर्थं सुदर्शनम्। सततं पृथिवीतीर्थं पञ्चप्लव पृथूदकौ। दशाश्वमेधिकं तीर्थं सर्पिदं विषयान्तिकम्। कोटितीर्थं पञ्चनदं वाराहं पक्षिणीह्रदम्। पुण्डरीकं सोमतीर्थं मञ्जुवाटं तथोत्तमम्। वदरीवनमासीमं रत्नमूलकमेव च। लोकद्वारं पञ्चतीर्थं कपिलातीर्थमेव च। सूर्य्यतीर्थं शङ्खिनी च धराभवनमेव च। तीर्थञ्च यक्षराजस्य ब्रह्मावर्तं सुतीर्थकम्। कामेश्वरं मातृतीर्थं तीर्थं शीतवनं तथा। श्वानलोमायनञ्चैव मांसमशनकं तथा। दशाश्वमेधं केदारं ब्रह्मोडुम्बरमेव च। सप्तर्षिकुण्डञ्च तथा तीर्थं देव्याः सुजम्बुकम्। इडास्पदं कोटिकूटं किन्नरं किंजपं तथा। कारण्डवञ्च विन्ध्यञ्च त्रिपिष्टपमथापरम्। पाणिखातं मिश्रकञ्च मधुवटमनोजवौ। कौशिकी देवतीर्थञ्च तीर्थञ्च ऋणमोचनम्। दिव्यञ्च तृणमूलाख्यं तीर्थं विष्णुपदन्तथा।

श्रीकुण्डं शान्तितीर्थञ्च नैमिषेयञ्च विश्रुतम्। ब्रह्मस्थानं सोमतीर्थं कन्यातीर्थं तथोत्तरम्। ब्रह्मतीर्थं मनस्तीर्थं तीर्थञ्चैलावनन्तथा। सौगन्धिकवनञ्चैव मणितीर्थं सरस्वती। ईशानतीर्थं प्रवरं पावनं पाञ्चयज्ञिकम्। त्रिशूलधारा माहेन्द्रं देवस्थानं कृतालयम्। शाकम्भरी देवतीर्थं स्वर्णाख्यं कालियं ह्रदम्। क्षीरेश्वरं विरूपाक्षं भृगुतीर्थं कुशोद्भवम्। ब्रह्मतीर्थं ब्रह्मयोनिं नीलपर्वतमेव च। कुब्जाम्रकं भद्रवटं वशिष्ठपदमेव च। धूमावर्त्तं तथा मेकं वारुणं कापिलञ्च यत्। स्वर्गद्वारं प्रजाद्वारं कालिकाश्रममेव च। रुद्रावर्त्तं सुगन्धाश्वं कपिलावनमेव च। भद्रकर्णह्रदञ्चैव शङ्कुकं ह्रदकं तथा। सप्तसारस्वतञ्चैव तीर्थमौशनसं तथा। कपालमोचनञ्चैव नरकञ्चैव काम्यकम्। तत्र सामुद्रिकञ्चैव शतिकञ्च सहस्रिकम्। रेणुकं पञ्चवटकं विमोचनमथौजसम्। विश्वेश्वरं वामनकं कन्थं नारायणाश्रमम्। गङ्गाह्रदं वटञ्चैव वदरीपचनन्तथा। ऐन्द्रमार्गमेकरात्रं क्षीरिकाराममेव च। सोमतीर्थं दारवञ्च श्रुततीर्थञ्च भो द्विजाः!। कन्याश्रमं सन्निहितं कोटितीर्थञ्च पुन्नदी। कोटितीर्थस्थलीञ्चैव भद्रकालीह्रदन्तथा। अरुन्धतीवनञ्चैव ब्रह्मावर्त्तन्तथोत्तमम्। अश्ववेदी कुब्जवनं यमुनाप्रभवं तथा। वीरप्रमोक्षं सिन्धूत्थं शमीकुल्या सकृत्तिका। उर्वशीक्रमणञ्चैव मायाविद्योद्भवन्तथा। महाश्रमो वैतसिकारूपं सुन्दरिकाश्रमम्। ब्रह्मतीर्थन्तु वैश्वासं गङ्गोद्भेदं सरस्वती। अरुणोदं तथा चान्द्रं शक्रतीर्थं सवालुकम्। तीर्थञ्चैवाविमुक्ताख्यं नीलकण्ठह्रदन्तथा। स्वर्गद्वारं किम्पुलिका तीर्थकोटिस्तथैव च। पिशाचमोचनञ्चैव सुभद्राह्रदमेव च। कुण्डं विमलदं तस्यां तीर्थं चण्डेश्वरस्य च। ज्येष्ठस्थानह्रदञ्चैव हरिकेशवनं तथा। अजामुखवनञ्चैव घण्टाकर्णह्रदन्तथा। पुण्डरीकह्रदञ्चैव वापीकर्कोटिकन्तथा। कुण्डं घर्घरिकायाश्च श्यामाकं पञ्चपुण्यदम्। श्मशानशुम्भकुण्डञ्च विनायकह्रदन्तथा। कूपं सिद्धभवञ्चैव पुण्यं ब्रह्मसरन्तथा। रुद्रावासं तथा तीर्थं नागतीर्थं सुलोमकम्। शृङ्गतीर्थं महातीर्थं श्रेष्ठा चैव महानदी। दिव्यं ब्रह्मसरः पुण्यं गयाशीर्षाक्षयं वटम्। दक्षिणञ्चोत्तरञ्चैव गोमयं रूपशान्तिकम्। कपिह्रदं गृध्रकूटं सावित्रीह्रदमेव च। प्रभासनं शीतवनं योनिद्वारञ्च धेनुकम्। रम्यकं कोकिलाख्यञ्च मतङ्गह्रदमेव च। पितृकूपं रङ्गतीर्थं शक्रतीर्थं सुमालिनम्। ब्रह्मस्थानं सप्तकुण्डं मणिरत्नह्रदन्तथा। मुद्गलस्याश्रमञ्चैव मुद्गल्याह्रदमेव च। तीर्थं जनककूपाख्यं वैश्यं विनशनन्तथा। घाद्यं विनाशतीर्थञ्च धारा माहेश्वरी तथा। देवपुष्करिणी रम्या पर्य्यङ्ककूपमेव च। जातिस्मरं वामनकं वटेश्वरह्रदन्तथा। कौशाख्यं भरतञ्चैव तीर्थं श्रेष्ठात्मिका तथा। विश्वेश्वरं कल्पशतं कन्यासायुज्यमेव च। वाराहकं कोटितीर्थं कुमारं सर्वतीर्थकम्। वीराश्रमं ब्रह्मसरो वीरवीरा च तापिनी। कुमारधारा श्रीधारा गौरीशिखरमेव च। कुम्भकर्णपदञ्चैव कौशिकीह्रदमेव च। धर्मतीर्थं कामतीर्थं तीर्थमुद्दालकं तथा। दण्डा विमालिनी तीर्थं तीर्थञ्चैव नरेभिका। सन्ध्यातीर्थं कारतोयं कपिला लोहितार्णवम्। सोमोद्भवं वंशगुल्ममृषभं कालतीर्थकम्। पुण्यतीर्थह्रदं तीर्थं तीर्थं वदरिकाश्रमम्। रामतीर्थं सिन्धुवनं विरजातीर्थमेव च। मार्कण्डेयवनञ्चैव कृष्णतीर्थं तथा वटम्। ध्रुवं स्वरूपं प्रवरमिन्द्रद्युम्नसरश्च यत्। सानुगर्त्तं समाहेन्द्रं श्रीतीर्थं श्रीवनन्तथा। इषुतीर्थञ्चार्षभञ्च कावेरीतीर्थमेव च। कन्यातीर्थञ्च गोतीर्थं गोमतीस्थानमेव च। संवर्त्तस्थापिनी स्थानं सप्तगोदावरीह्रदम्। वदरीह्रदमन्यच्च ब्रह्मतृष्णाविकर्त्तनम्। जातिह्रदं वेदह्रदं कुशप्रवणमेव च। सर्वदेवव्रतञ्चैव कन्याश्रमह्रदन्तथा। तथान्यत् वालिखिल्यानां सप्तर्षीणां तथा परम्। तथान्यच्च महर्षीणामखण्डितह्रदन्तथा। तीर्थेष्वेतेषु विधिवत् सम्यक् श्रद्धासमन्वितः। स्नानं करोति यो मर्त्यः सर्वपापैः प्रमुच्यते। अभ्यर्च्य देवतास्तत्र स्थित्वा च रजनीत्रयम्। पृथक् पृथक् फलं तेषु प्रतितिष्ठस्व भो द्विजाः!। प्राप्नोति हयमेधस्य फलं प्राप्नोत्यसंशयम्। यश्चेदं शृणुयान्नित्यं तीर्थमाहात्म्यमुत्तमम्। पठेच्च श्रावयेद्वापि सर्वपापैः प्रमुच्यते"।

पद्मपुराणे श्राद्धे प्रशस्ततीर्थानि उक्तानि यथा

भीष्म उवाच। "कस्मिन् वासरभागे तु श्राद्धं श्राद्धी समाचरेत्। तीर्थेषु केषु वै श्राद्धं कृतं बहुफलं भवेत्। पुलस्त्य उवाच। तीर्थन्तु पुष्करं नाम पुण्यं श्रेष्ठतमं स्मृतम्। सर्वेषां द्विजमुख्यानां मनोरथस्थितं तथा। यत्र दत्तं हुतं सर्वमनन्तं मुनिरब्रवीत्।

पितॄणां वल्लभं नित्यमृषीणां परमं प्रियम्। नन्दथुर्ललिता तद्वत्तीर्थं मायापुरी तथा। शुभं मित्रपदं राजंस्ततः केदारमुत्तमम्। गङ्गासागरमित्याहुः सर्वतीर्थमयं शुभम्। तीर्थं ब्रह्मसरस्तद्वत् शतद्रुः सलिलाह्रदः। तीर्थन्तु नैमिषञ्चैव सर्वतीर्थफलप्रदम्। गङ्गोद्भेदस्तु गोमत्यां यत्रोद्भूतः सनातनः। तथा यज्ञवराहस्तु देवदेवस्य शूलधृक्। यत्र तत् काञ्चनद्वारमष्टादशभुजो हरः। नेमिस्तु धर्म्मचक्रस्य शीर्णो यत्राभवत् पुरा। तदेतन्नैमिषारण्यं सर्वतीर्थनिषेवितम्। देवदेवस्य तत्रापि वराहस्य च दर्शनम्। यः प्रयाति स पूतात्मा नारायणपुरं व्रजेत्। कोकामुखं परं तीर्थं ब्रह्मणोऽव्यक्तजन्मनः। पुष्करारण्यसंस्थोऽसौ यत्र देवः पितामहः। विरिञ्चिदर्शनं श्रेष्ठं त्वपवर्गफलप्रदम्। कृतं तेन महापुण्यं सर्वपापनिसूदनम्। यत्राद्यो नरसिंहस्तु स्वयमेव जनार्द्दनः। तीर्थमिक्षुमती नाम पितॄणां वल्लभा सदा। तृप्यन्ति पितरो नित्यं गङ्गायमुनसङ्गमे। कुरुक्षेत्रं महापुण्यं यत्र मार्गोऽपि लभ्यते। अद्यापि पितृतीर्थं तत् सर्वकामफलप्रदम्। नीलकण्ठमिति ख्यातं पितृतीर्थं नराधिप!। तथा भद्रसरः पुण्यं सरोमानसमेव च। मन्दाकिनी तथाच्छोदो विपाशाथ सरस्वती। पूर्वमिन्द्रपदं तद्वद्वैद्यनाथं महासुखम्। गोदावरी तथा पुण्या तथा कालञ्जरं शुभम्। वंशोद्भेदं हरोद्भेदं गङ्गोद्भेदं महालयम्। भद्रेश्वरं विष्णुपदं नर्म्मदाद्वारमेव च। गयापिण्डप्रदानेन समान्याहुर्महर्षयः। एतानि पितृतीर्थानि सर्वपापहराणि च। स्मरणादपि लोकानां किमु श्राद्धप्रदायिनाम्। ओङ्कारं पितृतीर्थन्तु कावेरी कपिलोदकम्। कुरुक्षेत्राच्छतगुणम् तस्मिन् सुखादिकम्भवेत्। शक्रतीर्थन्तु विख्यातं तीर्थं सोमेश्वरं स्मृतम्। सर्वव्याधिहरं पुण्यं फलं कोटिशताधिकम्। श्राद्धे दाने तथा होमे स्वाध्याये जपसन्निधौ। छायावरोहणं नाम देवदेवस्य शूलिनः। स्ववतारं रोचयानो ब्राह्मणावसथे शुभे। जातं तत् सुमहापुण्यं तथा चर्म्मण्वती नदी।' नदी च वरणा तद्वत्तीर्थं हौताशनं परम्। भैरवं भृगुतुङ्गञ्च गौरीतीर्थमनुत्तमम्। तीर्थं वैनायकं नाम वज्रेश्वरमनुत्तमम्। तथा पापहरं नाम पुण्या वेत्रवती नदी। शूलतापी पयोष्णी च पयोष्णीसङ्गमस्तथा। महाबोधी पदेनापि नागतीर्थमवन्तिका। तथा वेणा नदी पुण्या महाशालस्तथैव च। महारुद्रो महालिङ्गो दशार्णा च महानदी।' शतरुद्रागता वापि तथा पितृपदं परम्। युङ्गःवाराहिकं तद्वन्नदौ द्वौ शोणघर्घरौ। कालिका च नदी पुण्यं पितरा च नदी तथा। एतानि पितृतीर्थानि शस्यन्ते स्नानदानयोः। श्राद्धमेतेषु यद्दत्तं तदनन्तफलं स्मृतम्। शनीचाटनदीधारा शवक्षीरनदी तथा। द्वारका कृष्णतीर्थञ्च तथाप्युत सरस्वती। नदी मणिमती नाम तथा च गिरिकर्णिका। धूतपापं तथा तीर्थं समुद्रे दक्षिणे तथा। गोकर्णो गणकर्णश्च तथा च पुरुषोत्तमः। श्रीशैलं शाकतीर्थञ्च नारसिंहमतः परम्। महेन्द्रश्च तथा पुण्यः पुण्या चापि महानदी। एतेष्वपि सदा श्राद्धमनन्तफलमश्नुते। दर्शनादपि पुण्यानि सद्यः पापहराणि च। तुङ्गभद्रा नदी पुण्या तथा भीमनदी सरित्। भीमेश्वरं कृष्णवेण्वा कावेरी वञ्जुरा नदी। नदी गोदावरी पुण्या त्रिसन्ध्या तीर्थमुत्तमम्। तीर्थं त्रैयम्बकं नाम सर्वतीर्थनमस्कृतम्। यत्रास्ते भगवान् भीमः स्वयमेव त्रिलोचनः। श्राद्धमेतेषु तीर्थेषु दत्तं शतगुणं भवेत्। स्मरणादपि पापानि व्रजन्ति शतधा नृप!। श्रीपर्णी च नदी पुण्या व्यासतीर्थमनुत्तमम्। तथा मत्स्यनदीधारा शिवधारा तथैव च। भवतीर्थञ्च विख्यातं पुण्यतीर्थञ्च शाश्वतम्। पुण्यं रामेश्वरं तद्वदेलापुरमनुत्तमम्। अङ्गारभृत्यं विख्यातमात्मदर्शमनायुधम्। तीर्थं व्रतेश्वरं तद्वत्तथा कोकामुखं परम्। गोवर्द्धनं हरिश्चन्द्रं पृथुचन्द्रं पृथूदकम्। सहस्राक्षं हिरण्याक्षं तथा च कदली नदी। नामाधिपापि च तथा तथा सौमित्रसङ्गतम्। इन्द्रनीलं महानादं तथा च प्रियमेलकम्। एतान्यपि सदा श्राद्धे प्रशस्तान्यधिकानि च। एतेषु सर्वदेवानां सान्निध्यं पठ्यते यतः। दानमेतेषु सर्वेषु भवेत् कोटिशताधिकम्। बाहुदा च नदी पुण्या तथा सिद्धवनं शुभम्। तीर्थं पाशुपतञ्चैव नदी पर्पटिका तथा। श्राद्धमेतेषु सर्वेषु दत्तं कोटिशताधिकम्। तथैव पर्वतीर्थञ्च त्रिपुरं खाण्डवं नदी। धृता लिङ्गसहस्रेण सव्येतरजलावहा। जामदग्न्यस्य सत्तीर्थं वेदायतनमुत्तमम्। प्रतीकस्याभया सिद्धा यदा गोदावरी नदी। तीर्थं तद्धव्यकव्यानामप्सरोगणसंयुतम्। श्राद्धादिदानकार्य्यञ्च तद्वत् कोटिशताधिकम्। तथा सहस्रलिङ्गञ्च राघवेश्वरमुत्तमम्। सेन्द्रफला नदी पुण्या यत्र दुःखाहतः पुरम्। निमेश्च

प्रस्तुतिमितं तपसा स्वर्गमाप्नुयात्। तत्र दत्तं नरैः श्राद्धमनन्तफलदं भवेत्। पुष्करं नाम वै तीर्थं शालग्रामं तथैव च। शौनपातश्च विख्यातो यत्र वैश्वानरालयः। तीर्थं सारस्वतं नाम स्वामितीर्थं तथैव च। मनन्दुरा नदी पुण्या कौशिकी चन्द्रिका तथा। विदर्भा चाप्यवेणाथ पयोष्णी प्राङ्मुखी परा। कावेरी चोत्तरागा च तथा जालन्धरो गिरिः। एतेषु श्राद्धतीर्थेषु श्राद्धमानन्त्यमश्नुते। लौहदण्डं तथा दण्डं चित्रकूटन्तथैव च। दिव्यं सर्वत्र गङ्गायास्तथा नदीतटं शुभम्। कुब्जाम्रञ्च तथा तीर्थमुर्वशीपुलिनं तथा। संसारमोचनं तीर्थं तथैव ऋणमोचनम्। एतेषु पितृतीर्थेषु श्राद्धमानन्त्यमश्नुते। अट्टहासं तथा तीर्थं गौतमेश्वरमेव च। तथा वशिष्ठतीर्थञ्च भारतञ्च ततः परम्। ब्रह्मावर्त्तं कुशावर्त्तं हंसतीर्थं तथैव च। पिण्डारकञ्च विख्यातं शङ्खोद्धारं तथैव च। खाण्डेश्वरं विश्वकञ्च नीलपर्वतमेव च। तथा च वदरीतीर्थं रामतीर्थन्तथैव च। जयन्तं विजयञ्चैव शुक्रतीर्थं तथैव च। एतेषु श्राद्धदातारः प्रयान्ति परमं पदम्। तीर्थं मातृगृहं नाम करवीरपुरं तथा। सप्तगोदावरीतीर्थं सर्वतीर्थेश्वरेश्वरम्। तत्र श्राद्धं प्रदातव्यमनन्तफलमिच्छुभिः। कीकटेषु गया पुण्या पुण्यं राजगृहं वनम्। च्यवनस्याश्रमं पुण्यं नदी पुण्या पुनःपुनाः। यत्र गाथा विचरति ब्रह्मणा परिकीर्त्तिता। एष्टव्या बहवः पुत्रा यद्यप्येको गयां व्रजेत्। यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत्। एषा गाथा विचरति तीर्थेष्वायतनेषु च। सर्वे मनुष्या राजेन्द्र! कीर्त्तयन्तः समागताः। किमस्माकं कुले कश्चिद्गयां यास्यति मत्सुतः। प्रीणयिष्यति ताङ्गत्वा सप्त पूर्वांस्तथाऽवरान्। मातामहानामप्येवं श्रुतिरेषा चिरन्तनी। गङ्गायाञ्चास्थिनिचयं गत्वा क्षेप्स्यति मत्सुतः। तिलैः सप्ताष्टभिर्वापि दास्यते च जलाञ्जलिम्। अरण्यत्रितये चापि पिण्डदानं करिष्यति। प्रथमं पुष्करारण्यं नैमिषन्तदनन्तरम्। धर्मारण्यं ततः प्राप्य श्राद्धं भक्त्या प्रदास्यति। गयायां धर्मपृष्ठे वा सरसि ब्रह्मणस्तथा। गयाशीर्षवटे चैव पितॄणां दत्तमक्षयम्। व्रतं कुर्यान्नरो यस्तु अध्वानं परिसर्पति। नरकस्थान् पितॄंस्तद्वत् स्वर्गं नयति सत्वरः। कुले तस्य न राजेन्द्र! प्रेतो भवति कश्चन। प्रेतत्वमोक्षभावश्च पिण्डदानाच्च गच्छति। गयायां पिण्डदानस्य नान्यत्स्थानं विशिष्यते। एकेन पिण्डदानेन तृप्तास्ते मोक्षगामिनः। धान्यप्रदानं प्रवरं वदन्ति वस्त्रप्रदानञ्च तथा मुनीन्द्राः। तोयञ्च तीर्थेषु नरैः प्रदत्तं तद्धर्महेतुं प्रवरं प्रदिष्टम्। सर्वाघघ्ना सुरुचिरा महाबला महानदी। ये तु पश्यन्ति तां गत्वा मानसे दक्षिणोत्तरे। प्रणम्य द्विजमुख्येभ्यः प्राप्तं तैर्जन्मनः फलम्। यद्यदिच्छति वै मर्त्यस्तत्तत् प्राप्नोत्यसंशयम्। एष उद्देशतः प्रोक्तस्तीर्थानां संग्रहो मया। वागीशोऽपि न शक्नोति विस्तरात् किमु मानुषाः” पुराणसर्वस्वे।

श्राद्धे तीर्थभेदस्य प्राशस्त्यं विष्णुसंहितायामुक्तं यथा

“अथ पुष्करेषु श्राद्धम् जप्यहोमतपांसि च। पुष्करे स्नानमात्रतः सर्वपापेभ्यः पूतो भवति। एवमेव गयाशीर्षे अक्षयवटे अमरकण्टकपर्वते वराहपर्वते यत्र क्वचन नर्मदातीरे गङ्गायां विशेषतः, कुशावर्त्ते विल्वके नीलपर्वते कनखले कुब्जाम्रे भृगुतुङ्गे केदारे महालये नड़न्तिकायां सुगन्धायां शाकम्भर्यां फल्गुतीर्थे महागङ्गायां त्रिशालिकाश्रमे कुमारधारायां प्रभासे यत्र क्वचन सरस्वत्यां विशेषतः। गङ्गाद्वारे प्रयागे च गङ्गासागरसङ्गमे। सततं नैमिषारण्ये वाराणस्यां विशेषतः। अगस्त्याश्रमे कौशिक्यां सरयूतीरे शोणस्य ज्योतिषायाश्च सङ्गमे। श्रीपर्वते कालोदके उत्तरमानसे वड़वायां मतङ्गवाप्यां सप्तर्षे विष्णुपदे स्वर्गमार्गपदे गोदावर्य्यां गोमत्यां वेत्रावत्यां विपाशायां वितस्तायां शतद्रुतीरे चन्द्रभागायाम् इरावत्यां सिन्धोस्तीरे दक्षिणे पञ्चनदे औशनसे। एवमादिष्वथान्येषु तीर्थेषु सरिद्वरासु सर्वेष्वपि स्वभावेषु पुलिनेषु प्रस्रवणेषु पर्वतेषु निकुञ्जेषु वनेषूपवनेषु गोमयोपलिप्तेषु मनोज्ञेषु”

तीर्थागमने दोषो यथा “अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च। अदत्त्वा काञ्चनं गाश्च दरिद्रो नाम जायते” प्रा० त०। तीर्थगमने फलं यथा

“अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः। न तत् फलमाप्नोति तीर्थाभिगमनेन यत्। तीर्थान्यनुस्मरन् धीरः श्रद्दधानः समाहितः। कृतपापो विशुध्येत किं पुनः शुद्धकर्मकृत्। तिर्य्यग्योनिं न वै गच्छेत् कुदेशे न च जायते। न दुःखी स्यात् स्वर्गभाक् च मोक्षोपायञ्च विन्दति” ब्रह्मवै०पु०।

तीर्थसम्यक्फलभागिनो यथा “यस्य हस्तौ च पादौ

च मनश्चैव सुसंयतम् । विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते । प्रतिग्रहादुपावृत्तः सन्तुष्टो येन केनचित् । अहङ्कारविमुक्तश्च स तीर्थफलमश्नुते । अदाम्भिको निरारम्भो लघ्वाहारो जितेन्द्रियः । विमुक्तः सर्व्वसङ्गैर्यः स तीर्थफलमश्नुते । अकोपनोऽमलमतिः सत्यवादी दृढव्रतः । आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते । अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः । हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः । इति काशीखण्डम् । प्रा०त० । तीर्थप्रतिग्रहे दोषो यथा ।

"तीर्थे न प्रतिगृह्णीयात् संक्रान्त्यादिषु च तथा । स्वकार्य्ये पितृकार्य्येऽपि देवताभ्यर्च्चनेऽपि वा । निष्फलं तस्य तत्तीर्थं यावत्तद्धनमश्नुते" । "तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे । वाराणस्यां वदर्य्याञ्च गङ्गासागरसङ्गमे । पुष्करे भास्करक्षेत्रे प्रभासे रासमण्डले । हरिद्वारे च केदारे सोमे वदरपाचने । सरस्वतीनदीतीरे पुण्ये वृन्दावने वने । गोदावर्य्याञ्च कौशिक्यां त्रिवेण्याञ्च हिमालये । एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः । स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च" इति ब्रह्मवै०प्र०ख० । शङ्खः "तीर्थं प्राप्यानुषङ्गेन स्नानं तीर्थे समाचरन् । स्नानजं फलमाप्नोति तीर्थयात्राफलं न तु" । तथा यस्य पादौ च हस्तौ च मनश्चैव सुसंयुतम् । विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते । नृणां पापकृतां तीर्थे भवेत् पापस्य संक्षयः । यथोक्तफलदं तीर्थं भवेच्छुद्धात्मनां नृणाम्" । हस्तसंयमोऽत्र निन्दितप्रतिग्रहादिनिवृत्तिः । पादसंयमस्तु अगम्यदेशादिगमननिवृत्तिः । मनःसंयमः कामक्रोधादिनिवृत्तिः, विद्या तत्तत्तीर्थफलबोधकसच्छास्त्रवेदाद्यधिगमरूपा । तपः आमिषादिनिवृत्तिः । कीर्त्तिः धर्मार्थतीर्थगमने धार्म्मिकत्वादिना प्रसिद्धिः । फलं सम्यगिति शेषः । एतच्च हस्तसंयमनादितीर्थयात्राङ्गं महाभारते तीर्थयात्रामुपक्रम्याभिधानात् तीर्थस्नानादिकर्म्माङ्गञ्च, प्रसङ्गेन यात्राप्रकरणमन्तरेणैव स तीर्थफलमश्नुते इति सामान्याभिधानात् । इति कल्पतरुः । अतएव पैठीनसिः "षोड़शांशं स लभते यः परार्थेन गच्छति । अर्द्धं तीर्थफलं तस्य यः प्रसङ्गेन गच्छति" । परार्थेन वेतनादिना, प्रसङ्गेन उद्देश्यान्तरप्रसङ्गेन । "तथा प्रतिकृतिं कृत्वा तीर्थवारिणि मज्जयेत् । मज्जयेत्तु यमुद्दिश्य अष्टभागं लभेन सः" ।

तीर्थयात्राविधानं यथा "यो यः कश्चित्तीर्थयात्रान्तु गच्छेत् । सुसंयतः स च पूर्वं गृहे स्वे । कृतोपवासः शुचिरप्रमत्तः संपूजयेद्भक्तिनम्रो गणेशम् । देवान् पितॄन् ब्राह्मणांश्चैव साधून् धीमान् प्रीणयन् वित्तशक्त्या प्रयत्नात् । प्रत्यागतश्चापि पुनस्तथैव देवान् पितॄन् ब्राह्मणान् पूजयेच्च । एवं कुर्वतस्तस्य तीर्थे यदुक्तं फलं तत् स्यान्नात्र सन्देह एव" इति ब्रह्मपुराणम् । एतदधिकारे प्रा०त० ।

"सुसंयतः पूर्वदिने कृतैकभक्तादिनियमः । तदुत्तरदिने कृतोपवासस्तदुत्तरदिने गणेशं ग्रहानिष्टदेवताश्च संपूज्य वृद्धिश्राद्धं कृत्वा ब्राह्मणान् भोजयेत् । ततः शुभलग्ने यात्रां कुर्य्यात् तीर्थयात्रान्तु गच्छेदित्युपक्रमादुपवासदिने मुण्डनमपि । "प्रयागे तीर्थयात्रायां पितृमातृवियोगतः । कचानां वपनं कार्य्यं न वृथा विकचो भवेत्" इति विष्णुपुराणवचनात् । प्रवेशेऽपि तीर्थयात्रायामिति वक्तव्यम् । "गच्छन् देशान्तरं यस्तु श्राद्धं कुर्य्यात्तु सर्पिषा । यात्रार्थमिति तत् प्रोक्तं प्रवेशे च न संशयः" इति भविष्यपुराणादिति गङ्गावाक्यावली । वस्तुतस्तु तीर्थप्रत्यागमनोत्तरस्वगृहप्रवेशे इत्येव वक्तव्यम् । यात्राप्रत्यागमनोत्तरस्वगृहप्रवेशयोर्भेदात् प्रत्यागमनोत्तरलाभस्तु प्रत्यागतश्चापीति प्रागुक्तत्वात् व्यक्तमाह हलायुधधृतं कूर्मपुराणवचनम् "तीर्थयात्रासमारम्भे तीर्थात् प्रत्यागमेऽपि च । वृद्धिश्राद्धं प्रकुर्वीत बहुसर्पिःसमन्वितम्" । ततश्च प्रवेशे चेति चकारेण श्राद्धमात्रं समुच्चितम् । नतु तस्य यात्रार्थत्वमपीति । एवं देवान् पितॄनित्यभिधानात् तत्पूजनमेव पुनः कार्य्यं नतूपवासादिकमपि अन्यथा देवानित्यादिकं व्यर्थं स्यात् । मत्स्यपुराणम् "तिलोदकाञ्जलिर्देयो जलस्थैस्तीर्थवासिभिः । सदा न हस्तेनैकेन गृहे श्राद्धं समिष्यते" । अत्र जलस्थैरित्यनेन स्थलस्थानामपि जलस्थत्वं नियम्यते । तथा हि "अन्तरुदके आचान्तो अन्तरेव शुद्धोभवति । तस्मादन्तरेकं वहिरेकञ्च पादं कृत्वा आचामेत् सर्व्वत्र शुद्धोभवति" इति पैठीनस्युक्तेन जलैकचरणकृताचमनेन उभयत्र कर्म्मार्हत्वात् तर्पणकाले तीर्थे जलैकचरणत्वं प्रतीयते । अन्यत्र त्वनियमः । तद्रूपायां जले च तर्पणमविरुद्धमिति । गृह इति स्थलोपलक्षणम् । देवीपुराणे । "अकालेऽप्यथ वा काले तीर्थश्राद्धं तथा नरैः । प्राप्तैरेव सदा कार्य्यं कर्त्तव्यं

पितृतर्पणम्। पिण्डदानं ततः शस्तं पितॄणाञ्चातिदुर्लभम्। विलम्बो नैव कर्त्तव्यो न च विघ्नं समाचरेत्। श्राद्धं तत्र तु कर्त्तव्यमर्घ्यावाहनवर्जितम्। श्वध्वाङ्क्षगृध्रकाकानां नैव दृष्टिहतञ्च यत्”। ध्वाङ्क्षोदण्डकाकः। अत्राकाल इति न रात्र्यादाविति पर्य्युदस्तप्रतिप्रसवः। तथात्वे तद्बाधापत्तेः। किन्तु पर्य्युदस्तेतराप्रशस्तकालपरम्। “तत् सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः” इत्यनुसारात्। काल इति प्रशस्तापराह्णादिकालपरम्। अत्र शुचेः प्राप्त्युत्तरविहितप्रथमदिन एव श्राद्धं तेन पूर्वदिने राक्षसीवेलादावागमनेऽपि परदिने श्राद्धमविरुद्धम्। तथा च हलायुधधृतम् “गत्वैव तीर्थं कर्त्तव्यं श्राद्धं तत्प्राप्तिहेतुकम्। पूर्वाह्णेप्यथ वा प्रातर्देशे स्यात् पूर्वदक्षिणे”। पूर्वाह्णे सङ्गवे पूर्वदक्षिणे अग्निकोणे। पिण्डदानमिति श्राद्धासम्भवे केवलपिण्डदानमिति न पौनरुक्त्यम्। तीर्थे पिण्डप्रतिपत्तिमाह मत्स्यपुराणम् “पिण्डांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा। तीर्थश्राद्धे सदा पिण्डान् क्षिपेत्तीर्थे विचक्षणः”।

वायुपु० “उद्यतश्चेद्गयां गन्तुं श्राद्धं कृत्वा विधानतः। विधाय कर्पटीवेशं कृत्वा ग्रामं प्रदक्षिणम्। ततो ग्रामान्तरं गत्वा श्राद्धशेषस्य भोजनम्” इत्युक्तं गयामित्युपलक्षणादन्यत्रापि तथा। अन्यत् मत्कृतगयाश्राद्धादिपद्धतौ द्रष्टव्यम्।

कूर्मपुराणम् “ऐश्वर्य्यलोभमाहात्म्यात् गच्छेद्यानेन यो नरः। निष्फलं तस्य तत्तीर्थं तस्माद्यानं विवर्जयेत्” इति मत्स्यपुराणम् “संवत्सरं द्विमासोनं पुनस्तीर्थं व्रजेद्यदि। मुण्डनञ्चोपवासञ्च तदा यत्नेन कारयेत्” इति गङ्गावाक्याव०। तीर्थप्राप्त्यनन्तरविधानं यथा।

“न परीक्ष्यो द्विजस्तीर्थेष्वन्नार्थी भोज्य एव हि। सक्तुभिः पिण्डदानञ्च चरुणा पायसेन च। कर्त्तव्यमृषिभिर्दृष्टं पिण्याकेन गुडेन च। श्राद्धं तत्र तु कर्त्तव्यमर्घ्यावाहनवर्जितम्। अकालेऽप्यथवा काले तीर्थश्राद्धन्तु तर्पणम्। अविलम्बेन कर्त्तव्यं नैव विघ्नं समाचरेत्। यदह्नि तीर्थप्राप्तिः स्यात्ततोऽह्नः पूर्ववासरे। उपवासश्च कर्त्तव्यः प्राप्तेऽह्नि श्राद्धदो भवेत्। तीर्थोपवासः कर्त्तव्यः शिरसो मुण्डनं तथा। शिरोगतानि पापानि यान्ति मुण्डनतो यतः। तीर्थं प्राप्य प्रसङ्गेन स्नानं तीर्थे समाचरेत्। स्नानजं फलमाप्नोति तीर्थयात्राश्रितं न तु” इति काशीखण्डम्। “मुण्डनञ्चोपवासश्च सर्वतीर्थेष्वयं विधिः। वर्जयित्वा गयां गङ्गां विशालां विरजान्तथा” इति स्कान्दम् “स्नापयेत् स्निग्धमित्रादीन् ज्ञातीं स्तीर्थे नरोत्तमः। अन्यथापहरन्त्येते बलात्तीर्थभवं फलम्” इति स्कान्दम् “मातरं पितरं जायां भ्रातरं सुहृदं गुरुम्। यमुद्दिश्य निमज्जेत अष्टभागं लभेत सः” इति प्रा०त०मार्क०पु०।

कलौ तीर्थानां पृथिव्यां स्थितिकालो यथा “सरस्वती पुण्यक्षेत्रमाजगाम च भारतम्। गङ्गाशापेन कलया स्वयं तस्थौ हरेः पदे। पश्चाद्भगीरथानीता महीं भागीरथी शुभा। समाजगाम कलया वाणीशापेन नारद!। पद्माजगाम कलया सा च पद्मावती नदी। भारतं भारतीशापात् स्वयं तस्थौ हरेः पदे। कलेः पञ्चसहस्रञ्च वर्षान् स्थित्वा च भारते। जग्मुस्ताश्च सरिद्रूपं विहाय श्रीहरेः पदम्। यानि सर्वाणि तीर्थानि काशीं वृन्दावनं विना। यास्यन्ति ताभिः सार्द्धञ्च वैकुण्ठमाज्ञया हरेः”।

“यानादिना गमनदोषो यथा “पुण्यार्द्धं हरते याने तदर्द्धं तत्र पादुके। तदर्द्धं तैलमांसाभ्यां सर्वं हरति मैथुने” इति कर्म्मलोचनम्।

तत्र उपाये घट्टे च “कृततीर्थः पयसामिवाशयः” किरा०। शास्त्रे तीर्थकरः। पात्रे। “ब्रह्मचारी धनदायी मेधावी श्रोत्रियः प्रियः। विद्यया विद्यं यः प्राह तानि तीर्थानि षण्मम” विद्यावाक्यम्। १८चात्वालोत्करयोरन्तराले देशे “दक्षिणेनाहृत्य तीर्थेन पूर्वेण वेदिमपरेण वा” कात्या०श्रौ०५।५।११। “तीर्थेन चात्वालोत्करावन्तरेण प्रवेश्य वेदिचात्वालयोरन्तरालेन पूर्वेणोत्तरवेदिं दक्षिणेनाग्नेः पुरस्तादाहृत्य अथवा तीर्थेन प्रवेशनानन्तरमुत्तरां वेदिमपरेण चानीय वेद्योरन्तरालेन दक्षिणस्याग्नेः पुरस्तादानीय जुहोति” “तेनान्तरेण प्रतिपद्यन्ते चात्वालं चैतद्वै देवानां तीर्थम्” षड्विं०ब्रा०। कराङ्गुलितलेषु ब्राह्मादितीर्थता यथाह मनुः “ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत्। कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन। अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते। कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः” शास्त्रानुज्ञाविषये। “अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः” छा०उ० “तीर्थशास्त्रानुज्ञाविषयः” भाष्यम्। १९मन्त्र्याद्यष्टादशसु। “कच्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च। त्रिभिस्त्रिभिर-

विज्ञातैर्वेत्ति तीर्थानि चारकैः" भा० स० ५ अ०। "तीर्थानि मन्त्रिप्रभृतीन्यष्टादश यान्यवगाह्य राजा कृतकृत्यो भवति तानि चोक्तानि नीतिशास्त्रे "मन्त्री१ पुरोहितश्चैव२ युवराजश्च३ भूपतिः४ पञ्चमो द्वारपालश्च५ षष्ठोऽन्तर्वेशिकस्तथा६। कारागाराधिकारी७ च द्रव्यसञ्चयकृत्तथा८। कृत्याकृत्येषु चार्थानां नवमो विनियोजकः९। प्रदेष्टा१० नगराध्यक्षः११ कार्य्यनिर्माणकृत्तथा१२। धर्माध्यक्षः१३ सभाध्यक्षो१४ दण्डपालस्त्रिपञ्चमः१५। षोड़शो दुर्गपालश्च१६ तथा राष्ट्रान्तपालकः१७। अटवीपालकान्तानि१८ तीर्थान्यष्टादशैव तु। चारान् विचारयेत्तीर्थेष्वात्मनश्च परस्य च। पाषण्डादीनविज्ञातानन्योन्यमितरेष्वपि। मन्त्रिणं युवराजञ्च हित्वा स्वेषु पुरोहितमिति" एषां तीर्थशब्दवाच्यत्वे हलायुधः "योनौ जलावतारे च मन्त्र्याद्यष्टादशस्वपि। पुण्यक्षेत्रे तथा पात्रे तीर्थं स्याद्दर्शनेष्वपि"। इति परेषामष्टादशसु स्वस्य मन्त्रिपुरोहितयुवराजवर्जं पञ्चदशसु च तीर्थेषु चारानन्यैः परस्परं चाविज्ञातांस्त्रींस्त्रीन् प्रयुज्य तत्रत्यां वार्त्तां सर्वचारसंवादे तथ्यां जानीयात्" नी० क०।

२·जलाशयादरत्निमात्रदेशे आदित्यपुराणे "अरत्निमात्रं जलं त्यक्त्वा कुर्याच्छौचमनुद्धृते। पश्चाच्च शोधयेत्तीर्थमन्यथा न शुचिर्भवेत्"। तस्मिन् देशे शौचं न कर्त्तव्यं यस्मादरत्निमात्रव्यवहितजलात् तत् स्थलमेव तीर्थं जलसमीपत्वात्" आ० त०।

"तीर्थाश्रमवनारण्यगिरिपर्वतसागराः। सरस्वती भारती च पुरीति दश कीर्तिताः" महानि० तन्त्रोक्ते ३सन्यासिनामुपाधि भेदे। तल्लक्षणं तत्रैव "त्रिवेणीसङ्गमे तीर्थे तत्त्वमस्यादिलक्षणे। स्नायात्तत्तीर्थभावेन तीर्थनामा स उच्यते"। अन्यानि च भौमतीर्थानि भारततीर्थयात्रापर्वादौ पुराणान्तरेषु प्रसिद्धानि। "अन्यानि यानि तीर्थानि काशीप्राप्तिकराणि च। काशीं प्राप्यैव मोक्षन्ते नान्यथा कल्पकोटिभिः" नीलकण्ठधृतवाक्यम्।

तीर्थकर पु० तीर्थं शास्त्रं करोति कृ-ट। १जिने हेमच०। २शास्त्रकरे त्रि०। ३विष्णौ पु। "मनोजवस्तीर्थकरः" विष्णुस०। "चतुर्दशविद्यानां बाह्यसमयानां च प्रणेता प्रवक्ता चेति तीर्थकरः हयग्रीवरूपेण मधुकैटभौ हत्वा विरिञ्चये सर्गादौ सर्वाः श्रुतीरन्याश्च विद्या उपादिशत् बाह्यविद्याः सुरवैरिणां वञ्चनाय चोपादिशदिति. पौराणिकाः कथयन्ति" भाष्यम्।

तीर्थकाक पु० तीर्थे काक इव लोलुपत्वात्। तीर्थे काकसदृशव्यवहारिणि लोलुपे। तीर्थध्वाङ्क्षादयोऽप्यत्र।

तीर्थकृत् पु० तीर्थं करोति कृ-क्विप् ६त०। १जिनदेवे हेमच०। २शास्त्रकरे त्रि०।

तीर्थङ्कर पु० तीर्थं शास्त्रं करोति कृ-ख मुम् च। जिनदेवे [हेमच०।

तीर्थदेव पु० तीर्थमिव श्रेष्ठः देवः तीर्थे दीव्यति वा दिव-अच् वा। शिवे शिवसहस्रनाम।

तीर्थमहाह्रद पु० तीर्थरूपो महाह्रदः। स्वनामख्याते तीर्थभेदे "नन्दा चापरनन्दा च तथा तीर्थमहाह्रदः" भा० अनु० १६५ अ०। नानातीर्थोक्तौ।

तीर्थयात्रा स्त्री तीर्थमुद्दिश्य यात्रा। १तीर्थोद्देशेन यात्रायाम्। तद्विधिः मत्कृतगयाश्राद्धादिपद्धतौ दृश्यः। भारतान्तर्गते २वनपर्वाऽवान्तरपर्वभेदे। "तीर्थयात्रा ततः पर्व कुरुराजस्य धीमतः" भा० व० १अ०। तच्च वनपर्वणि ८०अध्यायावधि१५६अध्यायान्तम्। [तीर्थराजिशब्दे उदा०

तीर्थराज पु० तीर्थानां राजा षच्समा०। प्रयागे तीर्थे।

तीर्थराजि(जी) स्त्री तीर्थानां राजिरत्र। अविमुक्ते काश्यां त्रिका० वा ङीप्। निन्दनात्तत्राष्टषष्टितीर्थानामानयनात्तथात्वम्। यथोक्तं काशी० ६९ अ०। "सर्वरत्नमया रम्या साष्टषष्टिरभूदिह। भूर्भुवःस्वस्तले यानि शुभान्यायतनानि हि। मुक्तिदान्यपि तानीह मयाऽऽनीतानि सर्वतः। यतोयच्च समानीतं यत्र यच्च कृतास्पदम्। कथयिष्याम्यहं नाथ! क्षणं तदवधीयताम्। स्थाणुर्नाम महालिङ्गं देवदेवस्य मोक्षदम्। कुरुक्षेत्रादिहोद्भूतं कलाशेषोऽस्ति तत्र वै। तदग्रे सन्निहित्याख्या महापुष्करिणी शुभा। लोलार्कपश्चिमे भागे कुरुक्षेत्रस्थली तु सा। तत्र स्नातं कृतं जप्तं तप्तं दत्तं शुभार्थिभिः। कुरुक्षेत्राद्भवेत् सत्यं कोटिकोटिगुणाधिकम्। नैमिषाद्देव देवोऽत्र ब्रह्मावर्त्तेन संयुतः। तत्रांशमात्रं संस्थाप्य काश्यामाविरभूद्विभो!। ढुण्ढिराजोत्तरे भागे सिद्धिदं साधकस्य वै। लिङ्गं वै देवदेवाख्यं तदग्रे कूप उत्तमः। ब्रह्मावर्त्त इति ख्यातः पुनरावृत्तिकृन्तनम्। तत्कूपाद्भिः कृतस्नानो देवदेवं समर्च्य च। तत्पुण्यान्नैमिषारण्यात् कोटिकोटिगुणं स्मृतम्। गोकर्णायतनादत्र स्वयमाविरभून्महत्। लिङ्गं महाबलं नाम शाम्बादित्यसमीपतः। दर्शनात् स्पर्शनादस्य क्षणादेनो महाबलम्। वाताहतस्तुलराशिरिव विद्राति दूरतः। कपालमोचनपुरो दृष्ट्वा लिङ्गं महाबलम्। महाबल-

मवाप्नोति निर्वाणनगरं व्रजेत् । ऋणमोचनतः प्राच्यां प्रभासात् क्षेत्रसम्भवात् । शशिभूषणसंज्ञं तु लिङ्गमत्र प्रतिष्ठितम् । तल्लिङ्गं सेवनान्मर्त्यः शशिभूषणतां व्रजेत् । प्रभासक्षेत्रयात्रायाः पुण्यं प्राप्नोति कोटिमत् । उज्जयिन्या महाकालः स्वयमत्रागतो विभुः । यन्नामस्मरणादेव न भयं कलिकालतः । प्रणवाख्यान्महालिङ्गात् प्राच्यां कलुषनाशनम् । महाकालाभिधं लिङ्गं दर्शनान्मोक्षदं परम् । योगन्धेश्वरलिङ्गं पुष्करात्तीर्थसम्भवात् । आविरासीदिह महत् पुष्करेण सदैव तु । तस्योदग्युत्तरे भागे दृष्ट्वाऽयोगन्धमुत्तमम् । स्नात्वाऽयोगन्धकुण्डे तु भवात्तारयते पितॄन् । महानादेश्वरं लिङ्गमट्टहासादिहागतम् । त्रिलोचनादुदीच्यान्तु तद्दृष्टिर्मुक्तये सताम् । महोत्कटेश्वरं लिङ्गं मरुत्कोटादिहागतम् । कामेश्वरोत्तरे भागे दृष्टं विमलसिद्धिदम् । विश्वस्थानादिहायातं लिङ्गं वै विमलेश्वरम् । स्वर्लीनात् पश्चिमे भागे दृष्टं विमलसिद्धिदम् । महाव्रतं महालिङ्गं महेन्द्रादिह संस्थितम् । स्कन्देश्वरसमीपे तु महाव्रतफलप्रदम् । वृन्दारकर्षिवृन्दानां स्तुवतां प्रथमे युगे । उत्पन्नं यन्महालिङ्गं भूमिं भित्त्वा सुदुर्भिदाम् । महादेवेति तैरुक्तं यन्मनोरथपूरणात् । वाराणस्यां महादेवस्तदारभ्याभवच्च यत् । मुक्तिक्षेत्रं कृतं येन महालिङ्गेन काशिका । अविमुक्ते महादेवं यो द्रक्ष्यत्यत्र मानवः । शम्भुलोके गमस्तस्य यत्र तत्र स्थितस्य हि । अविमुक्ते प्रयत्नेन तत् संसेव्यं मुमुक्षुभिः । कल्पान्तरेऽपि न त्यक्तं कदाप्यानन्दकाननम् । येन लिङ्गस्वरूपेण महादेवेन सर्वथा । तत्प्रसादोऽयमतुलः सर्वरत्नमयः शुभः । हिरण्यगर्भतीर्थाच्च प्रतीच्यां क्षेत्ररक्षिका । वाराणस्यामधिष्ठात्री देवता साभिलाषदा । महादेवेति संज्ञा वै सर्वलिङ्गस्वरूपिणी । वाराणस्यां महादेवो दृष्टो यैर्लिङ्गरूपधृक् । तेन त्रैलोक्यलिङ्गानि दृष्टानीह न संशयः । वाराणस्यां महादेवं समभ्यर्च्य सकृन्नरः । आहूतसंप्लवं यावच्छिवलोके वसेन्मुदा । पवित्रपर्वणि सदा श्रावणे मासि यत्नतः । लिङ्गे पवित्रमारोप्य महादेवे न गर्भभाक् । पितामहेश्वरं लिङ्गं गयातीर्थादिहागतम् । फल्गुप्रभृतिभिस्तीर्थैः सार्द्धं कोट्यष्टसम्मितैः । धर्मेण यत्र वै तप्तं युगानामयुतं शतम् । साक्षीकृत्य महालिङ्गं श्रीमद्धर्मेश्वराभिधम् । पितामहेश्वरं लिङ्गं तत्राभ्यर्च्य नरो सदा । त्रिःसप्तकुलसंयुक्तो मुच्यते नात्र संशयः । प्रयागतीर्थराजस्य शूलटङ्को महेश्वरः । तीर्थराजेन सहितः स्थित आगत्य वै स्वयम् । निर्वाणमण्डपाद्रम्यादवाच्यामतिनिर्मलः । प्रासादो मेरुणा यस्य स्पर्द्धते काञ्चनोज्ज्वलः । देवेनैव वरो दत्तो तत्र पूर्वयुगान्तरे । पूज्यो महेश्वरः काश्यां प्रथमं कलुषापहः । यः प्रयाग इह स्नातो नमस्यति महेश्वरम् । समभ्यर्च्य विधानेन महासम्भारविस्तरैः । प्रयागस्नानजात् पुण्यं शूलटङ्कविलोकनात् । स प्राप्नुयान्न सन्देहः पुण्यं कोटिगुणोत्तरम् । शङ्कुकर्णान्महाक्षेत्रान् महातेज इतीरितम् । लिङ्गमाविरभूदत्र महातेजोभिवृद्धिदम् । महातेजोनिधेस्तस्य प्रासादोऽतीव निर्मलः । ज्वालाजटिलिताकाशो माणिक्यैरेव निर्मितः । तल्लिङ्गदर्शनात् स्पर्शात् स्तवनाच्च समर्चनात् । प्राप्यते तत् परं धाम यत्र गत्वा न शोचते । विनायकेश्वरात् पूर्वे महातेजःसमर्चनात् । तेजोमयेन यानेन याति माहेश्वरं पदम् । रुद्रकोटिसमाख्यातात्तीर्थात् परमपावनात् । महायोगेश्वरं लिङ्गमाविश्चक्रे स्वयं परम् । पार्वतीश्वरलिङ्गस्य समीपे सर्वसिद्धिकृत् । तल्लिङ्गदर्शनात् पुंसां कोटिलिङ्गफलं लभेत् । तत्प्रासादस्य परितो रुद्राणां कोटिसम्मिता । प्रासादरम्यसंस्थाना निर्मिता रुद्रमूर्त्तिभिः । काश्यां रुद्रस्थली सा तु पठ्यते वेदवादिभिः । रुद्रस्थल्यां मृता ये वै कृमिकीटपतङ्गकाः । पशुपक्षिमृगा मर्त्या म्लेच्छा वाप्यथ दीक्षिताः । तेषां तु रुद्रीभूतानां पुनरावृत्तिरत्र न । जन्मान्तरसहस्रेषु यत् पापं समुपार्जितम् । रुद्रस्थलीं प्रविष्टस्य तत् सर्वं व्रजति क्षयम् । अकामो वा सकामो वा तिर्य्यग्योनिगतोऽपि वा । रुद्रस्थल्यां त्यजन् प्राणान् परं निर्वाणमाप्नुयात् । स्वयमेकाम्बरात् क्षेत्रात् कृत्तिवासा इहागतः । कृत्तिवासमिलिङ्गेऽत्र स्वयमेव व्यवस्थितः । अस्मिन् लिङ्गे स्वभक्तानां साम्बः सर्षिगणो विभुः । स्वयञ्चोपदिशेद्ब्रह्म श्रुतौ श्रुतिभिरीरितम् । क्षेत्रेऽत्र सिद्धिदे प्राप्तश्चण्डीशो मरुजाङ्गलात् । प्रचण्डपापसंघातं खण्डयेच्छतधेक्षणात् । पाशपाणिगणाध्यक्षसमीपे यः प्रपश्यति । चण्डीश्वरं महालिङ्गं स याति परमां गतिम् । कालञ्जरान्नीलकण्ठस्तिष्ठेदत्र स्वयं विभुः । गणेशात् कूटदन्ताख्यात् समीपे भवनाशनः । नीलकण्ठेश्वरं लिङ्गं काश्यां यैः परिपूजितम् । नीलकण्ठास्तएव स्युस्तएव

शशिभूषणाः । काश्मीरादिह संप्राप्तं लिङ्गं विजयसंज्ञितम् । सदा विजयदं पुंसां विजयेशः समर्च्चनात् । ऊर्द्ध्वरेतास्त्रिदण्डायाः संप्राप्तोऽत्र स्वयंविभुः । कुष्माण्डकं गणाध्यक्षं पुरस्कृत्वा व्यवस्थितः । ऊर्द्ध्वां गतिमवाप्नोति वीक्षणादूर्द्ध्वरेतसः । ऊर्द्ध्वरेतसि ये भक्ता न हि तेषामधोगतिः । मण्डलेश्वरतः क्षेत्राल्लिङ्गं श्रीकण्ठसंज्ञितम् । विनायकान्मुण्डसंज्ञादुत्तरस्यां दिशि स्थितम् । श्रीकण्ठस्य तु ये भक्ताः श्रीकण्ठा एव ते नराः । नेह श्रिया वियुज्यन्ते न परत्र कदाचन । छागलाण्डान्महातीर्थात् कपर्द्दीश्वरसंज्ञितः । पिशाचमोचने तीर्थे स्वयमाविरभूद्विभुः । कपर्द्दीशं समभ्यर्च्च्य न नरो निरयं व्रजेत् । न पिशाचत्वमाप्नोति कृत्वाऽत्राप्यवमुत्तमम् । आषाढ़केश्वरात् क्षेत्रात् लिङ्गं सूक्ष्मेशसंज्ञितम् । स्वयमभ्यागतं चात्र क्षेत्रे वै श्रेयसां पदे । विकटद्विजसंज्ञस्य गणेशस्य समीपतः । दृष्ट्वा लिङ्गेश्वरं लिङ्गं गतिं शुभामवाप्नुयात् । संप्राप्तमिह देवेशं जयन्तं मधुकेशवात् । लम्बोदराद्गणपतेः पुरस्तात्तदवस्थितम् । जयन्तेश्वरमालोक्य स्नात्वा गङ्गाजले शुभे । प्राप्नुयाद्वाञ्छितां सिद्धिं सर्व्वत्र विजयी भवेत् । प्रादुश्चकार देवेशः श्रीशैलात्त्रिपुरान्तकः श्रीशैलशिखरं दृष्ट्वा यत् फलं समुदीरितम् । त्रिपुरान्तकमालोक्य तत्फलं हेलयाप्यते । विश्वेशात् पश्चिमे भागे त्रिपुरान्तकमीश्वरम् । संपूज्य परया भक्त्या न नरो गर्भमाविशेत् । सौम्यस्थानादिहायातो भगवान् कुक्कुटेश्वरः । वक्रतुण्डगणाध्यक्षसमीपे सोऽवतिष्ठते । तद्दर्शनादर्च्चनाच्च करस्थाः सर्व्वसिद्धयः । जलेश्वरात्त्रिशूली च स्वयमीशः समागतः । एकदन्तोत्तरे भागे सोऽर्च्चितः सर्व्वकामदः । त्रिसन्ध्याक्षेत्रतो देवस्त्र्यम्बकोऽस्ति समागतः । त्रिमुखात् पूर्व्वदिग्भागे पूजितस्त्र्यम्बकत्वकृत् । हरेश्वरो हरिश्चन्द्रात् क्षेत्रादत्र समागतः । हरिश्चन्द्रेश्वरपुरः पूजितो जयदः सदा । इह सर्व्वः समायातः स्थानात् मध्यमकेश्वरात् । चतुर्व्वेदेश्वरं लिङ्गं पुरो वायव्यसंस्थितम् । सर्व्वलिङ्गं समभ्यर्च्च्य काश्यां परमसिद्धिकृत् । न जातु जन्तुपदवीं प्राप्नुयात् कापि मानवः । स्थलेश्वरान्महालिङ्गं प्रादुर्भूतं परन्त्विह । यत्र यज्ञेश्वरं लिङ्गं सर्व्वयज्ञफलप्रदम् । महालिङ्गं समभ्यर्च्च्य महाश्रद्धासमन्वितः । महतीं श्रियमाप्नोति लोकेऽत्र च परत्र च । इह लिङ्गं सहस्राख्यं सुवर्णाख्यात् समागतम् । यस्य संदर्शनात् पुंसां ज्ञानचक्षुः प्रजायते । शैलेश्वरादवाच्यान्तु सहस्राक्षेश्वरं विभुम् । दृष्ट्वा जन्मसहस्राणां शतानां पातकं त्यजेत् । हर्षिताद्धर्षितं चात्र प्रादुरासीत्तमोहरम् । लिङ्गं हर्षप्रदं पुंसां दर्शनात् स्पर्शनादपि । महेन्द्रेश्वरसमीपे तु प्रासादो हर्षितेशितुः । तद्विलोकनतः पुंसां नित्यं हर्षपरम्परा । इह स्वयं समायातो रुद्रो रुद्रमहालयात् । यस्य दर्शनतो यान्ति रुद्रलोके नराः स्फुटम् । यैस्तु रुद्रेश्वरं लिङ्गं काश्यामत्र समर्च्चितम् । ते रुद्ररूपिणो मर्त्या विज्ञेया नात्र संशयः । त्रिपुरेशसमीपे तु दृष्ट्वा रुद्रेश्वरं विभुम् । रुद्रास्त एव विज्ञेया जीवन्तोऽपि मृता अपि । छागादिह महादेवो वृषेशो वृषभध्वजात् । वाणेश्वरस्य लिङ्गस्य समीपे वृषदः सदा । इहागतं तु केदारादीशानेश्वरसंज्ञितम् । तत् द्रष्टव्यं प्रतीच्यां च लिङ्गं प्रह्लादकेश्वरात् । ईशानेशं समभ्यर्च्च्य स्नात्वा तु वरणाम्भसि । वसेदीशाननगरे ईशानसदृशप्रभः । भैरवाद्भैरवीमूर्त्तिरत्रायाता मनोहरा । संहारभैरवो नाम द्रष्टव्यः स प्रयत्नतः । पूजनात् सर्व्वसिद्धौ स प्राच्यां खर्व्वविनायकात् । संहारभैरवः काश्यां संहरेदघसन्ततिम् । उग्रः कनखलात्तीर्थादाविरासीत् सुसिद्धिदः । तद्विलोकनतो नृणामुग्रं पापं विनश्यति । उग्रं लिङ्गं सदा सेव्यं प्राच्यां खर्व्वविनायकात् । अत्युग्रा अपि नश्येयुरुपसर्गास्तदर्च्चनात् । यक्षापथान्महाचोलाङ्गवो नाम स्वयं विभुः । प्राच्यां दण्डीश्वरः पूज्यः स देहलिविनायकात् । तस्यार्च्चनेन मर्त्यानां न पुनर्भव ईक्ष्यते । भीमचण्डीसमीपे तु प्रादुरासीदिह प्रभुः । भवेश्वरं समभ्यर्च्च्य भवे नाविर्भवेन्नरः । प्रभुर्भवति सर्व्वेषां राज्ञामाज्ञाकृतामिह । देवदारुवनाद्दण्डी दण्डयन् पातकावलीः । वाराणस्यां समागत्य स्थितो लिङ्गाकृतिर्भवः । प्राच्यां दण्डीश्वरः पूज्यः स देहलिविनायकात् । तस्यार्च्चनेन मर्त्यानां न पुनर्भव ईक्ष्यते । भद्रकर्णह्रदादुदण्डो भद्रकर्णह्रदान्वितः । शिवः साक्षादिहायातः सर्व्वेषां शिवदोऽर्च्चितः । उद्दण्डाख्याद्गणपतेः प्राच्यां तत्तीर्थमुत्तमम् ! भद्रकर्णह्रदे स्नात्वाऽभ्यर्च्च्य लिङ्गं शिवाह्वयम् । सर्व्वत्र शिवमाप्नोति भद्रं भयविनाशकम् । शृणुयात् सर्व्वभूतानां भद्रं पश्यति चाक्षिभिः । शङ्करश्च हरिश्चन्द्रात् त्वत्पुरः प्रतिभासते । तत्पूजनाज्जनानां न जननीजठरे जनिः । यमलिङ्गान्महातीर्थात् काललिङ्ग-

मिह स्थितम् । कलशेश इति ख्यातं चन्द्रेशात् पश्चिमेन तु । यमतीर्थे नरः स्नात्वा मित्रावरुणदक्षिणे । काललिङ्गं समालोक्य कलिकालभयं कुतः । तत्र भौम चतुर्दश्यां यस्तु यात्रां करिष्यति । अपि पातकयुक्तश्च यमयात्रां न यास्यति । नेपालाच्च महाक्षेत्रादायात् पशुपतिस्त्विह । यत्र पाशुपतो योग उपदिष्टः पिनाकिना । महता देवदेवेन ब्रह्मादिभ्यो विमुक्तये । तस्य संदर्शनादेव पशुपाशैर्विमुच्यते । करवीरकतीर्थाच्च कपालीश इहागतः । कपालमोचने तीर्थे द्रष्टव्यः स प्रयत्नतः । तद्विलोकनमात्रेण ब्रह्महत्या विलीयते । उमापतिर्देविकाया इहागत्य व्यवस्थितः । दृष्टः पशुपतेः प्राच्यां हरेत् पापं चिरार्जितम् । लिङ्गं महेश्वरक्षेत्रादिह दीप्तेशसंज्ञितम् । उपोमापति तिष्ठेत्तु दीप्त्यै चेह परत्र च । भुक्तिमुक्तिप्रदं लिङ्गं दीप्तेशं काशिमध्यगम् । छायारोहणतः क्षेत्रादायातो नकुलीश्वरः । शिष्यैः परिवृतस्तिष्ठेन्महापाशुपतव्रतैः । दक्षिणे हि महादेवात् दृष्टो ज्ञानं प्रयच्छति । अज्ञानं नाशयेत् क्षिप्रं गर्भसंसृतिहेतुकम् । गङ्गासागरतश्चागादमरेश इतीरितम् । लिङ्गं यद्दर्शनादेव नामरत्वं हि दुर्लभम् । सप्तगोदावरीतीर्थाद्देवो भीमेश्वरः प्रभुः । प्रकाशते लिङ्गरूपी भुक्त्यै मुक्त्यै नृणामिह । नकुलीशात् पुरोभागे दृष्ट्वा भीमेश्वरं प्रभुम् । महाभीमानि पापानि प्रणश्यन्ति हि तत्क्षणात् । भूतेश्वरात् भस्मगात्रः प्रादुरासीदिह स्वयम् । भीमेशाद्दक्षिणे भागे तदभ्यर्च्यं प्रयत्नतः । सम्यक् पाशुपताद्योगादभ्यस्ताच्च समाः शतम् । यत्प्राप्नोति फलं तस्माद्भस्मगात्रविलोकनात् । नकुलीश्वरतो देवः स्वयम्भुरिति विश्रुतः । आत्मना प्रकटीभूतः काश्यां लिङ्गाकृतिर्हरः । स्वयम्भुलिङ्गं संपूज्य स्नात्वा सिद्धिह्रदे नरः । महालक्ष्मीश्वरपुरो न भूयो जन्मभाग्भवेत् । प्रयागतीर्थे निकषा प्रासादो विद्रुमः प्रभुः । वाराहस्य महानेष वरणी नाम एव हि । विन्ध्यपर्वं ततः प्राप्तो देवं श्रुत्वा समागतम् । सगणं सर्षिदेवञ्च मन्दराद्रत्नकन्दरात् । काश्यां धरणिवाराहो द्रष्टव्यः स प्रयत्नतः । आपत्समुद्रसंमग्नमुद्धरेच्छरणागतम् । कर्णिकाराद्गणाध्यक्षः कर्णिकारप्रसूनरुक् । समर्च्योऽयं गदाहस्त उपसर्गसहस्रहृत् । तस्माद्धरणिवाराहात् प्रतीच्यां दिशि संस्थितम् । पूजयित्वा गणाध्यक्षं गाणपत्यपदं लभेत् । हेमकूटाद्विरूपाक्षं लिङ्गमत्राविरास ह । महेश्वराद्वायव्यां तु दृष्टं संसारतारकम् । गङ्गाद्वाराद्धिमस्थेशं लिङ्गं हिमसमप्रभम् । ब्रह्मनालात् प्रतीच्यां च द्रष्टव्यमिह सिद्धिदम् । गणाधिपश्च कैलासात् गणा अन्ये महाबलाः । कैलासाद्रेः समायाताः सप्तकोटिमिताः प्रभो ! । दुर्गाणि तैः कृतानीह सप्त स्वर्गसमानि च । सद्वाराणि सयन्त्राणि सकपाटनिभानि च । कोटिकोटिभटाढ्यानि सर्वर्द्धिसहितानि च । सुवर्णरूप्यताम्रैश्च कांस्यरीतिकसीसकैः । अयस्कान्तेन कान्तानि रत्नान्यभ्रलिहान्यपि । ततः शैलं महादुर्गं तैः काशी परितः कृतम् । परिखापि कृता निम्ना मत्स्योदर्या जलाविला । मत्स्योदरी द्विधा जाता वहिरन्तश्चरी पुनः । तच्च तीर्थं महाख्यात मिलितं गाङ्गवारिभिः । यदा संहारमार्गेण गङ्गाम्भः प्रसरेदिह । तदा मत्स्योदरी तीर्थं लभते पुण्यगौरवात् । सूर्य्याचन्द्रमसोः पर्व तदा कोटिगुणं शतम् । सर्वपर्वाणि तत्रैव सर्वतीर्थानि तत्र वै । तत्रैव सर्वलिङ्गानि गङ्गा मत्स्योदरी यतः । मत्स्योदर्य्यां हि ये स्नाता यत्र कुत्रापि मानवाः । कृतपिण्डप्रदानास्ते न मातुरुदरेवसाः । अविमुक्तमिदं क्षेत्रं मत्स्याकारत्वमाप्नुयात् । परितः स्वर्धुनीवारिसंसारो परि वीक्ष्यते । मत्स्योदर्य्यां कृतस्नाना ये नरास्ते नरोत्तमाः । कृत्वापि बहुपापानि नेक्षन्ते भास्करेः पुरीम् । किं स्नात्वा बहुतीर्थेषु किं तप्त्वा दुष्करं तपः । यदि मत्स्योदरीस्नाताः कुतो गर्भभयं ततः । यत्र यत्र हि लिङ्गानि नृदेवर्षिकृतान्यपि । तत्र मत्स्योदरीं प्राप्य सुस्नातो मोक्षभाजनम् । सन्ति तीर्थान्यनेकानि भूर्भुवः स्वर्गतान्यपि । न समानि परत्नानि कोट्यंशेनापि निश्चितम् । इत्थं तीर्थं कृतं तेन विभो ! । कैलासवासिनः । गणाधिपेन सुमहत्सु महोदरकर्मणा । भूर्भुवःसंज्ञकं लिङ्गं पर्वताद्गन्धमादनात् । स्वयमाविरभूदत्र तस्मात् प्राच्यां गणाधिपात् । विलोक्य भूर्भुवं लिङ्गं भूर्भुवःस्वर्महः परे । निवसन्ति जनाः पुण्याः सुचिरं दिव्यभोगिनः । सप्तपातालहाटकेशं महालिङ्गं भोगवत्या समायुतम् । शेषवासुकिमुख्यैश्च तलत इहायातं स्वयं विभो ! । मणिमाणिक्यरत्नौघैर्निर्मायि तत्प्रासादो महानिह । प्रयत्नतः । तल्लिङ्गं हाटकमयं रत्नमालाभिरर्चितम् । ईशानेश्वरतः प्राच्यां पूजनीयं प्रयत्नतः । भक्तितोऽभ्यर्च्य तल्लिङ्गं नरः सर्वैः समृद्धिमान् । क्ष्मा भोगभुजामसंख्या-

तानन्ते निर्वाणमृच्छति । आकाशात्तारकं लिङ्गं ज्योतीरूपमिहागतम् । ज्ञानवाप्याः पुरोभागे तल्लिङ्गं तारकेश्वरम् । तारकज्ञानमभ्येति तल्लिङ्गस्य समर्चनात् । ज्ञानवाप्यां नरः स्नात्वा तारकेशं विलोक्य च । कृतसन्ध्यादिनियमः परितर्प्य पितामहान् । धृतमौनव्रतो धीमान् यावल्लिङ्गविलोकनम् । मुच्यते सर्वपापेभ्यः पुण्यं प्राप्नोति शाश्वतम् । प्रान्ते च तारकं ज्ञानं यस्मात् ज्ञानाद्विमुच्यते । किरातश्च किरातेश इह चाविर्बभूव ह । किरातरूपो भगवान् यत्र देवोऽभवत् पुरा । तत्किरातेश्वरं लिङ्गं भारभूतेश्वरादनु । नमस्कृत्वा नरो जातु न मातुरुदरेशयः । लङ्कापूर्याः समागच्छन्मरुकेश्वरसंज्ञकम् । पौलस्त्यलाघवात् पश्चात् पूजितं सर्वदुःखहृत् । पुण्यं जलप्रियं लिङ्गं जललिङ्गस्थलादपि । आयातं तच्च गङ्गाया जलमध्ये व्यवस्थितम् । तत्प्रासादोऽद्भुततरो मध्येगङ्गं निरीक्ष्यते । सर्वधातुमयः श्रेष्ठः सर्वरत्नमयः शुभः । अद्यापि दृश्यते कैश्चित् पुण्यसम्भारगौरवात् । श्रेष्ठं लिङ्गमिहायातं तीर्थात्कोटीश्वरादपि । कोटिलिङ्गार्चनपुण्यं तल्लिङ्गस्य निरीक्षणात् । श्रेष्ठं श्रेष्ठेश्वरात्पश्चात् श्रेष्ठसिद्धिप्रदायकम् । वड़वास्यात् समुद्भुतं लिङ्गमात्रानलेश्वरम् । नलेश्वरपुरोभागे पूजितं सर्वसिद्धिदम् । आगत्य विरजस्तीर्थाद्देवदेवस्त्रिलोचनः । लिङ्गे त्वनादिसंसिद्धे ह्यवतस्थे त्रिविष्टपे । पुण्ये पिलिप्पिले तीर्थे सर्वेषां तारकप्रदे । आविश्चक्रे स्वयं देव ओङ्कारेऽमरकण्टकात् । तदाद्यं तारकक्षेत्रं यदा गङ्गा न चागता । तदैवाविरभूत् काशी त्रैलोक्योद्धरणाय वै । तदोङ्कृति महल्लिङ्गं स्वयमाविरभूत्ततः । महिमानं न तस्यान्यः परिवेत्ति विभो कृते । एतान्यायतनानीश ! आनिनाय महान्ति च । शोभयित्वांशमात्रञ्च तस्मिन् क्षेत्रे निजे निजे । इहायातानि पुण्यानि सर्वभावेन नान्यथा । प्रासादाः सर्वतः श्रेष्ठा रम्या अभ्रंलिहा विभो ! । बहुधातुमयाश्चित्राः सर्वरत्नमहोज्ज्वलाः । येषां कलसमात्रस्य दर्शनान्मुक्तिराप्यते । श्रुत्वा च नामचैतेषां लिङ्गानां सुरसत्तम ! अपि जन्मसहस्रोत्थाः क्षीयन्ते पापराशयः । इदानीं को निदेशोऽत्र मयानुष्ठेय ईशितः ! । प्रसादीक्रियतां सोऽपि सिद्धो मन्तव्य एव हि । श्रीस्कन्द उवाच । श्रुत्वेति नन्दिनो वाक्यं देवदेवेश्वरो हरः । मुदा प्रसाद्य शैलादिमिदं प्रोवाच कुम्भज ! । श्रीदेवदेव उवाच । साधु कृतं त्वया नन्दिन् ! सदानन्दविधायक ! । विधेहि मे निदेशं च चक्रीव्यापारयाधुना । नव कोट्यस्तु चामुण्डायास्तत्र निवसन्ति हि । सदैव ताभिः सहिताः भूतवेतालभैरवैः । ताः पुरीरक्षणार्थाय सवाहनबलायुधाः । प्रतिदुर्गं दुर्गरूपाः परितः परिवासय । श्रीस्कन्द उवाच । नन्दिनं स निदेश्यापि मृड़ान्या सहितो मृड़ः । ययौ त्रैविष्टपं क्षेत्रं मुक्तिबीजप्ररोहणम् । शिलादतनयोऽप्यैशीं मूर्द्धन्याज्ञां विधाय च । आहूय सर्वास्ता दुर्गाः प्रतिदुर्गं न्यवेशयत् । निशम्याध्यायमेतञ्च पुण्यायतनगर्भितम् । नरः स्वर्गापवर्गौ च प्राप्नुयात् श्रद्धया क्रमात् । श्रुत्वाष्टषष्टिमेतां वै महायतनसंभवाम् । न जातु प्रविशेन्मर्त्यो जनन्या जठरीदरीम्"। [प्रशंसनीयत्वात् । केशे हेमच० ।

तीर्थवाक पु० तीर्थस्येव वाको वचनमस्य उत्ताङ्गस्थित्या

तीर्थशौच न० तीर्थस्य घट्टस्य शौचं परिष्कारः । घट्टादिपरिष्कारे । "सेतुबन्धरता ये च तीर्थशौचरताश्च ये । तड़ागकूपकर्त्तारो मुच्यन्ते ते तृषाभयात्" । आदित्यपु० तीर्थशौचं घट्टपरिष्कारः" रघु० ।

तीर्थसेनि स्त्री कुमारानुचरमातृभेदे । "माधवी शुभवक्त्रा च तीर्थसेनिश्च भारत !" भा० शल्य० ४७ अ० ।

तीर्थसेविन् पुंस्त्री० तीर्थं जलप्रान्तं सेवते मत्स्याहारार्थं सेव–णिनि । १बके राजनि० स्त्रियां ङीप् । २तीर्थसेवके त्रि० ।

तीर्थ्य पु० तीर्थे भवः यत् । रुद्रभेदे । "नमस्तीर्थ्याय च कुल्याय च" यजु० १६।४२ । समानतीर्थे वसति यत् । सतीर्थ्ये एकगुरुके अमरः । [तितीव ।

तीव स्थौल्ये भ्वा० पर० अक० सेट् । तीवति अतीवीत् ।

तीवर पु० तृ–ष्वरजन्तः नि० । १समुद्रे, २व्याधे, ३वर्णसङ्करजातिभेदे(तेओर)पुंस्त्री० जातिशब्दे दृश्यम् । स्त्रियां ङीष् ।

तीव्र न० तीव–रक् तिज–वन् दीर्घः जस्य वो वा । १अतिशये २तद्वति त्रि० अमरः । ३तीक्ष्णे ४लौहभेदे (इस्पात) ५तीरे ६त्रपुणि च उणा० ७लौहमात्रे राजनि० । ८अत्युष्णे ९कटौ १०नितान्ते च त्रि० उणा० । ११शिवे पु०शब्दर० । "विलङ्घिताधोरणतीव्रयत्नाः" रघुः । "तीव्रोत्थितास्तावदसह्यरंहसः" "तीव्रं महाव्रतमिवात्र चरन्ति वप्राः" माघः । वैराग्यस्य उपायस्य च तीव्रत्वं पात० सू० भाष्ये विवरणे च दर्शितं यथा "ते खलु नव योगिनो मृदुमध्याधिमात्रोपाया भवन्ति । तद्यथा, मृदूपायो मध्योपायोऽधिमात्रोपाय इति । तत्र मृदूपायोऽपि त्रिविधः मृदुसंवेगो मध्यसंवेगस्तीव्रसंवेग

इति। तथा मध्योपायस्तथाधिमात्रोपाय इति, तत्राधिमात्रोपायानाम्" भा॰ "तीव्रसंवेगानामासन्नतमः" पात॰सू॰। "समाधिलाभः समाधिफलञ्च भवतीति" भाष्यम् ननु श्रद्धादयश्चेद्योगोपायास्तर्हि सर्वेषामविशेषेण समाधितत्फले स्यातां दृश्यते तु कस्यचित्सिद्धिः कस्यचिदसिद्धिः कस्यचिच्चिरेण सिद्धिः कस्यचिच्चिरतरेण सिद्धिः कस्यचित्क्षिप्रमित्यत आह, "ते खलु नवयोगिन" इति। उपायाः श्रद्धादयो मृदुमध्याधिमात्राः प्राग्भवीयसंस्कारादृष्टवशाद् येषां ते तथोक्ताः संवेगोवैराग्यं तस्यापि मृदुमध्यतीव्रता प्राग्भवीयवासनादृष्टवशादेवेति तेषु यादृशां क्षेपीयसी सिद्धिस्तान् दर्शयति सूत्रेण, "तीव्रसंवेगानामासन्नतमः इति सूत्रम्" विव॰।

तीव्रकण्ठ पु॰ तीव्रः कण्ठो यस्मात् ५ब॰। सेवनेन कण्ठपीडके १सूरणे (ओल)रत्नमा॰ तस्य सेवने हि कण्ठोद्वेजिता लोकप्रसिद्धा।

तीव्रकन्द पु॰ तीव्रः कन्दोऽस्य। सूरणे राजनि॰।

तीव्रगन्धा स्त्री तीव्रो गन्धो यस्याः। यवान्यां राजनि॰। २तीव्रगन्धयुक्ते त्रि॰। कर्म॰। ३तीव्रे गन्धे पु॰।

तीव्रज्वाला स्त्री तीव्रं यथा तथा ज्वालयति उद्वेजयति सेविनम् ज्वल–णिच्–अच्। १धातक्याम् राजनि॰। तत्स्पर्शने हि गात्रे व्रणजन्म लोकप्रसिद्धमिति तस्यास्तथात्वम्। २तीव्रज्वालायुक्ते त्रि॰। कर्म॰। ३तीव्रायां ज्वालायां स्त्री।

तीव्रदारु न॰ कर्म॰। १तीव्रे दारुणि। तस्य विकारः रजता॰ अञ्। तैव्रदारव तद्विकारे त्रि॰ स्त्रियां ङीप्।

तीव्रबन्ध पु॰ तीव्रो बन्धो यस्मात्। तामसगुणे "दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता" गीतायां तामसकार्यासुरसम्पदो बन्धहेतुत्वोक्तेस्तथात्वम्।

तीव्रवेदना स्त्री कर्म॰। घोरायां यातनायाम् अमरः।

तीव्रसंवेग पु॰ कर्म॰। तीव्रवैराग्ये तीव्रशब्दे दृश्यम्।

तीव्रा स्त्री तीव्र+टाप्। १गण्डदूर्वायां २कटुरोहिण्यां ३राजिकायां (राइसरिसा) मेदि॰। ४नदीभेदे शब्दर॰। ५महाज्योतिष्मत्यां ६तरदीवृक्षे ७तुलस्याञ्च राजनि॰। ८तीव्रवेगयुक्तस्त्रीमात्रे च।

तीव्रानन्द तीव्र आनन्दोऽस्य। शिवे शिवसहस्रनाम।

तु वृत्तौ (वृद्धौ पा॰)अक॰ हिंसायां पूर्त्तौ च सक॰अदा॰पर॰ अनिट्। तौति तवीति। अतौषीत्। अत्र "नाभ्यस्तस्याचि पिति सार्वधातुके" ७।३।८७। "सूत्रतः सार्वधातुके इत्यस्यानुवृत्तिसम्भवेऽपि "तुरुस्तुशम्यमः सार्वधातुके" ७।३।९५ पा॰सूत्रे "पुनः सार्वधातुकग्रहणमपिदर्थमिति" सि॰कौ॰। तेन "उतो वृद्धिर्लुकि हलि" ७।३।८९पा॰सूत्रात् हलीत्यस्य "ब्रुव ईट्" ७।३।९३पा॰सूत्रात् "ईटः यङो वा" सू॰वेत्यस्य चानुवृत्तिः न पितीत्यस्य तेन तुवीतः तुतः तुवीथः तुथः। अचि तु न। तुवन्ति। मुग्धबोधमते तु हलीत्यस्यानुवृत्तिवत् पितीत्यस्यानुवृत्तिरिति वभ्राम" तेन तन्मते तुत इत्येव इति भेदः। तुताव। वेदे तुजादि॰अभ्यासदीर्घः। "स तूताव नैनमश्नोत्यंहतिरग्ने!" ऋ॰ १।९४।२ "ब्रह्मा तूतोदिन्द्रो गातुमिष्णन्" ऋ॰२।२०।५। तु वृद्धावित्यस्य लङि बहुलं छन्दसि विकरणस्य लुः। अडागमाभावश्च" भा॰।

तु अव्य॰ तुद–मितद्रु॰डु। १पादपूरणार्थे निरर्थके। "निरर्थकं तुहीत्यादि पूरणैकप्रयोजनम्" चन्द्रालोकः। २भेदे ३अवधारणे अमरः। ४समुच्चये ५पक्षान्तरे ६नियोगे ७प्रशंसायां ८विनिग्रहे शब्दर॰। तत्र पक्षान्तरे "आचारेण तु संयुक्तः संपूर्णफलभाक् भवेत्" मनुः। समुच्चये "उष्ट्रयानं समारुह्य खरयानं तु कामतः। स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुध्यति" मनुः। पूजायामेतद्योगे "तुपश्यपश्यताहैः पूजायाम्" पा॰तिङन्तं न निहन्यते" आदह स्वधाम तु पुनर्गर्भत्वमेरिरे" सि॰ कौ॰ धृता श्रुतिः।

तुकाक्षीरी स्त्री तुगाक्षीरी+पृषो॰। वंशरोचनायाम् हेम॰।

तुक्ष त्रि॰ तुष–बा॰ कस्। तोषयुक्ते मतः पक्षा॰ चतुरर्थ्यां फक्। तौक्षायण तत्सन्निकृष्टदेशादौ त्रि॰।

तुखा(षा)र पु॰विन्ध्यपर्वतस्थे जातिभेदे। "ये चान्ये विन्ध्यनिलयास्तुखा(षा)रास्तुम्बरास्तथा। अधर्मरुचयस्तात! विद्धि तान् वेणसम्भवान्" हरिवं॰ ५अ॰।

तुगा स्त्री तुज–बा॰ घ कित्च। वंशरोचनायां राजनि॰।

तुगाक्षीरी स्त्री तुगेव क्षीरी। वंशरोचनायाम् राजनि॰।

तुग्र न॰ तुज–रक् न्यङ्क्वा॰ जस्य गः। अश्विनीकुमारयोः शिष्ये राजर्षिभेदे। "तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन् ममृवाँ अवाहाः" ऋ॰१।११६।२। अत्रेयमाख्यायिका। "तुग्रो नामाश्विनोः प्रियः कश्चिद्राजर्षिः। स च द्वीपान्तरवर्त्तिभिः शत्रुभिरत्यन्तमुपद्रुतः सन् तेषां जयाय स्वपुत्रं भुज्युं सेनया सह नावा प्राहैषीत्। सा च नौर्मध्ये समुद्रमतिदूरं गता वायुवशेन भिन्नासीत्। तदानीं स भुज्युः शीघ्रमश्विनौ तुष्टाव" भा॰। "ता भुज्युं विभिरद्भ्यः समुद्रात् तुग्रस्य सूनुमूहथूरजोभि" ऋ॰६।६२।६। "ता तौ अश्विनौ युवां

तुग्रस्य सूनुं भुज्युं भुज्यु नामकं समुद्रमध्ये भग्ननावम्”भा०

तुग्र्या स्त्री तुज–रक् न्यङ्क्वा० कुः स्वार्थे यत्। १जले निघण्टुः। “आवः शमं वृषभं तुग्र्यासु” ऋ० १।३३।१५। “तुग्र्यासु जलेषु”भा०। निघण्टौ बुसं तुग्र्यमिति पाठान्तरात्। जले न०। तदनुसारेण “पिब स्वधैनवानामुत यस्तुग्र्ये सचा”८।२२।२०। बुसं तुग्र्यमित्युदकनामसु पाठात्”भा०। वस्तुतस्तु निघण्टौ बुसं तुग्र्यं तुग्र्यावर्बरमित्येव पाठः मुद्रितपुस्तके तुग्र्यमिति पतितम्। तुग्रस्य राजर्षेरपत्यं बा० यत्। तुग्रपुत्रे भुज्यौ पु०। “अस्तं वयो न तुग्र्यम्”ऋ० ८।३।२३ “‘तुग्र्यं तुग्रपुत्रम्”भा०।

तुग्वन् त्रि० तुज-बा० कनिप् न्यङ्क्वा० जस्य गः। १हिंसके। “सुषास्त्वा अधि तुग्वनि” ऋ० ८।१९।३७।

तुङ्ग पु०तुजि--हिंसायां घञ् न्यङ्क्वा०कुः।१पुन्नागवृक्षे २पर्वते ३बुधग्रहे हेमच०।४नारिकेले ५गण्डके राजनि०। ६उच्चे त्रि०। ७ग्रहविशेषस्य राशिभेदे पु०। उच्चशब्दे १५८पृ० दृश्यम् “अजवृषभमृगाङ्गनाकुलीरा झषवणिजौ च दिवाकरादितुङ्गाः। दशशिखिमनुयुक्तिथीन्द्रियांशैस्त्रिनवकविंशतिभिश्च तेऽस्तनीचाः”! “सूर्याद्युच्चान् क्रियवृषमृगस्त्रीकुलीरान्त्ययूके दिग्वह्नीन्द्रद्वयतिथिशरान् सप्तविंशांश्च विंशान्। अंशानेतान् वदति यवनश्चान्त्य तुङ्गांस्तुतुङ्गांस्तानेवांशान् मदनभवनेष्वाह नीचान्सुनीचानिति”।

तुङ्गस्थग्रहभेदफलम् “तुङ्गेऽर्कः शुभसंयुतः शुभकरैर्मित्रैश्च दृष्टो यदा दैवात् पश्यति सोऽपि वा शुभकरानेकं द्विकं वा त्रिकम्। वित्तेशः प्रथितो विमर्द्दितरिपुः क्षौणीशमान्योऽथवा क्ष्मापालार्च्चितपादपद्मयुगलो राजा त्रिकोणे यदा”। र०। “तुङ्गे चन्द्रमसि प्रसन्नवपुषि वभ्रादनष्टद्युतौ प्रख्यातोऽरिविमर्द्दकोऽगदतनू राजेश्वरो रूपवान्। क्ष्मापालार्च्चितपादपद्मयुगलो वा धर्मशीलो महान् सौम्यैरेव युतोऽथ वा प्रियतमैर्दृष्टे त्रिकोणेऽपि च”। च०। “यदि भवति मृगस्थो भूमिपुत्रस्तदा वै न दिनकरमयूखाद्भ्रष्टरश्मिर्नरेन्द्रः। अगदतनुरभीतः शत्रुदर्पापहारी प्रणतरिपुनरेन्द्रः स्यात्त्रिकोणेऽपि जातः”। म०। “कन्यास्थः शशलाञ्छनस्य तनयस्तिग्मांशकैः संयुतो दृष्टो वा यदि संयुतः शुभकरैर्ज्ञातस्तदा भूपतिः। यात्रायां तुरगोद्भमत्तकरिणां यानैर्महीं क्रमते स क्ष्माभृद्धरणीरुहाभिमलिता यान्ति त्रिकोणेऽपि च”। बु०। “तुङ्गे गुरौ मित्रखगेन दृष्टो राजा भवेदिन्द्रसमानमूर्त्तिः। गजाश्वनौकार्णवपूर्णलक्ष्मीः पृथ्वीपतिः स्यात्त्रिकोणगोऽपि”। वृ। “तुङ्गे भृगौ शुभसुहृत्प्रयुते च दृष्टे दैवात् पुनः स यदि पश्यति मित्रसंघान्। भूपाधिपो भवति कीर्त्तिकरः प्रधानो दौर्वारुग्रसुखभुग्भृगुजे त्रिकोणे”। शु। “तुङ्गे शनौ मित्रखगेन दृष्टे प्रचण्डदण्डो नृपतिप्रधानः। न दृश्यते दिग्गमने च गुर्वी त्रिकोणगे चापि नरेन्द्रमूर्त्तिः”। श। “भवति धरणीपालो नीचबुद्धिः प्रतापी हयगजधनपूर्णो जातिवर्गे विरक्तः। कुटिलमतिरनीतो भूरिभाण्डारयुक्तस्तमसि मिथुनसंस्थे जायते मानवेन्द्रः”। रा। “मृगपतिवृषकन्याकर्कटस्थे च राहौ भवति विपुललक्ष्मी राजराजाधिपो वा। हयगजनरनौकामण्डितः सार्वभौमोन्नपतिरमरपूज्यो राहुतुङ्गी चिरायुः”। रा। “अरिनिधनव्ययतुङ्गे कीर्त्तितमेतत्फलं व्यर्थं केन्द्रे त्रिकोणे लाभे वा तुङ्गफलं यथोद्दिष्टम्” इति कोष्ठीप्र०। ८किञ्जल्के न०शब्दार्थचि०। १०उच्चे ११प्रधाने १२उन्नते त्रि० शब्दर०। “तुङ्गत्वमितरा नाद्रौ नेदं सिन्धावगाधता”माघः।१३शिवे पु०तुङ्गबीजशब्दे दृश्यम्।

तुङ्गक पु० तुङ्ग+स्वार्थे क संज्ञायां कन् वा। १पुन्नागवृक्षे शब्दरत्ना० २तुङ्गजशब्दार्थे ३अरण्यरूपे तीर्थभेदे न०। “तुङ्गकारण्यमासाद्य ब्रह्मचारी जितेन्द्रियः। वेदानध्यापयत्तत्र ऋषिः सारस्वतः पुरा। तत्र वेदेषु नष्टेषु मुनेरङ्गिरसः सुतः। ऋषीणामुत्तरीयेषु सूपविष्टो यथासुखम्। ओङ्कारेण यथान्यायं सम्यगुच्चारितेन ह। येन यत्पूर्वमभ्यस्तं तत्सर्वं समुपस्थितम्। ऋषयस्तत्र देवाश्च वरुणोऽग्निः प्रजापतिः। हरिर्नारायणस्तत्र महादेवस्तथैव च। पितामहश्च भगवान् देवैः सह महाद्युतिः। भृगुं नियोजयामास याजनार्थं महाद्युतिम्। ततः स चक्रे भगवान् ऋषीणां विधिवत्तदा। सर्वेषां पुनराधानं विधिदृष्टेन कर्मणा। आज्यभागेन तत्राग्निं तर्पयित्वा यथाविधि। देवाः स्वभवनं याता ऋषयश्च यथागतम्। तदरण्यं प्रविष्टस्य तुङ्गकं राजसत्तम!। पापं प्रणश्यत्यखिलं स्त्रिया वा पुरुषस्य वा” भा० व० ८५ अ०। तत्कथा दृश्या

तुङ्गकूट पु० तुङ्गं कूटमस्य। उच्चशृङ्गे पर्वतभेदे।

तुङ्गनाभ पु० तुङ्गो नाभिरस्य। कीटभेदे। तुङ्गीनासशब्दे दृश्यम्।

[दृश्यम्। तुङ्गराश्याद्योऽप्यत्र।

तुङ्गभ न० कर्म्म०। सूर्यादीनामुच्चराशौ मेषादौ तुङ्गशब्दे

तुङ्गभद्र पु० तुङ्गोऽपि भद्रः। १मदोत्कटकरिणि दक्षिणस्थे २नदीभेदे स्त्री मेदि०। “शर्करावर्त्ता तुङ्गभद्राकृष्णवेणेत्यादि” भाग० ५।१९।१८ श्लो० भारतस्थनदीकथने। “तुङ्गभद्राजलं स्वादु स्निग्धं प्रोक्तं तथा गुरु!। कण्डूपित्तास्रदं प्रायः सात्म्रं मेधाकरं मतम्” राजनि० तज्जलगुणा उक्ताः।

तुङ्गवीज न० तुङ्गस्य शिवस्य वीजम्। १पारदे। “तुङ्गवीजसमायुक्तं गोलयन्त्रं प्रसाधयेत्” स्व०सि० “तुङ्गो महादेवस्तस्य वीजं वीर्यं पारद इत्यर्थः” रङ्गना०।

तुङ्गवेणा स्त्री नदीभेदे “तुङ्गवेणा कृष्णवेणा कपिला शोण एव च” भा०व० २२१ अ०। “विनदीं पिङ्गलां वेणां तुङ्गवेणां महानदीम्” भा० भी० ६अ०।

तुङ्गरस पु० तुङ्गः श्रेष्ठो रसोऽस्य। गन्धद्रव्यभेदे “कालागुरुविमिश्रेण तथा तुङ्गरसेन च” भा० आ० १२७ अ०।

तुङ्गशेखर पु०तुङ्गमुच्चशेखरमस्य।१पर्वते शब्दमा०।२उच्चशेखरयुक्ते त्रि०।कर्म्म०।३उच्चे शेखरे न०।

तुङ्गा स्त्री तुङ्ग+टाप्।१वंशलोचनायां २शम्याञ्च राजनि०।

तुङ्गिन् त्रि० तुङ्गं मेषादिकं स्थानमाश्रयत्वेनास्त्यस्य इनि। उच्चस्थिते ग्रहे २महाशतावर्य्यां स्त्री ङीप् राजनि०। ४प्रधानस्थानस्थे त्रि०। [३राशौ शब्दार्थचि०।

तुङ्गी स्त्री तुङ्ग+गौरा०ङीष्।१हरिद्रायां २वर्वरायां मेदि०।

तुङ्गीनास पु०तुङ्गी हरिद्रेव पीता नासाऽस्य। १कीटभेदे। “तुङ्गीनासो विचिलकस्तालको वाहकस्तथा। कोष्ठागारी क्रिमिकरो यश्च मण्डलपुच्छकः। तुङ्गनाभः सर्षपिकोऽवल्गुली शम्बुकस्तथा। अग्निकीटश्च घोराः स्युर्द्वादश प्राणनाशनाः” सुश्रु०।

तुङ्गीपति पु०तुङ्ग्याः रात्रेः पतिः। निशापतौ चन्द्रे त्रिका०

तुङ्गीश पु० कर्म्म०। १शिवे २कृष्णे ३सूर्य्ये च शब्दर० तेषां प्रधानस्थानस्थित्या तथात्वम्।६त०।रात्रीशे ४चन्द्रे।

तुच् पु० त्वच–क्विप् वा० संप्रसा०तुज–क्विप् वा पृषो० जस्य चः। १अपत्ये निघण्टु। “तुचे तनाय तत्सु” ऋ० ८।१८।१८। “तुचे पुत्राय” भा०। “तुचे तु नो भवन्तु” ८।२७।१४। “तोजयति पितृदुःखादिकमिति तुच् पुत्रः तस्मै” भा०। पृषो० जस्य चः इति भेदः। हेमचन्द्रे तु जान्ततयाऽयं पठितः वेदे तु सर्वत्र चान्तत्वेनैव प्रयोगः।

तुच्छ न० तुद–सम्प० क्विप् तुदा व्यथया छ्यति छो–क। १पुलाके (तुष) २हीने,उणा०। ३शून्ये अमरः ४अल्पे हेमच०। ५शून्ये च त्रि०। “किमेतै रात्मनस्तुच्छैः सह देहेन नश्वरैः। अनर्थैरर्थसङ्काशैर्नित्यानन्दरसोदधेः” भाग०७।७। ३८।८५नीलीवृक्षे६तुत्थाञ्जने भावप्र०।७मन्दे चलीके च त्रि०

तुच्छद्रु पु० कर्म्म०। एरण्डवृक्षे शब्दच०।

तुच्छधान्यक न० कर्म्म०। (भुसी) पुलाके अमरः।

तुच्छ्य न०तुच्छ–वेदे स्वार्थे इवार्थे वा यत्।१तुच्छशब्दार्थे२तुच्छकल्पे च “तम आसीत्तमसा गूढ़मग्रेऽप्रकेतं सलिलं सर्वमा इदम्। तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिना जायतैकम्”। ऋ०१०।१२९।३ अयमर्थः। ननूक्तप्रकारेण यदि पूर्वमिदं जगन्नासीत् कथं तर्हि तस्य जन्म? जायमानस्य जनिक्रियायां कर्तृत्वेन कारकत्वात् कारकं च कारणावान्तरविशेष इति कारकस्य सतो नियतपूर्वक्षणवर्तित्वस्यावश्यम्भावात्। अथैतद्दोषपरिजिहीर्षया जनिक्रियायाः प्रागपि तद्विद्यत इत्युच्यते कथं तस्य जन्म? अत आह। तमसा गूढ़मग्र अग्रे सृष्टेः, प्राक् प्रलयदशायां भूतभौतिकं सर्वं जगत्तमसा गूढ़म्। यथा नैशं तमः सर्वपदार्थजातमावृणोति तद्वत् आत्मतत्त्वस्यावरकत्वात् मायापरसं ज्ञं भावरूपाज्ञानमत्र तम इत्युच्यते। तेन तमसा निगूढ़ं संवृतं कारणभूतेन तेनाच्छादितं भवति। छादकात्तस्मात्तमसो नामरूपाभ्यां यदाऽविर्भवनं तदेव तस्य जन्मेत्युच्यते। एतेन कारणावस्थायामसदेव कार्य्यमुत्पद्यत इत्यसद्वादिनोऽसत्कार्य्यवादिनो ये मन्यन्ते ते प्रत्याख्याताः। ननु कारणे तमसि तज्जगदात्मकं कार्य्यं विद्यते चेत् कथं नासीद्रज इत्यादि निषेधः। तत्राह तम आसीदिति। तमोभावरूपाज्ञानं मूलकारणं तद्रूपता तदात्मनाम्। यतः सर्वं जगत् प्राक् तम आसीदतो निषिध्यत इत्यर्थः। नन्वावरकत्वादावरकं तमः कर्तृ आवार्य्यत्वाज्जगत् कर्म्म। कथं तयोः कर्म्मकर्त्रोस्तादात्म्यम्। अत्र तत्राह अप्रकेतमिति। अप्रकेतमप्रज्ञायमानम्। अयमर्थः। यद्यपि जगतस्तमसश्च कर्म्मकर्तृभावोयौक्तिको न विद्यते तथापि व्यवहारदशायामिव तस्यां दशायां नामरूपाभ्यां विस्पष्टं न ज्ञायत इति तादात्म्यवर्णनम्। अतएव मनुना स्मर्यते “आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः” इति। कुतो वा न प्रज्ञायते तत्राह सलिलम्। सल–गतौ। औणादिक इलच्। इदं दृश्यमानं सर्वं जगत् सलिलं कारणेन संगतमविभागापन्नम् आसीत्। अस्तेर्लङि तिपि बहुलं छन्दसीतीड़भावे हल्ङ्याब्भ्य इति

तिलोपे तिष्यनस्तेः पा० इति पर्य्युदासादीकाराभावः । यद्वा सलिलमिति लुप्तोपमम् । सलिलमिव । यथा क्षीरेणाविभागापन्नं नीरं दुर्विज्ञानं तथा तमसाऽविभागापन्नं जगन्न शक्यं विज्ञातुमित्यर्थः। ननु विविधविचित्र० रूपभूयसः प्रपञ्चस्य कथमतितुच्छेन तमसा क्षीरेण नीरस्येवाभिभवः । तथा तमोऽपि क्षीरवद्बलवदित्येवोच्यते । तर्हि दुर्बलस्य जगतः सर्गसमयेऽपि नोद्भवसम्भव इत्यत आह तुच्छ्येनेति । आसमन्ताद्भवतीत्याभु तुच्छ्येन । छन्दसो यकारोपजनः । तुच्छ्येन तुच्छकल्पेन सदसद्विलक्षणेन भावरूपाज्ञानेनापिहितं छादितमासीत्" भाष्यम् ।

तुज दीप्तौ चुरा० उभ० अक० सेट् इदित् । तुञ्जयति-ते अतुतुञ्जत् । तुञ्ज्यते ।

तुज प्रापणे हिंसायाञ्च भ्वा० पर० सक० बले अक० सेट् इदित् । तुञ्जति अतुञ्जीत् । तुतुञ्ज तुतुञ्जतुः । "तुञ्जे तुञ्जे य उत्तरे स्तोमाः" ऋ० १।७।७ । इमामृचमधिकृत्य "तुञ्जतेर्दानकर्म्मणः तुञ्जे तुञ्जे दाने दाने" इति ६।१७ निरुक्तोक्तेः । दाने च ।

तुज हिंसायां भ्वा० पर० सक० सेट् । तोजति अतोजीत् । तुतोज । वेदे तुजादि० अभ्यासस्य दीर्घः । तूतुजानः । प्रेरणे च "आ यां तोके तनये तूतुजाना" ऋ० ७।६७।६ । "प्रायत्तोके तनये तूतुजाना" ७।८४।५ । "तूतुजानाः प्रेर्य्यमाणाः" भा० । "अस्मा इत्तु प्रभया तूतुजानः" निरु० ६।२० उक्ता ऋक् ।

तुञ्ज पु० तुजि—बले अच् । वज्रे निघण्टुः ।

तुट कलहे तुद० कुटा० पर० अक० सेट् । तुटति अतुटीत् तुतोट ।

तुटितुट पु० शिवे । "नमस्तुण्डाय तुण्ड्याय नमस्तुटितुटाय च" हरिवं० २७७ अ० ।

तुटुम पुंस्त्री० तुट—बा० उम । उन्दुरौ त्रिका० ।

तुड भेदे तु० कुटा० पर० सक० सेट् । तुडति अतुडीत् तुतोड ।

तुड निष्पीड़ने भ्वा० आ० सक० सेट् इदित् । तुण्डते अतुण्डिष्ट । तुतुण्डे । तुण्ड्यते ।

तुड विधाकरणे भ्वा० पर० सक० सेट् । तोडति अतोडीत् ऋदित् । अतुतोडत्-त ।

तुडि स्त्री तुड—इन् किच्च । तोड़ने ।

तुड्ड अनादरे भ्वा० पर० सक० सेट् । तुड्डति अतुड्डीत् । अयं दोपध इत्यन्ये तन्मते क्विपि तुट्—डोपधत्वे तुड् इति भेदः ।

तुण कुटिलीकरणे तु० पर० सक० सेट् । तुणति अतोणीत् । तुतोण ।

तु(तू)णि पु० तूण+सङ्कोचे इण् बा० पृषो० । १कुणिरोगे अमरटीकायां क्षीरस्वामी २नन्दिवृक्षे राजनि० । "तूणीवृक्षः कटुः पाके कषायो मधुरो लघुः । तिक्तो ग्राही हिमो वृष्यो व्रणकुष्ठास्रपित्तहृत्" भावप्र० ।

तुणिक पु० तुणि—स्वार्थे क । नन्दिवृक्षे राजनि० ।

तुण्ड न० तुडि—तोड़ने अच् । १मुखे अमरः । "अयस्तुण्डैः कुलुखलैः" हरिवं० २४५ अ० । "स तेन पतगेन्द्रेण पक्षतुण्डक्षतक्षतः" भा० आ० ३२ अ० । "दीर्घनखा दीर्घदन्तो दीर्घतुण्डाश्च भारत !" भा० श० ४७ । २शिवे पु० तुटितुटशब्दे दृश्यम् । ३राक्षसभेदे । "तुण्डेन च नलस्तत्र पटुशः पनसेन च" भा० व० २८४ अ० ।

तुण्ड(ण्डि)केरी स्त्री प्रशस्तं तुण्डं(ण्डिः) कन् तद्-ईरयति ईर्त्ते वा ईर—अण् १कार्पास्याम् तस्याः फलमुखविदारे हि विस्तीर्णसूत्रहेतुकार्पासोत्पत्तिः । २विम्बिकायाम् (तेलाकुचा) तस्याः फलेन हि मुखाङ्गोष्ठसादृश्यदानात् तथात्वम् । स्वार्थे क ह्रस्वः । तुण्ड(ण्डि)केरिकाप्यत्र अमरः । संज्ञायां कन् । विम्बिकायां राजनि० ।

तुण्डदेव पु० तुण्डरूपो देवः तुण्डेन दीव्यति दिव—अच् वा । नृपभेदे तस्य विषयो देशः ऐषुका० भक्तल् । तुण्डदेवभक्त तदीये विषये देशे पु० ।

तुण्डि पु० तुण्ड—इन् । १मुखे, २चञ्चौ च । ३विम्बिकायां, ४वन्दायां, उणा० । ५नाभौ स्त्री शब्दरत्ना० वा ङीप् । स्वार्थे कन् उक्तार्थेषु । ६तुन्दौ माधवः तुण्डिभशब्दे दृश्यम् ।

तुण्डिका स्त्री तुण्डम् तदवयवाधरसादृश्यमस्त्यस्याः ठन् । १विम्बिकायां तत्फलस्यास्यावयवाधरसादृश्यात्तथात्वम् । स्वार्थे क । नाभौ शब्दरत्ना० ।

तुण्डि(ण्ड)केशी स्त्री तुण्डे (ण्डौ) मुखे कायति कै—क तुण्डि(ण्ड)कः ओष्ठः तत्र ईष्टे तत्तुल्यशोभाधारणात् ईश—अच् गौरा० ङीष् । विम्बिकायाम्(तेलाकुचा) । शब्दच० ।

तुण्डिभ(ल) त्रि० तुण्डि+भ सिध्मा० लच् वा । १तुन्दिले (भुँड़ि)युक्ते । अमरः । "तुन्दि(ण्डि) वलिवटेर्भः" पा० सू० । मूर्द्धन्योपधोऽयमिति माधवः । लान्तो २मुखरे उणादि० ।

तुण्डेल पु० गर्भोपद्रावके असुरभेदे । "उपेमन्तमुद्भवलं तुण्डेलमुत शालुडम्" अथ० ८।६।१७ ।

तुतात पु० मीमांसकभेदे । तेन प्रोक्तं ठक् । तौतातिक तत्प्रोक्तमीमांसादर्शने । तन्मतञ्च दिङ्मात्रम् अर्हच्छब्दे ३८२ पृ० दर्शितम् । "नैवाश्रावि गुरोर्मतं न विदितं तौतातिकं दर्शनम्" सा० द० ।

तुतुर्वणि पु० तूर्णौवनिर्भजनमस्य वेदे पृषो० । १तूर्णभजने । "यज्ञायज्ञावः समानां तुतुर्वणिः" ऋ० १।१६।१। "तुतुर्वणिः त्वरमाणः संभजमानः" भा० । [त्यत्-त ।

तुत्थ स्तुतौ अद० चु० उभ० सक० सेट् । तुत्थयति ते अतुतु-

तुत्थ पु० तुद-थक् । १प्रावणि उणा० । २अग्नौ संक्षिप्तसा० । (तुंते) ३अञ्जनभेदे न० । ४नील्याम्, ५सूक्ष्मैलायाञ्च स्त्री हेमच० । स्वार्थे क । तत्रार्थे । रसनाञ्जनस्य गुणादिकं भावप्र० उक्तं यथा "तुत्थं ताम्रोपधातुर्हि किञ्चित्ताम्रेण तद्भवेत् । किञ्चित्ताम्रगुणं तस्मात् वक्ष्यमाणगुणञ्च तत् । तुत्थकं कटुकं क्षारं कषायं वामकं लघु । लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत् । विषाश्मकुष्ठकण्डूघ्नं खर्परञ्चापि तद्गुणम्" भावप्र० अस्य शोधनम् "विष्ठायां मर्दयेत्तुत्थं मार्जारककपोतयोः । दशांशं टङ्कनं दत्त्वा पचेत् लघुपुटे ततः । पुटं दध्ना पुटं क्षौद्रैर्देयं तुत्थविशुद्धये" भावप्र० "कासीसं रोचनां तुत्थं हरितालं मनःशिलाम्" सुश्रुतः । [२मयूरकण्ठे च राजनि० ।

तुत्थाञ्जन न० कर्म० । १अञ्जनभेदे (तुंते) । तद्वर्णत्वात्

तुथ पु० तु-थक् तुद-वधे थक् पृषो० वा । १हननकर्त्तरि "तुथोऽसि जनधायो नभोऽसि" ताण्ड्यब्रा० १।४।२। "तुद्यतेर्वधकर्म्मणः तुथः रक्षःप्रभृतीनां हन्ता" भा० । २ब्रह्मणि । "तुथोऽसि विश्ववेदाः" यजु० ५।२१ । "हे ब्राह्मणाच्छंसिन् त्वं तुथो विश्ववेदाश्चासि । ब्रह्म वै तुथः" इति श्रुतेः । ब्रह्मरूपोऽसि । विश्वं वेत्ति विश्ववेदाः सर्वज्ञः । यद्वा तुथशब्देन देवान् प्रति दक्षिणानां विभागकर्त्ता पुरुष उच्यते तदाह तित्तिरिः "तुथो ह स्म वै विश्ववेदा देवानां दक्षिणा विभजतीति" । "ब्रह्मा वै तुथः" शत० ब्रा० ४।३।४।१६ । श्रुतेः। ३दक्षिणाविभाजके ब्रह्मरूपे ऋत्विग्भेदे ।

"तुथो वै विश्ववेदा विभजत्विति ब्रह्म वै तुथस्तदेना ब्रह्मणा विभजति । ब्रह्मा वै दक्षिणीयं चादक्षिणीयं च वेद तुथो ह्यस्यैता दक्षिणीयायैव दत्त्वा भजति नादक्षिणीयाय" । "रूपेण वो रूपमभ्यागां तुथो वो विश्ववेदा विभजतु" । यजु० ७.४५ "किं च तुथो ब्रह्मरूपः प्रजापति र्वो युष्मान् विभजतु यथायोग्यमृत्विग्भ्यो विभज्य ददातु 'ब्रह्म वै तुथ इति श्रुतेः" वेददी०।

तुद व्यथने तुदा० उभ० सक० अनिट् । तुदति ते अतौत्सीत् । अतुत्त तुतोद तुतुदे "तुतुदे गदयाचचारीन्"। "अतौत्सीत् गदयाङ्गदम्" भट्टिः। "इषुभिरिव मानसं कामिनां तुदति कुसुमचापः" ऋतु० । "यथा तुदति मर्म्माणि" भा० स० २५३० ।

तुदादि पु० शप्रत्ययनिमित्ते धातुसमुदाये स च गणः कविकल्पे धातुत्वेन पठितः । "तुदादिभ्यः शः" पा० ।

आ+सम्यग्व्यथने । "प्रतोदेनातुदन् भृशम्" मनुः । "धनुःकोट्यातुद्य कर्णेन वीरम्" भा० आ० १ अ० ।

निस्+निष्पीड़ने । "सूचिभिरिव निस्तुद्यते दश्यत इव पिपीलिकाभिः" । [इय तदपत्ये पुंस्त्री०।

तुद त्रि० तुद-क । व्यथके । तस्यापत्यं शुभ्रा० ढक् । तौ-

तुन्द न० तगु अर्दने बा० दा० नि० । उदरे अमरः ।

तुन्दकूपी स्त्री ह्रस्वः कूपः कूपी तुन्दस्य कूपीव । १नाभौ त्रिका० । स्वार्थे क । २तुन्दकूपिकाप्यत्र हेमच० ।

तुन्दपरिमृज पु० तुन्दं परिमार्ष्टि परि+मृज-क ६त० । १अलसे २मन्दे । अण् । तुन्दपरिमार्जोऽप्यत्र रमानाथः।

तुन्दमृज त्रि० तुन्दमुदरं मार्ष्टि मृज-क । १अलसे २मन्दे च हेमच० ।

तुन्दादि पु० "तुन्दादिभ्य इलच्च" पा० अस्त्यर्थे इलच्प्रत्ययनिमित्ते शब्दगणे स च गणः । पा०ग०सू० उक्तो यथा "तुन्द उदर पिचण्ड यवब्रीहि (स्वाङ्गाद्विवृद्धौ) विवृद्धौ कर्णौ यस्य सः कर्णिलः" । चादिनिठनौ मतुप् च । "तुन्दिलः तुन्दी तुन्दिकः तुन्दवान्" सि० कौ० ।

तुन्दिक(ल)(भ) त्रि० तुन्दं विद्यतेऽस्य ठन् । तुन्दि+भ तुन्द+इलच् वा । तुन्दियुक्ते (भुँड़ि) युक्ते ।

तुन्दिकर पु० तुन्दिं करोति कृ-अच् । (भुँड़ि) युक्ते तुन्दिले त्रिका० । [स्त्रियां ङीप् ।

तुन्दिन् त्रि० तुन्दोऽस्त्यस्य इनि । तुन्दयुक्ते (भुँड़ि)युक्ते

तुन्दिलफला स्त्री तुन्दिलं बृहत्फलमस्याः । त्रपुष्याम् (शशा) राजनि० ।

तुन्न पु० तुद-क्त । १नन्दिवृक्षे (तुंद) अमरः । २व्यथिते, ३छिन्ने च त्रि० । स्वार्थे क । अत्रैवार्थे ।

तुन्नवाय पु० तुन्नं छिन्नं वयति वे-अण् । १सौचिके, २सूच्याजीविनि (दरजी) अमरः । "शैलूषतुन्नवायान्नं कृतघ्नस्यान्नमेव च" मनुना तदन्नभक्षणं निषिद्धम् ।

तुन्नसेवनी स्त्री तुन्नं छिन्नं सीव्यतेऽनया सिव–करणे ल्युट् ङीप्। सूचीभेदे “प्रवेश्य तुन्नसेवन्या सुस्कौ सीव्येत् ततः परम्” सुश्रुतः। [तुतुम्पतुः तुतुम्पिथ।

तुन्प वधे भ्वा॰ सक॰पर॰ सेट्। तुम्पति अतुम्पीत्। तुतुम्प

तुन्प वधे सक॰ क्लेशे अक॰ तु॰ पर॰ सेट्। तुपति-तुम्पति अतु(पी)म्पीत्। तुतु(प)म्प तुतु(प)म्पतुः तुतुपिथ तुतुम्पिथ

तुन्फ वधे भ्वा॰ पर॰ सक॰ सेट्। तुम्फति अतुम्फीत्। तुतुम्फ तुतुफ(म्फ)तुः। तुतुम्फिथ।

तुन्फ वधे सक॰ क्लेशे अक॰ तुदा॰ पर॰ सेट्। तुफति तुम्फति अतु(तु)म्फीत्। तुतु(तु)म्फ तुतुफ(म्फ)तुः तुतुफिथ तुतुम्फिथ।

तुप वधे भ्वा॰ पर॰ सक॰सेट्। तोपति अतोपीत्। तुतोप।

तुप वधे सक॰ क्लेशे अक॰तुदा॰ मुचादि॰पर॰ सेट्। तुम्पति अतोपीत्। तुतोप। पारस्क॰ सुट्। प्रस्तुम्पति।

तुप अर्द्दने चुरा॰ उभ॰ सक॰ सेट् इदित्। तुम्पयति ते अतुतुम्पत्-त। तुम्प्यते। [अतोफीत्। तुतोफ।

तुफ वधे सक॰ क्लेशे अक॰ तु॰ मुचा॰ पर॰ सेट्। तुम्फति

तुफ वधे भ्वा॰ पर॰सक॰सेट्। तोफति अतोफीत्। तुतोफ।

तुब अर्द्दने वा चुरा॰ उभ॰ सक॰ पक्षे भ्वा॰ पर॰ सेट् इदित्। तुम्बयति-ते तुम्बति अतुतुम्बत्-त अतुम्बीत्। [तृदित्। अतुभत् अतोभिष्ट। तुतुभे।

तुभ हिंसे भ्वा॰ आत्म॰ ऌदित् उभ॰ सक॰ सेट्। तोभते।

तुभ हिंसायां दिवा॰ क्र्या॰ च पर॰ सक॰ सेट्। तुभ्यति तुभ्नाति अतोभीत्। तुतोभ “संक्रुद्धो मुष्टिनातुभ्नाद्-क्रुद्धोऽनु सहोदरम्” “अश्वान् विभीषणोऽतुभ्नात्” भट्टिः।

तुम प्रेरणे आहनने च तुम्नशब्दे माधवः। सक॰ भ्वा॰ पर॰ सेट्। तोमति अतोमीत् तुतोम तुम्नः। तोमरः।

तुमुर न॰ तुमुल+लस्य रः। तुमुले अमरटीका।

तुमुल पुंन॰ सौ॰ तु–मुलन्। १परस्परसंघातेन सङ्कुले युद्धे २कलिद्रुमे मेदि॰ ३व्याकुलयुद्धे न॰ त्रिका॰। “बभूव युद्धं तुमुलं जयैषिणोः” रघुः ४सङ्कुलमात्रे त्रि॰। “उभयोरपि पार्श्ववर्त्तिनां तुमुलेनार्त्तरवेण वेजिताः” रघुः

तुम्ब पुंस्त्री॰तुम्बति रुचिं तुबि–अर्द्दने अच्। १अलाब्वाम् भरतः। २हृहतुफलायाम्, राजनि॰। ३आमलक्यां, स्त्रीगव्यां ४गवि च स्त्री। स्वार्थे क तत्रार्थे शब्दरत्ना॰। अलाब्वां स्त्री त्रिका॰। टाप्।

तुम्बर न॰तुम्बं तदाकारं राति–रा आदाने क। (तानपूरा) १वाद्यभेदे तुम्बरचक्रम्। २तुम्बुरुगन्धर्वे च।

तुम्बरचक्र न॰ नरपतिजयचर्य्योक्ते चक्रभेदे चक्रशब्दे २ पृ॰ दृश्यम्।

तुम्बरु पु॰ गन्धर्वभेदे। “सुप्रिया चातिबाहुश्च विख्यातौ च हाहाहूहूः। तुम्बरुश्चेति चत्वारः स्मृता गन्धर्वसत्तमाः” भा॰ आ॰ ६५ अ॰।

तुम्ब(ष)वन न॰ देशभेदे स च देशः वृ॰ सं॰ दक्षिणस्यामुक्तः “अथ दक्षिणेन लङ्केत्युपक्रमे” तुम्ब(ष)वनकार्मणेयक याम्योदधितापसाश्रमा ऋषिकाः” १४ अ॰।

तुम्बि(म्बी) स्त्री तुबि–इन्। १अलाब्वां (लाउ) शब्दरत्ना॰ वा ङीप् तत्रार्थे अमरः। “तुम्बी गोमांसतुल्या स्यात्” ति॰ त॰ नवम्यां तद्भक्षणनिषेधः। स्वार्थे क। तुम्बिका तत्रार्थे कटुतुम्ब्याञ्च राजनि॰।

तुम्बिनी तुबि–णिनि ङीप्। कटुतुम्ब्यां राजनि॰।

तुम्बिपुष्प न॰ तुम्बेरिव पुष्पमस्याः। लताम्बुजे हारा॰। ६त॰। अलाबुपुष्पे च।

तुम्बुक न॰ तुबि उक। अलाबुफले हड्डचन्द्रः।

तुम्बुर पु॰ विन्ध्यपर्वतस्थे जातिभेदे। “ये चान्ये विन्ध्यनिलयास्तु(षा)खारास्तुम्बुरास्तथा” हरिवं॰५ अ॰। [मेदि॰।

तुम्बुरी स्त्री तुबि+बा॰उर गौरा॰ङीष्। १शस्यां २धन्याके च

तुम्बुरु पु॰ १गन्धर्वभेदे जटा॰। २अर्हदुपासकभेदे हेम॰। “गन्धर्वैः सहितः श्रीमान् प्रागायत च तुम्बुरुः” भा॰ आ॰ १२३अ॰। ३वृक्षभेदे। “तुम्बुरुः सौरभः सौरो वनजः सानुजोऽन्धकः। तुम्बरु प्रथितं तिक्तं कटु पाकेऽपि तत् कटु। रुक्षोष्णं दीपनं तीक्ष्णं रुच्यं लघु विदाहि च। वातश्लेष्माक्षिकर्णौष्ठशिरोरुक्गुरुताक्रमीन्। कुष्ठशूला रुचिश्वासप्लीहकृच्छ्राणि नाशयेत्” भावप्र॰।

तुम्र त्रि॰तुम–प्रेरणे आहनने च रक्। १प्रेरके २हिंसके च “सत्राहणं दाधृषिं तुम्रमिन्द्रम्” ऋ॰ ४।१७।८। “तुम्रं प्रेरकम्” भा॰ “आगत्या तुम्रो वृषभो मरुत्वान्” ऋ॰ ३।५०।१। तुम्रः आहन्ता तुमिराहननार्थः” भा॰।

तुर त्वरणे जुहो॰ पर॰ अक॰ सेट्। तुतोर्त्ति अतोरीत्। तुतोर। वैदिकोऽयम् धातुः “अपामिवेदूर्मयस्तर्तुराणाः” ऋ॰६।८५।३। ताच्छील्ये चानश्। अभ्यासस्यातोऽत्त्वं च “महिष्ठे तुरतस्तुरस्य” ऋ॰६।१८।४। “अर्को वा यत्तुरते” तै॰ सं॰२।२।१२।४। वेदे गणव्यत्ययः पदव्यत्ययश्च। अस्मादन्तचुरादित्वमपि। तुरयति। “तुरयन्नृजिष्यः” ऋ॰४।३८।७।

तुर त्रि॰ तुर–क। वेगवति। “प्र तव्यसो नमउक्तिं तुरस्याहम्” ऋ॰ ५।४३।६ “नहि त्वा शूरो न तुरो न धृ

ष्णुर्न” ऋ० ६।२५।५। घञर्थे भावे क वा ।२वेगे तुरगः।

तुरग पुंस्त्री तुरेण वेगेन गच्छति गम–ड। घोटके अमरः स्त्रियां जातित्वात् ङीष्। “तुरगशताकुलस्य परमेकतुरङ्गजन्मनः”। “उल्लङ्घ्य गन्तुं तुरगास्तदीषुः” माघः २चित्ते मेदिनिः। मुग्धबोधे तुरां वेगं गच्छतीति वाक्यम्।

तुरगगन्धा स्त्री तुरगस्येव गन्धोऽस्याः। अश्वगन्धायां राजनि० ६त०। अश्वस्य गन्धे पु०। तुरङ्गगन्धादयोऽप्यत्र रत्नमा०।

तुरगदानव पु० तुरगाकारो दानवः शा०त०। केशिदानवे। “यत्रास्ते स हि दुष्टात्मा केशी तुरगदानवः” “हतं तुरगदैत्येन सर्वान् गोपान् जिघांसता” हरिवं० ८१अ०।

तुरगब्रह्मचर्य्य न० तुरस्येव ब्रह्मचर्य्यम्। स्त्रिया अलाभे तत्त्यागरूपे व्रतभेदे त्रिका०।

तुरगलीलक पु० “द्रुतं द्वन्द्वं विरामान्तं लघुस्तुरगलीलके” संगीतदा० उक्ते तालभेदे।

तुरगातु त्रि० तुरेण गातुः गम–वेदे वा० डातु। १त्वरया गमनकारके ।२तूर्णगमने च “अनच्छये तुरगातु जीवमेजद्ध्रुवम्” ऋ० १।१६४।३०। “तुरगातु स्वव्यापाराय गमनम्” भा०।

तुरगानन पु०तुरगस्याननमिवाननमस्य। १किन्नरभेदे तुरङ्गवदने। देशभेदे स च देशः वृ० स० १४ अ० उत्तरस्यामुक्तः। “उत्तरतः कैलासः” इत्युपक्रमे “त्रिगर्त्ततुरगाननाश्वमुखाः”।

तुरगिन् त्रि० तुरगो वाहनत्वेनास्त्यस्य इनि। अश्वारोहिणि हेमच०। तुरङ्गिन् प्रभृतयोऽप्यत्र “तुरङ्गिभिर्यत्ननिरुद्धवेगाः” माघः।

तुरगी स्त्री तुरगस्तद्गन्धोऽस्त्यस्या अच् गौरा०ङीष्। १अश्वगन्धायाम् मेदि०। तुरग+जातौ ङीष् ।२तुरगजातिस्त्रियाञ्च।

तुरङ्ग पुंस्त्री० तुरेण गच्छति गम–ख मुम् वा डिच्च ।१घोटके स्त्रियां जातित्वात् ङीष्। २चित्ते न० शब्दरत्ना०। “नियोज्य तं होमतुरङ्गरक्षणे” रघुः। तुरगशब्दे उदा०।

तुरङ्गक पु० तुरङ्ग इव कायति कै–क। १हस्तिघोषावृक्षे रत्नमाला०। स्वार्थे क ।२घोटके।

तुरङ्गद्विषणी स्त्री तुरङ्गो द्विष्यतेऽनया बा० क्यु–ङीप्। महिष्यां राजनि०।

तुरङ्गप्रिय पु० ६त०। यवे राजनि०।

तुरङ्गम पुंस्त्री०तुरं गच्छति गम–खच् मुम्। १घोटके अमरः स्त्रियां जातित्वात् ङीष्। “अवेहि मां प्रीतमृते तुरङ्गमात्” रघुः। “रसातलं संक्रमिते तुरङ्गमे” रघुः।

तुरङ्गवक्त्र पु० तुरङ्गस्येव वक्त्रमस्य। अश्वाकारमुखे किन्नरे जटाधरः तुरङ्गवदनादयोऽप्यत्र अमरहेमचन्द्रौ।

तुरङ्गारि पु० ६त० सेवनेऽश्वनाशके १करवीरे वृक्षे, जात्या तद्द्वेषिणि २महिषे च रत्नमा०।

तुरङ्गिका स्त्री तुरङ्गः तदाकारोऽस्त्यस्याः ठन्। देवदालीलतायाम् राजनि०।

तुरङ्गी स्त्री तुरङ्गस्तद्गन्धोऽस्त्यस्याः अच् गौरा०ङीष् ।१अश्वगन्धायां रत्नमा० तुरङ्ग+जातौ ङीष् ।२घोटकजातिस्त्रियाञ्च।

तुरण त्वरायां कण्ड्वा० पर० अक० सेट्। तुरण्यति अतुरणी(ण्वी)त्।

तुरण न० जु० तुर–बा० भावे क्यु। क्षिप्रगमने “सुरेतस्तुरणे तुरण्युः” ऋ०१।१२१।५। “तुरणे क्षिप्रगमने” भा०।

तुरण्य पु०तुरण्य–कण्ड्वा०भावे घञ्। त्वरायाम्। “उपस्तुरण्यसत्” ऋ० ४।४०।२। “तुरण्यसद्त्वरया सीदतीति” भा०।

तुरण्यु त्रि०कण्ड्वा०तुरण्य–उन्। त्वरायुक्ते। “तुभ्यं शुक्रास शुचयस्तुरण्यवः” ऋ०१।१३४।५। “तुरण्यवः त्वरायुक्ताः” भा०।

तुरम् अव्य० अद० चु० तुर–बा० अमु। त्वरायाम्। “तुरं यतीषु तुरयन्नृजिप्यः” ऋ० ४।३८।७।

तुरस् न० अद० चुरा० तुर–असुन्। त्वरायाम्। “आयसस्तुरस्ये” १०।९६।८।

तुरायण न० तुर–क तस्यायनं “पूर्वपदात् संज्ञायाम्” पा० णत्वम्। १यज्ञभेदे सि०कौ०। २असङ्गे अमरः त्वरितस्य हि गमनमसङ्गवद्भवतीति तस्य तथात्वम्। २सत्रभेदे “तुरायणं वैशाखशुक्लपञ्चम्याम्” “चैत्रस्य वा” कात्या० २४।८।१।२। “तुरायणं सत्रनाम” कर्कः तद्विधानं तत्रैव उत्तरतो दृश्यम्। “अत ऊर्द्ध्वमिष्ट्ययनानि” आ० श्रौ० २।१४।१। उपक्रमे। “सांवत्सरिकाणि” २सू०। “इष्ट्ययनानि संवत्सरेण संवत्सरैर्वा साध्यानि” नारा०। तुरायणम् ४सू०। तद्विहितं इष्टिभिरयनं “तुरायणं हि व्रतमप्यष्टद्धमक्रुधनोऽकरवं त्रिंशतोऽब्दान्” भा० आनु०१०२ अ०। तुरायणं यज्ञभेदमावर्त्तयति ठञ्। तौरायणिक तद्यज्ञकारके।

तुरासाह् पु० तुरं त्वरितं साहयति अभिभवति चु० साहेः क्विप् पूर्वपददीर्घः। १इन्द्रे अमरः अस्य हलादौ सुपि हस्य ढत्वे षत्वम्। तुराषाट्–अजादौ तु न षत्वं तुरासाहमित्यादि “तुरासाहं पुरोधाय धाम स्वायम्भुवं ययुः” कुमा०। “कालेनारिवधात् प्रीतः तुराषाडिव शार्ङ्गिणम्” रघुः “तुराषाट् विश्वमूर्त्ते सुराग्रज!” हरिवं० २५९ अ०। इन्द्रस्तुतौ।

तुरि(री) स्त्री तुर–इन् "इगूधात् कित्" उणा० कित्त्व वा ङीप्। तन्तुवायस्य काष्ठादिनिर्म्मिते वयनसाधने (माकु) द्रव्ये "तद्गटचातुरीतुरीति"नैष०तुरीतन्तुसंयोगः जगदीशः २त्वरायुक्तमात्रे।"रुचा नृपतीव तुर्य्ये" ऋ०१०।१०६। "तुर्य्यै त्वरमाणायै संभ्रमवत्यै जनतायै" भा०।

तुरीप त्रि० तूर्णमाप्नोति व्याप्नोति तूर्ण+आप–क पृषो०। तूर्णं व्यापके।"त्वष्टा तुरीपोऽद्भुत इन्द्राग्नी पुष्टिवर्द्धनी" यजु० २१।२०। तुरीपः तूर्णमाप्नोति तुरीपः" वेददी०। "तन्नस्तुरीपमद्भुतम्" १।१४२।१ "तुरीपं तूर्णं व्यापि" भा० मुद्रितपुस्तके तुरीयमिति पाठः मुद्रादोषात् भाष्यव्याख्यादर्शनात् तुरीपपाठस्यैवोचितत्वात्।[अतुरीयीत्।

तुरीय गतौ भ्वा०सक०सेट् गतिकर्म्मसु निघण्टुः। तुरीयति

तुरीय त्रि० तुरीय–अच् चतुर्णां पूरणः चतुर+छ आद्यलोपश्च। १गतियुक्ते २चतुर्णां पूरणे च। ३तारके। "तनस्तुरीयमध पोषयित्नुः" ऋ०२।४।८। "तुरीयं तारकम्" भा०। "गुहा त्रीणि निहितानेङ्गयन्ति" "तुरीयं वाचो मनुष्या वदन्ति" ऋ०१।१६४।४५। अस्यार्थः भाष्ये बहुधा मतभेदेन दर्शितः किन्तु वैखरीरूपा वाक् चतुर्थीति निष्कृष्टार्थः तथा हि

"परा पश्यन्ती मध्यमा वैखरीति चत्वारि। एकैव नादात्मिका वाक् मूलाधारादुदिता सती परेत्युच्यते। नादस्य च सूक्ष्मत्वेन दुर्निरूपत्वात् सैव हृदयगामिनी पश्यन्तीत्युच्यते योगिभिर्द्रष्टुं शक्यत्वात्। सैव बुद्धिं गता विवक्षां प्राप्ता मध्यमेत्युच्यते मध्ये हृदयाख्ये उदीयमानत्वात् मध्यमायाः। अथ यदा सैव वक्त्रे स्थिता ताल्वोष्ठादिव्यापारेण बहिर्निर्गच्छति तदा वैखरीत्युच्यते एवं चत्वारि वाचः पदानि परिमितानि। मनीषिणो मनसः स्वामिनः स्वाधीनमनस्का ब्राह्मणा वाचोऽस्य शब्दब्रह्मणोऽधिगन्तारो योगिनः पदानि चत्वारि पदानि विदुः। जानन्ति। तेषु मध्ये त्रीणि परादीनि गुहानिहितानि हृदयान्तर्वर्त्तित्वात्। तुरीयं तु पदं वैखरीसंज्ञकं मनुष्याः सर्वे वदन्ति। ४सर्वाधारभूतेऽनुपहितचैतन्ये परब्रह्मणि "वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयजलतद्गतप्रतिबिम्बाकाशयोर्वा आधारानुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितचैतन्यं तत् तुरीयमित्युच्यते"वेदान्तसा०। आधारश्चासौ अनुपहितश्चासौ आकाशश्च स तथा तद्वदिति यावत्। यद्यप्याकाशस्य वनाश्रयत्वं जलाश्रयत्वं वा नास्ति तदनारम्भकत्वात् तथाप्याकाशमन्तरेण तयोः स्थित्यनुपपत्तेस्तदाधारत्ववचनमिति द्रष्टव्यम्। अस्य चैतन्यस्य तुरीयत्वं विश्वतैजसप्राज्ञापेक्षया द्रष्टव्यम्। "शिवमद्वैतं तुरीयं मन्यन्ते" वेदान्त सारधृता श्रुतिः

"तुरीयो यज्ञो यत्र हव्यमिति"। यजु०१७। ५७ तुरीयः चतुर्थः "आदौ यजुर्जपः ततोहोतुः ऋचां पठनम् ब्रह्मणोऽप्रतिरथजपः एवं च तुरीयोहोमः तथा च श्रुतिः "अध्वर्युः पुरस्ताद्यजूंषि जपति होता पश्चादृचोऽन्वाह ब्रह्मा दक्षिणतोऽप्रतिरथं जपत्येष एव तुरीयो यज्ञ" इति वेददी०। "तुरीयः ब्रह्महत्यायाः क्षत्रियस्य बधे स्मृतः" मनुः स्वार्थे क। तत्रार्थे। "भगिन्यश्च निजादंशात् दत्त्वांशन्तु तुरीयकम्" याज्ञ०।

तुरीयवर्ण पु० कर्म्म०। शूद्रे हला०।

तुरुष्क पु० तुर–उसिक् स्वार्थे क इसुसोरिति षत्वम्। १गन्धद्रव्यभेदे (शिलारस) अमरः।२म्लेच्छजातिभेदे मेदि० ३पारस्यभाषाभेदे च हेमच० ४श्रीवासवृक्षे विश्वः।

तुर्फरी त्रि० तृफ–हिंसायाम् बा० अरि। हन्तरि।

"सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका" ऋ० १०।१०६।६ "तृफ तृम्फ हिंसायाम्। अस्मात् जन्तस्य तुर्फरीतारावित्यस्य पृषोदरादित्वाद्वर्णविकारः। यद्वास्माद्वाङ्गलकादौणादिकोऽरीतुप्रत्ययः। उक्तं चात्र नि० १२।५।"द्विविधा सृणिर्भवति भर्त्ता च हन्ता च तथाश्विनौ चापि भर्त्तारौ जर्भरी भर्त्तारावित्यर्थस्तुर्फरीतू हन्तारावित्यादि। जर्भरिशब्दे ३०६२ पृ० दृश्यम्।

तुर्फरीतु त्रि० तृफ–बा० अरीतु पृषो०। हन्तरि तुर्फरीशब्दे दृश्यम्।

तुर्य्य त्रि० चतुर+पूरणे यत् च भागस्य लोपः। चतुर्थे। "एक एवेश्वरस्तुर्य्यः भगवान् स्वाश्रयः परः"भाग०६।५।१०। "तुर्य्यशब्दस्य वा एकदेशिसमासः तुर्य्यं भिक्षायाः तुर्य्यभिक्षा पक्षे षष्ठीसमासः भिक्षातुर्य्यम्।

तुर्य्यगोल पु० सि०। "दलीकृतं चक्रमुशन्ति चापं कोदण्डखण्डं खलु तुर्य्यगोलम्"शि०उक्ते कालज्ञानार्थे यन्त्रभेदे

तुर्य्यवाह् पु० तुर्य्यं चतुर्थं वर्षं वहति वह–ण्वि। चतुर्वर्षे पशौ।"तुर्य्यवाट् वयोऽनुष्टुप्छन्दः"यजु०१४।१८ "तुर्य्यवाट् तुर्य्यं चतुर्थं वर्षं वहतीति पशुः अनुष्टुप्छन्दो भूत्वोत्क्रान्तं तुर्य्यवाहं पशुं प्रजापतिर्वयसाऽग्रहीत्। तुर्य्यवाहं वयसाप्नोदनुष्टुप्भूत्वा तुर्य्यवाह उच्चक्रमुरिति" शत० ब्रा० ८।२।४।१५ श्रुतेः" वेददी०।

तुर्व हिंसायां भ्वा० पर०सक०सेट्। तूर्वति अतूर्वीत्। तुतूर्वतुः "हत्वं यादिन्द्र तूर्वसि" ऋ० ८।९९।६। "तूर्वणे सहस्तच्छ्रेष्ठमश्विनोरवः" ऋ० ८।९।१२। तूर्वणे। हिंसने" भा०।

तुर्वणि त्रि० तूर्णं वनुते वन संभक्तौ इन् पृषो०। तूर्णसंभक्तरि "तुर्वणिरहा विश्वेव तुर्वणिः" ऋ०१।१२०।९। "तुर्वणिस्तूर्णवनिः क्षिप्रं संभक्ता तुर्वणिस्तूर्णवनिरिति निरुक्तम् (६।१४।) भा०।

तुर्वश पु० नृपभेदे। "त्वमाविथ नर्य्यं तुर्वशं यदुम्" ऋ० १।५४।६। "नर्य्यादीन् हि राज्ञः" भा०। "उत त्या तुर्वशायदू अस्नातारा शचीपतिः" ऋ० ४।३०।१७।

तुर्वशे अव्य० अन्तिके निकटे निघण्टुः।

तुर्वसु पु० ययातिनृपपुत्रभेदे। "अन्वगृह्णात् प्रजां सर्वां ययातिरपराजितः। तस्य पुत्रा महेष्वासाः सर्वे समुदितागुणैः। देवयान्यां महाराज! शर्म्मिष्ठायाश्च जज्ञिरे। देवयान्यामजायेतां यदुस्तुर्वसुरेव च। द्रुह्युश्चानुश्च पूरुश्च शर्म्मिष्ठायां प्रजज्ञिरे" भा०आ०७५ अ०। तस्मै ययातिशापकथा यथा। "तुर्वसो! प्रतिपद्यस्व पाप्मानं जरया सह। यौवनेन चरेयं वै विषयांस्तव पुत्रक!। पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम्। स्वञ्चैव प्रतिपत्स्यामि पाप्मानं जरया सह। तुर्वसुरुवाच। न कामये जरां तात! कामभोगप्रणाशिनीम्। बलरूपान्तकरणीं बुद्धिप्राणप्रणाशिनीम्। ययातिरुवाच। यस्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि। तस्मात् प्रजासमुच्छेदं तुर्वसो! तव यास्यति। सङ्कीर्णाचारधर्मेषु प्रतिलोमचरेषु च। पिशिताशिषु चान्त्येषु मूढ़! राजा भविष्यसि। गुरुदारप्रसक्तेषु तिर्य्यग्योनिगतेषु च। पशुधर्म्मिषु पापेषु म्लेच्छेषु त्वं भविष्यसि" ८४ अ०। [ऋ०१।२६।१८

तुर्वीति पु० राजर्षिभेदे। "इहद्र्यं तुर्वीतिं दस्यवे सहः"।

तुल उन्माने वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट्। तोलयति ते तोलति अतूतुलत् त। "पतिष्यति चितौ भानुः पृथिवीं तोलयिष्यते" भट्टिः। तुलयतीति तु तुलाशब्दात् णिच्। "अन्तःसारं घनतुलयितुं नानिलः शक्ष्यति त्वाम्" "अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः प्रासादास्त्वां चन! तुलयितुमलं यत्र तैस्तैर्विशेषैः"मेघ०। "तुलयति स्म विलोचनतारकाः"माघः। "नक्तन्दिनैस्तुलितहर्तिलभक्तिशोभाः" रघुः।

उद्+उत्क्षेप्य तोलने। उत्तोलयति।

तुलभ पु० तुरेण वेगेन भाति भा—ड रस्य लः। आयुधजीवीसंघभेदे। ततः दामन्या० स्वार्थे छ। तुलभीय तदर्थे।

तुलसारिणी स्त्री तुरेण वेगेन सरति सृ—णिनि ङीप्। तूणे शब्दमा०।

तुलसी स्त्री तुलां सादृश्यं स्यति सो—क गौरा० ङीष् शकन्ध्वा०। स्वनामख्याते वृक्षभेदे। "यस्या देव्यास्तुला नास्ति विश्वेषु चाखिलेषु च। तुलसी तेन विख्याता" शब्दार्थचि० देवीभाग० उक्तनिरुक्तेस्तस्यास्तथात्वम्। "तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत्। दीपनी कुष्ठकृच्छ्रास्रपार्श्वरुक्कफवातजित्। शुक्ला कृष्णा च तुलसी गुणैस्तुल्या प्रकीर्त्तिता" भावप्र० तद्गुणा उक्ताः तुलस्यामाहात्म्यं यथा। "ब्रह्मोवाच। तुलस्याः शृणु माहात्म्यं पापघ्नं सर्वकामदम्। यत्पुरा विष्णुना प्रोक्तं तत्ते वक्ष्याम्यशेषतः। सम्प्राप्तं कार्त्तिकं दृष्ट्वा नियमेन जनार्दनः। पूजनीयो महद्भिश्च कोमलैस्तुलसीदलैः१। दृष्टा२ स्पृष्टा३ तथा ध्याता४ कार्त्तिके नमिता५ऽर्च्चिता६। रोपिता७ सेचिता८नित्यं पापं हन्ति युगार्जितम्। अष्टधा तुलसी यैस्तु सेविता द्विजसत्तम!। युगकोटिसहस्राणि ते वसन्ति हरेर्गृहे। रोपिता तुलसी यावत् कुरुते मूलविस्तृतिम्। तावद्युगसहस्राणि तनोति सुकृतं हरिः। तुलसीदलपुष्पाणि योदद्याद्धरये मुने!। कार्त्तिके सकलं पापं सोऽत्र जन्मार्जितं दहेत्। रोपिता तुलसी यावत् वर्द्धते वसुधातले। तावत्कल्पसहस्राणि विष्णुलोके महीयते। यत्फलं सर्वपुष्पैश्च सर्वपत्रेण यत्फलम्। तुलस्यास्तद्दलार्द्धेन पुण्यं स्याद्विष्णुपूजने। तुलसीगन्धमादाय यत्र गच्छति मारुतः। दिशोदश पुनात्याशु भूतग्रामांश्चतुर्विधान्। तुलसीकाननोद्भूता छाया यत्र भवेन्मुने!। तत्र श्राद्धं प्रदातव्यं पितॄणां तृप्तिहेतवे। तुलसीवीजनिकरो यस्मिन् पतति वै मुने!। तत् स्थानं परमं ज्ञेयं पितॄणां प्रीतिवर्द्धनम्। यस्मिन् गृहे द्विजश्रेष्ठ! तुलसीतलमृत्तिका। तत्रैव नोपसर्पन्ति भूतले यमकिङ्कराः। तुलसीमृत्तिकालिप्तो यदि प्राणान् परित्यजेत्। यमेन नेक्षितुं शक्तो मुक्तः पापशतैरपि। तुलसीमृत्तिकालिप्तं ललाटं यस्य दृश्यते। कुलं स्पृशति नो तस्य कलिस्तु निवरोत्तम!। यः कश्चित्तुलसीमूले कार्त्तिके केशवप्रियः। दीपं ददाति विप्रेन्द्र! स लभेद्वैष्णवं पदम्। तुलसीकाननश्चैव गृहे यस्यावतिष्ठते। तद्गृहं तीर्थभूतं हि नायान्ति यमकिङ्कराः।

दर्शनं नर्मदायास्तु गङ्गास्नानं तथैव च । तुलसीवनसंसर्गं सममेतत्त्रयं स्मृतम् । रोपणात् पालनात् सेकाद्दर्शनात् स्पर्शनान्नृणाम् । तुलसी दहते पापं वाङ्मनःकायसञ्चितम् । तुलसीमञ्जरीभिर्यः कुर्य्याद्धरिहरार्च्चनम् । न स गर्भगृहं याति मुक्तिभागी भवेन्नरः । पुष्करा‌द्यानि तीर्थानि गङ्गाद्याः सरितस्तथा । वासुदेवादयोदेवा वसन्ति तुलसीदले । तुलसीमञ्जरीयुक्तो यस्तु प्राणान् विमुञ्चति । यमोन वीक्षितुं शक्तो युक्तं पापशतैरपि" पाद्मोत्तरख० । "यत्रैकस्तुलसीवृक्षस्तिष्ठति द्विजसत्तम ! । तत्रैव त्रिदशाः सर्वे ब्रह्मविष्णुशिवादयः । केशवः पत्रमध्येषु पत्राग्रेषु प्रजापतिः । पत्रवृन्ते शिवस्तिष्ठेत् तुलस्याः सर्व्वदैव हि । लक्ष्मीः सरस्वती चैव गायत्री चण्डिका तथा । शची चान्या देवपत्न्यस्तत्पुष्पेषु वसन्ति वै । इन्द्रोऽग्निः शमनश्चैव नैर्ऋतो वरुणस्तथा । पवनश्च कुवेरश्च तच्छाखायां वसन्त्यमी । आदित्यादिग्रहाः सर्वे विश्वे देवाश्च सर्व्वदा । वसवो मनवश्चैव तथा देवर्षयोऽखिलाः । विद्याधराश्च गन्धर्व्वाः सिद्धाश्चाप्सरसस्तथा । तुलसीपत्रमाश्रित्य सर्व्वदा निवसन्ति वै । चिन्वन्ति तृणजातानि तुलसीमूलजानि वै । तद्देहस्था ब्रह्महत्याश्चिनोति तत्क्षणाद्धरिः । ग्रीष्मकाले द्विजश्रेष्ठ ! सुगन्धैः शीतलैर्जलैः । तुलसीसेचनं कृत्वा नरो निर्वाणमाप्नुयात् । चन्द्रातपं वा छत्रं वा तुलस्यै यस्तु यच्छति । विशेषतः निदाघेषु स मुक्तः सर्वपातकैः । वैशाखेऽच्छिन्नधाराभिरद्भिर्यस्तुलसीं जनः । सेचयेत् सोऽश्वमेधस्य फलं प्राप्नोति नित्यशः । कदाचित्तुलसीं दुग्धैः सेचयेद्यो नरोत्तमः । तस्य वेश्मनि विप्रर्षे ! लक्ष्मीर्भवति निश्चला । गोमयैस्तुलसीमूले यः कुर्य्यादनुलेपनम् । सम्मार्ज्जनञ्च कुरुते तस्य पुण्यफलं शृणु । रजांसि तस्य यावन्ति दूरीभूतानि जैमिने ! । तावत्कल्पसहस्राणि मोदते ब्रह्मणा सह । यद्धर्मकर्म्म कुरुते मनुजः पृथिव्यां नारायणप्रियतमां तुलसीं विना च । तत्सर्वमेव विफलं भवति द्विजेन्द्र ! पद्मेक्षणोऽपि न हि तुष्यति देवदेवः । यस्य स्यात्तुलसीपत्रं मुखे शिरसि कर्णयोः । मृत्युकाले द्विजश्रेष्ठ ! तत्र स्वामी न भास्करिः" पाद्मे क्रियायोगसारः । "स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः तुलसीपत्रतोये च योऽभिषेकं समाचरेत् । गवामयुतदानेन यत्फलं लभते नरः । तुलसीपत्रदानेन तत्फलं कार्त्तिके सति ! । तुलसीतोयकणिकां मृत्युकाले च यो लभेत् । रत्नयानं समारुह्य वैकुण्ठं स प्रयाति च । त्रिकालं तुलसीपत्रं शुष्कं पर्य्युषितं सति ! । श्राद्धे व्रते वा दाने वा प्रतिष्ठायां सुरार्च्चने । भूगतं तोयपतितं यद्दत्तं विष्णवे सति ! । शुद्धन्तु तुलसीपत्रं क्षालनादन्यकर्म्मणि" पार्व्वतीं प्रति शिववाक्यम् । तुलसीचयननिषेधकालो यथा । "पूर्णिमायाममायाञ्च द्वादश्यां रविसंक्रमे । तैलाभ्यङ्गे च स्नाते न मध्याह्ने निशि सन्ध्ययोः । अशौचेऽशुचिकाले च रात्रिवासान्वितेऽपि वा । तुलसीं ये च चिन्वन्ति ते छिन्दन्ति हरेः शिरः" । हरिभ० । तुलसीस्पर्शनेन मिथ्याप्रतिज्ञायां मिथ्याशपथे च दोषो यथा । "तुलसीं स्वकरे कृत्वा स्वीकारं यो न रक्षति । स याति कालसूत्रञ्च यावच्चन्द्रदिवाकरौ । करोति मिथ्याशपथं तुलस्या यो हि मानवः । स याति कुम्भीपाकञ्च यावदिन्द्राश्चतुर्दश" ब्रह्मवैवर्त्ते प्रकृतिखण्डम् । तुलसीपत्रचयने मन्त्रो यथा । "मातस्तुलसि ! गोविन्दहृदयानन्दकारिणि ! । नारायणस्य पूजार्थं चिनोमि त्वां नमोऽस्तु ते । कुसुमैः पारिजाताद्यैः सुगन्धैरपि केशवः । त्वया विना नैव तृप्तिं चिनोमि त्वामतः शुभे ! । तया विना महाभागे ! समस्तं कर्म निष्फलम् । अतस्तुलसि ! देवि ! त्वां चिनोमि वरदा भव । चयनोद्भवदुःखं यद्देवि ! ते हृदि वर्त्तते । तत् क्षमस्व जगन्मातस्तुलसि ! त्वां नमाम्यहम् । कृताञ्जलिरिमान् मन्त्रान् पठित्वा वैष्णवो जनः । करतालत्रयं दत्त्वा चिनुयात्तुलसीदलम् । शनैः शनैस्तथाकारैश्चीयते तुलसीदलम् । यथा न कम्पते शाखा तुलस्या द्विजसत्तम ! । पत्राणां चयने विप्र ! भग्नशाखा यथा भवेत् । तथा हृदि व्यथा विष्णोर्दीयते तुलसीपतेः" । पाद्मे क्रियायोगसारः ।

तुलसीकाष्ठमालामाहात्म्यं यथा । "तुलसीकाष्ठनिर्माणमालां गृह्णाति यो नरः । पदेपदेऽश्वमेधानां लभते निश्चितं फलम्" ब्रह्मवैवर्त्ते प्रकृ० । "सात्वतैस्तुलसीकाष्ठमाला कुञ्जसमुद्भवा । धार्य्या नित्यं प्रयत्नेन त्वेतद्भक्तस्य लक्षणम्" । हरिभक्तस्य तुलसीकुञ्जकाष्ठसमुद्भवा । चिह्नार्थमात्मनो माला पुरा कृष्णेन दर्शिता" पाद्मोत्तरखण्डम् "काष्ठमालाधरं विप्रं यतिनं यानरोहिणम् । खट्टास्थां विधवां दृष्ट्वा सचेलं जलमाविशेत्" इति वचनस्य साकरत्वे तुलसीकाष्ठेतरकाष्ठविषयत्वमिति वैष्णवाः । स्मार्त्तास्तु विप्रेतरपरत्वं पाद्मोत्तरखण्डवाक्यस्य वर्णयन्ति । तन्मूलञ्च "तुलसीपत्रजातेन

माल्येन भव भूषितः। विप्र ! त्वं न च तत्काष्ठमालां गलगतां कुरु” इति वाक्यमालोच्य तथा व्यवस्थापयन्ति। अन्ये तु विष्णुदीक्षाविहीनविप्रस्य तत्काष्ठमालाधारणनिषेधः। विधिस्तु वैष्णवस्येति वर्णयन्ति। गणेशपूजने तुलसीनिषेधो यथा तुलसीं प्रति गणेशवाक्यम् “पुष्पाणां सारभूता त्वं भविष्यसि मनोरमे !। कलांशेन महाभागे ! स्वयं नारायणप्रिया। प्रिया त्वं सर्वदेवानां कृष्णस्य च विशेषतः। पूजा विमुक्तिदा नृणां मम त्याज्या च सर्वदा” ब्रह्मवैवर्त्ते गणेशखण्डम्। “अक्षतैर्नार्चयेद्विष्णुं न तुलस्या विनायकम्। न दूर्वया यजेद्दुर्गां धुस्तुरेण न भास्करम्” राघवभट्टधृतम्।

तुलसीग्रहणविधिः वायुपुराणे। “अस्नात्वा तुलसीं छित्त्वा यः पूजां कुरुते नरः। सोऽपराधी भवेत् सत्यं तत् सर्वं निष्फलं भवेत्”। तच्चयने मन्त्रान्तरं स्कान्दे “तुलस्यमृतजन्मासि सदा त्वं केशवप्रिया। केशवार्थे चिनोमि त्वां वरदा भव शोभने”। “त्वदङ्गसम्भवैः पत्रैः पूजयामि यथा हरिम्। तथा कुरु पवित्राङ्गि ! कलौ मलविनाशिनि”। गारुड़े च। मोक्षैकहेतो ! धरणीप्रशस्ते। विष्णोः समस्तस्य गुरोः प्रियेति। आराधनार्थं वरमञ्जरीकं लुनामि पत्रं तुलसि ! क्षमस्व। इत्युक्त्वा तुलसीं नत्वा चित्वा दक्षिणपाणिना। पत्राण्येकैकशोन्यस्येत् सत्पात्रे मञ्जरीरपि। तन्माहात्म्यञ्च स्कान्दे। “मन्त्रेणानेन यः कुर्य्यात् गृहीत्वा तुलसीदलम्। पूजनं वासुदेवस्य लक्षकोटिफलं लभेत्”। किञ्च “शालग्रामशिलार्चार्थं प्रत्यहं तुलसीक्षितौ। तुलसीं ये विचिन्वन्ति धन्यास्ते करपल्लवाः”। इति। संक्रान्त्यादौ निषिद्धेऽपि तुलस्यवचयः स्मृतौ। परं श्रीविष्णुभक्तैस्तु द्वादश्यामेव नेष्यते” हरिभ० तुलस्यवचयनिषेधकालः। विष्णुधर्म्मोत्तरे “नोच्छिन्द्यात् तुलसीं विप्रा द्वादश्यां वैष्णवः क्वचित्”। गारुड़े “भानुवारं विना दूर्वां तुलसीं द्वादशीं विना। जीवितस्याविनाशाय न विचिन्वीत धर्मवित्”। पाद्मे च श्रीकृष्णसत्यासंवादीयकार्त्तिकमाहात्म्ये “द्वादश्यां तुलसीपत्रं धात्रीपत्रञ्च कार्त्तिके। लुनाति स नरो गच्छेन्निरयानतिगर्हितान्”। अतएवोक्तम्। “देवार्थे तुलसीच्छेदो होमार्थे समिधान्तथा। इन्दुक्षये न दुष्येत गवार्थे तु तृणस्य च”। “एवं कृत्वा महापूजामङ्गोपाङ्गादिकं प्रभोः। क्रमाद् यथा सम्प्रदायं तत्तत् स्थानेषु पूजयेत्”। हरिभक्तिविलासे ७विलासे। तुलसीविवाहप्रतिष्ठाविधिः “श्रीवशिष्ठ उवाच। विवाहं सम्प्रवक्ष्यामि तुलस्यास्तु यथाविधि। यथोक्तं पञ्चरात्रे वै ब्रह्मणा भाषितं पुरा”। “आदावेव वने वाप्य तुलसीं स्वगृहेऽपि वा। वर्षत्रयेण पूर्णेन ततो यजनमारभेत्। सौम्यायने प्रकर्त्तव्यं गुरुशुक्रोदये तथा। अथ वा कार्त्तिके मासि भीष्मपञ्चदिनेषु च। वैवाहिकेषु ऋक्षेषु पूर्णिमायां विशेषतः। मण्डपं कारयेत्तत्र कुण्डवेदी तथा पुनः। शान्तिकञ्च प्रकर्त्तव्यं मातृणां स्थापनं तथा। मातृश्राद्धादिकं सर्वं विवाहवत् समाचरेत्। ब्राह्मणांश्च शुचिः स्नातान् वेदवेदाङ्गपारगान्। ब्रह्मा चादेशकश्चैव चत्वारश्च तथर्त्विजः। वैष्णवेन विधानेन वर्द्धनीकलसं यजेत्। मण्डपं कारयेत्तत्र लक्ष्मीनारायणं शुभम्। ग्रहयज्ञं पुरः कृत्वा मातृणां यजनं तथा। कृत्वा नान्दीमुखं श्राद्धं सौवर्णं स्थापयेद्धरिम्। कृत्वारोप्य च तुलसीं लग्ने त्वस्तमिते रवौ। वासःशतेन मन्त्रेण वस्त्रयुग्मेन वेष्टयेत्। यदा वध्नेति मन्त्रेण कङ्कणं पाणिपल्लवे। कोऽदादिति च मन्त्रेण पाणिग्राहो विधीयते। ततः कुण्डे समागत्य आचार्य्यः सह सा द्विजैः। आचार्य्यो वेदिकाकुण्डे जुहुयाच्च नवाहुतीः। विवाहकर्मवत् सर्वं वैष्णवं देशिकोत्तमैः। कर्त्तव्यञ्च ततो होमोविशेषाद्विधिपूर्वकम्”। “यजमानः सपत्नीको ह्यन्ये ये गोत्रबान्धवाः। प्रदक्षिणाश्च कर्त्तव्याश्चत्वारो विष्णुना सह। तुलस्याः पाणिग्रहणे वेदिकायां विभावसौ। शातकुम्भं जपेत् सूक्तं पावमानीं विशेषतः। तथैव शान्तिकाध्यायम्। नवसूक्तीं तथैव च। जीवसूक्तं पुनर्जप्त्वा तथा वैष्णवसंहिताम्। शङ्खझर्झरनिर्घोषैर्गीततूर्य्यस्य निस्वनैः। गायन्ति मङ्गलानार्य्यो माङ्गल्यं विधिमाचरेत्। दद्यात् पूर्णाहुतिं पश्चादभिषेकविधिं ततः। ब्रह्मणे वृषभं दद्यादाचार्य्यं परिधाप्य च। गां पटञ्च तथा शय्यामाचार्य्याय प्रदापयेत्। ऋत्विग्भ्यो दापयेद्वस्त्राण्येषां दद्याच्च दक्षिणाम्। एवं प्रतिष्ठिता देवी विष्णुना च समर्चिता आजन्मोपार्जितं पापं दर्शनेन प्रणश्यति। रोपयेत्तुलसीं यस्तु सेचयेच्च प्रयत्नतः। प्रतिष्ठाप्य यथोक्तेन विष्णुना सह मानवः। स मोक्षं लभते जन्तुर्विष्णुलोकं तथा धनम्। प्राप्नोति विपुलान् भोगान् विष्णुना सह

मोदते” हरिभक्तिविलासे। “तुलसी ब्राह्मणमात्रेण दृष्टा भवति सुन्दरी” तन्त्रसा०। [अण्। वर्व्वर्य्यां (वावुइ) रत्नमा०

तुलसीद्वेषा स्त्री तुलसीं द्वेष्टि तुल्यगन्धत्वात् स्पर्द्धते द्विष–

तुला स्त्री तुल–भिदा० अङ्। १सादृश्ये २माने च गृहाणां ३दारुबन्धनार्थपीठिकायां ४पलशतमाने ५भाण्डे च मेदि०। राशिचक्रस्य द्वादशधा विभक्तस्य ६सप्तमे राशौ स च ३६० अंशात्मकराशिचक्रस्य १८१ अंशावधि २१० पर्य्यन्तः चित्राशेषार्द्धस्वातिविशाखान्तिमपादत्रयात्मकः। अस्याधिष्ठाता तुलाधरः पुरुषः। अस्य योगताराादिकम् अश्लेषाशब्दे उक्तन्नक्षत्रशब्दे च विशेष उक्तः। “तौलीना कथितस्तुलाघटधरः” जातकपद्धतिः। “पुमांश्चरस्थिरसमोदयोमतः प्रत्यक् मरुत् स्निग्धरवोऽथ वन्यः। स्वल्पप्रजासङ्गमशूद्र उग्रस्तुला द्युनीयो द्विपदः समानः” जातकपद्धत्युक्तस्वभावः। वादिप्रतिवादिनोर्लौकिकप्रमाणाभावे दिव्यपरीक्षया अर्थनिर्णये कर्त्तव्ये घटापरनामके ७परीक्षाभेदे। सा च परीक्षा दिव्यशब्दोक्तसामान्यविधिपूर्वकं सर्वं कृत्वा कर्त्तव्या। तद्विधिश्च वीरमित्रोदये दर्शितो यथा

पितामहः “विशालामुच्छ्रितां शुभ्रां घटशालान्तु कारयेत्। यत्रस्थो नोपहन्येत श्वभिश्चाण्डालवायसैः। कपाटवीजसंयुक्तां परिचारकरक्षिताम्। पानीयादिसमायुक्तामम्मूल्यां कारयेन्नृपः” इति। वीजानि यवव्रीह्यादीनि। घटार्थानि काष्ठानि नारद आह “खादिरं कारयेत्तत्र निर्व्रणं शुष्कवर्जितम्। शांशपन्तदभावे वा सालं वा कोटरैर्विना। “अर्जुनस्तिन्दुकी सारस्त्रिणिसो रक्तचन्दनम्। एवंविधानि काष्ठानि घटार्थं परिकल्पयेत्,। अर्जुनस्तिलकः शाकस्त्रिणिसो रक्तचन्दनम्” इति। माधवीये पाठः। शांशपमिति शिंशपावृक्षसम्बन्धि। “देविकाशिंशपेति” पाणिनिस्मरणादिकारस्याकारः। एवंविधानीत्यन्यस्याप्युदुम्बरादेर्यज्ञियस्य काष्ठस्य ससारस्य ग्रहणम्”। अतएव पितामहः “छित्त्वा तु यज्ञियं काष्ठं यूपवन्मन्त्रपूर्वकम्। प्रणम्य लोकपालेभ्यस्तुला कार्य्या मनीषिभिः। मन्त्रः सौम्यो वानस्पत्यः छेदने जप्य एव चेति”। यूपवन्मन्त्रपूर्वकमित्यनेन ओँ ओषधे त्रायस्वैनमित्यादिच्छेदनमन्त्रप्रयोगादिकमुक्तम्। वानस्पत्यः “वनस्पते शतवल्शोविरोहेति” मन्त्रः। छेदने क्षते इति शेषः। वानस्पत्यच्छेदनानन्तरं प्रयोगे यूपवदित्यतिदेशात्सिद्धेऽपि पुनर्विधानम् औपदेशिकस्य सोमदैवत्येनातिदेशिकस्य तस्य बाधनिवृत्त्यर्थम्। अत्र जप्य एव चेति चशब्दस्य वानस्पत्येत्यनेनान्वयात् तस्य च समुच्चयद्योतकत्वात्समुच्चय इति केचित् सौम्यवानस्पत्ययोरेकार्थत्वात्। “तुल्यार्थास्तु विकल्पेरन्नित्यनेन” माषैरेव व्रीहियवादिभ्यः” इत्यपरे। पितामहः “प्राङ्मुखो निश्चलः कार्य्यः शुचौ देशे घटः सदा। इन्द्रस्थाने सभायां वा धर्मस्थाने चतुष्पथे” इति। घटनिर्माणप्रकारन्तत्प्रमाणञ्चाह पितामहः; “चतुर्हस्ता तुला कार्य्या पादौ कार्य्यौ तथाविधौ। अन्तरन्तु तयोर्हस्तौ भवेदध्यर्द्धमेव चेति”। पादौ तुलाधारकाक्षनामककाष्ठधारणार्थौ स्तम्भौ तथाविधौ चतुर्हस्तौ। अन्तरं मध्यम्। अध्यर्द्धं सार्द्धहस्तद्वयम्। अक्षकाष्ठस्य प्रमाणम्पादस्तम्भमध्यप्रमाणाभिधानेनैव सूचितमिति न पृथगुपन्यस्तम्। अन्तरालप्रमाणपर्य्यालोचनया ततः किञ्चिदधिकमक्षकाष्ठं कर्त्तव्यम्। पादस्तम्भयोर्मस्तकप्रदेशाद्यथा वह्निर्निःसरति तथा अक्षकाष्ठङ्कार्य्यमिति स्मृतिचन्द्रिकायाम्। अत्र निखातभागपरित्यागेन पादस्तम्भयोश्चतुर्हस्तत्वाभिधानं ज्ञेयम्। अतएव पितामहः “हस्तद्वयं निखेयन्तु प्रोक्तं सुण्डकयोर्द्वयोः। षड्हस्तन्तु तयोः प्रोक्तं प्रमाणं परिमाणतः” इति सुण्डकौ पादस्तम्भौ। हस्तप्रमाणन्दर्शितं कालिकापुराणे “यवानान्तण्डुलैरेकमङ्गुलञ्चाष्टभिर्भवेत्। अदीर्घयोजितैर्हस्तश्चतुर्विंशतिरङ्गुलैः”। इति स्मृत्यन्तरेऽपि “तिर्य्यग्यवोदराण्यष्टावूर्द्ध्वा वा व्रीहयस्त्रयः। प्रमाणमङ्गुलस्योक्तं वितस्तिर्द्वादशाङ्गुलः”। शारदातिलके “चतुर्विंशत्यङ्गुलाढ्यं हस्तन्तन्त्रविदो विदुः। यवानामष्टभिः कृप्तं मानाङ्गुलमितीरितमिति”। हस्तो वितस्तिद्वितयं चतुर्विंशत्यङ्गुलो हस्त इत्यर्थः। यवानां यवतण्डुलानामित्यर्थः। “यवानान्तण्डुलैरिति” स्मरणात्। तुलाया विशेषान्तरमाह पितामहः “चतुरस्रा तुला कार्य्या दृढा ऋज्वी तथैव च। कटकानि च देयानि त्रिषु स्थानेषु यत्नतः” इति। कटकानि लोहमयानि वलयानि। त्रिषु स्थानेषु अन्त्ययोर्मध्ये। कटकग्रहणं लोहकीलादीनामुपयुक्तानामुपलक्षणम्। नारदोऽपि “ऋज्वी घटतुला कार्य्या खादिरी तैन्दुकी तथा। चतुरस्रा त्रिभिः स्थानैर्घटकर्कटकादिभिरिति”। घटो घटमध्यम्। कर्कटकौ अन्त्यौ। पादस्तम्भादीनां स्थूलता तु विशेषानभिधानात् यावति

स्थौल्ये दार्ढ्यं भवति तावत्येव कार्य्या । शिष्टाचाराद्विशेषो ज्ञेयः । पादस्तम्भावुदग्दक्षिणसंस्थानौ कृत्वा तुला प्राग्धारा कार्य्या । "पश्चिमे तोलयेत्कर्त्तॄन् अन्यस्मिन् मृत्तिकां शुभामिति" पितामहस्मरणात् । पूर्व्वपश्चिमसंस्थानौ कृत्वोदग्धारा वा कार्य्या । "धारयेदुत्तरे पार्श्वे पुरुषं दक्षिणे शिलामिति" नारदस्मरणात् । घटाङ्गत्वेन तोरणादिकं कार्य्यमित्याह पितामहः "तोरणे तु तथा कार्य्ये पार्श्वयोरुभयोरपि । घटादुच्चतरे स्यातान्नित्यन्दशभिरङ्गुलैः । अवलम्बौ तु कर्त्तव्यौ तोरणाभ्यामधोमुखौ । मृण्मयौ सूत्रसम्बद्धौ घटमस्तकचुम्बिनाविति" । घटारोहणमाह नारदः "शिक्यद्वयं समासज्य घटकर्कटयोर्दृढम् । एकशिक्ये तु पुरुषमन्यत्र तोलयेच्छिलाम्" । "धारयेदुत्तरे पार्श्वे पुरुषन्दक्षिणे शिलाम् । पिटकम्पूरयेत्तस्मिन्निष्टकापांशुलोष्टकैरिति" । इष्टकाभिर्ग्राविभिः पांशुभिर्लोष्टैर्वेत्यर्थः । माषराशिभिरपि पेटकम्पूरयेत् । "माषराशिमथापिवेति" स्मृत्यन्तरवचनात् । पितामहोऽपि" "शिक्यद्वयं समासज्य पार्श्वयोरुभयोरपि । प्रागग्रान् कल्पयेद्दर्भांस्तत्र विप्रः समाहितः । पश्चिमे तोलयेत्कर्त्तॄनन्यस्मिन्मृत्तिकां शुभाम् । इष्टकाभस्मपाषाणकपालास्थिविवर्जितामिति" । अत्र इष्टकापाषाणयोर्वर्ज्यत्वोक्तिः समुच्चयनिराकरणार्था न तु विकल्पनिराकरणार्था पूर्व्वोदाहृतनारदवचने तयोरपि विधानात् । "एतेन मृत्तिकापाषाणादीनां सम्भूय तोलनकर्त्तृत्वमिति मतमपास्तम् । मृत्तिकाशिलेष्टकादीनामेकार्थत्वात् "तुल्यार्थास्तु विकल्पेरन्निति" न्यायेन विकल्प इति मिताक्षरायाम् । विष्णुरपि "अत्रैकशिक्ये पुरुषमारोपयेत् द्वितीये प्रतिमानं शिलादीति" । समतानिरीक्षणार्थं राज्ञा तद्विदो नियोक्तव्याः । तथा च पितामहः "परीक्षका नियोक्तव्यास्तुलामानविशारदाः । वणिजो हेमकाराश्च कांस्यकारास्तथैव चेति" । नियुक्ताश्च निरीक्षेरन्नित्याह नारदः । "सुवर्णकारा वणिजः कुशलाः कांस्यकारकाः । तान्तुलामन्वीक्षेरन् तुलाधारणकोविदाः इति" । निरीक्षणं प्रत्याह पितामहः "कार्य्यः परीक्षकैर्नित्यमवलम्बत्र समो घटः । उदकञ्च प्रदातव्यं घटस्योपरि पण्डितैः । यस्मिन्न प्लवते तोयं स विज्ञेयः समो घट" इति । अवलम्बसमः तोरणयोर्लम्बमानौ यौ मृण्मयावलम्बौ तयोः समः । नारदोऽपि "प्रथमारोहणे प्राज्ञ प्रमाणनिपुणैः सह । तुलाशिरोभ्यान्तुल्यं तु तोरणान्यस्तलक्षणमिति" । तोलनानन्तरं कर्त्तव्यम्पितामह आह "तोलयित्वा नरं पूर्व्वं पश्चात्तमवतार्य्य तु । घटं तु कारयेन्नित्यं पताकाध्वजशोभितम्" । तत आवाहयेद्देवान्विधिनानेन मन्त्रवित् । वादित्रतूर्य्यनिर्घोषैर्गन्धमाल्यानुलेपनैः । प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवेकस्ततोवदेत्" इति । विवादानुरूपं प्रश्नम्पृच्छतीति प्राट् तद्विवेचयतीति विवेकः प्राट् चासौ विवेकश्च प्राड्विवेकः । ततोऽभियुक्तं तोलयित्वाऽवतार्य्य धर्म्मावाहनादारभ्याभियुक्तशिरसि पत्रबन्धनान्तं साधारणविधिं कुर्य्यात् । घटपूजायाङ्गन्धादिविशेषन्नारद आह "रक्तैर्गन्धैश्च माल्यैश्च दध्यपूपाक्षतादिभिः । अर्च्चयेत्तु घटं पूर्व्वं ततः शिष्टांस्तु पूजयेदिति" । शिष्टा नवशिष्टानिन्द्रादीन् । पत्रबन्धनानन्तरं मन्त्रयेत् प्राड्विवेक इत्याह पितामहः "घटमामन्त्रयेच्चैव विधिनानेन शास्त्रवित्" । विधिना मन्त्रेण शास्त्रवित्प्राड्विवेकः । मन्त्रश्च तेनैव दर्शितः" "त्वं घट ! ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम् । धकाराद्धर्म्ममूर्त्तिस्त्वं टकारात् कुटिलं नरम् । धृतो धारयसे यस्माद्घटस्तेनाभिधीयसे । त्वं वेत्सि सर्व्वभूतानां पापानि सुकृतानि च । त्वमेव देव ! जानीषे न विदुर्य्यानि मानवाः । व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छतीति" । शोध्यस्याभिमन्त्रणञ्चाह याज्ञवल्क्यः "तुलाधारणविद्भिरभियुक्तस्तुलाश्रितः । प्रतिमानसमीभूतो रेखां कृत्वाऽवतारितः । त्वन्तुले ! सत्यधामासि पुरा देवैर्विनिर्म्मिता । तत्सत्यं वद कल्याणि ! संशयान्मां विमोचय । यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय । शुद्धश्चेद्गमयोर्द्ध्वं मां तुलामित्यभिमन्त्रयेदिति" । तुलाश्रितः तुलामारूढः । प्रतिमानसमीभूतः प्रतिमानेन मृदादिना समीकृतः । रेखां कृत्वावतारणे साम्यचिह्नं कृत्वा अभिमन्त्रणमेवावतारणानन्तरं कार्य्यम् अवतारित इति क्तदर्शनात्ततः प्राड्विवेकः तुलाधारकं शपथैर्नियम्य शिरोगतपत्रकं पुनर्घटमारोपयेत् । अतएव नारदः "समयैः परिबद्ध्याथ पुनरारोपयेन्नरम् । निवाते दृष्टिरहिते शिरस्यारोप्य पत्रकमिति" । समयैः शपथैः परिबद्ध्य नियम्य । ते च विष्णुना दर्शिताः । "ब्रह्मघ्नो ये स्मृता लोकाः ये लोकाः कूटसाक्षिणः । तुलाधारस्य ते लोकास्तुलान्धारयतो मृषेति" पुनरारोहणकालेऽभि-

मन्त्रणमाह नारदः "त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च। त्वमेव देवि! जानीषे न विदुर्यानि मानवाः। व्यवहाराभिशस्तोऽयं मानवस्तोल्यते त्वयि। तदेनं संशयारूढं धर्मतस्त्रातुमर्हसि। देवासुरमनुष्याणां सत्ये त्वमभिषिच्यसे। सत्यसन्धोऽसि भगवन्! शुभाशुभविभावने। आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तमिति"। मन्त्रोच्चारणानन्तरकर्त्तव्यं पितामह आह "ज्योतिर्विद्ब्राह्मणश्रेष्ठः कुर्य्यात्कालपरीक्षणम्। विनाड्यः पञ्च विज्ञेयाः परीक्षाकालकोविदैः। साक्षिणो ब्राह्मणाः श्रेष्ठाः यथादृष्टार्थवादिनः। ज्ञानिनः शुचयोऽलुब्धा नियोक्तव्या नृपेण तु। शंसन्ति साक्षिणः श्रेष्ठाः शुद्ध्यशुद्धी नृपे तदा" इति।

कानि पुनर्जयपराजयचिह्नानीत्यपेक्षायामाह नारदः "तुलितो यदि वर्द्धेत विशुद्धः स्यान्न संशयः। समो वा हीयमानो वा न विशुद्धो भवेन्नरः" इति वर्द्धेत उपरि गच्छेत्। हीयमानः अधो गच्छेत्। यत्पुनरुक्तं पितामहेन "तुलितो यदि वर्द्धेत शुद्धो भवति धर्मतः। हीयमानो न शुद्धः स्यादेकेषान्तु समोऽशुचिः। अल्पपापः समो ज्ञेयो बहुपापस्तु हीयते" इति। अल्पत्वं व्यभिचारे समालिङ्गनादिना" चौर्य्ये तद्देशगमनादिना तत्र एकेषामिति पूजार्थं न तु स्वमते समस्य शुचित्वद्योतनार्थम् अल्पपापिनोऽप्यशुचित्वात्। तेन हीयमानसमयोर्न कश्चिद्विशेषः। दण्डप्रायश्चित्ते पापविशेषस्तयोर्दोषानुसारित्वात्। यत्तु कैश्चिदेकेषं तु समोऽशुचिरिति वचनम्। "अल्पपापः समो ज्ञेयः" इति वचनं साम्ये संशयपरमेवेत्युक्तं तत् क्लिष्टकल्पनया वाक्यानार्जवन्तैरुपेक्षणीयम्। यदुक्तम्, वृहस्पतिना "घटेऽभियुक्तस्तुलितो हीनश्चेद्धानिमाप्नुयात्। तत्समस्तु पुनस्तोल्यो वर्द्धितो विजयी भवेदिति" अयमर्थः पुनर्देवतावाहनाद्यसहितं सर्वं कर्म विधायोत्तोलनीय इति समस्याशुचित्वनिश्चयो न प्रथमतोलनपर्य्याये कार्य्यः। किन्तु पुनस्तोल्यमानस्य समतैव यदि भवति तदा अशुद्धिरवधारणीयेत्यर्थः इति स्मृतिचन्द्रिकायाम्। यत्तु कैश्चित्तस्मिन्नेव प्रयोगे तोलनमुक्तं तन्मन्दं प्रधानावृत्तावङ्गावृत्तिरिति न्यायेन तोलनस्य फलसम्बन्धेन प्रधानत्वात् तदावृत्तौ देवतावाहनाद्यङ्गानामप्यावृत्तेरेवोचितत्वात्। शिक्यादिच्छेदेऽपि पुनः समीकृत्य तोलनीय इत्याह कात्यायनः "शिक्यच्छेदे तुलाभङ्गे तथा चापि गुणस्य वा। शुद्धेस्तु संशये चैनं परीक्षेत पुनर्नरमिति" शुद्धिसंशयकारीण्याह नारदः "तुलाशिरोभ्यामुद्भ्रान्तं विचलं न्यस्तलक्षणम्। यदा वायुप्रणुन्नं वा तदा नैकतरं वदेत्" इति। अयमर्थः। यदा तुलान्तौ तिर्य्यक्चलितौ यदा च समतास्थानार्थन्यस्तं चिह्नमपैति यदा च वायुना प्रेरिता तुला ऊर्द्ध्वमधश्च कम्पते तदा जयं पराजयं च न वदेदिति। व्यासोऽपि "कक्षच्छेदे तुलाभङ्गे घटकर्कटयोस्तथा। रज्जुच्छेदेऽक्षभङ्गे वा दद्याच्छुद्धिं पुनर्नृपः" इति। कक्षं शिक्यतलं कर्कटौ तुलोपान्तस्थौ शिक्याधारावीषद्वक्रौ कर्कटशृङ्गसन्निभौ लोहकीलकौ। अक्षः पादस्तम्भयोरुपरिनिहितस्तुलाधारपट्ट इति मिताक्षरा। दार्ढ्यप्रयोजकः कीलक इति हलायुधः। यत्तु वृहस्पतिवचनम् "कक्षच्छेदे तुलाभङ्गे घटकर्कटयोस्तथा। रज्जुच्छेदेऽक्षभङ्गे च तथैवाशुद्धिमाप्नुयादिति" तदाऽऽकस्मिककक्षच्छेदादिविषयम्। कात्यायनवचनन्तु दृश्यमानकारणकशिक्यच्छेदादिविषयमिति विज्ञानेश्वराचार्य्यादयः" वीरमि०। तुलापुरुषाङ्गतुला तु हेमाद्रौ दा० खण्डे दृश्या। मत्कृततुलादानादिपद्धतौ च विस्तरेण दृश्या।

८ तोलने मिता०। "तुलाः स्त्रियां पलशतं भारः स्याद्विंशतिस्तुला इत्यमरोक्तेः पलशतमानं तुला। तत्र सादृश्ये "तुलां यदा रोहति दन्तवाससा," कुमा० "कामयानसमस्यया तुलाम्" रघुः। तुलोपमाशब्दयोगे षष्ठ्येव साधु न तु तृतीया "अतुलोपमाभ्याम्" पा० तृतीयाविधाने तयोः पर्य्युदासात् तृतीयाप्रयोगस्तु सहार्थशब्दाध्याहारेण तद्योगे इति मल्लि०। तुलाराशौ। "कन्यार्के च तुलार्के च पितृणां श्राद्धमिष्यते" स्मृतिः "तुलायां लोलया सह" ति०त०। "सहभागस्तुलया" ज्यो०त०। तोलनदण्डात्मके माने "अथ स दक्षिणादूरोरुत्कृत्य स्वमांसपेशीं तुलया धारयन् गुरुतर एव कपोत आसीत्" भा०व०१९६ अ०। "तुलामानं प्रतीमानं सर्वञ्च स्यात् सुलक्षितम्। षट्सु षट्सु च मासेषु पुनरेव परीक्षयेत्" मनुः "तुलामानं सुवर्णादीनां परिच्छेदार्थं यत् क्रियते प्रतीमानं प्रस्थद्रोणादि तत्सर्वं स्वनिरूपितं यथा स्यात् षट्सु षट्सु मासेषु गतेषु पुनस्तत्सर्वं सभ्यपुरुषैर्नृपतिः परीक्षयेत्" कुल्लू०। "आषाढ्यां तुलया बीजतोलने भाविशस्यहानिवृद्धिज्ञापनम् वृ० स० २६ अ० उक्तं तत्र अधिवासनाङ्गतुलानिर्म्माणप्रकारस्तत्रैवोक्तो यथा

"आषाढ्यां समनुलिताधिवासितानाम् अन्येद्युर्यद्धिकतामुपैति बीजम्। तद्वृद्धिर्भवति न जायते यदूनं मन्त्रोऽस्मिन् भवति तुलाभिमन्त्रणाय। स्तोतव्या मन्त्रयोगेन सत्या देवी सरस्वती। दर्शयिष्यसि यत्सत्यं सत्ये सत्यव्रता ह्यसि। येन सत्येन चन्द्रार्कौ ग्रहा ज्योतिर्गणास्तथा। उत्तिष्ठन्तीह पूर्वेण पश्चादस्तं व्रजन्ति च। यत्सत्यं सर्ववेदेषु यत्सत्यं ब्रह्मवादिषु। यत्सत्यं त्रिषु लोकेषु तत्सत्यमिह दृश्यताम्। ब्रह्मणो दुहिता चासि त्वमादित्येति कीर्तिता। काश्यपी गोत्रतश्चैव नामतो विश्रुता तुला। क्षौमं चतुःसूत्रकसन्निबद्धं षड़ङ्गुलं शिक्यकवस्त्रमस्याः। सूत्रप्रमाणं च दशाङ्गुलानि षड़ेव कक्षोभयशिक्यमध्ये। याम्ये शिक्ये काञ्चनं सन्निवेश्य शेषद्रव्याण्युत्तरेऽम्बूनि चैवम्। तोयैः कौप्यैः स्यन्दिभिः सारसैश्च दृष्टिहीना मध्यमा चोत्तमा च।. दन्तैर्नागा गोहयाद्याश्च लोम्ना हेम्ना भूपाः सिक्थकेन द्विजाद्याः। तद्देशा वर्षमाशा दिशश्च शेषद्रव्याण्यात्मरूपस्थितानि। हैमी प्रधाना रजतेन मध्या तयोरलाभे खदिरेण कार्या। विद्धः पुमान् येन शरेण सा वा तुला प्रमाणेन भवेद्वितस्तिः। हीनस्य नाशोऽभ्यधिकस्य वृद्धिस्तुल्येन तुल्यं तुलितं तुलायाम्। एतत्तुलाकोशरहस्यमुक्तं प्राजेशयोगेऽपि नरो विदध्यात्"।

तुलाकूट न० ६त०। तुलामानस्य कूटे १प्रकृतमानापेक्षया न्यूनतापादने। तुलायां कूटं यस्य। २तत्कारिणि पुरुषे च "मानकूटं तुलाकूटं कण्टमोष्ठं निपीड़य" काशी०८अ० स्वकिङ्करं प्रति यमवाक्यम्।

तुलाकोटि(टी) स्त्री तुलया तुलां वा कोटयति कुट—परितापे-इन् वा ङीप्। नूपुरे, "तुलाकोटिक्वाणैः कुसुमशरमुज्जागरयति" उद्भटः। "स्खलत्तुलाकोटिनिनादकोमलः" माघः।

तुलाकोश पु० तुला कोश इव। तुलायां भाविशस्यहानिवृद्धिज्ञापनार्थतुलारूपे मानदण्डभेदे वृ०स०वाक्यं तुलाशब्दे दृश्यम्। २तुलया परीक्षणे च मिता०।

तुलादान न० तुलया स्वदेहमानेन दानम्। तुलापुरुषसंज्ञके महादाने मत्स्यतुलादानादिपद्धतौ तत्प्रयोगो दृश्यः।

तुलाधट पु० तुलायै तोलनाय धटः। तुलाधारदण्डे त्रिका०।

तुलाधर त्रि० तुलाया मानदण्डस्य धरः धृ-अच्। १वाणिजके, २तुलार [illegible] तुलादण्डधारके त्रि० मेदि०।

तुलापुरुष पु० [illegible] षोडशसु महादानेषु आद्ये महादाने तत्प्रकारः मत्स्यपु०२७२अ०उक्तो यथा "अथातः सम्प्रवक्ष्यामि महादानानुकीर्तनम्" इत्युपक्रमे। "आद्यन्तु सर्वदानानां तुलापुरुषसंज्ञकम्" महादानानि विभज्य उक्तं यथा "मत्स्य उवाच। यानि नोक्तानि गुह्यानि महादानानि षोड़श। तानि ते कथयिष्यामि यथावदनुपूर्वशः। तुलापुरुषयागोऽयं येषामादौ विधीयते। अयने विषुवे पुण्ये व्यतीपाते दिनक्षये। युगादिषूपरागेषु तथा मन्वन्तरादिषु। सङ्क्रान्तौ वैधृतिदिने चतुर्दश्यष्टमीषु च। सितपञ्चदशीपर्वद्वादशीष्वष्टकासु च। यज्ञोत्सवविवाहेषु दुःस्वप्नाद्भुतदर्शने। द्रव्यब्राह्मणलाभे वा श्रद्धा वा यत्र जायते। तीर्थे वायतने वापि तड़ागे रुचिरे तथा। महादानानि देयानि संसारभयभीरुणा। अनित्यं जीवितं यस्मात् वसु चातीव चञ्चलम्। केशेष्वेव गृहीतः सन् मृत्युना धर्ममाचरेत्। पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम्। षोड़शारत्निमात्रन्तु दश द्वादश वा करान्। मण्डपं कारयेद्विद्वान् चतुर्भद्रासनं बुधः। सप्तहस्ता भवेद्वेदी मध्ये पञ्चकरा तथा। तन्मध्ये तोरणं कुर्य्यात् सारदारुमयं बुधः। कुर्य्यात् कुण्डानि चत्वारि चतुर्दिक्षु विचक्षणः। समेखलायोनियुतानि कुर्य्यात् सम्पूर्णकुम्भानि महासनानि। सुताम्रपात्रद्वयसंयुतानि सयज्ञपात्राणि सुविष्टराणि। हस्तप्रमाणानि तिलाज्यधूपपुष्पोपहाराणि सुशोभनानि। पूर्वोत्तरे हस्तमिताथ वेदी ग्रहादिदेवेश्वरपूजनाय। अत्रार्चनं ब्रह्मशिवाच्युतानां तत्रैव कार्य्यं फलमाल्यवस्त्रैः। लोकेशवर्णाः परितः पताका मध्ये ध्वजः किङ्किणिकायुतः स्यात्। द्वारेषु कार्य्याणि च तोरणानि चत्वार्य्यपि क्षीरवनस्पतीनाम्। द्वारेषु कुम्भद्वयमत्र कार्य्यं स्रगगन्धधूपाम्बररत्नयुक्तम्। शालेङ्गुदीचन्दनदेवदारुश्रीपर्णिविल्वप्रियकाञ्चनोत्थम्। स्तम्भद्वयं हस्तयुगावखातं कृत्वा दृढ़ं पञ्चकरोच्छ्रितञ्च। तदन्तरं हस्तचतुष्टयं स्यादथोत्तराङ्गञ्च तदङ्गमेव। समानजातिश्च तुलावलम्बा हैमेन मध्ये पुरुषेण युक्ता। दैर्घ्येण सा हस्तचतुष्टयं स्यात् पृथुत्वमस्यास्तु दशाङ्गुलानि। सुवर्णपट्टाभरणा तु कार्य्या सा लोहपाशद्वयशृङ्खलाभिः। युता सुवर्णेन तु रत्नमालाविभूषिता माल्यविलेपनाभ्याम्। चक्रं लिखेद्वारिजगर्भयुक्तं नानारजोभिर्भुवि पुष्पकीर्णम्। वितानकञ्चोपरि पञ्चवर्णं संस्थापयेत् पुष्पफलोपशोभम्। अथर्त्विजो वेदविदश्च कार्य्याः सुरूपवे-

शान्वयशीलयुक्ताः। विधानदक्षाः पटवोऽनुकूला ये चार्य्यदेशप्रभवा द्विजेन्द्राः। गुरुश्च वेदान्तविदार्य्यवंशसमुद्भवः शीलकुलाभिरूपः। पुराणशास्त्राभिरतोऽतिदक्षः प्रसन्नगम्भीरसरस्वतीकः। सिताम्बरः कुण्डलहेमसूत्रकेयूरकण्ठाभरणाभिरामः। पूर्व्वेण ऋग्वेदविदावथास्तां यजुर्व्विदौ दक्षिणतश्च शस्तौ। स्थाप्यौ द्विजौ सामविदौ तु पश्चादाथर्व्वणावुत्तरतस्तु कार्य्यौ। विनायकादिग्रहलोकपालवस्वष्टकादित्यमरुद्गणानाम्। ब्रह्माच्युतेशार्कवनस्पतीनां स्वमन्त्रतोहोमचतुष्टयं स्यात्। जप्यानि सूक्तानि तथैव चैषामनुक्रमेणापि यथास्वरूपम्। होमावसाने कृततूर्य्यनादो गुरुर्गृहीत्वा बलिपुष्पधूपम्। आवाहयेल्लोकपतीन् क्रमेण मन्त्रैरमीभिर्यजमानयुक्तः। एह्येहि सर्व्वामरसिद्धसाध्यैरभिष्टुतो वज्रधराऽमरेश!। संवीज्यमानोऽप्सरसाङ्गणेन रक्षाध्वरन्नो भगवन्नमस्ते (इन्द्रस्य)। एह्येहि सर्व्वामरहव्यवाह! मुनिप्रवीरैरभितोऽभिजुष्ट!। तेजस्विना लोकगणेन सार्द्धं ममाध्वरं रक्ष कवे! नमस्ते" (अग्नेः)। एह्येहि वैवस्वत! धर्म्मराज! सर्व्वामरैरर्च्चितदिव्यमूर्त्ते!। शुभाशुभानन्दशुचामधीश। शिवाय नः पाहि मखं नमस्ते" (यमस्य)। एह्येहि रक्षोगणनायकस्त्वं सर्व्वैस्तु वेतालपिशाचसङ्घैः। ममाध्वरं पाहि शुभाधिनाथ! लोकेश्वरस्त्वं भगवन्नमस्ते (नैर्ऋतस्य)। एह्येहि यादोगणवारिधीनाङ्गणेन पर्जन्यमहाप्सरोभिः। विद्याधरेन्द्रामरगीयमान! पाहि त्वमस्मान् भगवन्नमस्ते (वरुणस्य)। एह्येहि यज्ञे मम रक्षणाय मृगाधिरूढः सह सिद्धसङ्घैः। प्राणाधिपः कालकवेः सहायः गृहाण पूजां भगवन्नमस्ते (वायोः)। एह्येहि यक्षेश्वर! यज्ञरक्षां विधत्स्व नक्षत्रगणेन सार्द्धम्। सर्व्वौषधीभिः पितृभिः सहैव गृहाण पूजां भगवन्नमस्ते (सोमस्य)। एह्येहि विश्वेश्वर! नस्त्रिशूलकपालखट्वाङ्गधरेण सार्द्धम्। लोकेश! यक्षेश्वर! यज्ञसिद्ध्यै गृहाण पूजां भगवन्नमस्ते (ईशस्य)। एह्येहि पातालधराधरेन्द्र! नागाङ्गनाकिन्नरगीयमान!। यक्षोरगेन्द्रामरलोकसङ्घैरनन्त! रक्षाध्वरमस्मदीयम्"। (अनन्तस्य) एह्येहि विश्वाधिपते! मुनीन्द्र लोकेन सार्द्धं पितृदेवताभिः। सर्व्वस्य धातास्यमितप्रभाव! विशाध्वरन्नो भगवन्नमस्ते (ब्रह्मणः)। त्रैलोक्ये यानिभूतानि स्थावराणि चराणि च ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्व्वन्तु तानि मे। देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः। ऋषयो मनवोगावो देवमातर एव च। सर्व्वे ममाध्वरे रक्षां प्रकुर्व्वन्तु मुदान्विताः। इत्यावाह्य सुरान् दद्यादृत्विग्भ्यो हेमभूषणम्। कुण्डलानि च हैमानि सूत्राणि कटकानि च। अङ्गुलीयपवित्राणि वासांसि शयनानि च। द्विगुणं गुरवे दद्याद्भूषणाच्छादनानि च। जपेयुः शान्तिकाध्यायं जापकाः सर्व्वतोदिशम्। तत्रोषितास्तु ते सर्व्वे कृत्वैवमधिवासनम्। आदावन्ते च मध्ये च कुर्य्याद्ब्राह्मणवाचनम्। ततो मङ्गलशब्देन स्नापितो वेदपुङ्गवैः। त्रिःप्रदक्षिणमावर्त्त्य गृहीतकुसुमाञ्जलिः। शुक्लमाल्याम्बरोभूत्वा तां तुलामभिमन्त्रयेत्। नमस्ते सर्व्वदेवानां शक्तिस्त्वं सत्यमास्थिता। साक्षिभूता जगद्धात्री निर्म्मिता विश्वयोनिना। एकतः सर्व्वसत्यानि तथानृतशतानि च। धर्म्माधर्म्मकृतां मध्ये स्थापितासि जगद्धिते!। त्वं तुले! सर्व्वभूतानां प्रमाणमिह कीर्त्तिता। मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तु ते। योऽसौ तत्त्वाधिपोदेवः पुरुषः पञ्चविंशकः। स एकोऽधिष्ठितो देवि! त्वयि तस्मान्नमोनमः। नमोनमस्ते गोविन्द! तुलापुरुषसंज्ञक!। त्वं हरे! तारयस्वास्मान्महासंसारकर्द्दमात्। पुण्यकालं समासाद्य कृत्वैवमधिवासनम्। पुनः प्रदक्षिणं कृत्वा तुलामारोहयेद्बुधः। सखड्गचर्म्मकवचः सर्व्वाभरणभूषितः। धर्म्मराजमथादाय हैमं सूर्य्येण संयुतम्। कराभ्यां बद्धमुष्टिभ्यामास्ते पश्यन् हरेर्मुखम्। ततोऽपरे तुलाभागे न्यसेयुर्द्विजपुङ्गवाः। समादभ्यधिकं यावत् काञ्चनं चातिनिर्म्मलम्। पुष्टिकामस्तु कुर्व्वीत भूमिसंस्थं नरेश्वरः। क्षणमात्रं ततः स्थित्वा पुनरेवमुदीरयेत्। नमस्ते सर्व्वभूतानां साक्षिभूते! सनातनि!। पितामहेन देवि! त्वं निर्म्मिता परमेष्ठिना। त्वया धृतं जगत्सर्व्वं सहस्थावरजङ्गमम्। सर्व्वभूतात्मभूतस्थे! नमस्ते विश्वधारिणि!। ततोऽवतीर्य्य गुरवे पूर्व्वमर्द्धं निवेदयेत्। ऋत्विग्भ्योऽपरमर्द्धन्तु दद्यादुदकपूर्व्वकम्। गुरवे ग्रामरत्नानि ऋत्विग्भ्यश्च निवेदयेत्। प्राप्य तेषामनुज्ञां तु तथान्येभ्योऽपि दापयेत्। दीनानाथविशिष्टादीन् पूजयेद्ब्राह्मणैः सह। न चिरं धारयेद्गेहे सुवर्णं प्रोक्षितं बुधः। तिष्ठद्भयावहं यस्माच्छोकव्याधिकरं नृणाम्। शीघ्रं परस्वीकरणाच्छ्रेयः प्राप्नोति मानवः। अनेन विधिना यस्तु तुलापुरुषमाचरेत्। प्रतिलोकाधिपस्थाने प्रतिमन्वन्तरं वसेत्। विमानेनार्कवर्णेन किङ्किणीजाल-

मालिना। पूज्यमानोऽप्सरोभिश्च ततो विष्णुपुरं व्रजेत्। कल्पकोटिशतं यावत्तस्मिन् लोके महीयते। कर्म्मचयादिह पुनर्भुवि राजराजो भूपालमौलिमणिरञ्जितपादपीठः। श्रद्धान्वितो भवति यज्ञसहस्रयाजी दीप्तप्रतापजितसर्व्वमहीपलोकः। यो दीयमानमपि पश्यति भक्तियुक्तः कालान्तरे स्मरति वाचयतीह लोके। यो वा शृणोति पठतीन्द्रसमानरूपः प्राप्नोति धाम सपुरन्दरदेवजुष्टम्"। अन्यविधानं हेमा० दा० दृश्यम् एतत् प्रयोगस्तु मत्कृततुलादानादिपद्धतौ दृश्यः।

२व्रतभेदे। तच्च व्रतं पञ्चदशदिनसाध्यमेकविंशतिदिनसाध्यञ्च यथा।

"पिन्याकाचमतक्रोदकसक्तूनामुपवासान्तरितोऽभ्यव्यवहारास्तुलापुरुषः"। विष्णु० स०। "पिन्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम्। एकरात्रोपवासश्च कृच्छ्रः सौम्योऽयमुच्यते" इत्युपक्रमे "एषां त्रिरात्रमभ्यासादेकैकस्य यथाविधि। तुलापुरुष इत्येष ज्ञेयः पञ्चदशाह्निकः"। एषां पिन्याकादीनां पञ्चानां क्रमेनैकैकस्य त्रिरात्राभ्यासेन पञ्चदशाहव्यापी तुलापुरुषाख्यः कृच्छ्रो वेदितव्यः। अत्र पञ्चदशाह्निकत्वविधानादुपवासस्य निवृत्तिः। यमेन त्वेकविंशतिरात्रिकस्तुलापुरुष उक्तः "आचाममथ पिन्याकं तक्रञ्चोदकसक्तुकान्। त्र्यहं त्र्यहम्प्रयुञ्जानो वायुभक्षस्त्र्यहद्वयम्। एकविंशतिरात्रन्तु तुलापुरुष उच्यते इति"।

तुलाप्रग्र(ग्रा)ह पु०प्र+ग्रह वा घञ् पक्षे अप् ६त०।१तुलासूत्रे सि० कौ०। [ल्युट्। १तुलादण्डे शब्दार्थचि०।

तुलामान न०तुलार्थं तोलनार्थं मानं मीयतेऽनेन मा-करणे

तुलायष्टि स्त्री ६त०। १तुलादण्डे। "स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्। अहो सुसदृशी चेष्टा तुलायष्टेः खलस्य च" पञ्चत०।

तुलावीज न० तुलायाः तोलनस्य वीजं मूलम्। १गुञ्जायाम् तदारभ्यैव हि मानं शास्त्रे दर्शितं यथा "दशार्द्धगुञ्जं प्रवदन्ति माषमिति"लीला०[दण्डस्थितसूत्रे प्रग्रहे अमरः।

तुलासूत्र न० तुलार्थं तोलनार्थं सूत्रम्। तोलनार्थं तुला-

तुलि(ली) स्त्री तुरि(री)+रस्य लः। तुर्य्यां शब्दरत्ना०।

तुलिका स्त्री तुल-बा० क्वुन्। खञ्जनिकायां त्रिका०।

तुलित त्रि० तुला+तत्करोति णिच्-कर्मणि क्त। १परिमिते "येऽपीन्द्रपाणितुलितायुधलूनपक्षाः" माघः। २सदृशीकृते

तु(तू)लिनी स्त्री तूलं विद्यते फलेऽस्याः इनि ङीप् वा पृषो० ह्रस्वः। १शाल्मलिवृक्षे रत्नमाला।

तु(तू)लिफला स्त्री तुलि तूलयुक्तं फलमस्याः वा पृषो०। १शाल्मलीवृक्षे रत्नमाला।

तुल्य त्रि० तुलया सम्मितं यत्। १सदृशे अमरः। "सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः"। "सकामां दूषयंस्तुल्योनाङ्गुलिच्छेदमाप्नुयात् मनुः"। "कुम्भकर्णः कपीन्द्रेण तुल्यावस्थः स्वसुःकृतः"रघुः। [बहुभिरेकत्र पाने अमरः।

तुल्यपान न० तुल्येन सजातीयेन सह पानम्। सजातीयैः

तुल्ययोगिता स्त्री अर्थालङ्कारभेदे अलङ्कारभेदे अलङ्कारशब्दे२८८पृ० दृश्यम्। ["विम्बीलोटाश्च तुल्यशः"सुश्रु०।

तुल्यशस् अव्य० तुल्य+वीप्सार्थे शस्। तुल्यं तुल्यमित्यर्थे।

तुल्वल पु० ऋषिभेदे। तौल्वलिशब्दे दृश्यम्।

तुवर पु० तवति हिनस्ति रोगान् सौ० तु-ष्वरच् नि० गुणाभावः। १धान्यभेदे २कषायरसे च ३तद्वति त्रि० ४आढक्याम् ५सौराष्ट्रमृत्तिकायाञ्च स्त्री षित्त्वात् ङीष् स्वार्थे क तुवरिकाप्यत्रैव। रसभेदे पुंस्त्री तद्वति त्रि० अमरः। ६श्मश्रुहीने नरे उणा०।

तुवरयावनाल पु० कर्म० धान्यभेदे राजनि०। "तुवरो यावनालस्तु कषायोष्णो विरेचकः। संग्राही वातशमनो विदाही शोषकारकः" राजनि०।

तुवरिका स्त्री० तुवरोऽस्त्यस्याः ठन्। १सौराष्ट्रमृत्तिकायां (फटकिरि) अमरः। २आढक्यां (अरहर) भरतः।

तुवरी स्त्री तु+ष्वरच् षित्त्वात् ङीष्। १आढक्यां २सौराष्ट्रमृत्तिकायाञ्च (फिटकरि) राजनि०। (तोरी) इति २धान्यभेदे भावप्र० तद्गुणास्तत्रोक्ता यथा। "तुवरी ग्राहिणी शीता लघ्वी कफविषास्रजित्। तीक्ष्णोष्णा वह्निदा कण्डूकुष्ठकोठकृमिप्रणुत्"। [चक्रमर्दने शब्दच०।

तुवरीशिम्ब पु० तुवर्य्या आढक्या इव शिम्बा यस्य। रक्त-

तुवि स्त्री० तुम्बी+पृषो०। १तुम्बर्य्यां। तु-पूर्त्तौ इन् किच्च। २बहुशब्दार्थे निघण्टुः। "तुविकूर्म्मिर्ऋघावान्" ऋ० ३।३०।३। कृ-मि वेदे गुणे अकारस्योत्त्वम् "तुविग्राभं तुविकूर्म्मिं रभोदाम्" ऋ० ६।२२।५। "ग्रहेरप्। तुविग्राभं बहुग्राहकम्" भा० "तुविशुष्म! तुविक्रतो!" ऋ०८।६८।२वा ङीप्। "सहस्रेषु तुवीमघ!" ऋ० १।२९।१। तुवीमघ कथञ्चन" "प्र इद्दासं तुवीरवम्" ऋ०१०।९९।६।

तुविस् न० तु-वृद्धौ पूर्त्तौ वा इसि किच्च। १वृद्धौ २प्रज्ञायां ३बले च। "यः प्रप्रर्थिमर्द्द समस्तुविष्मान्" ऋ० २।१२।

१२। "तुविष्मान् वृद्धिमान् बलवान् वा" भा०। "भीमस्तुविष्मान् चर्षणिभ्यः" १।५५।१। "तुविष्मान् प्रज्ञावान् बलवान् वा" भा०। बलेन प्रज्ञया च वृद्धेः पूर्त्तेश्च सम्भवात् बलप्रज्ञयोस्तथात्वम्।

तुवीरवत् त्रि० तुवी मत्वर्थीयोरः ततो मतुप् मस्य वः। बहुस्तोत्रयुक्ते। "रथा कविस्तुवीरवान्" ऋ० १०।१६४।४। "तुवीरवान् बहुस्तोत्रयुक्तो भवति। मत्वर्थीयप्रत्ययावृत्तिः। यद्वा तुविशब्दस्य रो मत्वर्थीयः। बाहुल्ययुक्तैर्देवैः सहितो भवति" भा०।

तुश वधे भ्वा० आ० सक० सेट्। तोशते अतोशिष्ट तुतुशे। "इन्दुरिन्द्राय तोशते नितोशते" ऋ०९।१०९।२२ "इन्दुः सोम इन्द्रायेन्द्रार्थं तोशते" तोशते हन्यते अभिषूयते। नितोशते नितरामभिषूयते। तोशतिर्बधकर्म्मा" भा० कर्मकर्त्तरि तङ्। यगभावश्छान्दसः। "सत्रात्वं पुरुष्टुत एको वृत्राणि तोशसे"। ऋ०८।१५।११। तोशसे हिनस्सि" भा०।

तुष तोषे आनन्दभेदे दि० प० लृदित् अक० सेट्। तुष्यति अतुषत्। तुतोष। जीदित् वर्त्तमाने क्तः तुष्टः। तुष्टिः। तोषः "तुष्य द्रौपदि! मा क्रुध" भा० व० ११०९ श्लो०। "तुष्यन्ति च रमन्ति च" भा० आनु० १२७६ श्लो० "तुतोष पश्यन् वितृणान्तरालाः" भट्टिः।

तुष पु०तुष–क। १विभीतकवृक्षे (वयड़ा) २धान्यत्वचि स्वनामख्याते द्रव्ये च अमरः। "व्रीहीन् जिहासति सितोत्तमतण्डुलाढ्यान् को नाम भोस्तुषकणोपहितान् हितार्थी" प्रबो० च०। "तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः" हितो०। "सतुषं धान्यमुच्यते" आ०त०।

तुषग्रह पु०तुषेण गृह्यते ग्रह–कर्मणि अप्। वह्नौ त्रिका०

तुषज त्रि० तुषे जायते जन–ड। तुषजाते वह्न्यादौ। अस्य "दीर्घकाशतुषवटं जे" पा० आद्युदात्तता।

तुषधान्य न० तुषावृतं धान्यं शा०त०। तुषावृते सतुषे धान्ये। "तुषधान्यतीक्ष्णमन्त्राभिचारवेतालकर्मज्ञाः"। "परधनहरणाभिरतास्तुषधान्यं सर्वभिषजश्च"।वृ०स०१५अ०।

तुषसार पु०तुषं सरति अनुसरति सृ–अण्। वह्नौ शब्दमा०

तुषानल पु० तुषस्यानलः। तुषजाते अग्नौ। तुषाग्न्यादयोऽप्यत्र।

तुषाम्बु न० तुषोदकशब्दार्थे "तुषाम्बु दीपनं पाण्डुक्रिमिरोगगदापहम्। तीक्ष्णोष्णं पाचनं पित्तरक्तकृद्वस्तिशूलहृद्" भावप्र०।

तुषार पु० तोषयति तुष–अन्तर्भूतण्यर्थात् आरन् किच्च। १देशभेदे। (तुखार) शब्दे दृश्यम् तत्र तुखारा इत्यत्र तुषारा इति पाठान्तरम्। २हिमकणभेदे नीहारे हेमच०। ३शीतलस्पर्शे अमरः ४तद्वति त्रि०। "अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा" नैष०। "प्रपतत् तुषारो हेमन्तकालः" ऋतुसं० ५कर्पूरभेदे राजनि०। "जनस्तुषाराञ्जनपर्वतादिव" "स्नपनवारितुषारभृतस्तनाः" माघः। "आचचाम सतुषारशीकरः" रघुः। "पदं तुषारस्रुतिधौतरक्तम्" कुमा०। "लघुतुषारतुषारजलश्च्युतम्" किरा०।

तुषारकर पु० तुषारो हिमः करोऽस्य। १हिमकरे चन्द्रे तुषारकिरणादयोऽप्यत्र। "कलया तुषारकिरणस्य पुरः" माघः। २कर्पूरे च।

तुषारगिरि पु० ६त०। १हिमालये "तुषारगिरिकूटाभं सिताभ्रशिखरोपमम्" भा० अनु० १४ अ०। तुषाराचलादयोऽप्यत्र।

तुषित पु० तुष–बा० कितच् तुष–सम्प० क्विप् ततः तारका० इतच् वा। १गणदेवताभेदे ते च द्वादश। किन्तु मन्वन्तरभेदे भिन्ननामानः यथा "चाक्षुषस्यान्तरे पूर्वमासन् ये तुषिताः सुराः। वैवस्वतेऽन्तरे ते वै आदित्या द्वादश स्मृताः" हरिवं० ३अ०। तथा च आदित्यरूपा द्वादश१२ "प्राणापानावुदानश्च समानो व्यान एव च। चक्षुः श्रोत्ररसघ्राणस्पर्शा बुद्धिर्मनस्तथा। द्वादशैते तु तुषिताः देवाः स्वारोचिषेऽन्तरे" सारसुन्दरीधृतवाक्योक्ता द्वादश१२ "तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिडस्पतिः। इध्मः कविर्विभुः स्वाहा सुदेवो रोचनो द्विषट्१२। तुषिता नाम ते देवा आसन् स्वायम्भुवेऽन्तरे" शब्दार्थचि० धृतवाक्योक्ता द्वादश इति षट्त्रिंशत्। ये च द्वादशेति मन्यन्ते ते एकैकमन्वन्तरापेक्षया द्वादशेति वर्णयन्ति। समष्ट्यभिप्रायेण षट्त्रिंशदिति विवेकः। तदभिप्रायेणैव "षट्त्रिंशत्तुषिता मताः" इत्युक्तम्। २विष्णौ पु०। "तुषित! महातुषितेत्यादि" भा०शा०३४अ०। विष्णुस्तुतौ।

तुषोत्थ न० तुषादुत्तिष्ठति उद्+स्था–क ३त०। १तुषोदके राजनि०।

तुषोदक न० तुषमिश्रितमुदकं शा० त०। १काञ्जिकभेदे हारा०। तत्करणप्रकारो भावप्र० उक्तो यथा "तुषोदकं यवैरामैः सतुषैः शकलीकृतैः"। यवैरुदकसहितैः सन्धानवर्गोक्तत्वात्"। तुषाम्बुशब्दे तद्गुणादि दृश्यम्।

तुष्ट त्रि० तुष–कर्त्तरि क्त। १सन्तोषयुक्ते। "तस्मिँस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्" पुरा०। २विष्णौ पु० "परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः" विष्णुस० "परानन्दैकरूपत्वात्तुष्टः" भा०। तस्यानन्दरूपत्वेऽपि आनन्दाश्रयत्वं कल्पितम् अतएव विवरणे "आनन्दो विषयानुभवो नित्यत्वञ्च सन्ति धर्मा अपृथक्त्वेऽपि पृथगिवावभासन्ते" इत्युक्तम्। न्यायनये तु दुःखाभावस्यैवानन्दरूपत्वात् तस्य तदाश्रयत्वमस्त्येवेति भेदः।

तुष्टि स्त्री तुष–भावे क्तिन्। १तोषे २भोगेष्वेतावतालमिति बुद्धौ ३अधिगतार्थादन्यत्र तुच्छत्वबुद्धौ "तुष्टिर्नुरक्ततार्थस्य कृतार्थोऽस्मीति या मतिः" इत्युक्ते ४वृद्धिभेदे सा च नवविधा इति सांख्याचार्य्याः यथोक्तं सा० का० त० कौ० च।

"तुष्टिर्नवधेत्युक्तं ताः परिगणयति। "आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः। वाह्याविषयोपरमात् पञ्च नव तुष्टयोऽभिमताः" का०।

"प्रकृतिव्यतिरिक्त आत्मास्तीति प्रतिपद्य ततोऽस्य श्रवणमननादिना विवेकसाक्षात्काराय त्वसदुपदेशतुष्टो यो न प्रयतते तस्य चतस्र आध्यात्मिक्यस्तुष्टयो भवन्ति प्रकृतिव्यतिरिक्तमात्मानमधिकृत्य यस्मात्तास्तुष्टयस्तस्मादाध्यात्मिक्यः, कास्ता इत्यत आह प्रकृत्युपादानकालभाग्याख्याः प्रकृत्यादिराख्या यासां तास्तथोक्ताः। तत्र प्रकृत्याख्या तुष्टिर्यथा कस्यचिदुपदेशः (विवेकसाक्षात्कारो हि प्रकृतिपरिणामभेदः तञ्च प्रकृतिरेव करोतीति कृतं ते ध्यानाभ्यासेन, तस्मादेवमेवास्स्वेति)। सेयमुपदिष्टस्य शिष्यस्य प्रकृतौ तुष्टिः प्रकृत्याख्या तुष्टिः अम्भ इत्युच्यते। "या च प्रकृत्यविवेकख्यातिर्न सा प्रकृतिमात्राद्भवति मा भूत्सर्वस्य सर्वदा तन्मात्रस्य सर्वान् प्रत्यविशेषात् प्रव्रज्यायास्तु सा भवति तस्मात्प्रव्रज्यामुपाददीथाः कृतं ते ध्यानाभ्यासेनायुष्मन्नित्युपदेशे या तुष्टिः सोपादानाख्या सलिलमुच्यते। 'या तु प्रव्रज्यापि न सद्यो निर्वाणदेति सैव कालपरिपाकमपेक्ष्य सिद्धिन्ते विधास्यति अलमुत्तप्ततया तवेत्युपदेशे या तुष्टिः सा कालाख्या मेघ उच्यते। "या तु न कालात् नाप्युपादानाद्विवेकख्यातिरपि तु भाग्यादेव अतएव मदालसापत्यानि अतिबालानि मातुरुपदेशमात्रादेव विवेकख्यातिमन्ति मुक्तानि बभूवुः तत्र भाग्यमेव हेतुर्नान्यदित्युपदेशे या तुष्टिः सा भाग्याख्या तुष्टिरुच्यते। वाह्या दर्शयति वाह्यास्तुष्टयोविषयोपरमात् पञ्च, याः खल्वनात्मनः प्रकृतिमहदहङ्कारादीनात्मेत्यभिमन्यमानस्य वैराग्ये सति तुष्टयस्ता वाह्याः आत्मज्ञानाभावेऽनात्मानमधिकृत्य प्रवृत्तेरिति। ताश्च वैराग्ये सति सम्भवन्ति तुष्टय इति वैराग्यहेतुपञ्चविधत्वाद्वैराग्याण्यपि पञ्च, तत्पञ्चकत्वात् तुष्टयः पञ्चेति, उपरम्यतेऽनेनेत्युपरमो वैराग्यं विषयादुपरमो विषयोपरमः। विषया भोग्याः शब्दादयः पञ्च, उपरमा अपि पञ्च। तथा च अर्ज्जनरक्षणक्षयभोगहिंसादोषदर्शनहेतुजन्मान उपरमाः पञ्च भवन्ति। तथा हि सेवादयो धनोपार्जनोपायास्ते च सेवकादीन् दुःखा कुर्वन्ति। दृप्यद्दुरीश्वरद्वाःस्थहस्तदत्तचण्डार्द्धचन्द्रजां वेदनां भावयन् प्राज्ञः कः सेवासु प्रसज्जते। एवमन्येऽप्यर्जनोपाया दुःखा इति विषयोपरमे या तुष्टिः सैषा पारमुच्यते। तथार्जितं धनं राजैकागारिकाग्निजलौघादिभ्यो विनङ्क्ष्यतीति तद्रक्षणे महद्दुःखमिति भावयतो विषयोपरमे या तुष्टिः द्वितीया सुपारमुच्यते। तथा महतायासेनार्जितं धनं भुज्यमानं क्षीयते इति तत्प्रक्षयं भावयतो विषयोपरमे या तुष्टिः सा तृतीया पारपारमुच्यते। एवं शब्दादिभोगाभ्यासाद्वर्द्धन्ते कामास्ते च विषयाप्राप्तौ कामिनं दुःखयन्तीति भोगदोषं भावयतो विषयोपरमे या तुष्टिः सा चतुर्थी अनुत्तमाम्भ उच्यते। एवं नानुपहत्य भूतानि विषयोपभोगः सम्भवतीति हिंसादोषदर्शनाद्विषयोपरमे या तुष्टिः सा पञ्चमी उत्तमाम्भ उच्यते। एवमाध्यात्मिकीभिश्चतसृभिर्वाह्याभिश्च पञ्चभिर्नव तुष्टयोऽभिमताः"। भाष्यकृता अन्यथा तुष्टिभेदा दर्शिता यथा "तुष्टिर्नवधा" सा सू० "आध्यात्मिक्यादिभेदान्नवधा तुष्टिः" भा०। "इदं सूत्रं कारिकया व्याख्यातम्। आध्यात्मिक्य इत्यादिरस्यायमर्थः। आत्मानं तुष्टिमतः सङ्घातमधिकृत्य वर्त्तन्त इत्याध्यात्मिक्यस्तुष्टयश्चतस्रः। तत्र प्रकृत्याख्या तुष्टिर्यथा। साक्षात्कारपर्य्यन्तः परिणामः सर्वोऽपि प्रकृतेरेव तं च प्रकृतिरेव करोत्यहं तु कूटस्थः पूर्ण इत्यात्मभावनात् परितोषः। इयं तुष्टिरम्भ इत्युच्यते। ततश्च प्रव्रज्योपादानेन या तुष्टिः सोपादानाख्या सलिलमित्युच्यते। ततश्च प्रव्रज्यायां बहुकालं समाध्यनुष्ठानेन या तुष्टिः सा कालाख्या तुष्टिर्मेघ इत्युच्यते। ततश्च प्रज्ञानपरमकाष्ठारूपे धर्ममेघसमाधौ सति या तुष्टिः सा जलाख्या तुष्टिरित्युच्यत इति चतस्र आध्यात्मिक्यः।

बाह्याः पञ्च तुष्टयो बाह्यविषयेषु पञ्चसु शब्दादिष्वर्जनरक्षणक्षयभोगहिंसादिदोषनिमित्तकोपरमाज्जायन्ते । ताश्च तुष्टयो यथाक्रमं पारं सुपारं पारापारमनुत्तमाम्भ उत्तमाम्भ इति परिभाषिता इति । कश्चित् त्विमां कारिकामन्यथा व्याख्यातवान् । तद्यथा विवेकसाक्षात्कारोऽपि प्रकृतिपरिणाम एवेत्यलं ध्यानाभ्यासेनेत्येवं दृष्ट्वा या ध्यानादिनिवृत्तौ तुष्टिः सा प्रकृत्याख्या । प्रव्रज्योपादानेनैव मोक्षो भविष्यति किं ध्यानादिनेति या तुष्टिः सोपादानाख्या । कृतसन्न्यासस्यापि कालेनैव मोक्षो भविष्यत्यलमुद्वेगेनेति या तुष्टिः सा कालाख्या । भाग्यादेव मोक्षो भविष्यति न मोक्षशास्त्रोक्तसाधनैरेवं कुतर्के या तुष्टिः सा भाग्याख्येत्यादिरर्थ इति तन्न । तद्व्याख्याततुष्टीनामभावस्य ज्ञानाद्यनुकूलत्वेनाशक्तिपरिभाषानौचित्यादिति" ।

तुष—कर्त्तरि क्तिच् । ५गौर्य्यादिषु षोड़शसु मातृषु मध्ये मातृभेदे । कुलदेवताशब्दे २१२० पृ० दृश्यम् । ६अनन्तदेवपत्न्याञ्च । "अनन्तपत्नी तुष्टिश्च पूजिता वन्दिताऽभवत् । यया विना न सन्तुष्टाः सर्वे लोकाश्च सर्व्वतः" देवीभा० । "या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता" देवीमाहा० । "आचारश्चैव साधूनामात्मनस्तुष्टिरेव च" मनुः ।

तुष्टिमत् त्रि० तुष्टिरस्त्यस्य मतुप् । तोषयुक्ते । स्त्रियां ङीप् । २उग्रसेनात्मजे कंसभ्रातरि पु० "कंसः सुनामा न्यग्रोधः कङ्कः शङ्कुः सुहूस्तथा । राष्ट्रपालोऽथ सृष्टिश्च तुष्टिमानुग्रसेनजाः" भाग० ८।२४।१४ ।

तुष्टु पु० तुष—बा० तुक् । कर्णस्थमणौ शब्दच० ।

तुष्य पु० तुष—कर्त्तरि क्यप् । १महादेवे तुटितुटशब्दे दृश्यम्

तुस ध्वनौ भ्वा० पर० सक० सेट् । तोसति अतोसीत् । तुतोस ।

तुस पु० तुष+पृषो० । तुषे धान्यत्वचि रमानाथः ।

तुस्त न० तुस—क्त बा० इड़भावः । १रेणौ अमरे बुस्तेत्यत्र तुस्तेति पाठं मत्वा सारसुन्दर्यां व्याख्यातम् ।

तुह अर्द्दने बधे भ्वा० पर० सक० सेट् । तोहति । इरित् अतुहत् अतोहीत् । । तुतोह ।

तुह(हा)र पु० तुह—बा० करन् कारन् वा । कुमारपारिषद्भेदे । "तुहरस्य तुहारश्च चित्रदेवश्च वीर्य्यवान्" भा० स० ४६ अ० । कुमारपारिषदोक्तौ ।

तुहिन न० तुह्यतेऽनेन तुह—इनन् ह्रस्वश्च । १हिमे अमरः २चन्द्रतेजसि उज्ज्वल० "तृणाग्रलग्नैस्तुहिनैः पतद्भिः" ऋतुस० "सान्द्रस्तुहिनान्तरितः" प्रबोधच० ।

तुहिनकर पु० तुहिनं करोऽस्य । १चन्द्रे तुहिनांशुप्रभृतयोऽप्यत्र ।२कर्पूरे च ।

तुहिनांशुतैल न० ६त० । कर्पूरतैले राजनि० ।

तुहिनाचल पु० ६त० । हिमालये तुहिनाद्रिप्रभृतयोऽप्यत्र ।

तुहुण्ड पु० दनुवंश्ये दानवभेदे । "अश्वग्रीवश्च सूक्ष्मश्च तुहुण्डश्च महाबलः । एकपादेकचक्रश्च विरूपाक्षमहोदरौ । निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा । शरभः शलभश्चैव सूर्य्यचन्द्रमसौ तथा । एते ख्याता दनोर्वंशे दानवाः परिकीर्त्तिताः" भा० आ० ६५ अ० । २धृतराष्ट्रपुत्रभेदे "नन्दको बाहुशाली च तुहुण्डो विकटस्तथा" १८६ अ० ।

तूड अनादरे भ्वा० पर० सक० सेट् । तूडयति अतूडीत् । तुतूड । ऋदित् । णिच् अतुतूड़त् त ।

तूण सङ्कोचे अद० चुरा० उभ० सक० सेट् । तूणयति ते । अतुतूणत् त ।

तूण सङ्कोचे चु० उभ०सक०सेट् । तूणयति ते अतूतुणत् त ।

तूण पूरणे चु० आ० सक० सेट् । तूणयते, अतूतुणत् त ।

तूण पु० तूण्यते पूर्य्यते बाणैः तूण--पूरणे कर्म्मणि घञ् । इषुधौ बाणाधारे अमरः ।

तूणक न० "तूणकं भवेदिदं रजौ रजौ ततश्च रः" वृ० र० टीकोक्ते पञ्चादशाक्षरपादके छन्दोभेदे ।

तूणधार पु० तूणं धारयति धारि--अण् उप० स० । तूणधारिणि धानुष्के । अस्या नियुक्तत्वात् "अणि नियुक्ते" पा० न आद्युदात्तत्वम् । किन्तु तत्पुरुषस्वरः ।

तूणव पु०तूणस्तदाकारोऽस्त्यस्य केशा०व तूणं तदाकारं वाति वा—क वा । तूणाकारे वाद्यभेदे । "सैषा वाग् वनस्पतिषु वदति या दुन्दुभौ या तूणवे या वीणायाम्" तै० स० ६।१।४।१ । "वीणावादं क्रोशाय तूणवध्ममवरस्पराय" यजु० ३०।१९ । "तूणवं वाद्यभेदं धमति तथाभूतम्" वेददी० । "वीणावादं पाणिघ्नं तूणवध्मं तान्नृत्तायानन्दाय" यजु० ३०।२० ।

तूणवत् त्रि० तूण+अस्त्यर्थे मतुप् मस्य वः । १तूणयुक्ते धानुष्के "सायुधा बद्धनिस्त्रिंशास्तूणवन्तः समार्गणाः" भा० व० ८अ० । ठन् । तूणिक इनि तूणिन् मत्वार्थे त्रि० इन्नन्तस्य स्त्रियां ङीप् । तूणिन् । नन्दिवृक्षे पु० राजनि० ।

तूणी स्त्री तूण्यते पूर्य्यते शरैः तूण–पूरणे घञ् गौरा० ङीष् । १इषुधौ २तूणे ३नील्यां शब्दार्थचि० । ४तूणे स्त्री टाप् शब्दार्थचि० ।

तूणीक पु० तूणीव कायति कै–क । नन्दिवृक्षे राजनि० ।

तूणीर पु० तूण्यते पूर्य्यते शरैः तूण–पूरणे वा० ईरन् । १तूणे इषुधौ अमरः ।

तूतक न० तुत्थ+पृषो० । तुत्थे (तुँतिया) शब्दच० ।

तूतुजान पु० तुजि–बले कानच् तुजा० अभ्यासदीर्घः वा० नलोपः । १क्षिप्रे निघण्टुः ।२प्रेर्य्यमाणे च तुजधातौ दृश्यम् ।

तूतुजि स्त्री तुजि–बले दाने वा कि द्वित्वे तुजा० अभ्यासदीर्घः नलोपः । १क्षिप्रे निघण्टुः २दातरि च । “जज्ञेऽमूतुजिं चित्तूतुजिरशिश्नत्” ऋ० ७।२८।२ । “तूतुजिर्दाता” भा० ।

तूतुज्यमानास पु०तुजि–बले कर्मणि शानच् द्वित्वम् अभ्यासदीर्घः वा० नलोपः तथाभूतः असति दीप्यते अस–दीप्तौ अच् कर्म० । क्षिप्रे निघण्टुः ।

तूतुम त्रि० तुज–अच् द्वित्वे अभ्यासदीर्घः पृषो० । १तूर्णे माधवः “सवना तूतुमा कृषे” ऋ० १०।५०।५ । “एता विश्वा सवना तूतुमा कृषे” ऋ०१०।५०।६। “तूतुमा तूर्णानि” भा० ।

तूद पु० तुद–घञर्थे कर्मणि क पृषो०।१तूलवृक्षे राजनि०। अश्वत्थाकारे (पार्श्वपिप्पल) ख्याते वृक्षे भावप्र० “तूदं पक्वं गुरु स्तम्भि हिमं पित्तानिलापहम् । तदेवामं सुमधुरं संशोषि रक्तपित्तहृत्” ।

तूदी स्त्री देशभेदे । तूदी अभिजनोऽस्य ढक् । तौदेय पित्रादिक्रमेण तूदीदेशवासिनि त्रि० ।

तूपर पु० शृङ्गहीने १पशौ । स्त्रियां टाप् । तस्य शृङ्गहीनत्वकारणं यथा

“तासान्त्वेव वाऽनुवन्नासामहा एवेमौ द्वादशौ मासौ मं संवत्सरमापयामेति तासां द्वादशसु माःसु शृङ्गाणि प्रावर्त्तन्त ताः सर्वमन्नाद्यमाप्नुवंस्ता एतस्तूपरास्तस्मात्ताः सर्वान् द्वादशमासः प्रेरते सर्वं हिता अन्नाद्यमाप्नुवन्” ताण्ड्य०ब्रा०४।१।२। “तुशब्दो वैलक्षण्यद्योतनार्थः, तासां गवां मध्ये काश्चिदवुवन् किमित्युच्यते, यौ द्वादशौ द्वादशसंख्यापूरकावेव शिष्टावेकादशद्वादशौ मासौ इमौ आसामहा एवं अनुष्ठायैवं अनुष्ठाय प्रारब्धं संवत्सरसाध्यं समापयामेति व्यवहितास्वेति समित्यस्य व्यवहितेन सम्बन्धः, तासां गवां जातानि शृङ्गाणि द्वादशसु माःसु मासेषु पूर्णेषु प्रावर्त्तन्त प्रापतन् दशभिर्मासैः शृङ्गप्राप्तिलक्षणफले सिद्धेऽपि पुनरश्रद्धया यतो मासद्वयमन्वतिष्ठन् अतो जातानामपि शृङ्गाणां पुनः पतनमित्यभिप्रायः, तथा चैतरेयकम् “अथ समापयिषन्नामः संवत्सरमित्यासत तासामश्रद्धया शृङ्गाणि प्रावर्त्तन्तेति” । एतास्तूपरा इति ताः पतितशृङ्गाः गावः सर्वर्त्तुभवमन्नाद्यमदनीयमन्नं प्राप्नुवन् ता गावस्तूपराः शृङ्गहीनाः दृश्यन्ते तस्मात्ताः सर्वान् द्वादश मासौ मासान् प्रेरते प्रगच्छन्ति ईर गतौ शीतवातातपेषु सर्वदा पुष्टाङ्गा एव यथायथं गच्छन्ति शृङ्गिणो महिषादयस्तु कृशा भवन्ति, तस्मादित्युक्तं कस्मादित्याह हि यस्मात्ता गावः सर्वमन्नाद्यमाप्नुवन् तस्मात् सर्वर्त्तुषु पुष्टाङ्गा भवन्ति तथा चैतरेयकम्“ऊर्द्ध्वत्वमसमन्वत तस्माद् ताः सर्वभूतान्तरसुत्तिष्ठन्तीति” भा० । “प्राजापत्यांश्च सप्तदश श्यामतूपरान् वस्तान्” कात्या० श्रौ० १४।२।१२ “अश्वस्तूपरो गोमृगस्ते प्राजापत्याः”यजु० ।२४।१ ।

तूवर पुंस्त्री० सौ० तु+क्विप् तूः वृ–वृत्यौ अच् कर्म० । तूपर+पृषो० पस्य वो वो ।१तूपरे कालेऽजातशृङ्गे पशौ २कालेऽजातश्मश्रुके पुरुषे ३अव्यक्तपुरुषलक्षणे च “जहि तूवरकं क्षिप्रं कर्णस्य बलमादधत्” भा० द्रो० १९२अ० “तस्य तूवरकं बालं बह्वाशिनमविद्यकम्” भा० उ० १५८ अ० । २कषाये रसे पु० ३तद्वति त्रि० । ४आढक्यां ५सौराष्ट्रमृत्तिकायां स्त्री गौरा० ङीष् ।

तूय न० तोय+पृषो० । १जले निघण्टुः । तू–भावे सम्प० क्विप् तां याति या–क वा । २क्षिप्रे न० “देव हरिभिर्याहि तूयम्” ऋ० ३।४३।२ “तूयं क्षिप्रम्” भा० । ३क्षिप्रतायुक्ते त्रि०।“अद्रिणा ते मन्दिन इन्द्र ! तूयान्” ऋ० १०।२८।३ । “तूयानविलम्बितान्” भा० ।

तूर हिंसे, सक० वेगे अक० दिवा० आत्म० सेट् । तूर्य्यते अतूरिष्ट । तुतूरे ।

तूर् त्रि० त्वर–कर्त्तरि क्विप् ।१वेगयुक्ते । भावे सम्प० क्विप् । २वेगे स्त्री “पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः” भा० २। ७।२८। “अदृश्यतूर्भिः अलक्ष्यवेगाभिः” श्रीधरः ।

तूर न०तूर्य्यते ताड्यते सुखमारुतेन तुर–घञर्थे कर्मणि क । १वाद्यभेदे (सानाइ) हेमच० । २ताड्यमाने पटहादौ शब्दार्थचि० । [धूस्तुरे भावप्र० ।

तूरी स्त्री तूरं तदाकारोऽस्त्यस्याः अच् गौरा० ङीष् ।

तूर्ण न॰ त्वर–संभ्रमे भावे क्त पक्षे इड़भावः ऊठ् तस्य नः। १शीघ्रे कर्त्तरि क्त। २त्वरायुक्ते त्रि॰अमरः। "अभ्याजतोऽभ्यागततूर्णतर्णकान्" माघः। "चूर्णमानीयतां तूर्णं पूर्णचन्द्रनिभानने !"। पर्णानि स्वर्णवर्णानि सीदन्त्याकर्णलोचने !" उद्भटः।

तूर्णाश न॰ तूर्णमश्नुते अश–अच्। १उदके। "प्रतिश्रुताया वो दृषत्तूर्णाशं न गिरेरधि" ऋ॰ ८।३२।२। "तूर्णाशमुदकं भवति तूर्णमश्नुते" निरु॰ भा॰।

तूर्णि पु॰त्वर–नि नि॰ ऊठ्। १मनसि उज्ज्वलदत्तः शब्दकल्पद्रुमे मलार्थतोक्तिः नकारस्थाने लकारभ्रमात्। भावे नि। २त्वरायां हेमच॰। ३स्रोके संक्षिप्तसारे उणा॰ ४क्षिप्रे निघण्टुः। ५तद्वति त्रि॰। "प्र यतत्स्तोता जरिता तूर्ण्यर्थः" ऋ॰ ३।५२।५। "तूर्ण्यर्थः त्वरितगमनाः" भा॰ "विगाहं तूर्णिं तविषीभिरावृतम्" ऋ॰ ३।३।५। "तूर्णिं क्षिप्रगामिनम्" भा॰।

तूर्त्त न॰ त्वर–क्त ऊठ् वेदे न तस्य नः। १क्षिप्रे "यद्वै क्षिप्रं तत्तूर्त्तमथ यत् क्षिप्रात् क्षेपीयस्तत्प्रतूर्त्तम्" शत॰ ब्रा॰ ६।३।२।२।

तूर्य्य न॰ तुर्य्यते ताड्यते तूर–यत्। वाद्यभेदे "होमावसाने कृततूर्य्यनादः" मत्स्यपु॰ तुलापुरुषदानविधौ "तत्र भुक्त्वा पुनः किञ्चित्तूर्य्यघोषैः प्रहर्षितः" मनुः। एतत्परस्य मानस्य गिरिनद्या॰ न णत्वम् तूर्य्यमानम् "सतूर्य्यमेनां स्नपयाम्बभूवुः" कुमा॰।

तूर्य्यखण्ड पु॰ ६त॰। वाद्यभेदे ढगड़वाद्ये हारा॰।

तूर्व न॰तुर्व अच्–रेफे पूर्वास्यो दीर्घः। १क्षिप्रे तूर्णे "तूर्वयाणो गूर्त्तवचस्तमः" ऋ॰ १०।६१।२। "तूर्य्ययासस्तूर्णगमनः" भा॰। "रथो अग्निमशुषं तूर्वयाणम्" ऋ॰ १।१७४।२।

तूर्वि न॰ तुर्व–इन् दीर्घः। १क्षिप्रे "वाहधानाय तूर्वये" ऋ॰ ८।४२।२।

तूल पूरणे चुरा॰ आ॰ सक॰ सेट्। तूलयते अतूतुलत।

तूल इयत्तापरिच्छेदे निष्काशने भ्वा॰ पर॰ सक॰ सेट्। तूलति अतूलीत्। तुतूल।

तूल न॰ तूलयति पूरयति तूल्यते वा तूल-अच्। १सर्वव्यापके आकाशे मेदि॰ २अश्वत्थाकारे तूदे वृक्षे भावप्र॰ तूदशब्दे दृश्यम्। कार्पासादिबीजजाते(तूला)। ख्याते पदार्थे। "सर्वं दहति गङ्गाम्भस्तूलराशिमिवानलः" प्रा॰ त॰। अव्ययीभावेऽस्य "कूलतीरतूलेत्यादिना" पा॰आद्युदात्तता उपतूलम्। तूलशब्दे परे ईषिकाशब्दस्य षष्ठीतत्पुरुषे ह्रस्वः। ईषिकतूलं मुञ्जेषीकातूलम्। "कञ्चुकं तूलगर्भञ्च तूलिकाम् उपवीतिकां मञ्जिष्ठारूपवासांसि तथा तूलवतीं पटीम्। ऊर्णामयानि वासांसि यतिभ्योऽपि प्रदापयेत्" काशी॰ ४ अ॰।

तूलक न॰ तूल–स्वार्थे क। तूले हेमच॰।

तूलकार्मुक न॰ तूलस्य स्फोटमार्थं कार्मुकम्। तूलस्फोटनार्थे धनुषि (धुनखरा) तूलचापादयोऽप्यत्र शब्दच॰।

तूलनालि(ली स्त्री॰ तूलनिर्म्मिता नाली। पिञ्जिकायाम् (पाइज) स्वार्थे क। अत्रैवार्थे स्त्री त्रिका॰।

तूलपिचु पु॰ पिच–मर्दने कुन् तूलप्रधानः पिचुः। तूलवृक्षे (तुलारगाछ) भरतः।

तूलवृक्ष पु॰ तूलसाधनं वृक्षः शाक॰त॰। शाल्मलिवृक्षे। राजनि॰।

तूलशर्करा स्त्री तूलस्य शर्करेव। कार्पासबीजे रत्ना॰।

तूलसेवन न॰ ६त॰। तूलसूत्रकर्त्तने (काटनाकाटा) शब्दमा॰ तूलसेचनेति चमध्यपाठः प्रमादिकः।

तूलि(ली) स्त्री तूल-इन् वा ङीप्। चित्रसाधने स्वनामख्याते पदार्थे सि॰ कौ॰।

तूलिका स्त्री तूली स्वार्थे क। १नील्यां २वर्त्तौ च शब्दर॰। तूलीशब्दार्थे ३लेख्यकूर्चिकायां ४वीरणादिशलाकायाम्। ५आवर्त्तितसुवर्णादेर्द्रवाधारपात्रभेदे(मुचि)। तूल अस्त्यस्य ठन् कापि अत इत्त्वम्। ६(तोषक) शय्याभेदे तूलशब्दे उदा॰। "उन्मीलितं तूलिकयेव चित्रम्" कुमा॰। "तूलिका कथिता लेख्यकूर्चिका तूलशय्ययोः" विश्वः। तूलपूरितशय्या च तूलशय्येत्यर्थः।

तूलिनी स्त्री तूलोऽस्त्यस्या इनि ङीप्। शाल्मलीवृक्षे भावप्र॰। २लक्ष्मणाकन्दे राजनि॰। ३तूलयुक्ते त्रि॰ स्त्रियां ङीप् तूलिफला।

तूलिफला स्त्री तूलि तूलवत् फलं यस्याः। १शाल्मलीवृक्षे रत्नमा॰।

तूवर पु॰ सौ॰तु--बा॰ वरच् दीर्घश्च। १तूपरशब्दार्थे २कषाये रसे अमरः। ३तद्वति त्रि॰ अमरः।

तूवरिका स्त्री सौ॰ तु--बा॰ वरच् दीर्घः संज्ञायां कन् कापि अत इत्त्वम्। १आढक्याम् (अड़हर) २सौराष्ट्रमृत्तिकायाञ्च भरतः।

तूवरी स्त्री तूवर+गौरा॰ङीष्। १आढक्याम् २सौराष्ट्रमृत्तिकायाञ्च (फिट्किरि) भरतः।

तूष तुष्टौ भ्वा॰ पर॰सक॰सेट्। तूषति अतूषीत्। तुतूष।

तूष्णींशीलः त्रि॰ तूष्णीं शीलं यस्य। १मौनावलम्बिनि।

तूष्णीक त्रि॰ तूष्णीं शीलं यस्य शीलेऽर्थे कन् मलोपश्च। मौनावलम्बिनि अमरः।

तूष्णीकाम् अव्य० तूष्णीम्+अकच्प्रकरणे “तूष्णीमः काम् वक्तव्यः” वार्त्ति० काम् मित्त्वादन्त्यादचः परः। तूष्णीं शब्दार्थे। “तूष्णीकामास्ते” सि०कौ०।

तूष्णीगङ्ग अव्य० तूष्णीं गङ्गा यत्र “अन्यपदार्थे च संज्ञायाम्” पा० बहुव्रीह्यर्थे अव्ययी०। १देशभेदे। “अपां-ह्रदं च पुण्याख्यं भृगुतुङ्गं च पर्वतम्। तूष्णींगङ्गे च कौन्तेय! सामात्यः समुपस्पृश” भा०व० १२५अ०। तूष्णीगङ्गे इत्यत्र सप्तम्या वा न अम।

तूष्णीम् अव्य०तूष बा०नीम् स्वरादि ।१मौने(चुपकरा)अमरः। “यत्किञ्चित् दश वर्षाणि सन्निधौ प्रेक्षते धनी। भुज्यमानं परैस्तूष्णीं न स तल्लब्धुमर्हति” मनुः “परैर्वाकीर्त्त्यमानेषु तूष्णीमास्ते पराङ्मुखः” भा०शा०१०३अ०। तूष्णींशब्दे उपपदे “तूष्णीमि भुवः” क्त्वाणमुलौ तूष्णींभूय तूष्णीं भावम्। “तूष्णींभूय भयादासाञ्चक्रिरे मृगपक्षिणः” भट्टिः। क्त्वा च इति” पा०वा समासाभावेतूष्णीं भूत्वा।

तूष्णीभाव पु० तूष्णीम्+भू–घञ्। तूष्णींभवने मौनावलम्बने “अनिमिषनयननिरीक्षणे तूष्णींभावादयस्तत्र” सा० द० “तूष्णींभावेऽपि विज्ञेयं न चेद्भवति कारणम्” भा० शा०१०३अ०।

तूस्त न० तुस–बा० तन् दीर्घश्च। १रेणौ। २जटायाञ्च मेदि० ३पापे ४सूक्ष्मे च शब्दच०।

वि+तूस्त–णिच्। तूस्तय हनने। वितूस्तयति तूस्तं केश इत्येके जटीभूताः केशा इत्यन्ये पापमित्यपरे सि०कौ०।

तृंहण न०तृहि–भावे ल्युट्। हिंसने। [वा तत्र पाठः तत्रार्थे।

तृकन् पु०स्तेने निघण्टुः रिकेत्यत्र पाठान्तरम् तृका त्रिकेति

तृक्ष गतौ भ्वा० पर०सक० सेट्। तृक्षति अतृक्षीत् ततृक्ष।

तृक्ष पु० तृक्ष–अच्। काश्यपे ऋषौ तस्यापत्यं गर्गा० यञ्। तार्क्ष्य गरुड़े अरुणे विहगमात्रे च तार्क्ष्यशब्दे दृश्यम्

तृक्षाक पु०तृक्ष–आकन्। ऋषिभेदे ततोऽपत्ये शिवा० अण्। तार्क्षाक तदपत्ये।

तृक्षि पु० तृक्ष–इन्। त्रसदस्योः पुत्रे ऋषिभेदे। “येभिस्तृक्षिं वृषणा त्रासदस्यवम्” ऋ० ८।२२।७। “त्रासदस्यवं त्रसदस्योः पुत्रं तृक्षिमेतन्नामकम्” भा०।

तृख न० तृष–क पृषो०। जातीफले।

तृ(तृग)च न० तिसृणामृचां समाहारः तिस्र ऋचो यत्र वा अच्समा० वा सम्प्रसारणम्। १समानदेवताकानां समानच्छन्दस्कानामृचां त्रये २तद्युक्ते अनुवाकसूक्तादौ त्रि०। “मधुवाता तृचं जपेत्” हेमाद्रिश्राद्धकल्पः। “याश्चोषधोरिति तृचैर्वपत्युदपात्रवत्” कात्या० श्रौ० १७।३।८। सूक्तपरत्वे न० “गायत्रं तृचं दश त्रयीषु विद्यते” निरु० १२।४०। वा संप्रसारणाभावे त्र्यृचमप्यत्र।

तृण भक्षे तना० उभ० सक० सेट्। तृणोति तर्णोति तृणुते-तर्णुते। अतर्णीत् अतर्णिष्ट। उदित् तर्णित्वा-तृण्ट्वा।

तृण न० तृह–नक् ह्रलोपश्च। १नडादौ, खटे (खड़)। अमरः। “तृणेन वात्येव तयाऽनुगम्यते” नैष०। “लघुर्वह्नितृणं नरः” माघः। तृणस्यायं शिवा० अण्। तार्ण तृणजन्ये वह्नौ पु० “तार्णतार्णोभयं नास्तीति” जगदीशः। तृणसम्बन्धिमात्रे त्रि०। घोषादि० उत्तरपदस्थे तृणशब्दे पूर्वपदमाद्युदात्तम्। ग्रामतृणमित्यादि। समूहार्थे पाशा० य। तृण्या तृणसमूहे स्त्री तत्र भवः। उत्करा० मत्वर्थे छ नडा० कुक् च। तृणकीय तृणभवे त्रि०।

स्वल्पं तृणं कन्। तृणक स्वल्पतृणे “क्षीणीष्वेतास्तृणकेनापि राजन्!” भा०आ०८१अ०। स्वार्थे क। तत्रार्थे।

तृणकर्ण पु० तृणमिव कर्णोऽस्य। ऋषिभेदे ततः शिवा० अपत्यादौ अण्। तार्णकर्ण तद्गोत्रापत्ये। यस्का०बहुषु अणो लुक्। तृणकर्णास्तद्गोत्रापत्येषु ब० व०।

तृणकाण्ड न० तृणानां समूहः दूर्वा० काण्डच्। तृणसमूहे

तृणकुङ्कुम न० तृणजातं कुङ्कुमम्। सुगन्धद्रव्यभेदे राजनि०। “तृणकुङ्कुमं कटूष्णं कफपित्तविनाशनम्। वातशोकपामकण्डूकुष्ठामदोषनाशनम्। परमं भास्वरं तत्तु भिषग्भिः परिकीर्त्तितम्”. राजनि० तद्गुणा उक्ताः।

तृणकुटी स्त्री तृणाच्छादिता कुटी शा०त०! तृणाच्छादिते गृहे त्रिका०। तृणकुटीरादयोऽप्यत्र (कुड़ेघर)।

तृणकूर्म्म पु० तृणमयः कूर्म्मः। तूम्बग्रां शब्दमा०।

तृणकेतु पु०तृणेषु केतुरिव श्रेष्ठत्वात् असारत्वाद्वा। १वंशवृक्षे, २तालवृक्षे, तृणद्रुमतृणध्वजावप्यत्र। राजनि०। स्वार्थे क। तत्रार्थे।

तृणगण्ड पु० तृणमिव गण्डोऽस्य। उच्चिङ्गटे (उच्चिङ्गड़ा) कीटभेदे मेदि०। [२तृणजलौकायाञ्च।

तृणगोधा स्त्री तृणमिव गोधा। १गोधासकलासे मेदि०

तृणगौर न०. तृणमिव गौरं पीतम्। तृणकुङ्कुमे राजनि०।

तृणग्रन्थि स्त्री तृणमिव ग्रन्थिरस्य। स्वर्णजीवन्त्याम् राज०

तृणग्राहिन् पु० तृणं गृह्णाति ग्रह–णिनि ६त०। नीलमणौ राजनि०।

तृणचर पु॰ तृणेषु चरति चर–अच्। १गोमेदमणौ २तृणचारिमात्रे त्रि॰।

तृणजम्भन् त्रि॰ तृणं जम्भो भक्ष्यमस्य तृणमिव जम्भोदन्तोऽस्य "जम्भा सुहरित तृणसोमेभ्यः" पा॰ कृतसमासान्तः नि॰। तृणभक्षके तृणतुल्यदन्तयुक्ते च। शब्दकल्पद्रुमे अदन्तोक्तिः प्रामादिकी पा॰ सू॰ नान्ततयैव निपातनात्।

तृणजलायूका स्त्री॰ तृणाकारा तृणजाता वा जलायूका जलौकाभेदे। "तद्यथा तृणजलायूका तृणस्यान्तं गत्वात्मानमुपसंहरत्येवमेवायं पुरुष इदं शरीरं निहत्याविद्यां गमयित्वात्मानमुपसंहरति" शत॰ ब्रा॰ १४।७।२।४। तृणजलूकादयोऽप्यत्र स्त्री "यथा तृणजलूकेयं नापयात्यपयाति च" भाग॰ ४।२६।७६।

तृणजलौकान्याय तृणजलौकायाः यथा अपरदेशसंयोगानन्तरं पूर्वदेशवियोगस्तत्तुल्ये जीवस्यापरदेहसंयोगेन पूर्वदेहपरित्यागरूपे न्याये। स च नैयायिकानां तृणजलूकाशब्दे दर्शितस्तथा कल्पितः। तदेतन्मतं शा॰भा॰ आशङ्क्य तन्मूलश्रुतेरन्यार्थत्वं प्रदर्श्य दूषयित्वा छा॰ उ॰ पञ्चाग्निविद्योक्तश्रुतेः अन्यविध एव संसरणप्रकार उक्तः। यथा "नन्वन्या श्रुतिः तृणजलौकावत् पूर्वदेहं न मुञ्चति यावन्न देहान्तरमाक्रमतीति दर्शयति। इति। तद्यथा तृणजलायूकेति, (तृणजलायूकाशब्दे दर्शिता) तत्राप्यप्परिवेष्टितस्यैव जीवस्य कर्मोपस्थापितप्रतिपत्तव्यदेहविषयभावनादीर्घीभावमात्रं तृणजलूकयोपमीयत इत्यविरोधः। एवं श्रुत्युक्ते देहान्तरप्रतिपत्तिप्रकारे सति याः पुरुषमतिप्रभवाः कल्पनाः" इत्युपक्रमे 'ताः सर्वा एवानादर्तव्याः श्रुतिविरोधात्"। "नन्वेतद्देहं त्यक्त्वाऽद्भिः सहगतस्य पश्चाद्देहान्तरप्राप्तिरित्ययुक्तम्। यथा तृणजलायूका तृणान्तरं गृहीत्वा पूर्वतृणं त्यजति तथा जीवो देहान्तरं गृहीत्वा पूर्वदेहं त्यजतीति श्रुतिविरोधादिति शङ्कते नन्विति। इहैव कर्मायत्तभाविदेहं देहोऽहमित्यादिभावनया गृहीत्वा पूर्वदेहं त्यजतीति श्रुत्यर्थः। अतो न विरोधः, इति समाधत्ते, तत्रापीति भावनाया दीर्घभावो भाविदेहविषयत्वम्। घटाकाशवदुपहितो जीवः सूक्ष्मोपाधिगत्या लोकान्तरं गच्छतीति पञ्चाग्निश्रुत्युक्तः प्रकारस्तद्विरोधादन्याः कल्पनाः अनादर्तव्या इत्यन्वयः" रत्नप्र॰।

तृणजाति स्त्री तृणमेव जातिः। उलपादौ (खड़)।

तृणज्योतिस् न॰ तृणेषु मध्ये ज्योतिः ज्योतिष्मतः। रात्रौ प्रकाशवत्यां ज्योतिष्मत्यां लतायाम् शब्दार्थचि॰।

तृणता स्त्री तृणमिव तायते ताय–क्विप्। १धनुषि तृणस्य भावः तल्। २तृणत्वे च मेदि॰।

तृणद्रुम पु॰ तृणमिव द्रुमः असारत्वात्। १नारिकेले, २ताले, ३गुवाके, ४ताल्यां, ५केतक्यां, ६खर्जूरे, ७हिन्ताले, ८खर्जूर्य्यां च। "फलमुद्वेगमेते च हिन्तालसहितास्त्रयः (तालनारिकेलगुवाकाः) खर्जूरः केतकी ताली खर्जूरी च तृणद्रुमाः" अमरः।

तृणधान्य न॰ तृणमिव धान्यं अकृष्टोत्पन्नत्वात् शाक॰ त॰। १नीवारे, अमरः २श्यामाकादौ च।

तृणध्वज पु॰ तृणेषु ध्वज इव। १तालवृक्षे २वंशवृक्षे च अमरः

तृणनिम्ब पु॰ तृणाकारः निम्बः। नेपालनिम्बे किराततिक्ते (चिराता) राजनि॰।

तृणप पु॰ तृणं पाति -पा क। गन्धर्वभेदे। "युगपस्तृणपः कार्ष्णिर्नन्दिश्चित्ररथस्तथा" भा॰ आ॰ १२३अ॰। गन्धर्वोक्तौ।

तृणपञ्चमूल न॰ तृणरूपाणां पञ्चानां मूलम्। कशेरुशररामवाणकर्कटकात्मके पञ्चमूले वैद्यकम्। [राजनि॰।

तृणपत्रिका स्त्री तृणस्येव पत्रमस्त्यस्याः ठन्। इक्षुदर्भायां

तृणपत्री स्त्री तृणमिव पत्रमस्याः गौरा॰ ङीष्। गुण्डाशिम्यां राजनि॰।

तृणपदी स्त्री तृणस्येव पादोऽस्याः अन्त्यलोपः कुम्भप॰ ङीपि पद्भावः। तृणतुल्यमूलयुक्तायां लतायाम्।

तृणपीड न॰ तृणस्येव पीड़ा यत्र। युद्धभेदे "तृणपीड़ं यथाकामं पूर्णयोगं समुष्टिकम्। एवमादीनि युद्धानि प्रकुर्वन्तौ परस्परम्" भा॰ स॰ २२अ॰।

तृणपुष्प न॰ तृणजातं पुष्पम्। तृणकुङ्कुमे १गन्धद्रव्यभेदे राजनि॰। तृणमिव पुष्पमस्याः ङीप्। २सिन्दूरपुष्पीवृक्षे स्त्री राजनि॰। [स्वार्थे क। तृणपुष्पिकाऽप्यत्र स्त्री मेदि॰।

तृणपुली स्त्री तृणनिर्मिता पुली। चञ्चायां (चाँच) हारा॰

तृणमणि पु॰ तृणग्राहको मणिः शा॰ त॰। तृणग्राहिणि मणिभेदे हारा॰।

तृणमत्कुण पु॰ प्रतिभुवि (जामिन्) त्रिका॰।

तृणमय त्रि॰ तृणस्य विकारः शरा॰ मयट्। तृणविकारे "कुर्य्यात् तृणमयं चापं शयीत मृगशायिकाम्" भा॰ आ॰ १४५ अ॰। स्त्रियां ङीप्। [तालवृक्षे अमरः।

तृणराज पु॰ तृणेषु राजते राज–अच् ६त॰ टच् समा॰न्ता।

तृणवल्वजा स्त्री तृणरूपा वल्वजा। वल्वजायां राजनि॰।

तृणविन्दु ऋषिभेदे "जयद्रथेन पापेन यत् कृष्णा क्लेशिता

वने। यातेषु मृगयाञ्चैव तृणविन्दोरथाश्रमम्” भा० श० ६२अ०। “तृणविन्दुप्रसादाच्च धौम्यस्य च महात्मनः” भा० वि० १२ अ०। “द्रौपदीमाश्रमे न्यस्य तृणविन्दोरनुज्ञया” भा० व० २६३ अ०। “चरतः किल दुश्चरं तपः तृणविन्दोः प्रतिशङ्कितः पुरा” रघुः।

तृणविन्दुसरः ६त०। तृणविन्दोः ऋषेः सरोरूपे तीर्थे तत्स्थानं भारते उक्तं यथा “मरुभूमेः शिरः स्थानं तृणविन्दुसरः प्रति” भा० द० २५७ अ०।

तृणवीज न० ६त०। श्यामाके धान्ये रत्नमा०।

तृणशीत न० तृणेषु शीतम्। १कत्तृणे गन्धतृणे रत्नमा०। २जलपिप्पल्यां स्त्री राजनि०।

तृणशून्य न० १तृणमिव शून्यं फलरहितम्। केतकीपुष्पे २मल्लिकायाञ्च मेदि० तयोः फलरहितत्वात्तथात्वम्। तृणेन शून्यम्। ३तृणरहिते त्रि०।

तृणशूली स्त्री तृणं शूलमिव तीक्ष्णाग्रं यस्याः गौरा० ङीष्। लताभेदे। “सुरसास्तृणशूल्याश्च सिन्धुवारस्य यानि च” (पुष्पाणि) सुश्रु०।

तृणशोषक पुंस्त्री तृणमपि शोषयति शुष--णिच्--अण् उप० स०। राजिमत्सर्पभेदे। अहिशब्दे ५८१ पृष्ठे दृश्यम्

तृणशौण्डिका स्त्री तृणेषु शौण्डिका। लघुकेतकीवृक्षे। पारस्करनिघण्टुः।

तृणषट्पद पु० तृणमिव षट्पदः। (बोलता) वरोले [हारा०।

तृणसारा स्त्री तृणस्येव सारोऽस्याः। १कदल्याम् हारा०। तस्याः सर्वथाऽसारत्वात्तथात्वम्।

तृणसिंह पु० तृणे—सिंह इव। कुठारे शब्दार्थक०।

तृणसोमाङ्गिरस् पु० दक्षिणदिक्स्थिते धर्मराजस्य ऋत्विग्भेदे “उन्मुचुः प्रमुचुश्चैव स्वस्त्यात्रेयश्च वीर्यवान्। दृढव्यश्चोर्द्ध्ववाहुश्च तृणसोमाङ्गिरास्तथा। मित्रावरुणयोः पुत्रस्तथाऽगस्त्यः प्रतापवान्। धर्मराजर्त्विजः सप्त दक्षिणां दिशमास्थिताः भा० अनु० १५० अ०।

तृणस्कन्द तृणमिव स्कन्दति स्कन्द—अच्। तृणवच्चलनस्वभावे “तृणस्कन्दस्य नु विशः” ऋ० १।१७२।२।

तृणहर्म्य पुं न० तृणव्याप्तो हर्म्यः। तृणव्याप्ते हर्म्ये हारा०

तृणाङ्घ्रिप पु० तृणरूपोऽङ्घ्रिपः। मन्थानतृणे राजनि०।

तृणाग्नि पु० तृणजातोऽग्निः शा० त०। तार्णे वह्नौ त्रिका०। “ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति” मनुः।

तृणाञ्जन पु० तृणमिवाञ्जनः। कृकलासे त्रिका०।

तृणाटवी स्त्री तृणप्रचुराटवी। तृणमये वने हेम०।

तृणाढ्य न० तृणेषु आढ्यम्। पर्वतजाते तृणे राजनि०।

तृणादि पु० चतुरर्थ्यां सप्रत्ययनिमित्ते शब्दगणे स च गणः पा० ग० सू० उक्तो यथा
“तृण, नड़, मूल, वन, पर्ण वर्ण, वराण, विल, पुल, फल, अर्जुन, अर्ण, सुवर्ण, वल, चरण, वसु,”।

तृणाम्ल न० तृणेषु अम्लम्। तृणजलवणे राजनि०।

तृणारणिन्याय पु० तृणस्यारणेश्च वह्निजनने यथा परस्परनिरपेक्षतया कारणत्वमेवं स्वातन्त्र्येण कारणतासूचके न्यायभेदे।

तृणावर्त्त पु० तृणमावर्त्तयति भ्रमयति आ+वृत—णिच्—अण्। १वात्यारूपे वातसमूहे(घूर्णी) २तद्वज्जनभ्रामके असुरभेदे पु०

तृणासृज् न० तृणेषु असृगिव रक्तत्वात्। तृणकुङ्कुमे राजनि०

तृणेक्षु पु० तृणमिक्षुरिव मधुररसत्त्वात्। वल्वजायां राजनि०।

तृणेन्द्र पु० तृणमिन्द्र इव। तृणराजे ताले वृक्षे। “हलीबल इति ख्यातो भविष्यति धराधरः। त्रिशिरास्तस्य देवस्य शातकुम्भमयो द्रुमः। ध्वजस्तृणेन्द्रो देवस्य भविष्यति रथाश्रितः” भा० आनु० १४७ अ०।

तृणोत्तम पु० तृणेषु उत्तमः। उखर्बले तृणे राजनि०।

तृणोद्भव पु० तृणेभ्य उद्भवति उद्+भू—अच्। १नीवारे धान्यभेदे राजनि०। २तृणजाते वह्नौ च ३तज्जातमात्रे त्रि०।

तृणोल्का स्त्री तृणजाता उल्का। तृणजायामुल्कायाम् “न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया” हितो० “तृणोल्कया ज्ञायते जातरूपं वृत्तेन भद्रो व्यवहारेण साधुः” भा० उ० ३४ अ०।

तृणौकस् न० तृणनिर्मितमोकः। तृणनिर्मिते गृहे (खड़ेर घर)। हेमच०।

तृणौषध न० तृणात्मकमौषधम्। एलवालुकाख्ये गन्धद्रव्ये शब्दच०।

तृण्या स्त्री तृणानां समूहः पाशा० य। तृणसमूहे।

तृतीय त्रि० त्रयाणां पूरणः त्रि+तीयट् संप्रसारणञ्च। त्रयाणां पूरणे। “वाग्दण्डं प्रथमं कुर्यात् धिग्दण्डं तदनन्तरम्। तृतीयं धनदण्डं तु वधदण्डमतःपरम्”. “मातुः प्रथमतः पिण्डं निर्वपेत् पुत्रिकासुतः। द्वितीयन्तु पितुस्तस्यास्तृतीयं तत्पितुः पितुः” मनुः।

तृतीयक पु० तृतीयेऽह्नि भवः रोगः कन्। तृतीयदिनभवे ज्वरभेदे स च “दिनमेकमतिक्रम्य यो भवेत् स तृतीयकः” इत्युक्तलक्षणः। “वाताधिकत्वात् प्रवदन्ति तज्ज्ञास्तृतीयकञ्चापि चतुर्थकञ्च” सुश्रुतः।

तृतीयप्रकृति स्त्री तृतीया प्रकृतिः प्रकारः। स्त्रीपुरुषा-

पेक्षया तृतीये प्रकारे नपुंसके अमरः। तत्र तृतीयाप्रकृतिरिति व्यस्तं पदं समस्तत्वे तृतीयप्रकृतिरित्येव स्यात् व्यस्तपाठं दृष्ट्वा शब्दकल्पद्रुमे तृतीयाप्रकृतिशब्दकल्पनं प्रामादिकम्।

तृतीययुगपर्य्यय पु॰ तृतीयस्य युगस्य द्वापररूपस्य पर्य्ययः परिवर्त्तो यत्र काले। द्वापरयुगस्य परिवर्त्ताधारे कलिसन्ध्यारूपे काले "द्वापरे समनुप्राप्ते तृतीययुगपर्य्यये" भाग॰ १।४।१५ श्लो॰। इतः परं किं भविष्यतीति द्वापरे सन्देहे जाते इत्यर्थः तेन न विरोधः।

तृतीयसवन न॰ सूयते सोमोऽस्मिन् कर्म्म॰। कालत्रये सवनत्रयोपेताग्निष्टोमादेः तृतीये सवने। तद्विधानादि ताण्ड्य॰ ब्रा॰ १।६।१७ भाष्ये उक्तं यथा "तृतीयसवनारम्भमादित्यग्रहमाचरेत्। आर्भवेण स्तुवीताथ पश्वङ्गैः प्रचरत्यथ। सावित्रवैश्वदेवाख्यौ ग्रहौ सौम्यचरुस्तथा। पात्नीवतग्रहादूर्द्ध्वं यज्ञायज्ञायसंस्तवः। अग्निमारुतशस्त्रं स्यात् गृह्णीयात् हारियोजनम्। समाप्ते सवने पश्चात् कुर्य्यादवभृथं ततः। कुर्य्यादुदयनीयेष्टिमनूबन्ध्यां यजेत गाम्। देविकानिर्वपेद्देवसूश्चापि यजूंष्यथ। उपोष्य वेदिमाग्नेयमिष्टाग्निष्टोमसंस्थितिः" "प्रातः सवने नोच्चैः कर्म्माणि" कात्या॰ श्रौ॰ ८।६।१८ "प्रातः सवने यान्युच्चैः कर्म्माणि प्रैषोच्चारणादीनि तान्यपि प्रथमस्वरेणैव कार्य्याणि "मन्द्रं प्रातः सवने चरन्तीति" शाखान्तरात्। अतश्चाग्नीदग्नीन्विहरेत्यादयः प्रैषा आश्रावणादयश्च प्रथमस्वरेणैव प्रयोज्याः" कर्कः। "मध्यमेन माध्यन्दिने" १९सू॰ "माध्यन्दिने सवने यानि कर्म्माणि नीचैर्य्यानि चोच्चैस्तान्युभयान्यपि मध्यमेन स्वरेण कार्य्याणि शाखान्तरे तथा श्रवणात्" कर्कः। "उत्तमेन तृतीयसवने" २०सू॰ "तृतीयसवने यानि नीचैर्य्यानि च मध्यमेन स्वरेण प्राप्नुवन्ति तानि सर्वाण्युत्तमेन तृतीयेनैव स्वरेण कार्य्याणि तथैव शाखान्तरे श्रुतत्वात्" कर्कः।

तृतीया स्त्री तृतीय+टाप्। १चन्द्रमण्डलस्य तृतीयकलाक्रियायां २तदुपलक्षिते कालभेदे च तत्र व्रतादिकालव्यवस्थादि तिथिशब्दे ३२९॰ पृ॰ दर्शितम्। जन्मनक्षत्रापेक्षया ३तृतीयद्वादशैकविंशात्मकनक्षत्ररूपविपत्तारायाञ्च।

तृतीयाकृत त्रि॰ तृतीय+डाच्+कृ—क्त। १त्रिगुणं कृष्टे त्रिवारकृष्टे क्षेत्रादौ।

तृतीयाश्रम पुंन॰ कर्म्म॰। वानप्रस्थाश्रमे। "उषित्वैवं गृहे विप्रो द्वितीयादाश्रमात् परम्। बलीपलितसंयुक्तस्तृतीयन्तु समाश्रयेत्" संवर्त्तस॰।

तृतीयिन् त्रि॰ तृतीय+अस्त्यर्थे इनि। तृतीयभागार्हे। "सर्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे। तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः" मनुः। दक्षिणागोशतविभागे।

तृत्सु त्रि॰ तृद—बा॰ सुक्। हिंसके। "गव्या तृत्सुभ्यो अजगन्युधा नॄन्" ऋ॰ ७।१८।७। "तृत्सुभ्यो हिंसकेभ्य"। भा॰ २राजर्षिभेदे "व्यानवस्य तृत्सवे गयम्" ऋ॰ ७।१८।१३। तृत्सुं राजर्षिभेदम्" भा॰। [प्रतर्द्दनः।

तृद हिंसायां भ्वा॰ प॰सक॰ सेट्। तर्द्दति अतर्द्दीत् ततर्द्द।

तृद अनादरे रु॰उभ॰सक॰सेट्। तृणत्ति तृन्ते। इरित् अतर्द्दीत् अतृदत् अतर्द्दिष्ट। उदित् तर्द्दित्वा तृत्त्वा। "भूतिं तृणद्मि यज्वाणाम्" भट्टिः "क्षतस्य स्रोको बधिरा ततर्द" ऋ॰ ४।२३।८ "ततर्द तरसा विष्णुर्बाणैः शत्रुबलार्द्दनः" हरिवं॰ १२४ अ॰। "सेहे कपीरथाश्वांश्च रिपोस्ततर्द शाखिना" "अतर्दीच्चैव शूलेन कुम्भकर्णः प्लवङ्गमान्" भट्टिः।

तृदिल त्रि॰ तृद—बा॰ किलच्। १भेदके २भिन्ने च। "तृदिला अतृदिलासः" ऋ॰ १०।९४।११। "तृदिला भेदकाः अतृदिला अभिन्नाः" भा॰।

तृन्प(म्प) प्रीणने तु॰ पर॰ सक॰ सेट्। तृपति तृम्पति अतृम्पीत् अतृपीत्। ततृम्प ततृप।

तृन्फ(म्फ) प्रीणने तु॰ प॰ सक॰ सेट्। तृफति तृम्फति अतृम्फीत् अतृफीत् ततृम्फ ततृफ।

तृन्ह हिंसे तु॰ प॰ सक॰ सेट् क्त्वा वेट्। तृंहति लृदित् अतृहत्। ततृंह ततृंहतुः ततृंहुः।

तृप प्रीणने स्वा॰ पर॰ सक॰ सेट्। तृप्नोति अतर्पीत्। ततर्प।

तृप सन्दीपने प्रीणने च वा चुरा॰ उभ॰ पक्षे भ्वा॰ पर॰ सक॰ सेट्। तर्पयति ते तर्पति अततर्पत् त अतीतृपत् त। अतर्पीत्। ततर्प ततर्पिथ।

तृप प्रीणने दि॰ पर॰ सक॰ वेट् इरित्। तृप्यति अतर्पीत् अत्राप्सीत्-अतार्प्सीत्-अतृपत्। ततर्प।

तृप प्रीणने तु॰ पर॰ सक॰ सेट्। तृपति अतर्पीत्। "तृपत्सोमं पाहि" ऋ॰ २।११।१५।

तृपत पु॰ तृप। चन्द्रे उणादि॰। [संक्षिप्तसा॰।

तृपाना स्त्री तृप—कानच्। १लतायाम् २उणा॰।

तृपल न॰ तृप—कलच्। १उपले प्रस्तरे। "अपां तमन्युस्तृपलप-

भर्मा” ऋ० १०।८९।५। तृप्तप्रभर्मा ग्रावादिभिः क्षिप्रप्रहारी” भा०। २त्रिफलायाञ्च।

तृप्त त्रि० तृप–क्त। १तृप्तियुक्ते। “नित्यं तृप्ता स्वद्धेयस्य देवायज्ञस्य धर्म्मतः” भा०व०५८अ०। “स्वागतेनाग्नयस्तृप्ता आसनेन शतक्रतुः। पितरः पादशौचेन स्विन्नानेन गृही यतिः” पु०।

तृप्ति त्रि० तृप–क्तिन्। भोजनादिना आकाङ्क्षितानिवृत्तौ “वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी” मनुः “तस्यालमेषा क्षुधितस्य तृप्त्यै” रघुः।

तृप्तिमत् त्रि०सुखा०अस्त्यर्थे इनि तृप्तमनेन इष्टादि० इनि वा। १तृप्तियुक्ते स्त्रियां ङीप्। २उदके निघण्टुः।

तृप्नु त्रि० तृप–क्नु। तृप्तिशीले।

तृप्र पु०तृप–रक्। १पुरोडाशे उज्ज्वलद०। २तर्पके त्रि० “न यं शुक्रो न दुराशीर्न तृप्राः” ऋ० ८।२।५ “तृप्रास्तर्पकाः” भा० ३दुःखे न० ततः असहने आलु। तृप्रालु तदसहने। “तृप्रं दुःखमिति माधवः” सि०कौ०। ४घृते न० उणादि०।

तृफ प्रीणने तुदा० पर० सक० सेट्। तृफति अतर्फीत्। ततर्फ। तृफतेरपि कलच् इत्युज्ज्वलदत्तः। दुर्गादासस्तु अयं मुचादित्वभ्रान्त्या तृम्फतीत्युदाजहार। तच्चिन्त्यं पा० मुचादिमध्ये तृफधातोरनुत्कीर्त्तनात् उज्ज्वलदत्तेन तृफतेरिति निर्द्देशाच्च। मुचादयश्च सि०कौ०१५६२ आदौ दृश्याः। तृम्फादिशब्दे दृश्यः।

तृफला स्त्री तृफ–कलच्। त्रिफलायाम् उज्ज्वलद०।

तृफू स्त्री तृफ–कू। सर्पजातौ उणादि०।

तृम्फादि “तृम्फ तुम्फ तृम्फ दृम्फ ऋम्फ गुम्फ उम्फ शुम्फ” पा० धातुपाठोक्ते धातुगणभेदे।

तृष तृष्णायां दिवा०पर०सक०सेट्। तृष्यति इरित् अतृषत् अतर्षीत्। ततर्ष। “तृषित्येवानिशं स्वादु पिबन्तं सरितां पयः”। “समूर्च्छुर्धवमूरक्तं ततृषुश्चोभये भटाः” “रक्तमस्राक्षिषुः क्षुत्ताः क्षताश्च कपयोऽतृषन्” भट्टिः।

तृष्(षा) स्त्री तृष–सम्प०क्विप् वा टाप्। १आकाङ्क्षायां २पिपासायां ३कामकन्यायाञ्च शब्दर०। ४लाङ्गलीवृक्षे शब्दच० “लोभो जनयते तृषां तृषार्त्तो दुःखमाप्नोति” हितोप०। “कृपा हि मे सुमहती त्वां दृष्ट्वा तृट्समाश्रितम्” भा० आश्व०५५ अ०। “न हन्ति मण्डूककुलं तृषाकुलः” ऋतु०।

तृषाभू स्त्री ६त०। तृष्णाधारे क्लोमनि शब्दच०तृष्णाशब्दे चरकवाक्ये क्लोम्नस्तत्स्थानत्वं दृश्यम्। [(सौरी)स्त्री शब्दच०

तृषाह न० तृषां हन्ति हन–ड। १जले २मधुरिकायां [शब्दच०।

तृषित त्रि०तृषा जाताऽस्य तार०इतच्। १तृष्णान्विते हेमच० “तृषितान्याह्वये भोक्तुं नृपमांसानि वै भृशम्” हरिवं० ९२अ०।

तृषितोत्तरा स्त्री तृषित उत्तरः यस्याः। अशनपर्ण्याम्

तृषु न० तृ–तुर–वा सुक् पृषो०। १क्षिप्रे निघण्टुः। २तद्वति त्रि० स्त्रियामुदन्तगुणवचनत्वात् ङीप्। “तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि” ऋ० ४।४।१। “तृष्विति क्षिप्रनाम भरतेर्वा त्वरतेर्वा निरु०” भा०। “तृषु यदन्ना तृषुणा” ऋ० ४।७।११।

तृष्ट त्रि० तृष–क्त वेदे वा० इडभावः। १दाहजनके “तृष्टमेतत् कटुकमेतत्” ऋ० १०।८५।३४। “तृष्टं दाहजनकम्” भा०।

तृष्टामा स्त्री तृष्टं दाहमभयति गमयति अम णिच्–अच् १नद्याम् “तृष्टामया प्रथमं यातवे” ऋ०१०।७५।६। “तृष्टामया नद्या” भा०।

तृष्णज् त्रि० तृष नजिक्। १लुब्धे अमरः। “असिञ्चन्नुत्सं गोतमाय तृष्णजे” ऋ० १।८५।११।

तृष्णा स्त्री०तृष न किच्च। १पिपासायां, २लोभे, ३अप्राप्ताभिलाषे च अमरः ४रोगभेदे। तन्निदानादि भावप्र० उक्तं यथा

“भयश्रमाभ्यां बलसङ्क्षयाद्वा ऊर्द्ध्वं चितं पित्तविवर्द्धनैश्च। पित्तं सवातं कुपितं नराणां तालुप्रपन्नं जनयेत् पिपासाम्। स्रोतःस्वपांवाहिषु दूषितेषु दोषैश्च तृट् सम्भवतीह जन्तोः। तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात्तथान्यामसमुद्भवा च। भुक्तोद्भवा सप्तमिकेति तासां निबोध लिङ्गान्यनुपूर्वशस्तु”। नराणां चितं स्वस्थान एव सञ्चितं पित्तं सवातं पित्तविवर्द्धनैः कट्वम्लोष्णादिभिः कुपितम्। भयश्रमाभ्यां बलसङ्क्षयादुपवासादेश्च वातः कुपितः। तद्द्वयं ऊर्द्ध्वं प्रसरत् तालुप्रपन्नं सत् पिपासां जनयेत्। न केवलं तालुन्येव दूषिते तृष्णा भवति किन्तु जलवाहिस्रोतःस्वपि। अत आह। स्रोतःस्वित्यादि। नन्वत्र बहुवचनमयुक्तम्। यतो जलवहे द्वे स्रोतसी सुश्रुतेनोक्ते। उच्यते। तयोरेवानेकप्रतानयोगाद्ध दोषः। अपांवाहिषु स्रोतःस्विति जिह्वादेरप्युपलक्षणम्। यत आह चरकः। “रसवाहिनीश्च धमनीर्जिह्वाहृदयगलतालुक्लोम च। संशोष्य नृणां देहे कुरुतस्तृष्णामतिबलौ पित्तानिलाविति”। सङ्ख्यामाह तिस्र इत्यादि। तृष्णायाः सामान्यं लक्षणमाह।

"सततं यः पिबेत्तोयं न तृप्तिमधिगच्छति। मुहुः काङ्क्षति तोयञ्च तं तृष्णार्द्दितमादिशेत्। वातजायालक्षणमाह। क्षामास्यता मारुतसम्भवायां तोदस्तदा शङ्खशिरःसु चापि। स्रोतोनिरोधो विरसञ्च वक्त्रं शीताभिरद्भिश्च विवृद्धिमेति"। शङ्खशिरःसु शङ्खयोः शिरसि च। स्रोतो निरोधः। पित्तजामाह "मूर्च्छान्नविद्वेषविलापदाहरक्तेक्षणत्वं प्रततञ्च शोषः। शीताभिनन्दो मुखतिक्तता च पित्तात्मिकायां परिधूपनञ्च"। विलापः प्रलापः प्रततश्च शोषः अविरतश्च शोषः। शीताभिनन्दः शीतेच्छा। परिधूपनं कण्ठाद्धूमनिर्गम इव। कफजामाह। "वाष्पावरोधात् कफसंवृतेऽग्नौ तृष्णा बलासेन भवेन्नरस्य। निद्रागुरुत्वं मधुरास्यता च तयार्द्दितः शुष्यति चातिमात्रम्"। अग्नौ जठराग्नौ। कफसंवृते स्वकारणकुपितेन कफेनोपरिष्टादाच्छादिते। वाष्पावरोधात् अग्नेरूष्मावरोधात्। अवरुद्धानलोष्मणाम्बुवहस्रोतःशोषणात् बलासेन कफेन नरस्य तृष्णा भवेत्। तया तृष्णया अर्द्दितः पीड़ितः शुष्यति कृशो भवति। क्षतजामाह। "क्षतस्य रुक्शोणितनिर्गमाभ्यां तृष्णा चतुर्थी क्षतजा मता तु"। क्षतस्य शस्त्रादिक्षतयुक्तस्य। रुक् पीड़ा। क्षयजामाह। "रसक्षयाद्या क्षयसम्भवा सा तयाभिभूतस्तु निशादिनेषु। पेपीयतेऽम्भः स सुखं न याति तां सन्निपातादिति केचिदाहुः। रसक्षयोक्तानि च लक्षणानि तस्यामशेषेण भिषग् व्यवस्येत्"। रसक्षयलक्षणानि सुश्रुतेनोक्तानि "रसक्षये हृत्पीड़ा कम्पः शोषः शून्यता तृष्णा चेति"। व्यवस्येत् जानीयात्। आमजामाह। "त्रिदोषलिङ्गामसमुद्भवा च हृच्छूलनिष्ठीवनसादकर्त्री"। भुक्तोद्भवामाह। "स्निग्धं तथाम्लं लवणञ्च भुक्तं गुर्वन्नमेवाशु तृषां करोति"। लवणञ्चेति चकारात् कटु च। उपसर्गजामाह "क्षीणस्वरः प्रताम्य दीनाननहृदयशुष्कगलतालुः। भवति खलु सोपसर्गात् तृष्णा सा शोषिणी कष्टा"। शोषिणी धातुशोषिणी। उपसर्गानाह। "ज्वरमोहक्षयःश्वासो बाधिर्यं कास एव च। बहिर्निर्गतजिह्वत्वं सप्तैते तदुपद्रवाः"। तद्युक्तायां अरिष्टमाह "ज्वरमोहक्षयकासश्वासाद्युपसृष्टदेहिनाम्। सर्वास्त्वतिप्रसक्तारोगकृशानां वमिप्रसक्तानाम्। घोरोपद्रवयुक्तास्तृष्णा मरणाय विज्ञेयाः"। आदिशब्दादतीसारादीनां ग्रहणम्। अतिप्रसक्ताः निरन्तराः। घोरोपद्रवयुक्ताः अतीव मुखशोषादियुताः।

तृष्णाशब्दस्य वल्लीशब्देन द्वन्द्वे उभयपदे प्रकृतिस्वरः।

तृष्णाक्षय पु० तृष्णायाः क्षयो यत्र। १शान्तिगुणे हेमच०। ६त०। २पिपासानाशे च।

तृष्णारि पु० ६त०। १पर्पटे राजनि०। २तृष्णानाशके च।

तृष्णालु त्रि० तृष्णा+अस्त्यर्थे आलु। तृष्णायुक्ते। "तृष्णालुर्भवति पूतनागृहीतः" सुश्रु०।

तृष्य त्रि० तृष–ऋदुपधत्वात् क्यप्। १लोभ्ये २एषणीये। भावे क्यप्। ३लोभे न०। तृष्यमस्त्यस्य मतुपि वेदे दीर्घः। तृष्यावत्। तृष्णायुक्ते। "अभ्यवर्षीस्तृष्यावतः प्रावृष्यागतायाम्" ऋ०७।१०१।१। तृष्यावतस्तृष्णायतः" भा०।

तृह हिंसे तु० पर० सक० वेट्। तृहति अतर्हीत् अतृक्षत्।

तृह हिंसे वा चु० उ० पक्षे रुधा० पर० सक० वेट्। तर्हयति ते तृणेढि अततर्हत् त अतीतृहत् त अतर्हीत् अतृक्षत्। "तृणेढु रामः सह लक्ष्मणेन" भट्टिः।

तॄ तरणे प्लवने अभिभवे च भ्वा० प० सक० सेट्। तरति अतारीत्। ततार। "तरति ब्रह्महत्यां योऽश्वमेधेन यजते" "तरति शोकमात्मविद्" श्रुतिः शत०ब्रा०१४।७।१।२२ "ततार ताराधिपखण्डधारी" कुमा० "क्रमेण तस्मिन्नथ तीर्णदृक्पथे" नैष०। तेरतुः। तरीरिता तरि(री)ष्यति। तीर्य्यात्। तरीतुं तरितुं तीर्त्वा तीर्य्यते। तारयति तितीर्षति। "तितीर्षुर्दुस्तरं मोहात्" रघुः। "तांश्च तर्तुं प्रयच्छामीत्यत्रार्षः इड्भावः।

अति+अतिक्रम्य गमने। "स्वर्गानतितरन्ति ते" हितो०। "न यस्य कश्चातितितर्त्ति मायाम्" भाग०८।५।३०। यङ्लुङोरूपम्।

वि+अति+विशेषेण अतिक्रमे। "यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति" गीता। [नीम्" भा० द्रो० २८०।

अभि+उल्लङ्घने। "कथं नाभ्यतरामस्तां पाण्डवानामनीकि-

अव+अवनमने। "अथोरुदेशादवताय्य पादम्" कुमा०। अवतारः। "अवतरतः सिद्धिपथं शब्दस्य मनोरथस्य वा" मालविकाग्नि०।

उद्+उत्थाने अक०। "सपल्वलोत्तीर्णवराहयूथम्" रघुः। उल्लङ्घने सक०। "उदतारीदुदन्वन्तम्" "उदतारिषुरम्भोधिम्" भट्टिः। [१५५६६ श्लो०।

निस्+निःशेषेण तरणे। "कथञ्च निस्तरेयास्मात्" भा०व०

वि+दाने। "तड़िल्लेखालक्ष्मीर्वितरति पताकावलिरियम्" "ज्योत्स्ना शङ्कामिह वितरति" १ किरा०।

सम्+सम्यक् तरणे (सँतार देखोया)।

ते अव्य॰तम–बा॰डे।१त्वयेत्यर्थे त्रिका॰।२गौर्य्यां तेनशब्दे दृश्यम्

तेगा स्त्री तिज–पुंसि च जस्य गः। अप्रसिद्धदेवताभेदे।“शादं दद्भिरवकां दन्तमूलैर्मृदं वर्स्वैस्तेगां दंष्ट्राभ्याम्” यजु॰ २५।१। “तेगां देवतां शादादयोऽप्रसिद्धा देवाः आदित्यादयः प्रसिद्धाः देवाः” वेददीपः। [अतेजीत्। तितेज।

तेज निशाने पालने च भ्वा॰ पर॰ सक॰ सेट्। तेजति

तेजःफल न॰ तेजसे फलमस्य तेजः फलति–फल अच् वा। (तेजवल) वृक्षभेदे “तेजःफलः कटुस्तीक्ष्णः सुगन्धिर्दीपनो मतः। वातश्लेष्मारुचिघ्नश्च बालरक्षाकरः स्मृत इति” भावप्र॰।

तेजन पु॰ तेजयति शस्त्रमग्निं वा तिज–णिच्–ल्यु। १वंशे २मुञ्जे च अमरः संज्ञायां कन्। ३शराभिधे तृणे, करणे ल्युट्। ङीप्। ४मूर्वायां, ५ज्योतिष्मत्याञ्च स्त्री ङीप्। राजनि॰। ६शस्त्रे अमरः।

तेजपत्र न॰तेजयति तिज–णिच्-अच् तेजं पत्रमस्य।(तेजपात) ख्याते वृक्षभेदे। “तेजपत्रं वराङ्गं स्यात् त्वचं चोचं तथोत्कटम्। त्वचं लघूष्णं कटुकं स्वादु तिक्तञ्च रूक्षकम्। पित्तलं कफवातघ्नं कण्ड्वामारुचिनाशनम्। हृद्बस्तिरोगवातार्शःकृमिपीनसशुक्रहृत्” भावप्र॰।

तेजल पु॰ तिज–करणे कलच्। कपिञ्जलपक्षिणि राजनि॰।

तेजस् न॰ तिज–भावे करणादौ असुन्। १दीप्तौ २प्रभावे ३पराक्रमे ४रेतसि च मेदि॰। ५देहजकान्तौ ६नवनीते ७वह्नौ च हेमच॰। ८सुवर्णे ९मज्जनि १०पित्ते च राजनि॰। सा॰द॰उक्ते सात्विके अधिक्षेपापमानादेरसहनरूपे ११नायकगुणभेदे यथा

“शोभा विलासो माधुर्य्यङ्गाम्भीर्य्यं धैर्य्यतेजसी। ललितौदार्य्यमित्यष्टौ सत्वजाः पौरुषा गुणाः”इत्युद्दिश्य “अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत्। प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम्”सा॰द॰ लक्षितम्। १२सारे “रसादीनां शुक्रान्तानां धातूनां यत्परं तेजस्तत् खल्वोजस्तदेव बलमित्युच्यते”सुश्रु॰१३प्रागल्भ्ये १४पराभिभवसामर्थ्ये। १५परैरनभिभाव्यत्वे। १६अप्रतिहताज्ञत्वे। १७चैतन्यात्मके ज्योतिषि।१८स्त्रीबालकादिभिर्मूढैरनभिभाव्यत्वे। १९सत्वगुणजाते लिङ्गदेहे। २०हयवेगे। “तेजोनाम दर्पपरानाम्ना सत्त्वगुणविकारः प्रकाशकोऽन्तः सारविशेषः। यथाह भोजराजः “तेजोनिसर्गजं सत्त्वं वाजिनां स्फुरणं रजः। क्रोधस्तम इति ज्ञेयास्त्रयोऽपि सहजा गुणाः”। तच्च द्विविधम्। सततोत्थितं मयोत्थितञ्चेति। यथाह स एव “धारासु योजितानाञ्च निसर्गात् प्रेरणं विना। अवच्छिन्नमिवाभाति तत् तेजःसततोत्थितम्। कशापादादिघातैर्यत् साध्वसात् स्फुरितन्तु तदिति”। शब्दस्पर्शतन्मात्रसहिताद्रूपतन्मात्रादुत्पन्ने शब्दस्पर्शरूपगुणे २१तृतीये महाभूते। यथा “तृतीयं ज्योतिरित्याहुश्चक्षुरध्यात्ममुच्यते। अधिभूतं ततो रूपं सूर्य्यस्तत्राधिदैवतम्” भा॰आश्व॰ उष्णस्पर्शवत्तेजः। “तद्द्विविधम्। नित्यमनित्यञ्च। नित्यं परमाणुरूपम्। अनित्यं कार्य्यरूपम्। पुनस्त्रिविधम्। शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके। इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्त्ति विषयश्चतुर्विधः। भौमदिव्यौदर्य्याकरजभेदात्। भौमं वह्न्यादिकम्। अविन्धनं दिव्यं विद्युदादि। भुक्तान्नस्य परिणामहेतुरौदर्यम्। आकरजं सुवर्णादि” तर्कसंग्रहः “स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्। नैमित्तिकं द्रवत्वन्तु नित्यतादि च पूर्ववत्। इन्द्रियं नयनं वह्निस्वर्णादिर्विषयोमतः” इति भाषाप॰।

उपचारात् २२तेजस्विनि च। “त्रीणि तेजांसि नोच्छिष्ट आलभेत कदाचन” “अग्निं गां ब्राह्मणं चैव” भा॰ आनु॰५०१७ श्लो॰। स्वपरप्रकाशकं तेजः अन्धकारविरोधि तल्लक्षणञ्च शुक्लभास्वररूपसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम्। तेजसो गुणादिकमग्निशब्दे ६८ पृ॰ दृश्यम्। “सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः”माघः। भुक्ततेजसः कार्य्यञ्च छा॰ उ॰ दर्शितं “तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमं स मज्जा योऽणिष्ठः सा वाक्।“अन्नमयं हि सौम्य! मन आपोमयः प्राणस्तेजोमयी वागिति च” तेजोभूतञ्च वायुकार्य्यमपां कारणञ्च। यथोक्तं “अद्भिः सौम्य! शुङ्गेन तेजोमूलमन्विच्छ” छा॰ श्रुतिः २३रजोगुणे तैजसशब्दे दृश्यम् तेजसा निर्वृत्तः अण् तेजोजन्ये त्रि॰। तेजस्+अस्त्यर्थे विनि। तेजस्विन् मतुप् मस्य वः तेजस्वत्। तेजोविशिष्टे त्रि॰ स्त्रियां सर्वत्र ङीप्। तैजसी तेजस्विनी तेजस्वती। २४ वीर्य्ये च। [द्रव्ये स्त्रियां ङीप्।

तेजस्कर त्रि॰ तेजः करोति कृ–हेत्वादौ ट। तेजोहेतौ

तेजस्य त्रि॰ तेजसि साधु यत्। तेजःसाधने “यावामिन्द्रावरुणा सहस्या रक्षस्या तेजस्या तनूः”तै॰स॰२।३।१३।१।

तेजस्वत् त्रि॰ तेजस+अस्त्यर्थे मतुप् मस्य वः। तेजोयुक्ते

"तेजस्वदस्तु सुखम्" तैत्ति० १।७।७।२। स्त्रियां ङीप् सा च २गजपिप्पल्यां शब्दरत्ना० ३चविकायां रत्नमाला ४महाज्योतिष्मत्यां राजनि०। अत्र संज्ञात्वेन सान्तत्वात् सस्य पदत्वाभावे तेजोवतीत्यपि तत्रार्थे।

तेजस्विन् त्रि० तेजस्+अस्त्यर्थे विनि। तेजोयुक्ते "तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते" माघः। स्त्रियां ङीप्। सा च २ज्योतिष्मतीलतायां शब्दर०। ३महाज्योतिष्मतीलतायाम् राजनि०। "तेजोस्विनी कफश्वासकासाऽऽस्यामयवातहृत्। पाचन्युष्णा कटुस्तिक्तारुचिवह्निप्रदीपनी" भावप्र०।

तेजित त्रि० तिज–णिच्–क्त। शाणिते तीक्ष्णीकृते अमरः

तेजिष्ठ त्रि० तेजस्विन्+अतिशये इष्ठन् विनेर्लुकि डिद्भावः। अतिशयेन तेजस्विनि। "तेजिष्ठया तिथिग्वस्य वर्तनी" ऋ० १।५३।८।

तेजीयस् त्रि० तेजस्विन्+अतिशये ईयसुन् विनेर्लुकि डिद्भावः। अतितेजस्विनि। "तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा" भाग० १०।३३।२९। स्त्रियां ङीप्।

तेजेयु पु० रौद्राश्वनृपस्य पुत्रभेदे। "रौद्राश्वस्य महेष्वासा दशाप्सरसि सम्भवाः" इत्युपक्रमे। "तेजेयुर्बलवान् धीमान् सत्येयुश्चेन्द्रविक्रमः" भा० आ० ९४ अ०।

तेजोनाथ तीर्थभेदे शिवपु० दृश्यम्। [रत्नमा०।

तेजोमन्थ पु० तेजो मथ्नाति मन्थ-अण्। गणिकारिकायाम्।

तेजोमय त्रि० तेजस्+प्रचुरार्थे विकारे वा मयट्। १तेजःप्रचुरे २तेजोविकारे ३ज्योतिर्मये च। स्त्रियां ङीप्। "तेजोमयी वाक्" इति छा० उ० श्रुतिः। "तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः" मनुः।

तेजोमात्रा स्त्री तेजसां सत्त्वगुणानां मात्रांऽशः। इन्द्रियेषु भूतानां सात्विकांशेभ्य एव तेषामुत्पत्तिः सांख्यसिद्धा।

तेजोमूर्त्ति पु० तेजस्तेजस्वती मूर्त्तिर्यस्य। १सूर्य्ये २तेजआत्मके ३तेजःप्रचुरे च त्रि०। "स गच्छति परं स्थानं तेजोमूर्त्तिपथर्जुना" मनुः।

तेजोरूप न० तेजः सर्वप्रकाशकं चैतन्यं रूपं स्वरूपं यस्य। ज्योतीरूपे प्रकाशात्मके ब्रह्मणि "अशरीरं विग्रहवदिन्द्रियवदतीन्द्रियम्। यदसाक्षि सर्वसाक्षि तेजोरूपं नमाम्यहम्" ब्रह्मवै० पु०। ६त०। २तेजसो रूपे च अग्निशब्दे तद्रूपं दर्शितम्।

तेजोवत् त्रि० तेजस्+अस्त्यर्थे मतुप् मस्य वः वा० न पदत्वम्। तेजोयुक्ते स्त्रियां ङीप्। सा च (तेजस्वत्)शब्दोक्तार्थेषु। "तेजोवता लोकगणेन सार्द्धम्" मत्स्यपु०। अग्न्यावाहनमन्त्रः

तेजोविन्दु पु० उपनिषद्भेदे उपनिषच्छब्दे दृश्यम्। [राजनि०।

तेजोवृक्ष पु० तेजोयुक्तः वृक्षः शा० त०। क्षुद्राग्निमन्थवृक्षे

तेजोवृत्त न० तेजसः वीर्य्यस्यानुरूपं वृत्तम्। वीर्य्यानुरूपचरिते। "इन्द्रस्यार्कस्य वायोश्च यमस्य वरुणस्य च। चन्द्रस्याग्नेः पृथिव्याश्च तेजोवृत्तं नृपश्चरेत्" मनुः।

तेजोह्वा स्त्री तेजः ह्वयते स्पर्द्धते ह्वे–क। तेजस्विन्यां लतायाम् भावप्र०। "कम्पिल्लकं ससिन्दूरं तेजोह्वा तुत्थकाह्वये" सुश्रु०। [२। "तेदनीं देवतां प्रीणामि" वेददी०।

तेदनी स्त्री देवताभेदे "तेदनीमधरकण्ठेनापः" यजु० २५।

तेन अ० तद्+बा० एन। १तद्धेतुनेत्यर्थे भरतः। ते इति न इति शब्दौ यत्र। २गानाङ्गभेदे पु०। "तेनेति शब्दस्तेनः स्यान्मङ्गलानां प्रदर्शकः। तेशब्देनोच्यते गौरी नशब्देनोच्यते हरः। तेन माङ्गलिकस्यायं शब्दस्तेन इति स्मृतः" सङ्गी० दा०।

तेप कम्पे, च्युतौ च भ्वा० आ० अक० सेट्। तेपते अतेपिष्ट। तितेपे। ऋदित्। अतितेपत् त।

तेम पु० तिम–घञ्। आर्द्रीभावे। अमरः।

तेमन न० तिम–ल्युट्। १आर्द्रीकरणे। कर्मणि ल्युट्। २व्यञ्जने। अमरः। आधारे ल्युट् ङीप्। ३चुल्लीभेदे हेमच०।

तेलु पु० नृपभेदे ततः राजन्या० विषये देशे वुञ्। तैलवक तेलुनृपविषये देशे। [तितेवे। ऋदित् अतितेवत् त।

तेव क्रीड़ने भ्वा० आ० अक० सेट्। तेवते अतेविष्ट।

तेवन न० तेव–भावे ल्युट्। १क्रीड़ायाम्। आधारे ल्युट्। २केलिकानने हेमच०।

तैङ पु० तिङां व्याख्यानः ग्रन्थः अण्। तिङां व्याख्याने ग्रन्थे

तैजस न० तेजसो विकारः अण्। १घृते, २धातुद्रव्यमात्रे च। साङ्ख्योक्ते ३रजोगुणोत्पन्ने त्रि०। "वैकारः सात्विको नाम तैजसः राजसः स्मृतः। भूतादिस्तामसस्तेऽपि पृथक् तत्त्वान्यवासृजन्" पदार्थादर्शधृतवाक्यम्।

"सात्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात्। भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्" सां० का०। "ननु यदि सत्वतमोभ्यामेव सर्वं कार्य्यं जन्यते तदा कृतमकिञ्चित्करेण रजसेत्यत आह तैजसादुभयं तैजसात् राजसादुभयं गणद्वयं भवति। यद्यपि रजसो न कार्य्यान्तरमस्ति तथापि सत्वतमसी स्वयं क्रियासमर्थे अपि न स्वस्वकार्य्यं कुरुतः रजस्तु चलतया ते यदा चालयति तदा स्वस्वकार्य्यं कुरुत इति तदुभयस्मिन्नपि कार्य्ये सत्वतमसोः

क्रियोत्पादनद्वारेणास्ति रजसः कारणत्वमिति न व्यर्थं रज इति त०कौ०। तिज निशाने इत्यस्मादसुन् तेन तेजसा कृतः तैजसः रजसश्च सत्वतमसोः स्वस्वतेजकार्य्यसमर्थत्वकरणरूपतैक्ष्ण्यकरणगुणयोगात् तेजःपदाभिधेयता इति तदाशयः "तैजसादिन्द्रियाण्याहुः" शा०ति०। सत्त्वगुणस्य प्रकाशकत्वात् "तैजसमन्तःकरणमिति" वेदान्तप०। ४तीर्थभेदे न०। "तैजसं नाम तत्तीर्थं यत्र तीर्थेह्यपां पतिः। अभिषिक्तः सुरगणैर्वरुणो भरतर्षभ!" भा०श०४७ अ०। एतद्व्यष्ट्युपहितं चैतन्यं तैजसो भवति। तेजोमयान्तःकरणोपहितत्वात्" वेदान्तसारोक्ते ५चैतन्यभेदे पु०।

तैजसावर्त्तनी स्त्री तैजसं धातुद्रव्यमावर्त्त्यतेऽत्र आ–वृत णिच्–आधारे ल्युट् ङीप्। मूषायाम्।(मुची) अमरः

तैतल पु० ऋषिभेदे ततः तिका० अपत्ये फिञ्। तैतलायनि तदपत्ये पुंस्त्री।

तैतिक्ष त्रि०तितिक्षा शीलमस्य छत्रादि० ण। तितिक्षाशीले।

तैतिक्ष्य पुंस्त्री० तितिक्षस्य ऋषिभेदस्य गोत्रापत्यं गर्गा० यञ्। तितिक्षर्षिगोत्रापत्ये तस्य छात्राः कण्वा० अणि यञो लोपः। तैतिक्षाः तैतिक्ष्यस्य छात्रेषु ब०व०।

तैतिर पुंस्त्री० तैत्तिर दृशो०। (तितिर) खगे राजनि०। स्त्रियां ङीष्।

तैतिल पु० १गण्डकपशौ। २ववादितश्चतुर्थे करणे न० मेदि०। ३देवे च। "शक्तिसदृशेन दानेनावाधितशरणीतलतैतिलगणः" दशकु०। तैतिलशब्दस्य कद्रूशब्देन समासे पूर्वपदप्रकृतिस्वरः।

तैतिलिन् पु० गोत्रप्रवर्त्तकर्षिगणस्यप्रवरभेदे।

तैत्तिर न० तित्तिरीणां समूहः अण्। तित्तिरखगसमूहे। तित्तिर+स्वार्थे अण्। (तितिर)खगभेदे पुंस्त्री राजनि०। गण्डकपशौ च मेदि०।

तैत्तिरि पु० कुकुरवंश्यनृपभेदे। "कुकुरस्य सुतो वृष्णुर्वृष्णोऽस्तु तनयस्तथा। "कपोतरोमा तस्याथ तैत्तिरिस्तनयोऽभवत्"। हरिवं० ३८अ०। २ऋषिभेदे। "आद्यः कठस्तैत्तिरिश्च वैशम्पायनपूर्वजः" भा० शा० ३३८ अ०। २कृष्णयजुःप्रवर्त्तके ऋषिभेदे।

तैत्तिरीय पु०ब०व०तित्तिरिणा प्रोक्तमधीयते छण्। १तित्तिरिप्रोक्तशाखाध्येतृषु स्वार्थे क। तैत्तिरीयकाश्चात्रार्थे। यजुःशाखाभेदे। तन्नामनिरुक्तिः यथा।
"देवरातसुतः सोऽपि छर्दित्वा यजुषां गणम्। ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान्। यजूंषि तित्तिराभूत्वा तल्लोलुपतया ददुः। तैत्तिरीया इति यजुःशाखा अभवन् सुपेशलाः" भाग० १२।

तैन्तिडीक त्रि० तिन्तीड़िकेन संस्कृतम् कोपधत्वात् अण्। तिन्तिड़ीकसंस्कृतव्यञ्जनादौ। तस्य विकारः कोपधत्वात् अण्। २तिन्तिड़ीकविकारे च।

तैमिर तिमिरमेव अण्। नेत्ररोगभेदे "एभिं हन्यान्नक्तान्ध्यकाचान् नीलीरोगं तैमिराञ्जनेन" सुश्रु०। तैमिरो रोगोऽस्त्यस्य ठन् तैमिरिकः। तिमिररोगक्ते। "न वामयेत्तैमिरिकोर्द्ध्ववातगुल्मोदरप्लीहकृमिप्रमार्त्तान्" सुश्रु०। "तैमिरिका इवादूरदर्शिनम्" काद०।

तैर न० तीरे भवः अण्। कूलस्थे राजनि०।

तैरणी स्त्री तीरे नमति नम–वा०ड ततः स्वार्थे अण् गौरा० ङीष्। कुनीव्यां रागदे क्षुपभेदे।[तिर्यग्जातिसम्बन्धिनि

तैरश्च त्रि०तिरश्चामिदम् तिर्यच् अण्+भत्वात् तिरश्चादेशः।

तैर्थ त्रि० तीर्थे दीयते कार्य्यं वा व्युष्टा० अण्। १तीर्थे देये २तीर्थकार्य्ये च तीर्थात् आयस्थानादागतः शुण्डिका० अण्। तीर्थरूपायस्थानादागते द्रव्यादौ च।

तैर्थक त्रि० तीर्थे देशे भवः धूमा० वुञ्। तीर्थदेशभवे।

तैर्थिक त्रि० तीर्थं सिद्धान्तनिश्चयं नित्यमर्हति छेदा० ठञ्। १तीर्थसिद्धान्ताभिज्ञे शास्त्रकरे कपिलकणादादौ तीर्थं वेत्ति ठञ् वा।२सिद्धाभिज्ञे। तीर्थे भवः ठञ्।३तीर्थभवे। "तैर्थिकाभुञ्जते यस्तु मणिनागस्य" भा०अ०८५ अ०।

तैर्थ्य त्रि० तीर्थ+चतुरर्थ्यां० सङ्का० ण्य। तीर्थसमीपादौ।

तैर्य्यगयनिक त्रि० तिरश्चामयनं सत्रभेदः तदेव ठञ्। सत्रभेदे। "अष्टादशभिर्ज्यायानादित्यः संवत्सर एव तैर्यगयनिको भवति। आदित्यः खलु शश्वदेकदा षण्मासानुदङ्ङेति नव चाहानि तथा दक्षिणा" श्रुतिः।

तैर्य्यग्योन त्रि० तिर्य्यग्योनेरिदम्+अण्। तिर्य्यग्योनीनां पश्वादीनां सम्बन्धिनि सर्गभेदे।
"अष्टविकल्पो दैवस्तैर्य्यग्योनश्च पञ्चधा भवति। मानुष्यश्चैकविधः समासतो भौतिकः सर्गः" सा० का० तैर्य्यग्योनश्च पञ्चधा भवति पशुमृगपक्षिसरीसृपस्थावरात्मकः" त० कौ०। तत्र भवः अण्। तद्योनिभवे। "निन्दन्त्यवमतामन्त्वं तैर्य्यग्योनास्तथैव च" मनुः।

तैल न०तिलस्य तत्सदृशस्य वा विकारः अञ्। तिलसर्षपादिजनिते स्नेहद्रव्यभेदे। तल्लक्षणादिकं भावप्र० उक्तं यथा "तिलादिस्निग्धवस्तूनां स्नेहस्तैलमुदाहृतम्। तत्तु वातहरं सर्वं विशेषात्तिलसम्भवम्। अथ तिलतैलगुणाः

"तिलतैलं गुरु स्थैर्य्यबलवर्णकरं सरम्। वृष्यं विकाशि विशदं मधुरं रसपाकयोः। सूक्ष्मं कषायानुरसं तिक्तं वातकफापहम्। वीर्य्योष्णं हिमं स्पर्शे बृंहणं रक्तपित्तकृत्। लेखनं बद्धविण्मूत्रं गर्भाशयविशोधनम्। दीपनं बुद्धिदं मेध्यं व्यवायि व्रणमेहनुत्। श्रोत्रयोनिशिरःशूलनाशनं लघुताकरम्। त्वच्यं केश्यञ्च चक्षुष्यमभ्यङ्गे भोजनेऽन्यथा। छिन्नभिन्नच्युतोत्पिष्टमथितक्षतपिच्चिटे। भग्नस्फुटितविद्धाग्निदग्धविश्लिष्टदारिते। तथाभिहतनिर्भुग्ने मृगव्याघ्रादिविक्षते। वस्तौ पानेऽन्नसंस्कारे नस्ये कर्णाक्षिपूरणे। सेकाभ्यङ्गावगाहेषु तिलतैलं प्रशस्यते"। ननु बृंहण लेखनयोः कथं सामानाधिकरण्यमित्यत आह। "छन्नादिदुष्टः पवनः स्रोतः सङ्कोचयेद्यदा। रसोऽसम्यग्वहन् कार्श्यं कुर्य्याद्रक्ताद्यवर्द्धयन्। तेषु प्रवेष्टुं सरता सौक्ष्म्यस्निग्धत्वमार्द्दवैः। तैलं क्षमं रसं नेतुं क्षयानां तेन बृंहणम्। व्यवायि सूक्ष्मतीक्ष्णोष्णसरत्वैर्मेदसः क्षयम्। शनैः प्रकुरुते तैलं तेन लेखनमीरितम्। हृतं पुरीषं बध्नाति स्खलितं तत्प्रवर्त्तयेत्। ग्राहकं सारकञ्चापि तेन तैलमुदीरितम्। घृतमब्दात्परं पक्वं हीनवीर्य्यं प्रजायते। तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम्"। सर्षपतैलगुणाः। "दीपनं सार्षपं तैलं कटुपाकरसं लघु। लेखनं स्पर्शवीर्य्योष्णं तीक्ष्णं पित्तासृग्दूषकम्। कफमेदोऽनिलार्शोघ्नं शिरःकर्णामयापहम्। कण्डूकुष्ठक्रिमिश्वित्रकोठदुष्टक्रिमिप्रणुत्"।

राजिकातैलगुणाः "तद्वद्राजिकयोस्तैलं विशेषान्मूत्रकृच्छ्रकृत्"। राजिकयोः (कृष्णराई) (आरक्तराई) द्वयोः। तुवरी(तोरी)तैलगुणाः "तीक्ष्णोष्णं तुवरीतैलं लघु ग्राहि कफास्रजित्। वह्निकृद्विषकण्डूकुष्ठकोठक्रिमिप्रणुत्। मेदोदोषापहञ्चापि व्रणशोथहरं परम्"। अतसीतैलगुणाः "अतसीतैलमाग्नेयं स्निग्धोष्णं कफपित्तकृत्। कटुपाकमचक्षुष्यं बल्यं वातहरं गुरु। मलकृद्रसतः स्वादु ग्राहि त्वग्दोषनुद्घनम्। वस्तौ पाने तथाभ्यङ्गे नस्ये कर्णस्य पूरणे। अनुपानविधौ चापि प्रयोज्यं वातशान्तये। वररोः तैलगुणाः "कुसुम्भतैलमम्लं स्यादुष्णं गुरुविदाहि च। चक्षुर्भ्यामहितं बल्यं रक्तपित्तकफप्रदम्। खस (खाखस) बीजतैलस्य गुणाः। "तैलं तु खसबीजानां बल्यं वृष्यं गुरु स्मृतम्। वातहृत्कफहृच्छीतं स्वादुपाकरसं च तत्"। एरण्डतैलगुणाः "एरण्डतैलं तीक्ष्णोष्णं दीपनं पिच्छिलं गुरु। वृष्यं त्वच्यं वयःस्थापि मेधाकान्तिबलप्रदम्। कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनम्। विस्रं स्वादु रसे पाके सतिक्तं कटुकं सरम्। विषमज्वरहृद्रोगपृष्ठगुह्यादिशूलनुत्। हन्ति वातोदरानाहगुल्माष्ठीलाकटीग्रहान्। वातशोणितविड्बन्धब्रध्नशोथामविद्रधीन्। आमवातगजेन्द्रस्य शरीरवनचारिणः। एक एव निहन्तायमेरण्डस्नेहकेशरी"। राजतैलगुणाः "तैलं सर्जरसोद्भूतं विस्फोटव्रणनाशनम्। कुष्ठपामक्रिमिहरं वातश्लेष्मामयापहम्"। सर्वतैलगुणाः "तैलं स्वयोनिगुणकृद्वाग्भटेनाखिलं मतम्। अतःशेषस्य तैलस्य गुणाज्ञेयास्वयोनिवत्"। "प्रातः स्नाने व्रते श्राद्धे द्वादश्यां ग्रहणे तथा। मद्यलेपसमं तैलं तस्मात्तैलं विवर्जयेत्" कर्म्मलोचन०। "घृतञ्च सार्षपं तैलं यत्तैलं पुष्पवासितम्। अदुष्टं पक्वतैलञ्च तैलाभ्यङ्गे च नित्यशः" तिथ्या० त० वारविशेषे तैलग्रहणफलं यथा।

"अर्के मूनं दहति हृदयं कीर्त्तिलाभश्च सोमे भौमे मृत्युर्भवति नियतं चन्द्रजे पुत्रलाभः। अर्थग्लानिर्भवति च गुरौ भार्गवे शोकयुक्तस्तैलाभ्यङ्गात्तनयमरणं सूर्य्यजे दीर्घमायुः" ज्यो०त०। "घृतादष्टगुणं तैलं मर्दयेन्न तु खादयेत्" वैद्यक०। स्वल्पे कन्। तैलक स्वल्पतैले न०।

तैलकन्द पु० तिलस्यायम् अण् तैलः तिलसम्बन्धी कन्द इव कन्दोऽस्य। तिलचित्तपत्रके वृक्षभेदे "तैलकन्दः कटूष्णश्च लौहद्रावकरो मतः। मारुतापस्मारविषशोफनाशकरश्च सः। रसस्य बन्धकारी च देहशुद्धिकरस्तथा" राजनि०।

तैलकल्कज पु० तैलात् तिलसम्बन्धिनः कल्कात् जायते जन–ड। तिलकल्कजाते (तैलेर काट) तैलकिट्टे राजनि०।

तैलकार पु० तैलं करोति कृ–अण् (तेली) (कलु) इति प्रसिद्धे वर्णसङ्करे चाक्रिके तैलिनि। स च कोटकस्त्रीगर्भे कुम्भकाराज्जातः सङ्कीर्णजातिभेदः ब्रह्मवै०ब्रह्मख०

तैलकिट्ट न० ६त०। तैलमले (काट) इति ख्याते।

तैलकीट पु० कीटभेदे राजनि०।

तैलक्य न० तिलकस्य भावादौ पुरोहि० यक्। तिलकभावे।

तैलङ्ग पु० "श्रीशैलं तु समारभ्य चोलेशान्मध्यभागतः। तैलङ्गदेशो देवेशीत्युक्तो १देशे। २तत्रस्थे जने ब०व०। शब्दरत्ना०

तैलचोरिका स्त्री तैलं चोरयति चुर–ण्वुल् ष्टभो०। तैलपायिकायाम् (तेलापोका)। ष्टभो०। तैलचौरिकाप्यत्र।

तैलद्रोणी तैलपूर्णा द्रोणी शा०त०। "कण्ठपर्य्यन्तमज्जनार्थं"

तैलपूर्णे काष्ठादिनिर्मिते पात्रविशेषे । अत्रावस्थितिगुणाः । वातरोगव्याधिकुष्ठरोगपङ्गुबाधिर्य्यमिन्मिनगद्गदहन्वङ्गस्तम्भपृष्ठप्रचलितपवनगात्रकम्पकपाटीग्रीवाभङ्गापतन्त्रक्षयरुधिरभवमूत्रकृच्छ्रवस्तिरोगेषु हितत्वमिति” राजभल्लभः ।

तैलधान्य न० तैलोपयोगि धान्यं सतुषं शस्यम् । “तिलोऽतसी च तोरी (डी) च त्रिविधश्चापि सर्षपः । द्विधा राजी खसश्चैव वीजं कौसुम्भसम्भवम् । एतानि तैलधान्यानीत्युक्तेषु तिलादिषु ।

तैलपक पु० तैलं पिबति पा—क स्वार्थे क । तैलपायिकाख्ये पक्षयुक्ते कीटे । तैलहरणे तज्जातिप्राप्तिर्मनुनोक्ता यथा “मांसं गृध्रो वपां मद्गुस्तैलं तैलपकः खगः” [भावप्र० ।

तैलपर्णक पु० तैलाक्तमिव पर्णमस्य कप् । ग्रन्थिपर्णवृक्षे

तैलपर्णिक न० तैलपर्णी गिरिभेद उत्पत्तिस्थानत्वेनास्त्यस्य ठन् तैलाक्तं पर्णमस्त्यस्य ठन् वा । १हरिचन्दने अमरः । तिलपर्णः वृक्ष उत्पत्तिस्थानत्वेनास्त्यस्य ठन् । २चन्दनभेदे ।

तैलपर्णी स्त्री तिलपर्णी गिरिस्तत्र भवः अण् ङीप् ।१चन्दने २श्रीवासे ३सिल्हके च मेदि० । स्वार्थे क । तैलपर्णिका तत्रार्थे । “कालियकादकूलाश्च हिङ्गवस्तैलपर्णिकाः” हरिवं० २३१अ० । [राजनि० ।

तैलपा स्त्री तैलं पिबति पा—क । (तेलापोका) कीटभेदे ।

तैलपायिका स्त्री पा—ण्वुल् इत्त्व० । (तेलापोका) (आरसुला) कीटभेदे अमरः ।

तैलपायिन् पु० तैलं पिबति पा—णिनि । तैलपायिकाख्ये पक्षयुक्ते कीटभेदे । “तैलहृत् तैलपायी स्यात्” याज्ञ० ।

तैलपिपीलिका स्त्री तैलाक्तेव पिपीलिका । पिपिलीकाभेदे

तैलपीत त्रि० पीतं तैलं येन आहि०परनि० । पीततैलके ।

तैलफल पु० तैलं फले यस्य । इङ्गुदीवृक्षे राजनि० ।

तैलभाविनी स्त्री तैलं भावयति वासयति भू—णिनि ङीप् । तैलवासके जातीपुष्पवृक्षे राजनि० ।

तैलमाली स्त्री तैलेन मालः सम्बन्धो यस्याः गौरा० ङीष् । वर्त्तिकायां दीपदशायां शब्दमाला ।

तैलम्पाता स्त्री तिलस्य पातोऽत्र अ नि०मुम् च । १स्वधायाम्, २तदुपलक्षिते श्राद्धे च अमरः ।

तैलयन्त्र पु० तैलमर्द्दनार्थं यन्त्रम् । तिलादिनिष्पीड़नार्थे यन्त्रभेदे (कलुरघानि) “अमीमांस्यानि शौचानि तैलयन्त्रेक्षुयन्त्रयोः” स्मृतिः “रविरथचक्रं च तैलयन्त्रचक्रवत् भ्रमत्” भागवते ५।२१।१८ श्लोकः ।

तैलवक पु० तेलुन्टपस्य विषयो देशः राजन्या० वुञ् । तेलुन्टपविषये देशे । [रनिघ० ।

तैलवल्ली स्त्री तैलाक्तेव वल्ली । लघुशतावर्य्यां पारस्क० ।

तैलसाधन न० तैलं साधयति सुरभीकरोति सिध—णिच साधि—ल्यु । कक्कोले गन्धद्रव्ये शब्दच० । [मेदे हेमच० ।

तैलस्फटिक पु० तैलाक्तः स्फटिक इव । तृणमणौ गो-

तैलस्यन्दा स्त्री तैलमिव स्यन्दति स्यन्द—अच् । १श्वेतगोकर्ण्यां २काकोल्यां पारस्करनिघण्टुः ।

तैलागुरु पु० तैलाक्तमिवागुरु । दाहागुरौ राजनि० ।

तैलाटी स्त्री अटति अटं तैलेनाटं विषमस्याः गौरा० ङीष् । वरटायां तैलस्पर्शे तद्विषनाशात् तस्याः तथात्वम् ।

तैलाम्बुका स्त्री तैलमम्बु इव पेयमस्याः । तैलपायिकाख्ये कीटे जटा० ।

तैलिक त्रि० तैलं पण्यं यस्य तैलं शिल्पमस्य वा ठक् । २तैलार्थं तिलनिष्पीड़ने (कलु) “खलमलिननीचतैलिकविहीनसत्त्वोपहृतपुंस्त्वा” वृ०स०१६अ० । २तैलविक्रेतरि च “समुद्रगामी वन्दी च तैलिकः कूटकारकः” मनुः तिलविक्रेतुरपाङ्क्तेयत्वमुक्तम् ।

तैलिन् त्रि० तैलं निष्पाद्यत्वेनास्त्यस्य इनि । १तैलकारे हेमच० ।२तैलयुक्ते त्रि० । स्त्रियां ङीप् ङीवन्तः । ३तैलकीटे राजनि० ४दशायां वर्त्तौ शब्दमा० । [हेम० ।

तैलिशाला स्त्री ६त० । तैलनिष्पीड़नार्थे गृहे (घानिघर)

तैलीन तिलानां भवनं क्षेत्रं खञ् । तिलभवनयोग्ये क्षेत्रे अमरः । [२सम्बन्धिनि स्त्रियां ङीप् ।

तैव्रदारव त्रि० तीव्रदारुण इदम् रजता० अञ् । तीव्रदा-

तैष पु० तिष्यनक्षत्रयुक्ता पौर्णमासी अणि यलोपे ङीप् । तैषी साऽस्मिन् मासे अण् ।१पौषे मासि धनुःस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्ते चान्द्रे मासि अमरः तदीयपूर्णिमायामेव तद्योगसम्भवः । तिष्यशब्देन तत्समीपनक्षत्रस्यापि ग्रहणात् कदाचित् तत्सम्बन्धाभावेऽपि न क्षतिः ।२तदीयपौर्णमास्यां स्त्री “सास्मिन् पौर्णमासी” पा० नक्षत्रयुक्तकालस्य पूर्णिमायामेव तद्योगे साधुत्वेन पौर्णमासीपरत्वमेवेति बोध्यम् । “तैष्या नधीतपूर्वाणाम्” आश्व० श्रौ० ८।१४।२२ ।

तोक न० सौ० तु—क तस्य नेत्त्वम् । १अपत्ये पुत्रे, दुहितरि च अमरः । “नित्ये तोके दीदिवांसम्” २।२।११ “पश्वे तोकाय तनयाय जीवसे” ऋ० १०।३५।१२ “तोकेन

जीवहरणं यदुलूकिकायास्तैमासिकस्य च यदा शकटोऽपवृत्तः” भाग० २।७।२८।

तोक्म पु० तक म पृषो० अत ओत्त्वम्। १हरिद्वर्णे अपक्वयवे अमरः। २हरिद्वर्णे हेमच०। ३कर्णमले न० हेम०। ४मेघे पु० अजयपालः। ५नवप्ररूढे यवे यवाङ्कुरे न०। “प्रायणीयस्य तोक्मानि” यजु० १९।१३। “तोक्मानि नवप्ररूढयवाः” वेददी०। “पत्रपुष्पफलच्छायामूलवल्कलदारुभिः। गन्धनिर्यासभस्मास्थितोक्मैः कामान् वितन्वते” भाग० १०।२२।२५ “तोक्माः पल्लवाद्यङ्कुराः” श्रीधरः तेन ६तदर्थेऽपि च।

तोक्मन् न० तक–मनिन् पृषो० अत ओत्त्वम्। १नवविरूढयवे २अपत्ये न० निघण्टुः। “भेषजं तोक्मभिः” यजु० २१।२०। “तोक्मभिर्लाजैर्महःस्वन्तः” यजु० २१।४२।

तोटक न० द्वादशाक्षरपादके छन्दोभेदे। “इह तोटकमम्बुधिसैः प्रथितम्” वृ० र०।

तोड अनादरे भ्वा० पर० सक० सेट्। तोडति अतोडीत्। ऋदित्। णिच् अतुतोडत् त।

तोड़ल न० तन्त्रभेदे।

तोतस अव्य० तु–बा० तसि। १कलत्रे २त्वयीत्यर्थे च। “मा वयं रायस्पोषेण वियौष्म तोतो रायः” यजु० ४।२२। तोतः शब्दः कलत्रवाची अव्ययम्। तोतः कलत्रे रायो धनानि पशवो वा पदक्रमेण तिष्ठन्तु। यद्वाऽव्ययानामनेकार्थत्वात्तोतः शब्दो युष्मत्पर्य्यायः। तोतः त्वयि रायः सन्तु” वेददी०।

तोड़न न० तुड–भावे ल्युट्। १भेदने २दारणे ३हिंसने च।

तोड़ी(री) स्त्री तुड़–अच् गौरा० ङीष् वा डस्य रः। स्वनामख्याते तैलसाधने धान्यभेदे।

तोत्त्र न० तुद्यतेऽनेन तुद–करणे ष्ट्रन्। गवादिताड़ने दण्डे अमरः।

तोद पु० तुद–भावे घञ्। व्यथायां रत्नमाला। “हीनदग्धे तोदकण्डू जाड्यानि व्याधिवृद्धिश्च” सुश्रु०। “दंशे तोदकण्डू प्रादुर्भावैर्जानीयात्” सुश्रु०। कर्त्तरि अच्। २व्यथके त्रि०। “तोदो वातस्य हर्य्योरीशानः” ऋ० ४।१६।११। “तोदस्तोदकः” भा०।

तोदन न० तुद्यतेऽनेन करणे ल्युट्। १तुण्डे मुखे अमरः। भावे ल्युट्। २व्यथायाम् मेदि०। कर्त्तरि ल्यु। ३व्यथके त्रि०। “कषायं मधुरं रूक्षं तोदनं कफवातजित्” सुश्रु०। ४क्षीरिवृक्षभेदे पु०। “क्षीरिवृक्षफलजाम्बवराजादनतोदनतिन्दुकबकुलधन्वनाश्मन्तकाश्वकर्णफलगुपरूषकगाङ्गेरुकीपुष्करवर्त्तिबिल्वबिम्बीप्रभृतीनि। फलान्येतानि शीतानि कफपित्तहराणि च। संग्राहकाणि रूक्षाणि कषायमधुराणि च” सुश्रु०।

तोदपर्णी स्त्री तोदं तोदकं पर्णमस्याः गौरा० ङीष्। कुत्सिते धान्यभेदे।

“कोरदूषकश्यामाकनीवारशान्तनुतुवरकोद्दालकप्रियङ्गुमधूलिकानान्दीमुखकुरुविन्दगवेधुकवरुकतोदपर्णीमुकुन्दकवेणुयवप्रभृतयः कुधान्यविशेषाः” सुश्रु०।

तोमर पुंन० तु–विच् तौ गतौ म्रियतेऽनेन मृ–करणे अप्। १हस्तक्षेप्ये शल्यास्त्रे दण्डाकारेऽस्त्रभेदे (रायबाँश) अमरः। तोमरलक्षणं हेमा० प० लक्षणसमुच्चये उक्तं यथा। औशनसधनुर्वेदे। “शुक्रो भगवानुवाच जमदग्निं प्रति वत्स! निबोध यथाप्रश्नमुच्यमानम् तत्र दण्डान्वितं सर्वलौहं वेति तोमरं द्विविधं भवति। तच्च तोमरं सदण्डं लब्धायतं भवेत् तोमरं सर्वायसं तत्कार्य्ये प्रयोजयेत्। तच्च निकृष्टमध्यमोत्तमं भूयस्त्रिविधं प्रमाणतो भवति तत्र चतुर्हस्तप्रमाणं निकृष्टं सार्द्धचतुर्हस्तं मध्यमं पञ्चहस्तप्रमाणं तूत्तमं भवति। तथा कलनायां चाद्यं द्वितीयं तृतीयं चेति त्रिधा द्व्यङ्गुलमध्ये द्व्यङ्गुलकलितमेकं स्यान्मध्यात्पूर्वं त्र्यङ्गुलकलितं द्वितीयं स्यात्। मध्यात्पूर्वं षडङ्गुलकलितस्थानकलनया तृतीयं स्यात्। सार्द्धमेकं निकृष्टं, त्रयोमध्यमं षडुत्तमं कलनायास्तथा तोमरास्त्रस्य परिणाहः परः षडङ्गुलो भवति सार्द्धपञ्चाङ्गुलो मध्यमः पञ्चाङ्गुलः कनिष्ठ इति। त्रयाणां देशानां त्रयः छन्दाः। छादनास्तथा आवन्त्यो मागधो दाक्षिणात्यश्चेति। तत्रावन्त्यतोमरं तक्षणसंस्थानं भवति मागधं तोमरं योनिसंस्थानं भवति दाक्षिणात्यं तोमरं वृत्तं भवति। तेषां मुखानि तद्देशाच्छन्दतः इति इत्यादि। २नवाक्षरपादके छन्दोभेदे “प्रथमं सकं विनिधाय जगणद्वयञ्च निधाय। कुरु तोमरं सुखकारि फणिराजवक्त्रविहारि” तल्लक्षणम्।

तोमरग्रह पु० तोमरं गृह्णाति ग्रह–अच् न अण्। तोमरास्त्रग्राहिणि।

तोमरधर पु० तोमरमस्त्रं धरति धृ–अच्। वह्नौ शब्दार्थक०

तोमरिका स्त्री तोमर+संज्ञायां कन्। आढक्याम् शब्दर०

तोय न० तौ० तु–विच् तवे पूर्त्त्यै याति या क। १जले २पूर्वाषाढ़ानक्षत्रे च। “उद्धृत्य मेघैस्ततः एव तोयम्” माघः। “मृत्तोयैः शुध्यते शोध्यं नदीवेगेन शुध्यति” मनुः। पूर्वाषाढ़ानक्षत्रस्य जलदैवतत्वात् तथात्वम्। ३लग्नावधिचतुर्थस्थाने च ज्यो० त०। तत्र जलस्य चिन्तनीयत्वात् तथात्वम्।

तोयकर्म्मन् न० तोयेन कर्म्म । तर्पणे “तोयकर्म्मणि चारब्धे राज्ञामुदकदानिके” भा०आ०१अ० ।

तोयकाम पु० तोयं कामयते कम-अण् । १जलवेतसे जटाधरः । २जलाभिलाषुके त्रि० ।

तोयकुम्भ पु० तोयस्य कुम्भ इव । शैवाले पारस्करनिघण्टुः ।

तोयकृच्छ्र न० जलमात्रपानरूपे माससाध्ये व्रतभेदे । “यदा तु विल्वानि फलानि प्रत्येकं क्वथितानि मासम्पीयन्ते तदा फलकृच्छ्रादिव्यपदेशं लभते । यथाह मार्कण्डेयः “फलैर्मासेन कथितः फलकृच्छ्रो मनीषिभिः । श्रीकृच्छ्रः श्रीफलैः प्रोक्तः पद्माक्षैरपरस्तथा । मासेनामलकैरेवं श्रीकृच्छ्रमपरं स्मृतम् । पत्रैर्मतः पत्रकृच्छ्रः पर्णैस्तत्कृच्छ्र उच्यते । मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन तु” इति ।“इति पर्णकृच्छ्रमेकादशविधम्”मिता०।

तोयडिम्ब पु० तोयस्य डिम्ब इव । १मेघोपले करकायां हारा० ।

तोयद पु० तोयं ददाति दा+क । १मेघे, २मुस्तके च । ३घृते न० मेदि० । ४विधिना जलदातरि त्रि० । “तोयदस्तृप्तिमाप्नोति”पुरा० । तद्दानमाहात्म्यं भा० शा० दानधर्म्मे यथा

“अन्ने दत्ते नरेणेह प्राणा दत्ता भवन्त्युत । प्राणदानाद्धि परमं न दानमिह विद्यते । अन्नं वापि प्रभवति पानीयात् कुरुसत्तम ! । नीरजातेन हि विना न किञ्चित् संप्रवर्त्तते । अन्नौषध्यो महाराज ! वीरुधश्च जलोद्भवाः । यतः प्राणभृतां प्राणाः सम्भवन्ति विशाम्पते ! । तस्मात् पानीयदानाद्धै न परं विद्यते क्वचित् । तच्च दद्यान्नरो नित्यं यदीच्छेद् भूतिमात्मनः । धन्यं यशस्यमायुष्यं जलदानमिहोच्यते । शत्रूंश्चाप्यधि कौन्तेय ! सदा तिष्ठति तोयदः । सर्वकामानवाप्नोति कीर्त्तिञ्चैवेह शाश्वतीम् । प्रेत्य चानन्त्यमश्नाति पापेभ्यश्च प्रमुच्यते । तोयदो मनुजव्याघ्र ! स्वर्गं गत्वा महाद्युते ! । अक्षयान् समवाप्नोति लोकानित्यब्रवीन् मनुरिति” ।

तोयधर पु० तोयं धरति धृ-अच् । १मेघे मेदि० २मुस्तके च “नीला इवातपात्यये तोयं तोयधरा घनाः” रामा० वा० ६२ अ० ।

तोयधार पु० तोयानां धारा यत्र । १मेघे २मुस्तके च । धारि-भावे अच् । तोयस्य धारः वर्षणम् । ३जलवर्षणे पु० । “घनवत्तोयधारेण ववर्ष कनकाम्बुभिः” हरिवं० ११२अ० ।६त० । ४जलसन्ततौ स्त्री ।“शरान् व्यसृजतां शीघ्रं तोयधारा घना इव” भा०वि० ३२अ० । “गिरिः प्रस्रवण इव तोयधारा” रामा० आ० २५ स० ।

तोयधि पु० तोयानि धीयन्तेऽत्र धा-कि उप०स० । १समुद्रे जलधिप्रभृतयोऽप्यत्र । २चतुःसंख्यायाञ्च ।“समन्तान्मेरुमध्यात् तु तुल्योभागेषु तोयधेः” सू० सि० ।

तोयधिप्रिय न० तोयधिं प्रीणाति प्री–क ।१लवङ्गे शब्दच० ।

तोयनिधि पु० तोयं निधीयतेऽस्मिन् नि+धा–कि उप०स० । १समुद्रे २चतुःसंख्यायाञ्च ।“पूर्वापरौ तोयनिधी वगाह्य” कुमा० ।

तोयनिवी स्त्री तोयं समुद्रोदकं नीवीव यस्याः स्वार्थे न कप् । १पृथिव्यां “तोयनीव्याः पतिं भूमेरभ्यषिञ्चद्गजाह्वये”भाग० १।१५।३८। लोके तु कप् तोयनीविका तत्रार्थे । [लाङ्गल्याम् अमरः।

तोयपिप्पली स्त्री तोये पिप्पलीव । (काँचड़ा) शाकभेदे

तोयपुष्पी स्त्री तोयेन बहुजलदानेन पुष्पाण्यस्याः। १पाटलावृक्षे शब्दमाला ।

तोयप्रसादन पु० तोयं प्रसादयति फलयोगेन प्र+सद-णिच्-ल्यु । १कतके (निर्म्मलि) । फलपरत्वे न० रत्नमाला “तोयप्रसादकाम्बुप्रसादकादयोऽप्यत्र “फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम्” मनुः ।

तोयफला स्त्री तोयप्रधानं फलं यस्याः ।१इर्वारौ कर्कटीभेदे राजनि० । [२मुस्तके च ।

तोयमुच् पु० तोयं मुञ्चति मुच–क्विप् ६त० ।जलमुचि मेघे

तोययन्त्र न० सू० सि० उक्ते कालज्ञानार्थे घटीयन्त्रभेदे घटीयन्त्रशब्दे २७८१ पृ० दृश्यम् । (कोआरा) इति ख्याते २जलयन्त्रभेदे च ।

तोयराज् पु०तोयेषु राजते राज-क्विप् । १समुद्रे “यदीच्छेत् सागरः किञ्चिदुत्स्रष्टुमिह तोयराट्” हरिवं०२२६अ०।२वरुणे च

तोयराशि पु० तोयानां राशिरिव । १समुद्रे । ६त० । २जलसमूहे च “तोयराशिमवाप्य तृष्णां संवर्द्धयति” काद०। [रत्नमा०। स्वार्थे क । तोयवल्लिकाप्यत्र ।

तोयवल्ली स्त्री तोयसन्निहितस्थाने वल्ली ।१कारवेल्ले (उच्छे)

तोयशुक्तिका स्त्री तोयजाता शुक्तिका शा०त०। जलशुक्तिकायां राजनि० ।

तोयशूक पु० तोयस्य शूक इव । शैवाले पार० नि० ।

तोयसूचक पुंस्त्री० तोयं तोयवर्षं सूचयति रवेण सूच–ण्वुल् । १भेके शब्दार्थक० । स्त्रियां जातित्वात् ङीष् । २जलवर्षणसूचके योगभेदे त्रि०। जलशब्दे १०६५ पृ०दृश्यम् ।

तोयविम्ब न० तोयोत्थितं विम्बम् अर्द्धडिम्बाकारं वस्तु। जलविम्बे जलोपरिभासमाने अर्द्धगोलाकारे पदार्थे। अयं शब्दः तोयवल्लीशब्दात् परं पाठ्यः।

तोयात्मन् पु० तोयमात्मा स्वरूपं यस्य तत्प्रकृतित्वात्। १परमेश्वरे। "यस्य केशेषु जीमूताः। नद्यः सर्वाङ्गसन्धिषु कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः" विष्णुस्तुतिः।

तोयाधार पु० ६त०। १जलाशये। जलाशयोत्सर्गशब्दे ३०७५ पृ० तद्भेदादि दृश्यम्।"तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः" शकु०।

तोयाधिवासिनी स्त्री तोयं तोयार्द्रं देशमधिवसति अधि+वस–णिनि ङीप्। पाटलावृक्षे रत्नमाला।

तोयेश पु० ६त०। १वरुणे तदधिदेवताके २शतभिषानक्षत्रे च। तोयं जलमधिदेवोऽस्य। ३पूर्वाषाढ़ानक्षत्रे न०।

तोरण पुंन०। तुर–युच आधारे ल्युट् तोलयत्यनेन तुल–उन्माने करणे–ल्युट् लस्य रो वा। बहिः स्थिते १द्वारे। "अथोच्चकैस्तोरणसङ्गभङ्गेति" "गणो नृपाणामथ तोरणाद्बहिः" माघः। "भासोज्ज्वलत्काञ्चनतोरणानाम्" कुमा०। तच्च द्वाराग्रे निखातस्तम्भोपरिनिबद्धो धनुराकारः (फटक्) इति ख्यातः पदार्थः। यागादौ मण्डपाद्बहिर्द्वाररूपस्य तोरणस्य काष्ठविशेषप्रमाणादिकं मण्डपशब्दे दृश्यं मत्कृततुलादानादिपद्धतौ विस्तरो दृश्यः। २कन्धरायां न० हारा०।

तोरश्रवस् पु० अङ्गिरोमुनौ।

तोल पुंन०। चु० तुल–कर्म्मणि अच्। अशीतिरत्तिकामाने १कर्षे। "एकतोलं द्वितोलं वा त्रितोलं वेदतोलकम्। इतोऽधिकं नरः कृत्वा प्रायश्चित्तीयते ध्रुवम्" आगमः। स्वार्थे क। तत्रार्थे "पलं तु लौकिकैर्मानैः साष्टरत्तिद्विमाषकम्। तोलकत्रितयं ज्ञेयम्" तिथित०।

तोल्य त्रि० तुल+उन्माने कर्म्मणि–यत्। १तोलनीये। भावे यत्। २तोलने न०। "जीवानां वयसां मौल्ये तोल्ये वर्णस्य हेमनि" लीला०।

तोश पु० तुश--वधे भावे घञ्। १हिंसायाम्। कर्त्तरि अच्। २हिंसके "त्वे राय इन्द्र! तोशतमाः" ऋ०१।१६९।५। "तोशतिर्बधकर्मा नितोशयति निबर्हयतीति तद्धामसु पाठात् तोशतमाः नाशयितृतमाः" भा०। "तोशा वृत्रहणा हुवे" ऋ० ३।१२।४। "तोशा बाधकौ" भा०। [भा०उ०३८अ०। ३स्थाने आच्।

तोष पु० तुष–भावे घञ्। सन्तोषे। "तोषपरो हि लाभः"

तोषण न० तुष--भावे ल्युट्। १सन्तोषे। तुष–णिच् भावे ल्युट्। २सन्तोषोत्पादने। "एतावदेव पुरुषैः कार्य्यं हृदयतोषणम्" भा०स०१६अ०। कर्त्तरि ल्यु। ३सन्तोषजनके त्रि० "पश्यून् हृदयतोषणान्" भा० उ० ८३ अ०। करणे ल्युट्। ४तोषसाधने स्त्रियां ङीप् तोषणी।

तोषल न० तोषं लूनाति लू--बा० ड। अस्त्रभेदे १मुषलेऽस्त्रे "कृष्णस्तोषलमुद्यम्य गिरिकूटोपमं बली" हरिवं०८७अ०।

तौक्षिक पु०धनूराशौ दीपिका कौर्प्य शब्दे २२७८पृ०दृश्यम्।

तौतातिक न० तुतातभट्टेन निर्वृत्तम् ठञ्। तुतातभट्टकृतशास्त्रे "नैवाश्रावि गुरोर्मतं न विदितं तौतातिकं दर्शनम्" प्रबोधच०।

तौतिक न० १मुक्तायां २शुक्तौ च राजनि०।

तौदी स्त्री विषनाशके ओषधिभेदे घृतकुमार्य्याम्।"तौदी नामासि कन्या घृताची वा असि" अथ० १९।४।४२।

तौम्बुरविन् पु० ब०व०। तुम्बुरुणा कलाप्यन्तेवासिना प्रोक्तमधीयते इनि। कलाप्यन्तेवासिना तुम्बुरुणा प्रोक्तशाखाध्येतृषु।

तौर न० यागभेदे।"संवत्सरमहरहस्तौरेण यजेत" लाट्या० श्रौ० १०।२०।१। "दार्षद्वततौरयोर्व्रतानि" १०।१८।१०। तत्रैव।

तौरयान न० तूर्णं यानमस्य पृषो०। तूर्णगमनयुक्ते। "स तौरयान उपयाहि यज्ञम्" निरुक्ते ५।२५। स्मृतिः तौरयानः तूर्णयानः "तौरयान इत्यपि" निगमो भवति"

तौरश्रवस न०तोरश्रवसाऽङ्गिरसा दृष्टं साम अण्। सामभेदे "तौरश्रवसे माध्यन्दिने पवमाने तदावपनश्रुतेः" कात्या० श्रौ० २५।१४।१४। "तौरश्रवसे सामनी" कर्कः।

तौर्य्य न० तूर्य्ये मुरजादौ वाद्ये भवम् अण्। मुरजादिध्वनौ।

तौर्य्यत्रिक न० त्रयः परिमाणमस्य कन् तौर्य्योपलक्षितं त्रिकम्। समुदितेषु नृत्यगीतवाद्येषु अमरः। "वनेऽपि तौर्य्यत्रिकमारराध तम्" नैषधम्। "तौर्य्यत्रिकं वृथाट्या कामजो दशको गणः" मनुः।

तौल न० तुलैव तुला+स्वार्थे अण् स्वार्थिका अपि प्रत्ययाः क्वचित्प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्ते इत्युक्तेः दैवतादिवत् क्लीवता। मानभेदे १तुलायाम् २उन्मानदण्डे ३तुलाराशौ च ज्यो०।

तौलिक पु०तूल्या जीवति तूली+ठक्। चित्रकरे शब्दमाला।

तौलिकिक पु० तूलिकया जीवति ठक्। चित्रकरे हेमच०।

तौलिन् पु० तुलैव तौलं तत् विद्यतेऽस्य इनि । तुलाराशौ "तौलिनि चित्रान्त्यार्द्धं स्वातिः पादत्रयं विशाखायाः" वृ०सं०१०२अ०। अस्य क्लीवत्वमपि "शक्रे तौलि हुताशनेऽलिधनुषी याम्ये मृगो नैरृते" ज्यो०रात्रिलग्ननिर्णयः ।

तौल्य त्रि० तुलया परिच्छिन्नम् ष्यञ् । तुलया परिच्छिन्ने त्रिका० । तुल्यमेव स्वार्थेऽण् । २तुल्ये न० ।

तौल्वलि पु० तुल्वलस्यापत्यम् इञ् । तुल्वलार्षेरपत्ये "सर्वेभ्य एव निष्टणीयादिति तौल्वलिः क्रियागुणत्वात्" आश्व० श्रौ० २।६।१७ "अभक्षणमितरेषां तौल्वलिः कृतार्थत्वात्" ५।६।२४ । ततः इञन्तत्वात् यूनि फक् तौल्वल्यादित्वात् युवप्रत्ययस्य न लुक् । तौल्वलायन—यूनि तदपत्ये ।

तौल्वल्यादि पु० "न तौल्वलिभ्यः" पा० सूत्रोक्ते युवप्रत्ययस्य लुकि पर्य्युदस्ते शब्दगणे स च गणः पा०ग०सू० उक्तो यथा

"तौल्वलि, धारणि. पारणि. रावणि, दैलीपि, दैवति, वार्क्कलि, नैवकि, दैवमति, दैवयज्ञि, चाफट्टकि, वैल्वकि, वैङ्कि, आनुराहति, पौष्करसादि, आनुरोहति, आनुति, प्रादोहनि, नैमिश्रि, प्राडाहति, वान्धकि, वैशीति, आसिनासि, आहिंसि, आसुरि, नैमिषि, आसिबन्धकि, पौष्करेणुपालि, वैकर्णि, वैरकि, वैहति ।

तौवरक त्रि० तुवर्य्या इदम् अण् स्वार्थे क । तुवरीसम्बन्धिनि १स्नेहादौ "कृते भल्लातकस्नेहात् स्नेहात्तौवरकात्तथा" सुश्रुतः । स्वार्थे अण् । ततः स्वार्थे क । २तुवरके । "आयुष्करं तौवरकं कषायं कटुपाकिकम् । उष्णं कृमिज्वरानाहमेहावर्त्तविनाशनम्" सुश्रुतः ।

तौविलिका स्त्री ओषधिभेदे । तौविलिके ! ऽवेलयावायमैलव ऐलयीत्" अथ० ६।१६।३ ।

तौषायण त्रि० तुषस्यादूरदेशादि पक्षा० चतुरर्थ्यां फक् । तुषस्यादूरदेशादौ ।

तौषार त्रि० तुषारस्येदमण् । तुषारसम्बन्धिनि जले राजनि० "तत्रान्तरिक्षं धारं कारं तौषारं हैममिति" आन्तरिक्षजलविभागे सुश्रुतः । भावप्र० तल्लक्षणादि उक्तं यथा "अपि नद्याः समुद्रान्ते वह्निरापश्च तद्भवाः । धूमावयवनिर्मुक्तास्तौषाराख्यास्तु ताः स्मृताः । अपथ्याः प्राणिनां प्रायो भूरुहाणान्तु ता हिताः । तुषाराम्बुहिमं रूक्षं स्याद्वातलमपित्तलम् । कफोरुस्तम्भकण्ठाग्निमेदोगण्डादिरोगनुत्" । नदीमारभ्य समुद्रपर्य्यन्तं वह्निरास्ते तद्भवा वह्निभवाः धूमावयवनिर्मुक्ताः धूमांशरहिता आपः तौषाराख्या इत्यर्थः ।

त्मन् पु० आत्मन्+आलोपः । आत्मनि "त्मनमूर्जं न विश्वध क्षरध्यै" ऋ० १।६३।८ । त्मनमात्मानम् । "आङोऽन्यत्रापि छन्दसि दृश्यते" पा० इत्यात्मन आकारलोपः संज्ञापूर्वकस्य विधेरनित्यत्वादुपधादीर्घाभावः" भा० । "त्मने तोकाय तनयाय मृड" ऋ० १।११४।६ । "उप त्मन्या वनस्पते" ऋ० १।१८८।१० 'त्मन्या आत्मना" भा० । तृतीयास्थाने या । "अश्वो घृतेन त्मन्या" यजु० २९।१०। "वनस्पतिरवसृष्टो न पाशैः त्मन्या" २०।४५ ।

त्यक्त त्रि० त्यज—कर्म्मणि क्त । कृतत्यागे उत्सृष्टे समुज्झिते अमरः "अदृष्टार्थत्यक्तद्रव्यस्वीकारः प्रतिग्रहः" शूलपाणिः त्यजधातौ उदा०।२त्यक्तुमुद्यते च "मदर्थे त्यक्तजीविताः" गीता "इत्युक्तः करुणं वाक्यं वानरैस्त्यक्तजीवितैः, रामा० कि० ५४ अ० ।

त्यज हानौ दाने च भ्वा० सक० पर० अनिट् । त्यजति अत्याक्षीत् तत्याज । त्यक्तव्यं त्याज्यम् त्यागः त्यक्तं त्यक्त्वा त्यागी । "त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् । ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्" चाणक्यः "योऽत्याक्षीत् संयुगं भयात्" भा० द्रो० ९५ अ० "तं तत्याजाहितं पुत्रम्" रामा० २।३६ अ० । "नैव नीलिवर्णेन कदाचित् त्यज्यते" पञ्चत०। (शूराः) "मदर्थे त्यक्तजीविताः" गीता "प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्द्धुषिस्तथा" मनुः "न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति" मनुः "त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः । यज्ञदानतपः कर्म न त्याज्यमिति चापरे" गीता "ज्ञातिसम्बन्धिभिस्त्वेते त्यक्तव्याः कृतलक्षणाः" मनुः "चतुष्पदाः स्वयूथेभ्यस्त्यक्तव्याः परभूमिषु" वृ०स०६०अ० । वेदे तु नि०। णलि तित्याज "यस्तित्याज सचिविदं सखायम्" ऋ०१०।७१।६। त्यागश्च स्वत्वध्वंसानुकूलव्यापारः न ममेदमित्याकारः। स च मूर्त्तद्रव्याणामेव भवति अमूर्त्तजीवनादेर्वियोजनरूपः । उपसर्गपूर्वकस्य तत्तदुपसर्गद्योत्यार्थयुक्तत्यागे इति भेदः ।

त्यजस् पु० त्यज—भावेऽसुन् । १त्यागे "इन्द्रस्य न त्यजसा वि ह्रुणाति" ऋ०१।१६६।१२।"त्यजसा त्यागेन" भा० कर्त्तरि असुन् ।२त्यागकर्त्तरि त्रि०।"चिद्धारयातेमहि ! त्यजः" ऋ०

१०|१४४|६| त्यजो दुःखस्य वर्जयितृ भा० "न तं तिग्मं चन त्यजो न" ऋ० ८|४७|७| करणे असुन्। २क्रोधे च क्रोधात् प्रयुज्यमानमायुधं मुच्यते इति तस्य तथात्वम्।

त्यद् त्रि० त्यज–"त्यजितनियजिभ्यो डित्" उ० अदि डिच्च|१प्रसिद्धे। अस्य सर्वनामतया त्यदादिकार्य्यम्, स्यः त्यौ त्ये त्यस्मै त्यस्मात् त्येषां त्यस्मिन्। स्त्रियां स्या त्ये त्याः। क्लीवे त्यद् त्ये त्यानीति भेदः। २सर्वदा परोक्षाभिधानार्हे वस्तुनि।

"द्वे वाव ब्रह्मणो रूपे मूर्त्तञ्चैवामूर्त्तञ्च मर्त्यञ्चामृतञ्च स्थितञ्च यच्च सच्च त्यच्च। तदेतन्मूर्त्तं यदन्यद्वायोश्चान्तरीक्षाच्चैतन्मर्त्यमेतत् स्थितमेतत् सत्तस्यैतस्य मूर्त्तस्यैतस्य मर्त्यस्यैतस्य स्थितस्यैतस्य सत एष रसो य एष तपति सतो ह्येष रसः। अथामूर्त्तं वायुश्चान्तरिक्षं चैतदमृतमेतद्यदेतत्त्यत्तस्यैतस्यामूर्त्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्यैष रसो य एष एतस्मिन्मण्डले पुरुषस्त्यस्य ह्येष रस इत्यधिदैवतम्" बृ० उ०। "ते एते द्वे वाव" वावशब्दोऽवधारणार्थः। द्वे एवेत्यर्थः। ब्रह्मणो परमात्मनो रूपे रूप्यते याभ्यामरूपं परमब्रह्माविद्याध्यारोपणाभ्यां के ते द्वे। मूर्त्तञ्च एव मूर्त्तमेव च। तथा अमूर्त्तञ्च एवामूर्त्तमेव चेत्यर्थः। अन्तर्नीतस्वात्मविशेषणे मूर्त्तामूर्त्ते द्वे एवेत्यवधार्य्येते। कानि पुनस्तानि विशेषणानि मूर्त्तामूर्त्तयोरित्युच्यन्ते। मर्त्यं मरणधर्म्यमृतञ्च तद्विपरीतम्। स्थितं परिच्छिन्नं गतिपूर्वकं यत् स्थास्नु। यच्च यातीति यद्व्याप्यपरिच्छिन्नं स्थितविपरीतम्। सच्च सदित्यन्येभ्यो विशेष्यमाणासाधारणधर्मविशेषवत्। त्यच्च तद्विपरीतं त्यदित्येव सर्वदा परोक्षाभिधानार्हम्। अथामूर्त्तमधुनाऽमूर्त्तमुच्यते। वायुश्चान्तरिक्षञ्च यत्परिशेषितं भूतद्वयं एतदमृतममूर्त्तत्वादस्थितमतोऽविरुध्यमानं केनचिदमृतममरणधर्म्म तद्यत् स्थितविपरीतं व्याप्यपरिच्छिन्नं यस्मादेतदन्येभ्योऽपरित्यज्यमानविशेषमतस्त्यत्त्यदिति परोक्षाभिधानार्हमेव पूर्ववत्। तस्यैतस्यामूर्त्तस्यैतस्यामृतस्यैतस्य यत एतस्य त्यस्य चतुष्टयविशेषणस्यामूर्त्तस्यैव रसः। कोऽसौ। य एष एतस्मिन्मण्डले पुरुषः करणात्मको हिरण्यगर्भः प्राण इत्यभिधीयते। यः स एषः अमूर्त्तस्य भूतद्वयस्य रसः पूर्ववत् सारिष्ठः, एतत्पुरुषसारञ्चामूर्त्तं भूतद्वयं हैरण्यगर्भलिङ्गारम्भाय हि भूतद्वयाभिव्यक्तिरव्याकृतात्तस्मात्तादर्थ्यात्तत् सारं भूतद्वयम्। त्यस्य ह्येष रसो यस्माद्यो मण्डलस्थः पुरुषो मण्डलवच्च त्यत्सारस्य भूतद्वयस्य च साधर्म्यम्। तस्मादुक्तं प्रसिद्धवद्धेतूपादानं त्यस्य ह्येष रस इति" पा० भाष्यम् "सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम्" वेणी०। अव्ययीभावे शरदा० अच् समासान्तः। उपत्यदम्।

त्यदादि पु० पा० गणसूत्रोक्ते शब्दसमूहे। स च गणः "त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवत् किम्" "त्यदादीनामः" पा० अत्र अत्वविधौ द्विपर्य्यन्तस्यैव ग्रहणमिति भाष्यकारेष्टिः।

त्याग पु० त्यज–भावे घञ्। उत्सर्गे मूर्तद्रव्यस्य स्वत्वध्वंसानुकूलव्यापारे न ममेदमित्याकारे। "न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति" "उन्मत्तं पतितं क्लीबमबीजं पापरोगिणम्। न त्यागोऽस्ति द्विषन्त्याश्च न च दायापवर्तनम्" मनुः अमूर्तद्रव्यस्य २वियोगमात्रे च। त्यागश्च सात्त्विकादिभेदात् त्रिविधः। यथाह गीता "नियतस्य तु सन्न्यासः कर्मणो नोपपद्यते। मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः। दुःखमित्येव यत् कर्म कायक्लेशभयात् त्यजेत्। स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्। कार्य्यमित्येव यत् कर्म नियतं क्रियतेऽर्जुन!। सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः"। विशेषणाभावात् विशेष्याभावात् उभयाभावाच्च पुनरपि सात्त्विकस्त्यागः त्रिविधः तथा हि फलाभिसन्धिपूर्वककर्मत्यागः सत्यपि कर्मणि फलाभिसन्धित्यागादेकः। स च सात्त्विकत्वादादेयः। सत्यपि फलाभिसन्धौ कर्मत्यागात् द्वितीयः। स च दुःखबुद्ध्या कृतो राजसः विपर्य्यासेन कृतस्तामसः इति भेदः। द्विविधोऽपि हेयो भवति। फलाभिसन्धेः कर्मणश्च त्यागात् तृतीयः। स च कर्मानधिकारिकर्तृको नैर्गुण्यरूपः। सोऽपि साधनफलभेदेन द्विविधः। तत्र सात्त्विकेन फलाभिसन्धित्यागपूर्वककर्मानुष्ठानरूपेण त्यागेन शुद्धान्तःकरणस्योत्पन्नविविदिषस्य आत्मज्ञानसाधनश्रवणाख्यं वेदान्तविचाराय फलाभिसन्धिरहितस्यान्तःकरणशुद्धौ सत्यां तत्साधनस्य परित्यागः स एकः साधनभूतो विविदिषासन्न्यास उच्यते। जन्मान्तरकृतसाधनाभ्यासपरिपाकादस्मिन् जन्मनि आदावेवोत्पन्नात्मबोधस्य कृतकृत्यस्य स्वत एव फलाभिसन्धेः कर्मणश्च परित्यागः फलभूतः स विद्वत्सन्न्यास इत्युच्यते। "त्यागप्रपञ्चरूपस्य चिदात्मत्वावलोकनात्। त्यागो

हि महतां पूज्यः सद्यो मोक्षमयो यतः । त्यागेन युक्ता दिवमुत्पतन्ति त्यागेन हीना नरकं व्रजन्ति । न त्यागिनां दुष्करमस्ति किञ्चित् त्यागो हि सर्वव्यसनानि हन्ति” शब्दार्थचि० धृतवाक्यम् ।

त्यागिन् त्रि० त्यज–घिणुन् । १ दातरि, २शूरे, ३वर्ज्जनशीले, ४कर्मफलत्यागिनि च “न द्वेष्ट्यकुशलं कर्म कुशलेनानुषज्जते । त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः । न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः । यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते” गीता· “आत्मनस्त्यागिनां चैव निवर्त्तेतोदकक्रिया” मनुः ।

त्यागिमन् त्रि० त्यागेन निष्पन्नं त्याग+इमन् । त्यागेन निर्वृत्ते ।

त्याज्य त्रि० त्यज+ण्यत् कुत्वाभावः । १वर्ज्जनीये “तीरे प्रतिग्रहस्त्याज्यस्त्याज्यो धर्मस्य विक्रयः” प्रा० त० । २दातुं योग्ये च । “त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता” रघुः । “सा त्ववाप्यान्यतो गर्भं त्याज्या भवति पापिनी । महापातकदुष्टा च पतिगर्भविनाशिनी” व्यासस० ।

त्रक गतौ भ्वा० आत्म०सक०सेट् । त्रकते अत्रकिष्ट । तत्रके ।

त्रख गतौ भ्वा० पर० सक० सेट् धातुपाठः । त्रखति अत्रखीत् अत्राखीत् । तत्राख । [अत्रङ्खीत् । तत्रङ्ख ।

त्रङ्ख गतौ भ्वा० पर० सक० सेट् इदित् धातुपाठः । त्रङ्खति

त्रग गतौ भ्वा० पर०सक० सेट् इदित् । त्रङ्गति अत्रङ्गीत् । तत्रङ्ग । अयं दिवा० धातुपाठः । त्रङ्ग्यति ।

त्रङ्ग पुंस्त्री त्रगि–अच् । पुरभेदे हरिश्चन्द्रपुरे सौभे उद्गङ्गे पतिमार्गके त्रिका० ।

त्रन्द चेष्टायां भ्वा० पर० अक० सेट् इदित् । त्रन्दति अत्रन्दीत् । तत्रन्द ।

त्रप लज्जायां भ्वा०आ० अक० वेट् । त्रपते अत्रपिष्ट अत्रप्त त्रेपे । णिच् वा घ० । त्रपयति त्रापयति । षित् त्रपा । “कान्तया कान्तसंयोगे किमकारि नवोढ़या । अत्रापि च क्रिया प्रश्नोत्तरा शुभ्रा न बुध्यते” विदग्धमुख० । “अपेक्षाभिक्षायामपि किमपि चेतस्त्रपयति” शान्तिश० । अप–अन्यतो लज्जायाम् “तस्माद्बलैरपत्रेपे” भट्टिः । “लज्जा सापत्रपान्यतः” अमरः ।

त्रपा स्त्री त्रप–भावे अङ् । १लज्जायाम् अमरः । कर्त्तरि अच् । २सलज्जे त्रि० । ३कुलटायां स्त्री मेदि० । ४कुले ५कीर्त्तौ च शब्दच० ।

त्रपाक पुंस्त्री० त्रप–आक । म्लेच्छजातिभेदे उणादि० ।

त्रपारण्डा स्त्री त्रपायां रण्डा । लज्जाहीनायां वेश्यायां जटा० शब्दक० वस्तुतः त्रपारण्डेति नामद्वयं मेदिनौ त्रपाशब्दस्य वेश्यार्थकत्वोक्तेः रण्डाशब्दस्य च तदर्थप्रसिद्धेस्तत्समानार्थकत्वौचित्यात् ।

त्रपिष्ठ त्रि० अतिशयेन तृप्रः अतिशायने इष्ठन् प्रियादि० त्रपादेशः । तृप्रतरे । [स्त्रियां ङीप् ।

त्रपीयस् त्रि० अतिशयेन तृप्रः ईयसुन् त्रपादेशः । तृप्रतमे

त्रपु न० अग्निं दृष्ट्वा त्रपते लज्जते इव त्रप–उन् । १सीसके २रङ्गे च मेदि० तस्य विकारः अण् “त्रपुजतुनोः षुक् च” पा० षुक् च । त्रापुष तद्विकारे त्रि० । “ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य च” मनुः । “सुवर्णस्य मलं रूप्यं रूप्यस्यापि मलं त्रपु । ज्ञेयं त्रपुमलं सीसं सीसस्यापि मलं मलम्” भा०उ० २८ अ० । [लताभेदे ।

त्रपुकर्कटी स्त्री त्रपु इव शुभा कर्कटी । (ससा) इति ख्याते

त्रपुटी स्त्री त्रप–बा०-उटक् गौरा० ङीष् । सूक्ष्मैलायाम् । रत्नमाला ।

त्रपुल न० त्रप–बा० उल । रङ्गे द्विरूपकोषः ।

त्रपुष(स) न० त्रपुस्याः(ष्याः)फलम् अण् फले तस्य लुप् । त्रपुषी(सी)फले । “त्रपुसं(षं) लघु नीलञ्च नवं तृट्क्लमदाहजित् । स्वादु पित्तापहं शीतं रक्तपित्तहरं परम् । तत् पक्वमम्लमुष्णं स्यात् पित्तलं कफवातनुत् । तद्वद्धन्मूत्रलं शीतं रूक्षं पित्तास्रकृच्छ्रजित्” भावप्र० ।

त्रपु(ष)स न०त्रप-बा०उस(ष) । १रङ्गे द्विरूपकोषः । गौरा० ङीष् २माहेन्द्रवारुण्यां कर्कटीभेदे (ससा) लताभेदे । सा च पीतपीष्पा काण्डालुः बहुफला तुन्दिलफला कण्टकफला सुधावासा च ।

त्रप्सा स्त्री घनीभूतश्लेष्मादौ । “कृमिकीटपदक्षेपैर्दूषिता यत्र मेदिनी । त्रपसया कर्षणैः क्षिप्ता वान्तैर्वा दुष्टतां व्रजेत् । भस्मपङ्कटखैर्वापि नखदण्डतनूजत्वक्तुषपांशुरजोमलैः । प्रच्छन्ना मलिना भवेत्” “त्रपसा घनीभूतश्लेष्मादि” शु०त० ।

त्रप्स्य न० घनेतरदधनि अमरटीकायां विद्याविनोदः ।

त्रय न०स्त्री त्रयाणामवयवम् अयच् । त्रितये १त्रित्वसंख्यायाम् “वेदत्रयं निरदुहत् भूर्भुवः स्वरितीति च” मनुः । स्त्रीत्वपक्षे ङीप् । “व्याघोतिष्ट सभावेद्यामसौ नरशिखित्रयी” माघः त्रयोऽवयवा अस्य अयच् । २त्रित्वसंख्यान्विते त्रि० स्त्रियां ङीप् । “प्रत्यक्षमनुमानञ्च शास्त्रञ्च विविधागमम् । त्रयं सुविदितं कार्य्यं धर्म-

शुद्धिमभीप्सता:” मनुः ङीषन्तः “ऋग्यजुःसामरूपे ३वेदत्रये त्रित्वसंख्यान्वितेषु ऋगादिवेदेषु अमरः “एतद्विदन्तो विद्वांसस्त्रयीनिष्कर्षमन्वहम्” “त्रैविद्येभ्यस्त्रयीं विद्याद्दण्डनीतिञ्च शाश्वतीम्” मनुः। “ब्रह्माऽथ पुरुषो रुद्रस्त्रयमेतत् त्रयीमयम्। सर्गादावृङ्मयो ब्रह्मा स्थितौ विष्णुर्यजुर्मयः। रुद्रः साममयोऽन्ताय तस्मात् तस्याशुचिर्ध्वनिः” मनुः।४पुरन्ध्र्यां ५सुमतौ स्त्र्यां विश्वः ६सोमराजीवृक्षे स्त्री शब्दच०। ७भवान्याम् दुर्गायाम्। यथा “ऋग्यजुःसामभागेन साङ्गवेदगतापि या। त्रयीति पठ्यते लोके दृष्टा दृष्टार्थसाधिनीति” देवीपु०।

त्रयःपञ्चाशत् स्त्री त्र्यधिका पञ्चाशत् त्रिशब्दस्य त्रय आदेशः। (निपात्य)१त्र्यधिकपञ्चाशत्संख्यायां २तत्संख्यान्विते च बहुत्वेऽप्येकत्वम्। एवं त्रयोदशत्रयोविंशतित्रयस्त्रिंशत् त्रयश्चत्वारिंशत् प्रभृतयः त्र्यधिकदशादिसंख्यायां तत्संख्येये च। इयांस्तु भेदः अशीतिभिन्ने चत्वारिंशदादौ वा त्रय आदेशः। तेन पक्षे त्रिचत्वारिंशादित्यादि तत्रार्थे अशीतौ नेति त्र्यशीतिः।

त्रययाय्य पु० त्रयं जन्मत्रयं याति या-बा० आय्य। जन्मत्रयप्राप्ते “सूनुर्न त्रययाय्यः” ऋ० ६।२।७। “त्रययाय्यो जन्मत्रयं प्राप्तः। जन्मत्रयं स्मर्यते। मातुरग्रेऽधिजननात् द्वितीयं मौञ्जिबन्धनात्। तृतीयं यज्ञदीक्षाया इति जन्मत्रयं स्मृतमिति” तादृशः पुत्र इति भा०।

त्रयस्त्रिंश त्रि० त्रयस्त्रिंशत्+पूरणे डट्। त्र्यधिकत्रिंशत्संख्यापूरणे स्त्रियां ङीप्।

त्रयस्त्रिंशत्पति पु० त्रयस्त्रिंशतो देवानां पतिः। १इन्द्रे हेमच०। २प्रजापतौ च तयोः त्र्यधिकत्रिंशतो देवानां पतित्वात् तथात्वम्। देवानां त्रयस्त्रिंशत्त्वं तु

“अष्टौ वसवः एकादश रुद्रा द्वादशादित्या इमे एव द्यावा पृथिवी त्रयस्त्रिंश्यौ, त्रयस्त्रिंशद्वै देवाः प्रजापतिश्चतुस्त्रिंशस्तदेनं प्रजापतिम्” शत० ब्रा० ४।५।६।२। “कतमे ते त्रयस्त्रिंशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशत् इन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति” शत० ब्रा० ११।६।३।५। तु अन्यथोक्ता अस्मिन् पक्षे निर्द्धारणसप्तम्यासमासात् इन्द्रप्रजापतिपरत्वम् तयोस्तेषां मध्ये श्रेष्ठत्वेन पतित्वात्तथात्वमिति बोध्यम्। रामा० १। “आदित्यांश्च वसूंश्चैव रुद्रांश्चैवाश्विनावपि” २०। अन्यथा संख्योक्ता।

त्रयस्त्रिंशस्तोम पु० त्रयस्त्रिंशत् स्तोमा अस्य पृषो०। यज्ञभेदे। “त्रयस्त्रिंशस्तोमेन शोणः सात्रासाहः पाञ्चालो राजा। तदेतद्गाथयाऽभिगीतम् “सात्रासाहे यजमानेऽश्वमेधेन तौर्वशाः। उदीरते त्रयस्त्रिंशाः षट् सहस्राणि वर्मिणाम्” शत० ब्रा० १३।५।४।१६।

त्रयस्त्रिंशिन् न० त्रयस्त्रिंशत् ऋचः सन्त्यस्मिन् इनि डिच्च। त्रयस्त्रिंशदृग्भिर्गीयमाने सामभेदे। “त्रयस्त्रिंशि नाम साम माध्यन्दिने पवमाने भवति” तैत्ति० १।२।२।४

त्रयीतनु पु० त्रयी वेदा एव तनुरस्य। १सूर्ये हला०। “स्वर्गद्वारं त्रय्या विद्यया भगवन्तं त्रयीमयं सूर्यमात्मानं यजन्ते” भाग०५।२०।७। तस्य त्रयीमयत्वोक्तात्तथात्वम्।

त्रयीधर्म्म पु० त्रय्या वेदत्रयेण विधीयमानो धर्मः शाक०। वैदिके धर्मे ज्योतिष्टोमादौ अमरः।

त्रयीमय पु०त्रय्यात्मकः मयट्। १सूर्ये त्रयीतनुशब्दे दृष्टा० २त्रयीधर्म्मात्मके त्रि०। “एवं मुहूर्त्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि सौरो रथस्त्रयीमयोऽसौ चतसृषु परिवर्त्तते पुरीषु” भाग० ५ २१।१७। “त्रयीमयं रूपमिदञ्च शौकरम्” इत्युक्ते वाराहे ३रूपे न०सद्रूपविवृतिस्तत्रैव “स्रुक्तुण्ड आसीत् स्रुव ईश ! नासयोरिडोदरे चमसाः कर्णरन्ध्रे। प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रम्। दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयणीयदंष्ट्रः जिह्वाप्रवर्ग्यस्तव शीर्षकं क्रतोः सत्यावसथ्यं चितयोऽसवो हि ते। सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव ! धातवः। सत्राणि सर्वाणि शरीरसन्धयस्त्वं सर्वयज्ञक्रतुरिष्टिबन्धनः। नमो नमस्तेऽखिलमन्त्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने” भाग० ३।१३।४०। ४परमेश्वरे च पु०। “स एष आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः” भाग०२।४।१९।

त्रयीमुख पु० त्रयी मुखेऽस्य। विप्रे हेमच०।

त्रयोदशन् त्रि०त्रयश्च दश च, त्र्यधिका वा दश शाक० त्रय आदेशः। १त्र्यधिकदशसंख्यायां २तत्संख्यान्विते च। “क्वचित् द्वादश मासाः संवत्सराः क्वचित् त्रयोदश मासाः” श्रुतिः म०त०। ततः पूरणे डट्। त्रयोदश तत्पूरणे त्रि० “ज्यैष्ठे ज्येष्ठस्य कुर्वीत त्रयोदशादिनात् परम्” ज्यो०। स्त्रियां ङीप्। सा च चन्द्रस्य त्रयोदशकलाक्रियात्मके तिथिभेदे सा च स्मरतिथिः तत्रैव तस्योत्पत्तेः। “त्रयोदशी पञ्चदशी च माघे” मन्वादिकथने “वरुणेन समायुक्ता मधौ कृष्णा त्रयोदशी” वारुणीकथने च ति०त०।

त्र्यारुण पु० मान्धातृवंश्ये त्रिधन्वनः सुते नृपभेदे “राज्ञ

स्त्रिधर्मणश्चासीत् विद्वांस्त्रय्यारुणः सुतः" हरिवं०१२अ०।

त्रस गतौ ग्रहे निषेधे च चुरा० उभ० सक० सेट्। त्रसयति ते अतित्रसत् त।

त्रंस भाषे वा चुरा० उभ० पक्षे भ्वा० पर० अक० सेट् इदित्। त्रंसयति ते त्रंसति अतत्रंसत् त अत्रंसीत्।

त्रस भये वा दिवा० पक्षे भ्वा०पर०अक०सेट्। त्रसति अत्रासीत् अत्रसीत् तत्रास फणा० त्रेसतुः तत्रसतुः। ईदित् त्रस्तः। त्रस दिवादित्वे सार्वधातुके श्यन्। त्रस्यति। "त्रस्यन्ती चलशफरीविघट्टितोरूः" माघः "त्रसत्तुराद्रिसुतासंभ्रमस्वयंग्रहाश्लेषसुखेन निष्क्रियाम्" "कुञ्जरत्रसद्भिरपि यत्र गौरवात्" माघ। "त्रस्यन् वै जायमानेभ्यः" भट्टिः। "ततो रामेति चक्रन्दुस्त्रेसुः परिदिदेविरे" भट्टिः "कपेरत्रासिषुर्नादात् मृगाः सिंहध्वनेरिव" भट्टिः। "राक्षसस्य न चात्रासीत् प्रनष्टुमयतिष्ट च" भट्टिः।

उद्+उत्कटत्रासे। "बालानुत्त्रासयन्ति ह" हरिवं०२२७७।

त्रस त्रि० त्रस-भये आधारे घञर्थे क।१वने त्रिका०। त्रस-गतौ अच्। २जङ्गमे त्रि० अमरः। त्रसरेणुः।

त्रसदस्यु पु० मान्धातृपौत्रभेदे। "तस्यामुत्पादयामास मान्धाता द्वौ सुतौ नृप!। पुरुकुत्सञ्च धर्मज्ञं मुचुकुन्दञ्च धार्मिकम्। पुरुकुत्ससुतस्त्वासीत् त्रसदस्युर्महीपतिः" हरिवं० १२ अ०। [३त्रासयुक्ते त्रि०।

त्रसन न० त्रस-भावे ल्युट्। १भये २उद्वेगे कर्तरि ल्यु।

त्रसर पु०त्रस-अरन्। तन्तुवायोपकरणभेदे (तासनी) अमरः

त्रसरेणु पु० त्रसः चलो रेणुः कर्म०। "जालान्तरगते भानौ सूक्ष्मं यद्दृश्यते रजः। प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते" मनूक्ते गवाक्षान्तर्गतसूर्य्यकिरणेषु १दोधूयमाने रजसि २परमाणुषट्कात्मके द्व्यणुकत्रयात्मके रजसि "परमाणुद्वयेनाणुस्त्रसरेणुस्तु ते त्रयः" ब्रह्मवै०। "जालान्तरगते सूर्य्यकरे ध्वंसी विलोक्यते। त्रसरेणुस्तु विज्ञेयः त्रिंशता परमाणुभिः" इति वैद्यकपरिभाषया ३त्रिंशत्परमाणुरूपे रजसि च। ४सूर्य्यपत्नीभेदे स्त्री त्रिका०।

त्रसुर त्रि० त्रस-उरच्। भीरौ संक्षिप्तसारः।

त्रस्त त्रि० त्रस-क्त। १भीते २चकिते। ३शीघ्रे न०। "त्रस्तौ समासन्नकरेणुसूत्कात्" "त्रस्तः समस्तजनहासकरः करेणुः" माघः "जुगोपात्मानमत्रस्तः" रघुः।

त्रस्नु त्रि० त्रस-क्नु। भीरौ त्रासशीले अमरः। "सीतां सौमित्रिणा त्यक्तां स भीचीं त्रस्नुमेकिकाम्" भट्टिः "अत्र त्रस्नुभिर्युक्तधुरं तुरङ्गैः" रघुवंशकाव्यम्।

त्रा पालने अदा० आ० सक० अनिट् क्रमदीश्वरः। त्राति अत्रात। "कान्तारे ब्राह्मणान् गाश्च यः परित्राति कौशिकः!" भा०अनु०७२अ०। आर्षत्वात् पदव्यत्ययः।

त्राण न०त्रै-पालने भावे ल्युट् भावे क्त तस्य नो वा।१रक्षणे। कर्मणि क्त वा तस्य नः।२रक्षिते त्रि० ३त्रायमाणालतायां न० मेदि० तत्रार्थे स्त्री राजनि०। "न कुर्यादात्मनस्त्राणं गोरकृत्वा तु शक्तितः" मनुः। [भावे क्त। २रक्षणे न०।

त्रात त्रि० त्रै-कर्मणि क्त वा तस्य नत्वाभावः। १रक्षिते

त्रापुष त्रि०त्रपुणा निर्वृत्तम् अण् षुक् च। रङ्गमये पात्रादौ।

त्रामन् त्रि०त्रै-पालने मनिन्।१रक्षके "तव त्रामभिरिन्द्र! तूर्वयानम्" ऋ० १।५३।१०।

त्रायन्ती स्त्री त्रै-सम्प० भावे क्विप् त्राः तामयति गच्छति भ्वा० इ गतौ शतृ-ङीप्। त्रायमाणालतायाम् अमरः। "त्रायन्ती तुवरा तिक्ता सरा पित्तकफापहा। ज्वरहृद्रोगगुल्मास्रभ्रमशूलविषप्रणुत्" भावप्र०। "कलसी बृहती द्राक्षा त्रायन्ती निम्बगोक्षुरीः" सुश्रु०। स्वार्थे क। त्रायन्तिका तत्रार्थे "प्रियङ्ग्वनन्तायूथिकापद्मात्रायन्तिकालोहितकाम्बष्ठादाडिमत्वक्शालपर्णीपद्मतुङ्गकेशरधातकीबकुलशाल्मलीश्रीवेष्टकमोचरसेष्वरिष्टानयस्कृतीर्लेहानासवान् कुर्वीत" सुश्रु०।

त्रायमाण त्रि० त्रायते त्रै-कर्मणि शानच्। १रक्ष्यमाणायां (बाला)ख्यातायां २लतायाम् अमरः। स्वार्थे क। तत्रार्थे स्त्री राजनि०। [दशीभवे।

त्रायोदश त्रि० त्रयोदश्यां भवं सन्धिवेला० अण्। त्रयो-

त्रास पु०त्रस-भावे घञ्। १भये "त्रासाकुलः परिपतन् परितो निकेतान्" माघ०।२मणिदोषभेदे च मेदि०।

त्रासन न०त्रस-णिच् भावे ल्युट्। १भयोत्पादने कर्तरि ल्यु। २भयोत्पादके त्रि०।

त्रि त्रि० ब० व० तॄ-ड्रि। त्रित्वसंख्याविशिष्टे। "इति वेदास्त्रयस्त्रयी" अमरः "न्यायैस्त्रिभिरुदीरणम्" कुमा० "त्रिभ्य एव तु वेदेभ्यः पादत्रयमदूदुहत्" मनुः। स्त्रियां गौणत्वे मुख्ये च विभक्तौ परतः तिस्रादेशः। तिस्रः अतितिस्रा कैश्चित्तु प्रियत्रिसेत्युदाहृतम् तच्चिन्त्यम् "तिसृभिस्त्वमवस्थाभिर्महिमानमुदीरयन्" कुमा०। त्रयाणां वेदे तु क्वचित् त्रीणामिति रूपं "महि! त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः" ऋ०१०।१८५।१।

त्रिंश त्रि० त्रिंशत्+पूरणे डट्। त्रिंशत्पूरणे, त्रिंशत्तमे

"त्रिंशांशकस्तथा राशेर्भाग इत्यभिधीयते" सू० सि० ।

त्रिंशक त्रि० त्रिंशता क्रीतः वुन् डिच्च । त्रिंशत्संख्यान्वितद्रव्येण क्रीते वस्तुनि ।

त्रिंशत् त्रि० त्रयोदशतः परिमाणमस्य नि० । १त्रिदशकसंख्यायां २तत्संख्यान्विते च । तत्र संख्येये "निमेषा दश चाष्टौ च काष्ठाः त्रिंशत्तु ताः कलाः। त्रिंशत् कला मुहूर्त्तः स्यादहोरात्रन्तु तावतः" "त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम्" मनुः "संख्यायां "तत्त्रिंशता भवेन्मासः" सू० सि० ।

त्रिंशत्क त्रि० त्रिंशत्परिमाणमस्य कन् । १त्रिंशत्परिमाणे अवयवे कन् । २तत्संख्यायाम् "अमावास्याः पृथक् तेषां त्रिंशत्कं परिचक्षते" कामन्द० ।

त्रिंशति स्त्री त्रिंशत्+पृषो० । १त्रिंशत्संख्यायां २तत्संख्येये च । "पञ्चकं मण्डलं जय्यं त्रिंशत्याश्च मनीषिभिः" काम० ।

त्रिंशत्तम त्रि० त्रिंशतः पूरणः तमप् । १त्रिंशत्संख्यापूरणे स्त्रियां ङीप् । "ततस्त्रिंशत्तमे व्यूहे पङ्क्तिष्वतिष्ठन्" शत० ब्रा० १०।४।२।२२ ।

त्रिंशत्पत्र न० त्रिंशत्संख्यानि पत्राणि दलानि प्रतिपुष्पमस्य । १कुमुदे शब्दमाला ।

त्रिंशांश पु० त्रिंशस्त्रिंशत्पूरणोऽंशः । राशेस्त्रिंशत्पूरणे भागे षष्टिकलात्मके भागे षड्वर्गान्तर्गतानां राशिभेदे तेषामंशविशेषाणामधिपतयः ज्यो० उक्ता यथा

"पञ्च पञ्चाष्टसप्ताख्या विषमे त्रिंशदंशकाः । माहेयशनिजीवज्ञशुक्राणां व्युत्क्रमात् समे" । विषमराशौ कुजशनिगुरुबुधशुक्राणां पञ्च पञ्चाष्टसप्तपञ्चमितास्त्रिंशांशकाः क्रमात् ज्ञेयाः । समे राशौ व्युत्क्रमात् तेषां विपर्य्ययेण त्रिंशांशा ज्ञेयाः । यथा मेषो विषमराशिः तत्र प्रथमावधिपञ्चांशा भौमस्य । षष्ठांशमारभ्य दशमांशपर्य्यन्तं पञ्चांशाः शनेः । एकादशांशमारभ्याष्टादशांशपर्य्यन्तमष्टावंशा गुरोः । ऊनविंशांशमारभ्य पञ्चविंशांशपर्य्यन्तं सप्तांशा बुधस्य । ततः षड्विंशांशमारभ्य त्रिंशांशपर्य्यन्तं पञ्चांशाः शुक्रस्य त्रिंशांशाः क्रमात् ज्ञेयाः । मिथुनसिंहतुलाधनुःकुम्भेष्वप्येवम् । समराशौ व्युत्क्रमाद्यथा । वृषे प्रथमांशमारभ्य पञ्चांशा भृगोः । ततो द्वादशांशपर्य्यन्तं सप्तांशा बुधस्य, ततो विंशांशपर्य्यन्तमष्टावंशा गुरोः । ततः पञ्चविंशांशपर्य्यन्तं पञ्चांशाः कुजस्य त्रिंशांशाः । एवं कर्ककन्यावृश्चिकमकरमीनेष्वपि बोध्याः । त्रिंशदंशका इत्यत्र वृत्तौ त्रिभागवत् पूरणार्थता

त्रिंशिन् त्रि० त्रिंशत् प्रमाणमस्य इनि डिच्च । त्रिंशत्प्रमाणे स्त्रियां ङीप् ।

त्रिक न० त्रयाणां संघः कन् । १त्रित्वसङ्ख्यायाम् २पृष्ठवंशाधोभागे, ३कटिभागे, ४त्रिफलायाम् (हरितक्यामलकीवयस्थाफलत्रये) ५त्रिकटुनि, (शुण्ठीपिप्पलीमरिचत्रये) । वातादिषु मिलितेषु त्रिषु कायति कै-क । ६गोक्षुरे पु० अमरः । ७त्रिपथसंस्थाने हेम० । ८त्रिमदे "गुडूचीसारसंयुक्तात् त्रिकत्रयसमन्वयात् । वातरक्तं निहन्त्याशु सर्वरोगहरस्त्वयः" सुखबोधः त्रिकत्रयं त्रिकटु त्रिमदम् त्रिफलम् चेति त्रयमित्यर्थः । "युगं सत्कारविवर्त्तितत्रिकः" माघः । "व्यपोढ़पार्श्वैरपवर्त्तितत्रिका" किरा० । "त्रिफला तु फलत्रिकम्" "कश्चिद्विवृत्तत्रिकभिन्नहारः" रघुः । "एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथा" हारिका० । तृतीयेन रूपेण ग्रहणं यस्य कन् पूरणप्रत्ययस्य वा लुक् । ९तृतीयके त्रि० । त्रयः अधिकाः शुल्कं लाभो वृद्धिर्वा यत्र शतादौ १०त्र्यधिकलाभादियुक्ते शतादौ । "द्विकं त्रिकं चतुष्कञ्च पञ्चकञ्च शतं समम् । मासस्य वृद्धिं गृह्णीयात् वर्णानामनुपूर्वशः" मनुः । (शतकरा तिनटाका सुद) "स्फिगस्थ्नोः पृष्ठवंशास्थ्नोर्यः सन्धिस्तत्त्रिकं स्मृतम्" इत्युक्ते ११सन्धिभेदे न० ।

त्रिककुद् पु० त्रीणि ककुदतुल्यानि शृङ्गाण्यस्य ककुदस्य अन्त्यलोपः समा० । त्रिकूटाख्ये पर्वतभेदे अमरः । पर्वत एवास्य अन्त्यलोपः नान्यत्र । तत्र त्रिककुद तद्युक्ते त्रि० । २विष्णावपि पु० वा अन्त्यलोपः । "तथैवासं त्रिककुदो वाराहं रूपमास्थितः । त्रिककुत् तेन विख्यातः शरीरस्य प्रमापणात्" भा० शा० ३४४ अ० । ३दशरात्रसाध्ये यज्ञभेदेऽपि वा अन्त्यलोपः । "त्रिककुद्वा एष यज्ञो यद्दशरात्रः ककुत् पञ्चदशः ककुदेकविंशः ककुत्त्रयस्त्रिंशो य एवं विद्वान् दशरात्रेण यजते त्रिककुद एव समानानाम्" तै०स०७।२।५।२ । "चतुष्टोमात् समूढात् त्रिककुदः शस्त्रम् अथ महात्रिककुदस्य, छन्दोमत्रिककुदस्य" सा० श्रौ० १८।२८।१४ । "यत्र वा इन्द्रो वृत्रमहंस्तस्य यदक्ष्यासीत्तं गिरिं त्रिककुदमकरोत्" शत० ब्रा० ३।१।३।१२ । "वर्षिष्ठः पर्वतानां त्रिककुन्नाम ते पिता" अथ० ४।९।८ ।

त्रिककुभ् पु० त्रेधा कं पीतमुदकं स्कुभ्नाति स्कुन्भ क्विप् छान्दसः सलोपः । १उदाने वायौ "उदानो वै त्रिककुप्छन्दः" शत० ब्रा० ८।५।२।४। २नवरात्रसाध्ये यज्ञ०

भेदे। त्रिककुभोऽप्यत्र। त्रिककुब्व्यूढः पृष्ठ्यः। महात्रिककुप् व्यूढो नवरात्रः। समूढस्त्रिककुप्समूढः" आश्वा० श्रौ० १०।२।२१ नवरात्र इत्यनुवर्त्तते, नारा० "चतुष्टोम त्रिककुब्व्यूढोऽभिप्लवः एतैश्चतुर्भिः स्वानां श्रैष्ठ्यकामो यजेत। २२ एतैस्त्रिककुम्महात्रिककुप्समूढस्त्रिककुप् चतुष्टोमत्रिककुब्भिः स्वानां श्रैष्ठ्यकामो यजेत। एतेषां दशमो वैश्वानर एव भवति। कामश्चैतेषामेकैकेन सम्बध्यते" नारा०।

त्रिककुब्धामन् पु० मूर्द्धाधोमध्याभेदेन तिसृणां ककुभां दिशां समाहारः त्रिककुब् तत् धाम आश्रयो यस्य। विष्णौ विष्णु स०। [गोक्षुरवृक्षे शब्दर०।

त्रिकट पु० त्रीन् वातादिदोषान् कटति आवृणोति अच्।

त्रिकटु न० त्रयाणां कटुरसानां समाहारः। मिलितेषु शुण्ठीपिप्पलीमरिचेषु हेम०। "विश्वोपकुल्यामरिचं त्रयं त्रिकटु कथ्यते। त्र्यूषणं दीपनं हन्ति श्वासकासत्वगामयान्। गुल्ममेहकफस्थौल्यमेदश्लीपदपीनसान्" भावप्र०।

त्रिकण्ट पु० त्रयः कण्टाः कण्टका अस्य। १गोक्षुरे २स्नुहीवृक्षे, च रत्नमा०।(टेङ्गरा)३मत्स्यभेदे शब्दर०।४पत्रगुप्ते शब्दच०। वृहत्यग्निदमनीदुःस्पर्शात्मके ५द्रव्ये राजनि०।

त्रिकण्टक पु० स्त्री लघुगर्गमत्स्ये त्रिका० समा० द्वि०। २कण्टकत्रये स्त्री। ततः परिमाणे रजता०अञ्। त्रैकण्टक तत्परिमाणे। त्रयः कण्टका अस्य। ३गोक्षुरकवृक्षे पु० हेमच०।४कण्टकत्रयान्विते त्रि०।

त्रिकद्रुक पु०ज्योतिर्गौरायुरित्येतन्नामके "अभिप्लवाहस्त्रिके "अभिप्लवत्र्यहं पूर्वं त्रिकद्रुका इत्याचक्षते" आश्व०श्रौ०११।१।११ त्रिकद्रुकेषु पाहि सोममिन्द्र!" ऋ०२।११।१७ "त्रिकद्रुकेषु ज्योतिर्गौरायुरित्येतन्नामकेषु आभिप्लविकेष्वहःसु" भा० "त्र्यहार्थे ज्योतिर्गौरायुरिति त्रिकद्रुकाः" कात्या० श्रौ० २४।१।८ त्रिकद्रुक इति ज्योतिरादीनां समुदितानां संज्ञा संव्यवहारार्था" कर्कः "त्रिकद्रुकाः पृष्ठावलम्ब्य इति पशुकामस्य" आश्व० श्रौ० ।१०।२।१८।

त्रिकर्म्मन् पु० त्रीणि कर्म्माण्यस्य। यजनं याजनञ्चैव तथा दानप्रतिग्रहौ। अध्यापनञ्चाध्ययनं षट्कर्मा धर्मभाग् द्विजः" भा० अनु० १२१ अ०। उक्तेषु षट्सु कर्मसु मध्ये वृत्त्यर्थयाजनप्रतिग्रहाध्यापनभिन्नावृत्त्यर्थदानेज्याध्ययनरूपकर्मकारिणि द्विजे। "त्रैविद्यो ब्राह्मणो विद्वान् न चाध्ययनजीवकः। त्रिकर्मा त्रिपरिक्रान्तो मैत्र एव स्मृतः द्विजः" भा० अनु० १४१ अ०।

त्रिकश न० तिसृणां कशानां तदाघातानां समाहारः। कशाघातत्रये। कशाघातत्रिकञ्च कशशब्दे १८३४ पृ० दर्शितम्।

त्रिकशूल न० ६त०। वातजन्ये त्रिकस्थे व्यथाभेदे। "स्फिगस्थ्नोः पृष्ठवंशास्थ्नोर्यः सन्धिस्तत्त्रिकं स्मृतम्। तत्र वातेन या पीड़ा त्रिकशूलं तदुच्यते" भावप्र०।

त्रिका स्त्री त्रिधा कायति कै—क। कूपसमीपस्थे जलोद्धारके त्रिदारुमये यन्त्रभेदे क्षीरस्वामी।

त्रिकाण्ड पु० त्रीणि काण्डान्यस्य। स्वर्गवर्गादिकाण्डभूमिवर्गादिकाण्डसामान्यकाण्डरूपात्मके नामलिङ्गानुशासने अमरसिंहकृते १कोषभेदे तस्यैव शेषभूतस्त्रिकाण्डशेषः पुरुषोत्तमकृतः यथाह तदुपोद्घाते "अलौकिकत्वादमरः स्वकोषे न यानि नामानि समुल्लिलेख। विलोक्य तैरप्यधुना प्रचारमयं प्रयत्नः पुरुषोत्तमस्य"। २निरुक्ते तदपि त्रिकाण्डं तच्चानुक्रमणिकाभाष्ये दर्शितम् यथा "आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा। तृतीयं दैवतं चेति समाम्नायस्त्रिधा मतः"। त्रयाणां काण्डानां समाहारः ङीप्। त्रिकाण्डी ३काण्डत्रये स्त्री। त्रीणि काण्डानि प्रमाणमस्य मात्रच् द्विगोस्तस्य लुकि क्षेत्रपरत्वे ङीप् त्रिकाण्डी क्षेत्रभक्तिः। त्रिकाण्डमिते रज्ज्वादौ स्त्री टाप्।

त्रिकाय पु० त्रयः काया अस्य त्रिकं दुःखत्रिकमेत्यस्मात् इ—अपादाने अच् वा। बुद्धदेवे हेमच०।

त्रिकार्षिक न० कर्षाय हितम् ठक् त्रयाणां वातपित्तकफानां कार्षिकम्। नागरातिविषामुस्तारूपे मिलिते औषधभेदे राजनि०।

त्रिकाल न० त्रयाणां कार्य्यकालभूतभविष्यत्कालानां समाहारः। १भूतभविष्यद्वर्तमानकालत्रये २प्रातर्मध्याह्नरूपकालत्रये च। "त्रिकालं पूजयेद्देवीम्" इति तन्त्रम्। त्रिकालज्ञः। त्रयः काला अस्य। ३कालत्रयवर्त्तिनि त्रि०। साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम्" सां० का०। करणस्य मनसः त्रिकालबुद्ध्यादिसाधनत्वं यथा "नदीपूरभेदादभूद्वृष्टिः, अस्ति धूमादग्निरिह नगनिकुञ्जे, असत्युपघातके पिपीलिकाण्डसञ्चरणाद्भविष्यति वृष्टिरिति। तदनुरूपाश्च सङ्कल्पाभिमानाध्यवसाया भवन्ति" सा० कौ०।

त्रिकालज्ञ पु० त्रिकालवर्त्तिपदार्थान् जानाति ज्ञा—क। १सर्वज्ञे त्रिकालविदादयोऽप्यत्र। २भूतभविष्यद्वर्त्तमानकालाभिज्ञे त्रि०। "युद्धं यथा यदा वा भविष्यदादिश्यते त्रिकालज्ञैः" बृ०स० १७ अ०। त्रिकालवेत्ताप्यत्र।

त्रिकालदर्शिन् पु० त्रिकालं तद्वर्त्तिवस्तु पश्यति दृश–णिनि। १ऋषौ हारा०। २त्रिकालज्ञे त्रि० "अध्वंसिन्यपि काले त्रिकालदर्शी कलौ भवति" बृ० स० २१ अ०।

त्रिकूट पु० त्रीणि कूटानि शृङ्गाण्यस्य। लवणसमुद्रमध्यस्थे लङ्कापुराधारे पर्वतभेदे अमरः। "तैरूढे केशरिक्रान्तत्रिकूटशिखरोपमा" माघः "स सागरमनाधृष्यमतिक्रम्य महाबलः। त्रिकूटस्य तटे लङ्कां स्थितः स्वस्थो ददर्श ह" रामा० सु० २ अ०। स आकरत्वेनास्त्यस्य अच्। २तज्जाते सामुद्रलवणे न०। ३सुमेरुसुते क्षीरोदसमुद्रतीरस्थे पर्वते च तत्कथा वामनपु० "सर्वरत्नमयः श्रीमान् त्रिकूटो नाम पर्वतः। सुतः पर्वतराजस्य सुमेरोर्भास्करद्युतेः। क्षीरोदजलवीच्या यो धौतामलशिलातलः। उत्थितः सागरं भित्त्वा देवर्षिगणसेवितः" इत्युपक्रमे "तस्यैकं काञ्चनं शृङ्गं सेवते यद्दिवाकरः। नानापुष्पसमायुक्तं नानागन्धाधिवासितम्। द्वितीयं राजतं शृङ्गं सेवते यन्निशाकरः। पाण्डुराम्बुदसंकाशं तुषारचयसन्निभम्। वज्रेन्द्रनीलवैदूर्यतेजोभिर्भासयन् दिशः। तृतीयं ब्रह्मसदनं प्रकृष्टं शृङ्गमुत्तमम्। न तत् कृतघ्नाः पश्यन्ति न नृशंसा न नास्तिकाः। नातप्ततपसो लोका ये च पापकृतो जनाः। तस्य सानुमतः पृष्ठे सरः काञ्चनपङ्कजम्। कारण्डवसमाकीर्णं राजहंसोपशोभितम्। गजो ह्यचलसंकाशो मदाञ्चलितलोचनः। तृषितः पातुकामोऽसाववतीर्णश्च तज्जलम्। संलीनः पङ्कजवने यूथमध्यगतश्चरन्। गृहीतस्तेन रौद्रेण ग्राहेणाव्यक्तमूर्त्तिना। गरुडस्थो जगन्नाथो लोकाधारस्तपोधन!। ग्राहग्रस्तं गजेन्द्रं तं तञ्च ग्राहं जलाशयात्। उज्जहाराप्रमेयात्मा तरसा मधुसूदनः। स्थलस्थं दारयामास ग्राहं चक्रेण माधवः। मोचयामास नागेन्द्रं पापेभ्यः शरणागतम्"।

त्रिकूटलवण न० त्रिकूटं सामुद्रमिव लवणम्। द्रोणीलवणे राजनि०।

त्रिकूटवत् पु० त्रीणि कूटानि सन्त्यस्य मतुप् मस्य वः। १त्रिकूटपर्वते। "हिमवान् पारियात्रश्च सह्यः सुह्मस्त्रिकूटवान्" भा० आश्वमेधिकप० श्रेष्ठपर्वतकथने" ४३ अ०।

त्रिकूटा स्त्री भैरवीभेदे तन्त्रसा०।

त्रिकूर्चक न० सुश्रुतोक्ते शस्त्रभेदे अर्द्धधारशब्दे ३७५ पृ० दृश्यम्। "विशेषेण बालवृद्धकुमारभीरुनारीणां राज्ञां राजपुत्राणाञ्च त्रिकूर्चकेन विस्रावयेत्" सुश्रु०।

त्रिकोण त्रि० त्रयः कोणा यस्य। त्रिकोटियुक्ते १पदार्थे "विन्दुत्रिकोणवसुकोणदशारयुग्मम्" तन्त्रोक्ते श्रीचक्रोक्तौ। ज्योतिषोक्ते लग्नात् २नवमपञ्चमस्थाने न०। "त्रिकोणं नवपञ्चमम्" दीपि०। "त्रिकोणगान् गुरुश्चैव पश्यन् पूर्णफलप्रदः" ज्यो० त०। ३मोक्षे शब्दकल्पतरुः। ४त्रिभुजे क्षेत्रभेदे न०। क्षेत्रशब्दे २३८१ पृ० समत्रिकोणविषमत्रिकोणादिस्वरूपादिकमुक्तम्। ५कामरूपपीठभेदे "करतोयां समारभ्य यावद्दिक्करवासिनीम्। शतयोजनविस्तारं त्रिकोणं सर्वसिद्धिदम्" कामाख्यातन्त्रम्। त्रिकोणपदार्थाश्च कतिचित् कविकल्पलतायां संक्षिप्य दर्शिताः। "हलहरनेत्रकामाख्यावह्निमण्डलैकारवज्रशृङ्गाटशकटयोनिरूपाः"।

त्रिकोणफल न० त्रिकोणं फलमस्य। १शृङ्गाटके भावप्र०। ६त०। त्रिभुजक्षेत्रफले "लम्बगुणं भूम्यर्द्धं स्पष्टं त्रिभुजे फलं भवति" लीला०। [काक्षारयवक्षारटङ्कणक्षारेषु।

त्रिक्षार न० त्रयाणां क्षाराणां समाहारः। मिलिते सर्जि-

त्रिक्षुर पु० त्रीणि क्षुराणीवाग्राण्यस्य। कोकिलाख्यवृक्षे रत्ना०।

त्रिख न० त्रिधा खमाकाशोऽवकाशः फलेऽत्र। त्रपुषे शब्दच०।

त्रिखट्व न० त्रिसृणां खट्वानां समाहारः। खट्वात्रये। ततः वा ङीप्। तत्रार्थे स्त्री अमरः।

त्रिखर्व पु० सामवेदशाखाभेदाध्यायिनि "तामेतान्त्रिखर्वा उपासते तस्मात्ते स्पर्द्धमाना न व्लीयन्ते" ताण्ड्यब्रा० २।८।३। "तामेतां दशसप्ताख्यां विष्टुतिं त्रिखर्वाः शाखिन उपासते प्रयुञ्जते" भाष्यम्।

त्रिगङ्ग अव्य० तिस्रो गङ्गा नद्यो यत्र बहुव्रीह्यर्थे "नदीभिश्च" पा० अव्ययी०। १तीर्थभेदे। "सप्तगङ्गे त्रिगङ्गे च इन्द्रमार्गे च तर्पयन्। सुधां चैव लभेत् भोक्तुं यो नरो जायते पुनः" भा० अनु० २५ अ०।

त्रिगण त्रि० ६त०। १त्रिवर्गे अमरटीकायां नीलकण्ठः "न बाधतेऽस्य त्रिगणः परस्परम्" किरा०।

त्रिगन्धक न० त्रयाणां गन्धकद्रव्याणां समाहारः। १त्रिजातके त्रि० नैघण्टुपारस्करः। त्रिसुगन्धिकमप्यत्र। त्रिजातकशब्दे दृश्यम्।

त्रिगम्भीर पु० त्रिभिर्गम्भीरः। स्वरेण सत्त्वनाभिभ्यां त्रिगम्भीरः शिशुः शुभः" काशी० ११ अ० उक्ते शुभलक्षणयुक्ते "त्रिषु विपुलो गम्भीरस्त्रिष्वेव षडुन्नतश्चतुर्ह्रस्वः" इत्युपक्रमे "नाभिः स्वरः सत्त्वमिति प्रदिष्टं गम्भीरमेतत्त्रितयं नराणाम्" बृ० सं० ६८ अ०।

त्रिगर्त्त पु० त्रीणि गर्त्तानि यत्र। १जालन्धरे देशे हेमच०। स च देशः वृ०स०१४अ० कूर्मविभागे उत्तरस्यामुक्तः "उत्तरतः कैलास" इत्युपक्रमे "आदर्शान्तर्द्वीपित्रिगर्त्ततुरगाननाश्वमुखाः" सोऽस्याभिजनः, तस्य राजा वा अण्। त्रैगर्त्त पित्रादिक्रमेण तद्देशवासिनि तन्नृपे च बहुषु अणो लुक्। २तत्रार्थे ब०व०। "द्रविडाम्बष्ठत्रिगर्त्तसौराष्ट्रान्" वृ० स० ९अ०। "सुशर्मा च नरव्याघ्र! त्रिगर्त्तः प्रस्थलाधिपः" भा० द्रो० १७अ०। आर्षत्वात् एकत्वेऽपि अणो लुक्। "मद्रराजस्य बलवान् त्रिगर्त्तानामधीश्वरः" हरिवं०९१ अ०। स्वार्थे क। तत्रार्थे त्रिका०।

त्रिगर्त्तषष्ठ पु० ब० व० त्रिगर्त्तः षष्ठो वर्गो यस्य। १आयुजीविसंघभेदे स च संघः सि० कौ० उक्तो यथा "आहुस्त्रिगर्त्तषष्ठांस्तु कौण्डोपरथदाण्डकी। क्रौष्टुकिर्जालमानिश्च ब्रह्मगुप्तोऽथ जालकिः" "दामन्यादित्रिगर्त्तषष्ठाच्छः" पा० स्वार्थे तेभ्यः छ। कौण्डोपरथीय इत्यादि।

त्रिगर्त्ता स्त्री त्रयो योनिस्था गर्त्ताः अस्याः। कामुक्यङ्गनायां मेदि०। एकयोनिकाया अपि तस्या मैथुनाचरणे त्रियोनिकतुल्यत्वात्तथात्वम्।

त्रिगुण न० त्रयाणां सत्त्वरजस्तमसां गुणानां समाहारः। समाहृता वा त्रयो गुणाः, त्रयो गुणा अस्य वा। सांख्यमतसिद्धे साम्यावस्थापन्नगुणत्रयात्मके १प्रधाने। "त्रिगुणमविवेकि विषयं सामान्यमचेतनं प्रसवधर्मि" सा० कौ० "त्रिगुणं त्रयो गुणाः सुखदुःखमोहा अस्येति त्रिगुणं तदनेन सुखादीनामात्मगुणत्वं पराभिमतमपाकृतम्" त०कौ० "शब्दस्पर्शविहीनं तद्रूपादिभिरसंयुतम्। त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययम्" विष्णुपु० "सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान्महतोऽहङ्कारोऽहङ्कारात् पञ्च तन्मात्राण्युभयमिन्द्रियं तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गणः" सा० सू० "सत्त्वादीनि द्रव्याणि न वैशेषिकवद्गुणाः संयोगवत्त्वात्, लघुत्वचलत्वगुरुत्वादिधर्मकत्वाच्च। तेष्वत्र शास्त्रे श्रुत्यादौ च गुणशब्दः पुरुषोपकरणत्वात्पुरुषपशुबन्धकत्रिगुणात्मकमहदादिरज्जुनिर्मातृत्वाच्च प्रयुज्यते। तेषां सत्त्वादिद्रव्याणां या साम्यावस्था न्यूनानतिरिक्तावस्था न्यूनाधिकभावेनासंहतावस्थेति यावत्। अकार्यावस्थेति निष्कर्षः। अकार्यावस्थोपलक्षितं गुणसामान्यं प्रकृतिरित्यर्थः। यथाश्रुते वैषम्यावस्थायां प्रकृतिनाशप्रसङ्गात् "सत्त्वं रजस्तम इति एषैव प्रकृतिः सदा। एषैव संसृतिर्जन्तोरस्याः पारे परं पदम्" इत्यादिस्मृतिभिर्गुणसाम्यात्तस्यैव प्रकृतित्ववचनाच्च। सत्त्वादीनामनुगमाय सामान्येति। पुरुषव्यावर्तनाय गुणेति। महदादिव्यावर्तनाय चोपलक्षितान्तमिति। महदादयोऽपि हि कार्य्यसत्त्वादिरूपाः पुरुषोपकरणतया गुणाश्च भवन्तीति। तदत्र प्रकृतेः स्वरूपमेवोक्तम्" भाष्यम् २सत्त्वादिगुणयुक्ते त्रि० "महान्तमेव चात्मानं सर्वाणि त्रिगुणानि च। विषयाणां ग्रहीतॄणि शनैः पञ्चेन्द्रियाणि च" मनुः। त्रिभिर्गुण्यते गुण-घञर्थे क। ३त्रिभिर्गुणिते त्रि० "सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य" रघुः "व्रताय मौञ्जीं त्रिगुणां बभार याम्" कुमा० "एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्। त्रिगुणं स्याद्वनस्थानां यतीनान्तु चतुर्गुणम्" मनुः। त्रयो गुणा अस्याः। ४मायायां स्त्री ५तन्नामके (ह्रीं) बीजभेदे च "वेदाद्यां त्रिगुणां रमामथ वदेत् कामेन संसेविताम्" तन्त्रसा० श्रीविद्यामन्त्रभेदोक्तौ ६त्रिशिखे त्रिशूले "त्रिगुणपरिवारप्रहरणः" किरा०। "त्रिगुणः त्रिशिखः परिवार आकारो यस्य" मल्लि०। कर्णशब्दे परेऽस्य लक्षणपरत्वे दीर्घत्वम् त्रिगुणौ कर्णौ अस्य। त्रिगुणाकर्ण तथा लक्षणयुक्ते त्रि०। "पदैस्त्रिभिर्बलिर्बद्धो रागादि त्रिपदाथ वा। उत्पत्तिस्थितिनाशेषु रजादित्रिगुणा मता" देवीपु० ४५ अ० उक्तेः ७ दुर्गायां स्त्री।

त्रिगुणाकृत त्रि० त्रिगुणं कृत्वा कृष्टं डाच् कृ-क्त। त्रिधाहलेन कृष्टे क्षेत्रादौ अमरः।

त्रिगुणात्मक न० त्रयो गुणाः तेजोबन्नरूपा आत्मानोऽस्य। अज्ञाने। "गुणाश्च लोहितशुक्लकृष्णाः अज्ञानकार्य्येषु तेजोबन्नेष्ववान्तरप्रकृतिषु श्रुतिप्रसिद्धाः। तथा च कार्य्यगतत्रिरूपेण कारणमप्यज्ञानमव्यक्तात्मकं त्रिगुणात्मकम्। यद्वा रजःसत्त्वतमोलक्षणास्त्रयो गुणास्तद्युक्तमज्ञानं गुणगुणिनोरभेदविवक्षया त्रिगुणात्मकं भवति।

त्रिगुणित त्रि० त्रिभिर्गुणितः। त्रिरावृत्ते।

त्रिगुणी स्त्री त्रयो गुणाः पत्रेऽस्याः गौरा०। बिल्ववृक्षे तस्य पत्रस्य त्रिगुणात्मकत्वात्तथात्वम्। "मूलं धार्य्यं त्रिगुणत्राः सवितरि विगुणे, चोरिकामूलमिन्दौ" ज्यो० "त्रिगुणी श्रीफलवृक्षः" प्रमिता०।

त्रिचक्र पु० त्रीणि चक्राण्यस्य। अश्विनीकुमारयोः रथे। "अर्वाङ् त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः" ऋ०१।१५७।२।

त्रिचक्षुस् पु॰ त्रीणि चक्षूंष्यस्य । त्रिनेत्रे शिवे "त्रिचक्षुः शम्भुरेकस्त्वं विभुर्दामोदरोऽपि च" भा॰ शा॰ ४३ अ॰ ।

त्रिचतुर त्रि॰ । त्रयो वा चत्वारो वा विकल्पार्थे बहु॰ डच् समा॰। विकल्पेन त्रित्वचतुष्कसंख्यान्विते(तिन वा चार) अर्थे । "सद्यः पुरीपरिसरे च शिरीषमृद्वी गत्वा जवात् त्रिचतुराणि पदानि सीता" सा॰द॰ ।

त्रिचित् पु॰ त्रीन्+अग्नीन् चिनोति स्म चि—भूते क्विप् । अतीताग्नित्रयचयनकर्त्तरि ।

त्रिचित पु॰ त्रिभागोत्सेधाभिरिष्टकाभिः चितः । गार्हपत्येऽग्निभेदे । "त्रिचितमित्येके" कात्या॰ श्रौ॰ १७।१।२२ । "गार्हपत्यं कुर्वन्ति तत्र च त्रिभागोत्सेधा इष्टका इति सम्प्रदायः। अस्मिंश्च पक्षे प्रथमचितिः लोकंपृणानां पूरणं मृग्यम्" कर्कः । "उपर्य्येव चितित्रयात्मकं चिनोति । अथ यो गार्हपत्येऽग्निः सोऽस्यावाङ् प्राणाः तं हैके त्रिचितं चिन्वन्ति" शत॰ब्रा॰ ७।१।२।१५ ।

त्रिजगत् न॰ त्रिगुणितं जगत् संज्ञात्वात् कर्मधारयः । स्वर्गमर्त्यपातालरूपे लोकत्रये "तस्यां शिवस्त्रिजगतो जनको जनन्याः" भाग॰ ८।८।१९ श्लो॰ । त्रिजगत्यप्यत्र स्त्री "अन्तराल एव त्रिजगत्यास्तु दक्षिणस्याम्" भाग॰ ५।२६।६ श्लो॰ ।

त्रिजटा स्त्री तिस्रो जटा यस्याः । १रावणालयस्थे सीतापक्षपातिराक्षसीभेदे "सीतां ताभिरनार्याभिर्दृष्ट्वा संतर्जितां तदा । राक्षसी त्रिजटा वृद्धा प्रबुद्धा वाक्यमब्रवीत्" । "एवमुक्तास्त्रिजटया राक्षस्यः क्रोधमूर्च्छिताः" रामा॰२७ अ॰"हनुमानपि विक्रान्तः सर्वं शुश्राव तत्त्वतः । सीतायास्त्रिजटायाश्च राक्षसानाञ्च गर्ज्जितम्" ३॰ अ॰ । "सीतां मायेति शंसन्ती त्रिजटा समजीवयत्" रघुः । २शिवे पु॰ । "त्रिजटाय त्रिशीर्षाय त्रिशूलायुधपाणिने । त्र्यम्बकाय त्रिनेत्राय त्रिपुरघ्नाय वै नमः" भा॰ अनु॰ २८६ । ३बिल्ववृक्षे पु॰ । "शृणु देवि ! प्रवक्ष्यामि रहस्य त्रिजटोत्तमम् । पत्रं ब्रह्ममयं देवि ! अद्भुतं वरवर्णिनि ! । श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः । विष्णुप्रीतिकरश्चैव मम प्रीतिकरः सदा । ब्रह्मविष्णुशिवाः पत्रे हस्ते च शक्तिरूपिणी । हस्तमूले तु वज्रं स्यात् पत्रं मह्यं त्विदं प्रिये ! । एवञ्च त्रिजटापत्रैर्हरं वा हरिमर्च्चयेत् । कैवल्यं तस्य तेनैव शक्तिपूजा विशेषतः" ज्ञानभैरवीतन्त्रे ६प॰ ।

त्रिजात न॰ त्रिगुणितं जातं सुगन्धिद्रव्यरूपं सुन्दरद्रव्यं संज्ञात्वात् कर्म॰ । १तुल्यभागे त्वगेलापत्ररूपे मिलिते सुगन्धिद्रव्यत्र । स्वार्थे क । त्रिजातक तत्रार्थे "त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम् । नागकेशरसंयुक्तं चतुर्जातकमुच्यते" राजनि॰।"एलादिभिः समुद्दिष्टं त्रिजातं त्रिसुगन्धिकम् । चतुर्जातं सनागञ्च द्वयं वातकफापहम्" "शीतं त्रिजातात्समधो विमृद्य योगानुरूपा गुटिकाः प्रयोज्याः" "व्योषं त्रिजातकं मुस्ता विडङ्गामलके तथा" सुश्रु॰ ।

त्रिजीवा स्त्री त्रिषु राशिषु जीवा । त्रयाणां राशीनां ज्या- २४३८ संख्यारूपे ज्यार्द्धरूपे पदार्थे "लम्बज्याघ्नत्रिजीवाप्तः स्फुटो भूपरिधिः स्वकः" सू॰ सि॰ ।"त्रिज्यया गजाग्निवेदराम ३४३८ मितया भक्तः" रङ्गना॰ । त्रिज्यादयोऽप्यत्र । "तच्छेषं विवरेणाथ हन्यात् त्रिज्यान्त्यकर्णयोः" सू॰ सि॰ "त्रिज्यान्त्यकर्णयोस्त्रिराशिज्याद्वितीयशीघ्रकर्णयोः" रङ्गना॰।

त्रिण न॰ तृण+पृषो॰ । तृणशब्दार्थे शब्दरत्ना॰ । तृणशब्दव्युत्पत्तौ रेफेकारसंयुक्तमव्युत्पन्नशब्दान्तरमस्तीति उज्ज्वलद॰ । "उवृक्षिप्रत्रिणपत्रप्रांशुविहगः सौम्यस्वनः पूजितः" वराहः ।

त्रिणता स्त्री त्रिषु स्थानेषु नता संज्ञात्वात् पूर्वपदात् णत्वम् । १धनुषि त्रिका॰ । २त्रिषु स्थानेषु नते त्रि॰ । असंज्ञायां न णत्वमिति भेदः । "स्वगुणैराफलप्राप्तेराकृष्य गणिका इव । कामुकानिव नालीकांस्त्रिणताः सहसाऽमुचन्" माघः । वेश्यानां मध्यभ्रूषु त्रिषु स्थानेषु नतत्वात् त्रिणतत्वं श्लेषे णनकारयोरभेद इत्यालङ्कारिकाः । त्रिणस्य भावः तल् । ३तृणभावे तृणत्वे च स्त्री ।

त्रिणव पु॰ त्रिराहत्ता नव डच्समा॰ संज्ञात्वात् णत्वम् । सप्तविंशाहत्ते सामस्तोमभेदे । "त्रिणवत्रयस्त्रिंशौ स्तोमौ हेमन्तशिशिरावृतू" यजु॰ १०।१४ । "त्रिणवस्तोम एवमाम्नातः "नवभ्यो हिंकरोति स तिसृभिः स पञ्चभिः स एकया" नवभ्यो हिङ्करोति स एकया स तिसृभिः स पञ्चभि, नवभ्यो हिङ्करोति स पञ्चभिः स एकया स तिसृभिर्वज्रो वै त्रिणव इति" श्रुतिः । "प्रथमपर्य्याये प्रथमां त्रिर्गायेत् मध्यमां पञ्चकृत्वः उत्तमां सकृत्, द्वितीयपर्य्याये प्रथमां सकृद्गायेन्मध्यमां त्रि,रुत्तमां पञ्चकृत्वः,तृतीयपर्य्याये प्रथमां पञ्चकृत्वो, मध्यमां सकृ,दुत्तमां त्रिर्गायेत् सोऽयं त्रिराहत्तनवसंख्योपेतत्वात् त्रिणवको वज्रसमानः स्तोमः" वेददी॰ । "त्रिणवान्युक्थानेकविंशानि पृष्ठानि पट्-

त्रिंशाः" शतपथब्राह्मणे १३।५।४।२०। अध्यायादि ।

त्रिणाचिकेत पु० त्रिःकृत्वश्चितो नाचिकेतोऽग्निर्येन पृषो० संज्ञात्वात् णत्वम् । अध्वर्यु भेदे "छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः" इति श्रुतिः "त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित्" मनुः ।

त्रित पु० १४६६।६७ पृ०एकतशब्दोक्ते आप्त्ये १देवभेदे ब्रह्मणो मानसपुत्ररूपे २ऋषिभेदे च त्रिषु क्षित्यादिस्थानेषु तायमानः ताय—ड । त्रिषु विस्तीर्णतमे ३प्रख्यातकीर्त्तौ च त्रि०।"यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत्" ऋ० १।१८७।१। [तक्ष्णां त्रितये । स्त्रीत्वे वा ङीप् ।

त्रितक्ष न० स्त्री त्रयाणां तक्ष्णां समाहारः अच् समा०

त्रितय न०स्त्री त्रयाणामवयवः त्रयोऽवयवा येषाम् वा तयप् ॥ त्रयशब्दार्थे १त्रित्वसंख्यायाम् "ब्रह्महत्याव्रतं वापि वत्सरत्रितयं चरेत्" याज्ञ० "उदूढलोकत्रितयेन साम्प्रतम्" माघः । "वरमाप स दिष्टपिष्टपत्रितयानन्यसदृग्गुणोदयाम्" नैष० । स्त्रियां ङीप् । २तत्सङ्ख्यान्विते त्रि० । "पतिश्वशुरता ज्येष्ठे पतिदेवरतानुजे । इतरेषु च पाञ्चाल्याः त्रितयं त्रितयं त्रिषु" उद्भटः । "त्रितयं ज्ञानमयेन चक्षुषा" रघुः । "प्रणवव्याहृतिभ्यां च गायत्र्या त्रितयेन च । उपास्यं परमं ब्रह्म आत्मा यत्र प्रतिष्ठितः" यो०याज्ञ०।[धिभौतिकाधिदैविकरूपे दुःखत्रये ।

त्रिताप न० त्रयाणां तापानां समाहारः । आध्यात्मिका-

त्रिदण्ड न० त्रयाणां दण्डानां समाहारः । १चतुरङ्गुलगोबालवेष्टनादन्योन्यसंबद्धे यतेर्दण्डत्रये । २वाङ्मनःकायदण्डत्रये च । तदस्यास्तीति अच् । ३संन्यासाश्रमे पु० । त्रिदण्डिशब्दे दृश्यम् । "यस्त्वसंहृतषड्वर्गः प्रचण्डेन्द्रियसारथिः । ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति" भाग०

त्रिदण्डिन् पु० त्रिदण्डमस्त्यस्य इनि । सन्न्यासाश्रमे । "वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च । यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते । त्रिदण्डमेतन्निक्षिप्य सर्वभूतेषु मानवः । कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छति" मनुः । "त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते । अहन्येकादशे प्राप्ते पार्वणन्तु विधीयते" लिखि०सं० तस्यापि पार्वणं श्राद्धं विहितम् ।

त्रिदला स्त्री त्रीणि त्रीणि दलानि प्रतिपत्रं यस्याः । (गोलालिया) १गोधापदीलतायाम् जटा० ।२बिल्ववृक्षे पु०।

त्रिदलिका स्त्री त्रीणि दलानि प्रतिपत्रेऽस्याः कप् कापि अत इत्वम् । चर्म्मकषालतायां शब्दच० ।

त्रिदश पु० तिस्रो दशा जन्मसत्ताविनाशाख्या न तु वृद्धिपरिणामक्षया मर्त्यानामिव यस्य, त्रीन् तापान् दशति वा दश—घञर्थे संज्ञायां कर्त्तरि को वा । १देवे अमरः। अथ वा त्र्यधिकास्त्रिरावृत्ताश्च दश परिमाणमेषां डच् समा० शाक० अधिकावृत्तशब्दलोपः एकस्यैव त्रिशब्दस्य तन्त्रतयोच्चारणात् उभयार्थपरत्वम् । त्रयस्त्रिंशन्मुख्यगणवत्सु २देवेषु अयमेव पक्षः श्रुत्यनुगुणः त्री च दश चेति छान्दोग्येऽभिहितत्वात् त्र्यधिकावृत्तपरताद्योतनार्थं त्री चेति द्विवचनान्ततया निर्द्देशः । ते च देवाः "अर्का द्वादश, रुद्रा एकादश, वसवोऽष्टौ, अश्विनौ द्वाविति । अश्विनीकुमारौ विहाय इन्द्रः प्रजापतिश्चेति वा द्वाभ्यां पक्षान्तरे संख्यापूरणं त्रयस्त्रिंशत्पतिशब्दे मूले दृश्यम् "तस्मिन् मघोनस्त्रिदशान् विहाय" कुमा० । "त्रिदशैर्दिशे नमः" माघः। तिस्रो दशा जाग्रदाद्यवस्था यस्य । २जीवे त्रिदशाध्यक्षशब्दे दृश्यम् ।

त्रिदशगुरु पु०६त०। बृहस्पतौ । "धूमाभेऽनावृष्टिस्त्रिदशगुरौ नृपवधो दिवा दृष्टे" वृ० स० ८ अ० ।

त्रिदशगोप पु० त्रिदशो देवभेद इन्द्रः गोपो रक्षकोऽस्य तस्य वर्षाभवत्वात् । इन्द्रगोपकीटे "स्मद्धे त्रिदशगोपमातृके" रघुः । [प्यादयोऽप्यत्र ।

त्रिदशदीर्घिका स्त्री ६त० । गङ्गायां हेमच० । त्रिदशवा-

त्रिदशपति पु० ६त० । इन्द्रे त्रिदशेश्वरादयोऽप्यत्र ।

त्रिदशमञ्जरी स्त्री त्रिदशप्रिया मञ्जरी यस्य संज्ञात्वात् न कप् । तुलस्याम् राजनि० ।

त्रिदशवधू स्त्री ६त० । अप्सरःसु त्रिदशवनितादयोऽप्यत्र "कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः" मेघ० ।

त्रिदशवर्त्मन् न०६त०। नभसि शब्दार्थचि०। [नैष०पारस्करः

त्रिदशसर्षप पु० त्रिदशप्रियः सर्षपः । १देवसर्षपे सर्षपभेदे

त्रिदशाङ्कुश पु० ६त० वज्रे शब्दार्थचिन्तामणिः ।

त्रिदशाचार्य्य पु० ६त० । बृहस्पतौ हलायु० ।

त्रिदशाधिप पु० ६त० । शक्रे ।

त्रिदशाध्यक्ष पु० विष्णौ "त्रिपदस्त्रिदशाध्यक्षः" विष्णुस० । अस्य व्युत्पत्तिर्भाष्ये दर्शिता यथा "गुणावेशेन संजातास्तिस्रो दशा अवस्थाजाग्रदादयस्तासामध्यक्ष इति त्रिदशाध्यक्षः । त्रिदशानां वाऽध्यक्षः स्वामी" ।

त्रिदशायन पु०त्रिदशानामयनं यत्र । विष्णौ "नारायणायात्मभवायनाय लोकायनाय त्रिदशायनाय" हरिवं १५४अ० ।

त्रिदशायुध न० ६त०। १वज्रे त्रिका० । २इन्द्रधनुषि च ।

"अथ नभस्य इव त्रिदशायुधम् कनकपिङ्गतडिद्गुणसंयुतम्" रघुः।

त्रिदशारि ६त॰। असुरे शब्दरत्ना॰।

त्रिदशालय पु॰ ६त॰। १स्वर्गे अमरः। २सुमेरुपर्वते हलायु॰

त्रिदशावास पु॰ ६त॰। १स्वर्गे हला॰। २सुमेरुपर्वते च।

त्रिदशाहार ६त॰। अमृते सुधायां हलायु॰।

त्रिदशेश्वर पु॰ ६त॰। १इन्द्रे २दुर्गायां स्त्री ङीप्। "सुराश्च त्रिदशा देवा नन्दिनी दुन्दुभिर्मता। तेषाञ्च नन्दिनी नन्दी ईशत्वात् त्रिदशेश्वरी" देवीपु॰ ४५ अ॰।

त्रिदिनस्पृश् पु॰ त्रिदिनं स्पृशति स्पृश–क्विन्। १त्र्यहस्पर्शे चयाहे अवमदिनभेदे यथा "तिथ्यन्तद्वयमेको दिनवारः स्पृशति यत्र तद्वयत्यवमदिनम्। त्रिदिनस्पृक् दिनत्रयस्पर्शनादह्नः" इति ज्यो॰ त॰। अयनशब्दे ४३१ पृ॰ तदानयनादि दृश्यम्। अस्य क्विन्नन्तत्वात् झलि पदान्ते च कुत्वम्।

त्रिदिव पु॰ त्रयो ब्रह्मादयो दीव्यन्त्यत्र घञर्थे आधारे क, त्रिधा सत्त्वादिभेदेन दीव्यन्ति प्रकाशन्तेऽत्र दिव–क वा तृतीया द्यौः वृत्तिविषये संख्याशब्दस्य पूरणार्थत्वात् पृषो॰। लोकात् पुंस्त्वम्। १स्वर्गे, अमरः २आकाशे, हेमच॰। ३नभसि ४सुखे न॰ शब्दार्थचि॰। ५नदीभेदे स्त्री मेदि॰। "न हीष्टमस्य त्रिदिवेऽपि भूपतेः"। "त्रिदिवस्थेष्वपि निस्पृहोऽभवत्"। "देवादिनाम त्रिदिवेऽपि यस्य" रघुः। "अमूं किल त्वं त्रिदिवादवातरः" माघः।

त्रिदिवाधीश पु॰ ६त॰। १इन्द्रे हेम॰ १देवमात्रे च। त्रिदिवेश्वरादयोऽप्यत्र।

त्रिदिवेश पु॰ ६त॰। १देवे अमरः।

त्रिदिवोद्भवा स्त्री त्रिदिवे उद्भवो यस्याः। १स्थूलैलायां राजनि॰। २गङ्गायाञ्च। ३स्वर्गभवमात्रे त्रि॰।

त्रिदिवौकस् पु॰ त्रिदिवमोको यस्य। १देवे अमरः। "यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः" मनुः पृषो॰ त्रिदिवौकसोऽपि तत्रार्थे।

त्रिदृश् पु॰ तिस्रः दृशोऽस्य त्रीणि भूतादीनि पश्यति वा दृश–कर्त्तरि क्विप् वा। १त्रिनयने शिवे हेमच॰।

त्रिदोष न॰ त्रयाणां दोषाणां वातपित्तकफजानां समाहारः। १वातपित्तकफजदोषत्रये त्रयो दोषा हेतुत्वेन यत्र। २त्रिदोषजे रोगभेदे त्रिदोषजशब्दे दृश्यम्।

त्रिदोषज त्रि॰ त्रिदोषात् जायते जन–ड। दोषत्रयजाते वातादिसन्निपातजे रोगभेदे "चिरज्वरे वातकफोल्बणे वा त्रिदोषजे वा दशमूलमिश्रः। किराततिक्तादिगणः प्रयोज्यः शुद्ध्यर्थिने वा त्रिवृताविमिश्रः" चक्रद॰। अस्य पूर्वरूपं "सर्वलिङ्गसमवायः" भावप्र॰। ज्वरशब्दे दृश्यम्।

त्रिधन्वन् पु॰ सुधन्वनः पुत्रभेदे "सुधन्वनः सुतस्त्वासीत् त्रिधन्वा रिपुमर्दनः। राज्ञस्त्रिधन्वनस्त्वासीद्विद्वांस्त्रय्यारुणः सुतः" हरिवं॰ १२ अ॰।

त्रिधा अव्य॰ त्रि+प्रकारे धाच्। त्रिप्रकारे। "एकैकमूर्त्तिर्बिभिदे त्रिधा सा" कुमा॰। "ज्ञानं कर्म च कर्त्ता च त्रिधैव गुणभेदतः" गीता।

त्रिधातु पु॰ त्रीन् धर्मार्थकामान् दधाति पुष्णाति धा–तुन्। १गणेशे त्रिका॰। समा॰ द्विगुः। २धातुत्रये न॰।

त्रिधामन् पु॰ त्रीणि धामानि भूरादीनि स्थानानि, तेजांसि सत्त्वादीनि वा यस्य। १शिवे, २विष्णौ, ३वह्नौ च। शब्दार्थकल्पतरुः। समाहारद्विगुः। ४धामत्रये न॰ स्त्री स्त्रीत्वपक्षे वा ङीप्। "स एषोक्तसक्रमिदं त्रिनाभिसप्ताश्वयुक्त वहते वै त्रिधाम" भा॰ आनु॰ १५८ अ॰। "त्रिधामानं जपंस्तत्र अरम् विष्णुं सनातनम्" हरिवं॰ २७१अ॰। ६त॰। ५त्रिसंख्यान्विते त्रि॰ तानि च कतिचित् संक्षिप्य "त्रिगुणीकृतसर्वाङ्गी चिद्रूपा शिवगेहिनी। प्रसूते" इत्युपक्रमे "त्रिपुष्करं स्वरान् देवीर्ब्रह्मादीनां त्रयं त्रयम्। वह्निकालत्रयं शक्तित्रयं वृत्तित्रयं महत्। नाडीत्रयं त्रिवर्गं वा यद्यदन्यत् त्रिधाम तत्" शा॰ ति॰ उक्तानि। अन्यान्यपि त्रित्वसंख्यान्वितानि एकादिशब्दे दृश्यानि।

त्रिधामूर्त्ति पु॰ त्रिधा मूर्त्तिरस्य। ब्रह्मविष्णुमहेशरूपमूर्त्तित्रयान्विते परमेश्वरे।

त्रिधार त्रि॰ तिस्रो धारा अस्याः, त्रिषु स्थानेषु वा धाराः प्रवाहा अस्य अस्या वा। १धारात्रयान्विते २गङ्गायां स्त्री तस्याः स्वर्गमर्त्यपातालेषु धारावत्त्वात् तथात्वम् २स्नुहीवृक्षे च शब्दार्थचि॰। तस्य अग्रत्रयवत्त्वात् तथात्वम्।

त्रिधारक पु॰ तिस्रो धारा अग्राण्यस्य कप् संज्ञायां कन् वा। गुण्डतृणे राजनि॰।

त्रिधारस्नुही स्त्री त्रिषु भागेषु धारा यस्याः कर्म॰। (तेकांटासिजु) स्नुहीभेदे राजनि॰।

त्रिधाविशेषः पु॰ त्रिधा त्रिप्रकारो विशेषः। सूक्ष्मादित्रयरूपे विशेषे "सूक्ष्मा मातापितृजाः सह प्रभूतैः त्रिधा विशेषाः स्युः" सां॰का॰। "सूक्ष्मशरीरमेकः मातापितृजो द्वितीयः महाभूतानि तृतीयो विशेषः। तेषां

मध्ये सूक्ष्मानियताः मातापितृजा निवर्तन्ते कीटान्ता वा भस्मान्ता वा विड़न्ता वेति" त० कौ० ।

त्रिधासर्ग पु० त्रिकारः सर्गः । १भूतादिसर्गे । "अष्टविकल्पो दैवस्तैर्य्यग्योनश्च पञ्चधा भवति । मानुषश्चैकविधः समासतोऽयं त्रिधासर्गः" सां०का० । "ब्राह्मः प्राजापत्यः ऐन्द्रः पैत्रः गान्धर्वः याक्षः राक्षसः पैशाच इत्यष्टविकल्पो दैवः सर्गः । पशुमृगपक्षिसरीसृपस्थावरा इति पञ्चविधस्तैर्य्यग्योनः सर्गः । मानुष्यश्चैकविधः ब्राह्मणाद्यवान्तरजातिभेदाविवक्षया संस्थानस्य चतुर्ष्वपि वर्णेष्वविशेषात्" सा०त०कौ० ।

त्रिनयन पु० त्रीणि नयनानि यस्य "पूर्वपदात् संज्ञायामगः" पा० णत्वे प्राप्ते क्षुभ्ना० पाठात् न णत्वम् । १महादेवे "योग्यस्य त्रिनयनलोचनार्च्चिः" "शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम्" माघः । २पार्वत्यां स्त्री "लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम्" तद्ध्याने तस्या नेत्रत्रयोक्तेः । ३लोचनत्रययुक्ते त्रि० "बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये" मातृकासरस्वतीध्यानम् । त्रिनेत्रत्रिलोचनादयोऽप्यत्र । इयांस्तु भेदः त्रिनेत्रशब्दस्य महादेवपरत्वे संज्ञात्वात् पूर्वपदात् णत्वे प्राप्ते गिरिनद्या० वा णत्वम् । अन्यत्र न णत्वमिति । शिवस्य तृतीयनेत्राविर्भावकथा भा० अनु० १८ १४० । यथा

"सेवन्ती हिमवत्पार्श्वं हरपार्श्वमुपागमत् । ततः स्मयन्ती पाणिभ्यां नर्मार्थं चारुदर्शना । हरनेत्रे शुभे देवी सहसा सा समावृणोत् । संवृताभ्यान्तु नेत्राभ्यां तमो भूतमचेतनम् । निर्होमं निर्वषट्कारं जगद्वै सहसाऽभवत् । जनश्च विमनाः सर्वो भयत्राससमन्वितः । निमीलिते भूतपतौ नष्टसूर्य्य इवाभवत् । ततो वितिमिरो लोकः क्षणेन समपद्यत । ज्वाला च महती दीप्ता ललाटात्तस्य निःसृता । तृतीयञ्चास्य सम्भूतं नेत्रमादित्यसन्निभम्" इत्युपक्रमे उमोवाच "भगवान् सर्वभूतेश ! शूलपाणे ! महाव्रत ! संशयो मे महान् जातस्तन्मे व्याख्यातुमर्हसि । किमर्थं ते ललाटे वै तृतीयं नेत्रमुत्थितम् । किमर्थञ्च गिरिर्दग्धः सपक्षिगणकाननः । किमर्थञ्च पुनर्देव ! प्रकृतिस्थस्त्वया कृतः । तथैव द्रुमसंच्छन्नः कृतोऽयं तु पिता मम" महेश्वर उवाच । "नेत्रे मे संवृते देवि ! त्वया बाल्यादनिन्दिते । नष्टालोकस्तथा लोकः क्षणेन समपद्यत । नष्टादित्ये तथा लोके तमोभूते नगात्मजे ! । तृतीयं लोचनं दीप्तं सृष्टं मे रक्षता प्रजाः । तस्य चाक्ष्णो महत्तेजो येनायं मथितो गिरिः । त्वत्प्रियार्थञ्च मे देवि ! प्रकृतिस्थः पुनः कृतः" । दुर्गायाः त्रिनयनाशब्दवाच्यत्वे हेतुर्देवीपु० ४५ अ० उक्तो यथा

"पक्षिणां चोत्तरं लोकं तथा ब्रह्मायन परम् । नयं सन्मार्गधर्मत्वं दृष्टौ त्रिनयना मता" देवीपु० ४५ अ० । "पञ्चवक्त्रं त्रिनेत्रम्" शिवध्यानम् । "निजत्रिनेत्रत्वावतरत्वबोधिकाम्" नैष० साध्यगणभेदानां त्रिनेत्रत्वं मत्स्यपु० उक्तं यथा "ततः साध्यगणानीशस्त्रिनेत्रानसृसृन् पुनः । कोटयश्चतुरशीतिर्जरामरणवर्जिताः । कामं सृजन्नमर्त्यांस्तान् ब्रह्मणा विनिवारितः । नैवं विधा भवेत् सृष्टिर्जरामरणवर्जिता" ।

त्रिनवति स्त्री त्र्यधिका नवतिः शा० त० । १त्र्यधिकनवतिसंख्यायां २तत्संख्येये च । ततः पूरणे डट् । त्रिनवत तत्संख्यापूरणे त्रि० तमप् वा । त्रिनवतितम तत्संख्यापूरणे त्रि० स्त्रियामुभयतो ङीप् । पक्षे त्रयआदेशे त्रयोनवत्यादयोऽप्यत्र । तत्रायं भेदः "संख्या" पा० त्रिनवत्यादौ पूर्वपदे प्रकृतिस्वरः । त्रय आदेशोऽन्तोदात्त इति ।

त्रिनाक पु० नास्ति अकं दुःखं यस्मिन् नाकं पुण्यलोकः । तृतीयं नाकं वृत्तिविषये संख्याशब्दस्य पूरणार्थत्वात् । १तृतीये नाके २उत्तमस्थाने च । "यत्रानुकामं चरणं त्रिनाके" ऋ० ९।११३।९ । "तावत्त्रिनाकं नहुषः शशास" भाग० ६।१३।१३ श्लोकः ।

त्रिनाभ पु० त्रयो लोका नाभौ यस्य अच् समा० । विष्णौ "त्रिनाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे" भा० ९।१७। ० । विष्णुस्तुतौ ।

त्रिनिष्क त्रि० त्रिभिर्निष्कैः क्रीतम् ठञ् तस्य वा लुक् । त्रिभिर्निष्कैः क्रीते लुगभावे ठञि उत्तरपदस्य वृद्धिः । त्रिनैष्किक तत्रार्थे त्रि० ।

त्रिनेत्रचूड़ामणि पु० ६त० । चन्द्रे त्रिका० ।

त्रिपक्ष पु० तृतीयः पक्षः संख्याशब्दस्य वृत्तौ पूरणार्थत्वात् । तृतीये पक्षे "षष्ठे मासि त्रिपक्षे वा" स्मा० त० ।

त्रिपञ्च त्रि० ब० व० । त्रिगुणिताः पञ्च । पञ्चदशसंख्यान्विते "त्रिपञ्चारे पीठे" कर्पूरस्तवः ।

त्रिपञ्चाङ्ग पु० त्रिपञ्च पञ्चादशाङ्गान्यस्य । समाधिभेदे तदङ्गानि च "यमो हि नियमस्त्यागो मौनं देशः सुकालता । आसनं मूलबन्धश्च देहसाम्यञ्च दृक्स्थितिः । प्राणसंयमनञ्चैव प्रत्याहारश्च धारणा । आत्मध्यानं समाधिश्च प्रोक्तान्यङ्गानि वै क्रमात्" शब्दार्थचि० धृतवाक्योक्तानि ।

त्रिपञ्चाशत् स्त्री त्र्यधिका पञ्चाशत् शा०त०। १त्र्यधिकपञ्चाशत्संख्यायां २तत्संख्यान्विते च। ततः पूरणे डट्। ३त्रिपञ्चाश तत्संख्यापूरणे त्रि०। पक्षे तमप्। त्रिपञ्चाशत्तम तस्मिन्नर्थे स्त्रियामुभयतो ङीप्। पक्षे त्रय आदेशे। त्रयःपञ्चाशदादयोऽपि उक्तार्थेषु।

त्रिपटु पु० काचे पारस्करनिघण्टुः।

त्रिपताक न०तिस्रः पताका इव यस्मिन्। पताकाकारवलित्रयान्विते १ललाटे, हारा०। मध्यमानामिकासङ्कोचेनावशिष्टाङ्गुलित्रयोन्नतत्वेन २त्रिपताकाकारिते करे पु०। “त्रिपताकं करं कृत्वा” इत्यादि सा० द० जनान्तिकशब्दनिर्वचने स्थितम्।

त्रिपत्र पु० त्रीणि त्रीणि पत्राणि प्रतिपत्रं यस्य सप्तच्छदवत् संख्याशब्दस्य वृत्तौ वीप्सार्थत्वम्। १बिल्ववृक्षे। तदीयपत्रेषु ब्रह्मादीनां स्थितिरुक्ता यथा “ऊर्द्ध्वपत्रं हरो ज्ञेयः पत्रं वामं विधिः स्वयम्। अहं दक्षिणपत्रं च त्रिपत्रदलमित्युत” वृहद्धर्मपु० ११ अ०। २पुत्रत्रययुक्ते त्रि०। समा० द्विगुः। ३पत्रत्रये न०।

त्रिपत्रक पु० त्रिपत्र+संज्ञायां कन्। १पलाशवृक्षे राजनि०। त्रयाणां पत्राणां समाहारः संज्ञायां कन्। “तुलसी कुन्दमालूरपत्राग्र्याङ्कस्त्रिपत्रकम्” देवीपु० उक्ते २तुलस्यादिपत्रत्रये न०।

त्रिपथ न० त्रयाणां पथां समाहारः अच् समा०। “पथः संख्याव्ययादेः” पा०क्लीबता। १मार्गाणां त्रितये। त्रयः पन्थानो यत्र अच् समा०। २त्रिमार्गयुक्ते (तेमाथा पथ) इति ख्याते स्थाने। “शून्यागारे श्मशाने वा निर्जने वा चतुष्पथे। विल्ववाटोद्रुमस्थाने त्रिपथे वा भजेच्छिवम्। स भवेत् सर्वसिद्धीशः सर्ववेदविदां वरः’ गुप्तसाधनतन्त्रम्।

त्रिपथगा स्त्री त्रयाणां पथां समाहारः अच् समा० तेन गच्छति गम–ड। गङ्गायाम्। त्रिमार्गगादयोऽप्यत्र “गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च। त्रीन् पथो भावयन्तीति तस्मात् त्रिपथगा स्मृता” रामा० बा० ४४ अ०। “तराम सरितां श्रेष्ठां पुण्यां त्रिपथगां नदीम्” ४५ अ० ‘तन्वी शरत्त्रिपथगा पुलिने कपोलौ लोले दृशौ रुचिरचञ्चलखञ्जरीटौ” अमरुशत० “त्रिशिखां भ्रुकुटिञ्चास्य ददृशुर्दानवा रणे। ललाटस्थां त्रिकूटस्थां गङ्गां त्रिपथगामिव” हरिवं० २३५ अ०। “त्रीन् पथो हेतुना केन प्लावयेल्लोकपावनी। कथं गङ्गा त्रिपथगा विश्रुता सरिदुत्तमा। त्रिषु लोकेषु धर्मज्ञ! कर्मभिः कैः समन्विता” इत्युपक्रमे रामप्रश्ने विश्वामित्रस्योत्तरम् रामा० आ० ३६अ० वाक्यं गङ्गाशब्दे दृश्यम्। णिनि ङीप्। त्रिपथ गामिन्यादयोऽप्यत्र।

त्रिपदी स्त्री त्रयः पादा अस्याः अन्त्यलोपः समा०ङीपि पद्भावः। १त्रिपादयुक्तायां स्त्रियां २गायत्रीच्छन्दसि च तस्या अष्टाक्षरपादत्वेन चतुर्विंशत्यक्षरायास्त्रिपादत्वात् तथात्वम्। यथा “इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांसुरे” ऋ० १।२२।१७। “गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न हि पद्यसे” शत० ब्रा०१४।८।१५।१०। ३हस्तिनां पादबन्धनार्थरज्जुभेदे “नास्वसत् करिणां ग्रैवं त्रिपदीच्छेदिनामपि” रघुः ४अर्घ्याधारपात्रभेदे(तेपाइ)तन्त्रसा०५गोधापदीलतायां रत्नमा०। स्वार्थे क त्रिपदिकापि तत्रार्थे। भाषाकवितायां ६छन्दोभेदे तल्लक्षणं यथा“पज्झटिकान्ता यदि यमकान्ता द्वादशपरिक्षतमात्रा किन्नरगीतिस्तदिति नीवितिः स्याद्वसमाचरगात्रा। (स्वःपदान्तः)। यैषा सङ्गीतके नित्यं निवीतिः किन्नराख्यिका। सैव स्यात् प्राकृते गाने त्रिपदीति परिस्तुता” इति काव्योदयः। “ढाष्टपि” पा० टापि भत्वात् पद्भावः। त्रिपद ७गायत्र्यामृचि ऋग्भेदे स्त्री तच्छन्दस्के ८ऋङ्मात्रे स्त्री “त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम्” मनुः। “द्विपदा याश्चतुष्पदास्त्रिपदा याश्च षट्पदाः” यजु० २३।३४। ‘त्रीणि पदानि पादा अस्याः “इतिपदशब्देन समासः” वेददी०। त्रिविक्रमे ८परमेश्वरे पु० त्रीणि पदानि विचक्रमे इति श्रुतेस्तथात्वम्। “त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत्” विष्णुस०। ९अरत्नेर्दशमभागरूपपदत्रययुक्ते प्रक्रमे पु० यथा। “पञ्चारत्निः पुरुषो दशपदो द्वादशाङ्गुलं पदं प्रक्रमस्त्रिपदः समविभक्तस्य” कात्या० श्रौ० १६।८।२१ “पञ्चारत्नयो यस्य सः पञ्चभिररत्निभिः पुरुषः दशभिः पदैः पुरुषो द्वादशभिरङ्गुलैः पदम् इत्येवमर्थो न भवति इतः प्रागरत्न्यादीनां लक्षणस्यानुक्तत्वेनाभिहितत्वात् अतश्चैवम् पुरुषस्य समविभक्तस्य यः पञ्चमो भागः सोऽरत्निः तस्य दशमो भागः पदम् पदस्य द्वादशो भागोऽङ्गुलम् त्रिभिः पदैरेकः प्रक्रमः” कर्कः।

त्रिपरिक्रान्त पु०त्रिषु वृत्त्यर्थं कर्मसु परिक्रान्तः चेष्टमानः। याजनाध्यापनप्रतिग्रहरूपजीविकात्रयनिरते ब्राह्मणे। “त्रैविद्यो ब्राह्मणो विद्वान् न चाध्ययनजीवकः। त्रि-

कर्मा त्रिपरिक्रान्तो मैत्र एष स्मृतो द्विजः" भा० अनु० १४१ अ० ।

त्रिपर्ण पु० त्रीणि त्रीणि प्रतिपत्रं पर्णान्यस्याः । १किंशुके । २वनकार्पास्यां स्त्री राजनि० टाप् ङीप् वा । ३शालपर्ण्याम्, लतायां ४पृश्निपर्णीभेदे च स्त्री ङीप् भावप्र० । संज्ञायां कन् । त्रिपर्णिका कन्दाख्ये "त्रिपर्णी मधुरा शीता श्वासकासविषव्रणान् । विनाशयति सा नित्यं पित्तकोपप्रशान्तिकृत्" राजनि० । समा० द्विगुः । ५ पर्णत्रये स्त्री ङीप् ।

त्रिपाठ पु० ६त० । त्रयाणां पदक्रमसंहितानां पाठे ।

त्रिपाठिन् पु० त्रीन् पदक्रमसंहिताख्यपन्थान् पठति पठ-णिनि । वेदानां पदक्रमसंहिताख्यपथाध्यायिनि ।

त्रिपाण न० त्रिःकृत्वः पानं उदकपानं यस्य वृत्तौ सुपो लोपः संज्ञात्वात् णत्वम् । त्रिःकृत्वःपायिते १सूत्रभेदे २वल्कले च "तार्प्यं परिधापयति" कात्या० श्रौ० १५।४।७। "तार्प्यशब्दं स्वयमेव व्याकरोति "क्षौमम्" ८। क्षुमा अतसी तस्य विकारः । "त्रिपाणम्" ९ । त्रिःकृत्वः पायितं वा सकृदिति विकल्पः । वयनकाले उदकेन त्रिस्तर्पयित्वा यदूयते वस्त्रम् तत्तृप्यम् तस्य विकारस्तार्प्यम् त्रिः पायितैस्तन्तुभिर्व्यूतमित्यर्थः । केचित्त्रिपाणं वल्कलमित्याहुः" कर्कः ।

त्रिपाद पु० त्रयः पादा अस्य संख्यापूर्वत्वेऽपि समासान्तविधेरनित्यत्वान्नान्त्यलोपः । १परमेश्वरे "पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि" छा० उ० । भाष्यकारस्तु "त्रिपात् अस्यामृतः दिवीति" छित्त्वा त्रिपाद् त्रयः पादा अस्य सोऽयं त्रिपादिति हलन्तमाह । "नमो द्विशीर्ष्णे त्रिपदे चतुःशृङ्गाय तन्तवे" भाग० ८।१६।२६ । भत्वात् पादस्य पद्भावः । २ज्वरे च "ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः" हरिवं० १८१ अ० ।

त्रिपाद् पु० त्रयः पादा अस्य संख्यापूर्वत्वादन्त्यलोपः । १त्रिविक्रमे २विष्णौ तस्य तथात्वकथा यथा "भूयश्चैवाब्रवीदेनं वामनं वटुरूपिणम् । स्वल्पैः स्वल्पमते ! किन्ते पादैस्त्रिभिरनुत्तमम् ; कृत्स्नां ददामि ते विप्र ! पृथिवीं सागरैर्वृताम्" वामन उवाच "न पृथ्वीं कामये कृत्स्नां सन्तुष्टोऽस्मि पदैस्त्रिभिः । एष एव रुचिपत्रो मे वरो दानवसत्तम !" वैशम्पायन उवाच "तथाऽस्त्विति बलिः प्रोच्य स्पर्शयामास दानवः । पदानि त्रीणि देवाय विष्णवेऽमिततेजसे । तोये तु पतिते हस्ते वामनोऽभूदवामनः । सर्वदेवमयं रूपं दर्शयामास वै प्रभुः ॥ भूः पादौ द्यौः शिरश्चास्य चन्द्रादित्यौ च चक्षुषी । पादाङ्गुल्यः पिशाचाश्च हस्ताङ्गुल्यश्च गुह्यकाः" हरिवं० २६२ अ० "तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे । नभः प्रक्रममाणस्य पादमूले व्यवस्थितौ । विष्णोरमितवीर्य्यस्य वदन्त्येवं द्विजातयः" २६३ अ० "क्षितिं पदैकेन बलेर्विचक्रमे नभः शरीरेण दिशश्च बाहुभिः । पदं द्वितीयं क्रमतस्त्रिपिष्टपं न वै तृतीयाय तदीयमण्वपि । उरुक्रमस्याङ्घ्रिरुपर्य्युपर्य्यथो महर्जनाभ्यां तपसः परङ्गतः" भाग० ८।२०।२६ "बलिरुवाच "यद्युत्तमश्लोक ! भवान् ममेरितं वचो व्यलीकं सुरवर्य्य ! मन्यते । करोम्यृतं तन्न भवेत् प्रलम्भनं पदं तृतीयं कुरु शीर्ष्णि मे निजम्" ८।२२।२। "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे" ऋ० १।२२।१७। ३परमेश्वरे च त्रिपाद्शब्दे छा० उ० वाक्यं दृश्यम् । ४त्रेतायुगधर्मरूपे वृषे "राघवः शिथिलं तस्थौ भुवि धर्मस्त्रिपादिव" रघु० ।

त्रिपादिका स्त्री त्रयः पदाः मूलान्यस्याः कप् टाप् । हंसपदीलतायां राजनि० ।

त्रिपिण्ड न० त्रीणि पिण्डानि देयान्यत्र । पित्रादित्रयोद्देशेन कर्त्तव्ये १पार्वणश्राद्धे "ततः प्रभृति संक्रान्त्युपरागादिपर्वसु । त्रिपिण्डमाचरेत् श्राद्धमेकोद्दिष्टं मृताहनि" श्रा० त० मत्स्यपु० । समाहारद्विगुः ङीप् । २पित्राद्युद्देशेन पिण्डत्रये स्त्री ।

त्रिपिब पु० त्रिभिः कर्णाभ्यां जिह्वया च पिबति स्पृशति जलं पा-क । वार्ध्रीणसे लम्बकर्णे छागभेदे यथाह निगमे "त्रिपिबन्त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् । वार्ध्रीणसन्तु तं प्राहुर्याज्ञिकाः पितृकर्मणि" । "नद्यादौ पयः पिबतो यस्य त्रीणि जलं स्पृशन्ति कर्णौ जिह्वा च त्रिभिः पिबतीति त्रिपिबः" कुल्लू० ।

त्रिपि(वि)ष्टप न० मर्त्यपातालापेक्षया तृतीयं पि(वि)ष्टपं भुवनम् वृत्तौ त्रिशब्दस्य तृभागवत् पूरणार्थता । १स्वर्गे अमरः "तत् त्रिपिष्टपसङ्काशमिन्द्रप्रस्थं व्यरोचत" भा० आ० २०६ अ० । २आकाशे शब्दर० । [हला० ।

त्रिपिष्टप(व)सद् पु० त्रिपिष्टपे(वे) सीदति सद-क्विप् । देवे

त्रिपु पु० स्तेने निघण्टुः । तृपुरित्यत्र पाठान्तरम् ।

त्रिपुट पु० त्रीणि पुटान्यस्य । (खेसारी) १कलायभेदे २शरे, ३तालमायन्त्रे, ४हस्तभेदे शब्दर० । ५तीरे ६गोक्षुरवृक्षे

रत्नमा० । ७मल्लिकायां ८सूक्ष्मैलायां ९त्रिवृति (तेओड़ि) च स्त्री मेदि० । १०कर्णस्फोटलतायां ११स्थूलैलायां १२रक्तत्रिवृति च स्त्री राजनि० । १३देवीभेदे च स्त्री "ऋषिः सम्मोहनश्छन्दो गायत्री देवता पुनः । त्रिपुटाख्या द्विरुक्तैस्तैर्बीजैरङ्गानि षट् क्रमात्" तन्त्रसा०तस्याध्यानादिकं तत्रैव दृश्यम् १४त्रिवृति एरण्डे वा ङीप् । त्रयाणां पुटानां समाहारः । १५ पुटत्रये स्त्री ङीप् । त्रीणि पुटानि यस्य कप् ।१६व्रणाकारभेदे "तत्रायश्चतुरस्रो वृत्तस्त्रिपुटक इति सर्वव्रणसमासः" सुश्रुतः । त्रिपुट+स्वार्थे क संज्ञायां कन् वा । त्रिवृति वैदले "मुद्गवनमुद्गफलायमकुष्ठमसूरमङ्गल्यचणकसतीनत्रिपुटकहरेण्वाढ़कीप्रभृतयो वैदलाः" सुश्रु० ।

त्रिपुटिन् पु०त्रीणि पुटानि सन्त्यस्य इनि । एरण्डवृक्षे शब्दमा०

त्रिपुटी स्त्री त्रीणि पुटानि सन्त्यस्याः अच् गौरा० ङीष् । त्रिवृति भरतः ।

त्रिपुटीफल पु० त्रिपुटी पुटत्रयं फलेऽस्य । एरण्डवृक्षे हारा०

त्रिपुण्ड्र न०त्रयाणां पुण्ड्राणां इक्षुवदाकाराणां समाहारः । १ललाटस्थे तिर्य्यग् रेखात्रयात्मके, "वक्राः ललाटगास्तिस्रो भस्मरेखास्त्रिपुण्ड्रकम्" इत्युक्ते तिलकभेदे "विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया । पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः। तस्मान्मृदापि कर्त्तव्यं ललाटेऽपि त्रिपुण्ड्रकम्" ति०त० ब्रह्माण्डपुराणम् । "ऊर्द्ध्वपुण्ड्रं मृदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा । तिलकं वै द्विजः कुर्य्यात् चन्दनेन यदृच्छया । ऊर्द्ध्वपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियश्च त्रिपुण्ड्रकम् । अर्द्धचन्द्रञ्च वैश्यश्च वर्त्तुलं शूद्रयोनिजः" आ० त० । "शिवागमे दीक्षितैस्तु धार्य्यं तिर्य्यक् त्रिपुण्ड्रकम् । विष्ण्वागमे दीक्षितस्तु ऊर्द्ध्वपुण्ड्रं विधारयेत्" इति नागोजीभट्टधृतस्मृतसंहिता "मृत्स्नया भस्मना वापि त्रिपुण्ड्रं विन्दुसंयुतम् । ललाटे तिलकं कुर्य्याद्गायत्र्यावद्धकुन्तलः" इति महानिर्वाणतन्त्रम् "येषां वपुर्मनुष्याणां त्रिपुण्ड्रेण विना स्थितम् । श्मशानसदृशं तत् स्यान्न प्रेक्ष्यं पुण्यसज्जनैरिति" देवीभाग० । अपि च तत्रैव नारदं प्रति नारायणवाक्यम् "त्रिपुण्ड्रं ये विनिन्दन्ति निन्दन्ति शिवमेव ते । धारयन्ति च ये भक्त्या धारयन्ति तमेव ते । तिर्य्यग्रेखाः प्रदृश्यन्ते ललाटे सर्व्वदेहिनाम् । तथापि मानवा मूर्खा न कुर्वन्ति त्रिपुण्ड्रकमिति" ।

त्रिपुर् स्त्री त्रिगुणिताः पुरः समासान्तविधेरनित्यत्वात् आर्षे न अच् समा० । पुराणां त्रये त्रिपुरशब्दे च पुरत्रयं दृश्यम् । "ददाह तेन दुर्भेद्या हरोऽथ त्रिपुरो नृप !" भाग० ७।१०।५४ ।

त्रिपुर न० त्रयाणां पुराणां समाहारः । असुराणां १पुरत्रये । तत्पुरकथा भा० क० प० ३३ अ० ।

"ततस्ते सहिता राजन् ! संप्रधार्य्यासकृद्बहु । सर्व्वलोकेश्वरं वाक्यं प्रणम्येदमथाब्रुवन् । अस्माकं त्वं वरं देव ! प्रयच्छेमं पितामह ! । वयं पुराणि त्रीण्येव समास्थाय महीमिमाम् । विचरिष्याम लोकेऽस्मिँस्त्वत्प्रसादपुरस्कृताः। ततो वर्षसहस्रे तु समेष्यामः परस्परम् । एकीभावं गमिष्यन्ति पुराण्येतानि चानघ । समागतानि चैकत्वं यो हन्याद्भगवंस्तदा । एकेषुणा देववरः स नो मृत्युर्भविष्यति । एवमस्त्विति तान्देवः प्रत्युक्त्वा प्राविशद्दिवम् । ते तु लब्धवराः प्रीताः संप्रधार्य्य परस्परम् । पुरत्रयविसृष्ट्यर्थं मयं वव्रुर्महासुरम् । विश्वकर्म्माणमजरं दैत्यदानवपूजितम् । ततो मयः स्वतपसा चक्रे धीमान् पुराणि च । त्रीणि काञ्चनमेकं वै रौप्यं कार्ष्णायसं तथा । काञ्चनं दिवि तत्रासीदन्तरीक्षे च राजतम् । आयसञ्चाभवद्भौमं चक्रस्थं पृथिवीपते ! । एकैकं योजनशतं विस्तारायामसम्मितम् । गृहाट्टालकसंयुक्तं वृहत्प्राकारतोरणम् । गृहप्रवरसंवाधमसम्बाधमहापथम् । प्रासादैर्विविधैश्चैव द्वारैश्चाप्युपशोभितम् । पुरेषु चाभवन् राजन् ! राजानो वै पृथक् पृथक् । काञ्चनं तारकाक्षस्य चित्रमासीन्महात्मनः । राजतं कमलाक्षस्य विद्युन्मालिन आयसम् । त्रयस्ते दैत्यराजानस्त्रीँल्लोँकानाशु तेजसा । आक्रम्य तस्थुरूचुश्च कश्च नाम प्रजापतिः । तेषां दानवमुख्यानां प्रयुतान्यर्बुदानि च । कोट्यश्चाप्रतिवीराणां समाजग्मुस्ततस्ततः । मांसादाश्च सुदृप्ताश्च सुरैर्विनिकृताः पुरा । महदैश्वर्य्यमिच्छन्तस्त्रिपुरं दुर्गमाश्रिताः । सर्व्वेषाञ्च पुनस्तेषां सर्व्वयोगवहो मयः । तमाश्रित्य हि ते सर्व्वे वर्त्तयन्त्यकुतोभयाः । यो हि यं मनसा कामं दध्यात् त्रिपुरसंश्रयः । तस्मै कामं मयस्तं तं विदधे मायया तदा । तारकाक्षसुतो वीरो हरिर्नाम महाबलः । तपस्तेपे परमकं येनातुष्यत् पितामहः । सन्तुष्टमवृणोद्देवं वापी भवतु नः पुरे । शस्त्रैर्विनिहता यत्र क्षिप्ताः स्युर्बलवत्तराः । स तु लब्ध्वा वरं वीरस्तारकाक्षसुतो हरिः । ससृजे

तत्र वापीं तां मृतसञ्जीवनीं प्रभो! । येन रूपेण दैत्यास्तु येन योगेन चैव ह । मृतास्तस्यां परिक्षिप्तास्तादृशेनैव जज्ञिरे । तां प्राप्य ते पुनस्तांस्तु सर्वान् लोकान् बबाधिरे । महता तपसा सिद्धाः सुराणां भयवर्द्धनाः । न तेषामभवद्राजन् क्षयो युद्धे कथञ्चन" । "संगीयमानस्त्रिपुरावदानः" कुमा० । "गङ्गेव त्रिपुरद्विषः" रघुः "त्रिपुरदाहमुमापतिसेविनः" किरा० । त्रीणि पुराणि येषाम् । २तारकाक्षसुतहर्य्यादिषु असुरभेदे पु०ब०व० । त्रीन् धर्म्मार्थकामान् पिपर्त्ति पृ—क । ३देवीभेदे स्त्री । "वैष्णव्याः मन्त्रमुख्येषु त्रिपुरायास्ततः शृणु" तन्त्रसारः । "शृणु त्वं त्रिपुरामूर्त्तेः कामाख्यायास्तु पूजनम्" कालिकापु० ६२ अ० । शतदिनगर्य्यां त्रिपुराख्यदेशभेदे स्त्री ङीप् हेमच० ।

त्रिपुरघ्न पु० त्रिपुरं हन्ति हन—टक् । १महादेवे तस्य त्रिपुरहननकथा भा० क० ३४ अ० ।
"मूर्त्तिं सर्वां समाधाय त्रैलोक्यस्य ततस्ततः । रथं ते कल्पयिष्यामो देवेश्वर! महौजसम् । तथैव बुद्ध्या विहितं विश्वकर्म्मकृतं महत् । ततो विबुधशार्दूलास्तं रथं समकल्पयन् । विष्णुं सोमं हुताशञ्च तस्येषुं समकल्पयन् । शृङ्गमग्निर्बभूवास्य भल्लः सोमो विशाम्पते! । कुद्मलञ्चाभवद्विष्णुस्तस्मिन्निषुवरे तदा । बन्धुरं पृथिवीं देवीं विशालपुरमालिनीम् । सपर्वतवनद्वीपां चक्रुर्भूतधरां तदा । मन्दरः पर्वतश्चाक्षं जङ्घा तस्य महानदी । दिशश्च प्रदिशश्चैव परिवारो रथस्य ह । ईषा नक्षत्रवंशश्च युगः कृतयुगोऽभवत् । कूबरश्च रथस्यासीद्वासुकिर्भुजगोत्तमः । अपस्करमधिष्ठानं हिमवान् विन्ध्यपर्वतः । उदयास्तावधिष्ठाने गिरी चक्रुः सुरोत्तमाः । समुद्रमक्षमसृजन् दानवालयमुत्तमम् । सप्तर्षिमण्डलञ्चैव रथस्यासीत् परिष्कारः । गङ्गा सरस्वती सिन्धुर्धुरमाकाशमेव च । उपस्करो रथस्यासन्नापः सर्वाश्च निम्नगाः । अहोरात्राः कलाश्चैव काष्ठाश्च ऋतवस्तथा । अनुकर्षं ग्रहा दीप्ता वरूथञ्चापि तारकाः । धर्म्मार्थकामसंयुक्तं त्रिवेणुं दारुबन्धुरम् । ओषधीर्वीरुधस्तत्र नानापुष्पफलोपगाः । सूर्य्याचन्द्रमसौ कृत्वा चक्रे रथवरोत्तमे । पक्षौ पूर्वापरौ तत्र कृते रात्र्यहनी शुभे । दश नागपतीनीषां धृतराष्ट्रमुखान् दृढान् । द्यां युगं युगचर्म्माणि संवर्त्तकबलाहकान् । सन्ध्यां धृतिञ्च मेधाञ्च स्थितिं सन्नतिमेव च । ग्रहनक्षत्रताराभिश्चर्म्म चित्रं नभस्तलम् । सुराम्बुप्रेतवित्तानां पतीँल्लोकेश्वरान् हयान् । कालपृष्ठोऽथ नहुषः कर्कोटकधनञ्जयौ । इतरे चाभवन्नागा हयानां बालबन्धनाः । दिशश्च प्रदिशश्चैव रश्मयो रथवाजिनाम् । वषट्कारः प्रतोदोऽभूत् गायत्री शीर्षबन्धनी । सिनीवालीमनुमतिं कुहूं राकाञ्च सुव्रताम् । योक्त्राणि चक्रुर्वाहानां रोहकांस्तत्र कण्टकान् । कर्म्म सत्यं तपोऽर्थश्च विहितास्तत्र रश्मयः । अधिष्ठानं मनश्चासीत् परिरथ्या सरस्वती । नानावर्णाश्च चित्राश्च पताकाः पवनेरिताः । विद्युदिन्द्रधनुर्नद्धं रथं दीप्तं व्यदीपयन् । यो यज्ञे विहितः पूर्वमीशानस्य महात्मनः । संवत्सरो धनुस्तद्वै सावित्री ज्या महास्वना । दिवञ्च वर्म्म विहितं महार्हरत्नभूषितम् । अभेद्यं विरजस्कं वै कालचक्रबहिष्कृतम् । ध्वजयष्टिरभून्मेरुः श्रीमान् कनकपर्वतः । पताकाश्चाभवन्मेघास्तडिद्भिः समलङ्कृताः । रेजुरध्वर्युमध्यस्था ज्वलन्त इव पावकाः । कॢप्तन्तु तं रथं दृष्ट्वा विस्मिता देवताभवन् । सर्वलोकस्य तेजांसि दृष्ट्वैकस्थानि मारिष! । युक्तं निवेदयामासुर्देवास्तस्मै महात्मने । एवं तस्मिन् महाराज! कल्पिते रथसत्तमे । देवैर्मनुजशार्दूल! द्विषतामभिमर्दने । स्वान्यायुधानि दिव्यानि न्यदधात् शङ्करो रथे । ध्वजयष्टिं वियत् कृत्वा स्थापयामास गोवृषम् । ब्रह्मदण्डः कालदण्डो रुद्रदण्डस्तथा ज्वरः । परिष्कन्दा रथस्यासन् सर्वतोदिशमुद्यताः । अथर्वाङ्गिरसावास्तां चक्ररक्षौ महात्मनः । ऋग्वेदः सामवेदश्च पुराणञ्च पुरःसरा । इतिहासधनुर्वेदौ पृष्ठरक्षौ बभूवतुः । दिव्या वाचश्च दिव्याश्च परिपार्श्वचराः स्थिताः । स्तोत्रादयश्च राजेन्द्र! वषट्कारस्तथैव च । ओँकारश्च मुखे राजन्नति शोभाकरोऽभवत् । विचित्रमृतुभिः षड्भिः कृत्वा संवत्सरं धनुः । छायामेवात्मनश्चक्रे धनुर्ज्यामक्षयारणे । कालो हि भगवान् रुद्रस्तस्य संवत्सरो धनुः । तस्माद्रौद्री कालरात्रिर्ज्यां कृत्वा धनुषोऽजराम् । इषुश्चाप्यभवद्विष्णुर्ज्वलनः सोम एव च । अग्नीषोमं जगत् कृत्स्नं वैष्णवञ्चोच्यते जगत् । विष्णुश्चात्मा भगवतो भवस्यामिततेजसः । तस्माद्धनुर्ज्यासंस्पर्शं न विषेहुर्हरस्य ते । तस्मिन् शरे तिग्ममन्युर्मुमोचाविषहं प्रभुः । भृग्वङ्गिरोमन्युभवं क्रोधाग्निमतिदुःसहम् । स नीललोहितो धूम्रः कृत्तिवासा भयङ्करः । आदित्यायुतसङ्काशस्तेजो-

ज्वालाहतोऽज्वलत्। दुष्प्रापश्चप्रावनो जेता हन्ता ब्रह्मद्विषां हरः। नित्यं त्राता च हन्ता च धर्म्माधर्म्माश्रितान्नरान्। प्रमाथिभिर्भीमबलैर्भीमरूपैर्मनोजवैः। विभाति भगवान् स्थाणुस्तैरेवात्मगुणैर्युतः तस्याङ्गानि समाश्रित्य स्थितं विश्वमिदं जगत्। जङ्गमाजङ्गमं राजन्! शुशुभेऽद्भुतदर्शनम्। दृष्ट्वा तन्तु रथं युक्तं कवची स शरासनी। बाणमादाय तं दिव्यं सोमविष्ण्वग्निसम्भवम्। तस्य राजंस्तदा देवाः कल्पयाञ्चक्रिरे प्रभोः। पुण्यगन्धवहं राजन्! श्वसनं देवसत्तमम्। तमास्थाय महादेवस्त्रासयन् दैवतान्यपि। आरुरोह तदा यत्तः कम्पयन्निव मेदिनीम्। तमारुरुक्षुं देवेशं तुष्टुवुः परमर्षयः। गन्धर्वा देवसंघाश्च तथैवाप्सरसाङ्गणाः। ब्रह्मर्षिभिः स्तूयमानो वन्द्यमानश्च वन्दिभिः। तथैवाप्सरसांवृन्दैर्नृत्यद्भिर्नृत्यकोविदैः। स शोभमानो वरदः खड्गी बाणी शरासनी। हसन्निवाब्रवीद्देवान् सारथिः को भविष्यति। तमब्रुवन् देवगणा यं भवान् संनियोक्ष्यते। स भविष्यति देवेश! सारथिस्ते न संशयः। तानब्रवीत् पुनर्देवो मत्तः श्रेष्ठतरो हि यः। तं सारथिं कुरुध्वं मे स्वयं सञ्चिन्त्य मा चिरम्। एतच्छ्रुत्वा ततो देवा वाक्यमुक्तं महात्मना। गत्वा पितामहं देवाः प्रसाद्येदं वचोऽब्रुवन्। यथा तत् कथिता देव! त्रिदशारिविनिग्रहे। तथा च कृतमस्माभिः प्रसन्नो नो वृषध्वजः। रथश्च विहितोऽस्माभिर्विचित्रायुधसंवृतः। सारथिञ्च न जानीमः कः स्यात्तस्मिन् रथोत्तमे। तस्माद्विधीयतां कश्चित् सारथिर्देवसत्तम!। सफलां तां गिरं देव! कर्त्तुमर्हसि नो विभो! एवमस्मासु हि पुरा भगवन्नुक्तवानसि। हितं कर्त्तास्मि भवतामिति तत् कर्त्तुमर्हसि। स देवयुक्तो रथसत्तमो नो दुराधरो द्रावणः शात्रवाणाम्। पिनाकपाणिर्विहितोऽत्र योद्धा विभीषयन् दानवानुद्यतोऽसौ। तथैव वेदाश्चतुरो हयाग्र्या धरा सशैला च रथो महात्मनः। नक्षत्रवंशानुगतो वरूथी हरो हि योद्धा सारथिर्नाभिलक्ष्यः। तत्र सारथिरेष्टव्यः सर्वैरेतैर्विशेषवान्। तत्प्रतिष्ठो रथो देव! हरो योद्धा तथैव च। कवचानि सशस्त्राणि कार्म्मुकञ्च पितामह!। त्वामृते सारथिं तत्र नान्यं पश्यामहे वयम्। त्वं हि सर्वगुणैर्युक्तो दैवतेभ्योऽधिकः प्रभो!। स रथं तूर्णमारुह्य संयच्छ परमान् हयान्। जयाय त्रिदशेशानां बधाय त्रिदशद्विषाम्। इति ते शिरसा नत्वा त्रिलोकेशं पितामहम्। देवाः प्रसादयामासुः सारथ्यायेति नः श्रुतम्"। पितामह उवाच। "नात्र किञ्चिन्मृषा वाक्यं यदुक्तं त्रिदिवौकसः। संयच्छामि हयानेष युध्यतो वै कपर्दिनः"।

इत्युपक्रमे "तान् सोऽसुरगणान् दग्ध्वा प्राक्षिपत् पश्चिमार्णवे। एवन्तु त्रिपुरं दग्धं दानवाश्चाप्यशेषतः। महेश्वरेण क्रुद्धेन त्रैलोक्यस्य हितैषिणा" भा०क०३४अ०। भा० द्रो० २०० अ० किञ्चिदन्यथोक्तं यथा

"गन्धमादनविन्ध्यौ च कृत्वा वंशध्वजौ हरः। पृथ्वीं ससागरवनां रथं कृत्वा तु शङ्करः। अक्षं कृत्वा तु नागेन्द्रं शेषं नाम त्रिलोचनः। चक्रे कृत्वा तु चन्द्रार्कौ देवदेवः पिनाकधृक्। अणी कृत्वैलपत्त्रञ्च पुष्पदन्तञ्च त्र्यम्बकः। युगं कृत्वा तु मलयमवनाहञ्च तक्षकम्। योक्त्राङ्गानि च सत्त्वानि कृत्वा शर्वः प्रतापवान्। वेदान् कृत्वाथ चतुरश्चतुरोऽश्वान्महेश्वरः। उपवेदान् खलीनांश्च कृत्वा लोकत्रयेश्वरः। गायत्रीं प्रग्रहं कृत्वा सावित्रीञ्च महेश्वरः। कृत्वोङ्कारं प्रतोदञ्च ब्रह्माणञ्चैव सारथिम्। गाण्डीवं मन्दरं कृत्वा गुणं कृत्वा च वासुकिम्। विष्णुं शरोत्तमं कृत्वा शल्यमग्निं तथैव च। वायुं कृत्वाथ वाजाभ्यां पुङ्खे वैवस्वतं यमम्। विद्युत् कृत्वाथ निर्य्याणं मेरुं कृत्वाथ वै ध्वजम्। आरुह्य स रथं दिव्यं सर्वदेवमयं शिवः। त्रिपुरस्य बधार्थाय स्थाणुः प्रहरतां वरः। असुराणामन्तककरः श्रीमानतुलविक्रमः। स्तूयमानः सुरैः पार्थ! ऋषिभिश्च तपोधनैः। स्थानं माहेश्वरं कृत्वा दिव्यमप्रतिमं प्रभुः। अतिष्ठत् स्थाणुभूतः स सहस्रं परिवत्सरान्। यदा त्रीणि समेतानि अन्तरीक्षे पुराणि च। त्रिपर्वणा त्रिशल्येन तदा तानि बिभेद सः। पुराणि न च तं शेकुर्दानवाः प्रतिवीक्षितुम्। शरं कालाग्निसंयुक्तं विष्णुसोमसमायुतम्। पुराणि दग्धवन्तं तं देवा याता प्रवीक्षितुम्"।

त्रिपुरदहनादयोऽप्यत्र।

त्रिपुरभैरवी स्त्री त्रिपुरा भैरवी कर्म्म०। त्रिपुराख्यदेवीभेदे "आद्यं त्रिपुरभैरव्याः वीजमाद्यं प्रकीर्त्तितम्" इति "चिन्तयेद्वरदां देवीमेवं त्रिपुरभैरवीम्" इति च तन्त्रसा०

त्रिपुरमल्लिका स्त्री त्रीणि पुराणीव पूर्य्याणि यस्याः कर्म०। त्रिपुरमालिकापुष्पवृक्षभेदे त्रिका०।

त्रिपुरान्तक पु० त्रिपुरस्यान्तं करोति अन्त–णिच् ण्वुल्। शिवे अमरः।

त्रिपुरारि पु० ६त०। शिवे “त्रिपुरारिशिरश्चारि” गङ्गास्तवः।

त्रिपुरुष न० त्रयाणां पुरुषाणां समाहारः। १पित्रादिपुरुषत्रये। “क्रमात्त्रिपुरुषागता” स्मृतिः। त्रयः पुरुषाः पित्रादयो भोक्तारो यस्य। २भोगभेदे पु०। त्रिपूरुषादयोऽप्यत्र। व्यासः “प्रपितामहेन यद्भुक्तं तत् पुत्रेण विना च तम्। तौ विना यस्य भोगः स्यात् स विज्ञेयः त्रिपूरुषः। पिता पितामहो यस्य जीवेच्च प्रपितामहः। त्रयाणां जीवतां भोगो विज्ञेयस्त्वेकपूरुषः” व्यव०त०। त्रयः पुरुषाः परिमाणमस्याः ठन् तस्य लुक्। ३पुरुषत्रयपरिमिते त्रि० “अथ त्रिपुरुषां रज्जु मिमीते” शत०ब्रा०१०।२।१२। वा ङीप्। त्रिपुरुषीत्यप्यत्र।

त्रिपुषा स्त्री त्रीन् वातादिदोषान् पुष्णाति पुष–क। कृष्णत्रिवृति (कालतेओड़ि) शब्दच०।

त्रिपुष्कर न० त्रयाणां पुष्कराणां समाहारः। १पुष्करत्रये ब्रह्मकृततीर्थभेदे २ज्येष्ठमध्यमकनिष्ठभेदेषु त्रिषु पुष्कराभिधह्रदेषु। ३नक्षत्रतिथिवारयोगभेदे पु०। “वाराः क्रूरास्तिथिर्भद्रा नक्षत्रं भग्नपादकम्। जातेऽत्र जारजो योगो मरणेऽत्र त्रिपुष्करः” ज्यो०त०। स्वार्थे न अण्। त्रैपुष्करोऽप्यत्र पु० “भद्रातिथौ रविजभूतनयार्कवारे द्वीशार्यमाजचरणादितिवह्निवैश्वे। त्रैपुष्करो भवति मृत्युविनाशवृद्धौ त्रैगुण्यदो द्विगुणकृद्वसुतक्षचान्द्रे” मु० चि०।

“अथ त्रिपुष्करयोगं सफलं वसन्ततिलकयाह भद्रेति भद्रासंज्ञिका तिथिः द्वितीया सप्तमी द्वादशी तथा शनिभौमसूर्यवारेषु तथा द्वीशं विशाखा अर्यमोत्तराफाल्गुनी अजचरणः पूर्वभाद्रपदा अदितिः पुनर्वसुः वह्निः कृत्तिका विश्वमुत्तराषाढ़ा एषु षट्सु नक्षत्रेषु उक्ततिथिवारनक्षत्ररूपे विशिष्टयोगे सति त्रिपुष्कर एव त्रैपुष्करः प्रज्ञादिभ्यश्चेति स्वार्थेऽण्। त्रिपुष्करयोगो भवतीत्यर्थः कीदृशः। मृत्युविनाशवृद्धौ त्रैगुण्यदः तद्दिने यदि कश्चिन् म्रियेत तदा तदीयास्तत्सहितास्त्रयो म्रियेरन् यदि किञ्चिद्वस्तु विनष्टं तदा तस्य वस्तुत्रयनाशः तथा किञ्चिद्वस्तु लब्धं तदा त्रिगुणतद्वस्तुलाभः इत्यर्थः उक्तञ्च वसिष्ठेन। “रविरविजभौमवारे भद्रायां विषमपादनक्षत्रे। त्रैपुष्कराख्ययोगः त्रिगुणफलो यमलभैर्द्विगुणः”। नारदेनापि। “अर्कार्किभौमवारे चेद्भद्रायां विषमाङ्घ्रिभम्। त्रिपुष्करः त्रिगुणदो द्विगुणो यमलाङ्घ्रिभे”। अत्र यस्मिन्नक्षत्रे प्रथमपादान्ते तृतीयपादान्ते वा राशिसमाप्तिस्तद्विषमपादनक्षत्रमुच्यते तदेव स्पष्टं द्वीशार्यमेत्यादिनोपनिबद्धम् अथ वासवो धनिष्ठा तक्षा चित्रा चान्द्रं मृगः एतानि भानि भद्रास्तिथयः रविजभूतनयार्कवाराश्च अत्रापि विशिष्टयोगे सति द्विपुष्करनामा योगो भवति तत्फलं मृत्युविनाशवृद्धौ द्वैगुण्यकृत् मृते नष्टे वृद्धौ द्विगुणतां करोतीत्यर्थः “द्विगुणो यमलाङ्घ्रिभे” इत्युक्तेः यन्नक्षत्रे द्वितीयचरणान्ते राशिसमाप्तिस्तद्यमलाङ्घ्रिभं तच्च मृगचित्राधनिष्ठारूपमेव। अथ दैवात्त्रिपुष्करादिके तिथिवारनक्षत्रात्मके विशिष्टयोगे सति कस्यचिन्मरणसम्भवस्तदा तद्दोषशान्त्यर्थं दानं विधेयं यथाह वसिष्ठः “त्रितयं गवां हि दद्याद्दोषस्यापनुत्तये विद्वान्। द्वितयं द्विपुष्करेऽपि च तिलपिष्टैर्विप्रमुख्येभ्यः”। द्वितयं गवामिति शेषः अत्र तिथिवाराभावे केवलं विषमाङ्घ्रिभे यमलाङ्घ्रिभे वा मरणसम्भवे दोषो नास्तीत्यर्थः। अमुमर्थं स्पष्टमाह नारदः “प्रदद्याद्दोषनाशाय गोत्रयं मूल्यमेव वा। द्विपुष्करे द्वयं दद्यान्न दोषस्त्वृक्षमात्रतः” इति। अत्र त्रिपुष्करयोगे क्वचिद्बृहस्पतिवारोऽप्युक्तः यथाह कश्यपः “भद्रा तिथिः शनीज्यारवारे चेद्विषमाङ्घ्रिभम्। त्रिपुष्करं त्रिगुणदं द्विगुणं द्व्यङ्घ्रिभे मृतावित” इदमेव दृष्ट्वा श्रीपतिनाप्युक्तम्। “विषमचरणं धिष्ण्यं भद्रा तिथिर्यदि जायते सुरगुरुशनिक्ष्मापुत्राणां कथञ्चन वासरे। मुनिभिरुदितः सोऽयं योगः त्रिपुष्करसंज्ञितः त्रिगुणफलदो वृद्धौ नष्टे हृते च मृतेऽपि वा”। अस्य पूर्वोक्तवाक्यस्य चैकवाक्यतां देवाः कर्तुमर्हन्ति। कश्यपवाक्ये मृतावित पदोपादानान्मरण एवायं विचारो न तु नष्टे वृद्धौ च यदुक्तं ब्रह्मपुराणेऽपि “धनिष्ठापञ्चके जीवो मृतो यदि कथञ्चन। त्रिपुष्करे याम्यभे च कुलजान्मारयेत् ध्रुवम्। तदरिष्टविनाशार्थं विधानं समुदीरयेदिति” पी० धा०।

त्रिपुष्ट पु० त्रयः धर्मार्थकामाः पुष्टा अस्य। १प्राजापत्ये राजभेदे हेमच०। [स्थिते सत्यलोके हेमच०।

त्रिपृष्ठ न० त्रयाणां लोकानां पृष्ठः समाहारः। त्रिपृष्ठ-

त्रिपौरुष त्रि० त्रीन् पित्रादीन् पुरुषान् व्याप्नोति अण् उत्तरपदवृद्धिः। पित्रादिक्रमेण पुरुषत्रयव्यापके भोगादौ। त्रिपुरुषशब्दे दृश्यम्। स्त्रियां ङीप्

यस्य वेदश्च वेदी च उत्सन्ना त्रिपौरुषी स वै दुर्ब्राह्मणः" कात्या० श्रौ०८।२।१६ सूत्रे कर्कः।

त्रिप्रश्न पु० त्रयाणां दिग्देशकालानां प्रश्नः। १दिग्देशकालानां प्रश्ने २तन्मूलके दिगादिनिरूपणे च। तदधिकारेण सि० शि० उक्तं यथा "जगुर्विदोऽदः किल कालतत्त्वं दिग्देशकालावगमोऽत्र यस्मिन्। त्रिप्रश्ननाम्नि प्रचुरोक्तिधाम्नि"। सू० सि० "शिलातलेऽम्बुसंशुद्धे" इत्यादिनोक्त्वा "इति त्रिप्रश्नाधिकारः" इत्युक्तम् "दिग्देशकालानां प्रतिपादनमिदं परिपूर्त्तिमाप्तमित्यर्थः। दिशां साधनं शिलातल इत्यादि नियतं, तत्सम्बन्धेन समकोणयाम्योत्तरशङ्कूनां साधनान्यपि दिगन्तर्गतान्यनियतानि। पलभालम्बाक्षादिसाधनं देशनिरूपणं नियतम्। अपाचरादिसाधननियतम्। कालसाधनं तद्वच्छायादिसाधनं च कालनिरूपणमिति विवेकः" रङ्गना०।

त्रिप्रस्रुत पु० त्रिषु स्थानेषु प्रस्रुतः मेढ्रकपोलनेत्रेषु त्रिषु स्थानेषु क्षरितमदे मत्तगजे "गजानां तु प्रभिन्नानां त्रिधा प्रस्रवतां मदम्" भा० आ० २२१ अ०। "त्रिप्रस्रुतमदः शुष्मी षष्टिवर्षो मतङ्गराट्" १५१ अ०। "करात् कटाभ्यां मेढ्राच्च नेत्राभ्यां च मदस्रुतिः"। पालकाव्ये तु मदप्रस्रावस्य सप्तस्थानत्वोक्तेरिह प्राधान्यात् त्रिस्थानत्वं बोध्यम्।

त्रिप्लक्ष पु० देशभेदे तद्देशविवृतिः। "अवभृथमभ्यवयन्ति यमुनां त्रिप्लक्षावहरणं प्रति" कात्या० श्रौ० २४।६।३८। "यथा त्रिप्लक्षावहरणस्यार्जव्येन यमुनामवभृथमभ्युपैति तत्र च यमुनां प्राप्य त्रिप्लक्षहरणे देशे त्रिप्लक्षं नाम जनपदं प्राप्य तत्रैव यमुनायामवभृथमभ्युपैति तत्रैव हि देशे दृषद्वती मनुष्येभ्यस्तिरोभवति। बहूदकापि सती तत्रैवान्तर्हिता भवतीत्यर्थः" कर्कः।

त्रिफला स्त्री त्रयाणां फलानां समाहारः अजा० टाप्। "पथ्या विभीतधात्रीणां फलैः स्यात् त्रिफला समा" इत्युक्ते हरीतक्यादित्रये। तद्गुणा भावप्र० उक्ता यथा "फलत्रिकञ्च त्रिफला सा वरा च प्रकीर्तिता। त्रिफला कफपित्तघ्नी मेहकुष्ठहरा सरा। चक्षुष्या दीपनी रुच्या विषमज्वरनाशिनी"।

त्रिफलाघृत न० त्रिफलानां रसेन युक्तं घृतम् शा० त०। चक्रदत्तोक्ते घृतभेदे तच्च नानाविधं तत्रैवोक्तं यथा "त्रिफलाभृङ्गमहौषधमध्वाज्यच्छागपयसि गोमूत्रे। नागं सप्तनिषिक्तं करोति गरुडोपमञ्चक्षुः" अन्यदपि "त्रिफलाक्वाथकल्काभ्यां सपयस्कं शृतं घृतम्। तिमिराण्यचिराद्धन्ति पीतमेतन्निशामुखे"।

त्रिफलादिलौह न० भैषज्यरत्नावल्युक्ते लौहभेदे यथा "त्रिफला मुस्तकं व्योषं विडङ्गं पुष्करं वचा। चित्रकं मधुकञ्चैव पलांशं सूक्ष्मचूर्णितम्। अयश्चूर्णपलान्यष्टौ शुग्गुलोस्तावदेव हि। आलोड्य मधुनोपेतं पलद्वादशकेन च। प्रातर्विलिह्य भुञ्जानो जीर्णे तस्मिन् जयेद्रुजः। दुःसाध्यमामवातञ्च पाण्डुरोगं हलीमकम्। जीर्णान्नसम्भवं शूलं श्वयथुं विषमज्वरम्"

त्रिफलाद्यघृत न० चक्रदत्तोक्ते घृतभेदे तदपि लघुमहद्भेदेन द्विविधं तत्र लघु यथा

"फलत्रिकं भीरुकषायसिद्धं कल्केन यष्टीमधुकस्य युक्तम्। सर्पिः समं क्षौद्रचतुर्थभागं हन्यात् त्रिदोषं तिमिरं प्रवृद्धम्" महत् यथा

"त्रिफलाया रसप्रस्थं प्रस्थं भृङ्गरसस्य च। वृषभस्य रसप्रस्थं शतावर्य्याश्च तत्समम्। अजाक्षीरं गुडूच्याश्च आमलक्यारसस्तथा। प्रस्थं प्रस्थं समाहृत्य सर्वैरभिर्घृतं पचेत्। कल्कः कणा सिता द्राक्षा त्रिफला नीलमुत्पलम्। मधुकं क्षीरकाकोली मधुपर्णी निदिग्धिका। तत्साधुसिद्धं विज्ञाय शुभे भाण्डे निधापयेत्। ऊर्द्ध्वं पानमधःपानं मध्यपानञ्च शस्यते। यावन्तो नेत्ररोगास्तान् पानादेवापकर्षति। सरक्ते रक्तदुष्टे च रक्ते चातिस्रुतेऽपि च। नक्तान्ध्ये तिमिरे काचे नीलिकापटलार्बुदे। अभिष्यन्देऽधिमन्थे च पक्ष्मकोपे सुदारुणे। नेत्ररोगेषु सर्वेषु वातपित्तकफेषु च। अदृष्टिं मन्ददृष्टिञ्च कफवातप्रदूषिताम्। स्रवतो वातपित्ताभ्यां सकण्डूमसददूरदृक्। गृध्रदृष्टिकरं सद्यो बलवर्णाग्निवर्द्धनम्। सर्वनेत्रामयं हन्यात्त्रिफलाद्यं महद्घृतम्"।

त्रिःफलीकृत त्रि० त्रिः त्रिवारं फलीकृतः वितुषीकृतः। त्रिधा वितुषीकृते तण्डुलादौ। "दक्षिणोत्तराभ्यां पाणिभ्यां त्रिःफलीकृतांस्तण्डुलांस्त्रिर्देवताभ्यः प्रक्षालयेत्" गोभिलः "त्रिःफलीकृतान् त्रिधा वितुषीकृतान्" सं०त० रघुनन्दनः।

त्रिबन्धन पु० हर्य्यश्वपौत्रे १नृपभेदे। "हर्य्यश्वस्तत्सुतस्तस्मादरुणोऽथ त्रिबन्धनः" भाग०९।७।४। त्रीणि बन्धनानि यस्य। २जाग्रदाद्यवस्थात्रययुक्ते जीवे पु०।

त्रिवली(लि) स्त्री त्रिगुणिता व(ली)वलिः । १उदरस्थे वलीत्रये "त्रिवलीवलयोपेतां भ्रुकुटीभीषणाननाम्" दुर्गाध्यानम् । तिसृणां वलीनां समाहारः । २त्रिवलि तदर्थे न० उज्ज्वलदत्तः । [तस्य वलीत्रयवत्त्वात्तथात्वम् ।

त्रिवलीक न० तिस्रो वल्यो यत्र कप् । पायौ हेम० ।

त्रिबाहु पु० त्रयो बाहवोऽस्य । १रुद्रानुचरभेदे "त्रिबाहुः पञ्चबाहुश्च व्याघ्रवक्त्रः सितानन:" हरिवं० २७७ अ० । २असियुद्धाकारभेदे । "त्रिबाहुस्तुङ्गबाहुश्च" हरिवं ६१६ अ० । खड्गशब्दे २४६० दृश्यम् ।

त्रिभ न० त्रयाणां भानां राशीनां समाहारः । १लग्नादिराशित्रये । "त्रिभं त्रिभं लग्नभतः क्रमेण स्त्रीणां नृणां रात्रिदिनेषु तेषु" नील०ता० । २राशित्रयमात्रे च । "इत्रिभग्रहजक्रान्तिभागघ्नाः क्षेपलिप्तिकाः" सू०सि० । त्रीणि भानि नक्षत्राणि यत्र । ३नक्षत्रत्रययुक्ते "कार्त्तिक्यादिषु संयोगे कृत्तिकादि द्वयं द्वयम् । अन्त्योपान्त्यौ पञ्चमश्च त्रिभं मासत्रयं स्मृतम्" सू०सि० । "अत्र कार्त्तिकस्यादित्वेन यहादन्त्य आश्विनः उपान्त्यः भाद्रः पञ्चमः फाल्गुनः । मासत्रयं त्रिभिः स्मृतम् । रेवत्यश्विनीभरणीतिनक्षत्रत्रयसम्बन्धादाश्विनः । शततारापूर्वोत्तराभाद्रपदेति नक्षत्रत्रयसम्बन्धाद्भाद्रपदः पूर्वोत्तरफाल्गुनीहस्तेति नक्षत्रत्रययोगात् फाल्गुनः" रङ्गना० ।

त्रिभङ्गी स्त्री "प्रथमं यदि दशमं वदति विरामं तदनु निकामं वसुकम् । वसुविमलतरङ्गममतिहृदयङ्गमहृषितभुजङ्गमन्तपतिलकम् । त्रिंशद्विकलासुविहितनिवासं सततविलासं हृदयमुदेति मदमुदितभुजङ्गी मोहनरङ्गी वदति त्रिभङ्गीवृत्तमदः" इत्युक्ते मात्रावृत्ते छन्दोभेदे ।

त्रिभजीवा स्त्री ६त० राशित्रयधनुराकारक्षेत्रस्य जीवायाम् त्रिज्यायां त्रिज्याशब्दे दृश्यम् । "शङ्कुः सत्रिभजीवाघ्नः" सू० सि० । त्रिभज्याप्यत्र । "त्रिभज्यया भवेच्छङ्कुस्तद्वर्गं परिशोधयेत्" सू० सि० ।

त्रिभण्डी स्त्री त्रीन् वातादिदोषान् भण्डति भण्ड—परिभाषणे अण् । त्रिवृति (तेओड़ि) अमरः ।

त्रिभद्र न० त्रिषु दन्तक्षताश्लिङ्गनमर्द्दनेष्वपि भद्रं यत्र । सुरते त्रिका० ।

त्रिभाग पु० तृतीयो भागः वृत्तौ संख्याशब्दस्य पूरणार्थत्वम् । तृतीये भागे "त्रिभागशेषासु निशासु च क्षणम्" कुमा० । "अश्वयुक्कृष्णपक्षे तु श्राद्धं कुर्य्यात् दिने दिने । त्रिभागहीनं पक्षं वा त्रिभागं त्वर्द्धमेव वा" ११४० ब्रह्मपु० ।

त्रिभानु पु० तुर्वसुवंश्ये नृपभेदे । "तुर्वसोस्तु सुतो वह्निर्वह्नेर्भर्गोऽथ भानुमान् । त्रिभानुस्तत्सुतोऽस्यापि करन्धम उदारधीः" भाग० ९।२३।४ ।

त्रिभाव पु० त्रिषु कालेषु भावोऽस्य । त्रैकालिके पदार्थे तस्य भावः कर्म वा ब्राह्मणा० ष्यञ् । त्रैभाव्य तद्भावादौ न० ।

त्रिभुक्ति पु० त्रिषु भुक्तिरस्य । (तीरहुत) देशभेदे त्रिका० ।

त्रिभुज न० त्रयो भुजा यत्र । त्रिबाहुके त्रिकोणे क्षेत्रभेदे क्षेत्रशब्दे दृश्यम् । "त्रिभुजे भुजयोर्योगस्तदन्तरगुणो भृवा हृतो लब्ध्या" "स्पष्टं त्रिभुजे फलं भवति" लीला० । "योनिं कृत्वा त्रिभुजं शयानः" अथ० ८।९। अत्र योनिं त्रिभुजमिव कृत्वेत्यर्थः तेन न स्त्रीत्वम् । अतः त्रिभुज् इति शब्दान्तरकल्पनं प्रामादिकम् ।

त्रिभुवन न० त्रयाणां भुवनानां लोकानां समाहारः पात्रा० न ङीप् । त्रिलोक्यां मिलितेषु स्वर्गमर्त्यपातालेषु । "त्रिभुवनजये सा पञ्चेषोः करोति सहायताम्" सा०द० "त्रिभुवनगुरोर्धाम चण्डीश्वरस्य" मेघ० ।

त्रिभूम पु० तिस्रो भूमयः ऊर्द्ध्वाधोमध्यस्था अस्य अच् समा० । (तेताला) प्रासादभेदे ।

त्रिमण्डला स्त्री लूताभेदे "लूतास्तु द्विविधा स्मृताः" "तासामष्टौ कृच्छ्रसाध्यावर्ज्यास्तावत्य एव तु । त्रिमण्डला तथा श्वेता कपिला पितिका तथा । आलमूत्रविषा रक्ता कमला चाष्टमी स्मृता । ताभिर्दष्टे शिरो दुःखं कण्डूर्दंशे च वेदना । भवन्ति च विशेषेण गदाः श्लैष्मिकवातिकाः" । "त्रिमण्डलया दंशेऽसृक् कृष्णं स्रवति दीर्य्यते" इति च सुश्रु० ।

त्रिमद पु० त्रिगुणितो मदः संज्ञात्वात् कर्म० । "विद्यामदो धनमदस्तथैवाभिजनो मदः । एते मदा मदान्धानां त एव हि सतां दमाः" १इत्युक्ते गर्वत्रये "नूनं नृपाणां त्रिमदोत्-पथानां महीं मुहुश्चालयतां चमूभिः" भाग० ३।१।४२ । २मुस्ताचित्रकविडङ्गेषु च वैद्यकम् ।

त्रिमधु न० त्रिगुणितं मधु संज्ञात्वात् कर्म० । "दुग्धं सिता माक्षिकञ्च विज्ञेयं मधुरत्रयम्" इत्युक्ते १दुग्धादित्रये । २ऋग्वेदैकदेशे पु० ३तद्व्रतभेदे तदाचरणेन ४तदध्यायिनि पु०मिता० "मधुवाता इति त्रयः मधुशब्दा यत्र । मधुवाता इत्यादिके ५ऋक्त्रये पु० । "वेदार्थवित् ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णकः" याज्ञ० । "त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडङ्गवित्" मनुः । ६मधुशब्दत्रये च

"गायत्रीं त्रिः सकृद्वापि जपेद्व्याहृतिपूर्विकाम्। मधुवाता इति त्र्यृचं मध्वित्येतत् त्रिकं जपेत्" इति पारस्करः। ७आज्यमधुसितात्रये न० "कमलैश्च त्रिमध्वक्तैर्जुनेदष्टोत्तरं शतम्" तन्त्र०।

त्रिमधुर न० त्रिगुणितं मधुरं संज्ञात्वात् कर्म्म०। दुग्धसितामाक्षिकरूपे मधुरत्रये त्रिमधुशब्दे दृश्यम्। "त्रिमधुरेणाभ्यर्च्च्येन्नागान्" वृह० ४८ अ०।

त्रिमातृ त्रि० त्रयाणां लोकानां माता निर्म्माता। लोकत्रयनिर्म्मातरि "उत त्रिमाता विदथेषु सम्राट्" ऋ० ३।५६।५ भा०।

त्रिमात्र पु० तिस्रः मात्रा उच्चारणकालेऽस्य। प्लुतस्वरे "एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्द्धमात्रकम्" शिक्षा०। "प्रणवस्य ऋषिर्ब्रह्मा देवोऽग्निस्तस्य कथ्यते। गायत्रञ्च भवेच्छन्दो नियोगः सर्वकर्मसु। त्रिमात्रस्तु प्रयोक्तव्यः प्रारम्भे सर्वकर्म्मणाम्" संवर्त्तः। भोजदेवेन तु तस्य सार्द्धत्रिमात्रकतोक्ता यथा "तज्जपस्तदर्थभावनम्" पा० सू० "तस्य सार्द्धत्रिमात्रिकस्य प्रणवस्य जपः" वृत्तिः। युक्तञ्चैतत् ओकारस्य प्लुतत्वेन त्रिमात्रत्वेऽपि तदुत्तरमकारस्य व्यञ्जनत्वादर्द्धमात्रत्वेन सार्द्धत्रिमात्रत्वं संवर्तवचने त्रिमात्रपदं सार्द्धत्रिमात्रे लाक्षणिकमिति बोध्यम्। वस्तुतः मकारान्तत्वे सार्द्धत्रिमात्रत्वम् अनुस्वारान्तत्वे त्रिमात्रत्वमिति भेदः। तदभिप्रायेणैव तस्य त्रिमात्रतया जपफलं प्रश्नोपनिषद्युक्तं तच्च ओम् शब्दे १५६० पृ० दर्शितम्।

त्रिमार्गगा स्त्री त्रिभिर्मार्गैर्गच्छति गम–ड। १गङ्गायां हेमच०। "त्रिमार्गगावीचिविमर्द्दशीतः" रघुः। "अन्वर्थसंज्ञैव परं त्रिमार्गगा" माघः। गम–णिनि। त्रिमार्गगामिन्यादयोऽप्यत्र।

त्रिमार्गी स्त्री त्रयो मार्गा अस्याः। १गङ्गायां "त्रिमार्गयेव त्रिदिवस्य मार्गः" कुमा०। (तेमाता) २पथि। "त्रयाणां मार्गाणां समाहारः। ३मार्गत्रये स्त्री ङीप्। [हेमच०।

त्रिमुकुट पु० त्रीणि मुकुटानीव शृङ्गाणि यस्य। त्रिकूटपर्वते

त्रिमुख पु० त्रीणि मुखानि अस्य। १शाक्यमुनौ त्रिका०। गायत्रीजपाङ्गे चतुर्विंशतिमुद्रान्तर्गते मुद्राभेदे तल्लक्षणं विधानपारिजाते उक्तं यथा "संमुखासक्तयोः पाण्योः कनिष्ठाद्वययोगतः। शेषाङ्गुलीनां वैरल्यात् मुद्राः स्युर्द्विमुखादयः"। "संमुखासक्तपाण्योः कनिष्ठाद्वययोगेन शेषाङ्गुलीनां द्विरलत्वेनाङ्गुष्ठद्वयमारभ्यानामिकान्तं यावत् द्विमुखत्रिमुखचतुर्मुखपञ्चमुखाः मुद्राः स्युः' 'तद्व्याख्या। तथा चाङ्गुष्ठतर्ज्जनीनां वैरल्ये त्रिमुखमुद्रा। २बुद्धदेवीभेदे मायादेव्यां स्त्री त्रिका०।

त्रिमुनि न० त्रयाणां मुनीनां समाहारः। पाणिनिकात्यायनपतञ्जलिरूपे मुनित्रये। त्रयो मुनयो वंश्याः "संख्या वंश्येन" पा० स०। पाणिन्यादिमुनित्रयप्रणीते व्याकरणे विद्यातद्वतामभेदविवक्षया तस्य तथात्वम् "वंशश्च जन्मना विद्यया वा तत्र भवः वंश्यः" इति सि०कौ०।

त्रिमूर्त्ति पु० तिस्रो मूर्त्तयोऽस्य। ब्रह्मविष्णुशिवरूपमूर्त्तित्रययुक्ते परमेश्वरे। "नमस्त्रिमूर्त्तये तुभ्यं प्राक्सृष्टेः केवलात्मने" कुमा०। त्रिमूर्तिर्यः सर्गस्थितिविलयकर्माणि तनुते" चिन्तामणिः २ब्रह्मशक्तिभेदे स्त्री। "एकमूर्तिरपि भिन्नरूपिणी या जगज्जननपालनक्षये। कार्य्युतेश्वरतया विवर्त्तते ब्रह्मशक्तिमहमानतोऽस्मि ताम्" शब्दार्थचि० धृ० वाक्यम्। ३बुद्धदेवीभेदे स्त्री त्रिका०।

त्रिमूर्द्ध पु० त्रयो मूर्द्धानोऽस्य ष समा०। मूर्द्धत्रययुक्ते। "वङ्कमूर्द्धौ द्विमूर्द्धा च त्रिमूर्द्धा चाहतो वधे" भट्टिः।

त्रियम्बक पु० त्रीण्यम्बकानि दृष्टयो यस्य। "छन्दस्युभयथा" पा० या इयङ्। त्रिनेत्रे। क्वचिल्लोकेऽपि इयङ् "त्रियम्बकं संयमिनं ददर्श" कुमा० तद्व्याख्यायां मल्लिनाथेन मन्त्राकविप्रयोग एव तत्र मूलतयोक्तः।

त्रियव न० त्रयो यवाः परिमाणमस्य। कृष्णले "सर्षपाः षट् यवो मध्यस्त्रियवं त्वेककृष्णलम्" मनुः।

त्रियष्टि स्त्री त्रिषु वातादिषु यष्टिरिव विद्रावकत्वात्। (चेतपापड़ा) १क्षुपभेदे रत्नमा०। तिस्रो यष्टयो यस्य। २त्रिगुच्छे हारभेदे पु०।

त्रियामक न० त्रिषु कालेषु यमयति अन्तर्भूतण्यर्थे यम–[ण्वुल्। पापे शब्दमा०।

त्रियामा स्त्री त्रयो यामा अस्याः आद्यान्त्ययोरर्द्धयामयोश्चेष्टाकालत्वेन दिनप्रायत्वात्। १निशायाम् अमरः "त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम्। नाड़ीनां, तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते" ति० त०। "संक्षिप्येत क्षणमिव कथं दीर्घयामा त्रियामा" मेघ०। "कच्चिदसमेतपरिच्छदस्त्रियामाम्" रघुः। "ज्योतिर्भिरुद्यद्भिरिव त्रियामा" कुमा० २हरिद्रायाम् अमरः। कृष्णत्वात् ३यमुनायां ४नील्यां ५कृष्णत्रिवृति च उणादिको०।

त्रियुग पु० त्रीणि युगानि आविर्भावकालोऽस्य। १यज्ञपुरुषे तस्य कलियुगे आविर्भावाभावात् कलौ छन्नत्वात् वा। "इत्थं नृतिर्य्यगृषिदेवझषावतारैर्लोकान् विभावयसि

र्हसि जगत् प्रतीपान् । धर्मं महापुरुष ! पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम्" भाग० ७।९।३८ "कलौ तु तन्न करोषि यतस्तदा त्वं छन्नोऽभवः यतस्त्रिष्वेव युगेष्वाविर्भावात् स एवम्भूतस्त्वं त्रियुग इति प्रसिद्धः" श्रीधरस्वामी । २वसन्तादिकालत्रये । "या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा" यजु० १२।७५ "युगशब्दः कालवाची त्रयाणां युगानां समाहारस्त्रियुगं त्रिकालं वसन्ते प्रावृषि शरदि च । वेददी० ।

त्रियूह पुंस्त्री कपिलाश्वे हेमच० स्त्रियां ङीष् ।

त्रिरात्र न० तिसृणां रात्रीणां समाहारः अच् समा० । "अह्नाहान्ताः क्लेऽभेदाः रात्रान्ताः प्रागसंख्यकाः" इत्यमरोक्तेः संख्यापूर्वत्वात् क्लीबता । १रात्रित्रये २तदुपलक्षिते दिनत्रये च । "उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम्" "अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत्" मनुः । त्रिभिः रात्रिभिः निर्वृत्तम् ठञ् तस्य लुक् । तद्धितार्थद्विगुत्वात् अच् समा० । ३दिनत्रयोपवाससाध्ये व्रतभेदे न० । "एकरात्रं त्रिरात्रं वा षड्रात्रं वा विधीयते" प्रा० वि० धृतवचनम् । रात्रित्रयसाध्ये ४गर्गवेदादौ यज्ञभेदे पु० । "सहस्रदक्षिणे त्रिरात्रे" कात्या० श्रौ० १२।४।१५ । गर्गत्रिरात्रशब्दे २५४५ पृ० दृश्यम् । [शब्दे दृश्यम् ।

त्रिरूप पु० त्रीणि रूपाण्यस्य । अश्वमेधीये अश्वभेदे अश्वमेध-

त्रिरेख पु० तिस्रो रेखा यत्र । १शङ्खे हेमच० । समा० द्वि० । २रेखात्रये न० । ["त्रिलोनोऽष्टौ" वृ० र० ।

त्रिल पु० त्रयो लाः लघुवर्णा यत्र । लघुवर्णयुक्ते नगणे

त्रिलघु त्रि० त्रयो लघवः यत्र । छन्दोग्रन्थप्रसिद्धे नगणे "त्रिलघुश्च नकारः" छन्दोम० । त्रिभिर्लघुः । २शुभलक्षणभेदान्विते स्थानत्रयह्रस्वे पुरुषे "त्रिपृथुलघुगम्भीर" इत्युद्देशे "ग्रीवाजङ्घामेहनैश्च त्रिभिर्ह्रस्वोऽयमीड़ितः" काशी० ११अ० । वृ०स०६८अ०तु चतुर्ह्रस्वस्यैव शुभत्वमुक्तं यथा "ह्रस्वानि चत्वारि च लिङ्गपृष्ठं ग्रीवा च जङ्घे च हितप्रदानि" तत्र ह्रस्वे पृष्ठाधिक्यमिति भेदः ।

त्रिलवण न० त्रयाणां लवणानां समाहारः पात्रा० न ङीप् त्रिगुणितं लवणं वा संज्ञात्वात् कर्म० वा । "सैन्धवञ्च विड़ञ्चैव रुचकं च तृतीयकम् । मिलित्वैतत् त्रिलवणम्" इत्युक्ते लवणत्रये राजनि० ।

त्रिलिङ्ग त्रि० त्रीणि लिङ्गान्यस्य । १पुंस्त्वादिलिङ्गत्रययुक्ते शब्दे । समा० द्वि० ङीप् । २लिङ्गत्रये स्त्री "त्रिलिङ्ग्यां त्रिष्विति पदम्" अमरः । त्रीणि सत्वादीनि लिङ्गानि अनुमापकान्यस्य । ३अहङ्कारादौ त्रि० "रजःप्रधानान्महतस्त्रिलिङ्गो दैवनोदितात् जातः ससर्ज भूतादिर्वियदादीनि पञ्चशः" भाग० ३।२०।१४ । ४वातादिधातुदोषजे रोगे च त्रि० सुश्रुतः ।

त्रिलोकधृत् पु० त्रयाणां लोकानां धृत् धृतिरस्य, धृ—सम्प० भावे क्विप् उत्तरपदद्विगुः । लोकत्रयस्यापतनानुकूलप्रयत्नविशेषरूपधारणशालिनि परमेश्वरे "लोकस्वामी त्रिलोकधृत्" विष्णुस० ।

त्रिलोकनाथ पु० त्रयाणां लोकानां नाथः उत्तरपदद्विगुघटितस्तत्पुरुषः । त्रयाणां लोकानां नाथे परमेश्वरादौ । "त्रिलोकनाथेन सतां मखद्विषः" रघुः । "त्रिलोकनाथः पितृसद्मगोचरः" कुमा० । त्रिलोकपत्यादयोऽप्यत्र ।

त्रिलोकात्मन् पु० त्रयो लोकाः आत्मानः स्वरूपाणि यस्य कार्य्यकारणयोरभेदात् उत्तरपदद्विगुघटितस्तत्पुरुषो वा । १परमेश्वरे "त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः" विष्णुपु० ।

त्रिलोकी स्त्री त्रयाणां लोकानां समाहारः ङीप् । स्वर्गमर्त्यपातालरूपे लोकत्रये "यदि त्रिलोकी गणनापरा स्यात्" नैष० । "श्रियं त्रिलोकीतिलकः स एव" माघः ।

त्रिलोकेश पु० त्रयाणां लोकानामीशः उत्तरपदद्विगुघटितस्तत्पुरुषः । १परमेश्वरे "त्रिलोकात्मा त्रिलोकेशः" विष्णु० । २सूर्ये शब्दच० । त्रिलोकेश्वरादयोऽप्यत्र ।

त्रिलोचन पु० त्रीणि लोचनानि यस्य । १शिवे "त्रिलोचनैकांशतया दुरासदः" रघुः । "त्रिलोचनस्तामुपचक्रमे च" कुमा० । २काशीस्थे चतुर्दशमहालिङ्गान्तर्गते लिङ्गभेदे न० । "द्वितीयं च त्रिलोचनम्" ७५ अ० । तन्माहात्म्यं च तत्रैव दृश्यम् । ३लोचनत्रययुक्ते त्रि० "मुखेन पूर्णेन्दुनिभस्त्रिलोचनः" माघः । ४दुर्गायां स्त्री । "लोचनत्रयसंयुक्ताम्" दुर्गाध्यानोक्तेः ।

त्रिलोचनाष्टमी स्त्री गौणचान्द्रज्यैष्ठकृष्णाष्टम्याम् "ज्यैष्ठे मासि नृपश्रेष्ठ ! कृष्णाष्टम्यां त्रिलोचनम् । यः पूजयति देवेशमीशलोकं स गच्छति" संवत्सरकौमुदीधृतभविष्यपुराणम् । "ज्यैष्ठे मास्यसिते पक्षे अष्टम्याञ्च महेश्वरि ! । शिवार्च्चने च तल्लोकं लभते नात्र संशयः" उत्तरकामाख्यातन्त्रे ११ पटले ।

त्रिलोहक त्रि० त्रीणि लोहानि धातवो यत्र कप् संज्ञायां कन् वा । स्वर्णरजतताम्रमये पात्रादौ ।

त्रिलौही स्त्री त्रीणि लौहानि साधनत्वेनास्त्यस्याः गौरा० ङीष्। सुवर्णरजतताम्रपरिमाणभेदेन निर्मिते मुद्राभेदे "अथ मन्त्रिणां हितार्थाय त्रिलौही मुद्रा निरूप्यते। सोमसूर्य्याग्निरूपाः सुवर्णं लौहत्रयं तथा। रौप्यमिन्दुः स्मृतो हेम सूर्य्यस्ताम्रो हुताशनः। लौहभागाः समुद्दिष्टाः स्वराद्यक्षरसंख्यया। तैर्लौहैः कारयेन्मुद्रामसङ्कलितमङ्गताम्। एषु स्वराः स्मृताः सौम्याः स्पर्शाः सौराः शुभोदयाः। आग्नेया व्यापकाः सर्वे सोमसूर्य्याग्निदेवताः। स्वराः षोड़श विख्याताः स्पर्शाः स्युः पञ्चविंशतिः। व्यापका दश ते कामधनधर्मप्रदायिनः। साष्टं सहस्रं संजप्य स्पृष्टां तां जुहुयात्ततः। तस्यां सम्पातयेन्मन्त्री सर्पिषा पूर्वसंख्यया। निःक्षिप्य कुम्भे तां मुद्रामभिषेकोक्तवर्त्मना। आवाह्य पूजयेद्देवीमुपचारैर्विधानतः। अभिषिच्य विनीताय दद्यात्तां मुद्रिकां गुरुः। इयं मुद्रा क्षुद्ररोगविषमज्वरनाशिनी। व्यालचौरमृगादिभ्यो रक्षां कुर्य्याद्विशेषतः। युद्धे विजयमाप्नोति धारयन् मनुजेश्वरः। मन्त्रसिद्धिकरी पुंसां चतुर्वर्गफलप्रदा। धारयन् मनुजो नित्यं देवतुल्यो भवेद्भुवि"" तन्त्रसा०।

त्रिवत्स पु०। त्रयो वत्सा वत्सरा वयोयस्य पृषो०। त्रिवर्ष वयस्के वृषे। स्त्रियां तु टाप् त्रिवत्सा। "त्रिवत्सश्च मे त्रिवत्सा च मे" यजु०१८।२६। "वत्सो वत्सरः त्रयो वत्सा यस्य स त्रिवत्सः त्रिवर्षो वृषः तादृशी गौस्त्रिवत्सा" वेददी०। "सोमक्रयणस्त्रिवत्सः साण्डः" कात्या० श्रौ० २२।२।४०। "त्रिवत्सस्त्रिवर्षः साण्डः अण्डसंयुक्त ऋषभः" कर्कः।

त्रिवर्ग पु० त्रयाणां धर्म्मार्थकामानां वर्गः। १धर्म्मार्थकामरूपेषु पुरुषार्थेषु, अमरः २त्रिफलायां, ३त्रिकटुत्रिके, मेदिनि० साङ्ख्योक्ते ४सत्त्वरजस्तमोरूपगुणत्रये। "क्षयःस्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्" अमरोक्ते राज्ञामायव्ययवृद्धिरूपेषु ५पदार्थेषु च। "त्रिवर्गपारीणमसौ भवन्तम्" भट्टिः। "धर्म्मार्थावुच्यते श्रेयः कामार्थौ धर्मएव च। अर्थ एवेह तु श्रेयस्त्रिवर्ग इति तु स्थितिः"। "तं राजा प्रणयन् सम्यक् त्रिवर्गेणाभिवर्द्धते" मनुः।

त्रिवर्णक न० त्रयो वर्णाः पुष्पेष्वस्य कप्। १गोक्षुरे। २त्रिफलायां, ३त्रिकटौ। समा० द्वि० पात्रा० स्वार्थे कन्। ४ब्राह्मणक्षत्रियवैश्यरूपे द्विजातिवर्णत्रये न० मेदि०। ५श्यामरक्तपीतात्मके वर्णत्रये च।

त्रिवर्त्तु न० त्रिषु वसन्तादिषु ऋतुषु वर्त्तते वृत-तुन्। वसन्तादिके ऋतुत्रये प्रातरादिकाले अतिशयेन वर्त्तमाने आदित्यतेजसि। "त्रीणि वा आदित्यस्य तेजांसि वसन्ते प्रातर्ग्रीष्मे मध्यन्दिने शरद्यपराह्णे" इति श्रुतेस्तस्य वसन्तादिषु प्रातरादिकालभेदेऽतिशयेन वर्त्तमानत्वात् तथात्वम्" "त्रिवर्त्तु ज्योतिःस्वभिष्ट्य स्मे" ऋ०७।१०१।२ "त्रिवर्त्तु त्रिष्वृतुष्वतिशयेन वर्त्तमानम्" भा०।

त्रिवर्त्मन् पु० त्रीणि वर्त्मान्यस्य। देवयानपितृयानदक्षिणायानरूपमार्गत्रययुक्ते जीवे "स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः स करोति स्वकर्मभिः" श्वेता० ५।७। त्रीणि वर्त्मानि देवयानादयो मार्गभेदा अस्येति त्रिवर्त्मा धर्म्माधर्मज्ञानमार्गभेदान् अर्हति वा" भा० २गङ्गायां स्त्री। त्रिगुणितं वर्त्म। ३स्वर्गमर्त्त्यपातालरूपे मार्गे "ऊर्द्ध्ववर्त्तीं महापुण्यां मधुवतीं त्रिवर्त्मगाम्"। भा०आनु० २६अ०।

त्रिवर्ष त्रि० त्रयो वर्षा वयोऽस्य। त्रिवर्षवयस्के १प्राणिनि। "न त्रिवर्षस्य कर्त्तव्या बान्धवैरुदकक्रिया" मनुः।२त्रिहायण्यां गवि स्त्री "त्रिहायणी त्रिवर्षा गौः" अमरः। स्वार्थे क। त्रिवर्षिका तत्रार्थे। त्रिगुणितो वर्षः शा०त०। ३वर्षत्रये पु० न० "न सिद्ध्यत्यर्हितं वाढं त्रिवर्षं वपनस्य च" सुश्रुतः।

त्रिवर्षीय त्रि० त्रिवर्षे भवः गहा० छ। त्रिवर्षभवे "एकैकं वै त्रिवर्षीयं तेन पीवान् शुना सह" भा० आनु० ८३अ०

त्रिवार त्रि०त्रयो वारा अस्य।१वारत्रययुक्ते।२गरुड़ात्मजभेदे पु०। "त्रिवारः सप्तवारश्च वाल्मीकिर्दीपकस्तथा" भा० उ० १०० अ० गरुड़ात्मजोक्तौ।

त्रिविक्रम पु० त्रयो विक्रमाः पादन्यासा अस्य। १विष्णौ अमरः त्रिक्रमशब्दे दृश्यम्। "आनन्दो नन्दनानन्दः सत्यधर्मस्त्रिविक्रमः" विष्णुस०। "त्रयो विक्रमास्त्रिषु लोकेषु विक्रमः क्रान्तं यस्य स त्रिविक्रमः "त्रीणि पदानि विचक्रमे" श्रुतेः त्रयो लोका विक्रमाः क्रान्ता येनेति वा। "त्रिरित्येवं त्रयो लोकाः कीर्तिता मुनिसत्तमैः। क्रमसे तांस्तथा सर्वांस्त्रिविक्रमो जनार्द्दन!" विष्णुसं० भाष्यधृतहरिवं०वाक्ये तन्नाम निरुक्तिर्दर्शिता। हेत०। २लोकत्रयक्रमणे पु० "त्रिविक्रमे यथा विष्णुः सर्वदैत्यवधे पुरा" रामा० ल० ७९ अ०।

त्रिविद्य पु० तिस्रो विद्याऽस्य। त्रिवेदज्ञे द्विजे।

त्रिविध त्रि० तिस्रो विधा अस्य। त्रिप्रकारे "अथ त्रिविध-

दुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः” सां॰ सू॰। “त्रिविधदुःखञ्चाध्यात्मिकाधिभौतिकाधिदैविकरूपम्। “देवत्वं सात्त्विकं यान्ति मनुष्यत्वञ्च राजसाः। तिर्य्यक्त्वं तामसा नित्यमित्येषा त्रिविधा गतिः” मनुः। परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम्। वितथाभिनिवेशश्च त्रिविधं कर्म मानसम्” मनुः। नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमिष्यते” दक्षसं॰। सात्विकादिभेदेन श्रद्धादित्रैविध्यं गीतायामुक्तं यथा

“त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा। सात्त्विकी राजसी चैव तामसी चेति तां शृणु। सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत। श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः। यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः। भूतान् प्रेतगणांश्चान्ये यजन्ते तामसा जनाः। अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः। दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः। कर्षयन्तः शरीरस्थं भूतग्राममचेतसः। मां चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान्। आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः। यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु। आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः। रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः। कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः। आहारा राजसस्येष्टा दुःखशोकामयप्रदाः। यातयामं गतरसं पूतिपर्य्युषितं च यत्। उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्। अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते। यष्टव्यमेवेति मनः समाधाय स सात्त्विकः। अभिसन्धाय तु फलं दम्भार्थमपि चैव यत्। इज्यते भरतश्रेष्ठ! तं यज्ञं विद्धि राजसम्। विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम्। श्रद्धाविरहितं यज्ञं तामसं परिचक्षते। देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्। ब्रह्मचर्य्यमहिंसा च शारीरं तप उच्यते। अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत्। स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते। मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः। भावसंशुद्धिरित्येतत्तपो मानसमुच्यते। श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः। अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते। सत्कारमानपूजार्थं तपो दम्भेन चैव यत्। क्रियते तदिह प्रोक्तं राजसं चलमध्रुवम्। मूढग्राहेणात्मनो यत् पीडया क्रियते तपः। परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्। दातव्यमिति यद्दानं दीयतेऽनुपकारिणे। देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्। यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः। दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्। अदेशकाले यद्दानमपात्रेभ्यश्च दीयते। असत्कृतमवज्ञातं तत्तामसमुदाहृतम्। ओँ तत्सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृतः। ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा। तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः। प्रवर्त्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्। तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः। दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः। सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते। प्रशस्ते कर्म्मणि तथा सच्छब्दः पार्थ! युज्यते। यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते। कर्म चैव तदर्थीयं सदित्येवाभिधीयते। अश्रद्धया हुतं दत्तं तपस्तप्तं कृतञ्च यत्। असदित्युच्यते पार्थ! न च तत् प्रेत्य नो इह” १७अ॰।

“सन्न्यासस्य महाबाहो! तत्त्वमिच्छामि वेदितुम्। त्यागस्य च हृषीकेश! पृथक् केशिनिसूदन!। भगवानुवाच। काम्यानां कर्म्मणां न्यासं सन्न्यासं कवयो विदुः। सर्वकर्म्मफलत्यागं प्राहुस्त्यागं विचक्षणाः। त्याज्यं दोषवदित्येके कर्म्म प्राहुर्मनीषिणः। यज्ञदानतपः कर्म न त्याज्यमिति चापरे। निश्चयं शृणु मे तत्र त्यागे भरतसत्तम!। त्यागो हि पुरुषव्याघ्र! त्रिविधः संप्रकीर्त्तितः। यज्ञदानतपःकर्म न त्याज्यं कार्य्यमेव तत्। यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्। एतान्यपि तु कर्म्माणि सङ्गं त्यक्त्वा फलानि च। कर्त्तव्यानीति मे पार्थ! निश्चितं मतमुत्तमम्। नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते! मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः। दुःखमित्येव यत् कर्म कायक्लेशभयात्त्यजेत्। स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्। कार्य्यमित्येव यत् कर्म नियतं क्रियतेऽर्जुन!। सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः। न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते। त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः। न हि देहभृता शक्यं त्यक्तुं कर्म्माण्यशेषतः। यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते। अनिष्टमिष्टं मिश्रञ्च त्रिविधं कर्म्मणः फलम्। भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित्। पञ्चेमानि महाबाहो! कारणानि निबोध मे। सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्म्मणाम्।

अधिष्ठानं तथा कर्त्ता करणञ्च पृथग्विधम्। विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्। शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः। न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः। तत्रैवं सति कर्त्तारमात्मानं केवलन्तु यः। पश्यत्यकृतबुद्धित्वान्न पश्यति स दुर्मतिः। यस्य नाहङ्कृतो भावो बुद्धिर्यस्य न लिप्यते। हत्वापि स इमाँल्लोकान् न हन्ति न निबध्यते। ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना। करणं कर्म कर्त्तेति त्रिविधः कर्मसंग्रहः। ज्ञानं कर्म च कर्त्ता च त्रिधैव गुणभेदतः। प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि। सर्वभूतेषु येनैकं भावमव्ययमीक्षते। अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्। पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्। वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्। यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम्। अतत्त्वार्थवदल्पञ्च तत्तामसमिति स्मृतम्। नियतं सङ्गरहितमरागद्वेषतः कृतम्। अफलप्रेप्सुना कर्म यत्तत् सात्त्विकमुच्यते। यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः। क्रियते बहुलायासं तद्राजसमुदाहृतम्। अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्। मोहादारभ्यते कर्म यत्तत्तामसमुच्यते। मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः। सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते। रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः। हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः। अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः। विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते। बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु। प्रोच्यमानमशेषेण पृथक्त्वेन धनञ्जय!। प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्य्ये भयाभये। बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ! सात्त्विकी। यया धर्ममधर्मञ्च कार्य्यञ्चाकार्य्यमेव च। अयथावत् प्रजानाति बुद्धिः सा पार्थ! राजसी। अधर्मं धर्ममिति या मन्यते तमसावृता। सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ! तामसी। धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः। योगेनाव्यभिचारिण्या धृतिः सा पार्थ! सात्त्विकी। यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन!। प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ! राजसी। यया स्वप्नं भयं शोकं विषादं मदमेव च। न विमुञ्चति दुर्मेधा धृतिः सा पार्थ! तामसी। सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ!। अभ्यासाद्रमते यत्र दुःखान्तञ्च निगच्छति। यत्तदग्रे विषमिव परिणामेऽमृतोपमम्। तत् सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्। विषयेन्द्रियसंयोगात् यत्तदग्रेऽमृतोपमम्। परिणामे विषमिव तत् सुखं राजसं स्मृतम्। यदग्रे चानुबन्धे च सुखं मोहनमात्मनः। निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम्। न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः। सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः” १८अ०। त्रिविधार्थश्च विष्णूक्तोऽर्थशब्दे २६७ पृ० उक्तः। अन्यस्य त्रैविध्यं यथायथं यथास्थाने उक्तं वक्ष्यते च। उत्पातशब्दे उत्पातत्रैविध्यमुक्तम्। तस्य भावः ष्यञ्। त्रैविध्य त्रिप्रकारत्वे “एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते” भाषा०। “त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता” सा० द०।

त्रिविष्टप न० विशन्त्यस्मिन् सुकृतिनः विश–कपन् तुट् च। “विटपविष्टपविशिपोलपाः” उणा० उज्ज्वलदत्तेन विष्टपेत्यत्र पिष्टपेति पठितम्। अन्ये तत्र दन्त्योष्ठ्यादितया पेठुः। “यत्र ब्रध्नस्य विष्टपमित्यादिप्रयोगात् “विष्टपं भुवनं जगत्” अमरग्रन्थे विष्टपेति पाठस्य क्षीरस्वामिप्रभृतिसम्मतत्वाच्च। तृतीयं विष्टपम् वृत्तौ त्रिभागवत् संख्याशब्दस्य पूरणार्थत्वम्। १स्वर्गे अमरटीकायां स्वामी। “त्रिविष्टपस्येव पतिं जयन्तः” रघुः। “स्वर्गं त्रिविष्टपं प्राप्य धर्मराजो युधिष्ठिरः” भा० स्व० १अ०। समा० हि०। २त्रिभुवने न०

त्रिविष्टपसद् पु० त्रिविष्टपे स्वर्गे सीदति सद–क्विप्। देवे हला०।

त्रिविष्टब्ध न० त्रीणि विष्टब्धानि यत्र। त्रिदण्डरूपे अश्मत्रये “य इमां कुण्डिकां भिन्द्यात्त्रिविष्टब्धं च यो हरेत्। वासश्चापहरेत् तस्मिन् कथं ते मानसं भवेत्”। “त्रयीञ्च नाम वार्त्तां च त्यक्त्वा पुत्रान् व्रजन्ति ये। त्रिविष्टब्धञ्च वासश्च प्रतिगृह्णन्त्यबुद्धयः” भा० शा० १८ अ०।

त्रिविस्त त्रि० त्रीणि विस्तानि स्वर्णकर्षमूल्यान्यर्हति ठक् तस्य वा लुक्। स्वर्णकर्षत्रयमूल्यार्हे। लुगभावे त्रैविस्तिक तत्रार्थे त्रि०।

त्रिविस्तीर्ण पु० त्रिभिः विस्तीर्णः। शुभलक्षणभेदान्विते पुरुषे। “त्रिपृथुलघुगम्भीरो द्वात्रिंशल्लक्षणान्वितः” इत्युपक्रमे “ललाटकटिवक्षोभिस्त्रिविस्तीर्णो यथाह्यदौ। सर्वतेजोऽतितिग्मैश्वर्य्यं तथा प्राप्स्यति नान्यथा” काशी० ११अ०। त्रिपृथुशब्दोऽप्यत्र वृ० सं० ६८ अ० तु “उरो

ललाटं वदनञ्च पुंसां विस्तीर्णमेतत्त्रितयं प्रशस्तम्" विस्तीर्णचतुष्कप्रशस्ततयोक्तमिति भेदः ।[भाके राजनि० ।

त्रिवीज पु० त्रीणि त्रीणि वीजानि प्रतिफलं यस्य । श्यामा·

त्रिवृत्(ता) पु० त्रीन् अवयवान् वृणोति वृ—क्विप् त्रिभिरवयवैर्वृता वा । १(तेओड़ि) ओषधिभेदे, अमरः "श्वेता त्रिवृद्रेचनी स्यात् स्वादुरुष्णा समीरहृत् । रूक्षा पित्तज्वरश्लेष्मपित्तशोथोदरापहा । श्वेतकृष्णप्रभेदेन द्विविधा त्रिवृदुच्यते । श्यामा त्रिवृत्ततो हीनगुणा तीव्रा विरेचिका । मूर्च्छादाहमदभ्रान्तिकण्ठोत्कर्षणकारिणी" भावप्र०। वर्तनं वृत् त्रिः तिस्रः वृतो यत्र । एकस्य त्रिशब्दस्य त्रिवारे त्रिसंख्यान्विते च वृत्तिः तन्त्रोच्चारणात् । २त्रिधात्रिगुणिते त्रि० "विप्रस्योर्द्ध्ववृतं त्रिवृत्" इति मनुः त्रिगुणितसूत्रत्रयस्यैवोपवीतरूपत्वात्तथार्थता । त्रिर्वर्त्तते वृत-क्विप् । मिश्रितेषु ३तेजोजलान्नेषु च । "तासां त्रिवृतं त्रिवृतमेकैकां करवाणि" छा०उ० ४त्रिगुणिते "यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा । अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा" मनुः । त्रिभिरृग्यजुःसामभिर्वर्त्तते वृत—कर्तरि क्विप् । ५यज्ञे पु० । "यः सुपर्णो यजुर्नाम छन्दोगात्रस्त्रिवृच्छिराः" भा० शा० ४७ अ० । "त्रिवृत् यज्ञः शिरोऽस्य" नीलक० त्रिस्त्रिर्वर्तते सुजगभस्य त्रिशब्दस्य वीप्सार्थत्वम् । ६ऋग्विशेषाणां नवके । यथोक्तं सामसंहिताभाष्ये

"लौकिको वाक्यशेषार्थस्त्रिवृदादेः समत्वतः । उभौ विध्यर्थवाक्यैकवाक्यत्वादन्त्यहान्तिमः । "त्रिवृद्वहिष्पवमानम्" इति श्रुतौ त्रिवृच्छब्दस्य त्रैगुण्यं लोकसिद्धोऽर्थः वाक्यशेषादृक्-त्रयात्मकेषु सूक्तेष्ववस्थितानां वहिष्पवमानात्मक-स्तोत्र-निष्पादन-क्षमाणाम् "उपास्मै गायता नरः (उ १प्र०१२, १सू०)-इत्यादीनामृचां नवकेऽर्थः तत्र धर्मनिर्णये वेदस्य प्रबलत्वेऽपि पद-पदार्थ-निर्णये लोकवेदयोः समान-बलवत्त्वात् उभावर्थौ विकल्पेन ग्रहीतव्यौ, इति चेत्—नैवम्, लौकिकार्थ-स्वीकार-पक्षे विधिवाक्ये त्रैगुण्यमर्थः, अर्थवाद-वाक्ये स्तोत्रियाणामृचां नवकम्, इत्येवं विध्यर्थवादयोर्वैयधिकरण्यादेकवाक्यत्वं न स्यात्, अतः एकवाक्यत्वाय स्तोत्रियाणां नवकमेव विधिवाक्ये नियतोऽर्थः" ।

त्रिवृत्करण न० ६त० । तेजो जलान्नानां त्र्यात्मककरणे तत्प्रकारश्च छा० उ० भाष्ये दर्शितो यथा

"तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवतेमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् । तासां त्रिवृतं त्रिवृतमेकैकामकरोद्यथा तु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीति । यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां,यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् । यदादित्यस्य रोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत्कृष्णं तदन्नस्यापागादादित्यादादित्यत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् । यच्चन्द्रमसो रोहितं रूपं, तेजसस्तद्रूपं यच्छुक्लं तदपां, यत्कृष्णं तदन्नस्यापागाच्चन्द्राच्चन्द्रत्व वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् । यद्विद्युतो रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागाद्विद्युतो विद्युत्त्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम् ।

"सेयं तिस्रो देवता अनुप्रविश्य स्वात्मावस्थे वीजभूतेऽव्याकृते नामरूपे व्याकरवाणीतीक्षित्वा तासाञ्च तिसृणां देवतानामेकैकां त्रिवृतं त्रिवृतं करवाणि एकैकस्याः त्रिवृत्करणे एकैकस्याः प्राधान्यं द्वयोर्द्वयोर्गुणभावोऽन्यथा हि रज्ज्वा इवैकमेव त्रिवृत्करणं स्यात् । न तु तिसृणां पृथक् त्रिवृत्करणमिति । एवं हि तेजोवन्नानां पृथङ्नामप्रत्ययलाभः स्यात्तेज इदमिमा आपोऽन्नमिदमिति च । पृथङ्नामप्रत्ययलाभे देवतानां सम्यग्व्यवहारस्य प्रसिद्धिः प्रयोजनं स्यात् । एवमीक्षित्वा सेयं देवतेमास्तिस्रो देवता अनेनैव यथोक्तेनैव जीवेन सूर्यविम्बमदन्तः प्रविश्य वैराजं पिण्डं प्रथमं देवतादीनां च पिण्डाननुप्रविश्य यथासङ्कल्पमेव नामरूपे व्याकरोदसौ नामायमिदंरूप इति तासाञ्च देवतानां गुणप्रधानभावेन त्रिवृतं त्रिवृतमेकैकामकरोत् कृतवती देवता । तिष्ठतु तावद्देवतादिपिण्डानां नामरूपाभ्यां व्याकृतानां, तेजोवन्नमयत्वेन त्रिधात्वं यथा तु खलु बहिरिमाः पिण्डेभ्यस्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे मम निगदतो विजानीहि विस्पष्टमवधारयोदाहरणतः । यत्तद्देवतानां त्रिवृत्करणमुक्तं तस्यैवोदाहरणमुच्यते । उदाहरणं नामैकदेशप्रसिद्ध्याशेषप्रसिद्ध्यर्थमुदाह्रियत इति । तदेतदाह यदग्नेस्त्रिवृत्कृतस्य रोहितं रूपमिति विद्धि । प्रसिद्धं लोके तदत्रिवृत्कृतस्य तेजसो रूपमिति तथा च यच्छुक्लं रूपमग्नेरेव तदपामत्रिवृत्कृतानाम्

यत्कृष्णं तस्यैवाग्ने रूपं तदन्नस्य पृथिव्या अत्रिवृत्कृताया इति विद्धि। तत्रैवं सति रूपत्रयव्यतिरेकेणाग्निरिति यन्मन्यसे त्वं तस्याग्नेरग्नित्वमिदानीमपागादपगतम्। प्राग्रूपत्रयविवेकविज्ञानाद्याग्निबुद्धिरासीत्तेजसाग्निबुद्धिरपगताग्निशब्दश्चेत्यर्थः। यथा दृश्यमानरक्तोपधानसंयुक्तः स्फटिको गृह्यमाणः पद्मरागोऽयमिति शब्दबुद्ध्योः प्रयोजको भवति प्रागुपधानस्फटिकयोर्विवेकविज्ञानात्, तद्विवेकविज्ञाने तु पद्मरागशब्दबुद्धी निवर्त्तेते तद्विवेकविज्ञातुस्तद्वत्। ननु किमत्र बुद्धिशब्दकल्पनया क्रियते प्राग्रूपत्रयविवेककरणादग्निरेवासीत्तदग्नेरग्नित्वं रोहितादिरूपविवेककरणादपागादिति युक्तम्। यथा तन्त्वपकर्षणे पटाभावः। नैवं बुद्धिशब्दमात्रमेव ह्यग्निर्यत आह वाचारम्भणमग्निर्नाम विकारो नामधेयं नाममात्रमित्यर्थोऽतोऽग्निबुद्धिरपि मृषैव। तर्हि किं तत् सत्यं? त्रीणि रूपाणीत्येव सत्यं नाणुमात्रमपि रूपत्रयव्यतिरेकेण सत्यमस्तीत्यवधारणार्थः। तथा यदादित्यस्य यच्चन्द्रमसो यद्विद्युत इत्यादि समानम्। ननु यथा तु खलु सोम्येमास्तिस्रो देवतास्त्रिवृत्त्रिवृदेकैका भवति तन्मे विजानीहीत्युक्ता तेजस एव चतुर्भिरप्युदाहरणैरग्न्यादिभिस्त्रिवृत्करणं दर्शितं नाबन्नयोरुदाहरणं दर्शितं त्रिवृत्करणे। नैष दोषः। अबन्नविषयाण्यप्युदाहरणान्येवमेव च द्रष्टव्यानीति मन्यते श्रुतिः। तेजस उदाहरणमुपलक्षणार्थम्, रूपवत्त्वात् स्पष्टार्थत्वोपपत्तेश्च। गन्धरसयोरनुदाहरणं त्रयाणामसम्भवात् न हि गन्धरसौ तेजसि स्तः। स्पर्शशब्दयोरनुदाहरणं विभागेन दर्शयितुमशक्यत्वात्। यदि सर्व्वं जगत्त्रिवृत्कृतमित्यग्न्यादिवत्त्रीणि रूपाणीत्येव सत्यमग्नेरग्नित्ववदपागाज्जगतो जगत्त्वम्। तथाऽन्नस्यापि अप्शुङ्गत्वादाप इत्येव सत्यं वाचारम्भणमात्रमन्नम्। तथापामपि तेजःशुङ्गत्वाद्वाचारम्भणत्वे तेज इत्येव सत्यम्। तेजसोऽपि सच्छुङ्गत्वाद्वाचारम्भणत्वं, सदित्येव सत्यमित्येषोऽर्थो विवक्षितः। ननु वाय्वन्तरिक्षे त्वत्रिवृत्कृते तेजःप्रभृतिष्वनन्तर्भूतत्वादविशिष्येते। एवं गन्धरसशब्दस्पर्शाश्चावशिष्टा इति। कथं? सतो विज्ञानेन सर्व्वमन्यदविज्ञातं विज्ञातं भवेत्तद्विज्ञाने वा प्रकारान्तरं वाच्यम्। नैष दोषो रूपवद्द्रव्ये सर्व्वस्य दर्शनात्। कथं, तेजसि तावद्रूपवति शब्दस्पर्शयोरप्युपलम्भाद्वाय्वन्तरिक्षयोस्तत्र स्पर्शशब्दगुणवतोः सद्भावोऽनुमीयते। तथाबन्नयो रूपवतो रसगन्धान्तर्भाव इति। रूपवतां त्रयाणां तेजोऽबन्नानां त्रिवृत्करणप्रदर्शनेन सर्व्वं तदन्तर्भूतं सद्विकारत्वात्त्रीण्येव रूपाणि विज्ञातं मन्यते श्रुतिः। न हि मूर्त्तं रूपवद्द्रव्यं प्रत्याख्याय वाय्वाकाशयोस्तद्गुणयोर्गन्धरसयोर्वा ग्रहणमस्ति। अथ वा रूपवतामपि त्रिवृत्करणं प्रदर्शनार्थमेव मन्यते श्रुतिः यथा तु त्रिवृत्कृते त्रीण्येव रूपाणीत्येव सत्यं तथा पञ्चीकरणेऽपि समानो न्याय इत्यतः सर्व्वस्य सद्विकारत्वात्सतो विज्ञानेन सर्व्वमिदं विज्ञातं स्यात्सदेकमेवाद्वितीयं सत्यमिति सिद्धमेव भवति" भाष्यम्। क्षित्यादित्रयाणां प्रत्येकं द्वेधा विभागे द्वितीयार्द्धस्य पुनर्द्वेधा विभागे च एकैकस्मिन् स्वस्वेतरद्वितीयांशार्द्धयोजनरूपं पञ्चीकरणवत् त्रिवृत्करणम् "द्विधा विधाय चैकैकं द्विधा च प्रथमं पुनः। स्वस्वेतरद्वितीयांशैर्योजनात् त्र्यात्मकाश्च ते" इत्युक्तरीत्या कल्पत्रम्।

त्रिवृत्पर्णी स्त्री त्रिषु दोषेषु वर्त्तते नाशनाय त्रिवृत् त्रिदोषघ्नम् पर्णमस्याः। (हेलञ्चा) हिलमोचिकायाम् शब्दच०।

त्रिवृता स्त्री त्रिरावृत्ता। १त्रिवृति अमरः। २त्रिरावृत्ते त्रिगुणे त्रि० "त्रिवृता (मेखला) ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा" मनुः।

त्रिवृत्तिका स्त्री तिस्रः वृत्तयोऽस्याः कप्। १त्रिवृति राजनि०। २त्रिधावृत्तियुक्ते त्रि०।

त्रिवृद्वेद पु० ऋगाद्यात्मना त्रिर्वर्त्तते त्रिवृत् कर्म्म०। १त्रय्यां वेदत्रये तदुत्पन्ने २प्रणवे च। "ऋचो यजूंषि चान्यानि सामानि विविधानि च। एष (प्रणवः) ज्ञेयस्त्रिवृद्वेदो यो वेदैनं स वेदवित्। आद्यं यत् त्र्यक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता। स गुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित्" मनुः।

त्रिवे(णि)णी स्त्री तिस्रः वेणयः प्रवाहाः विच्छिन्नाः संयुक्ता वा यत्र ततः इदन्तत्वात् वा ङीप्। गङ्गायमुनासरस्वतीनां विच्छिन्नप्रवाहे १दक्षिणप्रयागे युक्तप्रवाहे २प्रयागे तीर्थभेदे च दक्षिणप्रयागसीमा च यथा "प्रद्युम्नस्य ह्रदात् याम्ये सरस्वत्यास्तथोत्तरे। तद्दक्षिणप्रयागन्तु गङ्गातो यमुना गता" प्रा० त०। त्रिवेण्या इदम् शिवा० अण्। त्रैवेण। तदीये त्रि०।

त्रिवेणु पु० त्रयो वेणवो यत्र। रथमुखस्यावयवभेदे शब्दार्थचि०। "अश्वांस्त्रिवेणुं तत्रस्थ तिलशोव्यधमच्छरैः" भा० व० २४१अ०।

त्रिवेद पु० त्रीन् वेदान् वेत्ति विद--अण् उप० स० त्रयो वेदा

अधीतत्वेन सन्त्यस्य अच् वा। १वेदत्रयवेत्तरि। “नायन्द्रितस्त्रिवेदोऽपि सर्व्वाशी सर्व्वविक्रयी” मनुः ततः स्वार्थे ब्राह्म० ष्यञ्। त्रैवेद्य तदर्थे “त्रैवेद्याः शुचयोदान्ताः” गीता। त्रिगुणितो वेदः शा०त०। २वेदत्रये ३तद्विहितकर्म्मणि च “त्रिवेदसंयोगाच्च” कात्या० श्रौ० २५।१४।३७। “वेदत्रयविहितकर्मयोगो ब्राह्मणः” कर्कः।

त्रिवेला स्त्री तिस्रो वेला सीमानोऽस्याम्। त्रिवृति (तेवोड़ि) राजनि०।

त्रिशक्ति स्त्री त्रिगुणिता शक्तिः। १कालीतारात्रिपुराख्ये तन्त्रोक्ते देवीत्रये “त्रिशक्तिविषये देवि! क्रमदीक्षा प्रकीर्तिता” तन्त्रसा० इच्छाज्ञानक्रियारूपे ऐश्वरे २शक्तित्रये प्रभावोत्साहमन्त्रजे राज्ञां ३शक्तित्रये। ब० म्री०। ४त्रिगुणात्मके प्रधाने च। [१परमेश्वरे २विजिगीषुनृपे च।

त्रिशक्तिधृत् पु० त्रिशक्तिं इच्छादिशक्तित्रयं धरति धृ–क्विप्।

त्रिशङ्कु पु० त्रयः शङ्कव इव यत्र। १मार्ज्जारे २शलभे मेदि०। ३चातकखगे शब्दच०। ४खद्योते शब्दमा०। ५सूर्य्यवंश्ये नृपभेदे। तस्य नामनिरुक्तिः हरिवं०१२अ० दर्शिता यथा

“अविद्यमाने मांसे तु वशिष्ठस्य महात्मनः। सर्वकामदुघान्दोग्ध्रीं ददर्श स नृपात्मजः। तां वै क्रोधाच्च मोहाच्च श्रमाच्चैव क्षुधार्दितः। दशधर्मगतो राजा जघान जनमेजय!। मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः। त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश। तच्च मांसं स्वयञ्चैव विश्वामित्रस्य चात्मजान्। भोजयामास तच्छ्रुत्वा वशिष्ठोऽप्यस्य चुक्रुधे। क्रुद्धस्तु भगवान् वाक्यमिदमाह नृपात्मजम्। वशिष्ठ उवाच। पातयेयमहं क्रूर! तव शङ्कुमसंशयम्। यदि ते द्वाविमौ शङ्कू न स्यातां वै पुनः कृतौ। पितुश्चापरितोषेण गुरोर्दोग्ध्रीवधेन च। अप्रोक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः। वैशम्पायन उवाच। एवं त्रीण्यस्य शङ्कूनि तानि दृष्ट्वा महातपाः। त्रिशङ्कुरिति होवाच त्रिशङ्कुस्तेन स स्मृतः”। तस्य सशरीरस्वर्गयानकथा रामा०आ०५७स०

“सोऽभिगम्य महात्मानः सर्वानेव गुरोः सुतान्। अभिवाद्यानुपूर्व्येण ह्रिया किञ्चिदवाङ्मुखः। अब्रवीत् स महात्मानः सर्व्वानेव कृताञ्जलिः। शरणं वः प्रपन्नोऽहं शरण्यान् शरणं गतः। प्रत्याख्यातो हि भद्रं वो वशिष्ठेन महात्मना। यष्टुकामो महायज्ञं तदनुज्ञातुमर्हथ। गुरुपुत्त्रानहं सर्व्वान्नमस्कृत्य प्रसादये। शिरसा प्रणतो याचे ब्राह्मणान् तपसि स्थितान्। ते मां भवन्तः सिद्ध्यर्थं याजयन्तु समाहिताः। सशरीरो यथाहं वै देवलोकमवाप्नुयाम्। प्रत्याख्यातो वशिष्ठेन गतिमन्यां तपोधनाः!। गुरुपुत्त्रानृते सर्व्वान्नाहं पश्यामि काञ्चन। इक्ष्वाकूणां हि सर्व्वेषां पुरोधाः परमा गतिः। तस्मादनन्तरं सर्व्वे भवन्तो दैवतं मम”।

“ततस्त्रिशङ्कोर्वचनं श्रुत्वा क्रोधसमन्वितम्। ऋषिपुत्त्रशतं राम! राजानमिदमब्रवीत्। प्रत्याख्यातोऽसि दुर्म्मेधो! गुरुणा सत्यवादिना। तं कथं समतिक्रम्य शाखान्तरमुपेयिवान्। इक्ष्वाकूणां हि सर्व्वेषां पुरोधाः परमा गतिः। न चातिक्रमितुं शक्यं वचनं सत्यवादिनः। अशक्यमिति होवाच वशिष्ठो भगवानृषिः। तं वयं वै समाहर्त्तुं क्रतुं शक्ताः कथञ्च न। बालिशस्त्वं नरश्रेष्ठ! गम्यतां स्वपुरं पुनः। याजने भगवान् शक्तस्त्रैलोक्यस्यापि पार्थिव!। अवमानं कथं कर्तुं तस्य शक्ष्यामहे वयम्। तेषां तद्वचनं श्रुत्वा क्रोधपर्य्याकुलाक्षरम्। स राजा पुनरेवैतानिदं वचनमब्रवीत्। प्रत्याख्यातो भगवता गुरुपुत्त्रैस्तथैव हि। अन्यां गतिं गमिष्यामि स्वस्ति वोऽस्तु तपोधनाः!। ऋषिपुत्त्रास्तु तच्छ्रुत्वा वाक्यं घोराभिसंहितम्। शेपुः परमसंक्रुद्धाश्चण्डालत्वं गमिष्यसि। इत्युक्त्वा ते महात्मानो विविशुः स्वं स्वमाश्रमम्। अथ रात्र्यां व्यतीतायां राजा चण्डालतां गतः। नीलवस्त्रधरो नीलः परुषो ध्वस्तमूर्द्धजः। चितामाल्याङ्गरागश्च आयसाभरणोऽभवत्। तं दृष्ट्वा मन्त्रिणः सर्व्वे त्यक्त्वा चण्डालरूपिणम्। प्राद्रवन् सहिता राम! पौरा येऽस्यानुगामिनः। एको हि राजा काकुत्स्थ! जगाम परमात्मवान्। दह्यमानो दिवारात्रं विश्वामित्रं तपोधनम्। विश्वामित्रस्तु तं दृष्ट्वा राजानं विफलीकृतम्। चण्डालरूपिणं राम! मुनिः कारुण्यमागतः। कारुण्यात् स महातेजा वाक्यं परमधार्म्मिकः। इदं जगाद भद्रन्ते राजानं घोरदर्शनम्। किमागमनकार्य्यन्ते राजपुत्र! महाबल!। अयोध्याधिपते! वीर! शापाच्चण्डालताङ्गतः। अथ तद्वाक्यमाकर्ण्य राजा चण्डालताङ्गतः। अब्रवीत् प्राञ्जलिर्वाक्यं वाक्यज्ञो वाक्यकोविदम्। प्रत्याख्यातोऽस्मि गुरुणा गुरुपुत्त्रैस्तथैव च। अनवाप्यैव तं कामं मया प्राप्तो विपर्य्ययः। सशरीरो दिवं यायामिति मे सौम्यदर्शन!। मया चेष्टं क्रतुशतं तथा तन्नाप्यते फलम्। अनृतं

नोक्तपूर्व्वं मे न च वक्ष्ये कदाचन । कृच्छ्रेष्वपि गतः सौम्य ! क्षत्त्रधर्म्मेण ते शपे । यज्ञैर्बहुविधैरिष्टं प्रजा धर्म्मेण पालिताः । गुरवश्च महात्मानः शीलवृत्तेन तोषिताः । धर्म्मे प्रयतमानस्य यज्ञं चाहर्त्तुमिच्छतः । परितोषं न गच्छन्ति गुरवो मुनिपुङ्गव ! । दैवमेव परं मन्ये पौरुषं तु निरर्थकम् । दैवेनाक्रम्यते सर्व्वं दैवं हि परमा गतिः । तस्य मे परमार्त्तस्य प्रसादमभिकाङ्क्षतः । कर्त्तुमर्हसि भद्रन्ते दैवोपहतकर्म्मणः । नान्यां गतिं गमिष्यामि नान्यच्छरणमस्ति मे । दैवं पुरुषकारेण निवर्त्तयितुमर्हसि” ५८ स० ।

“उक्तवाक्यं तु राजानं कृपया कुशिकात्मजः ! अब्रवीत् मधुरं वाक्यं साक्षाच्चण्डालताङ्गतम् । इक्ष्वाको ! स्वागतं वत्स ! जानामि त्वां सुधार्म्मिकम् । शरणं ते प्रदास्यामि मा भैषीर्न्नृपपुङ्गव ! । अहमामन्त्रये सर्व्वान्महर्षीन् पुण्यकर्म्मणः । यज्ञसाह्यकरान् राजंस्ततो यक्ष्यसि निर्वृतः । गुरुशापकृतं रूपं यदिदं त्वयि वर्त्तते । अनेन सह रूपेण सशरीरो गमिष्यसि । हस्तप्राप्तमहं मन्ये स्वर्गं तव नराधिप ! । यस्त्वं कौशिकमागम्य शरण्यं शरणागतः । एवमुक्त्वा महातेजाः पुत्त्रान् परमधार्म्मिकान् । व्यादिदेश महाप्राज्ञान् यज्ञसम्भारकारणात् । सर्व्वान् शिष्यान् स चाहूय वाक्यमेतदुवाच ह । सर्व्वानृषीन् सवाशिष्ठानानयध्वं ममाज्ञया । सशिष्यान् सुहृदश्चैव सर्त्विजः सुबहुश्रुतान् । यदन्यो वचनं ब्रूयान्मद्वाक्यबलनोदितः । तत्सर्व्वमखिलेनोक्तं ममाख्येयमनादृतम् । तस्य तद्वचनं श्रुत्वा दिशो जग्मुस्तदाज्ञया । आजग्मुरथ देशेभ्यः सर्व्वेभ्यो ब्रह्मवादिनः । ते च शिष्याः समागम्य मुनिं ज्वलिततेजसम् । ऊचुश्च वचनं सर्व्वं सर्व्वेषां ब्रह्मवादिनाम् । श्रुत्वा ते वचनं सर्व्वे समायान्ति द्विजातयः । सर्व्वदेशेभ्य आगच्छन् वर्जयित्वा महोदयम् । वाशिष्ठं यच्छतं सर्व्वं क्रोधपर्य्याकुलाक्षरम् । यथाह वचनं सर्व्वं शृणु त्वं मुनिपुङ्गव ! । क्षत्त्रियो याजको यस्य चण्डालस्य विशेषतः । कथं सदसि भोक्तारो हविस्तस्य सुरर्षयः । ब्राह्मणा वा महात्मानो भुक्त्वा चण्डालभोजनम् । कथं स्वर्गं गमिष्यन्ति विश्वामित्रेण पालिताः । एतद्वचनं नैष्ठुर्य्यमूचुः संरक्तलोचनाः । वाशिष्ठा मुनिशार्द्दूल ! सर्व्वे सहमहोदयाः । तेषां तद्वचनं श्रुत्वा सर्व्वेषां मुनिपुङ्गवः । क्रोधसंरक्तनयनः सरोषमिदमब्रवीत् । यद्दूषयन्त्यदुष्टं मां तप उग्रं समास्थितम् । भस्मीभूता दुरात्मानो भविष्यन्ति न संशयः । अद्य ते कालपाशेन नीता वैवस्वतक्षयम् । सप्त जातिशतान्येव मृतपाः सम्भवन्तु ते । श्वमांसनियताहारा मुष्टिका नाम निर्घृणाः । विकृताश्च विरूपाश्च लोकाननुचरन्त्वमी । महोदयश्च दुर्बुद्धिर्मामदुष्यं ह्यदूषयत् । दूषितः सर्व्वलोकेषु निषादत्वं गमिष्यति । प्राणातिपातनिरतो निरनुक्रोशताङ्गतः । दीर्घकालं मम क्रोधात् दुर्गतिं वर्त्तयिष्यति । एतावदुक्त्वा वचनं विश्वामित्रो महातपाः । विरराम महातेजा ऋषिमध्ये महामुनिः” ५९ स० ।

“तपोबलहतान् ज्ञात्वा वाशिष्ठान् समहोदयान् । ऋषिमध्ये महातेजा विश्वामित्रोऽभ्यभाषत । अयमिक्ष्वाकुदायादस्त्रिशङ्कुरिति विश्रुतः । धर्म्मिष्ठश्च वदान्यश्च मां चैव शरणं गतः । स्वेनानेन शरीरेण देवलोकजिगीषया । यथायं स्वशरीरेण देवलोकं गमिष्यति । तथा प्रवर्त्त्यतां यज्ञो भवद्भिश्च मया सह । विश्वामित्रवचः श्रुत्वा सर्व्व एव महर्षयः । ऊचुः समेताः सहसा धर्म्मज्ञा धर्म्मसंहितम् । अयं कुशिकदायादो मुनिः परमकोपनः । यदाह वचनं सम्यगेतत् कार्य्यं न संशयः । अग्निकल्पो हि भगवान् शापं दास्यति रोषतः । तस्मात् प्रवर्त्त्यतां यज्ञः सशरीरो यथा दिवि । गच्छेदिक्ष्वाकुदायादो विश्वामित्रस्य तेजसा । ततः प्रवर्त्त्यतां यज्ञः सर्व्वे समभितिष्ठत । एवमुक्त्वा च ऋषयः संजह्रुस्ताः क्रियास्तदा । याजकश्च महातेजा विश्वामित्रोऽभवत् क्रतौ । ऋत्विजश्चानुपूर्व्वेण मन्त्रवन्मन्त्रकोविदाः । चक्रुः सर्व्वाणि कर्म्माणि यथाकल्पं यथाविधि । ततः कालेन महता विश्वामित्रो महातपाः । चकारावाहनं तत्र भागार्थं सर्व्वदेवताः । नाभ्यागमंस्तदा तत्र भागार्थं ताश्च देवताः । ततः कोपसमाविष्टो विश्वामित्रो महामुनिः । स्रुवमुद्यम्य सक्रोधस्त्रिशङ्कुमिदमब्रवीत् । पश्य मे तपसो वीर्य्यं स्वार्जितस्य नरेश्वर ! । एष त्वां स्वशरीरेण नयामि स्वर्गमोजसा । दुष्प्रापं स्वशरीरेण स्वर्गं गच्छ नरेश्वर ! । स्वार्जितं किञ्चिदप्यस्ति मया हि तपसः फलम् । राजंस्त्वं तेजसा तस्य सशरीरो दिवं व्रज । उक्तवाक्ये मुनौ तस्मिन् सशरीरो नरेश्वरः । दिवं जगाम काकुत्स्थ ! मुनीनां पश्यतां तदा । स्वर्गलोकं गतं दृष्ट्वा त्रिशङ्कुं पाकशासनः । सह सर्व्वैः सुरगणै-

रिदं वचनमब्रवीत्। त्रिशङ्को! गच्छ भूयस्त्वं नास्ति स्वर्गकृतालयः। गुरुशापहतो मूढ! पत भूमिमवाक्शिराः। एवमुक्तो महेन्द्रेण त्रिशङ्कुरपतत् पुनः। विक्रोशमानस्त्राहीति विश्वामित्रं तपोधनम्। तच्छ्रुत्वा वचनं तस्य क्रोशमानस्य कौशिकः। रोषमाहारयत् तीव्रं तिष्ठ तिष्ठेति चाब्रवीत्। ऋषिमध्ये स तेजस्वी प्रजापतिरिवापरः। सृजन् दक्षिणमार्गस्थान् सप्तर्षीनपरान् पुनः। नक्षत्रवंशमपरमसृजत् क्रोधमूर्च्छितः। दक्षिणां दिशमास्थाय ऋषिमध्ये महायशाः। सृष्ट्वा नक्षत्रवंशञ्च क्रोधेन कलुषीकृतः। अन्यमिन्द्रं करिष्यामि लोको वा स्यादनिन्द्रकः। दैवतान्यपि स क्रोधात् स्रष्टुं समुपचक्रमे। ततः परमसम्भ्रान्ताः सर्षिसङ्घाः सुरासुराः। विश्वामित्रं महात्मानमूचुः सानुनयं वचः। अयं राजा महाभाग! गुरुशापपरिक्षतः। सशरीरो दिवं यातुं नार्हत्येव तपोधन!। तेषां तद्वचनं श्रुत्वा देवानां मुनिपुङ्गवः। अब्रवीत् सुमहद्वाक्यं कौशिकः सर्वदेवताः। सशरीरस्य भद्रं वस्त्रिशङ्कोरस्य भूपतेः। आरोहणं प्रतिज्ञातं नानृतं कर्तुमुत्सहे। स्वर्गोऽस्तु सशरीरस्य त्रिशङ्कोरस्य शाश्वतः। नक्षत्राणि च सर्वाणि मामकानि ध्रुवाण्युत। यावल्लोका धरिष्यन्ति तिष्ठन्त्वेतानि सर्वशः। मत्कृतानि सुराः सर्वे तदनुज्ञातुमर्हथ। एवमुक्ताः सुराः सर्वे प्रत्यूचुर्मुनिपुङ्गवम्। एवं भवतु भद्रन्ते तिष्ठन्त्वेतानि सर्वशः। गगने तान्यनेकानि वैश्वानरपथाद्बहिः। नक्षत्राणि मुनिश्रेष्ठ! तेषु ज्योतिःषु जाज्वलन्। अवाक्शिरास्त्रिशङ्कुश्च तिष्ठत्वमरसन्निभः। अनुयास्यन्ति चैतानि ज्योतींषि नृपसत्तमम्। कृतार्थं कीर्त्तिमन्तञ्च स्वर्गलोकगतं यथा। विश्वामित्रस्तु धर्म्मात्मा सर्वदेवैरभिष्टुतः। ऋषिमध्ये महातेजा वाढमित्येव देवताः। ततो देवा महात्मान ऋषयश्च तपोधनाः। जग्मुर्यथागतं सर्वे यज्ञस्यान्ते नरोत्तम!।" इ० स०

त्रिशङ्कोरपत्यम् अण्। त्रैशङ्कव हरिश्चन्द्रे "तस्य (त्रिशङ्कोः) सत्यरथा नाम पत्नी केकयवंशजा। कुमारं जनयामास हरिश्चन्द्रमकल्मषम्। स वै राजा हरिश्चन्द्रस्त्रैशङ्कव इति स्मृतः" हरिवं० १३अ०। (हेमच० त्रिशङ्कुशब्दे दृश्यम्।

त्रिशङ्कुज पु० त्रिशङ्कोर्जायते जन–ड। हरिश्चन्द्रे नृपे

त्रिशङ्कुयाजिन् पु० त्रिशङ्कुं याजयति यज–णिनि। विश्वामित्रे हेमच० त्रिशङ्कुशब्दे दृश्यम्।

त्रिशत न० त्रिगुणितं शतम् शा० त०। त्रिगुणिते शते। "चतुर्विंशतिसंयुक्तं मण्डलं त्रिशतं स्मृतम्" कामन्दकी। "नरकं त्रिशतं प्राप्य स विष्ठामुपजीवति" भा० अनु० १०१ अ०। समा० द्वि० ङीप्। २शतत्रये स्त्री।

त्रिशरण न० त्रीणि शरणान्यस्य। बुद्धदेवे त्रिका०।

त्रिशर्करा स्त्री त्रिगुणिता शर्करा शा० त०। मिलितगुडोत्थजाहिमोत्था मधुरेति मधुरत्रिके राजनि०।

त्रिशला स्त्री अर्हन्मातृभेदे हेमच०।

त्रिशाख त्रि० तिस्रः शाखा अग्राणि यस्य। शिखाकारायत्रययुते। "कृत्वा त्रिशाखां भ्रुकुटीं ललाटे" भा० कर्ण० ८५ अ०। [बिल्वे राजनि०।

त्रिशाखपत्र पु० तिस्रः शाखा अस्य तादृशं पत्रं यस्य।

त्रिशाण त्रि० त्रयः शाणाः परिमाणमस्य तैः क्रीतं वा अण् तस्य वा लुक्। १त्रिशाणपरिमिते २तत्क्रीते च। पक्षे न लुक्। त्रैशाण तत्रार्थे पक्षे यत् त्रिशाण्य तत्रार्थे एवं द्विशाणद्विशाण्य द्वैशाण द्विशाणक्रीते तत्परिमिते त्रि०

त्रिशालक न० तिस्रः शाला यत्र वा कप्। हिरण्यनाभाख्ये वास्तुभेदे तत्फलादिकं वृ० स० ५३ उक्तं यथा "उत्तरशालाहीनं हिरण्यनाभं त्रिशालकं धन्यम्। प्राक्शालया वियुक्तं सुक्षेत्रं वृद्धिदं वास्तु। याम्याहीनं चुल्ली त्रिशालकं वित्तनाशकरमेतत्। पक्षघ्नमपरयावर्जितम् सुतध्वंसवैरकरम्"।

त्रिशिख न० तिस्रः शिखा अस्य। १त्रिशूले अस्त्रभेदे २किरीटे च हेमच०। ३शिखात्रययुक्ते त्रि०। "त्रिशिखां भ्रुकुटिञ्चास्य ददृशुर्दानवा रणे" हरिवं० २२५ अ०। "त्रिशिखां भ्रुकुटीं कृत्वा सन्दश्य दशनच्छदम्" भा० क्रा० १६३अ०। ४रावणपुत्रे राक्षसभेदे पु०

त्रिशिखिदला स्त्री तिस्रः शिखाः सन्त्यत्र इनि तादृशं दलमस्य। मालाकन्दे राजनि०।

त्रिशिरस् पु० त्रीणि शिरांस्यस्य। १कुबेरे हेमच०। २रावणपुत्रभेदे ३खरसेनापतिभेदे च। त्रिशिरस्के ४ज्वरे च। "त्रिशिरस्ते प्रसन्नोऽहं व्येतु ते मज्ज्वराद्भयम्" भाग० १० अ० बाणयुद्धे। अस्य अदन्तत्वमपि "सर्वे सान्ता अदन्ताः स्युः" इत्युक्तेः "खरत्रिशिरदूषणप्रमुख्यबन्धून्" भाग० ९। १०। १० "ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः" हरिवं० १८१ अ०। त्रयो वेदाः शिरांसीव यस्य। ५जैवे रथे पु०। "सबन्धुरस्तस्य रथस्त्रिचक्रस्त्रिवृच्छिरास्त्रिशिराश्च त्रिनाभिः" भा० आनु० १९८ अ०। नील-

कण्ठस्तु "इहच्छिराश्चतुरश्वाश्विनाभिः" इति पठित्वा "चतुरश्वः कालादृष्टेश्वरेच्छाख्यसंकल्पाश्चत्वारोऽश्वा अस्येति" व्याचख्यौ। "अतीव हि त्रिशिरसं समुच्छिन्द्यात् सतत्वरः" कामन्दकी। त्रिशीर्षकादयोऽप्यत्र। तत्र त्रिशूले न० हेमच०।

त्रिशुच् पु० तिस्रः शुचो दीप्तयः शोका वाऽस्य। स्वर्गान्तरिक्षपृथिवीस्थदीप्तित्रययुते घर्मे। "घर्मस्त्रिशुक् विराजति विराजा" यजु० ३८।२७। "ताः शुचश्च तत्रैव १८ मन्त्रे उक्ता यथा "या ते घर्म! दिवा शुग्या गायत्र्यां हविर्धाने। सा त आप्यायतां निष्ट्यायतां तस्यै ते स्वाहा। या ते घर्मान्तरिक्षे तस्याः त्रिष्टुभ्याग्नीध्रे सा त आप्यायतामित्यादि या ते घर्म पृथिव्यां तस्या जगत्यां सदस्या। सा त आप्यायताम्" इत्यादि। २आध्यात्मिकादिशोकत्रययुक्ते च।

त्रिशूल न० त्रीणि शूलानीव अग्राणि यस्य। स्वनामख्याते अस्त्रभेदे हेमच०। "त्रिशूलं दक्षिणे हस्ते खड्गं चक्रं क्रमादधः" दुर्गाध्यानम् "त्रिशूलडमरुकरं व्याघ्रकृत्तिवसानम्" शिवध्यानम्।

त्रिशूलखात न० त्रिशूलेन खातम्। तीर्थभेदे "त्रिशूलखातं तत्रैव तीर्थमासाद्य भारत!। तत्राभिषेकं कुर्वीत पितृदेवार्चने रतः। गाणपत्यञ्च लभते देहं त्यक्त्वा न संशयः" भा० भ० ८४ अ०।

त्रिशूलमुद्रा स्त्री त्रिशूलमाकारत्वेनास्त्यस्याः कर्म०। मुद्राभेदे "अङ्गुष्ठेन कनिष्ठान्तु बद्ध्वा शिष्टाङ्गुलीत्रयम्। प्रसारयेत्त्रिशूलाख्या मुद्रैषा परिकीर्त्तिता" तन्त्र० तल्लक्षणमुक्तम्

त्रिशूलिन् पु० त्रिशूलमस्त्रमस्य इनि। शिवे "त्र्यक्षोऽभेद्यस्त्रिशूली च वृषकेतुर्महाबलः" स्कान्दपु० शिवस्तवः। २दुर्गायां स्त्री ङीप्। "त्रिशूलिनीं नमस्यामि महिषासुरघातिनीम्" हरिवं० १६६ अ०।

त्रिशृङ्ग पु० त्रीणि शृङ्गाण्यस्य। त्रिकूटपर्वते शब्दरत्ना०। "त्रिशृङ्गः पर्वतश्चैव कुमारी च सरिद्वरा" हरिवं० २३७ अ०। २त्रिकोणे। "कुरङ्गेण हीनस्त्रिशृङ्गस्तदन्तः" सारसमुच्चयः। [मत्स्ये शब्दार्थकल्पतरुः।

त्रिशृङ्गिन् पु० त्रीणि शृङ्गाणि सन्त्यस्य इनि। रोहित-

त्रिशोक पु० त्रयः आध्यात्मिकादयः शोका अस्य। १जीवे २कण्वपुत्रे ऋषिभेदे च। "अनु त्रिशोकः शतमावहन्नृन्" ऋ० १०।२९।२। त्रिशोको नामर्षिः" भा०। "याभिस्त्रिशोक उस्रिया" ऋ० १।११२।१२ "कण्वपुत्रस्त्रिशोक ऋषिः" भा०।

त्रिषंयुक्त त्रि० त्रिभिर्हविर्भिः संयुक्तं वेति छन्दसीति चानुवृत्तौ "पूर्वपदात्" पा० वा वेदे षत्वम्। त्रिभिर्हविर्भिः संयुक्ते इष्टिभेदे। "ऐन्द्रावैष्णवं चरुं, वैष्णवं त्रिकपालं वा पुरोडाशं चरुं वा तेन त्रिषंयुक्तेन यजते" शत० ब्रा० ५।२।५।१। "त्रिषंयुक्तेषु" कात्या० श्रौ० १५।२।११। "त्रिभिर्हविर्भिः संयुक्तं कर्म त्रिषंयुक्तम्" संप्र० व्याख्या। २त्रिभिः संयुतमात्रे त्रि०। "दक्षिणेऽग्नौ पावयन्ति पवित्राभिस्त्रिषंयुक्ताभिः" शत० ब्रा० १२।८।२३।१२१। लोके तु न षत्वम्।

त्रिषंवत्सर न० त्रयः संवत्सराः साधनकाला अस्य वेदे वा षत्वम्। त्रिवर्षसाध्ये सत्त्रभेदे। "त्रिषंवत्सरं षष्टिदीक्षम्" कात्या० श्रौ० २५।५३।१२ "त्रिषंवत्सरं सत्त्रं तत्र षष्टिदीक्षं भवति" सं० व्या० त्रिगुणितः संवत्सरः। २त्रिवर्षे च। "महातापश्चितं त्रिषंवत्सरोपसत्कम्" कात्या० श्रौ० २५।५।६। "त्रयः संवत्सरा उपसदो यत्र" कर्कः। लोके तु न षत्वम्। ३त्रिवर्षसाध्ये वस्तुनि त्रि०।

त्रिषन्धि त्रि० त्रयः सन्धयोऽस्य वेदे वा षत्वम्। १त्रिसन्धियुक्ते "चातुर्मास्यानि त्रिषन्धीनि द्विसमस्तानि तस्मादिमानि पुरुषस्याङ्गानि त्रिषन्धीनि द्विसमस्तानि" शत० ब्रा० ११।५।२।७। "त्रयः सन्धयोऽन्तरालकालाश्चत्वारश्चत्वारो मासा येषां तानि त्रिसन्धीनि द्विसमस्तानि शुनासीरीयवैश्वदेवयोः फाल्गुनस्य, शुक्लचतुर्दश्यां पौर्णमास्यां वा पौर्वापर्येणाव्यवहितानुष्ठानात् द्वाभ्यां पर्वभ्यां समस्तानि संश्लिष्टानि पादतलादधस्तनोपरितनसन्ध्योरुभयोः प्रत्यासन्नत्वाद्द्विसमस्तत्वम्" भा०। [पाठान्तरम्।

त्रि(ट)षम त्रि० ह्रस्वे निघण्टुः मायुषेत्यत्र तथा, त्र्यषमेति च

त्रिषवण न० सूयते सोमोऽत्र सु—आधारे ल्युट् "पूर्वपदात्" पा० वा षत्वम्। त्रिकाले प्रातर्मध्याह्नसायाह्नरूपे काले "उपस्पृशंस्त्रिषवणं पितॄन् देवांश्च तर्पयेत्। दान्तस्त्रिषवणस्नायी निवृत्तश्च प्रतिग्रहात्" "कुर्य्यात् त्रिषवणस्नायी कृच्छ्रं चान्द्रायणं तथा" याज्ञ०। षत्वाभावे लोके च त्रिसवनमप्यत्र

त्रिषष्टि स्त्री बहुत्वेऽपि एकव० त्र्यधिका षष्टिः शा० त०। १त्र्यधिकषष्टिसंख्यायां २तत्संख्येये च। "चतुःषष्टिस्त्रिषष्टिर्वा वर्णाः सम्भवतो मताः" शिक्षा। पक्षे त्रय आदेशे त्रयःषष्टिरप्यत्र। त्रयश्च षष्टिश्च इति विग्रहेऽपि तदर्थे। "संख्याः" पा० त० पक्षे पूर्वपदप्रकृतिस्वर इति भेदः। इयांस्तु भेदः त्रय आदेशे अन्तोदात्तः। त्रिषष्ट्या युतं शतादि ड। त्रिषष्ट त्रिषष्टियुतशतादौ त्रि०। ततः पूरणे तमप्।

त्रिषष्टितम त्रयःषष्टितम तत्संख्यापूरणे त्रि॰। स्त्रियां ङीप्। पूरणे डट्। त्रिषष्ट त्रयःषष्ट त्रिषष्टिपूरणे त्रि॰। स्त्रियां ङीप्।

त्रिषु(सु)पर्ण पु॰ त्रयः सुपर्णास्तद्वाचकशब्दा यत्र। १बह्वृचवेदभागभेदे त्रिसौपर्णशब्दे दृश्यं २तद्व्रते च तद्योगात् ३तद्व्रतधारिणि पुरुषे "त्रिणाचिकेतः पञ्चाग्निस्त्रिसु(षु)पर्णः षडङ्गवित्" मनुः। वा कप्। तत्रार्थे "वेदार्थवित् ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णकः" याज्ञ॰।

त्रिष्टुभ् स्त्री त्रिषु स्थानेषु स्तुभ्यते स्तुभ–क्विप् षत्वम्। एकादशाक्षरपादके वर्णवृत्ते छन्दोभेदे "गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च। त्रिष्टुप् च जगती चैव" वृ॰ र॰। प्रस्तावे तस्याः २०४८ भेदाः। "एकादशाक्षरा वै त्रिष्टुप् गायत्रीं क्षत्रं त्रिष्टुप्" शत॰ब्रा॰१।३।५।५। "तथैव माध्यन्दिनं सवनमतन्वत" इत्युपक्रमे "एकादशाक्षरा त्रिष्टुभ् तस्मादाहुस्त्रैष्टुभं माध्यन्दिनं सवनमिति" शत॰ब्रा॰ ४।२।२।८। २तच्छन्दोऽभिमानिदेवतायाञ्च। "इन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयत्" यजु॰ ९।३०। "इन्द्रो देवः एकादशाक्षरेण छन्दसा त्रिष्टुभं त्रिष्टुप्छन्दोऽभिमानिनीं देवतामुदजयत्" वेददीपः। प्रसङ्गात् छन्दोऽभिमानिदेवताः सर्वानुक्रमणिकायां ४ अ॰ उक्ताः प्रदर्श्यन्ते। "अथातश्छन्दोदेवता गायत्र्या अग्निरुष्णिहः सविताऽनुष्टुभः सोमो बृहत्या बृहस्पतिः, पङ्क्तेर्वरुणस्त्रिष्टुभ इन्द्रो जगत्याविश्वे देवा विराजो मित्रः, स्वराजो वरुणोऽतिच्छन्दसः प्रजापतिर्विच्छन्दसो वायुर्द्विपदायाः पुरुष एकपदाया ब्रह्मा। सर्वा ऋचः आग्नेय्यः सर्वाणि यजूंषि वायव्यानि सर्वाणि सामानि सौराणि सर्वाणि ब्राह्मणानि च। स्वाहाकारस्याग्निर्वषट्कारस्य विश्वे देवाः। कर्मारम्भे मन्त्राणां देवता वेदितव्याः संन्यस्य मनसि देवतां ततो हविर्हूयते देवतामविज्ञाय यो जुहोति देवास्तस्य हविर्न जुषन्ते। स्वाध्यायमपि योऽधीते मन्त्रदैवतज्ञः सोऽमुष्मिन् लोके देवैरपीज्यते। तस्माच्च देवता वेद्या मन्त्रे मन्त्रे प्रयत्नतः। मन्त्राणां देवताज्ञानान्मन्त्रार्थमधिगच्छति"। शब्दब्रह्मात्मनः मांसात् तस्या उत्पत्तिः भाग॰३।१२।२९ श्लो॰ उक्ता यथा "तस्योष्णिगासील्लोमभ्यो गायत्री च त्वचो विभोः। त्रिष्टुम्मांसात् स्नुतोऽनुष्टुब्जत्यस्थ्नः प्रजापतेः। मज्जातः पङ्क्तिरुत्पन्ना बृहती प्राणतोऽभवत्"।

त्रिष्टोम पु॰ त्रयः स्तोमा यत्र षत्वम्। क्षत्रधृतियज्ञस्य उभयतः कर्त्तव्ये यज्ञभेदे। "क्षत्रधृतिः" कात्या॰श्रौ॰१५।९।२४ सू॰ "तमुभयतः एके त्रिष्टोमज्योतिष्टोमौ" २५ सू॰। "एके तं क्षत्रधृतिमुभयतः त्रिष्टोमज्योतिष्टोमौ कुर्वन्ति" सं॰ व्या॰।

त्रिष्ठ पु॰ त्रिषु चक्रेषु तिष्ठति स्था–क अम्बाम्बेत्यादिना षत्वम्। चक्रत्रयस्थिते रथे। "त्रिष्ठं वां सूरे दुहितारुहद्रथम्" ऋ॰ १।३४।५। "त्रिष्ठं चक्रत्रयेऽवस्थितं रथम्" भा॰।

त्रिष्ठिन् त्रि॰ त्रिषु विद्यादानयज्ञेषु तिष्ठति स्था–वा॰ इनि सुपाम॰ षत्वम्। विद्यादिशीलयुक्ते। "उत् कूनिकूलेभ्यस्त्रिष्ठिनम्" यजु॰ ३०।१४। "त्रिषु विद्यादिषु स्थितं शीलवन्तम्" वेददी॰।

त्रिस् अव्य॰ त्रि+वारे सुच्। त्रिवारे "येन त्रिःसप्तकृत्वो नृपवहलवशामांसमस्तिष्कपङ्केति" प्रबोधच॰। "अनेन विधिना श्राद्धं त्रिरब्दस्य हि निर्वपेत्" मनुः। "त्रिर्जपेदघमर्षणम्" स्मृतिः।

त्रिसन्धि स्त्री त्रयः सन्धयोऽन्तरकाला विकाशेऽस्याः। (फागनिया) १पुष्पभेदे राजनि॰। सा त्रिविधा सिताऽसिता रक्ता च। समा॰द्वि॰। २पूर्वापरमध्यसन्धौ न॰।

त्रिसन्ध्य न॰ समाहारद्वि॰। प्राह्णपराह्णमध्याह्नरूपे सन्ध्यात्रये। "सान्निध्यं पुष्करे येषां त्रिसन्ध्यं कुरुनन्दन!" भा॰ व॰ ८२ अ॰। "करैस्त्रिसन्ध्यं त्रिदशैर्दिशे नमः" माघः। "त्रिसन्ध्यव्यापिनी या तु सैव पूज्या सदा तिथिः। न तत्र युग्मादरणमन्यत्र हरिवासरात्" ति॰त॰ पराशरः।   कुसुमे (फागनिया) राजनि॰।

त्रिसन्ध्यकुसुमा स्त्री त्रिसन्ध्यं कुसुमं यस्याः। त्रिसन्धि॰

त्रिसप्तति स्त्री एकव॰त्र्यधिका सप्ततिः शा॰त॰त्रयश्च सप्ततिश्च द्वन्द्वस॰वा। १त्र्यधिकसप्ततिसंख्यायां २तत्संख्येये च पक्षे वा त्रयआदेशे त्रयःसप्तति तत्रार्थे। तत्र त॰ पूर्वप्रकृतिस्वरः त्रय आदेशे अन्तोदात्त इति भेदः। ततः पूरणे तमप्। त्रिसप्ततितम त्रयःसप्ततितम तत्पूरणे त्रि॰स्त्रियां ङीप्। पूरणे डट्। त्रिसप्तत तत्रार्थे त्रि॰ स्त्रियां ङीप्। "भीमसेनं त्रिसप्तत्या नकुलं सप्तभिः शरैः" भा॰ग॰२२अ॰। त्रिसप्तत्या युतं शतादि ड। त्रिसप्तत तद्युते शतादौ त्रि॰।

त्रिसप्तन् त्रि॰ ब॰व॰त्रिगुणिताः सप्त। १एकविंशतिसंख्यायाम् २तत्संख्येये च। "विद्धा चैनं त्रिसप्तभिः" भा॰ग॰१२अ॰। "त्रिसप्तकृत्वः पृथिवीं योजिगाय भृगूत्तमः" हरिवं॰२०४अ॰।

त्रिसम न॰ त्रयः समा यत्र। समहरीतकीनागरगुड़रूपे पदार्थे राजनि॰। समा॰ द्वि॰। २वर्षत्रये न॰।

त्रिसर पु॰ कृसर+पृषो॰। कृशरे हेमच॰।

त्रिसरक न॰ त्रिवारं सरकम्, त्रयाणां सरकाणां शीधुपानानां समाहारः पात्रा॰न ङीप् वा। त्रिवारे मधुपाने "प्रातिभं त्रिसरकेण गतानाम्" माघः।

त्रिसर्ग पु॰ त्रयाणां सत्त्वरजस्तमसां सर्गः। सत्त्वरजस्तमसां सर्गे। "यत्र त्रिसर्गो मृषा" भा॰ १।१।१।

त्रिसामन् पु॰ त्रीणि सामानि स्तुतिसाधनानि यस्य। १परमेश्वरे। "त्रिसामा सामगः साम त्रिवर्णो भेषजं भिषक्" विष्णु सं॰। "त्रीणि वेदव्रतसामाख्यानि तैस्त्रिसामभिः स्तुतस्त्रिसामा" भा॰ वेदव्रतसामानि च। "अधिपताद् मित्र! पताद् सुपताद्" इत्येवमादीनि त्रीणि सामानि। २महेन्द्राद्रेः चरन्त्यां नद्याम् स्त्री टाप् शब्दार्थचि॰। "ऋषिकुल्या त्रिसामा कौशिकी इत्यादि" भाग॰ ५।१९।१८। भारतवर्षमहानद्युक्तौ।

त्रिसाहस्र त्रि॰ त्रीणि सहस्राणि परिमाणमस्य अण् उत्तरपदवृद्धिः। त्रिभिः सहस्रैः १परिमिते। स्त्रियां ङीप्। "त्रिसाहस्र्युत्तमा" कात्या॰ श्रौ॰ १७।७२१। "उत्तमा चितिः त्रिसाहस्री लोकम्पृणानां भवति" कर्कः।

त्रिसिता स्त्री त्रिगुणिता सिता शा॰ त॰। त्रिशर्कराशब्दार्थे राजनि॰। [सीतया कृष्टक्षेत्रे अमरः।

त्रिसीत्य न॰ त्रिवारं सीतया समितम् यत्। त्रिःकृत्वः

त्रिसुगन्धि न॰ त्रयाणां सुगन्धिद्रव्याणां समाहारः। "त्वगेलापत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्" इत्युक्ते तुल्यभागे एलादित्रिके राजनि॰। "पिबेद्रसं पुष्पफलोद्भवं वा सितामधूकत्रिसुगन्धियुक्तम्" सुश्रुतः।

त्रिसुवर्चक पु॰ आङ्गिरसे च्यवनरूपे वह्नौ "अग्निराङ्गिरसश्चैव च्यवनस्त्रिसुवर्चकः" भा॰ व॰ २१९ अ॰।

त्रिसौपर्ण न॰ त्रिः सुपर्णेन ऋषिणा कृतमण् इत्तौ त्रिशब्दस्य सुजर्थता उत्तरपदवृद्धिः। सुपर्णर्षिणा चरिते व्रतभेदे। "सुपर्णो नाम तमृषिः प्राप्तवान् पुरुषोत्तमात्। तपसा वै सुतप्तेन दमेन नियमेन च। त्रिः परिक्रान्तवानेतत् सुपर्णो धर्ममुत्तमम्। यस्मात्तस्माद्व्रतं ह्येतत् त्रिसौपर्णमिहोच्यते। ऋग्वेदपाठपठितं व्रतमेतद्धि दुश्चरम्। सुपर्णाच्चाप्यधिगतो धर्म एष सनातनः। वायुना द्विपदां श्रेष्ठः कथितो जलदायुधा। ततो वायोः सकाशात् प्राप्तश्च ऋषिभिर्विघसाशिभिः। ततो महोदधिश्चैव प्राप्तवान् धर्ममुत्तमम्। अन्तर्दधे ततो भूयो नारायणसमाहितः" भा॰ शा॰ ३५० अ॰। सुपर्णा एव स्वार्थे अण् त्रयः सौपर्णा यत्र। ऋग्वेदे १०।११४।३।४।५। मन्त्रत्रिके। ते च मन्त्राः "चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते। तस्यां सुपर्णा वृषणा निषेदतुर्यत्र देवा दधिरे भागधेयम्"।३ "एकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे। तं पाकेन मनसापश्यमन्तितस्तं माता रेह्लि स उ रेह्लि मातरम्"।४ "सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति। छन्दांसि च दधतो अध्वरेषु ग्रहान्त्सोमस्य मिमते द्वादश"।५ सुपर्णपदघटिते मन्त्रे विदितं अण् उत्तरपदवृद्धिः। १परमेश्वरनामभेदे "त्रिसौपर्णं तथा ब्रह्म यजुषां शतरुद्रियम्" भा॰ शा॰ २८६ अ॰। "त्रिसौपर्णं विदितं नाम त्रिसौपर्णमिति तदर्थः" श्रीधरः। त्रिसौवर्णेति पाठः लिपिकरप्रमादात्।

त्रिस्कन्ध न॰ त्रयः स्कन्धा इवावयवा अस्य। ज्योतिःशास्त्रे वृ॰ स॰ १ अ॰ तस्य स्कन्धत्रयमुक्तं यथा "ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम् तत्कार्त्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता। स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः"। तेन तन्त्रहोराङ्गनिर्णयाख्यास्तस्य त्रयः स्कन्धाः।

त्रिस्तन न॰ त्रयः स्तना दोह्या यत्र। त्र्यहसाध्ये यज्ञे प्रथमायामुपसदि दोह्यत्रिस्तनरूपे १व्रतभेदे "त्रिस्तनं प्रथमायां दोहयति" कात्या॰ श्रौ॰ ८।२।१ त्रयःस्तना अस्या ङीष्। स्तनत्रययुक्ते २राक्षसीभेदे स्त्री "त्रिस्तनीमेकपादाञ्च त्रिजटामेकलोचनाम्" भा॰ व॰ २७९ अ॰।

त्रिस्तावा स्त्री त्रिगुणिता तावती वेदिः। "द्विस्तावा त्रिस्तावा वेदिः" पा॰ अच् समा॰ टिलोपः समासस्य निपात्यते। प्रकृतौ यावती वेदिः ततस्त्रिगुणोऽश्वमेधाद्यङ्गे वेदिभेदे। वेदिभिन्ने तु त्रिस्तावती रज्जुः" इत्येव सि॰ कौ॰।

त्रिस्थली स्त्री त्रयाणां गयाकाशीप्रयागरूपस्थलानां समाहारद्वि॰। काशीगयाप्रयागरूपस्थलत्रिके। तदधिकृत्यैव त्रिस्थलीसेतुनामा ग्रन्थः अनन्तभट्टेन कृतः।

त्रिस्थान त्रि॰ त्रीणि स्थानान्यस्य। १स्वर्गमर्त्यपातालस्थे परमेश्वरे २जाग्रदाद्यवस्थात्रयसाक्षिणि जीवे च।

त्रिस्रोतस् स्त्री त्रिषु लोकेषु स्रोतो यस्याः। गङ्गायाम् "त्रिस्रोतसः कान्तिमतीत्य तस्थौ" कुमा०। "कृताभिषेकैर्दिव्यायां त्रिस्रोतसि च सप्तभिः" रघुः।

त्रिस्रोतसी स्त्री त्रीणि स्रोतांसि सन्त्यस्याम् अच् गौरा० ङीष्। स्रोतस्त्रययुक्ते नदीभेदे "तथा समुद्राश्चत्वारः। नदी भागीरथी च या" इत्युपक्रमे "अवन्ती गोमती चैव सन्ध्या त्रिस्रोतसी तथा" भा० स० ९अ०। वरुणसभास्थतीर्थभूतनद्यादिकथने।

त्रिस्पृशा स्त्री त्रीणि चान्द्रदिनानि एकस्मिन् सावने दिने स्पृशति स्पृश—क। एकादशीभेदे "यदा पूर्वदिने दशमी परदिने चैकादशी स्वल्पा ततो द्वादशी रात्रिशेषे त्रयोदशी सा चैकादशी त्रिस्पृशा" रघु० "एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारयेत्" एका० त० धृत वचनम्। "एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। त्रिस्पृशा नाम सा ज्ञेया ब्रह्महत्यां व्यपोहति" संवर्त्तवचनम्। अष्टसु महाद्वादशीषु वासरत्रयस्पर्शिन्यां २द्वादश्याञ्च द्वादशीशब्दे दृश्यम्।

त्रिस्नान न० त्रिषु कालेषु स्नानमत्र। त्रिकालस्नानाङ्गे व्रतभेदे। तच्च वानप्रस्थाङ्गं प्रायश्चित्ताङ्गञ्च। तत्राद्यं कामन्दकीनीतिशास्त्रे उक्तं यथा "वनवासः पयोमूलनीवारफलवृत्तिता। प्रतिग्रहनिवृत्तिश्च त्रिस्नानं व्रतचारिता। देवातिथीनां पूजा च धर्मोऽयं वनवासिनः" द्वितीयन्तु त्रिषवणशब्दे दर्शितम्। [क्षेत्रे अमरः

त्रिहल्य न० त्रिः हलेन कृष्टं क्षेत्रम्। त्रिवारं हलेन कृष्टे

त्रिहायण त्रि० त्रयो हायना वयोऽस्य णत्वम्। त्रिवर्षे गवादौ "अथ संस्मारणं कृत्वा लक्षयित्वा त्रिहायणान्" भा० व० २३१ अ०। स्त्रियान्तु ङीप्। "त्रिहायणी त्रिवर्षा गौः" अमरः। "वत्सतर्यश्च त्रिहायण्योऽप्रीताः पञ्चवर्णा राजीवपृष्ठ्यो नवनीतपृष्ठ्योऽरुणाः पिशङ्ग्यः सारङ्ग्यः" कात्या० श्रौ० २२।८।१२। २द्रौपद्यां ब्रह्मवै० "कृते युगे वेदवती त्रेतायां जनकात्मजा। द्वापरे द्रौपदी छाया तेन कृष्णा त्रिहायणी" जन्मखण्डम्।

त्रीषु त्रि० त्रय इषवः परिमाणमस्य कन् तस्य लुक्। १इषुत्रयमिते स्थाने। त्रयः इषवो यत्र कप्। २बाणत्रययुक्ते धनुषि न०। "त्रीषुकं धनुर्दक्षिणा" कात्या० श्रौ० २५।४।४७। अस्यां त्रिहविष्कायामिष्टौ त्रिभिरिषुभिरुपेतं धनुर्दक्षिणेत्यर्थः" सं० व्याख्या।

त्रीष्टक पु० तिस्रः ऋगादिरूपा इष्टका यस्य। अग्निभेदे "स एष त्रीष्टको ऽग्निः। ऋगेका यजुरेका सामैका तद्यां कां चानर्चोपदधाति रुक्म एव तस्या आयतनमथ यां यजुषा पुरुष एव तस्या आयतनमथ यां साम्ना पुष्करपर्णमेव तस्या आयतनमेवं त्रीष्टकम्" शत० ब्रा० १०।५।२।२१।

त्रुट छेदने वा दिवा० पक्षे तुदा० कु० पर० अक० सेट्। त्रुट्यति त्रुटति अत्रु(त्रो)टीत्। तुत्रोट। छेदश्चात्र अवयवद्विधाभाव मात्रम् "यावन्मे दन्ता न त्रुट्यन्ति" हितो० "त्रुटित पयोधरतटे हारं पुनर्योजय" सा० द०। "त्रुटित इव मुक्तामणिसरः" उत्तर०।

वि+विरुजीकरणे सक०। "कण्टकैरेना विरुजेयुः" कात्या० श्रौ० २२।३।२२। "विरुजेयुः वित्रुट्येयुः" सं० व्याख्या।

त्रुट छेदने चुरा० आ० सक० सेट्। त्रोटयते अतुत्रुटत।

त्रुटि(टी) स्त्री त्रुट० त्रुट—इन् वा ङीप्। १सूक्ष्मैलायां २अल्पे ३संशये ४कालभेदे च अमरः ’स च "योऽक्ष्णोर्निमेषस्य खराम३०भागः स तत्परस्तच्छतभाग उक्ता। त्रुटिर्निमेषैर्धृति१८भिश्च काष्ठा तत्त्रिंशता सद्गणकैः कलोक्ता" सि० शि० उक्तेः तत्परस्य शतभागकालरूपः। "क्षणद्वयात्मकः कालस्त्रुटिरिति’ ’भरतः तन्मूल्यं मृग्यम्। तदपेक्षया क्षणस्य भाग० अधिककालतोक्तेः तस्यामूर्त्तत्वात् क्षणस्य मूर्तत्वाच्च तथा हि "प्राणादिः कथितो मूर्त्तस्त्रुट्याद्योऽमूर्त्तसंज्ञकः" सू० सि० "त्रुटिराद्या यस्य तादृशः कालः एकप्राणान्तर्गतत्रुटितत्परादिकोऽमूर्त्तसंज्ञकः व्यवहारायोग्यत्वेनास्यामूर्त्तत्वम्। भाग० ३।११।५, ६। अन्यथा मानमुक्तं यथा "अणू द्वौ परमाणुः स्यात् त्रसरेणुस्त्रयः स्मृतः। ज्वालार्करश्म्यवगतः खमेवानुपतन्नगात्। त्रसरेणुत्रयं भुङ्क्ते यः कालः स त्रुटिः स्मृता। शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु लवः स्मृतः। निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रयः क्षणः"। "मरुतः सह पर्जन्याः कलात्रुटिलवक्षणाः" हरिवं० १६८अ०। "शुक्लस्त्वं बहुलश्चैव कला काष्ठा त्रुटिस्तथा" भा० आ० २५ अ०। "प्राणत्रुटिलुअवयवाद्यकालस्य क्षेत्रस्य च वेत्ता" ह०सं०२अ०। २कुमारानुचरमातृभेदे "क्षेमयन्ती त्रुटिर्नाम क्रोशना च तडित्प्रभा" भा० श०४७० मातृगणोक्तौ। भावे इन्। २अवयवादिहीनतायाम्।

त्रुटिबीज पु० त्रुटिरल्पं बीजमस्य। कच्वी मूलभेदे शब्दमा०।

त्रुटिशस् अव्य० त्रुटि+वीप्सार्थे शस्। त्रुटिस्त्रुटिरित्याद्यर्थे। "त्रुटिशोलवशश्चापि गण्यते कालनिश्चयः" भा० उ० ११८ अ०।

त्रुन्प(म्प) वधे भ्वा०पर०सक० सेट्। त्रुम्पति अत्रुम्पीत्। नोपधत्वे क्विपि त्रुप् त्रुपौ मोपधत्वे त्रुन् त्रुम्पौ इति भेदः।

त्रुन्फ(म्फ) वधे भ्वा० पर० सक० सेट्। त्रुम्फति अत्रुम्फीत्। नोपधत्वे क्विपि त्रुप् त्रुफौ मोपधत्वे त्रुन् त्रुम्फौ इति भेदः।

त्रुप(फ) वधे भ्वा० पर० सक० सेट्। त्रोप(फ)ति अत्रोपी- [(फी)त्। तुत्रोप (फ)

त्रेता स्त्री त्रित्वमिता पृषो०। दक्षिणाग्निगार्हपत्याहवनीयात्मके समुदिते १अग्नित्रये, सत्ययुगानन्तरवर्त्तिनि युगभेदे, द्यूतक्रीड़ासाधनस्याक्षस्य यस्मिन् पार्श्वे त्रयोऽङ्कास्तस्य पार्श्वस्य उत्तानतया ३पतने, द्यूतविशेषे वराटकानां मध्ये त्रयाणामुत्तानतया ४पतने च "त्रेतया हृतसर्वस्वः" इति मृच्छकटिका। अयशब्दे २२४पृ० दृश्यम्

"त्रेतायुगमानञ्च दिव्यमानेन ३००० वर्षाः आदौ सन्ध्या ३००। अन्ते सन्ध्यांशः ३०० मिलिताः ३६००। वर्षाः मानुषमानेन ३६० गुणिता १२९६००० वर्षाः। यथाह मनुः "चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्। तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः। इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु। एकापायेन वर्त्तन्ते सहस्राणि शतानि च"। सि० शि० "खखाभ्रदन्तसागरैर्युगाग्नियुग्मभूगुणैः। क्रमेण सूर्य्यवत्सरैः कृतादयोयुगाङ्घ्रयः। खसन्ध्यकातदंशकैर्निजार्क१२भागसम्मितैः। युताश्च तद्युता युगं रदाब्धयोऽयुताहताः"। खखाभ्रदन्तसागरैः ४३२०००अङ्कैस्त्रिभिर्गुणितैस्तन्मिता वर्षा त्रेतामानं तत्रापि त्रेतादौ सन्ध्यामानं १०८००० त्रेतामानं १०८०००० वर्षाः। त्रेतान्ते सन्ध्यांशमानम् १०८०००। मिलित्वा १२९६००० वर्षाः त्रेतामानम्। स्पष्टमुक्तं ब्रह्मवै० प्र० ख० "द्विषट्लक्षपरिमितं षण्णवतिसहस्रकम्। त्रेतायुगं परिमितं कालविद्भिः प्रकीर्त्तितम्"।

"दण्डनीत्यां यदा राजा त्रीनंशाननुवर्त्तते। चतुर्थमंशमुत्सृज्य तदा त्रेता प्रवर्त्तते। अशुभस्य चतुर्थांशस्त्रीनंशाननुवर्त्तते। कृष्टपच्यैव पृथिवी भवन्त्योषधयस्तथा"। "राजा कृतयुगस्रष्टा त्रेताया द्वापरस्य च। युगस्य च चतुर्थस्य राजा भवति कारणम्। कृतस्य कारणाद्राजा स्वर्गमत्यन्तमश्नुते। त्रेतायाः कारणाद्राजा स्वर्गं नात्यन्तमश्नुते" भा०शा०६९अ०। तद्धर्माश्च "त्रेतायुगे समायाते धर्मः पादोनतां गतः। अल्पक्लेशान्विता लोकाः केचित्, केचिद्दयाशयाः। विष्णुध्यानरता लोका यज्ञदानपरायणाः। वर्णाश्रमाचाररताः सुखिनः सुस्थचेतसः। क्षत्रा भूमिस्पृशः शूद्राः सर्वे ब्राह्मणसेविनः। ब्राह्मणाश्च महात्मानो वेदवेदाङ्गपारगाः। प्रतिग्रहनिवृत्ताश्च सत्यसन्धा जितेन्द्रियाः। तपोव्रतपरा नित्यं दातारो विष्णुसेविनः। कालवर्षी तड़ित्वांश्च स्त्रियः सर्वाः पतिव्रताः। वसुन्धरा च शस्याढ्या पुत्राश्च पितृसेविनः" इति पाद्मे क्रियायोगसारोक्ताः।

"अत्राहाद्या भगवती जीवानां निष्कृतिं यथा। कृते व्यतीते त्रेतायां दृष्ट्वा धर्मव्यतिक्रमम्। वेदोक्तकर्मभिर्मर्त्या न शक्ताः स्वेष्टसाधने। बहुक्लेशकरं कर्म वैदिकं भूरिसाधनम्। कर्त्तुं न योग्यामनुजाश्चिन्ताव्याकुलमानसाः। त्यक्तुं कर्त्तुं न चार्हन्ति सदा कातरचेतसः। वेदार्थयुक्तशास्त्राणि स्मृतिरूपाणि भूतले। तदा त्वं प्रकटीकृत्य तपःस्वाध्यायदुर्बलान्। लोकानतारयः पापात् दुःखशोकामयप्रदात्। त्वां विना कोऽस्ति जीवानां घोरसंसारसागरे। भर्त्ता पाता समुद्धर्त्ता पितृवत् प्रियकृत् प्रभुः" इति श्रीमहानिर्वाणतन्त्रे जीवोद्धारणहेतवे सदाशिवं प्रति जगन्मातुः वाक्यम्। तस्मिन् युगे पुरुषायुषकालस्त्रिशतवर्षो मनुनोक्तो यथा "चतुष्पात् सकलो धर्मः सत्यञ्चैव कृते युगे। नाधर्मेनागमः कश्चिन्मनुष्यान् प्रतिवर्त्तते। इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः। चौरिकानृतमायाभिर्धर्मश्चापैति पादशः। अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः। कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः। वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम्। फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम्"।

पुराणान्तरे अयुतवर्षास्तत्काल उक्तः अतएव "दशवर्षसहस्राणि रामो राज्यमकारयत्" इत्यादि सङ्गच्छते। तपसा आयुःकालाधिक्यमिति न मनूक्तिविरोधः इति तु न्याय्यम्।

"धर्मार्थो हि यथा त्रेता वह्निस्त्रेता तथैव च। तथैव सत्पौत्राणां स्वर्गस्त्रेता किलाक्षयः" भा० आश्व० ९० अ०। अग्नित्रयस्य त्रेतानामनिरुक्तिर्यथा "त्रिधा प्रणीतो ज्वलनो मुनिभिर्वेदपारगैः। अतस्त्रेतात्वमा-

पक्षो यदेकस्त्रिविधः कृतः” हरिवंशे २१२ अध्याये ।

त्रैताय पु० त्रेतानामकोऽयः । द्यूतभेदे कृतायशब्दे दृश्यम् ।

त्रैतिनी स्त्री त्रेता अस्त्यत्र इनि ङीप् । त्रेताग्निसाध्यक्रियायाम् “ऊर्द्ध्वा यज्ञे त्रैतिनी भूत्” ऋ० १०।१०५।८।

त्रैधा अव्य० त्रि+प्रकारे एधाच् । त्रिप्रकारे “इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्” ऋ० १।२२।१७ “एकस्त्रेधा विहितो जातवेदाः” अथ० १८।४।११ “तुभ्यं त्रेधा स्थितात्मने” कुमा० ।

त्रै पालने भ्वा०आ० सक० अनिट् । त्रायते अत्रास्त । त्राणः त्रातः । “मृत्योरात्मानं त्रायते” शत० ब्रा० २।२।४।७ । “गायन्तं त्रायते यस्मात् गायत्री तेन कीर्तिता” स्मृतिः “पुन्नाम्नो नरकाद्यस्मात् पितरं त्रायते सुतः” मनुः । “त्रातेयं कुरु सौमित्रे ! भयात् त्रायस्व राघवम्” भट्टिः । [त्रिंशदध्यायपरिमिते ब्राह्मणभेदे ।

त्रैंश न० त्रिंशदध्यायाः परिमाणमस्य ब्राह्मणस्य ड ।

त्रैककुद न० त्रिककुद् नाम पर्वतः तत्र भवः अण् । सौराञ्जने । “वृत्रस्येत्यक्ष्यावनक्ति त्रैककुदाञ्जनेनाभावेऽन्यद्द्विर्दक्षिणं त्रिरुत्तरं पराक्सकृत्सकृन्मन्त्रः शरेषीकया साग्रया” कात्या० श्रौ० ७।२।२४ । “अध्वर्युः साग्रया शरेषीकया शरस्याग्रशलाकया त्रैककुदाञ्जनेन सौवीराञ्जनेन यजमानस्य अक्ष्यौ चक्षुषी अक्षिणी पराक् अनावृत्तमनक्ति नेत्रस्यासुतश्च तत्र दक्षिणं चक्षुर्द्विरनक्ति उत्तरं त्रिवारम् । तत्राञ्जनमन्त्रः सकृत् सकृत्पठनीयः । त्रिककुत् पर्वतस्तत्र भवमञ्जनं त्रैककुदं सौवीरमिति यत् प्रसिद्धम् । त्रैककुदाभावेऽन्यत् लोकप्रसिद्धं यत् कज्जलादि । आपस्तम्बः “वृत्रस्य कनीनिकासीति त्रैककुदेनाञ्जनेनाङ्क्ते यदि त्रैककुदं नाधिगच्छेद्येनैव केनाञ्जनेनाञ्जीतेति” कर्कः । “त्रैककुदं भवति । यत्र वा इन्द्रो वृत्रमहंस्तस्य यदक्ष्यासीत्तं गिरिं त्रिककुदमकरोत्तद्यत्त्रैककुदं भवति चक्षुष्येवैतच्चक्षुर्दधाति तस्मात्त्रैककुदं भवति यदि त्रैककुदं न विन्देदप्यत्रैककुदमेव स्यात् समानी ह्येवाञ्जनस्य चक्षुता” शत० ब्रा० ३।१।३।१२ ।

त्रैकालिक त्रि० त्रिकाले भवः ठञ् । १भूतभविष्यद्वर्त्तमानकालवर्त्तिनि “त्रैकालिकमिदं ज्ञानं प्रादुर्भूतं तवेप्सितम्” भा० शा० २४२ अ० । २त्रिसन्ध्यव्यापके च ।

त्रैकाल्य न० त्रिकाल+स्वार्थे ष्यञ् । भूतादिषु त्रिषु कालेषु । “गुणात्तत्राप्य काश्यप कलाकं त्रैकाल्यमेव च” हरिवं० ४१ अ० । “त्रैकाल्यसन्ध्याकरणात् तत् सर्वं विप्रणश्यति” याज्ञ० ।

त्रैगर्त्तक त्रि० त्रिगर्तस्य देशभेदस्यादूरदेशादि चतुरर्थ्यां अरीहणा० वुञ् । त्रिगर्त्तदेशस्यादूरदेशादौ ।

त्रैगुणिक त्रि० त्रिगुणार्थं द्रव्यमेकगुणं प्रयच्छति । “तत् प्रयच्छति गर्ह्यम्” पा०ठक् । त्रिगुणमादातुमेकगुणद्रव्यप्रयोक्तरि वार्द्धुषिकभेदे ।

त्रैगुण्य न० त्रिगुणानां भावः कर्म वा स्वार्थे ष्यञ् तेन निर्वृत्तं वा । १सत्त्वादिगुणत्रये २तद्भावे ३तत्साध्ये संसारे च “त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन !” गीता । “अविवेक्यादेः सिद्धिस्त्रैगुण्यात्तद्विपर्ययेऽभावात्” “पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव” सा० का० ।

त्रैत पु० त्रीन् वत्सान् तनोति युगपत् तन–बा० ड त्रितो गर्भभेदस्तत्र भवः अण् । युगपज्जन्माधायकगर्भजाते पशौ । “रूपेणैवावरुन्द्धे सौमापौष्णं त्रैतमालभेत पशुकामो द्वौ वा अजायै स्तनौ नानैव द्वावभिजायेते ऊर्जं पुष्टिं तृतीयः” तै० स० २।१।१।६ “त्रयाणां वत्सानां युगपज्जातानां तः समुदायस्त्रितः तत्र भवस्त्रैतः तेषामन्यतमः इत्यर्थः। त्रयाणामुत्पत्तौ प्रयोजनमेवोच्यते यम् अजायास्तावद्द्वौ स्तनौ प्रसिद्धौ तौ नानैव पृथगेव पातौ द्वौ वत्सौ जायेते मातृरूपायामजायां येयमूर्क् पयःसारं या च शरीरगता पुष्टिस्तदुभयं ख्यापयितुं तृतीयो वत्स उत्पन्नः द्वावेव हि सर्वत्र जायेते तृतीयस्तु क्वचिदेव तथा सति यस्यां तृतीयो जातस्तस्याः शरीरे वीर्य्याधिक्यं पुष्ट्याधिक्यञ्चास्तीति लक्षयितुं शक्यते” भा० अत्र भाष्ये समुदेत्यस्मिन् इत्याधारे अपि गर्भपरतेति बोध्यम् ।

त्रैतन पु० अत्यन्तनिर्घृणे दासभेदे । “शिरो यदस्य त्रैतनो वितक्षत् स्वयं दासः” ऋ० १।१५८।५ । “त्रैतन एतन्नामको दासोऽत्यन्तनिर्घृणः” भा० ।

त्रैदशिक न० त्रिदशा देवता अस्य ठञ् । दैवे अङ्गुल्यग्ररूपे तीर्थे । “ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् । कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन” मनुः ।

त्रैधस् अव्य० त्रि+प्रकारे धमुञ् । त्रिप्रकारे “व्रताशकौ वा त्रैधं तण्डुलान् विभज्य” कात्या० श्रौ० २५।४।४० “सर्वमेव हठेनैके दैवेनैके वदन्त्युत । पुंसः प्रयत्नजं किञ्चित्त्रैधमेतन्निरुच्यते” भा० व० ३२ अ० ।

त्रैधर्म्य न० त्रयाणां वेदानां धर्मान् होत्राध्वर्य्यवौद्गात्रान्-

र्हति ष्यञ् । ऋगादिवेदसम्बन्धिहौत्राध्वर्य्यवौद्गात्रार्हे ज्योतिष्टोमादौ काम्यकर्म्मणि ।

त्रैधातवी स्त्री उदवसानीयाख्ये इष्टिभेदे "तस्य योनिराशय आस । तमनु परामृश्य संलुप्याच्छिनत् सैषेष्टिरभवत् तद्यदेतस्मिन्नाशये त्रिधातुरिवैषाविद्याशेन तस्मात्त्रैधातवी नाम" शत० ब्रा० ५।५।५।६। "सर्वा इष्टीरपि दर्विहोमान्यो राजसूयेन यजते देवसृष्टो वा एषेष्टिर्यत्त्रैधातवी" ११ । "त्रैधातव्युदवसानीयासावेव बन्धुः" शत० ब्रा० १३।६।२।१७ । "त्रैधातव्युदवसानीया सर्वत्र" कात्या० श्रौ० १३।४।८ ।

त्रैधातवीय न० त्रिधातवी+गहा० छ । इष्टिभेदाङ्गकर्मभेदे "सर्वो वा एष यज्ञो यत्त्रैधातवीयम्' तैत्ति०स०२।४।११।२।

त्रैधातुक त्रि० त्रिभिः धातुभिः स्वर्णरौप्यताम्रैः निर्वृत्तः ठञ् । स्वर्णादिधातुत्रयनिष्पाद्ये ।

त्रैनिष्किक त्रि० त्रिभिः निष्कैः क्रीतम् ठक् । त्रिनिष्कक्रीते । तस्य वा लुक् । त्रिनिष्क अप्यत्र ।

त्रैपारायणिक त्रि० त्रिः पारायणमावर्त्तयति ठञ् । त्रिवारं वेदपारायणकारके ।

त्रैपुर पु० त्रिपुर+स्वार्थे अण् । १त्रिपुरदेशे हेमच० । त्रिपुरोऽभिजनोऽस्य तस्य राजा वा अण् । २पित्रादिक्रमेण तद्वासिनि ३त्रिपुराधीशे च बहुषु अणो लुक् ।"मेकलैस्त्रैपुरैश्चैव चिच्छलैश्च समन्वितः" भा० भी० ८८ अ० । आर्षत्वात् बहुषु अणो न लुक् । त्रिपुरं पुरत्रयमस्त्यस्य अण् । त्रिपुरस्वामिषु ४असुरभेदेषु त्रिपुरशब्दे दृश्यम् । "येनोद्धृतास्त्रैपुरा मायिनो वै दग्धाघोरेण वितथान्ताः शरेण" हरिवं० १३१ अ० ।

त्रैपुरुष त्रि० त्रीन् पुरुषान् व्याप्नोति अण् आर्षे पूर्वपदवृद्धिः । त्रिपुरुषव्यापके । "ब्राह्मणानिन्दिता राजन् ! हन्युस्त्रैपुरुषं कुलम्" भा० आनु० ६० अ० । लोके तु उत्तरपदवृद्धिः त्रिपौरुष इत्येव ।

त्रैफल न० त्रिफलानां तदाद्यद्रव्याणामिदम् अण् । चक्रदत्तोक्ते घृतभेदे । यथा "त्रिफलां त्र्यूषणं द्राक्षां मधुकं कटुरोहिणीम् । प्रपौण्डरीकं सूक्ष्मैलां विडङ्गं नागकेसरम् ! नीलोत्पलं शारिवे द्वे चन्दनं रजनीद्वयम् । कार्षिकं पयसा तुल्यं त्रिगुणं त्रिफलारसम् । घृतप्रस्थं पचेदेतत् सर्वनेत्ररुजापहम् । तिमिरं दोषमास्रावं कामलां काचमर्बुदम् । वीसर्पं प्रदरं कण्डूं रक्तं श्वयथुमेव च । खालित्यं पलितञ्चैव केशानां पतनन्तथा । विषमज्वरमर्माणि शुक्रञ्चाशु व्यपोहति । अन्ये च बहवो रोगा नेत्रजा ये च वर्त्मजाः । तान् सर्वान् नाशयत्याशु भास्करस्तिमिरं यथा । न चैतस्मात् परं किञ्चिदृषिभिः काश्यपादिभिः । दृष्टिप्रसादनं दृष्टं यथा स्यात् त्रैफलं घृतम्" ।

त्रैबलि पु० ऋषिभेदे "दामोष्णीषस्त्रैबलिश्च पर्णादो वरजानुकः । मौञ्जायनो वायुभक्षः पाराशर्य्यश्च सारिकः" भा० स० ४ अ० ।

त्रैमातुर पु० तिसृणां मातॄणामपत्यम् अण् मातुरुत् । तिसृणां कौशल्याकैकयीसुमित्राणां स्नेहभाजनत्वेन तदीयांशपायसभोजनेन जनिते लक्ष्मणे "त्रैमातुरः कृत्स्नजितास्त्रशस्त्रः" भट्टिः । "सहि सुमित्रया, स्वांशपिण्डद्वयप्रदानात्ताभ्याञ्च जनितः" जयम० । तत्कथा रामायणे दर्शिता यथा "पायसं प्रतिगृह्णीयाः पुत्रीयं त्विदमात्मनः । कौशल्यायै नरपतिः पायसार्द्धं ददौ तदा । अर्द्धादर्द्धं ददौ चापि सुमित्रायै नराधिपः । कैकेय्यै चावशिष्टार्द्धन्ददौ पुत्रार्थकारणात् । प्रददौ चावशिष्टार्द्धं पायसस्यामृतोपमम् । अनुचिन्त्य सुमित्रायै पुनरेव महामतिः । एवन्तासां ददौ राजा भार्य्याणां पायसं पृथक् । तास्त्वेव पायसं प्राप्य नरेन्द्रस्योत्तमाः स्त्रियः । सम्मानं मेनिरे सर्वाः प्रहर्षोदितचेतसः । ततस्तु ताः प्राश्य तमुत्तमस्त्रियो महीपतेरुत्तमपायसं पृथक् । हुताशनादित्यसमानतेजसोऽचिरेण गर्भान् प्रतिपेदिरे तदा" आ० १६ स० ।

त्रैमासिक त्रि० त्रिमासं तृतीयमासं भूतः स्वसत्तया प्राप्तः "तमधीष्टो भृतो भूतो भावी" पा० ठञ् वृत्तौ त्रिशब्दस्य पूरणार्थत्वेन संख्यावाचकत्वाभावात् न द्विगुत्वं तेन "द्विगोर्लुगनपत्ये" पा० न लुक् । स्वसत्तया जन्मतस्तृतीयमासव्यापके त्रिमासवयस्के "तोकेन जीवहरणं यदुलूकिकायास्त्रैमासिकस्य च पदा शकटोऽपवृत्तः" भाग० २।७।२८ । २त्रिमासभवे च ।

त्रैमास्य न० त्रिमास+स्वार्थे ष्यञ् । त्रिमासे "अर्द्धमासमासत्रैमास्यषाण्मास्ये चैके" का० श्रौ० २०।३।६ ।

त्रैयम्बक त्रि० त्रियम्बको देवता अस्य । "त्र्यम्बकदेवताके १पशुभेदे । "पृषन्तस्त्रैयम्बकाः" यजु० २४।१८ । "विंशे यूपे त्रियम्बकदेवताकाः पृषन्तः" वेददी० । २होमभेदे पु० "त्रैयम्बकान् यक्ष्यामि" इत्युपक्रमे कात्या० श्रौ० २। १०।१०। "निर्वपति रौद्रानित्यादिना ते होमाः दर्शिताः

रुद्रदेवताके ३ धनुर्विद्याभेदे च । "वेदं षडङ्गं वेदाहमर्थविद्याञ्च मानवीम् । त्रैयम्बकमथेष्वस्त्रमस्त्राणि विविधानि च" भा० द्रो० १७ अ० । ४रुद्रदेवताके बल्यादौ त्रि० "निशायां नैत्यिकं चेरुनैशं त्रैयम्बकं बलिम्" भा० द्रो० ७९ अ० ।

त्रैयाहावक त्रि० त्र्याहावे देशभेदे भवः धूमा० वुञ् । "न य्वाभ्यां पदान्ताभ्यां पूर्वं ताभ्यामैच्" पा० वृद्धिनिषेधात् ऐच् । त्र्याहावदेशभवे ।

त्रैराशिक त्रि० त्रीन् राशीन् अधिकृत्य प्रवृत्तम् ठञ् । लीलावत्युक्ते राशित्रयाधिकारेण अनुपातरूपे गणितभेदे तत्प्रकारश्च क्रमव्यस्तभेदसहितो लीला० उक्तो यथा "त्रैराशिके करणसूत्रं वृत्तम् । प्रमाणमिच्छा च समानजाती आद्यन्तयोस्तः फलमन्यजाति । मध्ये, तदिच्छाहतमाद्यहृत् स्यादिच्छाफलं व्यस्तविधिर्विलोमे । उदाहरणम् । कुङ्कुमस्य सदलं पलद्वयं निष्कसप्तमलवैस्त्रिभिर्यदि । प्राप्यते सपदि मे वणिग्वर ! ब्रूहि निष्कनवकेन तत्कियत् । न्यासः ३/७ । ५/२ । ९/१ । लब्धानि कुङ्कुमपलानि । ५२ । कर्षौ । २ । अपि च प्रकृष्टकर्पूरपलत्रिषष्ट्या चेल्लभ्यते निष्कचतुष्कयुक्तम् । शतं तदा द्वादशभिः सपादैः पलैः किमाचक्ष्व सखे ! विचिन्त्य । न्यासः ६३/१ १०४/१ ४९/४ । इच्छागुणितम्फलम् । ५०९६/४ । छेदभक्तम् । १२७४ । आद्येन । ६३ । हृतं लब्धा निष्काः । २० । शेषम् । १४ । षोड़शगुणितम् । २२४ । आद्येन भक्तं जातद्रम्माः । ३ । एवं पणाः । ८ । काकिण्यः । ३ । वराटकाः । ११ । भागाश्च १/९ । पुनश्च । द्रम्मद्वयेन साष्टांशा शालितण्डुलखारिका । लभ्या चेत्पणसप्तत्या तत्किं सपदि कथ्यताम् । अत्र प्रमाणेच्छयोः सजातीयकरणार्थं द्रम्मद्वयस्य पणीकृतस्य न्यासः ३२/१ । ९/८ । ७०/१ । लब्धे खार्यौ । २ । द्रोणाः । ७ । आढ़काः ।१। प्रस्थौ । २ । इति क्रमत्रैराशिकम् । अथ व्यस्तं त्रैराशिकम् । इच्छावृद्धौ फले ह्रासो ह्रासे वृद्धिश्च जायते । व्यस्तं त्रैराशिकं तत्र ज्ञेयं गणितकोविदैः । यत्र इच्छावृद्धौ फले ह्रासः ह्रासे वा फले वृद्धिस्तत्र व्यस्तं त्रैराशिकं स्यात् । तद्यथा । जीवानां वयसो मौल्ये तौल्ये वर्णस्य हैमनि । भागहारे च राशीनां व्यस्तं त्रैराशिकं भवेत् । जीववयोमूल्ये उदाहरणम् । प्राप्नोति चेत् षोड़शवत्सरा स्त्री द्वात्रिंशतं विंशतिवत्सरा किम् । द्विधूर्वहो निष्कचतुष्कमुक्षा प्राप्नोति धूःषट्कवहस्तदा किम् । न्यासः । १६ ।३२।२०। लब्धं २५/३/५ । द्वितीयन्यासः । २ । ४ । ६ । लब्धं १/१/३ । वर्णीयसुवर्णतौल्ये उदाहरणम् । दशवर्णं सुवर्णं चेद्गद्यानकमवाप्यते । निष्केण तिथिवर्णन्तु तदा वद कियन्मितम् । न्यासः १०।१। १५ । लब्धं २३/२/३। राशिभागहरणे उदाहरणम् । सप्ताढ़केन मानेन राशौ शस्यस्य मापिते । यदि मानशतं जातं तदा पञ्चाढ़केन किम् । न्यासः ७।१००। ५ । लब्धम् १४०।"

"अस्ति त्रैराशिकं बीजं पाटी च विमला मतिः । किमज्ञातं सुबुद्धीनामतो मन्दार्थमुच्यते" लीला० ।

त्रैरूप्य न० त्रिरूपस्य भावः ष्यञ् । त्रिधारूपे "चात् यत् तेन त्रैरूप्यम्" सि० कौ० ।

त्रैलिङ्ग न० त्रीणि सत्वरजस्तमांसि पुंस्त्रीक्लीवरूपाणि वा लिङ्गान्यस्य, तस्येदम् वा अण् । त्रिलिङ्गप्रधानकार्य्ये । "पुमांश्चैवाऽपुमांश्चैव त्रैलिङ्गं प्राकृतं स्मृतम् । न वाऽपुमान् पुमांश्चैव त्रैलिङ्गीत्यभिधीयते" भा० शा० ३०७ अ० ।

त्रैलोक्य न० त्रिलोक्येव स्वार्थे ष्यञ् । स्वर्गमर्त्यपाताललोके । "तपसैव प्रपश्यन्ति त्रैलोक्यं सचराचरम्" मनुः। "त्रैलोक्ये यानि रत्नानि साम्प्रतं भान्ति ते गृहे" देवीमा०। "प्रसूतिं चकमे तस्मिन् त्रैलोक्यप्रभवोऽपि यत्" रघुः। आर्षे तु क्वचित् स्वार्थे अण् । त्रैलोक तत्रार्थे । "तत् प्रेक्ष्य तादृशं रूपं त्रैलोकेनापि दुर्जयम्" भा० शा० २८२ अ० ।

त्रैलोक्यमोहन न० त्रैलोक्यं मोहयति मुह–णिच्–ल्यु । तन्त्रोक्ते ताराकवचभेदे । "तारापूजा श्रुता नाथ ! विद्याश्च सकलास्ततः। साम्प्रतं श्रोतुमिच्छामि कवचं मन्त्रविग्रहम् । त्रैलोक्यमोहनं नाम सर्वापद्विनिवारकम् । पुरैव सूचितं नाथ ! कृपया मे प्रकाशय" भैरव उवाच "देवदानवसिद्धाष्टकपूजिते ! प्राणवल्लभे ! । त्रैलोक्यमोहनं नाम कवचं श्रूयतां वरम्"। इत्युपक्रम्य दर्शितम् ।

त्रैलोक्यविजया स्त्री त्रैलोक्यं विजयते सेवने स्वाधीनं करोति वि+जि–अच् । भङ्गायाम् (भाङ) शब्दच० ।

त्रैवण त्रि० त्रिवणस्य वनत्रयस्येदम् शिवा० अण् त्रिवणसम्बन्धिनि सोऽस्यास्तीति उत्करा० छ । त्रैवणीय तद्युक्ते त्रि० ।

त्रैवणि स्त्री त्रिवणस्य ऋषेरपत्यम् इञ् । त्रिवणस्यर्षेरपत्ये । "त्रैवणेस्त्रैवणिः" शत० ब्रा० १४।५।५।२१ ।

त्रैवर्गिक त्रि० त्रिवर्गाय हितं बा० ठञ् । १धर्मार्थकाम-

साधने कर्म्मादौ । “संस्थां विज्ञाय संन्यस्य कर्म्म त्रैवर्गिकञ्च यत्” भाग० २।४।५। स्त्रियां ङीप् । “सिद्धिस्त्रैवर्गिकी यतः” भाग० ३।१४।१५ । त्रिवर्गे प्रसृतः ठञ् । २त्रिवर्गरते । “त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः” भाग० ३।३२।१४ ।

त्रैवर्ग्य त्रि० त्रिवर्गे साधुः ष्यञ् । त्रिवर्गसाधने धनादौ “त्रैवर्ग्यार्थो यतो नित्यं कृतान्तभयसंयुतः” भाग० ४।२।१२ ।

त्रैवर्णिक त्रि० त्रिषु वर्णेषु विहितः ठञ् । १ब्राह्मणादित्रयरूपद्विजातिधर्म्मे । स्वार्थे ठञ् । २द्विजातौ च “त्रैवर्णिकानामराजकेषु राष्ट्रेषु परराष्ट्रपरचक्रागमनादिजनिते स्त्रोमङ्गरादौ मासे” कुल्लू० । “त्रैवर्णिकानामधिकारः” कर्कः ।

त्रैवर्षिक त्रि० त्रिवर्षे भविष्यति ठञ् । “वर्षस्याभविष्यति” पा० नोत्तरपदवृद्धिः । त्रिवर्षे भविष्यति वस्तुनि “त्रैवर्षिकं तापश्चितं तस्य सौम्यं संवत्सरः” आश्व० श्रौ० १२।५। १२ । अभविष्यति तु त्रैवार्षिक इत्येव ।

त्रैवार्षिक त्रि० त्रिवर्षे भूतो भवति वा ठञ् अभविष्यत्त्वात् उत्तरपदवृद्धिः । १त्रिवर्षभूते २तत्र भवति वा । “यस्य त्रैवार्षिकं भक्त पर्य्याप्तं भृत्यवृत्तये” मनुः । “त्रैवार्षिकाधिकान्नोयः स तु सोमं पिबेत् द्विजः” याज्ञ० ।

त्रैविक्रम त्रिविक्रमस्येदम् अण् । १त्रिविक्रमसम्बन्धिनि । “त्रैविक्रमं पादमिवेन्द्रशत्रुः” रघुः २त्रिविक्रमावतारे च । “वर्द्धयस्व महाबाहो ! पुरा त्रैविक्रमे यथा” हरिवं० ५६ अ० ।

त्रैविद्य पु० तिस्रो विद्याः समाहृताः ऋग्यजुःसामरूपास्त्रिविद्यं तदधीते वेद वा अण् । १वेदत्रयाभिज्ञे । “त्रैविद्यो हेतुकस्तर्की नैरुक्तो धर्म्मपाठकः । त्रयश्चाश्रमिणः पूर्व्वे परिषत् स्याद्दशावरा” व्यव० त० नारदः । “चत्वारो वेदधर्मज्ञाः पर्षद् त्रैविद्यमेव वा” “राजा कृत्वा पुरे स्थानं ब्राह्मणान्न्यस्य तत्र तु । त्रैविद्यं वृत्तिमद्ब्रूयात् स्वधर्म्मः पाल्यतामिति” याज्ञ० । तिसृणां विद्यानां समाहारः त्रिविद्यं स्वार्थे अण् । २तिसृषु विद्यासु । “धर्मं भागवतं शुद्धं त्रैविद्यं च गुणाश्रयम्” भाग० ६।२।२४ । ताश्च तिस्रो नानारूपाः “ऋचो यजूंषि सामानि त्रैविद्यं तत्र तिष्ठति” मा० गृह्य० । “स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः । महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः” मनुः “कर्षकाणां कृषिर्वृत्तिः पण्यं विपणिजीविनाम् । गावोऽस्माकं परा वृत्तिरेतत्त्रैविद्यमुच्यते” हरिवं० ७२अ० “त्रयोऽग्नयस्त्रयो वेदास्त्रैविद्यं कौस्तुभो मणिः” हरिवं० १६८ अ० “त्रयो लोकास्त्रयो वेदास्त्रैविद्यं पावकत्रयम्” मार्कण्डेयपु० ।

त्रैवि(पि)ष्टप पु० त्रिविष्टपे वसति अण् । देवे शब्दार्थचि० । “त्रैविष्टपानामपि दूरदर्शनम्” माघ० ११।७ ।

त्रैविष्टपेय पु० त्रिविष्टपे वसति वा० ढक् । देवे “गन्धर्व्वसिद्धासुरयक्षचारणत्रैविष्टपेयादिषु नानुविन्दत” भाग० ८।८।१२ ।

त्रैवृष्ण पु० त्रिवृष्णस्यापत्यं वा० अण् । राजभेदे “त्रैवृष्णो अग्ने दशभिः सहस्रैर्वैश्वानर ! त्र्यरुणश्चिकेत” ऋ० ५।२७।१ ।

त्रैवेदिक त्रि० त्रिषु वेदेषु तदध्ययनार्थं विहितः ठक् । वेदत्रयाध्ययनार्थे व्रतादौ । “षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम्” मनुः ।

त्रैशङ्कव पु० त्रिशङ्कोरपत्यम् अण् । हरिश्चन्द्रे त्रिशङ्कु-[शब्दे दृश्यम् ।

त्रैशोक न० त्रिशोकेन ऋषिणा दृष्टं साम । “विश्वा पृतना,” इत्यादिकायामृचि गेये ब्रह्मस्तोत्रके सामभेदे ।

त्रैसानु पु० तुर्वसुवंश्ये गोभानुसुते नृपभेदे “गोभानोस्तु सुतो राजा त्रैसानुरपराजितः । करन्धमस्तु त्रैसानोर्मरुत्तस्तस्य चात्मजः” हरिवं० ३२ अ० ।

त्रैस्वर्य्य न० त्रिस्वर+चतुर्व० स्वार्थे ष्यञ् । उदात्तानुदात्तस्वरितरूपस्वरत्रिके । तत्र यत्र यः स्वरः तत् उदात्तानुदात्तशब्दयोरुक्तं स्वरितशब्दे वक्ष्यते च तदपवादः एकश्रुतिशब्दे १४८४पृ० उक्तः ।

त्रैहायण त्रि० त्रिहायणस्येदम् हायनान्तत्वात् अण् । १त्रिवर्षसम्बन्धिनि । स्त्रियां ङीप् । भावे अण् । २तद्भावे न० ।

त्रोटक त्रि० त्रोटयति चु० त्रुट–ण्वुल् । १छेदके । “सप्ताष्टनवपञ्चाङ्कं दिव्यमानुषसंश्रयम् । त्रोटकं नाम तत् प्राहुः प्रत्यङ्कं सविदूषकम्” सा० द० उक्ते २दृश्यकाव्यभेदे प्रत्यङ्कं सविदूषकत्वात् शृङ्गारोऽत्राङ्गीति बोध्यम् । तत्र सप्ताङ्कं स्तम्भितरम्भम् । पञ्चाङ्कं विक्रमोर्वशी ।

त्रोटि(टी) स्त्री चु० त्रुट–इ वा ङीप् । १कट्फले, २चञ्च्वाम्, (पाखिर ठोठ) ३पक्षिभेदे ४मत्स्यभेदे च मेदिनि० । [खगे शब्दच० । स्त्रियां जातित्वात् ङीप् ।

त्रोटिहस्त पुंस्त्री त्रोटिर्हस्त इव ग्रहणसाधनं यस्य ।

त्रोतल न० १त्रोडनतन्त्रे (तोतला) २स्खलद्वाक्ये त्रि० ।

त्रोत्र न० त्रायतेऽनेन त्रै–त्रन । प्राजने तोदने कशादेः

प्रेरणसाधने १दण्डभेदे (पाचनी) अमरः। २अस्त्रे सि० कौ०। ३आरूपक्रियायाम् ४व्याधिभेदे च संक्षिप्तसा०।

त्रौक गत्यां चुरा० आ० सक० सेट्। त्रौकयते ऋदित् अतुत्रौकत।

त्र्यंश पु० तृतीयोऽंशः। १तृतीये अंशे। "सर्वस्मिन् विधुपापयुक्ततनुलवात्तर्द्धं निशाङ्कोर्धटीत्र्यंशं वै कुनवांशकं प्रहरतः पूर्वं दिनानां त्रयम्" मुहू०। २त्रिगुणितेऽंशे च "त्र्यंशं दायाद्धरेद्विप्रो द्वावंशौ क्षत्रियासुतः" मनुः

त्र्यक्ष पु० त्रीण्यक्षीण्यस्य ष समा०। त्रिनेत्रे शिवे त्रिका० "त्र्यक्षपत्न्या समादिष्टः सदृशः सज्जनः पतिः" हरिवं० १७६ अ०। २नेत्रत्रययुक्तमात्रे त्रि०। "चेदिराजकुले जातस्त्र्यक्ष एष चतुर्भुजः। रासभारावसदृशं ररास च ननाद च" भा० स० ४२ अ०। स्त्रियां ङीष्। "द्व्यक्षीं त्र्यक्षीं ललाटाक्षीं दीर्घजिह्वामजिह्विकाम्" भा० व० २८९ अ०। राक्षसीभेदोक्तौ। क्षार्थे क्वचित् न ष समा०। त्र्यक्षि शिवे। "त्र्यक्ष्णे पूष्णो दन्तभिदे वामनाय शिवाय च" भा० आश्व० ८ अ० शिवस्तुतौ।

त्र्यक्षर पु० त्रीणि अकारोकारमकाररूपाणि अक्षराणि यत्र। १प्रणवे "आद्यं यत् त्र्यक्षरं ब्रह्म त्रयी यत्र प्रतिष्ठिता। स गुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित्" मनुः। त्रीण्यक्षराणि वर्णा यत्र। मध्यानामके २छन्दोभेदे न०। "विष्णुस्त्र्यक्षरेण (छन्दसा) त्रींल्लोकानुदजयत्" यजु० ९।३१। "विष्णुस्त्र्यक्षरेणाक्षरत्रयात्मकेन छन्दसा त्रीन् भूरादीन् लोकान् उदजयत्" वेददी०। त्रिवर्णात्मके तन्त्रोक्ते ३मन्त्रभेदे तन्त्रसारे भूरिप्रयोगः। ४विद्यायां स्त्री गौरा० ङीष्। ५वर्णत्रययुक्तमात्रे त्रि०। "तदेतत् त्र्यक्षरं सत्यमिति स इत्येकमक्षरं तीत्येकमक्षरमित्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतं तदेतदनृतं सत्येन परिगृहीतं सत्यभूयमेव भवति नैवंविद्वांसमनृतं हिनस्ति" शत० ब्रा० १४.८।४।२। ६घटके त्रिका०। [७ईश्वरे पु० हेमच०।

त्र्यङ्क(ङ्ग)ट न०। १शिक्यभेदे २धौताञ्जने च मेदि०।

त्र्यङ्ग न० त्रीणि अङ्गान्यस्य। सौविष्टकृते हविषि "मध्यं जुह्वां द्वेधा कृत्वाऽवद्यत्यणिम त्र्यङ्गेषु" शत० ब्रा० १।८।१।१८। "त्र्यङ्गस्य दोष्णो गुदं द्वेधा कृत्वावद्यति त्र्यङ्ग्यायै श्रोणेरथ हिरण्यशकलाववदधाति" १९। त्र्यङ्गाय हितं यत् त्र्यङ्ग्य तत्साधनद्रव्ये।

त्र्यङ्गुल त्रि० त्रिस्रोऽङ्गुल्यः प्रमाणमस्य तद्धितार्थद्वि० द्वयसच् तस्य लुकि अच् समा०। १अङ्गुलित्रयमिते "द्व्यङ्गुलं त्र्यङ्गुलं वा तद्ध्यतिक्रान्तं यूपस्य" कात्या० श्रौ० ६।२१।२०। २तथाभूतखातान्विते च स्त्रियां टाप् सा च सोमयज्ञस्य वेदिः। "तं खनन्त इवान्वीयुस्तं त्र्यङ्गुलेऽन्वविन्दंस्तस्मात् त्र्यङ्गुला वेदिः स्यात्तदु हापि पाञ्चिस्त्र्यङ्गुलामेव सौम्यस्याध्वरस्य वेदिं चक्रे" शत० ब्रा० १।२।५।९। "पाञ्चिः सोमयागस्यापि वेदिं त्र्यङ्गुलखातामेव मेने" भा०

त्र्यञ्जन न० समा० द्वि०। कालाञ्जनरसाञ्जनपुष्पाञ्जनरूपे मिलिते अञ्जनत्रये राजनि०।

त्र्यञ्जल(लि) न० त्रयाणामञ्जलीनां समाहारः वा टच्स०। १समाहृते अञ्जलित्रये "त्रिभिरञ्जलिभिः क्रीतः तद्धितार्थद्विगौ तु तद्धितलुकि न टच्। त्र्यञ्जलि इत्येवेति भेदः सि० कौ०।

त्र्यधिष्ठान पु० त्रीणि मनोवाक्शरीराणि अधिष्ठानान्यस्य तिसृणां जाग्रदादीनामधिष्ठानं वा ६त०। १जीवे तत्पुरुषपक्षे न० "तस्येह त्रिविधस्यापि त्र्यधिष्ठानस्य देहिनः" मनुः जाग्रदाद्यवस्थात्रयसाक्षिणि कूटस्थे २चैतन्ये न०।

त्र्यध्वगा स्त्री त्रिभिरध्वभिर्गच्छति गम–ड त०। गङ्गायाम् त्रिका०।

त्र्यनीक पु० त्रीणि उष्णवर्षशीताख्यानि अनीकानि गुणा अस्य। संवत्सराभिमानिदेवभेदे "त्रिपाजस्यो वृषभो विश्वरूप उत त्र्युधा पुरुध प्रजावान्। त्र्यनीकः पत्यते माहिनावान्त्सरेतोधा वृषभः शश्वतीनाम्" ऋ० ३।५६।३। "त्र्यनीकस्त्रिभिरुष्णवर्षशीताख्यैरनीकैर्गुणैरुपेतः" भा०। २हस्त्यश्वरथाङ्गे सेनाभेदे स्त्री।

त्र्यमृतयोग पु० त्रयाणां तिथिवारनक्षत्राणाममृततुल्यो योगः। तिथिनक्षत्रवारभेदानां योगभेदे। स च योगः ज्यो०उक्तो यथा "नन्दा भौमार्कवारे श्रवणशतभिषार्द्रान्त्यचित्राग्निमूलासार्पैर्भद्रा ससेता, शशिनि भृगुसुते फल्गुयुग्भाद्रयुग्मैः। सौम्याह्ने वै जया स्यान्मृगगुरुहरिभेन्द्राश्वियाम्याभिजिद्भिर्जीवे रिक्ता च विश्वादितिवरुणविशाखानुराधामघाभिः। सौरे पूर्णा धनिष्ठाकरकमलजन्मर्क्षयुक्ता यदि स्याद् योगं प्राहुस्त्रिपूर्वं सततशुभकरं चामृताख्यं मुनीन्द्राः"।

त्र्यम्बक न० त्रीणि अम्बकानि नयनान्यस्य, त्रयाणां लोकानां अम्बकः पितेति वा, त्रीन् वेदान् अम्बते शब्दायते वा अबि–शब्दे ओष्ठ्योपधः कर्मण्यण् संज्ञायामिति कः त्रिषु लोकेषु कालेषु वा अम्बः

शब्दो वेदलक्षणो यस्येति वा, अम्बनम् अम्बः शब्दः। त्रयोऽकारोकारमकाराः अम्बाः शब्दाः प्रतिपादकाः वाचका वा अस्येति वा, त्रीणि पृथिव्यन्तरीक्षद्युलोकाख्यानि अम्बकानि स्थानानि यस्येति वा। १शिवे अमरः "त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्" यजु० ३।६० "जडीकृतस्त्र्यम्बकवीक्षणेन" महेश्वरस्त्र्यम्बक एव नापरः" रघुः। २दुर्गायां स्त्री "सोमसूर्य्यानलाक्षित्वात् त्र्यम्बका सा स्मृता बुधैः" देवीपुरा०।

त्र्यम्बकसख पु० ६त० टच् समा०। कुवेरे अमरः कुवेरशब्दे तस्य तथात्वम् दृश्यम्।

त्र्यरुण पु० त्रिवृष्णपुत्रे राजर्षिभेदे त्रैवृष्णशब्दे ऋ० वाक्यादिकं दृश्यम्।

त्र्यरुषि त्रि० त्रीणि अरुषीणि रोचमानानि शुभ्राणि ककुपृष्ठपार्श्वस्थानानि यस्य। रोचमानशुभ्रपृष्ठादित्रययुक्ते गवादौ। "त्र्यरुषीणां दश गवां सहस्रा" ऋ० ८।४६।२२।

त्र्यवि पु० षण्मासात्मकः कालः अविः तिस्रोऽवयोऽस्य। अष्टादशमासवयस्के पशौ। "त्र्यविर्वयस्त्रिष्टुप्छन्दः" यजु० १४।१०। त्रीन् लोकान् अवति अव–रक्षणादिषु इन्। वेददी०। "तस्थौ त्र्यविं रेरिहाणा" ऋ०३।५५।१४। "त्र्यविं सार्द्धसंवत्सरवयस्को वत्सस्त्र्यविरुच्यते तत् प्रमाणमादित्यम् त्रीन् लोकानवति स्वतेजसा व्याप्नोतीति वा" भा० उक्तेः २त्रैलोक्यव्यापके च।

त्र्यब्द न० समा०द्वि०पात्रा०। १वर्षत्रये "त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतम्" मनुः। त्रयोऽब्दा वयोमानं यस्य तद्धितार्थद्विगुः आर्हीयष्ठञ् अध्यर्द्धेत्यादि पा० तस्य लुक्। २त्रिवर्षवयस्के त्रि०।

त्र्यशीति स्त्री त्र्यधिकाऽशीतिः शाक० त० त्रयश्च अशीतिश्च समा० द्व० वा। (तिराशी) १त्र्यधिकाशीतिसंख्यायां २तत्संख्येये च। ततः पूरणे डट्। त्र्यशीत तत्पूरणे त्रि०। स्त्रियां ङीप् तमप्। त्र्यशीतितम तत्पूरणे त्रि०। त्र्यशीत्या युतं शतादि ड। त्र्यशीत तद्युतशतादौ।

त्र्यष्टक न० सुश्रुतोक्ते जलनिक्षेपणस्थानभेदे। यत्र निक्षेपणानि भवन्ति। तद्यथा फलकं त्र्यष्टकं मञ्चवलय उदकमञ्चिका शिक्यञ्चेति" सुश्रु०।

त्र्यष्टन् त्रि० त्रिगुणिताः अष्ट। १चतुर्विंशतिसंख्यायां २तत्संख्येये च। "त्र्यष्टवर्षोऽष्टवर्षीयां धर्म्मे सीदति सत्वरः" मनुः।

त्र्यस्र न० तिस्रः अस्रयः कोणा यस्य अच् समा०। १त्रिकोणे राजनि०। "प्रथमत्र्यस्रे द्वितीयत्र्यस्रे इत्यादि" कालीपूजापद्धतिः।

त्र्यह पु० त्रयाणामह्नां समाहारः टच् समाहारद्विगुत्वात् नाह्नादेशः। "अह्नाहाः पुंसि" पा० पुंस्त्वम्। दिनत्रये। उत्तरपदद्विगौ तु अह्नादेशः त्र्यह्नप्रिय इत्यादि। "त्र्यहं न कीर्त्तयेत् ब्रह्म राज्ञो राहोश्च सूतके" "त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम्। त्र्यहं परञ्च नाश्नीयात् प्राजापत्यं चरन् द्विजः" मनुः।

त्र्यहस्पर्श पु० त्र्यहं चान्द्रदिनत्रयं स्पृशति स्पृश–अण्। १तिथित्रयस्पर्शिन्येकसावनदिने त्र्यहस्पर्शिनि २दिनक्षये च

त्र्यहस्पृश पु० "एकं दिनं यत् तिथित्रयं च स्पृशेत्तमाहुर्दिनयोऽवमाख्यम्। एका तिथिस्त्रीणि दिनानि यत् स्पृशेत्तदाहुस्त्रिदिनस्पृशन्तु" इत्युक्ते सावनदिनत्रयस्पर्शिनि एकस्मिन् तिथौ "त्र्यहस्पृशं नाम यदेतदुक्तं तत् प्रयत्नः कृतिभिर्विधेयः। विवाहयात्राशुभपुष्टिकर्म सर्वं न कार्य्यं त्रिदिनस्पृशे तु" ज्यो० त०। क्विन्। त्र्यहस्पृग् क्विन्नन्तत्वात् झलि पदान्ते च कुः। तत्रार्थे "तिथिवारत्रये चैका त्र्यहस्पृक् समुदाहृता"। "एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। त्र्यहस्पृक् तदहो रात्रसुपोष्या सा सदा तिथिः" स्मृतिः।

त्र्यहीन पु० त्रिभिरहोभिः निर्वृत्तः ख। त्रिदिनसाध्ये क्रतुभेदे।

त्र्यहैहिक त्रि० ईहा चेष्टा तस्यां भवं ठञ् ऐहिकम् धनादि त्र्यहपर्य्याप्तमैहिकं धनं यस्य। दिनत्रयनिर्वाहोचितधनशालिनि। "त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा" मनुः।

त्र्याक्षायण पु० त्र्यक्षस्य युवाऽपत्यम् फञ् ऐषुकारिगणे "द्व्याक्षायण त्र्याक्षायणेति निर्देशात् "न य्वाभ्यां पदान्ताभ्यां पूर्वौ ताभ्यामैच्" पा० सूत्रोक्तं कार्य्यं न। त्र्यक्षस्य शिशुपालहरादेर्यून्यपत्ये। तस्य विषयो देशः ऐषुका० भक्तल्। त्र्याक्षायणभक्त तदीये विषये।

त्र्यायुष न० त्रयाणां बाल्ययौवनस्थाविराणामायुषां समाहारः वेदे अच् समा०। बाल्याद्यायुस्त्रये। "त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्" यजु० ३।६२।

त्र्यार्षेय पु० त्रयः आर्षेयाः ऋषयः यत्र। त्रिप्रवरे १गोत्रभेदे आर्षेयशब्दे दृश्यम्। ऋषेरयम् ढक् आर्षेयः ऋषिधर्म्मः त्रयः आर्षेया धर्मा एषाम्। २अन्धवधिरमूकेषु तेषाञ्च यथा ऋषिधर्मवत्त्वं तथा समर्थितं तत्त्वबोधिन्याम् यथा "एतन्न्यायमूलक एव तिर्य्यक्पङ्क्त्यार्षेयदेवतानां यागेषु नाधिकार इति प्रवादः। त्र्यार्षेयास्त्रय ऋषि-

धर्मा अन्धत्वबधिरत्वमूकत्वानि येषां ते ऋषीणां हि परद्रव्यदर्शनेन तत्र रागोत्पत्तिसम्भावनया चक्षुर्निमीलनेनान्धत्वं, परनिन्दाश्रवणशङ्कया श्रोत्रनिग्रहेण बधिरत्वं मिथ्याकथनशङ्कया वाक्यसंयमनान्मौक्यम्"। अन्धादीनां कर्मानधिकारे हेतुश्च "मनुष्याणां वा आरम्भसामर्थ्यात्"४ "अङ्गहीनाश्रोत्रियषण्ढशूद्रवर्जम्" कात्या॰ श्रौ॰ १।१।५। सूत्राभ्यां निरूपितः अत्र कर्कव्याख्या "अङ्गहीनाश्रोत्रियषण्ढशूद्रान् वर्जयित्वा मनुष्याणामधिकारः कर्मसु भवति। मनुष्या अपि ये अङ्गहीना अङ्गेन चक्षुरादिना हीना अन्धपङ्गुमूकबधिरादयः अश्रोत्रिया अनधीतवेदाः षण्ढा नपुंसकाः शूद्राश्च नैतेषामधिकार इत्यर्थः। आरम्भसामर्थ्यादित्यत्राप्यनुवर्त्तते न चैतेऽङ्गहीनादयो यथाश्रुतं कर्मारब्धुं कर्तुं शक्नुवन्ति तद्यथा न ह्यन्ध आज्यावेक्षणं कर्तुं शक्नोति मूकश्च मन्त्रोच्चारणम्, पङ्गुश्च विष्णुक्रमम्। बधिरश्च प्रैषश्रवणम् अनधीतवेदोऽश्रोत्रिय इत्युच्यते स च किमपि मन्त्रसाध्यं कर्तुं न शक्नोति षण्ढो नपुंसकः तस्याप्यनधीतवेदत्वादद्रव्यत्वादशुचित्वाच्च नाधिकारः शूद्रस्य चानधीतवेदत्वादनधिकारः। आज्यावेक्षणादिभिश्च विना कर्मणो वैगुण्यं भवत्येव। नन्वुक्तम् अशक्याङ्गरहितकर्मानुष्ठानादधिकारो भविष्यतीति। अत्रोच्यते। भवेदेवं यदि आज्यमवेक्षेत इत्यादीन्यङ्गवाक्यानि स्वातन्त्र्येण पुरुषैः सम्बध्येरन् प्रधानवाक्यशेषत्वात्त्वेषाम्। तदङ्गयुक्तेन प्रधानवाक्येन तदङ्गयुक्तः क्रतुः पुरुषैः सम्बध्यमानोऽसमर्थान् परित्यज्य समर्थान् प्रतिज्ञायते तेनान्धस्य क्रतुरेवाविहितो न त्वाज्यावेक्षणमेवाविहितमितरच्च विहितमिति मन्तव्यम्। न च प्रधानवाक्यविरोधः सर्वाधिकाराश्रयात् विशेषाभावाद्धि सर्वाधिकारः स्यात् अस्ति च विशेषः आरम्भसामर्थ्यम् अतः समर्थानामेवाधिकारः। यत्र तु प्रधानवाक्यविरोधो यावज्जीवं यजेतेत्यादौ तत्र यथाशक्तिप्रयोगादपि फलं भवति तदविरोधे तु सर्वाङ्गयुक्तकर्मानुष्ठानादेव फलम्। ननु आरम्भसामर्थ्यादित्यनेनैव षण्ढादीनामिवान्धादीनामप्यधिकाराभावसिद्धेः किमर्थं पुनरङ्गहीनादिवर्जमित्युक्तम् उच्यते नियमार्थम् एतेषामेवानधिकारो न निर्धनस्य तस्य चाधिकारो भवत्येव न त्वारम्भसामर्थ्याभावादनधिकारः अतो निर्धनोऽपि क्रत्वर्थं धनमर्जनादिना सम्पाद्यावश्यं यजेतेति। एवमन्धादिरपि यद्यौषधिशस्त्रादिनान्धत्वादिकं स्फोटयितुं शक्नोति तस्याप्यधिकारो भवत्येव पूर्वमनङ्गहीनत्वावस्थायामाहिताग्निश्चेत् पश्चाद्रोगादिनाङ्गवैकल्ये जाते काम्येष्वधिकारो न भवति नित्येषु तु यथाशक्ति कर्त्रधिक्रियत एव अङ्गवैकल्ये सति अग्न्याधेयं न भवत्येव" त्रीणि आर्षेयाणि यस्य। त्रिगोत्रोत्पन्ने माधवः। अत्रेदमभिधीयते तत्त्वबोधिन्याम् त्र्यार्षेयशब्दस्यान्धादिपरत्वकल्पनं सूत्रभाष्यविरुद्धम्। तथाहि "अङ्गहीनश्च तद्धर्मा" ६।१।६१। जै॰ सू॰। "अग्निहोत्रादिषु एवाङ्गहीनं प्रति सन्देहः किम् असावधिक्रियते, उत न इति। तत्राप्यधिकरणातिदेशः। असमर्थः इति कृत्वा पूर्वः पक्षः शक्तेर्विद्यमानत्वात् उत्तरः। तदिदम् अभिधीयते अङ्गहीनश्च तद्धर्मा। किंधर्मा अद्रव्यधर्मा" शब॰भा॰। "उत्पत्तौ नित्यसंयोगात्" जै॰६।१।४२ "यस्य तु अप्रतिसमाधेयमङ्गवैकल्यं तं प्रति विचारः किं अधिक्रियते न, इति पूर्वाधिकरणेन अधिक्रियते इति प्राप्ते ब्रूमः न अधिक्रियते इति। कुतः? शक्त्यभावात् न असौ केनचित् अपि प्रकारेण शक्नोति यष्टुम्, तस्मात् तस्य अधिकारो न गम्यते। ननु यत् शक्नोति तत्र अधिक्रियते इति चक्षुर्विकलो विना आज्यावेक्षणेन, विना विष्णुक्रमैः पङ्गुः, विना प्रैषादिश्रवणेन च बधिरः, एतान् पदार्थान् प्रति चक्षुर्विकलादीनामनधिकारः इति यदि हि तं प्रति निर्दिश्येत ततो विकलोऽप्यधिक्रियेत क्रतुम् प्रति। एषाम् उपदेशः प्रकरणाविशेषात् पुरुषस्य च आख्यातेन अनभिधानात् इति उक्तमेतत्। "विधिर्वा संयोगान्तरात् (२।४।१२) इत्यत्र। तेन विना विगुणं कर्म प्रयुक्तमपि न फलं साधयेत्। तस्मात् तस्य अनधिकारः" भा॰। "अत्रार्षेयस्य स न स्यात्" जै॰ ६।१।४३ "दर्शपूर्णमासयोः श्रूयते, "आर्षेयं वृणीते एकं वृणीते द्वौ वृणीते त्रीन् वृणीते न चतुरो वृणीते पञ्चाति वृणीते इति। तत्र सन्देहः किम् अत्र्यार्षेयस्य अधिकारः उत न इति किं प्राप्तम्। अत्र्यार्षेयोऽप्यधिक्रियते" इति कुतः आर्षेयं वृणीते इति सामान्यवचनम् तस्मात् एकं वरिष्यति द्वौ वा तच्च दर्शयति एकं वृणीते इति तथा प्रतिषेधति न चतुरो वृणीते इति। न हि अप्राप्तस्य प्रतिषेधोऽवकल्पते। तस्मात् अत्र्यार्षेयोऽप्यधिक्रियेत।

एवं प्राप्ते ब्रूमः यो न त्र्यार्षेयः स न अधिक्रियते।

कुतः? त्रीन् वृणीते इति विशेषवचनात् विधित्वं अप्राप्तत्वात्। ननु एकं वृणीते इत्यपि विशेषवचनमस्ति। न इत्युच्यते, विधायिकाया विभक्तेरभावात्। ननु स्तुत्या विधास्यन्ते यथा त्रीन् वृणीत इति। उच्यते त्रयाणामेव स्तुतिः सा त्रित्वं विधास्यति। एकं वृणीते इत्यवयुत्यवादोऽयं त्रयाणामेव, तत्रापि त्रित्वमेव श्रूयते विधातुम्। एवम् एकवाक्येन विधानं भविष्यति इति। न चतुरो वृणीते न पञ्चातिवृणीते इति नित्यानुवादो भविष्यति। तस्मात् त्र्यार्षेयस्य अधिकारो मान्यस्य इति" शव०भा०। न्यायमालायां माधवस्तु "ऋषिर्गोत्रप्रवर्त्तकः कश्यपभरद्वाजादिस्तस्य सम्बन्धि आर्षेयस्तं वृणीते उच्चारयति कश्यपगोत्रोऽहं भरद्वाजगोत्रोऽहमिति एवम् उपमन्युवशिष्ठगोत्रोऽहमिति द्विगोत्रोच्चारणम्। आङ्गिरसबार्हस्पत्यभरद्वाजगोत्रोऽहमिति त्रिगोत्रोच्चारणम्"। एवञ्च सूत्रभाष्यादिग्रन्थेषु त्र्यार्षेयशब्दस्य अन्यार्थपरत्वात् जात्यन्धादेः सूत्रान्तरेण अनधिकारस्य प्रतिपादनात् त्र्यार्षेयशब्दस्य न अन्धादिपरत्वमिति सुधीभिर्भाव्यम्।

त्र्याशिर् तिस्रः दधितक्रपयोरूपा आशिरः अधिश्रयणसाधनभूता यस्य। अग्नेर्द्दपभेदे। "यस्य मा परुषाः शतमुद्धर्षयन्त्युक्षणः। अश्वमेधस्य दानाः सोमा इव त्र्याशिरः" ऋ०५।२७।५।

त्र्याहण पुंस्त्री त्रिभिः चञ्चुपादैराहन्ति आ+हन–अच् पूर्वपदात् संज्ञात्वात् णत्वम्। विष्किरे पक्षिभेदे। "चकोरकलविङ्कमयूरक्रकरोपचक्रकुक्कुटसारङ्गशतपत्रकतित्तिरिकुररवाङ्कयवलप्रभृतयस्त्र्याहणनाविष्किरा लघवः शीतमधुराः कषायादोषशमनाश्च" सुश्रुतः।

त्र्याहाव पु० देशभेदे तत्र भवः वुञ्। त्रैयाहावक तत्रार्थे

त्र्याह्निक त्रि० त्र्यह्ने भवः ठञ्। आर्षत्वात् त्र्याह्वायणेति निर्द्देशाद्वा व्याभ्यां पूर्वं न ऐच्। त्र्यहभवे ज्वरादौ। "ऐकाहिको द्व्याहिकश्च त्र्याहिकश्चातुर्थिकेत्यादि अपराजितास्तोत्रे। त्र्यहपर्य्याप्तं धनं यस्य त्र्याहम् तदस्यास्ति ठन्। त्र्यहपर्य्याप्तधनयुक्ते त्रि०। "कुसूलकुम्भीधान्यो वा त्र्याहिकोऽश्वस्तनोऽपि वा" याज्ञ०। लोके तु व्याभ्यां पूर्वस्यैव त्रैयाहिक इत्येव त्र्यहभवे वस्तुनि।

त्र्युदय न० त्रिषु सवनेषु उदयो गतिरस्य। सोमाख्ये हव्ये। "त्र्युदयं देवहितं यथा वः" ऋ० ४।३७।३।

त्र्युधन् पु० त्रिभिः वसन्तग्रीष्मवर्षर्त्तुभिरूधोऽस्य अनङ् ह्रस्वश्च। वसन्तादिरूपोधोयुक्ते वत्सररूपे वृषभे। "उत त्र्युधा पुरुध प्रजावान्" ऋ० ३।५६।३।

त्र्यु(त्र्यू)षण न० त्रयाणामुषणानां समाहारः पृषो० वा दीर्घः। मिलितशुण्ठीपिप्पलीमरिचत्रिके अमरः भरतस्तु दीर्घमध्यं पपाठ।

त्र्यृच न० तिसृणामृचां समाहारः अच् समा०। ऋक्त्रये। "उदित्र्यृचा वा वारुण्या त्र्यृचेनाब्दैवतेन वा" "अथ त्र्यृचं जपेदब्दम्" मनुः। पक्षे संप्रसारणे तृचमप्यत्र।

त्र्येणी स्त्री त्रीणि एतान्यस्य सि०कौ० त्रिषु स्थानेषु एतः कर्वुरो यस्याः वे०य०माधवः। "वर्णादनुदात्तात्" पा० ङीप् तस्य नश्च णत्वम्। त्रिषु स्थानेषु कर्वुरायां स्त्रियाम्। "तत्त्र्येणी शलली भवति लोहः क्षुरः सा या त्र्येणी शलली सा त्रय्यै विद्यायै रूपं लोहः क्षुरो ब्रह्मणो रूपमग्निर्हि ब्रह्मणो हित इव ह्यग्निरुक्ष्मात्लोहः क्षुरो भवति" शत० ब्रा० २।६।४।५। "त्र्येणीति त्रिषु स्थानेषु एतः श्वेतः वर्णो यस्याः सा त्र्येणी" भा०। "अथास्यै युग्मेन शलाटुग्लपसेन त्र्येण्या च शलल्या" आश्वा० गृ० १।१४।४। त्रीण्येतानि यस्याः सेयं त्र्येणी शलली। एतः शुक्ल इत्यर्थः" नारा०

त्व त्रि० तन–विच् अनश्च वः। १भिन्ने अन्यार्थे सर्वनामकार्य्यं सर्वनामगणे त्वत्वसमसिमेति पठित्वा "त्वत्वेति द्वावप्यदन्तौ अन्यपर्य्यायौ एक उदात्तोऽपरोऽनुदात्त इत्येके। एकस्तान्त इत्यपरे" सि० कौ० उक्तेः तान्तत्वमपि तच्च क्विपि तुकि रूपमिति विवेकः। "ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु। ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उत त्वः" ऋ० १०।७१।११ त्वशब्दः सर्वनामसु पठितः एकशब्दपर्य्यायः भा०उक्तेः २एकशब्दार्थे माधवः। "प्रजायै त्वस्यै यदशिक्ष इन्द्र!" ऋ० १०।५४।१। "त्वस्यै एकस्यै प्रजायै" भा०। "उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्। उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः" ऋ० १०।७१।४। "त्वशब्द एकवाची। एकः। उतशब्दोऽप्यर्थे। पश्यन्नपि मनसा पर्य्यालोचयन्नपि वाचं न ददर्श दर्शनफलाभावान्न पश्यति। त्व एकः शृण्वन्नप्येनां वाचं न शृणोति श्रवणफलाभावात्। इत्यनेनार्द्धेनाविद्वानभिहितः। तृतीयपादेन विदित-

वेदार्थमाह । त्वष्टा एकश्चा अपि तन्वमात्मीयं शरीरं वि सृजे, स्वयं वाग्विविधं गमयति" भा० । अस्या एव ऋचामर्थव्याख्याने ऋग्वेदोपद्घाते माधवः त्वशब्दस्य अन्यार्थतामभिप्रेत्याह, यथा "त्वः अन्यः कश्चिदर्थज्ञानाय व्याकरणाद्यङ्गानि शृण्वन्नपि मीमांसाराहित्यादेनां वेदरूपां वाचं न सम्यक् शृणोति" अत उभयार्थता "विश्वं शृण्वन्तीमभिरूपां विराजं पश्यन्ति त्वे न त्वे पश्यन्त्येनाम्" अथ० ८।९।९ । सर्वनामत्वात् जसः शीभावः

त्वक्काण्डुर पु० त्वचः काण्डुं राति रा–क । व्रणे हारा० ।

त्वक्क्षीरा स्त्री त्वचः वंशत्वचः क्षीरमस्त्यस्याः आकरत्वेन अच् ।१वंशरोचनायां ।२तत्सार्थे गौरा० ङीष् राजनि०। "सिताजगन्धा त्वक्क्षीरी विदारी त्रिवृता समा" सुश्रु०

त्वक्छद पु० त्वगेव छदोऽस्य । क्षीरीशट्के (क्षीरकञ्चुकी) प्रसिद्धे वृक्षे रत्नमा० ।

त्वक्तरङ्ग पु०त्वचस्तरङ्ग इव । कण्डुपदार्थे पार०निघण्टुः।

त्वक्पञ्चक न० त्वचां पञ्चकम् । "न्यग्रोधोदुम्बराश्वत्थशिरीषप्लक्षपादपाः । पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक्पञ्चकं मतम्" इत्युक्ते न्यग्रोधादिवल्कले । केचित्तु शिरीषस्थाने वेतसं परे पारिशम् वदन्तीति शेषः "त्वक्पञ्चकं हिमं ग्राहि व्रणशोथविसर्पजित् । विष्टम्भाध्मानजित् तिक्तं कषायं लघु लेखनम्" भावप्र० ।

त्वक्पत्र न० त्वगिव पत्रमस्य । १गुड़त्वचि (दारचिनि) २तेजपत्रे च अमरभरतौ । "चन्दनागुरुसख्यानि त्वक्पत्राणां वनानि च" भा० शा०१७०अ० । ३हिङ्गुपत्र्याम् स्त्री गौरा० ङीप् अमरः ।

त्वक्पाक पु० त्वचः पाको यत्र । "शूकदोषनिमित्ता दश चाष्टौ च व्याधयो जायन्ते" इत्युपक्रमे "त्वक्पाकः शोणितार्बुदम्" इत्यादिना च तान् विभज्य "पित्तरक्तकृतो ज्ञेयस्त्वक्पाको ज्वरदाहवान्" सुश्रुतोक्ते शूकदोषनिमित्ते व्याधिभेदे ।

त्वक्पारुष्य न० त्वचः पारुष्यं कठोरता । त्वचः काठिन्ये "तस्य पूर्वरूपाणि त्वक्पारुष्यमकस्मात् रोमहर्षः" सुश्रुतः।

त्वक्पुष्प न० त्वचः पुष्पमिव । १रोमाञ्चे त्रिका० २किलासे (छुली) ख्याते हेमच० । त्वचि पुष्पं यस्याः गौरा० ङीष् । ३किलासे स्त्री जटा० स्वार्थे क । त्वक्पुष्पिका किलासे त्रिका० ।

त्वक्ष तनूकरणे भ्वा०पर०सक० सेट् त्वक्षति अत्वक्षीत् । "त्वष्टा तूर्णमश्नुते इति नैरुक्तास्त्विषेर्वा स्यात् त्वक्षतेर्वा स्यात्" निरुक्ते ८।१२ उक्तत्वात् तथा धातुरस्तीति गम्यते । "प्रत्वक्षाणो अतिविश्वा सहांसि" ऋ० १०।४४।१ । "प्रत्वक्षाणः प्रकर्षेण तनूकुर्वन्" भा० ।

त्वक्षस् न० त्वक्ष्यतेऽनेन त्वक्ष–करणे असुन् । बले निघण्टुः। "सप्ररिक्वा त्वक्षसा क्ष्मो दिवश्च" ऋ० १।१००।१५ । "त्वक्षसा बलेन" भा० ।

त्वक्षीयस् त्रि० अतिशयेन त्वक्षिता ईयसुन् तृचो लोपः। दीप्ते "मरुत्वान् त्वक्षीयसा वयसा नाधमानम्" ऋ० २।२३।५। "त्वक्षीयसा दीप्तेन" भा० ।

त्वक्सार पु० त्वचि सारोऽस्य । १वंशे अमरः । त्वगेव सारोऽस्य । २गुड़त्वचि (दारचिनि) ख्याते पदार्थे शब्दच०। ३शोणवृक्षे ४रन्ध्रप्रधानवंशे (तलतावाँश) राजनि० । "त्वक्साररन्ध्रपरिपूरणलब्धगीतिः" माघः । "चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान्" मनुः । "शिशूनां शस्त्रभीरूणां शस्त्राभावे च योजयेत् । त्वक्सारादिचतुर्वर्गं छेद्ये भेद्ये च बुद्धिमान्" सुश्रु० । त्वक्सारः उत्पत्तिस्थानत्वेनास्त्यस्याः अच् । ५वंशरोचनायां स्त्री राजनि०। [ङीप् । मुद्रचञ्चुवृक्षे राजनि० ।

त्वक्सारभेदिनी स्त्री त्वचः सारं भिनत्ति भिद–णिनि

त्वक्सुगन्ध पु० त्वचि फलत्वचि सुगन्धोऽस्य । नारङ्गे (नेवु) भेदे भावप्र० । २एलवालुकाख्यगन्धद्रव्ये स्त्री शब्दार्थचि० । [त्वचि शब्दार्थचि०।

त्वक्स्वादी स्त्री त्वचि स्वाद्वी । (दारचिनि) ख्याते गुड़

त्वग गतौ भ्वा० सक० पर० सेट् ईदित् । त्वङ्गति अत्वङ्गीत् तत्वङ्ग ।

त्वगङ्कुर पु० त्वचः अङ्कुर इव । रोमाञ्चे हारा० ।

त्वगाक्षीरी स्त्री त्वचः आक्षीरं स्वल्पक्षीरं यस्याः गौरा० ङीष् । वंशरोचनायाम् जटा०।

त्वग्गन्ध पु० त्वचि फलत्वचि गन्धोऽस्य । नागरङ्गे राजनि०

त्वग्ज न० त्वचो जायते जन–ड । १रोमणि २रुधिरे च राजनि० ।

त्वग्दोष पु० त्वचं दूषयति दुष–णिच्–अण् । कोठरोगे राजनि० "श्वयथुं पाण्डुरोगञ्च त्वग्दोषमविपाचिताम्" सुश्रु०। "प्रियः प्रजानामपि स त्वग्दोषेण प्रदूषितः" भा० उ०१४८अ०। ततः अस्त्यर्थे इनि तद्युक्ते त्रि० । "देवापिस्तु महातेजास्त्वग्दोषी राजसत्तमः!" भा०उ० १४८अ० ।

त्वग्दोषापहा स्त्री त्वग्दोषमपहन्ति अप+हन–ड । वाकुच्याम् राजनि० ।

त्वग्दोषारि पु॰ ६त॰। हस्तिकन्दे राजनि॰ त्वग्दोषान्तोऽप्यत्र। [अत्वचीत्। तत्वाच। त्वक्।

त्वच संवरणे तु॰ पर॰ सक॰ सेट्। त्वचति अत्वाचीत्

त्वच्(चा) स्त्री त्वच्यते संव्रियते देहोऽनया त्वचति संवृणोति वा देहम् त्वच–क्विप्। १गुड़त्वचि (दारचिनि) २वल्कले ३चर्मणि च मेदि॰।४स्पर्शग्राहके वाह्येन्द्रियभेदे सा च देहव्यापिनी त्वचिस्थिता सूक्ष्मावायोः सत्त्वांशेनोत्पन्ना वाताधिष्ठातृदेवताका" वेदा॰ सा॰ दृश्यम्। तत्र "उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः। रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणम्। द्रव्याध्यक्षे, त्वचो योगो मनसा ज्ञानकारणम्" भाषा॰ चर्मन् शब्दे २९०२ पृ॰ दृश्यम्।

चर्मणि "त्वचं समेध्यां परिधाय रौरवीम्" रघुः "आयूंषि त्वक्षु निर्भिद्य प्राभञ्जनिरमोचयत्" भट्टिः। "त्वगुत्तरासङ्गवतीमधीतिनीम्" कुमा॰। वल्कले "भूर्जत्वचः कुञ्जरविन्दुशोणाः" कुमा॰। गुड़त्वचि "त्वगेलापत्रकैस्तुल्यैः त्रिसुगन्धि त्रिजातकम्" राजनि॰। हलन्तत्वात् वा टाप्। तत्रार्थे शब्दरत्ना॰ त्वचापत्रम्। "मुक्तत्वच इवोरगः" भा॰ शा॰ १५०अ॰। "श्रीवत्साङ्कोऽरविन्दाक्ष ऊर्द्ध्वरोमा महत्त्वचः" हरिवं॰१७९ अ॰।

त्वच न॰ त्वच–अच्। वल्कले "त्वचवेष्टितमस्थिपञ्जरम्" उज्ज्वलद॰। गुड़त्वचम् इत्यादि। प्रशस्ता त्वगस्त्यस्य अच्। २त्वक्पत्रे न॰। "त्वचं लघूष्णं कटुकं स्वादु तिक्तञ्च रूक्षकम्। पित्तलं कफवातघ्नं कण्ड्वामारुचिनाशनम्। हृद्वस्तिरोगवातार्शःक्रिमिपीनसशुक्रहृदिति"। [त्वचयति।

त्वच त्वचं करोति सत्यापाशेत्यादि॰पा॰स्वार्थे–णिच् नामधातुः।

त्वचस् न॰त्वच–असुन्। त्वचि। त्वचसि हितम् यत्। त्वगिन्द्रियहिते "यक्ष्मं त्वचस्यं ते वयम्" अथ॰ २।३३।७।

त्वचापत्र न॰ त्वचा त्वक् पत्रमिवास्य। (दारचिनि) त्वक्पत्रे शब्दार्थचि॰।

त्वचिष्ठ त्रि॰ अतिशयेन त्वग्वान् इष्ठन् मतुपो लुकि न पदान्तकार्यम्। अतिशयत्वग्युक्ते। ईयसुन् त्वचीयस् तत्रार्थे त्रि॰ स्त्रियां ङीप्।

त्वचिसार पु॰ त्वचि सारोऽस्य हलन्तत्वात् वा सप्तम्या न [लायाम् हारा॰। लुक्। वंशे अमरः।

त्वचिसुगन्धा स्त्री त्वचि सुगन्धोऽस्याः अलुक् समा॰। क्षुद्रै-

त्वच्य त्रि॰त्वचि हितं यत् भत्वात् न पदान्तकार्यम्। त्वचिहिते। "त्वच्यं वृष्यं मधुरविपाकम्" सुश्रु॰।

त्वत् त्रि॰ तन–क्विप् अतो वः तुक् च। अन्यार्थे सर्वनामायम्। त्वच्छब्दे दृश्यम्। सर्वनामत्वात् टेरकच् त्वकत्। इति बोध्यम्। [कार्यादित्याद्यर्थे "त्वत्तः सर्वं प्रवर्त्तते"।

त्वत्तस् अव्य॰एकार्थवृत्तेः युष्मदः तसिल् त्वदादेशः। त्वत्स॰

त्वदीय त्रि॰ तव इदम् त्यदादित्वेन वृद्धत्वात् छ त्वदादेशः। एकवचनार्थवृत्तियुष्मदर्थसम्बन्धिनि। "पितुस्त्वदीयस्य मयाऽपहारितः" रघुः।

त्वन्च गतौ भ्वा॰ पर॰ सक॰ सेट्। त्वञ्चति अत्वञ्चीत्। तत्वञ्च। उदित्। त्वञ्चित्वा त्वक्त्वा। त्वक्तः

त्वन्च सङ्कोचे रुधा॰ पर॰ सक॰ वेट्। त्वनक्ति अत्वाङ्क्षीत् मतान्तरे उदित्। क्त्वा वेट्। अन्यत्र सेट्। त्वक्तः।

त्वद्विध त्रि॰ तवेव विधा प्रकारो यस्य। त्वत्सदृशे।

त्वम्पदलक्ष्यार्थ पु॰ त्वमिति पदस्य लक्ष्योऽर्थः। अज्ञानादिव्यष्ट्युपाध्युपहिताधारभूते अनुपहितप्रत्यगानन्दरूपे तुरीयचैतन्ये। [जीवस्तु त्वम्पदाभिधः" वेदान्तप्र॰।

त्वम्पदवाच्य त्रि॰६त॰। त्वम्पदाभिधे। "देहादिभिः परिच्छिन्नो

त्वम्पदवाच्यार्थ त्रि॰त्वम्शब्दार्थे अज्ञानादिव्यष्टिः एतदुपहिताल्पज्ञत्वादिविशिष्टं चैतन्यम् एतदनुपहितचैतन्यञ्च। एतत्त्रयं तप्तायःपिण्डवदेकत्वेनावभासमानः त्वम्पदवाच्यार्थो भवति" वेदान्तसा॰।

त्वम्पदाभिध पु॰ त्वम्पदमभिधा यस्य। त्वम्पदवाच्ये जीवे "आलम्बनतया भाति योऽस्मत्प्रत्ययशब्दयोः। अन्तःकरणसम्भिन्नबोधः स त्वम्पदाभिधः" इत्युक्तेः।

त्वयता स्त्री त्वया दत्तम् पृषो॰। त्वया दत्ते इत्यर्थे "मम इन्द्र! त्वयताया इषे" ऋ॰७।२०।२०। "त्वयतायै इषे त्वया दत्तायै इषे अन्नाय" भा॰ अन्नाय अन्नं भोक्तुमित्यर्थः।

त्वर वेगे भ्वा॰ आत्म॰ अक॰ सेट्। त्वरते अत्वरिष्ट। घटा॰। णिच्–त्वरयति। षित् त्वरा। ञीत् त्वरितोऽस्ति। "गच्छावः सहितौ तत्र ममापि त्वरते मनः" रामा॰ आर॰ ७८ स॰। "यस्य या त्वरते बुद्धिः" भा॰ स॰ १५५ श्लो॰ "दूता हि त्वरयन्ति माम्" रामा॰ वा॰ "अतत्वरन्त तान् योद्धुम्" भट्टिः।

त्वरा स्त्री त्वर–अङ्। १वेगे, २अभीष्टलाभार्थं विलम्बासहने च "औत्सुक्येन कृतत्वरा सहभुवा व्यावर्त्तमाना ह्रिया" रत्नावली।

त्वरायण त्रि॰ त्वरा अयनमस्य णत्वम्। त्वरासक्ते अमरः

त्वरायस् त्वरणे कण्ड्वा॰ आकृतिगणः पर॰ सक॰ सेट्। त्वरायस्यति।

त्वरि स्त्री त्वर—वेगे भावे इन्। त्वरायां हेमचन्द्रकोषः।

त्वरित न० त्वर—क्त। १शीघ्रे। २तद्वति त्रि०। "पयोऽभिषस्तु त्वरितं चमूचराः" माघः "त्वरितगतिर्व्रजयुवतिः" छन्दोम०। ३देवीभेदे स्त्री "अथाभिधास्ये त्वरितां त्वरितं फलदायिनीम्" इत्युपक्रमे तन्त्रसा० तद्ध्यानादिकमुक्तं दृश्यम्।

त्वरितक पु० त्वरितं कायति प्रकाशते जायते कै—क। व्रीहिभेदे (तोरी) कृष्णव्रीहीत्याद्युपक्रमे "त्वरितककुक्कुटाण्डकेत्यादि" सुश्रु०।

त्वरितगति स्त्री "त्वरितगतिश्च नजनगैः" छ० म० उक्ते दशाक्षरपादके वर्णवृत्तभेदे। [वचसि अमरः।

त्वरितोदित न० त्वरितमुदितम्। शीघ्रोच्चारिते निरुक्ते

त्वलग पु० जलग+पृषो०। जलसर्पे पारस्करनि०।

त्वष्ट त्रि० त्वक्ष—तनूकरणे क्त। तनूकृते तष्टशब्दार्थे अमरः

त्वष्टि पु० "मत्स्याघातो निषादानां त्वष्टिस्त्वायोगवस्य च" मनूक्ते सङ्कीर्णजातिभेदे।

त्वष्टीमती स्त्री त्वष्टा तदनुग्रहोऽस्त्यस्याः मतुप् पृषो०। त्वष्टुरनुग्रहोपेतायां स्त्रियाम् "स्त्रीपुरुषमिथुनरूपाणां पशुमनुष्यादीनां शरीरनिर्माता त्वष्टा तथा च अग्न्युपस्थानप्र० श्रूयते "यावन्तो वै रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोति तावन्तो वै तत् प्रजायते" तादृशस्य त्वष्टुरनुग्रहोपेता" भा०।

त्वष्टृ पु० त्वक्ष—तृच्। "एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते" भा० आ० ६५ अ० उक्ते १द्वादशादित्यमध्ये १आदित्यभेदे। "निर्भिन्ने अक्षिणी त्वष्टा लोकपालोऽविशत् विभोः। चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो दृशाम्" भाग०२।६।१४श्लो०। उक्तेस्तस्य नेत्रोपकारकतया नेत्राधिष्ठातृत्वम्। २देवशिल्पिभेदे अमरः "विश्वकर्मा च त्वष्टा च चक्राते ह्यायुधं बहु" हरिवं० २१९ अ०। "आह्वये विश्वकर्माणमहं त्वष्टारमेव च" रामा० बा० ९१ स०। "त्वष्टा तथैवोर्जितविश्वकर्मा" हरिवं० २४१ अ० इत्यादिषु तयोर्भेदेन निर्देशात् न पर्य्यायता। ३तद्देवताके चित्रानक्षत्रे। ४सूत्रधरे तक्षके वर्णसङ्करभेदे च। ५तक्षणकर्त्तरि त्रि० स्त्रियां ङीप्। ६पशुमनुष्यादीनां गर्भान्तःस्थरेतोरूपविकारकारके देवभेदे त्वष्टीमतीशब्दे दृश्यम्।

त्वष्टृमत् त्रि० त्वष्टृ+अस्त्यर्थे मतुप्। वीर्य्याधिष्ठातृदेवभेदयुक्ते "त्वष्टृमन्तस्त्वा सपेम" यजु०२७।२०। "त्वष्टा रेतसामधिष्ठाता तत्सहिताः। मैथुनार्थोपस्पर्शे वीर्य्याधिष्ठातामेचितोऽत एतद्युताः" वेददी०।

त्वाम्कामा स्त्री त्वां कामयते कम—णिङ् अण् वेदे द्वितीयायाः न लुक्। त्वामभिलषन्त्याम्। "अग्ने! त्वांकामया गिरा" ऋ० ८।११।७। लोके तु त्वत्काम इत्येव।

त्वायु त्रि० त्वामात्मन इच्छति क्यच् युष्मदस्त्वदादेशे क्याच्छन्दसि" पा० उ। आत्मनः त्वां मयमाने। "सुता इमे त्वायवः" ऋ० १।२।४।

त्वावत् त्रि० तवेव दर्शनमस्य युष्मद्+वतुप्प्रकरणे "युष्मदस्मद्भ्यां छन्दसि सादृश्ये उपसंख्यानम्" उक्तेः सादृश्ये वतुप् त्वादेशः "आ सर्वनाम्नः" पा० आ। त्वत्सदृशे "आ घ त्वावान् त्मनाप्तः" ऋ० १।३०।१४।

त्वावसु पु० त्वं वसुर्व्यापकोऽस्य त्वादेशः वेदे पृषो० आ। त्वया व्याप्ते। लोके तु त्वद्वसुः इत्येव।

त्वाष्टी स्त्री दुर्गायाम्। "तुष तुष्टौ स्मृतो धातुस्तस्य तुष्टीनिपातने। सृजत्येषा प्रजास्तुष्टी त्वाष्टी तेन प्रकीर्तिता" देवीपु० ४५ अ०।

त्वाष्ट्र त्रि० त्वष्टा देवता अस्य अण्। त्वष्टृदेवताके १आज्यादौ २चित्रानक्षत्रे स्त्री। त्वष्टुः आदित्यभेदस्य अपत्यम् अण्। ३विश्वरूपे ४वृत्रासुरे च। "त्वाष्ट्रस्य चिद्विश्वरूपस्य गोनामाचक्राणः त्रीणि शीर्षपरावर्क्" ऋ०१०।८।९। "विवस्वानर्य्यमा पूषा त्वष्टाथ सविता तथा" इत्युपक्रमे विवस्वदादीनां वंशमभिधाय। "त्वष्टुर्दैत्याभवत् भार्य्या रोचना नाम कन्यका। सन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्य्यवान्। तं वव्रिरे सुरगणाः स्वस्त्रीयं द्विषतामपि" भाग०६।६ अ० ४४श्लो० इति विश्वरूपोत्पत्तिकथा। वृत्रासुरोत्पत्तिकथा च "हतपुत्रस्ततस्त्वष्टा जुहावेन्द्राय शत्रवे। इन्द्रशत्रो! विवर्द्धस्व मा चिरं जहि विद्विषम्" इत्युपक्रमे तदुत्पत्तिमुपवर्ण्य "येनावृता इमे लोकास्तमसा त्वाष्ट्रमूर्तिना। स वै वृत्र इति प्रोक्तः पापः परमदारुणः" भाग० ६।९ अ० दृश्या। त्वष्टुः स्त्र्यपत्यम् अण् ङीप्। संज्ञानामनि ४सूर्य्यपत्न्यां स्त्री शब्दरत्ना०। छायाशब्दे २९८५ पृ० दृश्यम्। ५क्षुद्ररथे त्रिका०। ६सामभेदे। "इन्द्रो वृत्राद्विभ्यद्गां प्राविशत् तं त्वाष्ट्रेऽन्वनुजनयामेति तमेतैः सामभिरजनयन्" पञ्चविंशब्रा०।

त्विष दीप्तौ भ्वा० उभ० अक० अनिट्। त्विषति ते। अत्विक्षत् अत्विक्षत। तित्वेष तित्विषे। त्विक्षीष्ट। "ओजस्तदस्य तित्विषे" ऋ० ८।६।५। "समचरन्त वृजनाति"

त्विषन्त यत्" ऋ० ५।५४।१२। "अग्निरिव मन्यो! त्विषितः सहस्व" ऋ० १०।८४।२।

त्विष्(षा) स्त्री त्विष–सम्प०भावे क्विप्। दीप्तौ। "निशीथदीपाः सहसा हतत्विषः" रघुः। "रुचिधाम्नि भर्त्तरि परलोकमभ्युपगते विविशुः। ज्वलनं त्विषः कथमिवेतरथा" "चयस्त्विषामित्यवधारितं पुरः" माघः। हलन्तत्वात् वा टाप्। तत्रार्थे शब्दरत्ना०।

त्विषामीश पु० ६त० अलुक् समा०। १सूर्य्ये हेमच० २अर्क-
वृक्षे च। [वृक्षे च।

त्विषाम्पति पु० ६त० अलुक् स०। १सूर्य्ये अमरः २अर्क-

त्विषि पु० त्विष–इन्। किरणे हेमच०।

त्विषित त्रि० त्विट् जातास्य तार० इतच्। ज्वलिते। "अग्निरिव मन्यो त्विषितः" ऋ० १०।८४।२।

त्वेषथ त्रि० त्विष–अथच्। दीप्ते। "सूरस्येव त्वेषथादीषते वयः" ऋ० १।१४१।८। [न्धवः" ऋ० १।६१।११

त्वेषस् त्रि० त्विष–असुन्। दीप्ते "अस्येदु त्वेषसा रन्त सि-

त्वै अव्य० त्वच–बा० डै। १विशेषे २वितर्के च शब्दार्थचि०।

त्वोत त्रि० त्वया ऊतः वेदे नि०। त्वया रक्षिते इत्यर्थे। "त्वोतासो न्यर्वता" ऋ० १।८।२। लोके तु त्वदूत इत्येव

त्सर छद्मगतौ भ्वा० पर० सक० सेट्। त्सरति अत्सारीत्। "यस्त्वा स्वपन्तीं त्सरति यस्त्वा दिप्सति जाग्रतीम्" अथ० ८।६।८। "यो हैनं पाप्मा मायया त्सरति न हैनं सोऽभिभवति" शत० ब्रा० ११।१।६।१२।

त्सरु पु० त्सर–उन्। खड्गमुष्टौ। "मा मां पद्येन रपसा विदत् त्सरुः" ऋ० ७।५०।१। "खड्गं च कनकत्सरुम्" भा० व० १५२७ श्लो०। "गृहीतखड्गचर्म्माणस्ततो भूयः प्रहारिणः। त्सरुमार्गान् यथोद्दिष्टांश्चेरुः सर्व्वासु भूमिषु" भा० आ० ५२४६ श्लो०।

त्सारुक त्रि० त्सरौ तद्युद्धे निपुणः आकर्षा० कन् ततः स्वार्थे अण्। असियुद्धनिपुणे। "तथाऽतिपुरुषानन्यान् त्सारुकौ यमजावुभौ" भा० आ० १३२-अ०।

त्र्यब्दस्पृश् पु० त्र्यब्दं जैववर्षत्रयं स्पृशति स्पृश क्विन् जैववर्षत्रययुक्ते लुप्तसंवत्सरे सौरवर्षभेदे। "एकस्मिन् रविवर्षे सौरवर्षद्वयावसानं चेत्। त्र्यब्दस्पृगेवमेनं विलुप्तवत्सरं प्राहुः" यशोधरजतन्त्रम्। "गुरुवर्षयुग्मवत्सरसमा गदिता या वत् सुप्तसंज्ञिता" ज्योतिर्विदाभरणम्।

इति वाचस्पत्ये तकारादिशब्दार्थसङ्कलनम्।

थ

थकारः तवर्गीयद्वितीयवर्णो व्यञ्जनवर्णविशेषः अस्योच्चारणस्थानम् दन्तमूलं तदुच्चारणे दन्तमूलेन सह जिह्वाग्रस्पर्शः आभ्यन्तरप्रयत्नः, अतएवास्य स्पर्शवर्णता। बाह्यप्रयत्नास्तु विवारश्वासाघोषामहाप्राणाश्च। अस्य वाचकशब्दा वर्णाभिधाने उक्ता यथा

स्थिरवासी महाग्रन्थिर्ग्रन्थिग्राहो भयानकः। शिली शिरश्छिदो दन्ती भद्रकाली शिलोच्चयः। कृष्णो बुद्धिर्विकर्णा च दक्षिणाशाधिपोऽमरः। वरदा भोगदा केशो वामजङ्घाऽलसोऽनलः। नोज्जयिनी पृथुर्गुह्यः शरच्चन्द्रो विदारकः"। मातृकान्यासे अस्य वामजङ्घायां न्यासः। अस्याधिष्ठातृदेवीध्येयरूपं यथा "नीलवर्णां त्रिनयनां षड्भुजां वरदां पराम्। पीतवस्त्रपरीधानां सदा सिद्धिप्रदायिनीम्। एवं ध्यात्वा थकारन्तु तन्मन्त्रं दशधा जपेत्। पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा। तरुणादित्यसङ्काशं थकारं प्रणमाम्यहम्" अस्य स्वरूपं यथा "थकारं चञ्चलापाङ्गि! कुण्डली मोक्षरूपिणी। त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं सदा। पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा। तरुणादित्यसङ्काशं थकारं प्रणमाम्यहम्" कामधेनुतन्त्रम्। काव्यादौ अस्य प्राक्प्रयोगे युद्धं फलम् "थस्तु युद्धम्" वृ० र० टीका०।

थ पु० थुड्–थुर्व वा ड। १पर्व्वते २भयत्रायके त्रि० ३मङ्गले ४भये रक्षणे न० मेदि०। [पाङ्गि!" कामधेनुत०।

थकार पु० थ+स्वरूपे कार। थस्वरूपे वर्णे "थकारं चञ्चला-

थर्व्व चरणे भ्वा० पर० सक० सेट्। थर्वति अथर्वीत्। तथर्व "अङ्गीरसो नः पितरो नवग्वा अथर्वाणो भृगवः सौम्यासः" निघण्टुधृता श्रुतिः "अथर्वाणोऽचरन्तस्थर्वतिश्चरतिकर्मा तत्प्रतिषेधः" निरु० ११।८। लोकेऽपि गतिशून्ये (अथर्व इति) प्रसिद्धिः।

थुड संवृतौ तु० कु० पर० सक० सेट्। थुडति अथुडीत्। तुथोड। [करणे शब्दभेदे।

थुत्कार पु० थुत् इत्यव्यक्तशब्दस्य कारः। निष्ठीवनत्यागानु·

थुथूकृ थुथु इत्यव्यक्त शब्दात् निष्ठीवनत्यागानुकरणशब्दात् च्वि–कृञोऽनुप्रयोगः। थुथूकरोति। "थुथूकृत्य वमद्भिरध्वगजनैः" सूक्तिकर्णामृतम्।

थुथूकृत् स्त्री थुथु इत्यव्यक्तशब्दं करोत्यस्याम् कृ–बा० आधारे क्विप्। होलाकायां पारस्करनिब०।

थुर्व्व वधे भ्वा० पर० सक० सेट्। थूर्वति अथूर्वीत्। तुथूर्व।

थैथै अव्य० थै-थै इत्यव्यक्तशब्दानुकरणशब्दभेदे संगीतदामो०।

थो(थु)ड़न न० थुड़-भावे ल्युट् कुटादित्वेऽपि वा० गुणः। संवरणे। वस्तुतः थुड़नमित्येव तत्रार्थे साधु शब्दकल्पद्रुमे थोड़नशब्दकल्पनं प्रामादिकमेव। [शब्दार्थचि०।

थौणेय त्रि० स्थूणायां हितादि ढक् पृषो०। स्थूणाहितादौ

इति वाचस्पत्ये थकारादिशब्दार्थसङ्कलनम्।

द

दकारः तवर्गीयतृतीयवर्णः व्यञ्जनवर्णभेदः अस्योच्चारणस्थानं दन्तमूलम्। दन्तमूलेन सह जिह्वाग्रेण स्पर्शनादस्य उच्चार्य्यत्वात् स्पर्शवर्णता। अस्योच्चारणे बाह्यप्रयत्नाः संवारनादघोषा अल्पप्राणश्च। तस्य वाचकशब्दा वर्णाभिधानोक्ता यथा।

"दोऽद्रीशो धातकि धीता दाता त्रासः कलत्रकम्। दीनं ज्ञानञ्च दानञ्च भक्तिरावहनी धरा। सुषुम्णा योगिनी सद्यःकुन्तलो वामगुल्फकः। कात्यायनी शिवा दुर्गाऽनङ्गनामा त्रिकण्टकी। स्वस्तिकः कुटिलारूपः कृष्णः श्यामः जितेन्द्रियः। धर्म्मश्च वामदेवश्च स्मरेहः सुचञ्चला। हरिद्रापुरवेदी च दक्षपाणिस्त्रिरेखकः" अस्याधिष्ठातृदेवता ध्यानादि यथा "ध्यानमस्य दकारस्य वक्ष्यते शृणु पार्वति!। चतुर्भुजां पीतवस्त्रां नवयौवनसंस्थिताम्। अनेकरत्नघटितहारनुपूरशोभिताम्। एवं ध्यात्वा दकारन्तु तन्मन्त्रं दशधा जपेत्। त्रिशक्तिसहितं देवि! त्रिबिन्दुसहितं तथा। आत्मादितत्त्वसंयुक्तं दकारं प्रणमाम्यहम्" वर्णोद्धारतन्त्रम्। अस्य स्वरूपं यथा "दकारं शृणु चार्वङ्गि! चतुर्वर्गप्रदायकम्। पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा। त्रिशक्तिसहितं देवि! त्रिबिन्दुसहितं यदा। आत्मादितत्त्वसंयुक्तं स्वयं परमकुण्डली। रक्तविद्युल्लताकारं दकारं हृदि भावयेत्" कामधेनुतन्त्रम्। काव्यादौ अस्य प्रयोगे सौख्यं फलम्। "दोधः सौख्यं मुदं नः" वृत्त० र० टी० उक्तेः। मातृकान्यासेऽस्य वामगुल्फे न्यासः।

द पु० दैप्-शुद्धौ दा-दाने दो-खण्डने वा क दद-दाने बा० ड वा। १पर्वते २दत्ते ३दातरि च मेदि०। ४कलत्रे न० एकाक्षरकोषः। दो-खण्डने सम्प० भावे क्विप्। ५खण्डने ६रक्षणे च स्त्री मेदि०। "दाददो दुद्ददुद्दादी दादादो दूददीददोः। दुद्दादं दददे दुद्दे ददाददददोऽददः" माघः अस्य मल्लिनाथव्याख्यायामर्थविशेषा बोध्याः। "स्मरशापावधिदां सरस्वतीम्" कुमा० "करिणां मुदे सनलदा नलदाः" किरा०। "स्यादस्थानलदं विना न दलने तापस्य कोऽपि क्षमः" "दे! वःपतिविदुषि नैषधराजगत्याः" नैषधम्। हे विदुषि हे विद्वज्जने दात्रि! वो वरुणः इति वरुणपक्षे च्छेदः।

दंश पु० दन्श-अच् भावे घञ् वा। (डाश) १प्रसिद्धे कीटभेदे २सन्नहने (वर्मणि) ३दंशने च मेदि०। ४दोषे ५सर्पक्षते च विश्वः करणे घञ्। ७दन्ते पु० हेमच० "सर्वञ्च दंशमशकं स्थावरञ्च पृथग्विधम्"। "स्वेदजा दंशमशकं यूकामक्षिकमत्कुणम्" मनुः। "कण्डूयनैर्दंशनिवारणैश्च" रघुः। गौरा० ङीष् क्षुद्रो दंशः अल्पार्थे ङीप् वा। ८क्षुद्रदंशे (मशक) भेदे स्त्री अमरः।

दंशक पु० दन्श-ण्वुल्। (डाश) १मक्षिकाभेदे हारा०। २दंशनकर्त्तरि त्रि०।

दंशन न० दन्श-भावे ल्युट्। (कामड़ान्) (कुनवसान) १दन्तादिना खण्डने। "दष्टाश्च दंशनैः कान्तं दासीकुर्वन्ति योषितः" सा० द० २वर्म्मणि न०। "दृष्टदुम्नमहत्वा तु न विमोक्ष्यामि दंशनम्" भा० क० ५७ अ०।

दंशनाशिनी स्त्री दंशं नाशयति नाशि-णिनि-ङीप्। तैलकीटभेदे राजनि०।

दंशभीरु पु० दंशात् भीरुः। महिषे हेमच०।

दंशमूल पु० दंश्यते कर्म्मणि घञ् दंशं मूलमस्य। शिग्रौ (सजिना) राजनि०।

दंशित त्रि० दंशः वर्म संजातोऽस्य तार० इतच्। १कृतसन्नाहे धृतवर्म्मणि "सूर्य्यो यत्र च सौवर्णास्त्रयो भान्ति दंशिताः। तेजसा प्रज्वलन्तो हि कस्यैतद्वनुरुत्तमम्" भा० वि० ४२ अ० "छत्राणि च विराजन्ते दंशितानि शितानि च" हरिवं ५४५४ श्लो०।

दंशूक त्रि० दन्श बा० ऊक। दंशनशीले। "तस्मात् क्लीवाः दन्दंशूका दन्दशूकाः" तैत्ति० ब्रा० १।७।८।२।

दंष्ट्रा स्त्री दंश-ष्ट्रन् गौरादिषु मातामहशब्दस्य पाठात् षित्त्वात् ङीषोऽनित्यत्वात् टाप्। १स्थूलदन्तभेदे। दन्त-

पङ्क्तिद्वयप्रान्ते चत्वारो दन्तभेदा दंष्ट्रा इति प्रसिद्धिः । द्विगुणास्ततदन्तावलिरित्येके "दंष्ट्राकरालानि च ते मुखानि" गीता । "दंष्ट्रायां धरणिर्नखे दितिसुताधीशः पदे रोदसी" सा॰ द॰ । "दंष्ट्रामयूखैः शकलानि कुर्वन्" रघुः

दंष्ट्रानखविष पु॰ दंष्ट्रायां नखे च विषं यस्य । मार्ज्जारादौ यथाह सुश्रुतः । "तत्र दृष्टिनिश्वासं दंष्ट्रानखमूत्रपुरीषशुक्रलालार्त्तवमुखसन्दंशविशर्द्धितगुदास्थिपित्तशूकशवानीति" विषस्यानोपक्रमे "मार्जारश्ववानरमकरमण्डूकपाकमत्स्यगोधाशम्बूकप्रचलाकगृहगोधिकाचतुष्पादकीटास्तथान्ये दंष्ट्रानखविषाः"।

दंष्ट्राल त्रि॰ दंष्ट्रा+अस्त्यर्थे चूड़ा॰ ल । दंष्ट्रायुक्ते "धूम्रकेशो हरित्श्मश्रुर्दंष्ट्रालोष्ठपुटाननः" हरिवं॰ ४७ अ॰ ।

दंष्ट्राविष पु॰ दंष्ट्रायां विषमस्य । १भौमे सर्पे "भौमास्तु दंष्ट्राविषाः" सुश्रुतः २ लूताभेदे स्त्री । यथाह सुश्रुतः

"विषन्तु लालानखमूत्रदंष्ट्रारजःपुरीषैरथ चेन्द्रियेण ।
सप्तप्रकारं विसृजन्ति लूतास्तदुग्रमध्यावरवीर्य्ययुक्तम् ।
सकण्डूकोठं स्थिरमल्पमूलं लालाकृतं मन्दरुजं वदन्ति ।
शोफश्च कण्डूश्च पुलानिका च धूमायनं चैव नखावदंशे ।
दंशन्तु मूत्रेण सकृष्णमध्यं सरक्तपर्य्यन्तमवेहि दीर्णम् ।
दंष्ट्राभिरुग्रं कठिनं विवर्णं जानीहि दंशं स्थिरमण्डलञ्च" ।
[शुक्राद्योऽप्यत्र
लालाविषादयोऽप्यत्र ।

दंष्ट्रास्त्र पुंस्त्री दंष्ट्रास्त्रमिवास्य । वराहे शब्दार्थचि॰ । दंष्ट्रा-

दंष्ट्रिका स्त्री दंष्ट्रा स्वार्थे क क्वापि ह्रस्वे अत इत्वम् । दाड़िकायां दंष्ट्राशब्दार्थे । दंष्ट्रा+व्रीह्या॰ वा ठन् । दंष्ट्रायुक्ते त्रि॰ ।

दंष्ट्रिन् पु॰ दंष्ट्रा अस्त्यर्थे व्रीह्या॰ इनि । १शूकरे अमरः २सर्पे शब्दर॰ । ३दंष्ट्रायुक्ते त्रि॰ "दंष्ट्रिभिः शृङ्गिभिर्वापि हताम्लेच्छैश्च तस्करैः" शु॰ त॰ अग्निपु॰ ।

दंसना स्त्री चु॰ दन्स-भावे युच् । १कर्म्मणि निरुक्ते दंसस् इति शब्दस्य कर्मपर्य्यायतोक्तेस्तथार्थत्वम् । "तव क्रत्वा तव तद्दंसनाभिः" ऋ॰ ६।१७।६ । "दंसनाभिः कर्मभिः" भा॰ । "शची वस्तव दंसना" ऋ॰ १।२८।२

दंसस् न॰ दन्स-असुन् । कर्म्मणि निघण्टुः "चारुतममस्ति दंसः" ऋ॰ १।६२।६ । "अवर्द्धयो बलिनो अस्य दंससा" १०।१२८ । "दंससा कर्म्मणा" भा॰ । "सजोषा-वश्विना दंसोभिः" यजु॰ १२।७४ ।

दंसि पु॰ दन्स-इन् । कर्म्मणि । "कुत्साय मन्मन्नह्यश्च दंसयः" ऋ॰ १०।१३८।१ । "दंसयः कर्म्माणि" भा॰ "दंसयः कर्म्माणि दंसयत्येनानि" निरुक्ते ४।२५ ।

दंसिष्ठ त्रि॰ दन्स-तृन् दंसयिता अतिशयेन सः इष्ठन् तृणो लुकि णिलोपः । १अत्यन्तकर्मकर्त्तरि । "दस्रा दंसिष्ठा रथ्या रथीतमा" ऋ॰ १।१८२।२ । "दंसिष्ठा अतिशयितकर्म्माणौ" भा॰ औस्थाने आच् । २दर्शनीयतमे ३अतिशयेन शत्रुहिंसके च । "येना दंसिष्ठ ! कृत्वने" ऋ॰ ८।२४।२५ । "हे दंसिष्ठ ! दर्शनीयतम ! यद्वा शत्रूणां क्षपयितः !" भा॰ । अत्र दृशेः दंसेर्वा धातोरूपं पृषो॰ ।

दक न॰ उदक+पृषो॰ टैप्-लोपे क ततः संज्ञायां कन् वा । जले त्रिका॰ दकोदरम् । दकार्गलम् ।

दकोदर न॰ दकं जलस्फीतमुदरं यत्र । सुश्रुतोक्ते जलोदरापरनामके उदररोगभेदे यथा "यः स्नेहपीतोऽप्यनुवासितो वा वान्तो विरिक्तोऽप्यथ वा निरूढः । पिबेज्जलं शीतलमाशु तस्य स्रोतांसि दुष्यन्ति हि तद्वहानि । स्नेहोपलिप्तेष्वथ वापि तेषु दकोदरं पूर्ववदभ्युपैति । स्निग्धं महत्तत्सम्परिवृत्तनाभि भृशोन्नतं पूर्णमिवाम्बुना च । यथा दृतिः क्षुभ्यति कम्पते च शब्दायते चापि दकोदरं तत् । "नाभेरधश्चतुरङ्गुले वेध्या वामपार्श्वे दकोदरे" "वेध्याः सिरा बहुविधा मूत्रवृद्धिदकोदरम्" सुश्रु॰ ।

दक्ष वृद्धौ शीघ्रार्थे च भ्वा॰ आत्म॰ अक॰ सेट् । दक्षते अदक्षिष्ट । ददक्षे । दक्षः । "त्वमिनो शतहिमासि दक्षसे" ऋ॰ २।१।११ ।

दक्ष हन्त्यर्थे (गतौ वधे च) भ्वा॰ आत्म॰ सक॰ सेट् । दक्षते अदक्षिष्ट ददक्षे । मित् तत्करणसामर्थ्यात् अनुपधाया अपि दीर्घे ञिणि अदाक्षि अदक्षि णमुलि दक्षं दक्षम् दाक्षं दाक्षमिति रूपं षित् भावे अङ् । दक्षा ।

दक्ष पु॰ दक्ष-कर्त्तरि अच् । १ताम्रचूड़े दक्षसंहिताकर्त्तरि २मुनिभेदे ३शिववृषभे ४वृक्षभेदे ५अग्नौ च विश्वः । ६महेश्वरे शब्दरत्ना॰ । ब्रह्मणो दक्षिणाङ्गुष्ठजाते ७प्रजापतिभेदे । ८चतुरे शीघ्रेषु कर्त्तव्येषु चोपस्थितेषु सद्य एव ज्ञातुं कर्त्तुं च समर्थे पटौ त्रि॰ मेदि॰ ।

"दक्षस्त्वजायताङ्गुष्ठाद्दक्षिणाद्भगवान् ऋषिः । ब्रह्मणः पृथिवीपाल ! शान्तात्मा सुमहातपाः । वामादजायताङ्गुष्ठाद्भार्य्या तस्य महात्मनः । तस्यां पञ्चाशतं कन्याः स एवाजनयन्मुनिः । ताः सर्वास्त्वनवद्याङ्ग्यः कन्याः कमललोचनाः । पुत्रिकाः स्थापयामास नष्टपुत्रः प्रजा॰

पतिः" भा० आ० ६६ अ० तस्य पुत्रनाशकथा दक्षसुतशब्दे दृश्यम् हरिवंशे २अ० तु तस्य प्राचेतसत्वमुक्तं यथा

"उपगम्याब्रवीदेतानथ सोमः प्रजापतीन् । कोपं यच्छत राजानः ! सर्वे प्राचीनवर्हिषः ! । वृक्षशून्या कृता पृथ्वी शाम्येतामग्निमारुतौ । रत्नभूता च कन्येयं वृक्षाणां वरवर्णिनी । भविष्यं जानता तत्त्वं धृता गर्भेण वै मया । मारिषा नाम कन्येयं वृक्षाणामिति निर्म्मिता । भार्य्या वोऽस्तु महाभागा सोमवंशविवर्द्धिनी । युष्माकं तेजसोऽर्द्धेन मम चार्द्धेन तेजसः । अस्यामुत्पत्स्यते पुत्रो दक्षो नाम प्रजापतिः । स इमां दग्धभूयिष्ठां युष्मत्तेजोमयेन वै । अग्निनाऽग्निसमो भूत्वा प्रजाः संवर्द्धयिष्यति । ततः सोमस्य वचनाज्जगृहुस्ते प्रचेतसः । संहृत्य कोपं वृक्षेभ्यः पत्नीं धर्म्मेण मारिषाम् । मारिषायां ततस्ते तु मनसा गर्भमादधुः । दशभ्यस्तु प्रचेतोभ्यो मारिषायां प्रजापतिः । दक्षो जज्ञे महातेजाः सोमस्यांशेन भारत ! । पुत्रानुत्पादयामास सोमवंशविवर्द्धनान् । अचरांश्च चरांश्चैव द्विपदोऽथ चतुष्पदः । स सृष्ट्वा मनसा दक्षः पश्चादप्यसृजत् स्त्रियः । ददौ स दश धर्म्माय कश्यपाय त्रयोदश । शिष्टाः सोमाय राज्ञेऽथ नक्षत्राख्या ददौ प्रभुः । तासु देवाः खगा गावो नागा दितिजदानवाः । गन्धर्वाप्सरसश्चैव जज्ञिरेऽन्याश्च जातयः । ततः प्रभृति राजेन्द्र ! प्रजा मैथुनसम्भवाः । संकल्पाद्दर्शनात् स्पर्शात् पूर्व्वेषां प्रोच्यते प्रजा" ।

अनयोर्विरोधमाशङ्क्य कल्पभेदादविरोधः भङ्ग्या तत्रैव समाहितो यथा

"जनमेजय उवाच । देवानां दानवानाञ्च गन्धर्वोरगरक्षसाम् । सम्भवः कथितः पूर्व्वं दक्षस्य च महात्मनः । अङ्गुष्ठाद् ब्रह्मणो जातो दक्षः प्रोक्तस्त्वयाऽनघ ! । वामाङ्गुष्ठात्तथा चैव तस्य पत्नी व्यजायत । कथं प्राचेतसत्वं स पुनर्लेभे महातपाः । एतन्मे संशयं विप्र ! सम्यगाख्यातुमर्हसि । दौहित्रश्चैव सोमस्य कथं श्वशुरताङ्गतः" । वैशम्पायन उवाच । "उत्पत्तिश्च निरोधश्च नित्यौ भूतेषु पार्थिव ! । ऋषयोऽत्र न मुह्यन्ति विद्वांसश्चैव ये जनाः । युगे युगे भवन्त्येते सर्वे दक्षादयो नृपाः । पुनश्चैव निरुध्यन्ते विद्वांस्तत्र न मुह्यति । ज्यैष्ठ्यं कानिष्ठ्यमप्येषां पूर्व्वं नासीज्जनाधिप ! । तप एव गरीयोऽभूत् प्रभावश्चैव कारणम्" हरिवं० २अ० । ८औशीनरपुत्रनृपभेदे "शिविर्व्वनः शमिर्दक्षश्चत्वारौशीनरात्मजाः" भाग० ९। २३।४ । ९दक्षिणभागे "वामतो जानकी यस्य दक्षभागे च लक्ष्मणः । मारुतिः पुरतो यस्य" रामकवचम् । १०विष्णौ "उग्रः संवत्सरो दक्षः" विष्णुस० । "जगद्रूपेण वर्द्धमानत्वात् सर्व्वकर्म्माणि क्षिप्रं करोतीति वा दक्षः" भा० तत्र कुशले "दक्षमिष्टमधुवासरसारम्" "उपवनपवनानुपातदक्षैः" माघः "रन्ध्रान्वेषणदक्षाणां द्विषामामिषतां ययौ" रघुः । "मेरौ स्थिते दोग्धरि दोहदक्षे" कुमा० । दक्ष हिंसे करणे घञ् । ११बले निघण्टुः ।

"स दक्षाणां दक्षपतिर्बभूव" ऋ० १।९५।६ । दक्षाणां बलानाम् मध्ये यदतिशयितं बलं तस्याधिपतिः" भा० । १२वीर्य्ये न० "स्वैर्दक्षैर्दक्षपितेह सीद देवानाम्" यजु० १४।३ । "स्वैर्दक्षैः वीर्य्यैः सामर्थ्यैः सह, दक्षशब्दोऽत्र वीर्य्यार्थः । दक्षपिता दक्षं वीर्य्यं पातीति पालयिता" वेददी० ।

दक्षकन्या स्त्री ६त० । दक्षस्य सुतासु ताश्च षष्टिः । यथाह मत्स्यपु० ५ अ० ।

"ततस्तेषु विनष्टेषु षष्टिं कन्याः प्रजापतिः । वैरिण्यां जनयामास दक्षः प्राचेतसस्तथा । प्रादात् स दश धर्म्माय कश्यपाय त्रयोदश । सप्तविंशतिं सोमाय चतस्रोऽरिष्टनेमये । द्वे चैव भृगुपुत्राय द्वे कृशाश्वाय धीमते । द्वे चैवाङ्गिरसे तद्वत्तासान्नामानि विस्तरात्" । "तांश्चैव नष्टान् विज्ञाय पुत्रान् दक्षः प्रजापतिः । षष्टिं ततोऽसृजत् कन्यां वैरिण्यामिति नः श्रुतम् । तास्तदा प्रतिजग्राह भार्य्यार्थं कश्यपः प्रभुः । सोमो धर्म्मश्च कौरव्य ! तथैवान्ये महर्षयः । ददौ स दश धर्म्माय कश्यपाय त्रयोदश । सप्तविंशतिं सोमाय चतस्रोऽरिष्टनेमिने । द्वे चैव बहुपुत्राय द्वे चैवाङ्गिरसे तथा । द्वे कृशाश्वाय विदुषे तासां नामानि मे शृणु" हरिवं० ३ अ० । २सतीनाम्न्यां भवपत्न्यां दुर्गायाञ्च तत्कथा "प्रसूतिं मानवीं दक्ष उपयेमे ह्यजात्मजः । तस्यां ससर्ज्ज दुहितॄः षोडशामललोचनाः । त्रयोदशाऽदाद्धर्म्माय तथैकामग्नये विभुः । पितृभ्य एकां युक्तेभ्यो भवायैकां भवच्छिदे" भाग० ४।१। "अथापमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्व्वपत्नी । सती सती योगविसृष्टदेहा" कुमा० दक्षसुतादयोऽप्यत्र ।

दक्षक्रतु पु० ६त० । दक्षप्रजापतिकृते निरीश्वरभागे यज्ञभेदे । तद्यज्ञकथा काशी० ८७ अ० यथा

"अहं यियक्षुर्यूयं मे यज्ञसाहाय्यकारिणः । भवन्तु यज्ञसम्भारानानयन्तु त्वरान्विताः । श्वेतद्वीपमथो गत्वा

यज्ञे चक्रिणमच्युतम् । सहाक्रतूपदेष्टारं यज्ञपुरुषमेव च । तस्यर्त्विजोऽभवन् सर्वे ऋषयो ब्रह्मवादिनः । प्रावर्त्तत ततस्तस्य दक्षस्य च महाध्वरः । दूरादेव निकायाश्च तस्मिन् दक्षमहाध्वरे । अनीश्वरास्ततो वेधा व्याजं कृत्वा गृहं ययौ । दधीचिरथ संवीक्ष्य सर्वांस्त्रैलोक्यवासिनः । दक्षयज्ञे समेयातान् सतीश्वरविवर्जितान् । प्राप्तसम्मानसम्भारान् वासोऽलङ्कृतिपूर्वकम्" इत्युपक्रमे तत्र दधीचिना सह दक्षस्य उक्तिप्रत्युक्ती यथा

"तं विदन्ति वशिष्ठाद्यास्तवार्त्विज्यं भजन्ति ये । एको रुद्रो न द्वितीयः संविदानाश्चपीति हि । प्रावर्त्तन्तर्षयोऽन्येऽपि गौरवात्तव च क्रतौ । यदि मे ब्राह्मणस्यैकं शृणोषि वचनं हितम् । तदा क्रतुफलाधीशं विश्वेशं तं समाह्वय । विना तेन क्रतुरसौ कृतोऽप्यकृत एव हि । सति तस्मिन् महादेवे विश्वकर्मैकसाक्षिणि । तवापि चैषां सर्वेषां फलिष्यति मनोरथः । यथा जड़ानि बीजानि न फलन्ति स्वयं तथा । जड़ानि सर्वकर्माणि न फलन्तीश्वरं विना । अर्थहीना यथा वाणी धर्महीना यथा तनूः । पतिहीना यथा नारी शिवहीना तथा क्रिया । गङ्गाहीना यथा देशाः पुत्रहीना यथा गृहाः दानहीना यथा सम्पत् शिवहीना तथा क्रिया । मन्त्रहीनं यथा राज्यं श्रुतिहीना यथा द्विजाः । योषाहीनं यथा सौख्यं शिवहीना तथा क्रिया । दर्भहीना यथा सन्ध्या तिलहीनं तु तर्पणम् । हविर्हीनो यथा होमः शिवहीना तथा क्रिया । इत्थं दधीचिनाख्यातं जगाह वचनं न तत् । दक्षो दक्षोऽपि तत्रैव शम्भोर्मायाविमोहितः । प्रोवाच च भृशं क्रुद्धः का चिन्ता तव मे क्रतोः । क्रतुमुख्यानि सर्वाणि यानि कर्माणि सर्वशः । तानि सिध्यन्ति नियतं यथार्थकरणादिह । अयथार्थविधानेन सिद्ध्येत् कर्मापि नेशितुः । स्वकर्मसिद्धये साथ सर्व एव हि चेश्वरः । ईश्वरः कर्मणां साक्षी यत् त्वयापीति भाषितम् । तत्तथास्तु परं साक्षी नार्थं दद्याच्च कुत्रचित् । जड़ानि सर्वकर्माणि न फलन्तीश्वरं विना । यदुक्तं भवता तत्राप्यहो दृष्टान्तयाम्यहम् । जड़ान्यपि च बीजानि कालं संप्राप्य चात्मना । अङ्कुरयन्ति कालाच्च पुष्यन्ति च फलन्ति च । विनाऽपीशं यथा कर्म स्वयं काले फलत्यहो । किमीश्वरेण तेनात्र महाऽमङ्गलमूर्त्तिना । दधीचिरुवाच । यथार्थकरणात् सिद्धमपि कार्यं कदाचन । ईश्वरप्रातिकूल्याच्च सिद्धमेवाशु नश्यति । ईश्वरेच्छावशात् कर्म कृतमप्यविधानतः । संसिध्येत्तदधीनाश्च कथं सर्व इहेश्वराः । सामान्यसाक्षिवत्त्वेशः सर्वेषां सर्वकर्मणाम् । साक्षी भवेदसन्दिग्धं फलस्य प्रतिभूरपि । भूजलादिस्वरूपेण विदध्यादङ्कुरोदयम् । यत् त्वयोक्तं विनापीशं काले कर्म फलेत् स्वयम् । स एव कालो भगवान् सर्वकर्त्ता महेशिता । अन्यच्च भवता प्रोक्तं यदेवं तथ्यमेव तत् । किमीश्वरेण तेनात्र महामङ्गलमूर्त्तिना । ये महान्तो भवन्त्यत्र ये च मङ्गलमूर्त्तयः । ईश्वराख्या च ये सन्ति किन्तैरत्र तवान्तिके । उत्तरादुत्तरश्चेति प्रत्युत्तरयति द्विजे । दधीचौ कुपितोऽत्यन्तं दक्षो गर्वी हृतक्रिया । आदिदेश समीपस्थानालोक्य परितस्त्विति । ब्राह्मणाधमदं चास्तु परिदूरयताशु वै । अस्मादध्वरस्थादनादिष्टात्मनाऽऽगतम् । इत्थं दधीचिराकर्ण्य प्रोवाच प्रहसन्निव । किं मां दूरयसि मूढ ! दूरीभूतो भवानपि । सर्वेभ्यो मङ्गलेभ्यश्च सर्वैरेभिः समं ध्रुवम् । अकाण्डे क्रोधनो दण्डस्तव मूर्ध्नि पतिष्यति । महेशितुस्त्रिजगतीपुरीशास्तुः प्रजापते ! । इत्युक्त्वा निर्जगामाशु यज्ञवाटात् ततो द्विजः । तस्मिन्निर्याति निर्यातो दुर्वासाश्च्यवनो महान् । उत्तङ्क उपमन्युश्च ऋचीकोद्दालकावपि । माण्डव्यो वामदेवश्च गालवो गर्गगौतमौ । शिवतत्त्वविदोऽन्येऽपि दक्षयज्ञाद्विनिर्ययुः" । दक्षयज्ञादयोऽप्यत्र । दक्षाः कुशलाः क्रतवः संकल्पा येषाम् । २चक्षुरादीन्द्रियरूपेषु प्राणेषु "ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते नोऽवन्तु" यजु०४।११। "ये देवा ईदृशाः दीव्यन्ति द्योतन्ते इति देवाश्चक्षुरादीन्द्रियरूपाः प्राणाः । "इमे वै प्राणाः वागेवाग्निः प्राणोदानौ मित्रावरुणौ चक्षुरादित्यः श्रोत्रं विश्वे देवा इति" शत० ब्रा० ३।२।२।१२ श्रुत्युक्ताः । किम्भूताः मनोजाताः दर्शनश्रवणादीच्छारूपान्मनस उत्पन्नाः इच्छोत्पत्तौ तेषां प्रवर्त्तमानत्वात् । तथा मनोयुजः रूपादिदर्शनकालेऽपि मनसा युक्ता एव वर्त्तन्ते अन्यमनस्कस्य रूपादिप्रतिभासाभावात् । यद्वा स्वप्नावस्थायां मनसा युज्यन्ते ते मनोयुजः । तथा दक्षक्रतवः दक्षाः कुशलाः क्रतवः संकल्पाः येषां ते सङ्कल्पितार्थकारिण इत्यर्थः । ते देवा नोऽस्मानवन्तु यज्ञानुष्ठानविघ्नपरिहारेण पालयन्तु तेभ्यः प्राणरूपेभ्यः स्वाहा इदं घोरं हुतमस्तु" वेददी० ।

दक्षक्रतुध्वंसिन् पु० दक्षक्रतुं ध्वंसयति ध्वन्स-णिच्-

णिनि । १महादेवे तदंशाविर्भूते २वीरभद्रे च तत्कथा क्रतुध्वंसिन् शब्दे २२८४ पृ० दृश्यम् ।

दक्षजा स्त्री दक्षात् जायते जन–ड । सतीरूपायां १ दक्षकन्यायां महेशकलत्रे दुर्गायाम् २अश्विन्यादौ च । दक्षजातादयोऽप्यत्र ।

दक्षजापति पु० ६त० । १शिवे २चन्द्रे च हेमच० ।

दक्षतनया स्त्री ६त० । दक्षप्रजापतेर्दुहितरि १अश्विन्यादौ २दुर्गायाम् । ३वेदिरूपायां भूमौ च । "अदितिर्ह्यजनिष्ट दक्ष ! या दुहिता तव" ऋ० १०।७२।५ । दक्षस्य भूमिजत्वेऽपि तज्जनकत्वासम्भवमाशङ्क्य निरु० ११।२३ । समाहितं यथा "अदितेर्दक्षो अजायत" "दक्षाद्दितिं परीति" च तत्कथमुपपद्येत ? समानजन्मानौ स्यातामित्यपि वा देवधर्मेणेतरेतरजन्मानौ वेतरेतरप्रकृती" । दृश्यो० दक्षतनाप्यत्र "दक्षस्य पितरं तना" ऋ० ३।२७।९ "दक्षस्य दक्षप्रजापतेस्तना तनया" भा० ।

दक्षपितृ पु० दक्षः दक्षप्रजापतिः पिता उत्पादकोऽस्य समासान्तविधेरनित्यत्वात् न कप् । दक्षप्रजापतिजातप्राणाभिमानिदेवे "ये देवा मनोजाता मनोयुजः सुदक्षाः दक्षपितारस्ते नः पान्तु" तैत्ति० १।२।३।१ । दक्षपितार इत्यत्र गौणत्वात् ह्रस्वः । चक्षुरादिप्राणाभिमानिनो ये देवाः सन्ति तेऽस्मान् पयःपानरूपव्रतानुष्ठायिनोऽन्तर्बहिश्च शुद्धिसम्पादनेन पालयन्तु । कीदृशा देवाः । उत्पत्तिकाले मनसा सहोत्पन्नाः । व्यवहारकालेऽपि मनसा युज्यन्ते । अन्यमनस्कस्य चक्षुरादिभिः सन्निहितविषयाणामप्यनवगमात् । सति तु मनःसाहाय्ये स्वस्वविषयेषु सुदक्षाः कुशलाः । दक्षः प्रजापतिरुत्पादको येषां ते दक्षपितारः" भा० । लोके तु कप् । दक्षपितृका अश्विन्यादि स्त्री । दक्षस्य वीर्यस्य पिता पालक ! । २वीर्योत्पादके दक्षशब्दशेषे उदा० दृश्यम् ।

दक्षविहिता स्त्री १गीतिकाभेदे । "ऋग्गाथा पाणिका दक्षविहिता ब्रह्मगीतिका । गेयमेतत्तदभ्यासकरणान्मोक्षसंज्ञितम्" याज्ञ० । "ऋग्गाथाद्याश्चतस्रो गीतिकाः" मिता० । २दक्षकृते त्रि० ।

दक्षस् न० दक्ष–करणे असुन् । बले । "वृषणा दक्षसे यहुः" ऋ० २।२५।८।२ । "दक्षसे बलाय" भा० ।

दक्षसावर्णि पु० मनुभेदे नवमे मनौ । "नवमो दक्षसावर्णिर्मनुर्वरुणसम्भवः । धृष्टकेतुर्दीप्तकेतुरित्याद्यास्तत्सुता नृप । परे मरीचिगर्भाद्या देवा इन्द्रः श्रुतः स्मृतः । द्युतिमत्प्रमुखाः सप्त भविष्यन्त्यृषयस्ततः । आयुष्मतोऽम्बुधारायामृषभो भगवान् किल । भविता येन संराद्धां त्रिलोकीं भोक्ष्यतेऽद्भुतः" भाग० ८।१३।१९ । "८सावर्णि ९र्दक्षसावर्णि १०र्ब्रह्मसावर्णिकस्ततः । ११धर्मसावर्णिको १२रुद्रपुत्रो १३रौच्यश्च १४भौत्यकः" पुराणान्तरम् । हरिवंशे तु नवमस्य रोहितत्वमुक्तं यथा । "च्यवनश्चैव वाशिष्ठ श्चात्रेयो हव्यवाहनः । पौलहः सत्य इत्येते मुनयो रौहितेऽन्तरे । देवतानां गणास्तत्र त्रय एव नराधिप ! । दक्षपुत्रस्य पुत्रास्ते रोहितस्य प्रजापतेः । मनोः पुत्रो धृष्टकेतुः पञ्चहोत्रो निराकृतिः । पृथुश्रवा भूरिधामा ऋचीकोऽष्टहतो गयः । प्रथमस्य तु सावर्णेर्नव पुत्रा महौजसः" ७ अ० । कल्पभेदादविरोधः ।

दक्षसुत पु० ६त० । १देवे शब्दार्थचि० ।

देवस्य दक्षसृष्टत्वात् नष्टपुत्रेण दक्षेण पुत्रिकाधर्मेण दत्तायामादितावुत्पन्नत्वेन तस्य पुत्रिकापुत्रत्वाच्च तत्सुतत्वम् यथाह हरिवं० ३ अ० ।

"प्रजाः सृजेति व्यादिष्टः पूर्वं दक्षः स्वयम्भुवा । यथा ससर्ज भूतानि तथा शृणु महीपते ! । मनसा चैव भूतानि पूर्वमेवासृजत् प्रभुः । ऋषीन् देवान् सगन्धर्वानसुरानथ राक्षसान्" । २हर्य्यश्वादिषु तत्कथा "दक्षस्य पुत्रा हर्य्यश्वा विवर्द्धयिषवः प्रजाः । समागता महावीर्या नारदस्तानुवाच ह । बालिशा बत यूयं वै नास्या जानीथ वै भुवः । प्रमाणं स्रष्टुकामा वै प्रजाः प्राचेतसात्मजाः । अन्तरूर्द्धमधश्चैव कथं स्रक्ष्यथ वै प्रजाः । ते तु तद्वचनं श्रुत्वा प्रयाताः सर्वतोदिशः । अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः । हर्य्यश्वेष्वथ नष्टेषु दक्षः प्राचेतसः पुनः । वैरण्यामेव पुत्राणां सहस्रमसृजत् प्रभुः । विवर्द्धयिषवस्ते तु शबलाश्वाः प्रजास्तदा । पूर्वोक्तं वचनं तात ! नारदेनैव चोदिताः । अन्योन्यमूचुस्ते सर्वे सम्यगाह महामुनिः । भ्रातॄणां पदवीं ज्ञातुं गन्तव्यं नात्र संशयः । ज्ञात्वा प्रमाणं पृथ्व्याश्च सुखं स्रक्ष्यामहे प्रजाः । एकाग्राः स्वस्थमनसो यथावदनुपूर्वशः । तेऽपि तेनैव मार्गेण प्रयाताः सर्वतो दिशम् । अद्यापि न निवर्त्तन्ते समुद्रेभ्य इवापगाः । नष्टेषु शबलाश्वेषु दक्षः क्रुद्धोऽब्रवीद्वचः । नारदं नाशमेहीति गर्भवासं वसेति च । तदा प्रभृति वै भ्राता भ्रातुरन्वेषणे नृप ! । प्रयातो नश्यति क्षिप्रं तन्न कार्य्यं विपश्चिता । तांश्चैव नष्टान् विज्ञाय पुत्रान् दक्षः

प्रजापतिः। षष्टिं ततोऽसृजत् कन्यां वैरण्यामिति न श्रुतम्"।

२अश्विन्यादौ च स्त्री "तमोऽपहं दक्षसुता इवाबभुः" रघुः।

दक्षाध्वरध्वंसक दक्षस्याध्वरं ध्वंसयति ध्वन्स-णिच्-ण्वुल्। १शिवे २वीरभद्रे च दक्षाध्वरनाशकादयोऽप्यत्र।

दक्षाय्य पु० दक्ष-आय्य। १गरुडे २गृध्रखगे च उणादिवृत्तौ सि०कौ०। दक्ष-वृद्धौ अन्तर्भूतण्यर्थे ण्वुल्। ३वर्द्धके त्रि०। "मित्रो दक्षाय्यो अर्य्यमेवासि सोम!" ऋ०२।६२।२। "दक्षाय्यः सर्वेषां वर्द्धकः" भा०।

दक्षिण त्रि० दक्ष-इनन्। १परच्छन्दानुवर्त्तिनि पराभिप्रायानुवर्त्तिनि २सरले। ३दक्षभागस्थे च मेदि०। ४अवामे अपसव्ये देहभागभेदे (डाहिन) ख्याते भागे हेमच०। "एषु त्वनेकमहिलासु समरागो दक्षिणः कथितः" सा० द० उक्ते ५नायकभेदे यथा "स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसुर्द्यूतै रात्रिरियं जिता कमलया, देवी प्रसाद्याद्य च। इत्यन्तःपुरसुन्दरीः प्रति मया विज्ञाय विज्ञापिते देवेनाऽप्रतिपत्तिमूढमनसा द्वित्राः स्थितं नाड़िकाः"। स्वामेच्छया मेरुगिरितो विप्रकृष्टायां ६दिशि स्त्री ७तद्वर्त्तिनि त्रि०। ८यज्ञदानान्ते दाने ९प्रतिष्ठायां स्त्री यज्ञाद्यन्तदक्षिणानामनिरुक्तिः" शत० ब्रा० २।२।२।२। "स एष यज्ञो हतो न ददक्षे। तं देवा दक्षिणाभिरदक्षयंस्तद्यदेनं दक्षिणाभिरदक्षयंस्तस्माद्दक्षिणा नाम तद्यदेवात्र यज्ञस्य हतस्य व्यथते तदस्यैतद्दक्षिणाभिर्दक्षयत्यथ समृद्ध एव यज्ञो भवति तस्माद्दक्षिणा ददाति"। दक्षिणाविशेषनिर्णयः हेमा० दा० यथा

भविष्यपुराणे "अदत्तदक्षिणं दानं व्रतञ्चैव नृपोत्तम!। विफलं तद्विजानीयाद्भस्मनीव हुतं हविः"। षट्त्रिंशन्मतात् "श्रद्धायुक्तः शुचिर्दान्तो दानं दद्यात् सदक्षिणम्। अदक्षिणन्तु यद्दानं तत् सर्वं निष्फलं भवेत्"। मैत्रायणीयपरिशिष्टम् "दक्षिणालाभे सूक्तानां भक्ष्याणां ददाति न त्वेवं यजेत्"। तथा शतपथश्रुतिः "तस्मान्नादक्षिणं हविः स्यादिति"। भविष्योत्तरे "काम्यं यद्दीयते किञ्चित्तत्समाप्तं सुखावहम्। असमाप्तन्तु दोषाय भवतीह परत्र च। तस्माच्च दक्षिणाहीनं विधानविकलं न च। देयं दानं महाराज! समग्रफलकाङ्क्षया। अन्यथा दीयमानं तदपकाराय केवलम्। प्रत्यवतसार्थहानिर्न च तत् फलदं भवेत्"। आह भगवान् व्यासः "सुवर्णं परमं दानं सुवर्णं दक्षिणा परा। सर्वेषामेव दानानां सुवर्णं दक्षिणेष्यते।" एतच्च, विशेषविहितगोवस्त्रादिदक्षिणकदानवर्जं सामान्यविहितदक्षिणेषु दानेषु व्यवतिष्ठते तत्रापि परा श्रेष्ठतमेति प्राशस्त्यं दर्शयति न त्वन्यां दक्षिणां निराचष्टे आमन्त्र्यार्थत्वाद्दक्षिणायाः सुवर्णस्य प्रकृष्टत्वात् सर्वदानेषु सुवर्णं दक्षिणेतिवचनार्थः, अन्यदपि पुरुषस्याहारौपयिकं तण्डुलादिकं दक्षिणार्थेन योज्यं यत्तु स्मर्यते "अन्येषाञ्चैव दानानां सुवर्णं दक्षिणा स्मृता। सुवर्णे दीयमाने तु रजतं दक्षिणेष्यते" इति तदेतच्छ्रौतस्तैन्यं परिज्ञाय श्रद्धातव्यम्। "सुवर्णं रजतं ताम्रं तण्डुला धान्यमेव च। नित्यश्राद्धं देवपूजा सर्वमेव सदक्षिणम्"। स्कन्दपुराणे। "देयद्रव्यतृतीयांशं दक्षिणां परिकल्पयेत्। अनुक्तदक्षिणे दाने दशांशं वापि शक्तितः"। तुलापुरुषादिदानानि अधिकृत्य लिङ्गपुराणे "दक्षिणा च शतस्यार्द्धं तदर्द्धं वा प्रदापयेत्। ऋत्विजाञ्चैव सर्वेषां दश निष्कान् प्रदापयेत्"। भविष्योत्तरे "ज्ञेयं निष्कशतं पार्थ! दानेषु विधिरुत्तमः। मध्यमस्तु तदर्द्धेन तदर्द्धेनाधमः स्मृतः। मेषराश्व कालपुरुषे तथान्येषु महत्स्वपि। एवं हस्ते तथा द्वे च धेनोः कृष्णाजिनस्य च। अशक्तस्यापि कॢप्तोऽयं पञ्चसौवर्णिको विधिः। अतोऽप्यल्पेन यो दद्यान्महादानं नराधमः। प्रतिगृह्णाति वा तस्य दुःखशोकावहं भवेत्"; जयाभिषेकमुदाहृत्य लिङ्गपुराणे "अष्टषष्टिपलोन्मानं दद्याद्वै दक्षिणां गुरोः। होतृणाञ्चैव सर्वेषां त्रिंशत्पलमुदाहृतम्। अध्येतृणां तदर्द्धेन द्वारपानां तदर्द्धतः"। एतेनान्यत्रापि, गुरोरर्द्धम्, ऋत्विजां तदर्द्धं, जापकानां तदर्द्धं द्वारपालानां तदर्द्धमिति दक्षिणाविभागोऽवगन्तव्यः।" अन्या अपि दक्षिणाः तत्र तत्रोक्ता वेदितव्याः। यज्ञभेदे दक्षिणाभेदः कात्या० श्रौ० सू० उक्तः कातीयशब्दे दर्शितप्रायः विशेषतोऽह्यः। सर्वत्र दक्षिणाया अदाने कालविलम्बभेदे च दोषा दक्षिणानामनिरुक्तिसहिता उक्ता यथा।

"कार्त्तिक्यां पूर्णिमायान्तु रासे राधामहोत्सवे। आविर्भूता दक्षिणांशात् कृष्णस्य तेन दक्षिणा"। यज्ञो दक्षिणया सार्द्धं पुत्त्रेण च फलेन च। कर्म्मिणां फलदाता चेत्येवं वेदविदो विदुः। कृत्वा कर्म्म च तस्यैव तूर्णं दद्याच्च दक्षिणाम्। तत् कर्म्मफलमाप्नोति वेदैरुक्तमिदं मुने!।

कर्त्ता कर्मणि पूर्णे च तत्क्षणं यदि दक्षिणाम्। न दद्याद्ब्राह्मणेभ्यश्च दैवेनाज्ञानतोऽथ वा। मुहूर्त्ते समतीते तु द्विगुणा सा भवेद्ध्रुवम्। एकरात्रे व्यतीते तु भवेत् शतगुणा च सा। त्रिरात्रे तद्दशगुणा सप्ताहे द्विगुणा ततः। मासे लक्षगुणा प्रोक्ता ब्राह्मणानाञ्च वर्द्धते। संवत्सरे व्यतीते तु सा त्रिकोटीगुणा भवेत्। कर्म तद्यजमानानां सर्वञ्च निष्फलं भवेत्। स च ब्रह्मस्वापहारी न कर्मार्होऽशुचिर्नरः। दरिद्रो व्याधियुक्तश्च तेन पापेन पातकी। तद्गृहाद्याति लक्ष्मीश्च शापं दत्त्वा सुदारुणम्! पितरो नैव गृह्णन्ति तद्दत्तं श्राद्धतर्पणम्। एवं सुराश्च तत्पूजां तद्दत्तामग्निराहुतिम्। दाता न दीयते दानं ग्रहीता च न याचते। उभौ तौ नरकं यातश्छिन्नरज्जुर्यथा घटः। नार्पयेद्यजमानश्चेद्याचितुश्च दक्षिणाम्। भवेद्ब्रह्मस्वापहारी कुम्भीपाकं व्रजेद्ध्रुवम्। वर्षलक्षं वसेत्तत्र यमदूतेन ताडितः। ततो भवेत् स चाण्डालो व्याधियुक्तो दरिद्रकः। पातयेत् पुरुषान् सप्त पूर्वांश्च सप्तजन्मतः" ब्रह्मवैवर्त्ते प्रकृतिखण्डे। प्राणिरूपदक्षिणाद्रव्यग्रहणे मन्त्रभेदेनाभिमन्त्रणम् अप्राणिद्रव्यग्रहणे तु अभिमर्शनमात्रम् यथाह आश्व० श्रौ० सू० ५।१३।१५। "क इदं कस्मा अदात् कामायादात् कामो दाता कामः प्रतिग्रहीता कामं समुद्रमाविश कामेन त्वा प्रतिगृह्णामि कामैतत्ते वृष्टिरसि द्यौस्त्वा ददातु पृथिवी प्रतिगृह्णात्वित्यतीतान्यनुमन्त्रयेत् प्राणि"। सू० "विहारदेशमतीत्य नीतेषु दक्षिणाद्रव्येषु तन्मध्ये यत् प्राणिद्रव्यं तदेतेनानुमन्त्रयते" नारा०। "अभिमृशेदप्राणि" सू० "तन्मध्ये यदप्राणि तदभिमृशेत् नारा०। सा च यज्ञपत्नी तथाह "दक्षिणा यज्ञपत्नी च दीक्षा सर्वत्र पूजिता। यया विनापि विश्वस्य सर्वं कर्म तु निष्फलम्" भाग० २६।२।२।२८। १० नायिकाभेदे स्त्री यथा "या गौरवं भयं प्रेम सद्भावं पूर्वनायके। न मुञ्चत्यन्यसक्तापि सा ज्ञेया दक्षिणा बुधैः" इति विष्णुपु० टीकायां स्वामी" ११विष्णौपु०। "अक्रूरः पेशलो दक्षो दक्षिणः दक्षिणाम्बरः" विष्णु स०। अस्य दिग्देशादिव्यवस्थायामेव सर्वनामता तेन दक्षिणे गायकाः अन्यत्र दक्षिणाः(कुशलाः)इत्येव। "दिशः सपत्नी भव दक्षिणस्याः" रघुः "दक्षिणीयमवगम्य पङ्क्तिशः पङ्क्तिपावनमथ द्विजव्रजम्। दक्षिणः क्षितिपतिर्व्यशिश्रियद्दक्षिणाः सदसि राजसूयकीः" माघः। अनृतादौ दक्षिणकर्णस्पर्शनं पराशरो विधत्ते। "क्षुते निष्ठीवने चैव दन्तोच्छिष्टे तथाऽनृते। पतितानाञ्च सम्भाषे दक्षिणं श्रवणं स्पृशेत्। ब्रह्मा विष्णुश्च रुद्रश्च सोमः सूर्य्योऽनलस्तथा। ते सर्वे चापि तिष्ठन्ति कर्णे विप्रस्य दक्षिणे"। १२आचारभेदे दक्षिणाचारशब्दे दृश्यम्। १३दक्षिणाग्नौ पु० "दक्षिणपश्चिमे दक्षिणम्" आश्व० गृ० ४।२।३।

दक्षिणकालिका स्त्री दक्षिणा कालिका। १शिवहृदये न्यस्तदक्षिणपादायां कालिकायाम्।

दक्षिणगोल पु० कर्म०। विषुवरेखातो दक्षिणस्थिते तुलादिराशिषट्के यथाह सि० शि० "सौम्यगोलो भदलं यदाद्यं याम्योऽपरं सायनभागभानोः" दक्षिणायनशब्दे रङ्गनाथ व्याख्या दृश्या।

दक्षिणतस् अव्य० दक्षिणा—तसिल् सर्वनाम्नोवृत्तिमात्रे पुंवद्भावः।१दक्षिणस्यां दिशि। २दक्षिणभागे च "पितृभ्यो बलिशेषन्तु सर्वदक्षिणतो हरेत्" मनुः।

दक्षिणतस्कपर्द्द त्रि० दक्षिणतः शिरसो दक्षिणभागे कपर्द्दश्चूड़ा यस्य। दक्षिणभागचूड़ायुक्ते "श्वित्यञ्चो मा दक्षिणतस्कपर्दाः" ऋ० ७।३३।२। चूड़ाकर्मणि दक्षिणतो वशिष्ठानामिति स्मर्य्यते" भा०।

दक्षिणतीर न० कर्म० तीरस्य तारभावः। नद्यादेर्दक्षिणस्यतीरे।

दक्षिणत्रा स्त्री दक्षिण+वेदे नि० त्रा। दक्षिणभागादौ। "धिष्व वज्रं हस्त आ दक्षिणत्राभिः" ऋ० ६ २८।८।

दक्षिणदिक् स्त्री दक्षिणा दिक्। स्वापेक्षया मेरुतो विप्रकृष्टदिशि। तदधिपः भौमः यथाह "सूर्य्यः सोमः क्षमापुत्रः सैंहिकेयः शनिः शशी। सौम्यस्त्रिदशमन्त्री च प्राच्यादिदिगधीश्वराः" ज्यो० त०। तत्र बलिनौ ग्रहौ भास्करभूमिजौ यथाह तत्रैव "प्राच्यां सौम्यसुराचार्य्यौ याम्यां भास्करभूमिजौ। प्रत्यक् सौरिरुदीच्यां तु सितेन्दू दिग्बलान्वितौ" तद्दिक्पतिः शक्रः "इन्द्रो वह्निः पितृपतिर्नैरृतो वरुणो मरुत्। कुवेर ईशः पतयः पूर्वादीनां दिशां क्रमात्" इत्युक्तेः। तद्दिग्बलिनो राशयश्च अजवृषमृगसिंहाः। "ऐन्द्रे मानुषराशयस्तु पशवो याम्ये सवीर्य्याबलिवारुण्यां बलयुक् तथैव बलिनः पानीयजाश्चोत्तरे" ज्यो० त० उक्तेः। तद्दिक्पतिराशयः वृषकन्यामकरराशयः यथाह ज्यो० त० "प्रागादिककुभां नाथा यथासंख्यं

प्रदक्षिणम् । मेषाद्याराशयो ह्येवाश्विन्याद्युक्त्या परिभ्रमात्" ।। तद्दिक्स्थनक्षत्राणि च मघादिसप्तकम् । "कृत्तिकाद्यास्तु पूर्वादौ सप्त सप्तोदिताः क्रमात्" ज्यो० त० उक्तेः । दक्षिणदिग्भागस्था देशाश्च कूर्मविभागशब्दे वृ०सं० १४अ० उक्ताः "अथ दक्षिणेन लङ्का" इत्युपक्रमे दर्शिताः ।

दक्षिणपश्चात् अव्य० दक्षिणस्याः परायाश्च दिशः अन्तराला दिक् बहु० आति परस्य पश्चादेशः । प्रथमापञ्चमीसप्तम्यर्थवृत्ती दक्षिणपश्चिमाशब्दार्थे नैर्ऋतकोणे ।

दक्षिणपश्चिमा स्त्री दक्षिणस्याः पश्चिमाया दिशोऽन्तराला दिक् । "दिङ्नामान्यन्तराले" पा० बहु० पुंवत् । १नैर्ऋते कोणे । "जग्मुर्भरतशार्दूल ! दिशं दक्षिणपश्चिमाम्" भा० महाप्र० १अ० । २तद्देशवर्त्तिनि त्रि० "दक्षिणपश्चिमे दक्षिणम्" आश्व० गृ० १।२।१२ ।

दक्षिणपूर्वा स्त्री दक्षिणस्याः पूर्वस्या दिशोऽन्तराला दिक् बहु० पुंवत् । १अग्निकोणे २तद्दिग्भागस्थे त्रि० "दक्षिणपूर्वे उद्धृतान्त आहवनीयं निदधाति" आश्व०गृ०४।२।१

दक्षिणमानस न० गयास्थिते तीर्थभेदे "तस्य दक्षिणभागे तु तीर्थं दक्षिणमानसम् । दक्षिणे मानसे चैव तीर्थत्रयमुदाहृतम्" वायुपु० गयामा० ।

दक्षिणमार्ग पु० १तन्त्रोक्ते आचारभेदे २पितृयाणे मार्गभेदे "निर्विण्णोऽहं दक्षिणमार्गेण गतागतलक्षणेन" ईशोपनिषद्भाष्यम् । [लवणाम्बुधौ ।

दक्षिणसमुद्र पु० कर्म० । दक्षिणदिक्स्थे समुद्रे

दक्षिणस्थ त्रि० दक्षिणे भागे तिष्ठति स्था—क ७त० । १दक्षिणभागस्थिते २सारथौ पु० अमरः ।

दक्षिणा अ० दक्षिणा+प्रथमापञ्चमीसप्तम्यर्थे आच् । प्रथमाद्यर्थवृत्तिके दक्षिणाशब्दार्थे दक्षिणा वसति आगच्छति रमणीयं वा "अयं दक्षिणा विश्वकर्मा" यजु० २३।५५

दक्षिणांसव्रणिन् पु० दक्षिणांसे दक्षस्कन्धे व्रणोऽस्त्यस्य इनि । दक्षिणस्कन्धस्थव्रणयुक्ते "पितृस्वस्रभिगमनात् दक्षिणांसव्रणी भवेत् । तेनापि निष्कृतिः कार्य्या अजादानेन शक्तितः" पराशरः ।

दक्षिणाग्नि पु० दक्षिणोऽग्निः । अन्वाहार्य्यपचनाख्ये यज्ञाग्निमध्येऽग्निभेदे । "अन्वाहार्य्यं दक्षिणाग्नावधिश्रयति" कात्या० श्रौ० २।५।२७ "हीनं यज्ञस्यान्वाहरतीत्यन्वाहार्य्यः अध्वर्युरन्वाहार्य्यसंज्ञकं दक्षिणार्थं तण्डुलरूपमोदनं दक्षिणाग्नावधिश्रयति चतुर्णामृत्विजां तृप्तिर्यावता स्यात्तावत्परिमाणं ततोऽधिकं वान्वाहार्य्यमोदनं कुर्य्यात्" कर्कः ।

"उत्सर्गेऽपराह्णे गार्हपत्यं प्रज्वाल्य दक्षिणाग्निमानीय विट्कुलाद्वित्तवतो वैश्योनय इत्येके भ्रियमाणं वा प्रज्वाल्यारणिमन्तं वा मथित्वा गार्हपत्यादाहवनीयं ज्वलन्तमुद्धरेत्" आश्व० श्रौ० २।२।१ "उत्सर्गे अजस्रोत्सर्गे अग्निहोत्रहोमार्थं विहरेत् नाजस्रेषु । होमस्त्वजस्रेष्वपि भवतीत्युक्तम्, एवं स्थिते विहरणसहितमग्निहोत्रहोमप्रयोगं वक्तुकाम उत्सर्ग इत्युक्तवान् । अत्रापराह्णशब्देन अह्नश्चतुर्थभागो गृह्यते । विहरणकाले गार्हपत्यं प्रादुष्कृत्य प्रज्वाल्य च दक्षिणाग्निं वैश्यगृहादानयेत् । चतुर्णां वर्णानामन्यतमस्य द्रव्यवतो वा गृहात्, गार्हपत्याद्वा । धार्य्यश्चेत् प्रज्वलयेत् । काले काले यदि निर्मन्थ्यः तदा मन्थेत् । एषां प्रकाराणामुत्पत्तिवशाद्व्यवस्था । तेषामन्यतमप्रकारेण दक्षिणाग्निं साधयित्वा ततो गार्हपत्यात् ज्वलन्तमग्निमाहवनीयार्थमुद्धरेत् पात्रान्तरेण पृथक् कुर्य्यादित्यर्थः" नारा० । तस्य स्थापनञ्च नैर्ऋतकोणे "दक्षिणपश्चिमे दक्षिणम्" आश्व० गृ० ४।१२ । उक्तेः ।

दक्षिणाग्र पु० दक्षिणस्यामग्रमस्य । दक्षिणदिग्भागस्याग्रे कुशादौ "अथ यान्यमून्युदीचीनाग्राणि तृणानि भवन्ति दक्षिणाग्राणि तानि करोति पितृदैवत्यमेवैनत्तत्करोति" शत० ब्रा० १२।५।१।१२ । "उदगग्रान् दक्षिणाग्रान् करोतीति श्रुतेः" कात्या० श्रौ० ४।१०।१५ ।

दक्षिणाचल पु० दक्षिणस्थितोऽचलः । मलयपर्वते हेमच० दक्षिणपर्वतादयोऽप्यत्र ।

दक्षिणाचार पु० कर्म० १तन्त्रोक्ते आचारभेदे । "स्वधर्मनिरतो भूत्वा पञ्चतत्त्वेन पूजयेत् । स एव दक्षिणाचारः शिवो भूत्वा शिवं यजेत्" आचारभेदतन्त्रम् । द्वयोस्तु तत्र भेदः मद्यस्थाने विजयारसः । "चतुःप्रकाराः सन्त्येव पञ्चमो विजयारसः" इत्युक्तेः । दक्षिणा दक्षिणस्यां चारो गतिरस्य । २दक्षिणदिग्गतिशालिनि त्रि० । "दक्षिणां दक्षिणाचारो दिशं येनाजयत् प्रभुः" भा० वि० ५अ० ।

दक्षिणाज्योतिस् पु० दक्षिणा दक्षिणस्यां ज्योतिरस्य । पञ्चौदने छागभेदे । "योऽजं पञ्चौदनं दक्षिणाज्योतिषं ददाति" अथ० ९।५।२२।२३।२४।२५।२६ । तद्दानफलमुक्तम् ।

दक्षिणात् अव्य० दक्षिण+प्रथमापञ्चमीसप्तम्यर्थे आति। प्रथमाद्यर्थवृत्तौ दक्षिणशब्दार्थे दक्षिणात् रमणीयम् आगच्छति वसति वा।

दक्षिणान्तिका स्त्री "षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नोनिरन्तराः। न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः" इत्युपक्रमे "तृतीययुग्दक्षिणान्तिका समस्तपादेषु द्वितीयलः" वृ० र० उक्तलक्षणे वैतालीयभेदे मात्रावृत्तभेदे। "समस्तपादेषु द्वितीयलः यदि तृतीययुक् द्वितीयमात्रात्तृतीयमात्राभ्यामेको गुरुश्चेत् शेषं वैतालीयवत् तदा दक्षिणान्तिका नाम छन्द इत्यर्थः।

दक्षिणापथ पु० दक्षिणा (आजन्तः) पन्थाः अच् समा०। देशभेदे तद्देशवर्णनं भा० व० ६१ अ० यथा "एते गच्छन्ति बहवः पन्थानो दक्षिणापथम्। अवन्तीमृक्षवन्तञ्च समतिक्रम्य पर्वतम्। एष विन्ध्यो महाशैलः पयोष्णी च समुद्रगा। आश्रमाश्च महर्षीणां बहुमूलफलान्विताः। एष पन्था विदर्भाणामसौ गच्छन्ति कोशलाम्। अतः परञ्च देशोऽयं दक्षिणे दक्षिणापथः"। "दक्षिणापथजन्मानः सर्वे नरवरान्ध्रकाः। गुहाः पुलिन्दाः शवराश्चुचुका मद्रकैः सह" भा० शा० २०७ अ०। "युयुधे पाण्ड्यराजेन दिवसं नकुलानुजः। तं जित्वा स महाबाहुः प्रययौ दक्षिणापथम्" भा० स० ३० अ०। "तथापरे जनपदा दक्षिणापथवासिनः। पाण्ड्राश्च केरलाश्चैव चोलाः कुल्यास्तथैव च। सेतुका मुख्यकाश्चैव कुपथाचारवासिकाः। नवराष्ट्रा माहिषकाः कलिङ्गाश्चैव सर्वशः। कालेराश्च सहैषीकैराटव्याः शबरास्तथा। पुलिन्दा विन्ध्यमूषिका वैदर्भा दण्डकैः सह। कुलीयाश्च सिरालाश्च रूपसास्तापसैः सह। तथा तैत्तिरकाश्चैव सर्वे कारस्करास्तथा। नासिकाद्याश्च ये चान्ये ये चैवान्तरनर्मदाः। भानुकच्छाः समाहेयाः सह सारस्वतैस्तथा। कच्छीयाश्च सुराष्ट्राश्च आनर्त्ताश्चार्बुदैः सह" मत्स्यपु०। २दक्षिणास्थितमार्गमात्रे पु०। "कृष्णाजिनानि धुन्वन्तः स्वयमेव दक्षिणापथं यान्ति" आश्व० श्रौ० ५।१३।१२। दक्षिणापथोऽस्त्यस्य स्वामित्वेन आवासत्वेन सम्बद्धत्वेन वा ठन्। दक्षिणापथिक तद्देशनृपे तत्र वासिनि तत्सम्बद्धे च। "एते चान्ये च बहवो दक्षिणापथिकान् पथः" हरिवं० ११० अ०।

दक्षिणापरा स्त्री दक्षिणाया अपराया दिशोऽन्तराला दिक्। १नैर्ऋतकोणे "दक्षिणपूर्वस्यां दिशि दक्षिणापरस्यां वा" आश्व० गृ० ४।१।६। २तत्संस्थिते त्रि० "पुनर्दक्षिणापरेऽध्वर्युः पूर्वोत्तरे यजमानः" कात्या० श्रौ० ८।५।१८। दक्षिणायां परः। ३यज्ञपूर्त्यर्थद्रव्यदानरूपदक्षिणा तत्परे त्रि०।

दक्षिणाप्रवण त्रि० दक्षिणा (आजन्तः) दक्षिणस्यां प्रवणं निम्नम्। उत्तरापेक्षया दक्षिणतो निम्ने श्राद्धादिदेशे "दक्षिणाप्रवणम्" कात्या० श्रौ० २२।२।६। "दक्षिणाप्रवणं देवयजनं भवति" कर्कः "शुचिदेशं विविक्तं च गोमयेनोपलेपयेत्। दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेत्" मनुः। "दक्षिणाप्लवनमप्यत्र परिस्रुते शुचौ देशे दक्षिणाप्लवने तथा" याज्ञ० श्राद्धदेशोक्तौ।

दक्षिणाप्रष्टि पु० धुर्य्यापेक्षया प्रकृष्टं देशमश्नोति प्र+अश—क्तिच् पृषो० दक्षिणा दक्षिणभागे प्रष्टिः वाह्यः। धुर्य्यमध्ये दक्षिणस्थे पुष्टाङ्गे प्रकृष्टदेशस्थे वा अश्वभेदे "दक्षिणाप्रष्टिं जवो यस्त इति" कात्या० श्रौ० १४।३।८। "रथे तृतीयमश्वं युनक्ति धुर्य्यापेक्षया प्रकृष्टं देशमश्नोतीति प्रष्टिर्वाह्यो युग्यः" सं० व्या०। दक्षिणस्यां स इव इति विग्रहे २दक्षिणस्थे प्रष्टिसदृशेऽश्वे च। "अथ दक्षिणा प्रष्टिं युनक्ति सव्यप्रष्टिं वा" शत० ब्रा० ५।१।४।८। "प्रष्टिर्नाम पादत्रयोपेतो भोजनपात्रादिकाधारः" (तेपाइ) भा०।

दक्षिणाबन्ध पु० दक्षिणायां बन्धः अनुबन्धः। गृहस्थादीनां दक्षिणानुबन्धभेदे यथा "दक्षिणाबन्धो नाम गृहस्थब्रह्मचारिभिक्षुवैखानसानां काममोहोपहतचेतसामभिमानपूर्विकां दक्षिणां प्रयच्छतां दक्षिणाबन्ध इत्युच्यते" तत्त्वसारः।

दक्षिणाभिमुख त्रि० दक्षिणा दक्षिणस्यामभिमुखमस्य। दक्षिणदिङ्मुखे। "दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा" आह्नि० त०। दक्षिणामुखादयोऽप्यत्र। "आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः"। "उदकेनैव विधिना निर्वपेत् दक्षिणामुखः" मनुः। "यद्वेष्टितशिरा भुङ्क्ते यद्भुङ्क्ते दक्षिणामुखः" मनुना श्राद्धीयविप्रस्य तथा भोजनं निषिद्धम्। दक्षिणा दक्षिणस्यां मुखम्। दक्षिणादिकस्थे मुखे न०। "अमाश्राद्धं गयाश्राद्धं दक्षिणामुखभोजनम्। न जीवत्पितृकः कुर्य्यात् कृते च पितृहा भवेत्" ति० त०।

दक्षिणामूर्त्ति(क) पु० दक्षिणा अनुकूला मूर्त्तिरस्य वा कप् संज्ञात्वात् न पुंवत्। शिवमूर्त्तिभेदे तद्ध्यानादिकं

यथा "प्रोद्यच्छाखमहावटद्रुमतले योगासनस्थं प्रभुं प्रत्यक्तत्त्वबुभुत्सुभिः प्रतिदिशं प्रोद्वीक्ष्यमाणाननम्। मुद्रां तर्कमयीं दधानममलं कर्पूरगौरं शिवं हृद्यन्तः कलये स्फुरन्तमनिशं श्रीदक्षिणामूर्त्तिकम्"। "नित्यशो दक्षिणामूर्त्तिं ध्यायेत् साधकसत्तमः। शास्त्रव्याख्यानसामर्थ्यं लभन्ते वत्सरान्तरे" तन्मन्त्रादिकं तन्त्रे दृश्यम्। ध्यानान्तरं ध्यानशब्दे दृश्यम्।

दक्षिणायन न० दक्षिणा दक्षिणस्यां दक्षिणे गोले वा ऽयनं रवेः। रवेः स्वाधिष्ठितस्थानापेक्षया १दक्षिणदिग्गमने २दक्षिणगोलरूपतुलादिराशिषट्के गमने तदुपलक्षिते ऋतुत्रयात्मके ३कालभेदे च तत्राद्यार्थे "ऋतुत्रयञ्चाप्ययनं द्वे अयने वर्षसंज्ञिते। कर्कटादिस्थिते भानौ दक्षिणायनमुच्यते" मल० त० विष्णुपु०। द्वितीयार्थे "दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः। अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम्" मनुः। अयनशब्दे ३५२ पृ० उत्तरायणशब्दे ११०४ पृ० खगोलशब्दे च दक्षिणायनशब्दार्थस्योक्तप्रायत्वेऽपि दक्षिणायनव्यवस्थार्थमधिकमत्रोच्यते यद्यपि चन्द्रस्यापि स्वाधिष्ठितस्थानापेक्षया दक्षिणस्यां दक्षिणगोले च गतिः सम्भवति तथापि सूर्यस्यैव गतिभेदे तदुपलक्षितकाले च दक्षिणायनशब्दव्यवहारः। "सौरेण द्युनिशोर्मानं षडशीतिमुखानि च। अयनं विषुवं चैव संक्रान्तेः पुण्यकालता" सू० सि० अयनस्य सौरत्वोक्तेः "यान् मासान् दक्षिणा आदित्य एति यान् मासानुत्तरादित्य एति" वाजसनेयिनां पञ्चाग्निविद्यायां दक्षिणोत्तरमार्गयोः पाठात् "तस्मादादित्यः षण्मासान् दक्षिणेनैति षण्मासानुत्तरेणैतीति तैत्तिरीयश्रुतेश्चादित्यगतिमुपजीव्यैवायनशब्दप्रवृत्तेश्च। तेनादित्यगतिनिष्पन्नत्वात्तस्य सौरत्वम्। उभयविधदक्षिणायनस्य किमवधिकस्य मनूक्तं रात्रित्वं तदभिधीयते। तत्र "मेषादौ देवभागस्थो देवानां याति दर्शनम्। असुराणां तुलादौ तु सूर्यस्तद्भागसञ्चरः" सू० सि०।

"जम्बुद्वीपलवणसमुद्रसन्धौ परिधिवृत्तं भूगोलमध्ये तत्समसूत्रेणाकाशे वृत्तं विषुवद्वृत्तं तत्र क्रान्तिवृत्तं षड्भान्तरेण स्थानद्वये लग्नं तन्मेषतुलास्थानं प्रवहवायुना विषुवद्वृत्तमार्गे भ्रमति मेषस्थानात् कर्कादिस्थानं विषुवद्वृत्ताच्चतुर्विंशत्यंशान्तर उत्तरतः। मकरादिस्थानं विषुवद्वृत्ताच्चतुर्विंशत्यंशान्तरे दक्षिणतः। तत्र स्वस्थाने प्रवहवायुना भ्रमति। एवं क्रान्तिवृत्तप्रदेशाः स्वस्वस्थाने प्रवहवायुना भ्रमन्ति। तत्र मेषादौ देवभागस्थः "जम्बुद्वीपं च तत्रापि देवासुरविभागकृदिति" पूर्वोक्तेः। तत्सम्बद्धा मेषादिकन्यान्ता राशय उत्तरगोलः। तत्स्थः सूर्यो मेषादौ मेषादिप्रदेशे देवानां मेरोरुत्तराग्रवर्त्तिनां दर्शनं षण्मासानन्तरं प्रथमदर्शनं याति गच्छति प्राप्नोतीत्यर्थः विषुवद्वृत्तस्य तत्क्षितिजत्वात्। एवं दैत्यानां मेरोर्दक्षिणाग्रवर्तिनामित्यसुराणामित्युक्तेनैवोक्तम्। तद्भागसञ्चरो दैत्यभागे समुद्रादिदक्षिणविभागस्थास्तुलादिमीनान्ता राशयो दक्षिणगोलस्तत्र सञ्चरो गमनं यस्य स तादृशसूर्यस्तुलादिप्रदेशे तुकाराददर्शनानन्तरं प्रथमदर्शनं प्राप्नोतीत्यर्थः तेषामपि विषुवद्वृत्तक्षितिजत्वात्" रङ्गना०। "देवासुरा विषुवति क्षितिजस्थं दिवाकरम्। पश्यन्त्यन्योन्यमेतेषां वामसव्ये दिनक्षपे" सू० सि०।

"विषुवति काले देवदैत्याः सूर्यं क्षितिजस्थं पश्यन्ति विषुवद्वृत्तस्य तयोः स्वस्थानाद्भूगोलमध्यस्थत्वेन क्षितिजत्वात्। एतेषां देवदैत्यानामन्योन्यं परस्परं ये वामसव्ये अपसव्यसव्ये ते क्रमेण दिनक्षपे दिवसरात्री भवतः। अयं भावः देवानां भूमेरुत्तरभागः स्वकीयत्वात् सव्यमतो दैत्यानामपसव्यं स्वकीयत्वाभावात्। एवं दैत्यानां भूमेर्दक्षिणभागः स्वकीयत्वात् सव्यं देवानां स्वकीयत्वाभावादपसव्यमतो दैत्यानां वामसव्यावुत्तरदक्षिणगोलौ देवानां क्रमेण दिनरात्री। देवानां वामसव्यभागौ दक्षिणोत्तरगोलौ दैत्यानां दिनरात्री। अन्यथाऽन्योन्यं वामसव्ये इत्यनयोः सङ्गतार्थानुपपत्तेः। अतएव पूर्वं मेषादाबित्याद्युक्तमिति" रङ्गना०। अथ पूर्वश्लोकोत्तरार्धस्य सन्दिग्धत्वशङ्कया दिनपूर्वापरार्धकथनच्छलेन तदर्थं श्लोकाभ्यां विशदयति।

"मेषादावुदितः सूर्यस्त्रीन् राशीनुदगुत्तरम्। सञ्चरन् प्रागहर्मध्यं पूरयेन्मेरुवासिनाम्। कर्कादीन् सञ्चरंस्तद्वदह्नः पश्चार्धमेव सः। तुलादींस्त्रीन्मृगादींश्च तद्वदेव सुरद्विषाम्" सू० सि०।

"मेषादौ विषुवद्वृत्तस्थक्रान्तिवृत्तभागे रेवत्यासन्न उदितो दर्शनतां प्राप्तः सूर्य उत्तरं यथोत्तरं क्रमेणेति यावत् त्रीन् राशीनुदगुत्तरभागस्थान् मेषवृषमिथुनान् सञ्चरन्नतिक्रामन् सन् मेरुस्थानां देवानां प्रागहर्मध्यं प्रथमं दिनस्यार्धं पूरयेत् पूर्णं करोतीत्यर्थः। मिथुनान्ते सूर्ये मेरुस्थानां मध्याह्नं स्यादिति फलितार्थः। कर्कादीन् त्रीन्

राशीन् कर्कसिंहकन्यांस्तद्वत् क्रमेणेत्यर्थः। अतिक्रामन् सन् स सूर्यो दिवसस्य पश्चार्धमपरदलम्। एवकारोऽन्ययोगव्यवच्छेदार्थः। पूरयेत्। कन्यान्ते सूर्ये मेरुस्थानां सूर्यास्तो भवतीति फलितार्थः। अथ दैत्यानामाह। तुलादीनिति। सुरद्विषां मेरोर्दक्षिणाग्रवर्त्तिनां दैत्यानामित्यर्थः। तुलादींस्त्रीन् राशींस्तुलावृश्चिकधनुराख्यान् मृगादींस्त्रीन् राशीन् मकरकुम्भमीनांस्तद्वत् क्रमेणातिक्रामन् सूर्यः। चकारस्तुलामृगादिक्रमेण पूर्वापरार्धमित्यर्थकः। एवकार उक्तातिरिक्तव्यवच्छेदार्थः। दिनं पूरयतीत्यर्थः। धनुरन्ते सूर्ये दैत्यानां मध्याह्नं मीनान्ते सूर्ये सूर्यास्तो भवतीति फलितार्थः” रङ्गना०।

“अतो दिनक्षपे तेषामन्योन्यं हि विपर्ययात्। अहोरात्रप्रमाणं च भानोर्भगणपूरणात्। दिनक्षपार्धमेतेषामयनान्ते विपर्ययात्। उपर्य्यात्मानमन्योन्यं कल्पयन्ति सुरासुराः” सू० सि०।

“एतेषां देवदैत्यानामयनान्तेऽयनसन्धौ विपर्ययाद्व्यत्यासाद्दिनक्षपार्धं दिनार्धं रात्र्यर्धं च भवति। यत्र देवानां मध्याह्नं रात्र्यर्धं च तत्र दैत्यानां क्रमेण रात्र्यर्धमध्याह्ने यत्र च दैत्यानां मध्याह्नरात्र्यर्धे तत्र देवानां क्रमेण रात्र्यर्धमध्याह्ने इति फलितार्थः। अत्र हेतुमाह। उपरीति। देवदैत्या मेरोरुत्तरदक्षिणाग्रवर्तिनोऽन्योन्यमात्मानं स्वस्वपरिभाग ऊर्द्धभागे कल्पयन्त्यङ्गीकुर्वन्ति। वस्तुतो भूमेर्गोलत्वेन सर्वत्र तुल्यत्वान्निरपेक्षोर्ध्वाधोभागयोरनुपपत्तेः। तथा च देवा दैत्यापेक्षयोर्ध्वस्थत्वं मन्यमाना दैत्यानधःस्थानङ्गीकुर्वन्ति। दैत्याश्च देवस्थानापेक्षयोर्ध्वस्थं मन्यमाना देवानधः कुर्वन्तीति तात्पर्यार्थः। एवं च देवदैत्ययोर्विपरीतावस्थानाद्दिनरात्र्योर्वैपरीत्यं युक्तमेवेति भावः” रङ्गना०।

ततश्च उत्तरगोलरूपमेषादिराशिषट्कस्थरविकालस्य देवानां दिनत्वे दक्षिणगोलरूपतुलादिराशिषट्कस्थरविकालस्य रात्रित्वे स्थितेऽपि मकरादिकानां देवानां दिनरात्रिकालतोक्तिः श्रौतस्मार्त्तकर्म्मोपयोगिनी रवेः स्वाश्रितस्थानापेक्षया दक्षिणोत्तरतो गत्या वा तथा व्यवह्रियते इति बोध्यम् अतएव सि० शि० उक्तं यथा “दिनं दिनेशस्य यतोऽत्र दर्शने तमी तमोहन्तुरदर्शने सति। कुपृष्ठगानां द्युनिशं यथा नृणां तथा पितॄणां शशिपृष्ठवासिनाम्”। इदानीं संहितोक्तस्याभिप्रायमाह। “दिनं सुराणामयनं यदुत्तरं निशेतरत् सांहितिकैः प्रकीर्तितम्। दिनोन्मुखेऽर्के दिनमेव तन्मतं निशा तथा तत्फलकीर्त्तनाय तत्। द्वन्द्वान्तमारोहति यैः क्रमेण तैरेव हस्तैरवरोहतीनः। यत्रैव दृष्टः प्रथमं स देवैस्तत्रैव तिष्ठन् न विलोक्यते किम्?”। “सांहितिकानां न चेदयमभिप्रायस्तर्हि मेषादेरूर्द्ध्वं मिथुनान्तं यावद्यैर्हस्तैरेवारोहणं कुर्वन्नपि देवैर्दृष्टस्तैरेव पुनरवरोहणं कुर्वन् किं न दृश्यत इति” प्रमिता०।

एतदभिप्रायेणैव श्रीपत्युक्तं यथा

“मृगादिराशिद्वयभानुभोगात् षडर्त्तवः स्युः शिशिरो वसन्तः। ग्रीष्मश्च वर्षा च शरच्च तद्वद्धेमन्तनामा कथितोऽत्र षष्ठः॥ शिशिरपूर्वमृतुत्रयमुत्तरं ह्ययनमाहुरहश्च तदामरम्। भवति दक्षिणमन्यदृतुत्रयं निगदिता रजनी मरुतां च सा। गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबन्धपूर्वम्। सौम्यायने कर्म शुभं विधेयं यद्गर्हितं तत् खलु दक्षिणे च”।

एतदभिप्रायेणैव च सत्यव्रतः—“देवतारामवाप्यादिप्रतिष्ठोदङ्मुखे रवौ। दक्षिणाभिमुखे कुर्वन् न तत्फलमवाप्नुयात्” सूर्यस्य दक्षिणोत्तराभिमुख्येनैव प्रतिष्ठादौ विधिनिषेधावाह। अतएव सू० सि० “भानोर्मकरसंक्रान्तेः षण्मासा उत्तरायणम्। कर्कादेस्तु तथैव स्यात् षण्मासा दक्षिणायनम्” इत्युक्तम्। अतः स्वापेक्षया दक्षिणोत्तरगमनादेव दक्षिणोत्तरायणव्यवहारो भाक्तो दक्षिणोत्तरगोलयोर्गत्या तु मुख्य इत्यवधेयम्। तेन भाक्ते दक्षिणायन एव प्रतिष्ठादिनिषेधः न मुख्ये” प्रागुक्तसत्यव्रतवाक्यैकवाक्यत्वात्। विवाहव्रतबन्धादिचूडासंस्कारदीक्षणम्। यज्ञगृहप्रवेशादिदानार्च्चनप्रतिष्ठनम्। पुण्यानि यानि कर्म्माणि वर्ज्जयेद्दक्षिणायने” म० त० भविष्यपु०। तत्रापवादः कालमा० वैखानसंहितायां यथा “मातृभैरववाराहनरसिंहत्रिविक्रमाः। महिषासुरहन्त्री च स्थाप्या वै दक्षिणायने”

४तदभिमानिदेवताभेदे च “धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्” गीता। “आतिवाहिकास्तल्लिङ्गात्” शा० भा० धूमादीनां तदभिमानिदेवतापरत्वसमर्थनात्। ५दक्षिणभागस्थे प्राणे च “दक्षिणस्थो यदा प्राणस्तदा स्यात् दक्षिणायनम्। पञ्चभूतात्मकास्तत्र सूक्ष्माः पञ्चोदयन्ति वै” पदार्थादर्शधृतप्रयोगसारवाक्यम्।

दक्षिणारण्य न० दक्षिणस्थमरण्यम्। अरण्यभेदे।

दक्षिणारुस् पु० दक्षिणे भागे अरुर्व्रणमस्य । व्याधक्षतदक्षिणाङ्के मृगे अमरः । [ऋत्विजि ।

दक्षिणार्ह पु० दक्षिणामर्हति अर्ह–अण् उप०स० । दक्षिण्ये

दक्षिणावत् त्रि० दक्षिणा+अस्त्यर्थे मतुप् मस्य वः । दक्षिणायुक्ते अन्वाहार्य्यशब्दे २२० पृ० दृश्यम् ।

दक्षिणावर्त्त त्रि० दक्षिणे आवर्त्तते आ+वृत–अच् । १दक्षिणे आवर्त्तयुक्ते । "मृत्कुम्भवालुकारन्ध्रपिधानरचनेच्छया । दक्षिणावर्त्तशङ्खोऽयं हन्त चूर्णीकृतो मया" सा० द० । दक्षिणा दक्षिणस्यां वर्त्तते वृत–अच् । २दक्षिणदिक्स्थे त्रि० । "दक्षिणावर्त्त आदित्य एतन्मे मनसि स्थितम्" भा० भी० १२० अ० ।

दक्षिणावर्त्तकी स्त्री दक्षिणावर्त्त इव कायति कै–क गौरा० ङीष् । वृश्चिकाल्यां राजनि० । [दक्षिणानिले ।

दक्षिणावह पु० दक्षिणा दक्षिणदिक्तो वहति वह–अच् ।

दक्षिणावृत् त्रि० दक्षिणा आवर्त्तते वृत-क्विप् । दक्षिणावर्त्ते । "तस्मादिमं लोकं दक्षिणावृत् समुद्रः पर्य्येति" शत० ब्रा० ७।१।१।१२ ।

दक्षिणाशापति पु० ६त० । १यमराजे २भौमे ग्रहे च ।

दक्षिणाहि अव्य० दक्षिण+आहि दूरे । दूरस्थे दक्षिणभागे

दक्षिणित् अव्य० दक्षिणात्+वेदे पृषो० । दक्षिणस्यामित्यादर्थे । "प्रदक्षिणिद्धरिवो मा वि वेनः" ऋ०५।३६।४।

दक्षिणीय पु० दक्षिणामर्हति छ । दक्षिणार्हे ऋत्विजि । "क्रतवः संप्रवर्त्तन्तां दक्षिणीयैर्द्विजातिभिः । दक्षिणाश्चोपवर्त्तन्तां यथार्थं सत्रयाजिनाम्" हरिवं० ४६ अ० ।

दक्षिणेन अव्य०दक्षिण+एनप् । सप्तम्यर्थवृत्तौ १दक्षिणस्यां दिशि २दक्षिणदेशे च । एनपा योगे पञ्चमीवाधिका द्वितीया । "तत्रागारं धनपतिगृहान् दक्षिणेनास्मदीयम्" मेघ० । "जग्मतुर्दण्डकारण्यं दक्षिणेन परन्तपौ" भा० व० २७८ अ० ।

दक्षिणेर्म्मन् पु० दक्षिणे ईर्म्म व्रणं यस्य नि० अनिच् । व्याधक्षतव्रणयुक्तदक्षिणाङ्के मृगे अमरः । "मृगयुमिव मृगोऽथ दक्षिणेर्म्मा" भट्टिः ।

दक्षिण्य त्रि० दक्षिणामर्हति यत् । दक्षिणार्हे ऋत्विगादौ "दक्षिण्यदिष्टं क्षतमार्त्विजीनैः" भट्टिः ।

दक्षेश्वर न०काशीस्थे दक्षप्रजापतिस्थापिते लिङ्गभेदे तत्कथा "यत्त्वया स्थापितं लिङ्गमेतद्दक्षेश्वराभिधम् । अस्य संसेवनात् पुंसामपराधसहस्रकम् । क्षमिष्येऽहं न सन्देहस्तस्मात् पूज्यमिदं जनैः" काशीख०८८अ० ।

दगा(का)र्गल न० दकस्य जलद्वाररोधस्यार्गलमिव मध्यपाठे पृषो०कमध्यपाठस्तु सम्यक् । ५४ अ० वराहसंहितोक्ते निर्जलदेशे जलोपलब्धिसाधने उपायभेदे । यथा "धर्म्यं यशस्यं च वदाम्यतोऽहं दगा(का)र्गलं येन जलोपलब्धिः । पुंसां यथाङ्गेषु सिरास्तथैव क्षितावपि प्रोन्नतनिम्नसंस्थाः । एकेन वर्णेन रसेन चाम्भश्च्युतं नभस्तो वसुधाविशेषात् । नानारसत्वं बहुवर्णतां च गतं परीक्ष्यं क्षितितुल्यमेव । पुरुहूतानलयमनिर्ऋतिवरुणपवनेन्दुशङ्करा देवाः । विज्ञातव्याः क्रमशः प्राच्यादीनां दिशां पतयः । दिक्पतिसंज्ञाश्च सिरा नवमी मध्ये महासिरानाम्नी । एताभ्योऽन्याः शतशो विनिःसृता नामभिः प्रथिताः । पातालादूर्द्ध्वसिराः शुभाश्चतुर्दिक्षु संस्थिता याश्च । कोणदिगुत्था न शुभाः सिरानिमित्तान्यतो वक्ष्ये । यदि वेतसोऽम्बुरहिते देशे हस्तैस्त्रिभिस्ततः पश्चात् । सार्द्धे पुरुषे तोयं वहति सिरा पश्चिमा तत्र । चिह्नमपि चार्द्धपुरुषे मण्डूकः पाण्डुरोऽथ मृत् पीता । पुटभेदकश्च तस्मिन् पाषाणो भवति तोयमधः । जम्ब्वाश्चोदग्घस्तैस्त्रिभिः सिराधो नरद्वये पूर्वा । मृल्लोहगन्धिका पाण्डुराथ पुरुषेऽत्र मण्डूकः । जम्बूवृक्षस्य प्राग् वल्मीको यदि भवेत् समीपस्थः । तस्माद्दक्षिणपार्श्वे सलिलं पुरुषद्वये स्वादु । अर्द्धपुरुषे च मत्स्यः पारावतसन्निभश्च पाषाणः । मृद्भवति चात्र नीला दीर्घं कालं बहु च तोयम् । पश्चादुदुम्बरस्य त्रिभिरेव करैर्नरद्वये सार्द्धे । पुरुषे सितोऽहिरश्माञ्जनोपमोऽधः सिरा सुजला । उदगर्जुनस्य दृश्यो वल्मीको यदि ततोऽर्जुनाद्धस्तैः । त्रिभिरम्बु भवति पुरुषैस्त्रिभिरर्द्धसमन्वितैः पश्चात् । श्वेता गोधार्द्धनरे पुरुषे मृद्धूसरा ततः कृष्णा । पीता सिता ससिकता ततो जलं निर्दिशेदमितम् । वल्मीकोपचितायां निर्गुण्ड्यां दक्षिणेन कथितकरैः । पुरुषद्वये सपादे स्वादु जलं भवति चाशोष्यम् । रोहितमत्स्योऽर्द्धनरे मृत् कपिला पाण्डुरा ततः परतः । सिकता सशर्कराथ क्रमेण परतो भवत्यम्भः । पूर्वेण यदि बदर्या वल्मीको दृश्यते जलं पश्चात् । पुरुषैस्त्रिभिरादेश्यं श्वेता मृद्गोधिकार्द्धनरे । सपलाशा बदरी चेद् दिश्यपरस्यां ततो जलं भवति । पुरुषत्रये सपादे पुरुषेऽत्र च दुण्डुभिश्चिह्नम् । बिल्वोदुम्बरयोगे विहाय हस्तत्रयं तु याम्येन । पुरुषैस्त्रिभिरम्बु भवेत् कृष्णो

ऽर्धनरे च मण्डूकः। काकोदुम्बरिकायां वल्मीको दृश्यते सिरा तस्मिन्। पुरुषत्रये सपादे पश्चिमदिक्स्था वहति सा च। आपाण्डुपीतिका मृद् गौरसवर्णश्च भवति पाषाणः। पुरुषार्धे कुमुदनिभो दृष्टिपथं मूषिको याति। जलपरिहीने देशे वृक्षः कम्पिल्लको यदा दृश्यः। प्राच्यां हस्तत्रितये वहति सिरा दक्षिणा प्रथमम्। मृन्नीलोत्पलवर्णा कापोती चैव दृश्यते तस्मिन्। हस्तेऽजगन्धिमत्स्यो भवति पयोऽल्पं च सक्षारम्। शोणाकतरोरपरोत्तरे सिरा द्वौ करावतिक्रम्य। कुमुदा नाम सिरा सा पुरुषत्रयवाहिनी भवति। आसन्नो वल्मीको दक्षिणपार्श्वे विभीतकस्य यदि। अध्यर्धे तस्य सिरा पुरुषे ज्ञेया दिशि प्राच्याम्। तस्यैव पश्चिमायां दिशि वल्मीको यदा भवेद्धस्ते। तत्रोदग्भवति सिरा चतुर्भिरर्धाधिकैः पुरुषैः। श्वेतो विश्वम्भरकः प्रथमे पुरुषे तु कुङ्कुमाभोऽश्मा। अपरस्यां दिशि च सिरा नश्यति वर्षत्रयेऽतीते। सकुशासित ऐशान्यां वल्मीको यत्र कोविदारस्य। मध्ये तयोर्नरैरर्धपञ्चमैस्तोयमक्षोभ्यम्। प्रथमे पुरुषे भुजगः कमलोदरसन्निभो मही रक्ता। कुरुविन्दः पाषाणश्चिह्नान्येतानि वाच्यानि। यदि भवति सप्तपर्णो वल्मीकवृतस्तदुत्तरे तोयम्। वाच्यं पुरुषैः पञ्चभिरत्रापि भवन्ति चिह्नानि। पुरुषार्धे मण्डूको हरितो हरितालसन्निभा भूश्च। पाषाणोऽभ्रनिकाशः सौम्या च सिरा शुभाम्बुवहा। सर्वेषां वृक्षाणामधःस्थितो दर्दुरो यदा दृश्यः। तस्माद्धस्ते तोयं चतुर्भिरर्धाधिकैः पुरुषैः। पुरुषे तु भवति नकुलो नीला मृत् पीतिका ततः श्वेता। दर्दुरसमानरूपः पाषाणो दृश्यते चात्र। यद्यहिनिलयो दृश्यो दक्षिणतः संस्थितः करञ्जस्य। हस्तद्वये तु याम्ये पुरुषत्रितये तु सिरा सार्धे। कच्छपकः पुरुषार्धे प्रथमं चोद्भिद्यते सिरा पूर्वा। उदगन्या स्वादुजला हरितोऽश्माधस्ततस्तोयम्। उत्तरतश्च मधूकादहिनिलयः पश्चिमे तरोस्तोयम्। परिहृत्य पञ्च हस्तान् अर्धाष्टमपौरुषे प्रथमम्। अहिराजः पुरुषेऽस्मिन् धूम्रा धात्री कुलत्थवर्णोऽश्मा। माहेन्द्री भवति सिरा वहति सफेनं सदा तोयम्। वल्मीकः स्निग्धो दक्षिणेन तिलकस्य सकुशदूर्वश्चेत्। पुरुषैः पञ्चभिरम्भो दिशि वारुण्यां सिरा पूर्वा। सर्पावासः पश्चाद् यदा कदम्बस्य दक्षिणेन जलम्। परतो हस्तत्रितयात् षड्भिः पुरुषैस्तुरीयोनैः। कौबेरी चात्र सिरा वहति जलं लोहगन्धि चाक्षोभ्यम्। कनकनिभो मण्डूको नरमात्रे मृत्तिका पीता। वल्मीकसंवृतो यदि तालो वा भवति नारिकेलो वा। पश्चात् षड्भिर्हस्तैर्नरैश्चतुर्भिः सिरा याम्या। याम्येन कपित्थस्याहिसंश्रयश्चेदुदग्जलं वाच्यम्। सप्त परित्यज्य करान् खात्वा पुरुषान् जलं पञ्च। कर्बुरकोऽहिः पुरुषे कृष्णा मृत् पुटभिदपि च पाषाणः। श्वेता मृत् पश्चिमतः सिरा ततश्चोत्तरा भवति। अश्मन्तकस्य वामे बदरी वा दृश्यतेऽहिनिलयो वा। षड्भिरुदक् तस्य करैः सार्धे पुरुषत्रये तोयम्। कूर्मः प्रथमे पुरुषे पाषाणो धूसरः ससिकता मृत्। आदौ सिरा च याम्या पूर्वोत्तरतो द्वितीया च। वामेन हरिद्रतरोर्वल्मीकश्चेत्ततो जलं पूर्वे। हस्तत्रितये पुरुषैः सत्र्यंशैः पञ्चभिर्भवति। नीलो भुजगः पुरुषे मृत् पीता मरकतोपमश्चाश्मा। कृष्णा भूः प्रथमं वारुणी सिरा दक्षिणेनान्या। जलपरिहीने देशे दृश्यन्तेऽनूपजानि चिह्नानि। वीरणदूर्वा मृदवश्च यत्र तस्मिन् जलं पुरुषे। भार्गी त्रिवृता दन्ती सूकरपादी च लक्ष्मणा चैव। नवमालिका च हस्तद्वयेऽम्बु याम्ये त्रिभिः पुरुषैः। स्निग्धाः प्रलम्बशाखा वामनविटपद्रुमाः समीपजलाः। सुषिरा जर्जरपत्रा रूक्षाश्च जलेन सन्त्यक्ताः। तिलकाम्रातकवरुणकभल्लातकबिल्वतिन्दुकाङ्कोलाः। पिण्डारशिरीषाञ्जनपरुषकावञ्जुलातिबलाः। एते यदि सुस्निग्धा वल्मीकैः परिवृतास्ततस्तोयम्। हस्तैस्त्रिभिरुत्तरतश्चतुर्भिरर्धेन च नरस्य। अतृणे सतृणा यस्मिन् सतृणे तृणवर्जिता मही यत्र। तस्मिन् सिरा प्रदिष्टा वक्तव्यं वा धनं तस्मिन्। कण्टक्यकण्टकानां व्यत्यासेऽम्भस्त्रिभिः करैः पश्चात्। खात्वा पुरुषत्रितयं त्रिभागयुक्तं धनं वा स्यात्। नदति मही गम्भीरं यस्मिंश्चरणाहता जलं तस्मिन्। सार्धैस्त्रिभिर्मनुष्यैः कौबेरी तत्र च सिरा स्यात्। वृक्षस्यैका शाखा यदि विनता भवति पाण्डुरा वा स्यात्। विज्ञातव्यं शाखातले जलं त्रिपुरुषं खात्वा। फलकुसुमविकारो यस्य तस्य पूर्वे सिरा त्रिभिर्हस्तैः। भवति पुरुषैश्चतुर्भिः पाषाणोऽधः क्षितिः पीता। यदि कण्टकारिका तु कण्टकैर्विना दृश्यते सितैः कुसुमैः। तस्यास्तलेऽम्बु वाच्यं त्रिभिर्नरैरर्धपुरुषे च। खर्जूरी द्विशिरस्का यत्र भवेज्जलविवर्जिते देशे। तस्याः पश्चिमभागे निर्देश्यं त्रिपुरुषे वारि।

यदि भवति कर्णिकारः सितकुसुमः स्यात्पलाशवृक्षो वा । सव्येन तत्र हस्तद्वयेऽम्बु पुरुषत्रये भवति । ऊष्मा यस्यां धात्र्यां धूमो वा तत्र वारि नरयुग्मे । निर्देष्टव्या च सिरा महता तोयप्रवाहेण । यस्मिन् क्षेत्रोद्देशे जातं सस्यं विनाशमुपयाति । स्निग्धमतिपाण्डुरं वा महासिरा नरयुगे तत्र । मरुदेशे भवति सिरा यथा तथातः परं प्रवक्ष्यामि । ग्रीवा करभाणामिव भूतलसंस्थाः सिरा भान्ति । पूर्वोत्तरेण पीलोर्यदि वल्मीको जलं भवति पश्चात् । उत्तरगमना च सिरा विज्ञेया पञ्चभिः पुरुषैः । चिह्नं दर्दुर आदौ मृत्कपिलातः परं भवेद्धरिता । भवति च पुरुषेऽधोऽश्मा तस्य तले वारि निर्देश्यम् । पीलोरेव प्राच्यां वल्मीकोऽतोऽर्धपञ्चमैर्हस्तैः । दिशि याम्यायां तोयं वक्तव्यं सप्तभिः पुरुषैः । प्रथमे पुरुषे भुजगः सितासितो हस्तमात्रमूर्त्तिश्च । दक्षिणतो वहति सिरा सक्षारं भूरि पानीयम् । उत्तरतश्च करीरादहिनिलये दक्षिणे जलं स्वादु । दशभिः पुरुषैर्ज्ञेयं पुरुषे पीतोऽत्र मण्डूकः । रोहीतकस्य पश्चादहिवासश्चेत्त्रिभिः करैर्याम्ये । द्वादश पुरुषान् खात्वा सक्षारा पश्चिमेन सिरा । इन्द्रतरोर्वल्मीकः प्राग्दृश्यः पश्चिमे सिरा हस्ते । खात्वा चतुर्दश नरान् कपिला गोधा नरे प्रथमे । यदि वा सुवर्णनाम्नस्तरोर्भवेद्वामतो भुजङ्गगृहम् । हस्तद्वये तु याम्ये पञ्चदशनरावसानेऽम्बु । क्षारं पयोऽत्र नकुलोऽर्धमानवे ताम्रसन्निभश्चाश्मा । रक्ता च भवति वसुधा वहति सिरा दक्षिणा तत्र । बदरीरोहितवृक्षौ सम्पृक्तौ चेद्विनापि वल्मीकम् । हस्तत्रयेऽम्बु पश्चात् षोड़शभिर्मानवैर्भवति । सुरसं जलमादौ दक्षिणा सिरा वहति चोत्तरेणान्या । पिष्टनिभः पाषाणो मृच्छ्वेता वृश्चिकोऽर्धनरे । सकरीरा चेद्बदरी त्रिभिः करैः पश्चिमेन तत्राम्भः । अष्टादशभिः पुरुषैरैशानी बहुजला च सिरा । पीलुसमेता बदरी हस्तत्रयसम्मिते दिशि प्राच्याम् । विंशत्या पुरुषाणामशोष्यमम्भोऽत्र सक्षारम् । ककुभकरीरावेकत्र संयुतौ यत्र ककुभबिल्वौ वा । हस्तद्वयेऽम्बु पश्चान्नरैर्भवेत्पञ्चविंशत्या । वल्मीकमूर्द्धनि यदा दूर्वा कुशाश्च पाण्डुराः सन्ति । कूपो मध्ये देयो जलमत्र नरैकविंशत्या । भूमिःकदम्बकयुता वल्मीके यत्र दृश्यते दूर्वा । हस्तत्रयेण याम्ये नरैर्जलं पञ्चविंशत्या । वल्मीकत्रयमध्ये रोहीतकपादपो यदा भवति । नानावृक्षैः सहितस्त्रिभिर्जलं तत्र वक्तव्यम् । हस्तचतुष्के मध्यात् षोड़शभिश्चाङ्गुलैरुदग्वारि । चत्वारिंशत्पुरुषान् खात्वाश्मातः सिरा भवति । ग्रन्थिप्रचुरा यस्मिञ्छमी भवेदुत्तरेण वल्मीकः । पश्चात्पञ्चकरान्ते शतार्धसङ्ख्यैर्नरैः सलिलम् । एकस्थाः पञ्च यदा वल्मीका मध्यमो भवेच्छ्वेतः । तस्मिन् सिरा प्रदिष्टा नरषष्ट्या पञ्चवर्जितया । सपलाशा यत्र शमी पश्चिमभागेऽम्बु मानवैः षष्ट्या । अर्धनरेऽहिः प्रथमं सवालुका पीतमृत् परतः । वल्मीकेन परिवृतः श्वेतो रोहीतको भवेद्यस्मिन् । पूर्वेण हस्तमात्रे सप्तत्या मानवैरम्बु । श्वेता कण्टकबहुला यत्र शमी दक्षिणेन तत्र पयः । नरपञ्चकसंयुतया सप्तत्याहिर्नरार्धे च । मरुदेशे यच्चिह्नं न जाङ्गले तैर्जलं विनिर्देश्यम् । जम्बूवेतसपूर्वे ये पुरुषास्ते मरौ द्विगुणाः । जम्बूस्त्रिवृता मूर्वा शिशुमारी सारिवा शिवा श्यामा । वीरुधयो वाराही ज्योतिष्मती च गरुडवेगा । सूकरिकामाषपर्णीव्याघ्रपदाश्चेति यद्यहेर्निलये । वल्मीकादुत्तरतस्त्रिभिः करैस्त्रिपुरुषे तोयम् । एतदनूपे वाच्यं जाङ्गलभूमौ तु पञ्चभिः पुरुषैः । एतैरेव निमित्तैर्मरुदेशे सप्तभिः कथयेत् । एकनिभा यत्र मही तृणतरुवल्मीकगुल्मपरिहीना । तस्यां यत्र विकारो भवति धरित्र्यां जलं तत्र । यत्र स्निग्धा निम्ना सवालुका सानुनादिनी वा स्यात् । तत्रार्धपञ्चमैर्वारि मानवैः पञ्चभिर्यदि वा । स्निग्धतरूणां याम्ये नरैश्चतुर्भिर्जलं प्रभूतं च । तरुगहनेऽपि हि विकृतो यस्तस्मात्तद्वदेव वदेत् । नमते यत्र धरित्री सार्धे पुरुषेऽम्बु जाङ्गलानूपे । कीटा वा यत्र विनालयेन बहवोऽम्बु तत्रापि । उष्णा शीता च मही शीतोष्णाम्भस्त्रिभिर्नरैः सार्धैः । इन्द्रधनुर्मत्स्यो वा वल्मीको वा चतुर्हस्तात् । वल्मीकानां पङ्क्त्यां यद्येकोऽभ्युच्छ्रितः सिरा तदधः । शुष्यति न रोहते वा सस्यं यस्यां च तत्राम्भः । न्यग्रोधपलाशोदुम्बरैः समेतैस्त्रिभिर्जलं तदधः । वटपिप्पलसमवाये तद्वद्वाच्यं सिरा चोदक् । आग्नेये यदि कोणे ग्रामस्य पुरस्य वा भवति कूपः । नित्यं स करोति भयं दाहं च समानुषं प्रायः । नैरृतकोणे बालक्षयं वनिताभयं च वायव्ये । दिक्त्रयमेतत्त्यक्त्वा शेषास्तु शुभावहाः कूपाः। सारस्वतेन मुनिना दगा(का)र्गलं यत्कृतं तदवलोक्य । आर्याभिः कृतमेतद्वृत्तैरपि

मानवं वक्ष्ये। स्निग्धा यतः पादपगुल्मवल्ल्यो निश्छिद्रपत्राश्च ततः सिरास्ति। पद्मक्षुरोशीरकुलाः सगुण्ड्राः काशाः कुशा वा नलिका नलो वा। खर्जूरजम्ब्वर्जुनवेतसाः स्युः क्षीरान्विता वा द्रुमगुल्मवल्ल्यः। छत्रेभनागाः शतपत्रनीपाः स्युर्नक्तमालाश्च ससिन्धुवाराः। विभीतको वा मदयन्तिका वा यत्रास्ति तस्मिन् पुरुषत्रयेऽम्भः। स्यात्पर्वतस्योपरि पर्वतोऽन्यस्तत्रापि मूले पुरुषत्रयेऽम्भः। या मौञ्जकैः काशकुशैश्च युक्ता नीला च मृद् यत्र सशर्करा च। तस्यां प्रभूतं सुरसं च तोयं कृष्णाथवा यत्र च रक्तमृद्वा। सशर्करा ताम्रमही कषायं क्षारं धरित्री कपिला करोति। आपाण्डुरायां लवणं प्रदिष्टं मिष्टं पयो नीलवसुन्धरायाम्। शाकाश्वकर्णार्जुनबिल्वसर्जाः श्रीपर्ण्यरिष्टाधवशिंशपाश्च। छिद्रैश्च पर्णैर्द्रुमगुल्मवल्ल्यो रूक्षाश्च दूरेऽम्बु निवेदयन्ति। सूर्याग्निभस्मोष्ट्रखरानुवर्णा या निर्जला सा वसुधा प्रदिष्टा। रक्ताङ्कुराः क्षीरयुताः करीरा रक्ता धरा चेज्जलमश्मनोऽधः। वैदूर्यमुद्गाम्बुदमेचकाभा पाकोन्मुखोदुम्बरसन्निभा वा। भृङ्गाञ्जनाभा कपिलाथ वा या ज्ञेया शिला भूरिसमीपतोया। पारावतक्षौद्रघृतोपमा वा क्षौमस्य वस्त्रस्य च तुल्यवर्णा। या सोमवल्ल्याश्च समानरूपा साप्याशु तोयं कुरुतेऽक्षयं च। ताम्र समेता पृषतैर्विचित्रैरापाण्डुभस्मोष्ट्रखरानुरूपा। भृङ्गोपमाङ्गुष्ठिकपुष्पिका वा सूर्याग्निवर्णा च शिला वितोया। चन्द्रातपस्फटिकमौक्तिकहेमरूपा याश्चेन्द्रनीलमणिहिङ्गुलुकाञ्जनाभाः। सूर्योदयांशुहरितालनिभाश्च याः स्युस्ताः शोभना मुनिवचोऽत्र च वृत्तमेतत्। एता ह्यभेद्याश्च शिलाः शिवाश्च यक्षैश्च नागैश्च सदाभिजुष्टाः। येषां च राष्ट्रेषु भवन्ति राज्ञां तेषामवृष्टिर्न भवेत्कदाचित्। भेदं यदा नैति शिला तदानीं पालाशकाष्ठैः सह तिन्दुकानाम्। प्रज्वालयित्वानलमग्निवर्णा सुधाम्बुसिक्ता प्रविदारमेति। तोयं शृतं मोक्षकभस्मना वा यत्सप्तकृत्वः परिषेचनं तत्। कार्यं शरक्षारयुतं शिलायाः प्रस्फोटनं वह्निवितापितायाः। तक्रकाञ्जिकसुराः सकुलत्था योजितानि बदराणि च तस्मिन्। सप्तरात्रमुषितान्यभितप्तां दारयन्ति हि शिलां परिषेकैः। नैम्बं पत्रं त्वक् च नालं तिलानां सापामार्गं तिन्दुकं स्याद्गुडूची। गोमूत्रेण स्रावितः क्षार एषां षट्कृत्वोऽतस्तापितो भेद्यतेऽश्मा। आर्कं पयो हुडुविषाणमषीसमेतं पारावताखुशकृता च युतं प्रलेपः। टङ्कस्य तैलमथितस्य ततोऽस्य पानं पश्चाच्छितस्य न शिलासु भवेद्विघातः। क्षारे कदल्या मथितेन युक्ते दिनोषिते पायितमायसं यत्। सम्यक् शितं चाश्मनि नैति भङ्गं न चान्यलोहेष्वपि तस्य कौण्ठ्यम्। पाली प्रागपरायताम्बु सुचिरं धत्ते न याम्योत्तरा कल्लोलैरवदारमेति मरुता सा प्रायशः प्रेरितैः। तां चेदिच्छति सारदारुभिरपां सम्पातमावारयेत् पाषाणादिभिरेव वा प्रतिचयं क्षुण्णं द्विपाश्वादिभिः। ककुभवटाम्रप्लक्षकदम्बैः सनिचुलजम्बूवेतसनीपैः। कुरुवकतालाशोकमधूकैर्बकुलविमिश्रैश्छादिततीराम्। द्वारं च नैर्वाहिकमेकदेशे कार्यं शिलासञ्चितवारिमार्गम्। कोशस्थितं निर्विवरं कपाटं कृत्वा ततः पांशुभिरावपेत्तम्। अञ्जनमुस्तोशीरैः सराजकोशातकामलकचूर्णैः। कतकफलसमायुक्तैर्योगः कूपे प्रदातव्यः। कलुषं कटुकं लवणं विरसं सलिलं यदि वाशुभगन्धि भवेत्। तदनेन भवत्यमलं सुरसं सुसुगन्धि गुणैरपरैश्च युतम्। हस्तो मघानुराधापुष्यधनिष्ठोत्तराणि रोहिण्यः। शतभिषगित्यारम्भे कूपानां शस्यते भगणः। कृत्वा वरुणस्य बलिं वटवेतसकीलकं सिरास्थाने। कुसुमैर्गन्धैर्धूपैः संपूज्य निधापयेत् प्रथमम्। मेघोद्भवं प्रथममेव मया प्रदिष्टं ज्येष्ठामतीत्य बलदेवमतादि दृष्ट्वा। भौमं दगा(का)र्गलमिदं कथितं द्वितीयं सम्यग्वराहमिहिरेण मुनिप्रसादात्"।

दग्ध त्रि० दह–क्त। कृतदाहे भस्मीकृते "दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः" सा० द०। "सर्वं स्याद् दग्धमामिषम्" कर्मलोचनम्। देहस्याग्निदाहभेदाः सुश्रुते उक्ता यथा

"अत ऊर्द्धमितरथा दग्धलक्षणं वक्ष्यामः। तत्र स्निग्धं रूक्षं वा श्रित्य द्रव्यमग्निर्दहति। अग्निसन्तप्तो हि स्नेहः सूक्ष्मसिरानुसारित्वात्त्वगादीननुप्रविश्याशु दहति। तस्मात् स्नेहदग्धेऽधिका रुजो भवन्ति। तत्र प्लुष्टं दुर्दग्धं सम्यग्दग्धमतिदग्धञ्चेति चतुर्विधमग्निदग्धम्। तत्र यद्विवर्णं प्लुष्यतेऽतिमात्रं तत्प्लुष्टम्। यत्रोत्तिष्ठन्ति स्फोटास्तीव्राश्चोषदाहरागपाकवेदनाश्चिराच्चोपशाम्यन्ति तद्दुर्दग्धम्। सम्यग्दग्धमनवगाढं तालफलवर्णं सुसंस्थितं पूर्वलक्षणयुक्तञ्च। अतिदग्धे मांसावलम्बनं गात्रविश्लेषः सिरास्नायुसन्ध्यस्थिव्यापादनमतिमात्रं ज्वरदाहपिपासामूर्च्छाश्चोपद्रवा भवन्ति व्रणश्चास्य चिरेण रोहति रूढश्च विवर्णो भवति। तदेतच्चतुर्विध-

अग्निदग्धलक्षणमात्मकर्म्मप्रसाधकं भवति । भवति चात्र । अग्निना कोपितं रक्तं भृशं जन्तोः प्रकुप्यति । ततस्तेनैव वेगेन पित्तमप्यभ्युदीर्य्यते । तुल्यवीर्य्ये उभे ह्येते रसतो द्रव्यतस्तथा । तेनास्य वेदनास्तीव्राः प्रकृत्या च विदह्यते । स्फोटाः शीघ्रं प्रजायन्ते ज्वरस्तृष्णा च वर्द्धते” सुश्रु० ।

तिथिभेदेन युक्ते २चन्द्राश्रितराशौ पु० । “मृगसिंहौ तृतीयायां प्रथमायां तुलामृगौ । पञ्चम्यां बुधराशी द्वौ सप्तम्यां चापचन्द्रभे । नवम्यां सिंहकीटाख्यावेकादश्यां गुरोर्गृहे । वृषमीनौ त्रयोदश्यां दग्धसंज्ञास्तमी गृहाः । दग्धसद्मनि यत् कर्म कृतं सर्वं विनश्यति” ज्यो० त० । ३वारभेदेन युक्ते नक्षत्रभेदे न० । “याम्यं त्वाष्ट्रं वैश्वदेवं धनिष्ठार्य्यमणं ज्येष्ठान्त्यं रवेर्दग्धभं स्यात्” ज्यो०त० । ४वारभेदयुक्ते तिथिभेदे स्त्री “एकादशी चेन्दुवारे द्वादशी चार्कवासरे । षष्ठी वृहस्पतेर्वारे तृतीया बुधवासरे । अष्टमी शुक्रवारे च नवमी शनिवासरे । पञ्चमी भौमवारे च दग्धयोगाः प्रकीर्त्तिताः” नारदः । “द्वादश्येकादशी नागगौरीस्कन्दवसुष्वपि नवम्यां दग्धयोगाख्या भानुवारादितः क्रमात्” वसिष्ठः । ५सूर्य्यचन्द्राक्रान्तराशिभेदेन युक्ते तिथिभेदे स्त्री राजमार्त्तण्डे “द्वितीया मीनधनुषोश्चतुर्थी वृषकुम्भयोः । मेषकर्कटयोः षष्ठी कन्यामिथुनकेऽष्टमी । दशमी वृश्चिके सिंहे द्वादशी मकरे तुले । आद्या धनुःषु शफरीषु परा द्वितीया एकान्तरे दिनकरे तिथयः प्रदग्धाः । कार्मुके च तथा कुम्भे मेषे युग्मे हरौ घटे । एषु शुक्ला द्वितीयाद्याः दग्धाः कृष्णा झषादिषु । राशौ चन्द्रस्य च रवेः स्थित्या वाच्यं फलं बुधैः । याः प्रोक्तास्तिथयो दग्धाः मेषादिषु च राशिषु । शुक्लास्ता विषमे राशौ समे कृष्णाः प्रकीर्त्तिताः । एभिर्जातो न जीवेत यदि शक्रसमो भवेत् । विवाहे विधवा नारी यात्रायां मरणं भवेत् । निष्फलं कृषिवाणिज्यं विद्यारम्भे च मूर्खता । गृहप्रवेशे भङ्गः स्याच्चूडायां मरणं ध्रुवम् । कन्यादाने फलं नास्ति व्रतदाने च निष्फले । शुभकर्माणि सर्वाणि नैव कुर्य्याद्विचक्षणः” । उत्तरराशिषु चन्द्रस्थित्या दग्धायां व्यक्तत्वं यथा “षष्ठी मेषकुलीरयोर्हिमकरे कन्यायुगे चाष्टमी सिंहे वृश्चिकराशिगे च दशमी तौली मृगे द्वादशी । चापे चाथ झषे द्विका यदि वृषे कुम्भे चतुर्थी यदा दग्धाख्यास्तिथयो वदन्ति मुनयस्त्याज्या सदा कर्मसु” ज्यो० त० । दग्धादिवस्त्राद्यंशभेदे फलभेदः मु० चि० उक्तो यथा “वस्त्राणां नवभागकेषु च चतुष्कोणेऽमरा राक्षसा मध्यत्र्यंशगता नरास्तु सदशे पार्श्वे च मध्यांशयोः । दग्धे वा स्फुटितेऽम्बरे नवतरे पङ्कादिलिप्ते न सद्रक्षोंऽशे, नृसुरांशयोः शुभमसत् सर्वांशके प्रान्ततः” तदुक्तं श्रीपतिना “कर्दमकज्जलगोमयलिप्ते वाससि दग्धवति स्फुटिते वा । चिन्त्यमिदं नवधाभिहितेऽस्मिन्निष्टमनिष्टफलञ्च सुधीभिः । निवसन्त्यमरा हि वस्त्रकोणे मनुजाः पार्श्वदशान्तमध्ययोश्च । अपरेऽपि च रक्षसां त्रयोऽंशे शयने चासनपादुकासु चैवम् । भोगप्राप्तिर्देवतांशे, नरांशे पुत्राप्तिः, स्याद्राक्षसांशे च मृत्युः । प्रान्ते सर्वांशेष्वनिष्टं मया स्यात् प्लुष्टे वस्त्रे नूतने साध्वसाधु” । ६सूर्य्याधिष्ठितदिशि स्त्री । ७दग्धरुहायां वृक्षे च स्त्री ८संतप्ते त्रि० । [स्त्रियां जातित्वात् ङीष् ।

दग्धकाक पुंस्त्री० दग्ध इव काकः । द्रोणकाके हेमच० ।

दग्धमन्त्र पु० नित्यकर्म्म० । “वह्निर्वायुसमायुक्तो यस्य मन्त्रस्य मूर्द्धनि । सप्तधा दृश्यते तन्तु दग्धमन्त्रं प्रचक्षते” तन्त्रसारोक्ते मन्त्रभेदे । [२८४६ पृ० तद्रघदाहकथा दृश्या ।

दग्धरथ पु० दग्धो रथोऽस्य । चित्ररथगन्धर्वे चित्ररथशब्दे

दग्धरुह पु० दग्धोऽपि रोहति रुह–क । १तिलकवृक्षे, २भस्मरोहायाञ्च स्त्री राजनि० ।

दग्धिका स्त्री कुत्सिता दग्धा कुत्सिते कन् । (पोड़ाभात) १दग्धान्ने भरतः । दग्ध+स्वार्थे क । अतइत्वम् । २दग्धरुहावृक्षे राजनि० ।

दग्धेष्टका स्त्री कर्म्म० । झामके (झामा) हारा० ।

दघ त्यागे पालने च भ्वा० पर० सक० सेट् इदित् । दङ्घति अदङ्घीत् । ददङ्घ ।

दघ घातने स्वा० पर० सक० सेट् । दघ्नोति अदाघीत्-अदघीत् । ददाघ देघतुः । गतौ दिवा० निघण्टुः । दघ्यति इति भेदः । “पश्चा स दघ्या यो अघस्य” ऋ० १।१२३।५। “दघ्याः गच्छतु पुरुषव्यत्ययः” भा० । “पश्चाद्दघ्यरथ्यो विभागे” ऋ० ७।५६।२१ ।

दण्ड दण्डपातने दमने च अद० चुरा० उभ० सक० सेट् । दण्डयति ते अददण्डत्-त । दण्डः दण्ड्यः दण्डनीयः दण्डितः । ग्रहणपूर्वकशासने द्विक० । “प्रजाः शतं दण्डयति राजा । इहा० गौणे कर्म्मणि लकारादयः । गर्गाः शतं दण्ड्यन्ते । दण्डशब्दे उदा० “अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्” मनुः ।

दण्ड पुंन० दण्ड–अच् कर्मणि पुंसि घ वा दमेर्डो वा। १लगुड़े (लाटि) ख्याते पदार्थे २विप्रदण्डोद्यमे „अक्रमतिकष्टं निपातने। "परस्य दण्डं नोद्यच्छेत् क्रुद्धो नैव निपातयेत्" मनुः। दण्डधारणगुणाः "स्खलतः संप्रतिष्ठानं शत्रूणाञ्च निषेधनम्। अवष्टम्भनमायुष्यं भयघ्नं दण्डधारणम्" वैद्यकम्।

भिन्दिपालाङ्गदण्डलक्षणं हेमा० प० लक्षणसमुच्चयोक्तं भिन्दिपालशब्दे वक्ष्यते तदनुसारेणान्योऽपि दण्डो विधेयः। छत्राङ्गदण्डस्तु "समवृत्तदण्डयुक्तम्" वृ० सं० ७४ अ० उक्तः। चामराङ्गदण्डस्तु तत्रैव ७२अ० उक्तो यथा "अध्यर्द्धहस्तप्रमितोऽस्य दण्डो हस्तोऽथ वा रत्निसमोऽथवान्यः। काष्ठाच्छुभात् काञ्चनरूप्यगुप्ताद् रत्नैर्विचित्रैश्च हिताय राज्ञाम्"।

ब्रह्मचारिधार्य्ये काष्ठमये लगुड़ाकारे २पदार्थे, वर्णभेदेन तत्प्रमाणादि मनुनोक्तं यथा "ब्राह्मणो वैल्वपालाशौ क्षत्रियो वाटखादिरौ। पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः। केशान्तिको ब्राह्मणस्य दण्डः कार्य्यः प्रमाणतः। ललाटसम्मितो राज्ञः स्यात्तु नासान्तिको विशः। ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः। अनुद्वेगकरा नृणां सत्वचो नाग्निदूषिताः। प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम्। प्रदक्षिणं परीत्याग्निं चरेद्भैक्ष्यं यथाविधि"।

संन्यासिनां दण्डधारणे विशेषादि नि० सि० उक्तो यथा "हारीतः "कुटीचको बहूदको हंसश्चैव तृतीयकः। चतुर्थः परमो हंसो यो यः पश्चात् स उत्तमः"। आद्यः पुत्रादिना कुटिं कारयित्वा तत्र गृहे वा वसन् काषायवासाः शिखोपवीतत्रिदण्डवान् बन्धुषु स्वगृहे वा भुञ्जान आत्मज्ञो भवेत् एतदत्यन्ताशक्तपरम् द्वितीयस्तु बन्धून् हित्वा सप्तागाराणि भैक्ष्यं चरन् पूर्वोक्तवेषः स्यात्। हंसस्तु पूर्वोक्तवेषोऽप्येकदण्डः "सकन्तु वैणवं दण्डं धारयेन्नित्यमादरादिति" स्कान्दात् विष्णुरपि "यज्ञोपवीतं दण्डं च वस्त्रं जन्तुनिवारणम्। तावान् परिग्रहः प्रोक्तो नान्यो हंसपरिग्रहः"। चतुर्थोऽपि स्कान्दे "परहंसस्त्रिदण्डं च रज्जु" गोवालनिर्मिताम्। शिखां यज्ञोपवीतं च नित्यं कर्म परित्यजेत्। अयमप्येकदण्डः एव। ये तु शिखोपवीतादित्यागनिषेधास्ते कुटीचकादिपराः। यत्तु मेधातिथिः "आसन्न कुक्षयो दण्डाच्छायदेकेन वर्त्तयेदिति" तदपि तत्परमेव। यच्चात्रिः "चतुर्था भिक्षवः प्रोक्ताः सर्वे चैव त्रिदण्डिनः" इति तद्वाग्दण्डादिपरं न यष्टिपरम् "वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च। यस्यैते नियता दण्डाः स त्रिदण्डीति चोच्यते" मनूक्तेः। तस्मात् परमहंसस्यैकदण्ड एव। सोऽप्यविदुषः विदुषस्तु सोऽपि नास्ति "न दण्डं न शिखां नाच्छादनं न भैक्षं चरति परमहंस" इति महोपनिषदुक्तेः "ज्ञानमेवास्य दण्ड" इति वाक्यशेषाच्च यत्तु यमः "काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः। स याति नरकान् घोरान् महारौरवसंज्ञकानिति" तद्वैराग्यं विना जीवनार्थकृतसन्न्यासपरम् "एकदण्डं समाश्रित्य जीवन्ति बहवो नराः। नरके रौरवे घोरे कर्मत्यागात् पतन्ति ते" इति स्मृतेः यच्चाश्वमेधिके "एकदण्डी त्रिदण्डी वा शिखामुण्डित एव वा। काषायमात्रसारोऽपि यतिः पूज्यो युधिष्ठिरेति" तत्रापि पूर्वोक्तव्यवस्था ज्ञेया"।

भावे अच्; ३दमने "वाग्दण्डश्च मनोदण्डः कायदण्डस्तथैव च" मनुः। "शरणागतसंत्राणं भूतानामप्यहिंसनम्। बहिर्वेदि च दानञ्च दण्डमित्यभिधीयते" भा० मोक्षधर्मोक्ते ४शरणागतत्राणादित्रिके। दण्ड इवाचरति दण्ड+क्विप् ततो भावे घञ्। ५दण्डतुल्यस्थितौ (दाँड़ान) शारसुन्दरी दण्ड–यथायथं कर्मभावकरणादौ अच्। ६प्रकाण्डे ७अश्वे ८कोणे ९मन्थने १०सैन्ये ११भूमिमानभेदे (काठा) "हस्तैश्चतुर्भिर्भवतीह दण्डः" लीला०। गोचर्मशब्दे २६९५पृ० दृश्यम् "दशहस्तेन दण्डेन" इति पाठान्तरम्। १२सूर्य्यपारिषदभेदे १३यमे १४अभिमाने च मेदि०। १५दण्डाकारे व्यूहभेदे हेमच० व्यूहशृङ्गाटकशब्दे २७६९ पृ० दृश्यम्। १६इक्ष्वाकुनृपपुत्रभेदे। तत्कथा जनस्थानशब्दे ३०२४पृ० दृश्या। स्वार्थे क। तत्रार्थे। "दृष्ट्वा कथाम्बरीषय दण्डकस्येति ते त्रयः। यश्चकार महात्मा वै दण्डकारण्यमुत्तमम्" हरिवं० १०अ०।

षष्टिपलात्मके दिनषष्टिभागरूपे घटिकापरपर्य्याये १७कालभेदे तज्ज्ञानोपायश्च घटीयन्त्रशब्दे उक्तप्रायः। श्रीपतिनाप्युक्तो यथा

"शुल्वस्य दिग्भिर्विहितं पलैर्यत् षडङ्गुलोच्चं द्विगुणायतास्यम्। तदम्भसा षष्टिपलैः प्रपूर्यं पात्रं घटार्द्धप्रतिमं घटी स्यात्। सत्र्यंशमाषत्रयनिर्मिता या हेम्नः शलाका चतुरङ्गुला स्यात्। विद्धं तया प्राक्तनमत्र पात्रं प्रपूर्य्यते नाडिकयाम्बुना तत्" "षष्टिदण्डात्मिका०

यात्र तिथेर्निष्क्रमणं परे''। ''दण्डैकरजनीयोगः'' ति॰त॰।

१८व्यूहभेदे तल्लक्षणभेदादि अग्निपु॰२४१ अ॰ यथा

''मण्डलासंहतो भोगो दण्डास्ते बहुधा शृणु। तिर्य्यग्वृत्तिस्तु दण्डः स्यात् भोगोऽन्या वृत्तिरेव च। मण्डलः सर्वतो वृत्तिः पृथग्वृत्तिरसंहतः। प्रदरो दृढकोऽसह्यः चापो वैकुक्षिरेव च। प्रतिष्ठः सुप्रतिष्ठश्च श्येनो विजयसञ्जयौ। विशालो विजयः सूची स्थूणाकर्णचमूमुखौ। सर्पास्यो वलयश्चैव दण्डभेदाश्च दुर्जयाः। अतिक्रान्तः प्रतिक्रान्तः कक्षाभ्याञ्चैकपक्षतः। अतिक्रान्तस्तु पक्षाभ्यां त्रयोऽन्ये तद्विपर्य्यये। पक्षोरस्यैरतिक्रान्तः प्रतिष्ठोऽन्यो विपर्य्ययः। स्थूणापक्षो धनुःपक्षो द्विस्थूणो दण्ड ऊर्द्ध्वगः। द्विगुणोऽयन्त्वतिक्रान्तपक्षोऽन्यस्य विपर्य्ययः। द्विचतुर्दण्ड इत्येते ज्ञेया लक्षणतः क्रमात्। गोमूत्रिका हि सञ्चारी शकटो मकरस्तथा''

१९राज्ञामुपायभेदे चतुर्थोपाये। ते चोपायाः सामदानभेददण्डाः सर्व्वत्र प्रसिद्धाः तु अग्निपु॰ २४० अ॰। अन्येऽप्युपायाः सामादिप्रयोगविषयाश्चोक्ता यथा

''साम दानं च भेदश्च दण्डोपेक्षेन्द्रजालकम्। मायोपायाः सप्त परे निक्षिपेत् साधनाय तान्। चतुर्विधं स्मृतं साम उपकारानुकीर्त्तनात्। मिथः सम्बन्धकथनं मृदुपूर्वं च भाषणम्। आयातिदर्शनं वाचा तवाहमिति चार्पणम्। यः सम्प्राप्तधनोत्सर्ग उत्तमाधममध्यमः। प्रतिदानं तदा तस्य गृहीतस्यानुमोदनम्। द्रव्यदानमपूर्वं च स्वयंग्राहप्रवर्त्तनम्। देयस्य प्रतिमोक्षश्च दानं पञ्चविधं स्मृतम्। स्नेहरागापनयनं संहर्षोत्पादनं तथा। मिथो भेदश्च भेदज्ञैर्भेदश्च त्रिविधः स्मृतः। वधोऽर्थहरणं चैव परिक्लेशस्त्रिधा दमः। प्रकाशश्चाप्रकाशश्च लोकद्विष्टान् प्रकाशतः''। ''दण्डस्य दर्शनादुद्दुष्टान्, पुत्रभ्रात्रादि, सामतः। दानभेदैस्समूहस्थान् योधान् जनपदादिकान्। सामन्ताटविकान् भेददण्डाभ्यामपराद्धकान्। देवताप्रतिमानान्तः पूजयान्तर्गतैर्नरैः। पुमान् स्त्रीवस्त्रसंवीतो निशि चाद्भुतदर्शनः। वेतालोल्कापिशाचानां शिवानां च स्वरूपिता। कामतो रूपधारित्वं शस्त्राग्न्यश्माम्बुवर्षणम्। तमोऽनिलोऽनलो मेघ इति माया ह्यमानुषी। जघान कीचकं भीम आस्थितः स्त्रीस्वरूपताम्। अन्याये व्यसने युद्धे प्रवृत्तस्यानिवारणम्। उपेक्षेयं स्मृता भ्रातोपेक्षितश्च हिडिम्बया। मेघान्धकारवृष्ट्यग्निपर्वताद्भुतदर्शनम्। दूरस्थानां च सैन्यानां दर्शनं ध्वजशालिनाम्। छिन्नपाटितभिन्नानां संस्रुतानां च दर्शनम्। इतीन्द्रजालं द्विषतां भीत्यर्थमुपकल्पयेत्''। २०विष्णौ पु॰''धनुर्द्धरो धनुर्वेदो दण्डो दमयिता दमः'' विष्णु सं॰।२१शिवे ''शत्रुन्दमाय दण्डाय पर्णचीरपटाय च'' भा॰ शा॰ २८६ अ॰। २२दण्डाकारे ऋजौ सूर्य्यपरिवेषभेदे ''परिघस्तु प्रतिसूर्य्ययोर्दण्डस्त्वृजुरिन्द्रचापनिभः'' वृ॰ स॰ १९ अ॰। २३दण्डवत्स्थिते रविकरादेः संघाते ''रविकिरणजलदमरुतां सङ्घातो दण्डवत्स्थितो दण्डः। स विदिक्स्थितो नृपाणामशुभो दिक्षु द्विजातीनाम्। शस्त्रभयातङ्ककरो दृष्टः प्राङ्मध्यसन्धिषु दिनस्य। शुक्लाद्यो विप्रादीन् यदभिमुखस्तां निहन्ति दिशम्'' वृ॰ अ॰।

२४राज्ञः प्रजाशासनभेदे तत्स्वरूपादि भा॰शा॰१२१ अ॰

''शृणु कौरव्य! यो दण्डो व्यवहारो यथा च सः। यस्मिन् हि सर्वमायत्तं स दण्ड इह केवलः। धर्मस्याख्या महाराज! व्यवहार इतीर्य्यते। तस्य लोपः कथं न स्याल्लोकेष्ववहितात्मनः। इत्येवं व्यवहारस्य व्यवहारत्वमिष्यते। अपि चैतत् पुरा राजन्! मनुना प्रोक्तमादितः। सुप्रणीतेन दण्डेन प्रियाप्रियसमात्मना। प्रजा रक्षति यः सम्यक् धर्म्म एव स केवलः। यथोक्तमेतद्वचनं प्रागेव मनुना पुरा। यन्मयोक्तं मनुष्येन्द्र! ब्रह्मणो वचनं महत्। प्रागिदं वचनं प्रोक्तमतः प्राग्वचनं विदुः। व्यवहारस्य चाख्यानाद्व्यवहार इहोच्यते। दण्डे त्रिवर्गः सततं सुप्रणीते प्रवर्त्तते। दैवं हि परमो दण्डो रूपतोऽग्निरिवोत्थितः। नीलोत्पलदलश्यामश्चतुर्दंष्ट्रश्चतुर्भुजः। अष्टपान्नैकनयनः शङ्कुकर्णोर्द्ध्वरोमवान्। जटी द्विजिह्वस्ताम्रास्यो मृगराजतनुच्छदः। एतद्रूपं बिभर्त्युग्रं दण्डो नित्यं दुराधरः। असिर्द्धनुर्गदा शक्तिस्त्रिशूलं मुद्गरः शरः। मुषलं परशुश्चक्रं पाशो दण्डर्ष्टितोमराः। सर्वप्रहरणीयानि सन्ति यानीह कानिचित्। दण्ड एव स सर्वात्मा लोके चरति मूर्त्तिमान्। भिन्दन् छिन्दन् रुजन् कृन्तन् दारयन् पाटयंस्तथा। घातयन्नभिधावंश्च दण्ड एव चरत्युत। असिर्विशसनो धर्म्मस्तीक्ष्णवर्म्मा दुराधरः। श्रीगर्भो विजयः शास्ता व्यवहारः सनातनः। शास्त्रं ब्राह्मणमन्त्राश्च शास्ता प्राग्वदतां वर!। धर्मपालोऽक्षरो देवः सत्यगो नित्यगोऽग्रजः। असङ्गो रुद्रतनयो मनुर्ज्येष्ठः शिवङ्करः। नामान्येतानि दण्डस्य कीर्त्तितानि

युधिष्ठिर !। दण्डो हि भगवान् विष्णुर्दण्डो नारायणः प्रभुः। शश्वद्रूपं महद्बिभ्रन्महापुरुष उच्यते। तथोक्ता ब्रह्मकन्येति लक्ष्मीर्वृत्तिः सरस्वती। दण्डनीतिर्जगद्धात्री दण्डो हि बहुविग्रहः। अर्थानर्थौ सुखं दुःखं धर्म्माधर्म्मौ बलाबले। दौर्भाग्यं भागधेयञ्च पुण्यापुण्ये गुणागुणौ। कामाकामावृतुर्म्मासः शर्व्वरी दिवसः क्षणः। अप्रमादः प्रमादश्च हर्षक्रोधौ शमो दमः। दैवं पुरुषकारश्च मोक्षामोक्षौ भयाभये। हिंसाहिंसे तपो यज्ञः संयमोऽथ विषाविषम्। अन्तश्चादिश्च मध्यञ्च कृत्यानाञ्च प्रपञ्चनम्। मदः प्रमादो दर्पश्च दम्भो धैर्य्यं नयानयौ। अशक्तिः शक्तिरित्येवं मानस्तम्भौ व्ययाव्ययौ। विनयश्च विसर्गश्च कालाकालौ च भारत !। अनृतं ज्ञानिता सत्यं श्रद्धाश्रद्धे तथैव च। क्लीवता व्यवसायश्च लाभालाभौ जयाजयौ। तीक्ष्णता मृदुता मृत्युरागमानागमौ तथा। विरोधश्चाविरोधश्च कार्य्याकार्य्ये बलाबले। असूया चानसूया च धर्म्माधर्म्मौ तथैव च। अपत्रपानपत्रपे ह्रीश्च सम्पद्विपत्पदम्। तेजः कर्म्माणि पाण्डित्यं वाक्शक्तिस्तत्त्वबुद्धिता। एवं दण्डस्य कौरव्य ! लोकेऽस्मिन् बहुरूपता। न स्याद्यदीह दण्डो वै प्रमथेयुः परस्परम्। भयाद्दण्डस्य नान्योन्यं घ्नन्ति चैव युधिष्ठिर !। दण्डेन रक्ष्यमाणा हि राजन्नहरहः प्रजाः। राजानं वर्द्धयन्तीह तस्माद्दण्डः परायणम्। व्यवस्थापयति क्षिप्रमिमं लोकं नरेश्वर !। सत्ये व्यवस्थितो धर्म्मो ब्राह्मणेष्ववतिष्ठते। धर्म्मयुक्ता द्विजश्रेष्ठा वेदयुक्ता भवन्ति च। बभूव यज्ञो वेदेभ्यो यज्ञः प्रीणाति देवताः। प्रीताश्च देवता नित्यमिन्द्रे परिवदन्त्यपि। अन्नं ददाति शक्रश्चाप्यनुगृह्णन्निमाः प्रजाः। प्राणाश्च सर्व्वभूतानां नित्यमन्ने प्रतिष्ठिताः। तस्मात् प्रजाः प्रतिष्ठन्ते दण्डो जागर्त्ति तासु च। एवंप्रयोजनश्चैव दण्डः क्षत्रियतां गतः। रक्षन् प्रजाः स जागर्त्ति नित्यं सुविहितोऽक्षरः। ईश्वरः पुरुषः प्राणः सत्त्वं चित्तं प्रजापतिः। भूतात्मा जीव इत्येवं नामभिः प्रोच्यतेऽष्टभिः। अददद्दण्डमेवास्मै ध्रुवमैश्वर्य्यमेव च। बलेन यस्य संयुक्तः सदा पञ्चविधात्मकः। कुलं बहुधनामात्याः प्राज्ञाः प्रोक्ता बलानि तु। आहार्य्यमष्टकैर्द्रव्यैर्बलमन्यद्युधिष्ठिर !। हस्तिनोऽश्वा रथाः पत्तिर्नावो विष्टिस्तथैव च। दैशिकाश्चाविकाश्चैव तदष्टाङ्गं बलं स्मृतम्। अथ वाऽङ्गस्य युक्तस्य रथिनो हस्तियायिनः। अश्वारोहाः पदाताश्च मन्त्रिणो रसदाश्च ये। भिक्षुकाः प्राड्विवाकाश्च मौहूर्त्ता दैवचिन्तकाः। कोषो मित्राणि धान्यञ्च सर्व्वोपकरणानि च। सप्तप्रकृति चाष्टाङ्गं शरीरमिह यद्विदुः। राज्यस्य दण्डमेवाङ्गं दण्डः प्रभव एव च। ईश्वरेण प्रयत्नेन कारणात् क्षत्रियस्य च। दण्डो दत्तः समानात्मा दण्डो हीदं सनातनम्। राज्ञां पूज्यतमो नान्यो यथा धर्म्मः प्रदर्शितः। ब्रह्मणा लोकरक्षार्थं स्वधर्म्मस्थापनाय च। भर्त्तृप्रत्यय उत्पन्नो व्यवहारस्तथाऽपरः। तस्माद्यः सहितो दृष्टो भर्त्तृप्रत्ययलक्षणः। व्यवहारस्तु वेदात्मा वेदप्रत्यय उच्यते। मौलश्च नरशार्दूल ! शास्त्रोक्तश्च तथाऽपरः। उक्तो यश्चापि दण्डोऽसौ भर्त्तृप्रत्ययलक्षणः। ज्ञेयो नः स नरेन्द्रस्थो दण्डप्रत्ययलक्षणः। दण्डप्रत्ययदृष्टोऽपि व्यवहारात्मकः स्मृतः। व्यवहारः स्मृतो यश्च स वेदविषयात्मकः। यश्च वेदप्रसूतात्मा स धर्म्मो गुणदर्शनः। धर्म्मप्रत्यय उद्दिष्टो यथाधर्म्मं कृतात्मभिः। व्यवहारः प्रजागोप्ता ब्रह्मदिष्टो युधिष्ठिर !। त्रीन् धारयति लोकान् वै सत्यात्मा भूतिवर्द्धनः। यश्च दण्डः स दृष्टो नो व्यवहारः सनातनः। व्यवहारश्च दृष्टो यः स वेद इति निश्चितम्। यश्च वेदः स वै धर्म्मो यश्च धर्म्मः स सत्पथः। ब्रह्मा पितामहः पूर्व्वं बभूवाथ प्रजापतिः। लोकानां स हि सर्व्वेषां ससुरासुररक्षसाम्। समनुष्योरगवतां कर्त्ता चैव स भूतकृत्। ततोऽन्यव्यवहारोऽयं भर्त्तृप्रत्ययलक्षणः। तस्मादिदमथोवाच व्यवहारनिदर्शनम्। माता पिता च भ्राता च भार्य्या चैव पुरोहितः। नादण्ड्यो विद्यते राज्ञो यः स धर्म्मेण तिष्ठति।" तत्रैव १५ अ०।

"दण्डः शास्ति प्रजाः सर्व्वा दण्ड एवाभिरक्षति। दण्डः सुप्तेषु जागर्त्ति दण्डं धर्म्मं विदुर्ब्बुधाः। धर्म्मं संरक्षते दण्डस्तथैवार्थं जनाधिप !। कामं संरक्षते दण्डस्त्रिवर्गो दण्ड उच्यते। दण्डेन रक्ष्यते धान्यं धनं दण्डेन रक्ष्यते। एवंविद्वन्नुपादत्स्व भावं पश्यस्व लौकिकम्। राजदण्डभयादेके पापाः पापं न कुर्व्वते। यमदण्डभयादेके परलोकभयादपि। परस्परभयादेके पापाः पापं न कुर्व्वते। एवं सांसिद्धिके लोके सर्व्वं दण्डे प्रतिष्ठितम्। दण्डस्यैव भयादेके न खादन्ति परस्परम्। अन्धे तमसि मज्जेयुर्यदि दण्डो न पालयेत्। यस्माददान्तान्दमयत्यशिष्टान्दण्डयत्यपि। दम-

नाद्दण्डनाच्चैव तस्माद्दण्डं विदुर्बुधाः । वाचा दण्डो ब्राह्मणानां क्षत्रियाणां भुजार्पणम् । दानदण्डाः स्मृता वैश्या निर्दण्डः शूद्र उच्यते । असंमोहाय मर्त्त्यानामर्थसंरक्षणाय च । मर्य्यादा स्थापिता लोके दण्डसंज्ञा विशाम्पते ! । यत्र श्यामो लोहिताक्षो दण्डश्चरति सूद्यतः । प्रजास्तत्र न मुह्यन्ति नेता चेत् साधु पश्यति । ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः । दण्डस्यैव भयादेते मनुष्या वर्त्मनि स्थिताः । नाभीतो यजते राजन् ! नाभीतो दातुमिच्छति । नाभीतः पुरुषः कश्चित्समये स्थातुमिच्छति । नाच्छित्त्वा परमर्माणि नाकृत्वा कर्म दुष्करम् । नाहत्वा मत्स्यघातीव प्राप्नोति महतीं श्रियम् । नाघ्नतः कीर्त्तिरस्तीह न वित्तं न पुनः प्रजाः । इन्द्रो वृत्रवधेनैव महेन्द्रः समपद्यत । य एव देवा हन्तारस्तान् लोकोऽर्चयते भृशम् । हन्ता रुद्रस्तथा स्कन्दः शक्रोऽग्निर्वरुणो यमः । हन्ता कालस्तथा मृत्युर्वायुर्वैश्रवणो रविः । वसवो मरुतः साध्या विश्वे देवाश्च भारत ! । एतान्देवान्नमस्यन्ति प्रतापप्रणता जनाः । न ब्रह्माणं न धातारं न पूषाणं कथञ्चन । मध्यस्थान् सर्वभूतेषु दान्तान् शमपरायणान् । यजन्ते मानवाः केचित् प्रशान्ताः सर्वकर्मसु । न हि पश्यामि जीवन्तं लोके कश्चिदहिंसया । सत्त्वैः सत्त्वा हि जीवन्ति दुर्बलैर्बलवत्तराः । नकुलो मूषिकानत्ति विड़ालो नकुलं तथा । विड़ालमत्ति श्वा राजन् श्वानं व्यालमृगस्तथा । तानत्ति पुरुषः सर्वान् पश्य कालो यथागतः । प्राणस्यान्नमिदं सर्वं जङ्गमं स्थावरञ्च यत् । विधानं दैवविहितं तत्र विद्वान्न मुह्यति । यथा सृष्टोऽसि राजेन्द्र ! तथा भवितुमर्हसि । विनीतक्रोधहर्षा हि मन्दा वनमुपाश्रिताः । विना वधं न कुर्वन्ति तापसाः प्राणयापनम् । उदके बहवः प्राणाः पृथिव्यां च फलेषु च । न च कश्चिन्न तान् हन्ति किमन्यत्प्राणयापनात् । सूक्ष्मयोनीनि भूतानि तर्कगम्यानि कानिचित् । पक्ष्मणोऽपि निपातेन येषां स्यात् स्कन्धपर्य्ययः । ग्रामान्निष्क्रम्य मुनयो विगतक्रोधमत्सराः । वने कुटुम्बधर्माणो दृश्यन्ते परिमोहिताः । भूमिं भित्त्वौषधीश्छित्त्वा वृक्षादीनण्डजान् पशून् । मनुष्यास्तन्वते यज्ञांस्ते स्वर्गं प्राप्नुवन्ति च । दण्डनीत्यां प्रणीतायां सर्वे सिध्यन्त्युपक्रमाः कौन्तेय ! सर्वभूतानां तत्र मे नास्ति संशयः । दण्डश्चेन्न भवेल्लोके विनश्येयुरिमाः प्रजाः । शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः । सत्यं चेदं ब्रह्मणा पूर्वमुक्तं दण्डः प्रजा रक्षति साधुनीतः । पश्याग्नयश्च प्रतिशाम्य भीताः सन्तर्ज्जिता दण्डभयाज्ज्वलन्ति । अन्धन्तम इवेदं स्यान्न प्रज्ञायेत किञ्चन । दण्डश्चेन्न भवेल्लोके विभजन् साध्वसाधुनी । येऽपि सम्भिन्नमर्य्यादा नास्तिका वेदनिन्दकाः । तेऽपि भोगाय कल्पन्ते दण्डेनाशु निपीड़िताः । सर्वो दण्डजितो लोके दुर्लभो हि शुचिर्जनः । दण्डस्य हि भयाद्भीतो भोगायैव प्रवर्त्तते । चातुर्वर्ण्यप्रभेदाय सुनीतिनयनाय च । दण्डो विधात्रा विहितो धर्मार्थावभिरक्षितुम् । यदि दण्डान्न बिभ्येयुर्वयांसि श्वापदानि च । अद्युः पशून्मनुष्यांश्च यज्ञार्थानि हवींषि च । न ब्रह्म चाप्यधीयीत कल्याणीं न दुहेत गाम् । न कन्योद्वहनं गच्छेद्यदि दण्डो न पालयेत् । विश्वग्लोपः प्रवर्त्तेत भिद्येरन् सर्वसेतवः । ममत्वं न प्रजानीयुर्यदि दण्डो न पालयेत् । न संवत्सरसत्राणि तिष्ठेयुरकुतोभयाः । विधिवद्दक्षिणावन्ति यदि दण्डो न पालयेत् । चरेयुर्नाश्रमे धर्मं यथोक्तं विधिमाश्रिताः । न विद्यां प्राप्नुयात् कश्चित् यदि दण्डो न पालयेत् । न चोष्ट्रा न बलीवर्द्दा नाश्वाश्वतरगर्दभाः । युक्ता वहेयुर्यानानि यदि दण्डं न पालयेत् । न प्रेष्या वचनं कुर्य्युर्न बाला जातु कर्हिचित् । तिष्ठेत्पितृमती धर्मे यदि दण्डो न पालयेत् । दण्डे स्थिताः प्रजाः सर्वा दण्डे सर्वं विदुर्बुधाः । दण्डे स्वर्गो मनुष्याणां लोकोऽयञ्च प्रतिष्ठितः । न तत्र कूटं पापं वा वञ्चना वाऽपि दृश्यते । यत्र दण्डः सुविहितश्चरत्यरिविनाशनः । हविः श्वाऽपि लिहेद्दृष्ट्वा दण्डश्चेन्नोद्यतो भवेत् । हरेत्काकः पुरोडाशं यदि दण्डो न पालयेत् ।”

मनुनाप्युक्तं यथा “दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति । दण्डः सुप्तेषु जागर्त्ति दण्डं धर्मं विदुर्बुधाः । समीक्ष्य स धृतः सम्यक् सर्वा रञ्जयति प्रजाः । असमीक्ष्य प्रणीतस्तु विनाशयति सर्वतः । यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः । शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः । अद्यात् काकः पुरोडाशं श्वाऽवलिह्याद्धविस्तथा । स्वाम्यञ्च न स्यात् कस्मिंश्चित् प्रवर्त्तेताधरोत्तरम् । सर्वो दण्डजितो लोको दुर्लभो हि शुचिर्नरः । दण्डस्य हि भयात् सर्वं जगद्भोगाय कल्पते ॥

देवदानवगन्धर्वा रक्षांसि पतगोरगाः । तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीडिताः । दुष्येयुः सर्व्ववर्णाश्च भिद्येरन् सर्व्वसेतवः । सर्व्वलोकप्रकोपश्च भवेद्दण्डस्य विभ्रमात् । यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा । प्रजास्तत्र न मुह्यन्ति नेता चेत् साधु पश्यति । तस्याहुः सम्प्रणेतारं राजानं सत्यवादिनम् । समीक्ष्यकारिणं प्राज्ञं धर्म्मकामार्थकोविदम् । तं राजा प्रणयन् सम्यक् त्रिवर्गेणाभिवर्द्धते । कामात्मा विषमः क्षुद्रो दण्डेनैव निहन्यते । दण्डो हि सुमहातेजा दुर्द्धरश्चाकृतात्मभिः । धर्म्माद्विचलितं हन्ति नृपमेव सबान्धवम् ।" तस्य स्थानानि च मनूक्तानि

"दश स्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत् । त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत् । उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम् । चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च । अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः । सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत् । अधर्म्मदण्डनं लोके यशोघ्नं कीर्त्तिनाशनम् । अस्वर्ग्यञ्च परत्रापि तस्मात्तत् परिवर्जयेत् । अदण्ड्यान् दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् । अयशो महदाप्नोति नरकञ्चैव गच्छति । वाग्दण्डं प्रथमं कुर्य्यात् धिग्दण्डं तदनन्तरम् । तृतीयं धनदण्डन्तु बधदण्डमतः परम् । बधेनापि यदा त्वेतान्निग्रहीतुं न शक्नुयात् । तदैषु सर्व्वमप्येतत् प्रयुञ्जीत चतुष्टयम् ।"

तस्योत्तमाधममध्यमभेदेन परिमाणभेदा मनूक्ता यथा
"पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः । मध्यमः पञ्च विज्ञेयः सहस्रन्त्वेव चोत्तमः" ।

विवादभेदे तद्भेदाः स्मृत्युक्ताः क्रमशो दर्श्यन्ते ।

तत्र ऋणादाने प्रतिवादिनो निह्नवे निह्नुतद्रव्यतुल्यम् । वादिना मिथ्याभियोगे अभियोगविषयधनात् द्विगुणं धनं वादिनो दमः । "निह्नवे भावितो दद्यात् धनं राज्ञे च तत्समम् । मिथ्याभियोगी द्विगुणमभियोगात् धनं हरेत्" याज्ञ० । मनुनात्र विशेष उक्तः यथा

"ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति । अपह्नवे तद्द्विगुणं तन्मनोरनुशासनम्" ।

"यः साधयन्तं छन्देन वेदयेत् धनिकं नृपे । स राज्ञा तच्चतुर्भागं दाप्यस्तस्य च तद्धनम्" मनुः ।

प्रतिपन्नार्थस्य राज्ञा दापने अधमर्णस्य निह्नवाभावे दशकं शतं साधितद्रव्यस्य दशमभागो दमः । "राज्ञाऽधमर्णिको दाप्यः साधिताद्दशकं शतम्" याज्ञ० ।

उपनिधिनिक्षेपादौ नाशभेदे दमभेदो याज्ञ० उक्तो यथा

"भ्रेषश्चेत् मार्गितेऽदत्ते दाप्यो दण्डं च तत्समम् आजीवन् स्वेच्छया दण्ड्यो दाप्यस्तञ्चापि सोदयम् । याचितान्वाहितन्यासनिःक्षेपादिकेष्वयं विधिः" ।

अत्र विशेषो मनुनोक्तो यथा "यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते । तावुभौ चौरवच्छास्यौ दाप्यौ वा तत्समं दमम् । निक्षेपस्यापहर्त्तारं तत्समं दापयेद्दमम् । तथोपनिधिहर्त्तारमविशेषेण पार्थिवः" ।

छद्मना उत्कोचग्रहणे मनुनोक्तो यथा "उपधाभिश्च यः कश्चित् परद्रव्यं हरेन्नरः । ससहायः संहन्तव्यः प्रकाशं विविधैर्वधैः" । "करचरणशिरश्छेदादिभिर्नानाविधैः वधोपायैः स दण्ड्यः" कुल्लू० ।

कौटसाक्ष्ये मनुनोक्तो दमो यथा

"लोभान्मोहाद्भयान्मैत्रात् कामात् क्रोधात्तथैव च । अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते । एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेत् । तस्य दण्डविशेषांस्तु प्रवक्ष्याम्यनुपूर्व्वशः । लोभात् सहस्रं दण्ड्यस्तु मोहात् पूर्व्वन्तु साहसम् । भयाद् द्वौ मध्यमौ दण्डौ मैत्रात् पूर्व्वं चतुर्गुणम् । कामाद्दशगुणं पूर्व्वं क्रोधात्तु त्रिगुणं परम् । अज्ञानात् द्वे शते पूर्णे चाशिष्याच्छतमेव तु । एतानाहुः कौटसाक्ष्ये प्रोक्तान् दण्डान् मनीषिभिः । धर्म्मस्याव्यभिचारार्थमधर्म्मनियमाय च । कौटसाक्ष्यन्तु कुर्व्वाणान् त्रीन् वर्णान् धार्म्मिको नृपः । प्रवासयेद्दण्डयित्वा ब्राह्मणन्तु विवासयेत्" । अत्र विशेषमाह याज्ञ० "यः साक्ष्यं श्रावितोऽन्येभ्यो निह्नुते तत्तमोवृतः । स दाप्योऽष्टगुणं दण्डं ब्राह्मणन्तु विवासयेत्" ।

साक्ष्यादाने दममाह याज्ञ० । "अब्रुवन् हि नरः साक्ष्यमृणं स दशबन्धकम् । राज्ञा सर्व्वं प्रदाप्यः स्यात् षट्चत्वारिंशकेऽहनि । न ददाति च यः साक्ष्यं जानन्नपि नराधमः । स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि" ।

नष्टस्वामिकद्रव्यविषये दमो मनुनोक्तो यथा "ममेदमिति यो ब्रूयात् सोऽनुयोज्यो यथाविधि । संवाद्य रूपसंख्यादीन् स्वामी तद्द्रव्यमर्हति । अवेदयानो नष्टस्य देशं कालञ्च तत्त्वतः । वर्णं रूपं प्रमाणञ्च तत्समं दण्डमर्हति" । "हृतं प्रनष्टं यो द्रव्यं परहस्तादवाप्नुयात् । अनि-

वेद्या नृपो दण्ड्यः स तु षण्णवतिं पणान्" मनुः। "आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा। पञ्चबन्धो दमस्तत्र राज्ञे तेनाविभाविते" याज्ञ०। "पञ्चबन्धः पञ्चमांशः" मिता०।

अस्वामिविक्रये मनुनोक्तो दमो यथा "अवहार्य्यो भवेच्चैव सान्वयः षट्शतं दमम्। निरन्वयोऽनपसरः प्राप्तः स्याच्चौरकिल्विषम्"। "एष परस्वविक्रयी यदि स्वामिनो भ्रात्रादिरूपत्वेन सान्वयः सम्बन्धी भवति तदा षट् पणशतानि अवहार्य्यो दमनीयः यदि पुनः स्वामिनः सम्बन्धी न भवति अनपसरश्च स्यात् अपसरत्यनेनास्मात् सकाशाद्धनमित्यपसरः प्रतिग्रहक्रयादिः स यस्य स्वामिसम्बन्धिपुत्रादेः सकाशात् नास्ति तदा चौरसम्बन्धि पापं तद्दमनीय इत्यर्थः" कुल्लू०। "नान्यदन्येन संसृष्टरूपं विक्रयमर्हति। न चासारं न च न्यूनं न दूरे न तिरोहितम्" मनुः। "कुङ्कुमादिद्रव्यं कुसुम्भादिना मिश्रीकृत्य न विक्रेतव्यं न चासारं सारमित्यभिधाय न च तुलादिना न्यूनं न च परोक्षावस्थितं न च रागादिना स्थापितरूपम् अत्रास्वामिविक्रयसादृश्यादस्वामिविक्रयदम एव स्यात्" कुल्लू०।

दोषविशिष्टकन्यादाने दमो यथा। "यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति। तस्य कुर्य्यान्नृपो दण्डं स्वयं षण्णवतिं पणान्। अकन्येति च यः कन्यां ब्रूयाद्द्वेषेण मानवः। स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन्"।

दत्ताप्रदानिके नारदेनोक्तो दमो यथा "गृह्णात्यदेयं यो लोभाद् यश्चादेयं प्रयच्छति। अदेयदायको दण्ड्यस्तथाऽदत्तप्रतीच्छकः"। तत्सममित्यर्थः।

अभ्युपेत्याशुश्रूषायां "शिष्यन्तमनदुष्टं य आचार्य्यं परित्यजेत्। बलाद्वासयितव्यः स्यात् बधबन्धौ च सोऽर्हति" नारदः। "बधोऽत्र ताड़ना दोषस्याल्पत्वात्" मिता०।

संविद्व्यतिक्रमादौ "गणद्रव्यं हरेद्यस्तु संविदं यस्तु लङ्घयेत्। सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत्" याज्ञ०। "अयञ्च दण्डोऽनुबन्धाद्यतिशये द्रष्टव्यः। अनुबन्धाद्यल्पत्वे तु "यो ग्रामदेशसङ्घानां कृत्वा सत्येन संविदम्। विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत्। निगृह्य दापयेदेनं समयव्यभिचारिणम्। चतुःसुवर्णं षण्णिष्कं शतमानञ्च राजतमिति" मनूक्त निर्वासनचतुःसुवर्णनिष्कशतमानानां चतुर्णामन्यतमो जातिशक्त्याद्यपेक्षया कल्पनीयः" मिता०।

वेतनादाने "भृत्यो नार्त्तो न कुर्य्याद्यो दर्पात् कर्म यथोदितम्। स दण्ड्यः कृष्णलान्यष्टौ न देयं तस्य वेतनम्" मनुः।

द्यूतसमाह्वये "राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपधिदेविनः" याज्ञ० "कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत्। कण्ठेऽक्षमालामासज्य स ह्येषां विनयः स्मृतः" नारदः यानि च मनुवचनानि द्यूतनिषेधपराणि। "द्यूतं समाह्वयञ्चैव यः कुर्य्यात् कारयेत् वा। तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः" इत्यादीनि तान्यपि कूटाक्षदेवनविषयतया राजाध्यक्षसभिकरहितद्यूतविषयतया च योज्यानि" मिता०।

स्वामिपालविवादे मिताक्षरोक्ता दमा यथा "माषानष्टौ तु महिषी सस्यघातस्य कारिणी। दण्डनीया तदर्द्धं तु गौस्तदर्द्धमजाविकम्" याज्ञ०। परसस्यविनाशकारिणी महिषी अष्टौ माषान् दण्डनीया। गौस्तदर्द्धं चतुरो माषान् अजामेषञ्च माषद्वयं दण्डनीयम्। महिष्यादीनां धनसम्बन्धाभावात्तत्स्वामी पुरुषो लक्ष्यते। माषश्चात्र ताम्रिकपणस्य विंशतितमो भागः "माषो विंशतिमो भागः पणस्य परिकीर्त्तितः" इति नारदस्मरणात्। एतच्चाज्ञानविषयम्। ज्ञानपूर्वं तु "पणस्य पादौ द्वौ गां तु द्विगुणं महिषीं तथा। तथाऽजाविकवत्सानाम्पादो दण्डः प्रकीर्त्तितः" इति स्मृत्यन्तरोक्तं द्रष्टव्यम्। यत् पुनर्नारदेनोक्तम् "माषङ्गान्दापयेद्दण्डं द्वौ माषौ महिषीं तथा। तथाजाविकवत्सानां दण्ड स्यादर्द्धमाषिक" इति। तत्पुनः परोहयोग्यमूलावशेषभक्षणविषयम्। अपराधातिशयेन कञ्चिद्दण्डद्वैगुण्यमाह "भक्षयित्वोपविष्टानां यथोक्ताद्द्विगुणो दमः" याज्ञ०। "यदि पशवः परक्षेत्रे सस्यम्भक्षयित्वा तत्रैवानिवारिताः शेरते। तदा यथोक्ताद्दण्डाद्द्विगुणो दण्डो वेदितव्यः। "वसतां द्विगुणः प्रोक्तः सवत्सानाञ्चतुर्गुणः" इति वचनात्। क्षेत्रान्तरे पश्वन्तरे चातिदेशमाह "सममेषां विवीतेऽपि खरोष्ट्रं महिषीसमम्" याज्ञ०। विवीतः प्रचुरतृणकाष्ठो रक्ष्यमाणः परगृहीतो भूप्रदेशस्तदुपघातेऽपीतरक्षेत्रदण्डसमन्दण्डमेषां महिष्यादीनां विद्यात्। खराश्चोष्ट्राश्च खरोष्ट्रं तन्महिषीसमं महिषी यत्र यादृशेन दण्डेन दण्ड्यते तत्र तादृशेनैव दण्डेन खरोष्ट्रमपि प्रत्येकं दण्डनीयम्। सस्योपरोधकत्वे खरोष्ट्रयोः प्रत्येकं महिषीतुल्यत्वाद्दमस्य चापराधानुसारित्वात् खरोष्ट्रमिति समाहारो न विवक्षितः। परसस्यनाशे

गोस्वामिनो दण्ड उक्त इदानीं क्षेत्रस्वामिने फलमप्यसौ दापनीय इत्याह "यावत्सस्यं विनश्येत्तु तावत् स्यात् क्षेत्रिणः फलम्। गोपस्ताड्यस्तु गोमी तु पूर्वोक्तं दण्डमर्हति" याज्ञ०। सस्यग्रहणं क्षेत्रोपचयोपलक्षणार्थम्। यस्मिन् क्षेत्रे यावत्पलालधान्यादिकं गवादिभिर्विनाशितं तावत्क्षेत्रफलमेतावति क्षेत्रे एतावद्भवतीति सामन्तैः परिकल्पितं तत्क्षेत्रस्वामिने गोमी दापनीयः। गोपस्तु ताड़नीय एव न फलं दापनीयः। गोपस्य ताड़नं पूर्वोक्तधनदण्डसहितमेव पालदोषेण सस्यस्य नाशे द्रष्टव्यः। "या नष्टा पालदोषेण गौस्तु सस्यानि नाशयेत्। न तत्र गोमिनो दण्डः पालस्तद्दण्डमर्हतीति" वचनात्। गोमी पुनः स्वापराधेन सस्यनाशं पूर्वोक्तं दण्डमेवार्हतीति न ताड़नम्। फलदानं पुनः सर्वत्र गोमिन एव तत्फलपुष्टमहिष्यादिक्षीरोपभोगद्वारेण तत्क्षेत्रफलभोगत्वात्।

"क्षेत्रविशेषेऽपवादमाह "पथि ग्रामविवीतान्ते क्षेत्रे दोषो न विद्यते। अकामतः कामचारे चौरवद्दण्डमर्हति" याज्ञ०। पथि मार्गसमीपवर्त्तिनि क्षेत्रे ग्रामविवीतसमीपवर्त्तिनि च क्षेत्रेऽकामतो गोभिर्भक्षिते गोपगोमिनोर्द्वयोरप्यदोषः। दोषाभावप्रतिपादनं च दण्डाभावार्थं विनष्टसस्यमौल्यदानप्रतिषेधार्थं च। कामचारे कामतश्चारे चौरवत् चौरस्य यादृशो दण्डः तादृशं दण्डमर्हति। एतच्चानावृतक्षेत्रविषयम्। "तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि। न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणामिति" दण्डाभावस्यानावृतक्षेत्रविषयत्वेन मनुनोक्तत्वात्। आवृते पुनर्मार्गादिक्षेत्रेऽपि दोषोऽस्त्येव। वृतिकरणञ्च तेनैवोक्तम् "वृतिञ्च तत्र कुर्वीत यामुष्ट्रो नावलोकयेत्। छिद्रं निवारयेत्सर्वं श्वशूकरमुखानुगमिति"। पशुविशेषेऽपि दण्डाभावमाह "महोक्षोत्सृष्टपशवः सूतिकागन्तुकादयः। पालो येषां न, ते मोच्यादैवराजपरिच्युताः" याज्ञ०। "महांश्चासावुक्षा च महोक्षः वृषः सेक्ता। उत्सृष्टपशवः वृषोत्सर्गविधानेन देवतोद्देशेन त्यक्ताः। सूतिका प्रसूता अनिर्दशाहा। आगन्तुकः स्वयूथात्परिभ्रष्टो देशान्तरादागतः। एते मोच्याः। परसस्यभक्षणेऽपि न दण्ड्याः। येषां च पालो न विद्यते तेऽपि दैवराजपरिच्युताः दैवराजोपहृताः सस्यनाशकारिणो न दण्ड्याः। आदिग्रहणात् हस्त्यश्वादयो गृह्यन्ते। ते चोशनसोक्ताः "अदण्ड्या हस्तिनोऽश्वाः प्रजापाला हि ते स्मृताः। अदण्ड्यौ काणकुब्जौ च ये शश्वत्कृतलक्षणाः। अदण्ड्यागन्तुकी गौश्च सूतिका चाभिसारिणी। अदण्ड्याश्चोत्सवे गावः श्राद्धकाले तथैव चेति"। अत्रोत्सृष्टपशूनामस्वामिकत्वेन दण्ड्यत्वासम्भवात् दृष्टान्तार्थमुपादानं यथोत्सृष्टपशवो न दण्ड्या एवं महोक्षादय इति" मिता०।

"पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथवा पुनः। सपालः शतदण्डार्हो विपालान् वारयेत् पशून्" मनुः।

क्षेत्रादिसीमाविवादे मनूक्तो दमो यथा। "क्षेत्रकूपतड़ागानामारामस्य गृहस्य च। सामन्तप्रत्ययो ज्ञेयः सीमासेतुविनिर्णयः। सामन्ताश्चेन्मृषा ब्रूयुः सेतौ विवदतां नृणाम्। सर्वे पृथक् पृथग्दण्ड्या राज्ञा मध्यमसाहसम्"। "मर्यादायाः प्रभेदे तु सीमातिक्रमणे तथा। क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमाः" याज्ञ०। "अनेकक्षेत्रव्यवच्छेदिका साधारणी भूर्मर्यादा तस्याः प्रकर्षेण भेदने सीमातिक्रमणे सीमामतिलङ्घ्य कर्षणे क्षेत्रस्य च भयादिप्रदर्शनेन हरणे यथाक्रमेणाधमोत्तममध्यमदमा वेदितव्याः। क्षेत्रग्रहणञ्च गृहारामाद्युपलक्षणार्थम्। यदा पुनः स्वीयभ्रान्त्या क्षेत्रादिकमपहरति तदा द्विशतो दमो वेदितव्यः। "गृहं तड़ागमारामं क्षेत्रं वा भीषया हरन्। शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विशतो दमः" मनूक्तेः। अपह्रियमाणक्षेत्रादिभूयस्त्वपर्य्यालोचनया कदाचिदुत्तमोऽपि दण्डः प्रयोक्तव्यः। अतएवाह "बधसर्वस्वहरणं पुरान्निर्वासनाङ्कने। तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहस इति" मिता०।

वाक्पारुष्ये दमो मनूक्तो यथा "शतं ब्राह्मणमाक्रुश्य क्षत्त्रियो दण्डमर्हति। वैश्योऽप्यर्द्धशतं द्वे वा शूद्रस्तु बधमर्हति। पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्त्रियस्याभिशंसने। वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दमः। समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे। वादेष्ववचनीयेषु तदेव द्विगुणं भवेत्। एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन्। जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः। नामजातिग्रहन्त्वेषामभिद्रोहेण कुर्वतः। निःक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः। धर्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः। तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः। श्रुतं देशञ्च जातिञ्च कर्म शारीरमेव च। वितथेन ब्रुवन् दर्पा-

दाप्यः स्याद्द्विशतं दमम्। काणं वाप्यथ वा खञ्जमन्यं वापि तथाविधम्। तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम्। मातरं पितरं जायां भ्रातरं तनयं गुरुम्। आक्षारयन् शतं दाप्यः पन्थानं चाददद्गुरोः। ब्राह्मणक्षत्रियाभ्यान्तु दण्डः कार्यो विजानता। ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वेव मध्यमः। विट्शूद्रयोरेवमेव स्वजातिं प्रति तत्त्वतः। छेदवर्जं प्रणयनं दण्डस्येति विनिश्चयः।"

"सत्यासत्यान्यथास्तोत्रैर्न्यूनाङ्गेन्द्रियरोगिणाम्। क्षेपं करोति चेद्दण्ड्यः पणानर्द्धत्रयोदश। अभिगन्तास्मि भगिनीं मातरं वा तवेति च। शपन्तं दापयेद्राजा पञ्चविंशतिकं दमम्। अर्द्धोऽधमेषु द्विगुणः परस्त्रीषूत्तमेषु च। दण्डप्रणयनं कार्य्यं वर्णजात्युत्तराधरैः। प्रातिलोम्यापवादेषु द्विगुणास्त्रिगुणा दमाः। वर्णानामानुलोम्येन तस्मादेवार्द्धहानितः। बाहुग्रीवानेत्रसक्थिविनाशे वाचिके दमः। शत्यस्तदर्द्धिकः पादनासाकर्णकरादिषु। अशक्तस्तु वदन्नेवं दण्डनीयः पणान् दश। तथा शक्तः प्रतिभुवं दाप्यः क्षेमाय तस्य तु। पतनीये कृते क्षेपे दण्डो मध्यमसाहसः। उपपातकयुक्ते तु दाप्यः प्रथमसाहसः। त्रैविद्यनृपदेवानां क्षेप उत्तमसाहसः। मध्यमो जातिपूगानां प्रथमो ग्रामदेशयोः" याज्ञ०।

दण्डपारुष्ये दण्डा मनूक्ता यथा "येन केनचिदङ्गेन हिंस्याच्चेत् श्रेष्ठमन्त्यजः। छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम्। पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति। पादेन प्रहरन् कोपात् पादच्छेदनमर्हति। सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः। कट्यां कृताङ्को निर्वास्यः स्फिचं वाऽस्यावकर्त्तयेत्। अवनिष्ठीवतो दर्पात् द्वावोष्ठौ छेदयेन्नृपः। अवमूत्रयतो मेढ्रमवशर्द्धयतो गुदम्। केशेषु गृह्णतो हस्तौ छेदयेदविचारयन्। पादयोर्दाढिकायान्तु ग्रीवायां वृषणेषु च। त्वग्भेदकः शतं दण्ड्यो लोहितस्य तु दर्शकः। मांसभेत्ता तु षण्णिष्कान् प्रवास्यस्त्वस्थिभेदकः। वनस्पतीनां सर्वेषामुपभोगो यथा यथा। तथा तथा दमः कार्यो हिंसायामिति धारणा। मनुष्याणां पशूनाञ्च दुःखाय प्रहृते सति। यथा यथा महद्दुःखं दण्डं कुर्यात्तथा तथा। अङ्गावपीडनायाञ्च व्रणशोणितयोस्तथा। समुत्थानव्ययं दाप्यः सर्वं दण्डमथापि वा। द्रव्याणि हिंस्याद् यो यस्य ज्ञानतोऽज्ञानतोऽपि वा। स तस्योत्पादयेत्तुष्टिं राज्ञो दद्याच्च तत्समम्। चर्मचार्मिकभाण्डेषु काष्ठलोष्टमयेषु च। मूल्यात् पञ्चगुणो दण्डः पुष्पमूलफलेषु च। यानस्य चैव तु यातुश्च यानस्वामिन एव च। दशातिवर्त्तनान्याहुः शेषे दण्डो विधीयते। छिन्ननास्ये भग्नयुगे तिर्य्यक्प्रतिमुखागते। अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च। छेदने चैव यन्त्राणां योक्त्ररश्म्योस्तथैव च। आक्रन्दे चाप्यपैहीति न दण्डं मनुरब्रवीत्। यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य तु। तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम्। प्राजकश्चेद्भवेदाप्तः प्राजको दण्डमर्हति। युग्यस्थाः प्राजकेऽनाप्ते सर्वे दण्ड्याः शतं शतम्। स चेत्तु पथि संरुद्धः पशुभिर्वा रथेन वा। प्रमापयेत् प्राणभृतस्तत्र दण्डोऽविचारतः। मनुष्यमारणे क्षिप्रं चौरवत् किल्बिषी भवेत्। प्राणभृत्सु महत्स्वर्द्धं गोगजोष्ट्रहयादिषु। क्षुद्रकाणां पशूनाञ्च हिंसायां द्विशतो दमः। पञ्चाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु। गर्दभाजाविकानाञ्च दण्डः स्यात् पञ्चमाषकः। माषकन्तु भवेद्दण्डः श्वशूकरनिपातने। भार्य्या पुत्रश्च दासश्च शिष्यो भ्राता च सोदरः। प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा। पृष्ठतस्तु शरीरस्य, नोत्तमाङ्गे कथञ्चन। अतोऽन्यथा तु प्रहरन् प्राप्तः स्याच्चौरकिल्बिषम्"। अत्र विशेषमाह याज्ञ० यथा

"भस्मपङ्करजःस्पर्शे दण्डो दशपणः स्मृतः। अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणः स्मृतः। समेष्वेवं परस्त्रीषु द्विगुणस्तूत्तमेषु च। हीनेष्वर्द्धदमो मोहमदादिभिरदण्डनम्। विप्रपीडाकरं छेद्यमङ्गमब्राह्मणस्य, तु। उद्गूर्णे प्रथमो दण्डः संस्पर्शे तु तदर्द्धिकः। उद्गूर्णे हस्तपादे च दशविंशतिकौ दमौ। परस्परन्तु सर्वेषां शस्त्रे मध्यमसाहसम्। पादकेशांशुककरोल्लुञ्चनेषु पणान् दश। पीडाकर्षांशुकावेष्टपादाध्यासे शतं दमः। शोणितेन विना दुःखं कुर्वन् काष्ठादिभिर्नरः। द्वात्रिंशतं पणान् दाप्यो द्विगुणं दर्शनेऽसृजः। करपाददतो भङ्गे छेदने कर्णनासयोः। मध्यो दण्डो व्रणोद्भेदे मृतकल्पहते तथा। चेष्टाभोजनवाग्रोधे नेत्रादिप्रतिभेदने। कन्धराबाहुसक्थ्नाञ्च भङ्गे मध्यमसाहसः। एकं घ्नतां बहूनाञ्च यथोक्ताद्द्विगुणा दमाः। कलहापहृतं देयं दण्डश्च द्विगुणः स्मृतः। दुःखमुत्पादयेद्यस्तु स समुत्थानजं व्ययम्। दाप्यो दण्डञ्च यो

यस्मिन् कलहे समुदाहृतः। अभिघाते तथा छेदे भेदे कुड्यावपातने। पणान् दाप्यः पञ्चदशविंशतिन्तद्द्वयं तथा। दुःखोत्पादि गृहे द्रव्यं क्षिपन् प्राणहरन्तथा। षोड़शाद्यः पणान् दाप्यो द्वितीयो मध्यमं दमम्। दुःखे च शोणितोत्पादे शाखाङ्गच्छेदने तथा। दण्डः क्षुद्रपशूनाञ्च द्विपणप्रभृति क्रमात्। लिङ्गस्य छेदने मृत्यौ मध्यमो मूल्यमेव च। महापशूनामेतेषु स्थानेषु द्विगुणो दमः। प्ररोहिशाखिनां शाखास्कन्धसर्व्वविदारणे। उपजीव्यद्रुमाणाञ्च विंशतेर्द्विगुणो दमः। चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये। जातद्रुमाणां द्विगुणो दमो वृक्षेऽथ विश्रुते। गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधाम्। पूर्व्वस्मृतादर्द्धदण्डः स्थानेषूक्तेषु कर्त्तने"।

विक्रयासम्प्रदाने "वसानस्त्रीन् पणान् दण्ड्यो नेजकस्तु परांशुकम्। विक्रयावक्रयाधानयाचितेषु पणान् दश। पितापुत्रविरोधे तु साक्षिणां त्रिपणो दमः। अन्तरे च तयोर्यः स्यात्तस्याप्यष्टगुणो दमः। तुलाशासनमानानां कूटकृन्नाणकस्य च। एभिश्च व्यवहर्त्ता यः स दाप्यो दण्डमुत्तमम्। अकूटं कूटकं ब्रूते कूटं यश्चाप्यकूटकम्। स नाणकपरीक्षी तु दाप्य उत्तमसाहसम्। भिषङ्मिथ्या चरन् दाप्यस्तिर्य्यक्षु प्रथमं दमम्। मानुषे मध्यमं राजमानुषेषूत्तमं दमम्। अबन्ध्यं यश्च बध्नाति बद्ध्यं यश्च प्रमुञ्चति। अप्राप्तव्यवहारञ्च स दाप्यो दण्डमुत्तमम्। मानेन तुलया वापि योऽंशमष्टमकं हरेत्। दण्डं स दाप्यो द्विशतं वृद्धौ हानौ च कल्पितम्। भेषजस्नेहलवणगन्धधान्यगुड़ादिषु। पण्येषु प्रक्षिपन् हीनं पणान् दाप्यस्तु षोड़श। मृच्चर्म्ममणिसूत्रायःकाष्ठवल्कलवाससाम्। अजातौ जातिकरणे विक्रेयाष्टगुणो दमः। समुद्रपरिवर्त्तञ्च सारभाण्डञ्च कृत्रिमम्। आधानं विक्रयं वापि नयतो दण्डकल्पना। भिन्ने पणे तु पञ्चाशत् पणे तु शतमुच्यते। द्विपणे द्विशतो दण्डो मूल्यवृद्धौ च वृद्धिमान्" याज्ञ०उक्तो दमः।

"अन्यहस्ते च विक्रीतं दुष्टं वाऽदुष्टवद् यदि। विक्रीणीते दमस्तत्र मूल्यात्तु द्विगुणो भवेत्" याज्ञ०।

साहसे याज्ञ०उक्तो दमो यथा "सामान्यद्रव्यप्रसभहरणात् साहसं स्मृतम्। तन्मूल्याद्द्विगुणो दण्डो निह्नवे तु चतुर्गुणः। यः साहसं कारयति स दाप्यो द्विगुणं दमम्। यश्चैवमुक्त्वाऽहं दाता कारयेत् स चतुर्गुणम्। अर्घ्याक्रोशातिक्रमकृद्भ्रातृभार्य्याप्रहारकः। सन्दिष्टस्याप्रदाता च समुद्रगृहभेदकृत्। सामन्तकुलिकादीनामपकारस्य कारकः। पञ्चाशत्पणिको दण्ड एषामिति विनिश्चयः। स्वच्छन्दं विधवागामी विक्रुष्टेऽनाभिधावकः। अकारणे च विक्रोष्टा चण्डालश्चोत्तमान् स्पृशन्। शूद्रः प्रव्रजितानाञ्च दैवे पित्र्ये च भोजकः। अयुक्तं शपथं कुर्व्वन्नयोग्योऽयोग्यकर्म्मकृत्। वृषक्षुद्रपशूनाञ्च पुंस्त्वस्य प्रतिघातकृत्। साधारणस्यापलापी दासीगर्भविनाशकृत्। पितृपुत्रस्वसृभ्रातृदम्पत्याचार्य्यशिष्यकाः। एषामपतितानां तु त्यागी च शतदण्डभाक्।"

चौर्य्ये दण्डो मनूक्तो यथा। "यस्तु रज्जुं घटं कूपाद्धरेच्छिन्द्याच्च यः प्रपाम्। स दण्डं प्राप्नुयान्माषं तच्च तस्मिन् समाहरेत्। धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः। शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनम्। तथा धरिममेयानां शतादभ्यधिके वधः। सुवर्णरजतादीनामुत्तमानाञ्च वाससाम्। पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते। शेषेऽप्येकादशगुणं मूल्याद्दण्डं प्रकल्पयेत्। पुरुषाणां कुलीनानां नारीणाञ्च विशेषतः। मुख्यानां चैव रत्नानां हरणे वधमर्हति। महापशूनां हरणे शस्त्राणामौषधस्य च। कालमासाद्य कार्य्यञ्च राजा दण्डं प्रकल्पयेत्। गोषु ब्राह्मणसंस्थासु छुरिकायाश्च भेदने। पशूनां हरणे चैव सद्यः कार्य्योऽर्द्धपादिकः। सूत्रकार्पासकिण्वानां गोमयस्य गुड़स्य च। दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च। वेणुवैदलभाण्डानां लवणानान्तथैव च। मृण्मयानाञ्च हरणे मृदो भस्मन एव च। मत्स्यानां पक्षिणाञ्चैव तैलस्य च घृतस्य च। मांसस्य मधुनश्चैव यच्चान्यत् पशुसम्भवम्। अन्येषाञ्चैवमादीनां मद्यानामोदनस्य च। पक्वान्नानाञ्च सर्व्वेषां तन्मूल्याद्द्विगुणो दमः। पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु च। अन्येष्वपरिपूतेषु दण्डः स्यात् पञ्चकृष्णलः। परिपूतेषु धान्येषु शाकमूलफलेषु च। निरन्वये शतं दण्डः सान्वयेऽर्द्धशतं दमः। स्यात् साहसं त्वन्वयवत् प्रसभं कर्म्म यत्कृतम्। निरन्वयं भवेत् स्तेयं हृत्वापह्नूयते च यत्। यस्त्वेतान्युपकॢप्तानि द्रव्याणि स्तेनयेन्नरः। तमाद्यं दण्डयेद्राजा यश्चाग्निं चोरयेद्गृहात्। येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते। तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः"। अन्यत्र च चौर्य्यादिनानाविषये मनुनोक्तो दमो यथा।

"न होढ़ेन विना चोरं घातयेद्धार्म्मिको नृपः। स-

होढं सोपकरणं घातयेदविचारयन्। ग्रामेष्वपि च ये केचिच्चौराणां भक्तदायकाः। भाण्डावकाशदाश्चैव सर्व्वांस्तानपि घातयेत्। राष्ट्रेषु रक्षाधिकृतान् सामन्तांश्चैव चोदितान्। अभ्याघातेषु मध्यस्थान् शिष्याच्चौरानिव द्रुतम्। यश्चापि धर्म्मसमयात् प्रच्युतो धर्म्मजीवनः। दण्डेनैव तमप्योषेत् स्वकाद्धर्म्माद्धि विच्युतम्। ग्रामघाते हिताभङ्गे पथि मोषाभिदर्शने। शक्तितो नाभिधावन्तो निर्व्वास्याः सपरिच्छदाः। राज्ञः कोषापहर्त्तॄंश्च प्रतिकूलेषु च स्थितान्। घातयेद्विविधैर्दण्डैररीणाञ्चोपजापकान्। सन्धिं छित्त्वा तु ये चौर्य्यं रात्रौ कुर्व्वन्ति तस्कराः। तेषां छित्त्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेत्। अङ्गुली ग्रन्थिभेदस्य छेदयेत् प्रथमे ग्रहे। द्वितीये हस्तचरणौ तृतीये वधमर्हति। अग्निदान् भक्तदांश्चैव तथा शस्त्रावकाशदान्। सन्निधातॄंश्च मोषस्य हन्याच्चौरमिवेश्वरः। तडागभेदकं हन्यादप्सु शुद्धवधेन वा। तद्वापि प्रतिसंस्कुर्य्याद्दाप्यस्तूत्तमसाहसम्। कोष्ठागारायुधागारदेवतागारभेदकान्। हस्त्यश्वरथहर्त्तॄंश्च हन्यादेवाविचारयन्। यस्तु पूर्व्वनिविष्टस्य तडागस्योदकं हरेत्। आगमं वाप्यपां भिन्द्यात् स दाप्यः पूर्व्वसाहसम्। समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि। स द्वौ कार्षापणौ दद्यादमेध्यञ्चाशु शोधयेत्। आपद्गतोऽथवा वृद्धो गर्भिणी बाल एव वा। परिभाषणमर्हन्ति तच्च शोध्यमिति स्थितिः। चिकित्सकानां सर्व्वेषां मिथ्या प्रचरतां दमः। अमानुषेषु प्रथमो मानुषेषु तु मध्यमः। संक्रमध्वजयष्टीनां प्रतिमानाञ्च भेदकः। प्रतिकुर्य्याच्च तत् सर्व्वं पञ्च दद्याच्छतानि च। अदूषितानां द्रव्याणां दूषणे भेदने तथा। मणीनामपवेधे च दण्डः प्रथमसाहसः। समैर्हि विषमं यस्तु चरेद्वै मूल्यतोऽपि वा। स प्राप्नुयाद्दमं पूर्व्वं नरो मध्यममेव वा। बन्धनानि च सर्व्वाणि राजमार्गे निवेशयेत्। दुःखिता यत्र दृश्येरन् विकृताः पापकारिणः। प्राकारस्य च भेत्तारं परिखाणाञ्च पूरकम्। द्वाराणाञ्चैव भङ्क्तारं क्षिप्रमेव प्रवासयेत्। अभिचारेषु सर्व्वेषु कर्त्तव्यो द्विशतो दमः। मूलकर्म्मणि चानाप्तैः कृत्यासु विविधासु च। अबीजविक्रयी चैव बीजोत्कृष्टस्तथैव च। मर्य्यादाभेदकश्चैव विकृतं प्राप्नुयाद्वधम्। सर्व्वकण्टकपापिष्ठं हेमकारन्तु पार्थिवः। प्रवर्त्तमानमन्याये छेदयेल्लवशः क्षुरैः। सीताद्रव्यापहरणे शस्त्राणामौषधस्य च। कालमासाद्य कार्य्यञ्च राजा दण्डं प्रकल्पयेत्” “चौरं प्रदाप्यापहृतं घातयेद्विविधैर्वधैः। सचिह्नं ब्राह्मणं कृत्वा स्वराष्ट्राद्विप्रवासयेत्” या०। अङ्कनविशेषो मनुनोक्तो यथा “गुरुतल्पे भगः कार्य्यः सुरापाने सुराध्वजः। स्तेये च श्वपदं कार्य्यं ब्रह्महण्यशिराः पुमान्”। “एतच्च दण्डोत्तरकालं प्रायश्चित्तमचिकीर्षतां द्रष्टव्यम्। यथाह मनुः “प्रायश्चित्तन्तु कुर्व्वाणाः सर्व्वे वर्णा यथोदितम्। नाङ्क्या राज्ञा ललाटे तु दाप्यास्तूत्तमसाहसमिति” मिता०। “घातितेऽपहृते दोषो ग्रामभर्त्तुरनिर्गते। विवीतभर्त्तुस्तु पथि चौरोद्धर्त्तुरवीतके। स्वसीम्नि दद्याद्ग्रामस्तु पदं वा यत्र गच्छति। पञ्चग्रामी बहिःक्रोशाद्दशग्राम्यथ वा पुनः। बन्दिग्राहांस्तथा वाजिकुञ्जराणाञ्च हारिणः। प्रसह्यघातिनश्चैव शूलमारोपयेन्नरान्। उत्क्षेपकग्रन्थिभेदौ करसन्दंशहीनकौ। कार्य्यौ द्वितीयापराधे करपादैकहीनकौ। क्षुद्रमध्यमहाद्रव्यहरणे सारतो दमः। देशकालवयःशक्तिं सञ्चिन्त्य दण्डकर्म्मणि। भक्तावकाशाग्न्युदकमन्त्रोपकरणव्ययान्। दत्त्वा चौरस्य हन्तुर्वा जानतो दम उत्तमः। शस्त्रावपाते गर्भस्य पातने चोत्तमो दमः। उत्तमो वाऽधमो वापि पुरुषस्त्रीप्रमापणे। विप्रदुष्टां स्त्रियञ्चैव पुरुषघ्नीमगर्भिणीम्। सेतुभेदकरीञ्चाप्सु शिलां बद्ध्वा प्रवेशयेत्। विषाग्निदां पतिगुरुनिजापत्यप्रमापणीम्। विकर्णकरनासौष्ठीं कृत्वा गोभिः प्रमापयेत्। अविज्ञातहतस्याशु कलहं सुतबान्धवाः। प्रष्टव्या योषितश्चास्य परपुंसि रताः पृथक्। स्त्रीद्रव्यवृत्तिकामो वा केन वायं गतः सह। मृत्युदेशसमासन्नं पृच्छेद्वापि जनं शनैः। क्षेत्रवेश्मवनग्रामविवीतखलदाहकाः। राजपत्न्यभिगामी च दग्धव्यास्तु कटाग्निना” याज्ञ०। “तृणं वा यदि वा काष्ठं पुष्पं वा यदि वा फलम्। अनापृच्छन् हि गृह्णानो हस्तच्छेदनमर्हति” मिता० धृतवचनम्।

स्त्रीसंग्रहे मनुनोक्तो दमो यथा “परदाराभिमर्षेषु प्रवृत्तान् नॄन् महीपतिः। उद्वेजनकरैर्दण्डैश्चिह्नयित्वा प्रवासयेत्। परस्य पत्न्या पुरुषः सम्भाषां योजयन् रहः। पूर्व्वमाक्षारितो दोषैः प्राप्नुयात् पूर्व्वसाहसम्। परस्त्रियं योऽभिवदेत् तीर्थेऽरण्ये वनेऽपि वा। नदीनामपि संभेदे स संग्रहणमाप्नुयात्। उपचारक्रियाकेलिः स्पर्शो भूषणवाससाम्। सह खट्वासनञ्चैव सर्व्वं संग्रहणं तथा। स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तथा। परस्परस्या-

नुमते सर्व्वं संग्रहणं स्मृतम्। अब्राह्मणः संग्रहणे प्राणान्तं दण्डमर्हति। न सम्भाषां परस्त्रीभिः प्रतिषिद्धः समाचरेत्। निषिद्धो भाषमाणस्तु सुवर्णं दण्डमर्हति। नैष चारणदारेषु विधिर्नात्मोपजीविषु। सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च। किञ्चिदेव तु दाप्यः स्यात् सम्भाषां ताभिराचरन्। योऽकामां दूषयेत् कन्यां स सद्यो वधमर्हति। सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः। कन्यां भजन्तीमुत्कृष्टं न किञ्चिदपि दापयेत्। जघन्यं सेवमानान्तु संयतां वासयेद्गृहे। उत्तमां सेवमानस्तु जघन्यो वधमर्हति। शुल्कं दद्यात् सेवमानः समामिच्छेत् पिता यदि। अभिसह्य तु यः कन्यां कुर्य्याद्दर्पेण मानवः। तस्याशु कर्त्त्ये अङ्गुल्यौ दण्डञ्चार्हति षट् शतम्। सकामां दूषयंस्तुल्यो नाङ्गुलिच्छेदमाप्नुयात्। द्विशतन्तु दमं दाप्यः प्रसङ्गविनिवृत्तये। कन्यैव कन्यां या कुर्य्यात् तस्याः स्याद्द्विशतो दमः। शुल्कञ्च द्विगुणं दद्याच्छिफाश्चैवाप्नुयाद्दश। या तु कन्यां प्रकुर्य्यात् स्त्री सा सद्यो मौण्ड्यमर्हति। अङ्गुल्योरेव च छेदं खरेणोद्वहनं तथा। भर्त्तारं लङ्घयेद्या तु स्त्री ज्ञातिगुणदर्पिता। तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते। पुमांसं दाहयेत् पापं शयने तप्त आयसे। अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत्। संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः। व्रात्यया सह संवासे चाण्डाल्या तावदेव तु। शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन्। अगुप्तमङ्गसर्व्वस्वैर्गुप्तं सर्व्वेण हीयते। वैश्यः सर्व्वस्वदण्ड्यः स्यात् संवत्सरनिरोधतः। सहस्रं क्षत्रियो दण्ड्यो मौण्ड्यं मूत्रेण चार्हति। ब्राह्मणीं यद्यगुप्तान्तु गच्छेतां वैश्यपार्थिवौ। वैश्यं पञ्चशतं कुर्य्यात् क्षत्रियन्तु सहस्रिणम्। उभावपि तु तावेव ब्राह्मण्या गुप्तया सह। विप्लुतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना। सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद्व्रजन्। शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः। मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते। इतरेषान्तु वर्णानां दण्डः प्राणान्तिको भवेत्। न जातु ब्राह्मणं हन्यात् सर्व्वपापेष्वपि स्थितम्। राष्ट्रादेनं बहिः कुर्य्यात् समग्रधनमक्षतम्। न ब्राह्मणवधाद्भूयानधर्म्मो विद्यते भुवि। तस्मादस्य वधं राजा मनसापि न चिन्तयेत्। वैश्यश्चेत् क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत्। यो ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः। सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन्। शूद्रायां क्षत्रियविशोः साहस्रो वै भवेद्दमः। क्षत्रियायामगुप्तायां वैश्ये पञ्चशतं दमः। मूत्रेण मौण्ड्यमिच्छेत्तु क्षत्रियो दण्डमेव वा। अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन्। शतानि पञ्च दण्ड्यः स्यात् सहस्रन्त्वन्त्यजस्त्रियम्”।

“स्त्री निषेधे शतं दद्याद्द्विशतन्तु दमं पुमान्। प्रतिषेधे द्वयोर्दण्डो यथा संग्रहणे तथा। सजातावुत्तमो दण्ड आनुलोम्ये तु मध्यमः। प्रातिलोम्ये वधः पुंसः स्त्रीणां नासादिकर्त्तनम्। अलङ्कृतां हरन् कन्यामुत्तमस्त्वन्यथाऽधमम्। दण्डं दद्यात् सवर्णासु प्रातिलोम्ये वधः स्मृतः। सकामस्वनुलोमासु न दोषस्त्वन्यथा दमः। दूषणे तु करच्छेद उत्तमायां वधस्तथा। शतं स्त्रीदूषणे दद्याद्द्वे तु मिथ्याभिशंसने। पशून् गच्छन् शतं दाप्यो हीनां स्त्रीं गाञ्च मध्यमम्। अवरुद्धासु दासीषु भुजिष्यासु तथैव च। गम्यास्वपि पुमान् दाप्यः पञ्चाशत्पणिकं दमम्। प्रसह्य दास्यभिगमे दण्डो दशपणः स्मृतः। बहूनां यद्यकामासौ चतुर्व्विंशतिकः पृथक्। गृहीतवेतना वेश्या नेच्छन्ती द्विगुणं वहेत्। अगृहीते समं दाप्यः पुमानप्येवमेव च। अयोनौ गच्छतो योषां पुरुषं वापि मेहतः। चतुर्व्विंशतिको दण्डस्तथा प्रव्रजितागमे। अन्त्याभिगमने त्वङ्क्यः कुबन्धेन प्रवासयेत्। शूद्रस्तथान्त्य एव स्यादन्त्यस्यार्य्यागमे वधः”।

राजशासनकूटकरणादौ मनुनोक्तो दमो यथा

“ऊनं वाभ्यधिकं वापि लिखेद्यो राजशासनम्। पारदारिकचौरं वा मुञ्चतो दण्ड उत्तमः। अभक्ष्येण द्विजं दुष्यन् दण्ड्य उत्तमसाहसम्। क्षत्रियं मध्यमं वैश्यं प्रथमं शूद्रमर्द्धिकम्। कूटस्वर्णव्यवहारी विमांसस्य च विक्रयी। अङ्गहीनस्तु कर्त्तव्यो दाप्यश्चोत्तमसाहसम्। चतुष्पादकृतो दोषो नापैहीति प्रजल्पतः। काष्ठलोष्ट्रेषु पाषाणबाहुयुग्यकृतस्तथा। छिन्ननस्येन यानेन तथा भग्नयुगादिना। पश्चाच्चैवापसरता हिंसने स्वाम्यदोषभाक्। शक्तो ह्यमोचयन् स्वामी दंष्ट्रिणां शृङ्गिणां तथा। प्रथमं साहसं दद्याद्विक्रुष्टे द्विगुणं ततः। जारं चौरेत्यभिवदन् दाप्यः पञ्चशतं दमम्। उपजीव्य धनं मुञ्चंस्तदेवाष्टगुणीकृतम्। राज्ञोऽनिष्टप्रवक्तारं तस्यैवाक्रोशकारिणम्। तन्मन्त्रस्य च भेत्तारं जिह्वां छित्त्वा प्रवासयेत्। मृताङ्गलग्नविक्रेतुर्गुरो-

स्ताड़यितुस्तथा। राजयानासनारोढुर्दण्ड उत्तमसाहसः। द्विनेत्रभेदिनो राजद्विष्टादेशकृतस्तथा। विप्रत्वेन च शूद्रस्य जीवतोऽष्टशतो दमः। दुर्दृष्टांस्तु पुनर्दृष्ट्वा व्यवहारान्नृपेण तु। सभ्याः सजयिनो दण्ड्या विवादाद्द्विगुणं दमम्। यो मन्येताजितोऽस्मीति न्यायेनापि पराजितः। तमायान्तं पुनर्जित्वा दापयेद्द्विगुणं दमम्"। याज्ञवल्क्यवचनानि अनुपदमेषां मानवत्वोक्तिः प्रामादिकी।

सामान्यतोदमविधिः "पिताचार्य्यः सुहृन्माता भार्य्या पुत्रः पुरोहितः। नादण्ड्यो नाम राज्ञोऽस्ति यः स्वधर्मे न तिष्ठति। कार्षापणं भवेद्दण्ड्यो यत्रान्यः प्राकृतो जनः। तत्र राजा भवेद्दण्ड्यः सहस्रमिति धारणा। अष्टापाद्यन्तु शूद्रस्य स्तेये भवति किल्विषम्। षोड़शैव तु वैश्यस्य द्वात्रिंशत् क्षत्रियस्य च। ब्राह्मणस्य चतुःषष्टिःपूर्णं वापि शतं भवेत्। द्विगुणा वा चतुःषष्टिस्तद्दोषगुणविद्धि सः। वानस्पत्यं मूलफलं दार्वग्न्यर्थं तथैव च। तृणञ्च गोभ्यो ग्रासार्थमस्तेयं मनुरब्रवीत्। योऽदत्तादायिनो हस्ताल्लिप्सेत ब्राह्मणो धनम्। याजनाध्यापनेनापि यथा स्तेनस्तथैव सः। द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके। आददानः परक्षेत्रान्न दण्डं दातुमर्हति। असन्धितानां सन्धाता सन्धितानाञ्च मोक्षकः। दासाश्वरथहर्त्ता च प्राप्तः स्याच्चौरकिल्विषम्"।

"ऋत्विजं यस्त्यजेद्याज्यो याज्यञ्चर्त्विक् त्यजेद्यदि। शक्तं कर्म्मण्यदुष्टञ्च तयोर्दण्डः शतं शतम्। न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति। त्यजन्नपतितानेतान् राज्ञा दण्ड्यः शतानि षट्" मनूक्तो दमः।

अग्निपु० २२६ अ० सर्वविषये दमभेद उक्तो यथा "चौरैरमूषितो यस्तु मूषितोऽस्मीति भाषते। तत्प्रदातरि भूपाले स दण्ड्यस्तावदेव तु। यो यावद्विपरीतार्थं मिथ्या वा यो वदेत्तु तम्। तौ नृपेण ह्यधर्मज्ञौ दाप्यौ तद्द्विगुणं दमम्। कूटसाक्ष्यं तु कुर्वाणांस्त्रीन् वर्णांश्च प्रमापयेत्। विवासयेद्ब्राह्मणन्तु विधिरेष न हीतरः। निक्षेपस्य समं मूल्यं दण्ड्यो निक्षेपभुक् तथा। वस्त्रादिकस्य, धर्मज्ञ! तथा धर्मो न हीयते। यो निक्षेपं घातयति यश्चानिक्षिप्य याचते। तावुभौ चौरवच्छास्यौ दण्ड्यौ वा द्विगुणं दमम्। अज्ञानाद्यः पुमान् कुर्य्यात् परद्रव्यस्य विक्रयम्। निर्दोषो, ज्ञानपूर्वन्तु चौरवद्दण्डमर्हति। मूल्यमादाय यः पण्यं न दद्याद्दण्ड्य एव सः। प्रतिश्रुत्याप्रदातारं सुवर्णं दण्डयेन्नृपः। भृतिं गृह्य न कुर्य्याद्यः कर्माष्टौ कृष्णला दमः। अकाले तु त्यजन् भृत्यं दण्ड्यः स्यात्तावदेव तु। क्रीत्वा विक्रीय वा किञ्चिद्यस्येहानुशयो भवेत्। सोऽन्तर्दशाहात्तत्स्वामी दद्याच्चैवाददीत च। परेण तु दशाहस्य नादद्यान्नैव दापयेत्। आददद्धि ददच्चैव राज्ञा दण्ड्यः शतानि षट्। वरे दोषानविख्याप्य यः कन्यां वरयेदिह। दत्ताप्यदत्ता सा तस्य राज्ञा दण्ड्यः शतद्वयम्। प्रदाय कन्यां योऽन्यस्मै पुनस्तां सम्प्रयच्छति। दण्डः कार्य्यो नरेन्द्रेण तस्याप्युत्तमसाहसः। सत्यङ्कारेण वाचा च युक्तं पण्यमसंशयम्। लुब्धोऽन्यत्र च विक्रेता षट्शतं दण्डमर्हति। दद्याद्धेनुं न यः पालो गृहीत्वा भक्तवेतनम्। स तु दण्ड्यः शतं राज्ञा सुवर्णं वाप्यरक्षिता। धनुःशतं परीणाहो ग्रामस्य तु समन्ततः। द्विगुणं त्रिगुणं वापि नगरस्य च कल्पयेत्। वृतिं तत्र प्रकुर्वीत यामुष्ट्रो नावलोकयेत्। तत्रापरिवृते धान्ये हिंसिते नैव दण्डनम्। गृहन्तड़ागमारामं क्षेत्रं वा भीषया हरन्। शतानि पञ्च दण्ड्यः स्यादज्ञानात् द्विशतो दमः। मर्यादाभेदकाः सर्वे दण्ड्याः प्रथमसाहसम्। शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति। वैश्यस्तु द्विशतं राम! शूद्रस्तु बधमर्हति। पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने। वैश्ये चाप्यर्द्धपञ्चाशच्छूद्रे द्वादशको दमः। क्षत्रियक्षेपको वैश्यः साहसं पूर्वमेव तु। शूद्रः क्षत्रियमाक्रुश्य जिह्वाच्छेदमवाप्नुयात्। धर्मोपदेशं विप्राणां शूद्रः कुर्वंश्च दण्डभाक्। श्रुतदेशादिवितथी दाप्यो द्विगुणसाहसम्। उत्तमः साहसस्तस्य यः पातैरुत्तमान् क्षिपेत्। प्रमादाद्यैर्भयात् प्रोच्य प्रीत्या दण्डार्द्धमर्हति। मातरं पितरं ज्येष्ठं भ्रातरं श्वशुरं गुरुम्। आकारयञ्छतं दण्ड्यः पन्थानं चाददद्गुरोः। एकजातिर्द्विजातेस्तु येनाङ्गेनापराध्नुयात्। तदेव छेदयेत्तस्य क्षिप्रमेवाविचारयन्। अवनिष्ठीवतो दर्पाद् द्वावोष्ठौ छेदयेन्नृपः। अवमूत्रयतो मेढ्रमपशर्द्दयतो गुदम्। उत्कृष्टासनसंस्थस्य नीचस्याधोनिकृन्तनम्। यो यदङ्गं च रुजयेत्तदङ्गन्तस्य कर्त्तयेत्। अर्द्धपादकराः कार्य्या गोगजाश्वोष्ट्रघातकाः। वृक्षन्तु विफलं कृत्वा सुवर्णं दण्डमर्हति। द्विगुण

दापयेच्छिन्ने पथि सीम्नि जलाशये। द्रव्याणि यो हरेद्यस्य ज्ञानतोऽज्ञानतोऽपि वा। स तस्योत्पाद्य तुष्टिन्तु राज्ञे दद्यात्ततो दमम्। यस्तु रज्जुं घटं कूपाद्धरेच्छिन्द्याच्च वा प्रपाम्। स दण्डं प्राप्नुयान् माषं दण्ड्यः स्यात् प्राणिताड़ने। धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः। शेषेऽप्येकादशगुणं तस्य दण्डं प्रकल्पयेत्। सुवर्णरजतादीनां नृस्त्रीणां हरणे वधः। येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते। तत्तदेव हरेदस्य प्रत्यादेशाय पार्थिवः। ब्राह्मणः शाकधान्यादि स्वल्पं गृह्णन्न दोषभाक्। गोदेवार्थं हरंश्चापि, हन्याद्दुष्टं वधोद्यतम्। गृहक्षेत्रापहर्त्तारं तथा पत्न्यभिगामिनम्। अग्निदं गरदं हन्यात्तथा चाभ्युद्यतायुधम्। राजगव्यभिचाराभ्यां हन्याच्चैवाततायिनम्। परस्त्रियं न भाषेत प्रतिषिद्धो विशेन्न हि। अदण्ड्या स्त्री भवेद्राज्ञा वरयन्ती पतिं स्वयम्। उत्तमां सेवमानः स्त्रीं जघन्यो वधमर्हति। भर्त्तारं लङ्घयेद्या तां श्वभिः सङ्घातयेत् स्त्रियम्। सवर्णदूषितां कुर्य्यात् पिण्डमात्रोपजीविनीम्। ज्यायसा दूषिता नारी मुण्डनं समवाप्नुयात्। वैश्यागमे तु विप्रस्य क्षत्रियस्यान्त्यजागमे। क्षत्रियः प्रथमं, वैश्यो दण्ड्यः शूद्रागमे भवेत्। गृहीत्वा वेतनं वेश्या लोभादन्यत्र गच्छति। वेतनन्द्विगुणं दद्याद्दण्डञ्च द्विगुणं तथा। भार्या पुत्राश्च दासाश्च शिष्यो भ्राता च सोदरः। कृतापराधास्ताड्याः स्यूरज्ज्वा वेणुदलेन वा। पृष्ठे, न मस्तके हन्याच्चौरस्याप्नोति किल्विषम्। रक्षास्वधिकृतैर्यैस्तु प्रजाऽत्यर्थं विलुप्यते। तेषां सर्वस्वमादाय राजा कुर्य्यात् प्रवासनम्। ये नियुक्ताः स्वकार्येषु हन्युः कार्याणि कर्मिणाम्। निर्घृणाः क्रूरमनसस्तान्निःस्वान् कारयेन्नृपः। अमात्यः प्राड्विवाको वा यः कुर्य्यात् कार्य्यमन्यथा। तस्य सर्वस्वमादाय तं राजा विप्रवासयेत्। गुरुतल्पे भगः कार्य्यः सुरापाने सुराध्वजः। स्तेयेषु श्वपदं विद्याद् ब्रह्महण्याशिरः पुमान्। शूद्रादीन् घातयेद्राजा पापान्, विप्रान् प्रवासयेत्। महापातकिनां वित्तं वरुणायोपपादयेत्। ग्रामेष्वपि च ये केचिच्चौराणां भक्तदायकाः। भाण्डारकोषदाश्चैव सर्वांस्तानपि घातयेत्। राष्ट्रेषु राजाधिकृतान् सामन्तान् पापिनो हरेत्। सन्धिं कृत्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः। तेषां छित्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयेत्। तड़ागदेवतागारभेदकान् घातयेन्नृपः। समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि। स हि कार्षापणन्दण्ड्यस्तममेध्यञ्च शोधयेत्। प्रतिमासङ्क्रमभिदो दद्युः पञ्च शतानि ते। समेषु विषमं यो वा चरते मूल्यतोऽपि वा। समाप्नुयान्नरः पूर्वं दमं मध्यममेव वा। द्रव्यमादाय वणिजामनर्घेणावरुन्धताम्। राजा पृथक् पृथक् कुर्य्याद्दण्डमुत्तमसाहसम्। द्रव्याणां दूषको यश्च प्रतिच्छन्दकविक्रयी। मध्यमं प्राप्नुयाद्दण्डं कूटकर्त्ता तथोत्तमम्। कलहापहृतं देयं दण्डश्च द्विगुणस्ततः। अभक्ष्यभक्ष्ये विप्रे वा शूद्रे वा कृष्णलो दमः। तुलाशासनमानानां कूटकृन्नाणकस्य च। एभिश्च व्यवहर्त्ता यः स दाप्यो दममुत्तमम्। विषाग्निदां पतिगुरुविप्रापत्यप्रमापिणीम्। विकर्णकरनासौष्ठीं कृत्वा गोभिः प्रवासयेत्। क्षेत्रवेश्मवनग्रामविदाहकास्तथा नराः। राजपत्न्यभिगामी च दग्धव्यास्तु कटाग्निना। ऊनं वाप्यधिकं वापि लिखेद्यो राजशासनम्। पारजायिकचौरौ च मुञ्चतो दण्ड उत्तमः। राजयानासनारोढुर्दण्ड उत्तमसाहसः। यो मन्येताजितोऽस्मीति न्यायेनापि पराजितः। तमायान्तं पराजित्य दण्डयेद् द्विगुणं दमम्। आह्वानकारी वध्यः स्यादनाहूतमथाह्वयन्। दाण्डिकस्य च यो हस्तादभियुक्तः पलायते। हीनः पुरुषकारेण तद् दद्याद्दाण्डिको धनम्"। "दण्डो दमयतामस्मि" गीता। "दण्डवत्प्रायश्चित्तानि भवन्ति" प्रा० वि० धृतवाक्यम् कुलालचक्रार्थे "कलसे निजहेतुदण्डजः किमु चक्रभ्रमिकारिता गुणः" नैष०। दण्ड्यतेऽनेन करणे घञ्। २५देहे दण्डपारुष्यशब्दे मिता०। २६द्वापरोद्भवे नृपभेदे। "क्रोधहन्तेति यस्तस्य बभूवावरजोऽसुरः। दण्ड इत्यभिविख्यातः सोऽभवन्मनुजर्षभः" भा० आ० ६७ अ०। "वधः पाण्ड्यस्य च तथा अश्वत्थाम्ना महात्मना। दण्डसेनस्य च ततो दण्डस्य च वधस्तथा" भा० आ० १ अ०। दण्डयति कर्त्तरि—अच्। २७नृपे दण्डनीतिशब्दे कामन्द०। अस्य शब्दस्य शब्दकल्पद्रुमदृष्ट्या शरणागतत्राणार्थतोक्तिः प्रामादिकी तत्प्रमाणवाक्ये दत्तमित्यभिधीयते इत्येव पाठः साधुः। लिपिकरप्रमादात् दत्तमित्यत्र दण्डमिति पाठ इति बोध्यम् दत्तशब्दे दृश्यम्।

दण्डक पु० दण्ड+स्वार्थे क। १इक्ष्वाकुराजपुत्रभेदे "दण्ड-

को नृपतिः कामात् क्रोधाच्च जनमेजयः” कामन्दकी। जनस्थानशब्दे दृश्यम्। ह्रस्वो दण्डः अल्पार्थे कन्। २ह्रस्वलगुडे(सोँटा)। ३षड्विंशत्यक्षराधिकपादके चण्डप्रयातादौ छन्दोभेदे। “यदिह नयुगलं ततः सप्तरेफास्तदा चण्डप्रयातो भवेद्दण्डकः” वृ०र०। ४दण्डनृपकृते सन्निवेशे पु०। “दण्डकानध्यवात्तां यौ” भट्टिः पुंस्त्वेन बहुवचनान्ततया जयमङ्गलः पपाठ। “पराक्रमात् जिगमिषुरेव दण्डकान्” रामा० अयो० २१स० ६४ श्लो०। “प्राप्तानि दुःखान्यपि दण्डकेषु” रघुः। तद्भूमिपरत्वे स्त्री त्रिका० “भरतस्तु दण्डकामध्यवात्तां यौ”इति पपाठ उदाजहार च “कायोध्यायाः पुनरुपगमो दण्डकायावने वः”भवभूतिवाक्यम्। तच्च वनं वृ० स० १४० अ० कूर्मवि०दक्षिणस्यामुक्तं यथा“बलदेवपट्टनदण्डकावनतिमिङ्गिलाशना भद्राः”। [कन्दे राजनि०।

दण्डकन्दक पु० दण्डः प्रकाण्डः कन्दोऽस्य कप्। भूमि-

दण्डकाक पुंस्त्री० दण्डः यम इव कृष्णत्वात् काकः। (डाँड) काकभेदे हेमच०। [वरूथिनी”भा०व०४२ अ०।

दण्डगौरी स्त्री अप्सरोभेदे “उर्वशी मिश्रकेशी च दण्डगौरी

दण्डग्राह त्रि० दण्डं गृह्णाति ग्रह-अण् उप० स०। दण्डधारके ततः रेवत्या०अपत्यादौ ठक्। दाण्डग्राहिक तदपत्यादौ पुंस्त्री०।

दण्डघ्न त्रि० दण्डेन देहेन हन्ति हन-क। देहेन घातिनि दण्डपारुष्यकर्त्तरि। “न साहसिकदण्डघ्नौ स राजा शक्रलोकभाक्” मनुः। [वाद्यभेदे त्रिका०।

दण्डढक्का स्त्री दण्डा प्रकाण्डा ढक्का।(दामामा) ख्याते

दण्डताम्री स्त्री ताम्रेण निर्मिता अण् ङीप् दण्डा प्रकाण्डा ताम्री। ताम्रीवाद्यभेदे शब्दर०।

दण्डदास पु० दण्डेन कृतो दासः। दण्डद्रव्यदानासामर्थ्येन तच्छोधनार्थं स्वीकृतदासभावे दासभेदे “ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ। पैतृको दण्डदासश्च सप्तैते दासयोनयः” मनुः। “दण्डादिधनशुद्ध्यर्थं स्वीकृतदासभावः”कुल्लू०।

दण्डधर पु० दण्डं लोकानां कर्मानुसारिणं दण्डं लगुडं वा धरति धर-अच् ६त०। १यमे अमरः २नृपे। ३लगुडधारके त्रि०। “असमतुदं मनुदण्डधरान्वयम्” रघुः। “ईशो दण्डस्य वरुणो राज्ञां दण्डधरो हि सः” मनुः। “नाहं दण्डधरस्तव” भा० शा० २२ अ०।

दण्डधार पु० दण्डं धरति धृ-अण् उप० स०। १यमे २नृपे च मेदि०। ३लगुडहस्ते त्रि० “क्रोधवर्द्धन इत्येव यस्त्वन्यः परिकीर्त्तितः। दण्डधार इति ख्यातः स आसीन् नृपतिः क्षितौ”भा०आ०६७अ० उक्ते ४नृपभेदे पु० ५धृतराष्ट्रपुत्रभेदे। “कवची निषङ्गी दण्डी दण्डधारो धनुर्ग्रहः” ६७अ० धृतराष्ट्रपुत्रकथने।

दण्डनायक पु० दण्डं नयति नी-ण्वुल् ६त०। १सेनान्याम् हेमच०। दण्डप्रणेतरि २नृपे च।

दण्डनीति स्त्री दण्डो नीयतेऽनया नी-करणे क्तिन्। विद्याभेदे। “एकैव दण्डनीतिस्तु विद्येत्यौशनसी स्थितिः। तस्यान्तु सर्वविद्यानामारम्भाः समुदाहृताः”। “दमो दण्ड इति ख्यातस्तात्स्थ्याद्दण्डो महीपतिः। तस्य नीतिर्दण्डनीतिर्नयनान्नीतिरुच्यते” काम० नीतिः। तच्छास्त्रविषयविभागादि भा० शा० ५९ अ० उक्तं यथा

“ततोऽध्यायसहस्राणां शतञ्चक्रे स्वबुद्धिजम्। यत्र धर्मस्तथैवार्थः कामश्चैवाभिवर्णितः। त्रिवर्ग इति विख्यातो गण एष स्वयम्भुवा। चतुर्थो मोक्ष इत्येव पृथगर्थः पृथग्गुणः। मोक्षस्यापि त्रिवर्गोऽन्यः प्रोक्तः सत्त्वं रजस्तमः। स्थानं वृद्धिः क्षयश्चैव त्रिवर्गश्चैव दण्डजः। आत्मा देशश्च कालश्चाप्युपायाः कृत्यमेव च। सहायाः कारणञ्चैव षड्वर्गो नीतिजः स्मृतः। त्रयी चान्वीक्षिकी चैव वार्त्ता च भरतर्षभ!। दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः। अमात्यरक्षा प्रणिधी राजपुत्रस्य लक्षणम्। चारश्च विविधोपायः प्रणिधेयः पृथग्विधः। साम भेदः प्रदानञ्च ततो दण्डश्च पार्थिव!। उपेक्षा पञ्चमी चात्र कार्त्स्न्येनैवमुदाहृता। मन्त्रश्च वर्णितः कृत्स्नस्तथा भेदार्थ एव च। विभ्रमश्चैव मन्त्रस्य सिद्ध्यसिद्ध्योश्च यत् फलम्। सन्धिश्च त्रिविधाभिख्यो हीनो मध्यस्तथोत्तमः। भयसत्कारवित्ताख्यं कार्त्स्न्येन परिवर्णितम्। यात्राकालाश्च चत्वारस्त्रिवर्गस्य च विस्तरः। विजयो धर्मयुक्तश्च तथार्थविजयश्च ह। आसुरश्चैव विजयस्तथा कार्त्स्न्येन वर्णितः। लक्षणं पञ्चवर्गस्य त्रिविधञ्चात्र वर्णितम्। प्रकाशश्चाप्रकाशश्च दण्डोऽथ परिशब्दितः। प्रकाशोऽष्टविधस्तत्र गुह्यस्य च सुविस्तरः। रथा नागा हयाश्चैव पादाताश्चैव पाण्डव!। विष्टिर्नावश्चराश्चेह दैशिका इति चाष्टमम्। अङ्गान्येतानि कौरव्य! प्रकाशानि बलस्य तु। जङ्गमाजङ्गमाश्चोक्ताश्चूर्णयोगा विषादयः। स्पर्शे चाभ्यवहार्य्ये चाप्युपांशुस्त्रिविधः स्मृतः। अरिर्मित्रमुदासीन इत्येतेऽप्यनुवर्णिताः।

कृत्स्ना मार्गगुणाश्चैव तथा भूमिगुणाश्च ह। आत्मरक्षणमाश्वासः स्पशानाञ्चान्ववेक्षणम्। कल्पना विविधाश्चापि नृनागरथवाजिनाम्। व्यूहाश्च विविधाभिख्या विचित्रं युद्धकौशलम्। उत्पाताश्च निपाताश्च सुयुद्धं सुपलायितम्। शस्त्राणां पालनं ज्ञानं तथैव भरतर्षभ!। बलव्यसनमुक्तश्च तथैव बलहर्षणम्। पीड़ातापद्कालश्च पत्तिज्ञानञ्च पाण्डव!। तथा खातविधानञ्च योगसञ्चार एव च। चौरैराटविकैश्चोग्रैः परराष्ट्रस्य पीड़नम्। अग्निदैर्गरदैश्चैव प्रतिरूपककारकैः। श्रेणीमुख्योपजापेन वीरुधश्छेदनेन च। भूषणेन च नागानामातङ्कजननेन च। आराधनेन भक्तस्य प्रत्ययोपार्ज्जनेन च। सप्ताङ्गस्य च राज्यस्य ह्रासवृद्धी समञ्जसम्। कृतसामर्थ्ययोगाच्च राष्ट्रस्य च विवर्द्धनम्। अरिमध्यस्थमित्राणां सम्यक् चोक्तं प्रपञ्चनम्। अवमर्द्दः प्रतीघातस्तथा चैव बलीयसाम्। व्यवहारः सुसूक्ष्मश्च तथा कण्टकशोधनम्। श्रमो व्यायामयोगश्च त्यागो द्रव्यस्य संग्रहः। अभृतानाञ्च भरणं भृतानाञ्चान्ववेक्षणम्। अर्थस्य काले दानञ्च व्यसने चाप्रसङ्गिता। तथा राजगुणाश्चैव सेनापतिगुणाश्च ह। कारणञ्च त्रिवर्गस्य गुणा दोषास्तथैव च। दुष्टेप्सितञ्च विविधं वृत्तिश्चैवानुवर्त्तिनाम्। शङ्कितत्वञ्च सर्वस्य प्रमादस्य च वर्जनम्। अलब्धलाभो, लब्धस्य तथैव च विवर्द्धनम्। प्रदानञ्च विवृद्धस्य पात्रेभ्यो विधिवत्ततः। विसर्गोऽर्थस्य धर्मार्थं कामहेतुकमुच्यते। चतुर्थं व्यसनाघाते तथैवात्रानुवर्णितम्। क्रोधजानि तथोग्राणि कामजानि तथैव च। दशोक्तानि कुरुश्रेष्ठ! व्यसनान्यत्र चैव ह। मृगयाक्षास्तथा पानं स्त्रियश्च भरतर्षभ!। कामजान्याहुराचार्य्याः प्रोक्तानीह स्वयम्भुवा। वाक्पारुष्यं तथोग्रत्वं दण्डपारुष्यमेव च। निग्रहोऽथात्मनस्त्यागमर्थदूषणमेव च। यन्त्राणि विविधान्येव क्रियास्तेषाञ्च वर्णिताः। अवमर्द्दः प्रतीघातः केतनानाञ्च भञ्जनम्। चैत्यद्रुमावमर्द्दश्च रोधः कर्म्मानुशासनम्। अपस्करोऽथ गमनं तथोपास्याश्च वर्णिताः। पणवानकशङ्खानां भेरीणाञ्च युधिष्ठिर!। उपार्जनञ्च द्रव्याणां परिमर्द्दश्च तानि षट्। लब्धस्य च प्रशमनं सताञ्चैवाभिपूजनम्। विद्वद्भिरेकीभावश्च दानहोमविधिज्ञता। मङ्गलालम्भनञ्चैव शरीरस्य प्रतिक्रिया। आहारयोजनञ्चैव नित्यमास्तिक्यमेव च। एकेन च यथोत्थेयं सत्यत्वं मधुरं गिरः। उत्सवानां समाजानां क्रियाकेतनजास्तथा। प्रत्यक्षाश्च परोक्षाश्च सर्वाधिकरणेष्वथ। वृत्ते भरतशार्दूल! नित्यञ्चैवान्ववेक्षणम्। अदण्ड्यत्वञ्च विप्राणां युक्त्या दण्डनिपातनम्। अनुजीविस्वजातिभ्यो गुणेभ्यश्च समुद्भवः। रक्षणञ्चैव पौराणां राष्ट्रस्य च विवर्द्धनम्। मण्डलस्था च या चिन्ता राजन्! द्वायशराजिका। द्वासप्ततिविधा चैव शरीरस्य प्रतिक्रिया। देशजातिकुलानाञ्च धर्म्माः समनुवर्णिताः। धर्मश्चार्थश्च कामश्च मोक्षश्चात्रानुवर्णितः। उपायश्चार्थलिप्सा च विविधा भूरिदक्षिणा। मूलकर्मक्रिया चात्र मायायोगश्च वर्णितः। दूषणं स्रोतसाञ्चैव वर्णितं च स्थिराम्भसाम्। यैर्यैरुपायैर्लोकस्तु न चलेदार्य्यवर्त्मनः। तत्सर्वं राजशार्दूल! नीतिशास्त्रेऽभिवर्णितम्। एतत् कृत्वा शुभं शास्त्रं ततः स भगवान् प्रभुः। देवानुवाच संहृष्टः सर्वाञ्छक्रपुरोगमान्। उपकाराय लोकस्य त्रिवर्गस्थापनाय च। नवनीतं सरस्वत्या बुद्धिरेषा प्रभाविता। दण्डेन सहिता ह्येषा लोकरक्षणकारिका। निग्रहानुग्रहरता लोकाननुचरिष्यति। दण्डेन नीयते चेदं दण्डं नयति वा पुनः। दण्डनीतिरिति ख्याता त्रींल्लोकानतिवर्त्तते। षाड्गुण्यगुणसारैषा स्थास्यत्यग्रे महात्मसु। धर्म्मार्थकाममोक्षाश्च सकला ह्यत्र शब्दिताः। ततस्तां भगवान्नीतिं पूर्वं जग्राह शङ्करः। बहुरूपो विशालाक्षः शिवः स्थाणुरुमापतिः। प्रजानामायुषो ह्रासं विज्ञाय भगवान् शिवः। सञ्चिक्षेप ततः शास्त्रं महार्थं ब्रह्मणा कृतम्। विशालाक्षमिति प्रोक्तं तदिदं प्रत्यपद्यत। दशाध्यायसहस्राणि सुब्रह्मण्यो महातपाः। भगवानपि तच्छास्त्रं सञ्चिक्षेप पुरन्दरः। सहस्रैः पञ्चभिस्तात! यदुक्तं बाहुदन्तकम्। अध्यायानां सहस्रैस्तु त्रिभिरेव बृहस्पतिः। सञ्चिक्षेपेश्वरो बुद्ध्या बार्हस्पत्यं यदुच्यते। अध्यायानां सहस्रेण काव्यः संक्षेपमब्रवीत्। तच्छास्त्रममितप्रज्ञो योगाचार्य्यो महायशाः। एवं लोकानुरोधेन शास्त्रमेतन्महर्षिभिः। संक्षिप्तमायुर्विज्ञाय मर्त्यानां ह्रासमेव च।”

२दुर्गायाम् “नयानयगता लोके विकल्पनिलयामला। दण्डनाद्नयनाच्चापि दण्डनीतिरिति स्मृता” देवीपु०४५ अ०। भावे क्तिन्। ३दण्डप्रणयने स्त्री।

दण्डनेतृ न० दण्डं नयति अपराधिनम् नी—तृच् ६त०। दण्डप्रणायके नृपे। “सैन्यापत्यञ्च राज्यञ्च दण्डनेतृत्वमेव च” मनुः।

दण्डप पु॰ दण्डेन पाति पा—क। दण्डेन पालके नृपे तस्यापत्यं नडा॰ फक्। दाण्डपायन तदपत्ये पुंस्त्री।

दण्डपांशुल पु॰ दण्डेन यष्टिधारणेन पांशुलः अधमः। द्वारपाले शब्दर॰।

दण्डपाणि पु॰ दण्डः यष्टिः पाणौ यस्य। दण्डधरे यमे। काशीस्थे भैरवभेदे "विश्वेशं माधवं ढुण्ढिं दण्डपाणिञ्च भैरवम्" स च पूर्णभद्रयक्षसुतो हरिकेशनामा आराधितशिववरेण काश्यां दण्डपाणिनामत्वमवाप। यथाह काशीख॰ ३२ अ॰ "इति श्रुत्वा वचः पत्न्याः पूर्णभद्रः स यक्षराट्" इत्युपक्रमे "अन्तर्वत्न्यथ कालेन तत्पत्नी सुषुवे सुतम्। तस्य नाम पिता चक्रे हरिकेश इति द्विज!" इत्यनेन तस्योत्पत्तिमुक्त्वा तस्य शिवाराधनमुपवर्ण्य तपसा प्रसन्नशिवस्य तस्मै वरदानमुक्तं यथा "भक्तस्य धीरस्य तपोनिधेर्ददौ हरो वराणां निकरं तदा मुदे। चेतस्य यक्षास्य मम प्रियस्य भो भवाधुना दण्डधरो वरान्मम। स्थिरस्त्वमद्यादि दुरात्मदण्डकः सुपालकः पुण्यकृताञ्च मत्प्रियः। त्वं दण्डपाणिर्भव नामतोऽधुना सर्वान् गणान् शाधि ममाज्ञयोत्कटान्। त्वत्सात्कृतक्षेत्रवरेऽद्य यक्षराट् कस्त्वामनाराध्य सुमुक्तिभाजनम्। सभाजनं प्रागत एव ते चरेत् ततः समर्च्यो मम भक्त आदरात्। मद्भक्तियुक्तोऽपि विना त्वदीयां भक्तिं न काशीवसतिं लभेत। गणेषु देवेषु हि मानवेषु तदग्र्यमान्यो भव दण्डपाणे"। काश्यां तत्स्थितिस्थानञ्च तत्रैवोक्तं यथा "त्वं दक्षिणस्यां दिशि दण्डपाणे! सदैव मे नेत्रसमक्षमत्र। त्वं दण्डयन् प्राणभृतां दुरीहानिहास्य निस्थानभयं दिशन् वै"।

दण्डपारुष्य न॰ दण्डेन देहेन पारुष्यम्। व्यवहारविषयभेदे "तत्स्वरूपञ्च नारदेनोक्तम् "परगात्रेष्वभिद्रोहो हस्तपादायुधादिभिः, भस्मादिभिश्चोपघातो दण्डपारुष्यमुच्यत" इति। "परगात्रेषु स्थावरजङ्गमात्मकद्रव्येषु हस्तपादायुधैरादिग्रहणादुपावादिभिर्योऽभिद्रोहो हिंसनं दुःखोत्पादनं तथा भस्मना आदिग्रहणाद् रजःपङ्कपुरीषाद्यैश्च य उपवातः संस्पर्शनरूपं मनोदुःखोत्पादनन्तदुभयं दण्डपारुष्यम्। दण्ड्यतेऽनेनेति दण्डो देहस्तेन यत् पारुष्यं विरुद्धाचरणं जङ्गमादेर्द्रव्यस्य, तद्दण्डपारुष्यम्"मिता॰।

तद्भेदादिकं वीरमि॰ उक्तं यथा

"तस्य त्रैविध्यमाह नारदः। "तस्यापि दृष्टं त्रैविध्यं हीनमध्योत्तमक्रमात्। अवगोरणनिःशङ्कपातनक्षतदर्शनैः। हीनमध्योत्तमानाञ्च द्रव्याणां समतिक्रमात्। त्रीण्येव साहसान्याहुस्तत्र कण्टकशोधनमिति"। अवगोरणं ताड़नाद्युद्योगः। निःशङ्कपातनं निःशङ्कप्रहरणम्। त्रीण्येव साहसानि त्रिप्रकाराण्येव साहसाकृतानि दण्डपारुष्याणीत्यर्थः। अन्यानपि भेदानाह परिशिष्टकारः। "दुःखं रक्तं व्रणं भङ्गं छेदनं भेदनन्तथा। कुर्य्याद्वयः प्राणिनां तद्धि दण्डपारुष्यमुच्यते"। स्थावरजङ्गमप्राणिनां प्राण्यन्तरकृतनखादिना छेदनादिभवं दुःखं रक्तव्रणादिकञ्च दण्डपारुष्यमुच्यत इत्यर्थः। व्यासोऽपि "भस्मादिना प्रक्षिपणो ताड़नञ्च करादिना। आवेष्टनञ्चांशुकाद्यैर्दण्डपारुष्यमुच्यते"। आदिग्रहणाद्दुःखकरं कर्दमपांशुमलादि द्रव्यं गृह्यते। करादिनेत्यादिशब्देन पाषाणेष्टकायुधादि द्रव्यम्। अंशुकाद्यैरित्यादिशब्देन रज्जुशृङ्खलादिद्रव्यम्। दण्डपारुष्यस्य पञ्चप्रकारा विधयो नारदेन दर्शिताः। "विधिः पञ्चविधस्तूक्त एतयोरुभयोरपि। पारुष्ये सति संरम्भादुत्पन्ने क्रुद्धयोर्द्वयोः। स मान्यते यः क्षमते दण्डभाग्योऽतिवर्त्तते। पूर्वमाक्षारयेद्यस्तु नियतं स्यात् स दोषभाक्। पश्चाद्यः सोऽप्यसत्कारी पूर्वे तु विनयो गुरुः। द्वयोरापन्नयोस्तुल्यमनुबध्नाति यः पुनः। स तयोर्दण्डमाप्नोति पूर्वो वा यदि चेतरः। पारुष्यदोषावृतयोर्युगपत्सम्प्रवृत्तयोः। विशेषश्चेन्न लक्ष्येत विनयः स्यात् समस्तयोः। श्वपाकषण्डचाण्डालव्यङ्गेषु वधवृत्तिषु। हस्तिपव्रात्यदासेषु गुर्वाचार्यनृपेषु च। मर्य्यादातिक्रमे सद्यो घात एवानुशासनम्। यमेव ह्यतिवर्त्तेरन्नेते सन्तञ्जनं नृषु। स एव विनयं कुर्य्यात् न तद्विनयभाङ्नृपः। मला ह्येते मनुष्याणां धनमेषां मलात्मकम्। अतस्तान् घातयेद्राजा नार्थदण्डेन दण्डयेदिति"। अयमर्थः। वाग्दण्डपारुष्ययोरुभयोरपि द्वयोः प्रवृत्तकलहयोर्मध्ये यः क्षमते न तस्य केवलं दण्डाभाव एव किन्तु पूज्यत्वमपि। तथा पूर्वं कलहे प्रवृत्तस्य दण्डगुरुत्वम्। कलहे च बद्धवैरानुबन्धात्तुरेव दण्डभाक्त्वम्। तथा तयोर्द्वयोरपराधविशेषापरिज्ञाने सम एव दण्डः। तथा श्वपचादिभिरार्य्याणामपराधे कृते सज्जना एव दण्डने अधिकारिणस्तेषामशक्यत्वे तान् राजा घातयेदेव नार्थं गृह्णीयादिति।

यत्तु बृहस्पतिवचनम् "आक्रुष्टस्तु समाक्रोशं ताडितः प्रतिताडयन्। हत्वापराधिनञ्चैव नापराधी भवेन्नरः" इति। तत्पूर्वप्रवृत्तस्य समो दण्डः पश्चात् प्रवृत्तस्य नेत्येवंपरञ्च न तु दण्डाभावपरम्। दण्डपारुष्यस्वरूपसन्देहे निर्णयक्रमाह याज्ञवल्क्यः "असाक्षिकहते चिह्नैर्युक्तिभिश्चागमेन च। द्रष्टव्यो व्यवहारस्तु कूटचिह्नकृतो भयादिति"। यदा कश्चिद्रहस्यहमनेनाहत इति राज्ञे निवेदयति तदा चिह्नैर्व्रणादिभिस्तत्स्वरूपगतैर्लिङ्गैः युक्तिभिः कारणप्रयोजनपर्य्यालोचनादिभिः आगमेन जनप्रवादेन चशब्दाद्दिव्येन वा कूटचिह्नकृतसम्भावनभयात् परीक्षा कार्य्येत्यर्थः।

दण्डपाल पु० दण्डं देहं पालयति भक्षणात् पालि–अण् उप० स०। (डाड़िकोणा) मत्स्यभेदे हारा०। तद्भोजिनो रोगिणो देहस्वास्थ्यजननात्तस्य तथात्वम्। संज्ञायां कन्। दण्डपालक शकुलमत्स्यभेदे हारा०। उभयमपि दण्डनायके।

दण्डपिङ्गलक पु० दण्डः देहः पिङ्गलोऽत्र। उत्तरस्यदेशभेदे "उत्तरतः कैलासः" इत्युपक्रमे वृ० स० १४ अ० कूर्मविभागे "पौरवकवचदारुदण्डपिङ्गलकाः" उक्तः।

दण्डवालधि पु० दण्ड इव बालधिरस्य। हस्तिनि शब्दर०। तस्य लाङ्गूलस्य दण्डाकारत्वात् तथात्वम्।

दण्डबाहु त्रि० दण्ड इव बाहुरस्य। १दण्डाकारबाहुयुक्ते २कुमारानुचरभेदे पु०। "दण्डबाहुः सुबाहुश्च रजःकोकिल एव च" भा० श० ४६ अ० कुमारानुचरोक्तौ।

दण्डभृत् त्रि० दण्डं यष्टिं लोकदमनं वा बिभर्त्ति भृ–क्विप्। १यष्टिधारके २यमे त्रिका०।

दण्डमत्स्य पु० दण्ड इव मत्स्यः। दण्डाकारे शकुलमत्स्ये। "दण्डमत्स्यो रसे तिक्तः पित्तरक्तं कफं हरेत्। वातसाधारणः प्रोक्तः शुक्रलो बलवर्द्धन" राजव०।

दण्डमान(ण)व पु० दण्डप्रधानो मान(ण)वः शा० त०। दण्डप्रधाने जने बालके च तदर्थपरतायां गोत्रप्रत्ययान्तशब्दात् "दण्डमान(ण)वान्तेवासिषु" पा० न वुञ्। दाक्षा दण्डमान(ण)वाः शिष्या वा" सि० कौ०।

दण्डमातङ्ग पु० पिण्डतगरे पारस्करनिघण्टुः।

दण्डमाथ पु० दण्डाकारो माथः पन्थाः शा० त०। प्रधानपथे दण्डमाथं धावति ठक्। दाण्डमाथिक तत्धावके त्रि०।

दण्डमुद्रा स्त्री दण्डाकारा मुद्रा "उत्तानोर्द्धकृता मध्या सरला बद्धमुष्टिका। दण्डमुद्रा समाख्याता" तन्त्रसारोक्ते मुद्राभेदे।

दण्डयात्रा स्त्री दण्डार्थं शत्रुदमनार्थं दण्डा प्रकाण्डा वा यात्रा। १जिगीषोर्यात्रायां २सम्यग्गमने ३वरयात्रायाञ्च मेदि०।

दण्डयाम पु० दण्डेन यच्छति यम–बा० कर्त्तरि यम–घञ्। १यमे २दिने। दण्डे इन्द्रियदमने यामः संयमो यस्य। ३अगस्त्ये मुनौ च मेदि०।

दण्डरी स्त्री दण्डं तदाकारं राति रा–क गौरा० ङीष्। (डङ्गरा) इतिनामके वृक्षे राजनि०।

दण्डवादिन् पु० दण्डेन तदुत्तोलनेन वदति वद–णिनि। १द्वारपाले हारा० २दण्डवक्तरि प्राड्विकादौ च।

दण्डवासिन् पु० दण्डे दण्डनिमित्तं वसति द्वारदेशे वस–णिनि। १द्वारपाले त्रिका०। २एकग्रामदण्डनेऽधिकृते जने जटा०।

दण्डविष्कम्भ पु० दण्डं मन्थानदण्डं विष्कम्नाति वि+स्कन्भ–अण् उप० स०। (वोलमओयार खुँटि) तक्रमन्थनार्थं रज्ज्वा दण्डाकर्षणार्थे मन्थानबन्धनहेतौ स्तम्भभेदे अमरः।

दण्डवृक्ष पु० दण्डाकारः पत्रादिहीनत्वात् वृक्षः। स्नुहीवृक्षे। स्वार्थे क। स्नुहीवृक्षे राजनि०। तस्य पत्रशून्यत्वेन दण्डाकारत्वात्तथात्वम्।

दण्डव्यूह पु० दण्डसंज्ञको व्यूहः। व्यूहभेदे दण्डशब्दे दृश्यम्। "दण्डव्यूहेन तन्मार्गं यायात्तु शकटेन वा" मनुः। "दण्डाकृतिरचनो दण्डव्यूहः" कुल्लू०। "यत्राग्रे बलाध्यक्षो मध्ये राजा पश्चात् सेनापतिः पार्श्वयोर्हस्तिनस्तत्समीपे घोटकास्ततः पदातयः इत्येवं कृतरचनो दीर्घः सर्वतः समविन्यासो दण्डव्यूह उच्यते। तेन यातव्यं मार्गं सर्वतोभये सति यायात्" तदर्थः।

दण्डसहाय पु० दण्डे सहायः। दुष्टनिग्रहादौ राज्ञा सहाये। स च सहाया इत्युपक्रमे "दण्डेषु सुहृत्कुमाराटविकाः सामन्तकाद्याश्चेति" सा० द० उक्तः।

दण्डसेन पु० पौरवे विष्वक्सेनसुते नृपभेदे विष्वक्सेनस्य पुत्रोऽभूत् दण्डसेनो महीपतिः" हरिवं० २० अ० २द्वापरयुगीये नृपभेदे च। "वधः पाण्ड्यस्य च तथा अश्वत्थाम्ना महात्मना। दण्डसेनस्य च ततो दण्डस्य च वधस्तथा" भा० आ० १ अ०।

दण्डस्थान न० ६त०। मनूक्तेषु दशसु दण्डस्थानेषु उपस्थादिषु

दश स्थानानि दण्डस्येत्यादिवाक्यं दण्डशब्दे दृश्यम् ।

दण्डहस्त पु० दण्ड इव हस्तो हननमस्य । तगरपुष्पे राजनि० ।

दण्डाख्य न० चम्पानदीसमीपस्थे तीर्थभेदे । “तथा चम्पां समासाद्य भागीरथ्यां कृतोदकः । दण्डाख्यमभिगम्यैव गोसहस्रफलं लभेत्” भा० व० ८५ अ० । दण्डार्कमित्यपि तत्र पाठान्तरम् ।

दण्डाजिन न० दण्डश्चाजिनञ्च समा० द्व० । १दण्डचर्मणोः समाहारे । तत् छलेन धार्यतयाऽस्त्यस्य अच् । २शाठ्ये शब्दार्थचि० ।

दण्डादण्डि अव्य० दण्डैश्च दण्डैश्च प्रहृत्येदं प्रवृत्तं युद्धम् “क्रियाव्यतिहारे इच् समा० पूर्वपददीर्घः । परस्परदण्डकरणकप्रहारपूर्वकं प्रवृत्ते युद्धे ।

दण्डादि न० “दण्डादिभ्यो यत्” पा०अर्हार्थे यत्प्रत्ययनिमित्ते शब्दगणे स च पा० ग० सू० उक्तो यथा “दण्ड, मुसल, मधुपर्क, कशा, अर्घ, मेधा, मेघ, सुवर्ण, उदक, वध, युग, गुहा, भाग, इभ, भङ्ग” ।

दण्डापूप पु० दण्डे दण्डाकर्षे अपूपस्य तत्सम्बद्धस्यापूपस्याकर्षः । दण्डाकर्षणे अर्थसिद्धे तत्सम्बद्धापूपस्याकर्षे । तत्प्रतिपादकः न्यायः दण्डापूपन्यायः । यथा “भुञ्जीतामरणात् क्षान्तेति” वचनेन जाताधिकारायाः पत्न्या अभावे अनुत्पन्नाधिकारपत्न्यभावोक्तानां पूर्वधनस्वामिदायग्राहिणां दुहित्रादीनां समाधिकारस्य दर्शितत्वात् पत्नीतो जघन्यदुहितृदौहित्रयोरधिकारे दण्डापूपन्यायसिद्धोऽयमर्थः” “स्थावरपदाद्दण्डापूपन्यायादेवापरस्य धनस्य सिद्धिः” दा० भा० दण्डापूप इवाचरति क्यङ् ततः कर्त्तरि क्तः । दण्डापूपायित दण्डापूपवदाचरिते पदार्थे “पत्न्या च भर्त्तृधनात् कन्यायै विवाहार्थं तुरीयांशो देयः, पुत्राणामेव तद्दानप्रतिपादनात् दण्डापूपायितं पत्न्यादीनां दानम्” दा० भा० । “यथा दण्डाकर्षे तत्सम्बद्धस्यापूपस्याप्याकर्षः तथा अपुत्रसंक्रान्तधनस्य पत्नीगततया आकर्षे तत्सम्बद्धस्य कन्याविवाहैधमावधिपत्वविशेषस्याप्याकर्ष इति भावः” श्रीकृष्णः ।

दण्डार त्रि० दण्डमृच्छति ऋ—अण् उप० स० । १दण्डप्राप्ते । २मत्तहस्तिनि शब्दर० । ३कुम्भकारचक्रे ४यन्त्रभेदे ५वाहने पु० मेदि० ।

दण्डार्क न० चम्पानदीसमीपस्थे तीर्थभेदे “अथ चम्पां समासाद्य भागीरथ्यां कृतोदकः । दण्डार्कमभिगम्याथ गोसहस्रफलं लभेत्” भा० व० ८३ अ० । दण्डाख्यमिति वा पाठः

दण्डावतानक पु० सुश्रुतोक्ते वातरोगभेदे “कफान्वितो भृशं वायुस्तास्वेव यदि तिष्ठति । स दण्डवत्सम्भवयति कृच्छ्रो दण्डापतानकः” ।

दण्डासन न० आसनभेदे हेमच० ।

दण्डाहत न० दण्डेन मन्थानयष्ट्याऽऽहतम् ।(घोल) मन्थनदण्डेनालोडिते तक्रे अमरः ।

दण्डिक त्रि० दण्डोऽस्त्यस्य ठन् ।१दण्डधारके(डाडिकोषा) २मत्स्यभेदे राजनि० ३हारभेदे स्त्री जटाधरः ।४रज्ज्वां सुपद्मव्या० वृत्तिः ।

दण्डिन् पु० दण्ड+अस्त्यर्थे इनि । १यमे, हेमच० २नृपे, ३द्वारपाले, ४मञ्जुघोषे, ५रवेः पार्श्वचरभेदे, शब्दार्थचि० ६जिनभेदे, त्रिका० ७दमनकवृक्षे, राजनि० ८चतुर्थाश्रमविशिष्टे, काव्यादर्शग्रन्थकर्त्तरि ९कविभेदे च ।“जाते जगति वाल्मीके कविरित्यभिधीयते । कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि” उद्भटः । १०दण्डधारके त्रि० । स्त्रियां ङीप् । ११महादेवे पु० ।“दण्डिने लोमकर्णाय दण्डिदण्डाय वै नमः” भा० शा० २८५ अ० । दण्डिदण्डोऽपि शिवे “गुह्यकेशनखश्मश्रुः पाशी दण्डी कुसुम्भवान्” १२धृतराष्ट्रपुत्रभेदे दण्डधारशब्दे दृश्यम् ।

दण्डिमन् पु० दण्डस्य भावः कर्म वा पृथ्वा० इमनिच् । दण्डभावे दण्डकर्मणि च ।

दण्डोत्पल न० दण्डयुक्तमुत्पलमिव ।१वृक्षभेदे,(डानिकोषा) २मत्स्यभेदे राजनि० । तत्रार्थे स्त्री रत्नमाला ।

दण्ड्य त्रि० दण्ड—कर्म्मणि यत् । १दण्डनीये । दण्डमर्हति दण्डा० यत् । २दण्डार्हे । दण्डशब्दे उभयोदा० दृश्यम्

दत् पु० दन्त+पृषो० । १दन्ते शब्दरत्ना० । “दत् दतौ दतः नासाकर्णदतो भङ्क्ते” मनुः । दन्तशब्दस्यैव रूपमित्येके दन्तशब्दस्य शसादौ दत आदेशे तत्सिद्धेः शुभ्रादेः परतः दन्तस्य तु दत्रादेशे “शुद्दन् लोलकुण्डलः” भट्टिः । “सुदतीजनमज्जनार्त्तितैः” नैष० ।

दत्त त्रि० दा—कर्म्मणि क्त । १त्यक्ते कृतदाने उत्सृष्टे “स्वहस्तदत्ते मुनिमासने मुनिम्” माघः । दत्तं च सप्तविधं दत्ताप्रदानिकशब्दे वक्ष्यते । २अत्रेरनसूयागर्भजाते दत्तात्रेयापरनामके विष्णववताररूपे पुत्रभेदे पु० । आत्रेयशब्दे ३९२ पृ० तत्सम्भवकथा दृश्या “कपिलो नारदो दत्तो योगेशाः सनकादयः” भाग० ४।१८।६ । ३अग्निसिंहनन्दने जिनभेदे हेमच० ।४सात्वतवंश्ये भजमानान्वयजे राजाधिदेवस्य पुत्रभेदे । “राजाधिदेवस्य

सुता जज्ञिरे वीर्य्यवत्तराः। दत्तातिदत्तौ बलिनौ शोणाश्वः श्वेतवाहनः। शमी च दत्तशर्म्मा च दत्तशत्रुश्च शत्रुजित्। श्रवणा च श्रविष्ठा च स्वसारौ सम्बभूवतुः" हरिवं॰ ३९ अ॰। भावे क्त। ५ दाने न॰ "दत्तभुक्तफलं धनम्" दायभा॰ भारतवाक्यम्। "शरणागतसंत्राणं भूतानां चाप्यहिंसनम्। बहिर्वेदि च यद्दानं दत्तमित्यभिधीयते" भा॰ शा॰ उक्ते ६ शरणागतादित्रिके अत्र दण्डमिति लिपिकरप्रमादपाठदर्शनात् शब्दकल्पद्रुमे दण्डशब्दस्य शरणागतत्राणाद्यर्थकतोक्ता तद्दृष्ट्वैवास्माभिः दण्डशब्दस्य तदर्थकता प्रागुक्ता प्रमादकृतैव अर्थपर्य्यालोचनया तत्र "दत्तमित्यभिधीयते" इति पाठस्यैव समुचितत्वात् द्वादशपुत्रान्तर्गते ७ गौणपुत्रभेदे। स च कलियुगेऽपि कर्त्तुं शक्यते "दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः" कलिवर्ज्ज्ये आदित्यपु॰ "दत्तपदं कृत्रिमस्याप्युपलक्षणं "औरसः क्षेत्रजस्यैव दत्तः कृत्रिम एव च" कलिधर्म्मे पराशरः इति दत्तकमीमा॰। अन्यैस्तु क्षेत्रजपदस्य औरसविशेषणत्वं कृत्रिमपदस्य दत्तकविशेषणत्वं मत्वा द्वयोरेव कलौ पुत्रत्वमिति व्यवस्थापितम्। स्वार्थे क। तत्रार्थे। तल्लक्षणं याज्ञव॰ "दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्" मनुरपि "माता पिता वा दद्यातां यमद्भिः पुत्रमापदि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः" इति। "आपद्ग्रहणादनापदि न देयो दातुरयं प्रतिषेधस्तथा एकः पुत्रो न देयः "न त्वेवैकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वेति" वसिष्ठस्मरणात्। तथानेकपुत्रसद्भावेऽपि ज्येष्ठो न देयः। "ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः" इति तस्यैव पुत्रकार्य्यकरणे मुख्यत्वात्" मिता॰।

अथ दत्तकग्रहणाधिकारादिकं दत्तकचन्द्रिकायां दर्शितं तच्चेह प्रदर्श्यते।

मनुः "अपुत्रेण सुतः कार्य्यो यादृक्तादृक् प्रयत्नतः। पिण्डोदकक्रियाहेतोर्नामसंकीर्त्तनाय च।" अत्रिश्च "अपुत्रेणैव कर्त्तव्यः पुत्रप्रतिनिधिः सदा। पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात् प्रयत्नतः"। अपुत्रेण अजातपुत्रेण मृतपुत्रेण वा। "अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च" इति शौनकसंवादात्। तेन पुत्रोत्पत्त्या "ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः। पितॄणामनृणश्चैव स तस्माल्लब्धुमर्हतीति" मनुवचनावगते ऋणपरीहारेऽपि तत्पुत्रमरणे पिण्डोदकाद्यर्थं पुनः पुत्रकरणमावश्यकम्। अत्र पुत्रपदं पौत्रप्रपौत्रयोरप्युपलक्षणम् तयोरपि पिण्डदातृत्ववंशकरत्वाविशेषात्। अन्यथा सत्यपि पौत्रे मृतपुत्रस्य निर्निमित्तपुत्रपरिग्रहापत्तिः अतः पुत्रपौत्रप्रपौत्ररहितस्यैव पुत्रीकरणमवगम्यते। अपुत्रेणेत्यत्र पुंस्त्वैकत्वयोर्विधेयविशेषणतया विवक्षितत्वम् तेन द्वाभ्यां त्रिभिर्वा नैकः प्रतिग्राह्य इति तु न देश्यं द्व्यामुष्यायणस्य द्वाभ्यां परिग्रहस्य वक्ष्यमाणत्वात्। स्त्रियाश्च भर्त्तुरनुज्ञया तदधिकारात्। यथाह वशिष्ठः "न तु स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वान्यत्रानुज्ञानाद्भर्त्तुरिति"। प्रतिनिधिरिति। स च क्षेत्रजादिरेकादशविधः। यथाह मनुः "क्षेत्रजादीन् सुतानेतानेकादश यथोदितान्। पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः"। वृहस्पतिः "पुत्रास्त्रयोदश प्रोक्ता मनुना येऽनुपूर्वशः। सन्तानकारणन्तेषामौरसः पुत्रिका तथा। आज्यं विना यथा तैलं सद्भिः प्रतिनिधीकृतम्। तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना"। तत्रापि कलौ न सर्वेषामभ्यनुज्ञानम्। "अनेकधा कृताः पुत्रा ऋषिभिर्ये पुरातनैः। न शक्यन्तेऽधुना कर्त्तुं शक्तिहीनैरिदन्तनैरिति" वचनात्। "दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः" इत्याद्यभिधाय "इमान् धर्म्मान् कलियुगे वर्ज्ज्यानाहुर्म्मनीषिणः" इति दत्तकेतरप्रतिनिधिनिषेधात् अतो दत्तकविधिर्विवेच्यते। तत्र शौनकः। "ब्राह्मणानां सपिण्डेषु कर्त्तव्यः पुत्रसंग्रहः। तदभावेऽसपिण्डे वा अन्यत्र तु न कारयेत्"। सपिण्डेष्विति सामान्यश्रवणात् समानासमानगोत्रेष्वित्यर्थः। तथाच सपिण्डाभावे असपिण्डः सगोत्रस्तदभावे भिन्नगोत्रोऽपि ग्राह्य इत्याह शाकलः "सपिण्डापत्यकञ्चैव सगोत्रजमथापि वा। अपुत्रको द्विजो यस्मात् पुत्रत्वे परिकल्पयेत्। समानगोत्रजाभावे पालयेदन्यगोत्रजम्। दौहित्रं भागिनेयञ्च मातृस्वसृसुतं विना" इति। "अन्यत्र तु न कारयेदिति" ब्राह्मणातिरिक्तः क्षत्रियादिरसमानजातीयो दत्तको व्यावर्त्त्यते" यदाह मनुः। "माता पिता वा दद्यातां यमद्भिः पुत्रमापदि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः"। आपदि पुत्रप्रतिग्रहीतुरपुत्रत्वे सदृशं सजातीयम्। यत्तु "सदृशं न जातितः किन्तु कुलानुरूपैर्गुणैस्तेन क्षत्रियादिरपि ब्राह्मणस्य पुत्रो युज्यते"

इति मेधातिथिव्याख्यानम्। तत्रायमभिसन्धिः औरसासत्त्वे क्षत्रियादेरसमानजातीयतया पिण्डोदकाद्यनर्हत्वेऽपि नामसंकीर्त्तनादिप्रयोजनकतया पुत्रत्वमुत्पद्यते एव शास्त्रीयत्वात् परन्त्वल्पोपकारतया ग्रासाच्छादनमात्रभागित्वं यदाह कात्यायनः ‘असवर्णास्तु ग्रासाच्छादनभागिन” इति। तथा शौनकः “यदि स्यादन्यजातीयो गृहीतोऽपि सुतः क्वचित्। अंशभाजं न तं कुर्य्याच्छौनकस्य मतं हि तत्।” याज्ञवल्क्येनाऽपि पिण्डदोंऽशहरश्चैषां पूर्वाभावे परः परः। सजातीयेष्वयं प्रोक्तस्तनयेषु मयाविधिः”। सजातीयस्य पिण्डदातृत्वांशहरत्वे विहिते न तु विजातीयस्य पुत्रत्वं निषिद्धम् व्यक्तमाह वृद्धयाज्ञवल्क्यः “सजातीयः सुतो ग्राह्यः पिण्डदाता स रिक्थभाक्। तदभावे विजातीयो वंशमात्रकरः स्मृतः “ग्रासाच्छादनमात्रन्तु स लभेत तदृक्थिन” इति। वस्तुतस्तु मुनिवचने सदृशपदस्य सजातीयार्थकतैव युक्ता परत्र तादृशदत्तकस्य विभागदर्शनात् असवर्णस्य च विभागासम्भवात्। “दौहित्रो भागिनेयश्चेति” दौहित्रभागिनेयनिषेधः शूद्रातिरिक्तविषयः तथा च शौनकः “क्षत्रियाणां सजातौ च गुरुगोत्रसमेऽपि वा। वैश्यानां वैश्यजातेषु शूद्राणां शूद्रजातिषु। सर्वेषामेव वर्णानां जातिष्वेव न चान्यतः। दौहित्रो भागिनेयश्च शूद्रैस्तु क्रियते सुतः। ब्राह्मणादित्रये नास्ति भागिनेयः सुतः क्वचित्”। गुरुगोत्रसमेऽपि वेति क्षत्रियाणां प्रातिस्विकगोत्राभावात् गुरुगोत्रनिर्द्देशः “पौरोहित्यान् राजन्यविशां प्रवृणीते इति” सूत्रेण तस्य पुरोहितगोत्रभागित्वोक्तेः। जातिष्वेव नचान्यत इति नियमः सजातीयसम्भवे विजातीयनिषेधार्थः अन्यथा प्रागुक्तकात्यायनविरोधः स्यात्। तत्रापि सन्निहितसपिण्डेषु सति भ्रातृसुते स एव पुत्रीकार्य्य इत्याह मनुः “सर्वेषामेकजातानामेकश्चेत् पुत्रवान् भवेत्। सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्”। बृहस्पतिः “यद्येकजाता बहवो भ्रातरश्च सहोदराः। एकस्यापि सुते जाते सर्वे ते पुत्रिणः स्मृताः” इति। अत्र वचनद्वयेऽपि भ्रातृसुते पुत्रप्रतिनिधितया कथञ्चित् सम्भवति अन्यो न प्रतिनिधिः कार्य्य इत्यवगम्यते। न चापत्यमुत्पादयितव्यमिति नित्योह्ययं विधिः स यथा कथञ्चित् पालनीयस्तत्र भ्रातृव्ये पुत्रातिदेशेन तत्फलस्य पिण्डोदकादेरलोकतापरीहारस्य च सिद्धत्वेन न एव तत्र प्रवृत्तिरत एवाकृतस्यैव भ्रातृपुत्रस्य पुत्रत्वम्। “अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत्। स एव तस्य कुर्वीत श्राद्धपिण्डोदकक्रियामिति” वृद्धपराशरस्मरणात्। तस्मिन् सति तु न दत्तकाद्युपादानमिति वाच्यम्। भ्रातृव्यस्य पुत्रातिदेशेनालोकतापरीहारादिसाधकत्वेऽपि नामसंकीर्त्तनोचितवंशकरत्वानुपपत्त्या तदर्थं तदुपादानस्यावश्यकत्वात्। किञ्च इदं हि वचनद्वयं सति भ्रातृपुत्रे न दत्तकाद्युपादाननिषेधकं परन्तु श्राद्धादिकर्तृत्वरूपपुत्रधर्मातिदेशकम् अन्यथा सत्यपि भ्रातृपुत्रे क्षेत्रजपुत्रोत्पादनविधिविरोधापत्तेः। “अकृता वा कृता वापि यं विन्देत् सदृशात् सुतम्। पौत्री मातामहस्तेन दद्यात् पिण्डं हरेद्धनमिति” वचने दौहित्रेऽपि पौत्रातिदेशसत्त्वात् दौहित्रसत्त्वेऽपि प्रागुक्तयुक्त्या दत्तकाद्यनुपादानप्रसङ्गाच्च। ननु सत्यपि भ्रातृपुत्रे दत्तकाद्युपादानस्य शास्त्रीयत्वे “बह्वीनामेकपत्नीनामेष एव विधिः स्मृत” इति बृहस्पतिवचने “सर्वासामेकपत्नीनामेका चेत् पुत्रिणी भवेत्” सर्वास्ता स्तेन पुत्रेण प्राह पुत्रवतीर्म्मनुरिति” मनुवचने च सपत्नीपुत्रे पुत्रधर्मातिदेशेन सत्यपि तस्मिन् दत्तकाद्युपादानमस्त्विति चेन्न यथा “तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति वाजिभ्यो वाजिनम्” इत्यत्रामिक्षार्थं प्रवृत्तस्योद्देश्यीभूतामिक्षापचारे आमिक्षा पुरुषं प्रवर्त्तयति न तु वाजिनम् अनुद्देश्यत्वेनाप्रयोजकत्वात् यथा वा पितुः क्षयाहे पित्रादित्रिकस्य पार्वणे कृते मातामहादिश्राद्धाय न पुनः पार्वणारम्भः तस्य पितृश्राद्धाधीनप्रवृत्तेः तथात्रापि भर्तुरनुज्ञाशास्त्रेण तत्पुत्रोपादानाय प्रवृत्तायास्तत्पुत्राभाव एव तदुपादानं न तु तत्पुत्रानपचारेऽपि स्वपुत्रापचारे तदुपादानं तत्प्रवृत्तेरप्रयोजकत्वात् तत्रालोकतापरीहारोऽस्या न स्यादित्यपेक्षायां मनुबृहस्पतिवचनद्वयं सपत्नीपुत्रे पुत्रातिदेशेनालोकतापरीहारमात्रोपपादकं, भर्त्तृवंशमन्तरेण चास्या वंशान्तरासम्भवेन तस्यैव स्ववंशकरत्वं चेत्यतः समस्तस्यापि पुत्रप्रयोजनस्य सम्भवेन सति सपत्नीपुत्रे न दत्तकाद्युपादानं, भ्रातृपुत्रस्य तु वंशकरत्वाभावेन सत्यपि तस्मिन्नुपादीयन्ते दत्तकादय इत्येतावान् परं विशेषः। ननु सति भ्रातृसुते तस्यैव पुत्रीकरणावश्यम्भावे यत्रैक एव भ्रातृपुत्रस्तत्र तदसम्भवः। “नत्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय

पूर्व्वेषामिति" वशिष्ठस्मरणादिति चेन्न एतस्य द्व्यामुष्यायणेतरविषये सावकाशत्वात् द्व्यामुष्यायणे च हेतुवन्निगद्दर्शितसन्ततिविच्छेदाभावात् वेतालस्य च भैरवपुत्रपुत्रीकरणे पौराणिकलिङ्गदर्शनाच्च। यथा "ततः कदाचिदुर्व्वश्यां भैरवो मैथुनं गतः। तस्यां स जनयामास सुवेशं नाम पुत्रकम्। तमेव चक्रे तनयं वेतालोऽपि स्वकं सुतम्। ततस्तौ तेन पुत्रेण स्वर्ग्यां गतिमवापतुरिति"।

केन पुत्रो देय इत्याह शौनकः
"नैकपुत्रेण कर्त्तव्यं पुत्रदानं कदाचन। बहुपुत्रेण कर्त्तव्यं पुत्रदानं प्रयत्नतः" इति। द्विपुत्रस्यापि पुत्रदाने अपरपुत्रनाशे वंशविच्छेदमाशङ्क्याह बहुपुत्रेणेति। स्त्रियास्तु जीवति भर्त्तरि तदनुमतौ, प्रोषिते मृते वा तदनुज्ञां विनापि यथाह वशिष्ठः। "न तु स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वा अन्यत्रानुज्ञानाद्भर्त्तुरिति"। अनुमतिश्च अप्रतिषेधेऽपि भवति "अप्रतिषिद्धं परमतमनुमतं भवतीति" न्यायात्। निरपेक्षदानमाह याज्ञवल्क्यः "दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्"। तथा। "मातापितृभ्यामुत्सृष्टस्तयोरन्यतरेण वेति"।

अथ पुत्रपरिग्रहविधिमाह शौनकः "शौनकोऽहं प्रवक्ष्यामि पुत्रसंग्रहमुत्तमम्। अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च। संग्रहं संग्रहणविधिम्। उपोष्य ग्रहणात् पूर्व्वदिने कृतोपवासः। वृद्धगोतमः "वाससी कुण्डले दत्त्वा उष्णीषञ्चाङ्गुलीयकम्। आचार्य्यं धर्म्मसंयुक्तं वैष्णवं वेदपारगम्। मधुपर्केण सम्पूज्य राजानञ्च द्विजान् शुचीन्"। राज्ञो विप्रकृष्टत्वे ग्रामस्वामिनम् "बन्धूनाहूय सर्व्वांस्तु ग्रामस्वामिनमेव च" इति स्मरणात्। द्विजानिति बहुत्वं त्रित्वपर्य्यवसितं कपिञ्जलन्यायात्। द्विजानां पूजनं याचनार्थम्। "बर्हिः कुशमयञ्चैव पालाशं चेध्ममेव च। एतानाहृत्य बन्धूंश्च ज्ञातीनाहूय यत्नतः। बन्धूनन्नेन सम्भोज्य ब्राह्मणांश्च विशेषतः। अग्न्याधानादिकं तत्र कृत्वाज्योत्पवनान्तकम्। दातुः समक्षं गत्वा च पुत्रं देहीति याचयेत्। दाने समर्थो दातासौ "ये यज्ञेनेति पञ्चभिः"(१)। दद्यादिति शेषः। बन्धूनात्ममातृपितृबन्धून्। ज्ञातीन् सपिण्डान्। तदाह्वानं दृष्टार्थम् बन्धूनाहूतान् ब्राह्मणान्, पूर्व्वहूतान्। चकाराद् आहूतान्, ज्ञातींश्च सम्भोज्येत्यर्थः।

तथा "देवस्य त्वेति"(२)मन्त्रेण हस्ताभ्यां परिगृह्य च। अङ्गादङ्गेत्यृचं (३)जप्त्वा आघ्राय शिशुमूर्द्धनि। वस्त्रादिभिरलङ्कृत्य पुत्रच्छायावहं सुतम्। पुत्रच्छाया पुत्रसादृश्यं नियोगादिना(४)स्वयमुत्पादनयोग्यत्वमिति यावत्। तथा "नृत्यगीतैश्च वाद्यैश्च स्वस्तिशब्दैश्च संयुतम्। गृहमध्ये तमाधाय चरुं कृत्वा विधानतः। यस्त्वाहृदेत्यृचा(५) चैव तुभ्यमग्नेत्यृचैकया(६)। सोमोऽददददित्येताभिः(७) प्रत्यृचं पञ्चभिस्तथेति"।

(अत्र प्रतीकसूचिताः ऋचः प्रायशोऽनेकेषां तत्स्वरूपाज्ञानात् तेषां प्रबोधाय वेदादुद्धृत्य प्रदर्श्यन्ते। (१) "ये यज्ञेन दक्षिणया समक्ता इन्द्रस्य सख्यममृतत्वमानश। तेभ्यो भद्रमङ्गिरसो वो अस्तु प्रतिगृभ्णीत मानवं सुमेधसः" ऋ०१०।६२।१। "य उदाजन् पितरो गोमयं वस्वृतेनाभिन्दन् परिवत्सरे वलम्। दीर्घायुत्वमङ्गिरसो वो अस्तु प्रतिगृभ्णीत मानवं सुमेधसः।२। य ऋतेन सूर्य्यमारोहयन् दिव्यप्रथयन् पृथिवीं सुप्रजास्त्वमङ्गिरसो वो अस्तु प्रतिगृभ्णीत मातरं सुमेधसः।३। अयं नाभा वदति वल्गु वो गृहे देवपुत्रा ऋषयस्तच्छृणोतन। सुब्रह्मण्यमङ्गिरसो वो अस्तु प्रतिगृभ्णीत मानवं सुमेधसः।४। विरूपास इदृषयस्त इद्गम्भीरवेपसः। ते अङ्गिरसः सूनवस्ते अग्नेः परिजज्ञिरे" ५। (२) "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि" यजु० १।२। (३) "अङ्गादङ्गं सम्भवसि हृदयादधिजायसे। आत्मा वै पुत्रनामासि संजीव शरदां शतम्"। (४) "नियोगादिनेति आदिना विवाहसंग्रहः। दुहितृभगिनीप्रभृतीनां विवाहयोग्यत्वाभावात् अर्थतएव तत्सिद्धौ विरुद्धसम्बन्धोपलक्षणार्थमित्युक्तिरपि विवाहयोग्यत्वाभावसूचनार्थं शूद्रादेर्द्दौहित्रादिप्रतिसम्भवार्थञ्चातस्तेषां पृथग्ग्रहणमिति बोध्यम्)। (५) ("यस्त्वा हृदा कीरिणा मन्यमानोऽमर्त्यं मर्त्यो जोहवीमि। जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमानश" ऋ०५।४।१०। (६) "तुभ्यमग्ने पर्य्यवहन्त्सूर्य्यां वहतुना सह। पुनः पतिभ्यो जायां दा अग्ने! प्रजया सह" ऋ०१०।८५।३८। (७) "सोमोऽददद्गन्धर्व्वाय गन्धर्व्वोऽददग्नये। रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम्" ऋ० १०।८५।४१। "इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम्। क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे" ४२।

"आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा । अदुर्मङ्गलीः पतिलोकमाविश शं नो भव द्विपदे शं चतुष्पदे" ४२ "अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः । वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे" ४४ "इमां त्वमिन्द्रमीढ्वः सुपुत्रां सुभगां कृणु ! दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि" ४५) ।

वृद्धगौतमः । "पायसं तत्र साज्यञ्च शतसङ्ख्यञ्च होमयेत् । "प्रजापते न (८) त्वदेतानित्युद्दिश्य प्रजापतिमिति" । ("प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयोरयीणाम्" (८) यजु० १०।२०।)

वशिष्ठः । "पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राजनि निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा अदूरबान्धवं बन्धुसन्निकृष्टमेव गृह्णीयात् सन्देहे चोत्पन्ने दूरबान्धवं शूद्रमिव स्थापयेत् विज्ञायते ह्येकेन बहूञ्जायते इति" । (मुद्रितपुस्तके बहूंस्त्रायते इति पाठस्तु संहिताऽसंवादो अनन्वितश्चेत्युपेक्षितः । बहूंस्त्रायते" मीमांसाधृतपाठः । एकेन पुत्रेण बहवः पित्रादयस्त्रायन्ते इति व्याख्याय विज्ञायते इत्यादि श्रुतिं मत्वा बहूरिति जसः स्थाने सुप् इति त्रायते इति वचनव्यत्ययः" मीमांसाशयः) । निवेशनं गृहम् । सन्देहे इति दूरावस्थितबान्धवस्य अत्यन्तदेशभाषाविप्रकर्षादिना कुलशीलादिसन्देहो भवत्येव तथात्वे तन्निर्णयपर्य्यन्तं न व्यवहरेत् तत्र हेतुरेकेनेति । एतदन्यतरविधिरावश्यकः । ततश्च शौनकः "दक्षिणां गुरवे दद्यात् यथाशक्ति द्विजोत्तमः । नृपो राज्यार्द्धमेवाथ वैश्यो वित्तशतत्रयम् । शूद्रः सर्वस्वमेवापि अशक्तश्चेद्यथाबलम्" । राज्यार्द्धमर्द्धराज्योत्पन्नमेकवर्षीयद्रव्यम् । "प्रदद्यादर्द्धराज्योत्थमेकवर्षाहृतं धनमिति" वृद्धगौतमस्मरणात् । उत्तममध्यमाधमभेदेन वित्तानां सुवर्णरजतताम्राणामिति ज्ञेयम् । "शतत्रयं नाणकानां सौवर्णमथ राजतम् । प्रदद्यात् ताम्रमथ वा उत्तमादिव्यवस्थयेति" वृद्धगौतमस्मरणात् । सर्वस्वमेकवर्षभृतिलब्धमिति यावत् । तैत्तिरीयाणान्तु विधिविशेषमाह बौधायनः "अथ पुत्रपरिग्रहविधिं व्याख्यास्यामः प्रतिग्रहीष्यन्नुपकल्पयते द्वे वाससी द्वे कुण्डले अङ्गुलीयकम्, आचार्य्यञ्च वेदपारगञ्च कुशमयं बर्हिः, पर्णमयमिध्ममित्यथ बन्धूनाहूय निवेशनस्य मध्ये राजनि निवेद्य परिषदि वागारमध्ये ब्राह्मणवागालब्धेन उपविश्य पुण्याहं स्वस्ति ऋद्धिमिति वाचयित्वा यद्देवयजनोल्लेखप्रभृति आप्रणीताभ्यः कृत्वा दातुः समक्षं गत्वा मे पुत्रं देहीति भिक्षेत ददानीतीतर आह तं परिगृह्णाति धर्माय त्वा परिगृह्णामि सन्तत्यै त्वा परिगृह्णामि इत्यथैनं वस्त्रकुण्डलादिभिरलङ्कृत्य परिधानप्रभृत्यग्निमुखं कृत्वा पक्त्वा जुहोति यस्त्वाहृदा कीरिणाः मन्यमानो(९) इति" पुरोऽनुवाक्यामनूद्य "यस्मै त्वं सुकृते जातवेद" इति (१०) याज्यया जुहोत्यथ व्याहृतीर्हुत्वा स्विष्टकृत्प्रभृति सिद्धमाधेनुवरप्रदानदक्षिणां ददाति एते च वाससी एते कुण्डले एतच्चाङ्गुरीयकं य एवं त्वौरस उत्पद्यते तुरीयभागे सम्भवतीति आह स्म बौधायनः" इति । (९) प्राग्वत् (१०) यस्मै त्वं सुकृते जातवेद उ लोकमग्ने ! कृणवः स्योनम् । अश्विनं पुत्रिणं वीरन्तं गोमन्तं रयिं नशते स्वस्ति" ५।४।११) । एवमुक्तविध्यभावे परिगृहीतस्य तु विवाहोचितधनमात्रभागित्वं नत्वंशभागित्वमिति वक्ष्यते तथा मनुः । "गोत्ररिक्थे जनयितुर्न हरेद्दत्त्रिमः सुतः । गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधेति" । एतेन दातृधने दानादेव पुत्रत्वनिवृत्तिद्वारा दत्त्रिमस्य स्वत्वनिवृत्तिर्दातृगोत्रनिवृत्तिश्च भवतीत्युच्यते । तथा च गोत्रादिनिवृत्तेरेव दर्शनात् "संस्कुर्यात् स्वसुतान् पितेति" स्मरणात् ग्रहणानन्तरसम्भाव्यमाना एव दत्तकस्य संस्काराः प्रतिग्रहीत्रा कार्य्या न पुनर्जनकेन कृतपूर्वा अपि आवर्त्तनीयाः "एवमेनः शमं याति बीजगर्भसमुद्भवमिति" । "चित्रं कर्म यथानेकैरङ्गैरुन्मील्यते शनैः । ब्राह्मण्यमपि तद्वत् स्यात् संस्कारैर्विधिपूर्वकैरिति" मनुवचनबोधितस्य तत्तत्क्रियातो बीजादिदोषनाशस्य ब्राह्मण्याधानस्य च जातत्वेन तदावृत्तौ प्रमाणाभावात् । अन्यथा "अष्टौ संस्कारकर्माणि गर्भाधानमिव स्वयम् । पिता कुर्यात्तदन्यो वा तस्याभावेऽपि तत्क्रमात्" इत्यनेन पुंसवनसीमन्तोन्नयनयोरपि करणापत्तेः । तच्चायुक्तं असम्प्रदायिकत्वात् । किञ्च ग्रहणानन्तरमेव पितृत्वेन संस्काराधिकारात् तत्पूर्वभाविषु संस्कारेषु प्रतिग्रहीतुरनधिकार एवायाति कालाभावात् । यदि च तत्पूर्वभाविनोऽपि संस्कारा जनकेन न कृतास्तदा बीजगर्भदोषनाशावश्यकत्वेन क्रमानुरोधेन च प्रतिग्रहीत्रैव ते समाधेयाः । एवञ्च उपनयनमात्रकरणेऽपि प्रतिग्रहीतु-

दत्तकपुत्रसिद्धिः । “अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः । स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभागिति” वशिष्ठस्मरणात् । एतच्चाष्टमाब्दरूपतन्मुख्यकालाभ्यन्तरवर्त्तिपरिग्रहे बोध्यम् अन्यथा मुख्यकालेऽधिकारयोग्यत्वाभावे गौणकाले अनधिकारान्न तत्सिद्धिरिति । अत्र च जनकप्रतिग्रहीत्रोरुभयोरपि पुत्राभिसन्धाने सति दत्तकस्य द्व्यामुष्यायणत्वेनोभयगोत्रभागित्वम् । विशेषो वक्ष्यते यत्तु पुराणनाम्ना पठन्ति । “पितृगोत्रेण यः पुत्रः संस्कृतः पृथिवीपते ! । आचूड़ान्तं न पुत्रः स पुत्रतां याति चान्यतः । चूड़ाद्या यदि संस्कारा निजगोत्रेण वै कृताः । दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते । यदि स्यात् कृतसंस्कारो यदि वातीतशैशवः । यत्नेन पञ्चमाद्वर्षात् पुत्रेष्टिं प्रथमं चरेदिति” । तदमूलम् । समूलत्वेऽपि यज्जनकगोत्रेण चूड़ान्तसंस्कारसंस्कृतस्य न ग्रहीतुः पुत्रत्वं ग्रहीत्रैव चूड़ादिसंस्कारकरणे तत् । यदि च कृतचूड़ोऽतीतपञ्चवर्षो वा ग्राह्यो भवति न तदास्य पुत्रत्वं सम्भवतीति च विवृण्वन्ति तन्न अनुवादापत्तेः । पञ्चवर्षाभ्यन्तरगृहीतस्याप्युपनयनात् पूर्वं सकलशिष्टानुमोदितपुत्रत्वव्यवहारानुपपत्तेः तदानीं ग्रहीतरि मृते तच्छ्राद्धानधिकारापत्तेश्च । किन्त्वयं वचनार्थः जनकगोत्रेण कृतचूड़ान्तसंस्कारस्य पुत्रत्वं निषिद्धं प्रतिग्रहीत्रा पुनश्चूड़ादिकरणे तत् प्रतिप्रसूतम् । ततश्च कृतसंस्कारस्यातीतपञ्चवर्षस्य च ग्रहीत्रा चूड़ादिकरणात् पूर्वं दासत्वाक्षेपात् चूड़ादिकरणानन्तरं पुत्रत्वं लब्धम् । अकृतसंस्कारस्यानतीतपञ्चवर्षस्य तु परिग्रहणमात्रादेव तत्प्राप्तं तच्च विततम् । अथवा जनकेन चूड़ान्तं संस्कृतोऽपि पुत्रो न पुत्र इत्यपुत्रत्वादेशः यतोऽन्यतश्च पुत्रतां यातीति हेतुरुपदिष्टः । तथा च एकस्य पुत्रपदस्य चकारस्य च वैयर्थ्यदूषणमपि परिहृतम् । एवञ्च चूड़ाद्या इत्यतद्गुणसंविज्ञानबहुव्रीहिणा द्विजातीनामुपनयनलाभः शूद्रस्य तु विवाहलाभः । “अन्यशाखोद्भवो दत्तः पुत्रश्चैवोपनायितः । स्वगोत्रेण स्वशाखोक्तविधिना स स्वशाखभागिति” प्रागुक्तैकवाक्यत्वात् । पञ्चमाद्वर्षादिति । ब्रह्मवर्चसफलार्थिविप्राभिप्रायं “ब्रह्मवर्चसकामस्य कार्य्यं विप्रस्य पञ्चमे) इति मनुवचने तत्कामस्य पञ्चमवर्षस्यैव उपनयनमुख्यकालत्वेन तदेकमूलत्वात् । तदनर्थिनस्त्वाष्टमाब्दादिति । क्षत्त्रियादेरप्युपनयनतन्मुख्यकालादरः । मुख्यकालेऽपि सिद्धाधिकारयोग्यत्वस्यैव गौणकालेऽपि संस्काराधिकारादित्युक्तप्रायम् । चूड़ायां गौणकालादरस्तु वचनबलादेव । पुत्रेष्टिमिति तत्र वर्णत्रयस्यैवाधिकारं तेन पुत्रेष्टिपूर्वकचूड़ादिभिः पुत्रत्वं सम्पाद्यम् । शूद्रेण तु तदापि संस्कारमात्रादेवेति सर्वमनवद्यम् ।

एवञ्च सर्वेषामेव प्राचां कालविशेषमनन्तर्भाव्यैव पुत्रपरिग्रहविधानमुपपद्यते उक्तार्थस्य स्वतःसिद्धत्वात् । अथैवमुक्तवचनपरव्याख्याने कृतचूड़स्य दत्तकस्य जनकमात्रपुत्रत्वं निषिध्य अन्यतश्च पुत्रत्वं यातीत्यत्र चकारेण जनकप्रतिग्रहीतृसाधारण्यं लब्धम् उभयोरेव संस्कारकत्वात् तच्च उभयोरावयोरयं पुत्र इत्यभिसन्धाने सति बोध्यम् । अयमेव द्व्यामुष्यायणो नाम द्विपितृको द्विगोत्रश्च । ननु क्षेत्रजस्यैव द्विपितृकत्वं दृश्यते । यथा हारीतः, “जीवति क्षेत्रजमाहुरस्वातन्त्र्यान्मृते द्व्यामुष्यायणं अनुप्तबीजत्वात्” जीवत्यपि क्रियाभ्युपगमाद्द्विपितृको भवतीत्याह मनुः, “क्रियाभ्युपगमात्त्वेवं बीजार्थं यत्प्रदीयते । तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव चेति” । अपुत्रबीजक्षेत्रिकयोर्मम क्षेत्रं तव बीजं यदपत्यं तदावयोरित्ययं क्रियाभ्युपगमः । तथा “अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः । उभयोरप्यसावृक्थी पिण्डदाता च धर्मतः” इति । दत्तकस्य तु तददृष्टचरं प्रत्युत “गोत्ररिक्थे जनयितुर्न हरेद्दत्त्रिमः सुतः” इति प्रागुक्तमनुवचनं तद्विपरीतार्थग्राहकमेवास्तीति चेन्न दत्तकादिष्वपि “सर्वेषामेकधर्म्माणामेकस्यापि यदुच्यते । सर्वेषामेव तत् कुर्य्यादेकरूपा हि ते स्मृताः” इति बौधायनवचनेन क्षेत्रजधर्मलाभात् । “द्वे श्राद्धे कुर्य्यादेकश्राद्धे वा पृथगुद्दिश्य एकपिण्डे वा द्वावनुकीर्त्तयेत् प्रतिग्रहीतारं चोत्पादयितारञ्चा तृतीयात् पुरुषादिति” शाङ्खायनप्रवराध्याये सामान्यतोदर्शनाच्च दत्तकस्यापि द्विपितृकत्वसिद्धिः । अतएव सत्याषाढ़ोऽपि “नित्यानां द्व्यामुष्यायणानां द्वयोरिति” सूत्रेण नित्यद्व्यामुष्यायणानां क्षेत्रजानां सप्रवरगोत्रद्वयसम्बन्धमुक्त्वा दत्तकादीनां द्व्यामुष्यायणवदिति सूत्रेण तद्धर्मोऽतिदिष्टः । विवृतञ्चैतद्भाष्यकारैः “नित्यद्व्यामुष्यायणप्रसङ्गेनानित्यानाञ्च दत्तकादीनामिति” । तावदेव नोत्तरसन्ततौ प्रथमेनैव संगृहीता चेत्तदा उत्तरस्य पूर्वत्वात्तेनैव उत्तरत्रेति” ।